चौखम्बा संस्कृत ग्रन्थमाला १०२

श्रीश्वेतायनव्यासविरचिता

श्रीलक्ष्मीनारायणसंहिता



सम्पादकः संशोधकश्च
न्यायाचार्यः स्वामी श्रीकृष्णवल्लभाचार्यः शास्त्री

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

चौखम्बा संस्कृत ग्रन्थमाला
१०७
×××

श्रीश्वेतायनव्यासविरचिता

श्रीलक्ष्मीनारायणसंहिता

कृतयुगसन्तानाख्यः प्रथमः खण्डः

(प्रथमखण्डे द्वितीयो भागः)

सम्पादकः संशोधकश्च
न्यायाचार्यः
स्वामी श्रीकृष्णवल्लभाचार्यः शास्त्री
(भावनगर, सौराष्ट्र)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : द्वितीय, वि० सम्वत् २०६२, सन् २००५

ISBN : 81-7080-177-X (Vol. I)
81-7080-181-8 (Set)

के० ३७/९९, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास
पो० बा० नं० १००८, वाराणसी—२२१००१ (भारत)
फोन : (आफिस) (०५४२) २३३३४५८
(आवास) (०५४२) २३३५०२०, २३३४०३२
Fax : 0542 - 2333458
e-mail : cssoffice@satyam.net.in
web-site : www.chowkhambaseries.com

अपरं च प्राप्तिस्थानम्
चौखम्बा कृष्णदास अकादमी
के० ३७/११८, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास
पो० बा० नं० १११८, वाराणसी–२२१००१ (भारत)
फोन : (०५४२) २३३३४५८ P.P., २३३५०२०

शंखचूड! विजानीहि तव पक्षे समागतान्।
ते चैतेऽसुरपक्षीया दैत्याश्च दानवास्तथा ॥१००॥
सुराणां ते प्रतिपक्षा मच्छस्त्राऽतिथयस्तु ते।
ये च देवसमाः सुरपक्षगास्ते मयाऽसुर! ॥१०१॥
रक्षणीया मया सर्वे सज्जो भवाऽत्र दानव!।
दनोः पुत्रस्य तु विप्रचित्तेः दंभाभिधः सुतः ॥१०२॥
विष्णुभक्तो मम सखा तस्यासि त्वं सुतो महान्।
पुत्रार्थे पुष्करे कृष्णमन्त्रं जजाप ते पिता ॥१०३॥
चचार तप उग्रं च सहस्राब्दं तु ते पिता।
तत्प्रतापेन पुत्रस्त्वं सुदामा शंखचूडकः ॥१०४॥
किं ते वै कलहेनाऽद्य यदि जानासि मां हरम्।
यदि जानासि भक्तं स्वं सुदामानं तु दानवम् ॥१०५॥
सालोक्यसार्ष्टिसारूप्यसामीप्यैक्यं हरेरपि।
दीयमानं न गृह्णन्ति वैष्णवाः सेवनं विना ॥१०६॥
कृष्णभक्तस्य ते किं वा राज्येन कलहेन वा।
देहि राज्यं तु देवानां मत्प्रीतिं कुरु दानव ॥१०७॥
सुखं स्वराज्ये त्वं तिष्ठ देवाः सन्तु स्वके पदे।
अलं भ्रातृविरोधेन सर्वे हि कश्यपात्मजाः ॥१०८॥
यानि कानि च पापानि ज्ञातिद्रोहसमानि न।
काले नाशो भवत्येव ब्रह्मणोऽपि तवाऽत्र किम् ॥१०९॥
सर्वावस्थासु समता सर्वदा नहि कस्यचित्।
त्यज ज्ञानेन भक्तेन्द्र! मा विरोधेन दानव! ॥११०॥
सूर्यचन्द्रादयः सर्वे वर्धन्तेऽवतरन्ति च।
कालेन पृथ्वी ससस्या कालेन श्रीवियोगिनी ॥१११॥
कालेन त्वं महास्मृद्धः स ते कालो विवर्तते।
अहं मृत्युञ्जयः कालः संहरामि तु देहिनः ॥११२॥
करोमि सततं कृष्णनामसद्गुणकीर्तनम्।
त्वं तु सर्वं परित्यज्य कुरु कृष्णस्य कीर्तनम् ॥११३॥
इत्युक्त्वा विररामैनं शंकरो लोकशंकरः।
तथापि शंखचूडस्य मतं नाऽभून्मनागपि ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तने तुलसीविवाहाख्याने त्रिशूलयुक्तशंकरः पुष्पवन्तं दूतं शंखचूडं प्रति प्रेषयामास, शंखचूडतुलस्योर्ज्ञानं, शंखचूडस्य प्रातर्युद्धाय यानं, कश्यपस्य त्रयोदश-पत्नीनां वंशेदानवस्त्वं शंखचूडः सुदामेति शंकरेण स्मारितम्, शंभोरुपदेशश्चेत्यादि-निरूपणनामा षट्त्रिंशदधिकत्रिशत-तमोऽध्यायः ॥३३६॥

श्रीनारायण उवाच—

शंखचूडस्ततो लक्ष्मि! शंकरं प्राह नैतिकम्।
साभिमानं युद्धमूलं विनाशकृद्धि तामसम् ॥ १ ॥
त्वया कथितं यन्नाथ! सर्वं तथ्यं न चाऽनृतम्।
ज्ञातिद्रोहे महत्पापं यदि भवति शंकर ॥ २ ॥
कथं गृहीत्वा सर्वस्वं तलं प्रस्थापितो बलिः।
सभ्रातृको हिरण्याक्षः कथं देवैश्च हिंसितः ॥ ३ ॥
कथं समुद्रमथने पीयूषं भक्षितं सुरैः।
कथं त्वं दानवान् हंसि न देवान् न गणान् स्वकान् ॥ ४ ॥
कथं सतीनिमित्ते तत्पिता विहिंसितस्तदा।
कथं सुदर्शनं विष्णोरसुरेष्वेव सार्थकम् ॥ ५ ॥
सम्बन्धिन्योः काश्यपेयप्रजयोर्यद्विरोधनम्।
जायते महतीर्लज्जा स्पर्द्धाऽस्माभिः कथं हर ॥ ६ ॥
पितृवंशसमुन्नेता स्वर्गं याति तु मानवः।
परवंशानुसंयाता भवत्यधोगतिं गतः ॥ ७ ॥
कालेन यद्भवेत् तद्वै भवत्वत्र ममाऽऽलये।
पराजयो जयो वापि कालकृन्मान्य एव मे ॥ ८ ॥
अधुना त्वं महाकालो ममाऽसि पार्वतीपते!।
कालेन यद्भवेत् तत्र सन्तुष्टोऽस्मि रणं कुरु ॥ ९ ॥
मृतो यास्ये तु गोलोकं जये भोक्ष्ये तु वैभवम्।
रणे हानिर्न मे चास्ति न ते लाभो मनागपि ॥१०॥
इति विचार्य भगवन्! निवृत्तो भव शंकर!।
अल्पेन सह महतां हानिरेव न वर्धनम् ॥११॥
नमस्करोमि ते शंभो! उत्तिष्ठामि रणाय च।
इति कृत्वा ययौ यानमारुह्य निजवाहिनीम् ॥१२॥
तत्रैते येऽसुरपक्षा दैत्याश्च दानवादयः।
सुराणां प्रतिपक्षा ये ते तु युद्धेऽसुरानुगाः ॥१३॥
ये तु देवसमा दिवपक्षगास्ते हरानुगाः।
सैन्येषु चागताः सर्वे शंखचूडपिनाकिनोः ॥१४॥
कोट्यर्बुदाब्जयोद्धृणां सेने वार्धिसमे तदा।
सुशोभे ते स्म लक्ष्मि! द्राग् रणवाद्याऽधिते जिते ॥१५॥
नेदुर्दुन्दुभयः स्वर्गे पुष्पवृष्टिर्बभूव ह।
स्कन्दः सेनापतिश्चात्र तत्र राहुश्च भूपतिः ॥१६॥
द्वयोर्युद्धमभूद् व्योम्नि शतघ्नीबाणशक्तिभिः।
परशुपरिघाभूशुण्डीभिस्तोमरचक्रकैः ॥१७॥
बाणैः शिलीमुखैश्चापि धूम्रकृतैर्गोलकैस्तथा।
प्रस्तरैश्च सहस्रशैर्युद्धमद्भुतमुल्बणम् ॥१८॥

द्वयोश्च सैनयोर्मध्ये महाप्रलयसन्निभम् ।
मर्दनं कूर्चनं निकृन्तमं द्वैधीविभेदनम् ॥१९॥
छेदनं चूर्णनं प्राणिकर्दनं दलनं ह्यभूत् ।
शरवृष्टिश्चार्धचन्द्रशूलभल्लत्रिधारकैः ॥२०॥
हननं सर्वतोव्याप्तमासीदुभयसैन्ययोः ।
हस्तीनां च तथाऽश्वानां खच्चराणां भयंकरः ॥२१॥
विनाशोऽभूद् रथिनां च पत्तीनां गणना न वै ।
रथा भग्नाश्च यानानि चूर्णितानि सहस्रशः ॥२२॥
बाहाश्छिन्ना लक्षशश्च भटेश्वरास्तु कोटिशः ।
नष्टाश्छिन्ना व्यसवश्चाऽभवन् शश्वद्भूशायिनः ॥२३॥
दिवानिशं महाघोरं सततं प्रलयात्मकम् ।
युद्धं प्रवर्तितं तत्र क्षुत्तृषागणनापि न ॥२४॥
धनुष्मतां तदा बाणाः शस्त्राणि शस्त्रिणां तथा ।
कवचानि वर्मवतां क्षयमाप्तानि सर्वथा ॥२५॥
दानवानां गणानां च लयः प्राकृतिको यथा ।
यदा जातस्तदा त्रस्ता विदुद्रुवू रणांगणम् ॥२६॥
कार्तिकः शरवृष्ट्या वै चकार कदनं महत् ।
राहुश्चापि शरवृष्ट्या चकार कर्तनं परम् ॥२७॥
पर्वतानां च सर्पाणां शिलानां शाखिनां तथा ।
शश्वद् वृष्टिं चक्रतुस्तौ दुर्वार्यां च भयंकरीम् ॥२८॥
राहोर्मार्गणवृष्ट्या तु प्रच्छन्नः शिवनन्दनः ।
धनुः स्कन्दस्य छिच्छेद रथं चिच्छेद वाजिनोः ॥२९॥
मयूरं जर्जरीभूतं दिव्यास्त्रेण चकार सः ।
शक्तिं चिक्षेप सूर्याभां राहुर्वक्षोविभेदिनीम् ॥३०॥
गदया तां पोथयित्वा धनुर्दिव्यमुपाददे ।
स्कन्दो ववर्ष शस्त्राणि राहोर्नाशाय सर्वथा ॥३१॥
सर्पांश्च पर्वतांश्चापि वृक्षांश्च प्रस्तरांस्तथा ।
सर्वांश्चिच्छेद कोपेन दिव्यास्त्रैः शंकरात्मजः ॥३२॥
आग्नेयं वारुणास्त्रेण वारयामास वै गुहः ।
रथं धनुश्च चिच्छेद सैंहिकेयस्य लीलया ॥३३॥
सवाहं सारथिं चैव हत्वा चिक्षेप शक्तिकाम् ।
दानवो वक्षसि हतो मूर्छामवाप वै तदा ॥३४॥
शंखचूडः समायातो रथमारुह्य सत्वरम् ।
चकार शरजालानि मायया मायिनां वरः ॥३५॥
गुहं त्वाच्छाद्य समरे शरजालेन शक्तिकाम् ।
जग्राह शतसूर्याख्यां विष्णुतेजोऽन्वितां तदा ॥३६॥
चिक्षेप कार्तिके लग्ना पपात मूर्छितस्तदा ।
काली गृहीत्वा तं क्रोडे निनाय शिवसन्निधौ ॥३७॥
शिवः स्वसैन्यं देवाँश्च प्रेरयामास सत्वरः ।
दानवेन्द्रैः ससैन्यैश्च पुनर्युद्धं भयंकरम् ॥३८॥
समभूत् तत्र युयुधे महेन्द्रो वृषपर्वणा ।
भास्करो युयुधे विप्रचित्तिना प्रलयाग्निवत् ॥३९॥
दंभेन सह चन्द्रश्च कालः कालेश्वरेण च ।
गोकर्णेन कृशानुश्च कालकेयेन यक्षराट् ॥४०॥
मयेन विश्वकर्मा च मृत्युर्भयंकरेण च ।
संहारेण यमः कलविंकेन वरुणस्तथा ॥४१॥
चञ्चलेन पवनश्च घृतपृष्ठेन वै बुधः ।
रक्ताक्षेण शनिश्चैव वसवो वर्चसांगणैः ॥४२॥
जयन्तो रत्नसारेणाऽश्विनौ दीप्तिमता सह ।
नलकूबरो धूम्रेण धर्मो धनुर्धरेण च ॥४३॥
शोभाकरेणैवेशानो मण्डुकाक्षेण मंगलः ।
मन्मथः पिठरेणापि युयुधेऽस्त्रप्रहेतिभिः ॥४४॥
उल्कामुखेन धूम्रेण खड्गेनापि ध्वजेन च ।
काञ्चीमुखेन पिण्डेन धनेन सह नन्दिना ॥४५॥
विश्वेन च पलाशेन चादित्या युयुधुर्भृशम् ।
एकादश महारुद्रा युयुधिरे भयाह्वयैः ॥४६॥
महामारी युयुधे च प्रोग्रदण्डयादिभिस्तदा ।
नन्दीश्वरादयः सर्वे सह दण्डयादिदानवैः ॥४७॥
एवं ते युयुधुः सैन्येश्वराः सैन्यानि सर्वशः ।
शंखचूडो विशश्राम क्षणं तद्वच्च कार्तिकः ॥४८॥
दानवाश्चासुरा दैत्या युयुधिरे समन्ततः ।
देवाश्चकम्पिरे भीता दुद्रुवुर्वै दिशो दश ॥४९॥
चकार कोपं स्कन्दश्च देवेभ्यस्त्वभयं ददौ ।
युयुधेऽयं दानवानां गणैः सार्धं प्ररोषतः ॥५०॥
अक्षौहिणीनां शतकं समरे स जघान ह ।
काली रक्तं पपौ क्रुद्धा ननर्त समरे तदा ॥५१॥
दशलक्षं गजेन्द्राणां शतलक्षं च वाजिनाम् ।
समादाय समादाय मुखे चिक्षेप लीलया ॥५२॥
स्कन्दस्य शरजालैश्च दानवाद्या विदुद्रुवः ।
काली समरमासाद्याऽट्टाट्टहासानि चाकरोत् ॥५३॥
उग्रदंष्ट्रा चोग्रदण्डा कोटरा योगिनीगणाः ।
डाकिन्यश्चासुरान् खादयामासुश्च पपुर्मधु ॥५४॥
दृष्ट्वा कालीं शंखचूडो युद्धार्थमाद्रवत् तदा ।
काली चिक्षेप चाग्नेयं प्रलयाग्निसमं ततः ॥५५॥
शंखचूडोऽहरत्तद्वै वारुणास्त्रेण लीलया ।
चिक्षेप वारुणं काली गान्धर्वेण तु दानवः ॥५६॥

चिच्छेदाथ प्रचिक्षेप काली माहेश्वरास्त्रकम् ।
जघान दानवो वैष्णवास्त्रेण लीलया तदा ॥५७॥
नारायणास्त्रं चिक्षेप काली ततस्तु दानवः ।
ननाम दण्डवत् भूमौ भक्त्यस्त्रेण शशाम तत् ॥५८॥
ब्रह्मास्त्रं सा च चिक्षेप ब्रह्मास्त्रेणाऽप्रसद्धि सः ।
पाशुपतं सा चिक्षेप पाशुपतेन सोऽहनत् ॥५९॥
देवी चिक्षेप शक्तिं तां सोऽपि शक्त्याऽविनाशयत् ।
महाकाली तदा क्रुद्धा महाकालास्त्रमेव सा ॥६०॥
मन्त्रपूर्वं निक्षिपति तावदाकाशवागभूत् ।
मृत्युर्न दानवस्याऽस्ति कण्ठेऽस्य कवचं हरेः ॥६१॥
तुलस्याश्च सतीत्वं वै यावदस्ति तु तावता ।
जरामृत्यू न चाऽस्य स्तो विना सतीत्वनाशनम् ॥६२॥
श्रुत्वा काली विनिवृत्ता सोऽकरोज्जयगर्जनाम् ।
तावद्वटे समायातो विष्णुर्ब्राह्मणरूपधृक् ॥६३॥
शंभो ! मयाऽर्पितां शक्तिं समादाय रणस्थलीम् ।
याहि दैत्यविनाशाय विष्णुरस्मि जगद्गुरुः ॥६४॥
गच्छाम्यहं भिक्षुकः सन्नर्थयामि तु दानवम् ।
कवचं प्रति भूतेश ! पश्चाद् गच्छामि तुलसीम् ॥६५॥
शंखचूडस्वरूपेण वीर्याधानार्थमीश्वर ! ।
ततो दानवमृत्युर्वै भविष्यति न संशयः ॥६६॥
इत्युक्त्वा भगवान् विष्णुर्वृद्धब्राह्मणरूपधृक् ।
दानवेन्द्रं प्रति गत्वा भिक्षां देहीति चाऽब्रवीत् ॥६७॥
गृहाण किं तवेच्छास्ति प्रोवाच दानवस्तदा ।
ब्राह्मण प्राह कवचं देहि मे दानवद् भव ॥६८॥
तच्छ्रुत्वा दानवच्छ्रेष्ठो ददौ कवचमुत्तमम् ।
गृहीत्वा कवचं कृष्णो जगाम तुलसीं प्रति ॥६९॥
शंखचूडस्वरूपेण जगाम तुलसीगृहम् ।
दुन्दुभिं वादयामास चकार जयसद्रवम् ॥७०॥
तच्छ्रुत्वा परमानन्दा समुत्थाय ससंभ्रमा ।
राजमार्गगवाक्षेण ददर्श तुलसी पतिम् ॥७१॥
ब्राह्मणेभ्यो वाचकेभ्यो भिक्षुभ्यः सा धनं ददौ ।
मंगलं वाचयामास बन्दिभ्योऽपि धनं ददौ ॥७२॥
अवरुह्य रथात् कृष्णस्तुलस्या भवनं ययौ ।
कान्तमासाद्य तुलसी क्षालयामास तत्पदम् ॥७३॥
ननामाऽतिमुदा स्वर्णासनस्थं जयकारिणम् ।
समाश्लिषत् तदंगानि मर्दयामास शान्तये ॥७४॥
ताम्बूलं च ददौ तस्मै कर्पूरादिसुवासितम् ।
अद्य मे सफलं जन्म पश्यामि विजयं तव ॥७५॥
कथं विश्वस्य संहर्त्रा सार्धमाजौ जयोऽभवत् ।
तन्मे ब्रूहि प्राणनाथेत्युवाच तुलसी सती ॥७६॥
विष्णुरुवाच देवानां दानवानां महाक्षये ।
ब्रह्मा तत्र समागत्य कारयामास मेलनम् ॥७७॥
देवानामधिकारेषु देवा भवन्तु निर्भयाः ।
शंखचूड ! तव राज्ये सपत्नीकः सुखी भव ॥७८॥
इति सन्धिः कारितो वै ब्रह्मणा चावयोस्ततः ।
आगतोऽहं स्वभवनं शिवलोकं शिवो गतः ॥७९॥
इत्युक्त्वा तुलसीं कृष्णः शयनं प्रचकार वै ।
रेमे रमापतिस्तत्र तुलस्याः शयने रतिम् ॥८०॥
सापि सुखातिरेकाचाऽऽकर्षणादिविलक्षणम् ।
अप्रस्खलितभावाच्च तर्कयामास चेतरम् ॥८१॥
कस्त्वं वद महाराजस्वरूपोऽस्यत्र मायया ।
दूरीकृतं सतीत्वं मे भुक्ताऽहं मायया त्वया ॥८२॥
शपामि वद शीघ्रं मे श्रुत्वेति शापभीतितः ।
दधार लीलया स्वीयमूर्तिं नारायणात्मिकाम् ॥८३॥
नवीननीरदश्यामां शरत्पंकजलोचनाम् ।
कोटिकन्दर्पलावण्यां रत्नभूषणभूषिताम् ॥८४॥
ईषद्धास्यप्रसन्नास्यां शोभितां पीतवाससा ।
नारायणं तथा दृष्ट्वा कामिनी काममूर्छिता ॥८५॥
पुनश्च मोहमापन्ना श्रीकृष्णं परिषस्वजे ।
तदा तुलस्यां श्रीकृष्णो वीर्याधानं चकार ह ॥८६॥
शंभुस्तदा त्रिशूलेन शंखचूडं जघान वै ।
मृतस्यात्मा चतुर्बाहुः सुदामा धाम संययौ ॥८७॥
पुनश्च मोहमापन्ना पुनश्च प्राप्य चेतनाम् ।
उवाच कृष्णं हे नाथ ! पाषाणहृदयो भवान् ॥८८॥
दया नास्ति मनाङ्नाथ ! सतीबलप्रजीवनः ।
छलेन धर्मभंगेन मम स्वामी त्वया हतः ॥८९॥
तस्मात्पाषाणरूपस्त्वं भुवि देवो भवाऽधुना ।
अतस्त्वमेकजनुषि ज्ञानहीनो भविष्यसि ॥९०॥
इत्युक्त्वा सा च तुलसी निपत्य चरणे हरेः ।
रुरोद विललापैनामुवाच भगवाँस्तदा ॥९१॥
शंखचूडं च मे भक्तं सुदामानं पुनर्मम ।
वैकुण्ठं प्रापयितुं वै मया त्वयि छलं कृतम् ॥९२॥
तन्नाशाय मया दत्तं त्रिशूलं शंकराय वै ।
ग्रीष्ममध्याह्नमार्तण्डशतकप्रभमुज्ज्वलम् ॥९३॥
नारायणाऽधिष्ठिताग्रं ब्रह्माधिष्ठितमध्यमम् ।
शिवाधिष्ठितमूलं च कालाधिष्ठितधारकम् ॥९४॥

दुर्निवार्यं तथाऽव्यर्थं सर्वशस्त्रविघातकम् ।
शंकरकेशवाऽन्यैर्दुर्वहं ब्रह्माण्डनाशकम् ॥९५॥
धनुःसहस्रं दैर्घ्येण विस्तृत्या शतहस्तकम् ।
सजीवं ब्रह्मरूपं च शंभुश्चिक्षेप दानवे ॥९६॥
मया त्वयि कृतं वीर्याधानं दैत्यो ममार यत् ।
बभूव भस्मसाच्छंखचूडो रथयुतस्तदा ॥९७॥
बभूव च पुनर्दिव्यो द्विभुजो मुरलीधरः ।
नानारत्नसुभूषाढ्यगोपकोटिभिरावृतम् ॥९८॥
गोलोकादागतं यानमारुह्य तत्पुरं ययौ ।
अथ शूलश्च वेगेन प्रययौ शूलिनः करम् ॥९९॥
शंकरस्तेन शूलेन दानवस्याऽस्थिजालकम् ।
प्रेम्णा न्यक्षेपयच्छीघ्रं लवणोदे तु सागरे ॥१००॥
शंखजातिर्ज्ञायते सा श्रेष्ठा पूता सुरार्चने ।
प्रशस्तं शंखतोयं च देवानां प्रीतिदं भवेत् ॥१०१॥
यत्र शंखस्तत्र लक्ष्मीस्तुलसी तीर्थमत्र च ।
शंखतोयं तीर्थतोयं यत्र शंखस्ततो हरिः ॥१०२॥
शोकं त्यज मम पद्मे ! भव जातिस्मरा प्रिये ! ।
तपस्त्वया कृतं साध्वि ! मदर्थे बदरीवने ॥१०३॥
त्वदर्थे शंखचूडश्च चकार पुष्करे तपः ।
कृत्वा त्वां कामिनीं कामी विजहार च तत्फलात् ॥१०४॥
गतः स शरणं राधाकृष्णयोः रासमण्डले ।
गोलोके वर्तते भक्तो मम त्वं याहि सुन्दरि ! ॥१०५॥
इदं शरीरं त्यक्त्वेह दिव्यं देहं विधाय च ।
रासे मे रमया सार्धं त्वं रमासदृशी भव ॥१०६॥
तव शापेन पाषाणः शालग्रामो भवामि वै ।
त्वद्वियोगाऽसहमानः शपामि त्वां नदी भव ॥१०७॥
इयं तनुर्नदीरूपा गण्डकीति च विश्रुता ।
पूता मोक्षप्रदा नृणां भवतु पुण्यदाऽऽप्लवात् ॥१०८॥
तव रोमसमूहाश्च पुण्यवृक्षा भवन्तु वै ।
तुलसीरोमजा वृक्षास्तुलस्यः प्रभवन्तु वै ॥१०९॥
नद्यामहं शालग्रामो वहामि जलतुलसीम् ।
त्रिलोकेषु च पुष्पाणां पत्राणां देवपूजने ॥११०॥
प्रधानरूपा तुलसी सदा भवतु मत्प्रिया ।
राधाशापकृतस्ते मद्वियोगः सान्ततां गतः ॥१११॥
कृपया मे भव पद्मे धाम्नि रमाऽत्र तुलसी ।
विवाहविधिना वृन्दावनेऽहं त्वां सुकन्यकाम् ॥११२॥
ग्रहीष्यामि गमिष्यामि नीत्वा त्वां मत्सहायिनीम् ।
इत्युक्त्वा प्रययौ विष्णुर्यत्र शंभुर्मृधे स्थितः ॥११३॥
ववन्दाते शशंसतुः परस्परं हरो हरिः ।
देवास्तथापिताः सर्वे शिवसेना प्रजीविता ॥११४॥
विष्णुना शंकरेणापि मृता उज्जीवितास्तदा ।
शुक्रेण दानवसेना सञ्जीविन्या च जीविता ॥११५॥
चक्रुर्महोत्सवं तत्रोपदार्पणं कृतं ततः ।
सर्वे ययुर्हरेः शालग्रामता यत्र भाविनी ॥११६॥
गण्डकीरूपता यत्र तुलस्याश्चापि भाविनी ।
ततस्तद्रूपतां प्राप्तौ पूजयित्वा सुरादयः ॥११७॥
ययुर्वृन्दावनं रम्यं भाविनो यत्र तुलसी ।
यमुनायां कृतस्नानाश्चक्रुस्तत्र महोत्सवम् ॥११८॥
तुलसीवृक्षरूपा च जाता तत्र हरीच्छया ।
कन्यारूपा तथा दिव्या वरारोहाऽप्यभूत्तदा ॥११९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने तुलसीविवाहाख्याने शंकरं प्रति दानववचनं, स्कन्दराहुतत्सेनयोर्युद्धं, काल्यास्त्रकृतयुद्धं, विप्ररूपविष्णुकृतदानवकवचभिक्षा, शंखचूडरूपविष्णुकृततुलसीवीर्याधानं, शंखचूडमरणं, तुलस्याः पाषाणशालग्रामो भवेति विष्णोस्तुगण्डकीनदी तुलसीवृक्षिका च भवेति शापौ, युद्धे मृतानामुज्जीवनं, वृन्दावनागमनं, चेत्यादिनिरूपणनामा सप्तत्रिंशदधिकत्रिशततमोऽध्यायः ॥३३७॥

श्रीनारायण उवाच—

सत्पत्रमञ्जरीयुक्तां तुलसीं प्रविलोक्य च ।
देवाद्याश्च महाश्चर्यपरिप्लुतास्तदाऽभवन् ॥ १ ॥
लक्ष्म्यादयस्तथा देव्यो ववन्दिरे च तुलसीम् ।
नारायणो महाविष्णुर्महिमानमुवाच तान् ॥ २ ॥
शृणु लक्ष्मि ! तदा कन्या तुलसी दिव्यरूपिणी ।
मम पार्श्वे स्थिताऽप्यासीत् शृणोति स्म स्वगौरवम् ॥ ३ ॥
तुलना सीदति यत्र सर्वेषां तुलसी हि सा ।
स्वर्गे मर्त्ये च पाताले वैकुण्ठेऽक्षरधामनि ॥ ४ ॥
तुलसी सर्वदा चास्तु तरवो मम सन्निधौ ।
गोलोके विरजातीरे रासे वृन्दावने भुवि ॥ ५ ॥
भाण्डीरे चम्पकवनेऽशोके चन्दनकानने ।
माधवीकेतकीकुन्दमल्लिकामालतीवने ॥ ६ ॥
भवन्तु तुलसीवृक्षा यत्राहं तुलसी सह ।
तुलसीमूलभूमौ च तीर्थवासो भविष्यति ॥ ७ ॥

तुलसीपत्रपतनस्थले देवाद्यधिस्थितिः ।
तुलसीजलसंज्ञातस्तुलसीपत्रभोजनः ॥ ८ ॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
सर्वयात्रासु दानेषु पुण्यभाक् तुलसीश्रयः ॥ ९ ॥
सुधाघटप्रलक्षेण न तथा तृप्तिमानहम् ।
यः सन्तोषो मम देवास्तुलसीपत्रदानतः ॥१०॥
निधनस्य समये यस्तुलसीवारि संग्रसेत् ।
सर्वपापविनिर्मुक्तो वैकुण्ठं याति भक्तराट् ॥११॥
नित्यं तुलसीसंस्पृष्टं जलं पिबति भक्तितः ।
जीवन्मुक्तः स विज्ञेयो गंगास्नानफलं लभेत् ॥१२॥
तुलस्या मम पूजाकृल्लक्षाश्वमेधपुण्यभाक् ।
तुलसीपत्रमास्ये तु धृत्वा प्राणाँस्त्यजेत्तु यः ॥१३॥
तुलसीमालिकां कण्ठे बिभ्रन् यो मरणं व्रजेत् ।
स्वर्गे कोटियुगं भुंक्त्वा विष्णुलोकं प्रयाति सः ॥१४॥
तुलसीनामधृगश्वमेधपुण्यः पदे पदे ।
तुलसीतोयकणिकां भोजने यो लभेज्जनः ॥१५॥
मृत्युकालेऽथवाऽऽपत्तौ लभते तुलसीदलम् ।
स रत्नयानमारुह्य वैकुण्ठं याति मद्गृम् ॥१६॥
त्रिरात्रं तुलसीपत्रं शुद्धं पर्युषितं सुराः ।
श्राद्धे व्रते प्रदाने च प्रतिष्ठायां सुरार्चने ॥१७॥
भूगतं तोयपतितं क्षालयित्वा ददेत्तु तत् ।
विष्णवेऽर्पितमेवैतद् दिव्यं शुद्धं प्रजायते ॥१८॥
पर्वसु सन्धयोः रात्रौ न छेत्तव्यं तु तद्दलम् ।
द्रुमाधिदेवता धाम्नि तुलसी मम सुप्रिया ॥१९॥
नद्यधिदेवता भूमौ वार्निधेर्गण्डकी प्रिया ।
रमा पद्मा स्वरूपा च वैकुण्ठेऽपि मम प्रिया ॥२०॥
नित्यं सह मया रासे रममाणा भविष्यति ।
तुलस्याः शापयोगेन गण्डकीमूलतीरगः ॥२१॥
शैलरूपो भवाम्यत्र शालग्रामशिलामयः ।
वज्रकीटास्तु कृमयो वज्रदंष्ट्राश्च तासु ते ॥२२॥
मम चक्रं करिष्यन्ति कीटास्ते पार्षदा मम ।
स्वर्णरेखात्मचक्राढ्यः शिलात्माऽहं प्रतिष्ठितः ॥२३॥
एकद्वारे चतुश्चक्रं वनमाला विभूषितम् ।
स्वर्णरेखान्वितं लक्ष्मीनारायणाभिधं हि तत् ॥२४॥
एकद्वारे चतुश्चक्रं वनमालां विना यदि ।
स्वर्णरेखान्वितं लक्ष्मीजनार्दनाभिधं हि तत् ॥२५॥
द्वारद्वये चतुश्चक्रं गोष्पदेन समन्वितम् ।
रघुनाथाभिधं ज्ञेयं रहितं वनमालया ॥२६॥
स्वल्पं द्विचक्रसहितं मालया स्वर्णरेखया ।
प्रभाकृष्णाभिधं बोध्यं गृहिणां तत्सुखप्रदम् ॥२७॥
स्थूलं द्विचक्रं रहितं मालया स्वर्णरेखया ।
पार्वतीकृष्णसंज्ञं तत् त्यागिनां सुखदं स्मृतम् ॥२८॥
अतिक्षुद्रं द्विचक्रं तु दधिवामनसंज्ञितम् ।
रेखायुक्तं च वा मालायुग् गृहिणां सुखप्रदम् ॥२९॥
द्विचक्रं मालया युक्तं श्रीधरं श्रीप्रदं सदा ।
स्थूलं च वर्तुलाकारं रहितं वनमालया ॥३०॥
द्विचक्रं धान्यधनदं ज्ञेयं दामोदराभिधम् ।
क्षेत्रोद्यानवाटिकाकृत् तथा बोध्यं सुवस्त्रदम् ॥३१॥
मध्यमं वर्तुलाकारं द्विचक्रं बाणविक्षतम् ।
रणरामाभिधं बोध्यं शरतूणसमन्वितम् ॥३२॥
मध्यमं सप्तचक्रं च छत्रतूणसमन्वितम् ।
राजराजेश्वरं बोध्यं राजसम्पत्प्रदं नृणाम् ॥३३॥
द्विसप्तचक्रं स्थूलं च फणावदूर्ध्वकाऽऽस्यकम् ।
अनन्ताख्यं तु विज्ञेयं चतुर्वर्गफलप्रदम् ॥३४॥
मध्यरक्तं द्विचक्रं तु माणिकीकृष्णसंज्ञितम् ।
दाराऽपत्यगृहरत्नप्रदं वाहनदं हि तत् ॥३५॥
चक्राकारं द्विचक्रं सश्रीकं सगोष्पदं तु यत् ।
मधुसूदनसंज्ञं तद् भुक्तिमुक्तिफलप्रदम् ॥३६॥
सुदर्शनं त्वेकचक्रं गुप्तचक्रं गदाधरम् ।
द्विचक्रं हयवक्त्राभं हयग्रीवं प्रकीर्तितम् ॥३७॥
पञ्चवक्त्रं कृष्णनारायणात्मकं प्रकीर्तितम् ।
अतीव विस्तृतास्यं द्विचक्रं नृसिंहनामकम् ॥३८॥
वैराग्यत्यागदं तत्तु सभालं चेत् सुखप्रदम् ।
लक्ष्मीनृसिंहसंज्ञं तद् विघ्नहन्तृ तथा मतम् ॥३९॥
द्वारदेशे द्विचक्रं च सश्रीकं च समं च यत् ।
तद्वासुदेवसंज्ञं वै सर्वकामप्रपूरकम् ॥४०॥
सूक्ष्मचक्रं तु सुषिरे बहुच्छिद्रं प्रद्युम्नकम् ।
गृहिणां सुखदं सौभाग्यादिप्रवर्धकं हि तत् ॥४१॥
द्वे चक्रे त्वेकलग्ने च पृष्ठे तु स्थूलपुष्कलम् ।
संकर्षणं तु विज्ञेयं गृहिणां सुखकृत् सदा ॥४२॥
पीताभं वर्तुलं चातिशोभनं त्वनिरुद्धकम् ।
सुखप्रदं गृहस्थानां सम्पदां च प्रवर्धकम् ॥४३॥
शालग्रामशिला यत्र तत्र लक्ष्मीर्हरिस्तथा ।
वसन्ति सर्वतीर्थानि तदर्चा पापनाशिनी ॥४४॥
छत्राकारे तु साम्राज्यं वर्तुले सर्वसम्पदः ।
दुःखं तु शकटाकारे शूलाकारे मृतिर्भवेत् ॥४५॥

विकृतास्ये तु दारिद्र्यं पिंगले हानिरेव च।
लग्नचक्रे भवेद् व्याधिर्विदीर्णे तु मृतिर्ध्रुवा ॥४६॥
शालग्रामशिलातोयैः स्नायाद् यः स तु मानवः।
सर्वतीर्थकृतस्नानः सर्वयज्ञसुदीक्षितः ॥४७॥
व्रतं दानं प्रतिष्ठा च श्राद्धं च देवपूजनम्।
शालग्रामस्य निकटे कृतं कोटिप्रपुण्यदम् ॥४८॥
शालग्रामप्रदक्षिणं मतं पृथ्वीप्रदक्षिणम्।
वेदपुण्यं तपःपुण्यं शालग्रामार्चनाद् भवेत् ॥४९॥
शालग्रामजलपाता जीवन्मुक्तो भवेत् सदा।
तत्पादस्पर्शमिच्छन्ति तीर्थानि निखिलान्यपि ॥५०॥
पृथ्वी तत्पादपूता तल्लक्षवंशप्रमोक्षणम्।
निधने तज्जलपाता विष्णुलोकगतो भवेत् ॥५१॥
निर्वाणं लभते विष्णुपादयोः स प्रलीयते।
शालग्रामे तु विच्छेदं तुलस्याश्च करोति यः ॥५२॥
तस्य दाम्पत्यविच्छेदः स्त्रीविच्छेदो भवेद् ध्रुवम्।
तुलसीपत्रविच्छेदं शंखे यस्तु करोति वै ॥५३॥
तस्य भार्याविहीनत्वं रुग्णत्वं सप्तजन्मसु।
शालग्रामं च तुलसीं शंखमेकत्र चैव यः ॥५४॥
करोति रक्षति तस्य विच्छेदो न धनस्त्रियोः।
नारीच्छुस्तुलसीं दद्याच्छालग्रामाय सर्वदा ॥५५॥
तस्माद् देवाः सदा मह्यं तुलस्या पूजयन्तु वै।
तुलसि! त्वं महाभागे! वृक्षरूपा भवाऽत्र मे ॥५६॥
दिव्यकन्यास्वरूपा च भवाऽत्राऽहं विवाहये।
इत्युक्त्वा श्रीहरिस्तां च विरराम ततश्च सा ॥५७॥
पूर्वदेहं परित्यज्य दिव्यरूपं दधार ह।
यथा श्रीश्च यथा लक्ष्मीस्तथोवास हृदि प्रभोः ॥५८॥
शालग्रामशिलारूपो धनवज्जलसंस्थितः।
भूमिस्थः पिंगलो विष्णुरुपतापेन संस्थितः ॥५९॥
लक्ष्मीः सरस्वती गंगा पद्मा च तुलसी रमा।
राधा श्रीश्च प्रभा वृन्दा सर्वास्ता भगवत्स्त्रियः ॥६०॥
जया पार्वती माणिक्या पाञ्चाली ललिता तथा।
जोष्ट्राद्याः शक्तयस्तस्य कृष्णनारायणस्य वै ॥६१॥
अथात्र तुलसी कन्या दिव्यरूपाऽभवद् यदा।
कृष्णवक्षसि संलग्नां सेहे सरस्वतीतराः ॥६२॥
सरस्वती न वै सेहे कटाक्षेण व्यलोकयत्।
तुलसी तद्भयात्तत्र पुनरदृश्यतां गता ॥६३॥
कृष्णनारायणस्तदा बोधयित्वा सरस्वतीम्।
ध्यात्वा तां पूजयामास स्तोत्रं तस्याश्चकर च ॥६४॥

"श्रीं ह्रीं क्लीं ऐं वृन्दायै तुलस्यै स्वाहा"—प्रसंजपन्।
द्वादशाक्षरमन्त्रं तं विष्णुः पूजां चकार ह ॥६५॥
पूजयेद् यो विधानेन सर्वसिद्धिं लभेन्नरः।
घृतदीपेन धूपेन सिन्दूरचन्दनेन च ॥६६॥
नैवेद्येन च पुष्पेण वस्त्राभरणकज्जलैः।
अलक्तकेनोपहारैः पुपूज परमेश्वरः ॥६७॥
स्तोत्रेणापि च तुष्टा सा कन्याऽऽविर्भूय तद्द्रुमात्।
प्रपन्ना पादयोः सेयं जगाम शरणं हरेः ॥६८॥
वरं तस्यै ददौ विष्णुर्जगत्पूज्या भवेति च।
अहं त्वां च धरिष्यामि स्वमूर्ध्नि वक्षसीति च ॥६९॥
सर्वे त्वां धारयिष्यन्ति स्वयं मूर्ध्नि सुरादयः।
तदा सुरैरपि देवी तुलसी पूजिता यथा ॥७०॥
आवाहनं कृतं तस्या आसनं च समर्पितम्।
पाद्यमर्घ्यमाचमनजलमर्पितमित्यथ ॥७१॥
तैलं च मर्दनायापि तदा देवैः समर्पितम्।
दधि दुग्धं घृतं क्षौद्रं शर्करा चार्पिता तथा ॥७२॥
पञ्चामृतस्नानतीर्थजलस्नानं च कारितम्।
शाटिकाघर्घरीकंचुकीप्रभृति समर्पितम् ॥७३॥
कस्तूरीगन्धसारादिचन्दनकज्जलादिकम्।
कुंकुमकेशतैलादिसिन्दूरादि समर्पितम् ॥७४॥
अलक्तकाऽऽभूषणानि शृंगाराभरणादिकम्।
यज्ञसूत्रपवित्रकयोगपट्टादिकं तथा ॥७५॥
कौस्तुभमणिरक्षामंगलसूत्रसुतन्तिकम्।
नक्तकव्यजनादर्शदोरकबिन्दुसद्द्रवम् ॥७६॥
कुंकुमाऽक्षतगन्धधूपदीपाद्यर्पितं सुरैः।
मिष्टान्नपायसलड्डुफलताम्बूलवारि च ॥७७॥
मण्डपे कदलीस्तंभे तोरणाम्बरभूषिते।
सर्वतोभद्रके पञ्चरत्नयुक्कलशोपरि ॥७८॥
सफलं च तुलस्यास्तैः कृतं चारार्त्रिकं तदा।
वस्त्रं शंखोदकं तस्यै भ्रामितं धूप्दीकम् ॥७९॥
नमनं सफलं चार्घ्यं पुष्पांजलिः प्रदक्षिणम्।
स्तोत्रेण रक्षनं चैव तुलस्याः संकृतं तदा ॥८०॥
द्वादशवार्षिकी कन्या ख्याता स्वर्णसमा तु तैः।
हरिस्तुष्टाव च ततः शृणु लक्ष्मि! वदाम्यहम् ॥८१॥
प्रियां मे सर्वदा पत्नीं पद्मां च तुलसीं रमाम्।
वृन्दां च गण्डकीं वनस्पतिं कन्यां भजाम्यहम् ॥८२॥
गोलोके मे प्रिया नित्यं प्रियां पत्नीं भजाम्यहम्।
यया रमामि गोलोके रमां पत्नीं भजाम्यहम् ॥८३॥

पद्मावती नदी जाता पद्मां पत्नीं भजाम्यहम् ।
यस्यास्तुला न विश्वेषु तुलसीं तां भजाम्यहम् ॥८४॥
वृन्दावने तु वृन्दां तां वृन्दावनीं भजाम्यहम् ।
शालग्रामसमायुक्तां गण्डकीं तां भजाम्यहम् ॥८५॥
गण्डयोर्मन्द्बालयोश्च कंवर्तीं तां भजाम्यहम् ।
वृक्षरूपां पुष्पसारां वनस्पतिं भजाम्यहम् ॥८६॥
वरारोहां कन्यकां तां कृष्णां कृष्णो भजाम्यहम् ।
इत्येवं स्तवनं कृत्वा तत्र तस्थौ रमापतिः ॥८७॥
तदा ददर्श तुलसीं कन्यां स्वपादयोर्नताम् ।
वरं विष्णुर्ददौ तस्यै विश्वपूज्या भवेति च ॥८८॥
शिरोधार्या च सर्वेषां वन्द्या मान्या ममेति च ।
विष्णोर्वरेण सा देवी परितुष्टा बभूव ह ॥८९॥
सस्मिता मानयामासुर्लक्ष्मीर्गंगा सरस्वती ।
विरजा राधिका पद्मा श्रीश्च कृष्णस्य योषितः ॥९०॥
कार्तिकीपूर्णिमायां तु तुलस्या जन्म मंगलम् ।
तत्र पूजा प्रकर्तव्या विहिता हरिणा स्वयम् ॥९१॥
कार्तिके तुलसीपत्रं विष्णवे यो ददाति च ।
गवामयुतदानस्य फलमाप्नोति मानवः ॥९२॥
पुत्रप्रियाधनवस्त्रगृहान्नयानवाहनम् ।
आरोग्याऽभयपुण्यादि स्तोत्रस्य स्मरणाद् भवेत् ॥९३॥
पुष्पेषु तुलना चास्या नास्ति देवीषु वा तथा ।
पवीत्रीकृतसर्वस्वा तुलसी विश्वपावनी ॥९४॥
इति सम्मानिता कृष्णनारायणेन कन्यका ।
तुलसी वृक्षिका चापि प्रसन्नाऽभूद्धरीश्वरी ॥९५॥
उवाच श्रीहरिं कन्या यदि नाथ ! त्वया प्रभो ! ।
कृता स्वकीया वाण्या वा हृदयेनाऽऽत्मनाऽन्वहम् ॥९६॥
ग्रहीतव्यो मम करो विवाहस्य विधानतः ।
तथाऽस्त्विति हरिः प्राह देवा देव्यो जगुस्तथा ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने तुलसीविवाहाख्याने तुलसीशालग्रामस्वरूपमाहात्म्य-पूजास्तोत्रादिकथननामाऽष्टत्रिंशदधिकत्रिशत-तमोऽध्यायः ॥ ३३८ ॥

श्रीलक्ष्मीरुवाच—

तुलसीविवाहं पूर्णं श्रोतुमिच्छामि केशव ! ।
कन्यापक्षं वरपक्षं विवाहोत्सवमित्यपि ॥ १ ॥
कन्यायाः पितरौ चापि वरस्य पितरौ तथा ।
क्व कथं सोद्वाहिता च कोऽभवत् तत्पुरोहितः ॥ २ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि स्मरणाच्छ्रवणात्तथा ।
पापनाशकरं मोक्षकरं वृत्तं वदामि ते ॥ ३ ॥
वृन्दावनं चातिरम्यं यमुनातटशोभितम् ।
तुलसीविष्णुवैवाह्यविधिस्थानं सुशोभनम् ॥ ४ ॥
गोवर्धनात्समारभ्य पश्चिमकोसलावधिम् ।
कुरुक्षेत्रात्तथाऽऽरभ्य खाण्डकारण्यकावधिम् ॥ ५ ॥
महाक्षेत्रं विवाहस्य स्थलं चाभूत् तदा कृतम् ।
विष्णुः सस्मार भूस्थल्याः शुद्ध्यर्थं देवकर्षुकान् ॥ ६ ॥
द्रागेव ते समायाताः संस्कृता भूस्थली तु तैः ।
विष्णुः सस्मार च विश्वकर्माणं स समाययौ ॥ ७ ॥
चकार मण्डपं मुख्यं वृन्दावनेऽष्टयोजनम् ।
चकार मण्डपांश्चान्यान् शतयोजनविस्तरान् ॥ ८ ॥
अथ वृषध्वजो राजा शिवभक्तोऽभवद् यतः ।
तद्वंशजो धर्मध्वजस्तुलसी तस्य कन्यका ॥ ९ ॥
तस्मात् तुलस्याः पितरौ भवतं पार्वतीहरौ ।
इत्याज्ञप्तौ विष्णुना तौ तद्वैवाहिककर्मणि ॥१०॥
कन्यादानविधानार्थे पितरौ तु सतीहरौ ।
सर्वमान्यावभवतां तुलसी हर्षिताऽभवत् ॥११॥
अथ विष्णोर्वरस्यात्र जिज्ञासितौ तु पितृकौ ।
राधाकृष्णौ तु पितरौ गोलोकस्थौ सुसम्मतौ ॥१२॥
विष्णुना स्मारितौ तत्राऽऽययतुः सहमण्डलौ ।
वैकुण्ठाधिपतिर्नारायणो विष्णुर्वरोऽत्र वै ॥१३॥
विष्णुना संस्मृतः कन्याकुटुम्बस्य पुरोहितः ।
देवपुरोहितो बृहस्पतिर्गुरुरुपस्थितः ॥१४॥
विष्णुना च स्मृतः पुरोहितो वरकुटुम्बगः ।
धौम्यः कृष्णपुरोहितो गर्गेण सह चाययौ ॥१५॥
मंगलान्यभवन् लोकाचारश्चापि बभूव ह ।
लग्नपत्री कुंकुमाक्ता लिखिता प्रेषिताऽपि च ॥१६॥
विवाहमण्डपस्तत्र चतुर्योजनविस्तृतः ।
तुलसीनां वने यमीतीरे त्वष्ट्रा कृतो नवः ॥१७॥
यज्ञकुण्डस्तथा वेदी कलशस्थापनादिकम् ।
गणेशपूजनं मातृकादिस्थापनपूजनम् ॥१८॥
ग्रहाणां पूजनं माणिकाख्यस्तंभप्ररोपणम् ।
लोकाचारश्च कन्याया हरिद्राद्रवलेपनम् ॥१९॥
सदाशिवेन विधिवत् कारितं सर्वमेव तत् ।
स्वस्वसम्बन्धिपक्षौश्चाऽऽजुहुवुश्च समन्ततः ॥२०॥

वरपक्षशिबीरं तु खाण्डवस्य वने कृतम् ।
कन्यापक्षशिबीरं तु तुलसीवनके कृतम् ॥२१॥
वृन्दावने महामुख्ये मण्डपे महीमानकाः ।
न्युषुश्च कन्यकापक्षा वरपक्षास्तु खाण्डवे ॥२२॥
राधाकृष्णेन च तत्र स्मृतः पत्नीव्रतः सुरः ।
समायातः स विप्रोऽत्र वेदविद्यादिपारगः ॥२३॥
कुंकुमपत्रिकास्तेन लिखिताः प्रेषितास्तथा ।
जीवसृष्टावीशसृष्टौ ब्रह्मसृष्टावथापि च ॥२४॥
प्रेषितास्तत्तत्प्रविशैर्लग्नसमयसूचिकाः ।
द्वादश्यां मण्डपस्त्रयोदश्यां लोकाऽनुमंगलम् ॥२५॥
चतुर्दश्यां महीमानाः पूर्णिमायां विवाहनम् ।
कार्तिकशुक्लद्वादश्यां मण्डपारोपणादिकम् ॥२६॥
कृतस्तथा लोकाचारस्त्रयोदश्यां सुमंगलम् ।
चतुर्दश्यां महीमानाः सर्वशस्तु समाययुः ॥२७॥
कृष्णगृहेऽक्षरधाम्नो मुक्तानीमुक्तसेवितः ।
कृष्णनारायणोऽगच्छद् भगवान्पुरुषोत्तमः ॥२८॥
गोलोकाद् गोपगोपीनां गणाश्च कृष्णयोषिताम् ।
कृष्णस्य पार्षदाश्चाप्याययुस्ते कृष्णखाण्डवम् ॥२९॥
वैकुण्ठाच्च सपत्नीको नारायणः समाययौ ।
पार्षदाः पार्षदान्यश्च समाययुः समन्ततः ॥३०॥
वासुदेवादयो व्यूहाः सपत्नीकाः सपार्षदाः ।
समाययुस्तदा सर्वे तुलसीविष्णुलग्नके ॥३१॥
अव्याकृतात्तथाधाम्नो भूमपूरुषमण्डलम् ।
समाययौ च वैराजो महाविष्णुः समण्डलः ॥३२॥
संकर्षणास्तथा सर्वे तत्त्वानि प्रकृतिस्तथा ।
प्रधानानि प्राययुश्च तुलसीविष्णुलग्नके ॥३३॥
अवताराश्च तत्पत्न्यो माणिकीपार्वतीप्रभाः ।
जयारमाललिताद्या ईश्वराण्यः समाययुः ॥३४॥
श्रीरामश्चापि सीताद्याः सर्वे तत्र समाययुः ।
मुनयः ऋषयो देवाः पितरश्च समाययुः ॥३५॥
ब्रह्मपत्न्यश्च सावित्रीगायत्र्याद्याश्च विश्वसृट् ।
ब्रह्मणो मानसाः पुत्राः सप्तर्षयः समाययुः ॥३६॥
दिक्पाला मनवो धर्मवंशोऽर्थमादयो गणाः ।
भावणा वत्सरा याम्याः प्रेता वह्नय आययुः ॥३७॥
इन्द्रश्चन्द्रस्तथा सूर्यो मंगलो बुध इत्यपि ।
ग्रहास्तारा नक्षत्राणि चाययुस्तुलसीमहे ॥३८॥
सिद्धयो वसवो रुद्रा मरुतो निधयस्तथा ।
कृत्तिका मातरश्चान्या सुराः काष्ठाः कलाश्च वै ॥३९॥
तिथयश्च त्रयस्त्रिंशद्विधा देवाः समाययुः ।
यक्षाश्च भूतवर्गाश्च शांकराश्च गणास्तथा ॥४०॥
योगिनीमण्डलान्यत्र चण्डीप्रभृतिदेविकाः ।
भैरवाश्च पिशाचाश्च वीराभद्रा ज्वरादयः ॥४१॥
तामसी सृष्टिरितरा शिवपक्षाः समाययुः ।
पत्नीव्रतादिविप्राद्याः पतिव्रतादियोषितः ॥४२॥
वर्णाश्रमास्तथाऽऽययुर्जलस्था व्योमगास्तथा ।
गृहादिदेवता नद्यः पर्वताश्च वनानि च ॥४३॥
खाताः समुद्रा ग्रामाश्च द्वीपा द्रुमाः समाययुः ।
वल्लयः स्तम्भास्तृणान्यत्र पशवः पक्षिणस्तथा ॥४४॥
जन्तवश्चापि सस्यानि नागाः सर्पाः समाययुः ।
बदरीस्थाः श्वेतसंस्थाः क्षीरस्थाश्च समाययुः ॥४५॥
सृष्टेः सर्वा योषितश्च तत्र नराश्च भावुकाः ।
शिवविष्णुसमाहूता आययुस्तुलसीमहे ॥४६॥
छत्रचामरसंयुक्ता राजाधिराजकीर्तयः ।
विमानावरमारूढा हंसगरुडहस्तिगाः ॥४७॥
चम्पकाभा निर्निमेषाः स्वर्णमुकुटकुण्डकुण्डलाः ।
दासदासीसमायुक्ता आययुस्तुलसीमहे ॥४८॥
खाद्यानां च प्रभोज्यानां लेह्यानां चोष्यवस्तुनः ।
पेयानां दुग्धसाराणाममृतानां च वार्धयः ॥४९॥
मिष्टान्नानां व्यंजनानां शाकानां सूपवस्तुनः ।
तण्डुलानां शर्कराणां कन्दानां फलवस्तुनः ॥५०॥
पर्वतास्तु कृता यत्र नवनीतघृतस्य च ।
सरांसि संभृतान्येव शीतपेयसरिद्वराः ॥५१॥
घृतकुल्या दधिकुल्या रसकुल्या मधोर्नदाः ।
माधव्याश्चापि नद्यश्च वारुण्याश्च सरांसि च ॥५२॥
लवणं तिक्तमामिष्टं मधुरं चाम्ललमित्यपि ।
यथा यादृग् यथेष्टं च समुद्र इव चार्जितम् ॥५३॥
पर्यंकशय्याः पुष्पाणां दासा दास्यश्च कोट्यः ।
नृत्यं च नर्तकाश्चापि सूतमागधबन्दिनः ॥५४॥
भाटचारणपण्डितगणकाऽसंख्यभिक्षुकाः ।
साध्व्यः सत्यः सांख्ययोगित्यागिसन्यासियोषितः ॥५५॥
अप्सरसो गणिकाश्च पर्यश्च तुलसीमहे ।
तीर्थानि देवगन्धर्वा नटाश्च गीतिकास्वराः ॥५६॥
वेदाश्च सर्वविद्याश्च प्राययुस्तुलसीमहे ।
शीतोष्णजलपानानि शीतोष्णभोजनानि च ॥५७॥
शीतोष्णेन्द्रियभोग्यानि सन्त्यनन्तानि तन्महे ।
समिधः सर्वजातीयास्तिलाद्याश्च कणास्तथा ॥५८॥

होमोपकरणार्थाश्च यात्राऽसंख्या भवन्ति च ।
चातुर्होत्रा द्विजास्तत्र कोटिशश्च समाययुः ॥५९॥
स्वस्वपक्षे कृतावासा महीमानाः समन्ततः ।
कृतस्वागतभोज्याद्यास्तुतुषुश्च विरेजिरे ॥६०॥
पूर्णिमायां कृतस्नानपूजनाद्याः सुरादयः ।
शिवाज्ञया हवनानि यज्ञकार्याणि चक्रिरे ॥६१॥
अग्निमुखाश्च ये ते वै तृप्यन्त्यतितरां तदा ।
वाद्यानां तुमुला नादा भवन्त्यतितरां तदा ॥६२॥
नारीणां गीतिका रागा भवन्त्यतितरां तदा ।
नाटकानां रंजनानां भवन्त्यतितरां क्रियाः ॥६३॥
ब्राह्मणानां वेदघोषा भवन्त्यतितरां तदा ।
अप्सरसां नर्तनानि भवन्त्यतितरां तदा ॥६४॥
गणिकानां गायनानि भवन्त्यतितरां तदा ।
ऐन्द्रजालिदर्शनानि भवन्त्यतितरां तदा ॥६५॥
मायारचितदृश्यानि दृश्यन्तेऽतितरां तदा ।
संगीतवरकाव्यानि भवन्त्यतितरां तदा ॥६६॥
प्रेमोद्वाहप्रवाहाश्च जायन्तेऽतितरां तदा ।
आचार्याणां तत्त्ववादा वर्तन्तेऽतितरां तदा ॥६७॥
कलाकारकलायत्ना लोक्यन्तेऽतितरां तदा ।
सर्वरसाः सर्वगन्धाः सर्वरूपाणि वै तदा ॥६८॥
सर्वशब्दाः सर्वस्पर्शाः प्राप्यन्तेऽतितरां तदा ।
किं न्यूनं भगवान् यत्र विवाहयति तूलसीम् ॥६९॥
प्रातस्तत्र समायाता खाण्डवाद् वरवाहिनी ।
वरौ विष्णुश्चतुर्हस्त ऊनषोडशहायनः ॥७०॥
शंखचक्रगदापद्मवनमालाविराजितः ।
कौस्तुभकुण्डलापीडमुकुटकटकान्वितः ॥७१॥
नवीनपद्महारालिसमावृताननस्तदा ।
दिव्यश्वेताश्वमारुढः खड्गहस्तः समुज्ज्वलः ॥७२॥
सुवर्णतारचंचत्सद्वस्त्रविभूतिशोभितः ।
रत्नहीरकमौक्तिकमणिस्वर्णादिभूषणः ॥७३॥
पीताम्बरधरो नाथः सोपानत्पत्कजान्वितः ।
पिशंगपिष्टपिशंगः केसरवर्णराजितः ॥७४॥
केयूरमालिकाऽऽपीडहारशेखरशोभितः ।
कुंकुमाऽक्षतचन्द्रकभालतिलकराजितः ॥७५॥
श्रीभूतिह्रीप्रभाकान्तिसिद्धिलक्ष्मीविराजितः ।
समयायौ स वाहिन्या दशयोजनदीर्घया ॥७६॥
छत्रचामरयष्टिधृक्दासदासीप्रसेवितैः ।
राजाधिराजराजेशैः परमेशैः प्रयुक्तया ॥७७॥

लोकाचारविधानार्थे सदाशिवोऽभिस्थितः ।
सकोटीश्वरसम्राड्भिर्भोज्यपानेऽभिगृह्य च ॥७८॥
सजलश्रीफलपत्रयुक्तकलशमस्तकाः ।
सौभाग्यवत्यो दैव्यश्च कन्याश्चाभिययुर्वरम् ॥७९॥
स्वर्णस्थाल्यां धृताः पुष्पकुंकुमश्रीफलाऽक्षताः ।
माला लाजाः स्वस्तिकाश्चार्पिताः सत्या वराय वै ॥८०॥
वर्धितश्चन्दनैः पुष्पैर्लाजाऽक्षतैस्तदाऽऽलिभिः ।
नमस्कृतः शिवपक्षैराशीर्दत्तश्च भूसुरैः ॥८१॥
वर्धितः सर्वथा स्त्रीभिरीक्षितो महीमानकैः ।
रञ्जितो वाद्यघोषैश्च नीतो विश्राममण्डपम् ॥८२॥
भोजिताः पूजिता विश्रामिताश्च सत्कृताश्च ते ।
महीमाना उभपक्षाः सुखं प्रापुः प्रशाश्वतम् ॥८३॥
वरेण प्रेषितं वस्त्राभूषणादि तु सर्वथा ।
श्रांगारिकं च रत्नादि धारयामास तूलसी ॥८४॥
चन्द्रोदये कोटिचन्द्रसूर्यविद्युत्प्रकाशितम् ।
गृहमानीय सत्कारं वरस्य विदधे हरः ॥८५॥
लोकाचारं तदा कृत्वा जलपानं समर्प्य च ।
वर्धयित्वा वस्तुभिश्च विवाहमण्डपं हरः ॥८६॥
निनाय वरराजं तं वाद्यान्यवादयंस्तदा ।
वेदघोषा गीतिघोषास्तूर्यघोषास्तदाऽभवन् ॥८७॥
पुष्पवृष्टिं तदा चक्रुर्देव्योऽक्षतादिमिश्रिताम् ।
पदा कपालं भंक्त्वा श्रीविष्णुर्वेदीमुपाययौ ॥८८॥
वरसिंहासने तत्र निषादितो वरस्तदा ।
यज्ञकुण्डसमीपे च पट्टिकायां निषादितः ॥८९॥
प्रकोष्ठतन्तुना सार्कं कामफलेन योजितः ।
स्वस्त्यर्थं वाचितस्तत्र गुरुभिर्वेदपारगैः ॥९०॥
वर्धितस्तिलकेनाथ शंकरेण सभाजितः ।
पार्वत्या तिलकं कृत्वा कराभ्यां मंगलायितः ॥९१॥
वामे ततस्तूलसीं तामानीय सवधूकृतः ।
पुरोहिताभ्यां वर्धितौ तौ तिलकेन बिन्दुना ॥९२॥
पुष्पाक्षतैर्जलैर्द्रव्यैः प्रोक्षितौ संस्कृतौ तदा ।
आचामितौ हवनाय प्रेरितौ जुहुतः स्म तौ ॥९३॥
कन्यया वरमाला च विष्णुकण्ठे समर्पिता ।
पुरोहितेन योजितौ दम्पती वरमालया ॥९४॥
अंगदेवादिपूजां च कारयित्वा तदुत्तरम् ।
द्वयोर्मुखे कवले च दापयित्वा परस्परम् ॥९५॥
जलं संपाययित्वा च मन्त्रानुच्चार्य वैदिकान् ।
विष्णोर्दक्षकरे वामकरं बध्वा निधाय च ॥९६॥

सह धर्मं चरेतामित्यादिमन्त्रानश्रावयन् ।
द्वयोः स्वेदलवो रोमपुलकश्चाऽभवत्तदा ॥९७॥
तदा वाद्यान्यवाद्यन्त बभूवुर्वेदघोषणाः ।
जयशब्दा बभूवुश्च विष्णुना तुलसीग्रहे ॥९८॥
वह्निं प्रदक्षिणं कृत्वा निषीदतुश्च तौ पुनः ।
शेषहोमं विधायैवोर्मिकाक्रीडां प्रचक्रतुः ॥९९॥
गोभूहिरण्यमाणिक्यवस्त्रान्तररत्नभूमिकाः ।
कोटिकोट्यर्बुदसंख्या ब्राह्मणेभ्यो ददौ हरः ॥१००॥
रत्नहीरकमहिषीयानवाहनसद्गजान् ।
कृष्णो ददौ ब्राह्मणेभ्यो गृहक्षेत्रर्धिसम्पदः ॥१०१॥
तदा वराय वध्वै च ददुर्द्रव्यं प्रतौषिकम् ।
अथ मूशलशूर्पादि वरमूर्ध्नोऽवतारितम् ॥१०२॥
वधूवरौ गृहं नीत्वा शुभौ भोज्यं प्रकारितौ ।
एकान्तशयनं दत्वा प्रातः स्नानादिकोत्तरम् ॥१०३॥
कारयित्वा भोजनादि यौतं दत्वा विधानतः ।
रत्नहीरकस्वर्णादिनिधीनसंख्यकाँस्तथा ॥१०४॥
कोट्यश्वहस्तिगोप्राणियानवाहनभूतयः ।
दासदासीपरार्धाद्या गृहोपकरणादयः ॥१०५॥
प्रदत्ताः पितृभिश्चान्यैर्यथायोग्यं यथाधनम् ।
तत्सर्वं वरसात्कृत्वा लोकाचारं ताम्बूलकम् ॥१०६॥
जलपानं प्रदत्वा च क्षमायाचनमित्यथ ।
कृत्वा वरेण युक्तां स्वकन्यां निधाय वाहने ॥१०७॥
मंगलाशीर्वचो दत्वा प्राप्य कन्यानमःक्रियाम् ।
शंभुः प्रस्थापयामास विश्रान्तिमण्डपं तु तौ ॥१०८॥
वरपक्षा जनवाहा विश्रान्तिभवनं ययुः ।
शिवपक्षा विनिवृत्ताः शिवाश्रमं प्रतस्थिरे ॥१०९॥
प्रतिपद्दिवसे सर्वान् भोजयित्वातिभावतः ।
सत्कृत्य जनवाहाँश्चाऽप्रस्थापयद्धरो वरम् ॥११०॥
स्वगृहमहीमानाँश्चाऽप्रस्थापयत्ततो हरः ।
मण्डपादिसंहृतिं च कारयित्वा गणादिभिः ॥१११॥
विमानेन ययौ तस्मात्स्थानात् कैलासमीश्वरः ।
तुलसी वृक्षरूपा च वर्तते लग्नभूस्थले ॥११२॥
वधूरूपेण याता सा खाण्डवं वनमालयम् ।
तत्रापि मण्डपसंहारादिकं संविधाय च ॥११३॥
विष्णुः कृष्णादिकं नत्वा नीत्वा नववधूं सह ।
गरुडेन ययौ स्वीयं वैकुण्ठं पार्षदैः सह ॥११४॥
नवोढया सह रेमे विष्णुर्विविधकामनाम् ।
एवं तेन स्वकीया सा पत्नी शापाद् विमोचिता ॥११५॥
प्रापिता च स्वकं धाम परमानन्दसंभृतम् ।
तुलस्यपि पतिं कृष्णनारायणमवाप्य च ॥११६॥
पूर्णकामाऽभवल्लोके तुलसीति स्थिताऽभवत् ।
शृणु लक्ष्मि ! पूजयिष्यत्यनिशं मां तु ये जनाः ॥११७॥
तुलसीमञ्जरीपत्रैर्मद्भक्ता मत्समाश्रिताः ।
नरान् नारीस्तुलसीवन्नयिष्ये चरणे मम ॥११८॥
भुवि वृक्षस्तुलस्याश्च शालग्रामशिला तथा ।
अहमेव भवाम्यत्र रूपद्वयमुपागतः ॥११९॥
जलयोगेन पाषाणैः पत्रैः पुष्पैः कणैर्मृदा ।
यथाकथञ्चित्प्राणिभ्यो मुक्तिं ददामि तन्मिषाम् ॥१२०॥
इमां श्रुत्वा तुलस्यास्तु विवाहस्य कथां ततः ।
पूजयेद् विधिनाऽऽचार्यं वाचकं सर्वपूजितम् ॥१२१॥
धनेनाऽम्बरभूषाभिर्यानवाहनवस्तुभिः ।
अन्नरजतमण्याद्यैः स्वर्णहीरकव्यञ्जनैः ॥१२२॥
पत्रैः पुष्पैः फलैस्तोयैर्दुग्धदधिघृतादिभिः ।
शर्कराधान्यगोधूमैः खारीकखर्जुरादिभिः ॥१२३॥
श्रीफलचन्दनतैलच्छत्रचामरमञ्चकैः ।
गोभूगृहभवनाद्यैर्वाटिकावाहघोटकैः ॥१२४॥
मञ्चखट्वागेन्दुकैश्च शय्यादर्पणपात्रकैः ।
तिलशालिमुमुन्यन्नैर्नवनीतमुपिण्डकैः ॥१२५॥
श्रांगारिकैश्च बहुभिर्वस्तुभिः पूजयेद्गुरुम् ।
दद्याच्च बहुदानानि यथाशक्ति यथाधनम् ॥१२६॥
भोजयेद् बहुविप्राँश्च साधून् साध्वीः प्रभोजयेत् ।
बालाँश्च बालिकाश्चैव दीनान्धकृपणाँस्तथा ॥१२७॥
तर्पयेज्जलदानेन पितॄन् श्राद्धं च कारयेत् ।
देवपूजां कारयेच्च महापूजां प्रकारयेत् ॥१२८॥
शिवशिवार्चनं कुर्यात्तुलसीविष्णुपूजनम् ।
राधाकृष्णं पूजयेच्चार्पयेत् कृष्णनरायणम् ॥१२९॥
प्रसादं सम्प्रदायैव सर्वश्रोतृभ्य इत्यथ ।
ततो नीराजनं कारयित्वा स्तुत्वा तु दम्पतीम् ॥१३०॥
क्षमापराधं याचित्वा दत्वा तु दक्षिणां शुभाम् ।
विसर्जयेन्नमस्कृत्य स्मरेत् तुलसीमाधवम् ॥१३१॥
एवं षोडशवस्तूत्तमोत्तमैः पूजयेत्तु तौ ।
तुलसीमाधवौ भुक्तिं मुक्तिं लभेत पूजकः १३२॥
धनदाराऽपत्यपुत्रक्षेत्रराज्यगृहादिकम् ।
लभते तुलसीकृष्णपूजनेनाऽस्य कर्णनात् ॥१३३॥
वन्ध्या वै लभते पुत्रं निर्धनो धनवान् भवेत् ।
रोगी रोगाद् विमुच्येत ऋणी निर्ऋणतां व्रजेत् ॥१३४॥

निगडस्थः प्रमुक्तः स्यात् पापो निष्पापतां व्रजेत् ।
कन्या पतिं लभेत् कृष्णसमं सौभाग्यदं सदा ॥१३५॥
यथेष्टं संलभेत् सर्वं सम्पदां पात्रतां लभेत् ।
दुःखिनां दुःखनाशः स्यात् श्रावयेत् शृणुयादिदम् ॥१३६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने तुलसीविवाहाख्याने वृन्दावने यमुनातटे द्वादश्यां विश्राममण्डपादिकरणं, खाण्डववने विष्णुपितृशिबिरं, तुलसीवने तुलसीपितृशिबिरं, कुण्डमण्डपादिविधानं, जामिमही-मानाद्यागमः, वरवाहपक्षानां जनवाहवाहिन्यागमः, कार्तिकपूर्णिमायां तुलस्या विवाहविधयः, हस्त-मेलापः, विदायादिः, तुलसीविवाहकरणश्रवणादि-फलं, चेत्यादिनिरूपणनामैकोनचत्वारिंश-धिकदत्रिशततमोऽध्यायः ॥३३९॥

श्रीलक्ष्मीरुवाच—

शालग्रामेतिसंज्ञा वै कथं विष्णोः कृता सदा ।
किं स्थलं तत् कथामेतां श्रावय श्रीपते हरे ॥ १ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथामेनां शालग्रामार्थबोधिनीम् ।
यां श्रुत्वा तादृशी भक्तिर्भवेन्मुक्तिर्भवेत्तथा ॥ २ ॥
गण्डकीति तथानाम्नी यथा जाता महानदी ।
तत्र यद्यद् यथावृत्तं कथयामि निबोध मे ॥ ३ ॥
तुलस्या पूर्वतो ज्ञात्वा शालग्रामाख्यभूतलम् ।
शालग्रामशिला भवेत्यच्युतः शापितस्तदा ॥ ४ ॥
हरेश्च तपतो गण्डदेशयोर्जलमद्भुतम् ।
उत्पन्नं च जलधारा यत्प्रदेशे पपात वै ॥ ५ ॥
तत्क्षेत्रं गण्डकीक्षेत्रं ज्ञात्वा प्राग् जातमेव ह ।
विष्णुना गण्डकी भवेत्यभिशप्तं तदा पुरा ॥ ६ ॥
शालग्रामे सिद्धक्षेत्रे शिला बभूव केशवः ।
गण्डकी निर्झरणे सा नदी जाता तु गण्डकी ॥ ७ ॥
शृणु विस्तरतश्चैतत्क्षेत्रं सालंकनिर्मितम् ।
आसीद् ब्रह्मर्षिपरमः सालंकायनसंज्ञकः ॥ ८ ॥
पूर्वे कृतयुगे मे त्वाराधनाय दिशो दश ।
भ्रमते स्म महाभक्तो पुत्रेषणासमन्वितः ॥ ९ ॥
पुत्रार्थं स तपस्तेपे मेरुशृंगे समाहितः ।
पिण्डारके तथा लोहार्गले च रैवते गिरौ ॥१०॥

मम साक्षाद् विना तस्य शान्तिर्भवति नैव यत् ।
स तु तत्र समायातस्तपोऽर्थं हिमसन्निधौ ॥११॥
तपस्तेपे बहुवर्षं सालंकाख्यो मुनिः सदा ।
तेन पर्णगृहं तत्र कृतं पत्न्यर्थमल्पकम् ॥१२॥
अन्ये चापि भुवो देवाः सपत्नीकाः समावसन् ।
ग्रामोऽभूत् सालरचितः शालवृक्षेषु तद्वने ॥१३॥
सालवृक्षेऽयनकर्ता सालंकायन इत्यभूत् ।
शालेषु ग्रामवासेन शालग्रामस्थलं त्वभूत् ॥१४॥
तुलस्या तत्पूर्ववृत्तं विज्ञायैव शिलात्मकः ।
भव शालग्रामवासी त्वित्युक्तोऽहं तथाऽभवम् ॥१५॥
तत्रागत्य शैलरूपो वर्तामि वै मदिच्छया ।
सालंकस्य तपस्युग्रे प्रसन्नेन मया तदा ॥१६॥
दर्शनं स्वं प्रदायैव पुत्राशीर्वादयोजितः ।
सः प्राह त्वत्समः पुत्रो भवत्वेव मम प्रभो ॥१७॥
मया तथास्त्विति प्रोक्तं तत्पुत्रश्चाऽभवँस्ततः ।
शालग्रामे पर्वतेऽहं वासमकरवं मम ॥१८॥
वर्तामि जडवत् तत्र शिलेव सर्वदा प्रिये ।
ऋषिः सालंक एवाऽत्र निधनं प्राप्तवाँस्ततः ॥१९॥
शलाकाख्या च मे माता सती तेन सहाऽभवत् ।
तयोर्मोक्षं विधायैव विष्णुरहं तु तत्स्थले ॥२०॥
अदृश्यतां गतो नित्यं शिलापुञ्जे वसामि च ।
शमश्च पुनरेवाऽत्राऽऽधिक्येन निवसामि वै ॥२१॥
तत्र क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः ।
शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति ॥२२॥
अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यशः ।
तस्मिन् शिलाः समग्रास्तु मत्स्वरूपा न संशयः ॥२३॥
सर्वास्तु पूजनीयास्ताः किं पुनश्चक्रलाञ्छिताः ।
लिंगरूपाः शिलाः शंभुरूपा बोध्याऽत्र पर्वते ॥२४॥
शिवनाभाः शिलाः शंभुश्चक्रनाभाः शिलास्त्वहम् ।
सालंकायनकाख्यस्य मुनेस्तु तपसो बलात् ॥२५॥
शंभुना सह सम्मन्त्र्य स्थितावावां मम प्रिये ! ।
शालग्रामगिरिर्विष्णुः शिवशृंगं शिवोस्ति सः ॥२६॥
तयोः पर्वतयोर्या वै शिला विष्णुशिवाऽभिधा ।
रेवया तु कृतं पूर्वं तपः शिवसुतुष्टिदम् ॥२७॥
मम त्वत्सदृशः पुत्रो भूयादितिमनीषया ।
रेवायै तेन दत्तो वै वरो लिंगस्वरूपतः ॥२८॥
गर्भे तव निवत्स्यामि पुत्रो भूत्वा शिवप्रिये ! ।
इत्युक्त्वा स शिवः शालग्रामगिरिं विहाय च ॥२९॥

ययौ पाषाणरूपो वै लिंगात्मा नर्मदाजले।
नर्मदायां तले शिवलिंगश्रृंगस्य चोपलाः ॥३०॥
सर्वास्ताः शिवरूपा वै तथाऽत्राऽहं हरिः स्वयम्।
इति ते कथितं लक्ष्मि! शालग्रामार्थबोधकम् ॥३१॥
अथापि शृणु वृत्तान्तं मया तप्तं तपो बहु।
मद्गण्डयोः स्वेदजलाज्जलकुल्याऽभवत्तु या ॥३२॥
सापि चेतनरूपाऽभूत् कन्या कमललोचना।
तपस्तेपे च सा तत्र दारुणं पुत्रवाञ्छया ॥३३॥
शीर्णपर्णाशनं कृत्वा वायुभक्षाऽप्यनन्तरम्।
दिव्यवर्षशतं तेपे विष्णुचिन्तापरा सदा ॥३४॥
तत्र साक्षादभवेऽहं हरिः कृष्णनरायणः।
अवोचं मधुरं तां तु प्रीतः प्रणतवत्सलः ॥३५॥
गण्डकि! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे।
अविच्छिन्नया भक्त्या च वरं वरय तापसि! ॥३६॥
किं देयं तद् वदस्वाशु प्रीतोऽस्मि वरवर्णिनि!।
गण्डक्यपि पुरो दृष्ट्वा शंखचक्रगदाऽब्जिनम् ॥३७॥
दण्डवत्प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे।
"अहो देव! भवद्गण्डात् प्राविर्भूय जलात्मिका ॥३८॥
यावदत्र तु वर्तामि भवानदृश्यतां गतः।
कथमेकाकिनी त्वत्राऽरण्ये वसामि केशव! ॥३९॥
स वै पुनर्मया दृष्टो दुर्दर्शो योगिनामपि।
त्वां योगमायामाविश्य रूपतां प्राप्तवानसि ॥४०॥
मूढस्य जगतो मध्ये स्थिता किंचिदजानती।
त्वया कृता धृता चास्मि योग्याऽयोग्यमविन्दती ॥४१॥
त्वया महत्तां गमिता दृष्टा याऽस्मि त्वयाऽद्य वै।
ययाचेऽशतयोदार! तन्मे दातुं त्वमर्हसि ॥४२॥
दयालुरसि सर्वात्मन् दीनेषु तु विशेषतः।
इत्युक्त्वा प्रांजलिर्भूत्वा ययाचे वाञ्छितं वरम् ॥४३॥
मम गर्भगतो भूत्वा विष्णो! मत्पुत्रतां व्रज।
अथ विष्णुस्तु तां प्राह शृणु देवि! वचो मम ॥४४॥
शालग्रामशिलारूपी तव गर्भगतः सदा।
स्थास्यामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥४५॥
त्वं समागच्छ वैकुण्ठं बाला माऽत्र वसाऽनघे!।
अत्राऽऽयास्यति मे पत्नी तुलसी सरितात्मिका ॥४६॥
गण्डक्याख्या भाविनी सा महती मम धारिणी।
इत्यभिधाय भगवान् बालां निनाय पक्षिणा ॥४७॥
वैकुण्ठं, तां च तत्रैव रक्षित्वा त्वाययौ पुनः।
यत्र सा जलकुल्याऽस्ति गण्डकी तज्जले च सः ॥४८॥
शिलात्मकस्तु वसति वरदानस्य कारणात्।
सोऽहं शिलास्वरूपोऽस्मि विष्णुर्लक्ष्मि! सदातनुः ॥४९॥
मत्सान्निध्यान्नदीनां सा ख्यातिश्रेष्ठाऽभवत् ततः।
दर्शनात्स्पर्शनात्स्नानात्पानाच्चैवाऽवगाहनात् ॥५०॥
हरते सा महत्पापं वाङ्मनःकायसंभवम्।
स्नास्यति यस्तु गण्डक्यां देवर्षिपितृतर्पकः ॥५१॥
तारयित्वा च तत्पितॄन् ब्रह्मलोकं गमिष्यति।
यदि तत्रोत्सृजेत्प्राणान् सोऽपि वैकुण्ठमाप्नुयाम् ॥५२॥
लक्ष्मीः प्राह तदा विष्णुं कथं वै भगवान् पुरा।
कठिनं वै तपश्चक्रे यद्गण्डवारिगण्डकी ॥५३॥
नारायणस्तदा लक्ष्मीं प्राह शृणु प्रिये! सदा।
लोकानां हितकार्याय श्रेयसे धर्मगुप्तये ॥५४॥
तपः करोमि बहुधा कल्याणार्थं च तुष्टये।
एतत्तीर्थं पूर्वसृष्टावासीत् कर्तुं तथाविधम् ॥५५॥
तत्राहं तप आरेभे बहुकल्याणहेतवे।
अहं जानामि तत्सर्वं नान्यो जानाति पूर्वकृत् ॥५६॥
यदा हिमालये लक्ष्मि! नरनारायणावपि।
न चैवास्तां धर्मपुत्रौ तदा लोकावनाय वै ॥५७॥
मया तपः परं तप्तं हिमालयसमीपतः।
शालग्रामे महाक्षेत्रे तन्मे स्थानं तदाऽभवत् ॥५८॥
तत्र तपस्यतो मे वै काले बहुतिथे गते।
तीव्रं तेजः प्रादुरासीद् येन लोकाश्चराऽचराः ॥५९॥
तस्योष्मणाऽतिसंभ्रान्ता विस्मिताः सर्वतोदिशम्।
उष्मणा च समुद्भूतः स्वेदपूरस्तु गण्डयोः ॥६०॥
तेन जाता धुनी दिव्या लोकानामघहारिणी।
तस्य प्रभवमिच्छन्तो ज्ञातुं नेशाः कथंचन ॥६१॥
देवाः सर्वे ततो जग्मुर्ब्रह्माणं प्रति सोत्सुकाः।
ब्रह्माऽप्यज्ञो ययौ देवैः समं श्रीशंकरं प्रति ॥६२॥
पप्रच्छाऽद्भुततेजः किं कस्मात् कथं प्रभो वद।
शिवो ध्यात्वा क्षणं प्रत्युवाच विष्णुस्तपःस्थितः ॥६३॥
गच्छामो यत्र स चास्ते इति ते तत्स्थलं ययुः।
शंभुः स्मयन्नुवाचैनं तपस्यसि कथं प्रभो ॥६४॥
प्रपूर्णसर्वकामस्य किं ते तपसि कारणम्।
एवमुक्तो महाविष्णुर्नमस्कृत्य सुरेश्वरान् ॥६५॥
प्राह लोकहितार्थाय तपस्तप्तुं समुद्यतः।
युष्मद्दर्शनमासाद्य कृतार्थोऽभवमद्य वै ॥६६॥
एतत्क्षेत्रं देवभूमिस्तीर्थं श्रेष्ठतमं भवेत्।
तथाशीर्वचनैर्देवाः कृपां कुर्वन्तु सर्वथा ॥६७॥

तच्छ्रुत्वा तु तदा ब्रह्मा शंभुस्तथाऽन्यदेवताः ।
ऊचुर्विष्णो ! दर्शनात्ते मुक्तिक्षेत्रमेव यत् ॥६८॥
देवानां दर्शनाच्चापि मुक्तिक्षेत्रमिदं भवेत् ।
गण्डस्वेदोद्भवा यत्र गण्डकी सरितां वरा ॥६९॥
भविष्यति न सन्देहो यस्या गर्भे भविष्यसि ।
त्वयि स्थिते जगन्नाथे तव सान्निध्यकारणात् ॥७०॥
वयं देवाः समुनयो वेदास्तीर्थानि वै मखाः ।
निवत्स्यामः सदैवात्र गण्डक्यां जगतां पते ! ॥७१॥
कार्तिकं सकलं मासं यस्तु स्नास्यति तज्जले ।
सर्वपापविनिर्मुक्तो मुक्तिभागी न संशयः ॥७२॥
तीर्थानां परमं तीर्थं मंगलानां च मंगलम् ।
स्मरणाद् दर्शनात्स्पर्शाद् गंगाधिकफलं भवेत् ॥७३॥
एषा सा परमा पुण्या गण्डकी भुक्तिमुक्तिदा ।
अपरा देविका नाम्ना गण्डक्या सह संगता ॥७४॥
पुलस्त्यपुलहौ पूर्वं तेपाते परमं तपः ।
यत्र सृष्टिविधानार्थं कृत्वाऽऽश्रमपदं पृथक् ॥७५॥
सृष्टेर्विधानसामर्थ्यं ताभ्यां लब्धं ततः परम् ।
ततोऽभवद् ब्रह्मपुत्री गण्डक्या मिलिता तु सा ॥७६॥
तत्र त्रिवेण्यां हरिणा गजग्राहौ विमोचितौ ।
सुदर्शनेन चक्रेण ग्राहास्यं पाटितं द्रुतम् ॥७७॥
क्षिप्तं पुनः पुनस्तत्तु चक्रं संघटयच्छिलाः ।
संघटनात्तु चक्रस्य शिलाश्चक्रेण लाञ्छिताः ॥७८॥
वज्रकीटैस्ततस्तद्वद् देवैस्ता वर्धिताः सदा ।
अथ शालग्रामक्षेत्रे भक्तरक्षार्थमेव हि ॥७९॥
सुदर्शनं मयाऽऽज्ञप्तं यत्र भ्रमति सर्वदा ।
तत्र चक्रेण ताः सर्वा अंकिता ह्यभवन् शिलाः ॥८०॥
मुक्तिक्षेत्राद्धरिहरक्षेत्रपर्यन्तमेव तत् ।
द्वादशयोजनं क्षेत्रं शालग्रामशिलामयम् ॥८१॥
स्वभक्तानां रक्षणार्थं मया यत्र स्थितिः कृता ।
तत्र सालद्रुमाश्चापि ममांशाः सन्ति सुन्दरि ! ॥८२॥
योऽयं वृक्षस्तु गण्डक्या दृष्टः सोऽहं न संशयः ।
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ॥८३॥
शालग्रामस्थलं ख्यातं भक्तसंसारमोक्षणम् ।
चक्रस्वामिस्थले चक्रशिला स्वितस्ततः खलु ॥८४॥
दृश्यन्ते तत्स्थलं सर्वं पावनं मम योगतः ।
गण्डकी तुलसी वृन्दा पद्मा मत्तनुसंश्रिता ॥८५॥
तदाश्रितान् मम लोकं प्रापयेन्मद्बलाद्ध्रुवम् ।
शालग्रामस्य गण्डक्यास्तुलस्याश्च मम प्रिये ! ॥८६॥
यथावृत्तं कथितं ते ममापि तपसि स्थितिः ।
तीर्थसंस्थापनार्थाय लोककल्याणहेतवे ॥८७॥
शिलारूपेण मूर्तेर्मे देहिनां लाभहेतवे ।
कणपत्रादिरूपेण जन्तूनां लाभहेतवे ॥८८॥
जलपानाश्रयाद्यैश्च सर्वेषां लाभहेतवे ।
मया मम स्वरूपाणि कृतानि सर्जनक्षणे ॥८९॥
इत्येषा मे कृपा लक्ष्मि ! प्राण्युद्धारपरस्य वै ।
एषोऽध्यायो महाभागे ! सर्वमंगलकारकः ॥९०॥
तेजः श्रियं च लक्ष्मीं च सर्वकामान् सुसम्पदः ।
लभन्ते पठमाना वै मम मार्गानुसारिणः ॥९१॥
यावन्ति चाक्षराणि स्युरत्राध्याये मनस्विनि ! ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥९२॥
एतन्मरणकाले तु न कदाचिद्धि विस्मरेत् ।
श्लोकं वा यदि वा पादं यदीच्छेत्परमां गतिम् ॥९३॥
एतत्ते कथितं भद्रे रहस्यं श्रेयसां पदम् ।
मम क्षेत्रं महाभागे ! किमन्यच्छ्रोतुमिच्छसि ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शालग्रामक्षेत्राख्याने गण्डकीशालग्रामनामार्थबोधकप्राग्वृत्तान्तः, सालंकायनर्षिकृततपस्तत्पुत्ररूपविष्णुस्तस्य तत्रैव शिलारूपेण स्थितिः, रेवानद्याः पुत्रार्थं तपः, रेवायां पुत्रात्मकलिंगरूपेण शंभोः स्थितिः, शालवृक्षे तपस्यतोविष्णोर्गण्डस्थलात् प्रवाहस्य गण्डकीति संज्ञा, सा तुलसीस्वरूपा, गजेन्द्रमोक्षार्थं ग्राहे क्षिप्तस्य चक्रस्य घट्टनेन पाषाणकीटकृत्यो च चक्रचिह्नानीत्यादिनिरूपणनामा चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४०॥

श्रीलक्ष्मीरुवाच—

शालग्रामशिलां शंभुलिंगं नदीं च गण्डकीम् ।
शालद्रुं मुनिसालंकं श्रुत्वा सतीं च तुलसीम् ॥ १ ॥
मानसं मे न च तृप्तिमायाति श्रवणस्पृहम् ।
तीर्थानि वद शालग्रामक्षेत्रस्थानि केशव ॥ २ ॥
यच्छ्रवणेन पापानामप्युद्धारो भविष्यति ।
यत्करणेन चात्रापि धनदारादिमान् भवेत् ॥ ३ ॥

श्रीनारायण उवाच—

अहो भाग्यमहो पुण्यं शालग्रामकथाश्रुतिः ।
अहो दैवमहो मुक्तिः शालग्रामशिलार्चनम् ॥ ४ ॥

अहो स्वर्गमहो राज्यं शालग्रामस्थलस्थितिः ।
अहो समृद्धिरहो तृप्तिर्गण्डकीवारिसेवनम् ॥ ५ ॥
जीवानां बहुपुण्यानामुदये सति पद्मजे ! ।
शालग्रामस्थलयोगो जायते न ततोऽन्यथा ॥ ६ ॥
शालग्रामस्थलं गत्वा करिष्ये गण्डकीजले ।
स्नानतर्पणमित्येवं संकल्पयत ऐहिकी ॥ ७ ॥
पितृणामपि तृप्तिर्वै जायते कुर्वतो नु किम् ।
पापानां पापनाशार्थं स्वर्गार्थं पुण्यशालिनाम् ॥ ८ ॥
सकामानां समृद्ध्यर्थं मुक्त्यर्थं भक्तिशालिनाम् ।
सृष्ट्यारंभे मया शालग्रामक्षेत्रं विनिर्मितम् ॥ ९ ॥
शालग्रामशिला मूर्तिः प्रतिमा मे मया कृता ।
षोडशवस्तुभिः पूजाकर्त्रे भुक्तिं च मोक्षणम् ॥१०॥
ददामि चान्यदिष्टं यद् धनदारागृहादिकम् ।
कृपयैव मया प्राण्युद्धारार्थं तद्विनिर्मितम् ॥११॥
शृणु लक्ष्मि ! स्थले तत्र यानि तीर्थानि सन्ति च ।
यथा यथा च जातानि तानि वक्ष्यामि सर्वशः ॥१२॥
सालंकायनतीर्थे वै शालग्रामाख्यपर्वतः ।
सोमेन स्थापितस्तत्र हरः सोमेश्वरः प्रभुः ॥१३॥
सोमेश्वरगिरिश्चापि गण्डकी कथितानि ते ।
सोमेशाद् दक्षिणे भागे बाणेनाऽद्रिं विभिद्य च ॥१४॥
रावणेन तपः कृत्वा जलधाराऽतिपुण्यदा ।
प्रकाशिता बाणगंगा तीर्थं परमपावनम् ॥१५॥
सोमेशात्पूर्वतस्तत्र रावणस्य तपोवनम् ।
तत्र रावणनृत्येन प्रख्यातो नर्तनाचलः ॥१६॥
तस्य नृत्येन सन्तुष्टः शंभुर्वरं ददौ तदा ।
बाणेश्वरं बाणगंगा तीर्थं स्वर्गप्रदं शुभम् ॥१७॥
तत्र स्थित्वा त्रिरात्रेण तपसः फलमाप्नुयात् ।
स्नात्वा गंगास्नानफलं दृष्ट्वा पूजाफलं लभेत् ॥१८॥
अथ त्रिवेणीतीर्थं वै तीर्थानामुत्तमं तथा ।
यत्र वै देविकानाम्नी सरित् मिलति गण्डकीम् ॥१९॥
तपस्यतां तु देवानां तपोनियमनाय सा ।
समुद्भूता नदी सा वै देवानां मोक्षदायिनी ॥२०॥
अथ पुलस्त्यपुलहाश्रमाच्च देविकाऽपरा ।
गण्डक्या सह मिलिता त्रिवेणी गण्डकीति सा ॥२१॥
कामिकं तन्महत्तीर्थं पितृणां तृप्तिदं परम् ।
त्रिवेणीति समाख्यातं शृणु साऽऽख्यानमत्र तत् ॥२२॥
पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया ।
हिमालये तदा कालो यातो दीर्घतमो यदा ॥२३॥
तन्मूर्तेरनलस्तीव्रः प्रादुरासीद्धरेस्तदा ।
तस्योष्मणा समुत्पन्नः स्वेदपूरस्तु गण्डयोः ॥२४॥
तेन जाता धुनी दिव्या गण्डकी सा सरिद्वरा ।
देविकाख्या नदी योगं तया सह गता तदा ॥२५॥
देवानां तपसा तत्रोत्पन्ना सा देविका मता ।
पुलस्त्यपुलहयोस्तपोभिर्जाताऽपरा नदी ॥२६॥
सृष्टिज्ञानं तत्र लब्धं ताभ्यां वै तपसा ततः ।
तृतीया सा ब्रह्मपुत्रीनाम्नी नदी यशस्विनी ॥२७॥
गण्डक्या तत्र मिलिता त्रिवेणीति प्रकीर्तिता ।
तत्र स्नानात् तपश्चर्याफलं प्राप्नोति मानवः ॥२८॥
अथान्यत्ते प्रवक्ष्यामि तत्र त्रिवेणिकास्थले ।
गजेन्द्रमोक्षणं ग्राहमोक्षणं कृतवान् हरिः ॥२९॥
पुरा वेदनिधेः पुत्रौ जयविजय इत्युभौ ।
हरिं प्रसाद्य संजातौ पार्षदौ भगवद्गृहे ॥३०॥
तावेव राधिकाशापात् पुनः कल्पान्तरे भुवि ।
समायातौ पृथिव्यां च तृणबिन्दोः सुतावुभौ ॥३१॥
जातौ यज्ञकरौ वेदविद्यावेदांगपारगौ ।
पूजयन्तौ हरिं भक्त्या तन्निष्ठेन्द्रियमानसौ ॥३२॥
पूजाकाले हरिर्नित्यं तयोः सान्निध्यमृच्छति ।
मरुत्तेन कदाचित्तावाहूतौ यज्ञकर्मणि ॥३३॥
राज्ञा समाप्तयज्ञेन तोषितौ दक्षिणादिभिः ।
विभागं कर्तुमारब्धौ धनादेस्तौ परस्परम् ॥३४॥
परस्परघाते समो भागः कार्यो ज्येष्ठोऽभ्यभाषत ।
विजयस्त्वब्रवीच्चैनं येन लब्धं हि तस्य तत् ॥३५॥
अहं वै कुशलस्तस्मान्मया लब्धं विशेषतः ।
त्वं तथा न समर्थोऽसि न दास्ये समभागतः ॥३६॥
जयोऽब्रवीदसामर्थ्यं मन्वानो मा ब्रवीषि किम् ।
न ददासि गृहीत्वा यत् तस्माद् ग्राहत्वमाप्नुहि ॥३७॥
विजयोऽप्यब्रवीन्नूनमन्धीभूतोऽसि वै धनैः ।
गजो भव मदान्धस्त्वमिति तौ शापतः पृथक् ॥३८॥
गजग्राहावभूतां वै जातिस्मरौ जयो गजः ।
त्रिवेणीक्षेत्रकारण्ये विजयस्तु जलान्तरे ॥३९॥
ग्राहोऽभवद् वने तत्र गजं स्नातुं समागतम् ।
जलमध्यगतग्राहो जग्राह वैरमास्मरन् ॥४०॥
तयोर्युद्धं समभवदनेकाब्दं विकर्षणैः ।
वरुणेन ततो विज्ञापितो भक्तिवशो हरिः ॥४१॥
हस्तिकमलदानेन त्रिवेणीं प्रसमाययौ ।
सुदर्शनेन चक्रेण ग्राहास्यं समपाटयत् ॥४२॥

गजस्यापि कृता मुक्तिर्ग्राहस्यापि प्रमोक्षणम् ।
सुदर्शनप्रघट्टनक्रियया प्रस्तरादिषु ॥४३॥
चक्रचिह्नानि जातानि महिमा ते प्रकीर्तितः ।
एवमेतत्पुण्यतीर्थं तारकं देहिनां परम् ॥४४॥
जलेश्वरो महादेवस्तत्र विराजते प्रिये ! ।
मया चक्रं यदा क्षिप्तं पृथ्व्यां सलिलमागतम् ॥४५॥
तत्स्थानं वै त्वभूच्चक्रमयं तीर्थं जलेश्वरम् ।
पञ्चदिनं वसेत् तत्र भुक्तिं मुक्तिं लभेज्जनः ॥४६॥
सालंकायनपौत्रोऽभून्नन्दीश्वरो गणः पुरा ।
वृन्दावने स वसति गोधनं चारयन् सदा ॥४७॥
एकदा गाः समादाय हरिक्षेत्रं जगाम सः ।
नन्दी हरः स्वयं प्रोक्तो हरिक्षेत्रं जगाम सः ॥४८॥
गण्डक्याः स तटे वासं चकार बहुरात्रिकम् ।
गाश्चरन्ति शाद्वलानि यत्र क्षेत्रे दिवानिशम् ॥४९॥
तद्दिनादेव तत्ख्यातं क्षेत्रं हरिहरात्मकम् ।
देवानामटनाच्चैव देवाट-इत्यपि स्मृतम् ॥५०॥
एकदा भगवान् शंभुरास्थितः पीठमुत्तमम् ।
शंभोस्तत्र त्रिजटाभ्योऽभवँस्तिस्रः प्रवाहिकाः ॥५१॥
गंगा च यमुना पुण्या तथा सरस्वती नदी ।
एतत् त्रैधारिकं तीर्थं यत्र शंभुः सदा स्थितः ॥५२॥
दिशन् ज्ञानं स्वभक्तानां संसाराद् येन मोक्षणम् ।
स्नात्वा सन्तर्प्य पितॄन् संपूज्य देवान् प्रमुच्यते ॥५३॥
तस्यैव पूर्वदिग्भागे हंसतीर्थं हि विद्यते ।
काकास्तत्र कदाचिद्वै समुत्पेतुर्बुभुक्षिताः ॥५४॥
अन्नं गृहीत्वा काकं वै यान्तं काकोऽपरस्तदा ।
दृष्ट्वा युयुधे तौ तत्र कुण्डे निपेततुस्ततः ॥५५॥
हंसौ भूत्वा विनिर्यातौ गतौ वै मानसंसरः ।
इत्याश्चर्यमयं तद्वै हंसतीर्थमिति कृतम् ॥५६॥
मुक्तिक्षेत्राद्धंसतीर्थं क्षेत्रं द्वादशयोजनम् ।
तैर्थिकानां भोगमोक्षोभयदं वै मयाश्रितम् ॥५७॥
अथ सालंकायनर्षिर्यत्र तपोऽचरद्धि तत् ।
सालवृक्षसमूहः सः शालग्रामोऽभवत्प्रथः ॥५८॥
तत्र तीर्थानि गुप्तानि भवन्ति दश पञ्च च ।
तत्र बिल्वप्रभं नाम क्षेत्रं कुंजचतुःश्रयम् ॥५९॥
तत्र नद्यां जनः स्नात्वा दिवानिशं निवासतः ।
चतुर्णामश्वमेधानां फलं प्राप्नोति मानवः ॥६०॥
अथाऽपरं चक्रस्वामितीर्थं चक्रशिलामयम् ।
त्रियोजनप्रविस्तारं त्रिरात्रं निवसेज्जनः ॥६१॥
त्रिरात्रयज्ञपुण्यं वै प्राप्नोत्येव सुतीर्थकृत् ।
प्राणत्यागे तु संजाते वाजपेयफलं लभेत् ॥६२॥
अथ विष्णुपदं क्षेत्रं धारास्तिस्रो हिमाचलात् ।
पतन्ति यत्र तत्रैव स्नानात् तीर्थफलं लभेत् ॥६३॥
प्राणत्यागेऽतिरात्राणां त्रयाणां पुण्यभाग् भवेत् ।
तत्र कालीह्रदो नाम तीर्थं परमपावनम् ॥६४॥
बदरीवृक्षमूलाद्वै ह्रदस्रोतो वहत्यपि ।
स्नानात् तत्र नरमेधफलं प्राप्य विमुच्यते ॥६५॥
अथ शंखप्रभं तीर्थं द्वादश्यामर्धरात्रके ।
श्रूयन्ते शंखशब्दाश्च श्रोतारो मुक्तिभागिनः ॥६६॥
अथ गदाख्यकुण्डे वै तीर्थे दक्षिणस्रोतसि ।
स्नात्वा वेदान्तविद्यादि फलं प्राप्नोति मानवः ॥६७॥
अथाऽग्निसुप्रभं तीर्थं जलं प्रागुत्तरं शुभम् ।
हेमन्ते चोष्णकं वारि ग्रीष्मे भवति शीतलम् ॥६८॥
धारारूपेण पतति स्नात्वा पंचाग्निषोमभाग् ।
अथ सर्वायुधं तीर्थं सप्तस्रोतोमयं हि तत् ॥६९॥
स्नात्वा भवेन्महान् राजा सप्तदिनानि संवसेत् ।
अथ देवप्रभं तीर्थं चतुर्धारासमन्वितम् ॥७०॥
स्नात्वा तत्र लभेद् वेदचतुष्टयविबोधनम् ।
अथ विद्याधरं तीर्थं पञ्चधारासमन्वितम् ॥७१॥
स्नात्वा विद्याधरलोकं प्रयात्येव न संशयः ।
तत्र पुण्यनदीतीर्थं शिलाकुंजलतावृतम् ॥७२॥
तत्र स्नानं प्रकुर्वीत सप्तद्वीपाधिपो भवेत् ।
एकधारे तु गान्धर्वतीर्थे स्नात्वा सुखी भवेत् ॥७३॥
मोदते लोकपालेषु मम लोकं च गच्छति ।
अथ देवह्रदस्तीर्थं यत्र मत्स्याः सचक्रकाः ॥७४॥
सौवर्णानि च पद्मानि दृश्यन्ते भास्करोदये ।
तत्र स्नाता दिवं यान्ति शुद्धा वाक्कायनैर्मलैः ॥७५॥
दशानामश्वमेधानां फलमाप्नोति मानवः ।
यत्र यत्र देवनद्योः संगमो जायते प्रिये ! ॥७६॥
तत्र देवाश्च देव्यश्च तिष्ठन्ति तीर्थरूपिणः ।
गन्धर्वाऽप्सरसः पर्यो नागकन्याः सहोरगैः ॥७७॥
देवर्षयश्च मुनयः सर्वेऽपि च सुरेश्वराः ।
सिद्धाः सन्तः किन्नरोश्च स्वर्गादवातरन्ति हि ॥७८॥
हिमालये च नेपाले पशुपतेर्भुवोऽत्र वै ।
तेभ्यस्तेभ्यश्च स्थानेभ्यो नद्यो वहन्ति भूतलम् ॥७९॥
श्वेतगंगया संभूय नानानद्यो वनानुगाः ।
गण्डक्या कृष्णया चैव संगमासाः शिवोद्भवाः ॥८०॥

त्रिशूलगंगा सा जाता सर्वतीर्थकदम्बकम् ।
सिद्धाश्रमस्तथा तीर्थं पावनं पुण्यवर्धनम् ॥८१॥
शंभोस्तपोवनं चापि पुण्यनद्योश्च संस्रवे ।
स्नानाच्छताश्वमेधानां फलं तत्र भवेद् ध्रुवम् ॥८२॥
वैशाख्ये तत्र चाप्लाव्य गोसहस्रफलं लभेत् ।
माघमासे पुनः स्नात्वा प्रयागस्नानजं फलम् ॥८३॥
कार्तिके सतुलारवौ स्नानान्मुक्तिर्न संशयः ।
त्रिरात्रस्नानतस्तत्र राजसूयफलं लभेत् ॥८४॥
यज्ञो दानं तपो होमः श्राद्धं पूजा ह्यनन्तकम् ।
शालग्रामे महाक्षेत्रे देवनद्योश्च संस्रवे ॥८५॥
अहं लक्ष्मि ! पूर्वमुखः सदा वसामि मुक्तिदः ।
शिवो मे दक्षिणे पार्श्वे ब्रह्मा वामे सदा स्थितः ॥८६॥
हरिहरात्मकं विष्णुब्रह्मात्मकं स्थलं तु तत् ।
मृता मुक्तिं प्रयान्त्येव स्वर्गं वै शाश्वतं ध्रुवम् ॥८७॥
मुक्तिक्षेत्रं तु प्रथमं रुरुखण्डस्ततः परम् ।
संभेदो देवनद्योश्च त्रिवेणी च ततः परम् ॥८८॥
गण्डकीक्षेत्रमेवेदं गंगया मिलितं तु यत् ।
गण्डकी यत्र मिलिता भागीरथ्या तु गंगया ॥८९॥
क्षेत्रं हरिहराख्यं तन्महिमा सुरदुर्लभः ।
पठनाच्छ्रवणाच्चापि तीर्थस्नानफलं भवेत् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शालग्रामक्षेत्रस्थसालंकायनसोमेश्वरगण्डकीबाणगंगात्रिवेणी-देविकाब्रह्मपुत्रीगजग्राहतीर्थजलेश्वरत्रैधारिकतीर्थहंस-तीर्थशालग्रामतीर्थचक्रस्वामितीर्थविष्णुपदशंख-प्रभगदाकुण्डाऽग्निप्रभसर्वायुधदेवप्रभविद्या-धरैकधारदेवह्रदत्रिशूलगंगाहरिहरक्षेत्रादि-तीर्थप्रदर्शननामैकचत्वारिंशदधिक-त्रिशततमोऽध्यायः ॥३४१॥

श्रीलक्ष्मीरुवाच—

रुरुक्षेत्रं कथं जातं रुरुतीर्थं च कीदृशम् ।
तन्मे वद कृपासिन्धो श्रोतुमिच्छामि सर्वशः ॥ १ ॥

श्रीनारायण उवाच—

पुरा विप्रो देवदत्तो भृगुवंशोद्भवोऽभवत् ।
दिव्यं तपोऽतपद् यत्र मृगाकीर्णाश्रमे पुरा ॥ २ ॥
वर्षाणामयुतं जातं तपसि वर्ततो मुनेः ।
व्यचिन्तयत्तदा त्विन्द्रो विघ्नं कर्तुं तपस्यतः ॥ ३ ॥
कामं वसन्तसहितं गन्धर्वान् ससखीन् पुनः ।
प्रम्लोचां प्रेषयामास मलयानिलमित्यपि ॥ ४ ॥
इन्द्रस्याऽऽज्ञां समादाय ययुस्तस्याश्रमं प्रति ।
समीपोपवने रम्ये कोकिलाऽऽलापगुञ्जिते ॥ ५ ॥
रसालकुसुमामोदव्यापिपवनशीतले ।
भ्रमरनादसंघुष्टे गन्धर्वगीतगर्जिते ॥ ६ ॥
पंकजनेत्रसंशोभजलस्थलातिमञ्जुले ।
प्रविश्य सा तु प्रम्लोचा गीतं सुमधुरं जगौ ॥ ७ ॥
मुनिर्ध्यानादुपरतो गन्धर्वा गीतिमारभन् ।
कामो लब्धाऽवसरं च विचकर्ष धनुस्तदा ॥ ८ ॥
मुनिः क्षुब्ध इति ज्ञात्वा सायकान् समयूयुजत् ।
मुनिस्ततो विचचाराऽऽश्रमं शृण्वन् सुगीतिकाम् ॥ ९ ॥
दूराद् ददर्श तन्वंगीं कन्दुकक्रीडनान्विताम् ।
तस्याः समीपमगमत् सापि समीपमागता ॥१०॥
सम्मोहितो मुनिस्तां चाऽपृच्छत् का त्वं कथं वने ।
सा प्राह मुनिसेवार्थमागताऽस्मि गृहाण माम् ॥११॥
अथ तां हसमानां स रमयामास कामतः ।
बहूनहर्गणानेवं रममाणो यदृच्छया ॥१२॥
निर्वेदं प्राप्तवान् सद्यस्तदोवाच पुनः पुनः ।
अहो मायाबलं पश्य ययाऽहं भृशमोहितः ॥१३॥
जानन्नपि तपोभ्रंशं प्राप्तो देवबलात्कृतम् ।
पुमान् स्त्रीदर्शनादेव द्रवते तद्विमोहितः ॥१४॥
नाऽपराधस्ततो नार्याः पुमान् यदजितेन्द्रियः ।
एवं विचारं कृत्वा तां विससर्ज मुनिस्ततः ॥१५॥
त्यक्त्वा विघ्नमयं स्थानं गत्वा भृग्वाश्रमं प्रति ।
कृतस्नानस्तु गण्डक्यां पूर्वस्यां दिशि निर्जने ॥१६॥
अतप्यत तपो घोरं भृगुतुंगे शिवोपरि ।
शिवः साक्षात् समागत्योवाच तं मुनिसत्तमम् ॥१७॥
विष्णुशिवावभेदेन पश्यंस्त्वं सिद्धिमाप्स्यसि ।
एतच्छिवस्थले लिंगं समंगमिति तत्कृतम् ॥१८॥
समंगेश्वरतीर्थं तज्जातं वै गण्डकीतटे ।
देवदत्तस्तथा ज्ञात्वा सायुज्यं परमं गतः ॥१९॥
प्रम्लोचापि मुनेर्गर्भं पक्वं कन्यास्वरूपिणम् ।
प्रागाश्रमे परित्यज्य ययौ स्वर्गं ततः प्रिये ! ॥२०॥
रुरुभिर्मृगवर्यैः सा कन्या संपोषिता सती ।
युवभिः प्रार्थ्यमानाऽपि चित्ते कंचन नाऽध्यगात् ॥२१॥

चिन्तयाना हरिं कृष्णं तपसि प्रतितिष्ठति ।
मासे सा प्रथमे बाला फलाहारपरायणा ॥२२॥
एकान्तरं दिनं प्राप्य द्वितीये त्रिदिनान्तरे ।
तृतीये पञ्चमदिने चतुर्थे सप्तमान्तरे ॥२३॥
पञ्चमे नवरात्रेण षष्ठे पञ्चदशाहके ।
मासेन सप्तमे चेति शीर्णपर्णाशनाऽष्टमे ॥२४॥

त्यक्त्वा तान्यपि सा बाला वाय्वाहारा बभूव ह ।
एवं वर्षशते याते तस्याः प्रत्यक्षतां गतः ॥२५॥
अहं विष्णुर्यदाऽवोचं वरं याचय दुर्लभम् ।
सा ननाम च मां दृष्ट्वा प्रत्युवाच कृताञ्जलिः ॥२६॥
अनेनैव स्वरूपेण मत्स्थाने स्थातुमर्हसि ।
मन्नाम्ना क्षेत्रमेतच्च ख्यातं भवतु सर्वथा ॥२७॥
मद्देहोऽत्र तीर्थभूमौ रुरुतीर्थोऽस्तु पावनः ।
मम तीर्थे कृतस्नानो धूतपापा भवेज्जनः ॥२८॥

भुक्तिं मुक्तिं तथा यायाद् वरान् देहि जगत्पते ।
इति दत्वा वराँस्तस्यै तत्रैवान्तर्हितः स्थितः ॥२९॥
सापि कालेन सञ्जाता तीर्थरूपा तथाऽभवत् ।
तस्या नियम्यर्षीकाणि यतः प्रत्यक्षतां गतः ॥३०॥
हृषीकेश इतिख्यातः स्थानं चापि तथाविधम् ।
रुरुक्षेत्रमृषीकेशक्षेत्रं तीर्थं तदुच्यते ॥३१॥
अथ गोनिष्क्रमणाख्यं क्षेत्रं वदामि तच्छृणु ।
और्वो नाम पूर्वकल्पे प्रजापतिरभूत् प्रिये ॥३२॥
अत्र सृष्टौ समागत्य तपो घोरं समाचरत् ।
नेच्छति तत्फलं किञ्चिदेवं कालो महान् गतः ॥३३॥
हिमाद्रेः शिखरात् सोऽपि गंगाद्वारमुपागतः ।
पद्मपुष्पादिलब्ध्यर्थं तदा वै शंकरः स्वयम् ॥३४॥
तं निर्गतं ऋषिं ज्ञात्वाऽऽश्रमं चकार भस्मसात् ।
तत आश्रममायात और्वो दग्धं विलोक्य तत् ॥३५॥
उवाच क्रोधताम्राक्षो निर्दहन्निव दाहकम् ।
येनैष आश्रमो दग्धः सोपि तप्तोऽस्तु सर्वथा ॥३६॥
तत्क्षणादेव देवेशि ! ईशोपि कामदाहकः ।
महद्दाहेन सन्तप्तः शंभुर्देवीमुवाच ह ॥३७॥
और्वस्य तु तपो दृष्ट्वा भीतैर्देवैरुदाहृतम् ।
दह्यतेऽत्र जगत्सर्वं स तु किञ्चिन्न चेच्छति ॥३८॥
को वा प्रतिविधिस्तत्र यथा सर्वस्य संभवेत् ।
एवमुक्ते मया क्रोधादीक्षितस्तस्य चाश्रमः ॥३९॥
दग्धोऽभवत् क्षणेनैव वयं तस्माद्विनिर्गताः ।
एतद्दुःखेन सन्तप्तो मन्युना च परिप्लुतः ॥४०॥
और्वः शशाप रोषेण तेन तप्ता वयं शिवे ।
तेन दाहेन संतप्तो न शक्नोमि विचेष्टितुम् ॥४१॥
अतो नारायणं प्रति गच्छामः शापशान्तये ।
ततो नारायणं ज्ञात्वा निवेद्य सहितास्ततः ॥४२॥
और्वं गत्वा समूचुस्तं शापतापं निवारय ।
और्वं उवाच सुरभीगणमानीय माधव ! ॥४३॥
शंकरादीन् स्नापयन्तु दुग्धैः शापः प्रशाम्यति ।
एतस्मिन्नन्तरे लक्ष्मि ! मया गावोऽवतारिताः ॥४४॥
सप्तसप्ततिः कल्याण्यः सौरभेय्यः पयोधराः ।
तेनाऽऽप्लावितदेहाश्च परां शान्तिमुपागताः ॥४५॥
शंकराद्यास्तदेतद्वै गोनिष्क्रमणनामकम् ।
क्षेत्रं तीर्थं परं पुण्यमौर्वक्षेत्रं जगुर्वरम् ॥४६॥
तत्र स्नानं प्रकुर्वीत गोलोकं तेन चाप्यते ।
शंखचक्रगदायुक्तो मम लोके महीयते ॥४७॥

मूलवटस्य मूलेऽत्र पतन्ति पञ्चधारिकाः ।
पञ्चधाराकृतस्नानं पञ्चयज्ञफलप्रदम् ॥४८॥
भुक्तिमुक्तिप्रदं क्षेत्रं पञ्चधारं प्रकीर्तितम् ।
अथपञ्चपदं क्षेत्रं यत्र पञ्चमहाशिलाः ॥४९॥
मत्पूर्वां दिशमाश्रित्य वर्तन्ते सुदृढा यतः ।
ब्रह्मपदद्वयं तत्र कुण्डमध्यगता शिला ॥५०॥
ऊर्ध्वं नालपरीणाहं तत्र विष्णुपदं मम ।
तत्र स्नाताः शुद्धलोकान् यान्ति भागवतप्रियान् ॥५१॥
इदं ब्रह्मपदं क्षेत्रं धारा पतति पश्चिमाम् ।
तत्र स्नात्वा ब्रह्मलोके मोदते ब्रह्मणा सह ॥५२॥

अथ कोटिवटं नाम तीर्थं वायुदिशि ध्रुवम् ।
तत्र स्नानं प्रकुर्वीत पञ्चक्रोशान्तरस्थिते ॥५३॥
यज्ञकोटिफलं भुक्त्वा मम लोकं प्रपद्यते ।
अथ विष्णुसरो रम्यं पूर्वोत्तरं सुतीर्थकम् ॥५४॥
पञ्चक्रोशसुविस्तारं पर्वतोऽपि तथाऽऽयतः ।
तस्य प्रदक्षिणं कुर्वन् यावत्पदानि सुन्दरि ! ॥५५॥
भ्रममाणस्य जायन्ते तावद्वर्षसहस्रकम् ।
प्रतिपदं स पुण्यात्मा ब्रह्मलोके महीयते ॥५६॥

तत्र क्षेत्रे महाश्चर्यं ज्येष्ठे शुक्ले प्रजायते ।
द्वादश्यां तु गवां शब्दाः श्रूयन्ते व्योममार्गतः ॥५७॥
एतद् गोस्थलकं तीर्थं तापपापविनाशकम् ।
एतदध्यायवक्तुश्च तस्य श्रोतुस्तथाऽनघे ! ॥५८॥
प्रत्यक्षरं सहस्रं वै वर्षाणां मम धामनि ।
वासः स्याच्चैकविंशतिकुलोद्धारो भवेत्तथा ॥५९॥

गवां क्षेत्रं महाभागे ! पञ्चयोजनमण्डलम् ।
गंगायाः पूर्वतो भागे तिष्ठाम्यहं सदाऽत्र वै ॥६०॥
अथाऽपरं स्तुतस्वामिनामकं क्षेत्रमुत्तमम् ।
द्वापरं युगमासाद्य तत्र तिष्ठामि सुन्दरि ! ॥६१॥
शाण्डिल्यजाजलिभृगुकपिलसायणादयः ।
ते मां संस्थापयिष्यन्ति धर्ममूर्तिं महीं गतम् ॥६२॥
संकर्षणो वासुदेवः प्रद्युम्नो ह्यनिरुद्धकः ।
तेऽपि तत्र स्थिता भविष्यन्ति लोकहिताय वै ॥६३॥
मत्प्रसादेन मनुजाः सिद्धिं यास्यन्ति मत्पराम् ।
मात्सर्यं ये करिष्यन्ति मद्धर्मे मम रूपके ॥६४॥
तेषां नाऽयं परो लोको मात्सर्योपहतात्मनाम् ।
मात्सर्यं सर्वनाशाय मात्सर्यं धर्मनाशकम् ॥६५॥
बहुकर्मसमायुक्ता दानाध्ययननिष्ठिताः ।
तपसा ज्ञानयुक्ता वा नित्यं सत्कर्मसुव्रताः ॥६६॥
अपि मात्सर्यसंदग्धा न ते पश्यन्ति मां क्वचित् ।
न कर्तव्यं ततः सर्वैर्मात्सर्यं शान्तिघातकम् ॥६७॥
मात्सर्याऽभिधदोषेण बहवो निधनं गताः ।
शृणु लक्ष्मि ! भूतगिरौ प्रतिमा त्वायसी मम ॥६८॥
वाराहरूपिणी त्वास्ते ह्यभेद्या दृश्यते तु सा ।
केचित्पश्यन्ति कांस्यां तां केचिदायसीमित्यपि ॥६९॥
पाषाणीमपरे चान्ये वज्रां पश्यन्ति सौकरीम् ।
केचित्पश्यन्ति तां मूर्तिं मणिपूरगिरौ स्थिताम् ॥७०॥
सर्वकिल्बिषमुक्तास्ते यान्ति वै परमां गतिम् ।
वाराहक्षेत्रमेवैतत् पृथिव्युद्धाररूपधृक् ॥७१॥
अथान्यच्च प्रवक्ष्यामि पञ्चारूमेतितीर्थकम् ।
तत्र स्नातुर्भवेत् स्वर्गे वासोऽप्सरोऽभिसेविते ॥७२॥
अथ तीर्थं भृगुकुण्डो मम दक्षिणभूतले ।
तत्र स्नाता भवेन्मुक्तो ध्रुवदेशे प्रमोदते ॥७३॥
अथ तीर्थं मणिकुण्डोऽगाधवार्धिः सुरालयः ।
मणयो यत्र दृश्यन्ते मलयश्चाचलः स्थितः ॥७४॥
तत्र स्नात्वा रत्नभागी राजा भूत्वा विमुच्यते ।
मम पूर्वं त्रिक्रोशस्थं धूतपापेतिनामकम् ॥७५॥
क्षेत्रं कुण्डे जलं स्वर्णप्रभं मारकतोज्ज्वलम् ।
तत्र स्नाता धूतपापश्चेन्द्रराज्यं प्रविन्दति ॥७६॥
वर्तते च चमत्कारो मणिपूरे गिरौ मम ।
तावन्न पतति धारा यावत्पापं न धूयते ॥७७॥
वृक्षमश्वत्थमित्युक्तं निर्मलस्तत्र गच्छति ।
पश्चिमायां चामलकवृक्षः सर्वफलोदयः ॥७८॥
पापानि स्पर्शनाच्चापि क्षालयत्यतिपापिनः ।
देवैः स्तुतो महाक्षेत्रे मणिपूरस्थितोऽन्वहम् ॥७९॥
स्तुतस्वामीति मे नाम देवैरेव विनिश्चितम् ।
पठनाच्छ्रवणाच्चापि भुक्तिमुक्तिप्रदं नृणाम् ॥८०॥
अथ लोहार्गलं क्षेत्रं हिमालयसमाश्रितम् ।
श्रेष्ठं पञ्चदशायामं समन्तात्पञ्चयोजनम् ॥८१॥
तत्रोत्तरदिशि स्वर्णप्रतिमायां वसाम्यहम् ।
देवानां दुःखदास्तत्र दानवा ह्यभवँस्तदा ॥८२॥
दैत्याश्च मानवाँस्तत्र पीडयन्ति स्म सर्वदा ।
मया चैवान्तरं कृत्वा कृत्वा मायां तु वैष्णवीम् ॥८३॥
सीमानमर्गलं कृत्वा क्षिप्त्वा चक्रं महौजसम् ।
शतकोटिसहस्राणां दानवानां क्षयः कृतः ॥८४॥
ततो देवा मानवाश्च सुखं प्राप्ता हि तत्स्थले ।
एवं लोहार्गलं नाम क्षेत्रं तद्धि मया कृतम् ॥८५॥
एवं लोहार्गलः कुण्डस्तीर्थं मया कृतं शुभम् ।
तत्राऽश्वः शुक्लवर्णो वै दाने देयो दिवःप्रदः ॥८६॥
अथ पञ्चसरः कुण्डं तीर्थं गन्धर्वलोकदम् ।
चतुर्धाराः पतन्त्यत्र शंखवर्णाश्च मुक्तिदाः ॥८७॥
ततो नारदकुण्डं च तीर्थं पञ्चप्रवाहवत् ।
ततो वसिष्ठकुण्डं च तीर्थं तिस्रप्रवाहवत् ॥८८॥
पञ्चकुण्डं पञ्चधारायुतं तीर्थं सुपुण्यदम् ।
सप्तर्षिकुण्डतीर्थं च सप्तधाराप्रपातनम् ॥८९॥
शरभंगकुण्डतीर्थं शरभंगानदीयुतम् ।
कुण्डमग्निसरोनामतीर्थं वह्निगृहप्रदम् ॥९०॥
बृहस्पतिकुण्डतीर्थं धारैका हिमनिःसृता ।
वैश्वानरकुण्डतीर्थं धारैका हिमनिःसृता ॥९१॥
कार्तिकेयकुण्डतीर्थं धाराः पञ्चदशोत्तमाः ।
समापतन्ति हिमपर्वतात् स्नानात्तु पुण्यदाः ॥९२॥
उमाकुण्डमिति क्षेत्रं गौरी यत्र जनुं ययौ ।
स्नात्वा गौरीं प्रपश्येद्वै गौर्या लोके स मोदते ॥९३॥
महेश्वरस्य वै कुण्डं यत्र तुद्वाहिता ह्युमा ।
तत्र स्नाता रुद्रलोकं याति रौद्र्यभिसेवितः ॥९४॥
प्रख्यातं ब्रह्मकुण्डं च वेदा यत्र समुत्थिताः ।
चतस्रो वेदधाराश्च प्रपतन्ति हिमालयात् ॥९५॥
पूर्वे शुभ्रोत्तरे स्वर्णा पश्चिमे नीलवर्णिका ।
दक्षिणे त्विन्द्रगोपाभा धारा वेदचतुष्टयम् ॥९६॥
तत्र स्नातो ब्रह्मलोकं विन्दते नात्र संशयः ।
एवं लोहार्गलं क्षेत्रं पञ्चविंशतियोजनम् ॥९७॥

मया हिमालयो देवस्तीर्थानां कारणं कृतः ।
यस्माद् द्रवन्ति सरितः पावन्यो मुक्तिदा नृणाम् ॥९८॥
देवास्तत्र निवसन्ति ऋषयो निवसन्ति च ।
अहं वसामि लोकानां कल्याणार्थे समुद्रजे ! ॥९९॥
तत्तत्तीर्थे कृतस्नानदानधर्मा जना ध्रुवम् ।
स्वर्गं मोक्षं प्रयान्त्येव कृपया मम सर्वदा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने रुरुक्षेत्रऋषीकेशगोनिष्क्रमणपञ्चपदब्रह्मपदकोटिवटविष्णुसरःस्तुतस्वामिवराहक्षेत्रपञ्चासमभृगुकुण्डमणिकुण्डलोहार्गलपञ्चसरोनारदवशिष्ठसप्तर्षिशरभंगाग्निबृहस्पतिवैश्वानरकार्तिकेयोमामहेश्वरब्रह्मकुण्डादितीर्थानां निरूपणनामा द्विचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४२॥

श्रीलक्ष्मीरुवाच—

आनादिज्ञानमार्तण्ड ! सर्वसाक्षिन् ! सनातन ! ।
सर्वलोकविधाताऽसि त्वमेवतीर्थकृत्सदा ॥ १ ॥
तव योगाच्चेतनानि जडानि भूजलानि च ।
देहिनस्तारयन्त्येव त्वमेवं तीर्थमुत्तमम् ॥ २ ॥
जीवानां देहलाभेऽत्र मोक्षलाभो महान्मतः ।
विना मोक्षं कृतलाभास्ते सर्वे निधनाऽन्वयाः ॥ ३ ॥
वृन्दावनं माथुरं च शालग्रामं सनातनम् ।
तुलसीक्षेत्रपत्याद्यं त्वया प्रोक्तं पुरातनम् ॥ ४ ॥
त्वया तत्र कतिप्रादुर्भावा लब्धा वद प्रभो ! ।
लप्स्यन्ते चापि च कति ? क्व वा भूमौ ? वद प्रभो ! ॥ ५ ॥

श्रीनारायण उवाच –

अरे लक्ष्मि ! ह्यसंख्याताः प्रादुर्भावा भवन्ति मे ।
मानवेषु च देवेषु तिर्यक्षु पशुपक्षिषु ॥ ६ ॥
जलजेषु वनजेषु मुनिसाधुजनेषु च ।
ऋषिषु सत्सु सतीषु साध्वीषु सन्ति भूरिशः ॥ ७ ॥
प्रतिचतुर्युगं कृष्णो भवामि भुवि पद्मजे ।
वृन्दावनेषु देशेषु माथुरेषु यमीतटे ॥ ८ ॥
विचरामि विहरामि दैत्यानामन्तकृद्यथा ।
नारायणाः शतं पञ्चशतं च जलशायिनः ॥ ९ ॥
त्रिंशत्कमठरूपाणि मत्स्यरूपाणि विंशतिः ।
गोपालाश्च शतं चाहं बुद्धाः सन्ति सहस्रशः ॥१०॥
त्रिंशत्परशुरामाश्च रामा एकोत्तरं शतम् ।
अन्येऽपि कार्यवशगा अवतारा मम प्रिये ! ॥११॥
आकस्मिकास्त्वया सार्धं केवला वा भवन्ति वै ।
ब्रह्माण्डानि ह्यनेकानि ह्यनेका दैत्यदानवाः ॥१२॥
सुराश्च तापसाश्चापि ह्यसंख्याः कामनायुताः ।
आर्तानामार्तिनाशायाऽर्थिनामर्थप्रदास्तये ॥१३॥
सकामानां कामपूर्त्यै संभवामि स्थले स्थले ।
क्वचिदंशः क्वचित्पूर्णः क्वचित् त्वावेशरूपतः ॥१४॥
कलया वा क्वचित् क्वापि क्वचिद् विभूतिरूपतः ।
साधुरूपस्तथा राजरूपः सद्गुरुरूपतः ॥१५॥
व्यासरूपश्च विज्ञानिस्वरूपः संभवामि वै ।
विष्णुरूपोऽस्म्यहमेको मुक्तिमण्डलमध्यगः ॥१६॥
वृन्दावने मथुरायां बहुवारं जनिं गतः ।
तीर्थानां तीर्थमूर्धन्यं मथुराक्षेत्रमस्ति यत् ॥१७॥
युगे युगे यमीतीरे संभवामि पुनः पुनः ।
कृष्णरूपो दासदासीकोट्यब्जेच्छाप्रपूरकः ॥१८॥
अनन्तसृष्टिनारीणां कामेच्छाभक्तिकर्षितः ।
राजरूपः कोटिकामगर्वहा संभवाम्यहम् ॥१९॥
वसुः पिता च मे माता देवी भ्राता सुकर्षणः ।
अन्ये सन्तु न वा सन्तु ह्येभिः सह वसाम्यहम् ॥२०॥
प्रथमे तु द्वापरेऽहं संकर्षणेन संयुतः ।
युगलो वसुदेव्योश्च प्रादुर्भूतोऽभवं प्रिये ॥२१॥
तदा तत्राऽसुरा ह्यासन् कालनेमिप्रवंशजाः ।
तानहं हतवान् सर्वान् कृष्णः पृथ्वीसुतापतिः ॥२२॥
त्वं तदाऽऽसीः कमलाख्या मरुत्पुत्री मम प्रिया ।
प्रथमे द्वापरे चाहं कमलापतिकृष्णकः ॥२३॥
कालनैमेयवंश्यानां नाशको मथुरापुरे ।
तदारभ्य मथुरायाः क्षेत्रं परमपावनम् ॥२४॥
मम पादतलैः शुद्धं सर्वदा वर्तते प्रिये ! ।
तदुत्तरं मम प्रादुर्भावाः सन्ति सहस्रशः ॥२५॥
तत्राऽन्यत्र च कमले ! तदन्तं गणयामि न ।
भविष्यन्त्यवताराश्च तान् प्रगास्यन्ति मानवाः ॥२६॥
व्यासाश्च तान् यथायोग्यं वर्णयिष्यन्ति मुक्तये ।
शृणु प्रिये ! पवित्रं तन्माथुरं क्षेत्रमुत्तमम् ॥२७॥
न स्वर्गे न च पाताले तीर्थं वै मथुरासमम् ।
सा रम्या सर्वथा दिव्या जन्मभूमिः सदा मम ॥२८॥
यत्र वासेन मनुजास्तथाऽन्यप्राणिनः प्रिये ! ।
स्वर्गं च मोक्षणं यान्ति गोलोकमिव मे स्थलम् ॥२९॥
प्रयागे माघपूर्णायाः फलं नित्यं यमीजले ।
काश्यां वर्षसहस्रस्य फलं त्वत्र दिनेन वै ॥३०॥

पुष्करे कार्तिकीपूर्णाफलं त्वत्र क्षणेन वै ।
मायामूढा मथुरां विहायाऽन्यत्र भ्रमन्ति हि ॥३१॥
मथुराश्रवणाच्चापि लीयन्ते पापकोटयः ।
पृथिव्यां यानि तीर्थानि क्षेत्राणि च सरांसि च ॥३२॥
नद्यो नदास्तथा पूर्योऽरण्यानि च वनान्यपि ।
मथुरायां समायान्त्याषाढे सुप्ते जनार्दने ॥३३॥
मथुरामण्डले श्राद्धात् तृप्यन्ति पितरो युगम् ।
मथुरावासिनो लोका निधने यान्ति मत्पदम् ॥३४॥
कुब्जाम्रके सौकरवे जन्मस्थाने विशेषतः ।
वसतां तु विना सांख्यं योगं मोक्षोऽस्ति निश्चितः ॥३५॥
अन्नवस्त्रप्रदातारो नरा मुक्ता न संशयः ।
भविष्यामि वरारोहे द्वापरे युगसंस्थिते ॥३६॥
कृष्णोऽहं च ययातेस्तु वंशे दैत्यनिषूदनः ।
यमुना यत्र सुवहा वैवस्वतसुता प्रिया ॥३७॥
गंगां प्राप्य प्रयागे या त्रिवेणीति प्रवर्तते ।
सरस्वतीं च संगृह्य प्रथिता पापहारिणी ॥३८॥
यमी गंगाशतगुणा श्रेष्ठा माथुरमण्डले ।
तत्र तीर्थानि चान्यानि भविष्यन्ति मम प्रिये ! ॥३९॥
येषु स्नानाजलपानान्मुक्तिरेव न संशयः ।
निधने माथुरे क्षेत्रे जायते स चतुर्भुजः ॥४०॥
विश्रान्तिसंज्ञकं तीर्थं विश्रान्तिघटनाप्रदम् ।
सर्वश्रेष्ठं महापुण्यं स्नानाद् गोलोकदं नृणाम् ॥४१॥
सर्वतीर्थेषु यत्स्नानं दानं ध्यानं हुतं तपः ।
तत्सर्वं लभते लक्ष्मि ! विश्रान्तितीर्थदर्शनात् ॥४२॥
न तु यज्ञैर्न तपसा न ध्यानेन न संयमैः ।
तत्फलं लभते स्नातो यथा विश्रान्तिघट्टके ॥४३॥
कालत्रयं दर्शनाच्च तथा प्रदक्षिणद्वयात् ।
नमस्कारपञ्चकाच्च विष्णुलोके महीयते ॥४४॥
मया तत्र यमुनाया घट्टे विश्रान्तिरास्थिता ।
शाश्वती शान्तिरत्रास्ति यथा गोलोकधामनि ॥४५॥
अथाऽन्यन्मे परं तीर्थं प्रयागं तत्र विद्यते ।
देवानां दुर्लभं गुप्तं सर्वसंसारमोक्षणम् ॥४६॥
यत्र स्नातो मम लोकं यात्यग्निष्टोमपुण्यभाग् ।
सकामस्तु महेन्द्रः स्याच्चतो याति परां गतिम् ॥४७॥
अथाऽन्यन्ये कनखलं तीर्थं स्नानाद्दिवः प्रदम् ।
अथान्यत् तिन्दुकं तीर्थं मम गोलोकधामदम् ॥४८॥
पाञ्चालदेशे काम्पिल्यं नगरं धार्मिकप्रजम् ।
तत्र तिन्दुकसंज्ञो वै सदा वसति नापितः ॥४९॥
कालेन नापितस्यैव कुटुम्बं तु क्षयं गतम् ।
ततः स मथुरां प्राप्तो यमीतीरेऽवसत् सदा ॥५०॥
कुटुम्बोद्धारणार्थं वै श्राद्धादि तेन कारितम् ।
स नित्यं यमुनास्नायी कालेन निधनं गतः ॥५१॥
मथुरायां ब्राह्मणस्य जन्म त्वासाद्य वै ततः ।
वैष्णवः परमो भूत्वा ययौ गोलोकधाम सः ॥५२॥
एवं तिन्दुकसंज्ञोऽसौ जातिस्मरस्तु भूसुरः ।
सर्वान् विज्ञाप्य तत्तीर्थं ख्यापयित्वा मृतिं ययौ ॥५३॥
अथान्यत् परमं सूर्यतीर्थं पापविनाशनम् ।
आराधितो बलिना वै धनराज्यसमीहया ॥५४॥
ऊर्ध्वबाहुर्निराहारस्तताापाऽत्र परं तपः ।
तस्य प्रसन्नो भगवान् सूर्यनारायणः स्वयम् ॥५५॥
समागत्य बलिं प्राह किं ते तपसि कारणम् ।
बलिः प्राह त्रिलोकस्य नेत्रं सूर्यं जगत्प्रभुम् ॥५६॥
निर्धनोऽस्मि न मे राज्यं धनार्थं तप आचरम् ।
सूर्यस्तस्मै ददौ चिन्तामणिं स्वात् मुकुटात् ततः ॥५७॥
चिन्तामणिं स संप्राप्य गतः पातालमेव ह ।
सूर्यो यमीजले स्नात्वा हिरण्यमण्डलं ययौ ॥५८॥
एवं तीर्थवरं जातं पापतापविनाशकम् ।
स्नात्वा स्वर्गं ततो मोक्षं विन्दते स्याच्चतुर्भुजः ॥५९॥
रविवारे च संक्रान्तौ चन्द्रसूर्यग्रहे तिथौ ।
सूर्यतीर्थस्नानकर्ता राजसूयफलं लभेत् ॥६०॥
अथाऽत्र ध्रुवतीर्थं च यत्र तेपे ध्रुवः पुरा ।
तत्र स्नानेन साम्राज्यं मरणेन ध्रुवस्थलम् ॥६१॥
श्राद्धेनात्र पितरश्च तरन्ति यान्ति मोक्षणम् ।
ध्रुवस्य दक्षिणे तत्र तीर्थं वै तीर्थराजकम् ॥६२॥
तत्र स्नानेन वै लक्ष्मि ! मम गोलोकमाप्नुयात् ।
अथ तद्दक्षिणे लक्ष्मि ! ऋषितीर्थं परं मतम् ॥६३॥
स्नात्वा यायाद् ऋषिलोकं गोलोकं प्राणवर्जनात् ।
ततोऽपि दक्षिणे तीर्थं मोक्षतीर्थं परं मम ॥६४॥
यत्र स्नानाद् भवेन्मुक्तिर्गोलोकं चाप्नुयान्मम ।
तत्रैव कोटितीर्थं च देवानामपि दुर्लभम् ॥६५॥
तत्र स्नानात् तथा दानाजपाद्धोमाच्च भोजनात् ।
तर्पणादुपवासाच्च ब्रह्मलोके महीयते ॥६६॥
तारिताः पितरस्तेन कोटितीर्थनिषेविणात् ।
तथा सप्त च सप्ताथ सप्त वंशाश्च तारिताः ॥६७॥
अथ वै वायुतीर्थं च पितॄणां तारकं परम् ।
पितॄन् पिण्डप्रदातारस्तारयन्त्येव सर्वथा ॥६८॥

गयापिण्डप्रदानस्य फलं त्वत्र ह्यवाप्यते ।
ज्येष्ठमासे विशेषेण श्राद्धात्तरन्ति पूर्वजाः ॥६९॥
उक्तान्येतानि तीर्थानि भुक्तिमुक्तिप्रदानि वै ।
स्नानं दानं जपो होमः स्युः सहस्रगुणा हि ते ॥७०॥
तीर्थानां स्मरणाच्चापि वन्दनाद् दर्शनात्तथा ।
जलस्य कणिकापानान्मुक्तिर्भवति शाश्वती ॥७१॥
अथात्र तीर्थमूर्धन्यमवतारसमूहकम् ।
श्रीकृष्णस्याऽवतारा ये मिलित्वा जन्मनः क्षणे ॥७२॥
समायाताः क्षणं यत्र स्थिता यमीतटे शुभे ।
जन्मभूमिसमीपे तत् तीर्थं गुप्तं हि वर्तते ॥७३॥
स्नानात्तत्र वारिपानात् प्रोक्षणादपि सर्वथा ।
पापप्रध्वंसकं गोलोकवैकुण्ठादिलोकदम् ॥७४॥
तत्र वै मरणान्मुक्तिर्भवेदेव न संशयः ।
एकाहोपोषणाद्वापि कोटियज्ञफलं भवेत् ॥७५॥
रजःकणा मथुरायाः स्पृशन्ति देहिनस्तु यान् ।
तेऽपि मुक्तिं प्रयास्यन्ति तिर्यक्कीटादयोऽपि चेत् ॥७६॥
देशान्तरेऽपि तन्नामग्रहीता भुक्तिभाङ् ननु ।
यत्र साक्षात्परंब्रह्म राजते तत्र किं न वै ॥७७॥
धनधामधरादारपुत्रपुत्रीसमृद्धयः ।
क्षेत्रोद्यानाधिकारित्वराज्यसत्ताजनेशताः ॥७८॥
स्वर्णरूप्यमहालक्ष्मीश्रीसम्पद्भवनादयः ।
भवन्त्येव हरेर्योगाद् भक्तस्यात्र कृपाकणात् ॥७९॥
तारकं धारकं यद्वद् रक्षकं पालकं तथा ।
स्वर्गदं मोक्षदं चापि तीर्थं माथुरमुत्तमम् ॥८०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने **मथुराक्षेत्रमाहात्म्ये** भगवदवताराणामानन्त्यं, प्रथमद्वापरे कृष्णावतारः, विश्रान्तितीर्थप्रयागकनखलतिन्दुकसूर्यध्रुवतीर्थराजर्षिमोक्षकोटिवाय्ववतारतीर्थादिप्रदर्शननामा त्रिचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! मथुरायां शिवकुण्डं परं महत् ।
तीर्थं शिवकृतं तत्र चिरं तेपे हरः स्वयम् ॥ १ ॥
तत्र कृष्णः समागत्य शिवं प्राह च माधवः ।
कथं वै तप्यते शंभो ! तपः परमदारुणम् ॥ २ ॥
शंभुः प्राह महाराज ! दैत्यैरत्यर्दिताः सुराः ।
असुराणां विनाशायेहाऽवतरितुमर्हसि ॥ ३ ॥
तथास्त्विति हरिः प्राह यस्यां स्नात्वा हरस्ततः ।
समाप्य तु तपस्तस्माद् ययौ कैलासमेव सः ॥ ४ ॥
कृष्णनारायणश्चापि ययौ गोलोकमेव ह ।
आद्ये द्वापरसंयोगे जातोऽसौ कृष्ण एव तु ॥ ५ ॥
शिवकुण्डमिदं तीर्थं कृष्णागमनकारकम् ।
भुक्तिमुक्तिप्रदं यत्र स्नात्वा वैकुण्ठमाप्यते ॥ ६ ॥
शिवकुण्डोत्तरे तीर्थं संयमनं सुपुण्यदम् ।
स्नानेन जायते भाग्यं सौभाग्यं रूपवत्त्वकम् ॥ ७ ॥
स्वर्गं तथा परो मोक्षः प्राप्येते नात्र संशयः ।
संयमनो महातीर्थे यद्यद् वृत्तं पुरातनम् ॥ ८ ॥
शृणु लक्ष्मि ! महाश्चर्यकरं पापप्रणाशनम् ।
नैमिषारण्यवास्तव्यो निषादो दुष्टमानसः ॥ ९ ॥
पापाचारः समायातः कदाचिन्मथुरां प्रति ।
नित्यं स्नाति यमुनायां बाहुभ्यां तरणेन च ॥१०॥
प्रति तटं समायाति याति चापि पुनस्तथा ।
एवं स्नाते तरत्यपि कृष्णचतुर्दशीतिथौ ॥११॥
तर्तुकामो निषादः स जले पपात यामुने ।
ततार यमुनां सोऽथ तीर्थे संयमनं प्रति ॥१२॥
यावदायात्यभितीरं प्राप्य संयमनं शुभे ।
ममज्जाऽसौ श्रमितो वै निमग्नो जलमापपौ ॥१३॥
अशक्तः स महापापः सद्यः प्राणैर्व्ययुज्यत ।
तीर्थप्रभावतश्चास्य ध्वस्तं पापकरण्डकम् ॥१४॥
पुण्यं जातं महत्तस्य तेन जातो भुवः पतिः ।
सौराष्ट्रविषये देशे सौराष्ट्राधिपतिर्नृपः ॥१५॥
भद्रापत्तनसाम्राज्यं चकार स धनुर्धरः ।
नाम्ना यक्ष्मधनुर्नाम क्षत्रियो वसुधाधिपः ॥१६॥
पालयामास वसुधां क्षत्रधर्मं समाश्रितः ।
रैवताद्रिनिवासानां सिद्धानां सेवको ह्ययम् ॥१७॥
नित्यं यानेन संयाति दर्शनार्थं गिरौ मुदा ।
पूर्वस्यामश्वपट्टस्य सरसश्च तटे शुभे ॥१८॥
पत्नीव्रताश्रमे गत्वा तं ददर्श महामुनिम् ।
ददर्श कंभरालक्ष्मीं गोपालकृष्णमीश्वरम् ॥१९॥
कृष्णनारायणं चापि ददर्श नित्यमेव सः ।
तत्प्रतापेन राजाऽसौ कृष्णभक्तश्च वैष्णवः ॥२०॥
जातो महान् बली यस्य रक्षणे कण्ठमालिका ।
वर्मात्मिका प्रदत्ता या नृपं रक्षति सर्वथा ॥२१॥
तया युद्धेऽपि नृपती रक्षितो विजयी सदा ।
इति हेतोर्गौर्जराणां मरूणां राज्यमासवान् ॥२२॥

वैहायसेन यानेन काशीयात्रार्थमेव सः।
ययौ, काशीनृपतिना विदित्वा वैष्णवं परम् ॥२३॥
विजयिनं कीर्तिमन्तं सत्कृत्याऽस्मै निजा सुता।
प्रदत्ता पीवरीनाम्नी नीत्वा तां स ययौ पुरम् ॥२४॥
भद्रापत्तनमागम्य तेनोढा पीवरी शुभा।
पत्नीशतानां मुख्यानां प्रवरा सा कृता प्रिया ॥२५॥
तां चैव रमयामास सूद्यानेषु वनेषु च।
प्रासादेषु च रम्येषु नदीनां पुलिनेषु च ॥२६॥
प्रजाः पालयतस्तस्य दानानि ददतस्तथा।
कालो गच्छति राजाऽसौ पुत्रपौत्रयुतोऽभवत् ॥२७॥
भोगासक्तस्य च ययुर्वर्षाणि त्वयुतानि वै।
पुत्राः पुत्र्यः पञ्चशतान्यस्याऽभवन् सुशोभनाः ॥२८॥
कन्या विवाहिताः सर्वा विधिना तेन सर्वथा।
ज्येष्ठेऽर्पितं महाराज्यं मध्यमेषु पुराणि वै ॥२९॥
कनिष्ठेषु क्षितिर्योग्या जीविकार्थाऽर्पिताऽथ च।
एवं स्वयं सुखं प्राप्तो निवृत्तो राज्यकार्यतः ॥३०॥
राज्ञीनां जीविकाक्लृप्तिं चक्रेऽथ शयने क्वचित्।
पीवर्या सह सुप्तः सन् स्वप्ने संवदते ह्यवत् ॥३१॥
हाहा ओहोहो गच्छावः किमत्र जीवनेन वै।
स्मृत्वा तां मथुरां भूमिं स्मृत्वा तीर्थं तु संयमम् ॥३२॥
ततः पीवरी प्राह किमेवं भाषसे नृप!।
प्रियाया वचनं श्रुत्वा राजा प्राह प्रियां प्रति ॥३३॥
मत्तः सुप्तः प्रमत्तश्च ह्यसम्बद्धं प्रभाषते।
निद्राधीनस्य वचनं नाऽवधार्यं त्वया प्रिये! ॥३४॥
पीवर्युवाच मे नाथ श्रुतं पुनः पुनर्मया।
बहुवारं यतस्तद्वै दृढसंस्कारजं भवेत् ॥३५॥
जातिस्मरो महाराज! मे त्वं विभासि तद्वद।
प्राग्भवीयं त्वया राजन् प्रोच्यते वद मेऽनघ ॥३६॥
कथयस्व ममाऽद्य त्वं यद्यहं वल्लभा तव।
प्राणाँस्त्यक्ष्याम्यहं राजन् गोपायिष्यसि मे यदि ॥३७॥
प्रियाया वचनं श्रुत्वा प्रत्युवाच नराधिपः।
अवश्यं यदि वक्तव्यं गच्छामो मथुरां पुरीम् ॥३८॥
प्रकाशे त्वावयोर्मृत्युर्भविष्यति न संशयः।
तत्र गत्वा प्राग्भवीयं कथयिष्ये ह्युदन्तकम् ॥३९॥
ददस्व विपुलं दानं ब्राह्मणेभ्यः सुलोचने।
पुत्रान् संस्थाप्य दौहित्रान् स्वे स्वे स्थाने निभाल्य च ॥४०॥
ग्रामान् कोशांश्च रत्नानि पुत्रान् वीक्ष्य वितीर्य च।
राजा सम्मानयामास जनान्पुरनिवासिनः ॥४१॥
पितृपैतामहराज्यपालनार्थं यथाक्रमम्।
पुत्रानावेद्य च तथा कुटुम्बिबान्धवान् प्रियाः ॥४२॥
कुशलार्थं बोधयित्वा दारान् नियुज्य रक्षणे।
अथ प्राह सुहृन्मित्रभृत्यदासीप्रदासकान् ॥४३॥
राज्यं सम्पादितं यद्वै बन्धनं तत्तु सर्वथा।
ममाऽऽत्ममोक्षणार्थं वै गच्छामि मथुरां पुरीम् ॥४४॥
सन्तोषाच्च तथा त्यागान्नास्त्यन्यत् परमं सुखम्।
नास्ति विद्यासमं चक्षुर्नास्ति चक्षुःसमं बलम् ॥४५॥
नास्ति रागसमं दुःखं नास्ति त्यागात्परं सुखम्।
यः कामान् कुरुते सर्वान् यश्चैतान् सर्वथा त्यजेत् ॥४६॥
प्रायेण सर्वकामानां परित्यागो विशिष्यते।
तस्मान्मया प्रगन्तव्यं तीर्थं तु मथुरां पुरीम् ॥४७॥
इत्यावेद्य जनान्सर्वान्पुत्रान्नियुज्य रक्षणे।
यथापेक्षबलोपेतः सम्प्राप्तो मथुरां पुरीम् ॥४८॥
तेन दृष्टा पुरी रम्या पीवर्या चावलोकिता।
तीर्थैर्मुक्तिप्रदैर्युक्ता पुण्या पापहरा शुभा ॥४९॥
रम्यं वृन्दावनं नाम विष्णुस्थानमनुत्तमम्।
यद् दृष्ट्वा मनुजो लक्ष्मि! कृतकृत्यो हि जायते ॥५०॥
श्रावणशुक्लैकादश्यां यमीस्नातः प्रमुच्यते।
तथा सौम्यं मधुवनं मम स्थानमनुत्तमम् ॥५१॥
द्वितीयं तद्वनं दृष्ट्वा कृतकृत्यो हि जायते।
वनं कुन्दवनं नाम तृतीयं चैत्रमुत्तमम् ॥५२॥
भाद्रकृष्णैकादशिकातिथौ स्नातः प्रमुच्यते।
चतुर्थं काम्यकवनं मम धामप्रदं शुभम् ॥५३॥
विमलस्य च कुण्डे वै स्नातः पापात्प्रमुच्यते।
यस्तत्र मुंचति प्राणान् मम लोकं स गच्छति ॥५४॥
पञ्चमं बकुलवनं मम विहारभूस्थलम्।
तत्र गत्वा तथा स्नात्वा वह्निलोकं प्रगच्छति ॥५५॥
यमुनायाः परे पारे षष्ठं भद्रवनं मम।
तत्र गत्वा तथा स्नात्वा नागलोकं प्रगच्छति ॥५६॥
सप्तमं मे वनं तत्र खादिरं यशसदृशम्।
पवित्रं तु नरो दृष्ट्वा मम लोकगतो भवेत् ॥५७॥
महावनं चाष्टमं मे सर्ववृक्षसमन्वितम्।
यत्र गत्वा तु मनुज इन्द्रलोके महीयते ॥५८॥
नवमं तु वनं लोहजंघवनं वनोत्तमम्।
तत्र यातुर्जनस्यैतन्महापातकनाशकम् ॥५९॥
वनं बिल्ववनं नाम दशमं देवपूजितम्।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥६०॥

एकादशं तु भाण्डीरं योगदं योगिनां हि तत् ।
यत्र वै वर्तते वृक्षो भाण्डीरवटसंज्ञकः ॥६१॥
यत्र वै राधया सार्कं विवाहो मे प्रजायते ।
तस्य दर्शनमात्रेण जनो गर्भे न गच्छति ॥६२॥
राधाकृष्णं तत्र दृष्ट्वा पुनर्जन्म न विद्यते ।
तुलसीवनमेवात्र वनं द्वादशकं प्रिये ॥६३॥
कृष्णत्वङ्मयवृक्षाणां मोक्षदं मे विवाहभूः ।
वृन्दावनं हरितानां वृक्षाणां वनमेव मे ॥६४॥
तत्र गत्वा चावलुण्ठ्य पत्रं त्यक्त्वा दलं तथा ।
दृष्ट्वा वृन्दां तुलसीं च स्मृत्वा मां यमुनाजले ॥६५॥
स्नात्वा च मुक्तिमापन्नो गोलोके मे महीयते ।
वृन्दां तुलसीं गोविन्दं ये पश्यन्ति जनाः प्रिये ॥६६॥
न ते यमपुरं यान्ति यान्ति गोलोकमेव मे ।
स्वर्गं सकामा गच्छन्ति ततो वै मे पदं परम् ॥६७॥
एतादृशं महत् तीर्थं मथुरामभिगम्य तौ ।
मुदमवापतुस्तीर्थविधिं चक्रतुरादरात् ॥६८॥
पीवरी भोजनं कृत्वा कारयित्वा पतिं ततः ।
पप्रच्छ स्वाप्नवृत्तान्तं यद्गुह्यं पूर्वभाषितम् ॥६९॥
यदुक्तं नृपराजेन वक्ष्यामि मथुरां प्रति ।
तन्मे वद महाराज ! यद्गोप्यं पूर्वभाषितम् ॥७०॥
राजाऽप्याह स्वकां पत्नीं यथाप्राग्भवजां कथाम् ।
शृणु पत्नि ! निषादोऽहं नैमिषारण्यवासकृत् ॥७१॥
अत्रागत्य मृतः संयमने तीर्थे जलान्तरे ।
तेन पुण्येन सौराष्ट्रे राजा जातः प्रतापवान् ॥७२॥
पत्नीव्रताख्यकृष्णस्य प्रतापेनाऽऽमरक्षितेः ।
साम्राज्यं लब्धमेवापि त्वं लब्धा काशीराजतः ॥७३॥
जातिस्मरः सदा तीर्थं स्मरामि शयने तव ।
कदाचिन्निद्रया व्याप्तः प्रवदामि तु तत् खलु ॥७४॥
हाहा अहोहो गच्छावः किमत्र जीवनेन वै ।
इत्येतन्मे प्राग्भवीयं वृत्तं कथितमंगने ! ॥७५॥
श्रुत्वा सापि स्वकं प्राह वृत्तं जातिस्मरा नृपी ।
अहं तु पीवरी नाम गंगातीरनिवासिनी ॥७६॥
आगतेमां पुरीं द्रष्टुं कार्तिकद्वादशीतिथौ ।
नावमारुह्य यान्तीह पतिता यमुनाजले ॥७७॥
सद्यः प्राणैर्वियुक्ता च काशीराजसुताऽभवम् ।
त्वया विवाहिता राजन्न च मां साऽजहात् स्मृतिः ॥७८॥
एतत्तीर्थप्रभावेण राजपत्नी तवाऽभवम् ।
धारापतनके तीर्थे मम मृत्युरजायत ॥७९॥
पुनर्दृष्टं मोक्षतीर्थं मथुरायां प्रपुण्यतः ।
आवयोरायुषोरन्तः समायातोऽस्ति भूपते ॥८०॥
अद्यैव बहुदानानि देयानि स्वकरेण मे ।
इत्युक्त्वा यमुनातीर्थे स्नात्वा दानानि सा ददौ ॥८१॥
राजापि कृतवान् पुण्यं दानं विप्रादिभोजनम् ।
गोदानं स्वर्णदानं च तिलदानं धनार्पणम् ॥८२॥
भूदानं विप्रकन्यानां दानान्यपि च वै मुदा ।
यज्ञोपवीतदानानि वस्त्रान्नदानमित्यपि ॥८३॥
सर्वं कृत्वा ततो राजा राज्ञी चोभौ सह स्थितौ ।
यमुनायास्तटे वै चायाता गोलोकपार्षदाः ॥८४॥
विमानेन सहितास्ते पीवरीं यक्ष्मराजकम् ।
चतुर्भुजौ दिव्यदेहौ कृत्वा निन्युर्हरेः पदम् ॥८५॥
एवं तौ मथुरां प्राप्य स्नात्वा यामुनतीर्थके ।
मां पश्यन्तौ नियमतस्तत्रैव निधनं गतौ ॥८६॥
सर्वभावं विहायैव गतौ मम सलोकताम् ।
एतत्ते कथितं लक्ष्मि ! यदाश्चर्यमभून्महत् ॥८७॥
त्यक्त्वा तनुं जनस्तीर्थे धारापातनसंज्ञके ।
नाकलोकं च गोलोकमवाप्नोति न संशयः ॥८८॥
यमुनेश्वरमासाद्य त्यक्त्वा जीवितमात्मनः ।
विष्णुलोकमवाप्नोति दिव्यमूर्तिश्चतुर्भुजः ॥८९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये शिवकुण्डतीर्थे संयमनतीर्थे मृतस्य निषादस्य सौराष्ट्रराज्यप्राप्तिः, काशीराजपुत्र्या विवाहः, तयोर्जातिस्मरयोर्मथुरायां मरणं, यमुनेश्वरमाहात्म्य-मित्यादिनिरूपणनामा चतुश्चत्वारिंशदधिक-त्रिशततमोऽध्यायः ॥३४४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तथा तीर्थं त्वपरं कथयामि ते ।
नागतीर्थं परं तीर्थं नागो यस्माद् विवासितः ॥ १ ॥
अत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
अथ घण्टाभरणकं तीर्थं वै पावनं परम् ॥ २ ॥
तत्र स्नातः सूर्यलोकं प्रयात्येव न संशयः ।
अथाऽन्यद् ब्रह्मतीर्थं वै विद्यते यमुनाजले ॥ ३ ॥
तत्र स्नात्वा जलं पीत्वा ब्रह्मलोके महीयते ।
अथाऽन्यत् सोमतीर्थं वै पवित्रे यमुनांभसि ॥ ४ ॥
चन्द्रमास्तत्र मां दृष्ट्वा पुपूज भावतस्तदा ।
तत्राभिषेकं कुर्वीत सोमलोके महीयते ॥ ५ ॥

अथान्यत् परमं तीर्थं सरस्वतीप्रपातनम् ।
तत्र स्नातो नरो लक्ष्मि ! ह्यवर्णोऽपि यतिर्भवेत् ॥ ६ ॥
माथुरे मण्डले यस्यां त्रिरात्रोपोषितो जनः ।
स्नानमात्रेण व्रतकृन्मुच्यते ब्रह्महत्यया ॥ ७ ॥
अथ दशाश्वमेधाख्यं तीर्थं यस्यां तु पावनम् ।
मथुरा पश्चिमे भागे तत्स्थलं चातिपावनम् ॥ ८ ॥
तत्र ये स्नान्ति नियतास्तेषां स्वर्गो न दुर्लभः ।
ब्रह्मणा मानसं तीर्थं यस्यां वै निर्मितं पुरा ॥ ९ ॥
ऋषिभिः पूजितं तत्र स्नात्वा स्वर्गं प्रयान्ति वै ।
अथ विघ्नराजतीर्थं पुण्यं पापहरं शुभम् ॥१०॥
अष्टम्यां च चतुर्दश्यां चतुर्थ्यां तु विशेषतः ।
तस्मिँस्तीर्थवरे स्नातं न पीडयति विघ्नराट् ॥११॥
विद्यारंभेषु सर्वेषु यज्ञदानक्रियासु च ।
अविघ्नं कुरुते तस्य सततं पार्वतीसुतः ॥१२॥
अथाऽन्यत् कोटितीर्थं च स्नानात् कोटिगवां फलम् ।
प्राणत्यागे सोमलोकं मम लोकं च गच्छति ॥१३॥
अतः परं शिवक्षेत्रमर्धक्रोशं हि वर्तते ।
तत्र स्थितो हरो देवो रक्षति मथुरां सदा ॥१४॥
तत्र स्नात्वा जलं पीत्वा माथुरं लभते फलम् ।
अथात्र मुंचति प्राणान् मम लोकं स गच्छति ॥१५॥
अथान्यत् सुधनं तीर्थं तीर्थानामुत्तमं सदा ।
नित्यं वर्तामि तत्रैव लोकानां हितकाम्यया ॥१६॥
मां दृष्ट्वा मनुजाः स्नात्वा मुक्तिभाजो भवन्ति च ।
अयने विषुवे विष्णुपदीषु ग्रहणे रवेः ॥१७॥
स्नात्वाऽनन्तफलं लब्ध्वा मुच्यते सर्वपातकैः ।
राजसूयाऽश्वमेधोत्थफलमाप्नोति मानवः ॥१८॥
सुधने तीर्थके स्नातः प्रयागस्नानपुण्यभाक् ।
अत्राद्ये द्वापरयुगे यद्वृत्तं तच्छृणु प्रिये ! ॥१९॥
नाम्ना तु सुधनो नाम मम भक्तः सदैव हि ।
धनधान्यसुतदारगोगृहादिसमृद्धिमान् ॥२०॥
शीलसन्तोषसत्पूजादयादानादिलक्षितः ।
पुत्रदारसमेतः स मद्भक्तो वर्तते स्म वै ॥२१॥
गच्छन्ति दिवसास्तस्य मासाः संवत्सरास्तथा ।
मम भक्त्यैव साधूनां सतीनां सेवया सदा ॥२२॥
करोति गृहकृत्यानि यथालब्धधनेन सः ।
मानकूटं तुलाकूटं न करोति कदाचन ॥२३॥
नित्यं त्रिकालं कुरुते मम पूजनमुत्तमम् ।
आवाहनेन दुग्धादिपञ्चामृतेन वारिणा ॥२४॥
स्नापनेन विभूषाभिर्विविधाम्बरसद्द्रवैः ।
पुष्पदीपैस्तथा धूपचन्दनामृतसत्फलैः ॥२५॥
नैवेद्यैरतिमिष्टान्नैर्जलैस्ताम्बूलचूर्णकैः ।
एवमारार्त्रिकैर्नित्यं स्तवनैः कीर्तनैस्तथा ॥२६॥
प्रदक्षिणैर्दण्डवद्भिः सदा पूजयति स्म माम् ।
एकादश्यामुपवासं कुरुते जागरं तथा ॥२७॥
नित्यं यस्यां त्रिषवणं स्नानं करोति भावतः ।
कालिन्द्यास्तीरमासाद्य मम मूर्तेः समीपतः ॥२८॥
रात्रिपादे नृत्यति स्म ततो याति निजं गृहम् ।
एवं नित्यं करोत्येव त्वेकादश्यां विशेषतः ॥२९॥
कार्तिकशुक्लैकादश्या रात्रौ स्नात्वा स मन्दिरम् ।
प्रति जागरणार्थं स गतो यस्यास्तटं यदा ॥३०॥
तावत्केनाऽप्यागतेन गृहीतो ब्रह्मरक्षसा ।
कृष्णवर्णमहाकायोर्ध्वरोमातिभयंकृता ॥३१॥
उक्तश्च राक्षसोऽस्म्यत्र भक्ष्यार्थं पर्यटामि ह ।
दूरारण्यनिवासोऽस्मि भक्षयिष्यामि मा शुचः ॥३२॥
बहुकालक्षुधितोऽस्मि तृप्तिं यास्यामि वै चिरम् ।
दृष्ट्वा श्रुत्वा तथा कृत्वा धैर्यं प्राह वणिक् तदा ॥३३॥
सुधनोऽहं महाभोज्यं दास्ये ते मे प्रसीद यत् ।
प्रतीक्षस्व क्षणं मेऽद्य दास्यामि तव पुष्कलम् ॥३४॥
बहुमिष्टान्नसंमिश्रं भक्षयिष्यसि वर्ष्म मे ।
देवकार्यं विधायैव दास्ये ते सर्वमेव तत् ॥३५॥
जागरं देवदेवस्य करोमि हरिवासरे ।
व्रतं मे सार्वकालं वै यज्जागर्मि हरेः पुरः ॥३६॥
तत्र जागरणं कृत्वा प्रभाते तव सन्निधौ ।
यत्र कथय तत्राऽहमागमिष्यामि ते वशः ॥३७॥
कृत जागरणं मां त्वं खादिष्यसि यथासुखम् ।
विष्णुतुष्ट्यैव्रतं कार्यं तन्मे कर्तुं प्रदेहि चेत् ॥३८॥
सर्वकामप्रदं पुण्यं मोक्षदं व्रतमस्ति यत् ।
मा कुरु व्रतभंगं मे कृपां कुरु शुभं भवेत् ॥३९॥
सुधनस्य वचः श्रुत्वा क्षुधितो ब्रह्मराक्षसः ।
सुधनं प्राह मिथ्या त्वं प्रभाषसे वणिग् यतः ॥४०॥
नहि मृत्युमुखान्मुक्तः पुनर्मृत्युमुपैति वै ।
मम पाशाद्विमुक्तस्त्वं पुनः कथं समेष्यसि ॥४१॥
राक्षसस्य वचः श्रुत्वा वणिग् भक्तोत्तमोऽब्रवीत् ।
जगत्सर्वं सत्यमूलं सत्ये सर्वं प्रतिष्ठितम् ॥४२॥
सन्मूलाश्च प्रजाः सर्वाः क्षुधा तेऽस्ति सती यदि ।
तदाऽहं ते सत्यभक्ष्यः क्षुल्लोपे भक्ष्यता कथम् ॥४३॥

क्षुत्पिपासे ब्रह्मकार्ये ब्रह्मणा निर्मितं तु सत् ।
त्वदर्थे चेन्निर्मितोऽस्मि सिद्धिस्ते स्यान्न चान्यथा ॥४४॥
यद्यहं च वणिक् पूर्वं कर्मणा नहि दूषितः ।
अन्तरात्मा हृदये मे वसत्येव यथा तव ॥४५॥
भक्तोऽस्मि सत्यधर्मोऽस्मि सत्येन प्रवदामि च ।
शृणु मत्समयं रक्षो ! येनाऽहं पुनरागमम् ॥४६॥
कृत्वा जागरणं रात्रौ नृत्यं कृत्वा हरेः पुरः ।
पुनरेष्याम्यहं रक्षो ! नाऽसत्यं मयि वर्तते ॥४७॥
सत्येनोपार्ज्यते ब्रह्म धर्मः सत्येन रक्ष्यते ।
सत्येन दीयते कन्या सत्यवाचो हि भूसुराः ॥४८॥
नृपाः सत्येन चोत्तीर्णाः सत्येन ध्रियते क्षितिः ।
स्वर्गमोक्षौ प्रलभ्येते सत्यव्रतेन राक्षस ॥४९॥
सत्येन सूर्यस्तपति चन्द्रः सत्येन वर्धते ।
कालः सत्येन नयति वृष्टिः सत्येन जायते ॥५०॥
अहं सत्येन जीवामि नाऽसत्यं कृतवान् क्वचित् ।
तत्सत्यं मम नश्येद्वै यदि नायामि वै पुनः ॥५१॥
प्रसह्य कामवेगेन नारीं भुंक्ते तु यो जनः ।
तस्य पापेन लिप्येऽहं यदि नायामि ते पुरः ॥५२॥
भूगोदानादि कृत्वा यश्चापहरति तत्पुनः ।
तेन पापेन लिप्येऽहं नागच्छेयं पुनर्यदि ॥५३॥
नारीं नरं च वा स्वार्थमात्रं भुक्त्वा ततस्त्यजेत् ।
परार्थे न च कुर्वीत तत्पापं चाऽऽगमे मम ॥५४॥
सतीं पतिव्रतां भार्यां त्यजेन्निरागसां तु यः ।
तेन पापेन लिप्येऽहं पुनस्त्वनागमे मम ॥५५॥
पंक्तिभेदं तु यः कुर्यादेकपंक्त्यशिनां पुरः ।
तस्य पापेन लिप्येऽहं नाऽऽगन्ता यदि ते पुरः ॥५६॥
व्रतभंगप्रकर्तुर्यत् तत्पापं नाऽगमे तु मे ।
परहिंसकपापं मे नाऽऽगन्ता यदि ते पुरः ॥५७॥
द्विजत्यागिसतीसाधुदेवानां निन्दकस्य यत् ।
पापं तन्मे भवेद् रक्षो ! यदि मे नाऽऽगमः पुनः ॥५८॥
गुरुमित्रसुहृद्द्रोहकृतो यत्पापमेव तत् ।
नागच्छेयं यदि तेऽग्रे सत्यं ब्रवीमि राक्षस ! ॥५९॥
तीर्थे कृतानि पापानि मे स्युरनागमे पुनः ।
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ॥६०॥
विश्वासघातके चाततायिनि बालघातके ।
या गतिस्तां प्रपद्येहं यदि मे नागमः पुनः ॥६१॥
निरागसां तु प्राणिनां रोधने मारणे तथा ।
यत्पापं तद् भवेन्मेऽत्र यदि मे नागमः पुनः ॥६२॥
एतज्जन्मोत्तरं पापं रक्षोजन्म प्रयाम्यहम् ।
यद्यहं सत्यमुत्सृज्य नागच्छेयं प्रतारकः ॥६३॥
इतिवाक्यानि वणिजः श्रुत्वा तुष्टः स राक्षसः ।
विश्वासयति चापन्नो गच्छेत्यायाहि चाह तम् ॥६४॥
वणिक् शीघ्रं गृहं मे तु समागत्य पुपूज माम् ।
ममाऽग्रे नर्तनं कृत्वा चक्रे प्रजागरं मुदा ॥६५॥
प्रभाते स पुनर्नमोनारायणाय वै मुहुः ।
वदन् कुर्वन् मुहुर्दण्डवद् ययौ यमुनातटे ॥६६॥
कालिन्दीस्नानकृद् भक्तो रक्षोमार्गे प्रयाति ह ।
अहं दयापरो भूत्वा मार्गमाबध्य संस्थितः ॥६७॥
दिव्यरूपधरं कृष्णनारायणं पुमुत्तमम् ।
विलोक्य सुधनो भक्तो मां प्रोवाच चतुर्भुजम् ॥६८॥
ओं नमस्ते भगवते कृष्णनारायणाय च ।
भक्तमोक्षप्रदायाऽत्र दिव्यदर्शनदाय च ॥६९॥
स च पृष्टो मया लक्ष्मि ! क्व वणिक् प्रस्थितो द्रुतम् ।
प्रत्युवाच स सुधनो गच्छामि राक्षसान्तिकम् ॥७०॥
मया निवारितः श्रुत्वा न गन्तव्यं न वै नवै ।
जीवता त्वर्ज्यते धर्मो मृते किं मोक्षसाधनम् ॥७१॥
तथापि स न वै श्रुत्वा नत्वा मां राक्षसान्तिकम् ।
गत्वोवाच यथेष्टं भो रक्षो ! भक्षय मा चिरम् ॥७२॥
यथान्यायं विधानेन यथा वा तव रोचते ।
सत्यं मया सदा रक्ष्यं भुंक्ष्व राक्षस ! मा चिरम् ॥७३॥
राक्षसश्चैतदाश्चर्यं समाकलय्य तं प्रति ।
तुष्टो भूत्वो समुवाच वणिक् त्वं जीतवानसि ॥७४॥
त्वया सत्यव्रतो धर्मः पालितस्तेन तोषणम् ।
प्राप्तोऽस्मि मे क्षुधा नष्टा तृप्तिर्जाता च शाश्वती ॥७५॥
अहो सत्यव्रतस्यात्र कथं द्रोहं करोम्यहम् ।
किन्तु यावज्जागरस्य मम पुण्यं प्रयच्छ वै ॥७६॥
सत्यपुण्यप्रभावेन यथाऽहं मुक्तिमाप्नुयाम् ।
सुधनस्तद्वचः श्रुत्वा तदा प्रोवाच राक्षसम् ॥७७॥
जानासि राक्षस ! कीदृक् पुण्यं स्याज्जागरस्य वै ।
घटिकाजाग्रतेः पुण्यं माहेन्द्रपददायकम् ॥७८॥
घटिकाद्वयजाग्रतोः वेधसः पदमुत्तमम् ।
अर्धरात्रिजाग्रतो वै वैराजपदमुत्तमम् ॥७९॥
ऊनरात्रिजाग्रतो वै वैकुण्ठपदमेव ह ।
आप्रातर्जाग्रतो मुक्तिर्ब्रह्मलोकप्रदा भवेत् ॥८०॥
घटिकार्धं जाग्रतस्तु साम्राज्यं जायते खलु ।
जाग्रति नृत्यतस्तस्य गोलोको जायते ध्रुवम् ॥८१॥

तस्मान्नहं प्रदास्यामि फलं सम्पूर्णजाग्रतेः ।
अर्धं देहि तदर्धं वा तदर्धार्धं प्रदेहि मे ॥८२॥
मा लोभं कुरु भक्तेन्द्र ! मोक्षं कुरु ममापि भोः ।
इत्यर्थितोऽपि सुधनो मोक्षलोभी ददौ न वै ॥८३॥
पुनश्च प्रार्थयामास सुधनं ब्रह्मराक्षसः ।
एकनृत्यस्य मे पुण्यं देहि त्वं वणिगुत्तम ! ॥८४॥
सुधनस्तं समपृच्छद् वद मे तव पूर्वजम् ।
वृत्तान्तं सकलं पश्चाद् दास्ये त्वेकनृतेः फलम् ॥८५॥
किं त्वं मां न विजानासि वणिजं प्राह राक्षसः ।
तव गृहसमीपेऽहमग्निदत्तस्तु भूसुरः ॥८६॥
तव मित्रं समासं स एवाऽहं निजकर्मभिः ।
ब्राह्मणश्छान्दसश्चापि राक्षसत्वमुपागतः ॥८७॥
मयाऽऽरब्धं सुभवनं द्विभौमं तव भौमवत् ।
तदर्थमिष्टिका रात्रौ परकीयाः सदाऽहरम् ॥८८॥
पापमकरवं चौर्यं गृहं पूर्णं च नाऽभवत् ।
ज्वरेण पीडितो मध्ये हर्म्यस्य वासनान्वितः ॥८९॥
चौर्यदोषेण विप्रोऽपि ब्रह्मराक्षसतां गतः ।
सोऽहं मित्रं वणिग्वर्य तवास्मीति विभाव्य वै ॥९०॥
मित्रे प्राप्ते दयां कृत्वा ह्युपकारं कुरुष्व मे ।
एकनृत्यस्य पुण्यं मे देहि येन गतिर्मम ॥९१॥
मोक्षमयी भवेद् भक्त ! मुहुश्चाभ्यर्थयाम्यहम् ।
श्रुत्वा कृपार्द्रहृदयो वणिग् राक्षसमाह वै ॥९२॥
साधु राक्षस ! दत्तं ते त्वेकनृत्यफलं मया ।
इत्युच्चार्य जलं यावद् ददाति रक्षसः करे ॥९३॥
तावद्रक्षःशरीरं वै पतितं भूतले तदा ।
आत्मा चतुर्भुजो भूत्वा पार्षदः श्रीहरेर्यथा ॥९४॥
तथा भूत्वा द्व्यष्टवर्षो व्यराजत वणिक्पुरः ।
तं नेतुमागतो विष्णुर्दिव्यपार्षदशोभितः ॥९५॥
सुधनस्तं हरिं दृष्ट्वा पादयोर्धरणिं गतः ।
उवाच स्वप्रभुं तत्र भगवँस्तारितौ त्वया ॥९६॥
राक्षसस्य नृत्यलेशाद् मुक्तिदोऽस्ति भवान् यथा ।
ममापि च तथा मुक्तिप्रदाता भव माधव ॥९७॥
तदोवाच मधुरं तं देवदेवो जनार्दनः ।
एहि त्वमपि भक्तेन्द्र ! विप्रेन्द्रोऽपि समेतु मे ॥९८॥
सुधनाऽऽशु कुटुम्बं ते समेतु मम वाहने ।
विमानवरमारुह्य मम लोकं व्रजन्तु वै ॥९९॥
इत्युक्त्वा श्रीकृष्णनारायणः सर्वान् विमानके ।
आरोहयित्वा सुययौ वैकुण्ठं धाम शाश्वतम् ॥१००॥
यत्राश्चर्यमभूत् त्वेतत् तीर्थं सुधनसंज्ञितम् ।
कार्तिके धवले तत्र द्वादश्यां स्नानकारिणः ॥१०१॥
राजसूयफलं स्याच्च दानात्स्वर्गं फलं भवेत् ।
पूर्णिमायां वृषोत्सर्गकर्ता कुलानि तारयेत् ॥१०२॥
श्राद्धकर्ता पूर्वजाँश्च तारयेदत्र तीर्थके ।
इति ते कथितं लक्ष्मि ! सुधनस्य प्रमोक्षणम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये नागतीर्थघण्टाभरणकतीर्थसोमतीर्थसरस्वतीदशाश्वमेधतीर्थराजविघ्नराजकोटिशिवक्षेत्रसुधनतीर्थानां सुधनप्रदत्तनृत्यपुण्येन ब्रह्मराक्षसस्य मुक्तिश्चेत्यादेश्च निरूपणनामा पञ्चचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! माथुरे तु मण्डलेऽपरतीर्थकम् ।
वत्सक्रीडनकं तीर्थं रक्तप्रस्तरनिर्मितम् ॥ १ ॥
तत्र स्नानेन वै यायाद् वायुलोकं तु मानवः ।
प्राणत्यागे तु परमा मुक्तिः स्यान्नात्र संशयः ॥ २ ॥
अथ भाण्डीरकं तीर्थं दम्पतीत्वप्रदं परम् ।
यत्र कृष्णेन राधा वै विवाहिता वनस्थले ॥ ३ ॥
सालतालार्जुनैर्युक्ते तमालेङ्गुदपीलुकैः ।
करीररक्तपुष्पैश्च युक्ते भाण्डीरके स्थले ॥ ४ ॥
स्नातः पापविनिर्मुक्तश्चन्द्रलोकं प्रयाति सः ।
प्राणत्यागे तु गोलोकं प्राप्नोति नात्र संशयः ॥ ५ ॥
वृन्दावनं मम तीर्थं यत्र गोगोपगोपिकाः ।
मया साकं रमिष्यन्ति विचित्रक्रीडनैः सदा ॥ ६ ॥
सर्वेषां दुर्लभे स्थाने कुण्डे वृन्दावनस्थले ।
बहुगुल्मलतारण्ये स्नातः स्वर्गेऽप्सरोगणैः ॥ ७ ॥
गन्धर्वैः सेवमानश्च मोदते बहुवत्सरान् ।
तत्र चेन्मुञ्चति प्राणान् वैकुण्ठे मोदते ध्रुवम् ॥ ८ ॥
अथ वृन्दावने केशी दैत्यो यत्र निपातितः ।
तत्र स्नातः शतगुणं पुण्यमाप्नोत्यसंशयम् ॥ ९ ॥
हरिविश्रामतीर्थं च ततोऽपि शतपुण्यदम् ।
तत्र पिण्डप्रदानेन गयातुल्यफलं भवेत् ॥१०॥
स्नानं दानं च हवनं वह्निष्टोमफलप्रदम् ।
अथ द्वादशसूर्याणां तीर्थं श्रेष्ठं परं मतम् ॥११॥
कालिन्दीसलिले कृष्णः कालीयसर्पमस्तके ।
ननर्त दमनार्थं तं तत्राऽऽदित्या दशोज्ज्वलाः ॥१२॥

मयैव स्थापिता लक्ष्मि ! वरार्थे ज्ञापितास्तदा ।
आदित्याश्च तदा प्रोचुर्यदि देयो वरोऽस्ति नः ॥१३॥
अस्मत्तीर्थेऽत्र लोकानां स्नानेन मोक्षणं भवेत् ।
उत्तरे हरिदेवस्य कालीयस्य तु दक्षिणे ॥१४॥
मध्ये ये स्युर्मृतास्तेषां मुक्तिर्गोलोकधामनि ।
भवेदित्यर्थितं तैश्च तथास्त्विति मयाऽर्पितम् ॥१५॥
अथ यम्याः परे पारे तीर्थं तु मलयार्जुनम् ।
पर्यस्तं तत्र शकटं कुण्डं तत्र सुविद्यते ॥१६॥
तत्र स्नानोपवासाभ्यामनन्तफलभाग् भवेत् ।
द्वादश्यां ज्येष्ठशुक्लस्य स्नानाद् दानाच्च दर्शनात् ॥१७॥
अच्युतस्य समर्चनात् प्राप्नोति परमां गतिम् ।
उपोषितं जनं साक्षात् कृष्णो नेतुं प्रगच्छति ॥१८॥
अपि चास्मत्कुले जातः कालिन्दीसलिले प्लुतः ।
अर्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥१९॥
धन्योऽसौ पिण्डनिर्वापं यमुनायां करिष्यति ।
द्वादश्यां ज्येष्ठमासेऽत्र तृप्तिर्नः संभविष्यति ॥२०॥
इतिगायन्ति पितरः परलोकगताः सदा ।
अथात्र सुभगं तीर्थं वनं बहुलसंज्ञकम् ॥२१॥
स्नातो रुद्रस्य भवनं प्रयाति द्वादशीतिथौ ।
चैत्रशुक्लदशम्यां तु स्नातो मत्पदमाप्नुयात् ॥२२॥
अथ भाण्डहृदस्तीर्थं परे पारे सुविद्यते ।
दृश्यन्तेऽहरहस्तत्र त्वादित्याः सुपतङ्गकाः ॥२३॥
अर्ककुण्डे तत्र तीर्थे स्नानं यः कुरुते जनः ।
सर्वपापविनिर्मुक्तः सूर्यलोकं प्रयाति सः ॥२४॥
अथात्र विमलः कूपः सप्तसामुद्रनामकः ।
तत्र स्नाता यथेष्टः स्यात् स्वेष्टं लोकं प्रयाति सः ॥२५॥
तत्र प्राणप्रयाणे तु मम धाम प्रपद्यते ।
अथ वीरस्थलं नाम तीर्थक्षेत्रं परं शुभम् ॥२६॥
आसन्नसलिलं चैव पद्मोत्पलविभूषितम् ।
तत्र स्नाता वीरलोकं प्राप्याऽन्ते धाम याति मे ॥२७॥
कुशस्थलं तथा क्षेत्रं पुण्यं परमपावनम् ।
स्नात्वा याति ब्रह्मलोकं मृत्वा गोलोकमृच्छति ॥२८॥
तत्र पुष्पस्थलतीर्थं शिवक्षेत्रमनुत्तमम् ।
तत्र स्नानेन मनुजः शिवलोकं प्रगच्छति ॥२९॥
अथ गोपीश्वरमूर्तिर्महापातकनाशिनी ।
मातलिस्थापिता मोक्षप्रदा गोपीशतीर्थके ॥३०॥
कृष्णस्य रमणार्थं हि गोप्यस्तत्र सहस्रशः ।
समागतास्तदा कृष्णो जातः सहस्ररूपधृक् ॥३१॥
गोपीं गोपीं प्रति रेमे यथेष्टं सुखदः प्रभुः ।
मातलिस्तत्र चागत्य गोपीश्वरं विधाय च ॥३२॥
गोपवेषधरं देवमभिषेकं चकार ह ।
आनीय सप्तकलशान् रत्नौषधिपरिप्लुतान् ॥३३॥
गोप्यो गायन्ति नृत्यन्ति कृष्ण ! कृष्ण ! वदन्ति च ।
तत्र सप्तकलशैश्च स्थापयामास कूपकम् ॥३४॥
सप्त सामुद्रिकं नाम तीर्थं गोलोकधामदम् ।
तत्र श्राद्धे जलदात्रा पिण्डदात्रा च सर्वथा ॥३५॥
पितरस्तारितास्तेन कुलानां सप्तसप्ततिः ।
सोमवारे त्वमायां च श्राद्धकर्तुस्तु पूर्वजाः ॥३६॥
पितरस्तस्य तृप्यन्ति कोटिवर्षशतानि वै ।
गोविन्दस्य च देवस्य तथा गोपीश्वरस्य च ॥३७॥
मध्ये मृतो जनो याति महेन्द्रस्य सलोकताम् ।
तथा बहुलरुद्रस्य गोविन्दस्य च मध्यतः ॥३८॥
तथा वै वेधसश्चापि गोपीशस्य च मध्यतः ।
पिण्डदानस्नानकर्तुः कुलानां शतमुद्धरेत् ॥३९॥
वसुतीर्थं मथुरादक्षिणे फाल्गुनकं तथा ।
तत्र स्नात्वा च पीत्वा च मम लोके महीयते ॥४०॥
तत्र फाल्गुनके तीर्थे वृषभांजनकं स्थलम् ।
तत्राऽभिषेकमापन्नः सुरैः सह प्रमोदते ॥४१॥
अथ तालवनं नाम मथुरापश्चिमस्थितम् ।
तत्र कुण्डे स्नानकर्ता दाता वाञ्छितमाप्नुयात् ॥४२॥
अस्ति संपीठकं तीर्थं स्नाताऽग्निष्टोमपुण्यभाक् ।
कृष्णजन्मस्थले लक्ष्मि ! सप्तम्यां सोमवासरे ॥४३॥
व्रतं कृत्वा पूजयेन्मां सा तु पुत्रवती भवेत् ।
विंशतिर्योजनानां तु माथुरं मम मण्डलम् ॥४४॥
यत्र तत्र कृतस्नानो मुच्यते घोरपातकैः ।
वर्षाकालेऽत्र स्थातव्यं यत्स्थानं सुखदं भवेत् ॥४५॥
सप्तद्वीपेषु तीर्थानि पुण्यान्यायतनानि च ।
मथुरायां गमिष्यन्ति प्रसुप्ते तु सदा मयि ॥४६॥
सुप्तोत्थितं च मां दृष्ट्वा भवन्ति मुक्तिभाजनाः ।
यमुनायां कृतस्नानः कृतकेशवदर्शनः ॥४७॥
सर्वपापविहीनः सन्ममलोकं प्रपद्यते ।
पदे पदे फलं याति राजसूयाश्वमेधयोः ॥४८॥
प्रदक्षिणीकृतो येन मथुरायां तु केशवः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥४९॥
घृतदीपं तथा वस्त्रं दद्यात् कृष्णाय मन्दिरे ।
पञ्चयोजनविस्तारं दीर्घं षट्पंचयोजनम् ॥५०॥

दीपमालासमाकीर्णं विमानं लभते जनः ।
सर्वकामसमृद्धं तदप्सरोगणसेवितम् ॥५१॥
सर्वकामप्रदं रम्यं सर्वतेजोविराजितम् ।
सिद्धचारणमगन्धर्वा यदिच्छन्ति दिवं गताः ॥५२॥
यदि पुण्यं कृतं स्याद्वै लभ्येतैतादृशं गृहम् ।
अन्ते मोक्षस्त्वपाप्येत मथुरायाः प्रभावतः ॥५३॥
मथुरां रक्षति पूर्वामिन्द्रो यमस्तु दक्षिणाम् ।
पश्चिमां रक्षति वारीशः कुबेरस्तथोत्तराम् ॥५४॥
मध्यं रक्षति मे भक्तः शंकरः पार्वतीपतिः ।
मथुरायां गृहं यो वा प्रासादं कुरुते जनः ॥५५॥
चतुर्भुजस्तु विज्ञेयो जीवन्मुक्तो न संशयः ।
मथुरायां महत्कुडं विमलोदकनामकम् ॥५६॥
हेमन्ते तु भवेच्चोष्णं शीतलं ग्रीष्मके भवेत् ।
न वर्धते च वर्षासु ग्रीष्मे चापि न हीयते ॥५७॥
एतत्तु महदाश्चर्यं तस्मिन् कुण्डे परं मम ।
माथुरे मम क्षेत्रे तु गर्तेषु च नदीषु च ॥५८॥
कूपे ह्रदे देवखाते प्रवाहे संगमे तथा ।
स्नातव्यं यत्र वा तत्र तेन स्यात्परमा गतिः ॥५९॥
कार्तिकस्य तु मासस्य नवम्यां मम भक्तराट् ।
कृत्वा प्रदक्षिणं याति पृथ्वीप्रक्रमणवृषम् ॥६०॥
न दानैर्न तपोभिश्च न यज्ञैस्तादृशं फलम् ।
भूमेः प्रदक्षिणायाः स्याद् यादृशं तीर्थसेवया ॥६१॥
भूम्याः परिक्रमे सम्यग् योजनानां प्रमाणकम् ।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥६२॥
तत्र तीर्थानि देवाश्च गणिताः पवनेन वै ।
ब्रह्मणा लोमशेनापि नारदेन ध्रुवेण च ॥६३॥
पतीव्रतेन विप्रेण गरुडेन हनूमता ।
एतैरनेकधा देवैः सबाध्यावरणा मही ॥६४॥
क्रमिता बलिभिः सर्वैर्ब्राह्ममण्डलरेखया ।
योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयमुखैरपि ॥६५॥
सप्तद्वीपे च तीर्थानां भ्रमणाद् यत्फलं भवेत् ।
प्राप्यते त्वधिकं तस्मान्मथुरायाः परिक्रमे ॥६६॥
यथाविधानक्रमणं मथुरायां कृतं भवेत् ।
प्रदक्षिणफलं सम्यगनुक्रमविधिं ब्रुवे ॥६७॥
सर्वदेवेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
सर्वदानेषु यत्पुण्यमिष्टापूर्तेषु यत्फलम् ॥६८॥
तत्फलं लभ्यते लक्ष्मि ! माथुरस्य प्रदक्षिणे ।
देवर्षिमुनिसहिता ब्रह्माद्याः कोटिदेवताः ॥६९॥
नवम्यां कार्तिके शुक्ले चक्रुर्माथुरप्रक्रमम् ।
अष्टम्यां मथुरां प्राप्य स्नात्वा विश्रान्तितीर्थके ॥७०॥
कृत्वा पितृसुरर्षीणां पूजनं यमुनार्चनम् ।
विश्रान्तिदर्शनं कृत्वा दीर्घविष्णुं च केशवम् ॥७१॥
उपवासं प्रकृत्वैव स्वल्पमेध्याशनोऽथवा ।
ब्रह्मचर्यपरो भूत्वा मौनमास्थाय यत्नतः ॥७२॥
तिलाऽक्षतकुशान्नीत्वा विश्रान्तौ दीपमाददेत् ।
नवम्यां प्रातरेवाऽस्मात्स्थलाद् यात्रामुपाक्रमेत् ॥७३॥
ब्राह्मे काले रवेः पूर्वं स्नायाद् दक्षिणकोटिके ।
प्रक्षाल्य पादावाचम्य हनुमन्तं प्रसादयेत् ॥७४॥
सर्वमंगलदं सिद्धिकर्तारं फलसाक्षिणम् ।
प्रदक्षिणस्य यात्रायां यात्रासिद्धिप्रदो भव ॥७५॥
इति विज्ञाप्य विधिवद्धनूमन्तं गणेश्वरम् ।
दीपपुष्पोपहाराद्यैः पूजयित्वाऽग्रतस्ततः ॥७६॥
पूजयेत्पद्मनाभं च दीर्घविष्णुं सुखप्रदम् ।
दृष्ट्वा वसुमतीं देवीं तथाऽन्यामपराजिताम् ॥७७॥
आयुधागारसंस्थां च नत्वा गच्छेत् ततोऽग्रतः ।
कंसवासनिकां तद्वदौग्रसेनां च चर्चिकाम् ॥७८॥
वधूटीं तत्र नत्वा च दानवक्षयकारिणीम् ।
जयदां च ततो नत्वा मातॄंश्च देवपूजिताः ॥७९॥
गृहदेवीर्वास्तुदेवीर्दृष्ट्वाऽनुज्ञाप्य निःसरेत् ।
दक्षिणकोटिकं प्राप्य स्नात्वा सन्तर्प्य पितृकान् ॥८०॥
देवं कृष्णं संप्रणम्य चेक्षुवासां सतीं व्रजेत् ।
यत्र बालक्रीडनकैस्तीर्थं कृष्णेन वै कृतम् ॥८१॥
वत्सपुत्रं ततो गच्छेत् ततोऽर्कस्थलमेव च ।
वीरस्थलं कुशस्थलं पुण्यस्थलं महास्थलम् ॥८२॥
पद्मस्थलावलोकेन ब्रह्मणा सह मोदते ।
शिवं सिद्धमुखं दृष्ट्वा हयमुक्तिं च लोकयेत् ॥८३॥
अश्वो मुक्तिं गतश्चात्र सहायसहितो यतः ।
राजपुत्रः स्थितस्तत्र यानयात्रां न चाचरेत् ॥८४॥
मल्लिकादर्शनं कृत्वा कदम्बखण्डमाव्रजेत् ।
चर्चिकां योगिनीं दृष्ट्वा ततो गच्छेत्तु मातरम् ॥८५॥
अस्पृश्यां चाऽस्पृशां ते द्वे बालरक्षाकरे शुभे ।
वर्षखातं ततो गत्वा कुण्डं पितॄंश्च तर्पयेत् ॥८६॥
क्षेत्रपालं शिवं भूतेश्वरं गच्छेत् प्रपूजयेत् ।
कृष्णक्रीडासेतुबन्धं ततो गच्छेद् बलिह्रदम् ॥८७॥
ततः कुक्कुटक्रीडाख्यं स्थलं गच्छेद् गतिप्रदम् ।
स्तम्भोच्चयं सुशिखरं पूजयेत्तं परिक्रमेत् ॥८८॥

मुच्यते सर्वपापेभ्यो विष्णुलोकं व्रजेत्तु सः ।
वसुदेवस्य देवक्या एकान्तशयनस्थलम् ॥८९॥
गत्वा नारायणस्थानं प्रविशेच्च परिक्रमेत् ।
विघ्नविनायकं नत्वा कुब्जिकां वामनां तथा ॥९०॥
कृष्णदास्यौ तु विप्राण्यौ नत्वा गर्तेश्वरं व्रजेत् ।
महाविद्येश्वरीं दृष्ट्वा यात्रासिद्धिफलं भवेत् ॥९१॥
प्रभामल्लीं महाविद्येश्वरीं व्रजेच्च पूजयेत् ।
सिद्धेश्वरीं तथा संकेतेश्वरीं च प्रपूजयेत् ॥९२॥
यस्याश्चाग्रे दैत्यनाशार्थं संकेतितवान् हरिः ।
कुण्डे त्वाचमनं कृत्वा गोकर्णेश्वरमाव्रजेत् ॥९३॥
सरस्वतीं नदीं दृष्ट्वा विघ्नराजं समाव्रजेत् ।
गंगां दृष्ट्वा तथा स्पृष्ट्वा गच्छेद् रुद्रमहालयम् ॥९४॥
क्षेत्रपं तं समानत्वोत्तरकोटिगणाधिपम् ।
पूजयेद्यत्र कृष्णेन द्यूतक्रीडा कृताऽभवत् ॥९५॥
ततो गच्छेन्महातीर्थं विमलं यमुनाम्भसि ।
रुद्रमहालयाख्यं तत् स्नायात् पितॄँश्च तर्पयेत् ॥९६॥
गार्ग्यतीर्थं ततो गच्छेद् भद्रेश्वरं च सोमकम् ।
सोमेश्वरं प्रपूज्यैव यात्राफलं लभेज्जनः ॥९७॥
सरस्वत्याः संगमे च देवर्षिपितृमानवान् ।
सन्तर्प्य विधिवद् दत्वा कृष्णसायुज्यमाप्नुयात् ॥९८॥
घण्टाभरणकं गत्वा तथा गरुडकेशवे ।
धारालोपनकं गत्वा वैकुण्ठं खण्डवेलकम् ॥९९॥
मन्दाकिनीसंयमनं चासिकुण्डं च गोपकम् ।
मुक्तिकेश्वरमेवाऽथ वैलक्षगरुडं स्थलम् ॥१००॥
गत्वा सर्वत्र पितॄँश्च देवान्सम्पर्य तर्पयेत् ।
प्रार्थयेन्मथुरायाश्च यात्रा मे सफलाऽस्त्विति ॥१०१॥
इत्येवं देवदेवेशं विज्ञाप्य क्षेत्रपं शिवम् ।
विश्रान्तिसंज्ञके स्नात्वा कृत्वा च पितृतर्पणम् ॥१०२॥
विश्रान्तिं च परिक्रम्य गुरुं नत्वा हरिं तथा ।
सुमंगलां ततो गच्छेद् यात्रासिद्धिं प्रसादयेत् ॥१०३॥
यात्रेयं त्वत्प्रसादेन सफला मे भवत्विति ।
पिप्पलादेश्वरं गत्वा परिक्रमेदुपालिपेत् ॥१०४॥
एकं शिवं स्वस्य नाम्ना स्थापयेद् यात्रिकस्तदा ।
यात्राफलं प्रपद्येत पूजयेत्प्रणमेत् तथा ॥१०५॥
कर्कोटकं तथा नागं गच्छेद् देवीं च चण्डिकाम् ।
वज्रानन्नं ततो ध्यात्वा ततः सूर्यं कुलेश्वरम् ॥१०६॥
दृष्ट्वा तत्रैव दानं च दत्वा यात्रां समापयेत् ।
प्रतिक्रमं कुलानां वै सूर्यलोके स्थितिर्भवेत् ॥१०७॥
प्रदक्षिणप्रकर्ता च विष्णुलोके महीयते ।
मम प्रदक्षिणकर्ता गोलोके च महीयते ॥१०८॥
ब्रह्मघ्नाश्च सुरापाश्च चौरा भग्नव्रताश्च ये ।
प्रसह्य गमका ये च धनक्षेत्रापहारकाः ॥१०९॥
हिंसका दुःखदातारो निन्दकाः शठधूर्तकाः ।
मथुराक्रमणं कृत्वा निष्पापास्ते भवन्ति वै ॥११०॥
अन्यदेशागतो दूराद् यः करोति प्रदक्षिणम् ।
तस्य संदर्शनादन्ये पूता भवन्ति मानवाः ॥१११॥
यमुनाया वारिकणं पीत्वा दूरनिवासिनः ।
सर्वपापविनिर्मुक्ताः प्रयान्ति परमां गतिम् ॥११२॥
मथुरावासकर्तारो मथुरातीर्थसेविनः ।
मथुरावनद्रष्टारो मोक्षभाजो भवन्ति ते ॥११३॥
मधुवनं तालवनं कुन्दवनं तृतीयकम् ।
काम्यकवनं च बहुवनं भद्रवनं तथा ॥११४॥
खादिरं च महावनं लोहार्गलवनं तथा ।
बिल्ववनं च भाण्डीरं वृन्दावनं च द्वादशम् ॥११५॥
एतानि ये प्रपश्यन्ति न ते याम्याभिगामिनः ।
वनयात्राप्रकर्तार इन्द्रलोकं व्रजन्ति वै ॥११६॥
मम भक्ताश्च ये यात्रां मदर्थं त्वाचरन्ति ते ।
नरा नार्यश्च गोलोके यान्ति मामेव शाश्वतम् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये वत्सक्रीडनकभाण्डीरकवृन्दावनहरिविश्रामसूर्यतीर्थमलयार्जुनबहुलभाण्डह्रदार्ककुण्डविमलकूपवीरस्थलकुशस्थलपुष्पस्थलगोपीश्वरसप्तसामुद्रिकवसुफाल्गुनकवृषभांजनकतालवनसंपीठकविमलोदककुण्डानां निर्देशः, मथुराप्रदक्षिणे विधिः, तत्रत्यतीर्थानां क्रमनिर्देशो विश्रान्तिघट्टारंभणसमाप्त्यादिः, वनानि चेत्यादिप्रदर्शननामा षट्चत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४६॥

श्रीनारायण उवाच—

अथान्यत्ते प्रवक्ष्यामि महालक्ष्मि ! शृणुष्व तत् ।
मथुराया उत्तरस्थे चक्रतीर्थेऽभवत्तु यत् ॥ १ ॥
जम्बूद्वीपे महागृहोदयपत्तनवासकृत् ।
ब्राह्मणः स्वस्य कन्यां च पुत्रं चादाय वेदवित् ॥ २ ॥
शालग्रामं महाक्षेत्रं ययौ यात्रार्थमेव सः ।
निवासमकरोत् तत्र स्नायी तीर्थसुरार्चकः ॥ ३ ॥

देवतानां दर्शनेऽस्य सिद्धः कश्चिद् दृशोः पथि।
समायातः कलापाख्यग्रामवासी नराकृतिः ॥ ४॥
सिद्धो नित्यं दर्शनार्थं समायाति वियाति च।
विप्रस्य पर्णशालायां विश्रान्ति लभतेऽपि च ॥ ५॥
वर्णयति स्म कलापग्रामस्यातिविभूतिकाः।
श्रुत्वा विप्रस्य गमने जाता बुद्धिस्ततो द्विजः ॥ ६॥
प्राह सिद्धं मम मित्रं भवानद्य हि वर्तते।
कलापं मां नय मित्र! ते पश्यामि विभूतिकाः ॥ ७॥
सिद्धः प्राह तु विप्रेन्द्र! तत्र ते न गतिर्भवेत्।
शरीरं शीतवातैस्तु नाशं यास्यति ते द्विज! ॥ ८॥
तथापि ब्राह्मणः प्राह तव योगेन मां नय।
एवमभ्यर्थितः सिद्धः कन्यां पुत्रं च मित्रकम् ॥ ९॥
करे संगृह्योत्पपात व्योम्नि योगबलेन वै।
कलापे स्वाश्रमे न्यस्तं सिद्धेन ब्राह्मणत्रयम् ॥१०॥
तत्र कालेन यातेन विप्रो रुग्णोऽभवत्तदा।
मृत्युयोग्यं पितरं च निन्ये गंगातटं सुतः ॥११॥
सुता चापि स्वपितरं सेवते पथ्यवस्तुभिः।
एकदा पर्णशालायां पित्रर्थे पाकमाचरत् ॥१२॥
तदा कश्चिद् ब्राह्मणोऽपि भिक्षार्थं गृहमागतः।
पृष्टोऽसौ भद्रया तया क्व भवाँस्त्वमिहागतः ॥१३॥
स प्राह कान्यकुब्जस्य विप्रोऽहं सिद्धतां गतः।
विचरामि महातीर्थे कलापेऽत्र सुखी सदा ॥१४॥
कन्ययाऽऽवेदितः पित्रे भ्रात्रे स सिद्धदेहवान्।
पित्रा दत्ता विचार्यैव कन्या सिद्धद्विजाय सा ॥१५॥
सिद्धोऽप्ययं हि जामाता वसति श्वशुरगृहे।
कालेन क्षणतां प्राप्तं श्वशुरं पर्यपृच्छत ॥१६॥
कथं रोगः कदा त्वस्य विनाशोऽपि भविष्यति।
यथा रोगविनाशः स्यात्तथा करोमि सेवनम् ॥१७॥
जामातृवचनं श्रुत्वा श्वशुरः शान्तिमाव्रजत्।
प्राह जामातरं भवान् सिद्धया जानाति चेद् वद ॥१८॥
जामाता सिद्धिमान् ध्यात्वा श्वशुरं प्राह भो द्विज!।
कलापेऽत्र निवसता शूद्रान्नं भक्षितं त्वया ॥१९॥
अजानताऽर्पितं तेन भक्षितं चाऽप्यजानता।
तेन दोषेण रोगोऽयं वर्तते वर्ष्मणि द्विज! ॥२०॥
पादयोर्विद्यते चान्नं जान्वोरूर्ध्वे न विद्यते।
शूद्रान्नेन विहीनस्य विप्र! मृत्युर्भविष्यति ॥२१॥
जामातृवचनं श्रुत्वाऽऽत्मानं विप्रोऽत्यगर्हयत्।
दुःखेन पीडितः क्षीणो मर्तुमैच्छद् द्विजोत्तमः ॥२२॥
अथ प्रभाते जामाता सुता पुत्रश्च ते त्रयः।
कार्यार्थं तु ययुर्गेहाद् बहिस्तावत् क्षणान्तरे ॥२३॥
निर्जनावसरं लब्ध्वा मरणं प्रविचार्य च।
गंगातीरात् समुच्चिन्वन् दिशः सर्वा विलोकयन् ॥२४॥
सन्निधावुपलां दृष्ट्वा गृहीत्वा पर्णकुट्टके।
चूर्णयामास तौ पादौ पीडया दुःखितो द्विजः ॥२५॥
ततः प्राणान् परित्यज्य गतोऽसौ स्वर्गमुत्तमम्।
जामाता च सुता पुत्रः कार्यं कृत्वाऽऽययुर्गृहम् ॥२६॥
तावन्मृतं तु तं वृद्धं दृष्ट्वा रुरुदुरत्यति।
सर्पशृंगिहतानां च दंष्ट्रिप्राणिहतस्य च ॥२७॥
आत्मघातकृतस्यापि नास्ति संस्कारयोग्यता।
कथमस्य भवेद् दाहो विचार्येति पुनश्च ते ॥२८॥
"प्रायश्चित्तं विधीयीत न दद्याच्चोदकक्रियाम्"।
इति विधिं समाश्रित्य चक्रुर्दाहादिकं ततः ॥२९॥
प्रायश्चित्तं तथा चक्रुर्ययुर्ग्रामं कलापकम्।
तत्रस्थं मृतविप्रस्य मित्रं सिद्धं प्रणम्य ते ॥३०॥
मरणादिकमावेद्य क्षणं चक्रुः प्रशोचनम्।
कलापस्थश्च सिद्धोऽयं प्राह जामातरं द्विजम् ॥३१॥
ब्रह्महत्या तु ते जाता प्रायश्चित्तं ततः कुरु।
वृद्धसिद्धवचः श्रुत्वा जामाता वाक्यमब्रवीत् ॥३२॥
न मया ब्राह्मणवधः कदाचिदपि वै कृतः।
केन दोषेण मे पूज्य! ब्रह्महत्या फलं वद ॥३३॥
जामातुर्वचनं श्रुत्वा वृद्धसिद्धस्तमब्रवीत्।
त्वया तत्पादयोः शूद्रस्यान्नं चास्तीति दर्शितम् ॥३४॥
तदन्नस्य क्षये मृत्युरित्यपि दर्शितं तथा।
विप्रेण तेन च तद्वच्चूर्णितौ चरणौ स्वकौ ॥३५॥
मृत्युः कृतस्ततस्तत्र दोषभाक् त्वं तथाऽभवः।
इति त्वया वधोपायो निर्दिष्टश्च द्विजोत्तम! ॥३६॥
तेन दोषेण विप्रर्षे! ब्रह्महत्याफलं तव।
आसन्नशयनाच्चैव भोजनात् कथनात्तथा ॥३७॥
पापं संक्रमते व्यक्तौ सहसंचरणात्तथा।
ततः शुद्धिः प्रकर्तव्या माऽस्तु वासो मम गृहे ॥३८॥
कल्पग्रामं परित्यज्य मथुरां याहि भूसुर!।
नान्यत्र तव शुद्धिः स्यादित्यवेहि प्रयाहि च ॥३९॥
श्रुत्वा वृद्धस्य तद्वाक्यं मथुरां ते त्रयो ययुः।
पत्नी च शालकस्तेन जामात्रा सिद्धविद्यया ॥४०॥
उत्पतता व्योममार्गे त्वानीतौ मथुरां प्रति।
ब्राह्मणेभ्यो बहिःस्थाने वसतिं चक्रुरादरात् ॥४१॥

मथुरायां तदा राज्ञः सत्रे वै कुशिकस्य च ।
विप्राणां द्वे सहस्रे तु भुञ्जते मेध्यमन्वहम् ॥४२॥
ब्रह्मयज्ञकृतोच्छिष्टं भुंजते ते त्रयस्ततः ।
चक्रतीर्थे समासाद्य स्नानं च कुर्वते सदा ॥४३॥
पत्नी यज्ञप्रसादं स्वपतिं भिक्षाऽऽगतं निशि ।
भोजयित्वा प्रभुंक्ते च वर्षार्धे विगतं तथा ॥४४॥
ततो भिक्षार्थमायातं सिद्धं पप्रच्छुरादरात् ।
विप्रा यज्ञप्रकर्तारः कुत्र सन्तिष्ठसे द्विज ! ॥४५॥
भोजनं कुरुषे कुत्र स्थित्वा वद यथातथम् ।
सिद्धश्च कथयामास वृत्तान्तं स्वात्मनो हितम् ॥४६॥
भिक्षां त्वत्र गृहीत्वाऽहं भार्यया शालकेन च ।
सहितश्चक्रतीर्थेऽत्र समाप्लाव्य विभज्य च ॥४७॥
भोजनं वै करोम्यत्र ब्रह्महत्यानिवृत्तये ।
तच्छ्रुत्वा ब्राह्मणाः सर्वे ऊचुः शुद्धोऽसि वै द्विज ! ॥४८॥
चक्रतीर्थप्रभावेण पापान्मुक्तोऽसि सर्वथा ।
विप्राणां वचनाच्चैव पुनः शुद्धोऽसि वै द्विज ! ॥४९॥
इति विप्रकृतां शुद्धिं चक्रतीर्थकृतां तथा ।
प्रायश्चित्तकृतां चापि प्रसादस्याऽशनात्तथा ॥५०॥
प्राप्य सिद्धः प्रमुमोद सभार्याशालकस्तथा ।
चक्रतीर्थे समागत्य भिक्षां भोक्तुं व्यवस्थितः ॥५१॥
पत्नी हृष्टेन मनसा भर्तारं वाक्यमब्रवीत् ।
भोजनं कुरु विप्रेन्द्र ! हत्यां लक्ष्यामि ते गताम् ॥५२॥
चक्रतीर्थप्रभावेण हत्या नष्टा द्विजोत्तम ! ।
तस्मादत्र मथुरायां नित्यं स्थातव्यमेव ह ॥५३॥
ते व्यवस्य त्रयस्तत्र मथुरायां सदा स्थिताः ।
कलापं संपरित्यज्य मथुरा भुक्तिमुक्तिदा ॥५४॥
भद्रेश्वरं तु तत्तीर्थं सिद्धसेवितमित्यथ ।
कलापाद्धि शतगुणं चक्रतीर्थं हि पुण्यदम् ॥५५॥
अहोरात्रोपवासेन ब्रह्महत्या विनश्यति ।
किं तस्य तु कलापेन बाराणस्याऽथवापि किम् ॥५६॥
मथुरा यदि संलब्धा चक्रतीर्थं च सेवितम् ।
अपि कीटः पतंगो वा जायते स चतुर्भुजः ॥५७॥
कालधर्मं समापन्नास्त्रयस्ते ब्राह्मणाः प्रिये ! ।
प्रापुर्मे दिव्यगोलोकं चतुर्भुजा हि शाश्वताः ॥५८॥
शृणु चान्यत् प्रवक्ष्यामि बलं वैकुण्ठतीर्थजम् ।
मिथिलावासिनो लोकास्तीर्थार्थं मथुरां गताः ॥५९॥
वैकुण्ठतीर्थमासाद्य स्थितास्तेषां तु भूसुरः ।
कश्चिदासीद् ब्रह्महत्यापापेन स्वतिपीडितः ॥६०॥
रुधिरस्य तु वै धारा स्रवन्ती तस्य हस्ततः ।
प्रत्यक्षा दृश्यते बहुतीर्थस्नानेऽपि नो गता ॥६१॥
किन्तु वैकुण्ठतीर्थस्य स्नानेन विलयं गता ।
विस्मयो नात्र कर्तव्यो वैकुण्ठस्य फलं हि तत् ॥६२॥
अत्र स्नाता पापशून्यो वैकुण्ठं प्रतिगच्छति ।
पुनरन्यत् प्रवक्ष्यामि लक्ष्मि ! गन्धर्वकुण्डजम् ॥६३॥
माहात्म्यं, स्नानकर्ताऽस्मिन् गन्धर्वैः सह मोदते ।
माथुरं मण्डलं पद्मं योजनानां तु विंशतिः ॥६४॥
कर्णिकायामहं कृष्णो मृतानां मुक्तिदः सदा ।
पश्चिमेऽहं हरिर्गोवर्धनधारी वसामि च ॥६५॥
गोविन्दश्चोत्तरे पूर्वे विश्रान्तौ देवविश्रमः ।
दक्षिणेऽहं वराहोऽस्मि महाकायोऽतिकेशवान् ॥६६॥
कृते युगे नृपतिना मान्धात्रा तोषितोऽस्म्यहम् ।
मया तुष्टेन हि तस्मै प्रतिमा मम चार्पिता ॥६७॥
कपिलेन भगवता तैजसी दिव्यरूपिणी ।
मनसा निर्मिता रम्या वाराही प्रतिमा शुभा ॥६८॥
इन्द्रोऽपि ध्यायति नित्यं कपिलात् प्राप्य सौकरीम् ।
मूर्तिं स्वभवने समर्चयति स्म समादरात् ॥६९॥
रावणोऽपि गतः शक्रं विजेतुं स्वर्गमित्यपि ।
शक्रं जित्वा प्रविष्टस्तद्भवने तत्र सौकरम् ॥७०॥
रूपं दिव्यं रावणं वै बबन्ध बहुरश्मिभिः ।
रावणश्च स्तुतिं चक्रे त्रातुमर्हसि माधव ! ॥७१॥
मम त्वं भक्तियुक्तस्य प्रसादं कुरु सर्वथा ।
तदा प्रसन्नो भगवान् मुमोच रावणं हरिः ॥७२॥
रावणोऽपि तदा मूर्तिं लंका नेतुमियेष यत् ।
तामुद्धर्तुमशक्नन्न तदातिविस्मयं गतः ॥७३॥
नेमे तत्पादयोः प्राह लंकां नेतुं ममाऽऽशयः ।
वाराहः प्राह रक्षस्त्वमवैष्णवोऽसि तेन वै ॥७४॥
नाऽऽगमिष्ये ततो भूया वैष्णवश्चेन्नयस्व माम् ।
रावणो वैष्णवो भूत्वा नीतवान्नगरीं तु ताम् ॥७५॥
रामेण रावणो नाशं गमितः प्रतिमा तु सा ।
आनीता स्वनगरीं च पूजिता बहुवत्सरान् ॥७६॥
तेन शेषस्वरूपः स्वभ्राता रक्षोविनाशने ।
योजितः स मथुरायां समागत्य तु राक्षसान् ॥७७॥
नाशयामास च तत्र वाराहीं प्रतिमां हि ताम् ।
आनयामास रक्षार्थं स्थापयामास वै विधेः ॥७८॥
धन्येयं माथुरी पृथ्वी धन्या लोकाश्च तद्गताः ।
यैः सदा स्नापितो दृष्टः स्पृष्टो ध्यातोऽनुचर्चितः ॥७९॥

पूजितश्च वराहोऽयं मोक्षं दास्यति सर्वथा ।
वराहसन्निधौ पिण्डदानान्मुक्तास्तु पूर्वजाः ॥८०॥
भवत्येव गयाश्राद्धफलं पुष्करजं फलम् ।
श्वेतं वाराहमालोक्य विश्रान्तिं लोकयेत्तथा ॥८१॥
गोविन्दं च समालोक्य गोवर्धनधरं ततः ।
विलोकयेदिति लक्ष्मि ! कथितो महिमा च ते ॥८२॥
य इदं शृणुयाच्चापि पठेद्वा पाठयेत्तथा ।
तस्य वर्णितपुण्यानां प्राप्तिः स्यान्मोक्षणं भवेत् ॥८३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये चक्रतीर्थे कलापग्रामवास्तव्यविप्रस्य ब्रह्महत्यापातकनाशाख्यानं, मुक्तिश्च । वैकुण्ठतीर्थे मिथिलाया विप्रस्य ब्रह्महत्यापातकनाशाख्यानं, कपिलभगवता मनसोत्पादितवाराहस्य परम्परया मथुरायां प्रतिष्ठानमित्यादिनिरूपणनामा सप्तचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥ ३४७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महापुण्यं स्थलं गोवर्धनात्मकम् ।
मथुरायाः पश्चिमे तद् वर्तते योजनद्वये ॥ १ ॥
भुक्तिमुक्तिप्रदं क्षेत्रं प्रक्रमणेन देहिनाम् ।
ह्रदस्यत्र पापनाशकरः स्नानेन वै नृणाम् ॥ २ ॥
ऐन्द्रं पूर्वे यमतीर्थं दक्षिणे वर्तते प्रिये ! ।
पश्चिमे वारुणं तीर्थं कौबेरं तूत्तरेण वै ॥ ३ ॥
तत्तत्तीर्थे स्नानकर्ता तत्तल्लोके महीयते ।
प्राणत्यागे मम स्मर्ता मम लोकं प्रगच्छति ॥ ४ ॥
अन्नकूटस्थलं प्राप्य तस्य कुर्यात्प्रदक्षिणम् ।
स याति परमं लोकं धनधान्यादिसमृद्धिमत् ॥ ५ ॥
स्नात्वा मानसगंगायां दृष्ट्वा गोवर्धने हरिम् ।
अन्नकूटं परिक्रम्य न जनुर्जायते पुनः ॥ ६ ॥
सोमवारे त्वमायां वै गत्वागोवर्धनस्थलम् ।
पितॄन् सन्तर्पयेद् गयापिण्डतृप्तिस्तदा भवेत् ॥ ७ ॥
गोवर्धनं परिक्रम्य दृष्ट्वा कृष्णनरायणम् ।
राजसूयाऽश्वमेधानां पुण्यमाप्नोत्यसंशयम् ॥ ८ ॥
मासि भाद्रपदे शुक्लैकादश्यां समुपोषयेत् ।
स्नात्वा मानसगंगायां ब्राह्मे सूर्यस्य दर्शनम् ॥ ९ ॥
कृत्वा गोवर्धनं नत्वा शृंगे नत्वा हरिं स्थितम् ।
अवतीर्य सोपवासा कुर्याद् गिरेः प्रदक्षिणम् ॥१०॥
पुण्डरीकं स्थलं गच्छेत् कुण्डे स्नानं समाचरेत् ।
पितृदेवानर्चयेच्च पुण्डरीकं प्रपूजयेत् ॥११॥
एवं विधानकर्ता स प्रयाति भवनं हरेः ।
ततश्चाप्सरसे कुण्डे स्नायात् पितॄंश्च तर्पयेत् ॥१२॥
राजसूयाऽश्वमेधानां फलं विन्देत्तु तेन वै ।
तत संकर्षणे तीर्थे स्नायात् तर्पणमाचरेत् ॥१३॥
गोहत्याब्रह्महत्यादिपापानां विलयो भवेत् ।
अन्नकूटस्य निकटे शक्रतीर्थे ततश्चरेत् ॥१४॥
मखभंगो महेन्द्रस्य यत्र कृष्णेन वै कृतः ।
इन्द्रो ववर्ष रोषेण सर्वनाशेच्छया तदा ॥१५॥
कृष्णेन च गवादीनां रक्षणाय धृतो गिरिः ।
तत्र च भोजिता देवा देव्यो गावो महर्षयः ॥१६॥
गोपा गोप्यः पतंगाद्याः कीटाः पशवः पक्षिणः ।
सोऽन्नकूट इति नाम्ना ख्यातोऽभवद्गिरिस्तथा ॥१७॥
तत्र भोजनदानेन जलार्पणेन वै तथा ।
तर्पणेन च यात्रालुः शतयज्ञफलं लभेत् ॥१८॥
ततः कदम्बकुण्डे वै स्नातव्यं ब्रह्मलोकदे ।
ततो देवगिरिं गच्छेत् स्नायात् पश्येच्च भावतः ॥१९॥
महादेवं प्रपश्येच्च कुण्डे पितॄन्प्रतर्पयेत् ।
वाजपेयफलं प्राप्य स्वर्गे भुक्त्वा हरिं व्रजेत् ॥२०॥
गंगायाश्चोत्तरं यावद् देवदेवस्य चक्रिणः ।
स्थले कृष्णस्य संग्रामोऽरिष्टा सुरेणचाऽभवत् ॥२१॥
वृषासुरं हरिर्हत्वा स्नातस्तत्र पुनः पुनः ।
राधया तु समागत्य कृष्णः संस्नापितस्तदा ॥२२॥
राधाकुण्डमिति नाम्ना ख्यातं पापहरं शुभम् ।
तत्र स्नानेनाश्वमेधराजसूयफलं भवेत् ॥२३॥
गोनरब्रह्महत्यायाः पापं स्नानेन नश्यति ।
मोक्षराजाख्यतीर्थे च नत्वेन्द्रध्वजमाव्रजेत् ॥२४॥
इन्द्रध्वजोच्छ्रये तीर्थे स्नात्वा नत्वा समाव्रजेत् ।
पञ्चतीर्थाऽभिधं कुण्डं गच्छेद् यात्रां समापयेत् ॥२५॥
यात्राफलं श्रीहरये निवेद्य निशि जागरम् ।
गोवर्धने प्रकर्तव्यं द्वादश्यां च ततः प्रगे ॥२६॥
स्नात्वा पिण्डं तु निर्वाप्य नत्वा गच्छेद् भजन् हरिम् ।
य एवं कुरुते यात्रां पितॄन् स तारयत्यपि ॥२७॥
पापानि संविनिर्धूय परंब्रह्माऽधिगच्छति ।
अषाढेऽपि प्रकर्तव्यमन्नकूटपरिक्रमम् ॥२८॥
एतत्तु शृणुयाद् यश्च पठेच्च पाठयेत्तथा ।
यात्राफलं लभेत् स्नानफलं कृष्णप्रसन्नताम् ॥२९॥

श्रृणु लक्ष्मि ! सुशीलाख्यो वैश्यो वै दक्षिणापथे ।
प्रतिष्ठानपुरावासो बहुपुत्रः समृद्धिमान् ॥३०॥
उदरंभर एवाऽसौ कुटुम्बभरणे रतः ।
स्नानं दानं जपं होमं देवार्चां न करोति सः ॥३१॥
सतां समागमश्चापि कदापि तेन न कृतः ।
कथायाः श्रवणं धर्मकार्यं चापि कृतं नहि ॥३२॥
देवानां ब्राह्मणानां च भक्तिस्तस्य न विद्यते ।
पापमग्नस्य तु बुद्धिर्धर्मदानाय नाऽभवत् ॥३३॥
मतिदातारमाभर्त्स्य तिरस्करोति सर्वथा ।
एवं वै वर्तमानस्य कालेन मरणं ह्यभूत् ॥३४॥
निरुदकस्थले शुष्के प्रेतत्वं समुपागतः ।
मरुदेशे क्षुधाविष्टो भ्रमन् तिष्ठति दुःखितः ॥३५॥
मरौ स्तम्बे वसति स्म प्रेतो रौद्रो भयानकः ।
दीर्घदंष्ट्रो लम्बहनुर्बिडालास्यो महोदरः ॥३६॥
तत्र गतेन मार्गेण क्रयविक्रयकारकः ।
निर्जगाम वणिक् कश्चित् तं नृत्यन्नब्रवीत्तदा ॥३७॥
भक्ष्यं प्राप्तं मया त्वं वै क्वाऽधुना यातुमिच्छसि ।
मांसं ते भक्षयिष्यामि पास्यामि तव शोणितम् ॥३८॥
प्रेतस्य वचनं श्रुत्वा धैर्यं कृत्वाऽऽह तं वणिक् ।
कुटुम्बभरणार्थाय गच्छामि धनवाञ्छया ॥३९॥
वृद्धः पिता मे भवने माता पत्नी पतिव्रता ।
मयि संभक्षिते रक्षः ! कुटुम्बं मे मरिष्यति ॥४०॥
पुनः पापेन युक्तस्त्वं प्रेतभावान्न मोक्ष्यसे ।
इत्याकर्ण्य स प्रेतस्तं पप्रच्छ कुत आगमः ॥४१॥
वणिक् प्राह मथुरायाः समागतोऽस्मि ते वनम् ।
गोवर्धनः शैलवरो यमुना च महानदी ॥४२॥
तयोर्मध्ये मथुरायां वसामि बहुवंशतः ।
धनप्राप्त्यै प्रगच्छामि देशान्तरं दरिद्रकः ॥४३॥
प्रेतः प्राह श्रृणु दीन ! यदि कार्यं कुरुष्व मे ।
समयेन हि मोक्ष्यामि गच्छ त्वं मथुरां प्रति ॥४४॥
स्नानं कृत्वा तु विधिवत् चातुःसामुद्रिके प्रहौ ।
पिण्डदानं कुरुष्व त्वं मम नाम्ना प्रयत्नतः ॥४५॥
स्नानस्य च फलं यच्छ मम मुक्तिर्भविष्यति ।
तव गृहे धनं त्वस्ति ! दारिद्र्यं नास्ति ते वणिक् ! ॥४६॥
सुवर्णभारो गर्तस्थो गृहे तिष्ठति सञ्चितः ।
निवर्तस्व सुसन्तुष्टः कुरु मे मोक्षणं वणिक् ! ॥४७॥
वणिक् प्राह कथं तेऽस्ति ज्ञानं कूपः प्रमोक्षकः ।
रक्षः प्राह प्रतिष्ठाने पुरेऽगस्त्यो महामुनिः ॥४८॥
लक्ष्मीनारायणसंहितायाः कथामवाचयत् ।
सायंकाले कथां श्रोतुं गतोऽहं विष्णुमन्दिरम् ॥४९॥
श्रुतो मया ततः कूपः प्रेतानां मोक्षदायकः ।
समुद्राः किल तिष्ठन्ति चत्वारस्तत्र संगताः ॥५०॥
इतिश्रुता कथा तत्र वाचकाय जनैर्बहु ।
दानं दत्तं मया शाठ्याद् दत्तो वै ताम्रढब्बुकः ॥५१॥
ततो मे संगते काले निधनं समपद्यत ।
यमराजनियोगेन पूर्वकर्मबलेन च ॥५२॥
प्रेतत्वं समनुप्राप्तो दानहोमविवर्जितः ।
तदा तीर्थं कृतं नैव पितरस्तर्पिता नहि ॥५३॥
धर्मकार्यं कृतं नैव प्राप्तोऽहं प्रेततां ततः ।
ढब्बुकस्य प्रभावेण कथायाः श्रवणेन च ॥५४॥
ज्ञानं तु विद्यतेऽद्यापि गच्छ मे मोक्षणं कुरु ।
विम्बाख्यस्तु वणिक् प्राह कथं जीवसि मे वद ॥५५॥
रक्षः प्राह मया नैजगृहांगणे प्ररोपितः ।
छायार्थं पिप्पलवृक्षो जलेन वर्धितस्ततः ॥५६॥
तस्य वर्षे द्विवारं च भवन्त्येव फलानि वै ।
जन्तवस्तेन जीवन्ति तत्पुण्येन ममापि च ॥५७॥
तृप्तिर्भवति मे नित्या जलान्नविहिता यथा ।
श्रुत्वा वणिक् समाश्वास्य प्रेतं च मथुरां ययौ ॥५८॥
द्रव्यं निष्कास्य वै भूमेः प्रेतकार्यं चकार ह ।
चतुःसामुद्रिके कूपे पिण्डदानं चकार सः ॥५९॥
प्रेतोऽसौ तत्र चागत्य पिण्डान् भुक्त्वा ययौ दिवम् ।
वणिक् द्रव्यं तथा प्राप्य मोदते स्म गृहे निजे ॥६०॥
तीर्थे लक्ष्मि ! गृहेऽरण्ये देवस्थाने च चत्वरे ।
यत्र तत्र मृताः पिण्डदानान्मुक्तिं प्रयान्ति ते ॥६१॥
अन्यत्र कृतपापस्य तीर्थे मुक्तिर्हि निश्चिता ।
मथुरायां कृतपापस्यापि कूपार्णवे क्षयः ॥६२॥
मथुरायां कृतं पाप तत्रैव तु विनश्यति ।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥६३॥
कृतघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा ।
मथुरां यमुनां प्राप्य मुच्यते सर्वकिल्बिषैः ॥६४॥
तिष्ठेद् युगसहस्रं तु पादेनैकेन यः कश्चित् ।
ततोऽधिकं भवेत्पुण्यं मथुरायां निवासिनः ॥६५॥
मथुरावासिनः सर्वे दिव्या देवा हि मानवाः ।
तीर्थस्नानरतास्तेऽपि देवा वै नरमूर्तयः ॥६६॥
अन्यत्र विप्रसाहस्रपूजनेन तु यत्फलम् ।
एकेन पूजितेनात्र माथुरेण फलं भवेत् ॥६७॥

अनृग् वै माथुरो यत्र चतुर्वेदस्तथाऽपरः ।
न तु वेदैश्चतुर्भिः स्यान्माथुरेण समः क्वचित् ॥६८॥
भवन्ति सर्वतीर्थानि पुण्यान्यायतनानि च ।
मंगलानि तु सर्वाणि यत्र वै माथुरो द्विजः ॥६९॥
सर्वे मोक्षास्तत्र भूता भविष्यन्ति च देहिनाम् ।
यत्र वै माथुरं तीर्थे यमुनाया जलं तथा ॥७०॥
मथुरावासिनो बोध्याः पार्षदा वै चतुर्भुजाः ।
पठनाच्छ्रवणात्त्वस्य चतुर्बाहुत्वमाप्नुयात् ॥७१॥
शृणु त्वन्यत् प्रवक्ष्यामि माहात्म्यमसिकुण्डजम् ।
पुण्यनगरवास्तव्यो राजाऽभूद् विमतिः पुरा ॥७२॥
विमतेस्तु गृहे तत्र त्वागतो नारदः क्वचित् ।
तस्मै पाद्यं तथाऽर्घ्यं च दत्तवान् विमतिस्तदा ॥७३॥
प्रतिगृह्य ततस्तं च नारदः प्राह धर्मभृत् ।
आनृण्यं ते पितुः कर्तुं समर्थोऽसि नृपेश्वर ॥७४॥
मम मित्रं पिता ते मे समासीन्मानदः सदा ।
सुमतिनामकस्तस्य निधनोत्तरमेव तु ॥७५॥
कृतं त्वया महादानं पुण्यं चाप्यतिपुष्कलम् ।
तीर्थयात्रा कृता नैव तयाऽऽनृण्यं भवेत् पितुः ॥७६॥
पितुरनृणतां कृत्वा पुत्रोऽस्य धर्मभाग् भवेत् ।
एवमुक्त्वा नारदस्तु ययौ वै बदरीवनम् ॥७७॥
राजापि च ततोऽप्यैच्छत् तीर्थयात्रां पितुः कृते ।
तस्य बुद्धिः समुत्पन्ना गच्छामो मथुरां पुरीम् ॥७८॥
इति निश्चित्य राजाऽसौ त्वागतो मथुरां पुरीम् ।
चतुरो वार्षिकान्मासान्मथुरायां वसामि वै ॥७९॥
सर्वतीर्थानि चात्रैव चातुर्मास्ये वसन्ति च ।
इति विचार्य राजा स वासं दीर्घं चकार वै ॥८०॥
सहस्रमानवैर्युक्तो दासदासीप्रसेवितः ।
भृत्यास्तीर्थेषु सर्वत्र कुर्वन्ति मलवर्जनम् ॥८१॥
दासा दास्यः शूद्रवर्णा व्रताहेष्वपि मैथुनम् ।
कुर्वन्ति च तथा स्नान्त्यमर्यादं तीर्थवारिषु ॥८२॥
प्रसह्य ब्राह्मणादीनां नयन्त्युपस्करादिकम् ।
निन्दन्ति साधून् विप्रांश्च कथां च भर्त्सयन्ति वै ॥८३॥
मूत्रत्यागादिकं देवभूमौ कुर्वन्त्यथरोधिनः ।
मत्स्यान् खादन्ति तान्पापान् राजा दण्डं करोति न ॥८४॥
तत्पापं दुष्टताराज्ञः शिरस्येव भवत्यपि ।
मासे गते च तीर्थानि दुःखादूचुः परस्परम् ॥८५॥
राजा त्वस्मात् स्थलान्निष्कासनीयः सुखहेतवे ।
युद्धं विमतिना सार्धं स्वयं कर्तुं न शक्नुमः ॥८६॥
कल्पग्रामं वयं गत्वा वराहं परमेश्वरम् ।
कष्टं निवेदयामः स योग्यं सम्यक् करिष्यति ॥८७॥
कल्पग्रामे गतान्येव प्रार्थयांचक्रुरादरात् ।
जय विष्णो जय पृथ्वीपते राजपते जय ॥८८॥
तीर्थकष्टविनाशार्थं नारायण नमोऽस्तु ते ।
श्रुत्वा वराहभगवान् प्राह तीर्थानि सादरम् ॥८९॥
वरं वृणुत भद्रं वो यद्वो मनसि वर्तते ।
तीर्थान्यूचुर्हरे कृष्ण नोऽभयं दातुमर्हसि ॥९०॥
सुपापिना विमतिना कृतस्त्रासः सुदारुणः ।
तं नियच्छस्व पापिष्ठं मांसादं पापिसेवितम् ॥९१॥
श्रीवराहस्तदा प्राह हनिष्यामि महारिपुम् ।
एवं तीर्थनियोगेन त्वागतो मथुरां पुरीम् ॥९२॥
वाराहः स्वासिना राज्ञा युद्धं चकार दारुणम् ।
सूदयामास राजानं वराहः स्वासिना ततः ॥९३॥
खड्गं स्वस्य धरायां च धाराग्रं निहितं भुवि ।
क्षणं विश्रान्तिलाभाय निषसाद भुवस्तले ॥९४॥
सा भूमिः पावनी यत्र कुण्डं देवर्षिभिः कृतम् ।
असिकुण्डं तु तत्प्रोक्तं तीर्थं परमपावनम् ॥९५॥
द्वादश्यां वा चतुर्दश्यां कुण्डस्नानं हि मुक्तिदम् ।
तदा वराहतीर्थेऽहं तिष्ठामि मोक्षदानकृत् ॥९६॥
तीर्थे तत्र प्रदातव्या मूर्तयो मे चतुर्विधाः ।
एका वराहसंज्ञा च नारायणी द्वितीयका ॥९७॥
वामनस्य तृतीया च चतुर्थी राघवस्य च ।
एतासां दर्शनं पूजा प्रतिष्ठा दानमित्यपि ॥९८॥
कर्तव्यं सर्वथा तत्र मोक्षभाक् स भवेत्ततः ।
एताश्चतस्रो यः पश्येत् स्नात्वा कुण्डेऽसिनामके ॥९९॥
चतुःसागरपर्यन्ता क्रान्ता तेन वसुन्धरा ।
माथुराणां च तीर्थानां फलभाक् स भवेद्ध्रुवम् ॥१००॥
सुप्तोत्थितोऽपि द्वादश्यामसिकुण्डाप्लुतो नरः ।
मूर्तीः पश्यति यस्तास्तु ब्रह्मभूयाय कल्पते ॥१०१॥
नास्ति तत्पुनरावृत्तिर्नारायणप्रसादतः ।
पठनाच्छ्रवणात्त्वस्य भुक्त्वा मुक्तिं व्रजेत् खलु ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये गोवर्धनाऽन्नकूटतदन्यतीर्थप्रदक्षिणम्, प्रेतरूपस्य सुशीलवैश्यस्योद्धारः, वाराहेणविमतेर्नाशेऽसिकुण्डं वाराहक्षेत्रमाहात्म्यं चेत्यादिनिरूपण-नामाऽष्टचत्वारिंशदधिकत्रिशततमोऽध्यायः ॥३४८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! यमुनाया विश्रान्तिघट्टनिर्वचः।
उज्जयिन्यामभूद् विप्रो भ्रष्टाचारः प्रणास्तिकः॥ १॥
सदाचारपरित्यागी न तु स्नानं करोति सः।
स न पूजयते देवान्न स साधूत्रमस्यति॥ २॥
कामनाव्याकुलः सन्ध्याशयनः पितृनिन्दकः।
श्राद्धखण्डनकर्ता च पापसंगः सुदुर्मतिः॥ ३॥
स्वकुटुम्बोदरभरश्चौर्यादिभिः सदा निशि।
एकदा स निशि चौर्यं कुर्वाणः पापिभिः सह॥ ४॥
राजभटैर्वीक्ष्यमाणो द्रवन्वेगाद्विमार्गगः।
पलायमानः स परमन्धकूपेऽपतत्तदा॥ ५॥
मृतोऽसौ पतितश्चाथ राक्षसत्वमुपागतः।
स तु पार्श्वगमार्गस्थजीर्णवृक्षे वसन् सदा॥ ६॥
पशून्पक्षवतः प्राणान् रक्तं पिबति खादति।
कदाचित्तेन मार्गेण महान्सार्थ उपागतः॥ ७॥
तन्मध्यस्थेन विप्रेण रक्षोघ्नमन्त्ररक्षितः।
सार्थः सुष्वाप सुश्रान्तो वृक्षाऽधःकूपसन्निधौ॥ ८॥
तत्रागत्य च रक्षस्तु ब्राह्मणं प्राह भो द्विज!।
अहं दास्यामि ते द्रव्यं यत्ते मनसि वर्तते॥ ९॥
बहुकालेन संप्राप्तं भोजनं बहुमानवम्।
देहि भक्षयितुं विप्र! गच्छान्यत्र कृपां कुरु॥१०॥
येनाऽहं भक्षये सार्थं यावत् तृप्तिर्भवेन्मम।
विप्रः प्राह कृतघ्नोऽहं न भवामि कथंचन॥११॥
दुष्टेन मम का मैत्री को लाभो रक्षसा सह।
रक्षसा मित्रतालाभौ प्राणान्तामन्त्रणाप्रदौ॥१२॥
सार्थेन मम लाभोऽस्ति न त्वया तु कथंचन।
एकसार्थप्रयातोऽहं नोत्सृजामि सहार्थकम्॥१३॥
तस्माद् राक्षस! गच्छ त्वं विहाय मम सार्थकम्।
निरीक्षितुं न शक्तोऽसि मम मन्त्रबलेन वै॥१४॥
रक्षः प्राह हृते भक्ष्ये मे दोषस्ते भविष्यति।
दयां कुरु त्वं विप्रेन्द्र! भोजनं मम दीयताम्॥१५॥
एवमर्थमर्थयन्तं पप्रच्छ राक्षसं द्विजः।
केन कर्मप्रदोषेण राक्षसत्वमुपागतः॥१६॥
रक्षः प्रकथयामास चौर्याऽनाचारदूषणैः।
विप्रोऽपि पापकार्यैश्च राक्षसत्वमुपागतः॥१७॥
तदा सार्थगतः क्ष्मादेवोऽपि श्रुत्वा कृपां गतः।
उवाच रक्षो वद मे मार्जयामि द्विजस्य ते॥१८॥
यानि कानि च पापानि मुक्तिश्चापि यथा भवेत्।
मया कृतोपकारेण प्रियं किं करवाणि ते॥१९॥
श्रुत्वाऽऽह राक्षसो विप्रं त्वया यात्रा बहुकृता।
मथुरायां तु यत् स्नानं कृतं विश्रान्तितीर्थके॥२०॥
तच्च स्नानफलं देहि येन मुक्तिं व्रजाम्यहम्।
विप्रः पप्रच्छ तच्छ्रुत्वा राक्षसं प्रागुदन्तकम्॥२१॥
कथं जानासि रक्षस्त्वं तीर्थं विश्रान्तिसंज्ञकम्।
कथं च तादृशी संज्ञा सर्वं कथय वित्सि चेत्॥२२॥
राक्षसः प्राह विप्रेन्द्र! उज्जयिन्यां पुरा मम।
पुर्यां वासः सदाऽऽसीन्मे तत्र वै विष्णुमन्दिरे॥२३॥
लक्ष्मीनारायणसंहितायाः कथां तु भूसुरः।
करोति नित्यमेवातिभावतो जनताकृते॥२४॥
विश्रान्तितीर्थमाहात्म्यं श्रुतं द्विज मया तदा।
तस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता॥२५॥
सा तु संज्ञा श्रुता तत्र विश्रान्तेरर्थबोधिका।
वासुदेवः परं ब्रह्म कृष्णनारायणो हरिः॥२६॥
विश्रामं कुरुते नित्यं यत्र वै यमुनातटे।
तत्स्थानं जलसान्निध्ये विश्रान्तिसंज्ञकं ह्यभूत्॥२७॥
तत्र स्नाता कोटियुगान्स्वर्गं भुक्त्वा ततः परम्।
वैराजसंज्ञकान् लोकान् भुक्त्वा याति परं पदम्॥२८॥
तस्मात् प्रयच्छ विप्रेन्द्र! ह्येकस्नानस्य मे फलम्।
येन मे राक्षसभावान्मुक्तिः स्वर्गगतिस्तथा॥२९॥
अन्ते मुक्तिर्भवेच्चापि कृपां कुरु ममोपरि।
राक्षसस्य वचः श्रुत्वा सार्थविप्रोऽब्रवीत्तदा॥३०॥
एकस्नानस्य हि फलं तव दत्तं तु राक्षस!।
इत्यभिधाय यावत् स जलं ददाति रक्षसे॥३१॥
तावच्छुद्धो दिव्यतनुमवाप्य स दिवं ययौ।
तत्र भोगानपरान् भुक्त्वा मोक्षमवाप पद्मजे॥३२॥
ततः सार्थः स विप्रो हि ययौ देशं प्रति स्वकम्।
शृणु लक्ष्मि! पुरा शंभुर्हरेस्तोषणहेतवे॥३३॥
चकारोग्रं तपस्तेन प्रसन्नः सन्नहं तदा।
शंकरं तु समागत्य दत्वा दर्शनमेव मे॥३४॥
वरं वरय चेत्युक्तो वव्रे मत्तो वरं हरः।
यदि तुष्टोऽसि भगवन्! मथुराक्षेत्रमण्डले॥३५॥
यत्र क्वापि च मे स्थानं सदा कृष्ण! प्रदीयताम्।
तदा मया कथितं त्वं क्षेत्रपालो भविष्यसि॥३६॥
त्वयि दृष्टे महादेव! मम क्षेत्रफलं भवेत्।
मम क्षेत्रस्य संरक्षां कुरु शंभो! सदाऽभितः॥३७॥

मम क्षेत्रप्रवेशे च संसारो वै निवर्तते।
यथा वैकुण्ठनगरी वल्लभा मथुरा मम ॥३८॥
विंशतिर्योजनानां हि माथुरं मम मण्डलम्।
पदे पदेऽश्वमेधानां फलं मद्योगतो भवेत् ॥३९॥
अत्र तिष्ठन्ति तीर्थानि स्वर्गमोक्षप्रदानि वै।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥४०॥
इति श्रुत्वा वरं प्राप्य शंभुस्तत्रैव संस्थितः।
क्षेत्रपालस्वरूपो मे भक्तराड् वैष्णवः परः ॥४१॥
इति ते कथितं लक्ष्मि! माहात्म्यं मोक्षदं परम्।
ये पठन्ति च शृण्वन्ति ते यान्ति परमं पदम् ॥४२॥
कुलान्यपि तारयन्ति द्वे शते विंशयोर्द्वयोः।
प्राप्ते च मरणे तीर्थं स्मरेद् यो माथुरं जनः ॥४३॥
स गच्छेत् परमां सिद्धिमिह संसारनाशिनीम्।
सर्वेषामेव तीर्थानां माथुरं परमं महत् ॥४४॥
कृष्णेन क्रीडितं तीर्थं तच्छुद्धं हि पदे पदे।
दक्षिणोत्तरवसुधामण्डलं माथुरं सदा ॥४५॥
गृहान्निःसृत्य मौनेन यावत्स्नानं हि वर्तयेत्।
प्रपूजानन्तरं ब्रूयाद् धेनूर्दद्यात्पयस्विनीः ॥४६॥
हिरण्यं च वसु दद्याद् भोजयेद् भूसुरान् सतः।
चातुर्मास्ये मथुरायां वसेद् दादानि वर्तयेत् ॥४७॥
न तस्य पुनरावृत्तिर्मम लोके महीयते।
माथुरे तु मृता लक्ष्मि! मम लोकं व्रजन्ति वै ॥४८॥
अन्यत्र च मृतानां वै दाहे माथुरमण्डले।
कृते स्वर्गे तथा वासो मम गोलोकधामनि ॥४९॥
माथुराणां तु यद्रूपं तद्रूपं मे चतुर्भुजम्।
माथुरेण तु तृप्तेन तृप्तोऽहं वार्धिजे! सदा ॥५०॥
शृणु लक्ष्मि! यथावृत्तं गरुडस्य महात्मनः।
आगतस्य मथुरायां कृष्णदर्शनकांक्षया ॥५१॥
कृष्णस्याऽग्रे गरुडः स स्तुतिं चक्रे ननाम च।
जय लक्ष्मीपते! कृष्ण! जयस्व माणिकीपते! ॥५२॥
प्रभापते! जय राधापते! श्रीपार्वतीपते!।
जय विष्णो! जय कृष्णनारायण! रमापते! ॥५३॥
जय गोपीपते! कृष्ण! गरुडाधिपते! जय।
जय सर्वपते! ब्रह्म जय कृष्ण! नमोऽस्तु ते ॥५४॥
इत्येवं संस्तुतो देवो गरुडेन महात्मना।
गरुडस्य पुरः कृष्ण स्थितोऽभूत् सुशरीरवान् ॥५५॥
उवाच पक्षिराट् किं ते चिकीर्षितं तथाऽऽगमः।
वद शीघ्रं प्रदास्येऽहं श्रुत्वाऽऽह गरुडस्तदा ॥५६॥
मथुरामागतश्चाऽहं तव दर्शनकांक्षया।
न दृष्टं तव रूपं च मां तु मोहः समाविशत् ॥५७॥
मथुरायां भवान् लोकैः समं धृत्वा स्वरूपकम्।
वर्तते न मया ज्ञातस्ततो मां मोहमाविशत् ॥५८॥
इदानीं दिव्यरूपं ते दृष्ट्वा शान्तिरभूत्तु मे।
गरुडस्य वचः श्रुत्वा प्रहस्योवाच माधवः ॥५९॥
माथुराणां स्वरूपेण वर्ताम्यहं द्विजोत्तम।
ये पापस्ते न पश्यन्ति मद्रूपान् माथुरान् जनान् ॥६०॥
अहं वसामि तत्रैव विचरामि क्वचित् पृथक्।
एवमुक्त्वा ततः कृष्णस्तत्रैवान्तरधीयत ॥६१॥
गरुडोऽपि गतः कृष्णपदे वैकुण्ठमेव ह।
माथुरा मथुरायां वै स्थित्वा देवत्वमागताः ॥६२॥
पवित्रयन्ति सर्वांस्ते यथा कृष्णस्य पार्षदाः।
अपि कीटः पतंगो वा तिर्यग्योनिस्थितोऽपि वा ॥६३॥
चतुर्भुजा भवन्त्येव श्रीकृष्णस्य प्रतापतः।
अथ लक्ष्मि! शृणु त्वन्यत् चमत्कारं तु माथुरम् ॥६४॥
सौराष्ट्रस्य रैवताद्रेर्वास्तव्यो ब्राह्मणो हरिः।
पत्नीव्रताभिधानः स्वकुटुम्बेन पुरा युगे ॥६५॥
यमुनायास्तु यात्रार्थं गतो माथुरमण्डलम्।
विश्रान्तौ स यमुनायां स्नातश्चक्रे प्रदक्षिणम् ॥६६॥
मथुरायास्तथा गोवर्धनस्याऽन्यवनस्य च।
बृन्दावनस्य तुलसीवनस्यापि प्रदक्षिणम् ॥६७॥
भोजयित्वा बहून् विप्रान् नीत्वा तीर्थजलानि च।
न्यवर्तत स्वकं देशं मरुदेशः समागतः ॥६८॥
तत्राऽरण्ये शमीप्राये शुष्के शृंगमये स्थले।
ददर्श डाकिनीशाकिनीनां सार्धं शतोत्तरम् ॥६९॥
नृत्यन्तं भक्षय खादयेति ब्रुवन्तमुद्धतम्।
वीरूपं च विवस्त्रं च कृष्णवर्णं भयंकरम् ॥७०॥
कृत्यासार्थं विलोक्यैव पत्नीव्रतस्तु तत्क्षणम्।
चक्रं सस्मार कृष्णस्य द्रागेवोपस्थितं ज्वलत् ॥७१॥
प्रेतस्वरूपिकास्तास्तच्चक्रं ददाह बाह्यतः।
रुरुदुस्ताश्चुक्रुशुश्च प्रार्थयांचक्रुरत्यति ॥७२॥
त्राहि ब्रह्मन्! न भक्ष्यामो मरिष्यामोऽत्र रक्ष नः।
वयं मरुनृपतेर्वै पत्न्योऽभवन् शतोत्तरम् ॥७३॥
मद्यमांसाशनाः पापकारिण्यो धर्मवर्जिताः।
महामारीमहारोगे राजा तु निधनं गतः ॥७४॥
राज्यं हृतं त्रिपुरेण भ्रष्टास्तेन कृता वयम्।
भूकम्पे भवने भग्ने सर्वास्तत्राऽर्दिता मृताः ॥७५॥

डाकिनीशाकिनीभौतियोनिं गताः स्म भूसुर ! ।
मोक्षं कुरु तदस्माकं तीर्थजलेन केशव ! ॥७६॥
श्रुत्वा पत्नीव्रतः सोऽयं कृष्णांशो ब्राह्मणो जलम् ।
यमुनायाः करे धृत्वा प्रोक्षयामास तास्तदा ॥७७॥
प्रेतरूपाणि सन्त्यज्य दिव्याश्चतुर्भुजास्तु ताः ।
रमारूपास्तदा जाता नत्वा तुष्टुवुरादरात् ॥७८॥
कृष्णः स्वयं त्वमेवाऽसि ह्युद्धृता दुःखसागरात् ।
नय धाम स्वकं कृष्णेत्युक्ते विमानमागतम् ॥७९॥
विप्रः कृष्णस्वरूपः स गोलोकं तां निनाय वै ।
पुनः कुटुम्बसहितः स्वदेशं रैवतं ययौ ॥८०॥
इति विश्रान्तितीर्थस्य यमुनासलिलस्य च ।
प्रेतोद्धारकरं दिव्यं माहात्म्यं ते प्रकीर्तितम् ॥८१॥
कृष्णनारायणश्चाऽहं यमुनाजलसंगतः ।
यत्र तत्र तदा स्वर्गं गोलोकं मोक्ष एव च ॥८२॥
य इदं शृणुयाच्चापि वाचयेच्छ्रावयेत्तथा ।
तेषां लक्ष्मि ! भवेत् स्वर्गं गोलोके मुक्तिरेव च ॥८३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुराक्षेत्रमाहात्म्ये उज्जयिनीपुरीवासिभ्रष्टाचारविप्रस्य राक्षसत्वमुपगतस्य विश्रान्तिस्नानफलदानान्मुक्तिः, शंभुकृतक्षेत्रसंरक्षणं, गरुडस्य माथुररूपकृष्णाऽपरिचये स्तवनेन दिव्यदर्शनं, पत्नीव्रतविप्रात्मककृष्णनारायणकृतो विश्रान्तिजलप्रोक्षणेन डाकिनीशाकिनीशतोत्तरमोक्षश्चेत्यादिनिरूपणनामैकोनपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३४९ ॥

श्रीनारायण उवाच—

गोकर्णेश्वरमाहात्म्यं मथुरायां यमीतटे ।
कथयामि शृणु लक्ष्मि ! पुत्रस्वर्गप्रमोक्षदम् ॥ १ ॥
आसीद् विप्रः सुभद्राख्यः पारिभद्रस्य पुत्रकः ।
वैश्यवृत्तिसमायुक्तः क्रयविक्रयजीवनः ॥ २ ॥
सौराष्ट्रे विषये शत्रुंजितानदीतटे वसन् ।
कृषिं चापि करोत्यत्र गवादीन् पालयत्यपि ॥ ३ ॥
तस्य भार्या सद्गुणाढ्या जीवन्ती नामतः स्मृता ।
भर्तुः प्रियकरी साध्वी न प्रसूता वयोऽधिका ॥ ४ ॥
शोकं करोति नित्यं सा स्त्रियो दृष्ट्वा प्रजावतीः ।
सा याता कुंकुमवाप्यां पितृगृहं समुत्सवे ॥ ५ ॥
नाम्ना क्रतुर्महायोगी विप्रस्तस्याः पिताऽपि ताम् ।
सशोकां परिदृष्ट्वैव पप्रच्छ शोककारणम् ॥ ६ ॥
सापि प्राह पितरं चाऽनपत्यत्वं तु कारणम् ।
क्रत्वर्षिश्च क्षणं ध्यात्वा प्राह जीवन्तिकां सुताम् ॥ ७ ॥
आगच्छ पुत्रि ! कृष्णाग्रे कुर्वस्तद्विनिवेदनम् ।
इति निश्चित्य तौ पत्नीव्रतकृष्णस्य मन्दिरम् ॥ ८ ॥
गतौ नत्वा च तं देवं चाऽनिवेदयतां वृतम् ।
अस्या नास्ति कृष्णमुने ! दुर्भगायाः प्रजासुखम् ॥ ९ ॥
कृष्णनारायणः श्रुत्वा प्राह तां पुत्रगर्द्धिनीम् ।
कम्भराया महालक्ष्म्याः प्रसादेन सुपुत्रकः ॥१०॥
भविष्यत्येव ते नूनं कुरु यात्रां सुपुत्रदाम् ।
मथुरायां यमुनायास्तीरे गोकर्णकेश्वरम् ॥११॥
तीर्थे रम्यं पुत्रलाभफलं भवति सुव्रते ! ।
तमाराधय शीघ्रं वै सह पत्याऽभिगम्य च ॥१२॥
स्नानदीपोपहारेण स्तोत्रैर्नानाविधैस्तथा ।
प्रसादयाऽनुतिष्ठैतज्जीवन्ति ! ससुता भव ॥१३॥
इत्युक्ता सा यदा याता गृहं नत्वा पतिं तदा ।
सर्वं निवेदयामास यदुक्तं हरिणा तु तत् ॥१४॥
स तद्वचनमाकर्ण्य सुप्रीतः प्राह तां प्रियाम् ।
ममाऽप्येतन्मतं पत्नि ! यदुक्तं हरिणा ततः ॥१५॥
गतौ व्योम्ना सुयानेन मथुरां दशमीदिने ।
चैत्रे सायं यमुनायां स्नात्वा नत्वा च शंकरम् ॥१६॥
गोकर्णेश्वरमेवैतौ निद्रां जग्रहतुर्भुवि ।
प्रातरुत्थाय च स्नानं पूजां चक्रतुरादरात् ॥१७॥
ततः प्रसन्नो भगवानुमापतिरुवाच तौ ।
भविष्यति युवां पुत्रो गुणरूपधनान्वितः ॥१८॥
इत्युक्तौ तौ तु देवेन स्नानं कृत्वा सरस्वतीम् ।
यमीं नत्वा संगमे च क्षणं स्थित्वा द्विजातये ॥१९॥
द्रव्यं भोज्यं ददतुश्च वस्त्राद्यं बहुदक्षिणम् ।
एकादश्यां माथुरे मण्डले यात्रां विधाय च ॥२०॥
वैहायसा सुयानेनाऽऽजग्मतुस्तौ निजगृहम् ।
विप्रः पत्न्यां तु जीवन्त्यां गर्भाधानमविन्दत ॥२१॥
सुषुवे दशमे मासि सा पुत्रं चन्द्रमःप्रभम् ।
गोसहस्रं तदा दत्वा ससुवर्णं सुवस्त्रकम् ॥२२॥
बहुशः सर्ववर्णेभ्यः पुत्रजन्ममहोत्सवे ।
जातकर्म तथा श्राद्धं नामकर्म चकार सः ॥२३॥
गोकर्णेश्वरदत्तोऽयं गोकर्णो नामतोऽस्तु वै ।
स तु षोडशसंस्कारैः संस्कृतस्तरुणोऽभवत् ॥२४॥

त स विवाहयामास भार्याणां तु चतुष्टयम् ।
अप्रजा एव ताः सर्वा एकापि नहि पुत्रिणी ॥२५॥
अतो धर्मः समारब्धो भार्यायुक्तेन तेन वै ।
वापिकूपतडागानि देवतायतनानि च ॥२६॥
प्रपामालाश्च सत्रान्नं देवसेवाऽऽर्त्तिसेवनम् ।
शत्रुंजितातटे तत्र गोकर्णेश्वरशंकरम् ॥२७॥
गोक्षुरपत्तनात् पूर्वे स्थापयामास यामुनम् ।
प्रासादं कारयामास पंचायतनकं हरेः ॥२८॥
आरामस्तत्र विस्तीर्णः पुष्पजात्यस्तथैव च ।
फलजात्यस्तथा शाकपत्रकन्दप्रजातिकः ॥२९॥
प्राकारं कारयामास परिखामण्डलीयकम् ।
घटीयन्त्राणि कूपेषु यैः प्रसिञ्चन्तु वाटिकाः ॥३०॥
पुष्पाणि च विचिन्वन्ति सर्वास्तस्य सुयोषितः ।
स्नानं पूजादिकं भूमिमार्जनं दीपकर्म च ॥३१॥
कुर्वन्ति देवतागारे तस्य पत्न्यस्तु सर्वदा ।
मालाकारः स्वयं नित्यं विटपान् संप्रसिञ्चति ॥३२॥
जाताः सुपुष्पवन्तश्च द्रुमाः फलसमृद्धयः ।
दीयते भुज्यते सर्वैः फलाद्यं नित्यमुत्सवात् ॥३३॥
पूज्यते शंकरस्तेन सर्वदा भावपूर्वकम् ।
व्यापारं सः कृषिं चापि करोति कारयत्यपि ॥३४॥
एकदा मनसा कृत्वा वणिग्भावं हृदि स्थिरम् ।
कृत्वा सार्थमुपागम्य ययौ पश्चिममण्डलम् ॥३५॥
तत्र क्रीत्वा सुपण्यानि वामनस्थलपत्तनात् ।
मणिरत्नान्यश्वरत्नानि क्रीत्वा रैवताचले ॥३६॥
स्वर्णरेखानदीतीरे चक्रे निवासमुत्तमम् ।
तत्र निवेश्य भाण्डानि शैलं समारुरोह सः ॥३७॥
बहुदेवाधिवसतिं सिद्धगन्धर्वसेवितम् ।
दिव्यपुष्पफलोपेतं बहुकन्दरशोभितम् ॥३८॥
ततो मध्ये भुव्युपत्यकायां शृणोति गह्वरे ।
स्वागतं तत्र गत्वाऽसौ शुकं पश्यति पञ्जरे ॥३९॥
तेनोक्तं भो इहाऽऽगच्छ स्वातिथ्यं करवाणि ते ।
फलानीमानि स्वादूनि शीतमिष्टजलानि च ॥४०॥
गृह्णन्तु भो महाभागाः सार्थविप्राः शुभं भवेत् ।
अतिथेरागतस्येह पूजाया विमुखो भवेत् ॥४१॥
तद्गृहस्थस्य पितरो वसन्ति नरके ध्रुवम् ।
पूजिते पूजिताः स्वर्गे मोदन्ते कालमक्षयम् ॥४२॥
अतिथिर्यस्य भग्नाशो गृहान्निवर्तते यदि ।
आत्मनो दुष्कृतं तस्मै दत्वा तत्सुकृतं हरेत् ॥४३॥
तस्मात् सर्वप्रयत्नेन पूज्यो वै गृहमेधिना ।
काले प्राप्तस्त्वकाले वा यथा कृष्णस्तथैव सः ॥४४॥
एवंविधाः शुभा वाचः श्रुत्वा गोकर्णकोऽब्रवीत् ।
ऋषिः कस्त्वं सुधर्मज्ञः किं वा देवोऽथ गुह्यकः ॥४५॥
सिद्धो वा रैवतवासी मानवो वद कोऽत्र भोः ।
तव प्रसन्नरूपस्य यस्येयं वागमानुषी ॥४६॥
इत्युक्तः स शुकः सर्वं शशंसात्मपुराकृतम् ।
अहमासं वामदेवशिष्यो नाम्ना शुकोदरः ॥४७॥
गुरोर्वाक्यं बुद्धियुक्तं श्रुत्वाऽप्यहं तदग्रतः ।
ऊहाऽपोहकरं प्रश्नं वारं वारं तु पृष्टवान् ॥४८॥
तेन मुहुर्निषिद्धोऽपि न कृतं तद्वचो मया ।
तदा तेनातिकोपाद् वै शापितस्त्वं शुको भव ॥४९॥
शुकत्वं तत्क्षणात्प्राप्तो वसाम्यत्र हि रैवते ।
जातिस्मरो भवाम्यत्र करोमि भजनं हरेः ॥५०॥
प्राप्तस्त्वत्र गृहावासिमुनिना ब्रह्मसूरिणा ।
पञ्जरे रक्षितस्तेन जीवामि सुखतो गृहे ॥५१॥
वामदेवोऽतिदीनं मामुवाच कृपयाऽर्थितः ।
मथुरायां मृतेः पश्चाद् ब्रह्मलोकं गमिष्यसि ॥५२॥
तस्मान्नित्यं तु मथुरामथुरेति वदामि च ।
शुकस्य वचनं श्रुत्वा गोकर्णः प्राह पक्षिणम् ॥५३॥
रैवताद्रिसमं तीर्थं न भूतो न भविष्यति ।
भुक्तिमुक्तिप्रदं चैतन्मोक्षगोलोकधामदम् ॥५४॥
एतत्स्थानं परित्यज्य कथं माथुरमण्डलम् ।
मुक्त्यर्थं ते कृतं पक्षिन् ! चेज्जानासि वदात्र मे ॥५५॥
श्रुत्वा शुकस्तु तं प्राह रेखा मे तादृशी यतः ।
तत्रैव मरणान्मुक्तिर्नात्र मे मृतिनिर्णयः ॥५६॥
तस्माद् विप्र ! त्वया कार्या ममोपकृतिरेव सा ।
नय मां मथुरां श्रेष्ठिन् ! यदि क्वचिद्धि गच्छसि ॥५७॥
एवं तयोः कथयतोर्ब्रह्मसूरिः समित्करः ।
समायातो वनात्तत्र सोऽप्यतिथीन् विलोक्य च ॥५८॥
प्रसन्नस्त्वभवत् कृत्वा फलाद्यैरातिथेयकम् ।
कः कुतः संविदं कृत्वा वद किं करवाणि ते ॥५९॥
इत्युक्तः स तु गोकर्णो नत्वा मुनिमयाचत ।
शुकोऽयं पञ्जरस्थस्तु पुत्रार्थं मे प्रदीयताम् ॥६०॥
मथुरायां गमिष्यामि तस्य मोक्षार्थमेव यत् ।
ऋषिणा तु प्रसन्नेन शुकस्तस्मै समर्पितः ॥६१॥
नत्वा ऋषिं स गोकर्णो ययौ गोक्षुरपत्तनम् ।
सर्वरत्नसमुपेतः सर्वसार्थसमन्वितः ॥६२॥

शुकः शत्रुंजितानद्यास्तटे विप्रस्य वाटिकाम् ।
फलपुष्पादिसंयुक्तां दृष्ट्वा स्थातुं मनोऽकरोत् ॥६३॥
गोकर्णेनापि वाट्यां स फलपुष्पादिभोजनः ।
रक्षितस्त्वेकदा पत्नीश्चतस्रः प्राह मातरः ॥६४॥
कथं पुत्रा न दृश्यन्ते पुत्र्यश्चापि न वोऽत्र किम् ? ।
जलसेचनकर्त्र्यस्ता ऊचुस्तं कोविदं शुकम् ॥६५॥
पक्षिन् ! वन्ध्याश्चतस्रः स्मो वद स्युस्तु सुता यथा ।
शुकः प्राह कथयिष्ये यावता तिष्ठता मया ॥६६॥
एवं काले गते वर्षे पुनर्व्यापारवाञ्छया ।
गोकर्णः सशुको यातः कच्छं प्रति मुदान्वितः ॥६७॥
पत्न्यश्चापि ययुः कच्छं स्वामिना सहसेविकाः ।
नावा समुद्रमुत्तीर्य नारायणसरो ययुः ॥६८॥
तत्र दृष्टा दिव्यदेव्यो रूपानुरूपभासुराः ।
सहस्रशः सरोमध्ये जलवासाऽतिसौरमाः ॥६९॥
किन्तु शोकपरिम्लानाः पप्रच्छुस्ताः शुकं प्रति ।
कुतस्त्वागम्यते किं ते कार्यं सद् विद्यते वद ॥७०॥
शुकः प्राह मम स्वामी रत्नार्थं समुपागतः ।
भवतीनां भवेत् कार्यं ज्ञापयन्तु हि मां तदा ॥७१॥
श्रुत्वा ताश्च तदा प्राहुः शुकं परमकोविदम् ।
दुःखं तस्य समाख्येयं यो विनाशयते रुजम् ॥७२॥
आस्ते कुंकुमवापीति नृणां मुक्तिप्रदायिनी ।
अश्वपट्टसरो यत्र राजते सुरसेवितम् ॥७३॥
गौर्जराधिपतिर्वीरश्चतुरंगबलान्वितः ।
राजा धर्मवीरनामा कार्तिके रैवतस्य सः ॥७४॥
प्रदक्षिणादियात्रार्थं ययौ गच्छन् शनैः शनैः ।
मार्गे कुंकुमवाप्याश्च चक्रे यात्रां सरोवरे ॥७५॥
सस्नौ स श्राद्धकार्याणि चकार ब्रह्मभोजनम् ।
चक्रे सुवर्णरत्नैः कंभरागोपालपूजनम् ॥७६॥
कृष्णनारायणविष्णोर्दर्शनं हवनं तथा ।
मन्दिरस्य महोद्याने सप्तभूम्यतिशोभिनः ॥७७॥
आरामवाटिकाः शुभ्रा निम्नप्राकारवेष्टिताः ।
कूपघट्यावर्तयुक्ताः पुष्पजातिसुवासिताः ॥७८॥
फलवन्तो द्रुमास्तत्र सर्वर्तुसुमनोहराः ।
तदभ्याशे स राजर्षिश्चकारावासमुत्तमम् ॥७९॥
सेवकैर्नाशितः सर्व आरामः सफलद्रुमः ।
वयं सर्वास्तु ता वृक्षवल्ल्यः स्मो देवदेवताः ॥८०॥
इत्युक्त्वा रुरुदुः स्वार्त्तिजल्पिण्यो हाऽतिकृच्छ्रतः ।
सर्वासां रुदतीनां तु कुररीणामिव स्वनाः ॥८१॥
श्रूयन्ते दुःखदाः ताश्च सान्त्वयामास वै शुकः ।
तास्तु प्राह पुनस्तत्र रत्नान्यादाय सर्वथा ॥८२॥
गमिष्यति मम स्वामी करिष्यति सजीवनाः ॥
इत्युक्तमात्रे वचने ताः सर्वा लब्धचेतनाः ॥८३॥
शुकस्य स्वामिनं तद्वै वक्तुं तं वेदितुं तथा ।
ऐक्यभावेन ताः सर्वाः पप्रच्छुर्वणिजं प्रति ॥८४॥
अस्माकं जीवदाता त्वं कः कुतस्त्विह संगतः ।
गोकर्णः प्राह ता देवीः, भवत्यश्चारुलोचनाः ॥८५॥
सुचार्वास्याः सुचार्वंग्यः कथं शोकपरिप्लुताः ।
तदा ज्येष्ठा तमाहाथ पुष्पजात्या स्वलंकृता ॥८६॥
वयमारामसंस्थानाः खाद्यसलिलभोजनाः ।
हृद्याश्च स्वामिना गुप्ताः पुष्पवृद्धिरताः सदा ॥८७॥
राजलोकैः पीडिताः स्म छेदनोन्मूलनादिभिः ॥
कूर्चिता भृशमुद्विग्नास्तेन शोकपरिप्लुताः ॥८८॥
फलपुष्पविहीनाश्च मूलास्कन्धावशोषिताः ।
एवंविधा हि संभूता नष्टसंज्ञाः स्थिता वयम् ॥८९॥
अश्वपट्टसरो दिव्यं साक्षि तत्रास्ति भूसुरः ।
कृष्णनारायणो देवः साक्षी त्वस्माकमित्यपि ॥९०॥
पुण्यं सलिलपूर्णं च्चोत्फुल्लकमलशोभितम् ।
कलहंससमायुक्तं वृक्षाणां परिसेचकम् ॥९१॥
सरस्तत् तद् द्रुमाणां तु विनाशात्तो विनाशिता ।
विरूपताऽस्ति तत्र त्वं गत्वा नो जीवितान् कुरु ॥९२॥
इष्टापूर्ते द्विजातीनां प्रथमं धर्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्तेन मोक्षमेति च ॥९३॥
वापीकूपतडागानि देवतायतनानि च ।
पतितान्युद्धरेद् यस्तु स पूर्तफलमश्नुते ॥९४॥
भूमिदानेन ये लोका गोदानेन च कीर्तिताः ।
ते लोकाः समवाप्यन्ते पादपानां प्ररोहणे ॥९५॥
पिप्पलं च वटं निम्बं तुलसीं चाप्युदुम्बरम् ।
आमलकं तथा बिल्वं खदिरं चैकमेव यः ॥९६॥
पुष्पजातीर्दश द्वे द्वे दाडिमे चाम्रपञ्चकम् ।
तिन्तिडीमेकलां वात्र यस्तु वर्धयति द्विज ! ॥९७॥
पुष्पफलद्रुमरोपी न याति नरकं क्वचित् ।
वर्धिताश्च द्रुमाः पुत्रा इवोद्धरन्ति पोषकम् ॥९८॥
इन्धनैश्छायया श्रान्त्या पथिकानां सुखावहाः ।
पक्षिणां निलयेनैव सुखदा वृक्षवल्लिकाः ॥९९॥
पत्रमूलत्वगाद्यैरौषधैः सुखास्तु देहिनाम् ।
काष्ठैर्गृहाणि जायन्ते क्षुद्रजन्तुगृहाणि च ॥१००॥

एवं परोपकारास्ते सेवन्ते देहिनः सदा ।
फलपत्रदलशाखास्तम्भमूलैर्हि जीवदाः ॥१०१॥
स्वर्गदा मोक्षदाश्चापि देवपूजोपयोजिताः ।
तस्माद् गोकर्णरत्नानि गृहाणेष्टानि नः स्थलात् ॥१०२॥
वैहायसं विमानं च समारुह्य तथा च नः ।
सह नीत्वा याहि तत्र यत्रोद्यानं तु नः स्थितम् ॥१०३॥
अस्माकं जीवदानेन स्युः पुत्रिण्यस्तु ते प्रियाः ।
भविष्यन्ति सुसन्तानाः शुकं नीत्वा प्रयाहि वै ॥१०४॥
वयं गोपाश्च गोप्यश्च गोलोकस्था अपि क्षितौ ।
कृष्णसेवां प्रकुर्मोऽत्र वृक्षवल्लीतृणात्मिकाः ॥१०५॥
वयं दास्यः पार्षदाश्च वैकुण्ठस्था अपि क्षितौ ।
कुर्मो नारायणसेवां कुंकुमवापिकास्थिताः ॥१०६॥
पार्षदान्यः पार्षदाश्च मुक्ताः साकेतधामगाः ।
साकेतायां वृक्षवल्ल्यः स्मः श्रीरामार्चने रताः ॥१०७॥
वयं दूताश्च दूत्यश्च कैलासस्था अपि क्षितौ ।
काशीक्षेत्रादिसंस्थाना वल्लीवृक्षस्वरूपिकाः ॥१०८॥
इति हार्दं कथितं तेऽस्माकं विप्राऽत्र भौतिकम् ।
श्रीकृष्णमण्डलं कृष्णदासदासीमयं स्मृतम् ॥१०९॥
इत्युक्तः स तु गोकर्णो रत्नान्यादाय कोटिशः ।
देवीः सर्वास्तथा पत्नीः शुकं चादाय संययौ ॥११०॥
उद्यानं कृतवान् पुष्टं बीजैः खाद्यैर्जलादिभिः ।
वृक्षा वल्ल्यश्च देव्यश्च पुष्टा जाता हि सेवया ॥१११॥
धनं रत्नादिकं तत्र सेवायां योजितं बहु ।
मन्दिरं पोषितं चापि वृक्षाश्चापि प्रपोषिताः ॥११२॥
तेन पुण्येन च तस्य पत्न्यो गर्भधरा अपि ।
ताश्च देव्यो दिव्यरूपाः प्रशशंसुः पुनः पुनः ॥११३॥
वरं दत्वा यथाकामं स्वस्तीत्युक्त्वा तिरोऽभवन् ।
तत्र स्थित्वा यथान्यायं गोकर्णः सर्वमंगलम् ॥११४॥
शुकं च मातापितरौ साध्वीभार्याचतुष्टयम् ।
समानं सेवयामास यथाविभवशक्तितः ॥११५॥
स्वयं तु कृतवाँस्तत्र वैष्णवाख्यं महामखम् ।
भक्ष्यभोज्ये ब्राह्मणेभ्यो ददौ दानानि नित्यशः ॥११६॥
कुंकुमवाप्यां कृष्णस्याऽऽलयं जीर्णं नवोत्तमम् ।
कारयित्वा तु तद्वापीं नवीनामिव वै पुनः ॥११७॥
अश्वपद्मसरश्चापि त्वाबध्य सेतुना पुनः ।
तटे प्रतिष्ठां स्वनाम्ना गोकर्णेश्वरसंज्ञया ॥११८॥
महादेवस्य निर्वर्त्य ब्राह्मणैर्वेदपारगैः ।
ययौ गोक्षुरसंज्ञं वै पत्तनं स्वनिवासकम् ॥११९॥
य इदं शृणुयाच्चापि पठेद्वा भावतस्तथा ।
तीर्थयात्रां प्रकुर्याच्च पुत्रवान् धनवान् भवेत् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने माथुरक्षेत्रमाहात्म्ये सौराष्ट्रदेशीयसुभद्रनामकविप्रस्य मथुरायां गोकर्णेश्वरदर्शनादिना पुत्रप्राप्तिः, तन्नाम गोकर्ण इति, तेन शत्रुंजितानदीतटे गोकर्णेश्वरः स्थापितः, गोकर्णस्य धनार्थं वामनपत्तनं गतस्य रैवताचले शुकप्राप्तिः, पुनर्गृहमागत्य धनार्थं कच्छं गतस्य नारायणसरसि वनदेवतानां दर्शनं, गौर्जरराज्ञा भग्नस्योद्यानस्य कुंकुमवाप्यां नवीकरणम्, तीर्थस्था वृक्षवल्लिका धामपार्षदपार्षदान्य एवेतिमहिमकथनं चेत्यादिनिरूपणनामा पञ्चाशदधिकत्रिशततमोऽध्यायः ॥३५०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तत्र पुरे गोक्षुरे ब्राह्मणं शुकः ।
प्रोवाच यमुनायात्राकरणार्थं पुनः पुनः ॥ १ ॥
स्वस्य वै निधनं यस्यां स्मारयामास वै शुकः ।
नय मां माथुरीं भूमिं कुरु यात्रां प्रियाऽऽत्मजैः ॥ २ ॥
जन्मनस्तव साफल्यं कुरु गोकर्ण सर्वथा ।
गोकर्णेश्वरदेवस्य त्वद्दातुर्दर्शनं कुरु ॥ ३ ॥
श्रुत्वा शुकवचो विप्रो गोकर्णः सकुटुम्बकः ।
वैहायसेन यानेन ययौ माथुरमण्डलम् ॥ ४ ॥
विश्रान्तितीर्थके स्नात्वा गोकर्णेश्वरदर्शनम् ।
कृत्वा च प्रक्रमं भक्त्या मथुरामण्डलस्य सः ॥ ५ ॥
मथुरायां चकाराऽऽशु विष्णुयागं सुदक्षिणम् ।
विनिर्वृत्ते क्रतौ शुकोदो मृत्युं ययौ शुकः ॥ ६ ॥
विमानवरमासाद्य देवो भूत्वा दिवं गतः ।
शुकं हृदि समाश्लिष्य प्ररुरोह स वै वणिक् ॥ ७ ॥
यत्र शुको मृतस्तत्र गोकर्णेन महात्मना ।
शुकनाम्ना कृतं रम्यं शिवस्यायतनं महत् ॥ ८ ॥
शुकेश्वरं प्रतिष्ठाप्य दिव्यं सत्रं चकार सः ।
ब्राह्मणानां शते द्वे च मिष्टान्नवरभोजनम् ॥ ९ ॥
प्राप्नुतः प्रतिमध्याह्नं ख्यातं तच्छुकसत्रकम् ।
सत्रस्य परितस्तत्र फलपुष्पप्रदं वरम् ॥१०॥
मथुरावासिभिर्लोकैरुद्यानं सोऽप्यकारयत् ।
यत्र ता दिव्यरूपा वै देव्यो वल्लीस्वरूपिकाः ॥११॥

समागतयाऽवसँस्तत्र गोकर्णेन विलोकिताः ।
तासां जलघटीयन्त्रं जलपानार्थमाव्यधात् ॥१२॥
गोकर्णश्च सरस्वत्याः संगमे संविधाय तु ।
स्नानं प्रपूजनं चापि सदारसुतभृत्यकः ॥१३॥
विमानवरमारुह्य समायाति गृहं प्रति ।
मध्ये वै पुष्करं तीर्थं कर्तुं विप्रो मनो दधे ॥१४॥
पुष्करारण्यमासाद्य विमानं त्ववतारयत् ।
सुस्थल्यां पुष्करसरोऽन्तिके वृक्षघटासु वै ॥१५॥
न्यषीदत्तु क्षणं यावत् सदारसुतभृत्यकः ।
गोकर्णस्तत्र चाऽपश्यत् पञ्च प्रेतान्सुभीषणान् ॥१६॥
तान्दृष्ट्वा विकृताकारान् त्रासमुत्सृज्य दूरतः ।
पप्रच्छ धैर्यमालम्ब्य के यूयं रौद्रमूर्तयः ॥१७॥
प्रेता ऊचुः क्षुत्पिपासातुरा नित्यं सुदुःखिताः ।
न जानीमो दिशं चापि विदिशं च दिवानिशम् ॥१८॥
यदेतद्दुःखमापन्नं दुष्कृतैर्निजकर्मभिः ।
अहं पर्युषितो नाम परः सूचीमुखो ह्ययम् ॥१९॥
शीघ्रगस्तु तृतीयोऽस्ति चतुर्थो रोधकोऽस्ति च ।
पञ्चमो लेखकश्चेति कर्मनाम्ना वयं तथा ॥२०॥
अहं स्वादु सदाऽश्नामि दद्मि पर्युषितं द्विजे ।
तेन दोषेण सञ्जातो नाम्ना पर्युषितः स्वयम् ॥२१॥
सूचिता बहवोऽनेन भिक्षुकास्त्वन्नकांक्षिणः ।
एतेन कर्मणा चायं सूचीमुखो व्यजायत ॥२२॥
दानमध्ये ह्ययं शीघ्रं निरोधार्थं प्रयाति च ।
एतेन कर्मणा नाम्ना शीघ्रगस्त्वभवत् परः ॥२३॥
बहून् प्रतार्य चैकाकी द्वारं पिधाय वै ततः ।
भुक्तेऽयं भिक्षुकभयाद् रोधकस्तेन चेतरः ॥२४॥
भिक्षुकैर्योग्यकालेऽयं याचितोऽप्यलिखन् महीम् ।
न ददाति क्वचित् किञ्चित् कर्मणा तेन लेखकः ॥२५॥
पश्य विप्र गतिं नोऽत्र कृतेन पापकर्मणा ।
मदेन लेखको याति रोधकस्तु ह्यवाक्छिराः ॥२६॥
पङ्गुः सन् शीघ्रगो याति सूचीवन्मुखवान् परः ।
बृहद्वृषणलम्बोष्ठः पर्युषितो महोदरः ॥२७॥
एवं वयं महादुःखा दुष्टभ्रष्टप्रभोजिनः ॥
यच्छ्रुत्वा निन्दसे विप्र ! श्रोतव्याऽर्हं न वै तु तत् ॥२८॥
श्लेष्ममूत्रपुरीषाणि बालानां योषितां गृहे ।
क्षेत्रे त्यक्तान्यशौचानि प्रेता भुञ्जन्ति तानि वै ॥२९॥
देवार्पणविहीनानि मलमूत्रभृतानि च ।
अशुद्धौ रन्धितान्येव प्रेता भुञ्जन्ति तानि वै ॥३०॥
क्षिप्तानि नालिकायां तु भ्रष्टपात्रस्थितानि च ।
राजस्वल्यादिदुष्टानि प्रेता भुञ्जन्ति तानि हि ॥३१॥
अतिथ्यर्पणहीनानि कलहोत्पादकानि च ।
निन्दितानि तथाऽन्नानि प्रेता भुञ्जन्ति सर्वदा ॥३२॥
दुष्कर्माऽन्नं सूतकान्नं क्लेशान्नं नोऽभितिष्ठति ।
तथापि क्षुन्न हि प्रेतं त्यजत्यपि कदाचन ॥३३॥
जलमशुद्धिसंस्पृष्टमुपयाति च नोऽल्पकम् ।
नान्यत्र जलपानं स्याद्वारुणभृत्यपालिते ॥३४॥
भ्रष्टान्नेन तु भुक्तेन मानवो म्रियते यदि ।
तेनैव चोदरस्थेन स प्रेतो जायते द्विज ! ॥३५॥
मनुष्यादिशिरःकपालिकायां भुंजते तु ये ।
ते मृताः प्रेततां यान्ति पशुभिः सहभोजिनः ॥३६॥
मद्यमांसाशनो दुष्टवासनाद्यतिमोहितः ।
देवविप्रगुरुद्रव्यहर्ता प्रेतोऽभिजायते ॥३७॥
मातरं पितरं भ्रातॄन् भगिनीश्च स्त्रियं सुतम् ।
अदुष्टान् यस्त्यजेत्पापः प्रेतो भवति वै ध्रुवम् ॥३८॥
दुष्टकर्मकृतां संगी पापात्प्रेतोऽभिजायते ।
ब्रह्महा च कृतघ्नश्च बालघ्नो गोघ्न इत्यपि ॥३९॥
भूमिकन्याधनहर्ता गुरोर्द्वेष्टा च नास्तिकः ।
स पापो जायते प्रेत स्वाहारादिविवर्जितः ॥४०॥
तस्मात् पुण्यं प्रकर्तव्यं न द्वेष्टव्यं कदाचन ।
परोपकारकारी वै प्रेतो नैव प्रजायते ॥४१॥
सुखितेषु सदा मैत्रीं दुःखितेषु दयां शुभाम् ।
पुण्यवत्सु मुदितां च कुर्वन् प्रेतो न जायते ॥४२॥
अपुण्यशालिषु यो न सजते वै कदाचन ।
उपेक्षां कुरुते तेषु न स प्रेतोऽभिजायते ॥४३॥
व्रतं करोति देवानां तथा चान्द्रायणादिकम् ।
रागशून्यः स्वच्छबुद्धिर्न स प्रेतोऽभिजायते ॥४४॥
अन्नजलप्रदाता यः श्रद्धया धर्मकार्यकृत् ।
साधुदेवयतिपूजाकर्ता प्रेतो न जायते ॥४५॥
परोपकारकर्ता च परपोषणतत्परः ।
सर्वभूतदयालुश्च न प्रेतो जायते क्वचित् ॥४६॥
पितृसुराऽतिथिपूज्यपूजायाः कारकस्तु यः ।
परात्मतोषको विप्र ! न प्रेतो जायते क्वचित् ॥४७॥
कामक्रोधमहालोभमोहतृष्णाविवर्जितः ।
क्षमादानदयाशीलो न प्रेतः संभवेत् क्वचित् ॥४८॥

जयन्तीनां व्रतकर्ता कथानां वाचकः सदा ।
गोभूविप्रसतीसाधुतीर्थमन्ता सुधर्मवान् ॥४९॥
स्नानसन्ध्याजपहोमकर्ता प्रेतो न जायते ।
मातृसेवां पितृसेवां गुरोः सेवां करोति यः ॥५०॥
गवां सेवां पतिसेवां पत्नीसौख्यं करोति यः ।
दीनाऽनाथादिसेवाकृन्न प्रेतो जायते क्वचित् ॥५१॥
शुद्धयन्नं शुद्धिकृद्द्रव्यं यः स्वार्थे सयुनक्ति वै ।
सर्वाशीर्वादसंग्राही न प्रेतो जायते क्वचित् ॥५२॥
प्रेतानां चाभिजातानां गतिं जानासि चेद् वद ।
अस्माकं कुरु चोद्धारं चेत् समुद्धर्तुमर्हसि ॥५३॥
इति प्रेतवचः श्रुत्वा गोकर्णः प्राह तांस्तदा ।
ये धर्मविमुखा मूढा दयादानविवर्जिताः ॥५४॥
प्रेता जाताश्च वै तेषां मथुरासंगमे गतिः ।
श्रवणद्वादशीयोगे स्नात्वा यम्यां तु भाद्रके ॥५५॥
वामनार्चनमेवाथ हवनं कारयेत्तथा ।
छत्रोपानत्सुवर्णान्न वस्त्रदानं प्रकारयेत् ॥५६॥
पितॄंश्च तर्पयेत् तेन प्रेता यान्ति परं पदम् ।
मथुरातीर्थके स्नानं जनं ध्यात्वा हरिं स्मरेत् ॥५७॥
प्रेतस्तीर्थस्य माहात्म्यं शृणुयाच्चेद् गतिं लभेत् ।
विमानवरमारुह्य विष्णुलोकं स गच्छति ॥५८॥
मासि भाद्रपदे शुद्धा द्वादशी श्रवणान्विता ।
तस्यां दत्तं हुतं स्नातं सर्वं लक्षगुणं भवेत् ॥५९॥
यमीसरस्वतीसन्धौ स्नात्वा सम्पूज्य वामनम् ।
कलशं विधिना दत्वा प्रेतभावो न विद्यते ॥६०॥
कपिलानां शतं दत्वा हिरण्योपस्कराञ्चितम् ।
द्वादश्यां तत्फलं स्याद्वै स्नात्वा नद्योस्तु संगमे ॥६१॥
राक्षसत्वं भवेन्नष्टं श्रवणद्वादशीव्रतात् ।
स्वर्गे वसति तावद्वै यावदिन्द्राश्चतुर्दश ॥६२॥
ततः स्वर्गाद् भुवं याति विप्रो भवति वेदवित् ।
जातिस्मरो महायोगी मोक्षमार्गपरायणः ॥६३॥
ध्यानयुक्तेन भावेन सेवया परमात्मनः ।
आशीर्वादेन पित्रोश्च मुक्तो यात्यपुनर्भवम् ॥६४॥
यथालब्धसुवर्णेन कारयित्वा तु वामनम् ।
उपानच्छत्रसंयुक्तं पूजयेद्विधिवत्तु तम् ॥६५॥
आवाहयेत् तथा तं च स्नापयेत् पञ्चकामृतैः ।
जलेनाभिषेचयेच्च वस्त्रादि धारयेत्तथा ॥६६॥
अलंकारान् सुगन्धिसद्द्रव्यतैलादिकं ददेत् ।
चन्दनानि कुंकुमं च कज्जलं चोपवीतकम् ॥६७॥
अर्पयेच्च तथा धूपं दीपं नैवेद्यमुत्तमम् ।
फलं ताम्बूलकं वारि श्रीफलं चार्घ्यमेव वा ॥६८॥
दद्यान्नीराजयेद् देवं छत्रचामरमर्पयेत् ।
दक्षिणां च नमस्कारं गोदानं करकार्पणम् ॥६९॥
स्तुतिं कुर्याच्च तस्याऽग्रे ततो देवं विसर्जयेत् ।
एवं तु विधिना कृत्वा प्रेतमुक्तिर्भवेद् ध्रुवम् ॥७०॥
यस्तु सरस्वतीयोगे यमुनायाः सुसंगमे ।
करोति विधिनाऽनेन तस्य पुण्यं शतोत्तरम् ॥७१॥
श्रावणद्वादशीयोगे भाद्रे शुक्ले व्रतं चरेत् ।
तेन मुक्तिर्भवेद् ध्रौव्या गोलोकादिनिवासदा ॥७२॥
प्रेता ऊचुश्च तं गोकर्णं विप्रं शरणागताः ।
भो विद्वँस्तद्व्रतं कर्तुं प्रेतानां शक्तिरेव न ॥७३॥
तस्मात्पुण्यप्रदानेन कुर्वस्माकं विमोक्षणम् ।
गोकर्णश्च दयां कृत्वा ददौ स्नानजपुण्यकम् ॥७४॥
ददे पदोरजश्चापि ददौ पदोर्जलं तथा ।
तेन मुक्ताश्च ते सर्वे जाता वै प्रेतयोनितः ॥७५॥
आकाशे दुन्दुभिध्वानमभूद् देवकृतं तदा ।
प्रेतानां तु समूहाश्चागता द्रष्टुं समन्ततः ॥७६॥
देवदूत उवाचेदं प्रेतानां शृण्वतां तदा ।
अस्य विप्रस्य संभाषात्स्नानपुण्यसमर्पणात् ॥७७॥
चरणस्य रजोलाभाज्जललाभाच्च सर्वथा ।
प्रेतभावविमुक्ताः स्थ तीर्थस्य श्रवणादपि ॥७८॥
तस्मात् सर्वप्रयत्नेन कर्तव्यं तीर्थसेवनम् ।
सद्भिः संभाषणं कार्यं सतां सम्यक् प्रसेवनम् ॥७९॥
तीर्थश्रद्धा व्रतश्रद्धा कथाश्रद्धा च मानसे ।
कर्तव्या सर्वथा प्रेताः ! मुक्तिदाऽस्ति तु सा यतः ॥८०॥
तीर्थाभिषेकिपुरुषपादप्रक्षालनं जलम् ।
पातव्यं चापि मुक्त्यर्थं यथैतेषां विमुक्तिदम् ॥८१॥
प्रेतानामक्षयः स्वर्गः सरस्वत्याश्च संगमात् ।
प्राप्तं तीर्थप्रभावस्य प्रेतैर्वै श्रवणात् फलम् ॥८२॥
आगतानि विमानानि प्रेतानां दिव्यवर्ष्मणाम् ।
देवानां च कृते पश्चाऽऽरुह्य ते स्वर्गमुत्तमम् ॥८३॥
गता लक्ष्मि ! परं लोकं विना साधनसम्पदम् ।
गोकर्णः पुष्करं तीर्थं कृत्वा गोक्षुरमाययौ ॥८४॥

यः पठेत्परया भक्त्या शृणुयाद् भक्तितत्परः ।
श्रावयेच्च स्मरेत् तीर्थं स याति परमां गतिम् ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने माथुरक्षेत्रमाहात्म्ये शुकोक्त्या गोकर्णस्य मथुरायात्रा, शुकमोक्षः, शुकेश्वरस्थापना, मार्गे परावृतस्य गोकर्णस्य पञ्चप्रेतमिलापः, पुष्करे प्रेताऽप्रेतत्वकारण-संवादः, भाद्रशुक्लद्वादश्यां वामनपूजा, स्नान-पुण्यदानेन प्रेतानां मुक्तिश्चेत्यादिनिरूपण-नामैकपंचाशदधिकत्रिशत-तमोऽध्यायः ॥ ३५१ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कृष्णगंगातीर्थं यामुनवारिगम् ।
यत्र व्यासः स्वयं कृष्णो भगवान् सृष्टिबोधवान् ॥ १ ॥
आद्ये कृते युगे स्नात्वा वेदानध्यापयत् सदा ।
यावत्तु यमुनाभूमौ स्थास्यति तावदेव सः ॥ २ ॥
स्नास्यति तत्स्थले नित्यं कृष्णगंगाजले हरिः ।
सोमवैकुण्ठयोर्मध्ये कृष्णगंगा तु सा मता ॥३॥
तत्राश्रमपदे दिव्ये मुनयो दिव्यविग्रहाः ।
अदृश्यास्तु समायान्ति चातुर्मास्यव्रतार्थिनः ॥ ४ ॥
येषामुपरि तेषां वै दयालूनां कृपा भवेत् ।
तेषां ते ऋषयो दृष्टिपथमायान्ति नान्यथा ॥ ५ ॥
चातुर्मास्ये कृष्णगंगातीर्थे विप्रेण वीक्षितम् ।
दयापात्रेण वसुना पाञ्चाल्यकुलतन्तुना ॥ ६ ॥
शृणु लक्ष्मि ! कथयामि पाप्युद्धारकरीं कथाम् ।
पाञ्चाल्योऽथ द्विजः कश्चिन्नाम्ना वसुरितिश्रुतः ॥ ७ ॥
दुर्भिक्षपीडितोऽत्यन्तं सभार्यो वरपत्तनम् ।
ययौ भद्रातटे भिक्षावृत्त्या वासं समाचरत् ॥ ८ ॥
तत्रस्थस्य तदा पुत्रः कन्या चेत्यभवद् द्वयम् ।
कन्या विप्राय संदत्ता धनधान्यसमृद्धये ॥ ९ ॥
कन्यापतिस्ततो विप्रो यौवने रोगपीडितः ।
ममार बन्धुविधुरः कुटुम्बरहितस्तथा ॥१०॥
कन्याऽस्थीनि तु संगृह्य मथुरामाजगाम ह ।
लक्ष्मीनारायणसंहितोक्तं त्वस्थिप्रपातनम् ॥११॥
अर्धचन्द्रस्थले तत्र माथुरे मण्डले कृतम् ।
यस्य भवेत् स वै देही मुक्तिं यातीति वाञ्छया ॥१२॥
कन्ययाऽस्थीनि यमुनास्रोतसि विधिना तदा ।
क्षिप्तानि विप्रहस्तेन पत्युर्मुक्तिस्तदाऽभवत् ॥१३॥
बालरण्डा तु सा रम्या नीलकुञ्चितमूर्धजा ।
सुरूपा सुकुमारांगी निराधाराऽतिदुःखिता ॥१४॥
कदलीकाण्डसंकाशे तस्या ऊरू सुमांसले ।
सुश्लिष्टांगुलिकापादौ नखास्ताम्रोज्ज्वलाः शुभाः ॥१५॥
गंभीरा दक्षिणावर्त्ता नाभिस्त्रिवलिमण्डिता ।
आमोदरी समकुक्षिः पीनोन्नतपयोधरा ॥१६॥
कम्बुग्रीवा संवृतास्या सुदती स्वधराहनुः ।
सुनखी स्वक्षिणी सुभ्रूः सुप्रमाणा सुभाषिणी ॥१७॥
सुकटिः स्वल्पमध्या च चन्द्राननाऽब्जलोचना ।
तेन तेनैव सम्पूर्णरूपेण च तिलोत्तमा ॥१८॥
नाम्ना तिलोत्तमा स्वर्णवर्णा युवती सुन्दरी ।
एवंविधा तत्र तत्र तीर्थस्नानपरायणा ॥१९॥
यं यं पश्यति चार्वंगी यस्तां चापि प्रपश्यति ।
स स चित्र इव न्यस्तो विचेता जायते क्षणम् ॥२०॥
तथाविधा मथुरायां स्वकं वासमरोचयत् ।
तदैवाऽवसरे कान्यकुब्जदेशाधिपो नृपः ॥२१॥
मथुरायां देवमर्तेश्वरेऽन्नसत्रमाकरोत् ।
तत्र वै ब्राह्मणाः सत्यः साध्व्यो ब्राह्मण्य इत्यपि ॥२२॥
साधवो भिक्षुका दीना अनाथा भुंजते शतम् ।
तत्रैयं सुसदा भुंक्ते सुशीला तु तिलोत्तमा ॥२३॥
भोजनस्य समये तु संगीतं सुप्रवर्तते ।
वादित्राणि च गीतानि शक्रस्य भवने यथा ॥२४॥
राज्ञस्तस्य तु या नृत्यकारिण्यो गायिकास्तथा ।
दूत्यश्च गणिकाश्चापि ताभिः सा प्रतिलोभिता ॥२५॥
गीतनृत्यादिषु स्निग्धा तासां धर्ममुपागता ।
अल्पैस्तु दिवसैः साध्वी ह्यसाध्वीभिः परिवृता ॥२६॥
राज्ञः समागमं प्राप्ता भोगभोग्यभृताऽभवत् ।
युवती कामदाहेन नवं नवं समिच्छति ॥२७॥
एवं सा कामधर्मेषु व्यवायपथगाऽभवत् ।
अथतस्यास्तु यो भ्राता पाञ्चालो ब्राह्मणात्मजः ॥२८॥
गृहे स निर्धनो भूत्वा व्यवसायं विचार्य च ।
मथुरायां गते काले समायातो निराश्रयः ॥२९॥
कस्यचिच्छ्रेष्ठिवर्यस्य कर्मचारी तदाऽभवत् ।
व्यापारबुद्ध्या वर्षान्ते सोऽपि व्यापारलाभवान् ॥३०॥
धनवान् वै भाग्ययोगात् संजातो विधुरोऽपि च ।
यमुनायां सदा याति स्नानार्थं स्नाति यत्र सा ॥३१॥
नित्यं पश्यति चार्वंगीं दृष्ट्वा मोहवशं गतः ।
तत्र तीर्थवरे स्नात्वा वस्त्रालंकारभूषितः ॥३२॥

देवादिदर्शनं कृत्वा गर्तेश्वरं समर्च्य च।
तिलोत्तमाया मार्गे वै धृत्वा पश्चाद् ययौ शनैः ॥३३॥
यत्र तद्भवनं तत्र धात्रेयिकां व्यलोकयत्।
तया चापि युवा मुग्ध इति त्वाकारितो गृहे ॥३४॥
धात्रेयिकायास्तस्याश्च बहुमानपुरःसरम्।
ययौ प्रसन्नमनसा युवत्या भवनान्तरम् ॥३५॥
वस्त्राणि अद्भुतरूपाणि सौवर्णकटकानि च।
हारान् रत्नमयान् द्रव्यं ददौ तस्यै विमोहितः ॥३६॥
ददावगुरुसारं च सकर्पूरं सचन्दनम्।
तस्या गृहवरे तत्र वसतिं स्म दिने दिने ॥३७॥
प्रहरार्धे दिने जाते याति स्वशिबिरं ततः।
स्नात्वा तीर्थे समीपे च कृष्णगंगोद्भवे सदा ॥३८॥
एवं नित्यं तदासक्तः करोति वर्तनं स्वकम्।
सुमन्तुमुनिनां नित्यं गच्छन् स चाऽवलोक्यते ॥३९॥
अथैकदा प्रगच्छन् वै स्नातुं विप्रः सुमन्तुना।
स्वाश्रमस्थेन दिव्येन दृष्टः स कृमिकीटवान् ॥४०॥
कृमयो रोमकूपेभ्यः पतमाना अनेकशः।
दृश्यन्ते कुरुते यावत्स्नानं तावत्पतन्ति वै ॥४१॥
स्नाने कृते न दृश्यन्ते सुरूपश्चाभिजायते।
एवं सुमन्तुना दृष्टमाश्चर्यं बहुवासरम् ॥४२॥
सुमन्तुस्त्वाह्वयामास पप्रच्छ नाम कर्म च।
पाञ्चालस्तं तदा प्राह त्वहं पंचालदेशजः ॥४३॥
विप्रो वाणिज्यमाश्रित्य वसाम्यत्र नु चैकलः।
निशामुषित्वा शिबिरे तिलोत्तमासुरक्षिते ॥४४॥
प्रातः स्नात्वा त्रिगर्तेशं पूजयित्वा तमन्वहम्।
दिवा करोमि व्यापारं वसामि शिबिरे निशि ॥४५॥
सुमन्तुश्च तदा प्राह शृणु विप्र! यथातथम्।
आश्चर्यं तव देहेऽस्मिन् नित्यं पश्यामि निःसृतम् ॥४६॥
अस्नाते कृमिसंपूर्णं स्नाते निर्मलवर्चसम्।
अस्ति किञ्चिन्महत्पापं तव प्रच्छन्नसंभवम् ॥४७॥
अस्यां तीर्थप्रभावेण स्नानाद् गच्छति दूरतः।
त्रिगर्तेश्वरसंस्पर्शात् शुद्धं देहं तु दृश्यते ॥४८॥
निरूप्य कथयाऽस्मान् वै यत्ते प्रच्छन्नकिल्बिषम्।
इति मुनेः सुमन्तोः स श्रुत्वा त्रिकालवेदिनः ॥४९॥
स्वशिबिरेऽङ्गनासंगं करोमीति न्यवेदयत्।
गत्वा तथा तदैकान्ते तां तु पप्रच्छ मूलतः ॥५०॥
का त्वं कस्य सुता कश्च देशस्त्वत्रागमः कुतः।
त्यक्ष्यामि हि प्रियान्प्राणान् यदि सत्यं न वक्ष्यसि ॥५१॥
निर्बन्धं तस्य तं ज्ञात्वा दुःखेनोवाच सा स्वकम्।
पञ्चालो ब्राह्मणो देशे पञ्चाले वरपत्तने ॥५२॥
वर्तते वसुनामाऽख्यस्तत्सुताऽहं तिलोत्तमा।
विवाहिता पतिर्नष्टोऽस्थीनि त्वादाय माथुरम् ॥५३॥
आगता रागयोगेन कान्यकुब्जनृपाऽर्थिता।
व्यवायधर्ममापन्ना वर्तानि कामधर्मिणी ॥५४॥
मम भ्राता तु पाञ्चालो वर्तते पितृमन्दिरे।
भद्रानदीतटे तत्र गृहं मे ह्यभवत्पुरा ॥५५॥
अत्र वसाम्यनाथाऽहं कुलटाधर्ममाश्रिता।
वद त्वं स्वीयवृत्तान्तं यदि मां वेत्सि पात्रकम् ॥५६॥
एतच्छ्रुत्वा स पांचाल्यः साश्रुनेत्रोऽभवत्तदा।
लब्धसंज्ञं कुलं तस्य पप्रच्छ तं तिलोत्तमा ॥५७॥
ततस्तेन स्ववृत्तान्तं कथितं कुलनामकम्।
अत्यतिविमना जातो ह्यगम्यागमनेन वै ॥५८॥
प्रायश्चित्ते मतिरभून्निर्विण्णस्य द्विजन्मनः।
मातरं गुरुपत्नीं च स्वसारं पुत्रिकां वधूम् ॥५९॥
गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते।
पत्यात्मकं तु पाञ्चाली ज्ञात्वा स्वभ्रातरं तु तम् ॥६०॥
द्विजेभ्यः प्रददौ सर्वं रत्नवस्त्रधनादिकम्।
कालिंजरत्रिगर्तेशं दत्वा भूषाधनादिकम् ॥६१॥
कृष्णगंगोद्भवे तीर्थे चितां कृत्वा विधानतः।
आत्मनः सा विशुद्ध्यर्थं प्रजज्वाल हुताशनम् ॥६२॥
पाञ्चालोऽपि स्वकं द्रव्यं दत्वा दानेऽवशेषितम्।
और्ध्वदैहिकभागार्थं कल्पयित्वा यथाविधि ॥६३॥
स्नात्वा देवाँस्तथा नत्वा ब्राह्मणाँश्च सुमन्तुकम्।
ऋषिं गत्वा समुवाचाऽगम्यागमनपातकम् ॥६४॥
तत्पापस्य विशुद्ध्यर्थं देहत्यागं करोमि वै।
इत्युक्त्वा च चितां कृत्वा समुद्दीप्य घृतोक्षिताम् ॥६५॥
यावत्प्रवेष्टुं यात्येनं वागुवाचाऽशरीरिणी।
भगिनीं च प्रवेष्टुं वै तत्परां तावदेव ह ॥६६॥
मैवं कार्षीः साहसं च विपाप्मानौ यतो हि वाम्।
यत्र कृष्णस्य सञ्चारः क्रीडा जाता यथासुखम् ॥६७॥
चक्रांकितपदन्यासास्तत्स्थलं दिव्यमेव यत्।
ब्रह्मरूपं धामरूपं यत्र पापक्षयो भवेत् ॥६८॥
अन्यत्र हि कृतं पापं तीर्थमासाद्य नश्यति।
तीर्थस्थाने कृतं पापं वज्रलेपं भवेदपि ॥६९॥
तदुभयविनाशस्तु गंगासागरसंगमे।
गोमतीसागरयोगे यमुनापंचतीर्थके ॥७०॥

पृथिव्यां सर्वतीर्थेषु स्नानजं यत्फलं मतम् ।
यमुनायाः पञ्चतीर्थस्नानेन तुल्यमेव न ॥७१॥
एकादश्यां हि विश्रान्तौ द्वादश्यां सौकरे तथा ।
त्रयोदश्यां नैमिषे च चतुर्दश्यां प्रयागके ॥७२॥
पूर्णायां पुष्करे स्नानात् कार्तिक्यां च व्रते व्रते ।
तीर्थे तीर्थे जनः स्नात्वा सर्वपापात् प्रमुच्यते ॥७३॥
मथुरायां सर्वतीर्थे विश्रान्तौ पञ्चतीर्थके ।
असिकुण्डे सरस्वतीयोगे गर्तेश्वरे तथा ॥७४॥
स्नानजात्तु फलाद् दशगुणं पुण्यं सकृदपि ।
कृष्णगंगास्नानतो वै जायते नाऽत्र संशयः ॥७५॥
ज्ञानतोऽज्ञानतो वापि दुष्कृतं समुपार्जितम् ।
कृष्णगंगाजलस्पर्शे वज्राख्यमपि नश्यति ॥७६॥
मथुरा हि कृष्णरूपा नदी कृष्णमयी तथा ।
नरा नार्यः कृष्णरूपास्तत्र पापं न विद्यते ॥७७॥
यस्य श्रोत्रैकदेशे तु ह्याकाशो लेशमात्रकः ।
यस्य नयनयोः प्रान्ते तेजो लीनं भवत्यपि ॥७८॥
यस्य श्वासेऽनिलो लीनो जलं स्वेदे विलीयते ।
पृथ्वी यस्योदरे त्वण्वी भूत्वा तिष्ठति सर्वदा ॥७९॥
यत्कुक्षौ वार्धयः सर्वे लीना भवन्ति सर्वदा ।
यस्माद् भवन्ति सततं ब्रह्माण्डानि स्वरोमतः ॥८०॥
अवतारा वराहाद्या भवन्ति यस्य वाञ्छया ।
तस्मिन् कृष्णे स्थिते चात्र पापलेशो न विद्यते ॥८१॥
पृथ्वीरक्षाकरो देवो वराहो यत्र विद्यते ।
तस्य सन्दर्शनात्त्वत्र महापातकनाशनम् ॥८२॥
तत्क्षणादेव विप्रेन्द्र ! नात्र कार्या विचारणा ।
नवम्यां ज्येष्ठशुक्लस्य कृष्णगंगोदकाऽऽप्लवात् ॥८३॥
सूकरे तु त्रिरात्रं वै मानवो दीपदानतः ।
तिलोत्तमे ! महावज्रात्यतिपापैः प्रमुच्यते ॥८४॥
कालिंजरे तु द्वादश्यां स्नात्वा सम्पूज्य देवताम् ।
दिव्यचतुर्भुजो भूत्वा विष्णुलोके महीयते ॥८५॥
एवं लक्ष्मि ! देववाण्या पाञ्चालश्च तिलोत्तमा ।
बोधितौ तौ गतौ दिव्यसुमन्तोराश्रमे तदा ॥८६॥
पादयोः पतितौ तस्योचतुश्च त्वं पिता गुरुः ।
ब्रूहि दिव्यदृशा ब्रह्मन्नत्र किं करवावहै ॥८७॥
मुनिः प्राह व्योमवाणी यथार्था नाऽनृता क्वचित् ।
मया प्रत्यक्षतो दृष्टं भवद्गात्रेषु पातकम् ॥८८॥
स्नानात्प्रागेव नो पश्चात्ततो नास्त्येव पातकम् ।
पञ्चतीर्थे त्रिगर्तेशे स्नानं संकुरुतं सदा ॥८९॥
आश्रमे मम नित्यं च तिष्ठतं कुरुतं जपम् ।
पापादुपरमितौ च यावत्कालं प्रजीवथः ॥९०॥
ममाऽऽशीर्वादतश्चापि भ्राता च भगिनी शुभौ ।
विपाप्मानौ तु संभूतौ ब्रह्मलोकं गमिष्यथः ॥९१॥
एवं तत्राश्रमे लक्ष्मि ! सुमन्त्वाद्या महर्षयः ।
दिव्यदेहाः प्रवसन्ति ततस्तीर्थोत्तमं स्मृतम् ॥९२॥
संप्राप्तौ दिव्यदेहौ तौ भ्राता च भगिनी शुभौ ।
आर्षौ तत्राश्रमे जातौ दर्शनादपि मुक्तिदौ ॥९३॥
ततो विमानमारुह्य कृष्णनारायणस्य तौ ।
श्रीकृष्णेन समं यातौ गोलोकं धाम शाश्वतम् ॥९४॥
एवं प्रभावस्तीर्थस्य मथुरायां यमीजले ।
कृष्णगंगास्थलस्यापि तथा कालिञ्जरस्य च ॥९५॥
सूकरस्यापि तीर्थस्य महालक्ष्मि ! वदामि किम् ।
पापं न पापरूपं तद् यदि कृष्णाय चार्पितम् ॥९६॥
अपापं पापरूपं स्याद् यदि कृष्णाय नाऽर्पितम् ।
तस्मात् पुण्यं महादानं कार्यं यत्किञ्चिदेव तत् ॥९७॥
मह्यं कृष्णाय दातव्यं निर्दोषं दोषवत्तु यत् ।
कामः क्रोधो महान् लोभो मानः स्वादश्च मोहिता ॥९८॥
सर्वे कृष्णार्पिता दिव्या निर्बन्धाय भवन्ति वै ।
यः शृणोति महालक्ष्मि ! श्रद्धया पठति ध्रुवम् ॥९९॥
सप्तजन्मकृतं पापं तस्य सर्वं व्यपोहति ।
प्रातरस्यैकवारं वै चातुर्मास्ये तु वाचनम् ॥१००॥
करिष्यति जनस्तस्य फलं गोशतदानजम् ।
पापलेशो न वै तस्याऽमृतत्वं जायते दृढम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुरातीर्थमाहात्म्ये सौराष्ट्रीयस्य वरपत्तनवासिनः पांचालविप्रस्य तिलोत्तमाख्यभगिन्या सह मथुरायामजानतोर्जातस्य व्यवायभावस्य व्योमवाण्या सुमन्तुना ऋषिणा च निष्पापता पञ्चतीर्थकृष्णगंगातीर्थप्रभावेण दर्शितेति निरूपणनामा द्विपञ्चाशदधिकत्रिशततमोऽध्यायः ॥ ३५२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चरितं वै नारीणां चञ्चलं सदा ।
पुत्रं रूपयुतं दृष्ट्वा पितरं वा जनान्तरम् ॥ १ ॥
क्षणं संकल्पवशगा क्वचिद् भवति भामिनी ।
चञ्चलं हि मनस्तद्वद् राजसी कामवेदना ॥ २ ॥
पराधीनं करोत्येव यथा साम्बं करिष्यति ।
शृणु श्रीकृष्णस्य पुत्रः साम्बनामा भविष्यति ॥ ३ ॥

मातॄणां तत्र मोहेन शापपात्रं भविष्यति ।
साम्बस्य वर्ष्मणि कुष्ठरोगो भविष्यति तदा ॥ ४ ॥
स मथुरां समागत्याऽऽदित्यस्योपासनां तथा ।
करिष्यति प्रतिष्ठां च स्नास्यति यामुने जले ॥ ५ ॥
तेन कुष्ठविनाशोऽस्य भविष्यति न संशयः ।
एतादृशं तु माथुरं तीर्थं रोगविनाशकम् ॥ ६ ॥
शृणु विस्तरतो लक्ष्मि ! भविष्यत् कथयामि तत् ।
द्वारकां वसमानस्य पुत्रदारसुतैः सह ॥ ७ ॥
कृष्णस्य भवनं तत्र समायान्नारदो मुनिः ।
यथायोग्यं स्वागतं श्रीकृष्णस्तस्याऽकरोन्मुदा ॥ ८ ॥
नारदस्तु तदैकान्ते विज्ञप्तिमकरोद्धरिम् ।
कृष्ण ! किञ्चिद्वक्तुकामः शृणु स्वर्गे श्रुतं मया ॥ ९ ॥
साम्बनामा कृष्णपुत्रो युवा रूपातिशोभनः ।
स्पृहणीयः स्त्रीजनस्य कान्तो नान्यो हि तत्समः ॥१०॥
अपि कृष्णस्य पत्न्योऽपि स्पृहयन्ति विलोक्य तम् ।
देवयोन्यश्च याः सन्ति सहस्राणि च षोडश ॥११॥
साम्बं दृष्ट्वा तु सर्वासां क्षुभ्यन्ति मानसानि वै ।
एतत् स्वर्गादिलोकेषु गीयते दैवतैः कथम् ॥१२॥
यशो वै स्वर्गवासोऽस्ति नरकस्तद्विपर्ययः ।
त्वत्प्रियार्थं समायातः कथयितुं महाप्रभो ॥१३॥
पुण्यं संश्रूयते यावत् तावत्पुरुष उच्यते ।
अपुण्यश्रवणे तस्य निरयो वै प्रकीर्त्यते ॥१४॥
तस्मात्सत्यमसत्यं वा लक्षयिष्याम्यहं हि तत् ।
तस्मात् साम्बं तथा देवीगणं संसदि चाऽऽह्वय ॥१५॥
इतिप्रोक्तस्तथा कृष्णो देवीराहूय सर्वशः ।
निषाद्य साम्बमाहूय स्वपार्श्वेऽपि न्यषादयत् ॥१६॥
दृष्ट्वा रूपमतीवाऽस्य साम्बस्यात्र वरस्त्रियः ।
चुक्षुभुः सकला देव्यः कृष्णस्यैव तु पश्यतः ॥१७॥
नारदं ता नमस्कृत्य जग्मुः स्वं स्वं निकेतनम् ।
साम्बस्तस्थौ तत्र कृष्णो लज्जयाऽऽवाङ्मुखोऽभवत् ॥१८॥
क्षणो नास्ति रहो नास्ति नास्तिकृत्ये विचारणा ।
सुरूपं पुरुषं दृष्ट्वा क्षरन्ति प्रमदाः सदाः ॥१९॥
स्वभाव एष नारीणां तत्र का परिवेदना ।
यथा त्वेकेन चक्रेण रथस्य न गतिर्भवेत् ॥२०॥
विना नरं त्वगतयः क्षरन्ति नृरसाः स्त्रियः ।
पुंस्वाददृष्टिपातेन मन्यन्ते कृतकृत्यताम् ॥२१॥
प्रद्युम्नं वीक्ष्य ताः सर्वा लज्जामापुः सुपुष्कलाम् ।
साम्बं दृष्ट्वा तु ताः सर्वा अनङ्गेन प्रपीडिताः ॥२२॥

उद्दीपनविभावोऽयं साम्बस्त्वत्स्त्रीविमोहकः ।
सत्यलोके प्रवादो यस्तव जातो दुरत्ययः ॥२३॥
मया श्रुतस्तु लोकेभ्यो ब्रह्मर्षिभ्यो मुहुर्मुहुः ।
साम्बं त्यक्त्वाऽयशस्तस्मान्मार्ष्टुमर्हसि केशव ! ॥२४॥
इत्युक्त्वा नारदो मौनमास्थितोऽथ हरिस्ततः ।
तं तु शशाप साम्बं वै विरूपो भव पुत्रक ! ॥२५॥
तावत्साम्बः कुष्ठयुक्तोऽभवद् विरूप एव ह ।
अथ साम्बं तथा दृष्ट्वा सशोकं प्राह नारदः ॥२६॥
साम्ब साम्ब कृष्णपुत्र ! शृणु जाम्बवतीसुत ! ।
सूर्यमुद्यन्तमेव त्वं नमस्कुरु सदाऽनघ ! ॥२७॥
कुष्ठरोगो रविस्तुष्टो नाशयिष्यति पुत्रक ! ।
मथुरायां च त्वं गत्वा षट्सूर्ये प्राप्स्यसे फलम् ॥२८॥
प्रातराराधय सूर्यं षट्सूर्यतीर्थकेऽनघ ! ।
मध्याह्नेऽपि तथा सायं सद्यः फलमवाप्नुहि ॥२९॥
कृष्णगंगोद्भवे स्नात्वा सूर्यमाराध्य यत्नतः ।
सर्वपापविनिर्मुक्तः कुष्ठादिभ्यो विमुच्यते ॥३०॥
इत्युक्तस्तु महालक्ष्मि ! साम्बः कृष्णाज्ञया ययौ ।
मथुरां दोषहरणीं मुक्तिदां स ददर्श ह ॥३१॥
षट्सूर्यान्पूजयामास नियतस्नानतर्पणः ।
ब्राह्मं तथोदयन्तं च ह्यूर्ध्वं यान्तं च मध्यगम् ॥३२॥
नमन्तं चाप्यस्तगतं नित्यं साम्बः समार्चयत् ।
सूर्यस्तुष्टः स्वल्पकाले साम्बस्याऽग्रे समागमत् ॥३३॥
वरं वृणीष्व भद्रं ते गतं कुष्ठादिकं तव ।
इत्युक्त्वा साम्बसर्वाङ्गेऽस्पृशत् साम्बोऽपि तत्क्षणम् ॥३४॥
कुष्ठहीनोऽभवत्सूर्यसमकान्तिर्व्यराजत ।
सूर्यो द्वितीयरूपेण साम्बेन सह वर्तते ॥३५॥
ब्राह्मं सूर्यं विराडाख्यं साम्बश्चक्रे प्रतिष्ठितम् ।
उदयाख्यरविं यम्या दक्षिणे सम्प्रतिष्ठितम् ॥३६॥
ऊर्ध्वयान्तं कालप्रियरविं चक्रे प्रतिष्ठितम् ।
वैकुण्ठपश्चिमे चक्रे रविं माध्यन्दिनीयकम् ॥३७॥
अवतरन्त साम्बार्कं मथुरायां प्रतिष्ठितम् ।
अस्तमन्तं कृष्णगंगादक्षिणेऽर्कं प्रतिष्ठितम् ॥३८॥
चक्रे साम्बस्तत्पूजादिविधिं साम्बपुरे स्थितः ।
मथुरायां त्वभवत् तत् साम्बपुरं कुलेश्वरम् ॥३९॥
माघमासस्य सप्तम्यां दिव्यं साम्बपुरं प्रति ।
रथयात्रां साम्बसूर्यां करिष्यन्ति तु ये जनाः ॥४०॥
गच्छेयुस्तत्पदं शान्तं सूर्यमण्डलभेदकम् ।
कृष्णगंगां जनाः स्नात्वा दृष्ट्वा षट्सूर्यमण्डलम् ॥४१॥

पापरोगादिमुक्ताश्च यास्यन्ति परमं पदम् ।
इति ते कथितं लक्ष्मि ! मनःपापादिनाशकम् ॥४२॥
अगम्यागमनस्यापि चागम्यगमनस्य च ।
पापं प्रज्वालयत्याशु त्वादित्यषट्कतीर्थकम् ॥४३॥
कामेन यन्मनोदौष्ट्यं विधुनोति तु तद् द्रुतम् ।
अपराधानपि सर्वान् मथुरायां हरिः स्वयम् ॥४४॥
न वै गणयति कृष्णो गोपीजनकृतादरः ।
साम्बोऽभवद्धूतपापस्तत्रैवाऽन्तरधीयत ॥४५॥
सूर्यरथे सदा तिष्ठन् भविष्यं परिपृच्छति ।
तत्सर्वं तु नवं कृत्वा ज्ञातवान् कृष्णपुत्रकः ॥४६॥
साम्बपुरं मथुरायां कृत्वा यातो निजं गृहम् ।
पठनाच्छ्रवणात्त्वस्य षडादित्यार्हणाफलम् ॥४७॥
लभते सूर्यलोकं च प्राणान्ते कृष्णधाम च ।
शृणु लक्ष्मि ! भक्तकृतानपराधानपि प्रिये ! ॥४८॥
अज्ञातः सर्वथा शुद्धो वैषम्ये देशकालयोः ।
विनाऽपराधो मनुजः सापराधो विजायते ॥४९॥
कर्मणा मनसा वाचात्वपराधा भवन्ति वै ।
स्नानहीनत्वमेवाथ हिंसनं मिथुनक्रिया ॥५०॥
मलमूत्रपरित्यागो बालजन्मादिकं तथा ।
शवस्पर्शादिकं देवपूजने ह्यपराधनम् ॥५१॥
मन्दिरस्य तथा मूर्तेः सान्निध्ये पत्प्रसारणम् ।
पृष्ठदानं मेहनं च यथेष्टभक्षणादिकम् ॥५२॥
मलिनाऽशुद्धभक्षित्वं निषिद्धकुसुमार्चनम् ।
अनुत्तार्य तु निर्माल्यं पूजाक्षीणेऽन्धकारिणि ॥५३॥
क्लेशनं देवतागारे सोपानत्कोऽपसर्पणम् ।
सुरामांसाशनं देवस्यान्धकारे प्रबोधनम् ॥५४॥
अनमस्करणं तद्वद् ग्राम्यजल्पवितण्डिकाः ।
धूम्रपानं ष्ठीवनं चेत्याद्याः कर्मापराधकाः ॥५५॥
अध्यानं चाऽस्मरणं चाऽधारणं श्रीहरेस्तथा ।
अन्यसंकल्पकरणं विषयादिविचिन्तनम् ॥५६॥
रागो द्वेषस्तथा तृष्णा वासना चाऽन्यनिन्दनम् ।
कुतर्कहेतुसन्देहा भ्रान्तिर्विपर्ययस्तथा ॥५७॥
आलस्यं चाऽननुसन्धानकं गर्वोऽभिमानिता ।
कामः क्रोधस्तथा लोभो मदो मात्सर्यमित्यपि ॥५८॥
ईर्ष्याऽनिष्टविचाराद्या मानसा ह्यपराधकाः ।
मातृपितृसुहृन्मित्रगुरुद्विजसुरादयः ॥५९॥
सतीसाध्वीप्रियापत्नीबालाबालकवादयः ।
तृणाजन्तुचेतनाद्याः सर्वे नारायणान्तराः ॥६०॥
पतिभृत्याश्रिता नैवाऽपराद्धव्याः कदाचन ।
असत्प्रलापोऽसद्वार्ता व्यर्थभाषित्वमित्यपि ॥६१॥
अभजनं दोषदानं दुष्टशब्दप्रयोजनम् ।
कलहश्चाक्रोशनं च कोलाहलश्च पर्दनम् ॥६२॥
अतिशब्दध्वनिध्वानं गालीवाचनमित्यपि ।
अश्लीलवाक् समुद्घोषः सक्थिस्फोटादिकं तथा ॥६३॥
अनर्गलप्रहास्याद्या वाणी कृतापराधकाः ।
न कर्तव्या विचार्यैव स्वानिष्टफलदास्तु ते ॥६४॥
देवतीर्थगुरुविप्रसाधुसाध्वीपतिव्रताः ।
सर्वे ये तारकास्तेषामपराधान् न चाऽऽचरेत् ॥६५॥
सापराधस्तु पुरुषो विष्णुं नैव प्रपश्यति ।
राक्षसीं तामसीं पूजां नैव कुर्यात् कदाचन ॥६६॥
मांसमद्यार्पिणी पूजा राक्षसी प्रोच्यते प्रिये ! ।
हिंसादिकृत्ययुक्ता या पूजा सा तामसी मता ॥६७॥
पारदार्यं परद्रव्यहरणं च परार्दनम् ।
परनाशकरं कर्म राक्षसं कर्म कीर्तितम् ॥६८॥
कर्मकृतापराधानां शुद्धिः स्नानादिना भवेत् ।
तीर्थस्नानेन पञ्चगव्यानां संप्राशनेन च ॥६९॥
उपोषणेन यज्ञेन दीर्घकालगतेन च ।
पञ्चामृतेन च तथा ब्रह्मकूर्चव्रतेन च ॥७०॥
देवानां सेवया सतां सेवया शुद्धिरिष्यते ।
मनःकृतापराधानां शुद्धिर्ध्यानादिना भवेत् ॥७१॥
चित्तवृत्तिनिरोधेन तथेन्द्रियनिरोधतः ।
ज्ञानेन दोषत्यागेन तपसा पुण्यभावतः ॥७२॥
कथायाः श्रवणेनापि मननेन च निर्णयात् ।
आत्मनस्तु विचारेण चिदचितोर्विवेकतः ॥७३॥
पुंप्रकृत्योर्धर्मबोधान्मानसी शुद्धिरिष्यते ।
वाचा कृतापराधानां शुद्धिः स्यात्तु जपादिभिः ॥७४॥
कृष्णनारायण ! विष्णो ! हरे ! माधव ! केशव ! ।
लक्ष्मीपते रमानाथ ! श्रीपते ! पार्वतीपते ! ॥७५॥
गोपीपते ! प्रभो ! माणिकीपते ! च प्रभापते ! ।
सत्पते ! चाक्षरपते ! मुक्तपते ! पुमुत्तम ! ॥७६॥
गोलोकादिपते ! ब्रह्मपर ! श्रीपुरुषोत्तम ! ।
इत्येवं नामजपनादोंकारादिजपात्तथा ॥७७॥
क्षमाया याचनाच्चापि कथाया वाचनात्तथा ।
कृष्णकीर्तनकरणात् कृष्णमालाऽऽधिवर्तनात् ॥७८॥
सत्यव्रतप्रतिष्ठानाद् वाचिकी शुद्धिरिष्यते ।
मुच्यते त्वपराधैस्तु जनो विष्णोः स्तवं पठन् ॥७९॥

सम्वत्सरस्य मध्ये वै तीर्थस्नानेन शुद्ध्यति ।
काश्यां तथा मथुरायां द्वारकायां च पुष्करे ॥८०॥
बदर्यां च जगन्नाथपुर्यां साकेतपत्तने ।
हरिद्वारे च गण्डक्यां गोदावर्यां जनार्दने ॥८१॥
कावेर्यां सेतुबन्धे च पद्मावत्यां च रैवते ।
स्वर्णरेखाजले चाऽश्वपट्टसरसि मानसे ॥८२॥
नारायणे चेन्द्रद्युम्ने कावेर्यां पद्मनाभके ।
काञ्च्यां च नर्मदायां चाऽवभृथे पट्टकोत्सवे ॥८३॥
स्नानात्पानात्तथा ध्यानात् कीर्तनाद् धारणात्तथा ।
श्रवणान्मननाच्चापि दर्शनात् पातकक्षयः ॥८४॥
अटित्वा सर्वतीर्थानि प्रायान्माथुरमण्डलम् ।
आत्यन्तिकी तु विश्रान्तिर्विश्रान्तिघट्टके भवेत् ॥८५॥
फलं परार्धगुणितं मथुरायां प्रजायते ।
गतेरन्वेषकाणां तु मथुरा परमा गतिः ॥८६॥
या गतिर्योगयुक्तस्य सांख्यज्ञानवतस्तथा ।
सा गतिस्त्यजतः प्राणान् मथुरायां न संशयः ॥८७॥
न तीर्थं मथुरातुल्यं न देवः कृष्णसदृशः ।
न ब्रह्मधामभा मुक्तिर्न परः पुरुषोत्तमात् ॥८८॥
यदाश्रये कृते सर्वपापानां विलयो भवेत् ।
आत्मनि यद्भृते स्वस्याऽऽत्यन्तिकी मुक्तिरामिलेत् ॥८९॥
इति ते कथितं लक्ष्मि ! ज्ञानानां ज्ञानमुत्तमम् ।
श्रवणात्पठनाच्चापि जनस्तत्फलभाग् भवेत् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने माथुरतीर्थमाहात्म्ये द्वारिकायां साम्बरूपदर्शनेन कृष्णपत्नीनां मनःक्षोभात् कृष्णदत्तशापेन जातकुष्ठसाम्बस्य मथुरायामादित्योपासनया कुष्ठनिवृत्तिः षडादित्यस्थापना, कायिकवाचिकमानसिकापराधास्तन्निवारणं चेत्यादिनिरूपणनामा त्रिपंचाशदधिकत्रिशततमोऽध्यायः ॥३५३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! मथुरायां ध्रुवतीर्थे सुमुक्तिदम् ।
तर्पणादन्नदानाच्च पितॄणां तृप्तिकारकम् ॥ १ ॥
मथुरायां चन्द्रसेनो राजासीद् धर्मकार्यकृत् ।
तस्य पत्नी चन्द्रप्रभा वीरसूर्वीरपुत्रका ॥ २ ॥
तस्या दासीशतस्यैका दासी त्वासीत् प्रभावती ।
प्रभावत्याः पूर्वजा वै पितरः शतसंख्यया ॥ ३ ॥
स्वदोषैः पतिताः सर्वे नरकं प्रति भामिनि ! ।
करोति तर्पणं नापि कारयति प्रभावती ॥ ४ ॥
श्राद्धं दानं च वा किञ्चित् पितॄणां तृप्तिहेतवे ।
तस्याः कुटुम्बिनश्चापि कुर्वन्त्येव न तर्पणम् ॥ ५ ॥
तस्याः पितृगणो भ्रष्टः कदाचिद् यमुनातटे ।
सूक्ष्मः प्राणिसमूहो वै ध्रुवतीर्थे समापतन् ॥ ६ ॥
कृष्णवर्णाश्चंक्रमन्तो मशकाकारसन्निभाः ।
पितरः ऋषिणा दृष्टास्त्रिकालज्ञाऽभिधायिना ॥ ७ ॥
त्रिकालज्ञः सदा यस्यां पितॄन् दत्वा जलाञ्जलीन् ।
तर्पयत्येव पितरस्तृप्ता यान्ति महःस्थलम् ॥ ८ ॥
स ऋषिः षष्ठकालाशी पयोव्रती सदास्ति वै ।
सूर्यकिरणपानाशी सूर्यगत्या गतिस्थितः ॥ ९ ॥
आगतं पितृसमूहं दृष्ट्वा दृष्ट्वैव मोहितः ।
कृपया तान्निरीक्ष्यँश्च न चक्रे व्रतजापनम् ॥१०॥
चतुर्थांशावशेषश्च दिवसः पर्यवर्तत ।
एके तत्र समायान्ति पितरो नभसोऽवनिम् ॥११॥
अन्ये पूर्वादुत्तराच्च दक्षिणात्पश्चिमात्तथा ।
लक्षशः पितरस्तत्र ध्रुवतीर्थे समागताः ॥१२॥
आयान्ति प्रतियान्ति ये तान्पश्यन् विस्मयं गतः ।
तत्रैकः समूहो दृष्टो हृष्टपुष्टांगतुष्टिमान् ॥१३॥
पुत्रैः कृतस्वधाप्राप्तो जलं पीत्वा दिवं ययौ ।
अन्यः समूहो दृष्टोपि तपस्वी क्षामदेहवान् ॥१४॥
रूक्षः स्नानरतो पीत्वा जलं भुवर्ययौ स च ।
अथ संघोऽपरो दृष्टो वस्त्रालंकारशोभितः ॥१५॥
हृष्टपुष्टांग एवाऽसौ जलं पीत्वा दिवं ययौ ।
अथेतरः समुदायो दृष्टो नग्नशरीरकः ॥१६॥
सुपुष्टः सुखसम्पन्नो जलं पीत्वाऽम्बरं ययौ ।
अथाऽन्ते बहवो दृष्टा विमानवरमास्थिताः ॥१७॥
बहुभोजनपूर्णानि यानान्युच्चावचानि च ।
गृहीत्वा व्योममार्गेण गच्छन्ति महरादिकम् ॥१८॥
अथ परे लोकिताश्च त्वीरयन्तः शुभाशिषः ।
तृप्ता हंसगरुडादिपृष्ठस्था गजवाजिगाः ॥१९॥
तदन्ये विकृता दृष्टाः क्रुद्धाः क्षुधातिपीडिताः ।
पृष्ठलग्नोदरा मानहीनाः शापप्रदायिनः ॥२०॥
ततोऽन्ये च तथा दृष्टाः पुष्पहाराऽभिपूजिताः ।
श्राद्धे भुक्त्वा महोत्साहा यथा देवास्तथोज्ज्वलाः ॥२१॥
केचित् पिण्डान् करे धृत्वा केचिद्दत्त्वा फलानि च ।
केचित् षोडशवस्त्वाद्यैर्युक्ता यान्ति जनादिकम् ॥२२॥

केचिच्छय्यासमायुक्ता भोगभोग्यसमन्विताः ।
तुष्टाः प्रसन्नमनसो दृष्टास्तपोऽभियायिनः ॥२३॥
केचित् समुकुटा राज्यच्छत्रचामरवीजिताः ।
दृष्टा मानयुता याताः सत्यलोकं विमानकैः ॥२४॥
यमुनायां नववस्त्रैर्युता भूषादिशोभिताः ।
परिभ्रमन्ति पितरश्चान्ये दृष्टास्तथाविधाः ॥२५॥
कालिन्द्यां ध्रुवतीर्थे वै मध्याह्नोत्तरमेव ह ।
आसायं पितरश्चैवं त्रिकालज्ञर्षिणेक्षिताः ॥२६॥

गते पितृगणे पुत्राः सकलत्राः कुटुम्बिनः ।
श्राद्धकर्तार एवैते सायं स्वस्वगृहान् ययुः ॥२७॥
निर्जनं ध्रुवतीर्थं च जनहीनं तदाऽभवत् ।
त्रिकालज्ञोऽपि मुनिराड् विस्मितस्तत उत्थितः ॥२८॥
ददर्शैकं कृशांगं च क्षुत्क्षामं गतिविह्वलम् ।
प्रतीक्षन्तं कम्पमानं पृष्ठलग्नलघूदरम् ॥२९॥
ऊरुचर्मास्थिरुक्त्ररक्तं जृम्भमाणं पुनः पुनः ।
कोटराक्षं म्लानवक्त्रं क्षुद्रस्वल्पस्वरं कृशम् ॥३०॥

दयालुः स मुनिस्तं वै पप्रच्छ को भवानथ ।
दुःखितो विकृताकारो वेष्टितो मशकैर्बहु ॥३१॥
न गच्छसि न ते स्थानं निराश्रितोऽसि किं वद ।
मयाऽद्य बहवो दृष्टाः कोटिशः पितरोऽत्र वै ॥३२॥
तेषामालोकने कालो गतोऽद्य मम सर्वथा ।
न ममाद्य नैत्यकं वै कर्मजातं विलोकने ॥३३॥
अथ त्वं च मया दृष्टः क्रिया मे नश्यते खलु ।
पश्चात् कर्म करिष्ये मे नैत्यकं वद मे ऋतम् ॥३४॥

यथाशक्ति करिष्ये वै शक्तं स्याच्चेद्धितं तव ।
श्रुत्वा जन्तुरुवाचैनं मुनिं सर्वं यथातथम् ॥३५॥
बृहन्निमित्तमद्यैव पितृणां तृप्तिकारकम् ।
ध्रुवतीर्थे कृतं श्राद्धं दत्तं तिलोदकादिकम् ॥३६॥
अन्नं वस्त्रं फलं पुष्पं जलं शय्यादिकं तथा ।
उपानहौ गृहं छत्रं भूषा दुग्धं तथेतरत् ॥३७॥
अद्य दत्तं सुतदारपुत्रीपत्नीकुटुम्बिभिः ।
सर्वं लक्षगुणं तृप्तिप्रदं पितृप्रतर्पणम् ॥३८॥

ध्रुवतीर्थे ध्रुवं सर्वं दत्तं भवति भूसुर ! ।
यानं च वाहनं गौश्च वाटिका क्षेत्रमित्यपि ॥३९॥
दत्तं नीत्वा सह यान्ति स्वर्णं द्रव्यं तथेतरत् ।
तिलतृप्ताः सर्वतृप्ताः पितरोऽद्याऽतितोषिताः ॥४०॥
सर्वे तृप्ता दिवं यान्ति पितरश्चाद्य पुत्रिणाः ।
सन्तानैः पुष्टवपुषो दत्तश्राद्धैः कृतोदकैः ॥४१॥

येषां सन्ततिरक्षय्या तिष्ठत्येवं प्रजावती ।
ते स्वधापूजितैः पुत्रैर्गच्छन्ति परमां गतिम् ॥४२॥
अद्य राज्ञस्तु पितरश्चन्द्रसेनस्य पूजिताः ।
दृष्टास्त्वया तथा चान्ये दिव्यदृष्ट्या दिवंगताः ॥४३॥
ब्राह्मणानां क्षत्रियाणां वैश्यानां शूद्रकर्मणाम् ।
प्रतिलोमानुलोमानां सर्वेषां श्राद्धकर्मिणाम् ॥४४॥
पितरस्तु त्वया दृष्टा येषां सन्ततिरव्यया ।
अहन्तु संप्रतीक्षन्वै श्राद्धं त्वत्र व्यवस्थितः ॥४५॥
आशापाशशतैर्बद्धस्तृप्त्यर्थश्च बुभुक्षितः ।
योनिसंकरदोषेण पूर्वं वै नरकं गतः ॥४६॥
नास्तिकैर्मम वंश्यैश्च श्राद्धं दत्तं न मेऽद्य वै ।
प्रत्यब्दं त्वागतस्यात्र प्राप्तिः श्राद्धस्य मे नहि ॥४७॥
अन्यपितृदास्यवृत्तिं कृत्वा जीवामि भूसुर ।
अद्य श्राद्धसमारोहे शतवर्षैर्मनागपि ॥४८॥
कुटुम्बितो मया नैव लब्धं तृप्तिर्न मेऽद्य वै ।
अगतिर्गमने जाता त्रितापैश्च सुदुःखितः ॥४९॥

बलयुक्ता ययुः सर्वे निर्बलस्य कुतो गतिः ।
आगमिष्यन्ति वै केचित् सर्वपितृप्रतर्पकाः ॥५०॥
तदा ह्यवाप्य किञ्चिद्वै यास्येऽरण्यं समीपगम् ।
इमे ये मम देहे तु भवन्ति मशकाः कृशाः ॥५१॥
सन्तानप्रक्षयादेते मम देहं समाश्रिताः ।
अहं वै पूर्वजस्तेषां ह्येते मे वंशजा जनाः ॥५२॥
मां खादन्ति क्षुधाकाले तन्तुविच्छेददुःखिताः ।
एका तन्तुमयी पुत्री मम वंशेऽत्र विद्यते ॥५३॥
मथुरायां चन्द्रसेननृपतेः कर्मचारिणी ।
महिष्याः सेवने सक्ता दासी नाम्ना प्रभावती ॥५४॥
तस्याः पुत्रः कर्मचारी विरूपनिधिसंज्ञकः ।
अस्माकं सन्ततेस्तन्तुस्तस्य श्राद्धकृते वयम् ॥५५॥
आशया बद्धहृदया श्राद्धतर्पणकामनाः ।
स्थिता एतावदेवं तु ततो यास्यामहे वनम् ॥५६॥
नरके त्वप्रतिष्ठे वा वार्धौ वा भग्नमानसाः ।
यदि तन्तुः स चेद् दद्याज्जलं श्राद्धं तिलाञ्जलीन् ॥५७॥

तदा पुष्टा वयं भूत्वा यामो दिवं कनिष्ठकम् ।
शृणु निकृष्टयोन्याऽपि दत्तं वै प्राप्यते हविः ॥५८॥
तया दत्तेन सन्तुष्टा वयं स्यामः सुपुत्रिणः ।
पूर्वकर्मविपाकेन यां यां गतिमधोमुखीम् ॥५९॥
ऊर्ध्वां च प्राप्ताः पितरः पुत्रिणः पुत्रिकाश्रिताः ।
श्राद्धं पिण्डोदकं दानं पुत्रीकृतं त्ववाप्यते ॥६०॥

नान्या गतिः पितॄणां स्यात् पुत्र्या पितरः पुत्रिणः ।
अपि स्यात्स कुलेऽस्माकं यो नो दद्याज्जलांजलिम् ॥६१॥
नदीषु बहुतोयासु शीतलासु विशेषतः ।
तीर्थमध्ये तिलमिश्रं फल्युक्तं जलांजलिम् ॥६२॥
रौप्यजुष्टजलेनापि नाभिदघ्ने जले स्थितः ।
दर्भपाणिः प्रदद्याच्च तेन तृप्ता वयं सदा ॥६३॥
दर्भपाणिस्त्रिस्त्रिगोत्रे पितृनाम समुच्चरन् ।
तृप्यतां ह्यमुकनाम्ने स्वधा चेति वदन् सुतः ॥६४॥
देवेभ्यश्चांजलिं दद्याद् ऋषिभ्यस्त्वंजलिद्वयम् ।
पितृभ्यस्त्र्यञ्जलीन् दद्यात् तृप्यन्तां समुदाहरन् ॥६५॥
पित्रे प्रथमतो दद्यात् मात्रे दद्यात्ततः परम् ।
मातामहाय च दद्याद् दद्यात् पितामहाय च ॥६६॥
तत्परेभ्यश्च पितृभ्यः प्रदद्यात् त्रीन् जलांजलीन् ।
पितामह्यै तथा दद्याद् दद्याच्च प्रपितामहीम् ॥६७॥
अनेन पिण्डदानेन तेऽसूर्यान्नाशयाम्यहम् ।
इदं जलं मया दत्तमक्षय्या तृप्तिरस्तु ते ॥६८॥
वार्यपि श्रद्धया दत्तं तदानन्त्याय कल्पते ।
गृह्णानाः पितरः केचिद् भवन्त्युद्विग्नरूपिणः ॥६९॥
शृणु तत्कारणं विप्र ! श्राद्धं स्याद्विफलं यथा ।
अदेशकाले यद्दत्तं विधिहीनमदक्षिणम् ॥७०॥
अपात्रे मलिनं द्रव्यं तृप्तये नैव जायते ।
अश्रद्धेयमपांक्तेयं दुष्टप्रेक्षितमीक्षितम् ॥७१॥
तिलमन्त्रकुशैर्हीनमासुरं तद्भवेदिति ।
अशुचीनि गृहाण्येवाऽशुचिश्राद्धहवींषि च ॥७२॥
क्रोधाविष्टानि दानानि विधिपात्राऽकृतानि च ।
अदक्षिणानि श्राद्धानि राक्षसेभ्यो मिलन्ति वै ॥७३॥
दक्षिणाहीनयज्ञस्य फलं रक्षो भुनक्ति हि ।
देवब्राह्मणगुर्वग्रे वृथाशपथकारिणाम् ॥७४॥
कृतं सर्वं हि पातालवासिनो लक्ष्मि ! भुंजते ।
अश्रोत्रियाणि श्राद्धानि हुतं दत्तममन्त्रकम् ॥७५॥
गुर्वभक्तस्य शिष्यस्य कीर्तनं पुण्यकर्मणः ।
करिष्यतश्च धर्मस्य प्रागेव तु प्रकाशनम् ॥७६॥
सर्वं पातालवासानां तृप्त्यर्थं परिकल्पितम् ।
अलीकं तु वृथाऽऽडम्बरेण यद्वै कृतं व्रतम् ॥७७॥
दानं श्राद्धं तपो होमो रक्षसां तद्भवेत् किल ।
नोपतिष्ठन्ति पितॄणां नग्नाः पितृगणास्ततः ॥७८॥
मुषिता राक्षसाद्यैर्वै दानादिफलभोक्तृभिः ।
अफलास्ते यथाऽऽहूतास्तथा गच्छन्त्यभोजनाः ॥७९॥
मौनमास्थाय ते सर्वे क्षुधितास्तृषितास्तथा ।
आयान्ति च वियन्ति च न वैते पुण्यभागिनः ॥८०॥
एतत् सर्वं कथितं ते पितृवैरुप्यकारणम् ।
नवीनं बहुमूल्यं च श्रेष्ठं सारं ददाति यः ॥८१॥
तत्पितरः समृद्धिमन्तो यानस्था यान्ति वै दिवम् ।
जीर्णं क्षुद्रं कनिष्ठं चाऽसारं श्राद्धे ददाति चेत् ॥८२॥
तत्पितरो दरिद्रा वै पद्भ्यां भ्रमन्ति यान्ति च ।
दरिद्राणां दरिद्रास्ते समृद्धानां समृद्धिसंजुषः ॥८३॥
इत्युक्त्वा विररामाऽसौ वृद्धः पितृगणस्ततः ।
त्रिकालज्ञो दयाक्लिन्नः समुवाच हिताय तम् ॥८४॥
यावत् तृप्तिर्न ते भूयान्न भोक्ष्येऽहं स्थिरो भव ।
प्रतीक्षस्वाऽऽगमनं मे तामानयामि पुत्रिकाम् ॥८५॥
तदा श्राद्धं कारयिष्यामीत्युक्त्वा संययौ नृपम् ।
राजा तमागतं दृष्ट्वा ननाम पादयोः ऋषेः ॥८६॥
धन्योऽस्म्यनुगृहीतोऽस्मि मद्गृहं पावनं कृतम् ।
अद्य मे सफलं जन्म पाद्यमर्घ्यं गृहाण गाम् ॥८७॥
इति संवदतो राज्ञः सत्कारं प्राप्य चाब्रवीत् ।
राजन् शृणु कुरु तच्च येनाऽहं तोषितोऽभवम् ॥८८॥
आनय राजमहिषीं प्रभावतीसमन्विताम् ।
राज्ञाऽऽनीता ऋषिं नत्वाऽऽसनस्थां मुनिरब्रवीत् ॥८९॥
ध्रुवतीर्थे मयाऽऽश्चर्यं यद्दृष्टं कथयामि वः ।
कोटिशः पितरः सर्वे ययुः पुत्रार्चिता दिवम् ॥९०॥
एको वृद्धः शुष्कदेहः क्षुत्क्षामः शुष्कमांसकः ।
निराशो निरये गन्तुकामोऽसौ ध्रुवतीर्थके ॥९१॥
मया पृष्टः सुकारुण्यात् कस्त्वं किमिच्छसीति च ।
स प्राह मां मम वंशे दासी प्रभावती तथा ॥९२॥
तन्तुः पुत्रो विरूपकनिधिर्नाम्ना हि वर्तते ।
स कुर्याद् यदि मे श्राद्धं तृप्तिः स्यादिति भूसुर ॥९३॥
प्रभावत्या सुतद्वारा कारणीयं हि तर्पणम् ।
पितॄणां तु कृते दत्तं दानं वारि फलादिकम् ॥९४॥
स्वधा च पायसं श्राद्धं तृप्तिदं मुक्तिदं भवेत् ।
इत्युक्त्वा प्रत्ययार्थं तां प्राहर्षिर्मदविह्वलाम् ॥९५॥
किं त्वया पितृतृप्त्यर्थं कृतं दत्तं जलं न वा ? ।
सा नैवमित्युवाचाऽथ न जानामि च तान् पितॄन् ॥९६॥
क्रियां कर्म न जानामि न करोमि कदापि च ।
ऋषिः प्राह समायान्तु द्रक्ष्यथाऽद्य चमत्कृतिम् ॥९७॥
इति कृत्वा ययुः सर्वे ध्रुवतीर्थं तु नागराः ।
ब्राह्मणाश्च तथा राजा लोकाश्च बहवस्तदा ॥९८॥

मुनिना दर्शितस्तेभ्यो वृद्धो विचेतनः कृषः।
मशकैर्वेष्टितः क्षुद्रैः क्षुधया चातिपीडितः ॥९९॥
मुनिस्तं प्राह भो जन्तो! तव सन्तानजा सुता।
सपुत्रा त्वत्र चायाता पुष्ट्यर्थं वद वाञ्छितम् ॥१००॥
अगतिश्च तदोवाच स्नात्वाऽत्र विधिना मम।
करोतु तर्पणं नाम्ना ततः श्राद्धं करोतु च ॥१०१॥
सरौप्यवस्त्रं सतिलं पिण्डदानं करोतु च।
तथाऽन्यद्वै यथाशक्ति दानं करोतु चात्र वै ॥१०२॥
येनात्रैव भवन्तो हि मामीक्षथ सुखान्वितम्।
कारयन्तु यथाशक्ति श्राद्धं दानं हि तन्तुना ॥१०३॥
इतिश्रुत्वा राजपत्नी श्राद्धं सुबहुदक्षिणम्।
दास्या वै कारयामास तत्पुत्रेण च सर्वथा ॥१०४॥
पट्टवस्त्रं फलं धूपः कर्पूरागुरुचन्दनम्।
तिलोत्तरं पायसान्नं मिष्टान्नं च सपिण्डकम् ॥१०५॥
जलं तिलोदकं सर्वं यद्दत्तं तेन तृप्तिमान्।
सुकृती च सुतेजस्वी देववद् दीप्तिमान् बभौ ॥१०६॥
तत्सदृशास्तु मशका अपि तृप्ताः सुरूपिणः।
देवा इव व्यजायन्त शुशुभिरेऽतिपुष्टिकाः ॥१०७॥
स्वर्गागतैर्विमानैश्च छादितं तत्र वै नभः।
ते तु देवा इव सर्वे पितरस्तुष्टमानसाः ॥१०८॥
प्रोचुरस्मत्कुलतन्तुर्वृद्धिं यातु सुवंशजैः।
ये श्राद्धैर्विविधैरस्मान् तारयिष्यन्ति सर्वदा ॥१०९॥
शृण्वन्तु वचनं सर्वेऽस्मदीयं पितृतुष्टिदम्।
तीर्थानि सरितः कूपाः पर्वताश्च सरांसि च ॥११०॥
कुरुक्षेत्रं गया गंगा स्थानान्यायतनानि च।
पितॄणां मुक्तिदं त्वन्यन्न भूतं न भविष्यति ॥१११॥
भाद्रे प्रोष्ठपदीं स्नात्वा प्रतिपत्प्रभृति त्वथ।
शुक्लप्रतिपदन्तं च तीर्थे प्रोप्य ससत्वराः ॥११२॥
पितरः श्राद्धपिण्डाऽदाः आश्विने ध्रुवमास्थिताः।
कृत्वा प्रेतपुरीं शून्यां स्वर्गं पातालमित्यथ ॥११३॥
ईहमानाः स्वकान्पुत्रान् गोत्रतन्तून् तथाऽनुजान्।
तिष्ठामस्त्वत्र सहिताः स्वस्ववंशजपितृभिः ॥११४॥
कन्यां गते सवितरि यः श्राद्धं सम्प्रदास्यति।
तर्पणं ध्रुवतीर्थे ते पितॄणां षोडशाहके ॥११५॥
सुतृप्ताः स्मो वयं शश्वद् यास्यामः परमां गतिम्।
दृष्टो भवद्भिः पितॄणां तारको वै विधिर्यथा ॥११६॥
दुस्तरं तारितं पापं त्रिकालज्ञप्रसादतः।
इति संश्राव्य ते सर्वे राजानं च जनानृषिम् ॥११७॥
राज्ञीं दासीं च तत्पुत्रं संभाष्य शिवमस्तु वः।
आरुह्य वरयानानि गताः स्वर्गं वृताः सुरैः ॥११८॥
राजा राज्ञी सुतो दासी प्रजा नार्यो नरास्ततः।
महदाश्चर्यपूर्वास्ते ययुर्निजगृहान्प्रति ॥११९॥
चक्रुश्च सर्वदा योग्ये समये श्राद्धतर्पणम्।
उद्धृताः पितरस्तैस्तु ध्रुवतीर्थप्रभावतः ॥१२०॥
एतत्ते कथितं लक्ष्मि! माहात्म्यं मथुराभवम्।
यत्स्मरणाद् विनश्यन्ति पापानि पूर्वजन्मनाम् ॥१२१॥
पठेद् यः शृणुयाच्चैव स ध्रुवतीर्थपुण्यभाक्।
मथुरायां यमुनाया जलस्नानस्य पुण्यभाक् ॥१२२॥
यत्र क्वापि जलपार्श्वे स्थित्वा पिण्डं ददाति वै।
यमुनाध्रुवसत्तीर्थे स्मृत्वा त्वावाह्य पितृकान् ॥१२३॥
तत्र यामुनजलवत् पितृतृप्तिः प्रजायते।
वंशवृद्धिस्तथाऽऽरोग्यं समृद्धिस्तस्य सुजायते ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने
मथुरातीर्थमाहात्म्ये ध्रुवतीर्थे समागतकोटिपितृतृप्त्युत्तरं
त्रिकालज्ञाभिधर्षिणा क्षुधिते एकस्मिन् पितरि
दृष्टे तद्वंशे चन्द्रसेननृपतिदासीरूपां पुत्रीं विज्ञाय
तद्द्वारा श्राद्धं कारयित्वा पितृमुक्तिदानं
श्राद्धविधिर्महिमा चेत्यादिनिरूपणनामा
चतुःपञ्चाशदधिकत्रिशत-
तमोऽध्यायः ॥३५४॥

श्रीलक्ष्मीरुवाच—

श्रुतमेतन्मया कृष्णनारायण! जगत्प्रभो!।
माथुरक्षेत्रमाहात्म्यं सफलं स्वर्गमोक्षदम् ॥ १ ॥
श्राद्धं श्राद्धफलं चापि श्रुतं ते कृपया हरे!।
केन तूत्पादितं श्राद्धं विस्तरेण वदस्व मे ॥ २ ॥

श्रीनारायण उवाच—

शृणु प्रिये! कथयामि श्राद्धोत्पत्तिविनिश्चयम्।
सृष्ट्यारंभे मम नाभिपद्माद् ब्रह्मा व्यजायत ॥ ३ ॥
स च पुत्रात्मकानुत्पादयामास सुरादिकान्।
आदित्यांश्च वसून् रुद्रानश्विनौ च मरुद्गणान् ॥ ४ ॥
तारणार्थं तु सर्वेषां ब्राह्मणान् भुवि सर्वशः।
क्षत्रियान् वैश्यवर्णांश्च शूद्रवर्णांस्तथा पशून् ॥ ५ ॥
पक्षिणः स्थावरांस्तिर्यक्कीटाद्यान् समपेक्षितान्।
दितिद्वारा तथा दैत्यान्दनूद्वारा तु दानवान् ॥ ६ ॥

एवं वैदिकविज्ञानानृषींश्चापि तपोधनान् ।
तेषां पुत्रास्तथा पौत्रा जाता यैः पूरितं जगत् ॥ ७ ॥
वेधसो नेत्रतो जातो निमिस्तु मानसो नृपः ।
तस्यापि मानसः पुत्रः श्रीमान्नामा ह्यजायत ॥ ८ ॥
जातिमात्रो युवा जातिस्मरो वेदस्मरस्तथा ।
तपश्चचार परमं समाधाय मनो हरौ ॥ ९ ॥
पंचाग्निर्वायुभक्षश्च ह्येकपादोर्ध्वबाहुकः ।
शीर्णपर्णाम्बुभक्षश्च शिशिरे तु जलेशयः ॥१०॥
कृच्छ्रं चान्द्रायणं कुर्वन् वर्षाणामयुतोत्तरम् ।
मृत्युकालमनुप्राप्तः पञ्चत्वं समुपागमत् ॥११॥
निमिः शोकं परं प्राप्तश्चिन्तयामास तत्कृते ।
माघशुक्लद्वादश्यां स सृष्ट्वा विषयं मानसम् ॥१२॥
श्रद्धया कल्पयामास पुत्रार्थे किं करोमि वै ।
तावत्पुत्रो दिव्यदेहो दिवो विमानमार्गतः ॥१३॥
निमिमागत्य स प्राह देहि दानानि मत्कृते ।
जलं देहि फलं देहि मिष्टान्नं चाम्बराणि च ॥१४॥
भूषा यानानि पात्राणि पायसान्नानि देहि मे ।
यानि मे स्यात्प्रभोज्यानि मूलानि च रसास्तथा ॥१५॥
यानि मेऽतीव प्रेष्ठानि देहि मे शाकभाजिकाः ।
इतिकृत्वोषितस्तत्र देवधूनीतटे हिमे ॥१६॥
निमिरामन्त्र्य सप्तर्षीन् शुचिर्भूत्वा समाहितः ।
दक्षिणावर्ततः सर्वमकुर्वन् ऋषिसत्तमाः ॥१७॥
सप्तकृत्वस्तत्र तत्र युगपत् समुपाविशन् ।
ददुस्त्वन्नानि शाकानि मूलानि च फलानि च ॥१८॥
निमिर्विप्रान् प्रसंपूज्य सप्तकृत्वश्च सुन्दरि ! ।
कृत्वा तु दक्षिणाग्रांश्च कुशांश्च प्रयतस्तदा ॥१९॥
प्रददौ श्रीमते पिण्डान्नामगोत्रमुदाहरन् ।
जलं फलं दलं चान्नं पायसं चाम्बरादिकम् ॥२०॥
ददौ पुत्राय दिव्याय जग्राह स च सर्वथा ।
प्रत्यक्षं नीतवान्सर्वं प्रत्यक्षं बुभुजे पपौ ॥२१॥
तथा सप्तर्षिषु पुनः प्रविश्य बुभुजे मुहुः ।
तृप्तोऽस्मि चातितृप्तोऽस्मीत्युच्चार्याऽऽसाद्य वस्तुकम् ॥२२॥
दिवं विमानमारुह्य जगाम श्राद्धतोषितः ।
अर्के त्वस्तं गते राजा भावसन्ध्यामसेवत ॥२३॥
रात्रौ चिन्तयितुं रब्धः पुत्रार्थं यत्समाचरत् ।
कृत्वा स पिण्डदानादि पश्चात्तापं चकार सः ॥२४॥
अकृतं मुनिभिः पूर्वं किं मया तदनुष्ठितम् ।
निवापकर्म त्वशुचि पुत्रार्थे विनियोजितम् ॥२५॥
अहो स्नेहप्रभावेण मया मृत्युत्तरं कृतम् ।
नैतत्कर्म शवकर्म गर्ह्यं कर्म कृतं मया ॥२६॥
किं वक्ष्यन्ति च मां सर्वे ये वै पितृपदे स्थिताः ।
सदेवासुरगन्धर्वपिशाचोरगराक्षसाः ॥२७॥
इत्येवं चिन्तयानस्य ब्राह्मं प्रातरभूत्ततः ।
सन्ध्यां चकार हुत्वाऽग्नीन् पुनश्चिन्तां समाचरत् ॥२८॥
अहो मे जीवितं व्यर्थं पुत्रो यत्र न दृश्यते ।
नरकं पूतिकाख्यं वै हृदि दुःखं समुच्यते ॥२९॥
पुत्रे सति न वै दुःखं स्वर्गं भवति सर्वथा ।
पुत्रेण लभते स्वर्गं पौत्रेण तु पितामहाः ॥३०॥
अथ पुत्रस्य पौत्रेण मोदन्ते प्रपितामहाः ।
पुत्रेण श्रीमता हीनं नाऽहं जीवितुमुत्सहे ॥३१॥
एतस्मिन्नन्तरे लक्ष्मि ! नारदस्त्वाजगाम ह ।
तेजसा भ्राजमानं तं दृष्ट्वा पुपूज वै नृपः ॥३२॥
सत्कृतश्चासने तूपविष्टो नारद आह तम् ।
निमे ! शृणु महाप्राज्ञ ! शोकं मा कुरु शोकहन् ! ॥३३॥
अनित्यं गत्वरं देहं कथं प्राज्ञ ! विशोचसि ।
मृतं नष्टं गतं यान्तं नानुशोचन्ति सद्धियः ॥३४॥
गतो निवर्तते नैव हसन्ति शोकिनं जनाः ।
अमरत्वं मर्त्यलोके पश्यामि न चराचरे ॥३५॥
सत्यात्पातालपर्यन्ताः सर्वे कालवशा जनाः ।
जातस्य सर्वभूतस्य मृत्युर्निर्णीत एव ह ॥३६॥
अवश्यमेव गन्तव्यं त्वया मया च वेधसा ।
तव पुत्रो महात्माऽभूच्छीमान्नाम श्रियो निधिः ॥३७॥
पूर्णं तपो महत् कृत्वा ययौ स परमां गतिम् ।
एवं मुक्तस्य तु कृते नैव शोचितुमर्हसि ॥३८॥
इत्युक्तः स निमिः पादौ प्रणम्य शिरसा मुनेः ।
सव्रीडो निःश्वसन् भीतो दीनवत्प्राह नारदम् ॥३९॥
सान्वितोऽस्मि त्वया विप्र ! किन्तु वक्ष्यामि तच्छृणु ।
गतः स तु गत एव न चाऽऽयाति गतः पुनः ॥४०॥
परं मया शवपश्चात् कल्पयित्वा च यत् कृतम् ।
न तु श्रुतं मया पूर्वं न देवैः पूर्वजैः कृतम् ॥४१॥
शोकस्यैव प्रभावेण शवमुद्दिश्य यत्कृतम् ।
तर्पयित्वा द्विजान् सप्त त्वन्नाद्यैश्च फलैरपि ॥४२॥
पश्चाद् विसर्जितं पिण्डं दर्भानास्तीर्य भूतले ।
उदकानयनं चैव ह्यपसव्येन वासितम् ॥४३॥
एतद्वै नूतनं सर्वं कृतं बिभेमि तेन वै ।
श्रुत्वा तन्नारदः प्राह न भेतव्यं त्वया नृप ! ॥४४॥

अधर्मं नात्र पश्यामि पितरं शरणं व्रज।
इत्युक्तः स निमिर्ध्यात्वा पितरं शरणं गतः ॥४५॥
तावत्पुत्रस्तपोधनः श्रीमान्नामा समागतः।
उवाच निमे! त्वत्कृतं कल्पितं पितृयज्ञकम् ॥४६॥
पितृयज्ञात्मको धर्मो ब्रह्मणा कल्पितोऽस्ति वै।
स च कर्मात्मकस्त्वया मन्निमेषेण प्रकाशितः ॥४७॥
श्राद्धधर्मः पितृयज्ञः क्रतुस्त्वया प्रतिष्ठितः।
पूर्वपूर्वसृष्टिधर्मः श्राद्धधर्मश्चिरन्तनः ॥४८॥
कृतः स्वयंभुवा पूर्वं श्राद्धात्मा विधिरेव सः।
प्रेतकर्म श्राद्धधर्मः कर्तव्यः सर्वथा जनैः ॥४९॥
जातस्य वै मृतेः पश्चादवश्यं क्वापि संस्थितिः।
तत्र प्राप्त्यर्थमेवात्र कर्तव्यं श्रद्धयाऽर्पणम् ॥५०॥

अमोक्षस्य भवेत् तृप्तिर्मुक्तौ तृप्तिस्तु शाश्वती।
मोक्षः कर्मविशेषेण प्रायश्चित्तेन च ध्रुवम् ॥५१॥
दीर्घायुषो ह्यपि यान्ति किं पुनः स्वल्पकाऽऽयुषः।
अल्पायुषो जनाः पश्चाद् भविष्यन्ति युगान्तरे ॥५२॥
तामसा राजसाश्चापि भविष्यन्ति विशेषतः।
तेषां तु कुगतौ श्राद्धं गतिदं संभविष्यति ॥५३॥
तामसं नरकं विद्यात् तिर्यग्योनिं च राक्षसीम्।
क्रौर्यं भयं विषादश्च हिंसा निर्लज्जता तमः ॥५४॥
अज्ञानित्वं च पैशाचं तामसानां स्वभावजाः।
तामसं तं विजानीयादुच्यमानो न बुद्ध्यति ॥५५॥
दुर्मदाऽश्रद्धधानं च पराऽपकरणोद्यतम्।
राजसः प्रबलो वाण्यां स्वधृताऽत्मजनः सदा ॥५६॥
शूरः सर्वत्र व्यक्तश्च विषयेहाप्रपूरितः।
एतेषां परलोके वै तृप्त्यर्थं श्राद्धमर्थितम् ॥५७॥
सात्त्विको मोक्षभागी स्यात् क्षान्तो दान्तो विशुद्धहृत्।
श्रद्धालुस्तपसा युक्तो स्वाध्यायादिसमन्वितः ॥५८॥
एतेष्वपि यदि पुत्रेषणा लोकेषणा तथा।
धनेषणा तथा दारेषणा कामेषणा च वा ॥५९॥
भवेत्तेन प्रवाहेण परत्र प्रेततां व्रजेत्।
तस्य तृप्तिकृतेश्राद्धदानहवनकर्मणाम् ॥६०॥

कल्पना वेधसा पूर्वं कृता त्वया प्रसारिता।
एवं संचिन्तयानस्तु न शोकं कर्तुमर्हसि ॥६१॥
त्यज शोकं महाप्राज्ञ! शोकः सर्वविनाशनः।
शोको दहति गात्राणि बुद्धिः शोकेन नश्यति ॥६२॥
लज्जा धृतिश्च धर्मश्च श्रीः कीर्तिश्च स्मृतिर्नयः।
त्यजन्ति सर्वधर्माश्च शोकेनोपहतं नरम् ॥६३॥

एवं शोकं परित्यज्य विशोको भव भूपते!।
मूढः स्नेहप्रभावेण याति संसारबन्धनम् ॥६४॥
तस्मात् स्नेहं प्रसंयम्य बुद्धिं धर्मे नियोजयेत्।
धर्मो लोकहितार्थाय स श्राद्धं दानमर्चनम् ॥६५॥
सत्कारो हवनं चेति पञ्चधा प्रायशो मतः।
मृतानां तृप्तिदं श्राद्धं दानं तु जीवतां सुखम् ॥६६॥
प्रतिमाया अर्चनं शं सत्कारः प्राणिनां सुखम्
हवनं द्युगतानां शं दाताऽपि फलभाग् भवेत् ॥६७॥
मृत्युकाले यदिच्छा स्यात् पूरणीया विशेषतः।
म्रियमाणस्य सन्तोषः परलोकगतिप्रदः ॥६८॥
कण्ठस्थानं गते जीवे शीघ्रं निःसारयेद् गृहात्।
कुशास्तरणशय्यास्थं स्नेहभावेन वाचयेत् ॥६९॥

सुवर्णं तन्मुखे दद्याज्जलं दद्याद् व्रतादिकम्।
पुण्यं दद्याच्च गां दद्यात्परलोकहितावहाम् ॥७०॥
दोग्ध्रीणां तु गवां दानाच्छीघ्रं मुच्येत किल्बिषात्।
तस्य कर्णे हरेर्नाम श्रावयेन्मुक्तिसाधनम् ॥७१॥
मधुपर्कं मधु सर्पिर्दधि दद्यात्तदोष्ठयोः।
एवं विनिःसृते प्राणे संसारं नाधिगच्छति ॥७२॥
ततोऽस्थ घृतगन्धाद्यैः कृत्वा वै देहशोधनम्।
दक्षिणायां शिरः कृत्वा तीर्थस्नानं प्रकारयेत् ॥७३॥
श्रेष्ठवनस्पतिकाष्ठैश्चितां कृत्वा विधानतः।
दक्षिणशिरसा स्थाप्य कृत्वा हस्ते हुताशनम् ॥७४॥
दह त्वेतस्य गात्राणीत्युक्त्वा कृत्वा प्रदक्षिणम्।
प्रदापयेच्छिरःस्थाने भस्मीभावोत्तरं ततः ॥७५॥
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्तयेत्।
मृतं नाम तदोद्दिश्य दद्यात् पिण्डं महीतले ॥७६॥
गतायुषस्तृतीयेऽह्नि स्नानं कुर्यान्नदीजले।
पिण्डं संचूरणं दद्यात् त्रींश्च दद्याज्जलांजलीन् ॥७७॥
चतुर्थे पञ्चमे षष्ठे पिण्डमेकं जलांजलिम्।
सप्तमेऽष्टमनवमदशमेषु तथैव ह ॥७८॥
दशमे वस्त्रसंशुद्धिर्गात्रशुद्धिश्च सर्वथा।
कर्तव्या गोत्रजैस्तिलाऽऽमलकस्नेहतस्ततः ॥७९॥
पिण्डदानं विनिवर्त्य क्षौरकर्म तु कारयेत्।
स्नानं कृत्वा ज्ञातिभिश्च तत एकादशे दिने ॥८०॥
स्नात्वा प्रेतं ब्राह्मणेषु योजयेत्कारयेत्तथा।
एकोद्दिष्टं विप्रमेकं सुद्रव्येण हि भोजयेत् ॥८१॥
पुनः स्नात्वा च तं प्रेतं प्रेतेषु संनियोजयेत्।
एकोद्दिष्टं त्रिवर्णेषु कर्तव्यं पाकभोजनम् ॥८२॥

अपाकद्रव्यं संग्राह्यं चतुर्थवर्णकस्य तु ।
त्रयोदशे दिने पक्वैर्भोजयेद् ब्राह्मणान् सतः ॥८३॥
मनसा वायुभूतस्त्वं विप्रान् साधून् समाश्रय ।
विप्रसतां कृता सेवा प्रेताय सुखदा भवेत् ॥८४॥
प्रेतभोगशरीरं वै विप्रसतोः प्रकल्पितम् ।
प्रभातायां तु शर्वर्यामुदिते तु दिवाकरे ॥८५॥
श्मश्रुकर्म प्रकर्तव्यं विप्रस्य तु यथाविधि ।
स्नापनाऽभ्यंजने कार्ये प्रेतसन्तोषदायके ॥८६॥
स्थण्डिलं कारयेद् भूमौ प्रेतकार्यं समाचरेत् ।
यं देशं तु न पश्यन्ति कुक्कुटश्वानसूकराः ॥८७॥
श्वा चापोहति रावेण गर्जितेन तु सूकरः ।
कुक्कुटः पक्षवातेन चाण्डालो दर्शनेन च ॥८८॥
तत्र कुर्वन्ति यच्छ्राद्धं पितॄणां बन्धनप्रदम् ।
स्थण्डिले प्रेतभागं तु दद्यात् पूर्वाह्णिकं तु तत् ॥८९॥
कुर्याच्च पिण्डसंकल्पं नामगोत्रमुदाहरन् ।
ततश्चाश्नन्ति गोत्राणि कुलजाश्चैकभोजनाः ॥९०॥
एवं दत्तेन प्रीयन्ते प्रेतलोकगता जनाः ।
छत्रं दद्यादग्निभस्मशिलावृष्ट्यादिवारणम् ॥९१॥
दद्याच्चोपानहौ मार्गकण्टकादिनिवारकौ ।
धूपं दद्यात् प्रदीपं च वस्त्राण्याभरणानि च ॥९२॥
फलान्यपि सुपक्वानि प्रेतभोग्यानि वै ददेत् ।
एवं सर्वं विनिर्वर्त्य पक्वान्नं भोजयेद् द्विजम् ॥९३॥
प्रथमं ब्राह्मणस्तत्र प्रेतभागं प्रकल्पयेत् ।
हस्तशौचं ततः कृत्वा विप्रो मिष्टं हि भक्षयेत् ॥९४॥
ज्ञातिबान्धवमित्रैश्च ब्राह्मणाय पुनः पुनः ।
प्रेतभागः प्रदातव्यो वारणीयो न केनचित् ॥९५॥
निवारणे कृते तत्र गृह्णन्ति पितरो न वै ।
एवं विलुप्यते धर्मः प्रेतस्तत्र न तुष्यति ॥९६॥
तृप्ते विप्रे सलिलं च दातव्यं शीतलं शुभम् ।
उच्छिष्टं तु सरिदादौ मत्स्येभ्यो देयमेव हि ॥९७॥
दद्याच्छय्यासनं चापि तथैवाऽञ्जनकंकणम् ।
निवापस्थानमागत्य दद्यात्तिलोदकं ततः ॥९८॥
गवां लांगूलमुद्धृत्य दद्याद् ब्राह्मणहस्तके ।
पात्रेणोदुम्बरस्थेन कृत्वा कृष्णतिलोदकम् ॥९९॥
मन्त्रपूतं जलं दद्यात् तोयेनाऽभ्युक्ष्य वै ततः ।
प्रेतं विसर्जयेद् विप्राद् दद्याद् दानं द्विजातये ॥१००॥
पिपीलिकादिभूतेभ्यः प्रेतभागं प्रकल्पयेत् ।
दीनानाथेषु भक्तेषु प्रेतो भवति तृप्तिमान् ॥१०१॥
एवं श्राद्धात्मकः सर्वैः प्रेतभावविशोधनः ।
कर्त्तव्य एव संस्कारो निमे ! त्वया तु स कृतः ॥१०२॥
अयं श्राद्धक्रियाकल्पः क्रतुरेकः प्रकीर्तितः ।
इत आरभ्य लोकेषु पितृयज्ञो भविष्यति ॥१०३॥
यज्ञकर्ता भवान् निमे ! ब्रह्मलोकं गमिष्यति ।
एवं सर्वैः प्रदातव्यः प्रेतभागस्तृतीयके ॥१०४॥
मासे तु सप्तमे नवमे चाप्येकादशे तथा ।
ततः सांवत्सरीं कुर्यात् क्रियां प्रेतस्य मुक्तये ॥१०५॥
पूर्णे सम्वत्सरे याते प्रेतकार्ये कृते ततः ।
प्रयान्ति जन्तवो मुक्तिं केचिद् भ्रमन्ति चाऽम्बरे ॥१०६॥
पितामहः स्नुषा भार्या ज्ञातिसम्बन्धिबान्धवाः ।
एवमेते बहवोऽत्र सन्ति स्वप्नोपमास्तु ते ॥१०७॥
रुदित्वा तु क्षणं सर्वे यान्ति पराङ्मुखा हि ते ।
स्नेहपाशेन बद्धास्ते मुच्यन्ते च क्षणान्तरे ॥१०८॥
कस्य माता पिता कस्य कस्य भार्या सुतास्तथा ।
दिने दिने विवर्तन्ते मोहपाशप्रबन्धनाः ॥१०९॥
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूयन्ते कस्य ते कस्य वा वयम् ॥११०॥
स्वयं भुवा विधिः प्रोक्तः प्रेतसंस्कारलक्षणः ।
स्नेहभावेन कर्त्तव्यः संस्कारोऽयं मृतस्य वै ॥१११॥
प्रेतकार्ये निवृत्ते तु पितृत्वमुपजायते ।
मासि मासि ह्यमायां वै कर्त्तव्यं पितृतर्पणम् ॥११२॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
ब्राह्मणस्य मुखे होमात् तृप्यन्ति साधुभोजनात् ॥११३॥
एवमुक्त्वा मुनिश्रेष्ठो नारदस्तु दिवं ययौ ।
इत्येवं निमिना राज्ञा कृतं श्राद्धं पुरा युगे ॥११४॥
ततः प्रभृति श्राद्धं च पिण्डं कुर्वन्ति भूसुराः ।
इति ते कथितं लक्ष्मि ! श्राद्धपिण्डोद्भवादिकम् ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने माथुरक्षेत्रमाहात्म्ये निमिनृपतिना श्रीमात्रान्नो मृतपुत्रस्यार्थे श्राद्धं कृतम्, पश्चात् कल्पितकर्माऽप्रतिष्ठितमिति ज्ञात्वा शोकं कुर्वते निमये नारदेन श्राद्धं पुरातनो धर्म इत्युपदिष्टम्, श्राद्धक्रियाक्रमश्चोक्त इत्यादि-निरूपणनामा पञ्चपञ्चाशदधिकत्रिशत-तमोऽध्यायः ॥ ३५५ ॥

श्रीलक्ष्मीरुवाच—

श्रुतं श्राद्धं प्रेतभोज्यं कृपया तव केशव ! ।
ननु विप्राः प्रेतभागं दानं गृह्णन्ति भोजनम् ॥ १ ॥
अनिष्टं गर्हितं चापि प्रेताऽऽवेशेन भोजनम् ।
भुक्त्वा प्रेतस्य विप्रस्तु मुच्यते केन कर्मणा ॥ २ ॥
कथं स तारयेद् गर्ह्यो दातारं पुरुषोत्तम ! ।
इति मे संशयं छिन्धि कृष्णनारायण प्रभो ! ॥ ३ ॥

श्रीनारायण उवाच—

सम्यक् पृष्टं त्वया लक्ष्मि ! संशयं नाशयामि ते ।
यस्तु यतिर्भवेद् विप्रो महाभागवतस्तु यः ॥ ४ ॥
महायोगी महाज्ञानी सिद्ध्यैश्वर्यादिभूषितः ।
महत्तपोधनो यश्च वेदशास्त्रविशारदः ॥ ५ ॥
ध्यानं च धारणा यस्य समाधिश्चापि विद्यते ।
त्रिकालज्ञो यमनियमादिसद्गुणमण्डितः ॥ ६ ॥
षट्कर्मनिरतो नित्यं हर्याराधनतत्परः ।
प्रेतो यत्पदरजःस्पर्शाद् दिवि देवोऽभिजायते ॥ ७ ॥
साधुशीलः सदा शुद्धो वह्निवच्छोधको भवेत् ।
स वै प्रेतान्नमाभुक्त्वा गृहीत्वा दानमित्यपि ॥ ८ ॥
कृत्वा कर्माणि प्रेतस्य न तद्दोषेण लिप्यते ।
पुंप्रकृत्योर्विवेकज्ञो ब्रह्मात्मैक्यपरायणः ॥ ९ ॥
पापक्षालनसामर्थ्यो न तद्दोषेण लिप्यते ।
न शर्वरीकृतं ध्वान्तं सूर्यं क्वचिद् विलुम्पति ॥१०॥
ध्वान्तं प्रकाशतां याति सूर्यकिरणसन्निधौ ।
प्रेतस्य प्रेतता तादृग्योगेन देवता भवेत् ॥११॥
प्रेतत्वं ब्रह्मयोगेन देवत्वे परिवर्तते ।
पापं पुण्यतमं स्याच्च समर्थे नास्ति दूषणम् ॥१२॥
यस्तु नात्मबलाढ्यो वा नापि ब्रह्मपरायणः ।
नापि ब्रह्मव्रते पुष्टो न षट्कर्मादियोगवान् ॥१३॥
नाऽऽत्मज्ञो न विवेकज्ञः स विप्रो लिप्यते ह्यघैः ।
प्रेतभोजी प्रेत एव मलिनो जायते भुजेः ॥१४॥
स स्वदेहस्य शुद्ध्यर्थं कुर्यादेकमुपोषणम् ।
सन्ध्यां प्रातः स निर्वर्त्य कृत्वा चैवाग्नितर्पणम् ॥१५॥
तिलहोमं प्रकुर्वीत शान्तिमन्त्रान् पठन् द्विजः ।
प्राक्स्रोतसं नदं गत्वा स्नात्वा च पञ्चगव्यकम् ॥१६॥
मधुपर्कयुतं पीत्वा गृहं सम्मार्ज्य प्रोक्षयेत् ।
अग्निमुखान् सुरांस्तर्पयित्वा भूतबलिं चरेत् ॥१७॥
विप्रेभ्यो भोजनं दद्याद् गोदानं प्रसमाचरेत् ।
एवं यः कुरुते विप्रः स शुद्धो जायते ध्रुवम् ॥१८॥
एवं कृते ततो मृत्यौ स याति परमां गतिम् ।
अन्यथा कालधर्मे तु याते प्रेतान्नकोदरे ॥१९॥
प्रेत एव भवेत् सोऽपि निरये वासमाप्नुयात् ।
प्राप्नुयाद्राक्षसभावं ततो मुच्येत किल्बिषात् ॥२०॥
प्रायश्चित्तमनः कार्यं दातृभोक्तृसुखावहम् ।
गोहस्त्यश्वधनरत्नक्षेत्रदासीविभूषणम् ॥२१॥
प्रतिगृह्णन् समन्त्रं च प्रायश्चित्तं चरेत्तु यः ।
स शुद्धोतारयेच्चापि दातारं नात्र संशयः ॥२२॥
दैवे च जन्मनक्षत्रे श्राद्धकाले प्रपर्वसु ।
प्रेतकार्येषु सर्वत्र विप्रं षट्कर्मशालिनम् ॥२३॥
वेदविद्याव्रतस्नातं धर्मिष्ठं च तपस्विनम् ।
शीलसन्तोषसत्यादिगुणयुक्तं क्षमायुतम् ॥२४॥
अहिंसादियमयुक्तं भगवत्सुपरायणम् ।
पात्रं प्राप्य प्रकुर्याद्वै श्राद्धं दानं प्रपूजनम् ॥२५॥
स शुद्धस्तारयेत् सर्वानात्मानं चापि तारयेत् ।
न हि शिलां शिला क्वापि तारयेत् तारकं विना ॥२६॥
न ह्यशुद्धः क्वचित्त्वन्यान् तारयेत्पापसंभृतः ।
शुद्धो वै तारयेच्चान्यांस्तस्मात् पात्रे प्रयोजयेत् ॥२७॥
शृणु लक्ष्मि ! नृपः पूर्वं मेधातिथिरभून्महान् ।
अवन्त्यां त्वभवच्चन्द्रशर्मा तस्य पुरोहितः ॥२८॥
राजा गवां शतं दानं दत्वा भुंक्ते दिने दिने ।
राज्ञः पितुर्दिनं प्राप्तं वैशाखे श्राद्धकर्मणः ॥२९॥
आहूतान् ब्राह्मणान्नत्वा श्राद्धं कृत्वा विधानतः ।
पिण्डान्निर्वाप्य च श्राद्धे कल्पितान्नं ददौ बहु ॥३०॥
दानं वस्त्रविभूषाणां ब्राह्मणेभ्यो ददौ तथा ।
तन्मध्ये ब्राह्मणः कश्चिद्बलहीनोऽतिपापवान् ॥३१॥
व्यभिचारसमुत्पन्नः शूद्रबीजादिमिश्रितः ।
श्राद्धान्नं जगृहे तत्र तेन दोषेण भूभृतः ॥३२॥
पितरः पतिताः स्वर्गाद् भ्रष्टा वने सकण्टके ।
क्षुत्पिपासार्दिता नित्यं क्रन्दन्ति वै पुनः पुनः ॥३३॥
मेधातिथिर्दैवयोगाद् भ्रमणार्थं वनं गतः ।
तान्भ्रमतः स पप्रच्छ के भवन्तः सुदुःखिताः ॥३४॥
पितरस्तं तदा प्राहुरस्मद्वंशे हि विद्यते ।
नृपो मेधातिथिस्तस्य वयं स्मः पितरो वने ॥३५॥
पतिताः स्म दिवो भ्रष्टाः श्राद्धदोषेण भूभृतः ।
श्राद्धान्नं त्वर्थितं तेन पापिष्ठब्रह्मबन्धवे ॥३६॥

कर्मभ्रष्टव्यवायोत्थनाममात्रद्विजाय वै ।
तेनैव कर्मदोषेण नरकं गन्तुमिप्सवः ॥३७॥
तत्र दुःखं महद्भुक्त्वा पुनर्गच्छामहे दिवम् ।
विप्रेभ्यस्तु गवां दानात् तत्पुण्येन पुनर्दिवम् ॥३८॥
गमिष्यामः किन्तु तत्र नास्त्यन्नं तृप्तिदायकम् ।
इति श्रुत्वा नृपः प्राह मेधातिथिरहं हि सः ॥३९॥
भवतां तारणार्थं किं पुनः कार्यं वदन्तु मे ।
पितरः प्राहुरेनं ते यथा तृप्तिर्भवेद्धि नः ॥४०॥
तथा श्राद्धं पुनः कार्यं भोजनीया द्विजोत्तमाः ।
तेषां तद्वचनं श्रुत्वा मेधातिथिरगाद् गृहम् ॥४१॥
आहूतवान् द्विजान् साधून् वेदपाठकृतश्रमान् ।
पुण्यान् धर्मपरान् क्षान्तान् सुशीलान् सुतपस्विनः ॥४२॥
यमैश्च नियमैर्युक्तान्महाभागवतान्सतः ।
राजा श्राद्धं चकाराऽथ पिण्डान्निर्वाप्य सर्वथा ॥४३॥
ब्राह्मणान् भोजयामास दक्षिणाभिः प्रपूज्य च ।
नत्वा विसर्जयामास ततः स बुभुजे नृपः ॥४४॥
ततो वनं स्वयं यातो दृष्टवाँश्च स्वकान् पितॄन् ।
हृष्टान्पुष्टान् बलैर्युक्तान् दिवं गन्तुं समुद्यतान् ॥४५॥
दृष्ट्वाऽतिमुमुदे भूभृत् प्राहुश्च पितरो नृपम् ।
स्वस्ति तेऽस्तु गमिष्यामः स्वर्गलोकं प्रति नृप ! ॥४६॥
कदापि नैव प्रदातव्यं कुपात्रायाऽतिपापिने ।
दैवं पित्र्यं च वा तत्र दत्तं निष्फलमेव यत् ॥४७॥
दैवे पित्र्ये सुपात्रं चेद् ब्राह्मणो नैव लभ्यते ।
संकल्पितं तदन्नं तु गोभ्यो देयं यथाविधि ॥४८॥
गवामभावे नद्यां वा क्षिपेदन्नं प्रयत्नतः ।
अपात्राय न दातव्यं नास्तिकाय गुरुद्रुहे ॥४९॥
गोलकाय न दातव्यं कुण्डाय संकराय च ।
इत्युक्त्वा पितरः सर्वे गताः स्वर्गं विमानकैः ॥५०॥
मेधातिथिर्गृहं प्रायाद् ज्ञात्वा पात्रबलाबले ।
तस्माल्लक्ष्मि ! धर्मनिष्ठ ! एकोऽपि ब्राह्मणोत्तमः ॥५१॥
सन्तारयति दुर्गेभ्यो विषयेभ्यो न संशयः ।
तस्माच्छ्राद्धे भोजनीयाः सन्तो भागवता द्विजाः ॥५२॥
मासे मासेऽथवा पितृपक्षे पात्रतपोधनाः ।
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ॥५३॥
तारका भोजनीया वै ब्रह्मबोधपरा जनाः ।
साध्व्यः सत्यो भोजनीया ब्रह्मचर्यपरास्तथा ॥५४॥
इति ते कथितं लक्ष्मि ! सत्पात्रं तारयेत् पितॄन् ।
असत्पात्रं भ्रंशयेद्वै प्रायश्चित्तं ततश्चरेत् ॥५५॥

श्रीलक्ष्मीः प्राह तच्छ्रुत्वा कृष्णनारायणं हरिम् ।
प्रेताः स्वकर्मभिर्यान्ति योन्यन्तरं शरीरिणः ॥५६॥
पशुपक्षिमनुष्याद्याः कथमागत्य भुंजते ।
क एते पितरः कृष्ण ! श्राद्धं भोक्ष्यन्त्युपस्थिताः ॥५७॥
मृताः केचित्तु नरके यमपाशवशंगताः ।
केचित्तु देववर्गे वै कुटुम्बित्रिसुवशंगताः ॥५८॥
केचित् कर्मवशाल्लोके चतुरशीतियोनिषु ।
देहिनो वशगास्तत्र बन्धने पतिताः सदाः ॥५९॥
श्राद्धे शक्ता न चाऽऽगन्तु कथं श्राद्धं प्रभुंजते ।
इति मे संशयं नाथ ! सम्मार्जय विरोधिनम् ॥६०॥
वंशपरम्पराश्राद्धं कर्तव्यं येन रक्ष्यते ।
युगे युगान्तरे चापि कर्तव्यं येन रक्ष्यते ॥६१॥
इतिश्रुत्वा महालक्ष्मीवाक्यं कृष्णनरायणः ।
संशयं मार्जयन् लक्ष्म्याः प्रोवाच परमेश्वरः ॥६२॥
शृणु लक्ष्मि ! प्रभोक्तारः पितृयज्ञेषु सर्वदा ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥६३॥
त्रय एते भवन्त्येव श्राद्धभोक्तार ईश्वराः ।
पिता तु ब्रह्मदैवत्यो वेधोगात्राद्विनिर्मितः ॥६४॥
पितामहो विष्णुदेवो विष्णुगात्राद्विनिर्मितः ।
प्रपितामहो रुद्रेशो रुद्रगात्राद्विनिर्मितः ॥६५॥
श्राद्धे नियोजितास्तेऽत्र ब्रह्मविष्णुमहेश्वराः ।
प्रथमं ब्रह्मणोंऽशाय दद्याच्छ्राद्धं सपिण्डकम् ॥६६॥
द्वितीयं विष्णोरंशाय दद्याच्छ्राद्धं सपिण्डकम् ।
तृतीयं रुद्रस्यांशाय ददेच्छ्राद्धं सपिण्डकम् ॥६७॥
पित्रे पितामहायाऽथ हि प्रपितामहाय च ।
त्रिदेवरूपतापन्नः स्वयं नारायणो विभुः ॥६८॥
यत्र मृता जनुं प्राप्तास्तत्रान्तर्यामिभावतः ।
व्यापकः संस्थितः कृष्णस्तृप्तिं तान्प्रापयत्यपि ॥६९॥
एवं विप्रेषु स कृष्णोऽन्तर्यामी सत्सु वर्तते ।
श्राद्धकाले यदुद्देशस्तद्रूपो भवति प्रभुः ॥७०॥
श्राद्धं पिण्डं गृहीत्वा च प्रेतो यत्र गतो भवेत् ।
तत्र प्रापयति तस्मै कृष्णनारायणो हरिः ॥७१॥
इति विद्धि महालक्ष्मि ! योन्यन्तरगतार्थदः ।
अहमेव भवाम्यत्र श्राद्धे पित्रादिरूपकः ॥७२॥
अथान्यच्च शृणु लक्ष्मि ! विस्तरात्प्रवदामि ते ।
केचिद् यजन्ति वै ब्रह्मयज्ञं मूर्तौ सतां मुखे ॥७३॥
केचिद् यजन्ति वै देवयज्ञं कुण्डे हुताशने ।
केचिद् यजन्ति वै भूतयज्ञं पशौ गवां मुखे ॥७४॥

केचिद् यजन्ति मनुजक्रतुं नरे द्विजानने ।
केचिद् यजन्ति वै पितॄन् जलेऽग्नौ भ्वां द्विजानने ॥७५॥
सर्वे ते मयि वर्तन्ते सत्यमेतद् ब्रवीमि ते ।
किञ्च सर्वविधे यागे वह्निर्मुख्यो मुखात्मकः ॥७६॥
वह्निमुखेन चाश्नन्ति प्रेतपितृषिदेवताः ।
अहं च भगवान् कृष्णश्चाग्नि वह्निमुखेन वै ॥७७॥
कुण्डस्थाऽग्निरहं चास्मि दक्षिणाग्निरहं तथा ।
अहं चाहवनीयाग्निः पावनः पावकस्तथा ॥७८॥
वैश्वदेवाग्निरहं वै गार्हपत्योऽप्यहं तथा ।
बार्हस्पत्योऽप्यहं चैवाऽऽवसथ्योऽप्यहमेव च ॥७९॥
तन्मुखोऽहं त्रिदेवात्मा भुंजे सर्वक्रतुष्वपि ।
पितृयज्ञे ब्रह्ममुखे भुंजेऽहं तत्त्रयात्मकः ॥८०॥
श्रोत्रियं धर्मशीलं च महाभागवतं द्विजम् ।
श्राद्धे संभोजयेजीतेन्द्रियं सन्तुष्टमेव च ॥८१॥
दत्वा हुताशनायाऽऽदौ देवतीर्थस्वरूपिणे ।
पश्चाद् विप्रमुखे दद्यात् पित्रे पितामहाय च ॥८२॥
वै प्रपितामहायापि स्मृत्वा दद्यात्पुनः पुनः ।
प्रच्छन्नं भोजयेद् विप्रं तत्र पितॄन् समाह्वयेत् ॥८३॥
पिण्डास्त्रयः प्रदातव्याः सह व्यञ्जनसंयुताः ।
अपसव्येन दातव्यं मासि मासि तिलोदकम् ॥८४॥
परमात्मा शरीरस्थो देवतानां वहाम्यहम् ।
एवं दत्तेन प्रीयन्ते पितरश्च न संशयः ॥८५॥
त्रयो देवास्त्रय एव पितरो हरिनिःसृताः ।
पितृदेवा भविष्यन्ति भोक्तारश्च युगे युगे ॥८६॥
आयुः कीर्तिं बलं तेजो धनं पुत्रान् पशून् स्त्रियः ।
ददते पितरस्तस्य त्वारोग्यं पिण्डदायिनः ॥८७॥
विप्रे संभोजिते तृप्ते तिर्यङ्नारकमानुषाः ।
यत्र क्वापि स्थिताश्चान्ये तृप्यन्ति श्राद्धतर्पिताः ॥८८॥
ते सात्त्विकं शुक्लमार्गं तृप्ता यान्ति दिवं परम् ।
पुनरन्यत् प्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि ॥८९॥
अज्ञानतमसा व्याप्ताः पापा भ्रष्टा मृता जनाः ।
स्नेहपाशशतैर्बद्धाः पच्यन्ते नरकेऽशुचौ ॥९०॥
तेषां पुत्राश्च पौत्राश्च कदाचिदपि वंशजाः ।
मुञ्चन्ति जलबिन्दूँश्च अमां प्राप्य जलाशये ॥९१॥
तेनैव भाविता तृप्तिस्तेषां निरयगामिनाम् ।
तर्पणं श्राद्धमेवापि पिण्डान् तिलोदकं तथा ॥९२॥
समर्प्य तारयेत् पितॄन् द्विजातिर्भक्तिभावतः ।
देयो नीलो वृषश्चापि नरकार्तिविनाशनः ॥९३॥
नीलषण्डस्य लांगूले तोयमप्युद्धरेद् यदि ।
षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः ॥९४॥
उद्धृतो यदि पंकस्य पिण्डः श्रृंगेण तेन वै ।
उद्धृताः पितरस्तेन सोमलोकं समापिताः ॥९५॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
सोमलोकेषु मोदन्ते क्षुत्तृड्भ्यां तु विवर्जिताः ॥९६॥
एवं गृहस्थधर्मोऽयं पुत्रपौत्रादिभिः कृतः ।
श्राद्धात्मकः सतृष्णानामुद्धाराय विनिर्मितः ॥९७॥
पिपीलिकादिभूतानि जंगमाश्च विहंगमाः ।
स्थावराश्चोपजीवन्ति गृहस्थेषु न संशयः ॥९८॥
मासि मासि तु ये श्राद्धं प्रकुर्वन्ति गृहाश्रमे ।
तिथौ पर्वणि सद्वारे स्वपितॄँस्तारयन्ति ते ॥९९॥
पितरो निर्गतास्ते वै ब्रह्मविष्णुशरीरगाः ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥१००॥
एवं क्रमेण ते पश्चात् काश्यपा देवता इति ।
समभवँस्ततस्ते वै श्राद्धेषु विनियोजिताः ॥१०१॥
पितृयज्ञे विप्रमुखे दत्तं वै केवलं तदा ।
तदा त्वजीर्णतां प्राप्ताः पितरोऽजीर्णपीडिताः ॥१०२॥
सोमेन सहिता जग्मुः प्रणम्य च पितामहम् ।
प्रोचुर्वयं ह्यजीर्णेन पीडिता वारणं कुरु ॥१०३॥
येन नश्यत्यजीर्णं च पितॄणां च सुखं भवेत् ।
ब्रह्मा प्राह तदा योऽस्ति शाण्डिल्यस्य सुपुत्रकः ॥१०४॥
धूम्रकेतुर्विभावसुस्तेजस्वी जीर्णताकरः ।
श्राद्धे तु प्रथमं तस्य दातव्यं मानुषेषु वा ॥१०५॥
सह तेनैव भोक्तव्यं पितृपिण्डविसर्जितम् ।
तावत्स्मृतो हव्यवाहः सर्वभक्षो हुताशनः ॥१०६॥
योजितः पञ्चयज्ञेषु ब्रह्मणा सर्वकर्मसु ।
भोक्तव्यं प्रथमं वह्ने ! पितृपिण्डविसर्जितम् ॥१०७॥
त्वया भुक्ते प्रभोक्ष्यन्ति देवताः पितरस्त्विमे ।
श्राद्धं द्वितीयं भोक्तव्यं सहैव वह्निपितृभिः ॥१०८॥
तृतीयं पिण्डदानं तु सोमपितृहुताशनैः ।
मिलित्वैव प्रभोक्तव्यं ह्यजीर्णं न भविष्यति ॥१०९॥
इत्युक्ताः पितृयज्ञे ते भुंजते सहिता सदा ।
वह्निः पिता पितामहः प्रतितामह एव च ॥११०॥
सोमश्चेति भुंजते वै पितृदेवहुताशनाः ।
अपांक्तेयास्तदा विप्रा भोजनीया न वै क्वचित् ॥१११॥
अपांक्तेयान् प्रवक्ष्यामि कर्मतो हीनतां गतान् ।
नपुंसकाश्चित्रकाराः पशुपाला विनिन्दकाः ॥११२॥

स्वर्णचौरास्तथा काणाः कुष्ठिनो नास्तिकास्तथा ।
नर्तका गायकाश्चापि तथा नाटकजीविनः ॥११३॥
वेदविक्रयिणश्चापि सर्वयाजकयाजकाः ।
भृत्यकर्मकरा राज्यकिंकराः संकरास्तथा ॥११४॥
संस्कारहीनाः पतिताः शूद्रकर्मोपजीविनः ।
गणका ग्राम्ययाजिनो लेखका दांभिकास्तथा ॥११५॥
सर्वकर्मकरा भ्रष्टा मद्यमांसव्यवायिनः ।
अन्ये ये दूषितास्ते वै द्विजरूपैस्तु राक्षसाः ॥११६॥
तान् भुंजतः प्रपश्यन्तः पितरो दुःखमाप्नुयुः ।
प्रायश्चित्तं ततः शीघ्रं कुर्याच्छ्राद्धं पुनश्चरेत् ॥११७॥
घृतं तु जुहुयादग्नावादित्यं त्ववलोकयेत् ।
पुनरावपनं कृत्वा पितरं च पितामहान् ॥११८॥
दद्याद् गन्धं तथा धूपं दीपमर्घ्यं तिलोदकम् ।
विप्राय भोजयेच्चापि तेन पितृप्रतोषणम् ॥११९॥
यस्तु विप्रो मृतान्नं न भुनक्ति शुद्धिमान् सदा ।
तस्मै दानं प्रदातव्यं वैश्वदेवेषु तण्डुलाः ॥१२०॥
गोधूमा घृतमित्यादि शर्करा शाकमित्यपि ।
दुग्धं दधि तथा वस्त्रं श्राद्धेषु तं न योजयेत् ॥१२१॥
प्रेतान्नं भुंजमानानां प्रायश्चित्तं विधीयते ।
माघमासे द्वादश्यां तु सर्पियुक्तं सुपायसम् ॥१२२॥
लिहेद्वै मधुना सार्धं देहशुद्ध्यर्थमित्यथ ।
सवत्सां कपिलां दद्यादात्मनः शुद्धये तथा ॥१२३॥
तीर्थे स्नायाच्च गायत्रीसहस्रं प्रजपेत्तथा ।
यद्वा देहात्मनोः शुद्धिकामः स श्राद्धमाचरेत् ॥१२४॥
स्नात्वा भूमिं प्रविलिप्य मन्त्रयेद् ब्राह्मणोत्तमम् ।
अमायां वै महालक्ष्मि ! दन्तकाष्ठं न घर्षयेत् ॥१२५॥
हिंसितो यद्भवेत् सोमो देवताः पितरस्तथा ।
प्रभाते तेन विप्रेण श्मश्रुनखादिछेदनम् ॥१२६॥
कारणीयं स्नानमभ्यञ्जनं पक्वान्नमित्यपि ।
मध्याह्ने समये प्राप्ते विप्राय पाद्यमर्पयेत् ॥१२७॥
गृहान्तरं नयेद् दद्यादासनं चार्घ्यमुत्तमम् ।
गन्धमाल्यैर्धूपदीपैः सम्पूज्य सलिलं तिलान् ॥१२८॥
दत्वा पात्रं भोजनार्थं विप्राग्रे स्थापयेच्छुभम् ।
भस्मना मण्डलं कुर्यात् पंक्तिदोषनिवारकम् ॥१२९॥
अग्नौ हुत्वा ब्राह्मणाय मिष्टान्नं परिवेषयेत् ।
यथासुखेन भोक्तव्यमिति ब्रूयाद् द्विजं प्रति ॥१३०॥
तृप्तं ब्राह्मणं कृत्वा दद्याद्वै विकिरं ततः ।
उत्तरीयासनं दत्वा पिण्डप्रदनं तु कारयेत् ॥१३१॥
दक्षिणाभिमुखो भूत्वा दर्भानास्तीर्य भूतले ।
पिण्डदानं प्रकुर्वीत पित्रादित्रितये तथा ॥१३२॥
पिण्डानां पूजनं कुर्यात् तन्तुवृद्धयै यथाविधि ।
ब्राह्मणस्य च हस्ते तु दद्यादक्षयमात्मवान् ॥१३३॥
दक्षिणाभिः प्रतुष्यापि स्वस्तिवाच्यं विसर्जयेत् ।
पिण्डास्त्रयस्तु तत्रैव यावत्तिष्ठन्ति भूतले ॥१३४॥
आप्यायमानाः पितरस्तावत् तिष्ठन्ति वै गृहे ।
उपस्पृश्य शुचिर्भूत्वा दद्याच्छान्त्युदकानि च ॥१३५॥
प्रणम्य वैष्णवीं भूमिं काश्यपीमक्षयां ततः ।
भक्षयेत्प्रथमं पिण्डं पत्न्यै देयं तु मध्यमम् ॥१३६॥
तृतीयमुदके दद्याद् विसृजेत् पितृदेवताः ।
प्रणमेदेवं विधिना तुष्यन्ति पितृदेवताः ॥१३७॥
दीर्घायुष्यं प्रयच्छन्ति पुत्रपौत्रधनानि च ।
शृणु लक्ष्मि ! मधुपर्कं दद्यात्प्राणप्रयाणके ॥१३८॥
मधुपर्कः पुरुषो वै मे दक्षांगाद् विनिःसृतः ।
मया स सर्वकार्येषु भवमोक्षाय योजितः ॥१३९॥
मधुपर्को भवेद्यत्र यस्य वा तत्र मोक्षणम् ।
यत्र नास्ति मधुपर्कस्तत्र मुक्तिर्न विद्यते ॥१४०॥
मध्वेवं दधि सर्पिश्च कुर्यात्त्वेवं समं त्रिकम् ।
दद्याद् विप्राय पुण्यार्थं शवाय मोक्षणाय च ॥१४१॥
श्राद्धादेः कर्मणश्चान्ते शान्तिपाठं प्रकारयेत् ।
राधेशाय रमेशाय लक्ष्मीशाय च ते नमः ॥१४२॥
माणिकीशाय पार्वतीश्वराय व्यापिने नमः ।
प्रभेशायाऽनादिकृष्णनारायणाय ते नमः ॥१४३॥
दिशः पश्य त्वधः पश्य व्याधिभ्यो रक्ष नित्यशः ।
प्रसीद स्वस्य राष्ट्रस्य राज्ञः सर्वबलस्य च ॥१४४॥
गर्भिणीनां च वृद्धानां व्रीहीणां च गवां तथा ।
ब्राह्मणानां च साधूनां शान्तिं कुरु शुभं कुरु ॥१४५॥
अन्नं कुरु सुवृष्टिं च सुभिक्षमभयं कुरु ।
विभो ! प्रवर्धतां राष्ट्रं शान्तिर्भवतु नित्यशः ॥१४६॥
देवानां मनुजानां च भक्तानां कन्यकासु च ।
पशूनां सर्वभूतानां शान्तिर्भवतु नित्यशः ॥१४७॥
एवं शान्तिं पठित्वा तु मधुपर्कं प्रयोजयेत् ।
सर्पिर्मधुदधीन्येव समं पात्रे ह्युदम्बरे ॥१४८॥
अलाभे मधुनश्चात्र गुडेन सह मिश्रयेत् ।
घृताऽलाभे महालक्ष्मि ! लाजैः सह विमिश्रयेत् ॥१४९॥
अलाभे चापि दध्नस्तु क्षीरेण सह मिश्रयेत् ।
दधि क्षौद्रं घृतं चैव कारयेत् तत्समं च वा ॥१५०॥

समर्पयामि देवेश कृष्ण ! सर्पिर्घृतं मधु ।
सर्वेषामप्यलाभे तु जलमेव ददेन्मुखे ॥१५१॥
यो वै प्राणान्प्रमुञ्चेत्तु मधुपर्कं ददेन्मुखे ।
अयं पवित्रो विमलः सर्वकामप्रपूरकः ॥१५२॥
शृणोति मधुपर्कादेराख्यानमेतदुत्तमम् ।
याति दिव्यां परां मुक्तिं ममानुग्रहकारणात् ॥१५३॥
राजद्वारे श्मशाने वा भये च व्यसने तथा ।
ये पठन्ति त्विमां शान्तिं शीघ्रं स्वेष्टं भविष्यति ॥१५४॥
अपुत्रो लभते पुत्रमभार्यस्तु प्रियां लभेत् ।
लभेताऽपतिका कान्तं बद्धो निर्बन्धनो भवेत् ॥१५५॥
अस्य संस्मरणाचापि श्राद्धादिफलभाग् भवेत् ।
इति ते कथितं लक्ष्मि ! श्राद्धादिहार्दमुत्तमम् ॥१५६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मथुरातीर्थमाहात्म्ये श्राद्धभोक्तुः प्रायश्चित्तेन पावित्र्यम्, अवन्तीनगर्या मेधातिथिराज्ञः कुपात्रब्राह्मणभोजने पितॄणां पातित्यं सुपात्रे श्राद्धकरणे पुनः पितॄणां स्वर्गामित्वम्, पितुः पितामहस्य प्रपितामहस्य ब्रह्मविष्णुमहेशागात्रोत्पन्नता, सोमपितृहुताशनाः साधौ विप्रे च सहभोजिनः, नीलवृषदानम्, मधुपर्कदानम्, शान्तिपाठश्चेत्यादिनिरूपणनामा षट्पंचाशदधिकत्रिशततमोऽध्यायः ॥३५६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! यमराजः कार्तिके धवले दले ।
द्वितीयायां सूर्यपुत्र्या भोजितः पूजितोऽग्रजः ॥ १ ॥
प्रसन्नश्च यमो यमीं प्रोवाच वरदानकम् ।
तीर्थे त्वयि जले यद्वा पार्श्वे भूमौ तु देहिनः ॥ २ ॥
पापाः पुण्याश्च ये योनिचतुष्टयगता अपि ।
वसन्ति योगमापन्ना न ते दण्ड्या मया स्वसः ! ॥ ३ ॥
यमुनाऽऽह तदा ज्येष्ठं भ्रातरं यदि ते कृपा ।
अद्य यमपुरीवासान्निर्मोच्य समन्ततः ॥ ४ ॥
अहं स्नानफलं तद्वज्जलपानफलं बहु ।
वृन्दातुलसीपत्राणां दानस्य पुण्यमित्यपि ॥ ५ ॥
ददामि नारकेभ्यो वै कुरु निर्बन्धनान् हि तान् ।
स्वसुर्वाक्यं समगृह्य तथाऽस्त्वित्यभिधाय च ॥ ६ ॥
यमः सर्वान्नारकान् वै पुण्यं दत्वा यमीकृतम् ।
प्रेषयामास वै स्वर्गं रिक्तां कृत्वा यमस्थलीम् ॥७॥
अथ काले पुनर्याते संभृता पापिभिस्तु सा ।
लोकालोकपरे पारे गाढतमसि निर्मिता ॥ ८ ॥
जीवानां कर्मणां शुभाऽशुभफलप्रलब्धये ।
न्यायालयः कृष्णनारायणेन निर्मितः स हि ॥ ९ ॥
पापिभ्यः पुण्यवद्भ्यश्च यथान्यायं यमाधिपः ।
धर्मराजः स्वयं क्रूरः सौम्यो वा ददते फलम् ॥१०॥
प्रेता मृताः सर्वजीवाः पापाः पुण्याश्च कर्मिणः ।
तत्र गत्वैव गच्छन्ति परे लोकेऽपरेऽथवा ॥११॥
बहुपापा अल्पपापा यथाकर्म यमगृहे ।
नारकेषु कर्मफलं भुक्त्वा यान्ति भवाय हि ॥१२॥
नारकाणि त्वसंख्यानि स्थलानि मानसानि वै ।
धर्मराजेन तत्स्थल्यां निर्मितानि भवन्ति हि ॥१३॥
यथाकर्म तथा तस्मै दण्डाय प्रददाति तत् ।

श्रीलक्ष्मीरुवाच—

भगवन् श्रोतुमिच्छामि कर्मपाकफलस्थलम् ॥१४॥
कीदृशं किंप्रमाणं च किंरूपं केन दृश्यते ॥
कर्मपाकफलं कीदृङ् मानुषैरुपभुज्यते ॥१५॥
जनो गच्छेत् कथं नैव प्रेतराजनिवेशनम् ।
एतत्सर्वं समाख्याहि जनानामुपकारकम् ॥१६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पुरा वृत्तां कथां परमशोभनाम् ।
पावनीं सर्वपापानां प्रवृत्तौ शुभकारिणीम् ॥१७॥
समुद्रमथने जाता त्वलक्ष्मीर्देवतादिभिः ।
उद्दालकाय मुनये प्रदत्ता धर्मतः प्रिया ॥१८॥
तस्यां जातो मानसो वै सुतो वेदांगतत्त्ववित् ।
नचिकेत इति ख्यातः पित्राज्ञावर्तनः सदा ॥१९॥
अरण्ये गोधनं तस्य दशसाहस्रसंख्यकम् ।
आसीत् तस्मात् प्रगे नित्यं नचिकेतो महामुनिः ॥२०॥
प्रातः क्रतुं विधायैव शतं दानं ददाति वै ।
दाने तेन क्वचित्तत्र गावो दत्ता द्विजाय तु ॥२१॥
भुक्तभोगा गतावस्था भग्नदन्ता जरान्तिगाः ।
जग्धतृणाः शुष्कदुग्धा लुप्तदौर्हृदलक्षणाः ॥२२॥
एतादृशीस्तु गाः प्रायो ददन्तं नचिकेतसम् ।
पितरं प्राह पुत्रस्तु नाचिकेता दयावशः ॥२३॥

पितर्गावो दानयोग्या दोग्ध्र्यो भवन्ति सर्वथा ।
नैतादृश्यो जर्जरिता गर्भशक्तिक्षयान्विताः ॥२४॥
इति श्रुत्वा पिता प्राह शिष्यन्ते वृद्धधेनवः ।
युवत्यो दानसंदत्ता न सन्त्यसद्गृहेऽधुना ॥२५॥
श्रुत्वा पुत्रो विरराम ततो वै दिवसान्तरे ।
धेन्वर्थं तु समायातः कश्चिद् विप्रो हि भिक्षुकः ॥२६॥
ययाचे धेनुभिक्षां स नचिकेतोऽपि गोधनम् ।
अवशिष्टं चातिवृद्धं ददाति तद् द्विजाय वै ॥२७॥
तदा पुत्रो नाचिकेता मुहुर्जनकमाह यत् ।
न दातव्याः पितर्गावो या न दुग्धाय कर्हिचित् ॥२८॥
भाररूपास्तु ता गावो मृत्युमात्राऽवशेषिताः ।
पिता किञ्चिद् व्यग्रमना भूत्वा पुत्रमुवाच तम् ॥२९॥
किं तर्हि प्रददाम्यत्र त्वां ददामि गवां स्थले ।
इतिश्रुत्वा पुनः पुत्रो मां ददस्वेत्युवाच ह ॥३०॥
तदा पिता तु रोषेण प्राह पुत्रं भयंकरम् ।
पुनः पुनर्यतः पुत्र ! मां निरोधयसि द्रुतम् ॥३१॥
मां ददस्वेति वदसि दत्तस्त्वं मृत्यवे मया ।
इत्युक्तमात्रे पितरि मृत्युस्तत्राऽऽजगाम ह ॥३२॥
पुत्रस्तथास्तु ओं प्राह क्षणेनाऽन्तर्हितोऽभवत् ।
माभूद् वाक्यं पितुर्मिथ्या गमिष्यामि यमालयम् ॥३३॥
श्रुत्वा पुत्रवचः प्राह पिता वै दीनमानसः ।
एकस्त्वमसि वत्सश्च नान्यो बन्धुर्हि विद्यते ॥३४॥
याचितस्त्वं मया पुत्र ! गन्तुं वै तत्र नाऽर्हसि ।
रोषेण हि मयोक्तं यद् धर्मतत्त्वं न तन्मतम् ॥३५॥
पितृवाक्यं तु तन्मान्यं यत्राऽधर्मो न वै स्पृशेत् ।
यदि वैवस्वतो राजा त्वां पुनर्विसृजेन्नहि ॥३६॥
विनश्येयमहं पश्य कुलसेतुविनाशनः ।
नरकस्य पुदित्याख्या दुःखं वै नरकं विदुः ॥३७॥
पुतित्राणं भवेत् पुत्रादत्र परत्र सर्वथा ।
हुतं दत्तं तपस्तप्तं पितरश्चापि पोषिताः ॥३८॥
अपुत्रस्य हि तत्सर्वं मोघं भवति निश्चयात् ।
तपो वा विपुलं तप्त्वा दत्वा दानानि धर्मतः ॥३९॥
कृत्वा वह्नौ हवनानि जप्त्वा च मन्त्रमालिकाः ।
अपुत्रो नाऽऽप्नुयात् स्वर्गं मया देवत्रयात् श्रुतम् ॥४०॥
पुत्रेण गण्यते पिता पौत्रेण तु पितामहः ।
पुत्रस्य तु प्रपौत्रेण मोदते प्रपितामहः ॥४१॥
न हास्यामीति वत्स ! त्वां मम वंशविवर्धनम् ।
याच्यमानः प्रयत्ने न तत्र गन्तुं न चार्हसि ॥४२॥
श्रुत्वा तं पितरं प्राह नाचिकेता विनीतकः ।
न विषादः पितः कार्यो द्रक्ष्यसे मामिहाऽऽगतम् ॥४३॥
यमराजमहं दृष्ट्वा तथ्यं कृत्वा भवद्वचः ।
आगमिष्ये पुनस्त्वत्र नास्ति तस्माद् भयं मम ॥४४॥
सत्यं स्वर्गस्य सोपानं सत्ये तिष्ठतु वै भवान् ।
सत्येन लभ्यते सर्वं हितं तत्र प्रतिष्ठितम् ॥४५॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥४६॥
स्थितः सत्ये महाविन्ध्यो वर्धमानो न वर्धते ।
पालयन् स्वव्रतं सत्यं बद्धो वैरोचनो बलिः ॥४७॥
सत्यधर्मो रक्षितः सन् रक्षति स्वप्ररक्षकम् ।
तस्मात् सत्यं कुरुष्वाऽद्य रक्ष त्वात्मानमात्मना ॥४८॥
एवमुक्त्वा गतो मृत्युं नाचिकेताः प्रसन्नधीः ।
प्राप्तो यमगृहं यत्र यमो नासित्तदा गृहे ॥४९॥
लोकपालकृते यज्ञे गतस्त्वासीन्महोत्सवे ।
अतिथिर्ब्राह्मणो नाचिकेतोऽतिष्ठद् गृहांगणे ॥५०॥
क्षुधया तृषया युक्तो विना स्वागतमेव च ।
एकं दिनं द्वितीयं च गतं तत्स्वागतं विना ॥५१॥
तृतीयेऽह्नि यमस्याऽऽसीत् क्ष्मायां मुकुटपातनम् ।
तदा ज्ञातं महज्जातं पातकं विद्यते क्वचित् ॥५२॥
विज्ञातं कारणं त्वेतद् दूतैस्तत्परिमार्गितम् ।
अतिथेरस्वागतं वै विज्ञाय पुण्यनाशकम् ॥५३॥
दूतान्प्राह यमस्तत्र ह्यः समागतवानहम् ।
केनापि दूतवर्येणाऽतिथिर्विज्ञापितो न हि ॥५४॥
स्वागतं तस्य कुर्वन्तु विप्रस्य सत्यशालिनः ।
यस्यांऽगनेतिथिस्त्वास्ते जलाऽन्नाऽऽसनवर्जितः ॥५५॥
सुकृतं तद्गृहस्थस्य भस्मीभवति सर्वथा ।
आदेयं भोजनं तस्मै पादौ प्रक्षाल्य मस्तके ॥५६॥
जलं धार्यं गृहस्थेन तेन पुण्यं विवर्धते ।
स्वल्पं वा बहु वा देयं शक्तिपूर्वं सुश्रद्धया ॥५७॥
यद्यतिथिस्तु भग्नाशो यस्माद् गृहान्निवर्तते ।
गृहिणः पुण्यमादाय पापं दत्वा प्रयाति सः ॥५८॥
विप्रः साधुः सती साध्वी यतिश्च प्रथमाश्रमी ।
एते धर्मातिथयो वै तेभ्यो दत्तमनन्तकम् ॥५९॥
प्रेता वृद्धाश्च पितरः स्वाश्रिता वा निराश्रयाः ।
दीना बाला जडा अन्धा निमित्ताऽतिथयस्त्विमे ॥६०॥
पादावनेजनं कार्यमतिथेर्गात्रमर्दनम् ।
स्नपनं भोजनं वारिपानं निवेदनं शुभम् ॥६१॥

इत्युपादिश्य भृत्यान् स यमोऽपि नाचिकेतसम् ।
प्रति द्वारं समायातो नेमे पप्रच्छ तत्सुखम् ॥६२॥
सत्यायुष्ये समायातो विप्रो मे भाग्यमुत्तमम् ।
गृहाण साधो मिष्टान्नं भोजनं जलपानकम् ॥६३॥
प्रविशाऽत्र गृहान्तर्मे पाद्यमर्घ्यं गृहाण च ।
आसनं विविधं वस्त्रं विभूषाश्च गृहाण मे ॥६४॥
कथं किमर्थमायातो वद विप्र ! ददाम्यहम् ।
नाचिकेता यमं प्राह कृपया तव वै मया ॥६५॥
वस्त्रभूषादिकं प्राप्तं वदाऽऽत्मज्ञानमेव मे ।
यमो योगी हरिश्चैते प्रत्यक्षाऽऽत्मप्रदर्शिनः ॥६६॥
तदात्मदर्शनं याचे देहि मे सुकृपा यदि ।
यमः प्राह गृहाणेदं सुवर्णं रत्नसञ्चयम् ॥६७॥
कल्पवृक्षं सोमवल्लीं चिन्तामणिं तनुं पुनः ।
सुवर्णभवनं रम्यं दासान् दासीः शतोत्तरान् ॥६८॥
यानानि गजवाज्यादिवाहनानि सुवाटिकाः ।
उद्यानानि सुवर्णानां शेवधिं च गृहाण भोः ॥६९॥
न तु प्रत्यक्षात्मनो वै ज्ञानं दास्ये कदाचन ।
तथाऽस्तु त्वत्कृपयैव प्राप्तं सर्वं मया प्रभो ॥७०॥
इत्युक्त्वा नाचिकेतास्तं त्वात्मज्ञानाय चार्थयत् ।
यमः प्राह भुवो राज्यं सार्वभौमं गृहाण मे ॥७१॥
स्वर्गे यद्वा च पाताले सत्यराज्यं च वेधसः ।
ऐश्वर्याणि समग्राणि सिद्धीस्त्वणिमप्रभृतीः ॥७२॥
परकायप्रवेशाद्यं सामर्थ्यं च गृहाण भो ! ।
मा त्वर्थयाऽऽत्मविज्ञानं योगिनामपि दुर्लभम् ॥७३॥
तथाऽस्तु त्वत्कृपयैव प्राप्तं सर्वं मया प्रभो ।
इत्युक्त्वा नाचिकेतास्तं त्वात्मज्ञानमयाचत ॥७४॥
यमः प्राह वृणु त्वन्यद् यत्ते मनसि वर्तते ।
न तु त्वात्मप्रविज्ञानं दुष्करं तत् कुयोगिनाम् ॥७५॥
नाचिकेतास्तथाप्येवमात्मज्ञानमयाचत ।
यमः प्राह शृणु त्वात्मा दिव्यदृष्ट्या विलोक्यते ॥७६॥
ददामि दिव्यचक्षुस्ते पश्यात्मानं हृदि स्थितम् ।
इत्युक्त्वा धर्मराजस्तं ददौ वारि सुपुण्यवत् ॥७७॥
नेत्रांजनेन वै नाचिकेता ददर्श चेतनम् ।
भास्वरं सच्चिदानन्दं सूक्ष्मं मूर्तं गुणाकरम् ॥७८॥
सर्वसिद्ध्याश्रयं भान्तमन्तःस्थितान्तरात्मकम् ।
दृष्ट्वा जहर्ष चात्यन्तं नाचिकेताः सुदिव्यदृक् ॥७९॥
यमस्तस्याऽऽत्मविज्ञाने दृष्ट्वा दृढाग्रहं ततः ।
प्रसन्नः प्राह विप्राय वृणु त्वन्यद् यथेप्सितम् ॥८०॥

नाचिकेतास्तदा प्राह शवं मे त्वक्षतं भवेत् ।
यत्र मे जीवनं शश्वद् भवेद् दिव्यं विना क्षयम् ॥८१॥
पितुर्मे त्वपराधो माऽस्त्विति पश्यामि शान्तिदम् ।
नाचिकेताइतिनाम्ना सदा वह्निर्भवाम्यहम् ॥८२॥
कीर्तिरात्रब्रह्मभवनं सर्वत्राऽस्तु सदा मम ।
एतान्वरान् प्रयाचेऽहं पूर्वोक्तांश्च त्वयाऽर्पितान् ॥८३॥
तथाऽस्त्विति यमः प्राहाऽतिथये सर्वमार्पयत् ।
स्वसौधं कर्मचाराणां भवनानि शुभानि च ॥८४॥
दर्शयामास पापानां कारागाराणि चाप्यथ ।
नारकाणां दण्डवासान् पुण्यानां स्वर्गभूमिकाः ॥८५॥
दर्शयामास पूज्यायाऽतिथये यमराट् स्वयम् ।
सर्वं दृष्ट्वा - भ्रनं समृद्धिं नीत्वैश्वर्यं वरात्मकम् ॥८६॥
नाचिकेता ययौ नैजं गृहं यत्रास्ति तत्पिता ।
शवं चेतनयुक्तं वै समुत्तस्थौ सुदिव्यकम् ॥८७॥
ततो हृष्टमना लक्ष्मि ! पुत्रं दृष्ट्वा तपोनिधिः ।
परिष्वज्य च बाहुभ्यां मूर्धन्याघ्राय चाह तम् ॥८८॥
कच्चित् त्वं न हतो वत्स ! नैव बद्धो यमालये ।
कच्चित्ते सशिवः पन्था गच्छतस्तव पुत्रक ! ॥८९॥
कच्चित्ते यमसदने व्याधयो नाऽभवन् सुत ! ।
किं तत्र कृतवान् गत्वा दृष्टवाँश्च किमु गृहम् ॥९०॥
कच्चिद् यमस्त्वया दृष्टः परुषो वा सुकोमलः ।
तुष्टो वा क्रोधसम्पन्नो विसृष्टोऽसि कथं द्रुतम् ॥९१॥
कच्चिद् दौवारिकैस्तत्र रुद्धो वाऽन्तर्निवेशितः ।
कच्चित्ते पुण्यपापानां फलं नाऽभूत्तु बाधकृत् ॥९२॥
कच्चित्पन्थास्त्वया प्राप्तो निर्बाधो वा सुसत्कृतः ।
इत्युक्त्वा नचिकेतास्तं स्वपुत्रं नाचिकेतसम् ॥९३॥
हृष्टमनाः परिरेभे प्राहाऽऽगनाँस्तपस्विनः ।
पश्यन्तु मम पुत्रस्य प्रभावं विजयप्रदम् ॥९४॥
यमस्य भवनं दृष्ट्वा पुनर्देहं समागतः ।
पितृसेवाप्रतापेन गुरुशुश्रूषयापि च ॥९५॥
सत्येन दैवदृष्टेन जीवन्पुत्रो विलोकितः ।
अहो भाग्यं मम श्रेष्ठं मृत्युं तीर्त्वाऽऽगतः सुतः ॥९६॥
प्रसन्ना देवता मे वै ऋषयः सन्त ईश्वराः ।
कृष्णनारायणो हृष्टो यन्मे वत्सः समागतः ॥९७॥
इति त्वाभाषमाणे च कर्णाकर्णितया जनाः ।
श्रुत्वा वनौकसस्त्यक्त्वा व्रतं जपं तथाऽर्चनम् ॥९८॥
तपो होमं परित्यज्य द्रष्टुं सर्वे समागताः ।
उदूर्ध्वबाहवः केचित् केचिदेकपदस्थिताः ॥९९॥

केचित् सूर्याभिनेत्राश्च केचिद्धगतमस्तकाः ।
केचिद्दिगम्बराश्चान्ये दन्तोलूखलिनस्तथा ॥१००॥
अश्मकुट्टाश्च मौनाश्च शीर्णपत्रतृणादनाः ।
धूम्रपाना बाष्पपाना जलपानास्तथाऽपरे ॥१०१॥
परिवार्य तु तं सर्वे पप्रच्छुर्नाचिकेतसम् ।
भोभोः सत्यव्रताचार ! गुरुशुश्रूषणप्रिय ॥१०२॥
नाचिकेतर्ब्रूहि सत्यं किं दृष्टं च श्रुतं त्वया ।
यद्यद् यमस्य चरितं गुप्तं प्रकाशमित्यथ ॥१०३॥
सर्वं त्वया प्रवक्तव्यं त्वत्कृते चापि यत्कृतम् ।
दुःखं भर्त्सनमाक्रोशं गोप्यं प्रकाश्यमित्यपि ॥१०४॥
ब्रूहि सर्वं लोकशिक्षामयं यद्वै भविष्यति ।
इह चैव कृतं यत्तु तत्परत्रोपयुज्यते ॥१०५॥
कृतस्याऽन्तं न पश्यन्ति जन्तवः पारचिन्तकाः ।
चित्रगुप्तस्त्वया दृष्टो न वा कच्चित् करोति किम् ॥१०६॥
धर्मराजस्य किं रूपं कालरूपं च कीदृशम् ।
मृत्युरूपं तथा कीदृग् व्याधयः किंस्वरूपिणः ॥१०७॥
कर्मफलविपाकश्च कीदृशश्चानुभूयते ।
जितात्मानः कथं यान्ति पुण्याचारास्तथाविधाः ॥१०८॥
पापिनश्च कथं यान्ति कथं यान्ति ह्युदासिनाः ।
यथादृष्टं यथाजातं यथानुभूतमित्यपि ॥१०९॥
त्वया भुक्तं यथा यच्च तथाऽन्यत् त्वत्स्मृतौ स्थितम् ।
वद सर्वं नाचिकेतर्याथातथ्येन विस्तरात् ॥११०॥
इत्युक्त्वा चातिसन्तृष्णाः श्रोतुं त्वलौकिकं हि तत् ।
अभवन् दत्तहृदया नाचिकेता उवाच तान् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने माथुरक्षेत्रमाहात्म्ये यमुनाप्रतापेन यमपुरीरिक्तता, पुनः सा कर्मिभिः प्रपूरिता, नाचिकेतसः स्वपितुः शापेन यमसदनगमनं, यमाशीर्वादाऽऽत्मदर्शनयमपूरावलोकनोत्तरं स्वदेहे पुनरागमनं, तत्र किं किं दृष्टं श्रुतमितिऋषिप्रश्ना इत्यादिनिरूपणनामा सप्तपंचाशदधिकत्रिशततमोऽध्यायः ॥३५७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! नाचिकेताः स्वानुभूतं जगाद तान् ।
कथ्यमानं मया विप्राः शृण्वन्तु यमकौतुकम् ॥ १ ॥
यममार्गे गच्छता तु मया दृष्टा हि देहिनः ।
पुण्याः पुण्यविमानादिवाहनैः सहिताः सुखाः ॥ २ ॥
पापाः साधनशून्याश्च यमदूतैः सुताडिताः ।
मार्गे तु विकटे यान्ति यमस्थानं सुदुःखिताः ॥ ३ ॥
पापकृतान् कथयामि दृष्टा ये मार्गगा मया ।
असत्यवादिनः क्रूरा जन्तुस्त्रीबालघातकाः ॥ ४ ॥
साधुब्रह्महणो दुःखकरा विश्वासघातकाः ।
शठाः कृतघ्ना लोलुभाः परदाराभिहारिणः ॥ ५ ॥
कन्याघातकरा ये च धर्ममार्गविनाशकाः ।
प्रसह्य पापकर्तारो मद्यमांसादिसेविनः ॥ ६ ॥
जिह्मा विनिन्दका मातृपितृगुरुप्रघातकाः ।
मातापित्रोस्त्याजकाश्च सतीसाध्वीसुदुःखदाः ॥ ७ ॥
गुरुद्वेषकरा देवद्वेषिणो वंचकाः खलाः ।
गृहक्षेत्रहराः सेतुबन्धनाशकरास्तथा ॥ ८ ॥
श्रद्धाहीना नास्तिकाश्च निर्दयाः शौचवर्जिताः ।
दारपुत्रविहीनाश्च व्रतभंगादिकारकाः ॥ ९ ॥
द्विजा द्विजत्वहीनाश्च भ्रष्टाचारा विधर्मिणः ।
सर्वभक्षाः सर्वकार्याः सर्वमिथुनकारिणः ॥१०॥
आततायिजनाश्चापि पापिसंगकरास्तथा ।
पतिपत्नीक्लेशदाश्च पतिक्लेशप्रदाः स्त्रियः ॥११॥
नारीक्लेशप्रदाश्चापि वित्तहारिण एव ये ।
कपटमानकर्तारो मिथ्यादोषकलंकदाः ॥१२॥
कूटौषधप्रदातारो वार्ताभिर्वञ्चकास्तथा ।
अग्निशस्त्रप्रहातारश्चक्रे तिलादिपीडकाः ॥१३॥
देवालयान्नसत्रादिभंजका वृक्षनाशकाः ।
कूटशासनका ये च सूचकाः कर्णभेदकाः ॥१४॥
तीर्थप्रदूषका ये च कलहेष्टातिनिष्ठुराः ।
नराः स्त्रियस्तथाकर्मकरा दृष्टा मया पथि ॥१५॥
गतास्ते यमसदनं चित्रगुप्ताद्यधिष्ठितम् ।
अहं द्रागेव गतवान् यमराजगृहांगणम् ॥१६॥
सत्यव्रताक्षराण्येव फालके मम ते भटाः ।
वाचयित्वा प्रणमन्ति दर्शयन्ति च मार्गकम् ॥१७॥
यमराजगृहं रम्यं महाप्राकारवेष्टितम् ।
दृष्टं मयाऽसनं तस्य गोपुरे दिवसत्रयम् ॥१८॥
कृतं पश्चाद् यमः साक्षादायातः स्वागताय मे ।
सम्मान्य निन्ये मां तस्य विशालभवनान्तरम् ॥१९॥
वरान् दत्वा ततो मह्यं धर्मराजपुरं महत् ।
दर्शितं तद्भटैस्तस्याज्ञया दृष्टं मयाऽभितः ॥२०॥
योजनानां सहस्रं तु विस्तराद् द्विगुणायतम् ।
द्विगुणं परिवेषेण परिखाभिः समावृतम् ॥२१॥

भवनैरावृतं दिव्यैर्जाम्बूनदमयैः शुभैः ।
हर्म्यैः शतोत्तरभूमिप्रासादैः शिखरान्वितैः ॥२२॥
अट्टालिकान्वितसौधैः कलशान्वितमन्दिरैः ।
सौवर्णेन च महता प्राकारेणाभिवेष्टितम् ॥२३॥
यत्र यमपुरीभृत्याः प्रधानाश्चाधिकारिणः ।
श्रवणा याम्याः कालाश्च भटाद्या वै निवासिनः ॥२४॥
तत्रमिष्टसलिलाश्च नद्यः सरांसि दीर्घिकाः ।
कूपास्तडागा नालिन्यो राजन्ते वल्लिकाद्रुमैः ॥२५॥
दास्यो दूत्यस्तथा पत्न्यः सेविकाः कन्यकाः सुताः ।
वसन्ति तत्कुटुम्बानि यमराजप्रजात्मकाः ॥२६॥
गजवाजिराजहंसोष्ट्रकगोवृषभादयः ।
नानाजातिपशवोऽपि विद्यन्ते तूपकारकाः ॥२७॥
शुकसारसमेनाद्याः पक्षिव्राता वसन्ति वै ।
सर्वजीवैः समाकीर्णं यमराजस्य सत्पुरम् ॥२८॥
पुष्पोदका नदी वृक्षवल्लीषण्डसुशोभिता ।
उद्यानादिलसत्तीरा स्वर्णसोपानवालुका ॥२९॥
प्रतिसौधं गता यस्या नलिन्यो जलवाहिकाः ।
तत्र मिष्टशीतवारिह्रदेषु दिव्यवर्ष्मणः ॥३०॥
गन्धर्वाः किन्नरा दूताः किन्नर्योऽपि सुशोभनाः ।
विशालजघना भूषाचंचद्गात्रा रतिप्रदाः ॥३१॥
क्रीडन्ति स्नानकाले वै कामरूपधराः स्त्रियः ।
रामयन्ति नरांस्तत्र यथाकामं यथासुखम् ॥३२॥
तां नदीं क्षोभयन्त्यश्च गायन्ति स्वप्रियैः सह ।
दिव्यमौक्तिकरत्नादिकृतसोपानविस्तराम् ॥३३॥
वैवस्वतीं नामनदीं नगरमध्यगामिनीम् ।
दिव्यतोयां सदा पूर्णां कुन्दाभहंसराजिताम् ॥३४॥
पद्मवल्लीपुष्पषण्डवालखिल्यादिशोभिताम् ।
सुगन्ध्यमृतविमलसलिलां संनिनादिनीम् ॥३५॥
फलपुष्पतरुषण्डैः कन्दमूलादिभिर्युताम् ।
नार्यः स्वरूपा अवगाह्य क्रीडन्ति मदविह्वलाः ॥३६॥
तथा गायन्ति सहिता गीतवादित्रतालकैः ।
कन्यासमूहा यत्तीरोद्यानेष्वारामकेषु च ॥३७॥
अवतारेषु घट्टेषु नरा नार्यो मनोहराः ।
विहरन्ति प्रगायन्ति तन्त्रिमृदंगगीतिभिः ॥३८॥
गन्धः सुगन्धः पवनोऽगुरुचन्दनवासितः ।
शीतमन्दश्च हर्म्येषु चरत्यामोदकारकः ॥३९॥
विमानानि च यानानि वैहायसगमानि च ।
प्रचरन्ति जले व्योम्नि सकान्तप्रमदानि च ॥४०॥
राजमार्गा वसतय आनन्दानन्दसंप्लुताः ।
यावद्विधसमृद्धियुक्ता आपणादिविराजिताः ॥४१॥
सभागृहाणि दिव्यानि दिव्यप्रदर्शनानि च ।
दिव्यनाटकनृत्यादिगीतिगृहाणि सन्ति च ॥४२॥
एवं दृष्टं यमपुरं विस्तृतं सुखसंभृतम् ।
पुण्यवतां तु द्वितीयं वैकुण्ठमिव भासते ॥४३॥
अथ तद्गोपुरं रम्यं स्वर्णभूमिविराजितम् ।
दशयोजनविस्तारं ततो द्विगुणमायतम् ॥४४॥
प्राकारोभयपार्श्वे च प्रासादशतशोभितम् ।
समालिखदिवाऽऽकाशं नानायन्त्रप्रजालकम् ॥४५॥
स्वर्गमिव प्रकाशाढ्यं धर्मदर्शिप्रवेशनम् ।
देवर्षिपुण्यसत्कर्मकारिणां सुप्रवेशनम् ॥४६॥
तत्रैव विहितं द्वारं शारदाभ्रचयप्रभम् ।
मनुष्याणां सुकृतीनां प्रवेशस्तत्र निर्मितः ॥४७॥
अथ धूम्रसमवर्णं बहुदोषसमन्वितम् ।
आयसं गोपुरं तत्र दक्षिणं भीमदर्शनम् ॥४८॥
रौद्रं तप्तं दावकरं प्रवेशो यत्र पापिनाम् ।
नृशंसानां घातकानां क्रव्यादानां दुरात्मनाम् ॥४९॥
पापानां खलु सर्वेषां जीवदुःखप्रदायिनाम् ।
गोपुरं पश्चिमं तत्र बहुशस्त्रादिनिर्मितम् ॥५०॥
औदुम्बरवह्निजालसमालिप्तं विदाहकम् ।
दुष्कृतीनां प्रवेशार्थं यमेन कारितं स्वयम् ॥५१॥
तत्र पुरे सर्वरत्नमयी दिव्या सभाऽऽयता ।
यमेन योजिता सा च धर्मितपस्विमानवैः ॥५२॥
सत्यवादिजितक्रोधाऽलुब्धाऽरागैः सुशोभिता ।
सा सभा धर्मयुक्तानां सा सभा पापकारिणाम् ॥५३॥
सा सभा सर्वलोकस्य शुभस्यैवाऽशुभस्य च ।
कर्मणां न्यायदात्री सा सर्वेषां धर्मसंहिता ॥५४॥
यत्र मध्यस्थरूपा निरपेक्षा धर्मपाठकाः ।
चिन्तयन्ति फलान्येव सर्वलोकहिताय वै ॥५५॥
यथान्यायं यथालेखं यथाकालनिवेदकाः ।
मनुर्व्यासोऽत्रिरापस्तम्बश्च शुक्रो बृहस्पतिः ॥५६॥
नाचिकेता गौतमश्च शंखो लिखित इत्यपि ।
पुलस्त्यो भृगुरंगिरा वह्निर्वायुर्युगास्तथा ॥५७॥
पतीव्रतश्च पुलहस्तथाऽन्ये धर्मपाठकाः ।
यमेन सहिताः सर्वे चिन्तयन्ति प्रतिक्रियाम् ॥५८॥
सर्वे कार्यप्रचूरास्ते कुण्डलांगदभूषिताः ।
ब्रह्मदत्तमुकुटादितेजोभिर्दुर्निरीक्षणाः ॥५९॥

अथ तत्पार्श्वयोर्दिव्याः ऋषयो ब्रह्मवादिनः ।
वेदतदंगमर्मज्ञाः सत्यधर्मपुरस्कृताः ॥६०॥
तत्र चैवं मया दृष्टा ऋषयः पितरः खलु ।
भवने धर्मराजस्य प्रगायन्तः पुरा कथाः ॥६१॥
तेषां पार्श्वे मया दृष्टः कृष्णवर्णो महाहनुः ।
ऊर्ध्वाकृतिरूर्ध्वरोमा महादंष्ट्रो भयानकः ॥६२॥
क्रुद्धो वामकरे धृत्वा महोग्रं दण्डमेव च ।
दर्शयन् स्वमुखे शश्वद् दुर्दृश्यां विकरालताम् ॥६३॥
शिक्षार्थं धर्मराजेन सन्दिष्टोऽनेकरूपधृक् ।
शृणोति निर्णयान् कालो युनक्ति देहिनस्तथा ॥६४॥
तथाऽन्ये कालसदृशाः किंकरा गणनापराः ।
फलयोक्तार एवात्र कोटिशः शासनंकराः ॥६५॥
यमेन सत्कृता सम्यग् दिव्यगन्धानुलेपनैः ।
संहर्त्री सर्वलोकानां घोरा वै यातनामयी ॥६६॥
बिभ्यति ह्यसुरास्तस्याः ऋषयश्च तपोधनाः ।
असुराश्च सुराश्चैव योगिनोऽपि महौजसः ॥६७॥
तस्या देहात् समुद्भूता व्याधयः कालनिर्मिताः ।
महाघोरा महाक्लेशा दण्डदानेऽतितत्पराः ॥६८॥
मया दृष्टास्तथा दृष्टो महाक्रोधः सुदारुणः ।
प्रकृत्या दुर्विनीतश्च जरामरणवर्जितः ॥६९॥
महासत्त्वो विकरालो मृत्युर्नामा पुमाँस्तथा ।
दिव्यतेजोमयो दृष्टो सर्वपाशसमन्वितः ॥७०॥
गायका हासकाश्चापि सर्वजीवप्रबोधकाः ।
कालज्ञाश्च मया दृष्टास्तेजोभूषाम्बरान्विताः ॥७१॥
अनेकाश्च ज्वरा दृष्टा रोगाश्च वेदनास्तथा ।
नारीनरस्वरूपाश्च जीवभक्षकरा हि ते ॥७२॥
क्रोधदावानलदात्र्यो नानाकृत्या विलोकिताः ।
तीव्ररोषा नाशयित्र्यो नानारूपधराः स्त्रियः ॥७३॥
तत्र हलहलाशब्दः प्राणिशोषणहेतवे ।
श्रुतो ह्यविरतं क्रूरो धर्मराजसमीपतः ॥७४॥
कूष्माण्डा यातुधानाश्च राक्षसा मांसभोजिनः ।
एकपादा द्विपादाश्च त्रिपादा बहुपादकाः ॥७५॥
एकबाहुर्द्विबाहुश्च त्रिबाहुर्बहुबाहवः ।
शंकुकर्णाः शूर्पकर्णा नलकर्णास्तथाऽपरे ॥७६॥
कृकलासमुखास्त्वन्ये तथान्ये मकराननाः ।
अन्ये व्याघ्रबिडालास्या विकरालप्रनेत्रकाः ॥७७॥
सकुठाराः सकुद्दालाः सचक्राः शूलहस्तकाः ।
शक्तितोमरभूशुण्डीधनुर्मुद्गरपाणयः ॥७८॥
असिकुन्तधरास्त्वन्ये विचित्रभक्ष्यहस्तकाः ।
अथान्ये पुरुषा दृष्टाः सर्वशोभावशोभिताः ॥७९॥
केयूरशृंखलाचित्रमुकुटकटकान्विताः ।
स्रग्विणो वस्त्रशोभाढ्या सुगन्धगन्धमोदिताः ॥८०॥
वाजिकुंजरहंसादियुक्तास्त्वन्ये तु यानगाः ।
शरभर्षभसारसचक्रमयूरसंस्थिताः ॥८१॥
तथा सौम्या मया दृष्टा दृष्टास्त्वन्ये भयानकाः ।
उज्ज्वलाश्चाऽपरे तत्र मलिना अपि सर्वथा ॥८२॥
नवोज्ज्वलाम्बराः केचित् केचिज्जीर्णांशुकास्तथा ।
सात्त्विकाः सुमनसश्च तथाऽन्ये क्रूरमानसाः ॥८३॥
मृष्टवचनमाधुर्यास्तथाऽन्ये शतमारकाः ।
कलिः कृष्णा महाकृत्या कालिश्चाप्यवलोकिता ॥८४॥
धर्महस्ता यशोहस्ताः कीर्तिहस्तास्तथाऽपरे ।
एते कृतान्तसान्निध्ये वर्तन्ते तद्वचःपराः ॥८५॥
पशुभक्ष्या नरभक्ष्या नारीभक्ष्यास्तथाऽपरे ।
शवभक्ष्या बालभक्ष्याः पक्षिभक्ष्या ह्यनेकशः ॥८६॥
आमभक्ष्याः पक्षिभक्ष्याः पद्महस्ता यमानुगाः ।
महादंष्ट्रा विकराला वह्निवार्यपराभवाः ॥८७॥
अग्निदेहा जलदेहा लोष्ठवर्ष्माण इत्यमी ।
शस्त्राऽघात्या मया दृष्टा वाय्वस्पृश्यास्तथाऽपरे ॥८८॥
यमराजभटा ह्येते सिद्धिमन्तोऽवलोकिताः ।
सकुंभकाः सपक्षाश्च व्योमादिसर्वगामिनः ॥८९॥
अप्राणरोधवशगा यमभृत्या विलोकिताः ।
सर्वग्राह्या सर्वस्पृश्याः सर्वदृश्या विलोकिताः ॥९०॥
यावन्तश्चात्र वै ब्रह्माण्डे जना भुवनेषु च ।
देहिनां च स्वभावा वै यादृग्गुणास्तु चेतनाः ॥९१॥
जडा यादृग्गुणाः सन्ति मूर्ताऽमूर्तानि यानि च ।
स्थावरा जंगमाश्चापि यथा भवन्ति यादृशाः ॥९२॥
तेषां सर्वविधानां वै दण्डदानाय ते भटाः ।
सर्वशक्तियुताः सर्वसिद्धियुक्ता नियामकाः ॥९३॥
अलेपाश्चाऽपराभूतास्तेषामविषयास्तथा ।
भवन्ति किं वर्णयामि पारस्तेषां न विद्यते ॥९४॥
इष्टरूपधरा इष्टसिद्धिसामर्थ्ययोगिनः ।
इष्टतर्ककरा दण्डदानेऽप्रधृष्यशक्तयः ॥९५॥
केचित् सूक्ष्मशरीरा वै केचित्पर्वतरूपिणः ।
केचिद्ब्रह्माण्डतुल्यत्वं गृह्णन्ति कार्यसंगमे ॥९६॥
केचिन्नदनदीरूपाः केचिज्ज्वालास्वरूपिणः ।
केचित्सूर्यसमा उष्णाः केचिच्छीतहिमाढ्याः ॥९७॥

यादृशं दण्डतत्त्वं वै तादृशास्ते भवन्ति हि।
मया दृष्टा बहुरूपा आश्चर्यं प्राप्तवानहम् ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने याम्यचक्रे मार्गे दृष्टाः पापिनः, यमराजस्य पुरं गृहं प्राकारो गोपुराणि, कृतान्तकालमृत्युकिंकरकृत्यादीनां रूपाद्या-कृतिनिर्देशादिसामर्थ्यादिनिरूपणनामाऽष्टपंचाश-दधिकत्रिशततमोऽध्यायः ॥ ३५८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! नाचिकेता दृष्टवान् यमयातनाः।
जगाद ब्राह्मणान् सर्वान् यथादृष्टा वदामि ते ॥ १ ॥
नाचिकेता द्विजान्प्राह राजा प्रेतपुराधिपः।
सभामध्ये मया दृष्टो बहुकार्यविचक्षणः ॥ २ ॥
मे त्वेकमृषभं यमः सत्कारार्थं ददौ तथा।
आसनं पाद्यमर्घ्यं च पूजां मे विधिना ददौ ॥ ३ ॥
न्यषादयत् कांचनस्यासने मां पुष्पशोभिते।
पूर्वं रौद्रमुखः किन्तु तदा सौम्याननोऽभवत् ॥ ४ ॥
लोहिते तस्य नेत्रेऽपि जज्ञाते पद्मसदृशे।
एवं दृष्ट्वा मया तत्र विश्वस्तं भावनान्विते ॥ ५ ॥
अथ स्तुतिः कृता तस्य सुशान्तहृदयेन वै।
त्वं वै कर्मफलदाता पितॄणां परमो महान् ॥ ६ ॥
श्राद्धे धाता विधाता च धर्मराज! नमोऽस्तु ते।
कालकाल! कर्मवेत्तृन्! प्रेतनाथ! नमोस्तु ते ॥ ७ ॥
दण्डपाणे! पाशहस्त! धर्ममूर्ते! नमोऽस्तु ते।
सूर्यवर्ण! कृष्णवर्ण! हव्यकव्याद! ते नमः ॥ ८ ॥
सुरूप! क्रूररूपाऽपि न्यायमूर्ते! च ते नमः।
न त्वां चालयितुं शक्तास्तापसा ऋषयोऽपि वा ॥ ९ ॥
इतिस्तोत्रं शुभं श्रुत्वा यमराज उवाच माम्।
परितुष्टोऽस्मि भद्रं ते ब्रूहि किं करवाणि ते ॥१०॥
अहं तदाऽवदं तस्मै देशं ते दर्शय प्रभो!।
पापानां च शुभानां च द्रष्टुमिच्छामि यातनाः ॥११॥
चित्रगुप्तं प्रधानं ते द्रष्टुमिच्छामि दर्शय।
यमराजः समाहूय दूतं मां चाप्यप्रेषयत् ॥१२॥
चित्रगुप्तं प्रति प्रीत्या मां दृष्ट्वा चित्रगुप्तकः।
प्रत्युत्थाय चकारातिस्वागतं वै कृतांजलिः ॥१३॥
उवाचैनं दर्शयन्तु भृत्याः! प्रेतनिवासनम्।
अस्य रक्षा च गुप्तिश्च भवद्भिः क्रियतामिति ॥१४॥

सन्दिष्टा मां त्वरमाणा दूता निन्युः फलालयम्।
द्वाराभ्याशे मया दृष्टं शृणुतैतद्भयावहम् ॥१५॥
यमदूता बन्धयन्ति निर्दहन्ति च देहिनः।
पाटयन्ति प्रहारैश्च ताडयन्ति पुनः पुनः ॥१६॥
वेणुयष्टिप्रहारैश्च प्रहरन्ति च पापिनः।
भग्ना भिन्नाः छिन्नगात्रा भग्नपृष्ठशिरोधराः ॥१७॥
रुदन्ति करुणं घोरं त्रातारं नाप्नुवन्ति ते।
केचिन्नरके पच्यन्ते दह्यन्ते चोग्रपावके ॥१८॥
तैलपाके विपच्यन्ते क्षारे क्लिद्यन्त एव च।
केचिद् यन्त्रे प्रपीड्यन्ते शोणितं स्रवते ततः ॥१९॥
वैतरणी नदी तत्र वहति दुस्तराऽधिनाम्।
आरोप्यन्ते महाशूले बध्यन्ते पादयोस्तथा ॥२०॥
प्रक्षिप्यन्ते वैतरणीनद्यां दशन्ति दंष्ट्रिणः।
अथ ऊर्ध्वं जलावर्त्तभ्रमिता ऊर्मिदुःखिताः ॥२१॥
विलोक्यन्ते सहस्राणि शुष्यन्ति त्वपरेऽनिले।
मज्जन्तश्च वमन्तश्च मूर्छयन्तश्च देहिनः ॥२२॥
दृश्यन्ते बहवस्तत्र त्रातारं नाप्नुवन्ति ते।
अथाऽन्ये बहुभिर्दूतैरारोप्य कूटशाल्मलिम् ॥२३॥
असिशक्तिप्रहारैश्च ताड्यन्ते, लोहकण्टकैः।
कूष्माण्डा यातुधानाश्च कांश्चित् संचूर्ण्य यान्ति च ॥२४॥
राक्षसा मांसभोक्तारः खादन्ति घ्नन्ति चापरान्।
चूषयित्वाऽपरान् केचिद् विसृजन्ति क्षितौ तथा ॥२५॥
ततो जीवेन संयुक्ताश्चूषिता अपि वै पुनः।
यथापूर्वाः प्रजायन्ते चूषयन्ति च तान्पुनः ॥२६॥
पापास्ते पाहि मुञ्चेति वदन्त्यपि यमानुगाः।
पापप्रतिफलार्थं वै सूदयन्ति पुनः पुनः ॥२७॥
पाषाणवर्षैः केचित्तु पांशुवर्षैस्तथाऽपरे।
मृद्यन्ते विद्रुताः प्रविशन्ति बिले ज्वलन्ति च ॥२८॥
दूतैर्हता महाग्नौ ते पच्यन्ते वंशताडिताः।
जलं प्रदीयतां चेति ब्रुवते नः प्रसीदथ ॥२९॥
तप्तं जलं दीयते च पिबन्ति हृदये तदा।
दह्यन्ति चान्तरैस्तापैः क्रोशन्ति च भयंकरम् ॥३०॥
अथ पुण्यवतां भूमिर्दृष्टा यत्र मया मुहुः।
सुखिनोऽपि प्राणिनो वै दृष्टा मोदभरास्तथा ॥३१॥
येषामग्रेऽन्नमिष्टान्नभक्ष्याणां सन्ति राशयः।
दधिक्षीररसाश्चापि कृसरान्नं च पायसम् ॥३२॥
फलानां राशयश्चापि पेयानां कलशा हृदाः।
भोज्यचोष्यसुलेह्यानि बहूनि सन्ति सन्निधौ ॥३३॥

द्रव्याणि तैलपूगादिचर्वणानि विभान्ति च ।
तपोऽर्जितानि दिव्यानि तिष्ठन्ति सुकृतात्मनाम् ॥३४॥
माल्यानि धूपगन्धाश्च वस्त्रभूषापरिच्छदाः ।
मनोहरास्तथा कान्ताः कान्तिमत्यो रमन्ति च ॥३५॥
प्रमदाः सर्वविभूषा युवत्यो भोजनानि वै ।
कान्तान् स्वर्णासने परिवेषयन्ति विलोकिताः ॥३६॥
गृहीतकुंभमणिकाः पात्रहस्तास्तथाऽपराः ।
सुमनःपात्रहस्ताश्च भोजयन्ति सहस्रशः ॥३७॥
नूपुरशृंखलाशोभिकिंकिणीजालसुस्वनाः ।
सन्निधाय सुभोग्यानि तिष्ठन्ति च मनोहराः ॥३८॥
सेवन्ते चातिविश्रान्तान् यूनो रूपगुणाकरान् ।
ब्रुवते मिष्टमधुरस्वरं काले च योषितः ॥३९॥
अथोपदेशकर्तारो दूताश्चाप्यवलोकिताः ।
निघ्नन्तश्च हसन्तश्च क्रूरा निष्ठुरवादिनः ॥४०॥
भो भोः कृतघ्ना लुब्धाश्च सर्वदानविवर्जिताः ।
परापवादनिरताः परात्मदुःखदा जनाः ॥४१॥
सुलभानि न दत्तानि विभवे सति लौकिके ।
पानीयमथ काष्ठानि मिष्टान्नं सुखमागतम् ॥४२॥
तेन वध्या भवन्तो वै जाता यमकरैरिह ।
कर्मणां तु क्षयं कृत्वा विमुक्ता यान्तु वै भुवम् ॥४३॥
पुनः पापं न कर्तव्यं दरिद्रकुलजन्मिभिः ।
पुण्यं सम्यक् प्रकर्तव्यं पुण्याः स्वर्गं हि भुञ्जते ॥४४॥
ततः सत्यरता भूत्वा दयावन्तः सुधार्मिकाः ।
गच्छन्तु परमं स्थानं पृथिव्यां वा महत्कुले ॥४५॥
कृष्णाऽऽराधनया भक्त्या भविष्यति परागतिः ।
यद्वा सुन्दरनारीणां स्पृद्धं स्वर्गमवाप्स्यथ ॥४६॥
इति स्पष्टं मया तत्राऽऽकर्णितं सूपदेशनम् ।
अथाऽप्यग्रे नीतवन्तो भृत्या मां भूमिकान्तरम् ॥४७॥
अर्दनं ताडनं यत्र मर्दनं छेदनं तथा ।
चूर्णनं भेदनं यत्र दाहनं कच्चरादिवत् ॥४८॥
जीवानां वै मया दृष्टं पापिनां त्रासदायकम् ।
नोत्सहे वर्णनं कर्तुं दयार्द्रहृदयं यतः ॥४९॥
तथाप्याग्रहयुक्तत्वाद् ऋषयः ! प्रवदाम्यहम् ।
यत्र क्षितितलं सर्वमायसैः कण्टकैश्चितम् ॥५०॥
विषमं विषसंलग्नं वह्निव्याप्तं तमोमयम् ।
अथात्र छिन्नपादाश्च छिन्नपाणिशिरोधराः ॥५१॥
पापाचारा वपुष्मन्तः पात्यन्ते यमभृत्यकैः ।
स्त्रियः कृत्यास्वरूपाश्च प्रतीक्षन्ते व्यवायिनः ॥५२॥
आगतान् वह्निसंतप्ते निक्षिपन्ति शिलातले ।
क्लिश्यन्ति बहवो दुष्टास्त्रातारं नाप्नुवन्ति ते ॥५३॥
अथाऽन्ये तु श्वभिर्घोरैरापादतलमस्तकम् ।
भक्ष्यमाणा मया दृष्टाः प्रक्रोशन्तो मुहुर्मुहुः ॥५४॥
अथाऽन्ये च मया दृष्टा महादंष्ट्राः कृशोदराः ।
क्षुधितास्तृषिताः सूचीमुखाः पीड्यन्त एव ते ॥५५॥
अन्नानि भोज्यवस्तूनि मिलन्ति नैव वार्यपि ।
अयःसारमयी नारी वह्नितप्ता हि कृत्यका ॥५६॥
आलिंगति नरं तत्र धावन्तं त्वनुधावति ।
वदत्यहं ते भगिनी ह्यहं भार्या सुतस्य ते ॥५७॥
मातृस्वसा पितृस्वसा मातुलानी च ते ह्ययम् ।
गुरुभार्या सुता तेऽस्मि पूर्वं प्रसह्य धर्षिता ॥५८॥
भुंक्ष्व पापफलं पाप ! मोक्ष्यसे नहि दुष्कृतात् ।
ज्वालयिष्ये हनिष्येऽहं कथं धावसि दूरतः ॥५९॥
श्रावयन्ति बोधयन्ति चाभिद्रवन्ति पापिनाम् ।
अनुपीड्य दुरात्मानं धर्षयन्ति सुदारुणम् ॥६०॥
किं क्रन्दसि दुष्कर्मिन् त्वां परिष्वक्तो रतिं कुरु ।
यत्र क्वापि धावसि त्वां न त्यक्ष्ये पारदारिकम् ॥६१॥
एतत् कुतुहलं दृष्टं युवत्यस्तादृशान्नरान् ।
लोहयष्टिप्रहाराद्यैस्ताडयन्ति पुनः पुनः ॥६२॥
अथाऽन्ये दुःखिनो दृष्टास्ताडिता दण्डमुद्गरैः ।
व्याघ्रसिंहशृगालाद्यैः राक्षसैर्गर्दभैः श्वभिः ॥६३॥
भक्ष्यन्त श्वापदैः काकैर्गृध्रैश्च कृकलासकैः ।
अथान्ये च मया दृष्टा विदारिता विभेदिताः ॥६४॥
असितालवने दूतैर्ज्वालावने प्रदाहिताः ।
छिन्ना दग्धा हन्यमाना विघृष्टाश्च नदन्ति ते ॥६५॥
तान् वयांस्यायसैस्तुण्डैर्दंष्ट्राभिः श्वादयस्तथा ।
क्रव्यादा हिंसका व्याघ्राः खादन्ति रुषितास्तदा ॥६६॥
ऋक्षद्वीपे मया दृष्टा यमऋक्षैर्विपाटिताः
केचिन्मुद्गरभग्नांगाः शूलभग्नास्तथा परे ॥६७॥
अन्ये क्षिप्ता मया दृष्टा वापीह्रदनदीषु ते ।
रुधिरस्य तडागेषु कूपपुष्करिणीषु च ॥६८॥
पूतिमांसकृमिकीटाऽमेध्येषु च सरस्सु च ।
जिघ्रन्तः पापिनो गन्धं मज्जन्तश्चावलोकिताः ॥६९॥
अस्थिपाषाणरुधिरवर्षाभिश्चूर्णितास्तथा ।
धावन्तश्च प्लवन्तश्च हा हताः स्म प्रभाषिणः ॥७०॥
क्रन्दन्तः करुणस्तत्र रुद्धा विद्धाः श्रुता मया ।
स्थूलस्थाणुप्रबद्धाश्च, केचिदुद्बन्धने धृताः ॥७१॥

शिलाभिरर्दिताश्चान्ये शस्त्रैश्च शकलीकृताः ।
मया वै दुःखिनो दृष्टाः क्रन्दनं दारुणं श्रुतम् ॥७२॥
दर्शिताश्च ततो दूतैरष्टौ नरका दारुणाः ।
तप्तं चापि महातप्तं महारौरवरौरवौ ॥७३॥
सप्ततालः कालसूत्रं तामिस्रोऽन्धतामिस्रकः ।
प्रथमे प्रथमं दुःखं द्वितीयं द्विगुणं त्वकम् ॥७४॥
तृतीये त्रिगुणं कष्टं चतुर्थे तु चतुर्गुणम् ।
पञ्चमे पञ्चगुणकं षष्ठे षड्गुणकष्टकम् ॥७५॥
सप्तमे सप्तगुणकमष्टमेऽष्टगुणं त्वकम् ।
दुःखितानां तत्र दुःखं दुःखाद् दुःखतरं ततः ॥७६॥
दुःखमेवाऽत्र न सुखं दुःखैर्दुःखं विवृध्यते ।
उपायस्तत्र नैवास्ति येन स्वल्पं सुखं भवेत् ॥७७॥
शब्दे स्पर्शे रसे रूपे गन्धे शारीरमानसैः ।
दुःखान्तगामिभिर्दुःखैः पीड्यन्ते पापकारिणः ॥७८॥
आयसैः कण्टकैस्तीक्ष्णैस्तप्तैस्तप्ताऽऽवृता स्थली ।
अन्तरीक्षं खगानीकैरग्निजिह्वैः समावृतम् ॥७९॥
बुभुक्षाऽति पिपासाऽति उष्णमत्युष्णमित्यपि ।
शीतं चाप्यतिशीतं च वायुर्ज्वालाऽतिमिश्रितः ॥८०॥
पातुकामो जलं दूतैर्नीयते सर उष्णकम् ।
प्रेक्षते धावति पातुं पिबत्यन्तः प्रदह्यति ॥८१॥
तस्य पक्वानि मांसानि राक्षसा मत्स्यकादयः ।
अवधृत्य समुत्पाट्य खादन्ति च हसन्ति च ॥८२॥
अथ क्षारोदके तैश्च क्षिप्यते वै महाह्रदे ।
क्षारद्रुता भक्षयन्ति समांसो जायते पुनः ॥८३॥
करीषगर्ते सन्तप्ते कुंभीपाके भयंकरे ।
पेशीं पेशीं सुपक्वां च समुत्पाट्य तु देहिनः ॥८४॥
खादन्ति यमगाः पिष्ट्वा दशनैः स्वादवेदिनः ।
इति दृष्टा मया पापाः क्रोशन्तोऽदूरवर्तिनः ॥८५॥
अथ शृंगाटकस्थल्यां दृष्टाः सुतप्तवालुके ।
स्थले दह्यन्ते छिद्यन्ते विध्यन्ते कण्टकैश्च ये ॥८६॥
भिद्यन्ते चापि पात्यन्ते पीड्यन्ते यमदूतकैः ।
कृष्यन्ते च विशस्यन्ते ह्युत्कोच्यन्ते च पापिनः ॥८७॥
श्यामाः शबलाः श्वपदाः खादन्ति सर्पवृश्चिकाः ।
अथान्यश्च मया दृष्टो नरकः कूटशाल्मलिः ॥८८॥
कृष्यन्ते पापिनस्तत्र यावदस्थ्यवशेषिताः ।
कृत्यन्ते प्राणिनस्तत्र दूतैश्चूर्ण्यन्त उग्रकैः ॥८९॥
छिन्नांगाः सर्वगात्रेषु विन्दन्ति दुःखमुल्बणम् ।
अथान्या च मया दृष्टा नदी कर्दमवालुका ॥९०॥
अग्निज्वालाप्रवाहा च वह्नेयव्यालनक्रका ।
आग्नेयझषसंव्याप्ता ह्युत्तार्यन्ते तु तां नराः ॥९१॥
तथा सरिद् वैतरणी दृष्टा लवणकर्दमा ।
चर्ममांसाऽस्थिपंका च समज्वालाळलोहिता ॥९२॥
वज्रदंष्ट्राः कर्कटका वज्रजिह्वाश्च जन्तवः ।
महाविषाश्च मकरा झषाश्चाप्यस्थिभेदनाः ॥९३॥
यत्र पापान् भक्षयन्ति गिलन्ति चोत्किरन्ति च ।
पुनर्वै मांसलाः प्राग्वद् भवन्त्येव च पापिनः ॥९४॥
अथाग्रे भूतलं शून्यागारं दृष्टं सगह्वरम् ।
मूषका वज्रदन्ताश्च सविषा भक्षयन्ति तान् ॥९५॥
मूषकैर्जग्धगात्राश्च ह्यस्थिमात्रावशेषिताः ।
पुनर्वै वायुना स्पृष्टा भवन्ति मांसलास्तु ते ॥९६॥
अथाग्रे रुक्षकवनं दृष्टं रौद्रपतत्रियुक् ।
मांसादैः पक्षिभिर्यत्र वृक्षारूढोऽपि भक्ष्यते ॥९७॥
निर्मांसो निस्त्वगस्थी च निःशिराजालकस्तथा ।
निरक्षिश्रावणः पापः क्रियते तीक्ष्णचञ्चुभिः ॥९८॥
अथाग्रे तु मया दृष्टो वटवृक्षो महारुणः ।
वज्रकाष्ठो ह्यप्रदाह्यो दोलासहस्रसंयुतः ॥९९॥
यदधो यमचुल्ली वै दशयोजनविस्तृता ।
त्रियोजनसुगम्भीरा नित्यं प्रज्वालिता हि सा ॥१००॥
प्रेतानां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
प्रक्षिप्यन्तेऽत्र सततं राक्षसैर्यमकिंकरैः ॥१०१॥
वटशाखाबद्धरज्ज्वा पापिनं त्वन्तरालके ।
अधःशिरसं तं बध्वा भर्जयन्ति त्वदन्ति च ॥१०२॥
चुल्ल्यां क्षिपन्ति कांश्चिच्च भर्जितानप्यदन्ति च ।
यमभृत्यास्तथा प्रेता आस्वादयन्ति हर्षिताः ॥१०३॥
चुल्लीकुक्षेः शकुनिकाऽभिधा नदी तु वेगिनी ।
वसामेदोवहा याति तत्र क्षिपन्ति पापिनः ॥१०४॥
तत्राऽथ दृष्टमत्युग्रं यातनासप्तकं ततः ।
एकैकं दुस्तरं घोरं भुंक्ते पापी यथाक्रमात् ॥१०५॥
दश तत्र महाशूलाः कुंभीपाकास्त्रयोदश ।
वह्नितप्तेषु शूलेषु प्रोताः पच्यन्त एव ते ॥१०६॥
शुष्कोदपाने सधूम्रे ह्यधःशीर्षोऽवलम्बते ।
तप्ततैलकटाहे च ज्वाल्यते पच्यते तथा ॥१०७॥
करीषगर्ते निक्षिप्तः पच्यते मेदवह्निना ।
एवं दृष्टा मया जीवाः पच्यमानाः प्रदाहिताः ॥१०८॥
अथो यमनदी दृष्टा तप्ततत्रपुप्रवाहिका ।
तत्र निमज्ज्य जीवा वै पच्यन्ते पापकारिणः ॥१०९॥

अथ शीतजला दृष्टा दीर्घिका शीतकानना ।
यत्र शीतजलं पीत्वा क्षणं विश्रान्तिराप्यते ॥११०॥
भक्ष्यं भोज्यं यमस्वसा यमी ददाति तत्र वै ।
ततः शूलत्रहो नाम पाषाणः शतयोजनः ॥१११॥
पर्वतो हि मया दृष्टो जीमूतस्तत्र वर्षति ।
जीवास्तत्र निमज्जन्ति त्वग्रे गच्छन्ति वै ततः ॥११२॥
ततः शृंगारकवनं दृष्टं सदंशमक्षिकम् ।
दृष्टः पापी च वा स्पृष्टः कृमिरूपो हि जायते ॥११३॥
अथान्या भूमिका दृष्टा यत्र पश्यति बान्धवान् ।
मातरं पितरं पुत्रान् दारांस्तथा प्रियान् जनान् ॥११४॥
तेषामग्रे वध्यमानः क्रन्दते त्रासदं तदा ।
लगुडैर्मुद्गरैर्दण्डैर्जानुभिर्वेणुभिस्तथा ॥११५॥
मुष्टिभिश्च यष्टिभिश्च कशाभिः शृंखलादिभिः ।
अथान्या भूमिका दृष्टा प्रेतस्थावरताप्रदा ॥११६॥
तत्र यातो व्रजेद् प्रेतः स्थावरं भावमेव यत् ।
षष्टिवर्षसहस्राणि पशुभावं तु विन्दति ॥११७॥
स्वेदजो जायते पश्चात् ततः पक्षी प्रजायते ।
गोयोनौ तु ततो गत्वा पुनर्भवति मानवः ॥११८॥
यादृक् संसारचक्रं वै तद्भावे त्वस्ति रेखितम् ।
तथा ता यातना भुक्त्वा विप्रादिषु प्रजायते ॥११९॥
इत्यन्तं वै मया दृष्टं यमदूतैः प्रदर्शितम् ।
भ्रान्ता मत्सहिता दूता ययुस्ते चित्रगुप्तकम् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने याम्यचक्रे नाचिकेतःकृतयमराजस्तुतिः, विविधनरकावलोकनाय यमराजाऽऽज्ञा, दुःखदनिरययातनावलोकनम्, यातनावर्णनम्, नाचिकेतसा सहितानां दूतानां चित्रगुप्तं प्रत्यागमनमित्यादिनिरूपणनामैकोनषष्ट्यधिकत्रिशततमोऽध्यायः ॥३५९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चित्रगुप्तगृहे तु नाचिकेतसा ।
यद् दृष्टं तत् कथयामि नाचिकेता जगाद तान् ॥ १ ॥
शृण्वन्तु ब्राह्मणाः सर्वे चित्रगुप्ताङ्गणे मया ।
यद् दृष्टं च ततश्चापि तत्सर्वं कथयामि वः ॥ २ ॥
चित्रगुप्तेन चाऽऽदिष्टा मन्देहा नाम राक्षसाः ।
अन्ये दूताश्च विशस्ताः कर्मिणां यातनाकृते ॥ ३ ॥
नानारूपधरा घोराः सायुधाः पिशिताशनाः ।
भो भो मन्देहका वीरास्तथा दूताः सविक्रमाः ॥ ४ ॥
जीवान् बध्नन्तु गृह्णन्तु पापकान् यातनाकृते ।
मारयन्तु खादयन्तु मर्दयन्तु यथा कृतम् ॥ ५ ॥
इत्याज्ञप्ता राक्षसास्ते दूताश्च कामरूपिणः ।
सन्नद्धास्त्वरितं भीमा गजाश्वसिंहरूपिणः ॥ ६ ॥
व्याघ्रशृगालमहिषव्यालवृश्चिकरूपिणः ।
गृध्रश्येनफणिऋक्षगर्दभादिस्वरूपिणः ॥ ७ ॥
शूलशक्तिप्रहारास्ते यष्टितोमरपाणयः ।
पट्टिशासिखड्गयुक्ता दूता घोरपराक्रमाः ॥ ८ ॥
भिन्धि छिन्धि च गृह्णीष्व वदन्ति रक्तलोचनाः ।
खादन्ति घ्नन्ति मन्देहाश्चित्रगुप्तप्रपेरिताः ॥ ९ ॥
व्याधीनां तु सहस्राणि दूतानामयुतानि च ।
ज्वराश्च कालमुण्डाश्च कंकराक्षा सहस्रशः ॥१०॥
आरब्धा मर्दनं कर्तुं पापिनां पापकर्मिणाम् ।
धर्मराजेन सन्दिष्टचित्रगुप्तस्य शासनात् ॥११॥
यथान्यायं दण्डयोग्या बद्धा बन्धैस्तु राक्षसैः ।
अग्निना तापिताः केचिद् दशनाभिश्च चर्विताः ॥१२॥
दुराचारान्पापरतान्निर्घृणान्पापचेतसः ।
श्वानः श्वापदपशवो भक्षयन्ति दुरात्मकान् ॥१३॥
चित्रगुप्तः स्थितस्तत्र न्यायं श्रावयति ज्वरान् ।
दूतांश्च राक्षसांस्तद्वै मया प्रत्यक्षतः श्रुतम् ॥१४॥
पितृघ्नं मातृगोघ्नं च समारोप्य तु शाल्मलीम् ।
सुतीक्ष्णैः कण्टकैर्दूता विपाटयन्तु मा चिरम् ॥१५॥
पाचकं पक्षिणामेनं पाचयन्तु नराधमम् ।
पशूनां त्वन्यजन्तूनां तप्ततैलकटाहके ॥१६॥
ताम्रतप्तखले क्षिप्त्वा प्रदीप्ते हव्यवाहने ।
प्राणिनां भर्जकं चैनं भर्जयन्तु यथाकृतम् ॥१७॥
शयनासनहर्तारं वह्निदायिनमेव तु ।
वैतरण्यां प्रक्षिपन्तु वह्नौ पश्चात् क्षिपन्तु च ॥१८॥
तीर्थक्षेत्रधर्मक्षेत्रनाशकं पातयन्तु वै ।
विध्यन्तु तस्य मर्माणि कीलकैर्वह्नितापितैः ॥१९॥
पिशुनस्य कूटसाक्षिप्रदस्याऽस्य तु कर्णयोः ।
जिह्वायां च निन्दकस्य दीयन्तां वह्निकीलकाः ॥२०॥
कापट्ययाजकं धूर्तं शठं दांभिकमत्र हि ।
बद्ध्वा तु बन्धने कीले दीयतां तु न किंचन ॥२१॥
वाचा दुष्टस्याऽनृतस्य वक्तुर्जिह्वाऽस्य छिद्यताम् ।
प्रसह्य काममोहेन व्यवायिनोऽसिधारया ॥२२॥
छित्वा पापस्य लिंगं च क्षारमग्निश्च दीयताम् ।
अनेन कृत्वा षड्यन्त्रं दायादा बहवो जनाः ॥२३॥

विनाशिताः स्वार्थहेतोर्भेदयन्तु शरैर्हि तम् ।
सुवर्णस्तेयिनं त्वेनं कृतघ्नं पितृनाशकम् ॥२४॥
गोघ्नं मुद्गरैः संचूर्ण्य क्षारेऽग्नौ भर्जयन्तु वै ।
इमं कन्याहरं विप्रं खादन्तु कृत्यका द्रुतम् ॥२५॥
पिशुनं ब्राह्मणं व्याघ्राः खादन्तु तीक्ष्णदंष्ट्रकाः ।
इमं पचन्तु पाकेषु बहुधा मर्मभेदिनम् ॥२६॥
देवाग्निपूजया हीनं वीरघ्नं देवनिन्दकम् ।
कर्कटेषु मोचयन्तु देवद्रव्यविनाशकम् ॥२७॥
क्षिपन्त्विमं ह्रदे तप्ते सर्वयाजनयाजकम् ।
अदानकारकं धर्मविक्रयिणं खलं द्विजम् ॥२८॥
तोयभोजनहर्तारं घ्नन्तु दण्डैः सुदारुणैः ।
वेणुदण्डकशाभिश्च लोहदण्डैस्त्रिपीटकैः ॥२९॥
जलभस्मै न दातव्यं भोजनं च कदाचन ।
हतं विश्वास्य हन्तारं पाचयन्तु महानले ॥३०॥
देवद्रव्यं हृतं येन तमेनं पाचयन्त्वपि ।
राज्ञस्तु मारके गुरोर्मारके बालमारके ॥३१॥
योजयन्तु राजयक्ष्मरोगं क्षिपन्तु कन्दरे ।
कूटशाल्मलिवृक्षे स्त्रीघातकं घातयन्तु वै ॥३२॥
मांसादं तु वर्षशतं भक्षयन्तु यमानुगाः ।
ततः पाकेषु घोरेषु पच्यतां स नराधमः ॥३३॥
ततो मानुषतां प्राप्य गर्भस्थो म्रियतां मुहुः ।
दशगर्भमृतो भूत्वा क्लेशभागी प्रजायताम् ॥३४॥
बुभुक्षारुग्विकारैश्च सततं तत्र पीड्यताम् ।
यन्त्रेण पीड्यतां त्वेषो मित्रविश्वासघातकः ॥३५॥
दीप्यतां ज्वलने घोरे ततो वर्षशतद्वयम् ।
ततः श्वयोनिमापन्नो रोगी भवतु सर्वदा ॥३६॥
ततो रोगार्तदेहस्थो मानुषो जायतामयम् ।
रसहर्ता लवणादिहर्ताऽयं जायतां कृमिः ॥३७॥
वर्षाणां तु शतं पञ्च विष्ठाकृमिश्च जायताम् ।
ततः शकुन्तस्तत्पश्चाद् वृको भवतु नीरसे ॥३८॥
इममग्निप्रदं वह्नौ तापयन्तु मुहुर्मुहुः ।
पश्चान्मृगो वर्षशतं कीटो वर्षशतं ततः ॥३९॥
ततोऽतिदुःखयुक्तोऽसौ मानुषो जायतां घृणी ।
परद्रव्यापहारांश्च रौरवे पातयन्त्विमान् ॥४०॥
कुम्भीपाकेषु संपच्य क्षिपन्तु रासभे कुले ।
पश्चाम्मलदवाराहे ततश्चौरकुले नरे ॥४१॥
यत्र दुःखपरीताश्च कृतं वै भुंजते मुहुः ।
परोपघातिनं त्वेनं बद्ध्वाऽधोमस्तकं द्रुमे ॥४२॥
अग्निना पाचयन्त्वेनं क्षिपन्तु लुब्धजन्मसु ।
ततो वर्षशते पूर्णे मुञ्चन्त्वेनं यमानुगाः ॥४३॥
पिशुन वज्रतीरेण प्रविद्ध्य वह्नने ततः ।
क्षिपन्तु सूकरयोनौ ततो नकुलजन्मसु ॥४४॥
इममानृतिकं क्षेत्रहारकं कूटसाक्षिणम् ।
प्रक्षिपन्त्वन्धतामिस्रे ततस्तिर्यक्पशुद्रुमे ॥४५॥
यथाकर्म जनुं लब्ध्वा बधिरोऽन्धश्च मानुषे ।
मूकः काणो व्याधियुक्तो जायतां वै पुनः पुनः ॥४६॥
भूमिहरं क्षेत्रहरं बद्ध्वा वै पाचयन्त्विमम् ।
पश्चात्स जायतां पापो मार्जारः क्षुधयाऽर्दितः ॥४७॥
इमं शाकुनिकं पापं श्वभिर्गृध्रैश्च दारुणैः ।
घातयन्तु ततश्चैनं क्षिपन्तु कुक्कुटे कुले ॥४८॥
दंशयोनौ मशकेषु क्षिपन्तु पापकर्मिणम् ।
इमं सौकरिकं पापं महिषा घातयन्तु वै ॥४९॥
ततः सूकरयोनौ च महिषे कुक्कुटे शशे ।
जम्बूके क्रमशो गत्वा भक्ष्यो भवतु तत्र सः ॥५०॥
ततो व्याधो भवत्वेषः पापात्माऽरण्यवासवान् ।
अथोच्छिष्टान्नदातारं पचन्त्वंगारकैर्मुहुः ॥५१॥
भिन्नचारित्रदुःशीलां भर्तुर्व्यलीककारिणीम् ।
आयसान्पुरुषान्सप्ताऽऽलिंगयन्तु समन्ततः ॥५२॥
शूनी भवतु संकष्टा सूकरो दुःखिता त्वनु ।
पश्चाद्दासीजन्म लब्ध्वा बहुभोग्या भवत्वियम् ॥५३॥
अनेन भृत्या बहवो वञ्चितो दुःखिताः कृताः ।
रौरवे नरके त्वेनं निक्षिपन्तु दुरासदे ॥५४॥
पश्चादयं क्रूरजातौ सर्पादौ जायतां ततः ।
सूकरे च शृगाले च बके मेषे च वाजिनि ॥५५॥
भूत्वा भूत्वा गर्दभादौ श्वजातौ वृषजातिके ।
ततो वै जायतां दासवर्गे दुःखतरे ह्ययम् ॥५६॥
एतत्सर्वं श्रुतं दृष्टं विप्राः प्रत्यक्षमेव ह ।
अन्यान्यपि च पापानि चित्रगुप्तो दिदेश तान् ॥५७॥
धर्मव्रतादिहीनानां पापपक्षानुगामिनाम् ।
यमकारागृहे वर्षसाहस्रं वासमेव च ॥५८॥
कारयन्तु यमदूता हिंसाविहारिणां तथा ।
सूचकानां च कार्यप्रदूषकाणां गुरुद्रुहाम् ॥५९॥
दावाग्निसंप्रदातॄणां पाचनं पावके भटाः ।
कुर्वन्तु च ततो गर्भे प्रेरयन्तु च मानुषे ॥६०॥
अल्पायुषो व्याधिग्रस्ता भविष्यन्ति स्वपापतः ।
गर्भे एव मरिष्यन्ति यद्वा नश्यन्ति बालकाः ॥६१॥

अप्राप्तयौवनाः केचिद् मरिष्यन्ति प्रहिंसकाः ।
काष्ठपाशे शस्त्रपाशे वायौ वह्नौ जलेऽथवा ॥६२॥
पतनेन तथा नाशं ते यास्यन्ति विषेण वा ।
मातापितृवधकष्टं प्राणातिपतनं तथा ॥६३॥
प्राप्स्यन्ते स्वजनाद्दुःखं हिंसका घातकास्तथा ।
लोहकाः कारुका गर्तकारकाः प्राणिहिंसकाः ॥६४॥
मूत्राण्डनाशका ये च गरदाः पुरदाहकाः ।
ये तु पञ्जरकर्तारः शूलाद्यैस्तु प्रघातकाः ॥६५॥
पिशुनाः कलहाश्चापि मिथ्यादूषणकारिणः ।
पशुनाशकरा जीवोद्वेजका ये च घातकाः ॥६६॥
पश्यन्तां नरके घोरे यातनासु पुनः पुनः ।
कर्मक्षये जनुं प्राप्ता हीनांगाः संभवन्तु ते ॥६७॥
दरिद्राः कर्मभिस्तत्र कर्णयोः छेदनं तथा ।
नासाप्रच्छेदनं हस्तपादप्रच्छेदनं तथा ॥६८॥
प्राप्नुवन्तु मानसं शारीरं दुःखं तु सर्वदा ।
गलदुःखाः शिरोदुःखाः कुक्ष्यामया भवन्तु ते ॥६९॥
जडाऽन्धबधिरा मूकाः पंगवः करसर्पिणः ।
एकपक्षहताः काणाः कुनखाश्चामयाविनः ॥७०॥
कुब्जाः खञ्जा विकलाश्च फुल्लपादा घटोदराः ।
गलत्कुष्ठाः श्वित्रकुष्ठा वाताऽण्डाश्चाण्डवर्जिताः ॥७१॥
प्रमेहमधुमेहार्ता योनिशूलाऽक्षिशूलकाः ।
श्वासहृद्गुह्यशूलाश्च प्लीहगुल्मादिरोगिणः ॥७२॥
भवन्तु मानुषे भावे स्वकर्मफलभोगिनः ।
मिथ्याप्रलापिनः क्रूरान् पाचयन्तु यमानुगाः ॥७३॥
कर्कशान्निन्दकान् दूताः ! पिशुनान्कटुकाँस्तथा ।
स्नेहक्षयकरान् रूक्षान्मर्मघ्नान् वाक्प्रदूषकान् ॥७४॥
गालीदान्निष्ठुराँस्त्यक्तलज्जान् शठाँश्च निर्दयान् ।
समत्सरान् सेर्ष्यांश्चण्डान् बन्धयन्तु नराधमान् ॥७५॥
ततस्तिर्यक्कीटपक्षिपशुष्वेतान् क्षिपन्तु वै ।
ततो मनुष्यभावे ते भवन्तु लोकनाशकाः ॥७६॥
परिभूता अविज्ञाना नष्टचित्ता अकीर्तयः ।
अनर्च्याश्चाप्यनर्हाश्च स्वजनैरवमानिताः ॥७७॥
लोकद्वेषकरा द्वेष्या मित्रज्ञातिनिराकृताः ।
मिथ्याकलंकभोक्तारो वज्रशस्त्रविषादिभिः ॥७८॥
नाशं प्राप्ता भवन्त्वेते मिथ्याकलंकदूषणाः ।
अथाऽन्यत्तु श्रुतं तत्र चित्रगुप्तोदितं बहु ॥७९॥
स्तेयहारं प्रहारं च नीतिहारं करोति यः ।
स्तेयकर्माणि कुर्वन्ति प्रसह्य हरणानि च ॥८०॥
करचण्डाशिनो ये च राजच्छायोपजीविनः ।
पीडयन्ति प्रजाः सर्वास्तान्नराऽधमपापिनः ॥८१॥
सुवर्णमणिमुक्तादिकूटक्रयानुकारकान् ।
समये च कृतघ्नाँश्च स्वार्थमात्रपरायणान् ॥८२॥
भूतप्रेताभिचारघ्नान् धातुभेदकराँस्तथा ।
न्यासार्थहारकान्मन्त्रमोहनादिकराँस्तथा ॥८३॥
क्षुद्रोपाधिकरान् दीर्घं पाचयन्तु प्रपापिनः ।
दीननिर्धनकृपणपराश्रितादिकष्टदान् ॥८४॥
निक्षिपन्तु महागर्तेऽन्धकारे वृश्चिकान्विते ।
कर्मक्षये तु ताँस्तत्र योजयन्तु जनौ जने ॥८५॥
यत्र चौरभयं वारिक्षुद्भयं राजतो भयम् ।
आपद्भयं महद्दीतिभयं व्याधिभयं तथा ॥८६॥
धूर्तप्रजाजनो यत्र नगरं शठवासितम् ।
उपसर्गाः क्षणं यत्र न त्यजन्ति कदाचन ॥८७॥
अथ श्रुतं मया चान्यच्छृणुतात्र द्विजाः ! पुनः ।
त एते पापकर्माणो जायन्तां यत्र पीडनम् ॥८८॥
बहुदुःखपरिक्लिष्टां गर्भवासेऽपि पीडिताः ।
एकहस्ता द्विहस्ता वा वृक्णाश्च विकृतोदराः ॥८९॥
रुग्णनाडीकृतदुःखा हीनांगा वायुरोगिणः ।
सदा रोरूयमाणाश्च दारहीना व्यवायिनः ॥९०॥
अपत्यहीना कृपणा भैरवस्वनबालकाः ।
उच्छिष्टभोजकाश्चातिवेदनाभिः सुसंवृताः ॥९१॥
रूपतो गुणतो हीना बलतः शीलतस्तथा ।
भृत्यानामपि भृत्यास्ते तृणीभूता भवन्तु ते ॥९२॥
नित्यं यत्र नृपदण्डो वधो वा कृच्छ्रमेव वा ।
वृष्टिशीतकृतोद्वेगाः सर्वकार्ये क्षयाऽऽगमाः ॥९३॥
अकीर्तिभागिनश्चापि शुभेऽप्यशुभभागिनः ।
सुवृष्ट्यामपि येषां वै क्षेत्रे वृष्टिर्विवर्जयेत् ॥९४॥
अशनिर्वा पतेद् यत्र क्षेत्रं तद्वा विनश्यति ।
न सुखं नापि मरणं क्लेशो येषां तु भालके ॥९५॥
तत्र भवन्तु ते पापाः स्तेनाद्या लोककष्टदाः ।
अथ प्रसह्य दारादिप्रसक्तानां तु यातनाम् ॥९६॥
शृणुताऽत्र भटा यत्र निक्षेप्तव्या हि पापिनः ।
तिर्यङ्मानुषदेहेषु प्रसह्य कामिनस्तु ये ॥९७॥
कामुक्यो वा विहरन्ति धर्मचारित्रदूषिकाः ।
प्रसह्य वा भयं दत्वा ये चरन्ति कुलांगनाः ॥९८॥
वर्णसंकरकर्तारस्तान् क्षिपन्त्वनले मुहुः ।
बहुवर्षसहस्राणि पाचयन्तु ततश्च तान् ॥९९॥

क्षिपन्तु मानुषे भावे यत्र संकीर्णयोनिजाः ।
वेश्यालंघटकूटाश्च नैकमैथुनकुक्षिजाः ॥१००॥
स्त्रीबन्धकाः स्त्रीविनाशाः स्त्रीवेषाः स्त्रीविहारिणः ।
स्त्रीदासाः स्त्रीभोगभोग्याः स्त्रीभावाः स्त्रीप्रकर्मिणः ॥१०१॥
बीभत्सदर्शना यत्र तत्र क्षिपन्तु तान् जनान् ।
नार्योऽपि तत्स्वभावाश्च तद्वद् भवन्तु दुःखगाः ॥१०२॥
इति श्रुतं मया सर्वं नाचिकेता जगाद तान् ।
इतिते कथितं लक्ष्मि ! चित्रगुप्तनिदेशनम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने याम्यचक्रे पापिनां दण्डदानाय चित्रगुप्तकृताज्ञया विविधयातनासु मन्देहादिराक्षसैः कृतनारकिपीडनादिप्रदर्शननामा षष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६० ॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! चित्रगुप्तनिदेशनम् ।
यत्त्वधिकं पुनश्चोक्तं नाचिकेता जगाद तान् ॥ १ ॥
दूता ! गृह्णन्तु तं शीघ्रं यथा कालो न वै क्रमेत् ।
का कृपा क्रियते तत्र गृह्णन्तु भ्रन्तु मा चिरम् ॥ २ ॥
माऽत्र व्रीडा प्रकर्तव्या मा तिष्ठन्तु पराङ्मुखाः ।
किं न गच्छथ वेगेन वा मा स्त दीर्घसूत्रिणः ॥ ३ ॥
शीघ्रं गच्छत तत्रैव समानयत सत्वरम् ।
नाऽशक्तिर्दर्शयितव्या गणनीया न सत्क्रिया ॥ ४ ॥
न विवाहो न वै तापसत्वं नैष्ठिकता तथा ।
न नवस्त्रीरमणं वा पातिव्रत्यं सतीत्वकम् ॥ ५ ॥
साध्वीत्वं बालकत्वं वा दानस्थत्वं रतिस्थितिः ।
राज्यकार्यं सभास्थानं व्योमयानं प्रपूजनम् ॥ ६ ॥
मा गणनीयं किमपि यथा कालोऽनतिक्रमेत् ।
शीघ्रमत्राऽऽनयध्वं वै यथाकर्म प्रशासनम् ॥ ७ ॥
शीघ्रं त्वं भव सर्पश्च भव त्वं व्याघ्र इत्यपि ।
सरीसृपो जलग्राहो भव त्वं कृमिरल्पकः ॥ ८ ॥
भव त्वं व्याधिरूपश्च भवातिसार इत्यपि ।
छर्दिः पुनर्भव त्वं च कर्णरोगो विषूचिका ॥ ९ ॥
ज्वरो भवाऽनिलव्याधिस्त्वं च भव जलोदरः ।
अपस्मारस्त्वमुन्मादो विष्टंभो विभ्रमो भव ॥१०॥
द्रुतं द्रवत वेगेन सर्वे गच्छत मा चिरम् ।
यथान्यायं यथाकर्म यथाकालं च देहिनः ॥११॥
धर्षयन्तु कर्षयन्तु समानयन्तु मा चिरम् ।
आयुष्यान्ते मारयन्तु यथा कालो न सम्पतेत् ॥१२॥
जाग्रतं वा निद्रितं वा मूर्छितं वा सुषुप्तकम् ।
यथावाच्यं प्रकुरुत यथाकालो न गच्छति ॥१३॥
यथाऽऽज्ञापयति रुद्रो यथा संकर्षणः प्रभुः ।
यथा ब्रह्मा धर्मराजश्चित्रगुप्तस्तथा प्रभुः ॥१४॥
इत्याज्ञापयति चित्रगुप्तस्तथा प्रयान्ति च ।
यमदूता आनयन्ति देहिनस्तत्र सन्निधौ ॥१५॥
तेषां कर्माणि चालोक्य दण्डं दिशति तत्र वै ।
यमश्च चित्रगुप्तश्च वदामि यच्छ्रुतं मया ॥१६॥
अयं तु पुण्यवान् दाता यातु स्वर्गं महीक्षिताम् ।
अयं भवतु वृक्षो वै तीर्यगयं प्रजायताम् ॥१७॥
अयं नागो भवत्वेव यात्वयं परमां गतिम् ।
स्वपूर्वजाऽवमन्ताऽयं यातु नरकं दारुणम् ॥१८॥
दारत्यागकरं त्वेनं क्षपयन्तु हि रौरवे ।
मुच्यन्तां त इमे चान्ये मुच्यन्तां पापवर्जिताः ॥१९॥
स्वर्गं प्रयान्तु धर्मिष्ठा उषित्वा बहुकल्पकान् ।
सर्वसमृद्धिमये भूमौ मानुषे यान्तु सज्जनुम् ॥२०॥
ब्राह्मणार्थे गवार्थे वा राष्ट्रार्थे निधनं गतम् ।
शक्रस्य त्वमरावत्यां प्रेषयन्तु च मा चिरम् ॥२१॥
कल्पमेकं तत्र वासो भवत्वस्य सुखावहः ।
बहुदानरतं चैनं सर्वजीवानुकम्पकम् ॥२२॥
गन्धमाल्यैः पूजयन्तु समर्पयन्तु चोपदाः ।
विज्यतां चामरैरेषो यानमस्मै प्रदीयताम् ॥२३॥
वैहायसेन यानेन यात्वयं त्विन्द्रपत्तनम् ।
शंखतूर्याऽभिघोषेण सत्कृतो लभतां सुखम् ॥२४॥
अयं गच्छतु सल्लोकं कीर्तिमतां शुभास्पदम् ।
गुणैः सेवादिभिरिन्द्रायुष्योऽस्तु वै त्रिविष्टपे ॥२५॥
रत्नस्वर्णप्रदाताऽयमश्विनोर्लोकमेतु वै ।
ब्रह्मन्नदानकर्ताऽयं शिवलोकं प्रयातु वै ॥२६॥
मिष्टान्नस्य च दुग्धस्य दोग्ध्या गोर्दानकार्ययम् ।
हेमवस्त्रस्य सन्दाता तिस्रः कोट्यस्त्रिविष्टपे ॥२७॥
तिष्ठतु च्युत एवात्र ऋषिवर्यो भवेत् क्षितौ ।
पितृतर्पयिता चायं सत्यलोकं प्रयातु वै ॥२८॥
सर्वकामप्रदश्चायं सर्वभूतहिते रतः ।
क्षितेर्दाता प्रयात्वेव बहुकालं त्रिविष्टपम् ॥२९॥
एवं पुण्यकृतो यान्तु स्वर्गान्यथेष्टभोगदान् ।
पापकृतो ह्यधो यान्तु निरयान् क्लेशसंचयान् ॥३०॥
एवं श्रुतं मया विप्राः ! श्रुतश्चापि फलोदयः ।
कथयामि च तत्सर्वं शृणुध्वं वै समाहिताः ॥३१॥

अयं ह्यातिथ्यसत्कर्ता सर्वभूतानुकम्पनः ।
समान्नदानकर्ता च शेषभोजनभागयम् ॥३२॥
वैराजस्य पदं यातु सर्वभाग्यसुखान्वितः ।
एनं गास्यन्ति गन्धर्वा गमनेऽप्सरसस्तथा ॥३३॥
दीयतामासनं दिव्यं दीयतां व्योमवाहनम् ।
यान्यान्कामान्कामयते दीयतां मम शासनात् ॥३४॥
स्वर्गकामान्पितृकामान्सत्यकामान्विराजगान् ।
समर्पयन्तु वै त्वस्मै दासदासीपरिच्छदान् ॥३५॥
दत्तान्यनेन दानानि रत्नस्वर्णगवादयः ।
महिषीगजतुरगाः क्षेत्रं ह्योद्यानवाटिकाः ॥३६॥
कन्यादानानि बहूनि ह्यान्नदानान्यपीह यत् ।
प्रेक्ष्यतां स महाभागो भोक्तुं दिवि सहानुगः ॥३७॥
यावत् स्वर्गाद् विमानानि समागच्छन्ति कृत्स्नशः ।
ततः स प्रवरैर्यानैः सानुगः सपरिच्छदः ॥३८॥
देवानां भवनं यातु देवताभिः सुपूजितः ।
तत्रैव रमतां पुण्यो यावत्स्वर्गे हि तिष्ठति ॥३९॥
अथैनं यज्ञकर्तारं नैककन्याप्रदायकम् ।
पूजयन्तु सर्वकामैः पदं यातु स वैष्णवम् ॥४०॥
तत्रैष रमतां पुण्यः सहस्रमयुतं समाः ।
भूतानुकम्पको ह्येषः क्रियतामस्य पूजनम् ॥४१॥
वर्षाणामयुतं दिव्यं तिष्ठतु दिवि देववत् ।
अथाऽनेन प्रदत्तानि छत्रं पात्रं तथाऽम्बरम् ॥४२॥
उपानहौ च भोज्यानि तस्मै पूजां प्रयच्छथ ।
हस्तपद्मचमत्कारो विद्याधरो भवत्वयम् ॥४३॥
महापद्मानि चत्वारि स्वर्गे तिष्ठतु सर्वदा ।
अनेनाऽनाथदीनेषु दत्तं क्षीरं दधि घृतम् ॥४४॥
नीयतां रसवत्स्वर्गे पूजां त्वस्मै प्रयच्छथ ।
गोरसस्य च पूर्णानि भाजनानि प्रयच्छथ ॥४५॥
दत्वा स्वबान्धवेभ्यः स पीत्वा स्वजनबान्धवैः ।
यात्वनसूयके स्वर्गे रमतां वर्षकोटयः ॥४६॥
बहुसुन्दरनारीभिः सेव्यमानोऽमरः सदा ।
गोलोकेषु सदा ह्यायं वसतु भोग्यसंभृतः ॥४७॥
इक्षुसारप्रदाताऽयं दुग्धसाराऽर्पको ह्ययम् ।
अन्नसारप्रदाता च वस्त्रभूषाऽर्पकस्तथा ॥४८॥
गृहक्षेत्रप्रदाता च सर्वोपस्करणाऽर्पकः ।
गोलोकेषु नीयतां च वृषवाहनसंयुतः ॥४९॥
सर्वदेवात्मिका देव्यो यत्र तिष्ठन्ति सेविकाः ।
अमृतं धारयन्त्यश्च सेवन्तेऽहर्निशं शुभाः ॥५०॥
दधि दुग्धं घृतं पुष्टिः पवित्रं तीर्थममृतम् ।
दध्ना तृप्यन्ति देवाद्याः क्षीरेण तु महेश्वरः ॥५१॥
घृतेन पावको नित्यं पायसेन पितामहः ।
सकृद् दत्तेन प्रीयन्ते वर्षाणां तु त्रयोदश ॥५२॥
पञ्चगव्येन पीतेन वाजिमेधफलं लभेत् ।
गव्यं तु परमं मेध्यं गावो मेध्या हि देवताः॥५३॥
दन्तेषु मरुतो देवा जिह्वायां तु सरस्वती ।
खुरमध्ये तु गन्धर्वाः खुराग्रेषु तु पन्नगाः ॥५४॥
सर्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदे च नक्षत्राणि लांगूले धर्म आस्थितः ॥५५॥
अपाने सर्वतीर्थानि लक्ष्मीस्तिष्ठति शकृति ।
प्रस्रावे जाह्नवी देवी स्तनेष्वस्यास्तु सागराः ॥५६॥
ऋषयो रोमकूपेषु विद्याधरास्तु रोमसु ।
त्वचि वैकुण्ठमेवाऽस्ति पार्श्वयोरयनद्वयम् ॥५७॥
क्षमा धृतिश्च शान्तिश्च पुष्टिर्वृद्धिः स्मृतिर्मतिः ।
मेधा लज्जा वपुःकीर्तिर्विद्या शान्तिश्च सन्ततिः ॥५८॥
क्रियोन्नत्यादिका धर्मपत्न्यो गोषु व्यवस्थिताः ।
यत्र गावस्तत्र देवा लक्ष्मीर्धर्मश्च रक्षकाः ॥५९॥
गोदाता लभते सर्वे प्रासादान् भवनानि च ।
स्त्रीर्युवतीर्दासदासीः शयनासनपानकम् ॥६०॥
भोग्यभोगान् पानगृहभक्ष्यभोजनसंचयान् ।
वाजिनो वारणान् यानवाहनानि च वाटिकाः ॥६१॥
ददत गोप्रदातारं चित्रगुप्ताज्ञयाऽनुगाः ।
इमं त्वाम्रप्रदातारं तथोद्यानसमर्पकम् ॥६२॥
ददताऽऽम्रवणं रम्यं दिव्यकन्यां परीं शुभाम् ।
इत्येवं बहुधा तत्राऽऽकर्णितं दृष्टमित्यपि ॥६३॥
गृहाद् गृहान्तरं स्थलात् स्थलान्तरं तु गच्छता ।
कष्टात्कष्टतरं सौम्यात् सुखात्सुखतरं तथा ॥६४॥
कर्महानिः कर्ममहोदयोऽऽप्यालोकितो मया ।
ततोऽहं भगवान् धर्मराजस्य संसदि त्वयम् ॥६५॥
तावत्तत्र समायातो नारदो द्योतितप्रभः ।
यमराजः पूजयित्वा तं न्यषादयदासने ॥६६॥
प्राह पूता वयं सर्वे देशः पूतस्तवाऽऽगमात् ।
यत्कार्यं येन वा कार्यं प्रब्रूहि भगवन्निति ॥६७॥
श्रुत्वा तु नारदः प्राह संशयं छिन्धि मे परम् ।
अमरत्वं कथं यान्ति दानेन नियमेन वा ॥६८॥
व्रतेन तपसा वापि जपेनोपासनेन वा ।
केनाऽतुलां श्रियं यान्ति कीर्तिं स्थानं च शाश्वतम् ॥६९॥

केन गच्छन्ति नरकं पापिष्ठं लोकगर्हणम् ।
सर्वमाख्याहि तत्त्वेन भविष्यति हितं परम् ॥७०॥
यमराजस्तमुवाच शृण्वतां तत्र वर्तिनाम् ।
धर्मेण तु जना यान्ति स्वर्गं पुण्यसमर्जितम् ॥७१॥
अधर्मेण तु निरयान् बन्धाँश्च बहुजातिकान् ।
अग्निचिन्नरकं नैव याति कदापि नारद ! ॥७२॥
पुत्रवान् भूमिदः शूरो वेदशास्त्रविशारदः ।
ज्ञानवान् सत्यवर्मा च पत्नीव्रतः पतिव्रता ॥७३॥
शाठ्यकापट्यहीनाश्च स्वामिभक्तास्तु देहिनः ।
अहिंसका अकृतघ्ना ब्रह्मचर्यादिनिष्ठिताः ॥७४॥
दानिनो द्विजभक्ताश्च पितृभक्ताश्च साधवः ।
सतां दासाः पारदार्यरहिताश्च दयालवः ॥७५॥
सर्वभूतात्मवेत्तारो न यान्ति निरयान् क्वचित् ।
यातनापूर्णकान्दुःखान्पापिष्ठाँस्तमसावृतान् ॥७६॥
ये जना ज्ञानवन्तोऽत्र ये च विद्यां परां गताः ।
उदासीना न गच्छन्ति स्वाम्यर्थे च हता जनाः ॥७७॥
सर्वहिते रताः शुश्रूषका दातार एव ये ।
तिलगोपृथिवीस्वर्णकन्यादानकरास्तथा ॥७८॥
अन्नदा जलदाश्चापि सत्रसंचालकास्तथा ।
याजिनः क्रतिनश्चातुर्मास्यव्रतार्थिनश्च ये ॥७९॥
कार्तिकादिव्रतवन्तो गुर्वाज्ञावर्तनास्तु ये ।
मौनादिगुणवन्तोऽपि नित्यं स्वाध्यायकारकाः ॥८०॥
दान्ताः सौम्याः स्वात्मभावाः पर्वेन्द्रियजयास्तथा ।
निवृत्ताः सर्वकामेभ्यो निराशा निर्जितेन्द्रियाः ॥८१॥
न गच्छन्ति निरयाँस्तेऽमरत्वं प्राप्नुवन्ति च ।
भक्त्याऽमरत्वं संयान्ति कृष्णनारायणस्य वै ॥८२॥
ज्ञानाऽभयप्रदानेन नैष्ठिकनियमेन च ।
ब्रह्मव्रतेन ज्ञानात्मतपसा ओं हरिर्जपात् ॥८३॥
कृष्णनारायणोपास्त्या ह्यमरत्वं तु शाश्वतम् ।
कृष्णनारायणसेवा श्रियं लक्ष्मीं ददाति हि ॥८४॥
सतां सेवा गवां सेवा कीर्तिं स्थानं ददाति हि ।
लोकगर्हितकार्येण याति स्थानं तु गर्हितम् ॥८५॥
तपसा प्राप्यते स्वर्गं तपसा प्राप्यते यशः ।
आयुःप्रकर्षो भोगाश्च तपसैव भवन्ति हि ॥८६॥
ज्ञानं विज्ञानमारोग्यं रूपसौभाग्यसम्पदः ।
धनपत्नीसुतदासाः तपसा सर्वमाप्यते ॥८७॥
एवं मौनेन वाक्सिद्धिः सन्तोषात्सुखमुत्तमम् ।
उपभोगाश्च दानेन ब्रह्मचर्येण जीवितम् ॥८८॥
अहिंसया त्वनुद्वेगो दीक्षया कुलजन्म च ।
फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनो भवेत् ॥८९॥
पयोभक्षा दिवं यान्ति द्रव्यदा यान्ति चाढ्यताम् ।
गुरुशुश्रूषया श्राद्धदानेन शुभसन्ततिम् ॥९०॥
रसदानां गवाद्याश्च भवन्ति तृणशायिनाम् ।
स्वयं त्रिषवणाद् ब्रह्म जलपातेष्टलोकभाग् ॥९१॥
यज्ञकर्ता स्वः प्रयाति सौभाग्येन प्रमोदते ।
अन्नदानेन च प्राप्नोत्यन्नं मेधां स्मृतिं दिवम् ॥९२॥
छत्रदानेन साम्राज्यं गृहदानाद् गृहादिकम् ।
रथयानप्रदानेन यानवाहनवान् भवेत् ॥९३॥
वस्त्रदाता सुशृंगारान् धनपुत्राँश्च संलभेत् ।
पानीयदाता तृप्तिं वै शाश्वतीं लभते दिवि ॥९४॥
अन्नपानादिदानेन कामभोगैः सुतृप्यते ।
पुष्पगन्धफलवृक्षदाता स्त्रीरत्नवद्गृहम् ॥९५॥
शयनान्यनुलेपाँश्च गन्धकज्जलधूपकान् ।
स्रजो ददाति यः शय्यामारामं फलिपादपम् ॥९६॥
सः स्त्रीसमृद्धं गजवाजिपूर्णं गृहं प्रपद्यते ।
धूपदीपप्रदाता च प्राप्नोति वसुसाम्यताम् ॥९७॥
गजगोवृषदानेन स्वर्गं शाश्वतमाप्यते ।
घृतदानेन तेजस्वी सुकुमारो हि जायते ॥९८॥
तैलदानेन वै स्निग्धश्चमत्कारकरो भवेत् ।
मधुमिष्टशर्करादिदाता तृप्तगृहो भवेत् ॥९९॥
दीपदानाद् द्युतिमान् स्यात् पायसेन वपुर्दृढम् ।
कृसरान्नात् स्निग्धसौम्यभावं लभते सुरूपिताम् ॥१००॥
फलैस्तु लभते पुत्रं पुष्पैः सौभाग्यमित्यपि ।
रथैर्दिव्यं विमानन्तु यानं वाहनमित्यपि ॥१०१॥
अभयस्य प्रदानेन प्राणदानेन चाऽप्यथ ।
सर्वकामप्रदानेन सर्वान्कामानवाप्नुयात् ॥१०२॥
इतिते कथितं लक्ष्मि ! फलं यमेन भाषितम् ।
नारदाय तु तत्सर्वं विप्रेभ्यो नाचिकेतसा ॥१०३॥
श्रुत्वा तु नारदो नत्वा यमराजं पुनः पुनः ।
ययौ पूजां गृहीत्वा च सत्यलोके विहायसा ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने याम्यचक्रे चित्रगुप्ताज्ञया पापिनामानयनाय दूतानां प्रवृत्तिः, दत्तदानानां फलोदयाः, नारदाय धर्मराजोक्तः फलोदयः, प्रासिश्चेत्यादिनिरूपणनामैकषष्ट्यधिकत्रिशततमोऽध्यायः ॥३६१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततस्तत्र यज्जातं तद् वदामि ते ।
नाचिकेता द्विजानाह यद् दृष्टं तद् यथार्थतः ॥ १ ॥
शृण्वन्तु ब्राह्मणास्तत्र धर्मराजेन धीमता ।
दृष्टा विमानकैः सूर्यसमैर्यान्तो दिवं प्रति ॥ २ ॥
तापसाः सिद्धिमन्तस्ते पत्नीयुताः सबान्धवाः ।
सानुरागाः पुण्यपुञ्जद्योतमानाननाश्च ते ॥ ३ ॥
ततो द्रागेव सञ्जातो धर्मराजोऽतिदुःखितः ।
विवर्णवदनो रोषात् प्रभातेजोविवर्जितः ॥ ४ ॥
एतादृशं तु तं दृष्ट्वा पृष्टवानहमंजसा ।
अपि त्वं भ्राजमानस्तु कथ वैवर्ण्यमाप्तवान् ॥ ५ ॥
वितप्यसे कथं राजन् ! ह्येतदिच्छामि वेदितुम् ।
यमराजस्तदा प्राह विवर्णशोककारणम् ॥ ६ ॥
यायावरा उञ्छवृत्तिपराः स्वाध्यायकारिणः ।
आतिथ्यसत्क्रियावन्तो योगिनश्च जितेन्द्रियाः ॥ ७ ॥
ब्रह्मचर्यपरा ये तु साधवश्च सतीस्त्रियः ।
ते सर्वे मामनादृत्य गच्छन्त्युपरि मे द्विज ! ॥ ८ ॥
न ते यामुपतिष्ठन्ति न हि ते वशगा मम ।
मस्तके मम गच्छन्ति पत्नीयुक्ताः सहानुगाः ॥ ९ ॥
दिव्यगन्धविलिप्तांगा माल्याभरणभूषिताः ।
वदन्तश्च समुद्दिश्य मां यथा म्लानता भवेत् ॥१०॥
यमेशं न गणयामो गच्छामस्तत्परं स्थलम् ।
मृत्यो ! तिष्ठसि कस्यार्थे को वा मृत्युर्यमश्च कः ॥११॥
अस्मत्कृते निरर्थोऽयं यमो यमेश्वरोऽपि च ।
दोषान्वितान् सदा हंसि पापिष्ठान्धर्मवर्जितान् ॥१२॥
नाऽसि रोद्धुं समर्थोऽपि यास्यामः परमं पदम् ।
इति ब्रुवन्तः संयान्ति वैमानिकाः श्रुतं मया ॥१३॥
निग्रहानुग्रहौ कर्तुं मया शक्यौ न योगिनाम् ।
समर्थोऽपि शृणोम्येवं तेन तप्ये द्विजोत्तम ! ॥१४॥
अशक्तिं स्वां तेषु मत्वा परितप्ये भृशं द्विज ! ।
इत्यकथयन्मां धर्मराजस्तत्र क्षणान्तरे ॥१५॥
काचित्पतिव्रता साध्वी विमानेनाऽऽययौ पुरः ।
महाद्युतिः सानुगा सभर्तृका सपरिच्छदा ॥१६॥
सोत्सवा धर्मराजानमुवाच सुखकृद्धितम् ।
धर्मराज ! महापूज्य ! मा याहि म्लानतां प्रभो ॥१७॥
विप्रास्तपस्विनः शान्ताः सन्तः साध्व्यश्च तापसाः ।
दर्शनीया वन्दनीयाः स्वबलात् पारगामिनः ॥१८॥
एतेषां तपसां धर्म ! माहात्म्यं बलमित्यपि ।
मोक्षप्राप्तिप्रदं चेशलोकप्रदं परात्परम् ॥१९॥
अचिन्त्याः सर्वभूतानां साधवो ब्राह्मणास्तथा ।
ब्राह्मणाः सततं पूज्याः साधवः सर्वदेवताः ॥२०॥
सत्ता तत्र न योक्तव्या मात्सर्यं वर्ज्यमेव च ।
रागो रोषस्तथा मोहो न कर्तव्यः सदा सताम् ॥२१॥
एवमुक्त्वा नमस्कृत्य प्रयाता सा परं दिवम् ।
ततो मया वै संपृष्टं धर्मराजाय काऽभवत् ॥२२॥
धर्मराजो जगादाऽथ कथां मां कृत्स्नशस्ततः ।
पुरा कृतयुगे विप्र ! निमिर्नाम महायशाः ॥२३॥
आसीद् राजा धर्मतेजोवीर्यसत्यव्रतान्वितः ।
तस्य पुत्रो मिथिर्नाम मिथिला येन निर्मिता ॥२४॥
मिथिलाया जनकत्वात् जनकश्चोपनामकः ।
तस्य रूपवती नाम पत्नी प्रियप्रियंकरी ॥२५॥
पतिभक्ता महाप्रीत्या भर्तुर्वचनकारिणी ।
तयोः राज्ये जराव्याधिमृत्यवः प्रभवन्ति न ॥२६॥
ववर्ष सततं देवो रुजार्तो न जनः क्वचित् ।
उवाच राज्ञी राजानं विनयाद्धर्मभृद्वचः ॥२७॥
राजँस्त्वया कृता यज्ञा भोजितास्तेषु भूसुराः ।
दत्तं दानं बहुविधं नाल्पं द्रव्यं विशिष्यते ॥२८॥
भृत्यानां च द्विजातिनां तथा परिजनस्य च ।
यदभूद् द्रविणं किञ्चित्पृथिव्यां यद्गृहे च ते ॥२९॥
विनियुक्तं तु तत्सर्वं दानकार्ये ह्यशेषतः ।
न त्वं राजन् विजानासि कुतो भोजनमर्थयेत् ॥३०॥
नास्ति गृहे न चान्यत्र कपर्दिकापि विद्यते ।
पत्रं पुष्पं फलं कन्दः ऋषिभ्यो दत्तमेव ह ॥३१॥
क्षेत्रं च वाटिका राज्यं सर्वं ब्राह्मणसात्कृतम् ।
न वा गवादिकं किञ्चिन्न च वस्त्राणि कर्हिचित् ॥३२॥
न चैव वार्षिकः कश्चिदायोऽस्ति भोजनस्य तु ।
कथं क्षुदर्यशान्त्यर्थं वर्तनीयं वद प्रभो ! ॥३३॥
इति प्रियावचः श्रुत्वा जनकः प्राह भामिनीम् ।
शृणु ब्रवीमि संशक्यं यदि मे मन्यसे हितम् ॥३४॥
हविष्ये वर्तमानानामिदं वर्षशतं गतम् ।
कुद्दालेन च काष्ठेन क्षेत्रं वै कुर्वहे प्रिये ॥३५॥
ततोऽन्नपानवस्त्रादिप्राप्तिर्धर्मो भविष्यति ।
भक्ष्यं भोज्यं तदन्यच्च लब्ध्वा त्वं सुखमाप्स्यसि ॥३६॥
एवमुक्ता तु सा राज्ञी संहृष्टा नृपमब्रवीत् ।
भृत्यानां तु सहस्राणि दासीनां ते निवेशने ॥३७॥

अश्वानां च गजानां च सौरभीनां च कोटयः।
उष्ट्राणां च महिषाणां खराणां चापि कोटयः ॥३८॥
वृषभाणां च भृत्यानां कोटयः सन्ति ते गृहे।
नियुङ्क्ष्व राजन् सर्वांस्तान् कृषिकार्ये तवेप्सिते ॥३९॥
राजा प्राह मया राज्ञि! दाने दत्तानि तानि वै।
बलीवर्दाः खरा अश्वा गजा उष्ट्राश्च मानवाः ॥४०॥
सर्वे नियुक्ता दानेषु न मे सत्ताऽस्ति तेषु वै।
आयसं त्रापुषं ताम्रं राजतं काञ्चनं च यत् ॥४१॥
द्रविणं सर्वमेवात्र दाने यज्ञे नियोजितम्।
न वै पश्यामि धर्मज्ञे! गृहे स्वर्णं तथाऽऽयसम् ॥४२॥
येन कुर्यामहं देवि! कुद्दालं कृषिकर्मणे।
एवमुक्ताऽतिहृष्टा साऽब्रवीद् रूपवती नृपम् ॥४३॥
गच्छावो नृप! भद्रं स्यादुद्योगः सम्पदांप्रदः।
एवमुक्तो निमिपुत्रो ययौ क्षेत्रं सभार्यकः ॥४४॥
इदं भद्रं मम क्षेत्रं वनवृक्षमयं सदा।
असंस्कृतं तथाऽकृष्टं न दत्तं यन्निरर्थकम् ॥४५॥
अत्राऽऽस्व तं स्वल्पगुल्मान् कण्टकाँश्च छिनद्म्यहम्।
अतिस्वल्पतृणादींश्च त्वमेतान् शोधय प्रिये! ॥४६॥
एवमुक्ता महाराज्ञी पातिव्रत्यपरायणा।
वृक्षच्छायां समाश्रित्य तृणगुल्मान् निकृन्तति ॥४७॥
तावत् तया पतिवाक्यपालिन्या पुण्यवैभवात्।
दृष्टः पार्श्वे महान् गुल्मः सौवर्णः कनकप्रदः ॥४८॥
उवाच मधुरं वाक्यं प्रसन्ना सा नृपांगना।
वृक्षोऽत्र दृश्यते पार्श्वे सौवर्णो गुल्म उत्तमः ॥४९॥
तावद्वृक्षस्तया त्वन्यो दृष्टः फलादिशोभितः।
तावत्तत्र तृतीयो द्रुर्दृष्टो भोजनवस्तुयुक् ॥५०॥
न दृष्टन्तु जलं तत्र सान्निध्ये वनभूतले।
उवाच दृष्टा राजानं प्राप्तं भोज्यं न वै जलम् ॥५१॥
कथमेतच्चोपपन्नं दृष्ट्वा राजाऽप्युवाच ताम्।
पूर्वं दत्तं जलं चान्नं सर्वमग्रे प्रधावति ॥५२॥
कृतं वै प्राप्यते सर्वं नाऽकृतं तु कथंचन।
जलं चापि प्रदत्तं तदवश्यं सम्मिलिष्यति ॥५३॥
इत्युक्त्वा शोधयामास क्षेत्रं सभार्यको नृपः।
वियन्मध्ये तदोग्रश्च सविता तपते द्युति ॥५४॥
प्रवृद्धो दारुणो घर्मो राज्ञी तु तृषिताऽभवत्।
स्निग्धौ ताम्रतलौ पादौ तस्याः सन्तापमागतौ ॥५५॥
प्रवालरक्तौ हस्तौ च शरीरं कोमलं तथा।
व्यथिता सूर्यतापेन भृशमुष्णेन पीडिता ॥५६॥
पतिता मूर्छया भूमौ तृषावेगेन भामिनी।
पतन्त्या तु तया दृष्टः सूर्यो विह्वलया दृशा ॥५७॥
यदृच्छया पतन्त्या तु सूर्यः कोपेन वीक्षितः।
तेन सूर्योऽतितेजस्वी सन्त्रस्तो गगनेऽभवत् ॥५८॥
गतिहीनो दिवं मुक्त्वा पतितो धरणीतले।
निस्तेजस्कः शान्तवर्णः शीतलश्च तदाऽभवत् ॥५९॥
पतिव्रतायाः सान्निध्ये सूर्यतेजो लयं गतम्।
राजा स जनकः प्राह सूर्यं स्वभावशून्यकम् ॥६०॥
किमर्थमिह तेजस्त्वं त्यक्त्वा पृथ्व्यां समागतः।
किं करोमि हि पूजार्थे नमस्करोमि भास्कर! ॥६१॥
एवं ब्रुवन्तं राजानं सूर्यः सविनयोऽब्रवीत्।
पतिव्रता ते गृहिणी ममैषा रुषिता मनाक् ॥६२॥
तस्या रोषप्रभावेण पतितोऽहं विमूर्छितः।
अनया सदृशी नारी त्रैलोक्ये नैव विद्यते ॥६३॥
अहोऽस्याः परमा सेवा अहोऽस्याः परमं तपः।
अहो धैर्यमहो शक्तिस्तवेवाऽस्याः शुभा गुणाः ॥६४॥
अनुरूपा विशुद्धा च तव चित्तानुसारिणी।
पातिव्रत्येन तपसा साध्वी तव हिते रता ॥६५॥
कल्पवृक्षसमा चेयं सदृशी ते सुरार्चने।
पात्रे पात्रवता प्राप्तं सुकृतस्य महत्फलम् ॥६६॥
अनुरूपो विरूपो वा त्वया कामस्तु यः कृतः।
वितथो वा भवेदस्याः पातिव्रत्यप्रभावतः ॥६७॥
कुरुष्व स्वेप्सितं क्षेत्रं यथा मनसि धारितम्।
अहं ददामि वै वारि दैवममृतसदृशम् ॥६८॥
भोजनं संददाम्येतदुपानहौ सुदिव्यकौ।
छत्रं शय्यां तथा दिव्यां कामधेनुं मणिं शुभम् ॥६९॥
पात्रं त्वक्षय्यमेवापि नित्यं भोज्यादिपूरकम्।
एवमुक्त्वा स्वयं सूर्यः ससर्ज जलभाजनम् ॥७०॥
उपानहौ मणिं छत्रं शय्यां स्थालीं च गां तथा।
ददौ तस्मै मैथिलाय सविता स्नेहसंप्लुतः ॥७१॥
उवाच स पुनर्भूपं देहि राज्ञ्यै सुखां कुरु।
क्षेत्रं यशस्यं फलदं भविष्यत्यपि कामदम् ॥७२॥
राज्ञा साऽऽप्यायिता देवी तोयेन तु तदा हि सा।
लब्धसंज्ञा लुप्तभया राजानमिदमब्रवीत् ॥७३॥
केन दत्तं शीततोयं दिव्यं छत्रमुपानहौ।
शय्या धेनुर्मणिः पात्रं भोज्यं चेति वदात्र मे ॥७४॥
राजा प्राह स्वयं सूर्यो देवि! तवाऽनुकम्पया।
एतत्सर्वप्रदानाय मुक्त्वाऽऽकाशमिहाऽऽगतः ॥७५॥

इत्युक्त्वा पूजितः सूर्यो द्वाभ्यां सूर्येण सत्कृतौ ।
अर्थयामासतुः सूर्ये किं कुर्वो भगवँस्तव ॥७६॥
एवमुक्तो विवस्वान् स जगाद स्वाऽवनाऽर्थकम् ।
अभयं मे सदात्वस्तु पतिव्रताभ्य एव ह ॥७७॥
पतिव्रताभ्यः संक्लेशः स्त्रीभ्यो मे मा भवेत् क्वचित् ।
सूर्यस्य वचनं श्रुत्वा राज्ञी प्राह तथास्त्विति ॥७८॥
अभयं ते सर्वनेत्र! यथा त्वं वृतवानसि ।
इत्युक्तः स ययौ स्वस्य मण्डल दिवि भास्करः ॥७९॥
सैषा पतिव्रता रूपवती जनकभामिनी ।
पातिव्रत्यप्रभावेण सर्वभासवती वने ॥८०॥
मयाऽपि पूज्यते स्वामिव्रता सूर्यस्य सूनुना ।
न तस्या नियमो विप्र! स्वतन्त्रं नहि वै तपः ॥८१॥
उपवासो न दानं वा न देवो वा पतिमृते ।
प्रसुप्ते या प्रस्वपिति जागर्ति विबुधे सति ॥८२॥
भुंक्ते तु भोजिते पत्यौ सा मृत्युं जयति ध्रुवम् ।
मौने मौना स्थिते स्थितिमती मृत्युं जयत्यपि ॥८३॥
एकदृष्टिरेकमना भर्तुर्वचनकारिणी ।
तस्या बिभीमहे सर्वे देवा दैत्याश्च दानवाः ॥८४॥
देवानामपि पूज्या सा साध्वी सन्तोषसद्व्रता ।
भर्त्रा चाभिहिता या न तत्प्रत्याख्यायिनी भवेत् ॥८५॥
सेवायां वर्तमाना सा प्रत्याख्याता प्रियेण तु ।
न दैवतं संप्रयाति पत्युरन्यं कदाचन ॥८६॥
सा न मृत्युमुखं याति त्वेवं या स्त्री पतिव्रता ।
एवं या तु भवेन्नित्यं भर्तुः प्रियहिते रता ॥८७॥
सा तु नित्यं स्वभर्तारं छायेव त्वनुगच्छति ।
सा तु मृत्युमुखद्वारं न वै गच्छेत् कदाचन ॥८८॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
पतिं शुश्रूषते चैवं सा मां विजयते सदा ॥८९॥
भर्तारमनुध्यायन्ती भर्तारमनुगच्छती ।
भर्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥९०॥
गीतवादित्रनृत्यानि नैकप्रदर्शनान्यपि ।
न शृणोति न पश्येद् या मृत्युद्वारं न पश्यति ॥९१॥
स्नान्ती वा तिष्ठती वापि कुर्वन्ती वा प्रसाधनम् ।
प्रत्याहूता चोपतिष्ठेन्मृत्युद्वारं न पश्यति ॥९२॥
देवता अर्चयन्तं वा भुज्यमानं पतिं तु या ।
चित्तान्न त्यजते क्वापि मृत्युद्वारं न पश्यति ॥९३॥
नान्यं या मनसा पश्येन्मृत्युद्वारं न पश्यति ।
भानौ त्वनुदिते नित्यं गृहं मार्जयते तु या ॥९४॥
भर्तुर्मुखं प्रपश्येद् या भर्तुश्चित्तानुकारिणी ।
वर्तते तु हिते भर्तुर्मृत्युद्वारं न पश्यति ॥९५॥
चक्षुर्देहश्च भावश्च यस्या नित्यं सुसंवृतम् ।
शौचाचारसमायुक्ता सा तु मृत्युं न पश्यति ॥९६॥
एताः कीर्तिमतां लोके दृश्यन्ते दिवि देवताः ।
मानुषाणामपि भार्या दृश्यन्ते दिवि देवताः ॥९७॥
आदित्येन मम पित्रा पूजितास्ताः पतिव्रताः ।
मया तस्मात्तु पूज्यन्ते सर्वदैव पतिव्रताः ॥९८॥
एवं पतिव्रता नित्यं मार्गेणाऽनेन यान्ति वै ।
बहूनुद्धार्य सततं पूज्यन्ते ता मया सदा ॥९९॥
रुद्ध्यन्ते न मया तास्तु नाऽहं शक्तोऽस्मि रोधने ।
जनकस्य तु सा भार्या क्षणार्धे जलकाम्यया ॥१००॥
अत्राऽऽगताऽभवत्तावत्सूर्यस्तस्यै जलं ददौ ।
गृहीत्वा सत्कृतां पूजां ययौ द्राक् स्वामिनं स्वकम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने याम्यचक्रे पतिव्रतामाहात्म्ये मिथिनामजनकपत्न्या रूपवत्याः पातिव्रत्यप्रभावेण वनेऽपि सूर्यद्वारा फलान्नजलस्वर्णादिसर्वस्मृद्धिप्राप्तिः पतिव्रताधर्मकथनं चेत्यादिनिरूपणनामा द्वाषष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६२ ॥

श्रीनारायण उवाच—

नाचिकेता पातिव्रत्यधर्मं श्रुत्वा यमाननात् ।
यमं पप्रच्छ कुशलं सर्वलोकहितावहम् ॥ १ ॥
शृणु वच्मि यथा पृष्टं लक्ष्मि! वै नाचिकेतसा ।
धर्मराज! महाबाहो! कथयस्व महातपाः ॥ २ ॥
कांक्षन्ते सर्वजनताः सुखं तपोव्रतादिभिः ।
एवं कृच्छ्राश्रितानां धीः कथं पापे प्रजायते? ॥ ३ ॥
नानाव्रतशतोपायाः श्रेयोधर्मा हि मानवाः ।
कस्यैतच्चेष्टितं पापं कर्ता कारयिता तु कः ॥ ४ ॥
कथं द्वेषे मतिर्वृद्धा कथं रागे प्रजायते ।
कः कर्षति जगत्त्वेको भूतग्रामं चतुर्विधम् ॥ ५ ॥
श्रुत्वा प्राह यमो देवो ब्रह्मर्षे! श्रूयतां तु तत् ।
मानवा ब्रह्मणा सृष्टाः श्रेयोर्थं त्वेव केवलम् ॥ ६ ॥
अन्ययोनिगता दुःखाः सुखिनः खलु मानवे ।
धर्मज्ञानपरा भूत्वा भक्त्या श्रेयःपरायणाः ॥ ७ ॥
तपसा व्रतदानैश्च स्वर्गं मोक्षं प्रयान्त्विति ।
ऐन्द्रियिकं सुखं तत्र रागिणां सुखलब्धये ॥ ८ ॥

प्रदत्तं धनदारादि स्पर्शादि सार्वकालिकम् ।
सन्तुष्टाश्च सदा तृप्ता आत्मस्मरणकारकाः ॥ ९ ॥
नाकृष्यन्तेऽति तद्वेगे निर्वर्तन्ते यतः सुखाः ।
उपभोगेन तृष्णा स्याद् बलं तस्याः प्रजायते ॥१०॥
न्यायमार्गं परित्यज्य तया पापे प्रवर्तते ।
तृष्णया स्वार्थबुद्ध्या च कामक्रोधादिमिश्रया ॥११॥
मृगतृष्णारूपया च स्वाप्नार्थेहादितुल्यया ।
प्रायो निष्फलया बन्धफलयाऽऽत्रियतेऽवशः ॥१२॥
नान्यस्य चेष्टितं पापं सतृष्णस्यैव चेष्टितम् ।
कर्ता कारयिता नान्यः स्वतृष्णामन्तरा भवेत् ॥१३॥
इष्टाऽलाभे भवेद् द्वेष्टा लाभे रागी प्रजायते ।
तृष्णया तत्र संकृष्टोऽविवेक्यग्रे प्रवर्तते ॥१४॥
करोति कार्यं चाकार्यं तत् संञ्चितं प्रजायते ।
आत्मानं पातयत्यात्मा भुंक्ते कर्म कृतं स्वयम् ॥१५॥
आगतं भजते पूर्वं सुकृतं वाऽथ दुष्कृतम् ।
आत्मा शत्रुश्च बन्धुश्च स्वस्य भवति भूसुर ! ॥१६॥
स्वस्य भोग्यं परिक्लेशं निर्मितं पूर्वकर्मभिः ।
जगत्यामुपभुंक्ते वै जीवो योनिशतं गतः ॥१७॥
अन्तरात्मा हृदयस्थो जगत्सर्वं प्रपश्यति ।
संकल्पेन तथा शक्त्या जीवकर्मानुसारतः ॥१८॥
प्रकाशते यथाकालं शुभं वाऽप्यथवाऽशुभम् ।
ज्ञानं क्रियां हि जीवानां ताभ्यां कुर्वन्ति कर्म च ॥१९॥
ज्ञानक्रिये तु जीवस्थे जीवायत्ते हि पक्षिणी ।
पक्षाभ्यां विषये देशे धावत्यग्रे हि तृष्णया ॥२०॥
साधुकारी भवत्येव साधुः स्वर्गादिपुण्यभाक् ।
असाधुकारी भवत्यसाधुर्निरयपापभाक् ॥२१॥
मायया वर्ष्मणोपादानत्वं तु ब्रह्मणो भवेत् ।
कालेन तु महाशक्त्या सहकारित्वमुच्यते ॥२२॥
संकल्पेन हरेस्तत्र निमित्तमात्रताऽस्ति वै ।
यथा सृष्टौ भगवतस्तथा जीवस्य कर्मणि ॥२३॥
पुत्रोत्पादे ह्युपादानत्वं जीवस्य शरीरिणः ।
ऋतुकालं समागृह्य सहकारित्वमित्यपि ॥२४॥
कामनायुक्तजीवस्य निमित्तमात्रतापि च ।
एवं सर्वत्र जीवानां हेतुता फलभागिता ॥२५॥
तस्माच्छास्त्रादिभिर्ज्ञात्वा श्रेयः कर्म समाचरेत् ।
अश्रेयः सर्वथा ज्ञानयत्नाभ्यां वै परित्यजेत् ॥२६॥
यथा यथा क्षयं याति ह्यशुभं तु जनस्य वै ।
तथा तथा शुभा बुद्धिर्वर्धते च प्रवर्तते ॥२७॥
क्लेशक्षयं पापहरं शुभं कर्म करोति च ।
अर्जिते विमले पुण्ये ह्यमरेषु महीयते ॥२८॥
फलप्रकाशनप्राप्तिश्चान्तर्यामिकृताऽस्ति वै ।
स्वर्गः शुभफलप्राप्तिर्निरयः पापसंभवः २९॥
नाचिकेतः शृणु तत्र स्वकृते शुभवर्त्मनि ।
मनसा कर्मणा वाचा तपसा चरितेन वा ॥३०॥
शुभमेवाऽवलम्बेन पापेभ्यः स प्रमुच्यते ।
यः समः सर्वभूतेषु जितात्मा शान्तमानसः ॥३१॥
परोपकारकर्ता च परदुःखान्निवर्तते ।
परेषां सुखदो नित्यं स पापेभ्यो विमुच्यते ॥३२॥
तत्त्वार्थं वेत्ति यः सम्यग् जडं चेतनं तद्गुणान् ।
मोहशून्योऽनपेक्षश्च पदं प्राप्नोति शाश्वतम् ॥३३॥
गुणाऽगुणपरिज्ञाता क्षयाऽक्षयविवेकवान् ।
आत्मध्यानपरो ज्ञाता स पापेभ्यः प्रमुच्यते ॥३४॥
स्वदेहे परदेहे च स्वार्थपरार्थसदृशः ।
अहिंसाव्रतवान् विज्ञः स मुच्येतैनसा ध्रुवम् ॥३५॥
अनुद्वेगकरो यस्तु तृष्णाक्रोधादिवर्जितः ।
न्यायमार्गानुसारी यः स पापेभ्यः प्रमुच्यते ॥३६॥
प्राणायामपरो नित्यं धारणाध्यानवाँश्च यः ।
विनिर्वृत्तमना यश्च स पापेभ्यः प्रमुच्यते ॥३७॥
यस्य कुत्रापि नाऽऽशाऽस्ति लोलुपो नेष्टवस्तुषु ।
नित्यतृप्तस्त्यजेद् देहं स याति परमं पदम् ॥३८॥
श्रद्धावान् सुरपूजादौ पितृसेवापरायणः ।
परद्रव्याऽनभिलाषी स पापेभ्यः प्रमुच्यते ॥३९॥
गुरुशुश्रूषणपरोऽनसूयोऽमत्सरोऽघृणी ।
उदारचरितोऽक्षुद्रशीलो मुच्येत बन्धनात् ॥४०॥
प्रशस्तानां तु यः कर्ताऽनृशंसपरिहारवान् ।
मंगलोत्सवकर्ता यः स पापेभ्यः प्रमुच्यते ॥४१॥
तीर्थं गच्छति यो नित्यं शुद्धं ब्रह्म स्मरन् सदा ।
अपापां वर्तयन् वृत्तिं स पापेभ्यः प्रमुच्यते ॥४२॥
उत्थाय पितरं देवं मातरं च गुरुं द्विजम् ।
सन्तं साध्वीं नमस्कुर्यात् स पापेभ्यः प्रमुच्यते ॥४३॥
दाता नाऽऽप्नोति दुःखं वै प्रहर्ता सुखवान्न वै ।
भक्तो नाप्नोति संसारं विषयी मोक्षवान्न वै ॥४४॥
एतच्छ्रेयो हितं चैव सर्वेषां समुदाहृतम् ।
अथापि वक्ष्ये पापानां नाशाय साधनं द्रुतम् ॥४५॥
सरलं क्षणसाध्यं च नाऽऽयासो यत्र विद्यते ।
संसारतारका ये च गुरवः साधवो जनाः ॥४६॥

हरेर्भक्ताश्च देवाश्च मुनयश्च महर्षयः ।
सत्यः साध्व्यो ब्रह्मचर्यशीला भागवताश्च ये ॥४७॥
तेषां तु पादयोर्धार्यं शिरोऽर्प्यं हृदये मनः ।
तदाज्ञायां वर्तनीयं भाव्यं सेवापरेण च ॥४८॥
सन्तो यथा यथा येन केनापि कर्मणा मुहुः ।
प्रसन्नाः स्युस्तथा वृत्यं स पापेभ्यः प्रमुच्यते ॥४९॥
सोमं सूर्यं च गायत्रीजपेन स्मर्तुरेव च ।
दर्शनं ब्रह्मभावेन कर्तुः पापं प्रणश्यति ॥५०॥
गुरुं प्रदक्षिणं कुर्याद् ध्यायेत् तं सम्प्रपूजयेत् ।
गुरुं हरिं प्रसेवेत स पापेभ्यः प्रमुच्यते ॥५१॥
प्राणायामशतं कृत्वा सर्वपापैः प्रमुच्यते ।
सूर्यं चन्द्रं चक्षुषोर्वै ध्यायेदथ हृदि स्थितम् ॥५२॥
सम्पूर्णौ विमलौ सम्यग् भ्राजमानौ प्रपश्यति ।
तस्य स्वल्पं च वा वार्धिसमं पापं प्रणश्यति ॥५३॥
वामनं ब्राह्मणं दृष्ट्वा वाराहं च जलोत्थितम् ।
सिंहं च सिंहिकारूढं नमस्यतोऽघनाशनम् ॥५४॥
गावः पवित्रा मांगल्या देवानामपि देवताः ।
यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥५५॥
सौम्ये मुहूर्ते संयुक्ते पञ्चगव्यं तु यः पिबेत् ।
यावज्जीवकृतात्पापात् तत्क्षणादेव मुच्यते ॥५६॥
लाङ्गूलेनोद्धृतं तोयं मूर्ध्ना गृह्णाति यो जनः ।
सर्वतीर्थफलं प्राप्य स पापेभ्यः प्रमुच्यते ॥५७॥
गोमूत्रेण तु यः स्नायाद् रोहिण्या मूत्रधारया ।
सर्वपापकृता दोषा दह्यन्ते द्राङ् न संशयः ॥५८॥
धेनुस्तनाद् विनिष्क्रान्तां धारां दुग्धस्य मस्तके ।
धारयेद् यः पिबेच्चापि स पापेभ्यः प्रमुच्यते ॥५९॥
गां सूर्यं ब्राह्मणं सन्तं सतीं प्रातर्नमश्चरेत् ।
ददेद् दध्यक्षतवारि स पापेभ्यः प्रमुच्यते ॥६०॥
ददेद् दध्यक्षतवारि सोमाय पूर्णिमातिथौ ।
अरुन्धतीं ग्रहान्नत्वा सर्वपापैः प्रमुच्यते ॥६१॥
द्विजं शुश्रूषते शूद्रस्तस्य पापं प्रणश्यति ।
विषुवेषु च योगेषु संक्रान्त्यादिषु सर्वदा ॥६२॥
व्रताहेषु च सर्वेषु समुत्सवगृहेषु च ।
शूद्रः पयो दधि दत्वा सर्वपापैः प्रमुच्यते ॥६३॥
प्राचीनाग्रान् कुशान् कृत्वा स्थापयित्वा वृषं तथा ।
द्विजैः सह नमस्कृत्य सर्वपापैः प्रमुच्यते ॥६४॥
दक्षिणे तु तटे नद्यां स्नात्वा प्रागभिवाहिनीम् ।
आचामेत् संनमस्येत् स मुच्यते सर्वपातकैः ॥६५॥
दक्षिणावर्तशंखेन गृहीत्वा वारि मस्तके ।
जन्मकृतानि पापानि शमयत्येव मानवः ॥६६॥
प्राक्स्रोतसं जलं गत्वा नाभिमात्रजले: स्थितः ।
स्नात्वा कृष्णतिलैर्मिश्रा दद्यात् सप्ताञ्जलीन्नरः ॥६७॥
प्राणायामत्रयं कृत्वा कृष्णनारायणं स्मरेत् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥६८॥
अच्छिद्रपद्मपत्रेण सर्वरत्नोदकेन च ।
त्रिवारं यो नरः स्नायात् सर्वपापैः प्रमुच्यते ॥६९॥
एकादशीनां व्रतकृद् द्वादशीनां प्रपालकः ।
नारायणप्रभक्तो यस्तस्याऽघं स्पृशते नहि ॥७०॥
ब्रह्मस्वहरणे रक्तास्तथा ब्राह्मणघातकाः ।
गुरुद्रोहरता देवमित्रद्रोहरतास्तथा ॥७१॥
स्वामिद्रोहरता ये च परदाराभिमर्षकाः ।
परद्रव्यहरा ये चाऽभक्ष्यभक्षणकारिणः ॥७२॥
दांभिका भिन्नमर्यादा वेदब्राह्मणनिन्दकाः ।
असत्प्रतिग्रहे सक्ता ह्यगम्यागमने रताः ॥७३॥
हिंसकाः पाशकाश्चापि मारका हारकाश्च ये ।
धूर्ताः शठाः कापटाश्च तथा सुकृतवर्जिताः ॥७४॥
एकादशीं द्वादशीं च श्रद्धया पालयन्ति चेत् ।
तामुपोष्याऽघशून्याश्च भूत्वा यान्ति परं पदम् ॥७५॥
उपायोऽतः परो नान्यो विद्यते पापनाशकः ।
शुक्ला भक्तिप्रदा बोध्या कृष्णा मुक्तिं प्रयच्छति ॥७६॥
मनसा वचसा चैव कर्मणा समुपार्जितम् ।
पापं मासकृतं पुंसां दहत्येकादशी कृता ॥७७॥
न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ।
एकादशीं तु यः पूर्णामसमर्थ उपोषितुम् ॥७८॥
तेन नक्तं प्रकर्तव्यं तथाऽयाचितमित्यथ ।
एकभक्तेन दानेन कर्तव्यं द्वादशीव्रतम् ॥७९॥
उपवासासमर्थैस्तु द्वादशी च प्रबोधिनी ।
एकोपोष्या तु सा सर्वं पापं दहति जन्मकृत् ॥८०॥
तस्यामाराध्य श्रीकृष्णनारायणं परमेश्वरम् ।
प्राप्नोति सकलं चैतद् द्वादशद्वादशीफलम् ॥८१॥
पूर्वाभाद्रपदायुक्तद्वादश्यां कृतमक्षयम् ।
उत्तराभाद्रयुक्तायां ततः कोटिगुणं फलम् ॥८२॥
प्रबोधन्यां कृतं सर्वमनन्तफलदं भवेत् ।
शयने बोधने चैव हरेस्तु परिवर्तने ॥८३॥
उपोष्यैव विधानेन व्रती निर्मलतां व्रजेत् ।
एकादशी सोमयुता कार्तिके धवले दले ॥८४॥

उत्तराभाद्रसंयुक्ता त्वनन्तफलदा मता ।
एकादशी भौमयुक्ता द्वादशद्वादशीफला ॥८५॥
तस्मात् सर्वप्रयत्नेन द्वादशीं समुपोषयेत् ।
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम् ॥८६॥
जन्मान्तरसहस्रेषु समाराध्य परेश्वरम् ।
वैष्णवत्वं लभेद्विप्र ! सर्वपापक्षये सति ॥८७॥
वैष्णवा हि महाभागाः पुनन्ति सकलं जगत् ।
मामाराध्य तथा याति तद्विष्णोः परमं पदम् ॥८८॥
संस्मृतः कीर्तितो वापि दृष्टः स्पृष्टोऽपि वा द्विज ! ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि हरीच्छया ॥८९॥
ये वैष्णवा महात्मानो विष्णुपूजनतत्पराः ।
तरन्ति तारयन्त्यन्यान् स्त्रीशूद्रान् पापिनो जनान् ॥९०॥
नाचिकेतः ! शृणु गोप्यं रहस्यं पावनं परम् ।
महापापातिपापानां द्रागेव नाशकं महत् ॥९१॥
अत्यशुद्धजनानां च भ्रष्टानां कर्मिणां तथा ।
चाण्डालानां हिंसकानां मद्यचौर्यकृतां तथा ॥९२॥
व्यवायिनां वर्णप्रसांकर्यकृतां विशोधनम् ।
पापानां वज्रलेपानां क्षालनं प्रवदामि ते ॥९३॥
वैष्णवानां हि साधूनां पादप्रक्षालितं जलम् ।
स्नातं चापि जलं तैस्तु पीतं चापि जलं तु यत् ॥९४॥
स्पृष्टं चापि जलं यद्वै तत्पातव्यं हि पापिना ।
पीते तद् बिन्दुमात्रे वै पापानि प्रज्वलन्ति हि ॥९५॥
पाने स्नाने प्रोक्षणे च शिरःक्षेपेऽङ्गलेपने ।
नेत्रस्पर्शे च तद्वारि निघ्नन्त्यघानि जन्मनाम् ॥९६॥
यानि कानि च पापानि पापजातीयकान्यपि ।
दहन्ति जलपानेन सतां प्रासादिकेन वै ॥९७॥
सतां दृष्ट्या स्त्रियः शूद्राः शुद्ध्यन्ति श्वपचा अपि ।
सतां स्पर्शेन पापाश्च भवन्ति पावनाः क्षणात् ॥९८॥
सतां सेवापरो देहो दिव्यो भवत्यभौतिकः ।
सतां सेवापरा लक्ष्मीर्दिव्या भवति मोक्षदा ॥९९॥
सतां चरणरजसा स्नातास्ते मुक्तिभागिनः ।
सतां स्नेहस्य पात्रं यत् तत्पात्रं श्रीहरेः स्मृतम् ॥१००॥
नाचिकेतः ! सतां योगो हरेर्योगो न संशयः ।
मे दूतास्तत्र न यत्र विष्णोर्दूता हि साधवः ॥१०१॥
यमदूतैर्धर्षिता ये नार्यो नरा नपुंसकाः ।
आश्लिष्यन्ति तदा साधून् मुच्यन्ते ते द्रुतं यमात् ॥१०२॥
सर्वैन्द्रियैः सतां योगो मुक्तिदो ब्रह्मभावदः ।
साधुसंयोजनं दिव्यं नाऽस्माच्छ्रेष्ठं तथेतरत् ॥१०३॥
हरेर्योगात्साधवो वै निर्गुणा ब्रह्ममूर्तयः ।
साधुयोगात्पापिजीवा भवन्ति ब्रह्ममूर्तयः ॥१०४॥
सद्भिर्मुक्तं वस्तुमात्रं दिव्यं भवति निर्गुणम् ।
गुप्तं प्रकाशं तत्सर्वं ब्रह्मभूयाय कल्पते ॥१०५॥
इति ते कथितं विप्र ! समुद्धारस्य साधनम् ।
गच्छात्मज्ञानसहितश्चान्यद् दत्तमवाप्य च ॥१०६॥
इत्युक्त्वा यमराजः स समुत्थायाऽऽसनात् स्वकात् ।
कृत्वा पूजां च मे युक्तां प्रियमुक्त्वा च भूसुराः ! ॥१०७॥
विसर्जयामास विभुः सुप्रीतेनाऽऽन्तरात्मना ।
एतद्वः कथितं विप्रास्तस्य राज्ञः पुरोत्तमे ॥१०८॥
यथादृष्टं श्रुतं चापि यथा चेहाऽऽमतोऽस्म्यहम् ।
इति लक्ष्मि ! नाचिकेतोवचः श्रुत्वा तु भूसुराः ॥१०९॥
सर्वमूर्धन्यमूर्धन्यं सतां प्रासादिकं जलम् ।
ज्ञात्वा हर्षं समापन्नाः साधवो दीनवत्सलाः ॥११०॥
केचिद् वैखानसास्तत्र केचिदासन्निरासनाः ।
यायावरास्तथा चान्ये वानप्रस्थास्तथाऽपरे ॥१११॥
शालीनाश्च तथा केचित् कापोतीं वृत्तिमास्थिताः ।
शिलोञ्छाश्चाभवन्नन्ये पाकिनोऽपाकपाचिनः ॥११२॥
नानायज्ञकराः केचिज्जितात्मानस्तु केचन ।
स्थानमौनधरास्त्वन्ये जलवासास्तथाऽपरे ॥११३॥
तथोर्ध्वशायिकावृक्षे तथान्ये मृगचारिणः ।
पंचाग्नयस्तथा चान्ये केचित् पर्णफलाशिनः ॥११४॥
अब्भक्षा वायुभक्षाश्च तथाऽन्ये शाकभक्षिणः ।
तापसा विविधास्त्वेते शाश्वतीं धियमाश्रिताः ॥११५॥
श्रुत्वा चैव कथामेतामृषयो दिव्यवर्चसः ।
विस्मिता जलमाहात्म्यं श्रुत्वा साधुसमाश्रयम् ॥११६॥
ययुर्बद्रयाश्रमं साधोर्नरनारायणस्य वै ।
चरणयोर्जलं पातुमिच्छन्तो भक्तितत्पराः ॥११७॥
नचिकेतोऽपि धर्मात्मा पुत्रं दृष्ट्वा यमाऽर्चितम् ।
तपोधनं पुनःप्राप्तं धर्ममेवाऽन्वचिन्तयत् ॥११८॥
नाचिकेता अपि शिष्यान् आत्मज्ञानमशिक्षयत् ।
साधुधर्मं पावनं च पालयामास निर्भरम् ॥११९॥
इतिते कथितं लक्ष्मि ! याम्यचक्रं महाबलम् ।
तदुद्धारकरं वारि सतां प्रासादिकं महत् ॥१२०॥
यमुनायाश्च गंगाया गोमत्याश्चापि सर्वथा ।
गोदावर्याः सरय्वाश्च रेवायाश्चापि सर्वथा ॥१२१॥
गण्डक्याः स्वर्णरेखायास्तपत्याश्चापि सर्वथा ।
कावेर्यास्ताम्रपर्णायाः समुद्राणां च सर्वथा ॥१२२॥

तीर्थानां यानि वारीणि तेभ्यः सर्वेभ्य एव यत् ।
दिव्यं श्रेष्ठं पावनं च साधुपादजलं सदा ॥१२३॥
सर्वकामप्रदं मोक्षप्रदं लक्ष्मीप्रदं महत् ।
श्रवणात्पठनादस्य फलं सर्वप्रदं भवेत् ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने यमराजोक्तं शुभाशुभप्रवृत्तिकारणं, पापमोचनोपायः, धेनुसेवैकादशीप्रभृतिव्रतसाधुचरणामृतपानसेवनादिभिः परमश्रेयइत्यादिश्रुतमुक्त्वा नाचिकेता विरराम, ऋषयो बद्रीनारायणं जग्मुरित्यादिनिरूपणनामा त्रिषष्ट्यधिकत्रिशततमोऽध्यायः ॥ ३६३ ॥

श्रीलक्ष्मीरुवाच—

पूर्वं श्रुतं मया कृष्ण ! भवदाननपंकजात् ।
पतिव्रता त्वया सृष्टिप्रारंभे स्वात् प्रकाशिता ॥ १ ॥
सा तु भूमौ च पाताले स्वर्गे सत्ये तथाऽऽवृतौ ।
वैराजे चाथ वैकुण्ठे चेश्वराणां विभूतिषु ॥ २ ॥
जीवसृष्टावीशसृष्टौ सर्वत्र संस्थिताऽस्ति वै ।
व्यापिनी सा महाशक्तिस्तव सामर्थ्यरूपिणी ॥ ३ ॥
आदौ सा कंभरानाम्नी महालक्ष्मीरजायत ।
भवान् साक्षात्परब्रह्म गोपालः समजायत ॥ ४ ॥
पत्नीव्रताभिधो विप्रः कृष्णनारायणो हरिः ।
स्वयं जातो महाराजः सर्वधर्मप्रवर्तकः ॥ ५ ॥
तत्पत्नी कंभरालक्ष्मीर्यद्गृहे मानसः सुतः ।
लक्ष्मीनारायणो जज्ञे कृष्णनारायणः स्वयम् ॥ ६ ॥
साऽहं लक्ष्मीः स त्वं कृष्णः कृपया ते स्मरामि तत् ।
पतिव्रतात्मको धर्मः सतीधर्मो हि मोक्षदः ॥ ७ ॥
सुखदः स्वर्गदश्चापि सर्वकामप्रपूरकः ।
त्वदात्मको मदात्मकः कथं न तारयेज्जनान् ॥ ८ ॥
सतां सेवात्मको धर्मः सर्वोपरि प्रवर्तते ।
सत्यः पतिव्रताः साध्व्यस्तरन्ति साधुसेवया ॥ ९ ॥
साधुरूपो भवानस्ति सतीरूपोऽस्ति वै भवान् ।
सतीधर्मः साधुधर्मः खड्गधाराऽतिदुस्तरः ॥१०॥
सतीं रूपवतीं श्रुत्वा जनकस्य तु भामिनीम् ।
सतीबलं विशेषेण श्रोतुकामाऽस्मि संवृता ॥११॥
नार्यो भोग्याः कामधर्माः सतीसामर्थ्यसंश्रवात् ।
तरिष्यन्ति भवाम्भोधिं श्रुत्वा पतिव्रताबलम् ॥१२॥
तस्माच्छ्रावय मे विष्णो ! कृष्णनारायण ! प्रभो ! ।
पतिव्रतानामैश्वर्यचमत्कारान् सुखप्रदान् ॥१३॥
भूतान्मध्यान्भूयमानान् श्रोतुमिच्छामि केशव ! ।
भवच्छक्तिस्वरूपाणां सतीनां चरितानि वै ॥१४॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! परं जिज्ञासितं शुभम् ।
कल्याणं योषितां कर्तुं मे विभासि दयावती ॥१५॥
कथयामि चमत्कारान् सतीनां योषितां बहून् ।
कुमारीणां लग्नितानां नैष्ठिकीनां च योषिताम् ॥१६॥
सधवानामधवानां त्यागिनीनां सुयोषिताम् ।
योगिनीनां भागवतीस्थितिकानां सुरश्रियः ॥१७॥
आर्षीणां देवपत्नीनां ब्राह्मीणां कृष्णयोषिताम् ।
कथयिष्ये चमत्कारान् शृणु मद्वाङ्मना भव ॥१८॥
गोलोके राधिका याऽस्ति सावित्री या तदंशिका ।
निर्मिता वेधसोऽर्थे वै कृष्णनारायणेन सा ॥१९॥
सृष्ट्यारंभे कृते त्वाद्ये श्वेतद्वीपे स्थिताऽभवत् ।
तस्मिन्नेवाऽन्ववसरे बदरिकाश्रमे नृपः ॥२०॥
प्रियव्रतस्तपस्तेपे तत्रोपेयात्तु नारदः ।
राजा व्योम्नि ऋषिं वीक्ष्य समुत्तस्थौ सुहर्षितः ॥२१॥
तस्याऽऽसनं च पाद्यं च दत्वा पप्रच्छ सादरम् ।
भगवन् ! किञ्चिदाश्चर्यमेतस्मिन् कृतसंज्ञिते ॥२२॥
युगे दृष्टं श्रुतं वापि तन्मे कथय नारद ! ।
नारदस्तु यथादृष्टमेकमाश्चर्यमाह तम् ॥२३॥
ह्यस्तनेऽहनि राजेन्द्र ! श्वेतद्वीपं गतस्त्वहम् ।
तत्र संदृष्टवान् दिव्यं सरः पंकजशोभितम् ॥२४॥
सरसस्तस्य तीरे तु कुमारीं पृथुलोचनाम् ।
दृष्ट्वाऽहं विस्मयापन्नस्तां कन्यामायतेक्षणाम् ॥२५॥
पृष्टवानस्मि राजेन्द्र ! तां वै मधुरभाषिणीम् ।
काऽसि भद्रे ! कथं वाऽसि किं वा कार्यमिह त्वया ॥२६॥
कर्तव्यं चारुसर्वाङ्गि ! तन्ममाऽऽचक्ष्व शोभने ! ।
एवमुक्ता मया सा हि मां दृष्ट्वाऽनिमिषेक्षणा ॥२७॥
स्मृत्वा तूष्णीं स्थिता यावत्तावन्मे ज्ञानमुत्तमम् ।
विस्मृतं सर्ववेदाश्च संहिताश्च फलादिकम् ॥२८॥
सर्वं दृष्ट्वैव मे राजन् कुमार्याऽपहृतं क्षणात् ।
ततोऽहं विस्मयाविष्टश्चिन्ताशोकजडोऽभवम् ॥२९॥
तामेव शरणं गत्वा यावत्पश्यामि तां पुनः ।
तावद् दिव्यः पुमाँस्तस्याः शरीरे समदृश्यत ॥३०॥

तस्यापि पुंसो हृदये त्वपरस्तस्य चोरसि ।
अन्यो रक्तेक्षणः श्रीमान् द्वादशादित्यसन्निभः ॥३१॥
एवं दृष्टाः पुमांसोऽत्र त्रयः कन्याशरीरगाः ।
क्षणेन ते त्रयो लीनाः कन्यां पश्यामि चैकलाम् ॥३२॥
ततः पृष्टा मया देवी सा कुमारी कथं मम ।
वेदा नष्टा ममाचक्ष्व भद्रे तन्नाशकारणम् ॥३३॥
कन्योवाच तु वेदानां सावित्रीं मातरं तु माम् ।
नैव जानासि येन त्वं ततो वेदा हतास्तव ॥३४॥
इति श्रुत्वा नारदेन पृष्टा के पुरुषा इति ।
कन्योवाच हृदि मेऽयं ऋग्वेदो यो नरायणः ॥३५॥
विष्णुरूपोऽनलो नामोच्चारणात्पापदाहकः ।
तस्य हृदि द्वितीयस्तु यजुर्वेदः पितामहः ॥३६॥
तस्य हृदि तृतीयस्तु सामवेदो हि शंकरः ।
एतावादित्यवत्पापान्याशु दहत आस्मृतौ ॥३७॥
एते त्रयो महावेदा ऋषे ! देवास्त्रयस्तु ते ।
गृहाण विप्र ! गायत्रीं वैदिकीं जप वैष्णवीम् ॥३८॥
ततो गृहाण वेदाँश्च सर्वज्ञत्वं च नारद ! ।
एतस्मिन् वेदसरसि स्नानं कुरु च पुत्रक ! ॥३९॥
कृते स्नानेऽन्यजन्मीयं येन स्मरसि पुत्रक ! ।
अहं स्नात्वा लब्धवाँस्तज्ज्ञानं वर्षसहस्रजम् ॥४०॥
पुष्करपत्तनस्याऽऽसं पुरा सारस्वतो द्विजः ।
सोऽहं वै वेधसः पुत्रो मानसोऽस्मि पुरस्तव ॥४१॥
सावित्री सा मम माता तिरोभावं गता ततः ।
मया सा दिव्यदृष्ट्या तु सत्यलोके विलोकिता ॥४२॥
वेधसो धर्मपत्नीति प्रतापाढ्या पतिव्रता ।
ब्रह्मा भूतानि संसृष्ट्वा तत्याज स्ववपुर्मुहुः ॥४३॥
सावित्री तच्छवात् पातिव्रत्यप्रतापतो मुहुः ।
ब्रह्माणं स्वकरस्पर्शात् सर्जयामास वै तदा ॥४४॥
बहुवारं मृतं चाऽजं बहुवारं ससर्ज सा ।
सृष्टिर्यथेष्टं संजाता न्यवर्तत तदा मृतेः ॥४५॥
ब्रह्माणं तं पतिं प्राप्य शाश्वतं सा पतिव्रता ।
पातिव्रत्यप्रभावेण वर्तिष्यते च वर्तते ॥४६॥
मृत्युं त्वामन्त्र्य दत्वा च ब्रह्माणं मृत्यवे मुहुः ।
पतिं सा जीवयामास पातिव्रत्यप्रभावतः ॥४७॥
वेदाँस्त्रिपुरुषान् हुत्वा पुनर्दत्तवती तु सा ।
पातिव्रत्यप्रभावेण सावित्री जननी मम ॥४८॥
अहं राजन् कृतस्नानस्त्वां दिदृक्षुरिहाऽऽगतः ।
सत्यं गच्छामि सम्पूज्य नरनारायणं प्रभुम् ॥४९॥
इत्युक्त्वा च हरिं नत्वा सत्ये ययौ तु नारदः ।
इति ते कथितं लक्ष्मि ! पातिव्रत्यबलं महत् ॥५०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये सावित्र्यां नारदस्य त्रिवेदात्मकत्रिदेवदर्शनं, वेधसः सावित्रीपातिव्रत्यबलेन मुहुः शरीरवत्त्वमित्यादिनिरूपणनामा चतुःषष्ट्यधिकत्रिशततमोऽध्यायः ॥३६४॥

श्रीनारायण उवाच —

शृणु लक्ष्मि ! दिवि देवा गन्धर्वा मरुतस्तथा ।
ग्रहाश्चकेतवो नक्षत्राणि दिक्पालकाश्च ये ॥ १ ॥
वसवो निधयो रुद्राः ऋषयो रवयस्तथा ।
देव्योऽप्सरसो मुनयो दास्यः पर्यश्च दासकाः ॥ २ ॥
ऐरावताद्याः करिणो दिग्गजा वाजिनस्तथा ।
उच्चैःश्रवःप्रभृतयो हंसाश्च गरुडाः शुकाः ॥ ३ ॥
कामधेनवो गावश्च सरमाद्याः श्वजातयः ।
मेषाश्च महिषाश्चापि सिंहा ये देववाहनाः ॥ ४ ॥
ते सर्वे कामगा दिव्याः कामरूपधरास्तथा ।
अष्टसिद्धियुताः सर्वे निरावरणदृष्टयः ॥ ५ ॥
अप्रतिघातगतयः सर्वभाषाविदश्च ते ।
देवभाषाविदः सर्वे धर्मपुण्यावलम्बिनः ॥ ६ ॥
नियमस्था भुंजते स्वःसुखं दीर्घप्रजीवनः ।
मयूरा मूषकाः सर्पा ये देवानां गृहे स्थिताः ॥ ७ ॥
ते सर्वे कामरूपश्चाः स्वस्वधर्मपरायणाः ।
वर्तन्ते तत्र या त्वेका शुनी त्विन्द्रस्य सेविका ॥ ८ ॥
सरमा वर्तते नित्यं पत्यधीना पतिव्रता ।
सरमायाः पतिर्नाम्ना ग्रुमेयस्त्विन्द्रसेवकः ॥ ९ ॥
तत्परा सरमा स्वाभिभक्ता पत्युः प्रियंकरी ।
पत्यादेशस्थिता पतिप्रदत्तभोगकारिणी ॥१०॥
ग्रुमेयमन्तरा क्वापि नादत्ते भोजनादिकम् ।
येभ्यः केभ्यश्च देवेभ्यो लब्धं समर्प्य स्वामिने ॥११॥
ततो गृह्णाति वै नित्यं स्वाम्यादेशं करोति च ।
एकदा दिवि विद्युत्सुविद्युन्नामकराक्षसौ ॥१२॥
अकस्मात्तु गतौ योद्धुं सहेन्द्रेण कृते युगे ।
बलिष्ठाभ्यां महेन्द्रस्तु निर्जितः सन् पलायितः ॥१३॥
दासा दास्यो वाहनाद्याः सरमाद्याः पलायिताः ।
मेरोररण्यदेशेषु चक्रुर्गुप्तं निवेशनम् ॥१४॥

राक्षसावपि माहेन्द्रं पदं संगृह्य गर्वितौ ।
मोदमानौ विहारार्थं मेरुं प्रति गतौ मुदा ॥१५॥
तत्रारण्ये गुहां दृष्ट्वा सुखदां कामदां शुभाम् ।
मनोहरां विशिष्टां च समध्यास्य प्रतिष्ठितः ॥१६॥
इन्द्रपुरीं समागत्य प्रतिगत्वा च तां गुहाम् ।
रमेतेस्म बहुदासीसंश्लिष्टावुभयाऽसुरौ ॥१७॥
देवास्तु दुःखमापन्नाः विना राजानमिन्द्रकम् ।
मन्त्रयांचक्रुरव्यग्रा ऐन्द्रं पदमभीप्सवः ॥१८॥
सर्वे संहृत्य सैन्यानि चक्रुस्तयोः सुदंशिताः ।
अब्रवीत्तत्र देवानां गुरुर्बृहस्पतिश्च तान् ॥१९॥
गोमेधेन यजध्वं वै प्रथमं विष्णुमीश्वरम् ।
गवां मेध्यानि दुग्धानि घृतानि वह्निमूर्तये ॥२०॥
भोजयित्वा बलं प्राप्य यष्टव्यं क्रतुभिः पुनः ।
एवंकृते विजयो वो भविष्यति तु नान्यथा ॥२१॥
उपदेशो मया दत्तः क्रियतां शीघ्रमित्ययम् ।
एवमुक्तास्तदा देवाः पायसाद्यर्थमेव गाः ॥२२॥
कामधेनूः समानीय मेर्वरण्ये क्रतुस्थले ।
ररक्षुर्यज्ञकार्ये त्वारेभिरे गुरुयन्त्रिताः ॥२३॥
दुग्धं दधि घृतं सर्पिः प्राज्यं गवां प्रगे च ते ।
क्रत्वग्नौ विष्णवे नित्यं देवेभ्यश्च ददत्यपि ॥२४॥
दिवा ता धेनवः सर्वा यान्ति शाद्वलभूमिषु ।
आहाराय तृणाद्यर्थे निर्भयासु स्थलीषु च ॥२५॥
इन्द्रस्तत्र तदा देवैश्चाकारितश्च देशितः ।
गवां संरक्षणार्थाय दूतान्प्रेषय नित्यदा ॥२६॥
इन्द्रेण सरमा दत्ता शुनी पतिव्रता तदा ।
पातिव्रत्यप्रभावेण सर्वरक्षाकरी सती ॥२७॥
मुमुचुर्गाश्चारणार्थं रक्षार्थं सरमां ददुः ।
देवा हवनं कुर्वन्ति निश्चिन्ता बललब्धये ॥२८॥
तास्तु गावो देवशून्या रक्ष्यमाणास्तृणस्थले ।
तत्र जग्मुस्तदा गावश्चरन्त्यो यत्र तेऽसुराः ॥२९॥
ते तु धेनुकुलं दृष्ट्वा शुक्रमूचुः पुरोहितम् ।
पश्य त्वं देवगा ब्रह्मँश्चार्यन्ते रक्षमाणया ॥३०॥
इन्द्रशून्या सरमया वद विघ्नं यथा भवेत् ।
देवकृते क्रतौ शीघ्रं शाधि कुर्मो वयं तथा ॥३१॥
एवमुक्तस्तदा शुक्रः प्रत्युवाचाऽसुराँस्तदा ।
गा ह्रियन्तां शीघ्रमसुरा मा विलम्बत क्षणम् ॥३२॥
गावो मूलं हि यज्ञस्य देवानां पुष्टिदास्तु ताः ।
तद्रोधे यज्ञरोधः स्याद् देवा दुःखमवाप्नुयुः ॥३३॥
एवमुक्तास्तदा दैत्या जह्रुस्ता गा यदृच्छया ।
हृतासु तासु सरमा मार्गान्वेषणतत्पराः ॥३४॥
अपश्यत्ता दितेः पुत्रैर्नीता गावः क्रतोर्धराः ।
दैत्यैरपि शुनी दृष्टा दृष्टमार्गा सुरक्षिका ॥३५॥
दृष्ट्वा ते सरमां प्राहुः सामपूर्वमिदं वचः ।
सरमे त्वं सुरेभ्यस्तु मा निवेदय सर्वथा ॥३६॥
दैत्यैर्गावो हृताश्चेति मा ब्रूहि ते शुभं भवेत् ।
आसां गवां चातिमिष्टं क्षीरं त्वं सरमे शुभे ॥३७॥
पिब स्वैरमिति प्रोक्त्वा तस्यै दुग्धं ददुस्तदा ।
दत्वा तु क्षीरमतुलं तस्यै ते दैत्यनायकाः ॥३८॥
मा भद्रे देवराजाय गास्त्विमा विनिवेदय ।
एवं प्राहुर्मुहुस्तस्यै सा श्रुत्वा प्राह दानवान् ॥३९॥
यस्याऽन्नं भुंजते भृत्यास्तस्यार्थे भृत्यवर्तनम् ।
तदर्थे प्राणदानं च श्रेयःकृन्न तु चान्यथा ॥४०॥
यो भृत्यो वेतनं लब्ध्वा स्वामिनोऽर्थे करोति न ।
स याति रौरवं तर्हि विपरीतस्तु किं लभेत् ॥४१॥
नाऽहं देवशुनी देवविपरीता भवामि वै ।
रक्षार्थे विहिता साहं कथं यामि विनाशने ॥४२॥
कथयिष्ये सुरान् दैत्या ! वः कृत्यं धेनुलोपनम् ।
रक्षिका भक्षिका नाहं भविष्यामि कदाचन ॥४३॥
यस्यान्नकणिका भुक्ता तदर्थे शिरसोऽर्पणम् ।
शूनां जातिस्वभावोऽस्ति भयादपि न मुच्यते ॥४४॥
यदन्नमुदरे जीर्णं तस्याऽहितकरो जनः ।
स्वामिघ्नो धर्महन्ता च हन्यते सर्वदैवतैः ॥४५॥
न निष्कृतिर्भवेत् तस्य स्वामिविश्वासघातिनः ।
यत्प्राप्यते प्रभुज्ञामः स्वामिनोऽज्ञनरक्षकाः ॥४६॥
तिरस्कारे प्रहारेऽपि सन्तुष्टा गुणदर्शिनः ।
स्वामिसेवापरा नित्यं तन्वा वाचा क्रियादिभिः ॥४७॥
एतादृशान् सत्यभृत्यान् स्वामिधर्मपरायणान् ।
रक्षत्येव हरिः साक्षात् कृष्णनारायणः प्रभुः ॥४८॥
नाऽहं पास्यामि गोदुग्धं त्वाज्ञां वै स्वामिनो विना ।
नाऽहं रक्ष्यामि गुप्तं च प्रकाशयिष्ये सत्वरम् ॥४९॥
इत्युक्त्वा सा ततः स्थानादपाससार वेगतः ।
तावद् दैत्या विहन्तुं तां दुद्रुवुर्हेतिभिः सह ॥५०॥
सरमा प्राह दैतेया ! न मां हन्तुं समर्हथ ।
यत्र क्वापि त्रिलोक्यां वै स्त्रियं हन्ति न बुद्धिमान् ॥५१॥
इत्युक्ता अपि दैतेयाः श्वानो भूत्वाऽतिकामिनः ।
परिरब्धुं शुनीं तत्र दद्रुवुरतिगर्विताः ॥५२॥

त्रस्ता सस्मार सा देवान् पतिं श्वानं द्युमेयकम् ।
तावत्तत्र समायातो द्युमेयो देवसेवकः ॥५३॥
सरमा स्वपतिं नत्वा पीत्वा पतिमुखाम्बुजम् ।
प्राह दैत्यान् पराभावयितुं धर्मपरायणा ॥५४॥
यद्यहं स्वामिनो भोज्यं गृह्णामि तत्प्रसादकम् ।
तेन पुण्येन दैतेया दह्यन्तु वह्निनाऽत्र वै ॥५५॥
यद्यहं वचने नित्यं द्युमेयस्याऽस्मि संस्थिता ।
तेन पुण्येन दैतेया दह्यन्तु वह्निनाऽत्र वै ॥५६॥
यद्यहं स्वपतिं हित्वा नान्यं गच्छामि कर्हिचित् ।
तेन पुण्येन दैतेया दह्यन्तु वह्निनाऽत्र वै ॥५७॥
यद्यहं स्वपतितुष्टा नान्यतुष्टा भवामि चेत् ।
तेन पुण्येन दैतेया दह्यन्तु वह्निनाऽत्र वै ॥५८॥
यद्यहं स्वामिकार्येऽपि पतिप्रसन्नतां सदा ।
गृहीत्वैव नियुक्तास्मि दैत्या दह्यन्तु वह्निना ॥५९॥
पत्यौ सुप्ते प्रसुप्ताऽहं भुक्ते भुक्तवती तथा ।
तत्सुखे सुखमापन्ना दुःखे दुःखातिवर्तिनी ॥६०॥
पतिव्रता यथाजाति चेद् भवामि निरन्तरम् ।
तेन पुण्येन दैतेया दह्यन्तु वह्निनाऽत्र वै ॥६१॥
इत्युक्तवत्यां दैतेयाः श्वस्वरूपास्तदन्तिके ।
परितो वर्तिकां कृत्वा यावत् स्पृशन्ति तां शुनीम् ॥६२॥
तावदग्निः समुद्भूतो दावाऽनलोऽतिदारुणः ।
दैतेयान्समभिव्याप्य भस्मीचकार सर्वथा ॥६३॥
शुनी स्वपतिना सार्धमिन्द्रादिदेवताः प्रति ।
समागम्याऽकथयत् तद्वृत्तान्तमखिलं क्रतौ ॥६४॥
देवाः श्रुत्वा गतास्तत्र नीत्वा गा आगमत् क्रतुम् ।
शुक्रः सञ्जीवनीपत्रैर्मन्त्रैरुत्थाप्य चासुरान् ॥६५॥
नीत्वा ययौ तु युद्धार्थं यज्ञभूमौ प्रदर्पितः ।
सरमा पतिमापृच्छय शुक्रं जग्राह मस्तके ॥६६॥
महेन्द्राद्यास्तु यज्ञस्य बलेन पुष्टतां गताः ।
दैत्यनाशाय सैन्यानि रचयामासुरादरात् ॥६७॥
क्रियमाणेन यज्ञेन ववृधे देवताबलम् ।
वर्धितेन बलेनेन्द्रो देवसैन्यान्युवाच यत् ॥६८॥
सन्नह्यन्तां सुराः शीघ्रं दैत्यानां वधकर्मणि ।
एवमुक्तास्तदा देवाः सन्नद्धास्तत्क्षणेऽभवन् ॥६९॥
असुराणां विनाशाय दुद्रुवुरुद्यतायुधाः ।
ते देवा युयुधुस्तूर्णं विजिग्युस्त्वासुरीं चमूम् ॥७०॥
जितास्तु देवैरसुरा हतशेषा विचेतसः ।
जिजीविषवः संत्रस्ता ममज्जुः सागरेषु ते ॥७१॥
त्रिदिवं देवराजोऽपि लोकपालैश्च धेनुभिः ।
ग्रहनक्षत्रताराभिर्देवीभिः ऋषिभिस्तथा ॥७२॥
सर्वदेवैः समेतश्च स्वर्गं प्राप्य पुनः स्वकम् ।
परमारुह्य बुभुजे यथापूर्वं यथासुखम् ॥७३॥
एवं लक्ष्मि ! सरमाया देवशुन्याः स्वधर्मजा ।
पातिव्रत्यकृता सिद्धिः प्रजज्वालाऽसुरान्बहून् ॥७४॥
य इदं शृणुयाल्लोके सरमाधर्मसद्बलम् ।
स गोमेधस्य यज्ञस्य फलं प्राप्नोति वै जनः ॥७५॥
भ्रष्टराज्यश्च यो राजा शृणोतीदं समाहितः ।
स देवेन्द्र इव स्वर्गं राज्यं स्वं लभते जनः ॥७६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये विद्युदादिराक्षसैर्देवराज्ये हृते देवकृते यज्ञे मेरौ गोरक्षार्थं नियुक्तया सरमया देवशुन्या पातिव्रत्यधर्मेण दैत्याः प्रज्वालिता गावश्च रक्षिता देवराज्यं च देवैर्लब्धमित्यादि-निरूपणनामा पञ्चषष्ट्यधिकत्रिशत-तमोऽध्यायः ॥३६५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महासत्याः सावित्र्याः परमोत्तमम् ।
पातिव्रत्यप्रभावं त्वं येन संजीवितः पतिः ॥ १ ॥
या वेदजननी प्रोक्ता ब्रह्मणा पूजिता पुरा ।
देवव्रातैः पूजिता च पूजिता विदुषां गणैः ॥ २ ॥
राज्ञाऽश्वपतिना त्वाद्ये सत्ययुगेऽर्चिता तथा ।
सर्वैस्तु मानवैः पश्चात्पूजिता सा पतिव्रता ॥ ३ ॥
मद्रदेशे महाराजो बभूवाश्वपतिः शुभः ।
आसीत्तस्य महाराज्ञी मालती नाम नामतः ॥ ४ ॥
चकाराऽऽराधनं साध्वी पत्युर्निर्देशकारिणी ।
सावित्र्याः परया भक्त्या वशिष्ठस्योपदेशतः ॥ ५ ॥
आराधितवती ब्राह्मीं सावित्रीं बहुवत्सरान् ।
सा ददर्श न सावित्रीं फलं नाऽवाप वै मनाक् ॥ ६ ॥
संभग्नहृदया जाता दुःखिता भोगवर्जिता ।
राजा तां सान्त्ववचनैर्धैर्यं प्रदर्श्य नीतियुक् ॥ ७ ॥
राज्ञीं गृहे सन्नियुज्य राज्यभारं प्रदाय च ।
सावित्र्याः साधनार्थं सः पुष्करं तपसे ययौ ॥ ८ ॥
तत्र समाहितो भूत्वा तपश्चक्रे शतं समाः ।
ततः शुश्राव दिव्यां स वाणीं व्योम्न्यशरीरिणीम् ॥ ९ ॥

गायत्रीदशलक्षं त्वं जपं कुरु नृपेति वै ।
एतच्छ्रुत्वा त्वश्वपतिश्चिन्तयामास तद्विधिम् ॥१०॥
तावत्तत्र समायातो दिव्यदेहः पराशरः ।
राजा नत्वा मुनिं तत्र पप्रच्छ कृतपूजनः ॥११॥
विधिं जपस्य गायत्र्या मुनिर्नृपमुवाच ह ।
सकृज्जपस्तु गायत्र्याः पापं दिनकृतं हरेत् ॥१२॥
दशवारं जपः पापं दिनरात्रिकृतं हरेत् ।
शतवारं जपः पापं मासकृतं विनाशयेत् ॥१३॥
सहस्रधा जपः पापं वार्षिकं संविनाशयेत् ।
लक्षं जपो जन्मपापं शुष्कं चार्द्रं विनाशयेत् ॥१४॥
दशलक्षं जपः पापं विनाशयेत् त्रिजन्मनाम् ।
शतलक्षजपः सर्वजन्माद्यं नाशयेद् ध्रुवम् ॥१५॥
दशकोटिजपो मुक्तिं ददात्येव न संशयः ।
करं सर्पफणाकारं कृत्वा समूर्ध्वमुद्रितम् ॥१६॥
अनम्रमूर्धा ह्यचलः प्रजपेत् प्राङ्मुखो द्विजः ।
जपेत्सुरालये तीर्थे तुलसीकाष्ठमालया ॥१७॥
बीजानां वा स्फाटिकानां मालामष्टोत्तरं शतम् ।
मणिकाग्रथितां सौम्यामश्वत्थपत्रसप्तसु ॥१८॥
स्थापयित्वा स्नापयेच्च पञ्चगव्येन तां ततः ।
स्नापयेत्तीर्थतोयेन पुण्यगंगोदकेन वा ॥१९॥
गायत्रीशतकं जप्त्वा जपयोग्यां हि कारयेत् ।
अथ क्रमेण च ततो दशलक्षं जपं कुरु ॥२०॥
साक्षाद् द्रक्ष्यसि सावित्रीं सर्वपातकसंक्षये ।
प्रगे मध्ये तथा सत्यं नित्यं त्रिसन्ध्यकृद् भव ॥२१॥
सन्ध्याजापविहीनस्तु कर्मफलभाग् भवेत् ।
यावज्जीवं त्रिसन्ध्याकृद् भवेत्सूर्यसमोज्ज्वलः ॥२२॥
जीवन्मुक्ताः स विज्ञेयोऽन्येषां पापविनाशकृत् ।
तत्पादरजसा पृथ्वी सद्यः पूता भवत्यपि ॥२३॥
तीर्थान्यपि पवित्राणि भवन्ति तस्य संस्पृशेः ।
वैष्णवत्वविहीनस्य त्रिसन्ध्यारहितस्य च ॥२४॥
एकादशीविहीनस्य गृह्णन्ति नार्चनं सुराः ।
न गृह्णन्त्यपि पितरः श्राद्धपिण्डादितर्पणम् ॥२५॥
हर्यतर्पितभोजी च शवस्पर्शादिकारकः ।
शूद्रयाजनकर्ता च राजस्वल्यगमस्तथा ॥२६॥
असिजीवी मषीजीवी कृषिजीवी च मत्स्यभुक् ।
भगजीवी सुताविद्याविक्रयी नोच्यते द्विजः ॥२७॥
वैष्णवो भव राजर्षे ! मध्याह्ने च जपं कुरु ।
ज्येष्ठे कृष्णत्रयोदश्यां शुद्धो भूत्वा व्रती जनः ॥२८॥

व्रतं कुर्याच्चतुर्दश्यां सावित्रीं संजपन्मुहुः ।
निराहारं व्रतं कुर्याच्चतुर्दशसमात्मकम् ॥२९॥
चतुर्दशफलैर्युक्तं नैवेद्यं च द्विसप्तकम् ।
पुष्पाम्बरोपवीतं च धूपं दीपं प्रसंददेत् ॥३०॥
संस्थाप्य मंगलघटं फलरत्नादिसंयुतम् ।
गणेशं च दिनेशं च वह्निं विष्णुं शिवं शिवाम् ॥३१॥
संपूज्य पूजयेन्मुख्यं घटे त्वावाहिते व्रती ।
मुख्यां देवीं तु सावित्रीं ध्यायेन्मूर्तौ स्थिरो व्रती ॥३२॥
माध्यन्दिने तु सावित्र्या ध्यानं शृणु तथा नृप ! ।
स्तोत्रं पूजाविधानं च मन्त्रं च सर्वकामदम् ॥३३॥
तप्तकांचनसद्वर्णां ज्वलन्तीं ब्रह्मतेजसा ।
ईषद्धास्यप्रसन्नास्यां स्वर्णरत्नविभूषिताम् ॥३४॥
स्वर्णांशुकां दयाशान्तिसुखमुक्तिप्रदां सतीम् ।
सर्वसम्पत्प्रदात्रीं च कान्तां श्रीपरमेष्ठिनः ॥३५॥
वेदाधिष्ठातृदेवीं च बीजरूपां तु मातरम् ।
सर्वसंकल्पदात्रीं च भजे विद्याप्रदायिनीम् ॥३६॥
एवं ध्यात्वा ध्यानधार्यं पुष्पं दत्वा स्वमूर्धनि ।
घटे त्वावाहयेद् देवीं पूजयेत् षोडशार्पणैः ॥३७॥
आसनं पाद्यमर्घ्यं चाऽऽचमनीयं तथा जलैः ।
पञ्चामृतैश्च स्नानीयं सुगन्धाद्यनुलेपनम् ॥३८॥
अभिषेकं तथा वस्त्रैः संमार्जनं तथाऽम्बरम् ।
भूषा पुष्पाणि शृंगारद्रव्याणि त्वर्पयेत्तथा ॥३९॥
धूपं यज्ञोपवीतादि सौभाग्यार्थं द्रवाणि च ।
दीपं नैवेद्यकं वारि ताम्बूलं चन्दनादिकम् ॥४०॥
आरात्रिकं फलं पत्रं सुतल्पं नमनादिकम् ।
पादसंवाहनं दिव्यमनसा च क्षमापनम् ॥४१॥
ततः पुष्पाञ्जलिं दत्वा मातरं तां विसर्जयेत् ।
उपस्थिताय विप्राय दद्याद् व्रती तु दक्षिणाम् ॥४२॥
जपेत् श्रीं ह्रीं क्लीं सावित्र्यै स्वाहे-त्यष्टोत्तरं शतम् ।
सकृज्जपाद् दशकोटिजपपर्यन्तमेव हि ॥४३॥
यथाशक्ति जपेन्मध्यंदिने स्तोत्रं ततः परम् ।
कृष्णेन दत्ता सावित्री गोलोके ब्रह्मणे पुरा ॥४४॥
ब्रह्मा राधास्वरूपां तां पर्यष्टौद् वेदमातरम् ।
कृष्णशक्तिस्वरूपे ! श्रीस्वरूपे ! परमेश्वरि ! ॥४५॥
नारायणस्वरूपे ! त्वं नारायणि ! महेश्वरि ! ।
तेजोमयि ! परानन्दमयि ! द्विजातिवर्धिनि ! ॥४६॥
नित्ये ! सनातनि ! लक्ष्मि ! सर्वमंगलरूपिणि !
सर्वदेवीस्वरूपे ! मोक्षदे ! सुखदे ! सुन्दरि ! ॥४७॥

ब्रह्मतेजःप्रदे ! भक्तदुरीतनाशकारिणि !
कायेन मनसा वाचा जाताघानां विनाशिनि ! ॥४८॥
ब्रह्मणा संस्तुता या त्वं सत्यलोकं गता सह ।
सुखदे मोक्षदे कन्ये प्रसन्ना भव सुन्दरि ! ॥४९॥
इति स्तोत्रं वद त्वश्वपते ! प्राप्स्यसि दर्शनम् ।
स्तोत्रं चेदं त्रिसन्ध्यायां यः पठेन्मातरं स्मरन् ॥५०॥
चतुर्वेदादिपाठानां सम्पूर्णं लभते फलम् ।
प्रभा च पार्वती लक्ष्मीर्माणिक्या कमला सती ॥५१॥
सावित्री वेदमाता सा ददाति दर्शनं स्वकम् ।
इत्युक्त्वा स ऋषिश्रेष्ठो ययौ स्वर्गं पराशरः ॥५२॥
राजा त्वश्वपतिश्चक्रे सतपोजपनार्चनम् ।
ददर्श तां स सावित्रीं सहस्रार्कसमप्रभाम् ॥५३॥
ततो लक्ष्मि ! नृपतिः सोऽपूजयद् ध्येयदेवताम् ।
प्राह तं सा प्रसन्नास्मि ते जानामि मनोगतम् ॥५४॥
साध्वी कन्याभिलाषं ते करोति महिषी यतः ।
वाञ्छितं तव पत्न्यास्तत् सर्वं दास्यामि निश्चितम् ॥५५॥
त्वं तु प्रार्थयसि पुत्रं भविष्यति क्रमात् सुतः ।
इत्युक्त्वा सा महादेवी ब्रह्मलोकं ययौ तिरः ॥५६॥
राजा तु तां दिशं नत्वा जगाम स्वालयं ततः ।
नातिचिरेण कालेन सा कन्याऽऽदावजायत ॥५७॥
सवितृसदृशी रूपे सावित्रीवरदानजा ।
सूयमाना सुखं सा वै सावित्रीनामतः कृता ॥५८॥
तज्जन्मसमये ब्रह्मा देवैः सहाऽऽजगाम ह ।
पुष्पवृष्टिं तदा कृत्वा ययौ धाम स्वकं ततः ॥५९॥
नित्यं तस्यास्तु बालाया दर्शनार्थं सुरादयः ।
समायान्त्यदृश्यरूपा मुदा त्वश्वपतिगृहे ॥६०॥
वैकुण्ठसदृशं राज्ञो भवनं समशोभत ।
कालेन यौवनं प्राप्ता दिव्या देवी व्यराजत ॥६१॥
ब्रह्मांशः समभूत् काले द्युमत्सेनात्मजो बली ।
सत्यवानिति नाम्ना सः कुमारो गुणवारिधिः ॥६२॥
सा वरं वरयामास सत्यवन्तं स्वयंवरे ।
राजा तस्मै ददौ तां च रत्नाभूषणभूषिताम् ॥६३॥
विवाहविधिना तां स नीत्वा वरो गृहं ययौ ।
गार्हस्थ्यपातिव्रत्यादिधर्मांश्चरति सा सती ॥६४॥
संवत्सरे व्यतीते च सत्यवान् पितुराज्ञया ।
जगाम फलकाष्ठार्थमरण्यं घातके दिने ॥६५॥
सावित्री पातिव्रताख्यधर्मबलेन तन्मृतेः ।
कालं ज्ञात्वा तत्पश्चाद् ययौ यत्र गतः पतिः ॥६६॥
शुष्ककाष्ठानि चादातुं यतते सत्यवान् भुवि ।
शिरोवेदनया प्राणाँस्तत्याज तं तदा यमः ॥६७॥
बद्ध्वा सूक्ष्मशरीरेण युक्तं ययौ यमालयम् ।
तद्देहं वृक्षपत्रेषु रक्षित्वाऽनुययौ सती ॥६८॥
सतीं दृष्ट्वा यमस्तां वै प्रोवाच न्याययुग्वचः ।
अहो क्व यासि सावित्रि ! मानुषी सशरीरिणि ॥६९॥
यदि वाञ्छति चागन्तुं कान्तेन सह धर्मिणी ।
देहं त्यक्त्वा समायाहि सदेहा न गतिः खलु ॥७०॥
तव भर्तुः समायातः पूर्णः कालोऽत्र मानवे ।
स कर्मफलभोगार्थं सत्यवान् याति मद्गृहम् ॥७१॥
कर्मणा जन्म जन्तूनां मृत्युश्चापि तु कर्मणा ।
सुखं दुःखं भयं शोकः प्रपद्यन्ते हि कर्मभिः ॥७२॥
कर्मणा तु दिवं याति सत्यलोकं प्रयाति च ।
कर्मणा त्वीशतां याति हरेर्दास्यं च कर्मणा ॥७३॥
शुभेन कर्मणा यायात् सालोक्यादि चतुष्टयम् ।
इन्द्रत्वं वैधसत्वं च मुनित्वं विप्रजातिताम् ॥७४॥
मुक्ततां राजतां राजेन्द्रतां गुर्वीं तपस्विताम् ।
क्षत्रियतां वैश्यतां च शूद्रतां चान्त्यजातिताम् ॥७५॥
म्लेच्छतां जंगमतां च स्थावरात्मकतां तथा ।
शैलतां वृक्षतां चापि पशुतां पक्षितां तथा ॥७६॥
कृमितां जन्तुतां चापि गन्धर्वतां च नागताम् ।
राक्षसतां किन्नरतां कूष्माण्डतां च यक्षताम् ॥७७॥
वेतालतां भूततां च प्रेततां च पिशाचताम् ।
डाकिनीत्वं च दैत्यत्वं दानवत्वं सुरारिताम् ॥७८॥
प्राप्नोति कर्मभिर्जन्तुर्लोकान्तराणि कर्मभिः ।
कर्मभिः पुण्यवान् जीवो पापवाँश्चापि कर्मभिः ॥७९॥
सुन्दरश्च सुरूपश्च नीरोगी कर्मणा तथा ।
अन्धः काणः कुत्सितश्च महारोगी च कर्मणा ॥८०॥
सत्यं च निरयं स्वर्गं कर्मणा प्राप्यते तथा ।
शक्रलोकं सूर्यलोकं चन्द्रलोकं तथा परम् ॥८१॥
वह्निलोकं वायुलोकं वरुणालयमित्यपि ।
ध्रुवलोकं च कौबेरं पदं शिवगृहं तथा ॥८२॥
नक्षत्रलोकं च जनलोकं तपो महस्तथा ।
पातालानि च वैकुण्ठं गोलोकं चापि कर्मभिः ॥८३॥
क्षणजीवित्वमथ च चिरजीवित्वमित्यपि ।
कोटिकल्पादिजीवित्वं क्षीणायुष्ट्वं च कर्मभिः ॥८४॥
जीवसञ्चारमात्रायुर्गर्भे मृत्युः स्वकर्मणा ।
तव भर्तुस्तथा मृत्युः कर्मणा समुपस्थितः ॥८५॥

तस्मात् सावित्रि ! मन्मार्गात् परावृत्य यथासुखम् ।
त्यक्त्वा भर्तुरभिलाषं प्रयाहि स्वगृहं प्रति ॥८६॥
इत्युक्त्वा विररामाऽसौ यमो नत्वा सतीं ततः ।
सावित्री न परावृत्ता पातिव्रत्यपरायणा ॥८७॥
किन्तु पप्रच्छ विज्ञेयं कर्माऽकर्मादि सादरम् ।
शुभं तथाऽप्यशुभादि लक्ष्मि ! कर्मफलं तथा ॥८८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये मद्रदेशाधिपतिनाऽश्वपतिना सावित्र्या-राधनेन सावित्री सुता लब्धा, सा च सत्यवते दत्ता, सत्यवतो मरणे सावित्री पातिव्रत्यबलेन प्रेतमनुययौ, यमराजस्य संवादश्चेत्यादिनिरूपणनामा षट्-षष्ट्यधिकत्रिशततमोऽध्यायः ॥३६६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! यमप्रोक्तमनादरत्याऽतिभावतः ।
यत्पप्रच्छ तु सावित्री कथयामि निबोध मे ॥ १ ॥
शुभं किं चाऽशुभं कर्म किं बीजं कः फलप्रदः ? ।
केन कीदृग्भवेत्कर्म को हेतुस्तत्र सर्वथा ? ॥ २ ॥
को वा कर्मफलं भुंक्ते को वा निर्लिप्त इत्यपि ।
कर्म निर्मूलयन्त्येव कथं वै साधवो जनाः ? ॥ ३ ॥
कर्मकारकः कः प्रोक्तः को देहो देहवांश्च कः ।
किं विज्ञानं मनः किं च बुद्धिः का प्राण एव कः ? ॥ ४ ॥
किमिन्द्रियं देवताश्च भोक्ता भोजयिता च कः ।
को भोगो निष्कृतिः का च क आत्मा कः परः प्रभुः ? ॥ ५ ॥
एतत्सर्वं यमदेव ! चेज्जानासि वदात्र मे ।
यमः श्रुत्वाऽतिसंहृष्टः सावित्रीं प्राह तत्त्वतः ॥ ६ ॥
अभ्युदयप्रदं शान्तिप्रदं वेदादिदर्शितम् ।
कर्म शुभं मंगलकृद् विपरीतं न वै शुभम् ॥ ७ ॥
वासना भावना वापि कर्मबीजमुदीर्यते ।
फलप्रदः कृष्णनारायणः सर्वान्तरस्थितः ॥ ८ ॥
शुभेच्छया शुभं कर्माऽशुभयाऽशुभमेव तत् ।
कर्महेतुर्भवेद् यत्तस्तद्धेतुर्वाञ्छना मता ॥ ९ ॥
वाञ्छाहेतुस्तु विज्ञानं जीवे वस्तुसमाश्रयम् ।
ज्ञानहेतुस्तु संकल्पः पारमेश्वर आश्रितः ॥१०॥
विभ्वी शक्तिस्तत्र युक्ता क्रियां जनिं ददाति वै ।
हरेः संकल्पशक्तिभ्यां जीवे ज्ञानक्रिये मते ॥११॥
ताभ्यां परम्पराजन्यं कर्म सर्वं प्रजायते ।
अन्ततः सर्वथा हेतुः कृष्णनारायणो मतः ॥१२॥
जीवः कर्मफलं भुंक्ते तदात्मा नहि लिप्यते ।
अन्तर्यामी कृष्णनारायणो निर्लिप्त एव ह ॥१३॥
साधवः सर्वथा कर्मफलाभिसन्धिवर्जिताः ।
विष्णुसेवात्मकं कार्यं कुर्वन्त्यहर्निशं शुभम् ॥१४॥
अहैतुकं च संकल्पवर्जितं हरितुष्टये ।
तत्सर्वं भक्तिरूपं वै कर्मनिर्मूलनक्षमम् ॥१५॥
हरेर्भक्तः सदा मुक्तो मुक्तिस्तस्य द्विधा मता ।
जीवन्मुक्तिर्ब्रह्ममुक्तिर्निर्वाणपददायिनी ॥१६॥
जीवन्मुक्तिं भक्तिरूपां सदा वाञ्छन्ति वैष्णवाः ।
ब्राह्मीं मुक्तिं परां सेवां धाम्नि वाञ्छन्ति साधवः ॥१७॥
कर्मप्रयोजिका शक्तिः सा तु कृष्णे व्यवस्थिता ।
अन्तर्यामिस्वरूपस्था क्रियां जनयति ध्रुवा ॥१८॥
पञ्चभूतात्मको देहः स्थूल इत्यभिधीयते ।
तद्वान् जीवः सदा ज्ञाता चेतनो ज्ञानवान्मतः ॥१९॥
चतुर्विंशतितत्त्वानां जीवात्मपरमात्मनोः ।
स्वरूपैर्गुणकार्यैश्चाऽवगमो ज्ञानमुच्यते ॥२०॥
सर्वव्यवहृतिर्बीजं विज्ञानं त्वात्मनि स्थितम् ।
मूलमाया सत्त्वरजस्तमोमयी जडा सदा ॥२१॥
बुद्धिरूपा मनोरूपा प्राणरूपा प्रजायते ।
मनः संकल्पकं प्रोक्तं बुद्धिरध्यवसायिनी ॥२२॥
श्वासः प्राणो जीवनं च वृत्तिरतत्त्वैः सह स्थितिः ।
इन्द्रशक्तिसमापन्नमिन्द्रियं तत् प्रकीर्तितम् ॥२३॥
इन्द्र आत्मा सदा प्रोक्त इन्द्रियाणि बहूनि वै ।
श्रोत्रत्वचक्षूरसनाघ्राणानि ज्ञानदानि हि ॥२४॥
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि हि ।
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥२५॥
देवताश्च प्रकाशार्थं निर्मिताः शक्तिदास्तु ताः ।
भोक्ता देही भोजयिता त्वन्तरात्मा हरिः स्वयम् ॥२६॥
भोगः सुखस्य दुःखस्य साक्षात्कारः समुच्यते ।
निष्कृतिः शान्तिरित्युक्ता निवृत्तिः कर्मणां तथा ॥२७॥
कर्मनाशाय कर्माणि निष्कृत्यात्मानि वै विदुः ।
प्रायश्चित्तानि कर्माणि पूर्वेषां शोधकानि वै ॥२८॥
सूक्ष्मदेहाद्विविक्तो यो वासनाबलकर्षितः ।
जीवतां संविदन् स्वस्य जीवात्मा सुखसश्रितः ॥२९॥
अन्तर्नियामकस्तस्याऽक्षरधाम्नि च यः स्थितः ।
कृष्णनारायणः सोऽयं परप्रभुः प्रकीर्तितः ॥३०॥

पृथिवी वायुराकाशो जलं तेजस्त्विमानि वै।
पञ्चभूतानि चाश्रित्य जीवो भुंक्ते फलं बहु ॥३१॥
यदा भजति कृष्णं स वासनावर्जितो भवेत्।
जन्ममृत्युजराव्याधिशोकादिवर्जितो भवेत् ॥३२॥
भक्तिसमं न बलवत्साधनं त्वन्यदस्ति हि।
सर्वदुःखप्रशमनं सर्वसम्पत्प्रदं परम् ॥३३॥
स्वर्गमोक्षप्रदं श्रेष्ठं सर्वसमृद्धिप्रपूर्णकम्।
परमात्मा परब्रह्म कृष्णनारायणो हरिः ॥३४॥
कारणं कारणानां स राधालक्ष्मीप्रभापतिः।
पार्वतीमाणिकीनाथो रमावृन्दापतिः प्रभुः ॥३५॥
श्रीकृष्णः स परब्रह्म स्वयं श्रीपुरुषोत्तमः।
तस्य भक्तिः प्रकर्तव्या तेन मोक्षो भवेद् ध्रुवः ॥३६॥
श्रवणं कीर्तनं स्मृतिः कृष्णस्याऽङ्गप्रसेवनम्।
पूजनं स्तवनं भृत्यं मैत्र्यं सर्वसमर्पणम् ॥३७॥
एवं तु नवधा योगो भक्तिरूपः सुमुक्तिदः।
धर्मः काष्ठौषधिक्वाथो वैराग्यं तु विरेचनम् ॥३८॥
बोधो रम्योऽवलेहश्च भक्तिस्तत्र रसायनम्।
सन्धानिन्यौषधिर्धर्मो विवेको व्रणहारिणी ॥३९॥
विशल्यकरणी भक्तिर्जीवातुर्विरतिस्तथा।
हरौ स्नेहानुबन्धो यो भूरिसत्कारपूर्वकः ॥४०॥
भक्तिर्बोध्या मोक्षदा सा कर्तव्या सर्वदा जनैः।
चिक्कणत्वयुतस्वान्तःसान्द्रानन्दपरिप्लुतः ॥४१॥
भावः स्नेह स विज्ञेयो हरौ कार्यो हि सर्वदा।
स्वान्तर्वृत्तिरविच्छिन्ना हरौ स्नेहानुबन्धिनी ॥४२॥
भक्तिः प्रेम रतिः सेवा हरौ कार्या हि मुक्तिदा।
वैधी विधिवचोजन्या श्रवणादिनवात्मिका ॥४३॥
माहात्म्यज्ञानसंयुक्तो दृढीयान् सर्वतोऽधिकः।
रागः स्नेहो हरौ भक्तिर्मोक्षदा सर्वथा मता ॥४४॥
भक्तवात्सल्यमर्चाया दंभत्यागोऽनुमोदनम्।
शुद्धचित्तेन तत्पूजा तत्कथाश्रवणादरः ॥४५॥
अंगक्रिया तदर्थे च स्मृतिस्तन्नामकीर्तनम्।
एतेऽष्टावपि भक्तौ स्युरभिन्नाः फलदाः सदा ॥४६॥
गुरुपादाश्रयो दीक्षास्वीकारः सेवनं गुरोः।
विश्वासात्सत्पथे वृत्तिः सद्धर्मपृच्छनं तथा ॥४७॥
भोगत्यागश्च हर्यर्थे वासस्तीर्थादिभूमिषु।
यथापेक्षं व्यवहारो व्रतं हरिदिने तथा ॥४८॥
दैविवृक्षादिसत्कारो दशैते भक्तिवर्धनाः।
पुत्रशिष्याद्यरागश्च कुसंगिसंगवर्जनम् ॥४९॥
महारंभाद्यनुद्योगो दुर्विवादादिवर्जनम्।
हर्यर्थे द्रव्यदानं च शोकमोहादिवर्जनम् ॥५०॥
अन्याऽनुद्वेगकारित्वं देवगुर्वाद्यनिन्दनम्।
सुराऽपराधाऽकर्तृत्वं सुरनिन्दाऽसहिष्णुता ॥५१॥
दशैते साधनीयाः स्युर्भक्तैर्भक्तिविवृद्धये।
अथ कृष्णचिह्नधृतिः कृष्णनामस्मृतिर्हृदि ॥५२॥
पुष्पमालादिसंधृतिर्नृत्यं च दण्डवन्नतिः।
अभ्युत्थानं हरेरग्रे गमने चाऽप्यनुव्रजिः ॥५३॥
प्रदक्षिणं तथा स्तोत्रं सेवनं कीर्तनं जपः।
विज्ञानं स्तोत्रपाठश्च स्वादो नैवेद्यपज्जले ॥५४॥
प्रसादसौरभग्राहः स्पर्शनं चेक्षणं हरेः।
नीराजनं हरेरुत्सवावलोकनमित्यपि ॥५५॥
दयाप्रतीक्षणं ध्यानं स्मरणं दास्यमुत्तमम्।
सखित्वं चात्मदानं च हर्यर्थे चेष्टितं तथा ॥५६॥
प्रेष्ठार्पणं भक्तसेवा शरणे पतनं सदा।
तुलसीशास्त्रसत्तीर्थवैष्णवादिप्रपूजनम् ॥५७॥
यथाधनं तथासेवा वार्तादि साधुभिः सह।
आर्तसेवा जन्ममहो हरेश्चरणसेवनम् ॥५८॥
श्रद्धया भूयसीप्रीतिः शास्त्रार्थास्वादनं परम्।
सत्सु संगः कीर्तनं मे सद्भिः सत्सु सदा स्थितिः ॥५९॥
आत्मनिष्ठेति च चतुश्चत्वारिंशदिमे गुणाः।
भक्त्यात्मका भक्तिपुष्टिकराः स्नेहविवर्धनाः ॥६०॥
सतां संसेवनं कार्थं कृपा प्राप्या सतां सदा।
सद्धर्मेषु परा श्रद्धा हरेर्गुणश्रुतिस्तथा ॥६१॥
प्रेमांकुरोद्भवश्चापि श्रीहर्याश्रय उत्तमः।
हरौ रागाभिवृद्धिश्च हर्यर्चास्फुरणं सदा ॥६२॥
भक्ते कृष्णगुणाऽऽवासः स्थितिर्धर्मे हरेः सदा।
एते दशगुणाः सिद्धास्ततः प्रेमातिवर्धते ॥६३॥
सात्त्विकादिप्रभेदैश्च मृदुमध्याऽधिभेदतः।
अनेके वै भक्तिभेदाः सूक्ष्मा भवन्ति मुक्तिदाः ॥६४॥
अथ प्रेमपराकाष्ठा विधिर्यत्र न विद्यते।
सा तु सर्वप्रमूर्धन्या भक्तिर्भवति शाश्वती ॥६५॥
यावच्छास्त्रं प्रेमतत्त्वं यादृक्स्वभावपोषितम्।
देहिनां प्राकृतभावं तावच्छास्त्रमनन्तकम् ॥६६॥
प्रेमतत्त्वं भिद्यते वै यत्संख्या नहि पार्यते।
तस्माद्भक्तिरसंख्यातभेदा भवति पुष्पिता ॥६७॥
तस्या भक्तिमहादेव्या भुक्तिमुक्त्यादिसिद्धयः।
राज्ञ्याः सदाऽनुवर्तन्ते चेटिका इव तत्पराः ॥६८॥

परार्धगुणितो ब्रम्हानन्दो भक्त्यणुसदृशः ।
भक्त्यानन्दामृताम्भोधौ ब्राह्माण्यपि सुखानि वै ॥६९॥
मग्नस्य गोष्पदायन्ते प्रेमाऽऽनन्दाऽऽप्लुतस्य हि ।
येषां दृढा भवेद् भक्तिः प्रेमरूपा सदा हरौ ॥७०॥
ते स्वप्नेऽपि न पश्यन्ति कीनाशं यमराड्गृहम् ।
कोटिजन्मकृतैः पुण्यैराप्यां भक्तिं समाचरन् ॥७१॥
महापापाऽतिपापाँश्च पुनात्येव यथा हरिः ।
शत्रवो नैव बाधन्ते ग्रहा याम्याश्च राक्षसाः ॥७२॥
भूतप्रेतपिशाचाद्या भक्तिमन्तं हरेर्जनम् ।
भज तं देवप्रवरं भगवन्तं सनातनम् ॥७३॥
त्वत्पृष्टं कथितं सर्वं गच्छ वत्से ! यथासुखम् ।
इत्युक्त्वा च यमो नत्वा विरराम हि पद्मजे ! ॥७४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये सावित्रीकृतशुभाऽशुभकर्मादितत्सम्बन्धिप्रश्नानां यमराजकृतोत्तराणि भगवद्भक्तिप्रकारतन्माहात्म्यादि चेत्यादिनिरूपणनामा सप्तषष्ट्यधिकत्रिशततमोऽध्यायः ॥३६७॥

श्रीनारायण उवाच—

एवमुक्तापि सावित्री न न्यवर्तत पद्मजे ! ।
पुनराह यमं न्याय्यं पातिव्रत्यभरं वचः ॥ १ ॥
त्यक्त्वा क्व यामि कान्तं च त्वां च ज्ञानार्णवं गुरुम् ।
जिज्ञासा जायते प्रष्टुं तन्निवृत्तिं कुरु प्रभो ! ॥ २ ॥
कां कां योनिं याति जीवः कर्मणा केन वा यम ! ।
स्वर्गं वा नरकं वाऽपि मुक्तिर्वा केन कर्मणा ॥ ३ ॥
रोग्यरोगी दीर्घजीवी केनाऽल्पायुश्च कर्मणा ।
सुखी दुःखी विकलांगः काणोऽन्धो बधिरस्तथा ॥ ४ ॥
प्रमत्तः कृपणः क्षिप्तो लुब्धस्तथा च घातकः ।
जायते कर्मणा केन केन सिद्धीर्हि विन्दति ॥ ५ ॥
स्वर्गभोगादिकं केन वैकुण्ठं चामृतं तथा ।
गोलोकं चाऽक्षरं केन सालोक्यादिचतुष्टयम् ॥ ६ ॥
नरकं वा कतिविधं कः कियन्तं तु तिष्ठति ।
केन वा कर्मणा कीदृग्व्याधिर्भवति मानुषे ॥ ७ ॥
वद सर्वं यथा वेत्सि ह्युपकारो भविष्यति ।
इति श्रुत्वा तु सावित्रीं यमः प्राह तदुत्तरम् ॥ ८ ॥
विस्मितः स यमः प्राह कन्ये ! षोडशवत्सरा ।
वयसा त्वं कुतस्त्वेतज्ज्ञानं लब्धवती सुते ! ॥ ९ ॥

मन्ये तां ब्रह्मणः पत्नीं सावित्रीं त्वां समागताम् ।
प्राप्तां तु भूभृता त्वश्वपतिना तपसा पुरा ॥१०॥
ज्ञानं ते पूर्वविदुषां योगिनां ज्ञानिनां यथा ।
यथा श्रीः श्रीपतेरंके लक्ष्मीर्नारायणोरसि ॥११॥
यथा राधा च श्रीकृष्णे भवानी भववामगा ।
धर्मोरसि यथा मूर्तिः सावित्री ब्रह्मवक्षसि ॥१२॥
कर्दमे देवहूतिश्च शतरूपा यथा मनौ ।
अदितिः कश्यपे यद्वद् वशिष्ठेऽरुन्धती यथा ॥१३॥
यथा शची महेन्द्रे च यथाऽहल्या तु गौतमे ।
यथा च रोहिणी चन्द्रे कामदेवे रतिर्यथा ॥१४॥
हुताशने यथा स्वाहा यथा स्वधा च पितृषु ।
यथा दिवाकरे संज्ञा यज्ञे च दक्षिणा यथा ॥१५॥
कृष्णनारायणे लक्ष्मीर्माणिकी पार्वती प्रभा ।
वरुणानी च वरुणे वराहे तु धरा यथा ॥१६॥
कार्तिके देवसेना चालक्ष्मीरुद्दालके यथा ।
यथा पतिव्रतालक्ष्मीः पत्नीव्रते च भूसुरे ॥१७॥
यथा च कंभरालक्ष्मीः कृष्णगोपालवक्षसि ।
यथा जया च ललिताऽक्षराधीशे हरौ तथा ॥१८॥
सौभाग्या सुप्रिया त्वं च भव सत्यवति प्रिये ।
इति तुभ्यं वरो दत्तः प्रसन्नमनसा मया ॥१९॥
वृणु देवि ततोऽन्यच्चाऽपरमभीष्टमर्पये ।
एवं लक्ष्मि ! यमं दृष्ट्वा प्रसन्नं प्राह सा सती ॥२०॥
सत्यवदौरसेनैव पुत्राणां शतकं मम ।
भवेदिति वृणोम्यत्र मच्छ्वशुरस्य चक्षुषी ॥२१॥
राज्यलाभो भवेच्चापि मे भ्रातृशतकं भवेत् ।
समतीते लक्षवर्षे ततः सत्यवता समम् ॥२२॥
हरेर्धाम प्रयास्यामि देहीमं सद्वरं प्रभो ! ।
अन्यजिज्ञासितं सर्वं श्रोतुमिच्छामि तद्वद ॥२३॥
यमः प्राह च तच्छ्रुत्वा सावित्रीं मानयन् बहु ।
सर्वं त्वदीप्सितं देवि ! भविष्यति तथास्त्विति ॥२४॥
अन्यजिज्ञासितं वच्मि कर्मपाकं निशामय ।
यथा वेद्मि च तत्सर्वं कथयामि समासतः ॥२५॥
पृथ्व्यां शुभाऽशुभं कर्म भुंजते मानवास्त्विह ।
सुरा दैत्या दानवाश्च गन्धर्वा राक्षसादयः ॥२६॥
नराश्च कर्मजनका न सर्वे समजीविनः ।
विशिष्टजीविनः सर्वे भुंजते कर्म योनिषु ॥२७॥
विशेषतो मानवाश्च भ्रमन्ति सर्वयोनिषु ।
शुभेन कर्मणा स्वर्गं निरयं त्वशुभेन वै ॥२८॥

राजसेन तु पुण्येन जायते मानवो भुवि ।
सात्त्विकपुण्यपुञ्जेन देवताः संभवन्ति वै ॥२९॥

तामसेन च पापेन राक्षसाद्याः पिशाचकाः ।
भूतप्रेताः पशवश्च पक्षिणो वृक्षवल्लयः ॥३०॥

कीटाः पतंगाः सर्पाश्च सरीसृपाश्च जन्तवः ।
जायन्ते दुःखबहुलाश्चतुरशीतियोनिषु ॥३१॥

ऊर्ध्वं सत्त्वविशालाश्च मध्ये भवन्ति राजसाः ।
निकृष्टयोनिजाः सर्वे जायन्ते तामसा ह्यधः ॥३२॥

पुण्येन जायते स्वर्गं नरकं पापमात्रतः ।
मुक्तिर्भक्त्या कृष्णनारायणे स्नेहप्रसेवया ॥३३॥

रोगी कुकर्मणा जीवश्चाऽरोगी शुभकर्मणा ।
दीर्घजीवी च क्षीणायुः सुखी दुःखी शुभाऽशुभात् ॥३४॥

अन्धादयश्चांगहीनाः कुत्सितेन तु कर्मणा ।
अन्यनेत्रविनेष्टाऽन्धः काणो भवति मानवः ॥३५॥

अन्यनिन्दाश्रुतिलुब्धो बधिरो जायते ध्रुवम् ।
अन्योद्वेगकरश्चात्र प्रमत्तो जायते सदा ॥३६॥

अन्यद्रव्यापहर्ता च दरिद्रो निर्धनो भवेत् ।
अतिघृणस्तिरस्कर्ता क्षिप्तो भवति सर्वथा ॥३७॥

अप्राप्तभोगसम्पत्तिश्चान्यद्द्रव्यादि लुण्टति ।
जायतेऽयं घातकश्च लुब्धकश्चातिपापवान् ॥३८॥

ऋणाऽनिवर्तको जन्म गृह्णात्येव न संशयः ।
सिद्ध्यादिकमवाप्नोति सर्वोत्कृष्टेन कर्मणा ॥३९॥

स्वर्गभोगादिकं सर्वं दानेन लभते जनः ।
विष्णुभक्त्या तु वैकुण्ठं विद्यया चामृतं पदम् ॥४०॥

कृष्णभक्त्या तु गोलोकं परया विद्ययाऽक्षरम् ।
हरेः कृपया प्राप्येत सालोक्यादिचतुष्टयम् ॥४१॥

नरकं बहुधा प्रोक्तं कर्मणां बहुविस्तरात् ।
पापानां चाप्यसंख्यानां नरकाऽसंख्यताऽस्ति वै ॥४२॥

यावत्पापं तत्र पापी तिष्ठते तत्क्षये तु न ।
पराऽऽन्तरप्रदाहेन परेषां दुःखदत्वतः ॥४३॥

व्याधयोऽभिभवन्त्येनं परदुःखप्रदं जनम् ।
सामान्यं कथितं सर्वं विशेषं शृणु सुन्दरि ! ॥४४॥

दुर्लभा मानवी जातिः सर्वजातिषु भूस्तरे ।
विप्रः साधुश्च साध्व्यश्च श्रेष्ठास्ते भक्तिमज्जनाः ॥४५॥

सकामो भक्तिमान् कर्मयोगी भवति वै पुनः ।
निष्कामो भक्तिमान् ब्रह्ममुक्तः सम्पद्यते परे ॥४६॥

पुनरागमनं नास्ति तेषां निष्कामकर्मिणाम् ।
कृष्णभक्तास्तु गोलोकं यान्ति दिव्यद्विहस्तिनः ॥४७॥

नारायणार्चका यान्ति वैकुण्ठं वै चतुःकराः ।
भूमभक्ता अमृताख्यं यान्ति सहस्रबाहवः ॥४८॥

तीर्थस्थिता जना यान्ति सत्यलोकं च तापसाः ।
सूर्यभक्ता रविं यान्ति कैलासं शिवभावुकाः ॥४९॥

यज्ञनिष्ठाः स्वर्गलोकं शक्रत्वं वेष्टभावनाः ।
तत्तल्लोकं प्रयान्त्येव पुनरायान्ति कर्मणा ॥५०॥

हरिभक्तास्तु निष्कामा हरेर्लोकं प्रयान्ति हि ।
यस्मान्न पुनरावृत्तिरक्षरं तत्पदं परम् ॥५१॥

स्वधर्मरहिता भ्रष्टाचारा यान्त्यधमां गतिम् ।
नारकीं यातनां ते च भुंजते तिर्यगात्मसु ॥५२॥

स्वधर्मनिरताः सर्वे पृथ्व्यां सुफलभागिनः ।
स्वधर्मरहिताः सर्वे निरयान् यान्ति दारुणान् ॥५३॥

कन्यादाता चन्द्रलोकं यावदिन्द्राश्चतुर्दश ।
याति सालंकृतादानाद् द्विगुणं फलमुच्यते ॥५४॥

गव्यं च रजतं भार्यां वस्त्रं सस्यं फलं जलम् ।
ये ददति ते प्रयान्ति तत्तत्समृद्धां दिवं ध्रुवाम् ॥५५॥

कालं तु सुचिरं स्थित्वा पृथ्वीमायान्ति वै पुनः ।
सुवर्णं गां च ताम्रादि ददत्यत्र तु ये जनाः ॥५६॥

वसन्ति सूर्यलोके ते वर्षाणामयुतं सति ! ।
भूमिं धान्यानि ददति श्वेतद्वीपे वसन्ति ते ॥५७॥

गृहदानप्रदाता च सुरलोकं हि विन्दति ।
गृहरेणुप्रमाणाब्दवासस्तत्र ध्रुवो मतः ॥५८॥

यस्मै यस्मै तु देवाय यो ददाति गृहं जनः ।
स याति तस्य लोकं तु रेणुमानाब्दमुत्तमम् ॥५९॥

सौधे चतुर्गुणं पुण्यं पूर्ते शतगुणं फलम् ।
प्रकृष्टेऽष्टगुणं पुण्यं दिव्ये दिव्यफलं मतम् ॥६०॥

तडागकर्ता वर्षाणामयुतं जनलोकगः ।
वाप्यां फलं शतगुणं सेतुबन्धे सहस्रकम् ॥६१॥

धनुश्चतुःसहस्रेण दैर्घ्यमानेन वापिका ।
दशवापीसमा कन्या फलं ददाति पात्रके ॥६२॥

द्विगुणं च फलं तत्र यदि सालंकृतां ददेत् ।
वापीकूपतडागादेः पंकोद्धारे कृते फलम् ॥६३॥

अश्वत्थवृक्षसेवी च समारोपक इत्यपि ।
प्रयाति तपसो लोकं वर्षाणामयुतं परम् ॥६४॥

पुष्पोद्यानप्रदो वर्षायुतं ध्रुवे वसेत् सति ! ।
विमानदो विष्णुलोके वसेन्मन्वन्तरं परम् ॥६५॥

यानवाहनशिबिकारथदाता चतुर्गुणम् ।
फलं तु लभते पात्रे वैष्णवे सुखदं परम् ॥६६॥

दोलाद्यर्पयिता यायाद् विष्णुलोकं मन्वन्तरम् ।
राजमार्गं सौधयुक्तं करोति यः स ऐन्द्रकम् ॥६७॥
पदं वर्षायुतं भुक्त्वा पृथ्व्यां याति शुभं गृहम् ।
दत्तं दात्रे समायाति न दत्तं नोपतिष्ठति ॥६८॥
भुक्त्वा स्वर्गादिकं सौख्यं पुनर्भूमौ प्रयान्ति वै ।
लभेतोत्तमभवने जन्मोत्तमजनेष्विह ॥६९॥
विप्राश्च रक्षका यद्वोपार्जकाः सेवकाश्च वा ।
यथाकर्म भवन्त्येव भूमौ तद्वच्च सर्वदा ॥७०॥
अत्राऽन्यत्र कृतं सर्वं भोक्तव्यं भवति ध्रुवम् ।
इति ते कथितं सर्वं गच्छ सावित्रि ! मा चिरम् ॥७१॥
इत्युक्त्वा मौनमास्थाय यमश्चाग्रे ययौ शनैः ।
सावित्र्यपि शनैः पश्चाच्चचाल यमवाटगा ॥७२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये कर्मानुरूपशुभाशुभस्थानगतिः, स्वस्याः पुत्रशतं श्वशुरस्य चक्षुषी, स्वस्या भ्रातृशतकं सत्यवतो लक्षाब्दायुरितिवरप्राप्तिश्चेत्यादिनिरूपणनामाऽष्टषष्ट्यधिकत्रिशततमोऽध्यायः ॥३६८॥

श्रीनारायण उवाच—

सावित्रीं पृष्ठमायान्तीं दृष्ट्वा यमस्तु विस्मितः ।
पुनर्नत्वा सतीं प्राह किमिच्छसि वदाऽत्र मे ॥ १ ॥
इति श्रुत्वा यमवाक्यं सावित्री पुनरेव तम् ।
पप्रच्छ तं शृणु लक्ष्मि ! कथयामि निबोध मे ॥ २ ॥
प्रयान्ति स्वर्गमन्यं च लोकं येन विशेषतः ।
कर्मणा पुण्यवन्तस्तु तद्वदेति समासतः ॥ ३ ॥
कृतं सावित्रिकाप्रश्नं यमः प्राह तदुत्तरम् ।
अन्नदानप्रदाताऽन्नवर्षाण्यैन्द्रे महीयते ॥ ४ ॥
नात्र पात्रपरीक्षा च न कालनियमस्तथा ।
आसनस्य प्रदाता च देवविप्रादये जनः ॥ ५ ॥
वर्षाणामयुतं वह्निलोके सम्मोदते सुखी ।
यावन्ति तस्य सूत्राणि तावद्वर्षाऽयुतं दिवि ॥ ६ ॥
देवाय गां च विप्राय दद्यात्पयस्विनीं तु यः ।
वैकुण्ठे गोलोमसंख्यायुगानि स महीयते ॥ ७ ॥
चतुर्गुणं पुण्यदिने तीर्थे शतगुणं फलम् ।
दानं नारायणक्षेत्रे फलं कोटिगुणं भवेत् ॥ ८ ॥
विप्राय हरये गोदो यज्ञकार्यार्थिने तथा ।
वर्षाणामयुतं स्वर्गे चन्द्रलोके प्रमोदते ॥ ९ ॥
वत्सं प्रसूयमानां गामुभयतोमुखीं ददेत् ।
वैकुण्ठे तल्लोममानसमाः प्रमोदते सुखी ॥१०॥
शालग्रामं सभूषादि दद्यात् तत्पूजकाय वै ।
वैकुण्ठे मोदते दाता यावच्चन्द्रदिवाकरौ ॥११॥
छत्रदाताऽयुतसमा मोदते वरुणालये ।
पादुकादोऽयुतसमा वायुलोके महीयते ॥१२॥
शय्यादो मोदते चान्द्रे लोके चन्द्रायुरेव सः ।
विप्राय हरये दीपदाता तैलघृतप्रदः ॥१३॥
यावन्मन्वन्तरं सोपि ब्रह्मलोके महीयते ।
दिव्यदृष्टिर्भवेत्तस्य चान्धता नैव जायते ॥१४॥
गजदाता वसेदिन्द्रस्याऽर्धासने निरन्तरम् ।
अश्वदाता वारुणे वै कल्पस्थायी भवेत् सति ! ॥१५॥
शिबिकादो विष्णुलोके मन्वन्तरं महीयते ।
चामरव्यजनप्रदो वायुलोके महीयते ॥१६॥
वर्षाणामयुतं धान्यप्रदः कणसमा वसेत् ।
विष्णुलोके वसत्येषः श्रीहरेर्नामजापकः ॥१७॥
पलायते महामृत्युश्चिरजीवी स जायते ।
आन्दोलयेद्धरिं यस्तु प्रेंखायां मानवो भुवि ॥१८॥
सद्दोलां कारयेद्यस्तु व्रतोत्सवमहोत्सवे ।
जीवन्मुक्तः सुखं भुक्त्वा यात्यन्ते विष्णुधाम सः ॥१९॥
वैकुण्ठे निवसेत्तत्र शतमन्वन्तरावधिम् ।
फलमुत्तरफाल्गुन्यां ततोपि द्विगुणं भवेत् ॥२०॥
भवेत् कल्पान्तजीवी सः सर्वसमृद्धिगुणालयः ।
तिलदस्तिलवर्षाणि मोदते विष्णुमन्दिरे ॥२१॥
ताम्रपात्रे तिलदाने लभेद्वै द्विगुणं फलम् ।
कन्यादाता चन्द्रलोके कल्पमेकं वसेद् ध्रुवम् ॥२२॥
दासीदाता तु गान्धर्वेऽयुतवर्षाणि मोदते ।
जन्मसहस्रं सौभाग्ययुक्तां सतीं च विन्दति ॥२३॥
फलद्रुदः फलसमाः शक्रलोके महीयते ।
पृथ्व्यां च सुतवान् श्रेष्ठी सुन्दरीसहितो भवेत् ॥२४॥
फलदाता चिरं स्वर्गे वसत्येव सुखावहम् ।
द्रव्यसस्यगृहदाता कुबेरभवने वसेत् ॥२५॥
मन्वन्तरावधिं पश्चाद्धनवान् जायते भुवि ।
पुण्यक्षेत्रे पुण्यपात्रे ससस्यक्षेत्रदः सति ! ॥२६॥
वैकुण्ठे मोदते मन्वन्तरशतं शतं ततः पुनः ।
भुवि भूयान् भवत्येव श्रीपुत्रधनवांस्तथा ॥२७॥
नारीगोमान् सुखी स्याच्च जन्मनां शतकं परम् ।
सप्रजं श्रेष्ठभूमिं च ग्रामं दद्यात्तु शार्ङ्गिणे ॥२८॥

लक्षमन्वन्तरं दाता वैकुण्ठे स महीयते ।
पृथ्व्यां लक्षग्रामराजा लक्षजन्मसु जायते ॥२९॥
सप्रजं सुप्रकृष्टं च सस्येक्ष्वादिसमन्वितम् ।
वापीकूपयुतं क्षेत्रं नगरं च ददाति यः ॥३०॥
महीयते स वैकुण्ठे दशलक्षेन्द्रजीवनम् ।
नियुतपत्तनाऽधीशो राजेन्द्रो जायते भुवि ॥३१॥
नगराणां शतकं च देशं ददाति विष्णवे ।
महीयते स वैकुण्ठे कोटिमन्वन्तरावधिम् ॥३२॥

ततो जम्बूद्वीपपतिर्भवत्येव न संशयः ।
मही तं न जहात्येव जन्मनां कोटिमेव वै ॥३३॥
कल्पान्तजीवी च भवेत् राजराजेश्वरो महान् ।
स्वाधिकारप्रदाता च फलं चतुर्गुणं लभेत् ॥३४॥
जम्बूद्वीपप्रदाता च फलं दशगुणं लभेत् ।
सप्तद्वीपमहीदातुः सर्वतीर्थानुसेविनः ॥३५॥
सर्वेषां तपसां कर्तुः सर्वोपवासकारिणः ।
सर्वान्यदानदातुश्च सर्वसिद्धिमतस्तथा ॥३६॥

अस्त्येव पुनरावृत्तिर्न भक्तस्य हरेरहो ।
असंख्यब्रह्मणां पातं पश्यन्ति वैष्णवाः सति ! ॥३७॥
गोलोकस्थाश्च वैकुण्ठवासिनोऽक्षरधामगाः ।
परधामस्थिताश्चापि पश्यन्त्येतां पुनर्गतिम् ॥३८॥
हरेर्मन्त्रोपासकन्तु विहाय मानुषीं तनुम् ।
हरितुल्यो दिव्यरूपो भूत्वा याति हरेः पदम् ॥३९॥
गोलोकस्थाः कृष्णभक्ता वैकुण्ठस्थाश्च वैष्णवाः ।
लब्ध्वा कृष्णस्य सारूप्यं नारायणस्य चापि ते ॥४०॥
तयोः सेवां प्रकुर्वन्ति ह्यसंख्यं प्राकृतं लयम् ।
देवाश्चेशाश्च नश्यन्ति सिद्धा विश्वानि यानि च ॥४१॥

हरेर्भक्ता न नश्यन्ति जन्ममृत्युजराहराः ।
कार्तिके हरये वृन्दातुलसीपत्रदायकः ॥४२॥
युगं पत्रप्रमाणं तु मोदते हरिमन्दिरे ।
हरये घृतदीपं च कार्तिके यो ददाति वै ॥४३॥
पलप्रमाणं वर्षं स मोदते हरिमन्दिरे ।
हरीच्छया यदि याति सृष्टौ भागवतो भवेत् ॥४४॥
महाधनाढ्यश्चक्षुष्मान् दीप्तिमान् भक्तिकारकः ।
आचार्यो वाऽवतारो वा तदंशो मुक्तिदो भवेत् ॥४५॥

माघे प्रातस्तु गंगादितीर्थस्नायी हरेर्गृहे ।
युगषष्टिसहस्राणि मोदते स हरीच्छया ॥४६॥
ब्रह्माण्डेषु देशिकेन्द्रो भक्तो जितेन्द्रियो भवेत् ।
माघस्नायी तु गंगायां प्रयागे प्रातरेव यः ॥४७॥

वैकुण्ठे मोदते सोपि लक्षमन्वन्तरावधिम् ।
नारायणेहया सृष्टौ देशिकेन्द्रो भवेद्धि सः ॥४८॥
मानवीं स तनुं त्यक्त्वा पुनर्धाम प्रयाति सः ।
नास्ति पुनरावृत्तिश्च हरेर्धामगतस्य वै ॥४९॥
करोति स हरेर्दास्यं लब्ध्वा सारूप्यमित्यथ ।
नित्यस्नायी तु गंगायां पदे पदेऽश्वमेधजम् ॥५०॥
फलं याति च पूतः स सूर्यवज्जायते सति ! ।
तस्यैव पादरजसा सद्यः पूता वसुन्धरा ॥५१॥

मोदते स तु वैकुण्ठे यावच्चन्द्रदिवाकरौ ।
नारायणेहया पृथ्व्यां तपस्वी देशिको भवेत् ॥५२॥
ग्रीष्मादौ जलदाता तु वैकुण्ठं याति कल्पकम् ।
वैशाखे हरये यस्तु चन्दनादि ददाति वै ॥५३॥
युगषष्टिसहस्राणि मोदते विष्णुमन्दिरे ।
वैशाखे सक्तुदाता च मोदते विष्णुमन्दिरे ॥५४॥
सक्तुरेणुप्रमाणाब्दं ततो विष्णोस्तु वाञ्छया ।
आचार्यो भवति लोके तपस्व्युद्धारकोत्तमः ॥५५॥

करोति यः कृष्णजन्माष्टमीं भाद्राऽसिते दले ।
शतजन्मकृतपापाच्छुद्धो भवति तत्क्षणात् ॥५६॥
गोलोके मोदते कृष्णेच्छया कार्ष्णो भवेत्तथा ।
कृष्णनारायणजन्माष्टमीं कार्तिककृष्णके ॥५७॥
दले करोति यो भक्त्या हरेर्धाम प्रयाति सः ।
अनन्तसमयं कृष्णनारायणस्य सेवकः ॥५८॥
स चाश्नुते सर्वकामान् कृष्णनारायणाऽर्पितान् ।
शिवरात्रिव्रतकर्ता बिल्वपत्रं ददाति यः ॥५९॥
युगं पत्रप्रमाणं च मोदते शिवमन्दिरे ।
विद्यावान् पुत्रवान् श्रीमान् प्रजावान् भूमिमाँस्तथा ॥६०॥

शिवेच्छया भवत्येव सप्तमन्वन्तरावधिम् ।
महासृष्टौ सुखी भूत्वा यायाच्च शिवमन्दिरम् ॥६१॥
चैत्रे माघेऽर्चयेच्छंभुं पुरः कुर्यात्तु नर्तनम् ।
मासं वाऽप्यर्धमासं वा दश सप्तदिनानि वा ॥६२॥
दिनमानं युगं सोपि शिवलोके महीयते ।
श्रीरामनवमीं भक्तो यः करोति व्रतं व्रती ॥६३॥
सप्तमन्वन्तरं यावन्मोदते रामधामनि ।
पुना रामस्य भक्तो वै भूत्वाऽऽचार्यपदे स्थितः ॥६४॥

रामभक्त्या प्रयात्येव वैकुण्ठं स द्वितीयकम् ।
शरदृतुपूर्णिमायां पूजां हरेर्हरस्य च ॥६५॥
बहूपचारसम्पन्नां यः करोति प्रभक्तराट् ।
नैवेद्यैरुपहारैश्च धूपदीपादिभिस्तथा ॥६६॥

नृत्यगीतादिभिर्वाद्यैर्नानाकौतुकमंगलैः ।
हरेः शंभोर्वसेल्लोके सप्तमन्वन्तरावधिम् ॥६७॥
पुनः स निर्मलो भक्तो भूत्वा श्रियमवाप्नुयात् ।
महाप्रभावयुक्तश्च गजवाजिसमन्वितः ॥६८॥
राजराजेश्वरः पुत्रपौत्रादिमान्न संशयः ।
भाद्रशुक्लाष्टमीं प्राप्य महालक्ष्मीं समर्चयेत् ॥६९॥
षोडशवस्तुभिर्भक्त्या वैकुण्ठे याति कल्पकम् ।
पुनः पृथ्व्यां राजराजेश्वरो भवेद्धि सात्त्वतः ॥७०॥
कार्तिकीपूर्णिमायां यो रासमण्डलमाचरेत् ।
गोपीर्गोपान् शतं द्वेधा शतं कृत्वा सुवर्णजम् ॥७१॥
राधाकृष्णं कारयित्वा पूजयेदुपचारकैः ।
यथालब्धैर्बहुविधैर्गोलोकं याति पूजकः ॥७२॥
ब्रह्मणो वयसा तत्र स्थित्वा सृष्टौ प्रयाति सः ।
कृष्णभक्तिं पुनः कृत्वा लब्ध्वा मन्त्रं हरेस्ततः ॥७३॥
कृष्णसारूप्यमासाद्य पार्षदो जायते तु सः ।
गोलोके वर्तते नित्यं पुनरावृत्तिवर्जितः ॥७४॥
एकादशीव्रती याति यावद्वै वेधसो वयः ।
वैकुण्ठं च ततः क्ष्मायामागत्य पुनरेव सः ॥७५॥
हरिभक्तः पुनर्याति वैकुण्ठं न पतेत्पुनः ।
भाद्रशुक्ले द्वादश्यां यः शक्रं संपूजयेज्जनः ॥७६॥
षष्टिवर्षसहस्राणि शक्रलोके महीयते ।
रविवारेऽर्कसंक्रान्त्यां सप्तम्यां शुक्लपक्षके ॥७७॥
हविष्यान्नप्रदाताऽर्कलोकं प्रयाति कल्पकम् ।
पुनः पृथ्व्यां समागत्य नीरोगी श्रीयुतो भवेत् ॥७८॥
ज्येष्ठशुक्लचतुर्दश्यां सावित्रीं त्वां प्रपूजयेत् ।
मोदते स ब्रह्मलोके सप्तमन्वन्तरावधिम् ॥७९॥
पुनः पृथ्व्यां श्रीसमेतो ज्ञानसम्पत्तियुग् भवेत् ।
माघशुक्लस्य पञ्चम्यां पूजयेद् यः सरस्वतीम् ॥८०॥
महीयते स वैकुण्ठे कल्पमेकं पुनः कविः ।
गोसुवर्णप्रदाता गोलोमद्विगुणं हरेः ॥८१॥
वैकुण्ठे मोदते पश्चाद् विष्णुभक्तो भवेत् भुवि ।
राजराजेश्वरो गोमान् विद्याज्ञानसुतादिमान् ॥८२॥
भोजयेद् यः सतः साधून् साध्वीर्विप्रांस्तथाऽतिथीन् ।
भोक्तुलोमप्रमाणाब्दं मोदते विष्णुमन्दिरे ॥८३॥
अत्रागत्य सुखी श्रीमांश्चिरजीवी पराक्रमी ।
यो ददाति हरेर्नाम विष्णुलोके महीयते ॥८४॥
नामकोटिं जपन् बोध्यो जीवन्मुक्तो न संशयः ।
वैकुण्ठे विष्णुसायुज्यं प्राप्नोति शाश्वतं हि सः ॥८५॥
शिवार्चकः शिवं याति बाणरेणुप्रमाणकम् ।
युगाऽयुतं तु कैलासे स्थित्वा सम्राट् क्षितौ भवेत् ॥८६॥
शालग्रामार्चको भक्तो प्रसादस्य प्रभक्षकः ।
महीयते स वैकुण्ठे यावद्वै ब्रह्मणः शतम् ॥८७॥
पुनः पृथ्व्यां नृपो भूत्वा वैकुण्ठं याति नो पतेत् ।
तपोव्रताद्यनुष्ठाता वैकुण्ठं याति कल्पकम् ॥८८॥
भूत्वा पृथ्व्यां स राजेन्द्रस्ततो मुक्तो भवेद्धि सः ।
अश्वमेधक्रतुकारी शक्रस्याऽर्धासने वसेत् ॥८९॥
अश्वरोमप्रमाणाब्दं राजसूये चतुर्गुणम् ।
नरमेधेऽश्वमेधार्धं गोमेधे तु तथादशम् ॥९०॥
पुत्रेष्टौ तु तदर्धं स्याल्लांगुलेष्टौ गोमेधजम् ।
विप्रेष्टौ वृद्धियागे च फलं गोमेधजं भवेत् ॥९१॥
पद्मेष्टौ तु तदर्धं च विशोकेष्टौ विशोकजम् ।
विजयेष्टौ पद्मसमं प्राजापत्येऽपि तत्समम् ॥९२॥
ऋद्धियागे महैश्वर्यं विष्णुयागे तु वैष्णवम् ।
पदं पुण्यं लभेद् भक्तो विष्णुलोकं च शाश्वतम् ॥९३॥
विष्णुयज्ञः प्रधानोऽस्ति सर्वयज्ञेषु सुन्दरि ! ।
विष्णुयज्ञात्परो यज्ञो नास्ति श्रेष्ठफलप्रदः ॥९४॥
तत्कर्ता बहुकल्पान्तजीवी मुक्तो भवेदिह ।
ज्ञानेन तेजसा चैव विष्णुतुल्यो भवेदपि ॥९५॥
अश्वमेधशतेनैव शक्रत्वं प्राप्यते दिवि ।
सहस्रेण विष्णुपदं संप्राप पृथुभूपतिः ॥९६॥
तीर्थयज्ञतपोवेदव्रतानां फलतोऽधिकम् ।
मुक्तिदं श्रीकृष्णनारायणपादाब्जसेवनम् ॥९७॥
कृष्णनारायणस्यैव वर्णनं ध्यानमर्चनम् ।
कीर्तनं भजनं स्तोत्रं स्मरणं वन्दनं जपः ॥९८॥
तत्पादामृतनैवेद्यादनं सर्वेप्सितप्रदम् ।
भज त्वं स्वामिनं कृष्णनारायणं परात्परम् ॥९९॥
गृहाण च पतिं वत्से ! सुखं गच्छ स्वमन्दिरम् ।
इत्युक्त्वा मौनमास्थाय यमस्तस्थौ हि पद्मजे ! ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये सावित्रीपृष्ठकर्मफलप्रश्नानां यमकृतानि बहुविधफलोत्तराणि चेत्यादिनिरूपणनामैकोनसप्तत्यधिकत्रिशततमोऽध्यायः ॥३६९॥

श्रीनारायण उवाच—

हरेर्भक्तेर्महिमानं श्रुत्वा सती यमं पुनः ।
पप्रच्छ केन विधिना भजनीयो हरिः स्वयम् ॥ १ ॥

यमः श्रुत्वा तु सावित्रीं प्राह रीतिं सुमोक्षदाम् ।
शृणु लक्ष्मि ! कथयामि यथा प्राह सतीं यमः ॥ २ ॥
प्रातरुत्थाय तु कृष्णनारायणं हृदि स्मरेत् ।
मूर्तिं ध्यायेत् सौम्यरूपां चिन्तयेत्तु पुनः पुनः ॥ ३ ॥
स्नाने शौचे क्रियायां च बाह्ये चान्तरकर्मणि ।
भोज्ये विहारे शयने गृहकार्ये हरिं स्मरेत् ॥ ४ ॥
श्रद्धया परया तत्र हरौ सर्वेन्द्रियाणि वै ।
तथाऽन्तःकरणान्येवं योजयेच्छ्रीहरौ मुदा ॥ ५ ॥
पाने निषदने स्वप्ने निद्रायां जाग्रति क्रमे ।
शुभेऽशुभे तथा कार्ये स्मरणीयो हरिः सदा ॥ ६ ॥
जिह्वा तत्कीर्तनं कुर्यात्कर्णस्तच्छ्रवणं चरेत् ।
नेत्रं तद्दर्शनं कुर्याद् घ्राणं तद्गन्धमाप्नुयात् ॥ ७ ॥
चर्म तत्स्पर्शनं कुर्यात्करस्तत्पादसेवनम् ।
पादस्तन्मन्दिरं गच्छेद् वाणी तद्भजनं चरेत् ॥ ८ ॥
मलमूत्रेन्द्रियं विघ्ननाशार्थं गुणतां व्रजेत् ।
आनन्दं श्रीहरेर्लब्ध्वा श्रीहरेर्मननं चरेत् ॥ ९ ॥
निर्णयं माननं चापि चिन्तनं श्रीहरेश्चरेत् ।
एवं सर्वं हरेरेव कुर्यान्नान्यस्य कस्यचित् ॥१०॥
न स्वार्थं न परार्थं च कुर्याद्धर्यर्थमेव वै ।
तथा कृत्वा नचिरेण हरेर्धामगतिर्भवेत् ॥११॥
इत्युक्ता सा तु सावित्री यमं भक्तवरं परम् ।
ज्ञात्वा यमाष्टकं प्राह शृणु लक्ष्मि ! वदामि ते ॥१२॥
"सूर्यनारायणस्तीर्थे पुष्करे तपसा पुरा ।
धर्मांशं यं सुतं प्राप धर्मराजं नमाम्यहम् ॥१३॥
सर्वेषां प्राणिनां कर्मभोगान्तं संविधाय यः ।
शान्तिं करोति यो देवः शमनाय तु ते नमः ॥१४॥
कृतानां कर्मणां त्वन्तं न्यायरीत्या करोति यः ।
सर्वेषां देहिनां सोऽयं तं कृतान्तं नमाम्यहम् ॥१५॥
पापिनां दण्डकर्ता यो दण्डं बिभर्ति शुद्धिदम् ।
शास्त्रे तस्मै नीतियुजे दण्डिने ते नमो नमः ॥१६॥
सर्वेषां वस्तुकार्याणां परिच्छेदं करोति यः ।
सर्वायुःकलनं देवं कालरूपं नमाम्यहम् ॥१७॥
जीवान् दण्डप्रदानैर्यो यमयत्येव सर्वथा ।
कर्मानुरूपफलदस्तं यमं प्रणमामि वै ॥१८॥
यथा कर्म तथा दाता न रागाच्च च रोषतः ।
तस्माच्छुद्धिकरं मित्रं सर्वमित्रं नमामि च ॥१९॥
कृष्णनारायणमूर्तेः समुत्पन्नस्तु यः पुरा ।
ब्रह्मणोंऽशस्ततो जातस्तं ब्राह्मं प्रणमामि च" ॥२०॥
इत्युक्त्वा तं प्रणनाम यमस्तुष्टो बभूव ह ।
यमाष्टकं पठतस्तु भवेन्नैव यमाद्भयम् ॥२१॥
कायव्यूहेन च शुद्धिः कर्मणां तस्य जायते ।
मुच्यते यमपाशाच्च सतीं प्राहेति धर्मराट् ॥२२॥
यमस्तस्यै कृष्णनारायणमन्त्रं प्रदाय च ।
'ओं श्रीकृष्णनारायणं प्रणमामि' त्रिवारकम् ॥२३॥
कर्माऽशुभविपाकं च तामुवाच यमः स्वयम् ।
कुकर्मणा जनो याति नरकान् बहुदारुणान् ॥२४॥
नरकाणां तु कुण्डानि सन्ति नानाविधानि च ।
विस्तृतानि गभीराणि भयक्लेशकराणि हि ॥२५॥
षडशीतिश्च कुण्डानि घोराणि कुत्सितानि च ।
संयमन्यां प्रविद्यन्ते तानि निबोध नामतः ॥२६॥
वह्निकुण्डं तप्तकुण्डं क्षयकुण्डं भयानकम् ।
विट्कुण्डं मूत्रकुण्डं च श्लेष्मकुण्डं तु दुःसहम् ॥२७॥
गरकुण्डं दाहकुण्डं वसाकुण्डं तथा महत् ।
शुक्रकुण्डमसृक्कुण्डमश्रुकुण्डं च कुत्सितम् ॥२८॥
मलकुण्डं वीर्यकुण्डं रजःकुण्डं विगन्धकृत् ।
कर्णविट्कुण्डमुग्रं च नखकुण्डं च दुःखरम् ॥२९॥
मज्जाकुण्डं मांसकुण्डमस्थिकुण्डं च दुःखदम् ।
लोमकुण्डं क्लेशकुण्डं ताम्रलोहप्रकुण्डकम् ॥३०॥
तीक्ष्णकण्टककुण्डं च विषकुण्डं च दाहकम् ।
घर्मकुण्डं तप्तसुराकुण्डं वृश्चिककुण्डकम् ॥३१॥
तप्ततैलप्रकुण्डं च दन्तकुण्डं च विघ्नदम् ।
कृमिकुण्डं पूयकुण्डं सर्पकुण्डं भयावहम् ॥३२॥
दंशमशककुण्डं च वज्रदंष्ट्राप्रकुण्डकम् ।
शरकुण्डं शूलकुण्डं खड्गकुण्डं तु वैशसम् ॥३३॥
गोधाकुण्डं नक्रकुण्डं काककुण्डं महाभयम् ।
घृष्टिकुण्डं चूर्णकुण्डं बन्धकुण्डं निराश्रयम् ॥३४॥
तप्तपाषाणकुण्डं च तीक्ष्णग्रावाग्रकुण्डकम् ।
लालाकुण्डमसिकुण्डं चूर्णकुण्डं च मर्दनम् ॥३५॥
चक्रकुण्डं वज्रकुण्डं कूर्मकुण्डं महोल्बणम् ।
ज्वालाकुण्डं भस्मकुण्डं पूतिकुण्डं भयावहम् ॥३६॥
तप्तसूर्मीमसिपत्रं क्षुरधारं सुचीमुखम् ।
कृकलासप्रकुण्डं च जगदंशं चिपीटकम् ॥३७॥
कुंभीपाकं कालसूत्रमधःकन्धरसुप्रकम् ।
पांशुभोज्यं पाशकण्ठं शूलप्रोतं सुकीलकम् ॥३८॥
उल्कामुखं त्वन्धकूपं वेधनं दण्डताडनम् ।
जालबन्धं देहचूर्णं दलनं शोषणंकरम् ॥३९॥

सर्पज्वालामयं क्ष्वेडधूम्रान्धं नागपाशनम् ।
द्वैधीभावप्रकुण्डं च लावणं कुण्डमित्यपि ॥४०॥
भृगुप्रपातनं चापि वैतरणीप्रपातनम् ।
चर्मोत्कर्तनकुण्डं च भ्राष्ट्रकटाहमित्यपि ॥४१॥
कुण्डान्येतानि सावित्रि ! पापानां शोधकानि वै ।
पापिनां दुःखदान्येव रक्षितानि यमानुगैः ॥४२॥
दण्डहस्तैः शूलपाशशक्तितोमरहस्तकैः ।
मदोन्मत्तैस्तामसैश्च निर्दयैस्ताम्रपिंगलैः ॥४३॥
नानारूपधरैः सर्वाऽधृष्यैर्हदृश्यैस्तु पापिनाम् ।
पुण्यकृतामदृश्यैश्च धार्मिकाणां च योगिनाम् ॥४४॥
शृणु केषां कुत्र वासो दण्डरूपोऽस्ति कुण्डके ।
कटुवाण्या खलत्वेन दग्धान् करोति बान्धवान् ॥४५॥
गात्रलोमप्रमाणाब्दं वह्निकुण्डं प्रयाति सः ।
दग्ध्वा वह्नौ पातकानि लभेज्जन्मत्रयं पशोः ॥४६॥
गृहाऽऽगतातिथिं यो न भोजयेत् स्वाश्रितं तथा ।
लोममानसमास्तप्तकुण्डे स्थित्वा ततः स वै ॥४७॥
उष्णभूमौ मरौ देशे पक्षी स्यात्सप्तजन्मसु ।
रविवाराऽर्कसंक्रान्त्याममायां श्राद्धवासरे ॥४८॥
व्रते क्षारेण वस्त्रस्थकीटानां नाशकस्तु यः ।
क्षारकुण्डं स वै याति सूत्रमानाब्दमेव ह ॥४९॥
व्रजेच्च राजकीं योनिं सप्तजन्मसु सुन्दरि ! ।
स्वदत्तां परदत्तां च जीविकां तु हरेद्धि यः ॥५०॥
षष्टिवर्षसहस्राणि विट्कुण्डं तु प्रयाति सः ।
षष्टिवर्षसहस्राणि विड्भोजी विट्कृमिस्ततः ॥५१॥
तडागं नाशयेद् यस्तु मूत्रकुण्डं प्रयाति सः ।
तद्रेणुमानवर्षं च मूत्रपायी ततो भुवि ॥५२॥
सप्तजन्मसु गोधा स्याद् भित्तिवासकरी गृहे ।
एकाकी मिष्टभुग् याति श्लेष्मकुण्डं समाशतम् ॥५३॥
श्लेष्माभोजी भवेत् प्रेतो मूत्रपूयादिपानकृत् ।
पितरं मातरं पत्नीं गुरुं पुत्रीं सुतं सखीन् ॥५४॥
अनाथं च न पुष्णाति क्ष्वेणकुण्डं प्रयाति सः ।
अब्दसहस्रं तद्भोजी ततः प्रेतः शतं समाः ॥५५॥
अतिथिं क्रूरभावेन द्रष्टुर्जलं च पिण्डकान् ।
पितृदेवा न गृह्णन्ति कुलनाशस्ततो भवेत् ॥५६॥
तेषां तु घातकानां च मलकुण्डे प्रपातनम् ।
शतं समा मलभोजी ततः स सप्तजन्मसु ॥५७॥
दरिद्रो जायते दुःखी पतितश्च पदे पदे ।
दत्वा दानं तु चैकस्मै त्वन्यस्मै दीयते तु तत् ॥५८॥
वसाकुण्डं प्रयात्येव शतवर्षं वसादनः ।
जन्मत्रयं स चाण्डालः कृकलासश्च सप्तकृत् ॥५९॥
दरिद्रश्च भवेदल्पजीवी च पापकृत्ततः ।
नरो नारी स्वकं शुक्रं रजो वापि परस्परम् ॥६०॥
पाययत्येव कामाद्वा शुक्रकुण्डं प्रयाति सः ।
शतवर्षं च तद्भोजी योनिकीटः शतं समाः ॥६१॥
अथ पूज्यं ताडयित्वा गुरुं च पितरौ तथा ।
रक्तं प्रवाहयेद् यः स यात्यसृक्कुण्डमुल्बणम् ॥६२॥
शतवर्षं रक्तभोजी ततो व्याधः प्रजायते ।
सप्तजन्मसु पापानि कृत्वा पुनस्तथा व्रजेत् ॥६३॥
अश्रु स्रवन्तं गायन्तं नृत्यन्तं भक्तमेव यः ।
कृष्णाग्रे तु हसन् चाश्रुकुण्डं प्रयाति नर्मकृत् ॥६४॥
शतवर्षं त्वश्रुभोजी चाण्डालः स्यात् त्रिजन्मसु ।
खलो याति गात्रमलकुण्डं दशाब्दकं ततः ॥६५॥
त्रिजन्मसु खरो जम्बूकस्त्रिजन्मसु कष्टवान् ।
बधिरं यो हसत्येव निन्दत्यपि च नर्मकृत् ॥६६॥
स याति कर्णविट्कुण्डे तद्भोजी शतवत्सरान् ।
ततो बधिरः सप्तजन्मस्वंगहीनश्च सप्तसु ॥६७॥
जीविकादं तु यो हन्ति मज्जाकुण्डे स गच्छति ।
लक्षवर्षाणि तद्भोजी शशकः सप्तजन्मसु ॥६८॥
मीना एणाः सप्त सप्त ततः शुद्धः प्रजायते ।
कन्याविक्रयिणो यान्ति मांसकुण्डेऽतिदारुणे ॥६९॥
कन्यालोमप्रमाणाब्दं मांसादना हता यमैः ।
स्वमांसं रुधिरं मूर्ध्नस्ते खादन्ति क्षुधार्दिताः ॥७०॥
षष्टिवर्षसहस्राणि कन्याविट्सु कृमिस्ततः ।
सप्तजन्मसु व्याधः स वराहः कुक्कुरस्ततः ॥७१॥
सप्तजन्मसु मण्डूको जलौकाः काक इत्यपि ।
क्षौरं यत्र विधिनाऽऽप्तं न कारयेत्तु यो जनः ॥७२॥
नखकुण्डं प्रयात्येव नखभोजी नखाब्दकम् ।
रोमकुण्डे तथा याति रोमभोजी प्रताडितः ॥७३॥
सकेशं पार्थिवं लिंगं पूजयेद् यो जनस्तु सः ।
केशकुण्डे प्रयात्येव मृद्रेणुमानवर्षकम् ॥७४॥
ततो वै यवनो वर्षशतं प्रजायते भुवि ।
पितृपिण्डाऽप्रदाताऽस्थिकुण्डे पतति चोल्बणे ॥७५॥
ततः खञ्जः सप्तजन्मस्वतिनिर्धन एव च ।
यः सेवते पूर्णमासां गर्भिणीं प्रसवोन्मुखाम् ॥७६॥
प्रतप्तताम्रकुण्डे स शतवर्षाणि तिष्ठति ।
रजस्वलान्नं यो भुंक्ते शताब्दं लौहकुण्डके ॥७७॥

पतित्वा राजकीं योनिं चर्मकारीं च सप्तसु ।
महाव्रणी दरिद्रश्च जायते तत्परं शुचिः ॥७८॥
यश्च धर्मस्वेदहस्तं देवद्रव्ये सुयोजयेत् ।
शतवर्षप्रमाणं स घर्मकुण्डे हि तिष्ठति ॥७९॥
सुरापश्च सुराकुण्डं चोष्णं याति शतं समाः ।
ततः शूद्रः सप्तजन्मस्वतिनिर्धन एव च ॥८०॥
कटुवाण्या पतिं वक्ति सा कुण्डे तीक्ष्णकण्टके ।
पतिता ताड्यते दूतैश्चतुर्युगं च तिष्ठति ॥८१॥
अश्विनी जायते पश्चात् पृथिव्यां सप्तजन्मसु ।
विषदाता विषकुण्डे सहस्राब्दं हि तिष्ठति ॥८२॥
विषभोजी नृघाती च व्रणी स्यात् सप्तजन्मसु ।
सप्तजन्मसु कुष्ठी च ततः शुद्धः प्रजायते ॥८३॥
वृषं भृत्यं ताडयेद् यो दण्डेन तन्नियामकः ।
प्रतप्ततैलकुण्डे स तिष्ठत्येव चतुर्युगम् ॥८४॥
ततो गोरोममानाब्दं वृषो भवति भूतले ।
ब्रडिशेन च कुन्तेन दन्तेन कीलकेन च ॥८५॥
लौहेन हन्ति वृषभं देहिनं प्राणिनं च वा ।
कुन्तकुण्डे वसेत्सोऽपि वर्षाणामयुतं खलु ॥८६॥
ततो जलोदररोगी त्वेकजन्मनि जायते ।
अभक्ष्यभक्षी मनुजो कृमिकुण्डं प्रयाति वै ॥८७॥
स्वलोममानवर्षान्ते भुवि म्लेच्छस्त्रिजन्मसु ।
पापान्नभोजी व्रजति पूयकुण्डं शतं समाः ॥८८॥
ततः शूद्रः सप्तजन्मस्वतिशूलधरो भवेत् ।
सर्पहा सर्पकुण्डं तु याति सर्पेण भक्षितः ॥८९॥
सर्पविड्भक्षणः पश्चात्सर्पो वै जायते भुवि ।
ततः स्वल्पाऽऽयुरेवाऽयं दद्रुरोगी भवेत्तथा ॥९०॥
सर्पेण तस्य मृत्युश्च सर्पेण भक्षणं मतम् ।
जीवान् हन्ति स दंशाख्ये कुण्डे पतति पापकृत् ॥९१॥
आयुर्दिनाब्दकं स्थित्वा क्षुद्रजन्तुसहस्रके ।
जायते च मुहुः पश्चादंगहीनो भवेद् ध्रुवम् ॥९२॥
मधुहा मक्षिकाघाती सगरे कुण्डके पतेत् ।
स्वायुर्दिनात्मकं स्थित्वा मक्षिकायोनिमाप्नुयात् ॥९३॥
अदण्ड्यदण्डकृत् कुण्डे वज्रकीटे पतेद्ध्रुवम् ।
तल्लोममानवर्षं च स्थित्वा कीटो भवेद् भुवि ॥९४॥
अन्यायधनलो राजा वृश्चिके कुण्डके पतेत् ।
रोमाब्दं दुःखमासाद्य वृश्चिकः सप्तजन्मसु ॥९५॥
ततोऽङ्गविकलो व्याधिग्रस्तो भुवि भवेज्जनः ।
विप्रो धर्मविहीनो वै शरकुण्डे पतत्यथ ॥९६॥
शरविद्धः स्वलोमाब्दं स्थित्वा शुद्धो भवेत्ततः ।
कारागारे बन्धयति जीवान्निर्दोषकान् जनः ॥९७॥
तप्ततोये गोलकुण्डे पतति रोमवत्सरान् ।
कीटैर्विद्धस्ततो नीचभृत्यो वै जायते भुवि ॥९८॥
नक्रमीनप्रहन्ता च नक्रकुण्डे पतत्यथ ।
नक्रकण्टकमानाब्दं स्थित्वा नक्रस्ततो जले ॥९९॥
अन्यच्छिद्रान्वेषकस्तु काककुण्डे पतत्यथ ।
काकप्रक्षुण्णनेत्रश्च रोमाब्दं तत्र वर्तते ॥१००॥
सप्तजन्मदरिद्रः स त्रिजन्माऽन्धश्च जायते ।
स्वर्णताम्रलौहचौरो वज्रकुण्डं प्रयाति वै ॥१०१॥
देवद्रव्यप्रहर्ताऽपि रोमाब्दं वज्रकुण्डगः ।
वज्रैर्हतो भवेत्तत्र वज्रभुग् देहदाववान् ॥१०२॥
गवां शुकानां मूर्तीनां चौरस्तप्तोपलाभिधे ।
कुण्डे पतति स्वलोमाब्दं ततो वृकस्त्रिजन्मसु ॥१०३॥
हंसस्ततः शंखचिल्लस्ततो रक्तादिरोगवान् ।
सप्तजन्मसु चाल्पायुः कूप्यचौरोऽपि तादृशः ॥१०४॥
रीतिकांस्यादिचौरश्च तीक्ष्णग्रावाग्रकुण्डके ।
स्वलोमाब्दं वसेत्पश्चादश्वः स्यात् सप्तजन्मसु ॥१०५॥
ततोऽधिकांगकः कुब्जः पादे रुग्णश्च जायते ।
पुंश्चल्यन्नादतजीवी लालाकुण्डे पतेद् ध्रुवम् ॥१०६॥
तल्लोमाब्दं लाळभोजी चक्षूरोगी च शूलवान् ।
म्लेच्छसेवी मषीसेवी मषीकुण्डेऽतितप्तके ॥१०७॥
स्वलोमाब्दं वसेत् पश्चात् कृष्णपशुस्त्रिजन्मसु ।
छागः सर्पस्तालवृक्षस्त्रिषु त्रिषु च जन्मसु ॥१०८॥
धान्यताम्बूलतल्पाऽर्घ्याऽऽसनसस्यादिचौरकः ।
शताब्दं चूर्णकुण्डे वै ततो मेषश्च कुक्कुटः ॥१०९॥
त्रिजन्मसु ततः कासव्याधिग्रस्तश्च मानवः ।
वंशहीनो दरिद्रश्चाप्यल्पायुर्दुःखवान् भवेत् ॥११०॥
चक्रशस्त्रादिकर्ता तु शताब्दं चक्रकुण्डके ।
त्रिजन्मसु तैलकारो रोगी वंशहीनस्ततः ॥१११॥
प्रतिस्पर्धी मत्सरी च वक्रकुण्डे युगं पतेत् ।
सप्तजन्मसु वक्रांगो भार्यावंशविहीनकः ॥११२॥
कूर्मादिमांसभुक् कूर्मकुण्डे पतेच्छतं समाः ।
स त्रिजन्मसु कूर्मश्च सूकरोऽपि मयूरकः ॥११३॥
मार्जारश्चापि प्रत्येकं त्रिजन्मसु जायते ।
घृततैलादिचौरस्तु ज्वालाकुण्डे च भस्मनि ॥११४॥
कुण्डे शताब्दं पतति तैलपः सप्तजन्मसु ।
मत्स्यश्च मूषकः सप्तजन्मस्वथ ततः शुचिः ॥११५॥

सुगन्धितैलधात्र्यादिद्रव्यचौरस्तु कुण्डके ।
दुर्गन्धे लोममानाब्दं दुर्गन्धी जायते ततः ॥११६॥
दुर्गन्धिकः सप्तजनौ मृगनाभिस्त्रिजन्मसु ।
सप्तजन्मसुगन्धश्च ततः शुद्धो हि मानवः ॥११७॥
भूमिहर्ता तप्तशूले तप्ततैले पतेत् ततः ।
सप्तमन्वन्तरं पश्चाद् विट्कृमिरयुतं तु षट् ॥११८॥
भूमिहीनो दरिद्रश्च ततो वै शुद्ध एव सः ।
नरघाती चासिपत्रे वसेत्कल्पं ततः पुनः ॥११९॥
ब्रह्महा चेच्छतमन्वन्तरं खड्गवने वसेत् ।
छिन्नांगः खड्गधारैश्च चाण्डालः शतजन्मसु ॥१२०॥
सूकरः कुक्कुरो गोमायूश्च व्याघ्रो वृकस्ततः ।
गण्डी महिषः प्रत्येकं सप्तजन्मसु जायते ॥१२१॥
ग्रामादिदाहकः क्षुरधारे युगत्रयं पतेत् ।
ततः प्रेतो वह्निमुखोऽमेध्यभोजी ततः पुनः ॥१२२॥
खद्योतश्च सप्तजनौ महाशूली च तावता ।
सप्तजन्मगलत्कुष्ठी ततः शुद्ध्यति वह्निदः ॥१२३॥
कलंकदो निन्दकश्च सूचिमुखे युगत्रयम् ।
ततो भवेद् वृश्चिकश्च सर्पश्च सप्तजन्मसु ॥१२४॥
वज्रकीटः सप्तजनो भस्मकीटस्ततो नरः ।
गृहभेदी स्तेनकर्ता गोगोधामेषछागकान् ॥१२५॥
प्रत्येकं सप्तजन्मानि ततो रोगी नरोऽधुरः ।
द्रव्यचौरो नक्रमुखो युगं पश्चाच्च रोगवान् ॥१२६॥
गोगजाश्वनरहन्ता गजदंशे युगत्रयम् ।
ततस्तत्तज्जातिजन्मत्रयं म्लेच्छस्ततो भवेत् ॥१२७॥
गोजातिदुःखदो याति गोमुखे नरके ध्रुवम् ।
कृमितप्तोदके मन्वन्तरं स्थित्वा च गोवृषः ॥१२८॥
सप्तजनौ ततो रोगी दरिद्रोऽन्त्यजजातिकः ।
गोब्रह्मसाधुहत्याकृत् स्त्रीमित्रभ्रूणहा तथा ॥१२९॥
कुंभीपाके पतेत् कल्पं चूर्ण्यते यमदूतकैः ।
वह्नौ क्षणं कुण्डके च तप्ते तैले जले तथा ॥१३०॥
पाषाणे तप्तलौहे च दुःखानि पश्यति ध्रुवम् ।
गृध्रकोटिसहस्राणि शतजन्मानि सूकरः ॥१३१॥
काकश्च सप्तजन्मानि सर्पः स्यात्सप्तजन्मसु ।
विट्कृमिश्च वृषलश्च गलत्कुष्ठी ततो भवेत् ॥१३२॥
यक्ष्मग्रस्तो वंशहीनो भार्याहीनस्ततः शुचिः ।
श्रीहरौ च श्रीकृष्णे च नारायणे च भूमनि ॥१३३॥
वासुदेवे शिवे विष्णौ ब्रह्मणि भेदबुद्धिकृत् ।
ब्रह्महत्याकरो बोध्यो भेदो हत्यासमो मतः ॥१३४॥
अक्षरे राधिकायां च लक्ष्म्यां श्रियां रमातनौ ।
पार्वत्यां च प्रभायां च माणिक्यायां च भेदकृत् ॥१३५॥
ब्रह्महत्यासमदोषी ललिताजययोरपि ।
भेदकृत् स्वे गुरौ स्वेष्टदेवे पितरि मातरि ॥१३६॥
हर्यर्चायां भेदबुद्धिर्ब्रह्महत्यामदूषणम् ।
विष्णोर्नैवेद्यसलिलवर्जितोऽपि तथा मतः ॥१३७॥
पितृदेवगुरुपूजानिन्दकोऽपि तथा मतः ।
शिवं विष्णुं शिवां लक्ष्मीं निन्दन्ति ब्रह्मघातिनः ॥१३८॥
हरेर्जन्मतिथीन् शैवीं तिथिं चैकादशीं तथा ।
व्रताहानिं च निन्दन्ति ब्रह्महत्याकरा हि ते ॥१३९॥
गुरुं च मातरं तातं साध्वीं भार्यां सुतं सुताम् ।
आश्रितान् यो न पुष्णाति ब्रह्महत्याकरो हि सः ॥१४०॥
अपूजकश्च देवानां गोवृषादेश्च ताडकः ।
गोचरादिप्रहर्ता च ब्रह्महत्याकरो हि सः ॥१४१॥
गवां दुःखकरः पापं गोहत्याजं लभेत्तथा ।
गवां वृत्तिहरो गाश्च पदा संताडयेत्तु यः ॥१४२॥
योनिजीवी त्रिसन्ध्यादिविहीनो धर्मनाशकः ।
देवपित्रतिथिसेवाहीनो गोघातको मतः ॥१४३॥
स्वभर्तरि च कृष्णे च भेदबुद्धिकरी तु या ।
कटूक्त्या ताडयेत् कान्तं सा गोहत्याकरी मता ॥१४४॥
गवां वृत्तिं जीविकां च जलं गृहं तथाऽऽश्रयम् ।
हन्याद् यः स भवेच्चापि गोहत्यापातकी ध्रुवम् ॥१४५॥
देवपूजाकृते यानि जलान्नकुसुमानि तु ।
तानि यो लंघयेत्पादैर्गोहत्यापापकृद्धि सः ॥१४६॥
मिथ्यावादी गुरुद्वेषी देवद्वेषी च पितृद्विट् ।
गोहत्यापापवान् सोपि विज्ञेयो नात्र संशयः ॥१४७॥
पितुः शतगुणा माता मातुः शतगुणो गुरुः ।
विद्यामन्त्रप्रदाता च गुरुः पूज्यः सदा मतः ॥१४८॥
गुरुतो गुरुपत्नी च गौरवे च गरीयसी ।
यथेष्टदेवपत्नी च पूज्या चाभीष्टदेवता ॥१४९॥
ब्राह्मणस्तु सुरापाणी विड्भोजी वृषलीपतिः ।
हरिवासरभोजी च कुंभीपाकं व्रजेत् सति ! ॥१५०॥
गुरुपत्नीं राजपत्नीं सपत्नीमातरं प्रसूम् ।
सुतां पुत्रवधूं श्वश्रूं सगर्भां भगिनीं प्रियाम् ॥१५१॥
सोदरभ्रातृजायां च मातुलानीं पितृप्रसूम् ।
मातुः प्रसूं तत्स्वसारं भगिनीं भ्रातृकन्यकाम् ॥१५२॥
शिष्यां च शिष्यपत्नीं च भागिनेयस्य कामिनीम् ।
भ्रातुः पुत्रप्रियां चैवाऽप्यगम्यामाह पद्मजः ॥१५३॥

एतासु गमकः कामी ब्रह्महत्याशतं लभेत् ।
स याति कुंभीपाकं तु महापापी सुदुस्तरम् ॥१५४॥
हरेः सेवां विना साध्वि ! न लभेत् कर्मखण्डनम् ।
सर्वान्नभोगी संयाति कालसूत्रं शतं समाः ॥१५५॥
ततः शूद्रोऽतिरुग्णः स्याद् दरिद्रो निर्धनस्तथा ।
प्रकोपवदना कोपात् स्वामिनं या तु पश्यति ॥१५६॥
कटूक्तिं तं च वदति याति चोल्कामुखं हि सा ।
उल्कां ददाति वक्त्रे च सततं यमकिंकरः ॥१५७॥
दण्डेन ताडयेन्मूर्ध्नि तल्लोमाब्दप्रमाणकम् ।
ततो भवेन्मानवी च विधवा सप्तजन्मसु ॥१५८॥
या ब्राह्मणी सर्वभोग्या साऽन्धकूपं प्रयाति वै ।
तप्तशौचेदके तप्त्वा कल्पमानं ततः परम् ॥१५९॥
काकी सूकरी कुक्कुटी शृगाली च पारावती ।
वानरी सप्तजन्मानि चाण्डाली च ततो भवेत् ॥१६०॥
रजकी तैलकारी च ततः शुद्ध्यति सा सति ! ।
वेश्या वसेद् वेधकुण्डे गणिका दण्डताडने ॥१६१॥
जालबन्धे पुंश्चली च कुलटा देहचूर्णके ।
स्वैरिणी दलने कुण्डे यावन्मन्वन्तरं वसेत् ॥१६२॥
करे धृत्वा तु तुलसीं प्रतिज्ञां यो न पालयेत् ।
मिथ्या वा शपथं कुर्यात् स तु ज्वालामुखे पतेत् ॥१६३॥
दत्वा तु दक्षिणं हस्तं प्रतिज्ञां यो न पालयेत् ।
स्पृष्ट्वा गां ब्राह्मणं देवं वह्निं साधुं सतीं जलम् ॥१६४॥
न पालयेत्प्रतिज्ञां तु स वै ज्वालामुखे पतेत् ।
मित्रद्रोही कृतघ्नश्च तथा विश्वासघातकः ॥१६५॥
मिथ्यासाक्ष्यप्रदश्चापि स वै ज्वालामुखं व्रजेत् ।
कल्पं वसेत् ततो मूको बधिरश्च त्रिजन्मसु ॥१६६॥
मित्रद्रोही नकुलः स्यात् कृतघ्नश्चापि षण्ढकः ।
विश्वासघाती व्याघ्रश्च मिथ्यासाक्षी तु भल्लुकः ॥१६७॥
व्रतोपवासहीनश्च सद्वाक्यपरिनिन्दकः ।
जिह्मो वसेत्तु हैमे वै नरके तु शतं समाः ॥१६८॥
जलजन्तुः शतजन्मक्रमेण मत्स्यको भवेत् ।
देवादिद्रव्यहारी च धूम्रान्धे पतितो भवेत् ॥१६९॥
चतुर्युगं वसेत्तत्र मूषकः सप्तजन्मसु ।
पशौ पतत्रिणि कृमौ वृक्षजातिषु जायते ॥१७०॥
ततो भार्यावंशहीनः शबरो व्याधिमान् भवेत् ।
स्वर्णकारो वणिग् वैद्यो व्यापारी रसविक्रयी ॥१७१॥
कूटमानो नागवेष्टं कुण्डं यात्येव दारुणम् ।
ततो गोपो भवेच्चेति ततः शुद्ध्यति वै सति ! ॥१७२॥
प्रसिद्धानि तु कुण्डानि कथितानि पतिव्रते ! ।
अन्यान्यप्यप्रसिद्धानि यथाकर्म भवन्ति वै ॥१७३॥
सन्ति पापप्रकर्तारः कुण्डेषु फलभोगिनः ।
ततो भ्रमन्ति संसारे किंचित्तुभ्यं निवेदितम् ॥१७४॥
सर्वेष्टं सारभूतं तु मंगलं कृष्णसेवनम् ।
जन्ममृत्युजरारोगशोकसन्तापतारणम् ॥१७५॥
भक्तिवृक्षांकुरकरं कर्मवृक्षनिकृन्तनम् ।
सालोक्यसार्ष्टिसारूप्यसामीप्यादिप्रदं शुभे ! ॥१७६॥
कुण्डानि यमदूतं च यमं च यमकिंकरान् ।
स्वप्नेऽपि नहि पश्यन्ति सति ! श्रीकृष्णसेवकाः ॥१७७॥
हरिव्रतप्रकर्तारो गृहिणस्त्यागिनस्त्रियः ।
ये स्नान्ति हरितीर्थे च नाश्नन्ति हरिवासरे ॥१७८॥
संस्मरन्ति कृष्णनारायणं संपूजयन्ति च ।
न यान्ति ते मम घोरां दुःखां संयमनीं पुरीम् ॥१७९॥
आम्नायन्यायमार्गस्थास्त्यागिनो गृहिणश्च ते ।
शुद्धा धर्मपरा यान्ति कृष्णमन्दिरमक्षरम् ॥१८०॥
स्वदूतान्पाशहस्तांश्च गच्छतस्तान् वदाम्यहम् ।
यास्यथेति तु सर्वत्र हरिभक्ताश्रमं विना ॥१८१॥
हरेर्भक्तांश्चित्रगुप्तः पुष्पांजलिं करोति हि ।
मधुपर्कादिकं ब्रह्मा तेषां तु कुरुते सदा ॥१८२॥
मम लोकं सत्यलोकं विलंघ्य गच्छतां सताम् ।
स्पर्शमात्रेण पापानि नश्यन्ति याम्यदेहिनाम् ॥१८३॥
पावनास्ते भागवताः पञ्चभूततनुं विना ।
सूक्ष्मेणैव शरीरेण प्रयान्ति चोर्ध्ववेगिनः ॥१८४॥
ब्रह्मधामसमीपे तु स्नात्वा ब्रह्महृदे च ते ।
सूक्ष्मं विमुच्य मायायां ब्राह्मया तन्वा तु धामनि ॥१८५॥
आत्माऽऽत्मिकया मोदन्ते बहुशक्तिन्द्रियेन्द्रकाः ।
यमलोकं गता ये तु कर्मफलाय देहिनः ॥१८६॥
बिभ्रति सूक्ष्मदेहं ते नाशो यस्य न जायते ।
स देहो न भवेद् भस्म ज्वलदग्नौ यमालये ॥१८७॥
जले नष्टोभवेन्नैव प्रहारे नापि नश्यति ।
शस्त्रे शास्त्रे कण्टके च शूले तप्तद्रवे तथा ॥१८८॥
तप्ते लोहे च पाषाणे प्रतिकृतौ न नश्यति ।
कर्मफल तथा भुंक्ते सुखमात्रा न विद्यते ॥१८९॥
कृष्णनारायणधाम्नि दुःखमात्रा न विद्यते ।
तमेव भज सावित्रि ! गच्छ कान्तेन मन्दिरम् ॥१९०॥
इत्युक्त्वा सा यमेनापि न ययौ मन्दिरं स्वकम् ।
सत्यवन्तं सूक्ष्मदेहं स्वायत्तीकृत्य स्वे हृदि ॥१९१॥

जिज्ञासमाना पप्रच्छ कुण्डमानादिकं तदा ।
शृणु लक्ष्मि ! कथयिष्ये यमेन यत्तु भाषितम् ॥१९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये सावित्रीकृतयमाष्टकस्तोत्रं, षडशीतिनिरयकुण्डानि, यथाकर्म तत्पातः, ब्रह्महत्यागोहत्याप्रख्यपापानि, भक्तानां यमपराभवो चेत्यादिनिरूपणनामा सप्तत्यधिकत्रिशततमोऽध्यायः ॥३७०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रिये ! पत्नि ! लोकानामुपकारकम् ।
यमप्रोक्तं च सावित्र्यै कुण्डमानादिकं तु यत् ॥ १ ॥
पूर्णेन्दुमण्डलाकारं कुण्डं प्रत्येकमेव वै ।
गभीरं निम्नमत्युग्रकष्टदं न तु नश्वरम् ॥ २ ॥
तत्राऽग्निकुण्डकाऽऽयामः शतहस्तमितोऽस्ति वै ।
कोटिशस्त्वग्निकुण्डानां वर्तुलानि भवन्ति हि ॥ ३ ॥
प्रत्येककुण्डबाहुल्यं बोध्यं पापिबहुत्वतः ।
तप्तोदकप्रकुण्डं तु क्रोशार्धमानमेव च ॥ ४ ॥
तप्तक्षारोदककुण्डं क्रोशमात्रं प्रकीर्तितम् ।
तप्तमूत्रद्रवकुण्डं गव्यूतिमानमेव ह ॥ ५ ॥
श्लेष्मकुण्डं क्रोशमितं क्रोशार्धं गरकुण्डकम् ।
नेत्रमलप्रकुण्डं च क्रोशार्धं कीटपूरितम् ॥ ६ ॥
वसाकुण्डं क्रोशतुर्यं शुक्रकुण्डं तथा मतम् ।
दुर्गन्धिरक्तकुण्डं च वापीतुल्यं धनुःशतम् ॥ ७ ॥
नेत्राश्रुकुण्डं वाप्यर्धं मलकुण्डं तथैव हि ।
कर्णविट्कुण्डकं वापीतुर्यप्रमाणमेव च ॥ ८ ॥
मज्जाकुण्डं वापीतुर्यं मांसकुण्डं धनुःशतम् ।
नखकुण्डं लोमकुण्डं चास्थिकुण्डं च दन्तकम् ॥ ९ ॥
प्रत्येकं वापिकातुर्यमानं चातिभयानकम् ।
ताम्रकुण्डं तप्तताम्रप्रतिमाकोटिराजितम् ॥१०॥
गव्यूतिमानकं तप्तलोहकुण्डं तथाऽऽयतम् ।
घर्मकुण्डं सुराकुण्डं वाप्यर्धं लोहकुण्डकम् ॥११॥
अधः शाल्मलिवृक्षस्य तीक्ष्णकण्टककुण्डकम् ।
लक्षपौरुषनिम्नं च क्रोशमानं च वर्तुलम् ॥१२॥
धनुर्मानाः कण्टकाश्च भित्तिषु परितः स्थिताः ।
विषकुण्डं क्रोशमानं शस्त्रकुण्डं तथाऽऽयतम् ॥१३॥
प्रतप्ततैलकुण्डं च द्विगव्यूतिप्रमाणकम् ।
शस्त्रतल्पप्रकुण्डं च क्रोशतुर्यप्रमाणकम् ॥१४॥
क्रोशार्धं पूयकुण्डं च दन्तकुण्डं तथाऽऽयतम् ।
द्विगव्यूतिप्रमाणं च हिमतोयप्रकुण्डकम् ॥१५॥
मक्षिकादंशकुण्डे च क्रोशार्धे सम्मते तथा ।
वज्रवृश्चिककुण्डे च वाप्यर्धे समतायते ॥१६॥
शरकुण्डं च वाप्यर्धं नक्रकुण्डं तथाऽऽयतम् ।
काककुण्डं धनुर्लक्षं गृध्रकुण्डं तथाऽऽयतम् ॥१७॥
वाजकुण्डं तथा दीर्घं वज्रकुण्डं धनुःशतम् ।
तप्तपाषाणकुण्डं च वापीद्विगुणकायतम् ॥१८॥
लालाकुण्डं क्रोशमानं तप्ततोयं धनुःशतम् ।
चूर्णकुण्डं क्रोशमानं क्रोशतुर्यं तु चक्रकम् ॥१९॥
कुलालचक्रवद्घूर्णमानं षोडशधारकम् ।
ज्वालाकुण्डं कच्छपादिकुण्डं च क्रोशमानकम् ॥२०॥
क्रोशमानं तप्तभस्मकुण्डं ध्वान्तं च क्रोशकम् ।
दग्धकुण्डं क्रोशमात्रं तप्तक्षारं तथाऽऽयतम् ॥२१॥
तप्ततोयप्रकुण्डं द्विगव्यूतिमानमेव च ।
उत्तप्तसूर्मिकुण्डं च ह्यसिपत्रवनं तथा ॥२२॥
क्रोशार्धमानमेवेति रक्तकुण्डं तथाऽऽयतम् ।
क्षुरास्त्रकुण्डकं धनुःशतमानं भयंकरम् ॥२३॥
सूचिकुण्डं तु पञ्चाशद्धनुर्मानं विभेदकम् ।
गोधाकुण्डं कुपरूपं धनुर्विंशतिमानकम् ॥२४॥
कुण्डं नरमुखाकारं धनुःषोडशमानकम् ।
गजकुण्डं गजदन्तैर्घातकं वै धनुश्शतम् ॥२५॥
धनुस्त्रिंशत्प्रमाणं च स्मृतं गोमुखकुण्डकम् ।
कालचक्रं भ्रमिकुण्डं द्विगव्यूतिप्रमाणकम् ॥२६॥
लक्षमानवकुण्डं च तैललोहोपलान्वितम् ।
तप्तं च वह्निना चतुर्गव्यूतिमानकं हि तत् ॥२७॥
यावन्तः पापिनः सन्ति सर्वकुण्डेषु सुन्दरि ! ।
चतुर्गुणास्ततः कुंभीपाके सन्ति महत्तमे ॥२८॥
सर्वकुण्डप्रधानं तु कुंभीपाकं प्रकीर्तितम् ।
कालसूत्रं तप्ततोयं कुण्डं कोदण्डविंशतिम् ॥२९॥
धनुश्शतमवटोदं व्याधिरोगप्रपूरितम् ।
तप्तपांसुप्रकुण्डं च धनुःशतं प्रदाहकम् ॥३०॥
क्रोशार्तनादकुण्डं च धनुर्विंशतिमानकम् ।
शूलकुण्डं तथामानं क्रोशार्धं हिमतोयकम् ॥३१॥
धनुर्विंशतिमानं तु चोल्काकुण्डं प्रकीर्तितम् ।
अन्धकारप्रकुण्डं च धनुश्शतं महत्तरम् ॥३२॥
धनुर्विंशतिमानं तु वेधनं शस्त्रकुण्डकम् ।
धनुःषोडशमानं तु दण्डताडनकुण्डकम् ॥३३॥

धनुस्त्रिंशत्प्रमाणं च जालकुण्डं प्रकीर्तितम् ।
लौहवेदिचूर्णकुण्डं कोटिमानवमानकम् ॥३४॥
मूर्छाकुण्डं ध्वान्तयुक्तं धनुर्विंशतिमानकम् ।
धनुःषोडशमानं च दलनं कुण्डमुच्यते ॥३५॥
तप्तवालुकिकाकुण्डं धनुस्त्रिंशत्प्रमाणकम् ।
चर्मकषायकुण्डं च दुर्गन्धं वै धनुःशतम् ॥३६॥
शूर्पाकारमुखं कुण्डं धनुर्द्वादशमानकम् ।
अग्निशिखं तथा कुण्डं धनुर्विंशतिमानकम् ॥३७॥
ज्वालामुखं जिह्मकुण्डं वाप्यर्धं परिकीर्तितम् ।
धूम्रकुण्डं धनुःशतं विषधूम्रादिसंभृतम् ॥३८॥
धनुश्शतं नागपूर्णं नागवेष्टनकुण्डकम् ।
षडशीतिश्च कुण्डानि तान्युक्तानि मया सति ! ॥३९॥
सावित्रि ! वद चान्यद्वै यदि श्रोतुं समिच्छसि ।
सावित्री तु तदा प्राह सन्तुष्टा देहिदुर्लभाम् ॥४०॥
कृष्णनारायणभक्तिं भागवतवृषात्मिकाम् ।
तत्त्वज्ञानविहीना च स्त्रीजातिर्विधिना कृता ॥४१॥
किं तज्ज्ञानं मया ग्राह्यं सारभूतं वदात्र मे ।
सर्वदानं ह्यनशनं तीर्थस्नानं व्रतं तपः ॥४२॥
अज्ञाने ज्ञानदानस्य कलां नार्हन्ति षोडशीम् ।
पितुः शतगुणा माता मातुः शतगुणो गुरुः ॥४३॥
इति श्रुत्वा यमः प्राह भक्तिस्ते चास्तु केशवे ।
शेषः सहस्रवक्त्रैश्च नहि यां वक्तुमीश्वरः ॥४४॥
शंभुः पञ्चमुखैश्चापि ब्रह्मा चतुर्मुखैस्तथा ।
कार्तिकः षण्मुखैश्चापि नहि यां वक्तुमीश्वराः ॥४५॥
सरस्वती गणेशश्च सनत्कुमार इत्यपि ।
धर्मः सनकः सनन्दः कपिलश्च सनातनः ॥४६॥
सूर्यः पत्नीव्रतश्चापि नारदो ब्रह्मणः सुताः ।
न यां वक्तुं क्षमाः सिद्धा मुनीन्द्रा योगिनस्तथा ॥४७॥
के वाऽन्ये च वयं के च भगवद्भक्तिवर्णने ।
कश्चित् किञ्चिद् विजानाति भगवद्गुणकीर्तनम् ॥४८॥
ततः किञ्चिद् विजानाति ब्रह्मा लोकपितामहः ।
ततः किञ्चिद्विजानाति गणेशो ज्ञानिनां गुरुः ॥४९॥
सर्वातिरिक्तं जानाति सर्वज्ञः शंभुरेव तु ।
ततोऽप्यधिकं जानाति लक्ष्मीरेव न संशयः ॥५०॥
राधा प्रभा माणिकी च पार्वती च जयादयः ।
जानन्त्येव परां भक्तिं मुक्ता जानन्त्यसीमतः ॥५१॥
कृष्णनारायणेनैव पुरुषोत्तमरूपिणा ।
श्रीकृष्णे स्वस्वरूपे च ज्ञानं सर्वं सुरक्षितम् ॥५२॥

दत्तं तु शंभवे ज्ञानं कृष्णेन परमात्मना ।
अतीव निर्जने रम्ये गोलोके रासमण्डले ॥५३॥
धर्माय कथयामास शिवलोके शिवः स्वयम् ।
धर्मस्तत्कथयामास पुष्करे भास्कराय च ॥५४॥
सूर्यो मां कथयामास कृष्णभक्त्यादिकीर्तनम् ।
पूर्णं सोपि न जानाति तदन्यस्य तु का कथा ॥५५॥
सर्वान्तरात्मा भगवान् कृष्णनारायणो हरिः ।
सर्वसाक्षी सर्वरूपी सर्वकारणकारणम् ॥५६॥
रूपं विधत्ते युगलं भक्तानुग्रहहेतवे ।
कमनीयं सुन्दरं च किशोरं घनरूपकम् ॥५७॥
कोटिकन्दर्पलावण्यं श्रृंगाररससंभृतम् ।
पद्मपत्रप्रभानेत्रं पार्वणेन्दुसमाननम् ॥५८॥
भूषारत्नधरं पीताम्बरं राधादिसेवितम् ।
रासमध्ये रत्नसिंहासनस्थं वंशिकाधरम् ॥५९॥
वनमालाकौस्तुभादिशोभितं सस्मितं वरम् ।
कुंकुमागुरुकस्तूरीचन्दनादिसमर्चितम् ॥६०॥
चारुचम्पकमालाब्जमालतीमाल्यमण्डितम् ।
चंचत्सूक्ष्मातितेजस्विचूडावक्त्रिमराजितम् ॥६१॥
ब्रह्मविष्णुशिवा अनिरुद्धप्रद्युम्नकर्षणाः ।
सृष्टिं पुष्टिं संहृतिं च प्रकुर्वन्ति यदाज्ञया ॥६२॥
यत्प्रसादाद् वाति वातस्तपतः सूर्यचन्द्रकौ ।
वर्षतीन्द्रो महाकालः करोति कवलं तथा ॥६३॥
वह्निरुष्णो जलं शीतं यत्कृतं सर्वमेव तत् ।
दिशो रक्षन्ति दिक्पाला ग्रहा भ्रमन्ति यद्भयात् ॥६४॥
वृक्षाः फलन्ति पुष्प्यन्ति ऋतवः क्रमगामिनः ।
स्थले जले तथाऽऽकाशे जीवन्ति जन्तवस्तथा ॥६५॥
यदाज्ञया यमो न्यायप्रदाता धर्मदो वृषः ।
ज्वलदग्नौ पततश्च गभीरे च जलार्णवे ॥६६॥
वृक्षाग्रे तीक्ष्णखड्गाग्रे सर्पादीनां मुखेषु च ।
नानाशस्त्रास्त्रसंग्रामे रणेषु विषमेषु च ॥६७॥
यत्प्रसादाद्भवेद्रक्षा यत्कोपान्नाशनं तथा ।
धत्ते वायुरनलाग्निमनलो वारिसागरान् ॥६८॥
वारि कूर्मं महाकूर्मोऽनन्तं सर्पं स मेदिनीम् ।
सा समुद्रान्पर्वतांश्च यत्कृपया स गीयताम् ॥६९॥
इन्द्रायुश्चापि दिव्यानां युगानामेकसप्ततिः ।
अष्टाविंशच्छक्रपाते ब्रह्मणः स्यादहर्निशम् ॥७०॥
एवं त्रिंशद्रात्रिदिनैर्मासो द्वाभ्यामृतुस्तथा ।
ऋतुभिः षड्भिरेवाब्दं शताब्दं ब्रह्मणो वयः ॥७१॥

ब्रह्मणस्तु निपाते वै वैराजस्य दिनं भवेत् ।
वैराजशतवर्षाणि महाविष्णोर्दिनं भवेत् ॥७२॥
महाविष्णोः शतवर्षे दिनं प्राधानपौरुषम् ।
तस्य वर्षशतं स्यात्तु दिनं प्राकृतपौरुषम् ॥७३॥
तस्य वर्षशते चक्षुःपक्ष्मोन्मेलो हरेर्भवेत् ।
सोऽयं हरिः स्वयं श्रीशः कृष्णनारायणः प्रभुः ॥७४॥
विष्णुर्ब्रह्मा हरः सर्वे कृष्णात्मका न संशयः ।
चक्षुर्निमीलने तस्य लयः प्राकृतिको भवेत् ॥७५॥
प्राकृताकृतयः कृष्णे लीयन्ते नाभिपंकजे ।
विष्णुः क्षीरोदशायी च वैकुण्ठे यश्चतुर्भुजः ॥७६॥
लीयन्ते वामपार्श्वे ते कृष्णस्य परमात्मनः ।
शिवो ज्ञाने हरेर्लीनो दुर्गा बुद्धौ लयं व्रजेत् ॥७७॥
स्कन्दो लीनो वक्षसि श्रीकृष्णबाहौ गणेश्वरः ।
पद्मा राधा च गोप्यश्च कृष्णप्राणे लयं गताः ॥७८॥
सावित्री तु सरस्वत्यां सा जिव्हायां परात्मनः ।
कृष्णलोमसु गोपाश्च प्राणेषु पवनादयः ॥७९॥
हुताशनो जठराग्नौ जलं तद्रसनाग्रके ।
वैष्णवाश्चरणाम्भोजे भक्तिधर्मौ हृदन्तरे ॥८०॥
ईश्वरा यस्य वै मूर्तेरैश्वर्याणि भवन्ति हि ।
यस्यैव लोमकूपेषु विश्वानि निखिलान्यपि ॥८१॥
यस्य चक्षुर्निमेषेण भावकार्यलयो भवेत् ।
चक्षुरुन्मीलने सृष्टिर्यस्यैव परमात्मनः ॥८२॥
एवं सृष्टिलयानां तु संख्या नास्त्येव सुव्रते ! ।
तद्गुणोत्कीर्तनं वक्तुं ब्रह्माण्डेषु तु कः क्षमः ॥८३॥
प्रधाना तु हरेर्भक्तिर्मुक्तेरपि गरीयसी ।
कर्तव्या सा लयपारं गन्तुमिच्छसि चेत् सुते ! ॥८४॥
सालोक्यदा हरेरेका चाऽन्या सारूप्यदा हरेः ।
सामीप्यदा ततोऽन्या च सार्ष्टिदा च ततोऽपरा ॥८५॥
एकत्वप्रापिका त्वन्या भक्ता वाञ्छन्ति नैव ताः ।
सेवनं तु परित्यज्य वाञ्छनीयं न वै क्वचित् ॥८६॥
मुक्तिस्तु सेवारहिता भक्तिः सेवाविवर्धिनी ।
भक्तियुक्त्योरयं भेदो भक्तिः कार्या ततः सदा ॥८७॥
शरीरेणेन्द्रियैः सर्वैरन्तःकरणैः सर्वथा ।
क्रिया बुद्ध्यर्पणं कृष्णनारायणे हि मोक्षकृत् ॥८८॥
नार्या पुंसा समर्प्यैव कार्या सेवा हरेः सदा ।
स्नेहेन सर्वथा देवि ! ज्ञानं सारतरं त्विदम् ॥८९॥
गच्छ सावित्रि ! पतिना साकं च सुखिनी भव ।
इत्युक्त्वा सूर्यपुत्रश्च ह्यर्पयित्वा च तत्पतिम् ॥९०॥
तस्यै शुभाशिषं दत्वा गमनं कर्तुमुद्यतः ।
दृष्ट्वा यमं तु गच्छन्तं सावित्री तं प्रणम्य च ॥९१॥
आविले चक्षुषी कृत्वा धृत्वा शिरः सुपादयोः ।
वियोगशोकं प्राप्ताऽभूत् सद्विच्छेदो हि दुःखकृत् ॥९२॥
कृपालुस्तु यमः प्राह मा शोकं कुरु भामिनि ! ।
लक्षवर्षं सुखं भुक्त्वा पुण्यक्षेत्रे च सर्वथा ॥९३॥
नरनारायणखण्डे गोलोकं यास्यसि ध्रुवम् ।
गत्वा गृहं व्रतं भद्रे ! सावित्र्यास्त्वं तथा कुरु ॥९४॥
द्विसप्तवर्षपर्यन्तं नारीणां मोक्षदं हि तत् ।
ज्येष्ठे शुक्लचतुर्दश्यां सावित्र्या हि व्रतं कुरु ॥९५॥
शुक्लाष्टम्यां भाद्रपदे महालक्ष्म्या व्रतं कुरु ।
द्व्यष्टवर्षव्रतं चेदं प्रत्यब्दं पक्षमेव हि ॥९६॥
कार्तिककृष्णकाऽष्टम्यां कृष्णनारायणव्रतम् ।
कुरु भक्त्या परया त्वं यास्यस्यन्ते हरेः पदम् ॥९७॥
प्रतिमंगलवारे च देवीं मंगलचण्डिकाम् ।
प्रतिमासं शुक्लषष्ठ्यां षष्ठीं मंगलदायिनीम् ॥९८॥
राधां चाषाढसंक्रान्त्यां पूर्णायां कार्तिकेऽपि ताम् ।
प्रतिमासं सिताष्टम्यां दुर्गां दुर्गातिनाशिनीम् ॥९९॥
या नारी पूजयेद् भक्त्या कंभरां सुखदां सतीम् ।
शुक्लाष्टम्यां तथा प्रीत्या सा याति परमां गतिम् ॥१००॥
धनसन्तानलब्ध्यर्थे पतिपुत्रवतीं सतीम् ।
पतिव्रतासु शुद्धासु यन्त्रेषु प्रतिमासु च ॥१०१॥
पूजयमाना सुखिनी भूत्वाऽन्तेऽक्षरमाप्नुयात् ।
इत्युक्त्वा तां सतीं नत्वा यमराजो ययौ गृहम् ॥१०२॥
गृहीत्वा स्वामिनं सूक्ष्मं सावित्री स्वालयं ययौ ।
सत्यवानुत्थितो द्राग्वै जीवितोऽभूत् सुषुप्सितः ॥१०३॥
आनन्दः सर्वथा तत्र समभूत् पत्तने गृहे ।
सावित्री सत्यवन्तं च वृत्तान्तं तु यथाक्रमम् ॥१०४॥
अन्यॉश्च कथयामास श्रुत्वाऽऽश्चर्यं ययुश्च ते ।
सावित्रीजनकः पुत्रशतं प्राप यथाक्रमम् ॥१०५॥
श्वशुरश्चाक्षुषी राज्यं प्रापदारिद्र्यनाशकम् ।
सा च सत्यवतः पुत्रशतं प्राप क्रमेण च ॥१०६॥
एवं लक्ष्मि ! पातिव्रत्यप्रभावेण सतीवरा ।
मृत्युपराजयं चक्रे प्रत्युत प्राप सम्पदम् ॥१०७॥

पातिव्रत्यं पालितं चेत् कामधेनुसमं हि तत् ।
कल्पवृक्षसमं चापि चिन्तामण्यधिकं तथा ॥१०८॥
योगिनां योगसम्पत्तेः पातिव्रत्यं विशिष्यते ।
न चौरहार्यं न क्लेश्यं न वियोजनधर्मकम् ॥१०९॥
सदात्मनि दृढे धर्मे स्थितं निगूढमेव तत् ।
सा तु भुक्त्वा सुखं लक्षवर्षं भूमौ महासती ॥११०॥
जगाम स्वामिना सार्धं गोलोकं दिव्यरूपिणी ।
वैहायसा विमानेन ययौ देवैः सुवन्दिता ॥१११॥
द्वितीयेन स्वरूपेण सवितुश्चाधिदेविका ।
वेदानां चापि सावित्री मन्त्राधिष्ठातृदेवता ॥११२॥
सैव जाताऽनन्तरूपा पुरुषोत्तमभक्तितः ।
इति ते कथितं लक्ष्मि ! सावित्र्याख्यानमुत्तमम् ॥११३॥
या चेदं शृणुयान्नारी सतीत्वं त्वाप्नुयाद् ध्रुवम् ।
पातिव्रत्यं विना त्वन्यं धर्मं मुख्यं न वै चरेत् ॥११४॥
सर्वं पतिप्रतिमायां मुक्तिर्भक्तिश्च विद्यते ।
सर्वाश्च सिद्धयः पत्युर्भक्तौ तिष्ठन्ति दासिकाः ॥११५॥
ऐश्वर्याणि समग्राणि धनधान्याम्बराणि च ।
स्वर्णरौप्यमणिरत्नाभरणानि च सर्वथा ॥११६॥
पत्युः पादजले सन्ति पत्यंगुष्ठे समृद्धयः ।
पत्यानने महद्ब्रह्म पत्यंगेषु सुखानि वै ॥११७॥
पत्युस्तोषे महातोष आनन्दः पतिखेलने ।
पत्युर्हस्ते महालक्ष्मीः पत्युदरे स्वरव्ययम् ॥११८॥
पत्युर्नाड्यां च तीर्थानि पतिप्राणे हि मोक्षणम् ।
धर्मार्थकाममोक्षाश्च पत्युर्देहे व्यवस्थिताः ॥११९॥
तस्माल्लक्ष्मि ! परब्रह्म पतिरेव सतीकृते ।
पतिः कृष्णः पतिः कृष्णनारायणः परेश्वरः ॥१२०॥
पतिर्विष्णुर्वासुदेवः पतिः श्रीपुरुषोत्तमः ।
सर्वे देवास्तथा वेदा यज्ञा जपाश्च मालिकाः ॥१२१॥
दक्षिणादानरीतयो ज्ञानानि विविधानि च ।
योगाः परोपकाराश्च तथाऽहिंसादयः शुभाः ॥१२२॥
शुभकर्माणि कार्याणि पूजा व्रतानि सर्वथा ।
स्नानानि चोपरागाश्च संक्रान्तयश्च सर्वथा ॥१२३॥
पुण्याहानि च सर्वाणि तथोत्सवाः शुभानि च ।
वैवाहिकानि कार्याणि दैवानि चेतराण्यपि ॥१२४॥
यात्राश्च देवयानानि सन्ति लक्ष्मि ! पतिप्रभौ ।
पतिरेव परब्रह्म ज्ञात्वा भजेत्पतिव्रता ॥१२५॥
एतस्य पठनाच्चापि श्रवणात् कीर्तनाच्च वा ।
स्मरणान्माननाच्चापि भुक्तिर्मुक्तिः करे स्थिता ॥१२६॥
पत्युर्धर्मोच्चान्यधर्मः सत्याश्चात्र विशिष्यते ।
सतीधर्मः परोधर्मो हरेः सेवात्मको हि सः ॥१२७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये षडशीतिनरककुण्डपरिमाणानि, सावित्र्यै यमप्रोक्तं ज्ञानभक्त्यादिकं, सत्यवतो जीवनं, पतिधर्मश्रैष्ठ्यं, चेत्यादिनिरूपणनामैकसप्तत्यधिकत्रिशततमोऽध्यायः ॥३७१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! च पद्मायाश्चरित्रं पापनाशकम् ।
अनरण्यस्य पुत्र्यास्तद्धर्मशापात्मकं शुभम् ॥ १ ॥
पातिव्रत्यं पालयन्त्या पित्राज्ञावर्तमानया ।
पद्मया युगभेदेन धर्मह्रासः कृतः पुरा ॥ २ ॥
जातमात्रं यौवनं च तयैव विफलीकृतम् ।
बाल्यं कुमारता पश्चाद् यौवनं वृद्धता ततः ॥ ३ ॥
इत्यादिकं तया लोके कृतं लक्ष्मि ! क्रमागतम् ।
मनुवंशोद्भवो राजा सोऽनरण्यो महायशाः ॥ ४ ॥
चिरंजीवी धर्मशीलो वैष्णवो विजितेन्द्रियः ।
मंगलाऽरण्यपुत्रः स इन्द्रसावर्णिवंशजः ॥ ५ ॥
धरारण्यस्य पुत्रोऽभून्मंगलारण्य एव ह ।
अपुत्रको धरारण्यस्तपसे पुष्करं गतः ॥ ६ ॥
सुचिरं च तपस्तप्त्वा वरं लब्ध्वा परेश्वरात् ।
सम्प्राप्तो वैष्णवं पुत्रमनरण्यं जितेन्द्रियम् ॥ ७ ॥
दत्वा तस्मै स राज्यं स्वं जगाम तपसे वनम् ।
अनरण्यस्ततश्चक्रे भृगुणा तु पुरोधसा ॥ ८ ॥
यज्ञानां शतकं श्रेष्ठं तस्थौ वैराग्यवृत्तिकः ।
तुच्छं मत्वा च शक्रत्वं न लेभे नश्वरं पदम् ॥ ९ ॥
बभूवुः शतपुत्राश्च सर्वे पितृसमा गुणे ।
कन्यैका सुन्दरी रम्या पद्मा पद्मालयासमा ॥१०॥
तस्या योग्यवराऽन्वेषणार्थं यत्नं चकार सः ।
तावत् तपोवने पिप्पलादर्षिस्तत्र निर्जने ॥११॥
स्त्रीभिः रमन्तं गन्धर्वं दृष्ट्वा वै कामुकोऽभवत् ।
अथाऽयं पुष्पभद्रायां स्नातुं गच्छन्मुनीश्वरः ॥१२॥
ददर्श पद्मां युवतीं पद्मावताररूपिणीम् ।
मनोरमां विलोक्यैव दारसंग्रहभावनः ॥१३॥
केयं कस्येति पप्रच्छ समीपस्थाँस्तपस्विनः ।
ते च निवेदनं चक्रुः पद्माऽनरण्यजा त्विति ॥१४॥

मुनिः स्नात्वाऽभीष्टदेवं सम्पूज्य पुरुषोत्तमम् ।
जगाम कामी भिक्षार्थमनरण्यसभाऽजिरे ॥१५॥
राजा दृष्ट्वा मुनिं शीघ्रं प्रणनामाऽतिभक्तितः ।
मधुपर्कादिकं दत्वा पूजयामास सादरम् ॥१६॥
मुनिर्विज्ञापितो राज्ञा यथेष्टं वरणाय वै ।
पिप्पलादस्तदा पद्मां ययाचे कन्यकां शुभाम् ॥१७॥
श्रुत्वा मौनी नृपो जातः किञ्चिन्निर्वक्तुमक्षमः ।
मुनिः प्राह तदा तं वै देहि कन्यां नृपोत्तम ! ॥१८॥
अथवा भस्मसात् सर्वं करिष्यामि क्षणेन वै ।
सर्वे बभूवुराच्छन्ना भृत्याश्च मुनितेजसा ॥१९॥
शुशोच राजा राज्ञी च दृष्ट्वा वृद्धं ज्वरान्वितम् ।
महिष्यः शुशुचुः सर्वा इतिकर्तव्यताऽक्षमाः ॥२०॥
कन्यामाता विललाप कन्यादुःखं विचिन्त्य वै ।
तद्विलोक्य पिप्पलादो बोधयामास भूमिपम् ॥२१॥
महिषीं नृपपुत्रांश्च भृत्यांश्च कन्यकां तथा ।
अद्य वाऽन्यदिवसे वा दातव्या कन्यका भवेत् ॥२२॥
यस्मै कस्मै प्रदातव्या देहि विप्राय मे नृप ! ।
सत्पात्रं ब्राह्मणादन्यन्न पश्यामि जगत्त्रये ॥२३॥
पराय विप्रादन्यस्मै नैव त्वं दातुमर्हसि ।
सुतां दत्वा च मे राजन् रक्षस्व सर्वसम्पदः ॥२४॥
कन्यानिमित्तं सर्वस्वं मा ते भस्मगतं भवेत् ।
इत्येतद्वाक्यमत्युग्रं श्रुत्वा कन्यापि शोभना ॥२५॥
पितुर्हितं चिन्तयाना गौरवं तपसामृषेः ।
सर्वसम्पदविघ्नत्वं प्राह राज्ञे प्रदेहि माम् ॥२६॥
ततः सालंकृतां पद्मां राजा राज्ञी ददौ मुदा ।
कान्तां प्राप्य पिप्पलादो मुदितस्तपसा ज्वलन् ॥२७॥
दर्शयामास रूपं स्वं यौवनं योगकृद्बलात् ।
अष्टादशसमायोग्यं कन्यायोग्यं हि कामदम् ॥२८॥
राजादयोऽतिसंहृष्टाः कन्या तुतोष चान्तरे ।
यौतकं च तथा कान्तां गृहीत्वा मुनिराड् ययौ ॥२९॥
अनरण्यः पूर्णमना जगाम तपसे ततः ।
मनो मोक्षे दधौ तत्र चिन्तयन् राधिकेश्वरम् ॥३०॥
कृष्णनारायणं प्राप्य गोलोकं संजगाम ह ।
कीर्तिरण्यो ज्येष्ठपुत्रो राज्यं तस्य चकार वै ॥३१॥
अथाऽनरण्यस्य कन्या सिषेवे भक्तितः ऋषिम् ।
कर्मणा मनसा वाचा लक्ष्मीर्नारायणं यथा ॥३२॥
पातिव्रत्यपरा नित्यं सेवते श्रीहरिं यथा ।
अंगसंमर्दनं मुनेः पादसंवाहनं मुहुः ॥३३॥
कामेच्छापूरणं शश्वच्चक्रेऽनुवृत्तिमाश्रिता ।
स्नात्वा स्नापयति भुंक्ते भोजयित्वा द्विजं पतिम् ॥३४॥
स्वापयित्वा स्वपित्येव चानुतिष्ठति कर्मसु ।
यथा वै तापसो वृद्धो राजसोऽथ युवा मुनिः ॥३५॥
प्रसन्नः स्यात्तथा सेवां करोत्यहर्निशं सती ।
मन्यमाना स्वकं भाग्यं श्रेष्ठाच्छ्रेष्ठतमं सदा ॥३६॥
यदहं ब्राह्मणं प्राप्तास्तत्रापि मुनितापसम् ।
पवित्रं पुण्यरूपं च नारायणस्वरूपिणम् ॥३७॥
योगिनं चात्मवेत्तारं काऽन्या धन्या मया समा ।
पवित्राऽहं सदा जाता ह्यर्थिता ऋषिणा स्वयम् ॥३८॥
मम भाग्यस्य पारं न पुण्यपारं न विद्यते ।
अनेकजन्मपुण्यैश्च प्राप्यते भगवान्पतिः ॥३९॥
सोऽयं साक्षात् कृष्णनारायणो लब्धः पतिर्मया ।
तस्यैव सेवया मुक्तिस्तस्य तोषेऽक्षरं पदम् ॥४०॥
तस्यैव हृदये ब्रह्म ब्रह्म लब्धं मया ततः ।
नाऽत्र मे मोक्षणे त्वन्यत्साधनं परिशिष्यते ॥४१॥
मम पित्रा शुभं दत्ता स्वस्त्यस्तु जनकस्य मे ।
स्वस्त्यस्तु मम मातुश्च याऽहं जाता सुखाऽन्विता ॥४२॥
सर्वं लब्धं मया त्वत्र पिप्पलादे ऋषीश्वरे ।
ज्ञानतृप्ती रतितृप्तिर्भोगतृप्तिश्च लभ्यते ॥४३॥
यशस्तृप्तिः ख्यातितृप्तिः पूजातृप्तिश्च लभ्यते ।
राज्यभारो दुःखदोऽति महिषीत्वं ततोऽधिकम् ॥४४॥
महिषीणां न वै शान्तिः पञ्जरपक्षिणां यथा ।
धर्मोऽर्थः कामनाऽत्रैव भुज्यते सुखतो मया ॥४५॥
न तथा तत्पचित्ताभिर्महिषीभिः प्रभुज्यते ।
शुभं जातं तु यज्जातं सर्वं दैवं मयाऽर्जितम् ॥४६॥
मद्यमांसादनृपतिकरे न पतिताऽस्म्यहम् ।
तदेव पुण्यं मे चात्र प्रोद्बुद्धं रक्षकं मम ॥४७॥
कुमारिका न जानन्ति राजस्यो राजपीडनम् ।
पश्चात् पतित्वा शोचन्ति वयं क्व निरये गताः ॥४८॥
साधुशीलो देवगुणः पतिः सर्वत्र दुर्लभः ।
भोगको मारकः श्वेव पतिः सर्वत्र चाप्यते ॥४९॥
भोगैर्देहं क्षपयति पुण्यं नाशयति त्वघैः ।
यमलोकं प्रापयति सुलभस्तादृशः पतिः ॥५०॥
स्वार्थमात्रपरो यश्च परलोकाऽसहायकृत् ।
न पतिः स यथार्थोऽस्ति यद्योगान्नरकं ध्रुवम् ॥५१॥
तस्मादत्र परत्रैव चाऽर्धांगमिव रक्षति ।
सृष्टौ मोक्षे सुखे दुःखे सहगामी पतिः पतिः ॥५२॥

एतादृशं पतिं प्राप्य या न प्रसेवते तु तम् ।
कर्मणा मनसा वाचा साभवेद् वञ्चिता सदा ॥५३॥
कुलस्य गुणजालस्य रूपस्य बुद्धिधर्मयोः ।
मानं न सर्वथा रक्ष्यं पत्यग्रे कुलयोषिता ॥५४॥
देहं पतिर्मनः स्वामी त्वभिमानं पतिर्मम ।
कार्यकारणसंघातं सुखं दुःखं पतिर्मम ॥५५॥
भोज्यं भोगोभोक्तृवृत्तिर्भोग्यं सर्वे पतिर्मम ।
विश्वासो वरदानं च न्यासश्चापि पतिर्मम ॥५६॥
दीनता श्रेष्ठिता स्थैर्यं चानुकूल्यं पतिर्मम ।
व्रतं धर्मस्तथा पुण्यं तीर्थं दानं पतिर्मम ॥५७॥
स्वाध्यायपाठपूजाश्च सन्ध्याधर्मः पतिर्मम ।
उत्सवश्च समाजश्च प्रदर्शनं पतिर्मम ॥५८॥
यानं च नाटकं रम्यं नृत्यं गानं पतिर्मम ।
भवनं राज्यसमृद्धिर्गजवाजं पतिर्मम ॥५९॥
गुरुर्ब्रह्मा हरो विष्णुः सर्वे देवाः पतिर्मम ।
वैश्वदेवोऽतिथेः पूजा प्राघूर्णिकः पतिर्मम ॥६०॥
गर्भः पुत्रो रतिः प्रीतिर्नैःश्रेयसं पतिर्मम ।
धाम क्षेत्रं धरा राज्यं यत्सर्वस्वं पतिर्मम ॥६१॥
निषेधश्च विधिश्चापि स्वैरिणीत्वं पतिर्मम ।
इति तृप्तिं परां मत्वा सेवां करोमि वै ऋषेः ॥६२॥
एवं नित्यानन्दतृप्ता लक्ष्मि ! सा राजकन्यका ।
सिषेवे तमृषिश्रेष्ठं साक्षान्नारायणं यथा ॥६३॥
तस्या धर्मपरीक्षार्थं धर्मदेवो ह्यचिन्तयत् ।
कीदृशीयं पातिव्रत्यपरा वर्तत एव नु ? ॥६४॥
एकदा स्वर्णदीं स्नातुं प्रयातां सस्मितां सतीम् ।
ददर्श पथि धर्मस्तु मायया नृपलिंगकः ॥६५॥
स्वर्णरत्नरथारूढः स्वर्णरत्नादिभूषितः ।
नवयौवनरूपाढ्यः कामदेव इवाऽपरः ॥६६॥
सुरूपां सुन्दरीं दृष्ट्वा पद्मामुवाच मायया ।
अहो सुरूपा कान्तेयं क्व च क्व जर्जरो मुनिः ॥६७॥
अयि ! सुन्दरि ! लक्ष्मीव राजयोग्येऽति सूज्ज्वले ! ।
प्रकृष्टयौवनस्थे ! च कामगर्वहरे ! शुभे ! ॥६८॥
जरादग्धस्य वृद्धस्य समीपे किं विराजसे ? ।
काष्ठपाषाणतुल्यस्याऽस्थिमात्रशेषितस्य च ॥६९॥
राजयोग्याऽसि राजेन्द्रि ! राजसे राजवक्षसि ।
चन्दनागुरुलिप्तांगा स्वर्णरत्नादिभूषिता ॥७०॥
दासदासीशतैर्युक्ता सुखिनी भव सुन्दरि ! ।
विप्रं तपःकृशं शुष्कं ब्रह्मोन्मुखं क्षिणायुषम् ॥७१॥
विहाय पश्य राजेन्द्रं रतौ शूरं भुवां पतिम् ।
स्वर्गसुखसमृद्धं समावस्थं च मादृशम् ॥७२॥
किं पर्णकुट्यां सुखमस्ति किंचित् ,
किं कंधरे पक्षिजटेऽस्ति सौख्यम् ।
किं चाऽस्थिभस्त्रामवलम्बसे त्वम् ,
आयाहि चिन्तामणिरच्युतेऽत्र ॥७३॥
प्राप्नुहि चिन्मणिमच्युते मयि,
त्वं कल्पवल्ली भवसीति संवृणे ।
रत्नं पिनद्धं कनके प्रशोभते,
न शंखयोग्ये खलु पाशवे गले ॥७४॥
प्राप्नोति सुन्दरं पुण्यात् सौन्दर्यं पूर्वजन्मतः ।
सफलं तद्भवेत् सर्वं रसिकाऽऽलिंगनेन तु ॥७५॥
यथा कान्ता तथा कान्तं कामकार्यविशारदम् ।
किंकरं कुरु मां कान्ते ! सर्वं दास्यामि तेऽनघे ॥७६॥
सजलो निर्जने रम्ये वनेऽरण्ये च पर्वते ।
नद्यां नदे समुद्याने पुष्पिते गन्धशालिनि ॥७७॥
याने विमाने साम्राज्ये मलये रैवते गिरौ ।
अन्ये चन्दनवृक्षाढ्ये विहरिष्यामि वै त्वया ॥७८॥
कामज्वरप्रदग्धायाः शान्तिं कर्तुमहं क्षमः ।
विहरस्व मया सार्धं जन्मेदं सफलं कुरु ॥७९॥
इत्युक्तवन्तं राजानं करे गृहीतुमुत्सुकम् ।
निकटं तु समायान्तं धर्मं प्राह पतिव्रता ॥८०॥
दूरं गच्छ गच्छ दूरं पापचिन्तापरो ह्यसि ।
मां चेत् स्पृशसि कामेन सद्यो भस्म भविष्यसि ॥८१॥
अहं विवाहिता नारी पिप्पलादर्षिभामिनी ।
पतिव्रता न पश्यामि हृदाऽपि वै नरान्तरम् ॥८२॥
कथं स्पृशामि पापांशं स्त्रीजितं लम्पटं नृपम् ।
अधर्मिस्पर्शमात्रेण सर्वं पुण्यं विनश्यति ॥८३॥
परनारीं प्रसह्यात्र धर्षितुं त्वं समुद्यतः ।
न भूमौ पातकी त्वादृगन्यो भवति भूपतिः ॥८४॥
अहं ब्राह्मणपत्न्यस्मि तत्र वृद्धतपस्विनः ।
तां मातरं स्त्रीभावं कृत्वा येन ब्रवीषि माम् ॥८५॥
भविष्यति क्षयस्तेऽत्र धर्षितुर्मम शापतः ।
क्षयं याहि ध्रुवं राजन् हृदा पापेन कर्मणा ॥८६॥
श्रुत्वा धर्मः सतीशापं नृपरूपं विहाय तु ।
धर्मदेवः स्वयं भूत्वाऽदृश्यत प्राह तां च सः ॥८७॥
मातर्जानीहि मां धर्मं धर्मज्ञानां गुरोर्गुरुम् ।
परस्त्रीमातृबुद्धिं च कुर्वन्तं लोकरक्षकम् ॥८८॥

अहं तवाऽन्तर्विज्ञातुं समागतोऽस्मि पद्मिके ! ।
परीक्षितुं राजरूपं धृतवानस्मि धार्मिके ! ॥८९॥
तथापि स्वकृतं किञ्चिदकर्म भुंजते जनाः ।
मया कृतं चाऽवमानं तव वाक्यैस्तु निष्ठुरैः ॥९०॥
तत्फलं संप्रभोक्तव्यं मया नास्त्यत्र संशयः ।
कृतं मे दमनं त्वत्र न विरुद्धं यथोचितम् ॥९१॥
सर्वथा मे मृतिर्मास्तु सति ! तत्प्रार्थये सदा ।
शास्तिः समुत्पथस्थानामीश्वरेण विनिर्मिता ॥९२॥
शासनं त्वत्कृतं चास्तु यथासह्यं तु मे सति ! ।
पद्मोवाच तदा धर्मं साक्षी त्वमेव देहिनाम् ॥९३॥
कथं परीक्षितुं त्वेतद्राजरूपं धृतं त्वया ।
यन्निमित्तं मया शप्तश्चापराधोऽभवन्नु मे ॥९४॥
साध्वीशापो न वै मिथ्या जायते तु कदाचन ।
तव नाशे सृष्टिनाशो भवेदेव न संशयः ॥९५॥
तस्माद् यथा जीवनं ते शापश्च सार्थको भवेत् ।
तथा वदामि धर्मेन्द्र ! शृणु मानवभेदतः ॥९६॥
सत्ये जने चतुष्पादो भव त्वं धर्म ! सर्वथा ।
त्रेताव्याप्तजने त्वं त्रिपाद् भव वृष सर्वथा ॥९७॥
द्वापरव्याप्तमनुजे द्विपादो धर्म ! संभव ।
कलिव्याप्तजने त्वेकपादः शेषेऽस्तु ते लयः ॥९८॥
पशुप्राये जडे धर्म ! त्वमाच्छन्नो भविष्यसि ।
सात्त्विके पूर्णता तेऽस्तु राजसादावपूर्णता ॥९९॥
यद्यत् स्थलं तवाधारं श्रूयतां वृष ! वच्मि तत् ।
हरिभक्तेषु सर्वेषु वैष्णवेषु विशेषतः ॥१००॥
साध्वीषु साधुषु यतिमुनिषु ब्रह्मचारिषु ।
पतिव्रतासु प्राज्ञेषु वानप्रस्थेषु भिक्षुषु ॥१०१॥
धर्मशीलेषु सर्वेषु वैश्यक्षत्रियजातिषु ।
द्विजसेविषु शूद्रेषु सतां संगे स्थितेषु च ॥१०२॥
अश्वत्थवटबिल्वेषु तुलसीचन्दनेषु च ।
दीक्षापरीक्षाशपथगोष्ठगोपदभूमिषु ॥१०३॥
विवाहेषु च सर्वत्र पुष्पेषु वृक्षजातिषु ।
देवालयेषु तीर्थेषु सतां गेहेषु सर्वदा ॥१०४॥
वेदाऽऽम्नायविचारेषु कृष्णकीर्तनकारिषु ।
व्रतपूजातथोन्यायियज्ञसाक्षिस्थलेषु च ॥१०५॥
गोप्राणिष्वथ हंसेषु गरुडेषु सतीषु च ।
कृशता तेन भविता सत्यस्थलेषु सर्वथा ॥१०६॥
कृशता तु तदन्येषु स्थलेषु भविता शृणु ।
पुंश्चलीषु तु सर्वासु नरघातिगृहेषु च ॥१०७॥
नीचमूर्खखलनिन्दापरेषु च शठेषु च ।
देवतागुरुविप्रेष्टपाल्यानां धनहारिषु ॥१०८॥
धूर्तेष्वसत्सु दुष्टेषु चौरेषु व्यवायिषु ।
दुरोदरसुरामांसकलहाऽतिक्रमेषु च ॥१०९॥
शालग्रामसाधुतीर्थक्षेत्रसेवाप्रघातिषु ।
दस्युकर्मणि गर्विष्ठे मषीजीव्यसिजीविषु ॥११०॥
भर्तृनिन्दितनारीषु जीवहिंसोपजीविषु ।
दीक्षासन्ध्याधर्मभक्तिहीनेषु च कलंकिषु ॥१११॥
कन्यायोषित्सुरग्रन्थविद्याविक्रयिषु नृषु ।
मित्रद्रोहिकृतघ्नेषु सत्यविश्वासघातिषु ॥११२॥
शरणागतदीनाऽन्धाश्रितघ्नेषु मृषोक्तिषु ।
शश्वन्मिथ्योक्तिशीलेषु तथा सीमापहारिषु ॥११३॥
मिथ्यासाक्षिषु च मिथ्यान्यायदेषु च राजसु ।
पुण्यरोधिषु सर्वेषु न स्थातुं शक्यते त्वया ॥११४॥
शुद्धसात्त्विकशान्तेषु चतुष्पात् त्वं सदा वस ।
सत्त्वमिश्ररजोवृद्धौ त्रिपात् त्वं त्रितको वस ॥११५॥
रजोमिश्रतमोवृद्धौ द्विपात् त्वं द्वापरो वस ।
तमोमात्रहृदयेषु त्वेकपात् त्वं कलिर्वस ॥११६॥
सत्यं मखस्तपो दानं चतुष्पादाः पुरा तव ।
अहिंसादमनाऽऽस्तिक्यदानान्यत्र पदानि ते ॥११७॥
भाविकाले भविष्यन्ति शीलं शौचं च सेवनम् ।
कीर्तनं चेति पादास्ते क्रमात् ह्रासे तथा वस ॥११८॥
इत्युक्त्वा विररामैनां धर्म आशिष आददौ ।
धन्यासि पतिभक्तासि स्वस्ति तेऽस्तु हि सन्ततम् ॥११९॥
युवा भवतु भर्ता ते रूपवान् स्थिरयौवनः ।
चिरजीवी भवत्वेव मार्कण्डेयादतोऽधिकम् ॥१२०॥
धनैश्वर्यवती त्वं च संभव स्थिरयौवना ।
माता त्वं दशपुत्राणां भव संचिरजीविनाम् ॥१२१॥
श्रुत्वा पद्मा वृषं प्रदक्षिणं कृत्वा प्रणम्य च ।
ययौ स्वं मन्दिरं साध्वी धर्मोऽपि स्वस्थलं ययौ ॥१२२॥
प्रतिव्रतां प्रशशंस प्रतिसंसदि संसदि ।
पतिव्रतापि सा पद्मा पातिव्रत्यबलात् खलु ॥१२३॥
शतपुत्रवती जाता सर्वसौभाग्यसंभृता ।
एवं पतिव्रता नारी धर्मं हन्तुं च रक्षितुम् ॥१२४॥
स्वयमेव समर्थाऽस्ति कोऽन्यस्तां धर्षयेज्जनः ।
इति ते कथितं लक्ष्मि ! पद्मायाः वै कथानकम् ॥१२५॥
धर्मपुष्टिकरं शश्वत्पातिव्रत्यबलप्रदम् ।
स्वर्गमोक्षप्रदं चापि सर्वधर्मप्रदं तथा ॥१२६॥

पतिसेवाप्रदं चैतत्संसारशमनं परम् ।
भक्त्या शृणुयान्नारी पातिव्रत्ये दृढा भवेत् ॥१२७॥
श्रोतुर्वक्तुस्तथा रक्षां ध्रुवं धर्मो विधास्यति ।
पातिव्रत्यं प्रपत्तिश्च समानौ द्वौ वृषौ सदा ॥१२८॥
एकेनैवाऽऽप्नुयात्सर्वं द्वितीयाऽपेक्षणं नहि ।
यत्रोभौ तत्र वै लक्ष्मि ! किमु वक्तव्यमात्मना ॥१२९॥
पातिव्रत्यं दासधर्मः प्रपत्तिः स्नेहधर्मिणी ।
दास्यं स्नैह्यं परं लब्ध्वा भुक्तिं मुक्तिमवाप्नुयात् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽनरण्यपुत्र्याः पतिव्रतायाः पद्मायाः पिप्पलादेन लग्नं, धर्मकृतपरीक्षायां धर्मस्य शापश्चतुष्पादानां कालक्रमेण ह्रास इत्यादिनिरूपणनामा द्वासप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां तेऽपि पातिव्रत्यपरायणाम् ।
वैकुण्ठे समभूद् या वै गर्वनाशाय सर्वथा ॥ १ ॥
वैकुण्ठाऽधिपतिः कृष्णनारायणो हरिः स्वयम् ।
राजते स्म सभामध्ये नैकपार्षदवेष्टितः ॥ २ ॥
दासदासीवैष्णवैश्च सेवितः परमेश्वरः ।
अक्षराधिपतेर्वक्षः स्थलोत्पन्ना महासती ॥ ३ ॥
सम्पत्कर्त्री महेच्छा श्रीहरेः संकल्परूपिणी ।
लक्ष्मीः स्वां मुक्तरूपेभ्यो विलोक्याऽन्तर्विलक्षणाम् ॥ ४ ॥
प्रार्थयामास सर्वेशं लज्जया श्रीहरिं तदा ।
मम वासस्य योग्यं वै भवनं रचय प्रभो ! ॥ ५ ॥
यथाहं पातिव्रत्येन सिषेवे त्वां परेश्वरम् ।
कृष्णनारायणः साक्षात् परात्मा परमेश्वरः ॥ ६ ॥
श्रुत्वा योग्यां प्रार्थनां च ज्ञात्वा नारीं स्वसेविकाम् ।
वैकुण्ठं रचयामास युगलार्थं नवं शुभम् ॥ ७ ॥
स्वयं चतुर्भुजो जातो महालक्ष्म्यभिलाषया ।
पतिरूपः परब्रह्म शंखचक्रगदादिमान् ॥ ८ ॥
अष्टादशवयोवर्षः कमनीयोऽतिकान्तिमान् ।
सर्वांगवीर्यसम्पूर्णो लक्ष्मीः षोडशवत्सरा ॥ ९ ॥
कमनीया पतिसेवायोग्या मुक्ताऽतिसुन्दरी ।
सुस्तनी स्वानना रम्या सुमध्या स्वर्णवर्णिका ॥१०॥
सर्वांगशोभासम्पूर्णा सर्वसिद्धिसमाश्रिता ।
सर्वैश्वर्यमहानन्दा संकल्परूपधारिणी ॥११॥
कामिनी रतिकुशला नारायणपरायणा ।
सर्वाभरणशोभाढ्या दिव्यवस्त्रादिभूषिता ॥१२॥
सर्वशृंगाररसद्रव्यचूर्णकजलमण्डिता ।
अनंगश्चाऽभवत्तस्यां देहाऽभिन्न इव स्थितः ॥१३॥
तस्याः संकल्पपूर्त्यर्थं नारायणश्चतुर्भुजः ।
चतुर्भुजां स्वकां पत्नीं लक्ष्मीं नीत्वा ययौ हरिः ॥१४॥
वैकुण्ठं स्वकृतं धाम यत्र नाऽन्यद् द्वयं विना ।
तृतीयं व्यक्तिरूपं न युगलं तत्र मोदते ॥१५॥
संकल्पसिद्धयस्तत्र प्रोद्भूता वै सहस्रशः ।
दासिकास्ता महालक्ष्म्याः सर्वाः पञ्चदशाब्दिकाः ॥१६॥
तासां कृते कृतास्तत्र सौधाश्चन्द्रसमाः सुखाः ।
स्वकृते भवनं दिव्यं मन्दिरं च कृतं नवम् ॥१७॥
प्राकारोऽतिविशालश्च पत्तनं दीर्घविस्तरम् ।
जलपुष्करिणीवृन्दं चकार तत्र श्रीहरिः ॥१८॥
नदान् नदीस्तडागानि वाटिकोद्यानभूमिकाः ।
विहाराणि विचित्राणि रसशालाश्च दीर्घिकाः ॥१९॥
भोज्यशालास्तथा प्रसन्नताशाला रतिस्थलीः ।
सभास्थलं महद्दिव्यं सिंहासनं परात्परम् ॥२०॥
उपकरणवस्त्वाढ्यभवनानां तु पंक्तिकाः ।
विनिर्माय स्वयं तत्र मोदते युगलं सदा ॥२१॥
नारायणो यदा लक्ष्म्या साकं संतिष्ठते गृहे ।
प्रेममग्नास्तदा दास्यः समागच्छन्ति भावतः ॥२२॥
भगवत्प्रेमसम्पन्ना रजोरतिसमाहुताः ।
विलासार्थं समागत्याऽऽश्लिष्यन्ति परमेश्वरम् ॥२३॥
हरिस्तु बहुरूपाणि धृत्वा रमते तास्वपि ।
महालक्ष्मीश्चापि तत्र रमते भवने स्वके ॥२४॥
सहस्रायुतसंख्यासु समकाले हरिः स्वयम् ।
रमते बहुभावेन कोटिरूपधरः प्रभुः ॥२५॥
एवं वैकुण्ठभवने वैकुण्ठे पूर्णधामनि ।
नारायणं विना नान्यो नरः कश्चित्प्रवर्तते ॥२६॥
कोटिकोट्यस्तु दास्यश्च वर्तन्ते सेविकाः सदा ।
तत्रैकदा हि सर्वासु सर्वरूपधरो हरिः ॥२७॥
चक्रे वै रमणं दासीकोटितृप्तिकरं प्रभुः ।
महालक्ष्मीः स्वभवने नारायणे प्रवल्गिता ॥२८॥
महाऽऽनन्देऽतिमग्नाऽऽसीत् तल्लीनेव तदाऽभवत् ।
तत्रैवाऽवसरे नित्या मुक्ताः सनत्कुमारकाः ॥२९॥
ज्ञात्वा योगबलेनापि वैकुण्ठं नूतनं कृतम् ।
नारायणस्वरूपं च लक्ष्मीस्वरूपमित्यपि ॥३०॥

दासीकोटिस्वरूपाणि भवनानि नवानि च ।
साक्षाद् द्रष्टुं कृतहृदो मुक्ता बालस्वरूपिणः ॥३१॥
रतिभावेऽकृतयोगा अजानन्त इव स्त्रियम् ।
स्त्रीयोगं चाऽप्यजानन्तो विघ्नं जानन्ति चैव न ॥३२॥
दर्शनार्थं कृतयत्ना व्योममार्गादवातरन् ।
प्राकारान्तःस्थलीं गत्वा संविविशू रतिगृहम् ॥३३॥
नारायणं समाश्लिष्टां लक्ष्मीं विलोक्य ते तदा ।
गत्वा पार्श्वे द्वयोर्देहौ वाहयामासुरादरात् ॥३४॥
पादसंमर्दनं चक्रुः सेवयामासुरीश्वरौ ।
अशंकमानसाः सर्वे पंचवर्षाः कुमारकाः ॥३५॥
लक्ष्मीरानन्दमासाद्य सेवयित्वा नरायणम् ।
शुद्धा भूत्वा तु तान्बालान् भोजनादि ददौ सती ॥३६॥
भोजिताः पूजिता दृष्टाः स्पृष्टा नताश्च संययुः ।
ततः कृष्णं महालक्ष्मीः प्राह नारायणं प्रभुम् ॥३७॥
भगवन् सर्वदां नैवमुचितं दर्शनं तव ।
बालास्तु दोषरहितास्तथा मानविवर्जिताः ॥३८॥
किन्तु चान्ये महात्मानः ऋषयश्च सुरादयः ।
इत आरभ्य बालेभ्यो विज्ञाय दर्शनोत्सुकाः ॥३९॥
आयास्यन्ति सदा तेऽत्र दर्शनार्थं मुहुर्मुहुः ।
अकालदर्शने नौ वै विघ्नं तु सततं भवेत् ॥४०॥
दास्यस्तत्र नियोक्तव्या गोपुरादौ तु पालिकाः ।
यद्वा यथेष्टं भगवन् यथेच्छसि तथा कुरु ॥४१॥
श्रुत्वा नारायणो योग्यं युयोज द्वारपालिकाः ।
नियुक्ता अपि ताः क्वापि क्वचित् प्रेमातिरेकतः ॥४२॥
त्यक्त्वा द्वारं हरिं यान्ति द्वारं शून्यं भवत्यपि ।
ऋषयो मुनयो ज्ञात्वा समायान्ति तु भावुकाः ॥४३॥
वैकुण्ठस्य विलोकार्थं दर्शनार्थं हरेस्तथा ।
तदा लक्ष्म्या पुनः कृष्णनारायणः समर्थितः ॥४४॥
भगवन् द्वारपालत्वं दृढं भक्ताय दीयताम् ।
सख्यस्तु ताः स्नेहमग्ना द्वारे तिष्ठन्ति नैव यत् ॥४५॥
ये तु स्युर्द्वारपालत्वे कृतयत्ना भवन्तु ते ।
इति श्रुत्वा हरिस्तत्र सस्मारैश्वर्यसद्गुणान् ॥४६॥
ऐश्वर्याणि गुणाश्चापि पार्षदा रूपसुन्दराः ।
नराकाराश्चतुःकराः भूत्वाऽन्तिकमुपाययुः ॥४७॥
स्तुत्वा नारायणं लक्ष्मीं नत्वा प्राहुश्च देशनम् ।
दर्शयाऽत्र महाराज ! कर्तुं जाताः स्म ते धिया ॥४८॥
तत्र जयं विजयाख्यमैश्वर्यं प्राह केशवः ।
द्वारपालत्वमेवाऽत्र कर्तव्यं मम देशनम् ॥४९॥
एवं नन्दसुनन्दौ च पुष्पदन्तं च सात्त्वतम् ।
कुमुदं कुमुदाक्षं च नियुयुजेऽपि गोपुरे ॥५०॥
अष्टैश्वर्यात्मकपार्षदास्ते रक्षन्ति गोपुरम् ।
लक्ष्मीदासीकोटियुक्ता निःशंका सेवते पतिम् ॥५१॥
पातिव्रत्येन धर्मेण यथा छाया स्वदेहिनम् ।
नान्यं नरं विजानाति नारायणात्परं समम् ॥५२॥
नान्यं पश्यति पुंवर्गे द्वारपालमपि क्वचित् ।
नान्यैः सा भाषते लक्ष्मीर्नान्यं स्पृशति वै क्वचित् ॥५३॥
नान्यां रतिं प्रजानाति हरेर्वैकुण्ठवासिनः ।
नान्यसत्तां विजानाति चतुर्भुजनरायणात् ॥५४॥
नान्यगुणान् कथयति नारायणगुणान् ऋते ।
नान्यं ध्यायति स्मरति मनुते निश्चिनोति न ॥५५॥
नारायणः परब्रह्म नारायणः परेश्वरः ।
नारायणः सर्वद्रष्टा नान्यस्तस्मात्परः प्रभुः ॥५६॥
इति सर्वात्मना तत्र लीना भवति विद्यते ।
पतिवाक्यकरी स्वामिसुखदा पतिवर्तिनी ॥५७॥
स्वापे च रमणे स्नाने शयने भोजनेऽर्हणे ।
विहरणे प्रकार्ये च लक्ष्मीः पतिपरायणा ॥५८॥
सेवते श्रीहरिं तत्र शय्यायां वै नरायणी ।
तावत्तत्र पुनर्याता दर्शनाय कुमारकाः ॥५९॥
सनकाद्या ब्रह्मपुत्रा नित्यसिद्धा हि बालकाः ।
एवमेव हरेस्ते च दर्शनार्थं समागताः ॥६०॥
प्राकारं चाथ च द्वाराण्यपहाय महाऽम्बरात् ।
अवतेरुर्ब्रह्मरूपा ययुर्नारायणान्तिकम् ॥६१॥
पूर्ववत् सेवनं कृत्वा कृत्वा च दर्शनं मुहुः ।
प्रसन्नाः पञ्चवर्षीया ययुस्ते तृप्तमानसाः ॥६२॥
इति जाते प्रसंगे च महालक्ष्म्या तु वै ततः ।
आज्ञप्ता द्वारपालाद्या निरोधाय गतिकृताम् ॥६३॥
आगच्छेयुर्विनाऽऽज्ञां न प्रविशेयुर्न वै च ते ।
ये केऽपि स्युस्तथा द्वारपालत्वं कार्यमेव हि ॥६४॥
इत्याज्ञप्ता महालक्ष्म्या सर्वदिक्षु प्रपालिनः ।
विनाऽऽज्ञां तु महालक्ष्म्यास्तथा हरेरपि क्वचित् ॥६५॥
प्रवेशं न ददत्येव यद्यपि स्युर्हरादयः ।
एवं सेवापरा नित्यं लक्ष्मीः कृष्णं प्रसेवते ॥६६॥
अशंका चातिसम्मुग्धा दासीकोटिभिरर्चिता ।
पातिव्रत्यपरा नित्यं सेवते श्रीनरायणम् ॥६७॥
योगनिद्रोत्तरं योगनिद्रां गृह्णाति पद्मजा ।
स्वपने शयने नित्यं करोति त्वंगमर्दनम् ॥६८॥

योगनिद्रां हरेः पूर्वं विहायैव जलामृतम् ।
ददात्याननशुद्ध्यर्थं दन्तशुद्ध्यर्थचूर्णकम् ॥६९॥
स्नानाद्यर्थं जलं चोष्णं सुगन्धिचन्दनान्वितम् ।
वस्त्रं चाभूषणाद्यं च कुसुमादि ददाति च ॥७०॥
शृंगाररसपुष्ट्यर्थं करोत्याभूषितं हरिम् ।
भोज्यं मिष्टं दुग्धपानं कारयत्येव सर्वदा ॥७१॥
शीतलेष्टजलपानं फलं मुखप्रशोधनम् ।
ताम्बूलाद्यं ददात्येवाऽम्बरक्षालनमित्यपि ॥७२॥
कृष्णभोज्यादिपात्राणां मञ्जनं स्वकरेण वै ।
आसनादिप्रदानं च केशवेशादिसाधनम् ॥७३॥
कस्तूरीकज्जलकुंकुमाक्षतादिसमर्पणम् ।
व्यजनेनाऽनिलदानं शय्यास्तरणमित्यपि ॥७४॥
एवं तदंगकार्याणि करोत्येषा पतिव्रता ।
व्रतं पूजा जपो होमः पठनं स्तोत्रमित्यपि ॥७५॥
कृष्णाज्ञयैतत्सर्वं वै करोत्येषा पतिव्रता ।
नारायणस्य सेवायां नारायणी प्रवर्तते ॥७६॥
अथैकदा महालक्ष्मीर्दासीसहस्रवारिता ।
ययावुद्यानके रम्ये मनोरञ्जनकाम्यया ॥७७॥
तत्र विभिन्नशाखाढ्यवृक्षराजिविराजिते ।
शाद्वले पुष्पगन्धाढ्ये मृदुले सुभगे स्थले ॥७८॥
संरेमे सखाभिः सार्धं प्रशशंस स्वकं सुखम् ।
बहुमान्यं प्रशशंस गर्वमवाप सुन्दरी ॥७९॥
सख्यो नारायणो देवः सर्वेश्वरोऽपि सर्वदा ।
ममाऽभिप्रायमासाद्य करोत्येव क्रियां सदा ॥८०॥
मया तु सेवया नाथो वशीकृतोऽस्ति माधवः ।
मामन्तरा न वै स्थातुं क्षणं सौधे प्रवर्तते ॥८१॥
हिक्कान्वितां प्रपश्यन्तु मां हि स्मरति केशवः ।
आयास्यति क्षणेनात्र यद्वा गच्छाम एव तम् ॥८२॥
मद्वाक्यं नर्मयुक्तं वा यथार्थं वा न लुम्पति ।
यथा वच्मि कृष्णनारायणः करोति तत्तथा ॥८३॥
मयैव गृहवानस्ति मयैव शोभते सदा ।
मयैव च भवत्योऽपि दत्तास्तस्मै परात्मने ॥८४॥
नान्या मत्सदृशी मान्या धन्या चात्र सहेलिकाः ।
एवं गर्वं समापन्ना ज्ञाता नारायणेन सा ॥८५॥
पातिव्रत्यपरा चेयं स्मयमाप्ताऽतिभावतः ।
दर्पयुक्ता महालक्ष्मीः सखीभिः सह तत्स्थलात् ॥८६॥
गृहं प्रतिनिवृत्ता च समायाता तु गोपुरम् ।
हरिर्जये विजये च विवेश गर्वगञ्जनः ॥८७॥
विशमाना विभोर्द्वारं विशालं सा सखीवृता ।
निवारिता सा द्वारात्तु जयेन विजयेन च ॥८८॥
पराभूता महालक्ष्मीस्तेन द्वयेन सा ततः ।
मत्वाऽऽत्मनस्तिरस्कारं साभिमाना महासती ॥८९॥
स्मृत्वा हरेः पादपद्मे देहं त्युक्तं समुद्यता ।
अथ तत्र दर्शनार्थमायाताः सर्वदेवताः ॥९०॥
पितामहो महेशश्च विष्णुधर्मश्च भास्करः ।
चन्द्रश्च कामदेवश्च वैश्वानरो धनाधिपः ॥९१॥
ऋषयो मुनयश्चापि मनवो विघ्ननायकाः ।
महेन्द्रो वरुणश्चापि जगत्प्राणो हुताशनः ॥९२॥
गोपुरे संस्थिताः सर्वे महालक्ष्मीं प्रतुष्टुवुः ।
क्षमस्व भगवत्यम्बे ! क्षमाशीले ! परात्परे ! ॥९३॥
शुद्धसत्त्वस्वरूपे च साध्वीदेवीप्रपूजिते ।
त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम् ॥९४॥
सर्वसम्पत्स्वरूपा त्वं त्वत्कलाः सर्वयोषितः ।
त्वां जना ये पूजयन्ति सर्वसृष्टिप्रपूजिताम् ॥९५॥
अभार्यो लभते भार्यां विनीतां च सुतां सतीम् ।
सुशीलां सुदरीं रम्यामतिप्रियसुवादिनीम् ॥९६॥
अपुत्रो लभते पुत्रं वैष्णवं चिरजीविनम् ।
पौत्रं च गुणसम्पन्नं विद्यावन्तं यशस्विनम् ॥९७॥
भ्रष्टराज्यो लभेद् राज्यं भ्रष्टश्रीर्लभते श्रियम् ।
कीर्तिहीनो लभेद् कीर्तिं धनभ्रष्टो धनं लभेत् ॥९८॥
तादृशी त्वं महायोगैश्वर्यवती हि वर्तते ।
मा देवि ! निधने हार्दे कृथा भव कृपावती ॥९९॥
इति श्रुत्वा तु देवानां महालक्ष्मीरुवाच तान् ।
त्यजामि देहं न क्रोधान्न वैराग्येण साम्प्रतम् ॥१००॥
इदं हृदि समालोच्य देवास्तच्छ्रूयतां शुभम् ।
यत्र पत्यौ सदीशे वै समता तृणशैलयोः ॥१०१॥
भृत्ये पत्न्यां मत्समता किं कार्यं जीवनेन वै ।
कृष्णपत्नीप्रधानाऽहं निरस्ता द्वारिणाऽमुना ॥१०२॥
या स्त्रीर्भर्तुरसौभाग्या साऽसौभाग्या च सर्वतः ।
शयने भोजने तस्या न सुखं जीवनं वृथा ॥१०३॥
यस्यां नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत्किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽपि वा ॥१०४॥
यस्या भक्तिर्न वै कान्ते साऽसौभाग्या तु स्वामिनि ।
साऽशुचिर्धर्महीना च सर्वकर्मविवर्जिता ॥१०५॥
पतिर्बन्धुर्गतिर्भर्ता दैवतं गुरुरेव सः ।
सर्वस्मात्तु परः स्वामी न गुरुः स्वामिनः परः ॥१०६॥

पिता माता सुतो भ्राता स्वल्पं ददाति वै धनम् ।
सर्वस्वदाता स्वामी तु पत्नीनां योषितां पतिः ॥१०७॥
काचिदेव विजानाति स्वामिमाहात्म्यमुत्तमम् ।
अतिसद्वंशसञ्जाता महासाध्वी तपस्विनी ॥१०८॥
असद्वंशप्रसूता या दुःशीला धर्मवर्जिता ।
स्वार्थमात्रपरा दुष्टा पतिं निन्दति कोपतः ॥१०९॥
या स्त्री स्वस्वामिनं द्वेष्टि पतिं विष्णुसमं गुरुम् ।
कुंभीपाके पतेत् सा तु ब्रह्मणो दिनमानकम् ॥११०॥
व्रतं चानशनं दानं सत्यं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥१११॥
अतः किंचिन्न वक्ष्यामि निष्ठुरं मत्पतिं प्रति ।
हरेर्भृत्यतिरस्कारैः प्राणाँस्त्यक्ष्यामि निश्चितम् ॥११२॥
पतिदोषे महासाध्वी पतिं न निष्ठुरं वदेत् ।
यदि सोढुमशक्ता स्यात् प्राणाँस्त्यजति धर्मतः ॥११३॥
पतिसेवा व्रतं स्त्रीणां पतिसेवा परं तपः ।
पतिसेवा परो धर्मः पतिसेवा सुरार्चनम् ॥११४॥
पतिसेवा परं सत्यं दानतीर्थानुकीर्तनम् ।
सर्वदेवमयः स्वामी शुचिः पुण्यस्वरूपकः ॥११५॥
या सती भर्तुरुच्छिष्टं भुंक्ते पादोदकं सदा ।
तस्या दर्शमुपस्पर्शं नित्यं वाञ्छन्ति देवताः ॥११६॥
सत्याः सर्वाणि तीर्थानि पुनन्ति पापिनो ह्यघात् ।
इति श्रुत्वा स्वयं ब्रह्मा सतीमुवाच भक्तिमान् ॥११७॥
भविष्यति न भद्रं च जयस्य विजयस्य च ।
त्वया न शप्तौ तौ भृत्यौ स्वाम्यपराधभीतया ॥११८॥
सापराधं तु धर्मिष्ठः क्षमया न शपेद् यदि ।
सर्वनाशो भवेत्तस्य निश्चितं मा चिरं सति ! ॥११९॥
यदि शप्तुं न शक्तश्च न दण्डं कर्तुमीश्वरः ।
सापराधे तु पुरुषे धर्मो दण्डं करोति हि ॥१२०॥
सर्वं क्षमस्व हे मातर्गच्छ गच्छ प्रियाऽन्तिकम् ।
अस्माकमपि लाभः स्याद्दर्शनस्य हरेरिह ॥१२१॥
प्राह लक्ष्मीस्तदा देवा ! यदि चास्मि पतिव्रता ।
पतिधर्मे यदि लुब्धा पत्यर्थे प्राणदायिनी ॥१२२॥
पातिव्रत्यपरा नित्यमचला यदि स्वामिनि ।
मदुक्तेषु तु धर्मेषु वर्तमाना सदा यदि ॥१२३॥
पातिव्रत्यबलेनाऽत्र समायातु नरायणः ।
गोपुरे दर्शनं दातुं समायातु पतिर्मम ॥१२४॥
यद्यहं प्राणतः पत्नी हरेः स्नेहास्पदा सदा ।
त्यक्तसर्वस्वहर्यर्था समायातु हरिस्तदा ॥१२५॥
यद्यहं जीवतः पत्नी तदात्मिका पतिव्रता ।
तदा नारायणस्त्वत्र समायात्वन्यथा म्रिये ॥१२६॥
इत्युक्त्वा तु महालक्ष्मीरग्निरुत्पाद्य पादतः ।
यावद् दग्धुं मनश्चक्रे तावत् कृष्णः समागतः ॥१२७॥
धृत्वा वक्षसि तां लक्ष्मीं चुचुम्बाऽऽश्लिष्टवानपि ।
क्षमस्व देवि ! क्रौर्यं मे इत्युक्त्वाऽभूद् गलद्रवः ॥१२८॥
साश्रुनेत्रो जगादैनां सत्याऽसि त्वं पतिव्रता ।
पातिव्रत्यप्रभावेण त्वागतोऽहं हि गोपुरे ॥१२९॥
आयाहि सति ! मा रुष्टा भव साध्वि ! मया त्विदम् ।
परीक्षार्थं गर्वशान्त्यै प्रविश्य भृत्यकारितम् ॥१३०॥
भक्ते कलत्रे बन्धौ च सर्वत्र समता मम ।
विशेषतोऽपि मद्भक्तः कलत्रात्पर एव च ॥१३१॥
मद्भक्तौ तव पुत्रौ च द्वारपालौ कथार्थकौ ।
क्षम मामपराधं च तयोश्च भक्तिपूर्णयोः ॥१३२॥
इत्युक्त्वा जगतां नाथः सुरेभ्यो निजदर्शनम् ।
दत्वा लक्ष्मीं हृदि कृत्वा ययौ स्वभवनान्तरम् ॥१३३॥
द्वारपालं समाहूय हरिः प्राह तदा सुखम् ।
मा भैर्वत्स सुखं तिष्ठ भयं किं ते मयि स्थिते ॥१३४॥
मद्भक्तानां तु कः शास्ता गच्छ वत्साऽऽसनं स्वकम् ।
मया वै चिन्तितं बीजं लोकेषु गमनाय यत् ॥१३५॥
तदर्थं कारितं चैतद् गास्यन्ति मानवा हि तत् ।
चरित्रं मे च भक्तानां मोक्षं यास्यन्ति तेन वै ॥१३६॥
देवान्प्राह हरिस्तत्र शृण्वन्तु सर्वथाऽमलम् ।
पातिव्रत्यं परो धर्मस्तेनाऽनया वशीकृतः ॥१३७॥
सिंहासनं परित्यज्य गोपुरं च समागतः ।
पातिव्रत्यबलेनैव सर्वाधारोऽपि देवताः ॥१३८॥
तस्मान्नैतत्समो धर्मो भुक्तिमुक्तिप्रदोऽस्ति वै ।
नरो नारी च वा भक्तः पातिव्रत्येन सेवते ॥१३९॥
स मत्पदमवाप्नोति गच्छामि प्रति तं सुराः ।
निवसामि गृहे तेषां तदधीनोऽस्मि सर्वथा ॥१४०॥
इत्युक्तास्तु सुरा नत्वा संपूज्य स्वगृहं ययुः ।
सती सेवापरा जाता श्रोतुर्वक्तुश्च तत्फलम् ॥१४१॥
जयश्च विजयः पूर्वे हरेरैश्वर्यरूपिणौ ।
पूर्वसृष्टौ वेदनिधेः पुत्रौ व्रतेन पार्षदौ ॥१४२॥
जातौ तौ राधिकाशापात् तृणबिन्दोः सुतावुभौ ।
मरुत्तयज्ञकर्तारौ धनार्थे शापतो मिथः ॥१४३॥
गजग्राहौ तु सञ्जातौ तौ वैकुण्ठात्प्रहापितौ ।
हरिणा स्वेच्छया निःसारितौ तौ पार्षदौ पुनः ॥१४४॥

जातावत्रेति विज्ञेयौ शापाद् दैत्यौ पुनः पुनः ।
पुनश्च पार्षदावन्ते त्वैश्वर्याख्यौ भविष्यतः ॥१४५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वैकुण्ठस्थमहालक्ष्म्या गर्वनाशार्थं गोपुरे रुद्धायास्तस्याः पातिव्रत्यप्रलापेन नारायणस्य गोपुरं प्रत्याकर्षणमित्यादिनिरूपणनामा त्रिसप्तत्यधिकत्रिशततमोऽध्यायः ॥३७३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तथा शच्याः पातिव्रत्यं दृढं यथा ।
चतुर्दशसु चेन्द्रेषु ह्यागतेषु गतेषु च ॥ १ ॥
तेष्वेव पातिव्रत्यं वै त्विन्द्राण्या आस सर्वथा ।
एकदा तु समायातो बृहस्पतिर्हि संसदि ॥ २ ॥
महेन्द्रस्य च देवानामाशीर्वादपरायणः ।
इन्द्रो दर्पात् सभायां तु रत्नसिंहासनद्वरात् ॥ ३ ॥
नोत्तस्थौ स्वगुरुं दृष्ट्वा ब्रह्मिष्ठं वै बृहस्पतिम् ।
अन्ये सभासदाः सर्वे समुत्तस्थुर्ववन्दिरे ॥ ४ ॥
तानाशिषः संप्रयुज्य महेन्द्रं समुपेक्ष्य च ।
गुरुर्जगामाऽतिरुष्टः स्वाऽपमाने समत्सरः ॥ ५ ॥
न शशाप महाज्ञानी धैर्यमालम्ब्य धार्मिकः ।
विना शापेनेन्द्रगर्वश्चूर्णीभूतो बभूव ह ॥ ६ ॥
सकिल्बिषं सापराधं न शपेच्चेन्महाजनः ।
अपराधस्तं फलति धर्मो हन्त्यपराधिनम् ॥ ७ ॥
यदि हिंस्रं सापराधं शपेत् कोपेन धार्मिकः ।
सापराधो विनश्येत्तु धार्मिकः क्रोधवान् भवेत् ॥ ८ ॥
क्रोधितस्य कृतं सर्वं पुण्यं नश्यति मूलतः ।
तस्मात् क्रोधो न कर्तव्यः कुत्रचिच्छ्रेय इच्छता ॥ ९ ॥
सापराधेऽपि वै जन्तौ क्षमा रक्ष्या सुपुण्यदा ।
क्षमाशीलस्य सद्धर्मः स्वयं करोति रक्षणम् ॥१०॥
अवमानाद् गुरोरेव ब्राह्मणस्य तपस्विनः ।
ब्रह्महत्यासमं पापं जायते त्वपराधिनः ॥११॥
प्रतिष्ठितस्य हननं त्वपमानं प्रकीर्त्यते ।
तेनाऽधर्मेण शक्रस्य ब्रह्महत्या बभूव ह ॥१२॥
सा तु पापात्मिका चेन्द्रं ववल्गे मस्तके तदा ।
प्रमत्त इव संजात उन्मत्त इव भ्रान्तिमान् ॥१३॥
भीतश्चेन्द्रपदं त्यक्त्वा प्रययौ पुष्करं सरः ।
तत्र वै कामले सूत्रे चक्रे वासं निगूढवत् ॥१४॥
राज्यं रिक्तं तदा ज्ञात्वा देवाश्च मुनयोऽखिलाः ।
नहुषं नाम राजर्षिं चक्रुस्त्विन्द्रप्रधानकम् ॥१५॥
इन्द्रासनस्य पार्श्वस्थो नहुषो नाम भूपतिः ।
इन्द्रसत्ताप्रतिरूपां सत्तामासाद्य चेन्द्रवत् ॥१६॥
राज्यं संचालयत्येव चतुर्दशभुवां तदा ।
क्वचित्कदाचिदिन्द्रस्य त्वर्धासनेऽपि तिष्ठति ॥१७॥
इन्द्रस्य भवने चापि याने वाह्यां च वाहने ।
उद्याने याति नहुषो विहरत्यपि गर्वतः ॥१८॥
दृष्ट्वा शचीं वरारोहामनपत्यां च सुन्दरीम् ।
नवयौवनशोभाढ्यां बहुरूपसमन्विताम् ॥१९॥
सुकोमलां च सुदतीमनिन्द्रे शोकवासिताम् ।
महासतीं महाराज्ञीं पतिशून्यां मनोहराम् ॥२०॥
मूर्छां सम्प्राप नहुषः कामेन यौवनेन च ।
उवाच तां पुरः स्थित्वा विनयेन स्वकामिव ॥२१॥
धातुर्गतिर्विचित्राऽहो न बोध्या सा सतामपि ।
पारमेष्ठ्यं क्षणं चैन्द्रं क्षणं सर्वत्र बुद्ध्यते ॥२२॥
यौवनं च क्षणं राज्ञि ! भज मामिन्द्रसन्निभम् ।
त्वादृशीं स्त्रीं परित्यज्य कथमिन्द्रो महेश्वरः ॥२३॥
नराणां योषिति गन्ताऽहल्यायां चेटिकास्त्रियाम् ।
ईदृशी सुन्दरी यस्य परभार्यासु तन्मनः ॥२४॥
नैतदाश्चर्यमत्राऽस्ति कामो वाञ्छति नूतनाम् ।
अस्या अग्रे तु का रंभा कोर्वशी का तिलोत्तमा ॥२५॥
का वा मेना घृताची वा रत्नमाला कलावती ।
एताश्चाप्सरसश्चान्या नैतत्तुल्या भवन्ति वै ॥२६॥
इति प्रशंस्य नहुषो मां भजस्वाऽऽह भावतः ।
अहमिन्द्रपदं प्राप्तः पूर्वेन्द्रोऽदृश्यतां गतः ॥२७॥
ततो भव त्वं सौभाग्या मे वक्षसि सुखालया ।
लीलया च सहस्रेन्द्रान् जेतुं शक्तोऽहमीश्वरः ॥२८॥
मां गृहीत्वा कुरु रतिं पुष्पचन्दनचर्चितम् ।
ब्रह्मणस्तु वरैर्देवि ! जरामृत्युविवर्जितम् ॥२९॥
मां कुरुष्व पतिं भद्रे नित्यसुस्थिरयौवनम् ।
न मे स्पृहा परस्त्रीषु त्वां दृष्ट्वा लोलुपं मनः ॥३०॥
तत्रापीन्द्रो भवाम्यद्य त्वं च पत्नी निसर्गतः ।
भाविनी मे भव चाद्य प्रार्थिता न प्रसह्य वै ॥३१॥
इत्येवमुक्त्वा नहुषो जिज्ञासति तदुत्तरम् ।
उवाच तं शची साध्वी दासं नृपं तु मानवम् ॥३२॥
शृणु राजन् ! न्याययुक्तं पातिव्रत्यं सदा मम ।
ब्रह्मणा निर्मिता चाहं यावदिन्द्राश्चतुर्दश ॥३३॥

चतुर्दशानामिन्द्राणां पत्नी भवामि वै क्रमात् ।
चतुर्दशसु मध्ये त्वं नाऽसि वै गणितः खलु ॥३४॥
तस्मान्न त्वं पतित्वे मे योग्यश्चासि कथंचन ।
मानवोऽसि महाराज ! देव्यहं च ततोऽपि वै ॥३५॥
नाऽहं योग्या तव पत्नी न देवी मानुषं भजेत् ।
शृणु त्वन्यन्महाराज ! महेन्द्रपदमेव यत् ॥३६॥
भवते नाऽर्पितं देवैः कार्यमात्रं समर्पितम् ।
न त्विन्द्रत्वं चार्पितं ते भृत्यत्वं ते समर्पितम् ॥३७॥
इन्द्रानुपस्थितौ कार्यमिन्द्रस्य कुरु तद्यथा ।
प्रधानसत्तया कार्यमात्रं तुभ्यं समर्पितम् ॥३८॥
नेन्द्राणी नाऽऽसनं नैव भवनं नेन्द्रता तथा ।
मुनिभिस्त्वर्पिता तुभ्यं मा वृथा गर्वमावह ॥३९॥
शृणु त्वन्यन्महाराज ! प्रजापालनधर्मवान् ।
गण्यते तु पितातुल्यस्त्वं यातः पितृतुल्यताम् ॥४०॥
देवानां पितृता त्विन्द्रे राजत्वेन विराजते ।
तथा त्वयि समापन्ना पितृता मादृशीं प्रति ॥४१॥
नाऽहं विवाहिता तेऽस्मि न त्वदर्थं प्रकल्पिता ।
न हि तस्मात् तव भोग्या वृथा मां माऽऽग्रहं कुरु ॥४२॥
किं च राजन् ! शृणु तत्त्वं पूर्वेन्द्रे विगते सति ।
पूर्वं देहं सतीरूपं दग्ध्वा दधामि नूतनम् ॥४३॥
एवं त्रयोदशकृत्वः करोमि नूतनां तनूम् ।
वृणोमि त्वपरं चेन्द्रं तेनाऽस्मि संपतिव्रता ॥४४॥
त्वं राजँश्चेत् समर्थोऽसि त्यज देहं हि मानुषम् ।
गृहाण नूतनं दैवं ततश्चेन्द्रपदं पुनः ॥४५॥
चतुर्दशसु गणनां लभ देवर्षिसंसदि ।
पश्चाद् ब्रह्मादिभिर्दत्ता स्यां भवामि तव प्रिया ॥४६॥
नान्यथा भामिनी तेऽस्मि नाऽस्मि भोग्या कथंचन ।
यावदिन्द्रः सासुररति प्रोषितः पुष्करेऽब्जके ॥४७॥
त्वं चासि कर्मभूमेर्वै राजा न तु दिवः पुनः ।
भयत्राता भवेद् राजा सर्वेषां पालकः पिता ॥४८॥
भ्रष्टश्रीश्च महेन्द्रोऽद्य गुरोः कोपाद् भुवं गतः ।
त्वं तु कार्ये योजितोऽसि प्रजानां हि पिता यथा ॥४९॥
कार्यभारे योजितोऽसि नेन्द्राणी योजिता त्वयि ।
पूर्वराज्ञः पृथिव्यां वै योऽन्यः राजाऽभिषिच्यते ॥५०॥
स तत्पुत्रस्तस्य शिष्य इति पृथ्व्यां प्रसिद्ध्यति ।
पूर्वभूपस्य या पत्नी राजमाता हि गण्यते ॥५१॥
नूतनस्य तु राज्ञश्च पत्नी राज्ञीति गण्यते ।
इति रीत्या महाराज ! राजमाता भवामि ते ॥५२॥
न राज्ञी ते भवाम्येवं ज्ञात्वा मा लालसां कुरु ।
गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः ॥५३॥
पित्रोः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ।
पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनी सुता ॥५४॥
गर्भधात्रीष्टदेवी च पुंसः षोडशमातरः ।
त्वं नरो देवभार्याऽहं माता ते सर्वथाऽस्मि वै ॥५५॥
गच्छ वत्साऽदितिं रन्तुं यदि चेच्छसि मातरम् ।
सर्वेषां निष्कृतिस्त्वस्ति न वत्स मातृगामिनाम् ॥५६॥
कुंभीपाके प्रपच्यन्ते यावत्ते ब्रह्मणो वयः ।
ततो भवन्ति कृमयः कल्पाः सप्त ततः परम् ॥५७॥
कुष्ठिम्लेच्छाः सप्तजनौ ततः पापं प्रणश्यति ।
किं राजँस्ते मनो याति मातृयोनौ वदाऽत्र मे ॥५८॥
सन्त्येहाऽप्सरसो बह्व्यो यदि देवीः प्रवाञ्छसि ।
क्लेदेषु च मलाढ्येषु दुर्गन्धिनिलयेषु च ॥५९॥
सुबहुष्वनुभूतेषु तथापि हृदि वासना ।
सदृशेषु कथं तेऽस्ति स्त्रीभगेष्वत्र मां वद ॥६०॥
कुलप्रदीपे स्वर्गेशे त्वयि जाते सुधर्मिणि ।
कथमिच्छसि राजेन्द्र ! मूत्रगूह्यं परस्त्रियाः ॥६१॥
स्वर्गं प्राप्तं तथाऽप्यत्र तृष्णा किं न निवर्तते ।
साधूनां किं सुखं साधो ! स्त्रीणां योनिषु मां वद ॥६२॥
व्रतं पतिव्रतानां च पत्युः सेवापरं तपः ।
यथा पुत्रः परपतिरेष धर्मश्च योषिताम् ॥६३॥
पालयन्ति यथा भूपाः प्रजाः पुत्रानिवौरसान् ।
प्रजास्त्रियं च पश्यन्ति राजानो मातरं यथा ॥६४॥
यज्ञं कुर्वन्ति राजानो देवब्राह्मणरक्षकाः ।
निवारणं च दुष्टानां शिष्टानां परिपालनम् ॥६५॥
सतीनां रक्षणं चापि कुर्वन्ति भूभृतः खलु ।
विपरीतं कथं राजन् ! गृह्णासि वर्तनं त्विह ॥६६॥
इत्युक्त्वा तु महेन्द्राणी विरराम पतिव्रता ।
उवाच नहुषो राजा शचीं गर्विष्ठवाक्यवान् ॥६७॥
शृणु शचि ! न्याययुक्तं ग्राह्यं ते यदि रोचते ।
भूमौ शुभाऽशुभं कर्म कृत्वा त्वादाय तत्फलम् ॥६८॥
अन्यत्र मानवो भुंक्ते स्वर्गादौ वेदबोधितम् ।
भूमौ कृत्वा महत्पुण्यं स्वर्गं गच्छति पुण्यवान् ॥६९॥
गृहीत्वा सर्वकन्याश्च चिरं स्वर्गे प्रमोदते ।
स्वर्गमायाति मनुजो विहाय मानवीं तनुम् ॥७०॥
स्वशरीरेणाऽऽगातोऽहं मत्पुण्यं पश्य सुन्दरि ! ।
अनेकजन्मपुण्येन त्वागतः स्वर्गमीप्सितम् ॥७१॥

ततोऽप्यधिकपुण्येन महेन्द्रपदमाप्तवान् ।
तदिदं मे महत्पुण्यं दर्शनं मे त्वया सह ॥७२॥
नहि कर्मस्थलं चेदं स्वर्भोगस्थलमेव यत् ।
भोगस्थले भोग्यवस्तु नहि त्यक्तुं प्रशक्यते ॥७३॥
त्वं तु भोग्या महेन्द्रस्य स्थितोऽस्म्यहं तदासने ।
अस्वामिकाऽधुना त्वं च मम भोग्या प्रजायसे ॥७४॥
निर्मिता त्वं मम भोग्ये येनाऽहमैन्द्रमास्थितः ।
तव भाग्ये लिखितोऽहं यतश्चैन्द्रपदे स्थितः ॥७५॥
त्वं च कान्ते ! मम योग्या यावदिन्द्रो भवाम्यहम् ।
त्यक्ते त्विन्द्रपदे त्वां न लोकयिष्यामि वै पुनः ॥७६॥
एहि कान्ते ! भवनाऽन्तर्गृहे रंस्ये त्वया सह ।
त्यज द्वैधं तु मनसो मोदस्व मानवे सुरे ॥७७॥
इत्युक्त्वा विररामाऽसौ शची श्रुत्वा शुशोच ह ।
अचेतनस्य मूढस्य कार्याऽकार्यमजानतः ॥७८॥
श्रोष्याम्यद्य कथां कतिविधां कामातुरस्य च ।
वायुमत्तः सुरामत्तः काममत्तो विचेतनः ॥७९॥
मृत्युं न गणयेत् कामी कामेन हृतमानसः ।
प्राह वै नहुषं तत्र न्याय्यं प्रत्युत्तरं पुनः ॥८०॥
स्वर्गं भोगस्थलं त्वस्ति कर्मफलं हि भुज्यते ।
त्वया नास्ति कृतं तादृग् भोग्या भवामि येन ते ॥८१॥
पृच्छ वै धर्मराजाय पृच्छाऽन्यगुरवे तथा ।
तिष्ठन्तीन्द्रासने रिक्ते मक्षिका जन्तवोऽपि च ॥८२॥
न ते भवन्ति चेन्द्रा वै भोग्या तेषां भवामि न ।
इन्द्र एव पतिर्मेऽस्ति मक्षिका जन्तवो नहि ॥८३॥
त्वं तु राजँस्तथाभूतो माऽऽग्रहं कुरु वै मृषा ।
शृणु राजँस्तथा गोप्यं यदस्म्यद्य रजस्वला ॥८४॥
ऋतोः प्रथमो दिवसो ह्यद्य मे वर्तते नृप ! ।
प्रथमे दिवसे नारी चाण्डालीवत् त्वशुद्धिगा ॥८५॥
द्वितीये दिवसे म्लेच्छासमाऽतो रजकीसमा ।
तृतीयेऽथ चतुर्थे सा शुद्धा भर्त्रर्थमेव वै ॥८६॥
ततः सा दैवपैत्र्यादिकार्ययोग्या भवत्यपि ।
आद्ये रजस्वलागन्ता ब्रह्महत्यांशपापवान् ॥८७॥
द्वितीये दिवसे भोक्ता गोहत्यापापको भवेत् ।
तृतीये दिवसे भोक्ता भ्रूणहत्याघवान् भवेत् ॥८८॥
चतुर्थे पतियोग्या सा स्नात्वा संजायते सती ।
ऋतुदानं पतिर्दद्याद् विधिर्वेदैर्निरूपितः ॥८९॥
अयुगलासु रात्रिषु दाने कन्या प्रजायते ।
युगलासु तु रात्रिषु दाने पुत्रः प्रजायते ॥९०॥

आषोडशरात्र्यन्तं शक्तिर्गर्भधृतेर्भवेत् ।
तदुत्तरं प्रशान्तिस्तु गर्भधृतिर्न वै भवेत् ॥९१॥
तत्र पत्नी न गन्तव्या बीजहत्याऽभिदूषणात् ।
एवं धर्मः रचितोऽस्ति त्वं तु धर्मं विहाय वै ॥९२॥
कामातुरो भवस्यद्य गच्छ राज्ञीं निजां भुवि ।
शान्तिं लभ महाराज ! व्रतं दीर्घं चराम्यहम् ॥९३॥
शच्यास्तद्वचनं श्रुत्वा प्रहस्य नहुषस्तदा ।
उवाच धर्मविधुरं कल्पितं भोगकांक्षया ॥९४॥
देवपत्नी सदा शुद्धा राजस्वल्यं न विद्यते ।
रजस्वलाकृतं पापं भूलोके नात्र वै दिवि ॥९५॥
चन्द्रवंश्यो भवाम्यत्र महेन्द्रो देवपंक्तिगः ।
राजस्वल्येन मे नास्ति बाधस्त्वायाहि सुन्दरि ! ॥९६॥
ऋतुपापं मयि स्याच्चेत् ! तव किं रम शोभने ! ।
रमणार्थं कुरु शय्यां भवत्वद्य समागमः ॥९७॥
इत्युक्त्वा विररामाऽसौ राजा कुर्वन् प्रतीक्षणम् ।
शची प्राह शृणु राजन् ! बुद्धिस्ते विलयं गता ॥९८॥
पातिव्रत्यमप्रधृष्यं धृष्ये धृष्टुर्विनाशकम् ।
इतिज्ञात्वा वद चाग्रे प्रवृत्तोऽभूर्विचार्य वै ॥९९॥
त्वां शपामि चेत् त्वत्र रक्षकः कोऽपि नास्ति ते ।
पातिव्रत्यं महान् धर्मो नारायणस्वरूपवान् ॥१००॥
नारायणो हरो ब्रह्मा विष्णुर्वैराज ईश्वराः ।
बिभ्यत्येव पराद्धर्मात् पातिव्रत्याद्धि कंपिताः ॥१०१॥
सूर्यश्चन्द्रो वरुणश्च यमो मृत्युर्जरादयः ।
कालः संकर्षणो रुद्रो बिभ्यत्येव पतिव्रतात् ॥१०२॥
मेघः शनिश्चरो राहुर्दानवा राक्षसा अपि ।
दैत्या देवा वह्नयश्च वार्धयः पर्वतास्तथा ॥१०३॥
कम्पन्ते पातिव्रत्याद् वै विचारं कुरु मानसे ।
पतिव्रता सुभार्या वै पतिं जीवयति मृतम् ॥१०४॥
जलानां प्रलयं सैव शमयत्येव साध्विका ।
अग्नीनामुष्णतां शीतां करोत्येव पतिव्रता ॥१०५॥
महाकालं परावृत्य जीवत्येव पतिव्रता ।
सूर्यचन्द्रगतिरोधौ करोत्येव पतिव्रता ॥१०६॥
वृक्षपुष्पफलसमृद्धिं करोत्येव पतिव्रता ।
विष्णोः सुदर्शनं शस्त्रं ब्रह्मास्त्रं लोकनाशकम् ।
शमयत्येव संकल्पाद् द्रागेव तु पतिव्रता ॥१०७॥
सापराधस्य पुण्यानां नाशं करोति साध्विका ।
ब्रह्माण्डप्रलयं चापि कर्तुं शक्ता पतिव्रता ॥१०८॥

जले स्थलं स्थले वारि व्योम्नि भूमिं भुवोऽम्बरम् ।
नारीं नरं नरं नारीं कर्तुं शक्ता पतिव्रता ॥१०९॥
किं न जानासि राजेन्द्र ! का ते बुद्धिरुपस्थिता ।
यमपाशान् सुविच्छेत्तुं शक्ता नारी पतिव्रता ॥११०॥
तस्माद् राजन् भुवं याहि मा मनः कलुषं कुरु ।
इति जाते विवादेऽत्र बृहस्पतिरुपागतः ॥१११॥
राजात्विन्द्रस्वरूपत्वात् सत्कारं सुसमाचरत् ।
शची ययौ सलज्जा स्वभवनान्तरमेव यत् ॥११२॥
नहुषात् सत्कृतिं लब्ध्वा दत्त्वाऽऽशीर्वादमित्यथ ।
ययौ शचीगृहं तत्र शच्या दत्ते शुभासने ॥११३॥
निषसाद गुरुः शच्या विवादार्थो निवेदितः ।
प्रार्थितोऽपि गुरुः सम्यक् शच्या तु दीनया तदा ॥११४॥
रक्ष रक्ष महाभाग ! निमग्ना शोकसागरे ।
दूरीकृतो मम पतिस्त्वया शिष्यः स्वराज्यतः ॥११५॥
सम्पच्छून्यमाश्रमं मे नहुषश्चेन्द्रतां वहन् ।
स्वपत्नीं मां विधातुं स करोत्याग्रहमुल्बणम् ॥११६॥
अहं पतिव्रता नारी नेच्छाम्यन्यं पतिं गुरो ! ।
पातिव्रत्यं परं धर्मं मुत्स्रष्टुं नोत्सहे गुरो ॥११७॥
राजा तथा गुरुश्चोभौ मान्यौ पूज्यौ सदा मतौ ।
साम्ना यावद्विरोधस्य शान्तिः स्यात्तावदेव तु ॥११८॥
साध्व्या शापो न वै देयः सर्वथाऽपि समर्थया ।
इति विचार्य च मया शप्तो न नहुषो नृपः ॥११९॥
पत्युर्विप्रकरस्त्वं च शप्तो नाऽसि तु गौरवात् ।
यदि च्योक्तं मया सम्यङ् न भविष्यति वै गुरो ॥१२०॥
शपामि त्वां च नहुषं सर्वनाशो भविष्यति ।
तथापि महतां नाशे मास्तु मे मानसे त्वरा ॥१२१॥
इति कृत्वाऽऽवेदयामि शान्तिं कुरु गुरो ! सुखम् ।
यथा पतिर्महेन्द्रो मे समायात् स्वगृहं प्रति ॥१२२॥
नहुषस्तु भवेद् भ्रष्टस्तथा कार्यं विधीयताम् ।
दत्वा चरणरेणू स्तं महेन्द्रं देहि चाशिषः ॥१२३॥
सर्वेषां तु गुरूणां च जन्मदाता परो गुरुः ।
पितुः शतगुणा माता पूज्या वन्द्या गरीयसी ॥१२४॥
विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिदः ।
पूज्यो वन्द्यश्च सेव्यश्च मातुः शतगुणो गुरुः ॥१२५॥
अज्ञानतिमिरान्धस्य ज्ञानांऽजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः ॥१२६॥
जन्मदाताऽन्नदाता च तथाऽन्ये गुरवो मताः ।
आरोपिताश्च गुरवः प्रसह्य गुरुवस्तथा ॥१२७॥
तथोपगुरवः सन्ति शिक्षका गुरुवोऽपि च ।
पारं कर्तुं न शक्तास्ते घोरसंसारसागरे ॥१२८॥
विद्यामन्त्रज्ञातदाता निपुणः पारकर्मणि ।
स शक्तः शिष्यमुद्धर्तुमीश्वरश्चेश्वरेश्वरः ॥१२९॥
गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः ।
गुरुर्धर्मो गुरुः शेषः सर्वात्मा केशवो गुरुः ॥१३०॥
सर्वतीर्थाधिवासश्च सर्वदेवाधिवासितः ।
सर्वदेवात्मको दिव्यो गुरुरूपी हरिः स्वयम् ॥१३१॥
अभीष्टदेवे वै रुष्टे गुरुः शक्तो हि रक्षितुम् ।
गुरौ रुष्टेऽभीष्टदेवो न वै शक्तश्च रक्षितुम् ॥१३२॥
गुरौ रुष्टे ग्रहा रुष्टा रुष्टा देवाश्च सर्वथा ।
भाग्यान्यपि च रुष्टानि गुरुं रुष्टं न कारयेत् ॥१३३॥
न गुरोरधिकश्चात्मा प्रियः पुत्रः प्रियोऽपि न ।
धनं पत्नी तपो धर्मः पुण्यं सत्यं न वै प्रियम् ॥१३४॥
गुरोः परो न वै शास्ता राजा बन्धुर्न वै परः ।
मन्त्रो विद्यागुरुर्देवः पूर्वलब्धः पतिस्तथा ॥१३५॥
परात्परः स विज्ञेयः सर्वेषामुपरि स्थितः ।
माता वन्द्या पिता वन्द्यो वन्द्यश्च त्वादृशो गुरुः ॥१३६॥
विप्राणां त्वं वरिष्ठोऽसि गरिष्ठश्च तपस्विनाम् ।
ब्रह्मिष्ठोऽसि ब्रह्मवित्सु धर्मिष्ठः सर्वधर्मिणाम् ॥१३७॥
देवानां सर्वथा पूज्य इति जानामि सर्वदा ।
ततः क्षमां ययाचेऽहं शपामि नैव मद्गुरुम् ॥१३८॥
तुष्टो भव मुनिश्रेष्ठ ! शक्रमानय मा चिरम् ।
नहुषं त्विन्द्रभवनाच्छीघ्रं प्रक्षिप भूतले ॥१३९॥
इत्युक्त्वा त्वान्तरे तृप्ता बहिः सौम्या शची तदा ।
मौनमालम्ब्य धैर्येण फलं चेयेष सत्त्वरम् ॥१४०॥
बृहस्पतिस्तदा प्राह धन्याऽसि त्वं पतिव्रते ! ।
शप्तुं त्वं वै समर्थाऽसि रक्षितोऽहं नृपोऽपि च ॥१४१॥
नार्यो भवन्तु तादृश्यो यथा रक्षाकरी शची ।
इत्युक्त्वा प्राह चेन्द्राण्यै सर्वं भद्रं भविष्यति ॥१४२॥
सद्यः प्राप्स्यसि भर्तारं महेन्द्रं त्वं ममाशिषा ।
यथा कचस्य पत्नी मे तथा त्वमपि शोभने ! ॥१४३॥
यथा पुत्रस्तथा शिष्या न भेदः पुत्रशिष्ययोः ।
तर्पणे पिण्डदाने च पालने परितोषणे ॥१४४॥
यथाऽग्निदाता पुत्रश्च तथा शिष्योऽपि निश्चितः ।
पिता माता गुरुर्भार्या शिशुश्चऽनाथबान्धवाः ॥१४५॥
एते पुंसां नित्यपोष्या एष धर्मः सनातनः ।
कुरुते मानवीं बुद्धिं मातापित्रोस्तथा गुरौ ॥१४६॥

अयशस्तस्य सर्वत्र विघ्न एव पदे पदे ।
करोति सम्पन्मत्तो यः स्वगुरोस्तु पराभवम् ॥१४७॥
अचिरात्सर्वनाशोऽस्य भवेत् स्वस्यापि निश्चितम् ।
मां तु दृष्ट्वा सभामध्ये नोत्तस्थौ पाकशासनः ॥१४८॥
भुनक्ति तत्फलं त्विन्द्रः पश्य साध्वि तु साम्प्रतम् ।
अहं करोमि मोक्षं च समर्थोऽस्मि पतिव्रते ! ॥१४९॥
पातिव्रत्यबलात्ते च नहुषोऽपि विनंक्ष्यति ।
इन्द्रस्त्वायास्यति शीघ्रं सर्वं युक्तं भविष्यति ॥१५०॥
भविष्यति प्रभावस्ते दुर्गायाश्च समः सति ! ।
लक्ष्मीसमा प्रतिष्ठा च यशस्तद्यशसा समम् ॥१५१॥
सौभाग्यं राधिकातुल्यं तत्समं प्रेम भर्तरि ।
तत्तुल्यं गौरवं मान्यं प्रीतिप्राधान्यमुच्यते ॥१५२॥
रोहिण्यास्तु समा हृद्या पूज्या सरस्वतीसमा ।
शुद्धा भविष्यसि शश्वत्सावित्रीसदृशी सदा ॥१५३॥
इत्युक्त्वा तां गुरुस्तत्र शिक्षयामास रक्षणम् ।
वद साध्वि ! नहुषं तं शचीं चेद् भोक्तुमिच्छसि ॥१५४॥
अपूर्वं यानमारुह्य निशायामागमिष्यसि ।
सप्तर्षीणां यदि स्कन्धे दत्वा स्वशिबिकां शुभाम् ॥१५५॥
तामारुह्य समायाहि शचीं भोक्तुं तदाऽर्हसि ।
शच्यावाक्यानि तान्येवाऽऽवेदितानि तु भूभृते ॥१५६॥
प्रहस्य नहुषश्चापि किंकरं प्राह सत्वरम् ।
गच्छ गच्छ त्वरन् गच्छ सप्तर्षीन् शीघ्रमानय ॥१५७॥
इत्युक्तः प्रययौ दूतः सप्तर्षींस्त्वानयद् द्रुतम् ।
राजा दृष्ट्वा तु तान्सर्वान्ननामोवाच सादरम् ॥१५८॥
यूयं तु ब्रह्मणः पुत्राः परोपकरणे रताः ।
मोहमात्सर्यहीनाश्च दर्पाऽहंकारवर्जिताः ॥१५९॥
नारायणसमाः सर्वे ज्वलन्तो ब्रह्मतेजसा ।
मम कार्यकरणार्थे कृपावन्तो भवन्तु वै ॥१६०॥
प्राहुस्तं मुनयः श्रुत्वा वृणीष्व मनसि स्थितम् ।
सर्वे दातुं वयं शक्तास्त्वदर्थं मा चिरं कुरु ॥१६१॥
नहुषः प्राह तांस्तत्र यूयं वै भक्तवत्सलाः ।
अधुना दत्त मे तूर्णं शचीदानमभीप्सितम् ॥१६२॥
सप्तर्षिवाहनं कान्तं शचीच्छति महासती ।
एनमेव वरं मेऽद्य निष्पन्नं कुरुताऽचिरम् ॥१६३॥
इति श्रुत्वा तु मुनयो जहसुर्मोहितं नृपम् ।
चक्रुः स्कन्धेऽस्य शिबिकां ययौ राजा शचीं प्रति ॥१६४॥
जर्जरितास्तु मुनयः शनैर्यान्ति तदा नृपः ।
शीघ्रं सर्पन्तु मुनयः समाः प्राह मुनीन् मुहुः ॥१६५॥
श्रुत्वा क्रोधं समापन्नो दुर्वासास्त्वग्रगोऽवदत् ।
सर्पन्स्त्विति प्रवक्ता त्वं सर्पस्त्वजगरो भव ॥१६६॥
एवमुक्तो द्रुतं राजा महानजगरोऽभवत् ।
पतितः शिबिकातश्च स्तुतिं चक्रे तपस्विनाम् ॥१६७॥
ऋषयस्तु नृपं प्राहुर्धर्मपुत्रस्य दर्शनात् ।
मोक्षो भविष्यति सर्पाद् वैकुण्ठं च गमिष्यसि ॥१६८॥
इत्युक्त्वा प्रययुः सत्यं ऋषयस्तु दयालवः ।
शची जगाम तच्छ्रुत्वा गुरुं ननाम चादरात् ॥१६९॥
ययौ बृहस्पतिः शीघ्रं पुष्करे पद्मतन्तुषु ।
यत्र वै राजते त्विन्द्रश्चाजुहाव सुरेश्वरम् ॥१७०॥
अयि वत्स त्वमागच्छ गुरुस्तेऽहं बृहस्पतिः ।
श्रुत्वा गुरुस्वरं सौक्ष्म्यं हित्वा त्विन्द्रः समाययौ ॥१७१॥
पपात दण्डवत् तं च मूर्द्धोरसि चकार सः ।
नीत्वा यज्ञं कारयित्वा सोमं तं त्वमरावतीम् ॥१७२॥
प्रददौ परमैश्वर्यं पूर्वस्मात्तु चतुर्गुणम् ।
शची सम्प्राप भर्तारं पातिव्रत्यप्रभावतः ॥१७३॥
इत्येवं कथितं लक्ष्मि ! शच्याः सतीत्वमत्र ते ।
ब्रह्महत्याप्रशमनं सोमयागफलप्रदम् ॥१७४॥
वर्षं सोमलतापानं यजमानश्चकार सन् ।
वर्षमेकंफलाहारं जलपानं तु वत्सरम् ॥१७५॥
त्रैवार्षिकं व्रतं चेन्द्रश्चकाराऽऽस पुनः प्रभुः ।
सर्वसाध्यो न यज्ञोऽयं बह्वन्नो बहुदक्षिणः ॥१७६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये बृहस्पत्यवमानेन भ्रष्टेन्द्रस्य पुष्करनालवासे नहुषेणेन्द्रप्रतिनिधिनाऽर्थितायां शच्यां सप्तर्षियानमारुह्य गच्छता सर्पता प्राप्तेत्यादिगर्भकपातिव्रत्यबलकथननामा चतुःसप्तत्यधिकत्रिशततमोऽध्यायः ॥३७४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पतिव्रताऽहल्यासामर्थ्यमद्भुतम् ।
गौतमस्य ऋषेः पत्नी त्वहल्याऽभूत् पतिव्रता ॥ १ ॥
कुमारे शरीरे यस्यास्तेजोराशिः समन्ततः ।
अभूच्चन्द्रस्य परिधिर्यथा तथाऽत्र सर्वदा ॥ २ ॥
गंगातीरेऽवसत्काश्यां गौतमो ज्ञानवानृषिः ।
ब्रह्मपुर्यां पर्णकुट्यां समुच्छ्राये स्थले सदा ॥ ३ ॥

एकदा हिमशैलेऽभून्मुशलधारवर्षणम् ।
जलपूराणि तटयोर्मर्यादां सरितो जहुः ॥ ४ ॥
विपथेषु प्रवाहाश्च दद्रुवुर्वै भयंकराः ।
ग्रामान् खेटान् खर्वटाँश्च नीत्वा पूराणि चावहन् ॥ ५ ॥
काशीमभितः सलिलं पर्यवर्तत चोच्छ्रयम् ।
ऋषयो मुनयश्चान्ये प्रजाश्च निम्नभूमिगाः ॥ ६ ॥
जले मग्ना मृताः सर्वे हाहाकारो बभूव ह ।
लक्षशः कोटिशस्तत्र मग्ना जानपदस्थिताः ॥ ७ ॥
मानवाः पशवः पक्षसहाया वनिनस्तथा ।
गौतमो ध्यानमग्नश्च दृष्टवान् विप्लवं लयम् ॥ ८ ॥
ध्यानाद् बहिः समागम्य प्राह पत्नीमहल्यिकाम् ।
अरे ! पश्य लयं वारिकृतं सर्वस्वनाशकम् ॥ ९ ॥
जलान्येतानि गंगाया गृहं तेऽभिद्रवन्त्यपि ।
उच्छ्रयेऽपि प्रदेशे वै समागच्छन्ति वेगतः ॥१०॥
पर्णशाला तथाऽहं त्वं वहिष्यामश्च धेनवः ।
बहुधा प्रलयो जातो नाऽद्याऽपि स निवर्तते ॥११॥
किं कार्यं वद कल्याणि ! जलं सोपानमागतम् ।
पश्य वत्सा वत्सतर्यः क्रोशन्ति जलदर्शनात् ॥१२॥
कुरु शीघ्रं तथा यत्नं जीवामस्तु यथा वयम् ।
नाऽस्मद्गृहादपरोऽत्रोच्छ्रयदेशो गृहं विना ॥१३॥
मनुष्या द्रुममालम्ब्य जीविष्यन्ति यथाकथम् ।
गवां का वा दशा साध्वि ! महाकष्टमुपस्थितम् ॥१४॥
इत्युक्त्वा गौतमो देवः शुशोचाऽश्रुभृदीक्षणाः ।
अहल्या प्राह तं स्वामिन् ! यद्भावि तद्भविष्यति ॥१५॥
परं पतिमुपस्पृश्य चरणे प्रयतामि वै ।
इत्युक्त्वा प्रययौ साध्वी शीघ्रं पर्णगृहान्तरम् ॥१६॥
अग्निं प्रज्वालयामास घृतेन होममाचरत् ।
सस्मार गंगां चाहल्या पातिव्रत्यबलेन वै ॥१७॥
एहि गंगे ! भगिनि ! मे कथं नाशं करोषि वै ।
यदि नाऽऽयासि कल्याणि ! करोमि त्वां हि भस्मसात् ॥१८॥
गंगा भीता समायाता मूर्तिरूपा सुकन्यका ।
ववन्दे किंकरी भूत्वाऽहल्यां गौतमयोषितम् ॥१९॥
अहल्या प्राह तां तूर्णं का गंगे दुर्दशा कृता ।
प्रलयं ते जलान्यत्र कुर्वन्ति प्राणिनामति ॥२०॥
शीघ्रं वार्युपसंहारं कुरु गंगेऽन्यथा क्षणात् ।
हवनं ते करिष्यामि मृता यास्यसि वै लयम् ॥२१॥
चकम्पे तत्समाश्रुत्य प्राह दीना सतीं प्रति ।
किं करोमि महासाध्वि ! न मे दोषोऽत्र विद्यते ॥२२॥
हिमालयो विशालाद्रिर्जलानि न रुणद्धि हि ।
रक्षत्येव नहि स्वस्मिंस्तेनाऽयं विप्लवोऽस्ति वै ॥२३॥
श्रुत्वाऽहल्याऽऽह तां गंगां तिष्ठ सुन्दरि मद्गृहे ।
आह्वयामि हिमाद्रिं च तदुपायं करोम्यपि ॥२४॥
इत्युक्त्वा गौतमपत्नी सस्मार वह्निसन्निधौ ।
हिमालय ! समायाहि त्वन्यथा हवनं तव ॥२५॥
करिष्ये मा चिरं पश्य प्राणिनां कदनं महत् ।
तावच्चकम्पे गिरिराट् मूर्तिमान् समुपागतः ॥२६॥
काश्यामहल्या यत्राऽस्ति नत्वा प्रोवाच तां सतीम् ।
वद देवि ! कथं चाऽहं स्मृतश्चात्र द्रुतं दिश ॥२७॥
पश्य वारिप्रलयं त्वं कथं वारि न रक्षसि ।
निरोधं कुरु चाऽरण्ये वारीणां पर्वतेषु च ॥२८॥
हिमालयस्तदा प्राह मातः शक्तोऽस्मि तत्र न ।
नास्ति तत्र मम दोषो मया रक्ष्यं जलं सदा ॥२९॥
शिखरेषु जलं मेऽस्ति द्रोणीषु च गुहासु च ।
उदरे चोच्छ्रये चाऽधित्यकोपत्यकिकास्वपि ॥३०॥
अरण्येषु वनेषूर्ध्वं नदीष्वपि स्थलीष्वपि ।
यावच्छक्यं जलान्येव धारयामि समन्ततः ॥३१॥
किन्तु वृष्टिरतिवृष्टिः सततं सप्तवासरात् ।
दिवानिशं पतत्येव मुशलधारसदृशी ॥३२॥
अहं जले निमग्नोऽस्मि किं करोमि न शक्तिमान् ।
मत्प्रमाणाज्जलान्यत्र वर्धन्तेऽतिपतन्ति च ॥३३॥
न संहरन्ति मेघा वै वृष्टिं प्रलयकारिणीम् ।
यदि मेघाः संहरेयुर्जलानि संययुः क्षयम् ॥३४॥
श्रुत्वाऽहल्या तमुवाच तिष्ठाऽऽह्वयामि वार्धरम् ।
आहुत्या जलदं तत्र सस्मार द्रुतमानसा ॥३५॥
मेघा मृत्युभयोद्विग्नास्तूर्णं तत्र समाययुः ।
प्रकम्पन्तः प्रतस्थुश्च तानाह गौतमप्रिया ॥३६॥
रे रे मेघा घातकाः स्थ किं प्रालयो विचारितः ।
जलानामुपसंहारं कुर्वन्तु द्राङ् न चेन्मृताः ॥३७॥
भयंकरं तु तच्छ्रुत्वा कम्पमानास्तु तां सतीम् ।
प्राहुर्मातर्न नो दोषो दोषस्त्विन्द्रस्य विद्यते ॥३८॥
वयं तु किंकरास्तस्य वर्षामो वै तदाज्ञया ।
त्रस्ताः श्रान्ताः परिश्रान्ता जलहीनाः क्षुधाऽपि नु ॥३९॥
वज्रेण निहताः सर्वे वर्षामोऽत्र क्षमस्व नः ।
सदाऽकिंचित्कराश्चेन्द्रनिदेशकृतजीवनाः ॥४०॥
न तदाज्ञां विना किंचित् कर्तुं शक्ताः स्म साध्विके ।
इति श्रुत्वा च मेघानां वचनानि महासती ॥४१॥

इन्द्रं सस्मार मन्त्रेण वह्निमध्ये जुहाव च ।
तावदिन्द्रासनादिन्द्रः पतितो मन्त्रकर्षितः ॥४२॥
व्योममार्गेण तु शीघ्रं पर्णकुट्यां समापतत् ।
मृतोऽहं नाशितोऽहं च रक्षन्तु देवतागणाः ॥४३॥
इति ब्रुवन् पर्णकुट्यां तस्थौ साध्वीप्रतापतः ।
नत्वोवाच महासाध्वी महेन्द्रं देवभूभृतम् ॥४४॥
अरे चेन्द्र ! पृथिव्यां वै प्राणिनां कदनं महत् ।
जातं वृष्ट्याऽनया कस्मात् संहारं न करोषि वै ॥४५॥
जलसंहारमेवाऽद्य शीघ्रं वै रोधनं कुरु ।
अन्यथा ते वह्निमध्ये करिष्ये हवनं सुर ! ॥४६॥
इत्युक्तः स महाक्रुद्धः किन्तु दृष्ट्वा पतिव्रताम् ।
विनाशं क्षणमध्ये च समुपस्थितमीक्ष्य च ॥४७॥
समयं तं प्रविज्ञाय नम्रतायाः पुरन्दरः ।
प्रोवाच वै तदा मेघान् शीघ्रं कुर्वन्तु रोधनम् ॥४८॥
मेघाः संकुचितास्तत्र हिमाद्रौ च तथापि वै ।
जलानां निम्नता नासीत् तदा प्राह पतिव्रता ॥४९॥
इन्द्र ! मेघाः ! गिरे ! गंगे ! कथं नावतरन्ति वै ।
निम्नगानि न दृश्यन्ते जलानि प्रवदन्तु माम् ॥५०॥
इन्द्रः प्राह महासाध्वि ! वरुणो वारिषु स्थितः ।
स संकोचं जले कुर्यात् स्युर्निम्नगानि वै तदा ॥५१॥
सस्मार तु तदा साध्वी वरुणं यादसां पतिम् ।
जलाधिदेवरूपं च तावत्सोऽपि समागतः ॥५२॥
प्राहाऽहल्या जलेशं तं नैव पश्यसि मर्दनम् ।
कीदृशोऽयं लयो जातः संकोचय जलानि वै ॥५३॥
अन्यथा ते भवेन्मृत्युर्वह्नौ नात्र विचारणा ।
तावत्सोऽपि द्रुतं नत्वा प्राणायामँश्चकार ह ॥५४॥
तावज्जलानि संवेगाज्जातानि घट्टकानि हि ।
निम्नगानि बभूवुश्च संकुचितानि सर्वतः ॥५५॥
अथ दृष्ट्वा दुःखितान् वै मृतान् सम्बन्धिबान्धवान् ।
दयावती तदाऽहल्या वह्निं पप्रच्छ जीवनम् ॥५६॥
मृतानां वै पुनश्चात्र भवेदुपाय उच्यताम् ।
वह्निश्चेन्द्रो वरुणश्च गंगा मेघाश्च पर्वतः ॥५७॥
सर्वे प्राहुर्यमराजो जीवाऽजीवप्रदो मतः ।
अहल्या तं प्रसस्मार समायातो यमस्तदा ॥५८॥
समुवाच प्रांजलिस्तां किं कार्यं मेऽत्र साध्विके ! ।
तमुवाच सती शीघ्रं जलेऽत्र प्रलयेऽतिगे ॥५९॥
मृतान् मनुष्यान् वनिनो गृहिणोऽरण्यवासिनः ।
पशूंश्च प्राणिनः पक्षिजातीश्चान्यान् सरीसृपान् ॥६०॥
सर्वानकालनिधनान् समुज्जीवय मद्बलात् ।
यदि नोज्जीवयेश्चाद्य तव मृत्युरुपस्थितः ॥६१॥
होष्यामि त्वां तृणमात्रं शीघ्रं जीवय वै मृतान् ।
सोऽपि चकम्पे यमराट् प्रोवाच दीनमानसः ॥६२॥
अहं रुद्राधीनसत्त्वः संकर्षणानुगः सदा ।
मरणं वै तदधीनं यथाकर्म च देहिनाम् ॥६३॥
सती सस्मार रुद्रं तं संकर्षणं च तत्क्षणात् ।
कालकालौ समायातौ सतीं नत्वा ह्युपस्थितौ ॥६४॥
सती प्राह मृतान्सर्वानुज्जीवयतां चेश्वरौ ।
अन्यथा पातिव्रत्येन हरिष्ये वां प्रजीवनम् ॥६५॥
रुद्रः संकर्षणश्चाह सृष्टिः पुष्टिर्विनाशनम् ।
भवत्येव क्रमात्त्वत्र नारायणविनिर्मितम् ॥६६॥
वयं कर्तुं तथाऽकर्तुमन्यथाकर्तुमित्यपि ।
न समर्था भवामोऽत्र समर्थः श्रीहरिः परः ॥६७॥
सती सस्मार च तदा कृष्णनारायणं हरिम् ।
पातिव्रत्यप्रतापेन हरिस्तत्राऽऽययौ क्षणात् ॥६८॥
हरिं प्राह सती नत्वा महाविनयमानसा ।
अहो नारायण ! स्वामिन् ! कृष्णनारायण ! प्रभो ! ॥६९॥
महावृष्टिलये चात्र कोटिशः प्राणिनो मृताः ।
मानवाः पशवः पक्षिजातयो जन्तवस्तथा ॥७०॥
जीवयैतान् हरे कृष्ण त्वकालमृत्युमास्थितान् ।
भगवाँस्तां तदा प्राह कुरु संकल्पमेव ह ॥७१॥
यदि धर्मः पातिव्रत्यात्मकः संपालितो मया ।
तदा वृष्टिप्रवेगेन मृता जीवन्तु जन्तवः ॥७२॥
इत्याज्ञया हरेस्तत्र तयाऽहल्याख्यया कृतः ।
संकल्पस्तावदेवैते जीविता देहिनोऽखिलाः ॥७३॥
तेषां यत्र शवान्यासँस्तत्र तत्र समुत्थिताः ।
आसमुद्रप्रपर्यन्तं यावन्तो जीवितास्तदा ॥७४॥
ताँस्तु हर्याज्ञया गंगा मेघाश्चेन्द्रादयः सुराः ।
हिमाद्रिः सलिलेशश्च रुद्रः संकर्षणस्तथा ॥७५॥
नारायणो यमः कालो मृत्युश्च पार्षदा हरेः ।
सर्वान्नीत्वा यथापूर्वस्थानं तेषां गृहाणि च ॥७६॥
प्रापयामासुरेवेशाः पातिव्रत्यप्रभावतः ।
सुरूपां सुसमर्थां तां नवयौवनसुन्दरीम् ॥७७॥
नत्वा सर्वे ययुर्देवास्ततो नैजालयाँस्तदा ।
मानुषाद्या जीविता ये जाताः सुखिन एव ते ॥७८॥
इन्द्रो दृष्ट्वा मुमोहाऽत्र गौतमस्य तु योषिति ।
पतिव्रतायां देवेन्द्रो दूरं गत्वाऽऽजगाम ह ॥७९॥

तदा दृष्ट्वाऽपि पश्चात्तां नाऽपश्यद् देवराड् यतः ।
ययौ निराशः स्वर्गं वै पुनः कालान्तरेऽगमत् ॥८०॥
तदापि पर्णकुट्यां तां स्थितां नैव ददर्श सः ।
यतो मलिनहृदयो न ददर्श पतिव्रताम् ॥८१॥
पुनर्गत्वा ततः स्वर्गं कालान्तरे स आययौ ।
तदापि तां पर्णकुट्यां नैवाऽपश्यत् स्थितामपि ॥८२॥
पापानां चाऽप्यशुद्धानां मलिनाऽगुणशालिनाम् ।
नार्यः पतिव्रताः कापि नाऽऽयान्ति दृष्टिगोचरम् ॥८३॥
एवमिन्द्रो बहुवारं समागतो गतोऽपि च ।
धर्षणार्थमहल्यायाः कम्पमानोऽपि मूर्छितः ॥८४॥
कामान्धो न विजानाति मृत्युं स्वस्य परस्य च ।
ततः कालान्तरे रात्रौ समायातो भुवस्तलम् ॥८५॥
यत्राऽऽस्ते सा धर्ममयी साध्व्यहल्या पतिव्रता ।
तत्र रात्रौ त्वन्धकारे परितः प्रासरन्महत् ॥८६॥
तेजो दृष्टं महेन्द्रेण गौतमस्याऽऽश्रमाऽभितः ।
सोऽवातरत्पृथिव्यां वै तेजः पश्यति केवलम् ॥८७॥
यथा वै पूर्णिमाचन्द्रकौमुदीमण्डलं न्विदम् ।
तत्राऽहल्यां न चाऽपश्यत् पुनर्नाकं ययौ तदा ॥८८॥
चन्द्राय कथयामास मानसीं विकृतिं तथा ।
तेजोमयं दिव्यरूपं भोग्यार्हं चिरवाञ्छितम् ॥८९॥
चन्द्रेणाऽऽवेदितं तस्मै भवान् गौतमरूपधृक् ।
अहं भवामि ब्राह्मस्य सूचकः कुक्कुटः खलु ॥९०॥
गच्छावो यत्र सा चास्ते कुर्वश्छद्म फलं भवेत् ।
न भवेच्चेद्भवेन्मृत्युर्नात्र कार्या विचारणा ॥९१॥
इति सम्मन्त्र्य तावास्तां तदा बिडालकुक्कुटौ ।
अर्धरात्रोत्तरं गत्वा गौतमस्य गृहान्तिकम् ॥९२॥
जगौ तु कुक्कुटश्चन्द्रो ब्राह्ममुहूर्तकूजनम् ।
गौतमस्तत्तदा श्रुत्वा ययौ स्नानाय स्वर्णदीम् ॥९३॥
बिडालस्तु महेन्द्रो वै प्रविवेश गृहे नलात् ।
धृत्वा गौतमरूपं स जगाम शयने प्रियाः ॥९४॥
अहल्या तु पतिं दृष्ट्वा कामभावेन चागतम् ।
चुम्बनं त्वर्पितवती कामभोगेहयाऽऽदृता ॥९५॥
तावत्तु गौतमाय ह्युनद्या द्राक् संप्रभाषितम् ।
न ब्राह्मोऽयं ऋषे ! कालो गृहे ते कपटं भवेत् ॥९६॥
याहि शीघ्रं सतीं पश्य श्रुत्वैतत् गौतमो द्रुतम् ।
समायात् स्वगृहं यावत्तावद्वोक्तुं स्थितं हरिम् ॥९७॥
इन्द्रं स्वरूपमापन्नं ददर्श कपटान्वितम् ।
गौतमस्तं तुराषाढं भगलुब्ध विभाव्य वै ॥९८॥
मुनिः शशाप शक्रं च भगांगस्त्वं भवेति हि ।
अहल्याऽपि ज्ञातवती पत्यन्यं तं तथापि सा ॥९९॥
पतिप्रतिमारूपं तं न शशाप पतिव्रता ।
नाऽऽलिंगनं ददौ यावद् गौतमाऽन्यं विवेद सा ॥१००॥
गौतमाय स्वरूपाय दण्डयोग्याय चापि सा ।
समर्थापि महादण्डं न ददौ पतिरूपिणे ॥१०१॥
पतिरेव समायाति जानाति गौतमः स्वयम् ।
यावन्नाऽऽलिंगनं कुर्वे तावद् दण्डं प्रदास्यति ॥१०२॥
इति कृत्वा तदाऽहल्या पतिरूपाऽतिमानिनी ।
न ददौ शापमिन्द्राय प्रतिदण्डं ददौ स्वयम् ॥१०३॥
इन्द्रो योनिसहस्राढ्यो ययौ स्वर्गं मलान्वितः ।
चन्द्रो गुप्ततया तस्माद् दुद्राव भयविह्वलः ॥१०४॥
गौतमः स्वां तदा पत्नीं प्राह सौम्ये ! किमिच्छसि ।
नातिरूपं सुखदात्र नारीमत्त्वं च दुःखदम् ॥१०५॥
त्वं प्रिये ! धर्ममूर्धन्यं पालयस्येव सर्वथा ।
अहं तप्तुमनाः शश्वत् द्वयोः साह्यं न सौख्यदम् ॥१०६॥
यदि त्यजामि वैराग्याद् दुःखिता त्वं भविष्यसि ।
यदि रक्षामि मत्पार्श्वे चिन्तेदृशी हि जायते ॥१०७॥
तस्माद् वद प्रिये ! त्वां वै किं करोमि यथा पुनः ।
मम चिन्ता न ते धर्मविघ्नो मा च भवेत्पुनः ॥१०८॥
इति पत्युः सती श्रुत्वा पतिं प्राह पतिव्रता ।
निवसामि सदा स्वामिन् ! स्थाल्यामत्राऽऽत्मपार्वती ॥१०९॥
तथा तवाऽऽसनरूपा ह्युपला संवसाम्यहम् ।
नित्यं तवाऽऽश्रिता स्वामिन् ! त्वयाऽधिष्ठितभूमिका ॥११०॥
भवामि तेन ते चिन्ता न स्यान्न धर्मविघ्नता ।
पातिव्रत्यं सदा मे च रक्षितं संभविष्यति ॥१११॥
समुद्धारश्च वै स्वामिंस्तव योगाद्भविष्यति ।
इत्युक्त्वा सा पतिं नत्वाऽभिषिक्ता स्वामिना द्रुतम् ॥११२॥
बभूव ह्युपला तत्र पतिपादाश्रया सदा ।
पतिः प्राह दयिता त्वां रामः श्रीभगवान् स्वयम् ॥११३॥
आगमिष्यति चात्रैव विश्रान्तिं यास्यति त्वयि ।
तदा मया सह पत्नि ! वैकुण्ठं यास्यसि ध्रुवम् ॥११४॥
तावत्त्वत्र मनोऽभीष्टं तपः करोम्यहं सदा ।
निराशिनो महाशान्तिर्मम ते च सदाऽत्र वै ॥११५॥
आशावन्तः सदा दुःखसागराब्धौ निमज्जिताः ।
पारं यान्ति न संसारिवासनानां कदाचन ॥११६॥
मुक्तिः पाषाणकल्पा च प्रिये ! विघ्नादिवर्जिता ।
त्वया लब्धा पतिसेवा शिलासनमयी सदा ॥११७॥

अहं स्थास्ये शिलामूर्ध्नि करिष्येऽत्र तपश्चिरम् ।
त्रेतायां रामयोगेन यास्यावः परमं पदम् ॥११८॥
दिव्यरूपेण तु साध्वि ! द्वितीयेन सदा मम ।
सेवायां सुस्थिरा भूत्वा वर्तस्वेदं ममेप्सितम् ॥११९॥
इत्युक्ता साऽभवत्तत्रोपलाऽहल्या पतिव्रता ।
स्वामी तस्या उपलायां तेपे तु गौतमस्तपः ॥१२०॥
त्रेतायां रामयोगेन मतौ तौ परमं पदम् ।
इति ते कथितं लक्ष्मि ! त्वहल्यैश्वर्यमद्भुतम् ।
पठनाच्छ्रवणाच्चास्य पातिव्रत्यं दृढं भवेत् ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽहल्यायाः पातिव्रत्यप्रतापेनाऽतिवृष्टौ काशीसम्प्लवे गंगाहिमाद्रिमेघेन्द्रवरुणरुद्रसंकर्षणयम-नारायणाद्यागमोऽतिवृष्टिशमनं मृतानां जीवन-मिन्द्रस्याऽहल्यास्पर्शमात्रे भगांगताऽहल्याया उपलात्वं मोक्षणं चेत्यादिनिरूपणनामा पञ्चसप्त-त्यधिकत्रिशततमोऽध्यायः ॥३७५॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! पातिव्रत्यं सीतायाश्चापि कीदृशम् ।
पत्यर्थे जीवनं दत्वा दुःखं त्वाजन्म वै महत् ॥ १ ॥
अनुभूय महारण्ये राक्षसादिगृहादिषु ।
अन्ते पृथ्व्यां निमग्नाऽभूल्लक्ष्मीरूपाऽपि सा सती ॥ २ ॥
कुशध्वजस्य सा पोष्या कन्या धरणिकुक्षिजा ।
धनुर्भंगं तु रामो वै कृत्वा तां परिणीतवान् ॥ ३ ॥
साकेताख्यनगर्यां वै नृपः शतमखोऽभवत् ।
तस्य पुत्रः शातमखी रामादित्यो बभूव ह ॥ ४ ॥
नरादित्यस्तु तद्भ्राता सुवर्णातो बभूव ह ।
ब्रह्मणा प्रार्थितो विष्णुः कृष्णनारायणः स्वयम् ॥ ५ ॥
वासुदेवोऽभवद् भूमौ रामाऽऽदित्योऽतिधार्मिकः ।
सुवर्णायां च भगवाँस्त्रेतायां प्रथमेऽभवत् ॥ ६ ॥
विश्वामित्रप्रेषितस्तु राक्षसानां वधाय सः ।
नरादित्येन सहितः प्रययौ ऋषिणा सह ॥ ७ ॥
दृष्ट्वा पाषाणरूपां तां गौतमेनाऽप्यधिश्रिताम् ।
पतिव्रतामहल्यां वै स्वमार्गे दिव्यनेत्रकः ॥ ८ ॥
विश्वामित्रं तु पप्रच्छ कारणं जगदीश्वरः ।
पूर्ववृत्तं तदा श्रुत्वा रामो भुवनपावनः ॥ ९ ॥
दिव्यरूपेण तां ज्ञात्वा पतिसेवापरायणाम् ।
पस्पर्श पादांगुलिभिः सा बभूव तु पद्मिनी ॥१०॥
सा च रामाशिषं कृत्वा प्रययौ स्वामिना सह ।
विमानेन परं लोकं सत्यं स्वपतिसंश्रिता ॥११॥
शुभाशिषं ददौ रामादित्यायाऽपि तु गौतमः ।
अग्रे वामनपादाँऽकपावनं भूस्थलं ततः ॥१२॥
ददर्श रामस्तत्रैवाऽलुण्ठद् रजोधृतीच्छया ।
पावनं तु रजो देहे तत्र प्रमृद्य भावतः ॥१३॥
विश्वामित्राश्रमं गत्वा हत्वा मारीचराक्षसम् ।
गत्वा तु मिथिलां शंभुधनुर्भंगं विधाय च ॥१४॥
चकार पाणिग्रहणं सीताया लक्ष्मि ! तत्र च ।
कृत्वा विवाहं भगवानयोध्यां प्रययौ मुदा ॥१५॥
राजा पुत्रं नृपं कर्तुमियेष कृतसादरम् ।
सप्ततीर्थोदकं तूर्णमानीय मुनिपुंगवान् ॥१६॥
कृताधिवासं रामार्कं सर्वमंगलसंयुतम् ।
दृष्ट्वा तु कलहानाम्नी राज्ञी पूर्ववचोबलात् ॥१७॥
वारयामास राजानं पूर्वमंगीकृतं वरम् ।
रामस्य वनवासं च राजत्वं स्वसुतस्य वै ॥१८॥
अयोग्यस्यापि तस्यैव कालहेयस्य सर्वथा ।
वरं दातुं महाराजो नैयेष न्यायमार्गगः ॥१९॥
रामार्कस्तं नृपं प्राह धर्मसत्यान्वितं सुधीः ।
तडागशतदानेन यत्पुण्यं तु ततोऽधिकम् ॥२०॥
वापीदानेन लोकेऽत्र लभ्यते मानवैः पितः ! ।
दशवापीप्रदानेन यत्पुण्यं च ततोऽधिकम् ॥२१॥
यज्ञेनैकेन लभ्येत सर्वथा मानवैर्भुवि ।
शतयज्ञप्रपुण्येन यत्सुखं च ततोऽधिकम् ॥२२॥
पुत्राऽऽस्यदर्शनेनाऽत्र लभ्यते कर्मभूमिषु ।
दर्शने शतपुत्राणां यत्पुण्यं च ततोऽधिकम् ॥२३॥
सत्यस्य पालनाद् राजन् लभते पुण्यवाञ्जनः ।
नहि सत्यात् परो धर्मो नाऽनृतात्पातकं परम् ॥२४॥
नास्ति धर्मात्परो बन्धुर्नास्ति धर्मात्परं धनम् ।
सत्यधर्मात्परः को वा स्वधर्मं रक्ष यत्नतः ॥२५॥
स्वधर्मे रक्षिते राजन् शश्वत्सर्वत्र मंगलम् ।
यशस्यं सुप्रतिष्ठा च प्रतापः पूजनं परम् ॥२६॥
चतुर्दशाब्दं धर्मेण त्यक्त्वा गृहसुखं भ्रमन् ।
वनवासं करिष्यामि सत्यस्य पालनाय ते ॥२७॥
कृत्वा सत्यं तु शपथमिच्छयाऽनिच्छयाऽथवा ।
न कुर्यात्पालनं यस्तु भस्मान्ता तस्य निष्कृतिः ॥२८॥
कुंभीपाके पच्यते स यावद्वै ब्रह्मणो दिनम् ।
ततो मूको भवेत् कुष्ठी मानवः सप्तजन्मसु ॥२९॥

इत्युक्त्वा पितरौ नत्वा धृत्वा जटां सवल्कलाम् ।
यावद् गच्छत्यरण्यं स रामादित्यो नरार्कयुक् ॥३०॥
सीता पतिव्रता चापि प्रतस्थे स्वामिना सह ।
रामार्कस्तां जगादेदं प्रिये तिष्ठाऽत्र वाऽऽव्रज ॥३१॥
दुःखानि बहुलान्येव वने सन्ति पदे पदे ।
त्वमशक्ताऽसि सोढुं तान्यखिलानि तु जानकि ! ॥३२॥
सीता प्राह कुमारांगी पतिप्राणा पतिप्रिया ।
पतिधर्मपरा साध्वी पातिव्रत्यसुरक्षिणी ॥३३॥
जनकेनाऽर्पिता तुभ्यं नाऽन्यस्मै त्वर्पिताऽस्मि वै ।
पत्याज्ञा पालनीया मे धर्मोऽस्त्येव तथाप्यहम् ॥३४॥
प्रार्थयामि कृपासिन्धो ! त्वां विना मरणं ध्रुवम् ।
ममाऽत्र स्याद् गतिर्नैव भवेन्मे मत्पतिं विना ॥३५॥
अरण्ये मरणं श्रेयः पत्युः सान्निध्यमेव मे ।
पतिं विना गतिर्नास्ति पत्नीनां पारलौकिकी ॥३६॥
ऐहिकी च गतिर्नैव विद्यते पतिमन्तरा ।
सुख सुखे दुःखे दुःखं प्रसन्ने तु प्रसन्नता ॥३७॥
क्षुधिते क्षुधिता साध्वी तृप्ते तृप्ता सती भवेत् ।
स्वार्थानन्दपरा पक्षपातिनी नरकं व्रजेत् ॥३८॥
पतिभाग्येन सौभाग्यवती भवति साध्विका ।
पतिहीना सपतिका सजीवापि मृतैव सा ॥३९॥
नारी पार्श्वे स्वामिनोऽस्ति चार्धे साऽहं तवाऽस्मि तु ।
न वियोक्तुं तु योग्याऽहं स्वर्गे मे पतिरेव यत् ॥४०॥
दुःखिनं स्वामिनं त्यक्त्वा सुखं वाञ्छति स्वैरिणी ।
पतिव्रता महासाध्वी दुःखभागान् प्रविन्दति ॥४१॥
सर्वस्वस्य प्रदानेन यदि स्वामी सुखी भवेत् ।
प्राणैर्देहेन वा नार्या सुखनीयः पतिः सदा ॥४२॥
रक्षणीयः पतिर्नार्या देहं विक्रीय वाऽऽपदि ।
धनं यौते गतं कृत्वा रक्ष्यः स्वामी सुयोषिता ॥४३॥
स्वामी स्वस्याः परंब्रह्म धर्मः स्वामी सुखं विधिः ।
सर्वं स्वामी न चान्यो वै सुखयोगः कथंचन ॥४४॥
तस्मान्मया प्रभोः छायारूपया चानुनीतया ।
सहैव सर्वदा स्थेयं नात्र स्थेयं कथंचन ॥४५॥
यत्र पतिस्तत्र स्वर्गो वैकुण्ठं मोक्षणं तथा ।
राज्यं सम्पत् परा स्मृद्धिर्धर्मः शृंगार इत्यपि ॥४६॥
पतिं विना गृहं राज्यभवनं फेरुराड्गृहम् ।
भोग्यान्यपि च सर्वाणि विषतुल्यानि सर्वथा ॥४७॥
न स्वर्गे स्वर्गमेवोक्तं पतिः स्वर्गः सदा स्त्रियाः ।
न व्रतं व्रतमत्रोक्तं पतिरेव व्रतं स्त्रियाः ॥४८॥
न धर्मो धर्म एवोक्तः पतिर्धर्मः सदा स्त्रियाः ।
दानं जपस्तथा पूजा सौभाग्यं शान्तिरेव च ॥४९॥
स्वामिपार्श्वस्थितपत्न्याः सर्वं सिद्ध्यति नान्यथा ।
न फलं लभते स्वामिशून्या प्रोषितभर्तृका ॥५०॥
पश्य कान्त ! स्त्रिया भाग्यं पत्यौ देशान्तरं गते ।
निस्तेजस्कं भवत्येवोत्साहशक्तिविवर्जितम् ॥५१॥
पतिशून्यं सार्वभौमं राज्यं वै मुण्डिकासमम् ।
पतियुक्ता पर्णकुटी माहेन्द्रपदतोऽधिका ॥५२॥
नार्या वनं वनं नैव भवनं भवनं न वै ।
वनं सपतिकं स्वर्गो निःस्वामिभवनं वनम् ॥५३॥
देहः सपतिको दिव्यो पतिशून्यः शवात्मकः ।
न भूषा भूषणं प्रोक्तं पतिरेव हि भूषणम् ॥५४॥
अपतिकाऽऽभूषणानि गणिकां ख्यापयन्ति ताम् ।
जलं चान्नं चाऽम्बराणि सौभाग्यद्रव्यमंजनम् ॥५५॥
पतियुक्तं सतेजस्कं त्वन्यथा दूषणप्रदम् ।
तस्मात्पत्न्या सदा सार्धं वस्तव्यं स्वामिना प्रभो ॥५६॥
पतिं पार्श्वे विना पत्नी विनाशाय हि कल्प्यते ।
मा मे नाशो भवेत् कान्त ! वियुक्ताया गृहेऽत्र वै ॥५७॥
तथा कृपां परां कर्तुं त्वमेवाऽर्हसि केशव ! ।
इत्युक्त्वा साश्रुनेत्रा सा धृतवल्कलवस्त्रका ॥५८॥
हार्दं रामस्य विज्ञाय सज्जाऽभूद् गमनाय वै ।
रामः प्राह वने साध्वि ! क्षुधाऽसह्या भविष्यति ॥५९॥
सीता प्राह गृहे स्वामिन् क्षुधा मे न शमिष्यति ।
रामः प्राह वने साध्वि तृषा मृत्युं नयिष्यति ॥६०॥
सीता प्राह गृहे स्वामिंस्त्वत्तृषा मारयिष्यति ।
रामः प्राह वने कान्ते ! सिंहाद्यैस्त्वं मरिष्यसि ॥६१॥
सीता प्राह गृहे कान्तवियोगो मांसमत्स्यति ।
रामः प्राह वने पत्नि ! चातपोऽसून् हरिष्यति ॥६२॥
सीता प्राह गृहे रामविरहाग्निर्ज्वलिष्यति ।
शैत्याग्निर्वनिकः श्रेष्ठो गृहशैत्याग्निमानतः ॥६३॥
रामः प्राह वने दैत्यः कदाचित्त्वां हरिष्यति ।
सीता प्राह तदा रामो ध्येयकार्यो भविष्यति ॥६४॥
रामः प्राह ततो नाऽयं सकलंकां ग्रहीष्यति ।
सीता प्राह तदा सत्याः धर्मः प्रकाशमेष्यति ॥६५॥
रामः प्राह ततः पश्चाद्वियोगं सती चेष्यति ।
सीता प्राह ततः सीता वैकुण्ठे योगमेष्यति ॥६६॥
रामः प्राह शरीरेण सुखं दृष्टं न वै भवेत् ।
सीता प्राह त्वया साकं दुःखं दृष्टं न वै भवेत् ॥६७॥

रामः प्राह वने सीते! दुःखदा त्वं भविष्यसि।
सीता प्राह गृहे त्यक्त्वाऽत्यतिदुःखो भविष्यसि ॥६८॥
अर्द्यमाना वने सीता क्लिश्यमाना मुहुर्मुहुः।
पत्याधारा दुःखशब्दं श्वासेऽपि न गदिष्यति ॥६९॥
आनुकूल्यस्य संकल्पं प्रातिकूल्यविवर्जनम्।
सीता पतिव्रताऽरण्ये सर्वथैवाऽऽचरिष्यति ॥७०॥
वह्निना रक्षिता चाऽथ रामेणाऽप्यनुमोदिता।
छायया राक्षसं क्षिप्त्वा पातिव्रत्यमविष्यति ॥७१॥
भ्रामयित्वा साक्षरान्वै राक्षसान् छायया सती।
सीता सितत्वसंयुक्ता पुना रामं मिलिष्यति ॥७२॥
छाया वह्नौ विलीना वै भविष्यति पतीच्छया।
धर्मरक्षाकरं वाक्यं मत्वा पत्युः पुनः सती ॥७३॥
पत्युः प्रियंकरी सीता सती संशिक्षयिष्यति।
गुर्वाश्रमोऽथवाऽरण्यं स्वर्गं मान्यं पतीच्छया ॥७४॥
पत्युर्वाक्यं परो धर्मः पतिः श्रीपरमेश्वरः।
सीताद्वारा पती रामो हत्वा राक्षसकोटिकान् ॥७५॥
आज्ञापयिष्यति पत्नीं हृदि रक्षितुमिच्छुकः।
वैकुण्ठे दिव्यरूपा च साकेते हृदयस्थिता ॥७६॥
जनैरदृश्या सीते! त्वं सेवां कुरु सदा मम।
इत्याज्ञां सा समागृह्य धरण्यां वै प्रवेक्ष्यति ॥७७॥
तामिमां जानकीं बालां साकं नेतुं त्वमर्हसि।
इत्युक्त्वा वनवासं वै गन्तुं प्रोत्साहसंयुता ॥७८॥
दिव्यरूपाऽभवत् सीता माया मार्गप्रदर्शिका।
अग्रगा साऽभवत्तत्र रामः पश्यति तां तदा ॥७९॥
मानुष्या दृश्यतन्वा तु रामपृष्ठं ययौ सती।
एवं सेवकरूपोऽसौ नराऽऽदित्योऽपि संययौ ॥८०॥
प्रययौ तु वनं रामादित्यः सीतानरार्कयुक्।
पुत्रशोकाच्छतमखस्तत्याज स्वतनुं प्रिये! ॥८१॥
पालनाय पितुः सत्यं रामो बभ्राम कानने।
कालान्तरे महारण्ये भगिनी रावणस्य च ॥८२॥
ददर्श रामं कामार्त्ता ब्राह्मणी राक्षसी हि तम्।
प्राह शूर्पणखा राम! रूपधाम! गृहाण माम् ॥८३॥
रामः प्राह सभार्योऽहमभार्यं गच्छ मेऽनुजम्।
एकपत्नीव्रतश्चाऽहं दुःखमन्यापरिग्रहः ॥८४॥
श्रुत्वा सा तु नरादित्यं मां भजस्वेत्युवाच वै।
नरादित्यो ब्रह्मचारी तामुवाच हि राक्षसीम् ॥८५॥
न मे दारग्रहः कालो गच्छ सौम्ये! जनान्तरम्।
क्रुद्धा शूर्पणखा प्राह यदि त्यजथो मां वृथा ॥८६॥
युवयोस्तु विपत्तिर्वै भविष्यति न संशयः।
मम शापादयं रामो हृतभार्यो भविष्यति ॥८७॥
राक्षसीमित्युक्तवतीं मिषं वै रक्षसां वधे।
कर्तुं शस्त्रेण चिच्छेद नरार्को नासिकां स्त्रियाः ॥८८॥
तन्निमित्तेन वै चतुर्दशसहस्रराक्षसान्।
नरादित्यो यममार्गे प्रेषयामास संगरे ॥८९॥
शूर्पणखा तपः कृत्वा कुब्जा जाता तपस्विनी।
कृष्णं प्राप पतिं सा वै वेधोवरमवाप्य यत् ॥९०॥
अथ शूर्पणखा सिंहलाख्यं द्वीपं जगाम ह।
तन्नृपं रावणं सा वै जगाद चेष्टितं हरेः ॥९१॥
रावणोऽपि शूर्पणखावाक्यात् क्रोधितमानसः।
ज्ञात्वा सीतां सतीं हर्तुं चक्रे तु मानसं दृढम् ॥९२॥
मन्दोदर्या तस्य पत्न्या निषिद्धो रावणो बहु।
परनार्यास्तत्र पतिव्रतायास्तु प्रधर्षणम् ॥९३॥
सर्वथा नाशफलकं मा याहि सिंहलेश्वर!।
एवं संप्रार्थितश्चापि सीतां जहार मायया ॥९४॥
रामः सुग्रीवसाहाय्यो वरं दत्वा हनूमते।
दत्वाऽङ्कुलीयकं विश्वासस्थानं वानरेश्वरम् ॥९५॥
हनूमान् प्रययौ व्योम्ना सिंहलद्वीपमेव तु।
अशोककानने सीताच्छायां ददर्श शोकिताम् ॥९६॥
निराहारामतिकृशां रामनामजपस्थिताम्।
रूक्षजटाभारयुतां ध्यायमानां पतिं प्रभुम् ॥९७॥
प्रणम्य मातरं रत्नाङ्कुलीयकं ददौ जगौ।
रामसन्देशमेवाऽथ भस्मीचकार सिंहलम् ॥९८॥
रामदूतं च सोवाच साश्रुनेत्रा पतिव्रता।
अये! जीवति मे रामो मच्छोकार्णवदारुणात् ॥९९॥
अपि मे कुशली नाथो न शोकेन हतः प्रभुः।
अपि जाता वने तस्य स्वामिनो दुःखरूपिणी ॥१००॥
मदर्थे कति दुःखं वा सम्प्राप स मदीश्वरः।
किमाहारश्च किं भुंक्ते मम प्राणाऽधिकः प्रियः ॥१०१॥
अपि द्रक्ष्यामि तं रामं समुद्रान्तिकमागतम्।
अपि सेवां करिष्यामि पादपद्मे पुनः प्रभोः ॥१०२॥
पतिसेवाविहीनाया मूढाया जीवनं वृथा।
अयि! मे धर्मपुत्रस्तु नरादित्यः प्रजीवति ॥१०३॥
मच्छोकसागरे मग्नो देवकल्पस्तु देवरः।
हनूमाँस्तां सर्वनिरामयं विज्ञाप्य चाम्बरात् ॥१०४॥
प्रययौ कथयामास रामादित्यं सतीव्रतम्।
स च वानरसैन्यैश्च सेतुं बध्वा ययौ हरिः ॥१०५॥

सिंहलाधिपतिं हत्वा चक्रे सीताप्रमोक्षणम् ।
ययौ पुष्पकयानेन साकेतं सीतया सह ॥१०६॥
विजयस्योत्सवं कृत्वा सीतां कृत्वा तु वक्षसि ।
जहतुर्विरहज्वालां सीता रामार्क इत्युभौ ॥१०७॥
बभूवतू रामपुत्रौ धार्मिकौ च कुशीलवौ ।
वाल्मिकस्याश्रमे जातौ सूर्यवंशकरौ शुभौ ॥१०८॥
सीता तु धरणौ मग्ना साकेतपत्तने ततः ।
वर्षद्वादशसाहस्रं रामो राज्यं चकार ह ॥१०९॥
ततो यातः स वैकुण्ठं धर्मं संस्थाप्य भूतले ।
इति ते कथितं लक्ष्मि ! सीताचरित्रमुत्तमम् ॥११०॥
पातिव्रत्यपरं क्रूरारण्यराक्षसपीडितम् ।
श्रीरामचरितं त्वेतद् भुक्तिमुक्तिप्रदं सदा ॥१११॥
न जातो रामसदृशो दयालुर्धार्मिकः शुचिः ।
न च जनिष्यते पश्चात् कृष्णनारायणं विना ॥११२॥
नापि सीतासमा पत्नी दुःखंजीवा पतिव्रता ।
भविष्यति स्वामिजीवा न जातापि श्रुताऽपरा ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये शतमखद्युवर्णापुत्रवध्वाः सीताया रामादित्येन सह वनवासकष्टादिकं पत्यर्थमेवेति पातिव्रत्यधर्मपरत्वमित्यादिनिरूपणनामा षट्सप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! स्वयं राधा गोलोकस्था हरिप्रिया ।
पुत्रीं लक्ष्मीं तथा गंगां सरस्वतीं च पद्मिकाम् ॥ १ ॥
प्राह धर्मान् पातिव्रत्यपरान् प्रभां शिवां तथा ।
शृण्वन्तु च सुताः सर्वा धर्मान् वदामि शाश्वतान् ॥ २ ॥
स्त्रीणां धर्माः पातिव्रत्यं नाऽस्मात्परोऽस्ति कश्चन ।
तत्र भुक्तिर्महामुक्तिरात्मानन्दश्च शाश्वतः ॥ ३ ॥
वर्णानामाश्रमाणां च त्यागिनां गृहिणामपि ।
विधवानां वैष्णवानां सतां स्त्रीणां च सर्वथा ॥ ४ ॥
पुत्राणां चापि कन्यानां शिष्याणां भृत्यशालिनाम् ।
पातिव्रत्यं परो धर्मः प्रजानां सर्वथा सुताः ! ॥ ५ ॥
ध्यानपूता सदा नारी कुरुते पतिसेवनम् ।
नित्यं भुंक्ते तत्प्रसादं कृष्णे निवेद्य सर्वथा ॥ ६ ॥
विष्णुप्रसादभोक्त्री च जीवन्मुक्ता सती भवेत् ।
नित्यं तपस्यानिरता शुद्धा शान्ता धिया युता ॥ ७ ॥
व्रततीर्थाश्रिता नारी सर्वदाऽस्ति पतिव्रता ।
विष्णुमन्त्रं गृहीत्वा च कृत्वा सद्गुरुसेवनम् ॥ ८ ॥
प्राप्याऽऽशिषो गुरोः शिष्या सम्पद्यते पतिव्रता ।
गुर्वाज्ञा तु सदा पाल्या सर्वं तस्मै निवेदयेत् ॥ ९ ॥
सर्वेषामपि वन्द्यानां पिता चास्ति महान् गुरुः ।
पितुः शतगुणा माता मातुः शतगुणः सुरः ॥१०॥
मन्त्रदः सद्गुरुस्तत्र सुराणां वै चतुर्गुणः ।
नारायणश्च भगवान् गुरुः प्रत्यक्ष ईश्वरः ॥११॥
पतिरेव गुरुर्देवः कृष्णनारायणात्मकः ।
प्रत्यक्षभोक्ता स्वगुरुः स्वयं देही जनार्दनः ॥१२॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव स्वयं शिवः ।
गुरौ पत्यौ सर्वदेवास्तिष्ठन्ति सततं मुदा ॥१३॥
गुरौ तुष्टे हरिस्तुष्टस्तस्मिँस्तुष्टे च देवताः ।
गुरोः पादोदकं पीत्वा तीर्थस्नाता भवेत् सती ॥१४॥
मुच्यते सर्वपापेभ्यो विष्णुलोकाय कल्पते ।
सा स्नाता सर्वतीर्थेषु सर्वयज्ञेषु दीक्षिता ॥१५॥
पतिपादोदकैर्या स्त्री ह्यभिषेकं स्वयं चरेत् ।
गंगाजलाद् दशगुणं शालग्रामजलं शुभम् ॥१६॥
ततोऽपि दशधा श्रेष्ठं पतिपादोदकं मतम् ।
मित्यं या सेवते पत्नी जीवन्मुक्ता सुरोपमा ॥१७॥
साध्वीनां नित्यकृत्यं तु स्वामिप्रसादभोजनम् ।
यत्नेन पूजनं तस्य तत्पादोदकसेवनम् ॥१८॥
पृथिव्यां यानि तीर्थानि पतिपादोदके प्रिये ! ।
तिष्ठन्ति पत्निकासेवाफलसिद्ध्यै हि सर्वदा ॥१९॥
पतिपादोदकक्लिन्ना यावत् तिष्ठति मेदिनी ।
तावत्पत्नी महालक्ष्मीस्वरूपा पूज्यते सुरैः ॥२०॥
स्वामिप्रसादभोक्त्री वै पवित्रां कुरुते महीम् ।
तीर्थानि च प्रजाश्चापि जीवन्मुक्ता यतो हि सा ॥२१॥
पतिं प्रति पदा गच्छेद् व्रतानां फलभागिनी ।
पदे पदेऽश्वमेधस्य लभते सा फलं सती ॥२२॥
वह्निवायुसमा पूता तेजसा भास्करोपमा ।
वैकुण्ठे मोदते पश्चात्पत्या च हरिणा समम् ॥२३॥
विष्णुमन्त्रोपासिका या वैष्णवी पतिसेविना ।
न हि तस्याः परा देवी पावनी विद्यते भुवि ॥२४॥
हरेर्भक्ता महासाध्वी स्वामिसेवापरायणा ।
वैष्णवी या भवेत्तस्या मुखान्नारायणेति वै ॥२५॥
निर्गलितं हरेर्नाम मन्त्ररूपं प्रजायते ।
यस्य कर्णे विशेत् सोऽपि महापूतः प्रजायते ॥२६॥

भित्त्वा ब्रह्माण्डमखिलं सोपि यायाद्धरेः पदम् ।
पूर्वान्सप्त परान्सप्त सप्त मातामहादिकान् ॥२७॥
सोदरानुद्धरेद्भक्ता तत्प्रसूँ तत्प्रसूप्रसूम् ।
ऐकान्तिकी वैष्णवी तु पुंसां लक्षं समुद्धरेत् ॥२८॥
वयोहीना ज्ञानहीना विद्याहीनाऽपि सर्वथा ।
जातिहीना क्रियाहीना पातिव्रत्यपरा यदि ॥२९॥
सर्वश्रेष्ठा रमातुल्या कोटिधर्मान्विता हि सा ।
उद्धारयति लोकाँश्च पातिव्रत्यबलात्सती ॥३०॥
वयोहिनस्तथाऽल्पायुर्ज्ञानहीनोऽप्यपण्डितः ।
विद्याहीनो जातिहीनो मूर्खान्मूर्खोऽतिपातकी ॥३१॥
अनाश्रमी यशोहीनो रोगी व्याधिसमन्वितः ।
निर्वंशो वंशहीनश्च भार्याहीनो दरिद्रकः ॥३२॥
विष्णुभक्तिविहीनश्च धर्मकर्मादिवर्जितः ।
उदासीनो दुराचारो धनहीनोऽपि मानवः ॥३३॥
सत्याः पतिव्रतायाश्च साध्व्या आशीर्वयोबलैः ।
स्वर्गं स्वेष्टं सुखस्मृद्धिं भुक्तिं मुक्तिं प्रपद्यते ॥३४॥
सन्न्यासार्जनमात्रेण नरो नारायणो भवेत् ।
पतिसेवाप्रलभेन नारी नारायणी भवेत् ॥३५॥
पूर्वकर्माणि दग्ध्वा च परकर्मनिकृन्तनम् ।
कुरुते सधवा साध्वी गच्छति हरिमन्दिरम् ॥३६॥
सन्न्यासिनां पदस्पर्शात् सद्यः पूता धरा यथा ।
सतीनां तु पदस्पर्शात्तथा पूता वसुन्धरा ॥३७॥
सद्यः पुनन्ति तीर्थानि वैष्णवी वै पतिव्रता ।
पतिव्रतानां वचनान्निष्पापा जायते प्रजा ॥३८॥
पतिव्रतां भोजयित्वा त्वश्वमेधफलं लभेत् ।
नत्वा तां भावतो दृष्ट्वा राजसूयफलं लभेत् ॥३९॥
फलं सन्न्यासिनां तुल्यं यतीनां ब्रह्मचारिणाम् ।
पतिव्रतानां साध्वीनां वैष्णवीनां सदा सुताः ॥४०॥
ब्राह्मणी पतिहीनापि भवेन्निष्कामिनी सदा ।
एकभुक्ता दिनान्ते सा हविष्यान्नरता भवेत् ॥४१॥
न धत्ते दिव्यवस्त्रं च गन्धिद्रव्यं सुतैलकम् ।
स्रजं च चन्दनं चापि शंखसिन्दूरभूषणम् ॥४२॥
सदाऽराजसवस्त्रा स्यान्नित्यं नारायणं भजेत् ।
कृष्णनारायणसेवां कुर्यात्तु नित्यमेव सा ॥४३॥
तन्नामोच्चारणं पुत्र्यः ! कुर्याच्च भक्तितः सदा ।
पुत्रतुल्यं च पुरुषं पश्येद् वैधव्यधर्मतः ॥४४॥
न तथाऽद्याच्च मिष्टान्नं कामवृद्धिकरं तु यत् ।
वैभवान्नोपयुञ्ज्याच्च पतिं नारायणमृते ॥४५॥
सापि पतिव्रतातुल्या पतिकृष्णपरायणा ।
शृणुयात्तु सतां धर्मान् गुरोः सेवां समाचरेत् ॥४६॥
पातिव्रत्यपरा साध्वी मुच्येत भवबन्धनात् ।
पुत्र्यः शृणुत साध्वीनां कर्तव्यं प्रवदामि वै ॥४७॥
नित्यं तु भर्तर्यौत्सुक्यात् हृदा स्थेयं तु योषिता ।
तस्य पादोदकं भक्त्या भोक्तव्यं तदनुज्ञया ॥४८॥
व्रतं तपस्यां देवार्चां कुर्यात्पतिकृताऽऽज्ञया ।
कुर्याच्चरणसेवां च स्तवनं परितोषणम् ॥४९॥
पत्याज्ञारहितं कार्यं कुर्यान्नैव पतिव्रता ।
नारायणादधिकं वै कान्तं ध्यायेत्तु वै सती ॥५०॥
परपुंसां रजोभावप्रसंगं नाऽऽचरेत् सती ।
यात्रोत्सवं नर्तनं च गायनं क्रीडनं तथा ॥५१॥
पत्यर्थमाचरेत् साध्वी नान्यार्थं वै कदाचन ।
यद्भक्ष्यं स्वामिनो नित्यं साध्वीनां तु तदेव वै ॥५२॥
न त्यजेत्पतिसंगं सा साध्वी सेवापरायणा ।
उत्तरे नोत्तरं दद्यात्स्वामिनस्तु पतिव्रता ॥५३॥
न कोपं कुरुते शुद्धा ताडिता चापि कोपतः ।
क्षुधितं भोजयेत्कान्तं दद्यात्पानं च भोजनम् ॥५४॥
निद्रास्थं तं बोधयेन्न प्रेरयेन्नैव कर्मसु ।
पुत्रस्नेहाच्छतगुणं स्नेहं कुर्यात् प्रिये सती ॥५५॥
पतिर्बन्धुर्गतिर्भर्ता दैवतं कुलयोषितः ।
सुधाधावल्यवदनं कान्तं साध्वी स्मितानना ॥५६॥
पश्येद्वै भक्तिभावेन सर्वसम्पत्करी भवेत् ।
पुरुषाणां सहस्रं च सती स्त्री वै समुद्धरेत् ॥५७॥
पतिः पतिव्रतानां च मुच्यते सर्वपातकात् ।
नास्ति तेषां कर्मभोगः पातिव्रत्यबलात् खलु ॥५८॥
तया सार्धं कर्मशून्या मोदन्ते हरिमन्दिरे ।
पृथ्व्यां यानि तु तीर्थानि सतीपादेषु तान्यपि ॥५९॥
देवानां च मुनीनां च तेजः सतीषु विद्यते ।
तपस्विनां तपः सर्वं व्रतिनां विद्यते व्रतम् ॥६०॥
दातॄणां च फलं दाने तत्फलं तासु विद्यते ।
स्वयं नारायणः शंभुर्विधाता देवतादयः ॥६१॥
ऋषयो मुनयश्चापि साध्वीतो बिभ्यति ध्रुवम् ।
पतिव्रतां नमस्कृत्य मुच्यते पापबन्धनात् ॥६२॥
त्रैलोक्यं भस्मसात् कर्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था वै महापुण्यवती सती ॥६३॥
सतीनां च पतिः साधुः पुत्रश्चापि शुचिः सदा ।
नहि तस्य भयं किञ्चिद् देवेभ्यश्च यमादपि ॥६४॥

शतजन्मपुण्यवतां गेहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ॥६५॥
सती स्त्री प्रातरुत्थाय सन्त्यक्त्वा रात्रिवाससम् ।
भर्तारं च नमस्कृत्य करोति स्तवनं मुदा ॥६६॥
गृहकार्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पं च भक्तितः पूजयेत् पतिम् ॥६७॥
स्नापयित्वा सुगन्धाढ्यजलेन निर्मलेन वै ।
तस्मै दत्वा धौतवस्त्रे तत्पादौ क्षालयेन्मुदा ॥६८॥
आसने वासयित्वा च दत्त्वा भालेऽस्य चन्दनम् ।
सर्वांगगन्धलेपं च दत्वा मालां गलेऽपि च ॥६९॥
उपचारैः पतिं स्तुत्वा प्रपूज्य प्रणमेत् सती ।
धूपं दीपं जलं भोज्यं दत्वा ताम्बूलमित्यथ ॥७०॥
नीराजयेत्पतिं प्रीत्या कृष्णनारायणात्मकम् ।
प्रदक्षिणं नमस्कारं कृत्वा च स्तवनं चरेत् ॥७१॥
"नमः कान्ताय सद्भर्त्रे" शिरश्छत्रस्वरूपिणे ।
नमो यावत्सौख्यदाय सर्वदेवमयाय च ॥७२॥
नमो ब्रह्मस्वरूपाय सतीसत्योद्भवाय च ।
नमस्याय प्रपूज्याय हृदाधाराय ते नमः ॥७३॥
सतीप्राणस्वरूपाय सौभाग्यश्रीप्रदाय च ।
पत्नीनां परमानन्दस्वरूपिणे च ते नमः ॥७४॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ।
पतिर्वंशधरो देवो ब्रह्मात्मने च ते नमः ॥७५॥
क्षमस्व भगवन् दोषान् ज्ञानाऽज्ञानविधापितान् ।
पत्नीबन्धो दयासिन्धो दासीदोषान् क्षमस्व वै ॥७६॥
राधा प्राह ततः पुत्रीः स्वस्वपतिं प्रति ध्रुवम् ।
स्तवनं चेदृशं कार्यं सर्वेप्सितप्रदं तु वः ॥७७॥
ततः स्तोत्रमिदं पुण्यं सृष्ट्यादौ पद्मया कृतम् ।
सरस्वत्या च धरया गंगया रमया कृतम् ॥७८॥
साविश्याऽथ च पार्वत्या मुनिपत्नीभिरित्यपि ।
गीतं स्वस्वपतिं प्राप्य सर्वसामर्थ्यदं ततः ॥७९॥
पतिव्रतानां सर्वासां स्तोत्रमेतच्छुभावहम् ।
प्रसादरूपं चैतद्वै कंभरया कृते युगे ॥८०॥
महालक्ष्म्या तथा गीतं प्रभया जयया तथा ।
माणिक्यया ललितया मोहिन्या कीर्तितं पुरा ॥८१॥
नरो नारी शृणुयाच्चेल्लभते सर्ववाञ्छितम् ।
अपुत्रा लभते पुत्रं निर्धना लभते धनम् ॥८२॥
रोगिणी रोगमुक्ता स्यात् पतिहीना पतिं लभेत् ।
पतिव्रता पतिं स्तुत्वा तीर्थस्नानफलं लभेत् ॥८३॥
फलं च सर्वतपसां व्रतानां च फलं लभेत् ।
स्वर्गं मोक्षं च लभते पतिसन्तोषणात् सती ॥८४॥
यस्य माता गृहे नास्ति नास्ति भार्या पतिव्रता ।
अरण्यो तेन गन्तव्यं नरकान्मुक्तिरेव सा ॥८५॥
पतिं द्वेष्टि सदा दुष्टा विषतुल्यं च पश्यति ।
ददाति तस्मै नाऽऽहारं भर्त्सनं कुरुते सदा ॥८६॥
पूजनीयं मुनितुल्यं पापीयसी तु मानिनी ।
सततं तृणवन्मत्वा न्यक्कारं कुरुते पतिम् ॥८७॥
दुर्वाक्यवह्निना दग्धो मृततुल्यस्तु जीवति ।
यावज्जीवनपर्यन्तं संप्राप्य कुलटां स्त्रियम् ॥८८॥
तादृशी न गृहिण्युक्ता निरया कथिता तु सा ।
गृहिणी तु पतिभक्ता देवदैवतपूजिता ॥८९॥
सा शुद्धा प्रातरुत्थाय नमस्कृत्य पतिं सुरान् ।
प्रांगणे मंगलं दद्याद् गोमयेन जलेन च ॥९०॥
गृहकृत्यं च निर्वर्त्य स्नात्वाऽऽगत्य गृहं सती ।
सुरं गुरुं पतिं नत्वा पूजयेद् गृहदेवताम् ॥९१॥
पतिं संभोजयित्वा साऽतिथिं सत्कृत्य भावतः ।
पुत्रपौत्रादिसहिता स्वयं भुंक्ते सुखं सती ॥९२॥
गुरौ पितरि पत्यौ च मातरि श्वशुरेऽपि च ।
श्वश्र्वां कुर्यान्नरबुद्धिं न कदापि पतिव्रता ॥९३॥
पिता माता गुरुर्भार्या शिष्यः पुत्रः सदाऽऽश्रितः ।
अनाथा भगिनी कन्या श्वश्रूः श्वशुर इत्यपि ॥९४॥
पतिस्तद्भ्रातरश्चैते सेव्याः पत्याज्ञया सदा ।
स्त्रीजातिर्वास्तवी शुद्धा ताश्च सर्वाः पतिव्रताः ॥९५॥
सर्वा जातिस्त्वेकरूपा त्वादौ सृष्टा स्वयंभुवा ।
ताः सर्वाः प्रकृतेरंशाः पवित्राः सुखदाः सदा ॥९६॥
उत्तमा पतिभक्ता सा पतिधर्मसमन्विता ।
मध्यमा पतिभक्ता सा स्वार्थसंसाधिकाऽपि या ॥९७॥
कनिष्ठा पतिभक्ताऽपि पत्नी भक्तं पतिं श्रिता ।
तदन्या तु काममात्रपरा परेऽपि संगता ॥९८॥
तिस्रस्तत्र तु धर्माय चतुर्थी धर्महानये ।
बोद्धव्या देहिना शश्वज्ज्ञात्वा योग्यां समुद्वहेत् ॥९९॥
इति ते कथितं लक्ष्मि ! यद् राधोक्तं सुताः प्रति ।
ताश्च धर्मान्पातिव्रत्यपरान् श्रुत्वा मुदं ययुः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये गोलोके राधिकया स्वपुत्रीभ्यः कथितपतिव्रताचारधर्मपालनमाहात्म्यादिनिरूपणनामा सप्तसप्तत्यधिकत्रिशततमोऽध्यायः ॥३७७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां चान्यां गृहगोधाप्रकीर्तिताम् ।
पातिव्रत्यस्य धर्मस्य पुष्टिदां प्राक्प्रवर्तिताम् ॥ १ ॥
रुक्मांगदोऽभवद् राजा रैवताद्रौ विहारवान् ।
अश्वारूढः पश्यति स्म गिरेः शोभामनुत्तमाम् ॥ २ ॥
निखनन् स्वखुरेणोर्वीमश्वो याति स्थलीं स्थलीम् ।
तस्य दारयतः पृथ्वीं सुतीक्ष्णेन खुरेण हि ॥ ३ ॥
भूभागान्तर्गता काचिद् भूमिगोधा प्रकर्तिता ।
विदीर्यमाणां नृपतिरपश्यत्स दयापरः ॥ ४ ॥
शीतलेन जलेनाऽभ्यषिंचत्तां स विमूर्छिताम् ।
अवाप चेतनां लक्ष्मि ! शीतवारिप्रसेचनात् ॥ ५ ॥
राजानमग्रतो वीक्ष्य गोधा वचनमब्रवीत् ।
रुक्मांगद महाबाहो निबोध मम चेष्टितम् ॥ ६ ॥
शाकले नगरे पूर्वं भार्याऽहं त्वग्रजन्मनः ।
रूपयौवनसम्पन्नाऽप्यासं न तस्य सुप्रिया ॥ ७ ॥
सदा विद्वेषसंयुक्तो मयि निष्ठुरजल्पकः ।
ततोऽहं क्रोधसंयुक्ता वशीकरणमन्त्रकम् ॥ ८ ॥
सर्ववश्यकरं प्राप्तुं गता कांचित्तु तापसीम् ।
तत्राऽहं प्रणता भूत्वा पद्भ्यां न्यस्यांऽगुलीयकम् ॥ ९ ॥
निवेद्य मम भर्तुस्तु विमाननं स्थिराऽभवम् ।
तयोक्ताऽहं तदा राजन् प्रयोगार्थं समन्त्रकम् ॥१०॥
चूर्णो रक्षान्वितो ह्येषः सर्वभूतवशंकरः ।
त्वया भर्तरि संयोज्यो दुग्धपाने च मस्तके ॥११॥
भविष्यति पतिर्वश्यो द्वेषं नैव करिष्यति ।
चूर्णरक्षां गृहीत्वाऽहं प्राप्ता भर्तारमेकला ॥१२॥
प्रदोषे शिरसि भर्तू रक्षाचूर्णं प्रयोजितम् ।
पाने तु पयसा सार्धं प्रदोषे तत्र चार्पितम् ॥१३॥
यदा स पीतचूर्णस्तु भर्ता तद्भ्रान्तिः खलु ।
द्रागेव क्षयरोग्येव जातः क्षीणो दिने दिने ॥१४॥
हततेजा मम भर्ता मामुवाचाऽतिनिर्बलः ।
शोकं कुर्वन् दिवारात्रौ दासोऽस्मि तव शोभने ॥१५॥
त्राहि मां शरणं प्राप्तं मरणं निकटे मम ।
श्रुत्वाऽहं तापसीं याता निवेदितवती पुनः ॥१६॥
भर्ता मे वशगो जातः कथं जीवेद् भवेत् सुखी ।
तयौषधं पुनर्दत्तं स्वस्थोऽभूत्तेन मे पतिः ॥१७॥
पूर्वचूर्णोद्भवो दाहः शान्तस्तेनौषधेन वै ।
ततः प्रभृति मे भर्ता वश्योऽभूद् वचने स्थितः ॥१८॥
कालेनाऽहं मृता राजन् गता नरकयातनाम् ।
ताम्रभ्राष्ट्रे त्वहं दग्धा कृत्वा खण्डानि वै मुहुः ॥१९॥
युगकालोत्तरं जाता पृथिव्यां पापजातिका ।
भूमिगोधा स्थिता चात्र गृहगोधाभिजातिका ॥२०॥
वर्षसहस्रं तस्माद्या नारी पतिं वशं चरेत् ।
वृथाधर्मा वृथाचारा दह्यते ताम्रभ्राष्ट्रके ॥२१॥
भर्ता नाथो गतिर्भर्ता दैवतं गुरुरेव च ।
तस्य वश्यं चरेद् या तु सा कथं सुखमाप्नुयात् ॥२२॥
तिर्यग्योनिशतं याति कृमिकुष्ठसमन्विता ।
तस्माद् भूपाल ! कर्तव्यं स्त्रीभिर्भर्तृवचः सदा ॥२३॥
पातिव्रत्यं परो धर्मस्तारको योषितां शुभः ।
सापत्न्यं चापि यद्वैरं भर्तरि नैव योजयेत् ॥२४॥
इष्टा या भूपते ! भर्तुस्तस्या या दुष्टमाचरेत् ।
सा पत्नी नरकं याति यावद् वै ब्रह्मणो दिनम् ॥२५॥
सापत्नभावं या कुर्याद् भर्तृस्नेहेर्ष्यया सह ।
तत्फलं प्राप्यते याम्ये तापनं ताम्रभ्राष्ट्रके ॥२६॥
यथा सुखं भवेद् भर्तुस्तथा कार्यं हि भार्यया ।
अनुकूलं हितं तस्या इष्टाया भर्तुराचरेत् ॥२७॥
पतिं यथा तथा तां च संपश्येद् वै पतिव्रता ।
हीनायाश्चापि शुश्रूषां कृत्वा याति त्रिविष्टपम् ॥२८॥
सर्वान् भोगानवाप्नोति भर्तुरिष्टं करोति या ।
ईर्ष्याभावपरित्यागात् सर्वेश्वरपदं लभेत् ॥२९॥
सपत्नी या सपत्न्यास्तु शुश्रूषां कुरुते सदा ।
भर्तुरिष्टां सन्निरीक्ष्य तस्या लोकोऽक्षयो भवेत् ॥३०॥
शृणु राजन्मया दृष्टा पतिसेवापरायणा ।
गणिका पद्मिनीनाम्नी तत्कथां कथयामि ते ॥३१॥
पूर्वं मम गृहपार्श्वे शूद्रोऽभूद् भार्यया युतः ।
नाम्ना भालुक इत्यस्य पत्नी नाम्ना तु माङ्गली ॥३२॥
रूपयौवनसम्पन्ना पातिव्रत्यपरायणा ।
भालुकस्याऽभवत् त्विष्टा शूद्रा गणिका पिङ्गली ॥३३॥
शूद्रजातेः सुदुष्टस्य परित्यक्तक्रियस्य च ।
आचरद् वेश्यया सार्धं सेवां पतिव्रता सती ॥३४॥
प्रक्षालनं द्वयोः पादानामुच्छिष्टाशना द्वयोः ।
उभयोरप्यधः शेते तूभयोर्वै हिते रता ॥३५॥
वेश्यया वार्यमाणाऽपि सदाचारपथे स्थिता ।
एवं शुश्रूयन्त्यास्तु भर्तारं वेश्यया सह ॥३६॥
जगाम सु महान् कालः स्थितायाः पतिसेवने ।
अथैकदा तु तद्भर्ता माहिषं मूलकान्वितम् ॥३७॥

अभक्षयत्तु निष्पावं दुर्मेधास्तैलमिश्रितम् ।
तदपथ्यभुजस्तस्य चाऽवमन्य पतिव्रताम् ॥३८॥
अभवद् दारुणो रोगो गदे तस्य भगंदरः ।
सन्दह्यमानोऽतितरां दिवारात्रौ स भूरिशः ॥३९॥
अथ वेश्या तस्य वित्तं समादाय जगाम वै ।
अन्यस्मै सा ददौ प्रीत्या यूने कामपरायणा ॥४०॥
ततः शूद्रो दीनमना व्रीडयाऽति प्रधर्षितः ।
उवाच प्ररुदन् भार्यां परिपाल्य मां प्रिये ! ॥४१॥
न मयोपकृतं किंचित् तव सुन्दरि ! पापिना ।
वेश्याऽऽसक्तेन दुष्टेन बहुनब्दान् पतिव्रते ॥४२॥
यो भार्यां प्रणतां पापो नानुमन्येत गर्वितः ।
सोऽशुभानि समाप्नोति जन्मानि दश पंच च ॥४३॥
दिवाकीर्तिगृहे तस्माज्जन्म प्राप्स्यामि गर्हितम् ।
तवाऽपमानतो पत्नि ! पतिसेवापरायणे ॥४४॥
इति भर्तृवचः श्रुत्वा भार्या भर्तारमब्रवीत् ।
पुराकृतानि पापानि दुःखानि प्रभवन्ति हि ॥४५॥
तानि संक्षमते विद्वान् क्षमयाऽन्तो भविष्यति ।
एवमुक्त्वा समाश्वस्य भर्तारमनुशिष्य च ॥४६॥
आनीतवती जनकाद् वित्तं करोति सेवनम् ।
नारायणस्वरूपं तं मन्यते स्म सती पतिम् ॥४७॥
दिवा दिवा त्रिर्यत्नेन भगन्दरविशोधनम् ।
करोति सेवनं तस्य पवनं च ददात्यपि ॥४८॥
न सा रात्रौ स्वपित्यपि न दिवा च पतिव्रता ।
भर्तृदुःखेन सन्तप्ता त्वपश्यज्ज्वलितं जगत् ॥४९॥
यद्यस्ति वसुधा देवी पितरो देवतास्तथा ।
कुर्वन्तु रोगहीनं मे भर्तारं गतकल्मषम् ॥५०॥
चण्डिकायै प्रदास्यामि श्रीफलं माहिषं तथा ।
नवरात्रव्रतं चापि भर्तुरारोग्यहेतवे ॥५१॥
सादरं तु करिष्यामि ह्युपवासान् दशैव च ।
शरीरं स्थापयिष्येऽहं सूक्ष्मकण्टकसंस्तरे ॥५२॥
नोपभोक्ष्यामि मधुरं नोपभोक्ष्यामि वै घृतम् ।
बाह्याभ्यंगविहीनाऽहं संस्थास्ये बहुवासरान् ॥५३॥
जीवतां रोगहीनो हि भर्ता मे शरदां शतम् ।
एवं निश्चययुक्ता सा कृष्णबुद्ध्या प्रसेवते ॥५४॥
पतिस्तस्याः पातिव्रत्यप्रतापेनापि सर्वथा ।
रोगहीनस्तु संजातः सुखदो योषितेऽन्वहम् ॥५५॥
बहुकाले गते पश्चाद् त्रिदोषज्वरपीडितः ।
व्यज्ञायत कदाचित्तु कालगत्याऽन्तिकाऽन्तकः ॥५६॥

त्रिकटुं प्रददौ भर्त्रे यत्नेन महताऽपि सा ।
शीतार्तः कम्पमानोऽसौ पत्न्यंगुलिमखण्डयत् ॥५७॥
उभयोर्दन्तयोः श्लेषः सुदृढः समपद्यत ।
अंगुल्याः खण्डमास्येऽस्य स्थितमेवापि सुन्दरी ॥५८॥
सिषेवे परया प्रीत्या प्राणाँस्तत्याज सोपि वै ।
अथ विक्रीय वलयं क्रीत्वा काष्ठानि भूरिशः ॥५९॥
चितां सर्पियुतां चक्रे मध्ये धृत्वा पतिं तदा ।
अवरुह्य च बाहुभ्यां पादेनाकृष्य पावकम् ॥६०॥
मुखे मुखं समाधाय हृदये हृदयं तथा ।
जघने जघनं देवी त्वात्मनः सन्निधाय च ॥६१॥
दाहयामास कल्याणी भर्तुर्देहं पतिव्रता ।
आत्मना सह चार्वंगी ज्वलिते जातवेदसि ॥६२॥
विमुच्य देहं सहसा जगाम स्वामिना सह ।
देवलोकं शोधयित्वा महापापादिसञ्चयान् ॥६३॥
इतिदृष्टं मया साक्षाद् राजन् शूद्राणिकाव्रतम् ।
स्वर्गदं सुखदं तस्माद् विद्धिषेत्र पतिप्रियाम् ॥६४॥
स्वहस्तेन प्रियां भर्तुर्भार्या संभोजयेत् सती ।
सपत्नीं तु सपत्नी हि किंचिदन्नं ददाति यत् ॥६५॥
तदनन्तं भवेद् राजन् फलं चानन्तकं भवेत् ।
पतिव्रता च सा ज्ञेया योनिसंरक्षणा सदा ॥६६॥
नारीणां भर्तृशुश्रूषा पुत्राणां पितृसेवनम् ।
शूद्राणां लोकसेवा च लोकरक्षा महीभृताम् ॥६७॥
पातिव्रत्यं च तत्प्रोक्तं रक्षणं स्वामिनश्चरेत् ।
यस्या दुःखी भवेद् भर्ता भार्याया बहुभार्यकः ॥६८॥
समृद्धायाः सपापायास्तस्याः प्रोक्ता ह्यधोगतिः ।
सा याति नरकं पापा पूयाख्यं युगमेव यत् ॥६९॥
ततश्छुन्छुन्दरी स्याच्च सप्तजन्मानि पर्वते ।
ततः काकी ततः श्याली गोधा गोत्वेन शुद्ध्यति ॥७०॥
भर्तुरर्थे तु या वित्तं विद्यमानं न यच्छति ।
जीवितं वा स्वदेहं वा विष्ठायां सा भवेत् कृमिः ॥७१॥
कृमियोनिर्विनिर्मुक्ता काष्ठीला जायते ततः ।
काष्ठीलया पुरा प्रोक्तं श्रुतं मया वदामि ते ॥७२॥
मम कौमारभावे तु मद्ग्रामे काष्ठपाटकः ।
चुल्लिकायोग्यकाष्ठानि नित्यं पाटयति गृहे ॥७३॥
तत्र दृष्टा मया मुण्डा काष्ठीला दारुनिर्गता ।
नवनीतमृदुदेहा कनिष्ठांगुलिकाप्रभा ॥७४॥
मुखे त्वञ्जनसद्रूपा स्थौल्ये त्वंगुलिमानिका ।
तां पतितां भुवि दृष्ट्वा जग्धुं काकः समागतः ॥७५॥

यावत् भङ्क्त्वा प्रगृह्णाति तावन्मया तु कंकरैः ।
लोष्ठक्षेपणकैश्चापि सद्यः काको निवारितः ॥७६॥
सा मुक्ता सक्षता तुण्डताडिता न पलायितुम् ।
समर्था ह्यभवद् राजन्! वेपमानाऽतिमूर्छिता ॥७७॥
सिक्ता मया जलेनाथ स्वास्थ्यं ज्ञानमुपागता ।
ततः सा मानुषीवाचा पूर्वं जन्म जगाद माम् ॥७८॥
सुमन्तुनाम्नो हि मुनेः सर्वज्ञस्य सुताऽभवत् ।
पत्नी चासीद् गुणयुक्ता कौण्डिन्यस्य सुदर्पिता ॥७९॥
जनन्या बन्धुवर्गस्य पितुरिष्टतया ह्यहम् ।
पित्रा दत्तं यौतकं मे श्वशुरेणापि चार्पितम् ॥८०॥
अयुतं च सुवर्णानामुपवस्तुबहूत्तमम् ।
पितृश्वशुरवित्ताभ्यां सुसमृद्धाऽभवं तदा ॥८१॥
गोमहिष्यादिसंयुक्ता धनधान्यसमन्विता ।
इष्टा श्वशुरयोश्चाऽहं सौशील्येन जनस्य च ॥८२॥
कालेन पञ्चतां प्राप्तः श्वशुरो मेऽतिधार्मिकः ।
मृतं तं पतिमादाय श्वश्रूरग्निं विवेश सा ॥८३॥
अथ मासद्वये याते भर्ता मे राजमन्दिरम् ।
यज्ञकार्यप्रसिद्ध्यर्थं गतो वेश्याः ददर्श सः ॥८४॥
रूपाढ्या यौवनोपेतास्तासां मध्यात्तु वै द्वयम् ।
वेश्यारत्नं समादाय रक्षयामास वै गृहे ॥८५॥
तयोर्वित्तमशेषं तु क्षयं नीतं निषेवणात् ।
वर्षत्रये गते निःस्वो जातः पतिर्ममाऽथ सः ॥८६॥
प्रार्थयामास मां वित्तं देहि मेऽङ्गविभूषणम् ।
तन्मया नहि दत्तं तु भर्त्रे व्यसनिने तदा ॥८७॥
किन्तु सर्वं समादाय गताऽहं पितृमन्दिरम् ।
पतिना गृहवस्त्वादि विक्रीतं क्षयितं च तत् ॥८८॥
श्वशुरस्यापि यद्द्रव्यं यत्र क्वापि स्थितं त्वभूत् ।
सर्वं तत् क्षयितं तेन क्षेत्रभाण्डपरिच्छदम् ॥८९॥
अथ नावं समारुह्य द्रव्यार्थं कृतमानसः ।
गतः समुद्रमार्गेण दूरं यावत्तदाऽनिलैः ॥९०॥
प्रभंजनैर्वशं नीता नौका विशीर्णतां गता ।
अन्ये मृताः पतिर्मे तु दैवात् काष्ठं समाश्रितः ॥९१॥
वायुना शुभपुण्येनाऽऽससाद द्वीपमल्पकम् ।
यत्र सामुद्ररत्नानि चाऽभवन् कोटिशः खलु ॥९२॥
तत्तीरं स मुहूर्तं तु विशश्राम क्षुधान्वितः ।
पक्ववृक्षफलान्यत्त्वा पीत्वा जल सुखान्वितः ॥९३॥
सालवृक्षस्य मूले स रात्रौ सुष्वाप वै श्रमी ।
अभ्यगाद् राक्षसो घोरः कन्यामादाय सुन्दरीम् ॥९४॥
शुभां काशीपतेः पुत्रीं नाम्ना रत्नावलीं सतीम् ।
जहार राजसौधात् तां भक्ष्यार्थं स्वीययोषितः ॥९५॥
राक्षसः प्राह पत्नीं च मद्भक्ष्यं तु गुहामुखे ।
नररूपं समास्ते वै तमानय च मा चिरम् ॥९६॥
इत्युक्ता सा ययौ गुहाद्वारं मम पतिं प्रति ।
उवाच तु पतिं मे सा त्वां पतिं कर्तुमागता ॥९७॥
शक्तिं ददामि ते हस्ते मत्पतिं हन्तुमेव वै ।
यदि त्वमनया शक्त्या न हिंससि राक्षसम् ॥९८॥
खादयिष्यति दुर्मेधास्त्वां च मां च न संशयः ।
या गतिर्ब्रह्महत्यायां कुत्सिता प्राप्यते जनैः ॥९९॥
तां गतिं हि प्रपद्येऽहं वच्मि चेदनृतं यदि ।
इत्युक्त्वा ब्राह्मणं नीत्वा गुहायां राक्षसं प्रति ॥१००॥
गता सा प्राह विप्रं तं प्रक्षिपस्व सुशक्तिकाम् ।
श्रुत्वा द्रागेव तां शक्तिं मुमोच राक्षसं प्रति ॥१०१॥
कृत्वा भस्मावशेषं सा राक्षसं गगनं गता ।
अथोवाच द्विजं दृष्ट्वा भोगान् भुंक्ष्वाऽत्र कान्त ! मे ॥१०२॥
कान्तो मया हतो नैव किन्तु पापाद् वियोजितः ।
ब्राह्मणश्च कृतः कान्तो ब्राह्मणी च भवामि वै ॥१०३॥
कन्यात्वध्वंसको मा स्यात् पतिश्चैवं विनाशितः ।
यत्र तेऽस्ति गृहं तत्राऽऽगच्छामि कन्यया सह ॥१०४॥
इत्युक्त्वा राक्षसी सर्वं संप्रगृह्य गुहाधनम् ।
करेणुरूपिणी भूत्वा पृष्ठे कृत्वा पतिं मम ॥१०५॥
ययावाकाशमार्गेण काशीराजगृहं प्रति ।
पृष्ठात् करेणुरूपिण्याः सकन्योऽवातरद् द्विजः ॥१०६॥
करेणुश्चाऽभवत्कन्या मानुषी द्विजपत्निका ।
रत्नावली ययौ पितृगृहं वृत्तं जगौ तदा ॥१०७॥
तल्पस्था रक्षसा रात्रौ स्वपुरस्था हृताऽप्यहम् ।
जीवमानाऽक्षता प्राप्ता समाश्वसिहि मत्कृते ॥१०८॥
अविप्लुताऽस्मि च पितः ! राक्षस्या रक्षिताऽनया ।
ब्राह्मणः रक्षितश्चापि देह्यस्मै ब्राह्मणाय माम् ॥१०९॥
अनेनैकासना जाता स मे भर्ता भवेदतः ।
सुद्युम्नस्तां ददौ तस्मै विप्राय विधिना ततः ॥११०॥
कन्यां च राक्षसीं पत्नीद्वयमादाय वाडवः ।
महोदयपुरं प्रायात् करिणीवाहनः क्षणात् ॥१११॥
भर्ता पूर्वं परित्यक्तो यः स पत्नीद्वयान्वितः ।
सुसमृद्धः श्रुतश्चाथ तेन चाऽऽकारिताऽप्यहम् ॥११२॥
भर्तुर्गृहं पुनः प्राप्ता तेन मुख्यैव मानिता ।
सर्वं धनं तथा पत्नीद्वयं मह्यं समर्पितम् ॥११३॥

अहं वै स्वल्पसमये भाग्यहीना मृताऽभवम् ।
पत्युर्द्रोहाद् याम्यकुण्डाननुभूयाऽस्मि वै तरौ ॥११४॥
काष्ठीला चातिदुःखार्ता जाता यास्यामि पाशवीम् ।
योनिं च पक्षिजन्मानि पुनरेव सहस्रशः ॥११५॥
या भर्तुर्नाऽर्पयेद्वित्तं जीवितं च शुभानना ।
साऽपीदृशीमवस्थां वै यास्यत्येव न संशयः ॥११६॥
एवं ज्ञात्वाऽनिशं रक्षेत्पत्युर्वित्तं च जीवितम् ।
पतिर्माता पिता वित्तं जीवितं च गुरुर्गतिः ॥११७॥
पत्यौ प्रसन्ने पद्मेशः प्रसन्नो जायते ध्रुवम् ।
जीवितेनापि वित्तेन भर्तारं वञ्चयेत्तु या ॥११८॥
कृमियोनिशतं गत्वा पुल्कसी जायते तु सा ।
सुरतं याचमानाय पर्येवित्तं, मानिनी ॥११९॥
या न यच्छति दुष्टा सा काष्ठीला जायते ध्रुवम् ।
वित्तं देहं तथा पुत्रं यच्चान्यद्वा भवेद्धनम् ॥१२०॥
न्यक्कारं च भवेत् सर्वं स्त्रीणामेकं पतिं विना ।
तस्याऽर्थे वा त्यजेद् वित्तं जीवित च समन्ततः ॥१२१॥
धनं त्यजेत् त्यजेद् दासान् दारान् जीवं गृहं त्यजेत् ।
त्यजेद्देशं तथा भूपं स्वर्गं मित्रं गुरु त्यजेत् ॥१२२॥
त्यजेत्तीर्थं त्यजेद्धर्मं त्यजेदत्यन्तसुप्रियम् ।
त्यजेद् योगं त्यजेद् दानं ज्ञानं पुण्यक्रियां त्यजेत् ॥१२३॥
तपस्त्यजेत् त्यजेद् विद्यां सिद्धिं मोक्षं त्यजेत्तथा ।
न त्यजेत् स्वस्वामिसेवां तत्सर्वेभ्योऽधिकां सती ॥१२४॥
वेदैः शुश्रूषणं भर्तुः स्त्रीणां धर्मः प्रकीर्तितः ।
यद्ब्रवीति पतिः किञ्चित् तत्कार्यमविशंकया ॥१२५॥
शुक्लं शुक्लमिति ब्रूयात् शुक्लं वै पतिसेवनम् ।
तदग्रे सर्वमेवेति कृष्णं पतिव्रताकृते ॥१२६॥
काष्ठीलया स्वकं वृत्तं सर्वं मे कथितं ततः ।
मोक्षार्थं प्राह सा कष्टं प्राप्ता प्राणान्तगामिनी ॥१२७॥
देहि मे पुण्यमत्रैव करे धृत्वा जलं स्वसः ! ।
एकदिनस्य सेवायाः पत्युः पुण्यं च यद्भवेत् ॥१२८॥
तत्पुण्यं मे प्रदेह्यत्र येनाऽस्माद् वपुषो म्रिये ।
प्राप्स्ये जन्मान्तरं चाथ करिष्ये भर्तृसेवनम् ॥१२९॥
स्वर्गं गमिष्ये तत्पश्चान्मोक्षं यास्ये हि सेवया ।
इत्युक्ताऽहं ददौ तस्यै दिनैकं भर्तृसेवया ॥१३०॥
यल्लब्धं वै मया पुण्यं पूर्वं तेनैव सा मृता ।
सा च लब्ध्वा यथाकर्म जनुं काले च मानुषी ॥१३१॥
भूत्वा ययौ परं श्रेयः पतिसेवापरायणा ।
अहं राजन् भूमिगोधा मोक्तुमिच्छामि वर्ष्म यत् ॥१३२॥
देहि राजँस्तव पत्न्या सन्ध्यावल्या कृतं तु यत् ।
एकस्याऽह्नः पतिसेवाजन्यं पुण्यं सुखप्रदम् ॥१३३॥
पत्नीकृतेऽपि पुण्ये वै पत्युर्भोगोऽस्ति सर्वथा ।
त्वया दत्तं तव पत्न्या दत्तमेव भविष्यति ॥१३४॥
इत्युक्तः स च रुक्मांगदाख्यः पुण्यं ददौ तदा ।
गोधादेहं परित्यज्य ययौ शुभ्रां गतिं तदा ॥१३५॥
इति ते कथितं लक्ष्मि ! पतिसेवनकर्मणा ।
पुण्यमुद्धारकं नार्या प्राप्यते मोक्षणं तथा ॥१३६॥
पठनाच्छ्रवणाच्चास्य पतिसेवाफलं भवेत् ।
पतिद्रोहकृतं पापं नश्यत्येव न संशयः ॥१३७॥
उद्धरेत्पापिनीं नारीं पतिसेवैकवासरा ।
किं पुनराजीवनं तु कृता किं किं न दास्यति ॥१३८॥
पतिर्वेश्यापरो वापि व्यसनी वा विमार्गगः ।
पतिरेव पतिर्नार्या नान्यः प्रतिनिधिर्भवेत् ॥१३९॥
अन्यत्र स्यात्प्रतिनिधिः प्रतिनिधिर्न मैथुने ।
अन्यान्यंगानि पश्यन्ति मानवाश्चान्ययोषितः ॥१४०॥
योन्यंगं दर्शनाऽयोग्यं दृश्यं नान्यैः पतिं विना ।
प्रमत्तो वार्धको वाऽथ पाशवो राक्षसोऽथवा ॥१४१॥
दैत्योऽस्पृश्योऽथ चाण्डालो मलिनः पूयपूरितः ।
दुर्गन्धो विष्टया लिप्तो रुग्णः कृमिप्रपूरितः ॥१४२॥
यादृशस्तादृशो वापि योनिद्रष्टा स एव सः ।
नाऽन्यो देवोऽथवा सम्राड् योनियोग्यो हि धर्मतः ॥१४३॥
धर्मतो योनिरूपं स लीनमर्थं हि गच्छति ।
लीनो भूत्वा धातुरूपः पुत्रात्मा जायतेऽपि सः ॥१४४॥
पतिरूपेण पाताऽस्ति पुत्ररूपेण पास्यति ।
परलोके प्रपाता च पतिरेव मतो हि सः ॥१४५॥
तत्कृते वर्तितं यद्यत् सर्वं नार्याः प्रमोक्षकृत् ।
इति ज्ञात्वा सदा लक्ष्मि ! पातिव्रत्यं समाचरेत् ॥१४६॥
हरिर्यथाऽर्चितो भक्तैर्भक्तानुद्धरति स्वयम् ।
पतिस्तथाऽर्चितः पत्न्या पत्नीमुद्धरति स्वयम् ॥१४७॥
मलिना वा विचित्ता वा रुग्णा पूयप्रपूरिता ।
दुर्गन्धा वा कुरूपा वा वृक्णा जडा सजन्तुका ॥१४८॥
मद्यमांसरता वा दुर्वाणी दुष्टा मलान्विता ।
यादृशी तादृशी वा स्याद् राक्षसी वा पिशाचिका ॥२४९॥
भूती प्रेती च वेताली डाकिनी कालिकापि वा ।
पत्न्यां तस्यामेव पतिः रन्तुमिच्छति वै गृहे ॥१५०॥
अभयं रमणं यत्र स वै धर्मः सनातनः ।
सभयं रमणं यत्राऽधर्मः सम्परिकीर्तितः ॥१५१॥

अभयं रमणं रमयितारौ तारयेद् भयात् ।
पत्नीव्रतं ततः पातिव्रत्यमुद्धारकं सदा ॥१५२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये रुक्मांगदराज्ञे गृहगोधया स्वभर्तृवशीकारो, भालुकमाट्ठलीपिङ्गलीवृत्तान्तः, सुमन्तुसुताकौण्डिन्यपत्नीकाष्ठीलावृत्तान्तः, काशीराजपुत्रीवृत्तान्तः, भर्तृसेवैकदिनजपुण्यदानेन तासां मुक्तिः, पतिव्रतानां विशेषता पतिं प्रति चेत्यादि निरूपणनामाऽष्टसप्तत्यधिकत्रिशततमोऽध्यायः ॥ ३७८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि मेनोक्तान् पार्वतीं प्रति ।
पातिव्रत्यपरान् धर्मान् भुक्तिमुक्तिप्रदान् शुभान् ॥ १ ॥
कृत्वा विवाहं पार्वत्या मेना हिमगिरेः प्रिया ।
पुत्रीं संस्थापयामास धर्मानुक्त्वा परान् यथा ॥ २ ॥
गिरिजे ! शृणु सुप्रीत्या धर्मवृद्धिकरं वचः ।
इहाऽमुत्राऽऽनन्दकरं शृण्वतां च सुखप्रदम् ॥ ३ ॥
धन्या पतिव्रता नारी त्वादृशी शंकरप्रिया ।
पावनी सर्वकान्तानां सर्वपापप्रणाशिनी ॥ ४ ॥
या सती सेवते प्रेम्णा कृष्णनारायणं पतिम् ।
इह भुक्त्वाऽखिलान् भोगान् पत्यान्ते याति सद्गतिम् ॥ ५ ॥
पातिव्रत्येन धर्मेण पत्नी याति प्रपूज्यताम् ।
ब्रह्मविष्णुहरैर्मान्या मुनिमान्या भवत्यपि ॥ ६ ॥
त्वया पतिः सदा सेव्यः शंकरो लोकशंकरः ।
भुञ्जाद् भुक्ते प्रिये पत्यौ पातिव्रत्यपरायणा ॥ ७ ॥
तिष्ठेत् तस्मिन् सुखे नारी पत्यौ यदा तु तिष्ठति ।
स्वप्यात् स्वपिति पत्यौ सा बुद्ध्येत्तु प्रथमं सदा ॥ ८ ॥
सर्वदा तद्धितं कुर्यादकैतवगतिः प्रिया ।
अनलंकृतमात्मानं दर्शयेन्न क्वचित् सती ॥ ९ ॥
कार्यार्थे प्रोषिते तस्मिन् भवेन्मण्डनवर्जिता ।
पत्युर्नाम न गृह्णीयात् कदापीह पतिव्रता ॥१०॥
आक्रुष्टापि न चाक्रोशेत् प्रसीदेत्ताडिताऽपि च ।
आहूता गृहकार्याणि त्यक्त्वा गच्छेत्तदन्तिकम् ॥११॥
तदादिष्टा चरेत् कर्म मनसा कर्मणा प्रिया ।
चिरं तिष्ठेन्न वै द्वारे परगृहे न सञ्चरेत् ॥१२॥
गृहतत्त्वं परस्मै न कथयेच्चार्पयेत्तथा ।
पूजावस्तूनि सर्वाणि त्वनुक्तापि प्रसाधयेत् ॥१३॥
गच्छेन्न तीर्थयात्रादौ पत्युराज्ञां विना क्वचित् ।
तीर्थार्थिनी सती स्वस्याः पत्युः पादोदकं पिबेत् ॥१४॥
पत्युः पादोदके सर्वतीर्थक्षेत्राणि तत्कृते ।
भुंज्यात्पतिप्रसादं च मिष्टमन्नादिकं जलम् ॥१५॥
अविभज्य न वै भुंज्याद् देवातिथिपितृष्वपि ।
परिचारकवर्गेषु गोषु भिक्षुकुलेषु च ॥१६॥
संस्कृतोपस्करा हृष्टा चातिव्ययपराङ्मुखी ।
पत्याज्ञया व्रतकर्त्री भवेत्पतिपरायणा ॥१७॥
सुखासीनं रममाणं पतिं नोत्थापयेत् क्वचित् ।
दीनं क्लीबं व्याधितं च वृद्धं वापि न तर्जयेत् ॥१८॥
स्त्रीधर्मिणी त्रिरात्रं च स्वमुखं नैव दर्शयेत् ।
सुस्नाता भर्तृवदनमीक्षेताऽन्यस्य न क्वचित् ॥१९॥
पत्यौ चानुपस्थिते तं स्मृत्वा सूर्यं विलोकयेत् ।
हरिद्रां कुंकुमं बिन्दुं सिन्दूरं कज्जलादिकम् ॥२०॥
ताम्बूलं मंगलसूत्रं शृंगाराऽऽभूषणानि च ।
केशसाधनं कबरीं कंकणं कर्णभूषणम् ॥२१॥
नासिकाभूषणं सूत्रं सौभाग्यद्रव्यमित्यपि ।
भर्त्रायुष्येच्छुकी साध्वी दूरयेन्न कदाचन ॥२२॥
भर्तृविद्वेषिणीं संभाषयेन्नैव पतिव्रता ।
यत्र यत्र रुचिर्भर्तुस्तत्र प्रेमरतिर्भवेत् ॥२३॥
हृष्टे हृष्टा विषण्णास्या विषण्णास्ये प्रिये प्रिया ।
विपदि संपदि साध्वी भवेत् पत्येकरूपिणी ॥२४॥
सर्पिर्लवणतैलादिक्षये कष्टे न योजयेत् ।
विधेर्विष्णोर्हराद्वापि नारायणाच्च सर्वथा ॥२५॥
पतिरेकः परः सत्याः परब्रह्मस्वरूपकः ।
भर्तुराज्ञां विना चोपवासव्रतादि नाचरेत् ॥२६॥
उक्ता प्रत्युत्तरं क्रुद्धा दद्यात् सा सरमा भवेत् ।
शृगाली च भवेत् तिरस्कारिणी वानरी भवेत् ॥२७॥
उच्चासनं न सेवेत नाऽभिमानवती भवेत् ।
अपवादं कलहं च कलंकं न ददेत् प्रिये ॥२८॥
गुरूणां सन्निधौ नोच्चैर्वदेन्नापि हसेत् सती ।
बाह्यादायान्तमालोक्य भर्तारं त्वरिता सती ॥२९॥
जलान्नफलताम्बूलपादसंवाहनादिभिः ।
श्रमनोदनवाक्यैश्च प्रियैः संप्रीणयेत् पतिम् ॥३०॥
मितं ददाति जनको माता भ्राता सुतो मितम् ।
अमितस्य प्रदातारं पतिं सन्तोषयेत् सदा ॥३१॥
पतिर्देवः पतिर्धर्मस्तीर्थं भर्ता पतिर्गुरुः ।
परत्रेह च सुखदस्तं पतिं सेवयेत् सदा ॥३२॥

विना पतिं रहश्चारा तूलूकी जायते द्रुमे।
पत्युस्ताडनकर्त्री च व्याघ्री दंशा च जायते ॥३३॥
नरान्ये चक्षुषोर्दात्री वक्राक्षी मिञ्झरी भवेत्।
पतिं त्यक्त्वा तु मिष्टादी सूकरी वल्गुरी भवेत् ॥३४॥
तूंकृत्य स्वामिनं ब्रूते या सा मूकाऽल्पजिह्विका।
सपत्नीद्वेषयुक्ता स्याद् दुर्भगा गुप्तरोगिणी ॥३५॥
परयन्यं कामनायुक्तं मुखं दर्शयति स्वकम्।
काणा कुब्जा कुरूपा च कुमुखी च भवेत्तु सा ॥३६॥
अभर्तृका सुवर्णाऽपि नारी शवसमा मता।
माता धन्या पिता धन्यो धन्याः सम्बन्धिबान्धवाः ॥३७॥
धन्यो ग्रामः पतिर्देशो यत्रास्ते वै पतिव्रता।
पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ॥३८॥
पतिव्रताप्रपुण्यैस्ते दिवि देवा भवन्ति वै।
पतिव्रतापदन्यासा भूमिर्वैकुण्ठमुच्यते ॥३९॥
चन्द्रः सूर्योऽनलो वायुः पावित्र्याथ सतीपदम्।
स्पृशत्येव जलं तद्वत् तीर्थं भवति पावनम् ॥४०॥
भार्या गार्हस्थ्यमूलं चाऽऽनन्दमूलं प्रजाप्रदा।
पुण्यमूलं सर्वलोके जयदा गृहमेव सा ॥४१॥
गंगावत्पावनी साध्वी या सदा भर्तृतोषिणी।
पापनाशकरी देवी स्मरतां सद्गतिप्रदा ॥४२॥
सतीत्वं सति ! दुष्प्राप्यं निसर्गाच्छ्रीप्रसंभवम्।
साध्वीत्वं प्राप्य सद्धर्मं प्रमादात्तं न नाशयेत् ॥४३॥
पातिव्रत्यं सदा रक्षेत् प्राप्याऽपि विपदः सती।
सतीत्वं पुण्यतः प्राप्य नास्तिक्याद् या न मन्यते ॥४४॥
सा तु धर्मच्युता नारी कुलटात्वं प्रपद्यते।
स्वधर्मनिरता सत्यवादिनी च जितेन्द्रिया ॥४५॥
प्राप्नोति विपुलं स्वर्गं देवानामपि दुर्लभम्।
तस्मात् सर्वप्रयत्नेन साध्वी स्वधर्मतत्परा ॥४६॥
हेतुं सर्वपुमर्थस्य पातिव्रत्यं हि रक्षयेत्।
गवार्थे ब्राह्मणस्यार्थे स्वाम्यर्थे या हि वर्तते ॥४७॥
सा स्वमोक्षमवाप्नोति स्वामिसेवासमर्जितम्।
शृणु साध्वि ! मम पुत्रि ! पञ्चचूडोदितं तु यत् ॥४८॥
नारदः पञ्चचूडाख्यां पप्रच्छाऽप्सरसं पुरा।
स्त्रीणां स्वभावमिच्छामि त्वत्तः श्रोतुं वदाऽत्र मे ॥४९॥
पञ्चचूडा प्राह तत्र नारदं मुनिसत्तमम्।
स्त्रीस्वभावस्य कथनं निन्दायां परिवर्तते ॥५०॥
मुने ! शक्या कथं नारी नार्या तु निन्दितुं वद।
विदितास्ते स्त्रियो याश्च यादृश्यश्च स्वभावतः ॥५१॥
न मामर्हसि देवर्षे नियोक्तुं प्रश्नमीदृशम्।
तथापि त्वन्नियोगाद्वै कथयामि यथातथम् ॥५२॥
तत्र वाणीकृतो दोषस्त्वयि नारद ! गृह्यताम्।
ओमित्यंगीचकारर्षिस्ततः प्राहाऽप्सरोवरा ॥५३॥
कुलीना नाथवत्यश्च रूपवत्यश्च योषितः।
मर्यादासु न तिष्ठन्ति स्त्रीषु चाञ्चल्यदूषणम् ॥५४॥
चाञ्चल्येन स्वकं धर्मं पातिव्रत्यं गतिप्रदम्।
रक्षितुं न प्रयतन्ते ततो यान्त्यधमां गतिम् ॥५५॥
असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो !।
पापीयसो नरान् यद्वै लज्जां त्यक्त्वा भजामहे ॥५६॥
स्त्रियं च यः प्रार्थयते सन्निकर्षं च गच्छति।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥५७॥
अनर्थित्वान्मनुष्याणां भयात्पतिजनस्य च।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥५८॥
नाऽऽसां कश्चिदमान्योऽस्ति नाऽऽसां वयसि निश्चयः।
सुरूपं वा कुरूपं वा पुमांसमुपभुंजते ॥५९॥
न भयादथवाऽऽक्रोशान्नार्थहेतोः कथंचन।
न ज्ञातिकुलसम्बन्धात् स्त्रियस्तिष्ठन्ति भर्तृषु ॥६०॥
इत्याह स्त्रीस्वभावाँश्च पञ्चचूडाऽप्सरोवरा।
तान् स्वभावान् प्रसंमृद्य मनो नियम्य यत्नतः ॥६१॥
पतिं परं प्रभुं ज्ञात्वा चांचल्यं तत्र योजयेत्।
पतिमेव परंब्रह्म पतिमेव च भाजनम् ॥६२॥
सेवायाः परमं ज्ञात्वा तथा पुण्यस्य भाजनम्।
धर्मस्य भाजनं चैव तथा मोक्षस्य भाजनम् ॥६३॥
परलोकस्य सर्वस्य तथा स्वर्गस्य भाजनम्।
भाजनं सद्गुणानां च परमानन्दभाजनम् ॥६४॥
कुलककीर्तेर्भाजनं च मर्यादाभाजनं तथा।
चाञ्चल्यशान्तिपात्रं च धर्मपात्रं परं तथा ॥६५॥
कामनाशान्तिपात्रं च लज्जाया भाजनं तथा।
मनःशान्तेर्भाजनं चाऽनर्थाऽनुत्पादसाधनम् ॥६६॥
वंशोत्पत्तेर्बीजपात्रं स्वर्गमोक्षादिपात्रकम्।
पतिं हरिस्वरूपं वै भजेद्दिव्यं पतिव्रता ॥६७॥
अन्तकः शमनो मृत्युः पातालं वडवामुखम्।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥६८॥
तदेतानन्तकादिस्वभावान् निसर्गजान् गुणान्।
वर्तितव्यं विलीयैव सत्या पत्यौ हि सर्वथा ॥६९॥
पतिं ज्ञात्वा हरिं नित्यं पूजयेद् या पतिव्रता।
न तस्याः श्रीहरेः पूजा पत्यर्चातोऽतिरिच्यते ॥७०॥

इति ज्ञात्वा सदा पुत्रि! पतिं सेवय धर्मतः।
भुक्तिं मुक्तिं तथा स्वेष्टं प्राप्स्यसि पत्यनुग्रहात् ॥७१॥
इति लक्ष्मि! पातिव्रत्यधर्माश्चोक्ता हि मेनया।
पार्वत्यै च मया तुभ्यं प्रोक्तास्त्वत्र प्रसंगतः ॥७२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये मेनकोक्तान् पार्वतीं प्रति पतिव्रताधर्मान् पंचचूडोक्तान्नारदं प्रति स्त्रीस्वभावाँश्च प्रदर्श्य पातिव्रत्य-धर्मनिगमनमित्यादिनिरूपणनामैकोनाऽशीत्यधिक-त्रिशततमोऽध्यायः ॥ ३७९ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! मृगीं वन्यां पातिव्रत्यपरायणाम्।
पुष्करे साऽभवत्पत्नी ऋषेर्मृगस्य पाशवी ॥ १ ॥
यथा वै मानुषे देहे वर्तते तु पतिव्रता।
तथा सा मृगदेहेऽपि पातिव्रत्ये ह्यवर्तत ॥ २ ॥
मृगी मृगं कामधर्मा समाश्लिष्यत्तु यद्दिनात्।
तत एव दिनात् कान्तं मृगमेकं पतिं शुभम् ॥ ३ ॥
स्वीकृत्यैव तमाश्रित्य प्रावर्तत पतिव्रता।
नान्यं मृगं सा स्मरति नान्यं पश्यति भावतः ॥ ४ ॥
नान्यं स्पृशति नान्येन रमते सा कदाचन।
मृगयूथे पुनर्जाता मृगी सा तु रजस्वला ॥ ५ ॥
तदा बलिष्ठाः सारंगाः पतन्त्यनु च तां मृगीम्।
किन्तु सा स्वपतिं हित्वा नान्ययोगं समिच्छति ॥ ६ ॥
तदाऽन्यैः क्रोधमापन्नैर्मृगैर्यूथाद् बहिष्कृता।
सा तु पतिं मृगं नीत्वा मृगयूथं विहाय च ॥ ७ ॥
धर्मरक्षार्थमेवाऽऽयान्निर्मृगं काननान्तरम्।
मध्यमे पुष्करे तीर्थे शाद्वले निर्भये स्थले ॥ ८ ॥
तत्र सा सेवते नित्यं पतिं समनुवृत्तिभिः।
शृंगाग्रैः स्वामिनः कण्डूर्नाशयत्येव भावतः ॥ ९ ॥
लेलिहाना जिह्वया स्वकान्तं स्नेहमयी तथा।
स्पृशमाना मुखाग्रैश्च रञ्जयत्येव तं मृगम् ॥१०॥
घट्टेषु द्रुस्तबकेषु घासान्वितस्थलीषु च।
यत्र शैत्यं न वा वृष्टिर्न वा तापो भवेद् रवेः ॥११॥
तत्र छायामूलमध्ये स्तम्बान्तःस्थलमाप्य च।
रात्रिं कान्तेन वै साकं विनिर्गमय्य सा मृगी ॥१२॥
कान्तस्य जाग्रतः पूर्वं निद्रां त्यक्त्वा तु वै शनैः।
कान्ताननं विलोक्यैव प्रलेढि जिह्वया सती ॥१३॥
मृगस्तु जाग्रतिं प्राप्य कान्तां दृष्ट्वा पतिव्रताम्।
शृंगेण जिह्वया कान्ताकण्डूयनमथैति हि ॥१४॥
एवं परस्परं पत्नीव्रतस्वामिव्रतान्वितौ।
शय्यां स्थलीं प्रविहाय समायातो बहिःस्थलीम् ॥१५॥
यावत्कान्तो न गृह्णाति तृणं वा कोमलं दलम्।
तावन्मृगी न चाऽऽदत्ते पत्रं तृणं च वाऽङ्कुरम् ॥१६॥
प्रातः कान्तेन चेद्दत्तं पत्रं तदा मृगी ह्यपि।
पत्रमेव समादत्ते नान्यत् तृणं च वाऽङ्कुरम् ॥१७॥
यदि कान्तः समादत्ते तृणं तदनु सा मृगी।
भक्षयत्ति तृणमेव तत्र पतिप्रसादजम् ॥१८॥
पत्यभक्ष्यं न चाऽऽदत्ते सरसं श्रेष्ठमित्यपि।
भक्ष्यमाणे तृणादौ च यदि प्राप्नोति नूतनम् ॥१९॥
मिष्टं श्रेष्ठं मृदु भक्ष्यं पत्रं पुष्पं फलं तृणम्।
अंकुरं कन्दमूलं वा सस्यं शाखादिकं यदि ॥२०॥
तदा कान्तं समाहूय स्वामिने तद् ददाति सा।
जलपानेऽपि पूर्वं वै मृगः पिबति वै जलम् ॥२१॥
तदन्वेव मृगी पानं जलस्याचरतीति वै।
प्रयाते यात्यनु नित्यं स्थिते भवति सा स्थिता ॥२२॥
पलायमाने तु तदनु सा करोति पलायनम्।
तर्जिता ताडिता वापि न सा गणयति व्यथाम् ॥२३॥
मृगश्चेत्! सूर्यकिरणे तापे तिष्ठति वै मुदा।
यावत् तावच्च सा धर्मं मत्वा तापे प्रतिष्ठति ॥२४॥
एवं छायां गते पत्यौ ततश्छायां प्रतीच्छति।
सदा कान्तस्य सेवायां कल्याणं मन्यते सती ॥२५॥
एवं वै वर्तमानायां वने तत्राऽप्यवग्रहः।
समभूत् तेन सस्यानि नाऽप्ररोहन् जलं विना ॥२६॥
स्थली शुष्काऽभवच्चापि तत्र खाद्यं क्षयं गतम्।
मृग्यमाणं क्वचिच्छुष्कं शलाकाकाण्डपत्रकम् ॥ २७॥
लभ्यते च क्वचिन्नैव प्राप्यते तु तदा निशा।
क्षुधिताभ्यां याप्यते च स्वधर्मिभ्यां वने वने ॥२८॥
अथ प्राग् यत्परित्यक्तं मृगव्रातं क्षुधान्वितम्।
भ्रमद्वनं समायातं यत्रास्ते सा पतिव्रता ॥२९॥
दुःखं क्षुधितं चालोक्य कुटुम्बियूथमेव सा।
हृष्टा स्मृत्वा पतिं तत्र कृत्वा वृद्धान्नतिं मुहुः ॥३०॥
प्रोवाच तेषां भोज्यार्थं यत्रास्म्यहं पतिव्रता।
तदैतेषामतिथीनां सत्कारार्थं वनं मम ॥३१॥
वृष्टिं विनापि सदलं नूतनांकुरशोभितम्।
शाद्वलं सफलं सस्योत्तमश्रीललितं तथा ॥३२॥

सतृणं सजलं चापि भवत्वत्र मुहूर्तकम् ।
इत्येवं कथिते तद्वै वनं हरितमेव च ॥३३॥
सम्पन्नं भक्ष्यपौष्कल्यप्रपूर्णं ह्लादकारकम् ।
सर्वे कुटुम्बिनो जग्ध्वा जलं पीत्वा ययुस्तदा ॥३४॥
पतिव्रताया माहात्म्यं गायन्तः स्मृद्धिकारकम् ।
तैस्तु सर्वत्र वार्ता सा कथिताऽऽश्चर्यकारिणी ॥३५॥
मृगा वनान्तरेभ्यश्च समायाताः क्षुधातुराः ।
इयं पतिव्रता नित्यं पतिं नत्वा पुनः पुनः ॥३६॥
अतिथीनां भोजनार्थं नित्यं संकल्पमाचरत् ।
नित्यं मुहूर्तमात्रं च शुष्कं भवति चार्द्रकम् ॥३७॥
हरितं शाद्वलं भक्ष्यं भक्षयन्ति मृगास्ततः ।
तृप्त्वा गच्छन्ति भूभागान् पुनः शुष्कायते वनम् ॥३८॥
अथैकदाऽभवत्तत्र वने दावानलोद्भवः ।
प्रालेयवह्निसदृशः पशुपक्षिक्षयंकरः ॥३९॥
तदा सर्वैः स्मृता सा च मृगी वह्निप्रशान्तये ।
मृगी पतिक्षुरं स्पृष्ट्वा नत्वा प्रोवाच वै पतिम् ॥४०॥
यदि नाथ कृता सेवा तव भक्त्या सदा मया ।
तेन पुण्येन दावोऽयं शान्तिमेतु क्षयावहः ॥४१॥
इति संकल्पिते तत्र वह्निः कृष्णमृगोऽभवत् ।
समायातो यत्र साऽस्ति मृगी स्वामिव्रता सती ॥४२॥
ननाम तां सतीं प्राह देवि ! शान्तोऽस्मि ते भयात् ।
नातः प्रज्वालयेऽरण्यं विहरन्तु मृगाः सुखम् ॥४३॥
बिभेम्यहं सतीशापात् क्षमस्व मां पतिव्रते ! ।
इत्युक्त्वा च सतीं नत्वा ययौ शान्तिं दवानलः ॥४४॥
अथ सिंहास्तथा व्याघ्रा भल्लुका हिंस्रकास्तु ये ।
तेऽपि यातान्पशूँस्तत्र ज्ञात्वाऽऽययुस्तु तद्वने ॥४५॥
हिंस्राः पशून् विहिंसन्ति दुःखाऽऽक्रोशोऽभवद् वने ।
पशवोऽपि तु संभूय त्रस्तास्तत्र समाययुः ॥४६॥
पतिव्रता मृगी यत्र पुष्करे वर्तते भुवि ।
तदा तेषां महद्दुःखविनाशायाऽर्थयच्छिवम् ॥४७॥
मृगीश्वरो महादेवस्तत्र साक्षात् समागमत् ।
प्राह सा तं हरं नाथ ! रक्षां कुरु वने सदा ॥४८॥
हिंस्राः खादन्ति ते भक्तानस्मानवितुमर्हसि ।
महादेवस्तदा रूपं धृत्वा शरभमुत्कटम् ॥४९॥
वने चचार हिंस्राणां विद्रावणाय सर्वतः ।
प्रहिंस्राः पशवः क्रूरा दूरं यान्ति स्म तद्वनात् ॥५०॥
अथैनं शरभं देवं दृष्टवान् पर्शुरामकः ।
जामदग्न्यस्तपः कर्तुं यश्च तिष्ठति पुष्करे ॥५१॥

धनुरादाय बाणेन यावद्धन्तुं प्रवर्तते ।
तावद्देव गिरा प्राह शंकरः शरभः स्वयम् ॥५२॥
रे रे राम ! महाभाग ! भक्तरक्षाकरोऽस्म्यहम् ।
पतिव्रताया मृग्या वै संकल्पेन समागतः ॥५३॥
शंकरस्तवरूपोऽहं मा यत्नं त्वं वृथा कुरु ।
इत्युक्त्वा तु हरस्तस्मायदर्शयद्वरं तनुम् ॥५४॥
देवौ रामहरौ षष्वजाते परि परस्परम् ।
शंभु प्रदर्श्य सुखदां स्वर्णदीं तापसस्थलीम् ॥५५॥
तिरोऽभवत् ततो रामो ययौ तत्र फलाप्तये ।
स्तोत्रं चकार कृष्णस्य तेन तुष्टोऽभवद्धरिः ॥५६॥
जगाम दर्शनं तस्य जामदग्न्यस्य केशवः ।
ददावस्त्राणि शस्त्राणि क्षत्रवर्गलयाय वै ॥५७॥
तिरोभवच्च स कृष्णो रामोऽपि प्रति पुष्करम् ।
स्नानाद्यर्थे समागच्छद् दृष्टवान् स मृगीं सतीम् ॥५८॥
यत्प्रभावेन हरितं वनं तज्जायते मुहुः ।
यत्प्रतापेन शान्तोऽभूत् तत्र दावानलो वने ॥५९॥
यत्प्रभावाच्च शरभं रूपं वै धृतवान् हरः ।
तां तु दृष्ट्वा सतीं दिव्यां मृगीमाश्चर्यमाप्तवान् ॥६०॥
मृगी रामं कृष्णनारायणांशं दिव्यसद्धिया ।
ज्ञात्वा ननाम तुष्टावाऽतिथिसत्कारमाचरत् ॥६१॥
मृगोऽपि तं पर्शुरामं ननाम प्रणयान्वितः ।
तावत्तत्र समायातो व्याधो वै मृगयारतः ॥६२॥
पिपासितो घर्मतप्तो जलपानसमुत्सुकः ।
रामस्य पश्यतस्तत्र सरसस्तटमागतः ॥६३॥
मृगीमृगौ तु पिबतस्तत्र वारि भयान्वितौ ।
व्याधो मृगीमृगौ दृष्ट्वा मृगयार्थं धनुर्दधौ ॥६४॥
किन्तु दृष्ट्वा पर्शुरामं तस्थावक्षिप्तसायकः ।
शंकितश्चिन्तयामास तदा भीतस्तु रामतः ॥६५॥
पीत्वा मृगीमृगौ वारि वृक्षछायासमाश्रितौ ।
दृष्ट्वा रामं मृग्युवाच कान्तं निर्भयमानसा ॥६६॥
कान्त ! चात्रैव तिष्ठावो यावद्रामोऽत्र संस्थितः ।
अस्य वीरस्य सान्निध्ये व्याधो नौ प्रहरिष्यति ॥६७॥
तदा दृष्टः स मुनिना भस्मीभूतो भविष्यति ।
मृगश्चाह तथास्त्वेनं रामं जानामि भार्गवम् ॥६८॥
शिवस्य नारदस्यापि शुकस्यापि च मारुतेः ।
अम्बरीषस्य च बलेर्विभीषणस्य चोत्तमा ॥६९॥
प्रह्लादस्य रन्तिदेवस्योद्धवस्यापि चोत्तमा ।
गोपीनां च प्रभायाश्च पार्वत्याश्च यथोत्तमा ॥७०॥

माणिक्यायाश्च लक्ष्म्याश्च भक्तिः कृष्णे यथाऽस्ति वै।
तथा भक्तिं प्रकुर्वन् वै रामोऽयं तपसि स्थितः ॥७१॥
जातिज्ञानं त्वद्य जातं रामस्याऽस्य तु दर्शनात्।
शृणु प्रिये! प्रवक्ष्यामि यथाऽऽवां मृगतां गतौ ॥७२॥
पुरा द्रविडदेशे वै ब्राह्मणानां कुले शुभे।
जातः कौशिकगोत्रो मे सत्रायणाऽभिधः पिता ॥७३॥
वेदसूरिस्तस्य पुत्रश्चाऽहमासं सुभक्तिमान्।
गुरुशुश्रूषणे रक्तो वेदाध्ययनतत्परः ॥७४॥
एकदा कृतमालायां स्नात्वा ह्युषसि पर्वतम्।
समारूढस्तत्र चैका मृगी त्वागात् पिपासिता ॥७५॥
वारिपानपरां तां च वीक्ष्याऽहं कृपया द्रुतम्।
तस्याः समीपमगमं सापि विश्वासशालिनी ॥७६॥
मम वै पादयोस्तत्रागत्य नम्रा बभूव वै।
तावत्तत्र समायातः शार्दूलोऽतिभयंकरः ॥७७॥
मृगी पलायिता त्रस्ता शार्दूलो जगृहे च ताम्।
अहं शार्दूलनाशार्थं कृतवान् बहुयत्नकम् ॥७८॥
मृग्याः प्राणाऽवनार्थं च सा तथापि क्षता तदा।
कन्यारूपं चोनपञ्चदशवर्षं विधाय वै ॥७९॥
मत्समीपं समागत्य पतिता पादयोस्तु मे।
अहमाश्चर्यमापन्नः पृष्ठवाँस्तां कुमारिकाम् ॥८०॥
देवि! देवीसमा का त्वं मृगीरूपा हि कन्यका।
कस्य पुत्री कथं चाद्रौ त्वैकाकिनी समागता ॥८१॥
कन्या प्राह तदा मां सा पुत्र्यहं परमेष्ठिनः।
देवीनां ब्रह्मसरसां मध्ये नाम्ना हरिण्यहम् ॥८२॥
वरयोग्याऽभवं चाहं ब्रह्मणा प्रेषिताऽत्र वै।
सात्रायणिं वेदसूरिमुद्वहितुं समागता ॥८३॥
मृगीरूपेण चायाता मां यथाऽन्यो न धर्षयेत्।
सारंगी चाऽक्षता चाऽप्यरजस्वलाऽस्मि कन्यका ॥८४॥
ऋतुयोग्याऽस्मि सञ्जाता समुद्वहतु मां भवान्।
इत्युक्ता सा मया तत्र गान्धर्वेण विवाहिता ॥८५॥
अग्निं प्रज्वाल्य तत्रैव हुत्वा फलादिकं वने।
कृत्वा प्रदक्षिणं पुष्पमालां धृत्वा च दम्पती ॥८६॥
गार्हधर्मं समापन्नौ कामरूपौ हि योगिनौ।
कदाचिदृषिसद्रूपौ कदाचिन्मृगरूपिणौ ॥८७॥
कदाचिद् देवरूपौ च कदाचिद्वै पतत्रिणौ।
कदाचिज्जलमत्स्यौ च हंसौ च गरुडौ तथा ॥८८॥
भूत्वा भूत्वा यथेष्टं स्म वने वर्तावहे गिरेः।
पातिव्रत्यपरा त्वं च तथा पत्नीव्रतोऽप्यहम् ॥८९॥
गाढानुरागावन्योन्यमास्तां धर्मपरायणौ।
जातिस्मरौ त्रिकालज्ञौ धर्मकर्मपरौ सदा ॥९०॥
गिरौ चासन् मृगा मृग्यश्चान्ये शतसहस्रशः।
ते यथा न विजानीयुरावां मृगात्मकौ तथा ॥९१॥
भूत्वा तेषु मिलित्वैव विहरावः स्म नित्यदा।
एकदा स्तम्बपर्णानां निचये वृष्टिकारणात् ॥९२॥
वृक्षस्तम्बाश्रयं कृत्वा तिष्ठावो निर्भयं स्थलम्।
वियुज्य तन्मृगव्रातात् कामधर्मसुखेच्छया ॥९३॥
निशा तु क्षपिता प्रातर्वृष्टिर्नैव निवर्तते।
तावत्तत्र च क्षुधितः सिंहः कश्चित्समागतः ॥९४॥
ह्यकस्माद् विधृतौ तेन क्षतौ जातौ मृगौ तदा।
पातव्रत्येन धर्मेण हरिण्या रक्षितावपि ॥९५॥
कालधर्मं हि सम्प्राप्तौ मृगरूपौ मृगस्मृती।
अन्ते या च स्मृतिर्यस्य गतिस्तस्य तथा भवेत् ॥९६॥
इति भावनया तत्र व्याघ्रव्यापादनोत्तरम्।
सा मृता त्वं मृगी जाता मृगश्चाऽहं त्वया सह ॥९७॥
पत्नीव्रतस्तथा त्वं च मे प्रियाऽसि पतिव्रता।
आवाभ्यां भार्गवो रामो दुष्टः साक्षाद्धरिः स्वयम् ॥९८॥
गमिष्यामः शुभान् लोकान् येषु गत्वा न शोचति।
ययतुस्ताविति प्रोच्य रामस्य शरणं शुभौ ॥९९॥
प्रोचतुः परशुरामं सहस्रवर्षजीवितौ।
राम राम हरे कृष्णनारायण जगद्गुरो! ॥१००॥
जातिस्मरौ मृगीमृगौ स्वस्वधर्मपरायणौ।
शरणं ते च मुक्त्यर्थं प्राप्तौ मोचय बन्धनात् ॥१०१॥
एवमुक्त्वा पर्शुरामं तुष्टुवतुर्मृगीमृगौ।
यावत्तच्चरणौ स्पृष्टौ तावत्स्वर्यानमागतम् ॥१०२॥
चतुर्भिरद्भुतैः सिद्धैः कामरूपैर्मनोजवैः।
अनुयातमथोत्प्लुत्य स्त्रीपुंसौ हरिणौ तदा ॥१०३॥
रामस्य चरणौ नत्वा समारुरुहतुर्मुदा।
दिव्यदेहधरौ भूत्वा शंखचक्रादिचिह्नितौ ॥१०४॥
गतौ च वैष्णवं लोकं सर्वदेवनमस्कृतम्।
शृण्वतां पठतां चैतल्लक्ष्मि! मोक्षगतिर्भवेत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये ब्रह्मणः पुत्र्या हरिण्या वेदसूरिणा सह विवाहः, मृगीमृगदेहे पातिव्रत्यपत्नीव्रततापालनम्, वृष्टिं विनापि वनस्य हरितीकरणम्, दावानलप्रशमनम्, हिंस्रप्राणिनाशाय शिवस्य शरभरूपेणागमनम्, पर्शुरामदर्शनम्, पुष्करे प्राग्वृत्तान्तकथनम्, हरिणयोर्मुक्तिश्चेत्यादिनिरूपणनामाऽशीत्यधिकत्रिशततमोऽध्यायः ॥३८०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां चान्यां पातिव्रत्यपरायणाम् ।
रेणुका जमदग्नेर्या पत्नी चाऽभूत्पतिव्रता ॥ १ ॥
या मृतं पतिमादाय संविवेश चिताऽनले ।
यत्पुत्रः परशुरामो ह्यासीद्वने तपःस्थितः ॥ २ ॥
नर्मदायास्तटे माहिष्मत्या नातिप्रदूरके ।
वने श्रेष्ठाश्रमो ह्यासीज्जमदग्नेर्द्रुमाकुलः ॥ ३ ॥
जमदग्निः कामधेनुः पर्शुरामश्च रेणुका ।
एते मुख्यास्तथा चान्ये ह्यासन् शिष्याः सुताः परे ॥ ४ ॥
सहस्रशः पतिं संसेवते भक्त्या तु रेणुका ।
पातिव्रत्येन धर्मेण देवतावन्दिता सती ॥ ५ ॥
शृणु विस्तरतस्तस्याः कथां लक्ष्मि ! प्रमुक्तिदाम् ।
रेणुका पुत्रलब्ध्यर्थे तपश्चचार दारुणम् ॥ ६ ॥
शीतकाले पतिसेवां करोत्यहर्निशं सती ।
आर्द्रवस्त्रेण च कृष्णपूजां करोति वै प्रगे ॥ ७ ॥
एकभुक्ताऽभवच्चैव सूर्यपूजां करोति च ।
वह्निपूजामतिथीनां गवां पूजां करोति च ॥ ८ ॥
वर्षमात्रं फलाहारा वर्षे पत्रादनाऽभवत् ।
वर्षे जलादना वर्षे वाय्वाहाराऽभवत् सती ॥ ९ ॥
वर्षे बाष्पादना वर्षे निराहाराऽभवत् सती ।
कृष्णनारायणनाम्ना जपति स्म निरन्तरम् ॥१०॥
पत्युः सेवां द्वितीयेन रूपेण च करोति वै ।
एवं तस्मै प्रसन्नोऽभूत् कृष्णनारायणः प्रभुः ॥११॥
साक्षाज्जगाम तस्यास्त्वन्तिकं प्राह वरं वृणु ।
सती प्राह भवान् मेऽत्र गृहे पुत्रोऽस्तु रक्षकः ॥१२॥
तथास्त्विति प्राह कृष्णनारायणस्तिरोदधे ।
ततः कालेऽभवद् रामः काष्ठार्तं परशुं दधन् ॥१३॥
परशुरामनामाऽसौ ख्यातोऽभवद् वनेषु सः ।
एकदा पितरौ नत्वा पितामहगृहं गतः ॥१४॥
ऋचीकं तं पितामहं नत्वाऽऽससाद चासने ।
उवास कतिचिन्मासान् तच्छुश्रूषापरायणः ॥१५॥
ततो ययौ भृगुं ख्यातिं ननाम विनयान्वितः ।
भृगुः प्राह हितं कर्तुं लोकानां राममच्युतम् ॥१६॥
गच्छ पुत्र ममाऽऽदेशाद्धिमवन्तं तपःकृते ।
शंकरः सर्वथा तुष्टस्तव श्रेयः करिष्यति ॥१७॥
नत्वा तौ च ततो रामो जगाम हिमपर्वतम् ।
सरस्तीरे पर्णकुटीं कृत्वा तपश्चचार ह ॥१८॥
बहुवर्षे गते काले मृगव्याधवपुः शिवः ।
तपस्तुष्टो जगामास्याऽन्तिकं प्राह तु तापसम् ॥१९॥
स्नाहि सर्वत्र तीर्थेषु तपो घोरं समाचर ।
तेन पुण्येन ते राम ! सर्वाण्यस्त्राण्यवाप्स्यसि ॥२०॥
इत्युक्त्वाऽन्तर्दधे शंभू रामस्तीर्थानि संययौ ।
कैलासं च ययौ तस्मै शैवमस्त्रं ददौ हरः ॥२१॥
दत्वा च परशुं प्राह सुरशत्रून् सदा जहि ।
रामो दैत्यान् बहून् दत्वा समापेदे स्वकाश्रमम् ॥२२॥
शंभुस्तत्र समागत्य ददावस्त्राण्यशेषतः ।
सप्रयोगं ससंहारमस्त्रग्रामं चतुर्विधम् ॥२३॥
असंवेगं शुभ्राश्वं सुध्वजं च रथोत्तमम् ।
इषुधी चाऽक्षयबाणौ ददौ रामाय शंकरः ॥२४॥
अभेद्यमजरं दिव्यं दृढज्यं विजयं धनुः ।
सर्वशस्त्रसहं चित्रं कवचं च महाधनम् ॥२५॥
तपःप्रभावं चोग्रं च प्रददौ भार्गवाय सः ।
अथाऽरण्ये व्याघ्रव्यापादितं द्विजसुतं तदा ॥२६॥
जीवयामास रामोऽथं चाऽकृतप्रणनामकम् ।
शिष्यं कृत्वा तु शान्तर्षिसुतं रामो ययौ गृहम् ॥२७॥
जमदग्निं रेणुकां च ननाम दण्डवद्भुवि ।
अथ कालान्तरे तत्राऽऽययौ हैहयभूपतिः ॥२८॥
चतुरंगबलैर्युक्तो नर्मदातीरमाश्रमम् ।
दृष्ट्वोपेत्य जमदग्निं ननाम शिरसा नृपः ॥२९॥
जमदग्निस्तदातिथ्यं कामधेन्वा ह्यकारयत् ।
नगरं वाटिकाश्चोद्यानानि सौधानि सेविकाः ॥३०॥
दासा गा उपसामग्रीर्भोज्यपेयानि निर्ममे ।
रेणुकाऽपि कामधेनुं दोग्ध्रीमुवाच वै पुनः ॥३१॥
अयं राजा कार्तवीर्यो ममाऽतिथिस्तवाऽतिथिः ।
तस्मात् सर्वं तवैश्वर्यं प्रकटीकुरु मे स्वसः ! ॥३२॥
इत्युक्ता कामगौः प्राह कुरु संकल्पमीश्वरि ! ।
पातिव्रत्यबलात्तेऽहं वैराजसमृद्धीरानये ॥३३॥
अथ द्वयोः प्रभावात्तद्वने सुवर्णपत्तनम् ।
सुरराजगृहतुल्यं तदासीद् भृगुवंशिनः ॥३४॥
दिव्यविभूतिभिर्दैश्चाऽचिन्त्यरूपं तदाऽभवत् ।
हेमरत्नोज्ज्वलमार्गं समुद्यानचतुष्कवत् ॥३५॥
राजमार्गादिकल्लोलवालुकास्तबकान्वितम् ।
पूर्णचन्द्राभशिखरैः प्रासादैः परिशोभितम् ॥३६॥
स्वर्णरौप्यरीतिताम्ररसैः सौधैर्विराजितम् ।
रत्नोपलाभिः स्फटिकमिश्ररत्नालिराजितैः ॥३७॥

महामणिप्रदीपानां प्रकाशैरक्षतैर्युतम् ।
रत्नोज्ज्वलसुवर्णाढ्यवेदीसोपानसद्गृहैः ॥३८॥
रत्नमालाढ्यकुड्यादिकपाटार्गलगोपुरैः ।
स्वर्णास्तरणसंसक्तदेहल्यजिरशालिभिः ॥३९॥
रात्रिगृहान्वितं चतुष्किकातोरणशोभितम् ।
दिव्यस्तम्भैः कुड्यचित्रैः स्वर्णसिंहासनादिभिः ॥४०॥
पीठकैर्भक्ष्यभोज्यैश्च भाण्डैः पानैरनन्तकैः ।
देवोचितान्नसम्पद्भिर्वधूभिश्च मनोहरम् ॥४१॥
सुवर्णरत्नदुर्गैश्च कोष्ठकैः सातभौमकैः ।
परिखाभिश्च दिव्याभिर्जलनालीविराजितम् ॥४२॥
विद्युद्दीपैर्दूरयन्त्रैर्दूरदृश्यप्रदर्पणैः ।
दूरश्रावणकोशैश्च यानैर्वैहायसैर्युतम् ॥४३॥
दीर्घिकाभिर्वापिकाभिः स्नानतडागशोभितम् ।
प्रदर्शनैर्विविधैश्च नाटकैः श्रमनोदनैः ॥४४॥
मल्लैर्बहुसमायासैः रंजनैर्नर्तकैर्युतम् ।
गायकैर्वाद्यशालाभिः राजसंसद्भिराजितम् ॥४५॥
शस्त्रागारैश्चोपकरणैर्भुक्तिशालाभिरन्वितम् ।
स्नानसेवनशालाभिर्विमानैः कामगैर्युतम् ॥४६॥
हंसैश्च गरुडैश्चापि मेनाम्चातकसच्छुकैः ।
मयूरैर्देववाण्या वै वदद्भिश्चान्वितं शुभम् ॥४७॥
वृक्षवल्लीफलपुष्पदिव्यगन्धसुगन्धितम् ।
कृतं वै नगरं तत्र 'दुग्धेक्षुरसराजितम् ॥४८॥
अमृतं च कृतं तत्र प्रतिगृहं ह्रदेषु च ।
जलान्तर्यानसंपूर्णं वह्वयन्तर्यानभूषितम् ॥४९॥
रेणुका गौर्निर्ममाते योग्ययोषित्कुमारिकाः ।
विचित्रवेषाभरणपुष्पगन्धाम्बरादिभिः ॥५०॥
शृंगारशोभाश्रीकान्तिहावभावादिचेष्टितैः । ।
चाञ्चल्यौज्ज्वल्यनैर्मल्येषद्धास्याकर्षणादिभिः ॥५१॥
सौन्दर्यादिगुणैर्युक्ता मन्दहास्याऽऽस्यशोभनाः ।
कुन्दकलिकासदृशदन्तपंक्तिविराजिताः ॥५२॥
प्रत्यग्रयौवनभरा वल्गुमिष्टगिरः शुभाः ।
प्रेममन्थरनेत्राक्तकटाक्षेक्षणमण्डिताः ॥५३॥
प्रीतिप्रसन्नहृदयाः शृंगाररतिसत्प्रभाः ।
कल्पवृक्षकुसुमानां हृत्सु हारालिराजिताः ॥५४॥
देवांगनाऽधिकाऽत्यन्तसौभाग्यदिव्यतान्विताः ।
सौकुमार्याऽऽभिरूप्याढ्यमधुराकृतिराजिताः ॥५५॥
पीनवक्षोरुहद्वन्द्वभरानतसुमध्यमाः ।
श्रोणीभरानताश्चापि रक्तांघ्रिकरसत्तलाः ॥५६॥

हारकेयूरकंकणकण्ठसूत्रादिराजिताः ।
कर्णकपोलभालादिविभूषाभिर्विराजिताः ॥५७॥
प्रकोष्ठांगुलिकाभूषाकटिभूषाभिराजिताः ।
पुष्पभूषात्यभिरामालकपाशसुशोभिताः ॥५८॥
कांचीकलापकिंकिणीपरिशिञ्जितनूपुराः ।
नर्मसान्त्वनहास्यार्घ्यकेलीगीतिविशारदाः ॥५९॥
सुस्वराः सुमधुभाषा मिष्टगंभीरभाषणाः ।
रतिप्रगल्भा भावाढ्याः कामयोगविशारदाः ॥६०॥
पद्मपत्रनिभनेत्राः सम्पदौदार्यसंभृताः ।
गृहकार्यनिपुणाश्च तादृश्यः परिचारिकाः ॥६१॥
गृहचरान् भृत्यदासान् शतशोऽथ सहस्रशः ।
पाचकान् मर्दकान् पादसंवाहकाँश्च यापकान् ॥६२॥
देवालयान् रथाश्वाँश्च मातंगाँश्च खरोष्ट्रकान् ।
गोऽजाऽविकानुयुक्तान्निर्ममाते पशून् बहून् ॥६३॥
सामन्ताँश्च नरेन्द्राँश्च राजन्याँश्च निषादिनः ।
सादिनश्च पदातींश्च सेनापतींश्च नायकान् ॥६४॥
विप्रादिकाँश्च रथिनः सारथीन् सूतबन्दिनः ।
मागधाँश्चारणाँश्चापि नर्तकाँश्च नटाँस्तथा ॥६५॥
किन्नरान् बहुरूपाँश्च गणिकाँश्च नपुंसकान् ।
चक्राह्वहंसकुररीबकसारसचातकान् ॥६६॥
कल्हारकंजकुमुदोत्पलकुन्दकदम्बकान् ।
चूतप्रियालपनसान् मधूककदलीतरून् ॥६७॥
नागकेतकीपुन्नागमन्दारकुन्दचम्पकान् ।
करवीरान् यूथिकाश्च फलपुष्पाणि सर्वशः ॥६८॥
सर्वर्तुसौरभान् वायून् मन्दं मन्दं प्रसारिणः ।
निर्ममाते रेणुकायुक्कामधेनुर्नियोजिता ॥६९॥
राजा त्वातिथ्यसत्कारं देवादीनां हि दुर्लभम् ।
जग्राह प्राविशत्पुण्यं पत्तनं स्वकृते कृतम् ॥७०॥
सर्वोपभोगनिलयं कौशेयाऽम्बरकोटिभिः ।
चित्ररंगौर्णवस्त्रैश्च शोभितं चोज्ज्वलं पुरम् ॥७१॥
अन्तःप्रविश्य पुर्यर्द्धिं स्वर्गिलोकविमोहिनीम् ।
सबलो विस्मयं प्राप हेतुं विवेद गां ततः ॥७२॥
प्रवेशितं च राजानं नार्यश्चन्दनवारिभिः ।
प्रसूनलाजाप्रकरैश्चावीवृषन् गवाक्षगाः ॥७३॥
ब्राह्मीं तपःश्रियं दृष्ट्वा राजा मुमोह सर्वथा ।
शशंस मनसा वाचा मेने क्षत्रोत्तरां नवाम् ॥७४॥
अस्याः शतांशतुल्नां नोपगन्तुं मम श्रियः ।
प्रभवन्तीति मत्वैव मानगर्वगतोऽभवत् ॥७५॥

रत्नहीरकमालादिसपर्यां लब्धवान्नृपः ।
कामधेनुकृतसैन्यैः सेवकैश्च प्रवेशितः ॥७६॥
कक्षान्तराणि शनकैरतीत्य त्रीणि चार्जुनः ।
सद्माऽऽविवेश सौवर्णदीपोज्ज्वलसुभास्वरम् ॥७७॥
दधिदर्पणसौगन्ध्यपुष्पदुर्वाऽक्षतादिभिः ।
कन्याभिर्वर्धितो राजाऽऽरुरोह स्वर्णविष्टरम् ॥७८॥
पुरन्ध्र्यस्तु पुपूजुस्तं राजयोग्याऽर्हणादिभिः ।
ताभिश्च साकं नृपतिर्दिनं निनाय नाकवत् ॥७९॥
प्रपेदे च सदः सायं मन्त्रिसामन्तनायकैः ।
वाद्यविनोदः प्रवृत्तो नृत्यहास्यकथायुतः ॥८०॥
विलासा गणिकानां च हासक्रीडादयोऽभवन् ।
अर्धरात्र्युत्तरं सौधं विश्रामार्थं जगाम सः ॥८१॥
राजसैन्यं राजरूपवैभवेषु समेषु वै ।
सौधेषु प्राप्तवच्छान्तिं बभूव मुदितं बहु ॥८२॥
राजवद् राजसैन्यानां भोज्यं पेयं च भोग्यकम् ।
सर्वं चाऽभूत् समं तेन वसामोऽत्रैव ते जगुः ॥८३॥
स्वपन्तमेत्य राजानं सूतमागधबन्दिनः ।
प्रातः प्रबोधयितुं तं जगुरुच्चैर्मधुस्वरैः ॥८४॥
वीणावेणुरवोन्मिश्रैस्तालमूर्छासुमिश्रितैः ।
विनिद्राक्षः समुत्थाय राजा नैत्यकमाचरत् ॥८५॥
सेवितो वारयोषाभिः समुपेत्य तपोनिधिम् ।
ननामाऽथ ऋषिः प्राह व्युष्टा रात्रिः सुखेन किम् ॥८६॥
वन्या मृगसधर्माणो वयं वन्येन पोषिताः ।
राजानस्तु वने क्लेशं गणयन्ति प्रदुःसहम् ॥८७॥
इत्युक्तः प्रहसन् राजा मुनिं प्राह विनिर्मदः ।
भवत्प्रभावसंजातविभवाऽऽहृतचेतसः ॥८८॥
इतो न गन्तुमिच्छन्ति सैनिका मे सुखालयाः ।
नैव चित्रं तव विभो ! तपःसिद्धस्य योगिनः ॥८९॥
कामधेन्वास्तथा पतिव्रताया योषितश्च ते ।
स्वर्गं त्वत्रैव सञ्जातं का स्मृद्धिः क्षुद्रभूभृतः ॥९०॥
गमिष्यामि गृहं ब्रह्मन्ननुजानातु मां भवान् ।
तथेत्युक्तश्च मुनिना संप्रतस्थे पुरीं स्वकाम् ॥९१॥
चिन्तयामास धेनुं तां सर्वकामदुहां वराम् ।
किं मे सकलराज्येन कपर्दिकोपमेव वै ॥९२॥
ऋद्धमैन्द्रपदं धेनोः कलां नार्हति षोडशीम् ।
धेन्वा कृतं वने स्वर्गं धेन्वा क्षणेन नाशितम् ॥९३॥
एवंप्रभावा सा धेनुः राज्ययोग्या न तापसे ।
दत्वा मूल्यं गवाश्वादि त्वानेतव्या मया पुरे ॥९४॥

इति निर्णीय राजा सः प्रेषयामास मन्त्रिणम् ।
चन्द्रगुप्तः ऋषिं प्राह राजा वै भुवि रत्नभाक् ॥९५॥
रत्नान्यादाय राज्ञे त्वं गां रत्नं दातुमर्हसि ।
प्राहर्षिर्होमधेनुर्मे दातव्या नैव कस्यचित् ॥९६॥
क्रयविक्रयोर्नाऽहं कर्ता न नृपतेर्वशः ।
प्रसह्य हरणे त्वायुर्नाशस्ते भूभृतस्तथा ॥९७॥
इत्युक्तः क्रोधमापन्नो मन्त्री बुद्ध्वा तु गां तदा ।
विचकर्ष यथाशक्तिर्जमदग्निः रुरोध तम् ॥९८॥
मन्त्र्याज्ञप्ता मुनिं भृत्याः कषाभिर्जघ्नुरत्यथ ।
दूरे चक्रुः ऋषिः सेहे गां प्रसह्य प्रजगृहुः ॥९९॥
सा तु व्योमगता पश्चाद् वत्सां धृत्वा ययुर्हि ते ।
ऋषिर्ममार तावत्तु पर्शुरामो ह्युपस्थितः ॥१००॥
वनादागत एवासौ मातरं रुदतीं सुतः ।
श्रुत्वाऽऽक्रोशं च रामेति रामेत्येवं पुरो द्रुतम् ॥१०१॥
समिद्भारं त्ववतार्य दृष्ट्वा वै पितरं मृतम् ।
सान्त्वयामास जननीं रुदतीं साश्रुलोचनः ॥१०२॥
रेणुका शोकमापन्ना तदा वैधव्यशंकया ।
त्रिःसप्तकृत्वो हस्ताभ्यामुदरं समताडयत् ॥१०३॥
तदा रामो मातरं स्वामुवाचाऽऽवेशतः खलु ।
त्रिःसप्तकृत्वो यदिदं त्वया वक्षः समाहतम् ॥१०४॥
तावत्संख्यमहं क्षत्रं हनिष्ये मा शुचं व्रज ।
अथ सा रेणुका स्वामिव्रता पुत्रानुवाच ह ॥१०५॥
अहं पतिव्रता पुत्राः स्वर्गतं पितरं तु वः ।
अनुगन्तुमिहेच्छामि वह्निं प्रज्वाल्य देहतः ॥१०६॥
यथा तेन प्रवर्तिष्ये परत्रापि सहाऽनिशम् ।
भर्तुर्मम भविष्यामि पितृलोकप्रियाऽतिथिः ॥१०७॥
तावत्तत्राऽतिगंभीरा वागुवाचाऽशरीरिणी ।
पतिव्रतेऽत्र मा कार्षीः साहसं धैर्यमावह ॥१०८॥
कुरु पत्युः प्रबोधाय संकल्पं त्वं पतिव्रते ।
अचिरेणैव भर्ता ते भविष्यति सचेतनः ॥१०९॥
इत्युक्ता सा पतिदेहं निनाय कुटिकागृहे ।
सती संकल्पयामास भर्तुरुत्थानजीवनम् ॥११०॥
तावत्तत्र समायातो भृग्वर्षिः सुरवन्दितः ।
मृतसञ्जीवनीविद्यावारिधिस्तमजीवयत् ॥१११॥
जमदग्निरुत्थितश्च ननाम तं पितामहम् ।
पप्रच्छ राज्ञा पापं किं कृतं येन मृतोप्यहम् ॥११२॥
भृगुः प्राह वशिष्ठेन शप्तो नाशाय स नृपः ।
द्विजापराधतो मूढ वीर्यं ते विनशिष्यते ॥११३॥

तेन पुत्रश्च ते रामो हनिष्यति तमर्जुनम् ।
एकविंशतिवारं स निःक्षत्रां क्षमां करिष्यति ॥११४॥
दत्तात्रेयाद्धरेरंशाल्लब्धैश्वर्यः स जीवति ।
रामशस्त्रैर्हतश्चाद्य परलोकं गमिष्यति ॥११५॥
इत्युक्त्वाऽर्चनमादाय ययौ गृहं भृगुस्ततः ।
रामश्चक्रे प्रतिज्ञां चाऽर्जुनं नाशयितुं तदा ॥११६॥
जमदग्निश्च तं प्राह सतां धर्मं स्मरन् द्विजः ।
साधवो ये महाभागाः संसारान्मोक्षकारिणः ॥११७॥
न कस्मैचित्प्रकुप्यन्ति निन्दितास्ताडिता अपि ।
क्षमाधना महाभागा ये च दान्तास्तपस्विनः ॥११८॥
तेषां चैवाऽक्षया लोकाः सततं साधुकारिणाम् ।
यस्तु दुष्टैश्च दण्डाद्यैर्वचसापि प्रताडितः ॥११९॥
न तु क्षोभमवाप्नोति स साधुः परिकीर्त्यते ।
ताड्येत्ताडयन्तं यो न च साधुः स पापभाक् ॥१२०॥
क्षमयाऽर्हणतां प्राप्ताः साधवो ब्राह्मणा वयम् ।
तस्मान्निवारये पुत्र ! क्षमां कुरु तपश्चर ॥१२१॥
इति पित्रा समादिष्टः पर्शुराम उवाच तम् ।
सः शमः साधुदीनेषु न खलेषु कदाचन ॥१२२॥
तस्मादस्य वधः कार्यः कार्तवीर्यस्य वै मया ।
इत्युक्तवन्तं तं पुत्रं जामदग्निरुवाच वै ॥१२३॥
इतो व्रज त्वं ब्रह्माणं तदुक्तकारको भव ।
इत्युक्तः स ययौ व्योम्ना ब्रह्माणं तं ननाम च ॥१२४॥
वृत्तान्तं स्वप्रतिज्ञां च कथयामास सर्वथा ।
ब्रह्मा प्राह शृणु पुत्र ! गच्छ त्वं शंकरं प्रति ॥१२५॥
दिव्यं पाशुपतं चास्त्रं दास्यति कृष्णवर्म च ।
पश्चाद् विजेष्यसि पुत्र ! शंभुमाराध्य सर्वथा ॥१२६॥
इत्याज्ञया ययौ रामः शिवं कैलासमुत्तमम् ।
ननामोवाच कार्यार्थी ब्रह्मोक्तं सर्वमेव च ॥१२७॥
शिवस्तस्मै ददौ मन्त्रं कवचं विजयप्रदम् ।
नागपाशं पाशुपतं ब्रह्मास्त्रं वारुणं तथा ॥१२८॥
नारायणास्त्रमाग्नेयं वायव्यं गारुडं तथा ।
गान्धर्वं जृंभणास्त्रं च गदां शक्तिं त्रिशूलकम् ॥१२९॥
दण्डं परशुं शस्त्रास्त्रजालं रामः प्रहर्षितः ।
ययौ नत्वा पुष्करं सः साधयामास सर्वथा ॥१३०॥
अगस्त्योक्तेन मार्गेण कृष्णमाराध्य भक्तितः ।
कृष्णं साक्षाद् दृष्टवाँश्च कृष्णः प्राह भृगूद्वहम् ॥१३१॥
मम चक्रावतारं हि कार्तवीर्यं विनाशय ।
मदंशावेशयुक्तस्त्वं क्षौण्यां विचर भार्गव ! ॥१३२॥
रामश्चाहं पुनर्भूत्वा हरिष्ये तेज एव ते ।
इत्युक्त्वाऽन्तर्दधे कृष्णो रामो माहिष्मतीं ययौ ॥१३३॥
युद्धं वव्रेऽर्जुनाद् रामोऽर्जुनो युद्धाय निर्ययौ ।
अनेकाऽक्षौहिणीयुक्तो ददर्शाऽशकुनं पथि ॥१३४॥
सरजस्का दिशो व्योम निस्तेजस्कं ग्रहादिकम् ।
मुक्तकेशां छिन्ननासां रुदतीं च दिगम्बराम् ॥१३५॥
कृष्णवस्त्रपरीधानां वनितां स ददर्श च ।
कुचैलं पतितं भग्नं नग्नं काषायवाससम् ॥१३६॥
अंगहीनं ददर्शाऽसौ नरं दुःखितमानसम् ।
गोधां च शशकं शल्यं रिक्तकुंभं सरीसृपम् ॥१३७॥
कार्पासं कच्छपं तैलं लवणं चास्थिखण्डकम् ।
स्वदक्षिणे शृगालं च कुर्वन्तं भैरवं रवम् ॥१३८॥
रोगिणं पुल्कसं चैव वृषं च श्येनभल्लुकौ ।
दृष्ट्वाऽपि प्रययौ योद्धुं कालपाशाऽऽवृतो हठात् ॥१३९॥
शतपुत्रानर्जुनं च शताऽक्षौहिणिकायुतान् ।
दारयामास संग्रामे रामः शस्त्रास्त्रमण्डलैः ॥१४०॥
ततो ययौ स कैलासं दर्शनार्थं शिवस्य वै ।
गोपुरस्थगणेशेन रुद्धो दन्तं गणेशितुः ॥१४१॥
भंक्त्वा दृष्ट्वा शिवां शंभुमाजगाम पितुर्गृहम् ।
ददर्श पितरौ रामः पपात पादयोस्तयोः ॥१४२॥
उवाच कार्तवीर्यस्य हननं वामनुग्रहात् ।
रामं पिता सान्त्वयित्वा प्रायश्चित्तं ददौ ततः ॥१४३॥
महेन्द्राद्रिं ययौ प्रायश्चित्तं रामश्चकार ह ।
तत्र कृत्वाऽऽश्रमपदं तपस्तेपे सुदुष्करम् ॥१४४॥
ततः कदाचिद् विपिने चतुरंगबलान्विताः ।
अन्ये सहस्रार्जुनजाः पुत्रास्तदाश्रमं ययुः ॥१४५॥
जमदग्नेः शिरो हृत्वा प्रययुः स्वपुरीं प्रति ।
भर्तारं निहतं भूमौ पतितं वीक्ष्य रेणुका ॥१४६॥
समुद्धाव्य चिताग्निं च विवेश भस्मतां गता ।
भर्त्रा सह सती वैहायसा यानेन चाम्बरे ॥१४७॥
देवर्षिपूजिता स्वर्गं ययौ पश्चात् तदात्मजाः ।
अन्ये चक्रुस्तदूर्ध्वं वै यत्कर्तव्यमनन्तरम् ॥१४८॥
ततः काले गते रामः स्वाश्रमं त्वाययौ वनात् ।
पितुस्तु जीवहरणं शिरोहरणमित्यपि ॥१४९॥
मातुश्च मरणं श्रुत्वा क्षत्रनाशे मनो दधे ।
क्षत्रवंश्यानशेषेण हत्वा तद्देहलोहितैः ॥१५०॥
करिष्ये तर्पणं पित्रोरिति निश्चित्य संययौ ।
प्राप्य माहिष्मतीं रामः टंकारान् धनुषोऽकरोत् ॥१५१॥

सहस्रार्जुनपुत्राश्च राजानश्चतुरंगिणः ।
युयुधिरे समागत्य हता रामेण दुद्रुवुः ॥१५२॥
उदैरयद् भार्गवोऽस्त्रं तदा कालाग्निनामकम् ।
पुरीं प्राकारसहितां प्रददाहाऽस्त्रपावकः ॥१५३॥
भस्मावशेषं तद्राज्यं कृत्वा निःक्षत्रियां महीम् ।
महेन्द्राद्रिं ययौ रामस्तपसे धृतमानसः ॥१५४॥
वर्षद्वयेन भूयोऽपि कृत्वा निःक्षत्रियां महीम् ।
भूयोऽपि विरलं पृथ्व्यां क्षत्रमुत्पादितं द्विजैः ॥१५५॥
जघान भूमौ निःशेषं साक्षात् काल इवान्तकः ।
यथा यथा क्षितौ भूयः क्षत्रवंशः प्रकाशितः ॥१५६॥
त्रिःसप्तकृत्वः पृथ्वीं चक्रे निःक्षत्रियां मुहुः ।
ततो मूर्धाभिषिक्तानां षट्सहस्रद्वयं पुनः ॥१५७॥
जीवग्राहं गृहीत्वैव कुरुक्षेत्रं जगाम सः ।
सरसां पञ्चकं तत्र खानयित्वा भृगूद्वहः ॥१५८॥
जघान तत्र वै राज्ञः शरीरप्रभवाऽसृजा ।
सरांसि तानि वै पञ्च पूरयामास भार्गवः ॥१५९॥
पितॄन् सन्तर्पयामास श्राद्धं पित्रोश्चकार ह ।
ततो निवृत्तः रामोऽसौ गयातीर्थं ययौ पुनः ॥१६०॥
समन्तपञ्चकं तीर्थं कुरुक्षेत्रेऽभवद्धि तत् ।
यत्र स्नातः सर्वतीर्थैः स्नातो भवति मानवः ॥१६१॥
गयायां पितरस्तस्य पितृलोकादुपागताः ।
जगृहुस्तत्कृतां पूजां जमदग्निपुरोगमाः ॥१६२॥
प्राहुः राम ! महत्कर्म कृत्वा तर्पितवानसि ।
वधाच्च विनिवर्तस्व प्रायश्चित्तं पुनः कुरु ॥१६३॥
शममाप्नुहि भद्रं ते इत्युक्त्वाऽन्तर्दधुश्च ते ।
रामस्तीर्थानि सर्वाणि जगाम शुद्धिकाम्यया ॥१६४॥
ततो ययौ महेन्द्राद्रिं हयमेधं चकार सः ।
कश्यपाय ददौ पृथ्वीं चचार भार्गवस्तपः ॥१६५॥
इति ते कथिता लक्ष्मि ! पर्शुरामचमत्कृतिः ।
पातिव्रत्यं रेणुकायाः पुत्रस्य पितृभक्तता ॥१६६॥
क्षत्रियाणां च दौरात्म्यं फलं विनाश इत्यपि ।
पठनाच्छ्रवणाच्चास्य तत्तद्भक्तिफलं भवेत् ॥१६७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये पतिव्रताया रेणुकायाः कामधेन्वाश्च प्रभावेण पर्शुरामकृतक्षत्रियनाशो मृतजमदग्निसजीवनता रेणुकाजमदग्न्योश्च स्वर्गनिवास इत्यादिनिरूपणनामा एकाशीत्यधिकत्रिशततमोऽध्यायः ॥३८१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि पातिव्रत्यं परं तव ।
मां विहाय कदापि त्वं तिष्ठसे न जनान्तरे ॥ १ ॥
यत्र यत्रास्ति मेंऽशो वै तत्र तत्रासि चांशतः ।
पातिव्रत्यं परं मुख्यं धर्मं धृत्वा हि वर्तसे ॥ २ ॥
अहं चापि हृदि रक्षन् पत्नीव्रतपरायणः ।
वर्तामि च त्वयि लक्ष्मि ! सर्वात्मनाऽन्तरे बहिः ॥ ३ ॥
मदिच्छातः पुरा जाता लक्ष्मीस्त्वं हृदयाद् बहिः ।
वैकुण्ठे त्वं ततो जाता सती नारायणप्रिया ॥ ४ ॥
गोलोके राधिकारूपा कृष्णप्रियाऽसि सर्वदा ।
श्रीश्च त्वं वर्तसे चाऽव्याकृते धाम्नि मम प्रिया ॥ ५ ॥
श्वेतद्वीपेऽपि मे पत्नी क्षीराब्धौ त्वं रमासि मे ।
प्रभा च पार्वती चासि मम धाम्नि चिदम्बरे ॥ ६ ॥
माणिकी च वरारोहा सर्वदाऽसि ममाऽऽसनम् ।
क्षीराब्धौ त्वं ततो जाता जाता केदारपुत्रिका ॥ ७ ॥
भृगोः ख्यात्यां समुत्पन्ना जाता पद्मा तथा प्रिया ।
अनरण्यगृहे त्वं वै धरण्यां चापि मे प्रिया ॥ ८ ॥
तथा त्वं कम्भरालक्ष्मीर्जाता सौराष्ट्रके शुभे ।
सा त्वं नित्या जगन्माता विष्णोः श्रीरनपायिनी ॥ ९ ॥
कृष्णनारायणसविध्न वामे गौरस्वरूपिणी ।
वर्तसे त्वं सदा लक्ष्मीरहस्या सेविका सती ॥१०॥
यथा सर्वगतश्चाऽहं तथा सर्वगताऽसि वै ।
न त्वां विना क्वचिच्चाहं मां विना त्वं न च क्वचित् ॥११॥
अपृथकसिद्धतादात्म्यं वर्तते लक्ष्मि ! नौ सदा ।
सदा सर्वत्र सर्वाऽसि सर्वश्चास्मि तथाप्यहम् ॥१२॥
पतित्वं मे सदा ते च पत्नीत्वं सर्वदा प्रिये ।
कर्मणा मनसा वाचा वर्ष्मणा गुणचिन्तनैः ॥१३॥
जाग्रति स्वापने घोरे सुषुप्तावपि तुर्यके ।
स्थाने चात्मनि सर्वत्र विषये विलये तथा ॥१४॥
सृष्टौ लये चिदाकाशे जडे चेतनवर्गके ।
कार्ये वा कारणे लक्ष्मि ! सदा त्वं मे पतिव्रता ॥१५॥
पत्नीव्रतस्तथाऽजस्रं भवाम्येव न संशयः ।
अहं विष्णुश्च सर्वत्र व्यापकोऽस्मि सती सदा ॥१६॥
त्वं तत्र व्यापिनी देवी मम शक्तिस्वरूपिणी ।
अक्षरेशोऽप्यहं त्वं चाक्षरी भवसि मत्प्रिया ॥१७॥
मुक्तेशोऽहं यदा लक्ष्मि ! मुक्तानी त्वं हि वर्तसे ।
जया च ललिता त्वं वै हरिकृष्णस्तदाऽप्यहम् ॥१८॥

अहं चार्थस्त्वं च वाणी नीतिस्त्वं च नयोऽस्म्यहम् ।
बोधश्चाहं त्वं च बुद्धिर्धर्मोऽहं त्वं च सत्क्रिया ॥१९॥
स्रष्टा चाहं त्वं च सृष्टिर्भूमिस्त्वं भूधरोऽस्म्यहम् ।
सन्तोषोऽहं त्वं च तुष्टिः कामोऽहं त्वं च कामना ॥२०॥
यज्ञोऽहं दक्षिणा वै त्वं वेदोऽहं त्वं च वेदिका ।
आज्याहुतिस्त्वमेवासि पुरोडाशोऽस्मि वै तदा ॥२१॥
पत्नीशाला त्वमेवाऽसि प्राग्वंशोऽहं भवामि च ।
यूपोऽहं च चितिस्त्वं च त्वमिध्मा च कुशोऽस्म्यहम् ॥२२॥

उद्गीतिस्त्वं च सामाऽहं त्वं स्वाहाऽहं हुताशनः ।
गौरी त्वं शंकरश्चाहं त्वं प्रभाऽहं दिवाकरः ॥२३॥
अहं पितृणस्त्वं च स्वधा शाश्वतपुष्टिदा ।
आकाशोऽहं तथा त्वं द्यौश्चन्द्रोऽहं त्वं च कौमुदी ॥२४॥
वायुश्चाऽहं धृतिस्त्वं वै वेला त्वं सागरोऽस्म्यहम् ।
इन्द्राणी त्वं महेन्द्रोऽहं धूमोर्णा त्वं यमोऽस्म्यहम् ॥२५॥
ऋद्धिस्त्वं च कुबेरोऽहं गौरी त्वं वरुणोऽस्म्यहम् ।
देवसेना त्वमेवाऽसि सेनान्यहं च कार्तिकः ॥२६॥

अवष्टंभोऽस्म्यहं यत्र तत्र शक्तिस्त्वमेव मे ।
त्वं काष्ठाऽसि निमेषोऽस्मि मुहूर्तोऽहं कलासि मे ॥२७॥
त्वं ज्योत्स्नाऽहं प्रदीपोऽस्मि द्रुमोऽहं त्वं लतासि वै ।
दिवसोऽहं निशा त्वं च वधूस्त्वं च वरोऽस्म्यहम् ॥२८॥
नदोऽहं त्वं नदीरूपा पताका त्वं ध्वजोऽस्म्यहम् ।
लोभोऽहं त्वमसि तृष्णा रागोऽहं त्वं रतिर्मता ॥२९॥
देवतिर्यङ्मनुष्यादौ माया त्वं मायिकोऽस्म्यहम् ।
दुर्वासःशापतस्त्वं तु महेन्द्रादिं विहाय वै ॥३०॥
समुद्रेऽतीव संमग्ना पुनश्चाविर्बभूविथ ।
त्वं सिद्धिस्त्वं पद्मिनी च ख्यात्यां लक्ष्मीर्भृगोः सुता ॥३१॥

नर्मदायास्तटे त्वं तु भार्गवी दिव्यविग्रहा ।
जातमात्रा युवती त्वं तेपिषे दुष्करं तपः ॥३२॥
नारायणः पतिर्मेऽस्तु चतुर्बाहुः स्वयं हरिः ।
इति वर्षाऽयुतं साध्वि ! त्वया तप्तं परं तपः ॥३३॥
नित्यं षोडशवर्षीया वृद्धिह्रासविवर्जिता ।
तेजोमण्डलमध्यस्था भृगुकृच्छोच्छ्रयस्थिता ॥३४॥
वर्षसहस्रं पञ्चाग्नौ तपश्चकर्थ दारुणम् ।
ततो वर्षसहस्रं वै तण्डुलाहारकं तपः ॥३५॥
ततो वर्षसहस्रं वै फलाहारपरायणा ।
ततो वर्षसहस्रं वै कन्दाहारपरायणा ॥३६॥
ततो वर्षसहस्रं वै पत्राहारपरायणा ।
ततो वर्षसहस्रं त्वं शुष्कपत्रपरायणा ॥३७॥

ततो वर्षसहस्रं त्वं जलफेनपरायणा ।
ततो वर्षसहस्रं त्वं क्वचिज्जलपरायणा ॥३८॥
ततो वर्षसहस्रं त्वं धूम्रबाष्पपरायणा ।
ततो वर्षसहस्रं वै वायुपानपरायणा ॥३९॥
एकादशे सहस्रे त्वं सर्वेन्द्रियनिरोधिनी ।
ब्रह्मरन्ध्रे समासाद्य समाधिं मयि चागता ॥४०॥
त्वया स्तुतोऽप्यहं नेति विवाहार्थं जगाद ह ।
त्वया प्राणान् परित्यक्तुं ज्ञापयित्वा द्रुतं तु मे ॥४१॥

ब्रह्मरन्ध्रं समुद्धाट्य यावदूर्ध्वं गतिः कृता ।
तावन्मया समागत्य पुना रन्ध्रे निवेशिता ॥४२॥
त्वयोक्तं तु तदा लक्ष्मि ! यदि त्वं मे पतिर्भव ।
तदा रोधय मे प्राणानन्यथा त्वं वियोजय ॥४३॥
विहस्य साश्रुनेत्रोऽहं प्रेमपुलकिताऽङ्गकः ।
हृष्टरोमा स्वेदगात्रोऽभवमाश्लिष्टवानपि ॥४४॥
प्रोक्तवाँस्त्वं निवर्तस्व तपसश्चातिदारुणात् ।
यावत्सृष्टिर्ब्रह्मलोकस्तावत्पत्नीं करोमि वै ॥४५॥

गच्छ त्वं पितरं लक्ष्मि ! मातरं वद सर्वथा ।
आगच्छति विवाहार्थं कृष्णनारायणः प्रभुः ॥४६॥
इत्युक्ता त्वं समुत्थाय नत्वा स्पृष्ट्वाऽऽननं मम ।
सर्वं समर्पितं कृत्वा गता स्वपितृमन्दिरम् ॥४७॥
अहं यातश्च वैकुण्ठं तदा सस्मार नारदम् ।
सप्तर्षीन् राधिकां श्रीं च माणिकीं पार्वतीं प्रभाम् ॥४८॥
ते सर्वे तु समागत्य पप्रच्छुः कारणं तु माम् ।
मया गदितो वृत्तान्तो भार्गवीयोगसंभवः ॥४९॥
नर्मदायास्तटे रम्ये भृगुर्ब्राह्मणसत्तमः ।
दिव्यं वर्षसहस्रं तु समुपास्ते हरं प्रभुम् ॥५०॥

वल्मीकावस्थितश्चासौ दक्षिणे च निकेतनम् ।
तं ध्यायति समाधिस्थो वरं प्रार्थयते तथा ॥५१॥
आश्चर्यं तु महज्जातमुमायाः शंकरस्य च ।
गौरी पृच्छति शंभुं तु वल्मीकस्थोऽयमस्ति कः ? ॥५२॥
शंभुः प्राह भृगुर्नामा ऋषीणां प्रवरो मुनिः ।
वरं ध्यायति तपति प्रार्थयत्येव शंकरात् ॥५३॥
तदा प्रहसिता गौरी शंकरं प्रत्यभाषत ।
धूमवत्तु शिखा जाता ततोऽद्यापि न तुष्यसि ॥५४॥
दुराराध्योऽसि मे नाथ कथमेवं तु वर्तसे ।
शिवः प्राह महादेवि ! भृगुः क्रोधेन चेष्टितः ॥५५॥
दर्शयामि तथा तथ्यं प्रियं ते च करोम्यहम् ।
स्मारितो देवदेवेन धर्मरूपो वृषस्तदा ॥५६॥

स्मरणाद् देवदेवस्य वृषः शीघ्रमुपस्थितः ।
वदते मानुषीं वाचमादेशो दीयतां प्रभो ॥५७॥
वल्मीकैश्छादितो विप्रः एवं भूमौ निपातय ।
योगस्थस्तु ततो ध्यायँस्ततस्तेन निपातितः ॥५८॥
तत्क्षणात् क्रोधसन्तप्तो हस्तमुत्क्षिप्तवान् वृषम् ।
एष संभाषमाणश्च कुत्र गच्छसि भो वृष ! ॥५९॥
अद्य त्वामत्र पाप्मानं प्रत्यक्षं हन्म्यहं वृष ! ।
धर्षितस्तु तदा विप्रो ह्यन्तरिक्षगतं वृषम् ॥६०॥
आकाशे प्रेक्षते विप्रो ह्येतदद्भुतमुत्तमम् ।
ततः प्रहसिते रुद्रे ऋषिरग्रे व्यवस्थितः ॥६१॥
तृतीयं लोचनं दृष्ट्वा वैलक्ष्यात् पतितो भुवि ।
प्रणम्य दण्डवत् भूमौ स्तौति श्रीपरमेश्वरम् ॥६२॥
अलीकाहंकारयुक्तं क्षणभंगुरवैभवम् ।
क्रूरं कुपथपतितं त्राहि मां परमेश्वर ॥६३॥
शीघ्रं हरस्व मे तृष्णां लक्ष्मीं देहि च हृच्छ्रयाम् ।
छिन्धि पाशान् भवजातान् समुद्धारय शंकर ! ॥६४॥
रुद्रवेदी भवेदेषा नारायणस्वरूपिणी ।
यदि तुष्टोऽसि विश्वेश चैतत्सम्पादयस्व मे ॥६५॥
तथास्त्विति तदा प्राह शंभुर्लोकहिताय वै ।
नारायणी महालक्ष्मीः पुत्री तेऽत्र भविष्यति ॥६६॥
क्रोधस्थानं रुद्रवेदी भृगुक्षेत्रं भविष्यति ।
न पिता पुत्रयोश्चात्र ह्येकवाक्यं भविष्यति ॥६७॥
इत्युक्त्वा च हरस्तस्मात्तिरोभूच्च भृगोर्गृहे ।
दिव्या संकल्पजा पुत्री लक्ष्मीर्जाताऽतिशोभना ॥६८॥
ख्यातिः पुत्रीमती जाता पुष्पवृष्टिदिवौकसाम् ।
बभूव चोत्सवश्चापि वैकुण्ठमिव भूरभूत् ॥६९॥
तदा प्रभृति ब्रह्माद्याः सर्वे देवाः सकिन्नराः ।
उपासते भृगोस्तीर्थं तुष्टो यत्र महेश्वरः ॥७०॥
नित्यं यत्राऽभवल्लक्ष्मीर्भार्गवी वै नरायणी ।
नारायणं पतिं लब्धुं तपस्तेपेऽतिदारुणम् ॥७१॥
अहं तुष्टश्च तपसाऽयुतवर्षोत्तरं ययौ ।
तस्यै पणं मया दत्तं विवाहाय ततो मया ॥७२॥
गन्तव्यं वै भृगुक्षेत्रं वररूपेण वै यतः ।
वैकुण्ठात्तु गमिष्यामः कुर्वन्तु सज्जतां प्रियाः ॥७३॥
भृगुतुंगे मुनिवर्यो भृगुः ख्यात्या विराजते ।
अष्टाशीतिसहस्रैश्च ब्रह्मर्षिभिस्तपोधनः ॥७४॥
ततो दूरं नर्मदायास्तटे विष्णुर्विराजिते ।
पञ्चाशद्योजने भागे विष्णुतीर्थे वयं खलु ॥७५॥
वैकुण्ठं कारयित्वैव पार्थिवं विश्वकर्मणा ।
स्थास्यामश्च त्रयस्त्रिंशत्कोटि देवा अपि प्रियाः ॥७६॥
देवतीर्थे तटे तत्र नः स्थास्यन्ति प्रवाहितः ।
ऋषितीर्थे च ऋषयो मानवाश्चऋतीर्थके ॥७७॥
शुक्लतीर्थे च कृष्णाद्याः सर्वे वै परमेश्वराः ।
ब्रह्मतीर्थे तथा मुक्ताः स्थास्यन्ति महीमानकाः ॥७८॥
एवं वै नार्मदे देशे वत्स्यामो वयमादरात् ।
कार्तिक्यां च करिष्यामो वैकुण्ठं तत्र नूतनम् ॥७९॥
माघ्यां विवाहविधये यास्यामो भृगुपत्तनम् ।
इति सर्वान् विनिर्दिश्य कृष्णनारायणः प्रभुः ॥८०॥
आहूय पृथिवीं देवीं समाज्ञापयदच्युतः ।
कुरु रेवातटं रिक्तं शतयोजनविस्तरम् ॥८१॥
समतलं समुद्यानैर्व्यवस्थितैः सुशोभितम् ।
सर्वखाद्यखनियुक्ताः शालास्तत्र च कारय ॥८२॥
वस्तूनि चापि सर्वाणि तत्रोपस्थापय प्रिये ।
सस्यान्नानि फलपत्रकन्दमूलानि सर्वथा ॥८३॥
वेषवाराणि दिव्यानि गन्धचूर्णानि यानि च ।
मिष्टान्नानि च मृष्टानि शर्करादीनि चापि वै ॥८४॥
उपस्थापय ते गर्भे गह्वरेषु बहूनि च ।
भव दिव्या मम योगाद् वैकुण्ठाभा वसुन्धरा ॥८५॥
इत्याशीर्वादमादाय भूमिस्तत्र समागता ।
शतयोजनविस्तारे भूगर्भे सर्वसम्पदः ॥८६॥
रचयित्वा निधायैव स्वस्था चास्ते मुदान्विता ।
वरुणं जलदेवं च समाहूय नरायणः ॥८७॥
आदिदेशाऽमृतादीनां पेयानां पयसामपाम् ।
दध्नां च मादकानां च घृतानां रसिनां तथा ॥८८॥
मधूनां गूडवारीणां द्रुमाणां रसशालिनाम् ।
सोमवल्लीकल्पलताकल्पद्रुमादिसम्पदाम् ॥८९॥
रसानां च प्रवाहाणां पेयानां विपुलान् ह्रदान् ।
कर्तुं भर्तुं दिदेशाऽपि सोऽपि गत्वा तथाऽकरोत् ॥९०॥
सूर्यं चन्द्रं विद्युतश्च वाडवाग्निं महानलम् ।
कृष्णनारायणश्चाज्ञापयामास महानसान् ॥९१॥
पाकशाला विविधाश्च वह्निशालाश्च बाष्पदाः ।
कर्तुं रचयितुं तत्र शीतोष्णकुण्डवैभवान् ॥९२॥
दीपप्रदीपशोभाश्च चन्द्रिकाशीतलप्रभाः ।
स्फीतालोकान्महालोकानन्धकारप्रकल्पकान् ॥९३॥
कण्डनीः पेषणीश्चुल्लीश्चोदकुंभीश्च मार्जनीः ।
दिव्या दिव्यद्रवोपेताः कर्तुं दिदेश केशवः ॥९४॥

वायुं तथा समाहूय प्राणाँश्च मरुतस्तथा ।
व्यजनानां च तालानां मन्दसुगन्धशालिनः ॥९५॥
शीतान् वायून् क्वचित्तूष्णान् कर्तुमजीज्ञपद्धरिः ।
आकाशं च समाहूय चिदाकाशमथाऽकरोत् ॥९६॥
विभूतिं तत्र संप्रेष्य वैकुण्ठान्यमथाऽकरोत् ।
मेघान्प्राह हरिः कृष्णश्छत्राणि रचयन्त्विति ॥९७॥

इन्द्रं राजोपकरणान्याहर्तुं प्राह माधवः ।
कुबेरं सर्वरत्नाढ्ययन्त्रानयनमादिशत् ॥९८॥
यमं प्राह महासैन्यं शोभार्थं कुरु चाग्रगम् ।
शंभुं प्राह हरिस्तत्र सगणं नर्तनाय वै ॥९९॥
वाद्यानां वादनार्थं तु सरस्वत्यै न्यवेदयत् ।
मण्डपानां रचनार्थं दिदेश विश्वकर्मणे ॥१००॥
शोभाऽऽधिक्यकरणार्थं प्रैरयद् देवशिल्पिनः ।
भृग्वादिष्टो गुरुर्लग्नं दृष्ट्वा विलिख्य पत्रिकाम् ॥१०१॥

धाम ययौ ददौ भूम्ने वाद्यान्यवादयच्च सः ।
नारदं प्रेषयामासाऽऽह्वनार्थं त्रिषु सृष्टिषु ॥१०२॥
बलिशेषादयः पातालस्था आकारितास्तथा ।
पर्वताद्याः सरितश्च तीर्थानि जडचेतनाः ॥१०३॥
ऋषयो मुनयो देवाः पितरो ब्रह्मचारिणः ।
साध्व्यश्च साधवः सर्वे सात्वता आहुतास्तथा ॥१०४॥

ईशाश्चेशेश्वराश्चापि भगवन्तो दिगीश्वराः ।
लोकपालाः प्रजापालास्तत्त्वेशाः परमेश्वराः ॥१०५॥
ब्रह्माणो विष्णवो रुद्रा आदित्या वसवस्तथा ।
वैराजा वालखिल्याश्च याम्या ग्रहाश्च तारकाः ॥१०६॥
केतवश्चावरणस्था ईश्वरा अमृताऽक्षराः ।
वैकुण्ठस्थाश्च गोलोकवासिनः श्वेतधामगाः ॥१०७॥
मायालोकपराश्चान्ये तेजःपरास्तथाऽपरे ।
मुक्ताश्च धामवासाश्च शक्तयो मुक्तयोषितः ॥१०८॥

ब्रह्माण्यः सांख्ययोगिन्यो भगवत्यश्च देवताः ।
ईश्वरिण्यस्तथाऽऽर्ष्यश्च वेदा वेदान्य इत्यपि ॥१०९॥
अवतारास्तथा चावतारिण्यो हरियोषितः ।
मानव्यो वल्लिकाः सर्वा काश्यप्यः प्रमदास्तथा ॥११०॥
कुमारिकाश्च सधवास्तथा हरिधवाः पराः ।
जडाश्च चेतनाः सर्वाः समहूताश्च योषितः ॥१११॥
"कृष्णनारायणस्यात्र भार्गव्या सह लग्नके ।
विवाहोत्सववृद्ध्यर्थं माघ्यामायान्तु मद्गृहे ॥११२॥
अक्षराधिपतिः साक्षात्पुरुषोत्तमसंज्ञकः ।
आकारयाम्यतिप्रेम्णैकादश्यां मद्गृहे शुभे ॥११३॥

मण्डपारोहणे याने कन्यापितृगृहे तथा ।
सहायाः सन्तु सर्वे वै स्वयं तुष्याम्यहं हरिः ॥११४॥
अक्षरे मम धाम्न्यत्र समागच्छन्तु सगृहाः ।
सर्वे वयं गमिष्यामो भुवि भार्गवपत्तनम् ॥११५॥
नर्मदायास्तटे रम्ये शुक्लतीर्थे कृताश्रमे ।
भार्गव्यास्तु विवाहार्थं ततो यास्याम ईश्वराः" ॥११६॥

कुंकुमपत्रिकास्त्वेवं ब्रह्माण्डेषु प्रतिस्तरम् ।
प्रेषिताः पार्षदैश्चाथ मंगलान्यभवँस्ततः ॥११७॥
देव्यस्तु गीतिकाश्चक्रुर्मंगलायतनाः शुभाः ।
कृष्णनारायणं पिष्टचूर्णमर्दनमाचरन् ॥११८॥
वादकाश्चारुवाद्यानि सर्वतश्चाप्यवादयन् ।
जगुस्तु देवगन्धर्वा नर्तक्यो नृत्यमाचरन् ॥११९॥
महीमानाः समाजग्मुरक्षराख्यं गृहं प्रति ।
मानं सत्कारमाचक्रे भगवान् पुरुषोत्तमः ॥१२०॥

भोजयामास दिव्यानि मिष्टान्नान्यमृतानि च ।
पाययामास दिव्यानि वारीण्यमृतकानि च ॥१२१॥
शृंगारवेषरम्याणि यानवाहनकानि च ।
कोटिशो हस्तिनः श्वेता गरुडाः कोटिशस्तथा ॥१२२॥
हंसाः सिंहा वृषा नीलकण्ठाश्चापि च कोटिशः ।
अश्वाश्च कोटिशो दिव्याः शरभा गवयादयः ॥१२३॥

अर्बुदाः शेषशय्याश्च शिबिकाः कोटिकोटिशः ।
पर्य्यंः सपक्षाश्चानन्ता ईशान्यः पक्षचारिकाः ॥१२४॥
संयुञ्जन्ति स्म वाहिन्यां विवाहप्रोत्सवोत्सुकाः ।
अनन्ताश्चाक्षरमुक्ता गोलोकस्था अनन्तकाः ॥१२५॥
श्रीकृष्णेन सह याता वैकुण्ठस्था असंख्यकाः ।
अमृतस्था हिरण्यस्था आवृतिस्था विराट्स्थिताः ॥१२६॥
सत्यस्थाश्च जनादिस्था देवाः सुपाश्च मानवाः ।
स्थावरा जंगमाः सर्वे वाहिन्यामाययुर्मुदा ॥१२७॥

कृष्णनारायणस्याऽस्ति भार्गव्या सह लग्नकम् ।
गच्छामस्तद्दर्शनार्थं समायान्तु कुटुम्बिनः ॥१२८॥
इति सर्वे मुदा याताः पूजिता भोजितास्तथा ।
आबालवृद्धाः संभूय वाहिन्यां मिश्रितास्तदा ॥१२९॥
वरः शृंगारितः सम्यग् यथा राधेश्वरोऽपरः ।
साऽक्षतकुंकुमपुष्पमालाम्बरविभूषणैः ॥१३०॥
रत्नमौक्तिकसौवर्णशृंखलोर्मिकंकजलैः ।
सुगन्धरसचूर्णाद्यैराशीभिर्वर्धितः पुनः ॥१३१॥
भार्गव्याश्च विवाहार्थं ययौ षोडशहायनः ।
अक्षरब्रह्मलोकाद्वै वैकुण्ठलोकलम्बिनी ॥१३२॥

वाहिनी साऽभवद्दीर्घा वरपक्षानुयायिनी ।
नृत्यमंगलवाद्यादिकण्ठघोषादिरञ्जिता ॥१३३॥
अर्बुदाऽर्बुदसंख्यास्था शुक्लतीर्थे समाययौ ।
ब्रह्माण्डेषु च सर्वेषु मंगलान्यभवँस्तदा ॥१३४॥
कोटिभूमिकवैकुण्ठे दिव्ये रेवातटे शुभे ।
शतयोजनविस्तारे लक्षयोजनसूच्छ्रये ॥१३५॥
नारायणेच्छयाऽगम्याऽऽयतोच्छ्रायमये शुभे ।
असंख्यवाहिनीलोका ययुस्तत्र हरीच्छया ॥१३६॥
अणिमा महिमा प्राप्तिः प्राकाम्यं लघिमा तथा ।
गरिमा वशिता कामावसायिता च सिद्धयः ॥१३७॥
भवन्ति तु हरेर्यत्र तत्राश्चर्यं नु वै किमु ! ।
ब्रह्माण्डान्यप्यसंख्यानि यद्रोम्णां विवरेषु वै ॥१३८॥
अणुमात्रे स्थले सन्ति तत्राऽऽश्चर्यं नु वै किमु ।
एवं समागता शुक्लतीर्थे सा वरवाहिनी ॥१३९॥
विशश्राम सुखं तत्र नैजे वैकुण्ठके मुदा ।
स्नाताश्च भोजिताः सुप्ता धामधामनिवासिनः ॥१४०॥
सर्वत्र मंगलं जातं सोत्सुकाः प्राणिनस्तदा ।
आयान्ति शुक्लतीर्थं ते विवाहः पद्मयोरिति ॥१४१॥
सावित्र्या सहितो ब्रह्मा भवान्या च भवः स्वयम् ।
अनन्तश्चापि भोगिन्या धर्मो मूर्त्यादिभिः सह ॥१४२॥
भास्करः प्रभया साकं स्वाहया तु हुताशनः ।
स्मृद्ध्या साकं कुबेरश्च वरुणो वारुणीयुतः ॥१४३॥
पवनश्चापि चांजन्या यमो धूम्या सहाऽऽययौ ।
रोहिण्यादियुतश्चन्द्रः शचीयुक्तः सुरेश्वरः ॥१४४॥
रुद्राण्यादियुता रुद्रा आदित्याः सह संज्ञया ।
वसवश्चापि गन्धर्वाः किन्नरा देवदानवाः ॥१४५॥
आययुः शुक्लतीर्थं ते विवाहः पद्मयोरिति ।
दृष्ट्वा तु देवताद्या वै वैकुण्ठं नूतनं कृतम् ॥१४६॥
आकाशाच्च विमानैश्च सम्प्राप्य नर्मदातटम् ।
पत्तनं नूतनं चैव भृगुकच्छसमीपतः ॥१४७॥
मुक्तामाणिक्यहीरादिरत्नराजिविराजितम् ।
परितश्चतुरस्रं च शतयोजनसम्मितम् ॥१४८॥
सप्तभिः परिखाभिश्च गंभीराभिस्तु वेष्टितम् ।
प्राकारैः षोडशलक्षैस्त्रयस्त्रिंशत्सरोवरैः ॥१४९॥
सपद्मैः सर्वतोभद्रैः पुष्पोद्यानाऽयुताऽयुतैः ।
प्रफुल्लपुष्पैः पवनैः सर्वत्र सुरभीकृतम् ॥१५०॥
आमोदितं च शीतेन मन्दचन्दनवायुभिः ।
तरुभिः कोटिलक्षैश्च भूषितं चाम्रभूरुहैः ॥१५१॥
नारीकेलैश्च पनसैर्नवरंगैश्च दाडिमैः ।
द्राक्षाभिर्नागवल्लीभिरेलालवंगकैश्च ह ॥१५२॥
बदरीभिश्च बिल्वैश्च जम्बूभिश्चम्पकैस्तथा ।
बकुलैस्तिन्तिडीभिश्च जम्बीरैरिक्षुभिस्तथा ॥१५३॥
खर्जूरैर्नागरंगैश्च धात्रीभिः फलवद्द्रुमैः ।
अन्यैरुद्यानवर्यैश्च युक्तं शाद्वलसंप्लुतम् ॥१५४॥
असंख्यैर्मन्दिरैः रम्यैरत्युच्चैरपि संस्कृतम् ।
तत्तद्धाम्नां सुचित्रैश्च राजितं कलशान्वितैः ॥१५५॥
मणिसोपाननिकरैर्दिव्यस्तंभोज्ज्वलं तथा ।
दर्पणैः सूक्ष्मवस्त्रैश्च शोभितं श्वेतचामरैः ॥१५६॥
प्रांगणैः पद्मरागाद्यैरिन्द्रनीलपरिष्कृतम् ।
सच्चत्वरैः राजमार्गैर्देवदेवीभिरञ्चितम् ॥१५७॥
दृष्ट्वा वैकुण्ठनगरं सर्वे ते विस्मयं ययुः ।
विष्णुः पद्मः श्रीश्च पद्मा श्वशुरस्तु भृगुः स्वयम् ॥१५८॥
जामाता भगवान् यत्र किं न्यूनं यत्र वै भवेत् ।
गान्धर्वाः किन्नरा विद्याधर्यः किन्नर्य ईशिकाः ॥१५९॥
नर्तक्यो गायिका वाद्यभाण्डका गायकास्तथा ।
भिक्षुका गणका भट्टा भूपा वैद्याश्च सेवकाः ॥१६०॥
नटा मल्ला बहुरूपा वेषभ्रा मानवास्तथा ।
सोत्साहा आययुस्तत्र विवाहः पद्मयोरिति ॥१६१॥
भृगुकच्छेऽपि सन्न्यासियतिनैष्ठिकयोगिनः ।
भृग्वाहूता आययुर्वै विवाहः पद्मयोरिति ॥१६२॥
सनकश्च सनन्दश्च सनत् सनातनस्तथा ।
आययुस्त्रिकोटिशिष्यैर्विवाहः पद्मयोरिति ॥१६३॥
दुर्वासा लक्षशिष्यैश्च लक्ष्यभृत्यैश्च कश्यपः ।
पत्नीव्रतो लक्षशिष्यैर्विवाह पद्मयोरिति ॥१६४॥
गौतमोऽयुतशिष्यैश्च वाल्मीकोऽयुतशिष्यकैः ।
शुक्रश्च कोटिशिष्योऽगुर्विवाहः पद्मयोरिति ॥१६५॥
भारद्वाजोऽयुतशिष्यैः कोट्या बृहस्पतिः स्वयम् ।
अंगिरोऽयुतशिष्यैश्च विवाहः पद्मयोरिति ॥१६६॥
लक्षशिष्यैर्वशिष्ठश्च प्रचेता लक्षशिष्यवान् ।
पुलस्त्यो लक्षशिष्योऽपि विवाहः पद्मयोरिति ॥१६७॥
अगस्त्यो लक्षशिष्यैश्च पुलहो लक्षशिष्ययुक् ।
क्रतुर्लक्षेण चात्रिस्तु कोटिशिष्येण चागतः ॥१६८॥
मरीचिर्लक्षशिष्यैश्च शतानन्दः सहस्रकैः ।
भृगोर्गृहं समाजग्मुर्विवाहः पद्मयोरिति ॥१६९॥
सार्धं सहस्रशिष्यैश्च ऋष्यशृंगो विभाण्डकः ।
पाणिनिः कोटिशिष्यैश्चाऽयुतैः कात्यायनस्तथा ॥१७०॥

याज्ञवल्क्यः सहस्रैश्च व्यासः कोटिप्रशिष्यकैः।
गर्गोऽयुतेन शिष्याणां विवाहः पद्मयोरिति ॥१७१॥
गालवोऽपि सहस्रेण सहस्रेण च सौभरिः।
कोटिना लोमशश्चापि विवाहः पद्मयोरिति ॥१७२॥
सान्दीपनिर्देवलश्च मार्कण्डेयश्च लक्षकैः।
पञ्चशिखश्च गोपालो वोढुश्च लक्षशिष्यकैः ॥१७३॥
स्वयंप्रकाशस्तथाऽहं नरो नारायणः प्रभुः।
विश्वामित्रः कोटिमिश्च विवाहः पद्मयोरिति ॥१७४॥
जरत्कारुश्च लक्षेणाऽऽस्तीकश्चाऽयुतशिष्यकैः।
पर्शुरामः सहस्रेण विवाहः पद्मयोरिति ॥१७५॥
वत्सः शतेन दक्षस्त्रिशतेन कपिलोऽयुतैः।
संवर्तोऽयुतशिष्याद्यैर्विवाहः पद्मयोरिति ॥१७६॥
उतथ्यः शतशिष्यैश्च शतैश्चापि च भागुरिः।
समाययुस्त्वसंख्याता विवाहः पद्मयोरिति ॥१७७॥
भृगोः ख्यात्यां समुत्पन्नां लक्ष्मीं नारायणप्रियाम्।
कृष्णं लम्भयितुं यामो विवाहः पद्मयोरिति ॥१७८॥
देवौ धाताविधातारौ मेरोर्जामातरावुभौ।
लक्ष्म्याश्च भ्रातरौ तेषां सम्मानं वै प्रचक्रतुः ॥१७९॥
आयतिर्नियतिश्चापि मेरोः कन्ये पतिव्रते।
तयोर्धातृविधातृभ्यां प्राणो मृकण्डुरौरसौ ॥१८०॥
मार्कण्डेयो मृकण्डोश्च प्राणोद् वेदशिराः सुतः।
मरीचेरपि संभूतौ पूर्णमासः सुतस्तथा ॥१८१॥
कन्याचतुष्टयं तुष्टिर्वृष्टिः कृष्टिश्चापचितिः।
विरजाः पर्वतश्चोभौ पूर्णमासस्य वै सुतौ ॥१८२॥
पुलहस्य क्षमा पत्नी पुत्राः कर्दम इत्यथ।
वरीयाँश्च सहिष्णुश्च कनीयाँश्चेति वै ययुः ॥१८३॥
अत्रेः पत्नी ह्यनसूया पुत्राः सोमश्च दत्तकः।
दुर्वासाश्चाथांगिरसः पुत्री नाम्ना स्मृतिस्तथा ॥१८४॥
वासिष्ठाः शक्तिमुख्याश्च वाह्नेया क्रतुपुत्रकाः।
अग्निष्वात्ता बार्हिषदा आज्यपाः सोमपास्तथा ॥१८५॥
वालखिल्याश्च ऋषयो धरणी मेरुभामिनी।
पर्वताः सरितश्चापि सरांस्युपवनानि च ॥१८६॥
एवमृषीणां विस्तारा वंशास्तत्र महोत्सवे।
भृगोर्गृहं समायाता विवाहः पद्मयोरिति ॥१८७॥
मत्स्यः कूर्मो वराहश्च नृसिंहः ऋषभस्तथा।
कपिलो वासुदेवाश्च पृथुर्दत्तो मुनीश्वरः ॥१८८॥
हंसो हरिर्वामनश्च पर्शुरामः कुमारकाः।
यज्ञो रामो हयग्रीवो नारदो राजराजकः ॥१८९॥
व्यासः कृष्णश्च बुद्धश्च कल्किर्नारायणः स्वयम्।
पत्नीव्रतस्तथा चान्ये शिष्याः योगिप्रयोगिणः ॥१९०॥
सौराष्ट्रीया रैवताद्रेर्योगसिद्धाः समाययुः।
पत्नीयुक्ताः समायाता विवाहः पद्मयोरिति ॥१९१॥
कन्यापक्षस्य माण्डप्या ह्यासन् कोट्यब्जकाऽधिकाः।
वरपक्षस्य वाहिन्या ह्यासँस्ततोऽप्यसंख्यकाः ॥१९२॥
द्वादश्यां भोज्यपानाद्यैः सत्कृता महीमानकाः।
विशश्रमुश्च ते रात्रौ गीतनृत्यादिरञ्जिताः ॥१९३॥
मंगलानि विविधानि लोकाचाराः कृताः पराः।
हृष्टसद्भ्रदयाः सर्वे ह्यासन् प्रसन्नतोषिताः ॥१९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये भृगोः पुत्र्या भार्गव्या लक्ष्म्या कृततपसा तुष्टः श्रीकृष्णनारायणो भृगुकच्छनिकटे शुक्लतीर्थे वैकुण्ठं कारयित्वा विवाहार्थं समागतस्तद्वाहिनी-भृगुमहीमानादिवर्णननामा द्व्यशीत्यधिक-त्रिशततमोऽध्यायः ॥३८२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! भृगोः पुत्री महालक्ष्मीर्हि कानकी।
चम्पकपुष्पवर्णाभा प्रोज्ज्वला दिव्यविग्रहा ॥ १ ॥
अतीव सुन्दरी रम्या रमा रामासु पूजिता।
नवयौवनसम्पन्ना रत्नाभरणभूषिता ॥ २ ॥
तप्तकांचनकान्त्याढ्या तेजःपरिधिराजिता।
शुद्धसत्यस्वरूपा सा सत्यशीला पतिव्रता ॥ ३ ॥
शान्ता दान्ता नितान्ता चाऽप्यनन्तगुणशालिनी।
इन्द्राणी वरुणानी च चन्द्रनारी च रोहिणी ॥ ४ ॥
कुबेरपत्नी सूर्यस्त्री स्वाहा शान्ता कलावती।
अन्या अपि त्वहल्याद्याः पार्वत्याद्याश्च सूज्ज्वलाः ॥ ५ ॥
भार्गव्या भृगुकन्यायाः कलां नार्हन्ति षोडशीम्।
तां दृष्ट्वा देवनार्यश्च भगवद्योषितस्तथा ॥ ६ ॥
शरत्पूर्णेन्दुशोभाढ्यां शरत्कमललोचनाम्।
विवाहयोग्यां युवतीं लज्जानम्राननां सतीम् ॥ ७ ॥
मुमुहुस्ताः श्रियं सर्वा रूपानुरूपविग्रहे।
दृष्ट्वा स्तब्धा भवन्ति स्म लीनाः काष्ठजडा इव ॥ ८ ॥
अहो नारायणः साक्षात् पतिर्यस्याऽभिनिश्चितः।
तत्र किं नाम गौणं स्याद् गुणे रूपे च वर्ष्मणि ॥ ९ ॥
न काचिद् भगवत्सृष्टावीदृशी जनिता सती।
नास्ति न वा च दिव्यांगी भाविनी वा कदाचन ॥१०॥

इयं नारायणी साक्षात्पद्मा त्वस्त्येव भार्गवी ।
कृष्णनारायणयोग्या सोऽप्यस्या योग्य एव च ॥११॥
इत्याश्चर्यं परं प्रोचुर्जहृषुर्ददृशुर्मुहुः ।
तृप्ताश्चात्मनि तां ध्यात्वा कन्यां लक्ष्मीं हि भार्गवीम् ॥१२॥
मेनिरे च वरं योग्यं नवयौवनसंभृतम् ।
धर्मशीलं सत्यसन्धं नारायणमधीश्वरम् ॥१३॥
वेदवेदांगविज्ञं च पण्डितं सुन्दरं शुभम् ।
शान्तं दान्तं क्षमाशीलं गुणिनं चिरजीविनम् ॥१४॥
ब्रह्मकुलप्रसूतं च सर्वत्रैव प्रतिष्ठितम् ।
कृष्णनारायणं पूर्णं ब्रह्म श्रीपुरुषोत्तमम् ॥१५॥
निर्लिप्तं च निरीहं च साक्षिणं सर्वकर्मणाम् ।
यं न जानन्ति चत्वारो वेदाः सन्तश्च देवताः ॥१६॥
सिद्धेन्द्राश्च मुनीन्द्राश्च देवा ब्रह्मादयस्तथा ।
ध्यायन्ति ध्यानपूताश्च योगिनो न विदन्ति यम् ॥१७॥
सरस्वती जडीभूता वेदाः शास्त्राणि यानि च ।
सहस्रवक्त्रः शेषश्च पञ्चवक्त्रः सदाशिवः ॥१८॥
चतुर्मुखो जगद्धाता कुमारः कार्तिकस्तथा ।
ऋषयो मुनयश्चापि भक्ताः परमवैष्णवाः ॥१९॥
अन्येऽपि यं न जानन्ति यथा यावच्च यद्गुणः ।
तमेनं वरमासाद्य भार्गव्याप्तं जनेः फलम् ॥२०॥
घृतकुल्यासहस्राणि मधुकुल्याऽयुतानि च ।
दधिकुल्यासहस्राणि दुग्धकुल्याऽयुतानि च ॥२१॥
तैलह्रदा गुडशैलाः शर्कराराशयस्तथा ।
मिष्टान्नानां पर्वताश्च पिष्टानां राशयस्तथा ॥२२॥
यवगोधूमचूर्णानां पृथुकानां च पर्वताः ।
व्यंजनानां राशयश्च दृश्यन्तोऽक्षयभूमिकाः ॥२३॥
अहोऽस्माकं महद्भाग्यं यदैतदवलोकिकम् ।
सोत्साहं सम्प्रपश्यामो विवाहं पद्मयोरिमम् ॥२४॥
प्रासादाः स्वर्गतुल्याश्चामृतनद्यो वहन्ति च ।
यानानि च विमानानि वैहायसानि सर्वथा ॥२५॥
हंसगारुडहस्त्यादिवाहनानि च कोटिशः ।
पत्तनानि भृगुकच्छगिरौ गिरेः समन्ततः ॥२६॥
नूतनानि कारितानि भृगुणा मानसानि वै ।
यथा नवं हि वैकुण्ठे नारायणेन कारितम् ॥२७॥
तथा वै भृगुणा वार्धितटमायतमुज्ज्वलम् ।
शतयोजनविस्तार लक्षयोजनसूच्छ्रयम् ॥२८॥
दिव्यं भृगुपुरं तत्र कारितो मण्डपः श्रियः ।
समुद्रश्च स्वय तत्र बभूव सत्कृतिप्रदः ॥२९॥
मेरुश्चापि तथा चान्ये सिद्धाश्च मुनयोऽपरे ।
कल्पसिद्धास्तथा सत्ययुगाद्याः सत्कृतिप्रदाः ॥३०॥
आसन् कन्याप्रपक्षे वै कृष्णतुल्या हि तापसाः ।
तापस्यश्च श्रिया तुल्या यत्र न्यूनं न वै मनाक् ॥३१॥
मंगलानि त्रयोदश्यां शिष्टाचारास्तथा कृताः ।
लोकाचाराः कृताश्चैव पूजिता भोजितास्तथा ॥३२॥
रात्रौ मांगल्यगीतानि नृत्यानि कारितानि च ।
नार्यः प्रातश्चतुर्दश्यां देवार्चनानि चक्रिरे ॥३३॥
देवीनां देवतानां च लोकाचारकृतानि वै ।
पूजनानि प्रचक्रुस्ता वधूयुक्ताः स्त्रियः शुभाः ॥३४॥
चतुर्दश्यां भोजयित्वा भूमा नारायणौ निशि ।
सुवेषं कारयामास कृष्णनारायणस्य वै ॥३५॥
अतीव रम्यमतुलं त्रिषु सृष्टिषु दुर्लभम् ।
सम्पूज्य कारयामास यात्रां च प्रवरं वरम् ॥३६॥
कृष्णाद्याश्च तथा नारायणाद्या अवतारकाः ।
वैराजाद्यास्तथा मुक्ता ब्रह्मसृष्टिप्रयोषितः ॥३७॥
राधारमाप्रभाद्याश्च ब्रह्मा विष्णुर्महेश्वरः ।
तेषां पत्न्यो गणेशाश्चर्षयो ध्रुवासिनस्तथा ॥३८॥
देवा देव्यो ययुः सर्वे भृगुपत्तनमण्डपम् ।
तत्र कोट्यर्बुदान्यासन् स्वर्णसिंहासनानि वै ॥३९॥
सुधर्मा निर्मिता तेन समुद्रे स्वर्णवालुके ।
नर्तक्यो लक्षशस्तत्र गान्धर्व्यो लक्षशस्तथा ॥४०॥
किन्नर्यो गायिकाः पर्यः कोटिसंख्या उपस्थिताः ।
भृगुणा निर्मितं सर्वं भगवतां प्रतुष्टये ॥४१॥
न भूतं न च यद्भावि क्लृप्तं सिद्धिकृतं नवम् ।
विद्याधर्योऽपि लक्षं चाऽप्सरसो लक्षशस्तथा ॥४२॥
महापुरं भृगुव्याप्तं दिव्यं तद्भृगुपत्तनम् ।
वैराजभवनं यद्वत् ततोऽपि त्वतिमासुरम् ॥४३॥
यस्य प्राकारकलशो सम्प्रतिष्ठापितो रविः ।
यदन्तर्भोगमध्ये च पूर्णचन्द्रः स्थिरीकृतः ॥४४॥
तेजोमया ध्रुवास्त्वेवं रथ्यां रथ्यां प्रति कृताः ।
प्रकाशोऽकारणस्तत्र वर्तते भृगुपत्तने ॥४५॥
तत्त्वानि मूर्तिमन्ति च सेवायां स्थापितानि वै ।
चक्रुः प्रवेशनं भृगुपत्तनं वरयात्रिकाः ॥४६॥
पूर्णिमायां प्रगे सूर्यदर्शने भृगुसत्कृताः ।
एतस्मिन्नन्तरे चाग्रे बृहस्पतिरुपस्थितः ॥४७॥
कोट्यर्बुदर्षिसंयुक्तश्चाजगाम हरेः पुरः ।
मंगलं तु फलं दत्वा चन्द्रकं साक्षतं तथा ॥४८॥

पुष्पमालां गले दत्वाऽवाकिरत् कुसुमैर्हरिम् ।
लोकाचारं मंगलं च वारिकलशदर्शनम् ॥४९॥
चक्रुः कन्याश्च साध्व्यश्च ग्रामगोपुरसन्निधौ ।
वेदघोषाः श्राविताश्च मुनिभिरभिवर्धनाः ॥५०॥
पुरं प्रवेशयामास बृहस्पतिर्वदन् ऋचः ।
देवकन्या नागकन्या राजकन्या ऋषेः सुताः ॥५१॥
मुनिकन्या वरं द्रष्टुं सस्मिताश्च समाययुः ।
ददृशुर्योषितः सर्वा निमेषरहिताऽक्षिभिः ॥५२॥
प्रसन्नं जलदश्यामं शोभितं पीतवाससा ।
चन्दनोक्षितसर्वांगं वनमालादिभूषितम् ॥५३॥
रत्नकेयूरवलयरत्नमालाकुलोज्ज्वलम् ।
रत्नकुण्डलयुग्मेन गण्डस्थलविराजितम् ॥५४॥
रत्नेन्द्रसारनिर्माणक्वणन्मञ्जीररञ्जितम् ।
संस्मितं मुरलीहस्तं पश्यन्तं रत्नदर्पणम् ॥५५॥
पार्षदैः शतसाहस्रैः सेवितं श्वेतचामरैः ।
नवयौवनसम्पन्नं शरत्कमललोचनम् ॥५६॥
शरत्पूर्णेन्दुतुल्यास्यं रमाराधादिहृद्धरम् ।
कोटिकन्दर्पसौन्दर्यं ब्रह्मशेषेशवन्दितम् ॥५७॥
परमाह्लादकं रूपं कोटिचन्द्रसमप्रभम् ।
कामवीर्यभरं पुष्टं कृष्णनारायणं प्रभुम् ॥५८॥
दूर्वया पट्टसूत्रं च रत्नेन्द्रसारदर्पणम् ।
दधानं कतृकासाध्यं कदल्याः स्फुरमञ्जरीम् ॥५९॥
चूडां त्रिविक्रमाकारां मालतीमाल्यभूषिताम् ।
पुष्पं नारीप्रदत्तं च मुकुटं मस्तकोज्ज्वलम् ॥६०॥
दृष्ट्वा वरं युवत्यश्च मोहं प्रापुः परेश्वरम् ।
भार्गवीजीवनं धन्यं श्लाघ्यमित्यूचुरीप्सितम् ॥६१॥
जामातारं सा ददर्श ख्यातिर्भृग्वर्षिकामिनी ।
निमेषरहिता तुष्टा प्रसन्नवदनेक्षणा ॥६२॥
भृगुः प्रसन्नवदनः समुनिः सपुरोहितः ।
समागत्य हरिं कृष्ण सुरान् विप्राननाम ह ॥६३॥
ददौ विश्रान्तिभवनं शतयोजनविस्तरम् ।
भक्ष्यपूर्णं पानपूर्णं सेविकाभिर्विलासितम् ॥६४॥
भूमा चकार मन्त्रैश्च शुभाऽधिवासनं हरेः ।
सम्पूज्य मातृकाः सर्वाः साक्षाच्च सर्वदेवताः ॥६५॥
प्रदाय वसुधारां च वृद्धिश्राद्धादिकं तथा ।
सर्वान् संभोजयामास पाययामास सद्रसान् ॥६६॥
वाद्यानि वादयामास कारयामास मंगलम् ।
सुवेषं कारयामास वरस्याऽप्रतिमस्य च ॥६७॥
सुसज्जं कारयामास नरयानं सुशोभनम् ।
एवं मुनिर्भृगुश्चापि विवाहार्थं सुमंगलम् ॥६८॥
पुरोहितेन गुरुणा मन्त्रैरकारयद्विधिम् ।
रत्नानि च धनाद्यानि मुक्तामाणिक्यहीरकम् ॥६९॥
भक्ष्याणि चाम्बरादीनि ददौ दानानि चार्थिणे ।
वाद्यानि वादयामास कारयामास मंगलम् ॥७०॥
सुवेषं कारयामास भार्गव्याः सुमनोहरम् ।
देवीभिर्मुनिपत्नीभिर्विधानं च यथोचितम् ॥७१॥
ततः शुभे क्षणे प्राप्ते माहेन्द्रे परमोदये ।
विवाहोचितलग्ने च लग्नाधिपतिसंयुते ॥७२॥
सद्ग्रहेक्षणशुद्धे चाऽप्यसतां दृष्टिवर्जिते ।
शुभक्षणे शुभर्क्षे च विशुद्धे चन्द्रतारयोः ॥७३॥
वेधदोषादिरहिते शलाकादिविवर्जिते ।
दम्पत्योः शर्मयोग्ये च परिणामसुखप्रदे ॥७४॥
एवंभूते तु समये भृग्वर्षिप्रांगणं हरिः ।
आजगाम सुरेशाद्यैर्मुनिविप्रपुरोहितैः ॥७५॥
ईश्वरैर्भगवद्भिश्च धर्मभक्त्यादिभिस्तथा ।
भूम्ना लक्ष्म्या पार्षदैश्च मुक्तैश्च मुनिभिस्तथा ॥७६॥
स्थावरैर्जंगमैर्दिव्यैः शास्त्रज्ञैर्नर्तकैर्नटैः ।
गायकैर्माल्यकृद्भिश्च विद्याधरीभिरप्यथ ॥७७॥
अप्सरोभिः किन्नरीभिः सांख्ययोगिनिकादिभिः ।
स्थलं तद् ददृशुर्देवा देव्य ईशाश्च तत्स्त्रियः ॥७८॥
स्वर्णरंभास्तंभलक्षैः पट्टसूत्रपरिष्कृतैः ।
चम्पकानां चन्दनानां रसालानां च पल्लवैः ॥७९॥
माल्यैर्नानाविधैश्चैव पीतरक्तसितान्वितैः ।
परितो मंगलघटैः फलपल्लवसंयुतैः ॥८०॥
कस्तूरीचन्दनाक्तैश्च कुंकुमेन विराजितैः ।
पर्णैर्लाजाफलपुष्पदूर्वाभिरुपशोभितैः ॥८१॥
ईश्वरैर्मुनिभिर्विप्रैर्देवैः पितृभिरास्थितम् ।
रत्नेन्द्रसारनिर्माणवेदीयुक्तं मनोहरम् ॥८२॥
अर्चितं चन्दनस्निग्धैः कस्तूरीकुंकुमान्वितैः ।
सुगन्धिशीतमन्दैश्च वायुभिः सुरभीकृतम् ॥८३॥
रत्नानां कोटिभिश्चाप्युज्ज्वलं तेजस्विदीपकैः ।
नानाप्रकारधूपैश्च गन्धद्रव्यैः सुवासितम् ॥८४॥
चित्रैश्च शिल्पिनां रम्यैः परितः शोभनं कृतम् ।
गन्धर्वाणां सुसंगीतैर्नर्तकानां सुनर्तनैः ॥८५॥
विद्याधरीणां हावाद्यैरप्सरसां सुगायनैः ।
सुस्वरितं गवाक्षैश्च वधूभिरभिवीक्षितम् ॥८६॥

मंगलेन घटेनापि विदुषा सुपुरोधसा ।
भृगुणा कुशहस्तेन दानेन दानवस्तुना ॥८७॥
दृष्ट्वा सुप्रांगणे देवान् भृगोर्ब्रह्मादिकेश्वरान् ।
कृष्णं नारायणं वैराजं च मत्स्यादिकाँस्तथा ॥८८॥
सर्वान् विलोक्य सहसा भृगुः कुटुम्बिसंयुतः ।
मूर्ध्ना ववन्दे देवाँश्चेश्वरान् मुनीन् समर्हणाम् ॥८९॥
रत्नसिंहासनेष्वेव सुरम्येषु पृथक् पृथक् ।
क्रमान्निषादयामास सत्कृत्य चादरेण वै ॥९०॥
उवाचाऽद्य जनुर्मे वै सफलं जीवितं मम ।
बभूव जन्मकोटीनां कर्ममूलनिकृन्तनम् ॥९१॥
अवतारी स्वयं कृष्णनारायणोऽक्षरेश्वरः ।
दाता यः सम्पदां मुक्तेर्भुक्तेः स्वर्गस्य सर्वदा ॥९२॥
स्वप्ने यत्पादपद्मं वै द्रष्टुं नैव क्षमोऽस्म्यहम् ।
तपसां फलदाता सः स्रष्टाऽद्य प्रांगणे मम ॥९३॥
स्वात्मारामेषु पूर्णेषु शुभप्रश्नममीप्सितम् ।
योगीन्द्रैरपि सिद्धेन्द्रैः सुरेन्द्रैश्च मुनीश्वरैः ॥९४॥
ध्यानाऽदृष्टः स भगवान् श्रीहरिः प्रांगणेऽद्य मे ।
कालकालश्चाऽक्षरेशोऽवतारेशेश्वरः प्रभुः ॥९५॥
मानुषं रूपमास्थाय नराणां दृष्टिगोचरः ।
मत्कन्यां सफलीकर्तुं त्वांगणे मे समागतः ॥९६॥
सर्वान्तर्यामिता यस्य सर्वकामप्रदः प्रभुः ।
नास्त्यन्तो यस्य वेदेषु स हरिः प्रांगणेऽद्य मे ॥९७॥
ईशानामीश्वरो यस्तु सर्वाग्रे यस्य पूजनम् ।
स कृष्णो गोलोकपतिर्भाग्याद्वै प्रांगणेऽद्य मे ॥९८॥
यस्य लक्ष्म्यो ह्यनन्ताश्च रमाद्या योषितः प्रियाः ।
स मत्कन्याग्रहणार्थं नारायणोऽङ्गणेऽद्य मे ॥९९॥
वैराजाश्चापि देवाद्याः पितरो मानवाश्च ये ।
पातालस्था भागवता धन्योऽहं प्रांगणेऽद्य मे ॥१००॥
अपुनरावर्तनाश्च मुक्तास्त्वक्षरवासिनः ।
कोटिशः कृष्णपत्न्यश्च स्थावरं जंगमं तथा ॥१०१॥
सर्वं दिव्यं सत्त्वकुलं धन्योऽहं प्रांगणेऽद्य मे ।
ब्रह्मपुत्राः प्रपौत्राश्च वंशजा ये न लोकिताः ॥१०२॥
ते सर्वे मद्गृहेऽद्यैव धन्या कन्या च मे प्रभो ! ।
अहो कल्पान्तपर्यन्तं तीर्थीभूतो ममाऽऽश्रमः ॥१०३॥
येषां पादोदकैस्तीर्थं विशुद्धं तद्गृहं मम ।
पृथिव्यां यानि तीर्थानि तानि सर्वाणि सागरे ॥१०४॥

सागरे यानि तीर्थानि तानि सतां पदेषु वै ।
सतां पादोदकक्लिन्ना यावत् तिष्ठति मेदिनी ॥१०५॥
तावद्देवाश्च पितरस्तृप्ता भवन्ति वै भुवि ।
निकृन्तनं तु विपदां सम्पदां संप्रदं तथा ॥१०६॥
व्याधीनां नाशकं मायारोगहारकमौषधम् ।
सुखदं शुभदं सारं देवर्षिचरणाऽमृतम् ॥१०७॥
कृष्णनारायणस्याऽद्य प्राप्स्येऽहं चरणामृतम् ।
न रेवासदृशं तीर्थं न देवः केशवात्परः ॥१०८॥
स एव भगवानद्य साक्षात् कृष्णो मम गृहे ।
इत्युक्त्वा दण्डवत् कृत्वा तुष्टाव भृगुरच्युतम् ॥१०९॥
'तवाऽस्म्यहं मे सुसुताऽस्ति ते प्रभो !
भवान्ममाऽस्त्येव मदीयकं तव ।
सर्वं भवानेव ममाऽस्ति कारणं,
परं पदं देहि 'पुनातु जीवनम्' ॥११०॥
ननाम पादयोश्चापि कृत्वा कृष्णकरौ स्वके ।
पाद्यं पद्मार्चिते पादपद्मे भृगुर्मुदा ददौ ॥१११॥
अर्घ्यं च प्रददौ दूर्वापुष्पाक्षितजलान्वितम् ।
मधुपर्कं च सुरभिं सर्वांगे गन्धचन्दनम् ॥११२॥
पारिजातादिमालां च जामातुस्तु गले ददौ ।
वरणार्थं प्रकोष्ठे च भूषां कामफलं ददौ ॥११३॥
द्योतितरत्नमुकुटं ददौ कृष्णस्य मस्तके ।
धूपं रत्नप्रदीपं च नैवेद्यं सुमनोहरम् ॥११४॥
नानाप्रकारपुष्पाणि रत्नसिंहासनं ददौ ।
सप्ततीर्थोदकं तस्मै ददावाचमनीयकम् ॥११५॥
ताम्बूलं च वरं मिष्टं कर्पूरादिसुवासितम् ।
शय्या रतिकरीं रम्यां पानार्थं वासितं जलम् ॥११६॥
एवं वै वरणं कृत्वा ददौ पुष्पांजलिं मुदा ।
अथ वै मण्डपे वेदीसन्निधौ श्रीनरायणम् ॥११७॥
आनयामास पूर्णायां पूर्णे चन्द्रेऽम्बरं गते ।
लोकाचारं विधाप्यैव माणिक्यस्तंभमार्चयत् ॥११८॥
कलशं च गणेशं च वह्निं नत्वा गुरुं हरिः ।
निषसादाऽऽसने रम्ये पङ्कके कृतमंगलः ॥११९॥
ब्राह्मणैर्वेदमन्त्रैश्च देवैरीशैस्तथाऽऽत्मभिः ।
आशीर्वादे प्रदत्ते च कृतचन्द्रे हरौ ततः ॥१२०॥
भृगुः सम्पूज्य पुत्रीशं देहशुद्धिमकारयत् ।
वेदघोषाः स्वस्तिमन्त्रा गीतयो योषितां तथा ॥१२१॥

वाद्यघोषास्तथा तत्राऽभवन् विचित्ररीतयः ।
महोत्सवस्तदा जातो भृग्वानन्दो न निर्ममौ ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये शुक्लतीर्थाद् भृगुपत्तनं प्रति वरस्य वरातिकाजनैः सह यात्रा, मंगलादिसत्काराः भृगोर्हर्षवाक्यानि वरस्य मण्डपागमश्चेत्यादिनिरूपणनामा त्र्यशीत्यधिकत्रिशततमोऽध्यायः ॥३८३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कृष्णनारायणसकाशतस्तु यत् ।
वस्त्रभूषादिकं दिव्यमर्पितं तु वधूकृते ॥ १ ॥
ब्रह्मधाम्नो विभूतेर्वै सर्वं वस्त्रविभूषणम् ।
तत्सर्वं सन्दधारेयं भार्गवी दिव्यरूपिणी ॥ २ ॥
भूषयांचक्रिरे लक्ष्मीः श्रीः सावित्रीरमादिकाः ।
पार्वती माणिकी जया प्रभा च ललितादिकाः ॥ ३ ॥
ख्यात्याद्या मातरश्चापि तामलंचक्रुरादरात् ।
विभूषिताऽत्यलंकृता शुशुभे दिव्यतायुता ॥ ४ ॥
वह्निशुद्धांशुकाधाना कबरीभारभूषिता ।
कस्तूरीबिन्दुभिर्युक्ता स्निग्धसच्चन्दनार्चिता ॥ ५ ॥
सिन्दूरबिन्दुना शश्वद्भालमध्यस्थलोज्ज्वला ।
तप्तकांचनवर्णाभा कोटिचन्द्रसमप्रभा ॥ ६ ॥
चन्द्रमोक्षितसर्वांगा मालतीमाल्यशोभिता ।
नेत्रयो रञ्जितकृष्णा पक्वबिम्बौष्ठसुन्दरी ॥ ७ ॥
नागरंगस्तनी स्वर्णवर्णांगुलिकरद्वया ।
सूक्ष्मरोमावलीराजत्तत्स्थलीमनोहरा ॥ ८ ॥
लक्ष्मीस्थदिव्यचिह्नानां रेखाभिर्ज्ञातपद्मजा ।
अलक्ताञ्चितपादाब्जतला कमलवत्करा ॥ ९ ॥
आनीता मण्डपे वेदीसन्निधौ वरमालया ।
रत्नहीरकस्वर्णादिकुसुमादिसुवल्लसया ॥१०॥
करयोर्धृतया स्त्रीभिः शोभिता वरसन्निधौ ।
कृष्णनारायणं नत्वा वह्निं नत्वा च देवताः ॥११॥
स्थिरीकृता सव्यपार्श्वे जयशब्दो ह्यभूत्तदा ।
वाद्यानि च विचित्राणि वादयन्ति स्म तन्महे ॥१२॥
दृश्यमाणा सस्मिता सा कृष्णनारायणाननम् ।
प्रणम्य स्वपतिं लक्ष्मीः पुष्पाञ्जलिमवाकिरत् ॥१३॥
कृष्णस्य मूर्धनि भालेऽक्षतकुंकुमचन्द्रकम् ।
तिलकं चान्दनं चक्रे सुगन्धजलमार्पयत् ॥१४॥
वरमालां कृष्णगले दत्वा ननाम पादयोः ।
तीर्थजलेन चांगुष्ठं प्रक्षाल्य त्वपिबज्जलम् ॥१५॥
सप्तप्रदक्षिणाः कृत्वा प्रणम्य स्वपतिं पुनः ।
सिषेच पल्लवैस्तीर्थजलं चन्दनमिश्रितम् ॥१६॥
अथ नत्वा वामपार्श्वे निषसाद सती यदा ।
तां सिषेच जगत्कान्तः कान्तां शान्तां सुसुस्मिताम् ॥१७॥
साक्षतं चन्द्रकं तस्या भाले कृत्वा स्वयं प्रभुः ।
मस्तके च करौ दत्वा पुष्पाण्यवाकिरद्धरिः ॥१८॥
तदा पुरोहितो बृहस्पतिर्मालां गलस्थिताम् ।
नारदस्य समक्षं वै वधूकण्ठेऽप्यधापयत् ॥१९॥
वरमालान्विता लक्ष्मीः शुशुभे मेघवैद्युती ।
अथ मन्त्रास्तदा तत्र प्रावर्तन्तर्षिमण्डलात् ॥२०॥
भृगुस्तत्र सुताहस्तं कृष्णहस्ते ददौ शुभम् ।
एवं भृगुः प्रदानेन वेदमन्त्रेण वै ददौ ॥२१॥
बृहस्पतेः कथनेन स्वस्तीत्याह हरिस्तदा ।
जग्राह लक्ष्मीं श्रीकृष्णनारायणः प्रियां स्वकाम् ॥२२॥
अथ दानानि रत्नानां द्रव्याणां च गवां तथा ।
गृहाणां भवनानां च ब्रह्माण्डानामपि प्रभुः ॥२३॥
भृगुश्चापि ददौ तत्र ददौ नारायणोऽपि च ।
भृगुः पुत्र्यै भृगुकच्छं पत्तनं प्रददौ तदा ॥२४॥
भूमा च भृगवे मोक्षदानं ज्योतिःप्रवेदनम् ।
त्रिकालाऽबाध्यविज्ञानं चार्पयत् करुणाकरः ॥२५॥
हस्त्यश्वयानवाहानां दानान्यपि ददौ तदा ।
यौतकं हस्तके द्रव्यं वध्वै वराय संददुः ॥२६॥
अवतारा ईश्वराश्च मुनयः पितरस्तथा ।
देवाश्च मानवा भौमाः पातालस्था यथायथम् ॥२७॥
येषां वै यादृशी स्मृद्धिस्तद्योग्यं दानमाचरन् ।
अथाग्निं संप्रदक्षिणीकृत्य वारचतुष्टयम् ॥२८॥
दंपती संस्थितौ वह्निसान्निध्ये च नतौ पुनः ।
निषेदतुस्ततो होमं चक्रतुस्तौ घृतादिभिः ॥२९॥
अंगुलीयकमेवाऽस्यै वध्वै ददौ हरिस्तदा ।
अंगुल्यग्रेषु धृत्वा सा भोज्यकवलमार्पयत् ॥३०॥
कृष्णाय, तस्यै कृष्णोऽपि भोज्यकवलमार्पयत् ।
ऊर्मिकयाक्षणं रन्त्वा निवृत्तौ तौ प्रमोदितौ ॥३१॥
स्वेदाक्तौ तु करौ लक्ष्म्याश्चाथ नारायणस्य तौ ।
पुलकांकितरोमाणौ प्रकोष्ठयोर्बभूवतुः ॥३२॥
लग्नग्रन्थियुतौ तौ च वह्निं नत्वा गुरुं तथा ।
देवताश्च तदा नत्वा निर्यातौ मण्डपात् तदा ॥३३॥

ख्यात्यादिभिर्भोजितो तौ विश्रान्तौ रहसि क्षणम् ।
अथ हस्त्यादिभिः पूर्यां सर्वत्र भ्रामितौ मुदा ॥३४॥
पूजितौ तौ प्रजाभिश्च वन्दितौ पितरौ जनैः ।
लग्नग्रन्थिं नर्मदायां निर्ग्रन्थिं संविधाय च ॥३५॥
भार्गवीजननी ख्यातिरीशानीभिः क्रियादिभिः ।
पतिपुत्रवतीभिश्च साध्वीभिः सहिता मुदा ॥३६॥
आगत्यं मंगलं कृत्वा कुंकुमक्षालनादिकम् ।
दम्पतीं वेशयामास रत्ननिर्माणमन्दिरम् ॥३७॥
अनेकचित्रकृच्छोभं हीरहारेण भूषितम् ।
मुक्तामाणिक्यरत्नैश्च सुदीप्तं दर्पणैस्तथा ॥३८॥
तत्र नारायणः कृष्णो ददर्श देवयोषितः ।
ईश्वरयोषितश्चापि मुक्तानिश्च रमादिकाः ॥३९॥
मुनिपत्नीश्च याः सर्वाः पातिव्रत्यपरायणाः ।
रत्नसिंहासनस्थास्ता रत्नभूषणभूषिताः ॥४०॥
ता अपि श्रीकृष्णनारायणं दृष्ट्वा च सत्परम् ।
उत्तस्थुर्वासयामासू रत्नसिंहासने मुदा ॥४१॥
स्तुतिं चक्रुर्मुनिपत्न्यो नर्म चक्रुः सखीजनाः ।
ख्यातिः संभोजयामास वरेण सह कन्यकाम् ॥४२॥
सकर्पूरं सताम्बूलं प्रददौ वासितं जलम् ।
शारदा च ददौ कृष्णहस्ते श्लोकादिपत्रिकाम् ॥४३॥
सर्वासामाज्ञया देवी पठेति तमुवाच सा ।
पपाठ पत्रिकां कृष्णनारायणोऽतिहर्षितः ॥४४॥
"लक्ष्मीः सरस्वती दुर्गा सावित्री राधिका रमा ।
सती मेना जया ख्यातिर्माणकी पार्वती प्रभा ॥४५॥
तुलसी पृथिवी वृन्दाऽरुन्धती यमुनाऽदितिः ।
गंगा सीता शतरूपा देवहुतिश्च नर्मदा ॥४६॥
देव्यश्चैता वरवध्वोः कुर्वन्तु मंगलं परम्" ।
पपाठ चेति श्रीकृष्णः शुश्रुवुर्जहसुश्च ताः ॥४७॥
नवं तु यौवनं कान्तो नवः कान्ता नवा तथा ।
विदग्धाया विदग्धेन संगमोऽस्तु नवो नवः ॥४८॥
प्रौढा रूपवती पुष्टा युवा वीर्यभरो बली ।
योगे बलाबले चाऽद्य शास्यामः कस्य वै जयः ॥४९॥
राधा रमा तथाऽन्याश्च तव सन्ति सुयोषितः ।
भार्गवी कीदृशी रम्या रहश्चास्ति वदात्र नः ॥५०॥
इति क्षणं वरतुष्ट्यै जहसुः सर्वयोषितः ।
लोपामुद्राऽनसूया चाऽप्यहल्याऽरुन्धती तथा ॥५१॥
कंभरा ता मुनिपत्न्यो रमसं चक्रुरीश्वरम् ।
अथमुक्तानीश्वरांश्च देवान् स्थावरजंगमान् ॥५२॥
पूजयामास च भृगुर्भोजयामास चादरात् ।
खाद्यतां खाद्यतां मिष्टं दीयतां दीयतामिति ॥५३॥
शब्दो बभूव नगरे वाद्यसंगीतमंगलैः ।
अथ प्रभाते त्वरिताः सज्जा बभूवुरीश्वराः ॥५४॥
कारयामास यात्रां च नारायणं च भार्गवीम् ।
ख्यातिः रुरोद पुत्रीं स्वां कृत्वा वक्षसि वै क्षणम् ॥५५॥
पुत्रि ! वत्से ! विना त्वां वै कथं जीवामि दुःखिनी ।
वद नारायणं शश्वन् निवासार्थे भृगोर्गृहे ॥५६॥
जायापतिभ्यां दत्तं वै यौतकं भृगुपत्तनम् ।
अत्र द्वितीयरूपेण नारायणं निवासय ॥५७॥
लक्ष्मीः पतिव्रता नैवं चक्रे नियोगमच्युते ।
सजला नेत्रयोर्जाता कृष्णनारायणस्तदा ॥५८॥
लक्ष्मीं प्राह कथं सुभ्रु जाता सजललोचना ।
यथा श्वश्रूर्वदत्येवं करोम्येव वसाम्यहम् ॥५९॥
इत्युक्त्वा श्रीकृष्णनारायणो द्वेधा बभूव ह ।
भार्गवीसहितस्तत्र भृगोर्गेहेऽवसत् सदा ॥६०॥
द्वितीयं दम्पतीरूपं कोटियौतकसंभृतम् ।
असंख्यवाहिनीसंघैः शुक्लतीर्थं ययौ तदा ॥६१॥
प्रविश्य भवनं रम्यं कारयामास मंगलम् ।
भूमा नारायणो वाद्यं वादयामास सुन्दरम् ॥६२॥
सर्वा देव्यश्च मुक्तान्यस्तथाऽन्या योषितो हरेः ।
भार्गवीं श्रीकृष्णनारायणं विलोक्य वै मुहुः ॥६३॥
गृहं प्रवेशयामासुश्चक्रिरे मंगलानि हि ।
चतुर्विधं भोजयित्वा त्रिसृष्टिवासिनो जनान् ॥६४॥
महीमानान् रंजयित्वा परिहारं प्रचक्रिरे ।
भूमा सैन्यानि चादाय धामधामनिवासिनाम् ॥६५॥
ययौ वैकुण्ठमेवाऽऽद्य दम्पतीसहितस्तदा ।
महीमानाः स्वकान् लोकान् ययुर्धनप्रपूरिताः ॥६६॥
पृथ्वीजलादयश्चक्रुः क्लृप्तवैकुण्ठनाशनम् ।
भृगोर्गृहे महीमानाः भोजिताः पूजिताश्च ते ॥६७॥
ययुः सत्कारमादाय दिव्यरत्नादिसंभृताः ।
भृगुक्लृप्तमासमुद्रं महीमाननिवासनम् ॥६८॥
संहृतं क्षणमात्रेण भृगुणा सिद्धिभिस्तदा ।
कंभरा च महालक्ष्मीः कृष्णगोपाल एव तौ ॥६९॥
पितरौ पुत्रसान्निध्ये निवासं भृगुपत्तने ।
चक्रतुर्भार्गवीकृष्णनारायणस्य तुष्टये ॥७०॥
दिव्यदेहौ च पितरौ दम्पतीसविधे सदा ।
यथा ख्यातिभृगू पूज्यौ वर्तेते भृगुपत्तने ॥७१॥

भार्गवी श्रीकृष्णनारायणं प्राप्य रहः सदा ।
सेवते विविधैः कामैः पातिव्रत्यपरायणा ॥७२॥
कथं न स्मरसि लक्ष्मि ! त्वं जाता भार्गवी तदा ।
अहं जातः कृष्णनारायणः स्मरामि लग्नकम् ॥७३॥
त्वादृशी मे सदा दासी पत्नी भोग्या च किंकरी ।
सखी सह्या सहवासा सुरक्षिका पतिव्रता ॥७४॥
नाऽपरा मे सुखकर्त्री शान्ता सौभाग्यशालिनी ।
हृत्स्था रेखात्मिका गौरात्मिका श्रीवत्सविग्रहा ॥७५॥
अहं त्वं च त्वमेवाऽहं न भेदोऽस्ति मनागपि ।
इति ते कथितं लक्ष्मि ! बहुभाग्यवती भव ॥७६॥
पठनाच्छ्रवणाच्चास्य स्वर्गो मोक्षः फलं भवेत् ।
नारीणां श्रीकृष्णनारायणप्राप्तिर्भवेत् ॥७७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये भार्गव्या मण्डपानयनं कन्यादानविधिर्विवाहोत्तरं महीमानानां वरस्य च यात्रा, कृत्रिमवैकुण्ठादिविलयनम्, जामातुर्भूगृहे द्वितीयरूपेण वासश्चेत्यादिनिरूपणनामा चतुरशीत्यधिकत्रिशततमोऽध्यायः ॥ ३८४ ॥

श्रीनारायण उवाच—

मन्नाम्नां त्वं कीदृगर्थान् सुजानासि पतिव्रते ! ।
वद मां येन तुष्यामि ज्ञात्वा ते ज्ञानमुत्तमम् ॥ १ ॥
इत्युक्ता भार्गवी सा त्वं व्युत्पत्तिं प्रचकर्थ ह ।
कृषिर्भूवाचकः शब्दः णश्च निर्वृत्तिवाचकः ॥ २ ॥
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ।
दुःखानां कर्षणाद् धाम्नि नयनात् कृष्ण उच्यते ॥ ३ ॥
राशब्दः संपदां नाम मो मानं प्रोच्यते सदा ।
सम्पत्प्रमाणदः कृष्णो रामनामा समुच्यते ॥ ४ ॥
रमते रमया सार्धं तेन रामः समुच्यते ।
रमाया रमणस्थानं रामः कृष्णः स उच्यते ॥ ५ ॥
नरात्मनां समुदायेऽयनं संवासमेव यः ।
करोत्ययं प्रभुर्नारायणः कृष्णः स उच्यते ॥ ६ ॥
नारा पापानि वै तेषां चाऽयं नाशो यतो भवेत् ।
नारायणः स एवाऽस्ति कृष्णनारायणः प्रभुः ॥ ७ ॥
नारा जलानि तत्राऽऽस्ते तेन नारायणः स हि ।
नारा तु भार्गवी लक्ष्मीस्तयाऽयनं करोति यः ॥ ८ ॥
कृषिश्च प्रेम तन्नेता कृष्णनारायणः स वै ।
भवान् मम पतिः श्रीश्रीकृष्णनारायणो हरिः ॥ ९ ॥
हरसि भक्तदुःखानि हरिस्त्वं भगवान् स्वयम् ।
षडैश्वर्यसमेतस्त्वं भगवान् प्रोच्यते सदा ॥१०॥
भगं भक्तस्तदस्यास्ति भगवाँस्त्वं ततो मतः ।
अंकुरो भक्तिवृक्षस्य भक्तसंगेन वर्धते ॥११॥
तथा हरिकथालापपीयूषसेचनेन च ।
अभक्तालापदीपाग्निज्वालायाः कलयाऽपि तु ॥१२॥
अंकुरः शुष्कतां याति भक्तसेकेन वर्धते ।
तस्मादभक्तसंघं वै सावधाना त्यजामि वै ॥१३॥
कृषिसत्कृष्टवचनो णश्च सद्भक्तिबोधकः ।
अश्चापि दातृवचनः कृष्णस्त्वं प्रोच्यसेऽपि च ॥१४॥
कृषिश्च परमानन्दे णश्च तद्दास्यकर्मणि ।
तयोर्दाता भवान् कृष्णः कृष्णदासी च भार्गवी ॥१५॥
कृषिः क्लेशस्तस्य नाशात् कृष्णस्त्वयि प्रवर्तते ।
जलं भित्त्वा यथा पद्मं तथा भक्तस्त्वदाश्रयात् ॥१६॥
उद्धरति कृष्णनारायणनाम्ना भवार्णवात् ।
श्रिया त्वं श्रीकृष्णनारायणो युक्तोऽसि वै मया ॥१७॥
मम भाग्यं महन्मन्ये तव योगात्परेश्वर ।
धन्या सा कंभरालक्ष्मीर्धन्यो गोपालकृष्णकः ॥१८॥
यद्गृहे श्रीकृष्णनारायणस्त्वं वर्तसे सदा ।
यद्वाचि श्रीकृष्णनारायणनाम प्रवर्तते ॥१९॥
भस्मीभवन्ति वै तस्य महापातककोटयः ।
दिव्यो भूत्वा महामुक्तो जायते न पुनर्भवः ॥२०॥
सर्वेषामपि यज्ञानां लक्षाणि च व्रतानि च ।
तीर्थस्नानानि सर्वाणि तपांस्यनशनानि च ॥२१॥
वेदपाठसहस्राणि प्रादक्षिण्यं भुवः शतम् ।
कृष्णनारायणनाम्नः कलां नार्हन्ति षोडशीम् ॥२२॥
मा च ब्राह्मी वैष्णवी श्रीर्नारायणी सनातनी ।
महालक्ष्मीर्भार्गवी च तासां स्वामी च माधवः ॥२३॥
त्वयि सर्वेश्वरे भक्तिस्त्वद्दास्यं मे सदाऽस्तु वै ।
तव नाम्नां भजनं च सर्वदाऽस्तु च मे हृदि ॥२४॥
देहेन मनसा वाचा क्रियया सर्वकर्मभिः ।
तवैव सेवनं नाथ ! वाञ्छितं मे सदाऽस्तु तत् ॥२५॥
तपस्तप्तं तदर्थं वै सेविष्ये मत्प्रियं पतिम् ।
आनन्दं च त्वया दत्तं भोक्ष्ये शाश्वतमेव च ॥२६॥
इत्युक्त्वा भार्गवी लक्ष्मि ! विरराम हरेः पुरः ।
तावत्सख्यः समायाता भूषयितुं तु भार्गवीम् ॥२७॥
कृष्णनारायणो ज्ञात्वाऽवसरं चोत्थितस्तदा ।
नर्मदायास्तटं यातो विहारार्थं वयस्यकैः ॥२८॥

तावत्तत्र दिव्यरूपाः सर्वा नारायणप्रियाः ।
रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ॥२९॥
कृष्णपत्नी प्रभादेवी रत्नमालां गले ददौ ।
पार्वती दक्षिणे हस्ते क्रीडापद्मं ददौ शुभम् ॥३०॥
पद्मा तस्या ददौ पादपद्मयुग्मेऽप्यलक्तकम् ।
प्रददौ माणिकी पत्नी सिन्दूरं सुन्दरं वरम् ॥३१॥
चन्दनेन समायुक्तं सीमन्ताऽधस्तलोज्ज्वलम् ।
सुचारुकबरीं रम्यां चकार मंगला प्रिया ॥३२॥
मनोहरां मुनीनां च मालतीमाल्यभूषिताम् ।
स्थलपद्मदलपुष्पग्रथितं धम्मिलं व्यधात् ॥३३॥
कस्तूरीकुंकुमाक्तं च चारुचन्दनपत्रकम् ।
स्तनयुग्मे सुकठिने चकार ललिता प्रिया ॥३४॥
चारुचम्पकपुष्पाणां मालां गन्धमनोहराम् ।
सुधासखी ददौ तस्यै प्रफुल्लां नवमल्लिकाम् ॥३५॥
जया रत्यां सुरसिका रत्नभूषणभूषिताम् ।
तां चकाराऽतिरसिकां वरां रतिरसोत्सुकाम् ॥३६॥
शरत्पद्मदलप्रभं च लोचनं कज्जलोज्ज्वलम् ।
कृत्वा ददौ सुललितं पाञ्चाली चाम्बरं नवम् ॥३७॥
विजया पारिजातानां कुसुमानि करे ददौ ।
अमृता च सखी तैलं सुगन्धं प्रददौ तनौ ॥३८॥
रतिः श्रृंगारविषयं स्मारयामास राजसम् ।
सुधोपमं सुमधुरं वचनादि प्ररञ्जकम् ॥३९॥
कमलानां चम्पकानां दले चन्दनचर्चिते ।
चकार रतितल्पं च कमला चाशु कोमलम् ॥४०॥
चारु चम्पकपुष्पाणि स्थलाब्जानां दलानि च ।
चकार चन्दनाक्तानि कृष्णार्थे शारदा प्रिया ॥४१॥
केलिकदम्बपुष्पाणां स्तबकं च मनोहरम् ।
तथा माला कदम्बानां श्रीः कृष्णार्थे चकार ह ॥४२॥
ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् ।
कृष्णा चकार कृष्णार्थं ददौ तस्यै तथाऽपरम् ॥४३॥
कर्णयोर्भूषणे मेना धन्या ललाटभूषणम् ।
कलावती तु भार्गव्यै ददौ नासाविभूषणम् ॥४४॥
सिद्धिस्तस्यै ददौ गन्धसारं चोष्ठप्ररंजनम् ।
बुद्धिर्ददौ तु भार्गव्यै गण्डबिन्दुं मनोहरम् ॥४५॥
हरेर्वसुमती पत्नी रत्नहारान् गले ददौ ।
मूर्तिश्चास्यै ददौ रम्यां कंचुकीं कांचनप्रभाम् ॥४६॥
सावित्री च ददौ यज्ञोपवीतं कांचनं वरम् ।
प्रेयसी च ददौ त्वस्यास्तनयोश्चन्दनं शुभम् ॥४७॥
श्रेयसी च ददौ कट्यां रशनां स्वर्णनिर्मिताम् ।
ऋतम्भरा ददौ त्वस्यै प्रकोष्ठश्रृंखलां शुभाम् ॥४८॥
भूरिश्रृङ्गाददावस्यै भुजयोः कटके वरे ।
राध्यासा प्रददौ तन्त्रीं ललाटफलके तदा ॥४९॥
संज्ञा कण्ठीं सुवर्णस्य मुद्रमालात्मिकां ददौ ।
यतिनी प्रददौ चास्यै यवमालां सुशोभिताम् ॥५०॥
अरुणा प्रददौ शाटीं सूर्यवर्णां सुवर्णजाम् ।
अरुन्धती ददौ तस्यै स्वर्णोर्मिकादशद्वयम् ॥५१॥
मिश्रादेवी योगपट्टं ददौ सुवर्णनिर्मितम् ।
कंभरा प्रददौ रम्यं दर्पणं व्यजनं शुभम् ॥५२॥
सुवर्णा प्रददौ त्वस्यै स्वर्णघर्घरिकां शुभाम् ।
विकुण्ठा प्रददौ तस्यै नूपुरे कानके तदा ॥५३॥
नखरंगं ददौ बभ्री ज्योष्ट्री नेत्रप्रकज्जलम् ।
वार्क्षी धूपं सुगन्धं च पुष्पा गन्धजलं ददौ ॥५४॥
सुदुघा च ददौ दुग्धवटिकां पुष्टिदायिनीम् ।
तुलसी स्तंभनरसमपाययत्तु भार्गवीम् ॥५५॥
सरस्वती ददौ तस्याः पादयोः समलक्तकम् ।
चम्पा च मञ्जुला रामा दया शान्ता जयाऽनिला ॥५६॥
शान्तिर्हैमी च रत्ना च मुक्ता देवी च पानिका ।
मौक्तिकाऽऽमोदिका कान्तिः शिवा मणिश्च वै दमी ॥५७॥
इत्याद्या भगवत्पत्न्यो विदधुस्तामलंकृताम् ।
एवं श्रृंगारसम्पन्नां कृत्वा सख्योऽप्यरंजयन् ॥५८॥
परस्परं च विधिना भगवत्तोषहेतवे ।
प्रतीक्षन्ते त्वागमनं कृष्णनारायणस्य ताः ॥५९॥
अन्तर्यामी हरिर्ज्ञात्वा विहाय नर्मदातटम् ।
समाययौ भवनाग्रे कदम्बद्रुमसन्निधौ ॥६०॥
दौवारिककृतं शब्दं जयं श्रुत्वा सखीजनः ।
सत्कारार्थं भगवतो द्रागेव बहिराययौ ॥६१॥
पाद्यं चार्घ्यं जलं दत्वा पेयं दत्वा सुमिष्टकम् ।
निनाय श्रीकृष्णनारायणं वै भार्गवीशयम् ॥६२॥
ताश्च सर्वा विमुच्यैव नत्वा कृष्णनरायणम् ।
ययुर्गृहान्तराण्येव रहो दत्वा वधूं वरम् ॥६३॥
पातिव्रत्येन धर्मेण सिषेवे भार्गवी मुदा ।
कृष्णनारायणः पत्नीं ददर्श स्थिरचक्षुषा ॥६४॥
श्वेतचम्पकवर्णाभामतुलां सुमनोहराम् ।
श्रृंगारितां सखीभिर्वै स्वस्यार्थं मोहिनीं कृताम् ॥६५॥
सुकेशीं सुन्दरीं श्यामां स्तनयुग्मोन्नताननाम् ।
नितम्बकठिनश्रोणीं सस्मितां सुदतीं सतीम् ॥६६॥

कोटीन्दूज्ज्वलकान्त्यास्यां शरत्कमललोचनाम् ।
कज्जलोज्ज्वलनेत्रां च स्वर्णभूषाविभूषिताम् ॥६७॥
चित्रालितनुसद्रूपां कामपूर्णसुविग्रहाम् ।
रसिकां सोत्सुकां कृष्णनारायणाङ्कमानसाम् ॥६८॥
वह्निशुद्धांशुकाधानां रतिवेगभरान्तराम् ।
चारुकुण्डलयुग्मेन श्रुतिगण्डस्थलोज्ज्वलाम् ॥६९॥
सुनासास्वर्णनालां च गजमुक्तासुमालिकाम् ।
कुंकुमालक्तकस्तूरीस्निग्धचन्दनचर्चिताम् ॥७०॥
खगेन्द्रचञ्चुसन्नासां कोमलांगीं सुकामुकीम् ।
दधानां सुकपोलौ च कमनीयां करेणुगाम् ॥७१॥
कामकाम्यालयां तन्वीं कटाक्षानंगदर्शिनीम् ।
पारिजातप्रसूनानि दधानां क्रीडनाय वै ॥७२॥
कर्मणा मनसा वाचा स्वप्ने जागरणे तथा ।
कृष्णनारायणप्रीतिस्मृत्याढ्यां प्रेमसंभृताम् ॥७३॥
भावानुभावनासक्तां शुद्धभक्तां पतिव्रताम् ।
गौरवर्णां रक्तपूर्णां शश्वद्वक्षःस्थलस्थिताम् ॥७४॥
प्रियासु प्रियभक्तेषु भक्तासु प्रियवादिनीम् ।
दृष्ट्वा तु भार्गवीं कृष्णनारायणो मुमोह वै ॥७५॥
भार्गवी शयने दृष्ट्वा स्वामिनं प्राणवल्लभा ।
कामपूर्णं शुभवेषं सुन्दरेशं च सस्मितम् ॥७६॥
नवीनजलदश्यामं पीतकौशेयवाससम् ।
चन्दनोक्षितसर्वांगं रत्नभूषणभूषितम् ॥७७॥
स्वर्णसत्कल्गिमुकुटं मालतीमाल्यशोभितम् ।
ईषद्धास्यप्रसन्नाऽऽस्यं भक्तानुग्रहविग्रहम् ॥७८॥
रन्तुकामं मनःकान्तं कामकान्तं पतिं प्रियम् ।
जवेन वक्षसि कृत्वा प्रोवाच परमेश्वरम् ॥७९॥
जातं मे सफलं जन्म यस्या मे ईदृशः पतिः ।
सुजीवितं जीवितं मे यस्याः कान्तो नरायणः ॥८०॥
दृष्ट्वा ते मुखचन्द्रं मे सुस्निग्धं लोचनं मनः ।
पञ्चप्राणा द्रविताश्च हर्षो माति न मे तनौ ॥८१॥
त्वद्दृष्ट्याऽमृतवृष्ट्या च सुसिक्ताऽऽनन्दसम्मुखी ।
विरहः स्वामिनो नाथ ! दावानलः सुदारुणः ॥८२॥
इत्युक्त्वा भार्गवी लक्ष्मीः कृष्णनारायणं पतिम् ।
स्वासने स्थापयामास चक्रे पादादिमर्दनम् ॥८३॥
सुगन्धं जलसारं च तैलसारं च दर्पणम् ।
ताम्बूलं जलपानं च पुष्पहारान् सुचन्दनम् ॥८४॥
मधु भोज्यं फलं मिष्टं चानंगवल्लगूटिकाम् ।
सुधां ददौ कृष्णनारायणाय स्वां ददौ ततः ॥८५॥
सफलीकृतवान् स्वामी पुष्पशय्यां मनोहराम् ।
भार्गवीं सफलीचक्रे नवोढां रतिमन्दिराम् ॥८६॥
सस्मिता सस्मितं कान्तं शान्तं कान्तमनोहरा ।
तल्पे सर्वात्मना लक्ष्मीः सिषेवे सुखमूर्छिता ॥८७॥
सन्तुष्टा भार्गवी कान्तं सन्तुष्टं प्राह धर्मतः ।
सा स्त्री भावानुरक्ता या, यः पाति स्त्रीं पतिश्च सः ॥८८॥
प्रेमसौख्यं पतिपत्न्योर्धर्मतः खलु दुर्लभम् ।
पतिव्रता विजानाति रसिका गुणवत्पतिम् ॥८९॥
दूराद्धावति पद्मार्थे मधुलोभान्मधुव्रतः ।
भेकस्तत्रहि जानाति तन्मूर्ध्नि पादमुत्सृजेत् ॥९०॥
यन्त्री जानाति संगीतरसं यन्त्रं तु नैव हि ।
दुग्धस्वादं क्षुधितश्च न दर्वी नैव भाजनम् ॥९१॥
परिपक्वफलाऽऽस्वादं सुखं जानन्ति भोगिनः ।
एकत्राऽवस्थिताः शश्वन्न किंचित् फलिनो यथा ॥९२॥
सुशीतलजलाऽऽस्वादं विजानन्ति कृषीवलाः ।
न वापी न च कलशश्चैकत्राऽवस्थितो यथा ॥९३॥
भोगिनो हि विजानन्ति शालिस्वादुरसं परम् ।
एकत्राऽवस्थितं चापि न क्षेत्रं भाजनं न वा ॥९४॥
बुबुधे चन्दनाऽऽघ्राणं चन्दनार्थी न गर्दभः ।
सौभाग्यं गौरवं प्रेम दुर्लभं नित्यनूतनम् ॥९५॥
पतिव्रता विजानाति सुलभं पतिसेवनात् ।
पत्नीव्रतः पतिश्चापि प्राप्नोति सुलभं हि तत् ॥९६॥
तव सेवाप्रदं मेऽस्तु पातिव्रत्यं त्वयि प्रभो ! ।
पत्नीव्रते कृष्णनारायणे नाथे वृणोम्यहम् ॥९७॥
तथाऽस्त्विति हरिः प्राह भार्गवीं पतिसेविकाम् ।
दर्शयामास रूपाणि यानि लक्ष्म्या भवन्ति वै ॥९८॥
पश्य त्वं भार्गवि ! ते तु धृतानि यत्र यानि वै ।
रूपाणि तु मया साकं पातिव्रत्येन तिष्ठसि ॥९९॥
अक्षरे ब्रह्मणि चाहं वर्तामि पुरुषोत्तमः ।
तत्राऽसि त्वं चिदानन्दाऽक्षररूपेण वर्तसे ॥१००॥
गोलोके गोकुले वृन्दावने त्वं राधिकाऽसि मे ।
द्विभुजो गोपवेषोऽहं कृष्णोऽस्मि राधिकापतिः ॥१०१॥
चतुर्भुजोऽहं वैकुण्ठे द्वेधा नारायणः सदा ।
लक्ष्मीः सरस्वती त्वं च मया कान्तेन वर्तसे ॥१०२॥
सिन्धुकन्या त्वं तु लक्ष्मीर्मर्त्यो लक्ष्मीपतिस्तदा ।
श्वेतद्वीपे च क्षीरोदे लक्ष्मीपतिश्चतुर्भुजः ॥१०३॥
अहं नारायणर्षिश्च नरो धर्मः सनातनः ।
शान्तिर्लक्ष्मीस्वरूपा त्वं मयि चासि पतिव्रता ॥१०४॥

अहं कपिलस्त्वं सिद्धिः सर्वत्रैवं प्रवर्तसे ।
अहं पत्नीव्रतस्त्वं च पतिव्रता प्रवर्तसे ॥१०५॥
वैकुण्ठे तु महालक्ष्मीर्भवती हि सरस्वती ।
भवती मृत्युलक्ष्मीश्च क्षीरोदशायिनः प्रिया ॥१०६॥
धर्मपुत्रवधूस्त्वं च शान्तिर्लक्ष्मीस्वरूपिणी ।
कपिलस्य प्रिया कान्ता भुवि त्वं भारती सती ॥१०७॥
त्वं सीता रामरूपस्य मम पत्नी प्रवर्तसे ।
भविष्यसि कृष्णरूपे रुक्मिणी त्वं प्रिया तदा ॥१०८॥
कंभरा त्वं महालक्ष्मीर्गोपालकृष्णभामिनी ।
एवं त्वं भार्गवी जाता कृष्णनारायणोऽस्म्यहम् ॥१०९॥
पद्मा त्वं च रमा त्वं च प्रभा त्वं पार्वती तथा ।
माणिकी त्वं जया त्वं च श्रीस्त्वं कृष्णा मम प्रिया ॥११०॥
हंसा च मंजुला चम्पा हैमी देवी रमा दया ।
मौक्तिका च जया शान्तिस्त्वं तद्रूपाधिदेवता ॥१११॥
यत्र यदा जनुं प्राप्ता वर्तसे मे प्रिया तदा ।
उद्वाहयित्वा संगृह्य नयामि त्वां मया सह ॥११२॥
नानारूपः सदा चास्मि स्वांशेन कलया च वा ।
त्वया सहितः सर्वत्र विराजे मत्प्रिये ! शुभे ! ॥११३॥
परिपूर्णतमश्चास्मि त्वं च पूर्णतमाऽसि वै ।
यत्र यादृग् भवेत् कार्यं तत्र यामि त्वया सह ॥११४॥
पतिव्रतासमा नान्या त्वया चान्या हि विद्यते ।
अतितुष्टोऽस्मि देवेशि ! चैकरूपेण वर्तसे ॥११५॥
यास्तवेमां पतिसेवां श्रोष्यन्ति भावतश्च ताः ।
पठिष्यन्ति च वा ता वै समवाप्स्यन्ति मां पतिम् ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये भार्गव्याः शृंगारः, श्रीकृष्णनारायणस्य सेवनम्, पातिव्रत्यपरायणताप्रदर्शनं चेत्यादिनिरूपणनामा पञ्चाशीत्यधिकत्रिततमोऽध्यायः ॥ ३८५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि कथामन्यां तु मोक्षदाम् ।
पतिव्रतायाः स्वपत्युरुद्धारकारिणीं शुभाम् ॥ १ ॥
देवर्षिपितृभूतानि यस्य निःश्वस्य वेश्मनि ।
प्रयान्त्यनर्चितान्येव न तस्मात्पापकृन्नरः ॥ २ ॥
हतं देवादिनिःश्वासैः शरीरं यस्य वेश्म च ।
भाग्यं तस्य हतं सर्वं नाशाय कल्पते हि सः ॥ ३ ॥
पत्न्या पूज्याः साधवश्च साध्व्यो वृद्धा जनास्तथा ।
पितरो देवताश्चातिथयः साध्या दिने दिने ॥ ४ ॥
पतिव्रतया स्वामिनो वै पुण्येन कर्मणा सदा ।
आयुष्यं वर्धनीयं च यज्ञाः कार्याः शुभावहाः ॥ ५ ॥
अनभ्यर्च्य ऋषीन् देवान् पितृभूताऽतिथींस्तथा ।
यो भुंक्ते स स्वकीयं सुकृतं नाशयति ध्रुवम् ॥ ६ ॥
श्रूयते च पुरा ख्यातो राजा शतधनुर्भुवि ।
पत्नी च तस्य शैब्याऽभूत् स्वामिधर्मपरायणा ॥ ७ ॥
पतिव्रता महाभागा सत्यशौचदयान्विता ।
वृद्धसेवापरा शान्ता नयेन विनयेन च ॥ ८ ॥
स तु राजा तया सार्धं कृष्णनारायणं हि माम् ।
विभुं त्वाराधयामास परमेण समाधिना ॥ ९ ॥
होमैर्जप्यैस्तथा दानैरुपवासैश्च भक्तितः ।
पूजाभिश्चानुदिवसं मन्मना नान्यमानसः ॥१०॥
एकदा तौ समं स्नातौ भार्यापती नदीजले ।
भागीरथ्याः समुत्तीर्णौ कार्तिक्यां समुपोषितौ ॥११॥
एकादश्या व्रतिनौ तौ द्वादश्यां प्रातरेव हि ।
भागीरथ्यां सस्नतुस्तौ गृहं समागतौ ततः ॥१२॥
पारणार्थं रन्धितान्नं व्यञ्जनं दधि दुग्धकम् ।
देवर्षिपितृभूतेभ्यश्चानर्घ्यं स्थालरक्षितम् ॥१३॥
शैब्या प्रतीक्षते वाटं ब्राह्मणस्याऽतिथेर्गुरोः ।
समागत्य गुरुर्विप्रो नाम्ना चापार्यकः स्वयम् ॥१४॥
वैश्वदेवं स्वयं कृत्वा ऋषिपितृगवार्पणम् ।
दास्यति नः प्रसादं तमत्स्यामः पारणात्मकम् ॥१५॥
तावत्प्राघूर्णिका राज्ञो गृहे तत्र समाययुः ।
तेषां वै सत्कृतौ राज्ञो राज्याश्च समयो गतः ॥१६॥
गुरुश्चापि समागत्य दृष्ट्वा प्राघूर्णिकान् बहून् ।
भार्यापती व्यवसायपरौ दृष्ट्वा क्षणान्तरे ॥१७॥
देवर्षिपितृभूतेभ्यश्चाऽनिवेद्यान्नवारि च ।
ययौ स्वीयं गृहं कालो मध्याह्नोत्तरतां गतः ॥१८॥
रन्धितान्नं तथैवाऽऽस्ते देवर्षिपितरश्च ये ।
समागताः क्षुधिताश्चाऽप्राप्य पूजां जलान्नकम् ॥१९॥
निराशाश्चातिरुष्टाश्च ययुः स्वस्थानमेव ते ।
पतिव्रता तु सा नारी पत्यौ ज्ञात्वा क्षुधाश्रितम् ॥२०॥
पतिं सा पारयामास भोजनं जलमादि च ।
पत्न्यर्थं तत् प्रसादान्नं पतिशिष्टमभूत्तदा ॥२१॥
पतिभुक्तं तु तत्पूर्वं नासीद् देवप्रसादजम् ।
तद्दोषेण पतिर्लिप्तः पत्नी लिप्ता न धर्मतः ॥२२॥
पत्यर्थं चाऽप्रसादान्नं पत्न्यर्थं तु प्रसादजम् ।
पत्युस्तद्दोषकृज्जातं पत्न्यास्तु पुण्यदं ह्यभूत् ॥२३॥

भोजयित्वा महीमानान् भुक्त्वा भार्यापती ततः ।
सस्मरतुर्गुरुं देवर्षिपितृपूजकं तदा ॥२४॥
ज्ञातवन्तौ च भुक्तान्नमभूद् देवाद्यनर्पितम् ।
विष्णोः पूजादिकं सर्वं कृतवन्तौ पराह्णके ॥२५॥
अथापि जातदोषस्य यावन्नाशो न विद्यते ।
तावद्भवति भोक्तव्यो भवे वा च भवान्तरे ॥२६॥
कालेन गच्छता राजा ममार ज्वरपीडितः ।
अन्वारुरोह तं पत्नी चितास्थं भूपतिं पतिम् ॥२७॥
सहयानेन तौ यातौ मार्गे स्वर्गस्य तत्क्षणम् ।
तावदम्बरमार्गस्थ पितरः क्रोधकारिणः ॥२८॥
अकस्माद् वै समागत्य विमानं ह्यवरोधयन् ।
क्रूरदृष्ट्या तु राजानं भालयामासुरम्बरे ॥२९॥
तावज्जायापति तस्माद्विमानात्पतितौ भुवि ।
राजा पूर्वेण दोषेण श्वा जज्ञे वैदिशे पुरे ॥३०॥
राज्ञी जातस्मरा जज्ञे काशीराजकुमारिका ।
सर्वविज्ञानसम्पूर्णा सर्वसल्लक्षणान्विता ॥३१॥
अवश्यंभाविनो भावा भवन्ति न निवारिताः ।
पतिव्रताया अपि पितृरोषो रोधकोऽभवत् ॥३२॥
सा तु योग्या यदा जाता वरारोहा पतिव्रता ।
तां पिता दातुकामोऽभूद् वराय वारितस्तया ॥३३॥
पुत्रीरुद्धः स विरतो विवाहारंभतो नृपः ।
दिव्यया योगदृष्ट्या सा पतिं श्वानं प्रपश्यति ॥३४॥
पित्राज्ञां सा समादाय यात्रार्थं निर्ययौ सुता ।
वैदिशाख्यं पुरं गत्वा श्वानं पतिं ददर्श ह ॥३५॥
श्वाऽपि दृष्ट्वा तु तां पत्नीं तदा जातिस्मरो ह्यभूत् ।
रुरोद क्षणमात्रं च लज्जावानभवत् क्षणम् ॥३६॥
सापि रुरोद तं दृष्ट्वा तदवस्थं सुदुःखितम् ।
ददौ देवप्रसादं च सत्कारवचनं जलम् ॥३७॥
परपर्श सशुनः पृष्ठं करेण कर्णमस्तकम् ।
भुञ्जन् दत्तं तथा सोऽन्नमतिमिष्टमभीप्सितम् ॥३८॥
कुर्वन् श्वजातिललितं चकार बहुचाटुताम् ।
चाटुतां कुर्वता तेन बाला कृताऽतिलज्जिता ॥३९॥
सा सस्नेहा तमादेहं दयितं पशुयोनिजम् ।
स्मर्यतां तन्महाराज ! देवाद्यनर्पिताऽदनम् ॥४०॥
येन श्वयोनिमापन्नः पितृक्रोधस्य भाजनम् ।
विमानात्पतितो व्योम्नो मया साकं जनेश्वर ! ॥४१॥
प्राप्तोऽसि कुत्सितां योनिं किन्न स्मरसि तत्प्रभो ।
तयैवं स्मारिते तत्र पूर्वजातिकृतेऽवृषे ॥४२॥

दध्यौ चिरमथाऽवाप्य वैराग्यमतिदुर्लभम् ।
निर्विण्णमानसो भूत्वा नगरात्स विनिर्गतः ॥४३॥
कुमार्या रक्षितः सीम्नि जलेन प्रोक्षितो मुहुः ।
तावत्तस्य शरीराद्वै पापानि निर्ययुर्बहिः ॥४४॥
एकं शृगालरूपं च द्वितीयं वृकरूपकम् ।
तृतीयं गृध्ररूपं च चतुर्थं काकरूपकम् ॥४५॥
पञ्चमं मायूररूपं ददृशे वै पृथक् पृथक् ।
कुमारी प्राह तान्सर्वान् के यूयं कथमीदृशाः ॥४६॥
ते तु प्राहुस्तदा कन्यां शुनः पापानि वै वयम् ।
राज्ञा चौर्यं परराष्ट्रे कृतं पूर्वं तदस्म्यहम् ॥४७॥
प्रजाद्रव्यं वृकवच्च भक्षितं च तदस्म्यहम् ।
देवस्वं पतितं चास्य कोशे गृध्रस्तदस्म्यहम् ॥४८॥
अन्यायान्नं त्वस्य कोष्ठे जीर्णं काकस्तदस्म्यहम् ।
नदीगोचरगीर्यादेर्द्रव्यं भुक्तं शिखी त्वहम् ॥४९॥
पञ्चजन्मानि ते पत्युर्भविष्यन्ति ततः परम् ।
पुण्यस्तरेण राजाऽसौ जनको वै भविष्यति ॥५०॥
स्वयंवरे पतिं तं त्वं लब्ध्वा स्वर्गं प्रयास्यसि ।
पितरस्ते जनकस्य श्राद्धैर्मुक्तिं गता यदा ॥५१॥
भविष्यन्ति तदा चास्य त्वया स्वर्गं भविष्यति ।
गच्छ साध्वि ! गृहं नैजं मा नो नाशय प्रोक्षणैः ॥५२॥
इत्युक्ता सा सती प्राह यदि साध्वी भवाम्यहम् ।
पतिव्रता यथार्थाऽस्मि पत्युद्धारोऽस्तु मेऽत्र वै ॥५३॥
यद्यस्मि सेविका पत्युः पितॄणां मोक्षकारिणी ।
तेन पुण्येन च यमस्त्वत्राऽऽगत्योपतिष्ठतु ॥५४॥
इत्युक्त्वा जलमादाय चिक्षेप परितस्तदा ।
शुनि देहे तथा याम्यदिशि तावद् यमः स्वयम् ५५॥
उपस्थितः सतीं प्राह शैब्ये ! स्मृतः कथं त्वया ।
वद साध्वि ! कुरु शीघ्रं किं ते मनसि वर्तते ॥५६॥
शैब्या प्राह शुनो देहे यानि पापानि सन्ति वै ।
तेषां नाशं विधायैव पतिः प्राप्यो मया सह ॥५७॥
वदाऽत्र सत्वरं राजन् भस्मीकरोमि चान्यथा ।
यमः प्राह शृणु साध्वि ! भोगेन कर्मणां क्षयः ॥५८॥
त्वया संकल्प्यतां साध्वि ! न्यायश्चापि विधीयताम् ।
यद्वा प्रदर्शयाम्यत्र कुरु शीघ्रं तथा यदि ॥५९॥
तव धर्मप्रतापेन शीघ्रं चान्तो भविष्यति ।
एकैकस्य जनोर्नित्यं पापभोगोऽस्य संभवेत् ॥६०॥
तथाऽत्र पञ्चदिवसान्नुषित्वा क्षपणं कुरु ।
सती नारी पातिव्रत्यबलेन यच्च धारयेत् ॥६१॥

कर्तुं शक्ता तथा साऽत्र भवसि त्वं पतिव्रते ! ।
कुरु त्वद्य जलं गृह्य संकल्पं मम सन्निधौ ॥६२॥
अनेन जलयोगेन पतिर्मे मुच्यतां शुनः ।
दिनैकं स प्रेतदेहः श्रृगालः संभविष्यति ॥६३॥
श्वः प्रातः स श्रृगालो वै भूत्वाऽऽयास्यति तेऽन्तिकम् ।
अनेन जलदानेन मुच्यतां स श्रृगालतः ॥६४॥
दिनैकं सप्रेतदेहो वृको भूत्वा परेऽहनि ।
आयास्यति जलं देहि मुच्यतां वृकयोनितः ॥६५॥
दिनैकं स प्रेतदेहो गृध्रो भूत्वा चतुर्थके ।
दिने चायास्यति देहि वारि गृध्रो विमुच्यताम् ॥६६॥
दिनैकं स प्रेतदेहो मयूरः संभविष्यति ।
पञ्चमेऽहनि वार्देहि मयूरोऽयं प्रमुच्यताम् ॥६७॥
मायूरं त्वस्य वर्ष्मापि वाजिमेधमहाक्रतोः ।
अवभृथे जनकस्य निक्षिप सलिले सति ॥६८॥
यज्ञपुत्रो जनकस्य भविष्यति पतिस्तव ।
जातमात्रो युवा पुष्टो दिव्यो ज्ञानी प्रतापवान् ॥६९॥
स्वयंवरे गृहाण त्वं पातिव्रत्यबलात् सति ! ।
बहुवर्षसहस्राणि कुरु राज्यं ततः परम् ॥७०॥
इत्युक्त्वाऽन्तर्दधे धर्मो नत्वा शैब्यां पतिव्रताम् ।
शैब्यां तथा तथा सर्वं प्रत्यहं विदधे मुदा ॥७१॥
श्वाऽपि प्रेतस्तथा भूत्वा नित्यं जहाति वै तनुम् ।
एवं राजकुमारोऽसौ षष्ठेऽह्नि समजायत ॥७२॥
ऋतुध्वजोऽभवन्नाम्ना जातमात्रो युवा बली ।
ततः सा स्वगृहं साध्वी समागत्याऽर्थयत् पुनः ॥७३॥
तमेव दिव्यपुरुषं पतिं स्वमनसा सती ।
ततश्च पितरं शैब्या विवाहार्थमनोदयत् ॥७४॥
स चापि कारयामास शिबिस्तस्याः स्वयंवरम् ।
स्वयंवरे कृते साध्वी संज्ञातं पतिमात्मनः ॥७५॥
मुदा ववार भूयोऽपि भर्तृभावेन भामिनी ।
बुभुजे च तथा सार्धं नृपभोगान्नृपः पुनः ॥७६॥
पितृपरम्पराप्राप्तं राज्यं विदेहभूमिषु ।
चकार विधिवत्पितृमोक्षणं यज्ञकर्मभिः ॥७७॥
इयाज यज्ञान्सुबहून् ददौ दानानि चार्थिषु ।
पुत्रानुत्पादयामास भुक्त्वा राज्यवसुन्धराम् ॥७८॥
तत्याजाऽशीतिसाहस्रवर्षान्ते स्वकलेवरम् ।
ततश्चितास्थं तं भूयो भर्तारं सा पतिव्रता ॥७९॥
अन्वारुरोह विधिवद् यथापूर्वं मुदान्विता ।
ततोऽवाप तया सार्धं राजपुत्र्या स पार्थिवः ॥८०॥
ऐन्द्रानतीत्य वै लोकान् लोकान् कामदुहोऽक्षयान् ।
स्वर्गाऽक्षयत्वमतुलं दाम्पत्यमतिदुर्लभम् ॥८१॥
सत्यलोकात्परं प्राप्य वैराजस्थलमेव च ।
प्राप पुण्यफलं तत्र पतिव्रताप्रभावतः ॥८२॥
वैकुण्ठं जलतेजःस्थं प्राप सा स्वामिना सह ।
शैब्या हि वैष्णवी राज्ञी ऋतुध्वजनृपान्विता ॥८३॥
एवं पतिव्रतानार्या पतिः स्वस्य समुद्धृतः ।
पितरस्तारिताश्चापि वैकुण्ठवासिनः कृताः ॥८४॥
पापानि स्वप्रतापेन नाशितानि दिने दिने ।
पठनाच्छ्रवणाच्चास्य समुद्धारो भवेद्ध्रुवम् ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये शैब्यापत्युर्देवपित्राद्यनर्पितभोजनेन पापान्तरैश्च श्रृगालवृकगृध्रकाकजन्मानि पश्चाद्देषु समाप्य ऋतुध्वजाख्यराजपुत्रत्वं वैकुण्ठमोक्षणं च पातिव्रत्यप्रतापेनेत्यादिनिरूपणनामा षडशीत्यधिकत्रिशततमोऽध्यायः ॥ ३८६ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! च विप्रायाः पातिव्रत्यबलाश्रिताम् ।
कथां वदामि ते रम्यां श्रवणाद्धर्मवर्धिनीम् ॥ १ ॥
विन्ध्यभूमौ बभूवाऽऽद्ययुगे योगविशारदः ।
वेदश्रवा महर्षिश्च जपयज्ञपरायणः ॥ २ ॥
बहुवृक्षाकुले रम्ये शाद्वले जलसन्निधौ ।
पर्णकुटीं शुभां कृत्वा वसति स्म वने सदा ॥ ३ ॥
होमं देवार्चनं सन्ध्यामतिथेः पूजनादिकम् ।
सूर्यमन्त्रजपादींश्च कृत्वा वन्यफलादनः ॥ ४ ॥
आत्मश्रेयःपरोभार्याद्वितीयोऽरण्यकासनः ।
वर्तते स्म सदाचारः पत्नीव्रतपरायणः ॥ ५ ॥
क्वचिद् योगसमाधौ स तिष्ठत्येव दिनानि षट् ।
भार्यापि सुव्रता तस्य नित्यं सेवापरायणा ॥ ६ ॥
ब्रह्मिष्ठा योगिनी नाम्ना सुश्रुतिर्हि पतिव्रता ।
स्नानध्यानार्हणाध्ययनादिसत्कार्यवर्तिनी ॥ ७ ॥
ब्रह्म ध्यात्वा पतिं नत्वा सम्पूज्य प्रातरेव सा ।
आत्मानं मन्यते श्रेयःपरं प्राप्तां सजीवनीम् ॥ ८ ॥
आत्मा चास्ति परब्रह्मकिरणं स च मे पतिः ।
पतिरेव परंब्रह्म धर्मः सर्वोऽस्ति वै प्रिये ॥ ९ ॥
प्रियस्य या प्रियंकर्त्री तस्याः प्रियं सदा भवेत् ।
छाया देहं यथा तद्वत् पत्नी पतिमनुश्रयेत् ॥१०॥

पत्न्याः सर्वविधो धर्मः पत्यावेवाऽवतिष्ठति ।
पत्यौ तुष्टे हरिस्तुष्टो रुष्टे पत्यौ सरुट् हरिः ॥११॥
भोगदानेन भोज्यादिप्रदानेन च सेवया ।
माधुर्यादिप्रदानेनाऽर्हणया तोषयेत्पतिम् ॥१२॥

संवाहनं तदंगानां मर्दनं वर्ष्मणः सदा ।
शयनं स्वामिना साकं रमणं विग्रहेण च ॥१३॥
आप्लवनं जलाद्यैश्च शोभनं दिव्यवस्तुभिः ।
सुगन्धनं कुसुमादिसारैः संपोषणं फलैः ॥१४॥

रक्षणं जाग्रतिभावैः रञ्जनं सहखेलनैः ।
तोषणं तद्धृदि वासैर्गमनं चैकभावतः ॥१५॥
आनन्दनं तनुदानैस्तर्पणं नेत्रदानकैः ॥१६॥
हवनं चाऽपत्यदानैर्जपनं ओमितिकृतैः ।
स्नपनं रतिदानैश्च ध्यानं चात्मसमर्पणैः ॥१७॥

दानं ऋतुप्रदानैश्च धर्मे सह प्रवर्तनैः ।
यानं सह विहारैश्च निधनं तत्समर्पणैः ॥१८॥
सती साध्वी सार्थकं वै पत्यौ कुर्यात् पतिव्रता ।
इतिधर्मान्परान् स्वामिपरायणान् स्वमानसे ॥१९॥
सर्वधर्मोत्तमान् ज्ञात्वा सेवते सा पतिं वने ।
सुश्रुतिर्योगिनी योगे समाधौ तिष्ठति क्वचित् ॥२०॥

तस्या अग्रेऽप्यरण्यानां पशूनां यत्परस्परम् ।
वैरं साहजिकं तद्वै शान्तं चाभूत् सहस्थिते ॥२१॥
ऋषिश्चापि सदा पत्नी सहायः शुभधार्मिकः ।
ब्रह्मदृष्ट्या स्थितिं श्रेष्ठां प्राप्तो भार्यात्मदर्शनः ॥२२॥

भार्यां भार्यां न वै मेने मेने तां परमेश्वरीम् ।
परब्रह्मतनोर्जातां परब्रह्मस्वरूपिणीम् ॥२३॥
पत्नीं त्यक्त्वा न स विप्रो भुंक्ते कन्दफलादिकम् ।
स्वसेवार्थं तथाऽऽयासे न युनक्ति मृषा क्वचित् ॥२४॥

शरीरं मनुते क्षय्यं नश्वरं जलबिन्दुवत् ।
प्रसन्नः सर्वदा चास्ते मत्वा ब्राह्मीं प्रियां सतीम् ॥२५॥
रसनाया रसे नैव कर्णस्य श्रवणे न च ।
नासिकाया न च गन्धे त्वचः स्पर्शे न वै तथा ॥२६॥

चक्षुषोर्न च रूपेऽपि समासक्तो विरागवान् ।
भार्या पतिव्रता ब्राह्मी रसाद्यात्मा ह्यभूत् कृता ॥२७॥
पत्नीधर्मः परो धर्मो मुक्तिः पत्नीप्रसेवनात् ।
पतिव्रतायास्तोषेण तुष्यन्ति देविकासुराः ॥२८॥
भोजने शयने याने पाने विहरणे वने ।
रंजने स्वपने कार्ये ज्ञाने जपे सुरार्हणे ॥२९॥

शृंगारे चोत्सवस्थाने वैराग्ये श्रवणे रसे ।
गायने नर्तने वाद्ये विश्रान्ते शाद्वलाश्रये ॥३०॥
आभूषणे गृहकार्ये वनकार्ये विनोदके ।
हसने श्रवणे वादे विचारे ब्रह्मभावने ॥३१॥

आर्तवे विकृतौ स्वास्थ्ये सुखे दुःखे च तापने ।
संशये तर्कणे खाने पाने संस्करणे गिरि ॥३२॥
प्रसाधने पवित्रणे त्राणने दिनयापने ।
आलस्ये जल्पने पुराख्याने सर्वत्र भूसुरः ॥३३॥

पत्नीधर्मं पुरस्कृत्य वर्तते नान्यथा क्वचित् ।
एवं तौ धर्ममापन्नौ परस्परं तदात्मकौ ॥३४॥
वर्तेते स्माऽभिन्नधर्मौ पत्नीपतिसमार्थकौ ।
परस्परं प्रकुर्वाते सेवां ब्रह्ममयीमुभौ ॥३५॥
कामचारौ कामरूपौ सेवाधर्मपरायणौ ।
आत्मतृप्तिप्रदौ मत्वा ब्रह्मतृप्तिं हि सेवया ॥३६॥
यद्दर्शनाद्धि पापानि प्रयान्ति विलयं खलु ।
तादृशीं साधुतां प्राप्तौ विन्ध्यारण्यनिवासिनौ ॥३७॥

मनुष्यो न यथा पश्येत् क्वचिद् भवत ऐणकौ ।
पशुर्न च यथा पश्येत् शुकौ भवतश्च क्वचित् ॥३८॥
पक्षी न तौ यथा पश्येत् मत्स्यौ च भवतः क्वचित् ।
यादश्च न यथा पश्येद् गोवृषौ भवतः क्वचित् ॥३९॥
कश्चित्पराभवेन्नाऽतो व्याघ्रौ च भवतः क्वचित् ।
सिंहौ हंसौ सरीसृपौ शाखामृगौ क्वचित्क्वचित् ॥४०॥
भवतस्तौ वने तत्र क्वचित् सजटतापसौ ।
क्वचित्कल्पलताकल्पद्रुमरूपौ घनागमे ॥४१॥

क्वचिन्मणिस्वरूपौ च क्वचिद् वायुस्वरूपिणौ ।
क्वचिद् देवस्वरूपौ च क्वचिद् बालस्वरूपिणौ ॥४२॥
क्वचिद् वृद्धौ युवानौ चादृश्यौ दृश्यौ बभूवतुः ।
क्वचिद् विप्राऽतिथियोगे गुरुशिष्यस्वरूपिणौ ॥४३॥
पितृपुत्रस्वरूपौ वा यथापेक्षं व्यजायताम् ।
पत्नीव्रतं पतिव्रतं यथा लोपं न चाप्नुयात् ॥४४॥
तथा तथा स्वरूपैस्तौ वर्तेते स्म वनादिषु ।
अथ मासिकधर्मान्ते ऋतुस्नातां पतिव्रताम् ॥४५॥

ऋतुदानप्रदानार्थं युयुजे कामधर्मतः ।
ऋषिर्मानुषधर्मेण रतिकेलिपरायणः ॥४६॥
कामधर्माश्रितयोर्विप्रयोराश्रमसन्निधौ ।
स्फीतान्धतमसि कश्चिन्मानवो मानवीं गिरम् ॥४७॥
वदन्नटन्वनं तत्राऽकस्मादागतवाँस्तदा ।
तेनाऽदृष्टौ द्विजौ तावत् कामविघ्नं विचार्य च ॥४८॥

शब्देन मानुषं ज्ञात्वा प्रच्छन्नौ मृगरूपिणौ ।
बभूवतुस्तदा तत्राऽवियुक्तौ कामनायुतौ ॥४९॥
अप्राप्तौ कामनातृप्तिं पशुधर्मं समाश्रितौ ।
मनुष्यभालितौ चापि कामिनौ पशुधर्मिणौ ॥५०॥
मन्येते नैव लज्जां तौ तौ न निन्दन्ति मानवाः ।
कामासक्तौ पशूनैव ध्याने कुर्वन्ति मानुषाः ॥५१॥
पशूनग्नान् ज्ञानहीनान् लज्जाधर्मादिहीनकान् ।
मत्वा तु मानवाः पश्वोर्विघ्नयन्ति न मैथुने ॥५२॥
मैथुनस्थाः पशवोऽपि गणयन्ति न मानवान् ।
ऋतुदानं कामतृप्तिः पशुरूपेऽद्य संभवेत् ॥५३॥
मानुषे तु मानुषस्याऽऽतिथ्यं कर्तव्यमापतेत् ।
अशुद्धौ च कथं तत् स्यात् परिहर्तव्यमेव तत् ॥५४॥
रिक्तं पर्णगृहं मत्वा चाऽविलोक्य ऋषिं ततः ।
वनान्तरं मानवोऽयं गमिष्यति शुभं भवेत् ॥५५॥
निशा तु निष्फला न स्यात् स्यात्काले ऋतुदानकम् ।
कामाऽशान्तिकृतो वह्निर्न च पत्नीं प्रतापयेत् ॥५६॥
बीजं त्वधर्ममथनादिप्राप्तं नो विकृतिं व्रजेत् ।
ऋत्वदानसमुत्थश्च यथा दोषो न चापतेत् ॥५७॥
सुखयाप्यं तथा सर्वं मृगरूपे धृते भवेत् ।
इति कृत्वा मृगरूपौ कामारूढौ बभूवतुः ॥५८॥
किन्तु तथापि तत्काले जातं वै विपरीतकम् ।
मानुषः स तु बाणेन दृष्ट्वा विव्याध तन्मृगम् ॥५९॥
मृगो मृगी दुद्रुवतुः कामधर्मं विहाय वै ।
त्रासात् प्रधावितयोश्च पृष्ठं जग्राह मानवः ॥६०॥
ततस्तौ मानवं व्याधं मत्वा वै पशुहिंसकम् ।
पशुरूपं विहायैव ऋषिरूपौ बभूवतुः ॥६१॥
एवं कृतेऽपि व्याधः स निववृते न मानवौ ।
दृष्ट्वापि ब्राह्मणौ हृष्टो धर्तुं वेगेन संययौ ॥६२॥
ब्राह्मणं धृतवाँस्तूर्णं भक्षणार्थं स राक्षसः ।
ब्राह्मणी कामधर्मा सा निर्जनारण्यवासिनी ॥६३॥
कान्ताऽऽधारा निराधारा विललाप जगाद च ।
पादयोः पतिता तेऽत्र मां वा भक्षय भक्षक ! ॥६४॥
मां तु निराश्रयां ज्ञात्वा देहि पतिधनं मम ।
शरण्यस्य शरणस्था नारी वै किंकरी तव ॥६५॥
विलोक्य पतिधर्मां मां कामधर्मं विमोचय ।
वित्तहीनं प्रमत्तं च सुप्तं पृष्ठप्रदर्शिनम् ॥६६॥
प्रपन्नं चाश्रितं दीनं तवाऽस्मीतिब्रुवं जनम् ।
गुरुं च पितरं रुग्णं मातरं भगिनीं प्रियाम् ॥६७॥
साधुं साध्वीं बालकं गां स्त्र्यासक्तं स्त्रीं रतिस्थिताम् ।
सुप्तं निष्कल्मषं नैव मारयेद् घातयेन्न वा ॥६८॥
नाऽनेन ते हृतं किञ्चिन्न वा दुष्टं विचिन्तितम् ।
वन्यधर्मपरश्चायं न द्रोग्धा ते कदाचन ॥६९॥
ब्राह्मणोऽयं न हन्तव्यो ब्रह्महत्या तु ते भवेत् ॥७०॥
ऋतुहत्या महत्पापं बालहत्याकरं हि ते ।
भक्ष्यार्थं प्राणिनः सन्ति मा हिंसि मे पतिं नरम् ॥७१॥
अयं मे प्राणनाथोऽस्ति सर्वथा जीवनं मम ।
तन्नाशे स्यां विधवा स्त्री सर्वमांगल्यवर्जिता ॥७२॥
मा कुरु निष्फलं जन्म वैधव्यपापगर्भितम् ।
दयालुर्भव मे वाक्ये याचे सर्वस्वमेव मे ॥७३॥
अनेन पतिना सार्धं स्वर्गो मोक्षोऽत्र मेऽस्ति वै ।
तन्नाशे यमलोकोऽयं देहो मे वै भविष्यति ॥७४॥
मुञ्च नाथं कृपां कृत्वा स्वर्गं ते वै भविष्यति ।
मा जहाहि पतिं मेऽत्र मा जहीहि वृषं मम ॥७५॥
प्रसीदेक्ष्वाकुवंश्यानां तिलक ! त्वं पतिं मम ।
त्यज राजन् रक्ष धर्मं ययाचे त्वां मुहुर्मुहुः ॥७६॥
कामधर्माऽकृतार्थायां मयि कृपाकरो भव ।
न बुद्ध्यसे ऋतुधर्मसुखाऽभिज्ञोऽतिपापवान् ॥७७॥
एवं याचितवत्याः स वाक्यं कर्णे चकार न ।
तस्यां तु विलपन्त्यां स भर्तारं समभक्षयत् ॥७८॥
रुरोद सा सती तत्र दुःखिताऽतिप्रतापिनी ।
अतिकोपयुता तं राजानं शशाप दुःखिनी ॥७९॥
त्वया मय्यप्रतृप्तायां मत्पतिर्भक्षितो यतः ।
त्वमप्यन्तं प्रियाभोगप्रवृत्तौ प्राप्स्यसि ध्रुवम् ॥८०॥
इत्युक्त्वा सा पत्युरस्थिखण्डं नीत्वा करे सती ।
पातिव्रत्यप्रतापेन जीवयामास तं पतिम् ॥८१॥
राक्षसं दग्धुकामाऽपि व्योमवाण्या निवारिता ।
वशिष्ठशापाद् दग्धोऽसौ सौदासो राक्षसो भवन् ॥८२॥
कल्माषपादः संभूत्वा समाः भ्रमति द्वादश ।
पश्चाच्छापविनिर्मुक्तो मदयन्तीपतिर्नृपः ॥८३॥
भविष्यति प्रजापालो मैनं शापेन योजय ।
वैवस्वतो मनोर्वंशे जाता नृपतयः सति ! ॥८४॥
इक्ष्वाकुनृगशर्यातिनाभागाद्या हरेः प्रियाः ।
सुद्युम्नेलापुरूरवागयशतसुखादयः ॥८५॥
करन्धमाऽविक्षिमरुत्तृणबिन्दुविशालकाः ।
शर्यात्यानर्तरैवतककुद्मयम्बरिषादयः ॥८६॥

शशादककुत्स्थपृथुयुवनाश्वमान्धातृकाः ।
रुक्मांगदमुचुकुन्दाऽनरण्यकत्रिशंकवः ॥८७॥
हरिश्चन्द्रसगरांशुमद्दिलीपभगीरथाः ।
जनकबदरर्तुपर्णसुदाससौदासकाः ॥८८॥
दिवोदासेन्द्रद्युम्नतोण्डमद्रामकयाधुजाः ।
एतेऽभवन् हरेर्भक्ता महाभागवता नृपाः ॥८९॥

वशिष्ठादिकृपापात्रचमत्कारसमृद्धयः ।
सौदासोऽयमटव्यां वै व्याघ्रद्वयमलोकयत् ॥९०॥
व्याघ्राभ्यां तु वनं सर्वं खादित्वाऽपमृगं कृतम् ।
मृगयां न ततो राजालब्धवानिति रोषतः ॥९१॥
व्याघ्रमेकं जघानाऽथाऽपरो व्याघ्रो विदुद्रुवे ।
म्रियमाणश्च वै व्याघ्रो राक्षसो भीषणाकृतिः ॥९२॥
कृत्वाऽदृश्योऽभवत्तत्र द्वितीयोऽपि तु राक्षसः ।
प्रतिक्रियां करिष्यामीत्युक्त्वाऽन्तर्धौ जगाम ह ॥९३॥

अथ कालेन सौदासो यज्ञं चकार वैष्णवम् ।
आचार्ये तु वशिष्ठे च विनिष्क्रान्ते सदक्षिणे ॥९४॥
वसिष्ठरूपमास्थाय राक्षसः स समागतः ।
देयं मे भोजनं मांसं संस्करोतु द्रुतं त्विह ॥९५॥
क्षणादिहाऽऽगमिष्यामीत्युक्त्वा निष्क्रान्त एव सः ।
सूदवेषं पुनः कृत्वा राक्षसः स महानसे ॥९६॥
विवेश मानुषं मांसं संस्कृत्य क्ष्माभृते ददौ ।
सौदासोऽपि स्वर्णपात्रे मांसमादाय तदृषेः ॥९७॥

वाटं विलोक्य भक्तिमान् प्रतीक्षातत्परोऽभवत् ।
आगताय वसिष्ठाय नरमांसं स चार्पयत् ॥९८॥
वसिष्ठो नैव जानाति केनोक्तं किं कृतं न्विदम् ।
इतिचिन्तापरो भूत्वा किं वस्त्विति व्यलोकयत् ॥९९॥
ज्ञात्वा ध्यानेन मांसं तन्मानुषं वै समर्पितम् ।
अहो राज्ञोऽस्य दौःशील्यं मांसं मम प्रयच्छति ॥१००॥
तत्रापि मानुषं चैतद् राक्षसार्हं प्रयच्छति ।
इतिक्रोधपरो भूत्वा तूर्णं शशाप भूभृतम् ॥१०१॥

यस्मादभोज्यमस्माकं जानन्नपि ददासि मे ।
तस्मात्त्वं नरमांसादो भव राजन् विगर्हितः ॥१०२॥
राज्ञा स्फुटीकृतं कृत्यं कस्येदं ज्ञातवान् ऋषिः ।
नाऽपराधस्तु राजर्षेः राक्षसेन कृतं हि तत् ॥१०३॥
इतिविज्ञाततत्त्वश्च वसिष्ठः करुणाकरः ।
सौदासे द्वादशाब्दं राक्षसत्वं कृतवान् मुनिः ॥१०४॥
न त्वात्यन्तिकमित्येवमनुग्रहं चकार वै ।
सौदासोऽपि करे धृत्वोदकं शप्तं समुद्यतः ॥१०५॥

वशिष्ठाय तदा तस्य मदयन्ती सती प्रिया ।
पतिं रुरोध सहसा गुरुं शप्तुं ददौ न सा ॥१०६॥
गुरवो न हि शप्तव्या रक्षकास्तारकाश्च ते ।
कल्याणं वचने तेषां शिष्याणां सर्वथा हितम् ॥१०७॥
इति प्रसादितो राजा जलं चिक्षेप पादयोः ।
स्वपादौ मन्त्रशापोददग्धौ कल्मषतां गतौ ॥१०८॥

ततः कल्माषपादोऽसौ सौदासो मांसभक्षकः ।
षष्ठे काले राक्षसत्वमुपेत्य पर्यटन् क्षितौ ॥१०९॥
अनेकशो मानुषाँश्चाऽभक्षयद्विविधे वने ।
सोऽयं राजाऽस्ति सौदासो वशिष्ठस्य प्रशापतः ॥११०॥
दग्धोऽस्ति राक्षसे भावे तव पत्युः प्रभक्षकः ।
रतिभंगकृतं पापं स्त्रीसंगेऽस्योपयास्यति ॥१११॥
मरिष्यति ह्ययं राजा माऽन्यं शापं प्रदेहि तम् ।
क्षमां कुरु सति ! चात्र पतिस्त्वया प्रजीवितः ॥११२॥

तदोक्तं च वशिष्ठेन यदा वेदश्रवाः ऋषिः ।
सुश्रुतया समं वने तव नाश्यो भविष्यति ॥११३॥
तदुत्तरं त्वदुद्धारो रक्षोभावाद् भविष्यति ।
निधनं वेदश्रवसस्तव हस्तेन वेधसा ॥११४॥
लिखितं वै तावदेव तस्याऽऽयुरस्ति नाऽधिकम् ।
ततः पत्न्या जीवितोऽपि पातिव्रत्यबलेन वै ॥११५॥
भूमौ स्थातुं न वै योग्यः स्वर्गं पत्न्या गमिष्यति ।
सौदासश्च मदयन्त्यां वशिष्ठेन महर्षिणा ॥११६॥

नियोजितेन बीजार्थे वासिष्ठान् शतपुत्रकान् ।
लब्ध्वा पश्चान् मदयन्त्यां कामभोगं करिष्यति ॥११७॥
मृत्युना मोहितस्तत्राऽलब्धकामविनिर्वृत्तिः ।
मृत्युं प्राप्स्यति द्रागेव कालः सोऽयं समागतः ॥११८॥
अश्मकाद्यास्तस्य पुत्रा भविष्यन्ति हि सात्त्वताः ।
खट्वांगश्च दिलीपश्च रघुर्दशरथस्ततः ॥११९॥
रामचन्द्रादयश्चान्ये भविष्यन्ति प्रमुक्तिदाः ।
तदेवं निश्चितं मत्वा सुश्रुते त्वं पतिं स्वकम् ॥१२०॥

चितां कृत्वाऽत्र काष्ठीयां पातिव्रत्यविधानतः ।
अग्निं प्रज्वाल्य चांगुष्ठान्नारीमानुषविग्रहम् ॥१२१॥
पत्यस्थ्ना सह संगध्वा जीवितं स्वामिनं पुनः ।
विलीयाऽत्रैव संघातकृतं सर्वं समाप्य च ॥१२२॥
दिव्या त्वं दिव्यपतिना वह्निशुद्धा च नाकिना ।
शरीरेण विमानेऽत्र पतिं नीत्वा प्रयाहि वै ॥१२३॥
नाऽन्या पतिव्रता पत्नी ते समाऽन्या भविष्यति ।
ब्रह्मणो दिनपर्यन्तं स्वर्गे सुखमवाप्य च ॥१२४॥

ततो यास्यसि वैकुण्ठं तेनैव पतिना सह ।
इत्युक्त्वाऽऽकाशवाणी सा विरराम च सुश्रुतिः ॥१२५॥
ननाम तां दिशं राजा ननाम च सतीं तदा ।
ययौ क्षमां सुयाचित्वा स्वकं वै नगरं प्रति ॥१२६॥
सस्मार सुश्रुतिस्तत्र वशिष्ठं सोऽप्यदृश्यत ।
नत्वा धृत्वा पतिं काष्ठचितायां निजवह्निना ॥१२७॥
भस्मीकृत्वा सती देहौ दिव्यौ विधाय च ।
नत्वा वशिष्ठं यानेन ययतुः स्वर्गमेव तौ ॥१२८॥
देवदुन्दुभयो नेदुः पुष्पवृष्टिर्बभूव ह ।
इतिते कथितं लक्ष्मि ! चमत्कारकरं परम् ॥१२९॥
प्राग्वृत्तं दिव्यसिद्ध्यादिप्रदं तत्पठनात्तथा ।
श्रवणाच्च भवेद्धर्मदार्ढ्यं स्वर्गं च मोक्षणम् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वेदश्रवसः पत्न्याः पतिव्रतायाः सुश्रुतेश्चमत्काराः, कल्माषपादात्मकराक्षसस्य कामासक्तयोर्वेदश्रवःसुश्रुत्योराश्रमं प्रत्यागमनं, वेदश्रवसो राक्षसकृतभक्षणं, सुश्रुतिदत्तशापः, आकाशवाण्या सौदासस्य राक्षसत्वे निमित्तकारणाख्यानकथनं, वशिष्ठसन्निधौ सुश्रुतिवेदश्रवसोः सतीबलेन स्वर्गमनमित्यादिनिरूपणनामा सप्ताऽशीत्यधिकत्रिशततमोऽध्यायः ॥ ३८७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि धरण्या नन्दयोषितः ।
पतिव्रतायाश्चारित्र्यं चमत्कारसमन्वितम् ॥ १ ॥
जम्बूद्वीपस्य राजाऽभून्नन्दसावर्णिसंज्ञकः ।
समुद्रो यस्य राज्यस्य परिखाऽभूत्समन्ततः ॥ २ ॥
वाराहस्य प्रभोर्भक्तो रतो वाराहपूजने ।
वाराहे च महाक्षेत्रे नित्यं विज्ञानसत्पथा ॥ ३ ॥
समागम्य परां भक्तिं करोति देववाञ्छिताम् ।
हिरण्याक्षहृतां पृथ्वीमानेतुं भगवान् स्वयम् ॥ ४ ॥
वाराहरूपमास्थाय हिरण्याक्षं निहत्य च ।
पृथ्वीं स चाऽऽनयामासाऽस्थापयत्तां जलोपरि ॥ ५ ॥
तदाऽऽकाशे विमानेन भ्रमता नन्दभूभृता ।
वाराहन्तु महद्रूपं दृष्ट्वा ब्रह्माण्डनायकम् ॥ ६ ॥
अवतीर्य विमानात् सः स्तुतिं तस्याऽकरोत्तदा ।
नमोऽनन्तस्वरूपाय पुरुषोत्तमनामिने ॥ ७ ॥
स्वलोकाऽवनसंकर्त्रे धरित्र्याः पतये नमः ।
सर्वतत्त्वनिवासायाऽक्षराधीशाय ते नमः ॥ ८ ॥
कृष्णनारायणायाऽस्तु नमस्कारस्तु मे पुनः ।
त्वया पृथ्वी कृपयाऽद्य रक्षिता रक्षिता वयम् ॥ ९ ॥
अनाधाराश्च राजानः प्रजाश्चाऽप्यविताः प्रभो ! ।
रक्षणार्थे प्रजानां वै करोषि नूतनं वपुः ॥१०॥
सर्वशक्तिनिवासोऽसि सर्वरूपात्मने नमः ।
इति स्तुत्वा ननामाऽसौ राजा वाराहपादयोः ॥११॥
वाराहस्तु प्रसन्नः सन् प्राह राज्ञे वराय वै ।
ब्रूहि राजन् प्रसन्नोऽस्मि किं ते मनसि वर्तते ॥१२॥
वद दास्ये मनोऽभीष्टं सदा भक्तेष्टदोऽस्म्यहम् ।
इत्युक्तः स उवाचैनं प्रसन्नं परमेश्वरम् ॥१३॥
किं वृणोमि कृपासिन्धो धरणिं देहि मे पुनः ।
हिरण्याक्षहृतां चेलां त्वद्दत्तां पालयाम्यहम् ॥१४॥
मद्गृहे धरणिश्चाऽस्तु कुरु मां धरणीपतिम् ।
विना धरणिं राज्ञस्तु जीवनं निष्फलं यतः ॥१५॥
वाराहस्तु तदा प्राह तथास्त्विति नृपं ततः ।
नन्दसावर्णिरात्मेशं वाराहं समपूजयत् ॥१६॥
पत्रैः पुष्पैः फलैस्तोयैरन्नैः कन्दैस्तथाऽक्षतैः ।
रत्नैर्हीरकमण्यादिहारैश्चन्दनकुंकुमैः ॥१७॥
सौवर्णकटकैश्चापि कानकैश्च विभूषणैः ।
मुकुटोर्मिककटकैः शृङ्खलाकुण्डलादिभिः ॥१८॥
नूपुरैः किंकिणीयुक्तैर्वस्त्रैः सुगन्धवारिणा ।
धूपदीपैः स्तवनैश्च क्षमाऽपराधवन्दनैः ॥१९॥
वाराहं नित्यमेवाऽसौ प्रातः संपूज्य वै नृपः ।
ततोऽन्यत् प्रकरोत्येव सात्त्वतो वैष्णवो महान् ॥२०॥
वाराहः सुप्रसन्नः सन् राज्ञे वै मुकुटं ददौ ।
आपरिखं तव राज्यं जम्बूद्वीपेऽस्तु सर्वशः ॥२१॥
धरणिश्च भवत्वद्य ते पत्नी सुपतिव्रता ।
इत्युक्त्वा भगवान्नन्दसावर्णि तिलकं व्यधात् ॥२२॥
आनीतां पृथिवीं तस्यै ददौ राज्यप्ररेखया ।
ततः श्रीभगवान् प्राह धरणिं दिव्यरूपिणीम् ॥२३॥
भज देवि ! सतीरूपा राज्ञी भूत्वा नृपं सदा ।
नत्वा तु धरणी नारायणं त्वभ्यर्च्य भावतः ॥२४॥
तदाज्ञां मस्तके धृत्वा कन्यारूपं दधार सा ।
वाराहमानसी देवी द्व्यष्टवर्षाऽतिसुन्दरी ॥२५॥
जातमात्रा युवत्येव सपुष्पमालिका शुभा ।
सर्वलक्षणसम्पन्ना स्वामिधर्मपरायणा ॥२६॥

वाराहेणाऽर्पितां मालां दधाना करयोस्तदा ।
वाराहस्य निदेशेनाऽर्पयामास गले शुभे ॥२७॥
वरयामास भावेन नन्दसावर्णिमेव सा ।
वाराहं दम्पती प्रदक्षिणीकृत्य प्रणेमतुः ॥२८॥
वाराहं पूजयामासतुश्च साक्षाज्जनार्दनम् ।
धरित्री पूजयामास नित्यं नारायणं पतिम् ॥२९॥
तथा तदाज्ञया नन्दसावर्णिं पतिमुत्तमम् ।
नित्यं वसुन्धरा स्नात्वा मुदा षोडशवस्तुभिः ॥३०॥
वाराहं प्राक्पतिं सम्यक् पूजयित्वा ततस्तु तम् ।
भोजयित्वा च वन्दित्वा ततो नन्दं वधूत्तमा ॥३१॥
पूजयत्येव भावेन भोजयत्येव भावतः ।
सेवते भूभृतं नित्यं भूमिर्द्वितीयवर्म्मणा ॥३२॥
एवं भूर्भगवत्सेवां नन्दसेवां च भावतः ।
करोत्येव सदा पातिव्रत्यधर्मेण मेदिनी ॥३३॥
यस्यास्तु भगवान् स्वामी रक्षकश्च नियामकः ।
तस्याः सर्वे पातिव्रत्यधर्मास्तस्य निदेशने ॥३४॥
वाराहस्य वचः पातिव्रत्यं नन्दवचस्तथा ।
भूरूपा सा वराहस्य पत्नी चापि निदेशतः ॥३५॥
कन्यारूपा वधूः साऽभून्नन्दसावर्णिभामिनी ।
नन्दं प्रसेवते नित्यं वाराहात्मानमेव सा॥३६॥
वाराहस्त्वेकदा प्राह धरणे ! शृणु मद्वचः ।
उपसंहर्तुमिच्छामि रूपं वाराहमेव मे ॥३७॥
वद किं तेऽस्त्यभीष्टं तद् ददाम्यत्र च मा चिरम् ।
धरणिस्तु परं शोकं त्ववापाऽश्रुत्य तद्वचः ॥३८॥
ववन्दे चरणौ तस्य वव्रे पूजार्थमुत्तमम् ।
रूपं भगवतस्तत्र दर्शनार्थं निरन्तरम् ॥३९॥
भगवान् धरणिं प्राह मे दन्तं ते ददामि यत् ।
रक्ष पूजय संपश्य सेवयैनं यथा हि माम् ॥४०॥
इत्युक्त्वा प्रददौ दन्तं धरण्यै पूजनाय वै ।
दन्ते सामर्थ्यमत्युग्रं वर्तते तन्निबोध च ॥४१॥
अरण्ये पर्वते स्वर्गे पृथ्व्याद्यावरणेष्वपि ।
पातालेषु समुद्रेषु वह्निष्वपि दिगन्तरे ॥४२॥
यत्र क्वापि गन्तुमिच्छेः सह नीत्वा रदं मम ।
प्रयाहि धरणे ! यत्र तवेच्छा स्यादबाधिता ॥४३॥
गतिस्ते स्यादहता वै दन्तयुक्ता सुखं व्रज ।
वह्निर्जलं विषं शैत्यं शिला वायुस्तथाऽम्बरम् ॥४४॥
बाधन्ते न रदं मे वै रदयुक्तं तथा जनम् ।
इत्युक्त्वा स्वरदं दत्वा दत्वाऽऽशीर्वादमुत्तमम् ॥४५॥
धरणिं नन्दसावर्णिं निभाल्याऽदृश्यतां ययौ ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिर्बभूव ह ॥४६॥
देवाश्च मुनयः सर्वे विमानैस्तत्र चाययुः ।
तुष्टुवुर्धरणीनाथं वाराहं दिव्यरूपिणम् ॥४७॥
गच्छन्तं वै स्वकं धाम निन्युस्ते सोत्सवं हरिम् ।
अथाऽत्र धरणिः पत्नी सा नन्दस्य पतिव्रता ॥४८॥
नित्यमर्चयति दन्तं वाराहपरमात्मनः ।
सहनीत्वा विमानेन नन्दसावर्णिसंयुता ॥४९॥
क्वचिद्भूमौ क्वचित्स्वर्गे क्वचित्पातालविस्तरे ।
सामुद्रे सलिले क्षीरे सागरे च क्वचिद् ययौ ॥५०॥
एवं विहरतोः राज्ञीनृपयोर्बहुमानवाः ।
उपायनानि प्रददुः सुरर्षिपितरस्तथा ॥५१॥
पातालवासिनश्चापि स्वर्गदेवा जलेशयाः ।
मणिमाणिक्यरत्नानि हीरकमौक्तिकानि च ॥५२॥
सौवर्णं रौप्यकं ताम्रं तदन्यं च रसायनम् ।
धात्वायनं सुधाग्र्यं च वर्यशस्त्रास्त्रमण्डलम् ॥५३॥
यद्यदस्मै प्रदत्तं स्थानिभिस्तूपायनात्मकम् ।
नन्दो लोभाभिभूतश्च निनाय निजमन्दिरम् ॥५४॥
यदा द्रव्यस्य कोशादि धनादिभिः प्रपूरितम् ।
तदा विचारयामास कोषस्त्वन्यो ह्यपेक्ष्यते ॥५५॥
अक्षय्यश्चाऽप्यगम्यश्चाऽप्यदृश्यश्चाऽप्यगोचरः ।
कर्तव्योऽयं मया कोषस्तादृशो भूमिगर्भके ॥५६॥
एवं विचार्य धरणिं पत्नीं पप्रच्छ तद्विधाम् ।
पत्नी प्राह नृपं राजन् कोषं वार्धितले कुरु ॥५७॥
वाराहस्य रदस्तत्र सहायोऽस्ति गतिप्रदः ।
रदं विना गतिर्नास्ति ते मे कुतोऽपरस्य तु ॥५८॥
इति विचार्य सरदो नृपो गत्वाऽब्धिसन्निधौ ।
तावद् दन्तप्रभावेण मूर्तिमानब्धिरागतः ॥५९॥
ददौ मार्गं त्रसन् वारि संकुच्य नन्दभूभृते ।
नन्दो रत्नाकरे कृत्वा कोशं विशालमद्भुतम् ॥६०॥
धनं रत्नादि यत्किंचित्सर्वं निहितवाँस्ततः ।
वार्धितले कृते कोशे दन्तसाहाय्यतः खलु ॥६१॥
अबाधिते कृते कोशे लोभस्तस्य व्यवर्धत ।
पृथ्वीधनानि सर्वाणि स्वर्णरौप्यादिकानि च ॥६२॥
आहृत्य नीत्वा तत्रैव निक्षिपत्येव सर्वदा ।
लोभवृत्तेर्न वै श्रान्तो भक्त्यत्र विना तु शम् ॥६३॥
तावदस्याऽभवद् वृत्तिर्लोभाधीनाऽतिदुःखदा ।
सर्वा पृथ्वी प्रजाः सर्वा धनरिक्ता कृतास्ततः ॥६४॥

मृतानां भूगर्भगतशवानां मुखगं धनम् ।
धातुखण्डं दम्बुकं वा तन्निखन्याऽपि चाहृतम् ॥६५॥
जम्बूद्वीपे यत्र यत्र शवं शायेत भूगतम् ।
खानयित्वा तु तद् द्रव्यं शवाऽऽस्यात् प्रसमाहृतम् ॥६६॥
धृतं दन्तसहायेन कोशे सामुद्रके तले ।
अथैकदा धरण्या वै भूभृते सन्निवेदितम् ॥६७॥
कुरु राजन्महायज्ञं वैष्णवं रौद्रमित्यपि ।
अश्वमेधं राजसूयं पृथ्व्यां सत्राणि कारय ॥६८॥
लक्ष्मीनारायणसंहितायाः पारायणं महत् ।
चिरं सतां ब्रह्मयज्ञं मोक्षयज्ञं च कारय ॥६९॥
द्रव्यं तु नश्वरं वयं नश्वरा नश्वरं जगत् ।
सेश्वरं कार्यमाकृत्वा गच्छामः परमं पदम् ॥७०॥
इत्युक्तोऽपि महालोभी राजा धान्यं न वै ददौ ।
राज्ञी सा धरणी दिव्या नत्वा नन्दं पुनः पुनः ॥७१॥
वाराहं तु तदा स्मृत्वा तिरोऽभूत्तेन वर्ष्मणा ।
राजा रुरोद बहुधा सान्त्वयितः प्रजाजनैः ॥७२॥
यज्ञं चकार च पत्न्या वाक्यं स्मरन् शुशोच ह ।
नित्यं दन्तं वराहस्य पूजयत्येव भूपतिः ॥७३॥
लोभवृत्त्या धनं सर्वं पूर्ववदेव वै दत्ता ।
सहायेन समं नीत्वा ररक्षाऽब्धितले तथा ॥७४॥
राज्ञी कृता द्वितीया पंकिला षोडशहायना ।
समुद्रपुत्री नन्देन कामलुब्धेन भूभृता ॥७५॥
समुद्रस्याऽभवत्क्षोभः कोशस्याऽक्षयवस्तुनः ।
पुत्रीं प्राह नृपश्चायं वाराहदन्तहेतुना ॥७६॥
कोशं तले मे कृतवान् नित्यमायाति याति च ।
नित्यं सेवा मया कार्या क्षोभो भवति मे जले ॥७७॥
तत्सर्वं परिहार्यं स्यात्तथा कर्तव्यमस्ति मे ।
शृणु पुत्रि ! मेरुपुत्री उपला नन्दभामिनी ॥७८॥
तद्द्वारा वै मया रोधः कर्तव्योऽत्र न संचरेत् ।
गच्छाम्यहं कुबेराय विष्णवे ब्रह्मणे तथा ॥७९॥
निवेदयितुं नन्दस्य लोभवृत्तान्तमुल्बणम् ।
ततो यद्वै भावि तद्धि भविष्यति हरिकृतम् ॥८०॥
यत्नोऽवश्यं प्रकर्तव्यः फलं माधवहस्तगम् ।
इत्युक्त्वा प्रययौ राजा कुबेरभवनं च तम् ॥८१॥
नीत्वा ययौ हरेर्लोकं विष्णवे प्राह तद्वृत्तम् ।
श्रुत्वा विष्णुर्नियमने कृतसंकल्प एव च ॥८२॥
सस्मार नारदं तूर्णं प्राह वृत्तान्तमेव तम् ।
नारदस्तु तदा तर्कं संकल्प्य मानसे स्वके ॥८३॥
ययौ शीघ्रं नन्दसौधं नन्दो गृहे न वर्तते ।
उपलां नारदः प्राह कल्याणं चास्तु ते सति ! ॥८४॥
काऽस्ति नन्दः पंकिला च अन्याः सख्यश्च ते सति ! ।
उपला तमृषिं दृष्ट्वा सत्कारं नमनादिकम् ॥८५॥
अर्घ्यादिकं कृतवती पप्रच्छागमकारणम् ।
नारदस्तु तदा प्राह श्रुतं स्वर्गे मयाऽस्ति यत् ॥८६॥
ऋतं वा तदनृतं वा त्वायातोऽहं परीक्षितुम् ।
प्रत्यक्षं तु विना वाणीगेयं मान्यं न विद्यते ॥८७॥
प्रत्यक्षेण कृतं सिद्धं परिहार्यं न जायते ।
विज्ञानिनश्च सम्राजो नन्दस्य चक्रवर्तिनः ॥८८॥
गौणं विषयिनिन्द्यं च श्रव्यं योग्यं न वै यतः ।
कृत्वा प्रत्यक्षमेवाऽहं पश्चाद् यास्ये दिवं पुनः ॥८९॥
देवा देवसभामध्ये वर्णयन्ति घृणामयम् ।
नन्दो मृताया धरणेरस्थिपूजां करोति हि ॥९०॥
अन्याश्च नूतना नार्यः प्रेमपात्राणि नो तथा ।
यथा धरणिः पूर्वाऽऽसीत् प्रेमपात्रं यदस्थि च ॥९१॥
वदोपले ! त्वयि कीदृक् प्रेमास्ति नन्दभूभृतः ।
पंकिलायां तथाऽन्यासु स्नेहो नन्दस्य कीदृशः ॥९२॥
उपलाऽऽह तु देवर्षिं राजा मामन्तरा क्षणम् ।
स्थातुं भोक्तुं श्वसितुं च रन्तुं च जीवितुं तथा ॥९३॥
नैव शक्नोति देवर्षे भुंक्ते दृष्ट्वा ममाऽऽननम् ।
अन्यासु नेदृशः स्नेहो यथा मयि प्रवर्तते ॥९४॥
देवर्षिः प्राह सत्यं स्याद् यदि देवोक्तमनृतम् ।
देवोक्तं यदि सत्यं वै तवोक्तं त्वनृतं भवेत् ॥९५॥
यथा तव मुखं साध्वि नाऽदृष्ट्वा चात्ति भूपतिः ।
अदृष्ट्वा तु धरण्यस्थि न भुंक्ते नन्दभूपतिः ॥९६॥
कियत् सत्यं परीक्षस्व स्नेहोऽस्य कुत्र वाऽधिकः ।
दृष्ट्वाऽप्यहं गमिष्यामि पश्य पूजास्थवस्तुकम् ॥९७॥
इत्युक्ता ह्युपला शीघ्रं ययौ पूजास्थलं ततः ।
पूजावस्तूनि संदृष्ट्वा पूजापेटीं ददर्श सा ॥९८॥
तावत्तत्राऽस्थि संदृष्टं दन्तरूपं तया तदा ।
भग्नहर्षा म्लानमुखा तेजोहीनाऽभवत् क्षणम् ॥९९॥
रोषताम्रानना जाता नारदः प्राह तां सतीम् ।
मा स्म खेदं कुरु राज्ञि ! संसारः सारवान्न वै ॥१००॥
सत्यं देवाः प्रवदन्ति राजा पत्न्यस्थिपूजकः ।
स्नेहोऽधिको धरण्यस्थ्नि त्वं नाऽस्यस्थिसमाऽपि वै ॥१०१॥
सापत्न्यं सान्तकृद् दुःखं धन्याऽसि सहसे सति ! ।
अशुद्धमस्थि पूजायां रक्षितं हि श्मशानवत् ॥१०२॥

त्वां वै स्वर्गसमां त्यक्त्वा श्मशानं सेवते नृपः ।
दूरं कुरु श्मशानं तत् क्षिपाऽग्नौ भस्मतामियात् ॥१०३॥
स्नानं शुद्धिं कुरु वार्भिरित्युक्त्वा नारदो ययौ ।
उपला चोपलातुल्या सपत्नीरोषवह्निना ॥१०४॥
दग्धा शीघ्रं वराहास्थि चिक्षेपाग्नौ तदैव सा ।
नारदस्येच्छया हरेरिच्छाया वह्निरादहत् ॥१०५॥
अस्थिभस्मापि सरितो जले चिक्षेप रोषतः ।
सशोकरोषा गृहगा भोजनं नाऽकरोत् सती ॥१०६॥
राजा सायं त्वाजगाम नोवाच तं सती तदा ।
प्रातः स्नात्वा तु पूजार्थं यावत्तिष्ठति पार्थिवः ॥१०७॥
ददर्शाऽस्थि न पूजायां कोशस्य कुञ्चिकात्मकम् ।
शुशोच च क्षणं त्वां च पप्रच्छ मृतमानसः ॥१०८॥
क्वाऽस्थि गतं वद देवि ! सर्वजीवनकारणम् ।
उपला प्राह चुल्लिकावह्नौ गतं तदस्थिकम् ॥१०९॥
तवाऽऽननं ह्यनालोक्य भुंजामि न कदापि च ।
इति नो वंचनार्थाय मृषा राजन् विकत्थसे ॥११०॥
मृताया धरणेरस्थि पूजायां रक्ष्यते त्वया ।
यदग्रे तृणवन्मूल्यं कृतं नः सर्वथा त्वया ॥१११॥
मृषावादी स्वयं भूत्वा कथं वञ्चयसि प्रभो ।
अस्थि दग्धं च तद्भस्म नद्यां प्रवाहिता मया ॥११२॥
कुरु स्नेहं मयि राजन् जीवतीषु प्रियासु च ।
मृतायां मा कुरु स्नेहं भवबन्धनकारकम् ॥११३॥
इत्युक्तः स धनलोभी राजा धनतदात्मकः ।
अनित्याऽशुचिदुःखानात्मसु संघातकारिषु ॥११४॥
नित्यशिचिसुखात्मख्यातिमान् हा हेति वै वदन् ।
हृदयस्याऽतिरोधेन ममार नन्दपार्थिवः ॥११५॥
पत्न्यस्तं च तदा क्रोडे कृत्वा ताश्च सतीप्रियाः ।
देहान् प्रज्वाल्य वै स्वर्गं ययुर्वाराहयोगतः ॥११६॥
धरण्याश्च प्रतापेन वार्धिर्धनतलोऽभवत् ।
धरण्या धनसावर्णिस्ततो राज्यकरोऽभवत् ॥११७॥
तत्पुत्रो धर्मसावर्णिर्वैष्णवोऽभूद् भुवः पतिः ।
श्रवणात्पठनाच्चास्य ज्ञानं स्वर्गं तथा भवेत् ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये नन्दराज्ञो भक्त्या वाराहेण धरणिः भार्या कुमारिका रूपान्तरेण तस्मै दत्ता, धरण्याः पातिव्रत्येन वरदानरूपं दन्तास्थि प्राप्तं, नन्देन तद्द्वारा समुद्रे धनकोशः कृतः, धरणिनिधनोत्तरं नारदेनागत्य सपत्न्या अस्थिपूजनं राजा करोतीति उपलायै कथयित्वाऽस्थि भस्मायितं, तदाघातेन राजा नन्दो ममारेत्यादिनिरूपणनामाऽष्टाशीत्यधिकत्रिशततमोऽध्यायः ॥३८८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि मेरुदेव्याः कथां शुभाम् ।
पतिव्रताया नाभेश्च पत्न्या यद्ऋषभः सुतः ॥ १ ॥
जम्बूद्वीपाधिपः पूर्वमासीदाग्नीध्रराजकः ।
तस्य पुत्रोऽभवन्नाभिरनपत्योऽभजद्धरिम् ॥ २ ॥
नाभेः पत्नी मेरुदेवी पातिव्रत्यपरायणा ।
पतिं देवं पतिं कृष्णं पतिं नारायणं परम् ॥ ३ ॥
पतिं धर्मं पतिं कर्म वर्म नारायणात्मकम् ।
परब्रह्म पतिं मत्वा सेवते स्वात्मवत् सदा ॥ ४ ॥
स च ब्रह्मर्षिपत्नीनां ब्रह्मज्ञा ब्रह्मवित्तमा ।
ब्रह्मतन्तुवेदविद्यावती होमपरायणा ॥ ५ ॥
कर्मकाण्डक्रियाभिज्ञा पूजापाठपरायणा ।
ब्रह्मशक्तिस्वरूपा सा सरस्वत्यपरा यथा ॥ ६ ॥
वर्ततेस्म ब्रह्मपरा सति राज्येऽपि पावनी ।
प्रातः स्नात्वा पतिं नत्वा देवान् संपूज्य वस्तुभिः ॥ ७ ॥
पत्युः पूजां विधातुं सा प्रावर्तते पतिप्रिया ।
पतिं संस्नाप्य वस्त्राद्यैरलंकृत्य ततः सती ॥ ८ ॥
तदंगुष्ठजलं पीत्वा महापूजां करोति सा ।
सुवर्णस्य शुभे पीठे संनिषाद्य पतिं मुदा ॥ ९ ॥
विष्णवे पतिरूपाय समर्पयामि चासनम् ।
अर्घ्यं पाद्यं चाचमनं मत्स्वामिनेऽर्पयामि च ॥१०॥
दन्तशुद्धिकरं चार्द्रं काष्ठं ददामि रक्षिणे ।
गण्डूषार्थं जलं तैर्थं सुगन्धियुक् ददामि च ॥११॥
शौचाद्यर्थं जलं चान्यत् प्रददामि मदर्थिने ।
मृत्तिकाद्यैः परां शुद्धिं कारयित्वाऽमृतानि च ॥१२॥
दधि दुग्धं घृतं मिष्टं मधु ददामि स्वामिने ।
अभिषेकार्थसलिलं समर्पयामि स्वामिने ॥१३॥
स्नपयामि पतिं तैलं मर्दयामि सुगन्धकृत् ।
सिञ्चामि च जलं योग्यं स्नानार्थं मम स्वामिनि ॥१४॥
कोमलेनाऽम्बरेणाऽहं मार्जयामि जलं तनोः ।
वस्त्रं सुवर्णवर्णं च धौत्रं यज्ञोपवीतकम् ॥१५॥
उत्तरीयं यज्ञपट्टं स्वामिने त्वर्पयामि च ।
केशप्रसाधनं पुष्पसुगन्धतैलयोगतः ॥१६॥
कुर्वे मत्स्वामिनस्तुष्ट्यै समर्पयामि चन्दनम् ।
तिलकं चन्द्रकं भाले कारयामि सुशोभितम् ॥१७॥
नेत्रयोः कज्जलं रम्यं समनज्मि सतीपतेः ।
मस्तके मुकुटं रम्यं कर्णयोः कुण्डले शुभे ॥१८॥

कण्ठे मणिग्रथितात्युत्तमहारान् ददामि च ।
हस्तयोः शृंखले द्वे च भुजयोः कटके शुभे ॥१९॥
प्रकोष्ठयोः कटके च कट्यां च रशनां तथा ।
पादयोर्नूपुरे रम्ये पुष्पहाराँश्च शेखरान् ॥२०॥
गले मालाः करे गुच्छं पादुके पादयोः शुभे ।
समर्पयामि पतये सौवर्णस्य कृतानि वै ॥२१॥
छत्रं च चामरे रम्ये सिंहासनं सुवर्णजम् ।
धूपं दीपं चाऽक्षताँश्च कुंकुमं स्वर्णयष्टिकाम् ॥२२॥
समर्पयामि पतये नैवेद्यं मिष्टभोजनम् ।
स्वर्णस्थाल्यां प्रदत्तं च शष्कुलीलड्डुकादिकम् ॥२३॥
पायसान्नं व्यञ्जनानि दधि दुग्धादिकं फलम् ।
भक्ष्यभोज्ये लेह्यचोश्ये पेयं मिष्टं जलादिकम् ॥२४॥
समर्पयामि पतये कृष्णनारायणात्मने ।
आरार्त्रिकं ताम्बूलकं जलं शंखस्य शीतलम् ॥२५॥
प्रदक्षिणां दक्षिणां च पुष्पाञ्जलिं समर्पये ।
नतिं क्षमार्पणं चापि दास्यं सर्वं समर्पये ॥२६॥
पादसंवाहनं चान्यां सेवां सर्वां करोमि च ।
कृष्णनारायणरूपस्वामिनोऽहं पतिव्रता ॥२७॥
अग्नि प्रसादं देवस्य पत्युर्मे पापनाशनम् ।
एवं पूजयते नित्यं प्रातः पतिं यदा सती ॥२८॥
पत्यौ दिव्यं कृष्णनारायणं तत्र चतुर्भुजम् ।
पश्यति स्म तदा पातिव्रत्यभक्त्या महासती ॥२९॥
एवं प्रातश्च मध्याह्ने सायं रात्रौ च सेवते ।
एकदा सा स्थिता ध्याने सेवयित्वा पतिं सती ॥३०॥
ददर्श सा महत्तेजो ब्रह्मलोकाऽवधिप्रथम् ।
आविश्चकार भगवान् कृष्णनारायणो हरिः ॥३१॥
हिरण्मयः पीतकौशेयाम्बरधृक् श्रिया युतः ।
शंखचक्रगदापद्मचर्मखड्गसुवेणुमान् ॥३२॥
लसन्मुकुटकुण्डलकटककटिसूत्रकः ।
हारकेयूरनूपुराद्यंगभूषणभूषितः ॥३३॥
तादृशं श्रीकृष्णनारायणं चाऽऽर्हत् पतिव्रता ।
तुलसीदलदूर्वाऽद्भिः कुसुमैश्च निवेदनैः ॥३४॥
अर्हत्तमोऽसि भगवन् दिव्यगुणसमन्वितः ।
गुणगानं सेवनं ते भक्ताया मेऽस्तु गोचरम् ॥३५॥
राजर्षिर्मे पतिः शश्वत्प्रजाकामोऽस्ति भक्तराट् ।
त्वत्समः स्यादस्य पुत्रो येनाऽहं सुखमाप्नुयाम् ॥३६॥
भगवानाह मे दासि ! त्वन्मुखं मन्मुखं सति ! ।
त्वयाऽर्थितं सतीवाक्यं सत्यं भवतु तत्तथा ॥३७॥
आग्नीध्रीयोऽशकलयाऽवतरिष्यामि ते गृहे ।
इत्युक्त्वा सत्कृतिं लब्ध्वा त्वन्तर्दधे पुमुत्तमः ॥३८॥
तस्मिन्दिने निशाकाले मेरुदेव्यां नरायणः ।
प्रविवेशाऽथ प्रातश्चावततार तद्गृहे ॥३९॥
जातमात्रो युवा सर्वज्ञानसिद्धिप्रपूरितः ।
साम्योपशमवैराग्यैश्वर्यविभूतिसंभृतः ॥४०॥
एतादृशं सुतं कीर्तिबलौजःश्रीगुणादिभिः ।
वीर्यशौर्यधर्मभक्तियुतं तं ऋषभं जगौ ॥४१॥
ऋषभोऽयं कृष्णनारायणावतार एव सः ।
यत्स्पर्धया महेन्द्रश्च न ववर्ष समात्रयम् ॥४२॥
योगेश्वरः स ऋषभः प्रहस्य योगमायया ।
अजनाभे स्वीयराज्ये मेघो भूत्वाऽभ्यवर्षयत् ॥४३॥
नाभिः पुत्रं तमृषभं राज्येऽभिषिच्य चात्मना ।
परात्मनि महायोगं मेरुदेव्या युतोऽलभत् ॥४४॥
नरनारायणं ध्यात्वा दम्पती मोक्षमीयतुः ।
ऋषभः स्थापयामास विद्याशिक्षाप्रदं शुभम् ॥४५॥
धर्मशिक्षणलाभार्थं विद्यागुरुकुलं महत् ।
स्वयं राजा स्वयं शिक्षाचार्यो भूत्वाऽप्यशिक्षयत् ॥४६॥
इन्द्रः स्वयं समागत्य जयन्त्याख्यां स्वपुत्रिकाम् ।
लक्ष्मीरूपां भगवते ऋषभाय ददौ सतीम् ॥४७॥
गृहधर्मेण ऋषभस्तस्यां पुत्रशतं शुभम् ।
योगिनां मण्डलं तद्वै जनयामास सदृशम् ॥४८॥
तत्र वै भरतो राजा भारताधिपतिर्बभौ ।
कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ॥४९॥
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ।
महाभागवताश्चैते ब्रह्ममार्गाश्च योगिनः ॥५०॥
अन्ये कुशावर्तकाद्या राजानोऽप्यभवन् सुताः ।
ब्राह्मणा यज्ञशीलाश्च श्रोत्रीयाश्चाऽभवन्परे ॥५१॥
ऋषभो भगवान् कारुणिकः शान्तिप्रदो नृणाम् ।
द्रव्यदेशवयःश्रद्धाकालोजितवृषेऽचरत् ॥५२॥
एकदाऽभूत् समालक्षावधिब्रह्मर्षिसंकुला ।
ब्रह्मावर्ते जगाम श्रीऋषभो बोधमाददौ ॥५३॥
राज्यं समृद्धिः सुखं सर्वं स्वीयं चेति प्रकल्पितम् ।
पार्थिवेन प्रपुष्टं च देहं पारक्यमित्यपि ॥५४॥
क्लिद्यमानैर्भोजनाद्यैः क्लेदधर्मं च पाशवम् ।
सज्ञानं तत्तनुं लब्ध्वा ब्रह्मार्जनं प्रशस्यते ॥५५॥
सत्त्वशुद्धिर्देहभावे कथं स्याद् भोगसंभृते ।
ब्रह्मसौख्ये शाश्वतिके कुर्वन्तु श्रमणं प्रजाः ॥५६॥

ब्रह्मात्मानो ब्रह्मरूपा ब्रह्मसौख्या हि साधवः ।
योगिनो यतयः सेव्या महाभागवता जनैः ॥५७॥
गृहदाराऽपत्यवाटीपशुक्षेत्राणि यानि च ।
मां तु नारायणं त्यक्त्वा बन्धनानि तु तानि वै ॥५८॥
तानेव मां पुरस्कृत्य योजितानि परे यदि ।
मोक्षद्वाराणि जायन्ते सुहृदः साधवो यथा ॥५९॥
मां विहायेन्द्रियग्रामे लुब्धश्च विषयेष्विह ।
रमते यः सदा बद्धो न स साधुः प्रजायते ॥६०॥
यस्यात्मेन्द्रियविषयाऽन्तःकरणाद्यवर्ष्मणः ।
आत्मतत्त्वाप्त्यानुकूल्यं स वै पाशात्प्रमुच्यते ॥६१॥
तत्सर्वं मत्प्रीतियुक्तं यदि स्यात् कर्मकृद् यदि ।
निर्गुणं मत्पदप्राप्तिप्रदं स्यादात्मनः प्रियम् ॥६२॥
स्वार्थं बन्धकरं सर्वं परार्थं मोक्षदं यतः ।
स्त्रीपुंभावं हृदयस्थं ग्रन्थिरूपं विचिन्त्य यः ॥६३॥
मोहं विहाय विज्ञः स्यात्तदाऽऽश्लथेत बन्धनम् ।
कर्माशयो विलीयेत मुक्तः स्यादात्मनाऽऽत्मनि ॥६४॥
इच्छालये यत्नलयो निष्तृष्णस्य प्रजायते ।
पूर्णकामाश्रये प्राप्ते तृष्णा सर्वा निवर्तते ॥६५॥
दुःखदोषान्तकृत्सर्वं नाहं तथा निरीहकः ।
इति विमृश्य विद्यावान् परमहंसमाश्रयेत् ॥६६॥
मयि कर्माणि सन्न्यस्य मत्कथाश्रवणादिभिः ।
मम सतां प्रसंगेन मम लीलाप्रकीर्तनैः ॥६७॥
मयि निर्गुणभावेन युञ्जाना मुक्तिमाप्नुयुः ।
दृश्ये श्रव्ये तथा स्पृश्ये मां विभाव्यात्मनो गुरुम् ॥६८॥
साधुशीलो जनो भूत्वा ह्युपरमेत योगतः ।
भक्त्यानुवृत्त्या क्षमया वितृष्णया तितिक्षया ॥६९॥
मायायां दोषवृत्त्या च जिज्ञासयाऽप्यनीहया ।
मत्कथया सेवया मत्साम्यदृष्ट्या जिहासया ॥७०॥
अध्यात्मबुद्ध्या प्रहंससेवया ब्रह्मचर्यया ।
श्रद्धयेन्द्रियजयया यमनियमवार्तया ॥७१॥
भावनया प्रमादादिवर्जितया च विद्यया ।
योगवृत्त्या सत्त्वबुद्ध्या मद्दयया प्रसन्नया ॥७२॥
मदनुग्रहसंप्राप्योद्धरन्नुद्धारयेत्परान् ।
आशावादगतान् जीवान्निसर्गग्रध्नसंवहान् ॥७३॥
अविद्यायां वर्तमानान् कामकामाननारतान् ।
कर्ममूढाजडभावान् सुखलेशार्थमूर्छितान् ॥७४॥
उत्पथगान् रुडद्विड्व्याप्तानन्धकूपे न पातयेत् ।
प्रयोजयोच्च नैष्कर्म्ये येन शान्तिर्हि शाश्वती ॥७५॥

पुत्रः पत्नी गुरुर्माता पिता बन्धुः पतिः स्वसा ।
सुहृन्मित्रं सुताः सार्थः स एव यो विमोचयेत् ॥७६॥
धर्मं तु वक्षसि कृत्वा पृष्ठे विहाय चाऽवृषम् ।
युञ्ज्यात सर्वात्मना कृष्णे ऋषभो हंस एव सः ॥७७॥
धर्मतो मानवाः पूज्याः पुण्यश्रेष्ठा हि देवताः ।
सत्त्वश्रेष्ठास्तु ऋषयो ब्रह्माद्या ब्रह्मशक्तिभिः ॥७८॥
त एव ब्राह्मणाः प्रोक्ता ब्रह्मशक्त्यन्वितास्तु ये ।
मत्परा ब्राह्मणाः सर्वे महाभागवताः प्रियाः ॥७९॥
साधवो हृदयास्या मे तोलये नेतरत् समम् ।
यत्र वै श्रद्धया दत्तं हुतं गृह्णाम्यहं स्थितः ॥८०॥
त एव सेवनीया वै प्रजाभिर्मत्स्वरूपिणः ।
पदे पदे पावकास्ते यत्राऽर्हणं कृतं तु मे ॥८१॥
साक्षात् सोऽहं साधुमूर्तिश्चेतनः क्ष्माभुजां गुरुः ।
परः सोऽहं हंसरूपो धावल्यदः शुभात्मनाम् ॥८२॥
महामोहलयं प्राप्तः कृतान्तपाशकर्तनः ।
ग्रन्थिग्रथितग्रामाढ्यैः सुखप्राप्योऽत्र हंसकः ॥८३॥
स्वहंसेषु परहंसं गृह्णन्तु हंसकल्पकाः ।
इत्युपदेशमादत्वा शिष्यान् हंसान् विधाय च ॥८४॥
दिग्वासा ब्रह्मभोक्ता स. यथावरेण्यमेकलः ।
जडान्धमूकबधिरोन्मत्तवद्व्यचरद् वने ॥८५॥
आत्मार्पितस्वपरधर्ममताऽहंविवर्जितः ।
ब्रह्मानन्दपरिपूर्णतृप्तिहासप्रफुल्लितः ॥८६॥
अनन्तकामसौन्दर्यो नैजतेजःसमुज्ज्वलः ।
विकर्षन् प्रौढवनितामनांसि भगवद्गुणः ॥८७॥
क्षेत्रे वने ह्यटव्यां चाजगरीं वृत्तिमाश्रितः ।
शयानोऽश्नाति पिबति खादत्यपि च मेहति ॥८८॥
एवं गोमृगकाकादिचर्यया विचचार सः ।
कैवल्याधिपतिश्चात्ममहानन्दानुवेशितः ॥८९॥
जलस्थलाम्बरगतिः सिद्धसर्वार्थसंभृतः ।
यदृच्छासैश्वर्यसिद्धीर्नाभ्यनन्दत् हृदापि वै ॥९०॥
अस्थिरे मनसि सख्यं नैव कुर्याद्धरेर्जनः ।
विश्वस्तं तच्चिराचीर्णं तपो नाशयति द्रुतम् ॥९१॥
मिष्टं मिष्टं प्रदर्श्यैव गर्ते क्षिपति योगिनम् ।
कामं क्रोधं कलिं मोहं भयं दैन्यं ददाति यत् ॥९२॥
सोऽयं भगवद्रूपोऽपि दर्शयन्नैश्वरीं प्रथाम् ।
अवधूताकृतिं तिष्ठन् जिहासुः स्वकलेवरम् ॥९३॥
पाषाणं कवलं कृत्वा ददाह वेणुजेऽनले ।
अवतारा हरेर्याने नेतुं तत्र समागताः ॥९४॥

साधुं पुराणपुरुषं कल्याणसंभृतक्रियम् ।
निन्युः सत्कारवाद्याद्यैः स्थानिपावित्र्यलब्धये ॥९५॥
स्वर्गं जनं तपो महः सत्यं वैराजकं स्तरम् ।
हैरण्यगर्भं भौम चामृतं कृत्वा स पावनम् ॥९६॥
ययौ ब्रह्मपरं लोकं सच्चिदानन्दपौरुषम् ।
यत्र वै नैष्ठिका योगा ब्राह्मा ब्रह्मविदः सुराः ॥९७॥
पिबन्ति ब्रह्म परमं नित्यतृप्ता अथापि ते ।
इति ते कथितं लक्ष्मि ! मेरुदेव्यास्तथा शुभम् ॥९८॥
नाभेश्चरित्रं यस्य वै पुत्रोऽभूदृषभो हरिः ।
क्षुद्रजीवा यमाश्रित्य भविष्यन्ति सजीवनाः ॥९९॥
हंसा भूत्वा ब्रह्मलोकं यास्यन्ति केवलं पदम् ।
पठनाच्छ्रवणात्त्वस्य कैवल्यपदभाग् भवेत् ॥१००॥
आश्रयणाद् गृहत्यागाद् दीक्षाग्रहाद् वनासनात् ।
यो लाभः स भवेदस्य श्रद्धया श्रवणात् प्रिये ! ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये नाभेर्मेरुदेवीकृतया पातिव्रत्यधर्मेण महापूजया भगवदवतारः ऋषभः पुत्रो बभूव, तस्य योगेश्वरादयः पुत्राः, तस्योपदेशः, वनचर्या, चिरन्तनपरमहंसरीतिविवेचनम्, विवेकज्ञानमित्यादि निरूपणनामैकोननवत्यधिकत्रिशततमोऽध्यायः ॥ ३८९ ॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! कथा वैकुण्ठलोकगा ।
मम जन्मजयन्त्या उत्सवे नृत्ये सुसंभवा ॥ १ ॥
कार्तिकस्याऽधवलस्य पक्षस्य त्वष्टमीतिथौ ।
क्ष्मायां प्राविरभुवं कम्भरागोपालयोऽर्गृहे ॥ २ ॥
तन्निमित्तं महं चक्रुर्वैकुण्ठे मम पार्षदाः ।
पार्षदाण्यश्च भक्ताश्च वैकुण्ठं सोत्सवं ह्यभूत् ॥ ३ ॥
मण्डपाः कारिता रम्याः स्वर्णकलशशोभिताः ।
कदल्यादिस्तम्भयुक्ताऽशोकपत्रादितोरणाः ॥ ४ ॥
विद्युत्प्रदीपशोभाढ्याः श्रुतियन्त्रादिराजिताः ।
रंगानुरंगसचित्रहारालिदिव्यतान्विताः ॥ ५ ॥
सिंहासनादिशोभाढ्या भोज्यपेयादिशोभनाः ।
नृत्यमण्डपभागाढ्या नर्तकीगणसंश्रिताः ॥ ६ ॥
गन्धर्वाश्रितसद्वाद्या देवर्षिगणमण्डलाः ।
गृहाण्यपि विचित्राणि भवनानि कृतानि च ॥ ७ ॥
श्रृंगारितानि दिव्यानि रथ्यामार्गाः स्वलंकृताः ।
आवासाः संस्कृताः सर्वे नरा नार्यः स्वलंकृताः ॥ ८ ॥
स्नानभोजनपेयादिसमुत्सवप्रफुल्लिताः ।
गावः श्रृंगारिताः कन्या वस्त्रभूषादिशोभिताः ॥ ९ ॥
अजीराणि दधिरंगैश्चूर्णैर्मण्डलितानि च ।
वाद्यान्यपि प्रतिगृहं समवाद्यन्त तन्महे ॥१०॥
गीतयश्चापि श्रूयन्ते सर्ववैकुण्ठवासिषु ।
प्रातः सवितृसौवर्णे चाम्बरेऽथाभिकाशिते ॥११॥
दिव्यारमाप्रभालक्ष्मीमाणिकीपार्वतीश्रियः ।
कृष्णनारायणं नैजं स्वामिनं परमेश्वरम् ॥१२॥
संस्नाप्यामृतवार्भिश्च सुगन्धसारचन्दनैः ।
तैलसारादिभिर्वासयित्वा वस्त्रविभूषणैः ॥१३॥
रत्नहीरकमण्यादिहारैः कुसुमवस्तुभिः ।
मुकुटकुण्डलहारकटकश्रृंखलादिभिः ॥१४॥
ऊर्मिकानूपुरैर्यष्टिकुण्डलैस्तिलकादिभि. ।
शोभितो भगवान्नाथो दासीभिश्च चमत्कृतः ॥१५॥
पत्नीभिः सहितः स्वस्य पार्षदैश्चापि कोटिभिः ।
कन्याभिर्दासदासीभिर्मुक्तैः सभां समाययौ ॥१६॥
जयशब्दा ह्यभवँश्चाऽवाकिरन् कुसुमाऽक्षतैः ।
लाजाभिः कुसुमैर्द्रव्यैः स्वर्णमुद्रादिभिः प्रिया ॥१७॥
चक्रुर्गुणध्वनिं वेत्रहाराः कर्णमनोहरम् ।
नमन्ति स्म सभासंस्था वीक्षन्ते वैकुण्ठप्रजाः ॥१८॥
पूजयन्ति क्रमात् सर्वे भागवतास्तु पार्षदाः ।
सर्वा मुक्ताश्च मुक्तान्यः कृष्णपत्न्यश्च दासिकाः ॥१९॥
कन्यकाश्च प्रजाः सर्वा वैकुण्ठवासिनो जनाः ।
तिलकेन ललाटे च दर्भदानेन कर्णयोः ॥२०॥
पुष्पाञ्जल्या मस्तके च गुच्छेन करयोस्तथा ।
हारालिभिः कण्ठदेशे जलेन कृष्णपादयोः ॥२१॥
नमनेन तस्य हृदि प्रेम्णा नारायणात्मनि ।
उपदाभिश्चरणाग्रे पूजयित्वा च संसदि ॥२२॥
यथास्थानं स्थिताः सर्वे नृत्यं प्रावर्तताऽद्भुतम् ।
गान्धर्वा गायनं चक्रुर्वादयामासुरीश्वराः ॥२३॥
गायिकाश्चाप्यनुजगुस्तालदास्तालमाचरन् ।
नारदाद्याश्च तत्रासन् विप्रचीत्यादिकाः स्त्रियः ॥२४॥
ऋषयो मुनयो देवाः समाजग्मुर्महोत्सवे ।
अथात्र समये कन्या सात्त्वतपार्षदस्य वै ॥२५॥
कन्याशतयुता श्रृंगारिता नारायणस्य तु ।
पूजां कर्तुं समायाता द्व्यष्टवर्षातिसुन्दरी ॥२६॥
पार्षदस्तत्र श्रीकृष्णनारायणस्य पार्श्वगः ।
गान्धर्वजातीयवर्यो गान्धर्वः सल्लिल्युमान् ॥२७॥

चकमे तां वरारोहां दृष्ट्वा चञ्चलनेत्रकः ।
कन्या कृष्णं पूजयित्वा जलं कृष्णस्य पादयोः ॥२८॥
धृत्वा मुखे क्षितौ शेषं स्मृत्वा गान्धर्वमेव सा ।
शशाप त्वं क्षीणधनो मानवो भव चञ्चलः ॥२९॥
गान्धर्वोऽपि सुकन्यायाश्चिकीर्षितं ददर्श तत् ।
शशाप तां त्वमपि प्रक्षीणद्रव्यं तु मानवी ॥३०॥
चञ्चलाऽनुप्रयाह्यस्मात् स्थानाद् यावत् समानवः ।
इत्यभिधाय नत्वा तं ययौ नारायणं गृहम् ॥३१॥

तावत् पृथ्व्यां पतितोऽसौ च्यवनोऽभूदयोनिजः ।
अरण्ये व्यचरन्नित्यं सलिलेऽपि स्थितोऽभवत् ॥३२॥
जातिस्मरो जरद्देहो व्यचरच्च्यवनो मुनिः ।
वंशस्तम्बाश्रितः पृथ्व्यां तपस्तेपे स दारुणम् ॥३३॥
वल्मीकस्तस्य शिरसि वंशस्तम्बोऽप्यजायत ।
सुकन्या सात्त्वतपुत्री महान्ते भवनं ययौ ॥३४॥
पितरं प्राह तत्सर्वं सात्त्वतो हरिपार्षदः ।
सान्त्वयामास पुत्रीं स्वां प्राह कन्यां सुलोचनाम् ॥३५॥

शोकं मा कुरु पुत्रि ! त्वं त्वदर्थे चाप्यहं भुवि ।
द्वितीयेन स्वरूपेण चक्रवर्ती भवामि वै ॥३६॥
पश्चात्त्वं तु समायाहि त्वद्दुःखं नाशयाम्यहम् ।
इत्युक्त्वा सात्त्वतः पृथ्व्यां शर्यातिरभवन्नृपः ॥३७॥
परमो भक्तराड् राजा ब्रह्मिष्ठो ब्राह्मणप्रियः ।
जातिस्मरो वैष्णवश्च सूर्योदयास्तभूप्रभुक् ॥३८॥

वैकुण्ठस्य क्षणे याते सुकन्या भुवमागता ।
शर्यातिर्लक्षवर्षोऽभूच्च्यवनस्तु द्विलक्षकः ॥३९॥
शर्यातेस्तु गृहे कन्या मानसी पुत्रिकाऽभवत् ।
दिव्या दिव्यरमातुल्या यथा वैकुण्ठवासिनी ॥४०॥
नारायणपरा नित्यं शुभा पित्रोस्तु सेविका ।
पातिव्रत्यपरासर्वचमत्कारातिशालिनी ॥४१॥

जातिस्मरावनेऽरण्ये तीर्थे भूमौ च पर्वते ।
समुद्रे चाम्बरे स्वर्गे पाताले सैन्यकुद्रणे ॥४२॥
सर्वत्र व्योमगा दिव्या ययौ राज्ञोऽनुयायिनी ।
स्मरति स्म सलिलद्युं तपन्तं वंशविस्तरे ॥४३॥
तया सार्धं वनं यातो राजा सैन्येन संयुतः ।
सखीभिः सहिता सा च विचिन्वाना सुमानि वै ॥४४॥

ययौ यत्र तपस्व्यास्ते भाविसेवाश्रयो मुनिः ।
याभ्यां दृष्टा चंचलाभ्यां नेत्राभ्यां ते ददर्श सा ॥४५॥
वल्मीकरन्ध्रके रम्ये शुभे चञ्चत्सुतारके ।
दैवप्रेरणया बालाऽविध्यत्कण्टकयोजिते ॥४६॥

सुस्रावाऽसृक् ततो सैन्यस्याऽभून्मूत्रादिरोधनम् ।
शर्यातिस्तद्विलोक्याऽऽह सैनिकान् दुःखितान् मुहुः ॥४७॥
दैवीभूमिरियं काचिद् देवा वा मुनयोऽथवा ।
तापसा वा राक्षसा वाऽवश्यं स्युरत्र सद्वने ॥४८॥
कस्याऽप्यत्राऽपराधो वै मया सैन्येन कारितः ।
अन्यथा न भवेद् यावत्सैन्यमूत्रादिरोधनम् ॥४९॥
यत्किंचिद्वा यथा यद्वा तद्वा क्वापि च किंचन ।
यदि जातं केनचिच्चाऽवश्यं प्रकाश्यमेव तत् ॥५०॥

यद्वयं तत्प्रतीकारैः रक्षिताः स्याम ऐश्वरात् ।
तदा जातिस्मरा कन्या सुकन्या पितरं जगौ ॥५१॥
वंशस्तम्बेऽत्र युगलं ज्योतिर्मयं निभालितम् ।
मया वल्मीकविवरे निर्भिन्नं कण्टकेन च ॥५२॥
ततोऽसृङ्निर्गतं राजन् मन्ये तदपराधनम् ।
एतद्विज्ञाय राजाऽपि सस्मार सात्त्वतः स्वयम् ॥५३॥
सलिलद्युं च सुकन्यां च वैकुण्ठे शापशारदाम् ।
दुहितुर्वचनं श्रुत्वा राजा वल्मीकसन्निधौ ॥५४॥

ययौ प्रसादयामास वल्मीकान्तर्हितं मुनिम् ।
प्राह देही सुकन्यां मे मूत्ररोधादि नश्यति ॥५५॥
तथास्त्विति नृपः प्राह च्यवनश्चोत्थितो मृदः ।
वंशस्तम्बेन शिरसि शृंगवत्स व्यराजत ॥५६॥
तत्रैव दुहिता तस्मै प्रदत्ता सूर्यसाक्षिणा ।
स्वस्थं चाभूच्चतत्सैन्यं ययौ राजा गृहं स्वकम् ॥५७॥

च्यवनस्तपसा व्याप्तः शुष्कनाडीशरीरकः ।
तत्राश्रमे पर्णकुट्यां रुक्षो वृद्धोऽवसत्तथा ॥५८॥
सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ।
प्रीणयामास चित्तज्ञा समयज्ञाऽनुसेवया ॥५९॥
शरीरं मर्दयामास वृद्धस्य स्वामिनः सती ।
तैलेन पुष्पसारेण सुगन्धचन्दनादिभिः ॥६०॥

उष्णोदकेन स्नपनं कारयामास भावतः ।
वस्त्राणि चार्पयामास धारयामास चान्वहम् ॥६१॥
वन्यं फलं कणं कन्दं भोजयामास सद्वलम् ।
पाययामास मधुरं जलं प्रस्रवणाऽऽहृतम् ॥६२॥
शाययामास कदलीदलकुच्छयने सती ।
अग्निं प्रज्वाल्याग्निहोत्रं कारयामास सद्रसैः ॥६३॥
अतिथीन् सेवयामास दर्शनार्थं समागतान् ।
देवसेवां तुलस्याश्च पत्रैश्च कमलैः सती ॥६४॥
कारयामास विधिना फलैर्जलैश्च श्रद्धया ।
समिधश्चानयामास पार्श्वपवित्रवृक्षजान् ॥६५॥

गीतिकां कीर्तनं ज्ञानं श्रावयामास कण्ठतः ।
एवमृषेरनुवृत्त्या प्रीणयामास सा सती ॥६६॥
पातिव्रत्यं परं प्राप्ता विना कामसुखं सती ।
एकदा चिन्तयामास वृद्धस्य शुष्कवर्ष्मणः ॥६७॥
ऋषेर्देहस्य कल्पार्थे सस्माराश्विकुमारकौ ।
सुकन्यया स्मृतौ सूर्यपुत्रौ क्षणादुपस्थितौ ॥६८॥
वैद्यौ तां प्राहतुर्नम्रौ वद मातर्नमोऽस्तु ते ।
सुकन्याऽऽह ऋषेर्वर्ष्म मम योग्यं यथा भवेत् ॥६९॥
सुन्दरं यौवनोपेतं सबलं वीर्यवत्तमम् ।
तथा दत्तं वयो मत्स्वामिने भोगसमर्थकम् ॥७०॥
तथास्त्विति समुच्चार्याऽश्विपुत्रौ च्यवनाय वै ।
नत्वा तस्माच्च वव्राते सोमभागं क्रतौ सदा ॥७१॥
ऋषिर्बाढं तु तौ प्राह ततश्चैतौ रसायनैः ।
तत्रैव निर्मिते कुण्डे पूर्णे चाऽस्नापयदृषिम् ॥७२॥
ऋषिर्विंशतिवर्षो वै युवा देवीप्रमोहकः ।
मांसलः सुन्दरो रम्यः पूर्णसंभृतवीर्यकः ॥७३॥
रसायनैस्तु सञ्जातो न दृष्टो न श्रुतः पुरा ।
पुरा सुकन्ययापि तद्रूपं न दृष्टं न श्रुतं पुरा ॥७४॥
कन्यायाः पातिव्रत्यस्य परीक्षार्थं च तावपि ।
वैद्यौ रूपान्तरे धृत्वा रसायनेन मिश्रितौ ॥७५॥
यूना मुनिना संयुक्तौ समरूपौ बभूवतुः ।
पश्यन्त्या कन्यया कुण्डाद् दृष्टाः समुत्थितास्त्रयः ॥७६॥
पुरुषाः सदृशाकाराः कुण्डलिनः सुवाससः ।
सुगन्धव्याप्तशरीरा लावण्यरसवार्धयः ॥७७॥
दिव्यस्रग्धारिणस्तेजोभिश्च सूर्या इवाऽपरे ।
अजानती पतिं साध्वी दध्यौ ध्यानेन तं पतिम् ॥७८॥
कतमोऽत्र ऋषिर्बोध्यो यस्याऽस्म्यहं पतिव्रता ।
वरणीयः स एवाऽद्य त्याज्यौ द्वौ च तदन्यकौ ॥७९॥
विचार्येति सती स्वस्माच्छरीराच्च महानलम् ।
समुत्पाद्याऽनलव्याप्ता ययौ तांस्त्रीन् परीक्षितुम् ॥८०॥
उवाचाग्निं विना कान्तं प्रज्वालय तदन्यकौ ।
तावद्वह्निर्ववल्गे तावन्यौ ज्वालाभिरेव वै ॥८१॥
भस्मीकर्तुं मुनिं त्यक्त्वा तावचुक्रुशतुश्च तौ ॥
जाज्वल्यमानाऽवयवौ ववन्दाते भिषक्तमौ ॥८२॥
रक्षार्थं चक्रतुर्याच्ञां सत्या वह्निर्निवारितः ।
पातिव्रत्येन सत्येन च्यवने मालिकाऽर्पिता ॥८३॥
पातिव्रत्यं परं ज्ञात्वा सन्तुष्टौ त्वश्विपुत्रकौ ।
ऋषिमामन्त्र्य ययतुः सतीं नत्वा त्रिविष्टपम् ॥८४॥

अथर्षिश्च्यवनः स्वस्य श्वशुरं भूभृतं प्रति ।
वनिनं प्रेषयामासाऽऽकारयामास तद्वने ॥८५॥
शर्यातिः सुप्रसन्नात्माऽऽययौ ऋषिवराश्रमम् ।
दृष्ट्वा युवानं दिदृक्षुः पार्श्वे रूपान्तरान्वितम् ॥८६॥
राजाऽऽश्चर्यसमापन्नो बभूवोद्विग्नमानसः ।
पुत्री स्वपितरं दृष्ट्वा समुत्थाय नतिं व्यधात् ॥८७॥
राजा प्राह तदा पुत्रीं मुनिं वृद्धं विहाय किम् ।
जारं संसेवसे भर्तुः पितुर्निपात्यसे कुलम् ॥८८॥
अधिक्षिप्ता जनकेन पुत्री प्रसन्नमानसा ।
उवाच तात! जामाता तवैषश्च्यवनो मुनिः ॥८९॥
शशंस सर्ववृत्तान्तं मुनिः प्राह नृपं ततः ।
स्वागतं तेऽस्तु साम्राज्यं निर्विघ्नं चास्तु सर्वथा ॥९०॥
यज्ञं कुरु महाराज! सोमाऽभिधं ममाऽऽज्ञया ।
अश्विनोरसोमपयोर्देहि सोमग्रहं क्रतौ ॥९१॥
चकार यज्ञं राजाऽसौ च्यवनः स्वेन तेजसा ।
अकारयत् सोमपानं त्वश्विनोर्वैद्ययोस्तदा ॥९२॥
इन्द्रो वज्रं समुद्यम्य हन्तुं मुनिं समागतः ।
सवज्रं स्तंभयामास च्यवनः स हरेर्भुजम् ॥९३॥
अन्वजानंस्ततः सर्वे सदा सोमग्रहाविति ।
वैद्यौ कनिष्ठाविति यत् पूर्वं मत्वा बहिष्कृतौ ॥९४॥
ततस्तौ स्वर्गतौ राजा ददौ भूयसी दक्षिणाः ।
देवविप्राऽतिथिभ्यश्च च्यवनः स्वाश्रमं ययौ ॥९५॥
शर्यातेरभवत्पुत्रस्त्वानर्त्तः कृष्णभक्तिमान् ।
गोलोकात् स मणेः खण्डं कृष्णदत्तं समानयत् ॥९६॥
सोऽयमानर्तदेशोऽस्ति सौराष्ट्रः पश्चिमाब्धिभाग् ।
आनर्ताद् रेवतो जातो निर्ममे स कुशस्थलीम् ॥९७॥
तस्य जातः ककुद्मी च यस्य कन्या तु रेवती ।
याता पित्रा सह सत्ये लोके प्रष्टुं पितामहम् ॥९८॥
योग्यं पतिं तु कं लप्स्ये तत्र प्राह पितामहः ।
क्षणे कालेऽत्र संयाते पृथिव्यां सप्तविंशतिः ॥९९॥
चतुर्युगानां चातीता मूला आद्या नृपादयः ।
तद्वंशवंशवंश्यानामपि चिह्नं न विद्यते ॥१००॥
तस्माद् देहि कृष्णभ्रात्रे बलदेवाय मे मतम् ।
इत्युक्तः स समागत्य बलदेवाय तां ददौ ॥१०१॥
ककुद्मी तु तपः कर्तुं नरनारायणाश्रमम् ।
बदर्याख्यं ययौ भेजे कृष्णनारायणं सदा ॥१०२॥
इति ते कथितं लक्ष्मि! पातिव्रत्यपरायणम् ।
चमत्कारं सुकन्यायाः पठनाच्छ्रवणादपि ॥१०३॥

पापनाशस्तथा मुक्तिर्भुक्तिश्च वर्धतेऽधिका ।
कान्ते कृष्णेऽतिगा लक्ष्मि ! फलं सेवाकृतं लभेत् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने वैकुण्ठे श्रीकृष्णनारायणस्योर्जाऽधवलाऽष्टम्यां जयन्त्युत्सवे नृत्यादियोगे सलिलघ्रुगान्धर्वस्य सात्वतकन्यायाः सुकन्यायाः चञ्चलनेत्रदर्शनकृतशापेन परस्परं पृथिव्यामागत्य च्यवनत्वं शर्यातिकन्यात्वं च, ततो वने च्यवननेत्रयोः कण्टकाग्रेण स्फोटने सैन्यमलमूत्रादिनिरोधः, कन्यायाञ्चा च, च्यवनगार्हस्थ्यम्, अश्विनीकुमारद्वारा नवयौवनम्, पातिव्रत्यपरीक्षणम्, वैद्ययोः सोमयागे सोमभागग्राहित्वम्, शर्यातिपुत्र आनर्तस्तस्य ककुद्मी तस्य रेवत्या बलदेवेन विवाहनं चेत्यादिनिरूपणनामा नवत्यधिकत्रिशततमोऽध्यायः ॥३९०॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! पतिसेवाचमत्कृतिम् ।
यच्छ्रुत्वा संशयाः पतिव्रतानां यान्ति वै लयम् ॥ १ ॥
पतिः कृष्णस्वरूपोऽस्ति श्रीकृष्णः पतिरूपतः ।
वर्तते सर्वथा पत्न्याः कल्याणार्थं हरिः स्वयम् ॥ २ ॥
पतिः प्राकृतजनवत् करोति विविधां क्रियाम् ।
तथापि पुण्यरूपा सा पतिव्रताकृते मता ॥ ३ ॥
पतिव्रतायास्तत्रैव श्रेयः परं हि वर्तते ।
यथा यत्र प्रसन्नः स्यादधर्मोऽपि वृषः सहि ॥ ४ ॥
भर्तुः प्रीतिकरं कुर्यात् सदा पत्नी पतिव्रता ।
महाप्रीतिमवाप्नोति भर्त्रा सह तथाकरी ॥ ५ ॥
यद् देवेभ्यो यत्पितृभ्योऽतिथिभ्यो यद् यदात्मने ।
तत्सर्वं स्वामिनश्चार्थे विदध्याद्वै पतिव्रता ॥ ६ ॥
कृतस्याऽर्धं सती भुंक्ते भर्तृशुश्रूषयैव सा ।
भर्तृपुण्यं सदा भुंक्ते भर्तृलोके वसेच्चिरम् ॥ ७ ॥
यावदादित्यचन्द्रौ च तावद्देवोपमा दिवि ।
अत्र तत्र महासौख्यानन्दमग्ना भवेत् सती ॥ ८ ॥
पतिव्रताया ब्राह्मण्याः पतिसेवां वदाम्यहम् ।
कौशिकाख्यो ब्राह्मणो वै वेदकर्मविशारदः ॥ ९ ॥
प्रतिष्ठानपुरे त्वासीद् युवा रूपगुणालयः ।
कथाख्यानपरश्चापि बहुशिष्यप्रशिष्यकः ॥१०॥
धर्मं करोति नित्यं सः पुण्यं दानं करोति च ।
षट्कर्मनिरतश्चापि राजकार्यकरस्तथा ॥११॥
अन्तःपुरे वधूवर्गे विश्वास्यो याति नित्यदा ।
राज्ञीनां बोधकर्ता च कन्यानां शिक्षकस्तथा ॥१२॥
कलादाक्ष्यादिसंश्रेष्ठस्तत्त्वज्ञाने विशारदः ।
उत्सवेषु नृपाणां स राज्ञीनां याति मन्त्रणात् ॥१३॥
राजजन्माहसंसत्सु विप्रो याति निमन्त्रणात् ।
नर्तक्यो यत्र विविधा वादयित्र्यश्च गायिकाः ॥१४॥
देवीसमाः स्वर्णवर्णा द्व्यष्टवर्षाः सुसत्कृताः ।
राज्ञाऽऽदिष्टाः प्रगायन्ति नृत्यन्ति वादयन्ति च ॥१५॥
संगो हि बलवान् लक्ष्मि ! यस्य संगः प्रजायते ।
तद्रंगरञ्जितं व्यक्तेर्मानसं स्फटिकादिवत् ॥१६॥
जायते दर्शनं यादृक् तादृगिच्छा प्रवर्तते ।
प्रवृत्तिर्भोग्यलब्धौ च मोहितस्य प्रजायते ॥१७॥
पुरा सुसंस्कृता बुद्धिर्मोहाविष्टा तु कल्मषा ।
अतृप्तस्य सतृष्णस्य जायते लब्धिकिंकरी ॥१८॥
अस्य कौशिकविप्रस्य भार्याऽऽसीद्वै पतिव्रता ।
युवती सेविका शैब्या पत्याज्ञां पारमेश्वरीम् ॥१९॥
विधिश्रुतिं परां श्रेयस्करीं मत्वाऽनुवर्तते ।
पत्न्या सेविकया साध्व्या मुख्यभूत् स तथापि वै ॥२०॥
यदा राजसभां याति नृत्यगीतिविलासिताम् ।
तदा द्व्यष्टसमान्यूनाश्चन्द्रास्या गणिका द्विजः ॥२१॥
विलोक्य हावभावादिकर्त्रीः शृंगारशोभनाः ।
स्वर्णचम्पकवर्णाभाः कामनावान् बभूव सः ॥२२॥
तत्रैकां तनुशोभाढ्यां भोग्यां विप्रो ह्यकल्पयत् ।
अथाऽऽगतो गृहं दैवाज्ज्वरेणातिपरार्दितः ॥२३॥
असृग् जलात्मभावं वै देहे तस्य व्यजायत ।
चर्मकुष्ठं ततो जातं गलत्कुष्ठा नखास्तथा ॥२४॥
एवं रोगेण संक्लिष्टः स्मररोगेण चाधिकः ।
जाज्वल्यमानोहृदये निद्रां नाऽवाप वै पलम् ॥२५॥
सती पत्नी सुशीला सा सर्वभावेन सेवते ।
तं पतिं परमात्मानं मत्वा घृणां करोति न ॥२६॥
नित्यं प्रक्षालयत्युष्णसलिलेन नखादिकम् ।
स्नानं कारयति सम्यग् वस्त्राधानादिकं तथा ॥२७॥
अत्रेः शिष्योऽभवद् विप्रः सुशीला तु पतिव्रता ।
अनसूयासुशिष्याऽभूज्ज्ञानधर्मादिसद्धना ॥२८॥
अतः सा स्वपतिं नित्यं देहेन मनसा धिया ।
कर्मणा वचसा साध्वी सन्तोषयति सेवया ॥२९॥
विप्रो निःश्वासमामुच्यैकदा प्रोवाच तां सतीम् ।
निद्रा मे न समायाति मानसं ज्वलते सदा ॥३०॥

यद्दिनाद् वै मया दृष्टा गणिका राजसंसदि ।
तां भोक्तुं मे समिच्छाऽस्ति वद पत्नि करोमि किम् ॥३१॥
कामानलो हृदये मे ज्वलते गणिकाश्रयः ।
पादौ कुष्ठौ करौ वृक्णौ रुग्णोऽहं तां कथं लभे ॥३२॥
तां यदि प्रापय पत्नि ! सद्गतिर्मे भविष्यति ।
अन्यथा वासनावत्त्वे निधनेऽधोगतिर्ध्रुवा ॥३३॥
इत्युक्ता सा सती साध्वी नत्वा पत्युः प्रपादयोः ।
अहो भाग्यमहोभाग्यं पत्युस्तोषं करोमि वै ॥३४॥
गणिकां प्राप्नुयात् स्वामी यथा तद्वै करोम्यहम् ।
पत्नी सद्भाग्ययुक्ता सा बोध्या पुण्यकरी तथा ॥३५॥
याऽऽदिष्टा स्वामिना तुष्ट्यै द्राक् तुष्टिं प्रददाति सा ।
यया स्वामी भवेत् तुष्टः सेवा सा नेतरा क्वचित् ॥३६॥
इत्युक्त्वा प्रययौ साध्वी पृष्ट्वा पतिं तु तद्गृहम् ।
गणिकां पादयोर्नत्वा प्राह साध्वी प्रियं कुरु ॥३७॥
मम पत्युरसि मान्या स्मरत्यहर्निशं स्वसः ! ।
त्वामेवं हृदये ध्यात्वा विप्रो निद्रां करोति न ॥३८॥
अहं ते किंकरी भूत्वा करिष्ये तेऽतिसेवनम् ।
रंजय मे पतिं श्रेष्ठे यदिच्छस्व ददाम्यहम् ॥३९॥
इत्युक्ता सा ब्राह्मणस्य पप्रच्छ नाम वै धनम् ।
सर्वमावेदितं तस्यै साध्व्या स गणिका तदा ॥४०॥
साध्वी प्राह प्ररुग्णस्य कथं संगं ददामि वै ।
तथापि धनलोभेन रञ्जयिष्ये पतिं तव ॥४१॥
देहि नित्यं शतं मुद्रा राजतीर्निशिथेऽत्र मे ।
गृहे त्वानीय शयने कुरु ते तु पतिं मम ॥४२॥
नित्यं कुष्ठाक्तवस्त्राणि कुष्ठहस्तौ तथेतरत् ।
त्वमेव क्षालय चेद्वै दास्ये कामक्रियां तदा ॥४३॥
देहि सुवर्णभूषाश्च कामभोगं करोतु सः ।
इत्यादिष्टा सती चातिप्रसन्नाऽभूत् हृदन्तरे ॥४४॥
तावद् द्रव्यं ददात्येव नीत्वा स्वस्कन्धयोः पतिम् ।
संयोजयति सुन्दर्येष्टया गणिकया समम् ॥४५॥
बहुभिर्वासरैः स्वामी तृप्तोऽभूत् कामदेवतः ।
पत्नीं प्राह सति ! तेऽस्तु सतीलोकोऽत्र शाश्वतः॥४६॥
अद्याऽन्तिमनिशायां मां नीत्वा भोगं प्रकारय ।
पश्चात् तृप्तः सदा जातो नेच्छामि गणिकागृहम् ॥४७॥
इत्युक्ता सा सती भार्या स्कन्धे निधाय सत्पतिम् ।
रात्रावन्धतमोव्याप्तमार्गेण गणिकां ययौ ॥४८॥
तावन्मध्ये महद्विघ्नं समुत्पन्नं प्रिये ! शृणु ।
माण्डव्याख्यो महर्षिर्वै रात्रौ वृक्षतले स्थितः ॥४९॥
तत्र तेनैव मार्गेण चोरा राजधनं बहु ।
चोरयित्वा निर्गतास्तान् राजभटाः समन्ततः ॥५०॥
बद्ध्वा राजगृहं निन्युर्माण्डव्यं जगृहुश्च ते ।
पथि शूले तदा प्रोतमचौरं चौरशंकया ॥५१॥
माण्डव्यं तं तथाविधं शूलमारोप्य किंकराः ।
गतवन्तो गृहं नैजं माण्डव्यो दुःखितोऽभवत् ॥५२॥
पतिव्रता सुशीलाऽथ स्कन्धयोः कौशिकं पतिम् ।
कृत्वा दुःखार्तमाण्डव्यशूलं स्पृष्ट्वा तमोमये ॥५३॥
मार्गे यावज्जगामाऽसौ तावत्स्कन्धगतः पतिः ।
माण्डव्यमतिदुःखार्तं चालयामास स द्विजः ॥५४॥
पादावमर्षणात् क्रुद्धो माण्डव्यस्तमुवाच ह ।
सूर्योदये मृतिस्तस्य येनाऽहं चालितः पदा ॥५५॥
तच्छ्रुत्वा प्राह तद्भार्या सूर्यो नोदयमेष्यति ।
यद्यहं स्यां पतिभक्तिमती स्वामिपरायणा ॥५६॥
पतिसेवाप्रपुण्येन सूर्यमार्गो निरुध्यताम् ।
एतया तु यथोक्तं वै तत्तथैव प्रवर्तितम् ॥५७॥
ततः सूर्यस्य वै चाश्वाः प्रेर्यमाणा अपि ध्रुवाः ।
स्थैर्यमाप्ता जडीभूता गतिं नाग्रे समालभन् ॥५८॥
ततः सूर्योदयाऽभावादभवत् सततं निशा ।
सा तु सती पतिं नीत्वा वेश्याभोगं प्रदाय च ॥५९॥
पतिं तृप्तं कारयित्वा ययौ स्वस्या गृहं पुनः ।
पतिं संस्नाप्य विधिना कुष्ठं प्रक्षाल्य वर्ष्म च ॥६०॥
स्वयं स्नात्वा पतिं सुगन्धाद्यैः साऽमर्दयत्तथा ।
वस्त्रभूषापुष्पमालाधूपदीपादि संददौ ॥६१॥
दुग्धपानं ददौ साध्वी सर्वां पूजां चकार सा ।
पतिस्तृप्तो गृहसमृद्धिः सर्वा वेश्यावशंगता ॥६२॥
सती त्वचिन्तयल्लक्ष्मीं लक्ष्मीस्तत्रा समागता ।
वन्दिता पूजिता सत्या ददौ चिन्तामणिं ततः ॥६३॥
आशीर्वादवचो दत्वा ययौ लक्ष्मीर्निजं गृहम् ।
सती चिन्तामणिद्वारोऽरच्चयद्धनधान्यकम् ॥६४॥
गृहोपकरणं सर्वं भूषणानि च मुद्रिकाः ।
रसान् दिव्यांस्तथा भोगान् मिष्टान्नजलवैभवान् ॥६५॥
अथ सूर्योऽनुदयने ततो देवा भयं ययुः ।
ब्रह्माणं शरणं जग्मुस्तानूचे पद्मसंभवः ॥६६॥
पतिव्रताया माहात्म्यान्नोद्गच्छति दिवाकरः ।
पतिव्रतातपस्तेजः सूर्यतेजोऽधिकं यतः ॥६७॥
सूर्यस्याऽनुदयान्नाशो मर्त्यानां प्राणिनां तथा ।
सन्ध्यापूजार्चननैवेद्यक्रतुनाशनं भवेत् ॥६८॥

देवानामृषिवर्याणां पितॄणां चापि भोजनम् ।
विना सूर्योदयं लुप्तं भवेदेव न संशयः ॥६९॥
तस्मात् पतिव्रतां साध्वीं कौशिकस्य हि सेविकाम् ।
प्रसादयत वै पत्नीं भानोरुदयकाम्यया ॥७०॥
इत्याज्ञां ब्रह्मणो लब्ध्वा देवा मुनिजनर्षयः ।
ययुस्तत्र यत्र कुष्ठी त्वास्ते पत्न्या समं गृहे ॥७१॥
आगता म्लानवदनाः सत्कृतास्ते हि योषिता ।
अर्चिता वन्दिताश्चापि पृष्टाश्चागमकारणम् ॥७२॥
सर्वे स्वासनपाद्याद्यैः पूजिताः सुखहेतवे ।
ववन्दिरे सतीं हेतुं विनिवेद्य पुनः पुनः ॥७३॥
देवि ! माण्डव्यशापस्ते स्वामिने यत्कृतोऽधुना ।
त्वया सूर्याऽनुदयश्चेत्युभौ वै लोकनाशकौ ॥७४॥
किमत्र देव्या कर्तव्यं यथा लोकहितं भवेत् ।
कृपां कृत्वा कुरु साध्वि ! यथा कार्यद्वयं भवेत् ॥७५॥
पत्यायुः सूर्यदेवस्योद्गमश्च सुखदो भवेत् ।
माण्डव्यवचनं चापि यथा सत्यं भवेत्तथा ॥७६॥
अत्रेः पत्नी तदा तत्राऽनसूया लोकवन्दिता ।
कौशिकस्य गुरुपत्नी सुशीलां प्राह सा सती ॥७७॥
शृणु पुत्रि ! त्रयं कार्यं यथा भवेद् वदामि ते ।
देवास्त्वत्रागतास्तेषां प्रार्थना हितकारिणी ॥७८॥
कर्तव्या सर्वथा मात्रा त्वया चापि मयापि च ।
ब्रूहि धृत्वा जलं हस्ते यातु सूर्यः समुद्गमम् ॥७९॥
ब्रूहि पुत्रि ! देववैद्यौ कुरुतं निरुजं पतिम् ।
पत्युः रोगस्य नाशोऽत्र पतिनाशः प्रकल्प्यताम् ॥८०॥
कायाकल्पः स्वामिनस्ते निधनं परिगण्यते ।
युवा दिव्यस्वरूपो वै देववत् ते पतिर्भवेत् ॥८१॥
कृत्वादित्योदयं रुग्णं पतिं कान्तं प्रजीवय ।
इति प्रसादिता पत्नी सूर्योदयमकारयत् ॥८२॥
पतिं सूर्यस्य पुत्राभ्यां नवं देवमकारयत् ।
कृत्वादित्योदयं चैवं स्वभर्तारमजीवयत् ॥८३॥
कौशिकः सबलोवीर्यशक्तिभृतोऽभवत् क्षणात् ।
अश्विनीसुकुमाराभ्यां रसायनेन संस्कृतः ॥८४॥
अपूजयत सर्वदेवान् विससर्ज ततः सती ।
सिषेवे कान्तिकान्तं तं लेभे ब्रह्मसुखं महत् ॥८५॥
माण्डव्यो यमराजं च प्राह मे कर्मणः फलम् ।
यमः प्राह त्वया बाल्ये पञ्चवर्षेण खेलने ॥८६॥
तृणशुकी प्रविद्धाऽभूत् तीक्ष्णशूलेन मोहतः ।
तत्फलं शूलविध्यत्वं लब्धं त्वयाऽत्र मा शुचः ॥८७॥
माण्डव्यस्तु तदा धर्मं प्राह न्यायमयं वचः ।
पञ्चवर्षस्य बालस्य कामचारस्य सर्वथा ॥८८॥
दूषणं पातकं दण्डः सर्वं नास्त्येव बोध मे ।
पित्रोस्तत्पातकं पश्चादर्धं दशसमाऽवधिम् ॥८९॥
दशवर्षोत्तरं शिक्षा पातकं चोभयं भवेत् ।
मम तत्पातकं नास्ति कस्माच्छूलेऽभिरोपितः ॥९०॥
तस्मात् त्वं तत्फलं भुङ्क्ष्व भव धर्मश्चतुर्युगे ।
त्रेताधर्मेण विद्धस्त्वं द्वापरेणापि विद्धकः ॥९१॥
विद्धश्च कलिना दुःखमवाप्स्यसि गतः क्षितौ ।
अधर्मशूलविद्धस्य शूद्रता तेऽस्त्वहर्निशम् ॥९२॥
इतिशप्तो धर्मराजः शूलात्तमवरोपयत् ।
क्षमां ययाचे शूलस्य व्रणं दस्रेण नीरुजम् ॥९३॥
सन्धाय पूरयित्वा च यथापूर्वमकारयत् ।
इति ते कथितं लक्ष्मि ! चमत्कारपरायणम् ॥९४॥
पातिव्रत्यं व्रतं यत्र पापं पुण्यं प्रजायते ।
अधर्मो धर्मतां याति योगैश्वर्यादिवत् प्रिये ! ॥९५॥
पातिव्रत्यं महद्धर्मः पावनः सर्वदेहिनाम् ।
द्विजेनाऽनेन वै पूर्वं कृतं दीनस्य दुःखकृत् ॥९६॥
घातं तेनैव घातेन कुष्ठीजातोऽत्र जन्मनि ।
पुरा तेन कृतं दानं गौरीकन्यात्रयस्य वै ॥९७॥
तेन पुण्येन विप्रस्य गेहे पत्नी पतिव्रता ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिः सुखं भवेत् ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये कुष्ठिनः कौशिकविप्रस्य गणिकातृष्णस्य गणिकायोजनं तत्पतिव्रतया सुशीलया कारितं, माण्डव्यस्य शूलस्थस्य पादघट्टनेन कौशिकस्य रव्युदयपूर्वं निधनमिति शापे सुशीलया सूर्यस्याऽनुदयनं कृतम्, ततो देवानां प्रार्थनया सुशीलया शापादिनिवृत्तिः कृता, धर्मस्य तु प्रतिदंडरूपं युगेषु तत्तद्युगधर्मविद्धत्वमिति च निरूपणनामैकनवत्यधिकत्रिशततमोऽध्यायः ॥ ३९१ ॥

श्रीनारायण उवाच—

आकर्णय महापद्मे लक्ष्मि ! पापविनाशिनीम् ।
कथां शान्तिकरीं रम्यां शृण्वतां मोक्षकारिणीम् ॥ १ ॥
पूर्वे युगे महावीर्यः शत्रुजिन्नामभूपतिः ।
बभूव यज्ञकृत् यत्र तुष्टा देवाः सवासवाः ॥ २ ॥

तस्य पुत्रो महावीर्यो बभूव देववीर्यवान् ।
ऋतध्वज इतिख्यातो व्योमचारी स योगिराट् ॥ ३ ॥
सिद्धिभिः सेवितः शश्वद्विज्ञानगुणसागरः ।
यस्य नाऽविदितं किञ्चित् पाण्डित्यं सर्वतोऽधिकम् ॥ ४ ॥
तस्य कीर्तिं परां श्रुत्वा चतुर्दशस्तराऽधिपाः ।
ऋषयो मुनयो नागा आयान्ति दर्शनाय वै ॥ ५ ॥
कस्यचित्त्वथ कालस्य नागलोकान्महीतलम् ।
कुमारावागतौ नागौ पुत्रावश्वतरस्य तु ॥ ६ ॥
ब्रह्मरूपप्रतिच्छन्नौ तरुणौ प्रियदर्शनौ ।
दर्शनं सत्कृतिं कृत्वा ययतुश्चागतौ पुनः ॥ ७ ॥
एवं नित्यं बहुप्रीत्याऽऽययतुर्ययतुः सदा ।
स च ताभ्यां नृपसुतः परमानन्दमाप्तवान् ॥ ८ ॥
विना ताभ्यां न बुभुजे न सस्नौ न पपौ मधु ।
न रराम न जग्राह किञ्चित्ताभ्यां विना सुतः ॥ ९ ॥
अपि तौ बहुलं कालं कुमाराग्रे हि निन्यतुः ।
एकदा तत्र पाताले पिता तौ नागबालकौ ॥१०॥
पप्रच्छ मर्त्यलोके नौ मित्रता केन वर्तते ।
यत्र युवां बहुकालं यापयथः सुपुत्रकौ ॥११॥
तावूचतुः शत्रुजितः पुत्रो नाम्ना ऋतध्वजः ।
रूपवानार्जवोपेतो विद्वान्मैत्रो गुणाकरः ॥१२॥
प्रभोर्भक्तश्चातिथेयस्तेन चोपहृतं मनः ।
तद्वियोगेन नौस्तात ! न सुखं जायतेऽत्र वै ॥१३॥
पिता प्राह स धन्योऽस्ति यस्यैवं गुणकीर्तनम् ।
परोक्षस्यापि गुणिभिः क्रियते धन्यजीवनम् ॥१४॥
यस्य मित्रगुणान् मित्राण्यमित्राणि पराक्रमम् ।
कथयन्ति सभादौ वै पुत्रवाँस्तेन वै पिता ॥१५॥
तस्य निष्पादितं पुत्रौ किञ्चित्तोषाय चेतसः ।
मद्गृहे यत्सुवर्णादि रत्नं वाहनमासनम् ॥१६॥
यत्त्वन्यत् प्रीतये तस्य तद्देयमविशंकया ।
उपकारकृतो देवास्तस्येच्छन्ति सदोन्नतिम् ॥१७॥
आहतुश्च सुतौ तात ! यानि रत्नानि तद्गृहे ।
वाहनासनयानानि भूषणान्यम्बराणि च ॥१८॥
तानि सन्ति न त्रैलोक्ये ज्ञानं नान्यत्र तत्समम् ।
एकं तस्यास्ति कर्तव्यं तत्त्वसाध्यं प्रभुं विना ॥१९॥
पिता प्राह किमसाध्यं दुर्लभं व्यवसायिनः ।
उद्यतानां न त्वगम्यं नाऽप्राप्यं दिवि चेह वा ॥२०॥
तस्मात् कथयतं पुत्राववगच्छाम्यसाध्यकम् ।
प्राहतुः पितरं पुत्रौ "कदाचिद् गालवो द्विजः" ॥२१॥
समाययौ शत्रुजितं गृहीत्वा तुरगोत्तमम् ।
प्राहाश्रमे मम कश्चिद् दैत्यः खादति प्राणिनः ॥२२॥
तथा करोति विघ्नानि ध्याने मौने च मेऽपि सः ।
भस्मीकरोमि कोपेन यदि तर्हि तपःक्षयः ॥२३॥
राज्ञा तस्माद्धि दैत्यानां नाशः कार्यो हि धर्मतः ।
एकदा स मया राजन् दैत्यं निरीक्ष्य दुःखतः ॥२४॥
निःश्वासः प्रहितस्तावद्व्योम्नश्चायं तुरंगमः ।
सूर्येण प्रेषितश्चायात् त्रैलोक्याऽहतसञ्चरः ॥२५॥
पर्वतेषु समुद्रेषु पातालेष्वनलेषु च ।
नित्यं भूवलयं सर्वमश्रान्तोऽयं चरिष्यति ॥२६॥
अतः कुवलयो नाम्ना ख्यातिं लोके गमिष्यति ।
दैत्यं चैनं समारुह्य ऋतध्वजो हनिष्यति ॥२७॥
पुत्रमाज्ञापय राजन् यथा धर्मो न लुप्यते ।
स तस्य वचनाद् राजा तं वै पुत्रमृतध्वजम् ॥२८॥
तमश्वरत्नमारोप्य कृतकौतुकमंगलम् ।
अप्रेषयत् मुनिना सह मुन्याश्रमं ययौ ॥२९॥
ऋतध्वजश्च विघ्नानि नाशयामास चाश्रमे ।
दैत्यः स शौकरं रूपं धृत्वा धर्षयितुमृषिम् ॥३०॥
आगतस्त समालक्ष्य शीघ्रमारुह्य तं हयम् ।
अन्वधावद् वराहं तं ऋतध्वजः शरासनी ॥३१॥
बाणाहतो मृगो धावन् प्रविवेश महाटवीम् ।
त्रस्तः पपात विवरे तिमिरौघसमाकुले ॥३२॥
तमनु राजपुत्रोऽपि हन्तुं पपात वाजियुक् ।
वराहोऽदृश्यतां प्राप्तो राजपुत्रस्तु शोभितम् ॥३३॥
पातालं समपश्यद्वै सौवर्णसौधसंकुलम् ।
सप्राकारं पुरं रिक्तमपश्यत्तद् विवेश सः ॥३४॥
तत्र योषिद्वरा दृष्टा सा तं निन्ये गृहान्तरम् ।
तस्मै भवनभूमौ वै पर्यंके सर्वकांचने ॥३५॥
दर्शयामास युवतीं कन्यां पीनपयोधराम् ।
बिम्बाधरोष्ठीं तन्वंगीं नीलोत्पलविलोचनाम् ॥३६॥
रक्ततुंगनखीं मृद्वीं स्वर्णवर्णां शुभालकाम् ।
सा बालापि राजसुतं दृष्ट्वा शोभान्वितं तदा ॥३७॥
मुमोह क्षोभमाप्ता सा समैच्छन्नृपतिं पतिम् ।
ऋतध्वजेन संपृष्टा वृत्तान्तं नैजमाह सा ॥३८॥
विश्वावसुरिति ख्यातो दिवि गन्धर्वराजकः ।
तस्याऽहमात्मजा राजन् नाम्ना ख्याता मदालसा ॥३९॥
पतिव्रता पतिप्राणा पत्यर्थे सर्वदा स्थिता ।
प्रतीक्षे मत्पतिं प्राणसमं योग्यं हि मानवम् ॥४०॥

अहमुद्यानगा चाऽसं पुष्पार्थं तावदेव माम् ।
पातालकेतुर्दनुजोऽपहृत्य नीतवानिह ॥४१॥
आगामिन्यां त्रयोदश्यां मत्पाणिग्रहणाय सः ।
समुद्यतोऽस्ति तं राजन् वाराहरूपमाश्रितम् ॥४२॥
केनापि विद्धं बाणैश्च मुनीनां त्राणकारणात् ।
प्रच्छन्नं वर्तमानं तं हत्वा मां नय भूपते ॥४३॥
कस्त्वं कोऽसि वद शीघ्रं ज्ञातोऽपि तु विशेषतः ।
स्वीयवृत्तप्रकाशेन प्रेमपात्रं भविष्यसि ॥४४॥

देवो दैत्यो नु गन्धर्वः पन्नगः किन्नरोऽपि वा ।
तत् त्वमाख्याहि यावद्वै यथा मेऽवितथं मनः ॥४५॥
ततः प्रसन्नः कुवलयाश्वः ऋतध्वजो जगौ ।
राज्ञः शत्रुजितः पुत्रो गालवाश्रममागतः ॥४६॥
शौकररूपदैत्यस्य मन्नाराचहतस्य च ।
पृष्ठं प्रधाव्य गर्तेऽत्र पाताले पतितोऽस्म्यहम् ॥४७॥
ऋतध्वजोऽस्मि नाम्नाहं कुवलयाश्व इत्यपि ।
इत्येतत् कथितं वृत्तं न देवोऽहं न दानवः ॥४८॥

न पन्नगो न गन्धर्वः किन्नरो न शुचिस्मिते ! ।
मनुष्योऽस्मि तव रक्षां करिष्ये दैत्यतः प्रिये ! ॥४९॥
इत्याश्रुत्य तु कन्या सा प्रहृष्टा पुलकाञ्चिता ।
यदर्थं निर्मिता चाऽहं सोऽयं प्राप्तो मुमोद सा ॥५०॥
प्राह चैनं हृदयं मे त्वयि स्थैर्यं प्रपश्यति ।
जातिस्मराप्यऽहं राजँस्तवैवाऽस्मि स्मरामि च ॥५१॥
चन्द्रमेवोपैति कान्तिः समुपैति रविं प्रभा ।
भूतिर्धन्यं धृतिर्धीरं क्षान्तिरभ्येति सज्जनम् ॥५२॥

गृहाण मां प्रियां कान्त ! शीघ्रं नाशय राक्षसम् ।
ऋतध्वजस्तदा प्राह परवानहमस्मि वै ॥५३॥
किं करोमि विनाऽऽज्ञां तु पित्रोर्नाऽस्मि तथाक्रियः ।
सती मदालसा प्राह साधयामि पितुर्वचः ॥५४॥
इत्युक्त्वा सा जलं नीत्वा करे सस्मार तुम्बुरुम् ।
तुम्बुरुर्द्राक् समायातो नत्वा प्राह सतीं कुतः ॥५५॥

स्मृतोऽहं वद देवेशि ! साधयामि क्षणेन तत् ।
मदालसा कुलगुरुं तुम्बुरुमवदद् गुरो ! ॥५६॥
तूर्णं याहि शत्रुजितं निवेदय मदालसाम् ।
ऋतध्वजं पतिं कर्तुं समिच्छत्यनुमोदय ॥५७॥
तुम्बरुर्व्योममार्गेण त्वन्तर्धानाख्यविद्यया ।
शत्रुजितं प्रति गत्वा विनिवेद्य ह्युदन्तकम् ॥५८॥
आज्ञां तस्य समागृह्य प्रगृहीतसमित्कुशः ।
मदालसायाः सम्प्रीत्या प्राप्तस्तत्र पुनः क्षणात् ॥५९॥

प्रज्वाल्य पावकं हुत्वा मन्त्रवित् कृतमंगलाम् ।
कन्यां विवाहविधिना ददौ ऋतुध्वजाय सः ॥६०॥
जगाम तपसे तुम्बुरुर्मुनिः स्वाश्रमं पुनः ।
कन्याऽऽह तां श्रियं शान्तां कृतार्थाऽस्मि वरानने ! ॥६१॥
आज्ञापय च मां मातर्गन्तुं पत्युर्गृहं प्रति ।
कुण्डला सा तदोवाच कृतार्था स्याः पतिव्रते ! ॥६२॥
तीर्थाऽम्बुधूतपापाऽपि भवित्री नेदृशी यथा ।
संयुक्ताऽनेन संपूता जाता संसारतारिणी ॥६३॥

कथयाम्यथ नौ किञ्चित् स्नेहभारप्रणोदिता ।
भर्तव्या रक्षितव्या च भार्या हि पतिना सदा ॥६४॥
धर्मार्थकामसंसिद्ध्यै भार्या भर्तृसहायिनी ।
यत्र भार्या च भर्ता च मिथोमिथोऽनुवर्तिनौ ॥६५॥
तत्र धर्मार्थकामानां मोक्षस्याऽप्यस्ति संगतिः ।
भार्या तथैव भर्तारमृते धर्मादिसाधने ॥६६॥
मोक्षार्थे वा दिवि सत्ये वैराजे वा भुवस्तले ।
न समर्था यतो धर्मचतुष्टयमुभाश्रितम् ॥६७॥

देवतापितृभृत्यानामतिथीनां च पूजनम् ।
नैकेन शक्यते कर्तुं दाम्पत्यं तत्र कारणम् ॥६८॥
प्राप्तोऽपि चार्थो मनुजैरानीतोऽपि निजं गृहम् ।
क्षयमेति विना भार्यां कुभार्यासंश्रयेऽपि वा ॥६९॥
एतन्मयोक्तं युवयोर्दाम्पत्यं शाश्वतं तथा ।
वर्धतामनया सार्धं धनपुत्रसुखायुषा ॥७०॥
त्वं तु कन्ये ! मदालसे ! त्यक्त्वा पत्युर्मदालसा ।
भवाऽनेन च कान्तेन सार्धं स्वर्गाद् गरीयसी ॥७१॥

इत्युक्त्वा विररामैव ऋतध्वजो मदालसा ।
कुण्डलां तां परिष्वज्य समारुह्य तुरंगमम् ॥७२॥
उत्पपाताऽम्बरमार्गे दैत्या दृष्ट्वा विचुक्रुशुः ।
कन्यारत्नं यदानीतं ह्रियते ह्रियते दिवम् ॥७३॥
तिष्ठ तिष्ठेति जल्पन्तो ववृषुः शरजालकम् ।
ऋतध्वजोऽपि चिच्छेद शरजालं तु लीलया ॥७४॥

ततोऽस्त्रं त्वाष्ट्रमादाय चिक्षेप प्रति दानवान् ।
तेन ते दानवाः सर्वे स्फुटदस्थिचयाः कृताः ॥७५॥
स्त्रीरत्नेन सह तूर्णं समागच्छत् स्वकं पुरम् ।
प्रणिपत्य च तत्सर्वं स स्वपित्रे न्यवेदयत् ॥७६॥
पिता श्रुत्वाऽऽह तं प्रेम्णा परिष्वज्य सुपुत्रकम् ।
सत्पुत्रेण त्वया पुत्र ! तारितोऽहं महात्मना ॥७७॥
भयेभ्यो मुनयस्त्राताः कन्याऽपि रक्षिताऽऽहृता ।
यदुपात्तं यशः पित्रा धनं वीर्यमथाऽपरम् ॥७८॥

तद्वीर्यादधिकं कुर्याद् वर्धयेद् यस्तु शक्तिमान्।
नवं निष्पादयत्येनं प्रवदन्ति नरोत्तमम् ॥७९॥
तद्वन्योऽस्मीदृशं पुत्रं प्राप्याह पुण्यशालिनाम्।
सुश्लाघ्योऽस्म्यद्य संजातस्त्वया सद्धर्मशालिना ॥८०॥
यः स्वपराक्रमैर्हीनः प्रज्ञादानवृषादिभिः।
धिग्जन्म तस्य यः पित्रा लोके विज्ञायते जनः ॥८१॥
आत्मना ख्यातिमान् श्रेष्ठो मध्यः पितृपितामहैः।
मातृपक्षेण मात्रा च ख्यातिमेति नराधमः ॥८२॥
तत्पुत्र! धनवीर्यैस्त्वं विवर्धस्व सुखेन तु।
गन्धर्वतनया चेयं मा त्वया वै वियुज्यताम् ॥८३॥
इति पित्रा च मात्रा च प्रियमुक्तं पुनः पुनः।
गालवेनर्षिणा चापि ह्याशीर्वादाः समर्पिताः ॥८४॥
पुत्रश्च भार्यया सार्धं राज्यधर्मान् गृहाश्रमम्।
पालयन् वर्धयन् स्नेहं रेमे साध्व्या समं सुखी ॥८५॥
श्वश्रूश्वशुरयोः पादौ प्रणिपत्य मदालसा।
पतिव्रता सती रेमे जातिस्मरा स्वरक्षिणा ॥८६॥
एवं काले बहुतिथे गते राजा पुनः सुतम्।
प्राह गच्छाऽऽशु विप्राणां त्राणाय चर मेदिनीम् ॥८७॥
अश्वमेनं समारुह्य भ्रमणं कुरु मण्डले।
दुर्वृत्तेभ्यो दानवेभ्यो मुनीनां च सतामपि ॥८८॥
न स्याद् बाधा यथा पुत्र! रक्षणं त्वं तथा कुरु।
स तु पित्रुक्तरीत्यैव चचार मेदिनीं मुहुः ॥८९॥
यमुनायास्तटे दैत्यं तालकेतुं ददर्श सः।
वाराहरूपदैत्यस्याऽनुजं मुनिस्वरूपिणम् ॥९०॥
स दैत्यः प्राह तं तत्र पूर्ववैरमनुस्मरन्।
राजपुत्र! मुनिश्चास्मि यक्ष्ये यज्ञेन तत्र च ॥९१॥
हिरण्यं देहि मे कण्ठभूषणं तव यद्वरम्।
रक्ष ममाऽऽश्रमं चेमं यावदन्तर्जलेऽप्यहम् ॥९२॥
वरुणं वैदिकैर्मन्त्रैरभिष्टूयैमि चाश्रमम्।
इत्युक्तवते मुनये सः प्रादात् कण्ठभूषणम् ॥९३॥
प्राह स्थास्याम्यत्र तावद् यावदागमनं तव।
इत्युक्तः सः कपटर्षिर्दैत्यो ममज्ज वारिणि ॥९४॥
मदालसायाः प्रत्यक्षमुद्गतश्चोक्तवान् रुदन्।
वीरः कुवलयाश्वः स ममाश्रमसमीपतः ॥९५॥
केनापि दुष्टदैत्येन भिन्नः शूलेन वक्षसि।
मृतो ददौ तु मे कण्ठभूषणं मस्मितः स च ॥९६॥
अश्वं जहार दैत्यः सः सर्वं मयाऽवलोकितम्।
गृहाण देवि! ते भूषां क्रियतां चोत्तरक्रियाम् ॥९७॥

इत्युक्त्वोत्सृज्य तद्भूमौ स जगाम यथागतम्।
मदालसा तथान्ये च श्रुत्वा चक्रुर्विलापनम् ॥९८॥
निर्गम्य च बहिःस्नाता ददुः पुत्राय वार्यपि।
पतिव्रता तु सञ्चिन्त्य विना पतिममंगलाम् ॥९९॥
कृत्वा समाधिं हृदये वह्निमुत्पाद्य चान्तरम्।
शरीरं विलयीकृत्य स्वर्गं याता हि सुन्दरी ॥१००॥
विचिन्वाना पतिं नैजं नाऽवाप तत्र सा ततः।
यमराजं प्रति गत्वा पप्रच्छ क्वाऽस्ति मे पतिः ॥१०१॥
धर्मराजस्तदा प्राह जीवितोऽस्ति यमीतटे।
तव सजीवनार्थं च पाताले त्वत्पतिप्रियः ॥१०२॥
सुहृन्नागस्तपश्चर्यां करोति शंकरोपरि।
तावददृश्यरूपा त्वं मम धर्मालये वस ॥१०३॥
इति सा चोषिता धर्मभवने चात्र भूतले।
तालकेतुः स दैत्यस्तु निर्गत्य यमुनाजलात् ॥१०४॥
राजपुत्रं समुवाच कृतार्थोऽहं त्वया कृतः।
गच्छ गृहमिदानीं त्वमिति श्रुत्वा स तं ऋषिम् ॥१०५॥
प्रणिपत्य समारुह्य त्वश्वं प्रायात् पुरं स्वकम्।
जनान् ददर्शोद्विग्नान् प्राक् प्रहृष्टास्यांस्ततः पुनः ॥१०६॥
अहो विघ्नं गतं त्वस्य विद्यते जीववानयम्।
मृत्युवार्ता मृषा जाता चिरं जीव कुमारक! ॥१०७॥
इति श्रुत्वा पौरवाचः प्रविवेश पितुर्गृहम्।
मुमुदिरे पिता माता बान्धवाः सुहृदो जनाः ॥१०८॥
मदालसामनादृष्ट्वा पप्रच्छ पितरं सुतः।
ज्ञात्वा वृत्तान्तमघटं शुशोच क्षणमेव सः ॥१०९॥
पुनः स चिन्तयामास परिसंस्तभ्य मानसम्।
मृतेति सा मन्निमित्तं त्यजामि यदि जीवितम् ॥११०॥
किं मयोपकृतं पत्न्या पतिना पारलौकिकम्।
अतोऽत्र मन्ये कर्तव्यस्त्यागो भोगस्य योषितः ॥१११॥
तस्या मुक्तिर्यथा स्याद्वै तत्कर्तव्यं जपादिकम्।
अन्या भार्या न कर्तव्या ब्रह्मचर्यधृता मया ॥११२॥
यदि मदालसा नात्र भार्या मेऽस्ति ततो ध्रुवम्।
अन्यायाश्च पतिर्नास्ति पत्नीव्रतः ऋतध्वजः ॥११३॥
तामृते मृगशावाक्षीं गन्धर्वतनयामहम्।
न भोक्ष्ये योषितं कांचिदिति सत्यं वदाम्यहम् ॥११४॥
सद्धर्मचारिणीं पत्नीं तां मुक्त्वाऽऽहं पतिव्रताम्।
कांचिन्नांगीकरिष्यामीत्येतत् सत्यं वदाम्यहम् ॥११५॥
इति श्रुत्वा 'पुत्रयोश्च वचनं नागराट् स्वयम्।
तपश्चर्यां परां कृत्वा वरं प्राप्य च शंकरात् ॥११६॥

ऋतध्वजाय दातव्या पुना राज्ञी मदालसा।
यत्र सृष्टौ तु सा त्वास्ते तस्मादादाय सर्वथा ॥११७॥
इति प्रतिज्ञां कृतवान् पुत्रावापृच्छ्य वै ततः।
तीर्थे हिमवतो गत्वा तपस्तेपे सुदारुणम् ॥११८॥
अश्वतरः स नागेन्द्रस्तुष्टाव तपसा हरम्।
प्रातर्निशायां मध्याह्ने सन्ध्ययोश्चापि तत्परः ॥११९॥
तस्य कालेन महता प्राहेशो गृह्यतां वरः।
प्रणम्याऽश्वतरः प्राह वरमेनं प्रयच्छ मे ॥१२०॥
मृता कुवलयाऽश्वस्य पत्नी साध्वी मदालसा।
तेनैव वयसा सद्यो दुहितृत्वं प्रयातु मे ॥१२१॥
जातिस्मरा यथापूर्वं तद्वत्कान्तिसमन्विता।
योगिनी योगमाता च मद्गेहे जायतां सती ॥१२२॥
हरः प्राह तथाऽस्त्वेतत् सर्वं ते वै भविष्यति।
मत्प्रसादादसन्दिग्धं श्राद्धं कुरु तदिच्छया ॥१२३॥
भक्षयेथाः प्रसादं च ततस्ते मध्यमात् फणात्।
समुत्पत्स्यति कल्याणी पतिधर्मा मदालसा ॥१२४॥
सा तु साध्वी धर्मराजभवनेऽथ विराजते।
प्रतीक्षते पुनर्जन्म जातिस्मरं पतिं पुनः ॥१२५॥
सा च ते भाविनी पुत्री ऋतध्वजस्य कामिनी।
इत्युक्त्वा शंकरस्तत्र तिरोदधेऽथ सर्पराट् ॥१२६॥
रसातले गृहं गत्वा चकार श्राद्धमर्पितम्।
पिण्डं च मध्यमं तद्वद् यथावदुपभुक्तवान् ॥१२७॥
तावत्तां धर्मराजाऽपि प्राह गच्छ रसातलम्।
तत्राऽश्वतरनागेशः स्मरत्येव सुपुत्रिकाम् ॥१२८॥
भव दिव्या मनोजन्या जातमात्रा सुयौवना।
वरारोहा सुकन्या चाऽऽप्नुहि स्वेष्टमृतध्वजम् ॥१२९॥
इत्युक्ता श्राद्धतः पश्चात् साऽऽगता च जनिं गता।
शुशुभे द्व्यष्टवर्षावद्यथापूर्वा हि सुन्दरी ॥१३०॥
प्रतीक्षते तु सा कान्तं त्र्यवस्थासु मदालसा।
तदा स नागराडश्वतरः प्राह स्वपुत्रकौ ॥१३१॥
स राजपुत्रो युवयोरुपकारी ममान्तिकम्।
कस्मान्नानीयते वत्सौ द्रष्टव्योऽस्ति ममाऽपि सः ॥१३२॥
एवमुक्तौ सुतौ गत्वा कृत्वा किञ्चित्कथान्तरम्।
अब्रूतां प्रणयोपेतं स्वगेहगमनं प्रति ॥१३३॥
ऋतध्वजः स्वकं मत्वा समुत्थाय वरासनात्।
पितरं पादयोर्नत्वा ययौ नागपुरं सह ॥१३४॥
ताभ्यां नागकुमाराभ्यां नगरी दर्शिता शुभा।
कुमारैस्तरुणैर्वृद्धैरुरगैर्दिव्यवर्ष्मभिः ॥१३५॥
मोहकृन्नागकन्याभिः क्रीडन्तीभिः सुशोभिता।
ततः ऋतध्वजस्ताभ्यां प्रविवेश निवेशनम् ॥१३६॥
ददर्श मित्रपितरं मणिकुण्डलधारिणम्।
दिव्यमालाम्बरभूषं सुरूपं दिव्यदेववत् ॥१३७॥
स्वच्छमुक्ताफललताहारिहारोपशोभितम्।
केयूरिणं महाश्रेष्ठासने सर्वसुकाञ्चने ॥१३८॥
मणिविद्रुमवैडूर्यजालान्तरितरूपके।
समासीनं सुपुत्राभ्यां ऋतध्वजाय दर्शितम् ॥१३९॥
राजपुत्रो ननामैनं मित्रयोः पितरं मुहुः।
राजपुत्रं बलाद्गाढं नागेन्द्रः परिषस्वजे ॥१४०॥
मूर्ध्नि चैनमुपाघ्राय चिरं जीवेत्युवाच सः।
निहताऽमित्रवर्गश्च पित्रोः शुश्रूषणं कुरु ॥१४१॥
वत्स धन्यस्य कथ्यन्ते मत्पुत्राभ्यां तु ते गुणाः।
जीवितं गुणिनः श्लाघ्यं जीवन्नेव मृतोऽगुणः ॥१४२॥
देवताः पितरो विप्रा मित्रार्थिबान्धवाऽहिताः।
स्वेपरेऽन्ये तथेच्छन्ति जीवितं गुणिनश्चिरम् ॥१४३॥
परिवादनिवृत्तानां दुर्गतेषु दयावताम्।
गुणिनां सफलं जन्म त्वादृशानां नृपात्मज! ॥१४४॥
एवमुक्त्वा स्नापयित्वा शृंगारयित्वा भावतः।
मधुपानादिसंभोगान् दापयित्वाऽदनं तथा ॥१४५॥
तर्पयित्वाऽन्नपेयाद्यैर्विश्रान्तिशयनं ददौ।
सेवार्थे नागकन्याश्च प्रेषयामास नागराट् ॥१४६॥
परिश्रान्तोऽथ नृपजः सुष्वाप सुखनिद्रया।
सेवयामासुरत्यर्थं कन्याः संवाहनादिभिः ॥१४७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये शत्रुजित्पुत्रस्य ऋतध्वजस्य अश्वतरनागपुत्राभ्यां मित्रता, दैविवाजिप्राप्तिः, गालवाश्रमे विघ्नकर्तारं दैत्यं हन्तुं पाताले प्रवेशः, स तत्र नगरे मदालसामपश्यत्, पातालकेतुं दैत्यं जघान, मदालसामुद्वहत्, तुम्बुरुं कुण्डलां चापृच्छ्य स्वगृहागमनम्, यमुनातटे तालकेतुं कपटिनं जघान, मदालसामरणम्, कुमारतपश्चर्या, मदालसाया अश्वतरगृहेऽवतरणम्, ऋतध्वजमाहूय पुनर्मदालसादानमित्यादिनिरूपणनामा द्वानवत्यधिकत्रिशततमोऽध्यायः ॥३९२॥

श्रीनारायण उवाच—

अथ प्रातर्नृपपुत्रः ऋतध्वजः सुमंगलैः।
वाद्यैश्च गीतिभिश्चापि पातालख्यानकैस्तथा ॥ १ ॥

नागकन्याभिरत्यर्थं मिष्टस्वरैः प्रबोधितः ।
स्नापितोऽम्बरितः शृंगारितोऽर्चितो विभूषितः ॥ २ ॥
भोजितः पायितश्चापि सुस्पर्शैः रंजितो मुहुः ।
विज्ञापितश्च बहुधा रत्नादिग्रहणाय सः ॥ ३ ॥
रजतं वा सुवर्णं वा वस्त्रं वाहनमासनम् ।
यद्वाऽभिमतमत्यर्थं ग्रहणार्थं निवेदितः ॥ ४ ॥
ऋतध्वजस्तदा प्राहाऽश्वतरं नागयोगिनम् ।
तव प्रसादाद् भगवन् रत्नाद्यस्ति गृहे मम ॥ ५ ॥
ताते वर्षसहस्राणि शासतीमां वसुन्धराम् ।
न न्यूनं विद्यते किञ्चित्स्वर्गमन्यद् गृहेऽस्ति मे ॥ ६ ॥
तत्रापि सात्त्वतानां तु तृणवन्मायिकं खलु ।
तत्र लुब्धा जना नूनं धातुमायासुवंचिताः ॥ ७ ॥
तवाऽनया सुमधुरया वाण्या सत्कृतिशीलया ।
कृतकृत्योऽस्मि भावेन सफलं जीवनं तु मे ॥ ८ ॥
पित्रा वै जीवनं सार्थं मात्रा च जीवनं सुखम् ।
आरोग्येण च राज्येन वृद्धानां सेवया तथा ॥ ९ ॥
त्वादृशानां कृपाभिश्च जीवनं सार्थकं मम ।
अश्वतरस्तदा प्राह गार्हस्थ्यं भार्यया सुखम् ॥१०॥
तत् तवास्ति न वा सौम्य ! वद किं ब्रह्मवानसि ।
इति पृष्टः समुवाच भार्या मम पतिव्रता ॥११॥
सुता गन्धर्वराजस्य नाम्ना ख्याता मदालसा ।
केनापि कृतवैरेण विप्रलब्धाऽत्यजत् तनुम् ॥१२॥
तत आरभ्य लोके मे प्रतिज्ञां कृतवानहम् ।
नान्या भार्या भवित्री मे वर्जयित्वा मदालसाम् ॥१३॥
इत्यारभ्य सदा चास्मि ब्रह्मचर्यव्रतान्वितः ।
ब्रह्मचर्येण वै लोका वैराजाः सन्ति निर्मिताः ॥१४॥
मुक्तिलोको ब्रह्मचर्यपरस्याऽस्ति विनिर्मितः ।
मानुषस्य जनेर्लाभः संहितायां प्रपठ्यते ॥१५॥
स लाभोऽस्ति मदर्थं वाऽप्येकपत्नीव्रतस्य च ।
अश्वतरस्तदा प्राह शृणु राजकुमारक ! ॥१६॥
भाग्येन वर्धसे नित्यं चैकपत्नीव्रतेन वै ।
पातिव्रत्येन ते पत्नी सौभाग्येन प्रवर्धते ॥१७॥
या सा मदालसा राज्ञी श्रुत्वा पत्युर्विनाशनम् ।
समाधिना लयं प्राप्ता गता स्वर्याम्यकं पुरम् ॥१८॥
पतिमन्वेषितुं नैजं धर्मराजश्च तां जगौ ।
पतिस्ते वर्तते साध्वि ! जीवितो यमुनातटे ॥१९॥
योगायाऽश्वतरस्तस्य यतते तिष्ठ वै क्षणम् ।
इत्युक्ता सोषिता तत्र मया तप्त्वा हरात्खलु ॥२०॥
वरदानं परं प्राप्य पुत्रीरूपा तव प्रिया ।
आसादिता दिव्यरूपा जातमात्रा सुकामिनी ॥२१॥
तादृशी तव योग्या च पूर्वं यादृश्यभूद्धि सा ।
त्वदर्थं मानसी कन्या मद्गेहे वर्तते सती ॥२२॥
तुभ्यं दानाय सौम्याऽत्र मयाऽस्ति निश्चितं यतः ।
तस्मात् पश्येह वत्स त्वं सतीं चेद् द्रष्टुमिच्छसि ॥२३॥
अनुग्राह्यो भवान् गेहं बालोऽप्यभ्यागतो गुरुः ।
इत्युक्त्वा त्वानयामास तस्य पुत्रीं मदालसाम् ॥२४॥
प्राह सेयं न वा वत्स ! भार्या ते या मदालसा ।
स दृष्ट्वा तां सम्मुखं द्राक् हृष्टरोमा बभूव ह ॥२५॥
रुरोद पूर्वां संस्मृत्य प्रेमपूरितमानसः ।
अश्वतरस्तदा कामफलं बद्ध्वा करेऽस्य वै ॥२६॥
अग्निं प्रज्वाल्य विधिवत् कन्यारत्नं ददौ पुनः ।
प्राप्य भार्यां सतीं सोऽपि यौतकं च धनं बहु ॥२७॥
नागकन्यास्तथाऽन्याश्च दासीर्दासाँश्च सेवकान् ।
मणीन् हिरण्यभूषाँश्च मदालसां नवीकृताम् ॥२८॥
प्रतिलभ्य प्रणम्याथ नागेशं श्वशुरं मुहुः ।
शालकौ द्वौ समाश्लिष्य श्वश्रूं नत्वा तथाऽपरान् ॥२९॥
निर्गतः स्वाययौ नैजं पुरं यानेन वायुना ।
आगम्य स्वपुरं पित्रोर्नत्वा सर्वमशेषतः ॥३०॥
कथयामास तन्वंगी पुनः प्राप्ता यथा तथा ।
ननाम सा च चरणौ श्वश्रूश्वशुरयोः सती ॥३१॥
अन्याँश्च पूजयामास यथान्यायं यथावयः ।
ततो महोत्सवो जातः पौराणां सर्वथा प्रियः ॥३२॥
ऋतध्वजश्च सुचिरं तया रेमे सुमध्यया ।
अथ कालेन महता शत्रुजिन्मरणं गतः ॥३३॥
ऋतध्वजोऽभवद्राजा पत्नीव्रतः सुधार्मिकः ।
मदालसाऽभवद् राज्ञी राजमाता पतिव्रता ॥३४॥
शतसाहस्रदासीषु सतीष्वपि मदालसा ।
लक्ष्मीवत् स्वपतिं नित्यं सिषेवेऽङ्गक्रियादिषु ॥३५॥
पतिं मत्वा कृष्णनारायणरूपं हरिं प्रभुम् ।
सम्पन्मोक्षकरं नित्यसम्बद्धं सेवते स्म सा ॥३६॥
भोजयित्वा सदा भुंक्ते वस्तु समर्प्य सेवते ।
युंक्ते सा च स्वके कार्ये पतिप्रासादिकं सदा ॥३७॥
प्रातर्ध्यानं हरेः पूजां दानं चात्मविमर्शनम् ।
अतिथेर्भोजनं दत्वा स्वात्मार्थे युंक्त एव सा ॥३८॥
ब्रह्मार्पणं ब्रह्मसेवां ब्रह्मध्यानं तु सात्त्वती ।
महाभागवती साध्वी निष्पाद्य वर्तते परे ॥३९॥

दिवानिशं हरेर्लीलाकीर्तनं सा करोति वै।
अन्यान् श्रावयति हरेश्चमत्कारान् मुहुर्मुहुः ॥४०॥
एवं वै वर्तमानायाः संजज्ञे प्रथमः सुतः।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः ॥४१॥
तुतुषुस्तेन वै सर्वे जहास च मदालसा।
यस्या ब्रह्मस्वरूपाया हर्षशोकौ समौ यतः ॥४२॥
पुत्रं तु विक्रमं साध्वी बालमुत्तानशायिनम्।
रुदन्तमभिशान्त्यर्थमुल्लापनमिषेण सा ॥४३॥
स्मृत्वा हरिं तथात्मानं नित्यशुद्धं निरञ्जनम्।
पुत्रं मुक्तं देहधर्महीनं प्राह मदालसा ॥४४॥

शुद्धः स्वयं ब्रह्मसुरूपवानसि
प्रकल्पितं नाम च तेऽद्य कृत्रिमम्।
अपूर्वदेहादिकमाप्तवानसि
ह्यशोकनो रोदिषि कस्य शोकवान् ॥४५॥

हानौ सदा रोदिति देहधर्मवान्
सा न त्वयि ब्रह्मनिरञ्जनेऽस्ति वै।
सदाऽसि पूर्णो निजतृप्तिसंभृतः
सदा प्रतप्तस्य कथं नु रोदनम् ॥४६॥

आगन्तुका ये तु गुणाः सुखादयो
नियोजयन्त्येव तदिष्टवेदने।
ततः प्रवृत्तौ च फले शुभाऽशुभे
असारचक्रे हि मुहुः क्षिपन्ति ते ॥४७॥

शान्ताश्च घोराश्च तथा प्रमूढा
देहा विशेषाः परिवर्त्तयन्ति।
तद्वेगवेगी गुणवेगहीनो
ममत्वभाक् तापविभर्जितः स्यात् ॥४८॥

नानेन देहेन तु किंचिदस्ति
प्राप्तव्यमर्थे न च शाश्वतं वा।
येनाऽस्ति लभ्यं स तु नित्यपूर्णः
कथं प्रपूर्णस्य नु रोदनं ते ॥४९॥

लब्धं गतं सर्वमनित्यमेतद्
दृष्टं मया जन्मनि चात्र तत्र।
गतिस्वभावं पुरु नश्वरं च
शोकास्पदं त्वं नहि तादृशोऽसि ॥५०॥

आस्ते जलं जायते वर्धते च
सन्तिष्ठति क्षीयते नाशमेति।
एते तु धर्मा हि भूतेषु सन्ति
न ते कथं कस्य हानेर्हि शोकः ॥५१॥

न तेऽस्ति वृद्धिर्न च तेऽस्ति हानि-
स्तादृक्स्वभावेऽत्र न कंचुके त्वम्।
शोकं व्रजेथाः कुरु चात्मवित्तिं
नैसर्गिकानन्दमयीं प्रशस्तिम् ॥५२॥

तातेति किञ्चित् तनयेति कश्चि-
दम्बेति कांचिद् दयितेति कांचित्।
ममेति किंचिन्न ममेति किंचिद्
भूतात्मकं मा त्वयि मानयेथाः ॥५३॥

भोगः सदा मिश्रित एव वर्तते
मिष्टस्तथाऽमिष्ट इतिप्रतीतितः।
विज्ञस्य मिष्टेऽपि न मिष्टताऽस्ति वै
मूढस्य दुःखेऽपि न दुःखताऽस्ति च ॥५४॥

अहंममेत्यस्ति कृतं नवं नवं
गतं गतं वक्ति न तेऽस्त्यहंममः।
वृथा मतं दुःखकरं हि बाल्यतः
शीर्णे विकारेऽपि न तद् वियास्यति ॥५५॥

चक्षुश्च कर्णश्च सुनासिका च
मुखं रदास्त्वक् श्रवणं मनश्च।
जिह्वा करौ पत् मलमूत्रमार्गौ
नाभिश्च नामानि न ते हि सन्ति ॥५६॥

क्षेत्राणि यद्वत् खलु मृत्तिकाद्याः
सरांसि यद्वत् खलु सज्जलाद्याः।
स्वर्गाणि यद्वत् खलु तेजआद्याः
प्राणाश्च वाता न हि ते त्वदीयाः ॥५७॥

यथाऽत्र याने बहुमार्गगामिनि
सचेतनस्त्वं सुरथी प्रगच्छसि।
त्वदात्मके दिव्यचिदम्बराऽनसि
तथैव यन्ताऽस्ति तमच्युतं स्मर ॥५८॥

इदं वपुर्गत्वरमेव ते च मे
पितुश्च तद्वद् गतमेव तत्पितुः।
यथैवं भूतं सदृशं तु भाविन-
स्ततोलभस्वाऽङ्ग ! वपुस्तु शाश्वतम् ॥५९॥

श्रीकृष्णनारायण ! राधिकापते !
रमापते ! माधव ! पार्वतीपते ! ।
लक्ष्मीपते ! भक्तपते ! प्रभापते !
रटांग ! यच्छाश्वतमाप्स्यसे तनुम् ॥६०॥

न तेऽस्ति निद्रा न च तेऽस्ति तन्द्रा
न तेऽस्ति माता न च मेऽस्ति पुत्रः ।
न तेऽस्ति बाल्यं न च मेऽस्ति वृद्धिः
क्रमाऽक्रमौ ब्रह्मणि ते न मे च ॥६१॥
आत्मेति जानन्परमात्मसेवको
हृदाचिता वा मनसा च विज्ञया ।
आनन्दमग्नोऽनुभवेऽपरोक्षके
कार्ष्णे रसं चूषति तृप्तिमश्नुते ॥६२॥
पृथ्व्यां यथा सन्ति सुदोलनांघ्रयो
दोलोपरिस्तंभगताः पटांघ्रयः ।
पटान्तराले चरणौ तव स्थितौ
स्वदन्तरे यच्चरणौ हि तं भज ॥६३॥
अमूर्तके मूर्त इव स्थितः प्रभुः
संरक्षको मोक्षद ईश्वरेश्वरः ।
स एव माता च पिता विशालदृग्
विक्रान्तनामाऽपि स एव तं भज ॥६४॥
आत्माऽसि मुक्तोऽसि सदीश्वरोऽसि
ब्रह्माऽसि दिव्योऽसि सदासुखोऽसि ।
नरोऽसि नारायणरक्षितोऽसि
निजस्वरूपोऽसि भजाऽक्षरेशम् ॥६५॥

विःविज्ञानमित्युक्तं क्रान्तं क्रिया मता ततः ।
ज्ञानक्रियायुतश्चात्मा विक्रान्तं त्वं निजं वद ॥६६॥
वि-पक्षी तस्य वै पक्षौ संकल्पः शक्तिरित्यमू ।
संकल्पशक्तिपक्षाभ्यां क्रान्तस्त्वं स्वं निजं वद ॥६७॥
विश्च ज्ञानेन्द्रियं प्रोक्तं क्रं च कर्मेन्द्रियं तथा ।
तयोरन्तर्गतश्चात्मा विक्रान्तं त्वं निजं वद ॥६८॥
आत्मानं त्वं विजानीहि देहगेहविलक्षणम् ।
सच्चिदानन्दमेवेशं शोकस्त्वां न स्पृशेत् ततः ॥६९॥
इत्येवं प्रथमं पुत्रं बोधदानेन सा सती ।
मुक्तं कृतवती बाल्ये योगिराजं कृतार्थकम् ॥७०॥
वर्धमानं सुतं नित्यं नवं नूत्नं प्रबोधनम् ।
आत्मज्ञानमयं माता ददात्युल्लापनादिषु ॥७१॥
निरहंकारतां प्राप्तो निर्ममत्वं च सर्वथा ।
आत्मबलं परं लेभे ज्ञानं लेभे च सन्मयम् ॥७२॥
माता सा जननी सैव यया बालोऽतिबोधितः ।
मुक्तिमार्गगतः स्याच्च बन्धाद्भवाच्च मुच्यते ॥७३॥
मातृभाषापरिबोधे त्वात्मबोधमवाप्तवान् ।
इत्थं मात्रा स तनयो जन्मप्रभृतिबोधितः ॥७४॥
देहसौख्यातिगो जातो विरागो विषयाऽहृतः ।
यौवनेऽपि न रागात्मा द्वेषश्चास्य न कुत्रचित् ॥७५॥
स्त्रीपुंभावे कुणपेऽत्राऽनित्ये दुःखे विनाशिनि ।
भोगबुद्धिरनुत्पन्ना ब्रह्मरूपेण वर्तिनः ॥७६॥
रूपं रसं तथा गन्धं स्पर्शं च श्रवणं तथा ।
अनात्मीयं परं मत्वा न बबन्धापि तत्र वै ॥७७॥
काये पुष्टे बले जाते बलं पाषाणवन्मतम् ।
इन्द्रियाणां गोलकानि कोष्ठलानीव मन्यते ॥७८॥
एवं रागविहीनः स निर्द्वन्द्वः स्वस्वरूपवान् ।
चकार न मतिं प्राज्ञो गार्हस्थ्यं प्रति निर्ममः ॥७९॥
स्वशरीरेऽनहंकारो राज्येऽहंकारवर्जितः ।
क्षेत्रे हस्तिनि याने च वाहने राष्ट्रके तथा ॥८०॥
स्नेहभावविहीनोऽसौ बन्धनं नाऽऽप्तवान् किल ।
दासेषु भृत्यवर्गेषु दासीषु नगरीष्वपि ॥८१॥
भवनेषु वस्त्रभूषाऽतिभोग्यवस्तुकेष्वपि ।
न वै चक्रे मनः किञ्चिन्मुक्तवर्यो यथाऽभवत् ॥८२॥
भोजने रमणे पाने खाद्ये लेह्येऽपि सर्वथा ।
रसास्वादविहीनोऽसौ यतिराडिव लक्ष्यते ॥८३॥
रत्नहारादिभूषासु गन्धसुगन्धिवस्तुषु ।
द्रवद्रव्येषु तैलादौ कज्जलादौ विरागवान् ॥८४॥
प्रदर्शनेषु मल्लानां क्रीडासु वारयोषिताम् ।
गीतिषु नर्तकीनां च नृत्येषु विमना इव ॥८५॥
राज्ञां समाजे चोत्साहे प्रजोत्सवेषु केलिषु ।
अरण्यादिप्रवासेऽपि मृगयादौ विरागवान् ॥८६॥
दण्डदानेषु हिंस्रेषु कर्मसु व्याहृतौ तथा ।
व्यवहारेषु च क्रूरनिर्दयेषु विरागवान् ॥८७॥
ब्रह्मचर्ये तथा शौचे सन्तोषे तपसि ध्रुवे ।
स्वाध्याये देवपूजायां सदा प्रोत्साहवानभूत् ॥८८॥
सत्ये सर्वविधे मौने चाऽस्तेये मानसे बहिः ।
अपरिग्रहणे चापि धैर्ये कामादिवर्जने ॥८९॥
गुरोः प्रसेवने पित्रोः सेवने वृद्धमानने ।
अतिथिस्वागते भक्तदर्शने मुक्त एव सः ॥९०॥
श्रद्धालुः सर्वदा चास्ते सर्वथा चास्तिकः कृतिः ।
विवेकी च विमोकाढ्यो ब्रह्माभ्यासपरः सदा ॥९१॥
सतां सेवापरश्चापि सदा हरिक्रियापरः ।
कल्याणकृत्प्राणिनां च हर्षोद्वेजनवर्जितः ॥९२॥
एवं सनकतुल्यः स व्यजायत शिशुत्वतः ।
दृष्ट्वा सुतं महामुक्तं वैष्णवं परमं समम् ॥९३॥

माता चातीव जहृषे पिताऽप्यानन्दवानभूत् ।
प्रजा भृत्यास्तथा चान्ये मेनिरे देवमेव तम् ॥९४॥
अणिमा महिमा त्वस्य गरिमा लघिमा तथा ।
प्राप्तिः कामावसाना च वशितेशित्वरूपिणी ॥९५॥
शब्दऊहश्चाध्ययनं दुःखनाशास्त्रयस्तथा ।
सुहृत्प्राप्तिर्शोनदानं तथा तारा सुतारिका ॥९६॥
सर्वा आसन् पादयोश्च सिद्धः सः परमो ह्यभूत् ।
अप्रतिहतकामः स मुक्तो बभौ सुजातवत् ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये पाताले ऋतध्वजस्य मदालसालग्नितस्य पितृराज्यं प्रत्यागमनं, विक्रमाख्यपुत्रजन्म, तस्मै मदालसाकृतविवेकोपदेश इत्यादिनिरूपणनामा त्रिनवत्यधिकत्रिशततमोऽध्यायः ॥ ३९३ ॥

श्रीनारायण उवाच—

अथ लक्ष्मि ! द्वितीयं सुषुवे पुत्रं मदालसा ।
अभिधानं पिता तस्याऽकरोत् सुबाहुरित्यतः ॥ १ ॥
मदालसा जहासापि नामरूपविवर्जिते ।
नामरूपं प्रसह्यैव स्वार्थलोकेन रोप्यते ॥ २ ॥
इयं तु ब्रह्मविद्या तं बालमुल्लापनादिभिः ।
उपादिदेश नित्यं वै यथापूर्वं निरञ्जने ॥ ३ ॥
शृणु पुत्र ! शरीरं ते बालरूपं व्यजायत ।
पूर्वं नासीत् त्वदीयं वै कथं स्वीयं प्रमन्यसे ॥ ४ ॥
शीर्यते तच्छरीरं हि मुहुः शीतोष्णसंभृतम् ।
पराधीनकरं नित्यं सदा विश्वासघातकम् ॥ ५ ॥
पिता पूर्वस्थितैः क्लृप्तस्तस्य धातुः शरीरगः ।
विनिर्गतः स जन्माऽभूद् जलात्मकसुतस्य वै ॥ ६ ॥
गर्भवासे स्थितस्तस्यायुष्यं तु दशमासिकम् ।
यदि तत्र न तिष्ठेद्वै तदाऽऽयुष्यं क्षणं मतम् ॥ ७ ॥
मासिकं षाण्मासिकं वा स्रावे न्यूनाऽष्टमासिकम् ।
जन्मनि लब्धवत्येव चायुष्यं दशमासिकम् ॥ ८ ॥
ततोऽस्याऽज्ञानसंयुक्तं चायुष्यं मूढनामयम् ।
ततो दशदिनान्तं च सूतकात्मकमुच्यते ॥ ९ ॥
मासान्ते वर्षतः पूर्वमायुष्यं पारवश्यगम् ।
वर्षान्ते त्रिवर्षपूर्वमायुष्यं मातृशिक्षणम् ॥१०॥
ततः शिशुः कुमारश्चाऽऽद्वादशाब्दं स कीर्त्यते ।
ततः सौम्यस्ततः प्रौढो युवा चिन्ताप्रधानकः ॥११॥
विधुरो वा सधुरो वा चैकलो द्वौ ततोऽधिकः ।
शृगालवत् मण्डलितोऽहंममत्वसमावृतः ॥१२॥
शत्रुमित्रकुटुम्बादियशोलाभादिसंभृतः ।
अतस्मिँस्तद्विमन्ताऽभूद्धर्षशोकपरायणः ॥१३॥
पुत्रपौत्रादिसम्बद्धः पशुक्षेत्रादिचिन्तनः ।
वंशविस्तारपाशेन वासनामूलरोपितः ॥१४॥
जर्जरितेन देहेन वार्धक्यं समनुष्ठितः ।
रोगाऽशक्त्यादिसम्पन्नः शारीराज्ञाविवर्जितः ॥१५॥
वातरोगादिबन्धुश्चाऽपथ्याऽवमानसेवकः ।
तिरस्कारादिसम्मानो गन्तुकामोऽपि रोधितः ॥१६॥
मृतः प्रज्वालितः प्रेतः क्वाऽऽसीत्कुत्र गतः स वै ।
तस्मात् स्वप्नं यथा तद्वद् देहायुष्यं विवर्तते ॥१७॥
मत्वैवं त्वं सदा पुत्र नामरूपविवर्जितः ।
सच्चिदानन्दसंज्ञोऽसि नित्यतृप्तो निराशयः ॥१८॥
वर्तस्वानन्दमात्रायां मा वर्तस्व विवर्तने ।
असारे नित्यशुद्धस्त्वं माऽशुद्धिं मस्तके वह ॥१९॥
शुक्लोऽसि सर्वदा पुत्र ! मा कृष्णत्वं वहात्मनि ।
शुद्धदर्पणतुल्योऽसि कल्मषं मा निवेशय ॥२०॥

अम्बेति कृष्णो जनकेति कृष्णो-
ऽग्रजेति कृष्णोऽहममेति कृष्णः ।
बालेति कृष्णः स्वपरेति कृष्णः
सर्वस्वकृष्णं भज मुक्तिमेहि ॥२१॥
तेजः परंब्रह्म तमः परब्रह्म
ज्ञानं परंब्रह्म चिदम्बरेऽर्पितम् ।
दुःखं परंब्रह्म सुखं परंब्रह्म
स्वयं परेब्रह्मणि वर्तसेऽर्भक ! ॥२२॥
न मेऽस्ति किञ्चिन्न च तेस्ति किञ्चि-
जनूत्तरं मानवकल्पितं हि तत् ।
असंगत्वात्स्य न संगमाह
तीर्णोऽसि नित्यं कुरु चात्मनि श्रमम् ॥२३॥
शारीरयात्रा च यथा विनिर्वहेत्
तावत्परिग्राहक एव संभव ।
तत्राप्यसंगो भव मिष्टयोजनै-
र्हरेः प्रसादामृतमिष्टमावह ॥२४॥
शुद्धे निजे सच्चिदि सौख्यसंभृते
मा दुःखयोगान् विनियुंक्ष्व बन्धदान् ।
यथास्वरूपो विहरस्व वृक्षके
समानके निश्छिदि यावदस्तिके ॥२५॥

न तेऽस्ति भार्या न च तेऽस्ति सौधो
न चास्ति ते हस्तिसुभृत्यवाम्यः ।
न चास्ति सैन्यं न च रक्षकोऽन्यो
विना हरिं कृष्णनरायणं वै ॥२६॥
त्वं देहसंगेऽव सतां प्रसंगं
तथाऽऽत्मसंगेऽव हरेः प्रसंगम् ।
इष्टेऽतिसंगेऽपि प्रभुं विधेहि
श्रीकृष्णनारायणमाभजस्व ॥२७॥

इत्येवं सा महाराज्ञी बालमुल्लापनादिभिः ।
अशिक्षयच्चात्मविद्यां सोऽपि मुक्तो बभूव ह ॥२८॥
सोऽप्यमन्यत गोविन्दं रक्षकं बाहुमेव ह ।
कृष्णनारायणलब्ध्या सुबाहुं स्वं हि मन्यते ॥२९॥
नतु देहस्थबाहुभ्यां सुबाहुः स विनिश्चितः ।
माताऽपि तं महामुक्तं दृष्ट्वा तुतोष वै हृदि ॥३०॥
अमन्यत महासाध्वी मातृत्वं सार्थकं स्वकम् ।
आत्मप्रमाणं विज्ञानं ददौ यतः सुताय सा ॥३१॥
पापात् पाति पिता बोध्यो माता प्रमां ददासि या ।
तत्सर्वं वर्तते राज्ञ्यां मदालसायां तृप्तिकृत् ॥३२॥
अथ कालान्तरे तस्या जज्ञे पुत्रस्तृतीयकः ।
राजा प्राह च तं पुत्रं शत्रुमर्दनमेव ह ॥३३॥
तदा चातिप्रजाहास नाम स्मृत्वा पुनः पुनः ।
तं चापि स सती माता शिक्षयामास चिद्घनम् ॥३४॥

पालने च यदा तं सा ह्यान्दोलयति सादरम् ।
दुग्धं स्तन्यं तथा भक्ष्यं चोस्यं लेह्यं ददाति सा ॥३५॥
तदा तदा प्रसंगेन शिक्षयति स्म प्रोक्षणम् ।
शृणु कर्णेन पुत्र ! त्वं नहि कर्णोऽस्ति चेतनः ॥३६॥
गृहाणेदं सुपेयं त्वं मुखेन जिह्वया तथा ।
न जिह्वा न मुखं चासि त्वं सदाऽसि प्रचेतनः ॥३७॥
वद शब्दं पश्य रूपं कुरु हास्यं मनोरमम् ।
न त्वं शब्दो न वै चक्षुर्न चाऽन्तःकरणं ह्यसि ॥३८॥
पश्येदं मक्षिकादंशकृतं दंशादिकं तु यत् ।
तद् देहेऽस्ति न त्वय्यस्ति देहस्त्वदाश्रितोऽस्ति वै ॥३९॥
तत्रोष्णं वा परं शीतं खर्जनं विद्धि रक्तकृत् ।
त्वं न रक्तं न वा दद्रुर्न च चर्माऽस्थिखर्जनम् ॥४०॥
त्वया स्थितेन तत्सर्वं जायते च विलीयते ।
न ह्रासस्तेन जातेन न वा वृद्धिर्भवेत् त्वयि ॥४१॥
पानं पेयं क्षुधा तृट् च भोज्यं चोस्यं न वै त्वयि ।
त्वया स्थितेन तत्सर्वं देहोऽयं समपेक्षते ॥४२॥

विना त्वां न तनूर्नैव क्षुत्तृड्भ्यास्तु प्रवर्तनम् ।
सर्वं लयं समेयाद्वै तस्मात् त्वं सर्वतः परः ॥४३॥
परार्थं गृहवाप्यादि परार्थं जलधान्यकम् ।
परार्थं चाक्षुषं सर्वं यः परः स त्वदात्मकः ॥४४॥
जननं मरणं नित्यं व्यवस्थं देहवासितम् ।
अवस्थाभ्यः परस्त्वं वै परमात्मसमाश्रितः ॥४५॥
देहे त्वं च त्वयि कश्चिद् यः स बोध्यः परेश्वरः ।
परेश्वरसमस्त्वं वै नित्यबुद्धो निरञ्जनः ॥४६॥

नित्यशुद्धो नित्यसिद्धो नित्यविज्ञो भवातिगः ।
इदं तु पालनं स्वप्नं लालनं स्वप्नमित्यपि ॥४७॥
हसनं तर्पणं स्वप्नं जाग्रतो भव सर्वथा ।
योगनिद्रा हरेर्योगे सदा शान्तिप्रदा तव ॥४८॥
भोगनिन्द्रात्मिका निद्रा मायाजालं न सा त्वयि ।
अविशुद्धिः क्षयश्चापि स्मृद्धावतिशयश्च यः ॥४९॥
असूयामत्सरेर्ष्यादिकल्मषाढ्या न वै त्वयि ।
मुक्तो नित्यश्चात्मसत्तः पूर्णानन्दोऽसि पुत्रक ! ॥५०॥
यथा वस्त्रं नवं प्राप्तं त्यक्तं जीर्णं प्रसह्य वै ।
दिनं च नूतनं प्राप्तं गतं पूर्वं प्रसह्य वै ॥५१॥
प्रातर्गतं गतं सायं गता चान्द्रमसी निशा ।
अमावस्यानिशा माया तामसी चापि ते गता ॥५२॥
घटमालानुसारेण यदि सा तेऽन्तिकं भवेत् ।
आत्मविद्युन्मये दिव्यप्रकाशेऽवतराऽऽत्मवित् ॥५३॥

कामः क्रोधस्तथा लोभो मोहो मदोऽभिमानकम् ।
शत्रवस्ते निजबोधे तान्प्रमर्दय सर्वथा ॥५४॥
गतान् वै माऽन्वशोचस्त्वं वर्तमानान् निवर्तय ।
अनागतांश्च मा देह्यातिथ्यसत्करणं मनाक् ॥५५॥
आत्मज्ञानातिखड्गेन छिन्नास्ते चान्तरारयः ।
अनुद्भवाश्च वाऽपुष्टाः शुष्कायन्ते विना जलम् ॥५६॥
देहस्य शत्रवो लोके न वै चात्मनि शत्रवः ।
आत्मनो मोक्षणे विघ्नाः शत्रवस्ते प्रकीर्तिताः ॥५७॥
एवं त्वं चात्मशत्रूणां भूत्वा सम्मर्दकः पुरे ।
नवद्वारे प्रप्राकारे वर्तस्व शुभवर्जितः ॥५८॥
ततस्ते सार्थकं नाम पित्रोक्तं शत्रुमर्दनम् ।
इत्येवं बोधितः सोऽपि मात्रा पुत्रस्तृतीयकः ॥५९॥
बाल्यादेव सुमुक्तोऽभूद् द्वन्द्वभीतिविवर्जितः ।
याने च भोजने रम्ये भोग्ये भोगेऽप्यनातरः ॥६०॥
निष्तृष्णो नित्यतृप्तश्च वर्तते स्म निरन्तरम् ।
गतं बिभं गता द्वन्द्वाः संसारो नागतश्च के ॥६१॥

हृदये न समाविष्टं मायाजालं च गत्वरम् ।
उदयास्तमयौ नास्य बाधेते मुक्तिवर्तिनि ॥६२॥
स्वप्रकाशे स्वकानन्दे स्वात्मतृप्तौ हि वर्तते ।
सनन्दनसमानोऽयं दृश्यते योगिराडिव ॥६३॥
दृष्ट्वा माता प्रसन्नाऽभून्मातृत्वं सार्थकं कृतम् ।
जलेन रञ्जनां नैति नोद्वेगं याति वह्निना ॥६४॥
उत्सवेन शमं नैति विषेण विषमो नवा ।
सुखदुःखसमः पुत्रश्चाहं धन्या हि पुत्रिणी ॥६५॥

इत्यानन्दमयी नित्या हरिं भजति सा सती ।
मुक्तं पुत्रं समालोक्य मुक्तिमार्गस्थिताऽभवत् ॥६६॥
एवं पुत्रत्रयं लेभे जीवन्मुक्तं मदालसा ।
ब्रह्ममदेन जगति सालसाऽभून्मदालसा ॥६७॥
एवं पुत्रत्रयं स्वात्मसत्तया ब्रह्मतन्मयम् ।
क्रियाश्चकार निष्कामं न राजार्थोपकारकम् ॥६८॥
राजापि भक्तराट् दृष्ट्वा पुत्रान् कृष्णाश्रितान् शुभान् ।
मुक्तान् ब्रह्मस्वरूपांश्च तेषु तुतोष सर्वथा ॥६९॥
पतिव्रतायां भार्यायां तुतोषात्यन्तमेव च ।
जन्मना किं यदि बन्धाः पुत्रेऽपि निहितास्तदा ॥७०॥

यस्तु बन्धैरावृतश्च कथं पितॄन् स तारयेत् ।
पत्नी बन्धनकर्त्री या तया किं जन्मनः फलम् ॥७१॥
उद्धारयित्री या भार्या सा पत्नी सत्यतारिणी ।
कुटुम्बतारिणी सैव तया गार्हस्थ्यमुत्तमम् ॥७२॥
पुत्रोऽपि तारकः प्रोक्तः पत्नी तथैव तारिका ।
सती पत्नी सुतः साधुस्तौ मतौ भवतारकौ ॥७३॥
धन्योऽहं धन्यराज्यं मे धन्या चापि प्रजा मम ।
सत्संगाच्च सतीसंगात् तरिष्यामः प्रजादयः ॥७४॥

यत्र राज्ये भवेयुश्च साध्व्यः सत्यः पतिव्रताः ।
सुताश्च साधवो मुक्ता वैकुण्ठं तत्र विद्यते ॥७५॥
धिग्जनं धूर्तभार्यायाः पतिं तातं शठस्य च ।
धिग्राजानं वञ्चयित्र्याः प्रजायाः पालकं तथा ॥७६॥
जयस्तस्य सतीभार्यास्वामिनः सर्वदा भुवि ।
मदालसायाः पुण्येन विजयो मेऽस्ति सर्वथा ॥७७॥
स्वर्गं स्वर्गसमं राज्यं पुत्रा देवसमा मम ।
दिव्या लक्ष्मीसमा पत्नी वैकुण्ठं मेऽस्ति सर्वथा ॥७८॥
श्रीकृष्णः सर्वदा त्वास्ते मत्पुत्रेषु विरागिषु ।
श्रीराधा च सदा मदालसायां वर्तते ननु ॥७९॥
लक्ष्मीः सदा गृहे चास्ते मम चान्धसिकेषु वै ।
नारायणः स्वयं मयि नास्ति न्यूनं च मे मनाक् ॥८०॥

यस्य पतिव्रता भार्या यस्य पुत्रश्च भक्तराट् ।
तस्य वैष्णवयज्ञानां सहस्रं नित्यमेव हि ॥८१॥
यत्र नास्ति सती भार्या यत्र पुत्रो न भक्तराट् ।
तस्य गृहं पिशाचानां फेरुराजगृहोपमम् ॥८२॥
इत्येवं ऋतमेवाऽस्य ध्वजवद् दृश्यते सदा ।
तेनार्थवान्नभवत् स ऋतध्वजोऽपि पार्थिवः ॥८३॥
अथाऽयं स्वसुतानाह राज्यपालनहेतवे ।
पुत्राः प्राहुश्च पितरं कुर्मो ब्राह्मं हि राज्यकम् ॥८४॥

मातुः पितुः कृपयैव वयं समुद्धृता भवात् ।
राज्यं तु पार्थिवं सर्वं मग्नभावं करोति वै ॥८५॥
आत्मराज्यसमं राज्यं न भूतं न भविष्यति ।
ब्रह्मानन्दसमं सौख्यं न भूतं न भविष्यति ॥८६॥
नित्यतृप्तिं गतस्याऽत्र राज्यानन्दो विषोपमः ।
वितृष्णस्याऽऽत्मनः सौख्यात्परं सौख्यं न विद्यते ॥८७॥
आत्मनि परमात्मानं ध्यायन्ते योगिनो जनाः ।
सन्तस्तथा प्रपश्यन्ति श्रीहरिं हृदयान्तरे ॥८८॥
तद्योगं तु वयं प्राप्ताः पितर्मातुर्दयालवात् ।
ततो राज्यं न चेच्छामो बहिष्ठं नश्वरं क्षयम् ॥८९॥

श्रुत्वा पितेति पुत्राणां मुमुदे वै मुहुर्मुहुः ।
तारितोऽस्मि सुपुत्रैश्च कर्तव्यं नावशिष्यते ॥९०॥
इतिवृत्तस्य राज्ञस्तु कालान्तरे सुतः शुभः ।
चतुर्थोऽपि मदालसाराज्ञ्यां जज्ञे गुणालयः ॥९१॥
अथाऽस्मै सा महाराज्ञी प्रोवाच सुशुभं वचः ।
पुत्र ! पुण्येन बहुना तव जन्मात्र संगतम् ॥९२॥
अजन्मासि सजन्मा त्वं जातोऽसि राज्यकारणात् ।
अराजाऽसि पुरुपुण्याद् राजा भवसि पुत्रक ! ॥९३॥

अप्रजोऽसि प्रजायुक्तो भवसि राज्यकारणात् ।
नित्यमुक्तोऽसि तदपि बद्धोऽसि पितृतोषणात् ॥९४॥
मा स्म क्लेशं प्रजाकार्ये मन्येथाः मातृदेशनात् ।
मा स्म ग्लानिमसत्यार्थे कालक्षेपेऽपि संव्रज ॥९५॥
पित्रोः सेवा त्वया कार्या ज्ञानं संरक्ष्य वै हृदि ।
वर्तस्वाऽऽज्ञाकरो भूत्वा निर्लेपो लेपवानिव ॥९६॥
इत्युक्त्वा विररामाऽथ चिकीर्षुर्नाम भूपतिः ।
ददर्श तां सतीं भार्यामीषद्धासां मदालसाम् ॥९७॥
तामाह राजा हसतीं किञ्चित्कौतुहलान्वितः ।
क्रियमाणे मया नाम्नि प्रत्येके नामकर्मणि ॥९८॥
तव सजायते हास्यं वदात्र कारणं नु किम् ।
विक्रान्तश्च सुबाहुश्च तृतीयः शत्रुमर्दनः ॥९९॥

कृतान्येतानि नामानि मन्ये तानि शुभानि वै ।
यद्वा तेऽत्र नवं किञ्चिदूहमानं प्रकाशते ॥१००॥
वद साध्वि सन्त्यसन्ति नामानि कीदृशानि हि ।
अस्य चतुर्थपुत्रस्य नाम त्वं कुरु भामिनि ! ॥१०१॥
मदालसा पतिं प्राह करोम्याख्यां सुतस्य ते ।
अलर्क इति धर्मज्ञः ख्यातः सुतो भविष्यति ॥१०२॥
लः लयो रश्च विवृद्धिः क उत्पत्तिर्न यत्र वै ।
अलर्कः स तु विज्ञेयस्तव पुत्रश्चतुर्थकः ॥१०३॥
आत्मा न जायते कश्चिन्न वर्धते न नश्यति ।
अजन्मवृद्धिविलयोऽलर्कोऽयं तव पुत्रकः ॥१०४॥
आत्मनो नास्ति शत्रुर्वै येन मर्दनमाचरेत् ।
एवं शत्रुमर्दनं तु नाम निरर्थकं भवेत् ॥१०५॥
कामक्रोधादिशत्रूणां मर्दनं सार्थकं ततः ।
बाहुर्भुजा नात्मनोऽस्ति सुबाहुः स्यान्निरर्थकम् ॥१०६॥
बहुषु वर्तते योऽसौ बाहुः कृष्ण उदीर्यते ।
सु सम्मतो यस्याऽस्ति सुबाहुः सार्थकं ततः ॥१०७॥
क्रान्तिः क्रिया गतिर्यत्र विशेषेति निरर्थकम् ।
व्यापकस्यात्मनो नैव गतिस्त्वस्ति कदाचन ॥१०८॥
अथापि भगवल्लोके गतिर्विद्यत इत्यपि ।
विक्रान्तः सार्थकं नाम भवत्येव सुतस्य ते ॥१०९॥
एवं पुत्रास्तव राजन् ! तारका मोक्षदायकाः ।
जाता भाग्यवशान्मुक्ता जीवन्तु शाश्वतीः समाः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये द्वितीयसुतसुबाहुतृतीयशत्रुमर्दनचतुर्थाऽलर्काख्यपुत्रेभ्यो मदालसाकृतोपदेशनिरूपणनामा चतुर्नवत्यधिकत्रिशततमोऽध्यायः ॥३९४॥

श्रीनारायण उवाच—

अथ राज्ञा योजिता सा मदालसा चतुर्थकम् ।
पुत्रं लक्ष्मि ! प्रवृत्तेस्तु मार्गे ह्युपादिदेश यत् ॥ १ ॥
पुत्र ! वर्धस्व मद्भर्तुर्मनो नन्दय कर्मभिः ।
देवपित्रतिथीन् सर्वान् कर्मणा तोषमावह ॥ २ ॥
ब्रह्मचर्यं व्रतं पुत्र ! गृहाण सोपनायकम् ।
ततो विद्यां राजयोग्यां नीतिं गृहाण सद्गुरोः ॥ ३ ॥
राज्यं पितृप्रदत्तं च धर्मार्थं वह पुत्रक ! ।
प्रजा रक्ष क्रतून् श्रेष्ठान् कुरु वह्नौ घृतादिकम् ॥ ४ ॥
जुहुधि ब्राह्मणसाधुदीनेभ्यो देहि चार्थितम् ।
क्षितेः संपालनात् सौख्यं धर्मकार्यं भविष्यति ॥ ५ ॥
तेन स्वर्गे च देवत्वं सुखं प्राप्स्यसि शाश्वतम् ।
पर्वसु तीर्थके गत्वा तर्पयेथाः धरामरान् ॥ ६ ॥
पूरयेथाः मनोऽभीष्टं बान्धवानां समीहितम् ।
चिन्तयेथाः हृदि सर्वजीवानां हितमुत्तमम् ॥ ७ ॥
निवर्तयेथाः सततं चाकार्येभ्यश्चापि पापतः ।
यज्ञैर्दानैर्जपैर्होमैर्देवान् द्विजाँश्च प्रीणय ॥ ८ ॥
धर्मार्थकामसंज्ञैश्च विजयेथाः पुमर्थकैः ।
गुरून् संसेवयेथाश्च नन्दयेथाः सुहृज्जनान् ॥ ९ ॥
साधून् संरक्षयेथाश्च यजेथाः सुरमानवान् ।
व्रजेथास्तीर्थयात्रायां कारयेथाः स्वमोक्षणम् ॥१०॥
गृहधर्मान् पालयेथास्तोषयेथाः सुयोषितः ।
पुत्रानुत्पादयेथाश्च श्रयेथाः न्याससाधुताम् ॥११॥
समर्जयेथाः मुक्तिं च त्यजेथाः प्रवृत्तिं तथा ।
विलीयेथाः परे कृष्णनारायणेऽक्षराधिपे ॥१२॥
इति पुत्र तवार्थे वै मया मार्गो निदेशितः ।
तत्र श्रेयः श्रयेथास्त्वं रागत्यागोभयात्मकम् ॥१३॥
एवमुल्लाप्यमानः सोऽलर्को मात्रा पुनः पुनः ।
ववृधे वयसा बालः ऋतध्वजसुतः शुभः ॥१४॥
कृतोपनयनः प्राह मातरं वद मे सति ।
मम यदत्र कर्तव्यमैहिकाऽऽमुष्मिकं च यत् ॥१५॥
मदालसा पुनः प्राह ज्ञानयोग्ये वयस्यथ ।
वत्स ! राज्येऽभिषिक्तेन कर्तव्यं लोकरञ्जनम् ॥१६॥
व्यसनानि न कार्याणि राज्यनाशकराणि वै ।
आत्मा रक्ष्यो रिपुभ्यश्च मन्त्रो रक्ष्यो विशेषतः ॥१७॥
अमात्यादीन् विजानीयादासनाऽऽदानभाषणैः ।
चारैः सर्वत्र संदृष्टिं कारयेत् सत्यवेदिभिः ॥१८॥
कुत्रापि भूभृता विश्वसनीयं नैव सर्वथा ।
कार्यसाधकता रक्ष्या विश्वासैरपि कर्हिचित् ॥१९॥
देशकालादिविज्ञेन राज्ञा भाव्यं गुणादिभिः ।
आत्मा प्राक्मन्त्रिणः पश्चाद् भृत्या जेयस्ततः परम् ॥२०॥
कामादयो विजेतव्याः प्रथमं सर्वथा नृपैः ।
कामः क्रोधो मदो लोभो मानश्चैते विनाशकाः ॥२१॥
काकवच्चेष्टया भाव्यं कोकिलावत् स्वरेण च ।
भृंगवत् सारग्रहणे मृगवद्भ्रमणे सदा ॥२२॥
व्यालवद्, रोषकरणे मयूरवत् समादरे ।
हंसवत्तु विवेकेन कुक्कुटवद्धि जाग्रतौ ॥२३॥

लोहवद् दार्ढ्यभावेन भाव्यं राज्ञा हितार्थिना ।
कीटवत् कठिने शत्रौ प्रविशेत्तु शनैः शनैः ॥२४॥
सम्भूय च पिपीलिकावदाहरेत् परं नृपः ।
अग्निस्फुलिंगवद् वै चमत्कारं प्रदर्शयेत् ॥२५॥
चन्द्रवत् सूर्यवच्चापि नीत्यर्थे नियमं चरेत् ।
बन्धकी तु यथा स्त्रार्द्रे निर्लेपा पशुपक्षिषु ॥२६॥
पद्मं जले तु निर्लेपं ह्युपर्युपरि तिष्ठति ।
शरभः सिंहवर्गश्च फल्गुक्पुरुषार्थकः ॥२७॥
शूली वेधे न विफला तथा प्रज्ञां समर्जयेत् ।
दधिपात्रे प्रस्फुटिते गोपालिका न शोचति ॥२८॥
गुर्विणीस्तनतो दुग्धं स्रवते न कदाचन ।
एवं राज्ञा वर्तनीयं कर्तव्यं राज्यरक्षणम् ॥२९॥
इन्द्रवत्तोयमादाय दातव्यं समयागमे ।
सूर्यवत्तोयमादाय दातव्यं ऋतुसंगमे ॥३०॥
यमवत् सुहृदि शत्रौ दण्डकार्ये समो भवेत् ।
चन्द्रवत् शान्तमनसा भाव्यं क्वचिन्न सर्वदा ॥३१॥
वायुवत् सर्ववर्गेषु चारैर्गोप्यं समाहरेत् ।
न लोभे कामवर्गे वा कृष्यते स सुखी सदा ॥३२॥
धर्मं पालयति स्वर्ग्यं साध्वाश्रमांश्च रक्षति ।
तस्य सुखं प्रेत्य परत्रेह च शाश्वतम् ॥३३॥
प्रजायां धर्मसर्वस्वस्थापनेन नृपस्य तु ।
भागप्राप्तिर्भवत्येव तेन स्वर्गे पुनः पुनः ॥३४॥
कर्मयज्ञान् ज्ञानयज्ञान् भक्तियज्ञान् प्रवर्तयेत् ।
कृष्णनारायणप्रीत्या लभेत शाश्वतं पदम् ॥३५॥
सत्यं शौचमहिंसा चाऽनसूया च तथा क्षमा ।
आनृशंस्यमकर्मण्यं चैते रक्ष्या जनैर्भुवि ॥३६॥
वत्स ! गार्हस्थ्यमादाय जनः पुष्णाति वै जगत् ।
तत्पुण्येन च लोकान् स सञ्जयत्यभिवाञ्छितान् ॥३७॥
सुरा दैत्या दानवा वा मानुषाः पितरर्षयः ।
मुनयः कीटपतंगा वयांसि पशवो द्रुमाः ॥३८॥
गृहस्थमुपजीवन्ति तेन तृप्तिं प्रयान्ति च ।
मुखं त्वस्य निरीक्षन्ते ह्यपि नो दास्यतीति वै ॥३९॥
गार्हस्थ्यं पोषकं सर्वाधारं गौः सा त्रयीमयी ।
यत्र प्रतिष्ठितं विश्वं विश्वहेतुश्च सा मता ॥४०॥
इष्टापूर्तादिकार्याणि गृहस्थेनैव सर्वथा ।
स्वाहाकारस्वधाकारौ गृहस्थाधारकौ मतौ ॥४१॥
वषट्कारो हन्तकारश्चाऽहोकारोऽपि तन्मयः ।
गार्हस्थ्योच्छेदकर्ता यः स तु पापकरोऽस्ति वै ॥४२॥
गार्हस्थ्य पोषयेद् विज्ञः सः स्वर्गायोपकल्प्यते ।
राज्ञा वा धनिना वत्स ! देवर्षिपितृमानवाः ॥४३॥
भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा ।
पितृणां तर्पणं श्राद्धं काले कुर्यात्समाहितः ॥४४॥
सुमनोगन्धपुष्पाद्यैर्देवानभ्यर्चयेत् तथा ।
दीनाऽनाथदरिद्रेभ्यो दद्याद् भोज्यादिकं गृही ॥४५॥
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चाऽवपेद् भुवि ।
बुभुक्षुमागतं श्रान्तं याचमानमकिंचनम् ॥४६॥
भोज्यं पेयं प्रदद्याच्चातिथिं मत्वा हरिं प्रभुम् ।
तस्मिँस्तृप्ते नृयज्ञोत्थादृणान्मुच्येत वै गृही ॥४७॥
अतिथिर्यस्य भग्नाशो गृहस्थस्य निवर्तते ।
दत्वा स दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥४८॥
अप्यम्बुशाकदानेन सत्क्रियादतिथिं गृही ।
भिक्षां च याचतां दद्याद् यथाशक्तिप्रभिक्षणम् ॥४९॥
आश्रितान् भोजयित्वैव सदा भुंज्याद् गृहाधिपः ।
एवमुद्धृतः पुत्र ! गार्हस्थ्यं चोपकारकम् ॥५०॥
देवाः पितरो मुनयो दीनाश्चातिथिभिक्षुकाः ।
ऋषयो बान्धवाः पक्षिपशवः सूक्ष्मकीटकाः ॥५१॥
आशीर्वादपरा नित्याः सुखदाः संभवन्ति वै ।
परलोकेऽपि सुखदा अविघ्नाश्च भवन्ति ते ॥५२॥
एवंविधां शुभां गाथां स्वयमत्रिरगायत ।
वैश्वदेवं हि नामैतद् दत्वा युंज्यान्न चान्यथा ॥५३॥
पुत्रजन्मनि यत्कार्यं विवाहादौ च यद् यथा ।
तथा सतां तु सेवायां व्ययः कार्यो हरेर्दिने ॥५४॥
अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि ।
तेन तृप्तिं पिशाचाद्याः पर्युषितेन यान्त्यपि ॥५५॥
यदम्बु स्नानवस्त्रार्द्रे भूमौ पतति तेन वै ।
ये के च तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते ॥५६॥
ये तु देहांगलग्ना वै पतन्ति जलबिन्दवः ।
भूगतैस्तैश्च देवादौ गतास्तृप्तिं प्रयान्ति वै ॥५७॥
पिण्डान्नकणिकाभिश्च तिर्यञ्चो यान्ति तोषणम् ।
ये तु दग्धास्तथा बालाः क्रियायोग्या असंस्कृताः ॥५८॥
विपन्नास्तेऽन्नविकिरसम्मार्जनजलाशिनः ।
आचुलुकजलं पीत्वा तृप्तिमायान्ति ते मृताः ॥५९॥
तस्मान्महोत्सवे दद्यात् श्राद्धे दद्याच्च याचके ।
दद्यादेव गृहस्थस्तु कुले कश्चिन्न सीदति ॥६०॥
सदाचारो गृहस्थेन पालनीयो यथायथम् ।
न ह्याचारविहीनस्य सुखमत्र परत्र च ॥६१॥

दुराचारो हि पुरुषो नेहाऽऽयुर्विन्दति ध्रुवम् ।
सर्वपापनिषेधार्थे धर्मः कार्यो गृहार्थिना ॥६२॥
ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थौ चापि चिन्तयेत् ।
स्नात्वा सन्ध्यां तथा ध्यानं प्रकुर्वीत सुरार्चनम् ॥६३॥
असत्प्रलापमनृतं वाक्पारुष्यं च वर्जयेत् ।
असद्वादं च नास्तिक्यं नैव कुर्यात्कदाचन ॥६४॥
वृद्धेभ्यो नमनं कुर्यात् पूज्यपूजां समाचरेत् ।
गुरूणामासनं दद्यादभ्युत्थानादि चाचरेत् ॥६५॥
गुरुं च पितरौ श्रेष्ठं पतिं समभिवादयेत् ।
दुष्कृतं न गुरोर्ब्रूयात् क्रुद्धं त्वेनं प्रसादयेत् ॥६६॥
परनिन्दां न शृणुयान्न च कुर्यात्कदाचन ।
पन्था देयो ब्राह्मणानां राज्ञो दुःखातुरस्य च ॥६७॥
सतां विदुषां गुर्विण्या भारार्तस्य यवीयसः ।
मूकान्धबधिराणां च मत्तस्योन्मत्तकस्य च ॥६८॥
सत्याश्च वैरिणश्चापि बालस्य पतितस्य च ।
नर्माऽभिघातमाक्रोशं पैशुन्यं च विवर्जयेत् ॥६९॥
दंभाऽभिमानशाठ्यानि न कुर्याद्वै कदाचन ।
परदारा न गन्तव्या दीर्घायुष्यं समीच्छता ॥७०॥
रजस्वला सदा वर्ज्या सर्वैः रात्रिचतुष्टयम् ।
स्त्रीजन्मपरिहारार्थं पञ्चमीमपि वर्जयेत् ॥७१॥
ततः षष्ठ्यां व्रजेद् रात्र्यां पुत्रेच्छुको हि सर्वथा ।
युग्मासु पुत्रा जायन्ते कन्यास्त्वेकासु रात्रिषु ॥७२॥
आषोडशरात्रं वै गर्भाधानबलं मतम् ।
तत ऊर्ध्वं तु कमलं पिहितं जायतेऽफलम् ॥७३॥
कुर्यान्मैत्रीं न चाऽशीलैर्न चौर्यादिदूषितैः ।
न चाऽतिव्ययशीलैश्च न लुब्धैर्नापि वैरिभिः ॥७४॥
न तथा बलिभिर्मैत्रीं न न्यूनैर्नापि निन्दितैः ।
न सर्वशंकिभिश्चापि न वा दैवपरैस्तथा ॥७५॥
अथ मैत्रीं प्रकुर्वीत सदाचारैश्च साधुभिः ।
प्राज्ञैरपिशुनैः शक्तैः कर्मोद्योगादिशालिभिः ॥७६॥
पतिदेवगुरून् प्रति नैव पादौ प्रसारयेत् ।
तत्र पुत्र ! न वस्तव्यं यत्र नास्ति चतुष्टयम् ॥७७॥
ऋणप्रदाता वैद्यश्च श्रोत्रीयः सजला नदि ।
जिताऽमित्रो नृपो यत्र धर्मरक्षणकारकः ॥७८॥
पौराः सुसंयता यत्र यत्र सस्यवती मही ।
यत्राऽमत्सरिणो लोकास्तत्र वासः सुखोदयः ॥७९॥
तत्र पुत्र ! न वस्तव्यं यत्रैतत् त्रितयं सदा ।
जिगीषुः पूर्ववैरश्च जना उद्यमवर्जिताः ॥८०॥
शौचादिकं शृणु पुत्र ! यथा यस्यास्ति सम्मतम् ।
शंखाऽश्मस्वर्णरूप्याणां रज्जूनामथ वाससाम् ॥८१॥
शाकमूलफलानां च तथा विदलचर्मणाम् ।
मणिवज्रप्रवालानां रत्नमुक्ताफलस्य च ॥८२॥
गात्राणां च मनुष्याणामम्बुना शौचमिष्यते ।
सस्नेहानां तु भाण्डानां शुद्धिरुष्णेन वारिणा ॥८३॥
शूर्पधान्याऽजिनानां च मुशलोलूखलस्य च ।
संहतानां च वस्त्राणां प्रोक्षणात् संचयस्य च ॥८४॥
वल्कलानामरोषाणामम्बुना शुद्धिरिष्यते ।
तृणकाष्ठौषधीनां च प्रोक्षणाच्छुद्धिरिष्यते ॥८५॥
ऊर्णा केशादयः शुद्धा वायुना किरणेन वा ।
शुचि भैक्षं कारुहस्तः पण्यं योषिन्मुखं तथा ॥८६॥
यज्ञशाला रसशालाः स्तनन्धयसुताः स्त्रियः ।
शुचिन्यश्च तथा ह्यापः स्रवन्त्योऽगन्धबुद्बुदाः ॥८७॥
भूमिर्विशुद्ध्यति कालात् सेकाल्लेपात्सुमार्जनात् ।
उल्लेखनात्तथा वृष्टेर्मृत्तिकाशुद्धिरिष्यते ॥८८॥
भस्माऽम्बुघर्षणैर्कांस्यशुद्धिश्च वह्निना तथा ।
मृत्तोयैश्चान्यपात्राणां क्षारेण त्रपुसीसयोः ॥८९॥
रजोऽग्निरश्वो गौश्छाया रश्मयः पवनो मही ।
विप्रुषो मक्षिकाद्याश्च दुष्टसंगाददोषिणः ॥९०॥
अजाश्वौ मुखतो मेध्यौ न गोर्वत्सस्य चाननम् ।
मातुः प्रस्रवणं मेध्यं शकुनि फलपातने ॥९१॥
आसनं शयनं यानं नावः पथि तृणानि च ।
सोमसूर्यांशुपवनैः शुद्ध्यन्ति नित्यमेव हि ॥९२॥
प्रभूतोपहतादन्नादग्रमुद्धृत्य संत्यजेत् ।
शेषस्य प्रोक्षणं कुर्याद् वायुना शुद्धिरेव वा ॥९३॥
शवं स्पृष्ट्वा प्रकुर्याद्वै स्नानं शुद्धिस्ततो मता ।
मलत्यागे प्रकुर्वीत स्नानं करादिशोधनम् ॥९४॥
अपत्यजन्मनि शौचं मासमेकं हि पालयेत् ।
मृतशौचं द्वादशाहं पालयेन्न्यूनवर्षवत् ॥९५॥
इत्येवं त्वमलर्कात्राचारं पालय सर्वथा ।
आत्मशुद्धिः सदा रक्ष्या मायाभ्रमविनाशनैः ॥९६॥
स एवमनुशिष्टो वै मात्रा त्वलर्क आदरात् ।
पित्रादिष्टश्च संचक्रे धर्मदारपरिग्रहम् ॥९७॥
राज्यं पित्रा प्रदत्तं च गृहाणाऽलर्क ऐहिकम् ।
मदालसा स्वतनयं प्राहेदं पश्चिमं वचः ॥९८॥
यदा दुःखमसह्यं ते प्रियबन्धुवियोगजम् ।
शत्रुबाधोद्भवं वापि वित्तनाशादिसंभवम् ॥९९॥

तदाऽस्मात् पुत्र ! निष्कृष्य मद्दत्तादंगुलीयकात् ।
वाच्यं वै शासनं त्वत्र पट्टेऽस्ति लिखितं मया ॥१००॥
इत्युक्त्वा प्रददौ माता सौवर्णं सांऽगुलीयकम् ।
आशिषश्चापि या योग्या दत्ता मात्रा ततः परम् ॥१०१॥
पित्रा दत्ता आशिषश्च राज्यं चक्रे ह्यलर्ककः ।
मदालसाऋतध्वजौ तपसे काननं गतौ ॥१०२॥
ध्यात्वा तौ श्रीकृष्णनारायणं त्यक्त्वा तु भौतिकम् ।
दिव्यं देहं समासाद्य ययतुर्ब्रह्मधाम वै ॥१०३॥
एवं मदालसा लक्ष्मि ! वैष्णवी वै पतिव्रता ।
पुत्रान् मुक्तान् सुनिष्पाद्याऽक्षरधाम गता सती ॥१०४॥
एतस्य पठनाद्वापि श्रवणान्मुक्तिराप्यते ।
बन्धनानि विनश्येयुः सदा सौख्यं भवेत् प्रिये ! ॥१०५॥
अलर्कोऽपि यथान्यायं बन्धनं न भवेद् यथा ।
तथाऽकरोन्निजं राज्यं सर्वाः प्रमुदिताः प्रजाः ॥१०६॥
पालयामास धर्मात्मा पुत्रवद् धार्मिकीः प्रजाः ।
पुत्रांश्चोत्पादयामास तथेयाज महामखैः ॥१०७॥
अजायन्त सुतास्त्वस्य महाबलपराक्रमाः ।
धर्मात्मानो महात्मानो विमार्गपरिपन्थिनः ॥१०८॥
राज्यं कर्तुं समर्थेभ्यो न सुतेभ्यो ददौ धुरम् ।
वैराग्यं नाऽस्य संजज्ञे भुंजतो विषयान् बहून् ॥१०९॥
तं तथा भोगसंसक्तं भ्रान्तं चाऽप्यजितेन्द्रियम् ।
भ्रातरं रागनाशाय ह्युपदेष्टुमना वनी ॥११०॥
सुबाहुनामको भ्राताऽग्रजः सन्यासवान् यतिः ।
आययौ तद्गृहं शीघ्रमुपादिदेश मोक्षणम् ॥१११॥
आत्मविद्यां बहुविद्यां भ्रात्रापि कथितां च ताम् ।
स्मारं स्मारं जगादाऽस्मै बन्धनाशार्थमेव सः ॥११२॥
तथाप्यलर्को नो मेने राज्यत्यागं हितंकरम् ।
तदा बुबोधयिषुस्तं त्याजयितुं च बन्धनम् ॥११३॥
सुबाहुस्तु चिरं ध्यात्वा श्रेयोऽमन्यत सङ्गरम् ।
तद्वैरिसंश्रयं कृत्वा युद्धमुत्पाद्य चोल्बणम् ॥११४॥
कारयामि परं श्रेयो भ्रातुर्वैराग्यमुत्तमम् ।
औदासीन्यं समुत्पादयित्वा करोमि मोक्षणम् ॥११५॥
विचार्येत्थं सुबाहुः सः काशीभूपालमागमत् ।
तेन चक्रे बलोद्योगमलर्कं प्रति पार्थिवः ॥११६॥
दूतं च प्रेषयामास राज्यं भ्रात्रे प्रदीयताम् ।
इत्युक्तवन्तं तं दूतं प्रत्युवाच मदान्वितः ॥११७॥
मामेवाऽभ्येत्य हार्देन याचतां राज्यमग्रजः ।
नाऽऽक्रान्त्या संप्रदास्यामि काशीराजभयेन वै ॥११८॥
ततः काशीनृपेणास्य युद्धं घोरतरं ह्यभूत् ।
चिन्तां स परमां प्राप्य तत् सस्मारांगुलीयकम् ॥११९॥
मात्रा दत्तं तत्र पत्रं ददर्श प्रस्फुटाक्षरम् ।
'संगः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते' ॥१२०॥
सः सद्भिः सह कर्तव्यः सतां संगो हि भेषजम् ।
तृष्णा सर्वात्मना हेया त्यक्तुं चेच्छक्यते न सा ॥१२१॥
मुमुक्षया परित्याज्या सैव तस्यास्तु भेषजम् ।
वाचयित्वा मुमुक्षां च गृहीत्वाऽलर्कभूपतिः ॥१२२॥
साधुसम्पर्कमन्विच्छन् रात्रौ मितपरिग्रहः ।
दत्तात्रेयं महाभागं ययौ गुरुमसंगिनम् ॥१२३॥
प्रणिपत्याऽभिसंपूज्य यथासर्वमभाषत ।
कुरु प्रसादं दुःखादिविनाशायेत्ययाचत ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽलर्के मदालसा प्रवृत्तिधर्मानुपादिदेश, सा सपतिका दिव्यगतिमवाप, अलर्कस्याऽऽत्मज्ञानार्थं सुबाहोः प्रयास इत्यादिनिरूपणनामा पञ्चनवत्यधिकत्रिशततमोऽध्यायः ॥३९५॥

श्रीनारायण उवाच—

समाकर्णय विज्ञानं दत्तात्रेयाद् यथाऽर्जितम् ।
अलर्केण महालक्ष्मि ! योगिनामपि दुर्लभम् ॥ १ ॥
गुरुः प्राह किमर्थं ते दुःखं ब्रूहि यथातथम् ।
दुःखापहारमद्यैव करोमि तव पार्थिव ॥ २ ॥
शिष्यः प्राह सुबाहुर्मे भ्राता राज्यार्थमेव यत् ।
काशीनृपेण सम्मील्य वै मया सह युद्ध्यति ॥ ३ ॥
तद्दुःखं परमं शीघ्रं प्राक् प्रातरेव नाशय ।
गुरुः प्राह तदेतत्तु त्वयि नास्ति कदाचन ॥ ४ ॥
यस्यात्मनि न चास्ति त्वं तस्यापसरणं कुतः ।
विचारं कुरु राजेन्द्र प्रकाशोऽस्तु च ते हृदि ॥ ५ ॥
मत्कृपातो निजं विद्धि ह्यदुःखं ह्यसुखं सदा ।
गृहाणेदं जलं राजन् पिब गण्डूषमात्रकम् ॥ ६ ॥
देहि नेत्रोपरि तद्वन्मस्तके ब्रह्मदर्शकम् ।
इत्युक्तः स तथा कृत्वा ह्युद्घाटितहृदन्तरः ॥ ७ ॥
भूत्वा विमृश्य चात्मानं प्रहस्येदमथाऽब्रवीत् ।
प्रकृतिस्त्रिगुणा सर्वा निस्त्रैगुण्योऽस्म्यहं सदा ॥ ८ ॥
प्रकृतेर्ममता जाता तया जाताऽप्यहंकृतिः ।
तया मिष्टानि मात्राणि ग्राहकाणि मृदून्यपि ॥ ९ ॥

मात्रेभ्यः स्थूलभोग्यानि तेभ्यो देहो गुणाश्रितः ।
सुखं दुःखं तथा मोहः सत्त्वं रजस्तमश्च ते ॥१०॥
तत्कार्याणि तादृशानि तेषु चायान्ति तान्यपि ।
अ तादृशे ह्यतस्मिँश्च मयि नायान्ति तानि वै ॥११॥
ततः सुखं तथा दुःखं मोहः सन्ति न ते मयि ।
नाऽमुर्वी न सलिलं न ज्योतिरनिलो न च ॥१२॥
नाकाशं चेति गन्धाद्या धर्मा मयि न सन्ति वै ।
नाऽहं पृथ्वीर्न मे गन्धो नाऽहं जलं न मे रसः ॥१३॥
नाऽहं ज्योतिर्न मे रूपं नाऽहं वायुर्न मे स्पृशिः ।
नाऽहं व्योम न मे शब्दस्तद्धर्माश्च कुतो मयि ॥१४॥
पञ्चभूतानि युक्तानि हानिं वृद्धिं प्रयान्ति च ।
सुखदुःखप्रमोहानां हानिर्वृद्धिश्च दृश्यते ॥१५॥
दृश्यवद् दृश्यधर्माश्च घटो रूपादयस्तथा ।
दृश्यन्ते चक्षुषा यद्वत् सुखाद्या मनसास्तथा ॥१६॥
दृश्यस्यैव प्रकृतेस्ते नात्मनः सन्ति नश्वराः ।
अनश्वरस्य नित्यस्य कथमागन्तुधर्मिता ॥१७॥
एवं हस्तेन वै ग्राह्यं फलं चाम्रादिकं जडम् ।
रूपं तु चक्षुषा ग्राह्यं रसो रसनया तथा ॥१८॥
गन्धो नासिकया ग्राह्य उन्मादो मनसा तथा ।
आसवादौ गुणोन्मादो मत्तता धूस्तुरे खलु ॥१९॥
तक्रादौ मान्द्यमेवेत्यादयो ग्राह्या रसोत्तराः ।
मनसा ते तु गृह्यन्ते मनोऽपि तद्रसोत्तरम् ॥२०॥
अंशो मुक्तस्य चाणीयान्मन एव भवत्यथ ।
मनस्यवस्थिता धर्मो ज्ञानं विरागमीशिता ॥२१॥
सुखं दुखं विमोहस्ते मनस्यवस्थिता यतः ।
नाऽहं मनो न मे दुःखसुखमोहाः कथंचन ॥२२॥
अहं नाऽहं, मम नाऽहं, बुद्धिर्नाऽहं, न वै मनः, ।
तत्र स्थितं सुखं दुःखं तस्यैव मयि तत्कथम् ॥२३॥

नाहं पृथिव्यादिमयं शरीरं
न वा मनश्चान्तरमिन्द्रियं च ।
नापि प्रकर्माशयवासनाऽहं
तन्मोहदुःखानि च किं ममाऽत्र ॥२४॥

राज्यं धरित्री जनताः समस्ता-
स्तच्छासनं बुद्धिकृतं न तन्मे ।
बुद्धिः समाना त्रिगुणस्य पुत्री
तच्छासनं राज्यमिदं न तन्मे ॥२५॥

करोतु तच्छासनमस्य बुद्धिः
सुबाहुबुद्धिश्च करोतु यद्वा ।
नालर्कबुद्धिर्न सुबाहुबुद्धि-
र्यतोऽभिधा देहगता न जीवे ॥२६॥

न यस्य हस्तादिकमस्ति वश्यं
मांसं न चास्थीनि शिराविभागः ।
कस्तस्य हस्त्यश्वरथादिकोषैः
स्वल्पोऽपि संसर्ग इहास्ति पुंसः ॥२७॥

तस्मान्न मेऽरिर्न च मेऽस्ति दुखं
न मे सुखं पत्तनमस्ति मोहः ।
न कोशनागाश्वधरार्थदारा
न तस्य नान्यस्य न मे भवन्ति ॥२८॥

यदस्ति तस्यैव स मेऽस्ति शुक्रो
यदस्ति मे तस्य तदेव चास्ति ।
द्वयोर्यदस्त्येव स शुक्र आत्मा
दुःखं सुखं केन कृतं वदात्र ॥२९॥

सम्यक् प्रपश्यतः पुंसो दुःखं सुखं न किञ्चन ।
आत्मप्रदर्शिनः क्वापि राज्यं न हरिमन्तरा ॥३०॥
बुद्धिस्तथा स्थितिस्थाप्या बहुकालकृता सदा ।
यत्रासक्ता तथा तद्रूजायते गुणरञ्जिता ॥३१॥
मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ्ममताशून्ये चक्रवाकेऽथ मूषिके ॥३२॥
रक्षणे देहपुत्रादौ यथाबुद्धिः प्रवर्तते ।
न तथा देहलिक्षादावस्ति प्रत्युत मारणे ॥३३॥
एकस्यैव हि देहस्य धातुभिर्विविधाः प्रजाः ।
लिक्षाः कीटा मत्कुणा औरसा व्यवायजाः सुताः ॥३४॥
न सर्वत्र समा बुद्धिर्नखकेशमलेष्वपि ।
तस्माद् बुद्धिकृतं नैजं पारक्यं नात्मना कृतम् ॥३५॥
तस्माद् गुरो सत्यबोधे नाऽहं दुःखी न वा सुखी ।
न च मुग्धो नरः कश्चिद् वेद्मि तेऽनुग्रहात् खलु ॥३६॥
श्रुत्वैतच्छिष्यवाक्यं तु दत्तात्रेय उवाच तम् ।
एवमेतन्नरव्याघ्र ! जानासि तु यथातथम् ॥३७॥
मूलं ममेति दुःखस्य न ममेति च निर्वृतेः ।
मत्कृपातश्च ते ज्ञानमुत्पन्नमिदमुत्तमम् ॥३८॥
आदिष्टं तव मात्रा प्राङ् स्मारितं ते मयाऽद्य वै ।
अहममेतिजाड्यं वै क्षिप्तं येन विवेकतः ॥३९॥

तस्यैव सर्वथा तृप्तिर्भवत्येव विदेहिनः ।
गृहक्षेत्रपुत्रदारधनधान्यसुतादयः ॥४०॥
सर्वे मृषा मृषाबुद्धया अनित्याः शाश्वतीकृताः ।
भ्रान्तिज्ञानादिगर्तेषु तेषामात्यन्तिकं कुतः ॥४१॥
साधुसत्संगहंसस्थैर्जनैर्यैर्ममतादयः ।
निकृन्तिता गुरोर्वाक्यैस्ते गताः परमं पदम् ॥४२॥
प्राप्य चात्मवनं शुक्लं निर्द्वन्द्वं रोषवर्जितम् ।
मोहहीनं निरुपाधि वर्तस्व च सदा सुखी ॥४३॥
न त्वं स्थूलो न वा सूक्ष्मो न चासि कारणात्मकः ।
न तन्मात्रात्मकश्चासि नाऽहंकृतिमयोऽप्यसि ॥४४॥
तस्मात्परोऽसि क्षेत्रज्ञः संघातादुगुणसंज्ञितान् ।
शैवालकर्दममुञ्जमत्स्यमशकपाथसाम् ॥४५॥
यथैकत्वेऽपि पार्थक्यं तथा क्षेत्रात्मनोर्नृप ! ।
नित्यशुद्धो नित्यबुद्धो नित्यमुक्तो निरञ्जनः ॥४६॥
आत्मा चासि परो देहाद् देहराज्याद्विडम्बनात् ।
क्षितेः राज्यान्ममताया राज्यात्पारं गतो ह्यसि ॥४७॥
मुमुक्षुः सन्त्यजेत् संगं तन्नाशे ममतालयः ।
तेन वैराग्यभावः स्याद् दुःखदोषानुदर्शनात् ॥४८॥
अरागे वर्तते योगी सर्वभोगविवर्जितः ।
तद्गृहं यत्र वसति तद्भोज्यं येन जीवति ॥४९॥
अपरिग्रह एवाऽसौ जीवन्मुक्तः प्रकाशते ।
मुक्तये तु भवेज्ज्ञानमज्ञानं बन्धकृद् भवेत् ॥५०॥
शृण्वलर्क परं मार्गं परं पदप्रदं तथा ।
ऋषयो बहवो याता तेन मार्गेण मोक्षणम् ॥५१॥
चित्तवृत्तिनिरोधो हि योगो निर्वाणदः सदा ।
प्रमाणं पर्ययः कल्पो निद्रा स्मृतिर्हि वृत्तयः ॥५२॥
सत्यं ज्ञानं प्रमाणोत्थं मिथ्याज्ञानं विपर्ययः ।
वस्तुशून्यो विकल्पश्चाऽप्रत्ययो निद्रिका मता ॥५३॥
अनुभूतादिसंस्कारजन्यं तु स्मरणं मतम् ।
वस्तुयोगे तु संस्कारैर्जन्यते ह्यभिज्ञानकम् ॥५४॥
तदप्यत्र संस्कारोत्थास्मृतिरेवप्रकथ्यते ।
इत्येवं वृत्तयो बोध्या ज्ञाता अज्ञातकाश्च ताः ॥५५॥
तासां तु सर्वथा रोधो योग इत्युच्यते नृप ! ।
आत्मनो ब्रह्मणो योगो योगः श्रेष्ठतमो मतः ॥५६॥
बुद्धेर्मालिन्यनाशाय योगो नियुज्यते सदा ।
अविद्या चास्मिता रागो द्वेषो भयं च पञ्च ते ॥५७॥
क्लेशा मालिन्यभावाढ्या तन्नाशे निर्मलं मनः ।
तन्नाशार्थं यमाः साध्या नियमाश्च पुनः पुनः ॥५८॥

अहिंसा पालयेत् प्राज्ञः सत्यं हितकरं वदेत् ।
अस्तेयं सर्वथा रक्षेद् ब्रह्मचारी भवेत्तथा ॥५९॥
अपरिग्रहवान् यः स्यात्स वै बन्धात् प्रमुच्यते ।
शौचं तु मानसं कुर्याच्छारीरं योग्यमेव च ॥६०॥
सन्तोषं वर्धयेन्नित्यं यदृच्छालाभमात्रतः ।
तपश्चेन्द्रियनिग्रहात्मकं कुर्याद् यथायथम् ॥६१॥
स्वाध्यायं श्रीकृष्णनारायणनामजपात्मकम् ।
तन्मूर्तौ च प्रणिधानं कुर्यादतन्द्रितः सदा ॥६२॥
एवं वै कुर्वतो नित्यं मानसं दोषवर्जितम् ।
भवेन्मुख्यौ द्वेषरागौ दोषौ तत्त्यजनं कुरु ॥६३॥
आसनं सुस्थिरं कुर्यात्स्वस्तिकादिकमुत्तमम् ।
गोरक्षासनमेवात्र ब्रह्मचर्यप्ररक्षकम् ॥६४॥
प्राणायामान् यथापेक्षं कुर्याद् यथाबलं सदा ।
प्राणायामैर्दहेद् दोषान् धारणया च वासनाम् ॥६५॥
प्रत्याहारेण विषयान् ध्यानेनाऽनीश्वरान् गुणान् ।
समाधिना हरिं प्राप्याऽक्षरे धाम्नि प्रमोदते ॥६६॥
इन्द्रियाणां तु दोषा वै दह्यन्ते प्राणनिग्रहात् ।
लघुर्द्वादशसंख्यश्च द्विगुणः स तु मध्यमः ॥६७॥
त्रिगुणश्चोत्तमः प्रोक्तो नित्यं कुर्यादतन्द्रितः ।
प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ॥६८॥
विषादं हि तृतीयेन जयेद् दोषाननुक्रमात् ।
दोषान् सः साधितो हन्ति खगान् साधितश्येनवत् ॥६९॥
चेतसोऽपकषायत्वं प्राणायामेन जायते ।
कामक्रोधादयो दोषा दह्यन्ते प्राणरोधवत् ॥७०॥
अतीताऽनागतप्रज्ञा जायते दोषसंक्षयात् ।
संवित् संजायते चात्मबोधिनी प्राणसंयमात् ॥७१॥
मनःप्रसन्नतासौम्यभाविता जायते तथा ।
एवं स्थितौ भवत्यां च प्रत्याहारमुपक्रमेत् ॥७२॥
इन्द्रियाणि विषयेभ्यः प्राणान्मनस्तथाऽऽन्तरम् ।
निगृह्याऽन्तर्वर्तयेच्च प्रत्याहारस्तदात्मकः ॥७३॥
आत्मवृत्तिः सदा पश्येदिन्द्रियवृत्तिभिर्निजम् ।
आत्मानमात्मनि तेन प्रत्याहारोऽप्युपकृतिः ॥७४॥
प्रत्याहारोत्तरं राजन् धारणां समुपक्रमेत् ।
प्राणायामा दश द्वौ च स्थितिः साधारणात्मिकी ॥७५॥
द्वे धारणे भवेद् ध्यानं प्रत्ययैकैकतानकम् ।
एवंकृते हरेर्मूर्तौ नश्यन्ति दोषराशयः ॥७६॥
वीक्षते च परंब्रह्म मायागुणान् पृथक्पृथक् ।
स्वस्थो विभुर्यथा सर्वमात्मन्येव प्रपश्यति ॥७७॥

तथा ध्यानी सदा स्वस्थश्चात्मनि सर्वमीक्षते ।
नाभ्यां हृदये कण्ठे च तालौ भाले च नेत्रयोः ॥७८॥
मूर्ध्नि चात्मनि श्रीकृष्णे संयमं विदधीत वै ।
एवं वै धारणां कुर्वन् प्राप्नोत्यक्षरसाम्यताम् ॥७९॥
स्थानभ्रैः कृतसंस्कारादैश्वर्यविस्मयात्तथा ।
सामर्थ्ये विलयं याति तस्मात्तत्र निवर्तयेत् ॥८०॥
स्त्रियः कीर्तिर्विविज्ञानं राज्यं द्रव्यं समर्थता ।
देवत्वं बहुयशित्वं रसायनशरीरता ॥८१॥
आकाशजलवह्न्यादावप्रतिहतयानता ।
एते विघ्नाः प्रहर्तव्या मनस्तेषु न योजयेत् ॥८२॥
ब्रह्मसंगि मनः कुर्वन्नुपसर्गान्न हन्यते ।
प्रातिभं सर्वविज्ञानं श्रावणं दिव्यकर्णता ॥८३॥
चाक्षुषं दिव्यदृष्टिश्च सर्वभाषाऽवबोधिता ।
दूरग्राहित्वमेवाद्याः सिद्ध्यो विघ्नमूर्तयः ॥८४॥
आभिश्च सिद्धिभिः पुत्र ! देवता बन्धने स्थिताः ।
उपसर्गैर्महाविघ्नैरावर्तन्ते पुनः पुनः ॥८५॥
तस्माद् योगकृतावासः प्रावृत्य ब्रह्मकम्बलम् ।
चिन्तयेत्परमं ब्रह्म स यायात्परमां गतिम् ॥८६॥
धरित्रीं विलयेद् वार्धौ लयेद् वारीणि तेजसि ।
तेजो लयेत्तु पवनेऽनिलं लयेत्ततोऽम्बरे ॥८७॥
तान् शब्दे तं त्वहंकारे तं महत्यां प्रधानके ।
महतीं बुद्धिं विषमे वैषम्यं गुणसाम्यके ॥८८॥
गुणत्रयं विभौ चैकदेशे लयेत् समक्षरे ।
अक्षरं ब्रह्मरूपं स्वमात्मानं परमात्मनि ॥८९॥
परे ब्रह्मणि संयुंज्यात् तद्वै तस्य परं पदम् ।
भूतेषु यस्य सत्कारस्तस्यास्ति ध्रुवबन्धनम् ॥९०॥
यस्मिन् यस्मिँश्च कुरुते भूते रागं जनो यदा ।
तस्मिँस्तस्मिन् समासक्तिं मुहुः प्राप्य विनश्यति ॥९१॥
पुनरावर्तते राजन् भूतयोगो विघातकृत् ।
भूतेषु यस्य सार्वद्र्यौदासीन्यं मोक्षणं तु तत् ॥९२॥
अणिमा लघिमा चैव महिमा प्राप्तिरेव च ।
प्राकाम्यं च तथेशित्वं वशित्वं च तथाऽपरम् ॥९३॥
एवं कामावसायित्वं गुणानेताँस्तथैश्वरान् ।
मुक्तिप्रसूचकान्प्राप्य हन्यते त्रिगुणैर्न सः ॥९४॥
निर्दग्धदोषस्तेनैक्यं प्रयाति ब्रह्मणा सह ।
सोऽश्नुते हि सर्वान् कामान् सह तेन विपश्चिता ॥९५॥
तथाऽऽत्मा साम्यमभ्येति योगीशे परमात्मनि ।
सालोक्यं चापि सारूप्यं सायुज्यं नित्यमेव च ॥९६॥
समैश्वर्यादिमत्त्वं च प्राप्नोत्येव कृपावशात् ।
ओमित्येकं परंब्रह्म वदन् मां च सदा स्मरन् ॥९७॥
गृहं जीर्णं परित्यज्य प्रयाति मत्पदं नृप ! ।
मदाश्रयं सदा प्राप्तोऽलर्क ! विज्ञानमाप्तवान् ॥९८॥
मदनुग्रहतस्ते च दोषान्नष्टानवेहि च ।
न तु ते बन्धनं भूयाद् भूया निर्वाणभाक् सदा ॥९९॥
आत्मना ब्रह्मणा नित्यानन्देन सुखशायिना ।
परब्रह्मणि सम्मील्य शाश्वतानन्दवान् भव ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽलर्कराज्ञो दत्तात्रेयप्रदत्तज्ञानयोगवत्तया मुक्तादिनिरूपणनामा षण्णवत्यधिकत्रिशततमोऽध्यायः ॥३९६॥

श्रीनारायण उवाच—

एवं शुभाशिषः प्राप्याऽलर्को ब्रह्मस्वरूपताम् ।
स्वात्मन्यनुभवन्प्राह भगवन्तं गुरुं हरिम् ॥ १ ॥
भगवन् ! योगिनश्चर्यां श्रोतुमिच्छामि सर्वथा ।
ब्रह्मवर्त्मन्यनुगच्छन् लक्ष्यते कैर्विलक्षणैः ॥ २ ॥
गुरुः प्राह शृणु क्ष्मेश ! लोकचर्याविलक्षणाः ।
चर्यास्तस्य भवन्त्येव निर्मर्यादा निराहताः ॥ ३ ॥
मानापमानौ यावेतौ प्रीत्युद्वेगकरौ नृणाम् ।
तावेव विपरीतार्थौ योगिनस्तु विषामृते ॥ ४ ॥
मौनमालम्ब्य व्रते प्रायो हरेर्नाम गृणन् मुहुः ।
आतिथ्ययज्ञयात्रादौ न गच्छेन्निर्जनेच्छुकः ॥ ५ ॥
व्यस्ते विधूमे अंगारे सर्वस्मिन् भुक्तवजने ।
अटेत देवयात्रार्थे यदृच्छालाभतोषवान् ॥ ६ ॥
यद्वा चाजगरीं वृत्तिं समाश्रित्य हि वर्तते ।
फलं मूलं दलं कन्दं कणा भाजा च यल्लभेत् ॥ ७ ॥
तत्प्रयुञ्ज्यात्सुरेष्वाप्यं सतां वर्त्म न दूषयन् ।
सारभूतं यथापेक्षं गृह्णीयान्नाधिकं क्वचित् ॥ ८ ॥
वाग्दण्डः कर्मदण्डश्च मनोदण्डश्च ते त्रयः ।
यस्य वै नियताः स स्यात् त्रिदण्डी योगिराट् परः ॥ ९ ॥
कृष्णमूर्तौ सदा युञ्जन् योगं कृष्णेति संजपन् ।
वर्तते नित्यमग्नोऽसौ स्थितिं श्रेष्ठां समुद्वहन् ॥१०॥
तारस्वरेण भगवन्नामरटनमाचरेत् ।
तत्र युक्तस्तु योगीशो भगवल्लयमाप्नुयात् ॥११॥
शशांकरश्मिसंयोगाच्चन्द्रकान्तमणिः पयः ।
समुत्सृजति नाऽयुक्तः सोपमा योगिनः स्मृता ॥१२॥

सूर्यरश्मिसंप्रयोगात्सूर्यकान्तो हुताशनम् ।
आविष्करोति नैकाकी सोपमा योगिनः स्मृता ॥१३॥
पिपीलिकाऽऽखुनकुलग्रहगोधाकपिञ्जलाः ।
वसन्ति स्वामिवद्गेहे ध्वस्ते यान्ति ततोऽन्यतः ॥१४॥
दुःखं तु स्वामिनो गेहध्वंसे तेषां यथा न वै ।
तथा तु योगिना भाव्यं दुःखानावृतकेन वै ॥१५॥
वल्मीककीटिका मुखाग्रेण चापि त्वणीयसा ।
करोति वल्मीकचयं तथा योगं समर्जयेत् ॥१६॥
पशुपक्षिमनुष्याद्यैः पत्रपुष्पफलादिकम् ।
सवृक्षं लुप्यते तद्वल्लोप्यं सर्वं तु योगिना ॥१७॥
रुरुशावविषाणाग्रं वर्धमानं विलोक्य च ।
योगी योगे वर्धते च तदा सिद्धिमवाप्नुयात् ॥१८॥
तद्गृहं यत्र वसति तद्भोज्यं येन जीवति ।
येन सम्पद्यते चार्थस्तत्सुखं ममताऽत्र का ॥१९॥
भोज्ये मिष्टं च वाऽमिष्टं तीक्ष्णं क्षारं च वा कटु ।
न यद् वेदयते योगी ज्ञात्वाऽपि न भणत्यपि ॥२०॥
स वै जिह्वां रसं स्वादं जीतवानस्ति सर्वथा ।
कोमलं कठिनं रूक्षं मृदुः स्निग्धं खरं पृथु ॥२१॥
तीक्ष्णं प्रज्वालकं ज्ञात्वा चापि दुःखं न योजने ।
सोऽयं त्वचं सुखं स्पर्शं जीतवानस्ति सर्वथा ॥२२॥
मिष्टं भद्रं स्वरयुक्तं गीतं चाह्लादकं मृदु ।
नर्म हास्यप्रदं रोषकरं वा मानदं तथा ॥२३॥
ज्ञात्वा शब्दं न वै तत्र सुखं दुःखं हि मन्यते ।
स च वाचं तदर्थं च जीतवानस्ति सर्वथा ॥२४॥
सुन्दरं सुघटं स्वर्णसमं तेजोमयं शुभम् ।
धवलं कर्बुरं चान्यत् चिक्कणं तीक्ष्णमेव वा ॥२५॥
रूपं दृष्ट्वा सुखं दुःखं यो न मन्येत मानसे ।
जीतवान् सर्वथा रूपं नेत्रं दृश्यं स योगिराट् ॥२६॥
सुगन्धं समनुप्राप्य नासा नैति विकासताम् ।
दुर्गन्धं समनुप्राप्य नस्पुटं न च रुद्ध्यते ॥२७॥
स योगी जीतवान् गन्धं नासिकां च स्वभावतः ।
सत्यपि खर्जने प्राप्ते चांचल्ये वा त्वचि क्वचित् ॥२८॥
नैव स्पृशति कण्डूं च करोत्येव न त्वगजयी ।
पद्भ्यां याति हरेर्धाम प्रदक्षिणां करोति च ॥२९॥
तीर्थयात्रां साधुयात्रां करोति चरणोजयी ।
देवगुरुसतां सेवां कराभ्यां प्रसमाचरेत् ॥३०॥
वाण्या संकीर्तनं कृष्णनारायणस्य चाचरेत् ।
नृत्यं करोति देवाग्रे कथां करोति साधुषु ॥३१॥
गीतं करोति भक्तेषु ध्यानं करोति मूर्तिषु ।
चिन्तनं वन्दनं स्तोत्रं करोत्येव परात्मनि ॥३२॥
नमनं हसनं चाह्वानकं दिक्षु करोति च ।
दृष्ट्वा कृष्णं तत्र तत्र हर्षं चाविष्करोति च ॥३३॥
क्वचिद् वाऽदृश्यतां याति क्वचिद् वृक्षेषु वर्तते ।
क्वचिज्जलप्रदेशे वा क्वचिद्रणेऽपि वर्तते ॥३४॥
क्वचित्तु गह्वरे गर्ते कण्टकादौ क्वचित्क्वचित् ।
खेटे नगरे ग्रामादौ वनेऽरण्ये च निर्जने ॥३५॥
मनसा कल्पिते देशे भूतलेऽभ्रतलेऽपि वा ।
वसत्येव यथाचेष्टं यथासंकल्पमेव च ॥३६॥
मुखे क्वचिच्छिलाखण्डं धृत्वा खादति खाद्यवत् ।
कज्जलं कर्दमं वापि धूलीं क्षिपति गात्रके ॥३७॥
चन्दनं शीतलं मत्वा जिहीर्षति मुहुर्मुहुः ।
अगम्यं दूरदेशस्थं वस्तु हस्तेन धार्यते ॥३८॥
अन्यदेशे जायमानं वृत्तान्तं जनसंसदि ।
वर्णयत्येव च यथायथं क्वचित् सतीशवत् ॥३९॥
क्वचित् स्वपिति मार्गेषु क्वचिज्जनेषु कूर्दति ।
पशुष्वपि विना चिन्तां भयं निद्राति मत्तवत् ॥४०॥
धूलीधूसरितांगश्च मोदते मनसा क्वचित् ।
दिगम्बरः क्वचिद् याति क्वचित्पर्णाम्बरोऽपि वा ॥४१॥
क्वचिद् वृक्षत्वगम्बरः क्वचिद् भस्माम्बरोऽपि वै ।
क्वचिद्वृष्टिप्रधारासु क्वचिदातपवह्निषु ॥४२॥
क्वचिच्छैत्यादिसलिले कर्दमे तिष्ठति क्वचित् ।
क्वचिन्मलादिलिप्तांगः क्वचित्स्वच्छशरीरकः ॥४३॥
क्वचिन्मूत्रादिदुर्गन्धः ष्ठीवनादिषु निर्घृणः ।
नासिकालालसंलग्नो देहक्षालनवर्जितः ॥४४॥
आत्मारामो यथा ब्रह्मस्वरूपो दिव्यविग्रहः ।
निरावरणसञ्चारो नरनारीविभानकः ॥४५॥
पशुपक्षितृणवल्लीकण्टकादिषु निर्भयः ।
हरेर्भानेन युक्तोऽपि देहभानादिवर्जितः ॥४६॥
अविस्मर्तव्यमेवाऽत्राऽत्यक्तव्यं चापि यद्भवेत् ।
न त्यजति नापि विस्मरत्यवधानवानपि ॥४७॥
वर्तते बालवद्वापि वृद्धवच्च कदाचन ।
कदापि वर्तते काकबकमार्जारघूकवत् ॥४८॥
क्वचित् स वर्तते प्रेम्णि मयूरशुकहंसवत् ।
क्वचिन्माधुकरीं वृत्तिं क्वचिद् वृत्तिं तु वानरीम् ॥४९॥
क्वचित् सैंहीं क्वचिद् दीनां क्वचिच्छ्येनसमां तथा ।
क्वचिन्मत्स्यसमां वृत्तिं समादाय हि वर्तते ॥५०॥

श्रीहरौ चित्तयुक्तत्वं चाऽन्यत्र चित्तवर्जितम् ।
अह्नां निर्गमनं तस्य भवति ब्रह्मयोगिनः ॥५१॥
क्वचिन्मानसपूजायां हरिं भोजयति ध्रुवः ।
जलं दत्वा नमः कृत्वा विसर्जयति चेष्टया ॥५२॥
क्वचिद् धूल्यां तु पर्यंकं कृत्वा स्थापयति प्रभुम् ।
पत्रं पुष्पं दलं पर्णं फलं वा कंकरं तृणम् ॥५३॥
तुलसीं कमलं दत्वा हरिं रंजयति क्वचित् ।
एवं योगिजनस्यैव चेष्टा नियन्त्रणां विना ॥५४॥
दिव्या दिव्यस्वरूपा च दिव्यगतिप्रवर्तिका ।
दिव्यतत्त्वमयी सर्वा परश्रेयःप्रदायिनी ॥५५॥
भवत्येव सदाऽलर्क ! योगी जानाति योगिनम् ।
सनकाद्याः ऋषभाद्याः शुकाद्याश्च तथाऽभवन् ॥५६॥
सिद्धा नाथास्तीर्थकरा हंसा अघोरवर्तनाः ।
साधवो योगिनश्चान्ये जडाश्च भैरवादयः ॥५७॥
शंकरो योगिनीचक्रं चाऽवधूतास्तथाऽपरे ।
सत्यः साध्व्यस्तथा दास्यो वैष्णव्यश्च समाधिगाः ॥५८॥
प्रापुर्वै ब्रह्मपरमं लोकविलक्षणक्रियाः ।
किम्बहुनाऽत्र वाचा वै योगी योगेन दर्पितः ॥५९॥
नान्यत् किंचिद्विजानाति ब्रह्मभिन्नं हृदन्तरे ।
यस्य सर्वत्र चाऽऽत्माऽस्ति यस्मिन् सर्वात्मनो गृहम् ॥६०॥
सूत्रे मणिर्मणौ सूत्रं तथा यः स्थितिमाप्तवान् ।
परिपूर्णतमानन्दं प्राप्तवान् तन्मदान्वितः ॥६१॥
तस्य योगिनः साम्यं को विमर्शयितुमर्हति ।
चेष्टया वर्तते व्यग्रो बुद्धया विशारदो यथा ॥६२॥
वाचा तु वर्तते साधुर्वृत्त्या शान्तो हि वर्तते ।
हृदा तु वर्तते तृप्तो देहेन वर्ततेऽभयः ॥६३॥
गुणैस्तु वर्तते मूढः स्निग्धो मुखेन वर्तते ।
ब्रह्मणि वर्तते रागी मायिके वर्तते सरुट् ॥६४॥
निर्जने वर्तते लुब्धः सघृणो वर्तते जने ।
दैवे पैत्र्ये हरेर्योगे सश्रद्धो वर्तते च सः ॥६५॥
देहकार्ये विच्चित्तो वै निजकार्ये तु चित्तवान् ।
परे निःश्रेयसि सर्वबलयुक्तः प्रवर्तते ॥६६॥
व्यवहारे विच्चित्तोऽयं परमेशे सच्चित्तकः ।
एवं लक्षणसम्पन्नो योगी वर्तेत सर्वदा ॥६७॥
क्वचिद् दर्शयति स्वस्मिंश्चमत्कारान् बहून् बहून् ।
क्वचिद् वन्यवदेवाऽयं प्रदर्शयति मूर्खताम् ॥६८॥
एवंविधं जनं ज्ञात्वा विचित्रचेष्टिकं मुहुः ।
विजानीयान्महायोगेश्वरं ब्रह्मस्वरूपिणम् ॥६९॥

अथ योगी स्वयं चिह्नं ज्ञात्वा त्यजति विग्रहम् ।
शृणु वच्मि त्वरिष्टानि येनोत्क्रान्तौ न सीदति ॥७०॥
देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुन्धतीम् ।
यो न पश्यति नेत्रेण मृत्युस्तस्य समान्तरे ॥७१॥
सूर्यस्य मण्डलं रश्मिहीनं वह्निं सरश्मिकम् ।
यस्तु पश्यति नेत्रेण मृत्युस्तस्य समान्तरे ॥७२॥
वान्ते मूत्रपुरीषे च स्वर्णतुल्ये प्रपश्यति ।
स्वप्नेऽपि यदि पश्यति जीवेत् स दशमासिकम् ॥७३॥
दृष्ट्वा प्रेतपिशाचादीन् गन्धर्वनगराणि च ।
वृक्षान् कनकरंगांश्च नवमासान् स जीवति ॥७४॥
पीनः शुष्कः शुष्कः पीनो ह्यकस्माज्जायते मुहुः ।
शिरोवायुभ्रमो यस्य तस्याऽऽयुश्चाष्टमासिकम् ॥७५॥
पादन्यासे भुवि पार्ष्णिर्यद्वा फणे प्रखण्डिता ।
रजःकर्दमधूल्यादौ सप्तमासान् स जीवति ॥७६॥
गृध्रः कपोतः काकोलो वायसो वापि मूर्धनि ।
क्रव्यादो वा खगो नीलः षण्मासायुःप्रदर्शकः ॥७७॥
हन्यते काकपंक्त्या च पांशुवर्षेण स्वप्नके ।
स्वच्छायामन्यथा द्रष्टा चतुःपञ्च स जीवति ॥७८॥
अनभ्रे विद्युतो द्रष्टा दक्षिणस्यां प्रवासकृत् ।
रात्राविन्द्रधनुर्द्रष्टा द्वात्रमासिकजीवनः ॥७९॥
घृते तैले तथाऽऽदर्शे तोये वा नाऽऽत्मनस्तनुम् ।
यः पश्येदशिरस्कां वा मासादूर्ध्वं न जीवति ॥८०॥
यस्य बस्तसमो गन्धो गात्रे शवसमोऽपि वा ।
तस्य वै जीवनं चार्धमासिकं बोध्यमेव हि ॥८१॥
यस्य तु स्नातमात्रस्य हृदयं करपादकौ ।
पिबतश्च गले शोषो दशाहं स तु जीवति ॥८२॥
यस्य वेगेन वायोश्च दण्डभेदः प्रजायते ।
तस्याऽन्तकः समायातो मुहूर्ते वै मरिष्यति ॥८३॥
ऋक्षवानरबस्तोष्ट्रगर्दभजम्बुकादिभिः ।
दक्षिणां यो दिशं वाहे तिष्ठन् याति मरिष्यति ॥८४॥
रक्तकृष्णाम्बरधरा गायन्ती हसती च यम् ।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥८५॥
नग्नं क्षपणकं यद्वा राक्षसं कालमेव वा ।
हसमानं प्रवल्गन्तं दृष्ट्वा मृत्युं विचारयेत् ॥८६॥
आत्मानं सर्वथा मग्नं पंके पश्येन्मरिष्यति ।
केशे वह्निं भुजगं च भस्म शुष्कां नदीं तथा ॥८७॥
स्वप्ने दृष्ट्वा दशाहेन मरिष्यति न संशयः ।
करालैः पुरुषैरायुधादिभिश्चोपलादिभिः ॥८८॥

मारितस्ताडितः सोऽपि मरिष्यति न संशयः ।
दन्तजाड्यवतो मृत्युर्भविष्यति न संशयः ॥८९॥
सूर्योदये शिवा यस्य क्रोशन्ती याति सम्मुखम् ।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ॥९०॥
भुक्तमात्रस्य यस्यैव पुनः संबाधते क्षुधा ।
दीपगन्धं न यो वेत्ति स गतायुर्न संशयः ॥९१॥
नात्मप्रतिकृतिं त्वन्यचक्षुषोर्वै प्रपश्यति ।
रात्रौ शक्रायुधद्रष्टा दिवा ग्रहविलोकनः ॥९२॥
नासिका वक्रिता यस्य कर्णौ च निम्नकोन्नतौ ।
नेत्रं वामं स्रवत्येव तस्यायुर्नास्ति सर्वथा ॥९३॥
मुखं रक्तं भवेज्जिह्वा श्यामा दन्ताश्च कृष्णकाः ।
निर्घोषाऽश्रवणं कर्णे चक्षुर्ज्योतिःक्षयं तथा ॥९४॥
गर्ते गतस्योपलभिर्द्वारं यस्य पिधीयते ।
तस्य मृत्युः क्षणादूर्ध्वं स्वप्नेऽग्निवेशितस्य च ॥९५॥
जलप्रवेशने भूतैस्ताडने मृत्युरागतः ।
स्वभाववैपरीत्यं च प्रकृतेश्च विपर्ययः ॥९६॥
पूज्यनिन्दाऽवमानादि मृत्योराकारिणो मताः ।
तस्माद् योगं तदा युञ्ज्यान्मृत्युनाशाय तद्दिने ॥९७॥
यद्वा ब्रह्मणि युञ्जीतात्मानं नान्यत्स्मरेत्खलु ।
तेन कृष्णेन युक्तोऽसौ प्रयाति तत्परं पदम् ॥९८॥
सोऽयमात्यन्तिको मोक्षो मृत्युरात्यन्तिको हि सः ।
योगाभ्यासफलं तच्चाऽक्षरे पादार्चनं हरेः ॥९९॥
जननं सार्थकं तस्य मरणं सार्थकं तथा ।
सार्थकं राज्यकरणं प्राप्तिः कृष्णस्य पादयोः ॥१००॥
अलर्क इतिसंश्रुत्वा ननाम गुरुपादयोः ।
निशामध्ये मुहूर्ते वै ज्ञानयोगौ ललाभ च ॥१०१॥
पूजितो वन्दितो दत्तात्रेयश्च भगवान् मुहुः ।
उवाच बहुसन्तुष्टः पुलकांचितविग्रहः ॥१०२॥
दिष्ट्या काशीपतेर्भूरिबलसैन्येन तर्जितः ।
यन्निमित्तमिहाऽऽयातः स भवत्संगदो मम ॥१०३॥
धन्यो भ्राता सुबाहुश्च येन ज्ञाने सुयोजितः ।
दिष्ट्या मातृकृतं पत्रं वाचितं च मया तथा ॥१०४॥
दिष्ट्या त्वत्पादयुगलं सेवितं च मया तथा ।
दिष्ट्या त्वदुक्तयः सर्वा मम चेतसि सुस्थिराः ॥१०५॥
दिष्ट्या ज्ञानं ममोत्पन्नं तव साधोः समागमात् ।
दिष्ट्या भवता करुणा कृता भगवता मयि ॥१०६॥
सोऽहं तव प्रसादाग्निर्निर्दग्धाहंममादिकः ।
ब्रह्मधाम प्रगन्तुं वै यतिष्ये राज्यवर्तनात् ॥१०७॥
दत्तात्रेयस्ततः शिष्यं प्राह गच्छ सुखी भव ।
निर्ममो निरहंकारस्तथा चर विमुक्तये ॥१०८॥
एवमुक्तः प्रणम्यैनं जगाम निशिथे गृहम् ।
यत्र काशीपतिः राजा तथा सुबाहुरग्रजः ॥१०९॥
तत्र गत्वा समुवाच भुज्यतां राज्यमूर्जितम् ।
यथा वा रोचते तद्वत् सुबाहोः संप्रयच्छ वा ॥११०॥
काशीराजस्तदा प्राह किं त्यक्तं युद्धमन्तरा ।
अलर्कः प्राह गुरुणा ग्रन्थयो नाशिता मम ॥१११॥
दत्तात्रेयप्रसादेन भेदभावो निराकृतः ।
मनो ब्रह्मणि सन्धाय तज्जये परमो जयः ॥११२॥
सुबाहुः प्राह यस्यार्थे त्वामहं योद्धुमागतः ।
तन्मया सकलं प्राप्तं न मे राज्ये प्रयोजनम् ॥११३॥
काशीराजस्तथा प्राह ज्ञानवैराग्ययोः कृते ।
अलर्क ! तव मोक्षार्थे मया युद्धं प्रघोषितम् ॥११४॥
तत्ते ज्ञानं च वैराग्यं समुत्पन्नं व्रजाम्यहम् ।
उपेक्ष्यते सीदमानः स्वजनो बान्धवः सुहृत् ॥११५॥
स न प्रोक्तः स्वजनादिर्वाच्यः स तु जनैर्भवेत् ।
फलदायी सतां संगो मात्रा ते कथितः खलु ॥११६॥
तज्जन्यबोधलाभेन यतेथाः श्रेयसे नृप ! ।
एवमुक्त्वोत्सवं कृत्वा काशीराजो ययौ ततः ॥११७॥
सुबाहुरपि सिद्धार्थो ययौ स्वीयवनं पुनः ।
अलर्कस्तु समुत्तीर्णो गाथामेतामगायत ॥११८॥
अहो कष्टं मया कीदृग् राज्यं गर्वेण वर्तितम् ।
गुरोः कृपया विज्ञानं योगान्नास्ति परं सुखम् ॥११९॥
इत्युक्त्वा च निजं पुत्रमभिषिच्य नराधिपम् ।
वनं जगाम सन्त्यक्तसर्वसंगः प्रमुक्तये ॥१२०॥
ततः कालेन महता ब्रह्मनिर्वाणमाप्तवान् ।
श्रवणात्पठनाच्चास्य ब्रह्मसायुज्यमाप्नुयात् ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽलर्कस्य दत्तात्रेयोपदेशो मुक्तचर्या, योगिनां मृत्युचिह्नानि, अलर्कस्य वनवासः एवमादिनिरूपणनामा सप्तनवत्यधिकत्रिशततमोऽध्यायः ॥३९७॥

श्रीनारायण उवाच—

पुरा देवयुगे लक्ष्मि ! नारदो मुनिसत्तमः ।
सुमेरुशिखरे गत्वा ददर्श वेधसो गृहम् ॥ १ ॥
तस्योत्तरे पिप्पलद्रुं यदधो दिव्यमण्डपम् ।
पद्मरागमणिस्तंभसहस्रैरुपशोभितम् ॥ २ ॥
कृतस्वस्तिकमांगल्यं दिव्यतोरणशोभितम् ।
पुष्परागमहाद्वारं सप्तभूमिकगोपुरम् ॥ ३ ॥

प्रविश्याऽसौ ददर्शाऽन्तर्दिव्यमौक्तिकमण्डपम् ।
तन्मध्ये वेदिका तत्र तुंगाष्टपादराजितम् ॥ ४ ॥
सिंहासनं च यन्मध्ये पद्मं सहस्रपत्रकम् ।
तत्रसमभ्यासीनं च सुन्दरं पुरुषाकृतिम् ॥ ५ ॥
चतुर्बाहुं श्वेतवर्णं वराहास्यं ददर्श सः ।
शंखचक्राऽभयवरान् बिभ्राणं पुरुषोत्तमम् ॥ ६ ॥
पीताम्बरधरं देवं पुण्डरीकायतेक्षणम् ।
पूर्णेन्दुसौम्यवदनं किरीटोज्ज्वलकान्तिकम् ॥ ७ ॥

सामध्वनिं यज्ञमूर्तिं सुकृतुण्डं सुवनासिकम् ।
श्रीवत्सवक्षःसंशुभ्रयज्ञसूत्रविराजितम् ॥ ८ ॥
कौस्तुभश्रीसमुद्योतं स्वर्णभूषाविभूषितम् ।
कटकांगदकेयूरकुण्डलोज्ज्वलितं . हरिम् ॥ ९ ॥
नारदस्तमभिष्टूय स्थितो देवस्य सन्निधौ ।
एतस्मिन्नन्तरे लक्ष्मि ! धरणी तत्र चागता ॥१०॥
इलाया वै पिंगलया सखीभ्यां हि समन्विता ।
सर्वाभरणशोभाढ्या युवती तु सखीयुता ॥११॥

ननाम पादमूले श्रीहरेर्विकीर्य मस्तके ।
पुष्पाणि नैकगन्धानि कृताञ्जलिपुटा स्थिता ॥१२॥
तां देवीं श्रीवराहोऽपि ह्यालिंग्यांऽके निधाय च ।
पप्रच्छ कुशलं तस्यास्तथाऽऽगमनकारणम् ॥१३॥
पृथ्वी प्राह भगवँस्ते कृपया कुशलं मम ।
श्रुतं मया शेषशायिनारायणमुखात् खलु ॥१४॥
लक्ष्मीच्छया भुवि जज्ञे पूर्वं वेदवती तु या ।
तत्स्थानं तन्महत्तीर्थं द्रष्टुमिच्छामि माधव ॥१५॥
तच्छ्रुत्वा नारदः प्राह सत्यं तद्वै वसुन्धरे ।
तदेतदहमश्रौषं सत्ये वै मुनिसंसदि ॥१६॥

एवमुक्त्वा हरिं नत्वा नारदो बदरीं ययौ ।
धरणी प्राह भगवँस्तस्य स्थानस्य दर्शनम् ॥१७॥
पद्मिन्या दर्शनं कर्तुमिच्छामि ते कृपा यदि ।
तथास्त्विति वराहस्तामुक्त्वा सस्मार पक्षिणम् ॥१८॥
वैनतेयः समायातो दिव्यदेहेन तत्पुरः ।
धरणीं सह नीत्वैव वाराहो भगवान् स्वयम् ॥१९॥

समारुरोह गरुडं प्राजगाम जनिस्थलम् ।
विलोक्य पद्मिनीं छायां वियद्राजस्य कन्यकाम् ॥२०॥
नारायणपुरं दृष्ट्वा ययौ नारायणाचलम् ।
यत्र शेषाचलश्चाद्रिः सर्वातिशयपावनः ॥२१॥
अरुणाद्रिर्हस्तिशैलः सुवर्णमुखरी नदी ।
तस्याश्च ह्युत्तरे तीरे कमलाख्यं सरोवरम् ॥२२॥

तत्तीरे भगवानास्ते शुकस्य वरदो हरिः ।
सरसश्चोत्तरे पार्श्वे हरिचन्दनशोभितः ॥२३॥
श्रीवेंकटाचलो नाम वासुदेवालयो गिरिः ।
योजनद्वयविस्तीर्णः शैलोऽर्धयोजनोच्छ्रितः ॥२४॥
इन्द्राद्या देवताव्राता वशिष्ठाद्या मुनीश्वराः ।
सिद्धाः साध्याश्च मरुतो वैष्णवा भगवत्प्रियाः ॥२५॥
रम्भाद्या अप्सरःसंघा वसन्ति नियताः सदा ।
तपश्चरन्ति नागाश्च गरुडाः किन्नरादयः ॥२६॥

नारायणगिरौ लक्ष्मि ! स्वामिपुष्करिणी शुभा ।
अस्यास्तु पश्चिमे तीरे वाराहो धरणीयुतः ॥२७॥
गरुडादवतीर्यैव निवासमकरोद्धरिः ।
आस्तेऽस्या दक्षिणे तीरे श्रीनिवासो जगत्पतिः ॥२८॥
श्रीभूमिसहितश्चाहं तत्र वसामि पद्मजे ।
कृतेऽञ्जनाद्रिं त्रेतायां नारायणगिरिं जगुः ॥२९॥
द्वापरे सिंहशैलं च कलौ श्रीवेंकटाचलम् ।
प्रवदन्ति सुरास्तं च परमात्मालयं गिरिम् ॥३०॥

स्वामिपुष्करिणी तीरे पश्चिमे लोकपूजिते ।
आस्ते वराहवदनो शेषाद्रौ वृषभाचले ॥३१॥
तत्र विश्रान्तिमासाद्य नारायणगिरौ क्षितिः ।
वराहरूपिणं देवं सखीभिः संयुता धरा ॥३२॥
पप्रच्छ परया प्रीत्या लक्ष्मीछायां विलोक्य सा ।
वेंकटाख्ये महाशैले श्रीनिवासो जगत्पतिः ॥३३॥
कदा चक्षुष्पथं याति श्रीभूमिसहितः प्रभुः ।
श्रीवराहो धरामाह पुरावृत्तं शृणु प्रिये ! ॥३४॥
पूर्वं कृतयुगे त्वत्र वायोर्दृष्ट्वा महत्तपः ।
आगच्छच्छ्रीनिवासो हि श्रीभूमिसहितः प्रभुः ॥३५॥

दक्षिणेऽस्मिन् पुण्यतमे स्वामिपुष्करिणीतटे ।
हरिर्वायोः प्रियकरो ह्यानन्दाख्यविमानके ॥३६॥
आकल्पान्तमदृश्योऽस्मिन् विमाने वर्तते हरिः ।
योऽस्ति वैकुण्ठधामा श्रीकृष्णनारायणः प्रभुः ॥३७॥
धरण्याह कदा कृष्णः कथं दृश्यो भवेदिति ।
अगस्त्यऋषिराट् तं च याचेत यदि भावतः ॥३८॥

तदा सर्वस्य विषयश्चक्षुषोः स्यात् श्रियः पतिः ।
इतिश्रुत्वा धराऽगस्त्यं सस्मार सोऽपि चाययौ ॥३९॥
आराध्य परमात्मानं प्रीणयित्वा पुनः पुनः ।
ययाचे लोकलाभार्थं भवान् दृश्यो भवत्विति ॥४०॥
एवमुक्तो हृषीकेशः श्रीभूमिसहितः प्रभुः ।
सर्वेषां नेत्रविषयो ह्यभवत् स कृपालयः ॥४१॥

ववौ वायुः सुखस्पर्शस्तत्र पुत्रजनेर्दिने ।
पुत्रसूतिप्रवक्तृणां दारिद्र्यं तेन नाशितम् ॥८०॥
कपिलाकोटिदानं च वृषभाणां शताऽधिकम् ।
सुवर्णानामयुतं च ददावाद्ये च षष्ठके ॥८१॥
तथैकादशके प्राप्ते दिने नाम चकार सः ।
वसुदान इतिरम्यं संस्कारांश्चाऽप्यकारयत् ॥८२॥
वसुदानो ववृधे वै शुक्लपक्ष इवोडुराट् ।
उपनीतो विनीतोऽसौ गुरुभिः शिक्षितस्तथा ॥८३॥
चतुष्पादं धनुर्वेदं सांगोपांगमधीतवान् ।
पितुरस्त्राणि सर्वाणि समन्त्राण्यप्यशिक्षत ॥८४॥
अप्रधृष्योऽजय्य आसीद् दुःसहो दुर्निरीक्ष्यकः ।
तं तु पुत्रं महाभाग्यं दृष्ट्वा राजा तु वैष्णवीम् ॥८५॥
समन्त्रां कृष्णनाम्नां वै दीक्षां ददौ भवापहाम् ।
अथ पुत्रीं पद्मतुल्यां पद्मामिवाऽपरां शुभाम् ॥८६॥
लक्ष्मीतुल्यां विदित्वैव नाम्ना चकार पद्मिनीम् ।
तां तु यौवनसम्पन्नां सखीभिः परिवारिताम् ॥८७॥
आरामे विहरन्तीं च कीरकोकिलनादिते ।
यदृच्छयाऽऽगतस्तत्र नारदो सर्ववित्तमः ॥८८॥
वनलक्ष्मीमिवाऽऽलोक्य लक्ष्मीछायां सुनिश्चिताम् ।
ननाम देवीं पप्रच्छ काऽसि कस्याऽसि वै सुता ॥८९॥
भाग्यं ते बहुसम्पन्नं मन्ये हस्तं प्रदर्शय ।
इत्युक्ता सा सुचार्वंगी स्वकं परिचयं ददौ ॥९०॥
वियद्राजस्य कन्याऽहं धरणीपोषिताऽस्मि च ।
वर्धिता राजभवने समुत्पन्ना क्षितौ मुने ! ॥९१॥
किं किं जानासि सर्वज्ञ ! भाग्यं कीदृग् वदस्व मे ।
इत्युक्तो नारदस्तस्याः शारीरं चिह्नलक्षणम् ॥९२॥
प्रत्येकं संविलोक्यैव प्रहृष्टो ह्यवदत्तदा ।
पादाङ्गुलिनखा मध्यरक्ताश्चोन्नतिशालिनः ॥९३॥
पादौ प्रतिष्ठितौ शुभ्रौ रक्तपद्मसुचिह्नितौ ।
स्थलपद्मदलरंगौ मृदुभावान्वितौ शुभौ ॥९४॥
तलयोः सन्ति वल्ल्यादिचिह्नानि सुस्फुटानि ते ।
गुल्फौ गूढौ समौ चाप्युज्ज्वलौ वर्तुलसून्नतौ ॥९५॥
जंघे चाऽरोमशे रम्ये क्रमपुष्टेऽतिशोभने ।
जानुनी समसुस्निग्धे समावूरू क्रमपृथू ॥९६॥
समौ हस्तिकराभ्यां वै कोमलौ चन्द्रशीतलौ ।
सर्वातिशयरूपाढ्यौ कोमलौ चिक्कणौ तथा ॥९७॥
नितम्बौ पृथुलौ पीनौ समघट्टनकौ यतः ।
सक्थिमूले कोमले च रूपरूपातिशालिनी ॥९८॥
जघनं लिंगरेखाढ्यं मध्यं स्वर्णसमोज्ज्वलम् ।
नाभिः समण्डला निम्ना त्रिवलीरेखयान्विता ॥९९॥
पार्श्वौ शुभ्रौ मेदुरौ च स्थलपद्मदलोपमौ ।
उदरं त्रिवलीरम्यं रोमराजिसुशोभितम् ॥१००॥
स्तनौ पीनौ घनौ स्निग्धावुन्नतौ मग्नचूचुकौ ।
करौ ते रक्तपद्माभौ पद्मरेखासमन्वितौ ॥१०१॥
सुसूक्ष्मौ रक्तसत्पर्वनिरन्तरसमांगुली ।
चन्द्रतुल्यसुशुक्लाभौ मध्यरक्तसुसंभृतौ ॥१०२॥
दीर्घौ च कोमलौ कन्ये भुजौ ते पुष्पदण्डभौ ।
पृष्ठं ते वेदिवद् भाति विलग्नमृजुमध्यमम् ॥१०३॥
कण्ठः रक्तो मधुरश्च योग्यदीर्घोऽतिशोभनः ।
स्कन्धौ चावनतौ ते स्तः सिंहस्कन्धोपमौ तथा ॥१०४॥
मुखं प्रसन्नं सततं वर्तुलं शुभ्रकान्तिमत् ।
तेजःपरिधिसंराजद्रम्यं दृष्टिहरं शुभम् ॥१०५॥
कपोलौ कनकादर्शसदृशौ कुण्डलोज्ज्वलौ ।
तिलपुष्पसमाकारा नासिका तेऽस्ति पद्मिनि ! ॥१०६॥
विशालं धवलं चारु सूज्ज्वलं ते ललाटकम् ।
अकलंकाऽष्टमीचन्द्रनिभं रेखान्वितं शुभम् ॥१०७॥
नीलालकप्रमूलैश्च व्यञ्जितरूपभासुरम् ।
समं कम्मानिकोल्लेख्यं सर्वभाग्यविराजितम् ॥१०८॥
मूर्धा ते समवृत्तश्च स्निग्धायतकचान्वितः ।
स्मितसंशोभिदशनं बिम्बाधरसमन्वितम् ॥१०९॥
कुन्दकलिकासंशोभद्दन्तराजिविराजितम् ।
मुखं नारायणयोग्यं तवाऽस्ति तथ्यमेव यत् ॥११०॥
नाभिस्ते दक्षिणावर्त्ता हृदयं विष्णुहस्तवत् ।
रेखासुशोभितं चास्ति लक्ष्मीरूपा हि दृश्यसे ॥१११॥
मध्ये तु स्तनयोस्तेऽस्ति हृदि नारायणस्य वै ।
चरणोर्ध्वतिलकाख्यपुण्ड्ररेखापि विद्यते ॥११२॥
नाभ्यधो जघने भागे तेऽस्ति सुवर्णपिंगला ।
बाणाकृतिसमा रेखा, ललाटे मुकुटाकृतिः ॥११३॥
गण्डे तु दक्षिणे चाथ ललाटे मध्यदेशके ।
शोणबिन्दुश्च ते सुदर्शनतुल्योऽस्ति शोभनः ॥११४॥
उरसि ते चतुर्हस्तविष्णुरेखाऽस्ति सूक्ष्मिका ।
वामे भुजे गदाचिह्नं वामसक्थ्नि तु पादुका ॥११५॥

मुनिस्तद्दर्शनं कृत्वा प्रीतः प्रायात् स्वमाश्रमम् ।
विमानं विद्यमानं च न तु दृश्यं कदाचन ॥४२॥
ततश्चतुर्भुजो देवः सदा दृश्यो हि वर्तते ।
पृथ्वी तद्दर्शनं कृत्वा कृतकृत्या व्यजायत ॥४३॥
अथ सोमकुलोत्पन्नो मित्रवर्मा महारथः ।
तुण्डीरमण्डले राजा नारायणपुरेऽभवत् ॥४४॥
तस्मिन् शासति भूलोकं धर्मेण मित्रवर्मणि ।
अकृष्टपच्या पृथिवी सर्वसस्यान्विताऽभवत् ॥४५॥
निरीतिकोऽभवत्सर्वो जनो भक्तिसमन्वितः ।
तस्य पत्नी समभवत् पाण्ड्यकन्या मनोरमा ॥४६॥
तस्य जज्ञे कुलोत्तंसो वियन्नामा सुतः शुभः ।
तस्य पत्नी च धरणी नाम्नाऽऽसीच्छुद्धवंशजा ॥४७॥
वियति राज्यमाधाय मित्रवर्मा तु वैष्णवः ।
ययौ तपोवनं पुण्यं वेंकटाद्रेः समीपतः ॥४८॥
वियन्नामा सार्वभौमश्चैकपत्नीव्रतोऽभवत् ।
धरणीलग्नचेताः स शोधयामास भूतलम् ॥४९॥
यज्ञार्थे च काञ्चनेन हलेन सुविशालकम् ।
भूतले कृष्यमाणे तु वियता भूभृता स्वयम् ॥५०॥
बीजमुष्टिं विकिरता दृष्टा कन्या धरोद्गता ।
गह्वरं विवरं छन्नं तत्राऽऽसीद् भवनात्मकम् ॥५१॥
आप्यायनाऽनिलजुष्टं सुगन्धिप्रसरच्छुभम् ।
द्वारोपर्युपलायुक्तं तदधः कन्यकाश्रितम् ॥५२॥
सर्वसमृद्धिमयं स्थानं यदभूत् सुरपूजितम् ।
कृष्यमाणे हले तत्र सीता लग्ना हलस्य वै ॥५३॥
उपला चोत्थिता चान्तरतेजो दृष्टं सुपाण्डुरम् ।
पद्मशय्योपकरणान्यपि दृष्टानि भूभृता ॥५४॥
शय्यायां राजती पुत्री सुवर्णनिर्मिता यथा ।
आकाशराजा संदृष्टा विस्मयोत्फुल्लचक्षुषा ॥५५॥
आदाय तनयां राजा ममैवेयं पुनः पुनः ।
जहर्ष तं तदा प्राह वियद्वाणी विहायसि ॥५६॥
सत्यं तवैव तनया वर्धयस्व स्वपुत्रिकाम् ।
ततः प्रीतमना राजा तां रथे चावरोहयत् ॥५७॥
अभवत् कौसुमिर्वृष्टिर्देवोक्तविजयध्वनिः ।
दुन्दुभिध्वानसन्नादिताशाश्चक्रुः प्रतिध्वनीन् ॥५८॥
वाटिकाभूमिकां त्यक्त्वा विवेश स्वपुरं नृपः ।
आहूय धरणीं पत्नीमिदमाह महीश्वरः ॥५९॥
देवदत्तामिमां पश्य भूतलादुत्थितां मम ।
आवयोस्तदपुत्रयोः पुत्रीयं भविता ध्रुवम् ॥६०॥
इत्युक्त्वा प्रददौ पत्न्या हस्ते प्रीत्या वियन्नृपः ।
साध्वी राज्ञी विलोक्यैव बालां तर्कं करोति वै ॥६१॥
किमियं देवमाता वा वेदमाता च वा सती ।
श्रीर्वा लक्ष्मीः शारदा वाऽरुन्धती पार्वती च वा ॥६२॥
प्रभा वा माणिकी गंगा शची वा किं सरस्वती ।
राधा वा ललिता सीता जया वा विजया किमु ? ॥६३॥
एकादशी जयन्ती द्यौः किम्वहल्या पतिव्रता ।
किमु ब्राह्मी महालक्ष्मीर्मदर्थे किं समागता ॥६४॥
एवं कृतवती तर्कान् तावत्तया तनौ स्वकम् ।
प्राविष्कृतं महत्तेजो महावैकुण्ठसदृशम् ॥६५॥
तत्र सिंहासनं रम्यं यत्र नारायणो हरिः ।
चतुर्भुजो युवा श्यामो राजते त्वतिसुन्दरः ॥६६॥
तस्य वामे स्थितां पार्श्वे पुत्रीं ददर्श तां सतीम् ।
महालक्ष्मीसमरूपां चतुर्भुजां तु वैष्णवीम् ॥६७॥
स्वकरस्थां विष्णुपत्नीं बालां दृष्ट्वा क्षितिः स्वयम् ।
मुमोद तां निचिक्षेप पादयोर्माधवस्य वै ॥६८॥
कृष्णनारायणस्तां तु गृहीत्वा युवतीमयीम् ।
पुनर्ददौ धरण्यै च जगाद भगवान् स्वयम् ॥६९॥
रक्षयैनामहं तत्रागत्य श्रीवेंकटाचलात् ।
उद्वहिष्ये विधिपूर्वं तावत्सेवां करोतु वै ॥७०॥
इत्युक्ता सा धरणी तां करे कृत्वा प्रतिष्ठति ।
तावत्तेजश्च वैकुण्ठं सर्वं तिरोबभूव ह ॥७१॥
धरणिस्त्वभवत्तुष्टा जगाद वियते तदा ।
वियद्राजाऽपि दिव्यां श्रीछायां ज्ञात्वा तुतोष ह ॥७२॥
माता पुत्रीं श्रियं मत्वा नित्यं सेवां करोति हि ।
देवताश्चापि मुक्ताश्चाऽऽयान्ति द्रष्टुं दिवानिशम् ॥७३॥
पूजयन्ति तथा तां च नत्वा नत्वा प्रयान्ति वै ।
धरण्याश्च गृहं स्वर्गादधिकं विश्रुतं बभौ ॥७४॥
कन्यालाभे समकाले यज्ञसंकल्पपुण्यतः ।
आकाशराजभार्या सा धरणी गर्भमादधे ॥७५॥
वियन्नृपश्च सुप्रीतो वीक्ष्य दौहृदलक्षणाम् ।
उवाच फलिता सुभ्रु लता सान्तानिकी च मे ॥७६॥
अथ काले गते पत्नी धरणी सुषुवे सुतम् ।
सुप्रशस्ते मुहूर्ते च मेषस्थे च दिवाकरे ॥७७॥
सुतेजस्कं स्वर्णवर्णं देवतुल्यं तु बालकम् ।
दृष्ट्वा तु धरणी राजा मुमुदातेऽति तावुभौ ॥७८॥
ददतुर्बहुदानानि रत्नहस्तिगवादिकम् ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिर्गृहेऽपतत् ॥७९॥

हृदये वैजयन्त्याश्च रेखास्ति पौरटी शुभा ।
कमलं च करे धृत्वा हस्तिरस्तेऽस्ति करे शुभे ॥११६॥
दक्षिणे ते पदेऽङ्गुष्ठमूलाऽधःफणके वरम् ।
शंखचिह्नं वर्तते वै लक्ष्मीरूपप्रबोधकम् ॥११७॥
अंगुलीनां तथा मूले फणके सुविमानकम् ।
कनिष्ठामूलसान्निध्ये नावश्चिह्नं हि विद्यते ॥११८॥
गदाचिह्नं मीनचिह्नं शिखरचिह्नमस्ति च ।
ते च पार्ष्णौ मत्स्यरेखा तथा ताम्बूलवल्लिका ॥११९॥
वामांगुष्ठस्य मूले ते यवचिह्नं मनोहरम् ।
तथा तत्र सुप्रासादो रेखया वर्तते शुभः ॥१२०॥
छत्रचिह्नमूर्ध्वरेखा कमलं फणके तथा ।
ध्वजोऽङ्कुशं कुमुदं च श्रीफलं कलशस्तथा ॥१२१॥
तथा वै स्थलकमलं द्वितीयाचन्द्रचिह्नकम् ।
दशचक्राणि ते सन्ति स्वर्णरेखा फणोपरि ॥१२२॥
अंकान्येतानि ते कन्ये दृश्यन्तेऽतो हरेः प्रिया ।
भाविनीति तु मन्येऽहं हृत्स्थं पतिं कुरु ध्रुवम् ॥१२३॥
यस्या योनेर्मुखे मध्ये गर्भे चान्तर्दरीस्थले ।
बन्धकं वलयं कुण्डलिनीरूपं दृढं क्रमात् ॥१२४॥
लिंगस्य पेषकं सुसंकोचविकसिशालि च ।
भवेत् स पद्मिनी नारी विष्णुयोग्याऽस्ति सर्वदा ॥१२५॥
कस्याश्चिद् विद्यते त्वेतद् गर्भगं वलयं दृढम् ।
पत्युः स्वस्याश्च सौख्याय सर्वासां नहि तद्भवेत् ॥१२६॥
इत्युक्त्वा पूजितः साध्व्या नारदोऽन्तर्दधे तदा ।
एतच्छ्रुत्वाऽथ तत्सख्यस्तमूचुः पद्मिनीं सतीम् ॥१२७॥
पुष्पार्थं फलपत्रार्थं वनं गच्छाम ईश्वरि ! ।
पुष्पावच्चयनं कुर्मो वसन्तः समुपागतः ॥१२८॥
इत्यतस्ता वनं जग्मुराकाशतनयायुताः ।
कंचिद् गजेन्द्रं ददृशुः शुभ्रदन्तचतुष्टयम् ॥१२९॥
मदं वर्षन्तं गण्डाभ्यां धवलं करिणीयुतम् ।
चित्कारमुग्रं कुर्वन्तं दृष्ट्वा ता वृक्षमाश्रिताः ॥१३०॥
निलिल्युर्द्रुमसंघाते तावदश्वं च ददृशुः ।
श्वेतं सुवर्णभूषाढ्यं शरन्मेघमिवोन्नतम् ॥१३१॥
तत्पृष्ठे पुरुषं कृष्णवर्णं कामधनाऽऽभृतम् ।
पद्मपत्रायतनेत्रं सूक्ष्मकौशेयकाम्बरम् ॥१३२॥
सद्रत्नमणिसन्नद्धहारकेयूरकुण्डलम् ।
दिव्यशार्ङ्गधरं स्वर्णशरयुक्तं करेण वै ॥१३३॥
पीतवस्त्रप्रवेष्टितकटिभागं सुमध्यमम् ।
रत्नकंकणनूपुररशनासूत्रराजितम् ॥१३४॥
विशालवक्षःसंशोभिदक्षिणावर्तसंयुतम् ।
स्वर्णयज्ञोपवीतेन स्फुरत्स्कन्धं मनोहरम् ॥१३५॥
तं दृष्ट्वा विस्मिताः सर्वाः सस्मितास्तस्थुरादरात् ।
गजो ययौ तदा दूरं हयारूढो जनस्तदा ॥१३६॥
कन्या द्रुमाश्रिता दृष्ट्वा चाययौ तत्समीपतः ।
प्राह कन्या ! भवतीभिर्दृष्टः कश्चिन्मृगोऽत्र वै ॥१३७॥
प्रत्यूचुस्तास्तु तं सर्वा दृष्टोऽस्माभिर्न कश्चन ।
किमर्थमागतोऽस्माकं वनं गच्छ वनाद्बहिः ॥१३८॥
अत्राऽवध्या मृगाः सर्वे ह्याकाशराजरक्षिताः ।
एवं श्रुत्वा वचस्तासां हयादवरुरोह सः ॥१३९॥
पप्रच्छ का भवत्योऽत्र केयं कन्या च पद्मिनी ।
ब्रूत मेऽहं गमिष्यामि श्रुत्वा नारायणाचलम् ॥१४०॥
वसाम्यहं सदा नित्यं वने भ्रमामि यामि च ।
तदा तं धरणीपुत्र्या प्रेरिता प्राह शारदा ॥१४१॥
आकाशराजतनयां वसुधागर्भसंभवाम् ।
अस्माकं शिक्षिकां नाम्ना पद्मिनीं विद्धि बालिकाम् ॥१४२॥
देहि त्वं स्वीयनामादि किंजातिकोऽत्र वर्तसे ! ।
इति पृष्टः स ता आह सूर्यवंशी जनोऽस्म्यहम् ॥१४३॥
नाम्नां न मे प्रसंख्यानं पावनानां तु कन्यकाः ! ।
वर्णतो नामतश्चापि कृष्णोनारायणोऽस्म्यहम् ॥१४४॥
चक्रं भयावहं यस्य धर्मद्विषां तु देहिनाम् ।
शंखध्वनिर्यत्कृतो दारयत्यरिसमूहकान् ॥१४५॥
यस्य शार्ङ्गं धनुर्नित्यं सृष्टौ दैत्यविमोहनम् ।
पद्मं हस्तगतं दातृश्रियो लक्ष्म्याश्च वर्धकम् ॥१४६॥
सोऽहं वेंकटशैलस्थो मृगयार्थमुपागतः ।
मयाऽप्यनुद्रुतः श्वेतो गजात्मा मृगयूथपः ॥१४७॥
इतो धावन् वायुवेगो ययावदृश्यतामितः ।
समागच्छं समपश्यं सुभगां पद्मिनीमिमाम् ॥१४८॥
मृगं त्यक्त्वा मृगीं प्राप्तो मया किं लभ्यते न्वियम् ? ।
इति कृष्णवचः श्रुत्वा क्रुद्धास्ताः प्राहुरश्विनम् ॥१४९॥
गच्छ शीघ्रं वनादस्मान्मा वदैवं कदाचन ।
आकाशराजः श्रुत्वा त्वां निगडे बन्धयिष्यति ॥१५०॥
यथानामगुणो भासि कृष्णश्चान्तर्बहिः खलु ।
याहि दिव्यां परकन्यां याचसे किं न लज्जसे ॥१५१॥

सर्वा मिलित्वा चात्रैव बन्धयिष्याम एव हि ।
ताडयिष्याम एवात्र येनाऽवोचः पुनर्न तत् ॥१५२॥
तर्जितस्ताभिरेवं श्रीकृष्णनारायणः प्रभुः ।
हयमारुह्य सन्दृष्ट्वा कटाक्षेण ययौ गिरिम् ॥१५३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये मेरौ भूनारदाभ्यां वराहावतारदर्शनं कृतम्, लक्ष्मीछायाया जन्मस्थलं नारायणपुरं गरुडेनागत्य दृष्टं, पृथिवीगर्भात्पद्मिन्या उत्पत्तिः, वियन्नामराज्ञा सा वर्धिता, वसुदानः सुतश्च जज्ञे, नारदेन चिह्नैर्लक्ष्मीसमाऽसीत्युक्तं, उद्यानेऽश्वारूढो नारायण आगत्य परिचयं दत्वा वेंकटाद्रिं ययौ चेत्यादिनिरूपण-नामाऽष्टनवत्यधिकत्रिशत-तमोऽध्यायः ॥३९८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां दिव्यां रम्यां पूर्वभवां शुभाम् ।
अहं तमश्वमारूढो गत्वा श्रीवेंकटाचलम् ॥ १ ॥
हयात्तस्मादवतीर्य विवेश मम मण्डपम् ।
श्रीनिवासाभिधश्चाहं पञ्च कक्षा अतीत्य च ॥ २ ॥
मुक्तागृहं समासाद्य मञ्चे विवेश तां स्मरन् ।
अहं स विवशो भूत्वा श्रीनिवासो मुहुर्मुहुः ॥ ३ ॥
सस्मार पद्मिनीं पत्नीं पूर्वां मदर्थनिर्मिताम् ।
श्रीनिवासः प्रभुस्तत्र निद्रां लेभे मनाङ् न वै ॥ ४ ॥
मध्याह्नसमये जाते सखी बकुलमालिका ।
भोज्यं भक्ष्यं पायसान्नं मिष्टं सुगन्धमोदनम् ॥ ५ ॥
व्यञ्जनानि सूपतक्रे पूरिका वटिका रसान् ।
अपूपान् वटकान् पूर्णपोलिका दधि सर्पिषा ॥ ६ ॥
मिश्रितं शर्कराभिश्च कदलादिरसानकम् ।
महत्पात्रे निधायैव देवं द्रष्टुं समागता ॥ ७ ॥
अन्याः सख्यश्चित्ररेखा नवरंगा च मालती ।
कमला किंशुकी कल्पलता चान्या जलादिकम् ॥ ८ ॥
ताम्बूलं व्यजनं नक्तकोत्तमं चन्दनं फलम् ।
गृहीत्वा चाययुर्यत्र श्रीनिवासो विराजते ॥ ९ ॥
बकुलमालिका कृष्णं ववन्दे भक्तिभावतः ।
ध्यायन्तं चाऽपूर्वरूपं व्याजहार हरिं सखी ॥१०॥
उत्तिष्ठ देवदेवेश ! भोक्तुमागच्छ माधव ।
कथं वा दृश्यसे त्वार्तो यावदार्तिहरो हरिः ॥११॥
वने मृगयाव्याजेन दृष्टवानसि किं नवम् ।
अवस्था चिन्तयानस्य स्फुटं वदति हृद्गतम् ॥१२॥
का दृष्टा देवकन्या वा मानुषी वाऽहिपुत्रिका ।
ब्रूहि नो भगवँश्चित्तस्थितां तां चित्तहारिणीम् ॥१३॥
इत्याकर्ण्य श्रीनिवासो निःश्वासं समरेचयत् ।
उवाच तां सखीं तत्र विहस्य पुरुषोत्तमः ॥१४॥
पुरायुगे महादुष्टं रावणं हतवानहम् ।
तदा वेदवती दासी सीतासाहाय्यदाऽभवत् ॥१५॥
सीतारूपाऽभवल्लक्ष्मीर्जनकस्य महीतलात् ।
मया रामेण लब्धा सा ततः पञ्चवटीवने ॥१६॥
राक्षसो रावणस्तां तु हर्तुं समाययौ यदा ।
तदाऽग्निदेव एवैनां स्वाहायां सन्निविश्य च ॥१७॥
तस्याः स्थाने तत्स्वरूपां कन्यां वेदवतीं न्यधात् ।
निन्ये वेदवतीं रक्षो रामस्तं निजघान च ॥१८॥
अग्नौ वेदवतीं क्षिप्त्वा प्राप्य सत्यां तु जानकीम् ।
कृतकृत्योऽभवँस्तत्र तदा वह्निरुवाच माम् ॥१९॥
इयं वेदवती कन्या सीतायाः प्रियकारिणी ।
सीतार्थे राक्षसहस्ते गता दुःखमहार्णवे ॥२०॥
तस्मादेनं वरेणैव प्रीणय सीतया सह ।
इति वह्निवचः श्रुत्वा सीताऽपि मां जगाद ह ॥२१॥
मदर्थं दुःखमार्तेयं सखी वेदवती मम ।
तस्मात्परां भागवतीं देवैनां वरय प्रभो ॥२२॥
तदा मया प्रतिज्ञातं वरिष्ये तव वाक्यतः ।
आकाशभूपकन्यां वै पद्मिनीं श्रीस्वरूपिणीम् ॥२३॥
तावदेषा श्रियो दासी सखीरूपा हि वर्तताम् ।
यदा चेयं भूमिपुत्री वियत्पुत्री भविष्यति ॥२४॥
पद्मिनीति च वा नाम्ना लोके ख्यातिं गमिष्यति ।
मम पत्नी तु सा तर्हि पद्मिन्येव भविष्यति ॥२५॥
इति दत्तवरा पूर्वं मया लक्ष्म्या च मालिके ! ।
अद्य नारायणपुरे संभूता धरणीतलात् ॥२६॥
लक्ष्मीसमा पद्मनेत्री वने पुष्पाणि चिन्वती ।
मया वने तु सा दृष्टा रूपानुरूपसुन्दरी ॥२७॥
चित्तं तत्र च मे लग्नं तस्या योगं हि कारय ।
गच्छ तत्र विलोक्यैव योग्यां मदर्थमावह ॥२८॥
इत्युक्ता बकुला प्राह गच्छामि यत्र सास्ति हि ।
मार्गं वद रमानाथ ! करिष्ये तव वाञ्छितम् ॥२९॥
नारायणस्तदा प्राह श्रीनृसिंहगुहा यतः ।
तन्मार्गेणाऽवतीर्याऽस्मान्नारायणगिरेस्ततः ॥३०॥

अगस्त्याश्रममासाद्य सुवर्णमुखरीतटे ।
अगस्त्येशं प्रपूज्यैव गच्छ कौरवनं ततः ॥३१॥
अग्रे पद्मसरो नाम पद्मशोभिततत्तटे ।
नत्वा शुकं तपन्तं च कृष्णं बलं प्रपूज्य च ॥३२॥
आदाय स्वर्णकमलं सरसोऽस्मात्ततः सखि ।
तीर्त्वा सुवर्णमुखरीं तटस्थानि वनानि च ॥३३॥
अरणितीरमासाद्य विश्रम्य वै क्षणं ततः ।
नारायणपुरीं दृष्ट्वा विस्मयं संप्रयास्यसि ॥३४॥
गत्वा पूर्वोत्तरे मार्गेऽरणिनदीतटस्थिताम् ।
आकाशराजनगरीं गत्वा तत्रोचितं कुरु ॥३५॥
इत्यादिश्य तां विसृज्य स शिष्यैः श्रीसमन्वितः ।
बकुला श्रीहरिं नत्वा रक्ताश्वमधिरुह्य च ॥३६॥
ययौ यथोक्तमार्गेण नारायणपुरीं प्रति ।
मार्गेऽगस्त्यसमुद्याने नदीतीरेऽवतीर्य च ॥३७॥
स्नात्वा पीत्वा विशश्राम ददर्श पद्मिनीसखीः ।
कामार्थं देवपूजार्थमगस्त्येशो समागताः ॥३८॥
ताश्च पप्रच्छ बकुलमालिका पद्मिनीसखीः ।
का यूयं योषितो ब्रूत किंकार्यार्थे समागताः ॥३९॥
तास्तु श्रुत्वा समूचुस्तां वयमाकाशभूभृतः ।
दुहितुः पद्मिनीनाम्न्याः सख्यो भवाम एव हि ॥४०॥
किमर्थं त्वं समायाता क्व च गच्छसि नो वद ।
इत्युक्ता बकुला प्राह कथमास्ते नु पद्मिनी ॥४१॥
तास्तु प्राहुः पुण्यवने दृष्ट्वा सा पुरुषोत्तमम् ।
अश्वस्थं मन्दहासं सत्पीताम्बरं विभूषितम् ॥४२॥
द्रुतहेमनिभा सा तु पश्य पश्येति साऽब्रवीत् ।
पश्यन्तीनां तदाऽस्माकं गतोऽन्तर्धानमाशु सः ॥४३॥
सा सखी मोहिता चास्ते नृपो दृष्ट्वेदृशीं स्थितिम् ।
पप्रच्छ दैवयोगज्ञं ब्राह्मणं सोऽप्युवाच तम् ॥४४॥
उत्तमः पुरुषः कश्चिदागतः कन्यकां प्रति ।
तं दृष्ट्वा मोहितेयं वै तेन योगं समेष्यति ॥४५॥
तेनैव प्रेषिता काचिदागमिष्यति कन्यका ।
सा तु वक्ष्यति यद्वाक्यं तद्यथार्थं भविष्यति ॥४६॥
कारयाऽगस्त्येशपूजां सर्वं भद्रं भविष्यति ।
इत्युक्तः स नृपश्चास्मान् प्रेषयामास मन्दिरम् ॥४७॥
महापूजादिसंभारान्पुष्पादीन् चिनुमोऽत्र वै ।
वद त्वं का कथमत्रायाता किमिच्छसि प्रियम् ॥४८॥
बकुला प्राह तास्तत्र वेंकटाद्रेः समागता ।
धरणीं द्रष्टुकामाऽहं द्रष्टुं शक्या भवेन्न वा ॥४९॥
सख्यः प्राहुः सहाऽऽगच्छाऽस्माभिर्विलोकयिष्यसे ।
बकुला च ययौ ताभिर्नृपदुर्गान्तरं ततः ॥५०॥
समाक्रोशं शनैश्चक्रे ज्योतिर्वेत्त्री यथा वदेत् ।
वदामि सत्यं शृणुत भूतं भवन् भविष्यकम् ॥५१॥
धरणी तां तथा श्रुत्वा पृच्छेच्छुकी पुरःस्थिता ।
वद राशिफलं मे किं धनराशिं ददामि ते ॥५२॥
बकुला सत्यमवदद् दुहितुर्देहशोषणम् ।
पुरुषदर्शनाज्जातं कामतापप्रपीडितम् ॥५३॥
स तु देवाधिदेवो वै वैकुण्ठादागतः स्वयम् ।
अत्र स श्रीवेंकटाद्रौ वर्तते श्रीप्रसेवितः ॥५४॥
कामरूपी विहरति भक्ताभीष्टप्रदः प्रभुः ।
तुरंगस्थो वने राज्ञि ! तव कन्यां स दृष्टवान् ॥५५॥
सीताछायात्मिकां वेदवतीं ते पुत्रीपद्मिनीम् ।
पत्नीं कर्तुमिच्छया स प्रेषयिष्यति तेऽन्तिकम् ॥५६॥
ललितां सा च वै सर्वं कथयिष्यति तत्स्फुटम् ।
रमेव तं समेत्यैषा रमिष्यति सुखं चिरम् ॥५७॥
इत्युक्त्वा बकुला मौनमास्थिता धरणिस्ततः ।
गृहान्तरे सुतां गत्वा ददर्शाऽनंगमोहिताम् ॥५८॥
उवाच पुत्रि ! किं तेऽस्ति प्रियं करोमि यद्वद ।
इत्युक्ता सा जातिस्मरा समुवाच तु मातरम् ॥५९॥
नेत्राभिरामं यल्लोके सतामपि मनःप्रियम् ।
तेजसामपि तेजस्वि देवानामपि दैवतम् ॥६०॥
भक्तैः सद्भिरिह प्राप्यमभक्तैर्न कदाचन ।
तत्र कृष्णे मनो मातर्मम शश्वत् प्रवर्तते ॥६१॥
माता प्राह सुते भक्तलक्षणं ब्रूहि वेद्मि यत् ।
पद्मिनी प्राह जलजचक्रपद्मगदांकितः ॥६२॥
भुजयुग्मे तथा भाले तूर्ध्वपुण्ड्रकचन्द्रकः ।
गले तुलसिकाकण्ठी करे तु जपमालिका ॥६३॥
जिह्वायां श्रीहरेर्नाम हृदये प्रतिमा हरेः ।
पूजापाठपरा ये च सत्यवाचोऽनसूयकाः ॥६४॥
अनिन्दका ब्रह्मचर्यपराः शौचपराः सदा ।
हरेः प्रसादभोक्तारः सर्वभूतहितंकराः ॥६५॥
दयालवः श्रवणादिभक्तिप्रकारकारिणः ।
यदृच्छालाभसन्तुष्टा हरेर्ध्यानपरायणाः ॥६६॥
सत्संगिनः सदा शान्ता वैष्णवास्ते प्रकीर्तिताः ।
तैरेव लभ्यं तद्ब्रह्म तत्र मे प्रीतिरस्ति वै ॥६७॥
जन्मत एव मातर्मे तत्प्राप्तिं कांक्षते मनः ।
मातः कृष्णं विनाऽन्यत्र मनो मे नैव धावति ॥६८॥

तं श्रीकृष्णं स्मराम्येव वदामि चिन्तयेऽपि तम् ।
तेनैव मातर्जीवामि तद्योगे चिन्त्यतां विधिः ॥६९॥
श्रुत्वा माताऽचिन्तयच्च विष्णुयोगार्थमेव यत् ।
बहुधा कल्पयामास विष्णुः प्रीतः कथं भवेत् ॥७०॥
एवं विचार्यमाणायां धरण्यां तत्र दासिकाः ।
सर्वा एव समाजग्मुश्चिन्तां पप्रच्छुरुत्सुकाः ॥७१॥
कथं चिन्तामयी चाऽऽस्से वद कुर्मो हितं सुखम् ।
धरण्या कथितं सर्वं पुत्र्याश्चिन्तादिकं तदा ॥७२॥
प्राहुः सा बकुलाऽस्मभ्यो मिलिता वाटिकास्थले ।
प्राह नोऽपि समायाता वेंकटाद्रेर्हरेः सखी ॥७३॥
बकुलमालिकानाम्नी नारायणहितंकरी ।
स्वामी नारायणोऽस्माकमास्ते श्रीवेंकटाचले ॥७४॥
कदाचिद्धयमारुह्य हंसशुक्लं मनोजवम् ।
मृगयार्थं ययौ वेंकटाद्रेर्वने समीपतः ॥७५॥
वने कंचिद्गजं दृष्ट्वाऽपतत् पृष्ठे तदा गजः ।
करेणुयूथगोऽरण्ये दुद्राव स तमन्वगात् ॥७६॥
तत्र वने तपस्यन्तं पूजयन्तं जनार्दनम् ।
श्रीभूमिसहितं कृष्णनारायणं तु भक्तितः ॥७७॥
ददर्श शंखं राजानं शंखनागसरस्तटे ।
तुरंगादवतीर्यैव नृपरूपो नरायणः ॥७८॥
पप्रच्छ किं क्रियतेऽत्र वेंकटाद्रिवने वद ।
शंखः प्राह तदा विष्णुमहं हैहयदेशजः ॥७९॥
राजाऽस्मि श्वेतनृपतेर्महाविष्णुप्रतुष्टये ।
कृतवानखिलान् यज्ञान् दर्शनार्थं हरेर्मुहुः ॥८०॥
किन्तु नारायणः स्वामी दर्शनं न ददौ मम ।
निर्विण्णोऽहं ततो जातस्तदा व्योमसरस्वती ॥८१॥
उवाच शान्तिदा राजन्नात्र मे दर्शनं तव ।
गच्छ नारायणगिरिं तपः कुरु जपं कुरु ॥८२॥
ममाऽऽराधनया तत्र दर्शनं मे भविष्यति ।
तत्र कश्चिद्धयारूढो राजा त्वां सम्मिलिष्यति ॥८३॥
तदुक्तरीत्या कृत्वैव परं मोक्षमवाप्स्यसि ।
इत्युक्तोऽहं परित्यज्य देशमागत्य वैंकटे ॥८४॥
वने नारायणं कृष्णमाराधयामि सर्वदा ।
श्रीभूमिसहितं कृष्णनारायणं भजामि वै ॥८५॥
इति राज्ञो वचः श्रुत्वा नारायणो नृपं जगौ ।
स्वस्ति तेऽस्तु गच्छ नारायणाद्रौ श्रीहरेर्गृहे ॥८६॥
कुरु चाराधनां तत्र पश्चिमे शिखरे स्थितः ।
न्यग्रोधमूले त्वासीनं विश्वक्सेनं प्रणम्य च ॥८७॥
स्वामिपुष्करिणीं गत्वा स्नात्वा तीरे तु पश्चिमे ।
अश्वत्थं द्रक्ष्यसि तत्र वल्मीकं द्रक्ष्यसि त्वपि ॥८८॥
तयोर्मध्ये स्थिरो भूत्वा हर्याराधनमाचर ।
तत्र श्वेतवराहाख्यो हरिर्भ्रमति तत्स्थले ॥८९॥
वल्मीके त्वं क्वचिद् द्रष्टास्येनं पुण्यप्रतापतः ।
इति श्वेतं समादिश्य समासाद्याऽरणीं नदीम् ॥९०॥
अवरुह्य हयात्तीरे विचचार यदा हरिः ।
सिषेवे पवनः शीतसुगन्धः श्रमनोदनः ॥९१॥
सिषेविरे तं तरवः पुष्पैः सुरससत्फलैः ।
स च नाथस्तदा हस्तिनं सखीश्च व्यलोकयत् ॥९२॥
अदृश्योऽभूद् वने हस्ती चाययौ वः प्रतीश्वरः ।
तन्वीं लक्ष्मीसमां हेमवर्णां वो मध्यवर्तिनीम् ॥९३॥
दृष्ट्वा सक्तमनास्तत्र पद्मिन्यां समभूद्धरिः ।
तां गृध्नुराह केयं मे करग्राह्या भवेन्न वा ॥९४॥
युष्माभिरधिक्षिप्तः स वियद्राजो बलेन वै ।
श्रुत्वा द्राक् हयमारुह्य ययौ वेंकटभूभृतम् ॥९५॥
तेनैव प्रेषिता चास्मि दासी बकुलमालिका ।
पद्मिन्या हरये प्राप्त्यै धरणीं यामि सुकन्यकाः ॥९६॥
इत्युक्त्वा सा पुरतस्ते त्वायाता कृष्णदासिका ।
अयाचत तु ते कन्यां कृष्णनारायणाय वै ॥९७॥
यथोचितं कुरु मातर्विचार्य वियदादिभिः ।
अस्ति योग्यं प्रदानं तु योग्याय परमात्मने ॥९८॥
रमा रामाय दातव्या पद्मिनी पद्मचक्षुषे ।
कन्या कान्ताय दातव्या कामिनी कामुकाय वै ॥९९॥
दिव्या दिव्याय दातव्या भक्ता भगवते ध्रुवम् ।
इति तासां वचः श्रुत्वा पप्रच्छ नृपमेव सा ॥१००॥
पद्मिनीं चापि पप्रच्छ पुनरेव कृपावशा ।
राजा प्राह मम कन्या त्वयोनिजाऽस्ति देवता ॥१०१॥
अर्थिता श्रीकृष्णनारायणेनाऽनुग्राहः कृतः ।
पूर्णो मनोरथश्चाऽद्य मे तेऽन्येषामपि ध्रुवम् ॥१०२॥
सर्वे श्रुत्वा जहृषुश्च प्रोचुः कुलकृतार्थताम् ।
भवत्कन्येयमतुला श्रिया सह रमिष्यति ॥१०३॥
दीयतां परमेशाय वेंकटाद्रिनिवासिने ।
अयं वसन्तः श्रीजुष्टः शुभं शीघ्रं विधीयताम् ॥१०४॥

आहूय च गुरुं लग्नं विवाहार्थे विधीयताम् ।
तथास्त्विति नृपः प्राहाऽऽह्वयामास बृहस्पतिम् ॥१०५॥
मृगशीर्षे तु कन्याया देवस्य श्रवणं तु भम् ।
जन्मनस्तद्विचार्यैव गुरुर्लग्नं समब्रवीत् ॥१०६॥
सम्मता सुखवृद्ध्यर्थे तयोरुत्तरफाल्गुनी ।
तस्यां विवाहो विधिवद् वैशाखे क्रियतामिति ॥१०७॥
इत्युक्त्वा राजकृतपूजामादाय स्वर्गुरुर्ययौ ।
राजा तु प्रेषयामास दूतीं देवेश्वरं प्रति ॥१०८॥
शुकेन सहितां कन्यावाग्दानविषये तदा ।
शुको दूतः शारदा च दूती च बकुला तथा ॥१०९॥
तस्मिन्नेव दिने रम्ये ययुः श्रीवेंकटाचलम् ।
कृष्णनारायणं देवं श्रीनिवासं जगत्पतिम् ॥११०॥
प्रणम्य त्ववदन् प्रीताः कृत्यं जातं तव प्रभो ।
मांगल्यवार्तां संवक्तुं वयमत्र समागताः ॥१११॥
त्वां प्रत्याह सुता भूमेर्मामंगीकुरु माधव ! ।
जपामि तव नामानि स्मरामि प्रतिमां तव ॥११२॥
ध्याये तव सुचिह्नानि हृदयादौ जनार्दन ! ।
त्वामविस्मृत्य कार्याणि सर्वाणि प्रकरोमि च ॥११३॥
त्वयाऽर्थिता तवैवाऽस्मि पित्रोरनुमते मम ।
कुरु प्रसादं लक्ष्मीश ! मामंगीकुरु माधव ॥११४॥
वियच्च धरणी चैव प्रत्याहतुः परेश्वरम् ।
दानपात्रं स्वतो लब्धं शाश्वतफलदायकम् ॥११५॥
हर्षो माति न हृदये गृह्णातु कन्यकां हरे ।
प्रदत्ता वाक्प्रदानेन शुको निवेदयिष्यति ॥११६॥
तवाऽऽदेशं पुनः प्राप्य स्यामश्चोत्साहिनो वयम् ।
बकुला प्राह सन्देशं प्रपाठय जगद्गुरो ॥११७॥
कुरु प्रसादं मे नाथ पद्मिन्याश्चापि केशव ।
तथास्त्विति हरिः प्राह गृहीत्वा वाक्प्रदानकम् ॥११८॥
कर्तुं कल्याणमुद्वाहमागमिष्यामि चामरैः ।
शुक ! गच्छ वदैवं तानित्थं देवोऽब्रवीदिति ॥११९॥
गृहाणेमां वनमालां स्वर्णरत्नादिशोभिताम् ।
शुकश्च शारदा मालां गृहीत्वा ययतुर्गृहम् ॥१२०॥
प्रणम्याऽवदतां सर्वान् जातं कार्यं सुतार्थितम् ।
ददतुर्मालिकां कण्ठे पद्मिन्या भावगर्भिताम् ॥१२१॥
नृपो वै निश्चिते जातेऽप्रेषयल्लग्नपत्रिकाम् ।
कुंकुमपत्रिकाश्चापि लेखयित्वाऽनिलं सुतम् ॥१२२॥

ददाविन्द्राद्यानयनेऽसृजत् त्रिलोकमण्डले ।
आहूय विश्वकर्माणं पुरालंकारयोजनाः ॥१२३॥
रचयामास भगवान् सोऽपि क्षणाद् विनिर्ममे ।
इन्द्रोऽसृजत्पुष्पवृष्टिं ननृतुश्चाप्सरोगणाः ॥१२४॥
अवाद्यन्त च वाद्यानि महोत्सवश्च योषिताम् ।
धनदो धनधान्याद्यैः पूरयामास वेश्म तत् ॥१२५॥
यमस्तु रोगरहितान् चकार मनुजान् भुवि ।
वरुणो रत्नजालानि मौक्तिकादीन्यपूरयत् ॥१२६॥
सूर्यः सुवर्णरत्नानां भूषादीनि समार्पयत् ।
समुद्रश्च तथा शैला रत्नवस्तूनि चार्पयन् ॥१२७॥
कामगावः कामवृक्षाः कामवल्ल्यः स्वकं स्वकम् ।
कामं चिन्तामणयश्च वस्तून्यपूरयँस्तदा ॥१२८॥
नदा नद्यः समुद्राश्च द्यौः रसातलभूमयः ।
स्वस्वरत्नानि पेयानि भोज्यानि लेह्यकानि च ॥१२९॥
रचयामासुरीशस्य शासनाद् वेंकटाचले ।
अथ पृथ्वी जलं तेजो वायुश्चाकाश ईश्वराः ॥१३०॥
वियद्राजस्य भवने चक्रुर्वै मण्डपं शुभम् ।
दशयोजनविस्तारं योजनोच्छ्रायमेव च ॥१३१॥
महीमाननिवासार्थे कारयामास पत्तनम् ।
शतयोजनविस्तारं सामुद्रे द्वीपके वरम् ॥१३२॥
मोहमयं महत्पुण्यं द्वितीयं वै दिवः स्थलम् ।
यानवाहनशोभाढ्यं स्वर्णशिखरलक्षकम् ॥१३३॥
रसशालास्नानशालाशृंगारशालिकायुतम् ।
नृत्यगायनशृंगारकथाऽऽख्यानादिमण्डलम् ॥१३४॥
दूरं श्रूयेत् दृश्येत वाचयेत विमर्शयेत् ।
तथा दिव्यं भूतसारं गृहं विद्युद्विकासितम् ॥१३५॥
कारयामास राजाऽसौ चन्द्रमाहूय भक्ष्यकम् ।
अन्नं बहुविधं मिष्टममृतं रससंयुतम् ॥१३६॥
विष्णोर्नैवेद्ययोग्यं च परमान्नं तथौदनम् ।
देवानां च ऋषीणां च नराणामपि सम्मतम् ॥१३७॥
मुक्तानां च सतां चापि साध्वीनां सम्मतं तथा ।
चतुर्विधं सुगन्धाढ्यममृतांशैः प्रपूरितम् ॥१३८॥
रसायनं नैकविधं पेयं खाद्यं नवं नवम् ।
कारयित्वा संविधानं धरणीसहितो नृपः ॥१३९॥
वाद्यानां कारयामास निर्घोषं मंगलावहम् ।
पद्मिन्यलंकृतिं चक्रे देवागमनकांक्षिणी ॥१४०॥

सर्वानलंकृतान् कृत्वा धरणीसहितो नृपः ।
सभायां मन्त्रिसहितः समास्ते प्रीतमानसः ॥१४१॥
इति लक्ष्मि ! तवच्छाया पद्मिन्या भाग्यमुत्तमम् ।
फलितं भगवान् कृष्णः पाणिग्रहं करिष्यति ॥१४२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये श्रीनिवासभगवता बकुलमालिका पद्मिनीं प्रति प्रेषिता, सीतायाश्छाया वेदवती पद्मिनी जाता, धरणीगृहे बकुलमालिका ययौ, श्रीकृष्णपत्नीत्वं पद्मिन्याश्चिह्नैरुक्तम्, नारायणाय दातव्येति निर्णयः, लग्नपत्रिकाप्रेषणम्, विवाहोपकरणारंभश्चेत्यादि-निरूपणनामा नवनवत्यधिकत्रिशत-तमोऽध्यायः ॥ ३९९ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! श्रीनिवासो वेंकटाद्रौ निजां प्रियाम् ।
श्रियं लक्ष्मीं तथाऽन्याश्च सखीराहूय चाऽवदत् ॥ १ ॥
किं कार्यं वद मे लक्ष्मि ! श्रि ! सखीजन इत्यपि ।
आज्ञापयस्व सर्वाश्च विवाहार्थं तु यद्भवेत् ॥ २ ॥
कुर्वन्तु मिलिताः सर्वाः समुत्साहादिशोभनम् ।
लक्ष्मीः कृष्णवचः श्रुत्वा सखीः सर्वाः स्वनोदयत् ॥ ३ ॥
प्रीतिः सखी श्रियाऽऽज्ञप्ता सुगन्धं तैलमाददौ ।
श्रुतिः सखी समादाय क्षौमाम्बराणि चागता ॥ ४ ॥
स्मृतिः सखी विभूषाश्च समादाय स्थिता पुरः ।
धृतिः सखी समादध्रे दिव्यादर्शं समुज्ज्वलम् ॥ ५ ॥
दध्रे शान्तिः सखी श्रेष्ठं सुगन्ध्यैणमदं तदा ।
ह्रीः सखी संस्थिता चाग्रे गृहीत्वा यक्षकर्दमम् ॥ ६ ॥
कीर्तिः सखी स्वर्णपट्टं सरत्नं मुकुटं दधे ।
इन्द्राणी तु दधे छत्रं सरस्वती तु चामरम् ॥ ७ ॥
गौरी दध्रे चामरं च व्यजने विजया जया ।
श्रिया संस्नापितो देवस्ततः श्रीपरमेश्वरम् ॥ ८ ॥
सुगन्धं तैलमादाय देवमभ्यज्य कन्यकाः ।
उद्वर्तितं गन्धचूर्णैर्देवांगं परिमृज्य च ॥ ९ ॥
आनीतान् करिभिस्तोयकलशान् कांचनान् शतम् ।
प्रत्येकं तं समादाय त्वभ्यषिञ्चन् रमादयः ॥१०॥
केशान् संधूप्य धूपेन संसाध्य दन्तकेन च ।
वक्रान् चंचत्प्रान्तभागान् बबन्ध श्रीः सुशोभितान् ॥११॥
सुगन्धेनाऽनुलिप्याऽङ्गं पीतवर्णेन पिष्टिकाम् ।
संप्रमृज्य पीतवस्त्रं ददौ कट्यां सुकाञ्चिकाम् ॥१२॥
भूषयामास भूषाभिः पुष्पहारैस्तथेन्दिरा ।
धृतिश्च दर्शयामासाऽऽदर्शं वै मंगलायनम् ॥१३॥
कृष्णनारायणो देवश्चोर्ध्वपुण्ड्रं स्वयं दधे ।
एवं भूषाशोभमानो राजते भगवान् स्वयम् ॥१४॥
अथ कृष्णगृहे प्राघूर्णिका आययुरीश्वराः ।
श्रीकृष्णः श्रीनारायणो विराट् सदाशिवः प्रभुः ॥१५॥
भूमा हिरण्यगर्भश्च वासुदेवादयस्तथा ।
ब्रह्मा विष्णुर्महेशश्च लोकपालादयस्तथा ॥१६॥
पितरो मुनयो देवाः ऋषयो दिक्प्रपालकाः ।
सूर्यादयो ग्रहाश्चापि वसवो निधयस्तथा ॥१७॥
दिशा रुद्रास्तथाऽऽदित्या मनवो वासवादयः ।
नक्षत्राणि च तत्त्वानि गुणाश्च मरुतस्तथा ॥१८॥
वालखिल्याः कला नद्यो नदास्तीर्थानि पर्वताः ।
समुद्राश्च तथाऽखाताश्चैत्या व्याघ्रा द्रुमादयः ॥१९॥
पातालाऽनलवाय्वस्था मेघा रात्र्यो दिनादयः ।
जडाश्च चेतना व्याप्ता नारायणस्य लग्नके ॥२०॥
वेंकटाद्रौ महीमानाः कोट्यर्बुदाः समाययुः ।
सत्यो देव्यश्च मुक्तान्य ईशान्यः सुरपत्निकाः ॥२१॥
मानुष्यः कश्यपाजाता नार्यस्त्रिलोकमातरः ।
आगताः श्रीनिवासाद्रौ विमानहस्तिहंसकैः ॥२२॥
अश्वैः सिंहैस्तथा पक्षिवर्यैश्च योगकुंभकैः ।
सन्तश्च साधवो धीरा वैष्णवा वीतरागिणः ॥२३॥
सन्यासिनो ब्रह्मचारिवर्यास्त्यागिन आययुः ।
एवं वियद्गृहे चापि चतुर्विंशतिसंख्यकाः ॥२४॥
तत्त्वात्मकास्तु पुरुषाः पृथ्व्याद्या देविकास्तथा ।
वल्ल्यो नद्यो महास्थल्यो भूमयो द्यौः सुमूर्तयः ॥२५॥
देवा देव्यः समायाताः सोत्सुका दर्शनातुराः ।
तेषां भोजनसम्मानं वासपानसुखासनम् ॥२६॥
अपेक्षितार्हणदानं चक्रुश्चोभयपक्षिणः ।
मंगलान्यभवंस्तत्र वेंकटाद्रौ वियद्गृहे ॥२७॥
आगच्छन्ति विवाहे श्रीपद्मिनीश्रीनिवासयोः ।
आरुह्य गरुडं कृष्णः श्रीलक्ष्मीसहितो हरिः ॥२८॥
ब्रह्मेशवज्रिवरुणयमयक्षेशसेवितः ।
वशिष्ठादिमुनीन्द्रैश्च सनकाद्यैश्च योगिभिः ॥२९॥
भक्तैर्भागवतैः सद्भिर्नारदसनकादिभिः ।
कृष्णनारायणभूमहिरण्यगर्भवर्धितः ॥३०॥
ईश्वरैः शोभितो विष्णुर्नारायणपुरीं ययौ ।
गन्धर्वाश्च जगुः कीर्तिं ननृतुश्चाप्सरोगणाः ॥३१॥

देवदुन्दुभयो नेदुश्चक्रुर्गीतिं सुरांगनाः ।
आपुश्चमत्कृतिं नार्यो ददृशुर्वनदेवताः ॥३२॥
वनान्यवाकिरन् पुष्पैः पक्षिणो विजयं जगुः ।
जपन्तः स्वस्तिसूक्तानि मुनयस्तं समन्वगुः ॥३३॥
देवो देवगणैः शिष्यैर्विश्वक्सेनादिपार्षदैः ।
सखीभिः स्यन्दनहस्तियानस्थाभिः समन्वितः ॥३४॥
महीमानैः समस्तैश्च कोट्यादिसंख्यकैर्वरः ।
वियद्राजस्य नगरं त्वाससाद स्वलंकृतम् ॥३५॥
पत्तनस्य बहिर्वाट्यां बहुयोजनविस्तराम् ।
व्योममार्गाभिसंव्याप्तां तस्थौ श्रीभगवान् क्षणम् ॥३६॥
तावता लोकरीत्यैव पुर्याः प्रदक्षिणाय सा ।
पद्मिनी हस्तिसंरूढा गत्वा चागत्य गोपुरम् ॥३७॥
आभिमुख्येन देवस्य प्रतीक्षायुक्स्थिताऽभवत् ।
अथ वाट्योद्यानतः श्रीनिवासो गोपुरं ययौ ॥३८॥
करे मालां समागृह्णन् गरुडारूढ ईश्वरः ।
गजस्था पद्मिनी हस्ते मालां कृत्वाऽभ्यसंचरत् ॥३९॥
मुखोन्मुखं मिलित्वा तौ मालाद्वयं सुमूल्यकम् ।
परस्परं ददतुश्च कण्ठयोस्तौ वधूवरौ ॥४०॥
आलोक्याऽऽकाशराजोऽपि जहर्ष सह बन्धुभिः ।
विष्णुर्मालां स्वकण्ठस्थां मुमोच पद्मिनीगले ॥४१॥
पद्मिनीमल्लिकामालां विष्णोः कण्ठे समार्पयत् ।
एवं त्रिवारं तौ कृत्वा ययतुर्मण्डपगृहम् ॥४२॥
स्थित्वा पीठे क्षणं पश्चाद् गृहं विविशतुः शुभम् ।
विश्रान्तिं जलपानं च लौकिकाचारमित्यथ ॥४३॥
सत्कारं पूजनं साक्षतचन्द्रकविभूषणम् ।
वरार्थं कारयित्वा च मण्डपे वेदिकान्तिकम् ॥४४॥
वरं राजाऽऽनयामास पूजनं प्रचकार सः ।
ब्रह्मा तत्राऽभवन्मुख्यो विवाहविधिकारकः ॥४५॥
मांगल्यसूत्रबन्धादिसांकुराऽर्पणमित्यपि ।
प्रकोष्ठे च कामफलबन्धनं प्रचकार सः ॥४६॥
वह्निं प्रज्वालयामासाऽऽहवनीयं तु पद्मजः ।
स्वस्तिवाचनमांगल्यश्लोका गीयन्त एव च ॥४७॥
पद्मिनीं वरतो लब्धैर्वस्त्राभूषणहारकैः ।
शृंगारयित्वा त्वनयन्मण्डपं वरसन्निधौ ॥४८॥
वरं नत्वा निषसाद मालां गले समर्प्य सा ।
वामे स्थित्वा सह पत्या पूजाहोमौ चकार च ॥४९॥
वरमाला गुरुणा सा द्वयोः कण्ठे तदा कृता ।
चतुःप्रदक्षिणीकृत्य वह्निं होमं प्रचक्रतुः ॥५०॥
परस्परं कृतवन्तौ कवलप्राशनं तदा ।
रंगजले सुवर्णस्योर्मिकायाः खेलनं तथा ॥५१॥
पुष्पगुलालयोश्चापि क्षेपणं च परस्परम् ।
प्रचक्रुस्ततो मन्त्राः सहदाम्पत्यबोधकाः ॥५२॥
ब्राह्मणैरावृतास्तत्र सद्रागैर्वैदिकैः शुभाः ।
विष्णोः करे करं दत्वा कन्यादानं नृपोऽकरोत् ॥५३॥
विष्णुः प्रियां नवां प्राप्य पुलकाञ्चितरोमवान् ।
सद्योजातस्तदा कन्याप्रकोष्ठः स्वेदवानभूत् ॥५४॥
यौतकं तु तदा कन्यापक्षः कन्याकरे ददौ ।
वरपक्षो वरहस्ते ददौ स्वर्णं धनं बहु ॥५५॥
रत्नानि च मणीन् हारान् मौक्तिकान् भूषणानि च ।
अन्यान्यपि सुकौशेयान्यम्बराणि रसानपि ॥५६॥
ददुश्चान्ये यथाशक्तिर्देवर्षिमानवादयः ।
स्वस्वप्रदेशरत्नानि यानवाहनपात्रकम् ॥५७॥
दिव्यवस्तु सुगन्धादि ब्रह्मवल्ल्यादिका ददुः ।
एवं ब्रह्मा सबृहस्पतिकस्तत्राशिषो ददौ ॥५८॥
वैवाहिकं कारयित्वा लाजाहोमान्तमित्यथ ।
व्रतादेशं समाज्ञाय शयाते पद्मिनीहरी ॥५९॥
चतुर्थे दिवसेऽसमापयत् सर्वं चतुर्मुखः ।
वियद्राजा नवं नित्यं नवं पक्वान्नभोजनम् ॥६०॥
कारयामास सद्भक्त्या वैष्णवान्प्राणतोऽधिकान् ।
येषां येषां शरीराणां यद्यद् भोज्यं निसर्गजम् ॥६१॥
तेभ्यस्तेभ्यस्तथा दत्वा परां तृप्तिमकारयत् ।
विविधानि च पेयानि मधुराऽम्लानि संददौ ॥६२॥
ताम्बूलादिमुखशुद्धिसाधनानि ददौ तथा ।
एवं सेवाप्रकारैश्च राज्ञा तु वियता हरिः ॥६३॥
हरयः कोटिसंख्याश्च सुरर्षिमुनिमानवाः ।
देवा देव्यो रञ्जिताश्च दासदासीप्रसेवकैः ॥६४॥
अथ ब्रह्मा वियद्राजमनुज्ञाप्य तथा धराम् ।
श्रीलक्ष्मीपद्मिनीयुक्तमारोप्य गरुडे हरिम् ॥६५॥
गन्तुं प्रचक्रमे यावन्महीमानैर्युतस्तदा ।
वियद्राजा धरणी च वसुदानश्च नेत्रयोः ॥६६॥
कन्यावियोगजवारियुक्ता जाताः क्षणं तथा ।
पद्मिनी जननीपादौ स्पृष्ट्वा किञ्चिद् रुरोद ह ॥६७॥
आगन्तव्यमिति प्रोच्य समाश्लिष्य च वक्षसि ।
ययौ पुनर्गरुडे सा तदाऽभूत्तु जयध्वनिः ॥६८॥
वाद्यशब्दो महानासीत् सूतमागधबन्दिनः ।
जयशब्दान् प्रचक्रुश्च नेदुर्दुन्दुभयोऽम्बरे ॥६९॥

एवं वरातिका विष्णोर्ययौ श्रीवेंकटाचलम् ।
गृहे विशश्रमुः सर्वे तर्पिता जलभोजनैः ॥७०॥
अथ गन्तुमनसस्ते तुष्टुवुः पुरुषोत्तमम् ।
शुकादयो मुनिवृन्दा ब्रह्माद्या देवतागणाः ॥७१॥
वियद्राज्ञा प्रेषितं च स्वर्णसिंहासनं वरम् ।
पुत्रीविष्ण्वोः प्रियार्थं च स्वर्णकुसूलतण्डुलाः ॥७२॥
मुद्गपात्राण्यनेकानि घृतकुंभाऽयुतानि च ।
दिव्यानि चूतकदलीनालिकेरफलानि च ॥७३॥
धात्रीफलानि कूष्माण्डराजरम्भाफलानि च ।
शर्करापेटिका मणिमुक्ता गाः कोटिशस्तथा ॥७४॥
हंसेन्दुशुक्लवाजिनश्चतुर्दन्तगजादयः ।
अन्तःपुरचरा नार्यः सेविकाश्चाप्यनेकशः ॥७५॥
इदं सर्वं मण्डपे यत्कन्यादानोत्तरं हृदा ।
संकल्पितं च तत्सर्वं प्रेषितं तेन तत्क्षणम् ॥७६॥
हृदा स वरयामास प्रसन्नतां हरेः सदा ।
सेवां चरणयोर्भक्तिं नान्यल्लोकसुखादिकम् ॥७७॥
कन्यापक्षाश्च ये प्राघूर्णिकास्ते भोजितार्चिताः ।
वियद्राज्ञोऽनुमत्या च ययुर्लोकान् स्वकान् पुनः ॥७८॥
अथ श्रीवेंकटनाथः सुरादिकान् समर्च्य वै ।
पूजयित्वा कृष्णनारायणभूम्नः परेश्वरान् ॥७९॥
विराडाद्यानृषीन्पितॄन्मानवान् जडचेतनान् ।
स्वलोकगमनायैवमनुमेने ततश्च ते ॥८०॥
जग्मुर्नत्वा हरिं दासा दास्यः सर्वा हि सृष्टयः ।
यशो जगुर्भगवतः पद्मिनीभाग्यमेव च ॥८१॥
वेदवती तु या छाया सीतां प्रसेव्य सा खलु ।
अपद्माऽप्यभवत्पद्मा कृष्णनारायणप्रिया ॥८२॥
या ये भक्तिं प्रकुर्वन्ति प्राणान् समर्प्य सा यथा ।
तास्ते पद्मेव जायन्ते कृष्णभक्ता हि शाश्वताः ॥८३॥
गतेषु तेषु सर्वेषु पद्मिन्या च श्रिया युतः ।
लक्ष्म्या च रमया युक्तो रेमे श्रीभगवान् सदा ॥८४॥
आस्ते च सर्वदा कृष्णः स्वामिपुष्करिणीतटे ।
वेंकटाद्रौ क्वचित् साक्षाद् दिव्यालये भवत्यपि ॥८५॥
पद्मिनीसहितो नाथः क्वचिच्छ्रियान्वितः प्रभुः ।
क्वचिल्लक्ष्म्या च सहितो रमया सहितः क्वचित् ॥८६॥
बकुलमालिकाद्याभिः क्वचिद् वेंकटपर्वते ।
विहरत्येव भगवान् स्वामिनारायणो हरिः ॥८७॥
पतिव्रताश्च ताः सर्वा भगवत्यर्पिताः सदा ।
पत्न्यः कृष्णं प्रसेवन्ते हृदा देहेन कर्मभिः ॥८८॥

पद्मिनी पद्मवासिन्याः पतिं त्वासाद्य सेवते ।
प्रातः कृष्णं सदा पूर्वं समुत्थाय प्रसेवते ॥८९॥
पादसंवाहनं चांगमर्दनं प्रकरोति च ।
शयने श्रीनिवासं च तोषयत्येव सेवया ॥९०॥
आश्लेषं चूम्बनं कामं ददात्येव पतीष्टदम् ।
अथोत्थाय शयनात् सः प्रक्षाल्य करमाननम् ॥९१॥
जलमुष्णं करोत्येव भगवत्स्नानशुद्धये ।
स्नात्वा ददाति शुद्धापः करानन‌विशुद्धये ॥९२॥
दन्तधावनमार्द्रं च सरसं पायसं द्रवम् ।
दत्वा सुगन्धचूर्णं च ददाति सजलं घटम् ॥९३॥
हरिः शौचादिकं कृत्वा प्रक्षाल्य च मृदा करौ ।
गण्डूषान् स विनिर्वर्त्य स्नाति सुवर्णपट्टके ॥९४॥
पद्मिनी श्रीहरेरंगेष्वामृद्य गन्धचूर्णकम् ।
तिलपिष्टं पुष्पसारं सुगन्धितैलप्रभृति ॥९५॥
दत्वाऽमृतैर्जलैर्देवं पतिं स्नापयति प्रिया ।
मार्जयति जलं वस्त्रैर्धौत्रं ददाति सुन्दरम् ॥९६॥
उत्तरीयं ददात्येव यज्ञपट्टं च सूत्रकम् ।
आसनं त्वाचमनार्थं जलं ददाति शार्ङ्गिणे ॥९७॥
ददाति कज्जलं नेत्रे भाले पुण्ड्रं सचन्द्रकम् ।
कर्णयोः कुण्डले बिन्दुं ददाति दण्डके तथा ॥९८॥
केशान्प्रसाध्य तैलं च दत्वा कृत्वा सुचन्दनम् ।
मुकुटं प्रददात्येव हारान् सुवर्णरत्नजान् ॥९९॥
कण्ठे ददाति कृष्णस्य बाह्वोः प्रकोष्ठयोस्तथा ।
करयोः कटकौ हारौ श्रृंखले वलयौ तथा ॥१००॥
प्रददात्यूर्मिका अंगुलिषु कट्यां सुश्रृंखलाम् ।
पादयोर्नूपुरे रम्ये किंकिणीशब्दगर्जिते ॥१०१॥
वस्त्रोपानद्वरौ चरणयोर्ददाति पद्मिनी ।
नक्तकं च करे यष्टिं कानकीं मालिकां शुभाम् ॥१०२॥
छत्रं च चामरं चैव तथा श्रृंगारवस्तुकम् ।
ददाति व्यजनं चादर्शकं सिंहासनं तथा ॥१०३॥
धूपं दीपं त्वबीरं चाक्षतान् पुष्पाणि पत्रकम् ।
दलं जलं फलं भोज्यं नैवेद्यं मधुरं बहु ॥१०४॥
यथारुचि पयो मिष्टं दधि मधु च शर्कराम् ।
ताम्बूलं पेयमेवादिभक्ष्यं चूर्णादिकं शुभम् ॥१०५॥
पोलिकाः पूरिकाश्चापि संयावं घृतपूरकान् ।
पर्पिकान् ग्रन्थकांश्चापि पूपानपूपकांस्तथा ॥१०६॥
भर्जकान् लड्डुकांश्चापि सुखदां सक्तुकं तथा ।
ओदनं चणकांश्चापि मुद्गान् सूपं घृतादिकम् ॥१०७॥

आरनालाँस्तक्रदुग्धदधिफलरसाँस्तथा ।
ददाति भोजनार्थं सा श्रीनिवासाय नित्यदा ॥१०८॥
जलं पानार्थमन्यच्च भक्ष्यं कन्दफलादिकम् ।
ददाति वस्त्रशुद्ध्यादि करोति क्षालनादिकम् ॥१०९॥
आरार्त्रिकं प्रदक्षिणं दण्डवत् स्तवनादिकम् ।
नमस्कारान् करोत्येव मध्याह्नेऽपि तथा निशि ॥११०॥
एवं सदाऽनुवृत्त्या सा सेवते श्रीः रमा यथा ।
यथा लक्ष्मीः सेवते च तथा सेवापरायणा ॥१११॥
नारायणं हरिं कृष्णं कांभरेयं पुमुत्तमम् ।
श्रीनिवासं वेंकटेशं पद्मिनीस्वामिनं प्रभुम् ॥११२॥
स्वयं प्रसेवते दासीशतेषु सत्स्वपि प्रिया ।
एवं सा जन्मसाफल्यं लेभे पद्मेव पद्मिनी ॥११३॥
अथ कृष्णो बकुलायै वरदानमदात् खलु ।
पद्मिनीवत् वरिष्ये त्वां तथा श्रीवेंकटाचले ॥११४॥
सखीमध्ये कारयित्वा वेदीं स्थित्वा च माधवः ।
अग्नौ होमं स्वयं कृत्वा बकुलाकरमाददे ॥११५॥
पद्मिनीप्राप्तिसत्कार्यप्रतिलाभफलं ददौ ।
पत्नीं चकार भगवान् सखीं बकुलमालिकाम् ॥११६॥
सापि पतिव्रता नित्यं दासी च किंकरी प्रिया ।
सेवते श्रीहरिं नित्यानन्दभोक्त्री बभूव ह ॥११७॥
इति ते कथितं लक्ष्मि ! वेदवत्याः कथानकम् ।
पातिव्रत्यपरं या वै पद्मिनी धरणीसुता ॥११८॥
भूत्वा त्ववाप देवेशं कृष्णं गोपालबालकम् ।
एतदाख्यानकं श्रुत्वा श्रीकृष्णं सत्पतिं लभेत् ॥११९॥
सम्पत्पुत्रपतिप्राप्तिर्धनधान्याम्बरार्जनम् ।
यशःसत्ताप्रतिष्ठादि श्रुत्वेदं प्राप्यते ध्रुवम् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये श्रीनिवासभगवत्कृतः पद्मिन्या सह विवाहः, विधिः, यौतकं, पातिव्रत्यादि चेति-निरूपणनामा चतुःशततमोऽध्यायः ॥४००॥

श्रीलक्ष्मीरुवाच—

भगवन् श्रावितं मह्यं समाख्यानं सुखप्रदम् ।
विना त्वां कः समर्थोऽस्ति भक्तेच्छापूरणाय वै ॥ १ ॥
पूर्वं केन कृतं तेऽत्र दर्शनं भक्तिभाविना ।
केन वा दृश्यते कृष्णनारायणो दयालयः ॥ २ ॥
विमानं चापि देवार्थे कः करिष्यति भाविनि ।
तान्मे सर्वाश्चमत्कारान् श्रीशस्य वक्तुमर्हसि ॥ ३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि चमत्कारान् पुरागतान् ।
यच्छ्रुत्वा च भवेद् भक्तिर्मयि रंकस्य चापि वै ॥ ४ ॥
राजा दीनः पशुः पक्षी नरो नारी सती सुता ।
या मे भक्ता महाभागवतीं तां विद्धाम्यहम् ॥ ५ ॥
अवश्यं तु भवितव्यं तेन मदीयकेन वै ।
मत्तो येनेच्छनीयं तु सुखं शाश्वतिकं प्रिये ॥ ६ ॥
भविष्यन्तं सुवृत्तान्तं प्रवदामि निबोध मे ।
वेंकटाद्रौ वसुनामा निषादो भक्तिमान्मम ॥ ७ ॥
श्यामाकक्षेत्रपालोऽसौ श्यामाकजीवनोऽभवत् ।
श्यामाकतण्डुलान् पक्त्वा कृत्वा शर्करयाऽन्वितान् ॥ ८ ॥
निवेद्य श्रीनिवासाय श्रीभूमिसहिताय सः ।
भुंक्ते भार्यासहयुतस्ततः कार्ये प्रवर्तते ॥ ९ ॥
एवं प्रसादभक्ष्येण पवित्रः सर्वदा शुचिः ।
वैष्णवः परमो जातो भार्याऽपि वैष्णवी ह्यभूत् ॥१०॥
नाम्ना चित्रवती साध्वी पातिव्रत्यपरायणा ।
देवं यद्वत् पतिं तद्वत् सेवते तद्वशा सदा ॥११॥
स्नाति पूजां प्रकरोति जपं करोति शार्ङ्गिणः ।
कृष्णं ध्यायति स्मरति मूर्तीः शृणोति सत्कथाम् ॥१२॥
पतिं देवं समं कृत्वा मानयित्वा समं सदा ।
उभयोः किंकरी भूत्वा दास्यं करोति सर्वथा ॥१३॥
मध्याह्ने च निशि सायं प्रातर्भोजनमीश्वरे ।
समर्पितं जलं पुष्पं सर्वं गृह्णाति सा सती ॥१४॥
धन्या निषादजातीया ब्राह्मी दिव्या हि वर्तते ।
विप्राणीव सुधर्मिष्ठा कुलत्रयस्य तारिणी ॥१५॥
प्राप्ते काले पुत्रवती बभूव भामिनी ततः ।
वीररुद्रइतिनाम चकार तस्य वै पिता ॥१६॥
वसुः पुत्रेण सहितो भार्यया भक्तिभक्तया ।
मोदते स्वस्य भोज्यादौ सन्तुष्टो देवसेवया ॥१७॥
अथैकदा स्वकं पुत्रं श्यामाकं पालयेति च ।
विसृज्य क्षेत्ररक्षार्थं पत्नीयुक्तो वनं ययौ ॥१८॥
मधुमार्गणकार्यौ तावुभौ भ्रमत एच्छिकम् ।
मध्याह्ने प्राप्तवन्तौ तौ मधु पुष्कलमेव यत् ॥१९॥
मध्याह्ने बालकः पक्वश्यामाकफालिकाः शुभाः ।
गृहीत्वाऽग्नौ निधायैव पिष्ट्वा वृक्षतले मुदा ॥२०॥
पर्णे निवेदयामास हरये भोजनं जलम् ।
नैवेद्यं तत्प्रसादं च भोजयित्वाऽऽस शान्तितः ॥२१॥
तावत् तत्पितरौ मिष्टं मध्वादाय समागतौ ।
श्यामाकान् भक्षितान् दृष्ट्वा सन्तर्ज्य सुतमेव तम् ॥२२॥

वसुर्दण्डं समुद्यम्य हन्तुं तं हस्तमुद्दधे ।
वीररुद्रस्य हृदये स्थितो वै भगवान् स्वयम् ॥२३॥
दण्डं जग्राह हस्तेन प्राविर्भूय वसोः पुरः ।
दण्डो गृहीतः केनेति वसुः कृष्णं ददर्श ह ॥२४॥
शंखचक्रगदापाणिं दिव्यतेजोमयं विभुम् ।
वसुर्दण्डं परित्यज्य प्रणम्योवाच तं हरिम् ॥२५॥
किमिदं भगवन् पुत्ररक्षार्थं त्वं समागतः ।
अनेन नाशिताः पश्य पक्वश्यामाकफालिकाः ॥२६॥
दण्डपात्रं भवत्येव पुनः कुर्यान्न तत्तथा ।
इतिश्रुत्वा हरिः प्राह पुत्रस्ते भक्तिमान् मयि ॥२७॥

त्वत्तोऽपि मे प्रियतमस्तस्माद् रक्षार्थमागतः ।
श्यामाका भर्जिताश्चूर्णीकृताः पिष्टास्ततः परम् ॥२८॥
नैवेद्यं मेऽर्पयित्वा स भुक्तवान् भक्तराट् मम ।
श्यामाकानां बीजभावं गतानामात्मनां मया ॥२९॥
कृता मुक्तिस्तथा तेऽपि पुण्यं दत्तं हि शाश्वतम् ।
यदर्पणं कृतं मह्यं त्वत्कृषीयकणादिकम् ॥३०॥
अत्र सर्वत्र तिष्ठामि मम भक्तस्य सन्निधौ ।
रक्षां करोमि भक्तस्य जाग्रतौ च सुषुप्तिके ॥३१॥
दिवानिशं भक्तरक्षाकरोऽस्म्येव वसो सदा ।
स्वामिपुष्करिणीतीरे रम्ये वसामि सर्वथा ॥३२॥

इत्युक्त्वा भगवान् वसुदत्तं मधु सुमिष्टकम् ।
चित्रवत्याऽर्पितं बृस्यासनं फलजलादिकम् ॥३३॥
गृहीत्वा श्रीनिवासः श्रीकृष्णनारायणः स्वयम् ।
प्रहसन् वै तिरोभूत् ते त्रयो वृक्षतलं श्रिताः ॥३४॥
इत्येवं श्रीभगवता भक्तवश्येन पप्रजे ।
साक्षात् स्वदर्शनं दत्तं निषादाय महात्मने ॥३५॥

शृणु त्वन्यां कथां तत्र या जाता समये तदा ।
तावत् तत्र समायातो यात्रिकः शूद्रवर्णकः ॥३६॥
मार्गेण निर्गतो विष्णुभक्तः पाण्ड्यप्रदेशजः ।
द्वादशवर्षको बालः पप्रच्छ वीररुद्रकम् ॥३७॥
मार्गोऽयं श्रीनिवासस्य तीर्थं गच्छति किं न वा ? ।
मया तीर्थविधानार्थं गन्तव्यं तत्र विद्यते ॥३८॥

इति पृष्ट्वा श्रीनिवासस्थानस्य वर्त्मना तु सः ।
वीरप्रदर्शितेनाऽसौ गतवान् भावसंभृतः ॥३९॥
नारायणपुरीं प्राप्य श्रीवराहं प्रणम्य च ।
हृदि स्मृत्वा श्रीनिवासं वेंकटाद्रिनिवासिनम् ॥४०॥
सुवर्णमुखरीं प्राप्य स्नात्वा चोत्तीर्य तां ततः ।
कमले सरसि स्नात्वा तत्तीरस्थं हरिं बलम् ॥४१॥

नमस्कृत्य वनं प्राप्य शेषाद्रिं तु ययौ हि सः ।
जलनिर्झरणं दृष्ट्वा कपिलापूजितं शिवम् ॥४२॥
पूजयित्वा चक्रतीर्थे स्नात्वा श्रीवेंकटाचलम् ।
शनैः शनैर्ययौ बालः समारुरोह पर्वतम् ॥४३॥
स्वामिपुष्करिणीं स्नात्वा तटे चिञ्चातरोरधः ।
वैखानसेन मुनिना गोपीनाथेन पूजितम् ॥४४॥
आकाशस्थं पीतनीलाकृतिं श्रीभूमिसेवितम् ।
शंखचक्रगदाखड्गपद्मादिहेतिशोभितम् ॥४५॥
सगरुडं स्वपक्षाभ्यां धृतवन्तं वितानकम् ।
ददर्श बालः संहृष्टो बभूवाऽथ कृतार्थताम् ॥४६॥

मेने तत्रैव वसितुं जन्मसार्थक्यमित्यपि ।
एवं दत्वा दर्शनं श्रीनिवासोऽदृश्यतां गतः ॥४७॥
दिव्यवाण्या वदन् पुत्र ! मन्दिरं रचयात्र मे ।
श्रुत्वा बालो रंगदासस्तरोर्मूलेऽवसत् सुधीः ॥४८॥
वैखानसेन नैवेद्यं भिक्षां संगृह्य विष्णवे ।
समर्प्याऽत्ति फलाद्यं च नैवेद्येऽप्यार्पयत्यथ ॥४९॥
नित्यं वृक्षान् शनैश्छित्त्वा चिञ्चाभूरुहमन्तरा ।
रमायाश्चम्पकतरुं विहाय पार्श्वगान् स्थलीम् ॥५०॥
निर्वृक्षां प्रचकाराऽसौ रंगदासोऽतिशोभिताम् ।
निर्मूलां संस्कृतां कृत्वा बहुविस्तारमण्डलम् ॥५१॥
शिलाभित्तिमयदुर्गरक्षितं प्रचकार सः ।
तत्राऽभितः समुद्यानं पुष्पफलद्रुमाश्रितम् ॥५२॥
चकार कर्णिकामल्लिकाब्जमन्दारमालती ।
कुन्दचम्पकतुलसीः कदलीनवरंगकान् ॥५३॥
आम्रपनसद्राक्षादीन् श्रीफलादीनवर्धयत् ।
खनित्वाऽतिसलिलं च कूपं वृक्षानतर्पयत् ॥५४॥

आरामपुष्पमालाभिः श्रीनिवासमपूजयत् ।
एवं सेवां प्रकुर्वन् स तस्थौ तत्रैव तं भजन् ॥५५॥
एकदा तत्र सरसि स्नातुं गन्धर्व आययौ ।
कन्याभिः सुन्दरीभिः सुयुवतीभिः समं तदा ॥५६॥
जलक्रीडां करोति स्म दिवि न्यस्य विमानकम् ।
पश्यन् श्रीरंगदासोऽपि मुमोह कन्यकासु सः ॥५७॥
मुग्धवद् दर्शनं तासां कृत्वा स्तब्धोऽभवद् यतः ।
व्यस्मरन्माल्यमालादि ग्रन्थितुं जडवत्तदा ॥५८॥
आमध्याह्नं तथा तस्थौ मालां पुष्पाणि नाऽस्मरत् ।
गन्धर्वोऽपि खेलयित्वा कान्ताभिः सह तद्वहिः ॥५९॥
विनिर्गत्य विमानेन ययौ स धनदालयम् ।
रंगदासोऽपि संज्ञात्वा स्वस्थो भूत्वा च मालिकाः ॥६०॥

ग्रथित्वाऽऽदाय पुष्पाणि श्रीनिवासालयं ययौ ।
तत्रस्थपूजकेनोक्तं किमद्य चिरकार्यसि ॥६१॥
न बद्धा मालिका मित्र ! पूजाकालोऽपि निर्गतः ।
एवमुक्तोऽपि नाऽवोचद्रंगदासो हि लज्जया ॥६२॥
तदा तं श्रीनिवासो वै स्वयं प्रोवाच लज्जितम् ।
रंगदास ! हृदये ते स्मर्यन्ते तास्तु कन्यकाः ॥६३॥
मम मायाविमोहेन मा लज्जां वह भक्तराट् ।
गन्धर्वराजवद् राजा भविताऽसि महीतले ॥६४॥
भुंक्ष्व भोगान् बहुमतान् दिव्यांस्तृप्तिप्रदांस्ततः ।
प्राकारं च विमानं मे मन्दिरं कारयिष्यसि ॥६५॥
ततो मुक्तिं प्रदास्यामि भक्ताय सेवकाय ते ।
अत्रैव कुरु सेवां त्वमाशरीरविमोक्षणात् ॥६६॥
इत्युक्त्वा श्रीनिवासश्च विष्णुर्जग्राह मालिकाम् ।
रंगदासः पूजयित्वाऽऽरामं पुनः समाययौ ॥६७॥
साग्रं शताब्दं संजीव्य सेवित्वा श्रीनिवासकम् ।
शरीरं तद्विहायैव जातः सोमकुले नृपः ॥६८॥
जातिस्मरो दिव्यदृष्टिस्तोण्डमानिति नामतः ।
सौवीराख्यनृपपुत्रो नन्दिनीजननीभवः ॥६९॥
सः पञ्चवर्षकश्चासीद् भगवद्भक्तिसंभृतः ।
सर्वभक्तिपुष्टिदातृसद्गुणादिसुमण्डितः ॥७०॥
पाड्यस्य तनयां चारुपद्माख्यां सुमनोहराम् ।
उपयेमे तथाऽन्याश्च कन्याः कामस्वरूपिणीः ॥७१॥
रेमे नारायणपत्तनाधिपस्तोण्डमान्नृपः ।
अथैकदा ययौ श्रीवेंकटाद्रौ मृगयामनु ॥७२॥
ददर्श गजयूथेशं ग्रहीतुं तमनुद्रुतः ।
सुवर्णमुखरीं तीर्त्वा शुकं नत्वा च रेणुकाम् ॥७३॥
वल्मीकाकारदेवीं च नत्वा स पश्चिमां ययौ ।
कंचिच्छुकं पञ्चवर्णं जिघृक्षुस्तमनुद्रुतः ॥७४॥
शुको वदन् श्रीनिवास इति द्राक् पर्वतं ययौ ।
राजाऽप्यनुद्रवन् कीरं वेंकटाद्रिं समारुहत् ॥७५॥
अग्रे गच्छन् हरितं स श्यामाकक्षेत्रमेयिवान् ।
क्षेत्रपालस्तोण्डमानं ज्ञात्वा सत्कृतिमाचरत् ॥७६॥
तोण्डमानोऽपि पप्रच्छ क्षेत्रपं कः शुकोऽस्ति सः ।
क्षेत्रपः प्राह राजेन्द्र ! श्रीनिवासप्रियः सदा ॥७७॥
पार्श्ववर्ती सदा तस्य श्रीभूमिभ्यां विवर्धितः ।
स्वामिपुष्करिणीतीरे सदाऽऽस्ते हरिसन्निधौ ॥७८॥

दिवा विहृत्याऽद्रिवने सायं गच्छति मन्दिरम् ।
ग्रहीतुं शक्यते नैव केनापि स शुको नृप ! ॥७९॥
इत्युक्त्वा भूभृता साकं क्षेत्रपो मन्दिरं ययौ ।
स्नात्वा स्वामिपुष्करिण्यां बिल्वमूलस्थितं प्रभुम् ॥८०॥
सुशृंगारिसन्मूर्तिं श्रीभूयुक्तं ददर्श ह ।
वल्मीकगूढपादाब्जमाजानुपुरुषोत्तमम् ॥८१॥
क्षेत्रपो भूपतिश्चोभौ ववन्दतुः प्रणेमतुः ।
क्षेत्रपः श्यामाकपाकं निवेद्य हरयेऽर्पकम् ॥८२॥
ददौ राज्ञे च शिष्टार्धं ततः क्षेत्रं पुनर्ययौ ।
तोण्डमानोऽप्येकरात्रिमुषित्वा रेणुकावनम् ॥८३॥
चैत्रशुक्लनवम्यामानर्च गत्वा स रेणुकाम् ।
हविष्यान्नं परमान्नं सोपस्करं ददौ नृपः ॥८४॥
देवी तुष्टा वरं राज्ञे ददौ राज्यमकण्टकम् ।
भविता तव नाम्ना च राजधानी ममाऽन्तिके ॥८५॥
श्रीनिवासप्रसादस्य पात्रं चिरं भविष्यसि ।
अथ तोण्डी शुकं गत्वा नत्वा तस्य मुखात्तथा ॥८६॥
माहात्म्यं पद्मसरसः श्रुतवान् पापनाशकम् ।
पुरात्र पद्मया साकं विष्णुश्चक्रे तपः परम् ॥८७॥
देवैः स्तुतो महाविष्णुर्नाम पद्मासरोऽकरोत् ।
इतिश्रुत्वा ययौ तोण्डी राजधानीं पितुः पुरीम् ॥८८॥
पित्राऽभिषिक्तो राज्ये स्वे वसुनाऽथ वसुस्ततः ।
वाराहवल्मीकयात्राकरणार्थं ययौ मुदा ॥८९॥
तत्र वाराहभगवान् रात्रौ निर्गत्य तत्स्थलात् ।
श्यामाकानत्ति चाऽदृश्यो दिवा विशति तत्स्थले ॥९०॥
क्षेत्रपः खनयामास वल्मीकं वल्मीकं वीक्ष्य तत्तथा ।
वल्मीकाद् वाराहरूपो भगवानुत्थितोऽभवत् ॥९१॥
क्षेत्रपसन्निधौ प्राह राजानं मम मन्दिरम् ।
कारयात्र तव पुत्रद्वाराऽत्र निवसाम्यहम् ॥९२॥
वल्मीकं कृष्णगोक्षीरैः क्षालयित्वा तदुत्थिते ।
शिलातले तु वाराहं चोत्कृत्य तत्र मन्दिरे ॥९३॥
प्रतिष्ठाप्य च मन्मूर्तिं प्रपूजय सदा नृप ! ।
इत्युक्त्वा श्रीवराहस्तु तिरोऽभूत् स वसुस्ततः ॥९४॥
गत्वा गृहं तोण्डमानाभिधं प्राह सुतं कुरु ।
मन्दिरं श्रीवराहस्य मूर्तिं स्थापय तत्र च ॥९५॥
तोण्डमानोऽपि रात्रौ वै स्वप्ने सर्वं ददर्श तत् ।
प्रातरुत्थाय गा नीत्वा ययौ वल्मीकसन्निधौ ॥९६॥

क्षालयामास दुग्धैश्च शिलयां च वराहकम् ।
कारयित्वा स्थापयित्वा मन्दिरे तं परं प्रभुम् ॥९७॥
पूजां वै कारयामास राजधानीं चकार सः ।
स्वप्ने दृष्टं बिलं तेन वल्मीकसन्निधौ तु यत् ॥९८॥
बिलमन्तःपुरे कृत्वा प्राकारं समकारयत् ।
आशीर्वचोऽनुसारेण निर्ममे तत्र पत्तनम् ॥९९॥
चिञ्चां च चम्पकं चापि ररक्ष दुर्गमध्यतः ।
नित्यं बिलेन चागत्य देवं नत्वा स तोण्डमान् ॥१००॥
राज्यं चकार धर्मेण पृथ्वीं जिगाय तत्स्थितः ।
तोण्डमद्वंशजो राजा नाम्ना नारायणः शुभः ॥१०१॥
विमानं दिव्यमेवात्र प्राकारेऽकारयच्छुभम् ।
दिव्यमदृश्यमेवैतद् भक्तमात्राऽवलोकितम् ॥१०२॥
अभजच्छ्रीहरिं तत्र वाराहं दिव्यरूपिणम् ।
गोपालबालकं कृष्णं कांभरेयं श्रियः पतिम् ॥१०३॥
श्रीरंगं श्रीवेंकटेशं चाऽभजन्नित्यमेव सः ।
इत्युक्तं ते महालक्ष्मि ! पूर्वाख्यानमनुत्तमम् ॥१०४॥
श्रीरंगाऽपरजन्मस्थतोण्डमत्कारितं महत् ।
मन्दिरं यत्र भगवान् वाराहः श्रीधरायुतः ॥१०५॥
वर्तते दर्शनं चापि ददाति सात्त्वताय सः ।
अथाऽन्यदपि सामर्थ्यं शृणु ते कथयामि च ॥१०६॥
दाक्षिणात्यो द्विजः पत्नीसहितस्तीर्थवाञ्छया ।
समायातो गर्भवतीं पत्नीं गन्तुं तदाऽक्षमाम् ॥१०७॥
विलोक्य वीरशर्मा सः राजानं समुपागमत् ।
अकथयच्च तत्सर्वं तीर्थे विघ्नतमं यथा ॥१०८॥
शृणु राजन् मम पत्नी गुर्विणी भजनोन्मुखी ।
संस्थाप्यैनां गृहे ते च तीर्थं निर्वर्तयाम्यहम् ॥१०९॥
तावत्त्वं रक्षय स्वामिव्रतां लक्ष्म्यभिधां प्रियाम् ।
काशीप्रभृतितीर्थानि कृत्वा यावन्निवर्तये ॥११०॥
इत्युक्त्वा तां विसृज्यैव ब्राह्मणो निर्ययौ ततः ।
राज्ञाऽन्नादि प्रदाप्यैव वाटिकायां निवासिता ॥१११॥
विप्रस्यागमपूर्वं सा मृता ज्वरेण पीडिता ।
ब्राह्मणोऽप्यकरोत् पद्भ्यां दीर्घकालिकयात्रिकाम् ॥११२॥
नवमासा व्यतीता वै यत्र यत्र गतो यथा ।
गंगां काशीं प्रयागं च गयां साकेतपत्तनम् ॥११३॥
बदरिकाश्रमं शालग्रामं च पुष्करं तथा ।
सरस्वतीं कुशस्थलीं रैवतं सोमनाथकम् ॥११४॥
अश्वपट्टसरश्चापि तपतीं नर्मदां तथा ।
कुंकुमवापिकां सिंहारण्यं गोकर्णतीर्थकम् ॥११५॥
गोमतीं चेति तीर्थानि कृत्वा तु चैत्रके हि सः ।
मासे शुक्लैकादश्यां स राजानं प्रति चाययौ ॥११६॥
ब्राह्मणी कुशला चास्तीत्युवाच नृपतिं तदा ।
राजा तत्र ययौ यत्र रक्षिता ब्राह्मणी मृता ॥११७॥
दृष्ट्वा राज्ञा मृता सा तु शीघ्रं बिलेन मन्दिरम् ।
श्रीवेंकटेशं गतवान् राजा प्राह तदा हरिम् ॥११८॥
भगवन् ! ब्राह्मणी विप्रन्यासरूपा मृतास्ति सा ।
संशप्स्यति स विप्रो मां कृपां कुरु ममोपरि ॥११९॥
श्रीनिवासेन संप्रोक्तं दत्तं जलं प्रसादजम् ।
द्वादश्यामस्थिसरसि स्नापयैनां ततः खलु ॥१२०॥
प्राप्तजीवा यथापूर्वा भविष्यति न संशयः ।
शवं नीत्वा नृपस्तत्राऽऽययौ यत्राऽस्थिपल्वलम् ॥१२१॥
जलेनाप्लाव्य कुणपं राजा सस्मार तां सतीम् ।
तावत् दिव्यशरीरा सा नृपराज्यपरा यथा ॥१२२॥
समुत्थिता सगर्भा सा प्रसन्ना तदवस्थिका ।
आनीय शीघ्रं विप्राय ददौ विस्मयमाप सः ॥१२३॥
न गर्भो गलितः सोऽयं प्रतापोऽस्ति हरेः खलु ।
ततोऽपरे दिने तस्याः प्रसूतिः समजायत ॥१२४॥
पुत्रो देवसमो जातो नीत्वा मासोत्तरं द्विजः ।
राज्ञा प्रदत्तदानादि गृहीत्वा स्वगृहं ययौ ॥१२५॥
इत्युक्तस्ते चमत्कारो भगवद्भक्तिकारिणः ।
अथ कृष्णः श्रीनिवासो राजानं पुनरब्रवीत् ॥१२६॥
नैवेद्यान्ते प्रत्यहं मेऽर्चनं सुवर्णपद्मकैः ।
कुरु राजन् यद्दिष्टं सर्वं ते वै भविष्यति ॥१२७॥
राजा तोण्डी चकारैवं नित्यं कमलपूजनम् ।
एकदा तुलसीपुष्पं त्वपश्यत्स तु मृन्मयम् ॥१२८॥
विस्मितः श्रीहरिं राजा पप्रच्छ कोऽनुयाति हि ।
हरिः प्राह कुलालो मे भक्तोऽर्चयति मां तथा ॥१२९॥
स्वगृहेऽर्चयति क्ष्मेश ! तदङ्गीक्रियते मया ।
इतिश्रुत्वा ययौ कुर्वत्पुरं द्रष्टुं कुलालकम् ॥१३०॥
भीमाख्यं तं तथाभूतं पूजयन्तं विलोक्य च ।
राजा तु विस्मयं प्राप कुलालस्तु स्वभार्यया ॥१३१॥
दिव्यरूपो , विमानेन पत्न्या विष्णुपदं ययौ ।
यदा पूजाप्रसिद्धत्वं राज्ञस्त्वद्भवनागमः ॥१३२॥

तदा मुक्तिरिति पूर्वं श्रीनिवासेन भाषितम् ।
तत्तथैव तु संजातं वर्णयितुं न शक्यते ॥१३३॥
श्रीनिवासचमत्कारान् भक्तेच्छापूरकान् प्रिये ! ।
पठनाच्छ्रवणाद् बद्धो मुक्तो भवति पद्मजे ॥१३४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये तोण्डमाननृपकृतं श्रीवाराहभूमिकायां सप्राकारपत्तनम्, मृताया ब्राह्मण्याः सजीवनता, भीमकुलालकृतमृत्तिकापुष्पस्वीकारस्ततो भार्यायुक्तकुलालस्य मोक्षश्चेत्यादिनिरूपणनामैकाऽधिकचतुश्शततमोऽध्यायः ॥४०१॥

श्रीनारायण उवाच—

अथ लक्ष्मि ! शृणु राजा तोण्डी सुताय राज्यकम् ।
दत्वा तपोऽर्थमगमत् ततापाऽऽराधनं तपः ॥ १ ॥
तप्यमाने हरिः कृष्णः प्रत्यक्षोऽभवदच्युतः ।
गरुडं स्वं समारुह्य श्रीभूमिपद्मिनीयुतः ॥ २ ॥
तोण्डं नृपं समागम्य प्राहाऽऽराधनया तव ।
तुष्टोऽस्मि वद मे भक्त ! किं करोमि त्वदर्थकम् ॥ ३ ॥
श्रुत्वा तोण्डनृपस्तं वै कृत्वा प्राञ्जलिमाह यत् ।
जन्ममृत्युजराव्याधिवर्जिते त्वक्षरे तव ॥ ४ ॥
लोके वस्तुं समिच्छामि वरमेनं प्रदेहि मे ।
तावत्कलेवरं त्यक्त्वा कृष्णनारायणेक्षणः ॥ ५ ॥
कृष्णनारायणसाम्यदेहो भूत्वा स भक्तराट् ।
दिव्यं धामप्रदं शुभ्रं विमानं त्वारुरोह वै ॥ ६ ॥
मुक्तैः संस्तूयमानोऽसौ सारूप्यं प्राप्य शार्ङ्गिणः ।
पुनरावृत्तिरहितं ममाऽक्षरपदं ययौ ॥ ७ ॥
स्वामिपुष्करिणीतीर्थे नित्यं वसामि पद्मजे ।
पुष्करिण्यां कृतस्नानादश्वमेधफलं लभेत् ॥ ८ ॥
आत्मविद्या भवेत् साक्षान्मुक्तिश्चापि चतुर्विधा ।
तुलापुरुषदानस्य फलं स्वामिनिषेवणात् ॥ ९ ॥
गोसहस्रदानपुण्यं स्वामितीर्थनिमज्जनात् ।
धर्मार्थकाममोक्षाप्तिः स्वामितीर्थे प्रदानकात् ॥१०॥
प्रज्ञा लक्ष्मीर्यशः सम्पद्धर्मो ज्ञानं विरक्तता ।
मनःशुद्धिर्भवेयुश्च स्वामितीर्थाऽधिवासतः ॥११॥
ब्रह्महत्यासुरापानगुरुदारगमादिकम् ।
सुवर्णस्तेयमांसादि हिंसादोषादिकं तथा ॥१२॥
नश्यत्येव न सन्देहः स्वामितीर्थे व्रतादितः ।
अहो मौर्ख्यमहो मौर्ख्यं जनानां तद्भुवः खलु ॥१३॥

स्वामितीर्थे स्थितेऽन्यत्र रमते यन्मनः खलम् ।
अहो मोहस्य माहात्म्यं गृहतीर्थविनाशकृत् ॥१४॥
स्नातस्य स्वामितीर्थे तु नान्तकाद्भयमस्ति हि ।
स्तुवन्ति च प्रशंसन्ति स्पृशन्ति च नमन्ति च ॥१५॥
पिबन्ति स्नान्ति पश्यन्ति ये तेषां नान्तकाद् भयम् ।
भुक्तिमुक्तिप्रदं चैतच्छ्रीनिवासकृतालयम् ॥१६॥
श्रीभूसेवितकृष्णाधिवासितं धामसद्दशम् ।
तत्सर्वं वेंकटशैलदृष्टिपातभुवस्तलम् ॥१७॥
पुण्यं पवित्रं निर्वाणपदद सर्वतोऽधिकम् ।
शृणु लक्ष्मि ! कथां चान्यां धर्मगुप्तस्य भूभृतः ॥१८॥
सोमवंशे नन्दराज्ञः पुत्रो धर्मपरायणः ।
धर्मगुप्तइतिख्यातोऽभवन्नीतिपरायणः ॥१९॥
ईजे बहुविधैर्यज्ञैर्ददौ दानान्यनेकशः ।
प्रजा धर्मपराश्चासन् पातिव्रत्यपराः स्त्रियः ॥२०॥
अथैकदाऽश्वमारुह्य धर्मगुप्तो वनं ययौ ।
मृगयामनुचरतो निशाऽभूत् स ततो द्रुमम् ॥२१॥
अधिरुह्य विशश्राम ऋक्षस्तत्र समागतः ।
अनुद्रुतः स सिंहेन ऋक्षोऽरोहत्तु पादपम् ॥२२॥
उवाच भूपतिं दृष्ट्वा मरणत्रासकम्पितः ।
मा भीतिं याहि जनराड् ! वत्स्यावो रजनीमिह ॥२३॥
सिंहो भयंकरश्चात्र वृक्षमूलमुपागतः ।
रात्र्यर्धं भज निद्रां त्वं रक्ष्यमाणो मया सुखी ॥२४॥
ततः प्रसुप्तं मां रक्ष शर्वर्यर्धे सुरक्षक ! ।
इत्याकर्ण्य धर्मगुप्ते सुप्ते ऋक्षं हरिर्जगौ ॥२५॥
वयं वनेचराः सर्वे चतुष्पादा न मानवाः ।
किमस्माभिर्मानवेन नृपो मे त्यज्यतामयम् ॥२६॥
ते मे खाद्यं प्रपूर्णं संभविष्यत्यपवर्ज्यताम् ।
ऋक्षः प्राह तदा सिंहं धर्मयुक्तं सुनीतिमत् ॥२७॥
विश्वासघातिनां लोके महत्यधोगतिर्मता ।
मानवाः पशवः कीटाः पक्षिणो बालकाः स्त्रियः ॥२८॥
वन्या ग्राम्यास्तथाऽऽरण्या विश्वस्ता निवसन्ति वै ।
जीवन्त्याश्रयविश्वस्ताश्चतुष्पात्त्वं न कारणम् ॥२९॥
द्विपात्त्वं वा सपक्षत्वं यावद्विश्वासजीवनम् ।
विश्वासो हि परो धर्मस्तं कथं नु त्यजाम्यहम् ॥३०॥
स्वार्थी विश्वासधर्मं तु सन्त्यज्य घातकी भवेत् ।
न मया तत्प्रकर्तव्यं गच्छ त्यज प्रतीक्षणम् ॥३१॥
नहि मित्रद्रुहां पापं नश्येद् यज्ञायुतैरपि ।
ब्रह्महत्यादिपापानां कदाचिन्निष्कृतिर्भवेत् ॥३२॥

विश्वासघातिनां पापं विनश्येन्न कदाचन ।
न मेरुर्भारवाँस्तावद् यावद् भारोऽस्ति घातिनि ॥३३॥
हिंसा परतराऽधर्मस्वरूपा नाशदायिनी ।
विश्वासहिंसनं तत्र पापाऽतिपापतोऽधिकम् ॥३४॥
तस्माद् गच्छ वनादन्यद्वनं ते भोजनं मिलेत् ।
इत्युक्तः स वनराजो मौनं कृत्वा व्यवस्थितः ॥३५॥
अर्धरात्रिगते काले प्रबुद्धो नृपनन्दनः ।
सुष्वाप सुखतः ऋक्षः शाखायां प्रत्ययान्वितः ॥३६॥
सिंहः प्राह नृपं राजन् ! किं तवाऽनेन शाखिना ।
मम भक्ष्यं रक्षसि त्वं नूनं पापी भवस्यपि ॥३७॥
यथा राजा प्रजानां त्वं तथा वन्यनृपोऽस्म्यहम् ।
प्रजास्तु सर्वथा नीत्या भक्ष्या राज्ञां विनिर्मिताः ॥३८॥
अयं वन्यमृगस्त्वद्य मम भक्ष्य उपस्थितः ।
तवाऽऽश्रयं समासाद्याऽरोहद्वृक्षं हि ऋक्षकः ॥३९॥
भोजने मे भवान् राजा रोधकृद् वर्ततेऽद्य वै ।
किं तवाऽनेन ऋक्षेण त्यजस्व मम भोजनम् ॥४०॥
अन्यथा प्रातरेवापि दिवा वा भक्षयामि तम् ।
त्वां तथा वै भक्षयिष्ये समाहूयाऽन्यमद्विधान् ॥४१॥
एवमुक्तोऽथ सिंहेन राजा सुप्तमशंकितम् ।
स्वांकन्यस्तशिरस्कं तमृक्षं तत्याज वृक्षतः ॥४२॥
तावत् स भ्रामणीं कृत्वा शाखायामेव पादपे ।
पुण्यवशादूर्ध्वभागे समारुह्य रुरोद ह ।
राजा सिंहश्च तं पप्रच्छतुः कस्माद्धि रोदिषि ॥४३॥
भयं दूरं गतं तेऽद्य वद वानर ! हृद्गतम् ।
ऋक्षः प्राहोभयं नाऽहं मदर्थे रोदिमि प्रभो ॥४४॥
वने वन्या हि विश्वस्ता वसन्ति बहुवानराः ।
एतादृशं नृपं प्राप्य विश्वासघातिनं शठम् ॥४५॥
भविष्यन्ति हताश्चेति कृत्वा रोदिमि केसरिन् ।
सन्मुखं मरणं भूयान् माऽकस्मान् मृत्युरस्तु नः ॥४६॥
अहं न वानरो राजन् किन्त्वस्मि भृगुवंशजः ।
ध्यानकाष्ठाऽभिधर्षिर्वै कामरूपधरो वने ॥४७॥
कस्मादनागसं सुप्तमत्याक्षीन्मां भवान्नृप ।
मच्छापादति चोन्मत्तो भव त्वं चर भूतले ॥४८॥
इति शप्त्वा ततः सिंहं प्राहर्षिस्त्वं पुराऽनघ ।
कुबेरसचिवो ह्यासीः सखीजनपुरःसरः ॥४९॥
हिमाद्रौ विहरद् दैवाद् गतवान् गौतमाश्रमम् ।
विवस्त्रं त्वां विलोक्यैव गौतमः शापमासृजत् ॥५०॥
विवस्त्रः पशुचर्यस्त्वं ममाश्रमस्य सन्निधौ ।
कथं वै दुष्ट चरसि भव दुष्टोऽतिहिंसकः ॥५१॥
नग्नसिंहो भव चात्र रोमादिवर्जितः खलु ।
इतिशापेन सिंहस्त्वं तुष्टावर्षिं पुनः पुनः ॥५२॥
स चाह ते यदा राज्ञो धर्मगुप्तस्य वृक्षके ।
ध्यानकाष्ठस्य सद्भाग्याद् दर्शनं वै भविष्यति ॥५३॥
तदा शापात्तव मोक्षो भविष्यत्येव मा शुचः ।
भद्रनामाऽसि भृत्यस्त्वं ध्यानाज्जानाम्यहं हि तत् ॥५४॥
इत्युक्तः स ननामैनमृषिश्रेष्ठं नृपं तथा ।
सिंहत्वं च परित्यज्य द्रागभूद् यक्षरूपधृक् ॥५५॥
जातिस्मरस्तदा सर्वे विज्ञातर्षिकृपावशात् ।
आगतेन विमानेन दिव्येन द्यां ययौ हि सः ॥५६॥
ऋषिर्गतो वनं नैजं राजा मत्तोऽभवद् वने ।
विचचार पशुचर्यस्तमन्वेष्टुं प्रजा ययुः ॥५७॥
वने भ्रमन्तमुन्मत्तमानिन्युर्नर्मदातटम् ।
जैमिनेरन्तिकं प्राप्य जगदुश्चापराधनम् ॥५८॥
श्रुत्वा जैमिनिराहैतान् सुवर्णमुखरीतटे ।
वेंकटाद्रौ स्वामिपुष्करिणीतीर्थेऽतिपावने ॥५९॥
स्नापयन्तु नृपं तेन शापमुक्तो भविष्यति ।
एवं गत्वा कृतवन्तो जनास्तद्राज्यवासिनः ॥६०॥
धर्मगुप्तोऽभवत्स्वस्थो धनरत्नादि संददौ ।
धान्यक्षेत्राणि रत्नानि वेंकटेशस्य संददौ ॥६१॥
एवं राजाऽभवच्छापान्मुक्तो राज्यं चकार ह ।
स्वामिपुष्करिणीतीर्थं वर्तते एवमर्थदम् ॥६२॥
धर्मदं कामदं मोक्षप्रदं दुःखविनाशकम् ।
भूतप्रेतपिशाचाद्युन्मादा नश्यन्ति तज्जलात् ॥६३॥
स्नानात्पानात्स्पर्शनाच्च दर्शनाद् वन्दनादपि ।
नश्यन्ति पातकान्येव स्मरणादपि पद्मजे ॥६४॥
स्वामितीर्थं स्वामितीर्थं स्वामितीर्थमिति प्रिये ! ।
त्रिःपठन्तो नराः स्नाताः स्वामिस्नानफलं तथा ॥६५॥
पदं वै ब्रह्मणः श्रेष्ठं लभन्ते नात्र संशयः ।
श्रवणात्पठनाच्चास्य तत्र स्नानफलं भवेत् ॥६६॥
शृणु लक्ष्मि ! कथां त्वन्यां सुमतेर्ब्राह्मणस्य वै ।
महाराष्ट्रे यज्ञदेवसुतः सुमतिनामकः ॥६७॥
गृहं त्यक्त्वोत्कलं देशं गतो दुष्टसमागमात् ।
कांचित् किरातीं स दृष्ट्वा मुमोह तद्गृहे स च ॥६८॥
तस्थौ रेमे च बुभुजे चौर्यं चक्रे पपौ सुराम् ।
कंचिद्विप्रं स निशिथे खड्गेन हतवानथ ॥६९॥

द्रव्यमादाय विप्रस्य किरातीभवनं ययौ ।
कृष्णवर्णा ब्रह्महत्या ववल्गे तं भयंकरी ॥७०॥
तयोन्मत्तः स सुमतिः प्रययौ स्वगृहं प्रति ।
पितरं रक्ष रक्षेति त्वाक्रोशन् शरणं ययौ ॥७१॥
ब्रह्महत्या तज्जनकं समुवाच तदा ऋतम् ।
असौ सुरापी स्तेयी च ब्रह्महा चातिपातकी ॥७२॥
मातृद्रोही पितृद्रोही नीतित्यागी वृषोज्झितः ।
किरातीसंगदुष्टश्च मुञ्चैनं तु दुरात्मकम् ॥७३॥
नो चेत् त्वां तव भार्यां च सुतमेनं तथेतरान् ।
भक्षयिष्यामि वंशं च मा कुलं हन्तुमर्हसि ॥७४॥
एकं त्यक्त्वा कुलं रक्षेत्युक्त्वाऽग्रहीद्गले तु तम् ।
तावत् तत्र समायातो दुर्वासास्तु यदृच्छया ॥७५॥
स्तुतस्तैराह पितरं स्वामिपुष्करिणीजले ।
संस्नापय प्रमुच्येत हत्याया नात्र संशयः ॥७६॥
साकं दुर्वाससा सोऽथ ययौ पुष्करिणीजले ।
स्नातो हत्याविनष्टा च पूतो बभूव भूसुरः ॥७७॥
एवंप्रभावं तत्तीर्थं पापवृक्षकुठारकम् ।
शृण्वतां पठतां चापि वाजपेयफलप्रदम् ॥७८॥
वेंकटे कृष्णतीर्थेऽपि स्नात्वात्पापात्प्रमुच्यते ।
पितृन्मातृगुरूंश्चावमन्यमानो ये खलाशयाः ॥७९॥
तेऽपि वै कृष्णतीर्थेऽस्मिन् शुद्धयन्ति स्नानमात्रतः ।
कृष्णनामा मुनिः कश्चिदकरोद्वै तपः शुभम् ॥८०॥
वेंकटाद्रौ हरिं ध्यायन् कृतवाँस्तीर्थमुत्तमम् ।
रामकृष्णाभिधश्चान्यो मुनिर्मोक्षपरायणः ॥८१॥
तपश्चकार कठिनं ह्यनेकशतवत्सरान् ।
वल्मीकाक्रान्तदेहोऽपि स्वस्थानान्न चचाल सः ॥८२॥
वासवो मेघवृष्टिं च चकार सप्तवासरान् ।
वल्मीकस्योपरिष्टाद्वै निपपात महाशनिः ॥८३॥
वल्मीकशिखरं ध्वस्तं मुनिस्त्वस्थ्यवशेषितः ।
महेन्द्रेण तदा दृष्टो रक्षार्थे तस्य माधवः ॥८४॥
कांभरेयो महास्वामी गोपालबालकः स्वयम् ।
शंखचक्रादिसंयुक्त आविर्बभूव चाह तम् ॥८५॥
उत्तिष्ठ भद्रं ते भक्त! तपसाऽहं प्रतोषितः ।
अत्र तीर्थे मकरस्थादिवाकरे तु यो जनः ॥८६॥
स्नाति वा पौर्णमास्यां वा मदाविर्भावसद्दिने ।
मत्पार्षदाः कोटिसूर्यप्रभास्ते यन्ति मत्पदम् ॥८७॥
त्वन्नाम्ना च परां ख्यातिं गमिष्यति सुतीर्थकम् ।
इत्युक्त्वा श्रीनिवासश्च तत्रैवान्तरधीयत ॥८८॥
रामकृष्णौ ययौ धाम श्रीकृष्णेन समं हरेः ।
पठनाच्छ्रवणाच्चापि तीर्थं मोक्षप्रदं न्विदम् ॥८९॥
जलदानं चान्नदानं वस्त्रदानं धनार्पणम् ।
कर्तव्यं वेंकटे तीर्थे शाश्वतं वै भवेद्धि तत् ॥९०॥
हेमांगो नाम राजर्षिरभूदिक्ष्वाकुवंशजः ।
गवां दानं भूमिदानं स्वर्णदानादिकं ददौ ॥९१॥
तेनाऽदत्तं जलं त्वेकं सुखलभ्यधिया प्रिये! ।
अमूल्यं सर्वतो लभ्यं तद्दातुः किं फलं भवेत् ॥९२॥
अलभ्यदाने पुण्यं स्यादित्यवादीत्स युक्तितः ।
दीनानानर्च स व्यंगान्दरिद्रान्वृत्तिकर्षितान् ॥९३॥
नाऽऽनर्च श्रोत्रियान्विप्रान्साधूंश्च ब्रह्मवादिनः ।
प्रख्यातान्पूजयन्त्येव सर्वे लोकाः समुत्सुकाः ॥९४॥
दरिद्राणां गतिश्चाहं तस्मात्ते मद्दयास्पदाः ।
इति दुष्टेषु पात्रेषु दत्तवान् तेन तस्य वै ॥९५॥
चातकस्य त्रिजन्मानि गृध्रस्यैकजनुस्तथा ।
शुनश्च सप्तजन्मानि ह्यभवँश्च ततो गृहे ॥९६॥
मक्षिकाखादयित्री वै गृहगोधा व्यजायत ।
मिथिलादिपतेर्गेहे श्रुतदेवः समागमत् ॥९७॥
तेन दृष्टा हि ऋषिणा ह्यष्टाशीतिसमामयी ।
श्रुतदेवं प्रसंपूज्य राजा तच्चरणामृतम् ॥९८॥
मूर्ध्नाऽवहत् तदोत्क्षिप्तैर्बिन्दुभिः प्रोक्षिताऽपि सा ।
सद्यो जातिस्मरा जाता त्राहि त्राहीत्युवाच सा ॥९९॥
अहमिक्ष्वाकुकुलजो हेमांगश्च नृपोऽभवम् ।
पक्षपातः कृतो दाने जलं दत्तं न वै तथा ॥१००॥
तथा पात्रं समुत्सृज्य ह्यपात्रे प्रतिपादितम् ।
ज्वलन्तमग्निमुत्सृज्य भस्मन्येव हुतं मया ॥१०१॥
तुलसीं तु समुत्सृज्य विषवल्ली प्रसिञ्चिता ।
पंग्वाद्या येऽप्यनाथाद्या दयापात्रं हि केवलम् ॥१०२॥
तपोविज्ञानसद्विद्याश्रया विष्णुस्वरूपिणः ।
पूजनीया ज्ञानिनश्च प्रिया विष्णोः सदैव ते ॥१०३॥
तस्माज् ज्ञानी सदा पूज्यस्तस्मै देयं फलाप्तये ।
पूज्यात्पूज्यतरः सोपि स्वर्गमोक्षप्रदो भवेत् ॥१०४॥
न जलं वै मया दत्तं साधवो वा न सेविताः ।
तेन मे दुर्गतिश्चेयं जाता स्वर्गे गतेऽपि वै ॥१०५॥
एतच्छ्रुत्वा वेंकटाद्रेस्तीर्थस्नानफलं मुनिः ।
गोधायै दत्तवान् सा चाऽप्येकदिवसपुण्यतः ॥१०६॥
दिव्यरूपधरो दिव्यविमानवरसंस्थितः ।
स्तुत्वा ययौ स्वर्गलोकं जलदानफलान्वितः ॥१०७॥

जलं स्वर्गे ततः प्राप तस्माज्जलादिदानकम् ।
कर्तव्यमेव सद्भक्त्या मानवैः सततं भुवि ॥१०८॥
अथ कालान्तरे सोऽभूत् ककुत्स्थाख्यो महीपतिः ।
सप्तद्वीपपतिर्भूत्वा विष्णोः सायुज्यमाप्तवान् ॥१०९॥
इतिते कथितं लक्ष्मि ! पात्रमाहात्म्यमुत्तमम् ।
जलदानादिकं चापि श्रवणाच्चापि तत्फलम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वेंकटाद्रौ तोण्डमान्नामराज्ञः, धर्मगुप्तराज्ञः ऋक्षविश्वासघातिनः, सुमतिनामकविप्रस्य रामकृष्णर्षेः, हेमांगस्य च मुक्तिरित्यादिनिरूपणनामा द्व्यधिकचतुश्शततमोऽध्यायः ॥४०२॥

श्रीनारायण उवाच—

श्रीर्यत्रांशस्वरूपेण सीताछायास्वरूपिणी ।
वेदवती स्वयं लक्ष्मीस्वरूपाऽऽविर्बभूव या ॥ १ ॥
तत्क्षेत्रस्य सुमाहात्म्यं केन वक्तुं हि शक्यते ।
वेंकटाद्रिर्ब्रह्मधामस्वरूपोऽस्ति यदाश्रयात् ॥ २ ॥
यत्र नारायणः कृष्णो राजते वै स्वयंप्रभुः ।
यत्र वराहभगवान् साक्षाद् भवति वै मुहुः ॥ ३ ॥
यत्र भक्ताश्च जायन्ते वैष्णवा लोकतारकाः ।
यद्भूमेः कंकरकणोऽप्यस्य लोकस्य तारकः ॥ ४ ॥
यद्भूमिस्थलवार्याद्यं महापातकनाशकम् ।
ब्रह्मधामप्रदं साक्षात् कृष्णस्वामिप्रदं शुभम् ॥ ५ ॥
यत्र पतिव्रता नार्यो वर्तन्ते मुक्ततां गताः ।
वैष्णव्यश्च महासाध्व्यः स्वामिसेवापरायणाः ॥ ६ ॥
पत्युर्भक्ताः कृष्णनारायणपत्न्यो हि ता मताः ।
राधालक्ष्मीसमाः सर्वाः पार्वतीमाणिकीसमाः ॥ ७ ॥
प्रभारमासमा जयाविजयादिसमा हि ताः ।
यैः पूजितो रमाद्याभिर्युतः कृष्णनारायणः ॥ ८॥
तैः स्वर्गं शाश्वतं मोक्षस्थानमावृत्तिवर्जितम् ।
प्राप्तमेव न सन्देहो ममानुग्रहणात् प्रिये ! ॥ ९ ॥
पृथिव्यां यानि तीर्थानि ब्रह्माण्डान्तर्गतानि च ।
वेंकटाद्रौ वसन्त्येव तानि कृष्णपदाम्बुजे ॥१०॥
तस्य देवस्य सेवार्थं मुनयश्चेश्वरास्तथा ।
देवाश्च ऋषयः सिद्धा योगिनो यतयस्तथा ॥११॥
साध्व्यश्च साधवो धीरा विज्ञा देवेश्वरादयः ।
सकुटुम्बा हि सेवार्थमायान्ति प्रतिवासरम् ॥१२॥
ब्रह्मणा कार्तिके वेंकटेशध्वजमहोत्सवः ।
कृतस्तदा सत्यलोकेश्वराश्चायान्ति वत्सरे ॥१३॥
स्वामिसरोवरे तस्य दक्षिणे वेंकटेश्वरे ।
तदा पुण्यं तीर्थकृतश्चासंख्यं जायते प्रिये ! ॥१४॥
दशवर्षैस्तु यत्पुण्यं क्रियते तु कृते युगे ।
त्रेतायामेकवर्षेण तत्पुण्यं साध्यते जनैः ॥१५॥
द्वापरे पञ्चमासेन कलौ तु दिनमात्रतः ।
तत्फलं कोटिगुणकं श्रीनिवासस्य दर्शने ॥१६॥
निमिषे निमिषे लक्ष्मि ! जायते नात्र संशयः ।
रजःकणेन च मुक्तिर्जायते कृष्णसन्निधौ ॥१७॥
श्रीनिवासं महादेवं वेंकटेशं नरायणम् ।
कीर्तयन्ति हृदा ये ते मुच्यन्ते भवपंजरात् ॥१८॥
किं दानैः किं व्रतैरन्यतीर्थैस्तपसा चाऽध्वरैः ।
किं काश्या किं च गयया प्रयागेनापि किं फलम् ॥१९॥
किं शंभुना विश्वसृजा किं शक्रेणाऽमरादिभिः ।
येन नारायणो वेंकटेशो दृष्टोऽतिभक्तितः ॥२०॥
वेंकटेश्वरदेवस्य भक्तिमष्टविधां चरेत् ।
तद्भक्तजनसत्कारपूजादिपरितोषणम् ॥२१॥
देवपूजनसन्तोषस्तदर्थे देहचेष्टितम् ।
तन्माहात्म्यकथाश्रुतिश्चरित्रश्रवणं तथा ॥२२॥
नृत्यप्रेमाञ्चितभावो वेंकटध्यानमित्यपि ।
वेंकटाद्रिनिवासोपजीवनं चेति मुक्तिदाः ॥२३॥
भक्तिरेवंविधा बोध्या वेदान्तश्रवणं विना ।
वेंकटो वेंकटेशश्च नारायणस्वरूपिणौ ॥२४॥
वेंकटं प्रार्थयेत्पुण्यनारायणपदप्रदम् ।
त्वां भवन्तमहं पद्भ्यामाक्रमेयं नगोत्तम ! ॥२५॥
त्वन्मूर्धनि कृतावासं श्रीकृष्णं दर्शयस्व मे ।
स्वामिपुष्करिणीतीर्थे स्नात्वाऽग्रे पापनाशने ॥२६॥
तीर्थे त्वाचमनं कृत्वा स्नायात् पापविनाशने ।
आसीच्छूद्रसमाचारो ब्राह्मणः सुमतिः पुरा ॥२७॥
मालिन्यदोषभावेन गृहीतो ब्रह्मरक्षसा ।
रुदन् भ्रमन् स्खलन्मूढः प्रलपन्प्रहसन्नसौ ॥२८॥
शश्वद्धाहेति च वदन् मेधां पुण्यां समत्यजत् ।
तत्पिता तं वेंकटाद्रौ नीत्वा स्नानमकारयत् ॥२९॥
दिनत्रयं जलपानं तीर्थे पापविनाशने ।
तेन तस्य सुतस्तत्र विमुक्तो ब्रह्मरक्षसा ॥३०॥
बहुकालं सुखी भूत्वा देहान्ते मुक्तिमाप्तवान् ।
जलपानप्रसंगेन तीर्थेन ब्रह्मराक्षसः ॥३१॥

अपि मुक्तिं ययौ लक्ष्मि ! मम योगेन तत्स्थले ।
एवं चान्योऽपि दारिद्र्ययुक्तो भद्रमतिर्द्विजः ॥३२॥
शास्त्रज्ञो धार्मिकश्चासीत् षट्पत्नीसेवितः खलु ।
तत्पुत्रवंशीयाश्चाभवन् क्षुधयाऽर्दिताः ॥३३॥
तान्पश्यन् स भद्रमतिर्विललापाऽऽकुलेन्द्रियः ।
धिग्जन्म भाग्यरहितं धनकीर्तिविवर्जितम् ॥३४॥
आतिथ्यवर्जितं जन्म धिग् ज्ञानाचारवर्जितम् ।
यत्नसौख्ययशोबन्धुख्यात्यादिरहितं च धिक् ॥३५॥
ऐश्वर्यवर्जितं बह्वपत्यवज्जन्म धिक् तथा ।
अहो गुणाः सौम्यता च विद्वत्ता सत्कुलादिकम् ॥३६॥
धनहीनस्य सर्वैतच्छ्रेष्ठमपि न शोभते ।
सुता दाराः पुत्रपुत्रा बान्धवा भ्रातरस्तथा ॥३७॥
शिष्या भृत्या मातरश्च त्यजन्ति धनवर्जितम् ।
चाण्डालो वा यतिर्वापि सधनः पूज्यते भुवि ॥३८॥
कुणपो गण्यते रिक्तः संभृतो गण्यते धनी ।
अगुणो गुणवान् मूर्खो पण्डितत्वेन गण्यते ॥३९॥
धर्मशून्यः सधर्मश्च गण्यते धनवान् जनैः ।
तस्माद् दरिद्रता चाशा दुःखा दुःखतरा मताः ॥४०॥
आशादासाः सदा क्लिष्टा दास्याशः सुखमेधते ।
आकिंचन्यमहाग्राहग्रस्तो मृत्युमुखान्तिकः ॥४१॥
अहो दुःखं कथं चेदं तर्त्तव्यं मादृशेन वै ।
इतिचिन्तयतस्तस्य भार्या कञ्चनसंज्ञिका ॥४२॥
पतिव्रता महाभाग्या सर्वदा पतिदेवता ।
सर्वसाधुगुणैर्युक्ता पतिं तं प्रत्यभाषत ॥४३॥
भगवन् सर्वधर्मज्ञ सर्वार्थ ज्ञानशेवधे ! ।
मम कान्त सदा पूज्य शृणु वदामि तत्कुरु ॥४४॥
सुवर्णमुखरीतीरे पावनो वेंकटाचलः ।
तत्र च परमं तीर्थं नाम्ना पापविनाशनम् ॥४५॥
स्नानमात्रेण पापानां दाहकं धनपुण्यदम् ।
सर्वदुःखप्रशमनं सर्वसम्पत्प्रदायकम् ॥४६॥
धर्मैश्वर्यप्रदं चैतन्नारदश्चाऽब्रवीत्पुरा ।
भूमिदानं चरेत् तत्र सर्वकामफलप्रदम् ॥४७॥
भूमिदानात्परं दानं न भूतं न भविष्यति ।
परं निर्वाणमाप्नोति भूमिदो नात्र संशयः ॥४८॥
स्वल्पामपि महीं दत्वा श्रीकृष्णाय द्विजाय च ।
साधवे चाग्निहोत्रार्थे ब्रह्मलोके महीयते ॥४९॥
भूमिदः सर्वदः प्रोक्तो मोक्षणं तेन वै भवेत् ।
दशहस्तां महीं दत्वा सर्वपापैः प्रमुच्यते ॥५०॥

सत्पात्रे भूप्रदाता वै सर्वदानफलं लभेत् ।
इक्षुगोधूमकेदारपूगखर्जूरशोभिता ॥५१॥
मही प्रदीयते येन स भवेद् वैष्णवोऽक्षरे ।
देवार्थे भूप्रदाता तु मुक्तो भवति शाश्वतः ॥५२॥
गंगातीरेऽश्वमेधानां फलभाग् द्रोणभूप्रदः ।
अश्वमेधसहस्राणां वाजपेयशतात्मनाम् ॥५३॥
गंगातीरकृतानां वै फलभाग् भारभूप्रदः ।
इतिभार्यावचः श्रुत्वा तदा भद्रमतिर्ययौ ॥५४॥
सुशालीनगरीं यत्र सुघोषं ब्राह्मणोत्तमम् ।
ययाचे पृथिवीं पञ्चहस्तां सोऽपि ददौ मुदा ॥५५॥
उवाचाऽपि कृतार्थोऽहं सफलं मम जन्म च ।
मत्कुलं पुण्यवज्जातं विप्रोऽसि यस्य याचकः ॥५६॥
पृथिवी वैष्णवी पुण्या पृथिवी विष्णुपालिता ।
दीयते शुभपात्राय प्रीयतां मे जनार्दनः ॥५७॥
सोऽपि भक्तो हरेस्तां च गृहीत्वा हि वसुन्धराम् ।
ततो ययौ वेंकटाद्रौ यत्र स्वामिसरोवरम् ॥५८॥
तत्र स्नात्वा ततः श्वेतवाराहं वसुधाधरम् ।
नत्वा ययौ वेंकटेशं श्रीनिवासं परेश्वरम् ॥५९॥
ततो ययौ परं तीर्थं पापनाशननामकम् ।
स्नात्वा ददौ श्रोत्रियाय भूदानं वैष्णवाय सः ॥६०॥
तत्कालं भगवाँस्तत्र साक्षादाविर्बभूव ह ।
भद्रमतिःस्तवं चक्रे नमो नारायणाय ते ॥६१॥
कारणाय प्रपालायाऽन्तकाय नायकाय च ।
पावकाय प्रसन्नाय स्मृद्धिदाय च ते नमः ॥६२॥
श्रीशाय श्रीकृष्णनारायणाय भूधराय च ।
लक्ष्मीशाय प्रभेशाय माणिकीशाय ते नमः ॥६३॥
पार्वतीशाय गोपालबालकाय च ते नमः ।
कंभरांकप्रजाताय सर्वज्ञाय च ते नमः ॥६४॥
चक्रपद्मादिचिह्नाय पुमुत्तमाय ते नमः ।
क्षीरसागरवासाय श्रीलक्ष्मीसेविताय च ॥६५॥
अभीष्टसुखदात्रे ते यज्ञवाराहरूपिणे ।
नमस्ते कमलाकान्तपद्माकान्ताय ते नमः ॥६६॥
पद्मिनीपतये भक्तदारिद्र्यनाशकाय ते ।
साधुरूपाय ते कृष्ण ! भूयो भूयो नमो नमः ॥६७॥
इति श्रुत्वा हरिः प्राह तुष्टोऽस्मि ब्राह्मणोत्तम ! ।
सर्वभोगसमायुक्तो देहान्ते मुक्तिमाप्नुहि ॥६८॥
एवं वरं प्रदायैव तत्रैवान्तरधीयत ।
पापनाशनतीर्थे स द्विजः स्नात्वा गृहं ययौ ॥६९॥

श्रेष्ठी स्वर्णधनधान्यसमृद्धिमानभवत् ततः ।
पृथ्वीदानप्रतापेन महेन्द्र इव चापरः ॥७०॥
अथाऽपरं महत्तीर्थं वर्तते मोक्षदं नृणाम् ।
आकाशगंगाविख्यातं तन्माहात्म्यं वदामि ते ॥७१॥
रामानुजो द्विजः कश्चिद् विष्णुध्यानपरायणः ।
तपस्तेपे स पंचाग्निमध्यस्थोऽष्टाक्षरं जपन् ॥७२॥
वृष्टौ जले स्थितश्चापि द्वन्द्वस्पर्शविवर्जितः ।
जीर्णपर्णाशनो जलाहारो वाय्वदनश्चिरम् ॥७३॥
तस्थौ तपसि श्रद्धालुस्तुष्टोऽस्य भक्तवत्सलः ।
प्रक्ष्यतामगात्तत्र कृष्णनारायणः स्वयम् ॥७४॥
स्वर्णभूषाञ्चितदेहो रमाराधादिसेवितः ।
विश्वक्सेनसुनन्दाद्यैः सहितः श्रीरमेश्वरः ॥७५॥
नारदादियुतश्चापि पीताम्बरधरः प्रभुः ।
सनकादिमहायोगिसेवितद्वयपार्श्वकः ॥७६॥
वेंकटेशं दयालुं तं तुष्टाव तापसो द्विजः ।
नमो रामाय चक्रादिधारिणे महते नमः ॥७७॥
नित्यशुद्धस्वरूपाय नमो भक्तार्तिहारिणे ।
परव्यूहविभवाधाऽर्चादिरूपाय ते नमः ॥७८॥
अन्तर्यामिस्वरूपात्मव्यापिने ते नमो नमः ।
श्रीकृष्णाय महाभूम्ने नारायणाय ते नमः ॥७९॥
नमो हिरण्यगर्भाय वैराजाय च वेधसे ।
सदाशिवाय कान्ताय विष्णवे ब्रह्मणे नमः ॥८०॥
ईश्वरेशायेश्वराय पुष्पवन्नेत्रिणे नमः ।
नामजात्यादिपाराय नामजात्यादिरूपिणे ॥८१॥
कांभरेयाय कृष्णाय गोपीमण्डलरासिने ।
गोपालजाय गोसेवास्निग्धाय ते नमो नमः ॥८२॥
वेदान्तन्यायवेद्याय भाष्याय भाष्यकारिणे ।
आगमान्तःसुगतये लोकरक्षाय ते नमः ॥८३॥
सौराष्ट्राऽऽविःस्वरूपाय रैवताचलवासिने ।
अश्वपट्टक्षितीशाय पुष्करारण्यशालिने ॥८४॥
काशेश्वराय रंगादिपूजिताय च ते नमः ।
इति स्तुत्वा श्रीनिवासं रामानुज इयाय शम् ॥८५॥
वेंकटेशः समालिंग्य रामानुजमुवाच ह ।
स्तोत्रेण तपसा तुष्टो वरं वृणोतु सत्वरम् ॥८६॥
रामानुजस्तदा प्राह श्रीनिवास हरे प्रभो ।
त्वद्दर्शनात् कृतार्थोऽस्मि किं मेऽद्य दर्शनात् परम् ॥८७॥
देवाः पितरो मुनयो नैष्ठिकाः कर्मठाश्च यम् ।
योगिनो ज्ञानकुशलाः न पश्यन्ति विदन्ति न ॥८८॥
वेद्मि पश्यामि तं चाद्य किमस्मादधिकं नु मे ।
एतेन तु कृतार्थोऽस्मि मुक्तिबीजेन सर्वथा ॥८९॥
त्वत्पादपद्मयुगले निश्चला भक्तिरस्तु मे ।
इत्याश्रुत्य हरिः प्राह मयि भक्तिर्दृढाऽस्तु ते ॥९०॥
अत्र ते तपसः स्थाने समागत्य तु ये जनाः ।
स्नास्यन्त्याकाशगंगायां यास्यन्ति धाम मे परम् ॥९१॥
त्वं च प्रारब्धदेहान्ते मत्स्वरूपमवास्यसि ।
वियद्गंगास्नातकास्तु सर्वे भागवतोत्तमाः ॥९२॥
लक्ष्म भागवतानां त्वं शृणु भागवतोत्तम ! ।
भगवन्मयचर्या ये कर्मणा मनसा गिरा ॥९३॥
सर्वकार्याणि कृष्णार्थे कुर्वन्तः कृष्णचिन्तकाः ।
ज्ञानिनो निःस्पृहाः शान्तास्ते वै भागवतोत्तमाः ॥९४॥
सर्वेषु कृष्णद्रष्टारः कृष्णस्य सत्कथादराः ।
कृष्णपादाम्बुजभक्ता ये ते भागवतोत्तमाः ॥९५॥
मातापित्रोः कृष्णतन्वोः शुश्रूषादिपरायणाः ।
देवार्चनप्रपूजादिपरामोदभराश्च ये ॥९६॥
साधुसेवापराश्चापि साध्वीमानप्रदाश्च ये ।
परेशवृत्तयो ये ते महाभागवतोत्तमाः ॥९७॥
आत्मवत्सर्वभूतानां दृग्वद्भागवतोत्तमाः ।
शास्त्रज्ञा धर्मधर्तारः सत्यवाचः सदुत्तमाः ॥९८॥
कृष्णकथारताः कथावक्तरि स्नेहभावनाः ।
तीर्थप्रियाः कामधेनुसेवका वै सदुत्तमाः ॥९९॥
अन्योदये प्रसन्नाश्च कृष्णनामपरायणाः ।
कृष्णार्थं जलखातारो ये ते भागवतोत्तमाः ॥१००॥
देवालयप्रकर्तारो देवगायत्रिकाजपाः ।
भक्तिहर्षा हरौ मग्ना ये ते भागवतोत्तमाः ॥१०१॥
तुलसीपूजका वृन्दां नमन्ति तुलसीकराः ।
तुलसीमालिका याश्च तुलसीचन्दनाञ्चिताः ॥१०२॥
तुलसीमृत्तिकादेहास्ते वै भागवतोत्तमाः ।
वेदादिषु हरेः कृष्णनारायणस्य दर्शकाः ॥१०३॥
अतिथ्यादौ कृष्णनारायणस्यैव सुचिन्तकाः ।
ज्ञाततत्त्वेषु वै ब्रह्मबोधकाः साधुवृत्तयः ॥१०४॥
सर्वगुणादिसद्ग्राहास्ते वै भागवतोत्तमाः ।
एकादश्यादिव्रतिनः कृष्णार्थकर्मकारिणः ॥१०५॥
राधां लक्ष्मीं रमां श्रीं पार्वतीं प्रभां च माणिकीम् ।
ममांशां योषितं दृष्ट्वा नमन्ति वैष्णवीं तु ये ॥१०६॥
मत्स्वरूपां मयाऽधिष्ठितां पश्यन्ति हृदा सदा ।
बाले च बालिकायां च ते वै भागवतोत्तमाः ॥१०७॥

तथा नृषु प्रपश्यन्ति याः कृष्णं मां नरायणम् ।
ता वै सत्यो महाभागवत्यः प्रोक्ता मयाऽनघ ॥१०८॥
नराः सर्वे कृष्णरूपा नार्यो राधारमात्मिकाः ।
इति भागवतज्ञाना ये ते भागवतोत्तमाः ॥१०९॥
संक्षेपात्तु कथयामि मदर्थे सर्वथा स्थिताः ।
नरा नार्यः पशवोऽपि सर्वे भागवतोत्तमाः ॥११०॥
रामानुज ! त्वमेवासि तथा भागवतोत्तमः ।
प्रसन्नोऽस्मि त्वयि ध्रौव्यभक्तिस्थितेः सदा प्रिय ! ॥१११॥
तीर्थमाकाशगंगाख्यं तारकं भवपारकृत् ।
स्नातॄणां मोक्षदं चास्ति भुक्तिमुक्तिफलप्रदम् ॥११२॥
इत्युक्त्वाऽन्तर्दधे कृष्णनारायणः प्रभुस्तदा ।
पठनाच्छ्रवणाच्चास्य भक्तिमोक्षश्च हस्तगः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये भगवत्पातिव्रत्यपालकानां सुमतिभद्रमतिरामानुजानां तीर्थोत्तमे मोक्षणमित्यादिनिरूपणनामा त्र्यधिकचतुःशततमोऽध्यायः ॥४०३॥

श्रीनारायण उवाच--

शृणु लक्ष्मि ! दानपात्रं सत्तीर्थं कथयामि ते ।
नारायणः परं तीर्थं देयमस्मै तु शार्ङ्गिणे ॥ १ ॥
साधवे धर्मशीलाय विद्याजुषे महात्मने ।
त्यागिने ब्रह्मवेत्रे च दत्तं भवति चाक्षयम् ॥ २ ॥
साध्व्यै भोगप्रसक्तायै हरिकृष्णस्य योषिते ।
नारायण्यै महालक्ष्म्यै दत्तं भवति शाश्वतम् ॥ ३ ॥
सत्कर्मनिरतायै च सेविकायै हरेस्तथा ।
कृष्णनारायणपत्न्यै सत्यै दत्तं तु शाश्वतम् ॥ ४ ॥
अनाथायै च भक्तायै योगिन्यै दत्तमक्षयम् ।
भक्ताय ब्रह्मरूपाय ब्रह्मणे वेदवेदिने ॥ ५ ॥
कृष्णनारायणमूर्तिरूपाय देशिकाय च ।
विप्राय देवशिष्याय तथा सत्कर्मकारिणे ॥ ६ ॥
अनपेक्षितशान्ताय दत्तं भवति चाऽक्षयम् ।
गवे बालाय कन्यायै पितृभ्यां दत्तमक्षयम् ॥ ७ ॥
पत्न्यै स्वस्रे दुहित्रे च दौहित्राय सुकर्मिणे ।
स्वस्रुपुत्राय शिष्याय दत्तं भवति चाक्षयम् ॥ ८ ॥
गुरवे गुरुपत्न्यै च गुरुपुत्राय वेदिने ।
धर्मप्रचारकर्त्रे च दत्तं भवति चाक्षयम् ॥ ९ ॥
व्याख्यात्रे ज्ञानदात्रे च शास्त्रिणे विदुषे तथा ।
विद्याधिकारिणे विद्यापात्रे दत्तं हि चाक्षयम् ॥१०॥
वृत्तिशून्याय वै देयं दरिद्राय कुटुम्बिने ।
देवस्य पूजकायाऽपि परोपकारकारिणे ॥११॥
अध्यापकाय दातव्यं दातव्यं देश हेतवे ।
अभ्युदयार्थमेवापि दातव्यं रक्षकाय च ॥१२॥
नारायणस्य सामीप्ये दत्तं भवति चाक्षयम् ।
वैष्णवाय प्रदातव्यं येन तुष्टो भवामि वै ॥१३॥
दंभाचाराय चौराय विद्विषे निन्दकाय च ।
परद्रव्यपरदारपरे दत्तं तु निष्फलम् ॥१४॥
कृतघ्नस्य च मूर्खस्याऽसूयाविष्टहृदस्तथा ।
हिंसकस्य विक्रयिणो दत्तं भवति निष्फलम् ॥१५॥
परोपतापकर्तुश्च नास्तिकस्य जडस्य च ।
खलस्य छलधर्मस्य मर्यादाभेदकस्य च ॥१६॥
पाखण्डिनः कितवस्य शठस्याऽधर्मवर्तिनः ।
विवादशालिनश्चण्डरूपस्यापि तु निष्फलम् ॥१७॥
तीर्थे चक्रपुष्करिणीतीरे देयं विशेषतः ।
दाने पुण्यतमं तीर्थं चक्रतीर्थमनुत्तमम् ॥१८॥
पुरा श्रीवत्सगोत्रीयः पद्मनाभो द्विजर्षभः ।
चक्रपुष्करिणीतीरे तपोऽतप्यत दारुणम् ॥१९॥
वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोऽभवत् ।
कंचित्कालं जलाहारो वाय्वाहारः कियत्समाः ॥२०॥
एवं वै द्वादशे वर्षे तुष्टः कृष्णनरायणः ।
प्रत्यक्षतामगात्तस्य श्रीराधाकमलापतिः ॥२१॥
दृष्ट्वा कृष्णं श्रीनिवासं स्तोतुं समुपचक्रमे ।
गोपालकृष्णरूपाय कांभरेयाय विष्णवे ॥२२॥
नमः शेषाद्रिवासाय वेंकटेशाय ते नमः ।
नारायणाद्रिवासाय श्रीनिवासाय ते नमः ॥२३॥
भक्तिप्रियाय लक्ष्मीशपद्मिनीशाय ते नमः ।
इति स्तुतो घनश्यामः श्रीनिवासस्तुतोष ह ॥२४॥
पद्मनाभं द्विजं चाह चक्रतीर्थेऽत्र सर्वदा ।
आकल्पं पूजयँस्त्वं मां वस भक्तोत्तम प्रिय ! ॥२५॥
इत्युक्त्वा भगवान् कृष्णस्तत्रैवाऽन्तरधीयत ।
पद्मनाभोऽवसत् तत्र कदाचित्तं तु भक्षितुम् ॥२६॥
राक्षसश्चागतस्तत्र जग्राह ब्राह्मणं तदा ।
प्रचुक्रोश चक्रपाणे ! रक्ष रक्षेति वै मुहुः ॥२७॥
वेंकटेश हरे कृष्ण कृष्णनारायण ! प्रभो ! ।
कांभरेय ! कृपानाथ रक्ष मां रक्षसा धृतम् ॥२८॥
इति स्तुवतस्तस्यैव रक्षार्थं चक्रधारकः ।
स्वचक्रं प्रेषयामास चक्रपुष्करिणीतटम् ॥२९॥

सुदर्शनं महाज्वालं दृष्ट्वा रक्षः प्रदुद्रुवे ।
तस्य शिरश्चकर्तेदं विप्रस्तुष्टाव चक्रकम् ॥३०॥
विष्णोश्चक्र ! नमस्तेऽस्तु भक्तरक्षणदीक्षित ! ।
कृष्णनारायणहस्तपद्मभूषण ! ते नमः ॥३१॥
सर्वदाऽत्र प्रतिष्ठ त्वं रक्षकं भव मत्कृते ।
नारायणस्वरूपाय मोक्षदाय नमो नमः ॥३२॥
इत्यर्थितं पद्मनाभभक्तं प्राह सुदर्शनम् ।
चक्रतीर्थं मम नाम्ना बोध्यं भक्त ! त्वया कृतम् ॥३३॥
चक्रतीर्थे सततं संवसामि तव वाञ्छया ।
इतः परं जनानां न पीडा स्याद् राक्षसादिजा ॥३४॥
स्नातारोऽत्र धूतपापा यास्यन्ति श्रीहरेः पदम् ।
इत्युक्त्वा तां चक्रपुष्करिणीं प्राविशदुज्ज्वलम् ॥३५॥
इत्येवं मुक्तिदं भक्तपातिव्रत्यप्रभावतः ।
तीर्थं चक्राश्रितं जातं लक्ष्मि ! पापविनाशनम् ॥३६॥
शृणु यथाऽभवत् सोऽपि राक्षसो यो मृतोऽधुना ।
पुरा श्रीरंगपुर्यां वै वशिष्ठाद्यास्तु वैष्णवाः ॥३७॥
उपासाञ्चक्रिरे श्रीरंगनाथं मुक्तिकांक्षया ।
कदाचित् तत्र गन्धर्वः सुन्दराख्यः समाययौ ॥३८॥
सलिले युवतीभिर्विवस्त्राभिः स्नानमाचरत् ।
क्रीडां चकार विविधां वशिष्ठस्तावदेव हि ॥३९॥
स्नातुं गतो ददर्शैनं नग्नं शशाप निस्त्रपम् ।
मां दृष्ट्वापि न वै वासो धत्से तस्माद्धि सुन्दर ! ॥४०॥
याहि राक्षसतां सद्यस्ततोऽसौ राक्षसोऽभवत् ।
युवत्यः श्रीवशिष्ठं संनत्वा क्षमां ययाचिरे ॥४१॥
दयासिन्धो विलोक्याऽस्मान् कोपं मा कर्तुमर्हसि ।
पतिरेव हि नारीणां भूषणं परमं मतम् ॥४२॥
पतिहीना तु या नारी शतपुत्रापि नो शुभा ।
विधवेत्यमंगला सा ततो जन्म निरर्थकम् ॥४३॥
एकोऽपराधः क्षन्तव्यः प्रसीदाऽस्मत्प्रिये प्रभो ।
एवं स्तुतो वशिष्ठस्ताः प्राह शापो न मेऽफलः ॥४४॥
षोडशाब्दावधौ रक्षः पश्चाद् गन्धर्वतां व्रजेत् ।
चक्रतीर्थे पद्मनाभविप्रयोगे विमोक्ष्यति ॥४५॥
सुदर्शनेन चक्रेण मुक्तिरस्य भविष्यति ।
पतिर्वस्त्रिदिवं भूयो रमयिष्यति सुन्दरः ॥४६॥
इत्युक्त्वा स वशिष्ठो वै ययौ श्रीरंगमन्दिरम् ।
सुन्दरो राक्षसो जातो महादंष्ट्रो भयानकः ॥४७॥
तं दृष्ट्वा भयसंविग्ना जग्मू रामास्त्रिविष्टपम् ।
भ्रमतो रक्षसश्चाद्रौ षोडशाब्दानि निर्ययुः ॥४८॥
ततो ब्राह्मणयोगेन सुदर्शनेन मोचितः ।
सुन्दरः सुन्दरो जातो विमानेन दिवं ययौ ॥४९॥
चक्रं तत्रोषितं शश्वच्चक्रतीर्थमतोऽभवत् ।
यच्छ्रुत्वा पापजालानां नाशो भवति वै ध्रुवम् ॥५०॥
जाबालितीर्थमाहात्म्यं शृणु लक्ष्मि ! वदामि ते ।
दुराचाराभिधो विप्रः कावेरीतीरवासकृत् ॥५१॥
सदाऽभूत् पापिसंसर्गी नष्टब्राह्मण्यसत्क्रियः ।
ग्रस्तोऽभवद्भीषणेन वेतालेन बलीयसा ॥५२॥
बहुकालोत्तरं सोऽयं भ्रमन् वेंकटपर्वतम् ।
न्यमज्जत् तु जले तावद् वेतालेन विमोचितः ॥५३॥
यत्र जलेऽभवन्मुक्तस्तत्र जाबालिको मुनिः ।
अवसत् तन्महत्तीर्थं जाबालितीर्थमुच्यते ॥५४॥
वेतालोऽप्यभवत् पूर्वं ब्राह्मणो नास्तिको महान् ।
निन्दको देवसाधूनां तेन वेतालतां गतः ॥५५॥
सोऽपि तीर्थप्रभावेण पुनर्मानुष्यमेष्यति ।
इति ते कथितं लक्ष्मि ! जाबालितीर्थमुत्तमम् ॥५६॥
तुम्बुरुतीर्थमत्रापि कथयामि शृणु प्रिये ! ।
पापिनो मनुजाः सर्वे ह्यमासु स्नान्ति वै मुहुः ॥५७॥
विसृज्य पापजालानि पूता भवन्ति ते जनाः ।
अस्माकं पापजालानि कथं नश्यन्ति सर्वतः ॥५८॥
एवमालोच्य तीर्थानि गतानि वेंकटाचलम् ।
तत्र स्वामिपुष्करिणीजले सस्नुश्च तुम्बुरौ ॥५९॥
तीर्थे सस्नुरुत्तराफाल्गुन्यां शुक्ले तु पर्वणि ।
तेषां पापानि नष्टानि ययुस्तानि यथालयम् ॥६०॥
महापापरतं क्रूरं दानहीनं कुलान्तकम् ।
पशुघ्नं द्रोहकर्तारं पिशुनं चानृतं जनम् ॥६१॥
मित्रद्रुहं कृतघ्नं च भ्रूणहं परदारगम् ।
परार्थसूचकं स्वामिद्रोहं देवपराङ्मुखम् ॥६२॥
शठं च वञ्चकं धर्मविघ्नं कुलविभेदकम् ।
सुपल्लवफलोपेतवृक्षोद्यानविनाशकम् ॥६३॥
अग्निदं गरदं चापि पापं विश्वासघातकम् ।
गुरुद्वेषकरं दुष्टं दम्पत्योर्विरसावहम् ॥६४॥
एतान्सर्वांश्च वै लक्ष्मि ! तुम्बुरुतीर्थमुत्तमम् ।
पुनाति स्नानपानाद्यैः स्वर्गं मोक्षं ददाति च ॥६५॥
तुम्बुरुर्नामगन्धर्वो भार्यामुवाच वै पुरा ।
माघत्रये मया साकं स्नानं कुरु मलापहम् ॥६६॥
माघमास्युदिते सूर्ये गोमयालेपनं कुरु ।
रंगवल्ल्यादिभिः शुभ्रपद्मधातुकस्वस्तिकैः ॥६७॥

कृष्णनारायणपूजास्थलं शुद्धं कुरु प्रिये ! ।
दीपं कुरु घृतवर्त्तिप्रकाशितं सुगन्धकम् ॥६८॥
देहि पाकं शुचिर्भूत्वा कृष्णनारायणाय च ।
प्रदक्षिणानमस्कारैर्मया सह प्रसेवय ॥६९॥
देवसेवां कुरु नित्यं कथाश्रवणमाचर ।
नित्यं कृष्णप्रसादान्नजलं गृहाण वैष्णवि ! ॥७०॥
कृष्णनारायण विष्णो काम्भरेय जनार्दन ।
गोपालकृष्णगोविन्द रमाराधापते प्रभो ॥७१॥
श्रीलक्ष्मीपार्वतीनाथ माणिकोश प्रभापते ! ।
अन्तर्यामिन् मुक्तिदातृ चेति कीर्तय सर्वदा ॥७२॥
क्रोधमात्सर्यलोभादींस्त्यक्त्वा व्रतं समाचर ।
तेनैव जायते मुक्तिर्विष्णुलोको ह्यवाप्यते ॥७३॥
इति भर्तुर्वचः श्रुत्वा क्रोधं कृत्वा तु भामिनी ।
प्रत्युवाच तदा कान्तं शीतपीडामये खलु ॥७४॥
प्राणहारिणि माघे वै किं स्नानं तेऽतिसम्मतम् ।
न करोमि पते ! स्नानं प्रिये चेद् रक्षकोऽत्र मे ॥७५॥
धर्मस्तावज्जनैः कार्यो यावच्छक्यो भवेन्मृदुः ।
दुःखदो नाशकृद्धर्मो न कार्यो न करोमि तम् ॥७६॥
न च कर्माणि विष्ण्वर्थे शक्यानि च प्रगे मया ।
तुम्बुरुरित्युक्तवतीं शशापाऽप्रियवादिनीम् ॥७७॥
वेंकटाद्रौ घोणतीर्थे पिप्पलद्रुमकोटरे ।
तत्राम्बुरहिते मूढे मण्डूकी भव केवला ॥७८॥
श्रुत्वा साऽप्रार्थयत् कान्तं विशापमवदत् पतिः ।
कदाचिन्मुनिभिः सार्धमगस्त्यस्ते समीपतः ॥७९॥
स्थित्वा घोणस्य माहात्म्यं कथयिष्यति वै तदा ।
श्रुत्वा त्वं दूरतो मण्डूकीदेहाद्वै विमोक्ष्यसे ॥८०॥
पुनरागत्य मे स्थानं मया साकं रमिष्यसि ।
इत्युक्त्वा विरराामाऽथ धर्मपत्नी पतिव्रता ॥८१॥
भर्तृशापान्महाघोरां मण्डूकतनुमाश्रिता ।
बहुवर्षे गते कालेऽगस्त्यस्तत्र समाययौ ॥८२॥
स्वामिपुष्करिणीं स्नात्वा नत्वा वराहमीश्वरम् ।
वेंकटेशं श्रीनिवासं दृष्ट्वा पिप्पलसन्निधौ ॥८३॥
आगत्य घोणतीर्थस्य माहात्म्यमवदज्जनान् ।
मण्डूकी सा तदा मुक्ता पूर्वरूपवती बभौ ॥८४॥
उवाच मां दयया रक्ष पतिवाक्यविरोधिनीम् ।
पतिशापेन मण्डूकी जाताऽहं मोचिता त्वया ॥८५॥
अगस्त्यस्तां तदा प्राह पातिव्रत्यवृषान् शृणु ।
तव भर्ता सुधर्मज्ञस्त्वां शशाप ऋतं हि तत् ॥८६॥
पतिवाक्यविरोधिन्यां शापो युक्तो हि सर्वथा ।
पतिवाक्यमनादृत्य यथेष्टं वर्तते तु या ॥८७॥
सा पत्नी नरके कष्टे पतत्याकल्पमेव यत् ।
नार्या वाक्यं स्वपत्युर्वै नोल्लंघ्यं हि कदाचन ॥८८॥
पातिव्रत्येन पुण्येन पतिशुश्रूषणेन च ।
स्त्रियो विष्णुपदं यान्ति न त्वान्यैरपि सुव्रतैः ॥८९॥
पतिर्माता पतिर्विष्णुः पतिर्ब्रह्मा पतिः शिवः ।
पतिर्गुरुः पतिस्तीर्थं पतिर्मोक्षः परो मतः ॥९०॥
पतिवाक्यमपाकृत्य या तु सुकृतकारिणी ।
न सा फलमवाप्नोति नैव शुद्धा भवेत्तथा ॥९१॥
गुर्वाज्ञावर्तमानाऽपि पत्याज्ञां न करोति चेत् ।
नैव पूता नवा पुण्या भवते सा कदाचन ॥९२॥
पत्याज्ञया विदध्यात् सा व्रतं धर्मादिकं तथा ।
पतिबुद्ध्या प्रकुर्याच्च हरेः सेवादिकं सदा ॥९३॥
पतिपादाब्जतीर्थेन या स्नाता सा हरिप्रिया ।
सा स्नाता सर्वतीर्थेषु गंगादिषु न संशयः ॥९४॥
त्वया भुक्तं फलं दुःखं पुनर्जाताऽसि पूर्ववत् ।
गच्छ त्वं तुम्बुरोर्वासं सुखिनी भव सर्वथा ॥९५॥
तुम्बुरुतीर्थमेवैतत् तेन यात प्रसिद्धताम् ।
अत्र स्नान्ति पौर्णमास्यां ते यज्ञफलभागिनः ॥९६॥
दिने दिने कपिलागोसहस्रदानजं फलम् ।
दिने दिने रत्नकोटिसहस्रदानजं फलम् ॥९७॥
दिने हस्तिसहस्रदानस्याऽश्वाऽयुतदानजम् ।
फलं वै प्राप्यते सुभ्रु घोणतीर्थाऽवगाहनात् ॥९८॥
कन्याकोटिप्रदानस्य फलं घोणाऽवगाहनात् ।
कुरुक्षेत्रे सुवर्णानां सहस्रस्य प्रदानजम् ॥९९॥
यत्फलं तदवाप्नोति तुम्बुरुतीर्थगाहनात् ।
गुर्वर्थे च सतामर्थे स्वाम्यर्थे यस्त्यजेत्तनुम् ॥१००॥
पतिव्रतार्थे साध्व्यर्थे हर्यर्थे यस्त्यजेत् तनुम् ।
तत्फलं समवाप्नोति घोणतीर्थाऽवगाहनात् ॥१०१॥
आपन्नार्तिहराणां च तीर्थसेवापरात्मनाम् ।
सत्यव्रतानां यत्पुण्यं घोणतीर्थाद्धि यद्भवेत् ॥१०२॥
गंगायां नर्मदायां च सरयूचन्द्रभागयोः ।
स्वर्णवत्यां यमुनायां यत्फलं तद्भवेदिह ॥१०३॥

इतिश्रुत्वा जलं पीत्वा ययौ सा तुम्बुरुगृहम् ।
इतिते कथितं लक्ष्मि ! तुम्बुरुतीर्थमुत्तमम् ॥१०४॥
यच्छ्रुत्वाऽपि जनो यायाद् वाजपेयफलं महत् ।
विष्णुलोकं परं स्वर्गं तथा वै शाश्वतं पदम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये दानपात्रं, चक्रतीर्थे जाबालितीर्थे च पतिव्रतामाहात्म्यं, तीर्थबलं चेत्यादिनिरूपणनामा चतुरधिकचतुःशततमोऽध्यायः ॥ ४०४ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! वेंकटाद्रौ मुख्यतीर्थानि षट् तथा ।
स्वामिपुष्करिणी चैव वियद्गंगा ततोऽधिका ॥ १ ॥
पापविनाशनं चापि पाण्डुतीर्थं तदुत्तमम् ।
कुमारधारिकातीर्थं तुम्बुरुतीर्थमित्यपि ॥ २ ॥
कुंभलग्ने पौर्णमास्यां मघायोगो यदा भवेत् ।
कुमारधारिकां यान्ति तीर्थानि सर्वतो दिशः ॥ ३ ॥
राजसूयफलं स्नानान्मुक्तिर्विष्णोः पदे भवेत् ।
अन्नदानं प्रदातव्यं शाश्वतं फलमाप्यते ॥ ४ ॥
उत्तराफाल्गुनीयुक्तधावल्यदलपर्वसु ।
मीनसूर्ये तु तीर्थानि तुम्बुरुं यान्ति सर्वतः ॥ ५ ॥
अपराह्ने स्नानमात्रात्पुनर्जन्म न विद्यते ।
यज्ञोपवीतकं ब्रह्मव्रतं विवाहलग्नकम् ॥ ६ ॥
द्रव्यं दत्वा कारयेद् यस्तस्य पुण्यमनन्तकम् ।
मेषसूर्ये च चित्रायां पूर्णिमायां हि सर्वतः ॥ ७ ॥
समायान्ति वियद्गंगां तीर्थानि पावनानि वै ।
तत्र स्नात्वा शतक्रतुपुण्यं प्राप्नोति मानवः ॥ ८ ॥
स्वर्णदानं चान्नदानं कन्यादानं विशेषतः ।
प्रदातव्यं परं स्वर्गमिच्छता गृहमिच्छता ॥ ९ ॥
द्वादश्यां वृषभार्के च व्रतादौ हरिवासरे ।
भौमयुक्ते पाण्डुतीर्थं गंगायां यान्ति सर्वतः ॥१०॥
स्नात्वा च गां दोग्ध्रीं दत्वा मुच्यते पापकोटिभिः ।
अश्विन्यर्के शुक्लपक्षे सप्तम्यां सूर्यवासरे ॥११॥
उत्तराषाढयुक्सूर्ये तूत्तराभाद्रशालिनि ।
द्वादशीदिवसे चापि तीर्थं पापविनाशनम् ॥१२॥
शालग्रामशिलादानं कृत्वा स्नात्वा प्रमुच्यते ।
धनुर्मासे सिते द्वादशिकायामरुणोदये ॥१३॥
स्वामिपुष्करिणीतीर्थे तीर्थान्यायान्ति सर्वतः ।
यस्य जन्मसहस्रेषु पुण्यमेवाऽर्जितं भवेत् ॥१४॥
तस्य स्नानं भवेत् तत्र नाऽन्यस्याऽसुकृतस्य वै ।
यथाशक्तिप्रदातव्यं दानं स्नात्वा विमुच्यते ॥१५॥
शालग्रामं कामधेनुं दद्यात् तत्र विशेषतः ।
लक्ष्मीनारायणसंहिताया दानं समाचरेत् ॥१६॥
सौराष्ट्रेऽस्याः प्रदानेन गोलोकं चाप्नुयाद् ध्रुवम् ।
दक्षिणेऽस्याः प्रदानेन वैराजस्थानमाप्नुयात् ॥१७॥
प्राग्ज्योतिषि प्रदानेन सूर्यलोकमवाप्नुयात् ।
जालंधरे प्रदानेन वारुणं लोकमाप्नुयात् ॥१८॥
उत्तरकुरुष्वस्यास्तु दानेन ब्रह्मतां व्रजेत् ।
सप्तद्वीपेषु दानेन सप्तद्वीपपतिर्भवेत् ॥१९॥
ये श्रृण्वन्ति कथां विष्णोः सदा भुवनपावनीम् ।
जीवन्मुक्तास्तु ते भक्ता महाभागवता मताः ॥२०॥
मुहूर्तं वा तदर्धं वा क्षणं वा वेंकटाचले ।
लक्ष्मीनारायणसंहिताया अध्यायमेव वा ॥२१॥
यः श्रृणोति नरो भक्त्या मोक्षं शाश्वतमाप्नुयात् ।
यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलम् ॥२२॥
सकृत् संहिताश्रवणात् तत्फलं विन्दते जनः ।
संहिताश्रवणं कृष्णनारायणस्य कीर्तनम् ॥२३॥
उभे त्वेव मनुष्याणां कल्पद्रुपुण्यदायके ।
अमृतपानकृल्लोके स्यादेकश्चाजरामरः ॥२४॥
कृष्णकथाऽमृतपानात् कुलं स्यादजरामरम् ।
कृष्णनारायणश्चाहं वसामि वक्तरि सदा ॥२५॥
मद्रूपं वाचकं विद्यान्मन्मूर्तिं बोधदायिनीम् ।
वक्ताऽहं भगवान् साक्षात् श्रोत्री लक्ष्मीर्मम प्रिया ॥२६॥
इति मत्वाऽर्चयेन्नित्यं श्रोतारं वाचकं तथा ।
मत्प्रवेशं विना कः स्याच्छक्तः श्रोता च वाचकः ॥२७॥
श्रोतुं वक्तुं च वा लक्ष्मि ! दिव्याख्यानान्तरंगकम् ।
यत्रेयं संहिता लक्ष्मि ! तत्र दिव्यस्वरूपवान् ॥२८॥
अवश्यमुपतिष्ठामि राधालक्ष्म्यादिसंवृतः ।
पार्षदैश्च समायुक्तः कथापात्रैर्युतस्तदा ॥२९॥
दिव्यदृशः प्रपश्यन्ति न तु चर्मदृशो जनाः ।
कथायां विद्यमानायां प्राणाँस्त्यजन्ति तानहम् ॥३०॥
नयामि दिव्ययानेन वैकुण्ठं चाऽक्षरं तथा ।
गोलोकं चामृतं धाम यथा भक्तस्य वाञ्छितम् ॥३१॥
बालो युवाऽथवा वृद्धो दरिद्रो दुर्भगोऽपि वा ।
कथावक्ता सदा पूज्यः परमात्मस्वरूपकः ॥३२॥
संहिताज्ञे क्षुद्रबुद्धिं न कुर्वीत कदाचन ।
यस्याननोद्भवा वाणी मोक्षदा स्वर्गदा नृणाम् ॥३३॥

अनन्तजन्मक्षेत्रेषु भूत्वा भूत्वाऽतिनश्यताम् ।
समर्पयति जीवेभ्योऽभयदानं कथाव्रती ॥३४॥
व्यासो ज्ञानप्रदो व्यासासनस्थात् कः परो गुरुः ।
आसमाप्तेः कथायाश्च न नमेत् कस्यचित् गुरुः ॥३५॥
राजा सम्राट् चक्रवर्ती महाचार्योऽपि देशिकः ।
देवो वा सर्व एवैते निम्ना व्यासात्प्रकीर्तिताः ॥३६॥
एतेषामासनाद् व्यासासनं तुङ्गं सदा मतम् ।
एतेषामागमे व्यासो नोत्तिष्ठेत् स्वासनात् क्वचित् ॥३७॥
देवालये चतुष्कादौ. पञ्चश्रवणभूस्थले ।
गृहे तीर्थे शुभे क्षेत्रे तीर्थे पुण्यकथां वदेत् ॥३८॥
श्रद्धालवो भक्तिमन्तो वाग्यताः स्थिरमानसाः ।
अव्यग्राश्चास्तिका दान्ताः श्रोतारः पुण्यभाजनाः ॥३९॥
कथां कथाप्रवक्तारं सामग्रीभिः प्रपूजयेत् ।
तेषां पुण्यफलं शश्वल्लक्ष्मीश्रीधीप्रदं भवेत् ॥४०॥
अप्रदाय तु ये लोभाकृष्टाः शृण्वन्ति संहिताम् ।
तेषां पुण्यं फलं न स्याद् दारिद्र्यं स्याज्जनौ जनौ ॥४१॥
कथायां विघ्नकर्तारो वावदूका विडम्बकाः ।
अन्यगाथाप्रकर्तारो बालक्रीडादिबुद्धयः ॥४२॥
कथाध्यानप्रविक्षेपकर्तारः श्रुतिभंजकाः ।
तेषां भोगा विनश्यन्ति दारा धनानि सम्पदः ॥४३॥
ये च तुंगासनारूढा तथा वीरासनस्थिता ।
सिंहासनस्थिताः पादोपरि पादनियोजकाः ॥४४॥
श्रोतारस्ते तु जायन्ते वायसाः पादपास्तथा ।
अप्रणम्य च श्रोतारो जायन्ते विषपादपाः ॥४५॥
शयानाश्चापि श्रोतारो भवन्त्यजगराः खलु ।
वक्तुः समासनस्थाश्च निन्दकाश्च दुरुत्तराः ॥४६॥
जन्मशतं ते शुनका गर्दभाः कृकलासकाः ।
शूकराश्चापि जायन्ते विघ्नकर्तार एव ये ॥४७॥
प्रशंसन्ति कथां ये ते पदं गच्छन्ति शाश्वतम् ।
कथानां श्रावका यान्ति शाश्वतं ब्रह्मणः पदम् ॥४८॥
कम्बलाजीनवासांसि दद्यादासनमुत्तमम् ।
स्वर्गलोकं स वै गच्छेद् धनदो ब्रह्मणः पदम् ॥४९॥
पुस्तकस्य शुभं वस्त्रं ददाति सुखभाग् भवेत् ।
महापातकिनः शुद्धा भवन्ति ज्ञानलब्धितः ॥५०॥
इति श्रुत्वा महिमानं कथाश्रवणकर्मणः ।
देवाश्च मुनयः सिद्धाः ऋषयः पितरस्तथा ॥५१॥
दिक्पाला लोकपालाश्च नदा नद्यो वनानि च ।
तत्त्वानि पार्थिवा लोका वेंकटाद्रौ शुभालये ॥५२॥
लक्ष्मीनारायणसंहितायाः कथां सुपावनीम् ।
श्वेतवाराहवक्त्रात् ते शुश्रुवुर्योषितो नराः ॥५३॥
तेषां भोजनदानार्थे वेंकटेश्वरपाचकाः ।
मिष्टान्नानां कटाहानि महानसेष्वरक्षयन् ॥५४॥
अभोजयन्नसंख्यातान् देवान् देवीश्च देहिनः ।
तत्तीर्थं पावनं जातं यद्वै कटाहतीर्थकम् ॥५५॥
महादेवो विजानाति तस्य तीर्थस्य वैभवम् ।
वर्णाश्रमस्थिता येऽन्ये पशुपक्ष्यादयोऽपि च ॥५६॥
कटाहतीर्थवासेन प्राप्नोति परमं पदम् ।
अप्रायश्चित्तपापानां ध्वंसः कटाहसेवनात् ॥५७॥
आर्तानामार्तिनाशः स्यादस्य जलस्य सेवनात् ।
स्वामिपुष्करिणीस्नानं वराहश्रीशदर्शनम् ॥५८॥
वराहतीर्थे भोज्यान्नं पानं जलस्य तस्य च ।
लक्ष्मीनारायणसंहितायाश्च श्रवणं सदा ॥५९॥
साधूनां नित्यसेवा च षट्कं त्रैलोक्यदुर्लभम् ।
संहितायाः कथारंभे वाराहो भगवान् स्वयम् ॥६०॥
चतुर्भुजः समायातो भूकटाहात् बहिर्हरिः ।
तत्तीर्थं भूकटाहाख्यं तत्रैव वर्तते प्रिये ॥६१॥
यज्जलं चामृतं तेन तृप्ताः श्रवणकारकाः ।
संहितायाः कथामग्ना न विघ्नैस्ते पराऽभवन् ॥६२॥
मासं श्रुत्वा ययुः सर्वे निजस्थानानि देवताः ।
अथ केशवनामाख्यो विप्रो ब्राह्मणघातकः ॥६३॥
ब्रह्महत्यासमाक्रान्तो ययौ कटाहतीर्थके ।
स्नात्वा पीत्वा जलं शुद्धोऽभवत्तीर्थप्रतापतः ॥६४॥
तुंगभद्रातटे तस्य वेदग्रामेऽभवद् गृहम् ।
वैदिका ब्राह्मणाः शास्त्रविज्ञा ह्यासन् सहस्रशः ॥६५॥
अग्रहारः केशवोऽसौ कुलटापाशवञ्चितः ।
मातरं पितरं त्यक्त्वा भार्यामपि पतिव्रताम् ॥६६॥
सर्वदाकुलटासक्तोऽभवत् तद्गृहवासकृत् ।
बहुकाले गते तया रुग्णस्त्यक्तो हि केशवः ॥६७॥
स च बुभुक्षितश्चौर्यं कृतवान् ब्राह्मणगृहे ।
खड्गेन हतवान् विप्रं धनं नीत्वा सुवर्णकम् ॥६८॥
ययौ स कुलटागारं तया धनं प्रगृह्य च ।
ताडितो निष्कासितश्च ययौ स्वपितरं गृहे ॥६९॥
ब्रह्महत्यापृष्ठलग्नाऽभवत् सोवाच राक्षसी ।
अयं विप्रं विनिहत्य कुलटायै ददौ धनम् ॥७०॥
तया निष्कासितो जारः पितृमातृविडम्बकः ।
भार्यात्यागी दुरात्माऽस्ति पितृगृहमुपागतः ॥७१॥

यैनं पुत्रं हि मन्येथाः पद्मनाम द्विजोत्तम ।
त्यजैनं ब्राह्मणहनं न चेत् त्यजसि पुत्रकम् ॥७२॥
तद्भार्यामस्य भार्यां च त्वां च पुत्रमिमं द्विज ।
भक्षयिष्यामि वंशं च तस्मान्मुञ्च दुरात्मकम् ॥७३॥
ब्रह्महत्या स्वयं चास्मि नैनं मुञ्चामि सर्वथा ।
नैकस्यार्थे कुलं सर्वं विनाशयितुमर्हसि ॥७४॥
इत्युक्त्वा ब्रह्महत्या सा ववल्गे केशवं सुतम् ।
प्राणानत्तुं समुद्योगा बभूव राक्षसीसमा ॥७५॥
कुटुम्बिनस्तदा सर्वे रुरुदुः खिन्नमानसाः ।
तस्मिन्नवसरे भरद्वाजस्तत्राऽऽययौ मुनिः ॥७६॥
पद्मनाभो द्विजः स्तुत्वा ययाचे शरणं मुहुः ।
मत्पुत्रं रक्ष कृष्णांश ! यथा हत्या लयं व्रजेत् ॥७७॥
एक एव सुतो मेऽस्ति तन्मृतौ वंशनाशनम् ।
पितृपिण्डविलोपश्च नारकित्वं द्विजन्मनाम् ॥७८॥
समुद्धारय तद् विप्र ! बहु पुण्यं भविष्यति ।
कृष्णनारायणांशः स भरद्वाजोऽब्रवीत् तदा ॥७९॥
अयं विप्र ! तव पुत्रो वेंकटाद्रौ महाचले ।
श्रीभूतलीलायुतनारायणाश्रये मनोहरे ॥८०॥
कटाहतीर्थसलिले स्नायात् हत्यालयं व्रजेत् ।
इतिवाक्यं गृहीत्वैव पद्मनाभो द्विजः सुतम् ॥८१॥
नीत्वा ययौ वेंकटाद्रौ सस्नौ पुष्करिणीजले ।
वराहस्वामिनं नत्वा श्रीनिवासं ददर्श ह ॥८२॥
नत्वा दिव्यविमानं तद् ययौ कटाहतीर्थकम् ।
पपौ जलं जले सस्नौ सपुत्रो यावदेव तु ॥८३॥
तावद् हत्या लयं प्राप्ता भगवानाविरास च ।
प्राहैतत्तीर्थमागत्य ये पास्यन्ति जलं जनाः ॥८४॥
तेषां भुक्तिस्तथा मुक्तिः सर्वदा वै भविष्यति ।
इत्युक्त्वा श्रीकृष्णनारायणो माहात्म्यमाह तम् ॥८५॥
मया गोलोकधाम्नोऽयं चानीतो वेंकटाचलः ।
तत्र तपस्यतोऽगस्त्यमुनेर्ब्रह्मा सुतोषितः ॥८६॥
प्राह पुत्र वरं ब्रूहि ददामि यन्मनोगतम् ।
अगस्त्यो वेधसं प्राह वेंकटाख्ये महागिरौ ॥८७॥
मया गंगा समानेया जगतां पावनी सदा ।
ब्रह्मणा च स्मृता गंगा शीघ्रं तत्राऽऽजगाम ह ॥८८॥
अगस्त्यः शिखरादग्रे जगामाऽनुसरिद् ययौ ।
सुवर्णवत्प्रदेशं तं कुर्वती घोषकारिणी ॥८९॥
सुवर्णमुखरीनाम्ना वायुना बोधिता तदा ।
वेंकटाद्रिं निम्नदेशान् व्याप्य वार्धिगताऽभवत् ॥९०॥

अगस्त्यस्तां द्वितीयां वै गंगांशारूपिणीं नदीम् ।
मार्गे प्रदर्श्य तपसः स्थानं प्राप्याऽवसत् सुखम् ॥९१॥
यत्र श्रीवेंकटेशः श्रीकृष्णनारायणो हरिः ।
श्रीराधापार्वतीलक्ष्मीपद्मिनीमाणिकीपतिः ॥९२॥
प्रभारमाक्षितिलीलापद्मावृन्दापतिश्च सः ।
नित्यं स्नातिजलपानं करोत्येव सखीयुतः ॥९३॥
देवास्तीर्थानि मुक्ताश्च साध्व्यः स्नान्ति च पर्वसु ।
अगस्त्याचलसंभूता दक्षिणोदधिगामिनी ॥९४॥
पवित्रयति देशान् वै नारायणसमाश्रयात् ।
जलं निष्कमितं पीतं नाशयेत्पापपर्वतान् ॥९५॥
नित्यं स्मरेन्नमस्कुर्यात् कीर्तयेन्मनसाऽर्चयेत् ।
शुद्धिक्षेमशिवापेक्षी सुवर्णमुखरीं स्मरेत् ॥९६॥
आहूता ब्रह्मणा गगाऽगस्त्येन वाहिता भुवि ।
मूर्ता द्वितीयरूपा सा सुवर्णमुखरीश्वरी ॥९७॥
अस्यास्तटे भुवो दानं धनदानं सुतार्पणम् ।
कृत्वा तु विधिवद् देही याति ब्रह्म सनातनम् ॥९८॥
जपो होमस्तपो दानं पितृकर्म सुरार्चनम् ।
कृतं भवेच्छतगुणं सुवर्णमुखरीतटे ॥९९॥
अगस्त्योदयमासे ये स्नानमस्यां प्रकुर्वते ।
तैः कल्पं तु सुरावासे स्थीयन्ते पुण्यभागिभिः ॥१००॥
सौवर्णागस्त्यदातारो यान्ति वै ब्रह्मशाश्वतम् ।
अगस्त्यः कुंभसम्भूतो गोवर्धनस्य नेतृकः ॥१०१॥
विन्ध्यसस्तम्भनो वार्धिचुलुकीकृतिसिद्धिमान् ।
जलनैर्मल्यसामर्थ्यः सुवर्णमुखरोवहः ॥१०२॥
प्रीतिमाप्नोतु महतीं दानेनाऽनेन मे प्रभुः ।
इत्युक्त्वा तु ददेन्मूर्तिं जटाचर्मादिशोभिताम् ॥१०३॥
दण्डकमण्डलुयुक्तां स्वस्तिकासनसंस्थिताम् ।
सवल्कलामक्षमालायुक्करां सुमनोहराम् ॥१०४॥
नारायणेन सहितां दद्यात् पापविशुद्धये ।
स्मरेत् तीर्थानि सर्वाणि दानकाले शृणु प्रिये ॥१०५॥
अगस्त्यतीर्थे तन्मूलेऽगस्त्येश्वरश्च शंकरः ।
यत्र वै वर्तते तत्रोत्तरायणे विशेजलम् ॥१०६॥
अग्निष्टोमसहस्रस्य फलं भवति स्वर्गदम् ।
अधः क्रोशमितं तीर्थं देवर्षिपितृनामकम् ॥१०७॥
तत्र स्नाता ऋणत्रयान्मुक्तो भवति मानवः ।
ततो योजनयुगले वेणानद्याः सुसंगमः ॥१०८॥
तत्र दशाश्वमेधानां फलं स्नानेन लभ्यते ।
ततो योजनतुर्ये प्रागस्त्येश्वरं सुलिंगकम् ॥१०९॥

ततोऽर्धयोजने व्याघ्रपदायाः संगमोऽस्ति वै ।
तत्र विराजते शंखतीर्थे शंखेश्वरः शिवः ॥११०॥
शंखेन मुनिना पूर्वं स्थापितः पापनाशकः ।
निम्ने कल्यानदी तत्र संगता पापनाशिनी ॥१११॥
यत्र ब्रह्मशिला रम्या सरिन्मध्ये हि वर्तते ।
अथोदिच्यां योजनार्धे वैंकटाद्रिर्विराजते ॥११२॥
क्रोशोच्छ्रयस्य तस्यैवाभितश्चान्येऽपि भूधराः ।
अंजनोऽनन्तो वृषभो नीलो वराहः केसरी ॥११३॥
नारायणाचले श्रीवैंकटाद्रौ वासमाचरत् ।
वाराहस्तेन भूभृत्स वाराहक्षेत्रमीरितः ॥११४॥
सुवर्णमुखरीतीरे वैंकटाद्रौ श्रिया युतः ।
भुवा युतश्च पद्मिन्या युतः श्रीभगवान् हरिः ॥११५॥
युक्तश्च जयया ललितया बकुलया श्रिया ।
पार्वत्या प्रभया लक्ष्म्या माणिक्या लीलया च युक् ॥११६॥
सेव्यते सिद्धगन्धर्वमुनिमानवदानवैः ।
तस्य स्मरणकर्तॄणां सिद्ध्यन्ति वाञ्छितानि वै ॥११७॥
इति ते कथितं लक्ष्मि ! तीर्थानां मण्डलं शुभम् ।
श्रवणात्पठनाच्चास्य स्वर्गं मोक्षश्च वै भवेत् ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वैंकटाद्रौ षट्तीर्थानि, लक्ष्मीनारायणसंहिताकथाकर्तृश्वेताख्यव्यासस्य पूजनम्, केशवाख्यविप्रस्य ब्रह्महत्यामोक्षणम्, गंगाख्यसुवर्णमुखर्या आनयनम्, अन्यतीर्थानामुद्देशादि चैत्यादिनिरूपणनामा पञ्चाधिकचतुःशततमोऽध्यायः ॥४०५॥

श्रीलक्ष्मीरुवाच—

वैंकटाद्रौ महापुण्ये श्रीरमाकमलापते ! ।
कथं प्रादुरभूः पूर्वं वद मे सर्वमद्भुतम् ॥ १ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महिमानं कथयामि समासतः ।
सर्वेषामेव भूतानां कृष्णनारायणोऽस्मि भूः ॥ २ ॥
गोलोकेऽहं कृष्णनामा वैकुण्ठेऽहं नरायणः ।
वासुदेवोऽमृते धाम्नि भूमाऽव्याकृतधामनि ॥ ३ ॥
अक्षरे तु परे धाम्नि भवामि पुरुषोत्तमः ।
हिरण्यगर्भो वैराजः सदाशिवो भवामि च ॥ ४ ॥
सहस्रशीर्षा भगवान् महाविष्णुर्भवामि च ।
एकशीर्षा कृष्णनारायणो भूमौ भवाम्यहम् ॥ ५ ॥
मम भासा जगत् सर्वं भासते भास्करोऽस्म्यहम् ।
विद्यया मम सृष्टिर्वै व्याप्रीयते स चास्म्यहम् ॥ ६ ॥
सर्वहृत्सु सन्निहितोऽन्तर्याम्यहं वसामि वै ।
हरिः सदाशिवो ब्रह्मा कांभरेयो जनार्दनः ॥ ७ ॥
अहमेवाऽस्मि पर्यायाः सहस्राणि भवन्ति मे ।
यदेच्छामि शुभं कर्तुं तदाऽऽयामि भुवस्तलम् ॥ ८ ॥
सृजामि राजसेनैतत् सत्त्वेनापि वहामि च ।
हरामि तामसेनैव निद्रया स्वपिमीति च ॥ ९ ॥
गतां जलतले भूमिमानेतुं स्वेच्छया मया ।
रूपं वाराहसदृशं धृतं वै लीलया पुरा ॥१०॥
कर्दमभावमापन्ना मया दंष्ट्राग्रसिद्धिभिः ।
पिण्डीकृत्याऽऽहृता जलोपरि संस्थानहेतवे ॥११॥
जलं मर्यादितं यथा पृथ्वीं न नाशयेत्तथा ।
आधारार्थं दिग्गजाँश्च शेषं कूर्मं न्यवेशयम् ॥१२॥
ममाऽऽज्ञया जगद् ब्रह्मा यथापूर्वमकल्पयत् ।
कल्पे कल्पे च रक्षार्थं विहरामि महीतले ॥१३॥
वराहरूपधृक् चाहं प्रपेदे वैंकटाचलम् ।
स्वामिपुष्करिणीतीर्थे न्यवसं ब्रह्मणा तदा ॥१४॥
प्रार्थितो मूलरूपाय तदाऽदृश्योऽभवं प्रिये ! ।
हैहयवंशजो राजा शंखनामा बभूव ह ॥१५॥
वैष्णवः परमो भक्तो नवधा भजनेऽनिशम् ।
लक्ष्मीनारायणसंहितां शृणोति सदा नृपः ॥१६॥
तथाऽप्यस्य न साक्षाच्छ्रीकृष्णनारायणोऽभवत् ।
तेनाऽयं चाऽतृप्तमना विचारमकरोन्मुहुः ॥१७॥
कथं नु यायाद् भगवान् विषयं मम नेत्रयोः ।
एवंचिन्तयतस्तस्योवाच श्रीभगवान् हृदि ॥१८॥
गच्छ श्रीवैंकटाद्रौ त्वं भज वर्षसहस्रकम् ।
अदृश्यो दृश्यतां यास्ये तव चागस्त्यकस्य च ॥१९॥
आराध्य मां तपोनिष्ठौ मम दर्शनमाप्स्यथः ।
शंखो वज्रे सुते न्यस्य राज्यं श्रीवैंकटं ययौ ॥२०॥
अगस्त्योऽप्याससादैनं शैलं मुनिशतावृतः ।
प्रदक्षिणं चकारैनं ब्रह्मादिदेववासितम् ॥२१॥
देवाः सर्वे सनकाद्याः ऋषयश्च तपोधनाः ।
प्रतीक्षन्ते हरेः साक्षाद् दर्शनं कुंभयोनिवत् ॥२२॥
मिलित्वा ते समाजग्मुर्यत्र शंखोऽस्ति भक्तराट् ।
सुवर्णमुखरीतीरेऽपश्यँस्ते शंखभूपतिम् ॥२३॥

आसीनास्तत्र ते सर्वे संभाव्याऽन्योन्यमुत्सुकाः ।
गोविन्दकीर्तनपराः कृष्णनारायणात्मकाः ॥२४॥
तृतीयनिशिथे चान्ते ददृशुः स्वप्नमेव ते ।
शंखचक्रगदापाणिः पद्मिनीसहितः प्रभुः ॥२५॥
वरदानाय सम्प्राप्त इति ते ददृशुर्हरिम् ।
प्रातस्ते पुष्करिण्यां वै स्नात्वा तुष्टुवुरच्युतम् ॥२६॥
जेपुरष्टाक्षरं मन्त्रं ओंश्रीकृष्णनरायणः ।
तेषामग्रे प्रादुरभूदेकं तेजो महाद्भुतम् ॥२७॥
तत्र दृष्ट्वा कृष्णनारायणं तुष्टुवुरादरात् ।
जय विष्णो जय कृष्ण जय श्रीकृष्ण केशव ॥२८॥
जय भूधर गोविन्द वेंकटाद्रीश वै जय ।
कृतार्था नु कृताः सर्वे दिव्यदर्शनदानतः ॥२९॥
सदाऽत्र भगवन् वासं कुरु भक्तकृपाकर ।
सुवर्णमुखरीं चेमां कुरु त्रिलोकपावनीम् ॥३०॥
सदाऽस्मिन्नास्थितः शैले कांक्षितार्थप्रदो भव ।
कृष्णनारायणः श्रुत्वा प्राह तथास्त्विति प्रियम् ॥३१॥
तेन कृष्णेन सुवर्णमुखरी स्वाश्रया कृता ।
शैलो वैकुण्ठशैलश्च कृतो वासेन नित्यदा ॥३२॥
धर्मार्थकाममोक्षाणां प्रदो जातो हरिः प्रिये ! ।
शंखमाह हरिः कृष्णः प्रीतोऽस्मि तव भक्तितः ॥३३॥
आकल्पमिन्द्रलोकस्थो ह्यप्सरोगणसेवितः ।
भुक्त्वा बहुविधान् भोगाँस्ततो मल्लोकमेष्यसि ॥३४॥
एवं दत्वा वरं देवान् नित्यवासं प्रदाय च ।
नारायणः कमलेशस्तत्रैवाऽन्तरधीयत ॥३५॥
एवं सौम्यवपुर्भूत्वा कृष्णो वसति वेंकटे ।
नारायणं वेंकटाद्रिं स्वामिपुष्करिणीं तथा ॥३६॥
कटाहादीनि तीर्थानि स्मृत्वा शुद्धा भवन्ति वै ।
लक्ष्मीश्रीभूपद्मिनीशं प्राप्नुयुः पुरुषोत्तमम् ॥३७॥
शृणु लक्ष्मि ! पुरा काचिदंजनानामतः सती ।
पुत्रहीना तपः कर्तुं समारब्धाऽतिवैष्णवी ॥३८॥
मतंगाख्यो मुनिः कश्चित् तामाह तपसि स्थिताम् ।
किमिच्छसि दारुणेन तपसा वद सुन्दरि ! ॥३९॥
अंजनाऽऽह पिता मे केसरी ज्ञातीयराक्षसः ।
तपश्चक्रे शिवं स्मृत्वा पुत्रार्थं दारुणं तपः ॥४०॥
शिवाशिवौ वृषभस्थौ समायातौ कृपाकरौ ।
शिवः प्राह च ते नास्मिन् जन्मनि पुत्रदायकम् ॥४१॥
पुण्यं किन्तु ददामि त्वां पुत्रीं लोकेषु विश्रुताम् ।
तस्याः पुत्रेण पुत्रीत्वं मन्येथाः स्वं सुखी भव ॥४२॥
इति तस्मै वरं दत्वा तत्रैवान्तर्दधे हरः ।
मत्पिता राक्षसस्तुष्टो गृहं यातस्ततः परम् ॥४३॥
जज्ञेऽहं तस्य पत्न्यां च काले विवाहिताऽभवम् ।
केसर्याख्येन पतिना किष्किन्धाख्यमहापुरे ॥४४॥
व्रतानि माघमासस्य कार्तिकस्य व्रतानि च ।
वैशाखस्य व्रतान्यपि चातुर्मास्यव्रतानि च ॥४५॥
कृतवतीं च नवधां भक्तिं नारायणस्य च ।
शालग्रामान्नदानानि गोदानं दीपदानकम् ॥४६॥
तिलदानं वस्त्रदानं भूदानं वारिदानकम् ।
फलपुष्पप्रदानं च सत्पुत्रफलकांक्षया ॥४७॥
श्रावणस्य च यत्पुण्यं कृतवत्यपि सर्वथा ।
पुत्रं तथाऽप्यलब्ध्वाऽहं तदर्थं तपसि स्थिता ॥४८॥
अथ तां तापसीं साध्वीं मतंगः प्राह पुत्रदम् ।
इतो वै दक्षिणे घनाचलो नृसिंहवासभूः ॥४९॥
दशयोजनदूरं सः तत्पूर्वे दशयोजने ।
नदी सुवर्णमुखरी तदुदङ् वृषमाचलः ॥५०॥
तदग्रेऽस्ति स्वामिपुष्करिणी सरसी शोभना ।
गच्छ स्नाहि विधानेन वराहं पश्य केशवम् ॥५१॥
वेंकटेशं नमस्कृत्वा वियद्गंगां प्रयाहि च ।
वायुमुद्दिश्य च तपः कुरु तत्र हि वैष्णवि ! ॥५२॥
इतिश्रुत्वा ययौ सा वै वेंकटाद्रिं तपस्विनी ।
चक्रे तीर्थानि विधिवत् तपश्चक्रेऽतिदारुणम् ॥५३॥
वियद्गंगातटे वायुः प्रादुरासीत्तु तत्पुरः ।
उवाच वरदानार्थं पुत्रं देहीति साऽब्रवीत् ॥५४॥
पुत्रस्तेऽहं भविष्यामीत्युक्त्वा चान्तर्दधेऽनिलः ।
तदा शंकरधातुं वै समादाय महर्षयः ॥५५॥
समाजग्मुश्च तं वायुः केसरीरूपधृक् तदा ।
जहाराऽञ्जनीकर्णे तं ददौ पुत्रोऽभवत्ततः ॥५६॥
जातमात्रो युवा जातिस्मरो वायुबलातिगः ।
हनुमान् सोऽभवत्तस्यास्तपस्विन्याः सुपुत्रकः ॥५७॥
मेषसूर्ये चतुर्दश्यां चित्रानक्षत्रयोगके ।
सुवर्णमुखरीतीरे प्रादुरासाऽनिलः स्वयम् ॥५८॥
तदात्र स्नानदानादि कृतं भवति चाऽक्षयम् ।
अन्नदानं वस्त्रदानं स्वर्णदानं सुतार्पणम् ॥५९॥
शालग्रामशिलादानं गोदानं भूप्रदानकम् ।
प्रपादानं तिलदानं धान्यदानं गृहार्पणम् ॥६०॥
गन्धचम्पकपुष्पादि छत्रव्यजनचामरम् ।
ताम्बूलघनसारादि गृहोपकरणानि च ॥६१॥

यो ददाति जनस्तत्र दिव्यवस्त्रसहस्रकम् ।
भुक्त्वा भोगाननेकाँश्च स्वर्गलोकेऽपि भोगवान् ॥६२॥

सार्वभौमस्ततो विप्रो भूत्वा मुक्तिं प्रयाति सः ।
इति ते कथिता लक्ष्मि ! वेंकटाद्रिप्रमत्कृतिः ॥६३॥

श्रवणात्पठनाच्चास्य भुक्तिर्मुक्तिर्भवेद् ध्रुवम् ।
शृणु त्वन्यां कथां दिव्यां कृष्णनारायणाश्रिताम् ॥६४॥

कथयामि तव प्रीत्या पातिव्रत्यपरायणाम् ।
एकदा श्रीवेंकटाद्रिर्मेरुं गन्तुमचिन्तयत् ॥६५॥

उड्डीय स्वीयपक्षाभ्यां यावदुत्पतति क्षितेः ।
तावज्जातो महान् कम्पो विनाशो बहुदेहिनाम् ॥६६॥

चुक्रुशुः प्राणिनः सर्वे वराहं शरणं ययुः ।
मृताः स्मो भगवन्नस्योड्डयनेन विनाऽऽश्रयम् ॥६७॥

कुरु नो रक्षणं क्ष्मेश ! यथावत् स्थापय प्रभो ।
इत्यर्थितो वराहो वै स्वयं नारायणः प्रभुः ॥६८॥

जीवानाश्वासयामास सस्मारेन्द्रं सवज्रकम् ।
तावदुपागतश्चेन्द्रो वज्रमुद्यम्य पक्षहाः ॥६९॥

इन्द्रं दृष्ट्वा वेंकटाद्रिस्तत्रास कम्पितोऽभवत् ।
जगाम शरणं विष्णोर्वराहरूपिणस्तदा ॥७०॥

तुष्टाव मरणाद् भीतस्तमाह भगवान् स्वयम् ।
यदि कदाचिन्मा याहि पक्षाभ्यां व्योममार्गतः ॥७१॥

तदा रक्षां करिष्यामि स्थिरो भवात्र भूधर ।
इत्युक्तः सोऽभवन्नत्वा निष्कम्पः सुस्थिरस्तदा ॥७२॥

अदृश्योऽभूद् वराहश्च महेन्द्रः स्वालयं ययौ ।
वराहस्याश्रयेणास्य पक्षौ नेन्द्रेण कर्तितौ ॥७३॥

अथैकदा स शैलस्तु कल्पयामास वै हृदि ।
आगतोऽहं हि गोलोकाद् वसाम्यत्र चिरं समाः ॥७४॥

गोलोकदर्शनार्थं वै गच्छामि कृष्णसन्निधौ ।
इति विचार्य स कृष्णजन्माष्टम्यां यदा क्षितौ ॥७५॥

कुशस्थल्यां हि गोमत्यां स्नातुं तीर्थानि संययुः ।
ऋषयश्च गताः सर्वे नदा नद्यश्च देवताः ॥७६॥

अगस्त्यादय एवैते ययुर्गोमतीसंगमे ।
स्वं निर्जनं तदा दृष्ट्वा गन्तुं मनो दधे तदा ॥७७॥

चकम्पे पृथिवी तत्र जीवा नष्टाश्च कम्पनात् ।
तावत् तत्राऽभवदेका तापसी निर्धना सती ॥७८॥

ब्राह्मणी ब्राह्मणसेवापरा नित्यं प्रतिव्रता ।
नाम्ना सुवर्णरेखा च हिरण्या तत्स्वसा तथा ॥७९॥

हिरण्याऽभून्महासाध्वी कुमारिका तपस्विनी ।
सुवर्णरेखा सपतिका पतिर्नाम्ना नरायणः ॥८०॥

नारायणं द्विजं प्राह पीत्वा जलं तु पादयोः ।
वेंकटाद्रिः सपक्षोऽस्ति प्रागुड्डयने वारितः ॥८१॥

पुनरुड्डीयतेऽस्माकं मृत्युरेव भविष्यति ।
यदि पत्याज्ञया चैनं जडीकरोमि सर्वथा ॥८२॥

तदा श्रीवेंकटेशाद्याः क्रुद्धा नो दुःखदाः खलु ।
भविष्यन्ति ततो नाथ कर्तव्यं किं वदात्र मे ॥८३॥

इत्युक्तः सः प्रियामाह यथेष्टं कुरु भामिनि ! ।
यदि ते पातिव्रत्यं वै दृढं चास्ति जनाविह ॥८४॥

सर्वे पराभवमाता भविष्यन्ति तदग्रतः ।
मा भयं कुरु साध्वि त्वं शिक्षां कुरु हि पर्वतम् ॥८५॥

इति प्रियस्य वचनं समासाद्य सती तदा ।
प्राह यद्यस्मि मद्धर्मसंस्थिता वै पतिव्रता ॥८६॥

तदा पर्वतराजोऽत्र तव पक्षौ भुवोऽन्तरे ।
जडीभूतौ सदा स्तां वै पक्षशक्तिं विनाकृतौ ॥८७॥

पृथिव्या चैकतां प्राप्तौ यथा नोड्डयनं पुनः ।
इत्युक्तमात्रे तौ पक्षौ जडीभूतावचंचलौ ॥८८॥

अभवतां शक्तिहीनौ भुवोऽन्तरं निवेशितौ ।
वेंकटाद्रिर्नम्रतया ययाचे वै क्षमां मुहुः ॥८९॥

सती प्राह सदा चात्र नारायणस्य मे तथा ।
वासो न निश्चितस्तस्माद् यास्यामो रैवताचलम् ॥९०॥

त्वं सदा तिष्ठ निष्कर्मा मा भूः चंचलपर्वत ! ।
अन्यथा ते पुनर्देवो ध्रुवं नाशं करिष्यति ॥९१॥

सपक्षस्त्वं सर्वदैवं तिष्ठ नोड्डयनं भवेत् ।
ददामि पक्षयोर्जीवं कृपया मा शुचः पुनः ॥९२॥

शलभानां शुकानां च कोट्यस्तव पक्षयोः ।
भविष्यन्ति सशक्तास्ता उड्डयिष्यन्ति चाम्बरे ॥९३॥

शाद्वलेषु वनेष्वत्राऽरण्येषु शलभाः शुकाः ।
ओषधीन् भक्षयित्वा ते लयमेष्यन्ति पक्षयोः ॥९४॥

एवं ते पक्षयोः सजीवनतां ते ददामि वै ।
इत्युक्त्वा वेंकटं स्थिरीकृत्वा नारायणो द्विजः ॥९५॥

पतिव्रता स्वर्णरेखा ययतु रैवताचलम् ।
स्वर्णरेखा नदीरूपाऽभवन्नित्या पतिव्रता ॥९६॥

नारायणो ह्रदरूपोऽभवन्नित्योऽवसद् गिरौ ।
एवं नारायणः स्वर्णरेखा चेति हि दम्पती ॥९७॥

निवासं चक्रतुस्तीर्थरूपौ दिव्यौ हि रैवते ।
यत्र दामोदरेणापि पत्नीव्रतेन विष्णुना ॥९८॥
श्राद्धं कृतं परां तृप्तिं ददतुस्तौ हि चेतनान् ।
इति ते कथितं लक्ष्मि ! चमत्कारमयं वृत्तम् ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वेंकटाद्रावगस्त्यशंखद्वारा वराहप्रादुर्भावः, तत्र तपसांऽजन्या हनुमत्पुत्रलाभः, वेंकटाद्रेः पक्षयोर्जडीकरणम्, स्वर्णरेखानारायणह्रदयोः रैवताचले आगमनं, चेत्यादिनिरूपणनामा षडधिकचतुःशततमोऽध्यायः ॥४०६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! जयन्त्या वै चेन्द्रपुत्र्याः कथां शुभाम् ।
या चकार तपःसेवां शुक्रस्य पातिव्रत्यतः ॥ १ ॥
देवदानवयुद्धेषु देवास्तु सबला यदा ।
जेतुमशक्या दैत्यैश्च तदा दानवमण्डलम् ॥ २ ॥
शुक्राचार्यं समस्तौत् तदयथा दैत्यजयो भवेत् ।
तदा शुक्रः समयं वै बुद्ध्वा देवाश्रयावहम् ॥ ३ ॥
सर्वान् दैत्यान् परित्यज्य शुक्रो देवानढौकत ।
तदा दैत्या देवपक्षगतं शुक्रं समाह्वयन् ॥ ४ ॥
किं त्वं नो मिषतश्चास्माँस्त्यक्त्वा देवान् समाश्रितः ।
स्थातुं न शक्नुमो भूमौ प्रविशामो रसातलम् ॥ ५ ॥
विना हि रक्षकं त्वां तु गुरुं स्थास्यामहे कथम् ।
एवमुक्तोऽब्रवीद् दैत्यान् विषण्णान् सान्त्वयन् गिरा ॥ ६ ॥
मा भैष्ट रक्षयिष्यामि तत्र स्थितेन तेजसा ।
मन्त्रौषधिवसुसिद्धिरसास्तिष्ठन्ति वै मयि ॥ ७ ॥
कृत्स्नशस्तचतुर्थांशः सुरेष्वस्ति च वा न वा ।
मद्व्रतं वः प्रदास्यामि यूयं स्युस्तेन रक्षिताः ॥ ८ ॥
एतद्व्रतं सुविज्ञाय देवाः सर्वजिघृक्षया ।
चक्रुः सम्मन्त्रणां नेतुं स्ववशं मन्त्रप्रभृति ॥ ९ ॥
अध्ययनं समारब्धं देवैः शुक्रस्य सन्निधौ ।
किंचित् किंचिद् ददौ तेभ्यस्तदप्यपूर्णमेव वै ॥१०॥
यावद् दैत्येभ्य एवाऽयं शुक्रो नाऽध्यापयत्तु तत् ।
तावद् दैत्यान् सुरा हत्वा पातालं प्रापयन्ति हि ॥११॥
अथ दैत्या दीनभावाः काव्यमेवाभिदुद्रुवुः ।
तदापि च सुरा दैत्यान्निःशंकमभिसञ्जह्नुः ॥१२॥
शुक्रो रक्षां तदा कर्तुं मन्त्रान् दातुं शशाक न ।
किन्तु दैत्यानुवाचेत्थं युद्धं मास्त्विति मे मतम् ॥१३॥
देवा बलिष्ठाश्चेदानीं यूयं तु निर्बला यतः ।
कालप्रतीक्षां कुरुत गच्छामि तपसेऽप्यहम् ॥१४॥
यास्याम्यहं महादेवं वरार्थं विजयावहम् ।
अप्रतीपान् श्रेष्ठमन्त्रान् प्राप्य देवान्महेश्वरात् ॥१५॥
युद्ध्यामहे यदा देवाँस्तदा प्राप्स्यथ वै जयम् ।
अथ शास्त्राणि सन्त्यज्याऽसुराः प्राहुः सुराँस्तदा ॥१६॥
वयं तपश्चरिष्यामः शान्ताः सवल्कला वने ।
इति श्रुत्वा सुरा अपि न्यवर्तन्त तदर्दनात् ॥१७॥
अथ शुक्रो जगौ दैत्यान् यूयं यात रसातलम् ।
तपोयुक्ता हि कार्यार्थं किञ्चित्कालमुपास्यथ ॥१८॥
इत्युक्त्वा स दैत्यगुरुर्ययौ शंभुं हिमाचलम् ।
तपश्चक्रे दारुणं सः पूर्णं वर्षसहस्रकम् ॥१९॥
अवाक्शिराश्च भूकुण्डे कृत्वा पादौ विहायसि ।
ब्रह्मचारी तथा भूत्वा तपश्चकार दारुणम् ॥२०॥
शिवं जजाप मनसा निराहारोऽपि निश्चलः ।
अथ दैत्याः क्वचित् काले पृथ्व्यां स्थातुं समागताः ॥२१॥
तदा देवैस्ताडितास्ते ययुः काव्यस्य मातरम् ।
शरणं साऽब्रवीत्तांश्च वोऽस्त्वभयं निरन्तरम् ॥२२॥
न भेतव्यं न भेतव्यं भयं त्यजत दानवाः ।
मत्सन्निधौ वसतां वो भयं न स्याद् ब्रवीम्यहम् ॥२३॥
देवास्तत्र गता दैत्यान् ताडयितुं बलात्पुनः ।
ख्यातिः क्रुद्धाऽब्रवीद् देवान्महेन्द्रं नाशयामि वः ॥२४॥
इतिकृत्वा विद्यया सा महेन्द्रं तु जडीकृतम् ।
अभिचारेण तस्तम्भ योगिनी सा तपोधना ॥२५॥
प्राद्रवन्त ततो देवा दृष्ट्वा चेन्द्रं वशीकृतम् ।
अथ विष्णुर्महेन्द्रं स्वे रूपे चाकृष्य तत्क्षणम् ॥२६॥
नीत्वा यावद् दिवं याति तावत् ख्यातिः रुषान्विता ।
विष्णुना रक्षितं दृष्ट्वा ख्यातिस्तत्र वचोऽब्रवीत् ॥२७॥
एषा त्वां विष्णुना सार्धं दहामि मघवन् बलात् ।
तावद्विष्णुः स्वरक्षार्थं चक्रं जग्राह चापदि ॥२८॥
ज्ञात्वा तदानीं प्राणान्तं क्रूरं ख्यात्याश्चिकीर्षितम् ।
सुदर्शनेन वै ख्यात्याः शिरश्चिच्छेद तद्धिया ॥२९॥
तं स्त्रीवधं तदा दृष्ट्वा चुक्रोध भृगुरेव यत् ।
शशाप विष्णुं भार्यायाः ख्यात्या वधकरं तदा ॥३०॥
यस्मात्ते जानतो धर्ममवध्या स्त्री निषूदिता ।
तस्मात् त्वमपि कल्पादौ शिरोवधमवाप्स्यसि ॥३१॥
इत्येवं शापतः कृष्णो भूत्वा गणेश एव सः ।
शंकरस्य च हस्तेन चावाप्नोति शिरोवधम् ॥३२॥

अथ भृगुणा त्वरितं काये शिरो नियोजितम् ।
एषा त्वं विष्णुना देवि ! हता तां सञ्जीवयाम्यहम् ॥३३॥
यदि कृत्स्नो मया धर्मः पत्नीव्रतः प्रपालितः ।
तेन सत्येन जीवस्व यदि सत्यं वदाम्यहम् ॥३४॥
तां सम्प्रोक्ष्य शीतजलैरभिजीवेति सोऽब्रवीत् ।
उत्तिष्ठेति व्याहृते ख्यातिः सञ्जीविताऽभवत् ॥३५॥
साधु साध्विति जगदुर्देवाद्याः सर्वतोदिशम् ।
किन्त्विन्द्रो नाऽलभत शं ख्यातिशुक्रभयात्ततः ॥३६॥
शुक्रतपसि विघ्नार्थं विचार्येन्द्रः स्वकन्यकाम् ।
जयन्तीं प्राह पुत्रि त्वं मया शुक्राय चार्पिता ॥३७॥
गच्छ त्वं तस्य दत्ताऽसि प्रयत्नं कुरु मत्कृते ।
शुक्रः शंभोः साधनार्थं तपश्चरति दारुणम् ॥३८॥
देवानां स विनाशार्थं मन्त्रार्थं यतते भृशम् ।
गच्छ संसाधयस्वैनं श्रमापनयनादिभिः ॥३९॥
तैस्तैर्मनोऽनुकूलैश्च शयनाद्युपचारकैः ।
एवमुक्ता जयन्ती सा पितुर्वचनसंस्थिता ॥४०॥
अगच्छद् यत्र स घोरे तपसि वर्तते गिरौ ।
तमधःशिरसं कान्तं काव्यं कन्या ह्युपस्थिता ॥४१॥
वधूरस्मीति तं प्रोच्य सेवायां चाप्यवर्तत ।
गीर्भिश्चैवानुकूलाभिर्गात्रसंवाहनादिभिः ॥४२॥
कालेऽपेक्षितवस्त्वाद्यैः सेवमाना त्वचः सुखैः ।
व्रतचर्यानुकूलाभिरुवाच बहुलाः समाः ॥४३॥
पूर्णे वर्षसहस्रे तु पातिव्रत्यपरायणा ।
सस्मार शंकरं साध्वी कथं तुष्टो न जायते ॥४४॥
यदि शंभुर्न वै तुष्टस्तमत्र प्रदहामि वै ।
शापेनेति रुषं प्राप्ता तावत्तत्रायर्यौ हरः ॥४५॥
जयन्तीं प्राह देवानां विनाशाय च ते पतिः ।
करोति तप उग्रं वै तस्मान्नायामि दर्शने ॥४६॥
किन्तु तवाऽतिबलवत्पातिव्रत्येन कर्षितः ।
आगतोऽहं वरं दातुं वद यत् तत्करोमि ते ॥४७॥
जयन्ती प्राह पित्रा मे स्वकार्यार्थे समर्पिता ।
तत्कार्ये वै प्रकर्तव्यं पत्युः कार्यमथापि च ॥४८॥
कन्या यस्मै प्रदत्ता स्यात्तस्य धर्मं समाचरेत् ।
तद्धितं तस्य कल्याणं तस्याऽभ्युदयमेव च ॥४९॥
पतिः सर्वस्वमबलाजीतानां धर्म उच्यते ।
तद्विरोधे कदाचिन्न नार्याः श्रेयो भवेन्ननु ॥५०॥
तस्मात्पतिमना भूत्वा कृत्यं सर्वं मयोचितम् ।
पितुर्हितकरी कन्या पत्युर्दुःखं तु नाचरेत् ॥५१॥
कुरु शंभो यथायोग्यं द्वयोर्हितं यथा भवेत् ।
मया सेवा कृता चास्य काव्यस्य भावसंभृता ॥५२॥
किन्तु तत्तपसि ब्रह्मचर्ये विघ्नं न वै कृतम् ।
यत इन्द्रेण दत्ताऽस्य धर्मपत्नी भवाम्यहम् ॥५३॥
कथं करोमि कामेन विघ्नमस्य तपःक्षये ।
तस्मात्कामं विनिगृह्य रतिः कृता न वै मया ॥५४॥
तपःसिद्धिः प्रजाताऽस्य मच्छ्रेयसेऽपि सा यतः ।
पातिव्रत्यं पालितं वै मयाऽनिष्टं न वै कृतम् ॥५५॥
तेनैव पातिव्रत्येन कुर्वस्य मनसेप्सितम् ।
इत्युक्त्वा प्रेमपात्रं सा काव्यस्य विरराम ह ॥५६॥
महादेवः प्रसन्नः सन्नुवाच चकितस्तदा ।
शुक्र ! चैतादृशी कन्या यस्यार्थे दत्तजीवना ॥५७॥
पूर्णे वर्षसहस्रं वै पार्श्वे तिष्ठति नित्यदा ।
तथापि न त्वया त्यक्तं ब्रह्मचर्यं व्रतं तथा ॥५८॥
तयापि पतिव्रतया निगृहीतं मनोऽस्थिरम् ।
सर्वदा षोडशवर्षा ह्यद्यापि सा हि दीव्यति ॥५९॥
अक्षता च तवाऽधीना धन्येयं वै पतिव्रता ।
तेऽपि धन्यप्रवादोऽस्तु पारं गतोऽसि सर्वथा ॥६०॥
एतद्व्रतं त्वयैकेन चीर्णं नान्येन केनचित् ।
तस्माद्वै तपसा बुद्ध्या श्रुतेन च बलेन च ॥६१॥
तेजसा च सुरान् सर्वांस्त्वमेकोऽभिभविष्यसि ।
तव वध्याः पातिव्रत्यब्रह्मचर्यप्रभावतः ॥६२॥
प्रपत्स्यसेऽभिलषितं सर्वं वाच्यं न कस्यचित् ।
सुखं यातं दम्पती च प्रजेशतां धनेशताम् ॥६३॥
अवध्यत्वं च सद्विद्यां सञ्जीवनीं गृहाण च ।
इत्युक्तः स शुक्रदेवस्तुष्टुवेऽवाक्शिरःस्थितः ॥६४॥
नमोऽस्तु ब्रह्मरूपाय भक्तेच्छापूरकाय ते ।
नमः सद्यःप्रतुष्टाय चिरतुष्टाय ते नमः ॥६५॥
नमोऽस्तु नित्यतृप्ताय दिगम्बराय ते नमः ।
नमो भीमाय रुद्राय महादेवाय ते नमः ॥६६॥
नम उग्राय पिनाकधारिणे शंभवे नमः ।
मृगव्याधाय यतये किराताय च ते नमः ॥६७॥
नमस्त्रिचक्षुषे चन्द्रभालाय लिंगरूपिणे ।
सदाशिवाय शर्वाय भवेशाय नमो नमः ॥६८॥
सौम्याय साक्षिणे सतीस्वामिने ते नमो नमः ।
नीलकण्ठाय चण्डाय सद्योजाताय शूलिने ॥६९॥
ईशानाय पिशंगाय चर्माम्बराय ते नमः ।
पशूनां पतये तुभ्यं भूतानां पतये नमः ॥७०॥

नमोऽष्टवर्ष्मणे कृष्णनारायणात्मने नमः ।
पार्वतीपतये प्रभास्वामिने ते नमोनमः ॥७१॥
नमस्ते सर्वतः सर्वदिक्षु सर्वात्मसु प्रभो ।
फलदायानन्दकर्त्रे ते सर्वत्र नमोनमः ॥७२॥
इत्युक्त्वा विररामाऽसौ शंभुः प्राह तपस्तव ।
पूर्णं जातं समुत्तिष्ठ वरं गृहाण वाञ्छितम् ॥७३॥
तथापि शुक्रो नोत्तस्थे शंभुरदृश्यतां ययौ ।
जयन्ती तद्विलोक्यैव प्राप्तकालं जगाद तम् ॥७४॥
कथं नोत्तिष्ठसे नाथ कथं चोपेक्षसे वरम् ।
अवधानं कथं शंभोर्वाक्ये नैव करोषि वै ॥७५॥
श्रुत्वा पत्नीकृतं शब्दं यावदुत्तिष्ठति क्षितेः ।
तावच्छंभुं तिरोभूतं न ददर्श हि तापसः ॥७६॥
परमं खेदमापन्नो विदधे शोकमुल्बणम् ।
उपस्थितस्य वै त्यागे पुनर्योगो हि दुर्लभः ॥७७॥
व्योमवाण्या स वै काव्यो विज्ञापितो गृहं प्रति ।
गन्तुं नीत्वा तपःपुण्यं जयन्तीमादरात्तथा ॥७८॥
पत्नीं गृहं ययौ शुक्रो दशवर्षाणि सर्वथा ।
प्रच्छन्नः सोऽभवत् सौधे जयन्त्या सह भोगवान् ॥७९॥
तस्यां जाता देवयानी पुत्री ययातिभामिनी ।
अथ कृतार्थं शुक्रं तु ज्ञात्वा सर्वे दितेः सुताः ॥८०॥
अभिजग्मुर्गृहं तस्य गुरुं दिदृक्षवः स्वकम् ।
अदृष्ट्वा ते ययुः स्वस्वगृहं तदा बृहस्पतिः ॥८१॥
तुष्ट्यर्थं दशवर्षाणि जयन्त्या हितकाम्यया ।
शुक्ररूपं समासाद्य त्वसुरान् समुपाह्वयन् ॥८२॥
आगतानाह वो विद्या दास्यामि शंकरोदिताः ।
ते तु दृष्ट्वा दशसमा विद्यार्थमुपपेदिरे ॥८३॥
अन्या अन्या अध्यापिता वञ्चिता गुरुणा हि ते ।
ततः काव्यो दशवर्षोत्तरं द्रष्टुं स्वयाजकान् ॥८४॥
ययौ दृष्टा गुरुणा स्वरूपेण वञ्चितास्तु ते ।
वञ्चितान् काव्यरूपेण काव्योऽब्रवीत्तु तांस्तदा ॥८५॥
काव्यं मां वो विजानिध्वं नाऽयं काव्यो बृहस्पतिः ।
बृहस्पतिस्तदा प्राह काव्योऽहं नाऽयमेव सः ॥८६॥
अयन्तु वञ्चनार्थं वो दशवर्षोत्तरं गुरुः ।
समागतोऽस्ति मद्वेशान्मा काव्यो ज्ञायतामयम् ॥८७॥
एतच्छ्रुत्वा द्वयोर्वाक्यं सरूपयोस्तु दानवाः ।
प्रेक्षन्तस्तावुभौ तत्र संभ्रान्तास्ते तदाऽभवन् ॥८८॥
कालेन धूतं काष्ठं मरणान्तं न मुच्यते ।
न शक्यं त्वन्यथाकर्तुं दिष्टं हि बलवत्तरम् ॥८९॥
शुक्रेण बोधिताश्चापि नैवाऽमन्यत तद्वचः ।
यस्तु नो दशवर्षाणि सततं शास्ति वै प्रभुः ॥९०॥
एष वै गुरुरस्माकं काव्यो नागन्तुको ह्ययम् ।
इति निश्चित्य दैत्यास्ते चिराभ्यासेन मोहिताः ॥९१॥
प्राहुर्गच्छ द्रुतं चेतो गुरुस्तु शिक्षकोऽस्ति नः ।
भार्गवो वाऽङ्गिरा वापि भगवानेष नो गुरुः ॥९२॥
तदा शुक्रः कोपितोऽभूत् शशाप दानवाँस्तदा ।
सर्वे प्रणष्टभाना वै महद्दुःखमवाप्स्यथ ॥९३॥
शुक्रेण शप्ता असुराः कृतार्थोऽभूद् बृहस्पतिः ।
तिरोभवत् ततः स्थानात् ततस्ते ह्यसुराः पुनः ॥९४॥
विभ्रान्ता अभवन् लक्ष्मि ! वञ्चिताः स्मेति चावदन् ।
प्रह्लादमग्रतः कृत्वा शुक्राचार्यगृहं ययुः ॥९५॥
ऊचुस्तं नः क्षमस्वेति प्रसादं कुरु भार्गव ! ।
नो चेत् प्रसादं कुरुषे प्रविशामो रसातलम् ॥९६॥
काव्यो विचारयामास याज्यान्विनाऽप्यहं मृषा ।
ततो मया रक्षणीयाः शोभेऽहं सेवितश्च तैः ॥९७॥
अथाहैतान्न भेतव्यं न गन्तव्यं रसातलम् ।
भानं प्रणष्टं यद् वोऽद्य तत्पुनः प्रतिपत्स्यथ ॥९८॥
देवान् जित्वा त्वेकवारं पातालं प्रतिपत्स्यथ ।
इत्युक्ता ह्यसुरा हृष्टाः सुरान् जेतुं विनिर्ययुः ॥९९॥
सुरासुराणां संग्रामो ह्यभवद् दारुणस्तदा ।
अजयन्नसुरा देवान् देवाश्चापि ह्यमन्त्रयन् ॥१००॥
यज्ञे चाहूय वै षण्डामर्कौ दैत्यगुरू च तौ ।
आश्रयामः पूजयामो भजामो नो जयो भवेत् ॥१०१॥
देवैराहूय तौ प्रोक्तौ त्यजेतामसुरान् द्विजौ ।
वयं युवां भजिष्यामः सह जित्वा तु दानवान् ॥१०२॥
एवं सन्धाय च सुराश्चक्रुर्युद्धं हि दारुणम् ।
षण्डामर्कपरित्यक्ता दानवाश्च पराजिताः ॥१०३॥
काव्यशापाभिभूताश्च विविशुस्ते रसातलम् ।
एवं निरुद्यमा देवैः कृताः कृच्छ्रेण दानवाः ॥१०४॥
जयन्ती स्वपतिं नित्यं सेवते मोहकारिणी ।
शुक्राचार्यो विसस्मार दैत्याभ्युदयमेव च ॥१०५॥
इन्द्रस्यैवं कृतं कार्यं जयन्त्या विजयात्मकम् ।
दैत्यानां निर्बलत्वं च पातिव्रत्यार्थयाऽपि वै ॥१०६॥
पत्युश्चाऽप्यप्रधृष्यत्वं महेन्द्रादेर्जयादिकम् ।
दैत्यानां चापकृष्टत्वं साधितं कन्यया व्रतैः ॥१०७॥
नारायणः परंब्रह्माऽक्षरधामस्थितोऽपि सः ।
करोति रक्षणं काले धृत्वा धर्मात्मिकां तनुम् ॥१०८॥

आद्ये पत्नीव्रताख्योऽभूत् कृष्णो गोलोकवासकृत् ।
ततो नारायणो जज्ञे नरयुक्तो हिमाचले ॥१०९॥
पुनर्यज्ञो धर्मपुत्रोऽभवत् स एव धार्मिकः ।
नरसिंहः स एवाऽभूत् वामनोऽपि बभूव ह ॥११०॥
दत्तात्रेयो जामदग्न्यो रामादित्यो बभूव ह ।
वासुदेवो वेदव्यासः कृष्णनारायणस्तथा ॥१११॥

काम्भरेयस्तथा कल्की स एव भगवान् स्वयम् ।
जायते युगपर्याये सुरधर्मावनाय वै ॥११२॥
अहमेव स एवाऽस्मि मदंशाश्च सहस्रशः ।
दिने दिने प्रजायन्ते गूढरूपाः सुखप्रदाः ॥११३॥
धनुश्चक्रध्वजमत्स्यस्वस्तिककरचिह्निताः ।
गुल्फत्रयोर्ध्वरेखाऽर्धचन्द्रचक्रपदाम्बुजाः ॥११४॥

यत्पादसेवनात् सन्तः साध्व्यो भवन्ति देहिनः ।
मोक्षदा देवसदृशा मुक्ता एव न संशयः ॥११५॥
इति ते कथिता लक्ष्मि ! ख्यातेर्जयन्त्याः सिद्धयः ।
पातिव्रत्यकृताः पाठाच्छ्रवाद् भुक्तिमुक्तिप्रदाः ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रताख्यातिकृतमहेन्द्रादिजडीभावः, विष्णुकृतख्यातिनाशः, भृगुणा ख्यातिरुज्जीविता, शुक्रस्य तपश्चर्या, इन्द्रेण पुत्री जयन्ती विघ्नार्थं शुक्राय दत्ता, तत्पुत्री देवयानी, तपोनिरोधः, असुरपराजयः, पातिव्रत्यमहिमेत्यादिनिरूपणनामा सप्ताधिकचतुश्शततमोऽध्यायः ॥४०७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि पातिव्रत्यमहाबलम् ।
उपबर्हणपत्न्या वै मालावत्या प्रदर्शितम् ॥ १ ॥
ब्रह्माऽसृजद् यदा सृष्टिं विनिर्माय तु नारदम् ।
प्राह सृष्टिप्रवाहार्थे नारदस्तन्न्यषेधयत् ॥ २ ॥

मुक्तिदाता पिता प्रोक्तो मोक्षगामी सुतो मतः ।
भ्राता माता पतिः पत्नी भक्तिप्रदाः शुभाः सदा ॥ ३ ॥
मायाबन्धनदातारो न बोध्यास्ते कुटुम्बिनः ।
त्वं च ब्रह्मा स्वयं ज्ञानी नियोजयसि मायिके ॥ ४ ॥

नाहं मायां ग्रहीष्यामि न च सृष्टिं करोम्यपि ।
भजिष्ये ब्रह्म परमं तारयिष्ये त्वदादिकान् ॥ ५ ॥
सार्थकयिष्ये पुत्रत्वं मा खेदं वह विश्वसृट् ।
इत्युक्तो रोषताम्राक्षो ब्रह्मा शशाप नारदम् ॥ ६ ॥

मृत्युं प्राप्य दारयुक्तो भव दासस्ततः परम् ।
ज्ञानहीनः कर्मभारो भव नारद वै मुहुः ॥ ७ ॥
तदा तं नारदः प्राह पिता मैवं कुरु प्रभो ! ।
त्वमप्यत्र हि संसारे पूज्यतां मा लभ क्वचित् ॥ ८ ॥
इत्युक्तः स तदा ब्रह्मा सनकादिभिरर्थितः ।
पुत्रं प्राह पुनस्त्वं वै चतुर्थे मामवाप्स्यसि ॥ ९ ॥

ब्रह्मचर्यपरस्तत्र सदा पुत्र भविष्यसि ।
तावद् दारगृहव्याप्तो भविष्यसि न संशयः ॥१०॥
इत्युक्ते नारदो नष्टो मारीचो ह्यभवत् ततः ।
गन्धर्वराजस्य विश्वावसोः पुत्रत्वमाप्तवान् ॥११॥
उपबर्हणमामाऽसौ गन्धर्वोऽभूच्च वैष्णवः ।
शृणु लक्ष्मि ! कथयामि विश्वावसुः पुरा किल ॥१२॥
तपश्चचार शंभोश्च पुत्रहीनो हि कर्मणा ।
वशिष्ठः प्रददौ तस्मै मन्त्रं तु द्वादशाक्षरम् ॥१३॥
वर्षशतं जजापैनं पुष्करे तावदेव च ।
प्रसन्नास्यं वृषभस्थं ददर्श पुरतः शिवम् ॥१४॥
वरं वृणुष्वेति शिवस्तमुवाच ततो ह्ययम् ।
ययाचे श्रीहरेर्भक्तिं पुत्रं परमवैष्णवम् ॥१५॥
शिवः प्राह प्रसन्नोऽस्मि तथाऽस्तु तव मंगलम् ।
कृतार्थस्त्वं वरादेकादन्यच्चर्वितचर्वणम् ॥१६॥
यस्य भक्तिर्हरौ वत्स सुदृढा सर्वमंगला ।
स समर्थः सर्वविश्वं पातुं कर्तुं च लीलया ॥१७॥
भवेद् यस्य सुकृतिनः पुत्रः परमवैष्णवः ।
कुलकोटिं तस्य ते वै ह्युद्धारयन्ति लीलया ॥१८॥
चरितार्थः पुमानेकाद् वरमिच्छुर्वरादहो ।
किं वरेण द्वितीयेन पुंसा तृप्तिर्न मंगले ॥१९॥
हरेर्भक्तिं हरेर्दास्यं पुत्रं परमवैष्णवम् ।
चिरायुषं च गुणिनं शश्वत्सुस्थिरयौवनम् ॥२०॥
ज्ञानिनं सुन्दरं श्रेष्ठं गुरुभक्तं जितेन्द्रियम् ।
लभस्वेमं वरं चेति ह्युक्त्वा शंभुस्तिरोदधे ॥२१॥

विश्वावसुर्गृहं यातः पर्वते गन्धमादने ।
नारदस्तस्य भार्यायां लेभे जन्म शुभावहम् ॥२२॥
गुरुर्वशिष्ठस्तन्नाम चकार चोपबर्हणम् ।
उपशब्दोऽधिकार्थोऽत्र पूज्ये तु बर्हणः पुमान् ॥२३॥

पूज्यानामधिको बालस्तेनोपबर्हणाभिधः ।
उपबर्हणः कालेन तेपे च दुष्करं तपः ॥२४॥
गण्डकीतीरमासाद्य तं तदा स्थिरयौवनम् ।
गान्धर्व्यो ददृशुस्तं च पञ्चाशद् वव्रिरे पतिम् ॥२५॥

गृहीत्वा ता युवा रेमे द्विलक्षवर्षं कामुकः ।
एकदा स ययौ ब्रह्मसभायां च जगौ कथाम् ॥२६॥
तदा रंभां स चालोक्य चंचलो ह्यभवन्मुहुः ।
द्रुतं तत्याज संगीतं मूर्छां प्राप सभातले ॥२७॥
उच्चैः प्राजहसुर्देवा ब्रह्मा कोपाच्छशाप तम् ।
व्रज त्वं शूद्रयोनिं च गान्धर्वीं तनुमुत्सृज ॥२८॥
काले वैष्णवसंसर्गान्मन्पुत्रस्त्वं भविष्यसि ।
उपब्रर्हणगन्धर्वः स जहौ तां तनुं तदा ॥२९॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धमाज्ञाचक्रं षड् भित्त्वा तन्वा विनिर्ययौ ॥३०॥
योगेन ब्रह्मसम्प्राप श्रीकृष्णं मनसा स्मरन् ।
पत्न्यश्च बान्धवाः सर्वे विलप्य रुरुदुर्भृशम् ॥३१॥
पञ्चाशद्योषितां मध्ये साध्वी मालावती तदा ।
उच्चैः रुरोद सा तीव्रं कृत्वा कान्तं स्ववक्षसि ॥३२॥
चित्ररथस्य कन्यास्ता रुरुदुस्तस्य योषितः ।
मालावती विललाप कृष्ण त्वं जगतां पतिः ॥३३॥
नाहं जगद्बहिस्त्वस्मि मां न पासि कथं प्रभो ! ।
अरे सुरा यज्ञभुजो घृतं भोक्तुं क्षमा भुवि ॥३४॥
क्षणेनाऽयज्ञभाजश्च करिष्यामि सतीत्वतः ।
नारायण जगत्कान्त नाहमेव जगद्बहिः ॥३५॥
पातिव्रत्यं मम पूर्णमखण्डितं यदस्ति चेत् ।
शीघ्रं जीवय मत्कान्तमन्यथा त्वां शपाम्यहम् ॥३६॥
प्रजापते ! पुत्रशापात् त्वमपूज्यो धरातले ।
तवैवाऽनधिकारित्वं करिष्याम्यत्र सर्जने ॥३७॥
हे शंभो ज्ञानलोपं ते करिष्यामि शपेन वै ।
धर्मलोपं च धर्मस्य करिष्याम्येव वै क्षणात् ॥३८॥
यमाधिकारं दूरे च करिष्यामि न संशयः ।
सत्यं कालं शपिष्यामि मृत्युकन्यां सुनिष्ठुराम् ॥३९॥
शपामि सर्वानत्रैव जरां व्याधिं विनाऽधुना ।
व्याधिना जरया मृत्युर्न ह्यभूच्च पतेर्मम ॥४०॥
इत्युक्त्वा कौशिकीतीरे त्वागच्छच्छप्तुमेव तान् ।
तां शप्तुमुद्यतां दृष्ट्वा ब्रह्मा शंभुपुरोगमः ॥४१॥
देवताश्च ययुस्तीरं क्षीराब्धेः शरणं हरिम् ।
तत्र स्नात्वा च तुष्टुवुः परमात्मानमीश्वरम् ॥४२॥
विष्णुं ब्रह्मा जगत्कान्तमित्युवाच ह भीतवत् ।
उपबर्हणपत्नी सा कन्या चित्ररथस्य च ॥४३॥
कान्तहेतोश्च मा देवान् शपेत् त्वं रक्ष माधव ! ।
स्मरन्ति साधवः सन्तो महापत्सु परमेश्वरम् ॥४४॥
शरणागतदीनार्तपरित्राणपरायण ! ।
रक्ष रक्ष कृष्णनारायण ते शरणं गतान् ॥४५॥
अधिकारविहीनं मां मालावती दधाति वै ।
सम्पत् सर्वा महाब्राह्मी यास्यत्येवाऽधुना मम ॥४६॥
शंभु प्राह त्वया दत्तं महाज्ञानं सुदुर्लभम् ।
शतमन्वन्तरतपःफलेन पुष्करे पुरा ॥४७॥
ऐश्वर्यधनसामर्थ्यं प्राप्तं मया नरायण ! ।
ममैतज्ज्ञानरत्नं वै शापान्निर्याति योषितः ॥४८॥
अहो पतिव्रतातेजः सर्वेषां तेजसां परम् ।
तेजोऽनलेन दग्धं मां त्राहि रक्ष हरे प्रभो ॥४९॥
धर्मः प्राह महारत्नं धर्मं एव सनातनः ।
सोऽहं नाशं समेष्यामि योषितः शापतः प्रभो ! ॥५०॥
सप्तमन्वन्तरतपःफलेन परमेश्वर ! ।
प्राप्तो धर्मस्त्वया दत्तोऽधुना शापेन नश्यति ॥५१॥
देवा ऊचुः क्रतौ घृतभुजो वयं त्वया कृताः ।
योषिच्छापेन वै सर्वं नाशं याति दयां कुरु ॥५२॥
इति स्तुवन्ति तावद्वै वाग्बभूवाऽशरीरिणी ।
यूयं गच्छत तत्रैव यास्याम्यहं हि रक्षणे ॥५३॥
श्रुत्वा हृष्टाः सुरा मालावतीं ययुर्हि तत्क्षणम् ।
मालावती सुरान् दृष्ट्वा प्रणनाम पतिव्रता ॥५४॥
रुरोद कान्तं संस्थाप्य देवानां सन्निधौ प्रिये ! ।
एतस्मिन्नन्तरे कश्चित् तत्र ब्राह्मणबालकः ॥५५॥
आजगाम शुक्लवासाः पञ्चाङ्गपत्रसंयुतः ।
सतिलकः समागत्य सभामध्ये ह्युवास सः ॥५६॥
उवाच कथमत्रैते सुरा ब्रह्मादयोऽपरे ।
समायाता नमो वोऽस्तु स्रष्टा स्वयं कथं स्थितः ॥५७॥
अहो हर्ता स्वयं रुद्रो धर्मः साक्षी कथं स्थितः ।
कथं रविः कथं चन्द्रः कथमत्र हुताशनः ॥५८॥
कथं कालो मृत्युकन्या कथं वात्र यमादयः ।
हे मालावति ते क्रोडे कोऽति शुक्लः शवोऽधुना ॥५९॥
इति ब्रुवन्तं तं नत्वा मालावती जगाद ह ।
नमो विप्रस्वरूपाय कृष्णनारायणाय ते ॥६०॥
अकस्माद् ब्रह्मणः शापात् प्राणाँस्तत्याज मत्पतिः ।
देवानुद्दिश्य विलपाम्यथ जीवति मत्पतिः ॥६१॥
सर्वान्देवानहं याचे पतिदानं ममेप्सितम् ।
यदि दास्यन्ति देवा मे कान्तदानं यथेप्सितम् ॥६२॥
भद्रं तदाऽन्यथा तेभ्यः संशप्स्यामि च दारुणम् ।
दुर्निवार्यः सतीशापस्तपसा केन वार्यते ॥६३॥

ब्राह्मणस्तामुवाचेदं सति काले फलेत् कृतम् ।
काले प्राप्ते भवेच्चापि नाग्रहस्तत्र युज्यते ॥६४॥
यत्राधिकारो देवानां तत्तद् ददाति नाऽपरम् ।
न बलं न च सौन्दर्यं नैश्वर्यं न धनं सुतः ॥६५॥
नैव स्त्री न च सत्कान्तो लभ्यते तपसा विना ।
प्रकृतिं सेवते यः स लभेत् कान्तां गुणान्विताम् ॥६६॥
श्रियं च निश्चलां पुत्रं पौत्रं भूमिं धनं प्रजाम् ।
शिवार्चनात् सतीं कान्तां सत्पतिं लभते स सा ॥६७॥
विद्यां ज्ञानं सुकवितां पुत्रं पौत्रं परां श्रियम् ।
बलं धनं विक्रमं च महदैश्वर्यमित्यपि ॥६८॥
ब्रह्मार्चनाल्लभेत् सिद्धीर्विद्यां श्रियं प्रजास्तथा ।
सूर्यार्चनाल्लभेद् विद्यामारोग्यधनपुत्रकान् ॥६९॥
गणेशस्याऽर्चनाद् विघ्ननाशं सर्वाग्रपूज्यताम् ।
परमानन्दमैश्वर्यं पुत्रं विद्यां धनं प्रजाः ॥७०॥
विष्णोस्तु सेवया मुक्तिं तपो धर्मं यशः श्रियम् ।
धर्मस्य सेवनात् शान्तिं सुखं धनं लभेत च ॥७१॥
यो यं देवं भजेद्भक्त्या सत्वादौ लभते तु तम् ।
काले पश्चात्तेन सार्धं परं कृष्णपदं लभेत् ॥७२॥
भजते श्रीकृष्णनारायणं यः प्रकृतेः परम् ।
अक्षरं परमं ब्रह्म भगवन्तं सनातनम् ॥७३॥
साकारं च निराकारं ज्योतिः स्वेच्छामयं विभुम् ।
सर्वाधारं च सर्वेशं परमानन्दमीश्वरम् ॥७४॥
निर्लिप्तं साक्षिरूपं च भक्तानुग्रहविग्रहम् ।
जीवन्मुक्तः स सत्यं वै वरं नाकांक्षति ध्रुवम् ॥७५॥
स सर्वं मनुते तुच्छं सालोक्यादि चतुष्टयम् ।
ब्रह्मत्वममरत्वं च लोष्टवत्तुच्छवत् सति ! ॥७६॥
ऐश्वर्यं लोष्टतुल्यं च नश्वरं चेति मन्यते ।
जलबुद्बुदवत्सर्वं जानात्येव विनश्वरम् ॥७७॥
दास्यं विना न याचेत श्रीकृष्णस्य पदं परम् ।
स्वप्ने जागरणे वापि शश्वत् सेवां हि वाञ्छति ॥७८॥
परिपूर्णतमं ब्रह्म सेवते यः स्थिरः सदा ।
आत्मनः कुलकोटिं स शतं मातामहस्य च ॥७९॥
श्वशुरस्य शतं पूर्वमुद्धृत्य स्वं हि लीलया ।
दासं दासीं प्रसूं भार्यां पुत्रादपि परं शतम् ॥८०॥
उद्धरेद् कृष्णभक्तो वै गोलोकं धाम याति च ।
गुरुवक्त्राद् विष्णुमन्त्रो यस्य कर्णे विशत्यपि ॥८१॥
यमस्तल्लेखनं दूरं करोति तत्क्षणं भिया ।
मधुपर्कादिकं ब्रह्मा तदर्थे विनियुज्य च ॥८२॥
सत्यलोकेऽभितो याति मार्गेणानेन यास्यति ।
निःशंको याति गोलोकं विहाय मानवीं तनुम् ॥८३॥
पुरातनं कृतं कर्म यद्यत् तस्य शुभाशुभम् ।
छिनत्ति कृष्णश्चक्रेण तीक्ष्णधारेण सन्ततम् ॥८४॥
तं विहाय जरामृत्युर्याति चक्रभिया सति ! ।
अन्यथा शतखण्डं तां कुरुते तु सुदर्शनः ॥८५॥
गत्वा दिव्यां तनुं धृत्वा श्रीकृष्णं सेवते तदा ।
यावत् कृष्णो हि गोलोके तावद्भक्तो वसेत् सदा ॥८६॥
निमेषं मनुते दासो नश्वरं ब्रह्मणो वयः ।
वद विना कृष्णनारायणं नान्यः समर्थकः ॥८७॥
केन रोगेण हि मृतोऽधुना साध्वि तव प्रियः ।
सर्वरोगचिकित्सां च जानाम्यहं चिकित्सकः ॥८८॥
राजमृत्युं यमं कालं व्याधिमानीय ते पुरः ।
निबद्ध्य दातुं शक्तोऽहं व्याधो बध्वा पशुं यथा ॥८९॥
यो वा योगेन खेदेन देहत्यागं करोति च ।
तस्य तं जीवनोपायं जानामि योगधर्मतः ॥९०॥
विप्रवाक्यं सती श्रुत्वा कान्तभक्ता ह्युवाच तम् ।
सर्वं कलयितुं शक्तस्त्वं यदि ब्राह्मणोत्तम ! ॥९१॥
कालं यमं मृत्युकन्यां मदग्याशे समानय ।
मालावतीवचः श्रुत्वा विष्णुस्तानाह्वयँस्तदा ॥९२॥
ददर्श मृत्युकन्यां सा प्रथमं मालिकावती ।
कृष्णवर्णां घोररूपां रक्ताम्बरप्रधारिणीम् ॥९३॥
षड्भुजां च दयायुक्तां चतुष्षष्टिसुतान्विताम् ।
ततः कालं घोररूपं ददर्श पुरतः सती ॥९४॥
षड्वक्त्रं षोडशभुजं चतुर्विंशतिलोचनम् ।
षट्पादं कृष्णवर्णं च रक्ताम्बरधरं वरम् ॥९५॥
ग्रीष्मसूर्यसमकान्तिं सर्वसंहाररूपिणम् ।
सती ददर्श पुरतो व्याधिसंघान् सुदुर्जयान् ॥९६॥
वयसाऽतिमहावृद्धान् यूनो बालाँश्च घातकान् ।
सती ददर्श धर्मिष्ठं कृष्णवर्णं यमं तथा ॥९७॥
धर्माधर्मविचारज्ञं शास्तारं पापिनां गुरुम् ।
अथ मालावती यमं पप्रच्छ युक्तिकोविदा ॥९८॥
हे धर्मराज धर्मिष्ठ काले ह्यनागतेऽपि मे ।
कान्तमकाले तु कथं हरसि वद मे विभो ॥९९॥
यमः प्राहाऽप्राप्तकालो म्रियते न कदाचन ।
ईश्वराज्ञां विना साध्वि ! नाऽमृतं वै नयाम्यहम् ॥१००॥
अहं कालो मृत्युकन्या व्याधयश्च सुदुर्जयाः ।
निषेके निर्मिता यस्य तं हरामो हि तत्क्षणे ॥१०१॥

मृत्युकन्या सहवासा विज्ञापयति यत्क्षणम् ।
तत्क्षणेऽहं कलयामि पृच्छैनां त्वत्पतिकृते ॥१०२॥
मालावती तदा प्राह मृत्युकन्ये कथं त्वया ।
मम कान्तो हृतोऽकाले जीवितायां मयि प्रिये ! ॥१०३॥
मृत्युकन्यां च तां प्राह सृष्टा विश्वसृजाऽत्र वै ।
प्राणवियोजनकार्ये संहरामि यथाऽलम् ॥१०४॥
कालेन प्रेरिता चाऽहं निषेकेण सहस्थिता ।
नित्यमायुर्हराम्येव नात्र मे दूषणं प्रिये ॥१०५॥
सती सतीनां मध्ये च काचित्तेजस्विनी यदि ।
मामपि भस्मसात्कर्तुं क्षमा तदा जगत् खलु ॥१०६॥
मृत्युकन्याविहीनं सद्याऽमृतं स्यान्न त्वन्यथा ।
अहं तिष्ठामि गर्भेऽपि देहिनां देहतत्त्वके ॥१०७॥
नित्यं नित्यं संहरामि जानन्ति नैव तज्जनाः ।
अद्य यज्जायते श्वस्तद् वृद्धमित्येव वर्तते ॥१०८॥
नूतनं जायते पश्चाज्जीर्णं वृद्धं तदुच्यते ।
नित्यं नित्यं हि वार्धक्यं सर्वत्र संप्रवर्तते ॥१०९॥
जना मूढास्तु मोदन्ते युवाऽहं बालकोऽस्म्यहम् ।
नास्मि वृद्ध इत्यज्ञानं जानन्त्येव न वृद्धताम् ॥११०॥
वृद्धिर्हि वृद्धता प्रोक्ता निषेको वर्धते सदा ।
गर्भे च वर्धते नित्यं बाल्यादौ च विवर्धते ॥१११॥
वर्धते एव नित्यं न तूनो भवति कश्चन ।
कालप्रपेरिता चाहं मत्पुत्रा व्याधयस्तथा ॥११२॥
कुर्मः कार्यं प्रतिक्षणं न नो दोषोऽस्ति वै सति ! ।
पृच्छ कालं महात्मानमुचितं स करिष्यति ॥११३॥
सती प्राह तदा कालं साक्षिन् वै कर्मणां प्रभो ! ।
कथं हरसि मत्कान्तं जीवितायां मयि प्रभो ! ॥११४॥
श्रुत्वा मालावतीदुःखं कालः प्राह सतीं तदा ।
को वाऽहं को यमः का च मृत्युकन्या तथाऽऽधयः ॥११५॥
वयं भ्रमामः श्रीकृष्णादेशस्य परिपालकाः ।
मूला प्रकृतिर्यद्वामे यत्कुक्षौ विष्णुशंभ्वजाः ॥११६॥
देवता यन्निदेशस्था धर्मोऽपि यस्य वै वशे ।
ग्रहाश्च राशयो यस्य दिक्पालाद्याश्च वै वशे ॥११७॥
तस्यैवांशो ह्ययं कालो मृत्युर्मृत्युसुताऽऽधयः ।
इमे यत्प्रेरिताः सर्वे कुर्मो योगवियोजने ॥११८॥
पृच्छ कृष्णं शासकं त्वं कथं स्वामी मृतस्तव ।
इत्युक्त्वा विरमे कालो ब्राह्मणस्तामुवाच ह ॥११९॥
पृष्टः कालो यमो मृत्युकन्या व्याधिगणा अपि ।
कस्तेऽधुना च सन्देहस्तं पृच्छ कन्यके पुनः ॥१२०॥
मालावती तदा प्राह कं पृच्छाम्यधुना द्विज ! ।
योगेन प्राणाँस्तत्याज मत्पतिः शापहेतुना ॥१२१॥
अधुना मत्प्राणकान्तं देहि देहि यदि कृपा ।
नत्वा वः स्वामिना सार्धं यास्यामि स्वगृहं प्रति ॥१२२॥
कृष्णं क्व मार्गयाम्यत्र ब्राह्मणः कृष्ण एव हि ।
ब्राह्मणो यत्करोत्येव कृष्णोऽनुसरति द्विजम् ॥१२३॥
इति दीनवचः श्रुत्वा ब्राह्मणो देवमध्यगः ।
उवाच परमं सत्यं देवान्प्रति दयावशः ॥१२४॥
उपबृंहणभार्येयं पुत्री चित्ररथस्य च ।
ययाचे जीवदानं च स्वामिनः शरणागता ॥१२५॥
तन्मां ब्रूत सुराश्चात्र किमनुष्ठेयमर्थकृत् ।
शप्तुकामा सुरान्सर्वान् मया सती निरोधिता ॥१२६॥
बहुभिर्वाक्प्रलापैश्चाऽधुना किं स्याद् विलम्बने ।
युष्माभिरर्थितो विष्णुः श्वेतद्वीपे स नागतः ॥१२७॥
बभूवाऽऽकाशवाणी च पश्चादायाति केशवः ।
विपरीतं तु तज्जातं यतो नायाति केशवः ॥१२८॥
ब्रह्मोवाच तदा विप्रं नारदोऽयं ममाऽऽत्मजः ।
अकाले मम शापेन गन्धर्वस्तूपबर्हणः ॥१२९॥
योगेन प्राणाँस्तत्याज कालेऽवशेषितेऽपि वै ।
तत्तु वर्षसहस्रं चैवायुरस्यास्ति साम्प्रतम् ॥१३०॥
द्विलक्षं तु गतं तस्य यच्छेषं प्रवदामि तत् ।
यथैनं न स्पृशेच्छापो देवाश्च निर्भया यथा ॥१३१॥
हरिः सर्वत्र चास्त्येव नाऽऽयातो नैव विद्यते ।
दृश्याऽदृश्यस्वरूपेण कृष्णनारायणोऽस्ति सः ॥१३२॥
कृष्णः कथं न चायाति वियद्वागपि वै मृषा ।
इति निन्दां हरेस्तस्य मा कुरु द्विज ! संसदि ॥१३३॥
कस्य शिष्यो मुनीन्द्रस्य कस्त्वं नाम्ना च भो द्विज ! ।
क्व वासः कुत आयातः कस्य वंशोद्भवो भवान् ॥१३४॥
विडम्बयसि देवाँश्च कृष्णनारायणं तथा ।
अधुनापि सभां विष्णुर्नायात इति यद्वचः ॥१३५॥
त्वयोक्तं तन्न श्रोतव्यं निन्दात्मकं परात्मनः ।
विधिर्व्यासिर्नृश्च यावत् विष्णुः सर्वत्र व्यापकः ॥१३६॥
एवं सर्वत्र सत्त्वे वै गमनागमने कुतः ।
महन्निन्दा भवेत्त्वत्र नैव साधुः शृणोति ताम् ॥१३७॥
निन्दकः श्रोतृभिः सार्धं कुंभीपाकं व्रजेद् युगम् ।
विष्णुनिन्दा त्रिविधा वै मूर्तिखण्डनरूपिणी ॥१३८॥
अनस्तित्वरूपिणी च जीवसाम्यस्वरूपिणी ।
तस्याऽत्र निष्कृतिर्नास्ति यावद्वै ब्रह्मणः शतम् ॥१३९॥

गुरोर्निन्दां यः करोति पितुर्निन्दां नराधमः ।
स याति कालसूत्रं च यावच्चन्द्रदिवाकरौ ॥१४०॥
ब्राह्मणस्तु तदाकर्ण्य देवानुवाच वै तदा ।
का कृता विष्णुनिन्दाऽहो हे देवा धर्मशालिनः ॥१४१॥
नाऽऽगतो हरिरत्रेति व्यर्थाऽऽकाशसरस्वती ।
इति प्रोक्तं मया भद्रं न तद्वै निन्दनं कृतम् ॥१४२॥
यूयं वै भावुका ब्रूत विष्णुर्व्यापक ईश्वरः ।
इतिचेत् तत्कथं याताः श्वेतदीपं वराय च ॥१४३॥
अंशांशिनोर्न भेदश्चेत् परमेशतदंशयोः ।
कलां हित्वा निषेवन्ते सन्तः पूर्णतमं कथम् ॥१४४॥
सर्वांशानां प्रभुः कृष्णो भक्तानुग्रहविग्रहः ।
ऊर्ध्वे च सर्वब्रह्माण्डाद् वैकुण्ठं सत्यमेव वै ॥१४५॥
चतुर्भुजश्च वैकुण्ठे लक्ष्मीकान्तः सनातनः ।
तस्मादूर्ध्वे च गोलोकः पञ्चाशत्कोटियोजनम् ॥१४६॥
गोलोके द्विभुजः कृष्णो राधाकान्तः सनातनः ।
ततोऽतिव्यापको लोकोऽक्षरब्रह्मात्मकोऽतिगः ॥१४७॥
परिपूर्णतमं ब्रह्मपरमं तत्र राजते ।
एवं तस्य कथमत्र नागमोऽद्य भवेद् ब्रूत ॥१४८॥
ध्यायन्ति वैष्णवाः सन्तः सेवन्ते दिव्यविग्रहम् ।
यं सेवन्ते भागवताः सन्तः साध्व्यो निरन्तरम् ॥१४९॥
यस्य वंशोद्भवोऽहं च यस्य शिष्यश्च बालकः ।
सोऽयं वक्ति द्विजो भूत्वा देवसंघा निबोधत ॥१५०॥
शीघ्रं जीवय गन्धर्वं देवेश्वर सुरेश्वर ।
व्यक्ते जाते ततः कृष्णे वाग्युद्धे किं प्रयोजनम् ॥१५१॥
इत्युक्त्वा बालको विप्रश्चतुर्बाहुः रमायुतः ।
लक्ष्मीशः श्रीकृष्णनारायणात्मकोऽभवत्तदा ॥१५२॥
अथ ब्रह्मा कमण्डलुजलं शवे ददौ तदा ।
सञ्चारं मनसस्तस्य चकार सुन्दरं वपुः ॥१५३॥
ज्ञानदानं ददौ शंभुर्विष्णुर्जीवं ददौ ततः ।
धर्मज्ञानं स्वयं धर्मो वह्निर्ददौ हि जाठरम् ॥१५४॥
कामो ददौ सुरूपत्वं वायुः प्राणान् ददौ तदा ।
सूर्यो ददौ नेत्रतेजो वाणीं ददौ च शारदा ॥१५५॥
शोभां ददौ तदा श्रीश्च देवा ददुर्हि तत्क्रियाः ।
शवस्तथापि नोत्तस्थौ यथा शेते जडस्तथा ॥१५६॥
ब्रह्मोवाच तदा साध्वीं वयं कृतमनोरथाः ।
अथ स्नात्वा च श्रीकृष्णानारायणं हृदि स्मर ॥१५७॥
तं विना नोजीवनं वै जीवे तिष्ठति वास्तवम् ।
ब्रह्मणो वचनात् साध्वी तुष्टाव परमेश्वरम् ॥१५८॥
वन्दे तं परमात्मानं सर्वकारणकारणम् ।
विना येन शवाः सर्वे प्राणिनोऽपि निरर्थकाः ॥१५९॥
यदावेशात् सजीवाः सक्रियाः सचेतना यतः ।
सेवाध्यानं न तदपि घटते विग्रहं विना ॥१६०॥
तादृशं दिव्यरूपं श्रीकृष्णनारायणं विभुम् ।
तेजोमण्डलमध्यस्थं कोटिगोपीगणावृतम् ॥१६१॥
अतीव कमनीयं च श्यामं पंकजलोचनम् ।
मन्दहासाननं कोटिकन्दर्पसुन्दरं प्रभुम् ॥१६२॥
द्विभुजं पीतवस्त्रं च किशोरं राधिकापतिम् ।
लक्ष्मीश्रीपार्वतीपद्मापद्मिनीमाणिकीपतिम् ॥१६३॥
पार्षदैः सेवितं वन्दे सर्वरूपधरं हरिम् ।
प्राणरूपं पतिप्राणं वन्दे जीवातुमीश्वरम् ॥१६४॥
आयाहि भगवँश्चात्र गन्धर्वे जडचेतने ।
इत्युक्त्वा सा तु गान्धर्वी पुनः प्राह रुषा सती ॥१६५॥
यदि नायाहि भगवन्! करिष्ये वै रमादिकाः ।
मत्सदृशीः स्वामिहीनास्त्वां च गन्धर्वसदृशम् ॥१६६॥
पातिव्रत्यं यदि मेऽस्ति सत्यं तदेति यावता ।
वक्तुं याति तदा तावत् कृष्णस्तत्राऽऽजगाम ह ॥१६७॥
मा मा भेत्युक्तवाँस्त्रिधा सतीं शापे निषिध्य वै ।
प्रविवेश च गन्धर्वे तावत्सोऽभवदुत्थितः ॥१६८॥
उत्थाय शीघ्रं वीणां च धृत्वा स्नात्वा च वाससी ।
ननाम देवान् विष्णुं श्रीकृष्णनारायणं तथा ॥१६९॥
ननर्त च क्षणं कृष्ण हरे गोविन्द वै वदन् ।
नेदुर्दुन्दुभयो देवाः पुष्पवृष्टिं प्रचक्रिरे ॥१७०॥
सर्वे ययुः स्वस्वधाम नारदोऽपि स्वयोषिता ।
समं मात्रा तथा पित्रा ययौ गन्धर्वपत्तनम् ॥१७१॥
मालावती रत्नकोटिं ददौ धनानि वै सती ।
भोजनानि च विप्रेभ्यः स्वस्तिवाचमकारयत् ॥१७२॥
महोत्सवं चकारापि गन्धर्व उपबर्हणः ।
पुनर्जीवनमासाद्य पतिव्रताप्रदापितम् ॥१७३॥
हरेर्भक्तिं हरेर्दास्यं चकार तूपबर्हणः ।
यो या चेदं पठेद्वापि शृणुयाद् भावतः प्रिये! ॥१७४॥
तस्य तस्याः प्रसौभाग्यप्राप्तिर्भवेन्न संशयः ।
भुक्तिर्मुक्तिश्चतुर्वर्गसिद्धिर्भवेदखण्डिता ॥१७५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ब्रह्मशापान्नारदस्य मृत्युरुपबर्हणाख्यगन्धर्वजन्मनि पुनर्मृत्युस्तत्र तत्पत्न्या मालावत्या पातिव्रत्यबलेन सविष्णुदेवानाहूय कालादीनाहूय च स्वपतिरुज्जीवित इत्यादिनिरूपणनामाऽष्टाधिकचतुश्शततमोऽध्यायः ॥ ४०८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! प्रवक्ष्यामि पातिव्रत्यपरायणाम्।
कथां त्वाश्चर्यपरमां पूर्वयुगानुसंभवाम् ॥ १ ॥
कन्या विशालराजस्य वीरा धर्मपरायणा।
विशालेन कृते स्वयंवरे राजन्यशोभिते ॥ २ ॥
करन्धमस्य पुत्रो वै जिग्येऽवीक्षित् स्वयंवराम्।
अथराजन्यवर्गैः स बहुभिरेकलो रणे ॥ ३ ॥
पराजितः कुमारी सा हृता राजकुलैस्तदा।
श्रुत्वा करन्धमो यायात्सैन्यलक्षसमन्वितः ॥ ४ ॥
नृपान् हत्वा सुतं स्नुषां नीत्वा गृहं ययौ पुनः।
अवीक्षित् पितरं प्राह किं यशो मेऽवशिष्यते ॥ ५ ॥
नाहमेतां ग्रहीष्यामि न चान्यां योषितं पितः।
परैर्यस्या निरीक्षन्त्याः संग्रामेऽहं पराजितः ॥ ६ ॥
परैः पराजितोऽहं यत् कातरेयं यथाऽबला।
किमत्र मानुषत्वं मे पारतन्त्र्ये स्थितस्य वै ॥ ७ ॥
नारीमिषेण मे यशोहानिर्जाता परैरिह।
तस्मान्नारी न वोढव्या पारतन्त्र्यप्रदायिनी ॥ ८ ॥
इत्युक्तवन्तं कन्या साऽवीक्षितं प्राह सुन्दरी।
बहुपार्श्वसहायैस्तु सर्वे युद्ध्यन्ति लीलया ॥ ९ ॥
एकेन बहूनां युद्धं शौर्यव्यञ्जकमेव तत्।
विक्रमस्ते महान् राजन् बहुभिः संपरीक्षितः ॥१०॥
एकेन सह चैकस्य युद्धं चेत् समजायत।
एते यममहीमाना व्यजायन्तेति धारये ॥११॥
अजेयोऽयं महावीरो बहुभिर्मिलितैर्जितः।
अत्रार्थस्तु स्फुटो भाति युद्धे तेऽप्यखिला जिताः ॥१२॥
शौर्यविक्रमसंयुक्तमिमं सर्वमहीक्षितः।
धर्मयुद्धमधर्मेण जितवन्तोऽत्र का त्रपा ॥१३॥
तस्मादयं निर्मितो मे नान्यो मे भविता पतिः।
यदि राजन्य! चेन्मां त्वं न गृह्णासि पतिव्रताम् ॥१४॥
कृत्वा तपश्चेह दिवि त्वां सम्पत्स्ये हि विद्धि तत्।
वरं वृणोम्यहं नाथ मां भवान्यदि नेच्छति ॥१५॥
तपसोऽन्यो न मे भर्ता जन्मन्यस्मिन् भविष्यति।
एवमुक्तेऽप्यवीक्षिति निर्मनस्के व्यलोकिते ॥१६॥
कन्या जगाम तपसे वैराग्यं परमास्थिता।
निराहारास्त्रिमासा वै गताश्चास्या ततः पुनः ॥१७॥
देहत्यागाय सन्नद्धां ज्ञात्वा देवास्तदन्तिकम्।
दूतं संप्रेषयामासुर्मात्याज्यो देह आह ताम् ॥१८॥
त्वं भविष्यसि कल्याणि! जननी चक्रवर्तिनः।
पुत्रेणाऽरयो हन्तव्या म्लेच्छा दुष्टाश्च दस्यवः ॥१९॥
पालनीयं भूतलं च धर्मे स्थाप्यास्ततः प्रजाः।
यष्टव्यं विविधैर्यज्ञैः षट्साहस्रैश्च संख्यया ॥२०॥
सत्यं विना पतिं पुत्रः कथं मे स्यादुवाच सा।
अवीक्षितमृते भर्ता नान्यो मे ह्यत्र जन्मनि ॥२१॥
स च नेच्छति मां वीरो बोधितोऽपि विरागवान्।
दूतः प्राह वने तिष्ठ देहं पोषय भामिनि! ॥२२॥
तपःप्रभावात् सर्वं ते मनोऽभीष्टं भविष्यति।
इत्युक्त्वा देवदूतः स ययौ देहं पुपोष सा ॥२३॥
अथाऽवीक्षित्प्रसूः प्राह पिता ते वृद्धतां गतः।
एकस्त्वं तनयोऽवीक्षित्! त्यक्तदारपरिग्रहः ॥२४॥
पितरि स्वर्गते त्वय्यपुत्रे च पृथिवीमिमाम्।
तवाऽरिपक्षः पुत्रात्र वंशक्षये प्रभोक्ष्यति ॥२५॥
वंशक्षये च पितरः श्राद्धपिण्डोदकक्षयाः।
पतिष्यन्ति निरये तत् कुरु पितृुपकारिताम् ॥२६॥
पौत्रस्य दर्शय सुखं हठं सर्वं परित्यज।
नैष्ठिकतां परित्यज दारधर्मं समाचर ॥२७॥
कुलनाशे समापन्ने पापाय ब्रह्मचारिता।
कुलोद्धारकरं गृहव्रतं श्रेष्ठं विपद्गृहे ॥२८॥
इत्यादिमातृवचनं स्वीचकार तथास्त्विति।
अथ यातो वनं तत्र मृगयामचरद् वने ॥२९॥
शुश्राव सहसा शब्दं त्राहि त्राहीति योषितः।
मा भैर्मा भैरिति वदन् राजपुत्रश्च तां ययौ ॥३०॥
सा चोवाच गृहीता दानवेन भयविह्वला।
करन्धमसुतस्याहं भार्या साध्वी ह्यवीक्षितः ॥३१॥
ह्रियते रक्षसा पश्य तापसी वनवासिनी।
इत्याकर्ण्य तदाऽवीक्षित् शरवर्षैरवाकिरत् ॥३२॥
दण्डैर्वृक्षैश्च पाषाणैर्भल्लैश्चान्यायुधैस्तदा।
युद्धं तयोरभूद्घोरं वीरा वीरं समाश्रिताः ॥३३॥
तपोभागं ददात्यस्मै विजयार्थं जलेन वै।
पातिव्रत्यप्रभावेण सत्यदार्ढ्यवृषेण च ॥३४॥
अवीक्षितोऽवनं साध्वी करोति समरे तदा।
कुमारोऽपि बलं प्राप्तश्चिच्छेद दैत्यमस्तकम् ॥३५॥
सा तु हेतिक्षतदेहं सिषेवे स्वामिनं सती।
वने प्राह तपः सर्वं तथा स्वप्नेऽपि लोकितम् ॥३६॥
परह्योऽहं मुनिद्रायां स्नातुं गंगाह्रदं गता।
विकृष्टा केनचित् तत्र जलान्तर्मग्नतां गता ॥३७॥

ततो रसातलं नीता तत्र नागास्तदंगनाः ।
सहस्रशस्तुष्टुवुर्मो ययाचिरे सुरक्षणम् ॥३८॥
अपराधं करिष्यन्ति सर्पास्तव सुतस्य वै ।
क्षन्तव्यं तत् निवार्यः सः प्रसादं क्रियतामिति ॥३९॥
तथेति च मया प्रोक्ते पूजिता प्रापिता वनम् ।
दृष्टोऽत्र राजपुत्रोऽवीविक्षित् पतिर्यो हि मन्मतः ॥४०॥
तावन्निद्रा गता दृष्टं वनं प्रातः सुमंगलम् ।
नीलकण्ठः प्रियायुक्तः समागत्य मदन्तिके ॥४१॥
प्रातर्नृत्यं चकारात्र वामांगं मेऽस्फुरत्तदा ।
वामनितम्बगुह्यादिभागाश्चाप्यस्फुरँस्ततः ॥४२॥
शुकः शुकीसमेतश्चामृतपक्वफलं तदा ।
चञ्च्वा गृहीत्वा न्यक्षिपत् मदंके व्योमतो ब्रुवन् ॥४३॥
गतह्यश्च प्रगे श्वेतहस्ती दृष्टोऽत्र कानने ।
करेणुना च कलभैर्युक्तः कमलधृक् करे ॥४४॥
मम पाणिं गृहाण त्वं तवास्मि नापरस्य वै ।
इत्युक्तः सः प्राह भद्रं भवत्वेवं विधिकृतम् ॥४५॥
तदा पतिप्राणया वै तया संस्मारितो गुरुः ।
तुम्बुरुस्तत्र चायातो होमं चक्रे विधानतः ॥४६॥
तस्याः पाणिग्रहं चक्रे चावीक्षित् वनमध्यतः ।
तदा तत्र समायाता देवाः पुष्पाणि ससृजुः ॥४७॥
सस्वनुर्दिव्यवाद्यानि ननृतुश्चाप्सरोगणाः ।
प्रजगुर्देवगन्धर्वाः प्रसन्ना वनदेवताः ॥४८॥
उपजह्रुस्तयोस्तत्र मुनिगन्धर्वकिन्नराः ।
भक्ष्यानुलेपनवस्त्रस्रक्पानादिकमुत्तमम् ॥४९॥
स रेमे सहितस्तन्व्या सा च तेन ह्यवीक्षिता ।
ययौ राज्यगृहे स्वस्य पित्रोरभवदुत्सवः ॥५०॥
ददौ दानानि सर्वाणि पौत्रार्थं पितरौ तदा ।
अथ व्योम्ना ययौ भार्यासहितो मेरुपर्वतम् ॥५१॥
तया च रमतस्तस्य भामिन्या सह शोभने ! ।
गन्धर्वलोके वीरस्य पुत्रं सा सुषुवे सती ॥५२॥
बभूव पुत्रे सञ्जाते गन्धर्वाणां महोत्सवः ।
जगुः केचित्तथैवान्ये मृदंगपटहानकान् ॥५३॥
अवादयन्त वाद्यांश्च वेणुवीणामयूरकान् ।
ननृतुश्च तदुत्साहे बह्वोऽप्सरसां गणाः ॥५४॥
पुष्पवृष्टिमुचो मेघा जगर्जुर्मृदुनिस्वनाः ।
दम्पतीभ्यां स्मृतस्तत्राजगाम तुम्बुरुः स्वयम् ॥५५॥
अतिप्रसन्नो मनसा जातकर्माकरोत्तदा ।
चक्रे स्वस्त्ययनं तस्य बालस्य स्तुतिपूर्वकम् ॥५६॥
चक्रवर्ती महावीर्यो महाबाहुर्महाबलः ।
स्वस्तिमान् स्तात् अशेषायाः क्षितेः शास्ता सतीपतिः ॥५७॥
इमे शक्रादयः सर्वे लोकपालास्तथर्षयः ।
स्वस्ति कुर्वन्तु ते वीर वीर्यं चारिविनाशनम् ॥५८॥
मरुत्तव शिवायाऽस्तु वाति पूर्वो न यो रजः ।
मरुत् ते विमलोऽक्षीणोऽवैषम्यायाऽस्तु दक्षिणः ॥५९॥
पश्चिमस्ते मरुद् वीर्यमुत्तमं ते प्रयच्छतु ।
बलं यच्छतु चोत्कृष्टं मरुत् ते च तथोत्तरः ॥६०॥
इति स्वस्त्ययने गुरुरब्रवीत् मरुत्तं हि तम् ।
मरुत्तोऽयं समभवत् ख्यातः सुतो महर्षिभिः ॥६१॥
मरुत्तं च समादाय दम्पती स्वगृहं गतौ ।
गन्धर्वदेवमुनिभिः सह राज्ञः समीपतः ॥६२॥
बालं न्यस्य पितुस्त्वं के नत्वा वृत्तं च सर्वथा ।
निवेदयामासतुश्च राजापि पौत्रदर्शनात् ॥६३॥
समाग्योऽस्मीत्यथाऽऽत्मानं प्रशशंस पुनः पुनः ।
राज्ञी चापि पुत्रपुत्रं दृष्ट्वा मुमोद हर्षिता ॥६४॥
ततः पुरे महानासीदानन्दः पौरवेश्मसु ।
राजापि वसुरत्नानि गोऽलंकारान्ददौ तदा ॥६५॥
पुत्रं राज्येऽभिषिच्यैव सभार्यो वनमाविशत् ।
तत्र वर्षसहस्रं स तेपे वै दारुणं तपः ॥६६॥
विहाय देहं नृपतिः शक्रस्याऽऽप सलोकताम् ।
पत्नी वर्षशतं स्थित्वा तमेवाप पतिं दिवि ॥६७॥
अथाऽवीक्षित् बहून् यज्ञान् इयाज स्वाप्तदक्षिणान् ।
तस्याऽप्रतिहतं चक्रमासीद् द्वीपेषु सप्तसु ॥६८॥
पुत्रस्तस्य मरुत्तोऽपि चक्रे यज्ञान् शतायुतान् ।
सौवर्णो मुञ्जवान्नाम पर्वतश्चाहृतस्ततः ॥६९॥
सुवर्णं सर्वथा दत्तं तृप्त्या त्यक्तं च भूसुरैः ।
प्रासादादि समस्तं च सौवर्णं तस्य यत्क्रतौ ॥७०॥
विप्राणां परिवेष्टारो देवा ह्यासँश्च तन्मखे ।
यज्ञभूमौ तदा ह्यासन् विश्वे देवाः सभासदः ॥७१॥
साध्या मरुतो वसवो रुद्रा आदित्यकास्तथा ।
निधयः ऋषयश्चास्य कर्मचारास्तदाऽभवन् ॥७२॥
ऋत्विक् तस्य तु संवर्तो बभूवांऽगिरसः सुतः ।
भ्राता बृहस्पतेर्विप्रो देवानामग्रणीस्तदा ॥७३॥
अथौर्वस्य ऋषेराश्रमोत्तमे नागराट् तदा ।
उपद्रवं चकारास्य नाशार्थं जगृहे धनुः ॥७४॥
तथा कोपान्महदस्त्रं संवर्तकं दधार च ।
मरुत्तो नागराजानां चक्रे तेन च मर्दनम् ॥७५॥

समागच्छत्पुनः स्वस्य राज्यं पृथ्व्यां शशास च ।
तस्य माता सती वीरा पिताऽवीक्षित् वनं गतौ ॥७६॥
स्वर्गं प्राप्तौ पातिव्रत्यपत्नीव्रतसमुद्धृतौ ।
मरुत्तभार्या विदर्भतनया च प्रभावती ॥७७॥
सुवीरपुत्री सौवीरी द्वितीयाऽभूत् सुभामिनी ।
केतुवीर्यसुता केशी तृतीयाऽभूत् सुभामिनी ॥७८॥
मद्रराजसुता चासीत् केकयी तु चतुर्थिका ।
सिन्धुराजसुता भार्या सौरन्ध्री पञ्चमी ह्यभूत् ॥७९॥
चेदिराजसुत चाभूद् भार्या षष्ठी सुलोचना ।
तासां पतिव्रतानां तु पुत्रा अष्टादशाऽभवन् ॥८०॥
तेषां प्रधानो ज्येष्ठश्च नरिष्यन्तो नृपोऽभवत् ।
एते तु वैष्णवाः सर्वे राज्यः सत्योऽभवन् शुभाः ॥८१॥
महाभागवतो वंशः स्वस्वधर्मपरायणः ।
अभजद्भगवन्तं श्रीकृष्णनारायणं हरिम् ॥८२॥
धनदारा न वै भुंक्ते श्रीकृष्णार्पणमन्तरा ।
सर्वं स्वात्मार्पणं चक्रे श्रीकृष्णे परमात्मनि ॥८३॥
कृष्णनारायणं देव्यः पतिरूपमुपस्थितम् ।
मत्वा सेवां प्रकुर्वन्ति पत्नीर्लक्ष्मीश्च ते तथा ॥८४॥
एवं विष्णुसमास्ते वै ह्यासन् पृथ्व्यां महीक्षितः ।
पत्न्यो लक्ष्मीसमांश्चासन् वैष्णव्यो राजयोषितः ॥८५॥
एकदाऽभून्महाविष्णोः पूजायां समरुत्तकः ।
रुद्रस्तत्र समायातो ध्यानमग्ने तु राजनि ॥८६॥
सत्येवं न च संप्राप्तः रुद्रः सत्कारमित्यतः ।
चुकोपाऽस्यातिवेगेन हन्तुं शूलं विचिक्षिपे ॥८७॥
हृदये लग्नमेवैतद् राज्ञोऽसून् हृद् विदार्य तत् ।
विजहार तदा साध्वी वैदर्भी तु प्रभावती ॥८८॥
हस्ते जलं समग्राह्योवाच यद्यहमंजसा ।
आजीवनं पतिसेवाकर्त्री चास्मि पतिव्रता ॥८९॥
तेन सत्येन रुद्रोऽयं मृतिं यातु पुनः पुनः ।
यदि देवाः पूजिताश्चातिथयश्चापि सत्कृताः ॥९०॥
प्रसादितः पतिर्नित्यं शूलं दूरं शनैर्भवेत् ।
यदि श्वश्रूश्वशुरयोः कृता सेवा सुश्रद्धया ॥९१॥
प्रसादित भर्तृकुलं पतिहृत्सन्धितं भवेत् ।
गृहधर्मपरा नित्यं पतिदेवा भवामि चेत् ॥९२॥
पत्नीव्रतः पतिर्मे चेत् सजीवो भवतु प्रियः ।
सपत्न्यः स्वसृवन्नित्यं मानितास्तोषिता यदि ॥९३॥
मातृवत्पूजिताश्चापि दुहितृवत्सुरक्षिताः ।
तेन पुण्येन मे पापं रुद्रनाशान्न वै भवेत् ॥९४॥

इत्युक्तवती च यथा तथा सर्वं व्यवर्तत ।
हाहाकारो महानासीद् रुद्रनाशोऽतिदुःसहः ॥९५॥
मरुत्तेन तदा साध्वी चानुनीताऽति भामिनी ।
रुद्रस्योज्जीवनार्थं वै तदा शान्ताऽवदत्पतिम् ॥९६॥
समुज्जीवय देवेशं नाथ रुद्रं तु वैष्णवम् ।
अवैष्णवाश्च ये रुद्रास्ते तु कल्पे प्रकल्पके ॥९७॥
ब्रह्ममालासमुत्पन्ना नाशमेष्यन्ति वै ध्रुवम् ।
इति शापो मम रुद्रे कल्पादौ तु पुनः पुनः ॥९८॥
क्रूररुद्रसमुत्सर्गे तान् स्प्रक्ष्यति मुहुर्मुहुः ।
वैष्णवस्तु महारुद्रः स्थास्यत्येव न संशयः ॥९९॥
जलमामन्त्र्य भस्मैव कुर्वार्द्रं तत एव सः ।
मरुत्तेश्वर ईशोऽसौ समुज्जीवो भविष्यति ॥१००॥
इत्युक्तो मरुतः पत्न्या गृहीत्वा जलमेव च ।
यद्यहं त्वाजीवनं वै पत्नीव्रतपरायणः ॥१०१॥
प्रजाधर्मो राजधर्मोऽच्युतोऽस्मि वैष्णवः सदा ।
बहुच्छिद्रकृतोऽधर्मो यदि स्पृष्टो न मां क्वचित् ॥१०२॥
तेन पुण्येन रुद्रोऽयं वैष्णवो जीवतात् खलु ।
यदि पत्नी सती भार्या प्रभावती यथा मम ॥१०३॥
तथा पत्न्योऽपराश्चापि पूर्णाः पतिव्रताः खलु ।
अहं तासां समवर्ती पक्षपातं न चाचरम् ॥१०४॥
तेन पुण्येन रुद्रोऽयं सत्रिशूलः प्रजीवतु ।
इत्युक्त्वा प्रददौ वारि भस्मनि यावदेव तु ॥१०५॥
तावत् सौम्यो महारुद्रः सजीवोऽभवदग्रतः ।
वन्दितः पूजितः सोऽथ क्षमापितो मुहुर्मुहुः ॥१०६॥
रुद्रेणापि सती साध्वी प्रभावती प्रसादिता ।
राजा प्रसादितश्चापि राज्ञाऽर्चितः सुवन्दितः ॥१०७॥
मरुत्तेश्वररूपेण तस्थौ तद्भवने हरः ।
दिव्यरूपेण च ययौ कैलासं शंकरस्तदा ॥१०८॥
माहात्म्यं पातिव्रत्यस्य विवेद पार्वती जगौ ।
इति ते कथितं लक्ष्मि ! महापुण्यप्रदं व्रतम् ॥१०९॥
श्रवणात्पठनाच्चास्य सर्वयज्ञफलं भवेत् ।
कथायाः स्मरणाच्चापि भुक्तिमुक्तिफलं भवेत् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्येऽवीक्षित्नृपपत्न्या वीराया मरुत्तस्य च पत्न्याः प्रभावत्याश्च पातिव्रत्यचमत्कारे राक्षसनाशो रुद्रनाशसजीवनते चेत्यादिनिरूपणनामा नवाऽधिकचतुश्शततमोऽध्यायः ॥४०९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि शक्तिपत्न्याः पराक्रमम् ।
वशिष्ठोऽस्ति ब्रह्मणोंऽशो वेदद्रष्टा ऋषिः कृतः ॥ १ ॥
अरुन्धती सती साध्वी तस्य पत्नी पतिव्रता ।
तस्यां वशिष्ठो भगवान् सुतानजनयच्छतम् ॥ २ ॥
तत्र शक्तिसमाख्यो वै ज्येष्ठोऽभूद् यस्य योषिति ।
पराशरः ऋषिर्जज्ञे यस्याऽहं व्याससंज्ञकः ॥ ३ ॥
पुत्रोऽभवं मम पुत्रो ब्रह्म शुकस्वरूपवान् ।
यस्य मे सर्वथा कीर्तिर्गीयते मोक्षसिद्धये ॥ ४ ॥
राक्षसो रुधिरो नाम शक्तिं वशिष्ठपुत्रकम् ।
भक्षयामास तच्छ्रुत्वा वशिष्ठो बहुदुःखितः ॥ ५ ॥
नवनवतिपुत्राश्च रुधिरेण प्रभक्षिताः ।
तच्छ्रुत्वाऽथ वशिष्ठोऽपि मर्तुं चक्रे मतिं तदा ॥ ६ ॥
तदा तस्य स्नुषा प्राह पत्नी शक्तेर्महामुनिम् ।
भगवन् ब्राह्मणश्रेष्ठ ! तव देहमिमं शुभम् ॥ ७ ॥
पालयस्व विभो द्रष्टुं तव पौत्रं ममात्मजम् ।
गर्भस्थो मम सर्वार्थसाधकः शक्तिजो यतः ॥ ८ ॥
तदा गर्भगतो बालः ऋचमाह स्वरेण वै ।
तन्निशम्य वशिष्ठोऽभूदाश्चर्यवान् कथं कुतः ॥ ९ ॥
तावन्नारायणः कृष्णः साक्षादभूत् तदंगणे ।
प्राह त्वत्पुत्रपुत्रस्याऽऽननाद् ऋचो विनिःसृताः ॥१०॥
मत्समस्तव पौत्रोऽसौ शक्तिजः शक्तिमानिति ।
तेन सत्पौत्रलाभेन कुलं ते संतरिष्यति ॥११॥
एवमुक्त्वा कृष्णनारायणश्चान्तरधीयत ।
वशिष्ठो दक्षहस्तेन परपर्शोदरमादरात् ॥१२॥
अदृश्यन्त्याः शक्तिपत्न्या गर्भरक्षां चकार ह ।
अदृश्यन्ती सती साध्वी महापतिव्रता तदा ॥१३॥
कालं रुद्रं यमं विश्वामित्रं शशाप राक्षसम् ।
शक्ते ! शक्ते ! पते ! तेऽहं पातिव्रत्यपरायणा ॥१४॥
यदि पत्न्यस्मि धर्मिष्ठा त्वदर्थार्पितजीविता ।
श्वश्रूश्चारुन्धती चास्ति रमातुल्या पतिव्रता ॥१५॥
तदा कालश्च रुद्रश्च विश्वामित्रो यमस्तथा ।
राक्षसश्चेति सर्वे ते भवन्तु प्रस्तरा जडाः ॥१६॥
यत्र यत्रैव ते सन्ति तत्र पाषाणरूपिण ।
जडा निश्चेतनाः सन्तु यावदाभूतसम्प्लवम् ॥१७॥
इति शप्तास्तदा यत्र यत्राऽभवँश्च ते तदा ।
शिलारूपा हि सञ्जाताः स्थास्यन्ति ब्रह्मणो वयः ॥१८॥
कालो यत्र पृथिव्यादावभूत् तत्र हि सर्वथा ।
कृष्णवर्णाः शिला जाताः पृथ्वीपीठात्मिका हि ताः ॥१९॥
यदाधारा मृत्तिका वै जायन्ते कालमूर्तितः ।
अथ रुद्रोऽभवद् ग्रावा लोहकान्तस्तु पश्चिमे ॥२०॥
रौद्री शिला च सा प्रोक्ता शिवकन्दरपुत्तली ।
आकर्षति स्वनिकटं सर्वलोष्ठानि वारिधौ ॥२१॥
यां भूमिं चिरकालेनाऽऽप्लावयिष्यति वार्निधिः ।
विश्वामित्रोऽभवच्चैव मरुभूमौ हि पश्चिमे ॥२२॥
यत्र पाषाणरूपोऽसौ जातस्तस्मात्स्थलात्खलु ।
विश्वामित्री नदी तस्य स्वेदाज्जाता हि गौर्जरे ॥२३॥
शिला कालेन संमग्ना मूर्तिर्भूमौ भविष्यति ।
यमोऽभूच्च तदा कृष्णवर्णो वै रैवताचले ॥२४॥
महिषवाहनारूढो भयेन शरणं गतः ।
दामोदरस्य सान्निध्ये तत्र समहिषो यमः ॥२५॥
कृष्णपाषाणरूपो वै माहिषः पर्वतोऽभवत् ।
राक्षसः स ययौ भीत्याऽवाच्यां दिशि तदा द्रवन् ॥२६॥
शापेन पतितश्चाब्धौ सेतौ गिरिस्तदाऽभवत् ।
यो हनुमत्प्रवासे वै पर्वतो व्योमगोऽरुणत् ॥२७॥
हनुमन्तं महाकायं युयोध जडचेतनः ।
अथ हाहाकृतं चासीज्जगत्सर्वं जडीकृतम् ॥२८॥
विना रुद्रं विना कालं विना यमं च विश्वकम् ।
देवता व्याकुलाः सर्वे ब्रह्माणमुपपेदिरे ॥२९॥
सविष्णवश्च ते सर्वे ययुर्यत्र सती स्थिता ।
शक्तेः पत्नी वशिष्ठश्चाऽरुन्धती यत्र तान् सुराः ॥३०॥
ते नेमुर्दुःखिता नाशं निवेद्य लोकपालिनाम् ।
सान्त्वयामासुरत्यर्थं जीवनाय सुपालिनाम् ॥३१॥
मातर्जीवय लोकानां पालकान् येन शं भवेत् ।
अदृश्यन्ती ततः प्राह यदि मत्पतिदेवरान् ॥३२॥
जीवयध्वं तदा देवान् जीवयामि न चान्यथा ।
ब्रह्मा प्राह सति ! शक्त्यादयो राक्षसभक्षिताः ॥३३॥
भस्मास्थिचर्मतद्रजश्चावशिष्टं न लभ्यते ।
यत्संस्कारेण ते चाद्य कृताः स्युः सशरीरकाः ॥३४॥
यस्य शवोऽस्थि मांसं च भस्म मृद्वापि लभ्यते ।
तत्र समन्त्रवारिभिः सदेहः स विरच्यते ॥३५॥
शक्त्यादिशतपुत्राणां विना मांसास्थि शेषकम् ।
न ते जीवयितुं शक्या वदात्र सति ! किं भवेत् ॥३६॥
अदृश्यन्ती तदा प्राह यदि मत्पतिदेवराः ।
न चोत्पादयितुं शक्या न वा जीवयितुं तदा ॥३७॥

रुद्रादयोऽपि न शक्याश्चेतयितुं मया सुराः ।
मम पत्यादिलाभे तु वो लाभो लोकपालिनाम् ॥३८॥
यादृशे तादृशी प्रतिक्रिया न्यायो मया मतः ।
ब्रह्मा प्राह सति ! शक्त्यादिकान् दिव्यान् ददामि ते ॥३९॥
विदेहान् सूक्ष्मरूपाँश्च स्थूलभावविवर्जितान् ।
सती प्राह तदा वेधश्चाहमपि तथाविधान् ॥४०॥
कालरुद्रादिकान् स्थौल्यवर्जितान् सूक्ष्मरूपिणः ।
ददामि चेतयाम्येव शिलारूपातिरेकिणः ॥४१॥
द्वितीयेनाऽणुरूपेण कालो रुद्रो यमस्तथा ।
विश्वामित्रो राक्षसश्च कुर्वन्तु कर्म सृष्टिगम् ॥४२॥
न वै स्थूलस्वरूपेण शिलास्तिष्ठन्तु सर्वदा ।
इतिश्रुत्वाऽजविष्ण्वादिदेवैः शक्त्यादयस्तदा ॥४३॥
दिव्यसूक्ष्मस्वरूपाश्च स्वर्गादानीय चापिताः ।
स्वर्गस्थाः पृथिवीस्थाश्च वर्तन्ते तेऽणुमूर्तयः ॥४४॥
अदृश्यन्त्या अपि तदा कालरुद्रादयोऽपि वै ।
तथैवाणुस्वरूपाश्च कृताः कार्याधिकारिणः ॥४५॥
करे जलं समादाय प्रोवाच शक्तिमानिनी ।
यथा मे स्वामिनो मूर्तिर्देवराणां च यादृशी ॥४६॥
तादृशी चेतना मूर्तिः कालादीनां प्रपद्यताम् ।
इति तया कृताः कालादयः सूक्ष्माधिकारिणः ॥४७॥
ततो देवा गताः स्वर्गं नाऽऽपराध्यन्ति वै सतीः ।
समर्था अपि कम्पन्ते पातिव्रत्यप्रभावतः ॥४८॥
सूर्यश्चन्द्रो महेन्द्रश्च विष्णुश्चान्येऽपि देवताः ।
कम्पन्ते वै सतीनाम्ना तदन्येषां तु का कथा ॥४९॥
सतीधर्मः परो धर्मो न भूतो न भविष्यति ।
नार्या यादृक् पारवश्यं निहितं ब्रह्मणा तथा ॥५०॥
तेजः परं महत्पातिव्रत्यमैश्वर्यमर्पितम् ।
अबला सेविका यद्वत् तद्वत् सा पारमेश्वरी ॥५१॥
सबलाऽपि पातिव्रत्यधर्मेण वर्तते सदा ।
एवं विवर्तमानाया अदृश्यशक्तियोषितः ॥५२॥
गर्भो जज्ञे महाज्ञानी समये बालको मुनिः ।
ऋषिः पराशरः सोऽयं नाम्ना ख्यातोऽभवद् भुवि ॥५३॥
यस्य श्रीभगवानस्मि व्यासरूपः सुतः सति ! ।
जगुस्तदा तु पितरो ननृतुश्च पितामहाः ॥५४॥
प्रपितामहाश्च सर्वे ह्यवतीर्णे पराशरे ।
पुष्कराद्या असृजँश्च पुष्पवर्षं च खेचराः ॥५५॥
सर्वत्राऽऽसीन्महः श्रेष्ठं पराशरे समागते ।
दिव्यान् समागतान् पितॄनद्भ्रातॄन् वीक्ष्य बालकः ॥५६॥
जातमात्रो महाज्ञानी वदमानो ननाम तान् ।
सर्वानानन्दयामास वर्धमानो दिने दिने ॥५७॥
अप्राप्तयौवनो यावद् जगौ विष्णुकथानकम् ।
भूतभव्यभवत्सर्वाख्यानभृतं सुमुक्तिदम् ॥५८॥
एतद् यः श्रावयेद् भक्त्या शृणुयाच्छ्रद्धया तथा ।
पराशरं स्मरेच्चापि स्वेप्सितं प्राप्नुयाद्धि सः ॥५९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये वशिष्ठस्य पुत्रशक्त्यादिनां राक्षसद्वारा नाशे सति शक्तिपत्न्या अदृशन्त्या शप्ताः कालरुद्रयमविश्वामित्रराक्षसाः शिलारूपाः शैलाजाताः, ततः शक्त्यादयो ब्रह्माद्यैः कालादयस्त्वदृश्यन्त्या सूक्ष्मरूपेण सजीवीकृताश्च, शक्तिपुत्रः पराशरो जातश्चेत्यादिनिरूपणनामा दशाधिकचतुश्शततमोऽध्यायः ॥ ४१० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां श्रेष्ठां शृण्वतां पापनाशिनीम् ।
वैष्णवीनां सतीनां वै मोक्षदां स्वेष्टदायिनीम् ॥ १ ॥
यत्रास्ते वैष्णवी नारी तत्र नारायणी स्थिता ।
लक्ष्मीनारायणस्तत्र कृष्णनारायणोऽस्ति च ॥ २ ॥
कीर्त्यमाने हरौ यस्या रोमाञ्चो जायते मुहुः ।
कम्पः स्वेदस्तथाऽक्षेषु दृश्यन्ते जलबिन्दवः ॥ ३ ॥
विष्णुभक्तिमतीर्दृष्ट्वा या प्रीता जायते हृदि ।
समुत्थायाऽर्हणां कुर्याद् वासुदेवे यथा सती ॥ ४ ॥
सा भक्ता धर्मसंपोष्ट्री हरेः सैव पतिव्रता ।
पातिव्रत्यपरा नित्यं सेवते स्वपतिं हरिम् ॥ ५ ॥
गन्धपुष्पादिकं सर्वं प्रासादिकं हि धारयेत् ।
हरेः सर्वमितीत्येवं मत्वा सा वैष्णवी सती ॥ ६ ॥
हरेः क्षेत्रे शुभान्येव करोति स्नेहसंयुता ।
प्रतिमां च हरेर्नित्यं पूजयेत् सा पतिं यथा ॥ ७ ॥
कर्मणा मनसा वाचा जाग्रत्या निद्रयाऽपि च ।
कृष्णनारायणात्म्यैक्या महाभागवती हि सा ॥ ८ ॥
भोजनाराधनं सर्वं यथाशक्ति करोति या ।
अष्टधा सेविका कृष्णनारायणस्य सा सती ॥ ९ ॥
यस्यास्तेजःप्रभावं च दृष्ट्वा भीता हि देवताः ।
वासुदेवाश्रितां स्वामिव्रतां नत्वा वियन्ति च ॥१०॥

अन्यनारीसहस्रेभ्यो वैष्णवी स्त्री विशिष्यते ।
विष्णुभक्तासहस्रेभ्य स्वामिव्रता विशिष्यते ॥११॥
स्वामिव्रतासहस्रेभ्यो भक्तस्वामिवती सती ।
विष्णुभक्तपतिमत्त्वात् सर्वाभ्यः सा विशिष्यते ॥१२॥
यस्याः सुताः सुपुत्र्यश्च पौत्राश्च देवरादयः ।
जामातारौ श्वशुरश्च पितरौ बान्धवादयः ॥१३॥
सपत्न्यो दासदास्यश्च मित्राणि त्वालयस्तथा ।
वैष्णव्यो विष्णुभक्तान्यो यास्ताभ्यः सा विशिष्यते ॥१४॥
त्रिशंकोर्दयिता भार्या सर्वलक्षणशोभिता ।
अम्बरीषस्य जननी महाभागवती सती ॥१५॥
नित्यं स्वामिपरा स्वामिसेविका हरिदासिका ।
पतिं कृष्णं परंब्रह्म मत्वा वै सेवते सती ॥१६॥
त्रिशंकुस्तु सरय्वां वै नित्यं स्नात्वाऽर्चयद्धरिम् ।
साऽपि सेवापरा प्रातर्मध्याह्ने निशि तं पतिम् ॥१७॥
तथा कृष्णं सेवते स्म पूजाकाले सुवस्तुभिः ।
चन्दनं दीपनं धूपं तथा पञ्चाऽमृताऽऽप्लवम् ॥१८॥
विदधात्येव हस्ताभ्यां नान्यदास्यादिभिः क्वचित् ।
एवं सेवापरा नित्यं मुक्तानीव हि वर्तते ॥१९॥
नारायणं चतुर्बाहुं शेषपर्यंकशायिनम् ।
अर्चयामास सततं वाङ्मनःकायकर्मभिः ॥२०॥
माल्याऽऽदानादिकं सर्वं स्वयमेव चकार ह ।
गन्धादिपेषणं चैव हविषां पचनं तथा ॥२१॥
भूमेरालेपनादीनि स्वयं वै प्रचकार सा ।
नाम्ना पद्मावती राज्ञी वाचा नारायणेति च ॥२२॥
श्रीकृष्णेत्येव सा नित्यं भाषमाणा पतिव्रता ।
दशवर्षसहस्राणि तत्परेणान्तरात्मना ॥२३॥
अर्चयामास गोविन्दं गन्धपुष्पादिभिः सदा ।
विष्णुभक्तान् भागवतान् नरान्नारीश्च वैष्णवीः ॥२४॥
दानमानार्चनैर्नित्यं धनरत्नैरतोषयत् ।
ततः कदाचित् सा देवी द्वादशीं समुपोष्य वै ॥२५॥
हरेरग्रे महाभागा सुष्वाप पतिना सह ।
पतिं नारायणं ध्यात्वा सिषेधे गृह्यधर्मणा ॥२६॥
तत्र नारायणो देवस्तामाह पुरुषोत्तमः ।
किमिच्छसि वरं भद्रे मत्तस्त्वं ब्रूहि भामिनि ! ॥२७॥
सा कृष्णात्तु वरं वव्रे पुत्रो मे वैष्णवो भवेत् ।
सार्वभौमो महातेजाः सर्वस्वार्पणभक्तिमान् ॥२८॥
तथेत्युक्त्वा ददौ तस्यै फलमेकं जनार्दनः ।
सा प्रत्यक्षं फलं दृष्ट्वा भर्त्रे सर्वं न्यवेदयत् ॥२९॥

भक्षयामास संहृष्टा फलं तद्गतमानसा ।
ततः कालेन सा पद्मावती पुत्रं सुवंशदम् ॥३०॥
असूत वैष्णवं भक्तं वासुदेवपरायणम् ।
भक्तलक्षणसम्पन्नं चक्रांकिततनूरुहम् ॥३१॥
दिव्यरेखान्वितं परं भागवतं गुणालयम् ।
पिता जातक्रियाः सर्वाश्चकार ववृधेऽपि सः ॥३२॥
अम्बरीषइतिनामाऽभवन्मुक्तो गुणादिभिः ।
पित्राऽभिषिक्तो राज्येऽपि तप उग्रं चकार सः ॥३३॥
संवत्सरसहस्रं स जपन्नारायणं हरिम् ।
राधाप्रभापार्वतीश्रीलक्ष्मीशामाणिकीपतिम् ॥३४॥
श्रीवत्सवक्षसं वृन्दारमाश्रीपद्मिनीपतिम् ।
पद्मातुलसीविजयाललितामंजुलापतिम् ॥३५॥
देवीहैमीदयाशान्ताशान्तिचम्पासुपुष्पिका- ।
हंसारंभासविताभौक्तिकामुक्ताजयापतिम् ॥३६॥
अभजत् सर्वदा राजा श्रीकृष्णपुरुषोत्तमम् ।
ततः प्रसन्नो भगवान् चक्रपद्मांकपत्तलः ॥३७॥
गरुडं हस्तिनं कृत्वा भूत्वेन्द्रः स्वः समाययौ ।
अम्बरीषं हरिः प्राह महेन्द्रोहं वरं वृणु ॥३८॥
ब्रूहि किं ते ददाम्यत्र तपसां फलमूर्जितम् ।
अम्बरीषस्तदा प्राह त्वदर्थं न तपामि वै ॥३९॥
त्वया दत्तं च नेष्यामि गच्छ चेन्द्र ! यथासुखम् ।
नाहमिच्छामि ते भोगान् नश्वरान् पारमेष्ठिकान् ॥४०॥
वैराजान् वैश्वरान् निरयान् कामसंचितान् ।
विना नारायणकृष्णचरणाब्जस्य दासताम् ॥४१॥
ततः प्रहस्य भगवान् कृष्णनारायणः स्वयम् ।
स्वरूपमकरोत् स्वस्य लक्ष्मीकान्तं चतुर्भुजम् ॥४२॥
गरुडस्थं गुरुं दृष्ट्वाऽम्बरीषः प्रणनाम तम् ।
तुष्टावाऽह प्रसीदाऽत्र मम कृष्णनरायण ॥४३॥
कामम्भरेय महाविष्णो गोपालकुलबालक ! ।
पत्नीव्रत आदिदेवः श्रीव्यासः कमलेश्वरः ॥४४॥
क्रियाकाण्डं त्वयि कृत्वा परमात्मात्मनि स्थितः ।
त्वां प्रपन्नोऽस्मि भक्तानां वल्लभ शरणप्रद ! ॥४५॥
भगवाँश्च प्रहस्यैवाऽम्बरीषं प्राह लीलया ।
वद भक्त ! प्रदानार्थमागतोऽस्मीह वाञ्छितम् ॥४६॥
अम्बरीषो हरिं प्राह भवानेव वृतो मया ।
भवद्भक्तिं करोम्येव नित्यं मेऽस्ति यथामतिः ॥४७॥
पालयिष्यामि पृथिवीं कृत्वा वै वैष्णवं जगत् ।
यज्ञहोमार्चनैश्चैव तर्पयामि सुरस्थितम् ॥४८॥

वैष्णवान् पालयिष्यामि निहनिष्यामि ह्रिपून् ।
करिष्यामि भजनं ते नयिष्याम्यक्षरं बहून् ॥४९॥
एवमस्त्वित्यभिधाय चक्रं दत्वा सुदर्शनम् ।
शापरोगादिसन्तापनाशायाऽन्तरधीयत ॥५०॥
चक्रं सिंहासने धृत्वा विष्णुमूर्तिं प्रकल्प्य च ।
अम्बरीषस्तथा माता पद्मावती पुपूजतुः ॥५१॥
चक्रं सदैव गृह्णाति मातृपुत्रकृतार्हणाम् ।
एकदा हिमवत्पार्श्वे वृष्टिश्चाभूद् भयंकरी ॥५२॥
साकेतविषयस्तत्र मग्नो नाशो व्यजायत ।
पद्मावती हरिं प्राह चक्रं संपूज्य भामिनी ॥५३॥
भगवन् सर्वथा रक्ष प्रजा नैजास्तु वैष्णवीः ।
विप्लवो जायते वृष्ट्या रक्ष त्राहि कृपां कुरु ॥५४॥
पातिव्रत्यपरा स्यां चेत् त्वत्प्रपत्तिपरा यदि ।
तेन पुण्येन त्वद्वत्त्या जलं मेघश्च नश्यताम् ॥५५॥
सुदर्शनं विहस्यैव ज्वालामालाभयानकम् ।
भूत्वाऽऽकाशं प्रपद्यैव घनान् सर्वान् व्यनाशयत् ॥५६॥
जलं चाऽसंहरत् सर्वं प्रजा ररक्ष लीलया ।
इतिकृत्वाऽऽगतं चक्रं निषसाद निजस्थलम् ॥५७॥
अथाऽम्बरीषनृपतेः कन्याऽऽसीच्छ्रीमती शुभा ।
श्रीमत्या दानसमयं दृष्ट्वा राजा तु नारदम् ॥५८॥
अभ्यागतं प्रणिपत्य वरान्वेषणमार्थयत् ।
सुरूपां संविलोक्यैव तामैच्छन्नारदस्तदा ॥५९॥
आययौ पर्वतश्चापि तामैच्छच्चकमे मुहुः ।
तावुभौ नृपतिः प्राह कन्यां चैकां कथं ह्यहम् ॥६०॥
उभौ भवन्तौ तामेकां प्रार्थ्यमानौ ददामि वै ।
तथापि युवयोरेकं वरयिष्यति चेत्तदा ॥६१॥
तस्मै कन्यां प्रयच्छामि नान्यथा शक्तिरस्ति मे ।
तथेत्युक्त्वा ततो भूयः श्वो यास्याव इति स्म ह ॥६२॥
विष्णुं प्रजग्मतुस्तौ तु नेमतुश्च रहःस्थले ।
अम्बरीषः सुतां नाम्ना श्रीमतिं दातुमिच्छति ॥६३॥
मह्यं दद्यान्नारदाय कर्तुमर्हसि तत्तथा ।
वानराननवद् भातु पर्वतस्य मुखं यथा ॥६४॥
तथा कुरु हरिः प्राह तथास्त्विति ययौ च सः ।
अथागत्य पर्वतोऽपि हरिं प्राहाऽर्पयेत् स मे ॥६५॥
गोलांगूलाननो यथा नारदस्तत्र दृश्यते ।
तथा कुरु हरिः प्राह तथास्त्विति ययौ च सः ॥६६॥
राजा तु मण्डयामास स्वयंवरसभास्थलीम् ।
स्वर्गसभास्थलीतुल्यां राजन्यदेवपूरिताम् ॥६७॥
कन्यां श्रृंगारितां नीत्वाऽम्बरीषः प्रविवेश ह ।
उभौ देवर्षिसिद्धौ तौ सुरूपौ प्रथमं स्थितौ ॥६८॥
सर्वे बभूवुर्निष्कामाः कन्याशापरिवर्जिताः ।
सुतां कमलपत्राक्षीं प्राह राजा सुपद्मिनीम् ॥६९॥
अनयोर्ये वरं भद्रे मनसा त्वमिहेच्छसि ।
तस्मै मालामिमां देहि कन्ययाऽऽलोकितौ च तौ ॥७०॥
शाखामृगाननं दृष्ट्वा नारदं पर्वतं तदा ।
सा प्राह पितरं त्रस्ता कावेतौ नरवानरौ ॥७१॥
इति कृत्वा ययौ पश्चात् पश्चात् त्रस्ता शनैः शनैः ।
तावत्तयोरन्तराले ह्यूनषोडशवार्षिकम् ॥७२॥
सर्वाभरणसंशोभं स्थलपद्मातिशोभिनम् ।
रक्तान्तायतपद्माक्षं कोटिकामातिसुन्दरम् ॥७३॥
दन्तपंक्तिभिरत्यर्थं कुन्दकुड्मलसन्निभैः ।
हसन्तं सा ददर्शाऽतिरूपाभिरूपमच्युतम् ॥७४॥
कन्या दृष्ट्वा मुमोहाऽति राजाऽऽहाऽऽर्पय मालिकाम् ।
नारदपर्वतौ परस्परं ददृशातुर्मुखम् ॥७५॥
वानरीयं दर्पणेऽतिलज्जावन्तौ बभूवतुः ।
अन्ये च जहसुः सर्वे वानरास्यौ प्रति नृपाः ॥७६॥
प्रसह्य तावुभौ तत्र राजानं प्राहतुः खलु ।
आवयोरेकमेषा ते वरयत्वेव मा चिरम् ॥७७॥
ततः सा कन्यका बुद्धिमती नत्वेष्टदेवताम् ।
मायामादाय तिष्ठन्तं रक्षार्थं मध्यवर्तिनम् ॥७८॥
कृष्णनारायणं कान्तं मालिकामार्पयत्तु सा ।
अनन्तरं हि सा कन्या न दृष्टा मनुजैः सुरैः ॥७९॥
ततो नादः समभवत् किमेतदिति संसदि ।
तामादाय गतो विष्णुर्वैकुण्ठं पुरुषोत्तमः ॥८०॥
सभा विसृष्टा संजाता नारदः पर्वतस्तथा ।
गतौ वैकुण्ठमेवाऽऽद्यं नारायणमपश्यताम् ॥८१॥
तस्याऽङ्के सुस्थितां पत्नीं श्रीमतीं चाप्यपश्यताम् ।
अत्याश्चर्यं समापन्नौ प्राहतुः परमेश्वरम् ॥८२॥
कथं त्वया हि भगवन् वरं दत्वा विमोहितौ ।
कन्यालाभाय संप्रोच्य मध्यतो नीतवानसि ॥८३॥
तस्माज्जन्मान्तरे तेऽपि स्त्रीमोहेन सुकष्टदा ।
गतिर्भविष्यति तत्र वानरेषु चरिष्यसि ॥८४॥
भगवानाह ओमेवं स्वीचकार सुधर्मधृक् ।
तावृषी सान्त्वयामास श्रृणुतं तत्र कारणम् ॥८५॥
कथं मध्ये समागत्याऽऽहृतेयं श्रीमती तु वः ।
राक्षसादछलधर्माणो राहुवत् सन्त्यनेकशः ॥८६॥

यथाऽमृतस्य पानेऽभूत् तथाऽत्र क्रौंचिराक्षसः ।
प्रतीक्षन् युवयोर्मध्ये कन्यारूपेण मोहितः ॥८७॥
ह्यतिष्ठत् तद्विदूराय मध्यस्थोऽहं समागतः ।
किन्तु युवाभ्यां चान्योन्यं वानरास्यं समर्थितम् ॥८८॥
तत्तथैव हि संजातं युवयोरेव चार्थनात् ।
नास्ति दोषोऽण्वपि तत्र मदीयो मुनिपुंगवौ ! ॥८९॥
तारितौ तु मया वां वै मायया मोहितावपि ।
किन्त्वन्यच्छृणुतं विप्रौ ! पूर्वजन्मनि कन्यया ॥९०॥
तपः कृतं मदर्थे वै बहुसंवत्सरात्मकम् ।
सा प्रागासीन्महासाध्वी चाबाल्याद् ब्रह्मचारिणी ॥९१॥
मार्कण्डेयमहर्षेः सा कन्या सती तु मानसी ।
कम्भराख्यमहालक्ष्म्यास्तपःस्थाने सहायिनी ॥९२॥
नाम्ना श्रीः सा तपश्चक्रे दिव्यवर्षसहस्रकम् ।
कृष्णनारायणो मे स्यात्पतिश्चेत्यर्थवाञ्छया ॥९३॥
यदा सुदर्शनं दातुं चाम्बरीषाय माधवः ।
व्योममार्गात्समायातस्तदा दृष्ट्वा नरायणम् ॥९४॥
हर्षिता चकमे कृष्णं प्राप्तुं तपो विहाय सा ।
योगेन सहसा व्योम्नोत्पपाताऽनुययौ हरिम् ॥९५॥
अम्बरीषगृहे तावन्नारायणः समर्प्य च ।
चक्रं सुदर्शनं राज्ञेऽदृश्योऽभवत्ततो हि सः ॥९६॥
जातिस्मराऽभवत् कन्याऽम्बरीषस्य हि मानसी ।
मदर्थं वैष्णवी जाता प्रतीक्षन्ती मदागमम् ॥९७॥
मद्योगार्थं मयैवान्तःस्थितेन प्रेरितौ युवाम् ।
गतौ तस्याः सन्निधौ चागतौ मया विमोहितौ ॥९८॥
युवयोर्मिषमादाय तदिच्छापूरणाय च ।
समागतोऽम्बरीषस्य गृहं साक्षाच्चतुर्भुजः ॥९९॥
मध्ये तु युवयोर्भूत्वा वरमाला मया तदा ।
गृहीता कन्यकाहस्ताच्छ्रीमती सा मम प्रिया ॥१००॥
वर्ततेऽत्र ममांके सा सहासा वानराननौ ।
इत्युक्तौ रोषितौ नत्वा जग्मतुर्मुनिसत्तमौ ॥१०१॥
अम्बरीषं समासाद्य शेपतुस्तावुभौ मुनी ।
आहूय पश्चादन्यस्मै कन्यां त्वं दत्तवानसि ॥१०२॥
मायायोगेन तस्मात् त्वां तमो ह्यभिभविष्यति ।
एवं शापे प्रदत्ते तु तमोराशिरथोत्थितः ॥१०३॥
नृपं प्रति ततश्चक्रं तं जघान सुदर्शनम् ।
तमोराशिं द्रुतं हत्वा मुनयोः पृष्ठमालगत् ॥१०४॥
तौ तु लोकालोकपारं धावमानौ भयार्दितौ ।
त्राहि त्राहीति गोविन्दं प्राप्तौ वैकुण्ठनायकम् ॥१०५॥
त्राह्यावां पुण्डरीकाक्ष त्रातासि पुरुषोत्तम ! ।
कन्या लब्धा त्वया चक्रं नौ पृष्ठे निहितं कथम् ॥१०६॥
श्रुत्वा हसित्वा भगवान् चक्रं न्यवर्तयत्ततः ।
रुद्धं सुदर्शनं तत्र यथापूर्वमतिष्ठत ॥१०७॥
मुनिश्रेष्ठौ गतौ नत्वा प्रतिज्ञाय हरेः पुरः ।
अद्य प्रभृति देहान्तमावां कन्यापरिग्रहम् ॥१०८॥
न करिष्याव इत्येवं जातौ ध्यानपरायणौ ।
अम्बरीषो हरिं ध्यात्वा ययौ कृष्णपदाम्बुजम् ॥१०९॥
विष्णुलोकं सदा कृष्णनारायणं प्रसेवते ।
श्रीमती श्रीरिव लक्ष्मीरिव रमेव सेवते ॥११०॥
इति ते कथितं लक्ष्मि ! प्राग्वृत्तं श्रीमतीभवम् ।
यः पठेच्छृणुयाद्वापि श्रावयेद्वापि या सती ॥१११॥
सर्वे ते मम वैकुण्ठं यान्ति मामेव वैष्णवाः ।
इदं नित्यं पठेत् पुण्यं विष्णोः सायुज्यमाप्नुयात् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने प्रतिव्रतामाहात्म्ये त्रिशंकोः पद्मावतीराज्ञ्यामम्बरीषोत्पत्तिः, तस्य श्रीमत्याख्यदुहितुर्विवाहे नारदपर्वतयोर्वानरमुखता, नारायणेन च श्रीमत्या वैकुण्ठप्राप्तिः, पद्मावत्याः श्रीमत्याश्च पातिव्रत्यबलमित्यादिनिरूपणनामा एकादशाधिकचतुश्शततमोऽध्यायः ॥४११॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि दुःसहस्य तु योषिताम् ।
कथां पातिव्रत्यपरां ह्यधर्मस्य सुतस्य वै ॥ १ ॥
ब्रह्मणः पृष्ठतो जज्ञे ह्यधर्मोऽस्याभवत् सुतः ।
दुःसहो मानसः पुत्रो यत्र यत्र स तिष्ठति ॥ २ ॥
तत्र तत्र दुःसहत्वं प्रजानामपि जायते ।
तस्य पत्न्यश्चतस्रश्चाऽभवन्नाम्ना दरिद्रता ॥ ३ ॥
बुभुक्षा कलहा मलिनता चेति पतिव्रताः ।
यत्रास्ते दुःसहो देवो वसन्तीमाश्च तत्र वै ॥ ४ ॥
कुटुम्बिनः सुहृदश्च पार्श्ववासिन एव च ।
देशस्थस्य पुरस्थस्य दृष्टिमार्गगतस्य ये ॥ ५ ॥
सम्पदः समलोक्यैव न सहन्ते ज्वलन्ति च ।
तेषामीर्ष्याऽसूयिकाद्विड्भृतानां मानसे सदा ॥ ६ ॥
वासं ददौ स्वयं ब्रह्मा दुःसहस्य पितामहः ।
अथाऽधर्मस्य पुत्रोऽभून्मानसो वर्णसंकरः ॥ ७ ॥

सांकर्यस्याऽभवन् पुत्र्यश्चतस्रस्ता दरिद्रता ।
बुभुक्षा कलहा मलिनता चेति विवाहिताः ॥ ८ ॥
दुःसहाय प्रदत्तास्ताः सांकर्येण पतिव्रताः ।
दरिद्रता स्वरूपे तु निस्तेजस्का व्यदृश्यत ॥ ९ ॥
बुभुक्षाऽऽसीत् कुरूपा च कलहा क्रूररूपिणी ।
मलिनता मक्षिकादिव्याप्ता मलादिलेपिता ॥१०॥
स्नानदानजपहोमध्यानपुण्यादिवर्जिताः ।
दुःसहस्ता उपादाय वासं चक्रे ह्यरण्यके ॥११॥
अलब्ध्वा जीवनं तत्रोद्यमपत्तनमाविशत् ।
व्यवसायिद्विजादीनां मध्ये हर्म्यं विधाय च ॥१२॥
वासं चक्रे सभार्यः सः सहते न परोन्नतिम् ।
यस्योन्नतिं न सहते तद्गृहेऽयं प्रगच्छति ॥१३॥
गृहजनेषु चाविश्य निन्दां कुत्सां परस्परम् ।
वृद्धयोः कुशलस्याऽपि धार्मिकस्यापि सर्वथा ॥१४॥
करोति कारयत्येव धनाऽऽयप्रतिबन्धिकाम् ।
व्यवस्थ वर्धिनीं चैव लाभनाशकरीं तथा ॥१५॥
एकदा स प्रविवेश महेन्द्रे गुर्वपूजके ।
दुर्वाससाऽर्पितां मालां शक्रः सेहे न तद्बलात् ॥१६॥
माला तेन तदा क्षिप्ता गजकुंभे गजेन तु ।
समाकृष्य करेणैव स्वपादेनैव मर्दिता ॥१७॥
तावद्दुर्वाससि चापि प्रविष्टो दुःसहस्तदा ।
दुर्वासा तं शशापाऽपि सम्पद्धीनो भवेति वै ॥१८॥
सम्पदस्तत एवैता लयं प्राप्ता जलादिषु ।
द्रागेवेन्द्रगृहे दरिद्रतापत्नीयुतश्च सः ॥१९॥
दुःसहः स्वनिवासं वै चक्रे नित्यं प्रमोदितः ।
शच्या दारिद्र्यदोषेण दानमानादिकं ततः ॥२०॥
देवविप्रर्षिपित्रादिपूज्यातिथिप्रवासिनाम् ।
निरुद्धं च ततस्तस्यां संविवेश बुभुक्षता ॥२१॥
यस्मात्कस्मात्स्थलाद्वापि देवाद्वामानवात्तथा ।
ग्राह्यं ग्राह्यं समाहार्यं वर्ज्यं नास्तीति सर्वथा ॥२२॥
सर्वं ग्राह्यं भवत्येव सा गृह्णाति बुभुक्षया ।
चक्रवर्ती महाराजो नहुषो दृष्टिमागतः ॥२३॥
सुसमृद्धः सा शची चैच्छत् तस्मात् समृद्धिं तथोपदाः ।
राजानं सा समाहूयाऽयाचत वररत्नकम् ॥२४॥
पार्थिवं च तलीयं च यश्च लोकान्तरार्जितम् ।
राजापि देववन्द्यां तामापद्गतां विलोक्य वै ॥२५॥
दुर्वासःशापतो नश्यमानमपि ददौ च ताम् ।
बुभुक्षया शची नित्यं नवोपदां हि वाञ्छति ॥२६॥

देवानुमतिमादाय स्थापितादिन्द्रशासने ।
राज्ञा ज्ञातं बुभुक्षिता मया वस्तुप्रदानकैः ॥२७॥
तृप्ता विधीयते नित्यं मम भोग्या भविष्यति ।
नहुषेणाऽर्थिता रतिकर्मणे यावदेव तु ॥२८॥
तावच्च कलहा शच्यां नृपे च वासमाचरत् ।
क्लिष्टा जाता महेन्द्राणी नहुषः ऋषिवाहनात् ॥२९॥
पतितश्चाऽभवत् सर्पः शची याता तु पुष्करम् ।
अथ सर्पे महेन्द्रे च शच्यां मलिनताऽवसत् ॥३०॥
बहुवर्षसहस्राणि सर्वत्र दुःसहस्तथा ।
चतस्रो योषितस्तस्याऽवसन् प्रजासु सर्वशः ॥३१॥
हाहाकृतं महादुःखार्दितं सर्वं तदाऽभवत् ।
उद्योगपत्तनं नष्टं व्यवसाया वनं ययुः ॥३२॥
लक्ष्मीः समुद्रगा जाता समृद्धयोऽपि लयं ययुः ।
लोक्यते यत्र तत्र वै दुःसह स्त्रिभिरन्वितः ॥३३॥
पतिं विना न तिष्ठन्ति चतस्रस्ता व्रतान्विताः ।
मोदन्ते स्म हसन्ति स्म नृत्यन्ति स्म गृहे गृहे ॥३४॥
दुःसहस्तु गले कृत्वा मृदंगं वादयत्यपि ।
दरिद्रता ताण्डवं च करोति नृत्यमूर्जितम् ॥३५॥
बुभुक्षा भ्रमते पार्श्वे ढब्बुकान् भिक्षयत्यपि ।
कलहा केनचित् क्षिप्तं हरत्येव प्रसह्य तत् ॥३६॥
यदि भोज्यं फलं शुष्कं चार्द्रं ददाति कोऽपि वा ।
द्रागेव हृत्वा चाऽश्नाति नान्यस्यै सा ददाति हि ॥३७॥
यदि चान्या विभागं स्वं गृह्णाति तावदेव सा ।
कलहाऽऽरभते चाक्रोशनं ललाटपिट्टनम् ॥३८॥
तृप्त्यधिकं मिलेच्चेत् तद् ददात्यपरयोषिते ।
न चुलुकं न करयोः क्षालनं मुखशोधनम् ॥३९॥
करोति काचिन्नृत्येऽत्र मलिना संहसत्यपि ।
गृहं द्वारं चाङ्गणं च जलस्थानं च नालिका ॥४०॥
रसशालाऽऽप्लवस्थानं सर्वं मलिनतान्वितम् ।
किमु वै बहु वक्तव्यं पेटिकाऽऽस्तरणादिकम् ॥४१॥
गृहभित्तिस्तथोद्यानं स्फटिकासनमित्यपि ।
मुखं चक्षुः कपालं च भालं सर्वं मलान्वितम् ॥४२॥
सर्वत्र समभूल्लोके रूपं कुरूपतां गतम् ।
तेजो निस्तेजकतां च गतं कृष्णतमोऽन्वितम् ॥४३॥
एवं वै ताण्डवं दृष्ट्वा देवा नारायणादयः ।
समुद्रमथनं कृत्वा प्रथमं पुरुषं शुभम् ॥४४॥
उदाराख्यं हरिः प्राह धार्मिकं धर्मसंभवम् ।
गृहाण त्वं, यथेष्टं वै रत्नानि गच्छ साम्प्रतम् ॥४५॥

सन्तोषेण समं प्रसन्नताख्यया च योषिता ।
समं विचर सर्वत्र लोकेषु मा चिरं व्रज ॥४६॥
ततः स धर्मपुत्रश्च प्रसन्नतापतिः खलु ।
उदारः सानुजेनापि सन्तोषेण समन्वितः ॥४७॥
प्रजासु व्यचरच्छीघ्रं वासं चक्रे गृहे गृहे ।
तद् दृष्ट्वा दुःसहः क्रुद्धो देवान् प्रति जगाम ह ॥४८॥
भार्यायुतो ययाचे निष्कास्यमानोऽभितः खलु ।
वासार्थं जीवनार्थं मे देवैः प्रदीयतां स्थलम् ॥४९॥
नो चेद् विरागमापन्नो मरिष्ये नात्र संशयः ।
पतिव्रताश्च मे पत्न्यो भविष्यन्त्यनलाञ्चिताः ॥५०॥
सत्यः पृष्ठे मम सर्वाः संसारोऽसारतां व्रजेत् ।
अहमेव हि सारोऽस्मि संसारे जन्ममृत्युदः ॥५१॥
मद्विना यमराजस्य न्यायालयो न संचरेत् ।
मद्विना श्रीहरेरंशा भविष्यन्ति न सर्वथा ॥५२॥
मयि सत्येव सर्वत्राऽधर्मोऽपि नित्यपोषणम् ।
प्राप्नोति चासुराश्चोग्राः स्थिते मयि भवन्ति वै ॥५३॥
यथा यथेष्टं भवतां कुर्वन्तु बहुनाऽत्र किम् ।
इत्युक्त्वा विररामाऽसौ तावत्तस्य तु योषितः ॥५४॥
निराहारा भर्त्सिताश्च प्रजयाऽनादरीकृताः ।
क्षुधितास्तृषितास्तत्र देवानां पुरतो ययुः ॥५५॥
यत्र तासां पतिश्चास्ते चुक्रुधुः रुरुदुस्तदा ।
निजघ्नुर्निजवक्षांसि पुस्फुटुः स्वशिरांसि च ॥५६॥
बिभत्सवाणीर्जगदुः कोलाहलं प्रचक्रिरे ।
अरे रे रे क्व गच्छामस्तृषिताः क्षुधिता वयम् ॥५७॥
नास्ति भोज्यप्रदं क्षेत्रं नास्ति वासगृहं तथा ।
नास्ति वृक्षं सफलं वा नाऽऽश्रयश्चापि विद्यते ॥५८॥
निर्गुणाय निःस्थलाय प्रदत्ता जनकेन वै ।
अहो भाग्यं मरिष्यामोऽरण्येऽन्नसलिलं विना ॥५९॥
नास्ति चुल्ली गृहं नास्ति नास्ति वस्त्रादिकं तथा ।
पिष्टं मिष्टं तथा दिष्टं नास्ति कर्तव्यमेव किम् ॥६०॥
किं खादामः किं पिबामो निवासस्थानमन्तरा ।
पादं छित्वा नु किं चुल्ल्यां ज्वालयामो विनेन्धनम् ॥६१॥
बालान् किं खण्डशः कृत्वा भक्षयामः स्वकान् पते ! ।
प्रदीपे किं पूरणीयं रक्तं तैलं विनाऽत्र किम् ! ॥६२॥
सन्ताड्य पृथिवीं पादैः करैः सम्पीड्य मूर्धजान् ।
नेत्रैर्विमुच्य सलिलं रुरुदुर्दीनमानसाः ॥६३॥
आक्रन्दनं महादुःखमयं चक्रुश्च ताः स्त्रियः ।
तदा धर्मो यमः सूर्यश्चेन्द्रः शंभुर्हरिस्तथा ॥६४॥
लोकपालास्तथा देव्यो दृष्ट्वा दयावशंगताः ।
एताः प्रसान्त्वयामासुर्विचार्यैव ददुः स्थलम् ॥६५॥
यत्र भर्ता च भार्या च परस्परविरोधिनौ ।
गुरुः शिष्योऽतिथिः स्वामी द्विजा गावो विरोधिनः ॥६६॥
सभार्यस्त्वं गृहे तेषां विशेषाद् वस दुःसह ! ।
यत्र निन्दा च देवानां गुरूणां स्वामिनां श्रियाः ॥६७॥
स्त्रीणां निन्दा च वृद्धानां पित्रोश्च तत्र संवस ।
जपहोमादिकं दानार्चनं यत्र न विद्यते ॥६८॥
परोपकारहीनाश्च सभार्यस्तेषु चाविश ।
हरेः कथा न यत्रास्ति गुरुसम्माननं न च ॥६९॥
रात्रौ रात्रौ गृहे यत्र कलहो वर्तते मिथः ।
पितृतर्पणहीनाश्च सभार्यस्तेषु चाविश ॥७०॥
बालानां प्रेक्ष्यमाणानां यत्राऽदत्वा स्वभक्षयम् ।
भक्ष्याणि तत्र संहृष्टः सभार्यस्त्वं समाविश ॥७१॥
हिंसाकर्मरताः पापा दयाहीनाः परस्परम् ।
गृहे यस्मिन्नासते तद्गृहे देशेऽपि चावस ॥७२॥
यस्य काकगृहं निम्बे चारामे वा गृहेऽपि वा ।
मुण्डिन्याश्च गृहे नित्यं सभार्यस्त्वं समाविश ॥७३॥
एका दासी गृहे यत्र त्रिगवं पञ्चमाहिषम् ।
षडश्वं सप्तमातंगं सभार्यस्त्वं समाविश ॥७४॥
यत्र भार्या मन्त्रकर्त्री डाकिनी डाकनः पतिः ।
पिशाचवासो यत्रास्ति सभार्यस्त्वं समाविश ॥७५॥
यत्र कन्या गर्भवती कुमारी च रजस्वला ।
विधवा चान्यसंगिनी सभार्यस्त्वं समाविश ॥७६॥
यत्र नरा निन्दकाश्च साधूनां द्वेषकारिणः ।
पलाण्डुजातिगन्धीयाः सभार्यस्तेषु चाविश ॥७७॥
यत्र नार्यो विनिन्दन्ति यतीन् साध्वीः सततस्तथा ।
पतीन् वृद्धान् भूसुरांश्च सभार्यस्तत्र चाविश ॥७८॥
मैथुनानन्तरं यत्र न स्नानं शुद्धिरेव न ।
ऋतूत्तरं नवा शुद्धिः सूतकं न च पाल्यते ॥७९॥
ज्ञानमंगलहीनाश्च सभार्यस्तेषु चाविश ।
मलिनास्या मलदन्ता मदिरामांसभोजनाः ॥८०॥
सन्ध्याध्यानादिहीनाश्च द्यूतवेश्यारतास्तथा ।
नार्यो भाण्डादिषु प्रीता यत्र तत्र समाविश ॥८१॥
मर्त्याः पशुरता यत्र पशवो मानुषीरताः ।
वृथा धातुविनेष्टारस्तेषां गृहे समाविश ॥८२॥
यत्र कण्टकिनो वृक्षा गवाद्याः क्षुधितास्तथा ।
वध्यन्ते कृतनिःश्वासास्तेषां स्कन्धे सदा वस ॥८३॥

पवित्रे वासयोग्ये च स्थले मलादिसर्जकाः ।
सशक्ता अपि विद्यन्ते तेषां स्कन्धे सदा वस ॥८४॥
शास्त्रलोपप्रकर्तारो राज्यन्यायातिचारिणः ।
लोकमार्गच्युतास्तेषां गृहे स्कन्धे सदा वस ॥८५॥
दानकार्ये विरुद्धा ये सुखकार्ये विरोधिनः ।
दम्पतीस्नेहहन्तारस्तत्र सभार्यको वस ॥८६॥
इत्युक्तो दुःसहो नत्वा देवान् विष्णुपुरोगमान् ।
ययौ वासाय सर्वत्र लभ्यते यत्र तत्स्थलम् ॥८७॥
त्रयोदश्यां चतुर्दश्यां दीपावल्यां प्रतिपदि ।
रथ्यां भ्रमन्ति ताः सर्वाश्चतस्रो दुःसहस्त्रियः ॥८८॥
अंगणे गोपुरे भित्तौ देहल्यां चत्वरे बहिः ।
दीपदानेन स्वस्तिकपूरणेन सुतोरणात् ॥८९॥
रङ्गवल्ल्यादिभिश्चापि धूलीमार्जनतस्तथा ।
स्वच्छताकरणाच्चापि दधिदानेन वा च ताः ॥९०॥
यत्र पतिव्रतानार्यः पतयश्च पत्नीव्रताः ।
उभौ कृष्णपरौ यत्र यत्र वै वैष्णवा जनाः ॥९१॥
साधुतृप्तिप्रदाः शिष्याः साध्व्यो यत्र हरिप्रियाः ।
कृष्णनारायणो यत्र तत्र नाऽऽयान्ति ताः प्रिये ॥९२॥
लक्ष्मीपूजा भवेद् यत्र शारदापूजनं तथा ।
गणेशपूजनं यत्र दानं च विविधं भवेत् ॥९३॥
नत्वा सर्वा निवर्तन्ते नाऽऽयान्ति वत्सरं हि ताः ।
इति ते कथितं लक्ष्मि ! दरिद्रतादिवर्तनम् ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये अधर्मपुत्रदुःसहस्य दरिद्रताबुभुक्षा-कलहामलिनताख्यानां पत्नीनां पतिव्रतानां सपतिकनिवासस्थानानां प्रदर्शननामा द्वादशाधिकचतुश्शततमोऽध्यायः ॥४१२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पुरावृत्तं ब्रह्मसदसि संवृतम् ।
ब्रह्मणा निर्मिते चात्र लोके देवर्षिरक्षिते ॥ १ ॥
मुनयः ऋषयो देवाः पितरो मानवाः खगाः ।
पातालस्तरवासाश्च गन्धर्वाः किन्नराः नृपाः ॥ २ ॥
साध्या विश्वे मरुतश्च वसवो देवनायकाः ।
ब्रह्मचर्यपराश्चापि यतयो ध्यानयोगिनः ॥ ३ ॥
विद्याधराः किंपुरुषा अनेके देवयोनयः ।
अप्सरसो ब्रह्मसरसः साध्व्यः सत्यश्च कन्यकाः ॥ ४ ॥
दास्यः किंकर्यः सेवार्थसाधिकाः अपि योषितः ।
कामचाराः कामरूपा यथेष्टसुखदायिकाः ॥ ५ ॥
सममानाः समदेहाः सुन्दर्यः षोडशाब्दिकाः ।
तत्र पत्न्यर्थमेवायं ब्रह्मा लोकपितामहः ॥ ६ ॥
ददौ दिविषदादिभ्यः शच्याद्या मानसीस्त्रियः ।
तासां पतिव्रताधर्माः पतिगृहीतयोषिताम् ॥ ७ ॥
पातिव्रत्येन संरब्धा भुक्तिमुक्तिप्रदाः खलु ।
ब्रह्मणा देवपत्नीभ्यः स्नुषाभ्यश्चोपवर्णिताः ॥ ८ ॥
उपदिष्टाः पातिव्रत्यपरा मोक्षस्य साधकाः ।
धर्मार्थकाममोक्षाख्यास्ताभिः श्रुताः समादरात् ॥ ९ ॥
गृहीताः सर्वथा श्रेयस्करास्तुष्टाश्च ताः स्त्रियः ।
किन्तु दासीस्वरूपिण्यः श्रुत्वा धर्मांश्च सर्वशः ॥१०॥
अस्माकं सेविकानां वै को धर्मश्चेत्यतर्कयन् ।
वयं दास्यः परवश्याः पितामहेन निर्मिताः ॥११॥
देवानां च तथा देवीयोषितां कर्मचारिकाः ।
उपपत्न्यो भवामश्च पातिव्रत्यविवर्जिताः ॥१२॥
दास्ये नैकपतिमत्त्वं सुरक्ष्येत कदाचन ।
कैंकर्यं च पराधीनं स्वामिसन्तोषलम्बनम् ॥१३॥
स्वामिनो बहवः स्युश्च नैकधर्मोऽस्ति सुदृढः ।
बहूनां सेवया दासीजीवनं हि विवर्तते ॥१४॥
तत्राऽनेकप्रसंगेन दुरीतं जायते ततः ।
असुकृतेन दोषेण निरये वै गतिर्भवेत् ॥१५॥
तस्माद् दास्यं तु नारीणां न वै श्रेयःप्रदं भवेत् ।
न कार्यं तादृशं दास्यं यत्र नास्त्युत्तमा गतिः ॥१६॥
राज्ञां धनिनां सर्वेषां कामभावेन सेवनम् ।
नर्तनं पण्यभावेन पण्यपत्नीत्ववर्तनम् ॥१७॥
यदि दोषावहं तर्हि तन्न ग्राह्यं हि सर्वथा ।
तस्माद् यथा कृताः सर्वा विवाहिताः सुरस्त्रियः ॥१८॥
ब्रह्मसरसः कन्याश्च वयं तद्वद् विवाहिताः ।
अप्सरसः सुराद्यैश्च गृहीता एव सेविकाः ॥१९॥
स्यास्यामो वै पातिव्रत्यधर्मपराः सदा शुभाः ।
मुनिषु ब्रह्मरूपेषु सुरेषु मानवेष्वपि ॥२०॥
नागेषु सिद्धगन्धर्वचारणेषु वनिष्वपि ।
विवाहेनैव पतिभिः सार्कं पतिपरायणाः ॥२१॥
पतिधर्मान् समगृह्य वर्तिष्यामह एव यत् ।
पतिधर्मः परो धर्मो धर्मार्थकाममोक्षदः ॥२२॥
पतिन्यासः परो न्यासः पुत्रवित्तसुखप्रदः ।
पतिरक्षा परारक्षा पतिर्देवः परो गुरुः ॥२३॥

विना विवाहविधिना दासीत्वं काचवन्मतम् ।
अध्रुवं नश्वरं नाऽऽस्थाप्रदं छलादिसंभृतम् ॥२४॥
अतृप्तिदं समुद्वेगकरं दुःखप्रदं सदा ।
तस्माद्वै ब्रह्मणे सर्वा मिलिता वयमेव च ॥२५॥
प्रार्थयामोऽप्सरसो वै विवाहेन प्रदानकम् ।
इति विचार्य ताः सर्वा अप्सरसोऽजसंसदि ॥२६॥
ब्रह्माणं प्रार्थयामासुर्विवाहार्थं पुनः पुनः ।
ब्रह्मणा च तदा स्वस्य पुत्रीभ्यो धर्महेतवे ॥२७॥
स्नुषाभूताभ्य एवैता धर्मा मोक्षकरास्तथा ।
सुखदाः स्वर्गदाश्चापि दुरीतक्षयकारकाः ॥२८॥
उपदिष्टाः सुखायैव तथा निःश्रेयसाय च ।
शृणु लक्ष्मि ! कथयामि पण्यधर्मान् सुखाश्रयान् ॥२९॥
या दासी च पराधीना कुमारी सधवाऽथवा ।
अपतिका च दासीत्वे स्थिता वा नृपधर्मिणी ॥३०॥
बहुस्वामिमती या वा चाऽपरिचितस्वामिनी ।
कामधर्मेण लुब्धा वा यस्या नास्त्यपरा गतिः ॥३१॥
तया नृपाः स्वामितुल्याः सूता वापि च तत्समाः ।
सेवनीया भवेयुर्वै तासां सौभाग्यमेव ते ॥३२॥
ये केचिद् वृत्तिदातारः शुल्कदातार एव वा ।
आजीवनं रक्षकास्ते तारकाः पतयः स्मृताः ॥३३॥
तेषां वै सेवया दास्यस्तरन्ति भावभक्तितः ।
जारे शुल्कप्रदे नारायणं स्मृत्वा तु मां हरिम् ॥३४॥
नारायणसमां सेवां करिष्यन्ति तु याः स्त्रियः ।
तादृङ्निश्छद्मवृत्त्या तास्तरिष्यन्ति हरेर्बलात् ॥३५॥
उपचार्यो हरिबुद्ध्या समायातोऽतिथिर्यथा ।
न तु वै तृष्णया लुब्धवृत्त्या वा कपटेन वा ॥३६॥
क्षणिकं च पतिं मत्वा सेवनीयो हरिर्यथा ।
पितॄणां देवतानां च पुण्याहे समुपस्थिते ॥३७॥
गोभूहिरण्यदानानि प्रदेयानि स्वशक्तितः ।
गुरूणां च सतां दैवीजनानामाशिषस्तथा ॥३८॥
प्राप्तव्याः श्रेयसे ताभिः पाल्यानि वचनानि च ।
यदा सूर्यदिने हस्तः पुष्यो वाऽथ पुनर्वसुः ॥३९॥
भवेत् सर्वौषधिस्नानं पण्यनारी समाचरेत् ।
धात्रीफलतिलपिष्टाऽपामार्गतुलसीदलैः ॥४०॥
तण्डुलैर्विष्णुपादाब्जवारिमिश्रजलैः शुभैः ।
स्नायात्तथाऽर्चयेत् कामरूपं कृष्णनरायणम् ॥४१॥
रतिं कामं प्रतिष्ठाप्य राधां कृष्णं तु कानकम् ।
लक्ष्मीं नारायणं स्वर्णे संस्थाप्य पूजयेत्तु सा ॥४२॥
कामाय पादौ सम्पूज्य जंघे वै मोहकारिणे ।
मेढ्रं कन्दर्पनिधये कटिं प्रीतिमते नमः ॥४३॥
नाभिं सौख्यसमुद्राय रामाय च तथोदरम् ।
हृदयं हृदयेशाय स्तनावाह्लादकारिणे ॥४४॥
उत्कण्ठायेति वैकुण्ठमास्यमानन्दकारिणे ।
वामांगं पुष्पचापाय पुष्पबाणाय दक्षिणम् ॥४५॥
मानसायेति वै मौलिं विलोलायेति मूर्धजम् ।
सर्वात्मने कृष्णनारायणात्मने प्रसेविने ॥४६॥
कान्तरूपाय चक्रादिधारिणे परमात्मने ।
नमो नारायणायेति कामदेवात्मने नमः ॥४७॥
कामपित्रे कामदेवनिवासाय च ते नमः ।
काममोक्षकरायाऽर्तिहराय हरये नमः ॥४८॥
कामबन्धनकाराय कामबन्धनहारिणे ।
कृष्ण कृष्ण काम कृष्ण मोक्षदाय च ते नमः ॥४९॥
अस्माकं त्वं पतिः कृष्ण नान्योऽस्ति त्वादृशः पतिः ।
अन्ये स्वार्थाः पतयस्ते वयं स्वार्थाश्च योषितः ॥५०॥
त्वं परार्थः परब्रह्म गृहाणाऽस्मान्निजे करे ।
पातिव्रत्यं त्वयि चास्तु नान्यत्र क्षणदेषु वै ॥५१॥
क्षणदेषु भवानास्ते भवानेव पतिः प्रभो ! ।
तारयाऽस्मान् भववाहात् कृष्णवाहे नय प्रभो ॥५२॥
नार्यः कामकृते सृष्टाः भवान् कामरूपो हि नः ।
बीजरूपो हरिः कृष्णो बालरूपो भवान् मतः ॥५३॥
प्रेमरूपो लिङ्गरूपो भवानेव मतो हि नः ।
मा भक्तानां योषितां ते किंकरीणां दुरीतकम् ॥५४॥
पण्यत्वे च कदाचिद्वै स्पृशत्वस्माँस्तव प्रियाः ।
यत्कुर्मो वामभागस्थाः शर्म कर्म सुखावहम् ॥५५॥
अर्पयामो भवत्येव निर्गुणं तन्निवर्तताम् ।
एवं कृष्णार्पणं लक्ष्मि ! कार्यं वारस्य योषिता ॥५६॥
पण्यस्त्रीभिस्तथा दास्या कार्यं कृष्णार्पणं हि तत् ।
अथ लक्ष्मीं राधिकां च रतिं मत्वा समर्चयेत् ॥५७॥
नमः पुष्ट्यै नमस्तुष्ट्यै नमः सर्वार्थसम्पदे ।
अनंगजननीं वन्दे कामपत्न्यै नमो नमः ॥५८॥
कामात्मिकायै सुन्दर्यै कृष्णकान्त्यै च ते नमः ।
आनन्दात्मकरूपिण्यै तारिण्यै ते नमो नमः ॥५९॥
एवं प्रातः सदा पण्यप्रमदा श्रीहरिं पतिम् ।
श्रीपतिं पूजयेत् स्वामिभावेन मोक्षणं व्रजेत् ॥६०॥
गन्धैर्माल्यैस्तथा धूपैर्नैवेद्यैर्जलदीपनैः ।
कामिनी चाप्सरसश्च पूजयेच्छ्रीजनार्दनम् ॥६१॥

अन्नदानं वस्त्रदानं द्रव्यदानं द्विजातये ।
साधवे ब्रह्मशीलाय दद्याच्च ब्रह्मचारिणे ॥६२॥
तस्मै कृष्णायाऽर्पयामि श्रीकृष्णः प्रीयतां मम ।
इति पूजां कारयेद्वा कुर्यात् पुण्यप्रदां सती ॥६३॥
एतादृशीं प्रियां भक्तिमतीं कृष्णो हि तारयेत् ।
पुरुषं कामदेवो वै कृष्णोऽयमिति धारयेत् ॥६४॥
सर्वभावेन चात्मानमर्पयेत् कृष्णतन्मयी ।
ततो दोषैर्न लिप्येत पण्यस्त्री किंकरी च वा ॥६५॥
तण्डुलप्रस्थदानं च रविवारे प्रकारयेत् ।
कार्तिके माधवे माघे चातुर्मास्ये व्रताहके ॥६६॥
भक्तिं नवविधां कुर्यात् पण्यस्त्री पावनी भवेत् ।
विप्रस्योपस्करैर्युक्तां शय्यां दद्यात् सुशोभनाम् ॥६७॥
सोपधानकविश्रामां सास्तरावरणां शुभाम् ।
प्रदीपोपानहच्छत्रपादुकासनसंयुताम् ॥६८॥
कृष्णस्य मन्दिरे दद्यात् शय्यादानं हि पावनम् ।
हेमसूत्रं विभूषाश्च हारान् रम्याम्बराणि च ॥६९॥
अङ्गुलीयकरशनाकटकद्रव्यकाणि च ।
लक्ष्मीनारायणमूर्तिं कामस्य प्रतिमां तथा ॥७०॥
रतिमूर्तिं प्रदद्याच्च दाने विप्राय वेदिने ।
ताम्रपात्रं हेमसूत्रं मौक्तिकं चक्षुरित्यपि ॥७१॥
इक्षुदण्डं गुडकुंभं धूपमाल्यानुलेपनम् ।
तैलं सुगन्धि दद्याच्च भोजनं च द्विजातये ॥७२॥
दोग्ध्रीं धेनुं तथा दद्याद् वदेच्च धेनुसन्निधौ ।
यथाऽन्तरं न पश्यामि कामकेशवयोः सदा ॥७३॥
तथैव सर्वकामाप्तिरस्तु कृष्ण सदा मम ।
यथा न कमला देहात् प्रयाति तव केशव ॥७४॥
तथा मामपि देवेश शरीरे स्वे कुरु प्रभो ।
ततः प्रदक्षिणीकृत्य विप्रं विसर्जयेत् सती ॥७५॥
एवं वै श्रीकृष्णनारायणरूपं प्रपूजयेत् ।
विप्रं वान्यं नरं चाभ्यागतं कृष्णं सुतोषयेत् ॥७६॥
तर्पयेत यथाकामं प्रोषितेऽन्यं प्रतोषयेत् ।
यदृच्छयाऽभ्यागतं वै रञ्जयेत् तत्पतिप्रिया ॥७७॥
एवं कृतेऽपि गर्भो वै यदीच्छेद् रक्षयेच्छुभम् ।
अनिच्छा चेदृतुधर्मात् षोडशाहोत्तरं नरम् ॥७८॥
संस्पृशेद्रतिकामार्थे ह्यनपत्या वसेत्तथा ।
अकामया ह्यकामेन पारवश्यतया यदि ॥७९॥
सगर्भात्वं प्रसज्येत ह्युपचारान् समाचरेत् ।
एतद्धि कथितं चाऽप्सरोभ्यः पूर्वं हि वेधसा ॥८०॥
अधर्मोऽयं ततो न स्यात् पण्यस्त्रीणां हि सर्वथा ।
पुरुहूतेन च पुरा दानवीषु तथोदितम् ॥८१॥
पशुपक्षिप्रमदासु पुरा युगे तथोदितम् ।
तदिदं साम्प्रतं सर्वं भवतीषु च युज्यते ॥८२॥
सर्वपापप्रशमनं कृष्णप्राप्तिप्रदायकम् ।
कृष्णार्पणात्मकं कार्यं निर्गुणं स्यान्मदाज्ञया ॥८३॥
कल्याणीनां कथितं तत् कुरुध्वं प्रवरांगनाः ।
इत्युक्ता ब्रह्मणा सर्वा अप्सरसो यथावचः ॥८४॥
अवर्तन्त दिविषत्सु मुनिषु मानवेषु च ।
तासां पापप्रणाशाय देवास्तदाऽवदन् मुहुः ॥८५॥
याश्च दास्यः परवशाः किंकर्यश्च निराश्रयाः ।
कर्मचारिण्य आज्ञास्थाः प्रेष्या भुजिष्ययोषितः ॥८६॥
शुक्रनार्यश्चाऽलग्निकाः शुद्धा देव्यो भवन्तु ताः ।
वारस्त्रियश्च नर्तक्यः शिक्षिका दायिकास्तथा ॥८७॥
उपपत्न्यश्च ताः सर्वाः शुद्धा भवन्तु सर्वदा ।
कृष्णकृष्णेति कृष्णेति मत्वा नराश्रिताः सदा ॥८८॥
पूजिता वर्तमानाः स्युर्दैवैर्वन्द्या हरेः पुरम् ।
प्रयास्यन्ति सुकृतज्ञा ब्रह्मा साक्ष्यस्मि योषिताम् ॥८९॥
मासे मासे च यासां वै प्रदत्तमार्त्तवं व्रतम् ।
शुद्ध्यन्ति ऋतुना सर्वा नार्यश्चेति ह्यजोऽब्रवीत् ॥९०॥
व्रतं यदृषिपञ्चम्याः सोपवासं परं मतम् ।
तेन शुद्ध्यन्ति भामिन्यः सर्वदोषलयो भवेत् ॥९१॥
कृष्णभावनया नॄन् सेवन्ते सर्वाः पतिव्रताः ।
कृष्णः पतिः परब्रह्म तद्व्रतास्ताः पतिव्रताः ॥९२॥
कृष्णः सन्तोषमायाति नरात्मनि समस्थितः ।
नारी सन्तोषमायाति नार्यात्मनि हरिः स्थितः ॥९३॥
इतिभावात्मको भक्तो भक्ता नार्हति दूषणम् ।
एवं पतिव्रताधर्मं पण्यस्त्रीणामुदाहृतम् ॥९४॥
आदौ कृतयुगे प्रोक्तं सुरनार्यः समाचरन् ।
युगक्षये मनःकल्ये कृष्णभावविवर्जिते ॥९५॥
जाते तु समये दोषः काममात्रातिमर्षणे ।
सुकृतं नैव जायेत कृतं नश्येच्च वै तपः ॥९६॥
ततो नार्या पण्यभावे वर्तितव्यं न शोभनम् ।
नरेणापि जारभावे वर्तितव्यं न शोभनम् ॥९७॥
स्वच्छे स्वाच्छयं भवेद्धर्मो मालिन्येऽधो मलं मतम् ।
ततः पण्यमयाद्धर्माल्लग्नधर्मः परो मतः ॥९८॥
वस्तुतः शृणु वै सर्वं मलमूत्रमशुद्धकम् ।
असह्यगन्धं निकृष्टं ह्यशुभं मलिनं सदा ॥९९॥

मलं पापं हि मन्तव्यं निर्मलं पापवर्जितम् ।
मलं नवसु द्वारेषु क्षरते भिन्नरूपकम् ॥१००॥
गर्भवासमलं प्रोक्तं मूत्रं द्रवन्मलात्मकम् ।
तद्वै पापस्थलं बोध्यं तद्योगः पापमुच्यते ॥१०१॥
योगस्तु सर्वथा पापं मलसाधनयोः खलु ।
तद् विवाहितयोर्यद्वा चाऽविवाहितयोरपि ॥१०२॥
विवाहो नियमः प्रोक्तो नियमः सह्यते सदा ।
अविवाहो न नियमः सह्यते न जनैर्हि सः ॥१०३॥
मलं पापं कर्म तुल्यं सह्यते न च सह्यते ।
सह्यते च यतस्तत्र पापत्वं नेति नैव हि ॥१०४॥
मैथुनं सर्वथा पापं पुण्यकर्म न विद्यते ।
कामश्च सर्वथा दोषो ह्यधर्मवंश एव सः ॥१०५॥
कृष्णनारायणयोगाद् यदि दिव्योऽर्पितस्तदा ।
सर्वार्पणात्मकं तद्धि हरेः प्रसन्नताप्रदम् ॥१०६॥
पत्न्या तदन्यया चापि कार्या हरेः प्रसन्नता ।
कामः पाप्मा नियमितो वृद्धैर्विवाहकर्मणा ॥१०७॥
अप्सरसां तु गान्धर्वो विवाहो ब्रह्मणा कृतः ।
दासीनां शुल्कनारीणां क्षणगान्धर्व एव सः ॥१०८॥
वेष्टुं योग्यो यश्च कोऽपि शुल्केन यत्र योषिति ।
स वेश्यसंज्ञकस्तावत् सा वेश्या तावतैव हि ॥१०९॥
तयोस्तावत्प्रसंगश्च सह्यते यदि मानवैः ।
यथा विवाहितयोः स नैतावता वृषो मतः ॥११०॥
किन्तु सह्यं मतं कर्म धर्मत्वेनोपचारितम् ।
तच्छ्रीकृष्णार्पणं कृत्वा यथार्थे धर्ममाचरेत् ॥१११॥
इति तत्त्वं कथितं ते पण्यस्त्रीणां तथा प्रिये ।
पतिस्त्रीणां समं कर्म धर्मो नियमतो मतः ॥११२॥
कामभोगस्तु नरको निरयप्रद एव सः ।
पत्नीनां गणिकानां वा वेश्यानां वाऽन्ययोषिताम् ॥११३॥
दाल्भ्यनामा महर्षिश्च तत्त्वं स्त्रीभ्यः पुराऽवदत् ।
ऐन्द्रियकं तु यत् कर्म कृष्णस्मरणवर्जितम् ॥११४॥
सर्वं पापात्मकं तद्धि कामः क्रोधो जपो व्रतम् ।
स्वर्गाद्या भूमयः सर्वा निरयाः कृष्णमन्तरा ॥११५॥
कामाद्या भोगनिवहा निरयाः कृष्णमन्तरा ।
तस्मात् कृष्णं परं कान्तं कृत्वा प्रसाद्य तं प्रभुम् ॥११६॥
सेवित्वा सत्पतिं नारायणं नारायणी भवेत् ।
नवा देहस्य कामाय कामभोगो भवत्यपि ॥११७॥
आत्मनस्तु सुखायैव कामभोगं करोत्यजः ।
न चेन्द्रियाणां कामाय कामभोगा भवन्त्यपि ॥११८॥
अन्तःस्थात्मसुखायैव कामभोगा भवन्त्यपि ।
न चात्मा केवलः कामे प्रवर्ततेऽन्तरा हरिम् ॥११९॥
तस्माद्धर्यर्थमेवैते आत्मकामा भवन्ति वै ।
यदि कृष्णो भवेन्नैवात्मनि चात्मा निरर्थकः ॥१२०॥
तस्मात् कामाः कृष्णयोगादानन्ददा भवन्ति हि ।
एवं कृष्णं समाराध्य प्राप्तव्यं कामनाफलम् ॥१२१॥
पातिव्रत्यं तदेवोक्तं पण्यस्त्रीणां तु पद्मजे ।
इति श्रुत्वा परं धर्मं नैजं मत्वाऽप्सरोगणाः ॥१२२॥
ब्रह्माऽऽज्ञायामवर्तन्त शुल्कधर्मपरायणाः ।
सशुल्कः सत्कृतः स्वामी यावद् रञ्जनतामियात् ॥१२३॥
तस्य सेवां प्रकुर्वत्यैव प्राप्स्यन्ते ताः पदं परम् ।
पठनाच्छ्रवणाच्चास्य धर्मतत्त्वं प्रबुध्यते ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये दासीपण्यस्त्रीणामपतिकानां भगवत्पातिव्रत्यनिरूपणनामा त्रयोदशाधिकचतुश्शततमोऽध्यायः ॥ ४१३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथं कार्यं पातिव्रत्यं परात्मनि ।
नारदाय हरेणोक्तं कृष्णेन शंकराय च ॥ १ ॥
ब्रह्मणे च सनत्कुमारायोक्तं कथयामि ते ।
मयोक्तं मम भक्तैश्च प्रोक्तं परम्परात्मकम् ॥ २ ॥
त्वयोक्तं कम्भरादेव्यै पुनः स्मृत्वा वदामि ते ।
कृष्णस्याऽऽत्मार्पणे बुद्धिः कर्तव्या सेव्य एव सः ॥ ३ ॥
आराधयेत् स्वामिरूपं भगवन्तं श्रिया सह ।
पतिरेव हरिः स्त्रीणां दासीभावेन वर्तयेत् ॥ ४ ॥
दासीभावेन या नारी नारायणं प्रसेवते ।
तारितानि तया नैजकुलानि त्वेकविंशतिः ॥ ५ ॥
स एव दिवसो धन्यो धन्या माताऽथ बान्धवाः ।
पिता धन्यः पतिर्धन्यो धन्यं सर्वं कुटुम्बकम् ॥ ६ ॥
यया कृष्णः पतिबुद्ध्या सेवितः परमेश्वरः ।
बहुजन्मकृतं पापं तस्या नश्यति सर्वथा ॥ ७ ॥
पावनी जायते लक्ष्मीस्वरूपा परमेश्वरी ।
शंभुः प्राह पुरा पातिव्रत्यं सत्यै परेश्वरे ॥ ८ ॥
गंगादेव्या तथोक्तं च श्रोतव्यार्हं शृणु प्रिये ।
पातिव्रत्यं परःस्नेहः स्वामिन्येव न चापरे ॥ ९ ॥

पत्यौ स्नेहः स्त्रियाः कृष्णनारायणात्मके तथा ।
सति ! त्वया यथा ध्यातः शंकरोऽहं पतिस्तव ॥१०॥
तथा मया हरिर्ध्यातः सर्वावस्थासु सुन्दरि ! ।
स एव रक्षकः पोष्टा पतिरेव शरीरिणाम् ॥११॥
सत्यं पतित्वं कृष्णे च वर्तते देहधारिणाम् ।
तृषातुरो यथैवाऽम्भस्तथा कृष्णं स्मराम्यहम् ॥१२॥
हिमाकुलः स्मरत्यग्निं तथा कृष्णं स्मराम्यहम् ।
पतिव्रता पतिं यद्वत् तथा स्मरामि माधवम् ॥१३॥
दूरस्थस्तु यथा गेहं चातको जलदं यथा ।
ब्रह्मविद्यां ब्रह्मविदस्तथा कृष्णं स्मराम्यहम् ॥१४॥
हंसा मानसमिच्छन्ति ऋषयो मानसे हरिम् ।
भक्ताभक्तिं यथेच्छन्ति तथा कृष्णं स्मराम्यहम् ॥१५॥
वैष्णवाश्च यथा शुद्धिं पशवश्च यथा तृणम् ।
सन्तः क्षमां यथेच्छन्ति तथा कृष्णं स्मराम्यहम् ॥१६॥
व्यसनी व्यसने सक्तो देहे सक्तो ह्यनात्मवित् ।
सतृष्णश्चायुषि सक्तस्तद्वत् स्मरामि केशवम् ॥१७॥
षट्पदास्तु यथा पुष्पं चक्रवाकाः प्रभाकरम् ।
आत्मप्रिया प्रियं यद्वत् तथा विष्णुं स्मराम्यहम् ॥१८॥
तमःस्था दीपमिच्छन्ति श्रमार्ताः शान्तिमित्यपि ।
निद्रां जागरिता यद्वत् तथा कृष्णं स्मराम्यहम् ॥१९॥
विद्यामालस्यहीनाश्च गजा आरण्यकीं स्थलीम् ।
सिंहा मृगादिकं यद्वत् तथा कृष्णं स्मराम्यहम् ॥२०॥
सूर्यकान्ते रवियोगात् कार्पासे त्वनलो यथा ।
चन्द्रकान्ते चन्द्रयोगाद् यथा वारि प्रजायते ॥२१॥
कुमुद्वती यथा सोमं दृष्ट्वा पुष्पैर्विकाशते ।
एवं सतीप्रसंगेन तथा कृष्णः प्रकाशते ॥२२॥
यथा नालीगता रात्रौ भ्रमरी रक्षकं स्मरेत् ।
यद्वा नालीगता प्राणाँस्त्यक्त्वा निर्वाणतां व्रजेत् ॥२३॥
तथा साध्वीगता दासी कृष्णं संरक्षकं स्मरेत् ।
गोपीभिर्जारबुद्ध्यैव कृष्णः स्मृतो हि सर्वथा ॥२४॥
ताश्च सायुज्यतां प्राप्तास्तथा कृष्णं स्मराम्यहम् ।
काऽपि वै दुष्टभावेन छद्मभावेन काऽपि च ॥२५॥
काचिल्लोभेन वैराग्यभावेनापि तथाऽपरा ।
स्नेहेन भक्त्या द्वेषेण कान्तभावेन चेतरा ॥२६॥
ज्ञानेन काचिच्छ्रीकृष्णं चिन्तयित्वा जनार्दनम् ।
इह लोके सुखं भुक्त्वा गोलोकं प्रययौ सती ॥२७॥
यदृच्छयाऽपि स्मरणं भक्ताया मुक्तिदायकम् ।
एकेन पातिव्रत्येन समीपे दृश्यते क्षणात् ॥२८॥
पतिस्नेहं विना पत्नी पत्नीस्नेहं विना पतिः ।
सान्निध्येऽपि स्थितो दूरे नेत्रयोरञ्जनं यथा ॥२९॥
पातिव्रत्यमयी भक्तिः प्राप्ता प्राप्तो हरिस्तदा ।
इन्द्राद्यैरमृतं प्राप्तं विना भक्तिं तु दुःखिताः ॥३०॥
पतिभक्त्यमृतं प्राप्य पुनर्दुःखं न जायते ।
जलं विहाय हंसाश्च दुग्धं पिबन्ति नेतरत् ॥३१॥
मायां विहाय सत्यश्च कृष्णं पिबन्ति चक्षुषा ।
वस्त्रपोटलिका शक्ता न स्याज्जलस्य बन्धने ॥३२॥
मायापोटलिका न स्याच्छक्ता कृष्णस्य योजने ।
पतिभक्तिं विना नारी कृष्णं कान्तं समीहते ॥३३॥
कथं चायास्यति कृष्णः पातिव्रत्यार्पणं विना ।
पतिभक्तिः कृष्णभक्तिः कार्या नार्या सदा स्वतः ॥३४॥
बाहुभ्यां सागरं यद्वत् तर्तुं मूढाऽभिवाञ्छति ।
संसारसागरं तद्वत् कृष्णं पतिं विनेच्छति ॥३५॥
दरिद्रस्य यथा स्वर्णे स्पृहाऽस्ति मे हरौ तथा ।
कामोद्रेके यथा नार्या कृष्णे मेऽस्ति तथा स्पृहा ॥३६॥
वह्निः स्वल्पोऽप्यरण्यानि दहति नित्यवर्धितः ।
कृष्णे पातिव्रत्यभावो रेणुमात्रमपि कृतः ॥३७॥
जन्मान्तरसहस्राऽघाऽचलान् करोति भस्मसात् ।
कृष्णः पतिः पतिः कृष्ण इति स्मृत्वा पतिं भजेत् ॥३८॥
स्त्रीशतैः श्रूयते पातिव्रत्यं सतां प्रसंगतः ।
स्त्रीसहस्रैर्बुध्यते च कदाचिन्नहि पाल्यते ॥३९॥
बुद्धिं परासां दास्यन्ति लोके नैकविधाः स्त्रियः ।
स्वयमाचरते सा तु नारी कोटिषु दृश्यते ॥४०॥
सागरे तु यथा पोतः कूपे द्रोणोपवेशनम् ।
तथा यादृग् भवेत्पात्रं तथा धर्मः प्रकाशते ॥४१॥
मूले सिक्तं जलं वृक्षे पत्रशाखासु गच्छति ।
पुष्पं फलं तथा बीजं क्रमेणैव भवन्त्यपि ॥४२॥
तथा पत्युः कृता सेवा पुत्रपौत्रादिवर्धिनी ।
स्वर्गदा मोक्षदा चापि भवत्येव न संशयः ॥४३॥
पानीयहारिणी यद्वद् घटे कूपे पदे करे ।
चित्तं ददाति स्वस्यां च तथा पत्यौ हरावपि ॥४४॥
बाला गुडं प्रभुक्त्वा च मातरं याचते पुनः ।
सती पतिं प्रभुक्त्वा च श्रीकृष्णं याचते तथा ॥४५॥
नीरे नीरं यथा मिश्रं दुग्धे दुग्धं घृते घृतम् ।
पत्यौ कृष्णस्तथा मिश्रः सत्या द्रष्टव्य एव सः ॥४६॥
सूर्यः सर्वगतो यद्वत् प्रभया किरणेन च ।
वह्निः सर्वगतो यद्वत् पाकेन जाठरेण च ॥४७॥

कृष्णनारायणः स्वामी तथा पत्यात्मको हरिः ।
सर्वं गतोस्ति देवेशि ! पतिभक्तिं तथा चरेत् ॥४८॥
ग्रावाणो जलमध्यस्था लिप्यन्ते न जलैर्मनाक् ।
पातिव्रत्यपरा नार्यो लिप्यन्ते नाऽन्यदेहिषु ॥४९॥
सोमकान्तिर्हि सुखदा पतिकान्तस्तथा सुखः ।
फलं पक्वं सदा मिष्टं कृष्णस्तथा पतिः स्त्रियाः ॥५०॥
दर्दुरो वसति नीरे षट्पदो हि वनान्तरे ।
गन्धं वेत्ति कुमुद्वत्याः षट्पदो नहि दर्दुरः ॥५१॥
गंगातटे वसन्त्येके ह्येके च शतयोजनम् ।
कश्चिद् गंगाफलं वेत्ति तथा कृष्णपतिव्रता ॥५२॥
कर्पूराऽगुरुभारं च ह्युष्ट्रो वहति नित्यशः ।
मध्यगन्धं न जानाति नाऽऽनन्दं वेत्ति तन्मयम् ॥५३॥
तथा भारवहा पत्नी पातिव्रत्यं विना क्वचित् ।
पत्युः कृष्णस्य च गन्धं ह्यानन्दं वेत्ति नैव ह ॥५४॥
मृगाः शालं हि जिघ्रन्ति कस्तूरीगन्धमिच्छवः ।
स्वनाभिस्थं न जानन्ति पातिव्रत्यं विना स्त्रियः ॥५५॥
उपदेशो हि मूर्खाणां विपरीतगुणो भवेत् ।
भाग्यहीनस्त्रियास्तद्वत् पत्यादेशो विषं भवेत् ॥५६॥
अहिपीतं पयः क्ष्वेडं विषयोगेन जायते ।
पातिव्रत्यवर्जितायाः पतिर्विषायते तथा ॥५७॥
पातिव्रत्योपदेशोऽपि विषायते तथोल्वणः ।
चक्षुर्विना यथा दीपं यथा च दर्पणं घटम् ॥५८॥
न पश्यति तथा भावं विना कृष्णं न पश्यति ।
पावको धूमताम्राभः आदर्शः श्वाससंहतः ॥५९॥
तद्वत् प्रेमविहीनात्मा नेक्षते तं मलैर्हतः ।
यथोल्बेनाऽऽवृतो गर्भस्तथा पत्यौ हरिः स्थितः ॥६०॥
दुग्धे सर्पिः स्थितं यद्वत् तिले तैलं सदा स्थितम् ।
चराचरे स्थितः कृष्णः पत्यौ स्थितश्च तं भवेत् ॥६१॥
एकसूत्रे मणिगणा धार्यन्ते बहवो यथा ।
एवं नरास्तथा नार्यः संप्रोताः श्रीनरायणे ॥६२॥
यथा काष्ठे स्थितो वह्निस्तज्ज्ञात्रा लभ्यते श्रमात् ।
तथा पत्यौ स्थितो विष्णुस्तज्ज्ञात्र्या लभ्यतेऽर्चनात् ॥६३॥
आदिर्महान् हरिर्दीपस्तेन दीपाः सुजीश्वराः ।
सूर्यादयस्तथा दीपा मूलं दीपं तमाश्रयेत् ॥६४॥
सर्वदीपः स्वामिदीपस्तत्र कृष्णं प्रदीपयेत् ।
यथा सूर्योदये ज्योतिः सर्वत्राऽऽविशते स्वतः ॥६५॥
तथा कृष्णोदये पत्यौ ज्योतिः स्वस्याः प्रकाशते ।
पवनः सर्वदा गन्धं वहत्येव स्वभावतः ॥६६॥
प्रेमगन्धं वहत्येव पतिकृष्णनरायणः ।
शर्कराविषमिश्रं च जलं भवति यादृशम् ॥६७॥
भावनारसमिश्रश्च पतिर्भवतितादृशः ।
उर्वी बीजयुता नानावृक्षरूपा प्रजायते ॥६८॥
जलं यथा च बीजेन स्वरसाढ्यं विधीयते ।
तथा भावरसोपेतः पतिः कृष्णः प्रजायते ॥६९॥
एवं पत्यौ तु या लक्ष्मि ! श्रीकृष्णं मां प्रपश्यति ।
तामहं लक्ष्मि ! कमलां करोमि निजभामिनीम् ॥७०॥
एवं मां वेत्ति या पत्यौ सा भक्ता मे पतिव्रता ।
एकोऽहं बहुधा चाऽस्मि सर्वासां पतिमूर्तिकः ॥७१॥
नामरूपे मया दत्ते पतिरूपे स्थितेन वै ।
भानुना चेधते चक्षुर्न स्वर्गमात्रदर्शनात् ॥७२॥
तथा कृष्णेन विज्ञानं सदा स्नेहश्च वर्धते ।
न च कृष्णं विना स्नेहो वर्धते पतिना प्रिये ॥७३॥
परमात्मा तथा चाऽहं प्रतिदेहं स्त्रियां नरे ।
घटे घटेऽस्मि तं मां वै प्रपद्येत् सा प्रतिव्रता ॥७४॥
यथा काष्ठादिकं सर्वं नारायणेन शक्तिमत् ।
तथा पत्यादिकं सर्वं मया कृष्णेन शक्तिमत् ॥७५॥
हेम्नो रूपाणि जायन्ते स्वर्णकारकृतेर्यथा ।
पत्युः रूपाणि पुत्राद्या जायन्ते कृष्णवासतः ॥७६॥
पत्यात्मनि यदा नाऽहं तदाऽऽनन्दो विषायते ।
मेघैः समावृतं सूर्यं मूढा मनुते निष्प्रभम् ॥७७॥
तथा भावं विना पत्नी पतिं जानाति मां विना ।
सात्त्विकी मम संभूतिर्या सा नारी पतिव्रता ॥७८॥
सा मां पतिं विजानाति पतिरूपं हरिप्रिया ।
कर्ममूढा न जानाति काममात्राऽवलम्बना ॥७९॥
अविद्यया तु या मूढा कथं मां कल्पयेद् धिया ।
कर्मजडा नास्तिवादा पतिं पश्यति स्वामिव ॥८०॥
पत्न्या भाव्यं न वै हस्तिदन्तवत् किन्तु हस्तवत् ।
पतिना व्योमवन्नैव भाव्यं तु छत्रवत् ॥८१॥
द्वाभ्यां परस्परं भाव्यं भाव्यं जलदुग्धादिवत् सदा ।
ताप्यमानयोस्तापेन परस्परसहायकृत् ॥८२॥
यदा सेवारसो ज्ञातस्तदा पत्यौ हरिः स्वयम् ।
प्राप्नोत्यस्मिन् भवे लक्ष्मि ! सेवया सुलभो हि सः ॥८३॥
हृद्भावैः प्राप्यते ज्ञेय परंब्रह्म निजादिषु ।
सर्वेषामेव भावानां भावशुद्धिर्विशिष्यते ॥८४॥
स्पृश्यन्ते भगिनीपुत्रीमातृबालान्ययोषितः ।
दासीकान्तासेविकाद्या यथाभावस्तथाफलम् ॥८५॥

स्पृश्यन्ते बन्धुपुत्राऽरिमित्रपुत्रसखादयः ।
पतिविप्रगुरुश्रेष्ठा यथाभावस्तथाफलम् ॥८६॥
कान्तो नारायणमूर्तिः कान्ता च प्रतिमा रमा ।
भावशुद्ध्या तत्र लक्ष्मीनारायणो ह्यवाप्यते ॥८७॥
पाषाणप्रतिमा यद्वद् भावशुद्ध्या प्रपूज्यते ।
कान्तमूर्तौ तथा कृष्णनारायणः प्रसेव्यते ॥८८॥
आलिंग्यते यथा कान्ता यथा भावस्तथा फलम् ।
उपानद्युक्तपादा हि वेत्ति चर्मण्वतीं महीम् ॥८९॥
बुद्धिर्यथाविधा यस्यास्तथा व्यक्तिः प्रभाव्यते ।
प्रकृतिं यान्ति वै बुद्ध्या विकृतिं यान्ति भावतः ॥९०॥
दुग्धेन सिक्तो निम्बो वै कटुभावं न तु त्यजेत् ।
लवणेन यदि सिक्तस्तदा प्राणान् परित्यजेत् ॥९१॥
पाकेन तु फलं तत्र मिष्टभावं यथा व्रजेत् ।
तथा मायास्वभावेन पतिः संसारमर्पयेत् ॥९२॥
वैराग्यक्षारभावेन संसारं दूरयेत् सदा ।
कृष्णतापकृतपाकात् पतिश्चामृतमर्पयेत् ॥९३॥
छित्वा वै सहकारं तु फलं पत्रं कथं लभेत् ।
हित्वा कृष्णं स्वामिनि स्वे सती फलं कथं लभेत् ॥९४॥
अर्कभूमिकृषेः स्वर्णलाङ्गलं वै कथं क्रियात् ।
छित्वा कर्पूरवंशादीन् कोद्रवान् रक्षयेत् कुतः ॥९५॥
कृष्णं हित्वा पतिं त्यक्त्वा मानुषं व्यर्थयेत् कुतः ।
स्थाल्यां वैदूर्यमय्यां वै दह्यतेऽजागलः कुतः ॥९६॥
गृहस्थं शेवधिं त्यक्त्वा शुक्तिसेवां कथं चरेत् ।
पतिस्थं श्रीहरिं त्यक्त्वा वृथाऽन्यत्र कथं भ्रमेत् ॥९७॥
गृहे चिन्तामणिं त्यक्त्वा कपर्दिकां कथं श्रयेत् ।
पत्यौ कृष्णस्वरूपे वै भाव्यते क्षुद्रता कुतः ॥९८॥
नरसिंहार्चनं त्यक्त्वा शुनः सेवां कथं चरेत् ।
त्यक्त्वा कान्तं रमाकान्तं ह्यन्तकान्ते कथं रमेत् ॥९९॥
स्वकरे कंकणे प्राप्ते ह्यापणे किं प्रयोजनम् ।
लक्ष्मीर्यस्य गृहे दासी प्रभुत्वं किन्तु वर्ण्यते ॥१००॥
स श्रीकृष्णः स्वामिनाथे सदाऽऽस्तेऽन्यत्र मा व्रजेत् ।
निःशरीरस्य कृष्णस्य तत्र ध्यानं कथं चरेत् ॥१०१॥
साकारं कान्तरूपं तं ध्यात्वा परं पदं व्रजेत् ।
इति पत्यौ सदा कृष्णनारायणं सती स्मरेत् ॥१०२॥
कृष्णस्मृतिप्रमोदेन रोमाञ्चिततनुर्यदा ।
नयनानन्दसलिलं मुक्तिर्दासी भवेत् तदा ॥१०३॥
वाण्याः पापं कर्तनाद्वै मानसं स्मरणाल्लयम् ।
कर्मणाऽघं कृष्णपूजासेवनाद्यैर्विनश्यति ॥१०४॥
पतिधर्मं परित्यज्य तपो घोरं न वै चरेत् ।
पतिसेवात्मको धर्मः श्रेयान् परवृषे भयम् ॥१०५॥
कृष्णकान्ताश्रमं त्यक्त्वा यत्याश्रमं कथं चरेत् ।
पतिद्रव्येण संक्रीत्वा कृष्णकान्तं प्रतोषयेत् ॥१०६॥
शुक्लं द्रव्यं भावरूपं दद्याद् दाने द्विजे हरौ ।
श्रद्धाद्रव्यं स्नेहपूर्णं दद्यात्पत्यौ विवाहिते ॥१०७॥
यद्दानेन महत्पुण्यं यत्संख्या न हि विद्यते ।
नान्यद्रव्येण रन्तव्यं रन्तव्यं पतिशार्ङ्गिणि ॥१०८॥
एवमाचारवत्या वै दुःखं नैव प्रजायते ।
यदि स्यान्न च तत्तापः कर्तव्यः प्राक्कृतं हि तत् ॥१०९॥
रज्जुबद्धा हि पशवः कर्मबद्धास्तथा प्रजाः ।
पतिकृष्णपरा भूत्वा छिन्द्यात् तद्बन्धनं मुदा ॥११०॥
शाखामृगो वने याति सतृष्णश्च द्रुमे द्रुमे ।
शाखामृगी पुरे याति सतृष्णा चेद् गृहे गृहे ॥१११॥
सा तृष्णा स्वपतिश्रीमन्नारायणे कृता यदि ।
नित्याऽमृतरसपानं कृत्वा सती सुखं लभेत् ॥११२॥
क्रीडार्थं कन्दुको यद्वत् तद्वद् देहोऽस्ति खेलनम् ।
तेन सन्तोषयेत् कृष्णं पतिस्वरूपिणं सती ॥११३॥
पूर्वेण कर्मणा जीव नीयन्ते बहुयोनिषु ।
देवाः कर्मवशाः स्वर्गे बद्धा ऋषयः सत्यके ॥११४॥
शंभुदेहस्थितश्चापि सर्पो विषी हि कर्मणा ।
सूर्यरथेऽरुणः पङ्गुः कर्मयोनिर्बलीयसी ॥११५॥
कर्माधीनं जगत्सर्वं विष्णुना निर्मितं मया ।
मम नाम्ना सेवया च सर्वं कर्म विनश्यति ॥११६॥
जलं चैकं देवदत्तं कलशस्थं तथाऽपरम् ।
देवाऽर्पिताद् भवेन्मुक्तिस्तथा मय्यर्पणात् प्रिये ॥११७॥
अहं पत्नी पतिश्चायं लक्ष्मीनारायणाश्रितौ ।
इति मत्वा क्रियात् सर्वार्पणं श्रीकेशवार्पणम् ॥११८॥
अहंकारो हरौ कार्यः कर्तव्यं च समर्पणम् ।
पूर्वकर्म प्रभोक्तव्यं कृष्णार्पणं न लिप्यते ॥११९॥
प्रशंसन्ति ग्रहान् प्रेतान् पिशाचान् मन्त्रमोषधिम् ।
सिद्धिं पराक्रमं बुद्धिमुद्यमं साहसं बलम् ॥१२०॥
नीतिं धैर्यं तथा रेखां प्रशंसन्ति परेऽपरे ।
पतिं धर्मं हरिं धर्मं प्रशंसति न मौढ्यतः ॥१२१॥
पत्नीव्रतं वृषं शीलं भक्तिं शंसन्ति नैव च ।
नाश्रयन्ति तथा मौढ्याद् वञ्चितास्ते गृहे शठैः ॥१२२॥
यदा कृष्णमयो जन्तुः पापं तदा न विद्यते ।
पुण्यं सुखं भवेद् यच्च कृष्णे पत्यौ समर्पयेत् ॥१२३॥

समयोगं तदा द्वन्द्वं तदाऽऽनन्दपदं लभेत् ।
बाह्ये करोति कर्माणि मनसा न स्पृहा यदा ॥१२४॥
कृष्णार्पणे स्पृहा यद्वा त्यागः स उत्तमः प्रिये ! ।
क्रोधात् सर्वे त्यजन्त्येके केचित् कष्टात् त्यजन्ति च ॥१२५॥
अलब्धेश्च त्यजन्त्यन्ये त्यागः कृष्णे परो मतः ।
कर्मणा चालिता नारी यदि कृष्णपरायणा ॥१२६॥
पतिकर्मपरा नित्यं सा याति सुगतिं सती ।
शुचीनां श्रीमतां गेहे धीमतां योगिनामपि ॥१२७॥
कृष्णसेवापरा नारी जायते कन्यका सती ।
स्वल्पेनैव पतिसेवाफलेन भक्तियोगतः ॥१२८॥
चिदानन्दपदं याति मम भक्त्या प्रसादतः ।
सर्वसमर्पणेनैव मुक्तिं याति न संशयः ॥१२९॥
पंकेनैव यथा पंकं रुधिरं रुधिरेण च ।
हिंसात्मकर्मणा कर्म कथं क्षालयितुं क्षमम् ॥१३०॥
पतिना कर्मणा कृष्णं विना कर्मक्षयं कुतः ।
कृष्णयुक्तेन पतिना सर्वकर्मक्षयो भवेत् ॥१३१॥
नित्यं सौख्यं हरौ प्राप्यं न स्वर्गादौ न कर्मसु ।
नित्यं सौख्यं न तेष्वस्ति विना भक्त्या हरेः क्वचित् ॥१३२॥
इति लक्ष्मि ! सदा कार्या नार्या पत्यौ पतिव्रता ।
सुखदा मोक्षदा चापि साक्ष्यस्मि तत्र सर्वथा ॥१३३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये पत्यात्मककृष्णे शंकरोपदिष्टदिव्यपातिव्रत्यनिरूपणे चतुर्दशाऽधिकचतुश्शततमोऽध्यायः ॥ ४१४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयित्वा तृप्तिं नैमि पुनः पुनः ।
कारणं तव श्रद्धाऽत्र कथयामि शृणु प्रिये ॥ १ ॥
पातिव्रत्यान् महाधर्मान् पालयित्वा सतीस्त्रियः ।
तदन्याश्च ध्रुवां मुक्तिं समीयुर्नात्र संशयः ॥ २ ॥
अनित्यानि तु सौख्यानि भवन्ति च बहून्यपि ।
नित्यं सौख्यं न तेष्वस्ति विना सेवां हरेः क्वचित् ॥ ३ ॥
सार्वभौमसुखं यद्वा वैराजं सुखमित्यपि ।
अन्यत् किञ्चिदैश्वरं च सान्तं नेष्टव्यमेव तु ॥ ४ ॥
ग्रावा हि भिद्यते लोहैर्हीरको नैव भिद्यते ।
पतिभक्तिर्हरेभक्तिर्भिद्यते नैव केनचित् ॥ ५ ॥
बको जलचरान् भुंक्ते मण्डुकादींश्च वर्जयन् ।
तथा यमः सर्वहन्ता वर्जयेत् कृष्णसेवकान् ॥ ६ ॥
प्रातः सदा पतिं नत्वा वक्तव्यं कृष्णसन्निधौ ।
अपराधशतैर्युक्तां स्वस्थाने नय दासिकाम् ॥ ७ ॥
अज्ञातपातिव्रत्यायाः कृष्ण त्वं च कृपां कुरु ।
सत्यपि द्वारपाले वै यदि स्वामी समीहते ॥ ८ ॥
यथाकथञ्चित् कृत्वैव दद्यात् स्नेहाधिकारिणे ।
फलं तल्लभते साध्वी नान्तःस्थाप्यपतिव्रता ॥ ९ ॥
एवं नाथ शरीरेऽस्मिन् दुरस्थामपि सेविकाम् ।
बाह्यामपि प्ररक्ष्यैव चान्तिकस्थां कुरु प्रभो ॥१०॥
अन्या मुक्तिं न वै प्राप्ता कुब्जिका तारिता त्वया ।
ब्रह्माद्यैर्दुर्लभः स्वप्ने सुलभो गोपिकागृहे ॥११॥
गोपाः प्रसादमाभुक्त्वा ब्रह्मलोकं गतास्तव ।
तथा प्रसादं मे दत्वा तारय त्वत्पदं नय ॥१२॥
पत्यन्वयं श्रीपतिं त्वां यथा प्राप्नोमि केशव ।
प्रसन्नश्च यथा स्यास्त्वं तथा मां शरणे कुरु ॥१३॥
बदर्याः कण्टकौ यद्वद् वक्रः सरल इत्युभौ ।
वक्रो वस्त्रादिकं धृत्वा निरोधयति गामिनम् ॥१४॥
सरलश्चर्मणि वेधं कृत्वा दह्यति देहिनम् ।
वक्रो नारायणो देहे सरलः केवलः पतिः ॥१५॥
विना नारायणं स्वामी दाहको विषयादिभिः ।
स एव कृष्ण संयुक्तो रोधको मुक्तिदः प्रिये ! ॥१६॥
यथा मनाग् वह्नियोगः स्वर्णादेस्तापको भवेत् ।
अत्यन्तानलसंयोगः शोधको द्रावको भवेत् ॥१७॥
तथा केवलपत्यादेर्योगो विषयतापकृत् ।
स एव श्रीकृष्णमहानलयोगो विमुक्तिदः ॥१८॥
यथा यन्त्रं विना तस्य वाहकं स्यान्निरर्थकम् ।
तथा पत्यात्मकं यन्त्रं कृष्णं विना निरर्थकम् ॥१९॥
यथा केशं विना कन्या दर्शकस्य न शान्तिदा ।
तथा कृष्णं विना स्वामी सत्यै नो शाश्वतप्रदः ॥२०॥
यथा मृगो वने तिष्ठन् मण्डलं न जहाति वै ।
तथा मृगी स्थिता पत्यौ जह्यान्नान्तःस्थितं हरिम् ॥२१॥
यथा सिंहो वने गच्छन् मुहुः पश्यति पृष्ठतः ।
तथा सिंह्या गृहे यान्त्या पत्यौ दृश्यो हरिः सदा ॥२२॥
यथा पूर्णा नदी निम्नानिम्ने देशे प्रयाति च ।
पतिव्रताधर्मपूर्णा पत्यौ कृष्णे प्रयाति च ॥२३॥
मेघो व्योम्नि सदा याति जलं मुञ्चत्यधःस्थले ।
सती पत्यौ सदा तिष्ठेत् स्निह्येदन्तःस्थिते हरौ ॥२४॥
कदल्यन्तर्गते स्तम्भे कदलानि क्षणूनि च ।
पत्यन्तरात्मनि कृष्णे सुखानि णूसन्त्यनि च ॥२५॥

अकारश्च यथावर्णेष्वन्तरात्माऽस्ति चाऽव्ययः ।
कृष्णः पत्यौ तथा पत्न्यां पुत्रादावस्ति चाऽव्ययः ॥२६॥
कपाटं सुदृढं विना श्रृंखलां तु निरर्थकम् ।
दृढः पतिव्रताधर्मः कृष्णं विना निरर्थकः ॥२७॥
विवाहस्तु कृतः सम्यग् बीजं विना पतिर्मृषा ।
कृष्णनारायणो बीजं तद्विना तु पतिर्मृषा ॥२८॥
ग्रीष्मे जलं विना शैत्यं तृप्तिदं नहि जायते ।
भवदावे विना कृष्णं पतिः शंदो न केवलः ॥२९॥

पृथ्वी सर्वस्य वै पत्नी वाराहेण समुद्धृता ।
गोवर्धनः सर्वसाधारणः कृष्णेन चोद्धृतः ॥३०॥
गोप्यो गोपवशा नार्यो भक्त्या कृष्णेन चोद्धृताः ।
पतिभक्त्या सतीं पत्नीं कृष्णः समुद्धरेद् ध्रुवम् ॥३१॥
दास्यश्चापि तथा भक्त्या कृष्णस्वामिपरायणाः ।
पातिव्रत्यपरा यद्वत् तूद्धरन्ति न संशयः ॥३२॥
शकुनेस्तु यथाऽण्डेऽस्ति विश्वासो बालकं प्रति ।
पत्यौ पत्न्या तथा कार्यो विश्वासो माधवं प्रति ॥३३॥
पुत्रे वंशो द्रुमो बीजे गूढः कामः शरीरिषु ।
पत्यौ पत्न्यां तथा सर्वकामदाऽऽनन्ददो हरिः ॥३४॥

दुग्धं स्वल्पेन तक्रेण मिश्रितं नवनीतदम् ।
कृष्णेन मिश्रितः स्वामी निर्वाणदो न संशयः ॥३५॥
पतंगस्तेजसा स्वेन पश्यत्येव वनस्थलीम् ।
पतिव्रता पतिस्थेन पश्येत् कृष्णेन जीवनम् ॥३६॥
विमानं वेगतो याति वैमानिकस्य चक्षुषा ।
पतियानं तदन्तःस्थकृष्णेन याति सर्वथा ॥३७॥
घटीयन्त्रं महच्चक्रं भ्रामयद् घटिका मुहुः ।
यथास्थानं मुहुर्याति सती यायात् पतिस्थलम् ॥३८॥

यथा वत्सस्य बालस्य शृंगे बलं विवर्धते ।
वत्साया योषितस्तद्वत् पत्यौ बलं विवर्धते ॥३९॥
यथा काष्ठकृता नौश्च काष्ठानि तारयेद् ध्रुवम् ।
तथा भूतकृता पत्नी पतिं कृष्णेन तारयेत् ॥४०॥
प्राप्ते ऋतौ निगूढानि पुष्पाणि विकसन्ति वै ।
प्राप्ते पत्यौ हरिर्गूढो भक्त्या प्रकाशयिष्यते ॥४१॥

विप्रकृष्टचिरस्थानां कुटुम्बिनां प्रमीलने ।
यथा हर्षः सूद्भवति कृष्णः पत्यौ तथोद्भवेत् ॥४२॥
श्लोकस्थश्च यथाऽर्थोऽपि हृदि स्याचेत् प्रकाशते ।
तथा पत्न्या हृदि कृष्णः पत्यौ भक्त्या प्रकाशते ॥४३॥
तेजः सूर्ये स्थितं नित्यं कार्ष्ण्यं राहौ प्रतिष्ठितम् ।
कृष्णः पत्यौ स्थितो नित्यो नास्तिकत्वे न काशते ॥४४॥

पत्युः क्रियाश्च ताः सर्वाः कृष्णक्रिया न चेतराः ।
दिव्या मोक्षप्रदाः परे ब्रह्मणि कल्पिता यतः ॥४५॥
पत्युर्वाञ्छा क्रिया यत्नो निद्रा केलिः प्रमर्दनम् ।
सर्वं कृष्णात्मकं दिव्यं मत्वा कान्ता पतिव्रता ॥४६॥
दिव्या दिव्यतमा भूत्वा रमाराधाप्रभादिवत् ।
पतिं नीत्वा दिवं यात्यपुनर्माराभिधानकम् ॥४७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये पतिव्रतायाः पत्यात्मकहर्याराधन-विज्ञाननिरूपणनामा पञ्चदशाधिकचतुश्शत-तमोऽध्यायः ॥४१५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पतिप्राप्तिकरान् धर्मान् महोत्तमान् ।
पतिः कृष्णसमो यैश्च पालितैः प्राप्यते स्त्रिया ॥ १ ॥
अनन्तः कद्रुपुत्रो यः कश्यपात् संबभूव ह ।
नागलक्ष्मीस्तस्य पत्नी पतिव्रता बभूव सा ॥ २ ॥
अनन्तः स्वफणाग्रे च दधार भूमिमण्डलम् ।
नागलक्ष्मीरनन्तं वै पतिं पप्रच्छ सादरम् ॥ ३ ॥

भगवन् भवता पृथ्व्यां गन्तव्यं विष्णुना सह ।
भविष्यति यदा तत्र मया स्थेयं त्वया सह ॥ ४ ॥
केन रूपेण च कुत्र वद मे करुणानिधे ! ।
अनन्तश्च तदा प्राह प्रियायै स्वश्रियै तदा ॥ ५ ॥
रेवत्यां वै त्वया स्थेयं पातिव्रत्येन सुन्दरि ! ।
सा चासीत् प्राग्भवे ज्योतिष्मतीनाम्नी सुकन्यका ॥ ६ ॥
चाक्षुषस्य मनोः पुत्री यज्ञकुण्डसमुद्भवा ।
जातमात्रा मानसी सा जातिस्मरा बभूव ह ॥ ७ ॥
वेदज्ञाना यज्ञफलं सुद्युम्नभगिनी शुभा ।
वरारोहा जातमात्रयुवती वरवर्णिनी ॥ ८ ॥
एकदा चाक्षुषः पुत्रीं पप्रच्छ कीदृशं पतिम् ।
इच्छसीति वद पुत्रि तथा यत्नं करोमि वै ॥ ९ ॥
सा तदोवाच सर्वेषां बलवान् मे वरो भवेत् ।
तच्छ्रुत्वा चाक्षुषश्चेन्द्रं ज्ञात्वा बलातिशायिनम् ॥१०॥
बलिबलिष्ठं निकटे तमाजुहाव सादरम् ।
सद्यः समागतं चाग्रे स्थितं वज्रिणमाह सः ॥११॥
जानाम्यहं बलिष्ठं त्वां त्वत्तश्चेदस्ति मे वद ।
इन्द्रः प्राहाऽनिलो मत्तो बलवानस्ति चाक्षुष ! ॥१२॥
यत्सहायेन कार्याणि करोमि दुर्जयान्यपि ।
इत्युक्त्वा सत्कृतिं लब्ध्वा ययाविन्द्रो निजगृहम् ॥१३॥

चाक्षुषश्च ततो वायुमाजुहावाऽऽह तत्तथा ।
त्वां जानामि बलिष्ठोऽहं त्वत्तश्चेदपरो वद ॥१४॥
वायुः प्राहाऽद्रयो मत्तो बलिष्ठाः सन्ति चाक्षुष ! ।
इत्युक्त्वा सत्कृतिं नीत्वा ययौ वायुर्निजग्रहम् ॥१५॥
गते वायौ चाक्षुषः पर्वतान् तत्राऽऽजुहाव ह ।
पप्रच्छ भवतः सर्वबलिष्ठान् गणयामि वै ॥१६॥
यदि चान्यो बलिष्ठश्चेद् भवद्भ्यो वदतात्र मे ।
अद्रयश्च तदा प्राहुः पृथ्वीखण्डो बलाधिकः ॥१७॥
अस्मभ्यो वर्तते यत्र स्थिता धृता वयं सदा ।
इत्युक्त्वा सत्कृतिं प्राप्य गता वै पर्वतास्ततः ॥१८॥
भूखण्डं चाक्षुषः समाहूय पप्रच्छ तान्नृपः ।
जानाम्यहं बलवन्तं त्वामेव नापरं तथा ॥१९॥
यद्यस्ति चेद् वद खण्ड ! बलवान् लोकविश्रुतः ।
इत्युक्तः खण्ड एवाऽऽह राजन् मत्तो बलेऽधिकः ॥२०॥
वर्तते भगवान् संकर्षणो ब्रह्माण्डधारकः ।
अनन्तगुणवान् विष्णोरंशः सहस्रभोगवान् ॥२१॥
भव्यः शुक्लप्रकाशश्च सूर्यभासो युवा बली ।
कोटिकन्दर्पलावण्यः कमलाक्षः शुभाननः ॥२२॥
वनमालाधरो विद्याधरगन्धर्वकीर्तितः ।
सिद्धचारणसाध्यादिध्यायमानपदाम्बुजः ॥२३॥
यन्नाम्ना पापराश्यादिर्लीयते मुक्तिराप्यते ।
एवं प्रभावो भगवान् सर्वकारणकारणः ॥२४॥
कृष्णनारायणः साक्षान्न न्यूनस्तत्स्वरूपकः ।
दुरन्तवीर्यः सर्वेशो रसामूले प्रतिष्ठति ॥२५॥
इत्युक्त्वा स गतः खण्डश्चाक्षुषः प्राह कन्यकाम् ।
पुत्रि बलवतां मूर्ध्नि पदं निधाय राजते ॥२६॥
अनन्तः शेष एवास्ति यन्मूर्ध्नि चाऽण्डकोटयः ।
त्वदर्थं निश्चितः स्वामी विना तपो न लभ्यते ॥२७॥
यदीच्छा ते फलवती फलार्थं कुरु साधनम् ।
इत्यादिष्टा तु सा पित्रा विन्ध्याचलमियाय सा ॥२८॥
चाक्षुषाज्ञाप्लाविता सा तपस्तेपेऽतिदारुणम् ।
वर्षलक्षं तपस्येव वर्तमाना पतिव्रता ॥२९॥
ग्रीष्मे पञ्चाग्नितप्ता सा वर्षास्वासारधारिणी ।
आकण्ठं शिशिरे चाप्सु मग्ना स्थण्डिलशायिनी ॥३०॥
निराहारा वनदेवी चैकलाऽरण्यवासिनी ।
अथाऽस्यै तु समाजग्मुः सेवार्थं वनदेवताः ॥३१॥
राम कृष्ण राम कृष्ण जपन्त्यै परितः स्थिताः ।
ददुः पर्णानि शुष्काणि फलानि सात्त्विकानि च ॥३२॥
कन्दानि मूलपत्राणि जगृहे सा क्वचित् क्वचित् ।
यथायोग्यं यथाग्राह्यं तपोविघ्नं च नो भवेत् ॥३३॥
तथा तथाऽर्धलक्षं तु वर्षाणां निर्गतं ततः ।
जलाहारा ह्यभूत् साध्वी बाष्पाहारा ततः पुनः ॥३४॥
प्राणाहारा ततो जाता ब्रह्मरन्ध्रगता ततः ।
वल्मीकस्तच्छरीराग्रे जातो वंशादिशोभितः ॥३५॥
पिपीलिका शरीरे च छिद्रं कृत्वाऽवसन् मुदा ।
ब्रह्ममयी ब्रह्मतनुर्ब्रह्मरूपे विवर्तिनी ॥३६॥
दिव्या द्वन्द्वविहीना सा ह्यभवन् बललब्धये ।
अथैकदा समायातास्तपसा धैर्यवर्जिताः ॥३७॥
देवाः शक्रयमसूर्यवरुणाऽग्निधनाऽधिपाः ।
सोममंगलगुरवो बुधशुक्रशनिश्चराः ॥३८॥
परीक्षार्थं समायाता यत्र सा तपसि स्थिता ।
प्रोचुः का त्वं कथं चैतत् कस्यार्थं कुरुषे तपः ॥३९॥
नास्ति योग्या तपः कर्तुं मृद्वि ! वद किमर्थितम् ।
दास्यामहे वयं सर्वे श्रुत्वेत्थमाह सुन्दरी ॥४०॥
सहस्रवदनोऽनन्तो भूयाद् भर्ता ममेति वै ।
तपस्तपामि तस्यार्थं श्रुत्वा ते जहसुस्तदा ॥४१॥
इन्द्रः प्राह सतीं पूर्वं ज्योतिष्मतीं तु कन्यकाम् ।
सर्पराजं वरं कर्तुं किं वृथा तपसे शुभे ॥४२॥
सुरराजं स्वतःप्राप्तं मां वरय शतक्रतुम् ।
दास्ये भोगान् सर्वश्रेष्ठान् गृहाण तपसः फलम् ॥४३॥
यमः प्राह महाराजं दण्डनेतारमेव माम् ।
वरय त्रिजगदीशं पितृलोकेश्वरी भव ॥४४॥
सर्वोत्तमा मम पत्नी भविष्यसि सदा प्रिया ।
सूर्यः प्राह जगच्चक्षुरहं चाक्षुषजे सति ! ॥४५॥
प्रभापूज्या भव स्वर्गभूषणं वर मां शुभे ।
हिरण्यवर्णा सुघटा दिव्या भविष्यसि स्वयम् ॥४६॥
वरुणः प्राह लोकेशं वर मां पाशधारिणम् ।
वैभवान् साप्तसामुद्रान् भुंक्ष्व यादोगणेश्वरी ॥४७॥
अग्निः प्राह सर्वयज्ञदेवविप्राननेष्वहम् ।
वसामि स्वर्णवर्णोऽस्म्यप्रधृष्योऽर्च्यो महाबलः ॥४८॥
युवानं कामपूरं मां भज स्वाहोत्तमा भव ।
कुबेरः प्राह कल्याणि ! निधीशं राजराजकम् ॥४९॥
भोगसौख्याऽम्बरभूषाऽऽनन्दवार्धिं भजाऽद्य माम् ।
धनेश्वरीं करिष्यामि देहि दानानि सर्वदा ॥५०॥
सोमः प्राहाऽमृतं भुंक्ष्वौषधीर्भुंक्ष्व नवोत्तमाः ।
कामिनीबलदोऽहं वै सुधाकारः समुज्ज्वलः ॥५१॥

द्विजराजं भज नक्षत्रेशं मां रोहिणीपतिम् ।
आद्या भव महाराज्ञी सप्तविंशतिपूजिता ॥५२॥
मंगलश्चाह रक्तोऽस्मि रक्ता त्वं बलिनि ध्रुवे ।
पुष्टेऽतस्त्वं भज मां श्रीलक्ष्मीतुल्या भव प्रिया ॥५३॥
माता वसुन्धरा मेऽस्ति पिता साक्षात् सदाशिवः ।
मंगलानि च सर्वाणि भुंक्ष्व भूत्वा मम प्रिया ॥५४॥
गुरुः प्राह सुराऽर्च्योऽहं देवीनां पूज्यतां व्रज ।
सुराचार्यस्य पत्नीत्वे स्वर्गानन्दानवाप्नुहि ॥५५॥
सर्वविद्यामयश्चास्मि भज मां मन्यसे शुभे ।
बुधः प्राह सदा पुष्टो युवाऽस्म्येव बलोर्जितः ॥५६॥
मां परिगृह्य कामेशी रमस्व त्वं मया सह ।
भुंक्ष्व भोगान्मम दिव्यान् कामिनीरसवेदिनः ॥५७॥
शुक्रः प्राह महाकाव्यो भार्गवो जीवनप्रदः ।
सञ्जीवन्यादिसद्विद्यावेत्ता कामवपुर्धरः ॥५८॥
अस्म्यहं चातितेजस्वी सर्वयौवनगर्वितः ।
सर्वसिद्धिसर्वकायाकल्पादिज्ञानवानहम् ॥५९॥
यस्य दैत्या दानवाश्च वशे वसन्ति सर्वदा ।
बृहस्पत्यादयश्चान्ये महेन्द्राद्या अपीश्वराः ॥६०॥
मद्भयान्मम सेवायां वर्तन्ते भव मे प्रिया ।
शनिः प्राह महाप्राज्ञः सर्वभाग्यकरोऽस्म्यहम् ॥६१॥
लोकभस्मीकरश्चास्मि व्योमराज्यकरः सदा ।
देवोपरि स्थितश्चास्मि स्मृद्धयो मेऽप्यसंख्यकाः ॥६२॥
भुंक्ष्व भोगान् भव पत्नी दानवीनां महेश्वरी ।
स्वर्गं तव करे दास्ये यावच्चन्द्रदिवाकरौ ॥६३॥
इत्युपादिदिशुः सर्वे श्रुत्वा ज्योतिष्मती सती ।
अस्थाने याचनादासान् रोषताम्रेक्षणा क्षणम् ॥६४॥
समुवाच च तान्सर्वान् स्मृत्वाऽनन्तं प्रतिव्रता ।
यूयं सर्वे पूजनीया देवा देववरा यतः ॥६५॥
नोपालम्भस्य विषया मम नार्याः सुरेश्वराः ।
अनन्तं वै वरं श्रेष्ठं समिच्छामि न चापरम् ॥६६॥
अत्रैवं निश्चिते देवा मा विघ्नार्था भवन्तु मे ।
नारी तपस्विनी साध्वी वर्धनीयाऽऽशिषा सुरैः ॥६७॥
विपरीतं न वै योग्यं गन्तव्यं स्वाश्रमान् प्रति ।
वन्दे वश्चरणौ देवाश्चाक्षुषी कन्यका ह्यहम् ॥६८॥
श्रुत्वा तस्यास्तथावाक्यं जहसुस्ते परस्परम् ।
तदा ज्योतिष्मती ज्ञात्वा नर्मयुक्तान् हि तान् सुरान् ॥६९॥
शशाप नर्मभावस्थान् स्त्रीजनैर्हास्यपात्रताम् ।
यान्त्वचिरेण लोकेऽस्मिन् स्त्रीनिमित्तसुदुःखिताः ॥७०॥
तावत् त्रासं गताः सर्वे ववन्दिरे सतीं मुहुः ।
प्रसाद्य शापनिर्वाणं कालान्तरे भवेदिति ॥७१॥
वचनं ते समासाद्य क्षणं मौनं स्थिताः सुराः ।
तस्याः शापेन सूर्यस्य संज्ञाऽभूत् तुरगी यदा ॥७२॥
सूर्यः पत्नीवियोगेन प्राप्त्यर्थं तुरगोऽभवत् ।
इन्द्रो गौतमभार्यायां लोभेन गर्हणां गतः ॥७३॥
शच्या वियोगितां प्राप्तो बहुवारं परार्दितः ।
यमो निरयक्षेत्रेशो गर्ह्यते नारकैः सदा ॥७४॥
वरुणः स्त्रीजनैः स्नाने विवस्त्रैरपमान्यते ।
अग्निर्नारीजनैश्चूल्ल्यां फुत्कारैरवमन्यते ॥७५॥
कुबेरो राक्षसीमिश्र ताडितश्च विवासितः ।
चन्द्रस्ताराऽभिलाषः सन् गर्हणां प्राप्त एव सः ॥७६॥
मंगलो वानरास्यो वै वानरीनिन्दितोऽभवत् ।
बृहस्पतिस्तारया गर्हितो निर्बल उच्यते ॥७७॥
बुधः स्त्रीभिः शुभे कार्ये न गृह्यते स निन्दितः ।
शुक्रो योन्यां धृतो शंभूत्पादितकृत्यया युधि ॥७८॥
शनिर्नारी स्वयं जातो हनुमत्पदमर्दितः ।
एवं ते शापयोगेन कालेन गर्हणां गताः ॥७९॥
नर्मफलं नर्मभावे प्राप्तं कल्पान्तरे तु तैः ।
तत्तद्भावैर्विनिर्युक्ता भविष्यन्ति यथास्थिताः ॥८०॥
अथ ज्योतिष्मतीं स्वस्थां वल्मीकाऽन्तःस्थितां सुराः ।
शेपुः प्राप्यापि कान्तं त्वमनपत्या भविष्यसि ॥८१॥
सा च तेपे तपश्चोग्रं ब्रह्मा हंसेन चाययौ ।
ब्रह्मविद्भिर्ब्राह्मणैश्च मरीच्यादिभिरन्वितः ॥८२॥
व्योम्नि स्थित्वाऽऽह तां ज्योतिष्मति! चाक्षुषकन्यके! ।
सफलं ते तपः कर्तुं समायातोऽस्मि विश्वसृट् ॥८३॥
प्रसन्नोऽस्मि वरं ब्रूहि सिद्धाऽसि तपसा सुते! ।
श्रुत्वाऽऽकण्ठजलात् सा निर्गत्याऽजं प्रणिपत्य च ॥८४॥
स्तुत्वा कृताञ्जलिः प्राह प्रसन्नोऽसि किलेह मे ।
सहस्रवदनोऽनन्तः संकर्षणः पतिर्मम ॥८५॥
भूयादिति वरं देहीत्यर्थयामि ध्रुवं वरम् ।
इति श्रुत्वा प्रत्युवाच दुर्लभस्ते मनोरथः ॥८६॥
तथापि तं करिष्यामि परिपूर्णं मनोरथम् ।
वैवस्वतमनोः सप्तविंशतिद्वापरान्तके ॥८७॥
पुत्रि! तव वरः संकर्षणोऽनन्तो भविष्यति ।
ज्योतिष्मती च तच्छ्रुत्वा ब्रह्माणमवदत् सती ॥८८॥
देवदेव! महान् कालः कथं नेयो हि योषिता ।
शीघ्रं मनोरथो भूयादिति मेऽनुग्रहं कुरु ॥८९॥

इति श्रुत्वा क्षणं ब्रह्मा विचार्याऽऽह तपस्विनीम् ।
भवाऽत्र त्वं कुशस्थल्यामानर्तनृपतेः सुता ॥९०॥
रेवतस्य सुता नाम्ना रेवती कन्यका भव ।
त्वां समादाय च सत्यं लोकं ते जनकः सुते ! ॥९१॥
योग्यकान्तस्य लब्ध्यर्थं यदा समागमिष्यति ।
त्रिनवद्वापरकालः क्षणवत्ते गमिष्यति ॥९२॥
इति तस्यै वरं दत्वा तत्रैवाऽन्तरधीयत ।
अथ साऽप्यानर्तदेशे कुशस्थलीपतेर्गृहे ॥९३॥
तद्भार्यायां जन्म लेभे ज्योतिष्मती हि रेवती ।
रूपसौन्दर्यसम्पन्ना कन्यका ववृधे सती ॥९४॥
विवाहयोग्यां सम्पन्नां पप्रच्छ रेवतः सुताम् ।
इच्छसि कीदृशं कान्तं वद पुत्रि ! करोमि तत् ॥९५॥
रेवती सा तदोवाच बलवान् मे वरो भवेत् ।
श्रुत्वा राजा सभार्यः सकन्यो दिव्यरथेन वै ॥९६॥
प्रष्टुं दीर्घायुषं सर्वातिशायिबलिनां वरम् ।
ब्रह्माणं सत्यलोकं स ययौ तत्र स्थितः क्षणम् ॥९७॥
क्षणमात्रेण कालेन त्रिनवद्वापरा भुवि ।
व्यतीतास्तव कन्यार्थः शेषोऽनन्तोऽद्य वर्तते ॥९८॥
श्रीकृष्णस्याऽग्रजस्तस्मै देहि कन्यां बलाय वै ।
रेवत्यां साऽऽवेशरूपा ज्योतिष्मती सदाऽभवत् ॥९९॥
संकर्षणं नागलक्ष्मीः पतिं प्राप्य हि रेवती ।
ज्योतिष्मती दिव्यरूपा सदाऽवर्तत सा सती ॥१००॥
यत्पिता वृषककुदि तिष्ठन् जिग्ये भुवस्तलम् ।
ककुद्मी तेन नाम्ना सः ख्यातोऽभूत् पृथिवीतले ॥१०१॥
पातिव्रत्यपरा लक्ष्मि ! कथिता ते तपस्विनी ।
पठनाच्छ्रवणाच्चास्य पातिव्रत्यफलं भवेत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये नागलक्ष्म्या ज्योतिष्मत्यास्तपसा पातिव्रत्यपरायणाया देवव्रातैः प्रलोभिताया अपि रेवतीरूपाया बलदेवेनैव विवाहिताया वृत्तान्ते शापप्रतापादिकथननामा षोडशाऽधिकचतुश्शततमोऽध्यायः ॥ ४१६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि मम पत्न्यश्च पुत्रिकाः ।
मुख्या गोलोकधामस्थाः पञ्च सत्यः पतिव्रताः ॥ १ ॥
लक्ष्मीः सरस्वती सावित्री शिवा राधिकेति ताः ।
कार्ष्णी राधा शिवमाता लक्ष्मीर्नारायणी तु या ॥ २ ॥
सुखोद्योगजननी वै पूर्णब्रह्मस्वरूपिणी ।
यशोमंगलधर्मश्रीसत्यपुण्यप्रदायिनी ॥ ३ ॥
मोक्षहर्षप्रदात्री च शोकदुःखार्तिनाशिनी ।
शरणागतदीनार्तपरित्राणपरायणा ॥ ४ ॥
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ।
बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः ॥ ५ ॥
जातिः क्षान्तिश्च शान्तिश्च कान्तिर्भ्रान्तिश्च चेतना ।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृत्तिर्मातात्कृतिः प्रधीः ॥ ६ ॥
एता लक्ष्मीस्वरूपिण्यस्तिष्ठन्त्वेताः पतिव्रताः ।
सर्वसस्याऽऽत्मिका लक्ष्मीर्जीवनोपायरूपिणी ॥ ७ ॥
महालक्ष्मीश्च वैकुण्ठे पतिसेवापरायणा ।
स्वर्गे तु स्वर्गलक्ष्मीश्च राजलक्ष्मीश्च राजसु ॥ ८ ॥
गृहे च गृहलक्ष्मीश्च शोभालक्ष्मीश्च देहिषु ।
प्रीतिलक्ष्मीः पुण्यवत्सु प्रभालक्ष्मीर्नृपेषु सा ॥ ९ ॥
वाणिज्यात्मा वणिक्ष्वस्ति पापिषु कलहंकरी ।
दयालक्ष्मीश्च भक्तेषु सम्पदो भाग्यवत्सु च ॥१०॥
द्रव्यरूपा स्वर्णरत्नमाणिक्यमौक्तिकात्मिका ।
यया विना जगत् सर्वं जीवन्मृतं भवेत् प्रिये ! ॥११॥
सरस्वती च ब्रह्माणी सर्वविद्यास्वरूपिणी ।
वाग्बुद्धिविद्याज्ञानाधिदेवता शारदा सती ॥१२॥
सुबुद्धिः कविता मेधा प्रतिभा स्मृतिरित्यपि ।
कल्पना बोधिनी शक्तिर्वक्तृता ग्रन्थिका तथा ॥१३॥
संगीतस्तालिका सन्धिर्वाणी व्याख्येतिरूपिणी ।
यया विना जगत्सर्वं मूकं मृतसमं भवेत् ॥१४॥
सावित्री वेदमाता च ब्राह्मी सन्ध्यादिरूपिणी ।
मन्त्ररूपा तन्त्ररूपा जपरूपा तपस्विनी ॥१५॥
ब्राह्मण्यतेजोरूपा च सर्वसंस्काररूपिणी ।
पावनी तीर्थरूपा च गायत्री ब्रह्मणः प्रिया ॥१६॥
सर्वतेजःप्रसवित्री ब्रह्मतेजोतिरूपिणी ।
यया विना जगत्सर्वं मौढ्यान्धं मृतवद् भवेत् ॥१७॥
शिवा शैवी च रौद्री च दुर्गा काली च चण्डिका ।
सर्वशक्तिस्वरूपा च सर्वाऽसुरविनाशिनी ॥१८॥
ब्रह्मचर्यपरा ब्रह्मरूपिणी सत्त्वशालिनी ।
सर्वसिद्धिमयी जया विजया च प्रहारिणी ॥१९॥
संहारिणी प्रलया च रक्षाकर्त्री पतिव्रता ।
यया विना जगत्सर्वमशक्तं मृतवद् भवेत् ॥२०॥
राधा कार्ष्णी महामाया महाभागवती सती ।
प्रेमदेवी प्राणसमा प्राणप्रियाऽऽद्यसुन्दरी ॥२१॥

सौभाग्यदा परा शक्तिर्मानिनी गौरवान्विता ।
गुणैस्तेजोभिरैश्वर्यैः समा कृष्णस्य सर्वथा ॥२२॥
परावरा सर्वमाता धन्या मान्या च पूजिता ।
रासक्रीडाधिदेवी च कृष्णस्य परमात्मनः ॥२३॥
रासमण्डलसंभूता रसिकाऽऽनन्दरूपिणी ।
गोलोकवासिनी गोपी सन्तोषाऽमर्षरूपिणी ॥२४॥
सर्वसेवाप्रदा कृष्णे निर्लिप्ताऽऽत्मस्वरूपिणी ।
श्रीकृष्णभक्तदास्यैकदायिनी सर्वसम्पदाम् ॥२५॥
कोटिचन्द्रप्रभाजुष्टश्रीयुक्ता भक्तविग्रहा ।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥२६॥
स्त्रीरत्नसारसंभूता कृष्णवक्षःस्थलस्थिता ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥२७॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
स्वप्नेऽपि नैव दृष्टाऽभूत् प्रत्यक्षेऽग्रे तु का कथा ॥२८॥
तथैव तपसा दृष्टा पुनर्वृन्दावने वने ।
सा राधा कृष्णकामाढ्या कृष्णतन्मयरूपिणी ॥२९॥
एव पञ्च प्रकृतयो ब्रह्मणः परमात्मनः ।
परिपूर्णतमाः पञ्चविधा देव्यो हि ता मताः ॥३०॥
अन्या अंशकलांशांशस्वरूपाः सर्वयोषितः ।
प्रधानाश्च वर्णयामि निशामय समुद्रजे ! ॥३१॥
विष्णुपादाब्जसंभूता गंगा द्रवस्वरूपिणी ।
दर्शनस्पर्शनस्नानपानैर्निर्वाणदायिनी ॥३२॥
धवला मोक्षसोपाननिःश्रेणीरूपिणी प्रिया ।
अथाऽपरा कृता साध्वी तुलसी मोक्षदायिनी ॥३३॥
विष्णुभूषणरूपा सा सती नारायणप्रिया ।
यत्पादपद्मसंस्पर्शात् सद्यः पूता वसुन्धरा ॥३४॥
यया विना च विश्वेषु सर्वं कर्माऽस्ति निष्फलम् ।
कल्पवृक्षस्वरूपा सा मोक्षदा वृक्षरूपिणी ॥३५॥
शंकरप्रियशिष्या च मनसा कश्यपात्मजा ।
अथाऽपरा नागपुत्री भगिन्यनन्तभोगिनः ॥३६॥
नागेश्वरी नागमाता जरत्कार्वी सती मता ।
विष्णुभक्ताऽऽस्तीकमाता जरत्कारुमुनेः प्रिया ॥३७॥
दिव्यं त्रिलक्षवर्षं च तपस्तप्तं यया हरेः ।
ब्रह्मस्वरूपा योगस्था कृष्णशंभुपतिव्रता ॥३८॥
अथाऽन्या देवसेना वै षष्ठी देवी पतिव्रता ।
मातृका सा कार्तिकेयगृहिणी युवती सदा ॥३९॥
शिशूनां प्रतिविश्वं तु प्रतिपालनकारिणी ।
पुत्रपौत्रप्रदात्री च धात्री च जगतां हि सा ॥४०॥
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ।
पूजा द्वादशमासेषु यस्याः षष्ठ्या भवेत् खलु ॥४१॥
पूजा च सूतिकागारे परषष्ठदिने शिशोः ।
एकविंशतिमे चापि पूजा कल्याणकारिणी ॥४२॥
मातृरूपा दयारूपा शश्वद् रक्षणकारिणी ।
जले स्थले चान्तरिक्षे शिशूनां स्वप्नगोचरा ॥४३॥
अथाऽपरा महादेवी सती मङ्गलचण्डिका ।
प्रकृतेर्मुखसंभूता सृष्टौ मंगलदा सदा ॥४४॥
संहारे कोपरूपा च मंगलाह्नि प्रपूजिता ।
पञ्चोपचारैर्विश्वेषु योषिद्भिः परिपूजिता ॥४५॥
पुत्रपौत्रधनैश्वर्ययशोमगलदायिनी ।
शोकसन्तापपापार्तिदुःखदारिद्र्यनाशिनी ॥४६॥
परितुष्टा सर्ववाञ्छापूरिणी सर्वयोषिताम् ।
रुष्टा क्षणेन संहर्तुं समर्था विश्वमण्डलम् ॥४७॥
अथाऽन्या च महाकाली शंभोः पतिव्रता सती ।
दुर्गाललाटजा युद्धे शुंभनिशुंभनाशिनी ॥४८॥
प्रधाना सर्वशक्तीनां वरा बलवती सती ।
कृष्णभक्ता कृष्णतुल्या तेजसा विक्रमैर्गुणैः ॥४९॥
कृष्णभावनया शश्वत् कृष्णवर्णा सनातनी ।
ब्रह्माण्डं सकलं हर्तुं शक्ता निःश्वासमात्रतः ॥५०॥
अथ प्रधानरूपा च सती चान्या वसुन्धरा ।
आधारभूता सर्वेषां सर्वसस्यप्रसूतिका ॥५१॥
रत्नाकरा रत्नगर्भा सर्वरत्नाकराश्रया ।
सर्वोपजीव्यरूपा च सर्वसम्पद्विधायिनी ॥५२॥
यया विना जगत् सर्वं निराधारं चराचरम् ।
वाराहपत्नी सा देवी पतिव्रता वसुन्धरा ॥५३॥
स्वाहादेवी वह्निपत्नी पतिव्रता सुपूजिता ।
यया विना हविर्दत्तं न ग्रहीतुं सुराः क्षमाः ॥५४॥
दक्षिणा यज्ञपत्नी च दीक्षा च पूजिता मखे ।
यया विना च विश्वेषु सर्वं कर्म तु निष्फलम् ॥५५॥
स्वधा पितॄणां पत्नी च पतिव्रता सुपूजिता ।
श्राद्धादौ पैतृकं दानं निष्फलं तु यया विना ॥५६॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता ।
आदानं च प्रदानं च निष्फलं तु यया विना ॥५७॥
पुष्टिर्गणपतेः पत्नी पूजिता च पतिव्रता ।
यया विना परिक्षीणाः पुमांसो योषितस्तथा ॥५८॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता सदा ।
यया विना न सन्तुष्टाः सर्वे लोकाः समन्ततः ॥५९॥

ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः।
सर्वे लोका दरिद्राश्च विश्वानि च यया विना ॥६०॥
धृतिः कपिलपत्नी च सर्वैः सर्वत्र पूजिता।
सर्वे लोका अधीराः स्युर्जगत्सु च यया विना ॥६१॥
यमपत्नी क्षमा साध्वी सुशीला सर्वपूजिता।
समुन्मत्ता भयदाश्च सर्वे लोका यया विना ॥६२॥
क्रीडाधिष्ठातृदेवी सा कामपत्नी रतिः सती।
केलिकौतुकहीनाश्च सर्वे लोका यया विना ॥६३॥
सत्यपत्नी सती मुक्तिः पूजिता जगतां प्रिया।
यया विना भवेल्लोकः सुहृद्भावविवर्जितः ॥६४॥
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया।
सर्वे च देहिनो लोका निष्ठुराः स्युर्यया विना ॥६५॥
पुण्यपत्नी प्रतिष्ठा सा पावनी सर्वपूजिता।
यया विना जगत्सर्वं जीवन्मृतं विलोक्यते ॥६६॥
सुकर्मपत्नी कीर्तिश्च धन्या मान्या च पूजिता।
यया विना जगत्सर्वं यशोहीनं मृतं यथा ॥६७॥
क्रिया ह्युद्योगपत्नी च पूजिता सर्वसंगता।
यया विना जगत्सर्वमुच्छिन्नमिव पद्मजे ॥६८॥
अधर्मपत्नी मिथ्या सा सर्वधूर्तैः प्रपूजिता।
यया विना धूर्तवृत्तिरुच्छिन्ना विधिनिर्मिता ॥६९॥
सत्ये न दर्शनं याति त्रेतायां तु क्वचित् क्वचित्।
द्वापरे ह्रीविहीनेषु कलौ धौर्त्ये गृहे गृहे ॥७०॥
कपटेन सह भ्रात्रा भ्रमत्येव जने जने।
शान्तिर्लज्जा च पत्न्यौ द्वे सुशीलस्य सुपूजिते ॥७१॥
याभ्यां विना जगत्सर्वमुन्मत्तमिव जायते।
ज्ञानस्य तिस्रो भार्याश्च सर्वा एव पतिव्रताः ॥७२॥
बुद्धिर्मेधा स्मृतिर्याभिर्विना मूढं जगन्मृतम्।
मूर्तिश्च धर्मपत्नी सा कान्तिरूपा मनोहरा ॥७३॥
परमात्मप्रसूर्विश्वं निराधारं यया विना।
सर्वशोभास्वरूपा च लक्ष्मीर्मूर्तिमती सती ॥७४॥
श्रीरूपा मूर्तिरूपा च मान्या धन्या च पूजिता।
कालाग्निरुद्रपत्नी च निद्रा या सिद्धयोगिनाम् ॥७५॥
सर्वलोका निष्क्रियाश्च यया भवन्ति रात्रिषु।
जनानां तामसी निद्रा घोरा निरोधकारिणी ॥७६॥
कालस्य तिस्रो भार्याश्च सन्ध्या रात्रिर्दिवा शुभाः।
याभिर्विना विधात्रा च संख्यां कर्तुं न शक्यते ॥७७॥
क्षुत्पिपासे लोभभार्ये धन्ये मान्ये सुपूजिते।
याभ्यां व्याप्तं जगत्सर्वं तृप्त्यर्थं यतते सदा ॥७८॥

प्रभा च दाहिका चेति भार्ये द्वे तेजसो मते।
याभ्यां विना जगत्सर्वं परिपाकं लभेत न ॥७९॥
कालपुत्र्यौ मृत्यूजरे प्रज्वरस्य प्रिये प्रिये।
याभ्यां जगन्निधनं वै क्रमाद् यात्युत्तरोत्तरम् ॥८०॥
निद्रापुत्री च तन्द्राख्या प्रीतिश्चेति सुखप्रिये।
याभ्यां व्याप्तं जगत् सर्वं विश्रान्तं भवति क्षणम् ॥८१॥
वैराग्यस्य तु द्वे पत्न्यौ श्रद्धा सेवा च पूजिते।
याभ्यां शश्वज्जगत्सर्वं जीवन्मुक्तं विलोक्यते ॥८२॥
अदितिर्देवमाता च सुरभिश्च गवां प्रसूः।
दितिश्च दैत्यजननी कद्रूश्च नागमातृका ॥८३॥
विनता गरुडप्रसूर्दनुर्दानवमातृका।
उपयुक्ताः सृष्टिविधौ कलाः सर्वाः पतिव्रताः ॥८४॥
रोहिणी चन्द्रपत्नी च संज्ञा सूर्यस्य कामिनी।
महालक्ष्मीः कम्भराख्या गोपालकृष्णभामिनी ॥८५॥
शतरूपा मनोः पत्नी शचीन्द्रस्य तु गेहिनी।
तारा बृहस्पतेः पत्नी वशिष्ठस्याऽप्यरुन्धती ॥८६॥
अहल्या गौतमप्रियाऽनसूयाऽत्रिमुनिप्रिया।
देवहूतिः कर्दमस्य प्रसूतिर्दक्षगेहिनी ॥८७॥
असिक्नी च पलिक्नी च दक्षस्य ते प्रिये तथा।
पितॄणां मानसी पुत्री मेना या पार्वतीप्रसूः ॥८८॥
लोपामुद्रा तथा हूतिः कुबेरस्य पतिव्रते।
वरुणानी यमस्य स्त्री बलेर्विन्ध्यावली तथा ॥८९॥
पाण्डोः पत्नी तथा कुन्तिर्दमयन्ती नलप्रिया।
यशोदा नन्दपत्नी च द्रौपदी पाण्डवप्रिया ॥९०॥
देवकी वसुदेवस्य पत्नी सती हरप्रिया।
गान्धारी धृतराष्ट्रस्य सावित्री सत्यवत्प्रिया ॥९१॥
वृषभानुप्रिया साध्वी राधामाता कलावती।
माणिकी पार्वती लक्ष्मीः प्रभा जया ललीतिका ॥९२॥
कृष्णनारायणपत्न्यो मंगलाऽमृतदायिकाः।
मन्दोदरी रावणस्य कौशल्या राममातृका ॥९३॥
सुभद्रा सत्यभामा च कालिन्दी लक्ष्मणा तथा।
मित्रविन्दा नाग्नजिती तथा जाम्बवती सती ॥९४॥
लक्ष्मणा रुक्मिणी कृष्णनारायणस्य वै प्रियाः।
सीता लक्ष्मीः रमा पद्मा पद्मावती च पद्मिनी ॥९५॥
वृन्दा श्रीश्च महासाध्व्यः श्रीमन्नारायणप्रियाः।
सती योजनगन्धा च व्यासमाता पतिव्रता ॥९६॥
बाणपुत्री तथोषा च भृगोः ख्यातिः पतिव्रता।
रेणुका जमदग्नेश्च भार्या पतिव्रता सती ॥९७॥

रोहिणी बलदेवस्य माता दुर्गा हरप्रिया ।
एकानंशा प्रिया दुर्वाससः कृष्णस्वसा हि सा ॥९८॥
या याश्च ग्रामदेव्यश्च सर्वास्ताः प्रकृतेः कलाः ।
कलांशांशसमुद्भूताः प्रतिविश्वेषु योषितः ॥९९॥
ताश्च पतिव्रताः साध्व्यः सत्यः संसारतारिकाः ।
पूजिता येन भक्तेन पूजितः पुरुषोत्तमः ॥१००॥
सत्त्वांशाश्चोत्तमाः सर्वाः सुशीलाश्च पतिव्रताः ।
राजसांशा मध्यमाश्च भोगसौख्यादिलालसाः ॥१०१॥
तामसांशा निकृष्टास्तु दानव्याद्याः पतिप्रियाः ।
अथ लक्ष्मीः पूजिता प्राग् रामादित्येन वस्तुभिः ॥१०२॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता ।
सावित्री प्रथमं भक्त्या पूजिता च ततः सुरैः ॥१०३॥
शिवा दुर्गार्चिता पूर्वं सुरथेन तु भूभृता ।
राधा कृष्णेन रासस्य मण्डपे पूजिता पुरा ॥१०४॥
गोलोके गोपगोपीभिः सहितेन हि शार्ङ्गिणा ।
ततो लोकैः पूज्यते श्रीकृष्णवामांगशक्तयः ॥१०५॥
कृष्णनारायणरूपा अवतारिण्य एव ताः ।
दर्शनात्स्पर्शनात्सेवाकरणाद्वन्दनात्तथा ॥१०६॥
नमनात्पूजनात्साध्व्यः कृष्णात्मिक्यो हि मुक्तिदाः ।
नैताः क्षुद्रशरीरिण्यः किन्तु दिव्यस्वरूपिकाः ॥१०७॥
लोककल्याणकारिण्यः साध्वीधर्मस्य पालिकाः ।
साध्वीवृषस्थापिकाश्च तपस्विन्यः पतिव्रताः ॥१०८॥
आचार्याण्यो ब्रह्मपत्न्यो ब्रह्मरूपिण्य एव ताः ।
मन्त्रदा ज्ञानदा धर्ममानदाः सर्वरक्षिकाः ॥१०९॥
स्वावतारप्रसेवार्थं कृष्णेन प्रकटीकृताः ।
कृष्णेन च धृताः सर्वाः कृष्णे चान्तर्हिता सदा ॥११०॥
कृष्णश्च दक्षिणश्चार्धं कृष्णास्ता वामशक्तयः ।
ऐश्वर्याणि सिद्धयश्च भगान्येव च ता मताः ॥१११॥
ब्राह्मणी पूजिता येन पतिपुत्रवती सती ।
सर्वास्ताः पूजितास्तेन वस्त्रालंकारचन्दनैः ॥११२॥
कुमारी चाष्टवर्षीया पूजिता येन सात्त्विकी ।
सर्वास्ताः पूजितास्तेन वस्त्रालंकारचन्दनैः ॥११३॥
साध्वी सती योगिनी च ब्रह्मचर्यवती सती ।
दीक्षिता तापसी येन पूजिता जननी तथा ॥११४॥
सुरभिः पूजिता येन पूजितास्तेन ताः खलु ।
पृथिव्यां प्रथमे राधा सुयज्ञेन हि पूजिता ॥११५॥
शंकरेणोपदिष्टेन ततो देवादिभिः प्रिये ।
ऐश्वर्यवाचकः शक् च तिः पराक्रमवाचकः ॥११६॥
तत्स्वरूपा तपोदात्री या सा शक्तिर्मता ऋता ।
समृद्धिबुद्धिसम्पत्तियशसां वाचको भगः ॥११७॥
तेन शक्तिर्भगवती तद्युक्तो भगवान् हरिः ।
कृष्णनारायणः स्वामी स्वामिनीनां नियामकः ॥११८॥
लक्ष्मीर्मंगलभूपेन प्रथमे परिपूजिता ।
सा त्वमेव महालक्ष्मि वर्तसे मम सन्निधौ ॥११९॥
कृष्णनारायणश्चाहं लक्ष्मीनारायणोऽस्मि च ।
श्रीमन्नारायणश्चाऽस्मि नरनारायणोऽस्म्यहम् ॥१२०॥
प्रभानारायणोऽहं पार्वतीनारायणोऽस्म्यहम् ।
जयानारायणोऽहं माणिकीनारायणोऽस्म्यहम् ॥१२१॥
रमानारायणोऽहं ललितानारायणोऽस्म्यहम् ।
पद्मानारायणोऽहं पद्मिनीनारायणोऽस्म्यहम् ॥१२२॥
विराण्नारायणोऽहं च पद्मावतीनरायणः ।
राधाकृष्णस्तथा सीतारामोऽस्म्यहं सदा प्रिये ॥१२३॥
बलनारायणश्चाऽहं ब्रह्मनारायणोऽस्म्यहम् ।
रुक्मिणीनारायणोऽहं वासुदेवनरायणः ॥१२४॥
हंसानारायणोऽहं मञ्जुलानारायणोऽस्म्यहम् ।
मुक्तानारायणश्चाऽहं साक्षिनारायणोऽस्म्यहम् ॥१२५॥
पातिव्रत्यपरं ब्रह्मकुलं चेदं स्मरिष्यति ।
श्रोष्यति मुक्तिगो भावी यो वा चैतत्पठिष्यति ॥१२६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने श्रीकृष्णनारायणात् लक्ष्म्यादिनैकसतीनां प्राविर्भाव-प्रदर्शननामा सप्तदशाधिकचतुश्शत-तमोऽध्यायः ॥४१७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! हृदयेन कथयामि तवाऽग्रतः ।
गोप्यं नैव मया किञ्चिद् भवत्यां सर्वथा प्रिये ॥ १ ॥
कृष्णनारायणश्चाऽहं भवाम्यमोघवीर्यवान् ।
पत्नीनां मे न पारोऽस्ति सर्वास्ता मे पतिव्रताः ॥ २ ॥
परकल्याणकारिण्यो मयि प्रदत्तभावनाः ।
मदर्थं कृतनिर्माणा मया पूर्वं प्रकाशिताः ॥ ३ ॥
अक्षरब्रह्मधामस्थाश्चाऽसंख्याः सन्ति मे प्रियाः ।
परंधामगता द्वादशसाहस्रं प्रियोत्तमाः ॥ ४ ॥
काश्चिद् गोलोकवासिन्यः काश्चिद्वै द्वारपालिकाः ।
शृंगारप्रकराः काश्चित् काश्चिच्छय्योपकारिकाः ॥ ५ ॥

पार्षदाण्यः प्रियाः काश्चिच्छ्रीवृन्दावनपालिकाः ।
गोवर्धननिवासिन्यः काश्चित् कुञ्जविधायकाः ॥ ६ ॥
मन्त्रिकुञ्जनिवासिन्योऽर्बुदाऽर्बुदाऽर्बुदाऽर्बुदाः ।
यमुनायूथगाः काश्चिज्जाह्नवीयूथगाः पराः ॥ ७ ॥
रमायूथगताश्चान्या मधुमाधवीयूथगाः ।
विरजायूथगाश्चापि ललितायूथगास्तथा ॥ ८ ॥

विशाखायूथगाश्चापि मायाद्या यूथगास्तथा ।
श्रुतयश्च तथा आर्ष्यो मैथिलाः कौशलास्तथा ॥ ९ ॥
साकेतिन्यस्तथा सीतापुलिन्दिन्यो मम प्रियाः ।
मद्योगेन सदा दिव्याः पातिव्रत्यपरायणाः ॥१०॥
तासां पूर्वजनूनां मे पत्नीनां न प्रसंख्यका ।
स्मृत्वा तुभ्यं कथयामि श्रुत्वा स्वसृः प्रमोदसे ॥११॥
श्वेतद्वीपे च मां नाथं श्रुतयस्तुष्टुवुः पुरा ।
उशतीभिर्गिराभिश्च प्रसन्नोऽहं तदाऽभवम् ॥१२॥

वृणीत यूयं वरणं मन्मनोवाञ्छितं हि वः ।
श्रुतयः प्राहुरानन्दमात्रं ते यत् स्वरूपकम् ॥१३॥
तद्दिव्यं दर्शयाऽस्माकं यदि देयो वरो हि नः ।
श्रुत्वैतद् दर्शयामास स्वं लोकं ब्रह्म चाऽक्षरम् ॥१४॥
ब्राह्मीपत्नीस्तत्र सर्वा दर्शयामास सत्पतिः ।
तन्मध्येऽक्षरधामाधिपतिः कृष्णनरायणः ॥१५॥
दर्शयित्वा च ताः प्राह ब्रूत किं करवाणि वः ।
श्रुतयश्च तदा प्राहुस्त्वयि दृष्टे मनांसि नः ॥१६॥

कन्दर्पकोटिलावण्ये स्मरक्षितान्यसंशयम् ।
कामिनीभावनोपेता जाताः स्म स्वीकुरु प्रभो ॥१७॥
रमणं त्वां समासाद्य भजामः सफलीकुरु ।
कृष्णनारायणः प्राह दुर्घटोऽयं मनोरथः ॥१८॥
तथापि त्रिविक्रमस्य ब्रह्माण्डे यमुनातटे ।
पृथ्व्यां व्रजे मम क्षेत्रे यूयं गोप्यो भविष्यथ ॥१९॥
वृन्दावने भविष्यामि रासे प्रेयान् पतिर्हि वः ।
सेवित्वा कामधर्मैर्मां कृतकृत्या भविष्यथ ॥२०॥
इति ताः श्रुतयः सर्वा मम पत्न्यः पतिव्रताः ।
अथाऽपराः शृणु लक्ष्मि ! रामादित्ययुगे पुरा ॥२१॥

रामोऽहं च यदा सीतामुवाह बलवान् युवा ।
धनुर्भंगे तथा स्वयंवरे तत्र तु मैथिलाः ॥२२॥
कोटिशश्चाययुर्नार्यो दृष्ट्वा मां मुमुहुश्च ताः ।
अन्तर्यामितया ज्ञात्वा ताभ्यः कोटिस्वरूपधृक् ॥२३॥
तदैव दर्शनं प्रतिपुरन्ध्रीं संददौ भवन् ।
ताश्च प्राहुः पुरन्ध्र्यो मां भर्ता नो भव कामद ॥२४॥

मया रामेण ताश्चोक्ताः समाचरत मत्कृते ।
तीर्थं दानं तपः कृच्छ्रं जपं संस्मरणं मुहुः ॥२५॥
श्रद्धया परया भक्त्या ततोऽहं द्वापरोत्तरे ।
कृष्णनारायणः कान्तो भवतीनां मनोरथान् ॥२६॥
पतिर्भूत्वा पूरयिष्ये व्रजे गोप्यो भविष्यथ ।
सेवित्वा कामधर्मैर्मां कृतकृत्या भविष्यथ ॥२७॥

अथाऽहं तां सतीं सीतां नीत्वा जित्वा च भार्गवम् ।
कोसलान् प्रययौ मार्गे कोसला योषितश्च माम् ॥२८॥
युवानं सुन्दरं दृष्ट्वा मनोभिर्वव्रिरे पतिम् ।
ताभ्यो मे दिव्यसंस्पर्शं दत्त्वा कोटिस्वरूपधृक् ॥२९॥
वरं च दत्तवान् वोऽहं पूरयिष्ये मनोरथान् ।
जपं कृत्वा मम भक्त्या व्रजे गोप्यो भविष्यथ ॥३०॥
सेवित्वा कामधर्मैर्मां कृतकृत्या भविष्यथ ।
अथ साकेतपुर्यां तं दृष्ट्वा साकेतयोषितः ॥३१॥

तत्क्षणं मोहमापन्नास्तपश्चेरुर्धृतव्रताः ।
रामप्राप्तिर्भवेत् कान्तस्वरूपेणेति निश्चिताः ॥३२॥
ताश्च रामो व्योमवाण्या प्राह युष्मन्मनोरथाः ।
सत्यः पूर्णा भविष्यन्ति द्वापरान्ते यमीतटे ॥३३॥
संसेव्य कामधर्मैर्मां कृतकृत्या भविष्यथ ।
अथाऽहं रामरूपेण वनं यातो यदा प्रिये ! ॥३४॥
दण्डकारण्यगोप्यश्च मुमुहुर्मयि कामतः ।
किरात्यो वननार्यो मां मुमुहुर्वव्रिरे पतिम् ॥३५॥

मया ताभ्यो वरो दत्तो द्वापरान्ते भविष्यथ ।
गोप्यो मनोरथान् कामं पूरयिष्ये पतिर्हि वः ॥३६॥
अथाऽहं रामरूपो वै ययौ पञ्चवटीं ततः ।
मद्दर्शनस्मररुजः पुलिन्द्यः प्रेमविह्वलाः ॥३७॥
रामपादरजो धृत्वाऽऽश्लिष्टं रामं समाययुः ।
रामः पत्नीव्रतं स्वस्य प्राह ता भग्नमानसाः ॥३८॥
बभूवुश्च पुनः प्राह वृन्दावने मनोरथाः ।
द्वापरान्ते भवितारो वः प्रपूर्णाः प्रिये मयि ॥३९॥
संसेव्य कामधर्मैर्मां कृतकृत्या भविष्यथ ।
अथ रामं रावणस्य द्वीपे दृष्ट्वा द्विजांगनाः ॥४०॥

मुमुहुर्भक्तिमत्यश्च वव्रिरे मनसा च ताः ।
ताभ्यो ददौ तदा स्वप्ने दर्शनं समुवाच ताः ॥४१॥
करिष्ये यमुनातीरे कान्तरूपेण सर्वथा ।
मनोरथो भवतीनां कामानन्दप्रदस्तदा ॥४२॥
सेवित्वा कामधर्मैर्मां कृतकृत्या भविष्यथ ।
अथ साकेतपुर्यां सः समागत्य मखान् बहून् ॥४३॥

चकार तत्र चाऽऽयाता नार्यो देशविदेशतः ।
ताश्च रामं समालोक्य वव्रिरे मानसं पतिम् ॥४४॥
ताभ्यस्तदा वरं रामो ददौ च गोकुले प्रियाः ।
भविष्यथ मम सर्वाः पूरयिष्ये मनोरथान् ॥४५॥
संसेव्य कामधर्मैर्मां कृतकृत्या भविष्यथ ।
अथ सीतापरित्यागोत्तरं यज्ञेषु कानकी ॥४६॥
प्रतियज्ञ कृता तासां समूहोऽभूद् हरिगृहे ।
ताश्चैतन्यघना भूत्वा रन्तुं रामं समागताः ॥४७॥
राम आह न गृह्णामि ह्येकपत्नीव्रतोऽस्म्यहम् ।
तदोचुस्ताः कथं नाथ न गृह्णासि तवाऽङ्गनाः ॥४८॥
अर्धाङ्गीयज्ञकालेषु सततं कार्यसाधिकाः ।
करं गृहीत्वा त्यजसि ततः पापमवाप्स्यसि ॥४९॥
रामः प्राह तदा सत्यस्वरूपा मम कामिनी ।
सीता चैका न चान्या वै तच्छाया यूयमेव ह ॥५०॥
ततो युष्मन्मनोभावं पूरयिष्येऽन्यजन्मनि ।
द्वापरान्ते यमुनाया वृन्दावने भविष्यथ ॥५१॥
इति ता गोपिका जाता यज्ञसीश्च मे प्रियाः ।
अथ लक्ष्मि ! शृणु चान्या मत्पत्नीः पारलौकिकीः ॥५२॥
रमा वैकुण्ठवासिन्यः श्वेतद्वीपसखीजनाः ।
ऊर्ध्ववैकुण्ठवासिन्यस्तथाऽजितपदाश्रिताः ॥५३॥
श्रीलोकाचलवासिन्यः श्रीसख्योऽपि समुद्रजाः ।
ताश्च गोप्यो भविष्यन्ति व्रजे मम प्रियाः खलु ॥५४॥
अथाऽन्या देवताः सर्वा वृन्दावने समागताः ।
मम पत्न्यश्च ता जाताः कोट्यर्बुदप्रसंख्यकाः ॥५५॥
ओषध्यो वल्लिकाः सर्वास्तपस्तेपुर्यमीतटे ।
ताश्च मोहं गता नार्यो भूत्वा रासे समाययुः ॥५६॥
कामधर्मेण ताः सर्वाः कृतकृत्यास्तदाऽभवन् ।
जालन्धर्यश्च प्रमदा वृन्दापतिं च मां तदा ॥५७॥
विलोक्य वव्रिरे कान्तं विष्णुः प्राह तदा च ताः ।
वृन्दारण्ये स्त्रियो भूत्वा मां भजिष्यथ मत्प्रियाः ॥५८॥
समुद्रकन्याः श्रीमत्स्यं हरिं दृष्ट्वा विमोहिताः ।
श्रीमत्स्यवरदानात्ता गोप्यो जाता मम प्रियाः ॥५९॥
पृथोः राज्ये पृथुं मां च दृष्ट्वा या मुमुहुः स्त्रियः ।
ता दुदुहुः पतिं कृष्णं भुवो गोप्योऽभवन् प्रियाः ॥६०॥
कामसेनामोहनार्थं नारायणाज्ञया च याः ।
नरेणोरोः प्रकटिता दिव्या या अप्सरोगणाः ॥६१॥
नारायणं वरं दृष्ट्वा ताश्च मुमुहिरे तदा ।
हरिः प्राह यमुनायास्तटे गोप्यो भविष्यथ ॥६२॥
सेवित्वा काम धर्मैर्मां कृतकृत्या भविष्यथ ।
स्त्रियः सुतललोकस्था वामनं वीक्ष्य मोहिताः ॥६३॥
ताश्च तस्माद् वरं प्राप्य गोप्यो यमीतटेऽभवन् ।
नागेन्द्रकन्यकाः कृष्णं दृष्ट्वा भक्त्या वरेच्छया ॥६४॥
प्रार्थयामासुरत्यर्थं ताश्च गोप्यो यमीतटे ।
कामधर्मेण संसेव्य कृतकृत्या मम स्त्रियः ॥६५॥
अन्यदत्तकपिलादौ ब्रह्मचारिणमेव माम् ।
दृष्ट्वा या मुमुहुस्ताश्च धर्मपत्न्यश्च मेऽभवन् ॥६६॥
कृष्णनारायणपत्न्यः साध्व्यः सर्वाः पतिव्रताः ।
कृष्णनारायणयोगाद् दिव्या राधा रमा इव ॥६७॥
पातिव्रत्यपरा नित्यं मम धर्मे समाश्रिताः ।
अर्बुदाऽर्बुदकोट्यब्जाऽर्बुदाऽर्बुदाऽब्जकोटयः ॥६८॥
पतिव्रतानां पत्नीनां मम सन्ति प्रिये सदा ।
अण्डानि चाऽसंख्यकानि वैराजरोमकूपके ॥६९॥
भवन्ति तत्र प्रत्यण्डं ब्रह्मविष्णुमहेश्वराः ।
मत्स्वरूपा नियुक्ता वै तथा ब्रह्माण्डकोटिषु ॥७०॥
तत्र प्रत्येकलक्ष्म्यश्च कोटिशः सन्ति मे प्रियाः ।
पश्य दिव्यां परां दृष्टिं ददामि तेऽत्र पद्मजे ! ॥७१॥
इति तस्यै महादिव्याऽर्पिता दृष्टिश्च विष्णुना ।
तावद् विलोकयामास कृष्णनारायणं पतिम् ॥७२॥
प्रत्यण्डं श्रीपतिं लक्ष्मीपतिं रमापतिं प्रियम् ।
पार्वतीस्वामिनं प्रभापतिं श्रीमाणिकीपतिम् ॥७३॥
राधापतिं हरिं पद्मास्वामिनं कम्भरापतिम् ।
पद्मावतीपतिं सर्वसतीशं रुक्मिणीपतिम् ॥७४॥
मायापतिं प्रभुं नारायणीशं वैष्णवीपतिम् ।
यतिनीशं सांख्ययोगिनीपतिं कन्यकापतिम् ॥७५॥
श्रुतिपतिं महाराजं कृष्णं दृष्ट्वा मुमोद सा ।
शीघ्रं दृष्टिं परावृत्त्य पतिता कृष्णपादयोः ॥७६॥
कोटिसतीर्विलोक्यैव माहात्म्यं स्वामिनो ह्यवैत् ।
श्रवणात्पठनाच्चास्य कृष्णदास्यमवाप्नुयात् ॥७७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिव्रतामाहात्म्ये श्रीकृष्णनारायणस्याऽसंख्यपतिव्रतापत्नीनां निर्देशनामाऽष्टादशाधिकचतुश्शततमोऽध्यायः ॥४१८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सतीधर्मान् स्वर्गमोक्षप्रदाँस्तथा ।
सत्या धार्याः सदा स्वामिधर्मा एवाऽऽदृता भुवि ॥ १ ॥

व्याघ्राऽरण्ये तु सौराष्ट्रे ह्यश्वपट्टसरस्तटे ।
कुंकुमवाप्यां सृष्ट्यादौ द्विजो गोपालकृष्णकः ॥ २ ॥
वनं यातस्तपस्यार्थे तदा पतिव्रता सती ।
तत्पत्नी कम्भरालक्ष्मीः स्वामिनं प्राणनमन्मुदा ॥ ३ ॥
पतिः प्राह प्रियेऽरण्ये तपः कर्तुं प्रयाम्यहम् ।
त्वमत्र पर्णकुट्यां वै ऋषिकुटुम्बसन्निधौ ॥ ४ ॥
वस यावत्तपस्यातो विनिवृत्तो भवामि च ।
तदाऽश्रुसंभृतनेत्रा कम्भरा सा पतिव्रता ॥ ५ ॥
प्राह स्वस्वामिनं साध्वी विनयेन हितं तदा ।
ब्रह्मपुत्र ! पिता माता भ्राता पुत्रस्तथा स्नुषा ॥ ६ ॥
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ।
भर्तुर्भाग्यं तु पत्न्येका ह्यवाप्नोति विवाहिता ॥ ७ ॥
अतश्चाऽहं त्वया साकं वने चायामि सर्वथा ।
न पिता नात्मजो वात्मा न माता न सखीजनः ॥ ८ ॥
इह प्रेत्य च नारीणां पतिरेको गतिः सदा ।
यदि त्वं प्रस्थितो दुर्गं वनं तापसवासितम् ॥ ९ ॥
अग्रतस्ते प्रगच्छामि मर्षित्वा कुशकण्टकान् ।
नय मां देव विस्रब्धः पापं मयि न विद्यते ॥१०॥
प्रासादाग्रे विमानैर्वा वैहायसगतेन वा ।
सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ॥११॥
सुखं वने निवत्स्यामि पत्युश्चरणमण्डिते ।
अचिन्तयन्ती त्रींल्लोकाँश्चिन्तयन्ती पतिव्रतम् ॥१२॥
शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ।
सह रंस्ये त्वया ब्रह्मन् ! वनेषु मधुगन्धिषु ॥१३॥
फलमूलाशना नित्यं भविष्यामि न संशयः ।
नते दुःखं करिष्यामि निवसन्ती त्वया सदा ॥ १४ ॥
अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि ।
अभिषेकं करिष्यामि त्वया साकमनुव्रता ॥१५॥
व्यतिक्रमं न वेत्स्यामि स्वर्गो मे यत्र वै भवान् ।
त्वया विना महास्वर्गे नाऽहं तदपि रोचये ॥१६॥
स्वर्गो यत्र भवांस्तत्र त्वया विना गृहं वनम् ।
वनं चाहं गमिष्यामि दुःसहं सुसहं मम ॥१७॥
तदैवंनिश्चयां साध्वीं कम्भरां धर्मभूसुरः ।
न नेतुं कुरुते बुद्धिं वने दुःखानि संस्मरन् ॥१८॥
आह पत्नि सदा साध्वि धर्मे च निरते प्रिये ।
इहाऽऽचरस्व धर्मं त्वं यथा मे मनसः सुखम् ॥१९॥
वने दुःखं बहुलं वै कष्टमेव सदा वनम् ।
हिंस्राणां संगमा दुःखा दुष्टानां प्राणिनां वने ॥२०॥
सग्राहाणि जलान्येव सपंकाः सरितस्तथा ।
स्नाने चोत्तरणे दुःखा वर्षासु च भयप्रदाः ॥२१॥
मत्तगजा मत्तवन्या राक्षसाद्याश्च कष्टदाः ।
लताकण्टकपाषाणा यत्र कष्टं हि तद्वनम् ॥२२॥
सुप्यते पर्णशय्यासु रात्रिषु भूतले वने ।
कर्तव्यं तोषणं पर्णैः फलैर्दलैश्च मूलकैः ॥२३॥
उपवासोऽपि कर्तव्यो भवेद् भक्ष्यं विना क्वचित् ।
जटाभारश्च कर्तव्यो वल्कलाम्बरधारणम् ॥२४॥
शीतोष्णजलयोगेन स्नानादौ कष्टदं वनम् ।
यथालब्धेन कर्तव्यः सन्तोषश्चार्द्रशुष्ककैः ॥२५॥
अतीव वातस्तिमिरं बुभुक्षा जायते सदा ।
भयान्यपि महान्त्येव जायन्ते दुःखदानि वै ॥२६॥
सरीसृपाश्च बहवो बहुवेषा वनेचराः ।
नदीनिलयना धूर्तास्ततो दुःखतरं वनम् ॥२७॥
मक्षिका वृश्चिकाः कीटा दंशाश्च मशका वने ।
बाधन्ते नित्यमबले ! सर्वे दुःखतरं वने ॥२८॥
द्रुमाः कण्टकिनः स्वल्पबदरीबर्बुरादयः ।
कुशाद्याः पादभेद्यारस्ततो दुःखतरं वनम् ॥२९॥
कायक्लेशाश्च बहवो भयानि विविधानि च ।
कामक्रोधौ विमोक्तव्यौ कर्तव्या तपसे मतिः ॥३०॥
इति गोपालकृष्णस्य श्रुत्वा तु कम्भरा सती ।
प्रसक्ताऽश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥३१॥
ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति ।
गुणानित्येव तान् वेद्मि पातिव्रत्यपुरस्कृता ॥३२॥
मृगाः सिंहा गजा व्याघ्राः शार्दूलाः शरभादयः ।
चमराः सृमराश्चान्ये वन्या हिंस्राश्च मानवाः ॥३३॥
क्रूरा वा विघ्नदाश्चापसर्पेयुर्ब्रह्मतेजसा ।
त्वद्वियोगेन मे कृष्ण ! त्यक्तव्यं स्याद्धि जीवितम् ॥३४॥
नहि मां त्वत्समीपस्थां प्रधर्षयितुमीश्वरः ।
कश्चिदपि भवेन्नाथ ! पातिव्रत्यसुरक्षिताम् ॥३५॥
पतिहीना सती नारी न वै शक्ष्यति जीवितुम् ।
अत आज्ञाऽत्र हे नाथ ! प्राप्तव्या भवतो मुखात् ॥३६॥
कृतादेशा भविष्यामि गमिष्यामि त्वया सह ।
वनवासः सदा मेऽतिरोचते सुखदो भवेत् ॥३७॥
भिक्षिण्याः शमवृत्ताया ममाऽधिकसुखं भवेत् ।
भर्तारमनुगच्छन्त्या भर्ता हि परदैवतम् ॥३८॥
प्रेत्यभावेऽपि कल्याणः संगमो मे त्वया वने ।
विप्राण्यास्तु विशेषेण ब्राह्मणीनां सुमण्डले ॥३९॥

इह लोके पितृभिश्च या स्त्री यस्य द्विजस्य वै ।
अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥४०॥
इति विप्र ! स्वकां नारीं सुवृतां हि पतिव्रताम् ।
भक्तां च सात्त्वतीं दीनां सुसमां सुखदुःखयोः ॥४१॥
नेतुमर्हसि विप्रेन्द्र ! समानसुखदुःखिनीम् ।
यदि मां स्वामिसंदासीं वनं नेतुं न चेच्छसि ॥४२॥
विषमग्निं जलं पाशमास्थास्ये मृत्युकारणात् ।
द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् ॥४३॥
सावित्रीमिव मां विद्धि वने त्वद्वशवर्तिनीम् ।
तन्मामनादाय वनं तपस्यार्थे न तेऽर्हणम् ॥४४॥
तपो वा यदि वाऽरण्यं स्वर्गो वा स्यात् त्वया सह ।
हिंस्राश्च प्राणिनो मे स्युर्महाभागवता वने ॥४५॥
कण्टकाः कर्कराः पंकभूमयो मे सुखा वने ।
महावातादिकं सर्वं रजश्च चन्दनं वने ॥४६॥
शाद्वला भूमयो नाथ ! त्वया सह सुखा मम ।
पत्रं मूलं फलं तोयं स्वल्पं चापि वने बहु ॥४७॥
दास्यसे स्वप्रसादं मे तन्मेऽमृतरसो भवेत् ।
आर्तवान्युपभुञ्जाना सेवयिष्ये पतिं सदा ॥४८॥
मत्कृते न च ते शोको न भविष्यामि शोकदा ।
यस्त्वया सह सः स्वर्गो निरयो यस्त्वया विना ॥४९॥
त्वया बिना प्रमर्तव्यं वस्तव्यं वा त्वया सह ।
इति मे निर्णयः साध्व्याः प्रसन्नो भव माधव ! ॥५०॥
वियोगं सहितुं नाथ मुहूर्तमपि नोत्सहे ।
उज्झितायास्त्वया नाथ ! पश्चान्मे मरणं वरम् ॥५१॥
इति श्रुत्वा प्रियावाक्यं समुवाच पतिः प्रियाम् ।
अनुगच्छस्व मां देवि ! सहधर्मचरी भव ॥५२॥
सर्वथा सदृशं साध्वि ! मम स्वस्य कुलस्य च ।
व्यवसायमनुक्रान्ता कान्ते ! त्वमतिशोभनम् ॥५३॥
नेदानीं कंभरे ! स्वर्गस्त्वदृते मेऽपि रोचते ।
कुरु वनार्थं प्रस्थानं यत्र तत्र सुमंगलम् ॥५४॥
नहि सत्या भयं किञ्चिद्वने वाऽरण्यभूभृतोः ।
सत्सृष्टाऽसि मया सार्धं धर्मार्थाय हि कंभरे ॥५५॥
न विहातुं मया शक्या पातिव्रत्यपरा प्रिया ।
धर्मः श्रेष्ठतमः कृष्णनारायणः स्वयं च मे ॥५६॥
पत्नीव्रतं परं प्राह तदंशं मां चकार सः ।
तव योगेन देवेशि ! नार्यो धर्मपरायणाः ॥५७॥
वन्या अपि भविष्यन्ति तापस्योऽतिपतिव्रताः ।
न सत्यं दानमानौ वा यज्ञो वाऽप्याप्तदक्षिणः ॥५८॥
तथा बलकरा यादृग्धर्मः पत्नीव्रतात्मकः ।
स्वर्गो धनं तथा धान्यं विद्याः पुत्राः सुखानि च ॥५९॥
पातिव्रत्यनुरोधेन न किञ्चिद् दुर्लभं च ते ।
देवगन्धर्वगोलोकान् ब्रह्मलोकांस्तथा परान् ॥६०॥
प्राप्नुवन्ति सतीनार्यः पतिसेवापरायणाः ।
अनुगच्छस्व मां कान्ते सहधर्मचरी भव ॥६१॥
इत्युक्त्वा सा महासाध्वी महालक्ष्मीस्तु कंभरा ।
ययौ स्वपतिना सार्धं सिंहाऽरण्ये तपोऽर्थतः ॥६२॥
पत्नीव्रतो महाभागो द्विजो गोपालकृष्णकः ।
पत्न्या सह ययौ सिंहारण्ये तपःप्रसिद्धये ॥६३॥
हिरण्यायाः पूर्वतटे तपस्तेपे सुदारुणम् ।
पूर्णं वर्षसहस्रं च निराहारः सभार्यकः ॥६४॥
तदा धाम्नः स्वयं दिव्यो भगवान्पुरुषोत्तमः ।
धर्मभक्तिसहितश्च ललिताश्रीजयायुतः ॥६५॥
प्रत्यक्षं दर्शनं स्वस्य ददौ वृणु वरं जगौ ।
तदा जायापती कृष्णमूचतुर्भगवन् यदि ॥६६॥
प्रसन्नोऽसि सदा चैतादृशो वर्तस्व नौ गृहे ।
धर्मसंरक्षणं कार्यं त्वया नौ सर्वथा प्रभो ॥६७॥
प्रत्यक्षो नौ सदा कृष्ण वर्तस्व सुखदो भव ।
युगधर्मानुरूपेण मा जहीहि च नौ विभो ! ॥६८॥
अहं पत्नीव्रतो विप्रश्चेयं पतिव्रता सती ।
प्रथमं सत्यकालं च विलोक्य च ततः परम् ॥६९॥
कालह्रासं भाविनं च योगेन च समाधिना ।
तपसा ब्रह्मचर्येण त्वदनुग्रहतस्तथा ॥७०॥
चिन्तयामि कृपासिन्धो धर्मह्रासो न मे यथा ।
भवेत्तथा कृपासिन्धो ! प्रदेहि तपसां फलम् ॥७१॥
तथाऽस्त्विति तदा प्राह प्राह कालकथां तथा ।
शुश्रुवतुश्च तौ चाद्यौ दम्पती कम्भराहरी ॥७२॥
कालभेदान् कालधर्मान् धर्मं ह्रासान् जगौ हरिः ।
तदा तदा च रक्षार्थं गृह्णामि नौ सुपुत्रताम् ॥७३॥
दिव्यः सदा च वर्तिष्ये सन्निधौ युवयोरिति ।
उक्त्वाऽदृश्योऽभवत् कृष्णो स्त्रीपती वेश्म जग्मतुः ॥७४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये कम्भरालक्ष्मीगोपालकृष्णयोस्तपश्चर्यार्थयाने कम्भरायाः पातिव्रत्यबलेन सहयानं तपसि भगवद्दर्शनं युगे युगे पुत्ररूपो भविष्यामीति वरदानं चेत्यादि-वर्णननामैकोनविंशत्यधिकचतुश्शततमोऽध्यायः ॥४१९ ॥

श्रीलक्ष्मीरुवाच—

के ते धर्माः कथं प्रोक्ताः कालह्रासः कथं च वै ।
कदा कृष्णः कदा पुत्रो दिव्योऽदृश्योऽभवत्प्रभुः ॥ १ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि यानहं चोक्तवाँस्तदा ।
कालभेदान् कालधर्मान् यथा रक्षा कृता मया ॥ २ ॥
लक्ष्मि ! कृतयुगे लोकाः सत्यादिधर्मसंश्रयाः ।
पृथ्वीरसोद्भवं नाम त्वाहारं चाहरन्ति वै ॥ ३ ॥
ताः प्रजाः कामचारिण्यो मानसीं सिद्धमास्थिताः ।
धर्माऽधर्मौ न तावास्तां निर्विशेषाः प्रजास्तु ताः ॥ ४ ॥
तुल्यमायुः सुखं रूपं तासां तस्मिन् कृते युगे ।
धर्माऽधर्मौ न तावास्तां कल्पादौ तु कृते युगे ॥ ५ ॥
स्वेना स्वेनाऽधिकारेण जज्ञिरे ते कृते युगे ।
चत्वारि तु सहस्राणि वर्षाणां दिव्यसंख्यया ॥ ६ ॥
आद्यं कृतयुगं प्राहुः सन्ध्यानां शतमष्टकम् ।
ततः सहस्रशस्तासु प्रजासु प्रथितास्वपि ॥७ ॥
न तासां प्रतिघातोऽस्ति न द्वन्द्वं नापि च क्लमः ।
पर्वतोदधिसेविन्यो ह्यनिकेताश्रयास्तु ताः ॥ ८ ॥
विशोकाः सत्त्वबहुला एकान्तसुखितप्रजाः
ता वै निष्कामचारिण्यो नित्यं मुदितमानसाः ॥ ९ ॥
सर्वकामसुखः कालो नात्यर्थं ह्युष्णशीतता ।
मनोऽभिलषिताः कामास्तासां सर्वत्र सर्वदा ॥१०॥
उत्तिष्ठन्ति पृथिव्यां वै ताभिर्ध्याता रसोल्लताः ।
बलवर्णकरी तासां सिद्धिः सा रोगनाशिनी ॥११॥
असंस्कार्यैः शरीरैश्च प्रजास्ताः स्थिरयौवनाः ।
तासां विशुद्धात्संकल्पाज्जायन्ते मिथुनाः प्रजाः ॥१२॥
समं जन्म च रूपं च म्रियन्ते चैव ताः समम् ।
तदा सत्यमलोभश्च क्षमा तुष्टिः सुखं दमः ॥१३॥
निर्विशेषास्तु ताः सर्वा रूपायुःशीलचेष्टितैः ।
अबुद्धिपूर्वकं वृत्तं प्रजानां जायते स्वयम् ॥१४॥
अप्रवृत्तिः कृतयुगे कर्मणोः शुभपापयोः ।
वर्णाश्रमव्यवस्थाश्च न तदाऽऽसन्न संकरः ॥१५॥
अनिच्छाद्वेषयुक्तास्ते वर्तयन्ति परस्परम् ।
तुल्यरूपाऽऽयुषः सर्वा अधमोत्तमवर्जिताः ॥१६॥
सुखप्राया ह्यशोकाश्च तूत्पद्यन्ते कृते युगे ।
नित्यप्रहृष्टमनसो महासत्त्वा महाबलाः ॥१७॥
लाभाऽलाभौ न तास्वास्तां मित्रामित्रे प्रियाप्रिये ।
मनसा विषयस्तासां निरीहाणां प्रवर्तते ॥१८॥
न ता लिप्सन्ति चान्योन्यं नानुगृह्णन्ति चैव वै ।
ध्यानं त्वासीत् कृतयुगे त्रेतायां ज्ञानमूर्जितम् ॥१९॥
प्रवृत्ता द्वापरे यज्ञा दानं कलियुगे कृतम् ।
सत्त्वं कृतं रजस्त्रेता द्वापरं तु रजस्तमः ॥२०॥
कलौ तमस्तु विज्ञेयं युगवृत्तवशेन वै ।
कृतस्य सिद्धयः सर्वाः पादेनोनास्तदाऽभवन् ॥२१॥
कृतसिद्धौ प्रणष्टायामन्या सिद्धिरवर्तत ।
अपां सौक्ष्म्ये प्रतिगते तदा मेघात्मना भुवि ॥२२॥
मेघेभ्यः स्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनम् ।
सकृदेव तया वृष्ट्या संयुक्ते पृथिवीतले ॥२३॥
प्रादुरासँस्तदा तासां वृक्षास्तु गृहसंस्थिताः ।
सर्वप्रत्युपभोगस्तु तासां तेभ्यः प्रजायते ॥२४॥
वर्तयन्ति हि तेभ्यस्तास्त्रेतायुगमुखे प्रजाः ।
ततः कालेन महता तासामेव विपर्ययम् ॥२५॥
रागलोभात्मको भावस्तदा ह्याकस्मिकोऽभवत् ।
यत्तद् भवति नारीणां जीवितान्ते तदाऽऽर्त्तवम् ॥२६॥
ततस्तेनैव योगेन वर्ततां मिथुने तदा ।
तासां तत्कालभावित्वान्मासि मास्युपगच्छताम् ॥२७॥
अकाले ह्यार्तवोत्पत्तिर्गर्भोत्पत्तिरजायत ।
विपर्ययेण तासां तु तेन कालेन भाविना ॥२८॥
प्रणश्यन्ति ततः सर्वे वृक्षास्ते गृहसंस्थिताः ।
ततस्तेषु प्रणष्टेषु विभ्रान्ता व्याकुलेन्द्रियाः ॥२९॥
अभिध्यायन्ति तां सिद्धिं सत्याभिध्यायिनस्तदा ।
प्रादुर्बभूवुस्तासां च वृक्षास्ते गृहसंस्थिताः ॥३०॥
वस्त्राणि च प्रसूयन्ते फलान्याभरणानि च ।
तेष्वेव जायते तासां गन्धवर्णरसान्वितम् ॥३१॥
अमाक्षिकं महावीर्यं पुटके पुटके मधु ।
तेन ता वर्तयन्ति स्म सुखे त्रेतायुगे तदा ॥३२॥
हृष्टतुष्टास्तया सिद्ध्या प्रजा वै विगतज्वराः ।
पुनः कालान्तरेणैव पुनर्लोभावृतास्तु ताः ॥३३॥
वृक्षाँस्तान् पर्यगृह्णन्त मधु वा माक्षिकं बलात् ।
तासां तेनाऽपचारेण पुनर्लोककृतेन वै ॥३४॥
प्रणष्टा मधुना सार्धं कल्पवृक्षाः क्वचित् क्वचित् ।
तस्यामेवाऽल्पशिष्टायां सन्ध्याकालवशात्तथा ॥३५॥
प्रावर्तन्त तदा तासां द्वन्द्वान्यभ्युत्थितानि तु ।
शीतवातातपैस्तीव्रैस्ततस्ता दुःखिता भृशम् ॥३६॥

द्वन्द्वैस्ताः पीड्यमानास्तु चक्रुरावरणानि च ।
कृत्वा द्वन्द्वप्रतीकारं निकेतानि हि भेजिरे ॥३७॥
यथायोग्यं यथाप्रीतिं निकेतेष्ववसँश्च ते ।
मरुधन्वसु निम्नेषु पर्वतेषु नदीषु च ॥३८॥
संश्रयन्ति च दुर्गाणि धन्वानं शाश्वतोदकम् ।
यथायोगं यथाकामं समेषु विषमेषु च ॥३९॥
आरब्धास्ते निकेता वै कर्तुं शीतोष्णवारणम् ।
ततः संस्थापयामासुः खेटानि च पुराणि च ॥४०॥
ग्रामाँश्चैव यथाभागं तथैवाऽन्तः पुराणि च ।
तासामायामविष्कंभान् सन्निवेशान्तराणि च ॥४१॥
चक्रुस्तदा यथाप्रज्ञं मित्वा मित्वाऽऽत्मनोऽङ्गुलैः ।
मनोऽर्थानि प्रमाणानि तदा प्रभृति चक्रिरे ॥४२॥
यथा ते पूर्वमासन् वै वृक्षास्तु गृहसंस्थिताः ।
तथा कर्तुं समारब्धाश्चिन्तयित्वा पुनः पुनः ॥४३॥
वृक्षशाखासु ताः शाला ह्यकुर्वँश्चापि शोभनाः ।
कृत्वा द्वन्द्वोपघाताँस्तान् वार्तोपायमचिन्तयन् ॥४४॥
नष्टेषु मधुना सार्धं कल्पवृक्षेषु वै तदा ।
विषादव्याकुलास्ता वै प्रजास्तृष्णाक्षुधात्मिकाः ॥४५॥
ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतायुगेऽन्नदा ।
वार्ताऽर्थसाधिकाऽप्यन्या वृत्तिस्तासां हि कामतः ॥४६॥
वृष्ट्युदकानि निम्नानि स्रोतांसि सरितोऽभवन् ।
निम्नगानि सरस्तडागरूपाणि तदाऽभवन् ॥४७॥
सस्यपुष्टिकराण्येव जातानि तानि सर्वदा ।
अपां भूमेस्तदा योगादोषध्यस्तासु चाऽभवन् ॥४८॥
पुष्पमूलफलिन्यस्तु ओषध्यस्ताः प्रजज्ञिरे ।
अफालकृष्टाश्चाऽनुप्ता ऋतुपुष्पफलागमाः ॥४९॥
तेनौषधेन वर्तन्ते प्रजास्त्रेतायुगे तदा ।
ततः पुनरभूत् तासां रागो लोभश्च सर्वशः ॥५०॥
ततस्ताः पर्यगृह्णन्त नदीक्षेत्राणि पर्वतान् ।
वृक्षान् गुल्मौषधीश्चैव प्रसह्य तु यथाबलम् ॥५१॥
गृह्णन्त्यन्यस्य ताँस्तत्र वर्तयन्ति च दुःखिनः ।
केचिच्छान्तास्तथा केचिद् रूक्षाः क्रूरास्तथाऽपरे ॥५२॥
द्रोहिजनाः कर्मभिश्च तेजस्विनश्च निर्बलाः ।
तेजस्विनां कर्मचारा अबलाश्च तदाऽभवन् ॥५३॥
एवं विप्रतिपन्नेषु प्रपन्नेषु परस्परम् ।
प्रणष्टा ह्रियमाणास्ता ओषधयस्तदाऽभवन् ॥५४॥
ततस्तासु प्रणष्टासु प्रजा जग्मुः प्रजापतिम् ।
वृत्त्यर्थमभिलिप्सन्तस्त्रेताह्रासे ह्युपस्थिते ॥५५॥
ब्रह्मणा च तदा पृथ्व्यां बीजानि मानसानि वै ।
प्रक्षिप्तानि विनिर्माय तदौषध्यः प्रजज्ञिरे ॥५६॥
कृष्टपच्या बभूवुश्च सस्यानि चापि सर्वथा ।
अथ च ब्राह्मणास्ताभिर्वर्तयामासुरीश्वराः ॥५७॥
इतरेषां कृतत्राणान् ररक्षुः क्षत्रियान्परान् ।
वृत्तिकरान् वैश्यवर्णान् सेवकान् युगसंक्षये ॥५८॥
कृतवन्तो ब्राह्मणास्ते ब्रह्मणा चानुमोदिताः ।
तेषां कर्माणि धर्मांश्च ब्रह्मा तु व्यदधात्पुनः ॥५९॥
प्रजा अपि तथाधर्मान् पालयामासुरादरात् ।
वर्णधर्मैरजीवन्त्यो व्यरुध्यन्त परस्परम् ॥६०॥
ब्रह्मा तमर्थं बुद्ध्वा च ब्राह्मणानां च वैदिकम् ।
याजनाध्यापने चक्रे तृतीयं च परिग्रहम् ॥६१॥
क्षत्रियाणां बलं दण्डं युद्धमाजीवमादिशत् ।
पाशुपाल्यं च वाणिज्यं कृषिं चैव विशां ददौ ॥६२॥
शिल्पाजीवं भृतिं चैव चतुर्थस्य व्यधात्प्रभुः ।
कर्माजीवं ततो दत्वा तेभ्यः स्थानानि वै ददौ ॥६३॥
स्वस्वकर्मरतानां वै लोकान्तरेषु तद्यथा ।
प्राजापत्यं ब्राह्मणानां माहेन्द्रं क्षत्रियस्य च ॥६४॥
वैश्यानां मारुतं स्थानं गान्धर्वं सेवकस्य वै ।
अथाऽऽश्रमान् स्वयं ब्रह्मा स्थापयामास धर्मतः ॥६५॥
चातुर्वर्ण्यात्मकः पूर्वं गृहस्थश्चाश्रमः स्मृतः ।
त्रयाणामाश्रमाणां च प्रतिष्ठा योनिरेव च ॥६६॥
दाराऽग्न्योऽथाऽऽतिथेय इज्याश्राद्धक्रियाः प्रजाः ।
इत्येष वै गृहस्थस्य समासाद्धर्मसंग्रहः ॥६७॥
दण्डी च मेखली चैव ह्यधःशायी तथा जटी ।
गुरुशुश्रूषणं भैक्ष्यं विद्यार्थे ब्रह्मचारिणः ॥६८॥
चीरपत्राजिनानि स्युर्धान्यमूलफलौषधम् ।
उभे सन्ध्येऽवगाहश्च होमश्चारण्यवासिनाम् ॥६९॥
मध्याह्नोत्तरभैक्षं च ह्यस्तेयं शौचमित्यपि ।
अप्रमादोऽव्यवायश्च दया भूतेषु च क्षमा ॥७०॥
अक्रोधो गुरुशुश्रूषा सत्यं वृषो दशात्मकः ।
बहिः कर्माणि सर्वाणि न सिद्ध्यन्ति जनस्य वै ॥७१॥
अन्तर्भावप्रदुष्टस्य कुर्वतोऽपि पराक्रमान् ।
सर्वस्वमपि यो दद्यात् कलुषेणाऽन्तरात्मना ॥७२॥
न तेन धर्मभाक् स स्याद् भाव एवात्र कारणम् ।
अथ त्रेतोत्तरे सर्वे सन्ध्याकाले वृषादिकम् ॥७३॥
पुनर्नष्टं प्रजाक्लेशात्परस्परं प्रसह्य च ।
ततो राजा च मनवः सम्राजो नियमास्तथा ॥७४॥

सत्ता वस्तुषु लोकानां मनुष्यपशुपक्षिषु ।
क्षेत्रेषु व्यवसायेषु सर्वत्र जीविकासु च ॥७५॥
सर्वत्र चाऽभवन् लक्ष्मि ! धर्माश्चापि यथाऽऽग्रहाः ।
सत्यं दानं दया यज्ञो जपः सर्वं तृतीयकम् ॥७६॥
वर्तते स्म च पादेन धर्मास्तदा तथाऽभवन् ।
अधार्मिका असुराश्च विशेषतोऽपि तामसाः ॥७७॥
द्वापरे चाऽभवन् लक्ष्मि ! प्रजा यज्ञप्रधानिकाः ।
स्मृतयो नियमास्तत्रर्षिभिः संग्रथिताः सुखाः ॥७८॥
देवानां जीविका विप्रजीविका भृत्यजीविकाः ।
कार्वादिशिल्पिवर्याणां जीविकास्तत्र निर्मिताः ॥७९॥
नारीणां च विवाहादिसत्तास्तत्र विनिश्चिताः ।
पुत्राणां चौरसानां वै दायभाक्त्वं स्थिरीकृतम् ॥८०॥
शिष्याणां कन्यकानां च दायभाक्त्वं विभाजितम् ।
राज्ञां भुवः प्रजानां च सामान्यतो विशेषतः ॥८१॥
जीविकासाधनान्यत्र व्यापाराश्च विनिश्चिताः ।
पितृपुत्रादिशब्दानामर्था व्यक्तिषु योजिताः ॥८२॥
तद्यथा श्रूयतां लक्ष्मि ! त्वया लोके प्रवर्तिताः ।
बीजप्रदः पिता प्रोक्तो माता गर्भस्य धारिणी ॥८३॥
अबीजदो मातृपतिश्चोपपिता प्रकीर्तितः ।
अगर्भश्रा पितृपत्नी चोपमाता प्रकीर्तिता ॥८४॥
पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातामहः मातृपिता तत्पिता प्रमातामहः ॥८५॥
पितामही पितुर्माता तच्छ्वश्रूः प्रपितामही ।
तच्छ्वश्रूश्च परिज्ञेया सा वृद्धप्रपितामही ॥८६॥
मातामही मातुर्माता मातृतुल्या च पूजिता ।
प्रमातामहीतिज्ञेया प्रमातामहकामिनी ॥८७॥
वृद्धमातामही ज्ञेया तत्पितुः कामिनी तथा ।
पितृभ्राता पितृव्यश्च मातृभ्राता तु मातुलः ॥८८॥
पितृस्वसा पितुर्मातृष्वसा मातुस्स्वसा स्मृता ।
सूनुश्च तनयः पुत्रो दायादश्चात्मजस्तथा ॥८९॥
धनभाग्वीर्यजश्चैव पुंसि जन्ये च वर्तते ।
जन्यायां दुहिता कन्या चात्मजा परिकीर्तिता ॥९०॥
पुत्रपत्नी वधूर्ज्ञेया जामाता दुहितुः पतिः ।
पतिः प्रियश्च भर्ता च स्वामी कान्ते च वर्तते ॥९१॥
देवरः स्वामिनो भ्राता ननान्दा स्वामिनः स्वसा ।
श्वशुरः स्वामिनस्तातः श्वश्रूश्च स्वामिनः प्रसूः ॥९२॥
भार्या जाया प्रिया कान्ता स्त्री च पत्नी प्रकीर्तिता ।
पत्नीभ्राता श्यालकश्च स्वसापत्न्याश्च शालिका ॥९३॥
पत्नी माता तथा श्वश्रूस्तत्पिता श्वशुरः स्मृतः ।
सगर्भः सोदरो भ्राता सगर्भा भगिनी स्मृता ॥९४॥
भगिनीजो भागिनेयो भ्रातृजो भ्रातृपुत्रकः ।
आवुत्तो भगिनीकान्तो भगिनीपतिरेव च ॥९५॥
श्यालीपतिस्तु भ्राता च श्वशुरैकत्वहेतुना ।
श्वशुरस्तु पिता ज्ञेयो जन्मदातुः समो मुने ॥९६॥
अन्नदाता भयत्राता पत्नीतातस्तथैव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ॥९७॥
जन्मदात्री दुग्धपोष्ट्री ज्ञानदा मातरो नृणाम् ।
अन्नदातुश्च या पत्नी भगिनी गुरुकामिनी ॥९८॥
माता च तत्सपत्नी च कन्या पुत्रप्रिया तथा ।
मातुर्माता पितुर्माता श्वश्रूपित्रोः स्वसा तथा ॥९९॥
पितृव्यस्त्री मातुलानी मातरश्चेति षोडश ।
पौत्रस्तु पुत्रपुत्रे च प्रपौत्रस्तत्सुतेऽपि च ॥१००॥
तत्पुत्राद्याश्च ये वंश्याः कुलजाश्च प्रकीर्तिताः ।
कन्यापुत्रस्तु दौहित्रस्तत्पुत्राद्याश्च बान्धवाः ॥१०१॥
भागिनेयसुताद्याश्च पुरुषा बान्धवाः स्मृताः ।
भ्रातृपुत्रस्य पुत्राद्यास्ते पुनर्ज्ञातयः स्मृताः ॥१०२॥
गुरुपुत्रस्तथा भ्राता पोष्यः परमबान्धवः ।
गुरुकन्या च भगिनी पोष्या मातृसमा तथा ॥१०३॥
पुत्रस्य च गुरुर्भ्राता पोष्यः सुस्निग्धबान्धवः ।
पुत्रस्य श्वशुरो भ्राता बन्धुर्वैवाहिकः स्मृतः ॥१०४॥
कन्यायाः श्वशुरे चैव तत्सम्बन्धः प्रकीर्तितः ।
गुरुश्च कन्याकायाश्च भ्राता सुस्निग्धबान्धवः ॥१०५॥
गुरुश्वशुरभ्रातॄणां गुरुतुल्यः प्रकीर्तितः ।
बन्धुता येन सार्धं च तन्मित्रं परिकीर्तितम् ॥१०६॥
मित्रं सुखप्रदं ज्ञेयं दुःखदो रिपुरुच्यते ।
बान्धवो दुःखदो दैवान्निस्सम्बन्धोऽसुखप्रदः ॥१०७॥
सम्बन्धास्त्रिविधा लोके सर्वेषां जगतीतले ।
विद्याजो योनिजश्चापि प्रीतिजश्च प्रकीर्तितः ॥१०८॥
मित्रं तु प्रीतिजं ज्ञेयं स सम्बन्धः सुदुर्लभः ।
मित्रमाता मित्रभार्या मातृतुल्या न संशयः ॥१०९॥
मित्रभ्राता मित्रपिता भ्रातृतातसमौ नृणाम् ।
चतुर्थो नामसम्बन्धः सर्वत्र जायते नृणाम् ॥११०॥
जारश्चोपपतिर्बन्धुदुष्टः संभोगकर्तरि ।
उपपत्न्यां नवज्ञा च प्रेयसी चित्तहारिणी ॥१११॥
स्वामितुल्यश्च जारश्च नवज्ञा गृहिणी समा ।
एवं शब्दाः प्रवृत्ताश्च द्वापरे व्यवहारजाः ॥११२॥

तेजीयसां न दोषाय व्यवहारा युगे युगे ।
ततः कृष्णोऽभवं रक्षाकरो द्वापरवैगमे ॥११३॥
धर्मरक्षादैत्यनाशतापसीहाकरोऽभवम् ।
कलौ धर्मा बहुक्लेशाः समजायन्त वै यदि ॥११४॥
गंगाद्याः सरितश्चापि तीर्थानि देवतास्तथा ।
गते चतुः सहस्रे वै वर्षाणां तु कलेर्भुवि ॥११५॥
यास्यन्ति दिव्यलोकं ते तदा वै कम्भरासुतः ।
कृष्णनारायणो धर्मं स्थापयिष्यति भूतले ॥११६॥
गोपालकृष्णपुत्रोऽसावाचार्यो भगवान् स्वयम् ।
श्रीराधापद्मिनीकान्तः कमलापार्वतीपतिः ॥११७॥
माणिकीशः प्रभालक्ष्मीरमानाथः परेश्वरः ।
धर्मं भागवतं लोके संस्थाप्यैष्यति वै वनम् ॥११८॥
ब्रह्मधाम ततो धर्मः काले याते शते शते ।
पुनर्नाशं समेष्यन्ति स्थापिता धर्मसेतवः ॥११९॥
शालग्रामो हरेर्मूर्तिर्जगन्नाथः कथानकम् ।
सहस्राद्वान्तरे सर्वे यास्यन्ति श्रीहरेः पदम् ॥१२०॥
वैष्णवाः संहिताग्रन्थाः शंखाश्च श्राद्धतर्पणम् ।
वेदोक्तानि च कर्माणि यास्यन्ति लयमित्यपि ॥१२१॥
हरेः पूजा हरेर्नाम तत्कीर्तिर्गुणकीर्तनम् ।
वेदशास्त्राणि धर्माश्च यास्यन्ति विलयं स्वतः ॥१२२॥
सत्त्वं सत्यं साधुता च दिव्यता ग्राम्यदेवताः ।
व्रतं तपस्याऽनशनं यास्यन्ति श्रीहरेः पदम् ॥१२३॥
वामाचाररताः सर्वे मिथ्याकापट्यसंयुताः ।
तुलसीवर्जिताः सर्वे भविष्यन्ति ततः परम् ॥१२४॥
एकादशीविहीनाश्च सर्वधर्मविवर्जिताः ।
कृष्णप्रसंगविमुखा भविष्यन्ति ततः परम् ॥१२५॥
शठाः क्रूरा दाम्भिकाश्च महाऽहंकारसंयुताः ।
चौराश्च हिंसकाः सर्वे भविष्यन्ति ततः परम् ॥१२६॥
पुंसां भेदस्तथा स्त्रीणां विवाहो वादनिर्णयः ।
स्वस्वामिभेदी वस्तूनां न भविष्यत्यतः परम् ॥१२७॥
सर्वे जनाः स्त्रीवशाश्च पुंश्चल्यश्च गृहे गृहे ।
तर्जनैर्भर्त्सनैः शश्वत् स्वामिनं ताडयन्ति च ॥१२८॥
गृहेश्वरी च गृहिणी गृही भृत्याधिकोऽधमः ।
चेटी भृत्यासमा वध्वः श्वश्रूश्च श्वशुरस्तथा ॥१२९॥
पुंश्चल्यो राज्यकर्त्र्यश्च योनिसम्बन्धिनो नृपाः ।
कर्तारो बलिनो लोके योनिसम्बन्धिबान्धवाः ॥१३०॥
संभाषा नैव विद्वद्भिर्मूर्खैरान्तरमित्रता ।
सर्वकर्माऽक्षयाः पुंसो योषितामाज्ञया विना ॥१३१॥
यज्ञसूत्रं भावलुप्तं जातेः परिचयो न च ।
म्लेच्छाचारा भविष्यन्ति सर्वे वर्णाश्रमास्तदा ॥१३२॥
म्लेच्छशास्त्रं पठिष्यन्ति म्लेच्छभोजनयोगिनः ।
वर्णाः सर्वे भविष्यन्ति म्लेच्छानां सेवकास्तदा ॥१३३॥
सूपकर्त्र्यो भविष्यन्ति म्लेच्छिकाश्चर्मकारिकाः ।
सत्यहीना जनाः सर्वे सस्यहीना च मेदिनी ॥१३४॥
फलहीनाश्च तरवोऽपत्यहीनाश्च योषितः ।
क्षीरहीनास्तथा गावः क्षीरं सर्पिर्विवर्जितम् ॥१३५॥
दाम्पत्यं प्रीतिहीनं च गृहिणः सुखवर्जिताः ।
प्रतापहीना भूपाश्च प्रजाश्च करपीडिताः ॥१३६॥
जलहीना नदा नद्यो दीर्घिकाः कन्दरात्मिकाः ।
धर्महीनाः पुण्यहीना वर्णा अवर्णकास्तदा ॥१३७॥
लक्षेषु पुण्यवान् कोऽपि न तिष्ठति ततः परम् ।
कुत्सिता विकृताकारा नरा नार्यश्च बालकाः ॥१३८॥
कुवार्त्ताः कुत्सितपथा भविष्यन्ति ततः परम् ।
केचिद् ग्रामाश्च नगरा नाशप्राया विदुर्गकाः ॥१३९॥
नरशून्याः प्रजाशून्याः स्वल्पकुटीरकान्विताः ।
अरण्यानि भविष्यन्ति गोमायूवासिताः कलौ ॥१४०॥
अरण्यवासिनः सर्वे जनाश्च करपीडिताः ।
सस्यानि तु भविष्यन्ति तडागेषु नदीषु च ॥१४१॥
क्षेत्राणि सस्यहीनानि धनिनो द्रव्यवर्जिताः ।
चौरा धनिनः प्रकृष्टा बलदर्पसमन्विताः ॥१४२॥
प्रकृष्टवंशजा हीना भविष्यन्ति कलौ युगे ।
अलीकवादिनो धूर्ताः शठा वै सत्यवादिनः ॥१४३॥
पापिनः पुण्यवन्तश्चाऽप्यशिष्टः शिष्ट एव तु ।
जितेन्द्रिया लम्पटाश्च पुंश्चल्यश्च पतिव्रताः ॥१४४॥
तपस्विनः पातकिनो विष्णुभक्ता अवैष्णवाः ।
हिंसकाश्च दयायुक्ताश्चौराश्च नरघातिनः ॥१४५॥
भिक्षुवेषधरा धूर्ता निन्दन्त्युपहसन्ति च ।
देहसेवासु निपुणा जनानां मोहकास्तथा ॥१४६॥
पूजितास्ते भविष्यन्ति वञ्चका ज्ञानदुर्बलाः ।
वामना व्याधिताः शुष्का नरा नार्यश्च सर्वतः ॥१४७॥
अल्पायुषो जरायुक्ता यौवनेषु कलौ युगे ।
धर्मः पशुसमाचारो योनिसम्बन्धमुख्यता ॥१४८॥
मातृभावोऽपि च लुप्तो भविष्यति तदा कलौ ।
पञ्चसहस्रवर्षाणां विगमे तु पुनः पुनः ॥१४९॥
अहं विप्रो भविष्यामि चमत्कारपुरे तदा ।
जन्मसिद्धो महायोगी नाम्ना बृहद्व्रतः कलौ ॥१५०॥

भक्तिं भगवतश्चाहं कृष्णनारायणस्य वै ।
स्थापयिष्ये लक्ष्मीनारायणसंहितया तदा ॥१५१॥
मदुपदिष्टवाक्यैश्च नरा यास्यन्ति मोक्षणम् ।
मनांसि सात्त्विकान्येव भविष्यन्ति ममाश्रयात् ॥१५२॥
अतः परं नरा नार्यश्चाण्डालाः सर्व एव ते ।
पलिताः षोडशे वर्षे महावृद्धास्तु विंशतौ ॥१५३॥
अष्टवर्षा च युवती रजोयुक्ता च गर्भिणी ।
वत्सरान्ते प्रसूता स्त्री षोडशेन जरान्विता ॥१५४॥
एताः काश्चित् सहस्रेषु वन्ध्याश्चापि गृहे गृहे ।
कन्याविक्रयिणश्चापि स्वकन्यापतयस्तथा ॥१५५॥
मातृजायावधूनां च जारोपार्जनतत्पराः ।
कन्यानां भगिनीनां च जारोपार्जनजीविनः ॥१५६॥
हरेर्नाम्नां विक्रयिणः पुण्यविक्रयिणस्तदा ।
कीर्त्यै दानं क्षणं दत्त्वा पुनश्चापहरिष्यति ॥१५७॥
देवगुरुब्रह्मवृत्तिं प्रसह्याऽपहरिष्यति ।
कन्याश्वश्रूवधूस्वसृसपत्नीमातृगामिनः ॥१५८॥
अगम्याभ्रातृपत्न्यादिगामिनश्च कलौ युगे ।
अजागोगर्दभीमेढीहरिणीगामिनः कलौ ॥१५९॥
गवयीगरुडीशुनीमयूरीगामिनस्तथा ।
सूकरीवानरीवाजिन्यादिसंगामिनः कलौ ॥१६०॥
स्वस्य नारीं परित्यज्य विहरिष्यन्ति सर्वतः ।
पत्नीनां निर्णयो नास्ति भर्तृणां च कलौ युगे ॥१६१॥
प्रजानां चैव वस्तूनां ग्रामाणां च विशेषतः ।
अलीकवादिनः सर्वे सर्वे चौर्यार्थलम्पटाः ॥१६२॥
परस्परं हिंसकाश्च सर्वे च नरघातिनः ।
नार्यः सर्वपशुज्ञातिनरसंगमितास्तदा ॥१६३॥
वृषलैः पालितावस्त्रशून्याश्चापि कलौ युगे ।
यज्ञसूत्रविहीनाश्च ध्यानशुद्धिविहीनकाः ॥१६४॥
पुंश्चली वार्धुषाऽबीरा कुट्टिनी च रजस्वला ।
सर्वेषां रन्धनागारे भविष्यन्ति तु पाचिकाः ॥१६५॥
अन्नानां निर्णयो नास्ति योनीनां निर्णयो न च ।
पुत्राणां निर्णयो नैव सर्वे म्लेच्छाः कलौ युगे ॥१६६॥
कलौ घोरे प्रवृत्ते तु तदन्तसमये भुवि ।
तत्र पञ्चसमा कन्या गर्भमाता भविष्यति ॥१६७॥
दशवर्षवयस्का सा वृद्धा मृत्युसमीपगा ।
नरा द्वादशवर्षाश्च मृत्युपात्राणि वै तदा ॥१६८॥
सम्पूर्णे तु कलौ याते ह्रस्वं सर्वं तदा भवेत् ।
हस्तप्रमाणे वृक्षे चाऽङ्गुष्ठमाने च मानवे ॥१६९॥
वर्षद्वयायुषः सर्वे वर्षायुषश्चतुष्पदाः ।
मासायुषो नदा नद्यो मार्जारा इव हस्तिनः ॥१७०॥
मूषिकाऽञ्जलितृप्ताश्च भविष्यन्ति जनाः कलौ ।
मूषिकागर्भवद्बालान् जनयिष्यन्ति योषितः ॥१७१॥
पृथ्वीवासा वसतयो गृहादि नास्ति वै तदा ।
वृष्टिश्चाऽङ्गुष्ठपर्वा च वर्षास्वेका भविष्यति ॥१७२॥
एवं कलेः सर्वकाले विगते प्रान्तभागके ।
विप्रस्य विष्णुयशसः पुत्रः कल्की भविष्यति ॥१७३॥
सोऽहं नारायणो लक्ष्मि ! करवालं करे दधन् ।
कृष्णदत्तं श्वेतवाहं समारुह्याऽम्बरे व्रजन् ॥१७४॥
पृथ्वीं प्रदक्षिणीकृत्य त्रिरात्रेण भुवस्तलम् ।
वायुप्रमण्डलं सर्वं स्वांगस्पर्शेन वर्तुलम् ॥१७५॥
करिष्ये पावनं पश्चान्म्लेच्छान् कृत्वा सुमानसान् ।
हत्वा त्वन्यानतिदुष्टान् करिष्यामि च संस्कृतान् ॥१७६॥
कृतं संस्थापयिष्यामि सत्ययज्ञार्हमानवान् ।
कलौ गते च दुर्धर्षे संप्रवृत्ते कृते युगे ॥१७७॥
तपस्सत्यसमायुक्तो धर्मः पूर्णो भविष्यति ।
तपस्विनस्तदा विप्राः पूतास्ते वैष्णवास्ततः ॥१७८॥
कल्किशिष्याश्च धर्मिष्ठा वेदज्ञानप्रकाशिनः ।
पतिव्रतास्ततः सत्यो नार्यः पत्नीव्रता नराः ॥१७९॥
वर्णधर्माः पुनः स्थाने प्राप्स्यन्ति च प्रकाशनम् ।
यज्ञा दानानि कर्माणि लज्जा च मानवेषु वै ॥१८०॥
विष्णुभक्तिरताः सर्वे भविष्यन्ति च वैष्णवाः ।
लेशो नास्ति ह्यधर्माणां धर्मपूर्णे कृते युगे ॥१८१॥
व्योमयानानि सर्वत्र दूरश्रवणशक्तयः ।
स्वर्गगमनयानानि भविष्यन्ति कृते युगे ॥१८२॥
दूरदर्शनयोगाश्च वार्धितलाभिगामिता ।
विद्युदग्निवायुरथा भविष्यन्ति कृते युगे ॥१८३॥
भौतिकेष्वणिमाद्याश्च सिद्धयः शक्तिरूपिकाः ।
लयनाशोद्भवकर्त्र्यो भविष्यन्ति कृते युगे ॥१८४॥
भूलोके स्वर्गलोके न भेदो भविष्यति कृते ।
नार्यो देव्य इवाऽऽभासा नरा देवाः कृते युगे ॥१८५॥
मन्त्रा तन्त्राश्च यन्त्राश्च सफलाश्च कृते युगे ।
प्रभाकुल्याः जलकुल्याः शब्दकुल्याः गृहे गृहे ॥१८६॥
अष्टषष्टिकलाग्राह्याः प्रतिबिम्बग्रहानलाः ।
शारीरभेदविज्ञानं प्रसृतं स्यात् कृते युगे ॥१८७॥
गर्भाऽगर्भेच्छुनियमाः पुंस्त्रीविवर्तशक्तयः ।
मृतजीवनदानादि भविष्यन्ति कृते युगे ॥१८८॥

वानस्पत्यविधिर्दिव्यो रासायनविवर्तनः ।
द्रागेच्छापूरकः शक्तो भविष्यति कृते युगे ॥१८९॥
सञ्जीवनी महाविद्या तथाऽदृश्यप्रयोजिका ।
देवावेशादिसंचाराः भविष्यन्ति कृते युगे ॥१९०॥
शक्तितत्त्वादिबोधानि भूतभौतिकजानि च ।
दिव्यमानकराण्येव यन्त्राणि स्युः कृते युगे ॥१९१॥
एवं संस्थाप्य भगवान् धर्मं कृतयुगं नवम् ।
स्वर्गवद् वसुधां कृत्वा चान्तर्धानं गमिष्यति ॥१९२॥
धर्मस्त्रिपाच्च त्रेतायां द्विपाच्च द्वापरे स्मृतः ।
कलौ प्रवृत्ते पादात्मा सर्वलोपस्ततः परम् ॥१९३॥
लक्ष्मि ! सर्वत्र मे भक्ताः पावना विचरन्ति वै ।
तेषां पादरजःस्पर्शाद् भूः सदा तीर्थरूपिणी ॥१९४॥
नद्यो वृक्षाः पर्वताश्च मद्भक्तैः पाविताश्च ते ।
क्षालयन्ति जनानां वै पापानि तीर्थरूपिणः ॥१९५॥
साधवः पुण्यदेहाश्च साध्व्यश्चापि हरिश्रिताः ।
चेतनानि हि तीर्थानि पावयन्ति दिने दिने ॥१९६॥
पृथिव्यां यानि तीर्थानि पापाश्च मानवादयः ।
देवा नराश्च पशवो जीवाः स्थावरजङ्गमाः ॥१९७॥
भविष्यन्ति च पूतास्ते मद्भक्तस्पर्शदर्शनात् ।
इति ते कथिताः साध्वि ! युगधर्मा बहुप्रथाः ॥१९८॥
नार्यः पतिव्रता यत्र भविष्यन्ति युगे युगे ।
तत्र स्वर्गे सदा सौख्यं भविष्यति धनादिकम् ॥१९९॥
इति ते कथितं लक्ष्मि ! प्रसंगान्मम जन्म च ।
पठनाच्छ्रवणाच्चास्य भवेद् वैकुण्ठवासभाग् ॥२००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्यमहिमनि चतुर्युगधर्मनिरूपणनामा विंशत्यधिकचतुश्शततमोऽध्यायः ॥ ४२० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारं तीर्थराजे प्रयागके ।
भरद्वाजस्य वसतस्त्रिवेण्या भार्यया सह ॥ १ ॥
ब्रह्मपुत्री मानसी या जातमात्रा महासती ।
शतचन्द्रसमा रूपे युवती च पतिव्रता ॥ २ ॥
ब्रह्मसरोऽग्रगण्याऽऽसीत् त्रिनवंशसमुद्भवा ।
भरद्वाजं लक्षवर्षतपस्विनं प्रयागके ॥ ३ ॥
कुंभस्नाने ब्रह्मलोकादागता तं ददर्श सा ।
अहो दिव्यो वरयोग्यः ऋषिश्चात्र विराजते ॥ ४ ॥
इति सञ्चिन्त्य सेवायां छायायां तस्य संस्थिता ।
ब्रह्मणा कुंभकालस्य कृत्वा स्नानं तदुत्तरम् ॥ ५ ॥
त्रिवेण्या मानसं ज्ञात्वा भरद्वाजाय साऽर्पिता ।
गंगाया यमुनायाश्च सरस्वत्याश्च वै कलाः ॥ ६ ॥
त्रिवेण्यै चार्पिता नाम्ना त्रिवेणीं तां च कन्यकाम् ।
प्रसंसमर्प्य ऋषये ब्रह्मा सत्यस्थलं ययौ ॥ ७ ॥
त्रिवेणी पातिव्रत्येन भरद्वाजं तपस्विनम् ।
निषेवते सदा भक्त्या पातिव्रत्याऽभिवृद्धया ॥ ८ ॥
प्रातःस्नानादिना नित्यं पादाऽवमर्दनेन च ।
पूजावस्तुप्रदानेन भोज्यार्पणेन सर्वदा ॥ ९ ॥
ब्रह्मज्ञानेन च नित्यं सन्ध्यावन्दनकर्मभिः ।
शय्यायां सेवनैश्चापि सेवते सा पतिव्रता ॥१०॥
कामधेनुः सदा यत्र कल्पद्रुर्वर्तते सदा ।
सोमवल्ली सदा तत्र करे चिन्तामणिः स्थितः ॥११॥
यत्र धर्मवती नारी पातिव्रत्यपरायणा ।
सर्वं तत्र च रत्नानामुपस्थानं प्रवर्तते ॥१२॥
एकदा भरतस्तत्र साकेतकोसलेश्वरः ।
ससैन्येनाऽऽगमत् तीर्थविध्यर्थं माघतापसः ॥१३॥
सैन्यं संस्थाप्य वै दूरं जगाम दर्शनाय सः ।
भरद्वाजस्य ऋषिषु प्रवरस्य गुरोस्तदा ॥१४॥
ननाम भरतस्तस्य पादयोर्दण्डवन्मुदा ।
भरद्वाजस्य पत्न्याश्च पादयोः स ननाम ह ॥१५॥
भरताय तदाऽर्घ्यं च पाद्यं दत्वा फलानि च ।
आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ॥१६॥
साकेतायां बले कोशे मित्रेष्वपि च मन्त्रिषु ।
भरतोऽपि भरद्वाजं पप्रच्छ कुशलादिकम् ॥१७॥
शरीरेऽग्निषु शिष्येषु वृक्षेषु मृगपक्षिषु ।
तथेति तु प्रतिज्ञाय भरद्वाजो महायशाः ॥१८॥
प्रसन्नः प्राह चात्रैव वसाऽऽश्रमेऽत्र पर्वणि ।
स्वागतं ते च सत्कारं सेवां यथागुणं तथा ॥१९॥
करिष्ये तीर्थवासोऽस्ति यावत्ते नृपपुंगव ! ।
गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता ॥२०॥
सन्ति त्वयि गुणाः सर्वे वसाऽत्र त्वाश्रमे मम ।
इत्युक्तः स च भरतस्तथेत्येवमुवाच तम् ॥२१॥
कृतबुद्धिं निवासाय तत्रैव स मुनिस्तदा ।
भरतं ऋषितुल्यं स आतिथ्येन न्यमन्त्रयत् ॥२२॥
अब्रवीद् भरतस्त्वेनं नन्विदं भवता कृतम् ।
पाद्यमर्घ्यमथातिथ्यं वने यदुपपद्यते ॥२३॥

अथोवाच भरद्वाजो भरतं प्रहसन्निव ।
जाने त्वां प्रीतिसंयुक्तं तोषयिष्ये यथाधनम् ॥२४॥
सेनायास्तव सर्वस्याः कर्तुमिच्छामि सत्कृतिम् ।
मम प्रीतिर्यथारूपा त्वमर्हो मुनिराड् यथा ॥२५॥
किमर्थं चापि निक्षिप्य दूरे सैन्यमिहाऽऽगतः ।
कस्मान्नेहोपयातोऽसि सबलः प्रियभक्तराट् ॥२६॥
भरतः प्रत्युवाचेदं प्रांजलिस्तं तपोधनम् ।
न सैन्येनोपयातोऽस्मि भगवन् भगवद्भयात् ॥२७॥
राज्ञा हि भगवन्नित्यं राज्याऽधिकारिणाऽथवा ।
यत्नतः परिहर्तव्या विषयेषु तपस्विनः ॥२८॥
वाजिमुख्या मनुष्याश्च मत्ताश्च वरवारणाः ।
प्रच्छाद्य भगवन् भूमिं महतीमनुयान्ति माम् ॥२९॥
ते वृक्षानुदकं भूमिमाश्रमेषूटजाँस्तथा ।
न हिंस्युरिति तेनाऽहमेक एवाऽऽगतस्ततः ॥३०॥
आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा ।
तथाऽनुचक्रे भरतः सेनायाः समुपागमम् ॥३१॥
तावदृषिः सतीं भार्यां त्रिवेणीं प्राह शोभने ! ।
पातिव्रत्येन धर्मेण विरच्यय्य सुपत्तनम् ॥३२॥
कुरु राज्यसमं चास्य स्वागतं सत्कृतिं प्रिये ।
इत्युक्ता सा सती पत्नी नत्वाऽनुग्रहकृत्पतिम् ॥३३॥
अग्निशालां प्रविश्याऽथ पीत्वाऽऽपः परिमृज्य च ।
आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत् ॥३४॥
आह्वये विश्वकर्माणमहं त्वष्टारमत्र वै ।
आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥३५॥
आह्वये लोकपालाँस्त्रीन् देवानिन्द्रपुरोगमान् ।
आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥३६॥
प्राक्स्रोतसश्च या नद्यस्तिर्यक्स्रोतस इत्यपि ।
पृथिव्यामन्तरिक्षे च समायान्त्वद्य सर्वशः ॥३७॥
अन्याः स्रवन्तु दुग्धादि पेयानि मधुराणि च ।
अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम् ॥३८॥
आह्वये देवगन्धर्वान् विश्वावसुहहाहुहून् ।
तथैवाऽप्सरसो देवगन्धर्वांश्चापि सर्वशः ॥३९॥
घृताचीमथ विश्वाचीं मिश्रकेशीमलंबुषाम् ।
नागदत्तां च हेमां च सोमामद्रिं कृतस्थलीम् ॥४०॥
शक्रं याश्चोपतिष्ठन्ति ब्रह्माणं याश्च भामिनीः ।
सर्वास्तुम्बुरुणा सार्धमाह्वये सपरिच्छदाः ॥४१॥
वनं कुरुषु यद्दिव्यं वासोभूषणपत्रवत् ।
दिव्यनारीफलं शश्वत् तत्कौबेरमिहैव तु ॥४२॥
इह मे भगवन् सोमो विधत्तामन्नमुत्तमम् ।
भक्ष्यं भोज्यं च चोष्यं च लेह्यं च विविधं बहु ॥४३॥
विचित्राणि च माल्यानि पादपप्रच्युतानि च ।
रसादीनि च पेयानि खाद्यानि विविधानि च ॥४४॥
एवं समाधियुक्ता सा तेजस्विनी पतिव्रता ।
वह्निं ध्यात्वाऽस्मरत् सर्वान् समाजग्मुश्च ते पृथक् ॥४५॥
चन्दनपर्वतौ स्पृष्ट्वाऽनिलः स्वेदनुतः शिवः ।
सुप्रियात्मा सुखः शान्तो ववौ सौरभपूरितः ॥४६॥
देवैः कृताः स्वर्गपुष्पवृष्ट्यो दिव्यताप्रदाः ।
घनाश्चन्दनबिन्दुभिरभ्यवर्षन्त वै मनाक् ॥४७॥
देवदुन्दुभिघोषाश्च मंगलश्रवणास्तदा ।
शुश्रुविरे तथा भूमौ ननृतुश्चाप्सरोगणाः ॥४८॥
प्रजगुर्देवगन्धर्वा वीणाः प्रमुमुचुः स्वरान् ।
स्वागतार्थं च वाद्यानि अवाद्यन्त यदा ततः ॥४९॥
भरतः सैन्यमादाय समायातः सकौतुकः ।
ददर्श तस्य तत्सैन्यं विधानं विश्वकर्मणः ॥५०॥
कृता तत्र महाभूमिः समन्तात्पञ्चयोजनम् ।
शाद्वलैर्बहुभिश्छन्ना नीलवैडूर्यसन्निभैः ॥५१॥
तत्र बिल्वाः कपित्थाश्च पनसाः सहकारकाः ।
आमलक्यः खर्जुराश्च बभूवुः फलभूषिताः ॥५२॥
उत्तरेभ्यः कुरुभ्यश्च वनं दिव्योपभोगवत् ।
आजगाम नदी वृक्षवल्लीफलसमन्विता ॥५३॥
चतुश्शालानि शुभ्राणि शालाश्च गजवाजिनः ।
हर्म्यप्रासादसंयुक्ततोरणानि शुभानि च ॥५४॥
सितमेघनिभं चापि राजवेश्म सुतोरणम् ।
शुक्लमाल्यकृताकारं दिव्यसुगन्धमिश्रितम् ॥५५॥
चतुरस्रमसंबाधं शयनासनयानवत् ।
दिव्यैः सर्वरतेर्युक्तं दिव्यभोजनवस्त्रवत् ॥५६॥
उपकल्पितसर्वान्नं धौतनिर्मलभाजनम् ।
क्लृप्तसर्वासनं श्रीमत्स्वास्तीर्णशयनोत्तमम् ॥५७॥
प्रविवेश महाभक्तो भरतो रत्नवेश्म तत् ।
अनुजग्मुश्च सैन्यस्य मन्त्रिणः सपुरोहिताः ॥५८॥
बभूवुश्च वशिष्ठाद्या दृष्ट्वा वेश्ममुदान्विताः ।
तत्र राजासनं दिव्यं व्यजनं छत्रमित्यपि ॥५९॥
भरतो मन्त्रिभिः सार्धमभ्यवर्तत राजवत् ।
आसनं शोभयामास दिव्यं देवार्हमेव तत् ॥६०॥
आनुपूर्व्या निषेदुश्च सर्वे मन्त्रिपुरोहिताः ।
ततः सेनापतिः पश्चात्प्रशास्ता च न्यषीदत ॥६१॥

तावत्तत्र मुहूर्तेन नद्यः पायसकर्दमाः ।
उपातिष्ठन्त भरतं त्रिवेण्याश्चानुशासनात् ॥६२॥
आसामुभयतः कूलं पाण्डुमृत्तिकलेपनाः ।
रम्याश्चावसथा दिव्यास्त्रिवेण्याः सम्प्रसादजाः ॥६३॥
तेनैव च मुहूर्तेन दिव्याभरणभूषिताः ।
आगुर्विंशतिसाहस्रा ब्रह्मणा प्रहिताः स्त्रियः ॥६४॥
सुवर्णमणिमुक्तैश्च प्रवालैश्च सुभूषिताः ।
आगुर्विंशतिसाहस्राः कुबेरप्रहिताः स्त्रियः ॥६५॥
याभिरनुगृहीताश्च नराः स्युर्दिव्यवर्ष्मणः ।
आगुर्विंशतिसाहस्रा नन्दनादप्सरोगणाः ॥६६॥
नारदाद्याश्च गन्धर्वाः कान्त्या सूर्यसमा ययुः ।
ते गान्धर्वकलाभिश्च भरतस्याऽग्रतो जगुः ॥६७॥
अलम्बुषा मिश्रकेशी पुण्डरीकाऽथ वामना ।
उपानृत्यन्त भरतं भरद्वाजस्य शासनात् ॥६८॥
यानि माल्यानि देवेषु यानि चैत्ररथे वने ।
प्रयागे तान्यदृश्यन्त त्रिवेण्यास्तेजसा तदा ॥६९॥
बिल्वा मार्दंगिका आसन् शम्या ग्राहा बिभीतकाः ।
अश्वत्था नर्तकाश्चासन् त्रिवेण्यास्तेजसा तदा ॥७०॥
ततश्च सरलास्तालास्तिलकाश्च तमालकाः ।
प्रहृष्टास्तत्र चायाताः कुब्जा भूत्वाऽथ वामनाः ॥७१॥
शिंशपाऽऽमलकीजम्बूनवरंगादयो द्रुमाः ।
सेवकाः फलदा भूत्वा भरद्वाजाऽऽश्रमेऽवसन् ॥७२॥
द्राक्षाचिर्भटिकानागवल्लीसोमादिवल्लिकाः ।
शर्करावल्लिका मिष्टा याश्चान्याः कानने लताः ॥७३॥
प्रमदारूपधारिण्यो भरद्वाजाश्रमेऽवसन् ।
मिष्टान् पिबत भो भृत्या आसवान् वै यथेप्सितान् ॥७४॥
पायसं परमान्नानि भक्ष्यन्तां च बुभुक्षितैः ।
फलानि देह्यचोद्यानि भक्ष्यन्तां सैन्यपुंगवैः ॥७५॥
संकृत्वोद्वर्तनं नार्यो नदीतीरेषु वल्गुषु ।
स्नापयन्त्येकमेकं स्म नरं ताः सप्त चाष्ट च ॥७६॥
संवाहयन्त्या उत्पेतुर्नार्यो विपुललोचनाः ।
पाययन्ति करान् धृत्वा मध्वादिकं वरांगनाः ॥७७॥
हयान् गजान् खरानुष्ट्रान् वृषभान् घोटकान् वरान् ।
अभोजयन्वाहनपास्तेषां भोज्यं यथायथम् ॥७८॥
इक्षूँश्च मधुलाजाँश्च भोजयन्ति स्म वाहनान् ।
मत्तप्रमत्तमुदितास्तदा चमूः प्रसंभ्रमौ ॥७९॥
तर्पिताः सर्वकामैश्च रक्तचन्दनपूजिताः ।
अप्सरोभिर्वर्धिताश्च सैन्या उदैरयँस्तदा ॥८०॥

अहो सौध्यान्यहो वस्तून्यहो दास्यश्च सेविकाः ।
अहो कल्पलताश्चात्र स्वर्गोऽयमिति चाब्रुवन् ॥८१॥
नृत्यन्तश्च हसन्तश्च गायन्तश्चापि सैनिकाः ।
संप्रहृष्टा विनेदुश्च नरा नार्यः सहस्रशः ॥८२॥
भरतस्याऽनुयातारो माल्योपेताः सहस्रशः ।
तृप्ताश्चाश्चर्यसम्पूर्णा भरद्वाजं ववन्दिरे ॥८३॥
धन्योऽयं मुनिराजोऽस्ति त्रिवेणी यस्य कामिनी ।
सर्वसिद्धिकरा साध्वी यत्प्रतापादिदं शुभम् ॥८४॥
यद्यपि स्याद्वने वासो यस्य पत्नी पतिव्रता ।
स्वर्गं तस्य करे चास्ते किमस्य राज्यवैभवैः ॥८५॥
या पत्नी स्वपतेः पादोदकं पीत्वाऽनलाऽन्तिके ।
स्थित्वेच्छति महादिव्या विभूतीस्तास्तु तत्क्षणम् ॥८६॥
समायान्ति किमु स्वर्गं परं नास्मात् कदाचन ।
ततः सर्वत्र वै सन्तु साध्व्यो नार्यः पतिव्रताः ॥८७॥
तथा तासां स्वामिनश्च भरद्वाजोपमा नराः ।
पत्नीव्रतपराः सन्तु येषां स्वर्गं करे सदा ॥८८॥
इति वदन्तः सर्वे वै सहस्रशो हि सैनिकाः ।
लक्षाधिमानवाः साकेतस्य विषयवासिनः ॥८९॥
तैर्थिकाः कोटिशश्चान्ये कुंभपर्वणि चागताः ।
स्वर्गं दिव्यं भरद्वाजकृतं विलोक्य ते तदा ॥९०॥
कंभरां च महालक्ष्मीं गोपालकृष्णमीश्वरम् ।
कृष्णनारायणं तत्र स्थितं पत्रासनं प्रभुम् ॥९१॥
त्रिवेणीं च नदीरूपां तथा तीर्थानि कोटिशः ।
भरद्वाजप्रियां पत्नीं त्रिवेणीं युवतीं तथा ॥९२॥
विलोक्य दर्शनं कृत्वा पूतास्ते दिव्यतां ययुः ।
ततो भुक्तवतां तेषां तदन्नममृतोपमम् ॥९३॥
दिव्यानुद्वीक्ष्य भक्ष्याँश्चाऽभवत् तद्भक्षणे मतिः ।
प्रेष्याश्चेट्यश्च वध्वश्च बलस्था देशवासिनः ॥९४॥
यात्रालवश्च किंकर्यो दासा दास्यश्च नैकशः ।
बभूवुस्ते भृशं प्रीताः सर्वे नूत्नाम्बरास्तथा ॥९५॥
कुञ्जराश्च खरोष्ट्राश्च गोऽश्वाश्च मृगपक्षिणः ।
तृप्ता बभूवुस्ते नान्यत् तृणाद्यं वै तदाऽऽर्थयन् ॥९६॥
नाऽशुक्लवासास्तत्राऽऽसीत् कश्चिद्वै क्षुधितस्तदा ।
फलादिसद्रसैः सूपैः क्वथिकाभिश्च पायसैः ॥९७॥
पूर्णा ह्यासन् ह्रदास्तत्रौदनानां पर्वतास्तथा ।
बभूवुश्चाश्रमे पार्श्वे कूपाः पायसकर्दमाः ॥९८॥
ताश्च कामदुघा गावो द्रुमाश्चासन् मधुच्युतः ।
वाप्यश्चासवपूर्णाश्च स्वर्णपात्राणि कोटिशः ॥९९॥

राजतानि च पात्राणि ताम्राणां कोटयस्तदा ।
पात्रीणां च सहस्राणि स्थालीनां नियुतानि च ॥१००॥
न्यर्बुदानि च पात्राणि शातकुंभमयानि च ।
स्थाल्यः कुम्भ्यः करम्भ्यश्च दधिपूर्णाः सुसंकृताः ॥१०१॥
हैयंगवीनकूटानि तक्राणां कुण्डकानि च ।
हृदाः पूर्णरसालानां तिक्ताम्ब्लमिष्टचूर्णकाः ॥१०२॥
पर्पटानां समूहाश्च पोलिकानां तथाऽद्रयः ।
मिष्टान्नानां महाशृंगाण्यभवन् तत्र चाश्रमे ॥१०३॥
बभूवुर्व्यञ्जनानां च शर्कराणां च सञ्चयाः ।
चूर्णानि लेपयोग्यानि स्नानानि विविधानि च ॥१०४॥
ददृशुर्भाजनस्थानि तीर्थेषु सरितां जनाः ।
शुक्लानंशुमतश्चापि दन्तधावनसञ्चयान् ॥१०५॥
शुक्लाँश्चन्दनकल्काँश्च सम्पुटेष्ववतिष्ठतः ।
दर्पणानुत्तमाँश्चित्रवाससां बहुसंचयान् ॥१०६॥
मुखवासान् बहुविधान् चूर्णताम्बुलचर्वणान् ।
पादुकोपानहांश्चैव युग्मान्यत्र सहस्रशः ॥१०७॥
आंजनीः कंकतान् कूर्चान् दन्तकान् छत्रचामरान् ।
मर्मत्राणानि चित्राणि शयनान्यासनानि च ॥१०८॥
प्रतिपानहृदान् पूर्णान् खरोष्ट्रगजवाजिनाम् ।
अवगाह्य सुतीर्थांश्च हृदान् सोत्पलपुष्करान् ॥१०९॥
आकाशवर्णप्रतिमान् स्वच्छतोयान् सुखाप्लवान् ।
नीलवैदूर्यवर्णांश्च मृदुप्राऽऽवाससंचयान् ॥११०॥
भक्षणार्थं पशूनां ते ददृशुस्तत्र सर्वशः ।
दोलाश्च विविधास्तत्र भवने भवने शुभाः ॥१११॥
वातयन्त्राणि रम्याणि विद्युद्दीपाः सहस्रशः ।
शीतोष्णजलकुण्डानि द्यूतगृहाणि वै तथा ११२॥
विमानभवनान्येव स्वर्गयानानि तान्यपि ।
जलान्तर्यानवर्याणि दूरश्रवणयन्त्रिकाः ॥११३॥
दूरदर्शनपेट्यश्चातीतक्रीडाप्रदर्शिकाः ।
नटनर्तकचाटादिक्रीडांगणानि भूरिशः ॥११४॥
व्यस्मयन्त मनुष्यास्ते स्वप्नकल्पं तदद्भुतम् ।
दृष्ट्वाऽऽतिथ्यं कृतं तावन् महेन्द्रादधिकं तदा ॥११५॥
भरद्वाजत्रिवेणीभ्यां कृतं स्वर्गं नवं हि तत् ।
भरद्वाजाश्रमे कुंभदिनरात्रिर्गता सुखम् ॥११६॥
प्रातः स्नानं विधायैव भरताद्यास्तदा पुनः ।
भोजनादिविधिं कृत्वा सम्पूज्यर्षिं त्रिवेणिकाम् ॥११७॥
दत्वा दानान्यनेकानि ययुः साकेतधाम ते ।
प्रतिजग्मुश्च ते सर्वे गन्धर्वाश्च वरांगनाः ॥११८॥
सर्वे ये तत्र चाहूताः त्रिवेण्या पत्युराज्ञया ।
प्रतिजग्मुः कृत्रिमं तत् सर्वमदृश्यतां गतम् ॥११९॥
इति लक्ष्मि ! प्रतापस्ते पातिव्रत्यवृषस्य वै ।
कथितो यश्चतुर्दशलोकेषु प्रथितः प्रिये ॥१२०॥

इतिश्रीलक्ष्मीनाराणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये भरतार्थे प्रयागे भरद्वाजपत्न्या त्रिवेण्या नवीन-स्वर्गे रचितमिति तन्निरूपणनामा एकविंशत्यधिक-चतुर्दश ततमोऽध्यायः ॥४२१॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! शबरी लोकपावनी ।
याऽऽसीद् ब्रह्मप्रिया नाम्नी पत्नी कृष्णस्य धामनि ॥ १ ॥
यदा वै राधया लक्ष्मीर्गंगा चापि सरस्वती ।
भुवं यातुं रुषा प्रोक्तास्तदा ब्रह्मप्रिया सखी ॥ २ ॥
राधां तत्पादयोर्नत्वा प्राह कल्याणि मा वद ।
क्षमां कुरु सपत्नीषु मातर्योग्या क्षमा तव ॥ ३ ॥
तदा राधा च तामाह गच्छ त्वं रमया सह ।
पृथ्व्यां दासीवर्गजन्म गृहीत्वा वस भूतले ॥ ४ ॥
तदा तत्र सखी चान्या पम्पानाम्न्यभवद्धरेः ।
सा ननाम तदा राधां मा वदेत्याह तां च सा ॥ ५ ॥
राधा प्राह प्रयाहि त्वं भुवि ब्रह्मप्रियायुता ।
वसाऽरण्ये महापम्पे जडे याहि समीपतः ॥ ६ ॥
इत्युक्ते ते राधिकायाश्चक्राते पादमर्दनम् ।
प्रसन्नाऽभूत् तदा राधा प्रोवाच शापमोक्षणम् ॥ ७ ॥
कृष्णेन साकं यां काचित् सखी राधां विना यदि ।
विहरिष्यति ताः सर्वाः प्रेषयिष्यामि भूतलम् ॥ ८ ॥
ब्रह्मप्रिये च पम्पे च गोलोकत्रटिकाऽवधिम् ।
पृथ्व्यां बहुमनूनां वै कालं भुक्त्वा ततः परम् ॥ ९ ॥
रामरूपं वरं कृष्णं प्राप्याऽत्राऽऽयास्यथः पुनः ।
करिष्यथो ब्रह्मवेत्र्यौ भक्तिं तावद्धरेर्भुवि ॥१०॥
ब्रह्मचारिधर्मवत्यौ लोककल्याणदे सदा ।
दिव्यश्चिरायुषां युक्ते देव्यौ भविष्यथौ भुवि ॥११॥
इत्यनुग्रहमासाद्य कृष्णाज्ञया च ते शुभे ।
लक्ष्म्या समं समायाते भूतले दक्षिणे स्थले ॥१२॥
लक्ष्मीर्वेदवती जाता कुशध्वजस्य कन्यका ।
सा च तप्त्वा तपश्चोग्रं बदर्याख्याश्रमे सती ॥१३॥
पृथ्व्यां च बालिका सीता जाता जनकनन्दिनी ।
कुशध्वजस्य दासश्चाटवीपालोऽभवत्तदा ॥१४॥

भीमाख्यो वै कुलालः श्रीवेंकटाद्रिनिवासकृत् ।
तस्य वै मानसी कन्ये पम्पा ब्रह्मप्रिया शुभे ॥१५॥
युगले जनिते दिव्ये जातिस्मरे हरेः प्रिये ।
जग्मतुस्ते तपोऽर्थं वै जातमात्रे वनान्तरम् ॥१६॥
क्रौंचारण्यात् समारभ्य ऋष्यमूकाद्रिशोभितम् ।
महारण्यं विविशतुः कन्यके ते शुभे ततः ॥१७॥
चक्रतुस्तप उग्रं ते निर्जने दिव्यभावने ।
तत्राऽर्कवंशजाश्चासन् वानराः पशवश्च ये ॥१८॥
बलिनः क्रूरकर्माणो धर्माम्नायविवर्जिताः ।
क्वचित्क्वचिद्वने तत्र तापस्यौ कन्यके तु ते ॥१९॥
पीडयामासुरत्यर्थं पशुचेष्टितक्रोशनैः ।
तदा पम्पा विचार्यैव पुष्करिण्यभवज्जलम् ॥२०॥
जलरूपा तपश्चर्यां करोति हरिलब्धये ।
ब्रह्मप्रियाऽभवत् तत्र जरठाऽतिकुरूपिणी ॥२१॥
अस्थिमात्र शरीरा च शुष्का धनुर्धरा सती ।
क्रूरवर्णाऽतिनिर्घृणा शबरी सा भयावहा ॥२२॥
यां दृष्ट्वा भयमापुस्ते वानरा राक्षसीमिव ।
एवं तपः प्रकुर्वन्त्यौ समासाते शुभे प्रिये ॥२३॥
पतिं कृष्णं च ते नित्यमाराधयत आदरात् ।
ऋष्यमूकगिर्यरण्ये फलिवृक्षातिसंकुले ॥२४॥
जम्बूप्रियालपनसैर्न्यग्रोधप्लक्षतिन्दुकैः ।
अश्वत्थकर्णिकारैश्च तिलकैर्नक्तमालकैः ॥२५॥
नागवृक्षैः सहकारैरशोकैः करवीरकैः ।
पारिभद्रैः कदम्बैश्चन्दनैर्नारंगखारिकैः ॥२६॥
खर्जूरश्रीफलनारीकेलैः फलिद्रुमैर्युते ।
सर्वकालफलास्तत्र पादपा मधुरस्रवाः ॥२७॥
सर्वे च ऋतवस्तत्र फलपुष्पप्रसूसमाः ।
शोभन्ते निर्झरा यत्राऽमृतकन्दादयस्तथा ॥२८॥
तादृशी पुष्करिणी सा पम्पा जलमयी ह्यभूत् ।
अशर्करा ह्यविभ्रंशा समतीर्था ह्यशैवला ॥२९॥
सूक्ष्मसंस्कृतवालुका कमलोत्पलशोभिता ।
हंसैः क्रौंचैर्मण्डुकैश्च कुररैश्चातकैः शुकैः ॥३०॥
मेनामयूरकुक्कुटैर्जलीयैः शब्दिताः मुहुः ।
रात्रौ कन्या स्वरूपा सा शबर्या सह मोदते ॥३१॥
दिवा पम्पा जलरूपा शबरी यत्र मोदते ।
प्राणिनां निद्रिते काले कन्यके चक्रतुर्मुदम् ॥३२॥
कृष्णनारायणं लक्ष्म्या राधया सहितं वरम् ।
पार्वत्या प्रभया युक्तं श्रिया माणिक्यया युतम् ॥३३॥
पद्मावत्या च पद्मिन्या मालत्या जययाऽन्वितम् ।
मोहिन्या वृन्दया साकं तुलस्या पद्मया युतम् ॥३४॥
माल्या दुर्गया युक्तं सरस्वत्या च गंगया ।
ललितयाऽन्वितं ते श्रीकृष्णनारायणं मुदा ॥३५॥
पुपूजतुः शुभैर्द्रव्यैः प्राण्यसम्बाधके क्षणे ।
पातिव्रत्येन धर्मेण प्रकृत्या सहितं पतिम् ॥३६॥
सुगन्धश्चन्दनानां तु तत्र याति समन्ततः ।
वादित्राणां स्वरास्तत्र जायन्ते सुखदास्तदा ॥३७॥
वनदेवीभिरागत्य गीयन्ते गीतिकास्तदा ।
वृक्षा वल्ल्यस्तृणाः स्तम्बा मूर्ताश्चायान्ति पूजने ॥३८॥
फलपुष्पाण्यर्पयन्ति दुग्धानि कामधेनवः ।
देवगजाश्च धवला गरुडाः पाण्डुरास्तथा ॥३९॥
स्वर्गहंसाः स्वर्णमत्स्या मूर्ताश्चायान्ति पूजने ।
नदा नद्यः समुद्राश्च रत्नान्यायान्ति तत्र वै ॥४०॥
कम्भराख्या महालक्ष्मीगोपालकृष्ण ईश्वरः ।
आगत्य च तयोः पूजां संगृहीतो निशोत्तरे ॥४१॥
लक्ष्म्यादिविंशतिपत्नीयुक्श्रीकृष्णनरायणः ।
पूजां कन्याद्वयकृतां गृहीत्वाऽऽश्लिष्य वक्षसि ॥४२॥
रमयित्वा सुखं दत्वा दत्वा सर्वं प्रसादजम् ।
चुम्बयित्वा हरिर्नित्यमदृश्यो जायते ततः ॥४३॥
पम्पा जलमयी चान्या जरठा शबरी तदा ।
भवतीति तपस्तयोर्निर्विघ्नं जायते सदा ॥४४॥
एवं पम्पां पुष्करिणीं नूतनामृषयः खलु ।
श्रुत्वा मतंगशिष्या ये पर्वतारण्यवासिनः ॥४५॥
आसन्निवसितास्तत्र द्रष्टुं समाययुस्तदा ।
ते च पुष्करिणीं दैवीं दृष्ट्वा मुदान्वितास्ततः ॥४६॥
पम्पातीरे न्युषुः पर्णकुटीर्विधाय नैकशः ।
तेषां तपःप्रकर्तॄणां शरीरात् स्वेदबिन्दवः ॥४७॥
ये प्रपेतुर्महीं तानि बभूवुः कुसुमानि वै ।
स्वेदबिन्दुसमुत्थानि नश्यन्ति कुसुमानि न ॥४८॥
तेषां वासार्हभूमौ सा शबरी पादचारिणी ।
श्रमणी शबरी नित्यं कृष्णभक्तिपरायणा ॥४९॥
प्रतीक्षते तं समयं कदा सीता मिलिष्यति ।
कदा रामो वनं यास्यन्नौ मोक्षं प्रापयिष्यति ॥५०॥
एतस्मिन्नन्तरे रामलक्ष्मणावुपतस्थतुः ।
तौ पुष्करिण्याः पंपायास्तीरमासाद्य पश्चिमम् ॥५१॥
वनवासे रावणेन हृतां मार्गयितुं प्रियाम् ।
समागतावपश्यतां शबर्या रम्यमाश्रमम् ॥५२॥

बहुद्रुमसमाकीर्णं पम्पाशोभितविग्रहम् ।
सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥५३॥
तौ दृष्ट्वा तु तदा सिद्धा समुत्थाय कृताञ्जलिः ।
पादौ जग्राह रामस्य लक्ष्मणं प्रणनाम च ॥५४॥
पाद्यमाचमनीयं च सर्वं प्रादाद् यथाविधि ।
तामुवाच ततो रामः श्रमणीं धर्मसंस्थिताम् ॥५५॥
स्मर्यते किं ब्रह्मप्रिये राधावाक्यं तपःप्रदम् ।
रामोऽहं श्रीकृष्णनारायणोऽस्मि मोक्षदस्तव ॥५६॥
पम्पा तावत् स्वरं श्रुत्वा भूत्वा कन्या समाययौ ।
रामस्य चरणे नत्वा पतित्वाऽमुञ्चदश्रुणी ॥५७॥
रामः पप्रच्छ कुशलं स्वास्थ्यं वृत्तान्तपूर्वकम् ।
कच्चिद् वां निर्जिता विघ्नाः कच्चिद् वां वर्धते तपः ॥५८॥
कच्चिद् वां नियतः कोप आहारश्च तपोधने ।
कच्चिद् वां नियमाः प्राप्ताः कच्चिद्वां मनसः सुखम् ॥५९॥
कच्चिद्वां वृद्धशुश्रूषा सफलाऽत्र प्रवर्तते ।
रामेण पृष्टे तापस्यौ सिद्धे सिद्धाभिवन्दिते ॥६०॥
शशंसतुः शबरी वृद्धा पम्पा रामाय शोभनम् ।
अद्य प्राप्ता तपःसिद्धिस्तव संदर्शनात् प्रभो ॥६१॥
अद्य नौ सफलं जन्माऽतिथयश्चापि पूजिताः ।
अद्य नौ सफलं तप्तं स्वर्गश्च पदशाश्वतम् ॥६२॥
त्वयि नाथे समापन्ने पूजिते चाभिवन्दिते ।
सेविते भोजिते कृष्णे सर्वं प्राप्तं फलं प्रभो ॥६३॥
ववाऽऽवां चक्षुषा नाथ पूते च दिव्यतां गते ।
यास्यावो नैजगोलोकं त्वत्प्रसादात् प्रियप्रभो ॥६४॥
चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः ।
इतस्ते दिवमारूढा ह्यावाभ्यां येऽत्र सेविताः ॥६५॥
उक्ते तैश्चातिधर्मज्ञैर्महाभागवतर्षिभिः ।
आगमिष्यति रामः स पुण्यं वामिममाश्रमम् ॥६६॥
स युवाभ्यां सेवनीयः श्रीकृष्णः साऽनुजोऽतिथिः ।
तं तु दृष्ट्वा स्वकं लोकं गोलोकं यास्यथो युवाम् ॥६७॥
एवमुक्ते महाभागैस्तदाऽऽवां कान्तकेशव ।
आवाभ्यां सञ्चितं वन्यं विविधं च फलादिकम् ॥६८॥
तवाऽर्थे कमलाकान्त पंपायास्तीरसंभवम् ।
पंपया च शबर्याऽर्घ्यं समर्पितं गृहाण तत् ॥६९॥
इत्युक्त्वा ते ददतुश्च निवेश्य कुशविष्टरे ।
पादप्रक्षालनं कृत्वा तत्तोयं पापनाशनम् ॥७०॥
शिरसाऽऽधार्य पीत्वा च वन्यैः पुष्पैः पुपूजतुः ।
फलानि च सुपक्वानि मूलानि मधुराणि च ॥७१॥
स्वयमास्वाद्य माधुर्यं परीक्ष्य परिभक्ष्य च ।
पश्चान्निवेदयामास शबरी प्राणदायिने ॥७२॥
बदर्यादिप्रपक्वानि भक्षयामासतुश्च तौ ।
अथ रामः सतीं दासीं शबरीं प्राह संस्मरन् ॥७३॥
दानवाश्चात्र वै पूर्वे चक्रुर्यज्ञमहोत्सवम् ।
अद्यापि विद्यते वेदी वह्निस्तत्र प्रकाशते ॥७४॥
इत्याश्चर्यमयं स्थानं द्रष्टुमिच्छामि सुन्दरि ।
इत्युक्ता सा ययौ नीत्वा रामं दूरे वनान्तरम् ॥७५॥
शबरी दर्शयामास तावुभौ तद्वनं महत् ।
पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम् ॥७६॥
मतंगवनमेवैतद् विश्रुतं मुनिवासितम् ।
इह ते भावितात्मानो गुरवोऽत्र मम प्रिय ॥७७॥
जुहवांचक्रिरे नीडं मन्त्रवन्मन्त्रपूजितम् ।
इयं प्रत्यक्स्थली वेदी यत्र वै दानवाः सदा ॥७८॥
पुष्पोपहारं कुर्वन्ति देवताभ्यो दिने दिने ।
तेषां तपःप्रभावेण पश्याऽद्यापि जनार्दन ॥७९॥
द्योतयन्ती दिशः सर्वाः श्रिया वेद्युतुल्यप्रभा ।
अशक्नुवद्भिस्तैर्गन्तुमुपवासकृशैः सदा ॥८०॥
स्नानार्थं चिन्तिताः सप्ताऽब्धयस्तिष्ठन्ति चात्र वै ।
कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ॥८१॥
अद्यापि न विशुष्यन्ति प्रदेशेऽत्र विलोकय ।
देवकार्याणि कुर्वद्भिर्यानीमानि धृतानि वै ॥८२॥
मृदून्यपि च पुष्पाणि म्लानतां यान्ति नात्र वै ।
इत्येवं पश्यति रामस्तावत् ते तापसास्तदा ॥८३॥
दिव्यरूपधराः सर्वे दनुवंशसमुद्भवाः ।
वैष्णवास्ते मतंगस्य शिष्यास्तत्र समाययुः ॥८४॥
पतिताः पादयोस्तस्य रामस्याऽक्षालयन् पदम् ।
पीतवन्तश्च ते सर्वे मुनयः प्राग्भवे तु ते ॥८५॥
विहाय दानवीं योनिं विमानमधिरुह्य च ।
नीताश्च पार्षदैः सर्वे जग्मुर्वैकुण्ठमेव ते ॥८६॥
अथ दासी शबर्याह कान्तं कृष्णनरायणम् ।
कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ॥८७॥
तदिच्छाम्यभ्यनुज्ञाता त्यक्ष्याम्येतत्कलेवरम् ।
पम्पाऽपीच्छति गोलोकं गन्तुं पूर्णे युगे हरे ॥८८॥
क्वाऽस्ति लक्ष्मि ! स्वसनौ श्रीः लक्ष्मीर्वद कृपां कुरु ।
श्रुत्वा रुरोद रामश्च ते धैर्यं ददतुस्तदा ॥८९॥
सीतावृत्तान्तमाज्ञाय चक्रिरे चिन्तनं च ते ।
अथ स्वास्थ्यं परं प्राप्य रामेणानुग्रहेण वै ॥९०॥

धैर्यमादाय च दृष्ट्वा देहं त्याजयितुं तदा ।
पम्पा तत्र समायाता साप्ययाचत मोक्षणम् ॥९१॥
सापि रामेण तत्रैव कृपया चावलोकिता ।
उवाच शबरीं पम्पां नैष्ठिकीं वृत्तिमाश्रिताम् ॥९२॥
आजीवनं ब्रह्मचर्यव्रतस्थां श्रीहरिप्रियाम् ।
अर्चितोऽहं त्वया पम्पे शबरि गच्छ मे गृहम् ॥९३॥
तावत्तत्र समायातं विमानं कृष्णसंयुतम् ।
लक्ष्मीयुक्तं पार्षदैः सेवितं नारायणं प्रभुम् ॥९४॥
नत्वा ध्यात्वा हृदि कृत्वा पम्पा च शबरी तदा ।
अनुज्ञाता तु रामेण पादादुद्भाव्य चानलम् ॥९५॥
कृत्वा देहं भस्मसाच्च गोपी गोलोकवासिनी ।
कृष्णप्रिया यथा चासीत्पम्पा ब्रह्मप्रिया तथा ॥९६॥
ज्वलत्पावकसंकाशे राधालक्ष्मीसमे शुभे ।
भूत्वा तु कन्यके दिव्ये कृष्णपार्श्वे निषेदतुः ॥९७॥
दिव्याभरणसंयुक्ते दिव्यमालानुलेपने ।
दिव्याम्बरधरे तत्र बभूवतुः सुदर्शने ॥९८॥
विराजयन्त्यौ कृष्णस्य पार्श्वे विद्युल्लते यथा ।
ययतुर्नित्यगोलोकं कान्तयानेन ते शुभे ॥९९॥
इति ते कथितं लक्ष्मि ! ब्रह्मप्रियाचरित्रकम् ।
श्रुत्वा पठित्वा यायाद्वै गोलोकं प्रमदा नरः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये गोलोकाद् ब्रह्मप्रियापम्पयोः राधिकारोषादवतरणं रामचन्द्रयोगेन शबरीपम्पयोः पुनर्गोलोकप्राप्तिः पातिव्रत्यं चेतिनिरूपणनामा द्वाविंशत्यधिकचतुश्शततमोऽध्यायः ॥४२२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां चान्यां पातिव्रत्यपरायणाम् ।
गोलोकस्य कृष्णदास्याश्चित्रलेखात्वदायिनीम् ॥ १ ॥
पुराऽहमृषभो जातोऽवतारः साधुतां चरन् ।
गार्हस्थ्यं च परित्यज्य भरते स्वात्मजे धुरम् ॥ २ ॥
न्यस्याऽवधूततां गच्छन् वृषं पारमहंस्यकम् ।
समस्थापयदुर्व्यां चाऽऽययौ वैकुण्ठमेव तु ॥ ३ ॥
भरतस्याऽभवत्पुत्रः शतशृंगः प्रतापवान् ।
तस्य पुत्राष्टकं चैका पुत्री चेति नवाऽभवन् ॥ ४ ॥
इन्द्रद्वीपः कसेरुश्च ताम्रद्वीपो गभस्तिमान् ।
नागः सौम्यश्च गन्धर्वो वरुणश्च कुमारिका ॥ ५ ॥
कुमारिकाऽभवद् दासी गोलोके शाश्वती सखी ।
नाम्ना सा चित्रलेखेति राधाक्रोधाज्जनिं गता ॥ ६ ॥
कुमारिकाऽत्र नाम्नैवाऽभवत् ख्याता हरिव्रता ।
जातिस्मरा जातमात्रा युवती ब्रह्मवादिनी ॥ ७ ॥
स्नानसन्ध्यापरा वेदप्रसूजपा त्रिवर्षकम् ।
शालग्रामाऽर्हणाश्रद्धावती नित्यं प्रसेवते ॥ ८ ॥
वैष्णवी तुलसी मालां रक्षति स्म गले सदा ।
करे वृन्दामालिकया जपति स्म हरिं पतिम् ॥ ९ ॥
शयने जाग्रतौ कार्ये विश्रामे भोजनेऽर्जने ।
पाने वस्त्वानयने च स्नाने शृंगारके तनौ ॥१०॥
जपे प्रसाधने विलेपने प्रक्षालनेऽर्थने ।
रन्धने मज्जने शुद्धावालस्ये वादने स्तुतौ ॥११॥
श्रवणे कीर्तने काष्ठसञ्चये मुदमानसे ।
रागे विलोकने वृत्तौ संचारे क्रमणे क्षुधि ॥१२॥
पिपासायां ज्वरे ग्रीष्मे शीते समुत्सवे वने ।
वृक्षे वल्ल्यां भवनादौ सखीनां मण्डले गृहे ॥१३॥
स्वामिनं श्रीकृष्णनारायणं जपति ध्यायति ।
हसति नृत्यति रौति द्रवत्यश्रूणि मुञ्चति ॥१४॥
प्राप्नोति दिव्यभावं च व्योम्ना याति वनान्तरम् ।
गृहान्तरं कृष्णमनुप्रविशत्यहतक्रमा ॥१५॥
अन्नं वारि फलं पत्रं पुष्पं बीजं द्रवं पयः ।
मिष्टं रूक्षं वस्त्रमर्घ्यं धूपं दीपं समर्हणम् ॥१६॥
प्रदाय पतये कृष्णनारायणाय कन्यका ।
भुंक्ते प्रासादिकं कृत्वा तदन्यद्भोगवर्जिता ॥१७॥
कृष्णनारायणो दत्तं भुंक्ते साक्षाद्धि कन्यया ।
रमते तु तया सार्धं क्षणं द्यूतं मनोहरम् ॥१८॥
एवं नित्यं कृष्णपातिव्रत्यपरा कुमारिका ।
समाराधयति कृष्णनारायणं पतिं प्रभुम् ॥१९॥
तस्यास्तु वदनं चासीदजामुखसमाकृति ।
शृणु तत्कारणं लक्ष्मि ! गोलोके राधिका यदा ॥२०॥
रोषं प्राप्ता तदा चित्रलेखया लम्बितं मुखम् ।
ओष्ठौ लम्बौ कृतौ चापि जिह्वा बाह्ये विलम्बिता ॥२१॥
विकृताननमेवेदं राधायै दर्शितं तदा ।
विकृतानुकरणस्थं दृष्ट्वा चित्रलिखाऽऽननम् ॥२२॥
राधाऽऽह तां बर्करिकामुखी लम्बाननी भव ।
दर्शयसे मुखं चापि स्वभावं बर्करी यथा ॥२३॥
तस्मात् त्वं बर्करी भूत्वा विहर क्षितिमण्डले ।
इत्युक्ता सा सखी राधासेविकाऽऽह नयान्विता ॥२४॥

सेवाफलं महतीनां दास्या प्राप्यं महद् भवेत् ।
यदि राधेऽसि महती राजराजेश्वरीश्वरी ॥२५॥
प्रयच्छ च तदा स्वानुरूपं फलं महत्तमम् ।
यद्यसि क्षुद्रिके यच्छ किंकर्यै क्षुद्रकं फलम् ॥२६॥
पारितोषिकवस्त्वादि दातुः श्रैष्ठ्यकनिष्ठते ।
प्रख्यापयति लोकेषु स्वानुरूपं प्रदानकम् ॥२७॥
राधा श्रुत्वा महाराज्ञी प्रसन्नाऽभूत् प्रहस्य च ।
चित्रलेखां तदा प्राह भव राजेश्वरी भुवि ॥२८॥
क्षणं बर्करिका भूत्वा कृष्णर्षभस्य पुत्रिका ।
भव त्वं भूभृती वत्से ह्यत्राऽगमिष्यति क्षणात् ॥२९॥
इत्युक्ता सा चित्रलेखा महीसागरसंगमे ।
अवाततार वै व्योम्नो मार्गाद् दिव्या तु कन्यका ॥३०॥
तां दृष्ट्वा सागरः शुभ्रां चुक्षुभे मानसे क्षणम् ।
युवा रत्नधरो भूत्वा त्वाययौ संगमेच्छया ॥३१॥
तावत् सा कन्यकाऽरण्येऽदृश्या बभूव बर्करी ।
समुद्रस्तां महासिद्धिं देवीं चाप्सरसं च वा ॥३२॥
वितर्क्यं शान्तमनसा प्रष्टुं पृष्ठे ययौ यदा ।
तदा सा भयमापन्ना विदुद्राव वनान्तरे ॥३३॥
जालिगुल्मलताकीर्णे स्तम्भतीर्थस्य सन्निधौ ।
भ्रान्ता विक्लवचित्ता सा प्रदेशे तत्र दुश्चरे ॥३४॥
इतस्ततो भ्रममाणा क्षुत्पिपासाऽर्दिता सती ।
विदुद्राव महीतीरे तदाभिमुखतः प्रिये ॥३५॥
जलस्य दशहस्ताद्यायतं खातं समागतम् ।
उल्लंघ्योत्प्लुत्य च यावत्पतत्यग्रे सुतीरके ॥३६॥
जालिवृक्षप्रशाखादिमण्डिते तत्तटे तु सा ।
पतिता जालिकाष्ठानां मध्ये गुप्तिसमीहया ॥३७॥
किन्तु तस्याः शिरस्तत्र शाखापाशवशं गतम् ।
पृष्ठतोऽपि भयं तस्या गलस्यापि भयं ह्यभूत् ॥३८॥
क्षुत्पिपासाभयं चापि संभोगभयमित्यपि ।
मूलदेशप्रपातस्य भयं पञ्चभयैर्हि सा ॥३९॥
मृता क्षणेन तत्रैव शरीरं पतितं जले ।
मस्तकं जालिशाखायां वितस्तिमात्रमूर्ध्वके ॥४०॥
तीरे चालम्बते तत्र न निमग्नं जलान्तरे ।
मस्तकं जलहीनं तु देहो महीजलान्तरे ॥४१॥
इति तीर्थप्रभावेण शरीरेण तु कन्यका ।
मानुषी सुन्दरी जाता मस्तकं बर्करीसमम् ॥४२॥
शतशृंगस्य वै राज्ञः सिंहलेष्वभवत् सुता ।
एवं सा बर्करीमुखी व्यजायत हरिप्रिया ॥४३॥

दिव्यनारी शुभाकारा शेषकायं बभौ शुभम् ।
ज्येष्ठा राज्ञोऽप्यपुत्रस्य स्निग्धा पुत्रशतोपमा ॥४४॥
पुत्री जाता प्रमोदेन स्वजनानन्दवर्धिनी ।
तां बर्करीमुखीं दृष्ट्वा राजानो विस्मयं ययुः ॥४५॥
विषादं परमापन्नो राजा स्वान्तःपुरान्वितः ।
खिन्नाः प्रजास्तथा लोका ये ये पश्यन्ति तां सतीम् ॥४६॥
तत् किमित्येतदाश्चर्यमूचुः सर्वत्र मानवाः ।
किन्तु सा दिव्यरूपाऽऽसीत् चन्द्राधिकप्रभावती ॥४७॥
अजामुखीं महामायां ज्ञात्वा पुपूजुरादरात् ।
अजामेकां रक्तशुक्लकृष्णां मूलस्वरूपिणीम् ॥४८॥
हरेः शक्तिं प्रकृतिं तां ज्ञात्वा पुपूजुरादरात् ।
अजोऽप्येनां कामभावे ह्यलब्ध्वा निवृत्तोऽभवत् ॥४९॥
ततः सा जातमात्रा च युवती वेदबोधिनी ।
यथा सरस्वती देवी तथाऽभूज्ज्ञानसत्त्वभिः ॥५०॥
स्वमुखं दर्पणे दृष्ट्वा स्मरति नित्यमेव सा ।
तीर्थं महीनदीरूपं महासागरसंगतम् ॥५१॥
गोलोकस्थं स्वकीयं च चित्रलेखास्वरूपकम् ।
मात्रे पित्रे प्रजाभ्यश्च प्राह सा ज्ञानगर्भिणी ॥५२॥
मा याताऽऽश्चर्यमेवाऽत्र पूर्वजन्मार्जिते फले ।
ममास्ति मस्तकं महीनद्यां जालिद्रुमान्तरे ॥५३॥
तदस्ति निपतेन्मह्यां मुखं मे मानवं भवेत् ।
इत्युक्त्वा सा तमुद्देशं प्रति यानाय निश्चिता ॥५४॥
पित्रा दत्ताः सेवकाश्च पोतानि भोज्यकानि च ।
रत्नानि दासिका द्रव्यं दानार्थे विविधं तदा ॥५५॥
स्तम्भतीर्थे ततः साऽपि प्राप्य पोतार्थसंयुता ।
भूरि दानं तत्र चक्रे दानं सर्वस्वदक्षिणम् ॥५६॥
जालिगुल्मान्तरेऽन्विष्य कपालं शिरसोऽस्थि यत् ।
दग्ध्वा संगमसान्निध्ये चिक्षेपाऽस्थ्यादि तीर्थके ॥५७॥
तेन तीर्थप्रभावेण पूर्णसामर्थ्यतेजसा ।
तेजःपरिधिसंव्याप्तं मुखं जातं हि मानवम् ॥५८॥
न तादृग्देवकन्यानां न तादृङ्नागयोषिताम् ।
न तादृङ्मर्त्यनारीणां सस्या यादृङ्मुखं शुभम् ॥५९॥
सुरासुरनराद्याश्च तस्या रूपेण मोहिताः ।
बहुधा प्रार्थयन्त्येनं न सा वरमभीप्सति ॥६०॥
श्रेष्ठं तपस्तया तत्राऽऽरब्धं चान्यप्रदुष्करम् ।
कृष्णनारायणो नाथः पूर्णे जाते हि वत्सरे ॥६१॥
प्रत्यक्षतां गतस्तस्या वरदोऽस्मीति चाऽब्रवीत् ।
तं च पूर्वपतिं पूजयित्वाऽऽह कन्यका सती ॥६२॥

परितुष्टोऽसि हे नाथ यदि देयो वरो मम ।
सान्निध्यं चर मे नाथ ततो गोलोकमाहर ॥६३॥
एवमस्त्विति कृष्णेन प्रोक्ता दृष्टा कुमारिका ।
ततः कृष्णं पूजयित्वा कुमार्याह जनार्दनम् ॥६४॥
तीर्थे त्वत्रास्तु वै स्वस्तिकरं गंगाजलात्मकम् ।
अत्र मृतानां दाहश्च बर्करीश्वरसन्निधौ ॥६५॥
प्रजायते ततस्तेषां मुक्तिर्भवतु माधव ।
स्नात्वाऽर्णवमहीतोये मुक्तिं यातु जनो हरे ॥६६॥
तथास्त्विति हरिः प्राह ययौ चाद्दश्यतां पुनः ।
अथाश्चर्यं परं श्रुत्वा पातालात्स्वस्तिकाऽभिधः ॥६७॥
नागराजो बिलात्तत्र दर्शनार्थं समागतः ।
स च कूपः स्वस्तिकाख्यस्तीर्थं ख्यातिं तदाऽगमत् ॥६८॥
नागेन तु बर्करीशं लिङ्गं संस्थापितं तथा ।
स्वस्तिकेश्वरसंज्ञं च लिंगं संस्थापितं शुभम् ॥६९॥
तया तु कन्यया तत्र कारयित्वा सुमन्दिरम् ।
अजाविष्णुः स्थापितो वै भगवान् स्वपतिः स्वयम् ॥७०॥
सेवायां वर्तते मूर्त्या कृष्णनारायणस्य सा ।
कार्तिके तु चतुर्दश्यां यः स्नायात् तत्र कूपके ॥७१॥
तर्पयेत्पूर्वजांश्चैव स तारयति विंशतिम् ।
एवं सा कन्यका दिव्या तीर्थं कृत्वा ययौ गृहम् ॥७२॥
सिंहले शतशृंगाय पित्रे सर्वं न्यवेदयत् ।
श्रुत्वा प्रजायुतो राजा तीर्थार्थं तत्र चाययौ ॥७३॥
ददौ दानानि पुत्र्याश्च मन्दिरे जीविका ददौ ।
पुत्र्या ख्यातिं गतो राजा धन्यो यस्य सुता सती ॥७४॥
अथ स्वनगरं गत्वा समुत्सवं चकार सः ।
अनिच्छन्त्यां कुमार्यां च वरं द्रव्यं च पद्मजे ॥७५॥
पिताऽजनाभखण्डं स्व नवधैव विभज्य सः ।
ददावष्टौ स्वपुत्राणामजायै नवमं ददौ ॥७६॥
कन्याकुमारिकाखण्डो दक्षिणे राज्यमेव यत् ।
चकाराऽजा महासाध्वी कुमारिका हरिव्रता ॥७७॥
कुमारी सा महाभागा स्तम्भतीर्थे महीतटे ।
वर्तते दिव्यरूपेण राज्येऽपि वर्तते सदा ॥७८॥
नवखण्डस्थाऽऽजनाभे षण्णवतिप्रकोटयः ।
द्वासप्ततिस्तथा लक्षाः पत्तनानां भवन्ति वै ॥७९॥
एवं सा संविधायैव कुमारिक्षेत्रमुत्तमम् ।
तद्रक्षकं महाकालं विधाप्य च सती ततः ॥८०॥
बदरिकाश्रमं याता तपस्तप्तुं हरेर्गृहे ।
चित्रलेखा तापसी साऽभवद्बदरिकाश्रमे ॥८१॥
अहं वृन्दावने कृष्णो भविष्यामि यदा रमे ! ।
तदाऽनिरुद्धो मत्पुत्रस्तूषायाः पतिरुत्तमः ॥८२॥
यया चित्रे लेखयित्वा स्वाप्नदृश्यो भविष्यति ।
सा ततः पञ्चसाहस्रे वर्षाणां विगते भुवि ॥८३॥
कृष्णनारायणपत्नी सौराष्ट्रे संभविष्यति ।
श्रीतुल्याऽदृश्यरूपेण सेवयित्वा हरिं पतिम् ८४॥
यास्यति श्रीकृष्णनारायणगोलोकमेव सा ।
इति ते कथिता लक्ष्मि ! दिव्या चित्रलिखा सती ॥८५॥
पठनाच्छ्रवणाच्चास्य कन्यातीर्थफलं लभेत् ।
धनकन्यासुतदारसम्पद्वान् स्यान्न संशयः ॥८६॥
अदृश्या दृश्यतां प्राप्ता चित्रलेखा तु मञ्जुला ।
स्मर्यते मुक्तिदा सापि येन कृष्णसमा प्रिया ॥८७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गोलोकाद् ऋषभवंशे चित्रलेखादास्याः प्राविर्भावः, तत्र-बर्कररूपसमुद्रमोहोबर्करीमुखता, महीसागरसंगमे तीर्थे चमत्कारादिप्रदर्शनं कुमारिकाखण्डादिप्रसिद्धिः, तस्या मञ्जुलारूपायाः श्रीकृष्णनारायणप्राप्तिश्चे-त्यादिनिरूपणनामा त्रयोविंशत्यधिकचतुश्शत-तमोऽध्यायः ॥४२३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! रेवताद्रेश्छायायां वसतः पुरा ।
भिक्षुनामकविप्रस्य कलहायास्तु योषितः ॥ १ ॥
कथां पतिविरोधिन्याः स्वामिमाहात्म्यबोधिनीम् ।
करवीरपुरे ह्यासीद् धर्मदत्ताख्यभूसुरः ॥ २ ॥
स्नानसन्ध्यातपोहोमस्वाध्यायजपतत्परः ।
महाभागवतो नित्यं सेवते स सतो जनान् ॥ ३ ॥
ग्रामस्थान् वै जनान् सर्वान् संगृह्य भूमिसत्तले ।
नामसंकीर्तनं नित्यं करोति गीतिपूर्वकम् ॥ ४ ॥
नृत्यं करोति कृष्णस्य सन्निधौ वक्ति सत्कथाम् ।
उत्सवांश्च बहून् भक्तियुक्तान् करोति भावतः ॥ ५ ॥
व्रताद्यादौ विशेषेण कारयत्येव श्रेष्ठिभिः ।
अतिथीन् स्वागतैः सन्तोषयत्यहर्निशं द्विजः ॥ ६ ॥
कृष्णनारायणं मालामणिभिर्जपमाचरत् ।
'ओं नमः श्रीकृष्णनारायणाय ओं' जपन् सदा ॥ ७ ॥
याति नारायणपूजाकरणार्थं च मन्दिरम् ।
ब्राह्मे मुहूर्ते नद्यां सुस्नातेन वस्त्रं गृह्णता ॥ ८ ॥

मन्दिरं व्रजता मार्गे दृष्टा तेन हि राक्षसी।
भीषणा क्षुधिता क्रूरा बहिर्दंष्ट्रा दिगम्बरा ॥ ९ ॥
कृष्णाद्रिसदृशी स्थूला ललज्जिह्वा सखर्परा।
खादयामि भक्षयामि वदन्ती घर्घरस्वरा ॥१०॥
अतिवेगादुत्पतन्ती ग्रहीतुं लम्बदुष्करा।
धर्मदत्तोऽपि तां दृष्ट्वा त्रस्तः क्रोशन् प्रधावितः ॥११॥
सापि पृष्ठे प्रदुद्राव धर्तुं भक्षितुमुल्बणा।
यावत्सा निकटं प्राप्ता धर्मदत्तस्तु विह्वलः ॥१२॥
प्राणरक्षापरस्तस्या दूरीकरणहेतवे।
हरे नारायण कृष्ण रक्ष गोविन्द माधव ॥१३॥
श्रीपते माणिकीस्वामिन् रमानाथ प्रभापते!।
लक्ष्मीराधापते पार्वतीपते कमलापते ॥१४॥
जयादयारमाचम्पापते मुक्तापतेऽव माम्।
मञ्जुलाललितादेवीशान्तिहंसेश रक्ष माम् ॥१५॥
ओंश्रीकृष्णनारायणसुदर्शनाऽत्र मामव।
इतिगृणन् निचिक्षेप तुलसीदलयुग्जलम् ॥१६॥
राक्षस्यां श्रीकृष्णनारायण पूजनवस्तु च।
कृष्णनारायणस्वामिन् रक्ष रक्षेति संवदन् ॥१७॥
यदि स्पृशसि मां विप्रं रामस्य शपथोऽस्तु ते।
यदि स्पृशसि मां क्षुद्रे चण्डिकाशपथोऽस्तु ते ॥१८॥
यदि स्पृशसि मां नग्ने योगिनीशपथोऽस्तु ते।
यदि स्पृशसि मां रण्डे दुर्गायाः शपथोऽस्तु ते ॥१९॥
यदि स्पृशसि मां कृत्ये रुद्रस्य शपथोऽस्तु ते।
यदि स्पृशसि मां कृष्णे कृष्णस्य शपथोऽस्तु ते ॥२०॥
यदि स्पृशसि मां रात्रे मायायाः शपथोऽस्तु ते।
यदि स्पृशसि मां दुष्टे कालस्य शपथोऽस्तु ते ॥२१॥
एवं वदन् स पाषाणैः कृष्णनाम्नाऽहनद् रुषा।
पूजातुलसीपत्रैश्च जलैः पापानि चाऽदहत् ॥२२॥
मतिं प्राप्य शुभां पूर्वकृतं संस्मृत्य पातकम्।
पापजालानि संस्मृत्य धर्मदत्ताय चाह सा ॥२३॥
पूर्वजन्मनि सौराष्ट्रे रैवताचलसन्निधौ।
भद्रातटेऽवसद् भिक्षुनामा विप्रस्तु वैष्णवः ॥२४॥
तस्य भार्या निष्ठुराऽहमासं विरुद्धवर्तना।
किंशीला किंजल्पना किंवितण्डिकाऽतिकष्टदा ॥२५॥
कलिर्मे हृदये चास्ते गाली जिह्वाग्रनर्तिनी।
क्रौर्यं च नेत्रयोः शश्वत्तामसीत्वं च मानसे ॥२६॥
चण्डभावो ललाटे मे महारुट् नासिकातटे।
तिरस्कारश्चौष्ठयोर्मे वाण्यां तु कलहः स्थितः ॥२७॥
श्वासे त्वनिष्टतावासश्चोद्वेगः कर्मणि स्थितः।
लज्जा पृष्ठे कृता नित्यं ह्यग्रे निर्लज्जता धृता ॥२८॥
अवमानं ताडनं च मम हस्ततले स्थितम्।
एवं नित्यं वर्तमाना निवसामि द्विजगृहे ॥२९॥
सौराष्ट्रे सर्वतो देशे यत्र यत्र गृहे क्वचित्।
विवादो दम्पतीमध्ये जायते चेत् तदा मम ॥३०॥
स्मर्यते नाम गृहिणा– कलहा काऽऽगताऽत्र फट्।
एवं नाम्ना प्रसिद्धाऽहं पतिक्लेशकरी सदा ॥३१॥
मन्नाम स्मर्यते प्रातर्भोजनं नाऽऽप्यते तदा।
एवं पापमयी चाऽहं भिक्षुभार्याऽभवं पुरा ॥३२॥
कारयामि स्वपतिना मम पादावमर्दनम्।
वस्त्रप्रक्षालनं चापि गृहमार्जनमित्यपि ॥३३॥
भाण्डमञ्जनमेवापि कारयामि च भिक्षुणा।
एवंविधा महापापपुञ्जात्मिकाऽभवँस्तदा ॥३४॥
न ददामि स्वपतये भोजनं सुखदं जलम्।
यदर्थयति तस्मात्तु विपरीतं ददामि वै ॥३५॥
तदपि गालिकायुक्तं नष्टं भ्रष्टं ददामि च।
खाद रसफलं नार्या इत्येवं जल्पयामि च ॥३६॥
नित्यं चोद्वेजितः कान्तो मधुरं चापि नाऽवदम्।
शुभं किञ्चित् कृतं नैव मत्तो वेश्याऽपि सौख्यदा ॥३७॥
पुंश्चली चापि सन्तोषप्रदा न कलहा क्वचित्।
इतिदुष्टाऽभवं विप्र मत्तः कृत्याऽपि सौख्यदा ॥३८॥
उपपत्न्यपि सुखदा नाऽहं तथा विवाहिता।
इत्यतिदुःखितो भिक्षुर्गतो वनं तु रैवतम् ॥३९॥
अहं क्रुद्धा दुःखदात्री तत्राऽगच्छं वनस्थले।
शिखायां तं दृढं धृत्वाऽऽनीतवती गृहं निजम् ॥४०॥
कामातुरा कामस्वार्था पाशवीं च क्रियां श्रिता।
तदाऽपि न द्विजो मां वै हन्ति ताडयति क्वचित् ॥४१॥
अथ क्वचिद् दयायुक्ता रोदिमि कलहोत्तरम्।
एकदा तु मया विप्राद् याचितं जलपानकम् ॥४२॥
पर्यंके दिवसे व्यर्थं शयानयाऽतिक्रुद्धया।
तेन दत्तं जलं मह्यं करोष्णं गर्गरीस्थितम् ॥४३॥
मृत्पात्रं तु ह्यभूद् रिक्तं शीतं जलं न विद्यते।
तदा तु क्रुद्धया धृत्वोत्थाय मूशलमेव ह ॥४४॥
ताडितश्च महाशब्दः प्रश्रुतः पार्श्ववासिभिः।
आगतास्तेऽवदन् विप्रं निष्कासय गृहादिमाम् ॥४५॥
कुरु त्वन्यां सुपत्नीं च भिक्षो कृत्यां परित्यज।
दास्यामो द्रव्यमेवाऽपि सुखी संभव भूसुर ॥४६॥

विप्रोऽपि निश्चयं कृत्वा परिणेतुं गतोऽन्यतः ।
द्वितीयां कन्यकां पूर्वं तदर्थं वचनेऽर्थिताम् ॥४७॥
ततो मया विषं भुक्तं प्राणास्त्यक्तास्तदैव तु ।
यमदूतैः पाशबद्धा नीता यमालयं प्रति ॥४८॥
बहुकष्टं ताडनेन वाग्बाणेनाऽध्वनि तदा ।
अनुभूतं मया वह्निवालुकागमनोद्भवम् ॥४९॥
क्षुत्तृषासहनं देहत्रोटनं मूर्छनादिकम् ।
एवं यमालयं प्राप्ता वध्यमाना पुनः पुनः ॥५०॥
विलोक्य धर्मराजो मां पप्रच्छ चित्रगुप्तकम् ।
अस्याः पापं चास्ति कीदृक् पश्य कर्म शुभाशुभम् ॥५१॥
कर्मफलं महादुष्टं दृश्यतेऽस्या विलोकने ।
चित्रगुप्तस्तदा शीघ्रं दृष्ट्वा कर्माऽतिदारुणम् ॥५२॥
रण्डे कृत्ये महादुष्टे पापे सम्बोध्य चाह सः ।
पापया दुष्टयाऽनया नैव किञ्चिच्छुभं कृतम् ॥५३॥
गालीदानं ताडनं च कृतं भर्तरि सर्वदा ।
न तु मिष्टं भोजितं वै भुंजानयाऽनया क्वचित् ॥५४॥
काकी भवतु विष्ठादा तेन पापेन सा पुनः ।
वल्गुली भवतु स्वस्यां विष्ठादाऽधोमुखी सदा ॥५५॥
ताडितस्तु पतिस्तेन पापेन गर्दभी तथा ।
पाकभाण्डे भोजिका विष्ठादा भवतु सूकरी ॥५६॥
सदा पत्युर्द्वेषकरी बिडाली चास्तु वै ततः ।
आत्मघातः कृतस्तस्मात् प्रेताऽस्तु मरुभूमिगा ॥५७॥
ततः पिशाची भूत्वा च बहुपिशाचकामिनी ।
भवत्वतः परं दुष्टा राक्षसी पापकारिणी ॥५८॥
एवं न्यायं परं श्रुत्वा यमराजस्तु कर्मभिः ।
योजयित्वा च मां तत्तज्जन्म प्रदत्तवान् मुहुः ॥५९॥
तत्सर्वं पारयित्वाऽहं राक्षसी दुःखिताऽभवम् ।
नास्ति मे कर्मनिस्तारो जायते पापकं पुनः ॥६०॥
नित्यं पापेन संलिप्ता भवामि राक्षसी वने ।
भक्षयामि पशून् पक्षिवर्यांश्च मानवान् वने ॥६१॥
किं करोमि क्व गच्छामि नान्तोऽस्ति मम कर्मणाम् ।
इति शोकान्विता क्षुधातृषाभ्यां चातिपीडिता ॥६२॥
ववल्गेऽहं वणिजं वै तच्छरीरे विवेश ह ।
तेन सह समायाता देशं वै दक्षिणं शुभम् ॥६३॥
वणिक् स तु पपौ वारि कृष्णावेण्योस्तु संगमे ।
संस्थितस्तत्र वै श्रान्तस्तावद् देवास्तटस्थिताः ॥६४॥
अताडयन् मुहुर्मां ते दूरं चाहं पलायिता ।
क्षुत्तड्युक्ता मार्गयामि पात्रं वणिक्समं पुनः ॥६५॥
तावद् दृष्टोऽसि पुष्टोऽसि क्षुन्निवृत्तिर्भवेन्मम ।
इत्यर्थं सत्वरं धर्तुं समागताऽस्मि हर्षिता ॥६६॥
तावत् त्वया श्रावितं वै हरेर्नामातिपावनम् ।
सिञ्चितं वारि तुलसीदलयुक्तं सुतीर्थजम् ॥६७॥
त्वादृशभक्तवर्यस्य दर्शनं पावनं मम ।
त्वत्पादपद्मरजसा पाविता च विशेषतः ॥६८॥
मेऽपि कर्माणि सर्वाणि मन्येऽन्तं प्रगतानि वै ।
पापं सर्वं गतं नाशं पुण्यं मे वर्धतेऽधुना ॥६९॥
शान्तिर्मे हृदये जाता तृप्तिश्च जलसेचनात् ।
भ्रान्तिः सर्वः प्रमादश्च वह्निरान्तरजो गताः ॥७०॥
पतिदुःखप्रदं पापं तीर्थेऽत्र जडचेतने ।
नष्टं मन्ये तव योगात् कुरु मे मोक्षणं द्विज ॥७१॥
याऽहं साऽहं किंकरी वा चाण्डाली श्वपची च वा ।
दुष्टा रण्डा निकृष्टा च कृपापात्रं तवास्मि वै ॥७२॥
कृपया तीर्थते जन्तुनाऽत्र पापं भयंकरम् ।
सतां कृपा परं पुण्यं तन्मूलं सर्वसुकृतम् ॥७३॥
सतां कृपां विना त्वन्यत् सुकृतं तत्तु दुष्कृतम् ।
कृपा पुण्यं कृपा मोक्षः कृपा स्वर्गं सुखं धनम् ॥७४॥
सतां कृपा पतिसेवा बहुपुण्येन लभ्यते ।
यस्या नास्ति कान्तसेवा सन्तः सेव्याः सदा तया ॥७५॥
यस्याः सेवा सतां नास्ति तया सर्वं विनाशितम् ।
स्वामी सेव्यः पतिः सेव्यः परमेश्वर एव सः ॥७६॥
अन्ततः प्रार्थनीयः क्षमापनीयः पुनः पुनः ।
पतिरेव परंब्रह्म शाश्वतं पुण्यमेव सः ॥७७॥
पतिः प्राणप्रदः पुत्रप्रदो लोकप्रदः सदा ।
स्वर्गदः सुखदश्चानन्दस्य प्रदः पतिर्हरिः ॥७८॥
दुःखं हरति नार्याश्च स्वयं सहते तत्स्थले ।
कष्टानि देहजातानि पुण्यं त्वर्धं ददाति च ॥७९॥
स्वार्जितं च धनं पुण्यं बलं बीजं ददाति च ।
कोऽन्यस्तस्मात्परो बोध्यः संसारे परमेश्वरः ॥८०॥
पतिरेव हि नारीणां परमं दैवतं ततः ।
पतिः सेव्यः पतिः पूज्यः पतिः प्राप्यस्तपोऽधिकैः ॥८१॥
अन्यथा राक्षसीभावो नारीणां स्यादिति स्थितिः ।
इत्युक्त्वाऽऽह पुनः कृत्या यथोद्धारो भवेन्मम ॥८२॥
अवशिष्टप्रपापानां विनाशोऽपि तथा भवेत् ।
तथा ब्रह्मन् कुरु मोक्षं कल्याणं ते भविष्यति ॥८३॥
अनाथायाः समुद्धर्तुः समुद्धारो भविष्यति ।
इत्युक्तो धर्मदत्तः स दयावान् प्रह्वमानसः ॥८४॥

प्रोवाच चिन्तयित्वा वै कलहायै सुखप्रदम् ।
शृणु रम्ये व्रततीर्थदानैः पापालयो भवेत् ॥८५॥
प्रारब्धस्य सञ्चितानां सुकृतैर्विलयो भवेत् ।
त्वं चाऽसि राक्षसी प्रेता दीनादौ नाऽधिकारिणी ॥८६॥
प्रेतस्य नाऽधिकारोऽस्ति तीर्थदानव्रतादिषु ।
नैवाऽन्यै क्षीयते कर्म रक्षःप्रेतत्वसंप्रदम् ॥८७॥
किन्तु हरेः पातिव्रत्यपरं व्रतं कृतं मया ।
कार्तिकस्य जन्मतो वै तदर्धं ते ददाम्यहम् ॥८८॥
हरेः पातिव्रत्यपुण्यं त्वपातिव्रत्यपापहम् ।
इत्युक्त्वा जलमादाय धर्मदत्तस्तु वैष्णवः ॥८९॥
तुलसीजलमिश्रं तत् तस्या उपरि चाक्षिपत् ।
ओं नमः श्रीकृष्णनारायणाय ओमिति ब्रुवन् ॥९०॥
तावत् सा पुण्यमादाय प्रेतत्वरहिता ह्यभूत् ।
कन्या दिव्या द्वादशाब्दा सर्वसौन्दर्यशोभिता ॥९१॥
वह्निवस्त्रा चन्द्रसमा कान्त्या शान्त्या विराजिता ।
भूत्वा ननाम विप्रं च समुवाच प्रहर्षिता ॥९२॥
तव विप्रकृपालेशात् प्रसादिता च संस्कृता ।
तारिता च त्वया क्लेशाद्गच्छामि भगवत्पदम् ॥९३॥
इत्युक्तौ जायमानायां विमानं दिव्यमागतम् ।
पार्षदद्वयसंराजत्पार्षदाणीगणान्वितम् ॥९४॥
पार्षदाभ्यां समाहूता कन्याऽऽरुरोह सत्वरम् ।
धर्मदत्तेन तौ कृष्णपार्षदौ वन्दितौ तदा ॥९५॥
पृष्टौ काविति प्रत्युक्तिं श्रेष्ठस्तं प्रजगाद ह ।
पुण्यशीलः सुशीलेनानुमतः प्राग्भवादिकम् ॥९६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सौराष्ट्रे भिक्षुपत्न्याः कलहाया अपातिव्रत्यपापेन वल्गुलीगर्दभीसूकरीबिडालीप्रेताराक्षसीत्वं धर्मदत्त-विप्रद्वारा नामजपतुलसीजलादिना च पापनाशे मोक्षश्चेत्यादिनिरूपणनामा चतुर्विंशत्यधिकचतुश्शततमोऽध्यायः ॥ ४२४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पुण्यशीलो द्वयोर्वृत्तान्तमाह यम् ।
विष्णुपातिव्रत्यपरं पार्षदत्वप्रदं शुभम् ॥ १ ॥
विमानस्थो विष्णुसेवापरः पार्षदपुंगवः ।
पुण्यशीलोऽस्म्यहं विप्र ! सुशीलोऽयं द्वितीयकः ॥ २ ॥
त्वया युक्तं कृतं विप्र तारितेयं सुपुण्यतः ।
अस्या जन्मान्तरशतोद्भवं पापं लयं गतम् ॥ ३ ॥
वैकुण्ठं नीयते सा च विष्णुदासी भविष्यति ।
त्वं च कार्तिकव्रतवान् भार्याभ्यां सह भूसुर ! ॥ ४ ॥
कालान्तरे हरेर्धाम प्रयास्यसि सुपुण्यतः ।
हरिव्रतं सदा भक्तकृतं पतिव्रताव्रतम् ॥ ५ ॥
भवत्येव न सन्देहः पुण्यदं मोक्षदं व्रतम् ।
बहून्यब्दसहस्राणि पुण्यं भुक्त्वाऽत्र भूतले ॥ ६ ॥
सूर्यवंशोद्भवो राजा दशरथो भविष्यसि ।
भार्याभ्यां सहितश्चैव ये स्तो विवाहिते तव ॥ ७ ॥
इयं तृतीया कलहा तव पुण्यार्धभागिनी ।
पत्नी भविता च तदा विष्णुर्यास्यति ते गृहम् ॥ ८ ॥
देवकार्यकरो भूत्वा प्रयास्यति स्वकं पदम् ।
कृष्णनारायणः सोऽयं रामनामा भविष्यति ॥ ९ ॥
ये तु रामस्य शरणं यास्यन्ति भूतले जनाः ।
तेऽपि मुक्तिं प्रयास्यन्ति वासुदेवप्रतापतः ॥१०॥
भावना प्रेम भक्तिश्च स्नेहश्चाऽऽर्द्रत्वमित्यपि ।
विशिष्यते हरौ क्रियात्मकात् काण्डादिति स्थितिः ॥११॥
कर्मणो ज्ञानमुत्कृष्टं ज्ञानाद् ध्यानं तथोत्तमम् ।
ध्यानाच्च भावना श्रेष्ठा भावतः स्नेह उत्तमः ॥१२॥
सकामस्नेहतः श्रेष्ठो निष्कामः स्नेह एव यत् ।
स्नेहाच्छ्रेष्ठः प्रह्वीभावस्तद्रूपं तद्रसात्मता ॥१३॥
न ततोऽधिकमेवाऽस्ति किञ्चिद् विप्र ! हरौ सदा ।
शृणु तत्र कथां रम्यां दानाद् भावो विशिष्यते ॥१४॥
काञ्चीपुर्यां पुरा राजा चोलनामाऽभवद् व्रती ।
वैष्णवो दानकृद् रक्षाकरः प्रजासु वन्दितः ॥१५॥
देवपूजाकरो नित्यं यद्राज्ये सुखिनी प्रजा ।
ताम्रपर्णीतटे येन यज्ञाश्च बहवः कृताः ॥१६॥
विमानेन स नृपतिर्लोकान्तरं प्रयाति च ।
एवं विमानमारुह्य ययौ श्वेताख्यधाम सः ॥१७॥
ततः क्षीराब्धिशयनं धाम योगेन संययौ ।
अनन्तशयनं कृष्णनारायणं तु निद्रितम् ॥१८॥
चकार दण्डवत्तावन्नारायणः समुत्थितः ।
श्रीपतिं पूजयामास मणियुक्ताफलादिभिः ॥१९॥
सुपत्रैश्च सुवर्णस्य कुसुमैर्हीरकादिभिः ।
धूपदीपसुनैवेद्यैर्वस्त्रैर्विभूषणैस्तथा ॥२०॥
दिव्यैः रत्नायुतैश्चापि पुपूज परमेश्वरम् ।
एवं सम्पूज्य सन्नत्वोपविष्टः सन्निधौ हरेः ॥२१॥
तावत्तस्यैव राज्यस्य ब्राह्मणो विष्णुदायकः ।
तुलसीं च जलं पुष्पं नीत्वा पूजार्थमागतः ॥२२॥

तेनापि श्रीहरेः पूजा कृता पत्रादिवस्तुभिः ।
हीरकाद्यास्तया छन्नाः पत्रपुष्पादिभिः खलु ॥२३॥
आच्छादितां स्वकृतपूजां विलोक्य नृपतिस्तदा ।
विप्रं प्राह कथं स्वर्णमाणिक्यादिसुशोभिता ॥२४॥
पूजा कृता मया विप्र त्वया वै छादिता दलैः ।
गौरवं नैव जानासि न जानासि प्रपूजनम् ॥२५॥
मूल्यं नापि गणयसि श्रैष्ठ्यं करोष्यनुत्तमम् ।
पत्रादिकं निकृष्टं तु करोषि तूत्तमं द्विज ॥२६॥
इत्युक्तः स द्विजस्तत्र चौलं प्राह सुभाववान् ।
राजन् विष्णोः सदा पूजा भावनासहिता प्रिया ॥२७॥
गर्वयुक्ताऽहंकृतिस्था न प्रिया जायतेऽनघ ।
त्वया तु क्रियते पूजा रत्नस्वर्णादिपुष्पकैः ॥२८॥
मयाऽपि क्रियते सैव तुलसीदलवारिभिः ।
मम पूजा तव पूजा भावनातो विशिष्यते ॥२९॥
वद राजन् नृपलक्ष्म्या त्वया किंकिं कृतं व्रतम् ।
मया कृतं न वै किञ्चिद् वद त्वं चेत् कृतं महत् ॥३०॥
तदा चौलः सगर्वस्तु प्राह विप्रं कृतं तु यत् ।
मया कृतं स्वर्णदानं रत्नहीरकदानकम् ॥३१॥
गोदानानि ह्यनन्तानि यज्ञाश्च बहवः कृताः ।
पूजने श्रीहरेर्नित्यं समर्पयामि हीरकान् ॥३२॥
निर्धनस्य तव भक्त्या मम भक्तिर्विशिष्यते ।
त्वया यज्ञः कृतो नैव देवालयो न वा कृतः ॥३३॥
मया सर्वं कृतं विप्र पश्य यज्ञान्तरं पुनः ।
करिष्यामि गमिष्यामि साक्षात्कारं हरेः पुरा ॥३४॥
विप्रा शास्यन्ति ये भक्तिं श्रेष्ठां तदैव नान्यथा ।
पूर्वं साक्षात्करणार्थं विष्णुयागं करोम्यहम् ॥३५॥
इत्युक्त्वा श्रीहरिं नत्वा ययौ चौलप्रदेशकान् ।
चौलः समारभद् यज्ञं कृत्वाऽऽचार्यं तु मुद्गलम् ॥३६॥
सत्यलोकात्तत ऊर्ध्वाद् वैराजा ब्रह्मचारिणः ।
मुनयः ऋषयो वृद्धाः पितरश्च सुरास्तथा ॥३७॥
यज्ञाश्च देवगन्धर्वा मानवाश्चापि भूसुराः ।
नदा नदश्च तीर्थानि तरवो वल्लिकास्तथा ॥३८॥
पुर्यः क्षेत्राणि चैत्यानि पातालभूगतानि च ।
तारकाणि प्रकृष्टानि वैष्णवा देवतास्तथा ॥३९॥
देव्यः सर्वाः सर्वधामनिवासा मुक्तनायकाः ।
आकारिता नृपतिना वैष्णवे स्वकृते क्रतौ ॥४०॥
स्वर्णं द्रव्यं हीरकादि सर्वं तत्र समर्पितम् ।
वस्त्रान्नपेयभोग्यानि समर्पितानि सर्वशः ॥४१॥
ऋषीणां वेदसंघोषा ह्यासंस्तत्र महाध्वरे ।
विप्राणां मूर्तयस्तत्र सन्तुष्टा ह्यभवन्मखे ॥४२॥
वह्नयस्तृप्तिमापन्ना मुक्ता देवाः प्रतोषिताः ।
मुदिताश्चाऽभवन् सत्यो देव्यो ब्रह्माण्डयोषितः ॥४३॥
कृतो यज्ञो महान् सर्वलोकेषु ख्यात एव सः ।
किन्तु गर्वात् कृतो नैव निष्कामभावतः कृतः ॥४४॥
स्पर्धया यत्कृतं चापि मत्सरेणाऽप्यथेर्ष्यया ।
तत्सर्वं न फलवत् स्याद् यथा निष्कामजं फलम् ॥४५॥
विष्णुदासो हरेर्देवालये चकार सेवनम् ।
शरीरेण च भावेन हरेः संस्नपनं तथा ॥४६॥
प्रबोधनं पूजनं च शृंगारं धूपदीपनम् ।
तुलसीपत्रदानं च जलाभिषेकमर्चनम् ॥४७॥
पुष्पपत्रफलार्घ्यानामर्पणं चन्दनार्पणम् ।
अक्षतकुंकुमदानं श्रीफलाद्यर्पणं तथा ॥४८॥
नीराजनं प्रदक्षिणं स्तुतिं दण्डवदादिकम् ।
क्षमायाचनमेवापि कीर्तनं श्रवणं तथा ॥४९॥
मार्जनं लेपनं गुणप्रगानं च निवेदनम् ।
ताम्बूलकं जलं सुगन्धिवद्द्रव्यार्पणं तथा ॥५०॥
व्यजनेन पवनस्य दानं चामरधारणम् ।
छत्रसन्धारणं चापि यथर्तुसेवनादिकम् ॥५१॥
पुष्पवाटीं तथा कृत्वा पुष्पहारादिकं शुभम् ।
तुलसीवाटिकां कृत्वा हर्यर्थे जलसेचनम् ॥५२॥
एवं स्नेहेन भावेन दिवानिशं हरेः प्रभोः ।
पातिव्रत्यपरां भक्तिमकरोद् विष्णुदासकः ॥५३॥
एकादश्यादिदिवसान् जपयुक्तान् व्रतानि च ।
संयमेन महाभक्त्या कृष्णसंस्मरणेन च ॥५४॥
पूजया षोडशवस्तुकृतया नृत्यगीतिभिः ।
भावातिसेवया सन्निर्गमयत्येव सर्वथा ॥५५॥
पश्यन् शृण्वन् स्पृशन् जिघ्रन् रसयन् संवदन्नपि ।
गृह्णन् गच्छन् शयानश्च स्तवन् ध्यायन् विनिश्चयन् ॥५६॥
चिन्तयन् मानयँश्चाप्यनुभवन् भावयँस्तथा ।
स्मरन् संप्रत्यभिजानन् संशयानो विपर्ययन् ॥५७॥
तर्कयन् चेतयन् चेच्छन् विष्णुमेव हि वर्तते ।
सर्वत्रात्मकृतावासं विदन् विष्णुमचिन्तयत् ॥५८॥
ओं नमः श्रीकृष्णनारायणाय ओं नमोनमः ।
एवं षोडशवर्णार्णं गृणन् विष्णुमयो ह्यभूत् ॥५९॥
ब्राह्मणस्य सदा सेवां गृह्णाति भगवान् स्वयम् ।
राज्ञो यज्ञं हुतद्रव्यं गृह्णाति भगवान् स्वयम् ॥६०॥

ब्राह्मणस्याऽभवद् द्वयो राज्ञस्त्वद्वयस्य ईश्वरः ।
भावाऽभावौ तथा गर्वाऽगर्वौ तत्र हि कारणे ॥६१॥
एकदा विष्णुदासेन नित्यमिव महानसे ।
कृतो मिष्टान्नपाकश्चाऽहस्त्वं कोऽप्यलक्षितः ॥६२॥
पूजाविघ्नं च मध्याह्ने पुनः पाके भवेदिति ।
विचार्य न पुनः पाकः कृतो न बुभुजे स्वयम् ॥६३॥
फलं जलं च नैवेद्येऽर्पितवान् शार्ङ्गिणे हि सः ।
द्वितीयेऽपि दिने तद्वत् कृतं पाकं जहार ह ॥६४॥
तृतीयेऽपि दिने तद्वत् पाकं जहार माधवः ।
एवं सप्तदिनान्येव पाकं जह्रेऽर्पणं विना ॥६५॥
चिन्तातुरो द्विजस्तस्थौ रक्षार्थं पाकसन्निधौ ।
पाकं कृत्वा गृहकोणे काष्ठपाषाणहस्तकः ॥६६॥
उपोषितश्च सप्ताहं ददर्श पाकहारिणम् ।
चाण्डालं मलिनं कंचित् क्षुधितं शुष्कदेहकम् ॥६७॥
द्विजो दृष्ट्वा दयायुक्तो जातस्तस्मिन् हरिं स्मरन् ।
उवाच तिष्ठ मा रूक्षं भुंक्ष्व घृतं गृहाण वै ॥६८॥
इत्युक्तवन्तं तं विप्र दृष्ट्वा दुद्राव भीतितः ।
पतितो मूर्छितस्तत्र तं गत्वा विष्णुदासकः ॥६९॥
जलं ददौ पवनं च वस्त्रान्तेन व्यमूर्छयत् ।
तावत् स उत्थितो विष्णुश्चतुर्भुजधरोऽभवत् ॥७०॥
साक्षात् श्रीमत्कृष्णनारायण चतुर्भुजं हरिम् ।
शंखचक्रगदापद्मकौस्तुभादिविराजितम् ॥७१॥
प्रत्यक्षं श्रीहरिं दृष्ट्वा विष्णुदासोऽतिगद्गदः ।
बभूव प्रेमपूर्णश्च स्तोतुं वक्तुं न चाऽशकत् ॥७२॥
अथ यज्ञे स्थिता देवाः क्रतुं त्यक्त्वा समाययुः ।
चौलराज्ञा तु ते पृष्टाः क्व गम्यते सुरेश्वरैः ॥७३॥
ते प्राहुर्विष्णुदासाय कृष्णनारायणः प्रभुः ।
साक्षात्कारं दर्शनं वै ददौ तत्र हि सन्निधौ ॥७४॥
प्रगच्छामो दर्शनार्थे आयास्यामश्च सत्वरम् ।
इत्युक्त्वा ते ययुस्तत्र यत्र चतुर्भुजो हरिः ॥७५॥
देवाश्चक्रुस्तवं तस्य गन्धर्वाऽप्सरसो जगुः ।
ननृतुर्देवगन्धर्वा आशिषः ऋषयो ददुः ॥७६॥
गीतवादित्रमोदाढ्यं स्थानं तत्त्वभवत्तदा ।
यज्ञस्थाः सर्वदेवाद्याश्चतुर्दशभुवां जनाः ॥७७॥
सर्वे समाययुस्तत्र तीर्थाद्या वह्नयोऽपि च ।
यज्ञस्थानं तदा रिक्तं जातं देवैर्विना क्षणम् ॥७८॥
देवालयस्य निकटे विष्णुः प्राहेश्वरादिकान् ।
भक्त्या च सेवया स्नेहभावया प्रेमपूरया ॥७९॥

तुष्टोऽहं विष्णुदासस्याऽगर्वस्य किंकरस्य मे ।
साक्षात्कारो मम तस्य शीघ्रं जातोऽस्ति देवताः ! ॥८०॥
नाऽहं बहुविधैर्द्रव्यैः सगर्वस्याऽन्तिकप्रगः ।
साक्षात्स्वदर्शनप्रदो भवामीति विनिश्चयः ॥८१॥
इत्युक्त्वा भगवान् विष्णुराश्लिष्य विष्णुदासकम् ।
समारोप्य विमाने स्वे निनाय धाम शाश्वतम् ॥८२॥
चौलराजो ददर्शैनं यान्तं श्रीविष्णुमन्दिरम् ।
शीघ्रं तदाऽऽह्वयाञ्चक्रे गुरुं मुद्गरमेव सः ॥८३॥
जगाद च मुनिं तत्र यदर्थं यज्ञमारभे ।
यत्स्पर्धया सर्वद्रव्यं यज्ञे मया समर्पितम् ॥८४॥
स तु पूर्वं हरिं प्राप्य ययौ वैकुण्ठमेव ह ।
त्वया यज्ञः कर्मकाण्डात्मको नैव हि पार्यते ॥८५॥
कर्तव्यस्य फलं नैव मया प्रागत्र चार्जितम् ।
तस्माद् धनं क्रतुर्दानं सर्वे न तोषयेद्धरिम् ॥८६॥
हरिस्तु भावभक्त्यैव भजनेन जपेन च ।
स्मरणेन प्रसन्नः स भवतीति विनिश्चितम् ॥८७॥
कुरु यज्ञस्येतिभावं गृहाण दक्षिणां गुरो ! ।
याहि गृहं समायातान् प्रस्थाप्य दत्तदक्षिणान् ॥८८॥
अहं गच्छामि च पश्चात् समाराधनहेतवे ।
भक्त्या तुष्यति भक्तेशो न यज्ञैर्दानविस्तरैः ॥८९॥
प्रसादने हरेरेषो विप्रो जातो निदर्शनम् ।
इत्युक्त्वा राज्यभारं च भागिनेये विसृज्य च ॥९०॥
ययौ यज्ञं हरिं समाराधयितुं जनाधिपः ।
वह्निकुण्डाग्रतः स्थित्वा ददौ हवनद्रव्यकम् ॥९१॥
विष्णो भक्तिं सदा देहि मनोवाक्कायकर्मभिः ।
उच्चैस्त्रिवारमेतद्वै समुच्चार्य हरिं स्मरन् ॥९२॥
सर्वेषां पश्यतां राजा वह्निकुण्डेऽपतत्तदा ।
हाहाकारो महान् जातो विष्णुश्चाविरभूत्तदा ॥९३॥
नृपं चतुर्भुजं कृत्वा समादाय विमानके ।
वैकुण्ठमनयद्रूपं पार्षदत्वं ददौ हरिः ॥९४॥
पातिव्रत्यपरया च भक्त्या तुष्टो हरिः स्वयम् ।
मयि तुष्टो नृपे तुष्टः स्वयं कृष्णनारायणः ॥९५॥
धर्मदत्त स एवाऽहं विष्णुदासोऽस्मि पार्षदः ।
पुण्यशीलाभिधानश्च राजा सुशीलनामकः ॥९६॥
आवां त्वत्राऽऽगतौ नेतुं कलहां रामकारणात् ।
वैकुण्ठं तां तव पुण्यान्नीत्वा ते राजजन्मनि ॥९७॥
दशरथाऽभिधाने च कलहा कैकयी तदा ।
भविष्यति तृतीया ते पत्नी धर्मांशभागिनी ॥९८॥

रथचक्रनाभिमध्ये हस्तं निक्षिप्य यास्यति ।
पातिव्रत्यपरां दृष्ट्वा त्वं तु मोहं गमिष्यसि ॥९९॥
वरदानाय सा चोक्ता भविष्यत्कालयोगि तत् ।
यथेच्छं दानमेवेयं न्यासवत् कारयिष्यति ॥१००॥
प्राप्ते रामस्याऽभिषेके राक्षसानां विनाशने ।
प्रेरिता विष्णुना रामे वन्यत्वमर्थयिष्यति ॥१०१॥
रावणादिविनाशश्च सीताछायामिषेण वै ।
भविष्यति ततस्त्वं च पुनर्वैकुण्ठमेष्यसि ॥१०२॥
इति ते कथितं सर्वं भाविवृत्तान्तवर्तनम् ।
पठनाच्छ्रवणाच्चास्य वैकुण्ठे गमनं भवेत् ॥१०३॥
शृणु लक्ष्मि ! चौलराज्येऽभिषिक्तस्य नृपस्य तु ।
पट्टराज्ञ्याश्च नाऽद्यापि पुत्रे राज्याभिषेचनम् ॥१०४॥
स्वस्त्रीयस्यैव तद्राज्ये जायते न्वभिषेचनम् ।
कलौ प्रजायाः शास्तौ च प्रधानः स्वस्त्रजो भवेत् ॥१०५॥
अथापि शृणु कल्याणि ! भक्तश्चौलनृपो यदा ।
स्वस्यैव हननं चक्रे विप्रास्तदा तु मुद्गलम् ॥१०६॥
जहसुश्च तिरश्चक्रुर्धिक्कारं च ददुस्तदा ।
असामर्थ्यं जगदुश्च राजहत्याकरं जगुः ॥१०७॥
श्रुत्वा श्रुत्वा मुद्गरोऽपि क्रुद्धः प्रज्वलितान्तरः ।
यावत्प्रवर्तते कुण्डे पतितुं तावदेव तु ॥१०८॥
भूसुरैः सुदृढं सम्यग् धृतो न्यायेन वारितः ।
राज्ञ्या तद्योषिता चान्यैः रुद्धो बलात्प्रयत्नकैः ॥१०९॥
तदा क्रोधेन हस्ताभ्यां स्वजटामुदपाटयत् ।
शिखां जटां समुत्पाट्याऽऽजुहाव वह्निमण्डले ॥११०॥
तेन चाद्यापि तद्गोत्रे विशिखाः सन्ति भूसुराः ।
अथ ते निष्कृतिं चक्रुर्ययुः सर्वे निजालयम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने हरौ पातिव्रत्येन चोलराजविष्णुदासयोः सुशीलपुण्यशील-नामकविष्णुपार्षदरूपता, सौराष्ट्रीयकलहायाः कैकेयी-रूपता, धर्मदत्तस्य दशरथजन्मादिवृत्तान्तकथननामा पञ्चविंशत्यधिकचतुश्शततमोऽध्यायः ॥४२५॥

श्रीनारायण उवाच—

आकर्णय महालक्ष्मि ! गोकुले गोपकन्यकाः ।
चक्रुर्व्रतं पातिव्रत्यात्मकं कृष्णस्य लब्धये ॥ १ ॥
कुमारिका महादिव्या देव्यो धामाधिविग्रहाः ।
दृश्यन्ते भूतले भूवद्विग्रहा वास्तवं न तत् ॥ २ ॥
सर्वा राधासमा दिव्याः श्रीसमा ब्रह्ममूर्तिकाः ।
नाऽण्वपि कृष्णसारूप्याद् भेदस्तासु हि विद्यते ॥ ३ ॥
गर्भो जन्म च बालत्वं गौरीत्वं च ततः पुनः ।
रोहिणीत्वं कन्यकात्वं कार्ष्णीनां दिव्यमेव तत् ॥ ४ ॥
चर्मनेत्राः स्ववत् सर्वं लोकयन्ति न तत्तथा ।
तासां कृष्णपतिप्राप्तिकृद्धिचेष्टनमेव यत् ॥ ५ ॥
कृष्णपतिव्रताः सर्वाः कृष्णनारायणप्रियाः ।
कृष्णार्थकृतसर्वस्वाः किन्तु वै तासु वर्ण्यते ॥ ६ ॥
ताभिर्जातिस्मराभिश्चार्थितः कृष्णो हि सर्वदा ।
कृष्णनारायणस्तासां स्वप्ने प्रातरदृश्यत ॥ ७ ॥
विहसन् भावमाज्ञाय पातिव्रत्यक्रतुं ददौ ।
तास्तु कृष्णनिदेशेन चक्रुः पतिव्रताक्रतुम् ॥ ८ ॥
मार्गशीर्षे वृषमासे कुर्वन्तु मत्प्रियं व्रतम् ।
अहं प्राप्तो भविष्यामि पूरयिष्ये मनोरथान् ॥ ९ ॥
स्वात्मार्थे च यथा सर्वं मदर्थे सर्वमेव तत् ।
प्रियं सर्वं प्रकुर्वन्तु तूर्णं भवामि वः पतिः ॥१०॥
इत्युक्तानां तु कन्यानां पातिव्रत्यस्य सर्वथा ।
कृष्णस्य कृपया प्रादुर्भूतं ज्ञानं तु तादृशम् ॥११॥
चक्रुर्व्रतं तु ताः सर्वाः सहस्रशस्तु गोपिकाः ।
तासां मनांसि च मयि ह्यासन् कृष्णनारायणे ॥१२॥
तासां बुद्धिर्मया दत्ता मार्गशीर्षाऽवगाहने ।
प्रातःकाले ब्राह्मयोगे मिलित्वा संघशस्तु ताः ॥१३॥
यमुनायां कृतस्नाना गायन्ति कृष्णकीर्तनम् ।
कुर्वन्ति जलदानं मेऽक्षतदानं जले तथा ॥१४॥
द्रव्यदानं जले चापि गृह्णाम्यन्तःस्थितोऽप्यहम् ।
भोज्यदानं जले ताभिः कृष्णं स्मृत्वा कृतं प्रगे ॥१५॥
क्वचित् कृष्णः क्वचिन्मत्स्यो भूत्वा गृह्णामि तज्जले ।
पत्रं पुष्पं फलं यद्यज्जले दत्तं मदात्मनि ॥१६॥
मया सर्वं स्वीकृतं तत् तासां भावेन वारिणि ।
पूजा कृता मदर्थं च ताभिर्गत्वा गृहे गृहे ॥१७॥
हविष्यान्नं मदर्थं च भुक्तं ताभिर्मदर्पितम् ।
सर्वं मम प्रसादार्थं कृतं सम्यग् व्रतं ततः ॥१८॥
मया दत्तो वरश्चात्मा तासां तुष्टेन सत्पतिः ।
शृणु लक्ष्मि ! कथयामि कृष्णपतिव्रताविधिम् ॥१९॥
प्रातर्ब्राह्मे समुत्थाय ताभिः श्रीगुरवो नताः ।
स्मृतश्चाहं क्षणं ध्यातः कृष्णेति कीर्तितो मुहुः ॥२०॥
ततो यम्यास्तटं गत्वा कृत्वा शौचादिकं ततः ।
स्नाताश्च मुखशुद्ध्यादि कृत्वा यमीजले च ताः ॥२१॥

तुलसीमृत्तिकां लिप्त्वा तुलसीपत्रवारिणा ।
संप्रोक्ष्य स्वशरीराणि सस्नुर्नद्यां च मां हृदि ॥२२॥
स्मरन्त्यः श्रीकृष्णनारायणेति व्याहरन्त्यपि ।
ओंनमः श्रीकृष्णनारायणाय पतये नमः ॥२३॥
अथाऽक्षतान् कुसुमानि पत्राणि कुंकुमादिकम् ।
दीपं फलादिकं मह्यं ददुस्ताश्चार्द्रवस्त्रकाः ॥२४॥
ओं नमः श्रीकृष्णनारायणाय पतयेऽर्प्यते ।
इति समर्प्य तास्तीरं विनिर्गत्याऽम्बराणि च ॥२५॥
परिधाय तथाऽऽचम्याऽतर्पयन् पूर्वजाँस्ततः ।
ऋषीन्देवान्नमस्कृत्याऽकुर्वन् कुंकुमचन्द्रकम् ॥२६॥
भाले च कण्ठमध्ये च हृदये चन्दनादिना ।
बिन्दीं रेखां यथायोग्यं चक्रुः कृष्णरताश्च ताः ॥२७॥
ललाटे केशवो ध्यातो नारायणस्तथोदरे ।
वक्षसि माधवो ध्यातो गोविन्दः कण्ठकूबरे ॥२८॥
ध्यातो विष्णुर्दक्षकुक्षौ वामकुक्षौ तु वामनः ।
दक्षबाहौ च मधुहा वामबाहौ श्रियोधरः ॥२९॥
त्रिविक्रमः कर्णमूले हृषीकेशस्तु कर्णयोः ।
पृष्ठे ध्यातः पद्मनाभो दामोदरो ह्यधःस्थले ॥३०॥
सर्वांगे श्रीकृष्णनारायणः पतिः सुचिन्तितः ।
शंखं चक्रं गदां पद्मं चक्रिरे भुजयोश्च ताः ॥३१॥
ओं नमः श्रीकृष्णनारायणाय पतये नमः ।
इति षोडशव[illegible]नां मुद्रा दध्युश्च मानसे ॥३२॥
तुलसीमालिकाः सूक्ष्माः कण्ठे दध्युः करे तथा ।
धात्रीफलकृतां मालां दध्युः काश्चिद् गले करे ॥३३॥
एवंकृत्वा विधिं ताश्च नत्वा गुरून् गृहं गताः ।
तत आचम्य ताः सर्वाः प्रविविशुश्च मण्डपम् ॥३४॥
कुशासनस्थिताः पद्मासनाः पूर्वमुखाश्च ताः ।
चक्रुः प्राणस्य नियमं मध्ये तु मण्डपस्य ताः ॥३५॥
कर्णिकायां भास्करं च शशिनं वह्निमेव च ।
संस्थाप्योद्देशमात्रेण तण्डुलेषु दधुश्च तान् ॥३६॥
ततोऽष्टपत्रकं [illegible]पं तण्डुलैश्चक्रुरादरात् ।
तत्र दध्युश्च मां दिव्यं स्ववयोग्यं वरं पतिम् ॥३७॥
समासीनं हसन्तं च कोटिशीतांशुसन्निभम् ।
चतुर्भुजं सायुधं च काश्चिद् द्विभुजमच्युतम् ॥३८॥
पद्मपत्रविशालाक्षं महावीर्यबलान्वितम् ।
श्रीवत्सकौस्तुभोरस्कं पीतवस्त्रान्वित च माम् ॥३९॥
दिव्याभरणसंशोभं दिव्यमण्डनमण्डितम् ।
दिव्यचन्दनलिप्तांगं दिव्यकुसुममालिकम् ॥४०॥
तुलसीमालिकायुक्तवनमालाद्विराजितम् ।
कोटिबालार्कसदृशं कान्तं कान्तमनोहरम् ॥४१॥
युवत्या तु श्रियाऽऽश्लिष्टतनुं चुम्बन्तमेव माम् ।
ध्यात्वा ताः प्रजपुर्मुग्धाः कृष्णनारायणेति माम् ॥४२॥
ततस्ताः स्थापयामासुः शंखं गन्धोदपूरितम् ।
तथा सुगन्धपुष्पादिपात्रं न्यधुश्च दक्षिणे ॥४३॥
वामे न्यधुर्वारिकुंभं वस्त्रपूतं सुवासितम् ।
घण्टां न्यधुः प्रदीपांश्च चक्रुर्धूपं समन्ततः ॥४४॥
अथ पात्राणि चत्वारि सन्न्यधुस्तत्र कन्यकाः ।
अर्घ्यपाद्याऽऽचमनीयमधुपर्कार्थकानि च ॥४५॥
सर्षपाऽक्षतपुष्पाणि कुशाग्रं तिलचन्दनम् ।
फलं यवानर्घ्यपात्रे ररक्षुस्तत्र कन्यकाः ॥४६॥
दूर्वां गंगां यमीं पद्मं पाद्यपात्रे न्यधुश्च ताः ।
कंकोलं च लवंगं च फलं मालतिसंभवम् ॥४७॥
आचमनीयपात्रे ता न्यधुस्तीर्थजलं तथा ।
गव्यं पयो दधि मधु घृतं च शर्करान्वितम् ॥४८॥
मधुपर्कस्य पात्रे ता न्यधुस्ततो हरेः पुरः ।
करन्यासान् प्रचक्रुश्च स्वांगेषु कृष्णकाम्यया ॥४९॥
मस्तके मस्तकं चास्तु कृष्णस्य मम सर्वथा ।
ललाटे श्रीकृष्णदेवललाटं चास्तु मे शुभम् ॥५०॥
नेत्रयोः श्रीकृष्णनारायणनेत्रेऽधितिष्ठताम् ।
कर्णयोर्मे कृष्णकर्णौ नासायां कृष्णनासिका ॥५१॥
कपोल्योः कपालं मे गण्डयोः कृष्णगण्डकौ ।
कटाक्षयोः कटाक्षौ मे कृष्णस्य चाधितिष्ठताम् ॥५२॥
ओष्ठयोर्मे कृष्णकान्तोष्ठद्वयं वसतु प्रियम् ।
चिबुके कृष्णचिबुकं कण्ठे कण्ठोऽस्तु मे हरेः ॥५३॥
स्कन्धयोः श्रीकृष्णनारायणस्कन्धौ प्रतिष्ठताम् ।
भुजयोः श्रीहरेः स्तां सुभुजौ करौ करद्वये ॥५४॥
हृदये कृष्णहृदयं नाभौ नाभिर्हरेर्मम ।
जघने कृष्णजघनं कट्यां चास्तु हरेः कटिः ॥५५॥
गोप्ये कृष्णस्य गोप्यं च सक्थ्नोर्मे सक्थिनी हरेः ।
जान्वोर्मे कृष्णजानूस्तां जंघे मे जंघयोर्हरेः ॥५६॥
पादयोर्मे कृष्णपादौ मयि कृष्णोऽस्तु सर्वथा ।
मदिन्द्रियेषु कृष्णस्येन्द्रियाणि सन्तु सर्वशः ॥५७॥
सन्तु मेऽन्तःकरणेष्वन्तःकरणानि वै हरेः ।
एवं ममाऽनुस्मरणं चक्रुस्ता हृदयंगमम् ॥५८॥
सस्मरुस्तास्तदात्मानं मत्समं मत्पतिव्रताः ।
मंगलं श्रीकृष्णनारायणः कान्तः प्रियः कुरु ॥५९॥

प्रपेठुः गोपकन्यानां पतिस्त्वं मंगलं कुरु।
अथ शंखं पुपूजुश्च पुष्पचन्दनवारिभिः ॥६०॥
सुवासितेन तैलेन चक्रुरुद्वर्तनं तु ताः।
कस्तूर्या चन्दनेनापि चक्रुरुद्वर्तनं तथा ॥६१॥
सुगन्धवासितैस्तोयैस्ततः संस्नापितोऽप्यहम्।
शंखतोयं प्रजग्राह स्नानार्थे तु पुनः पुनः ॥६२॥
पञ्चामृतानि प्रददुः स्नापयामासुरादरात्।
तीर्थजलैः सुखस्पर्शैरभिषेकं ददुश्च ताः ॥६३॥
चन्दनं गन्धसारादि मर्दयामासुरादरात्।
वस्त्रेण मार्जयामासुः शरीरं मे पुनः पुनः ॥६४॥
ददुरर्घ्यं सफलं च पाद्यमाचमनीयकम्।
मधुपर्कं ददुश्चाथ ददुर्दिव्याम्बराणि च ॥६५॥
दिव्यभूषारलंकारान् गन्धादीन् संददुर्मम।
कज्जलं केशतैलादि पुण्ड्रार्थं चन्दनादिकम् ॥६६॥
कुंकुमादि ददुस्ताश्च द्रवसारान् ददुस्ततः।
अलक्तरंगरागादि प्रददुस्ताश्च कन्यकाः ॥६७॥
सिंहासनं तथा छत्रं चामरे व्यजनं ददुः।
दर्पणं केशदन्तं च शुक्रचूर्णं ददुश्च ताः ॥६८॥
तुलसीमालिकां पुष्पहारांश्च शेखरान् ददुः।
गुच्छान् स्वर्णविभूषाश्च पत्त्राणे संददुस्तदा ॥६९॥
वंशीं ददुश्च ता मिष्टस्वरां चाहमवादयम्।
दोलायां मां समस्थाप्य दोलयामासुरादरात् ॥७०॥
नैवेद्यं चार्पयामासुः पायसाऽपूपमिश्रितम्।
जलं फलं च ताम्बूलं शाकं पूगीफलादिकम् ॥७१॥
प्रददुस्ता व्यजनैश्च सेवयामासुरेव च।
धूपं दीपं पुनश्चक्रुर्ददुः पुष्पाणि भक्तितः ॥७२॥
भोजयामासुरत्यर्थं प्रीत्या ताः कवलैर्मुहुः।
तृप्तोऽहं चाऽपिबं वारि ताम्बूलकं समाददे ॥७३॥
ताश्च प्रणम्य संचक्रुर्नीराजनं पुनः पुनः।
स्तुतिं चक्रुर्नमश्चक्रुः प्रदक्षिणं पुनस्तथा ॥७४॥
अपराधक्षमायाञ्चां पुष्पाञ्जलिं समादधुः।
वरं च याचयामासुः पतिर्नो भव सर्वदा ॥७५॥
शाययित्वा च पर्यंके परितस्तस्थुरादरात्।
पादसंवाहनं चक्रुर्यथेष्टं ताः सिषेविरे ॥७६॥
मया तासां मानसानि पूरितानि तदा प्रिये।
स्पर्शनेनाऽऽश्लेषणेन भावेनाऽवर्ण्यकेन च ॥७७॥
ततस्ताः सुखमापन्ना अभूतपूर्वमेव वै।
आनन्देषु निमग्नास्ता मगलार्घ्यं ददुस्ततः ॥७८॥
विसृज्य मां च ताश्चक्रुर्गृहकार्याणि वै ततः।
प्रसादं भक्षयामासुर्ममपूजानिवेदितम् ॥७९॥
मया दत्तं महानन्दं स्मृत्वा स्मृत्वाऽतिहर्षिताः।
चक्रुः स्वगृहकार्याणि श्रमं न विविदुश्च ताः ॥८०॥
जलाहरणकार्ये ता ददृशुर्मां घटे जले।
कण्डनीधान्यघाते ता ददृशुर्मां कणेषु वै ॥८१॥
पिष्टार्थं पेषणीकार्ये पेषण्यां ददृशुर्हि माम्।
मार्जनीकार्यकाले ता भूतले ददृशुश्च माम् ॥८२॥
पाककाले पाकपात्रे स्थाल्यां भोजनपात्रके।
दृश्ये श्रव्ये तथा स्पृश्ये मामेव ददृशुश्च ताः ॥८३॥
आदर्शे स्वमुखे नेत्रे तैले वस्त्रे विभूषणे।
हृदये सर्वकार्येषु मामेव ददृशुश्च ताः ॥८४॥
दिव्यदेहा बभूवुश्च भित्त्यावरणवर्जिताः।
देहभानप्रहीणाश्च कृष्णरूपं दधुस्तु ताः ॥८५॥
एका कृष्णो द्वितीया तु कृष्णा भूत्वा च रेमतुः।
एका पत्नी द्वितीया तु पतिर्भूत्वा ननन्दतुः ॥८६॥
एका सखी द्वितीया तु सखा भूत्वा चुचूम्बतुः।
एका वधूर्द्वितीया तु वरो भूत्वा विरेजतुः ॥८७॥
एवं कृष्णमयं तासामान्तरं च मया कृतम्।
कृष्णपातिव्रत्यरंगैः रक्तानां भिन्नता न मे ॥८८॥
एवंभावं प्रपन्नास्ताः स्नातुं याता यमीजले।
कदम्बद्रुमनिकटे तास्त्वहं चाप्यलक्षितः ॥८९॥
ययौ कुमारिकारूपं धृत्वा स्नानाय वै सह।
अवतेरुश्च तास्तीर्थे न्यस्य वस्त्राणि तत्तटे ॥९०॥
सस्मरुश्च सह स्नातुं रन्तुं मां कन्यका हृदि।
यथा चान्या न जानाति तथा प्रत्येकया सह ॥९१॥
रेमे तत्र जले बाह्यकन्यश्चान्तरपूरुषः।
प्रत्येकं सा विजानाति रमणं नाऽपरा तदा ॥९२॥
एवं मनांसि सम्पूर्य तृप्तास्ताश्च ततः परम्।
जले कन्यास्वरूपोऽपि वनात् कृष्णोऽहमागतः ॥९३॥
तासां वस्त्राणि चादाय प्रारुरोह कदम्बकम्।
ताभिः संकल्पितं तद्वन्मया मनः प्रपूरितम् ॥९४॥
कृष्णश्चास्मत्तनूं पश्येदिति तद्वन्मया कृतम्।
व्रतस्थानां वरुणस्याऽवधीरणा कृता यतः ॥९५॥
बहिर्निर्गत्य सूर्याय कुरुत प्रांजलिं प्रियाः।
इति भावानुसारेण ताश्च मया विलोकिताः ॥९६॥
तास्तु तुष्टास्तदा जाता मेनिरे कृतकृत्यताम्।
ददौ वस्त्राणि ताभ्यश्च वरांश्चापि ददौ मुहुः ॥९७॥

रामयिष्ये रमयिष्ये यथेष्टं मम वै प्रियाः ।
व्रतस्य तु फलं सर्वं चार्पयिष्ये नवं नवम् ॥९८॥
नित्यं ताः कान्तभावेन मया सत्यः प्रतर्पिताः ।
ता एव तु दिवारात्रौ मदात्मिकाः सदाऽभवन् ॥९९॥
कामो दिव्यो रतिर्दिव्या भावो दिव्यः कृतो मया ।
मदीयदिव्यभावेन तासां दिव्यमभूद्धि तत् ॥१००॥
निष्काम कर्म तत्प्रोक्तं यन्मयि त्वर्प्यते सदा ।
बन्धघ्नं शान्तिदं मोक्षकरं साक्षान्मदर्पणम् ॥१०१॥
यथा ताभिः कृतं तद्वन्नान्या काचित् करिष्यति ।
इत्यहं त्वभवं तासां प्रसन्नः कान्त एकलः ॥१०२॥
कान्तास्ताश्चाऽभजन् मां च प्रापुर्मां च परे पदे ।
ताश्च सर्वाः कृष्णकान्ताः कृष्णव्रता हरेः प्रियाः ॥१०३॥
कृष्णनारायणपत्न्यः कृष्णपतिव्रताः स्त्रियः ।
नित्यं मां पूजयामासुः रमयामासुरन्तिके ॥१०४॥
मिष्टान्नानि च ता नित्यं भोजयामासुरच्युतम् ।
दध्युर्मां हृदये नित्यं शाश्वतानन्ददायकम् ॥१०५॥
एवं या पातिव्रत्येन पतिसेवां करिष्यति ।
पतिं मां श्रीकृष्णनारायणं प्राप्य प्रमोक्ष्यते ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गोकुलकन्यानां श्रीकृष्णनारायणपातिव्रत्यपराणामष्टोत्तरशतोपचारैर्व्रतपूजादिभिः श्रीकृष्णपतिप्राप्तिरित्यादिनिरूपणनामा षड्विंशत्यधिकचतुश्शततमोऽध्यायः ॥ ४२६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां तासां पुनःप्राप्तिस्वरूपिणीम् ।
यदा कृष्णो द्वारिकायां समागत्याऽवसत्तदा ॥ १ ॥
शोकातुरास्तु ताः सर्वास्तत्यजुर्वारि भोजनम् ।
श्रीकृष्णेन मया ताश्च पुनः पुनस्तदन्तिकम् ॥ २ ॥
गत्वा त्वदृश्यरूपेण सान्त्वयिताः प्रसादिताः ।
आप्यायिता आनन्दिता यथेष्टक्रीडनादिभिः ॥ ३ ॥
अदृश्येन स्वरूपेण प्रतिगोपीं रमाम्यहम् ।
पार्श्वस्था नैव जानन्ति यतस्ते चर्मचक्षुषः ॥ ४ ॥
तास्तु दिव्याः प्रजानन्ति वदन्ति यमुनातटे ।
सख्यो मिलन्ति विजने मां स्तुवन्ति हसन्ति च ॥ ५ ॥
मां विना ताः क्षणं स्थातुमशक्ता अमिलँस्तटे ।
चक्रुश्च निश्चयं गन्तुं द्वारिकां कान्तसन्निधौ ॥ ६ ॥
दिव्यदेहास्तु ताः सर्वाः कृत्वा रूपं द्वयं द्वयम् ।
एकरूपेण तत्रैव गोकुले तस्थिरे सदा ॥ ७ ॥
द्वितीयेन तु दिव्येन मिलितास्तु सहस्रशः ।
कृष्णनारायणपत्न्यो नीत्वोपदा यथाबलम् ॥ ८ ॥
भौतिकैश्चाऽदृश्यरूपा व्योममार्गेण संययुः ।
घटिकाऽऽभ्यन्तरे प्रापुर्दिव्यां पुष्करिणीं शुभाम् ॥ ९ ॥
अहं योगेन ता ज्ञात्वा प्रतिजगाम सत्वरम् ।
स्वागतं कृतवाँस्तासां दधे रूपसहस्रकम् ॥१०॥
आनन्दं प्रददौ शीघ्रं ददौ भोज्यादिकं ततः ।
उपदा जगृहे पश्चाच्चिरं तापं ह्यपानुदम् ॥११॥
एवं द्वीपे द्वारिकायां ररक्ष चिरमेव ताः ।
तर्पिताश्चाज्ञया सर्वाः सिषेविरे यथेष्टकम् ॥१२॥
एकदा रैवते रन्तुं मया ताश्च समर्थिताः ।
आययुश्च विचेरुश्च रेमिरे मां ववल्गिरे ॥१३॥
स्वर्णरेखासरित्तीरे सुगन्धिपुष्पवासिते ।
कोटिवृक्षवने रम्ये कामाऽऽनन्दं प्रपेदिरे ॥१४॥
तास्तु दृष्ट्वा महारम्यं स्थलं रैवतपत्तलम् ।
निश्चिक्युर्मां भोजयितु सस्मरुर्भोजनानि च ॥१५॥
तत्रस्था वनदेव्यस्तु योगिन्यो योगिनीगिरेः ।
सिद्धस्त्रियोऽप्सरादास्यश्चाऽऽनिन्युर्भोज्यानि सर्वशः ॥१६॥
सौवर्णानि राजतानि पात्राणि पर्णजानि च ।
ब्रह्मद्रुमदलपात्राण्यानिन्युर्विविधानि ताः ॥१७॥
ता अपि जन्मसाफल्यं मन्वानाश्च प्रहर्षिताः ।
भोजयामासुरत्यर्थमातिथ्यं चक्रुरादरात् ॥१८॥
रैवत्यो देवताः कन्या गौकुल्यः कन्यकास्तथा ।
श्रीकृष्णं कोटिरूपस्थं भोजयामासुरीश्वरम् ॥१९॥
कार्तिके यानि भोज्यानि चाऽन्नकूटेऽर्हणानि वै ।
मार्गशीर्षे च देयानि तान्याजह्रुर्हरेः कृते ॥२०॥
सर्वाणि भोजयामासुर्नारायणहृदान्तिके ।
शृणु लक्ष्मि ! च नामानि यान्यहं भुक्तवाँस्तदा ॥२१॥
वक्ष्यामि तेऽन्नपानादिव्यञ्जनादीन्यशेषतः ।
हिरण्मयानि पात्राणि राजतानि सहस्रशः ॥२२॥
विस्तीर्णानि सुन्दराणि पालाशानि बहून्यपि ।
कच्चोलाश्च शरावाश्च कुडवाश्च सहस्रशः ॥२३॥
विन्यस्ताः सन्निधौ मे च विशाले भूतले तदा ।
जलानां कलशाः सोपपात्रास्तत्र धृताः शुभाः ॥२४॥
पायसं कामधेनूनां कन्याभिस्त्वर्पितं ततः ।
सशर्करो दुग्धपाकः सुगन्धिभक्त उत्तमः ॥२५॥

मुद्गाः सौगन्ध्ययुक्ताश्च पात्रीषु संधृतास्तदा ।
नानाव्यञ्जनपात्र्यश्च निम्बूरसादिमिश्रिताः ॥२६॥
फलमूलप्रपाकाश्च कर्पूरादिसुवासिताः ।
शतशो व्यञ्जनभेदा निहिताः पात्रिकासु वै ॥२७॥
द्राक्षाश्च मिश्रिताश्चूतकरमर्दकसंयुताः ।
मरीचपिप्पलीशूण्ठीकर्पूरैलाऽऽर्द्रकैर्युताः ॥२८॥
काथाः क्वथिका विविधाश्चटन्यस्तिक्तमिष्टिकाः ।
जम्बूरसान्विताः पत्रवल्लीनां भर्जकास्तथा ॥२९॥
प्रलेहनाश्च विविधाः कुसुमामोदसंभृताः ।
पात्रीषु निहितास्ताभिरुष्णभावाः समुत्तमाः ॥३०॥
शर्करादुग्धयुक्ताश्च मण्डका वर्तुलाः शुभाः ।
प्रफुल्लाः पुष्पवटिकाः पात्रीषु परिवेषिताः ॥३१॥
सकेसरं सशर्करं हैयंगवीनमुत्तमम् ।
घृतं श्रेष्ठं महिषीणां वाटिकासु समर्पितम् ॥३२॥
पुटेषु निहिताश्चूर्णाश्चार्द्रपत्रफलादिजाः ।
स्थालेषु चार्पितास्ताभिः सौत्राह्निकाश्च पूरिकाः ॥३३॥
पोलिकाश्च शतच्छिद्रा अपूपाः पूपकास्तथा ।
सुमिष्टपोलिकामिष्टपूरिका युगपोलिकाः ॥३४॥
विशालपोलिकाश्चापि पूर्णप्रपोलिकास्तथा ।
रोटका घृतपूर्णाश्च घृतपूराश्च शाटकाः ॥३५॥
चणका नैकधा माषा वल्लाश्च संस्कृता नवाः ।
सूत्रफेण्यः पर्पटाश्च वटाः कूष्माण्डमाषजाः ॥३६॥
वटिका नवधा चैव समर्पिता मुदा तदा ।
जातीफलमरीचैलाकेसराढ्या च पायसी ॥३७॥
सिद्धान्नं तादृशं दुग्धपक्वं पात्रेषु चार्पितम् ।
चित्रवर्णं नैकरसं राजिकाराद्धमुत्तमम् ॥३८॥
कृतं बहुविधं ताभिश्चिञ्चिणीदधिचूतजम् ।
द्राक्षेक्षुरसकदलीबिल्वरसादिनिर्मितम् ॥३९॥
घृतपक्वानि तैलेन पक्वानि कन्दकानि च ।
तथा पक्वानि पत्राणि सपिष्टोपरसानि च ॥४०॥
पिष्टाचारालीबीजैश्च नारीकेलस्य गर्भकैः ।
खसबीजैर्लवंगैश्च मिश्रिता घृतशर्करैः ॥४१॥
कटाहे पाचिता दुग्धैस्तिलतण्डुलस्वल्पकाः ।
स्निग्धा रम्याः फेणिकाश्चार्पितास्ताभिर्मुहुर्मुदा ॥४२॥
घृतपक्वाः सकर्पूरा दत्तास्त्रिधारिपूरिकाः ।
चारालीबीजयुक्ताश्च खसबीजप्रलेपिताः ॥४३॥
द्राक्षान्तर्वासयुक्ताश्च मोदका बहुजातिकाः ।
सगूडाः सशर्कराश्च सखण्डा दुग्धमर्दिताः ॥४४॥
जलीयाश्च घृतीयाश्च वह्निकुण्डप्रपाचिताः ।
घृते च पाचिताश्चापि स्वल्पघृताक्तचूर्णकाः ॥४५॥
नारीकेलसुगर्भैलालवंगकर्पूरान्विताः ।
वंशपुष्पाजपुष्पादिसंमिश्राः मोदकाः शुभाः ॥४६॥
वृक्षनिर्याससंयुक्ताः पक्वगुन्द्रादिमिश्रिताः ।
बदाममोदकास्तिलमोदका मौक्तिकादयः ॥४७॥
लड्डुका गोलकाश्चान्ये मुद्गचणकपिष्टजाः ।
ताण्डुला लड्डुकाश्चापि द्वात्रपिष्टादिलड्डुकाः ॥४८॥
स्थालेषु चार्पितास्ताभिर्वर्तुलाश्च सुगन्धिनः ।
चतुःखण्डास्तथा दत्ता महाशुभस्य शोभनाः ॥४९॥
मोहनस्थालखण्डाश्च पर्पिचूर्णपटास्तथा ।
बिन्दुकीलड्डुकाश्चापि माषमोदकजातयः ॥५०॥
ग्रन्थकाः कलिकाश्चैव सेविकाश्च चतुर्वटः ।
बाष्पाटाः शाटकाश्चापि शष्कुल्यः पिण्डकास्तथा ॥५१॥
गणग्रन्थाः शर्कपाराः कंसाराश्च बिरञ्जकाः ।
दुग्धमापः श्रीखण्डश्च पीतसाराश्च तक्रकम् ॥५२॥
संयावाद्याः पूरणानि जाम्बवश्च प्रसूत्रकाः ।
मिष्टा अमिष्टाः तिक्ताश्च लावण्यव्यञ्जनास्तथा ॥५३॥
कुलत्थिकाः संस्कृताश्च राजमाषादयस्तथा ।
ताभिः पात्रेषु पर्णेषु यथावस्तुप्रपूरिताः ॥५४॥
आर्द्रकस्य लवंगानां चूतानामारनालकम् ।
आमलकस्य निम्बूनां गरिम्णश्चारनालकम् ॥५५॥
मरीचकानां कन्दानां शुण्ठीनामारनालकम् ।
कैरटानां कर्मदानां शिग्रूणां चारनालकम् ॥५६॥
मूलकानां च पत्राणां खर्जूराणां रसांस्तथा ।
खारिकाणां च वन्यानां वंशानामारनालकम् ॥५७॥
क्षीरिकाणाममृतानां गल्कीनां च व्यञ्जनम् ।
घृताशानां च दुग्धीनां परवलानां व्यञ्जनम् ॥५८॥
कुनराणां मृदालूनां रक्तालूनां च व्यञ्जनम् ।
बृहतीनां सुवासानां मेथिकानां च भाजिकाः ॥५९॥
इक्षुरसः पुष्पिकापः द्राक्षा च क्षीरिकाफलम् ।
चूतानि नवरंगानि कदलान्यमृतानि च ॥६०॥
आमलकानि बिल्वानि रसानि विविधानि च ।
ताभिर्दत्तानि पात्रेषु भावुकाभिर्मुदा मुहुः ॥६१॥
सशर्करं पयःप्रस्थं ह्यर्धं घृतं मनाङ् मधु ।
मनाक् शुण्ठीर्मनाङ्मरीचकं कर्पूरकं मनाक् ॥६२॥
गालितं क्वथितं ताभिर्दत्तं पानोत्तरं तु मे ।
ताम्बूलकानि श्रेष्ठानि श्रेष्ठवस्त्वन्वितानि च ॥६३॥

ताभिर्दत्तानि तत्रैव जलानि विधिना तथा ।
दत्तानि भोजितश्चाहं सर्वाभिश्च पृथक् पृथक् ॥६४॥
कवलैः कण्ठसंस्पर्शैः सत्पेयैस्तर्पितोमुहुः ।
ताश्च सर्वाः करे कृत्वा कवलानि तु मे ददुः ॥६५॥
मुखे गृह्णामि भावेन भुनज्मि चापि सत्वरम् ।
देवताश्चागता आर्षा मुनयः पितरस्तथा ॥६६॥
दर्शनार्थं मया भुक्तं प्रसादं जगृहुस्तु ते ।
एवं ताभिः कारितं मे भोजनं बहुतृप्तिदम् ॥६७॥
मया भुक्त्वा तु ताः सर्वाः प्रत्येकं भोजिता मया ।
कवलानि चूम्बनानि स्पर्शनानि प्रदाय च ॥६८॥
सर्वाभ्यः सर्ववस्तूनां प्रसादास्तृप्तिदा मया ।
प्रदत्ता भोजिताश्चापि जलं ताम्बूलमर्पितम् ॥६९॥
तदा नारायणह्रदे मत्स्या भूत्वा तु देवताः ।
पक्षिणश्च पितरोऽपि भूत्वाऽवापुः प्रसादकम् ॥७०॥
कन्याभिः सेवितस्तत्र कुंजेषु तृप्तिपूर्वकम् ।
पुष्पाणां हारमालाभिः श्रृंगारितस्तथा ह्यति ॥७१॥
वन्दितः पूजितश्चापि प्रार्थितः सर्वदा गिरौ ।
रैवते वासलाभाय मुहुः सुखप्रदे गिरौ ॥७२॥
मया तासां कृता चाज्ञा यान्तु वै गोकुलं प्रति ।
तास्तु प्राहुः सदा कृष्ण ! रक्षयाऽत्र गिरौ हि नः ॥७३॥
समागच्छ सदा चात्र सुखदानाय माधव ! ।
त्वय्यर्पिता वयं सर्वास्तनुना कर्मणा धिया ॥७४॥
त्वयि प्राप्ते क्व गन्तव्यं कान्तस्य चरणौ विना ।
सदा ते सेविका देहि सौख्यं नो रमणेन वै ॥७५॥
नैकरूपी प्रभुः कामैः रत्या तास्त्यतर्पयत् ।
अथ तत्र ततो लक्ष्मि ! ब्रह्मा कार्याय चागतः ।
गोप्यं नान्ये विजानन्ति जानाम्यहं नरायणः ॥७६॥
ब्रह्मा प्राह तदा मह्यं रहस्यं वाच्यमेव न ।
यावत् कालात् कृतयुगस्त्रेता द्वापर एव च ॥७७॥
पृथ्व्यां राज्यं प्रकुर्वन्ति कलिर्निराश एव यत् ।
स्थानं क्वाऽप्यलभमानो ययौ लोकाचलं रुषा ॥७८॥
तपः करोति तत्रैव स्थानस्य लब्धये तु सः ।
तपःफलप्रदानाय त्वया गन्तव्यमेव हि ॥७९॥
वरदानं कृपासिन्धो दातव्यं लोकरक्षकम् ।
द्वापरस्य गतः कालः कलिः पृथ्व्यां भविष्यति ॥८०॥
गंगादीनि च तीर्थानि धर्मश्च देवतादयः ।
पञ्चसहस्रवर्षाणि न स्थास्यन्ति भुवि प्रभो ॥८१॥
तावत्कालं कलिः पृथ्व्यां निर्बलो निवसिष्यति ।
क्रमेण तु ततस्तिष्यबले जाते भुवस्तले ॥८२॥
सर्वमानुषरूपेषु प्रकटः सन्निवत्स्यति ।
ततश्चाधर्मबीजानि रोपयिष्यति सर्वशः ॥८३॥
एकाकारं जगत् कर्तुं यतिष्यते स सर्वथा ।
सर्वं जगद् धर्महीनं करिष्यति स्वपुष्टये ॥८४॥
जातिभेदो धर्मभेदो ह्यस्पृश्यास्पर्श इत्यपि ।
अगम्यागमनं चाऽप्यभक्ष्याऽभक्ष्यादिकं तदा ॥८५॥
देवचाण्डालयोः शुद्धिर्मनुधर्मोदयस्तदा ।
रुग्णाः सर्वे भविष्यन्ति ततो धर्मस्य गुप्तये ॥८६॥
सौराष्ट्रे रैवते देशे तदा कृष्ण पुनस्त्वया ।
अश्वपट्टसरस्तीरे ग्राह्यं प्राकट्यमेव च ॥८७॥
सर्वविद्यासर्वधर्माऽधिष्ठात्रा च सता त्वया ।
कृष्णनारायणनाम्ना भवितव्यं ध्रुवं प्रभो ॥८८॥
तवोपदेशात् सर्वत्र दीर्घकालं पुनर्भुवि ।
वृषो भक्त्यधिकः पुष्टो जीविष्यति जने जने ॥८९॥
मत्स्यध्वजधनुःशूलस्वस्तिकवज्रचिह्नितम् ।
भगवन्तं परिज्ञाय शरणं ते जनास्तदा ॥९०॥
आयास्यन्ति तरिष्यन्ति तव दर्शनसेवनात् ।
भक्तिः पृथ्व्यां तदा कृष्ण तव दिव्येन वर्चसा ॥९१॥
पुष्टिमेष्यति सर्वत्र जना यास्यन्ति मोक्षणम् ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥९२॥
इतिमन्त्रं गुरोः प्राप्य भक्त्या यास्यन्ति धाम ते ।
अथ तिष्यबले जाते प्रजाश्चाण्डालसन्निभाः ॥९३॥
तदा स्वत्वं परत्वं च समूलं संविनंक्ष्यति ।
योनिबन्धो धनबन्धः स्वार्थन्यायो भविष्यति ॥९४॥
तदा पुनस्त्वया कृष्ण भवितव्यं पुनः पुनः ।
कलेर्नाशाय सत्याय सत्यधर्माय वै पुनः ॥९५॥
शिक्षादानाय प्राकट्यं तव कार्यं पुनः पुनः ।
यावत् पृथ्व्यां प्रतिमायां देवास्तीर्थानि वै जले ॥९६॥
मनुष्येषु च पावित्र्यं तावन्मैतु बलं कलिः ।
तथाऽस्त्विति हरिः प्राह ब्रह्मा नत्वा स्थितः पुरः ॥९७॥
ब्रह्मणे हरिणा सर्वं प्रासादिकं प्रभोजितम् ।
कृष्णः प्राह विनोदेन कुमारिकास्तदोत्तरम् ॥९८॥
अहं पृथ्व्यां पुनश्च श्रीकृष्णनारायणः प्रभुः ।
कलेः पराभवार्थं वै भविष्यामि सुराष्ट्रके ॥९९॥
तावद् यूयं प्रियाः सर्वास्तपः कुर्वन्तु रैवते ।
प्राकट्ये मे च तत्रैव सुयोगो वो भविष्यति ॥१००॥

श्रुत्वैतत् ताः परं खिन्नाः साश्रुनेत्रास्तदाऽभवन् ।
तावत्कालं वियोगं चाऽसहमाना हि तापनम् ॥१०१॥
भगवांश्च तदा प्राह सान्त्वयित्वा शनैः पुनः ।
वियोगाऽसहमानानां पञ्चवर्षसहस्रकम् ॥१०२॥
सुक्षणमात्रकालो वै सत्यलोके गमिष्यति ।
अद्यैव ब्रह्मणा साकं यूयं गच्छत कन्यकाः ॥१०३॥
ब्रह्मलोकं प्रपश्यन्तु क्षणैकमात्रमुत्सुकाः ।
पुनश्चात्र समायान्तु ब्रह्मणा प्रेरिताः प्रियाः ॥१०४॥
एभिर्दिव्यशरीरैर्वै भक्तिमत्यो भवन्तु मे ।
अहं चात्र भविष्यामि सौराष्ट्रे भगवान् स्वयम् ॥१०५॥
सतां मध्यगतश्चिह्नैर्ज्ञातव्यः कृष्ण एव हि ।
यूयं सर्वा दिव्यदेहाः सौराष्ट्रादौ गृहे गृहे ॥१०६॥
जन्म प्राप्य तदा भक्तिमत्यो मे वै भविष्यथ ।
भवतीनां सुसत्संगात् नरा नार्योऽपि कोटिशः ॥१०७॥
मम भक्तिप्रकर्तारो भविष्यन्ति गृहे गृहे ।
आचार्योऽहं गूढरूपो विचरिष्यामि साधुवत् ॥१०८॥
मत्तः सुखमवाप्यैव जना यास्यन्ति धाम मे ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥१०९॥
इति जापं करिष्यन्ति यास्यन्ति मत्पदं हि ते ।
मम सेवां मम पूजां मम नामानुकीर्तनम् ॥११०॥
मत्कथाश्रवणं ये वै करिष्यन्ति तु ते जनाः ।
यास्यन्ति परमं धाम शाश्वतं श्रीनिषेवितम् ॥१११॥
इत्युक्तास्ताः प्रसन्नाश्च भूत्वा च ब्रह्मणा सह ।
ययुः सत्यं ब्रह्मलोकं श्रीकृष्णो द्वारिकां ययौ ॥११२॥
इत्युक्ता मत्कथां तुभ्यं पापतापप्रणाशिनी ।
मया पूर्वं हि यज्जातं संस्मृत्यात्र निवेदितम् ॥११३॥
ताश्च सर्वा मम पत्न्यो वर्तन्ते मयि चार्पिताः ।
मदर्थे त्यक्तसर्वस्वाः सर्वा मम पतिव्रताः ॥११४॥
तासां वै दर्शनात्स्पर्शात् लोका यास्यन्ति मोक्षणम् ।
किं पुनर्मम योगेन साक्षात् दिव्यप्रसेवया ॥११५॥
इति ते कथितं लक्ष्मि! वृत्तं पुराभवं शुभम् ।
युगे युगे भविष्यामि कृष्णनारायणो ह्यहम् ॥११६॥
बहुवारं प्रतियुगं भवामि प्रभवामि च ।
क्षत्रतेजाः साधुतेजास्तपस्तेजा मुनीश्वरः ॥११७॥
शास्त्रतेजा ज्ञानतेजा धर्मतेजा गुरोर्गुरुः ।
धर्मपोष्टा भक्तिपोष्टा भक्तपाता च शासकः ॥११८॥
सतीत्राता प्रियाभर्ता रतिदाता रमापतिः ।
राज्यदाता यज्ञपाता दैत्यहर्ता च भिक्षुकः ॥११९॥
दुःखहर्ता सुखदाता शरण्यश्च चतुर्भुजः ।
प्रभावान् पारवांश्चापि कणस्थलशरीरवान् ॥१२०॥
कृष्णपातिव्रत्यनिष्ठास्तरिष्यन्ति सदा प्रिये ।
इति ते कथितं हार्दं पतिः कृष्णो न चापरः ॥१२१॥
रक्षयिष्ये रक्षयामि ररक्षापि दिने दिने ।
भक्तियुक्तान् मञ्जुहंसान् पातिव्रत्यपरायणान् ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गोकुलीयगोपीनां द्वारिकाऽऽगमोत्तरं रैवताद्रौ श्रीकृष्णाय द्वादशोत्तरशतविधभोजनभोगदानं सौराष्ट्रादौ सर्वत्र प्राकट्यवचनं श्रीकृष्णनारायणस्य पातिव्रत्येन पुनः प्राप्तिश्चेत्यादिनिरूपणनामा सप्तविंशत्यधिकचतुश्शततमोऽध्यायः ॥४२७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! कथां रम्यां वीरबाहोः सतीस्त्रियाः ।
काम्पिल्यनगरस्यासीद् वीरबाहुरिति प्रधीः ॥ १ ॥
सत्यवादी च नृपतिर्ब्राह्मणो मम भक्तराट् ।
भक्तो भागवतानां च मत्कथायां रुचिंगतः ॥ २ ॥
दाताऽनाथाऽऽश्रयप्रदः पत्नीव्रतश्च पुत्रवान् ।
तस्य कान्ता कान्तिमती महासाध्वी पतिव्रता ॥ ३ ॥
मुक्त्वैकं मां वीरबाहुर्नान्यज्जानाति दैवतम् ।
एकदा तद्गृहं यातो भारद्वाजो महामुनिः ॥ ४ ॥
राजा चकार चातिथ्यं स्वागतं चार्घ्यमासनम् ।
प्रणनाम च तं भक्त्या ह्युवाच सुप्रमोदितः ॥ ५ ॥
अद्य मे सफलं जन्म त्वद्य मे सफलं दिनम् ।
अद्य मे सफलं राज्यमद्य मे सफलं गृहम् ॥ ६ ॥
सफलश्चाश्रमश्चापि सफला धनबान्धवाः ।
यस्य मे ब्रह्मविज्ञस्य दर्शनं चरणं गृहे ॥ ७ ॥
यस्य हरिः प्रसन्नोऽस्ति तद्गृहं यान्ति साधवः ।
हरेर्भक्ता गृहे यस्य तस्य कोट्यघसंक्षयः ॥ ८ ॥
तीर्थं भवति भवनं यत्पादरजसा दिवम् ।
राज्यं लक्ष्मीर्गजाश्वादि सर्वं मुने! त्वदर्थकम् ॥ ९ ॥
भवद्दर्शनलाभेन जीवन्मुक्तोऽस्मि वर्तितः ।
महाभागवतश्चासि नाऽदेयं ते ममास्ति यत् ॥१०॥
वैष्णवायाऽर्पितं स्वल्पं मेरुतुल्यं फलं भवेत् ।
यद्गृहे नास्ति चरणं सतां कृष्णस्य योगिनः ॥११॥

तद्गृहं शववासाहँ दिनं च विफलं भवेत् ।
यद्गृहं च दिनं चापि सतां प्राप्तिविवर्जितम् ॥१२॥
वद मे सर्वधर्मज्ञ ! गार्हस्थ्यवर्तिनां च यत् ।
तारकं साधनं श्रेष्ठं बन्धनं हरिधामदम् ॥१३॥
भारद्वाजः प्रसन्नः सन् स्मृत्वा कृष्णनरायणम् ।
उवाच राजन् भद्रं ते योऽसि भक्तजनप्रियः ॥१४॥
स्मृद्धिस्तु सुलभा राजन् हृद्भावो दुर्लभः खलु ।
या त्वयि भावना भक्ते नैकजन्माऽर्जिता हि सा ॥१५॥
यस्य कृपालुः श्रीकृष्णनारायणः श्रियः पतिः ।
तस्य वै भावना सत्सु सुदिव्या मोक्षदा हि सा ॥१६॥
श्रीहरिर्हि सदा सेव्यः सेव्याश्च साधवः सदा ।
साध्व्यः सेव्याश्च नारीभिर्याश्च कृष्णपतिव्रताः ॥१७॥
धनं धान्यं सुतः कीर्तिः राज्यं सौभाग्यमर्हणम् ।
आरोग्यं कान्तिरैश्वर्यं त्वाशीर्भिर्लभ्यते सताम् ॥१८॥
साधवस्तोषिता येन तेन कृष्णः प्रतोषितः ।
कृष्णे तुष्टे जगत् तुष्टं सदेवमुनिमानवम् ॥१९॥
अतुष्टे तु हरौ सर्वं तुष्टं चापि निरर्थकम् ।
धन्योऽसि त्वं महाराज ! राजसे वैष्णवो महान् ॥२०॥
धन्योऽस्यधिको राजसे यत्ते पत्नी पतिव्रता ।
पातिव्रत्यं द्वयं यस्याश्चोभयं साधितं तया ॥२१॥
स्वामिनि श्रीहरौ कृष्णे तथा कान्ते विवाहिते ।
एतल्लोके सुखं प्राप्तं प्राप्स्यते धाम वै तथा ॥२२॥
नेदृशं साधनं लोके गार्हस्थ्यस्य तु तारकम् ।
गृहे पतिव्रतानारी कृष्णे भक्तिश्च शाश्वती ॥२३॥
राज्ये प्रजा भागवती वैष्णवी धार्मिकी सती ।
तत्र सदा प्रवस्तव्यं न त्ववैष्णवराजके ॥२४॥
वरं वासो वने तीर्थे न तु राष्ट्रे ह्यवैष्णवे ।
यत्र भागवतो राजा प्रशास्ति च वसुन्धराम् ॥२५॥
वैकुण्ठं तद्धि मन्तव्यं फलं वैकुण्ठमेव यत् ।
राजा भक्तो यथार्थोऽस्ति सतां पात्रं स आशिषाम् ॥२६॥
तद्राज्यं वर्धते नित्यं दम्पत्योः पातिव्रत्यतः ।
राजन्नेत्रं सफलं मे पश्यामि त्वां हि वैष्णवम् ॥२७॥
सफलौ च तथा कर्णौ यच्छृणोमि पतिव्रताम् ।
पतिव्रता स्वयं लक्ष्मीस्वरूपा ब्रह्मणा कृता ॥२८॥
पत्नीव्रतो वैष्णवश्चोद्धारको ब्रह्मणा कृतः ।
वैष्णवानां दर्शनं वै शान्तिदं मोक्षदं तथा ॥२९॥
लब्धं च दर्शनं तेऽत्र तव श्रीसमयोषितः ।
स्वस्ति तेऽस्तु गमिष्यामि सुखी भव जनाधिप ! ॥३०॥

अवैधव्यं च ते पत्न्याः कान्तिमत्याः सदा शुभम् ।
पत्यौ भक्तिः केशवे च निश्चला भक्तिरस्तु वाम् ॥३१॥
पत्यौ कृष्णे त्वैक्यबुद्धिः कान्तिमति ! सदाऽस्तु ते ।
पूर्वं त्वया पातिव्रत्यं पालितं त्वतियत्नतः ॥३२॥
पतिस्तवाऽयं पूर्वस्मिन् जन्मन्यासीत् प्रहिंसकः ।
नास्तिको दुष्टचारित्रः शूद्रः परप्रियारतः ॥३३॥
कृतघ्नो दुर्विनीतश्च सदाचारविवर्जितः ।
कर्मणा मनसा वाचा त्वया नित्यं हि देववत् ॥३४॥
सेवितः कृष्णबुद्ध्या च पातिव्रत्यवृषेण च ।
शूद्रीत्वेऽपि त्वया कश्चिन्नान्यो नरः प्रकल्पितः ॥३५॥
पतिव्रता महासाध्वी परस्पर्शविवर्जिता ।
दुष्टभावादिहीना च सिषेविषे पतिं हरिम् ॥३६॥
कदाचिद् द्रव्यहीनोऽयं पतिस्तेऽरण्यमागतः ।
क्षीयमाणाऽपि भार्या त्वं नाऽत्यजः स्वं पतिं हरिम् ॥३७॥
शशादिभिर्वर्तयन्तौ दम्पती वनवासिनौ ।
ददृशाथुः कदाचिद्वै वने भ्रष्टपथं मुनिम् ॥३८॥
ब्राह्मणं श्रीकृष्णनारायणभक्तं सुवैष्णवम् ।
मध्याह्ने तृषितं चापि पतितं मूर्च्छितं तथा ॥३९॥
हृदि कृष्णं स्मरन्तं च देवशर्माभिधानकम् ।
ब्राह्मणं तं सिषेचाथे जलेन पवनेन च ॥४०॥
पादयोर्मर्दनेनापि फलादिभोजनेन च ।
विष्णुं कृष्णं हरिं मत्वा वैष्णवं तारकं द्विजम् ॥४१॥
आश्रमे छायया व्याप्ते रम्ये निन्यथुरादरात् ।
युवाभ्यां सेवितः सम्यक् स्नापितो भोजितस्तथा ॥४२॥
साष्टांगः सन्नतश्चोक्तो भावभक्त्या स वैष्णवः ।
आवयोस्तारणार्थायाऽतिथिर्विष्णुस्त्वमागतः ॥४३॥
दर्शनात्तव विप्रर्षे जातोऽस्मत्पापसंक्षयः ।
वद विप्र वने किञ्चित्साहाय्यं चेदपेक्ष्यते ॥४४॥
ब्राह्मणस्तु तदा प्राह पुण्ययोगेन वै वने ।
भवद्योगो मम जातो जीवितो वै वनान्तरे ॥४५॥
करवाणि युवयोः किं व्रतं किञ्चिदभीप्सितम् ।
शूद्रः प्राह यथा सौरिलोकदर्शनं मा भवेत् ॥४६॥
पत्न्या सह प्रगच्छामि कृष्णधाम हि शाश्वतम् ।
उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥४७॥
देवशर्मा तदा प्राह शृणु प्राक्चरितं तव ।
पूर्वजन्मनि विप्रस्त्वमवन्त्यां धार्मिको ह्यभूः ॥४८॥
तव पत्नी तदा चेयं पातिव्रत्यपरा सती ।
आसीद्धर्मपरा नित्यं ह्यतिथीनां प्रसेविका ॥४९॥

तवाऽऽज्ञयाऽनया त्वन्नं ह्येकादश्यां सुपाचितम् ।
ब्राह्मणेभ्यश्चातिथिभ्यो भोजनार्थं समर्पितम् ॥५०॥
जातं पुण्यं त्वन्नदानाद् भोजनात्पापमित्यपि ।
पुण्यपापप्रतापेन यमादिष्टेन वै पथा ॥५१॥
युवां शूद्रकुले जन्माऽवापथुः पुण्यमिश्रितम् ।
यावत्पुण्यमभूत् तावद्धनधान्याद्यभूच्च वाम् ॥५२॥
पुण्यं नष्टं ततो वन्यो वासोऽयं समुपागतः ।
किन्तु विदर्भनगरे वर्तते ते सुतासुतः ॥५३॥
कृतं तेन विधानेन हरेरेकादशीव्रतम् ।
प्रदत्तं तेन तत्पुण्यं युवाभ्यां यद्बलाच्च वाम् ॥५४॥
धर्मोपरि गतिर्नित्यं वर्तते युवयोः शुभा ।
कान्तिमत्याः पातिव्रत्ये सदा त्वासीन्मतिस्तदा ॥५५॥
तेन पुण्यप्रभावेण युवयोः संगतिः सदा ।
वियोगो जायते नैव न भूतो न भविष्यति ॥५६॥
स्वल्पेनैव प्रकालेन यूयं स्वर्गं गमिष्यथः ।
तत्र पतिव्रताधर्मबलेन सुचिरं सुखम् ॥५७॥
समनुभूय भूलोके शूद्रजन्म ह्यवाप्स्यथः ।
तावुभौ च युवां जातौ विष्णुभक्तिपरायणौ ॥५८॥
अथोत्तरं शुभं जन्म मम सेवाप्रभावतः ।
पातिव्रत्यप्रभावेण दीर्घं राज्यमवाप्स्यथः ॥५९॥
इत्युक्त्वा स ययौ विप्रस्तीर्थार्थं च युवामुभौ ।
कालधर्मं समापन्नौ राज्ञी राजा च वैष्णवौ ॥६०॥
जातौ स्थः पुनरेवात्र सती भार्या तवाऽस्ति च ।
त्वं तु पत्नीव्रतश्चासि सेवसे मादृशान् सदा ॥६१॥
विष्णुं नारायणं कृष्णं श्रीपतिं कमलापतिम् ।
लक्ष्मीपतिं सतां नाथं सेवसे पातिव्रत्यतः ॥६२॥
इयं साध्वी तव भार्या कृष्णं त्वां सेवते सदा ।
तत्फलं दीर्घराज्यं च पुत्रस्तेऽस्ति सुवैष्णवः ॥६३॥
प्रजास्ते सर्वदा नारायणे पतिव्रतास्तथा ।
वैष्णव्यः सन्ति तेनाऽत्र जयसे मोक्षणं प्रति ॥६४॥
कुरु भक्तिर्हरेर्नित्यं प्रसेवय गुरून् यतीन् ।
पत्नीव्रतं सदा रक्ष पातिव्रत्यं सति ! ह्यव ॥६५॥
एवं वै वर्तने स्वर्गं शाश्वतं त्वत्र तेऽस्ति हि ।
अन्ते धाम परं दिव्यं गोलोकं यास्यथो ध्रुवम् ॥६६॥
सम्प्राप्तैकादशीपुण्याद् विप्रस्याऽऽतिथ्यसेवनात् ।
पातिव्रत्याच्च भार्यायाः प्राप्तं राज्यादिकं त्वया ॥६७॥
भज विष्णुं सदा त्वं श्रीकृष्णनारायणं प्रभुम् ।
भज साध्वि स्वामिनं श्रीकृष्णनारायणं पतिम् ॥६८॥

इत्युक्त्वा प्रययौ बद्रीं भारद्वाजो महामुनिः ।
चक्राते तावुभौ भक्तिं ययतुर्धाम मे ह्युभौ ॥६९॥
शृणु लक्ष्मि ! कृष्णपातिव्रत्येन नाम मे जपेत् ।
तस्मै ददामि वैकुण्ठं गोलोकं वाऽक्षरं पदम् ॥७०॥
मम नाम प्रवक्तव्यं क्षणे क्षणे विशेषतः ।
राधाकृष्णेति वक्तव्यं प्रभाकृष्णेति प्रीतिदम् ॥७१॥
हरिकृष्णेति वक्तव्यं दुःखहन् मोक्षदं परम् ।
प्रतिज्ञैषा तु मे लक्ष्मि ! सर्वथा शरणागतः ॥७२॥
सर्वेच्छां समवाप्नोति वैकुण्ठं कमलामपि ।
मद्भक्ताय ददाम्येव तत्सर्वं यन्ममाऽस्ति वै ॥७३॥
वदति श्रीकृष्णनारायणेति संस्मरत्यपि ।
यथाकथंचिद्भजते तमहं तारयामि ह ॥७४॥
लक्ष्मीनारायणं ये तु वदन्ति मृत्युसन्निधौ ।
मृत्युर्यमश्च तद्दूतास्त्यक्त्वा यान्ति हि तं प्रिये ॥७५॥
अन्तकाले यस्य कर्णे रामरामेति चागतम् ।
वैकुण्ठे नीयते रामपार्षदैः स न संशयः ॥७६॥
ओं नमः श्रीकृष्णनारायणाय पतये नमः ।
इत्येवं गृणतो मन्त्रं नयामि मम चाक्षरम् ॥७७॥
पातिव्रत्यपरा पत्नी यत्रास्ति तुलसीदलम् ।
महाभागवतः साधुर्यत्रास्ति तत्र चास्म्यहम् ॥७८॥
अहं कृष्णः पतिः कृष्णः स्वामी कृष्णः प्रियः स हि ।
रमाप्रभामाणिकीपार्वतीनाथः स्त्रियाः पतिः ॥७९॥
जयाललिताकान्तः स नारीणां कान्त एव सः ।
पतिव्रता यतः सर्वा लक्ष्यांशसंभवाः सति ! ॥८०॥
इति ते कथितं सेवाकरणं त्वैक्यभावतः ।
पठनाच्छ्रवणाच्चास्य पातिव्रत्यफलं लभेत् ॥८१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये वीरबाहोः कान्तिमत्याश्च दम्पत्योर्भारद्वाजेन विप्रशूद्रनृपजन्मत्रयोत्तरं मुक्तिः कृतेत्यादिनिरूपणनामाऽष्टाविंशत्यधिकचतुश्शततमोऽध्यायः ॥४२८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सूर्यपुत्र्या मम पत्न्याः कथानकम् ।
याऽभूद् गोलोकमध्यस्था सखीश्रेष्ठाऽतिहासिनी ॥ १ ॥
यदा यदा सखीनां वै समुद्याने सुक्रीडनम् ।
मिलित्वा जायते तत्र हसतीयं मुहुर्मुहुः ॥ २ ॥

एकदा राधिकायुक्ता गोप्यश्च कोटिशः स्त्रियः।
जग्मुः स्नानाय सरसि दिव्ये मदर्थनिर्मिते ॥ ३ ॥
शैवाले राधिका पद्भ्यां संस्पृश्य पतिता तदा।
यमुना राधिकां धर्तुं प्रदुद्राव जहास च ॥ ४ ॥
राधा प्राह यमुने ! किं स्थाने हससि नर्मणि।
अस्थाने हसनं नैव शोभते हास्यसंभृते ॥ ५ ॥
पतिताऽहं कर्दमेन व्याप्ता पृष्ठो शिलाहता।
जलं नसि मुखे नेत्रे प्रविष्टं नर्म मा कुरु ॥ ६ ॥
एवं प्रबोधिता साऽपि धृत्वा राधां प्रगृह्य च।
वस्त्रादीनि तदाऽन्यानि ददौ सन्धारणाय वै ॥ ७ ॥
मुखं केशाः पृष्ठभागः प्रक्षालिताः सुसंस्कृताः।
तदा राधां पुनर्दृष्ट्वा प्रजहासाऽति सा मुहुः ॥ ८ ॥
राधा रुष्टा तु यमुनां प्रायशः सेविकां प्रति।
प्राह शैवालकेशा त्वं भव कर्दमशालिनी ॥ ९ ॥
यमुना तु तदा रुष्टा राधां प्राह पुनः पुनः।
त्वं प्रिये कर्दमे शैवालेऽपि विहर मद्युता ॥१०॥
त्वां परित्यज्य नैवाहं विहरामि कदाचन।
कृष्णो ज्ञात्वा शुभे प्राह मैवं मैवं प्रिये मम ॥११॥
युवाभ्यां तु विहीनोऽहं कथं स्थास्यामि शोभने।
आगमिष्याम्यहं तत्र यत्र यमुनाराधिके ॥१२॥
यमुना सूर्यपुत्री संभूत्वा नदी तु भूतले।
हिमाद्रिं प्रथमं सृष्ट्वा ययौ वृन्दावनं सती ॥१३॥
राधापि गोपिका भूत्वा रापाणस्य सुताऽनिशम्।
यमुनायास्तटे तच्छैवालकर्दमचारिणी ॥१४॥
जाता कृष्णप्रिया कृष्णसंकेतानुप्रसारतः।
यमुना कन्यकारूपा सेवते तु पतिं हरिम् ॥१५॥
एकदा कृष्णपत्न्यो वै कृष्णेन सह तद्वने।
कुमारिकाः प्रक्रीडन्ति यमुना तद् ददर्श ह ॥१६॥
सा कृष्णं संविलोक्यैव चकमे कान्तकामिनी।
कृष्णस्तां प्राह यमुने ! भव कन्या ततः परम् ॥१७॥
करिष्येऽहं विवाहं ते कलिन्दराजकन्यका।
भव शीघ्रं मम पत्नी भविष्यसि न संशयः ॥१८॥
सा तु कलिन्दराजस्य द्वितीयेन स्ववर्ष्मणा।
जाता वै कन्यका श्रीकृष्णेन साऽपि विवाहिता ॥१९॥
एकदा कृष्णपत्न्यस्तु श्रीकृष्णविरहातुराः।
कालिन्दीं मुदितां वीक्ष्य पप्रच्छुर्गतमत्सराः ॥२०॥
यथा वयं कृष्णपत्न्यस्तथा त्वमपि सूर्यजे।
वयं विरहदग्धाः स्म कथं त्वं विरहं विना ॥२१॥

तच्छ्रुत्वाऽऽह रवेः पुत्री कालिन्दी कृष्णसेविका।
दिव्यं वै श्रीकृष्णनारायणं प्राप्नोमि सर्वदा ॥२२॥
न मां विहाय भगवान् कदाचिद् याति दूरतः।
राधिकाऽस्ति महाराज्ञी कृष्णात्मा कृष्णरूपिणी ॥२३॥
अस्म्यहं राधिकांशा वै न भिद्ये कृष्णरूपतः।
राधां विना न वै कृष्णो नाऽहं च राधिकां विना ॥२४॥
कृष्णश्च मां विना नैव जानीतैकात्म्यमेव यत्।
एवं सत्यपि दास्यं वै राधायास्तु विशिष्यते ॥२५॥
तदानन्देन मुदिता विन्दामि विरहं न वै।
पतिव्रता सती नारी पतिं गर्भे हृदि व्रते ॥२६॥
पार्श्वे चात्मनि विज्ञाने रक्षत्येव न संशयः।
स्वप्ने जाग्रति निद्रायां रमते स्वामिना सह ॥२७॥
भेदो न देहयोरस्ति व्यवस्था पतिमिश्रिता।
यदेच्छति तदा सत्याः पतिर्नारायणात्मकः ॥२८॥
आगत्याऽऽनन्ददाताऽस्ति वियोगो नास्ति कर्हिचित्।
सती पतिव्रता पत्नी यद्यत् सुखं प्रवाञ्छति ॥२९॥
तत्तत्सुखप्रदानार्थं पतिरूपं दधन् हरिः।
पतिव्रतामनःकामान् पूरयत्येव सर्वथा ॥३०॥
तस्मात्पतिव्रतानार्या वियोगः स्वामिनो न वै।
स एवाऽयं कृष्णनारायणश्चास्मत्पतिः प्रभुः ॥३१॥
सर्वकामपूरकोऽस्ति वियोगो नास्ति मे क्वचित्।
श्रुत्वा ता योषितः प्राहुर्यदि कालिन्दि ! वै त्वया ॥३२॥
साकं कृष्णः सदा त्वास्ते नः प्रदर्शय साम्प्रतम्।
इत्युक्ता सा प्रहस्यैव शाटिकां स्वां करेण वै ॥३३॥
दक्षपार्श्वाद्धस्तमात्रं वियुक्तां प्रचकार ह।
तावत्तत्र स्थितः पार्श्वे समाश्लिष्य यमीं हसन् ॥३४॥
ताभिश्च लोकितः कृष्णः कालिन्दीं रमयन् मुहुः।
मुग्धाः सर्वास्तदा जाताः क्षणं दृष्ट्वा पतिं हरिम् ॥३५॥
शशंसुः सूर्यपुत्र्यास्तु पातिव्रत्यं हि तास्तदा।
तदेव पातिव्रत्यं यत् पतिर्नारायणः स्वयम् ॥३६॥
नारायणस्वरूपोऽस्ति ध्यान्तरात्माऽस्ति सर्वथा।
न विमुक्तः कदाचित्स यथाऽऽत्मा न वियुज्यते ॥३७॥
इति भक्तिमती नारी पण्डिता वै पतिव्रता।
कर्मणा विद्यते काचित् सती न मनसा हि सा ॥३८॥
मनसा विद्यते काचित् सती न कर्मणा हि सा।
बुद्ध्या काचित् सती सा न मनसा न च कर्मणा ॥३९॥
त्रीभिर्या विद्यते काचित्सा चेन्नैवाऽऽत्मना सती।
सर्वे तद्विरहायैव जायते चात्मवर्जितम् ॥४०॥

पातिव्रत्यं स्वात्मना यत् तत्पातिव्रत्यमुत्तमम् ।
मया तादृक् सदा प्राप्तं राधायाः कृपया ध्रुवम् ॥४१॥
दास्यं स्वाम्यं पातिव्रत्यं तस्मात् कृष्णो मयि स्थितः ।
राधाकृष्णस्यांऽशरूपा वयं श्रीकृष्णनायिकाः ॥४२॥
तस्याऽन्वयेन चास्मासु नित्यभोगोऽपि विद्यते ।
स एव सा सैव सोऽस्ति राधा वै प्रेमशेवधिः ॥४३॥
तयोः प्रेम सुमूर्तं सद् वंशीरूपं दधार ह ।
रुक्मिण्यादिसमावेशो राधायां लोकितो मया ॥४४॥
यूयं सर्वाश्च राधायां श्रीकृष्णे स्थ समन्विताः ।
नित्यानन्दमहावार्धियोजिता न वियोजिताः ॥४५॥
किन्तु ह्येवं न जानीथ तस्माद् व्याकुलतां गताः ।
आत्मनां पातिव्रत्ये तु नैवं व्याकुलता भवेत् ॥४६॥
पातिव्रत्येऽपि गोपीनां भवतीनामिव भ्रमः ।
विरहाभासरूपः स आसीदुद्धवनाशितः ॥४७॥
उद्धवस्य भवतीनां भवेच्चेत् सुसमागमः ।
विरहाभासनाशः स्यात् कान्ताऽऽनन्दं सुलप्स्यथ ॥४८॥
गोवर्धनगिरेर्भूमौ गोपीनां पादरेणुभिः ।
पवित्रतां सदा वाञ्छन्नुद्धवो वल्लिकात्मकः ॥४९॥
वर्तते तु सदानन्दः पातिव्रत्यपरायणः ।
यदि सुमूर्तः प्राप्तव्यस्तदा संभूय तत्स्थले ॥५०॥
पत्नीभिः कीर्तनगीतिसंगीतैरुत्सवो महान् ।
आरब्धव्यस्तत्र तस्य दर्शनं भविता ध्रुवम् ॥५१॥
तथा चात्मसमीहानां सिद्धिरवश्यभाविनी ।
इत्युक्तास्ताः कृष्णपत्न्यो गत्वा वल्लीवने द्रुतम् ॥५२॥
गोवर्धनाददूरेणाऽऽरेभिरे कीर्तनोत्सवम् ।
कृष्णनारायणगीतिरसेऽनन्यधियोऽभवन् ॥५३॥
तावत्प्रेमभरो भक्तस्तृणगुल्मलताचयात् ।
आजगामोद्धवः स्रग्वी दिव्यः पीताम्बरान्वितः ॥५४॥
प्रगायन् श्रीकृष्णनारायणं नृत्यन् नमन् हसन् ।
कृष्णरूपं दधत् तं तु दृष्ट्वा नार्यः सुविस्मिताः ॥५५॥
उद्धवं पूजयांचक्रुस्ताः श्रीकृष्णस्वरूपिणम् ।
श्रीकृष्णरूपिणं दृष्ट्वा मुमुहुः रुरुदुः स्त्रियः ॥५६॥
उद्धवेन तदा ज्ञात्वा विरहाग्निं तु योषिताम् ।
निष्कास्य स्वहृदः कृष्णं ताभ्यश्चार्पितवान् क्षणम् ॥५७॥
कृष्णः सहस्रधा तत्र संभूतो योगमायया ।
कान्तः कामप्रपूरोऽभूत् प्रतिकुंजं प्रतिप्रियाम् ॥५८॥
आश्लेषणं चूम्बनं च रमणं स्नेहपूरितम् ।
ददौ प्रतिप्रियायै स निर्वृत्तिं परमां ददौ ॥५९॥
शान्तं चकार वै तासां विरहानलमुल्बणम् ।
आत्मशान्तिं ददौ ताभ्यः कृष्णश्चोद्धववत् तथाः ॥६०॥
पातिव्रत्यं ददौ ताभ्यः कालिन्द्या इव सर्वदा ।
तासां पार्श्वे विलीनश्च शाश्वतात्मसुखप्रदः ॥६१॥
वर्तते स्म यथाकान्तस्त्र्यवस्थात्मव्रतार्थितः ।
एवं कृष्णं शाटिकासु पार्श्वे नीत्वा ययुर्गृहम् ॥६२॥
उद्धवोऽपि हरिं नीत्वा वल्लीषु संजगाम ह ।
एतदात्मकृतं पातिव्रत्यं प्रोक्तं हि पद्मजे ! ॥६३॥
श्रवणात्पठनाच्चास्य तादृशं तद्व्रतं लभेत् ।
कृष्णं पार्श्वे लभेन्नित्यं शाट्यां हृदि न संशयः ॥६४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये कालिन्द्याः उद्धवस्य पातिव्रत्येनाऽन्यासां कृष्णपत्नीनामात्मपातिव्रत्यदार्ढ्यप्राप्तिरित्यादि-निरूपणनामा एकोनत्रिंशदधिकचतु-श्शततमोऽध्यायः ॥४२९॥

श्रीनारायण उवाच—

यदा विष्णुरहं वक्ता लक्ष्मीस्त्वं श्रवणे रता ।
संहितायास्तदा श्रावो द्विमासाभ्यां प्रमोक्षदः ॥ १ ॥
यदा लक्ष्मीर्हि संवक्त्री विष्णुः श्रोता भवामि च ।
संहितायास्तदा श्रावो वेदमासैः प्रमोक्षदः ॥ २ ॥
प्राप्यते श्रीलक्ष्मीनारायणसंहितया ध्रुवः ।
आत्मपातिव्रत्यधर्मः प्राप्तस्त्वया मुखान्मम ॥ ३ ॥
राधया श्रीकृष्णमुखात् संहिताश्रवणेन वै ।
तथाऽन्याभिर्गोपिकाभिः कृष्णनारायणाननात् ॥ ४ ॥
काश्यां कुंकुमवाप्यां च बदर्यां दिव्यधामसु ।
सर्वसृष्टौ यथायोग्यमस्या भागेन वै ध्रुवम् ॥ ५ ॥
पातिव्रत्यं परं प्राप्ता नरा नार्यो नरायणे ।
मुक्तिं च शाश्वतीं जग्मुर्मम धाम्नि च शाश्वतीम् ॥ ६ ॥
शृणु लक्ष्मि ! कथां रम्यां भवबन्धननाशिनीम् ।
पाञ्चालदेशे राजाऽभूद् वैष्णवो धार्मिकः शुचिः ॥ ७ ॥
निर्भयवर्मा नृपतिर्नारायणपरायणः ।
तुलसीमालया नित्यं भजते श्रीनरायणम् ॥ ८ ॥
ध्यानं पूजां क्रियाकाण्डं मुदा नारायणार्पणम् ।
चक्रे सर्वं हरौ नित्यं सर्वस्वार्पणपूर्वकम् ॥ ९ ॥
एको दानकसंज्ञश्च कुमारस्तस्य धार्मिकः ।
नवधा भक्तिमान् कृष्णे गोपीनाथपरायणः ॥१०॥

निर्भयस्तु तपस्तेपे भक्तियुक्तं सुदारुणम् ।
तद्गृहे तु सुते जाते राधालक्ष्मीकलान्विते ॥११॥
जीवन्ती लावण्यवती ब्रह्मचर्यपरायणे ।
नारायणं स्वामिनं ते सेवाते पातिव्रत्यतः ॥१२॥
साक्षाद्भक्त्या हरिः कृष्णः सेवां गृह्णाति तत्कृताम् ।
ते ह्युभे श्रीकृष्णनारायणस्वामिपरायणे ॥१३॥
व्रतस्थे तपसा युक्ते देवकार्यपरायणे ।
यद्गृहे भगवान् कृष्णो विराजते निरन्तरम् ॥१४॥
उन्मत्ता च संविद् यत्र कृष्णदासी विराजते ।
कुमारः पश्चिमे व्याघ्रारण्ये तलस्य रक्षसः ॥१५॥
वनं संप्राविशत् तीर्थे कर्तुं श्यामस्य दर्शनम् ।
तत्रारण्ये योगिनश्च रैवताचलवासिनः ॥१६॥
व्याघ्रसिंहादिरूपैः संविचरन्ति स्म च क्वचित् ।
कुमारेण पथि दृष्टाः सिंहा व्याघ्राः शतं परम् ॥१७॥
भयेन त्रस्तो वृक्षं स समारुरोह सत्वरम् ।
सिंहास्तु द्रुमसान्निध्ये निषेदुर्निर्भया यथा ॥१८॥
तान् दृष्ट्वा निश्चलान् सिंहान् क्रुद्धो हन्तुं मनो दधे ।
क्रोधेन तेजसा दानी व्यमुञ्चद् दारुणान् शरान् ॥१९॥
एको बाणेन विद्धश्च प्राप मृत्युं तदाऽपरे ।
ऋषिरूपास्तापसास्ते बभूवुर्मानवा द्रुतम् ॥२०॥
राजानमाहुः ऋषयो वयं रैवतवासिनः ।
योगिनः स्म समायाता यात्रार्थे श्यामशार्ङ्गिणः ॥२१॥
मा हिन्धि क्रूररूपांश्च पशून् ज्ञात्वा नृपोत्तम ।
इतिश्रुत्वा मुनीन् दृष्ट्वा कुमारः शोकमाप्तवान् ॥२२॥
अहो मया हतो योगी विप्रो ह्यजानता वने ।
तीर्थपुण्यस्थले पापं कृतं हत्यात्मकं मया ॥२३॥
कथं वै निष्कृतिस्त्वस्य भवेन्मे हननस्य वै ।
विचार्यावततार द्रोः पपात चरणे तदा ॥२४॥
प्राहर्षीन् पापनाशार्थं विध्यन्तु मां शरैर्मुहुः ।
हत्यात्मकं पापं मम नश्येन्महर्षयः ! ॥२५॥
दयालवस्तु ऋषयः शरणागतमेव तम् ।
वैष्णवं छत्रधर्माणं प्रोचुः कृपापरं वचः ॥२६॥
वयं तु साधवो द्वन्द्वसहा रैवतयोगिनः ।
सिद्धा दिव्या दिव्यदेहाः संकल्पाधीनचारिणः ॥२७॥
जीवयितुं मृतं सर्वे समर्थाः स्म च मा शुचः ।
इत्युक्त्वा तलश्यामस्य तीर्थस्योष्णोदकं शवे ॥२८॥
धारया संददुः सर्वे सजीवो भव प्रोचिरे ।
तावदृषिः समुत्थाय ननाम तान् गुरून्मुहुः ॥२९॥

दानी चातिप्रसन्नोऽभूत् पुपूज तान् हृदा मुहुः ।
ऋषयस्तु तदाऽदृश्यभावं प्राप्तो वनान्तरे ॥३०॥
किन्तु हत्योद्भवं पापं ववल्गे दानिनं तु यत् ।
तेनातिविह्वलस्तत्र हत्यया पीडितो वने ॥३१॥
बभ्राम हत्यया लग्नो व्याधधर्ममुपाश्रितः ।
न क्वापि स्थितिमापेदे हत्ययाऽभिद्रुतो भृशम् ॥३२॥
स वै भ्रमन् ययौ सिंहारण्यं यत्र सरस्वती ।
वडवाग्निं समुद्रे सा प्रचिक्षेप पुरा कृते ॥३३॥
ततः सः सोमनाथं सत्क्षेत्रं प्राप कुमारकः ।
प्राचीं सरस्वतीं चापि ययौ यत्र महामुनिः ॥३४॥
त्रितोनामा दिव्यदेहः पर्णकुट्यां विराजते ।
तेनाऽयं सत्कृतस्तस्य पादयोः पतितो भुवि ॥३५॥
पादावनेजनं चक्रे पादसंवाहनादिकम् ।
जलाहरणं दास्यं च फलाहारादिकं तथा ॥३६॥
कुट्याश्रमस्य मार्जन्या मार्जनं निर्विकं चरम् ।
पत्रावलीकरणं च ब्रह्मवृक्षदलादिभिः ॥३७॥
चकार सेवनं तस्य त्रितस्य योगिनः स वै ।
योग्यं लक्ष्मि ! साधुसेवा पापं दहति जन्मनः ॥३८॥
साधूनां दर्शनं पुण्यं वन्दनं पापनाशनम् ।
प्रसन्नता भाग्यदा च तृप्तिः पुत्रादिवंशदा ॥३९॥
पादसेवा श्रीप्रदा च मोक्षदा तु प्रपन्नता ।
सन्तोषणं सर्वदं हि सन्तोषणीयाः साधवः ॥४०॥
येषां चरणवार्यत्र ब्रह्महत्यादिनाशकम् ।
येषां पादरजः पापिपापप्रध्वंसनं शुभम् ॥४१॥
येषां पूजा भोजनादि सर्वं रक्षति सर्वदा ।
यदाशिषः सुमूर्ताश्च रक्षन्ति देशकालयोः ॥४२॥
यथाशक्ति यथाद्रव्यं यथाभावस्तथा तथा ।
सेवनीयाः सदा सन्तो दिव्यास्ते हरिमूर्तयः ॥४३॥
निर्गुणा बन्धनैर्हीनाः सेवकाँस्तारयन्ति वै ।
त्रितस्य सेवया लक्ष्मि ! ब्रह्महत्या लयं गता ॥४४॥
ततो विस्मयमापन्नः कुमारो दानको मुहुः ।
साधुसमागमस्तस्या विनाशे वेद कारणम् ॥४५॥
तावत्तत्र समायाता नेतुमेनं यमानुगाः ।
यमदूतान्महाघोरान् ददर्श दानकस्तदा ॥४६॥
सेवापुण्येन सस्मार कृष्णनारायणं प्रभुम् ।
गोपीनाथं हरिं कृष्णं स्वामिनं जगतां पतिम् ॥४७॥
नारायणः स्वयं स्वस्य पार्षदानाह सत्वरम् ।
गच्छन्तु दानिरक्षार्थं वारयन्तु यमानुगान् ॥४८॥

इत्यादिष्टाः पार्षदास्ते समाययुस्त्रिताश्रमम् ।
दूरं वै वृक्षमध्ये तान् दृष्ट्वा दूतान् हि दारुणान् ॥४९॥
आक्रोशेन पराभाव्य विद्राव्य भक्तसेवकम् ।
दानिनं निन्युरेते वैमानिकेन पथा हरिम् ॥५०॥
हरिः प्राह मुनेः सेवा कृताऽनेन सुपुण्यदा ।
भक्तोऽस्ति मे महाशान्तो दान्तश्चापि चिरायुषः ॥५१॥
तस्मादेनं राज्यभारे स्थापयन्तु महाबलम् ।
साधूनां सेवको भावी वर्तते वैष्णवो महान् ॥५२॥
महाभागवतो भावी मदर्थाऽर्पितनैजकः ।
इत्युक्तश्च तदा दानी प्राह तं परमेश्वरम् ॥५३॥
न कांक्ष्यते भुवो राज्यं न जन्म न च वै दिवम् ।
कांक्ष्यते ते सदा सेवा राधालक्ष्म्यन्वितस्य वै ॥५४॥
हरिः प्राह तथाऽस्त्वेतद् गच्छ वत्स यथासुखम् ।
तव स्वस्रोर्मम राधालक्ष्म्यौ निवत्स्यतः शुभे ॥५५॥
अहं नारायणः स्वामी निवत्स्यामि तव गृहे ।
सुखयिष्ये मोक्षयिष्ये गच्छ त्वं पार्षदैः सह ॥५६॥
तव दूर्गे निवत्स्यामि स्वस्त्यस्तु तेऽनु सेवक ! ।
इत्यादिष्टो भगवता ययौ स्वनगरं प्रति ॥५७॥
कृष्णपातिव्रत्यपरान् धर्मांश्चकार दादकः ।
साधुसेवापरः कृष्णनारायणप्रसेवकः ॥५८॥
सर्वोत्सवकरः कृष्णार्पितसर्वस्वदक्षिणः ।
प्रवृद्धः सर्वसम्पद्भिर्गोलोकसदृशं गृहम् ॥५९॥
कारयित्वा गोपिकायुक्कृष्णं संस्थाप्य तत्र च ।
भुक्त्वा भोगान् समस्तांश्च जीवन्मुक्तोऽभवत्सदा ॥६०॥
सतां पतिः प्रभुर्नारायणः स्वामी जनार्दनः ।
तस्य गृहे यथोक्तं च निवासं प्रचकार ह ॥६१॥
तदुत्तरं हरेः पातिव्रत्ययुक्ते सती शुभे ।
जीवन्ती लावण्यवती दिव्यैश्वर्ये बभूवतुः ॥६२॥
जीवन्त्यां श्रीराधिकायाः कलाऽऽवेशो बभूव ह ।
लावण्यवत्यां लक्ष्म्याश्च कलाऽऽवेशो बभूव ह ॥६३॥
जीवन्त्या लावण्यवत्या दादकेन निरन्तरम् ।
पातिव्रत्यं कृष्णनारायणे गोपीश्वरे कृतम् ॥६४॥
त्रयस्य भगवान् धार्मिः प्रत्यक्षो वर्ततेऽन्वहम् ।
भोजने शयने वाट्यां विहारे च समुत्सवे ॥६५॥
विमानेन सदा याति लोकान्तरेषु तैः सह ।
मुक्तैर्देवैः पूजितश्च समायात्यनु तद्गृहम् ॥६६॥
जीवन्त्या लावण्यवत्यार्पितं भुंक्ते हरिः स्वयम् ।
श्रीहरिणा तु जीवन्त्यै लावण्यायै च दानिने ॥६७॥
स्वस्य मन्त्रः प्रदत्तश्च संसारभवनाशकः ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥६८॥
इति मन्त्रं समासाद्य चक्रुस्तत्कीर्तनं मुहुः ।
तच्छ्रुत्वा प्राणिनः सर्वे वैकुण्ठं परमं ययुः ॥६९॥
एकदा दादको गत्वा यममार्गेऽतिदारुणे ।
मन्त्रं जपन् स्थितो द्वारि श्रावयामास नारकान् ॥७०॥
सर्वेऽपि नारकाः पूता ययुर्धामाऽक्षरं हरेः ।
यमक्षेत्रमभूद् रिक्तं कृष्णकीर्तनसंश्रवात् ॥७१॥
गच्छद्भिर्वैष्णवं धाम स्वकर्मस्थैर्जनैः क्षणात् ।
शून्यास्तु नरकाः सर्वे पापिप्राणिविवर्जिताः ॥७२॥
वैकुण्ठे नारदो दृष्ट्वा ह्यकस्माद्वैष्णवाऽऽगमम् ।
पप्रच्छ तान् कुतः सर्वे समायान्ति हि वैष्णवाः ॥७३॥
ते प्राहुर्यमलोकाद्वै तत्र दादकनामकः ।
श्रावयित्वा हरेर्मन्त्रं पावयामास नारकान् ॥७४॥
आययुस्ते नारका ये वयं स्म एव ते मुने ! ।
श्रुत्वैतन्नारदस्तूर्णं यमक्षेत्रं तु वीक्षितुम् ॥७५॥
समाययौ धर्मलोकं यमेन पूजितो मुनिः ।
पप्रच्छ धर्मराजं स रिक्तं क्षेत्रं हि ते कथम् ॥७६॥
धर्मराजस्तदा प्राह दादको भक्तराडयम् ।
अतिभक्तो हृषीकेशे पुराणपुरुषोत्तमे ॥७७॥
प्रबोधयति कृष्णस्य नाममन्त्रं हि नारकान् ।
ते सर्वे तु गता विष्णोर्लोकं ब्रह्म तु शाश्वतम् ॥७८॥
अयं भक्तो मया यद्वा त्वया यमस्य मण्डलात् ।
विनयेन च सत्कृत्या दूरयितव्य एव यत् ॥७९॥
इति विचार्य देवर्षियमर्षी प्रोचतुस्तु तम् ।
भो भक्तराट पापिनो वै तव कीर्तनसंश्रवात् ॥८०॥
दण्ड्यां स्थलीं विहायैव गच्छन्ति विष्णुधाम ते ।
अन्यायो भवते त्वत्र मा कर्तव्यं तथाऽनघ ! ॥८१॥
धर्मलोपो भवेन्नैव कर्मलोपो भवेन्न च ।
तथा कार्यं त्वया भक्त ! याहि स्वनगरं प्रति ॥८२॥
दानकः सः तदा प्राह मुक्तिर्देया व्रतं मम ।
पातिव्रत्यं परो धर्मः कृष्णसर्वस्वमेव यत् ॥८३॥
तत्प्राप्त्यर्थं हि जीवानां पापिनां पापनाशनम् ।
तन्नामस्मरणं चात्र करोमि धर्ममेव मे ॥८४॥
न गमिष्ये मम स्थानं वासोऽत्र रोचते मम ।
नारकाणां प्रदुःखानां दुःखमोचनहेतवे ॥८५॥
इत्युक्तौ निश्चयं नायं गमिष्यति गृहं स्वकम् ।
विचार्य तौ विमानेन ययतुर्यमनारदौ ॥८६॥

ब्रह्माख्यं श्रीहरेर्धाम लेभाते स्वागतं हरेः ।
पुपूजतुर्नेमतुश्च निषेदतुर्हरेः पुरः ॥८७॥
तदा यमो जगादैनं नारायणं जगत्पतिम् ।
नाथ ! पापमये क्षेत्रे तव भक्तो हि दानकः ॥८८॥
समागत्य तव नाम्नां करोति कीर्तनं मुहुः ।
यमक्षेत्रं तेन जातं रिक्तं सर्वं हि निर्जनम् ॥८९॥
अधिकारो निरर्थो मे कृतस्तेनाऽतिकीर्तनात् ।
कर्मदण्डस्य पट्टस्ते जायते स्म निरर्थकः ॥९०॥
नियोगि न नियोगं हि करोति कार्ययोजितः ।
प्रभोर्वित्तं समश्नाति स भवेत् काष्ठकीटकः ॥९१॥
लोभाद् वित्तस्य हर्ता च कार्यस्याऽविनिवर्तकः ।
तिर्यग्योनिमवाप्नोति कल्पपर्यन्तमेव सः ॥९२॥
वेतनं त्वर्जयन् कार्यमालस्येन करोति न ।
स जायते वनमध्ये वायसः शतवत्सरान् ॥९३॥
स्वार्थी स्वामिकार्यलोप्ता मूषको जायते वने ।
सोऽहं निरर्थकश्चाऽस्मि दानी यावन्मम स्थले ॥९४॥
तं त्वं तस्मान्मम क्षेत्राद् दूरीकुरु जनार्दन ।
निग्राह्यो जगतां नाथ ! भवता दानकः शुचिः ॥९५॥
अन्यथा ते दण्डपट्टस्तव पद्भ्यां निवेद्यते ।
किं वृथा धारणेनाऽस्य वृथा वै वेतनेन च ॥९६॥
इत्युक्त्वा विररामाऽसौ हरिः प्राह यमं तदा ।
किमाश्चर्यं भवेदत्र मन्नाम्नामनुकीर्तनम् ॥९७॥
पापिनां सर्वपापघ्नं स्वर्गदं मोक्षदं तथा ।
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥९८॥
कर्णयो पतितं यस्य कृष्णनारायणेति च ।
प्रयाति कृष्णसायुज्यं पाप्युद्धारकरो हरिः ॥९९॥
भक्ता मे पापिजीवानामुद्धारार्थं स्थले स्थले ।
विचरन्ति यथेष्टं ते तारयन्ति प्रपत्तितः ॥१००॥
तेषामहं सदा तुष्टो ये गृणन्ति ममाऽभिधाम् ।
तारयन्ति पापिनश्च कीर्तयन्ति कथां मम ॥१०१॥
पातिव्रत्यं पालयन्ति धारयन्ति च मां हृदि ।
वर्तयन्ति मदर्थं च नरा नार्यश्च मे मताः ॥१०२॥
मत्कार्यं ते हि कुर्वन्ति मदर्थं त्यक्तजीवनाः ।
तेषां चाहं प्रसन्नात्मा सहाये सर्वदा स्थितः ॥१०३॥
यत्करोति करोत्येव श्रेष्ठं तन्मुक्तिकृद् यम ! ।
नियोगी स्वामिकार्येषु यावच्छक्ति समीहते ॥१०४॥
तावता स कृतार्थः स्यान्नरकान्नैव गच्छति ।
कार्ये शक्तिविनिष्क्रान्ते स्वामिने वै निवेदयेत् ॥१०५॥

अनृणस्तावता भृत्यो नियोगी सुखमश्नुते ।
तस्मान्निवेदितार्थस्य न ऋणं न च पातकम् ॥१०६॥
यत्ने कृते स्वकर्तव्ये नाऽपराधोऽस्ति देहिनः ।
तस्मादशक्यकार्येऽस्मिन्न विशोचितुमर्हसि ॥१०७॥
लक्ष्मीं वापि परित्यक्ष्ये प्राणान् देहमथापि वा ।
श्रीवत्सं कौस्तुभं मालां वैजयन्तीमथापि वा ॥१०८॥
श्वेतद्वीपं च वैकुण्ठं क्षीरसागरमेव च ।
शेषं च गरुडं चैव न भक्तं त्यक्तुमुत्सहे ॥१०९॥
विसृज्य सकलान् भोगान् मदर्थे त्यक्तजीवितान् ।
मदात्मकान् महाभागान् कथं ताँस्त्यक्तुमुत्सहे ॥११०॥
तस्माद् राजन् दानकं तं भक्तवर्यं स्वयं हरिः ।
दातुं वै दर्शनं यामि नेतुं यानेन वै पुनः ॥१११॥
गच्छ त्वं यमलोकं च पश्चादायाम्यहं यम ! ।
वद तस्मै ममाऽऽयं त्वं स मत्प्रेम्णाऽऽप्लुतस्तदा ॥११२॥
कीर्तनं मे विहायैव हास्यनृत्ये करिष्यति ।
तावत्तस्मै दर्शनं मे दत्वा धृत्वा विमानके ॥११३॥
गमिष्यामि तव कार्यं कृत्वा याम्यस्य मण्डलात् ।
इत्युक्तश्च यमस्तत्र प्रजगामाऽतिहर्षितः ॥११४॥
श्रावयामास कृष्णस्याऽऽगमं तस्मै हि दानिने ।
सोऽपि चकार नृत्यादि भगवत्प्रेमपूरितः ॥११५॥
तावद् दिव्यं विमानं वै नारायणहरेरियात् ।
चतुर्भुजं कृष्णनारायणं दृष्ट्वा तु दानकः ॥११६॥
कृष्णाज्ञया विमानं तु समारुह्य रटन् मुहुः ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥११७॥
नृत्यन् ध्यायन्नमन् कृष्णं प्रेममग्नोऽभवत्तदा ।
धर्मराजकृतां पूजां संगृह्य भगवान् हरिः ॥११८॥
राधारमासमायुक्तो दुर्गं दानिगृहं ययौ ।
अवतार्य परं भक्तं स्वयं स्थित्वा निशां प्रभुः ॥११९॥
जीवन्त्या लावण्यवत्याः सेवां पतिव्रतामयीम् ।
स्वीकृत्य भोजनं लब्ध्वा दत्वा दिव्यं स्वदर्शनम् ॥१२०॥
अभयस्य कुटुम्बाय पातिव्रत्याऽयनाय च ।
जीवन्त्यां कलया राधां लावण्यायां श्रियं तथा ॥१२१॥
कलया वसितुं त्वाज्ञां दत्वा छायात्मके यथा ।
तथा ते कन्यके कृत्वा पावयित्वा गृहाणि च ॥१२२॥
उन्मत्ताया जले स्नात्वा पीत्वाऽम्भस्तत्र पावनम् ।
वैहायसेन दिव्येन यानेन स्वपदं ययौ ॥१२३॥
गोप्यो ज्ञात्वा तु तद्वृत्तं मथुरामण्डलात्तथा ।
द्वारिकातः कृष्णपत्न्यो जग्मुश्च दिव्यविग्रहाः ॥१२४॥

राधालक्ष्मीनिवासेन गोपीनां कृष्णयोषिताम् ।
वासरूपं बभूवैतत् क्षेत्रं दुर्गात्मकं पुरम् ॥१२५॥
श्रीहरेस्तत्र वासेन गोलोकसदृशं हि तत् ।
ब्रह्मधामसमं दिव्यं मोक्षदं जातमुत्तमम् ॥१२६॥
दर्शनात्स्पर्शनान्नद्या जलपानाऽवगाहनात् ।
धूल्यास्तु धारणाद् देहे पापक्षयश्च मोक्षणम् ॥१२७॥
राधालक्ष्मीप्रतापेन प्रातिव्रत्यवृषेण च ।
असंख्यानां तु दासीनां सांख्ययोगव्रतेन च ॥१२८॥
कोटियज्ञफलदातृ कृष्णनारायणाश्रितम् ।
श्रोतुर्वक्तुस्तीर्थयातुः पराऽक्षरपदप्रदम् ॥१२९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्ये सौराष्ट्रपञ्चालदेशीयदादक (दानक) नृपतेस्तलश्याम-यात्रायां सिंहरूपर्षिघाते जातब्रह्महत्यायास्त्रितमुनिसेवया नाशोत्तरमागतयमदूतानां भगवत्पार्षदैर्निवारणं, हरिभजनेन यमनारकाणां मोक्षणं, दान (द) कस्य राधालक्ष्मी-नारायणाऽऽशीर्वादो दुर्गे जीवन्तीलावण्यवत्योरंशतया राधालक्ष्म्योर्निवासो हरेरपि दुर्गक्षेत्रे निवास-श्चेत्यादिनिरूपणनामा त्रिंशत्यधिकचतुश्शत-तमोऽध्यायः ॥४३०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि श्रेष्ठं पतिव्रतावृषम् ।
पतिर्नारायणः कृष्णस्तद्व्रतं तत् पतिव्रतम् ॥ १ ॥
पत्यर्थे वृत्यते यावद् बुद्धिसाधनकर्मभिः ।
पतिर्यथा प्रशस्येत तथा पत्न्या विधीयते ॥ २ ॥
अगुणो वा सगुणो वा दुर्गुणोऽपि प्रशंस्यते ।
ईशवत् सर्वथा नार्या गीयते जिह्वया धिया ॥ ३ ॥
तद्व्रतं प्रथमं लक्ष्मि ! पातिव्रत्योत्तमं मतम् ।
प्रशंसा सर्वथा सर्वप्राणिनां शर्करासमा ॥ ४ ॥
अतिमिष्टा मिष्टतमा सर्वत्राऽप्यनुभूयते ।
पुत्रप्रशंसया प्रमोदते तत्पितरौ यथा ॥ ५ ॥
पितृप्रशंसया पुत्राः प्रमोदन्तेऽतिहर्षिताः ।
पत्नीप्रशंसया स्वामी प्रमोदतेऽति चान्तरे ॥ ६ ॥
श्रेष्ठिप्रशंसया भृत्यो राज्ञः प्रशंसया प्रजाः ।
वृषप्रशंसया वृषवाहकोऽपि प्रमोदते ॥ ७ ॥
शिष्यप्रशंसया गुरुर्गुरोः प्रशंसयाऽनुगः ।
देशप्रशंसया देशी शास्त्रप्रशंसयाऽऽस्तिकः ॥ ८ ॥
यत्प्रति यस्य सद्भावस्तत्प्रशंसा तु भाविनः ।
मोदप्रमोदसंस्थानं समुत्साहोत्सवावहा ॥ ९ ॥
भवत्येव सदा लक्ष्मि ! पतिकीर्तिसुगर्भिता ।
विदेशस्थस्य कान्तस्य वार्तां श्रुत्वा पतिव्रता ॥१०॥
पुत्रोत्सवाऽधिकाऽऽनन्दवती भवति तत्क्षणम् ।
तद्व्रतं मानसगम्यं पातिव्रत्यं मुदावहम् ॥११॥
हार्दं स्नेहं न चान्ये वै प्रजानन्ति परात्मनः ।
परात्मनो गुणा नैव साक्षाद् भवन्ति सर्वथा ॥१२॥
स्वात्ममनःसंयोगस्य हेतोस्तत्राऽनुपस्थितेः ।
आवेशादिक्रियायोगे परम्पराभियोगतः ॥१३॥
प्रत्यक्षमिव चान्येषामाभासन्ते न वास्तवम् ।
पातिव्रत्यं सदा स्निग्धं ह्यकारणं सकारणम् ॥१४॥
स्वार्थं यद्वा परार्थं वा स्वार्थमेवाऽनुभूयते ।
मम स्वामी कथं ख्यातो भवेदित्याग्रहः स्त्रियाः ॥१५॥
पातिव्रत्यान्वयित्वं वै सततं बोध्यमेव हि ।
पत्युः कथाश्रवे यद्वत् तेऽस्ति प्रमोद आग्रहः ॥१६॥
तद्वत् कृष्णकथाबोधे यस्याऽस्त्याग्रह उत्कटः ।
कथायाः श्रवणे वापि कीर्तने च प्रशंसने ॥१७॥
पुंसो भक्तस्य नार्याश्च भक्तिमत्याः सदा हरेः ।
सतः सत्यास्ततो नित्यं पातिव्रत्यं प्रकाशते ॥१८॥
दास्यं श्रेष्ठं पातिव्रत्यं शुभं प्रसन्नताप्रदम् ।
कथायाः श्रवणं पातिव्रत्यं ततोऽधिकं मतम् ॥१९॥
कथायाः कीर्तनं पातिव्रत्यं ततोऽपि चोत्तमम् ।
पत्युः स्वस्वामिनः कीर्तेर्गानं नित्यं हि दुर्लभम् ॥२०॥
पत्युश्च श्रीकृष्णनारायणस्याऽभेदभावतः ।
सर्वदा गुणगानं तत्पातिव्रत्यं परं स्त्रियाः ॥२१॥
हरेः कथात्मकं पातिव्रत्यं सत्पतिलोकदम् ।
श्रोतुर्वक्तुर्न सन्देहः सन्तुष्टोऽहं जनार्दनः ॥२२॥
नयामि तं महत्स्वर्गं सतीलोकं सतीं तथा ।
निष्कामानां च मद्धाम मत्पदं प्रापयामि वै ॥२३॥
मत्कथाभिर्हि लोकानां हृदयेषु निरन्तरम् ।
मद्भक्तिर्निहिता येन लक्षाणां कोटिदेहिनाम् ॥२४॥
मम दास्यं कथाद्वाऽङ्कुरितं येन देहिषु ।
मम व्रतं मम सेवा मम पूजा ममाऽर्हणम् ॥२५॥
मम जापो मम भक्तिर्मम स्मृतिर्ममाऽऽश्रयः ।
ममेच्छा मम विज्ञानं मम ध्यानं ममेहनम् ॥२६॥
मम योगो मम वाञ्छा ममार्पणं मम ग्रहः ।
मद्धारणा मयि न्यासो मयि वासो ममार्थना ॥२७॥

मय्यभेदो मयि स्नेहो मयि कामो रतिर्मयि ।
मम सर्वस्वदानं च मदर्थं जीवनं मृतिः ॥२८॥
उपार्जनं मदर्थं च मदर्थमुपकारिता ।
परोपकारादि दानं व्रतं पुण्यं मदर्थकम् ॥२९॥
मत्पदे गमनं त्वन्ते मत्सेवाग्रहणं सदा ।
कथाभिः कारितं येन लोकानां हृदयेषु वै ॥३०॥
तादृशो मे कथावक्ता शास्त्रज्ञानप्रदश्च मे ।
मन्महिम्नः पुष्टिकर्ता मद्भक्तिपोषकश्च यः ॥३१॥
तस्य लक्ष्मि ! पातिव्रत्यं मयि कोटिगुणं मतम् ।
श्रेष्ठाच्छ्रेष्ठतमं पातिव्रत्यं वक्तुर्हि शाश्वतम् ॥३२॥
कथावाचनपुण्यस्य पारं प्राप्नोमि नाऽप्यहम् ।
असंख्यजीवजातानां कुलानां वैष्णवीधिया ॥३३॥
उद्धारको भवत्येव कथाया वाचको गुरुः ।
मत्स्वरूपो न सन्देहस्त्वत्तः श्रेष्ठः स पद्मजे ॥३४॥
पितुर्दशगुणी माता मातुर्दशगुणो गुरुः ।
पिता बीजप्रदत्वेन जननी जन्मदत्वतः ॥३५॥
गुरुर्मोक्षप्रदत्वेन श्रेष्ठः सर्वेभ्य उच्यते ।
पतिः श्रेष्ठो गुरुः श्रेष्ठस्तयोः श्रेष्ठतरो गुरुः ॥३६॥
पिता पतिर्गुरुः श्रेष्ठास्तेषां श्रेष्ठतमो गुरुः ।
आत्मा श्रेष्ठो हरिः श्रेष्ठस्तयोः श्रेष्ठतमो हरिः ॥३७॥
आत्मा हरिर्गुरुः श्रेष्ठास्तेषां श्रेष्ठतमो गुरुः ।
यदाश्रयाद्धरेः प्राप्तिर्यं विना दुर्लभो हरिः ॥३८॥
पृथ्वीदाता वृत्तिदाता जीवदाता सदोत्तमाः ।
तेषामपेक्षया मोक्षदाता ज्ञानद उत्तमः ॥३९॥
कृष्णज्ञानं पातिव्रत्यं तत्प्रदः सुपतिः स्मृतः ।
कृष्णभक्तिः स्वामिधर्मस्तत्प्रदः सुपतिः सदा ॥४०॥
नामधारः पतिस्त्वन्यो यथार्थो भक्तिदः पतिः ।
एवं ज्ञात्वा हरेः पातिव्रत्यं धार्यं सदा प्रिये ॥४१॥
हरेर्गुणानां गानं च हरेर्मूर्तेश्च चिन्तनम् ।
हरेः कथाया व्याख्यानं पातिव्रत्यं तदुत्तमम् ॥४२॥
यत्र कथा तत्र भक्ता देवास्तीर्थानि चाच्युतः ।
देव्यः ऋषयः पितरो मुक्तिर्भक्तिर्वृषादयः ॥४३॥
सिद्धा यतयः सत्यश्च साधवो योगिनस्तथा ।
युगाः शास्त्राणि वेदाश्च क्षेत्राणि च वनानि च ॥४४॥
व्यासास्तत्त्वानि मुक्ताश्च कथापात्राणि यानि च ।
आगत्य तां कथां भावप्लुताः शृण्वन्ति सर्वदा ॥४५॥
केचिन्मूर्ता अमूर्ताश्चाऽदृश्या दृश्यास्तथाऽपरे ।
पातिव्रत्यपराः सर्वे कथां शृण्वन्ति वै हरेः ॥४६॥
स्वस्वयशो हरेः कीर्तिं भक्तानां च कथानकम् ।
श्रुत्वा श्रुत्वा प्रमोदन्ते ददत्याशिष एव ते ॥४७॥
वाचकाय गुरवे ते नमस्कुर्वन्ति वै तथा ।
श्रोतारः शिष्यवर्गा वै नमस्कुर्वन्ति वाचकम् ॥४८॥
तस्माच्छ्रावयिता श्रेष्ठः सर्वेभ्यो गुरुभक्तिदः ।
नारायणसमो बोध्यः पातिव्रत्यस्य बोधकः ॥४९॥
कृष्णनारायणं नत्वा कथां श्रुत्वा हरेः शुभाम् ।
सर्वपापविनिर्मुक्तो याति कृष्णपदं परम् ॥५०॥
पुरा गोदावरीतीरे सम्पन्नं सुकथानकम् ।
लक्ष्मीनारायणसंहितायाः पारायणं ह्यभूत् ॥५१॥
पापघ्नं पावनं स्वर्गप्रदं ज्ञानदमोक्षदम् ।
दुर्वाससो मुनेः शिष्यो यतिः सत्यव्रताऽभिधः ॥५२॥
ब्रह्मनिष्ठो निरपेक्षो भिक्षामात्रप्रजीवनः ।
गुहावासकरस्तत्राऽपरिग्रहव्रतान्वितः ॥५३॥
तुलसीमालिकायुक्तः कृष्णनारायणं जपन् ।
करोतिस्म कथां नित्यं सायं प्रतिदिनं प्रिये ! ॥५४॥
ध्यात्वा स्मृत्वा स्मारयित्वा कृष्णनारायणं पतिम् ।
नमः कृत्वा कारयित्वा कृष्णकथां करोति सः ॥५५॥
श्रोतॄणामप्यभावे च व्याख्यातॄणामनागमे ।
सत्यव्रतस्तु सततं करोति श्रीहरेः कथाम् ॥५६॥
नित्यकर्म स्वकं कृत्वा करोत्येव हरेः कथाम् ।
श्रोता चेदस्ति यः कश्चित् तस्मै व्याख्यात्यहर्निशम् ॥५७॥
यदि नास्ति स्थले श्रोता रिक्तेऽपि कुरुते कथाम् ।
अन्यो व्याख्याति कश्चिद्वा हरेः पुण्यां कथां तदा ॥५८॥
स्वकर्माणि परित्यज्य शृणोति श्रीहरेः कथाम् ।
हरेः पातिव्रत्यपरः कथायाः श्रवणे रतः ॥५९॥
तीर्थानि देवतानां चाऽगाराण्यपि विहाय सः ।
कथाविरोधकान्यन्यकर्माण्यपि विहाय सः ॥६०॥
कथां दिव्यां संशृणोति सति वक्तरि सर्वदा ।
वक्तर्यसति स्वयं च व्याख्याति कृष्णसत्कथाम् ॥६१॥
कथां विना न जानाति पातिव्रत्यं परं वृषम् ।
चत्वरे च गृहे नैजे स्वयं व्याख्याति भावतः ॥६२॥
आवश्यकानि कार्याणि कथातो नाऽधिकानि वै ।
आवश्यकोत्तमं कार्यं कथारूपं प्रधानकम् ॥६३॥
कथाया विरतौ चान्यकार्यप्राधान्यमेव ह ।
कथां लक्ष्मि ! शृण्वतस्तु कर्मबन्धो न विद्यते ॥६४॥
ज्ञानदीपः प्रदीप्तः स्याद् विरतिश्च विवर्धते ।
सत्त्वशुद्धिस्तथा शान्तिः शृण्वतः संप्रवर्तते ॥६५॥

हरौ प्रीतिः सदा शृण्वता कथां दार्ढ्यमाप्यते ।
कृष्णे प्रीत्या महारत्या कृष्णोहृद्यवरुध्यते ॥६६॥
येषु कृष्णस्तेषु चास्य सौहार्दं सत्सु जायते ।
साधुरूपो हरिस्त्वस्य प्रत्यक्षो भवति ध्रुवम् ॥६७॥
ततो दिव्यः स्वयं कृष्णनारायणः श्रियः पतिः ।
पातिव्रत्यं परं ज्ञात्वा दिव्यदर्शनदो भवेत् ॥६८॥
पुंसा नार्या ततः कृष्णकथा श्रव्या यथाबलम् ।
कथां विना न वै शानं तद्विना शान्तिरेव न ॥६९॥
दुःखावर्त्ते भवे त्वस्मिन् शान्तिकृत् कृष्णकीर्तनम् ।
कथायाः श्रवणं चैव कृष्णस्य स्मारकं परम् ॥७०॥
सत्त्वशुद्धिकरं चापि शुद्धया ध्यानं प्रजायते ।
बहुधा श्रवणं तस्य मननं ध्यानमुत्तमम् ॥७१॥
कृष्णनारायणस्वामिपतिप्राप्तिकरं मतम् ।
यत्र कृष्णकथा नैव यत्र सन्ति न साधवः ॥७२॥
गंगातटमपि त्याज्यं विना पतिं न तत् प्रियम् ।
यत्र वै तुलसी नास्ति न यत्र हरिमन्दिरम् ॥७३॥
यत्र हरे पातिव्रत्यपरो भक्तो न वर्तते ।
यत्र विष्णोः कथा नास्ति ग्रामः श्मशानसदृशः ॥७४॥
तत्र मृतो जनो याति यमराजतमःस्थलीम् ।
इति विचार्य मुनिराट् सत्यव्रतः स वैष्णवः ॥७५॥
ब्रह्मविद्यापरो विष्णुस्मृतिमात्रपरायणः ।
हरेः कथापरो नित्यं मनुते चौत्मकर्म तत् ॥७६॥
न किञ्चिदधिकं जातु मनुते श्रवणात्परम् ।
कथायाः कथनाद्वापि परं धर्मो न तस्य वै ॥७७॥
नित्यं सायं निश्चिते वै समये व्यासपट्टिकाम् ।
समागत्य नियमेन कथां करोति यत्र वै ॥७८॥
एकदा तत्र राज्ञश्च सैन्यं वै पार्श्वतो गतम् ।
जनाः सर्वे निरुद्धाश्च व्यासोऽपि रुद्ध एव ह ॥७९॥
मार्गे केनापि नैवात्र गन्तव्यं सैन्यमध्यतः ।
इतिमार्गे निरुद्धः स कथारोधोऽपि तेन वै ॥८०॥
देवाद्या ये श्रवणार्थे त्वायातास्तत्स्थले च ते ।
प्रतीक्षन्ते स्म वक्तुश्चागमनं तद्दिशादृशः ॥८१॥
सत्यव्रतो न चायातो व्यत्येति समयस्तदा ।
सत्यव्रतस्वरूपं च धृत्वा कृष्णनरायणः ॥८२॥
स्वयं कथां श्रावयितुं निषसादाऽऽसने तदा ।
लक्ष्मीनारायणसंहिताकथामकरोद्धरिः ॥८३॥
देवाः शृण्वन्ति भावेन सैन्यं क्रान्तं पथस्तदा ।
सत्यव्रतः समायातो दृष्ट्वा व्यासं स्वरूपिणम् ॥८४॥
महदाश्चर्यमापन्नो विज्ञाय स्मरतो हरिम् ।
ननामाऽन्यैर्यथा दृश्यो न भवेद् विष्णुना कृतः ॥८५॥
आगत्य त्वासने विष्णोर्मूर्तौ लीनोऽभवत्तदा ।
कथा विच्छेदरहिता यथा तत्र प्रवर्तते ॥८६॥
विष्णुना सन्धितस्तत्र स्वस्मिन् सत्यव्रतः प्रियः ।
कृष्णस्त्वदृश्यतां प्राप्तः कथा तद्वत्प्रवर्तते ॥८७॥
सत्यव्रतः समुवाच श्लोकं विष्णुविरामितम् ।
तावत्स्वरस्य श्रवणे माधुर्ये भिन्नतां गतम् ॥८८॥
आकर्षणं दिव्यता च पूर्वतोऽन्यविधां गता ।
देवादिभिस्तदा ज्ञातं ध्यानिभिर्योगवृत्तिभिः ॥८९॥
स्वयं कृष्णः कथां चक्रे सत्यव्रताऽनुपस्थितौ ।
अहो धन्या वयं कृष्णमुखात्कथाश्रवं गताः ॥९०॥
इत्याश्चर्यं गताः सर्वे शृण्वन्ति च कथां पुनः ।
तावत् तत्र समायातः शिष्यो दुर्वाससोऽपरः ॥९१॥
तपोव्रताख्यः कर्मठः कथाऽनादरकृत् सदा ।
कथां मृषां मन्यमानः श्रोतॄन् वक्तॄंश्च नर्मकृत् ॥९२॥
प्रजहास कथां श्रुत्वा वितण्डां प्रचकार ह ।
जल्पयित्वा कथञ्चिच्च व्याजहार दुराग्रही ॥९३॥
वक्ता प्रतारयतीमानिमे तु पशवो यथा ।
प्रतारणाजालबद्धाः कथया मृषया मुहुः ॥९४॥
इत्युक्त्वा प्रययौ हित्वा वाच्यमानां कथां तदा ।
न व्याख्याति स्वयं क्वापि न शृणोति कदापि च ॥९५॥
तपः कार्यं परं मत्वा गृहकार्यादिकं शुभम् ।
करोत्येव सदा तद्वै कथानिन्दां करोति वै ॥९६॥
एवं त्वायुःक्षये प्राप्ते निन्दापापेन वै वने ।
पिशाचोऽभूच्छमीवृक्षे निर्जले छिन्नकर्णकः ॥९७॥
निराहारो महादुःखी शुष्ककण्ठौष्ठतालुकः ।
स्वकृतं चिन्तयानः स मत्तोन्मत्त इवाऽभ्रमत् ॥९८॥
प्राप्तं जलं वह्नितुल्यं फलपुष्पादिकं विषम् ।
वायुर्वह्निसमस्त्वस्य जायते पापकर्मणः ॥९९॥
न निर्वृत्तिं नवा तृप्तिं लभते कर्मठो वने ।
साधुशून्ये कथाशून्येऽरण्ये क्षुधाऽऽकुलो रुदन् ॥१००॥
सत्यव्रतेन दैवाद्वै दृष्टो मार्गेण गच्छता ।
पृष्टः कोऽसीदृशीं कस्माद् दशां प्राप्तोऽसि मे वद ॥१०१॥
इति पृष्टश्छिन्नकर्णस्तपोव्रत उवाच तम् ।
दुर्वाससः सुशिष्योऽहं तपोव्रतसुनामधृक् ॥१०२॥
कथानिन्दोत्थपापेन पिशाचोऽस्मि सुदुःखितः ।
अद्य ते दर्शनान्मोक्षो भविष्यति ममात्र वै ॥१०३॥

क्षमस्व त्वं चापराधान् मम वैतण्डिकादिकान् ।
इत्युक्त्वा स रुदन् मोक्षं समिच्छन् पृथिवीं स्पृशन् ॥१०४॥
पपात पादयोः सत्यव्रतस्य त्राहि मां गृणन् ।
सत्यव्रतः सलिलं स्वकरे धृत्वा हरिं स्मरन् ॥१०५॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
इतिमन्त्रं ददौ कर्णे जलं चिक्षेप मस्तके ॥१०६॥
दत्वा पादं तस्य पृष्ठे पापं प्रज्वाल्य शक्तितः ।
समर्प्यैकदिवसीयकथायाः पुण्यमुत्तमम् ॥१०७॥
लक्ष्मीनारायणसंहिताध्यायस्य कथोद्भवम् ।
ज्ञानं प्रदाय च कृत्वा मुक्तं पिशाचदेहतः ॥१०८॥
दिव्यदेहधरं कृत्वा सस्मार श्रीहरिं प्रभुम् ।
तावत् कृष्णः समायातो राधालक्ष्मीप्रभान्वितः ॥१०९॥
पार्वतीमाणिकीनाथः पद्मारमाजयापतिः ।
ललिताश्रीपतिः कृष्णनारायणः सपार्षदः ॥११०॥
कोटिसूर्यातिसंशोभिविमानवरसंस्थितः ।
सत्यव्रतेन भगवान् नतोऽर्चितः स्तुतो मुहुः ॥१११॥
तपोव्रतं विमाने स्वे नेतुं सम्प्रार्थितो मुहुः ।
प्रजहास हरिस्तत्र भक्तेच्छापूरकः प्रभुः ॥११२॥
प्राह गोलोकवासार्हं पुण्यं वै नास्य विद्यते ।
सत्यव्रतस्तदा प्राह गुरुमन्त्रेण दीक्षितः ॥११३॥
वैष्णवोऽस्ति मया त्वत्र कृतोऽयं पुण्यवान् कृतः ।
लक्ष्मीनारायणसंहितैकाध्यायस्य सुकृतम् ॥११४॥
दत्तमस्मै मया कृष्ण ददामि तुलसीस्रजम् ।
तव पादजलं चास्मै पुनर्ददामि केशव ॥११५॥
तव प्रसादं नैवेद्यं ददाम्यस्मै क्षणेन च ।
तेन पुण्येन भक्तोऽयं तवाऽनुग्रहमात्रतः ॥११६॥
गोलोकं ते यातु धाम भक्तेच्छापूरको भवान् ।
इत्युक्तः स हरिः सत्यव्रतं तथाऽस्तु चाह यत् ॥११७॥
तपोव्रतो मुनिं नत्वा विमानं त्वच्युताज्ञया ।
समारुरोह प्रययौ गोलोकं विष्णुना सह ॥११८॥
दुर्वासाश्च तदा तत्राऽऽजगाम दिव्यदृष्टिमान् ।
प्रशशंस स्वकं शिष्यं सत्यव्रतं कथाकरम् ॥११९॥
सतीर्थ्यमोक्षदं शान्तं वैष्णवं भवतारकम् ।
पुनः पुनस्तदोवाच दुर्वासा हृष्टमानसः ॥१२०॥
अहो ह्येकेन शिष्येण तारितः कर्मठोऽपरः ।
अहो ह्येकेन शिष्येण तारितं सकलं जगत् ॥१२१॥
अहो ह्येकेन शिष्येण तारितोऽहं गुरुस्तथा ।
अयो ह्येकेन शिष्येण शिष्यवानस्मि साम्प्रतम् ॥१२२॥
सत्सु दशसहस्रेषु शिष्येष्वपि सुशिष्यवान् ।
सत्यव्रतेन जातोऽस्मि कृष्णकथाप्रसेविना ॥१२३॥
यत्र कृष्णकथापूरप्रवाहो वहते सदा ।
तत्र वासकृतां मुक्तिर्दासीव करपात्रगा ॥१२४॥
इति ते श्रावितो लक्ष्मि ! कथापतिव्रतावृषः ।
श्रवणात्पठनाचास्य कृष्णधामपदं लभेत् ॥१२५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दुर्वाससः शिष्यस्य पातिव्रत्यपरायणस्य सत्यव्रतनामकस्यैकदिवसीयकथापुण्यदानेन तपोव्रतस्य पिशाचत्वमोक्षणं धामप्राप्तिश्च, सत्यव्रतस्य कथाकालेऽनुपस्थितौ भगवान् सत्यव्रतरूपधृक् कथामवाचयदित्यादिनिरूपणनामैकत्रिंशदधिकचतुश्शततमोऽध्यायः ॥४३१॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! पातिव्रत्यपरायणाम् ।
दिव्यां चमत्कृतिं वक्ष्ये पापतापविनाशिनीम् ॥ १ ॥
पाञ्चालदेशे सौराष्ट्रे हेमन्ताख्योऽभवन्नृपः ।
शशास राज्यं धर्मेण पश्चिमे पुण्यलालसः ॥ २ ॥
पूर्वं दानं कृतं तेन रत्नानां कनकस्य च ।
जलं मूल्यात्मकं नास्ति जलदानं तु नाऽकरोत् ॥ ३ ॥
तेन दोषेण राज्ञो वै लिप्तस्य च शनैः शनैः ।
सम्पद्धानिर्जायते स्म गजाश्वा रोगपीडिताः ॥ ४ ॥
गोमहिष्यादि यच्छ्रेष्ठं नष्टं पशुधनं हि तत् ।
अजाविकं समस्तं च वन्यं मृगादिकं तथा ॥ ५ ॥
रोगप्रपीडितं सर्वं विनाशमगमच्छनैः ।
अनावृष्टिरभूत्तस्य निर्मानुष्यविधायिनी ॥ ६ ॥
देशः शुष्कस्ततो जातः प्रजा देशान्तरं ययुः ।
राज्यकोशादिकं जातं शून्यं रिक्तं च निर्बलम् ॥ ७ ॥
ज्ञात्वा त्वन्ये नृपाः पञ्च मिलित्वा यानमाचरन् ।
तं जेतुं सुलभं मत्वा समाजग्मुः समन्ततः ॥ ८ ॥
पाञ्चालराजं युद्धेन जिग्युर्निन्युश्च सम्पदः ।
हेमन्तः स्वपतिव्रतापत्न्या युक्तस्तु रैवते ॥ ९ ॥
धात्रीभृत्यादिसहितो विवेश गिरिगह्वरम् ।
मानिन्या भार्यया युक्तो वन्यैर्यात्रां चरन्नृपः ॥१०॥
चिन्तयामास बहुधा बदरीजम्ब्वरण्यके ।
फलकन्दकृताहारः किमेतद् दुःखमागतम् ॥११॥

मया दानं प्रदत्तं वै बहुधा प्रतिपर्वणि ।
मातृपितृहितं सर्वे कृतवानस्मि सेवकः ॥१२॥
गुरवस्तोषिता नित्यं ब्राह्मणाश्चापि रक्षिताः ।
धर्मः सुरक्षितः शश्वद् देवाश्चापि प्रपूजिताः ॥१३॥
इन्द्रियाणां वशो नाहं नाहं व्यसनलम्पटः ।
न चौर्यपारदार्यादिकर्तृसंगी कदाचन ॥१४॥
तथापि वै कथं चेदं दारिद्र्यं समुपागतम् ।
पराजयो महान् जातो विरुद्धा बान्धवादयः ॥१५॥
येऽनुकूलास्तु ते सर्वेऽधुनाऽऽप्ताः प्रतिकूलताम् ।
कस्य वा कर्मणश्चेदं फलमाप्तं मया प्रभो ॥१६॥
एवं चिन्तयतस्तस्य रैवताद्रिवनेऽनिशम् ।
यात्रार्थे त्वागतस्तत्र तद्गुरुर्याजकाभिधः ॥१७॥
प्राप्तश्च सत्कृतो वन्यैस्तृप्तो नतश्च पादयोः ।
पप्रच्छ दुःखप्राप्तेः स पाञ्चालेशस्तु कारणम् ॥१८॥
दारिद्र्यं कोशनाशश्च शत्रुभिः संपराजयः ।
राज्यनाशो वने वासो बान्धवा विमुखाः कथम् ॥१९॥
मम देशेऽप्यनावृष्टिः कथमेतद् गुरो ! वद ।
इति पृष्टो गुरुर्ध्यात्वा विज्ञाय पूर्वजन्मजम् ॥२०॥
कर्म तत्कारणं सर्वं तस्मै प्राह शृणु नृप ! ।
पुराऽरण्यनिवासी त्वं व्याधः प्राणिविहिंसकः ॥२१॥
निष्ठुरश्चौर्यकुशलो धर्मकर्मविवर्जितः ।
कृष्णनारायणनाम्नो जपकार्यविरोध्यपि ॥२२॥
कृष्णस्मरणहीनश्च प्रणामवर्जितः सदा ।
शस्त्रजीवी मार्गलब्धप्रजापीडाकरः शठः ॥२३॥
बालापत्यमृगाणां पक्षिणां हत्याकरस्य ते ।
अपत्यानि न जायन्ते जातस्य गर्भपातता ॥२४॥
विश्वासघातकत्वेन बान्धवा नैव सोदराः ।
मार्गपीडाकरत्वेन मित्रसुहृद्विवर्जितः ॥२५॥
साधूनां च तिरस्कारात् शत्रुभिस्ते पराभवः ।
कदाऽप्यदत्तदोषेण दारिद्र्यं ते ह्युपस्थितम् ॥२६॥
प्रवासिनां कष्टदस्त्वं कष्टमुद्वेजनं तव ।
सर्वावमानकर्ता त्वं चावमानं गतो महत् ॥२७॥
जलादीनामदानेन वने त्वं जलपीडितः ।
निराहारो भवस्येव पूर्वकर्मविपाकतः ॥२८॥
अथ राजँस्त्वयाऽरण्ये सुकृतं राज्यदं कृतम् ।
शृणु कश्चिन्मुनिस्तत्र कर्षणाख्यः समागतः ॥२९॥
ब्रह्मचर्यव्रती कृष्णपातिव्रत्यपरायणः ।
तदा त्व धनुरादाय मार्गं रुद्ध्वा पुरः स्थितः ॥३०॥

पृष्टवान् चेद्द्रव्यमस्ति दीयतां मे वनेचर ! ।
मुनिः प्राहाऽव्ययं द्रव्यं मदग्रे वर्तते शठ ! ॥३१॥
यदीच्छसि प्रदास्येऽहं पात्रं गृहाण चेदसि ।
श्रुत्वा तं विस्मितस्तत्र कीदृक् पात्रं धनं च किम् ॥३२॥
विचार्य प्रोक्तवानेनं देहि चेदस्मि पात्रकम् ।
कर्षणस्तस्य वचसा तुतोष प्राह रे शठ ! ॥३३॥
कति हत्याः कृताश्चात्र वद निष्कपटं पुरा ।
व्याधः प्राह मयाऽरण्ये पारे सहस्रं घातिताः ॥३४॥
पशवः पक्षिणश्चान्ये स्वल्पा वै मानवा अपि ।
कर्षणः प्राह पापी त्वं पापक्षालनमिच्छसि ॥३५॥
तदा पापान्यहं तेऽत्र क्षालयामि यदीच्छसि ।
व्याधः प्राह समिच्छामि पापानां क्षालनं मम ॥३६॥
कर्षणः प्राह प्रथमं स्नात्वाऽऽयाहि मदान्तिके ।
व्याधः स्नात्वाऽऽययौ पश्चात् तुलसीदलमिश्रतम् ॥३७॥
कृष्णप्रासादिकं वारि तस्मै पानार्थमर्पितम् ।
अपिबत् स जलं शिष्टं मस्तके धृतवाँस्ततः ॥३८॥
गुरोश्चरणौ प्रक्षाल्याऽप्यपिबत् सलिलं पुनः ।
कर्षणेन तदा तस्य कर्णे दक्षे पुनः पुनः ॥३९॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
वारत्रयं महामन्त्रः श्रावितस्तावदेव तु ॥४०॥
तच्छरीरालोमकूपेभ्यश्च पापानि सर्वशः ।
निर्गतानि मूर्तिमन्ति हत्यादीनि सहस्रशः ॥४१॥
रुरुदुस्तानि सर्वाणि दीनानि विकृतानि च ।
भयंकराणि सर्वाणि प्राहुस्तं कर्षणं तदा ॥४२॥
अस्माकं कोऽस्त्यपराधः कथं च मुनिना त्वया ।
निष्कासितान्यस्य देहाद् दयां कुरु कृपां कुरु ॥४३॥
देहि वासं त्वयि यद्वा तस्मिन् यद्वा स्थलान्तरे ।
अवश्यमेव भोक्तव्यं कृतं तेन वनान्तरे ॥४४॥
कर्षणस्तु तदा प्राह कृष्णनाम्ना त्वघानि वै ।
प्रज्वलन्त्याजन्मजानि युष्माकं तादृशीं गतिम् ॥४५॥
करिष्यामि क्षणेनैव ततो दूरं प्रगच्छत ।
न मत्साम्ये स्थितिर्वोऽस्ति दूरं गच्छत सर्वथा ॥४६॥
इत्युक्तानि तु पापानि मूर्तिमन्ति गतानि वै ।
दामोदरस्य तीर्थस्य पर्वते संभ्रमन्ति हि ॥४७॥
अथ व्याधेन वन्यैश्च फलैः संभोजितो गुरुः ।
सरोजलं समानीय तृषा तस्य निवारिता ॥४८॥
सुगन्धीनि सुपुष्पाणि कुन्दान्यानीय यत्नतः ।
मालादिकं रचयित्वा कण्ठे शिरसि पूजितः ॥४९॥

पादावनेजनं तस्य देहावमर्दनं तथा ।
कृतं व्यजनपवनः शीतलो वीजितस्तदा ॥५०॥
एवं साधोः कृता पूजा कर्षणर्षेर्हि भावतः ।
कृष्णपूजोपहाराणि समानीतानि तेन च ॥५१॥
प्रसादो भक्षितो वारि पीतं प्रासादिकं तथा ।
एवं व्याधेन भक्तेन परिचर्या कृता तदा ॥५२॥
पुण्यं जातं महत्तत्राशीर्वादा गुरुणाऽर्पिताः ।
राज्यवान् धनवान् लक्ष्मीपूरितो भव पार्थिव ! ॥५३॥
इत्युक्त्वा सत्कृतिं लब्ध्वा ययौ तीर्थान्तरं गुरुः ।
व्याधो हिमप्रभावेण रात्रावेव मृतिं गतः ॥५४॥
स च त्वं भूरियशसः सौराष्ट्रनृपतेर्गृहे ।
कुमारोऽसि जनिं प्राप्तः साधुसेवा कृता त्वया ॥५५॥
तेन पुण्येन राजाऽभूः पुण्यं सर्वं तु भक्षितम् ।
पुण्यनाशं विलोक्यैव दामोदरस्य सन्निधौ ॥५६॥
रैवताद्रौ तु तेऽघानि यानि विद्रावितानि वै ।
तानि संपश्य सर्वाणि पुनस्त्वां वै ववल्गिरे ॥५७॥
तेषां बलेन चेदृक् ते भ्रमणं पतनादिकम् ।
जातं राजन् यतस्तानि पापानि प्राग्भवे तव ॥५८॥
ऋषिणा दयया नैव प्रज्वालितानि सर्वथा ।
सजीवनानि यातानि तानि पुनर्ववल्गिरे ॥५९॥
तस्मात् कृष्णकृष्णकृष्णकृष्णनारायण प्रभो ।
हरेकृष्ण परब्रह्म वासुदेव रमापते ॥६०॥
श्रीपते राधिकाकान्त कमलेश प्रभापते ।
माणिकीश जयालक्ष्मीपते श्रीपार्वतीपते ॥६१॥
सतां पते कृपासिन्धो भक्तपते सुमुक्तिदे ।
सावित्रीश तुलसीष्ट गंगासरस्वतीपते ॥६२॥
योगिपतिपते सिद्धासाध्वीपतिव्रतापते ।
अन्तरात्मन् ममाऽघानि प्रज्वालय विनाशय ॥६३॥
दासोऽहं किंकरस्तेऽस्मि सेवाऽर्हं पावनं कुरु ।
रक्षय मां पाददास्ये कैंकर्ये पातिव्रत्यके ॥६४॥
इत्यर्थनां कुरु भूभृत् सर्वं श्रेष्ठं भविष्यति ।
मंगलानां प्रदे कृष्णे तुष्टे सर्वं निरामयम् ॥६५॥
अहं वै याजकस्तेऽस्मि गुरुर्याजकनामतः ।
तव कल्याणकृच्चास्मि वद किं करवाणि ते ॥६६॥
यदीच्छसि सुखं राज्यं धनधान्यादिसम्पदः ।
स्वर्गापवर्गौ यदि वा सायुज्यं वा हरेः पदम् ॥६७॥
किमिच्छसि वद राजन् कृतकृत्यो भवाऽत्र मे ।
श्रुत्वा जगाद हेमन्तो हर्षविह्वलमानसः ॥६८॥
राज्यं चेच्छामि निर्विघ्नं शत्रूणां गर्वभञ्जकम् ।
ततश्च श्रीकृष्णनारायणस्य चरणे सदा ॥६९॥
पातिव्रत्यपरां भक्तिं समिच्छामि सदा द्विज ।
श्रुत्वा तं याजकस्त्वाह युक्तान् धर्मान् निबोध मे ॥७०॥
दानेन लभते राज्यं स्वर्गं सम्पद् धनानि च ।
सेवया लभते त्वायुर्भाग्यं भोग्यं सुतादिकान् ॥७१॥
भक्त्या लभते गोविन्दचरणं धाम शाश्वतम् ।
सत्संगेन महाशान्तिं सुखं चानन्दशेवधिम् ॥७२॥
एतच्चतुष्टयं राजन् यथाशक्ति समाचर ।
गां देहि पृथिवीं देहि स्वल्पामपि द्विजाय वै ॥७३॥
तेन लक्ष्मीं च पृथिवीं पुनः प्राप्स्यसि सत्वरम् ।
शय्याछत्रादिकं देहि राज्यं प्राप्स्यसि वै पुनः ॥७४॥
स्वर्णं रौप्यं धनं देहि तेन प्राप्स्यसि सम्पदः ।
नारायणह्रदे स्नात्वा दामोदरं समर्चय ॥७५॥
वामनस्ते पुनर्जयं कारयिष्यत्यसंशयम् ।
कृष्णनारायणमूर्तिदानं कुरु गुरौ शुभम् ॥७६॥
जलदानं प्रपादानं कुरु चात्र वनान्तरे ।
पुत्रान् प्राप्स्यसि राजेन्द्र त्वात्मतुल्यपराक्रमान् ॥७७॥
यन्नास्ति तत्तु संकल्पाद् देहि जलस्य साक्षितः ।
पश्चात्प्राप्ते प्रदातव्यं कार्यं शाठ्यं न कर्हिचित् ॥७८॥
सेवां साधुजनानां च कुरु प्राप्स्यसि चायुषम् ।
भोग्यं वस्तुप्रजातं च दाराः सुतानवाप्स्यसि ॥७९॥
पातिव्रत्यं कुरु कृष्णे सतीवत् सर्वथाऽनघ ।
सेवनं पूजनं तस्मै सुनैवेद्यं जलार्पणम् ॥८०॥
यथर्तुस्नानशृंगारं समुत्साहमहोत्सवम् ।
व्रतमुद्यापनं चान्यद् यत्किञ्चिच्छक्यमेव तत् ॥८१॥
कुरु दास्यं च कैंकर्यं ध्यानं च भजनं जपम् ।
सर्वेषां सुखदो भूत्वा प्राप्स्यसि धाम चाक्षरम् ॥८२॥
राधाकृष्णं रमाकान्तं लक्ष्मीनारायणं प्रभुम् ।
शिवाशिवं पार्वतीशं श्रीपतिं कमलापतिम् ॥८३॥
माणिकीशं प्रभाकान्तं जयेशं ललितापतिम् ।
पद्मिनीशं च पद्मेशं दुर्गेशं तुलसीपतिम् ॥८४॥
देवीपतिं हरिं कृष्णं स्वामिनं श्रीनरायणम् ।
कम्भरेशं रुक्मिणीशं परब्रह्मात्मनां पतिम् ॥८५॥
सतां पतिं सर्वनाथं भजाऽन्तर्यामिणं गुरुम् ।
राधादिवत् सदा पातिव्रत्यं पालय केशवे ॥८६॥
गृहाणेमां गले कण्ठीं तुलसीमालिकां शुभाम् ।
ओं श्रीकृष्णकृष्णकृष्णनारायण नमोऽस्तु ते ॥८७॥

इत्युच्चार्य हरिं नत्वा ध्यात्वा कान्तं मनोहरम् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥८८॥
एवं जपं कुरु राजन्नष्टोत्तरशतं दिने ।
तेन मुक्तिं परप्राप्तिस्वरूपां त्वं लभिष्यसि ॥८९॥
सतां दिव्यजनानां त्वं कुरु संगं सुपुण्यदम् ।
साध्वीनां च सतीनां च दर्शनं कुरु वै सताम् ॥९०॥
सेवां पूजां पादचर्यां कैंकर्यं दासवत् कुरु ।
वह तेषां पादरजांस्यपि स्वशिरसा सदा ॥९१॥
चरणामृतमेतेषां पिब स्नाने नियोजय ।
सत्यश्च साधवो राजन्नानखादाशिरोऽवधिम् ॥९२॥
दिव्याः पवित्राः पुण्याश्च भागत्यागविवर्जिताः ।
तान्प्रसेवय यद्वत् श्रीं श्रीकृष्णं च नरायणम् ॥९३॥
सदा निष्कामभावेन प्रसेवय श्रियाः पतिम् ।
तेन ते सकला लोका भविष्यन्ति वशानुगाः ॥९४॥
प्रत्यक्षो भविता कृष्णनारायणस्तव गृहे ।
प्रत्यक्षा भविता लक्ष्मीस्तव सम्पद्विवर्धिनी ॥९५॥
तवेयं महिषी राजन्नित्यं श्रीपूजनं प्रगे ।
करोतु श्रीवृक्षपत्रे कुंकुमेन विराजिताम् ॥९६॥
रेखाभिः सुदृश्यरूपां चतुर्भुजां हरिप्रियाम् ।
धूपदीपसुनैवेद्यजलपुष्पफलादिभिः ॥९७॥
पूजयतु स्नेहभक्त्या प्रसन्ना सा भविष्यति ।
दास्यत्यभीष्टमेवाऽस्यै पातिव्रत्येन सेवया ॥९८॥
सर्वं ते वाञ्छितं हृद्यं तूर्णं प्राप्तं भविष्यति ।
इत्युक्त्वा याजकस्तस्मै दत्वा शुभाशिषस्ततः ॥९९॥
ययौ वनान्तरं लक्ष्मि ! हेमन्तः स्नानमाचरत् ।
चक्रे दानं पूजनादि सेवां रैवतवासिनाम् ॥१००॥
योगिनां वैष्णवानां च सत्संगं चकार ह ।
कथां दामोदरकृष्णदेवालयेऽशृणोत् शुभाम् ॥१०१॥
ध्यानं सुमननं कृष्णनारायणस्य चाकरोत् ।
शुभान्यस्य स्वाप्नदर्शनान्यभुवन् निशाव्यये ॥१०२॥
हस्तिमारुह्य सच्छत्रो याति राज्यं सुवर्धितः ।
वन्दितो देवलोकस्थैः प्रजया त्वभिवेष्टितः ॥१०३॥
अप्सरोभिः पुष्पमालाऽऽभूषणैरभिवर्धितः ।
लक्ष्म्याऽऽगत्य कलशाद्भिः संस्नापितश्च सोऽभवत् ॥१०४॥
गायकैर्देवगन्धर्वैर्गीतैः संश्रावितः स च ।
गुरुवर्गैश्च मातृभिस्तिलकैः साऽक्षतैर्युतः ॥१०५॥
ललाटे शोभितश्छत्रचामरादिभिरर्थितः ।
एवं दृष्ट्वा च स स्वप्नं सुमोद प्राह योषिते ॥१०६॥
कृष्णनारायणदृष्ट्या राज्यं पुनर्मिलिष्यति ।
शुभं शकुनं विजये विलोक्य ध्वजदर्शनम् ॥१०७॥
यात्रां चकार नगरीं राज्यं जिगाय वै स्वकम् ।
जिगायाऽन्यान्महाशत्रून् कांश्चिज्जग्राह वै वशान् ॥१०८॥
राज्ञां कोशगजाऽश्वाँश्च स्वयं जग्राह वीर्यवान् ।
करदा भग्नसंकल्पा भूभृतश्च बभूविरे ॥१०९॥
एकच्छत्रमभूद् राज्यं सौराष्ट्रविषयेषु वै ।
पुत्रस्तस्याऽभवद् धृष्टद्युम्नश्चातिप्रतापवान् ॥११०॥
हेमन्तो भक्तसाधूनां सेवां चक्रे दिने दिने ।
कथां शुश्राव कृष्णस्य नित्यं राज्यगृहे मुदा ॥१११॥
प्रजाश्च वैष्णवी जाता पातिव्रत्यपरा हरेः ।
यथाऽऽत्मनि तथा कृष्णे भक्तिं प्रचक्रिरे सदा ॥११२॥
सन्तुष्टश्च स्वयं कृष्णो नारायणश्चतुर्भुजः ।
अक्षयायां तृतीयायां प्रत्यक्षः समजायत ॥११३॥
लक्ष्मीयुक्तो गरुडस्थो दिव्यभूषादिभूषितः ।
निरीक्ष्य हर्षात् प्रोन्मत्तो ननर्त पुलकाञ्चितः ॥११४॥
तुष्टाव परया भक्त्या प्राञ्जलिः प्रेमपूरितः ।
जलं पादाववनिज्य दधार मुखमस्तके ॥११५॥
अर्चयामास सद्वस्तुषोडशकेन पार्थिवः ।
ववन्दे सर्वदानेन पुराणपुरुषं हरिम् ॥११६॥
वन्दे धृत्वा हृदये ते पदं तीर्थास्पदं प्रभो ।
यस्य साधोः प्रसंगेन तारितोऽहं त्वया हरे ! ॥११७॥
साधुसेवारतस्याऽयं संसारो गोष्पदायते ।
सत्संगेन हरे कृष्ण त्वयि जाता मतिर्मम ॥११८॥
राज्यनाशोऽभवन्मे तेऽनुग्रहो यत्फलं भवान् ।
तथा सेवां स्मृतिं दास्यं पातिव्रत्यं प्रदेहि मे ॥११९॥
मनस्ते पादयोरस्तु वचस्ते गुणकीर्तने ।
नेत्रे च दर्शने ते स्तां श्रोत्रे तव कथाश्रवे ॥१२०॥
रसना त्वत्प्रसादेऽस्तु घ्राणं त्वन्मूर्तिसौरभे ।
चर्माऽस्तु स्पर्शने तेऽत्र हस्तौ मन्दिरमार्जने ॥१२१॥
पादौ त्वत्क्षेत्रगमने चान्ये त्वदर्थयोजिते ।
मूर्धा ते वन्दने चास्तु कामस्त्वदर्थमेव च ॥१२२॥
बुद्धिस्ते निर्णये चास्तु चित्तं ते चिन्तने सदा ।
अहंभावोऽस्तु कान्ते मे चायुर्मे त्वयि चार्पितम् ॥१२३॥
सन्तु दिनानि साधूनां सेवायां प्रेमभावतः ।
सत्संगस्ते सतां चास्तु मुक्तिस्ते पादसेवनम् ॥१२४॥
नाऽन्यां श्रियं प्रकांक्षेऽहं क्वचिच्छ्रीपतिमन्तरा ।
इतिस्तुतः कृष्णनारायणः श्रीमङ्गलेश्वरः ॥१२५॥

हसन् प्राह वरं तस्मै त्वायुष्यं चायुतं परम् ।
भक्तिं कृत्वा मम दास्यं पातिव्रत्यं विधाय च ॥१२६॥
मम सायुज्यमेव त्वमाप्स्यसि स्वकुटुम्बयुक् ।
तृतीयायामक्षयायां त्वमिव मे प्रपूजनम् ॥१२७॥
करिष्यन्ति जनास्तेऽपि यास्यन्ति मत्पदं ध्रुवम् ।
स्नानं दानं मम पूजां करिष्यन्ति तु याः प्रजाः ॥१२८॥
नरान्नारीर्नयिष्येऽहं त्वक्षरं मम धाम वै ।
इति दत्वा वरं कृष्णस्तत्रैवाऽन्तरधीयत ॥१२९॥
राजा चक्रे सतां मध्ये वासं शुश्राव सत्कथाम् ।
पातिव्रत्यपरां भक्तिं कृष्णस्य स्वकुटुम्बयुक् ॥१३०॥
भुक्त्वा राज्यमयुतान्ते ययौ त्वन्ते हरेः पदम् ।
श्रवणात्पठनाच्चास्य यास्यन्ति श्रीहरेः पदम् ॥१३१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सौराष्ट्रे पञ्चालदेशीयहेमन्तनृपतेः प्राक्कृतकर्मभिः राज्यनाशादिः, गुरूपदिष्टश्रीकृष्णनारायणपातिव्रत्यदास्यधर्मेण पुना राज्यप्राप्तिः, श्रीहरिदर्शनमोक्षादिनिरूपणनामा द्वात्रिंशदधिकचतुश्शततमोऽध्यायः ॥ ४३२ ॥

श्रीनारायण उवाच—

आकर्णय महालक्ष्मि ! नरनारायणात्प्रभोः ।
उर्वशी या समुत्पन्ना पातिव्रत्यप्रभावतः ॥ १ ॥
पूर्वं साऽभूत् शुनी ततः पूर्वतरा तु ब्राह्मणी ।
दुष्टा काश्मीरदेशीया पतिद्वेषकरी शठा ॥ २ ॥
देवव्रतसुता नाम्ना मालिनीति सुरूपिणी ।
सत्यशीलाऽभिधविप्रपत्नी पतिप्रिया न वै ॥ ३ ॥
तया सह पतिर्देशं यावनं तु ययौ क्वचित् ।
सा तु पत्यौ क्रोधयुक्ता वशीकरणलम्पटा ॥ ४ ॥
यवनीभ्यस्तु बह्वीभ्यः पप्रच्छ वश्यभेषजम् ।
ताभिस्तु दर्शिता धूर्ता काचिदोषधकारिणी ॥ ५ ॥
दास्यति भेषजं येन भविता दासवत् पतिः ।
ब्राह्मणी चापि धूर्ताया गृहं ययौ सलालसा ॥ ६ ॥
दृष्टवती कुटीं तस्याः खप्परादिसमन्विताम् ।
बहूनामोषधानां च सुपात्रैश्चुल्लिकादिभिः ॥ ७ ॥
शोभितां मन्त्रविद्यानां साधनाऽऽसनराजिताम् ।
यन्त्रैर्मन्त्रैर्भस्मग्रन्थिनीलवस्त्रैः सुशोभिताम् ॥ ८ ॥
अस्थिभिर्वेदिकाभिश्च योगसाधनगर्भिताम् ।
सजटाभिश्च दीर्घाभिः शिष्याभिः शुभदीपिताम् ॥ ९ ॥
धूपकुण्ड्युतां वीक्ष्य कुटीं सदण्डधूर्तिकाम् ।
बह्वीभिर्दुःखिताभिश्चाराधितां कार्यलब्धये ॥१०॥
भस्मावगुण्ठितां देहे योगिवत् तिलकान्विताम् ।
ननाम परया भक्त्या ब्राह्मणी शठयोगिनीम् ॥११॥
दुःखं निवेदयामास ततः सा शठधूर्तिका ।
मयूरपत्रमार्जन्या चक्रे तस्याः प्रमार्जनम् ॥१२॥
संस्करणं तच्छरीरे फुत्कृतेन च भस्मना ।
चन्द्रकं भस्मना चक्रे भाले करे जलं ददौ ॥१३॥
कृष्णडोरकरुद्राक्षमालां स्कन्धे प्रदाय च ।
श्रावयामास विप्राण्यै वश्यमन्त्रं त्रिवारकम् ॥१४॥
नमः कामाक्षिकादेव्यै पतिं वशं कुरु स्वाहा ।
इति मन्त्रं ददौ तस्यै ददौ द्रव्यांगुलीयकम् ॥१५॥
रक्तं माणिक्यखचितं कानकं वश्यकारकम् ।
और्णं रक्तं चापि सूत्रं भुजाबन्धनकं ददौ ॥१६॥
ददावोषधमेवापि चूर्णं रक्षान्वितं शुभम् ।
प्राह चैतन्महावश्यकरं चूर्णं हि वर्तते ॥१७॥
अस्य प्रयोगतो वायुसदृशा बलिनो ह्यपि ।
वश्या भवन्ति सततं स्वामिनो वानरा इव ॥१८॥
चूर्णं भर्तरि भोज्यादौ भोक्तव्यं स्वल्पकं सदा ।
रक्षां च दोरकं चापि गले त्वं स्वीकुरु ध्रुवम् ॥१९॥
रक्तं तु दोरकं त्वं स्वभुजे बन्धय भामिनि ! ।
भविष्यति पतिर्वश्यो मन्त्रं स्वशयने जप ॥२०॥
मन्त्रितं भोजनं देहि मन्त्रितं जलमित्यपि ।
मन्त्रितं शयनं देहि सर्वं देहि सुमन्त्रितम् ॥२१॥
स्वल्पकालेन ते स्वामी तव वश्यो भविष्यति ।
यदि किञ्चिद् भवेत् कार्यं समागच्छ द्रुतं तु माम् ॥२२॥
इत्युक्ता दक्षिणां दत्वा विप्राणी स्वगृहं ययौ ।
ओषधं योजितं दुग्धे भोजने पतयेऽर्पितम् ॥२३॥
मन्त्रितं च जलं वस्त्रं शयनं स्वामिने ददौ ।
एवं दिने दिने चूर्णं ददौ यथा यथा तथा ॥२४॥
पतिः श्वासेन कासेन कफेन च क्षयेण च ।
पीडितोऽभवदत्यन्तं मूत्रादावुष्णताऽधिका ॥२५॥
देहे प्रफुल्लिका रक्ता प्रावर्तन्ताऽतिखर्जनाः ।
दिनैः कतिपयैः स्वामी पराधीन इवाऽभवत् ॥२६॥
अशक्तो रोगदुःखी च मृत्युशंकासमन्वितः ।
हततेजास्ततो भर्ता विप्राणीं प्राह विह्वलः ॥२७॥
तवाऽस्मि दासवत्त्वत्र त्राहि मां रक्ष शोभने ।
नान्यां वै कामये कांचिन्नारीं त्वामन्तरा प्रिये ॥२८॥

वर्तिष्येऽपि तवाऽऽज्ञायां तव दासोऽधुना सदा ।
तव कार्ये प्रकर्तव्ये न करिष्ये विरोधनम् ॥२९॥
ततः सा कामिनी पत्युर्जीवने स्वार्थशालिनी ।
सति पत्यौ भूषणादि धार्यं भोग्यं निःसंशयम् ॥३०॥
इति तूर्णं गता शाठ्ययोगिनीं भीतवत्तदा ।
पतिर्मे वशमापन्नः किन्तु ध्रुवं मरिष्यति ॥३१॥
मम स्वार्थविनाशः स्यात्तस्माज्जीवय तं शुभे ।
इतिन्यवेदयत्सर्वं धूर्ता विज्ञाय चापरम् ॥३२॥
ददावौषधमेवाऽस्यै दुःखदाहार्दिनाशकम् ।
दत्ते तु भेषजे तस्मिन् स्वस्थोऽभूत् तत्क्षणात्पतिः ॥३३॥
साऽभूत्प्रसन्ना त्वत्यर्थं वश्येऽपि वर्तते पतिः ।
अन्येषां संगमे त्वस्यै न च वक्ति मनागपि ॥३४॥
तिष्ठत्युपपतिर्गेहे गृहकार्यापदेशतः ।
भर्ता नैव वदत्येव किञ्चिदपि कथञ्चन ॥३५॥
अथ सा ब्राह्मणी दुष्टा पतिद्वेषकरी शनैः ।
रोगव्याप्ताऽभवद् देहे कृमयः संप्रजज्ञिरे ॥३६॥
तेन पञ्चत्वमापन्ना गता नरकयातनाः ।
प्रतप्ते ताम्रकुण्डे सा निक्षिप्ता बहुवत्सरम् ॥३७॥
ततः शुनी शतवारं दद्रुरोगप्रपीडिता ।
क्लिन्नावयवा खञ्जा च ताडिताऽपि गृहे गृहे ॥३८॥
अन्तिमे पद्मबन्ध्वाख्यद्विजस्य भवने तु सा ।
जाता सौवीरदेशे वै दास्याः शुनी सुरोगिणी ॥३९॥
कृमिपूर्णाऽवयवा सा द्विजगृहांगणे यदा ।
पादप्रक्षालनशिलामधिरुह्य स्थिताऽभवत् ॥४०॥
तदा दैवाद् द्विजपुत्रः कृष्णनारायणं स्मरन् ।
गायत्रीं प्रजपन् कृष्णपूजां कृत्वा कमण्डलौ ॥४१॥
प्रसादजं जलं विष्णुस्नापितं तुलसीयुतम् ।
नीत्वा गृहे समायातः सोपानैर्यावदेव हि ॥४२॥
गृहांगणं तून्छ्रितं वै पञ्चसोपानमात्रकम् ।
समारुरोह तावत्त्वन्तिमे सोपानके पदा ॥४३॥
स्खलितः पतितो हस्तात्कमण्डलुर्जलान्वितः ।
पार्श्वे निम्ने शिलाभागे स्थितायां दैवयोगतः ॥४४॥
कमण्डलुजलं शुन्यां पतितं सर्वमेव यत् ।
शुनी स्नातवती पीतवती भाग्यवशात्तदा ॥४५॥
मिष्टं प्रसादं पतितं भाग्याद् भुक्तवती तदा ।
तेन पुण्येन सा लक्ष्मि ! ध्वस्तपापा बभूव ह ॥४६॥
जातिस्मरा जनवाचा समुवाच द्विजं क्षणात् ।
भो भूदेव ! महापापां त्राहि मां त्राहि मां द्विज ॥४७॥
अहमासं पुरा विप्रा पतिद्वेषकरी सदा ।
पत्युर्विषप्रदात्री च वश्यमन्त्रकरी तथा ॥४८॥
दुःखदात्री महादुष्टा परप्रसंगकारिणी ।
तेन पापेन ताम्राणां कुण्डेषु पातिता यमैः ॥४९॥
शतवारं तु जाताऽस्मि शुनी दद्रुमयी द्विज ।
अन्तिमोऽयं मम देहस्त्वया जलेन संस्कृतः ॥५०॥
दैवाज्जातिस्मरा जाता स्मर्यते शतजन्मजम् ।
अतिदुःखं मया भुक्तं वर्णने पार्यते न वै ॥५१॥
पतिद्वेषकरी नारी पच्यते तप्तताम्रके ।
दुराचारा तप्तसूर्म्याऽऽश्लिष्यते कामिभिस्तदा ॥५२॥
भर्ता नाथो गुरुर्भर्ता भर्ता दैवतमुत्तमम् ।
तस्य द्रोहं विधायैव कथं सा सुखिनी भवेत् ॥५३॥
तिर्यग्योनिशतं याति कृमिव्याप्तं भयंकरम् ।
तस्मान्नार्या सदा कार्या भर्तुः सेवा वचोऽन्विता ॥५४॥
पातिव्रत्यं परो धर्मः पुण्यं वै पतिसेवनम् ।
पत्यौ हरिः स्वयं त्वास्ते स्त्रीनिस्तारणहेतवे ॥५५॥
खञ्जः काणस्तथा वृक्णः केकराक्षोऽष्टवक्रकः ।
कज्जलसुन्दरो देहे बधिरो वामनः कृशः ॥५६॥
रुग्णः कुष्ठी विक्षिप्तश्च क्रूरः कामातिवेगवान् ।
विषयी व्यसनी वावदूकोऽनृतपरोऽपि वा ॥५७॥
पत्न्यर्थं निर्मितस्तादृक् कृष्णांशो ब्रह्मणा स्वयम् ।
तेनैव पत्न्या उद्धारो नान्येन सूर्यवर्चसा ॥५८॥
यादृशस्तादृशो नीलः कृष्णः कज्जलरूपवान् ।
कामेन कार्यमासाद्य सेवनीयः पतिः प्रभुः ॥५९॥
पतिः कामेन सन्तृप्तो रतिदानेन चेद् यदि ।
कृष्णनारायणः साक्षात् तृप्तस्तस्या इति वृषः ॥६०॥
एवं तस्य सदा भूत्वा सेवनीयः स्त्रिया पतिः ।
रुग्णे सेवा सुखे शान्ता विपत्तौ धैर्यदा तथा ॥६१॥
क्षुधिते भोज्यदा तृष्णे तृप्तिदा शयने प्रिया ।
कार्ये सहायदा याने सहगा भवने सती ॥६२॥
व्यवहारे सखी संरक्षणे मातेव वर्तते ।
या स्त्री सा स्वर्गमयुतं भुंक्ते नास्त्यत्र संशयः ॥६३॥
यद्यप्यस्मिन्भवे नास्ति सुरूपश्चेत्पतिस्तदा ।
पतिभक्त्या देवतुल्यं कर्तुं शक्ता सती भवेत् ॥६४॥
काली हिमगिरेः पुत्री गौरी सा तपसा ह्यभूत् ।
कुब्जा कृष्णप्रसंगेन राधातुल्याऽभवत् पुरा ॥६५॥
शबरी रामयोगेन चतुर्भुजाऽभवत्तथा ।
यवनी स्वामियोगेन मुक्ता दिव्याऽभवत्पुरा ॥६६॥

जटायूः रामयोगेन चतुर्भुजोऽभवच्छुभः ।
गजग्राहौ विष्णुयोगान्मुक्तौ दिव्यौ बभूवतुः ॥६७॥
अरुन्धती श्वपची तु ऋषिपत्नी गवाश्रयात् ।
सरमा देवशुनिका मुक्ता सुरभिसेवनात् ॥६८॥
वृन्दा तुलसी वृक्षाश्च कृष्णयोगात् तदात्मकाः ।
जडाः श्रीकृष्णसम्बन्धाद् भवन्ति चेतना इव ॥६९॥
सूतः पौराणिको दिव्यो ब्रह्मपूज्यो बभूव ह ।
इन्द्रतिरस्कृतं पुष्पं लक्ष्मीनाशकरं ह्यभूत् ॥७०॥
पुनस्तदर्पितं तस्य स्मृद्धिदं क्षीरसागरे ।
एवं वस्तु नरो नारी यद्यमनोहरं भवेत् ॥७१॥
तपसा रमणीयं तज्जायते नात्र संशयः ।
दुर्गुणं सद्गुणं चापि जायते तपसा सदा ॥७२॥
कुब्जा कुब्जोऽथवा पाल्या पाल्यश्च भगवद्धिया ।
सेवनीयौ स्वतपसा स्वामिभक्त्या सतीधिया ॥७३॥
एवं कृत्वा हरिं मत्वा सतीं मत्वा च दम्पती ।
सेवेयातां सुखप्राप्त्या सहनं च क्षमां गतौ ॥७४॥
मया विप्र ! सेवितो न तिरस्कृतो वशीकृतः ।
दुःखितः पीडितस्तेन दुःखिता भवसागरे ॥७५॥
समुद्धराऽधुना ब्रह्मन् कृष्णपूजाफलार्पणैः ।
अन्यथा मे पुनर्जन्म दुष्टयोनिषु दृश्यते ॥७६॥
इत्युक्तश्च तदा विप्रः करुणां प्रविधाय च ।
एकादश्याः फलं चापि द्वादश्याः पूजनादिकम् ॥७७॥
सर्वं पुण्यं ददावस्यै यदक्षयफलं मतम् ।
तप्तं दत्तं हुतं यच्च कृतं देवार्चनादिकम् ॥७८॥
कृष्णपातिव्रत्यरूपं सर्वं त्वस्यै ददौ द्विजः ।
उवाच तां महादुष्टे दयापात्रं न विग्रसे ॥७९॥
पतिद्वेषकरी साधु द्वेषिणी देवनिन्दिका ।
कृपापात्रं न वै प्रोक्तं तथापि स्वाश्रिता यतः ॥८०॥
कृपा मया कृता तेऽस्ति दीनां ज्ञात्वा तु किंकरीम् ।
स्वपोष्या ये हि वर्तन्ते गृहस्थस्य महात्मनः ॥८१॥
तेषामुद्धरणं कार्यमिति कृत्वा समुद्धृता ।
चण्डाला वायसाश्चापि सारमेयाश्च किंकराः ॥८२॥
दासा दास्यस्तथा भृत्या नकुलाः शुकसारिकाः ।
शशका हरिणो हंसा ये चान्ये बलिभोजिनः ॥८३॥
गृहस्थानां दयापात्रं ह्यनाथा बालबालिकाः ।
अधवास्तु स्त्रियस्तद्वद् रुग्णा निराश्रयाः सदा ॥८४॥
पोष्या भवन्ति ते सर्वे समुद्धार्याः प्रयत्नतः ।
गृहस्थो नोद्धरेत्पोष्यं सोऽधःपतेन्न संशयः ॥८५॥
पातिव्रत्यं परं पत्युराज्ञा पतिः परेश्वरः ।
कृष्णनारायणः स्वामी तदाज्ञा पोष्यरक्षणम् ॥८६॥
पोष्यरक्षां परित्यज्य परक्लृप्त्यां प्रवर्तते ।
पतिद्रोग्धा भवेत् सोऽत्र कीनाशगृहमृच्छति ॥८७॥
परोपकारो धर्मोऽस्ति वृषः किंकरमोक्षणम् ।
मोक्षदानं महद्दानं कृष्णप्राप्तिपरायणम् ॥८८॥
प्रसन्नता हरेस्तत्र जायते स्वामिनः सदा ।
परो मोक्षस्तस्य सम्यगुपादानं पतिव्रतम् ॥८९॥
परोपकारो मोक्षोऽत्र ज्ञानिना देय एव सः ।
भक्तिमता तथा देयश्चान्यस्मै पत्युराज्ञया ॥९०॥
शशी सूर्योऽथ पवनो दिवा रात्रिर्जलं क्षितिः ।
चन्दनं पादपाः सन्तः परोपकरणे स्थिताः ॥९१॥
दधीचिना कृतं त्वस्थिदानं देवेभ्य एव यत् ।
शिबिना त्वर्पितं मांसं कपोताय स्वदेहजम् ॥९२॥
जीमूतवाहनेनापि राज्ञा पूर्वं दयालुना ।
गरुडायार्पितं स्वस्य जीवितं चिरजीवनम् ॥९३॥
धर्मांगदेन मोहिन्यै व्रतार्थे तु शिरोऽर्पितम् ।
सृष्ट्यर्थं वेधसा देहाः पुनः पुनः समर्पिताः ॥९४॥
लोकानां मोक्षणार्थाय गंगाद्याः सरितोऽभवन् ।
विष्णुः शालग्रामशिला शंकरो लिंगरूपकः ॥९५॥
लक्ष्मीस्तु तुलसीरूपा लोकमोक्षणहेतवे ।
कृष्णो गोपालतां प्राप्तस्तथा मत्स्यादिरूपवान् ॥९६॥
परोपकृतये सर्वं पूर्वैः पूर्वतरैः कृतम् ।
पर्जन्यश्चन्द्रमाः सूर्यः समाः सर्वेषु जन्तुषु ॥९७॥
तथा त्वया तु किंकर्यां शुन्यां पुण्यं दयालुना ।
समभावयुजा दत्तं निर्धूताऽखिलकल्मशा ॥९८॥
जातेदानीं गुरो सन्तु त्वादृशा मोक्षदा भुवि ।
परोपकारशीलाश्च साधवो हि पतिव्रताः ॥९९॥
देह्याज्ञां मे हरेर्धाम गन्तुं यामि सुखालयम् ।
इत्युक्तो ब्राह्मणः प्राह तस्यै मन्त्रं हरेर्मुहुः ॥१००॥
ओं नमः श्रीकृष्णनारायणोद्धर कुक्कुरीम् ।
गच्छ कृष्णस्य गोलोकं शुनि ! पुण्यवती भव ॥१०१॥
एवं श्रुत्वा तु सा पूर्णे जाता दिव्या सुरूपिणी ।
श्वदेहं तु परित्यज्य शुभाऽऽदित्यसमाऽभवत् ॥१०२॥
तावत्तत्रागतं दिव्यं विमानं सूर्यलौकिकम् ।
तत्रारूढा द्योतयन्ती व्योममण्डलमूर्ध्वतः ॥१०३॥
दिव्या देव्यभवच्चन्द्राननाऽऽभरणभूषिता ।
कल्पं वासं दिवि कृत्वा भुक्त्वा भोगान् महीतले ॥१०४॥

नरनारायणादेवादुर्वशीनाम नामतः ।
वरांगना समुत्पन्ना वैष्णवी देवताप्रिया ॥१०५॥
अप्सरोधर्मयुक्ताऽपि सदा कृष्णपतिव्रता ।
पातिव्रत्यपरा जाताऽऽश्रितमोक्षप्रदायिनी ॥१०६॥
आम्रपुष्पाणि संगृह्य नरेणोरौ प्रमर्दने ।
उद्भाविता महादिव्या महेन्द्रसैन्यमोहिनी ॥१०७॥
यदाऽऽगतो नरनारायणतपःसु विघ्नकृत् ।
इन्द्रो नारायणदेशादिन्द्रभवनं सा स्थिता ॥१०८॥
वैष्णवी सा महाभाग्यवती तत्र प्रवर्तते ।
नित्यं सा श्रीकृष्णनारायणं पतिं प्रसेवते ॥१०९॥
इति ते कथितं लक्ष्मि ! पापतापप्रणाशनम् ।
पातिव्रत्यपरं सर्वं मोक्षदं तारकं शुभम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पतिद्वेष्ट्र्याः काश्मीरीयब्राह्मण्याः शतजन्मशुनीत्वं ततः श्रीकृष्णनारायणपातिव्रत्यपरेण सौवीरदेशीयविप्रेण शुन्याः प्रमोक्षणं देवीत्वं, ततो नरनारायणस्योरोरुर्वशीत्वमिति निरूपणनामा त्रयस्त्रिंशदधिकचतुश्शततमोऽध्यायः ॥४३३॥

श्रीनारायण उवाच—

पुनर्लक्ष्म्यद्भुतं किञ्चित् प्रब्रवीमि निशामय ।
वसुर्विधूमनामा चाऽप्सरोवर्या त्वलम्बुषा ॥ १ ॥
ब्रह्मशापात्पुरा प्राप्तौ पृथिव्यां वै मनुष्यताम् ।
श्रीकृष्णपातिव्रत्येन ब्रह्मशापाद्विमोचितौ ॥ २ ॥
पुरा सुधर्मसंज्ञायां सभायां सत्यलोकगः ।
ब्रह्मा समाजं महतां चक्रे विष्णुदिनोत्सवे ॥ ३ ॥
तत्र मध्यासने रम्ये निषसाद चतुर्भुजः ।
सावित्र्या च सरस्वत्या पार्श्वयोः संविराजितः ॥४॥
गायत्र्या च चतुर्वेदैर्मोहिन्या चापि शोभितः ।
सनत्सनन्दनसनातनसनकनारदैः ॥ ५ ॥
दक्षाद्यैर्वालखिल्यैश्च धर्माद्यैः पितृभिस्तथा ।
मेघैर्मुनिभिर्देवीभिः सहितः प्रपितामहः ॥ ६ ॥
इन्द्रादिभिर्लोकपालैर्दिक्पालैर्ग्रहतारकैः ।
सिद्धिभिश्च वसुभिश्च निधिभिः ऋषिभिस्तथा ॥ ७ ॥
दिशाभिः रुद्रदेवैश्चाऽऽदित्यैः कामस्य मण्डलैः ।
मनुभिस्तिथिभिश्चापि कलाभिः सेवितस्तथा ॥ ८ ॥
तत्त्वैर्नक्षत्रवर्यैश्च सुराऽसुरगणैरपि ।
गुणैर्मरुद्भिर्वर्णैश्च भोगैस्तीर्थैः सुसेवितः ॥ ९ ॥
कामाभिर्नाडिकाभिश्च खनिभिर्वन्दितो ह्यजः ।
वायवीयैः पार्थिवैश्च पातालिकैश्च देहिभिः ॥१०॥
व्योमगैर्जलजैश्चापि वन्दितो वै पितामहः ।
किन्नरैः किम्पुरुषैश्च साध्यैर्गन्धर्वभूषणैः ॥११॥
उर्वशीभिर्महानृत्यकलाविद्भिश्च वन्दितः ।
अप्सरसां मनोहारि नृत्यं वादित्रसंयुतम् ॥१२॥
वीक्षमाणः स्वयं ब्रह्मा राजते तत्र संसदि ।
क्रमशश्च सुरनार्यो ननृतुर्नन्दयन् सभाम् ॥१३॥
वीणावेणुमृदंगानां ध्वनिश्च मधुरोऽभवत् ।
स्वराश्च विविधा मिष्टा निरगच्छन् द्युयोषिताम् ॥१४॥
अलम्बुषा मदयन्ती ननर्तातीव सुन्दरम् ।
मुख्याऽङ्गानि मुहुश्चित्ताऽऽकर्षकाणि समक्षिपत् ॥१५॥
मन्दं मन्दं स्मितं तत्राऽकरोत् व्यलोकयन्मुहुः ।
प्रेमनिभृतनेत्राभ्यां कटाक्षं चाऽप्यमोचयत् ॥१६॥
व्यकम्पयत् स्तनमात्रं मन्दं नितम्बमात्रकम् ।
कपोलमात्रकं चापि सक्थिमात्रकमेव च ॥१७॥
एवं वै नर्तनं तस्या विलोक्य तु मुहुर्मुहुः ।
विधूमाख्यो वसुस्तस्यां कामनावान् मुमोह तु ॥१८॥
दर्शयन् कामनां तस्यै प्रजहास पुनर्मुहुः ।
नेत्राभ्यां चोन्निमेषाभ्यां वारंवारं प्रकामनाम् ॥१९॥
पारिषदेषु पश्यत्सु दर्शयामास वै वसुः ।
ब्रह्मा विज्ञाय चाञ्चल्यं विधूमस्य तु तत्र वै ॥२०॥
प्राह वसो न ते युक्तं चाञ्चल्यं नर्तनस्थले ।
सभायां नैव योग्यं त्वं कृतवानसि सर्वथा ॥२१॥
नृत्यभंगो रंगभंगो विक्षेपो जायते यतः ।
तेन दोषेण गच्छ त्वं मानुषो भव भूतले ॥२२॥
चञ्चला मनुषाः पृथ्व्यां पाशरज्जुविवर्जिताः ।
तेषु वासोऽस्तु ते मर्त्यलोके गच्छ ततः परम् ॥२३॥
अलम्बुषा तु ते भार्या भविता गच्छ मा चिरम् ।
इत्याज्ञप्तो विधूमस्तु ब्रह्मणश्चरणेऽपतत् ॥२४॥
प्रार्थयच्छापनाशार्थं रक्षार्थं स्वस्य वै मुहुः ।
ततो ब्रह्माऽऽह सत्यं ते सर्वं भावि न संशयः ॥२५॥
त्वं कौशाम्बीनगर्यां वै शतानीकस्य भूभृतः ।
पतिव्रतायां भार्यायां विष्णुमत्यां कुमारकः ॥२६॥
भूत्वा राजा ततो भूत्वाऽलम्बुषायां सुपुत्रकम् ।
जनयित्वा च तं राज्येऽभिषिच्य दक्षिणोदधेः ॥२७॥
चक्रतीर्थे पत्नीयुक् त्वं स्नास्यसि तावदेव तु ।
पत्नीयुक् त्वं देवरूपः स्वं लोकं प्रतिपत्स्यसे ॥२८॥

इत्युक्तो वसुरेवाऽयं पृथ्व्यां पपात सत्यतः ।
शतानीकगृहे जातः कुमारोऽतिविचक्षणः ॥२९॥
शाण्डिल्यो नाम चक्रेऽस्य सहस्रानीकमित्यमुम् ।
अम्बुषा ह्ययोध्याया भूभृतः कृतवर्मणः ॥३०॥
गृहे मृगावती कन्या जज्ञे देवीगुणान्विता ।
जन्मतः सा वैष्णवी च कृष्णभक्तिपरायणा ॥३१॥
युवत्यपि ज्ञानवती पातिव्रत्यपरायणा ।
करोति श्रीकृष्णनारायणनाम्नो जपं मुहुः ॥३२॥
अथेन्द्रेण शतानीको दैत्यैर्योद्धुं निमन्त्रितः ।
दिवंगतो मृतो युद्धे तत्पुत्राय शवोऽर्पितः ॥३३॥
सहस्रानीक एवाऽस्य शवसंस्कारमाचरत् ।
विष्णुमती शवं लब्ध्वा विललाप जगाद च ॥३४॥
हे नाथ हे प्राणनाथाऽऽगच्छ प्राणाऽधिकप्रिय ! ।
प्राणाधिष्ठातृदेवेह प्राणा यान्ति त्वया विना ॥३५॥
स्त्रीगर्वः पतिसौभाग्याद् वर्धते तु दिने दिने ।
सुस्त्री चेद् विभवो यस्मात् तं संभजेत धर्मतः ॥३६॥
पतिर्बन्धुः कुलस्त्रीणामधिदेवः सदा गतिः ।
परं सम्पत्स्वरूपश्च सुखरूपश्च मूर्तिमान् ॥३७॥
धर्मदः सुखदः शश्वत्प्रीतिदः शान्तिदः सदा ।
सम्मानदो मानदश्च मान्यो वै मानखण्डनः ॥३८॥
सारात्सारतरः स्वामी बन्धूनां बन्धुवर्धनः ।
न वै भर्तुः समो बन्धुः सर्वबन्धुषु दृश्यते ॥३९॥
भरणादेव भर्ताऽयं पालनात्पतिरुच्यते ।
शरीरेशाच्च स स्वामी कामदः कान्त एव सः ॥४०॥
बन्धुश्च सुखबन्धाद्वै प्रीतिदानात् प्रियः परः ।
ऐश्वर्यदानादीशश्च प्राणेशात्प्राणनायकः ॥४१॥
रतिदानात्स रमणः प्रियो नास्ति प्रियात्परः ।
पुत्रस्तु स्वामिनः शुक्राज्जायते तेन स प्रियः ॥४२॥
शतपुत्रात्परः स्वामी कुलजानां प्रियः सदा ।
असत्कुलप्रसूता वै कान्तं विज्ञातुमक्षमा ॥४३॥
स्नानं च सर्वतीर्थेषु सर्वयज्ञेषु दीक्षणम् ।
प्रादक्षिण्यं पृथिव्याश्च सर्वाणि च तपांसि वै ॥४४॥
सर्वाण्येव व्रतादीनि महादानानि यानि च ।
उपोषणानि पुण्यानि यान्यन्यानि च सर्वशः ॥४५॥
गुरुसेवाविप्रसेवादेवसेवादिकं च यत् ।
स्वामिनः पादसेवायाः कलां नार्हन्ति षोडशीम् ॥४६॥
गुरुविप्रेष्टदेवेषु सर्वेभ्यश्च पतिर्गुरुः ।
विद्यादाता यथा पुंसां कुलजानां तथा प्रियः ॥४७॥

मम भाग्यं गतं सर्वं शिरश्छत्रं गतं मम ।
इत्युक्त्वा सा पतिं देहं तत्र दध्यौ सुभक्तितः ॥४८॥
सती पतिव्रता भार्या विष्णुमती सतीत्वतः ।
पादाङ्गुष्ठात् समुत्पाद्य वह्निं नत्वा महाजनान् ॥४९॥
तेनैव वह्निना दग्धा सहैवानुममार सा ।
पुत्रः सहस्रानीकस्तत्प्रेतकार्ये व्यवर्तयत् ॥५०॥
राज्यं चकार विधिवत् सहस्रानीकको मुहुः ।
एकदेन्द्रेण वै स्वर्गे नन्दनस्य महोत्सवे ॥५१॥
निमन्त्रितः सहस्रानीकः कुमारो ययौ दिवम् ।
तत्रेन्द्रभवने स्वस्य वसुत्वं चाऽशृणोत् तथा ॥५२॥
अलम्बुषायाः स्वपत्नीत्वं वसुश्चाऽशृणोत् ततः ।
पृथ्व्यामागत्य चायोध्यानृपपुत्रीमलम्बुषाम् ॥५३॥
मृगावतीं परिणीय मुमुदे तु तया सह ।
सा तस्माद् गर्भमाधत्त पीयूषक्षालिता बभौ ॥५४॥
पुष्पदोलोत्सवे राज्ञी राजा च कुंकुमान्विते ।
केसरादियुते रक्ते रङ्गाढ्ये सलिले ह्रदे ॥५५॥
सस्नतुस्सु परिश्रान्तौ पार्श्वे पार्श्वे हि तस्थतुः ।
रक्तवर्णौ स्वर्णवर्णौ सुन्दरौ चातिरञ्जितौ ॥५६॥
राजा श्रमेण सुष्वाप क्षणनिद्रां गतस्तदा ।
राज्ञी स्नानाय तु पुनः पार्श्वे रङ्गस्य कुण्डके ॥५७॥
जले स्नानस्य तृप्त्यर्थं सुखायाऽवातरत् सती ।
रक्तवर्णा रंगजले स्नानं सादरमातनोत् ॥५८॥
ततस्तां रंगतोयार्द्रां सञ्चारिणीं जलान्तरे ।
मत्स्यां महत्तमां ज्ञात्वाऽऽमिषबुद्ध्या तदाम्बरात् ॥५९॥
पपात वेगतः कश्चित् सुपर्णकुलसंभवः ।
महारविकटः पक्षी चञ्च्वा धृत्वाऽम्बरं ययौ ॥६०॥
ज्ञात्वेयं मानुषी काचिदिति तामुदयाचले ।
कन्दरे संविहायैव गतोऽन्यत्र विहायसा ॥६१॥
सा तु रुरोद भीता वै मुहुरश्रूण्यवर्तयत् ।
हा नाथ मन्दभाग्याऽहं स्नानं चक्रे पतिं विना ॥६२॥
तेन पापेन तूर्णं वै त्वद्वियोगेन पीडिता ।
का गतिः क नु गच्छामि द्रक्ष्यामि त्वन्मुखं कदा ॥६३॥
इत्युक्त्वा गजसिंहानां पुरोऽभून्मृत्युकांक्षिणी ।
सर्वैः क्रूरैः परित्यक्ता तत्र नो निधनं गता ॥६४॥
आपत्काले न वै नृणां मरणं मैत्र्यमिच्छति ।
रुदतीं वनवृक्षेषु जमदग्नेः सुपुत्रकः ॥६५॥
कारुणिकस्तु तां नीत्वा मुनये तां न्यवेदयत् ।
मुनिनाऽऽश्वासिता राज्ञी पोषिता रक्षिताऽऽश्रमे ॥६६॥

सुषुवे बालकं काले नाम्ना ह्युदयनाऽभिधम् ।
ववृधे स जमदग्नेः शिष्यो बभूव वेदवित् ॥६७॥
एकदा वनवासी वै व्याधः कश्चित्समागतः ।
आश्रमे जमदग्नेश्च पेटिकायां भुजंगमम् ॥६८॥
धरन् भिक्षार्थमेवासौ रमयामास सर्पकम् ।
भिक्षां दत्वा कंकणं सा दत्वा सर्पं व्यमोचयत् ॥६९॥
राज्ञ्यास्तत्कंकणं विक्रेतुं तु व्याधो ययौ नृपम् ।
सहस्रानीकमेवाऽथ राजा स्वनामकंकणम् ॥७०॥
दृष्ट्वा पप्रच्छ वृत्तान्तं व्याधः सर्वं न्यवेदयत् ।
व्याधाय तु धनं दत्वा ययौ राजा तदाश्रमम् ॥७१॥
तपस्यन्तं मुनिं दृष्ट्वा शिरसा प्रणनाम सः ।
आशीर्वादेन स मुनिः प्रतिजग्राह तं नृपम् ॥७२॥
विधिवत्पूजयामास पाद्यार्घ्याचमनीयकैः ।
ऋमुवाच महीपालं धर्मार्थसहितं वचः ॥७३॥
नरनाथ ! मृगावत्यां जातोऽयं तनयस्तव ।
भविष्यति दिशां जेता नाम्ना ह्युदयनः कृतः ॥७४॥
इयं मृगावती भार्या पातिव्रत्यपरायणा ।
कृष्णनारायणभक्तिमती भागवती सती ॥७५॥
सेहे त्वदर्थं दुःखानि शुद्धा सा रेणुका यथा ।
सपुत्रां तां महाराज ! प्रतिगृह्णीष्व मा चिरम् ॥७६॥
श्रुत्वा राजा मुनिं नत्वा तां गृहीत्वाऽऽर्पयद् धनम् ।
प्रियासहायो नृपतिराययौ स्वपुरीं प्रति ॥७७॥
स्मरन् शक्रस्य वचनं मानुषं जन्म कुत्सयन् ।
महीमुदयनायैव ददौ पुत्राय धीमते ॥७८॥
मृगावत्या समं राजा चक्रतीर्थं ययौ ततः ।
उदधेस्तु तटे स्थित्वा स्नानं चक्रे यथाविधि ॥७९॥
वनवृक्षेषु वासं च वन्यैर्निर्वाहमेव च ।
चक्रे राजा विधूमः सहस्रानीको मुनिर्भवन् ॥८०॥
मृगावती च साऽरण्ये पतिसेवापरायणा ।
एकभुक्ता फलभुक्ता नान्यद्भुक्ता कदाचन ॥८१॥
पतिपादोदकपाना नान्यत्पाना कदाचन ।
पतिपार्श्वे कृताऽऽवासा नान्यद्वासा कथंचन ॥८२॥
पतिपादोदकस्नाना नान्यत्स्नाना कदाचन ।
पतिरूपहरिध्याना नान्यद्ध्याना हि सा सती ॥८३॥
पत्यंगमर्दना साध्वी नान्यस्पर्शा पतिव्रता ।
पतिकृष्णकृतानन्दा नाऽन्याऽऽनन्दा भ्रमादपि ॥८४॥
पतिपूजापरा नित्यं स्वामिसेवापरायणा ।
स्वयं वैराग्यमापन्ना पत्यर्थं मंगलप्रिया ॥८५॥
मत्वा वेदकृतां वाणीं पत्याज्ञां पारमेश्वरीम् ।
वचोवद् वर्तते साध्वी ह्यप्सरो नाऽप्सरो यथा ॥८६॥
चाञ्चल्यं मोक्षविषयं तदन्यल्लीनतां गतम् ।
सकामत्वं तु नैष्काम्ये पर्यवर्तत मोक्षकृत् ॥८७॥
सदेहत्वं विदेहत्वे राज्ञ्याश्च परिवर्तितम् ।
चर्मचक्षुर्दिव्यचक्षुर्ब्रह्मरूपं बभूव ह ॥८८॥
विषयाश्च निराहारा यात्रामात्रा अविकृताः ।
समभवन् मृगावत्याः पतिकृष्णसुखावहाः ॥८९॥
नित्यं सा भजते कृष्णं यथा पतिं तथा हरिम् ।
सर्वं कृष्णमयं कृत्वा पत्यौ जुहोति सत्क्रियाः ॥९०॥
कर्मकाण्डं जपकाण्डं ध्यानकाण्डं हरौ हि सा ।
देहकाण्डं चेन्द्रियाणां वृत्तिकाण्डं जनार्दने ॥९१॥
नारायणे हरौ नित्यं स्वामिन्येव जुहोति सा ।
एवं ध्यात्वा हरिं नारायणं पतिं प्रसेव्य च ॥९२॥
चक्रतीर्थे हरेस्तीर्थे स्नात्वा च पतितीर्थके ।
पतिं तु स्नानमात्रेण दिव्यं कृत्वा स्वयं तथा ॥९३॥
दिव्या भूत्वा शतचन्द्रसमा रूपे मनोहरा ।
देवयानेन च स्वर्गं पतियुक्ता ययौ हि सा ॥९४॥
तत्राऽयुतसमाः स्थित्वा श्रीकृष्णं पुरुषोत्तमम् ।
स्वामिनं श्रीकृष्णनारायणं त्वाराध्य सर्वदा ॥९५॥
चक्रतीर्थे तु ये तीर्थयात्रार्थं वै समागताः ।
नरा नारीजना येऽपि भगवद्भक्तिकर्मकाः ॥९६॥
तेभ्यः सर्वेभ्य एवेयं महाभागवती सती ।
शुश्राव श्रीकृष्णनारायणाय स्वामिने नमः ॥९७॥
कण्ठरवेण च तालीवादनेन मुहुर्मुहुः ।
अतिहर्षेण संयुता श्रावयामास कीर्तनम् ॥९८॥
एवं भागवतान् कृत्वा जनानसंख्यदेहिनः ।
ययौ सा पतिना सार्धं सत्यं वै वेधसः पुरम् ॥९९॥
इति ते कथितं लक्ष्मि ! दिव्याख्यानं सुपुण्यदम् ।
पठनाच्छ्रवणाच्चास्य ब्रह्मलोकफलं भवेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विधूमवसोरलम्बुषाऽप्सरसश्च ब्रह्मणो वचनात् पृथिव्यां सहस्रानीकाभिधनृपत्वं राज्ञीमृगावतीत्वं च, जमदग्नेः शिष्यतोत्तरं पातिव्रत्येन धर्मेण पुनः स्वर्गादिप्राप्तिरित्यादिनिरूपणनामा चतुस्त्रिंशदधिकचतुश्शततमोऽध्यायः ॥ ४३४ ॥

श्रीनारायण उवाच—

शृणु त्वं मनसा सार्धं ब्रवीम्यत्यद्भुतां कथाम् ।
अज्ञा अपि प्रमोदन्ते यां श्रुत्वा पद्मजे प्रिये ॥ १ ॥
मरुभूमौ गिरौ देशे पुरा वै गालवो मुनिः ।
परब्रह्म हरिकृष्णनारायणं स्मरन् सदा ॥ २ ॥
तपस्तेपे गिरौ स्वस्याश्रमे वृक्षजलान्विते ।
पुत्री तस्याऽतिसौभाग्या नाम्ना कान्तिमती सती ॥ ३ ॥
कृष्णपतिव्रता भक्ता साध्वी पूताऽतिवैष्णवी ।
तुलसीमालिकां कृष्णां कण्ठे धारयति ध्रुवाम् ॥ ४ ॥
करे च मालिकां धृत्वा कृष्णकृष्णेति सर्वदा ।
जपं करोति सा साध्वी रूपयौवनशालिनी ॥ ५ ॥
कृष्णनारायणं हित्वा पतिं नान्यं हि वाञ्छति ।
पतिं सत्यं परं कृष्णं ज्ञात्वा कृष्णपतिव्रता ॥ ६ ॥
शयने भोजने याने भ्रमणे चाश्रमे द्रुमे ।
पाने देहादिकार्येऽपि न विस्मरति तं पतिम् ॥ ७ ॥
श्रीकृष्णस्तां रहस्ये वै प्रत्यक्षो ह्यभवत् क्वचित् ।
अथैकदा परीक्षां वै कृतवान् भगवान् स्वयम् ॥ ८ ॥
यथा नित्यं च सा बाला वेदिसम्मार्जनादिकम् ।
बल्यर्थं च मुनेः पुष्पाहरणं समिधां तथा ॥ ९ ॥
आनयनं करोत्येव तथा सा दिवसे सती ।
पूजायां कृष्णबल्यर्थं पुष्पाण्याहर्तुमुद्यता ॥१०॥
आश्रमस्य समीपे सा पुष्पस्तम्बके कन्यका ।
गत्वा पुष्पाणि रम्याणि समाहृत्य च पेटके ॥११॥
कृत्वा निववृते यावत् तावत्तां पुष्टयौवनाम् ।
व्योमयानेन निर्गच्छन् विद्याधरकुमारकः ॥१२॥
सुदर्शनाभिधो दृष्ट्वा काममोहवशंगतः ।
तया रिरंसुकामः स विमानाग्रादवातरत् ॥१३॥
कन्यां प्राह निजस्नेहं दर्शयन् स्निग्धया गिरा ।
यदि कन्ये ! परकीया नासि चेत् त्वां प्रकामये ॥१४॥
गान्धर्वेण विधिनाऽत्र यदि योग्यं हि मन्यसे ।
सुकण्ठनामधेयस्य विद्याधरसुतोऽस्म्यहम् ॥१५॥
सुदर्शनाभिधस्त्वं च वद स्वस्या मनोगतम् ।
परिगृह्णीष्व मां भद्रे भजमानमुपस्थितम् ॥१६॥
तदा कान्तिमती प्राह कन्याऽहं गालवस्य वै ।
अनूढा वैष्णवी शुद्धा पितृसेवापरायणा ॥१७॥
कृष्णनारायणकान्तशुश्रूषणपरायणा ।
नान्यं पतिं समिच्छेऽहं पिता कोपं विधास्यति ॥१८॥
कुसुमानां विलम्बेन विद्याध्र गच्छ मा चिरम् ।
कन्या तु पितुरधीना न स्वतन्त्रा कदाचन ॥१९॥
नाऽहं कांक्षे पतिं चापि विष्णुभक्ता तपस्विनी ।
इत्युक्तः स तु विद्याध्रो गत्वा पार्श्वे प्रकामतः ॥२०॥
जग्राह तां तु केशेषु तावद् बाला समुच्चकैः ।
चक्रन्द सहसा विद्याधराजनक त्राहि माम् ॥२१॥
तावदेव क्षणात्तत्र पार्श्वस्था गालवादयः ।
श्रुत्वा तूर्णं समाजग्मुर्ददृशुस्तं सुदर्शनम् ॥२२॥
सुतां त्यक्त्वा भयाच्छीघ्रं पलायमानं चाम्बरे ।
गालवस्तं शशापैवं दुष्टस्त्वं मानुषो भव ॥२३॥
व्योममार्गात्पतत्वत्र धर्षणस्य फलं व्रज ।
चिरं कालं याहि निन्दां ततो वेतालतां व्रज ॥२४॥
मांसशोणितभोक्ता त्वं भव दुःखी महावने ।
इत्युक्तस्य तदा तद्वै विमानं पतितं क्षितौ ॥२५॥
विद्याध्रः पतितस्तस्माद् विमानं तु दिवं गतम् ।
कर्मवशाद् यमुनायास्तटे चिरनिवासिनः ॥२६॥
गोविन्दस्वामिनः पत्न्यां विद्याध्रो बालकोऽभवत् ।
विजयदत्तसंज्ञां च तस्य चक्रे पिता द्विजः ॥२७॥
जातिस्मरो ह्यभूत् सोऽपि पूर्वकर्म स्मरत्यपि ।
युवा पुत्रोऽभवद् यावद् यात्रार्थं काशिकां पुरीम् ॥२८॥
सपुत्रभार्यो गोविन्दस्वामी ययौ शनैः शनैः ।
मार्गाऽऽगते प्रयागे च कृत्वा तीर्थं ततश्च सः ॥२९॥
तत्रत्यं योगिनं कंचित् कपालमालिनं श्रुतम् ।
दृष्ट्वा श्रुत्वा तदुक्तं यत् पुत्रध्वंसोऽचिरात्तव ॥३०॥
एवमाकर्ण्य गोविन्दस्वामी काशीं प्रति द्रुतम् ।
ययौ मार्गे ह्यकस्माच्च हिमवायुः समुत्कटः ॥३१॥
ववौ पुत्रश्च शैत्येनाऽऽवृतो वह्निर्न चाप्यते ।
ग्रामीणास्तु जनास्तत्राऽन्तिके गंगातटे शवम् ॥३२॥
दग्धुं समागतास्त्वन्यमृतस्य ग्रामवासिनः ।
तस्य चिताग्निना शैत्यं दूरीकर्तुं सुतो ययौ ॥३३॥
पार्श्वे विजयदत्तः स स्थित्वा गृह्णाति तापकम् ।
अस्मिन्नवसरे वंशं गृहीत्वा दाहकः शवम् ॥३४॥
शिरोमार्गं च दाहार्थं वंशेनाऽग्नौ समाक्षिपत् ।
तावद्वंशेन तु द्वेधा शिरस्तत् समभूत्ततः ॥३५॥
वह्नियोगेन च वेगाद् रक्तं विजयदान्तिके ।
मुखे चागत्य संलग्नं तावदेवातिभ्रष्टताम् ॥३६॥
प्राप्तो विजयदत्तः स वेतालः समजायत ।
तीक्ष्णदंष्ट्रो महाकायो बभूवाऽतिभयंकरः ॥३७॥

शववसां लेलिहानश्चापिबत्तत्र तां मुहुः ।
तस्याऽट्टहासघोषेण वेतालनर्तनेन च ॥३८॥
दिशः प्रदिशो विदिशः स्फुटिता ह्यभवन्निव ।
अथ स्वपितरं चान्यान् हन्तुं दधाव चाम्बरात् ॥३९॥
भीताः सर्वे श्मशानाद्वै पलायिताः समन्ततः ।
वेतालः स शवं जग्ध्वा बभूव बलवाँस्ततः ॥४०॥
श्माशानिकैस्तु वेतालैर्मिलित्वा वासमाचरत् ।
वेतालानां कदाचिद्वै गन्धर्वैः सह योधनम् ॥४१॥
विन्ध्याचले ह्यभूद् घोरं तत्राऽयं जयमाप्तवान् ।
वेतालराजा सम्पन्नो राज्यवान् विन्ध्यपर्वते ॥४२॥
अथ वेतालरूपं तं त्यक्त्वा पुत्रं द्विजस्ततः ।
प्रववृते सभार्यश्च जगाम काशिकापुरीम् ॥४३॥
तत्राऽभवत्सुतस्तस्य द्वितीयो वज्रवद्वपुः ।
काश्यां वासं सपुत्रः सः चक्रे कृष्णपरायणः ॥४४॥
अत्रान्तरे नरपतिं प्रतापमुकुटाभिधम् ।
काशिदेशाभिधं मल्लः कश्चिदभ्याययौ बली ॥४५॥
काशीराजोपदेशेन वज्रदेहो द्विजस्तु तम् ।
मल्लयुद्धे महामल्लमहनत् प्राणतस्तदा ॥४६॥
काशीराजेन विप्राय ग्रामाः पञ्च समर्पिताः ।
कदाचित् काशिकाराजो द्विजपुत्रेण संयुतः ॥४७॥
सन्ध्यायां विजने देशे चचार तावदेव तु ।
संशुश्राव कष्टमयीं दीनां वाणीं तु दूरतः ॥४८॥
अहो कष्टमहो कष्टं काशीराजस्य शासने ।
स्वल्पापराधे शूले वै समारोपोऽतिदारुणः ॥४९॥
अहो प्राणा न वियन्ति तृषा मां बाधते त्वति ।
इतिश्रुत्वा काशिकेशस्तूर्णं ययौ सभूसुरः ॥५०॥
जलमादाय तं पातुं वज्रांगो याति यावता ।
तत्र तस्य गृहपत्नी स्थिता दृष्टा द्विजेन वै ॥५१॥
सापि पतिव्रता मृतं चानुयातुं तदा स्थिता ।
प्राहैनं च जलं दातुं ह्रस्वाऽहं पारयामि न ॥५२॥
वज्रांगश्च दयायुक्तस्तां वधूमब्रवीत्तदा ।
मातर्मत्स्कन्धमारुह्य देह्यस्मै शीतलं जलम् ॥५३॥
इत्युक्ता सा तु वेताली वज्रांगस्कन्धमास्थिता ।
जलं गृहीत्वा वेतालं शूलस्थं मायिकाकृतिम् ॥५४॥
मृषाशूलस्थितं पत्नी जलं तं समपाययत् ।
अथाऽपृच्छद् द्विजपुत्रः कासि कोऽयं च तेऽस्ति वै ॥५५॥
कथं दण्डं समापन्नः सत्यं ब्रूहि शुभानने ।
वैताली प्राह मे स्वामी भवत्ययं पुरा द्विजः ॥५६॥
गोविन्दस्वामिनः पुत्रो विजयदत्तसंज्ञकः ।
ततः पूर्वं ह्यभूच्चायं विद्याधरः सुदर्शनः ॥५७॥
गालवस्य सतीं पुत्रीं त्वधर्षयत् क्षणं वने ।
तावद् गालवमुनिना शप्तोऽयमीदृशीं गतिम् ॥५८॥
गतोऽस्ति तस्य भार्याऽहं वैताली नौ समुद्धर ।
उद्धारार्थं कृतं त्वेतच्छूल्यादिकं मृषात्मकम् ॥५९॥
जलं प्राप्तं तव हस्ताच्छूलीमिषेण पावनम् ।
तेनाऽयं पावितो भूतः भूताऽहं पाविता तथा ॥६०॥
कुरु नौ मोक्षणं विप्र सर्वदानफलं भवेत् ।
राजसूये वाजपेये गोमेधे नरमेधके ॥६१॥
अश्वमेधे लांगले च विष्णुयज्ञे यशःक्रतौ ।
धनदे भूमिदे फल्गौ पुत्रेष्टौ गजमेधके ॥६२॥
लोहयज्ञे स्वर्णयज्ञे पटलव्याधिखण्डने ।
शत्रुयज्ञे रुद्रयज्ञे शक्रयज्ञे च बन्धके ॥६३॥
इष्टौ वरुणयज्ञे च कन्दुके वैरिमर्दने ।
शुचियागे धर्मयागे रेचने पापमोचने ॥६४॥
बन्धने कर्मयोगे च मणियागे सुभद्रके ।
श्येनयागे वाजपेये सावित्रे कमलक्रतौ ॥६५॥
जपयज्ञे ज्ञानयज्ञे कथायज्ञे च यत्फलम् ।
तत्फलं ते ध्रुवं भावि वैतालानां विमोक्षणात् ॥६६॥
श्रुत्वा द्विजः स्वराजानं प्राहैते प्रेतरूपिणः ।
तव राज्ये काशिराज्ये वर्तन्ते नृप दुःखिनः ॥६७॥
गंगातोयप्रदानेन कर्तव्यं तद्विमोक्षणम् ।
राजा प्राह तव भ्राता वेतालोऽयमभूत् पुरा ॥६८॥
त्वया जलं पायितं च पापनाशोऽस्य विद्यते ।
तस्य मोक्षकरं त्वन्यत्कर्तव्यं यद्भवेद्धि तत् ॥६९॥
इत्युक्त्वा भूपतिस्तस्मै पृष्ठवान् शूलवर्तिने ।
वद प्रमोक्षणं केन कर्मणा ते भवेदिह ॥७०॥
प्रेतः प्राह ऋषेः शापान्मोक्षणं नान्यतो भवेत् ।
ऋषेरेव प्रसादेन मोक्षणं मे भविष्यति ॥७१॥
काशिराजस्तथा गोविन्दस्वामी मे पिताऽनुजः ।
माता चेति भवन्तो वै गच्छन्तु गालवं मुनिम् ॥७२॥
मम दुःखस्य निस्तारस्तदुक्तविधिना भवेत् ।
अथ श्रुत्वा तु ते सर्वे गता यत्र स गालवः ॥७३॥
कन्यायुतं मुनिं नत्वा ववन्दिरे पुनः पुनः ।
सत्कृता गावलेनाथ प्रोचुर्वृत्तान्तमेव तम् ॥७४॥
ऋषिः प्राह सती साध्वी कन्या मे पारमेश्वरी ।
सर्वसिद्धिमयी महाभागवती च वैष्णवी सती ॥७५॥

शरणागतजीवानां रक्षयित्री दयावती ।
कृष्णनारायणभक्तिमती त्वैश्वर्यशालिनी ॥७६॥
दिव्या नारायणलग्ना नारायणपरायणा ।
ब्रह्मचर्यव्रतयुक्ता कृष्णात्मकपतिव्रता ॥७७॥
क्षणेन दग्धुं शक्ता सा पापानां मेरुशालिनाम् ।
कोटिवेतालभूतानां मुक्तिं दातुं तथेश्वरी ॥७८॥
अनन्तब्रह्मणां सृष्टिं कर्तुं प्रकृतिरीश्वरी ।
वैष्णवी कमलांऽशाऽस्ति प्रसादयन्तु तां सतीम् ॥७९॥
सा वै तुष्टा महालक्ष्मीः कृष्णकान्ता सुकान्तिनी ।
तारयिष्यति वेतालान् कृष्णमन्त्रप्रदानतः ॥८०॥
इत्युक्तास्ते काशिराजादयः सर्वे कुमारिकाम् ।
मातरं जगतां लक्ष्मीं कान्तिमतीं हरिप्रियाम् ॥८१॥
नेमुस्तुष्टुवुः शरणं निपेतुश्च ववन्दिरे ।
तेभ्यो वृत्तान्तमाज्ञाय वेतालमोक्षणकृते ॥८२॥
कन्या कृष्णव्रतधर्मान् प्राह सर्वसुखप्रदान् ।
सुखं दुःखं भयं शोकं हर्षं मंगलमित्यपि ॥८३॥
सम्पत्तिश्च विपत्तिश्च सर्वं भवति कर्मभिः ।
कर्मणा ब्रह्मपुत्री च वंशहीनश्च कर्मणा ॥८४॥
कर्मणा रूपवाँश्चैव रोगी शश्वत्स्वकर्मणा ।
कर्मणा मृतपुत्रश्च कर्मणा चिरजीविनः ॥८५॥
कर्मणा गुणवन्तश्च कर्मणा त्वंगहीनता ।
कर्मणा भूतवेताला देवताः कर्मणा नराः ॥८६॥
कृते शुभे शुभा लोका अशुभे न्यक्कृता जनाः ।
शुभेन तेन संप्राप्तं विद्याधरत्वमित्यपि ॥८७॥
अशुभत्वं च तेनैव दुष्टभावकृतेन वै ।
सत्यां पतिव्रतायां च कन्यायां शुद्धयोषिति ॥८८॥
दुष्टचक्षुःप्रयोक्तारो जात्यन्धाः संभवन्ति वै ।
कुष्ठाः काणास्तथा खञ्जा वृक्णाः कुण्ठा भवन्ति च ॥८९॥
दुष्टभावनया दुष्टाः कर्मफलैश्च दुःखिनः ।
सतीभावनया सत्त्वगुणिनः सुखभागिनः ॥९०॥
नियमानां तु यो भङ्गो धर्मभंगो हि निश्चितः ।
अनियमेन यातारो दण्ड्या राज्ञो भवन्ति वै ॥९१॥
त एव यमदण्ड्याश्च कृष्णदण्ड्या भवन्ति च ।
सर्वदण्ड्याश्च ते लोके नान्यः पन्थास्तदन्यकः ॥९२॥
पत्नीव्रतं परो धर्मः सुखदः शान्तिदः सदा ।
श्रीकृष्णेन पुरा पत्नीव्रतश्चोत्पादितो द्विजः ॥९३॥
तद्वंशीयाः सर्वविप्राः ऋषयो मुनयस्तथा ।
पत्नीव्रतपराः सर्वे गृहब्रह्मव्रतान्विताः ॥९४॥
तरन्ति तारयन्त्यन्यान् नियमार्पितवर्तनाः ।
धातवो भोजनोत्पन्ना देहिनां देहसंस्थिताः ॥९५॥
नियमिता ब्रह्मचर्यं धर्मरूपाः सुखावहाः ।
अनियमे धर्मलोपो गर्भवासादिदुःखदः ॥९६॥
आत्मानन्दं परित्यज्य खर्जनानन्दमाश्रितः ।
भुंक्ते स खर्जनं दुःखं ब्रह्मानन्देन वञ्चितः ॥९७॥
दद्रुचन्द्रे खर्जनं वै पश्चात्तु ज्वलनं सदा ।
अन्यायकामभोगे च याम्ये प्रज्वलनं ध्रुवम् ॥९८॥
तस्मान्नियमितः कामो विवाहेन विमर्शितः ।
स्पर्शो नियमितश्चापि दृश्यं वाच्यं नियामितम् ॥९९॥
कस्याः कस्य तु किं भोग्यं सर्वं पूर्वैर्नियामितम् ।
नियमो धर्म एवाऽस्ति पत्नीव्रतः स यौवने ॥१००॥
पतिव्रतश्च तद्वत् सः सर्वदा सुखदः खलु ।
अनेन लोपितः सो यत् कन्याया धर्षणं कृतम् ॥१०१॥
अनिच्छन्त्या अपि स्पर्शो विवर्ततेऽनलात्मकः ।
स तु शान्तो भवेत्तस्य कृष्णर्पणेन कल्पितः ॥१०२॥
यूयं चेत् तस्य भूतस्य मुक्तिमिच्छथ सत्वरम् ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥१०३॥
इति मन्त्रं गृहीत्वा च धृत्वा तुलसीमालिकाम् ।
कृष्णपूजाप्रसादं च जलं स्वन्नं दलादिकम् ॥१०४॥
मत्तो नीत्वा तत्र यान्तु यत्र वेतालपुंगवः ।
तं च वेतालसाहस्रयुतं नयत वारिधिम् ॥१०५॥
दक्षिणस्योदधेस्तीरे चक्रतीर्थस्य सन्निधौ ।
वेतालमुक्तिकृत्तीर्थे वेतालोद्धारकं परम् ॥१०६॥
स्नापयध्वं जले तत्र वेतालान् वै सहस्रशः ।
ततस्तान् वै मयोक्तं च मन्त्रं संत्रिः पुनः पुनः ॥१०७॥
प्रसादजं जलं चान्नं पत्रं समर्प्य भोजने ।
कुरुतैषां मोक्षणं च नान्यः पन्थाः सुखप्रदः ॥१०८॥
इति श्रुत्वा तु ते सर्वे कान्तिमत्यास्तदैव हि ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥१०९॥
इति मन्त्रं गृहीत्वा च गृहीत्वाऽन्नं जलादिकम् ।
तया दत्तं दलं चापि नीत्वा स्तुत्वा ययुश्च तम् ॥११०॥
वेतालं प्रति गत्वैते वेतालांश्च सहस्रशः ।
नीत्वा ययुश्चक्रतीर्थाद् दक्षिणे तूदधेस्तटे ॥१११॥
वेतालोद्धारके तीर्थे स्नपयित्वा च तास्तदा ।
जलमन्नं कृष्णप्रासादिकं च तुलसीं ददुः ॥११२॥
घोरां वेतालतां त्यक्त्वा दिव्यरूपाण्यवाप्य च ।
प्रसादपुण्यतो लब्ध्वा चतुर्भुजस्वरूपताम् ॥११३॥

विमानेषु समारूढा वैष्णवास्ते सहस्रशः ।
विष्णोर्वै पार्षदा भूत्वा वैकुण्ठं प्रययुस्तु ते ॥११४॥
एवं वेतालजातीनां कृत्वा मोक्षं नृपादयः ।
ययुः काशीं यमीं चापि यथास्थानं तु ते पुनः ॥११५॥
इत्येतत्कथितं लक्ष्मि ! सुताया गालवस्य वै ।
कृष्णनारायणपातिव्रत्यैश्वर्यं परं महत् ॥११६॥
श्रुत्वा स्मृत्वा पठित्वाऽपि पातिव्रत्यफलं लभेत् ।
पत्नीव्रतफलं लब्ध्वा नरो मुक्तिमवाप्नुयात् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गालवर्षिकन्यायाः कृतावहेलनेन सुदर्शनविद्याधरस्य मानुषजन्मोत्तरं वेतालत्वं काशीराजद्वारा गालवकन्यायाः कृष्णपातिव्रत्यबलेन मोक्षणं चेत्यादिनिरूपणनामा पञ्चत्रिंशदधिकचतुश्शततमोऽध्यायः ॥ ४३५ ॥

श्रीनारायण उवाच—

सर्वमंगलमांगल्यं त्वयि लक्ष्मि ! सुवर्तते ।
त्वं यथाऽसि मम स्वामिव्रता नान्यास्ति तादृशी ॥ १ ॥
या मद्वक्षःस्थले नित्यं वर्तसे त्वं मम प्रिया ।
त्वां विना तु मम मूर्तिर्निःश्रीका शुष्ककाष्ठवत् ॥ २ ॥
भवत्येव न सन्देहस्त्वया रम्या प्रकाशते ।
परेऽक्षरे मम धाम्नि पुमुत्तमस्य तत्र मे ॥ ३ ॥
जयाख्या ललिताख्या त्वं वर्तसे मम कामिनी ।
गोलोके मे कृष्णनाम्नो राधा दुर्गा सरस्वती ॥ ४ ॥
गंगा पद्मा पञ्चरूपा ततः कोटिस्वरूपिणी ।
वर्तसे त्वं मम पत्नी पातिव्रत्यपरायणा ॥ ५ ॥
वैकुण्ठे मे वर्तसे त्वं नारायणस्य कामिनी ।
लक्ष्मीरूपा मम साध्वी कोटिस्वरूपधारिणी ॥ ६ ॥
अमृताख्ये पदे भूम्नो नारायणस्य मे प्रिया ।
चतुर्विधे च वैकुण्ठे महालक्ष्मीस्त्वमीश्वरी ॥ ७ ॥
सीता प्रभा माणिकी त्वं पार्वती मंगला सती ।
वर्तसे मे पातिव्रत्यपरायणा महासती ॥ ८ ॥
वह्नेः पत्नी मम स्वाहा वह्न्यात्मके मयि स्थिता ।
त्वां विना भोजनं नैव हुतं गृह्णामि वै क्वचित् ॥ ९ ॥
देवानामपि त्वद्धस्ताद्याप्यते हुतमन्वहम् ।
पितॄणां मम रूपाणां स्वधा त्वं वर्तसे सती ॥१०॥
हव्ये कव्ये तर्पणे च त्वां विना नाऽऽप्यतेऽर्पितम् ।
यज्ञस्य मे सदा पातिव्रत्यधर्माऽसि दक्षिणा ॥११॥

विना तु दक्षिणां नाऽहं पूर्णो भवामि वै क्रतुः ।
यज्ञे विना दक्षिणां तु फलं पुत्रो न जन्यते ॥१२॥
फलं विना कृतं सर्वं श्रममात्रं व्ययात्मकम् ।
मम कार्तिकरूपस्य देवसेनाऽभिधानिका ॥१३॥
त्वमेवाऽसि महालक्ष्मि ! त्वां विना विजयो न वै ।
त्वं सा मातृस्वरूपाऽसि षष्ठीदेवी दयावती ॥१४॥
धात्री त्वं बालकानां तु रक्षिणी षष्ठिका सदा ।
सा त्वं चापत्यदात्री चापत्यरक्षाविधायिनी ॥१५॥
अपत्यपुष्टिदात्री च रता विघ्ननिवारणे ।
सा त्वं वै मानसी देवी जरत्कार्वीस्वरूपिणी ॥१६॥
नागमाताऽऽस्तीकमाता विषाद् रक्षाकरी सदा ।
जरत्कारुस्वरूपस्य मम पत्नी पतिव्रता ॥१७॥
मनसा नागिनी सर्पजातीनां परमेश्वरी ।
कन्या भगवती सा त्वं कश्यपस्य हि मानसी ॥१८॥
त्रियुगं तु तपस्तप्त्वा कृष्णस्य परमात्मनः ।
जरत्कारुशरीरं च दृष्ट्वा श्रीपुष्करे हरिः ॥१९॥
गोपीपतिरहं नाम जरत्कारुर्दधे तव ।
जरद्गौरी विष्णुभक्ता पातिव्रत्यपरायणा ॥२०॥
जरत्कारुर्जरद्गौरी मनसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥२१॥
जरत्कारुप्रियाऽऽस्तीकमाता विषहरीति च ।
महाज्ञानयुता चापि त्वं देवी सर्वपूजिता ॥२२॥
तव नाम्नां पाठकस्य नागभीतिर्न विद्यते ।
जरत्कारुमुनीन्द्राय कश्यपस्त्वां ददौ पुरा ॥२३॥
अयाचितो मुनिश्रेष्ठो जग्राह ब्राह्मणाज्ञया ।
कृत्वोद्वाहं महायोगी विश्रान्तस्तपसा चिरम् ॥२४॥
सुष्वाप देव्या जघने वटमूले तु पुष्करे ।
जगामाऽस्तं दिनकरः सन्ध्याकालश्च गच्छति ॥२५॥
विना सन्ध्यां मम पत्युर्ब्रह्महत्यावलेपनम् ।
भवेदतः सुधर्मिष्ठा बोधयामास तं पतिम् ॥२६॥
किन्तु बुद्ध्वाऽभवद् रुष्टो जगाद कोपगर्भितम् ।
निद्राभंगो मम साध्वि ! कथं वद कृतस्त्वया ॥२७॥
व्यर्थं व्रतादिकं तस्या या भर्तुस्त्वपकारिणी ।
तपस्त्वनशनं चापि व्यर्थं दानादिकं व्रतम् ॥२८॥
यथा पतिः पूजितश्च श्रीकृष्णः पूजितस्तथा ।
पतिव्रताव्रतार्थे च पतिरूपी हरिः स्वयम् ॥२९॥
सर्वदानानि यज्ञाश्च यावत्तीर्थानि दक्षिणाः ।
तपांसि चोपवासाश्च व्रतानि देवपूजनम् ॥३०॥

स्वामिसेवाकलांशस्य न यान्ति समतामपि ।
पतिसेवापरा पत्नी वैकुण्ठे स्वामिना सह ॥३१॥
मोदते श्रीकृष्णनारायणभक्तिपरायणा ।
विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम् ॥३२॥
कुम्भीपाकं व्रजेत्सा तु चाण्डाली जायते ततः ।
इतिश्रुत्वा सती पत्युः पादयोः पतिताऽऽह च ॥३३॥
सन्ध्यालोपभयेनैव निद्रालोपः कृतस्तव ।
कुरु क्षमां प्रियाऽज्ञायां दुष्टायां मयि सुव्रत ॥३४॥
श्रृंगाराऽऽहारनिद्राणां या तु भंगं करोति सा ।
प्रव्रजेत् कालसूत्राख्यं निरयं सेविका ह्यपि ॥३५॥
इत्युक्त्वा पादयोः पत्युः पपात तावदेव तु ।
सूर्यः स्वं शप्तुमुद्यन्तं जरत्कारुं विलोक्य वै ॥३६॥
सन्ध्यया सह भगवान् भास्करस्त्वाजगाम ह ।
सूर्यं दृष्ट्वा जरत्कारुरध्यक्षिपत् कथं रवे ! ॥३७॥
मम सन्ध्यां विना देव चाऽस्तं गन्तुं समिच्छसि ।
विना सन्ध्यां मम निद्राभंगो जातः प्रपश्यसि ॥३८॥
सूर्यः प्राह श्रृणु विप्र ! नाऽहमस्तंगतस्तदा ।
तव सन्ध्यां विना चाहं कथं गच्छामि चास्तताम् ॥३९॥
क्षमस्व भगवन् ब्रह्मन् मां शप्तुं नोचितं मुने ! ।
विप्रक्रोधे जगन्नाशो विप्रे तुष्टे जगत् स्थिरम् ॥४०॥
ब्राह्मणः सः कृष्णभक्तो भावयेल्लोकमंगलम् ।
एवं श्रुत्वा द्विजः शान्तो ददावाशिषमेव च ॥४१॥
सूर्यो ययौ निजस्थानं जरत्कारुस्ततः परम् ।
पत्नी तु बन्धनं मत्वा वृद्धस्य तरुणी विषम् ॥४२॥
विचार्य मनसा भार्यां तत्याज शोकदुःखिताम् ।
सा सस्मार गुरुं शंभुमिष्टदेवं हरिं विधिम् ॥४३॥
कश्यपं जन्मदातारं समाजग्मुस्तु ते द्रुतम् ।
पातिव्रत्येन धर्मेण भक्त्या ते तु समाययुः ॥४४॥
जरत्कारुस्तदाऽऽश्चर्यपरो भूत्वा ननाम तान् ।
कथमागमनं त्वत्रेत्येवं प्रश्नं चकार सः ॥४५॥
ब्रह्मा प्राह महासर्प ! नेयं साधारणी प्रिया ।
पातिव्रत्येन धर्मेण शक्ता सृष्टिं सुरक्षितुम् ॥४६॥
इयं चास्ति महालक्ष्मीकला धर्मपरायणा ।
यथा सा कथयेत् तद्वत् त्वया कार्यं न चाऽन्यथा ॥४७॥
न त्यक्तव्या धर्मपत्नी धर्मिष्ठा पतिधर्मिणी ।
अस्यास्त्यागे तव धर्मलोपः शश्वद्भविष्यति ॥४८॥
तेन त्वं नरकं गन्ता परलोकं विचारय ।
कुरुष्वाऽस्यां सुतोत्पत्तिं धर्मरक्षणहेतवे ॥४९॥

यतिर्वा ब्रह्मचारी वा भिक्षुर्वनचरोऽपि वा ।
जायायां सुसुतोत्पत्तिं कृत्वा पश्चाद् भवेन्मुनिः ॥५०॥
अकृत्वा तु सुतोत्पत्तिं विरागी यस्त्यजेत् प्रियाम् ।
स्रवेत् तपस्तत्पुण्यं च चालिन्यां तु यथा जलम् ॥५१॥
वृक्षोऽपि वल्लिकां स्तम्बे लग्नां दूरीकरोति न ।
नाऽऽत्मा बुद्धिं स्वीयपत्नीं दूरीकरोति वै क्वचित् ॥५२॥
दिवा रात्रिं न त्यजति शब्दः शक्तिं क्षिणोति न ।
भास्करो द्यां न त्यजति जरत्कारुः कथं प्रियाम् ॥५३॥
इत्युक्तः स जरत्कारुर्जग्राह ब्रह्मणो वचः ।
न तत्याज प्रियां पश्चाद् देवास्ते प्रययुर्दिवम् ॥५४॥
अथ प्राह जरत्कार्वी स्वपतिं ज्ञानशालिनम् ।
वरं त्यागो विषयाणां दम्पत्योरपि सर्वथा ॥५५॥
पत्युः पत्न्या न वै श्लाघ्यस्त्यागस्तयोः परस्परम् ।
यदि नेच्छेद् विषयाँश्च सह स्थित्वा सुखं वसेत् ॥५६॥
स्वामिना यस्तिरस्कारः पत्न्याः स्यान्मरणाय सः ।
स्वामिना या परित्यक्ता मानहीना तु सा भुवि ॥५७॥
सर्वतिरस्कृतिपात्रभूता सर्वसौभाग्यवर्जिता ।
बिन्दुकज्जलकबरीयोग्याऽपि न भवेत्ततः ॥५८॥
तिरस्कृतायां नार्यास्तु जीवनं व्यर्थमेव यत् ।
तस्मान्नाथ जरत्कारो ! यदिच्छसि तपः परम् ॥५९॥
तदा संकल्पमात्रेण देहि मे मानसं सुतम् ।
तवाऽऽज्ञया सदाऽहं च तपः करोमि सन्निधौ ॥६०॥
सेवां करिष्ये कान्तस्य विषयान् परिहाय च ।
यद्वा कान्ताऽऽज्ञया यत्र वासो मे योग्य इष्यते ॥६१॥
तत्र वसामि कान्तस्याऽऽज्ञयाऽरण्येऽन्तिकेऽथवा ।
यत्र वर्तामि तत्रैव तवैव सत्तया प्रभो ॥६२॥
कान्तसत्ताविहीना न वस्तुमिच्छामि प्राणद ।
त्वदीयाऽहं न चान्यस्य त्वां विना क्व वसाम्यहम् ॥६३॥
दूरे त्वां हृदये कृत्वा वसिष्ये पर्वते वने ।
निकटे त्वां हृदि क्रोडे कृत्वा स्थास्ये कृपां कुरु ॥६४॥
इत्युक्तः स जरत्कारुः शुद्धां पत्नीं विचार्य च ।
चक्रे तन्नाभिसंस्पर्शं योगाद्वै पुत्रलब्धये ॥६५॥
मुनेः करस्पर्शमात्रात् सद्यो गर्भो बभूव ह ।
पतिः प्राह मनसे ! ते श्रेष्ठः पुत्रो भविष्यति ॥६६॥
जितेन्द्रियाणां प्रवरो धर्मिष्ठो वैष्णवाग्रणीः ।
तेजस्वी च तपस्वी च यशस्वी च गुणान्वितः ॥६७॥
वरो वेदविदां चापि योगिनां ज्ञानिनां वरः ।
विष्णुभक्तो धार्मिकश्च कुलोद्धारकरः परः ॥६८॥

पतिव्रता सुशीला त्वं सुप्रिया प्रियवादिनी।
धर्मिष्ठा पुत्रमाता त्वं कुलजा कुलपालिका ॥६९॥
भव तादृशपुत्रस्य जननी लोकपूजिता।
का माता? कृष्णसम्बन्धबोधिनी, नाऽपरा, सति! ॥७०॥
कः पुत्रो? यो हरिप्राप्तिसहायो, नाऽपरः, प्रिये!।
को बन्धुर्यो हरिभक्तिप्रदो न च परः शुभे ॥७१॥
यो बन्धछित् स स्यात् पिता हरेर्वर्त्मप्रदर्शकः।
सा गर्भधारिणी या वै गर्भवासविमोचिनी ॥७२॥
कृष्णधामप्रदाता यः स गुरुर्विष्णुभक्तिदः।
पतिः स यो मुक्तिपालः कृष्णो वा वैष्णवोऽथवा ॥७३॥
स एव तु गुरुः साध्वि! ज्ञानदः कृष्ण एव सः।
ज्ञानदो मोक्षदः कृष्णमन्त्रदश्च पतिर्गुरुः ॥७४॥
दत्तं ज्ञानं मया तुभ्यं त्वया दत्तो वृषो मयि।
ज्ञानं धर्मः श्रीकृष्णस्य सेवातो न विशिष्यते ॥७५॥
ज्ञानदः सत्यदः स्वामी ज्ञानाद्बन्धो विशीर्यते।
बन्धनाशाय कृष्णस्य भक्तिदो ज्ञानदो गुरुः ॥७६॥
स पतिः सः ऋतः स्वामी नाथः कान्तो नरायणः।
स रिपुः शिष्यघाती च यो न बन्धाद् विमोचयेत् ॥७७॥
जननीगर्भजात् क्लेशाद् यमताडनदुःखतः।
न मोचयेद् यः स कथं गुरुः पतिश्च बान्धवः ॥७८॥
मदाज्ञया भज साध्वि! श्रीकृष्णं व्रतशालिनी।
परब्रह्माऽच्युतं कृष्णनारायणं सुमोक्षदम् ॥७९॥
मया छलेन त्वं त्यक्ता दोषो मे क्षम्यतां प्रिये।
मत्तोऽप्यधिका धर्मे च सौशील्ये भजने जपे ॥८०॥
ज्ञाने भक्तौ विरागे च वर्तसे त्वं पतिव्रते।
त्वया मे जन्मसाफल्यं मोक्षो मे करगस्तथा ॥८१॥
त्रिलोके विजयश्चापि त्वया सत्या ममाऽस्ति यत्।
करिष्ये पुष्करे चाहं तपः परमदारुणम् ॥८२॥
श्रीकृष्णचरणाम्भोजे धृत्वा बुद्धीन्द्रियादिकम्।
धननारीगृहेष्वास्था प्रवृत्तिपथगामिनाम् ॥८३॥
श्रीकृष्णचरणे त्वास्था निवृत्तिनिस्पृहार्थिनाम्।
वद देवि! सहवासे क्वचिन्मे मानसं चलम् ॥८४॥
संक्षोभं प्राप्स्यते तस्माद् दम्पत्योरेकभूतले।
सदाऽऽवासो बन्धनं स्याद् वियोगौ गुणतां व्रजेत् ॥८५॥
तस्माद् वियोगो योग्यो वै यद्वै श्रेष्ठं तदाचर।
सहवासे दूरवासे प्रसन्नोऽस्मि सदा त्वयि ॥८६॥
आर्ये कुरु यथाऽऽत्मनोर्बन्धच्छेदश्च मोक्षणम्।
जरत्कारुवचः श्रुत्वा मानसी कमलाकला ॥८७॥
योग्यं मेने वियोगं वै संयोगं विषबन्धनम्।
अपि पत्नी सदा पार्श्वे ऋतुधर्मे समाश्रिता ॥८८॥
पतिं संयोजयेत् कामे पतिर्वा वेगतः क्वचित्।
तस्मात्ज्ञानवतोश्चात्र दम्पत्योर्मोक्षकांक्षिणोः ॥८९॥
ज्ञात्वा वियोजनं युक्तं भयं यत्र न विद्यते।
पातिव्रत्यं पत्युराज्ञा दूरे वा निकटेऽपि वा ॥९०॥
पत्नीव्रतं तु पत्यर्थे श्रेयस्कामः सदा पतिः।
कामो दोषो न वै श्रेयःप्रदो भवति नारकः ॥९१॥
तस्मान्मोक्षेच्छुकयोर्दम्पत्योर्वियोजनं वरम्।
मया गन्तव्यमेवाऽद्य सतीपार्वतीसन्निधौ ॥९२॥
कैलासे कान्तवचसा प्राप्तव्यो मोक्ष एव हि।
इति विचार्य तु सती मानसी नागनन्दिनी ॥९३॥
शोकाऽश्रुनेत्रा विनयादुवाच प्राणवल्लभम्।
श्रेयोऽर्थं वै त्वया नाथ वियोगो मन्यते सुखः ॥९४॥
यथा प्रसन्नो भगवान् तच्चिकीर्षामि नान्यथा।
गच्छाम्यहं तु कैलासं पार्वतीचरणेऽनिशम् ॥९५॥
करिष्ये भजनं तत्र कृष्णनारायणस्य वै।
यदा स्मरामि बन्धो त्वां तदा मामागमिष्यसि ॥९६॥
बन्धुभेदः क्लेशतश्च पुत्रभेदस्ततः परः।
प्राणेशभेदः प्राणानां विच्छेदकस्ततोऽधिकः ॥९७॥
पतिः पतिव्रतानां तु शतपुत्राधिकः प्रियः।
सर्वस्मात्तु प्रियः स्त्रीणां प्रियस्तेनोच्यते सुरैः ॥९८॥
पुत्रे यथैकपुत्राणां वैष्णवानां यथा हरौ।
नेत्रे यथैकनेत्राणां तृषितानां यथा जले ॥९९॥
यथा परस्वे चौराणां कामुकानां यथा स्त्रियाम्।
विदुषां च यथाशास्त्रे वाणिज्ये वणिजां यथा ॥१००॥
तथा शश्वन्मनः कान्ते साध्वीनां योषितां प्रभो।
किं करोमि यथा कान्तः प्रसन्नो वृष एव मे ॥१०१॥
इत्युक्त्वा साजरत्कार्वी पपात स्वामिनः पदे।
उवाच मां तु कैलासं सम्प्रापय कृपानिधे ॥१०२॥
शंकराय च पार्वत्यै निवेदय तपः परम्।
कारणं येन निःशंका मान्या स्यां तत्र सादरा ॥१०३॥
इत्युक्तस्तु जरत्कारुस्तथास्त्वित्यभिधाय ताम्।
क्षणं चकार क्रोडे तां प्रेम्णा ददर्श तन्मुखम् ॥१०४॥
पस्पर्श पाणिना कान्तां वियोगाय कृपानिधिः।
नेत्रोदकेन मनसां स्नपयामास तां सतीम् ॥१०५॥
साऽश्रुभिश्च मुनेः क्रोडं सिषेध भेदकातरा।
ततो ज्ञानेन तौ द्वौ च विशोकौ संबभूवतुः ॥१०६॥

जग्मतुस्तौ तु कैलासं नेमतुः पार्वतीं शिवम् ।
जरत्कारुः स्ववृत्तान्तं कथयामास शंभवे ॥१०७॥
शंभुश्चापि प्रसन्नोऽभूत् पार्वती च ततोऽधिका ।
वियोगदुःखं नैवाऽस्ति योगिनामीदृशी गतिः ॥१०८॥
शंभुं च पार्वतीं दत्वा जरत्कार्वीं स्वयोषितम् ।
जगाम तपसे विप्रः पुष्करं त्वर्बुदाचले ॥१०९॥
मानसी तु गुरुं शंभुं गुर्वीं प्राप्य च पार्वतीम् ।
मुमुदे तपसा नित्यं ववृधे मन्दिरे गुरोः ॥११०॥
अथ काले गते साध्वी सुषुवे बालकं शुभम् ।
नारायणांशं च महाज्ञानिनां योगिनां गुरुम् ॥१११॥
संस्कारान् कारयामास शंकरोऽस्य ततः परम् ।
वेदादीन् पाठयामास ज्ञानं ब्रह्मपरं तथा ॥११२॥
भक्तिरास्ते स्वकान्ते चाऽभीष्टे देवे हरौ गुरौ ।
यस्यास्तेन च तत्पुत्रः श्रीहरेणाऽऽस्तिकः कृतः ॥११३॥
तदा स्मृतो जरत्कारुः पुत्रदर्शनहेतवे ।
समागत्य सुतं दृष्ट्वा चाशीर्भिः संप्रयुज्य च ॥११४॥
शंभुं नत्वा प्रियां दत्वा मानसं पुष्करं ययौ ।
आस्तिकोऽपि ययौ पित्रा समं श्रीपुष्करं तदा ॥११५॥
दिव्यं वर्षत्रिलक्षं तु तपस्तप्त्वा शिवं प्रभुम् ।
जननीं स्वां नमस्कर्तुं कैलासं त्वाययौ ततः ॥११६॥
आस्तीकः स्वजनन्याऽनुगतो हि कश्यपं ययौ ।
तां सपुत्रां सुतां दृष्ट्वा कश्यपो मुदमाप्तवान् ॥११७॥
सा सपुत्रा च सुचिरं तस्थौ तातालये सती ।
कृष्णभक्तिपरा साध्वी मोक्षमार्गपरायणा ॥११८॥
पुत्रयुक्ता मानसा सा सर्पसत्रे ह्युपस्थिता ।
पातिव्रत्येन धर्मेण तथाऽऽस्तीकबलेन च ॥११९॥
कृष्णनारायणभक्त्या ररक्ष भोगिनोऽखिलान् ।
सेयं लक्ष्मि ! मानसी त्वं नागिनी मनसा ह्यभूः ॥१२०॥
त्वमेव त्रिपुरादीनां नाशे मंगलचण्डिका ।
सुराणां मंगलदा च दैत्यानां चण्डनाशिका ॥१२१॥
ह्यभूस्त्वं सुरभिर्जाता दुग्धदात्री च देहिनाम् ।
नारायणी जगन्माता कम्भरा त्वमभूर्भुवि ॥१२२॥
पद्मिनी तुलसी वृन्दा प्रभा पार्वती भार्गवी ।
माधवी त्वमभूर्नैका मत्पतिव्रतपालिका ॥१२३॥
त्वं हंसा मंजुला चम्पा दया मुक्ता च देविका ।
शान्तिः शान्ता च सविता रुक्मिणी श्रीर्जयाऽनिला ॥१२४॥
हेम्नी च मौक्तिका स्वर्णा सीता पद्मावती प्रथा ।
राधा गौरी कस्तुरिका नलिनी विजया मुदा ॥१२५॥
हरिणी ललिता चन्द्रा कुमुदा च सरोजिनी ।
बहुधा वर्तमाना त्वं युगे युगे प्रसेवसे ॥१२६॥
इति ते कथितं लक्ष्मि ! पापतापप्रणाशनम् ।
कृष्णपतिव्रतं श्रावात्पाठान्मुक्तिर्भवेत्सुखम् ॥१२७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने लक्ष्म्या अनेकावतारेषु जरत्कार्वीपतिव्रतायां स्वपति-जरत्कारोस्तपःप्रस्थाने कैलासे वास आस्तीकाख्यपुत्र-प्राप्तिश्चेत्यादिनिरूपणनामा षड्त्रिंशदधिकचतुश्शत-तमोऽध्यायः ॥ ४३६ ॥

श्रीनारायण उवाच—

लक्ष्मि ! सोमकुले राजा मनोजवोऽभवत्पुरा ।
अयष्ट स सुरान् यज्ञैर्ब्राह्मणानन्नसंचयैः ॥ १ ॥
पितॄंश्च तर्पयामास कव्येन सेवया हरिम् ।
अहंकारोऽभवत्तस्य धनपुत्रादिनाशकृत् ॥ २ ॥
अहंकारो मदो लोभो हिंसा कामश्च रुट् रतिः ।
एते सर्वे सवयस्याः सम्पदां नाशहेतवः ॥ ३ ॥
तस्य राज्ञोऽभवल्लोभो विप्रद्रव्यकराऽर्जने ।
धनं धान्यं च विप्राणां जहार किल लोभतः ॥ ४ ॥
देवानां चापि वित्तानि लोभाच्च जगृहे नृपः ।
क्षेत्राणि जीविकाश्चापि जहार रागतः स हि ॥ ५ ॥
अथ पुण्यविनाशेन क्रूरकर्मविपाकतः ।
पुरं तस्य महासैन्यैः रुरोध गोलभो रिपुः ॥ ६ ॥
षण्मासान् तौ युयुधाते गोलभस्य जयोऽभवत् ।
मनोजवः पुत्रदारयुक्तो वनान्तरं ययौ ॥ ७ ॥
यत्रान्नं प्राप्यते नैव फलान्यपि क्वचित्क्वचित् ।
तत्र बालः क्षुधितश्चाऽयाचताऽन्नं हि मातरम् ॥ ८ ॥
अम्ब मेऽन्नं प्रयच्छ त्वं क्षुधा मे बाधते भृशम् ।
पितर्भक्ष्यं देहि किञ्चिदन्यथा मे मृतिर्ध्रुवा ॥ ९ ॥
श्रुत्वा पिता सुमित्राख्यां भार्यां प्राह शनैस्तदा ।
सुमित्रे ! किं करोम्यद्य क्व याम्यन्नार्जनाय तु ॥१०॥
मरिष्यत्यचिरादेषः साऽवयोरपि वै गतिः ।
कथं ब्रह्मा ससृजे वै दुर्भाग्यं मां निरर्थकम् ॥११॥
नाऽन्नदानं प्रदत्तं वै पूर्वस्मिन् संभवे मया ।
न वा शंभुर्हरिकृष्णनारायणः प्रपूजितः ॥१२॥
सूर्यवह्निवरुणाद्या देवा अपि न पूजिताः ।
न जीविकाः प्रदत्ता वै पूर्वजन्मनि सुन्दरि ! ॥१३॥

अन्यदत्तं त्वपहृतं वित्तकर्ये मृते जनौ ।
तेन पापेन त्वस्मिन् वै जन्मन्यहं प्रगर्वितः ॥१४॥
अहंकारेण वै देवविप्रक्षेत्राण्यपाहरम् ।
क्षितं चाऽपाहरं दैवं वैप्रं धार्मिकमित्यपि ॥१५॥
एवं मे दुष्कृतं सर्वं यत्फलं राज्यनाशनम् ।
पराजयो वने वासो यत्राऽन्नादि न लभ्यते ॥१६॥
क्षुधिताः पुत्रदाराश्च तृषिताश्च यथा वने ।
क्षुधातृषाभिभूतेन विलोक्यन्ते तु हा गतिः ॥१७॥
पूर्वं दाने जलं चान्नं नैव दत्तं भवेद् यतः ।
न हुतं न कृतं तीर्थं श्राद्धं कृतं च नो भवेत् ॥१८॥
अतिथिः पूजितो नैव ज्ञातिभोजनमेव न ।
बालानां भोजनं चापि गवां चापि तृणादिकम् ॥१९॥
साध्वीनामाश्रयश्चापि सेवा सतां न वै कृता ।
जन्तूनां कणपिष्टादि दत्तं नैव भवेत् प्रिये ॥२०॥
अन्यथा वै कथं चेदृक् कष्टं मम समापतेत् ।
फलं जलं दलं कन्दो मूलं पुष्पं च पादुके ॥२१॥
ताम्बूलं चन्दनं छत्रं चामरं चानुलेपनम् ।
वस्त्रं विभूषणं यानं वाहनं किञ्चिदित्यपि ॥२२॥
अन्ततस्तक्रमेऽवापि प्रदत्तं न भवेदिति ।
तेन पापेन सर्वस्वदुःखाऽद्रिर्मे समागतः ॥२३॥
नाऽश्वत्थश्चाम्रवृक्षो वा कपित्थस्तिन्तिडी तथा ।
अमृतादिफलिवृक्षा रोपिताः सिञ्चिता नहि ॥२४॥
नारीकेलामलकीनां तरवो रोपिता नहि ।
अध्वगानां तैर्थिकानां विश्रान्तिभवनानि न ॥२५॥
धर्मशालाश्च वा नैव कारिताः स्युः पुरा प्रिये ।
देवालये मया सेवा मार्जनलेपनादिका ॥२६॥
न कृता कारिता नैव तडागाद्या न खानिताः ।
पुष्पोद्यानो न रोपितश्च न कृतं तुलसीवनम् ॥२७॥
तेन पापेन सर्वस्वदुःखाऽद्रिर्मे समागतः ।
न कृताः क्रतवश्चापि दक्षिणाश्चापि नार्पिताः ॥२८॥
उपोषणं व्रतानां न कृतं नान्येन कारितम् ।
श्रेष्ठमासे च वर्षासु देवपूजा न कारिता ॥२९॥
नैवेद्यं जलपानादि मया नीराजनादि न ।
देवोत्सवः कीर्तनं चोद्यापनं कारितं न च ॥३०॥
तुलसीमालिका नापि धृता कण्ठे सुपावनी ।
कृतो नैव जपश्चापि कारितो न कदाचन ॥३१॥
तेन पापेन सर्वस्वदुःखाऽद्रिर्मे समागतः ।
एवं स विलपन् राजा दुःखमूर्छामुपाययौ ॥३२॥

सुमित्रा विललापाऽथाऽऽलिङ्ग्य सा पतिदेवता ।
अहो नाथ न यातोऽसि दुःखात् कच्चिन्मृतिं वने ॥३३॥
मामनाथां ससुतां त्वं विहाय विजने वने ।
मृतोऽसि यदि राजेन्द्र निर्भयाऽनुव्रजाम्यहम् ॥३४॥
चन्द्रकान्तः सुतश्चापि पितरं परिरभ्य च ।
रुरोद तावद् योगीन्द्रः पराशरमहामुनिः ॥३५॥
यदृच्छयाऽऽजगामाऽत्र दृष्ट्वा तं तु पतिव्रता ।
सुमित्रा तत्सुतश्चापि ववन्दाते समुत्थितौ ॥३६॥
आश्वासितौ तौ मुनिना प्राहतुश्च मुनिं तदा ।
गोलभेन हृतं राज्यं वनागमक्षुधादिकम् ॥३७॥
सर्वं परिचयं राज्ञो मूर्छां चेति यथार्थकम् ।
शक्तिपुत्रस्तु तच्छ्रुत्वा पराशरः पतिव्रताम् ॥३८॥
सुमित्रां प्राह मा भीस्ते भूयादत्र ममाऽऽगमे ।
अशुभं वै विनष्टं यत् यत् साधोर्मे दर्शनं तव ॥३९॥
सम्बोधयामि राजानं पश्य कृष्णप्रतापतः ।
इत्युक्त्वा मुनिराट् हस्ते जलं कृत्वाऽऽह मन्त्रकम् ॥४०॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
पस्पर्श च करेणैनं शवतुल्यं नराधिपम् ॥४१॥
तावन्मनोजवो राजा ह्युत्थितश्च ननाम तम् ।
प्रोवाच भगवन् रक्ष कष्टादस्माद्धि दारुणात् ॥४२॥
पराशरः सतीं पुत्रं प्राह मन्त्रं पुनः पुनः ।
पापं प्रज्वालयामास भक्तान् भागवतान् व्यधात् ॥४३॥
ददौ वन्यफलानां सुभोजनं जलमुत्तमम् ।
अक्षयं च फलं राज्ञ्यै प्रददौ स मुनीश्वरः ॥४४॥
प्रातः श्रीमत्कृष्णनारायणमूर्तिं जलेन वै ।
विधाय पूजनं कार्यं फलं मूर्त्या सहापि च ॥४५॥
पूजनीयं कुसुमाद्यैस्तस्मात् फलानि षोडश ।
अमृतानि जनिष्यन्ते प्रातः सायं च षोडश ॥४६॥
तान्येव भक्षणीयानि यावद्व्यसननाशनम् ।
इत्युक्त्वा च सुमित्रां स पातिव्रत्यं जगाद ह ॥४७॥
शृणु सुमित्रे ! नित्यं त्वं त्वरण्ये प्रातरेव यत् ।
सुसंस्कृत्य शरीरं स्वं देशकालानुसारतः ॥४८॥
पतिं सम्पूज्य विधिवत् फलं सम्पूज्य भावतः ।
वह्निं प्रज्वाल्य समिधो दत्वा पुष्पफलानि च ॥४९॥
स्वपत्युर्विजयार्थं च शत्रूणां नाशनाय च ।
तव मस्तकतः केशं त्वेकमुत्पाट्य नाऽपरम् ॥५०॥
जुहुधि पावके साध्वि ! सायं प्रातः पृथक् पृथक् ।
'शत्रुनाशकाय रुद्राग्नये स्वाहे'ति वै वद ॥५१॥

चत्वारिंशद्दिनं होमं कुरु ब्रह्मव्रताऽन्विता ।
ब्रह्मचर्यवती साध्वि ! विजयस्ते भविष्यति ॥५२॥
प्रयोगोऽयं सेतुबन्धे गन्धमादनपर्वते ।
अब्धितटे मंगलाख्यतीर्थे समाचरेः सति ! ॥५३॥
इत्युक्ता सा ययौ राज्ञा सुतेन सहिता सती ।
पराशरं नमस्कृत्या फलाहारा पतिव्रता ॥५४॥
भोजयित्वा सुतं नाथं तीर्थे स्नात्वाऽथ सा सती ।
यथोक्तं श्रीकृष्णनारायणमन्त्रं जजाप च ॥५५॥
वह्नौ होमादिकं दत्वा केशं जुहाव मन्त्रतः ।
चत्वारिंशत्तमे सायाह्ने सा जुहाव केशकम् ॥५६॥
तद्धूमाद्द्राक्समुत्पन्नं धनुर्लोकभयंकरम् ।
अक्षयाविशुधी चापि खड्ग च कनकत्सरू ॥५७॥
एकं चर्म गदा त्वेका शक्तिश्च मुशलो महान् ।
शंखो रथोऽश्वसहितः सपताकः ससारथिः ॥५८॥
अभेद्य कवचं सेनापतिः सैन्यान्वितस्तथा ।
अस्त्रशस्त्राणि बहूनि यानानि वाहनानि च ॥५९॥
भोजनादीनि सर्वाणि फलाजातानि पद्मजे ! ।
दिव्यवस्त्राणि भूषाश्च राजसम्पन्नवोत्तमा ॥६०॥
ओषधानि तथा वाहाः सर्वे तस्मादुपस्थितम् ।
आकाशवाणी तामाह भद्रे ! साध्वि ! जयोऽस्तु ते ॥६१॥
स्मारितश्च तथा पूज्यो महामुनिपराशरः ।
सस्मितो द्राग् विप्रवर्यश्चाययौ तत्पुरःस्थितः ॥६२॥
पराशरस्तदा राज्ञे ब्रह्माद्यस्त्रं समन्त्रकम् ।
साऽङ्गं च सरहस्यं च सोत्सर्गं सोपसंहृतिम् ॥६३॥
उपादिशत्तदा राजा जग्राहेश्वरराडभूत् ।
मुनिना प्रेरितो नत्वा चारुरोह रथं ततः ॥६४॥
राज्ञीं समादिशत्तत्र रथमध्ये स्थिरा भव ।
यावद् युद्धं च विजयो रथान्मा त्वमवातर ॥६५॥
तव मस्तककेशानां सैन्यं चामरमेव यत् ।
पतिश्चापि सुनिर्विघ्नो यावत्तेऽस्ति रथे स्थितिः ॥६६॥
त्वयि रथस्थितायां वै मृतस्य जीवनं भवेत् ।
पातिव्रत्यबलेनाऽस्य राज्ञो निर्विघ्नता भवेत् ॥६७॥
पुत्रं पार्श्वे तदा कृत्वा रथे तिष्ठ सदा सति ! ।
यावत्स्वराज्यभवने चत्वरे ते गतिर्भवेत् ॥६८॥
राज्यांगणे त्वया तावत् स्थेयं रथे ततः परम् ।
तवाऽवरोहात्पूर्वं त्वं पुत्रं पतिं सुवस्तुकम् ॥६९॥
अवरोहयेः प्रागेव ततस्त्वं भूमिमा भव ।
तावदेव रथः सैन्यं केशजं लयमेष्यति ॥७०॥
गच्छ साध्वि ! याहि राजन् कुमार राज्यमाप्नुहि ।
इत्युक्त्वा तिलकं बिन्दुं चन्द्रं कृत्वा तिरोऽभवत् ॥७१॥
सार्धं पत्न्या च पुत्रेण ससैन्यो विजयाय सः ।
गत्वा स्वीयपुरं राजा दध्मौ शंखं मुहुर्मुहुः ॥७२॥
गोलभो निर्ययौ तूर्णं युद्धाय सैन्यसंयुतः ।
दिनत्रयमभूद् युद्धं नष्टं सैन्यं तु गौलभम् ॥७३॥
चतुर्थे दिवसे राजा गोलभोऽपि विनाशितः ।
ततः सपुत्रभार्यश्च क्ष्मेशो मनोजवः स्वकें ॥७४॥
भवने संप्रविवेश तेऽवतेरुः रथात्ततः ।
तावत्सैन्यं रथः शस्त्रं फलादीनि तिरोऽभवन् ॥७५॥
राज्यं चक्रे हतशत्रुं नाऽहंकारं चकार सः ।
धर्मं यज्ञं जपं दानं पुण्यं चक्रे निरन्तरम् ॥७६॥
देवब्राह्मणसाध्वीनां सतां सेवां सदाऽकरोत् ।
अतिथीन् पूजयांचक्रे दानधर्मान् बहून् व्यधात् ॥७७॥
खातधर्मान् सत्रधर्मान् यज्ञधर्मांस्तथाऽऽचरत् ।
वृक्षसेचनधर्मांश्च श्राद्धधर्मांस्तथाऽकरोत् ॥७८॥
जीविकावृत्तिधर्मांश्च करक्षमापनादिकान् ।
गोरक्षादिकधर्मांश्च व्रतधर्मान् समाचरत् ॥७९॥
प्रजारक्षाकरान् धर्मान् देवपूजादिकान् स्वयम् ।
अकरोत् कारयामास कथाज्ञानादिधर्मकान् ॥८०॥
द्रोहनिन्दादिकं त्यक्त्वा चाहिंसो निरतोऽभवत् ।
राज्ञी चापि सतीधर्मान् पालयामास सुन्दरी ॥८१॥
पूर्वतस्तु विशेषेण यथा सा तापसी शिवा ।
नित्यं ध्यानपरा कृष्णनारायणे स्वस्वामिनि ॥८२॥
कान्ते सेवापरा नित्यं ब्रह्मचर्यपरा तथा ।
देवपूजापरा कृष्णव्रतकर्त्री निरञ्जनी ॥८३॥
त्रिषवणस्नायिनी च पतिकृष्णपरायणा ।
एकभुक्ता जपयज्ञपरा साधुप्रसेविका ॥८४॥
अभवच्च सदा तीर्थपाना मुन्यर्हभोजना ।
एवं स्वस्वामिनं दासी किंकरीव प्रसेवते ॥८५॥
राजाऽप्यहिंसानिरतः सदा धर्मपरोऽभवत् ।
प्रजाः सर्वा वैष्णवीदीक्षितास्तेन विधापिताः ॥८६॥
विशेषतस्तु साधूनामाहूय मण्डलानि च ।
कारयामास सततं नामसंकीर्तनं हरेः ॥८७॥
ऋषीन् गृहे वासयित्वा वेदशास्त्रकथाः शुभाः ।
सकुटुम्बश्च शुश्राव सेवयामास सात्त्वतान् ॥८८॥
सहस्तवत्सरानेवं ररक्ष स मनोजवः ।
ततो राज्ये सुतं चाभिषिच्य तपसे संययौ ॥८९॥

ध्यायन् कृष्णमचिरेण गोलोकं प्रययौ नृपः ।
सुमित्राऽपि तपसे सा पत्युश्छायास्थिताऽभवत् ॥९०॥
पतिदेहं समालिंग्य वह्निमुत्पाद्य देहजम् ।
अन्वारुह्य चितां तस्य प्राप धामाऽक्षरं हरेः ॥९१॥
एतत्ते कथितं लक्ष्मि ! पातिव्रत्यपरायणम् ।
यः शृणुयात्पठेद्वापि सर्वधर्मफलं लभेत् ॥९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मनोजवनृपतेर्नास्तिकत्वेन गोलभद्वारा राज्यादिनाशः पराशरोक्तमन्त्रहवनादिभक्त्या तत्पत्नीसुमित्रायाः पातिव्रत्येन हवनाद्युत्थितदिव्यसैन्यद्वारा पुनः राज्यप्राप्तिर्मोक्षादि चेतिनिरूपणनामा सप्तत्रिंशदधिकचतुश्शततमोऽध्यायः ॥४३७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारं तव जातं पुराभवम् ।
मया भक्तपरीक्षार्थं त्वया प्रेषितया कृतम् ॥ १ ॥
पुरा पुण्यनिधिर्नाम सोमवंशोद्भवो नृपः ।
माथुरमण्डलराज्यं शशास भक्तिमान् हरौ ॥ २ ॥
स त्वेकदा सेतुबन्धं तीर्थार्थं प्रययौ नृपः ।
सर्वाधिकं सेतुतीर्थं गन्धमादनगर्भितम् ॥ ३ ॥
श्रुत्वा शास्त्रेभ्य आदाय परिवारं हरिश्रितम् ।
धनुष्कोट्यादितीर्थेषु सस्नौ रामेश्वरं सदा ॥ ४ ॥
सिषेवे सकुटुम्बः स यज्ञं तत्राऽकरोन्मुदा ।
विष्णुयागाऽवसाने स मुदाऽवभृथकौतुकी ॥ ५ ॥
सस्नौ तीर्थे धनुष्कोटौ सदारः सपरिच्छदः ।
तत्र श्रीहरिणा लक्ष्मीर्नृपभक्तिं परीक्षितुम् ॥ ६ ॥
वैकुण्ठात्प्रेषिता चाष्टवर्षवयःस्वरूपिणी ।
धनुष्कोटौ समागत्य तस्थौ सा कमलालया ॥ ७ ॥
राजा स्नात्वा च दानानि कृत्वा ददर्श तां सतीम् ।
अतीव रूपसम्पन्नां कन्यां चारुविलोचनाम् ॥ ८ ॥
सर्वशोभामयीं चन्द्रकान्तपरिधिराजिताम् ।
पुण्यनिधिस्तां पप्रच्छ का त्वं कस्याऽसि कन्यका ॥ ९ ॥
अत्राऽऽगमः कथं कन्ये ! वद सर्वं यथातथम् ।
कन्या श्रुत्वाऽभवद् दीना प्राह तं नृपसत्तमम् ॥१०॥
न मे माता पिता राजन् विद्येते तीर्थवाञ्छया ।
भ्रमाम्यनाथा नृपते ! ह्युपार्जयामि भोजनम् ॥११॥
राजा प्राह तदा कन्ये ! समागच्छ मया सह ।
कन्या प्राह पिता भूत्वा यदि रक्षसि चेन्नृप ! ॥१२॥
तदा त्वया समं राजन् सुता भूत्वा निरन्तरम् ।
त्वद्गृहेऽहं निवत्स्यामि तातं त्वां पश्यती सदा ॥१३॥
विना मदिच्छां कश्चिन्मे मा गृह्णातु करं नृप ।
तदा ते मन्दिरे राजन् वत्स्यामि पितृसेविका ॥१४॥
राजा प्राह सुते ! मे वै नास्ति पुत्री यतो मम ।
भव पुत्री सदा कन्ये मेऽस्त्येक एव पुत्रकः ॥१५॥
तव यस्मिन् रुचिर्भद्रे त्वां तस्मै प्रददाम्यहम् ।
मद्भार्यायाः सुता भूत्वा मम चान्तःपुरे वस ॥१६॥
कन्या प्राह यदि राजन् हठात् कश्चित् करेण माम् ।
ग्रहीष्यति ह्यनाथां च ज्ञात्वा तदा त्वया नृप ॥१७॥
शासनीयः स एव स्यात्पुत्रो मित्रं च बान्धवाः ।
यतो हि राजगर्वेण कुमारा उद्विवर्तनाः ॥१८॥
धर्षयन्ति देशकालवैषम्ये तद्बिभेम्यहम् ।
तद्भयं मे तव पार्श्वे कदाचित्त्वपि मा भवेत् ॥१९॥
इत्युक्तः स नृपः प्राह तथाऽस्त्विति ततः सुताम् ।
राजा स्वभार्याहस्ते तां प्रददौ चाऽब्रवीच्च ताम् ॥२०॥
रक्षेमां सर्वथा साध्वीं पुरुषान्तरतः प्रिये ।
इत्यादिश्य सह नीत्वा राजा स्वगृहमागतः ॥२१॥
पालितां पोषितां कन्यां न्यवात्सीत् सुखपूर्वकम् ।
अथ विष्णुः परीक्षार्थं नरो भूत्वा समाययौ ॥२२॥
सखीभिः कन्यका यत्र पुष्पाण्यवचिनोति हि ।
पुष्पोद्याने तीर्थवासी विप्रो भूत्वा समाययौ ॥२३॥
तीर्थजलं कन्यकाभ्यः प्रददौ तुलसीदलम् ।
शनैः पश्चात्करं तस्या हठाजग्राह भूसुरः ॥२४॥
तदा चुक्रोश सा कन्या चुक्रुशुश्चान्यकन्यकाः ।
मालाकारस्तु तद्वृत्तं कथयामास भूभृते ॥२५॥
राजा समाययौ यत्र तूर्णं सभटवाहनः ।
कन्याभिर्दर्शितो विप्रो हठात्करप्रधर्षकः ॥२६॥
राज्ञा तु निगृहीतः स बध्वा निगडपाशितः ।
कारागारे प्रेषितश्च कन्यास्ता भवनं ययुः ॥२७॥
राजा रात्रौ तु निद्रायां स्वप्ने विप्रं ददर्श तम् ।
शंखचक्रगदापद्मवनमालाविभूषितम् ॥२८॥
सकौस्तुभश्रीवत्सांकोरस्कं पीताम्बरं हरिम् ।
नवीनजलदश्यामं गरुडादिप्रवन्दितम् ॥२९॥
सुस्मितं कुन्दकलिकादन्तं सुवर्णकुण्डलम् ।
पार्षदैर्मुनिभिर्लक्ष्मीरमाप्रभादिपूजितम् ॥३०॥

तस्य पार्श्वे कमले श्रीकृष्णनारायणप्रियाम् ।
स्वपुत्रीं कमलारूपां ददर्श दिव्यरूपिणीम् ॥३१॥
धृतपंकजहस्तां च नीलकुञ्चितमूर्धजाम् ।
दिग्गजैरभिषिक्तांगीं दिव्याभरणभूषिताम् ॥३२॥
महालक्ष्मीं ददर्शाऽसौ विष्णुपत्नीं स्वकां सुताम् ।
एवं दृष्ट्वा सहसा चोत्थितो राजा विचार्य च ॥३३॥
कन्यागृहं जगामाऽसौ निःशब्दो मौनमाश्रितः ।
कन्या कन्यागृहे चास्ते न वा चेति परीक्षितुम् ॥३४॥
यद्वा दृष्टं मया स्वप्नं सत्यं वाऽनृतमेव वा ।
सत्यं सा कमला विष्णोः शयने वर्तते नवा ॥३५॥
यद्वा विष्णुर्निशामध्ये राजते किं तया सह ।
यद्वा विप्रः स्वयं विष्णुर्निगडे वर्तते नवा ॥३६॥
यद्वा विष्णुस्वरूपोऽयं शेते किं कन्यया सह ।
इतिसर्वं विनिश्चेतुं राजा चाऽविदितो जनैः ॥३७॥
शनैः शनैर्मध्यरात्रौ कन्यागृहमवाप च ।
तथैव दृष्टवान् कन्यां यथा स्वप्ने ददर्श ताम् ॥३८॥
अथ राजा मौनमेव दूराद् दृष्ट्वा हरिं श्रियम् ।
ययौ शीघ्रं निजपत्नीं जगाद दिव्यदर्शनम् ॥३९॥
तदैव निगडस्थानं समारुह्य तु वाजिनम् ।
ययौ द्रष्टुं तदा तत्र ब्राह्मणो न विलोकितः ॥४०॥
अवापाऽऽश्चर्यमधिकं पुनः राज्ञीगृहं ययौ ।
पत्नीयुक्तो महाश्चर्यमवाप मुमुदे ह्यति ॥४१॥
श्रिया साकं हरेः रात्रौ विघ्नं मा शयने भवेत् ।
इति विचार्य वै राजा पुत्रीगृहं ययौ न वै ॥४२॥
अथोदिते भास्करे स ययौ कन्यागृहं शुचिः ।
ददर्श विष्णुसेवायां पूजायां स्वसुतां तदा ॥४३॥
राजा समागतश्चेति विज्ञाय तु सुता हरेः ।
आज्ञां गृहीत्वा प्रागेव रुमाबहिः समाययौ ॥४४॥
प्रणम्य पितरं लक्ष्मीर्निनाय स्वगृहान्तरे ।
तावद्विष्णुरभूद् विप्ररूपधृग् भिक्षुको यथा ॥४५॥
राजा विष्णुं विप्ररूपं तुष्टाव प्रेमविह्वलः ।
नमस्ते मे सुतानाथ ! प्रसीद कमलापते ॥४६॥
विप्ररूप नमस्तुभ्यमपराधं क्षमस्व मे ।
नमस्ते पुण्डरीकाक्ष चक्रपाणे श्रियःपते ॥४७॥
नमः श्रीवत्सचिह्नाय नमः कौस्तुभधारिणे ।
पार्वतीपतये तुभ्यं लक्ष्मीशाय नमोनमः ॥४८॥
माणिकीपतये प्रभानाथाय विष्णवे नमः ।
श्रीनिवासाय श्रीकृष्णनारायणाय ते नमः ॥४९॥

पद्मेशाय पद्मावतीस्वामिने हरये नमः ।
पद्मिनीशाय कृष्णाय भार्गवीशाय ते नमः ॥५०॥
नारायणाय रामाय सीतायाः पतये नमः ।
सरस्वतीपतये ते गंगायाः स्वामिने नमः ॥५१॥
विरजायाः पतये ते श्रीदुर्गापतये नमः ।
मत्सुतापतये हंसामञ्जुलापतये नमः ॥५२॥
कृष्णविप्रात्मने तुभ्यं हृदन्तरात्मने नमः ।
दयामूर्ते नमस्तुभ्यं कम्भरापतये नमः ॥५३॥
नमोध्वजधनुर्मत्स्यशूलहस्ताय ते नमः ।
स्वस्तिवरदहस्ताय कान्तरूपाय ते नमः ॥५४॥
मया निगडपाशाभ्यां बद्धस्त्वं परमेश्वर ।
अजानतस्ते भक्तस्य त्वपराधान् क्षमस्व मे ॥५५॥
एवं स्तुत्वा कृष्णनारायणं श्रीपुरुषोत्तमम् ।
पादयोः पतितः पश्चाल्लक्ष्मीं तुष्टाव वैष्णवीम् ॥५६॥
नमः कृपास्वरूपायै स्वलब्धायै नमोनमः ।
नमः सुतास्वरूपायै दिव्यदेव्यै नमोनमः ॥५७॥
गूढतन्व्यै कृष्णनारायणपत्न्यै च ते नमः ।
विष्णुवक्षोनिवासायै कमलायै नमो नमः ॥५८॥
राधायै च सरस्वत्यै पद्मिन्यै ते नमोनमः ।
दुर्गायै च महालक्ष्म्यै शारदायै च ते नमः ॥५९॥
गंगायै च तुलस्यै च वृन्दायै ते नमो नमः ।
पद्मावत्यै च भार्गव्यै कम्भरायै च ते नमः ॥६०॥
सिद्ध्यै पुष्ट्यै स्वधायै च स्वाहायै सततं नमः ।
दक्षिणायै मंगलायै पार्वत्यै च श्रियै नमः ॥६१॥
माणिक्यायै प्रभायै च ललितायै च ते नमः ।
जयायै जानकीदेव्यै द्रौपद्यै ते नमो नमः ॥६२॥
नारायण्यै च सन्ध्यायै षष्ठ्यै देव्यै नमो नमः ।
मातृकायै च कृष्णायै मञ्जुलायै नमो नमः ॥६३॥
श्रद्धामेधाभूतिधात्रीहंसाख्यायै च ते नमः ।
धरण्यै सर्वविद्यायै बुद्ध्यै गोप्यै नमो नमः ॥६४॥
प्रकृत्यै ते जगन्मातः पुत्र्यै भूयो नमो नमः ।
पुत्रीभावे मया चाधिक्षिप्तं वा शासनं कृतम् ॥६५॥
त्वंकारकरणं लक्ष्मि ! क्षमस्व मम सर्वथा ।
लोका वां शिशवः सर्वे जगतां पितरौ युवाम् ॥६६॥
सुतापराधः क्षन्तव्यः पितृभ्यां च प्रसीदतम् ।
इति सम्प्रार्थितौ देवौ विष्णुः पुण्यनिधिं नृपम् ॥६७॥
प्राह राजन्न वै भीश्च त्वया कार्या कदाचन ।
त्वया यज्ञः कृतः सेतुबन्धे तदा ह्यहं हरिः ॥६८॥

लक्ष्मीनारायणः कृष्णनारायणः पुमुत्तमः ।
अभवं सुप्रसन्नश्च प्रेषिता कमला मया ॥६९॥
तव यज्ञे प्रपूर्त्यर्थं सा दृष्टाऽवभृथे त्वया ।
त्वया साकं तदा सा तु वर्ततेऽत्र मदाज्ञया ॥७०॥
भक्त्याऽहं तव वश्योऽस्मि भक्तिपाशेन यन्त्रितः ।
भक्तापराधं सततं क्षमाम्येव न संशयः ॥७१॥
तव भक्तिं सदा ज्ञातुं सा लक्ष्मीस्ते गृहे स्थिता ।
त्वया संरक्षिता नित्यं पोषिता मत्प्रिया रमा ॥७२॥
तेनाऽहं चातितुष्टोऽस्मि मत्स्वरूपा त्वियं सती ।
लक्ष्म्यां यो भक्तिमान् लोके स मद्भक्तोऽभिधीयते ॥७३॥
अस्यां यो विमुखो राजन् स मे द्वेष्टा न संशयः ।
त्वं रमां भक्तिसम्पन्नः सदा पूजितवानसि ॥७४॥
मम पूजा कृता जाता लक्ष्म्यभिन्नोऽस्म्यहं यतः ।
अतस्त्वया नाऽपराधः कृतोऽस्ति निगडादिजः ॥७५॥
लक्ष्मीरक्षा कृता यस्माद् लक्ष्म्या वचनपालनात् ।
रमापराधकर्तारं निगडे धृतवान् यतः ॥७६॥
तेनाऽप्यतिप्रसन्नोऽस्मि मत्पत्नी रक्षिता त्वया ।
तद्रक्षतां कुर्वता राजन् संकेतोऽकारि यत्पुरा ॥७७॥
तत्संकेतः पालितः सा सेवा मम कृता त्वया ।
सा प्रिया मम राजेन्द्र सेवा साऽपि मम प्रिया ॥७८॥
इयं लक्ष्मीस्तव सुता त्वया सत्यं कृतं सदा ।
इत्युक्तः स पुण्यनिधिः साश्रुनेत्रो बभूव ह ॥७९॥
अथ लक्ष्मीस्तमुवाच पितः प्रीताऽस्मि सेवया ।
रक्षिताऽस्मि सदा चाहं स्वतन्त्राऽपि सदा त्वया ॥८०॥
तव भक्तेः प्रपुष्ट्यर्थमहं विष्णुरिहाऽऽगतौ ।
भक्त्या प्रसेवया चावां सन्तुष्टौ स्वः सुखी भव ॥८१॥
आवयोः कृपया राजन् लक्ष्मीस्ते भवतात् तथा ।
महद्भूमण्डलैश्वर्यं सदा ते भवतु ध्रुवम् ॥८२॥
आवयोः पादयुगले भक्तिर्भवतु ते ध्रुवा ।
देहान्ते चावयोर्धामप्राप्तिस्तेऽस्तु च शाश्वती ॥८३॥
सदा कृष्णपातिव्रत्यपरा भक्तिस्तवास्त्विति ।
एवमुक्त्वा महालक्ष्मीः कृष्णनारायणे प्रिये ॥८४॥
तिरोबभूव सहसा गरुडश्चाप्यदृश्यत ।
पार्षदाश्च व्यदृश्यन्त ह्याशीर्वादपरायणाः ॥८५॥
विन्ध्यावली राजपत्नी श्रीकृष्णस्य च दर्शनात् ।
पार्षदानां दर्शनाच्च मुमुदे प्रेमविह्वला ॥८६॥
यदा ज्ञातवती दिव्या लक्ष्मीः पुत्री ममाऽभवत् ।
मया सा सेविता नित्यं लालिता पालिता सदा ॥८७॥
रामिता हसिता साध्वी शासिता भोजिता मुहुः ।
स्नापिता च समुद्याने विहारिता मया सह ॥८८॥
पायिता मर्दिता शिरःप्रसाधिताऽतिहर्षिता ।
आवाहिता रत्नसिंहासने निषादिता मया ॥८९॥
आकारिता सुते पुत्रि कन्यके च कुमारिके ।
शोभने तातिके मातर्दुःखे सान्त्वयिता मुहुः ॥९०॥
स्पृष्टा शृंगारिता नित्यं सखीभिः सह प्रेषिता ।
आनन्दिता महोद्याने रञ्जनेषु च रञ्जिता ॥९१॥
अनुकूलेषु चार्थ्येषु प्रदत्तेषु प्रसादिता ।
एवं भाग्यात् समालब्धा स्वप्नेऽपि न वियोजिता ॥९२॥
न च दूरीकृता पुत्री मम पार्श्वात् कदाचन ।
अहो भाग्यं च साफल्यं मम नार्याः सदुत्तमम् ॥९३॥
यस्याः सेवाकृतो लाभो मया नार्या समर्जितः ।
मम गृहं च भवनं शय्यास्तरणवस्तुकम् ॥९४॥
पात्राणि चासनादीनि यानानि वाहनानि च ।
प्रसादानि च दिव्यानि पूजानि मोक्षदानि वै ॥९५॥
मम गृहं तु वैकुण्ठं दिव्यं जातं न संशयः ।
सर्वं यद्यत् सुतया मे स्पृष्टं लक्ष्म्या निभालितम् ॥९६॥
तत्सर्वं दिव्यतां प्राप्तं किं भाग्यं वर्णयामि मे ।
अहो लक्ष्मि ! मम मातः सुते पुत्रि पुनः सुकृत् ॥९७॥
यदि मे भक्तिरस्ति श्रीमत्यां त्वयि सनातनी ।
यदि मे पातिव्रत्यं च कृष्णे पत्यौ नरायणे ॥९८॥
तदा मे दर्शनं साध्वि ! प्राणेशि देहि मे सुते ! ।
कथमदृश्यतां प्राप्ता कथं मे नहि दृश्यसे ॥९९॥
इत्युक्त्वा नेत्रसलिलं सहर्षा प्रमुमोच सा ।
तावल्लक्ष्मीः स्मितहास्याऽऽनना चंद्रसमुज्ज्वला ॥१००॥
निर्गत्य श्रीहरेर्वक्षःस्थलात् क्रोडाऽऽगता स्थिता ।
मातुस्तुवक्षसि लग्ना क्षणं स्नेहेन पुत्रिका ॥१०१॥
अंकस्थितायाः शिरसं जिघ्राति स्म नृपप्रिया ।
उवाच पुत्रि यत्राऽसि श्रीकृष्णमन्दिरे सुते ॥१०२॥
देहान्ते मां पतियुक्तां नयेथाः कृष्णवल्लभे ।
ओमित्युक्त्वा मिष्टजलं पीत्वा विलोक्य चाननम् ॥१०३॥
शीघ्रं तिरोदधे लक्ष्मीर्नारायणस्तिरोऽभवत् ।
पार्षदाश्च गरुडश्च तिरोऽभवन् क्षणात् प्रिये ॥१०४॥
त्वां समादाय गरुडे वैकुण्ठमहमासवान् ।
राजा वैराग्यमापन्नः पुत्रे धुरं निधाय च ॥१०५॥
पुनः पुण्यं सेतुमाधवाख्यं तीर्थं जगाम ह ।
पत्नीयुक्तो हरिं ध्यायन् शेषं कालं निनाय सः ॥१०६॥

कृष्णनारायणं ध्यात्वा देहान्ते मुक्तिमाप्तवान् ।
विन्ध्यावली च तत्पत्नी तमेवाऽनुममार सा ॥१०७॥
पतिव्रता पतिप्राणा लक्ष्मीकृष्णपरायणा ।
समुत्पाद्य सती वह्निं पादाङ्गुष्ठाच्चितोपरि ॥१०८॥
यावद्दग्धुं समारेभे तावल्लक्ष्मीनरायणौ ।
आययतुर्दम्पतीं तु नेतुं वैकुण्ठमुत्तमम् ॥१०९॥
विमाने तौ समारोहयित्वा भक्तौ हरिव्रतौ ।
पतिव्रतौ दिव्यदेहौ निन्यतुर्धाम वैष्णवम् ॥११०॥
इति ते कथितं लक्ष्मि ! तवैव चरितं शुभम् ।
एतत्पठन्वा शृण्वन्वा वैकुण्ठे लभते गतिम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पुण्यनिधिनृपतेः सेतुबन्धरामेश्वरे यज्ञकरणेन पुत्रीरूपेण लक्ष्मीप्राप्तिः, लक्ष्मीकृतपरीक्षणे परमभागवतसभार्यकनृपतेर्नारायणाऽनुग्रहो ब्राह्मणरूपेणागमनम् , दिव्यदर्शनम् , वैकुण्ठनयनं चेत्यादिनिरूपणनामाऽष्टात्रिंशदधिकचतुश्शततमोऽध्यायः ॥४३८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! मम पितुर्धर्मदेवस्य वै पुरा ।
उपदेशं तु वर्धिन्यै चाऽप्सरसे तपःस्थले ॥ १ ॥
पुरा धर्मः स्वयं तेपे तपो वै दारुणं महत् ।
प्रजानां श्रेयसे धर्मारण्ये वर्षसहस्रकम् ॥ २ ॥
धर्मोपरि वंशवृक्षस्तम्बा वल्मीकमूलकाः ।
अभवँस्तं महेन्द्राद्या ज्ञात्वा जग्मुर्भयं भृशम् ॥ ३ ॥
यदि चेद्वै तपश्चोग्रं धर्मदेवः करिष्यति ।
तदुत्थेनाऽनलेनेदं जगद्भस्म भविष्यति ॥ ४ ॥
तपोरोधाय देवाद्यैर्मिलित्वा वर्धिनी तदा ।
अप्सरः प्रेषिता धर्मारण्ये रूपगुणान्विता ॥ ५ ॥
सा गत्वा वृद्धपितरं ववन्दे धूलिकाऽऽवृतम् ।
निःसार्य वंशवल्मीकं सुभानं धर्ममाह सा ॥ ६ ॥
किंहेतुकं तपस्तेऽस्ति धर्मः प्राह द्युवासिनाम् ।
भूस्थानां रक्षणार्थं च तपः करोमि दारुणम् ॥ ७ ॥
कथं त्वं चाऽऽगताऽरण्ये युवती सुन्दरी सती ।
सा तु प्राह महेन्द्राद्यास्तपसा भवतः पितः ॥ ८ ॥
भीता मां प्रेषयामासुस्तपःकारणवित्तये ।
ज्ञातं वै कारणं पूज्य ! कल्याणं न भयं यतः ॥ ९ ॥
कथयिष्ये सुरेन्द्रादीन् भविष्यन्ति निरामयाः ।
किन्तु चेत्तेऽपराधश्चेज्जातो मेऽनुग्रहं कुरु ॥१०॥
अहं परवशा नारी प्रेषिता पुण्यशालिनी ।
वृद्धपितुर्दर्शनं मे जातं जाताऽस्मि पावनी ॥११॥
रोचते मे न वै विघ्नं कर्तुं कस्यापि सुकृते ।
किन्तु देववशा तस्मात् प्रेर्यते तत्र यामि वै ॥१२॥
कल्याणं भवेद्येन शाधि चेन्मां पितामह ।
महेन्द्राय तपोहेतुं निवेद्याऽऽयामि वै पुनः ॥१३॥
अप्सरत्वं पितर्मे न रोचते नर्तनादिकम् ।
प्रेष्यत्वं दुःखदं सर्वसुकृतानां विनाशकम् ॥१४॥
यत्र वै नियमो नास्ति स्वामिनां किंकरीभवे ।
कैंकर्यं बहुपापानां नारीणां जायते पितः ॥१५॥
परहस्तगतत्वं च परभोग्यत्वमित्यपि ।
सुकृतानां प्रतिरोधि न मे संरोचते पितः ॥१६॥
श्रुत्वैतस्या वचो धर्मभृतं धर्मस्तुतोष ताम् ।
उवाच त्वं महेन्द्राय तपोहेतुं निवेद्य च ॥१७॥
शीघ्रमायाहि सत्पुत्रि ! करिष्ये तव शोभनम् ।
वर्धिनि ! त्वं भयं त्यक्त्वा समायाहि च मा चिरम् ॥१८॥
इत्युक्ता सा वृषं नत्वा प्रसन्ना त्वरिता ययौ ।
महेन्द्रादीन् तपोहेतुं निवेद्यैव प्रजाऽवनम् ॥१९॥
शीघ्रं धर्मं प्रतिधर्मारण्यं प्राप्ता सती शुभा ।
नत्वा धर्मं च सा वल्मीकान्तःस्थं परमादरात् ॥२०॥
सिषेवे तु दिवारात्रौ फलमूलाशना सती ।
वंशानुत्पाटयामास वल्मीकस्थाँश्च सा शनैः ॥२१॥
मृत्तिकाश्च शनैर्दूरीचकार धर्मदेहतः ।
अस्थिमात्राऽवशिष्टं तं देहं तीर्थजलेन सा ॥२२॥
स्नापयामास कुशला देहः पल्लवतां गतः ।
तत्र दिव्यस्वरूपश्च शतसूर्यसमप्रभः ॥२३॥
धर्मो बभूव संकल्पाद् ददर्श सेविकां सतीम् ।
वर्धिनी पतिता धर्मपादयोश्चार्पयज्जलम् ॥२४॥
पत्रं पुष्पं फलाद्यं च समार्पयद् वृषाय सा ।
समप्रच्छन्निजं श्रेयश्चक्रे पादावनेजनम् ॥२५॥
प्रसन्नः श्रीधर्मदेवस्तामाह शाश्वतान् वृषान् ।
कृष्णनारायणः श्रीमान् ससर्ज जडचेतनान् ॥२६॥
नरान्नारीश्च सर्वात्मा धर्मरक्षणहेतवे ।
पत्नीव्रतं पुरा विप्रं ससर्ज भगवान् स्वयम् ॥२७॥
पतिव्रतां च तत्पत्नीं ससर्जाऽऽह च तद्वृषान् ।
शृणु साध्वि ! सात्त्विके ते कथयामि तु तान् वृषान् ॥२८॥

पालितैर्यैश्च नारीणां परं श्रेयो भवेत् सति!।
यावत्कन्या भवेत्तावत् कुमारिकावृषाँश्चरेत् ॥२९॥
मातापितृप्रसेवां वै कुर्याच्च गुरुसेवनम्।
ब्रह्मचर्यपरा कृष्णनारायणं समर्चयेत् ॥३०॥
विवाहिता तु सा नारी पातिव्रत्यं प्रपालयेत्।
नो चेद् विवाहिता ब्रह्मचारिणी वर्तते यदि ॥३१॥
कृतभोगा क्षतपूर्वा विधवा चाऽधवाऽपि च।
ब्रह्मचर्यपरं परंश्रेयःप्रदं चेच्छेद्यदि ध्रुवम् ॥३२॥
कृष्णपातिव्रत्यपरा जायेत ब्रह्मचारिणी।
वर्तते सर्वदा धर्मे कृष्णकान्ते पतिव्रता ॥३३॥
पत्यौ कान्ते कृष्णकान्ते पातिव्रत्यपरा यथा।
सन्तिष्ठेत्तान् वृषान् पुत्रि ते वक्ष्यामि हितावहान् ॥३४॥
वाङ्मनःकायशुद्धा स्यात् पूज्यपूजापरायणा।
अलौल्या चास्तिका कृष्णस्वामिभक्तिमती भवेत् ॥३५॥
कृष्णः स्वामी पतिः कृष्णः कृष्णार्थे व्रतमास्थिता।
पत्यर्थे व्रतसम्पन्ना कीर्तिता सा पतिव्रता ॥३६॥
पतिव्रता तु सा नारी पतिशुश्रूषणे रता।
पत्यौ कान्ते तथा कृष्णमूर्तौ व्रतवती भवेत् ॥३७॥
श्रुत्वैतद् वर्धिनी प्राह धर्मदेवं तु पद्मजे!।
पतिव्रतानां सर्वासां लक्षणं कीदृशं वद ॥३८॥
धर्मदेवस्तदा प्राह प्रजाबोधाय विस्तरात्।
पतिव्रता गृहे यस्य सफलं तस्य जीवनम् ॥३९॥
यस्य साऽङ्गसमा छायासमा सेवापरायणा।
नित्यं पुण्यप्रदा यस्याः कथाऽपि पुण्यकारिणी ॥४०॥
भुंक्ते भुक्ते स्वामिनि सन्तिष्ठति त्वनुतिष्ठति।
विनिद्रिते या निद्राति प्रथमं परिबुद्ध्यति ॥४१॥
अनलंकृतमात्मानं कान्ते देशान्तरं गते।
कार्यार्थे प्रोषिते तावद् भवेन्मण्डनवर्जिता ॥४२॥
भर्तुर्नाम न गृह्णीयादायुषो वृद्धिकाम्यया।
आक्रुष्टाऽपि च नाऽऽक्रोशेत् ताडिताऽपि प्रसीदति ॥४३॥
कार्याऽऽज्ञायां कृतं स्वामिन्निति वक्ति करोति च।
आहूता स्वामिना शीघ्रं याति त्यक्त्वाऽन्यकार्यकम् ॥४४॥
वद कान्त करोम्यद्य सेविका तेऽस्म्युपस्थिता।
एवं मिष्टं वदेत्सर्वं कुर्यात् सर्वं यदादिशेत् ॥४५॥
नकारं न वदेद् ब्रूयात् प्रसादो मे विधीयताम्।
स्वामी यथा भवेत्तुष्टः प्रसन्नश्चाचरेत्तथा ॥४६॥
गृहद्वारे परान्नैव स्थित्वा पश्येन्नराँश्चिरम्।
अदातव्यं न वै दद्यादन्यस्मै पत्यसन्निधौ ॥४७॥
स्नानपूजोपकरणाद्यनुक्ता साधयेत् स्वयम्।
पत्रपुष्पादिकं सर्वं यथाकालं प्रसाधयेत् ॥४८॥
उद्विग्ना न भवेत् क्वापि हृष्टा सेवेत वै पतिम्।
प्रतीक्षमाणा सत्प्रीतिं भर्तारं संप्रतोषयेत् ॥४९॥
भर्त्रा भुक्तं प्रसादं च भुंक्तेऽन्यद्वर्जयेत् सदा।
समाजोत्सवयात्रादि विवाहप्रेक्षणादिषु ॥५०॥
विना कान्तं न वै गच्छेद् वर्धिनि! या पतिव्रता।
पत्याज्ञया प्रगच्छेद्वै स्वामिधर्मपरायणा ॥५१॥
सुसमासीनमुत्स्थं च क्रीडन्तं कार्यतत्परम्।
स्वार्थार्थं च सती वोपस्थापयेद् विघ्नमन्तरा ॥५२॥
राजस्वल्ये तु सम्प्राप्ते त्रिरात्रं मलिना सती।
अशुद्धिं पालयेद् गृहाद् बहिर्गच्छेन्न सर्वथा ॥५३॥
अतेजस्कं मुखं स्वस्या दर्शयेन्न बहिः सती।
शब्दं न श्रावयेत्त्वन्यान् गृहाद्बहिः पतिव्रता ॥५४॥
चतुर्थे दिवसे स्नात्वा शुद्धा भवति भामिनी।
तुर्यरात्र्यां व्यतीतायां देवार्चनादियोगिनी ॥५५॥
शुद्धा भवति सेवार्हा कुर्यात् स्वस्वामिदर्शनम्।
यद्वा स्वस्वामिनं स्मृत्वा कुर्यात्सूर्यस्य दर्शनम् ॥५६॥
अयुग्मासु बीजलाभे प्रसूयेत हि कन्यकाम्।
युग्मासु गर्भलाभे तु प्रसूयेत हि पुत्रकम् ॥५७॥
आषोडशनिशं गर्भकमलोद्घाटनं सदा।
ततः परं पिहीतं स्याद् व्यर्था भवन्ति धातवः ॥५८॥
रजस्वलायां रुग्णायां काचिदन्या तु भामिनी।
द्वादशवारं प्रत्येकं स्पृष्ट्वा स्नात्वा पुनः पुनः ॥५९॥
पूर्वधृतानि वस्त्राणि तस्या दूरे प्रकारयेत्।
जलेन प्रोक्षयेदन्ते रजस्वला प्रशुद्ध्यति ॥६०॥
विवाहे चोत्सवे याने समाजे वाहने पथि।
प्रवासे तीर्थयात्रायां यज्ञ दाने विपत्स्थले ॥६१॥
संग्रामे सत्कथाख्याने ज्ञाने दीक्षाविधौ वने।
त्यागभावे योगभावे चमत्कारे तपःस्थितौ ॥६२॥
अनाश्रये पराधीने कारागारे च निर्जने।
असहाये कर्मभृत्यभावे विच्चित्तकस्थितौ ॥६३॥
अत्यावश्यककार्ये च शवयोगे च सूतके।
प्रवासे परगेहादौ ब्रह्मचर्ये व्रते क्रतौ ॥६४॥
विद्यार्जने चोपवासविधौ चान्द्रायणादिके।
भ्रातृसुतजनकाद्यैरावश्यके तु कार्यके ॥६५॥
स्नात्वा त्वेकोपवासेन शुद्ध्यत्येव रजस्वला।
धर्ममूर्तिः स्वयं कान्तः कृष्णमूर्तिः स्वयं पतिः ॥६६॥

पतिर्धर्मः पतिः कर्म पतिः शुद्धिर्हि नान्यथा ।
पतियोगे भवेच्छुद्धा तावदेव रजस्वला ॥६७॥
चातुर्मास्ये यथा नद्यः सर्वदैव रजस्वलाः ।
वार्धियोगे तु शुद्धाः स्युस्तदयोगे रजस्वलाः ॥६८॥
तस्मात्पत्युर्वशे शुद्धिः पतियोगे हि शुद्धिकृत् ।
पतिविद्वेषिणीं नारीं प्रभाषेन्न सती क्वचित् ॥६९॥

हरिद्रां कुंकुमं बिन्दुं सिन्दूरं कज्जलं तथा ।
शिरोवस्त्रं च ताम्बूलं मांगल्याऽऽभरणानि च ॥७०॥
केशसंस्कारकरणं कंकणादिसुभूषणम् ।
भर्तुरायुष्यमिच्छन्ती दूरयेन्न पतिप्रिया ॥७१॥
नैकाकिनी बहिर्गच्छेन्न नग्ना स्नानमाचरेत् ।
रतिकार्ये कुशला स्यान्मानाऽऽलस्यविवर्जिता ॥७२॥

यत्र यथा रुचिर्भर्तुस्तथा तत्र सखी भवेत् ।
धर्मो व्रतं जपः सेवा पूजा पतिप्रसादनम् ॥७३॥
मत्वा कुर्याद् भर्तृतोषे सर्वं भवति सुकृतम् ।
न कण्डन्यां न पेषण्यां न चुल्ल्यां मुशले न च ॥७४॥
न दर्व्यां न महास्थाल्यां न देहल्यां न यन्त्रके ।
न शिलायां पिष्टलोष्टे साधनादावुपाविशेत् ॥७५॥

निर्धनं रूपहीनं च क्लीबं जरठं रोगिणम् ।
रागहीनं कामहीनं शक्तिहीनं च दुःस्थितिम् ॥७६॥
कृष्णसमं पतिं ज्ञात्वा शक्ताऽपि न विलंघयेत् ।
सर्पिर्लवणतैलादिक्षयेऽपि सुखतो यथा ॥७७॥
प्राप्तिः स्यात्तत्तथा वाच्यं क्लेशयेन्न कदाचन ।
लोष्ठपात्रे भोजयेन्नोच्छिष्टं स्वस्याः प्रभोजयेत् ॥७८॥
पतिपादोदके तीर्थे स्नायात् पिबेद् वसेत्सदा ।
शिवाद्विष्णोः पञ्चदेवेभ्योऽधिकः स्वपतिः स्त्रियाः ॥७९॥

पतिमुल्लंघ्य सा नैव व्रतोपोषणमाचरेत् ।
उक्ता कष्टोत्तरं नैव दद्यात्साध्वी कदाचन ॥८०॥
पत्युरधिक्षेपकर्त्री क्रोधिता क्लेशदायिनी ।
सरमा जायते ग्रामे शृगाली निर्जने वने ॥८१॥
भर्तुः पादौ प्रपूज्यैव कुर्यात्प्रसादभोजनम् ।
भर्तुरुच्चासने नैव निषीदेन्न व्रजेद्बहिः ॥८२॥

परगृहस्थितिमती भवेन्नैव कदाचन ।
क्लिष्टपारुष्यवाक्यानि ब्रूयान्नैव कदाचन ॥८३॥
गुरूणां सन्निधौ नोच्चैर्वदेन्नर्म न चाऽऽचरेत् ।
सजने तु स्थले कान्तं स्वरेण नाऽऽह्वयेत् सती ॥८४॥
यस्याः स्वशयने कान्तो न रोचते सा दुर्मतिः ।
उलूकी चक्रवाकी च जायते वृक्षवासिनी ॥८५॥

पत्युस्ताडनकर्त्री च व्याघ्री मार्जारिका भवेत् ।
कटाक्षयित्री कान्तान्यं काणाक्षी सा भवेद् ध्रुवम् ॥८६॥
पतिं विना या मिष्टादा सूकरी वल्गुली भवेत् ।
पत्युस्त्वंकारयित्री सा मूका तोतलिका भवेत् ॥८७॥
सपत्न्या ईर्ष्ययित्री तु मुहुः रुग्णभगा भवेत् ।
अन्यस्मै मुखदर्शिका कुरूपा कुमुखी भवेत् ॥८८॥

अन्यं प्रहर्षयेद् भावैरन्यं संदर्शयेत्तनुम् ।
अन्यं स्पृशेच्च सा गोधा रण्डा वेश्या ततो भवेत् ॥८९॥
कार्ये परिश्रमं कृत्वा समायान्तं विलोक्य सा ।
जलासनैश्च ताम्बूलैः पादसंवाहनादिभिः ॥९०॥
व्यजनैः फलदानैश्च मिष्टवाण्या प्रसन्नयेत् ।
पत्युरेवं प्रीणयित्री शाश्वतं सुखमश्नुते ॥९१॥

पिता माता सुतो भ्राता स्वल्पदा मितदा मताः ।
अमितस्य तु सर्वस्य दाता कान्तः स्त्रियाः सदा ॥९२॥
इष्टो देवो गुरुः श्रेष्ठस्तीर्थं पात्रं पतिर्मतः ।
धर्मः पुण्यं व्रतं कृच्छ्रं सर्वं पत्यौ तमर्चयेत् ॥९३॥
विनाऽऽत्मानं शवं व्यर्थं पत्नी कान्तं विना तथा ।
सुस्नाता गन्धिताऽलंकारिताऽप्यशुचिरेव सा ॥९४॥

धवः स्थानं मंगलानां तं विना मंगलानि न ।
धवं विना सुदुष्टाऽपि माता पुत्रस्य मंगला ॥९५॥
महाभागवती साध्वी भक्ता सर्वस्य मंगला ।
रण्डा मुण्डा त्यागवती वह्निवस्त्रा तु मंगला ॥९६॥
वैष्णवी विधवा कृष्णधवा शश्वद्धि मंगला ।
प्रिया पत्नीकृता या का जारस्यापि तु मंगला ॥९७॥
कृष्णनारायणशाटीधारिणी मंगला सदा ।
कृष्णपतिव्रता कृष्णाधारा या काऽपि मंगला ॥९८॥

तुलसीमालिका कण्ठे करे भाले तु पुण्ड्रकम् ।
लक्ष्मीबिन्दुश्च यस्याः सा मंगला कृष्णभामिनी ॥९९॥
गुरुमन्त्रप्रदात्री च ज्ञानदात्री च मंगला ।
रण्डा मुण्डा व्यंगषण्ढा वैष्णवी मंगला सदा ॥१००॥
कृष्णनारायणांकस्थाः कृष्णनारायणप्रियाः ।
कृष्णनारायणकान्ता दिव्याः सर्वा हि मंगलाः ॥१०१॥

कन्यादाने वाचयन्ति विप्राः प्रतिव्रतावृषान् ।
भर्तुः सहचरी भूया जीवतोऽजीवतोऽपि वा ॥१०२॥
श्मशानं या गृहाद्भर्तुः शवस्याऽनुप्रयाति सा ।
पदे पदेऽश्वमेधस्य पुण्यवती चिताऽनुगा ॥१०३॥
यमहस्तात्पतिमाकृष्य सा स्वर्गं व्रजेत् सती ।
सतीं वीक्ष्य पलायन्ते हित्वा पतिं यमानुगाः ॥१०४॥

सूर्यो वह्निर्वाडवाग्निर्विद्युत्ताराग्रहादयः ।
पातिव्रत्यमहसोऽग्रे कम्पन्ते देवकोटयः ॥१०५॥
पतिव्रतावर्ष्मरोमसंख्या यावती तावताम् ।
कोट्ययुतवत्सराणां स्वर्गायुष्यवती सती ॥१०६॥
भर्त्रा दिव्यसुखं भुंक्ते ततो मुक्तिं व्रजेत्ततः ।
सुधन्यौ तस्याः पितरौ पतिर्धन्यः कुटुम्बकम् ॥१०७॥
पितृवंश्याः मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः ।
पतिव्रतायाः पुण्येन स्वर्गे यान्ति तया सह ॥१०८॥
पतिव्रतायाश्चरणो भूमिं तीर्थीकरोति वै ।
सूर्यः सोमश्च गन्धर्वाः स्प्रष्टुं बिभ्यति वै सतीम् ॥१०९॥
पतिव्रतापादयोगं वाञ्छन्ति सलिलान्यपि ।
गायत्र्या यस्य पापस्य नाशो नैव भवेदिह ॥११०॥
पातिव्रत्येन तन्नाशं करोत्येव पतिव्रता ।
संसारो रूपलावण्यगर्वितस्त्रीमयो न किम् ॥१११॥
परं सती क्वचित्पतिव्रता लभ्येत वैष्णवी ।
गृहं पतिव्रतापत्नी तया गृहस्थ उच्यते ॥११२॥
पत्नीमूलं गृहधर्मे धर्मफले सुखे सुते ।
परलोके चेह पित्रतिथिदेवसमर्हणे ॥११३॥
गृहं स्यात्पावनं स्वामिव्रतया गंगयाऽथवा ।
कुलं स्यात्पावनं भक्त्या पतिव्रतया वा स्त्रिया ॥११४॥
विवाहितः पतिर्यस्यास्तया पतिप्रसेवया ।
स्वर्गो मोक्षः साधनीयौ श्रीकृष्णचरणौ तथा ॥११५॥
यस्याः पतिर्ययौ स्वर्गं सगर्भा भक्तितत्परा ।
वैधव्यवृषशक्ता सा भवेत् कृष्णपतिव्रता ॥११६॥
कृष्णं संपूजयेन्नित्यं भोजयेल्लालयेद्धरिम् ।
सेवयेत् सर्वथा नारी कृष्णं कृत्वा पतिं निजम् ॥११७॥
कृष्णं स्वशयने स्मृत्वा निद्रां लभेत् पतिव्रता ।
कृष्णं चोद्वर्तयेद् गन्धद्रव्यं कृष्णाय चार्पयेत् ॥११८॥
भर्तारं श्रीहरौ स्मृत्वा दद्यात् कुशतिलोदकम् ।
पतिं श्रीमत्कृष्णनारायणं ध्यायेत्प्रपूजयेत् ॥११९॥
पत्युरिष्टं यदासीत्तद्दद्यात्कृष्णाय सर्वदा ।
स्नानं दानं तीर्थयात्रां कथाश्रवणमर्चनम् ॥१२०॥
वैशाखे जलकुंभांश्च कार्तिके घृतदीपकान् ।
माघे धान्यतिलाद्यांश्च पतिकृष्णाय चार्पयेत् ॥१२१॥
वैशाखे तु प्रपां दद्याच्छिवे दद्याद्गलन्तिकाम् ।
उशीरं व्यजनं छत्रं सूक्ष्मवासांसि चन्दनम् ॥१२२॥
सकर्पूरं च ताम्बूलं पुष्पदानं सुभोजनम् ।
जलपात्रं पिष्टदानं द्राक्षारम्भादि सत्फलम् ॥१२३॥
श्रीकृष्णाय प्रदेयाद्वै पतिर्मे प्रीयतामिति ।
कार्तिकेऽन्नानि सर्वाणि शाकानि शिम्बिकास्तथा ॥१२४॥
घृतादिकं कम्बलादि प्रदद्यात्कृष्णतुष्टये ।
घण्टां शय्यां घृतपात्रं धनं धेनुं पयस्विनीम् ॥१२५॥
दीपदानं प्रदद्याच्च पतिकृष्णप्रतुष्टये ।
कुमारिकाऽथवा या चाऽधवा वा पतिवर्जिता ॥१२६॥
तथा कृष्णस्वामिधर्माः पालनीया हि सर्वथा ।
कृष्णनारायणः पूज्यः सेवनीयो हृदि प्रभुः ॥१२७॥
इत्युक्ता धर्मदेवेन वर्धिनी ब्रह्मचारिणी ।
धर्मारण्ये सदा स्थित्वा कृष्णभक्तिपरायणा ॥१२८॥
कृष्णनारायणे कान्ते पातिव्रत्यपरा सती ।
भेजे नित्यं मूर्तिरूपं श्रीकृष्णं पुरुषोत्तमम् ॥१२९॥
तपस्यन्तं धर्मदेवं सिषेवे पितृसेविका ।
अथ तुष्टो हरिः कृष्णो नारायणः समाययौ ॥१३०॥
तां कृत्वा दिव्यदेहां च निनाय निजमन्दिरम् ।
धर्मदेवं तथा दत्वा वरदानं यथेप्सितम् ॥१३१॥
प्रजाया रक्षणं शश्वत् करिष्ये तपसाऽप्यहम् ।
तपसो निवृत्तिः कार्या चेत्युक्तो वृष एव सः ॥१३२॥
निववृते तपसश्च ययौ सत्यं ह्यजस्थलम् ।
नारायणः सतीं नीत्वा वर्धिनीं स्वालयं ययौ ॥१३३॥
इत्येवं कथितं लक्ष्मि ! वर्धिनीपातिव्रत्यकम् ।
पठनाच्छ्रवणाच्चास्य स्वर्गं मुक्तिं लभेज्जनः ॥१३४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने धर्मारण्ये धर्मतपस्याभंगार्थं समागताया इन्द्रप्रेषितवर्धिन्या अप्सरायाः धर्मकृतपातिव्रत्यबोधेन कृष्णनारायणपातिव्रत्येन मुक्तिरित्यादिनिरूपणनामैकोनचत्वारिंशदधिकचतुश्शततमोऽध्यायः ॥ ४३९ ॥

श्रीनारायण उवाच—

अथ लक्ष्मि ! वृषारण्ये ब्राह्मणादिप्ररक्षिकाः ।
पतिव्रतामहासत्यो विष्णुस्थापितमातरः ॥ १ ॥
तास्तु नारायणभक्ताः सदा लोकस्य रक्षिकाः ।
पातिव्रत्यपरा देवीर्वक्ष्यामि शृणु सादरम् ॥ २ ॥
सोपाख्यानां कथां तत्र विप्राणां या पुराऽभवत् ।
तामपि संप्रवक्ष्यामि शृणु धर्मोद्भवां शुभाम् ॥ ३ ॥
पुरा गोलोकधाम्नि श्रीकृष्णनारायणः प्रभुः ।
पत्नीव्रतं सुतं विप्रं स्वस्मात् प्राविश्चकार ह ॥ ४ ॥

स तु विप्रः कृष्णनारायणाज्ञयाऽत्र गोलके।
आजगाम निजपत्न्या पतिव्रतया संयुतः ॥ ५ ॥
धर्मारण्ये सहस्राक्षः सहस्रास्यः सहस्रपात्।
पत्नीव्रतः कृतवान् स्वस्वरूपाणि सहस्रशः॥ ६ ॥
त एते ब्राह्मणाः सर्वे सदाचाराः शुभव्रताः।
अशेषधर्मकुशलाः सर्वशास्त्रविशारदाः ॥ ७ ॥
तपोज्ञाने महाख्याता ब्रह्मयज्ञपरायणाः।
उषिताः ऋषयः सर्वे त्रिकालज्ञाः प्रतापिनः ॥ ८ ॥
अष्टादशसहस्राणि कृष्णनारायणात्मजाः।
चतुर्विंशतिगोत्राणि प्रावर्तन्ताऽत्र वै पुरा ॥ ९ ॥
भारद्वाजस्तथा वत्सः कौशिकः कुश इत्यपि।
शाण्डिल्यः कश्यपश्चापि गौतमः शान्धनस्तथा ॥१०॥
जातूकर्ण्यस्तथा वात्स्यो वसिष्ठो धारणस्तथा।
आत्रेयो भाण्डिलश्चापि कृष्णायनश्च लौकिकः ॥११॥
उपमन्युश्च गार्ग्यश्च मौषको मुद्गलस्तथा।
गांगासनश्च कौण्डिन्यः पुण्यासनः पराशरः ॥१२॥
चतुर्विंशतिश्चैतानि प्रावर्तन्त पुरा युगे।
आंगीरसः शौनकश्च काश्यपः जामदग्न्यकः ॥१३॥
लौगाक्षसश्च माण्डव्यो बभूवुर्गोत्रिणस्ततः।
प्रवराणि तु जातानि तान्यपि मे निशामय ॥१४॥
भारद्वाजसगोत्रेयाः प्रवरैः पञ्चभिर्युताः।
आङ्गीरसो बार्हस्पत्यो भारद्वाजश्च सैन्यसः ॥१५॥
गार्ग्यश्चेवेति प्रवराः पञ्च ते वैष्णवा द्विजाः।
वत्सगोत्रे द्विजा लक्ष्मि! प्रवराः पञ्च ते यथा ॥१६॥
भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः।
कौशिकवंशे ये जाताः प्रवरत्रयसंयुताः ॥१७॥
विश्वामित्रोऽघमर्षी च कौशिकश्चेति ते त्रयः।
कुशिकगोत्रे ये जाताः प्रवरैस्त्रिभिरन्विताः ॥१८॥
विश्वामित्रो देवरात औदलश्चेति ते त्रयः।
शाण्डिल्यगोत्रे ये जाताः प्रवरत्रयसंयुताः ॥१९॥
असितो देवलश्चापि शाण्डिल्यश्चेति ते त्रयः।
कश्यपा ब्राह्मणा लक्ष्मि! प्रवरत्रयसंयुताः ॥२०॥
काश्यपश्चापवत्सारो नैध्रुवश्चेति ते त्रयः।
गौतमगोत्रजा ये तु प्रवराः पञ्च एव ते ॥२१॥
कौत्सो गार्ग्यो प्रवहश्चाऽसितो देवल इत्यमी।
शान्धनस्य तु नैवासीत् स्वतन्त्रः प्रवरः सति! ॥२२॥
जातूकर्ण्यस्यापि तथा स्वतन्त्रः प्रवरो न वै।
वात्स्यगोत्रे भवा विप्राः प्रवरैः पञ्चभिर्युताः ॥२३॥
भार्गवच्यवनाप्नुवानौर्वश्च जमदग्निकः।
अथ वशिष्ठगोत्रोत्थाः प्रवरत्रयसंयुताः ॥२४॥
वसिष्ठो भारद्वाजश्च इन्द्रप्रमद इत्यमी।
अथ धारीणसगोत्रे प्रवरास्त्रय एव ते ॥२५॥
अगस्तिर्दविश्वेता च दध्यवाहन इत्यमी।
आत्रेयगोत्रे ये जाताः पञ्चप्रवरसंयुता ॥२६॥
आत्रेयोऽर्चनानसः श्यावाश्च आंगीरसोऽत्रिकः।
माण्डीलस्य तु नैवासीत् स्वतन्त्रः प्रवरस्तदा ॥२७॥
तथा कृष्णायनस्यापि स्वतन्त्रः प्रवरो न वै।
लौकिकस्यापि च तथा स्वतन्त्रः प्रवरो न वै ॥२८॥
उपमन्युसगोत्रेयाः प्रवरत्रयसंयुताः।
वसिष्ठश्च भरद्वाजस्त्विन्द्रप्रमद इत्यमी ॥२९॥
गार्ग्यस्य गोत्रजानां तु प्रवरास्त्रय एव तु।
अङ्गिराश्चाम्बरीषश्च यौवनाश्वस्तृतीयकः ॥३०॥
मौषकस्य तु नैवासीत् स्वतन्त्रः प्रवरस्तदा।
मुद्गलस्यापि च तथा स्वतन्त्रः प्रवरो न वै ॥३१॥
गांगासनस्य तु गोत्रे प्रवराः पञ्च एव तु।
भार्गवश्चावनाप्नुवानौर्वाश्च जामदग्न्यकः ॥३२॥
आत्रेयोऽर्चनानसश्च श्यावास्यश्च त्रयोऽपि ते।
गांगासने भवन्त्येते त्रयोऽपि प्रवराः क्वचित् ॥३३॥
कौण्डिन्यस्य च पुण्यासनस्य पराशरस्य च।
गोत्रे स्वतन्त्राः प्रवरा नासन् लक्ष्मि! तदा पुरा ॥३४॥
अथाऽन्यॉंस्ते कथयामि जामदग्न्यस्य पञ्च तु।
भार्गवश्च्यवनाप्नुवानौर्वश्च जमदग्निकः ॥३५॥
माण्डव्यस्य सगोत्रे तु प्रवराः पञ्च ते यथा।
भार्गवश्च्यावनोऽत्रिश्चाप्नुवानौर्वस्त एव हि ॥३६॥
वात्स्यायनसगोत्रेयाः प्रवरैः पञ्चभिर्युताः।
भार्गवश्च्यावनाप्नुवानौर्वश्च जमदग्निकः ॥३७॥
कश्यपे गोत्रके चान्ये प्रवरत्रयसंयुताः।
काश्यपश्चापवत्सारो रैभ्यश्च विश्रुतास्त्रयः ॥३८॥
शौनकसेषु ये जाताः प्रवरत्रयसंयुताः।
भार्गवः शौनहोत्रश्च गार्त्स्यमद इतित्रयः ॥३९॥
जाता आंगीरसगोत्रे प्रवरत्रयसंयुताः।
आङ्गिरसोऽम्बरीषश्च यौवनाश्व इति त्रयः ॥४०॥
अथ पत्नीव्रतगोत्रे देवानीको दसायकः।
सन्तकश्चेति प्रवरा महादानपरायणाः ॥४१॥
तेषां शाखाः प्रशाखाश्च पुत्रपौत्रादयो द्विजाः।
जज्ञिरे बहवो लोके नूत्नशाखावलम्बिनः ॥४२॥

धर्मसावर्णिगोत्रीयाः प्रवरा ह्यभवँस्त्रयः ।
वैतहव्यः सावेतसो भारद्वाजश्च ते ह्यमी ॥४३॥
एतान् विसृज्य च विप्रा नूतनप्रवरमार्गगाः ।
भविष्यन्ति गते काले सर्वे कालविडम्बनम् ॥४४॥
शृणु लक्ष्मि ! द्विजानेतान् धर्मारण्येऽन्यभूतले ।
यक्षरक्षःपिशाचाद्या उद्वेजयन्ति वै तदा ॥४५॥
जृम्भको नाम यक्षोऽभूद् धर्मारण्यसमीपतः ।
उद्वेजयति नित्यं स धर्मारण्यनिवासिनः ॥४६॥
तद्दुःखं तैर्द्विजाग्र्यैश्च देवेभ्यो विनिवेदितम् ।
पत्नीव्रतं पुरः कृत्वा सुरा वेधःसभां ययुः ॥४७॥
ब्रह्मा ययौ तु गोलोकं श्रीकृष्णं तज्जगाद ह ।
श्रीकृष्णेन तदा गोप्यो लक्षशस्तत्र प्रेषिताः ॥४८॥
तास्तु दिव्याः कृष्णपत्न्यः कृष्णाज्ञावर्तनाः प्रियाः ।
कृष्णनारायणपातिव्रत्यधर्मावगाहिताः ॥४९॥
सत्यः प्रसन्ना दिव्याङ्ग्यश्चाययुर्वेधसो गृहम् ।
ब्रह्माज्ञया च ताः सर्वा आययुः कन्यका दिवम् ॥५०॥
तत्र विश्वावसुकन्याः मानस्यश्चाऽभवन् क्षणात् ।
जातिस्मरा युवत्यश्च सुताः सर्वांगसुन्दराः ॥५१॥
ब्रह्मचर्यधर्मपराः कृष्णपत्न्यः कुमारिकाः ।
रक्षणार्थं हि विप्राणां लोकानां हितकाम्यया ॥५२॥
योगिन्यो देवगन्धर्वैः स्थापिता धर्मभूमिषु ।
गोत्रान् प्रतितथैकैका स्थापिता योगिनी सती ॥५३॥
यस्य गोत्रस्य या शक्तिः पालने रक्षणे क्षमा ।
सा तस्य कुलदेवीति साक्षात्तत्र बभूव ह ॥५४॥
श्रीमाताद्याः शृणु लक्ष्मि ! ताः सर्वा द्वादशाऽब्दिकाः ।
श्रीमाता, तारणी, आशापुरी, चेच्छाऽऽर्तिनाशिनी ॥५५॥
पिप्पली, विकरावशा, जगन्माता, तु सप्तमी ।
महामाता, तथा सिद्धा, भट्टारिका, कदम्बिका: ॥५६॥
विकरा, मिष्टा, सुपर्णा, मातंगी, वसुजा, तथा ।
महादेवी, तथा वाणी, भद्री, च मुकुरेश्वरी, ॥५७॥
संहारी, च महाशक्ति,र्महाबला, तथा पुनः ।
चामुण्डा तु महादेवी, इत्येता गोत्रमातरः ॥५८॥
ब्रह्मविष्णुमहेशाद्यैः स्थापिता विप्ररक्षणे ।
ताः पूजयन्ति विप्रेन्द्रा वैष्णवीर्भगवत्सतीः ॥५९॥
अथ यज्ञेषु गव्यार्थं ब्रह्मा लोकपितामहः ।
सस्मार कामधेनुं तु कामधेनुः समाययौ ॥६०॥
ब्रह्मा तां कथयामास गव्यार्थं तु प्रतिद्विजम् ।
एकैकां कामधेनुं च देहि मातः प्रसीद मे ॥६१॥

तथेत्युक्त्वा कामधेनुः प्राविश्चकार पुत्रिकाः ।
नन्दिन्यो लक्षशः श्वेताः प्राविर्भूताः सुयौवनाः ॥६२॥
संकल्पमात्रात् सवत्सा दोग्ध्र्यो गव्यप्रदाः शुभाः ।
प्रावर्तन्त शुभा यज्ञा देवास्तृप्ताः सुपायसैः ॥६३॥
अथ ब्राह्मणवर्णानां सेवकाश्च द्विजातयः ।
ब्राह्मणैर्मानसास्तत्रोत्पादिता वणिजोऽयुताः ॥६४॥
सोपवीताः सशिखाश्च सर्वतत्त्वविशारदाः ।
द्विजभक्ताः सदाचारा युवानश्च तपोन्विताः ॥६५॥
एकैकस्मै द्विजायैवाऽर्पितं ह्यनुचरद्वयम् ।
वाडवस्य तु यद्गोत्रं गोत्रं चानुचरस्य तत् ॥६६॥
ब्रह्मणा शिष्यता तेभ्यश्चोपदिष्टा हिताय हि ।
कुरुध्वं वचनं त्वेषां दद्ध्वं च यदिच्छितम् ॥६७॥
समित्पुष्पकुशादीनि ह्यानयध्वं दिने दिने ।
अनुज्ञयैषां वर्तध्वं माऽवज्ञां कुरुत क्वचित् ॥६८॥
इत्येवं ते वर्तमाना ब्रह्मचर्यपरायणाः ।
सेवन्ते ब्राह्मणान् सर्वे वैष्णवा व्रतशालिनः ॥६९॥
परिग्रहार्थं तेषां वै वेधसा च वृषेण च ।
गन्धर्वकन्यका रम्या दारास्तत्रोपकल्पिताः ॥७०॥
विश्वावसोः कन्यकास्ता विप्रवध्वः पतिव्रताः ।
षष्टिकन्यासहस्राणि स्नुषारूपास्तदाऽभवन् ॥७१॥
श्वश्रूरूपास्तथा चान्या मातरो विप्रयोषितः ।
चत्वारिंशत्सहस्राणि कन्यानामभवन् प्रिये ॥७२॥
श्रेष्ठा देव्योऽथ योगिन्यो मातृरूपाश्च रक्षिकाः ।
धर्मारण्ये लक्षशस्ताः स्त्रियः कृष्णपतिव्रताः ॥७३॥
एवं गृहस्था अभवन् पुत्रपौत्रादिविस्तराः ।
सर्वाः पतिव्रता नार्यः पत्नीव्रताश्च पूरुषाः ॥७४॥
एवं गृहस्थविप्रेषु वसमानेष्वरण्यके ।
उपद्रवं परं चक्रे राक्षसो लोलजिह्वकः ॥७५॥
महादंष्ट्रो महाकायो विद्युज्जिह्वो भयंकरः ।
तं तु नाशयितुं देव्यो विप्ररक्षणतत्पराः ॥७६॥
त्रिशूलवरधारिण्यः शंखचक्रगदायुताः ।
कशाखड्गयुताश्चान्याः पाशांकुशयुतास्तथा ॥७७॥
काश्चित् परशुहस्ताश्च दिव्यायुधधराश्च ताः ।
युयुधुः राक्षसेनात्र सस्मरुश्च नरायणम् ॥७८॥
विष्णुरागत्य चक्रेण मारयामास राक्षसम् ।
विप्रास्तु संहताश्चैकनगरे वासमाचरन् ॥७९॥
धर्मारण्यं पुरा यत्तु सत्यमन्दिरपत्तनम् ।
नगरं विप्रवासं सुदिव्यं स्वर्गसमं ह्यभूत् ॥८०॥

अन्या नगररक्षार्थे योगिन्यः स्थापिता यथा ।
मदारिकायां श्रीमाता, शान्ता नन्दापुरे तथा ॥८१॥
सावित्री, ज्ञानजा चापि, गात्रायी, पक्षिणी तथा, ।
छत्रजा, चूटिका, द्वारवासिनी, पिप्पला तथा ॥८१॥
शीहोरी, शापुरी, चेता, रक्तवस्त्रा, भयंकराः ।
आनन्दा च, तथौंकारा, तथा च धर्मपुत्रिका, ॥८३॥
श्यामला, चेति ता रक्षां कुर्वन्ति धर्मदेशिताः ।
अथ कर्णाटनामाऽभूद् राक्षसो विप्रपीडकः ॥८४॥
योगमालिनी तं विद्रावयामास च दक्षिणाम् ।
तन्नाम्ना सोऽभवद् देशः कर्णाटक इतिप्रथः ॥८५॥
तया तूत्पादिताः क्रूरा ब्रह्मचारिण्य एव ताः ।
शाकिनी डाकिनी चापि काकिनी हाकिनी तथा ॥८६॥
एकिनी लाकिनी चैताः शक्तयो दैत्यनाशिकाः ।
धर्मारण्ये प्ररक्षार्थे धर्मदेवेन वासिताः ॥८७॥
एताः पतिव्रताः सर्वा रुद्रकान्तस्य सेविकाः ।
विप्राणां रक्षिका नित्यं सतीवंशस्य रक्षिकाः ॥८८॥
तया चोत्पादिता लक्ष्मि ! तदन्याश्च पतिव्रताः ।
रुद्रव्रता महादेव्यो धर्मारण्यकृताश्रयाः ॥८९॥
ता एता ब्रह्मचारिण्यः कन्यकाः कुलदेवताः ।
रक्ष्यन्ते सर्वदा याभिर्विप्रकुलानि भूतले ॥९०॥
भट्टारिकी तथा छत्रा औविका ज्ञानजा तथा ।
भद्रकाली च माहेशी सिंहोरी धनमर्दिनी ॥९१॥
गात्रा शान्ता शेषदेवी वाराही भद्रयोगिनी ।
योगेश्वरी मोहलज्जा कुलेशी शकुलाचिता ॥९२॥
तारणी कनकानन्दा चामुण्डा च सुरेश्वरी ।
दारभट्टारिकेत्याद्याः प्रत्येकाः शतधा पुनः ॥९३॥
उत्पन्नाः शक्तयः सर्वा धर्मारण्यादिकाश्रयाः ।
अथ धर्मपिता चक्रे धर्मारण्ये महाक्रतुम् ॥९४॥
तत्र देवाश्च पितरः ऋषयो मुनयो नराः ।
मनवाद्याश्चतुर्दशभुवनेशाः समाययुः ॥९५॥
तत्राचार्ये त्वांगिरसं मार्कण्डेयं चकार सः ।
अत्रिं च कश्यपं चापि होतारं समकल्पयत् ॥९६॥
जमदग्निं गौतमं च अध्वर्युं समकल्पयत् ।
भरद्वाजं वशिष्ठं च प्रत्यध्वर्युं प्रकल्पयत् ॥९७॥
नारदं चापि वाल्मीकिं प्रेरितारमकल्पयत् ।
ब्रह्मासने तु ब्रह्माणं स्थापयामास धर्मराट् ॥९८॥
क्रोशचतुष्कमात्रां सुवेदीं कृत्वा सुरैस्ततः ।
द्विजाः सर्वे समाहूता जापकाः पाठकास्तथा ॥९९॥
द्वारपाला गणेशस्कन्देन्द्रजयन्तकाः कृताः ।
ततो रक्षोघ्नमन्त्रेण हूयते हव्यवाहने ॥१००॥
जुहुवुस्ते तदा देवा वेदमन्त्रैर्हि पद्मजे ।
तिलांश्च यवमिश्रांश्च मध्वाज्येन सुमिश्रितान् ॥१०१॥
आधारावाज्यभागौ च हुत्वा चापि ततः परम् ।
द्राक्षेक्षुपूगनारिङ्गजम्बीरं बीजपूरकम् ॥१०२॥
उत्तरतो नारिकेलं दाडिमं च यथाक्रमम् ।
मध्वाज्यं पयसा युक्तं कृशरं शर्करायुतम् ॥१०३॥
तण्डुलैः शतपत्रैश्च कृत्वा यज्ञं सदक्षिणम् ।
उत्तमं च शुभं स्तोमं वैष्णवं च जगुस्तदा ॥१०४॥
अवारिताऽन्नमददद्दीनान्धकृपणेष्वपि ।
पायसं शर्करायुक्तं साज्यशाकसमन्वितम् ॥१०५॥
मण्डका वटकाः पूपास्तथा वै वेष्टिकाः शुभाः ।
सहस्रमोदकाश्चापि फेणिका घुर्घुरादयः ॥१०६॥
ओदनश्च तथा दाली आढक्यादिकृतद्रवा ।
तथैव मुद्गदाली च पर्पटा वटिका तथा ॥१०७॥
सपिप्पलीलवंगमरीचानि लोह्यकानि च ।
कुल्माषा वेल्लकाश्चापि कोमला वालकाः शुभाः ॥१०८॥
कर्कटिकाश्चार्द्रकाश्च मरिचेन समन्विताः ।
विविधानि सुशाकानि भाजाश्च विधिधास्तथा ॥१०९॥
पायसानि चैक्षवानि गोधूमानि सहस्रशः ।
मिष्टान्नानि चणकानां भोजयित्वा द्विजान् वृषः ॥११०॥
अष्टादशप्रलक्षांश्च तथाऽन्यान् कोटिशो जनान् ।
कृत्वाऽवभृथकं स्नानं यज्ञफलमवाप सः ॥१११॥
यज्ञं कृत्वा ययुः सर्वे स्वस्वस्थानानि देहिनः ।
श्रवणात्पठनाच्चास्य विष्णुयागफलं भवेत् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने धर्मारण्ये श्रीकृष्णदासीनां पतिव्रतानां गान्धर्वीभूतानां कुलदेवीमण्डलत्वं, तथा विप्रादीनां गोत्रप्रवरादिः, देवीकृतो लोलजिह्वराक्षसनाशः, योगिनीनां स्थापना, धर्मदेवकृतयज्ञश्चेत्यादिनिरूपणनामा चत्वारिंशदधिकचतुश्शततमोऽध्यायः ॥ ४४० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! यथा स्त्रीणां कृष्णस्याऽऽराधन तथा ।
येन मुक्तिर्भवेच्चापि तं धर्मं प्रवदाम्यहम् ॥ १ ॥
धर्मोढा या भवेत् पत्नी दशदोषविवर्जिता ।
अक्लीबाऽव्यङ्गिनी शस्ता महारोगाद्यदूषिता ॥ २ ॥

अनिन्दिता शुभकला चक्षूरोगविवर्जिता ।
बाधिर्यहीना चपला कन्या मधुरभाषिणी ॥ ३ ॥
दूषणैर्दशभिर्हीना यथोक्तविधिना नरैः ।
विवाहिता तु सा पत्नी गृहिणी ख्यायते सती ॥ ४ ॥
पुण्यकार्येषु सर्वेषु प्रथमा सा प्रतिष्ठति ।
तया सुविहितो धर्मः सम्पूर्णफलदो भवेत् ॥ ५ ॥
कार्यं स्त्रीभिः सदा कृष्णं संस्मृत्य पञ्चयज्ञकम् ।
स्नानं च तर्पणं चापि वह्निहोमोऽच्युताऽर्चनम् ॥ ६ ॥
अतिथेः सत्कृतिश्चेति पञ्चयज्ञान्न संत्यजेत् ।
पञ्चयज्ञैस्तु सन्तुष्टा भवन्ति पितृदेवताः ॥ ७ ॥
स्त्रियाः पतिव्रतायास्तु पतिशुश्रूषया मुदा ।
पत्यात्मके हरौ तुष्टा भवन्ति पितृदेवताः ॥ ८ ॥
पतिव्रताया देहे तु सर्वे देवा वसन्ति हि ।
अतस्तया स्वामिना युक्तया धर्मस्य चागमः ॥ ९ ॥
उभयोर्मानसे चैक्ये सन्तुष्टाः पितृदेवताः ।
सर्वकार्यप्रसिद्धिश्च फलं सम्पद्यते शुभम् ॥१०॥
समानजातिसंभूता पत्नी विवाहिता भवेत् ।
तस्या भर्ताऽर्धभागी स्याद् धर्मकार्येषु सर्वथा ॥११॥
अर्धदेहाधिकारोऽस्यास्तेन धर्मार्धधारिणी ।
पतिर्धर्मार्धधारी च द्वयोः शुभेऽशुभेऽपि च ॥१२॥
याऽनुगच्छति भर्तारं मृतं सुतपसा प्रिये ! ।
साध्वी महासती ज्ञेया यया तूद्ध्रियते कुलम् ॥१३॥
यं कंचिद्वा पतिं मृतं धृता वाऽथ विवाहिता ।
वैश्वानरस्य मार्गेण सा तमुद्धरते पतिम् ॥१४॥
यथा तु तारको मज्जन्तं समुद्धरते जलात् ।
तथा चोद्धरते साध्वी भर्तारं याऽनुगच्छति ॥१५॥
या कन्या स्वयमुद्यम्य पित्रा दत्ता वराय सा ।
विवाहविधिनोदूढा पितृदेवार्थसाधिनी ॥१६॥
विवाहा दशधा प्रोक्तास्तदन्यतममेव या ।
अवलम्ब्य पतिं प्राप्ता सा समुद्धरते कुलम् ॥१७॥
पुनर्विवाहिता साऽपि सती चेत् कुलतारिणी ।
क्रयक्रीता भवेद् दासी किन्तु चेत् सा विवाहिता ॥१८॥
सती प्रोक्ता धर्मवती सा समुद्धरते कुलम् ।
पवित्रकुलजा रक्ता धर्मोढा यदि साध्विका ॥१९॥
सा पुनाति कुलं सर्वं पातिव्रत्यप्रभावतः ।
प्राजापत्यस्तथा ब्राह्मो दैवाऽऽर्षौ ते सदुत्तमाः ॥२०॥
गान्धर्वश्चासुरश्चापि राक्षसश्च पिशाचकः ।
प्रातिभो घातकश्चेति विवाहाः कथिता दश ॥२१॥

औरसः क्षेत्रजश्चापि दत्तः कृत्रिम इत्यपि ।
गूढोत्पन्नोऽपविद्धश्च कानीनश्च सहोढजः ॥२२॥
क्रीतः पौनर्भवश्चापि पुत्रास्ते दशधा मताः ।
एवं सुतसुतादारपतिपितृकुटुम्बिनः ॥२३॥
पातिव्रत्येन तीर्यन्ते सतीभिः कृष्णसेवया ।
देववद् दिवि दीव्यन्ति स्त्रियः सत्यः पतिव्रताः ॥२४॥
सर्वासां योषितां लक्ष्मि कृष्णभक्तिः सदा शुभा ।
शुद्ध्यर्थं सद्गुरोः सेवा गुरुपूजा सदोदिता ॥२५॥
स्वर्गार्थं स्वामिनः सेवा पतिपूजा सदोदिता ।
मोक्षार्थं श्रीकृष्णनारायणार्पणं तु योषिताम् ॥२६॥
एवं धर्मं समाश्रित्य शूद्रः पैजवनः पुरा ।
साध्व्या स्वभार्यया साकं कृष्णलोकं ययौ पुरा ॥२७॥
आसीत् स धर्मनिरतो विष्णुब्राह्मणपूजकः ।
न्यायाऽऽगतधने तुष्टः स्त्रीयुतः सेवकः सताम् ॥२८॥
सत्यवादी वैष्णवोऽभूत् तस्य भार्या च सुन्दरी ।
धर्मोढा तूक्तविधिना समानकुलजा शुभा ॥२९॥
पतिव्रता महाभागा देवद्विजहिते रता ।
काश्यां सम्बन्धिता कन्या वैजयन्त्यां विवाहिता ॥३०॥
सा धर्माचरणे दक्षा वैष्णवव्रतधारिणी ।
भर्तारं श्रीकृष्णनारायणं ज्ञात्वा प्रसेवते ॥३१॥
अर्थाप्तिः सुकृतपुण्यैर्वर्धतेऽस्या गृहे सदा ।
वाणिज्येन सफलेन व्यापारेण सतीपतेः ॥३२॥
एवमर्थश्च बहुधा संजातो धर्मदर्शिनः ।
पुत्रद्वयं च सञ्जातं पुत्र्यश्चेति च वैष्णवाः ॥३३॥
कृष्णनारायणभक्ताः पितृसेवापरायणाः ।
पित्रोः शुश्रूषणे रक्ताः पत्नी पतिव्रता सदा ॥३४॥
सर्वे संपूज्यपूजां संकुर्वन्ति सेवनादिकम् ।
कृष्णनारायणं स्मृत्वा पूजयन्त्यतिथींस्तथा ॥३५॥
ऋद्धिमद्भवनं तेषां धनधान्यसमन्वितम् ।
गृहागतो न विमुखो येषां याति कदाचन ॥३६॥
शीतकाले धनं प्रादुरुष्णकाले जलाऽन्नदाः ।
वर्षाकाले वस्त्रदाश्च बभूवान्नप्रदाः सदा ॥३७॥
वापीकूपतडागादिप्रपादेवगृहाणि च ।
कारयन्त्युचिते काले कृष्णभक्तिव्रतस्थिताः ॥३८॥
पंक्तिभेदो गृहे नैषां समभागेन तोषिणः ।
एवं वै वर्तमानानां गृहे श्रीगालवो मुनिः ॥३९॥
समाजगाम बहुभिर्भक्तशिष्यैः समावृतः ।
सुन्दरीसहितः पैजवनः पुत्रादिसंयुतः ॥४०॥

स्वागतं कृतवाँस्तस्य चाभ्युत्थानासनादिभिः ।
अतिहर्षं गतस्तत्र पादयोर्जलमार्पयन् ॥४१॥
कृतार्थं मानयन् नैजं कुटुम्बं समुवाच सः ।
अद्य मे सफलं जन्म जातं जीवितमुत्तमम् ॥४२॥
अद्य मे सफलो धर्मः सकुलश्चोद्धृतस्त्वया ।
मम पापसहस्राणि दृष्ट्या दग्धानि ते मुने ! ॥४३॥
हरिर्नारायणः कृष्णो गालवो मे गृहागतः ।
गृहं मम गृहस्थस्य कृष्णेन पावितं त्वया ॥४४॥
इति श्रुत्वा महाभक्त्या गतमार्गपरिश्रमः ।
प्रसन्नो गालवः शूद्रं पप्रच्छ कुशलं बहु ॥४५॥
कच्चित्ते कुशलं सौम्य मनो धर्मे प्रवर्तते ।
कृष्णार्थकृतसर्वस्वाः कच्चित्ते दारबालकाः ॥४६॥
कृष्णनारायणे कच्चिद्भक्तिस्ते दानपूर्विका ।
धर्मार्थकाममोक्षेषु सस्नेहं मानसं नु वै ॥४७॥
विष्णुपादोदकं नित्यं शिरसा धार्यते नु किम् ।
सतीयं सर्वथा कृष्णकान्तसेवापरा नु किम् ॥४८॥
सत्या वै धार्यते सर्वं सत्या संरक्ष्यते तथा ।
सत्या निस्तीर्यते दुःखात् सती सुखादिसाधनम् ॥४९॥
स इत्युक्तः पैजवनः प्रत्युवाच कृपा तव ।
यन्मे सर्वं तथा स्वास्ते विशेषोऽनुग्रहस्तव ॥५०॥
शाधि मां सेवकं मत्वा सेविकां तु सतीमिमाम् ।
सेवकाँश्च सुतान् सुताः प्रस्तुतागमकारणम् ॥५१॥
गालवस्तान् समुवाच यस्य भक्तिः सदाऽच्युते ।
यस्य भार्या सती साध्वी पतिकृष्णपतिव्रता ॥५२॥
यस्य पुत्रा हरेर्दासा दास्यः पुत्र्यः सतां हरेः ।
कुटुम्बं बान्धवाद्याश्च वैष्णवा यस्य पावनाः ॥५३॥
एतेषां संगमे तीर्थे मुक्तिः क्वापि न दुर्लभा ।
कुटुम्बं वैष्णवं यद्धि ब्रह्मपिण्डमिदं शुभम् ॥५४॥
यस्य संदर्शनादेव पूतो भवति चाघवान् ।
निर्गुणस्य कृष्णनारायणस्य योगतस्तव ॥५५॥
सर्वं निर्गुणतां प्राप्तं भक्तियुग् दासधर्मतः ।
स्त्रीणामपि च साध्वीनां भक्तियुग् दासधर्मता ॥५६॥
प्रेमधर्मो वल्लवीनां शबर्याश्च हरावभूत् ।
पिङ्गलायाः प्रेमधर्मो मुक्तिदः पावनोऽभवत् ॥५७॥
कृष्णश्वेतगिरेः पुत्र्याः प्रेमधर्मोऽभवच्छिवे ।
तेन वर्षसहस्रान्ते सम्प्राप सा महेश्वरम् ॥५८॥
पार्वत्याश्च प्रभायाश्च ललितायास्तथा प्रिये ! ।
लक्ष्म्या जयाया माणिक्यायाश्च स्नेहोऽतिकाष्ठगः ॥५९॥
अभवच्छ्रीकृष्णनारायणेऽवापुश्च ताः पतिम् ।
वृन्दायाश्च तुलस्याश्च विवाहः स्नेहमूलगः ॥६०॥
तुलसीपत्रकैः कृष्णार्चया मोक्षो भवेद् ध्रुवम् ।
स्नेहमूलो हरौ मोक्षः सत्याः पत्यौ तथा मतः ॥६१॥
वृन्दाद्या अपि लोकानां तारकाश्चाऽभवन् क्षितौ ।
शृणु भक्तैकदा सर्वे पितरो हि पुरा युगे ॥६२॥
ययुर्भोजनतृप्त्यर्थं ब्रह्माणं शरणं तदा ।
तृप्त्यर्थं सलिलं यद्यद् वरुणाधिष्ठितं शुभम् ॥६३॥
विना तु तर्पणैर्नैव ग्राह्यं नो पितॄणां यतः ।
केनापि दीयमानं तद् ग्राह्यं भवति तृप्तिकृत् ॥६४॥
तस्मादस्मत्प्रतृप्त्यर्थं किञ्चिद्विधेहि पूर्वज ।
इत्यर्थितस्तदा ब्रह्मा श्रीकृष्णशरणं ययौ ॥६५॥
प्रार्थयामास तृप्त्यर्थं पितॄणां तु जलाप्तये ।
तदा भगवता श्रीमत्कृष्णनारायणेन वै ॥६६॥
क्षणं विचार्य कथितं सर्वात्मा भगवानहम् ।
सर्वेषां तृप्तिकृच्चास्मि नान्यो भवति तादृशः ॥६७॥
तस्मान्मया यथा तेषां तृप्तिः स्यात् कार्यमेव तत् ।
सर्वे जनाश्च मां कुत्र प्राप्स्यन्ति दिव्यरूपिणम् ॥६८॥
तस्मान्मया शुभं रूपं जलतर्पणहेतवे ।
धारणीयं जगत्प्राणिदत्तकल्याणकृद्भवेत् ॥६९॥
विचार्येत्थं स्वयं कृष्णोऽश्वत्थरूपो बभूव ह ।
पिप्पलो मूर्तिमान् भूत्वा दिव्यदेहो जनार्दनः ॥७०॥
रैवताद्रौ कृष्णनारायणदामोदरस्थले ।
द्वाभ्यां पूर्वं कृतं श्राद्धं तत्र नारायणे ह्रदे ॥७१॥
तस्थौ तदा प्लक्षमूले कृष्णद्वयेन मन्त्रतः ।
जलं प्रदत्तं तीर्थस्य तृप्तास्ते पितरस्ततः ॥७२॥
एवं श्रीमत्कृष्णनारायणः श्रीभगवान् स्वयम् ।
प्लक्षाऽवतारं धृतवान् रैवताद्रौ पुरा युगे ॥७३॥
अथर्षिभिर्जलदानं पिप्पलस्य सदा कृतम् ।
पिप्पलेऽर्पितसलिलं त्रैलोक्यां प्राप्यते गतैः ॥७४॥
अथ देवा महेन्द्राद्याः शिवाद्या वैष्णवास्तथा ।
कृष्णं लोकयितुं तत्र ययुर्नारायणे ह्रदे ॥७५॥
स्वर्णरेखानदीतीरे वने कृष्णः प्रमार्गितः ।
अन्वेष्यमाणोऽपि हरिः कैश्चित्तत्र हि मायया ॥७६॥
वृक्षरूपो हि भगवान् विज्ञातो नैव नैव च ।
ततो देवा बृहस्पतिं प्राहुर्वै भगवान् हरिः ॥७७॥
द्रुमतां संगतः सोऽयं कथं द्रष्टुं हि शक्यते ।
तदा बृहस्पतिः प्राह वृक्षश्चेद् द्रष्टुमीप्स्यते ॥७८॥

वृक्षनेत्रैर्वृक्षरूपो हरिः प्रत्यक्षतां व्रजेत् ।
इत्युक्तास्ते सुराः सर्वे नारायणह्रदाऽन्तिके ॥७९॥
वृक्षरूपधरा जातास्तदा कृष्णं प्रवीक्षितुम् ।
श्रीस्तत्र तुलसीरूपा पार्वतीभालबिन्दुजः ॥८०॥
महातरुर्बिल्वसंज्ञः पार्वती बिल्वरूपिणी ।
जाता तत्र तदा ब्रह्मा वटरूपो बभूव ह ॥८१॥
सावित्री तिलगुल्माख्या सतिला संबभूव ह ।
महेन्द्रो यववृक्षोऽभूच्चूतवृक्षाः प्रजेश्वराः ॥८२॥
गन्धर्वा मलयवृक्षा अगुरुश्च गणाधिपः ।
समुद्रा वैतसवृक्षा यक्षाः पुन्नागभूरुहाः ॥८३॥
नागवृक्षास्तदा नागाः सिद्धाः कंकोलकद्रुमाः ।
गुह्यकाः पनसवृक्षाः किन्नरा मरिचद्रुमाः ॥८४॥
यष्टिमधुद्रुः कन्दर्पो वह्निः रक्तांजनद्रुमः ।
यमो विभीतकवृक्षो निर्ऋतिर्बकुलद्रुमः ॥८५॥
वरुणः खर्जुरीवृक्षः पूगवृक्षस्तु मारुतः ।
धनदोऽक्षोटकवृक्षो रुद्रास्तु बदरीद्रुमाः ॥८६॥
सप्तर्षयो महाताला एलाद्रुमाः परे सुराः ।
जम्बूवृक्षास्तदा मेघा अशोका विद्युतोऽभवन् ॥८७॥
प्रियाला वसवो जाता आदित्यास्तु जपाद्रुमाः ।
मदनौ तु तदाऽश्विनीकुमारकौ बभूवतुः ॥८८॥
विश्वेदेवास्तु मधुका राक्षसा गुग्गुलद्रुमाः ।
सूर्यस्त्वर्कद्रुमश्चाथ पलाशश्चन्द्रमाऽभवत् ॥८९॥
मंगलः खदिरो जातश्चापामार्गो बुधोऽभवत् ।
बृहस्पतिस्तदाऽश्वत्थः शुक्रो ह्युदुम्बरोऽभवत् ॥९०॥
शनैश्वरः शमीवृक्षो राहुर्दुर्वात्मकोऽभवत् ।
केतुर्दर्भस्वरूपोऽभूत्तथा फलद्रुमोऽपि सः ॥९१॥
सत्यस्तदा देवपत्न्यो बभूवुर्वल्लयस्तदा ।
विष्णुः शालस्वरूपोऽभूत् ह्यपामार्गोऽस्य वाहनः ॥९२॥
श्रीवत्सोऽभूत् कल्पवृक्षः कार्तिकश्चम्पको ह्यभूत् ।
नारदोऽभूत्पारिजातो गौरी वृन्दाऽभवत्तदा ॥९३॥
लक्ष्मीस्तु मालती जाता धात्री सरस्वती ह्यभूत् ।
अथ स्थलान्तरेऽरण्ये तत्रैव बहुरूपधृक् ॥९४॥
अश्वत्थरूपी भगवान् विष्णुर्जातः सुरूपधृक् ।
वटरूपोऽभवद्रुद्रो ब्रह्मा पलाशरूपधृक् ॥९५॥
धवलद्रुस्तदा नन्दी शंभुर्बिल्वस्वरूपधृक् ।
इन्द्रः शिरीषरूपोऽभून्निम्बवृक्षः प्रभाकरः ॥९६॥
शिवाशिवौ बिल्ववृक्षौ शिवा वृन्दास्वरूपिणी ।
ब्रह्मारुद्रौ वटवृक्षौ ब्रह्मा पलाशरूपवान् ॥९७॥
चन्द्रमाश्च पलाशोऽभून्निम्बार्कौ सूर्यरूपिणौ ।
अश्वत्थरूपौ विष्णुबृहस्पती चेति वै द्विधा ॥९८॥
तत्तद्वृक्षेऽवान्तरजातीयकौ तौ मतौ तदा ।
एते कृष्णं द्रुस्वरूपा द्रुनेत्रैस्तं व्यलोकयन् ॥९९॥
महत्पत्रान्वितोऽश्वत्थो दृष्टो नारायणे ह्रदे ।
कृष्णस्तेन स्वरूपेण जलाऽऽदानस्य हेतवे ॥१००॥
पितॄणां तृप्तिलाभाय वर्तते स्म कृपालयः ।
तन्मूले ब्राह्मणैश्चापि नारायणद्वयेन च ॥१०१॥
पत्नीव्रतेन देवेनार्पितं स्वर्णनदीजलम् ।
तत्सर्वं श्रीकृष्णनारायणार्पितं तु पितृषु ॥१०२॥
प्राप्तं तृप्तिप्रदं जातं तस्मात् पिप्पलमर्चयेत् ।
तद्वंशाश्चापि ते वृक्षाः स्थास्यन्ति पितृमोक्षदाः ॥१०३॥
यावत्कृष्णः पिप्पलद्रुः स्थास्यत्याप्रलयं क्षितेः ।
सर्वेषां मोक्षदाश्चैते देवद्रुमाः सुपूजिताः ॥१०४॥
स्त्रीणां तथाऽन्यवर्णानां मोक्षदाः सेवनाद्धि ते ।
इत्युक्त्वा जलमादाय दत्वा पितृभ्य एव सः ॥१०५॥
कृष्णो ययौ निजं लोकं मूलरूपेण गोरथलम् ।
देवाः स्वं स्वं ययुर्लोकं कृष्णभक्तिपरायणाः ॥१०६॥
गालवस्य मुखात्त्वेतत् पैजवनस्त्रिया श्रुतम् ।
सुन्दर्या च तदा संकल्पितं पतिव्रतं मुहुः ॥१०७॥
यथा वै गालवश्चायं प्रकाशयति देवताः ।
यदि ताः सत्यरूपाः स्युर्द्रुमात्मानः सुरादयः ॥१०८॥
तदा मे दर्शनं भूयात्तेषां तत्तत्स्वरूपतः ।
यद्यहं पतिधर्माऽस्मि पातिव्रत्यपरायणा ॥१०९॥
इति संकल्पिते लक्ष्मि ! सर्वे देवाः समाययुः ।
वृक्षवल्लीस्वरूपाश्च तया दृष्टास्तथात्मकाः ॥११०॥
पुनः संकल्पितं तत्र सुन्दर्या स्यां पतिव्रता ।
तदा गालवशिष्याणां भोजनानि भवन्त्विति ॥१११॥
तावत् तत्र सुमिष्टान्नपर्वतास्त्वभवन् प्रिये ।
सशिष्यो गालवो भुक्त्वा ययौ स्वस्याश्रमं प्रिये ॥११२॥
देवताः स्वस्वरूपाश्च सत्कृताः स्वस्थलं ययुः ।
तदारभ्य सतीनार्यः पूजयन्ति द्रुमान् मुहुः ॥११३॥
यज्ञे पवित्ररूपास्ते देवद्रुमाः सुपुण्यदाः ।
हूयन्ते स्वर्गदा मोक्षप्रदाः सम्पत्प्रदाश्च ते ॥११४॥

इति ते कथितं लक्ष्मि ! स्त्रीणां वृक्षादिपूजनम् ।
पठनाच्छ्रवणाच्चापि स्वर्गमोक्षसुपुण्यदम् ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गालवप्रदर्शितानां स्त्रीमोक्षप्रदसरलोपायानां मध्ये तुलस्यादिविविधवृक्षाणां देवताद्यवतारत्वं तत्पूजनादिना मोक्षश्चेत्यादिनिरूपणनामैकचत्वारिंशदधिकचतुश्शततमोऽध्यायः ॥४४१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पतिकृष्णव्रतं मोक्षप्रदायकम् ।
पावनं कृष्णभक्तं तु सुयज्ञं वैष्णवं परम् ॥ १ ॥
ब्रह्मणस्तु सुतः स्वायंभुवो मनुर्बभूव ह ।
उत्तानपादस्तत्पुत्रस्तत्पुत्रो ध्रुवनामकः ॥ २ ॥
ध्रुवपुत्र उत्कलोऽभून्नारायणपरायणः ।
सहस्रं राजसूयानां पुष्करे स चकार ह ॥३ ॥
तस्य नाम स्वयं ब्रह्मा सुयज्ञं प्रचकार ह ।
स चान्नदाता रत्नानां दाता च सर्वसम्पदाम् ॥ ४ ॥
दशलक्षं गवां चापि रत्नशृंगपरिच्छदम् ।
गवां द्वादशलक्षाणां ददौ नित्यं मुदान्वितः ॥ ५ ॥
षट्कोटीर्ब्राह्मणानां च भोजयामास नित्यशः ।
चोष्यैश्चर्व्यैर्लेह्यपेयैरतितृप्तं दिने दिने ॥ ६ ॥
विप्रलक्षं सूपकारं भोजयामास तत्परम् ।
दिने सुयज्ञयज्ञान्ते षट्त्रिंशल्लक्षकोटयः ॥ ७ ॥
चक्रुः सुभोजनं विप्राश्चातितृप्ताश्च सुन्दरि ।
गृहीतानि तु रत्नानि स्वगृहं बोढुमक्षमाः ॥ ८ ॥
येभ्यः केभ्यो ददुश्चापि बहुशः पथि तत्यजुः ।
विप्रान्येभ्योऽपि सर्वेभ्यो भोजनानि ददुश्च ते ॥ ९ ॥
तथाप्युर्वरितं तत्र त्वन्नराशिसहस्रकम् ।
एवं यज्ञं शुभं कृत्वा सुयज्ञो राजसंसदि ॥१०॥
समुवास महारत्नक्लृप्ते सिंहासने शुभे ।
पट्टवस्त्रैः शोभिते सुचन्दनादिसुगन्धिते ॥११॥
शाखायुक्तैः पूर्णकुंभैः रंभावृक्षैः सुशोभिते ।
चन्दनाऽगुरुकस्तुरीघनसिन्दूरसंस्कृते ॥१२॥
वसुवासवचन्द्रेन्द्ररुद्रादित्यसमन्विते ।
मुनिनारदमन्वादिब्रह्मविष्णुहरान्विते ॥१३॥
एतस्मिन्नन्तरे तत्र विप्र एकः समाययौ ।
रूक्षो मलिनवासाश्च चक्रे नृपं शुभाशिषः ॥१४॥
राजा तं प्रणनामाऽपि नोत्तस्थौ स्ववरासनात् ।
सभासदोऽपि नोत्तस्थुर्मनाग् जहसुस्तं प्रति ॥१५॥
तेन क्रुद्धो द्विजस्तत्र शशाप नृपतिं यथा ।
राज्यभ्रष्टो गलत्कुष्ठी बुद्धिहीनो भवाऽधुना ॥१६॥
तावत्सभासदो नेमुरुत्तस्थुस्तेन भूसुरः ।
तत्याज रोषं राजाऽपि पादयोः पतितस्ततः ॥१७॥
ऋषयस्तत्र तं विप्रं ददुः श्रेष्ठं शुभासनम् ।
पुलहश्च पुलस्त्यश्च प्रचेता भृगुरङ्गिराः ॥१८॥
मरीचिः कश्यपश्चापि वशिष्ठः क्रतुरित्यपि ।
शुक्रो बृहस्पतिश्चापि दुर्वासा लोमशस्तथा ॥१९॥
गौतमश्च कणादश्च कण्वः कात्यायनः कठः ।
पाणिनिर्जाजलिश्चापि ऋष्यशृंगो विभाण्डकः ॥२०॥
तैत्तिरिश्चाप्यापिशलिर्मार्कण्डेयो महातपाः ।
सनकश्च सनन्दश्च वोढुः पैलः सनातनः ॥२१॥
सनत्कुमारो नरो नारायणश्च पराशरः ।
पत्नीव्रतो जरत्कारुः संवर्त्तः करभस्तथा ॥२२॥
भरद्वाजश्च वाल्मीकिरौर्वश्च च्यवनस्तथा ।
अगस्त्योऽत्रिरुतथ्यश्च संकर्ताऽऽस्तीक आसुरिः ॥२३॥
शिलालिर्लांगलिश्चापि शाकल्यः शाकटायनः ।
गर्गो वत्सः पञ्चशिखो जमदग्निश्च देवलः ॥२४॥
जैगिषव्यो वामदेवो वालखिल्याश्च लक्षशः ।
शक्तिर्दक्षः कर्दमश्च प्रस्कन्नः कपिलस्तथा ॥२५॥
विश्वामित्रश्च कौत्सश्चाप्यृचीकोऽप्यघमर्षणः ।
स्वयंप्रकाशो ब्रह्मिष्ठः शतानन्दश्च सुव्रतः ॥२६॥
एते त्वन्ये च मुनयः पितरोऽग्निहविःप्रियाः ।
दिक्पाला देवताः सर्वाः समूचुर्ब्राह्मणं क्रमात् ॥२७॥
तव शापेन विप्रेन्द्र राज्ञो लक्ष्म्या लयो भवेत् ।
ब्राह्मणानां तु हृदयं कोमलं तपसा सदा ॥२८॥
क्षमस्वाऽऽशिषमाधत्स्व तद्गृहं पावनं कुरु ।
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ॥२९॥
पितरस्तस्य देवाश्च वह्निः प्रयान्त्यतोषिताः ।
पश्यन्ति ये वक्रदृष्ट्या त्वतिथिं गृहमागतम् ॥३०॥
दत्वा स्वपापं तस्मै तत्पुण्यमादाय गच्छति ।
राजा स्वगर्वदोषेण नोत्तस्थौ तत्क्षमां कुरु ॥३१॥
राज्यश्रिया विद्यया वा ब्राह्मणं योऽवमन्यते ।
श्रियाहीनो भवेत् सद्यो व्रतनैवेद्यवर्जितः ॥३२॥
दीक्षा व्यर्था भवेत्तस्य धनपुत्रादिहीनता ।
भार्याहीनो भवेच्चापि क्षमस्वाऽस्याऽपराधकम् ॥३३॥

अतिथिं पितरौ देवं विद्वांसं ब्राह्मणं गुरुम् ।
अवमन्येत यः सोऽत्र भक्तिभ्रष्टो भवेद्ध्रुवम् ॥३४॥
अतिथिं ब्राह्मणं दृष्ट्वा नाऽभ्युत्थानं करोति यः ।
प्राप्नोति कौंजरीं योनिमरण्ये सप्तजन्मसु ॥३५॥
शीघ्रं दयां विधायैव राज्ञे देह्याशिषः शुभाः ।
गुरुं वा ब्राह्मणं वापि देवताप्रतिमामपि ॥३६॥
दृष्ट्वा शीघ्रं न प्रणमेत् स भवेत् सुकरो भुवि ।
क्षमस्व सर्वमस्माकं चातिथ्यग्रहणं कुरु ॥३७॥
स्त्रीघ्नगोघ्नकृतघ्नानां गुरुस्त्रीगामिनां तथा ।
ब्रह्मघ्नानां पापभाक् स्यादतिथेरवमानकृत् ॥३८॥
इत्यार्षवाचः संश्रुत्वा राजा पप्रच्छ तान्मुनीन् ।
स्त्रीघ्नादीनां तु किं पापं ब्रूत मां योगिनां वराः ॥३९॥
वसिष्ठः प्राह राजेन्द्र शृणु गोवधजं हि तत् ।
कामतो गोवधे राजन् वर्षं तीर्थे भ्रमेन्नरः ॥४०॥
यवयावकभोजी च करेण तु जलं पिबेत् ।
ततो धेनुशतं दिव्यं ब्राह्मणेभ्यः सदक्षिणम् ॥४१॥
दत्वा मुञ्चति पापात्तु भोजयित्वा शतं द्विजान् ।
प्रायश्चित्ते तु वै चीर्णे सर्वपापान्न मुच्यते ॥४२॥
पापावशेषाद् भवति दुःखी चाण्डाल एव सः ।
गोहत्याद्विगुणं पापं स्त्रीहत्यायां भवेद्ध्रुवम् ॥४३॥
षष्टिवर्षसहस्राणि कालसूत्रे वसेद्धि सः ।
ततो भवेत् सूकरश्च सर्पश्च सप्तजन्मसु ॥४४॥
स्त्रीहत्याद्विगुणं पापं ब्रह्महत्याकृतो भवेत् ।
लक्षवर्षं महाघोरे कुंभीपाके वसेद्धि सः ॥४५॥
विष्ठाकृमिः शताब्दं च सर्पश्च सप्तजन्मसु ।
दोषः कृतघ्ने राजेन्द्र ब्रह्महत्याचतुर्गुणः ॥४६॥
निष्कृतिर्नास्ति राजेन्द्र कृतघ्नानां विनिर्मिता ।
कृतघ्नाः षोडशविधाः सन्ति राजेन्द्र निश्चिताः ॥४७॥
कृते सत्ये च पुण्ये च स्वधर्मे तपसि स्थिते ।
प्रतिज्ञायां च दाने च स्वगोष्ठीपरिपालने ॥४८॥
गुरुकृत्ये देवकृत्ये काम्यकृत्ये द्विजार्चने ।
नित्यकृत्ये च विश्वासे परमधर्मप्रदानयोः ॥४९॥
एतान् यो हन्ति पापिष्ठः स कृतघ्न इति स्मृतः ।
विविधानां कृतघ्नानां नरका विविधा अपि ॥५०॥
कृत्वा शपथरूपं च सत्यं हन्ति न पालयेत् ।
सः कृतघ्नः कालसूत्रे वसत्येव चतुर्युगम् ॥५१॥
सप्तजन्मसु काकश्च सप्तजन्मसु पेचकः ।
ततः शूद्रो महाव्याधिः सप्तजन्मस्वतः शुचिः ॥५२॥
कृत्वा पुण्यं वदत्येव कीर्तिवर्धनहेतुना ।
स कृतघ्नस्तप्तकुण्डे वसत्येव युगत्रयम् ॥५३॥
पञ्चजन्मसु मण्डूकस्त्रिषु जन्मसु कर्कटः ।
ततो मूको महारुग्णो दरिद्रोऽपि ततः शुचिः ॥५४॥
कृत्वा स्वधर्मं यो हन्ति सन्ध्याधर्मविघातकः ।
विष्णुपूजामन्त्रजापनैवेद्यव्रतनिन्दकः ॥५५॥
देवव्रतादिहीनश्च पितृकृत्यादिवर्जितः ।
कृतघ्नः स कुंभीपाके वसत्याकल्पमेव यत् ॥५६॥
सप्तजन्मसु चाण्डालो गृध्नश्च शतजन्मसु ।
सूकरः शतजन्मा च ततश्चाण्डालको भवेत् ॥५७॥
पुनश्च रौरवं गत्वा गर्दभः पञ्चजन्मसु ।
मार्जारो मण्डूकः पञ्चजन्मसु च ततः पुनः ॥५८॥
वृषाणां वाहको विप्रो भूत्वा दुःखानि विन्दति ।
भृत्यद्वारा स्वयं वापि यो विप्रो वृषवाहकः ॥५९॥
स कृतघ्न इति बोध्यः पुण्यहा स यतो मतः ।
ब्रह्महत्यासमं पापं तन्नित्यं वृषताडने ॥६०॥
वृषपृष्ठे भारदानात्पापं तद्द्विगुणं भवेत् ।
सूर्याऽऽतपे वाहयेद् यः क्षुधितं तृषितं वृषम् ॥६१॥
ब्रह्महत्याशतं पापं लभते नाऽत्र संशयः ।
लालाकुण्डे वसत्येव यावच्चन्द्रदिवाकरौ ॥६२॥
विष्ठाभक्ष्यं मुत्रजलं तत्र तस्य भवेत् सदा ।
त्रिसन्ध्यं ताडयेत्तं तु शूलेन यमकिंकरः ॥६३॥
उल्कां ददाति मुखके सूच्या कृन्तति सन्ततम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥६४॥
ततः काकः पञ्चजन्मस्वथैवं बक इत्यपि ।
पञ्चजन्मसु गृध्रश्च शृगालः सप्तजन्मसु ॥६५॥
ततो दरिद्रः शूद्रश्च महारुग्णः शुचिस्ततः ।
सतीनार्या धर्मलोपी कृतघ्नः परिकीर्तितः ॥६६॥
वृषलीशः पुंश्चलीशः कृतघ्नः स मतो द्विजः ।
कृमिदंष्ट्रे वसेत् सोऽपि यावदिन्द्राश्चतुर्दश ॥६७॥
प्रतिमां तां तप्तलौहीमाश्लेषयति नित्यशः ।
ततः शूद्रो भवेद् दुःखी तथा वर्षसहस्रकम् ॥६८॥
कृत्वा तपांसि पुण्यानां हन्ता कृतघ्न उच्यते ।
अन्याचरिततपसां हन्ता कृतघ्न उच्यते ॥६९॥
व्रतघ्नस्य कृतघ्नस्य कुंभीपाकोऽयुताब्दिकः ।
कृत्वा प्रतिज्ञां कार्यस्य दत्वा विश्वासमुत्तमम् ॥७०॥
करोति स्वप्रतिज्ञाया भंगं कृतघ्न एव सः ।
लोहतप्ते तु तं कुण्डे प्रज्वालयति कल्पकम् ॥७१॥

दानं बहुविधं यत्तद् यो नाशयति शाठ्यतः ।
वाग्दानं वस्तुदानं च कन्याज्ञानप्रदानकम् ॥७२॥
हन्ति यः स वसेत् कालसूत्रेऽयुतयुगा ध्रुवम् ।
कृत्वा दत्वा स्ववचनं गोष्ठीं वा हन्ति यो जनः ॥७३॥
कार्यहा गोष्ठीघ्न एव पाशकुण्डेऽयुताब्दिकः ।
गुरुकार्यविहन्ता वै गुरुताडयिता च यः ॥७४॥
गुरुघ्नः स कृतघ्नो वै वह्निकुण्डेऽयुताब्दिकः ।
देवकृत्ये देववृत्तिहरः कृतघ्न उच्यते ॥७५॥
स्वदत्तां परदत्तां वा देवादिवृत्तिहारकः ।
रोमवर्षसहस्रं स शूलप्रोते प्रतिष्ठति ॥७६॥
तप्तांगारं च तद्भक्ष्यं पानं वै तप्तमूत्रकम् ।
तप्तांगारेषु शयनं ताडितो यमकिंकरैः ॥७७॥
ततो विष्ठाकृमिर्भूत्वा वर्षषष्टिसहस्रकम् ।
ततो दरिद्रः कृपणो भूमिप्रजाविहीनकः ॥७८॥
रुग्णो निन्द्यो भवेच्छूद्रः कालान्तरे ततः शुचिः ।
काम्यकृत्यविनेष्टा च स्वपरस्वविनाशकः ॥७९॥
हन्ति यः परकीर्तिं च स्वकीर्तिं च नराधमः ।
स कृतघ्नः काम्यकेष्टापूर्तादिनाशकः स च ॥८०॥
अन्धकूपे महाघोरे वसेदाकल्पमेव हि ।
नकुलगृध्रकीटाद्यैर्भक्षितस्तप्तक्षारपः ॥८१॥
सप्तजन्मस्वतः सर्पः काकः पञ्चस्वतः शुचिः ।
द्विजार्चनस्य यो हन्ता कृतघ्नः स महान्मतः ॥८२॥
ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वाऽपि यो हरेत् ।
अवटोदे वसेत्सोऽपि कृतघ्नः कल्पमेव यत् ॥८३॥
ततो भवेत् सुरापश्च ततः शूद्रस्ततः शुचिः ।
नित्यकृत्यस्य यो हन्ता स कृतघ्नो महत्तरः ॥८४॥
पितृमातृगुरूंश्चापि भक्तिहीनो न पालयेत् ।
न नमेच्च सदा प्रातर्वाचापि ताडयेन्मुहुः ॥८५॥
तथा स्वस्वामिनं वाचा ताडयेत् कुलटा तु या ।
पूज्यपूजाविलोप्तारः कृतघ्नास्ते प्रकीर्तिताः ॥८६॥
वह्निकुण्डे वसन्त्येव यावच्चन्द्रदिवाकरौ ।
ततो भवेज्जलौकाश्च सप्तजन्मस्वतः शुचिः ॥८७॥
विश्वस्य घातनं कुर्यात् कृतघ्नः स महत्तमः ।
मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधाद् भयात्तथा ॥८८॥
सभायां पाक्षिकं वक्ति पुण्यहन्ता कृतघ्नकः ।
सर्वत्रापि च सर्वेषां कृतस्य सुकृतस्य वै ॥८९॥
भोगकृतं च हन्तृत्वं कृतघ्नता प्रकीर्तिता ।
पुण्यहाः कृतहाः प्रोक्तः पुण्यं तु नश्वरं सदा ॥९०॥

तस्मात् कृष्णप्रसादाख्ये शाश्वते न कृतघ्नता ।
शाश्वतं पुण्यमार्थ्यं वै नश्वरं नार्थ्यमेव तु ॥९१॥
मिथ्यासाक्षी पाक्षिकादिर्विश्वासहाश्च पुण्यहाः ।
यावदिन्द्रसहस्रं स सर्पकुण्डे वसेद् ध्रुवम् ॥९२॥
सर्पैस्तु भक्षितो भुंक्ते तद्विण्मूत्रं हि ताडितः ।
मण्डूकः कृकलासश्च सप्तजन्मसु जायते ॥९३॥
ततोऽरण्ये शाल्मलिद्रुर्मूकशूद्रस्ततः शुचिः ।
परदारगमनादि परधर्मावमेलनम् ॥९४॥
परधर्माचरणं वै कृतघ्नत्वे तु गण्यते ।
स्वयोग्यकर्मणां रोधः पराईकर्मसंश्रयः ॥९५॥
कृतघ्नता भवत्येव तद्वाँश्चाण्डालसदृशः ।
कुंभीपाके वसेत्सोऽपि कल्पपर्यन्तमेव यत् ॥९६॥
अगम्यागमकः पश्चाद् भवेन्नपुंसकस्ततः ।
गलत्कुष्ठी सप्तजन्मा शूद्रः स्याच्च ततः शुचिः ॥९७॥
लोहसूर्म्यां पतेच्चापि ततो भवेन्नपुंसकः ।
चाण्डालस्तु ततो भूत्वा शूद्रो भूत्वा ततः शुचिः ॥९८॥
प्रकृष्टदानं कन्यादिदानं स्वर्णादिकाऽर्पणम् ।
कृत्वा तद्धन्ति दानं यः कृतघ्नः स प्रकीर्तितः ॥९९॥
कृतकार्यस्य नाशश्च कृतं जानाति नैव च ।
कृतघ्नः स षोडशधा कथितो भूप सर्वथा ॥१००॥
अतिथेरवमानेन जायते तु कृतघ्नता ।
तद्दोषस्य निवृत्त्यर्थमतिथिः पूज्यतां त्वया १०१॥
गृहे नीत्वा पूज्यतां च तत्पादाब्जे प्रसेव्यताम् ।
गृह्यतां तत्प्रसादश्च पज्जलं संनिपीयताम् ॥१०२॥
अर्ज्यतां चातिथेराशीर्दोषः प्रमार्ज्यतां तथा ।
ततो वनं गम्यतां च पुनः श्रीः प्राप्यतां शुभा ॥१०३॥
स्मर्यतां श्रीकृष्णनारायणस्वामी श्रियाः पतिः ।
दास्यति ते पुनर्भद्रां सम्पत्तिं मोक्षमच्युतः ॥१०४॥
इत्युक्त्वा मुनयः सर्वे ययुः स्वस्थानमेव च ।
सुयज्ञस्तं ननामादौ गृहं संप्राऽऽपयद् द्विजम् ॥१०५॥
पप्रच्छ नामगोत्रादि प्रसाद्य पूजया मुहुः ।
ऋषिः प्राह स्वकं नाम सुतपा इति विश्रुतम् ॥१०६॥
तत्पिता विरूपनामा विश्वरूपश्च तत्पिता ।
त्वष्टा तस्य पिता चापि तस्य पिता च कश्यपः ॥१०७॥
तत्पिता च मरीचिस्तत्पिता तु विश्वसृट् स्वयम् ।
ब्रह्मणः सप्तमश्चाहं पुरुषोऽस्मि भुवः पते ! ॥१०८॥
महादेवो मम गुरुर्विद्यादाता सुमन्त्रदः ।
अभीष्टदेवः श्रीकृष्णनारायणः पतिः प्रभुः ॥१०९॥

तच्चिन्तयामि पादाब्जं न मे वाञ्छाऽस्ति सम्पदि ।
सालोक्यसार्ष्टिसारूप्यसामीप्यं राधिकापतेः ॥११०॥
तेन दत्तं न गृह्णामि विना तत्पादसेवनम् ।
श्रुत्वा सुयज्ञयज्ञे ते मुनीनामागमं नृप ॥१११॥
लालसां विष्णुभक्तिं ते सम्प्रापयितुमागतः ।
केवलानुगृहीतस्त्वं नहि शप्तो मयाऽधुना ॥११२॥
समुद्धृतश्च पतितो घोरे निम्ने भवार्णवे ।
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥११३॥
ते पुनन्त्युरुकालेन कृष्णभक्तास्तु दर्शनात् ।
राजन्निर्गम्यतां गेहाद् देहि राज्यं सुताय तु ॥११४॥
श्रीकृष्णं भज राधेशं तदन्यन्नश्वरं त्यज ।
मच्छापेन महद्राज्यं परित्यज सदाऽनघ ॥११५॥
गलच्छरीरं तपसा कौ क्षितौ स्थितिमत् कुरु ।
राज्याऽऽडम्बरमायाढ्यबुद्ध्या संविरतो भव ॥११६॥
राजा विप्राज्ञया शान्तिं जग्राह विरतिं तथा ।
पप्रच्छ तीव्रसंवेगं गोलोकाऽऽप्तिप्रकारणम् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सुयज्ञराज्ञो राजसूयान्तेऽसत्कृतसुतपोविप्रकृतशापः, पुनस्तत्कृतकृष्णपतिव्रतोपदेशेऽतिथिमहिमा, षोडशविधकृतघ्नता, ऋषिकृतोपदेशश्चेत्यादिनिरूपणनामाद्विचत्वारिंशदधिकचतुश्शततमोऽध्यायः ॥ ४४२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सुयज्ञः सुतपसं प्राह यत्तदा ।
हे मुने ! नश्वरं सर्वं कदा कथं वदाऽत्र मे ॥ १ ॥
साधनं च तथा तीव्रं मोक्षस्य वद तत्परम् ।
इति राज्ञो वचः श्रुत्वा सुतपाः प्राह तत्त्ववित् ॥ २ ॥
शृणु राजन् प्रकृतिजं सर्वं नश्वरमेव यत् ।
पात्रं षट्पलसंभूतं गभीरं चतुरङ्गुलम् ॥ ३ ॥
स्वर्णमाषकृतच्छिद्रं दण्डैश्च चतुरंगुलैः ।
यावज्जलप्लुतं पात्रं तत्कालं दण्ड इत्ययम् ॥ ४ ॥
दण्डद्वयं मुहूर्तं च यामस्तस्य चतुष्टयम् ।
वासरस्त्वष्टभिर्यामैः पक्षस्तैर्दशपञ्चभिः ॥ ५ ॥
मासो द्वाभ्यां च पक्षाभ्यां वर्षं द्वादशमासकैः ।
मासेन वै नराणां तु पितॄणां तदहर्निशम् ॥ ६ ॥
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्तिता ।
वत्सरेण नराणां वै देवानां तु दिवानिशम् ॥ ७ ॥
अयनमुत्तरमहो रात्रिर्वै दक्षिणायनम् ।
युगक्रमानुरूपं च नरादीनां वयो नृप ॥ ८ ॥
कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ।
चत्वारि त्रीणि द्वे चैकं सहस्राणि कृतादिकम् ॥ ९ ॥
अष्टषट्चतुर्द्विशतान्येषां सन्ध्यांशकानि वै ।
वर्षाणि द्वे सहस्रे ते द्वादशाब्दसहस्रकम् ॥१०॥
चतुर्युगं ततो मन्वन्तरं युगैकसप्ततिः ।
दिवसे ब्रह्मणस्ते तु मनवः स्युश्चतुर्दश ॥११॥
यथा दिवा तथा रात्रौ समयो व्येति वेधसः ।
अष्टाविंशतिमनवोऽहर्निशं ब्रह्मणो यतः ॥१२॥
आद्यो मनुर्ब्रह्मपुत्रः स्वायंभुवोऽभवन्नृप ।
संप्राप्य शंकराज् ज्ञानं कृष्णमन्त्रं सुदुर्लभम् ॥१३॥
सम्प्राप्य कृष्णदास्यं च गोलोकं वै जगाम सः ।
स्वारोचिषो मनुश्चापि द्वितीयो वह्निनन्दनः ॥१४॥
प्रियव्रतसुतौ मनू तौ तृतीयचतुर्थकौ ।
पञ्चमो रैवतो जातश्चाक्षुषः षष्ठ ईरितः ॥१५॥
श्राद्धदेवः सूर्यसुतो वैष्णवः सप्तमो मनुः ।
सावर्णिः सूर्यतनयो वैष्णवो मनुरष्टमः ॥१६॥
नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः ।
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः ॥१७॥
ततश्च धर्मसावर्णिर्मनुरेकादशः स्मृतः ।
ज्ञानी च रुद्रसावर्णिर्मनुस्तु द्वादशः स्मृतः ॥१८॥
धर्मात्मा देवसावर्णिर्मनुरेषस्त्रयोदशः ।
चतुर्दशो महाज्ञानी चन्द्रसावर्णिरन्तिमः ॥१९॥
यावदायुर्मनूनां स्यादिन्द्राणां तावदेव तु ।
चतुर्दशेन्द्रावच्छिन्नं ब्रह्मणो दिनमेककम् ॥२०॥
तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ।
तस्यां ब्रह्मनिशायां तु क्षुद्रः प्रलय उच्यते ॥२१॥
देवाश्च मनवश्चात्र लोका नश्यन्ति वै दश ।
एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव तु ॥२२॥
वर्षं कल्पसहस्रं तु ब्रह्मणो जायते नृप ।
एवं शताब्दपर्यंतं परमायुः प्रजापतेः ॥२३॥
ब्रह्मणस्तु निपाते स्याद् वैराजकल्प एककः ।
वैराजस्य शतवर्षमायुस्ततोऽस्य नाशनम् ॥२४॥
दिनं तत्तु महाविष्णोः सोपि वर्षशतस्थितिः ।
ततो नश्यति प्रधानपुरुषस्य दिनं त्विदम् ॥२५॥
तस्य वर्षशते याते प्रकृतिपुरुषस्य वै ।
दिनं भवति तस्यापि शतवर्षोत्तरं लयः ॥२६॥

अक्षरे ब्रह्मणि लीनो जायते मायया सह ।
प्राकृतिको लयः सोऽयं राधा प्रकृतिरुच्यते ॥२७॥
आत्यन्तिको लयो मोक्षः स चातिदुर्लभो नृप ।
एतच्छ्रुत्वा सुयज्ञश्च पप्रच्छ साधनं द्रुतम् ॥२८॥
मोक्षदं किं येन यामि गोलोकं धाम शाश्वतम् ।
सुतपाः प्राह सुयज्ञ ! भज राधां हरिप्रियाम् ॥२९॥
कृष्णप्रेममयीं यस्या वचः कृष्णोऽपि मन्यते ।
शीघ्रं यास्यसि गोलोकं तदनुग्रहसेवया ॥३०॥
श्रीकृष्णं तु समाराध्य चिरेण यान्ति गोदिवम् ।
कृपाराधां तु संसेव्य भक्ता यान्त्यचिरेण वै ॥३१॥
राधांशा तव पत्नी च नाम्ना रासेश्वरीति या ।
पतिव्रता महाभागा गूढा राधाऽस्ति साऽत्र ते ॥३२॥
पत्नीव्रतं परं कृत्वा पालयित्वा तु तद्‌वृषान् ।
विजेष्यसि महामृत्युं राधांशायाः प्रतापतः ॥३३॥
राजन् कथयितुं चैतत् त्वागमो मे विशेषतः ।
रासेश्वरीं तव पत्नीं राधांशां धर्मतो भज ॥३४॥
सा ह्येषा वर्तते साध्वी पश्य दिव्येन चक्षुषा ।
इत्युक्त्वा नृपतेर्नेत्रे पस्पर्श तावदेव सः ॥३५॥
ददर्श राधिकारूपां सतीं पत्नीं पतिव्रताम् ।
आश्चर्यचकितो भूत्वा राधामन्त्रमवाप सः ॥३६॥
ओं श्रीं ह्रीं क्लीं रासेश्वर्यै राधिकायै स्वाहा इति ।
अथ पत्नीव्रतधर्मान् शुश्राव सुतपोमुखात् ॥३७॥
यथा कृष्णस्तथा राधा राधांशाः कृष्णमूर्तयः ।
पातिव्रत्यं यथा कृष्णे नारीदेहस्य सम्मतम् ॥३८॥
तथा पत्नीव्रतधर्मैः कृष्णराधांशसंभवे ।
प्रातरुत्थाय सद्भक्तः संस्मरेद् राधिकां मुहुः ॥३९॥
संस्नापयेत्पूजयेच्च शृंगारयेत् सुभोजयेत् ।
सेवयेत्तोषयेदिष्टप्रदानैः रञ्जयेन्मुहुः ॥४०॥
नीराजयेत् संस्तुवीत स्वापयेत् समवाहयेत् ।
एवं राधां सदा पत्नीव्रतः कृष्णात्मिकां भजेत् ॥४१॥
न गृहं गृहमित्युक्तं गृहिणी गृहमुच्यते ।
राधांशया तया स्मृद्धं सतेजस्कं प्रशोभते ॥४२॥
गृहिणी गृहलक्ष्मीर्वै तां विना गह्वरं गृहम् ।
गृहिण्या तु तमोव्याप्तमपि प्रकाशते गृहम् ॥४३॥
अपि श्वा गृहिणीयुक्तो ग्रामसिंहः प्रजायते ।
अपि रंकः सभार्यस्तु कुटुम्बित्वेन गण्यते ॥४४॥
अपि राजा प्रियाशून्यो निर्वास्यते स्त्रियाः गृहात् ।
किंकरोऽपि गृहमध्ये रक्ष्यते गृहिणीयुतः ॥४५॥

यस्य नास्ति सती भार्या गृहेषु प्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥४६॥
सुशीला सुन्दरी भार्या नास्ति यत्र गृहे ह्यहो ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥४७॥
यस्य पतिव्रता नास्ति पतिसाध्या सुशासिता ।
प्रियाहीनं गृहं शुष्कं पूर्णं बन्धुधनैरपि ॥४८॥
भार्याशून्या वनसमाः सभार्यास्ते गृहा गृहाः ।
गृहिणी तु गृहे दैवे पैत्र्ये कर्मणि पुण्यदा ॥४९॥
भार्यामूलः क्रियाः सर्वा भार्यामूला गृहास्तथा ।
भार्यामूलं सुखं सर्वं गृहस्थानां गृहे नृप ! ॥५०॥
भार्यामूलाः सदा हर्षो भार्यामूलं च मंगलम् ।
भार्यामूलं च संसारो भार्यामूलं च सौरभम् ॥५१॥
सर्वरत्नप्रधानं तु स्त्रीरत्नं गृहमेधिनाम् ।
यथा जलं, विना पद्मं, तथा भार्या विना गृहम् ॥५२॥
सा तु पत्नी तव सौधे राधांशा विद्यते नृप ।
पतिव्रता सुशीला च सती भागवती प्रिया ॥५३॥
पत्नीव्रतेन धर्मेण राधा कृष्णेन पूजिता ।
स्तुता तथा भवाँश्चापि पूजां करोतु सादरम् ॥५४॥
सा तुष्टा ह्यचिरात् स्वर्गं मोक्षं धाम प्रदास्यति ।
सुयज्ञः प्राह बहुधा श्रुतः पतिव्रतावृषः ॥५५॥
पत्नीव्रतवृषः कीदृक् श्रोतुमिच्छामि मे वद ।
सुतपाश्चाह राजेन्द्र पत्नीं विभाव्य चैश्वरीम् ॥५६॥
प्रातः पत्नीं स्मरेन्नित्यं ध्यायेत्पत्नीं हरिप्रियाम् ।
प्रातः पत्नीमुखं पश्येत् पश्चादन्यान् विलोकयेत् ॥५७॥
पत्न्याः स्नानं त्विष्टजलैः कारयेच्च सुवेषयेत् ।
केशप्रसाधनं तस्याः कारयेद् दासिकादिभिः ॥५८॥
यद्वा पतिः स्वयं तस्याः केशादीन् सम्प्रसाधयेत् ।
शृंगारयेत् सुगन्धाद्यैः सौभाग्यरूपमर्पयेत् ॥५९॥
सन्धारयेद् विभूषाश्च बिन्दुं कज्जलमर्पयेत् ।
भोजयेज्जलपानादि दद्यात्ताम्बूलमर्पयेत् ॥६०॥
यद्यदिष्टं तु तत्सर्वं प्रदद्याद् रञ्जयेत् सदा ।
शरीरमर्दनं कुर्यात् श्रमं निःसारयेत् स्त्रियाः ॥६१॥
प्रक्षालयेत्तु मालिन्यं तथा गात्राणि वाहयेत् ।
मिष्टाऽऽख्यानकथाश्चावैशोनं तस्यै प्रकाशयेत् ॥६२॥
कारयेन्नवधा भक्तिं श्रीकृष्णस्य परात्मनः ।
शय्यां सुखकरीं दद्याद् रत्या संसुखयेद् सतीम् ॥६३॥
अन्यया न प्रभाषेत नान्यां क्वचित् समस्पृशेत् ।
अन्यामुखं न वै पश्येन्नान्यावार्ता समाचरेत् ॥६४॥

नान्यां संचिन्तयेत् क्वापि नान्यासक्तमना भवेत् ।
गृह्णीयान्नाऽपरागन्धं शृणुयान्नाऽपरास्वरम् ॥६५॥
अन्याचरितनृत्यादि पत्नीव्रतो न लोकयेत् ।
अन्यादेहस्तनाद्यं तु न पश्येद्वै कदाचन ॥६६॥
अन्यादत्तं जलान्नादि गृह्णीयान्न कदाचन ।
अन्यास्पृष्टस्ववस्त्रादितैलादि नैव धारयेत् ॥६७॥
अन्याऽर्पितं सुपुष्पादि, दुग्धाद्यपि न संग्रसेत् ।
अन्यया सह यानादौ निषीदेन्न कदाचन ॥६८॥
अन्यया सह मार्गादौ चलेत्सार्थतयाऽपि न ।
क्षेत्रोद्यानाऽऽपणादौ त्वन्यया साकं न संविशेत् ॥६९॥
कार्यं नाऽप्यन्यया सार्धं कुर्यात् पत्नीव्रतो जनः ।
समाजोत्सवशालादौ परायोगं न वै चरेत् ॥७०॥
परादत्तं न वै किञ्चिदुपभुञ्ज्यात् कदाचन ।
पारक्यानां मण्डलेषु तिष्ठेन्नैव कदाचन ॥७१॥
पारक्यास्नानभूम्यादौ स्नानाद्यर्थं न सञ्चरेत् ।
पारक्यारूपसौन्दर्यं न पश्येन्न विचिन्तयेत् ॥७२॥
परया रन्धितं भोज्यं न संग्रसेत् कदाचन ।
न च रात्रौ बहिर्गच्छेन्नाऽन्यागृहगतो भवेत् ॥७३॥
नारीमार्गादिषु राजन्न तिष्ठेच्चत्वरादिषु ।
वाद्यं नाकर्णयेन्नार्या वादित परयोत्सवे ॥७४॥
नान्यां कटाक्षयेत् क्वापि संकेतं ज्ञापयेन्न च ।
नान्यां प्रशंसेत्तस्याश्च गुणगानं न चाचरेत् ॥७५॥
एवं वै सर्वथा त्यागं स्वीयाऽन्यायाः समाचरेत् ।
तद्वै पत्नीव्रतं पुष्टिप्राप्तं भवति मोक्षदम् ॥७६॥
स्वपत्नीं क्रूरयेन्नैव ताडयेन्न कदाचन ।
क्रूरं संश्रावयेन्नैव रुषाऽवमानं नाचरेत् ॥७७॥
परिश्रमेण यत्नेन व्यापारेणाऽन्यकर्मणा ।
कृष्या कैंकर्यकार्येण द्रव्यमुत्पाद्य नैतिकम् ॥७८॥
सम्पोषयेन्निजां पत्नीं भक्ष्ये भेदं न चाचरेत् ।
विलासे रंजने दास्ये क्रीडायां तां सुतोषयेत् ॥७९॥
पत्न्या दत्तं जलान्नादि प्रेम्णा प्रशंस्य भक्षयेत् ।
क्षाराधिक्यादिदोषाँस्तु गणयेन्न कदाचन ॥८०॥
अमृतं चेति मत्वैव गृह्णीयान्नाऽवमानयेत् ।
अकामां बलयेन्नैव चार्तवीं न परित्यजेत् ॥८१॥
सुप्तां प्रबोधयेन्नैव सकामां न तिरश्चरेत् ।
तृष्णया वा प्रसह्यापि नोद्वेजयेत्कदाचन ॥८२॥
यथा यथा प्रसन्ना स्यात्तथा तथा समाचरेत् ।
गृहवस्तु च निःशेषं पत्न्यै समर्पयेद् व्रती ॥८३॥
आत्मानं चार्पयेत्तस्यै सदा सम्मानमाचरेत् ।
मानं रक्षेत् सुष्ठु पत्न्यास्त्वंकारेण न वै वदेत् ॥८४॥
स्वभावैः पीडयेन्नैव नाऽन्यायेन ह्यधिक्षिपेत् ।
नाऽऽक्रोशेल्लंघयेन्नैव पत्नीवचः कदाचन ॥८५॥
नित्यं पत्नीं महादेवीं मत्वा कुर्यान्नमःकृतिम् ।
विषयान् सर्वतो दद्यान्नास्तीति संवदेन्न वै ॥८६॥
सेवाधर्मे चाक्रमादौ न निर्मनस्कतां व्रजेत् ।
यथा नारायणो लक्ष्मीं विना भुंक्ते न वै क्वचित् ॥८७॥
यथा कृष्णः सतीं राधां विना भुंक्ते न वै क्वचित् ।
तथा पत्नीं विना किञ्चित् क्वचिद् भुंज्यान्न वै व्रती ॥८८॥
स्वमेढ्रादि विना पत्नीं नान्ययाऽऽलोकितं भवेत् ।
अन्यया चुम्बितं न स्यात् स्वकपोलाऽऽननाद्यपि ॥८९॥
नाऽऽकृष्टं हृद् भवेत् क्वाऽप्यन्यया वर्तेत वै तथा ।
स्वप्नेऽपि न स्पृशेदन्यां तथाऽन्यां नाऽवलोकयेत् ॥९०॥
धर्मकार्यादिकं दैवं पैत्र्यं पत्न्या सहाऽऽचरेत् ।
न गोपयेद् गृहकार्यं पत्न्यां पत्नीव्रतः क्वचित् ॥९१॥
पत्न्यै निवेद्य यावद्वै कार्यं कुर्यान्न चैकलः ।
पत्न्यास्तु सम्मतिं त्यक्त्वा धर्मव्रतादि नाचरेत् ॥९२॥
पत्नीतन्त्रो भवेन्नित्यं श्रेयोऽर्थे नरकाय न ।
मोक्षार्थं तदधीनः स्यान्नरकार्थे तु न क्वचित् ॥९३॥
सौख्यार्थं मानयेन्नित्यं न क्लेशार्थं कदाचन ।
विश्वासपात्रिकायां विश्वसेन्न कुलटादिषु ॥९४॥
प्राणान् धनानि रत्नादि कुर्यात् तत्करसात् पतिः ।
पत्नी त्वर्धं सदा पत्युः पत्न्यास्त्वर्धं तथा पतिः ॥९५॥
पतिस्तस्या दरीकुक्षौ पुत्ररूपः प्रजायते ।
भुक्ता पत्नी प्रसवित्री प्रसूः पोष्ट्री ततश्च मा ॥९६॥
सदा पाल्या सदा पोष्या सदा रक्ष्या सुवस्तुभिः ।
पत्न्यां कामस्य सन्तोषः शौचं तस्यां नु मेहतः ॥९७॥
पत्न्याः सेवा तपः श्रेष्ठं तथा वार्ता कथाऽमृतम् ।
ईश्वरिण्या रूपमात्रे प्रणिधानं प्रियस्य वै ॥९८॥
अहिंसनं तदद्रोहः सत्यं तस्यामगोपनम् ।
पत्न्यामेकहृदय्यत्वमस्तेयं नैव वञ्चनम् ॥९९॥
पत्न्यां यथेष्टं कामार्थो ब्रह्मचर्यं गृहाश्रितम् ।
पत्न्यर्थं सर्ववस्तूनामादानं चाऽपरिग्रहः ॥१००॥
सुप्तायां तु प्रसुप्तः स्याज्जागृतायां प्रबोधवान् ।
स्नातायां चाप्लवे तुष्टो भुक्तायां भोजनप्रियः ॥१०१॥
पीतायां पानरक्तश्च क्रीडितायां प्रक्रीडकः ।
शृंगारितायां शोभाढ्यो दुःखितायां सुदुःखवान् ॥१०२॥

अस्वच्छायां नातिशुभ्रः सुखितायां सुखान्वितः ।
रुग्णायां तु मनोमान्द्यः प्रोत्फुल्लायां प्रफुल्लितः ॥१०३॥

सस्मितायां सुस्मितश्च तृप्तायां तृप्तिमान् पतिः ।
चिन्तितायां भग्नमना व्रतस्थायां व्रतान्वितः ॥१०४॥

तपःस्थायां तपोयुक्तः सुकृतायां सुसुकृती ।
मृतायां चानुमरणश्रितायां त्वनुसंज्वलेत् ॥१०५॥

एवं पत्नीव्रतव्याप्तः पतिः सन्तारयेत् कुलम् ।
एकोत्तरं शतं स्वस्य पत्न्याश्चोद्धरते तथा ॥१०६॥

भज रासेश्वरीं पत्नीं राधिकांशां सदा नृप ।
ओंनमः श्रीकृष्णनारायण्यै पत्न्यै नमोऽस्तु ते ॥१०७॥

एवं नमन् महासार्वभौमपत्नीव्रतं चरन् ।
जगदुद्धारयन् सर्वे यात्यन्ते ब्रह्म चाक्षरम् ॥१०८॥

पत्नीहस्तजलं पीत्वा स्वर्गलोके महीयते ।
पत्नीपात्रगतं पुत्रं प्राप्य पितृणवर्जितः ॥१०९॥

पत्नीयानं परं प्राप्य परं पदमवाप्यते ।
यावन्ति जलतीर्थानि भूम्यरण्याद्रिजानि वै ॥११०॥

तानि सर्वाणि पत्न्यां वै पतिव्रतायां शेरते ।
धर्मो व्रतं तपो होमो जपः स्वाध्याय आनतिः ॥१११॥

दानं पुण्यं चोपकृतिः सेवा चाशिषः इत्यपि ।
सर्वं पत्नीशरीरेऽस्ति सेविता भावतो यदि ॥११२॥

सा पत्युस्तारिका प्रोक्ता पतिस्तस्याश्च तारकः ।
द्वौ तौ कुलस्य सर्वस्य तारकौ भवबन्धनात् ॥११३॥

तस्मात् पत्नीव्रतं पाल्यं ब्रह्मचर्यं तदेव यत् ।
ब्रह्मप्राप्तिकरं शश्वत्सुखधामप्रदं यतः ॥११४॥

सर्वे देवाः समुनयो देव्यः साध्व्यः पतिव्रताः ।
पत्नीदेहे वसन्त्येव ब्रह्म वसति तत्र च ॥११५॥

पत्नीव्रतश्च पुरुषो विष्णुरूपो न संशयः ।
यथा कृष्णो निर्गुणश्च सर्वजीवाधिदेवता ॥११६॥

सर्वेषां तारको निर्लेपश्च कर्मभिरेव सः ।
तथा पत्नीव्रतस्त्वन्योद्धारकः परमेश्वरः ॥११७॥

अग्नयस्तं विलोक्यैव प्रत्युत्तिष्ठन्ति भावतः ।
सिद्धयो योगसामर्थ्यमैश्वर्याणि ह्यशेषतः ॥११८॥

तत्संकल्पे सफलानि जायन्ते कृष्णवत्सदा ।
पत्नीव्रतः स्वयं कृष्णो वसत्येव सतीव्रते ॥११९॥

रासेश्वरीं सतीं राजन् भज राधांशजां प्रियाम् ।
यथाऽभजद् धर्मदेवः पत्नीं मूर्तिं प्रियाव्रतः ॥१२०॥

शतरूपां मनुर्यद्वत् पत्नीव्रतस्तथा भज ।
इत्युक्त्वा विररामासौ सुतपाः कमले ! प्रिये ! ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सुयज्ञस्य नृपतेः सुतपःऋषिकृतपत्नीव्रतधर्मोपदेशादि-निरूपणनामा त्रिचत्वारिंशदधिकचतुश्शत-तमोऽध्यायः ॥ ४४३ ॥

श्रीलक्ष्मीरुवाच—

सुयज्ञः स कथं जप्त्वा स्तोत्रं पत्नीव्रतो नृपः ।
किमात्मकं तपःकृत्वा मोक्षमवाप तद्वद ! ॥ १ ॥

श्रीनारायण उवाच—

पत्नीव्रतः सुयज्ञः स राधिका मन्त्रमाप यम् ।
जजाप स पुष्करे गत्वा पत्नीयुक्तस्तपःप्रियः ॥ २ ॥
'ओं राधायै स्वाहा' मन्त्रं सदा जजाप भूपतिः ।
ध्यानं चकार राधायाः पूजां चक्रे समादरात् ॥ ३ ॥
श्वेतचम्पकवर्णाभां कोटिचन्द्रसमप्रभाम् ।
शारत्पार्वणचन्द्रास्यां शरत्पंकजलोचनाम् ॥ ४ ॥
पक्वबिम्बाऽधरां मुक्तादन्तपंक्तिविराजिताम् ।
ईषद्धास्यप्रसन्नास्यां रत्नमालादिभूषिताम् ॥ ५ ॥
वह्निशुद्धांशुकाधानां भक्तानुग्रहमण्डिताम् ।
रत्नकेयूरवलयां रत्नमञ्जीररञ्जिताम् ॥ ६ ॥
रत्नकुण्डलसंशोभागण्डकर्णसुभूषणाम् ।
सूर्यप्रभाभगण्डाभां तेजःपरिधिराजिताम् ॥ ७ ॥
रत्नग्रैवेयकैर्युक्तां किरीटमुकुटोज्ज्वलाम् ।
रत्नांगुलीयकशोभां रत्नपाशकशोभिताम् ॥ ८ ॥
मालतीमाल्यग्रथितकबरीभारशोभिताम् ।
रूपानुरूपावयवां सर्वोत्तमांगराजिताम् ॥ ९ ॥
बिन्दुतिलकभालां च पूजितां चन्दनादिभिः ।
कृष्णसौभाग्यसंशोभां कृष्णप्राणस्वरूपिणीम् ॥१०॥
कृष्णभक्तिप्रदां शान्तां वैष्णवीं कृष्णस्नेहिताम् ।
रत्नसिंहासने रासे स्थितां रासेश्वरीं भजे ॥११॥
इति ध्यात्वा ददौ तां वै चोपचाराणि षोडश ।
आसनं वसनं पाद्यमर्घ्यं गन्धानुलेपनम् ॥१२॥
धूपं दीपं सुपुष्पं च स्नानीयं रत्नभूषणम् ।
षट्पञ्चाशत्सुनैवेद्यं ताम्बूलं वासितं जलम् ॥१३॥
मधुपर्कं रत्नतुल्यमुपचाराणि षोडश ।
तथा ददावष्टोत्तरशतं भावेन भक्तराट् ॥१४॥

कृष्णभक्तिं कृष्णदास्यं देहि मे कृष्णपूजिते ।
एवं चक्रे परीहारं ननाम परमेश्वरीम् ॥१५॥
कार्तिकीपूर्णिमायां तु तां सम्पूज्य परेश्वरीम् ।
अचलां श्रियमाप्नोति राजसूयफलं लभेत् ॥१६॥
नारी तां चिन्तयेद् भक्त्या स्वामिसौभाग्यगा भवेत् ।
सा प्रयाति च गोलोकं मुच्येत भवबन्धनात् ॥१७॥
एवं नित्यं सुयशो वै जजाप च पुपूज च ।
तुष्टाव दध्यौ नामानि तदर्थांश्चिन्तयन्मुहुः ॥१८॥
तां तु स्मृद्धिं ददात्येव धां धृतिं पादयोर्व्रजेत् ।
भुक्तिमुक्तिप्रदां कृष्णां नमामीत्यभ्यचिन्तयत् ॥१९॥
पत्रं पुष्पं फलं भुक्त्वा तेपे तपः सुदुष्करम् ।
सर्वं राधामयं चक्रे शतवर्षं नराधिपः ॥२०॥
राधा तुष्टा नृपतेश्च प्रत्यक्षा संबभूव ह ।
प्राह तं तु तदा रासेश्वरीयुक्तं सुयशकम् ॥२१॥
पत्नीव्रतं त्वया राजन् कृष्णवत् पालितं सदा ।
मम सेवा कृता नित्यं भक्त्या चातीव तोषिता ॥२२॥
पूजिता वन्दिता नित्यं ध्याता रासेश्वरी सदा ।
पत्नीव्रतमखण्डं संपालितं कृष्णवत्त्वया ॥२३॥
सौकुमार्ये सदा पुष्पसमां मत्वा ह्यपालयः ।
वस्त्राभूषणशृंगारद्रव्यादिभिः सुतोषिता ॥२४॥
भोज्यपेयसुभोग्यादिदानैः शश्वत्प्रपोषिता ।
गुर्विण्यवस्थामालक्ष्य स्वेष्टदानैः प्रपालिता ॥२५॥
सूतकादिष्ववस्थासु निर्विघ्नेन निभालिता ।
राजसादौ तु भावेषु सर्वभावैः सुरञ्जिता ॥२६॥
तमोवृत्तौ क्षमां धृत्वा क्रोडे कृत्वा प्रसादिता ।
ज्वराद्यवस्थासान्निध्ये क्षणं नैव वियोजिता ॥२७॥
आपत्स्वपि त्वया राजन् दूरीकृता न पार्श्वतः ।
सोढ्वा वै सर्वमत्युग्रं न चापदा सुयोजिता ॥२८॥
आशौचादौ त्वया धर्माच्च्याविता न कदाचन ।
सगर्भायां त्वया नैव व्यर्थकामेन योजिता ॥२९॥
सबालायां कदाचिन्न विना वस्तु त्वया कृता ।
क्षुधिते तृषिते कान्ते न प्रयासे निपातिता ॥३०॥
विभ्रमे बहुचिन्तायां न समुद्वेजिता क्वचित् ।
यथाकालं यथाद्रव्यं सर्वभावेन पूजिता ॥३१॥
वन्दिता तोषिता विश्वक् सुखदानैः प्रसादिता ।
ममैवं सेवया राजन् तुष्टः कृष्णनरायणः ॥३२॥
तेनैव प्रेषिता चाहं राधा त्वां नेतुमागता ।
अहं रासेश्वरी राधा पत्नीव्रतफलप्रदा ॥३३॥

मदर्थं कारितं यद्यत् कृतं वा तत्फलप्रदा ।
सत्त्वेन रजसा यद्वा तमसाऽपि मदर्पितम् ॥३४॥
सर्वं तन्निर्गुणं विधापयामि कृष्णयोगतः ।
कामो रोषस्तथा स्वादः स्नेहो लोभो मदादयः ॥३५॥
मदर्थं त्वर्पिता जाताः कृता अपि तु निर्गुणाः ।
यतोऽहं निर्गुणा पत्नी कृष्णनारायणस्य वै ॥३६॥
ततो मद्योगमापन्नं पत्नीव्रतस्य निर्गुणम् ।
कृष्णस्य क्रीडया सर्वं जगत् सक्रियमेव तु ॥३७॥
यदि कृष्णो नैव कुर्यात् क्रियाहीनं जगद्भवेत् ।
दम्पत्योस्तु क्रियाः सर्वा राधाकृष्णोद्भवा यतः ॥३८॥
सदृश्योऽपि भवन्त्येव निर्गुणा बन्धनाशिकाः ।
ब्रह्म ब्राह्मयायुतं पूर्वं करोत्येव जगत्तथा ॥३९॥
दिवा रात्रिं विना नास्ति चात्मा बुद्धिं विना न वै ।
ब्रह्म ब्राह्मीं विना नास्ति कृष्णः कृष्णां विना न वै ॥४०॥
शब्दः शक्तिं विना नास्ति धर्मो भक्तिं विना न वै ।
कृष्णो राधां विना नास्ति सत् चित् नाऽऽनन्दमन्तरा ॥४१॥
मम व्रतेन राजेन्द्र पूतस्त्वं सर्वथा यतः ।
आगच्छ कृष्णगोलोकं विमानेन सभार्यकः ॥४२॥
त्वया प्रसादिता चाहं सर्वैर्व्रतैर्नृपोत्तम ।
यदा रासेश्वरी चेयं ज्वरेणाऽभिभवं गता ॥४३॥
पुरा मासं जलं चान्नं गृहीतं न तया तदा ।
त्वयाऽपि मासमेकं तु जलान्नं भुक्तमेव न ॥४४॥
स्वस्थेनापि त्वया पत्नीव्रतेन रक्षितं व्रतम् ।
प्रसवादौ यदा यद्यत् पत्न्या त्यक्तं सुभोजनम् ॥४५॥
अन्यच्चापि सुभोग्यादि त्वयाऽपि त्यक्तमेव तत् ।
समायां विषमायां वा स्थितौ क्वापि त्वया नृप ॥४६॥
पत्नीं विहायाऽनर्पित्वा किंचन नोपयुक्तवान् ।
साधुवद् वर्तसे राजन् सर्वं पत्न्यां निधाय च ॥४७॥
अक्षयं दानपुण्यादि पत्नीद्वारा कृतं त्वया ।
मया तत् शाश्वतफलं कृतं त्वदर्थमेव हि ॥४८॥
चातुर्मास्यव्रतं पत्न्या रासेश्वर्यां कृतं यदा ।
तदा तस्यै न निवेद्य त्वया भुक्तं न वै क्वचित् ॥४९॥
कार्तिके श्रावणे माघे वैशाखे च व्रतानि वै ।
यानि यानि तव पत्न्या कृतानि कृच्छ्राणि वै ॥५०॥
तत्र तत्र च यत् त्यक्तं रासेश्वर्या त्वयाऽपि तत् ।
कदाचिन्न गृहीतं वै पत्नीव्रतेन सर्वथा ॥५१॥
यमाश्च नियमा ये ये तव पत्न्या ह्यनुष्ठिताः ।
ते ते त्वयाऽपि तावन्तस्तावत्कालमनुष्ठिताः ॥५२॥

स्नानदानजपहोमास्तया कृतास्त्वया कृताः ।
तया संकल्पितं यद्यत् सर्वं त्वयाऽपि निश्चितम् ॥५३॥
नान्या नारी त्वया स्पृष्टा कामतो न विलोकिता ।
दास्यश्च कर्मचारिण्यः पुत्रीवद् रक्षितास्त्वया ॥५४॥
प्रजाः कन्या युवत्यश्च शिष्या इव विलोकिताः ।
स्नुषा पत्न्यो मातरश्च देव्य इव प्रपूजिताः ॥५५॥
साध्व्यः सत्यो योगवत्यः शिवावद् वन्दितास्त्वया ।
भिक्षुक्यो विधवा निराश्रयाः पित्रेव पालिताः ॥५६॥
नर्तक्यो नायिका बहुरूपिण्यो धर्मतः स्मृताः ।
वैष्णव्यः सांख्ययोगिन्यो गुरुपत्न्य इवाऽर्चिताः ॥५७॥
विद्यार्थिन्यः सदा सरस्वतीतुल्या विलोकिताः ।
दृष्टा वै ब्रह्मचारिण्यो गंगावत् तीर्थपाविताः ॥५८॥
एवं सुयज्ञ सर्वास्ता ब्रह्मात्मभावभाविताः ।
त्वया विलोकिता राजन् पत्नीव्रतेन भूभृता ॥५९॥
ऋणमुक्ताः कृताश्चान्या आपत्तिभ्यः सुतारिताः ।
कष्टाद् दूरीकृताश्चान्या नार्यश्च वैष्णवीकृताः ॥६०॥
धन्योऽसि त्वं सदा राजन् धन्या रासेश्वरी प्रिया ।
धन्यं चांशस्वरूपं मे यत्प्राप्त्या मुक्ततां गतम् ॥६१॥
विश्वासं वरणं न्यासं कार्पण्यं मतिस्थिरताम् ।
आनुकूल्यं प्रातिकुल्यवर्जितं कृतवान् मयि ॥६२॥
नैतादृशं परः कश्चिन्मद्व्रतं पालयिष्यति ।
पत्नीव्रतं व्रतं मे तन्मोक्षदं पालितं त्वया ॥६३॥
पितरस्तारिता राजन् प्रजाश्च तारितास्त्वया ।
सर्वं वै तारितं राज्येऽरण्येऽपि जडचेतनम् ॥६४॥
इत्युक्त्वा राधिका देवी रासेश्वरीं सुयज्ञकम् ।
विमाने दिव्यदेहौ तौ नीत्वा गोलोकमाययौ ॥६५॥
इति पत्नीव्रतं लक्ष्मि ! कथितं स्फुटमेव ते ।
पठनाच्छ्रवणाच्चास्य गोलोकमाप्नुयाद् व्रती ॥६६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सुयज्ञं पत्नीव्रतधर्मपालकं राजानं रासेश्वरीं पत्नीं च विमाने नीत्वा राधा गोलोकं ययावित्यादिपत्नीव्रतमाहात्म्यकथननामा चतुश्चत्वारिंशदधिकचतुश्शततमोऽध्यायः ॥४४४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! गुरुपत्नीं तारां पतिपरायणाम् ।
अप्यकामा चन्द्रभुक्ता पातिव्रत्यान् पपात न ॥ १ ॥
अत्रिस्तु ब्रह्मणः पुत्रस्तस्य पुत्रो निशाकरः ।
स च कृत्वा राजसूयं चन्द्रमाः संबभूव ह ॥ २ ॥
एकदा चन्द्रमाः सम्पन्मत्तोऽगाज्जाह्नवीतटे ।
ददर्श स गुरोर्भार्यां तारां धर्मपतिव्रताम् ॥ ३ ॥
सुस्नातां सुन्दरीं रम्यां पीनोन्नतपयोधराम् ।
तनुमध्यां सुरूपां सुदतीं कोमलविग्रहाम् ॥ ४ ॥
सूक्ष्मवस्त्रपरीधानां युवतीं स्वर्णभूषणाम् ।
कस्तूरीबिन्दुना सार्धमधश्चन्दनबिन्दुना ॥ ५ ॥
सिन्दूरबिन्दुना चारुफालमध्यस्थलोज्ज्वलाम् ।
चन्द्रश्वेतां कनकाभां रक्ताक्षीं कामसंभृताम् ॥ ६ ॥
शरत्पार्वणचन्द्रास्यां पक्वबिम्बाऽधरां सतीम् ।
गच्छन्तीं स्वगृहं स्नात्वा मत्तवारणगामिनीम् ॥ ७ ॥
निर्जने तां विलोक्यैव शश्वभून्मन्मथाऽर्दितः ।
लज्जां विहाय संरुद्ध्य मार्गे तां समुवाच ह ॥ ८ ॥
नमस्ते सुन्दरि विप्रे सुरूपे ब्रह्मरूपिणि ! ।
क्षणं तिष्ठ वरिष्ठे ! ते पादयोः प्रणमाम्यहम् ॥ ९ ॥
त्वादृशीनां सतीनां वै योगात्पातकनाशनम् ।
भाग्योदयो भवेच्चापि जानीह्यन्तर्गतं मनः ॥१०॥
कर्तुं सखीं समिच्छामि रजन्यां शयनस्थिताम् ।
यदि मे मानसं साध्वि ! कामोद्वेलत्वमागतम् ॥११॥
रतिदानेन शान्तं त्वं कर्तुं शक्ताऽसि वै सकृत् ।
तदा त्वां संपरित्यज्य गमिष्यामि तथा कुरु ॥१२॥
यदि चेन्न रतेर्दानं ददासि त्वां नयाम्यहम् ।
प्रसह्याऽपहरणं वै कृत्वा यामीति निश्चितम् ॥१३॥
अहो तपस्विना देवगुरुणा त्वं नियोजिता ।
किं सुखं सौरतं तेन तव शान्तिकरं भवेत् ॥१४॥
अहं चन्द्रो मम राज्यं स्वर्गे साक्षाद् विलोक्यते ।
आगच्छ वा भव तत्र शतविंशतिमानिता ॥१५॥
निष्फलं यौवनं याति वृद्धेन स्वामिना तव ।
स्वप्ने जागरणे चापि ध्यायन्नास्ते बृहस्पतिः ॥१६॥
अन्यश्च त्वन्मनःकामो गुरोरन्यच्चिकीर्षितम् ।
ययोस्तु भिन्नौ विषयौ का प्रीतिः संगमे तयोः ॥१७॥
वासन्तीपुष्पतल्पे वा गन्धचन्दनचर्चिते ।
भवती युवती भाग्यवती तत्रैव मोदताम् ॥१८॥
इत्युक्त्वा मदनोन्मत्तः पपात चरणे पुनः ।
निरुद्धमार्गा चन्द्रेण प्रोवाच तं पतिव्रता ॥१९॥
शिष्यस्त्वं गुरुपत्नी ते तारा भवामि मातृवत् ।
वक्तुं न लज्जसे कामिन् कथमन्धो विजायसे ॥२०॥

नाऽस्म्यहं कामिनी चन्द्र ! सती चाहं तपस्विनी ।
पवित्रा पावनी माता ते भवामि कुपुत्रक ॥२१॥
सप्तविंशतिनार्यस्ते सन्ति किम्वधिकं मयि ।
मनो यच्छ सुखं गच्छ किं साध्व्या ते प्रयोजनम् ॥२२॥
अत्रेरभाग्यात्त्वं जातो व्यर्थं ते जन्म जीवनम् ।
धिक् त्वां परप्रियातृष्णं व्यर्थं ते सर्वसुकृतम् ॥२३॥
अहं तपस्विनी दुष्ट ! तपस्विनां समाश्रिता ।
योग्यः स योगिराड् बृहस्पतिर्मे मुक्तिदायकः ॥२४॥
त्वादृशो जारकर्मा च क्षुद्रकामजितो यदि ।
सतीत्वं मे नाशयसि यक्ष्मग्रस्तो भविष्यसि ॥२५॥
दुष्टानां दर्पहा कृष्णो दर्पं ते निहनिष्यति ।
त्यज मां प्रति संकल्पं सत्यं ते शं भविष्यति ॥२६॥
इत्युक्त्वा पार्श्वतस्तारा यावद् याति शशी तु ताम् ।
प्रसह्य च करे धृत्वा रथे नीत्वा ययौ दिवम् ॥२७॥
रुरोदाऽऽक्रन्दनं तारा चकार साक्षिणं रविम् ।
धर्मं वायुं धरां वह्निं व्योमाऽब्जं जलमच्युतम् ॥२८॥
कलशस्थं जलं तारा करे कृत्वा पतिव्रता ।
सती चन्द्रं भस्म कर्तुं यावद् यतते रोषतः ॥२९॥
तावद् व्योमगिरा रुद्धा मा भस्मीकर्तुमर्हसि ।
सर्वः कर्मफलं भुंक्ते तथा ते फलमागतम् ॥३०॥
शृणु साध्वि सति बाले कृतं चाऽज्ञातया त्वया ।
यदा त्वं दशवर्षीया पितृगेहस्थिता तदा ॥३१॥
श्वदम्पतीमिथुनस्थौ चालिङ्गितौ तवाऽऽश्रमे ।
त्वया दृष्टौ तदा यष्ट्या पाषाणेनापि ताडितौ ॥३२॥
अप्राप्तौ कामनिर्वृत्तिं वियोजितौ विद्रावितौ ।
कामाऽतृप्त्या तदा शुन्या शप्ता त्वं तद्विभाषया ॥३३॥
अहो दुष्टे ! यथा पत्युर्वियोगं त्वं करोषि मे ।
तथा तवापि पत्युश्च वियोगस्ते भविष्यति ॥३४॥
अन्यः श्वा च यथा मयि फलिष्यति तथा त्वयि ।
अन्यश्चावद् अपतिस्ते फलिष्यति त्वयि ध्रुवम् ॥३५॥
कामासक्तौ क्षुद्रकीटौ यद्वा पशू पतत्रिणौ ।
मानवौ वाऽन्यजातीयौ वियोक्तव्यौ न कर्हिचित् ॥३६॥
कामतृप्तिमनालब्धौ धार्मिकौ वाऽप्यधार्मिकौ ।
कामतृप्तिप्रविद्वद्भिर्वियोक्तव्यौ न कर्हिचित् ॥३७॥
रतिविघ्नकृतां भार्यानाशो वा भर्तृनाशनम् ।
वियोगो वा महारोगो जायते नात्र संशयः ॥३८॥
कामाऽतृप्तौ समुत्थोऽग्निर्भस्मीकरोति विघ्नदम् ।
तथा त्वया कृतं कर्म तारे ! भुंक्ष्व फलं हि तत् ॥३९॥
अन्यथा ते च तत्कर्म भविष्यति न सुकृतम् ।
यो ददाति परस्मै च दुःखमेव तु सर्वतः ॥४०॥
तस्मै ददाति दुःखं तु शास्ता नारायणः स्वयम् ।
अन्यच्छृणु तथा तारे ! स्वामिना ते कृतं पुरा ॥४१॥
बृहस्पतिरुतथ्यश्च संवर्तश्च त्रयोऽपि ते ।
पुत्राश्चांगिरसः सर्वे वेदवेदांगपारगाः ॥४२॥
संवर्ताय कनिष्ठाय दायभागं बृहस्पतिः ।
किंचिदपि ददौ नैव संवर्तो भिक्षुकोऽस्ति यत् ॥४३॥
तस्य निःश्वासदग्धेयं गृहलक्ष्मीर्बृहस्पतेः ।
त्वत्स्वरूपा परेणापि नीयते मा शुचोऽत्र वै ॥४४॥
मध्यमस्योतथ्यकस्य सतीं भार्यां च गुर्विणीम् ।
जहार कामतस्तां स भ्रातृजायां बृहस्पतिः ॥४५॥
यो हरेद् भ्रातृजायां तु कामी कामादकामुकीम् ।
ब्रह्महत्यासहस्रं स लभते मरणादनु ॥४६॥
कुंभीपाकं स यात्येव यावत्कल्पं ततः पुनः ।
वर्षकोटिसहस्राणि विष्ठाकृमिः प्रजायते ॥४७॥
योनिकीटस्ततो गृध्रः शतजन्मानि कुक्कुरः ।
ततश्च सूकरो भूत्वा मानवः स्त्रीविहीनकः ॥४८॥
नाऽभुक्तं क्षीयते प्राप्तं कर्म सोढव्यमेव यत् ।
बृहस्पतेरुतथ्यस्य पत्नीहरणपातकम् ॥४९॥
कारणं ते हरणेऽस्ति मा भस्मीकुरु चन्द्रकम् ।
एवं कृते द्वितीयं ते ब्रह्महननपातकम् ॥५०॥
भविष्यति ततस्तारे ! यथाभाग्यं शमं कुरु ।
इत्युक्ताऽऽकाशवाण्या सा विरराम शशाप न ॥५१॥
सती पतिव्रता साध्वी चन्द्रं प्रसह्य शिश्रिये ।
अकामिन्यां प्रसह्यैव रेमे निशापतिर्मुहुः ॥५२॥
स्वर्गे सुखमये रम्ये पुष्करे पुष्पकानने ।
पृथ्व्यां मेरौ नदे नद्यां शृंगारं कुर्वतोस्तयोः ॥५३॥
गतं वर्षशतं हर्षान्मानवं स्वर्मुहूर्तकम् ।
गर्भं दधार सा तारा चन्द्रादमोघमुत्तमम् ॥५४॥
अथ चन्द्रश्चातिभीतो दैत्येषु शरणं गतः ।
शुक्राचार्यगृहे तस्थौ तारया सह सत्कृतः ॥५५॥
अभयं तु ददौ तस्मै शुक्राचार्योऽतिगर्वितः ।
गुरुं जहास देवानां सुविपक्षं बृहस्पतिम् ॥५६॥
सभायां जहसुर्दैत्या भीताया चाभयं ददुः ।
सतीसतीत्वध्वंसेन पापिष्ठचन्द्रमण्डले ॥५७॥
बभूव शशरूपं च कलंकं निर्मले मलम् ।
शुक्रश्चन्द्रमसं प्राह त्वया योग्यं न वै कृतम् ॥५८॥

त्वमहो ब्रह्मणः पौत्रोऽप्यत्रेर्भगवतः सुतः।
दुर्नीतं कर्म ते पुत्र नीचवन्न यशस्करम् ॥५९॥
राजसूयफले स्वच्छेऽमृतसागरके दिवि।
कलंकरूपो मदिराब्निन्दुस्त्वया समर्जितः ॥६०॥
त्यज देवगुरोः पत्नीं प्रसूमिव महासतीम्।
तथ्यं वाच्यं रिपौ मित्रे सत्यं विजयते सदा ॥६१॥
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि।
सः शत्रुर्मे सुरगुरुर्धर्मो वाच्यो हि संसदि ॥६२॥
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः।
गौरेकं पञ्च च व्याघ्री सिंही सप्तप्रसूयते ॥६३॥
हिंसकाः प्रलयं यान्ति धर्मो रक्षति धार्मिकम्।
देवाश्च गुरवो विप्राः शक्ता यद्यपि रक्षितुम् ॥६४॥
तथापि नहि रक्षन्ति धर्मघ्नं पापिनं जनम्।
धर्मं चर महाभाग ब्राह्मणीं त्यज साम्प्रतम् ॥६५॥
उपायेन तु ते पापं तूर्णं दूरीभविष्यति।
भीतो दीनः शरणार्थी रक्षणीयः सुधार्मिकः ॥६६॥
अधार्मिकस्य रक्षायां विनिपातः समन्ततः।
आगच्छ चन्द्र गंगायां भूतशुद्धिं समाचर ॥६७॥
इत्युक्त्वा तं दैत्यगुरुर्मन्दाकिन्यां निनाय च।
स्नापयामास च हरेः कारयामास पूजनम् ॥६८॥
कृष्णपादाब्जयुक्तं च तन्नैवेद्यं सुपावनम्।
तुलसीदलमिश्रं स भोजयामास चन्द्रकम् ॥६९॥
पापं प्रक्षालयामास कुशहस्तो हरिं स्मरन्।
शुक्राचार्यः कृपां कृत्वा समुवाच पुनः पुनः ॥७०॥
यद्यस्ति मे तपः सत्यं सत्यं पूजाफलं हरेः।
सत्यं व्रतफलं चापि सत्यं सत्यवचःफलम् ॥७१॥
तीर्थस्नानफलं सत्यं सत्यं दानफलं यदि।
उपवासफलं सत्यं शिष्यभक्तोऽस्म्यहं यदि ॥७२॥
वैष्णवः कृष्णभक्तश्च पापान्मुक्तः शशी भवेत्।
विप्रं विप्रकर्महीनं पतिं स्वस्त्रीप्रवञ्चकम् ॥७३॥
पतिवञ्चनशीलां च देवप्रसादवर्जितम्।
स्वीयश्लाघाप्रकर्तारं परस्य निन्दकं तथा ॥७४॥
पोष्यवर्गाऽपोषकं च कुलटासंगतं तथा।
व्रताऽपालनकं पापं सतीशीलविनाशकम् ॥७५॥
अश्वत्थतुलसीबिल्वच्छेत्तारं विष्णुनिन्दकम्।
साधूनां द्रोहकर्तारं साध्वीनां द्वेषिणं तथा ॥७६॥
मातापितृदुःखदं च देवादिवृत्तिनाशकम्।
गोविप्रादिप्रहन्तारं यातु तान् चन्द्रपातकम् ॥७७॥
चन्द्रपापेन ते यान्तु दारुणां घोरयातनाम्।
स्वपापेन सह ते वै सहन्तां यमयातनाम् ॥७८॥
इति चन्द्रं शुचिं कृत्वा समुवाच पुनश्च तम्।
तारा गर्भवती जाता तव योगेन चन्द्रक ॥७९॥
त्वं तु शुद्धीकृतश्चात्र मा तारां स्पृश वै पुनः।
अकामेन च कामेन मातरं मा स्पृश क्वचित् ॥८०॥
इति चन्द्रं शुचिं कृत्वा समुवाच तु तारकाम्।
त्यक्त्वा चन्द्रं महासाध्वि गच्छ कान्तं बृहस्पतिम् ॥८१॥
प्रायश्चित्तं विना पूता त्वमेव शुद्धमानसा।
अकामाऽपि बलिष्ठेन भुक्ता स्त्री नैव दुष्यति ॥८२॥
प्राप्ते तु मासिके राजस्वल्ये नारी प्रशुद्ध्यति।
इत्येव मुक्त्वा शुक्रस्तु चन्द्रं च तारकां सतीम् ॥८३॥
आशिषः प्रददौ सम्यक् सत्कारं मानमाचरत्।
अथैतस्मिन्नवसरे बृहस्पतिस्तपोनिधिः ॥८४॥
शिष्यं पप्रच्छ मातस्ते कथं स्नाने विलम्बते।
पश्य याहि कथं स्नात्वा यथाकालं न चागता ॥८५॥
शिष्योऽन्विष्य न संप्राप्य श्रुत्वाऽपहरणं शुकान्।
रुदन्नागत्य ताराऽपहरणं प्राह गीष्पतिम् ॥८६॥
श्रुत्वा बृहस्पतिस्तारां चन्द्रेणाऽपहृतां प्रियाम्।
रुरोदोच्चैर्विललाप सशिष्यो दूयता हृदा ॥८७॥
प्रोवाच प्राक्कृतं कर्म काले पक्वेऽभिबाधते।
उतथ्यभार्याहर्तुर्मे भार्या चन्द्रेण वै हृता ॥८८॥
संवर्ताय धनाऽदातुः सर्वस्वं मे हृतं गृहम्।
दुःखं धर्मविरुद्धो यः स प्राप्नोति न संशयः ॥८९॥
भावानुरक्ता सुशीला सुशासिता पतिव्रता।
गृहाधिष्ठातृदेवी च गता यस्य गृहादहो ॥९०॥
भार्यामूलं सुखं सर्वं स्वर्गो मोक्षश्च निर्गताः।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥९१॥
इति विलप्य बहुधा पुरन्दरगृहं ययौ।
स गुरुः पूजितस्तेन त्वाथित्येन मरुत्वता ॥९२॥
तमुवाच स्ववृत्तान्तं हृदि शल्यमिवाऽपरम्।
बृहस्पतिवचः श्रुत्वा रुषा प्रज्वलितान्तरः ॥९३॥
महेन्द्रः प्रेषयामास चारकर्मणि देवताः।
प्राह गुरुं त्यज चिन्तां कस्य श्रीर्विपदं विना ॥९४॥
दूतश्चन्द्रं शक्रसौधे तं प्रपन्नं निरामयम्।
दृष्ट्वा सतारकं भीतं कथयामासुरिन्द्रकम् ॥९५॥
श्रुत्वेन्द्रः शोकमापन्नो हृदयेन विदूयता।
प्राह चन्द्रो बलिष्ठस्याऽऽश्रयेऽजय्यो हि वर्तते ॥९६॥

अस्माभिः रचनीयं वै चक्रं तस्मान्महत्तमम् ।
गच्छ शीघ्रं ब्रह्मलोकमस्माभिः सार्धमेव हि ॥९७॥
ब्रह्मणा सह यास्यामः कैलासे शंकरं वयम् ।
इत्येवं ते गताः सत्यं प्रणेमुर्वेधसं तथा ॥९८॥
प्रोचुस्ते सर्ववृत्तान्तं श्रुत्वा ब्रह्माऽप्युवाच तान् ।
यो ददाति परस्मै तु दुःखं वृथा हि सर्वतः ॥९९॥
तस्य दुःखं समायाति न्यायालयाद्धि शासितुः ।
संवर्तौतिथ्यगुरव आत्रेयास्त्रय एव ते ॥१००॥
संवर्ताय कनिष्ठाय न दायं प्रददौ गुरुः ।
मध्यौतथ्यस्य गुर्विणी भार्या तु गुरुणा हृता ॥१०१॥
तत्फलं तु गुरुः प्राप्तः कृतं भोगेन नश्यति ।
तथाप्यत्र यतिष्यामो गत्वा श्रीशंकरं शिवम् ॥१०२॥
शंकरः कृष्णपुत्रोऽस्ति गुरुः कृष्णवरोद्भवः ।
अंगिरसो मुनेः पत्न्यामतो भ्राता हि गण्यते ॥१०३॥
दक्षयज्ञे सती दग्धा शंभुर्विचित्ततां गतः ।
आंगिरास्तं ददौ ज्ञानं शिष्यश्चांगिरसः शिवः ॥१०४॥
एवंरीत्याऽपि स भ्राता शिवो बृहस्पतेर्भवेत् ।
शुक्रो मृत्युञ्जयमात्राद् बिभेति नान्यतः क्वचित् ॥१०५॥
शिवस्तस्मै नीतिमुक्त्वा तारां प्रदापयिष्यति ।
इति सर्वे गताः श्रेष्ठाः कैलासं शंकरालयम् ॥१०६॥
दृष्ट्वा बृहस्पतिं शंभुरुदतिष्ठत् कुशासनात् ।
ब्रह्मादिभ्यो ददौ सिंहासनान्युवाच गीष्पतिम् ॥१०७॥
कथमेवं विधो भ्रातर्म्लानास्यो लक्ष्यसे वद ।
किं वा तपस्या नष्टा ते किं वा सन्ध्याविवर्जितः ॥१०८॥
किं वा श्रीमत्कृष्णनारायणसेवाविवर्जितः ।
किं वा पित्रोरिष्टदेवे भक्तिहीनो गुरौ च किम् ॥१०९॥
किं वा शरणमापन्नं रक्षितुं शक्यते न वै ।
किं वाऽतिथयो विमुखाः पोष्यास्ते किं बुभुक्षिताः ॥११०॥
किमु वा ते चाऽवशा स्त्री पुत्रो नाऽऽज्ञाकरश्च किम् ।
शिष्यभृत्यादयः किं ते प्रत्युत्तरप्रदा ननु ॥१११॥
किं वा लक्ष्मीर्ह्रासजुषा किं वा रुष्टो गुरुस्तव ।
वैष्णवा वाडवाश्चान्ये रुष्टाः किं प्रबलो रिपुः ॥११२॥
किं वा कुटुम्बविच्छिन्नो निर्धनो वा प्रशोचसि ।
किं वा खलैः कृतः क्लिष्टस्त्यक्तोऽसि बान्धवैश्च किम् ॥११३॥
किं वा तीर्थं व्रतं दानं पुण्यं नीतं हि राक्षसैः ।
किं वा निन्दा श्रुता साक्षाद् गुरोर्निन्दाऽधिका मृतेः ॥११४॥
किं वा ते पापकृत्कर्म बभूव म्लानकारकम् ।
वद विपद्गतं तेजस्त्यजत्यपि दिवाकरम् ॥११५॥
इत्यापृष्टो गुरुः शंभुं वृत्तान्तमाह दुःखदम् ।
तारापहरणं श्रुत्वा नम्रास्योऽभूत् क्षणं शिवः ॥११६॥
उवाच तु क्षणं ध्यात्वा कृतकर्मफलं त्विदम् ।
यदा गुरो फलं स्वस्य कर्मणः प्राप्यते तदा ॥११७॥
निष्कासितं ताडितं च दूरं भवति नैव तत् ।
कार्ये पराक्रमे स्मृद्धौ कीर्तौ वंशे कुटुम्बके ॥११८॥
जले पुत्रे प्रतापे च भूमौ धने सुते हरौ ।
स्वभावे वचने बुद्धौ चाश्रमे चावलम्बने ॥११९॥
व्यवहारे तथाऽऽचारे चरित्रे दानकर्मणि ।
प्राक्कृतस्याऽनुरूपं वै जायते हृदयं नृणाम् ॥१२०॥
चन्द्रस्य हृदयं तादृक् तव कर्मप्रपेरितम् ।
यादृग् येषां पूर्वकृत्यं तादृक् तेषां तु मानसम् ॥१२१॥
स्वयं तु कर्मजनकः कर्म दैवस्य कारणम् ।
दैवं स्वभावहेतुश्च स्वभावात् प्रतिजन्मनि ॥१२२॥
सुखं दुःखं भयं शोकः कालुष्यं स्वस्य जायते ।
अहोऽनिष्टं कृतं मातृगामित्वं शशिना त्विदम् ॥१२३॥
शिवमस्तु तु साधूनां वैष्णवानां सतां सदा ।
असतां पापनिष्ठानामशिवं स्यात् पदे पदे ॥१२४॥
अन्येषां दुःखकर्ता यो विघ्नस्तस्य पदे पदे ।
कृष्णनारायणस्मृतिर्मनोनैर्मल्यकारणम् ॥१२५॥
अहो श्रीकृष्ण भक्तस्य कीदृक् हृदयं निर्मलम् ।
हृतभार्यमपि चन्द्रं न शशाप बृहस्पतिः ॥१२६॥
गुरुर्यस्य वशिष्ठोऽपि धार्मिकः सात्त्विकः सदा ।
शतपुत्रप्रहन्तारं विश्वामित्रं शशाप न ॥१२७॥
निःश्वासाद्धै बृहस्पतेर्भस्मीभूतो भवेच्छशी ।
ताराया अपि शापेन कृष्णलौहो भवेच्छशी ॥१२८॥
तथापि तं क्षेपतुर्न तपोध्वंसो न यद् भवेत् ।
वर्णेषु ब्राह्मणाः श्रैष्ठ्यं प्राप्ता वै क्षमया किल ॥१२९॥
विष्णुभक्तिविहीनेभ्यो द्विजेभ्यः श्वपचो वरः ।
परिपक्वा अपक्वा वा वैष्णवाः साधवश्च ते ॥१३०॥
सततं पाति तांश्चोग्रं विष्णुचक्रं सुदर्शनम् ।
वायुश्च पवनो वह्निः सूर्यो ब्रह्माऽप्यहं हरः ॥१३१॥
शेषो धर्मः सर्वसाक्षी वाञ्छामो वैष्णवाश्रयम् ।
चन्द्रोऽपि दुर्बलो भीतः सुदर्शनाभिरक्षितम् ॥१३२॥
दैत्यगुरुं भागवतं तं शुक्रं शरणं ययौ ।
तं जेतुं केऽपि शक्ता न यतिष्ये तत्तथापि वै ॥१३३॥
भज सत्यं परं ब्रह्म पत्नीं प्राप्स्यसि लीलया ।
तावद् भवेत्तु भोगेच्छा स्त्रीसुखेच्छा नृणामिह ॥१३४॥

यावद् गुरुमुखाम्भोजान्न प्राप्नोति मनुं हरेः।
संप्राप्य दुर्लभं मन्त्रं वितृष्णो हि भवेन्नरः॥१३५॥
ततो नेच्छति विषयान् मोक्षं वा दास्यमन्तरा।
यदीच्छति चेद् विषयान् विषमत्ति न संशयः॥१३६॥
अहं ब्रह्मा च विष्णुश्च धर्मोऽनन्तश्च कश्यपः।
कपिलश्च कुमारश्च नरनारायणावृषी॥१३७॥
स्वायम्भुवो मनुश्चापि प्रह्लादश्च पराशरः।
भृगुः शुक्रश्च दुर्वासा वशिष्ठः क्रतुरंगिराः॥१३८॥
बलिश्च वालखिल्याश्च वरुणश्च हुताशनः।
वायुः सूर्यश्च गरुडो दक्षो गणपतिर्धरा॥१३९॥
सर्वे कृष्णस्य दासाः स्मः कलांशा गर्ववर्जिताः।
भज ओं श्रीकृष्णनारायणाय स्वामिने नमः॥१४०॥
पठ–ओं श्रीं ह्रीं क्लीं श्रीकृष्णाय श्रीपतये नमः।
वयं यामो यत्र शुक्रश्चन्द्रस्तारा वसन्ति वै॥१४१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चन्द्रकृतबृहस्पतिपत्नीपतिव्रतातारापहरणं, भयाच्चन्द्रस्य शुक्राचार्यशरणगमनम्, शुद्धता द्वयोर्दर्शिता, बृहस्पतेरुतथ्याख्यानुजस्त्रीहरणस्य फलमिदम्, ताराप्राप्त्यर्थं ब्रह्मविष्णुमहेशेन्द्रबृहस्पतीनां मन्त्रणा चेतिनिरूपणनामा पञ्चचत्वारिंशदधिकचतुश्शततमोऽध्यायः॥४४५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! हरवाक्यं श्रुत्वा बृहस्पतिः स्वयम्।
महाभागवतो भक्तो वैराग्येण जगाद यत्॥१॥
ज्ञानं प्राप्य विषण्णः स भवाब्धौ हरमाह वै।
आज्ञां कुरु कृपासिन्धो यामि तप्तुं हरेस्तपः॥२॥
तारा तिष्ठतु तत्रैव न तया मे प्रयोजनम्।
अज्ञानं बाधते मूढं लीनं मे कृपया तव॥३॥
नरो भूत्वा हरिं प्राप्स्ये नार्या किं मे प्रयोजनम्।
अमृतं दृश्यते बाह्यं विषं सर्वं विना हरिम्॥४॥
शरणं श्रीकृष्णनारायणं यामि परात्परम्।
इत्युक्तवन्तं तं शंभुर्विहस्याऽऽह बृहस्पतिम्॥५॥
परग्रस्तां स्त्रियं त्यक्त्वा न प्रशस्यं तपो मुने।
संभावितस्य दुश्चर्या मरणादतिरिच्यते॥६॥
स्वस्त्रीं शत्रुकरग्रस्तां समासाद्य ततः परम्।
यत्कर्तव्यं त्वया कार्यं गार्हस्थ्यं वा तपो मुने!॥७॥
वयं यामो यत्र शुक्रस्तत्र सर्वे धुरन्धराः।
सूर्यो धर्मोऽनन्तशेषो नरो नारायणो ह्यजः॥८॥
क्रतुः सनत्कुमारश्च वसिष्ठोऽपि मरीचिकः।
सनातनः सनन्दश्च वोढा पञ्चशिखस्तथा॥९॥
पत्नीव्रतश्च कपिलस्तथाऽङ्गिरस इत्यपि।
इत्युक्त्वा प्रययुः सर्वे शुक्राश्रमं शिवान्विताः॥१०॥
शुक्रः प्रणम्य तान्सर्वान् पूजयामास सादरम्।
भीताः प्रणेमुस्तान्देवान् तदानीं दितिनन्दनाः॥११॥
शुक्रः सपुलकः साश्रुनेत्रः प्रोवाच वै तदा।
अद्य मे सफलं जन्म जीवितं च सुजीवितम्॥१२॥
स्वयं विधाता भगवान् साक्षाद् दृष्टः स्वमन्दिरे।
साक्षाद् दृष्टाश्च तत्पुत्रा भगवन्तः सनातनाः॥१३॥
तुष्टः श्रीमत्कृष्णनारायणोऽद्य मयि सर्वथा।
स्वयं नारायणो लक्ष्मीपतिर्मद्गृहमागतः॥१४॥
ब्रह्मरूपः स्वयं शंभुर्मोक्षदाश्च समागताः।
कृतार्थं कर्तुमीशा मां कृपया न्वागता मयि॥१५॥
स्वात्मारामेषु कुशलं प्रश्नरूपं विडम्बनम्।
पुत्रं पवित्रं कर्तुं वै नूनमत्र समागताः॥१६॥
अपरं ब्रूथ किं वाऽपि शास्त नः करवाणि तत्।
श्रुत्वैतद् विश्वसृट् प्राह कुशलं ते सदाऽस्तु वै॥१७॥
उद्विग्नश्चिरविच्छेदात् त्वां पौत्रं द्रष्टुमागतः।
कुशलं सकुटुम्बस्य तव पौत्र! निरामयम्॥१८॥
श्रीकृष्णपूजनं नित्यं कुशलं ते तु वर्तते।
स्वगुरोः सेवनं चापि कुशलं ते नु जायते॥१९॥
गुरोः कृष्णस्य पित्रोश्च वृद्धानां चापि पूजनम्।
सर्वदुःखहरं पुण्यं भाविसम्पत्सुरक्षकम्॥२०॥
अभीष्टदेवः सन्तुष्टो गुरौ तुष्टे भवेदिह।
इष्टदेवे तु सन्तुष्टे सन्तुष्टाः सर्वदेवताः॥२१॥
गुरुर्विप्रः सुरो रुष्टो येषां पातकिनामिह।
तेषां तु कुशलं नास्ति विघ्नस्तस्य क्षणे क्षणे॥२२॥
तव तुष्टो गुरुश्चाऽहं तदा तुष्टो हरिः स्वयम्।
हरौ तुष्टे सर्वदेवास्तुष्टाः क्षेमं भवेत्तव॥२३॥
साम्प्रतं शृणु मे धीमन्नत्राऽऽगमनकारणम्।
कृष्णवरजपुत्रस्य साध्वीं तारां बृहस्पतेः॥२४॥
अपहृत्य निशानाथस्त्वैव शरणाऽऽगतः।
देहि तारां न्यायमार्गात् सर्वं ते कुशलं भवेत्॥२५॥
पूर्वं ज्ञातं त्वया चन्द्रः शुद्धीकृतोऽस्ति धर्मतः।
तारा शुद्धा सती चास्ति नित्यशुद्धा यतः स्त्रियः॥२६॥

चन्द्रे दण्डं न योक्ष्यामस्तद्भयं त्यज सर्वथा ।
अदाने यदि युद्धं स्यान्नाशस्तूभयपक्षयोः ॥२७॥
तारां भुंक्ते शशी यद्वा गुरुर्यद्वा विनाशनम् ।
कोटिसंख्यकमूर्धन्यदेवदैत्यादिपक्षयोः ॥२८॥
अन्यायं तु परासूय न्यायः कार्यस्त्वयाऽधुना ।
विनाशकारणं युद्धमुभयोर्देवदैत्ययोः ॥२९॥
सुसाम्नाऽऽचरण पौत्र ! सर्वमंगलकारणम् ।
तारां भिक्षां देहि मह्यं भिक्षुकाय तु वेधसे ॥३०॥
देहि तारां महाभाग ! चन्द्रं प्राणाधिकं तथा ।
स्वकीर्तिं रक्ष सुचिरं प्रार्थयामः पुनः पुनः ॥३१॥
शुक्रः संप्राह तच्छ्रुत्वा त्रिदेवान् प्रपितामहान् ।
तारा गर्भवती त्वास्ते चन्द्रयोगेन सा सती ॥३२॥
देया वा नाऽत्र देया वा प्रमाणं प्रपितामहाः ।
ब्रह्मा प्राह प्रदेयैव नाऽत्र कार्या विचारणा ॥३३॥
गर्भप्रसवमैश्वर्यात् कारयिष्याम एव तु ।
आनयाऽत्र निशानाथं तारां च गुर्विणीं सुत ॥३४॥
इत्युक्तः सत्वरं शुक्रस्तारां चन्द्रमसं तदा ।
समाहूय ददौ तेभ्यो महद्भयश्चातिलज्जया ॥३५॥
दत्वा तारां विधुं शुक्रः प्रणनाम विधेः पदे ।
ब्रह्मा ददर्श तारां तु प्रणतां स्वपदे सतीम् ॥३६॥
लज्जया नम्रवक्त्रां सुरुदतीं गुर्विणीं शुभाम् ।
चन्द्रं संप्रणतं धाता क्रोडे कृत्वाऽभयं ददौ ॥३७॥
उवाच गुर्विणीं तारां कातरां प्रपितामहः ।
सौभाग्ययुक्ता स्वपतौ भविष्यसि भयं त्यज ॥३८॥
दुर्बला बलिना ग्रस्ता निष्कामा न च्युता भवेत् ।
मनःखेदेन शुद्धा सा राजस्वल्येन वा पुनः ॥३९॥
ततः स्वकान्तयोगेन न स्त्री जारेण दुष्यति ।
सकामा कामतो जारं भजते स्वसुखाय या ॥४०॥
प्रायश्चित्तादपि शुद्धा न सा स्वामिविवर्जिता ।
त्वं तु सती सदा शुद्धा वह्निरिवाऽतिपावनी ॥४१॥
बृहस्पतेः कर्मयोगात् तद्भार्याऽऽहरणं ह्यभूत् ।
तवापि कर्मयोगाच्च तवात्र हरणं ह्यभूत् ॥४२॥
किन्तु तत्त्वं किमत्राऽस्ति जानन्त्येव न देवताः ।
विना त्रिदेवान् गुप्तं तद् रहस्यं पश्य मद्बलात् ॥४३॥
यदा चन्द्रोऽहरत् त्वां वै तदा स्प्रष्टुं शशाक न ।
पतिव्रतां सतीं देवीं स्प्रष्टुं शक्नोति कोऽपि न ॥४४॥
किन्तु सूर्यप्रभा मूर्तिमती त्वागत्य तत्र वै ।
द्वितीयां निर्ममे ताराछायां ताराप्रतिकृतिम् ॥४५॥
सत्यां तारां तिरोधाय निन्ये सूर्यस्य मण्डले ।
साऽद्याऽवधि महादिव्या सती शुद्धा विराजते ॥४६॥
सा त्वं पश्य निजां मूलां प्रभाऽऽनीतां यथातथाम् ।
इमां छायां तथा पश्य सगर्भां चन्द्रसेविताम् ॥४७॥
इत्युक्त्वा विश्वसृड् द्वेधा दर्शयामास तारकाम् ।
मूलां तारां ददौ देवगुरवेऽन्यां ततस्तु ते ॥४८॥
प्राहुस्तारे ! त्यज गर्भं पक्वं त्वस्मत्प्रभावतः ।
इत्युक्ता सा द्रुतं त्वन्तर्गृहे गत्वा सुषाव तम् ॥४९॥
जातमात्रो युवा स्वर्णवर्णोऽभूत् शशिना समः ।
जातकर्मादिकं तत्र कृतवाँश्चन्द्रमाः स्वयम् ॥५०॥
ब्रह्माज्ञया तदा ताराछायाऽदृश्या बभूव ह ।
अदृश्यां तां सूर्यप्रभा जग्राह निजपुत्रिकाम् ॥५१॥
सा तु सूर्ये सदा कृष्णं भजमाना बभूव ह ।
प्रभादासी सदा दास्यं कृष्णस्यैव चकार सा ॥५२॥
पुरुषोत्तममासे तु प्रभया सह सा सती ।
ययौ श्रीमत्कृष्णनारायणस्य धाम चाक्षरम् ॥५३॥
दिव्या नित्यमहामुक्ता जाता कृष्णप्रिया सती ।
मूला तारा पतिं प्राप्य बभूव निर्भया पुनः ॥५४॥
ब्रह्मा तस्यै सतीधर्मानापत्कालकृतान् मुदा ।
पातिव्रत्यपरान् प्राह कृते युगे प्रवर्तितान् ॥५५॥
शृणु लक्ष्मि ! प्रवक्ष्यामि यैस्तु नार्योऽप्यदूषिताः ।
स्वामिनस्त्वाज्ञया नारी पातिव्रत्यपरायणा ॥५६॥
अन्यभुक्ता न सा दूष्यत्यतः स्वामिवचो वृषः ।
पतिर्यस्मै क्षणिकं वा शाश्वतं दानमार्पयत् ॥५७॥
तेन भुक्ताऽपि सा नारी नैव दूष्यति वै क्वचित् ।
दाने ग्रहीतुः स्वत्वं यत् ततो नारी न दुष्यति ॥५८॥
निर्जनादावबला या भुक्ता प्रसह्य केनचित् ।
अकामा च पराधीना नैव दुष्यति वै क्वचित् ॥५९॥
योगादिसिद्धपुरुषैर्भुक्ता प्रविश्य स्वामिनि ।
भुक्ता कृत्रिमरूपेण साऽपि नैव प्रदुष्यति ॥६०॥
निद्रां मूर्छां गता या तु विचित्ता मादकादने ।
अन्यभुक्ताऽपि सा तत्र नैव दुष्यति पद्मजे ॥६१॥
पत्युः पितुः सुतभ्रात्रोरायत्कालेऽतिदारुणे ।
तेषां प्राणाऽवनार्थे चेत् परभुक्ता न दुष्यति ॥६२॥
अपत्यार्थे गवामर्थे कुटुम्बार्थे पराऽऽहृता ।
अक्षतकन्यकार्थे च कुमार्यर्थे न दुष्यति ॥६३॥
आपत्काले प्राणहरे देशग्रामादिविप्लवे ।
अन्यभुक्ता पराधीना तदा नैव प्रदुष्यति ॥६४॥

गान्धर्वविधिना योगे परभुक्ता न दुष्यति।
राजस्वल्यस्य विगमे पत्ययोगे ऋतोर्वृषे ॥६५॥
अन्ययोगगता नारी दुष्यत्येव न वै क्वचित्।
स्वामिनः कार्यसिद्ध्यर्थे परभुक्ता न दुष्यति ॥६६॥
तपस्विनस्तपस्याया विघ्नार्थे त्वप्सरोगणः।
स्वामीन्द्रप्रेषितश्चान्यभुक्ताऽप्सरो न दुष्यति ॥६७॥
दास्यः कृत्वा भूभृतस्तु सेवायां चार्पितास्तु याः।
परभुक्ताश्च ताः क्वापि नैव दुष्यन्ति सेविकाः ॥६८॥
पण्यस्त्रीत्वं समापन्ना विपन्नाशार्थमेव या।
परभुक्ता चाऽगतित्वे तावन्मात्रं न दुष्यति ॥६९॥
अपतिका नृत्यगीतिकुशला क्वापि मोहिता।
गान्धर्वेण परायत्ता परभुक्ता न दुष्यति ॥७०॥
प्राणरक्षणकार्यार्थे परभुक्ता न दुष्यति।
तेजस्वियोगमासाद्य शापादिभयकातरा ॥७१॥
दुःखस्य परिहारार्थे परभुक्ता न दुष्यति।
कृष्णनारायणांशाद्यैर्भुक्ता सती न दुष्यति ॥७२॥
तुलस्या तु विष्णुयोगः पतिप्राशस्त्यबोधकः।
अन्ययोगे तथा नारी पतिहन्त्री भवेच्च वा ॥७३॥
स्ववंशतन्तुसन्धातृपुत्रलाभार्थमेव तु।
परभुक्ता सती नारी न कदापि प्रदुष्यति ॥७४॥
दिव्यदेवादिभिर्भुक्ता सती नैव प्रदुष्यति।
अहल्यायास्त्विन्द्रयोगे शिलात्वं स्वामिरुट्फलम् ॥७५॥
स्वप्ने त्वन्येन या भुक्ता सा सती नैव दुष्यति।
भूतप्रेतादिभिर्भुक्ता वाय्वंशैर्नहि दुष्यति ॥७६॥
पितृभ्यां संप्रदत्ता या यस्मै तेन न दुष्यति।
अनाथा युवती प्राप्ता पत्नीकृता न दुष्यति ॥७७॥
पातिव्रत्यं परो धर्मो दूषणं स्वेच्छया परे।
पतीच्छया परार्थत्वं भूषणं पतिधर्मतः ॥७८॥
प्रसह्यत्वे बलिष्ठस्य दूषणं न तु तत् स्त्रियाः।
नोदनालक्षणो धर्मश्चानर्थो न भवेद् यदि ॥७९॥
अनर्थे तु फलं दुःखं सोढव्यं भवति ध्रुवम्।
इत्येवं सर्वदाऽस्माभिर्देवैर्धर्मो विनिश्चितः ॥८०॥
तस्मात् तारा सदा शुद्धा पुनर्भूवत् पतिव्रता।
चन्द्रश्चापि फलं भुंजन् देवता स्थास्यति ध्रुवः ॥८१॥
राजस्वल्ये मासिके वै नार्यशुद्धिर्विनश्यति।
पवित्रा पावनी स्नात्वा साध्वी पृथ्वीसमा सती ॥८२॥
क्षेत्रं प्रोक्तं बीजकोशो बीजाधानाय निर्मितः।
पाकं दत्वा शैत्यकाले ग्रीष्मे तापात् प्रताप्यते ॥८३॥
वर्षायां जलदानेन शुद्धः कणान् ददाति सः।
क्षेत्रं नारी बीजपात्रं बीजाधानाय निर्मितम् ॥८४॥
पाकोत्तरं सदा शीतं राजस्वल्ये प्रतप्यते।
निषेकवर्षादानेन शुद्धं बालान् ददाति तत् ॥८५॥
तस्मात् क्षेत्रं प्रतिवर्षं शुद्धमेव भवेद्यथा।
तद्वन्नार्यात्मकं क्षेत्रं प्रतिमासं प्रशुद्ध्यति ॥८६॥
इति तस्यै पातिव्रत्यं दत्वा सर्वे सुरादयः।
साध्वीं तारां तु गुरवे दत्वाऽभयं च सर्वथा ॥८७॥
देवा ययुः स्वभवनं स्वगृहं च बृहस्पतिः।
पतिव्रत्यं परं धर्मं पालयामास सा सती ॥८८॥
पत्नीव्रतं वृषं चापि पालयामास गीर्पतिः।
अथ तारासुतो बुधश्चन्द्रजन्मा ग्रहोऽभवत् ॥८९॥
स एव नन्दनवने चित्रां प्राप्य सतीं प्रियाम्।
घृताचीगर्भसंभूतां कुबेरस्य तु रेतसा ॥९०॥
तां गान्धर्वविवाहेन जग्राह चन्द्रमस्सुतः।
तत्पुत्रस्त्वभवच्चैत्रः सप्तद्वीपक्षितीश्वरः ॥९१॥
तस्य पुत्रोऽधिरथाख्यस्तस्य सुरथनामकः।
पुत्रस्तपस्यया जातो मन्वन्तरः स चाऽष्टमः ॥९२॥
सावर्णिरितिनाम्ना वै वैष्णवः परमो हि सः।
पठनाच्छ्रवणाच्चास्य पातिव्रत्यफलं भवेत् ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने तारायां बृहस्पतयेऽर्पणं, बुधजन्म, आपत्समाः स्त्रीधर्माः शुद्धिश्च, पातिव्रत्येऽदूषणानि चेत्यादिनिरूपण-नामा षट्चत्वारिंशदधिकचतुश्शत-तमोऽध्यायः ॥४४६॥

श्रीनारायण उवाच—

गुरवो निर्मलाः शान्ताः साधवो हितकारिणः।
एभिः कारुण्यतो दत्तो नाममन्त्रः प्रसिद्ध्यति ॥ १ ॥
पातिव्रत्यं परो धर्मः कृष्णनाम्ना दृढीकृतः।
सिद्धीरैश्वर्यसर्वार्थचमत्कारप्रदो भवेत् ॥ २ ॥
शृणु लक्ष्मि! कथां राजवत्या वैष्णविकास्त्रियाः।
यथा सिद्धिस्तया प्राप्ता दिव्या भक्त्या च सेवया ॥ ३ ॥
आसीद् राजा मथुरायां दाशार्हो नाम धैर्यवान्।
वदान्यश्चाऽप्रधृष्यश्च नयवान् शास्त्रकोविदः ॥ ४ ॥
स वै कलावतीं काशीराजकन्यां पतिव्रताम्।
उपयेमे सतीं साध्वीं वैष्णवीं धर्मसंयुताम् ॥ ५ ॥

कलावती सदाऽऽबाल्यात् कृष्णं भेजे सनातनम् ।
कृष्णनारायणस्वामिन् मामुद्धर भवार्णवात् ॥ ६ ॥
कृष्णनारायणविष्णो श्रीपते कमलापते ।
इत्येवं प्रार्थनां चक्रे नित्यं भक्तिपरायणा ॥ ७ ॥
पतिः कृष्णः पतिर्नारायणः श्रीराधिकापतिः ।
अहं राधा ह्यहं लक्ष्मीरहं श्रीरनपायिनी ॥ ८ ॥
इत्यैकात्म्यं हरौ चात्मन्यवाप्ता योगदर्शिनी ।
पत्यौ कृष्णं दिव्यदृष्ट्या पश्यत्येव दिवानिशम् ॥ ९ ॥
एवं स्थितिं समापन्नां युवतीं योगिनीं सतीम् ।
कृतोद्वाहस्तु दाशार्हः प्रापयित्वा स्वमन्दिरम् ॥१०॥
शृंगारशयने पत्नीं संगमाय समाह्वयत् ।
सा चाऽऽगत्यनमश्चक्रे शीघ्रं भयाद् विनिर्गता ॥११॥
युवतीषु च वृद्धासु मध्ये शिष्ये सुखेन सा ।
राजाऽयं चिन्तयामास किमत्र कारणं भवेत् ॥१२॥
युवत्यपि न सा कान्तं युवानं मां समिच्छति ।
यद्वा तद्वा भवत्वत्र शनैर्वै ज्ञास्यते ऋतम् ॥१३॥
क्षमां कृत्वा च दाशार्हः शान्तो निन्ये निशां तु ताम् ।
एवं नित्यं स दाशार्हः समाह्वयति कामुकः ॥१४॥
सा त्वागत्य नमस्कृत्य निनिर्याति तु सत्वरम् ।
कृष्णनारायणविष्णो स्वामिँस्तेऽस्तु नमो मुहुः ॥१५॥
इत्युच्चार्य विनिर्याति योषित्तु प्रतितिष्ठति ।
नैकला तु क्वचित्तत्र पतिव्रता सा तिष्ठति ॥१६॥
नैकान्तं रोचते तस्यै राजा त्वेकान्तमिच्छति ।
रत्यर्थं युवती राज्ञा बहुवारं निवेदिता ॥१७॥
ततः स्वस्या मनश्चक्रे दृढं निष्कामवर्तने ।
सा स्वभर्त्रा समाहूता बहुशः प्रार्थिता सती ॥१८॥
न बबन्ध मनस्तस्मिन्न चागच्छत्तदन्तिकम् ।
संगमाय यदाऽऽहूता नाऽऽगता सा विवाहिता ॥१९॥
बलादाहर्तुकामस्तामुदतिष्ठन्महीपतिः ।
तदा सा प्राह राजानं मा मां स्पृश महीपते ॥२०॥
मा साहसं मयि कार्षीर्व्रतेऽस्मि हेतुगर्भिते ।
दर्शयिष्ये तु तं हेतुं येनाऽहं व्रतमास्थिता ॥२१॥
त्वं च धर्मं विजानासि गूढाद्गूढतरं नृप ।
भुक्तस्य परिणामश्चेदप्रियः कष्टवर्धनः ॥२२॥
दम्पत्योः प्रीतियोगेन संगमः सुखवर्धनः ।
प्रीतिर्यदा मे जायेत तदा संगोऽस्तु ते मयि ॥२३॥
का प्रीतिः किं सुखं पुंसां बलाद् भोगेन योषिताम् ।
अप्रीतां रोगिणीं कन्यामन्तर्वत्नीं धृतव्रताम् ॥२४॥
रजस्वलामकामां च न काम्येत बलात्पुमान् ।
प्रीणनं लालनं पुष्टिं रञ्जनं मार्दवं दयाम् ॥२५॥
आकर्षणं मनऐक्यं श्रेयोभावं च भावनाम् ।
कृत्वा वधूमुपगच्छेद् युवतीं प्रेमवान् पतिः ॥२६॥
तत्रापि धार्मिकः स्वामी व्यर्थं भोगं न चाचरेत् ।
भ्रूणहत्यात्मकं पापं व्यर्थबीजस्य मेहने ॥२७॥
नार्यामृतु समालक्ष्य भोगेन बीजमर्पयेत् ।
व्यर्थं कामाऽऽग्रहं राजन् मा कुर्वत्र वृषं चर ॥२८॥
इत्युक्तोऽपि तया साध्व्या दाशार्हः स्मरवेगवान् ।
बलादाकृष्य युवतीं परिरेभे रिरंसया ॥२९॥
सा च ओं श्रीकृष्णनारायणाय पतये नमः ।
इत्युक्त्वा च पतिं नत्वा कृष्णकृष्णेति चावदत् ॥३०॥
तावत् तस्याः शरीरे वै निगूढोऽग्निर्बभूव ह ।
चक्षुषा दृश्यते यो न दहत्येव तु केवलम् ॥३१॥
तां स्पृष्टमात्रां सहसा तप्ताऽयःपिण्डसन्निभाम् ।
निर्दहन्तीमिवाऽऽत्मानं तत्याज भयविह्वलः ॥३२॥
राजा विवेद तां देवीं चमत्कारमयीं सतीम् ।
प्राहाऽहो महदाश्चर्यमिदं दृष्टं त्वयि प्रिये ॥३३॥
कथमग्निमयं जातं वपुः कुसुमकोमलम् ।
क्षमस्व साहसं मेऽत्र करिष्ये न पुनस्तथा ॥३४॥
एवं जगाद भीतः सः तमुवाच पतिव्रता ।
राजन् सती धर्मवती ऋताविच्छति संगमम् ॥३५॥
नाऽन्येव कामकारेण क्षुद्रेव विषयार्थिनी ।
प्राग्भवेऽपि ब्रह्मचर्यं मया तथैव पालितम् ॥३६॥
अस्मिन् जन्मन्यपि तथा समीहे व्रतमुत्तमम् ।
अग्निः साक्षान्मम रक्षां करोति धर्मयोषितः ॥३७॥
अकाले स्पृशसि चेन्मां त्वां स भस्मीकरिष्यति ।
पूर्वपालितसौशील्यबलेनैतज्जनौ मम ॥३८॥
दुर्वासा मुनिराट् कृष्णभक्तः परमवैष्णवः ।
दत्तवान् श्रीकृष्णमन्त्रं पावनं मे सुरक्षकम् ॥३९॥
आबाल्यादहमेवैनं श्रीकृष्णाय नमः सदा ।
जपामि सततं चाथ द्वितीयं तु महामनुम् ॥४०॥
ओं नमः श्रीकृष्णनारायणाय पतये नमः ।
षोडशार्णं च तेनाऽहं गुप्तास्म्यनलशालिना ॥४१॥
तेन मन्त्रानुभावेन ममांगं कल्मषोज्झितम् ।
स्प्रष्टुं न शक्यते पुम्भिः सपापैर्देववर्जितैः ॥४२॥
त्वया राजन् सदा दास्यः किंकर्यः कुलटास्तथा ।
गणिकाद्या निषेव्यन्ते मदिराऽऽमिषभोजनाः ॥४३॥

तेन पापेन निस्तेजा वर्तसे क्षत्रियोऽपि सन्।
प्रासाया अपि योग्यो न दुष्कृतं किमतः परम् ॥४४॥
विवाहिताऽपि या पत्नी निर्मोक्तुं नैव शक्यते।
व्यर्थं वै जीवनं तस्य पूर्वपापाद्विभोगिनः ॥४५॥
न स्नानं क्रियते नित्यं न मन्त्रो जप्यते त्वया।
नाऽऽराध्यते पतिः कृष्णः कथं मां स्प्रष्टुमर्हसि ॥४६॥
पत्नीव्रतं त्वया राजन् कदाचिन्नहि पालितम्।
तेन पापेन ते राजन् सामर्थ्यं विलयं गतम् ॥४७॥
कामभोगेन किं राजन् सुखं यन्न सह व्रजेत्।
आत्मना सह नित्यं यत्सुखं तत् समुपार्जयेत् ॥४८॥
योनिलुब्धो योनिजन्म लभते नाऽत्र संशयः।
कृष्णलुब्धो हरेर्धाम प्राप्नोति नात्र संशयः ॥४९॥
अहं विवाहिता कृष्णधर्मसक्ताऽस्मि सर्वथा।
न चाऽऽसक्ता कामधर्मे तस्मात् कामं सदा त्यज ॥५०॥
कामो निरयरूपोऽत्र योनौ लिंगे च तिष्ठति।
कथं तस्मिंस्तु निरये लुब्धव्यं वै विजानता ॥५१॥
योनिकुण्डं सदा भ्रष्टं मूत्रदुर्गन्धसंभृतम्।
शुद्धः कथं प्रसज्जेत तत्र विट्मात्रके स्थले ॥५२॥
तत्र पक्वास्तत्र यान्ति पुनः पाचनहेतवे।
अज्ञास्तत्र प्रसह्यैव यान्ति पतनहेतवे ॥५३॥
विज्ञैः कथं नु गन्तव्यं मृत्युकुण्डे पुनः पुनः।
त्यज लोभं योनिकुण्डे ब्रह्मकुण्डे निमज्ज वै ॥५४॥
आत्मकुण्डं परे कृष्णे समर्पय विमुक्तये।
बह्व्यो दास्यस्त्वया भुक्ताः सर्वाः समा विलोकिताः ॥५५॥
अपि त्वां बाधते तृष्णा किं पापं स्यादतः परम्।
जिव्हया भोजनं ग्रस्तं तदान्त्रानलभर्जितम् ॥५६॥
रसात्मकं ह्यधोयातं चोष्णं स्निग्धं जलात्मकम्।
खर्जनं जायते तेन स्मर्यते मूत्रकुण्डकम् ॥५७॥
धिक् तदिदं भोजनं च यत् कृष्णस्मारकं न वै।
धिक् तमिमं कामभावं यस्तु न कृष्णदास्यदः ॥५८॥
धिक् तं तां च पतिं पत्नी यौ न कृष्णाय कल्पितौ।
भज राजन् कृष्णनारायणं विचार्य चेति वै ॥५९॥
पत्नीव्रतं हि तत्प्रोक्तं येन कृष्णो ह्यवाप्यते।
पातिव्रत्यं च स धर्मो येन कृष्णो ह्यवाप्यते ॥६०॥
इत्युक्तः स तदा राजाऽत्राप्य ज्ञानं स्वयोषितः।
विरागः सन् सतीं प्राह वद मन्त्रं ममापि तम् ॥६१॥
जपविध्वस्तपापोऽहं त्वयेच्छामि सुसंगतिम्।
ममाऽज्ञानकपाटं तु त्वया चोत्पाटितं प्रिये ॥६२॥
राज्ञी प्राह पतिं पूज्यं नाऽहं योग्याऽस्मि तत्कृते।
नाऽहं तवोपदेशं वै कुर्यां मम गुरुर्भवान् ॥६३॥
उपातिष्ठ गुरुं राजन् गर्गं मन्त्रविदां वरम्।
इतिसंभाषमाणौ तौ दम्पती गर्गसन्निधिम् ॥६४॥
प्राप्य तच्चरणौ मूर्ध्ना ववन्दाते कृताञ्जली।
अथ राजा गुरुं प्रीतमभिपूज्य पुनः पुनः ॥६५॥
संजगाद विनीतात्मा रहस्यात्ममनोरथम्।
कृतार्थं मां कुरु गुरो सम्प्राप्तं शरणागतम् ॥६६॥
मोक्षदात्रीं परां विद्यामुपदेष्टुं त्वमर्हसि।
अनाज्ञातं यदज्ञातं यत्कृतं राजकर्मणा ॥६७॥
शुष्कं चार्द्रं महत् स्वल्पं पापं मायाबलोद्भवम्।
तत्सर्वं येन शुद्ध्येत तन्मन्त्रं देहि मे गुरो! ॥६८॥
विना सतां प्रसंगेन पापिनां पापनाशनम्।
आत्मनः शोधनं चापि नैव स्याद्धि कदाचन ॥६९॥
नरा नार्यः सदा पापविशुद्ध्यर्थं युगे युगे।
सेवन्ते साधुपुरुषान् यतो मोक्षो यतो हरिः ॥७०॥
भोजिता वन्दिता दृष्टाः स्पृष्टाश्चरणे मर्दिताः।
शरीरे सेविताः सम्यक् प्रपुनन्ति प्रसेविनः ॥७१॥
यद्यत्प्रियं भवेत् स्वस्य देयं तत्साधवे सदा।
साधवो निर्गुणाश्चतुरर्थाः श्रीकृष्णमूर्तयः ॥७२॥
कृष्णसेवाफलं साधुसेवया लभ्यतेऽधिकम्।
कृष्णनारायणप्राप्तिप्रदास्ते साधवोऽनघाः ॥७३॥
यथा कामेन कामिन्यां कान्ते स्नेहः प्रजायते।
यथा जले तृषितस्य यथाऽन्ने क्षुधितस्य च ॥७४॥
यथा शैत्याभिभूतस्य वह्नौ स्नेहः प्रजायते।
यथा चेष्टौ सतृष्णस्य पुत्रे पितुश्च सद्गुणे ॥७५॥
यथौषधेऽतिरुग्णस्याऽपत्ये मातुर्यथा तथा।
साधुजने कृतः स्नेहस्तारयत्येव निश्चितम् ॥७६॥
यथा शिलाद्याः प्रतिमा जडा अपि सचेतनाः।
साधुरूपास्तथा दिव्यचेतनाः प्रतिमा हरेः ॥७७॥
तत्र दत्तं हुतं क्षिप्तं समर्पितं शुभाऽशुभम्।
सर्वं मोक्षप्रदं सम्पत्प्रदं स्वेष्टप्रदं नृणाम् ॥७८॥
येषां यासां न चाधारः कश्चित्तस्य तु साधवः।
आधारास्तारकाश्चात्मरक्षका भगवज्जनाः ॥७९॥
तस्माद्वै गर्ग मे शुद्धिं कुरु मन्त्रप्रदानतः।
एवमभ्यर्थितो राज्ञा गर्गो वैष्णवपुंगवः ॥८०॥
तौ निनाय महापुण्यं यमुनायास्तटं शुभम्।
तत्र वृन्दातरोः पार्श्वे निषण्णोऽथ गुरुः स्वयम् ॥८१॥

यमीतीर्थजलस्नातं दाशार्हं समुपोषितम् ।
प्राङ्मुखं चोपवेश्यैव नत्वा कृष्णपदाम्बुजम् ॥८२॥

तन्मस्तके करं न्यस्य मन्त्रं कृष्णात्मकं ददौ ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥८३॥
श्रीकृष्णाय नमश्चेति मन्त्रं दधार कर्णतः ।
तन्मन्त्रधारणादेव तद्गुरोर्हस्तसंगमात् ॥८४॥

निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ।
ते दग्धपक्षाः क्रोशन्तो निपतन्तो महीतले ॥८५॥
भस्मीभूतास्ततः सर्वे दृश्यन्ते स्म सहस्रशः ।
राजा राज्ञी च तद् दृष्ट्वा गर्गं गुरुमपृच्छताम् ॥८६॥
भगवन्निदमाश्चर्यं किमेतन्मे शरीरतः ।
निर्गतं वायसव्रातं दग्धं चेति वद स्फुटम् ॥८७॥
गर्गः प्राह त्वया जन्मसहस्रेषु प्रधावता ।
सञ्चितानि हि पापानि दुरन्तान्यप्यनेकशः ॥८८॥
पुण्यवशान्नरराजा संभूतोऽसि च तत्र वै ।
क्रियन्ते चातिपापानि तानीमान्यधुना तव ॥८९॥
मन्त्रग्रहणमात्रेण निर्गतानि शरीरतः ।
त इमे वायसाः सर्वे तमःपापस्वरूपिणः ॥९०॥

दृश्यन्ते स्म दह्यमानास्तव पातककोटयः ।
इति शुद्धोऽसि राजेन्द्र भज कृष्णं सनातनम् ॥९१॥
तदा कृष्णस्य तेजोभिर्युक्तस्त्वं वै भविष्यसि ।
ततस्त्वं चाऽनया तेजस्विन्या सार्धं सदार्तवे ॥९२॥
काले योग्ये मिते पुण्ये रन्तुं योग्यो भविष्यसि ।
अन्यथा ते सतीवह्निः काकवत् प्रदहिष्यति ॥९३॥

इत्युक्त्वा स मुनिर्गर्गो लब्ध्वा सत्कारमर्चनम् ।
ययौ निजाश्रमं राजा राज्ञ्या स्वभवनं ययौ ॥९४॥
वैष्णवौ दम्पती तौ च रेजतुः स्म महाद्युती ।
अथ मन्त्रप्रतापेन लक्षजापोत्तरं नृपः ॥९५॥

पत्नीस्पर्शस्य सत्पात्रमभूद् दिव्यशरीरवान् ।
तदा दृढं समाश्लिष्य पत्नीं चन्दनशीतलाम् ॥९६॥
सन्तोषं परमं लेभे चार्तवे समये तथा ।
श्रीकृष्णस्य व्रतं सत्या पुण्यदं वर्षमेव तु ॥९७॥

पालितं वै तया राज्ञ्या ब्रह्मचर्यं ह्यखण्डितम् ।
राजाऽपि वत्सरान्ते संशुद्धोऽभूद् वह्निसन्निभः ॥९८॥
ततो ददावृत्तौ बीजं पुत्रप्राप्तिफलात्मकम् ।
गतेषु नवमासेषु पुत्रं प्राप सुवैष्णवम् ॥९९॥

इति लक्ष्मि ! चमत्कारः कृष्णपतिव्रतोद्भवः ।
कथितस्ते श्रवात् पाठात् तादृशं लभते फलम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दाशार्हराज्ञः पापमय्यवस्थायां कृष्णपातिव्रत्यपरायणपत्न्याः स्पर्शे वह्निदाहस्ततः कृष्णमन्त्रग्रहणे पापदाहे शुद्ध्युत्तरं स्पर्शयोग्यतेत्यादिचमत्कारनिरूपणनामासप्तचत्वारिंश-दधिकचतुश्शततमोऽध्यायः ॥४४७॥

श्रीनारायण उवाच—

लक्ष्मि ! मया सदाशिवस्वरूपं संधृतं पुरा ।
त्यागवैराग्यरूपं तत् सर्वसंहारकारणम् ॥ १ ॥
मम शिवस्य रूपस्य सोमवारेऽर्चकः पुरा ।
आर्यावर्ते नृपश्चित्रवर्माऽऽसीद्धार्मिकः परः ॥ २ ॥
सुगोप्ता धर्मसेतूनां यष्टा यज्ञादिकर्मणाम् ।
पुण्यानामाश्रयो दाता भक्तः शिवमुकुन्दयोः ॥ ३ ॥
बहुपुत्रोत्तरं तस्य पत्न्यां कन्या व्यजायत ।
प्राग्जन्मनां तु कर्माणि जातमात्रा प्रवक्ति सा ॥ ४ ॥
जातिस्मरा सती साध्वी कृष्णधर्मपरायणा ।
सदा श्रीमत्कृष्णनारायणध्यानरता शुचिः ॥ ५ ॥
पातिव्रत्यपरा कृष्णे नान्यं स्मरति नित्यदा ।
एकदा भूभृता कृष्णसाधवो भोजिता गृहे ॥ ६ ॥
विप्राः सहस्रशो बाला नैष्ठिका बालिकास्तथा ।
ज्योतिर्विदो भाग्यविदो रेखाविदश्च योगिनः ॥ ७ ॥
तेषां ताम्बूलदानार्थं कन्या सेवापरा ह्यभूत् ।
दैवज्ञास्तां विलोक्यैव भिन्नं भिन्नं फलं जगुः ॥ ८ ॥
एकोऽब्रवीत् तव कन्या नाम्ना सीमन्तिनी नृप ।
पार्वतीव सुमांगल्यवती राधेव रूपिणी ॥ ९ ॥
शारदेव कलाभिज्ञा लक्ष्मीरिव महागुणा ।
सुप्रजा देवमातेव सती कृष्णे धृतव्रता ॥१०॥
माणिक्येव हरौ लग्ना प्रभेव कृष्णमाश्रिता ।
दशवर्षसहस्राणि सह भर्त्रा प्रमोदिनी ॥११॥
अष्टतनयमातेयं भविष्यति सुखान्विता ।
अथाऽन्योऽपि द्विजः प्राह रेखाभिर्निर्भयस्तदा ॥१२॥
एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यति ।
अथ कायाकल्परूपं पतिं पुनरवाप्स्यति ॥१३॥
राजा वज्रसमं वाक्यं श्रुत्वा शुशोच सा त्वपि ।
किन्तु दैवकृतं सर्वं मत्वा तत्याज शोचनम् ॥१४॥

बाला सीमन्तिनीनाम्नी भाविवैधव्यशंकिता ।
याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्यपृच्छत ॥१५॥
मातस्त्वं ब्रह्मवेदित्री कृष्णात्मार्पणवैष्णवी ।
ज्ञानाधिशेवधिश्रेणी सर्वापन्नाशिनी ह्यसि ॥१६॥
मातस्त्वच्चरणाम्भोजं प्रपन्नाऽस्मि भयार्दिता ।
वैधव्यं ब्राह्मणाश्चाहुर्मेऽत्र किं भावि तद् वद ॥१७॥
पुनस्तस्यैव पत्युश्च प्राप्तिर्मेऽस्तीत्यप्यूचिरे ।
अतः सौभाग्यवृद्ध्यर्थं सुकृतं वद मेऽनघे ! ॥१८॥
इत्युक्ता तां तु मैत्रेयी प्राह श्रीपार्वतीव्रतम् ।
सोमवारे पूजयस्व शिवं गौरीं श्रियाः पतिम् ॥१९॥
उपोषिता च सुस्नाता विरजोऽम्बरधारिणी ।
कृष्णपातिव्रत्यपरा प्रातः पूजां प्रकल्पय ॥२०॥
पापक्षयोऽभिषेकेण साम्राज्यं पादपूजनात् ।
सौभाग्यमखिलं सौख्यं गन्धमाल्याऽक्षताऽर्पणात् ॥२१॥
धूपदानेन सौगन्ध्यं कान्तिर्दीपप्रदानतः ।
नैवेद्यैस्तु महाभोगा लक्ष्मीस्ताम्बूलदानतः ॥२२॥
धर्मार्थकाममोक्षाश्च पुष्पांजलिनमोऽर्पणात् ।
अष्टैश्वर्याणि सिद्ध्याद्याः श्रीकृष्णात्मसमर्पणात् ॥२३॥
होमेन सर्वकामाश्च सफलाः संभवन्ति हि ।
सर्वे देवाः प्रतुष्यन्ति विप्राणां भोजनात् सताम् ॥२४॥
इत्थमाराधय कृष्णयुतां शिवशिवां सुते ।
घोराद्घोरं भयं पुत्रि ! तरिष्यसि न संशयः ॥२५॥
इत्युक्ता कन्यका तां मैत्रेयीं सम्पूज्य वस्तुभिः ।
गृहं गत्वा चकारैतद् व्रतं सौभाग्यवर्धनम् ॥२६॥
सा तेनाऽभूत् सिद्धियुक्ता पार्वतीश्रीसमा सती ।
अथ कन्यापिता चित्रवर्मा चन्द्रांगदाय ताम् ॥२७॥
ददौ नलस्य पुत्राय इन्द्रसेनसुताय वै ।
तदुद्वाहे महीपानां समवायो महानभूत् ॥२८॥
महोत्सवे सुनिर्वृत्ते जामाता श्वशुरगृहे ।
उवास कतिचिन्मासान् कन्यायाः स्नेहकारणात् ॥२९॥
एकदा यमुनां तर्तुं तरीमारुह्य बालकाः ।
ययुर्मध्ये दैवयोगादावर्त्ताभिहता तरी ॥३०॥
ममज्जुः सलिले ते तु मम्रिरे सुकुमारकाः ।
नाऽदृश्यन्त कुमारास्ते मज्जिता हि महाजले ॥३१॥
हाहाकारो महानासीद् राजा राज्ञी प्रजास्तथा ।
सीमन्तिनी तथा सख्यो नायकाश्च पुरोहिताः ॥३२॥
विलेपुर्मन्त्रिणश्चेन्द्रसेनोऽपि विललाप ह ।
यमुनाया महापूरे शवा अपि लयं गताः ॥३३॥
चित्रवर्मा प्रकारयामासौर्ध्वदैहिकं विधिम् ।
सा तु सीमन्तिनी साध्वी योगिनी योगिवत्तदा ॥३४॥
विदधे संयमं सौधे स्थित्वा पत्यर्थमेव सा ।
समाधौ संगता तूर्णं जलान्तरे तले सती ॥३५॥
बहुरूपधरा साध्वी बहुसामर्थ्ययोगिनी ।
यमुनां तां तदा पीतवती स्वांजलिभिः सती ॥३६॥
शुष्काऽभवत्तदा त्वेषा यमुना क्षेत्रसदृशी ।
मृताः शवा अदृश्यन्त सा निनाय तटं तु तान् ॥३७॥
ब्रह्मरन्ध्रगतान् यांश्च यमलोकगतांस्तथा ।
आजुहाव मुहुः सत्यपरास्तेऽत्र समाययुः ॥३८॥
जीविता एव ये सर्वे पतितत्र भू दृश्यते ।
चन्द्रांगदः पन्नगीभिः कन्याभिर्दृष्ट एव यत् ॥३९॥
सकामाभिः सुजाताभिः पातालं प्रापितोऽभवत् ।
तक्षकस्य पुरं नीतश्चेन्द्रस्वर्गाऽधिकं शुभम् ॥४०॥
रूपयौवनमाधुर्यविलासगतिशोभिना ।
नागकन्यासहस्रेण समन्तात्परिवारितः ॥४१॥
तक्षकस्तं राजपुत्रं ददर्श कन्यकायुतम् ।
पप्रच्छ सर्ववृत्तान्तं कन्यास्त्वाहुर्यथातथम् ॥४२॥
अथ चन्द्रांगदश्चापि शिवकृष्णेति संजपन् ।
तक्षकेण श्रुतो दृष्टः प्रेम्णोक्तश्च सुमानतः ॥४३॥
परितुष्टोऽस्मि भद्रं स्तात् तव भक्तियुतस्य वै ।
बालोऽपि यं शिवं कृष्णं जपस्येव निरन्तरम् ॥४४॥
एष रत्नमयो लोक एताश्चारुदृशोऽबलाः ।
एते कल्पद्रुमाः सर्वे वाप्योऽमृतरसांभसः ॥४५॥
यथेष्टं विहरैतेषु भुङ्क्ष्व भोगान् यथोचितान् ।
इति श्रुत्वा राजपुत्रः प्रोवाचाऽहं विवाहितः ॥४६॥
पतिव्रता मम कान्ता सती साध्वी शिवव्रता ।
कृष्णपातिव्रत्यपरा मत्वा मां तु मृतं ततः ॥४७॥
वैधव्यं सर्वचिह्नैस्तु ग्रहीष्यति ततोऽथवा ।
अग्नौ प्रवेक्ष्यति साध्वी सती सा विद्यते यतः ॥४८॥
अतो मया बहुतिथं नात्र स्थेयं कथञ्चन ।
तमेव लोकं कृपया मां प्रापयितुमर्हसि ॥४९॥
इत्युक्तवन्तं चन्द्रांगं तक्षको नागकन्यकाः ।
भवनानि सुभोग्यानि वाहनान्यमृतानि च ॥५०॥
ददौ कन्याप्रतुष्ट्यर्थं रमणार्थं समस्तकम् ।
अथाऽत्र तत्सती भार्याऽनवलोक्य प्रियं पतिम् ॥५१॥
समुद्रं त्वाह्वयामास सत्येन च व्रतेन वै ।
यद्यहं श्रीकृष्णनारायणभक्ताऽस्मि सर्वथा ॥५२॥

यद्यहं स्वपतिप्राणा पतिव्रताऽस्मि सर्वथा ।
यद्यहं च शिवायुक्तशिवतुष्ट्यै व्रतान्विता ॥५३॥
तदा समुद्रस्त्वत्रैव समायातु समीपतः ।
इत्युक्त्वा स्वहस्तगतं जलं मुमोच सा भुवि ॥५४॥
तावत् समुद्रः सभयः सुमूर्तो वै समाययौ ।
ननाम तु सतीं रत्नप्रदानैः समतोषयत् ॥५५॥
उवाचैनां मया नैव पतिस्तेऽपहृतोऽस्ति वै ।
पाताले तक्षककन्या निन्युस्तं सुन्दरं वरम् ॥५६॥
आगमिष्यति शीघ्रं सः तोषयित्वा सुपन्नगीः ।
एवमुक्त्वा ययौ त्वब्धिः सीमन्तिनी सुहर्षिता ॥५७॥
किन्त्वज्ञैः राजमुख्यैः सा पुरोहितादिभिस्तथा ।
वैधव्यचिह्नयुक्तैव तत्र प्रसह्य कारिता ॥५८॥
अथ कन्यास्तोषयित्वा रथं रत्नानि भूरिशः ।
नागकन्याः शुभाः सर्वाऽऽभूषावस्त्रादिशोभिताः ॥५९॥
तक्षकेनाऽर्पिता नीत्वा यमुनायां समाययौ ।
सती सीमन्तिनी स्वप्ने त्वागतं यमुनाजले ॥६०॥
दृष्ट्वोत्थाय ययौ पूजापात्रं नीत्वा सखीयुता ।
सा ददर्श नदीतीरे विहरन्तं पतिं प्रियम् ॥६१॥
दिव्यरत्नसमाकीर्णं दिव्यमालावतंसकम् ।
दिव्यगन्धेन देहेनाऽपूर्वाकृतिं समुज्ज्वलम् ॥६२॥
विलोक्य जडवद् राज्ञी तस्थौ तन्न्यस्तलोचना ।
तां च चन्द्रांगदो वीक्ष्य मुमोह क्षणमेव तु ॥६३॥
निर्मुक्तकण्ठाभरणां कण्ठसूत्रविवर्जिताम् ।
असंयोजितधम्मिल्लामंगरागविवर्जिताम् ॥६४॥
किञ्चिद्वैधव्यधर्माक्तां तामाहूयाऽब्रवीदिदम् ।
किमिदं दृश्यते साध्वि! शोकस्याऽऽवेदकं तव ॥६५॥
इति स्नेहेन संपृष्टा नाऽब्रवीदश्रुलोचना ।
सखी प्राह प्रसह्यैनां वैधव्यं कारितं जनैः ॥६६॥
विना पतिं हि क्षन्तव्यमनाथायास्तु सा गतिः ।
सोमवारव्रतं नैव त्यक्तं न च पतिव्रतम् ॥६७॥
कृष्णसेवा न वा त्यक्ता सर्वं तथैव विद्यते ।
मुनिपत्नीदर्शितस्य व्रतस्य फलमेव तु ॥६८॥
प्राप्तं ते प्रियया राजन्! गृहाणैनामनिन्दिताम् ।
इत्युक्तः स निजां पत्नीं चक्रे वक्षसि पीडिताम् ॥६९॥
अथ पौरजनास्तत्र दृष्ट्वाऽऽगतं नृपात्मजम् ।
गत्वा राज्ञे द्रुतं प्रोचुः राजा राज्ञी च नागराः ॥७०॥
प्रत्युद्गम्य परिष्वज्य तमानिन्युर्निजालयम् ।
राजपुत्रः श्वशुरौ तु ववन्दे बाष्पमुत्सृजन् ॥७१॥
प्रजास्तं मानयामासुर्वर्धयामासुराशिषा ।
तेषां मध्ये समासीनः स्ववृत्तान्तमशेषतः ॥७२॥
राज्ञे निवेदयामास तक्षकस्य सुमित्रताम् ।
दत्तं रत्नादिकं सर्वं दिव्यं राज्ञे न्यवेदयत् ॥७३॥
सौमांगल्यमयी वार्ता पत्नीराष्ट्रेऽभवत्तदा ।
तथा स्वस्य पितुः राष्ट्रे मानवैः कथिता कथा ॥७४॥
पितरौ च प्रजाः सर्वा निषधस्याऽतिहर्षिताः ।
तदुत्सवो महानासीद् राष्ट्रग्रामपुरादिषु ॥७५॥
सीमन्तिनी पतिं प्राप्य त्यक्तवैधव्यलक्षणा ।
वह्निं प्रदक्षिणीकृत्य सौभाग्यमंगलाऽभवत् ॥७६॥
चन्द्रांगदः स्वहस्तेन सिन्दूरादि समार्पयत् ।
बिन्दुं परस्परं तौ तु चक्राते साक्षतं शुभम् ॥७७॥
मालां परस्परं तौ चार्पयामासतुरैश्वरीम् ।
ताम्बूलकं ददतुश्च दानानि विविधान्यपि ॥७८॥
अथाऽयं श्वशुरौ नत्वा पत्नीयुतो निजं गृहम् ।
निषधं संययौ पित्रोः पादयोरपतत् ततः ॥७९॥
दशवर्षसहस्राणि सीमन्तिन्या स्वभार्यया ।
सार्धं चन्द्रांगदो राजा बुभुजे विषयान् बहून् ॥८०॥
प्रासूत तनयानष्टौ कन्यामेकां वराननाम् ।
रेमे सीमन्तिनी भर्त्रा ध्यायमाना हरिं हरम् ॥८१॥
दिने दिने तु सौभाग्यं प्राप चैवेन्दुवासरात् ।
एवं लक्ष्मि सदा पातिव्रत्यं विजयते भुवि ॥८२॥
स्वर्गे सत्ये ब्रह्मलोके पाताले प्रमदाजने ।
पातिव्रत्यं रक्षितं चेत् सर्वसिद्धिकरं भवेत् ॥८३॥
पतिं कृष्णस्वरूपं तु मत्वा ध्यात्वा सदा सती ।
कल्पवृक्षसमं धर्मं पातिव्रत्यं समाचरेत् ॥८४॥
पराधीनाऽबलानां वै कामप्रतिमयोषिताम् ।
देहाः पापाश्रयाः सन्ति ततोऽप्यधिकपुण्यदाः ॥८५॥
पापं तु कामातिशयः, पुण्यं सेवा पदे पदे ।
पतिसेवा कृष्णसेवा व्रतदानादिसेवनम् ॥८६॥
अतिथेश्च सतां सेवा गवां सेवा पदे पदे ।
निष्पापानामपत्यानां सेवा ब्रह्मस्वरूपिणाम् ॥८७॥
गृहसंरक्षणं सेवा वह्न्यन्नादिपाचनम् ।
वैश्वदेवात्मिका सेवा ह्यनाथश्वादिभोजनम् ॥८८॥
अन्नसत्रात्मिका सेवा बालस्य कलभाषणम् ।
विद्यादानात्मिका सेवा सहनं साधुभूषणम् ॥८९॥
पत्यधीना निरीहा च सद्गुणादिसुशोभनम् ।
इत्येवं सेवया पुण्यमनन्तकं स्त्रियाः सदा ॥९०॥

भुक्तिमुक्तिप्रदं तस्मात् पातिव्रत्यं समाचरेत् ।
पठनाच्छ्रवणाच्चास्य स्वर्गो मोक्षः करे स्थितौ ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चन्द्रांगदस्य कृष्णपतिव्रतया सीमन्तिनीनाम्न्या पत्न्या पातिव्रत्यबलचमत्कारैर्यमुनामग्नः पतिः पाताले नागकन्याभिर्नीतोऽपि पुनः प्राप्त इत्यादि-निरूपणनामाऽष्टचत्वारिंशदधिकचतुश्शत-तमोऽध्यायः ॥ ४४८ ॥

श्रीनारायण उवाच—

अथ सीमन्तिनीसत्याश्चमत्कारं वदामि ते ।
शृणु लक्ष्मि ! कृष्णभक्तिपरायाः पतियोषितः ॥ १ ॥
पातिव्रत्येन धर्मेण सदा कृष्णः प्रतुष्यति ।
पत्नी लक्ष्मीस्वरूपाऽस्ति पतिर्नारायणात्मकः ॥ २ ॥
इति बुद्ध्या प्रसेवेत परस्परं प्रमुच्यते ।
दम्पत्योः कृतसंकल्पाः सिद्ध्यन्ति नहि निष्फलाः ॥ ३ ॥
विदर्भविषये विप्रो वेदमित्रोऽभवत् सुधीः ।
तस्य पुत्रः सुमेधोऽभूद्धर्माचारपरायणः ॥ ४ ॥
अन्यः सारस्वताख्यश्च विप्रोऽभूत्तस्य पत्तने ।
तस्य पुत्रः सोमवाँश्चाऽभवद्धर्मपरायणः ॥ ५ ॥
सुमेधः सोमवाँश्चोभौ मित्रवर्यौ समाकृती ।
सर्वविद्याकुशलिनौ समविद्यौ बभूवतुः ॥ ६ ॥
तावेकदा स्वतनयौ द्विजाववोचतां हितम् ।
हे पुत्रकौ युवां बाल्ये कृतविद्यौ सुवर्चसौ ॥ ७ ॥
वैवाहिकोऽयं समयो वर्तते युवयोः समम् ।
इमं विदर्भराजानं प्रसाद्य प्राप्य वै धनम् ॥ ८ ॥
श्रेष्ठकुलजकन्याभ्यां कृतोद्वाहौ भविष्यथः ।
एवमुक्तौ सुतौ गत्वा समतोषयतां नृपम् ॥ ९ ॥
धनार्थमर्थितो राजा प्राह तौ दैवनोदितः ।
मम पुत्री निषधेशपत्नी सीमन्तिनी सती ॥१०॥
सोमवारे पूजयित्वा श्रीपतिं पार्वतीपतिम् ।
पत्नीयुक्तान् द्विजान् वेदविदो धनं ददात्यलम् ॥११॥
अतोऽत्र युवयोरेको नारीविभ्रमवेषधृक् ।
एकस्तस्याः पतिश्चेति जायेथां विप्रदम्पती ॥१२॥
गत्वा तत्र धनं लब्ध्वा पुनर्यातं ममान्तिकम् ।
यदि न्यूनं भवेच्चेत् तद् दास्येऽहं त्वधिकं धनम् ॥१३॥
इत्युक्तौ प्राहतुः राजन् कर्तुं ह्यजायते भयम् ।
देवतासु गुरौ पित्रोः सिद्धे योगिनि भूभृति ॥१४॥
कौटिल्यमाचरन् सद्यो दण्डपात्रं विनश्यति ।
गोप्यमानं तु नौ छद्म कदाचित् ख्यातिमेष्यति ॥१५॥
तदार्जिता गुणाः सर्वे नशिष्यन्ति क्षणान्नृप ।
पापं निन्दा भयं वैरं तिष्ठन्ति छद्मनि ध्रुवम् ॥१६॥
अतो धूर्तजनाचारं नाश्रयावः कदाचन ।
श्रुत्वैतन्नृपतिः प्राह देवतापितृयोगिनाम् ॥१७॥
नोल्लंघ्यं शासनं पाल्यं सद्गुरुसिद्धभूभृताम् ।
शुभाशुभं तदादिष्टं कर्तव्यं श्रेयसे भवेत् ॥१८॥
इत्युक्तौ तौ तथेत्युक्त्वा सामवान् रूपवाँस्तदा ।
स्त्रीवेषं शाटिकां भूषा अञ्जनं केशसाधनम् ॥१९॥
अंगरागं स्पृहणीयं दधार युवती यथा ।
एवं तौ दम्पती भूत्वा जग्मतुस्तां सीमन्तिनीम् ॥२०॥
सा राज्ञी त्वर्चयांचक्रे पत्नीयुक्तान् यथाव्रतम् ।
तौ तु विप्रसुतौ दृष्ट्वा प्राप्तौ कृतकदम्पती ॥२१॥
पातिव्रत्येन धर्मेण तथा कृष्णस्य सेवया ।
हरभक्त्या विवेदैनं कुमारं कन्यकाकृतम् ॥२२॥
ज्ञात्वा किंचिद् विहस्याऽथ पित्रा संप्रेषिताविति ।
मेने गौरीमहेशौ च लक्ष्मीनारायणाविति ॥२३॥
शिवकृष्णात्मकान् विप्रान् गौरीश्रीरूपयोषितः ।
आवाह्य गन्धमाल्याद्यैर्धूपदीपैरपूजयत् ॥२४॥
पायसं मोदकान् मिष्टपोलिकाः शष्कुलीस्तथा ।
शाकानि भक्ष्यभोज्यानि विप्रानभोजयत् सती ॥२५॥
ताम्बूलं दक्षिणा धेनूर्हिरण्यं रत्नलक्षकम् ।
प्रत्येकं वस्त्रबाहुल्यं दत्वा नत्वा व्यसर्जयत् ॥२६॥
सीमन्तिन्या शिवां लक्ष्मीं त्वावाह्य सामवान् द्विजः ।
पूजितः कल्पिता कन्या सत्यं कन्या व्यजायत ॥२७॥
नारीचिह्नानि सर्वाणि पर्यवर्तन्त वर्ष्मणि ।
तौ तु धनं यथेष्टं वै प्राप्य ययतुः स्वं गृहम् ॥२८॥
सा तु विस्मृतपुंभावा मित्रे जातस्पृहाऽभवत् ।
कराभ्यां विप्रमाबद्ध्य कन्दर्पविवशाऽब्रवीत् ॥२९॥
अयि कान्त क्षणं तिष्ठ वने रम्ये सुपुष्पिते ।
त्वया विहर्तुमिच्छामि प्रिया तेऽस्मि गृहाण माम् ॥३०॥
परिष्वजस्व मां कान्तां पायय्स्व नवाऽधरम् ।
नाऽहं गन्तुं समर्थाऽस्मि स्मराऽऽवेगप्रपीडिता ॥३१॥
इत्थमश्रुतपूर्वां तां दृष्ट्वा निशम्य शंकितः ।
पप्रच्छ स्तनयुक्तां तां किमेवं भाषसे सखे ॥३२॥
नर्मवाक्यं वृथा नैवं वक्तव्यं कृत्रिमाऽबले ।
कन्यावेषं परित्यज्य कुमारवेषमावह ॥३३॥

इत्याज्ञप्ता प्रसन्ना सा वस्त्राणि दूरतोऽकरोत् ।
तावत् सा सत्यधम्मिला जघनस्तनशोभिनी ॥३४॥
योनियुक्ता लिंगहीना दृष्टा सुमेधसा प्रिया ।
सा तु जग्राह विप्रं तं सुरताय नवप्रिया ॥३५॥
सुमेधाः प्राह तां कन्यां शाटिकादीनि धारय ।
न प्रशस्तं विदुषोवैं जारधर्मनिषेवणम् ॥३६॥
वञ्चयित्वाऽऽत्मपितरौ धूर्तराजाऽनुशासनात् ।
अयं स्वयंकृतोऽनर्थ आवाभ्यां यद्विचेष्टितम् ॥३७॥
यस्त्वं विप्रात्मजो बालः प्राप्तः स्त्रीत्वं विगर्हितम् ।
कामभोगो ह्यनर्थाय कुमारयोर्विषं फलम् ॥३८॥
एवं विवेकमाश्रित्य तूष्णीमेहि स्वयं गृहम् ।
देवद्विजप्रसादेन स्त्रीत्वं नाशं समेष्यति ॥३९॥
अथवा दैवयोगेन स्त्रीत्वमेव भवेत्तव ।
पित्रा दत्ता मया साकं रंस्यसे वरवर्णिनि ॥४०॥
इत्युक्तापि कामदावानलव्याप्ता वधूस्तदा ।
बलेन तं समालिंग्य चुचुम्बाऽधरपल्लवम् ॥४१॥
धर्षितोऽपि तया धीरः सुमेधाः स्पर्शमात्रतः ।
शान्तिं तस्याश्चकारैव बहिः स्पर्शः प्रदाय च ॥४२॥
अक्षता कन्यका तृप्ता कामदाहो निवव्रृते ।
शुद्धिं कृत्वा जलाद्यैश्च ययतुर्नृपमन्दिरम् ॥४३॥
राजा ज्ञात्वाऽथ तद्वृत्तमवाप विस्मयं ततः ।
आहूय पितरौ विप्रौ जगाद स्वविचेष्टितम् ॥४४॥
श्रुत्वा सारस्वतः प्राह राजानं धूर्तचेष्टितम् ।
अरे राजन् मम पुत्रस्तवाऽऽज्ञया तु कान्यकम् ॥४५॥
वेषं धृत्वाऽभवत् कन्या स्त्रीत्वं भुंक्ते जुगुप्सितम् ।
अद्य ममैकपुत्रस्य वंशो नष्टस्तथा मम ॥४६॥
निराशाः पितरः सर्वे लुप्तपिण्डोदकक्रियाः ।
वदाऽत्र किं मया कार्यं दण्ड्योऽस्त्यद्य भवान् खलु ॥४७॥
राजा सर्वान् समाहूय महर्षीनाह दीनवत् ।
अस्याः पुंस्त्वं यथा स्यात् कुर्वन्तु मयि प्रसादनम् ॥४८॥
तेऽब्रुवन् श्रीपतेः सतीपतेर्लभ्यं प्रसादनम् ।
तद्भक्तानां प्रसादश्च लभ्यस्तेनेष्टमाप्नुयात् ॥४९॥
अथ राजा भरद्वाजं समाहूय महामुनिम् ।
पूजनं कारयामास श्रीपतेः पार्वतीपतेः ॥५०॥
विप्रा राजा तथा कन्याश्चैते सर्वे ह्युपोषिताः ।
त्रिरात्रं पूजनं चक्रुः षोडशादिसुवस्तुभिः ॥५१॥
अखण्डं भजनं चक्रुर्महोत्सवमकारयन् ।
जय लक्ष्मि जय चाम्बे श्रीपते पार्वतीपते ॥५२॥

इति तद्भजनं चाखण्डितं वाद्यसमन्वितम् ।
चक्रुस्तेन सुसन्तुष्टौ श्रीपतिः पार्वतीपतिः ॥५३॥
आययतुर्वाहनस्थौ पत्नी युक्तौ कृपालयौ ।
तौ चाहतुश्च राजानं किं ते ब्रूहि समीहितम् ॥५४॥
सोऽप्याह पुंस्त्वमेतस्य दीयेतां कृपया मयि ।
तावाहतुस्तदा राजन्नस्मद्भक्तैस्तु यत् कृतम् ॥५५॥
शक्यते नाऽन्यथाकर्तुं वर्षायुतशतैरपि ।
सीमन्तिनी महाभक्ता सती कृष्णपतिव्रता ॥५६॥
नैकसिद्धियुता देवी यमुनाजलपायिनी ।
स्वभर्तुर्जीवरक्षायाः कर्त्री योगसमाधिना ॥५७॥
यथा संकल्पयेत् साध्वी सती कृष्णापतिव्रता ।
तथा तत्कल्पनारूपं वस्तु परिणतं भवेत् ॥५८॥
कन्यावेषोऽभवद् बालस्तयाऽर्चिता तु कन्यका ।
कन्येयं पार्वती लक्ष्मीरिति संकल्प्य पूजिता ॥५९॥
सुमेधसः सुपत्नीयमिति संकल्प्य सादरम् ।
सुमेधाश्च पतिरस्याः सोमवत्याश्च कल्पितः ॥६०॥
तत् तथैव हि सञ्जातं योगिनां सबला गतिः ।
नान्यथा क्रियते कैश्चिदिति राजन् निबोध वै ॥६१॥
वयं भक्तवशाः सर्वे भक्तकृतं मतं हि नः ।
गच्छन्तु च भवन्तो वै सीमन्तिन्याः प्रपन्नताम् ॥६२॥
यदि कृपायुता राज्ञी युष्मदिष्टं विधास्यति ।
कन्येयं कृपया तस्याः पुनः पुंस्त्वमवाप्स्यति ॥६३॥
इत्युक्ता विमनसस्ते ययुः सीमन्तिनीगृहम् ।
पुंस्त्वार्थं प्रार्थयामासुः प्राह सीमन्तिनी तु तान् ॥६४॥
कृतं कर्मफलं भुंक्ते मानवो भुवि सर्वथा ।
अस्या मात्रा व्रतं पुण्यकाख्यं कृतं पुरा यदा ॥६५॥
पुत्रेच्छया कृतं चापि वर्षान्ते दक्षिणाविधौ ।
पुत्री स्यान्मे तदा श्रेष्ठयमिति वै कल्पितं फले ॥६६॥
एवं द्वेधा व्रतपूर्णाहूतौ संकल्पितं यतः ।
ततः पुत्रः समुत्पन्नः स एव यौवनं गते ॥६७॥
कन्यारूपा प्रजाताऽस्ति व्रतेन कर्मणापि च ।
तस्मान्नेयं पुनः पुंस्त्वं गमिष्यति कदाचन ॥६८॥
किन्तु पुनरतत्स्वरूपस्तत्पित्रोः सुसुतः शुभः ।
सर्वलक्षणसम्पन्नो दीर्घजीवी च वैष्णवः ॥६९॥
ममेष्टदेवसंकल्पाद् भविष्यति हि निश्चितः ।
एषा सामवती नाम सुता तस्य द्विजन्मनः ॥७०॥
भूत्वा सुमेधसः पत्नी कामभोगेन युज्यताम् ।
यत्संकल्पेन यज्जातं प्राग्भवे चात्र वा भवे ॥७१॥

फलं संस्कारजन्यं तत् समापतति कालतः।
अस्मिन्नेव भवे त्वेषा नारीवेषधरा सती ॥७२॥
पतिं मत्वा सुमेधं तं वामपार्श्वे स्थिताऽभवत्।
पतिव्रताया हस्तेन पूजनं सर्वसाक्षिकम् ॥७३॥
सञ्जातं देवतुल्येन राज्ञा समनुमोदितम्।
सत्सर्वं तीव्रसंवेगं कर्म त्वस्याः फलात्मकम् ॥७४॥
पाकं प्राप्तं शक्यते नाऽन्यथाकर्तुं तु केनचित्।
कण्वस्य वचनात् कृष्णकुटुम्बस्य विनाशकम् ॥७५॥
साम्बगर्भसमाबद्धं मूशलं सुव्यजायत।
तस्माच्छोको न कर्तव्यः प्राप्ते फले तु कर्मणः ॥७६॥
कन्यात्वेऽपि परो लाभः पुत्रस्ते स्याद् द्वितीयकः।
एवं मत्वा सुखं यान्तु सर्वे सन्तु निरामयाः ॥७७॥
इत्युक्त्वा सा सती पुत्रीं सीमन्तिनी शुभाशिषा।
योजयामास बहुधा ययुः स्वं स्वं गृहं तु ते ॥७८॥
सारस्वतो द्विजः पुत्रीं ददौ तस्मै सुमेधसे।
अलभद् द्वितीयं पुत्रं सुताभूतसुतोत्तमम् ॥७९॥
एवं सतीप्रतापेन त्वतर्क्यमपि जायते।
तत्रापि कृष्णभक्ताया इष्टं द्रुतं विवर्तते ॥८०॥
एतत्ते कथितं लक्ष्मि सर्वं तपःप्रभावनम्।
पठनाच्छ्रवणात्तस्य यथेष्टं लभते जनः ॥८१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सारस्वतविप्रस्य सामवान्नामकसुतस्य विवाहव्ययार्थे विदर्भराजतो धनेच्छया गतस्य कन्यावेषेण भिक्षुकस्य सामवतः पतिव्रतया सीमन्तिन्या कन्यां मत्वा पूजितस्य सामवतीकन्यात्वं तत्पितुः पुत्रान्तरप्राप्ति-श्चेत्यादिनिरूपणनामैकोनपञ्चाशदधिकचतुश्शत-तमोऽध्यायः ॥४४९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सुतार्थे वै पार्वत्याः पातिव्रत्यकम्।
सत्या स्वयं सुरमध्ये व्रतान्ते सम्प्रकाशितम् ॥ १ ॥
हिमालयो ददौ कन्यां पार्वतीं शंकराय तु।
संरेमे नर्मदातीरे शय्यायां शिवया हरः ॥ २ ॥
तयोर्बभूव शृंगारो योगिनोर्बहुवासरान्।
देवा दैत्यार्दिताः शंभुपुत्रं दैत्यविनाशकम् ॥ ३ ॥
अयोनिजं समिच्छन्तो ययुस्तयोः रतेर्गृहम्।
वीर्यस्रावस्य निकटे प्राक्क्षणे द्वारि ते स्थिताः ॥ ४ ॥
आजुहुवुर्महादेवं देवास्ते रतिभंजकाः।
उत्तिष्ठतो महेशस्य भूमौ वीर्यं पपात ह ॥ ५ ॥
तद्वै तत्र सुवर्णं च रजतं च व्यजायत।
अथ वीर्यं न वै गर्भे प्राप्तं सत्याः शुशोच सा ॥ ६ ॥
यतो देवैः कृतं विघ्नं ततो देवा अपि सदा।
रति भंगकराः सर्वे व्यर्थवीर्या भवन्त्विति ॥ ७ ॥
इत्युक्त्वा शंकरं प्राह रतिविच्छेददुःखिता।
रतिभंगो दुःखमेकं द्वितीयं वीर्यपातनम् ॥ ८ ॥
दुःखातिरेकिदुःखं तु तृतीयमनपत्यता।
ततः पुत्रो यथा मे स्यात्तथा कुर्वत्र शंकर ! ॥ ९ ॥
श्रुत्वा तां शंकरः प्राह हरेर्भक्त्यन्विता सदा।
व्रतं तु पुण्यकं नाम वर्षमेकं कुरु प्रिये ॥१०॥
तेन पुत्रफलं तेऽत्र निश्चितं वै भविष्यति।
व्रतं तत् सुखदं पुण्यं वाञ्छाकल्पद्रुमात्मकम् ॥११॥
जाह्नवी सरितां मध्ये सुराणां श्रीहरिर्यथा।
अहं वैष्णवभक्तानां यथा त्वं देवयोषिताम् ॥१२॥
लक्ष्मीश्च सम्पदां यद्वत् सुवर्णं द्रव्यनामिनाम्।
शीलव्रतं व्रतानां च तद्वत् पुण्यव्रतं त्विदम् ॥१३॥
वर्णानां ब्राह्मणो यद्वत् तीर्थानां बदरीवनम्।
पारिजातं कुसुमानां दलानां तुलसीदलम् ॥१४॥
एकादशी तिथीनां च वाराणां तु यथा रविः।
मार्गशीर्षश्च मासानामृतूनां च वसन्तकः ॥१५॥
सम्वत्सरश्च वर्षाणां युगानां च कृतं यथा।
विद्यागुरुश्च पूज्यानां गुरूणां जननी यथा ॥१६॥
सती पत्नी यथाऽऽप्तानां विश्वस्तानां तु हृद् यथा।
यथा रत्नं धनानां च प्रियाणां च यथा पतिः ॥१७॥
यथा सुतश्च बन्धूनां कल्पद्रुः शाखिनां यथा।
आम्रफलं फलानां देशानां सौराष्ट्रको यथा ॥१८॥
वृन्दावनं वनानां च राधिका योषितां यथा।
पुरीणां च यथा काशी लक्ष्मीनां कंभरा यथा ॥१९॥
तेजस्विनां यथा त्वर्कः खण्डानां त्वजनाभकम्।
रात्रीशानां यथा चन्द्रो मोहकानां च मन्मथः ॥२०॥
विद्यानां तु यथा वेदाः साधूनां कपिलो यथा।
वानराणां हनूमाँश्च क्षेत्राणां च सतांमुखम् ॥२१॥
नेत्राणां च यथा विद्या वासना बलिनां यथा।
मनोहराणां काव्यं च व्यापकानां वियद् यथा ॥२२॥
अंगानां लोचनं यद्वत् साध्यानां मोक्षणं यथा।
वैभवानां कृष्णकथा सुखानां तृष्णिकालयः ॥२३॥

स्पर्शानां पुत्रसंस्पर्शो हिंसकानां खलो यथा ।
यथा मिथ्या च पापानां पापिनां मातृगो यथा ॥२४॥
पुण्यानां स्वार्पणं यद्वत् कार्याणां साधुसेवनम् ।
ऐकाग्र्यं तपसां यद्वल्लाभानां हरिसेवनम् ॥२५॥
गव्यानां च घृतं यथा वृक्षस्तपस्विनाम् ।
अमृतं भोज्यवस्तूनां सस्यानां व्रीहयो यथा ॥२६॥
पवित्राणां यथा वारि शोधकानां यथाऽनलः ।
स्त्रीरूपं सर्वरूपाणां मिष्टानां सुप्रियं वचः ॥२७॥
वैनतेयः पक्षिणां च ऐरावतश्च दन्तिनाम् ।
सनत्कुमारो योगिनां देवर्षीणां च नारदः ॥२८॥
गन्धर्वाणां चित्ररथो गुरुर्बुद्धिमतां यथा ।
कवीनां तु यथा शुक्रः काव्यानां संहिता यथा ॥२९॥
स्रोतस्वतां यथा त्वब्धिः क्षमिणां च क्षितिर्यथा ।
फलानां च यथा मुक्तिः शान्तिश्च सम्पदां यथा ॥३०॥
पावनानां वैष्णवाश्च वर्णानां प्रणवो यथा ।
कृष्णमन्त्रश्च मन्त्राणां पोष्टॄणां प्रकृतिर्यथा ॥३१॥
सरस्वती विदुषीणां गायत्री छन्दसां यथा ।
यथा कुबेरः श्रेष्ठिस्थो नागानां वासुकिर्यथा ॥३२॥
शय्यानां च यथा शेषो लयानां निद्रिका यथा ।
निष्क्रियाणां यथाऽऽलस्यं शैलानां मेरुपर्वतः ॥३३॥
गवां च सुरभिर्यद्वत् तृणानां च यथा कुशः ।
वेदानां सामवेदश्च मनो वै वेगिनां यथा ॥३४॥
सुखदानां यथा लक्ष्मीरक्षराणामवर्णकः ।
हितार्थिनां यथा तातो हेतीनां कवचं यथा ॥३५॥
शालग्रामश्च मूर्तीनां पशूनां केसरी यथा ।
देहिनां मानवो यद्वदिन्द्रियाणां तु हृद् यथा ॥३६॥
मन्दाग्निश्च रुजां यद्वच्छक्तिः शक्तिमता यथा ।
स्थूलानां च विराड् यद्वत् सूक्ष्माणां परमाणुकः ॥३७॥
आदित्यानां यथा विष्णुर्देवानामिन्द्र एव च ।
दैत्यानां च बलिर्यद्वद् दातॄणां च दधीचिकः ॥३८॥
प्रह्लादश्चैव साधूनां चक्राणां च सुदर्शनम् ।
ब्रह्मास्त्रं च यथाऽस्त्राणां रामादित्यश्च भूभृताम् ॥३९॥
धन्विना च नरो यद्वत् कृष्णो हृदयवासिनाम् ।
प्रसेव्यानां गुरुर्यद्वद् व्रतानां पुण्यकं तथा ॥४०॥
कर्तव्यं सेवनीयं च पालनीयं सुपुत्रदम् ।
हरेर्मन्त्रं गृहीत्वा त्वं व्रतं पुत्रप्रदं कुरु ॥४१॥
माघशुक्लत्रयोदश्यां व्रतारंभः शुभः प्रिये ।
उपोष्य पूर्वदिवसे द्वितीये व्रतमाचरेत् ॥४२॥
श्रीकृष्णं षोडशवस्तुसूपचारैः प्रपूजयेत् ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥४३॥
स्नानीयं मधुपर्कं च वस्त्राण्याभरणानि च ।
सुगन्धि पुष्पधूपं च दीपं नैवेद्यचन्दनम् ॥४४॥
यज्ञसूत्रं च ताम्बूलं द्रव्याण्येतानि षोडश ।
पुष्पांजलिं प्रणामादीन् क्षमा चाथ विसर्जनम् ॥४५॥
नित्यं कुर्याद् व्रतं सांवत्सरं पुत्रफलप्रदम् ।
षण्मासाँश्च हविष्यान्नं मासान् पञ्च फलादिकम् ॥४६॥
हविः पक्षं जलं पक्षं व्रतमेवं समापयेत् ।
देया व्रतसमाप्तौ च दक्षिणा होमपूर्विका ॥४७॥
कृष्णांशो वै भवेत्पुत्रो व्रतकर्त्र्या न संशयः ।
प्रियव्रतोत्तानपादौ लेभे शतरूपा व्रतात् ॥४८॥
देवहूतिर्व्रताल्लेभे कृष्णांशं कपिलं सुतम् ।
अरुन्धती व्रताल्लेभे कृष्णांशं शक्तिकं सुतम् ॥४९॥
सावित्री च व्रतं कृत्वा लेभे वेदान् सुपुत्रकान् ।
शक्तिकान्ता व्रतं कृत्वा लेभे पुत्रं पराशरम् ॥५०॥
सत्यवती व्रतं कृत्वा लेभे व्यासं सुतं हरिम् ।
व्रतेन कंभरा प्राप सुतं कृष्णनरायणम् ॥५१॥
अदितिश्च व्रतं कृत्वा लेभे वामनकं सुतम् ।
महेन्द्राणी व्रतं कृत्वा लेभे जयन्तकं सुतम् ॥५२॥
उत्तानपादपत्नी च लेभे ध्रुवं व्रतात् सुतम् ।
कुबेराणी व्रतं कृत्वा ललाभ नलकूबरम् ॥५३॥
सूर्यपत्नी श्राद्धदेवं मनुं लेभे च रैवतम् ।
अनसूया व्रतं कृत्वा लेभे चन्द्रं शुभं सुतम् ॥५४॥
लेभे चांगिरसः पत्नी व्रतात् सुतं बृहस्पतिम् ।
ख्यातिर्लेभे व्रतं कृत्वा शुक्राचार्यं सुतं कविम् ॥५५॥
एते नारायणांशा वै जाता व्रतप्रभावतः ।
व्रतस्याऽस्य प्रभावेण स्वयं गोपीपतिः प्रभुः ॥५६॥
ईश्वरः सर्वभूतानां तव पुत्रो भविष्यति ।
इत्युक्त्वा प्रययौ शंभुः पार्वत्या सह जाह्नवीम् ॥५७॥
तस्यै ददौ हरेर्मन्त्रं श्रीकृष्णाय नमः शुभम् ।
स्नात्वा व्रतस्य संकल्पं कृत्वा ययौ गृहं निजम् ॥५८॥
आनीय सर्वद्रव्याणि समारेभे व्रतं ततः ।
सनत्कुमारो भगवानभूत् तत्र पुरोहितः ॥५९॥
ब्रह्माद्या देवताः सर्वे मनवो यतयस्तथा ।
ऋषयो वालखिल्याश्च दक्षाद्या भूभृतस्तथा ॥६०॥
दिक्पाला लोकपालाश्च चिरजीविन आययुः ।
पूजिताः शंभुना प्राहुः करोतु पुण्यकं शिवा ॥६१॥

श्रीकृष्णश्च सुतस्तस्या भविष्यति पुरा यथा ।
एवं क्रमो महादेव ! कल्पे कल्पेऽस्ति सर्वथा ॥६२॥
इत्युक्तः शंकरः सनत्कुमारेण निवेदिताम् ।
पार्वतीद्वारिकां कृष्णपूजां श्रेष्ठामकारयत् ॥६३॥
संस्थाप्य रत्नकलशं शुक्लधान्योपरि स्थितम् ।
आम्रपल्लवसंयुक्तं फलाक्षतसुशोभितम् ॥६४॥
चन्दनागुरुकस्तूरीकुंकुमादिसमर्चितम् ।
मुनीन् सती पूजयित्वा संपूज्य स्वपुरोहितम् ॥६५॥
पुरः संस्थाप्य दिक्पालान् देवान् समर्च्य वै ततः ।
स्वस्तिवाचं वाचयित्वाऽऽवाह्य कृष्णं घटे ततः ॥६६॥
सम्पूज्य षोडशद्रव्यैरुपहारं चकार सा ।
तिलसर्पिषा हवनं त्रिलक्षं प्रचकार सा ॥६७॥
ब्राह्मणान् भोजयामास प्रददौ दक्षिणां पराम् ।
पुरोहितः शिवां प्राह देहि मे पतिदक्षिणाम् ॥६८॥
पतिरूपां दक्षिणां तु श्रुत्वा शुशोच पार्वती ।
शिवः प्राह शिवे ! दक्षिणया कर्मफलं भवेत् ॥६९॥
यत्कर्म दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् ।
तन्मुहूर्ते व्यतीते तु दक्षिणा द्विगुणा भवेत् ॥७०॥
चतुर्गुणा दिनातीते पक्षे शतगुणा भवेत् ।
मासे पञ्चशतगुणा षण्मासे तच्चतुर्गुणा ॥७१॥
सम्वत्सरे व्यतीते तु कर्म तन्निष्फलं भवेत् ।
पुत्रपौत्रधनैश्वर्यक्षयः स्यात्तु ततः परम् ॥७२॥
धर्मो नष्टो भवेत्तस्य धर्महीने तु कर्मणि ।
विष्णुः प्राह सति ! रक्ष फलदं रक्षकं वृषम् ॥७३॥
ब्रह्मा प्राह सति ! धर्मे नष्टे कर्ता विनश्यति ।
धर्मः प्राह शिवे ! कान्तं दत्वा मां रक्ष यत्नतः ॥७४॥
रक्षिते च मयि साध्वि ! सर्वं भद्रं भविष्यति ।
देवा ऊचुः रक्ष धर्मं कुरु पूर्णं व्रतं सति ! ॥७५॥
वयं तव व्रते पूर्णे कुर्मस्त्वां पूर्णमानसाम् ।
ऊचुस्तां मुनयः शंभुं देहि विप्राय दक्षिणाम् ॥७६॥
स्थितेष्वस्मत्सु धर्मज्ञे नाऽभद्रं ते भविष्यति ।
प्राह सनत्कुमारस्त्वं मे शिवं देहि दक्षिणाम् ॥७७॥
नो चेद् व्रतफलं सर्वं त्यज प्राप्स्याम्यहं फलम् ।
शिवा प्राह पतिर्यत्र ह्रियते तु पुरोधसा ॥७८॥
किं मे स्यात् तद्व्रतेनापि किं मे दक्षिणया सुराः ।
किं पुत्रेण च धर्मेण सर्वस्वं यत्र नीयते ॥७९॥
कुतः फलं कुतो वृक्षो यदि बीजं न विद्यते ।
भूमिः सा निष्फला बीजं विना सस्यप्रदा न वै ॥८०॥
कृषिश्च विफला सर्वा बीजं विना तु वार्षिकी ।
प्राणं त्यक्त्वा प्रयत्नेन वर्ष्मणा किं प्रयोजनम् ॥८१॥
दृष्टिशक्तिविहीनेन चक्षुषा किं प्रयोजनम् ।
शतपुत्राधिकः स्वामी साध्वीनां तु सुरेश्वराः ॥८२॥
यदि भर्ता व्रते देयः किं व्रतेन सुतेन वा ।
भर्तुर्वंशो हि तनयो भर्तुर्मूलो भवेत्सदा ॥८३॥
यत्र मूलं भवेद् भ्रष्टं तद्व्यापारस्तु हानिदः ।
विष्णुः प्राह सतीं तत्र पुत्रात् स्वामी परः सदा ॥८४॥
स्वामिनश्च परो धर्मस्तन्नाशे स्वामिनाऽपि किम् ।
ब्रह्मा प्राह सति पुत्रि धर्मो वै स्वामिनः परः ॥८५॥
धर्मात्परं सत्यकार्यं व्रतं सत्यं परं मतम् ।
सत्यं सदक्षिणं कर्म न तु भ्रष्टं कुरु व्रतम् ॥८६॥
शिवा प्राह च वेदेषु स्वशब्दो धनवाचकः ।
तद् यस्याऽस्तीति स स्वामी धनवान् स समुच्यते ॥८७॥
धनितः श्रेष्ठ एवात्र धर्मस्ततो व्रतं ऋतम् ।
तेभ्योऽधिकः पतिः स्वामी स्वामित्वं तत्र शाश्वतम् ॥८८॥
आगन्तुकं धनवतां तस्मात् स्वामी पतिः परः ।
तस्याऽहं धनमेवाऽस्मि पित्राऽहं चार्पिता पुरा ॥८९॥
दानरूपा शिवस्वत्ववती चाहं न मे शिवः ।
स्वत्वं विना कथं दानं वदन्त्यत्र सुरादयः ॥९०॥
धर्मः प्राह सदा पत्नी स्वामिनोऽर्धांगना मता ।
दम्पतीमूर्तिरेकैव स्वेन स्वं शक्यतेऽर्पितुम् ॥९१॥
सती प्राह मयि स्वाम्यं स्वामित्वं चेति चागतम् ।
स्वामित्वविगमं स्वाम्यं विनियोगक्षमं भवेत् ॥९२॥
ततो योग्या न वर्तेऽत्राऽर्पयितुं तु पतिं मम ।
पतिर्दाने स्त्रिया दत्त इति सृष्टौ न वै श्रुतम् ॥९३॥
कन्यादानं श्रुतावुक्तं जामात्रे जगतां क्रमः ।
वरदानं वरार्थिन्यै ज्येष्ठपित्रे कुतः क्रमः ॥९४॥
देवाः प्राहुः सति ! नैव बुद्धिमन्तो वयं त्वयि ।
पुण्यके कल्पितां स्वामिदक्षिणां धर्ममाचर ॥९५॥
श्रुतौ श्रुतः स वै धर्मो विपरीतो ह्यधर्मकः ।
सती प्राह विना लोकाचारं वेदोऽतिनिर्बलः ॥९६॥
वेदे प्रकृतिपुंसोस्तु गरीयान् पुरुषोऽधिपः ।
अधिपं नु कथं दास्ये बालाऽहं कथयामि किम् ॥९७॥
बृहस्पतिस्तदा प्राह सर्गश्चोभयनिर्मितः ।
श्रीकृष्णश्चोभयस्रष्टा समौ प्रकृतिपूरुषौ ॥९८॥
सती प्राह पुमान् कृष्णनारायणांश एव सः ।
नार्यस्तु मूलप्रकृतेरंशास्ततः पुमान् गुरुः ॥९९॥

पुमाँस्त्वत्र परब्रह्म सदाशिवः पतिर्मम ।
मया कथं पतिर्देयो वदन्त्वत्र हि देवताः ॥१००॥
इतिवादे प्रवृत्तेऽत्र विमानं स्वर्णभास्वरम् ।
आगतं श्रीपतिर्नारायणश्चतुर्भुजस्ततः ॥१०१॥
अवतीर्य सभामध्ये स्थितः सर्वैः प्रपूजितः ।
प्राह गौरीं सति ! त्वया न्याय्यमेव समुच्यते ॥१०२॥
दक्षिणा यज्ञपत्नी च यजमानेन दीयते ।
विप्राय तत्र मूल्यं वै दीयते न क्रतुप्रिया ॥१०३॥
परपत्नी परेण दीयते पराय न क्वचित् ।
तन्निमित्तं स्वर्णरौप्यं दीयते धनमेव यत् ॥१०४॥
पत्नीदाने पुत्रदाने स्वस्य दाने पत्यर्पणे ।
गोप्रदानं विधायैव कर्म पूर्णं प्रजायते ॥१०५॥
विष्णुदेहा यथा गावो विष्णुदेहस्तथा शिवः ।
विष्णुदेहा दक्षिणा च मूल्यात्मिका प्रदीयते ॥१०६॥
व्रतं पूर्णं कुरु शिवे ! शिवं दत्वा तु दक्षिणाम् ।
पुनः समुचितं मूल्यं दत्वा नाथं ग्रहीष्यसि ॥१०७॥
इत्युक्ता सा हवनान्ते शिवं वै दक्षिणां ददौ ।
स्वस्तीत्युक्त्वा तु जग्राह कुमारो देवसंसदि ॥१०८॥
सती प्राह गृहाणैतद् गवां लक्षं धनं च वा ।
देहि मत्स्वामिनं विप्र दास्ये दानानि वै ततः ॥१०९॥
पतिं विना न वै कर्म त्वन्यत् कर्तुं क्षमा यतः ।
सनत्कुमारश्चोवाच मे गवां न प्रयोजनम् ॥११०॥
रत्नानां च धनानां च साधोर्मे किं प्रयोजनम् ।
प्रयोजनं मे शिष्यस्य त्यागिनोऽवधूतस्य च ॥१११॥
स तु प्राप्तो मया त्वत्तो न दास्ये शंकरं तव ।
कर्तुरेवेप्सितं कर्म स्वस्य द्रव्ये स्वतन्त्रता ॥११२॥
अन्ये वदन्तु यत्किञ्चिद् गोभिर्न मे प्रयोजनम् ।
दिगम्बरं पुरः कृत्वा भ्रमिष्यामि जगत्त्रयम् ॥११३॥
बालकानां बालिकानां समूहस्मितकारणम् ।
इत्युक्त्वा तु शिवं पार्श्वे वासयामास वै सनत् ॥११४॥
पार्वती तु तदोत्तस्थौ जगाद शोकविह्वला ।
पुनर्लब्धः पतिर्नैव न प्राप्तं तु फलं व्रते ॥११५॥
एषा सती भवाम्यत्र वह्निमुत्पाद्य देहतः ।
हाहाकारोऽभवत् तत्र श्रीकृष्णो भगवान् स्वयम् ॥११६॥
झटित्येनां समाश्लिष्य वारयामास मूर्तिमान् ।
सत्या दृष्टश्च भगवान् विमानादवतीर्य सः ॥११७॥
रराज विनिवार्यैव सभामध्ये विलोकितः ।
देवैः सुपूजितं कृष्णं पार्वती तुष्टुवे हृदा ॥११८॥
त्वयाऽहं जीविता कृष्ण पुनर्जीवय शंभुना ।
शंभुं देहि फलं देहि पुत्रं भवादृशं प्रभो ॥११९॥
इत्युक्तः श्रीहरिः सत्यै दापयामास शंकरम् ।
पुरोधसे ददौ द्रव्यं विप्रेभ्यो दक्षिणास्तथा ॥१२०॥
व्रतं समाप्य सा सर्वान् भोजयित्वा ततः परम् ।
बुभुजे स्वामिना सार्धं ताम्बूलं च ददौ ततः ॥१२१॥
देवाद्याः पूजिताः सर्वे ययुः स्वर्गं ततः सती ।
शय्यायां शंभुना रेमे तावद् ब्राह्मणरूपधृक् ॥१२२॥
कृष्णस्तत्र समायातो वृद्धो भिक्षुक आह च ।
मातर्भिक्षां तु मे देहि पुनः पुनरुवाच ह ॥१२३॥
शंभुरुत्थाय तु शीघ्रं वीर्यमुत्सृज्य शायने ।
बहिः शीघ्रं त्वाजगाम तत् सत्याः शरीरेऽलगत् ॥१२४॥
वीर्यं यत्तत्कृतः पिण्डः कृष्णस्तस्मिन् व्यलीयत ।
तूर्णं बालोऽभवत् सत्या कृष्णतुल्यो विलोकितः ॥१२५॥
एवं प्राप्तो गणेशः सः श्रीकृष्णः स्वयमेव तु ।
पातिव्रत्येन सा दुर्गा पतिं तत्याज न क्वचित् ॥१२६॥
पतिर्देवः पतिः पोष्टा परलोकप्रदायकः ।
पुत्रपौत्रादिवंशस्य मूलं पतिः परः प्रभुः ॥१२७॥
प्राणानां विगमे चापि न त्याज्यः स्वपतिः प्रियः ।
दक्षिणार्थे गृहीतोऽपि गृहीतो न विसर्जितः ॥१२८॥
एवं पतिप्रिया साध्वी लभते कृष्णसदृशम् ।
सुपुत्रं कृपया पत्युः किमु वाच्यं नु पद्मजे ॥१२९॥
सतीव्रतसमाख्यानं पतिदानसमाग्रहम् ।
शृणुयाद्वा पठेद्वापि पुत्रं सौभाग्यमाप्नुयात् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पार्वत्याः पुण्यकव्रते शंभुदक्षिणानिमित्तपातिव्रत्यव्रतं संवादो गणेशपुत्रप्राप्तिश्चेत्यादिनिरूपणनामा पञ्चाशदधिकचतुरशततमोऽध्यायः ॥४५०॥

श्रीनारायण उवाच —

शृणु लक्ष्मि ! प्रवक्ष्यामि शबर्यास्तु पतिव्रतम् ।
चमत्कारभरं सर्वं पत्यर्थे किं न जायते ॥ १ ॥
या सती सर्वथा स्वामिसन्तोषादिपरायणा ।
जयत्येव सदा लोके धर्मो रक्षति रक्षितः ॥ २ ॥
आसीत् पाञ्चालराजस्य सिंहकेतोस्तु किंकरः ।
चण्डकाख्यस्तु शबरो यस्य गेहे पतिव्रता ॥ ३ ॥
शबरी पतिभक्ताऽऽसीत् पतिं मत्वा परं प्रभुम् ।
पतिं भेजे सदा भक्त्या यथा सन्तोषमाप्नुयात् ॥ ४ ॥

भोजनादौ विहारादौ व्यवसायादिकर्मसु ।
कैंकर्ये वा गृहकार्ये क्लेशं नैव करोति सा ॥ ५ ॥
सर्वदा सुप्रसन्नाऽऽस्ते स्मितानना च किंकरी ।
शुष्कं रूक्षं पर्युषितं स्निग्धं मिष्टं च वातुलम् ॥ ६ ॥
तिक्तं दग्धमपक्वं वा भर्जितं पाचितं च वा ।
संस्कृतं बाष्पितं यद्वा यादृक् तादृग् भवेदपि ॥ ७ ॥
शबरो न रुषं याति शबरी न विदूयते ।
शबरो नित्यमेवाऽस्याः प्रेमपात्रं सुशान्तिदः ॥ ८ ॥
शबरी स्वामिवशगा दत्वा कान्ताय खादति ।
कान्तं विष्णुं सदा मत्वा करोति सेवनं सती ॥ ९ ॥
शूद्रधर्मे पुरस्कृत्य वर्तेते दम्पती सदा ।
निष्कपटौ शाठ्यहीनौ सत्यमार्गपरायणौ ॥१०॥
साधूनां सेवकौ न्यायमार्गलब्धसुजीवनौ ।
कैंकर्येण च यल्लब्धमन्नाद्यं तत्र तुष्यतः ॥११॥
कार्ये प्राप्ते शबरश्च पृष्ट्वा भार्यां करोति तत् ।
शबर्यपि पतिं पृष्ट्वा कार्यं योग्यं करोति सा ॥१२॥
यद्यपि स्यात्प्राणनाशः पतिवाक्यं न मुञ्चति ।
शबरोऽपि निषिद्धं यच्छबर्या न करोति तत् ॥१३॥
शबर्यपि निषिद्धं यत् स्वामिना न करोति तत् ।
यत्र वै मनसोरैक्यं वैकुण्ठं स्वर्गमेव तत् ॥१४॥
यत्र सत्यं निष्कापट्यं परस्परं सुमाननम् ।
तत्र नारायणः कृष्णो विष्णुः शिवः शिवा श्रियाः ॥१५॥
स्मृद्धयश्च शुभो लाभः सिद्धिः रक्षा निरामयम् ।
एकदा सिंहकेतुः सः क्षात्रधर्मे समाश्रितः ॥१६॥
जगाम मृगयार्थं सभृत्यो वनं मृगान्वितम् ।
शबरः स वने जीर्णं ददर्श देवतालयम् ॥१७॥
तत्र लिंगं भग्नपीठे वियुक्तं स्वल्पमित्यपि ।
दृष्ट्वाऽऽदाय नृपं प्राह पश्यैनं रुचिरं शिवम् ॥१८॥
तमेनं पूजयिष्यामि यथाविभवमादरात् ।
पूजारीतिं मम ब्रूहि प्रीतः स्याच्छंकरो यथा ॥१९॥
इति पृष्टो नृपः प्राह प्रहस्यैनं यथातथम् ।
कठिनं पूजनं त्वस्य त्वया तन्नहि पार्यते ॥२०॥
संकल्पेन सदा कुर्यादभिषेकं नवाऽम्भसा ।
उपवेश्याऽऽसने शुद्धे शुभैर्गन्धाऽक्षतैर्नवैः ॥२१॥
वन्यैः पत्रैश्च कुसुमैर्धूपैर्दीपैश्च पूजयेत् ।
चिताभस्मोपहारं च प्रथमं परिकल्पयेत् ॥२२॥
आत्मोपभोग्येनान्नेन नैवेद्यं कल्पयेत् सदा ।
पुनश्च धूपदीपादीनुपचारान्प्रकल्पयेत् ॥२३॥
नृत्यवादित्रगीतादीन् यथावत् परिकल्पयेत् ।
नमस्कारं प्रकुर्याच्च प्रसादं धारयेत् ततः ॥२४॥
एष साधारणः प्रोक्तः शिवपूजाविधिस्तव ।
चिताभस्मोपहारेण सद्यस्तुष्यति शंकरः ॥२५॥
नमः शिवाय च वदेत् पार्वतीपतये नमः ।
एवमुच्चारयन् देवं पूजयेत् सकुटुम्बकः ॥२६॥
इत्युक्तश्चण्डको भीलो मूर्ध्ना जग्राह तद्वचः ।
अथ स्वभवनं प्राप्य लिङ्गरूपं सदाशिवम् ॥२७॥
चतुष्के पिप्पलमूले संस्थाप्य वैदिकोपरि ।
प्रत्यहं पूजयामास चिताभस्मोपहारकृत् ॥२८॥
यत्त्वात्मनः प्रियं वस्तु पत्न्याश्चापि प्रियं तु यत् ।
गन्धपुष्पाऽक्षताद्यं च मिष्टान्नं कणमेव वा ॥२९॥
निवेद्य शंभवे नित्यमुपायुंक्त ततः स्वयम् ।
एवं सदाशिवं भक्त्या सह पत्न्याऽभ्यपूजयत् ॥३०॥
आशुतोषस्तुतोषाऽस्मै ददौ सुखं धनादिकम् ।
अन्नं वस्त्रं गृहं द्रव्यं गौश्च दोग्ध्री यशस्तथा ॥३१॥
राज्यतः प्राप्यते सर्वं वेतनं दास्यधर्मतः ।
सत्याधारं शिवाधारं सुखं प्राप्तं कुटुम्बिना ॥३२॥
यथा यथाऽभवद् भीलः सुखी साधनवाँस्तथा ।
पूजनं प्राकरोन्नित्यं नियमेनाऽर्हणं मुहुः ॥३३॥
स्वयं गत्वा श्मशानादाबादाय शवभस्म सः ।
शिवस्य पूजनं चक्रे वृष्ट्यादावपि नित्यदा ॥३४॥
एकदा शिवपूजायै प्रवृत्तः शबरोत्तमः ।
न ददर्श चिताभस्म पात्रे यद् रक्षितं च तत् ॥३५॥
वृष्ट्या रात्रौ जलधारा पात्रे पपात छिद्रतः ।
भस्म प्रक्षालितं सर्वं प्रवाहेण समं गतम् ॥३६॥
इति विलोक्य रिक्तं तत्पात्रं यत्र च नाऽण्वपि ।
भस्म लेभे ततो दूरं श्मशानं प्रययावपि ॥३७॥
वृष्ट्या प्रक्षालितत्वात्तु चिताभूमेर्मनागपि ।
भस्म लेभे न वै तत्र परितः संभ्रमन्नपि ॥३८॥
ततः श्रान्तो रिक्तहस्तो गृहमागान्निराशकः ।
किं करोमि क्व गच्छामि भस्मार्थं चाद्य भूतले ॥३९॥
वृष्टिः सर्वत्र बहुला जाता प्रजायतेऽतिगा ।
ग्रामान्तरेऽपि सर्वत्र क्षालिता फेरुराट्क्षितिः ॥४०॥
भस्म प्राप्येत नैवाद्य पूजा जायेत नैव च ।
भोजनाद्यं ततः सर्वं भवेन्नाद्य तु मे खलु ॥४१॥
वृष्टेर्विरामे संजाते कस्यचिन्मरणोत्तरम् ।
मासान्ते वा मिलेद् भस्म तदा नीत्वा हरं प्रभुम् ॥४२॥

पूजयिष्ये ततो भक्ष्यं गृहीष्यामि कुटुम्बयुक् ।
इतिविचार्यं चाहूय पत्नीं भीलोऽब्रवीत् प्रिये ! ॥४३॥
न प्राप्ताऽहं चिताभस्म किं करोमि वद प्रिये ! ।
हरपूजामहाविघ्नं जातं मे त्वद्य दुस्तरम् ॥४४॥
प्राप्तवान्न चिताभस्म वृष्ट्या धौतं श्मशानकम् ।
उपायं नात्र पश्यामि पूजोपकरणार्जने ॥४५॥
पूजां विना क्षणार्धं वा नाऽहं जीवितुमुत्सहे ।
उपवासा भवेयुर्मे विना भस्मप्रपूजनम् ॥४६॥
इतिव्याकुलितं दृष्ट्वा सा सती शबरांगना ।
चिन्तयामास सततं शिवेन सुखिनो वयम् ॥४७॥
शिवः सुखप्रदो लक्ष्मीप्रदो मोक्षप्रदस्तथा ।
नहि शिवस्य भक्तानामशिवं संभवेत् क्वचित् ॥४८॥
शिवार्थे क्रियते यद्यत् तत्सर्वं शिवदं भवेत् ।
धनं गृहं यशो वस्त्रं भोजनं जलमित्यपि ॥४९॥
शिवार्थे कल्पितं सर्वं दिव्यं शिवकरं भवेत् ।
शिवेन सुन्दरो देहः प्रदत्तस्तेन पोषितः ॥५०॥
पत्यर्थे च शिवार्थे मे नारीदेहो भवेच्छुभः ।
को लाभस्तत्परश्चात्र येन मोक्षो भवेन्मम ॥५१॥
एव विचार्य शबरी मा भैः कान्तमुवाच ह ।
इदमेव गृहं दग्ध्वा जीर्णकाष्ठोपबृंहितम् ॥५२॥
अहमग्निं प्रवेक्ष्यामि चिताभस्म भवेत् ततः ।
पूजां तेन कुरु कान्त नारी कार्याऽपरा त्वया ॥५३॥
अहं प्राप्स्ये च कैलासं तव देहवियोजने ।
नेतुं चाहं त्वागमिष्ये शंभुना सह मा शुचः ॥५४॥
प्रियावाक्यं समाकर्ण्य शबरस्तामुवाच ह ।
धर्मार्थकाममोक्षाणां देहः परमसाधनम् ॥५५॥
कथं त्यजसि तं देहं सुखदं नवयौवनम् ।
अधुना त्वनपत्या त्वं भोगयोग्या पुनः पुनः ॥५६॥
दृढा पुष्टा बलिष्ठा च कथं दग्धुमिहेच्छसि ।
शबरी प्राह रे कान्त साफल्यं जीवितस्य मे ॥५७॥
प्राणत्यजनं पत्यर्थे शिवार्थे किमुत स्वयम् ।
किन्तु तप्तं तपो घोरं किं वा दत्तं मया पुरा ॥५८॥
किं वाऽर्चनं कृतं शंभोः पूर्वजन्मशतान्तरे ।
किं वा पुण्यं मम पितुः का वा मातुः कृतार्थता ॥५९॥
यच्छिवार्थे समिद्धाऽग्नौ त्यजाम्येतत्कलेवरम् ।
शबर्या मे प्राप्तकालो मोक्षस्याऽयं प्रवर्तते ॥६०॥
अनेकजन्मभिर्यो न प्राप्यते भीलयोषिता ।
कथं तं निष्फलं कर्तुं मोहे पतामि शूद्रिका ॥६१॥
सर्वे यज्ञाः प्रदानानि तीर्थानि च तपांसि च ।
मम जातानि मन्येऽहं मद्भस्म शंकरेऽर्पितम् ॥६२॥
इत्थं स्थिरां मतिं दृष्ट्वा तस्या भक्तिं च शंकरे ।
शबरोऽपि स्वस्य भस्म कर्तुं दातुं मनो दधे ॥६३॥
उवाच शबरीं पत्नीं जीव कान्ते शतं समाः ।
मम भस्म विधायैव मोक्षं यास्येऽतिदुर्लभम् ॥६४॥
नैकजन्मनां पापेन शबरोऽहं महाऽधमः ।
प्राप्तं मोक्षस्य सद्द्वारं कथं त्यक्तुं समुत्सहे ॥६५॥
त्वया शंभुः पूजनीयो सदा मद्भस्मना प्रिये ।
यद्वा सती प्रियं कान्तं जीवयत्येव भस्मतः ॥६६॥
सावित्री सत्यवन्तं संजीवयामास वै पुरा ।
यद्वा सती स्वयं वह्निमुत्पाद्य स्वामिना सह ॥६७॥
दिवं व्रजेत् तथा कार्यं त्वया मे प्रियया प्रिये ।
इत्युक्ता सा पतिं प्राह नाथ ते मरणोत्तरम् ॥६८॥
निश्चितं मरणं मेऽस्ति सतीरीत्या हि सर्वथा ।
द्वयोर्मृत्यवपेक्षयाऽत्र ममैव मरणं वरम् ॥६९॥
पतिदृष्ट्या सती नारी पतिहस्तेन या मृता ।
पत्यर्थे च शिवार्थे च जन्मसाफल्यमृच्छति ॥७०॥
एकोत्तरशतवंशोद्धारयित्री तु सा भवेत् ।
तल्लाभो मेऽत्र संप्राप्तो भवत्वेवं मयि कृपा ॥७१॥
इत्थं स्थिरां मतिं दृष्ट्वा न्याय्यं तस्या हितं वचः ।
तथेति दृढसंकल्पः शबरः प्रत्यपूजयत् ॥७२॥
सा भर्तारमनुज्ञाप्य स्नात्वा शुचिरलंकृता ।
गृहमादीप्य तं वह्निं भक्त्या चक्रे प्रदक्षिणम् ॥७३॥
नमस्कृत्वाऽऽत्मगुरवे ध्यात्वा पतिं तथा शिवम् ।
अग्निप्रवेशाऽभिमुखी कृतांजलिरिदं जगौ ॥७४॥
ममेन्द्रियाणि पुष्पाणि सन्तु धूपोऽगुरुर्वपुः ।
हृदयं सुप्रदीपोऽस्तु प्राणा हवींषि सन्तु च ॥७५॥
करणान्यक्षताः सन्तु शंभो त्वां पूजयाम्यहम् ।
न वाञ्छामि महाराज्यं स्वर्गं वा परमं पदम् ॥७६॥
तव सेवां सह पत्या सदा त्विच्छामि शंकर ।
चित्तं त्वयि सदा त्वस्तु हृदयेश नमोऽस्तु ते ॥७७॥
इतिप्रसाद्य देवेशं शबरी मुदितानना ।
विवेश ज्वलितं वह्निं भस्मसादभवत्क्षणात् ॥७८॥
शबरोऽपि तु तद्भस्म यत्नेन परिगृह्य च ।
चक्रे दग्धगृहोपान्ते हरपूजां समाहितः ॥७९॥
अथ सस्मार पूजान्ते प्रसादग्रहणोचिताम् ।
दयितां नित्यमायान्तीं प्रांजलिं विनयान्विताम् ॥८०॥

स्मृतमात्रां तदाऽपश्यदागतां पृष्ठतः स्थिताम् ।
पूर्वरूपां यथायोग्यां भक्तिनम्रां सुरूपिणीम् ॥८१॥
तां वीक्ष्य शबरः पत्नीं हास्ययुक्तां कृतांजलिम् ।
तथा भस्मीकृतं देहं यथापूर्वमवस्थितम् ॥८२॥
क्षणमाश्चर्यमापन्नस्तर्कयामास वै हृदि ।
अग्निर्दहति तेजोभिः सूर्यो दहति रश्मिभिः ॥८३॥
राजा दहति दण्डेन ब्राह्मणो मनसा दहेत् ।
शत्रुर्दहति हान्याद्यैः कुलटा वाक्प्रताडनैः ॥८४॥
विषं दहति चोष्णत्वाद् दुष्टा दहन्ति दर्शनात् ।
चिन्ता दहति फल्गुत्वाद्धिमं दहति शैत्यतः ॥८५॥
तृष्णा दहति चाऽतृप्तेः सती दहति शापतः ।
साधुर्दहति पापानि स्पर्शमात्रान्न संशयः ॥८६॥
कथं चेयं न वै दग्धा दृश्यतेऽत्र यथायथम् ।
किमयं स्वप्न आहोस्वित् किंवा मायेन्द्रजालिका ॥८७॥
इतिविस्मयसंभ्रान्तस्तां पत्नीं समपृच्छत ।
अयि त्वं तु कथं चास्से भस्मीभूताऽपि जवसि ॥८८॥
प्रदग्धं भवनं भूयः कथं पूर्ववदास्थितम् ।
श्रुत्वा प्रसन्नसुमुखी पतिव्रताऽऽह तं प्रियम् ॥८९॥
यदा गृहं समुद्दीप्य प्रविष्टाऽहं हुताशने ।
तदात्मानं न जानामि न पश्यामि हुताशनम् ॥९०॥
तदा पश्यामि पीयूषाक्तं शंभुं मम पार्श्वगम् ।
पाययन्तं सुधां मे संस्पृशन्तं स्वकरेण माम् ॥९१॥
न तापलेशोऽप्यासीन्मे प्रविष्टाया इवोदकम् ।
सुषुप्तेव क्षणार्धेन प्रबुद्धाऽस्मि पुनः क्षणात् ॥९२॥
तावद् भवनमद्राक्षमदग्धमिव सुस्थितम् ।
अधुना देवपूजान्ते प्रसादं लब्धुमागता ॥९३॥
देहि प्रसादं मे कान्त त्वानयामि सुवस्तु किम् ! ।
इत्युक्त्वा जलमादाय ददौ फलं तथाऽक्षतान् ॥९४॥
एवं प्रतिदिनं तौ तु पूजयामासुरादरात् ।
लक्षशो मनुजाः श्रुत्वा चमत्कारं तथाऽद्भुतम् ॥९५॥
दर्शनार्थं समाजग्मुस्तयोश्च शंकरस्य च ।
एवं परस्परं प्रेम्णा दम्पत्योर्वर्तमानयोः ॥९६॥
शंकरस्य कृपालेशात् सुखं लक्षसमा गताः ।
पुत्रपौत्रधनागारक्षेत्रगोदासयोषितः ॥९७॥
वैष्णवाः शंकरान्मन्त्रं प्राप्य जाताः कुटुम्बिनः ।
देहान्ते तु तयोर्भक्तदम्पत्योर्दिव्यमद्भुतम् ॥९८॥
प्रादुरासीद्विमानं च तत्र स्थित्वा तु दम्पती ।
शिवदूतकरस्पर्शाद् दिव्यदेहौ सरूपिणौ ॥९९॥
भूत्वा शिवालयं धाम ययतुर्वै परात्परम् ।
इति ते कथितं लक्ष्मि ! पातिव्रत्यं परं व्रतम् ॥१००॥
पत्नीव्रतं तथा श्रेष्ठं व्रतं शंभ्वार्पणं व्रतम् ।
आत्मार्पणं व्रतं सर्वव्रतेभ्यो वै विशिष्यते ॥१०१॥
योऽपि शूद्रः पठेद्वापि शृणुयाद्वा कथामिमाम् ।
शिवलोकं विष्णुलोकं भक्त्या यायान्न संशयः ॥१०२॥
पत्नीव्रतं पातिव्रत्यं विज्ञायाऽपि तथाऽऽचरेत् ।
ततोऽपि सर्वथा भुक्तिं मुक्तिं चान्ते लभेत् प्रिये ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शबरदम्पतीकृतशिवपूजार्थं पतिव्रताशबरीचिताभस्मार्पणे शबर्याः पुनर्जीवनमित्यादिपातिव्रत्यचमत्कारनिरूपण-नामैकपञ्चाशदधिकचतुश्शत-तमोऽध्यायः ॥४५१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारं पातिव्रत्यस्य वै पुनः ।
पतिर्देवो गुरुर्देवः शिवो देवस्त्रयो यया ॥ १ ॥
पूजिताः सेविता नित्यं वन्दिताः कृष्णकान्तया ।
तस्या मृषापि सत्यं स्याद् विपरीतं च सत्फलम् ॥ २ ॥
दुःखं चापि भवेत् सौख्यं वन्ध्यात्वं च सापत्यकम् ।
वैधव्यं सधवात्वं दुर्भाग्यं श्रेष्ठभाग्यकम् ॥ ३ ॥
अदैवं चापि सौभाग्यं विरुद्धं सानुकूलकम् ।
विपत् सम्पत्स्वरूपा स्यात् तुष्टे पत्यौ गुरौ शिवे ॥ ४ ॥
आनर्तविषये कश्चिन्नाम्ना वेदरथो द्विजः ।
चमत्कारपुरे त्वासीत् सुतदारकुटुम्बवान् ॥ ५ ॥
तस्य कन्या शारदाख्या कमलेव सती सदा ।
जन्मतः श्रीकृष्णनारायणाय स्वामिने नमः ॥ ६ ॥
इति प्राग्भवसंस्कारात् सदा वदति वै स्फुटम् ।
श्रुत्वा जना महाश्चर्यं प्राप्ता ववन्दिरे सतीम् ॥ ७ ॥
कृष्णं शिवं हाटकेशं गुरुं च पितरौ सती ।
नित्यं प्रातर्नमस्कृत्य ततोऽन्यत् प्राकरोत् सदा ॥ ८ ॥
एवं सा भजनानन्दाऽभवद् द्वादशहायना ।
तां ययाचे पद्मनाभो ब्राह्मणो नृपमानितः ॥ ९ ॥
महाधनस्य शान्तस्य तां कन्यां प्रददौ पिता ।
कृतोद्वाहो द्विजः सायं सन्ध्यां कर्तुं ययौ नदीम् ॥१०॥
मार्गे दष्टो भुजंगेन स ममार द्विजस्ततः ।
चुक्रुशुर्बान्धवा ज्ञात्वा श्वशुरावस्य कामिनी ॥११॥

कृतं तु बान्धवैरौर्ध्वदैहिकं शारदा ततः।
ब्राह्मणी प्राप्तवैधव्या पितुरेवाऽऽलये स्थिता ॥१२॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः।
वदत्येव सदा बाला नमः कृष्णाय चाऽजपत् ॥१३॥
कृष्ण एव पतिर्नान्यो ज्ञात्वाऽर्चयति माधवम्।
पितरौ सेवते नित्यं शिवाशिवस्वरूपिणौ ॥१४॥
लक्ष्मीं नारायणं नार्यां नरे पश्यति योगिनी।
शिवः स्वामी पतिः कृष्णो गुरुर्देवः पिता हरिः ॥१५॥
माता लक्ष्मीः सखी देवी कुटुम्बं साधुमण्डलम्।
भक्तिः शय्या रतिः कृष्णे ध्यानं मूर्तौ शिवा सुखम् ॥१६॥
भाग्यं धर्मः कृतिः सेवा विश्रान्तिर्भगवत्स्मृतौ।
यस्या भागवती सर्वा क्रिया दिव्या सतीमयी ॥१७॥
वैधव्येऽप्यभवत्पूर्वार्जितपुण्यबलाच्छुभा।
कृष्णः कान्तो धवो यस्याः सेवा सतां च मातृका ॥१८॥
तत्र सौभाग्यमेवाऽस्ति वैधव्यं परिवर्तते।
एवं वै वर्तमानायास्तस्याः पितुश्च मन्दिरे ॥१९॥
एकदा नैध्रुवो नाम साधुर्वृद्धः समागतः।
अन्धः शिष्यकरग्राही भिक्षां देहीति चाऽवदत् ॥२०॥
साधुं दृष्ट्वा यथा विष्णुं ददौ साऽऽसनमुत्तमम्।
स्वागतं ते महापूज्य पीठेऽस्मिन्नु ह्युपाविश ॥२१॥
इत्युक्त्वा भक्तिमास्थाय कृत्वा पादावनेजनम्।
वीजयित्वा जलं दत्वाऽपूजयत् पुष्पचन्दनैः ॥२२॥
श्रेष्ठमिष्टवरान्नैश्च भोजयामास सादरम्।
तृप्तस्त्वन्धमुनिस्तस्यै सुप्रीतः परमाशिषम् ॥२३॥
विहृत्य भर्त्रा सुखिनी लब्ध्वा सुतं गुणाधिकम्।
कीर्तिं च महतीं प्राप्य भव देवकृपावती ॥२४॥
साधूक्तं सा समाकर्ण्य विस्मिता प्रत्युवाच तम्।
साधो त्वद्वचनं सत्यं मन्दाया मे कथम् ऋतम् ॥२५॥
शिलाग्र्यामिव सद्वृष्टिः शुनक्यामिव सत्क्रिया।
विफला विधवायां वै शुभाशीः साधुदाऽपि तु ॥२६॥
अहं विधवा जाताऽस्मि त्वदाशीःपात्रता कथम्।
साधुः प्राह च तां देवीं मयोक्तं सफलं भवेत् ॥२७॥
साधूनां वचने कृष्णः स्वयमेव विराजते।
शंभुर्देवाः सहायाश्च भवन्ति वचने सताम् ॥२८॥
बलाल्लक्ष्म्या च शिवया प्रेरितोऽहं समागतः।
तव भक्त्या सति ! पुत्रि ! सौभाग्यं ते भविष्यति ॥२९॥
नहि भक्तिमती बाला दुःखिनी स्यादिति प्रभुः।
विष्णुश्चाहं साधुरूपस्त्वदर्थे वै समागतः ॥३०॥
भज कृष्णं शिवं लक्ष्मीं शिवां च पितरौ सदा।
कुरु त्वेकव्रतं पुत्रि ! ह्युमामाहेश्वराभिधम् ॥३१॥
यथोक्तं तु मया सर्वं सौभाग्यं ते भविष्यति।
वैधव्यं मम भक्तायाः कथं सहे सुपुत्रिके ॥३२॥
आगच्छ तव पितरौ कथयामि यथातथम्।
इत्युक्त्वा साधुविष्णुस्तामानयत् पितृसन्निधौ ॥३३॥
दत्ताशीर्वादवृत्तान्तं सौभाग्यं च व्रतं हरिः।
जगाद भावि यत्सर्वं ततश्चान्तरधीयत ॥३४॥
शृणु लक्ष्मि ! व्रतं चोमामाहेश्वरं सुभाग्यदम्।
मया तदा शारदायै कथितं चाकरोत् तु सा ॥३५॥
चैत्रे वा मार्गशीर्षे वा शुक्लपक्षे शुभे दिने।
अष्टम्यां वा चतुर्दश्यामुभयोः पर्वणोरपि ॥३६॥
गुर्वाज्ञया व्रतारंभं प्रकुर्वीत सती शुभा।
संकल्पं विधिवत् कृत्वा प्रातः स्नानं समाचरेत् ॥३७॥
सन्तर्प्य पितृदेवादीन् मण्डपं रचयेच्छुभम्।
तन्मध्ये पंचरंगानां चूर्णैः पद्मं समुल्लिखेत् ॥३८॥
चतुर्दशदलैर्वाह्येर्द्वाविंशद्भिस्तदन्तरे।
तदन्तरे षोडशभिरष्टभिश्च तदन्तरे ॥३९॥
चतुरस्रं ततः कुर्यादन्तर्वर्तुलमित्यपि।
मध्ये कूर्चं तत्परितो व्रीहितण्डुलराशिकम् ॥४०॥
कृत्वा कूर्चे वारिपूर्णं कलशं स्थापयेत्ततः।
वस्त्रं चित्रं कलशे च तत्र विन्यस्य वै शिवम् ॥४१॥
शिवां च स्थापयेद् द्रव्यैः षोडशभिः प्रपूजयेत्।
पंचामृतैः स्नापयेच्च जलेन स्नापयेत्ततः ॥४२॥
रुद्रं त्वेकादशवारं समुच्चार्य शताष्टकम्।
शिवाय नम इत्युक्त्वा पीठे मूर्तिं समर्चयेत् ॥४३॥
प्राणायामान् यथाशक्ति कृत्वा संकल्पयेत् ततः।
पूर्वजन्मीयपापानां नाशार्थं त्वां समर्थये ॥४४॥
सौभाग्यविजयाऽऽरोग्यधर्मैश्वर्याभिवृद्धये।
पुत्रसम्पत्स्वर्गमोक्षसिद्ध्यर्थं वां प्रपूजये ॥४५॥
अंगन्यासौस्ततः कृत्वा ध्यायेदीशं च पार्वतीम्।
योगिनं शंकरं ध्याये सतीं ध्याये पतिव्रताम् ॥४६॥
सजटं च सकेशां च त्र्यम्बकं त्र्यम्बिकां तथा।
ससर्पभूषणं कान्तं स्वर्णभूषान्वितां सतीम् ॥४७॥
नीलकण्ठं मिष्टकण्ठां द्विभुजं दोर्दशाऽष्टकाम्।
ध्यानमग्नं त्वंकमग्नां श्वेतं रक्तां विचिन्तये ॥४८॥
इतिध्यात्वा प्रतिमायामावाहनादि चारभेत्।
आवाहनं तथाऽर्घ्यं च गन्धं पुष्पाणि चाक्षतान् ॥४९॥

धूपं दीपं च नैवेद्यं जलं ताम्बूलकं ददेत् ।
शिवाय नमो मन्त्रेण जुहुयादष्टकं शतम् ॥५०॥
ततो नीराजनं कुर्यान्नमस्कारं क्षमापनम् ।
अथाऽभ्यर्च्योपचारेण भोजयेद् भक्तदम्पतीम् ॥५१॥
एवं सायं प्रकुर्याच्च पूजां भुञ्जीत पायसम् ।
एवं संवत्सरं कुर्यात् तत उद्यापनं चरेत् ॥५२॥
शतरुद्राध्यायपाठं कारयित्वा प्रपूजयेत् ।
वस्त्रं सुवर्णं कलशं प्रतिमां गुरवेऽर्पयेत् ॥५३॥
साधून् विप्रान् भोजयेच्च दद्याच्च स्वर्णदक्षिणाम् ।
ततः प्रसादं गृह्णीयाद् गोदानादिकमाचरेत् ॥५४॥
एवं व्रतस्य कर्ता वा कर्त्री स्वेष्टसुखं लभेत् ।
वंशं सौभाग्यमर्थं च सम्पदं भुक्तिमाप्नुयात् ॥५५॥
अन्ते मोक्षं शिवपदं कृष्णपदं प्रपद्यते ।
महाव्रतमिदं तेन साधुनोक्तं कृतं तया ॥५६॥
साध्व्या संवत्सरस्यान्ते तदुद्यापनमर्जितम् ।
उपोषिता तु सा बाला जजाप मन्त्रमन्वहम् ॥५७॥
शिवा शिवः समायतौ दिव्यरूपधरौ शुभौ ।
विष्णुना कथितं यद्वत् सर्वं सौभाग्यमेव तत् ॥५८॥
भवत्वत्रैव देहे ते पतिसौख्यं लभस्व च ।
इत्याशीर्वचनैर्बालां समरञ्जयतां शुभौ ॥५९॥
शंभुः प्राह प्रिये बाले पितरौ बान्धवादिकान् ।
समाह्वयाऽत्र तान् वक्तुमिच्छामि ते पुराभवम् ॥६०॥
इत्युक्ता शारदा सर्वानाह्वयत् शिवसन्निधौ ।
सर्वेषां शृण्वतां शंभुः शारदामाह पुत्रिके ॥६१॥
द्राविडे प्राग्भवे विप्रपत्न्यौ त्वं चापरा शुभे ।
आस्तां तत्र त्वया नित्यं पतिस्त्वयि प्रमोहितः ॥६२॥
ज्येष्ठायै ते सपत्न्यै च त्वया कान्तकृतं सुखम् ।
कदाचिन्नार्पितं तेन ज्येष्ठा दुःखेन वै मृता ॥६३॥
तेन पापेन विधवा त्वं त्विदानीं प्रविद्यसे ।
याः कुर्वन्ति स्त्रियो लोके जायापत्योस्तु विप्रियम् ॥६४॥
तासां कौमारवैधव्यं भवत्येव न संशयः ।
त्वया त्वाराधितः कृष्णो व्रतं चापि कृतं शुभम् ॥६५॥
तेन पुण्यं महज्जातं तेन पुण्येन ते पतिः ।
पूर्वभवीयविप्रोऽसौ स्वप्ने रतिं प्रदास्यति ॥६६॥
तेन पुत्रो विष्णुतुल्यश्चात्रैव संभविष्यति ।
एषः स विप्रवर्योऽस्ति शंभुर्यावज्जगाद ताम् ॥६७॥
तावत् तत्र प्राक्पतिः सः समदृश्यत वै युवा ।
सर्वैर्दृष्टः शिववाक्यात् तया माला समर्पिता ॥६८॥
कान्तेन चार्पितो भाले केशे सिन्दूरचूर्णकः ।
प्रकोष्ठयोः प्रदत्ते च कंकणे नेत्रकज्जलम् ॥६९॥
सर्वसौभाग्यद्रव्याणि दत्वा प्राग्ब्राह्मणः पतिः ।
पाणिना तच्छिरस्तत्र पस्पर्श यावदेव तु ॥७०॥
तावत् केशाः कृष्णरूपाः प्ररोहिताः प्रसाधिताः ।
धम्मिलश्च कृतस्तेन शाटिका स्वर्णतारिका ॥७१॥
कृता तत्रैव हस्तस्य स्पर्शेनाऽऽशीः प्रयुञ्जिता ।
एवं हसन् क्षणं तस्थौ शंभुर्दत्वा शुभाशिषः ॥७२॥
अदृश्यश्चाभवत्सोऽपि पतिश्चाऽदृश्यतां गतः ।
उत्सवः समभूत्तस्याः कन्याया व्रतपुण्यतः ॥७३॥
शृणु लक्ष्मि ! व्रतदाता साधुर्विष्णुरभूत् स्वयम् ।
स एव शंभुना चात्राऽऽहूतो विष्णुर्वरोऽभवत् ॥७४॥
कन्यायाः प्रत्ययार्थं च तद्वत् कुटुम्बिनां तथा ।
प्राग्भवीयस्य कान्तस्य रूपं दधार माधवः ॥७५॥
स एव भगवान् कृष्णः पतिर्भूत्वा सदा निशि ।
भक्ताया मानसे नित्यं कामतृप्तिं ददाति सः ॥७६॥
क्वचित् कृष्णस्वरूपं च क्वचिद् विप्रस्वरूपकम् ।
क्वचिच्छिवस्वरूपं च क्वचित्साधुस्वरूपकम् ॥७७॥
गृह्णाति भगवानस्या भवने रमते सदा ।
साऽपि श्रीरिव सौभाग्यतेजोभिर्दीप्यतां ययौ ॥७८॥
आत्मानं भुक्तिगं मेने प्रकाशं नाऽकरोत् सती ।
एवं दिनेषु गच्छत्सु सा बाला तु प्रतिक्षणम् ॥७९॥
भर्तुः समागमं लेभे रात्रौ सुखविवर्धनम् ।
शिवयोर्वरदानेन शारदा विशदव्रता ॥८०॥
दधार गर्भं स्वप्नेऽपि कृष्णसंगानुभावतः ।
अज्ञातास्तु जनाः कन्यां गर्भिणीं जारिणीं जगुः ॥८१॥
तैरज्ञातैः कृतस्तत्र समाजो ग्रामवासिनाम् ।
दण्डदानाय विद्वांसः पृष्टास्तत्र समागताः ॥८२॥
तेषु मध्ये स्वयं कृष्णो विप्रो भूत्वाऽपि चाययौ ।
शिवस्तत्र सुपण्डितो भूत्वा काश्यां समागतः ॥८३॥
शृणु लक्ष्मि ! शारदायाः कृते किं किमभूत्तदा ।
अन्तर्वत्नीं समाहूय शारदां वृद्धमानवाः ॥८४॥
पप्रच्छुस्तु कुतो गर्भः शारदापितरौ तदा ।
प्रत्यूचतुः प्राग्भवीयकान्तयोगाद् व्रतार्जितात् ॥८५॥
स्वप्ने बीजस्य लाभेन गर्भोऽयं नहि दोषवान् ।
जहसुश्च तदा सर्वे तिरस्कृत्य कुटुम्बकम् ॥८६॥
अतर्जयन् सुसंक्रुद्धाः केचिदासन् पराङ्मुखाः ।
सर्वे सम्मन्त्रयामासुः किं कुर्म इतिभाषिणः ॥८७॥

केचिदाहुः पापिनीयं कुलद्वयविनाशिनी ।
कृत्वाऽस्याः केशवपनं छित्वा कर्णौ च नासिकाम् ॥८८॥
निर्वासयन्तु च बहिर्ग्रामात् स्वगोत्रतो बहिः ।
अथ विष्णुः पण्डितस्तु तत्राऽऽह सर्वमानवान् ॥८९॥
मया पूर्वं श्रुतं चोमामाहेश्वरं व्रतं कृतम् ।
अनया तेन पुण्येन प्राप्तः स्वाप्नः पतिः सदा ॥९०॥
स्वप्ने गर्भो न भवति संशयो गर्भिणीकृते ।
नाऽस्यै दण्डः प्रदातव्यः सुचरित्रेयमंगना ॥९१॥
कुचारित्र्यं तु वदतां जिह्वा द्वेधा भविष्यति ।
श्रुत्वा प्रजह्नुस्तस्या जननीजनकादयः ॥९२॥
ततः क्षणं ग्रामवृद्धा मौनं भयात् प्रजगृहुः ।
तत्र केचिदविश्वस्ता मिथ्या स्वप्नमवादिषुः ॥९३॥
तेषां जिह्वा द्विधा भिन्ना ववमुस्ते तु रक्तकम् ।
भीताः सर्वे न चोचुर्वै विपरीतं ततश्च ते ॥९४॥
अथ शंभुः पण्डितश्च तदाह विष्णुपण्डितम् ।
स्वप्ने गर्भोऽपि भवति दैवानामीदृशी गतिः ॥९५॥
मायामयमिदं विश्वं दृश्यते श्रूयते च यत् ।
किं भाव्यं किमभाव्यं वा संसारे कृष्णनिर्मिते ॥९६॥
अनिरूप्यमभूतार्थं कदाचिज्जायते ऋतम् ।
श्रीकृष्णस्य वशे सर्वं तस्य को वेद चेष्टितम् ॥९७॥
यूपकेतोस्तु राजर्षेः शुक्रं निपतितं जले ।
सशुक्रं तज्जलं पीत्वा दासी गर्भं दधौ किल ॥९८॥
मुनेर्विभाण्डकस्यापि शुक्रं पीत्वा सहाम्भसा ।
हरिणी गर्भिणी भूत्वा ऋष्यश्रृंगमसूयत ॥९९॥
सौराष्ट्रस्य तथा राज्ञः करं स्पृष्ट्वा मृगांगना ।
तत्क्षणाद् गर्भिणी भूत्वा मुनिं प्रासूत तापसम् ॥१००॥
तथा सत्यवतीनारी शफरीगर्भसंभवा ।
तथैव महिषीगर्भो जातो वै महिषासुरः ॥१०१॥
फलस्य भोजनेनापि गर्भवत्यः स्त्रियः पुरा ।
मनसा कल्पिता नार्यो बभूवुः पुत्रमातरः ॥१०२॥
साम्बस्य जठराज्जातं मुसलं मुनिशापतः ।
युवनाश्वस्य गर्भोऽभून्मुनीनां मन्त्रगौरवात् ॥१०३॥
बीजं नार्यां नरे वापि विद्यते सर्वथा जनाः ।
परिणामी योगिनां तु वचनेन विजायते ॥१०४॥
अहल्या चोपला जाता गौतमस्यैव वाक्यतः ।
रामस्पर्शेन सा जाता युवती चेति दृश्यते ॥१०५॥
इन्द्रहेतिकृता जाता मरुतो बहवस्तथा ।
राधाया वचनाद् गंगा जलरूपा व्यजायत ॥१०६॥
समुद्रमथनाल्लक्ष्मीः क्षितेः सीता ह्यजायत ।
एवं वै बहुधा सृष्टिर्योगिनां वै प्रजायते ॥१०७॥
वसुदेवस्य कृपया रोहिण्यां गर्भं आस्थितः ।
शंकरस्य जटातश्च वीरभद्रोऽप्यजायत ॥१०८॥
नूनमेषापि कल्याणी व्रतस्य बलतस्तथा ।
साधोः सेवाप्रतापेन कृष्णस्य शरणागतेः ॥१०९॥
आशीर्वादात्मकं बीजं धत्ते गर्भमनिन्दिता ।
इत्युक्तस्तु सभाश्रेष्ठाः शशंसुर्ज्ञातिबान्धवाः ॥११०॥
साधुसाध्विति जगदुर्मुमुचुर्नेत्रतो जलम् ।
कुलस्त्रियः प्रमुदितास्तामुद्दिश्य समाश्वसन् ॥१११॥
तथापि मानवानां वै सन्देहस्य निवृत्तये ।
विप्रौ तौ तत्र सञ्जातौ क्षणमात्रं शिवो हरिः ॥११२॥
विष्णुर्विप्रस्वरूपोऽभूत् क्रोडे कृत्वा तु शारदाम् ।
तान् सर्वान् दर्शयामास कान्तं स्वं शारदां प्रियाम् ॥११३॥
दम्पतीरूपिणौ दृष्ट्वाऽऽवापुर्विस्मयमुत्तमम् ।
ततो व्यलीयत कृष्णः शिवोऽप्यन्तरधीयत ॥११४॥
सतीं तां पूजयामासुः श्रीरूपिणीं तदा जनाः ।
चमत्कारपुरावासा ययुः स्वं स्वं निकेतनम् ॥११५॥
अथ काले शुभे पुत्रमसूत शारदा सती ।
शारदेयाऽभिधः सोऽपि विद्वान् कृष्णसमोऽभवत् ॥११६॥
शारदा बहुवर्षाणि कृष्णसेवां विधाय च ।
वंशं लोके स्थापयित्वा श्रीकृष्णेन समं सती ॥११७॥
दिव्ययानेन गोलोकं ययौ पदं हि शाश्वतम् ।
इत्येतत् पुण्यमाख्यानं शारदायाः प्रवर्णितम् ॥११८॥
पठतां शृण्वतां सम्यग् भुक्तिमुक्तिफलप्रदम् ।
स्त्रीणां मंगलसौभाग्यसन्तानर्द्ध्यायुषां प्रदम् ॥११९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आनर्तदेशे चमत्कारपुरीयशारदाया वैधव्ये साधोराशीर्वादेन पुनः कृष्णात्मकविप्ररूपपतितः सौभाग्यं पुत्रलाभो जनानां विश्वासार्थे विप्ररूपकृष्णदर्शनं गोलोकप्राप्तिश्चेत्यादिपातिव्रत्यचमत्कारनिरूपणनामा द्विपञ्चाशदधिकचतुश्शततमोऽध्यायः ॥ ४५२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि भक्ताया वारयोषितः ।
नारायणमनस्कायाश्चमत्कारमयीं कथाम् ॥ १ ॥
नन्दिग्रामे पुरा त्वासीन्महानन्दाभिधा हरे ।
भक्तिमती तु वनिता श्रृंगारललिताकृतिः ॥ २ ॥

कुटुम्बरहिता स्वेच्छातन्त्रा शिवस्य किंकरी।
यद्यपि वारवनिता किन्तु कृष्णमयी सती ॥ ३ ॥
नित्यं स्नाति हरं विष्णुं पूजयत्यतिभावतः।
नर्तनं गायनं चापि करोति देवसन्निधौ ॥ ४ ॥
नृत्यगायनतालादौ ये त्वायान्ति तु दर्शकाः।
तेभ्यः प्रासादिकं वारि फलं तुलसीमिश्रितम् ॥ ५ ॥
पावित्र्यार्थे ददात्येव कृष्णार्थसर्वसंभवा।
नित्यं भजति गोविन्दं कृष्णभावनया नरम् ॥ ६ ॥
कृष्णार्पणं विधायैव देहकार्यं करोति सा।
छत्रं पूर्णेन्दुसंकाशं यानं स्वर्णविराजितम् ॥ ७ ॥
चामराणि सुदण्डानि पादुके तु हिरण्मये।
अम्बराणि विचित्राणि पर्यंकश्च हिरण्मयः ॥ ८ ॥
चन्द्ररश्मिनिभां शय्यां कृष्णार्थे परिरक्षति।
गावो महिष्यो दोग्ध्र्यश्च दीपांगदासदासिकाः ॥ ९ ॥
तस्या वचनविश्वस्ताः पूजयन्ति हरं हरिम्।
भूषणानि परार्ध्याणि नवरत्नोज्ज्वलानि च ॥१०॥
गन्धकुंकुमकस्तूरीकर्पूराऽगुरुलेपनम्।
चित्रमाल्यावतंसश्च यथेष्टं मृष्टभोजनम् ॥११॥
नानाचित्रवितानाढ्यं नानाधान्यभृतं गृहम्।
बहुरत्नसहस्राढ्यं स्वर्णरूप्यादिकं धनम् ॥१२॥
सर्वं कृतं हरार्थे च हर्यर्थे च तया सदा।
एवं सविभवा वारवनिता सत्यधर्मिणी ॥१३॥
भक्तसेवापरा कृष्णशिवपूजापरायणा।
सदा शास्त्रकथाश्रोत्री नामजापपरायणा ॥१४॥
विनोदहेतोर्देवाग्रे नाट्यमण्डपमध्यतः।
रुद्राक्षैर्भूषयित्वैकं मर्कटं चैककुक्कुटम् ॥१५॥
करतालैश्च गीतैश्च सदा नर्तयति स्वयम्।
रूद्राक्षैः कृतकेयूरकर्णाभरणभूषणः ॥१६॥
मर्कटः शिक्षया तस्याः सदा नृत्यति बालवत्।
शिखायां बद्धरुद्राक्षः कुक्कुटः कपिना सह ॥१७॥
चिरं नृत्यति नृत्यज्ञः पश्यतां चित्रमावहन्।
एकदा भवनं तस्याः कश्चिद् वणिक् सभृत्यकः ॥१८॥
नृत्यस्य दर्शनार्थं सद्भक्तः सकरकंकणः।
तत्प्रकोष्ठस्थितं रत्नकंकणं वीक्ष्य चाह तम् ॥१९॥
महारत्नखचितोऽयं कंकणस्ते करस्थितः।
मनो हरति मे भक्त दिव्यस्त्रीभूषणोचितः ॥२०॥
इति तां सस्पृहां वीक्ष्य वणिक् प्राह च तां तदा।
यदि ते रोचते चायं कंकणो मम भूषणम् ॥२१॥
भद्रमादत्स्व मद्भूषां मूल्यमस्य ददासि किम्।
तदा विहस्य सा वारवनिता स्फुटमाह तम् ॥२२॥
आगन्तुकस्य देहेन सेवाधर्मोऽस्ति मे सदा।
नारायणस्वरूपं त्वां मत्वा सेवां करोमि वै ॥२३॥
यद्येतद्रत्नखचितं ददासि करभूषणम्।
दिनत्रयमहोरात्रं तव पत्नी भवाम्यहम् ॥२४॥
नियतस्य न पत्नीत्वं सर्वदा वारयोषिताम्।
एकनियतपत्नीत्वं यथा नाऽप्सरसां दिवि ॥२५॥
तथास्त्विति वणिक् प्राह प्रमाणं शशिभास्करौ।
कृत्वा सत्यं त्रिवारं च स्पृष्ट्वाऽन्योन्यस्य वक्षसि ॥२६॥
दिनत्रयमहोरात्रं भूत्वाऽऽवां दम्पती ह्युभौ।
सहधर्मे चरावश्चेत्याहतुर्हृदयस्पृशौ ॥२७॥
अथ तस्यै वणिक्श्रेष्ठी प्रददौ रत्नकंकणम्।
निन्यतुस्तौ सुखं रात्रिं कामधर्मेण दम्पती ॥२८॥
द्वितीयायामथ रात्रौ नाट्यमण्डपिकान्तरे।
अकस्मादुत्थितो वह्निर्दीपवर्तिप्रसंगतः ॥२९॥
मर्कटकुक्कुटौ मुक्तौ बन्धनान्निर्गतावुभौ।
अन्ये दासाश्च दास्यश्च गोमहिष्यादयोऽपि च ॥३०॥
निर्बन्धना विनिर्गता तौ चापि निर्गतौ ततः।
शिवलिंगं हरिमूर्तिर्वह्नौ भस्माऽभवत् तदा ॥३१॥
स्मृत्वा तद् दम्पती तौ च दुरन्तं दुःखमापतुः।
वणिक् प्राह मम योगे सर्वे ते ज्वलितं प्रिये ॥३२॥
शिवो विष्णुर्मूर्तिरूपो ज्वलितो मम चागमात्।
महत्पापं मया चात्राऽऽगत्याऽर्जितं दुरन्तकम् ॥३३॥
न वै शर्म लभे साध्वि! म्रिये दुःखाऽसहात् प्रिये।
इत्युक्त्वा प्राणमाहृत्य पपात धरणौ वणिक् ॥३४॥
युवती त्रिदिनं तस्य धर्मपत्नी ह्यभूद् यतः।
अतीव दुःखिता भूत्वा स्मृत्वा धर्मं सुसाक्षिकम् ॥३५॥
सर्वानाहूय सा तत्र बभाषे करुणं वचः।
रत्नकंकणमादाय साक्ष्ये च शशिसूर्ययोः ॥३६॥
दिनत्रयमहमस्य पत्नी जाताऽस्मि धर्मतः।
यया तस्य चितायां वै प्रवेष्टव्यं हि धर्मतः ॥३७॥
इति तस्या वचः श्रुत्वा वणिग्भृत्य उवाच ताम्।
मैवं मैवं वद सौम्ये पतिर्नोऽयं विवाहितः ॥३८॥
विवाहितेन पतिना वह्निना साक्षिणा च या।
गृहीता करग्राहा च सा पत्नीति प्रकीर्त्यते ॥३९॥
त्वं तु नैतादृशी पत्नी व्यभिचारपरायणा।
कंकणार्थं महालोभात् पत्नीनाम्ना प्रकत्थसे ॥४०॥

त्वया सहाऽस्य दहने नरकं जीवतो यथा।
व्यवायस्य गृहे नष्टो व्यवायिनीकरेण च ॥४१॥
व्यवायिन्या समं दाहः श्रेयसां न प्रदायकः।
गच्छ दूरं सदा धूर्ते पुंश्चलि संप्रतारिके ! ॥४२॥
मम स्वामिशवस्थाऽहं करिष्ये दहनं तथा।
प्रवेक्ष्ये स्वामिचितायां मरिष्ये भृत्यधर्मतः ॥४३॥
भृत्योऽहं बहुकालीनः सेवयामि निरन्तरम्।
विना वै स्वामिनं प्राणाः स्थातुं शक्ता न मेऽत्र वै ॥४४॥
अन्नदाता वृत्तिदाता रक्षको ज्ञानदायकः।
निषेकी मन्त्रदो विपन्नाशकः पितरः स्मृताः ॥४५॥
विना पितरं लोकेऽस्मिन् भृत्यो मृत इव स्मृतः।
स्वामिनं नाशयित्वाऽहं दर्शयिष्ये कथं मुखम् ॥४६॥
भृत्योऽहं पुत्रतुल्योऽहं पोष्योऽहं धर्मतः सदा।
दाहं दास्ये ह्यहं पश्चात्प्रवेक्ष्यामि हुताशनम् ॥४७॥
मम लोका भविष्यन्ति शाश्वताः स्वामिना सह।
इत्युक्त्वा स चितां चक्रे काष्ठान्यादाय सर्वथा ॥४८॥
वणिजस्तु धनं किञ्चित्तथाऽन्यच्छृखलादिकम्।
ददौ दानं सुपात्रेभ्यः शवं न्यस्य चितानले ॥४९॥
प्रवेष्टुं याति यावद्धि तावत् सा वारकामिनी।
प्रधाव्य जगृहे हस्तं मा मा मेति जगाद तम् ॥५०॥
मैवं भृत्य त्वया कार्यं पुत्र जीव सदा भुवि।
इत्युक्तोऽपि जनैः सर्वैर्वारितोऽपि विवेश ह ॥५१॥
चितायां पतिते भृत्ये ततो निकटधर्मिणी।
सती त्वाह समाजस्य शृण्वतोऽस्य गृहिण्यहम् ॥५२॥
सधर्मचारिणी त्वस्य दिनत्रयं सुसम्मता।
मद्देहे मम योगेन मृतोऽयं वै पतिः कृतः ॥५३॥
तस्मादहं प्रवेक्ष्यामि सहाऽनेन हुताशनम्।
सत्येन प्रीतिमायान्ति देवास्त्रिभुवनेश्वराः ॥५४॥
सत्यात्मा वै परो धर्मः सत्ये सर्वं प्रतिष्ठितम्।
सत्येन स्वर्गमोक्षौ च नाऽसत्येन परा गतिः ॥५५॥
तस्मात् सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनम्।
भक्तयोगेन पूताऽहं भविष्यामि च पावनी ॥५६॥
कृष्णनारायणविष्णो शिव मंगलकृद्भव।
ओंनमः श्रीकृष्णनारायणाय स्वामिने नमः ॥५७॥
नमः शिवाय कृष्णाय श्रीराधापतये नमः।
इति श्रीकृष्णभजनं चक्रे दानं ददौ बहु ॥५८॥
सर्वस्वं साधुभक्तेभ्यो दत्वा ध्यात्वा हरं हरिम्।
नत्वा सर्वान् पतिं ध्यात्वा पर्युक्षिताऽनलं सती ॥५९॥
तद्भक्ता त्रिः परिक्रम्य प्रवेशाभिमुखी स्थिता।
तां पतन्तीं समिद्धाऽग्नौ स्वपदार्पितमानसाम् ॥६०॥
वारयामासतुर्देवौ प्रादुर्भूतौ शिवाऽच्युतौ।
वीक्ष्य सा तौ देवदेवौ कोटिसूर्याधिकप्रभौ ॥६१॥
स्तब्धेव जायमाना सा भीतेव जडवत् स्थिता।
तामूचतुः समाश्वास्य भगवन्तौ कृपानिधी ॥६२॥
सत्यं धर्मे च ते धैर्यं भक्तिं नरात्मके प्रभौ।
शिवकृष्णप्रतिमायां द्रष्टुं शिवाच्युतावुभौ ॥६३॥
माययाऽग्निं समुत्पाद्य दग्धवन्तौ सुमण्डपम्।
दग्धं कृत्वोभप्रतिमे भृत्यः शिवः स्वयं मुदा ॥६४॥
भृत्यभक्तिं दर्शयितुं प्रविष्टोऽत्र हुताशनम्।
वणिग्रूपोऽप्यह नारायणकृष्णः पतिस्तव ॥६५॥
परीक्षितुं समायातश्चान्तिमं सेवनं तव।
वेश्याः कैतवकारिण्यः स्वैरिण्यो जनवञ्चकाः ॥६६॥
सा त्वं सत्यमनुस्मृत्य प्रविष्टाऽग्निं सहाऽनुगा।
अतस्ते वाञ्छितं दास्ये वद श्रेष्ठोत्तमोत्तमम् ॥६७॥
श्रुत्वा साऽऽह न मे वाञ्छा भोगे त्वत्पादवर्जिते।
एते भृत्याश्च दास्यश्च ये त्वन्ये मम बान्धवाः ॥६८॥
सर्वे त्वदर्चनपरास्त्वयि सन्न्यस्तवृत्तयः।
सर्वानेतान् मया सार्धं नीत्वा तवाऽक्षरं पदम् ॥६९॥
शाश्वतानन्दसम्पूर्णसेवायां रक्ष सर्वदा।
तथेति तस्या वचनं प्रतिनन्द्य नरायणः ॥७०॥
तान् सर्वांश्च तया सार्धं निनाय पदमव्ययम्।
कालेन निधनं प्राप्तौ यौ तु कुक्कुटमर्कटौ ॥७१॥
कुक्कुरः काश्मीरराज्यकुमारः पुण्यतोऽभवत्।
मर्कटस्तत्प्रधानस्य कुमारश्चाऽभवत् तदा ॥७२॥
शिवविष्णुमहाभक्तौ कृत्वा राज्यं चिरं च तौ।
देहान्ते चाऽक्षरं धाम ययतुर्यत्र सा सती ॥७३॥
इतिते कथितं लक्ष्मि ! महापापप्रमोक्षणम्।
पठनाच्छ्रवणात्त्वस्य पापप्रध्वंसनं भवेत् ॥७४॥
पापिन्यपि वारनारी श्रवणात् करणात्तथा।
साधुसंसेवनात् सद्यो मुक्ताऽन्या मुच्यते तथा ॥७५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने वारवनितायाः सर्वस्वार्पणभक्त्या शिवाच्युतौ भृत्यवणिजौ भूत्वा पातिव्रत्याऽनलपरीक्षां चक्रतुर्मोक्षं प्रददतुश्चेत्यादि-निरूपणनामा त्रिपंचाशदधिकचतुश्शत-तमोऽध्यायः ॥४५३॥

श्रीनारायण उवाच—

शृणु प्रिये महालक्ष्मि! पातिव्रत्यं जनातिगम्।
धर्माधर्मौ स्वामिवचो मुख्यं नान्यदिति ध्रुवम्॥ १॥
पत्युर्वचसि चेन्मान्द्यं सती कुर्यात् सुधानिभम्।
स्वामिवाक्यं भवेत् हिंस्रं कुर्यात् पुण्यनिभं सती॥ २॥
कान्तोक्ते चेद् भवेत् स्तैन्यं न्याय्यं मत्वाऽऽचरेत् सती।
भर्त्राज्ञप्तं व्यवायं च धर्मं मत्वाऽऽचरेत् सती॥ ३॥
पतिरेव परब्रह्म कृष्णनारायणः स्वयम्।
शुभं समादिशेद् यद्वाऽशुभं सती समाचरेत्॥ ४॥
सती तस्य वचोवश्या पातिव्रत्यफलं लभेत्।
पतिश्चेदशुभं समादिशेत् स फलभाग् भवेत्॥ ५॥
नाऽत्राऽशुभे वचोऽधीने कार्ये तद्भागिनी सती।
प्रत्युताऽशुभकार्ये सा सामर्थ्यात् शुभदं चरेत्॥ ६॥
अनिष्टं दुःखदं सा तु सुखदं परिवर्तयेत्।
सत्याः संकल्पमात्रेण मृत्युः कालो यमो भयम्॥ ७॥
अधर्माः क्लेशदाः सर्वे सुखदाः संभवन्ति वै।
पातिव्रत्यं परो धर्मः पातिव्रत्यं परं बलम्॥ ८॥
पातिव्रत्यवृषाग्रे तु पापं पुण्यप्रदं भवेत्।
दुःखं सुखस्वरूपं स्यात् पतिकृष्णप्रतोषणात्॥ ९॥
अत्रार्थे तु पुरा वृत्तं कथयामि शृणु प्रिये।
पतिवाक्यं समादृत्य व्यवायस्थस्वयोषितः॥१०॥
सर्वं पुण्यात्मकं जातं देवतोषकरं यथा।
दक्षिणापथमध्ये वै ग्रामे बाष्कलनामके॥११॥
प्रजा असंस्कृता आसन् ज्ञानवैराग्यवर्जिताः।
नरा नार्यः कृषिकार्या आरण्यकप्रजीवनाः॥१२॥
तत्रैको विदुरो नाम धर्माचारविवर्जितः।
द्विज आसीत् कृषिगोप्ता शूद्रादिमित्रतांगतः॥१३॥
कृषिकार्ये कर्मचारिणीभिः प्रवर्ततेऽनिशम्।
परनारीप्रसंगादिदोषं जानाति नैव सः॥१४॥
शूद्रया सह कार्यादौ कामेन संगतः क्वचित्।
विदुरं कृपणा सा च याचते भोजनं धनम्॥१५॥
विदुरः कृपयाऽऽविष्टः कामभावनया तथा।
निर्वाहार्थं तु शूद्रायै ददात्येव क्वचित्क्वचित्॥१६॥
सदारोऽपि सतीं भार्यां बन्दुलां नातिमन्यते।
गृहस्थितं धनं चान्नं शूद्रायै प्रददाति सः॥१७॥
बन्दुला सहते सर्वं पत्यर्थं नवयौवना।
धनं चान्नं क्षयं प्राप्तं शूद्रायै स्वामिनाऽर्पितम्॥१८॥
विदुरस्तु सतीं पत्नीं याचते देहि मे धनम्।
अन्नं देह्यम्बरं देहि शूद्रयर्थं देहि मे प्रिये॥१९॥
इत्युक्ता सा सती प्राह गृहे यद्यद्धि विद्यते।
तत्सर्वं नीयतां नाथ त्वदधीनं गृहं सदा॥२०॥
त्वयि नाथे प्रसन्ने च सर्वं मे सुखदं भवेत्।
मदग्रे तु धनं नास्ति यदात्थ तत्करोम्यहम्॥२१॥
विदुरस्तां सतीमाह गच्छाऽन्यसेवनं कुरु।
नरान् धनिनः संसेव्य धनमानय देहि मे॥२२॥
सती त्वाज्ञाकरी पत्यौ विश्वस्ता चेश्वरे यथा।
कैंकर्यं कस्यचित् कृत्वा दास्य पत्नीत्वमेव वा॥२३॥
धनमानयति पत्याज्ञया तस्मै ददाति च।
पतिरेव परो धर्मः पतिवाक्यं सुखावहम्॥२४॥
इतिमत्वा परपुंसां कामसेवापराऽभवत्।
एवं तयोस्तु दम्पत्योर्दुराचारप्रवृत्तयोः॥२५॥
ग्रामे कश्चित् कथाकारो ब्राह्मणो दैवयोगतः।
समाययौ संहितायाः कथां चकार धर्मतः॥२६॥
ग्रामीणाः शुश्रुवुः सर्वे प्राचीनां धर्मसंहिताम्।
कुमार्गं संपरित्यज्य धर्ममार्गं समाश्रिताः॥२७॥
जगृहुर्वैष्णवं मन्त्रं पूजयामासुरच्युतम्।
ब्राह्मणं त्वर्चयामासुर्विहायाऽसत्क्रियां जनाः॥२८॥
पश्चात्तापं स्वकृत्यानां चक्रुस्ते सस्मरुर्हरिम्।
विदुरेण परित्यक्तः शूद्रासंगस्ततः परम्॥२९॥
अतीव धार्मिको जातश्चैकभुक्तं करोति च।
स्नानं सन्ध्यां जपं पूजां नैवेद्यं देवदर्शनम्॥३०॥
कृत्वा भुंक्ते सदा त्वेवं पत्नी चापि तथाऽकरोत्।
एवं वै वर्तमानस्य विदुरस्याऽऽयुषः क्षये॥३१॥
आयाता यमदूतास्तं नेतुं यमपुरं तदा।
चुक्रोश दृष्ट्वा तान्दूतान् कृष्णनारायणेति सः॥३२॥
पत्नी प्राह च तं श्रुत्वा कथमाक्रोशनं प्रिय।
स चाह तां यमदूता नेतुं मां वै समागताः॥३३॥
पत्नी जलं करे कृत्वा समुवाच सती तदा।
यदि पत्युः प्रिया भार्या पत्युः प्रियकरी सदा॥३४॥
पत्याज्ञायां वर्तमाना पतिकृष्णपरायणा।
तेन सत्येन दूतास्ते दूरं यान्तु यमालयम्॥३५॥
इत्युक्त्वा तज्जलं पत्युः पार्श्वे चिक्षेप तावता।
दूरात्पलायिता दूता अवप्लुत्य स्थलात्ततः॥३६॥
पतिः स्वस्थस्तदा जातो वृत्तान्तमाह तत्तथा।
पत्नी प्राह पुनः कान्तं स्वामिसेवाकृतं फलम्॥३७॥

तुभ्यं ददामि मे कान्त सद्गतिरस्तु तेन ते।
तावद्वै वैष्णवा विष्णोः पार्षदास्त्वाययुर्मुदा ॥३८॥
पत्न्या दृष्टा पातिव्रत्यधर्मफलेन तत्क्षणम्।
पूजिता वन्दिताश्चापि पतिं निन्युः परं पदम् ॥३९॥
बन्दुला तु पतिं कृत्वा क्रोडे रुरोद वै क्षणम्।
अथ संचिन्तयामास यद्यहं कान्तरञ्जिनी ॥४०॥
तदा कान्तेन साकं मे प्राणाः प्रयान्तु तत्क्षणम्।
तावन्मूर्छां गत्वा साध्वी प्राणाँस्त्यक्त्वा तु तत्क्षणम् ॥४१॥
स्वामिना दिव्यदेहेन सह याता सुरूपिणी।
दिव्यदेहा विमानस्था विष्णुपार्षदसत्कृता ॥४२॥
तत्तेजश्च विमानं च दृष्टं श्रोतृभिरुज्ज्वलम्।
ब्राह्मणः स तु सद्भक्तैस्तयोर्वै चोर्ध्वदैहिकम् ॥४३॥
कारयामास विधिना भोजयामास वैष्णवान्।
ददौ कृष्णोपदेशं च धर्मं पत्नीव्रतं ददौ ॥४४॥
पातिव्रत्यं तथा धर्मं ददौ प्रजाः स्वयं द्विजः।
सर्वेऽपि वैष्णवास्त्वासन् नरा नार्यः समन्ततः ॥४५॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः।
इति मन्त्रं तु ते लब्ध्वा भेजिरे कृष्णमच्युतम् ॥४६॥
कथां शुशुकरीशस्य चक्रुश्च भजनं सदा।
कथाया वाचको विप्रः स्वप्ने स्वदर्शनं ददौ ॥४७॥
नरेभ्यो वनिताभ्यश्च नारायणश्चतुर्भुजः।
हारकेयूरमुकुटपीताम्बरसुदर्शनैः ॥४८॥
सहितः सेवितो लक्ष्म्याऽदृश्यत वै मनोहरः।
कथान्ते पूजितः सर्वैः स्वीकृत्य पूजनं ततः ॥४९॥
उपादिदेश तान् सर्वान् भक्तानुग्रहविग्रहः।
पातिव्रत्यं परं धर्मं बन्दुलाया विलोक्य तु ॥५०॥
अहं नारायणस्तस्याः कल्याणार्थं द्विजात्मकः।
समायातः कथाकारश्चोद्धृता यूयमित्यपि ॥५१॥
कथां श्रुत्वा वैष्णवाश्च जातास्तत्सेवनं मम।
पूजयध्वं च मां नित्यं शृणुध्वं च कथां हरेः ॥५२॥
नरैः पत्नीव्रतं पाल्यं नारीभिश्च पतिव्रतम्।
उभाभ्यां श्रीकृष्णनारायणव्रतं च तारकम् ॥५३॥
सत्कथाश्रवणं नित्यं कर्तव्यं मोक्षदं परम्।
कृष्णस्य कथया चेतो विशुद्धिं परमां व्रजेत् ॥५४॥
कथया सिद्ध्यति ध्यानं ध्यानात् कैवल्यमुत्तमम्।
सर्वेषां श्रेयसां बीजं सत्कथाश्रवणं मतम् ॥५५॥
कामः क्रोधश्च लोभश्च मदमानादयः परे।
अधर्मस्य सुता यान्ति दूरं कथाश्रवाद्धरेः ॥५६॥
गुरुतल्पः सुरापानं तथाऽकामाप्रसंगकः।
कामस्य तनयास्त्वेते यान्ति दूरं कथाश्रवात् ॥५७॥
पितृवधो मातृवधो ब्रह्महत्या च नाशनम्।
क्रोधस्य तनयाश्चैते दूरं यान्ति कथाश्रवात् ॥५८॥
देवस्वहरणं विप्रस्वहारः स्वर्णमोषणम्।
लोभस्य तनयास्त्वेते दूरं यान्ति कथाश्रवात् ॥५९॥
अश्रद्धा चापि दुर्मेधा अविद्यायाः सुते ह्युभे।
कृष्णनारायणकथाश्रवाद् दूरं प्रगच्छतः ॥६०॥
कथा संसृतिबद्धानां सद्यो मुक्तिप्रदा शुभा।
स्त्रीणां पांसुलपादानां दासानां दासयोषिताम् ॥६१॥
अज्ञानतिमिरान्धानां दीपरूपा हरेः कथा।
भवरोगाभिभूतानां सुसेव्यं परमौषधम् ॥६२॥
महापातकशैलानां कथा वज्रनिभा मता।
भर्जनं कर्मबीजानां साधनं सर्वसम्पदाम् ॥६३॥
शृण्वतां श्रीहरेर्गाथां तथा कीर्तयतां सताम्।
तेषां पादरजांस्यैव तीर्थानि मुनयो जगुः ॥६४॥
मुहूर्तमपि शृणुयादशक्तोऽपि दिने दिने।
घटिकां वा तदर्धं वा क्षणं वा पावनीं कथाम् ॥६५॥
स्थूलकार्यप्रसक्तानां स्थूलबुद्धिमतां कथा।
कल्पवृक्षसमो नान्यः पन्थाः कथेतरः सुखः ॥६६॥
पिबन्नेवाऽमृतं यत्नादेकः स्यादजरामरः।
पीतं कथामृतं कुर्यात् कुलमेवाऽजरामरम् ॥६७॥
कथावक्ता हरिः साक्षाद् गुरूणां यावतां गुरुः।
मोक्षदः पुण्यदो ज्ञानप्रदीपः परो गुरुः ॥६८॥
ये कथां तत्प्रवक्तारं प्रशंसन्ति जना अपि।
अशृण्वन्तोऽपि ते यान्ति शाश्वतं परमं पदम् ॥६९॥
कथाश्रवणसाहाय्यं ये कुर्वन्ति जना भुवि।
कल्पकोटिशतं साग्रं तिष्ठन्ति ब्रह्मणः पदम् ॥७०॥
सत्कथाबोधलाभेन स्मरणं मे हरेर्भवेत्।
सदास्मरणयोगेन वासनानां क्षयो भवेत् ॥७१॥
तथा सती विरागः स्याद् रागाभावे परं सुखम्।
तृष्णाक्षयसुखं त्वात्मानन्दोद्भवे सहायकृत् ॥७२॥
रागे नष्टे प्रतिद्वन्द्वी द्वेषोऽपि नश्यति ध्रुवम्।
रागद्वेषौ यस्य नष्टौ दोषौ तस्य प्रवर्तनम् ॥७३॥
शुभाऽशुभं न वै जन्ममृत्युप्रदं प्रजायते।
प्रवृत्तेरप्यभावेन भोगाभावो भवेत् सदा ॥७४॥
नित्यानन्दं चिदानन्दं सदानन्दं निजात्मकम्।
भुंक्ते भक्तिरसे मग्नः श्रीकृष्णात्मकभावतः ॥७५॥

नित्यतृप्तो मम मूर्तौ नित्यमग्नो मदात्मनि ।
ब्रह्मानन्दमयो धाम्नि ममोऽश्नुतेऽकृतं सुखम् ॥७६॥
एवं कथाश्रुतेः पुण्यं फलं मोक्षप्रदं भवेत् ।
अहं तुष्टो भवाम्येव यत्र मेऽस्ति कथामृतम् ॥७७॥
वज्रलेपादिपापानि कथात्ममत्प्रयोगतः ।
मदाराधनविज्ञानात् भस्मीभवन्ति सर्वशः ॥७८॥
सत्या पतिगुणाः श्रव्या एष धर्मः सनातनः ।
पतिश्चाहं परब्रह्म मत्कथां शृणुयाच्छुभाम् ॥७९॥
दानं यज्ञं तथा तीर्थं द्रव्यं व्ययैः समुत्सवम् ।
कर्तुमशक्तभक्तेन कथा श्रव्या मम ध्रुवम् ॥८०॥
कीर्तनं मे स्वामिनश्च नित्यं कार्यं प्रगे निशि ।
पूजा कार्या मदर्थे च ग्रसितन्यं निवेदितम् ॥८१॥
पत्रं पुष्पं जलं खाद्यं सर्वं प्रासादिकं ग्रसेत् ।
तेन सत्त्वप्रशुद्धिः स्यात्स्मृतिर्देवस्य शाश्वती ॥८२॥
कृष्णनारायणस्मृत्या ध्रुवो मोक्षोऽप्यवाप्यते ।
स्मृतौ तु सर्वथा हेतुः श्रीकृष्णयशसां श्रवः ॥८३॥
क्षितेदनिजपुण्येन स्वर्गप्राप्तिर्न वै ध्रुवा ।
कथाश्रवणभक्त्या तु शाश्वतं धाम गम्यते ॥८४॥
स्वर्णकोटिसहस्राणां दानाच्चाऽप्यधिका कथा ।
राजसूयसहस्रेभ्यश्चोत्तमा श्रीहरेः कथा ॥८५॥
व्रतेभ्यो नियमेभ्यश्च जपेभ्यः श्रेयसी कथा ।
यत्र मे मम साधूनां भक्तानां योगयोषिताम् ॥८६॥
साध्वीनां च सतीनां च चमत्कारा निरूपिताः ।
चरित्राणि सुदिव्यानि ग्रुमन्ति वर्णितानि च ॥८७॥
तानि सर्वाणि दातॄणि सम्पदां मोक्षणस्य च ।
भवतां मोक्षणार्थाय सत्याः सद्भावसेवया ॥८८॥
युष्माकं तारणार्थं वै विप्ररूपो भवाम्यहम् ।
अथाऽहं यामि वैकुण्ठं भवन्तः साधुसेवनम् ॥८९॥
कथायाः श्रवणं नित्यं कुर्वन्तु ध्यानमेव मे ।
भुक्तिं मुक्तिं मम सेवां यूयं सर्वे गमिष्यथ ॥९०॥
इत्युक्त्वा वाचको विप्रो विमानेन सुतेजसा ।
ययौ नारायणो भूत्वा वैकुण्ठं भक्तसेवितः ॥९१॥
इत्येवं कथितं लक्ष्मि ! कान्ताज्ञापालने फलम् ।
श्रवणात्पठनाच्चास्य भुक्तिर्मुक्तिर्भवेद् ध्रुवम् ॥९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पातिव्रत्यपराया बन्दुलाया विदुराख्यविप्रस्य स्वस्वामिनः आज्ञापालने व्यवायस्याऽदोषत्वे भगवत्कथाप्रातिलाभेन भगवद्धामप्राप्तिरित्यादिनिरूपणनामा चतुःपञ्चाशदधिक-चतुश्शततमोऽध्यायः ॥ ४५४ ॥

श्रीनारायण उवाच—

अगस्त्यस्य प्रियपत्न्याः प्रतापं त्वं शृणु प्रिये ।
पतिव्रतोत्तमालोपामुद्राया दिव्ययोषितः ॥ १ ॥
कदाचिन्नारदो लक्ष्मि ! स्नात्वा श्रीनर्मदाम्भसि ।
विन्ध्यं विलोकयाञ्चक्रे व्रजन् श्रीबदरीश्वरम् ॥ २ ॥
रसालयं द्रुमवल्लीस्तम्बसस्यादिशोभितम् ।
वर्धमानं महाकाशे लोकयन्तं समन्ततः ॥ ३ ॥
दृष्ट्वा क्षणं नारदः स तस्थौ व्योम्न्येव कौतुकात् ।
विन्ध्योऽपि सूर्यसंकाशं नभसि द्योतिताम्बरम् ॥ ४ ॥
नारदं दृष्टवान् प्रेम्णा दूरात् प्रत्युज्जगाम तम् ।
सन्तं दृष्ट्वा कठिनोऽपि धत्ते मृदुलतां यतः ॥ ५ ॥
नत्वा मुनिं ददौ पाद्यमर्घ्यं चासनमर्हणम् ।
पादसंवाहनं चक्रे बभाषेऽवनतो गिरिः ॥ ६ ॥
अद्य ते पादरजसा नष्टं रजस्तमो मम ।
धराधरत्वं कुलिषु मान्यं मे स्यात्तवाऽऽगमात् ॥ ७ ॥
श्रुत्वैतन्नारदः किञ्चिदुच्छ्वस्य स्थितवाँस्ततः ।
विन्ध्याद्रिराह मुनिराडुच्छ्वासकारणं वद ॥ ८ ॥
हिमाद्रीन् पर्वतान्नाहं गणये भूधरानिति ।
वद कार्यं तु ते किञ्चित् करिष्ये सेवया युतः ॥ ९ ॥
नारदस्तं तदा प्राह मेरुस्त्वामवमन्यते ।
इत्युक्त्वा नारदस्तस्माद् ययौ बदरिकाश्रमम् ॥१०॥
विन्ध्याद्रिस्त्वाप महतीं चिन्तां धिग्जीवनं मम ।
ज्ञातिपराजितस्यात्रोद्यमविवर्जितस्य च ॥११॥
कथं भुनक्ति स दिवा कथं रात्रौ स्वपित्यहो ।
रहः शर्म कथं तस्य यस्य ज्ञातिपराभवः ॥१२॥
युक्तमुक्तं पुराविद्भिश्चिन्ता कृत्या भयंकरी ।
नोपायैः शाम्यति घोरा निद्रां बलं हरत्यपि ॥१३॥
चिन्ताज्वरो महातीव्रः प्रत्यहं नवतां व्रजेत् ।
किं करोमि क्व गच्छामि कथं मेरुं जयाम्यहम् ॥१४॥
विश्वेशं शरणं यायां स मे बुद्धिं प्रदास्यति ।
इति विचार्य महति त्वम्बरे वर्धते गिरिः ॥१५॥
दक्षिणे सूर्यमार्गं स निरुद्ध्य समवस्थितः ।
सूर्याश्वास्त्वग्रतो गन्तुं न शेकुर्वै तदाऽरुणः ॥१६॥
प्राह सूर्यं महाविन्ध्यो निरुद्ध्य गगनं स्थितः ।
स्पर्धते मेरुणा प्रेप्सुस्त्वद्दत्तां तु प्रदक्षिणाम् ॥१७॥
राहुबाहुग्रहव्यग्रो यः क्षणं नाऽवतिष्ठति ।
योजनानां सहस्रे द्वे, द्वे शते, द्वे च योजने ॥१८॥
योजनस्य निमेषार्धाद् याति सोऽपि चिरं स्थितः ।
तत् सूर्यस्य गतिस्तम्भात् स्तम्भितं तन्निमित्तकम् ॥१९॥

कालमानं तथा कार्यं रुरुदुर्दुद्रुवुः प्रजाः ।
ततो देवादयः सर्वे ब्रह्माणं शरणं ययुः ॥२०॥
नमश्चक्रुस्तुष्टुवुश्च रक्ष रक्षेति चाऽब्रुवन् ।
विलोक्य दुःखितान् ब्रह्मा प्रत्युवाच दिवौकसः ॥२१॥
दास्यामि सकलान् कामान् वृणुध्वं वरमुत्तमम् ।
स्वस्थास्तिष्ठत भो यूयं कथं सत्ये समाकुलाः ॥२२॥
एते वेदाः सर्वविद्याः सत्यं धर्मस्तपः क्रतुः ।
ब्रह्मचर्यं भारतीयं श्रुतयः स्मृतयस्तथा ॥२३॥
ब्रह्मनिष्ठास्तापसाश्च व्रतिनश्चोपवासिनः ।
पातिव्रत्यपरा नार्यो ये चान्ये ब्रह्मचारिणः ॥२४॥
मातापित्रोः सदा भक्ता गोभक्ता देवसेवकाः ।
पत्नीव्रता अतिथीनां पूजका दानसुकृताः ॥२५॥
सर्वे मे सत्यलोकेऽत्र सन्ति ते सुखिनः सदा ।
वदन्तु भवतां चेष्टं करोमि सुखकृद्ध्रुवम् ॥२६॥
देवाः प्राहुर्विन्ध्यशैलः स्पर्धते मेरुणा दिवि ।
सूर्यमार्गं निरुद्ध्यैव वर्धते त्वद्गृहं प्रति ॥२७॥
सूर्याधाराः क्रिया रुद्धास्ततो लयो भविष्यति ।
सूर्यमार्गमतो रोधरहितं कुरु सर्वथा ॥२८॥
श्रुत्वैतद् विश्वसृट् प्राहाऽगस्त्यनामा महामुनिः ।
काशीक्षेत्रे तपत्युग्रं याचध्वं तं मुनिं सुराः ॥२९॥
मित्रावरुणपुत्रः स लोपामुद्रापतिः ऋषिः ।
विधास्यति स वः कार्यं वातापील्वलभक्षकः ॥३०॥
इत्युक्तास्तु सुराद्यास्ते ययुः काशीमगस्त्यकम् ।
मणिकर्ण्यां सुराः स्नात्वा ददृशुः काशिकां पुरीम् ॥३१॥
विद्वज्जनप्रलक्षैः सत्साधुलक्षैरधिष्ठिताम् ।
तीर्थवासिजनव्रातकोटिमण्डलचञ्चलाम् ॥३२॥
देवालयैस्त्रिकोटिभिर्गृहस्थालयकोटिभिः ।
सहस्रोद्यानसत्क्षेत्रैः राजसौधसहस्रकैः ॥३३॥
वारनारीप्रलक्षैश्च देवनारीप्रलक्षकैः ।
ब्रह्मचारिकोटिभिश्च नैकदेशीयमानवैः ॥३४॥
तीर्थकोटिशतलक्षैर्गंगायुनदिकानदैः ।
विमानैर्वाहनैर्यानैर्महापुस्तकपत्तनैः ॥३५॥
धन्वन्तर्यादिशालाभिरन्नसत्रसहस्रकैः ।
सुशोभितां भिक्षुकैश्च दीनाऽनाथैः सहस्रकैः ॥३६॥
एवं तां नगरीं दृष्ट्वा कृत्वा तीर्थान्यनेकशः ।
विश्वनाथं चान्नपूर्णां लक्ष्मीनारायणं तथा ॥३७॥
श्रीबिन्दुमाधवं धर्मदेवं दृष्ट्वा प्रणम्य ते ।
सम्पूज्य चरणौ प्रक्षालयित्वाऽऽगृह्य चामृतम् ॥३८॥
जग्मुः परोपकारार्थमगस्तिर्यत्र तिष्ठति ।
अगस्तीश्वरलिंगं च कुण्डं कृत्वा तदग्रतः ॥३९॥
शतरुद्रीयसूक्तेन जपन्मुनिर्विराजते ।
तेजसा सूर्यसंकाशं दृष्ट्वा सिष्मियिरे सुराः ॥४०॥
अहो हो सर्वतेजांसि श्रित्वेमां ब्राह्मणीं तनुम् ।
शीलयन्ति परं धाम शान्तं शान्तपदाप्तये ॥४१॥
यस्याऽऽश्रमेऽत्र दृश्यन्ते हिंस्रा अपि समन्ततः ।
सत्त्वाश्रिताः सर्वसत्त्वास्त्यक्त्वा वैरं निसर्गजम् ॥४२॥
सह सर्वे निवसन्ति क्रूराः शान्ताश्च राजसाः ।
पशवः पक्षिणः सर्वे मृगाः सरीसृपास्तथा ॥४३॥
इत्याश्रमचरान् दृष्ट्वा तिरश्चोऽपि मुनीनिव ।
अबोधि विबुधैः सर्वैः प्रभावोऽगस्तिभूमिजः ॥४४॥
धर्मार्थकाममोक्षास्तु मूर्ता यत्र चरन्ति हि ।
इतिपश्यन्तो गीर्वाणा ददृशुस्तूटजं मुनेः ॥४५॥
होमधूपसुगन्धाढ्यं बहुभिर्बहुभिर्वृतम् ।
ब्रह्मचर्यरताभिश्च ब्रह्माऽध्ययनतेजसा ॥४६॥
चन्द्राभाभिर्मुनिकन्याभिश्च सौम्यमलंकृतम् ।
सार्द्रवल्कलकौपीनैर्वृक्षशाखावलम्बिभिः ॥४७॥
सूचयत् सन्मुनिवासान् सत्त्वप्रसादकारितान् ।
पतिव्रताशिरोरत्नलोपामुद्रांऽघ्रिमुद्रया ॥४८॥
मुद्रितं वीक्ष्य ते नेमुः पर्णशालाऽङ्गणं सुराः ।
विसर्जितसमाधिं च धृतकर्णाऽक्षिमालिकम् ॥४९॥
अधिष्ठितबृसीपृष्ठं वेधसा सदृशं श्रिया ।
पुरोऽगस्त्यं समालोक्य देवाः सर्वे सवासवाः ॥५०॥
प्रहृष्टवदनाः प्रोचुः प्रोच्चैर्जय जयेति च ।
मुनिः सर्वानुपावेश्य पप्रच्छागमकारणम् ॥५१॥
देवगुरुस्तमुवाच देवागमनकारणम् ।
धन्योऽसि कृतकृत्योऽसि मान्योऽसि महतामपि ॥५२॥
प्रत्याश्रमं प्रतिनगं प्रत्यरण्यं तपोधनः ।
किन्न सन्तः सन्त्यगस्त्ये काचिदन्यैव ते स्थितिः ॥५३॥
तपोलक्ष्मीस्त्वयीहास्ति ब्राह्मं तेजस्त्वयि स्थिरम् ।
पुण्यश्रीश्च त्वयि श्रेष्ठा चमत्कारास्त्वयि स्थिताः ॥५४॥
पतिव्रतेयं कल्याणी लोपामुद्रा सधर्मिणी ।
तवांऽगच्छायया तुल्या यत्कथा पुण्यकारिणी ॥५५॥
अरुन्धती च सावित्री शाण्डिली श्रीः सती तथा ।
अनसूया महालक्ष्मीः शतरूपा च मेनका ॥५६॥
सुनीतिः कमला स्वाहा संज्ञा चेति पतिव्रताः ।
या यास्तासु यथैषा वर्ण्यते श्रेष्ठा तथा न ताः ॥५७॥

भुंक्ते भुक्ते त्वयि मुने तिष्ठति त्वयि तिष्ठति ।
सुनिद्रिते तु निद्राति प्रथमं प्रतिबुध्यति ॥५८॥
नाऽलंकृतं निजात्मानं तव दर्शयति क्वचित् ।
गते भवति कार्यार्थे न धत्ते मण्डनानि तु ॥५९॥

तवाऽऽयुष्यविवृद्ध्यर्थं न गृणात्यभिधां तव ।
कृष्णं विनाऽन्यपुन्नाम नैव वदति कर्हिचित् ॥६०॥
आक्रुष्टा दण्डिता चापि नाऽऽक्रोशति प्रसीदति ।
इदं कुरु समाज्ञप्ता शीघ्रं करोति तत्क्षणम् ॥६१॥

करिष्यसीति सम्प्रोक्ताऽवश्यं कान्तेति वक्ति च ।
त्वयाऽऽहूताऽन्यकार्याणि त्यक्त्वा त्वायाति सत्वरम् ॥६२॥
आज्ञापय कृपासिन्धो वक्ति कृतं प्रमन्यताम् ।
न चतुष्कस्य मार्गस्याऽङ्गनस्य द्वारि तिष्ठति ॥६३॥
अनापृष्ट्वा भवन्तं सा वस्तुमात्रं तृणं ह्यपि ।
त्वया नानुमतं किञ्चित् कस्मैचिन्न ददात्यपि ॥६४॥

स्वयमाहरति पूजासामग्रीर्नोदिताऽपि च ।
जलं दर्भान् फलपत्रपुष्पाणि चाक्षतादिकान् ॥६५॥
साधयत्यैव समये विनाऽऽज्ञामपि सा सती ।
नोद्विग्ना भवति क्वापि नोद्वेजयति चापरान् ॥६६॥
यथाकालं यथायोग्यमुपस्थापयतीक्षते ।
भुंक्ते भर्तुः प्रसादं च जलमन्नं फलादिकम् ॥६७॥

मत्वा महाप्रसादं तत् स्वामिदत्तं समीहते ।
देवपित्रतिथिपोष्यानाथसतीसतः सदा ॥६८॥
दासगोभिक्षुकान् दत्वाऽश्नाति विभज्य नैजकम् ।
संयतोपस्करा प्रातर्दक्षा व्ययपराङ्मुखी ॥६९॥
यथापेक्षव्ययकर्त्री योग्यशश्वत्परिग्रहा ।
तवाऽऽदेशं विना नेयं करोत्यपोषणं व्रतम् ॥७०॥

विनाऽऽज्ञां ते न यातीयं द्रष्टुं समाजमुत्सवम् ।
प्रदर्शनं मल्लयुद्धं नृत्यं नाट्यं कलालयम् ॥७१॥
तीर्थयात्रां विवाहं ते विनाऽऽज्ञां द्रष्टुमेति न ।
आसीनं रममाणं च सुप्तं पतिं सुखेन सा ॥७२॥
अत्यावश्यककार्येऽपि त्वां नोत्थापयति क्वचित् ।
अकामं त्वां च रजसा स्वार्थार्थं नापि सेवते ॥७३॥

राजस्वल्ये मुखं नैव दर्शयति दिनत्रयम् ।
श्रावयति स्ववाक्यं न पूर्वं स्नानादिशुद्धितः ॥७४॥
पश्यति तुर्यदिवसे भर्तुर्मुखं रविं हरिम् ।
ध्यायतीयं कान्तरूपं कृष्णरूपं पतिव्रता ॥७५॥
नित्यं सौभाग्यचिह्नानि धारयत्येव त्वद्व्रता ।
केशसंस्कारकबरीकरकर्णादिभूषणम् ॥७६॥

हरिद्रां कुंकुमचन्द्रं सिन्दूरं नेत्रकज्जलम् ।
कंचुकीं नथिकां तन्त्रीं नूपुरं बंगिडीं तथा ॥७७॥
शृंखलां चोर्मिकां हारं स्वर्णैरणे च शाटिकाम् ।
विष्णुतैलं सुगन्धं च धारयत्येव त्वद्व्रता ॥७८॥

न च संगं करोत्येषा नास्तिकायास्तु योषितः ।
नाऽस्पृश्याया न पुंश्चल्याः पाखण्डिन्याश्च योषितः ॥७९॥
नाऽशुद्धायाश्च कामिन्या धर्मवर्जितयोषितः ।
भर्तृविद्वेषिणीं नारीं नैषा संभाषते सती ॥८०॥

नैकाकिनी बहिर्याति विवस्त्रा स्नाति न क्वचित् ।
निषीदति सदा निम्ने न समे भर्तृसन्निधौ ॥८१॥
कण्डन्यां न च पेषण्यां न चूल्ल्यां जलकुंभके ।
गर्गर्यां न कटाहादौ मूशले न शिलातले ॥८२॥
चूर्णयन्त्रे न मार्जन्यां चट्टनीपेषके न हि ।
न देहल्यां पुण्यपात्रे कृत्वा पृष्ठं गुरुं पतिम् ॥८३॥

निषीदति क्वचिच्छाटीमुत्तार्याऽपि न त्वद्व्रता ।
स्तनं जघनं कश्चिन्न संपश्येद् वर्तते तथा ॥८४॥
विना व्यवायसमयं प्रागल्भ्यं समरक्षति ।
भर्तुर्यत्र यथा तृप्तिः रुचिस्तत्र प्रवर्तते ॥८५॥
परं धर्मं व्रतं श्रेष्ठं देवपूजनमुत्तमम् ।
पालनं पतिवाक्यस्य मत्वोल्लंघनमेति न ॥८६॥

बालमशक्तमकामं व्याधितं दुरवस्थकम् ।
क्लीबं व्रतस्थं वृद्धं वा रुग्णं पतिं पतिव्रता ॥८७॥
सुस्थितं दुःस्थितं वापि व्यसनाढ्यं दरिद्रकम् ।
चौरं कामातिसक्तं वा सेवते सर्वदा सती ॥८८॥
तापसं चापि निष्कामं त्वां सदा सेवते त्वियम् ।
हृष्टा सदा त्वयि हृष्टे विषण्णे शोकगर्भिता ॥८९॥

सम्पत्सु चैकरूपा ते विपत्स्वपि तव प्रिया ।
गृहे भोज्यस्य वस्तूनां वेषवारस्य च क्षये ॥९०॥
सम्पादयति चाज्ञया नास्तीति न ब्रवीत्यपि ।
तीर्थेच्छया ते चरणामृतं पिबति नित्यशः ॥९१॥
विष्णोर्नारायणाच्छंभोरधिकं मनुते पतिम् ।
भर्तृचरणपूजात्मनियमं तु प्ररक्षति ॥९२॥

सत्रपं चापवादं च कष्टदं कलिकारकम् ।
मृषा हसनं चाक्रोशं नेयं गृणाति वै क्वचित् ॥९३॥
देवं गुरुं व्रतं तीर्थं धर्मं जानाति सा पतिम् ।
तव छायासमा चेयं वर्तते किंकरी तव ॥९४॥
धन्योऽसि मुनिवर्य त्वं धन्यौ ते पितरौ तथा ।
अस्यास्तु पितरौ धन्यौ यतश्चेयं पतिव्रता ॥९५॥

पतिव्रतायाश्चरणो यत्र भूमौ स्पृशत्यपि ।
सा भूमिः सर्वदा तीर्थं पावनं तारकं भवेत् ॥९६॥
परमेश्वरभक्त्यैव लभते स्त्री पतिव्रता ।
गृहस्थस्त्वं यथार्थोऽसि यस्य तेऽस्ति पतिव्रता ॥९७॥
पतिव्रताया दृष्ट्याऽपि पातकी पावनो भवेत् ।
न गंगया तया भेदो या नारी पतिदेवता ॥९८॥
गंगास्नानफलं त्वेतद् यज्जातं तव दर्शनम् ।
तव पत्न्या दर्शनं च जातं नो बहुपुण्यतः ॥९९॥
प्रणवस्त्वं श्रुतिश्चेयं क्षमैषा त्वं स्वयं तपः ।
सत्क्रियेयं फलं त्वं च धन्योऽसि त्वं महामुने ! ॥१००॥
इदं पतिव्रतं तेजो ब्रह्मतेजो भवान्परम् ।
तत्राऽप्येतत्तपस्तेजः किमसाध्यतमं तव ॥१०१॥
तव नाऽविदितं किञ्चित्तथापि प्रवदाम्यहम् ।
यदर्थमागता देवास्तन्मुनेऽत्र निशामय ॥१०२॥
अयं शतमखः श्रीमानयमग्निर्जगत्प्रभुः ।
धर्मराजो वरुणश्च वायुः श्रीशशिवादयः ॥१०३॥
समभ्यर्थयितारोऽमी त्वं याच्यश्च जगत्कृते ।
वाङ्मात्रोद्यमसाध्यं तत् तव विश्वोपकारकम् ॥१०४॥
विन्ध्याद्रिर्वर्धते मेरोः स्पर्धया त्वं निवारय ।
सूर्यमार्गमवरुद्ध्येदानीमूर्ध्वं प्रगच्छति ॥१०५॥
ये तु निष्ठुरनैसर्गा ये च मार्गावरोधकाः ।
ये स्पर्धन्ते च वृद्ध्यर्थं तद्वृद्धिर्हानिदा सदा ॥१०६॥
श्रुत्वा ध्यात्वा क्षणं तथेत्युक्त्वाऽगस्तिर्महामुनिः ।
विसृज्य देवताः प्राह लोपामुद्रामिदं वचः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विन्ध्याद्रिणा वर्धमानेन सूर्यमार्गाऽवरोधे देवानामगस्तिमुनिं प्रति यानं लोपामुद्रायाः पातिव्रत्यधर्मवर्णनं चेतिनिरूपणनामा पञ्चपञ्चाशदधिकचतुश्शततमोऽध्यायः ॥ ४५५ ॥

श्रीनारायण उवाच—

ध्याने सर्वं समालोच्याऽगस्तिः स्वस्य पतिव्रताम् ।
लोपामुद्रामुवाचेदं शृणु लक्ष्मि ! जगद्धितम् ॥ १ ॥
अपि पश्य वरारोहे ! किमेतत्समुपस्थितम् ।
क्व तत्कार्यं क्व च वयं मुनिमार्गाऽवलम्बिनः ॥ २ ॥
काशीक्षेत्रे निवसतां विघ्ना भवन्ति भाग्यतः ।
काशीक्षेत्रं न मोक्तव्यं सर्वथैव मुमुक्षुभिः ॥ ३ ॥
उपस्थितोऽयं कल्याणि ! सोऽन्तरायो महान्मम ।
तथापि देवकार्यार्थं यास्यामि श्रीशिवोऽवतात् ॥ ४ ॥
इत्युच्चार्य शिवं नत्वोपस्पृश्याऽसिजलं शुभम् ।
लोपामुद्रासहायः स योगेन तपसा मुनिः ॥ ५ ॥
व्योममार्गेण दिव्येन निमेषार्धेन वै दिवम् ।
जगामाऽग्रे ददर्शाद्रिं विन्ध्यं रुद्धाम्बरोन्नतम् ॥ ६ ॥
चकम्पे त्वचलस्तूर्णं दृष्ट्वैवाऽग्रस्थितं मुनिम् ।
तमगस्तिं प्रियायुक्तं वातापील्वलवैरिणम् ॥ ७ ॥
गोवर्धनं करे धृत्वाऽस्थापयद् यो यमीभुवि ।
तमग्निसदृशं विन्ध्यो भूत्वा खर्वतरो भयात् ॥ ८ ॥
आज्ञाप्रसादः क्रियतां किंकरोऽस्मीति चाऽब्रवीत् ।
अगस्तिः प्राह विन्ध्य ! त्वं मां विजानासि तत्त्वतः ॥ ९ ॥
पुनरागमनं चेन्मे तावत् खर्वतरो भव ।
इत्युक्त्वा प्रियया साकं दक्षिणाशां ययौ मुनिः ॥१०॥
विन्ध्यः पश्यति सोत्कण्ठो न शक्तो यदगस्तिना ।
न मया सदृशो धन्य इति मत्वा तुतोष ह ॥११॥
अद्य श्वो वा परश्वो वाऽप्यागमिष्यति वै मुनिः ।
इतिचिन्तामहाभारैर्गिरिर्हस्वस्तथा स्थितः ॥१२॥
नोऽद्यापि मुनिरायाति नाद्यापि गिरिरेधते ।
अरुणोऽपि च तत्काले कालज्ञोऽश्वानकालयत् ॥१३॥
जगत्स्वास्थ्यमवापोच्चैः पूर्ववद् भानुसञ्चरैः ।
विवर्धिषति यो नीचः पराऽसूयां समुद्वहन् ॥१४॥
दूरे तद्वृद्धिवार्ताऽऽस्तां प्रागवृद्धेरपि संशयः ।
मनोरथा न सिद्धाः स्युः सिद्धा नश्यन्त्यपि ध्रुवम् ॥१५॥
अविज्ञायाऽन्यसामर्थ्यं स्वसामर्थ्यं प्रदर्शयेत् ।
उपहासमवाप्नोति तथैवाऽयमिहाऽचलः ॥१६॥
अथ गोदावरीतीरं ययावगस्तिरीश्वरः ।
ददर्शाऽग्रे महालक्ष्मीं सहास्यां सुचिरं स्थिताम् ॥१७॥
तां तु स्तुत्वा भगवतीं महालक्ष्मीं हरिप्रियाम् ।
पत्नीयुक्तः प्रणनाम साष्टांगं दण्डवन्मुनिः ॥१८॥
लक्ष्मीं प्राह मुनिं लोपामुद्रां चापि पतिव्रताम् ।
प्रसन्नाऽहं त्वां प्रवीक्ष्य वृणु यत्ते हृदि स्थितम् ॥१९॥
राजपुत्रि ! महाभागे ! त्वमिहोपविशाऽमले ।
कोलदैत्यविनाशार्थमहमत्र समागता ॥२०॥
त्वदंगलक्षणैरेभिः सुपवित्रैश्च ते व्रतैः ।
निर्वापयितुमिच्छामि दैत्याऽस्त्रैस्तापितां तनुम् ॥२१॥
इत्युक्त्वा मुनिपत्नीं तां समालिङ्ग्य हरिप्रिया ।
अलंचकार सुप्रीत्या बहुसौभाग्यमण्डनैः ॥२२॥

लोपामुद्राऽपि तां लक्ष्मीं सेवयामास सुस्पृशैः ।
देहसंवाहनं चक्रे तापः शशाम च श्रियः ॥२३॥
लोपामुद्रा श्रियाः पादौ धृत्वा ननाम सादरम् ।
ववन्दे स्तवनं चक्रे तव लक्ष्मिः तदा सती ॥२४॥
शृणु तत्स्तवनं येन स्तावकाः स्युर्धनाश्रयाः ।
नैकसम्पत्समायुक्तास्त्वया प्रसन्नयेक्षिताः ॥२५॥
"मातर्नमामि कमले ! पद्माऽऽयतसुलोचने ।
श्रीविष्णुहृत्कमलस्थे विश्वमातर्नमोऽस्तु ते ॥२६॥
क्षीरसागरसत्पुत्रि पद्मगर्भाभसुन्दरि ।
लक्ष्मि प्रसीद सततं विश्वमातर्नमोऽस्तु ते ॥२७॥
महेन्द्रसदने त्वं श्रीः रुक्मिणी कृष्णभामिनी ।
चन्द्रे ज्योत्स्ना प्रभा सूर्ये विश्वमातर्नमोऽस्तु ते ॥२८॥
स्मितानने जगद्धात्रि शरण्ये सुखवर्द्धिनि ।
जातवेदसि दहने विश्वमातर्नमोऽस्तु ते ॥२९॥
ब्रह्मणि त्वं सर्जनाऽसि विष्णौ त्वं पोषिका सदा ।
शिवे संहारिका शक्तिर्विश्वमातर्नमोऽस्तु ते ॥३०॥
त्वया शूरो गुणी विज्ञो धन्यो मान्यः कुलीनकः ।
कलाशीलकलापाढ्यो विश्वमातर्नमोऽस्तु ते ॥३१॥
त्वया गजस्तुरंगश्च स्त्रैणस्तृणं सरः सदः ।
देवो गृहं कणः श्रेष्ठा विश्वमातर्नमोऽस्तु ते ॥३२॥
त्वया पक्षी पशुः शय्या रत्नं पृथ्वी नरो वधूः ।
श्रेष्ठाः शुद्धा महालक्ष्मि ! विश्वमातर्नमोऽस्तु ते ॥३३॥
लक्ष्मि ! श्रि कमले पद्मे रमे पद्मोद्भवे सति ।
अब्धिजे विष्णुपत्नि त्वं प्रसीद सततं प्रिये" ॥३४॥
इति स्तुता प्रसन्ना च श्रीरुवाच पतिव्रताम् ।
लोपामुद्रे मुने जाने वां यत् हृत्तापकारणम् ॥३५॥
सचेतनं दुनोत्येव काशीविश्लेषजोऽनलः ।
युवां वाराणसीं प्राप्य सिद्धिं प्राप्स्यथ ईप्सिताम् ॥३६॥
ये पठिष्यन्ति मत्स्तोत्रं तापदारिद्र्यनाशकम् ।
इष्टसम्पत्प्रदं तेषां जयसन्ततिकारकम् ॥३७॥
मम सान्निध्यदं बालग्रहादिव्याधिनाशनम् ।
भविष्यति मम सारूप्यादिप्रमोक्षणं तथा ॥३८॥
इति लब्ध्वा दम्पती श्रीप्रदाशिषः प्रणम्य ताम् ।
ययतुर्नातिदूरस्थं श्रीशैलं कमलाश्रयम् ॥३९॥
पत्नीयुक्तः स संवीक्ष्य परां मुदमवाप ह ।
परोपकरणं येषां जागर्ति हृदये सताम् ॥४०॥
नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे पदे ।
तीर्थस्नानैर्न सा शुद्धिर्बहुदानैर्न तत्फलम् ॥४१॥
तपोभिरुग्रैस्तन्नाऽप्यमुपकृतया यदाप्यते ।
नोपकारात्परो धर्मो नाऽपकारादघं परम् ॥४२॥
उपकारफलं लक्ष्मीदर्शनं शैलदर्शनम् ।
लोपामुद्रामुनिभ्यां श्रीवेंकटाद्रिर्विलोकितः ॥४३॥
उवाच वचनं पत्नीं तदा प्रीतमना मुनिः ।
आकर्णय वरारोहे तत्त्वं ते कथयामि वै ॥४४॥
मुक्तिस्थानान्यनेकानि भवन्ति भूतले सति ।
प्रयागं तीर्थराजं वै कुरुक्षेत्रं च नैमिषम् ॥४५॥
अवन्तिका हरिद्वारमयोध्या मथुरा पुरी ।
द्वारिका चामरावती तथा कुंकुमवापिका ॥४६॥
सरस्वती सिन्धुसंगो गंगासागरसंगमः ।
काञ्ची च त्र्यम्बकं चापि सप्तगोदावरीतटम् ॥४७॥
कालंजरं प्रभासश्च बद्रिकाश्रमरैवतौ ।
महालयस्तथौंकारक्षेत्रं च पौरुषोत्तमम् ॥४८॥
गोकर्णो भृगुकच्छश्च भृगुतुङ्गश्च पुष्करम् ।
श्रीपर्वतो मानसं च धारातीर्थं च भौतिकम् ॥४९॥
आध्यात्मिकानि तीर्थानि दयास्नेहादिकान्यपि ।
एतानि मुक्तिदान्येव नाऽत्राऽस्ति संशयो मनाक् ॥५०॥
सत्यं तीर्थं क्षमातीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्वभूतदयातीर्थं तीथमार्जवमित्यपि ॥५१॥
दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ।
ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता ॥५२॥
ज्ञानं तीर्थं धृतिस्तीर्थं तपस्तीर्थमुदाहृतम् ।
सर्वतीर्थपरं तीर्थं शुद्धिर्या मानसी सदा ॥५३॥
न जलेन विशुद्धिर्वै मनःशुद्धिः सती सदा ।
न शरीरमलत्यागाच्छुद्धिर्देहो न निर्मलः ॥५४॥
ऐहिकसुखलब्ध्यर्थं वाञ्छा वै मानसो मलः ।
तत्र तत्र विरागस्तु मुनैर्मल्यमुदाहृतम् ॥५५॥
भावे तु निर्मले जाते कामाद्या अपि निर्मलाः ।
दोषाश्च गुणतां यान्ति सत्त्वप्रकर्षसंश्रयात् ॥५६॥
निगृहीतेन्द्रियग्रामो यत्र क्वापि वसेज्जनः ।
तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥५७॥
ध्यानपूते ज्ञानजले रागद्वेषमलापहे ।
यः स्नाति मानसे तीर्थे स याति परमां गतिम् ॥५८॥
एतत्ते मानसं प्रोक्तं तीर्थं साधुप्रसेवनम् ।
बाह्यं भौमं जलीयं च शृणु तीर्थं कथं हि तत् ॥५९॥
शारीरा ब्रह्मरन्ध्राद्या भागा मेध्यतमा यथा ।
तथा भूजलभागाश्च मेध्यास्तीर्थानि तानि वै ॥६०॥

स्वयंजातानि पुण्यानि कानिचिद् देवजानि च ।
कानिचित्सत्पूरुषाणां निवासाद्यैः कृतानि च ॥६१॥
पतिव्रतानां वासाद्यैश्चमत्कारैः सतामपि ।
सतीनां चाप्यनुग्रहैः साध्वीनां तपसा तथा ॥६२॥
पत्नीव्रतानां कार्याद्यैस्तीर्थानि संभवन्ति हि ।
आत्मतीर्थं महत् प्रोक्तं श्रीकृष्णो महतो महान् ॥६३॥
शुद्धं बुद्ध्यात्मकं तीर्थं निर्मलानीन्द्रियाण्यपि ।
भौतिकानि शरीराणि तपोभिः पावनानि च ॥६४॥
अस्थि चर्मादिकं चाप्यशुद्धं सतां तु पावनम् ।
तीर्थं वै जायते कृष्णतपोयोगात् सुदिव्यकम् ॥६५॥
कथात्मकं सर्वश्रेष्ठं तीर्थं तीर्थोत्तमोत्तमम् ।
भावात्मकं महत्तीर्थं स्नेहतीर्थं च सुकृतम् ॥६६॥
वृद्धाभिवन्दनं तीर्थं ब्रह्मलोकप्रदं मतम् ।
यज्ञभूमिर्महत्तीर्थं गोतीर्थं तुलसीक्षतिः ॥६७॥
एकादश्यादिकं तीर्थं तारयत्येव बन्धनात् ।
श्रद्धात्मकं परं तीर्थं पुण्यदं फलदं तथा ॥६८॥
तस्माद्भौमेषु तीर्थेषु जलीयेषु तथा प्रिये ।
यथा दिव्यत्वबुद्धिर्वै तथा कृत्वा तु देहिषु ॥६९॥
देवालयेषु देवेषु मूर्तिषु प्रतिमासु च ।
सत्सु साध्वीषु सत्कार्ये सुकृतं त्वर्जयेत् सदा ॥७०॥
आन्तरेषु च बाह्येषु तीर्थेषु स्नाति यो जनः ।
कृष्णसंघगतौ भक्तो विन्दति परमां गतिम् ॥७१॥
स्नानं दानं जपो होमस्तर्पणं वपनं कृतम् ।
हरेः सतां सेवनं च दर्शनं त्वक्षयं भवेत् ॥७२॥
काशी काञ्ची च मायाख्या त्वयोध्या द्वारवत्यपि ।
मथुराऽवन्तिका चैता मोक्षदा भगवद्भुवः ॥७३॥
तथापि काशिका सर्वदेववासेन यादृशी ।
मानसे मे रोचतेऽद्य न तथाऽन्या पतिव्रते ॥७४॥
तारकं ज्ञानमन्त्रादि ददाति शंकरः स्वयम् ।
नित्यं भिक्षुकरूपेण भ्रमत्येव गृहं गृहम् ॥७५॥
महावैष्णवराजोऽयं वैकुण्ठं चामृतं तथा ।
गोलोकं चापि कैलासं भक्तान् प्रेषयति प्रभुः ॥७६॥
यममार्गः सदा रुद्धः काशीवासकृतां प्रिये ।
अविमुक्तं महाक्षेत्रं शिवादीनां परात्परम् ॥७७॥
तद्वासार्थं रोचयेऽहं यावरतां काशिकां पुरीम् ।
सतीनां काशिकावासाद् ब्रह्मलोकाऽऽप्तिरेव वै ॥७८॥
सतीलोकात्परं लोकं वैकुण्ठं यान्ति ताः स्त्रियः ।
एतच्छ्रुत्वा मुनिं लोपामुद्रा पप्रच्छ सादरम् ॥७९॥
नारीणां चाप्सरसां च सतीनां क्वाऽस्ति तत्पुरम् ।
वद मे जीवनेशाऽत्र स्यां च निःसंशया यथा ॥८०॥
ओमित्युक्त्वा सतीलोकमगस्तिः प्राह योषिते ।
शृणु साध्वि भूमिलोकात्परो वायुस्तरः स्मृतः ॥८१॥
पिशाचादिनिवासः स ततो गुह्यकमण्डलम् ।
गुह्यकानां तु देवानां लोकः स स्मृद्धिसंभृतः ॥८२॥
ततो गान्धर्वलोकश्च यत्र गन्धर्वचारणाः ।
ततो वैद्याधरो लोको विद्याध्रा यत्र सन्ति हि ॥८३॥
ततो धर्मपुरी रम्या धार्मिकाः स्वर्गवासिनः ।
ततः स्वर्गं महत्पुण्यभाजां स्थानं सदासुखम् ॥८४॥
ततश्चाऽप्सरसां लोकः स्वर्गे चोर्ध्वं व्यवस्थितः ।
अप्सरसो महासत्यो यज्ञभाजां प्रियंकराः ॥८५॥
वसन्ति चाप्सरोलोके लोकपालानुसेविकाः ।
युवत्यो रूपलावण्यसौभाग्यनिधयः शुभाः ॥८६॥
दृढग्रन्थिनितम्बिन्यो दिव्यालंकारशोभनाः ।
दिव्यभोगप्रदा गीतिनृत्यवाद्यसुपण्डिताः ॥८७॥
कामकेलिकलाभिज्ञा द्यूतविद्याविशारदाः ।
रसज्ञा भाववेदिन्यश्चतुराश्चोचितोक्तिषु ॥८८॥
नानाऽऽदेशविशेषज्ञा नानाभाषासुकोविदाः ।
संकेतोदन्तनिपूणाः स्वतन्त्रा देवतोषिकाः ॥८९॥
लीलानर्मसु साभिज्ञाः सुप्रलापेषु पण्डिताः ।
क्षीरोदस्य सुताः सर्वा नारायणेन निर्मिताः ॥९०॥
उर्वशी मेनका रंभा चन्द्रलेखा तिलोत्तमा ।
वपुष्मती कान्तिमती लीलावत्युत्पलावती ॥९१॥
अलम्बुषा गुणवती स्थूलकेशी कलावती ।
कलानिधिर्गुणनिधिः कर्पूरतिलकोर्वरा ॥९२॥
अनंगलतिका विद्युल्लता मदनमोहिनी ।
चकोराक्षी चन्द्रकला मणिप्रभा मनोहरा ॥९३॥
ग्रावद्रावा तपोद्वेष्ट्री चारुनासा सुकर्णिका ।
दारुसञ्जिवनी सुश्रीः क्रतुशुल्का शुभानना ॥९४॥
तपःशुल्का तीर्थशुल्का दानशुल्का हिमावती ।
पञ्चाश्वमेधिका विद्या राजसूयार्थिनी प्रभा ॥९५॥
अष्टाग्निहोमिका माध्वी वाजपेयशतोद्भवा ।
अच्छोदा मोहिनी चम्पा ललिता च जया रमा ॥९६॥
वर्धिनी पद्मिनी मञ्जुकेशी हेम्नी च मञ्जुला ।
मिश्रकेशी देविका शान्तिका षष्टिसहस्रकम् ॥९७॥
अप्सरसां वसत्यन्या स्त्रियो लोकेऽत्र सन्त्यपि ।
सदाऽस्खलितलावण्याः सदाऽस्खलितयौवनाः ॥९८॥

दिव्याम्बरा दिव्यमाला दिव्यगन्धानुलेपनाः।
दिव्यभोगैः सुसम्पन्नाः स्वेच्छाविधृतविग्रहाः ॥ ९९ ॥
कृत्वा मासोपवासानि स्खलन्ति ब्रह्मचर्यतः।
सकृदेव द्विकृत्यो वा त्रिःकृत्वो दैवयोगतः ॥१००॥
ता इमा दिव्यभोगिन्यो रूपलावण्यसम्पदः।
निवसन्त्यप्सरोलोके सर्वकामसमन्विताः ॥१०१॥
कृत्वा व्रतानि सांगानि कामिकानि विधानतः।
भवन्ति कामचारिण्यो देवभोग्या इहाऽऽगताः ॥१०२॥
पतिव्रतधरानार्यो बलेन बलिना धृताः।
भर्तृबुद्ध्या रमन्ते तं कदाचित्ता इमाः प्रियाः ॥१०३॥
भर्तरि प्रोषिते यास्तु ब्रह्मचर्यव्रताः सदा।
विप्लवन्ते सकृद् दैवात् ता एता वामलोचनाः ॥१०४॥
स्वर्णं सुगन्धं सहस्रं शय्यां भूषाश्च भोजनम्।
बहुकौतुकवस्तूनि समर्च्य द्विजदम्पतीम् ॥१०५॥
संक्रान्तौ वा व्यतीपाते दद्यात् या वरवर्णिनी।
कामरूपधरो देवः प्रीयतामिति वादिनी ॥१०६॥
कोऽदात् कस्मा अदात् कामोऽदात् कामाय त्वदात्तथा।
कामो दाता कामः प्रतिगृहीता काम ते इदम् ॥१०७॥
इतिमन्त्रेण संदात्री यथाशक्ति सकामना।
सा श्रेष्ठाऽप्सरसां मध्ये वसेत् कल्पमिहांऽगना ॥१०८॥
कन्यारूपधरा काचिद् व्याभुक्ता केनचित् क्वचित्।
देवरूपेण तं कालमारभ्य ब्रह्मचारिणी ॥१०९॥
वृत्तं तद् ध्यायमाना सा निधनं याति कालतः।
दिव्यरूपधरा सेह जायते दिव्यभोगभाक् ॥११०॥
इत्यावेद्य स्त्रियै कुंभजन्मा मित्रावरुणजः।
लोपामुद्राऽभिधपत्न्यै तूष्णीमास महामुनिः ॥१११॥
अथ काश्यां शिवा दुर्गा देव्यो ब्रह्मव्रतप्रियाः।
ययुः प्रातरगस्त्यस्याश्रमं देवीं पतिव्रताम् ॥११२॥
देवीपूज्यां महासाध्वीं लोपामुद्रां प्रवीक्षितुम्।
अदृष्ट्वा तामनिवृत्तां रिक्तं चाश्रममण्डलम् ॥११३॥
ध्यात्वा ज्ञात्वा वेंकटाद्रौ स्थितां द्रष्टुं द्रुतं ययुः।
नेमुराश्लेषयामासुः कथाः प्राहुः परस्परम् ॥११४॥
देवीभिरर्थिता साध्वी ताभिः सार्कं निजाश्रमम्।
अगस्तिना सह साध्वी समाजगाम काशिकाम् ॥११५॥
पतिव्रतां महासाध्वीं सतीं प्राप्य सुरस्त्रियः।
काशीस्था सुखमापन्ना दुर्लभः सत्समागमः ॥११६॥
इति ते कथितं लक्ष्मि ! विन्ध्यस्याऽवर्धनं तथा।
अगस्त्यस्य चमत्कारो लोपामुद्रासतीशता ॥११७॥
या कन्या शृणुयाच्चेदं पठेद्वा सा पतिव्रता।
सती साध्वी श्रीसमाना भवेदेव न संशयः ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विन्ध्याचलस्य सूर्यमार्गमवरुद्ध्य स्थितस्याऽगस्त्येन निरोधः-कृतः, अगस्त्यस्य महालक्ष्मीदर्शनं, महालक्ष्मीस्तोत्रं, तीर्थविविधता, तीर्थप्रशंसा, अप्सरसां लोकः, अप्सरोभावप्राप्तिकारणानि, काशीदेविभिर्लोपा-मुद्रागस्त्ययोः काश्यां प्रत्यानयनमित्यादि-निरूपणनामा षट्पञ्चाशदधिकचतुश्शत-तमोऽध्यायः ॥४५६॥

श्रीनारायण उवाच—

दत्तात्रेयस्य सच्छिष्यः कार्तवीर्योऽर्जुनो नृपः।
पतिव्रतया तत्पत्न्या मनोरमाख्यया मुहुः ॥ १ ॥
रक्षितोऽपि बोधितोऽपि न मेने स्वप्रियावचः।
अनादृत्य गतो युद्धे जामदग्न्यस्य सन्निधौ ॥ २ ॥
तदा देहः परित्यक्तो मनोरमाख्ययोषिता।
ततो मृतः कार्तवीर्यः शृणु लक्ष्मि ! कथां तु ताम् ॥ ३ ॥
माहिष्मत्या नगर्याः स राजाऽभूदर्जुनो महान्।
एकदा कार्तवीर्यः स जगाम मृगयां वने ॥ ४ ॥
रात्रौ बुभुक्षितः श्रान्तो जमदग्न्याश्रमं ययौ।
कामधेनुप्रतापेन ससैन्यो भोजितो नृपः ॥ ५ ॥
जमदग्निं मारयित्वा कामधेनुं जहार सः।
ययावनु सती वह्नौ प्रविश्य रेणुका पतिम् ॥ ६ ॥
पर्शुरामः क्रोधमाप्तः प्रतिज्ञां प्रचकार ह।
त्रिःसप्तकृत्वो निर्भूपां करिष्यामि महीमिमाम् ॥ ७ ॥
ब्राह्मणेभ्यो धनं दत्वा ब्रह्मलोकं जगाम ह।
प्रतिज्ञां कथयामास ब्रह्मणेऽथ तमाह सः ॥ ८ ॥
शिवलोकं गच्छ वत्स शंकरं शरणं व्रज।
श्रीकृष्णमन्त्रकवचग्रहणं कुरु शंकरात् ॥ ९ ॥
दुर्लभं वैष्णवं तेजः शैवं शाक्तं विजेष्यति।
श्रुत्वा नत्वा वेधसं सः शिवलोकं जगाम ह ॥१०॥
ननाम मूर्ध्ना शंभुं स वृत्तान्तं समुवाच तम्।
प्रसन्नः शंकरस्तस्मै ददौ श्रीकृष्णसन्मनुम् ॥११॥
त्रैलोक्यविजयं वर्म तथा स्तोत्रं हरेः शुभम्।
त्रैलोक्यविजयस्याऽस्य कवचस्य प्रजापतिः ॥१२॥
ऋषिश्छन्दश्च गायत्री देवो रासेश्वरः प्रभुः।
त्रैलोक्यविजयप्राप्तौ विनियोगः सदा मतः ॥१३॥

प्रणवो मे शिरः पातु श्रीकृष्णाय नमः सदा।
पायात् कपालं 'कृष्णाय स्वाहा' पञ्चाक्षरात्मकः ॥१४॥
कृष्णेति पातु नेत्रे च कृष्णः स्वाहेति तारकम्।
हरये नम इत्येवं भ्रूलतां पातु मे सदा ॥१५॥
ओं गोविन्दाय स्वाहेति नासिकां पातु सर्वदा।
गोपालाय नमो गण्डौ पातु मे सर्वतः प्रभो ॥१६॥
ओं नमो गोपांगनेशाय कर्णौ पातु सदा मम।
ओं कृष्णाय नमः शश्वत्पातु मेऽधरयुग्मकम् ॥१७॥
ओं गोविन्दाय स्वाहेति दन्तौघं मे सदाऽवतु।
पातु कृष्णाय दन्ताऽधो दन्तोर्ध्वं क्लीं सदाऽवतु ॥१८॥
ओं श्रीकृष्णाय स्वाहेति जिह्विकां पातु मे सदा।
रासेश्वराय स्वाहेति तालुकं पातु मे सदा ॥१९॥
राधिकेशाय स्वाहेति कण्ठं पातु सदा मम।
नमो गोपांगनेशाय वक्षः पातु सदा मम ॥२०॥
ओं गोपेशाय स्वाहेति स्कन्धं पातु सदा मम।
नमः किशोरवेशाय स्वाहा पृष्ठं सदाऽवतु ॥२१॥
उदरं पातु मे नित्यं मुकुन्दाय नमः सदा।
ओं ह्रीं क्लीं कृष्णाय स्वाहा करौ पातु सदा मम ॥२२॥
ओं विष्णवे नमो बाहुयुग्मं पातु सदा मम।
ओं ह्रीं भगवते स्वाहा नखरं पातु मे सदा ॥२३॥
ओं नमो नारायणाय नखरन्ध्रं सदाऽवतु।
ओं ह्रीं ह्रीं पद्मनाभाय नाभिं पातु सदा मम ॥२४॥
ओं सर्वेशाय स्वाहेति कंकालं पातु मे सदा।
ओं गोपीरमणाय स्वाहा नितम्बं पातु मे सदा ॥२५॥
ओं गोपीरमणनाथाय पादौ सदाऽवतु मम।
ओं ह्रीं क्लीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥२६॥
ओं केशवाय स्वाहेति मम केशान् सदाऽवतु।
नमः कृष्णाय स्वाहेति ब्रह्मरन्ध्रं सदाऽवतु ॥२७॥
ओं माधवाय स्वाहेति मे लोमानि सदाऽवतु।
ओं ह्रीं श्रीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥२८॥
परिपूर्णतमः कृष्णः प्राच्यां मां सर्वदाऽवतु।
स्वयं गोलोकनाथो मामाग्नेय्यां दिशि रक्षतु ॥२९॥
पूर्णब्रह्मस्वरूपश्च दक्षिणे मां सदाऽवतु।
नैर्ऋत्यां पातु मां कृष्णः पश्चिमे पातु मां हरिः ॥३०॥
गोविन्दः पातु मां शश्वद् वायव्यां दिशि नित्यशः।
उत्तरे मां सदा पातु रसिकानां शिरोमणिः ॥३१॥
ऐशान्यां मां सदा पातु वृन्दावनविहारकृत्।
वृन्दावनीप्राणनाथः पातु मामूर्ध्वदेशतः ॥३२॥
सदैव माधवः पातु बलिहारी बलाधिकः।
जले स्थले चान्तरिक्षे नृसिंहः पातु मां सदा ॥३३॥
स्वप्ने जागरणे शश्वत् पातु मां माधवः सदा।
सर्वात्मा श्रीकृष्णनारायणो मां पातु सर्वतः ॥३४॥
इति त्रैलोक्यविजयं वर्मोक्तं ते महाऽद्भुतम्।
कण्ठे वा दक्षिणे बाहौ धारणाद् विजयः सदा ॥३५॥
स भवेत् सिद्धकवचो दशलक्षं जपेत्तु यः।
दशांशहोमः कर्तव्यो यथेष्टसिद्धिमिच्छता ॥३६॥
ओं श्री नमः श्रीकृष्णाय परिपूर्णतमाय स्वाहा।
सिद्धः स्यात् पञ्चलक्षैस्तु मन्त्रः सप्तदशाक्षरः ॥३७॥
अथ स्तोत्रं शृणु दिव्यं सद्यस्तुष्टिकरं परम्।
दिव्यं श्रीश्रीकृष्णनारायणस्य वेधसोदितम् ॥३८॥
सूक्ष्मतमं चाक्षरेशं निर्गुणं सगुणं हरिम्।
निराकारं च साकारं श्रीकृष्णं प्रणमाम्यहम् ॥३९॥
सर्वाधारं स्वतन्त्रं च कमनीयं विभुं हरिम्।
साक्षिणं कर्मफलदं श्रीकृष्णं प्रणमाम्यहम् ॥४०॥
जगज्जन्मादिकर्तारं सच्चिदानन्दमर्थगम्।
स्त्रीपुंनपुंसकात्मानं श्रीकृष्णं प्रणमाम्यहम् ॥४१॥
तारकं धारकं सर्वकारणानां तु कारणम्।
बीजं विप्रं रविं चन्द्रं श्रीकृष्णं प्रणमाम्यहम् ॥४२॥
शंकरं शेषरूपं च ब्रह्माणं कपिलं मुनिम्।
सनत्कुमारं राधेशं श्रीकृष्णं प्रणमाम्यहम् ॥४३॥
विष्णुं देवीं मनुं भक्तं वसन्तं मार्गशीर्षकम्।
एकादशीं सागरं च श्रीकृष्णं प्रणमाम्यहम् ॥४४॥
हिमालयं क्षितिं वृन्दां चन्दनं कल्पपादपम्।
धान्यं च पारिजातं च श्रीकृष्णं प्रणमाम्यहम् ॥४५॥
ऐरावतं वैनतेयं कामधेनुं तथाऽमृतम्।
सुवर्णं च यवं सिंहं श्रीकृष्णं प्रणमाम्यहम् ॥४६॥
बृहस्पतिं कुबेरं च वेदमिन्द्रं सरस्वतीम्।
अकारं जाह्नवीं मनः श्रीकृष्णं प्रणमाम्यहम् ॥४७॥
सुदर्शनं ब्रह्मतेजः कान्तं कालं बलं गुरुम्।
मातरं विश्वकर्माणं श्रीकृष्णं प्रणमाम्यहम् ॥४८॥
पतिव्रतां पितरं च शालग्रामं सुतं नृपम्।
सामवेदं वृषं शैत्यं श्रीकृष्णं प्रणमाम्यहम् ॥४९॥
गन्धं शब्दं राजसूयं गायत्रीं पावकं पयः।
सुचित्ररथं स्तुतिं दर्भं श्रीकृष्णं प्रणमाम्यहम् ॥५०॥
शान्तिं विभुं मतिं चित्रं श्यामलं गोपिकापतिम्।
दिव्यभूषाधरं कान्तं श्रीकृष्णं प्रणमाम्यहम् ॥५१॥

विहारिणं च रसिकं राधाकान्तं मनोहरम् ।
लक्ष्मीशं श्रीकृष्णनारायणं नित्यं नमाम्यहम् ॥५२॥
इति स्तोत्रेण त्रैलोक्ये सर्वदा विजयो भवेत् ।
गच्छ साधय संकुरु प्रतिज्ञान्तं जयस्तव ॥५३॥
रामो गत्वा पुष्करे संसाध्य युद्धाय निर्गतः ।
ददर्श मंगलान्येव शुश्राव जयसूचकम् ॥५४॥
हरिशब्दं सिंहशब्दं घण्टादुन्दुभिवादनम् ।
आकाशीयस्वरगीतिं जयस्ते भवितेति वै ॥५५॥
नवेङ्गितं च कल्याणं मेघशब्दं जयावहम् ।
ददर्श पुरतो विप्रबन्दिदैवज्ञभिक्षुकान् ॥५६॥
पुरो ददर्श दीपं च पतिपुत्रवतीं सतीम् ।
शिवं शिवां पूर्णकुंभं चापं च नकुलं तथा ॥५७॥
कृष्णमृगं गजं सिंहं तुरगं गण्डकं द्विपम् ।
चमरीं राजहंसं च चक्रवाकं शुकं पिकम् ॥५८॥
मयूरं खञ्जनं शंखचिल्लं तथा चकोरकम् ।
पारावतं बलाकं च कारण्डं चातकं चटम् ॥५९॥
सौदामिनीं शक्रचापं सूर्यं सूर्यप्रभां शुभाम् ।
सद्योमांसं सजीवं च मत्स्यं शंखं सुवर्णकम् ॥६०॥
माणिक्यं रजतं मुक्तां मणीन्द्रं च प्रवालकम् ।
दधि लाजान् शुक्लधान्यं शुक्लपुष्पं च कुंकुमम् ॥६१॥
पर्णं पताकां छत्रं च दर्पणं श्वेतचामरम् ।
धेनुं वत्सयुतां नृपं रथस्थं हेतिसंयुतम् ॥६२॥
दुग्धमाज्यं च पूगं चामृतं च पायसं शुभम् ।
शालग्रामं फलं पक्वं स्वस्तिकं शर्करां मधु ॥६३॥
मार्जारं च वृषं श्वेतं मेषं पर्वतमूषिकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥६४॥
कस्तूरीं व्यजनं तोयं हरिद्रां तीर्थमृत्तिकाम् ।
सिद्धार्थं सर्षपं दूर्वां विप्रबालं च कन्यकाम् ॥६५॥
मृगं वेश्यां षट्पदं च कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषं च गोधूलिं गोपदाऽङ्कितम् ॥६६॥
गोष्ठं गवां वर्त्म रम्यां गोशालां गोगतिं तथा ।
भूषणं देवमूर्तिं च ज्वलदग्निं महोत्सवम् ॥६७॥
ताम्रं च स्फटिकं वन्द्यं सिन्दूरं माल्यचन्दनम् ।
गन्धं च हीरकं रत्नं ददर्श दक्षिणे मुनिः ॥६८॥
सुगन्धिपवनाऽऽघ्राणं प्राप्य विप्राशिषः शुभाः ।
कार्तवीर्याऽर्जुनाऽभ्याशे ययौ श्रीनर्मदातटम् ॥६९॥
तत्राऽक्षयवटाऽधस्ताद् रात्रौ निद्रां जगाम ह ।
निशातीतं ददर्शायं स्वप्नानि विविधानि च ॥७०॥
न चिन्तितं यन्मनसा वायुपित्तकफं विना ।
गजाश्वशैलप्रासादगोवृक्षफलितेषु च ॥७१॥
आरुह्यमाणमात्मानं रुदन्तं कृमिभक्षितम् ।
आरुह्यमाणमात्मानं नौकायां चन्दनोक्षितम् ॥७२॥
पुष्पमालां धृतवन्तं पीतवस्त्रैः सुशोभितम् ।
विण्मूत्रोक्षितसर्वांगं वसापूयसमन्वितम् ॥७३॥
वीणां वरां वादयन्तमात्मानं स ददर्श ह ।
विस्तीर्णपद्मपत्राढ्यं स्वं ददर्श सरित्तटे ॥७४॥
दध्याज्यमधुसंयुक्तं भुक्तवन्तं च पायसम् ।
भुक्तवन्तं च ताम्बूलं लभन्तं ब्राह्मणाशिषम् ॥७५॥
फलपुष्पप्रदीपं च पश्यन्तं स्वं ददर्श ह ।
परिपक्वफलं क्षीरमुष्णान्नं शर्करान्वितम् ॥७६॥
स्वस्तिकं भुक्तवन्तं च मिष्टान्नं श्वेतचूर्णजम् ।
शर्करायुग्वारिपानं कुर्वन्तं स्वं ददर्श सः ॥७७॥
जलौकसा वृश्चिकेन मीनेन भुजगेन च ।
भक्षितं भीतमात्मानं पलायन्तं ददर्श सः ॥७८॥
ततो ददर्श चात्मानं मण्डले शशिसूर्ययोः ।
पतिपुत्रवतीं नारीं ददर्श सस्मितां ततः ॥७९॥
सुवेषया कन्यया सस्मितेन च द्विजेन च ।
ददर्श श्लिष्टमात्मानं तुष्टेन परितुष्टया ॥८०॥
फलितं पुष्पितं वृक्षं देवताप्रतिमां नृपम् ।
गजस्थं च रथस्थं च पश्यन्तं स्वं ददर्श सः ॥८१॥
पीतवस्त्रपरीधानां रत्नालंकारभूषिताम् ।
विशन्तीं ब्राह्मणीं गेहं पश्यन्तं स्वं ददर्श सः ॥८२॥
शंखं च स्फटिकं श्वेतमालां मुक्तां च चन्दनम् ।
सुवर्णं रजतं रत्नं पश्यन्तं स्वं ददर्श सः ॥८३॥
गजं वृषं च सर्पं च श्वेतं च श्वेतचामरम् ।
नीलोत्पलं दर्पणं च पर्शुरामो ददर्श ह ॥८४॥
रथस्थं नवरत्नाढ्यं मालतीमाल्यभूषितम् ।
रत्नसिंहासनस्थं स्वं रामः स्वप्ने ददर्श ह ॥८५॥
पद्मश्रेणीं पद्मकुंभं दधि लाजान् घृतं मधु ।
पर्णच्छत्रं छत्रिणं च रामः स्वप्ने ददर्श ह ॥८६॥
बकपंक्तिं हंसपंक्तिं कन्यापंक्तिं व्रतान्विताम् ।
पूजयन्तीं घटं शुभ्रं रामः स्वप्ने ददर्श ह ॥८७॥
मण्डपस्थं द्विजगणं पूजयन्तं हरं हरिम् ।
जयोऽस्त्वित्युक्तवन्तं तं रामः स्वप्ने ददर्श ह ॥८८॥
सुधावृष्टिं पर्णवृष्टिं फलवृष्टिं गवागमम् ।
पुष्पचन्दनवृष्टिं च रामः स्वप्ने ददर्श ह ॥८९॥

सद्योमांसं जीवमत्स्यं मयूरं श्वेतखञ्जनम् ।
सरोवरं च तीर्थानि रामः स्वप्ने ददर्श ह ॥९०॥
पारावतं शुकं चापं शंखं चिल्लं च चातकम् ।
व्याघ्रं सिंहं च सुरभीं रामः स्वप्ने ददर्श ह ॥९१॥
गोरोचनां हरिद्रां च शुक्लधान्यचयं शुभम् ।
ज्वलदग्निं तथा दूर्वां रामः स्वप्ने ददर्श ह ॥९२॥
देवालयसमूहं च शिवलिंगं च पूजितम् ।
अर्चितां मृन्मयीं शैवां रामः स्वप्ने ददर्श ह ॥९३॥
यवगोधूमचूर्णानां भक्ष्याणि विविधानि च ।
भुक्तवन्तं मुहुः स्वं च रामः स्वप्ने ददर्श ह ॥९४॥
दिव्यवस्त्रविभूषाढ्या नारीः स्वप्ने स भुक्तवान् ।
अगम्यागमनं स्वप्ने चकार परशुप्रधिः ॥९५॥
ददर्श नर्तकीं वेश्यां रुधिरं च सुरां पपौ ।
रुधिरोक्षितसर्वांगं स्वात्मानं स ददर्श ह ॥९६॥
पक्षिणां पीतवर्णानां मानुषाणां च पद्मजे ।
मांसानि बुभुजे रामो हृष्टः स्वप्नेऽरुणोदये ॥९७॥
अकस्मान्निगडैर्बद्धं क्षतं शस्त्रेण स्वं पुनः ।
दृष्ट्वैवं बुबुधे प्रातः समुत्तस्थौ हरिं स्मरन् ॥९८॥
मनसा बुबुधे सर्वं विजेष्यामि रिपून् ध्रुवम् ।
कार्तवीर्यार्जुनो रात्रावनिष्टानि ददर्श ह ॥९९॥
तैलाऽभ्यंगितमात्मानं ददर्श गर्दभोपरि ।
औदपुष्पस्य माल्यं च बिभ्रतं रक्तचन्दनम् ॥१००॥
रक्तवस्त्रपरीधानं लोहालंकारभूषितम् ।
क्रीडन्तं च हसन्तं च निर्वाणांगारराशिना ॥१०१॥
भस्मच्छन्नां च पृथिवीं जयापुष्पान्वितां भुवम् ।
रहितं चन्द्रसूर्याभ्यां रक्तसन्ध्यान्वितं नभः ॥१०२॥
मुक्तकेशां च नृत्यन्तीं विधवां छिन्ननासिकाम् ।
रक्तवस्त्रपरीधानां ददर्श चाट्टहासिनीम् ॥१०३॥
सशाराममग्निरहितां चितां भस्मसमन्विताम् ।
भस्मवृष्टिमसृग्वृष्टिमग्निवृष्टिं ददर्श सः ॥१०४॥
पक्वतालफलाकीर्णां पृथिवीमस्थिसंभृताम् ।
कर्परौघं ददर्शाऽपि छिन्नकेशनखान्विताम् ॥१०५॥
पर्वतं लवणानां च राशीभूतं कपर्दकम् ।
चूर्णानां चैव तैलानां ददर्श कन्दरं निशि ॥१०६॥
ददर्श पुष्पितं वृक्षमशोककरवीरयोः ।
तालवृक्षं च फलितं ददर्श सः पतत्फलम् ॥१०७॥
स्वकरात्पूर्णकलशः पपात च बभञ्ज च ।
ददर्शाऽपि च गगनात् सम्पतत्सूर्यमण्डलम् ॥१०८॥

एवं ददर्श गगनात् सम्पतच्चन्द्रमण्डलम् ।
उल्कापातं धूमकेतुं ग्रहणं चन्द्रसूर्ययोः ॥१०९॥
विकृताकारपुरुषं विकटास्यं दिगम्बरम् ।
आगच्छन्तं त्वग्रतस्तं स्वप्ने ददर्श चार्जुनः ॥११०॥
बाला द्वादशवर्षीया वस्त्रभूषणभूषिता ।
संरुष्टा याति स्वगेहादेवं स्वप्ने ददर्श सः ॥१११॥
मनोरमा निजपत्नी याचते काननं प्रति ।
गमनायैकला चेति स्वप्ने ददर्श चार्जुनः ॥११२॥
रुष्टो विप्रो मां शपते सन्यासी च यतिर्गुरुः ।
भित्तौ पुत्तलिकाश्चित्रा नृत्यन्तीश्च ददर्श सः ॥११३॥
गृध्रैः काकैर्महिषैश्च पीडितं स्वं ददर्श सः ।
पीडितं तैलयन्त्रेण भ्रामितं तैलकारिणा ॥११४॥
धृतं नग्नैः पाशहस्तैरात्मानं स ददर्श ह ।
नृत्यन्ति गायकाः सर्वे गानं गायन्ति मे गृहे ॥११५॥
विवाहं परमानन्दं रमतो लोकनायकान् ।
केशाकेशि कुर्वतश्चाऽर्जुनो ददर्श वै निशि ॥११६॥
ददर्श समरं रात्रौ काकानां च शुनां तथा ।
मोटकानि च पिण्डानि श्मशानं शवसंयुतम् ॥११७॥
रक्तवस्त्रं शुक्लवस्त्रं ददर्श चार्जुनो निशि ।
कृष्णाम्बरा कृष्णवर्णा विवस्त्रा मुक्तमूर्धजा ॥११८॥
विधवाऽऽश्लिष्यति स्वं तत् स्वप्नेऽर्जुनो ददर्श ह ।
नापितो मुण्डते मुण्डं श्मश्रुश्रेणीं च वक्षसम् ॥११९॥
नखैर्विदारितं वक्षः स्वप्नेऽर्जुनो ददर्श ह ।
पादुकाश्चर्मरज्जूनां राशिं स्वप्ने ददर्श सः ॥१२०॥
चक्रं भ्रमन्तं भूमौ च कुलालस्य ददर्श सः ।
वात्यया घूर्णमानं च शुष्कवृक्षं समुत्थितम् ॥१२१॥
घूर्णमानं कबन्धं च स्वप्नेऽर्जुनो ददर्श ह ।
ग्रथितां मुण्डमालां च चूर्ण्यमानां तु वात्यया ॥१२२॥
अतीव घोरदशनान् भूतप्रेतान् भयंकरान् ।
हुताशनं वमतश्च स्वप्नेऽर्जुनो ददर्श ह ॥१२३॥
दग्धजीवं दग्धवृक्षं व्याधिग्रस्तं नरं परम् ।
अंगहीनं च वृषलं स्वप्नेऽर्जुनो ददर्श ह ॥१२४॥
कुहपर्वतवृक्षाणां सहसा पतनं तथा ।
मुहुर्मुहुर्वज्रपातं स्वप्नेऽर्जुनो ददर्श ह ॥१२५॥
कुक्कुराणां शृगालानां मुहुः शुश्राव रोदनम् ।
अधःशिर्षमूर्ध्वपादं मुक्तकेशं दिगम्बरम् ॥१२६॥
भूमौ भ्रमन्तं गच्छन्तं ददर्श चार्जुनो निशि ।
विकृतध्वनिशब्दं च ग्रामाग्रे देवरोदनम् ॥१२७॥

श्रुत्वा प्रातर्जजागार कार्तवीर्योऽर्जुनो नृपः ।
क्षुवँश्च शयनाद् यातः प्रस्खलन् स्वपतिव्रताम् ॥१२८॥
मनोरमां निशि दृष्टदुष्टस्वप्नातिदुःखिताम् ।
सती साध्वी प्रिया नाथं पतिं दृष्ट्वा पतिव्रता ॥१२९॥
सिषेवे त्वन्तिमां सेवां क्रोडे कृत्वा पतिं स्वकम् ।
शतपुत्राधिकः प्रेम्णा सतीनां वै पतिर्यतः ॥१३०॥
किन्तु दुष्टापशकुनैर्ज्ञात्वा भाविविनाशनम् ।
पतिर्मे श्रीकृष्णनारायणांशेन द्विजेन वै ॥१३१॥

योद्धुं याति च विज्ञाय प्राणान् सर्वान् निरुद्ध्य सा ।
षट्चक्राणि भेदयित्वा ब्रह्मरन्ध्रं जगाम सा ॥१३२॥
त्वरितं दिव्यरूपा सा सतीलोकं तु प्राग् ययौ ।
अथाऽर्जुनो ययौ योद्धुं ददर्शाऽमंगलानि सः ॥१३३॥
सती दिव्यशरीरेण स्वामिना सह सङ्गरम् ।
रथमारुह्य पार्श्वस्थाऽदृश्या सहचरी ययौ ॥१३४॥
ददर्श द्वारि विधवां छिन्ननासां कुरूपिणीम् ।
अर्जुनः कृष्णवस्त्राढ्यां रुदतीं मुण्डिनीं खलाम् ॥१३५॥
मुखदुष्टां योनिदुष्टां व्याधियुक्तां च कुट्टिनीम् ।
पतिपुत्रविहीनां चाऽपरां ददर्श पुंश्चलीम् ॥१३६॥

कुंभकारं तैलकारं व्याधं सर्पोपजीविनम् ।
कुचैलमतिरूक्षांगं नग्नं काषायवाससम् ॥१३७॥
चितादग्धं शवं भस्म निर्वाणांगारमित्यपि ।
वसाविक्रयिणं चापि कन्याविक्रयिणं तथा ॥१३८॥
सर्पक्षतं नरं सर्पं गोधां च शशकं विषम् ।
श्राद्धपाकं च पिण्डं च मोटकं च तिलाँस्तथा ॥१३९॥
शूद्रान्नभोजकं विप्रं देवलं ग्रामयाजकम् ।
कुशपुत्तलिकां चैव शवदाहनकारिणम् ॥१४०॥

शून्यकुंभं भग्नकुंभं तैलं लवणमस्थि च ।
कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् ॥१४१॥
दक्षिणे तु शृगालं च कुर्वन्तं भैरवं रवम् ।
कपर्दकं च क्षौरं च छिन्नकेशं नखं मलम् ॥१४२॥
कलहं च विलापं च तथा क्लेशकरं जनम् ।
अमंगलं रुदन्तं च रुदन्तं शोकिनं जनम् ॥१४३॥

मिथ्यासाक्ष्यप्रदातारं चौरं च नरघातिनम् ।
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभक्षकम् ॥१४४॥
देवतागुरुविप्राणां वस्तुवित्तापहारकम् ।
दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् ॥१४५॥
पितृमातृविरक्तं च द्विजाऽश्वत्थविघातिनम् ।
सत्यघ्नं च कृतघ्नं च क्षतं विश्वासघातिनम् ॥१४६॥

गुरुदेवद्विजानां च निन्दकं स्वांगहीनकम् ।
नपुंसकं कुष्ठिनं च काणं बधिरमित्यपि ॥१४७॥
पुल्कसं छिन्नलिंगं च खल्वाटं श्मश्रुहीनकम् ।
सुरामत्तं सुरां रण्डामुष्ट्रं महिषगर्दभौ ॥१४८॥
क्षिप्तं वमन्तं रुधिरं छूकं काकं ददर्श सः ।
मूत्रं पुरीषं श्लेष्माणं रूक्षिणं नृकपालकम् ॥१४९॥
चण्डवातं रक्तवृष्टिं कुवाद्यं वृक्षपातनम् ।
वृकं च सूकरं गृध्रं श्येनं कंकं च भल्लुकम् ॥१५०॥

निगडं शुष्ककाष्ठं च वायसं गन्धकं तथा ।
अभिचारोपजीवं कुवैद्यं तुषं तथौषधम् ॥१५१॥
रक्तपुष्पं मृतवार्तां विप्रशापं क्षुवं तथा ।
यष्टिमुकुटपतनं कार्तवीर्यो ददर्श ह ॥१५२॥
वामांगस्पन्दनं देहजाड्यं रथाश्वपश्वनम् ।
रथचक्रक्रूररावो हृदि त्रासश्च जज्ञिरे ॥१५३॥
तथापि राजा निःशंकः प्रविवेश रणाजिरम् ।
प्रणम्य परशुरामं ब्राह्मणेभ्यो ददौ धनम् ॥१५४॥
रणतूर्याण्यवाद्यन्त सन्नाहोऽभूच्च सैन्ययोः ।
पर्शुरामोऽर्जुनमाह न्याय्यं यत् सर्वशृण्वताम् ॥१५५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कामधेनुहरणमिषेण जमदग्निनाशः, रेणुकायाः सतीत्वं, पर्शुरामस्य शंकरात् श्रीकृष्णमन्त्रकवचस्तोत्रलाभः, स्वप्ने जागरणे पर्शुरामस्य शकुनानि, सहस्रार्जुनस्याऽपशकुनानि, पतिव्रतायाः मनोरमायाः पातिव्रत्येन सतीत्वं, रणागमश्चेत्यादिनिरूपणनामा सप्तपञ्चाशदधिकचतुश्शततमोऽध्यायः ॥४५७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! माधवांशः पर्शुराम उवाच तम् ।
कार्तवीर्यं रणमध्ये धर्मभृतं वचो यथा ॥ १ ॥
शृणु राजेन्द्र ! धर्मिष्ठ चन्द्रवंशसमुद्भव ।
विष्णोरंशस्य शिष्यस्त्वं दत्तात्रेयस्य धीमतः ॥ २ ॥
कथं दुर्बुद्धिमाप्तस्त्वमहनो वृद्धभूसुरम् ।
ब्राह्मणी शोकसन्तप्ता भर्त्रा सार्धं गता सती ॥ ३ ॥
किं भविष्यति ते भूप परत्रैवाऽनयोर्वधात् ।
क्व गता कपिला सा ते कीदृक् फलं भविष्यति ॥ ४ ॥
यत् कृतं तु त्वया राजन् हालिको न करिष्यति ।
सत्कीर्तिश्चाथ दुष्कीर्तिः कथामात्राऽवशेषिता ॥ ५ ॥

त्वया कृतो घोरतरस्त्वन्यायस्तत्फलं लभ ।
उत्तरं देहि राजेन्द्र समाजे रणमूर्धनि ॥ ६ ॥
कार्तवीर्योऽर्जुनः श्रुत्वा प्रवक्तुमुपचक्रमे ।
शृणु राम हरेरंशस्त्वमप्यसि न संशयः ॥ ७ ॥
सद्बुद्ध्या कर्मणा ब्रह्मभावनां करोति यः ।
स्वधर्मनिरतः शुद्धो ब्राह्मणः स प्रकीर्त्यते ॥ ८ ॥
अन्तर्बहिश्च मननात् कुरुते फलदां क्रियाम् ।
मौनी शश्वद् वदेत् काले हितकृन्मुनिरुच्यते ॥ ९ ॥
स्वर्णे लोष्ठे गृहेऽरण्ये पंके सुस्निग्धचन्दने ।
रामवृत्तिः समभावो योगी यथार्थ उच्यते ॥१०॥
सर्वजीवेषु यो विष्णुं भावयेत् समताधिया ।
हरौ करोति भक्तिं च हरिभक्तः स उच्यते ॥११॥
तपोधनं ब्राह्मणानां मुनीनां योगिनां तथा ।
हरिभक्तस्य विप्रस्य तपस्याः कामधेनवः ॥१२॥
क्षत्रियाणां सदैश्वर्ये स्पृहा रत्नेषु सर्वदा ।
क्षत्रियाणां तु तपसि स्पृहाऽतीवाऽप्रशंसिता ॥१३॥
ब्राह्मणानां विवादे च स्पृहाऽतीव विनिन्दिता ।
रागी राजसिकं कार्यं कुरुते कर्मरागतः ॥१४॥
रागान्धो यो राजसिकस्तेन राजा प्रकीर्त्यते ।
रामतः कामधेनुस्तु मया वै याचिता मुने ॥१५॥
तव पित्रा तु सैन्यानि कृतान्ययं व्यतिक्रमः ।
कृत एव वद विप्र को दोषो रागिणोऽत्र मे ॥१६॥
त्रिंशदक्षौहिणीसेना हत्या नाशयितुं च माम् ।
उद्यतस्य तु हनने न दोषो ह्याततायिनः ॥१७॥
त्वं चापि तापसो भूत्वा विप्रधर्मविवर्जिताम् ।
प्रतिज्ञां कृतवान् सोऽयमन्यायः किं न मे वद ॥१८॥
पित्रोर्द्वयोः कृते त्वं तु कर्तुं पृथ्वीं निःक्षत्रियाम् ।
त्रिःसप्तकृत्वो यत्तत् किं न्याय्यं वद भूसुरः ॥१९॥
इति श्रुत्वा गर्ववाक्यं पर्शुरामोऽतिरुड्भरः ।
क्षणात् टंकारयित्वा स्वं धनुर्मुमोच सायकान् ॥२०॥
बाणौघैश्छादयामासाऽर्जुनं रथं तथाऽम्बरम् ।
मनोरमा स्थिता दिव्या रथे पतिव्रता सती ॥२१॥
महालक्ष्मीयुता देवी ररक्ष स्वपतिं तदा ।
तावद् राजाऽपि बाणौघाँश्चिच्छेद निजसायकैः ॥२२॥
रामस्य भ्रातरः सर्वे चत्वारोऽन्ये प्रशिष्यकाः ।
निजघ्नुरर्जुनसैन्यं तीक्ष्णशस्त्राऽसिपाणयः ॥२३॥
शरजालेन राजेन्द्रो वारयामास तानपि ।
चिच्छिदुः शरजालं च जमदग्निसुतास्तदा ॥२४॥
राजा चिक्षेप दिव्यास्त्रं मुनयश्चिच्छिदुस्तु तत् ।
दिव्यास्त्रेणैव मुनयश्चिच्छिदुः सशरं धनुः ॥२५॥
रथं च सारथिं चैव राज्ञः सन्नाहमित्यपि ।
मनोरमा दिव्यरूपा ररक्ष स्वपतिं सती ॥२६॥
न्यस्तशस्त्रं नृपं दृष्ट्वा मुनयो हर्षविह्वलाः ।
जगृहुः शूलिनः शूलं मत्स्यराजजिघांसया ॥२७॥
शूलनिक्षेपसमये वागभूवाऽशरीरिणी ।
शूलं त्यजत विप्रेन्द्रा शिवस्याऽव्यर्थमेव तत् ॥२८॥
शिवस्य कवचं दिव्यं सर्वावयवरक्षकम् ।
मत्स्यराजगलेऽस्त्येतत् कवचं याचत नृपम् ॥२९॥
श्रुत्वा रामो यतिर्भूत्वा ययाचे कवचं नृपम् ।
राजा ददौ तु कवचं ब्रह्माण्डविजये ततः ॥३०॥
रामो जघान शूलेन मूर्छां जगाम चार्जुनः ।
मनोरमा सती सत्यव्रतेन योगसिद्धिभिः ॥३१॥
स्वस्वामिहस्तदा प्राणान् मूर्ध्नि ररक्ष भामिनी ।
सा तदाऽऽकाशवत् साध्वी समुवाच नृपान् सती ॥३२॥
बृहद्बलं सोमदत्तं विदर्भं मिथिलेश्वरम् ।
निषधाधिपतिं चापि मगधाधिपतिं तथा ॥३३॥
प्रशृण्वन्तु प्राणतुल्याः प्राणस्य मेऽवनं त्वहम् ।
करोमि यातु भवन्तो रणं कुर्वन्तु चोल्वणम् ॥३४॥
क्षत्रियाणां रणो धर्मो रणे मृत्युर्न गर्हितः ।
रणे स्वाहा ब्राह्मणानां लोके वेदे विडम्बना ॥३५॥
क्षत्रियाणां बलं शस्त्रं व्यापारस्तु बलं विशाम् ।
भिक्षाबलं भिक्षुकाणां शूद्राणां सेवनं बलम् ॥३६॥
भक्तिर्दास्यं कृष्णनारायणे भक्तबलं हरिः ।
तपो बलं तापसानां दुष्टानां हिंसनं बलम् ॥३७॥
बलं वेषस्तु नारीणां यौवनं गृहयोषिताम् ।
बलं सैन्यं नृपाणां वै बालानां रोदनं बलम् ॥३८॥
सतां सत्यं बलं भक्तिः साधूनां तु बलं क्षमा ।
मिथ्या बलं चाऽसतां तु धैर्यं साहसिनां बलम् ॥३९॥
विद्या बलं पण्डितानां धनं तु धनिनां बलम् ।
बलं विवेकः श्रेष्ठानां प्रजानां बलमेकता ॥४०॥
गुणो बलं तु गुणिनां सतीनां पतिसेवनम् ।
पूजा देवबलं प्रोक्तं शिष्याणां गुरुसेवनम् ॥४१॥
बलं पत्नी गृहस्थानां भृत्यानां स्वामितोषणम् ।
त्यागिनां निस्पृहत्वं तु बलं ब्रह्मव्रतं महत् ॥४२॥
पुण्यं बलं सुकृतीनां जलजानां जलं बलम् ।
शान्तिर्बलं तु विप्राणां क्षत्रियाणां बलं बलम् ॥४३॥

ससैन्याः क्षत्रियाः सर्वे युद्धं कुर्वन्तु भूसुरैः ।
इत्युक्त्वा सा सती मनोरमाऽर्जुनं विमूर्छितम् ॥४४॥
परिचचार विविधैरुपचारैः सुशक्तिदैः ।
यद्यहं प्राणनाथस्य पतिव्रताऽस्मि सर्वथा ॥४५॥
प्राप्नोतु चेतनां स्वामी समुवाच पतिव्रता ।
तावत् स चेतनां प्राप्तः समुत्थितो रणाय च ॥४६॥
अथ रामस्त्रिशूलेन सोमदत्तं जघान ह ।
बृहद्बालं तु गदया विदर्भं तोमरेण च ॥४७॥
मैथिलं मुद्गरेणापि शक्त्या तु नैषधं तथा ।
मागधं तीक्ष्णनाराचैरस्त्रजालैश्च सैन्यकान् ॥४८॥
निहत्य निखिलान् भूपान् दुद्राव चाऽर्जुनं प्रति ।
तावत् सती समीपस्था मनोरमा व्यवस्थिता ॥४९॥
रामरामाऽधमविप्र भस्मीभूतो भविष्यसि ।
यदि त्वन्यायमालम्ब्य मन्नाथं मारयिष्यसि ॥५०॥
श्रुत्वा सतीं पुरो दृष्ट्वा भयाद् रामो न्यवर्तत ।
कान्यकुब्जाः शतशस्तु सौराष्ट्राः शतशस्तथा ॥५१॥
राष्ट्रीयाः शतशश्चापि महाराष्ट्राश्च वंगजाः ।
गौर्जराश्च कलिंगाश्च रामेण व्यसवः कृताः ॥५२॥
द्वादशाक्षौहिणीः रामो जघान त्रिदिवानिशम् ।
तावद्राजा कार्तवीर्यः श्रीलक्ष्मीकवचं करे ॥५३॥
बद्ध्वा शस्त्रास्त्रसम्पन्नो रथमारुह्य चाययौ ।
युयुधे विविधैरस्त्रैर्जघान ब्राह्मणान् बहून् ॥५४॥
पर्शुरामः सपरशुर्दधाव कालरूपधृक् ।
शिरो निकृन्तितुं तावद् विष्णुर्विप्रस्वरूपधृक् ॥५५॥
मा याहीति करं धृत्वा रुरोध प्राह तत्क्षणम् ।
कवचं श्रीमहालक्ष्म्या बाहौ तेन धृतं यतः ॥५६॥
न मरिष्यति भूपालो ययाचे तं स्थिरो भव ।
विष्णुर्विप्रस्वरूपस्तद् याचितुं नृपमाययौ ॥५७॥
विप्रो भूत्वा च कवचं ययाचे भगवान् स्वयम् ।
मनोरमा तदा त्रासमापेदे पतिपक्षिणी ॥५८॥
अर्जुनो दित्सति तावन्मनोरमा न्यवारयत् ।
राजन् लक्ष्मीकवचं ते बाहौ यावद्धि वर्तते ॥५९॥
तावल्लक्ष्मीस्वरूपाऽहं शक्नोमि त्वां प्ररक्षितुम् ।
मा देहीति मुहुः प्रोक्तस्तथापि प्रददौ नृपः ॥६०॥
क्षणं मनोरमालक्ष्मीः पतिं नत्वा रुरोद वै ।
अथाऽशक्ता कवचेन समं यातुं च तत्परा ॥६१॥
अभूद् विष्णुपरीक्षां च करोति स्म तदा सती ।
विष्णुः कवचमादाय रामं प्रति समाययौ ॥६२॥

ददौ समन्त्रं परशुरामाय तच्छृणु प्रिये ।
"ओं श्रीकमलवासिन्यै स्वाहा" मन्त्रं ददौ ततः ॥६३॥
प्रजापतिः ऋषिर्यस्य छन्दश्च बृहती तथा ।
देवी पद्मालया यस्य चतुर्वर्गे नियोजनम् ॥६४॥
"ओं श्रीकमलवासिन्यै स्वाहा मे पातु मस्तकम् ।
ओं श्री कपालं मे पातु लोचने श्रींश्रियै नमः ॥६५॥
ओं श्रींश्रियै स्वाहेति वै कर्णयुग्मं सदाऽवतु ।
ओंश्रींक्लीं महालक्ष्म्यै स्वाहा मे पातु नासिकाम् ॥६६॥
ओं श्रीं पद्मालयायै च स्वाहा दन्तान् सदाऽवतु ।
ओंश्रीं कृष्णप्रियायै च दन्तरन्ध्रान् सदाऽवतु ॥६७॥
ओं श्रींनारायणेशायै मम कण्ठं सदाऽवतु ।
ओंश्रीं केशवकान्तायै मम स्कन्धं सदाऽवतु ॥६८॥
ओंश्रीं पद्मनिवासिन्यै स्वाहा नाभिं सदाऽवतु ।
ओं ह्रीं श्रीं संसारमात्रे मम वक्षः सदाऽवतु ॥६९॥
ओंश्रींमों कृष्णकान्तायै स्वाहा पृष्ठं सदाऽवतु ।
ओंह्रींश्रींश्रियै स्वाहा च मम हस्तौ सदाऽवतु ॥७०॥
ओंश्रीनिवासकान्तायै मम पादौ सदाऽवतु ।
ओंश्रींह्रींक्लीं श्रियै स्वाहा सर्वांगं मे सदाऽवतु ॥७१॥
प्राच्यां पातु महालक्ष्मीराग्नेय्यां कमलालया ।
पद्मा मां दक्षिणे पातु नैर्ऋत्यां श्रीहरिप्रिया ॥७२॥
पद्मालया पश्चिमे मां वायव्यां पातु मा स्वयम् ।
उत्तरे कमला पातु चैशान्यां सिन्धुकन्यका ॥७३॥
नारायणी च पातूर्ध्वमधो विष्णुप्रियाऽवतु ।
सन्ततं सर्वतः पातु विष्णुप्राणाधिका मम" ॥७४॥
इतिसर्वैश्वर्यप्रदं वर्म बाहौ सुधारय ।
देवेन्द्रैश्चासुरेन्द्रैश्चाऽवध्यो भवसि निश्चितम् ॥७५॥
इत्युक्त्वा कवचं दत्वा ययौ वैकुण्ठमच्युतः ।
तावन्मनोरमा लक्ष्मीकलाऽर्जुनं विहाय वै ॥७६॥
ययौ तु विष्णुना सार्धं वैकुण्ठं विष्णुना हृता ।
अर्जुनः प्राह रे पत्नि त्यक्त्वा मां याहि मा प्रिये ॥७७॥
मनोरमा तु तं प्राह सम्बन्धः सान्ततां गतः ।
परशुरामशस्त्रेण हतो मामनुयास्यसि ॥७८॥
शीघ्रं ब्राह्मणहस्तेन हतः प्राप्स्यसि मोक्षणम् ।
वैकुण्ठं त्वत्कृते राजन् निश्चितं यत्र मे स्थितिः ॥७९॥
इत्युक्त्वा सा ययौ देवी राजा युयोध दारुणम् ।
द्विलक्षसैन्यं युयुधे ब्राह्मणैः सह पद्मजे ॥८०॥
राजा चिक्षेप शस्त्राणि रामशिष्याः पलायिताः ।
चिक्षेप रामस्त्वाग्नेयं बभूवाऽग्निमयं रणे ॥८१॥

निर्वापयामास राजा वारुणेन महौजसा ।
चिक्षेप रामो गान्धर्वं शैलसर्पादिकोटिकम् ॥८२॥
वायवेनार्जुनस्त द्वै वारयामास दारुणम् ।
चिक्षेप रामो नागास्त्रं राजा चिक्षेप गारुडम् ॥८३॥
रामश्चिक्षेप माहेशं राजा चिक्षेप वैष्णवम् ।
ब्रह्मास्त्रं चिक्षिपे रामो राजा ब्रह्मास्त्रमाक्षिपत् ॥८४॥
तावत् ध्यातोऽर्जुनगुरुर्दत्तात्रेयः समागतः ।
ददौ शूलं हि रामस्य नाशार्थे कृष्णवर्म च ॥८५॥
जग्राह राजा शूलं तच्चिक्षेप रामकन्धरे ।
मूर्छामवाप रामः सः पपात श्रीहरिं स्मरन् ॥८६॥
ब्राह्मणं जीवयामास शंभुर्नारायणाज्ञया ।
चेतनां प्राप्य च रामोऽग्रहीत् पाशुपतं यदा ॥८७॥
दत्तात्रेयेण दत्तेन सिद्धाऽस्त्रेणाऽर्जुनस्तु तम् ।
जडीच्चकार तत्रैव स्तम्भितो राम एव वै ॥८८॥
श्रीकृष्णरक्षितं भूपं ददर्श कृष्णवर्म च ।
ददर्शाऽपि भ्रमत्सुदर्शनं रक्षाकरं रिपोः ॥८९॥
एतस्मिन्नन्तरे तत्र वाग्बभूवाऽशरीरिणी ।
कृष्णस्य कवचं राज्ञो बाहावस्ति तदुत्तमम् ॥९०॥
रक्षति तन्नृपं शंभुर्याचतु भिक्षया तु तत् ।
तदा हन्तुं नृपं शक्तो भार्गवोऽयं भविष्यति ॥९१॥
अथ शंभुः सिद्धमन्त्रैर्दत्वा चेतनमेव तु ।
अपोह्य स्तंभनं रामो जग्राह परशुं स्वकम् ॥९२॥
पाशुपतं करे धृत्वा परशुं च तथा करे ।
सस्मार श्रीकृष्णनारायणं तावत् स आययौ ॥९३॥
शंभुर्विप्रः स्वयं भूत्वा ययाचेऽर्जुनमेव तत् ।
कवचं नृपसंदत्तं रामाय शंभुरार्पयत् ॥९४॥
सुदर्शनं च कवचं कृष्णनारायणस्त्रयः ।
रामपार्श्वे समागत्य प्राहुर्जेष्यसि साम्प्रतम् ॥९५॥
शंभोः पाशुपतं श्रेष्ठं हरेरेव सुदर्शनम् ।
एते प्रधाने सर्वेषामस्त्राणां तु जगत्त्रये ॥९६॥
कवचं रक्षकं श्रेष्ठं धारयित्वाऽऽह तं द्विजः ।
राजन् कुरु रणं शीघ्रं कालभेदे जयाऽजयौ ॥९७॥
त्वयाऽधीतं बहुदत्तं शासिता च वसुन्धरा ।
संग्रामेऽहं त्वया जडीकृतोऽत्रैव सुमूर्छितः ॥९८॥
जिताः सर्वेऽपि भूपाला रावणो लीलया जितः ।
जितोऽहं दत्तशूलेन शंभुना जीवितोऽस्म्यहम् ॥९९॥
शीघ्रं कुरु क्षणस्तेऽयं श्रुत्वैवं प्रत्युवाच सः ।
अहो राम किमधीतं किं दत्तं का च शासिता ॥१००॥
गताः कतिविधा भूपा मच्छ्रेष्ठाः कालभक्षिताः ।
बुद्धिस्तेजो विक्रमश्च जयश्च विजयस्तथा ॥१०१॥
श्रीरैश्वर्यं मतिर्दानं प्रतिष्ठा परमं तपः ।
विद्या गर्वस्तथा मान्यं सार्वभौमत्वमित्यपि ॥१०२॥
सर्वे मनोरमासंगे गतमेव मम क्षणात् ।
सा च लक्ष्मी कला साध्वी पातिव्रत्यपरायणा ॥१०३॥
मृता यावद् रक्षिका मे तया सार्धं गतं मम ।
त्वं किं विप्र प्रथमं वै युद्धं पश्यसि केवलम् ॥१०४॥
मम युद्धानि पूर्वाणि नेक्षितानीति शोचना ।
प्रथमाऽथ द्वितीयाऽपि मरणं ब्राह्मणेन मे ॥१०५॥
वृद्धदम्पतीनाशेन शोचना चातिनिष्ठुरा ।
काले सिंहः शृगालं च सृगालः सिंहमेव वा ॥१०६॥
काले व्याघ्रं हन्ति मृगो गजेन्द्रं हरिणस्तथा ।
महिषं मक्षिका काले गरुडं च तथोरगः ॥१०७॥
नृपश्च किंकरं स्तौति महेन्द्रो मानवं तथा ।
सर्वं कालकृतं विप्र कालो हि दुरतिक्रमः ॥१०८॥
ब्राह्मणस्य च हननं सर्वं नाशकरं मम ।
पतिव्रताया मरणं ब्राह्मणीनाशकृत्फलम् ॥१०९॥
पतिव्रताया मरणे मृतोऽहं सर्वथा द्विज ।
लक्ष्मीरूपा मृता प्राग्वै संकेतोऽच्युतकृद्धि सः ॥११०॥
याचे त्वां च तथा देवान् गुरून् सर्वांश्च भावतः ।
क्षमध्वं चापराधान्ये मा भून्मे नरकं पुरः ॥१११॥
इत्युक्त्वा च धनुष्टंकारयित्वा सायकान् मुहुः ।
कालकाल इव भूत्वा ववर्ष लक्षशो बहून् ॥११२॥
कृष्णकृष्णवदन् राजा मनोरमेति संवदन् ।
अर्धचन्द्रांस्तथा शक्तीर्भल्लान् खड्गान् सहस्रशः ॥११३॥
चिक्षेप धनुषा तत्र ब्राह्मणेष्वायुषःक्षये ।
रामो रूपद्वयं कृत्वा युयुधे तेन भूभृता ॥११४॥
कृत्रिमेण तु रूपेण धृत्वा कुठारकं करे ।
दधाव तं पुरो गत्वा चिच्छेद भुजमण्डलम् ॥११५॥
द्वितीयेन स्वरूपेण जग्राहाऽस्त्रं महोल्बणम् ।
पाशुपतं समन्त्रं च चिक्षेप लीलया नृपे ॥११६॥
हाहाकारो महानासीत् कार्तवीर्यार्जुनो हतः ।
अन्ये ये जीवसंग्राहास्तेऽप विप्रैर्हता रणे ॥११७॥
विदुद्रुवुस्तथा चान्ये स्वस्वराज्यानि चक्रिरे ।
माहिष्मतीं तदा रामो ददौ विप्राय दक्षिणाम् ॥११८॥
अन्येषां चापि राज्यानि ददौ विप्राय दक्षिणाः ।
देवाश्च मुनयो देव्यः सिद्धगन्धर्वकिन्नराः ॥११९॥

सर्वे चक्रुः पुष्पवृष्टिं राममूर्ध्नि च पद्मजे ।
स्वर्गे दुन्दुभयो नेदुर्हर्षशब्दो बभूव ह ॥१२०॥
एवं त्रिःसप्तकृत्वश्च चक्रे पृथ्वीं निःक्षत्रियाम् ।
यशसा चापि परशुरामस्याऽऽपूरितं जगत् ॥१२१॥
ब्राह्मणेभ्यो ददौ रामो राज्यानि विरराम च ।
हतास्तु क्षत्रियाः सर्वे गर्भस्था बालकास्तथा ॥१२२॥
युवानो जरठा वृद्धाः स्तनंधया अपि प्रिये ।
काश्चन क्षत्रियनार्यः पातिव्रत्यपरायणाः ॥१२३॥
देव्यो दिव्यगतिकाश्च गुप्ता ययुर्हिमालयम् ।
कन्दरासु वसन्त्यश्च पुपुषुर्बालकान् स्वकान् ॥१२४॥
तद्वंशाः क्षत्रिया जाताः पुना राज्यानि चक्रिरे ।
पर्शुरामः प्रतिज्ञां स्वां पूरयित्वा कुरुस्थले ॥१२५॥
स्यमन्तपञ्चकान् कुण्डान् क्षत्रियरुधिराऽञ्चितान् ।
कृत्वा रक्तैः पितुर्मातुर्ब्राह्मणानां जलांजलीन् ॥१२६॥
श्राद्धं ददौ तदा तृप्तिं चकार पितृदेवताः ।
ततो जलं तथाऽन्नं च बुभुजे शान्तितः स्वयम् ॥१२७॥
क्षत्रियाणां विनाशे तु निर्बला ये ह्यसुप्रियाः ।
मृषा वदन्तो जीवानां चक्रुर्वै रक्षणं तु ते ॥१२८॥
अन्या अन्या जातयश्च जाता वर्णा विभिन्नकाः ।
अक्षात्रास्ते क्षात्रकर्महीना दस्यव एव वै ॥१२९॥
व्यापारकारकाश्चान्ये दास्यकृष्यादिकारकाः ।
वर्तन्ते स्म भुवि लक्ष्मि ! गुप्तक्षत्रियजातयः ॥१३०॥
अथ प्रतिज्ञां सम्पूर्णां कृत्वा रामो ययौ गुरुम् ।
शिवं पूजयितुं दिव्ये कैलासे तत्र गोपुरे ॥१३१॥
गणेशेन निरुद्धः सः क्रुधा गणपतिं तदा ।
रामो जघान दन्ते तं पर्शुना तु गणाधिपम् ॥१३२॥
दन्तो भग्नस्ततश्चैकदन्तो गणेश उच्यते ।
आमूलाद् भग्नदन्तेन कृत्वा शुण्डं सुदीर्घकम् ॥१३३॥
गणेशेन धृतः शुण्डे शुण्डश्च वर्धितो बहुः ।
त्रैलोक्ये भ्रामयित्वा तं रामं चिक्षेप वारिधौ ॥१३४॥
जडीभूतं पुनर्धृत्वा गोलोके विनिपातितः ।
श्रीकृष्णचरणांभोजे पातकानां विशुद्धये ॥१३५॥
ततः शुद्धं कृतं राममुत्थाप्य श्रीगणेश्वरः ।
चिक्षेप परशुरामं शंकरस्य हि सन्निधौ ॥१३६॥
ददर्श शंकरं प्राप्याऽऽशीर्वादं चाप्यनुग्रहम् ।
शंकरस्य शिवायाश्च प्रसाद्य श्रीगणेश्वरम् ॥१३७॥
चक्रे स्तुतिं शिवं शिवां तं तु शिवाऽऽह मंगलम् ।
अमरो भव हे पुत्र ! वत्स सुस्थिरतां व्रज ॥१३८॥
सर्वप्रसादात् सर्वत्र जयोऽस्तु तव सन्ततम् ।
सर्वान्तरात्मा भगवाँस्तुष्टः स्यात् सन्ततं हरिः ॥१३९॥
भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ ।
शंभुः प्राह सदा शिष्य चिरंजीवो भव भुवः ॥१४०॥
ततः परशुरामोऽसौ जगाम तपसे भुवम् ।
महेन्द्रपर्वते स्थित्वा तपः करोति शाश्वतम् ॥१४१॥
इति ते कथितं लक्ष्मि ! कार्तवीर्यस्य नाशनम् ।
मनोरमायाः कथितं पतिव्रतबलं तथा ॥१४२॥
पठनाच्छ्रवणाच्चास्य पतिसेवाबलं लभेत् ।
भुक्तिं मुक्तिं कृष्णसेवां लभेत् कृष्णप्रसादतः ॥१४३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पर्शुरामेण सह युद्धे मनोरमया दिव्यया पतिव्रतया सहस्रार्जुनो रक्षितः, लक्ष्मीकवचवियोगे मनोरमा-वियोगस्ततोऽर्जुनस्य मरणं, गणेशस्यैकदन्तत्वं चेत्यादिनिरूपणनामाऽष्टपंचाशदधिक-चतुश्शततमोऽध्यायः ॥ ४५८ ॥

श्रीनारायण उवाच—

इन्द्रलोकात्परे त्वर्चिष्मतीनाम्नी शुभा पुरी ।
वीतिहोत्रस्य नगरी स्वर्गोत्तमेऽस्ति पद्मजे ॥ १ ॥
जातवेदसि या भक्तास्ता वसन्त्यत्र सुव्रताः ।
अग्निप्रवेशं याः कुर्युर्दृढसत्त्वा जितेन्द्रियाः ॥ २ ॥
वह्निस्नाना नरा नार्यः सर्वास्ता वह्निभासुराः ।
अग्निहोत्ररता विप्रास्तथाऽग्निब्रह्मचारिणः ॥ ३ ॥
पञ्चाग्निव्रतिनो भक्ता ब्राह्मणाश्चाग्निपूजकाः ।
समिदिध्माग्निष्टिकानां दातारो वह्निरूपिणः ॥ ४ ॥
यज्ञस्य कारिणो वह्नेरर्चिष्मत्यां वसन्ति वै ।
धूपप्रदीपनैवेद्यपयोदधिघृतैश्चवम् ॥ ५ ॥
वह्निभुक्तं निषेवन्ते सर्वविधा दिवौकसः ।
विश्वानरस्य विप्रस्य नर्मदातटवासिनः ॥ ६ ॥
नर्मपुराधिदेवस्य ब्रह्मयज्ञरतस्य च ।
ब्रह्मतेजसः शाण्डिल्यगोत्रस्याऽभूत् सुचिन्तनम् ॥ ७ ॥
चतुर्णामप्याश्रयाणां कोऽतीव श्रेयसे सताम् ।
इति विचार्य गार्हस्थ्यं विश्वानरः शशंस ह ॥ ८ ॥
सर्वाधारो गृहस्थो वै देहिभिरुपजीव्यते ।
परदारपरित्यागात् स्वदारपरितुष्टितः ॥ ९ ॥
ऋतुकालाभिगामित्वाद् ब्रह्मचारी गृही सदा ।
एवं निश्चित्य स विश्वानरो विप्रः पतिव्रताम् ॥१०॥

उदुवाहविधानेन स्वोचितां कुलकन्यकाम् ।
अग्निशुश्रूषणरतः पञ्चयज्ञपरायणः ॥११॥
देवपित्रतिथ्यनाथगवादिपरिपूजकः ।
एवं वै वर्तमानस्य कालो बहुतिथो गतः ॥१२॥
भार्या शुचिष्मती नाम सुव्रता स्वामिसेविका ।
अपश्यन्त्यंकुरमपि सन्ततेः स्वर्गसाधनम् ॥१३॥
पतिं कृष्णं पतिं विष्णुं मत्वोवाच पतिव्रता ।
भगवन् दुर्लभं नास्ति किञ्चित्तव दयालवात् ॥१४॥
महेशसदृशं पुत्रं देहि वंशविवर्धनम् ।
श्रुत्वा प्रोवाच तां पत्नीमेकपत्नीव्रते स्थितः ॥१५॥
तथास्त्विति ततो विप्रो जगाम तपसे द्रुतम् ।
प्राप्य वाराणसीं स्नात्वा गंगायां वीक्ष्य शंकरम् ॥१६॥
यत्र निश्चलतामेति तपस्तनयकाम्यया ।
तत्र वीरेश्वरभूमौ गत्वा जग्राह सद्व्रतम् ॥१७॥
एकाहारोऽभवन्मासं मासं नक्ताशनोऽभवत् ।
अयाचिताऽशनो मासं मासं त्यक्ताशनस्तथा ॥१८॥
पयोव्रतोऽभवन्मासं मासं शाकफलाशनः ।
मासं मुष्टितिलाहारो मासं पानीयभोजनः ॥१९॥
पञ्चगव्याशनो मासं मासं चान्द्रायणव्रती ।
मासं कुशाग्रजलभुक् मासं श्वसनभक्षणः ॥२०॥
अथ त्रयोदशे मासे स्नात्वा गंगाजले द्विजः ।
प्रत्यूष एव वीरेशं यावदायाति भूसुरः ॥२१॥
तावल्लिंगान्तरे बालं ददर्शाऽष्टसमं शुभम् ।
पिंगजटं दीर्घनेत्रं श्वेतं विभूतिभूषितम् ॥२२॥
तमालोक्य स्तुतिं चक्रे विश्वानरोऽतिमोदवान् ।
एकमेवाऽद्वितीयं यत् परंब्रह्म परात्परम् ॥२३॥
कृष्णनारायणसंज्ञं शिवदं शिव ते नमः ।
कर्तृ पोष्टृ च संहर्तृ तेजो विविधतां गतम् ॥२४॥
यन्मूर्तेरेकभागस्थमैश्वर्यं ज्वलनादिकम् ।
सौरभ्यादि यतो भूमौ तस्मै बालाय ते नमः ॥२५॥
यद् गृहीतृ गन्तृ द्रष्टृ धातृ नियन्तृ चान्तरम् ।
सर्वकामप्रदातृ तत् तस्मै बालाय ते नमः ॥२६॥
स्तुत्वेति पादयोस्तस्य विश्वानरः पपात ह ।
बालो वरं वृणीहीति प्रोवाच हसिताननः ॥२७॥
विश्वानरः प्रत्युवाच भवान् सर्वप्रदो यतः ।
पुत्रं देहि त्वादृशं ते प्रणतोऽस्मि पुनः पुनः ॥२८॥
बालः प्राह तथास्त्वित्यचिरेण ते मनोरथः ।
शुचिष्मत्यामहं पुत्रो भविष्यामि फलिष्यति ॥२९॥
ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ।
तव पुत्रो भविष्यामीत्युक्त्वा चान्तरधीयत ॥३०॥
विश्वानरस्ततस्तूर्णमाजगाम निजं गृहम् ।
शुचिष्मत्यै जगादैतत् स्वल्पकालेन भामिनी ॥३१॥
गर्भं दधार सुषुवे कालेन पुत्रमेव सा ।
गर्भाधानादयः सर्वे संस्कारा गुरुणा कृताः ॥३२॥
पुत्रजन्मनि देवाद्या ववृषुः कुसुमादिकान् ।
देवदुन्दुभयो नेदुः प्रोत्सवो ह्यभवन्महान् ॥३३॥
अप्सरसां सुनृत्यानि त्वभवन् विप्रमन्दिरे ।
विद्याधर्यश्च किन्नर्यस्तथाऽमर्यः सहस्रशः ॥३४॥
गन्धर्वोरगयक्षाणां सुवासिन्यश्च कन्यकाः ।
मणिरत्नोपदा नीत्वा सश्रृंगारसुशोभनाः ॥३५॥
सवाद्या मंगलवस्तुसहिताश्चन्द्रसत्प्रभाः ।
गायन्तो ललितं गीतं जग्मुर्विश्वानरगृहम् ॥३६॥
मरीच्याद्याः ऋषयश्च शतशोऽपि तु तद्गृहम् ।
लोकपाला मुनयश्च समाजग्मुः सहस्रशः ॥३७॥
विष्णवाद्याश्च सुराः सर्वे नागाश्च मानवादयः ।
तीर्थक्षेत्राणि सर्वाणि चाजग्मुः पितरस्तथा ॥३८॥
स्थावरा जंगमं रूपं धृत्वाऽऽयाताः सहस्रशः ।
जातकर्म स्वयं चक्रे तस्य देवः पितामहः ॥३९॥
श्रुतिं विचार्य तद्रूपां नाम्ना गृहपतिस्त्वयम् ।
इति नाम ददौ तस्मै देयमेकादशेऽहनि ॥४०॥
गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ।
अग्ने गृहपते आयच्छस्वाऽन्नं मे यशो बलम् ॥४१॥
अजो नाम इतिकृत्वा स्तुत्वा सत्यं ययौ ततः ।
देवाद्यास्तु ययुः सर्वे शंसन्तः पुत्रमुज्ज्वलम् ॥४२॥
अतः पुत्रं समीहन्ते गृहस्थाश्रमवासिनः ।
पुत्रेण लोकान् जयति भक्तेनापि विशेषतः ॥४३॥
अपुत्रस्य गृहं शून्यमपुत्रस्याऽर्जनं वृथा ।
अपुत्रस्याऽन्वयच्छिन्नो नाऽपवित्रं ह्यपुत्रतः ॥४४॥
न पुत्रात्परमो लाभो न पुत्रात्परमं सुखम् ।
न पुत्रात्परमं मित्रं परत्रेह च कुत्रचित् ॥४५॥
औरसः क्षेत्रजः क्रीतो दत्तः प्राप्तः सुतासुतः ।
आपत्सु रक्षितः शिष्यः पुत्रास्ते त्वष्टधा मताः ॥४६॥
विश्वानरः सुतं त्वध्यापयामास यथोचितम् ।
नवमे वत्सरे वैश्वानरं जगाम नारदः ॥४७॥
पप्रच्छ कुशलं सर्वं पुत्रस्य मुनिराड् यथा ।
विश्वानर महाभाग शुचिष्मति शुभव्रते ॥४८॥

कुरुते युवयोर्वाक्यं कच्चिद् गृहपतिः शिशुः ।
नान्यत्तीर्थं न वा देवो न गुरुर्न च सत्क्रिया ॥४९॥
विहाय पित्रोर्वचनं नान्यो धर्मः सुतस्य वै ।
गर्भधारणपोषाभ्यां माता पितुर्गरीयसी ॥५०॥
पिता वन्द्यो यतिर्वन्द्यः सन्यासी वन्द्य इत्यपि ।
तैः सर्वैस्तु गुरुर्वन्द्यस्तेषां वन्द्याः प्रसूः सदा ॥५१॥
इदमेव तपोऽत्युग्रमिदमेव परं व्रतम् ।
अयमेव परो धर्मो यत् पित्रोः परितोषणम् ॥५२॥
पितृव्रतमिदं प्रोक्तं कृष्णमिव प्रसेवयेत् ।
मातृव्रतमिदं प्रोक्तं लक्ष्मीमिव प्रसेवयेत् ॥५३॥
वैश्वानर समभ्येहि ममोत्संगे निषीद भो ।
लक्षणानि परीक्षेऽहं पाणिं दर्शय दक्षिणम् ॥५४॥
इत्युक्तः स गृहपतिर्नारदांऽके ह्युपाविशत् ।
मुनिर्दृष्ट्वा बालकस्य तालुजिह्वाद्विजानथ ॥५५॥
आनीय कुंकुमाऽऽरक्तं सूत्रं च त्रिगुणीकृतम् ।
ममौ समस्तकाद् बालमापादतलमुच्छ्रयम् ॥५६॥
तिर्यगूर्ध्वं समो माने योऽष्टोत्तरशतांगुलः ।
स भवेत् पृथिवीपालो यथाऽयं बालकोऽपि च ॥५७॥
पञ्चसूक्ष्मः पञ्चदीर्घः सप्तरक्तः षडुन्नतः ।
त्रिपृथु लघुगम्भीरो द्वात्रिंशल्लक्षणोऽस्त्ययम् ॥५८॥
त्वक्केशांगुलिदशनपर्वाण्यणूनि पञ्च च ।
सन्त्यस्य खलु सूक्ष्माणि दिक्पालपदभाग् भवेत् ॥५९॥
भुजौ नेत्रे हनुर्जानू नासा दीर्घाणि चास्य वै ।
तेनायं तु भवेद् दीर्घायुष्को ब्रह्माण्डसञ्चरः ॥६०॥
पाण्यो स्तले च नेत्रान्ते तालुजिव्हाऽधरौष्ठकम् ।
सप्ताऽरुणं च सनखमस्य राज्यसुखप्रदम् ॥६१॥
वक्षःकुक्ष्यलकं स्कन्धं करं वक्त्रं षडुन्नतम् ।
दृश्यतेऽस्य भवेच्चायं महदैश्वर्यभाक् खलु ॥६२॥
ललाटकटिवक्षोभिः पृथुरयं भवेन्नृपः ।
ग्रीवाजंघामेहनैश्च ह्रस्वोऽयं बहुभोगवान् ॥६३॥
स्वरेण हृदा नाभ्या च गम्भीरः सुखभाक् सदा ।
कमठीपृष्ठकठिनौ पत्रवत्कोमलौ करौ ॥६४॥
राज्यहेतू शिशोरस्य पादौ पद्मसुकोमलौ ।
अच्छिन्ना तर्जनीं व्याप्य तथा रेखाऽस्य वर्तते ॥६५॥
कनिष्ठापृष्ठनिर्याता दीर्घायुष्यं निवेदयेत् ।
पादौ सुमांसलौ रक्तौ समौ सूक्ष्मौ सुशोभनौ ॥६६॥
समगुल्फौ स्वेदहीनौ स्निग्धावैश्वर्यसूचकौ ।
स्वल्पाभिः कररेखाभिरारक्ताभिः सदा सुखी ॥६७॥

लिंगेन कृशहस्तेन राजराजो भविष्यति ।
उत्कटासनगुल्फस्फिग्नाभिरस्यापि वर्तुला ॥६८॥
दक्षिणावर्तमरुणं महदैश्वर्यसूचिका ।
धारैका मूत्रयत्यस्मिन् दक्षिणावर्तिनीति सा ॥६९॥
गन्धश्च मीनमधुनोर्गुप्तवीर्येऽस्य वर्तते ।
विस्तीर्णौ मांसलौ स्निग्धौ स्फिचावस्य सुखोचितौ ॥७०॥
वामावर्तौ सुप्रलम्बौ दोषौ दिग्रक्षणोचितौ ।
श्रीवत्सवज्रचक्राऽब्जमत्स्यकोदण्डदण्डभृत् ॥७१॥
तथाऽस्य करगा रेखा यथा स्यात् त्रिदिवस्पतिः ।
द्वात्रिंशद्दशनश्चायं करकम्बुशिरोधरः ॥७२॥
क्रौंचदुन्दुभिहंसाऽभ्रस्वरः सर्वेश्वराऽधिकः ।
मधुपिंगलनेत्रोऽसौ नैनं श्रीस्त्यजति क्वचित् ॥७३॥
पञ्चरेखललाटस्तु तथा सिंहोदरः शुभः ।
ऊर्ध्वरेखांकितपदो निःश्वसन्पद्मगन्धवान् ॥७४॥
अच्छिद्रपाणिः सुनखो महालक्षणवानयम् ।
तथापि द्वादशे वर्षे प्रत्यूहो विद्युदग्नितः ॥७५॥
अस्य विशंके भगवन् रक्षणीयः प्रयत्नतः ।
इत्युक्त्वाऽर्चां गृहीत्वैव नारदो निर्जगाम ह ॥७६॥
दम्पती क्षणमात्रं तु शुशुचतुर्मुमुदतुः ।
अथ बालश्चिरायुष्को भवितु पितरौ तदा ॥७७॥
प्राह प्रतिज्ञां शृणुतं यदि वां तनयो ह्यहम् ।
करिष्येऽहं तपस्तादृक् विद्युन्मत्तस्त्रसिष्यति ॥७८॥
मृत्युञ्जयं कालकालं समाराधयितुं सुतः ।
पित्रोरनुज्ञां सम्प्राप्य ययौ स काशिकां पुरीम् ॥७९॥
सस्नौ गंगाजले शंभुं ददर्श चान्नपूर्णिकाम् ।
मत्स्योदर्यां क्षितौ गत्वा तस्थौ क्षणं ततः परम् ॥८०॥
निर्विघ्ने तु स्थले स्थाप्य लिंगं चक्रे तपः सुतः ।
संस्नाप्य प्रत्यहं शंभुं दत्वा नीलोत्पलानि वै ॥८१॥
जपति स्म नमः कृष्णनारायणशिवाय ते ।
तपश्चचार षण्मासं कन्दमूलफलाशनः ॥८२॥
शीर्णपर्णाशनस्तद्वत् षण्मासाँस्तप आचरत् ।
षण्मासं वायुभक्षोऽभूत् षण्मासं जलबिन्दुभुक् ॥८३॥
एवं वर्षद्वये याते जन्मतो द्वादशे गते ।
विघ्नं सत्यं करिष्यन् वै चाभ्यगात् कुलिशायुधः ॥८४॥
वरं ब्रूहीति तं प्राह सुतः श्रुत्वाऽऽह वासवम् ।
नाहं वृणे वरं त्वत्तः शंकरो वरदोऽस्ति मे ॥८५॥
गच्छाऽऽहल्यापतेऽसाधो श्रुत्वा क्रुद्धः स्ववज्रकम् ।
चिक्षेप यावच्छंभुस्तज्जग्राह लीलया करे ॥८६॥

प्रत्यक्षः शंकरो जातो महेन्द्रश्च ययौ दिवम् ।
शंभुस्तं तु ददौ चिरंजीवेति वरमुत्तमम् ॥८७॥
सर्वेषामेव देवानां मुखं भवाऽग्निरूपकः ।
जाठरो भव भूतानां दिगीशो राज्यमाप्नुहि ॥८८॥
मल्लिंगं त्वत्स्थापितं तद् भवत्वग्नीश्वराभिधम् ।
इत्युक्त्वा प्रययौ शंभुर्दत्वा मन्त्रं च वैष्णवम् ॥८९॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
वैश्वानरो ययौ स्वस्य गृहं माता पतिव्रता ॥९०॥
अर्चिष्मती सुतं दृष्ट्वा मुमुदे जनकोऽपि च ।
उत्सवं तु मुदा चक्रे समाहूय सुरादिकान् ॥९१॥
इन्द्रं तत्र समायातं दृष्ट्वा चुक्रोध वह्निराट् ।
पुनर्वज्रं प्रचिक्षेप वैश्वानरोपरीन्द्रकः ॥९२॥
मूर्छां जगाम बालस्तन्माता स्वांके निधाय तम् ।
पातिव्रत्यं भवेन्मे चेदिन्द्रः पततु भूतले ॥९३॥
पतिव्रता दृढा स्यां चेदिन्द्रवज्रं निरर्थकम् ।
सर्वथा सर्वथा चास्तु पुत्रो मे चेतनो भवेत् ॥९४॥
एवमुक्ते तया वज्रं कृष्णकर्दमतां गतम् ।
इन्द्रः पतितो धरणौ बुबुधे त्वंकजः सुतः ॥९५॥
हाहाकारो महान् जातः पातिव्रत्यबलेन वै ।
महेन्द्रप्रार्थिता देवी क्षमार्थे करुणापरा ॥९६॥
उवाच तं महेन्द्रं सा समुत्तिष्ठ स्थिरो भव ।
गृहाण वज्रं मा वह्नौ कदाचित् त्वं नियोजय ॥९७॥
मातृपितृगुरुकृष्णद्रोहिषु सतीद्रोहिषु ।
वज्रं ते प्रेरितं विद्युद्रूपं भवतु मद्वरात् ॥९८॥
कृष्णभक्तेषु पित्रोश्च गुरोर्भक्तेषु तापसे ।
सतीभक्तेषु ते वज्रं कर्दमत्वमवाप्नुहि ॥९९॥
इत्युक्तः स सतीं नत्वा नत्वा वैश्वानरं तथा ।
विश्वानरं पुनर्नत्वा ययौ स्वर्गं सुरा ययुः ॥१००॥
अर्चिष्मत्याः प्रभावेण पातिव्रत्यवृषस्य च ।
आसन्नमरणश्चापि रक्षितः शंभ्वनुग्रहात् ॥१०१॥
यावद्ब्रह्मा भवेत्तावद् वैश्वानरो भविष्यति ।
इति ते कथितं लक्ष्मि ! वृत्तं भुक्तिसुमुक्तिदम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विश्वानरविप्रस्य पुत्रस्य गृहपत्याख्यस्य तपसा चिरजीवित्वं, मातुः पातिव्रत्यबलेनेन्द्रकृतवज्रद्वारकमृत्युविघ्नविनाश-श्चेत्यादिनिरूपणनामैकोनषष्ट्यधिकचतुश्शत-तमोऽध्यायः ॥४५९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारं ज्ञानोदस्य वदामि ते ।
अनादिसिद्धे संसारे पुरा देवयुगे सति ॥ १ ॥
ईशानाख्यो दिशापालश्चरन् भूमिं समाययौ ।
तदा संकल्पमात्रेण सत्यधर्माः कृते युगे ॥ २ ॥
न वर्षन्ति यदाभ्राणि न प्रावर्तन्त निम्नगाः ।
यदा जलाभिलाषा न स्नानपानादिकर्मसु ॥ ३ ॥
पृथिव्यां मुनिसञ्चारे वर्तमाने क्वचित् क्वचित् ।
आनन्दकाननं क्षेत्रमूषरं प्रविवेश सः ॥ ४ ॥
आलुलोके ब्रह्मतेजोमयं लिंगं यदक्षरात् ।
किरणाख्यं समायातं यदा विष्णोश्च वेधसः ॥ ५ ॥
अहमहमिको भावः श्रेष्ठत्वेत्वमभवत्तदा ।
ईशानेन तदा स्वल्पमूषरे त्ववलोकितम् ॥ ६ ॥
स्वर्णसमं सुरूपं प्रोज्ज्वलं दिव्यं सुमोहकम् ।
ईशानस्याऽभवदिच्छा स्नापयामि जलैस्तु तत् ॥ ७ ॥
चखान च त्रिशूलेन दक्षिणाशोपकण्ठतः ।
कुण्डं तत्र जलं दिव्यं तदा नारायणांगजम् ॥ ८ ॥
जलावरणसम्बद्धं प्राविरासाऽतिपावनम् ।
तैर्जलैः स्नापयाञ्चक्रे लिंगं सुवर्णसदृशम् ॥ ९ ॥
पीयूषवत् स्वादुतरैरस्पृष्टैरन्यदेहिभिः ।
अदृष्टपूर्वलोकानां मनोनयनहारिभिः ॥१०॥
सहस्रधारैः कलशैः स ईशानो दिगीश्वरः ।
सहस्रकृत्वः स्नपयामास तुष्टस्ततो हरः ॥११॥
प्रोचे वृणु वरं मत्तो ददामि तेऽतिदुर्लभम् ।
ईशानः प्राह विश्वेशं त्वन्नाम्ना तीर्थमस्त्विति ॥१२॥
विश्वेश्वरस्तदा प्राह तथास्त्विति सुमूर्तिमान् ।
भूत्वा लिंगस्वरूपः स ववर्ति महेश्वरः ॥१३॥
लीनमर्थं गमयति लिंगं ज्ञानप्रदं तु तत् ।
रश्मिं विना तदाधारं संभवेन्न कदाचन ॥१४॥
आधारस्तु परब्रह्म भगवान् पुरुषोत्तमः ।
तस्य ज्ञानप्रदं चिह्नं लिंगं तत् किरणं मतम् ॥१५॥
तस्य सुवर्णरूपस्य वापी स्नानार्थमेव या ।
ज्ञानवापी ज्ञानजलं ज्ञानोदं तीर्थमेव तत् ॥१६॥
ज्ञानं द्रवस्वरूपं च ज्ञानोदं शंकरालयम् ।
अस्य स्पर्शनपानाचमनस्नानोक्षणादिभिः ॥१७॥
भुक्तिं मुक्तिं पितृतृप्तिं यथेष्टं च फलं लभेत् ।
ज्ञानरूपोऽहमेवात्र द्रवमूर्तिं विधाय च ॥१८॥

जाड्यविध्वंसनं कुर्यां कुर्यां ज्ञानोपदेशनम् ।
इति दत्वा वरं शंभुर्लिंगे चान्तरधीयत ॥१९॥
ईशानश्च गतो नत्वा स्वदिशां प्रति पद्मजे ।
अथाऽऽनन्दवने तत्र हरिस्वामीति भूसुरः ॥२०॥
आसीत्तस्याऽभवत्पुत्री शीलरूपगुणान्विता ।
कलाकलापकुशला मिष्टस्वराऽतिसुन्दरी ॥२१॥
कृष्णभक्ता कृष्णनारायणस्वामिप्रदेवता ।
सुशीला नाम सा नित्यं स्नात्वा ज्ञानोदतीर्थके ॥२२॥
विश्वेश्वरालये संमार्जनादि कुरुते सती ।
कृष्णकृष्णेतिकृष्णेति शिवशंभो जगौ मुदा ॥२३॥
सुलोचनापि सा कन्या पश्यत्यास्यं न कस्यचित् ।
सुश्रवा ह्यपि सा बाला नाऽऽदत्ते कस्यचिद् वचः ॥२४॥
सुशीला शीलसम्पन्ना रहस्तद्गतमानसैः ।
प्रार्थिताऽपि कृष्णव्रता नाभिलाषां बबन्ध सा ॥२५॥
धनैस्तस्यास्तु जनको युवभिः प्रार्थितो बहुः ।
नाऽशकत्तां सुशीलां स दातुं शीलोर्जितश्रियम् ॥२६॥
ज्ञानोदतीर्थभजनात् सुशीला सा कुमारिका ।
बहिरन्तस्तदाऽद्राक्षीत् सर्वं कृष्णमयं जगत् ॥२७॥
अथ विद्याधरस्तत्र शंभोर्दिदृक्षयाऽऽगतः ।
रूपलावण्यसम्पन्नां दृष्ट्वा तां चकमे तु सः ॥२८॥
गान्धर्वेण विवाहेन गृहीत्वा स ययौ सतीम् ।
सापि प्रसेवते नित्यं मलयाद्रौ तु तं पतिम् ॥२९॥
पातिव्रत्यपरा साध्वी कृष्णनारायणं पतिम् ।
सस्मार सर्वदा तत्र स्वामिनिं त्विष्टदेवताम् ॥३०॥
अथ कदाचिन्मलये भ्रमन्तं तं पतिं महान् ।
निजघान त्रिशूलेन ह्यकस्माद् व्योममार्गतः ॥३१॥
पतिव्रतया च तया शीघ्रं जलं धृतं मुखे ।
तत्याजाऽसून् राक्षसं च भस्मीचकार सा सती ॥३२॥
अथाऽस्य शवमादाय कृत्वा चितां तु सुन्दरी ।
कृष्णं पतिं तदा ध्यात्वा चक्रे चिताग्निसात् तनुम् ॥३३॥
दम्पती तौ स्वर्गलोकं भुक्त्वा वै लक्षवत्सरान् ।
विद्याध्रः स जनुः प्राप राज्ञो मलयकेतुतः ॥३४॥
वैष्णवः परमोदारः सतां सेवापरायणः ।
सुशीला सा जनुर्लेभे कर्णाटे नगरे सती ॥३५॥
सुतो मलयकेतोस्तां कालेन परिणीतवान् ।
जातिस्मरौ दम्पती तौ कृष्णभक्तिपरायणौ ॥३६॥
नाम्ना तौ समविख्यातौ माल्यकेतुः कलावती ।
कलावती माल्यकेतुं पतिं प्राप्य पतिव्रता ॥३७॥
अपत्यत्रितयं लेभे दिव्यभोगसमृद्धिभाक् ।
एकदा कश्चिदौदीच्यो माल्यकेतुं नरेश्वरम् ॥३८॥
चित्रकृच्चित्रपटिकां चित्रां दर्शितवानथ ।
तां तु चित्रपटीं राजा कलावत्यै समार्पयत् ॥३९॥
साऽङ्कुल्या प्राङ्निवासस्य स्थानं स्मृत्वा विवेद तत् ।
गंगामुदग्वहां स्मृत्वा स्मृत्वा च मणिकर्णिकाम् ॥४०॥
पञ्चगंगां च गोघाटं तथा प्रह्लादकेशवम् ।
बलिकेशवनामानं विष्णुं नारदकेशवम् ॥४१॥
आदिकेशवनामानं कृष्णमादित्यकेशवम् ।
भीष्मकेशवनामानं तथा वामनकेशवम् ॥४२॥
भृगुकेशवनामानं नरनारायणौ तथा ।
गोपीगोविन्दनामानं यज्ञवाराहकेशवम् ॥४३॥
लक्ष्मीनृसिंहनामानं शेषमाधवनामकम् ।
शंखमाधवनामानं सस्मार सा पतिव्रता ॥४४॥
श्रीबिन्दुमाधवं कृष्णं साक्षाल्लक्ष्मीपतिं पतिम् ।
तथा श्रीमंगलागौरीं सस्मार धर्मकूपकम् ॥४५॥
दशाश्वमेधिकं तीर्थं ज्ञानवापीं प्रियां पराम् ।
विश्वेश्वरं तथा कृष्णनारायणेश्वरं हरिम् ॥४६॥
कलावती चित्रपटीं पश्यन्तीत्थं मुहुर्मुहुः ।
पुनर्ददर्श ज्ञानोदं श्रीविश्वेश्वरभूतले ॥४७॥
हर्षबाष्पाम्बुकलिले जाते तस्याः सुलोचने ।
तस्तम्भ गात्रलतिका मुखं प्रफुल्लतां गतम् ॥४८॥
स्वरोऽथ गद्गदो जातो ज्ञानवापीं विलोक्य वै ।
दृष्ट्वा राजा सतीं प्राह किं प्रिये स्मरसि स्थलम् ॥४९॥
सा तु नम्राऽभवत् क्षिप्रं लज्जयोवाच वै ततः ।
नाथ धर्मार्थकामाश्च मोक्षश्चेति पुमर्थकाः ॥५०॥
साधनीया मनुष्येण मोक्षो मुख्यः पुमर्थकः ।
तद्विहीना जनिरपि जलबुद्बुदवन्मता ॥५१॥
यत्राऽऽनुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते ।
मद्विधानां तु दासीनां बाहुल्यं तेऽस्ति मन्दिरे ॥५२॥
तथापि नितरां प्रेम स्वामिनो मयि दृश्यते ।
तव दास्यपि भोगाढ्या किमुताऽङ्कस्थलीचरी ॥५३॥
तत्राऽप्यनन्यसम्पत्तिस्तत्र स्वाधीनभर्तृता ।
विपश्चित्संचयेदर्थानिष्टापूर्ताय कर्मणे ॥५४॥
तपोऽर्थमायुर्निर्विघ्नं दारांश्चापत्यलब्धये ।
सर्वं ते नृप संभूतं वैराग्येऽथ मनः कुरु ॥५५॥
भक्ष्यविकारकामानां नाऽन्तोऽस्ति मरणं विना ।
ज्ञानेन मरणं कार्यं देहस्य मरणं न तत् ॥५६॥

आनन्दकाननयात्रां कर्तुमिच्छामि मोक्षदाम् ।
पूरणीयोऽभिलाषो मे मानुष्यं सफलं भवेत् ॥५७॥
श्रुत्वा राजा च तामाह योग्यं काले सुस्मारितम् ।
सैव पत्नी सती साध्वी लक्ष्मीः श्रीः सा हरेः प्रिया ॥५८॥
पतिव्रताऽपि सा या स्मारयेदन्ते हरिं पतिम् ।
न राज्यं राज्यमित्याहुः राज्यश्रीर्या पतिव्रता ॥५९॥
ससांगमपि साम्राज्यं तया हीनं तृणायते ।
यदि पत्नी स्वयं भूत्वा पतिं पातयति वृषात् ॥६०॥
मोक्षाच्च सा न वै पत्नी कृत्या माया तु राक्षसी ।
स्वयं यात्येव निरयं नयत्यपि पतिं सुतान् ॥६१॥
कुलान्यपि तु पापाद्यैः पातयत्येव सा दिवः ।
या न स्मारयति भक्तिं कृष्णनारायणस्य वै ॥६२॥
साध्वी नारी तु सा प्रोक्ता सति द्रव्ये च सम्पदि ।
धर्मं तीर्थं व्रतं पुण्यं दानं संस्मारयेद्धरिम् ॥६३॥
तीर्थं समुत्सवं पूजां गुरोः पित्रोश्च शार्ङ्गिणः ।
सतां सेवां हरेर्दास्यं कारयत्येव सा प्रिया ॥६४॥
प्रियात् प्रियतरस्त्वात्मा तस्य प्रियतमोऽच्युतः ।
मोक्षः प्रियतमश्चाति स्मारयेत्तं पतिव्रता ॥६५॥
तव बलान्मया साध्वि भुक्तं राज्यमकण्टकम् ।
हृषीकार्थाः कृतार्थाश्च धर्मश्चापि कृतोऽतुलः ॥६६॥
अपत्यान्यपि जातानि किं कर्तव्यमिहाऽस्ति मे ।
अवश्यमेव गन्तव्याऽऽवाभ्यां वाराणसी पुरी ॥६७॥
इति निश्चित्य राजा स्वं पुत्रे राज्यं निधाय च ।
दत्वा दानानि बहूनि काशीं प्रति प्रतस्थिवान् ॥६८॥
दृष्ट्वा विश्वेश्वरं ज्ञानवापीं निजपुराभुवम् ।
जहृषतुश्च तौ कृष्णनारायणपदार्थिनौ ॥६९॥
स्नात्वा ददौ विविधानि दानानि कनकानि च ।
सुवर्णरूप्यकलशान् गाश्च दोग्ध्रीर्ददौ मुदा ॥७०॥
दुकूलानि विचित्राणि पूजोपकरणानि च ।
ययौ भार्यायुतो मुक्तिमण्डपं तत्र वा चिताम् ॥७१॥
लक्ष्मीनारायणसंहितायाः शुश्राव सत्कथाम् ।
दक्षिणां सद्धनं दत्वा पूजां सायं शिवस्य सः ॥७२॥
कारयामास विधिना ज्ञानवापीं ययौ ततः ।
नृपः सार्धं कलावत्या तत्र सस्नौ प्रहृष्टवत् ॥७३॥
तत्र पिण्डान् स निर्वाप्य सन्तर्प्य श्रद्धया पितॄन् ।
दीनाऽनाथसतीसाधून् दत्वा दानानि वै ततः ॥७४॥
बुभुजाते दम्पती च भोजनं प्रविभज्य तु ।
ततः कलावती कृष्णनारायणं मुदा मुहुः ॥७५॥
जजाप परया भक्त्या तपश्चक्रे तपस्विनी ।
एकान्तरोपवासैश्च कदाचित्तु त्र्यहोत्रतैः ॥७६॥
षडहोभोजनैश्चापि पक्षार्धनियमैरथ ।
पक्षान्तरोपवासैश्च मासोपवसनादिभिः ॥७७॥
चान्द्रायणव्रतैः कृच्छ्रैर्भर्तुः शुश्रूषणैरपि ।
निनाय क्षणवत्कालमायुःशेषस्य सा सती ॥७८॥
एकदा ज्ञानवाप्यां तु प्रातः स्नात्वोपविष्टयोः ।
आगत्य जटिलः कश्चिदाशीर्भिरभिनन्द्य च ॥७९॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
मन्त्रं दत्वा प्रसन्नास्यस्तुलसीमालिकाधरः ॥८०॥
उत्तिष्ठतं प्रकुरुतं मोक्षार्थं मानसं परम् ।
तावद् विमानमापन्नं सुक्वणत्किंकिणीगणम् ॥८१॥
चतुर्भुजैर्हरैर्भक्तैर्दिव्यैः सत्पार्षदैर्युतम् ।
लक्ष्मीनारायणमूर्तितेजोव्याप्तं सुशोभितम् ॥८२॥
स्वयं लक्ष्मीस्त्ववतीर्य दत्वा ज्ञानं परात्परम् ।
तारकं मोक्षदं तौ च निनाय दिव्यविग्रहौ ॥८३॥
विमानेन महालक्ष्म्या सह नारायणेन तौ ।
चतुर्भुजौ दिव्यदेहौ कृष्णधाम गतौ प्रिये ॥८४॥
इति ते कथितं लक्ष्मि ! कलावत्याव्रतं शुभम् ।
मोक्षदं पठनाद्वापि श्रवणात्सर्वथा सति ! ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आनन्दवनक्षेत्रे ज्ञानोदमहिमनि सुशीलायाः साध्वीव्रतस्थायाः गान्धर्वविवाहोत्तरं दम्पत्योर्जन्मान्तरे राज्यप्राप्तिः पातिव्रत्यप्रभावेण मोक्षणं चेत्यादिनिरूपणनामा षष्ट्यधिकचतुश्शततमोऽध्यायः ॥ ४६० ॥

श्रीलक्ष्मीरुवाच—

पातिव्रत्यं परो धर्मः श्रुतो ज्ञातश्च ते मुखात् ।
नारीदेहस्य पावित्र्यं शाश्वतं कृत्रिमं च वा ॥ १ ॥
यद्वा संस्कारसम्प्राप्यं यद्वा वैवाहिकं मतम् ।
यथार्थं वद मे कान्त धर्मकार्यादिपुष्टिकृत् ॥ २ ॥

श्रीनारायण उवाच—

स्त्रियः पवित्राः सततं नैता दुष्यन्ति केनचित् ।
मासि मासि रजस्तासां दुष्कृतान्यपकर्षति ॥ ३ ॥
पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः ।
भुंजते मानुषाः पश्चान्नैता दुष्यन्ति केनचित् ॥ ४ ॥

स्त्रीणां शौचं ददौ सोमः पावकः सर्वमेध्यताम् ।
कल्याणवाणीं गन्धर्वास्तेन मेध्याः सदा स्त्रियः ॥ ५ ॥
कन्यां भुंक्ते रजःकालेऽग्निः शशी लोमदर्शने ।
स्तनोद्भेदेषु गन्धर्वास्तत्प्रागेव प्रदीयते ॥ ६ ॥
कन्यामभुक्तां सोमाद्यैर्ददद्दानफलं बहु ।
कन्यादानफलप्रेप्सुस्तस्माद्दद्यादयौवनाम् ॥ ७ ॥
रजोरोमस्तनोद्भेदा यौवनस्य प्रदर्शकाः ।
अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी ॥ ८ ॥
दशवर्षा भवेत् कन्या ह्यत ऊर्ध्वं रजोऽन्विता ।
कन्यादानं शुभं प्रोक्तं चतुर्दशसमाय वै ॥ ९ ॥
शयनासनयानानि कुणपं स्त्रीमुखं कुशाः ।
यज्ञपात्राणि सर्वाणि न प्रदुष्यन्ति वै क्वचित् ॥१०॥
वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने ।
नार्यो रतिप्रयोगेषु श्वा मृगग्रहणे शुचिः ॥११॥
अजाऽश्वयोर्मुखं मेध्यं गावो मेध्यास्तु पृष्ठतः ।
ब्राह्मणाः पादतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥१२॥
बलात्कारोपभुक्ता वा चोरहस्तगताऽपि वा ।
न त्याज्या दयिता नारी मेध्याऽजेन विनिर्मिता ॥१३॥
साध्वो गैरिकापूता रजःपूताश्च योषितः ।
कृष्णपूतं जगत्सर्वं दम्पत्युद्वाहपावनौ ॥१४॥
गर्भपूतं सदा वीर्यं जन्मपूतं तु बालकम् ।
मन्त्रपूताः सदा शिष्या दीक्षापूताः शरीरिणः ॥१५॥
व्रतपूताः सदा सन्तः पतिपूतो वधूजनः ।
जीवपूतं सदा दुग्धं स्थानपूता रदादयः ॥१६॥
भावपूता सदा कन्या युवती जरठाऽथवा ।
आपः स्वभावतो मेध्या मेध्यो वह्निः स्वभावतः ॥१७॥
वह्निरापोऽनिलो नारी मेध्या वंशोद्भवाः सदा ।
तदभ्यर्च्याः सुवासिन्यो भूषणाच्छादनाऽशनैः ॥१८॥
भूतिकामैर्नरैर्नित्यं सत्कार्येषूत्सवेषु च ।
रमन्ते देवतास्तत्र स्युस्तत्र सफलाः क्रियाः ॥१९॥
यत्र तुष्यति भर्त्रा स्त्री स्त्रियां भर्ता च तुष्यति ।
तत्र वेश्मनि कल्याणं सम्पद्येत पदे पदे ॥२०॥
प्रातिकूल्ये कलत्रं चेन्नरकेणापि किं ततः ।
दक्षा प्रजावती साध्वी प्रियवाणी वशंवदा ॥२१॥
पतिप्राणा भागवती सा श्रीः स्त्रीरूपधारिणी ।
सदा गृही सुखं भुंक्ते स्त्री लक्षणवती यदि ॥२२॥
वपुरावर्तगन्धाश्च छाया सत्त्वं स्वरो गतिः ।
वर्णश्चेत्यष्टधा बोध्या नारीलक्षणभूमयः ॥२३॥

षष्टिः षडुत्तरा योषिदंगलक्षणसत्खनिः ।
आदौ पादतलं रेखास्ततोऽङ्गुष्ठांऽगुलीनखाः ॥२४॥
पृष्ठं गुल्मद्वयं पार्ष्णी जंघे रोमाणि जानुनी ।
ऊरू कटिर्नितम्बस्फिगभगो जघनबस्तिके ॥२५॥
नाभिः कुक्षिद्वयं पार्श्वोदरमध्यवलित्रयम् ।
रोमाली हृदयं वक्षो वक्षोजद्वयचूचुकम् ॥२६॥
जत्रुस्कन्धांऽसकक्षादोर्मणिबन्धकरद्वयम् ।
पाणिपृष्ठं पाणितलं रेखाऽङ्गुष्ठांऽगुलीनखाः ॥२७॥
पृष्ठिः कृकाटिका कण्ठे चिबुकं च हनुद्वयम् ।
कपोलो वक्त्रमधरोत्तरौष्ठौ द्विजजिह्विकाः ॥२८॥
घण्टिकातालुहसितं नासिका क्षुतमक्षिणी ।
पक्ष्मभ्रूकर्णभालानि मौलिसीमन्तमौलिजाः ॥२९॥
एतेष्वंगेषु नार्यो वै परीक्ष्यन्ते शृणु प्रिये ! ।
स्त्रीणां पादतलं स्निग्धं मांसलं मृदुलं समम् ॥३०॥
अस्वेदमुष्णमरुणं बहुभोगोचितं स्मृतम् ।
रूक्षं विवर्णं परुषं खण्डितप्रतिबिम्बकम् ॥३१॥
शूर्पाकारं विशुष्कं च दुःखदौर्भाग्यसूचकम् ।
चक्रस्वस्तिकशंखाब्जध्वजमीनाऽऽतपत्रवत् ॥३२॥
यस्याः पादतले रेखाः सा भवेद्वै नृपांगना ।
मध्यांगुलीगताचोर्ध्वरेखा भोगातिभोगदा ॥३३॥
सर्पमूषकरेखास्तु दारिद्र्यदुःखदायिकाः ।
पुष्टोन्नतः शुभोऽङ्गुष्ठो वर्तुलो बहुभोगदः ॥३४॥
ह्रस्ववक्रचिपिटस्त्वंगुष्ठः सौभाग्यनाशकः ।
विधवा विपुलांगुष्ठा दीर्घांगुष्ठा तु दुर्भगा ॥३५॥
मृदून्नतघनवृत्तांगुलयः सम्पदां प्रदाः ।
दीर्घांगुलयः कुलटाः कृशांगुलयो निर्धनाः ॥३६॥
ह्रस्वांगुल्यो ह्रस्वजीवा भुग्नांगुल्यः शठा मताः ।
चिपिटांऽगुलयो दास्यो दरिद्रा विरलांगुलिः ॥३७॥
परस्परसमारूढपादांगुल्यस्तु योषितः ।
अनेकवारं विधवाः परनार्यश्च ता मताः ॥३८॥
यस्याः पथि चलन्त्यास्तु पृष्ठे धूली समुच्छलेत् ।
सा पित्रोश्च तथा पत्युः कुलनाशकरी भवेत् ॥३९॥
यस्याः कनिष्ठिका भूमिं गच्छन्त्या न परिस्पृशेत् ।
सा निहत्य पतिं योषा द्वितीयं कुरुते पतिम् ॥४०॥
अनामिका तु गच्छन्त्या यस्या भूमिं तु न स्पृशेत् ।
पतिद्वयं निहत्यैव तृतीयं कुरुते पतिम् ॥४१॥
मध्यमांगुलिका यस्या यान्त्या भूमिं न वै स्पृशेत् ।
पतित्रयं निहत्यैव चतुर्थं कुरुते पतिम् ॥४२॥

अनामिका मध्यमाऽतिह्रस्वा पतिवियोगिनी ।
प्रदेशिनी सदांगुष्ठसंयुक्ता कुलटाकरी ॥४३॥
स्निग्धाः समुन्नतास्ताम्रा वृत्ताः पादनखाः शुभाः ।
उन्नतं चेत् पादपृष्ठं मसृणं मृदु मांसलम् ॥४४॥
अस्वेदमशिराढ्यं च राज्ञी भवेन्न संशयः ।
मध्यनम्रं पादपृष्ठं सदा दारिद्र्यसूचकम् ॥४५॥
शिरालं त्वध्वगतिदं रोमाढ्यं किंकरीकरम् ।
निर्मांसं चेत् सुदुर्भाग्यप्रदं बोध्यं हि योषितः ॥४६॥
गूढौ गुल्फौ तु सुखदौ वर्तुलौ चाऽशिरालकौ ।
नीचैःस्थौ शिथिलौ बाह्यौ दुर्भाग्यदौ हि योषितः ॥४७॥
समः पार्ष्णिः सुशुभदः पृथुः पार्ष्णिस्तु दुर्भगः ।
उन्नतः कुलटापार्ष्णिः पार्ष्णिर्दीर्घः सुदुःखदः ॥४८॥
नीरोमे विशिरे जंघे स्निग्धे च क्रमवर्तुले ।
मनोहरे सुरक्तके राजपत्न्या मते शुभे ॥४९॥
राज्ञी भवेदेकरोमा द्विरोमा सुखभागिनी ।
त्रिरोमा रोमकूपेषु विधवा स्यान्न संशयः ॥५०॥
वृत्ते सुमांसले पुष्टे जानुनी धर्मयोषितः ।
निर्मांसे स्वैरचारिण्या दरिद्रायास्तु विश्लथे ॥५१॥
कदलीकरभाकारौ मसृणौ धवलौ घनौ ।
ऊरू वृत्तौ मृदू रोमरहितौ विशिरौ शुभौ ॥५२॥
भूपत्नी सुधनाढ्यस्त्री विदुषी स्यात् पतिव्रता ।
सरोमोरुयुता स्याद्वै विधवा परगा तथा ॥५३॥
दुर्भाग्या स्याच्चिपिटोरुमती दुःखमयी सदा ।
सच्छिद्रोरुयुता दुःखभागिनी सशिरोरुका ॥५४॥
कठिनत्वगूरुमती दारिद्र्यव्यापिनी सदा ।
चतुर्विंशत्यंगुला या कटिर्वर्तुलमानगा ॥५५॥
समुन्नतनितम्बा च चतुरस्रा कटिः शुभा ।
निम्ना नता चिपिटा च शुष्का दीर्घा तु दुःखदा ॥५६॥
कटिः सरोमा ह्रस्वा तु विधवात्वप्रसंजिका ।
नितम्बौ तून्नतौ पुष्टौ पृथू कठिनमांसलौ ॥५७॥
कपित्थफलवद्वृत्तौ रतिभोगविवर्धनौ ।
योनिः कच्छपविस्तारा गजकुंभोन्नता शुभा ॥५८॥
वामोन्नता तु कन्यादा दक्षोन्नता तु पुत्रदा ।
आखुरोमनिभरोमा गुप्तमध्या च विस्तृता ॥५९॥
दृढबन्धा दृढतटोन्नता प्लक्षदलाऽऽयता ।
पद्मवर्णा स्वल्पशुष्का श्रेष्ठा सौभाग्यवर्धिनी ॥६०॥
मृगादिखुररूपाया वर्तुला चुल्लिकासमा ।
सरोमा विवृतास्या च लम्बशुकाऽधमा मता ॥६१॥
शंखावर्तसमा गर्भधृतियोग्या न जायते ।
चिपिटा खर्पराकारा किंकरीकारिणी सदा ॥६२॥
वंशवेतसपत्राभा दीर्घोच्छ्ररोमसंयुता ।
अत्युन्नतशुकाढ्या तु योनिर्नैव शुभप्रदा ॥६३॥
दृढोन्नततटा स्वच्छरक्ताभा स्वल्पमध्यिका ।
अन्तर्वलययुक्ता तु योनिः सौख्यप्रदा सदा ॥६४॥
मांसच्छन्नोर्ध्वाऽस्थिगुप्ता निमज्जदस्थिरक्षिता ।
परितोऽन्तर्मांसला तु योनिः सौख्यप्रदा सदा ॥६५॥
विकटा कुटिला लम्बा विशाला शिथिलं गुहा ।
कन्दरा मुक्तमांसार्द्रा सुखदा न कदाचन ॥६६॥
भगभालं जघनं तु विशालं तुंगमांसलम् ।
मृदुलं मृदुरोमाढ्यं दक्षिणावर्तमुत्तमम् ॥६७॥
वामावर्तं च निर्मांसं वक्रं वैधव्यसूचकम् ।
जघनं गर्भिणीतुल्यं लम्बोदरं न शान्तिदम् ॥६८॥
शुष्कं संकुचितं निम्नं जघनं सास्थि दुःखदम् ।
जघनपार्श्वगा बस्तिर्मृद्वी विपुलकोमला ॥६९॥
किञ्चिच्च प्रोन्नता श्रेष्ठा यानवाहनदायिनी ।
रोमशा च शिराला सा रेखांका नैव शस्यते ॥७०॥
गम्भीरा दक्षिणावर्ता नाभिः स्यात् सुखसम्प्रदा ।
वामावर्त्ता समुत्ताना व्यक्तग्रन्थिर्न शस्यते ॥७१॥
विस्तृतकुक्षिका सूते सुतान् बहून् हि भामिनी ।
मण्डुकोदरवत् कुक्षिः सूते पुत्रं नृपं सती ॥७२॥
ऊर्ध्वकुक्षिर्भवेद् वन्ध्या वलिकुक्षिः सती भवेत् ।
सावर्तकुक्षिका दासी भवेदाजन्मकिंकरी ॥७३॥
सममांसलमृदुलमग्नास्थिपार्श्वशालिनी ।
सौभाग्याऽऽनन्दसुगुणैश्वर्यसौख्यवती भवेत् ॥७४॥
सरोमोन्नतसंदृश्यनाडिकाकुद्यपार्श्वला ।
दुःशीला निरपत्या च सा भवेद् दुःखसागरा ॥७५॥
स्वल्पं विशिरं मृदुत्वगुदरं भोगबोधकम् ।
कुंभमृदंगकूष्माण्डोदरं दुष्पूरमेव हि ॥७६॥
लम्बोदरी श्वशुरघ्नी निरपत्या पृथूदरी ।
तनुमध्या तु सुभगा वलित्रया रतिप्रदा ॥७७॥
ऋज्वी तन्वी च रोमाली यस्याः सा शर्मनर्मदा ।
पिंगा वक्रा स्थूलछिन्ना रोमाली धववर्जिता ॥७८॥
निर्लोमोन्नतहृदया पतिस्नेहप्रदा सदा ।
विशालहृदया नारी पुंश्चली निर्दया भवेत् ॥७९॥
उद्भिन्नरोमहृदया पतिहा भवति ध्रुवम् ।
अष्टादशांगुलततमुरो यस्यास्तु पीवरम् ॥८०॥

उन्नतं सुखदं प्रोक्तं मांसलं शोभनं वरम्।
दुःखदं तु भवेत् तद्वै रोमशं विषमं पृथु ॥८१॥
घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ।
स्थूलाग्रौ विरलौ शुष्कौ कोमलौ नहि शर्मदौ ॥८२॥
दक्षिणोन्नतदार्व्याढ्यकुचा पुत्रवती भवेत्।
वामोन्नतकुचा कन्यां सूते सौभाग्यसुन्दरीम् ॥८३॥
अरघट्टघटीतुल्यौ कुचौ दौःशील्यसूचकौ।
पीवरास्यौ सान्तरालौ पृथूपान्तौ न शोभनौ ॥८४॥
मूले स्थूलौ क्रमकृशौ तीक्ष्णाग्रौ यौ पयोधरौ।
प्रथमं सुखदौ पश्चाच्छोकदौ दुःखकारिणौ ॥८५॥
सुन्दरे कठिने श्यामे वर्तुले चूचुके शुभे।
अन्तर्मग्ने च वा दीर्घे कृशे क्लेशस्य सूचके ॥८६॥
पीवराभ्यां तु जत्रुभ्यां तु धनधान्यवती वधूः।
श्लथाऽस्थिभ्यां तु निम्नाभ्यां विषमाभ्यां दरिद्रिणी ॥८७॥
अबद्धावनतौ स्कन्धावदीर्घावकृशौ शुभौ।
वक्रौ स्थूलौ च रोमाढ्यौ प्रेष्यवैधव्यसूचकौ ॥८८॥
निगूढसन्धी स्रस्ताग्रौ शुभावंसौ सुसंहतौ।
वैधव्यदौ समुच्चाग्रौ निर्मांसावतिदुःखदौ ॥८९॥
कक्षे शस्ते सूक्ष्मरोमे तुंगे स्निग्धे सुमांसले।
न प्रशस्ते स्वेदयुक्ते गम्भीरे च शिरालके ॥९०॥
हस्तौ रक्तौ मांसलौ निदिशिरौ गूढास्थिकोमलौ।
विरोमाणौ शुभ्रताम्रौ सरलौ सत्ययोषिताम् ॥९१॥
वैधव्यं स्थूलरोमाणौ ह्रस्वौ दौर्भाग्यकारकौ।
दृश्यशिरौ तथा रूक्षौ कृष्णौ क्लेशप्रदौ मतौ ॥९२॥
अम्भोजमुकुलाकारमंगुष्ठांगुलिसम्मुखम् ।
हस्तद्वयं सतीनां तु बहुभोगप्रसूचकम् ॥९३॥
मृदु मध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम्।
शस्तरेखान्वितं शस्तं स्वल्परेखं शुभश्रियम् ॥९४॥
विधवा बहुरेखाभिश्चाऽरेखा तु दरिद्रिणी।
सशिरे भिक्षुकी पाण्योस्तले वैराग्यबोधके ॥९५॥
विरोमे विशिरे पाण्योः पृष्ठे शस्ते समुन्नते।
सरोमे मांसरहिते सशिरे विधवास्त्रियः ॥९६॥
रक्ता व्यक्ता गभीरा च स्निग्धा पूर्णा च वर्तुला।
कररेखा भाग्यरेखा प्रशस्ता योषितां मता ॥९७॥
मत्स्येन सुभगा साध्वी स्वस्तिकेन धनप्रदा।
पद्मेन भूपतेः पत्नी नृपमाता भवेत्तु सा ॥९८॥
चक्रवर्तिस्त्रियाः पाणौ दक्षिणावर्तस्वस्तिकः।
शंखातपत्रकमठध्वजच्छत्राणि वामके ॥९९॥
तुलारेखा वणिक्पत्नी बद्धकोशा वणिक्प्रिया।
गजवाजिवृषा वामे प्रासादशकटे तथा ॥१००॥
युगचिह्नं तु वामे चेद् वैश्यपत्नी हि सा भवेत्।
चामरांऽकुशकोदण्डैः राजपत्नी समीरिता ॥१०१॥
अंगुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम्।
सा स्यान्नारी पतिहन्त्री घातिनी दुःखकारिणी ॥१०२॥
त्रिशूलाऽसिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
दानकर्त्री भवेत् सा स्त्री कीर्तिमती पतिव्रता ॥१०३॥
कंकजम्बूकमण्डूकवृकवृश्चिकभोगिनः ।
रासभोष्ट्रबिडालाः स्युः करस्था दुःखदाः स्त्रियाः ॥१०४॥
कृष्णा दन्तेषु दीर्घा या भिञ्जरीमुखतस्तु या।
रोरूयमाणवदना खञ्जागमनतिर्यगा ॥१०५॥
कृष्णचाम्पलचरणा हनुलम्बमुखी च या।
पृष्ठमग्नोदरघटा कीर्तिस्थानविनाशिनी ॥१०६॥
शुभंकृत् सरलोऽङ्गुष्ठो वृत्तो वृत्तनखो मृदुः।
अंगुल्यश्च सुपर्वाण्यो दीर्घा वृत्ताः कृशाः शुभाः ॥१०७॥
ताश्चिपिटा रूक्षशुष्काः पृष्ठरोमयुजोऽशुभाः।
अतिह्रस्वाः कृशा वक्रा विरला रोगहेतुकाः ॥१०८॥
बहुपर्वसमेतांगुलयो दुःखप्रदा सदा।
अरुणाः सशिखास्तुंगा वर्तुलाश्च नखाः शुभाः ॥१०९॥
निम्ना विवर्णाः शुक्त्याभाः पीता दारिद्र्यसूचकाः।
नखेषु बिन्दवः श्वेताः स्वैरिणीत्वप्रसंजकाः ॥११०॥
अन्तर्निमग्नपृष्ठास्थिः पृष्ठिश्च मांसला शुभा।
रोमयुक्ता यदि पृष्ठिर्वैधव्यबोधिका तु सा ॥१११॥
भुग्ना नता सुशिरा च पृष्ठिर्दुःखप्रदायिनी।
ऋज्वी कृकाटिकोन्नता समांसा शोभना सदा ॥११२॥
शुष्काशिराला रोमाढ्या विशाला कुटिलाऽशुभा।
मांसलो वर्तुलः कण्ठः प्रशस्तश्चतुरंगुलः ॥११३॥
शस्ता ग्रीवा त्रिरेखाङ्का चाऽव्यक्तास्थिः सुसंहता।
निर्मांसा चिपिटा दीर्घा शुष्का नास्ति शुभप्रदा ॥११४॥
स्थूलग्रीवा तु विधवा वक्रग्रीवा तु किंकरी।
वन्ध्या स्याच्चिपिटग्रीवा ह्रस्वग्रीवा तु निःसुता ॥११५॥
चिबुकं द्व्यंगुलं शस्तं वृत्तं पीनं सुकोमलम्।
स्थूलं द्विधा विभक्तं सरोमाऽऽयतं न शोभनम् ॥११६॥
हनुश्चिबुकसंलग्ना निर्लोमा सुघना शुभा।
वक्रा स्थूला कृशा ह्रस्वा रोमशा न शुभप्रदा ॥११७॥
पीनौ वृत्तावुन्नतौ शस्तौ कपोलौ सुपूरितौ।
निम्नौ परुषौ रोमाढ्यौ निर्मांसौ सुखदौ नहि ॥११८॥

जनेतृवदनच्छायं स्वामोदं वर्तुलं समम् ।
स्निग्धं रम्यं सुमांसं प्रपूर्णं मुखं सतीस्त्रियाः ॥११९॥
सुरक्तो वर्तुलः स्निग्धो मध्ये रेखाविभूषितः ।
अधरो राज्यदो मध्यादाप्रान्तं क्रमशस्तनुः ॥१२०॥
कृशः प्रलम्बः स्फुटितो रूक्षो दौर्भाग्यबोधकः ।
स्थूलः कपिशो वैधव्यक्लेशदश्चाऽधरौष्ठकः ॥१२१॥
किञ्चिन्मध्योन्नतोऽरोमा चिक्कणो भोगदोऽधरः ।
कोदण्डाकाररेखश्च लक्ष्मीदश्चोत्तराधरः ॥१२२॥
शुक्ला दाडिमबीजाभाः स्निग्धाश्चोभयतः समाः ।
स्तोकं समुन्नता दन्ताः सतीनां धर्मयोषिताम् ॥१२३॥
पीताः श्यावाः स्थूलदीर्घाः शुक्त्याभा विरला रदाः ।
मूलरूक्षा असमा द्विपंक्तयो भाग्यवर्जिताः ॥१२४॥
अधोऽधिकरदा नारी मातृनाशकरी मता ।
विकटदन्ता विधवा कुलटा च पृथक्दती ॥१२५॥
शोणा मृद्वी सिता जिह्वा मिष्टभोजना भवेत् ।
मध्ये संकुचिता चाग्रे विस्तृता दुःखदा भवेत् ॥१२६॥
सिता जलमृतिदात्री श्यामा कलहकारिणी ।
मांसला दारिद्र्यदा च लम्बा त्वभक्ष्यभक्षिणी ॥१२७॥
विशाला रसना नित्यप्रमादबोधिनी मता ।
सुस्निग्धं भूपद्मरंगं तालु मृदु प्रशस्यते ॥१२८॥
सितं तालुनि वैधव्यं पीतं संन्यासिनी भवेत् ।
कृष्णेऽपत्यविहीना च रूक्षे बहुकुटुम्बिनी ॥१२९॥
कण्ठान्तर्वर्तिनी घण्टी तीक्ष्णा रक्ता च वर्तुला ।
अप्रलम्बा शुभाऽस्थूला स्थूलकृष्णा तु दुःखदा ॥१३०॥
हास्यं चाऽदृश्यदन्तं च किञ्चित्फुल्लकपालकम् ।
अनिमीलितनेत्रं च स्मितं नार्याः प्रशस्यते ॥१३१॥
समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा ।
स्थूलाग्रा मध्यनिम्ना चोन्नता नापि प्रशस्यत ॥१३२॥
शुकचञ्चुसमवक्रप्रान्ता नासा तु चोत्तमा ।
ह्रस्वाग्रा रक्तवर्णान्ता नासा वैधव्यकारिणी ॥१३३॥
चिपिटा किंकरीनासा ह्रस्वा दीर्घा कलिप्रिया ।
ललनालोचने शस्ते रक्तान्ते कृष्णतारके ॥१३४॥
धवले दलवद्दीर्घे सुस्निग्धे कृष्णपक्ष्मणी ।
उच्छ्रयाक्षिर्न दीर्घायुर्वृत्ताक्षी कुलटा मता ॥१३५॥
मेषाक्षी महिषाक्षी च चिपिटाक्षी न शस्यते ।
गोपिंगाक्षी कामवेगा बहुभोगाश्रया भवेत् ॥१३६॥
पारावताक्षी दुःशीला रक्ताक्षी भर्तृघातिनी ।
दुष्टा गह्वरनयना गजनेत्रा न शस्यते ॥१३७॥

पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकर्णिका ।
रमणी मधुपिंगाक्षी धनधान्यसमृद्धिभाग् ॥१३८॥
पक्ष्मभिः सुघनैः सूक्ष्मैः स्निग्धैः कृष्णैः सुभाग्यभाक् ।
कपिलैर्विरलैः स्थूलैर्निन्द्यकार्यकरी मता ॥१३९॥
भ्रुवौ सुवर्तुले स्निग्धे कृष्णकटे पृथक्स्थिते ।
प्रशस्ते मृदुरोमाणौ सुतीक्ष्णे कार्मुकाकृती ॥१४०॥
खररोमा विस्तृता च दीर्घरोमा च पिंगला ।
संहता च विकीर्णा च भ्रूर्न शस्ता वरस्त्रियाः ॥१४१॥
कर्णौ लम्बौ शुभावर्तौ कोमलौ सुखदौ स्त्रियाः ।
शष्कुलीरहितौ निन्द्यौ शिरालौ कुटिलौ कृशौ ॥१४२॥
भालः शिराविरहितो निर्लोमाऽर्धेन्दुसन्निभः ।
अनिम्नस्त्र्यंगुलो नार्याः सौभाग्यारोग्यसौख्यदः ॥१४३॥
स्पष्टस्वस्तिकरेखं तु ललाटं राज्यदं भवेत् ।
प्रलम्बमस्तका नारी भवेद् देवरघातिनी ॥१४४॥
शिरालोचोन्नमणिमस्तका रोगिणी मता ।
सीमन्तः सरलः श्रेष्ठः श्रेष्ठो मौलिः समुन्नतः ॥१४५॥
गजकुंभनिभौ वृत्तः सौभाग्यैश्वर्यसूचकः ।
घटमूर्धा तु विधवा लम्बशीर्षा तु पुंश्चली ॥१४६॥
विशालमूर्धा द्विमूर्धा दुर्भाग्या भवतीह वै ।
केशाः कृष्णा मृदुसूक्ष्माः स्निग्धाऽऽकुंचितसाग्रकाः ॥१४७॥
दीर्घाः सरला भास्वराः पातिव्रत्यस्य सूचकाः ।
परुषाः स्फुटिताग्राश्च पिशंगा लघुरूक्षकाः ॥१४८॥
विरलाः स्थूलकठिना दुःखदारिद्र्यदायकाः ।
भ्रुवोरन्तर्ललाटे वा मशको राज्यदो मतः ॥१४९॥
वामे कपोले मशकः शोणो मिष्टान्नपानदः ।
तिलकं दक्षिणावर्तो माला वा भ्रमरोऽपि वा ॥१५०॥
तिलश्चन्द्रो मशको वा लक्षणं राज्यभाग्यदाः ।
दक्षकुचे रक्तबिन्दुस्तिलो वा सा प्रसूर्भवेत् ॥१५१॥
कन्याचतुष्टयस्यापि पुत्रत्रयस्य वै सती ।
वामे कुचे तिलः शोणः पुत्रैकजननी तु सा ॥१५२॥
ततो वैधव्यमाप्नोति धर्मवती तु सा सती ।
गुह्यदक्षे तिलवती राजमाता भवेत् सती ॥१५३॥
नासाग्रे मशकः शोणो यस्याः सा नृपभामिनी ।
स चेत् कृष्णः सा पतिघ्नी पुंश्चली च भवेत् खलु ॥१५४॥
नाभ्यधो मशकश्चिह्नं तिलः पतिव्रतास्त्रियाः ।
गुल्फदेशे तिलश्चिह्नं मशकश्च दरिद्रकृत् ॥१५५॥
सव्ये कण्ठे करे कर्णे कपोले वा तिलोऽथवा ।
मशको वा भवेच्चिह्नं प्रथमं पुत्रदं भवेत् ॥१५६॥

भाले त्रिशूलरेखा चेदाचार्याणी भवेन्नृपी ।
सुप्ता जल्पति दन्तांश्च कटायते कुलक्षणा ॥१५७॥
करे रोम्णां दक्षिणावर्तस्तु धर्मकरः सदा ।
वामावर्तो दुःखदः स्यात् करे रोम्णां स्त्रिया अपि ॥१५८॥
नाभौ कर्णे हृदि दक्षावर्तः प्रशस्त एव सः ।
पृष्ठस्य दक्षिणे दक्षावर्तो महासुखप्रदः ॥१५९॥
पृष्ठदण्डे निम्नदक्षावर्तश्चायुःसुतप्रदः ।
योनेस्तु मस्तके दक्षावर्तो राज्ञीत्वसूचकः ॥१६०॥
स चेत् स्याच्छकटाकारो बहुपत्यादिसौख्यदः ।
भगारब्धः कटिश्रान्तश्चेत् पुत्रपतिनाशकः ॥१६१॥
उदरपुच्छकौ पृष्ठावर्तौ लम्बौ न शान्तिदौ ।
एकः स पतिहन्ता स्यादन्यः स पुंश्चलीकरः ॥१६२॥
कण्ठस्थो दक्षिणावर्तो मतो वैधव्यदुःखदः ।
केशारंभे ललाटे सः कबर्यां वाऽतिकष्टदः ॥१६३॥
कृकाटिकायां कूपे वा यस्या रोमभ्रमो भवेत् ।
सव्यावर्तोऽथवा दक्षावर्तः सा विधवा भवेत् ॥१६४॥
मस्तके वामभागे स्यादेको द्वौ वा तदा तु सा ।
आदशाहं पतिघ्नी स्यात् कट्यावर्ता तु पुंश्चली ॥१६५॥
पृष्ठावर्ता तु भर्तृघ्नी नाभ्यावर्ता पतिव्रता ।
कुलक्षणाऽपि सद्भक्ता देवभक्ता सती मता ॥१६६॥
तीर्थव्रततपोहोमजपदानपरायणाः ।
सतां हरेश्च कृपया पतिव्रताः सुलक्षणाः ॥१६७॥
सुलक्षणाः सतीनार्यः स्वल्पायुष्कमपि प्रियम् ।
दीर्घायुषं प्रकुर्वन्ति तारयन्ति कुलानि च ॥१६८॥
सर्वलक्षणमूर्धन्यं पातिव्रत्यं परो वृषः ।
तद्भवेच्चेल्लक्षणानि सर्वाणि सुखदानि वै ॥१६९॥
लक्षणानि मयोक्तानि सुखाय गृहिणां प्रिये ।
पठनाच्छ्रवणाच्चास्य स्वज्ञानं सुखदं भवेत् ॥१७०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने स्त्रीपावित्र्यस्त्रीतनुस्थशुभाऽशुभादिसूचकचिह्नरेखा-ऽङ्गप्रत्यंगादिफलनिरूपणनामैकषष्ट्यधिक-चतुश्शततमोऽध्यायः ॥४६१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! भविष्यत्कालिकीं कथां वदामि ते ।
संहिता भगवत्प्रोक्ता ब्रूते त्रैकालिकीं कथाम् ॥ १ ॥
भगवद्गोचरं सर्वं यथार्थं चाऽप्यबाधितम् ।
कल्पे कल्पे विभिन्ना च काचित् सजातिसदृशी ॥ २ ॥

कथा संजायते विष्णोर्मम ते चापि सुन्दरि ।
आकर्णय प्रिये लक्ष्मि ! पञ्चवक्त्रो हरः स्वयम् ॥ ३ ॥
पृथिव्यां पञ्चधा भूत्वा यज्ञे संहारकृच्छिवः ।
उमापि च जगद्धात्री द्रुपदस्य महीभुजः ॥ ४ ॥
यजतो वह्निकुण्डात् सा प्रादुरास सुकन्यका ।
पञ्चापि पाण्डुतनयाः साक्षादिन्द्रस्वरूपिणः ॥ ५ ॥
अवतेरुरिह स्वर्गात् क्षितेर्भाराऽपनुत्तये ।
संजज्ञे श्रीकृष्णनारायणोऽपि तत्सहायकृत् ॥ ६ ॥
सम्पद्विपद्भ्रमावर्ता नैसर्गिका जगद्भुवि ।
जगद्भवां प्रजायन्ते ह्युदयाऽनुदयादयः ॥ ७ ॥
कदाचित्ते महावीरा भ्रातृव्यैः समयोजिताम् ।
वनवासिप्रथारीतिं शिश्रियिरे विपत्समाम् ॥ ८ ॥
पञ्चालपुत्री सा देवी ययौ वनस्थलीं तु तैः ।
भक्ता पतिव्रता साध्वी पूजयत्येव तान् सदा ॥ ९ ॥
पतिभक्ता सती साध्वी कृष्णभक्ता हरेः सखी ।
इन्द्रपत्नी तापसी साऽऽराधयामास भास्करम् ॥१०॥
ब्रह्मचर्यपरा वन्याहारा संसेव्य तान्पतीन् ।
शेषकाले ह्यनिरुद्ध्य सूर्यध्यानपराऽभवत् ॥११॥
ध्यात्वा चानखकेशान्तं समावाह्याऽर्कपादपे ।
बहुवस्तुप्रदानेन पूजयत्येव भावतः ॥१२॥
जलं पुष्पं दलं वन्यं फलं भोज्यं सुगन्धिकम् ।
नीराजनं प्रदीपं च भक्त्याऽर्पयति सा सती ॥१३॥
नमनं स्मरणं स्तोत्रं प्रदक्षिणं क्षमापनम् ।
पुष्पाञ्जलिं परिहारं सा करोति पतिव्रता ॥१४॥
आराधितोऽथ सविता ददौ स्वदर्शनं रविः ।
उवाच तां महादेवीं वद किं तेऽस्त्यभीप्सितम् ॥१५॥
अहं सूर्यः कृष्णतनुस्त्वं कृष्णा यज्ञसंभवा ।
तन्वोरैक्यं विजानामि यन्मदीयं तवापि तत् ॥१६॥
द्रौपदी प्राह देवेश वने वै साधनं विना ।
बहूनां भोजनाद्यं च पर्याप्तं नैव पार्यते ॥१७॥
सहस्राणामतिथीनामागमो भवति क्वचित् ।
श्रुत्वा हि पाण्डवानां तु वनवासं वने रवे ! ॥१८॥
तदा तेषां कृते योग्यं यथापूर्णा तु सत्कृतिः ।
जायेत भगवँस्तद्वै देहि निर्व्याधिकं धनम् ॥१९॥
पातिव्रत्यं पतिकीर्तिर्यथा न स्यात्तु निम्नगा ।
तथा सहायतां देहि वनवासकृतेऽर्थदाम् ॥२०॥
आसनं च जलं वन्यफलान्नं मधुरा च वाक् ।
नेत्रस्नेहस्त्वतिथीनां प्रसादस्य प्रयोजकाः ॥२१॥

आशीर्वादाः प्रजायन्ते प्रसन्नहृदयोत्थिताः ।
दूयमानहृदुत्थास्तु शापा भस्मकरा मताः ॥२२॥
पतिसेवा वने लाभः परमो मेऽत्र वर्तते ।
पतितुल्याऽतिथिसेवाऽन्नाद्यैः संशयिता प्रभो ॥२३॥
इति श्रुत्वा तु पाञ्चाल्याः प्रसन्नो भास्करः प्रभुः ।
सदर्वीं सपिधानां च स्थालिकामक्षयां ददौ ॥२४॥
उवाच स प्रसन्नात्मा स्वात्मिकां तां सतीं तनुम् ।
स्थाल्यैतया महापुण्ये यावन्तोऽन्नार्थिनो जनाः ॥२५॥
तावन्तस्तृप्तिमाप्स्यन्ति यावच्च त्वं न भोक्ष्यसे ।
भुक्तायां त्वयि रिक्तैषा पूर्णभक्ता भविष्यति ॥२६॥
रसवद्व्यञ्जननिधिरिच्छाभक्ष्यप्रदायिनी ।
यावद्वने निवासस्ते तावत् स्थास्यति ते वशे ॥२७॥
प्रसेवय पतीन् नित्यं लक्षशो वनवासिनः ।
पुण्यमर्जय देवेशि सर्वं भद्रं सदाऽस्तु ते ॥२८॥
त्वं लक्ष्मीस्त्वं सती श्रीश्च त्वं प्रभा त्वं च माणिकी ।
त्वं पार्वती जया राधा रमा पद्मा च मोहिनी ॥२९॥
पद्मावती च रुद्राणी चम्पा त्वं शारदा शिवा ।
तुलसी त्वं महालक्ष्मीर्वृन्दा सीता च रुक्मिणी ॥३०॥
त्वं न जानासि देवेशि मानुषलीलयाऽन्विता ।
जानाम्यहं सति त्वां वै कृष्णकान्ताऽसि सर्वथा ॥३१॥
नररूपोऽर्जुनस्ते वै पतिः कृष्णार्धकस्तव ।
कृष्णे पतिव्रतं तेऽस्ति कृष्णा त्वं कृष्णकामिनी ॥३२॥
त्वामेकां निमित्तीकृत्य पञ्चवीरैर्वसुन्धराम् ।
कृष्णो निर्दैत्यभारां वै कर्तुमिच्छति यज्ञजे ॥३३॥
त्वत्स्वरूपं मम पात्रं चोभे त्वक्षयपूर्तिदे ।
त्वतः सर्वाः कलाः सत्यो मम पात्रात्तु सन्मखाः ॥३४॥
भवन्त्येव भविष्यन्ति कृष्णनारायणाश्रिताः ।
नहि कृष्णवचःकर्त्री त्वादृशी कोमला सती ॥३५॥
सात्त्विकी क्षमया व्याप्ता विना लक्ष्मीं भविष्यति ।
कृष्णवचस्तदेवास्ति व्रतं पतिव्रतं तव ॥३६॥
धर्माधर्मौ कृष्णवाक्ये बन्धमोक्षावपि प्रभो ।
सुखदुःखे कृष्णमूर्तौ पाण्डवाः कृष्णमूर्तयः ॥३७॥
मातस्तेऽस्तु सदा स्वस्ति मा दुःखं वनवासकृत् ।
मन्येथाः सुखरूपाऽसि स्मर कष्टे हरिं च माम् ॥३८॥
करिष्ये सेवनं काले दास्ये साहाय्यमित्यपि ।
महतीनां भवेत्कष्टं क्षुद्रीणां किं भवेत् सती ॥३९॥
खड्गधारसहा राज्यं कुर्वन्ति क्षत्रिया भुवि ।
नहि शृगालतुल्यानां क्षेत्रे स्वल्पं स्वकं भवेत् ॥४०॥

अग्निकष्टं सहेत या साऽग्निवर्चस्कभूषणा ।
भवत्येव हि साऽग्नेस्तु जाया कोट्यर्कवर्चला ॥४१॥
नहि भेकी सिंहपत्नी नहि काकी प्रहंसिका ।
नहि दासी राजपत्नी न रंका धनदाधिपा ॥४२॥
त्वया सर्वं जगत् स्मृद्धं त्वां विना निष्प्रभायते ।
द्रौपदि स्मर गोविन्दं हृत्स्थं स्वामिस्थितं च तम् ॥४३॥
इत्युक्त्वा प्रययौ सूर्यो नत्वा तां स तया नतः ।
द्रौपदी वनमध्ये संसेवते श्रीहरिं पतीन् ॥४४॥
धार्तराष्ट्रेण दुर्वासा ह्यच्युतशिष्यसेवितः ।
प्रेषितः पाण्डवानां तु विनाशमिषहेतवे ॥४५॥
आतिथ्यभोजनं न स्यादयुतानां ततः ऋषिः ।
प्रशप्स्यति पाण्डवांश्च नाशमेष्यन्ति ते ततः ॥४६॥
इत्यभिप्रेत्य विहितो दुर्वासास्तद्वनं ययौ ।
पाण्डुभिः सत्कृतश्चापि भोजनार्थं निवेदितः ॥४७॥
स्नानार्थं स ययौ यावत् सूर्यपात्रं तु तत्तदा ।
प्रक्षाल्य स्थापितं सत्या नैव दास्यति भोजनम् ॥४८॥
नियमोत्तरकाले तु क्षीणमन्नं न वर्धयेत् ।
विनाऽन्नं ऋषिराट् क्रुद्धः प्रशप्स्यति ध्रुवं यतः ॥४९॥
तदा सत्या स्मृतः कृष्णः कृष्णप्रियया योषिता ।
दिव्यरूपः स्वयं कृष्णः समायातः कृपालयः ॥५०॥
वद देवि स्मृतः कस्मादाह कृष्णनरायणः ।
सती प्राहाऽत्रिपुत्रस्य भोजनं किं ददाम्यहम् ॥५१॥
सर्वं रिक्तं तु संजातं भुक्तं मयाऽपि पात्रकम् ।
प्रक्षाल्य रक्षितं स्थाने नास्त्यन्नं कृष्ण माधव ॥५२॥
कृष्णः प्राह सति पात्रं समानय विलोकये ।
आनीतं तत्र पार्श्वे संलग्नं तान्दूलपत्रकम् ॥५३॥
दृष्टं कृष्णेन तत्पत्रं निहितं स्वमुखे तु तद् ।
प्रियतां श्रीविश्वभर्ता ब्रह्माण्डं प्रियतां तथा ॥५४॥
इत्युक्त्वा भगवान् कृष्णश्चखाद तद्दलं शुभम् ।
पपौ जलं ततश्चक्रे समुद्गारं पुनः पुनः ॥५५॥
अहो तृप्तिस्तु मे जाता त्रैलोक्यं तृप्तमेव च ।
दुर्वासास्तदयुतं च शिष्याणां तृप्तमेव च ॥५६॥
उदराणि प्रपूर्णानि जातान्येव हरेः कृतेः ।
यस्य गेहे हरिर्भुङ्क्ते तस्य भुङ्क्ते जगत्त्रयम् ॥५७॥
यस्य गेहे हरिस्तृप्तस्तस्यास्तृप्तं जगत्त्रयम् ।
दुर्वासाः शिष्यसहितो भयं प्राप्तोऽति तृप्तिमान् ॥५८॥
किं भवेन्नैव भोक्ष्यामस्तदा शप्तास्तु योषिता ।
विनंक्ष्यामस्ततस्तत्र गन्तव्यमेव नो त्वितः ॥५९॥

इति विचिन्त्य सहसा स्नानस्थानाद् ययुर्द्रुतम् ।
पलायनपराः सर्वे शिष्याश्च क्रोधनो मुनिः ॥६०॥
पाण्डवाश्चाऽभवन् स्वस्था द्रौपद्यपि विचिन्तना ।
कृष्णश्च सेवितः सर्वैः रक्षाकरहरिर्वने ॥६१॥
यदाऽऽपत् स्यात् सुस्मर्तव्य इत्युक्त्वा प्रययौ प्रभुः ।
एष पतिव्रताधर्मः कृष्णपत्न्यात्मकः सति ॥६२॥
सर्वा वाञ्छन्ति सुभगं सुरूपं यौवनान्वितम् ।
धनाढ्यं स्मृद्धमैश्वर्यान्वितं कीर्तिकरं पतिम् ॥६३॥
तादृशं कृष्णमासाद्य का न सेवेत किंकरी ।
का न कुर्यात् स्वीयजन्मसाफल्यं वै पतिव्रता ॥६४॥
देव्यो गान्धर्व्य आसुर्यो नागपत्न्यो मुनिप्रियाः ।
वल्ल्यो नद्यः क्षमाद्याश्च क्षमाद्याश्च किन्नरस्त्रियः ॥६५॥
मानव्यश्च किंपुंपत्न्यो विद्याधर्यस्तथाऽपराः ।
या या मुमुहुः कृष्णे ताः सर्वाः प्रापुः परं पदम् ॥६६॥
तासां सुखकरः कृष्णो लोके जायते जन्मना ।
जन्म कर्म च दिव्यं तद् दृश्यते न विधीयते ॥६७॥
श्रीहरेर्हरिकृष्णस्य कृष्णनारायणस्य वै ।
राधादीनां रमादीनां जन्मानि योनिजानि न ॥६८॥
यदा यदा स्वयं कृष्णश्चावतरितुमिच्छति ।
ददात्याज्ञां वायुदेवं वस गर्भपुटे स्थिरः ॥६९॥
यथा दृश्यं भवेन्मातुदरं गर्भयुतं शुभम् ।
नवमासान् स्थिरो भूत्वा दशमे मासि चागते ॥७०॥
जन्मकाले त्वया गर्भान्निःसरणीयं बालवत् ।
अहं तदाऽपत्यरूपं बालकं मां विधाय च ॥७१॥
पतिष्यामि भुवो भागे जानीयुर्मां हि जन्मितम् ।
अयोनिजं मम जन्म तथा भवति सर्वथा ॥७२॥
सर्वेषामवताराणामयोनिजं जनुर्मम ।
राधालक्ष्मीरमापद्माश्रीप्रभाकान्तिशारदाः ॥७३॥
माणिकीपार्वतीदुर्गासरस्वतीसतीजयाः ।
पद्मावतीललिताकम्भराद्यास्ता अयोनिजाः ॥७४॥
यदा यदा हि जायन्ते वायुर्गर्भे प्रतिष्ठति ।
दशमे मासि चायाते प्राप्ते कालेऽनिलः स्वयम् ॥७५॥
क्षणं बालस्वरूपो वै भूत्वा योनेर्बहिस्ततः ।
आयात्येव तदा देव्यो भवन्ति बालिकात्मिकाः ॥७६॥
अन्ये यथा न जानीयुस्तथा बाला भवन्ति ताः ।
कथयन्ति जना अज्ञा योनिजा इति तास्तदा ॥७७॥
दिव्यदृष्टिपरास्तास्तु पश्यन्त्ययोनिबालिकाः ।
इदं दिव्यजनुस्तस्य कृष्णस्य तस्य योषिताम् ॥७८॥

संकल्पसृष्टिवत् सृष्टिः कृष्णनारायणस्य वै ।
कामो वीर्यं रतिर्गर्भः सर्वं दर्शनमात्रकम् ॥७९॥
लोकवत्तु तस्य लीलां कैवल्यं चापि लोकवत् ।
लोकाः पश्यन्ति देवास्तु देववद् दिव्यचक्षुषः ॥८०॥
ईश्वरा ईशवत्तद्वै मुक्ताः पश्यन्ति मुक्तवत् ।
स्वः विलोकयति स्वीयं स्ववच्छ्रीपुरुषोत्तमः ॥८१॥
तस्मात् सर्वाः क्रियाः कृष्णे दिव्या दिव्यत्वदायिकाः ।
इतिधर्मान् कृष्णधर्मान् कृष्णपतिपरायणान् ॥८२॥
पतिरूपान् कृष्णभक्तान् संप्राप्य च पतिव्रताः ।
स्वर्गं मोक्षं वृषं कामं चार्थं समर्जयन्ति ताः ॥८३॥
पुत्रं पुत्रीं सुखं दिव्यानन्दं समर्जयन्ति ताः ।
कृष्णार्थं सर्वमेवापि कृत्वाऽर्चयन्ति माधवम् ॥८४॥
कृष्णव्रतं सदा कृत्वा संसेव्य पतिमाधवम् ।
देहं स्वं पतिसात्कृत्वा चाप्नुवन्ति हरेः पदम् ॥८५॥
किं वक्तव्यं प्रिये लक्ष्मि ! जानास्येवेदृशं व्रतम् ।
मद्व्रतं त्वद्व्रतं सर्वं शुभं दाम्पत्यधर्मकम् ॥८६॥
निर्गुणं च परनिर्वाणदं मत्पदनायकम् ।
श्रेष्ठाच्छ्रेष्ठतरं तुभ्यं कथितं मत्प्रिये सति ॥८७॥
या कापि नीचगा चोच्चकुलजा वा तु भामिनी ।
मद्व्रतिर्मत्कृतप्राणा मदर्थार्पितजीवना ॥८८॥
मयोक्तभावसंभिन्ना सेवते मां पतिव्रता ।
हरिव्रता च सा त्वन्ते प्राप्स्यत्येव पतिव्रता ॥८९॥
अस्याऽध्यायस्य संश्रोत्री कर्त्री दर्शितसद्विधेः ।
अर्चयित्री च मे नित्यं प्राप्स्यत्येव सती हि माम् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने द्रौपद्याः सतीत्वेन पातिव्रत्यबलेन वनेऽभोजनकालागतसशिष्यदुर्वाससो द्रौपद्यादिरक्षणं तान्दूलपत्रादनं कृष्णकृतमिति निरूपणनामा द्वाषष्ट्यधिकचतुश्शततमोऽध्यायः ॥ ४६२ ॥

श्रीनारायण उवाच—

आकर्णय महालक्ष्मि ! प्रभे ! पार्वति ! पद्मजे ।
सरस्वति ! रमे ! कृष्णे ! माणिकि ! कम्भरे सति ! ॥ १ ॥
दुर्गे ! राधे ! शारदे ! च वृन्दे ! तुलसि ! चाब्धिजे ! ।
पद्मावति ! पाण्डवेशि ! सावित्रि ! रुक्मिणी ! प्रिये ॥ २ ॥
विनतायास्तथा कद्र्वाः कथां पूर्वभवां परां ।
दक्षदत्ते कश्यपाय कद्रूश्च विनता तथा ॥ ३ ॥

पतिव्रते महासाध्व्यौ स्वामिसेवापरायणे ।
कृष्णनारायणभक्ते कामरूपधरे शुभे ॥ ४ ॥
कृष्णार्थं च तपस्यन्त्यावास्तामपत्यवाञ्छने ।
कद्र्वाः सर्पाः सुता जाताः कामरूपधराः शुभाः ॥ ५ ॥
काद्रवेया गणास्ते वै कृष्णा रक्ता हरिद्गुणाः ।
पिशंगाः पीतरक्ताश्च कपिशाश्चित्रकास्तथा ॥ ६ ॥
श्वेता नीलास्तथा सूक्ष्मा मध्या दीर्घाः प्रदीर्घकाः ।
नागाः सरीसृपाः कद्रूसुताः कद्रूपिणोऽभवन् ॥ ७ ॥
श्यामाश्च शबलाश्चापि तथाऽर्जुनाश्च धूम्रकाः ।
मिश्रवर्णास्तुलालाब्वः कोटिशो नागजातयः ॥ ८ ॥
अथासूतोलूकताक्ष्यार्ऽरुणादीन् विनता सुतान् ।
उलूको राज्यमाप्यापि ज्येष्ठत्वात् पक्षिणां ततः ॥ ९ ॥
निर्गुणत्वाच्च तैः सर्वैः स राज्यादवरोपितः ।
क्रूराक्षश्च दिवान्धश्च सदा वक्रनखोऽशुभः ॥१०॥
वाणी त्वस्योद्वेजिकेति नाऽयं राज्यसमर्हणः ।
अथ त्वराजके राज्ये वर्तन्ते स्वैरचारिणः ॥११॥
पक्षिणश्चेति राजार्थे पुत्रवीक्षणलालसा ।
अण्डं प्रास्फोटयामास मध्यमं विनता तदा ॥१२॥
यद्वै पक्वं भवेद् वर्षसहस्रे पूर्णतां गते ।
तदभेदि तयौत्सुक्यादण्डमष्टमके शते ॥१३॥
तावत् सर्वाणि गात्राणि सन्ति पूर्णानि नैव हि ॥१४॥
स तु गर्भोऽभवत् क्रुद्धोऽर्धवर्ष्मसिद्धिभेदने ।
क्रोधेन शिशुना माता शापिता त्वविचार्य यत् ॥१५॥
मातृस्त्वयाऽर्धदेहान्तर्गतमण्डं विभेदितम् ।
रदनिष्पन्नसर्वांगः शपामि त्वां सुताऽहिताम् ॥१६॥
यतो दृष्ट्वा काद्रवेयान् तन्मातुरंकलालितान् ।
अधैर्येणाऽण्डमेतन्मे स्फोटितं तन्मिषात्त्वया ॥१७॥
पुत्रं प्राप्य द्रुतं त्वंके लालयामीति चेहया ।
ततस्त्वमेधि दासीत्वं सपत्न्या वै विहंगमे ॥१८॥
इति श्रुत्वा सुतदत्तं शापं माता शुचान्विता ।
प्राहाऽनूरो ब्रूहि शापस्याऽन्तं पुत्र शुभं कुरु ॥१९॥
अनूरुः प्राह मा भिन्धि तृतीयाऽण्डमपूर्णकम् ।
तृतीयेऽण्डे भविष्यन् यः स शापं वारयिष्यति ॥२०॥
इत्युक्त्वा मातरं नत्वोड्डीयाऽनूरुर्ययौ वनम् ।
सूर्यमाराध्य तपसा वरं लब्ध्वा प्रभाकरान् ॥२१॥
सूर्येण रक्षितो यन्त्रे रव्यश्वान् वाहयत्ययम् ।
अरुणस्योदयः पूर्वं पश्चात् सूर्योदयः कृतः ॥२२॥
अथ वर्षसहस्रे तु पूर्णेऽण्डं तु तृतीयकम् ।
स्वयं भिन्नं ततो जातो गरुडः सूर्यसदृशः ॥२३॥
पतंगोऽपि बहिः साक्षादण्डान्निःसृत्य शावकः ।
क्षुधार्थी मातरं प्राह भक्ष्यं मे दीयतामिति ॥२४॥
दृष्ट्वाऽऽह माता क्षुधितं गरुडं तु महाबलम् ।
क्षुधां शमयितुं पुत्र न शक्नोमि तदन्ततः ॥२५॥
तव तातः कश्यपोऽस्ति मेरौ तिष्ठति तं व्रज ।
स दास्यति भोजनं ते क्षुधा ते शममेष्यति ॥२६॥
मातुर्वचः समाकर्ण्य ययौ यत्र स कश्यपः ।
प्रणम्य शिरसा वाक्यमुवाच पितरं खगः ॥२७॥
सुतस्ते गरुडश्चाऽहं मात्रा विनतयेरितः ।
क्षुधया पीडितस्तात भक्ष्यं मे दीयतां प्रभो ! ॥२८॥
ज्ञात्वा सुतं तमुवाच कश्यपः स्नेहप्रह्वणः ।
अनेकशतसाहस्रा निषादाः पयसां निधेः ॥२९॥
तीरे वसन्ति मत्स्यादास्तांस्त्वं भक्ष सुखी भव ।
विना विप्रं निषादेषु देहयात्रां प्रवर्तय ॥३०॥
इत्युक्तः प्रययौ तत्र गत्वा चखाद तांस्ततः ।
अलक्ष्यभावो विप्रोऽपि गिलितस्तेन पक्षिणा ॥३१॥
अथ जातो गले वह्निर्जज्वाल कण्ठमध्यमम् ।
वमितुं गिलितुं वापि न शशाक स पक्षिराट् ॥३२॥
गत्वाऽथ पितरं प्राह कण्ठाऽन्तर्मेऽनलः पितः ।
करोति दहनं शश्वल्लग्नः कश्चिज्जनोऽन्तकृत् ॥३३॥
कश्यपः प्राह भो पुत्र भवेद् विप्रोऽन्यथा न तत् ।
इत्युक्त्वा कश्यपो विप्रं समाजुहाव वै बहिः ॥३४॥
विप्रः प्राह विहायैतान्न निर्गच्छामि भो पितः ।
गिलिताः सुहृदः केचित् प्रियाः सम्बन्धिनस्तथा ॥३५॥
एतैः सह प्रयास्यामि निरयं वा सुखं हरिम् ।
श्रुत्वा तु विस्मितः प्राह कश्यपः पतितं द्विजम् ॥३६॥
निषादैः सह सम्बन्धं चापावानसि तत्ततः ।
निरयं त्वेव गन्ताऽसि पापियोगाद्धि पापवान् ॥३७॥
अज्ञानाद् यदि वा मोहात्कृत्वा पापं सुदारुणम् ।
ततो धर्मं चरेच्चेत् स यायाद्वै परमां गतिम् ॥३८॥
पापकृन्न वृषं कुर्यात् कुर्यात्पापं पुनस्तदा ।
निमज्जति महाघोरे निरये ते गतिस्तथा ॥३९॥
निर्गच्छ वा मृतिं याहि कण्ठे मा तिष्ठ भूसुर ।
श्रुत्वा कश्यपवाक्यं स सम्बन्धिव्रतवान् द्विजः ॥४०॥
उवाच कश्यपं स्पष्टं शृणु तात हितं मम ।
यद्यप्यस्मि द्विजो जात्या निषादी मेऽस्ति कामिनी ॥४१॥

निषादा मे श्यालकाश्च श्वशुरश्चापरे तथा ।
निगिलिता गरुडेन मृतास्ते त्वस्य जाठरे ॥४२॥
पावनस्य तु योगेनाऽपावनं पावितं भवेत् ।
विप्रयोगेन ते सर्वे तव योगात्तु पावनाः ॥४३॥
गरुडगर्भयोगेन पावितास्ते विशेषतः ।
सम्बन्धित्रतवाँश्चाहं पातिव्रत्यपरायणः ॥४४॥
निर्मुक्ताः स्युश्च ते सर्वे जीविताः स्युः पितर्मम ।
निर्गच्छामि तदा कण्ठादन्यथा मरणं ध्रुवम् ॥४५॥
बन्धुजीवः प्राणान्तो वा प्रतिज्ञा सुदृढा मम ।
कश्यपस्तत्समाकर्ण्य श्रेयोऽर्थे त्वाह पक्षिणम् ॥४६॥
उद्वमैतान् सविप्रांश्च निषादानपि सर्वशः ।
इत्युक्तो गरुडश्चैतानुद्ववाम निषादकान् ॥४७॥
ते वै दिक्षु विदिक्षु सम्वसन्ति पक्षिहिंसकाः ।
गरुडकुक्कुटहंसपारावातादिभक्षकाः ॥४८॥
कलौ सर्वे मिलिष्यन्ति त्वेकाहारे प्रजाजने ।
जातिभेदो यदा नैव स्थास्यत्यदनलग्नयोः ॥४९॥
अथापि क्षुधया युक्तो ययाचे भक्ष्यमुत्तमम् ।
कश्यपेन तदादिष्टो ययौ सागरसन्निधौ ॥५०॥
तत्र दृष्ट्वा महासत्त्वौ नैकयोजनविग्रहौ ।
कूर्मगजौ नखैर्भित्वोत्पपाताऽऽकाशमुज्ज्वरः ॥५१॥
मेरौ दृष्ट्वा जम्बुशाखां निषसाद महत्तमाम् ।
भग्नां शाखां गजकूर्मौ गृहीत्वोड्डीय चाम्बरे ॥५२॥
सत्यलोकं ययौ ब्रह्मसदनं यत्र माधवः ।
कृष्णनारायणो विष्णुः स्तुतस्तत्र समागतः ॥५३॥
हरिः प्राह कथं व्योम्नि भ्रमसि त्वं खगेश्वर ।
विधृत्य महतीं शाखां महान्तौ गजकच्छपौ ॥५४॥
गरुडस्तु हरिं प्राह काश्यपो विनतासुतः ।
गरुडोऽहं गजकूर्मौ गृहीत्वा जम्बुभूरुहम् ॥५५॥
गतः स मेरुवृक्षोऽपि भग्नस्तिष्ठामि कुत्र वै ।
भक्षितुं क्षुधितश्चास्मि क्व यामि वद मे प्रभो ॥५६॥
मम भारं तथा वेगं सहन्ते न द्रुमादयः ।
पर्वताश्चापि कम्पन्ते ग्रहाः क्षुभ्यन्ति चाम्बरे ॥५७॥
इत्युक्तो भगवानाह तिष्ठ बाहौ ममात्र वै ।
क्षुधां कुरु प्रशान्तां त्वं भक्षेमौ गजकच्छपौ ॥५८॥
इत्युक्तो गरुडो बाहौ पपात श्रीहरेस्तदा ।
शाखां त्यक्त्वा महाब्धौ च चखाद गजकच्छपौ ॥५९॥
क्षुधा तथापि शान्ता न ततः प्राह हरिस्तु तम् ।
भुजस्य मम मांसं त्वं भक्षयित्वा सुखी भव ॥६०॥
इत्युक्तो भुजमांसं स खादित्वा तृप्ततां गतः ।
तथापि न व्रणो बाहौ जातश्चेति विलोक्य सः ॥६१॥
हरिं प्राह प्रियं किं ते करिष्यामि वद प्रभो ।
हरिः प्राह भव मे वाहनं त्वं सार्वकालिकम् ॥६२॥
अवध्यः सर्वभूतेषु भव त्वं चाऽजराऽमरः ।
सर्वत्र ते गतिश्चास्तु कर्म तेजश्च मत्समम् ॥६३॥
आहारं लप्स्यसे पूर्णं मातृव्यसनतनाशनात् ।
इत्युक्तः स ययौ पक्षी पितरं कश्यपं प्रति ॥६४॥
प्रष्टुं चाज्ञां ग्रहीतुं चाऽकथयत् पितरं च सः ।
प्रहृष्टात्मा कश्यपस्तु तनयं प्राह सद्वचः ॥६५॥
धन्योऽहं जननी धन्या धन्यं कुलं सुपुत्रवत् ।
यस्य पुत्रो विष्णुभक्तः कुलकोटिप्रमोचकः ॥६६॥
क्षयात्तु सर्वपापानां विष्णोः किंकरतां व्रजेत् ।
विष्णुर्यस्य भवेत् प्रीतः सोऽपि स्यात्पुरुषोत्तमः ॥६७॥
पुत्रः पत्नी सुता गौश्च कृष्णार्थं यस्य विद्यते ।
धन्यः स देहवानत्र पूतं यस्य कुटुम्बकम् ॥६८॥
तपोभिर्बहुभिर्धर्मैर्मखैर्नानाविधैरपि ।
विष्णुर्न लभ्यते देवैस्त्वया लब्धो हरिः स वै ॥६९॥
मातरं त्वं सेवयित्वा गच्छ विष्णोः परं पदम् ।
इति त्वाज्ञां गृहीत्वा स शीघ्रं जगाम मातरम् ॥७०॥
नत्वा तु मातरं स्वल्पशरीरेण स बालकः ।
कामरूपधरो भूत्वा रेमे जहर्ष सन्निधौ ॥७१॥
कद्रूवास्तु किंकरीभूत्वा स्थितां दृष्ट्वा तु मातरम् ।
पप्रच्छ गरुडस्तत्र कारणं वद मेऽम्बिके ॥७२॥
माता प्राह शृणु पुत्र प्राग्वृत्तं कथयामि ते ।
कद्र्वा सह यः संजातः पणस्तं त्वं निबोध मे ॥७३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कश्यपात् कद्रूप्रजाः सर्पाः, विनतायामुलूकस्याऽरुणस्य गरुडस्योत्पत्तिः, गरुडेन भक्षिताः सविप्रशबरा उद्वमिताः, विष्णुभुजपललं भक्षितम्, विष्णोर्वाहनं वरदानं चेत्यादिनिरूपणनामा त्रिषष्ट्यधिकचतुश्शततमोऽध्यायः ॥४६३॥

श्रीनारायण उवाच—

पुरा कद्रूश्च विनता दक्षपुत्र्यौ तु योषितौ ।
कश्यपस्य धर्मपत्न्यौ क्रीडन्त्या वेकदा शुभे ॥ १ ॥
उच्चैःश्रवासः सूर्याश्वाः शबला धवला नु वा ? ।
किंरूपाः स्युरितिवादं चक्राते कश्यपगृहे ॥ २ ॥

कद्रूरुवाच विनते गतिस्ते व्योम्न्यखण्डिता ।
ततः सर्वं विजानासि वद रूपं नु कीदृशम् ॥ ३ ॥
पणं च कुरु कल्याणि तुभ्यं यो रोचतेऽनघे ।
विनतोवाच कल्याणि किं पणेनात्र दक्षजे ॥ ४ ॥
पणे तु नावयोः सौख्यं पणोऽन्यतरदुःखकृत् ।
इति ज्ञात्वा पणो नैव कर्तव्यः स्नेहहानिकृत् ॥ ५ ॥
त्वज्जये का च मे हानिर्मे जये का च ते क्षतिः ।
ध्रुवमेकस्या विजयेऽन्यस्यास्त्ववनतिर्भवेत् ॥ ६ ॥
एवमेव कथयामि विना पणेन तत् स्वसः ।
कद्रूः प्राह सदा खेलव्यवहारे पणं विना ॥ ७ ॥
आस्वादो मानसो नैव रसो नापि प्रजायते ।
तस्मात् पणं पुरस्कृत्य रमन्ते खेलकारिणः ॥ ८ ॥
बाला अपि मृषा पणं कुर्वन्ति च हसन्ति च ।
रमन्ते कालयानार्थं पणं कुरु ततो वद ॥ ९ ॥
विनताऽऽह यथा प्रीतिस्तवाऽत्र वै ।
अथ कद्रूः शठा धूर्ता पणरूपं जगाद ह ॥१०॥
तस्यास्तु सा भवेद् दासी पराजीयेत् या यया ।
अस्मिन्पणे त्विमाः सर्वाः सख्यः साक्षिण्य एव नौ ॥११॥
पणीकृत्य तथा कद्रूः कर्बुरं प्राह वाजिनम् ।
विनता धवलं प्राह ततो ययतुः स्वालयम् ॥१२॥
कद्रूः कृष्णसुतान् सर्पानाहूय प्राण तत्पणम् ।
उवाच यात सत्पुत्रा द्रुतं मम निदेशतः ॥१३॥
श्वेतं तं वाजिनं पुत्रा वल्गत प्रतिरोमकम् ।
कृष्णवर्णः प्रदृश्येत कल्मषयेत सर्वतः ॥१४॥
इति श्रुत्वा वचो मातुः केचनाऽऽहुः स्वमातरम् ।
वयं नैव गमिष्यामो मृषा दोषभयान्विताः ॥१५॥
अन्येऽपि तु तथा प्राहुर्दोषो विश्वासनाशनम् ।
अनृतं नरकद्वारं दोषं कुर्मो न तद् वयम् ॥१६॥
अपरेऽपि स्वबन्धूनां स्नेहं मातृस्वसुस्तथा ।
पुरस्कृत्य निषेधं तत्कार्येऽकुर्वन् नयान्विताः ॥१७॥
तान्सर्वानुरगी कद्रूः शशाप क्रोधशेवधिः ।
तार्क्ष्यभक्ष्याः सदा सन्तु ये मद्वचोविरोधिनः ॥१८॥
इति शापप्रदग्धास्ते ययुः पातालमाश्रयम् ।
अथान्ये बालकास्त्वासन् मातृस्नेहसमाकुलाः ॥१९॥
त मत्वा मातृवचनं ययुः सूर्याश्वमम्बरे ।
ववल्गिरे परितोऽश्वं चक्रुर्नीलं सुकर्बुरम् ॥२०॥
अथ सूर्यस्य तापेन दग्धास्ते त्वाययुर्गृहम् ।
मातरं प्राह तत्सर्वं तदा कद्रूस्तु राहुकम् ॥२१॥

समाहूय समर्च्याऽपि सूर्यतापविनाशकम् ।
सुयोजनं समादिश्य पर्वणि राहुणाऽऽवृतम् ॥२२॥
गत्वा सर्पा अर्कवाहं ववल्गिरे समन्ततः ।
विनतापृष्ठमारुह्य कद्रूर्ययौ दिवं यदा ॥२३॥
ताभ्यां तुरंगमोऽदर्शि कर्बुरो नीलवर्णकः ।
विनता प्राह धवलो मया व्यलोकि वै मुहुः ॥२४॥
तव भाग्योदयादश्वः कर्बुरोऽद्य विलोक्यते ।
अस्तु यथा तथा भावि भाग्यं केन निवार्यते ॥२५॥
विधिर्बलीयान् सर्वत्र श्वेतं नीलायतेऽपि यत् ।
अदृष्टं यादृशं यत्र भोग्यत्वेनोपतिष्ठति ॥२६॥
प्रतिकूलं प्रजायेत् सानुकूलमपि द्रुतम् ।
इति दृष्ट्वा नीलमश्वं पराभूता हि पक्षिणी ॥२७॥
कद्रूगृहस्थिता नित्यं तस्या दास्यं सदाऽकरोत् ।
गरुडस्तां तथाभूतां दृष्ट्वा दासीं स्वमातरम् ॥२८॥
प्राह मातः कथं त्वेतद्दास्यं वै प्रोह्यते त्वया ।
धिक् तान्सुतान्बलिष्ठाँस्तु यन्माता त्वन्यकिंकरी ॥२९॥
पुत्रोत्पत्तिस्तदर्था वै या पित्रोः परिपोषिका ।
पुत्रैरपोषिता माता गर्दभ्या तुलनायते ॥३०॥
सत्सु सत्सु पुत्रेषु गर्दभी भारवाहिनी ।
धिक् तान् पुत्राँस्तु यन्माता तेषु जीवत्सु दुःखिनी ॥३१॥
वरं वन्ध्यात्वमेवाऽस्या यत्सुता वन्ध्यकर्मिणः ।
क्लेशितं जननीजठरं येन माता न मोदते ॥३२॥
माता लक्ष्मीर्जन्मदात्री निजस्वत्वप्रदायिनी ।
सा दुःखात् तारिता यैर्न तेषां जन्म निरर्थकम् ॥३३॥
मयि सत्त्वे बलिष्ठे च यदि माताऽतिदुःखिनी ।
किं बलं मे प्रशस्तं वै नारकं तत् स्मृतं बलम् ॥३४॥
अपि पापकृतः पुत्रा यदि रक्षन्ति मातरम् ।
तरन्ति मातृतीर्थेन सेवया तोषितेन तें ॥३५॥
न यज्ञा न व्रतं जाप्यं दानं न चापि दक्षिणा ।
मातृसेवाशतांशत्वं प्राप्नुवन्ति कदाचन ॥३६॥
अपि विघ्नसहस्राणि यमदूताऽयुतानि च ।
थियन्ति दूरतो मातुः सेवयाऽऽशीर्भिरेव हि ॥३७॥
इतिपुत्रवचः श्रुत्वा विनता भक्तबालकम् ।
प्रोवाचाऽहं पुरा दास्यं कद्र्वाः प्राप्ताऽस्मि वै पणे ॥३८॥
अश्वः सूर्यस्य धवलो मयोक्तश्च तया ततः ।
कर्बुर इत्यभिहितस्ततस्तत्पुत्रकैः खलु ॥३९॥
गत्वाऽश्वश्चित्रितः कृष्णश्चाहं दासीत्वमागता ।
यस्मिन् काले ह्यभीष्टं च तस्या द्रव्यं ददामि चेत् ॥४०॥

तदा दासीत्वविगमं प्राप्स्ये पृच्छ तु सर्पिणीम् ।
गरुडो विनतां नत्वा कद्रूं नत्वा पुनः पुनः ॥४१॥
पप्रच्छ मातृदासीत्वमोक्षदं कद्रुकां हि सः ।
कद्रूः प्राह सुधां देहि भवेद् दासीत्वमोक्षणम् ॥४२॥
गरुडस्तत्समाकर्ण्य समापृच्छ्य तु मातरम् ।
संस्मृत्य श्रीकृष्णनारायणं ययौ स कश्यपम् ॥४३॥

तं जगाद सुधार्थे स्वयात्रां तं प्राह कश्यपः ।
स्वर्गलोकस्य वै चोर्ध्वे निधानं देवभोजनम् ॥४४॥
अमृतं वर्तते देवभृत्यैश्चक्रेण रक्षितम् ।
गच्छ शीघ्रं कृष्णनारायणं स्मृत्वा जयो भवेत् ॥४५॥
जगामाकाशमाविश्य गरुडः पितृवाक्यतः ।
यत्राऽमृतनिधानं तद्दृष्ट्वा मुमोद भक्तराट् ॥४६॥
कृष्णनारायणं स्मृत्वा कोशाध्यक्षान् ददर्श सः ।
पक्षवातेन तान्सर्वान् विधूय सर्वशो बली ॥४७॥

ददर्श कर्तरीयन्त्रममृतोपरि संस्थितम् ।
भ्रममाणं बहुवेगात् सुदर्शनसमं महत् ॥४८॥
अपि स्पृशन्तं कमपि भेदयत्येव खण्डशः ।
क्षणं विचार्य गरुडः सूक्ष्माणुत्वमुपागतः ॥४९॥
यद्यहं मातृभक्तोऽस्मि कृष्णनारायणाऽनुगः ।
तदा मे रक्षणं त्वत्र करोतु भगवान् स्वयम् ॥५०॥
जरितौ पितरौ यस्य बालापत्यश्च निर्धनः ।
साध्वी भार्या च तत्पुष्ट्यै दोषोऽकृत्येऽपि तस्य न ॥५१॥

मातुर्विप्रस्य बालस्य गोः पत्न्याश्च गुरोरपि ।
जीवदानस्य हेत्वर्थे त्वकृत्ये नास्ति दूषणम् ॥५२॥
एवं कृत्वा तु चक्रस्य ह्यधोभागस्थितां सुधाम् ।
विलोक्य कलशे भृत्वा पीत्वाऽपि मृत्युनाशिनीम् ॥५३॥
ततश्चक्रं योगबलात् पिन्छेनोत्पाट्य कीलकात् ।
भ्रमिहीनं मन्दवेगं स्थिरं कृत्वा तु यावता ॥५४॥
सुधाकुंभेन सहितः समुद्गच्छति तावता ।
रक्षकास्तं विलोक्यैव दुद्रुवुः पाशहस्तकाः ॥५५॥
पक्षवातेन तान् सर्वान् मूर्छयित्वाऽतिवेगतः ।
बहिर्यातो निधेस्तस्मात् तावत्सुरेश्वरादयः ॥५६॥
दूतस्मृतास्तत्र तूर्णं युद्धाय त्वाययुः रुषा ।
महेन्द्रस्तं सहेतिर्वै प्राह कस्त्वं सुधाहरः ॥५७॥
तिष्ठ तिष्ठ महाबाहो वज्रेण सूदयामि वै ।
श्रुत्वा वाक्यं हरेस्तत्र चुकोप गरुडस्तदा ॥५८॥
पराक्रमं दर्शयस्व नयामि गरुडोऽमृतम् ।
इत्युक्तश्चेन्द्र एवैनं वज्रेण प्रजघान ह ॥५९॥

कुलिशस्याऽतिपातेऽपि न वै क्षुब्धो महाबलः ।
स्वं मोघं कुलिशं दृष्ट्वा भीतश्चेन्द्रस्तमाह यत् ॥६०॥
यदि दास्यसि पीयूषमिदानीं नागमातरि ।
भुजंगास्त्वमराः सर्वे क्रियन्ते तु त्वया खग ॥६१॥
प्रतिज्ञा ते भवेन्नष्टा भोजनं ते न वै भवेत् ।
तस्मान्मा तां सुधां देहि कद्रूं कुरु न चामृताम् ॥६२॥

इतिश्रुत्वाऽऽह गरुडो नयामि सुरराट् सुधाम् ।
दास्ये कद्रूं च माता मे स्याददासी ततः परम् ॥६३॥
शीघ्रं त्वया प्रहर्तव्या सुधा न पानतां व्रजेत् ।
तथास्त्विति हरिः प्राह ययौ कद्रूं च पक्षिराट् ॥६४॥
दत्वा दास्यं विनिर्धूय मातुः स निर्ऋणोऽभवत् ।
अथ सर्पांश्च कद्रूं च प्राह वै पक्षिराट् स्वयम् ॥६५॥
अशुद्धौ नहि पातव्या सुधा त्वशुद्धतां व्रजेत् ।
रससामर्थ्यहीना स्यात् स्नात्वाऽतश्च पिबन्तु ताम् ॥६६॥

इत्युक्तास्ते ययुः स्नातुं शक्रो जहार तां सुधाम् ।
आगत्य भुजगैर्नैव दृष्टं त्वमृतभाजनम् ॥६७॥
कुशास्तम्बे यत्र पात्रं स्थापितं त्वासीदेव तत् ।
पर्यलिहंस्ततस्तेषां जिह्वाः कुशैर्द्विधाऽभवन् ॥६८॥
तदा तु चुक्रुशुः सर्पास्त्वमृतार्थे समुत्त्रणाः ।
इन्द्रेण तु तदा त्वन्यः कलशः कृत्रिमः कृतः ॥६९॥
यत्र विषं सुधारंगं प्रच्छन्नं निहितं कृतम् ।
तदादाय पपुः सर्वे बिन्दुमात्रं विभागशः ॥७०॥

तानुवाच प्रसूः पुत्रान् युष्मन्मुखे सदा सुताः ।
बिन्दवः खलु तिष्ठन्तु नो लोपः स्यात् कदाचन ॥७१॥
इत्याशीर्वादमाप्तास्ते सर्पा ययुर्निजं गृहम् ।
दृष्टास्त्वमृतभ्रान्त्या ते नागाः प्रमुदितास्त्वथ ॥७२॥
ताँस्तान् गरुडः क्षुधितश्चखाद बलवाँस्ततः ।
पलायितास्तु ते नागा पर्वतादिष्ववस्थिताः ॥७३॥
एवं स गरुडः स्वस्य मातरं किंकरीपदात् ।
मोचयित्वा गृहीत्वा च पित्रोराशीर्वचांसि सः ॥७४॥

ययौ वैकुण्ठलोकं संवाहात्मको हरेरभूत् ।
हरेर्दास्यं सदा प्राप्तो विष्णुवत्पूज्यतां गतः ॥७५॥
यन्माता विनता चापि भक्तपुत्रप्रसूर्यतः ।
कश्यपस्य सदा मान्या ह्यभवत् सत्यसंस्थिता ॥७६॥
अमृतादाः सुताश्चासन् विनतायाः सतीस्त्रियाः ।
शठाया विषवक्त्रायाः कद्रूवास्त्वासन् सुताः शठाः ॥७७॥
तस्माल्लक्ष्मि सदा पाल्यं पातिव्रत्यं हरौ मयि ।
स्वप्रतापेन तेषां वै दूरयामि दुरन्तकम् ॥७८॥

पितृभक्तिर्मातृभक्तिर्गुरोर्भक्तिश्च तारिणी ।
पतिभक्तिः पुत्रभक्तिः सतीभक्तिः सुतारिणी ॥७९॥
भृत्यभक्तिर्देवभक्तिर्भार्याभक्तिश्च तारिणी ।
साधुभक्तिः कृष्णभक्तिर्मोक्षदा मम धामनि ॥८०॥
सर्वदेहिष्वहं त्वस्मि त्वया शक्त्या सह ध्रुवः ।
इति मत्वा मम भक्तिं कुर्याद् देहिषु देहिभिः ॥८१॥
समर्पयेत् कृतं सर्वं मय्येव त्वान्तरस्थिते ।
मत्प्रसादात्मकं मत्वा भक्तो भुञ्जीत नाऽन्यथा ॥८२॥
नार्यां नरे पशौ वृक्षे वल्ल्या जडे च चेतने ।
कृष्णनारायणो भोक्ता भोग्यं च सर्वमेव सः ॥८३॥
इति मत्वा तु यो देही भुंक्ते यत् तद्धि निर्गुणम् ।
पातिव्रत्यमिदं प्रोक्तं मयि सर्वात्मना मया ॥८४॥
एवं कृत्वा व्रतं देहि मुच्यते नात्र संशयः ।
पठनाच्छ्रवणात् त्वस्य पातिव्रत्यफलं लभेत् ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कद्रूविनतयोः सूर्याश्वस्य कर्बुरत्वं श्वैत्यं वेति पणे कद्रूशाठ्येन विनताया दासीत्वस्य गरुडेन प्रमार्जनं कृतमित्यादिनिरूपणनामा चतुःषष्ट्यधिकचतुश्शततमोऽध्यायः ॥ ४६४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महासाध्वीं लीलावतीं पतिप्रियाम् ।
काशीराजदिवोदासगृहिणीं संशितव्रताम् ॥ १ ॥
दिवोदासोऽभवत् कृष्णपार्षदो धामवासकृत् ।
भक्तिप्रवर्तनायाऽत्र भुवि कृष्णनिदेशतः ॥ २ ॥
मानुषस्त्वभवद्राजा महाभागवतः प्रिये ।
तस्य भक्तिः सदा कृष्णनारायणे तु निर्मला ॥ ३ ॥
आसीन्निष्कामरूपा वै कृष्णप्रसन्नताप्रदा ।
लीलावती हरेः पत्नी दासी गोलोकवासिनी ॥ ४ ॥
सखी लक्ष्म्याः सदा पार्श्ववर्तिनी कृष्णकामिनी ।
कृष्णाज्ञया सती साध्वी सुराष्ट्रेशसुताऽभवत् ॥ ५ ॥
तस्या जन्मनि देवेन्द्राः ऋषयो मुनयः स्त्रियः ।
देव्यो गन्धर्वविद्याध्रा ईशाश्च मनवस्तथा ॥ ६ ॥
आययुस्तद्गृहं त्वाशीर्वादान् ददुः शुभावहान् ।
पुष्पवृष्टिं तदा चक्रुर्देवा जगुश्च योषितः ॥ ७ ॥
ननृतुश्चाप्सरसस्तु महोत्सवः शुभोऽभवत् ।
जातमात्राऽथ सा कन्या चतुर्भुजा क्षणं शुभा ॥ ८ ॥
अदृश्यत वरारोहा सुन्दरी कमला यथा ।
क्षणान्तरेऽभवत् कन्या जाता सूतकशायिनी ॥ ९ ॥
अथ योग्ये वयस्यस्या विवाहं त्वकरोन्नृपः ।
पृथिवीजिन्महाराजस्तदा वै विष्णुपार्षदाः ॥१०॥
काशीस्थास्तु शंकरस्य सर्वे कोटिगणादयः ।
समाजग्मुर्विवाहेऽस्या लीलावत्याः समन्ततः ॥११॥
आशीर्वादान् ददुस्ते च देवा देव्योऽतिहर्षिताः ।
काशीं ययौ विमानेन दिवोदासयुता सती ॥१२॥
तदा देवैः पुष्पवृष्टिः कृता विमानमस्तके ।
दम्पती वर्धयामासुः शंकराद्याश्च वैष्णवाः ॥१३॥
दम्पत्योश्चाऽभवत्पुत्रः समरंजयसंज्ञकः ।
ततः पञ्चशतं त्वासीत्पुत्राणां धर्मवर्तिनाम् ॥१४॥
दिवोदासोऽपि राजेन्द्रः कुमारं समरंजयम् ।
अभिषिच्य महाबुद्धिर्ययौ दिग्विजयाय सः ॥१५॥
महासतीं रथे नीत्वा लीलावतीं पतिव्रताम् ।
दाक्षिणात्यान्नृपान् जिग्ये लीलावत्याः प्रभावतः ॥१६॥
प्राग्ज्योतिषां नृपान् जिग्ये हिमपर्वतभूभृतः ।
उत्तरस्थान्पश्चिमस्थान् जित्वा काशीमगाद्धि सः ॥१७॥
प्रासादं कारयामास स्वर्धून्याः पश्चिमे तटे ।
रिपून् प्रमथ्य समरे यावती श्रीरुपार्जिता ॥१८॥
तावत्या सह भूपालो देवालयानकारयत् ।
भूपाललक्ष्मीरखिला यत्तत्र विनियोजिता ॥१९॥
तन्मध्ये श्रीकृष्णनारायणार्चा स्थापिता शुभा ।
शंभुश्च स्थापितः पार्श्वे ब्रह्मा पार्श्वान्तरेऽपि च ॥२०॥
अन्ये देवाः स्थापिताश्च राज्ञा सतीप्रतुष्टये ।
लीलावती महालक्ष्मीमन्दिरं चाप्यचीक्लृपत् ॥२१॥
लीलावत्याश्चमत्कारं कथयामि शृणु प्रिये ।
लीलावती प्रगे स्नात्वा करोति देवपूजनम् ॥२२॥
पत्युश्च पूजनं नित्यं करोत्येव विधानतः ।
एकदा चिन्तयामास प्रथमं कस्य पूजनम् ॥२३॥
कर्तव्यं योषिता पतिव्रतया प्रातरेव तु ।
इतिसंशयमापन्ना सस्मार कमलेश्वरम् ॥२४॥
लक्ष्मीपतिः सह लक्ष्म्या प्राययौ प्रसमुज्ज्वलः ।
सत्कृतो वन्दितो देव्या पूजितः पृष्ट इत्यपि ॥२५॥
कस्य वै पूजनं पूर्वं मया कार्यं कृपानिधे ।
भगवान् श्रीप्रेरितश्च प्राह तूर्णं पतिव्रताम् ॥२६॥
पातिव्रत्यं परो धर्मः पत्युः पूजा विशिष्यते ।
पतिर्द्वेधा शरीरस्य चात्मनश्चेति सुन्दरि ॥२७॥

उभयस्य पतिः श्रेष्ठः पूज्यः पूर्वं त्वया सति ।
लीलावती प्रसन्नाऽभूत् परीक्षामकरोत् ततः ॥२८॥
शरीरस्य पतिः कोऽस्ति चात्मनश्च पतिर्हि कः ।
उभयस्य पतिः को वै तदाकर्णय पद्मजे ॥२९॥
पतिर्धातुः शरीरस्य शरीरं पाति रक्षति ।
धातुक्षये क्षयस्तस्य तद्रक्षणं पतिव्रतम् ॥३०॥
ब्रह्मचर्यव्रतं पतिव्रतं नरस्य योषिताः ।
अनेन ब्रह्मशीलेन पातिव्रत्येन पद्मजे ॥३१॥
ब्रह्मलोकात्परं लोकं यान्ति शीलव्रताः प्रजाः ।
संन्यासिनां यतीनां च त्यागिनां ब्रह्मचारिणाम् ॥३२॥
कन्यकानां च बालानां वृद्धानां नरयोषिताम् ।
यूनां चापि धातुरक्षा दम्पतीनां व्रतं तथा ॥३३॥
नियमेन यथा रक्षा यथाऽपत्यजनिर्भवेत् ।
व्यर्थव्ययो यथा नैव पातिव्रत्यं तु तत् सदा ॥३४॥
मोक्षदं वंशदं स्वर्गप्रदं देहेऽपि पुष्टिकृत् ।
पातिव्रत्यं व्रतं ज्ञेयं द्वितीयं चापि तच्छृणु ॥३५॥
देहं पाति सदा पुष्ट्या यदन्नं तत्पतिर्भवेत् ।
अन्नाद् भूतानि जायन्ते जीवन्त्यभिविशन्ति तत् ॥३६॥
अन्नं ब्रह्म विजानीयादुपास्यं पद्मशङ्कैः ।
संविभज्य प्रदातव्यं चात्तव्यं च ततः परम् ॥३७॥
या निन्द्यादन्नमेवात्र देवाय प्राक् समर्पयेत् ।
ऋषिभ्यः पितृभ्यश्चाथ गोभ्यो भृत्येभ्य इत्यतः ॥३८॥
पतये स्वामिने चापि तृप्तिदं ब्रह्म चार्पयेत् ।
अन्नं पतिर्व्रतं तस्य पातिव्रत्यं सदान्नतम् ॥३९॥
पातिव्रत्यं त्वन्नसत्रं स्वर्गो मोक्षश्च तेन वै ।
अन्नेऽपि भक्षते लक्ष्मि यदि प्राणो न तिष्ठति ॥४०॥
तदा शवो भवेद् देहस्तस्मात् प्राणस्तृतीयकः ।
पतिरूपः सदा प्रोक्तः प्राणव्रतं समाचरेत् ॥४१॥
वृद्धानां चापि पूज्यानामागमे स्वगृहे सति ।
उत्थातव्यं समीपे च गन्तव्यं तान्नमेत्तथा ॥४२॥
अनुत्थाने स्वयं प्राणः समुत्तिष्ठन्ति वै बलात् ।
आयुःक्षयस्तथा स्याच्च तस्मात्प्राणान् सुरक्षयेत् ॥४३॥
वृद्धानां यत् सदा मानं प्राणव्रतं तु तत्स्मृतम् ।
पातिव्रत्यं हि पत्यर्थे तत्प्राणव्रतमाचरेत् ॥४४॥
श्वश्रूश्वशुरयोः पित्रोः स्वामिनश्च तपस्विनः ।
विदुषां त्यागिनां श्रेष्ठजनानां च गुरोः स्त्रियाः ॥४५॥
राज्ञां देवस्य साध्वीनां गुणिनां नाऽवमाननम् ।
प्राणव्रतं हि तत्प्रोक्तं पातिव्रत्यं महत्तरम् ॥४६॥
पालयेत् तत् सदा साध्वी स्वर्गो मोक्षश्च तत्करे ।
चतुर्थं तु शृणु लक्ष्मि मानसं हृदयं सदा ॥४७॥
वासनाकोटि विक्षिप्तं कामक्रोधादिसंभृतम् ।
रागद्वेषभृतं नित्यं लोभमोहाद्यधिश्रितम् ॥४८॥
सात्त्विकं चेन्मनस्तद्वै पाति रक्षति देहिनम् ।
स्थाने स्याच्चेन्मनस्तस्य यशः सर्वत्र जायते ॥४९॥
विचित्तं चेन्मनस्तस्य प्रमत्तस्य क्षयो भवेत् ।
मनो वाजी सुमार्गस्थः स्वर्गं मोक्षं ददाति च ॥५०॥
स एव रक्षणकर्ता पतिः प्रोक्तोऽत्र कोटरे ।
मनस्तस्मान्निगृहीतं पतिरूपं प्ररक्षति ॥५१॥
तद्व्रतं वै पातिव्रत्यं रागद्वेषादिवर्जनम् ।
मायाया वासनायाश्च मिथ्याकामस्य वर्जनम् ॥५२॥
पातिव्रत्यं चतुर्थं तन्मनो ब्रह्मसमर्चनम् ।
मनो ब्रह्म विजानीयादुपासीत मनोव्रतम् ॥५३॥
पञ्चमं तु शृणु लक्ष्मि ज्ञानं रक्षति देहिनम् ।
देहस्य रक्षणं ज्ञानं विज्ञानं धर्मरक्षकम् ॥५४॥
अर्थकामप्रदं ज्ञानं विज्ञानं चात्मबोधकम् ।
विज्ञानं रक्षकं पाति रक्षत्येव शुचःस्थले ॥५५॥
यावद्देहवतां पाता विज्ञानं पतिरेव सः ।
विज्ञाने नैव रक्षन्ति त्वात्मानं प्राणिनः प्रिये ॥५६॥
तस्मात् पतिः सुविज्ञानं बालकेऽपि स्तनन्धये ।
रक्ष्यं ज्ञानव्रतं पातिव्रत्यं कथाप्रसंगतः ॥५७॥
कृष्णकथामृतास्वादग्रहणं तत्पतिव्रतम् ।
पतिर्देवः पतिः कृष्णः पतिर्ज्ञानं तु शार्ङ्गिणः ॥५८॥
आराधना सदा कार्या देवोपास्तिसमन्विता ।
पातिव्रत्यं व्रतं तद्धि स्वर्गमोक्षप्रदं परम् ॥५९॥
शृणु लक्ष्मि तथा षष्ठं व्रतं त्वानन्दसंज्ञकम् ।
सर्वे सदा महाविज्ञाः स्वल्पज्ञाश्च तृणादयः ॥६०॥
अभिलषन्ति चानन्दं सुखं स्नेहं प्रमोदनम् ।
उत्सवं च समुत्साहं तेन जीवन्ति जन्तवः ॥६१॥
आनन्देन तु भूतानि प्रजायन्तेऽपि तेन ते ।
जीवन्त्यपि तथा मृत्युं यान्त्यानन्दार्थमेव च ॥६२॥
तस्मात्पाति सदाऽऽनन्दो जीवान् रक्षति वै पतिः ।
आनन्दः स परब्रह्म विजानीयात् पतिं परम् ॥६३॥
आनन्दे तु सदा मुक्तास्तिष्ठन्ति योगिनोऽपि च ।
आनन्दं तत्परब्रह्म पतिः पतिव्रतं तु तत् ॥६४॥
पातिव्रत्यं महालक्ष्मि! ज्ञात्वा त्वेतत् समाचरेत् ।
देहस्यैते पतयो वै क्वचिदात्मनि वै मनाक् ॥६५॥

पञ्चभूतात्मके देहे कान्तात्मके च ते सदा ।
तिष्ठन्त्येव स्त्रियाश्चापि पातिव्रत्यं निजं निजम् ॥६६॥
स्वामिनस्तु तथा पत्न्यां तिष्ठन्त्येते निजेऽपि च ।
एतद् विज्ञाय वै धर्मस्वरूपं व्रतमाचरेत् ॥६७॥
अथात्मनः शृणु लक्ष्मि पातिव्रत्यं वदामि ते ।
श्रवणं कीर्तनं कृष्णस्मरणं कृष्णसेवनम् ॥६८॥
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
विश्वासो वरणं न्यासः कार्पण्यं निश्चलप्रधीः ॥६९॥
आनुकूल्यं सदा कृष्णे परमात्मनि माधवे ।
स एव रक्षिता पाताऽऽनन्दयिताऽविता हरिः ॥७०॥
तद्व्रतं सर्वथा त्वात्मार्पणं सर्वार्पणात्मकम् ।
नैतादृशं व्रतं किञ्चित् स्वर्गदं मोक्षदं च वा ॥७१॥
स्वर्गदं सर्वकृच्चापि यत्र शेषं न विद्यते ।
यत्र नास्ति क्षतिः काचिद् यत्र बन्धो न विद्यते ॥७२॥
यत्र नास्ति व्ययः कश्चिदलाभो नास्ति वै प्रिये ।
एतत्पतिव्रतं कृत्वाऽसंख्यात्मानो दिवं गताः ॥७३॥
यान्ति यास्यन्ति वै त्वन्ये नरा नार्यस्तथेतराः ।
आत्मा ब्रह्म पतिः सोऽयं परब्रह्मव्रतान्वितः ॥७४॥
शाश्वतव्रतवाँश्चाऽयं पातिव्रत्यपरायणः ।
इत्युक्तानि सति तुभ्यं पातिव्रत्यानि सर्वथा ॥७५॥
लीलावत्यै मयोक्तानि श्रुत्वा साऽऽश्चर्यगर्विता ।
क्षणं ध्यात्वा विदित्वैव कान्ते विवाहिते निजे ॥७६॥
द्वेधा चक्रे पातिव्रत्यं दिवोदासे सती सदा ।
ब्रह्मचर्यं दिवोदासे प्रथमं सा पतिव्रतम् ॥७७॥
अन्नार्पणं दिवोदासे द्वितीयं सा पतिव्रतम् ।
प्राणार्पणं दिवोदासे तृतीयं सा पतिव्रतम् ॥७८॥
मनोऽर्पणं दिवोदासे चतुर्थं सा पतिव्रतम् ।
ज्ञानमात्रं दिवोदासे पञ्चमं सा पतिव्रतम् ॥७९॥
आनन्दं च दिवोदासे षष्ठं चापि पतिव्रतम् ।
पालयित्वा सती लीलावती पतिमपूजयत् ॥८०॥
देहस्य पातिव्रत्यं वै दिवोदासे तदात्मनि ।
आत्मस्थे श्रीहरौ स्वस्यात्मनश्चापि पतिव्रतम् ॥८१॥
पालयामास सा साध्वी पूजयामास तं पतिम् ।
स्वामिने साऽर्पयामासोपचारान् षोडशापि हि ॥८२॥
आत्मने चार्पयामास स्वात्मानं लीनभावतः ।
आत्मात्मनि स्थितायान्तर्यामिणे सर्वमेव सा ॥८३॥
अर्पयामास भावेन ददर्श तत्र तं हरिम् ।
दिवोदासे दिव्यरूपं श्रीकृष्णं परमेश्वरम् ॥८४॥
पत्यौ पतिं परं दृष्ट्वा प्रमुमोद सती तदा ।
साक्षात् कृष्णस्वरूपं स्वस्वामिन्यपश्यदञ्जसा ॥८५॥
भौतिकेन तु नेत्रेण दिवोदासं ददर्श सा ।
दिव्येनाऽऽन्तरनेत्रेण श्रीकृष्णं तं ददर्श सा ॥८६॥
एवं प्राप्य परां दिव्यां दृष्टिं लीलावती सदा ।
पातिव्रत्येन धर्मेण योगं सिद्धिं च शाश्वतीम् ॥८७॥
योगिनामप्यलभ्यां संप्रापत् कृष्णप्रसादतः ।
अन्तेऽक्षरं पदं लेभे तेनैव दिव्यवर्ष्मणा ॥८८॥
सार्धं स्वस्वामिना वंशेनापि सत्प्रजया तथा ।
इति ते कथितं लक्ष्मि ! दिव्यं पतिव्रतं शुभम् ॥८९॥
सर्वा आत्मनिवेदिन्यस्तथा कृत्वाऽक्षरं पदम् ।
प्राप्नुवन्ति न सन्देहः कृष्णनारायणं पतिम् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने काशीनृपतिदिवोदासपत्न्या लीलावत्या अनेकविधदिव्यपातिव्रत्यचमत्कारेण श्रीकृष्णनारायणपददास्यप्राप्त्यादिनिरूपणनामा पञ्चषष्ट्यधिकचतुश्शततमोऽध्यायः ॥ ४६५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! धर्मपत्न्याः पातिव्रत्यपरायणाम् ।
कथां काशीपञ्चगंगातीर्थकरीं सुपावनीम् ॥ १ ॥
काश्यां पञ्चनदं तीर्थमध्यास भगवान् स्वयम् ।
भुर्भुवःस्वःप्रदेशेषु तीर्थं पञ्चनदं परम् ॥ २ ॥
स्थितः कृष्णः स्वयं तत्र तीर्थे पञ्चनदे परे ।
पुरा वेदशिरा नाम महासंयमतापसः ॥ ३ ॥
भृगुवंशमुनिरासीत् तपस्यानिरतः सदा ।
युवानं तं समालोक्य शुचिनाम्न्यप्सरोवरा ॥ ४ ॥
चकमे तेन ऋषिणा स्खलितं सा पपौ शुचिः ।
शुचिं वेदशिराः प्राह धार्मिकं दोषवर्जितम् ॥ ५ ॥
शृणु साध्वि ! यौवनस्य विकृतिः सर्वदेहिषु ।
जायते सा न दोषाय कामवर्जितदेहिनः ॥ ६ ॥
स्वाभाविकं निर्मनस्कं धातूनां स्खलनं सति ।
तपोभंगाय नैवाऽस्ति स्नानेन शुद्धिरिष्यते ॥ ७ ॥
किन्तु ते मनसि त्वस्ति भावना बीजलब्धये ।
तेन धातुः स्रवितो मे विना मैथुनसंचरात् ॥ ८ ॥
तस्माद् धारय गर्भे त्वं यं त्वं पीतवती प्रिये ।
देवपत्नी यथेष्टं वै कर्तुं शक्नोति सर्वथा ॥ ९ ॥

अमोघबीजा मुनयो मम बीजात्तव प्रिये ।
कन्यारत्नं वैष्णवाग्र्यं भविष्यति पतिव्रतम् ॥१०॥
इत्युक्ता साऽऽश्रमे तस्य तस्थौ प्रसववाञ्छया ।
अथ कालेन दिव्यस्त्रीकन्यारत्नमजीजनत् ॥११॥
अतीव भासुरं नेत्रानन्ददं रूपशेवधिम् ।
दत्वा पुत्रीं ययौ स्वर्गं शुचिनाम्न्यप्सरोवरा ॥१२॥
तां तु वेदशिराः कन्यां स्नेहेन समवर्धयत् ।
हरिण्याः स्वाश्रमस्थायाः स्तन्येन पयसा मुनिः ॥१३॥
मुनिर्नाम ददौ तस्या धूतपापेति सार्थकम् ।
दशवर्षोत्तरां कन्या दृष्ट्वा पप्रच्छ तां मुनिः ॥१४॥
कस्मै दद्यां वराय त्वां त्वमेवास्याहि ये शुभे ।
श्रुत्वा पितुः शुभं वाक्यं प्रोवाच भक्तिमानसा ॥१५॥
सर्वेभ्योऽतिपवित्रो यो यः सर्वेषां नमस्कृतः ।
सर्वे यमभिलष्यन्ति यस्मात् सर्वसुखोदयः ॥१६॥
कदाचिद्यो न नश्येद्वै यः सदैवानुवर्तते ।
इहामुत्रापि यो रक्षेन्महापद्भ्यः स्वरूपवान् ॥१७॥
सर्वे मनोरथा यस्मात् प्रपूर्णाः संभवन्ति मे ।
दिने दिनेऽतिसौभाग्यं वर्धते यस्य सेवया ॥१८॥
नैरन्तर्येण यत्पार्श्वे भयं कस्यापि नैव मे ।
यन्नामग्रहणाच्चापि बाधा लीयन्त उत्कटाः ॥१९॥
यदाधारेण तिष्ठन्ति ब्रह्माण्डान्यपि सृष्टिषु ।
एवमाद्या गुणा यत्र तस्मै मां देहि शर्मणे ॥२०॥
एतच्छ्रुत्वा मुनिश्चातिप्रसन्नो मुदमाप ह ।
धन्योऽस्मि यद्गृहे पुत्री धार्मिकी कुलतारिणी ॥२१॥
धूतपापा सार्थनाम्नी धन्येयं ज्ञानशेवधिः ।
अनया वर्णितः कोऽत्र भवेद्वै सद्गुणोदयः ॥२२॥
वरं तं धर्मदेवाख्यं मन्ये तस्मै ददामि ताम् ।
परं स सुखलभ्यो न सर्वसद्गुणमण्डनः ॥२३॥
तपःपणेन स क्रय्यो बहुपुण्येन वा क्वचित् ।
विचार्येत्थं सुतां प्राह कन्ये वरोऽस्ति तादृशः ॥२४॥
नार्थभारैः स सुलभो न कौलीन्येन कन्यके ।
न चैश्वर्यबलेनापि न बुद्ध्या न पराक्रमैः ॥२५॥
मनःशुद्ध्येन्द्रियशुद्ध्या तपसा दमनेन च ।
लभ्यते स महाप्राज्ञो नान्यथा सदृशः पतिः ॥२६॥
इतिपितृवचः श्रुत्वा पितरं प्रणिपत्य च ।
अनुज्ञां तु पितुर्लब्ध्वा तेपे तपः सुदारुणम् ॥२७॥
कठोरं वर्ष्म संसाध्य वर्षाधारासु सा स्थिता ।
शिलासु हिमपातेषु न चकम्पे मनागपि ॥२८॥

पञ्चाग्नीन् परिधायाऽपि तपस्यति तपोवने ।
जलाभिलाषिणी बाला जलं नैवाऽपिबत् तदा ॥२९॥
अपास्तभोगसंपर्का वाय्वाहाराऽभवत् सती ।
कृशाऽतितपसा क्षामा दिदीपे तत्तनुस्तराम् ॥३०॥
ब्रह्मा त्वागत्य तामाह प्रसन्नोऽस्मि वरं वृणु ।
धूतपापा नमस्कृत्योवाच श्रीपरमेष्ठिनम् ॥३१॥
पितामह पवित्रेभ्यः कुरु मामतिपावनीम् ।
तुष्टो ब्रह्मा च तामाह संपवित्राणि यानि वै ॥३२॥
तेभ्योऽधिकं सुपावित्र्यमेधिमद्वरदानतः ।
तिस्रः कोट्योऽर्धकोटि च सन्ति तीर्थानि कन्यके ॥३३॥
अष्टषष्टिप्रधानानि श्रेष्ठानि तेषु सन्ति च ।
तानि सर्वाणि तीर्थानि त्वत्तनौ प्रतिलोम वै ॥३४॥
वसन्तु मम वाक्येन भव सर्वातिपावनी ।
कल्पान्तरे तु मूर्तिस्त्वं भविष्यसि न संशयः ॥३५॥
धर्मदेवप्रिया पत्नी हरेर्माता तु दक्षजा ।
इत्युक्त्वाऽन्तर्दधे ब्रह्मा ययौ सापि पितुर्गृहम् ॥३६॥
ज्ञात्वा वेदशिराः सर्वं तुतोष तपसा मुहुः ।
सापि नित्यं धर्ममूर्तिं संविधाय चतुर्भुजाम् ॥३७॥
षोडशवस्तुभिर्दिव्यां प्रातर्नित्यमपूजयत् ।
पातिव्रत्येन धर्मेण सर्वं वृषाय चार्पयत् ॥३८॥
स्वप्ने धर्मं धूतपापा ददर्श नित्यमेव सा ।
कदाचिद् धर्मदेवः सः साक्षादागत्य तं मुनिम् ॥३९॥
ययाचे कन्यकां योग्यां मुनिस्तस्मै ददौ ततः ।
कन्या चन्द्रसमा कान्तिमती धर्मं प्रसेवते ॥४०॥
अथ तत्र महाक्षेत्रे धूतपापा महासती ।
अदृश्येन स्वरूपेण धर्मगृहे विराजते ॥४१॥
द्वितीयेन स्वरूपेण चन्द्रकान्तमणिः स्वयम् ।
भूत्वा जले तु गंगाया राजते सा तपस्विनी ॥४२॥
धर्मदेवोऽपि तु धर्मनदो भूत्वा जलान्तरे ।
चन्द्रकान्तशिलायुक्तो राजते वै दिवानिशम् ॥४३॥
धर्मस्य मन्दिरे दिव्यस्वरूपेणापि राजते ।
एवं काश्यां तु गंगायां धर्मो धर्मनदोऽभवत् ॥४४॥
धूतपापाऽभवत् स्वल्पा नदी चापि नदान्विता ।
अथ सूर्यः समागत्य तप उग्रं चचार ह ॥४५॥
किरणेभ्यः प्रववृते महास्वेदजसन्ततिः ।
ततः सा किरणा नाम नदी जाताऽतिपावनी ॥४६॥
अथ तत्र समायाता सरस्वती महासती ।
यमुना गंगया युक्ता तत्र तिष्ठति पावनी ॥४७॥

किरणा धूतपापा च यमी गंगा सरस्वती ।
पञ्चनद्यो महासत्यो नदो धर्मनदाह्वयः ॥४८॥
मिलिताः सर्वं एवैतास्तीर्थे पञ्चनदात्मकम् ।
पञ्चगंगेतिनाम्ना वै प्रसिद्धं सर्वथाऽभवत् ॥४९॥
तत्र स्नात्वा जलं पीत्वा मुच्यते सर्वबन्धनात् ।
दत्वा पञ्चनदे दानं कृत्वा वै पितृतर्पणम् ॥५०॥
बिन्दुमाधवमभ्यर्च्य न भूयो जन्मभाग् भवेत् ।
पञ्चकूर्चेन पीतेन या तु शुद्धिरुदाहृता ॥५१॥
सा शुद्धिः श्रद्धया प्राश्य बिन्दुं पाञ्चनदाम्भसः ।
पुरा धर्मनदं नाम ततश्च धूतपापकम् ॥५२॥
ततो वै बिन्दुतीर्थं तत् ततः पञ्चनदाह्वयम् ।
गोभूतिलहिरण्याऽश्ववासोऽन्नस्रग्विभूषणम् ॥५३॥
यत्किंचिद् बिन्दुतीर्थेऽत्र दत्त्वाऽक्षयमवाप्नुयात् ।
तत्राऽऽगत्य वह्निबिन्दुस्तपस्तेपेऽतिदारुणम् ॥५४॥
कृष्णनारायणः साक्षादागत्याह वरं वृणु ।
अग्निबिन्दुर्हरिं प्राह वसाऽत्र मम सन्निधौ ॥५५॥
तथाऽस्त्विति हरिः प्राह निवासं चाऽकरोन्मुदा ।
बिन्दुमाधवसंज्ञोऽहं वसामि तत्र पञ्चजे ॥५६॥
धर्मदेवगृहे पुत्रो बिन्दुमाधवसंज्ञकः ।
नित्यं वसामि दिव्योऽहं धूतपापासुपुत्रकः ॥५७॥
धूतपापा जननी मे पिता धर्मो मम प्रिये ।
अहं माधवरूपश्च वसामो बिन्दुतीर्थके ॥५८॥
वसुस्वरूपिणी लक्ष्मीलक्ष्मीर्निर्वाणसंज्ञिका ।
धर्मपार्श्वे स्थिता सा मे हृदि पञ्चनदेऽप्यहम् ॥५९॥
व्रतैः संशोधिते देहे धर्मो वसति नित्यशः ।
कृष्णश्चापि धूतपापा श्रीश्च वसन्ति सर्वथा ॥६०॥
अर्थकामौ सनिर्वाणौ तत्र वसतः सर्वदा ।
आदिमाधवनामाऽहं ततश्चानन्तमाधवः ॥६१॥
श्रीदमाधवसंज्ञोऽपि ततो वै बिन्दुमाधवः ।
एवं नामभिः सर्वेशः स्थास्याम्यानन्दकानने ॥६२॥
मम माता धर्मपत्नी धूतपापा पतिव्रता ।
श्रीधर्मं सेवते नित्यं पातिव्रत्यपरायणा ॥६३॥
पञ्चनदे महापुण्ये दिव्ये श्रीधर्ममन्दिरे ।
नरा नार्यश्च तत्क्षेत्रे स्नात्वा कृत्वा वृषार्चनम् ॥६४॥
धूतपापार्चनं कृत्वा माधवस्य ममार्चनम् ।
धर्मप्रतिज्ञां कृत्वा च चातुर्मास्यव्रतादिकम् ॥६५॥
कृत्वा कार्तिकदानादि व्रती मोक्षमवाप्नुयात् ।
धर्मपत्न्यस्तथा तत्र वसन्ति धर्मसेवने ॥६६॥
द्वितीयेन स्वरूपेण सर्वा विश्वस्य मातरः ।
श्रद्धालक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ॥६७॥
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदश ।
ताश्च सर्वा धर्मसेवां कुर्वन्त्येव सह स्थिता ॥६८॥
पातिव्रत्यपराः सर्वा यत्र धर्मस्तु तत्र ताः ।
धूतपापा विशेषेण सेवते श्रीवृषं पतिम् ॥६९॥
प्रातः स्नात्वा तु सा देवी प्रातः स्नापयति वृषम् ।
वस्त्रालंकारकस्तूरीचन्दनाक्षतकुंकुमैः ॥७०॥
पूजयित्वा ततो देवी नीराजयति तं पतिम् ।
प्रदक्षिणां स्तुतिं कृत्वा नत्वा तत्पादयोः सती ॥७१॥
गंगाजलेन धर्मस्य प्रक्षाल्य चरणावुभौ ।
आचमनामृतं शुद्धं पीत्वा दत्वा सुमाञ्जलिम् ॥७२॥
ततो धर्माय षट्पञ्चाशन्मिष्टान्नानि भोजने ।
सव्यञ्जनानि रस्याऽऽद्यपेययुक्तानि सा प्रिया ॥७३॥
समर्पयति ताम्बूलं करोति देहमर्दनम् ।
नृत्यं करोति धर्माग्रे कीर्तिं करोति शार्ङ्गिणः ॥७४॥
नरनारायणगाथां करोति धर्मदेशतः ।
सपत्नीनां ततः सेवां श्रद्धादीनां करोति सा ॥७५॥
कृष्णनारायणभक्तिं धर्माज्ञया करोत्यपि ।
एकदा श्रीधर्मदेवश्चातुर्मास्यव्रते स्थितः ॥७६॥
लक्ष्मीनारायणसंहितायाः पारायणं शुभम् ।
वाचयामास सततं तीर्थे पञ्चनदे गृहे ॥७७॥
ऋषयो मुनयो देवाः पितरो मानवाः स्त्रियः ।
चतुर्दशभुवां संस्थाश्चायातास्तत्र तूत्सवे ॥७८॥
नद्यो नदाश्च तीर्थानि क्षेत्राणि विविधान्यपि ।
सर्वेषां मुनिवासादि धूतपापा चकार ह ॥७९॥
धूतपापा सती प्राह यद्यहं धर्मचारिणी ।
धर्मपत्नी धर्मधर्त्री धर्मपतिव्रतार्थिनी ॥८०॥
तदा दिव्यं सुनगरं पंचाशत्क्रोशविस्तृतम् ।
ब्रह्मेन्द्रशंभुमुख्यानां सम्पदो यास्तु सन्ति वै ॥८१॥
ततोऽधिकानि मे सौधे खाद्यपेयानि सन्ति वै ।
यानवाहनभोग्यानि शय्याशृंगारकाणि च ॥८२॥
पात्राणि रसभोज्यानि दृश्यानि विविधानि च ।
वह्निशुद्धांशुकादीनि सन्तु मत्पतिसद्गृहे ॥८३॥
दधिकुल्या घृतकुल्या मधुकुल्याः सिताद्रयः ।
पयःकुल्यास्तथा दासा दास्यः सन्तु च लक्षशः ॥८४॥
इतिसंकल्पितं स्मृत्वा धर्मस्य चरणाम्बुजम् ।
तावद् दिव्या बहुविधाः समृद्धयः क्षणतोऽभवन् ॥८५॥

स्वर्णरत्नविभूषाश्च हीरकाद्या मणिव्रजाः।
समुद्भूता धूतपापासंकल्पात् तन्नदान्तिके ॥८६॥
सुधर्मासदृशी दिव्या सभा जाता क्षणात् प्रिये।
दुर्गा सरस्वती लक्ष्मीः सावित्री राधिका दया ॥८७॥
जया ललिता माणिक्या रमा पद्मा च पार्वती।
प्रभा हंसा च मनसा मंजुला श्रीश्च पद्मिनी ॥८८॥
शान्तिः शान्ता हेमलता देवी मुक्ता च मौक्तिका।
आसन् वै सेविका धर्मगृहे तत्र कथोत्सवे ॥८९॥
लक्ष्मीनारायणसंहिताकथाश्रवणकारिणाम्।
स्वागतादिमहत्कार्ये भोज्यपेयसमर्पिकाः ॥९०॥
कार्तिके च प्रबोधन्यां कथान्ते पूजनं परम्।
धर्मदेवस्य तैः सर्वैः सर्वाभिश्च कृतं महत् ॥९१॥
अनन्तपुण्यदं रत्नस्वर्णहीरकवस्तुभिः।
धर्मोऽपि दक्षिणाः सर्वा ददौ ताभ्यो मुदान्वितः ॥९२॥
देवेभ्यः श्रोतृवर्गेभ्यो विप्रेभ्योऽतिधनं ददौ।
तत्र यज्ञे समायातः कृष्णनारायणो हरिः ॥९३॥
कंभरा च महालक्ष्मीर्गोपालकृष्ण आगतौ।
विमानेन तदा सर्वैः प्रत्यक्षे पुरुषोत्तमे ॥९४॥
पुष्पवृष्टिः कृता दिव्या जयकारोऽभवन्मुहुः।
पितृभ्यां सहितः कृष्णनारायणो महामखे ॥९५॥
दशांशहवनं चक्रे धर्माज्ञयाऽतिभावतः।
यज्ञं समाप्य विधिवत् कृत्वाऽवभृथमन्तिमम् ॥९६॥
धर्मदेवो ददौ दिव्यां दक्षिणां च द्विजातये।
काशीराजो मैथिलेशः साकेतेशः कलिंगराट् ॥९७॥
सौराष्ट्रेशो मरुस्वामी सिन्धुभूपो निपालराट्।
कुरुक्ष्मेशः श्वेतभूपः प्राग्ज्योतिर्भूप आर्चयन् ॥९८॥
धर्मदेवं भूसुरांश्च साधून् साध्वीः सहस्रशः।
स्वर्णहीरकरूप्याणि ददुर्वस्त्राणि दक्षिणाः ॥९९॥
व्यसर्जयत् ततः सर्वान् भोजयित्वा समर्च्य च।
धर्मदेवः परीहारं चक्रे स्वतेजसा सती ॥१००॥
धूतपापा जलं हस्ते गृह्याऽसंकल्पयन् मुदा।
विग्रहं धर्मदेवस्य स्वामिनो मे प्रतुष्टये ॥१०१॥
सर्वं क्लृप्तवती तर्हि पत्युर्भक्तेर्बलेन मे।
अदृश्यं भवतु सौधादिकं स्मृद्धं नदे मयि ॥१०२॥
इति संकल्पिते तूर्णं क्षणात् सर्वं तिरोऽभवत्।
जग्मुराश्चर्यमति वै देवाद्याः कोटिशो जनाः ॥१०३॥
पातिव्रत्यप्रतापं तं ज्ञात्वा शशंसुरादरात्।
तां सतीं धूतपापां वै देव्यः शशंसुरीश्वरीम् ॥१०४॥
एवं पञ्चनदं तीर्थं धर्मदेवाश्रमात्मकम्।
पावनं सर्वदेवानां धूतपापाप्रभावतः ॥१०५॥
धूतपापापतिव्रतबलं ते कथितं प्रिये।
पठनाच्छ्रवणाच्चास्य मुक्तिर्भुक्तिर्भवेत्तथा ॥१०६॥
पातिव्रत्यात्मको धर्मो भवेद्वै मोक्षदो दृढः।
सर्वसम्पत्प्रदश्चापि धर्मभक्तिप्रदस्तथा ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने वेदशिरसः ऋषेः शुचिनाम्न्यप्सरसि जाताया धूतपापाख्य-कन्याया धर्मदेवपतिप्राप्त्या मूर्तिदेवीत्वं, पञ्चनदे संहिता-कथाप्रसंगे पातिव्रत्यबलेन पंचाशत्क्रोशेषु नगररचना, देवादिभूपादिमानवादीनामागमः, यज्ञोऽवभृथं चेत्यादि, नूतनगरस्मृद्धितिरोभावचमत्कारश्चेति-निरूपणनामा षट्षष्ट्यधिकचतुश्शत-तमोऽध्यायः ॥ ४६६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! कलावत्या वृषभानोस्तु योषितः।
पतिव्रतायाः सामर्थ्यं प्रवदामि महोत्तमम् ॥ १ ॥
पितृणां मानसी कन्या कमलांशा कलावती।
सुन्दरी वृषभानस्य पतिव्रतपरायणा ॥ २ ॥
यस्यास्तु तनया राधा कृष्णप्राणाधिका प्रिया।
श्रीकृष्णार्धांशसम्भूता तेन तुल्या च तेजसा ॥ ३ ॥
बभूवुः कन्यकास्तिस्रः पितृणां मानसात्पुरा।
कलावती रत्नधन्या मेनका च दिनान्तरे ॥ ४ ॥
रत्नधन्या तु जनकं वरयामास भूभृतम्।
हिमाचलं हरेरंशं वरयामास मेनका ॥ ५ ॥
रत्नधन्यासुता सीता रामपत्नी पतिव्रता।
मेनापुत्री सती शंभुपत्नी च पार्वती तथा ॥ ६ ॥
अयोनिसंभवे चोभे पतिव्रते रमे शुभे।
कलावती सुचन्द्रं तु वरयामास सत्पतिम् ॥ ७ ॥
मनुवंशीयनृपतिं प्राप्य वर्षसहस्रकम्।
रेमे राज्ये ततो राजा संविरक्तो बभूव ह ॥ ८ ॥
जगाम तपसे विन्ध्यशैलं सह स्वयोषिता।
पुलहाश्रममासाद्य तपस्तेपेऽतिदारुणम् ॥ ९ ॥
मोक्षाकांक्षी निराहारो दिव्यवर्षसहस्रकम्।
समाधिमाप नृपतिर्ध्यात्वा कृष्णपदाम्बुजम् ॥१०॥
तद्गात्रव्याप्तवल्मीकं पत्नी दूरं चकार सा।
निश्चेष्टितं पतिं दृष्ट्वा प्राणाऽसञ्चारविग्रहम् ॥११॥

मांसशोणितशून्यं तमस्थिसंसक्तविग्रहम् ।
शोकं चकार सा राज्ञी सा रुरोद कलावती ॥१२॥
हे नाथनाथेत्युच्चार्य पातिव्रत्यपरायणा ।
श्रुत्वा तु रोदनं तस्याः कृपया स कृपालयः ॥१३॥
आविर्बभूव जगतां पितामहो ह्यजः स्वयम् ।
ब्रह्मा तां च नृपं चापि विलोक्य शोकमाप ह ॥१४॥
ततः कमण्डलुजलेनासिच्य नृपविग्रहम् ।
जीवं संचारयामास ब्रह्मशक्त्या स विश्वसृट् ॥१५॥
राजा तु पुरतो दृष्ट्वा जगद्धातारमेव तम् ।
प्रणनाम प्रतुष्टाव प्रसन्नवदनेक्षणम् ॥१६॥
ब्रह्मा नृपं समुवाच वरं वृणु यथेप्सितम् ।
राजा वव्रे तु निर्वाणं नित्यमोक्षं परं पदम् ॥१७॥
श्रुत्वा ब्रह्मा वरं दातुमुद्यतस्त्वभवद् यदा ।
कलावती महासाध्वी ब्रह्माणमाह सादरम् ॥१८॥
यदि मुक्तिं नृपेन्द्राय ददासि कमलोद्भव ।
ततोऽबलाया हे ब्रह्मन् का गतिर्मे विना धवम् ॥१९॥
विना कान्तं तु कान्तानां का शोभा विधवात्मनि ।
व्रतं पतिव्रतायाश्च पतिरेव श्रुतौ मतम् ॥२०॥
गुरुश्चाभीष्टदेवो हि तपोधर्ममयः पतिः ।
सर्वे वै बान्धवाः श्रेष्ठाः पतितुल्या न योषिताम् ॥२१॥
सर्वेषां तु प्रियतमो बन्धुर्न स्वामिनः परः ।
सर्वधर्मात् परा ब्रह्मन् पतिसेवा सुदुर्लभा ॥२२॥
व्रतं दानं तपः पूजा जपहोमादिकं तु यत् ।
स्वामिसेवाविहीनायाः सर्वं तन्निष्फलं भवेत् ॥२३॥
सर्वतीर्थेषु च स्नानं तथा पृथ्व्याः प्रदक्षिणा ।
सर्वयज्ञेषु दीक्षा च महादानव्रतानि वै ॥२४॥
वेदानां पठनं चापि यावन्त्यपि तपांसि च ।
सतामर्थे भोजनं च विप्रार्चा देवसेवनम् ॥२५॥
चातुर्मास्यतपःकृच्छ्रचान्द्रायणादिकं तथा ।
एतानि स्वामिसेवायाः कलां नार्हन्ति षोडशीम् ॥२६॥
स्वामिसेवाविहीना या वदन्ति स्वामिने कटु ।
पतन्ति कालसूत्रे ता यावच्चन्द्रदिवाकरौ ॥२७॥
सर्पाश्च कृमयस्तत्र दंशन्ति ता दिवानिशम् ।
मूत्रश्लेष्मपुरीषाणां भक्षणं कारयन्ति ताः ॥२८॥
तासां मुखे ददत्येवमुल्कास्तु यमकिंकराः ।
एवं वै यातना भुक्त्वा कृमियोनिं प्रयान्ति ताः ॥२९॥
भक्षन्ति तत्र मलिनं यान्ति मानुषतां ततः ।
इतिश्रुतं मया सद्यो वेदवाक्येभ्य इत्यतः ॥३०॥
किं वदामि जगद्धातर्न जानाम्यबला यतः ।
त्वं पिता जगतां धाता योगी गुरुः सतां सदा ॥३१॥
सर्वज्ञं किं बोधयामि मा वियोजय मां पितः ।
प्राणाऽधिकोऽयं कान्तो मे यदि मुक्तो बभूव ह ॥३२॥
मम को रक्षिता ब्रह्मन् धर्मस्य यौवनस्य च ।
कौमारे रक्षिता तातो दत्त्वा पात्राय मुच्यते ॥३३॥
लग्नेन रक्षिता कान्तो यावज्जीवति वै पतिः ।
तदभावे सुतो रक्षेत् त्रातारस्ते त्रयः स्मृताः ॥३४॥
अरक्षके सती साध्वी त्वन्याश्रयमुपाव्रजेत् ।
तदधीना भवेत् तत्र पातिव्रत्यं लयं व्रजेत् ॥३५॥
बहुजन्मार्जितं पुण्यं तदा नार्या विनश्यति ।
बाल्ये च यौवने कान्ते वार्धक्येऽपि सतीस्त्रियाः ॥३६॥
पतिव्रतायाः कान्ते स्वे सर्वकाले समा स्पृहा ।
पुत्रे स्नेहो हि मातॄणां भवेत्सर्वाधिकोऽपि च ॥३७॥
पतिस्नेहस्य साध्वीनां कलां नार्हति षोडशीम् ।
पुत्रस्य स्तन्यलाभान्तो मिष्टान्ने भोजनावधिः ॥३८॥
स्वार्थिनां स्वार्थलाभान्तः स्नेहो भवति न ध्रुवः ।
कान्ते स्नेहः सतीनां तु स्वप्ने जाग्रति सन्ततः ॥३९॥
स्मृत्यन्तो बन्धुविच्छेदः पुत्राणां तु ततोऽधिकः ।
सुदारुणः स्वामिनस्तु दुःखं नातः परं स्त्रियाः ॥४०॥
अविदग्धा यथा दग्धा ज्वलदग्नौ विषादने ।
तथाऽविदग्धा दग्धा स्यात् स्वामिनो विरहानले ॥४१॥
नाऽन्ने तृष्णा जले तृष्णाऽम्बरे भोग्ये न तृष्णिका ।
गृहे यशसि सौन्दर्ये साध्वीनां स्वामिनं विना ॥४२॥
विरहाग्नौ मनो दग्धं रक्तं दग्धं तथाऽऽननम् ।
भुक्तं दग्धं धनं दग्धं भवेदग्नौ तृणं यथा ॥४३॥
नहि कान्तात्परो बन्धुर्नहि कान्तात्परः प्रियः ।
नहि कान्तात् परो देवो नहि कान्तात्परो गुरुः ॥४४॥
नहि कान्तात्परे प्राणा नहि कान्तात् परः स्त्रियाः ।
नहि कान्तात्परो धर्मो नहि कान्तात् परं धनम् ॥४५॥
निमग्नं श्रीकृष्णनारायणे यथा सतां मनः ।
यथैकपुत्रे मातुश्च कृपणानां धने यथा ॥४६॥
यथा भयेषुभीतानां शास्त्रेषु विदुषां यथा ।
स्तन्यपाने शिशूनां च शिल्पेषु शिल्पिनां यथा ॥४७॥
यथा कान्ते कामिनीनां तथा प्रिये मनो मम ।
तं विना जीवितुं ब्रह्मन् क्षणमेकं न वै क्षमम् ॥४८॥
मरणं तु वरं तासां जीवनं मरणायते ।
तद्भर्तृरहितानां च सतीनां शोकचेतसाम् ॥४९॥

अन्यशोको भवेद् दूरः पानभोजनखेलनैः ।
कान्तशोको वर्धते वै पानभोजनखेलने ॥५०॥
सती नारी पतिच्छाया वियोक्तुं नार्हति क्वचित् ।
पतिपुण्यकृता मूर्तिः पत्यावेव सुसज्जते ॥५१॥
स्वामिना कृतपुण्यस्य फलं नारी पतिव्रता ।
फलभोगः स्वामिनोऽस्ति कथं साध्वी वियुज्यते ॥५२॥
वियोगे फलभोगो न कृतं पत्युर्निरर्थकम् ।
तस्मान्नारी सती नित्यं बुभुजे स्वामिना शुभा ॥५३॥
इतरे खलु नश्यन्ति देहनाशे स्वभावतः ।
नारी कर्मफला मूर्तिः सार्था जन्मनि जन्मनिः ॥५४॥
ततो ब्रह्मन् पतिं मुक्तं चेत् करोषि मया विना ।
त्वां शप्त्वा त्वां प्रदास्यामि प्रसह्य स्त्रीवधं ह्यघम् ॥५५॥
श्रुत्वा कलावतीवाक्यं विस्मितश्च प्रजापतिः ।
हितं स्यात्तु यथा सत्यास्तथोवाच भयान्वितः ॥५६॥
वत्से मुक्तिं न दास्यामि स्वामिनं ते त्वया विना ।
तव पुण्यं तथा त्वास्ते स्वर्गभोगेन नश्यति ॥५७॥
मुक्तं कर्तुं त्वया सार्धं साम्प्रतं नाहमीश्वरः ।
सुते मुक्तिः पुण्यभोगं विना सर्वस्य दुर्लभा ॥५८॥
निर्वाणतां समाप्नोति धर्मी भोगेन नाशने ।
बहुकालं स्वर्गभोगं कुरुष्व स्वामिना सह ॥५९॥
ततश्च युवयोर्जन्म भविता यमुनातटे ।
यदा भविष्यति सती कन्या ते राधिका स्वयम् ॥६०॥
जीवन्मुक्तौ तथा सार्धं गोलोकं संगमिष्यथः ।
साध्वी वै सत्त्वयुक्तेयं मा मां शप्तुं समर्हसि ॥६१॥
जीवन्मुक्ताः समाः सन्तः कृष्णनारायणे रताः ।
इत्युक्त्वा प्रययौ ब्रह्मा स्वालयं ययतुश्च तौ ॥६२॥
स्वर्गं भुक्त्वा सुचन्द्रश्च वृषभानुर्बभूव ह ।
पद्मावत्या हि जठरे सुरभानस्य रेतसा ॥६३॥
जातिस्मरो हरेरंशो हरिपादाब्जमानसः ।
नन्दबन्धुर्महायोगी वैष्णवः परमो महान् ॥६४॥
कलावती कान्यकुब्जे बभूवाऽयोनिसंभवा ।
जातिस्मरा महासाध्वी भनन्दस्य सुपुत्रिका ॥६५॥
यज्ञकुण्डोत्थितां तां च लब्ध्वा सुकनकप्रभाम् ।
मालावत्यै ददौ पत्न्यै सा पुपोष प्रहर्षिता ॥६६॥
चक्रे कलावतीनाम चकार सुमहोत्सवम् ।
भवन्दनो नृपतिस्तां प्रददौ वृषभानवे ॥६७॥
जातिस्मरो हरेरंशो वृषभानुरुपाददे ।
तस्यां कन्याऽभवद् राधा कृष्णनारायणप्रिया ॥६८॥
तस्या विवाहो भाण्डीरे वटे ब्रह्मा व्यधापयत् ।
कृष्णेन सह राधायाः सुखं प्रापातिराधिका ॥६९॥
राधैकदा सती कृष्णं वृन्दावने रहस्थले ।
कृष्णजन्मदिने कृष्णं स्नपयामास सुन्दरी ॥७०॥
यमीजलेन तत्रैव सस्मार स्वकगोधनम् ।
गोलोकादागता गावस्तस्याः स्मरणमात्रतः ॥७१॥
सुनन्दा सुमनाश्चापि सुशीला सुरभिस्तथा ।
कपिला पंचमी चेति स्ववंशविस्तरैर्युता ॥७२॥
वात्सल्यदृष्ट्या कृष्णस्य तासामूधांसि सुस्रुवुः ।
ववृषुः पयसां पूरैस्तदूधांसि पयोधराः ॥७३॥
कृष्णः संस्नापितस्ताभिः शृंगारितश्च राधया ।
कृष्णेन कृतसत्कारा वाराणसीं ययुस्तु ताः ॥७४॥
राधा संभोजयामास रमयामास तं पतिम् ।
जन्मोत्सवं सुखं कृत्वा ययौ कृष्णो गृहं निजम् ॥७५॥
वाराणस्यां तु ता गावः शंकरं परमीश्वरम् ।
धारासारैरविच्छिन्नैर्दुग्धानां पापनाशिनाम् ॥७६॥
स्नपयामासुरत्यर्थं तावद्यावद्ध्रदोऽभवत् ।
शंभुर्यत्राऽभवत् पूर्वं स्थितः स्नातश्च दुग्धकैः ॥७७॥
आगतानां गवां स्नेहात् प्रतिजगाम यत्स्थले ।
तत्स्थलं त्वभत् ख्यातं कपिलाह्रद एव यत् ॥७८॥
कपिलधारा तत्तीर्थं तत्र श्राद्धेन पायसैः ।
अग्निष्वात्ता बर्हिषद आज्यपाः सामपास्तथा ॥७९॥
पितरस्त्वन्यजातीया अपि तृप्यन्ति शाश्वतम् ।
पठनाच्छ्रवणाल्लक्ष्मि मोक्षदं कथितं तव ॥८०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने राधिकामातुः कलावत्या वृषभानोः पत्न्या प्राग्भवे सुचन्द्रपत्न्याः कलावत्यास्तस्याः पातिव्रत्येन पत्युस्तपसा च दम्पत्योर्वृषभानुकलावतीरूपेण यमुनातटे जन्म, तयोः पुत्री राधिका कृष्णजन्मोत्सवे गोदुग्धैः कृष्णं स्नपयामासेत्यादिनिरूपणनामा सप्तषष्ट्यधिकचतुश्शततमोऽध्यायः ॥ ४६७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकरस्य भक्तायास्तु कथां शुभाम् ।
असच्छूद्राया नर्तक्या नट्याः पतिव्रतात्मिकाम् ॥ १ ॥
पुरा तु नर्तकी शंभोर्भक्ता नाम्ना कलावती ।
ब्रह्मचर्यपरा त्वासीन्नृत्यनाट्यार्थकोविदा ॥ २ ॥

सैकदा फाल्गुने कृष्णे शिवरात्र्यां शिवालये ।
ननर्त जागरं कृत्वा जगौ गीतं स्वरेण सु ॥ ३ ॥
स्वयं प्रवादयामास वाद्यान्यपि ननर्त च ।
पतिः कृष्णः पतिः शंभुः पतिर्नारायणो मम ॥ ४ ॥
दिव्यः पतिर्मया ज्ञातो लब्धो देवः पतिर्मया ।
धर्ता पाता रक्षिता चाऽऽनन्दयिता हरिर्मम ॥ ५ ॥
नान्येना स्वामिना त्वत्र प्रयोजनं मम प्रभो ।
इत्येवं गायति वक्ति नृत्यत्यपि प्रहृष्यति ॥ ६ ॥
नित्यं स्नापयति शंभुं शृंगारयति भावतः ।
भोजयति सुमिष्टान्नं पाययति पयः शुभम् ॥ ७ ॥
नीराजयति सन्ध्यायां रात्रौ ध्यायति शंकरम् ।
पतिं मत्वा सदा शंभुं समर्चयति सर्वथा ॥ ८ ॥
एवं शंभोः पातिव्रत्यपरा पुण्ययुता नटी ।
कालधर्मवशं याता यदा सा भक्तनर्तकी ॥ ९ ॥
सुता गन्धर्वराजस्य वसुभूतेर्बभूव सा ।
रम्या रत्नावलीनाम्नी रूपलावण्यशालिनी ॥१०॥
कलाकलापकुशला मधुरालापवादिनी ।
पितुरानन्ददा नित्यं वसुभूतेः सुपुत्रिका ॥११॥
सर्वगान्धर्वकुशला गुणरत्नमहाखनिः ।
तस्याः सखीत्रयं त्वासीच्चारुचातुर्यभाजनम् ॥१२॥
तदप्यासीद्धरे पातिव्रत्यधर्मान्वितं प्रिये ।
शशिलेखाऽनङ्गलेखा चित्रलेखेति नामतः ॥१३॥
तिसृभिस्ताभिरेकत्र वाग्देवी परिशीलिता ।
ताभ्यः सर्वाः कलाः प्रादात् परिप्रीता सरस्वती ॥१४॥
प्राप्य रत्नावली स्वस्या गतजन्मस्मृतिं मुहुः ।
शंकरस्य प्रजग्राह नियमं परमं तु सा ॥१५॥
नित्यं सन्दर्शनं कृत्वा काश्यां कृष्णेश्वरस्य वै ।
अन्यत् कार्यं करिष्यामि वक्ष्याम्यपि वचो मुखे ॥१६॥
इत्थं नियमवत्यासीत् सा गन्धर्वसुता सती ।
ताभिः सखीभिः सहिता नित्यं शंभुं प्रपश्यति ॥१७॥
एकदा सा समानर्च कृष्णेश्वरं तु शंकरम् ।
रञ्जयामास तं बाला रम्यया गीतमालया ॥१८॥
सख्यः प्रदक्षिणीकर्तुं कृष्णेश्वरं ययुर्यदा ।
तदा रत्नावली गीतैः प्रसन्नः शंकरः स्वयम् ॥१९॥
वैष्णवैः सर्वचिह्नैश्च कृष्णनारायणं गृणन् ।
उवाच दर्शनं दत्वा वरं वृणु सुकन्यके ॥२०॥
कन्या प्राह प्रभो शंभो भवान् ब्रह्म प्रवर्ण्यते ।
त्वां जानामि महादेवं परात्परपुमुत्तमम् ॥२१॥
त्वया त्वाराधना कस्य मालया क्रियते प्रभो ।
कस्येदं तिलकं भाले चन्द्रकः कस्य शंकरः ॥२२॥
तुलसीमालिका कस्यात् कण्ठे सन्धार्यते त्वया ।
शंभुः प्राह हितं मिष्टं श्रुत्वा कृष्णस्मृतिप्रदम् ॥२३॥
धन्याऽसि त्वं भागवती बाले यं मां सुपृच्छसि ।
इष्टदेवः स्वयं कृष्णनारायणो हरिर्मम ॥२४॥
तस्य चरणरेखायास्तिलकं धार्यते मया ।
चन्द्रकः कुंकुमकृतो भाले लक्ष्म्याः प्रधार्यते ॥२५॥
तुलसी भगवत्पत्नी हरेः प्रासादिकं दलम् ।
तस्याः सन्धार्यते बाले माला कृष्णजपार्थिका ॥२६॥
करे कण्ठे सदा वृन्दामाला यस्य तु विद्यते ।
स वै भागवतश्रेष्ठः परमो वैष्णवः सदा ॥२७॥
एतच्छ्रुत्वाऽऽह सा कन्या यन्माला जप्यते त्वया ।
स मे भर्ता भवेन्नाथः कान्तः पतिर्वरो मम ॥२८॥
वराणां श्रेष्ठमेनं वै वरं देहि महेश्वर ।
तथाऽस्त्विति हरः प्राह प्राह चातिहितं ततः ॥२९॥
अत्र रात्रौ स्वयं कृष्णः रंस्यते तु त्वया सह ।
तव भावप्रसन्नः सः तव भर्ता भविष्यति ॥३०॥
इमाः सख्यः कृष्णदास्यो भविष्यन्ति त्वया सह ।
वरं लब्ध्वा तु ताः सर्वा ययुर्गृहं ततः परम् ॥३१॥
प्राहुः सख्यस्तु तां रत्नावलीं विहस्य वै शृणु ।
यद्यायाति स ते रात्रावद्य कृष्णनरायणः ॥३२॥
चौरो बाहुलतापाशैः पाशितव्योऽतियत्नतः ।
गोचरीक्रियतेऽस्माभिर्यथा स राधिकापतिः ॥३३॥
अहो भाग्योदयस्तेऽद्य महान्पुण्योदयस्तव ।
एकस्यास्तेऽभवत् सिद्धिस्त्वया साकं च नः खलु ॥३४॥
इति संव्याहरन्त्यस्ता निन्यू रात्रिं यथातथम् ।
अथ प्रातः समुत्थाय पुनरेकत्र संगताः ॥३५॥
प्रातः कलावती स्नात्वा पूजयित्वा हरं ततः ।
निर्बन्धेन वयस्याभिः परिपृष्टा जगाद ह ॥३६॥
गुरोः कृपास्तथा त्वाशीर्वादाः फलन्ति वै ध्रुवम् ।
गुरोः सेवा तपः शीघ्रं ददात्येव परं सुखम् ॥३७॥
अद्य कृष्णं हृदि कृत्वाऽऽविशं शय्यां हि सत्वरम् ।
निद्राधिष्ठितनयना तद्विलोकनलालसा ॥३८॥
क्षणात् स्वप्नदशां प्राप्ता भाविनोऽर्थस्य गौरवात् ।
आत्मविस्मरणे हेतू ततो मे द्वौ बभूवतुः ॥३९॥
तन्द्री कृष्णांगसंस्पर्शौ मम बोधापहारकौ ।
तन्द्र्यां परवशा त्वासं ततस्तत्स्पर्शनेन च ॥४०॥

आनन्दशेवधौ मग्ना न जाने मां च तं प्रभुम् ।
सुखयित्वा जिगमिषुं यावद्धर्तुं समुत्सहे ॥४१॥
तावद्धस्तं वञ्चयित्वा विहस्य सत्वरं गतः ।
दोष्णोः कंकणशब्दैश्च द्रागहं त्ववबोधिता ॥४२॥
सुखसन्तानपीयूषहृदे परिनिमज्ज्य वै ।
क्षणं तु तद्वियोगाग्नौ पतिताऽहं समुत्कटे ॥४३॥
दुनोति नितरां सख्यस्तद्विश्लेषाऽनलो महान् ।
प्राणानां मे यियासूनां पुनराशा महौषधम् ॥४४॥
अहो तस्य पुनः शक्तिरहो तस्य बलं क्रिया ।
अहो तस्य प्रसौन्दर्यं रमणं तस्य चाद्भुतम् ॥४५॥
अहो चूडामणिस्तस्य पिच्छं मायूरकं शुभम् ।
ललाटफलकं रम्यं पद्मपत्रायतेक्षणे ॥४६॥
सस्मितं त्वाननं मिष्टं मिष्टश्वासप्रपूरितम् ।
चन्द्रकोट्युज्ज्वलं वक्त्रं तेजःपरिधिमण्डितम् ॥४७॥
कामगर्वहरा भ्रूश्च वक्षः शीतलपंकवत् ।
करौ सुकोमलौ पुष्टौ बाहुपार्श्वौ मनोहरौ ॥४८॥
उदरं जघनं यत्र हृदयं मे जडं ह्यभूत् ।
ऊरू नेत्राऽऽनन्दकरौ यथा मणी प्रकाशकौ ॥४९॥
चरणौ कोमलौ स्पर्शः स्वाकर्षणकरः परः ।
अहो तस्य पुमंकस्य सुखदत्वं चिरायितम् ॥५०॥
सर्वस्वेन मया तत्र हुतं वर्ष्म प्रमोदने ।
अहो योगो बलं तस्य त्वहो वीर्यं दृढांगता ॥५१॥
पुनः पुनः प्रयोगेण जिता शक्तिश्च मे हृता ।
काऽलीकमालयो वक्ति स्निग्धे मुग्धे सखीजने ॥५२॥
दशाम्यवस्था सन्नह्येद् बाधितुं मां हि तं विना ।
इति तस्या गिरः श्रुत्वा मूर्छां प्रापुस्तदाऽऽलयः ॥५३॥
तावत् कृष्णः समायातस्तासां सौभाग्यहेतवे ।
स्वप्ने सुरूपो भगवान् युवा ताः परिषस्वजे ॥५४॥
तास्तु दत्वा सुखं तत्र तिरोऽभूद् वै क्षणान्तरे ।
शशिलेखाऽनङ्गलेखाचित्रलेखा जजागरुः ॥५५॥
दृष्ट्वा कृष्णकृताऽऽश्लेषचिह्नानि स्वकलेवरे ।
परस्परं विलोक्यैता ह्रीयुक्ताः संविरेजिरे ॥५६॥
ननृतुः सुखसंहृष्टाः सख्यो मुमुदिरे भृशम् ।
श्रवणं चापि कृष्णस्य साक्षात्कारप्रदं त्वभूत् ॥५७॥
चतस्रस्ताः स्वपितरं पितृतुल्यं सुवैष्णवम् ।
वसुभूतिं तु गन्धर्वं प्रातः प्रोचुर्हरिदर्शनम् ॥५८॥
स्वप्ने कृष्णो यथा दृष्टो यथा कृष्णः प्रतोषितः ।
यथा वरो महादेवात् पूर्वं लब्धोऽप्यभूत् तथा ॥५९॥

श्रुत्वा सर्वं पिता प्राह तास्तु चतुःकुमारिकाः ।
कृष्णस्यैव कृते पुत्र्यो मया जलेन चार्पिताः ॥६०॥
अद्य कृष्णो यदि त्वायाद् वक्तव्या मन्नतिः स्तुतिः ।
वाग्दानं च महादेव्यो भवताद् भगवान्पतिः ॥६१॥
जामाता श्रीकृष्णनारायणः कुत्र हि लभ्यते ।
शंकरस्य वरदानाल्लब्धो युष्माभिरेव सः ॥६२॥
धन्योऽहं कृतकृत्योऽहं धन्यं मेऽपि कुलं सदा ।
जामाता यस्य भगवान् श्रीकृष्णः पुरुषोत्तमः ॥६३॥
धन्या यूयं सदा साध्व्यो धन्या यूयं पतिव्रताः ।
धन्या यूयं कृष्णपत्न्यो धन्याः कृष्णव्रताः स्त्रियः ॥६४॥
इत्युक्त्वा कारयामास मण्डपं कन्यकाऽऽज्ञया ।
श्रीकृष्णाय प्रदातव्याः कन्यका इतिवाञ्छया ॥६५॥
द्वितीयायां निशायां स समाजगाम माधवः ।
बुभुजे ताः कन्यका वै ताभिस्तुष्टः परेश्वरः ॥६६॥
विवाहार्थं तथाऽस्त्विति कृष्णः प्राह कृपावशः ।
प्रातरेव महाब्राह्मे मुहूर्ते वह्निसन्निधौ ॥६७॥
गवां मध्ये ददौ कन्याः कृष्णाय परमात्मने ।
वसुभूतिः कृष्णनारायणं चानर्च भावतः ॥६८॥
श्यामं सुयौवनं पुष्टं पीतकौशेयवाससम् ।
सुन्दरं सस्मितं शान्तं राधाकान्तं मनोहरम् ॥६९॥
शरत्पार्वणचन्द्रास्यं रत्नालंकारभूषितम् ।
रत्नकुण्डलयुग्माभ्यां गण्डस्थलविराजितम् ॥७०॥
रत्नकेयूरवलयरत्ननूपुरभूषितम् ।
आजानुलम्बितां शुभ्रां बिभ्रतं रत्नमालिकाम् ॥७१॥
मालतीमालया कण्ठवक्षःस्थलविराजितम् ।
चन्दनागुरुकस्तूरीकुंकुमाञ्चितविग्रहम् ॥७२॥
सुनखं सुकपोलं च पक्वबिम्बाधरं वरम् ।
पक्वदाडीमबीजाभं बिभ्रतं दन्तमण्डलम् ॥७३॥
शिखिपिच्छसमायुक्तं बद्धचूडं परात्परम् ।
कदम्बपुष्पयुग्माभ्यां कर्णमूले विराजितम् ॥७४॥
समर्च्य सर्वभूषाढ्यं ननाम कन्यकापिता ।
कृष्णस्ताः कन्यका दिव्या जग्राह विधिना प्रभुः ॥७५॥
शरत्पार्वणचन्द्राभा मुष्टवक्त्रमनोहराः ।
शरन्मध्याह्नपद्मानां शोभामोचनलोचनाः ॥७६॥
परितस्तारकापक्ष्मविचित्रकज्जलोज्ज्वलाः ।
खगेन्द्रचञ्चुचारुश्रीशंसानाशुकनासिकाः ॥७७॥
तन्मध्यस्थलशोभार्हस्थूलमुक्ताफलोज्ज्वलाः ।
कबरीवेषसंयुक्ता मालतीमाल्यवेष्टिताः ॥७८॥

ग्रीष्ममध्याह्नमार्तण्डप्रभामुष्टककुण्डलाः ।
पक्वबिम्बफलानां च श्रीमुष्टाऽधरयुग्मकाः ॥७९॥
मुक्तापंक्तिप्रभातैकदन्तपंक्तिसमुज्ज्वलाः ।
ईषत्प्रफुल्लकुन्दानां सुप्रभासंशुभस्मिताः ॥८०॥
कस्तूरीबिन्दुसंयुक्तसिन्दूरबिन्दुभूषिताः ।
कपालानि च मल्लिकायुक्तानि श्रीयुतानि च ॥८१॥
संदधानाः कृष्णकान्ताः कृष्णतुल्यसुशोभिताः ।
सुचारुवर्तुलाकारकपोलपुलकान्विताः ॥८२॥
मणिरत्नेन्द्रसाराणां हारोरःस्थलभूषिताः ।
सुचारुश्रीफलद्वयकठिनस्तनसंभवाः ॥८३॥
पत्रावलीश्रिया युक्ता दीप्ताः सद्रत्नकान्तिभिः ।
यासां सुवर्तुलाकारमुदरं सुमनोहरम् ॥८४॥
विचित्रत्रिवलीयुक्तं निम्ननाभिश्च वर्तुला ।
सद्रत्नसाररचितमेखलाजालभूषिताः ॥८५॥
कामास्त्रसारभ्रूभंगयोगीन्द्रचित्तमोहिकाः ।
स्थलपद्मप्रभाशोभाऽञ्चिततलपदाम्बुजाः ॥८६॥
रत्नभूषणसंयुक्ता यावकद्रवशोभिताः ।
मणीन्द्रशोभासंमुष्टसालक्तककरद्वयाः ॥८७॥
सद्रत्नसाररचितक्वणन्मञ्जीररञ्जिताः ।
रत्नकंकणकेयूरचारुशंखविभूषिताः ॥८८॥
रत्नांगुलीयनिकरवह्निशुद्धांशुकोज्ज्वलाः ।
चारुचम्पकपुष्पाणां प्रभामुष्टकलेवराः ॥८९॥
सहस्रदलसंयुक्तक्रीडाकमलशोभिताः ।
रत्नदर्पणसंयुक्ता नववधूः स्वयं हरिः ॥९०॥
रञ्जयन् बहुधा नीत्वा यौतकं चातिमूल्यकम् ।
ययौ प्रस्थापितो यानैर्वैहायसैः परं पदम् ॥९१॥
तेनैव वर्ष्मणा तास्तु दिव्याः कृष्णप्रसंगतः ।
गोलोकयोग्याः सञ्जाता राधालक्ष्मीसमाः प्रियाः ॥९२॥
इति ते कथितं लक्ष्मि ! पातिव्रत्यपरायणम् ।
कृष्णप्राप्त्यात्मकं पुण्यं श्रवणादपि मोक्षकृत् ॥९३॥
पठनादस्य तत्पुण्यं कृष्णसौभाग्यदं भवेत् ।
अनूढो लभते कन्यारत्नं श्रेष्ठकुलोचितम् ॥९४॥
कन्याऽपीमं समाकर्ण्य कृष्णभक्तिसमन्विता ।
श्रद्धया सत्पतिं प्राप्य भविष्यति पतिव्रता ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कलावतीनर्तक्याः शंकरद्वारा कृष्णपतिव्रताधर्मेण तिसृभिः सखीभिः सह जन्मान्तरे गान्धर्वीत्वं कृष्णेन विवाह्य च गोलोकप्राप्तिमत्त्वं चेतिनिरूपणनामाऽष्टषष्ट्यधिकचतुरशततमोऽध्यायः ॥ ४६८ ॥

श्रीनारायण उवाच—

शृणु कृष्णकथां लक्ष्मि ! द्विजपत्नीसमन्विताम् ।
यां श्रुत्वा पातिव्रत्येन मोक्षणं मानसं भवेत् ॥ १ ॥
एकदा तु पुरा कृष्णो बलरामश्च बालकाः ।
वृन्दावनाद् ययुर्यमीतटे मधुवने शुभे ॥ २ ॥
विचेरुर्गोसहस्रैस्ते चिक्रीडुर्वै परस्परम् ।
श्रान्ताः क्षुधितास्तृषिताः शिशवस्तूचुरच्युतम् ॥ ३ ॥
क्षुदस्मान् बाधते कृष्ण किं कुर्मोऽत्र वनेऽदनम् ।
श्रीकृष्णस्तांस्तदा प्राह बाला गच्छत सन्निधौ ॥ ४ ॥
यज्ञस्थानं ब्राह्मणानां याचताऽन्नं तु भूसुरान् ।
आंगिरसान् वैष्णवांश्च मुमुक्षून् यजतस्तु माम् ॥ ५ ॥
अजानन्तश्च मां विष्णुं मायाप्रच्छन्नविग्रहम् ।
न चेद् ददति युष्मभ्यमन्नं यज्ञस्थिता द्विजाः ॥ ६ ॥
तत्कान्ता याचत बाला दयायुक्ताः शिशून् प्रति ।
श्रीकृष्णवचनं श्रुत्वा ययुर्बालकपुंगवाः ॥ ७ ॥
ब्राह्मणानां पुरस्तस्थुर्भिक्षार्थं नम्रकन्धराः ।
तानूचुर्बालका नम्रा अन्नं दत्त द्विजोत्तमाः ॥ ८ ॥
द्विजा न शुश्रुवुस्तांस्तु शृण्वन्तो न मनो ददुः ।
अतस्तस्मात् स्थलाद् दूरं गता रन्धनशालिकाम् ॥ ९ ॥
ब्राह्मण्यो यत्र सूपादि पाचयन्ति महानसे ।
गत्वा नम्रा विप्रपत्नीर्ययाचिरेऽन्नमास्थया ॥१०॥
यूयं वै मातरः सर्वा विप्रपत्न्यः पतिव्रताः ।
दत्ताऽन्नं मातरस्त्वस्मान् क्षुधितान् गोपबालकान् ॥११॥
शिशूनां मृदुवाक्यानि श्रुत्वा दृष्ट्वा हि तान् स्त्रियः ।
पप्रच्छ सादरं साध्व्यः के यूयं केन दर्शितम् ॥१२॥
यदत्राऽन्नं हि लब्धं स्याद् ब्रूतात्र गोपबालकाः ।
दास्यामोऽन्नं मृष्टमुष्णं व्यञ्जनादिसमन्वितम् ॥१३॥
श्रुत्वा प्रसन्नाः शिशवो यष्टिहस्ता जगुस्तु ताः ।
प्रेषिता रामकृष्णाभ्यां दर्शितं त्वन्महानसम् ॥१४॥
दत्ताऽन्नं मातरोऽस्मभ्यं तूर्णं यामस्तदन्तिकम् ।
इतो विदूरे भाण्डीरेऽतिशोभेऽत्र मधौवने ॥१५॥
वटाऽधःस्थितभ्रातृभ्यां याचितान्नं प्रदत्त नः ।
श्रुत्वेति कोमलं कृष्णसम्बन्धं वाक्यमुत्तमम् ॥१६॥
पुलकांकितसर्वांगा हृष्टानन्दाश्रुलोचनाः ।
कृष्णनारायणं स्मृत्वा शाल्यन्नं पायसं दधि ॥१७॥
मिष्टान्नं स्वस्तिकाद्यं च लड्डुकान् सुपोलिकाः ।
नानाव्यञ्जनसूपादि कृत्वा पात्रेषु योषितः ॥१८॥

पात्राणि राजतादीनि सन्त्यतो वयमेव तु ।
आगच्छामः सहबाला इत्युक्त्वा प्रययुर्मुदा ॥१९॥
विप्राण्यो मनसा हृष्टाः कृत्वा नानामनोरथान् ।
पतिव्रतास्ता धन्याश्च श्रीकृष्णदर्शनोत्सुकाः ॥२०॥
श्रीकृष्णं ददृशुर्गत्वा बलदेवं च बालकान् ।
वटच्छायास्थितान् दृष्ट्वा ददृशुस्ताः पुनर्हरिम् ॥२१॥
श्यामं किशोरवयसं पीतकौशेयवाससम् ।
सुन्दरं सस्मितं शान्तं राधाकान्तं मनोहरम् ॥२२॥
शरत्पार्वणचन्द्रास्यं रत्नालंकृतिराजितम् ।
रत्नकुण्डलयुग्माभ्यां गण्डस्थलविराजितम् ॥२३॥
रत्नकेयूरवलयरत्ननूपुरभूषितम् ।
आजानुलम्बितां शुभ्रां बिभ्रतं रत्नमालिकाम् ॥२४॥
मालतीमालया कण्ठवक्षःस्थलविराजिताम् ।
चन्दनागुरुकस्तूरीकुंकुमाञ्चितविग्रहम् ॥२५॥
सुनखं सुकपोलं च पक्वबिम्बाधरं हरिम् ।
पक्वदाडीमबीजाभदन्तपंक्तिविराजितम् ॥२६॥
मयूरपर्णसंशोभद्बद्धचूडामणिं प्रभुम् ।
कर्णयोर्धृतकादम्बपुष्पगुच्छसुशोभितम् ॥२७॥
ध्यानाऽसाध्यं योगिनां च भक्तानुग्रहकातरम् ।
ब्रह्मेशधर्मशेषेन्द्रैः स्तूयमानं परेश्वरम् ॥२८॥
कोटिकन्दर्पलावण्यवात्सल्यप्रेमपूरितम् ।
दृष्ट्वैवमुज्ज्वलं कृष्णं भक्त्या नेमुर्द्विजस्त्रियः ॥२९॥
स्वानां ज्ञानानुरूपं च तुष्टुवुः परमेश्वरम् ।
त्वं ब्रह्म परमं कृष्णः साक्षाच्छ्रीपतिरच्युतः ॥३०॥
निर्गुणस्त्वं निराकारः साकारः सगुणः स्वयम् ।
साक्षिरूपश्च निर्लेपः परमात्मा निराकृतिः ॥३१॥
अक्षरात्परतः श्रेष्ठस्त्वक्षरातीत एव च ।
मुक्तसेव्यः श्रिया सेव्यो राधारमादिपूजितः ॥३२॥
पार्वतीमाणिकीलक्ष्मीप्रभाद्याभिः पतिः कृतः ।
प्रकृतेः पुरुषस्यापि महाविष्णोश्च वेधसः ॥३३॥
शिवादीनां मनूनां च कारणं परमं भवान् ।
जडं तत्त्वात्मकं यच्चेतनं च तदन्वितम् ॥३४॥
त्वया व्याप्तं तव तेजोबलात्तेजस्विताश्रयम् ।
सर्वैश्वर्याणि शक्त्याद्यास्तवमूर्तेः समुद्भवाः ॥३५॥
सर्वानन्दः परेशोऽसि पतिः प्राणाधिकः प्रियः ।
अदिव्यचक्षुषा नैव ग्राह्योऽसि देहवानपि ॥३६॥
महेशः कार्तिकेयश्च शेषो धर्मो विधिर्गुरुः ।
सरस्वती जडाः सर्वे स्तवने तत्र का वयम् ॥३७॥
पार्वती कमला राधा सावित्री शारदा प्रभा ।
माणिकी श्रीर्लक्ष्मवती प्रवर्तन्ते न का वयम् ॥३८॥
प्रसन्नो भव नो देव दीनबन्धो कृपां कुरु ।
इति पेतुस्तु ता विप्रपत्न्यः कृष्णपदाम्बुजे ॥३९॥
अभयं प्रददौ ताभ्यः कृष्णनारायणो हरिः ।
वरं वृणुत कल्याणं भविता चेत्युवाच सः ॥४०॥
ततः साध्व्यस्तु ता ऊचुर्ब्रूमः प्रवरं प्रभो ।
देहि स्वदास्यमस्मभ्यं दृढां भक्तिं पदाम्बुजे ॥४१॥
पश्यामोऽनुक्षणं वक्त्रं सेवयामः पदाम्बुजे ।
अनुग्रहं कुरु श्रेष्ठ यास्यामो न गृहं पुनः ॥४२॥
पतिव्रतानां वाक्यानि श्रुत्वा कृष्णः कृपानिधिः ।
ओमित्युक्त्वा विप्रपत्नीदत्तमन्नं सुधासमम् ॥४३॥
बालकान् भोजयित्वाऽनुबुभुजे भगवान् स्वयम् ।
एतस्मिन्नन्तरे तत्र शातकुंभं रथं परम् ॥४४॥
गोलोकादागतं तास्तु ददृशुर्दिव्यपार्षदम् ।
रत्नदर्पणतेजस्कं वस्त्रसारपरिच्छदम् ॥४५॥
सुवर्णकलशोपेतं रत्नस्तंभधरादिकम् ।
सर्वतश्चामरैर्युक्तं पारिजातसुमालिकम् ॥४६॥
शतचक्रोपरिक्लृप्तं वनमालादिशोभितम् ।
दिव्यपार्षदवर्यैश्च कृष्णतुल्यैः सुवाहितम् ॥४७॥
पीतवस्त्रपरीधानैः रत्नालंकारभूषितैः ।
नवयौवनसम्पन्नैः श्यामलैश्च मनोहरैः ॥४८॥
द्विभुजैर्मुरलीहस्तैर्गोपिवेशधरैर्वरैः ।
शिखिपिच्छगुञ्जमालाबद्धवक्रिमचूडकैः ॥४९॥
पार्षदैः सन्नतः कृष्णो विप्रपत्न्यस्तु बोधिताः ।
गमनार्थं तु गोलोकं ताश्चाऽऽसन् मुदिताननाः ॥५०॥
कृष्णनारायणं नत्वा त्यक्त्वा मानुषविग्रहान् ।
बभूवुर्गोपिकाः सद्यो जग्मुर्गोलोकमीप्सितम् ॥५१॥
कृष्णश्छायां विनिर्माय तासां रूपान्तराणि वै ।
गृहान् प्रस्थापयामास विप्राणां विप्रकामिनीः ॥५२॥
विप्रा गवेषणं चक्रुः क्व गतास्ता इतिब्रुवाः ।
ददृशुः पथि चायान्तीः पत्नीः शान्तिं ययुस्ततः ॥५३॥
पुलकाङ्कितसर्वांगाः प्रसन्नवदनेक्षणाः ।
ऊचुरहोऽतिधन्याः स्मो यूयं चापि पतिव्रताः ॥५४॥
यासां पत्न्यः कृष्णभक्ता लक्ष्मीराधासमा हरौ ।
तपो जपो व्रतं ज्ञानं वेदाध्ययनमर्चनम् ॥५५॥
तीर्थस्नानमनशनं सफलं कृष्णसेवया ।
श्रीकृष्णः सेवितो याभिः किं तासां पुण्यपर्वतैः ॥५६॥

प्राप्तः कल्पतरुर्याभिः किं तासां तरुकोटिभिः ।
श्रीकृष्णो हृदये यासां किं तासां कर्मकोटिभिः ॥५७॥
इति कृष्णस्य माहात्म्यं पत्नीनां चापि सर्वथा ।
जानन्तस्ते ययुर्यज्ञं ततो ययुर्गृहाणि वै ॥५८॥
तासां ततोऽधिकं प्रेम क्रीडासु सर्वकर्मसु ।
दाक्षिण्यं सेवनं सर्वं त्वासीद् विप्रैरतर्कितम् ॥५९॥
प्राग्भवीयोत्तमपुण्यैः प्राप्यते भगवान् यतः ।
आसँस्तास्तु पुरा सप्तर्षीणां पत्न्यः पतिव्रताः ॥६०॥
गुणवत्यो रमण्यस्ता रूपेणाऽप्रतिमा पराः ।
नवीनयौवनाः सर्वाः पीनश्रोणिपयोधराः ॥६१॥
दिव्यवस्त्रपरीधाना रत्नालंकारभूषिताः ।
तप्तकाञ्चनवर्णाभाः स्मेराननसरोरुहाः ॥६२॥
यज्ञस्थानस्थिताः स्वामिसहिताश्चक्रुरर्पणम् ।
वह्नौ द्रव्यादिवस्तूनां चकमेऽग्निर्विलोक्य ताः ॥६३॥
ततो वह्निः स्वीयज्वालाकरैः पस्पर्श ता मुहुः ।
अग्निरंगानि तासां च दर्शं दर्शं मुमोह च ॥६४॥
हविष्यं भक्षयँश्चापि स्पर्शं कृत्वाऽतिकामुकः ।
समाश्लिषत् करैस्तास्त्वदृश्यैर्भावैः पुनः पुनः ॥६५॥
चकार सुरतं सूक्ष्मं शिखाभिः परिष्वज्य ताः ।
पतिव्रताश्च ता नैव जानन्ति वह्निवर्तनम् ॥६६॥
दिव्यद्रष्टाऽङ्गिरा वह्नेर्ज्ञात्वा गुप्तं तु वर्तनम् ।
कामभावान्वितं वह्निं शशाप रोषमावहन् ॥६७॥
अद्यप्रभृति वह्ने ते शिखायां च करेषु च ।
ज्वालायां च तथाऽङ्गारादिषु कामौ भवेन्न वै ॥६८॥
नपुंसकः सदास्यास्त्वं ज्वालात्मकः सुपुण्यदः ।
मूर्तिमाँस्त्वं सकामः स्याः स्वाहापि तादृशी तथा ॥६९॥
एवं शप्तस्ततो वह्निर्निष्कामो ज्वालयाऽभवत् ।
यज्ञयागादिकार्याणि यतः पुण्यानि तद्बलात् ॥७०॥
अथाऽङ्गिरा अशुद्धास्ता वह्निस्पृष्टा हि कामतः ।
शशाप शुद्धिलाभाय यात योनिं तु मानुषीम् ॥७१॥
कुलजैर्ब्राह्मणैः पाणिर्गृहीतो वो भविष्यति ।
इत्युक्तास्ताः क्षणं शोकं जग्मुश्चक्रुश्च तं नतिम् ॥७२॥
हितं तथ्यं प्रार्थयामासुश्च सर्वाः पतिव्रताः ।
न त्यजाऽस्मान् मुनिश्रेष्ठ निष्पापा वै पतिव्रताः ॥७३॥
अजानन्त्यः परस्पृष्टा न वै नस्त्यक्तुमर्हसि ।
भक्तानां किंकरीणां च न दण्डं कर्तुमर्हसि ॥७४॥
युष्माकं चरणाम्भोजं कदा द्रक्ष्यामहे वयम् ।
खड्गच्छेदाद् वज्रपातात् सर्वप्रहरणात्तथा ॥७५॥
दारुणः कान्तविच्छेदः साध्वीनां दुःसहः सदा ।
ब्रह्मिष्ठानां गुणवतां परान् कान्तान् महामुनीन् ॥७६॥
पत्नीव्रतान् कथं त्यक्त्वा यास्यामः पृथिवीतलम् ।
यास्यामो यदि विप्रेश कदाऽत्राऽऽगमनं वद ॥७७॥
अन्येषां तु भयात् कान्ता व्रजन्ति शरणं पतिम् ।
स्वकान्तभयसंविग्नाः शरणं कं व्रजन्ति ताः ॥७८॥
अभयं देहि धर्मिष्ठ भययुक्ताभ्य एव यत् ।
पुत्रे शिष्ये कलत्रे च को दण्डं कर्तुमक्षमः ॥७९॥
दण्डं दत्वा वारणं च कर्तुं त्वपि न कः क्षमः ।
कामिनीनां वचः श्रुत्वाऽङ्गिराः प्रेम्णा रुरोद वै ॥८०॥
संज्ञामवाप्य च भ्रातॄन् पृष्ट्वा प्रोवाच तास्ततः ।
हितं सत्यं प्रियं योग्यमन्येषां बोधदं परम् ॥८१॥
परभुक्तां स्वस्य कान्तां विना तच्छोधनं पतिः ।
नैव भुञ्जीत वै क्वापि पापं संक्रमते प्रिये ॥८२॥
न सा दैवे न सा पैत्र्ये पाकार्हा पापसंयुता ।
तस्या आलिंगने भर्ता भ्रष्टश्रीस्तेजसा हतः ॥८३॥
देवताः पितरस्तस्य हव्यदाने च तर्पणे ।
सुखिनो न भवन्त्येव कवोष्णमुपभुंजते ॥८४॥
तस्माद् यत्नेन भार्याया रक्षणं कार्यमन्वहम् ।
पदे पदे सावधानैः कान्ता रक्ष्याः सुपण्डितैः ॥८५॥
नाऽन्याऽधीना भवेद् योषा दोषाणां हि करण्डिका ।
कलत्रं पाकपात्रं च सदा रक्षितुमर्हति ॥८६॥
परस्पर्शादशुद्धे ते शुद्धे स्वस्यैव हस्तगे ।
अशुद्धानां प्रशुद्धिश्चर्तुना व्रतेन जन्मना ॥८७॥
तस्मान्नारी परैर्यत्नाददृष्टा पूर्वजैः कृता ।
असूर्यंपश्या या दारा शुद्धास्तास्तु पतिव्रताः ॥८८॥
स्वामिसाध्या तु या नारी कुलधर्मभिया स्थिता ।
कान्तेन सार्धं सा कान्ता वैकुण्ठं याति निश्चितम् ॥८९॥
ऋषिलोकनिमेषेण पृथ्व्यां विंशतिवर्षकः ।
कालो यास्यति शीघ्रं वै जन्मना शुद्धिरर्थ्यते ॥९०॥
यात यूयं च पृथिवीं मानुषीं योनिमीप्सिताम् ।
कृष्णभोजनदानेन वः शापस्य हि मोचनम् ॥९१॥
श्रीकृष्णस्य प्रतापेन रूपत्रयं धरिष्यथ ।
दिव्यकन्यास्वरूपेण गोलोकं यास्यथ ध्रुवम् ॥९२॥
देवीकन्यास्वरूपेण ऋषिलोकं प्रयास्यथ ।
छायाकन्यास्वरूपेण विप्रगृहं प्रयास्यथ ॥९३॥
युष्मदंशा विप्रपत्न्यो मृतौ प्राप्स्यथ नो ध्रुवम् ।
युष्माकं ममशापोऽयं वर्ततेऽद्य वराधिकः ॥९४॥

भुक्तिर्मुक्तिर्गृहप्राप्तिस्त्रयमेतदवाप्यते ।
इत्युक्तास्ता यज्ञभूमेर्ययुः पृथ्वीं यमीतटे ॥९५॥
योग्यगृहे समुद्भूय बभुवुर्विप्रयोषितः ।
दत्वाऽन्नं हरये भक्त्या जग्मुर्गोलोकमेव ताः ॥९६॥
तथाऽन्यरूपैः कान्तस्य लोकं जग्मुश्च तास्तदा ।
छायारूपैर्ययुर्विप्रगृहाण्येव तु ताः स्त्रियः ॥९७॥
बभूव निश्चितं तासां शापो वै सम्पदोऽधिकः ।
अहो सद्यः सतां कोपस्तूपकाराय कल्पते ॥९८॥
विना विपत्तेर्महिमा कुतः कस्य भवेत् खलु ।
भूताः कान्तपरित्यागान्मुक्ता ब्राह्मणयोषितः ॥९९॥
इत्येवं कथितं लक्ष्मि ! पतिव्रताहरिव्रतम् ।
पठनाच्छ्रवणात्त्वस्य भुक्तिर्मुक्तिस्तथोन्नतिः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सप्तर्षिपत्नीनां वह्निभोगेन शापाद् विप्रपत्नीत्वे श्रीकृष्णनारायणपातिव्रत्येन यज्ञे यमीतटे श्रीकृष्णादिबालानां वत्सचाराणां भोजनदानेन मोक्षणं चेत्यादिनिरूपणनामैकोनसप्तत्यधिकचतुश्शततमोऽध्यायः ॥४६९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सर्पजातौ पतिव्रता वृषं शुभम् ।
यमुनायास्तटे रम्ये ययौ कृष्णो बलान्वितः ॥ १ ॥
गोपालकैर्वृषैर्गोभिर्विजहार जलान्तिकम् ।
गावो वृषास्तथा बालाः पपुर्वारि तृषातुराः ॥ २ ॥
विषाक्तं तज्जलं त्वासीत् कालीयसर्पवासतः ।
केचिन्मूर्छां गतास्तत्र त्वन्ये प्राणांश्च तत्यजुः ॥ ३ ॥
कृष्णनारायणो ज्ञात्वा जीवयामास तांस्तदा ।
कृष्णः कदम्बमारुह्य कृत्वा देहं महत्तमम् ॥ ४ ॥
पपात जलमध्ये स नागस्योपरि माधवः ।
नैकहस्तप्रमाणं तु जलोत्थानं तदाभवत् ॥ ५ ॥
स सर्पो मानुषं दृष्ट्वा दुद्राव क्रोधवेगतः ।
बद्धुं तं मानुषं रूपं यावज्जग्राह तं हरिम् ॥ ६ ॥
तप्तलोहसमं जातं कृष्णवर्ष्म हि तेजसा ।
दग्धकण्ठोदरो नागस्तूद्विग्नः कृष्णतेजसा ॥ ७ ॥
प्राणा यान्त्येवमुक्त्वा वै चकारोद्गमनं पुनः ।
भग्नदन्तो रक्तमुखः कृष्णवज्राङ्गचर्वणात् ॥ ८ ॥
रक्तवक्त्रस्य भगवानुत्तस्थौ मस्तकोपरि ।
नागो विश्वंभराक्रान्तः पपात मूर्छितः प्रिये ॥ ९ ॥
पुनः स चेतनां प्राप्य फणाभिः श्रीनरायणम् ।
स्वपुच्छेन मुहुर्युक्त्या श्रीकृष्णं समताडयत् ॥१०॥
भगवान् श्रीहरिः कलानिधिस्तून्नमितां फणाम् ।
पल्लतया पुनर्युक्त्या तताड च ननर्त च ॥११॥
फणा शिथिलतां प्राप्ता सर्पोऽभूत्तु मृदुर्बहुः ।
मूर्छितं तं तदा दृष्ट्वा नागिन्यो रुरुदुर्भृशम् ॥१२॥
पतिप्राणाः स्वामिधर्माः पत्यर्थे कृतजीवनाः ।
तासु श्रेष्ठा सुरसाख्या पत्नी तस्य शुभा सती ॥१३॥
नागिनीभिः सह प्रेम्णा रुरोद पुरतो हरेः ।
बद्धाञ्जलिपुटा तूर्णं प्रणम्य श्रीहरिं सती ॥१४॥
धृत्वा पादारविन्दं श्रीकृष्णमाह भयाकुला ।
हे जगत्कान्त मे कान्तं देहि मानं सुमानद ॥१५॥
पतिः प्राणाधिकः स्त्रीणां नास्ति बन्धुस्तु तत्परः ।
पतिव्रताऽहं नागस्य पत्नी स्वेच्छास्वरूपिणी ॥१६॥
नागे मृगे च वैधव्यदुःखिता स्यां ततः प्रभो ।
मरणं मे प्रथमं च कुरु मे स्वामिनस्ततः ॥१७॥
तन्नाशे मम नाशोऽस्ति स्त्रीहत्या ते भविष्यति ।
नागपत्नीवचः श्रुत्वा श्रीकृष्णस्तामुवाच ह ॥१८॥
उत्तिष्ठोत्तिष्ठ नागेशि वरं वृणु भयं त्यज ।
गृहाण कान्तं नागेशि चिरंजीवाऽजरामरा ॥१९॥
यमीह्रदं परित्यज्य सकुटुम्बाऽन्यतो व्रज ।
खण्डं रमणकं गच्छ तत्र संमुखिनी भव ॥२०॥
यत्पादपद्मचिह्नेन गरुडस्त्वत्पतिं शुभे ।
कृत्वा तु स्तवनं भक्त्या प्रणमिष्यति मत्पदम् ॥२१॥
श्रुत्वेदं सा भक्तिनम्रा सुरसोवाच माधवम् ।
त्वत्पादाब्जे दृढां भक्तिं निश्चलां देहि मे हरे ॥२२॥
मन्मनस्त्वत्पदाम्भोजे भ्रमतु भ्रमरो यथा ।
स्वकान्ते मम सौभाग्यं सर्वदा देहि मे विभो ॥२३॥
एवं सम्प्रार्थ्य सुरसा ददर्श श्रीहरेर्मुखम् ।
लोचनाभ्यां पपौ वक्त्रं निमेषरहितं सती ॥२४॥
सर्वांगपुलकोद्भिन्ना सानन्दाश्रुपरिप्लुता ।
उवाच पुरतः कृष्णं भक्त्युद्रेकपरिप्लुता ॥२५॥
न यास्यामि रमणकं तत्र मे न प्रयोजनम् ।
सर्पः करोतु संसारं कुरु मां तव किंकरीम् ॥२६॥
नागपत्न्या वचः श्रुत्वा श्रीश ओमित्युवाच ह ।
एतस्मिन्नन्तरे तूर्णं रथो दिव्यः समागतः ॥२७॥
पार्षदप्रवरैर्युक्तो दिव्यवस्तुपरिच्छदः ।
अवरुह्य शतचक्राद्रथाच्छ्रीकृष्णपार्षदाः ॥२८॥

प्रणम्य कृष्णं तां नीत्वा जग्मुर्गोलोकमुत्तम् ।
कृष्णच्छायां विनिर्माय ददौ सर्पाय सर्पिणीम् ॥२९॥
सर्पः किञ्चिन्न बुबुधे चमत्कारं कदम्बिनः ।
अवरुह्य हरिर्मूर्ध्नो ददौ हस्तं तु भोगिनि ॥३०॥
सर्पः प्रबोधमासाद्य ददर्श पुरतो हरिम् ।
नागिनीं साश्रुनेत्रां च सुरसां स्वपतिव्रताम् ॥३१॥
बालकृष्णं नमस्कृत्य रुरोद प्रेमविह्वलः ।
श्रीकृष्णस्तं परं भक्तं वरं वृण्वित्युवाच ह ॥३२॥
त्वं मे भक्तो यतः सर्प सुखं तिष्ठ भयं त्यज ।
तस्याऽहमनुगृह्णामि यो मे भक्तोऽतिगाऽर्पितः ॥३३॥
किञ्चित्तद्‌मनं कृत्वा तत्प्रसादं करोम्यहम् ।
त्वद्वंशजातान् सर्पांश्च हन्ति यो मानवः क्वचित् ॥३४॥
ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ।
मत्पादपद्मचिह्ने यः करोति दण्डघातनम् ॥३५॥
द्विगुणा ब्रह्महत्या वै भविता तस्य निश्चिता ।
लक्ष्मीर्यास्यति तद्गेहाच्छापं दत्वा सुदारुणम् ॥३६॥
वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ।
देहान्ते तस्य मृत्युश्च सर्पदंशाद् भविष्यति ॥३७॥
तस्य वंशोद्भवानां च त्वद्वंशाद् भविता भयम् ।
ये तु त्वद्वंशजान् दृष्ट्वा मत्पदांकं मदीयकम् ॥३८॥
प्रणमिष्यन्ति भक्त्या ते मोक्ष्यन्ते चौरगाद् भयात् ।
गच्छ शीघ्रं रमणकं त्यज भीतिं खगाधिपात् ॥३९॥
मत्पदाङ्कं तव मूर्ध्नि दृष्ट्वा पक्षी नमिष्यति ।
तव त्वद्वंशजानां च गरुडान्न भयं क्वचित् ॥४०॥
वरं चाप्यपरं सर्प वाञ्छितं वरयाऽधुना ।
इत्युक्तः प्राह कालीयो भक्तिं देहि स्मृतिं तव ॥४१॥
दास्यं देहि त्वत्पदाब्जे ध्रुवं जन्मनि जन्मनि ।
तद्भवेत् सफलं यत्र स्मृतिस्त्वच्चरणाम्बुजे ॥४२॥
तन्निष्फलः स्वर्गवासो नास्ति चेत् त्वत्पदस्मृतिः ।
त्वत्पादध्यानयुक्तस्य यत्तत्स्थानं तु तत् परम् ॥४३॥
क्षणं वा कोटिकल्पं वा पुरुषायुः क्षणोऽस्तु वा ।
यदि त्वत्सेवया याति सफलो निष्फलोऽन्यथा ॥४४॥
तेषां त्वायुर्व्ययो नास्ति ये त्वत्पादाब्जसेवकाः ।
न सन्ति जन्ममरणरोगशोकाऽऽर्तिभीतयः ॥४५॥
सम्प्राप्तस्त्वन्मनुर्ब्रह्मन्ननन्ताद् यावदेव तु ।
तावत् त्वद्भावनेनैव त्वद्वर्णोऽहमनुग्रहात् ॥४६॥
मां तु भक्तमपक्वं वा विज्ञाय गरुडः स्वयम् ।
देशाद् दूरं च न्यक्कारं चकार दृढभक्तिमान् ॥४७॥
भवता तु दृढां भक्तिं दत्वाऽहं स्वीकृतः स्वकः ।
गरुडश्च समुक्तस्तु मा भक्तं खाद चोरगम् ॥४८॥
अनुगृहीतश्चाहं संरक्षितः सर्वदा त्वया ।
हे नाथ करुणासिन्धो दीनबन्धो क्षमाऽधमम् ॥४९॥
इति ब्रुवन्तं नागेन्द्रमोमित्याह हरिस्तदा ।
नागेन्द्राय वरं दत्वा गच्छेत्याह हरिः पुनः ॥५०॥
सर्पः प्राह कदा विष्णो द्रक्ष्यामि त्वत्पदाम्बुजम् ।
प्रणम्य शतकृत्वश्च ययौ रमणकं स्थलम् ॥५१॥
जलं जातं सुधाकल्पं प्रसन्नाः सर्वजन्तवः ।
शृणु लक्ष्मि तस्य पूर्वस्थलत्यागस्य कारणम् ॥५२॥
शेषाज्ञया नागगणाः प्रतिसंवत्सरं भिया ।
कार्तिकीपूर्णिमायां तु कुर्वन्ति गरुडार्चनम् ॥५३॥
पुष्पैर्धूपैः सुदीपैः सन्नैवेद्यैर्बलिभिस्तथा ।
पुष्करे ते महातीर्थे सुस्नातास्तस्य पूजनम् ॥५४॥
चक्रुस्तदा तु कालीयो न चकाराऽत्यहंकृतः ।
नागपूजोपकरणं बलाद् भक्षितुमुद्यतः ॥५५॥
तावत्तत्र समायातो गरुडो युयुधे तु तैः ।
कालीयजातीयसर्पैः सर्पास्तेन पलायिताः ॥५६॥
अनन्तं शरणं जग्मुस्तत्र गत्वा तु पक्षिराट् ।
युद्धं चकार तुमुलं त्वनन्तं जितवान् खगः ॥५७॥
कालीयस्तु विदुद्राव जगाम यमुनाह्रदम् ।
न तं सौभरिशापेन खगेन्द्रो गन्तुमीश्वरः ॥५८॥
गरुडस्त्वेकदा पूर्वं मत्स्यभक्षणवाञ्छया ।
तपतः सौभरेर्यमीतटस्थस्य समीपतः ॥५९॥
जग्राह चञ्चुना मीनं मीनोऽपि दैवयोगतः ।
चञ्च्वा वियुक्तो निकटे पपात सौभरेस्तदा ॥६०॥
शरणागतरक्षां संकुरु चेत्याह मीनराट् ।
मुनिराह गरुडं तं पुनरादातुमुद्यतम् ॥६१॥
गच्छ दूरं गच्छ दूरं खगेन्द्र मत्समीपतः ।
करोमि भस्मसात्तूर्णं यद्यागच्छसि मे ह्रदम् ॥६२॥
मदीयशापात् तूर्णं त्वं भस्मसाद् भवितासि वै ।
सौभरेस्तु वचः श्रुत्वा प्रचचाल खगेश्वरः ॥६३॥
स्मारं स्मारं कृष्णपादं तं प्रणम्य जगाम ह ।
इतिहेतोर्गरुडः स नायाति यमुनाह्रदम् ॥६४॥
अतो निर्भयतामाप्य कालीयस्तत्र संस्थितः ।
श्रीकृष्णस्य प्रतापेन दिव्यो भक्तोऽभवत्ततः ॥६५॥
गतो रमणकं खण्डं नागिन्याश्छायया सह ।
मूलरूपा तु मोक्षं सा सुरसा संजगाम ह ॥६६॥

नागरूपाऽपि तिर्यञ्ची पातिव्रत्यपरायणा ।
पतिं प्राप्त्वा रक्षयित्वा भूत्वा द्वेधाऽच्युताऽर्थनात् ॥६७॥
कृष्णदास्यं गता धाम्नि पत्यौ छायाऽप्यवर्तयत् ।
एवं रक्षा कृता चापि कृष्णनारायणेन वै ॥६८॥
किमस्ति दुर्लभं लक्ष्मि ! भगवद्ध्यायिनोऽत्र वै ।
परत्रापि च दौर्लभ्यं सौलभ्ये परिवर्तते ॥६९॥
तस्माद् ध्येयः सदा कृष्णः सुखवाञ्छाप्रपूरकः ।
पठनाच्छ्रवणाच्चास्य नागभीतिर्न जायते ॥७०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने यमुनाह्रदस्थकालीयसर्पस्य पतिव्रतायाः सुरसानागिन्या भगवत्प्राप्तिः पतिसौभाग्यसातत्यं, नागभक्षक-गरुडस्य सौभरिशापात् यमुनाह्रदे सर्पस्य निर्भयता, पश्चाद् रमणके वास इत्यादि-निरूपणनामा सप्तत्यधिकचतुश्शत-तमोऽध्यायः ॥ ४७० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! च मण्डुक्याः कथामुद्धारकारिणीम् ।
आनन्दकानने शंभोर्मन्दिरं त्वास शोभनम् ॥ १ ॥
एका भेकी सदा तत्र संवसते शिवसन्निधौ ।
प्रदक्षिणं करोतीयं निर्माल्याऽक्षतभक्षिणी ॥ २ ॥
एकदा सा बहिर्याता विहारार्थं तृणादिषु ।
कश्चित् काकः समालोक्य मण्डूकीं तामितस्ततः ॥ ३ ॥
संप्लवमानामादाय चञ्च्वा क्षेत्राद् बहिर्गतः ।
वर्षाभ्वी तेन सा क्षिप्ता काकेन क्षेत्रबाह्यतः ॥ ४ ॥
मृता चञ्चुप्रहारेण प्रदक्षिणादिपुण्यतः ।
पुष्पबटुगृहे कन्या गान्धर्वी सा व्यजायत ॥ ५ ॥
शंकरस्य तु लिंगस्य शैवालादि तु भक्षितम् ।
तेन पुण्यप्रभावेण शुद्धा मिष्टस्वरान्विता ॥ ६ ॥
बाल्यादेव निपूणा सा संव्यजायत गीतिषु ।
नाम्ना सा माधवी साध्वी शंभुपतिव्रताऽभवत् ॥ ७ ॥
शुभावयवसंस्थाना श्रेष्ठलक्षणलक्षिता ।
महाभागवती जातिस्मरा भक्तोत्तमाऽभवत् ॥ ८ ॥
सम्यग्गीतरहस्यज्ञा नितरां मधुरस्वरा ।
गायत्येव यथाकालं षड्जमृषभं वा स्वरम् ॥ ९ ॥
गान्धारं मध्यमं पञ्चमं वा धैवतमित्यपि ।
क्वचिन्निषादं सा बाला गायति प्रवरोच्छ्रयम् ॥१०॥
षड्जग्रामैर्मध्यमग्रामैश्च गान्धारग्रामकैः ।
अथ तत्र षड्जग्रामे मूर्छनाः सुयुनक्ति सा ॥११॥
उत्तरमन्द्रां च रजनीं तृतीयामुत्तरायताम् ।
शुद्धषड्जां मत्सरितामश्वक्रान्ताऽभिरुद्गते ॥१२॥
एवं मध्यमग्रामेषु सौवीरीं हारिणां तथा ।
अश्वां च कालोपनतां शुद्धमध्यमां गीर्मयीम् ॥१३॥
पौरवीं चेत्यथ गान्धारग्रामेषु तु नन्दिकाम् ।
विशालां सुमुखीं चित्रां चित्रवतीं सुखां तथा ॥१४॥
आलापां च यथावाहं सुयुनक्ति धिया सती ।
तानाँस्त्वेकोनपञ्चाशत् क्रमाऽवृत्त्या युनक्ति च ॥१५॥
अग्निष्टोमं तथाऽत्यग्निष्टोमं च वाजपेयकम् ।
षोडशीं पुण्डरीकं चाऽश्वमेधं राजसूयकम् ॥१६॥
एवमादीन् दर्शयित्वा करोति शुभगायनम् ।
तालानेकोत्तरशतं ध्रुवं साम्यं तथाऽपरान् ॥१७॥
सन्निपातादिकान् लाति गायत्यपि तथाविधान् ।
षड्रागान् श्रीं वसन्तं च पंचमं भैरवं तथा ॥१८॥
मेघं जङ्गलरायणं निष्कासयति यत्नतः ।
प्रत्येकस्य च पञ्चापि रागिनीः पञ्च सा सती ॥१९॥
षट्त्रिंशद्रागरागिणीः प्रकाशयति कण्ठतः ।
देशकालविभेदेन पञ्चषष्ट्यपरास्तथा ॥२०॥
यावन्त एव तालाः स्यू रागास्तावन्त इत्यपि ।
तान् सर्वान् नित्यदा साध्वी गायति गीतिवेदिनी ॥२१॥
माधवी मधुरालापा ओंकारं शंकरं सदा ।
सन्तोषयति रागाद्यैर्नर्तनैः पूजनैः स्तवैः ॥२२॥
प्राप्याऽप्यनर्घ्यतारुण्यमोंकारं बह्वमन्यत ।
स्वभावचञ्चलं चेतः शंभौ स्थैर्यं समागमत् ॥२३॥
न वै तां बाधयाञ्चक्रे क्षुत्तृण्निद्राश्रमादिकम् ।
अतन्द्रितमानसाऽऽसीन्नित्यं शंकरसेविका ॥२४॥
निमेषं विघ्नरूपं सा मेने कालं निरर्थकम् ।
निमेषान्तरितः कालो यो यो व्यर्थो गतो मम ॥२५॥
शिवाऽनवेक्षणात्तस्य प्रायश्चित्तं करोति च ।
इति सञ्चिन्तयन्त्येव सेवां तत्याज नैव सा ॥२६॥
जलाभिलाषिणी शंभुनामाऽमृतं पिबत्यपि ।
नान्यद्दिदृक्षिणी तस्या अक्षिणी श्रुतिगे ह्यपि ॥२७॥
तस्याः कर्णौ शिवशब्देतरशब्दग्रहौ न वै ।
अतीव सुन्दरौ हस्तौ शिवार्थं मालिकाकरौ ॥२८॥
नाऽन्यत्र चरणौ तस्याश्चरतः सुखवाञ्छया ।
नामान्तरं न गृह्णाति क्वचिदन्यस्य कस्यचित् ॥२९॥

शिवं शंभुं हरं कृष्णं नारायणं सतीपतिम् ।
परं पतिं च रटति स्वामिनं प्रणवाभिधम् ॥३०॥
रसना नैव जानाति तस्या अन्यद् रसान्तरम् ।
सम्मार्जनं रंगमालाः प्रासादं परितः सदा ॥३१॥
विदधाति माधवी सा प्रतिमापूजनं मुदा ।
पात्राणां शोधनं नित्यं मन्दिरस्य प्रसेवनम् ॥३२॥
ये केऽपि च हरे भक्तिमन्तस्तेषां समर्चिका ।
शुश्रूषयति नित्यं तान् पितृबुद्ध्याऽतिभक्तितः ॥३३॥
वैशाखस्य चतुर्दश्यामेकवारं तु माधवी ।
रात्रौ जागरणं कृत्वा दिवोपवाससद्व्रता ॥३४॥
भक्त्या मिलितभक्तेषु प्रातर्गतेषु वै ततः ।
सम्मार्जनादिकं कृत्वा शंभुमभ्यर्च्य भावतः ॥३५॥
गायन्ती मधुरं गीतं नृत्यन्ती निजलीलया ।
ध्यायन्ती श्रीहरिं कृष्णमोंकारेश्वरबिम्बके ॥३६॥
अतीव द्रवभावेन पश्यतां तु तपस्विनाम् ।
अनेनैव शरीरेण पार्थिवेन महामतिः ॥३७॥
तत्रैवोंकारमूर्तौ सा लयं याता रसात्मिका ।
तत्र ज्योतिषि सा बाला ज्योतिर्मय्यपि सा सती ॥३८॥
वैशाखशुक्लपक्षस्य चतुर्दश्यां पतिव्रता ।
दिव्यभावं गता तत्र शंभुस्तस्या विमुक्तये ॥३९॥
ददौ तस्यै कृष्णमन्त्रं तुलसीमालिकां गले ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥४०॥
मन्त्रं त्रिवारं तिलकं वैष्णवीत्वं ददौ हरः ।
चतुर्भुजा सती भूत्वा ययौ गोलोकमीश्वरी ॥४१॥
मत्स्योदरीतटे क्षेत्रे गोघट्टे च पतिव्रताः ।
स्नान्ति दिव्ये कृष्णदेवालये कुर्वन्ति दर्शनम् ॥४२॥
घनश्यामस्य ये लोका अक्षरं ते प्रयान्ति वै ।
पञ्चनदे तु प्राक् स्नात्वा तत ओंकारसन्निधौ ॥४३॥
मत्स्योदरीं ततः स्नात्वा गोघट्टे तु ततः परम् ।
मत्स्योदर्युद्यानदक्षे श्रीघनश्याममन्दिरे ॥४४॥
लक्ष्मीनारायणं काशीविश्वेश्वरं प्रपूज्य च ।
गणेशं हनुमन्तं च नत्वा मुक्तो भवत्यपि ॥४५॥
यदाप्रभृति विश्वेशो मन्दरादागतोऽभवत् ।
काश्यामानन्दवनके लक्ष्मीनारायणोऽप्यहम् ॥४६॥
मत्स्योदरीतटे सप्तशिखराढ्ये सुमन्दिरे ।
पद्माकारे महारम्ये कृष्णनारायणाह्वयः ॥४७॥
योऽहं गोलोकधामस्थः काम्भरेयोऽत्र भूतले ।
सोऽहं तत्र निवसामि प्रतिमायां त्वया सह ॥४८॥
मम नाम सदा विप्रा जपन्ति तत्र शाश्वतम् ।
लक्ष्मीनारायणं कृष्णनारायणं तथा प्रिये ॥४९॥
विश्वेश्वरं तथौंकारं पूजयन्ति च पण्डिताः ।
यावन्नेन्द्रियवैकल्यं यावन्नैवाऽऽयुषः क्षयः ॥५०॥
यावत्सुयोगः पुण्यस्य मानसस्याऽतिभावना ।
तावत् सेव्यः प्रयत्नेन मोक्षदो भगवान् हरिः ॥५१॥
य आनन्दवने शंभोः शिश्रियुः श्रीनिकेतनम् ।
अचला श्रीर्न मुञ्चेत् तान्महासौख्यप्रदायिनी ॥५२॥
इममध्यायमाकर्ण्य जनाः श्रीश्वरमानसाः ।
विमुक्ताः सर्वपापेभ्योऽक्षरं पदमवाप्नुयुः ॥५३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मण्डूक्याः शिवप्रसादादने मरणोत्तरं गान्धर्वीत्वं शिवपातिव्रत्येन शिवालये गायन्त्या माधव्यास्तस्या मोक्ष इत्यादिनिरूपणनामैकसप्तत्यधिकचतुश्शततमोऽध्यायः ॥४७१॥

श्रीनारायण उवाच---

शृणु लक्ष्मि ! तथा त्वन्यां कथां पारावतीभवाम् ।
देवालये निवसन्त्याः पारावत्यास्तु भर्तरि ॥ १ ॥
पातिव्रत्येन धर्मेण सेवया तोषणेन च ।
देवदेवप्रसादेन भुक्तिर्मुक्तिर्बभूवतुः ॥ २ ॥
नाम्ना रथन्तरे कल्पे त्रिलोचनस्य मन्दिरे ।
पीठे वीरजके क्षेत्रे रत्नसातौ सुशोभिते ॥ ३ ॥
देदीप्यमानसौवर्णकलशैः संविराजिते ।
शृंगे पारावतद्वन्द्वं वसति स्म कृतालयम् ॥ ४ ॥
प्रातः सायं च मध्याह्ने कुर्वन्नित्यं प्रदक्षिणाम् ।
उड्डीयमानं परितः पक्षवातैरितस्ततः ॥ ५ ॥
रजः प्रासादसंलग्नं दूरीकरोति सर्वदा ।
त्रिलोचनेति सततं नाम कृष्णनरायणम् ॥ ६ ॥
भक्तैरुदाहृतं ताभ्यां तयोः कर्णाऽतिथीकृतम् ।
मंगलारात्रिकं तयोर्भक्तिं वर्धयति ध्रुवम् ॥ ७ ॥
दिवा भक्तजनाकीर्णे प्रासादं परितोऽन्वहम् ।
तण्डुलादि चरन्तौ तौ प्रकुर्वाते प्रदक्षिणम् ॥ ८ ॥
प्रासादिकजलं तौ च पिबतः स्म नलीगतम् ।
तयोरित्थं विचरतोर्महादेवसमीपतः ॥ ९ ॥
अगाद् बहुतिथिः कालो द्विजयोः साधुचेष्टयोः ।
अथ देवालयस्कन्धे गवाक्षान्तर्गतौ क्वचित् ॥१०॥

श्येनो दृष्ट्वाऽपतद् वेगात् पारावातजिघृक्षुकः ।
उड्डीय तौ गतावन्तर्देवालयं रिरक्षया ॥११॥
श्येनो विलोकयामास तत्र तयोर्विनिर्गमम् ।
कथं युगपदेतौ मे ग्राह्यौ स्यातामचिन्तयत् ॥१२॥
सायं श्येनो ययौ स्थानान्तरं लब्धौ न तौ यतः ।
अथ पारावती दक्षा पतिसेवापरायणा ॥१३॥
कालं पक्षिणं संलक्ष्य प्राह पारावतं पतिम् ।
प्रिय पारावत प्राज्ञ श्येनः स प्रबलो रिपुः ॥१४॥
भक्षयिष्यति नौ नाथ यावः स्थानान्तरं प्रभो ।
विधवात्वं विधुरत्वं यद्वा द्वयोर्विनाशनम् ॥१५॥
श्येनेन चेत् कृतं स्याद्वै महापत्तिमयं भवेत् ।
पत्नीव्रतं तव स्वामिन् मम स्वामिव्रतं तथा ॥१६॥
विलुप्येत परो लोकः प्रतिबध्येत तेन वै ।
इति श्रुत्वा कलरव्याः साध्व्याः प्राह पतिस्तु ताम् ॥१७॥
दुर्गात्ममन्दिरे साध्वि ! नास्ति चिन्ता हराश्रये ।
वस्तव्यं त्वद्यदिवसात् सुनिपूणतया प्रिये ॥१८॥
दुर्गस्थौ नाभिभूयेताऽबलोऽपि केनचित् क्वचित् ।
मन्दिरं दुर्गरूपं वै वर्तते तत्र किं भयम् ॥१९॥
नैतादृशं वै लप्स्येत स्वाश्रयं सुस्थलान्तरम् ।
इति पारावतवाक्यं श्रुत्वा पारावती तदा ॥२०॥
मौनमालम्ब्य तत्रैव पत्युः पादार्पितेक्षणा ।
हितवर्त्मोपदिश्याऽपि प्रियप्रियचिकीर्षया ॥२१॥
साध्व्या जोषं समास्थेयं कार्यं पत्युर्वचः सदा ।
अन्येद्युरप्यथाऽयातः श्येनोऽपश्यत् स दम्पतीम् ॥२२॥
अपरिच्छिन्नया दृष्ट्या प्रासादं परितो भ्रमन् ।
अनाधृष्यौ शृंगमध्ये स्थितौ मत्वा ययौ हि सः ॥२३॥
गतेऽथ नभसि श्येने पुनः पारावती पतिम् ।
प्रोवाच प्रेयसी नाथ दृष्टो दुष्टो विघातकः ॥२४॥
अवश्यं स कदाचिद्वै नौ विघ्नं हि करिष्यति ।
तस्मात् स्थानान्तरं नाथ गन्तव्यं सुखदं भवेत् ॥२५॥
तस्या वाक्यं समाकर्ण्य पुनः कलरवोऽब्रवीत् ।
किं करिष्यत्यसौ मुग्धे ! दुर्गे स्वर्गसमं हि नौ ॥२६॥
यत्र तस्य प्रवेशो न न जानाति प्रवेशिकाम् ।
देवसौधान्तरे वासो योगक्षेमकरः प्रिये ॥२७॥
यदि दैवाद्गगनेऽपि भवेदाकस्मिकोऽभिगः ।
तथापि वेद्मि ता गतीर्या न वेत्ति ममाऽहितः ॥२८॥
प्रडीनोड्डीनसण्डीनकाण्डव्याडकपाटिकाः ।
स्रसनीमण्डलवती गतयोऽष्टावुदाहृताः ॥२९॥
भ्रमणं रेचनं स्यन्दमूर्ध्वयानं च वक्रता ।
पतनं मूर्छनं बद्धं गतयोऽष्टौ तथाऽपराः ॥३०॥
सर्वा जानामि मे तत्र कौशल्यं सर्वथा प्रिये ।
यथा तथाऽम्बरे नास्ति पक्षिणोऽन्यस्य मत्समम् ॥३१॥
सुखेन तिष्ठ का चिन्ता मयि जीवति ते प्रिये ।
इतिपत्युर्वचः श्रुत्वा सा स्थिता मूकवत् सती ॥३२॥
अपरेद्युरपि श्येनस्तत्र पद्मशिलोपरि ।
कियन्तं कालमासाद्योपविष्टोऽतिप्रहृष्टहृत् ॥३३॥
मार्गं त्वन्तःप्रवेशस्य भ्रमित्वा समलोक्य च ।
पुनर्ययौ व्योममार्गे दृष्ट्वा त्वन्तःस्थितौ तु तौ ॥३४॥
अथ भीता सती पारावती प्राह पुनः पतिम् ।
प्रिय ! स्थानमिदं त्याज्यं शत्रुदृष्टिविदूषितम् ॥३५॥
असौ क्रूरोऽतिवेलं वै समायाति जिघृक्षया ।
श्रुत्वा प्रियावचः प्राह किं करिष्यत्यसौ प्रिये ॥३६॥
योषितां तु निसर्गोऽयं प्रायशो भीरुवृत्तिता ।
अथेतरेद्युरपि स श्येनः प्राप्तो जिघृक्षया ॥३७॥
ययोरभिमुखस्तत्र स्थितो यामद्वयावधिम् ।
पुनर्विलोक्य तौ शीघ्रं ययौ ततश्च साऽऽह तम् ॥३८॥
नाथ स्थानान्तरं यावो मृत्युर्नौ निकटोऽत्र यत् ।
गतिस्तेऽभिहिता नैकविधाऽत्र किं तवाऽऽग्रहः ॥३९॥
यत्र क्वापि निवत्स्यावः सिद्धिरुद्योगसन्मुखा ।
सोपसर्गं निजं देशं यो न त्यजति मानवः ॥४०॥
स पंगुर्नाशमाप्नोति बल्यपि दैववर्जितः ।
प्रियोदितं खगो नैव मेने भाविदशार्दितः ॥४१॥
प्राह मा भैः खगात् साध्वि स्थानं नैतादृशं परम् ।
अथाऽपरस्मिन्नहनि स श्येनः प्रातरेव तु ॥४२॥
तन्मार्गदेशमासाद्य सायं यावत् स्थितो बलः ।
सूर्यास्ते तु खगे याते प्राह पारावती पतिम् ॥४३॥
नाथ निर्गमनस्याऽयं कालोऽस्तीदं गृहं त्यज ।
त्यक्त्वा मामपि निर्याहि पश्चाद् योग्यं भविष्यति ॥४४॥
त्वयि जीवति दुष्प्राप्यं न किञ्चिज्जगतीतले ।
पुनर्दाराः पुनर्मित्रं पुनर्वसु पुनर्गृहम् ॥४५॥
आत्मा चेद् रक्षितः पुंसा दारैरपि धनैरपि ।
प्रियो बन्धुरयमात्मा रक्षणीयो महद्धनम् ॥४६॥
धर्मार्थकाममोक्षाणामयमात्माऽर्जकः परः ।
यावदात्मनि वै क्षेमं तावत् क्षेमं जगत्त्रये ॥४७॥
अतः क्षेमकरं वाक्यं ममश्रुत्वा नयान्वितम् ।
इतोऽन्यत्र व्रज स्वामिन्नन्यथा मां स्मरिष्यसि ॥४८॥

इत्युक्तोऽपि स वै पत्न्या पतिसेवासुमेधया ।
न निर्ययौ ततः स्थानाद् भवित्र्या प्रतिवारितः ॥४९॥
अथोषसि समायातः श्येनः प्राह प्रसह्य तम् ।
आगच्छ स्थानतो बाह्ये त्वद्य भक्ष्यो भविष्यसि ॥५०॥
यद्वा क्षुधितश्चाहं वै स्वार्थी कष्टं न पश्यति ।
आगच्छामि गृहान्तस्ते प्रिये वा मारयामि वा ॥५१॥
इत्युक्त्वाऽन्तःप्रविश्यैव श्येनेन चरणेन सः ।
धृतः खगस्ततश्चञ्च्वा बलिना सा धृता खगी ॥५२॥
आक्रोशं चक्रतुस्तौ वै न वै केनापि रक्षितौ ।
श्येनस्तं भक्षितुं स्थानं निर्विघ्नं चिन्तयन्मुहुः ॥५३॥
व्योम्नि संभ्रमणं चक्रे तावत् खग्या सुमेधया ।
कथितं नाथ वचनं त्वन्तिमं मेऽनुवर्तय ॥५४॥
चञ्च्वा त्वात्मविमुक्त्यै त्वमरेः प्रादं दृढं दश ।
इत्यादिष्टश्चकारैवं श्येनः पीडां जगाम ह ॥५५॥
अत्यतिदंशितः श्येनश्चित्कारान् कृतवाँस्तदा ।
पारावती मुखात्तस्य निःसृता कलया बलात् ॥५६॥
सापि पृष्ठे मुहुश्चञ्च्वा पद्भ्यां जघान घातकम् ।
तेन पारावतश्चापि मुक्तस्त्वाकुलितेन वै ॥५७॥
उभाभ्यां मूर्छितः श्येनो विपद्यवि समुद्यमात् ।
दुर्बलेऽप्युद्यमवति फलं भाग्यं ददाति वै ॥५८॥
प्रशंसन्त्युद्यमं तस्मात् सर्वावस्थासु रागिणः ।
अथ तौ क्षतमापन्नावपि भाग्यवशात् खलु ॥५९॥
जीववन्तौ सरय्वाश्च नद्यास्तटे मनोहरे ।
चिरं साकेतनगरे स्थित्वा मृत्युमुपागतौ ॥६०॥
पक्षी तत्राऽभवद् विद्याधरो मन्दारदामजः ।
अनेकविद्यानिलयो नाम्ना परिमिलालयः ॥६१॥
कौमारं वय आसाद्य शिवभक्तिपरोऽभवत् ।
नियमं चातिजग्राह ब्रह्मचर्यपरायणः ॥६२॥
एकपत्नीव्रतं श्रेष्ठं चरिष्यामि ऋतुस्थितम् ।
यावज्जीवं महादेवमनर्च्याऽश्नामि नाण्वपि ॥६३॥
एवं करोति नित्यं स नियमं त्वथ सा खगी ।
रत्नावलीति नाम्नाऽभून्नागकन्या सतीवृषा ॥६४॥
कामरूपधरा नित्यं साकेतारण्यवासिनी ।
तस्याः सखीद्वयं त्वासीत् प्रभावती कलावती ॥६५॥
सुरूपे यौवनं प्राप्ते कामरूपधरे शुभे ।
रत्नावली युवत्यपि जग्राह नियमं सती ॥६६॥
शंभुं प्रातः सदा दृष्ट्वा मौनं त्यक्ष्यामि नान्यथा ।
दिने दिने तु सा नैकवर्णगन्धसुपुष्पकैः ॥६७॥
मालाचन्दनदीपाद्यैः पूजयित्वा हरं ततः ।
तिस्रोऽपि गीतं गायन्ति लसद्गान्धारसुन्दरम् ॥६८॥
रासमण्डलभेदैश्च लास्यं तिस्रोऽपि कुर्वते ।
वीणावेणुमृदंगांश्च लयतालविचक्षणाः ॥६९॥
वादयन्ति मुदा युक्तास्तिस्रो नागकुमारिकाः ।
विचित्रगन्धमालाभिः सम्मार्जनविलेपनैः ॥७०॥
सेवयन्ति हरं नित्यं नृत्यगीतसुभोजनैः ।
वैशाखे त्वेकदा तिस्रस्तृतीयायामुपोषिताः ॥७१॥
चक्रुर्जागरणं रात्रौ प्रातः पूजां प्रचक्रिरे ।
साधून् संभोजयामासुस्ततो मध्याह्नके क्षणे ॥७२॥
नैवेद्यं ता ददुर्मिष्टं जलं च शंकराय वै ।
आरार्त्रिकं प्रचक्रुश्च पुष्पाञ्जलीन् ददुर्यदा ॥७३॥
तावच्छ्रीशंकरस्तुष्टः साक्षात् तासां बभूव ह ।
शुद्धकर्पूरगौरांगो जटामुकुटमण्डलः ॥७४॥
सत्यधिश्रितवामोरुर्नागयज्ञोपवीतिकः ।
प्रसन्नवदनो देवः कामारिर्मोक्षदायकः ॥७५॥
तं विलोक्य तु ताः कन्या बभूवुः पुलकांकिताः ।
ववन्दिरे तुष्टुवुश्च सन्नकण्ठ्योऽतिगद्गदम् ॥७६॥
जय शंभो जय भक्तवत्सल प्रजय प्रभो ।
जय साध्वीपते पशुपते विश्वपते जय ॥७७॥
जय मोक्षपते भक्तपते पावन शंकर ।
जयस्तेऽस्तु नमस्तेऽस्तु नमस्तुभ्यं नमो नमः ॥७८॥
इत्युक्त्वा दण्डवत् भूमौ प्रणिपेतुः कुमारिकाः ।
ताः समाश्लिष्य भगवान् समुवाच कृपानिधिः ॥७९॥
सुतो मन्दारनाम्नो यो नाम्ना परिमिलालयः ।
पतिर्विद्याधरवरो भवतीनां भविष्यति ॥८०॥
चिरं विद्याधरे लोके भोगान् भुक्त्वा समन्ततः ।
ततो निर्वेदमापन्ना मोक्षसिद्धिमवाप्स्यथ ॥८१॥
यूयं तिस्रोऽपि मे भक्ताः स च विद्याधरो मम ।
चत्वरोऽप्येत एवात्र प्रान्ते मोक्षमवाप्स्यथ ॥८२॥
जन्मान्तरे पुरा सेवा युष्माभिर्विहिता मम ।
तेनापि विहितं दास्यं व्रतं ब्रह्मव्रतं तथा ॥८३॥
तेन पुण्येन भगवान् कृष्णनारायणः स्वयम् ।
गुरुर्मे भवतीनां च मोक्षदाता भविष्यति ॥८४॥
भवन्तु च महाभाग्यवत्यः कृष्णपतिव्रताः ।
अहं जपामि सर्वेशं कृष्णनारायणं पतिम् ॥८५॥
भवत्योऽपि भजन्त्वेनं गृह्णन्त्वस्य मनुं परम् ।
प्रसादं च जलं त्वेतद् गृह्णन्त्वच्युतसेवितम् ॥८६॥

इति कृत्वा हरस्ताभ्यो ददौ मनुं सुमोक्षदम् ।
ओं नमः श्रीकृष्णनाराय स्वामिने नमः ॥८७॥
त्रिवारं सम्प्रदायैव ददौ तुलसिकादलम् ।
तुलसीमालिकां चापि कण्ठे करे च सन्ददौ ॥८८॥
बिन्दुं ददौ ललाटेऽथ चन्दनस्य हरः स्वयम् ।
एवं दत्वातु विधिना प्रतिमां मणिनिर्मिताम् ॥८९॥
प्राह स्वस्ति सदा चास्त्वखण्डसौभाग्यमच्युते ।
वैष्णवीत्वं सदा कृष्णे दास्यं पतिव्रतं तथा ॥९०॥
आराधनं तथा कृष्णनारायणेऽस्तु सर्वदा ।
पतिसेवां कृष्णसेवा विना भेदं सदाऽस्तु वः ॥९१॥
इत्युक्त्वा शिरसि दत्वा करं त्वदृश्यतां गतः ।
तास्तु प्रहृष्टहृदया गत्वा गृहं जगुर्मुदा ॥९२॥
दिव्यभावं समापन्ना भित्त्याद्यावरणादिभिः ।
अनिरुद्धा व्योममार्गगतयः कमला यथा ॥९३॥
पूर्वजातिस्मराः सत्यो ब्रह्मचर्यपरायणाः ।
कृष्णभक्तिपराः शंभोरादेशात् सात्त्वतीमुखाः ॥९४॥
जीवन्मुक्ताः प्रसञ्जाताः स्वतन्त्रगतिका इह ।
लक्ष्मि ! पारावतः पूर्वे द्विजो नारायणाह्वयः ॥९५॥
आमुष्यायणपुत्रोऽभूत् पितृशुश्रूषणव्रतः ।
सर्पदंष्टो मृतश्चाथ सोऽयं पारावतोऽभवत् ॥९६॥
चारायणस्य पुत्र्यौ द्वे भवानी गौतमी तथा ।
आमुष्यायनपुत्रस्य पत्नी नारायणस्य ते ॥९७॥
वैधव्यदुःखमापन्ने दैन्यग्रस्ते बभूवतुः ।
अथर्षेः कस्यचिद् दैवादाश्रमे परमाद्भुते ॥९८॥
रंभाफलानि संगृह्य खादतः स्म तदा मुनेः ।
शापात्ते कन्यके नष्टे वानर्यौ ते बभूवतुः ॥९९॥
जले पतित्वा तत्यजतुः प्राणाँस्तीर्थोत्तमे ततः ।
ते जाते नागकन्ये वै देवालयाश्रमाश्रयात् ॥१००॥
कृष्णधर्मपरे साध्व्यौ प्रभावती कलावती ।
परिमलालयविद्याधरपत्न्याः सखीद्वयम् ॥१०१॥
पितृभ्यां ते प्रेमवत्यौ ज्ञात्वा विद्याधरे शुभे ।
परिमलालये पश्चात्तस्मै दत्ते विवाहिते ॥१०२॥
एवं पत्नीत्रयं रत्नावली प्रभा कलावती ।
कृष्णनारायणे रक्ता पातिव्रत्यपरायणा ॥१०३॥
कृष्णनारायणं नित्यं भजन्ते स्म सुखान्विताः ।
पूजां जपं च नैवेद्यं स्तुतिं नीराजनं क्षमाम् ॥१०४॥
पुष्पांजलिं प्रकुर्वन्ति नित्यं नैमित्तिकोत्सवान् ।
कार्तिके कृष्णपक्षे ता अष्टम्यां कृष्णपूजनम् ॥१०५॥
जयन्तीं ता अभिप्रेत्य कृष्णव्रतं प्रचक्रिरे ।
गोलोकात्तु स्वयं कृष्णो राधारमाप्रभापतिः ॥१०६॥
आजगाम विमानेन नेतुं ताः पतिसंयुताः ।
दिव्यं स्वं दर्शनं दत्वा नीत्वा विमानकोत्तमे ॥१०७॥
ययौ गोलोकमेवासौ मुक्तिं दास्यात्मिकां ददौ ।
वद लक्ष्मि ! न कृष्णाऽग्रे भक्तानां भिन्नभावना ॥१०८॥
यत्र क्वापि प्रसूतोऽपि भक्तो हरिपदं लभेत् ।
सर्वे वै बालकास्तस्य कृष्णनारायणस्य वै ॥१०९॥
तं भजित्वा प्रयान्त्येव परमं धाम शाश्वतम् ।
श्रीकृष्णस्य कथामेतां श्रुत्वा पापाद् विमुच्यते ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पारावतदम्पत्यौ शिवमन्दिराश्रयेण विद्याधरजन्म ललभतुः, परिमलालयविद्याधरस्य रत्नावलीप्रभावतीकलावतीपत्नीत्रयम्, कार्तिककृष्णाष्टमीव्रतेन कृष्णपातिव्रत्येन चत्वारोऽपि ते मुक्तिं जग्मुरितिनिरूपणनामा द्विसप्तत्यधिकचतुश्शततमोऽध्यायः ॥४७२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! धर्मपीठे क्षेत्रे त्वानन्दकानने ।
चमत्कारोऽभवद् धर्मतपस्याया वदामि तम् ॥ १ ॥
धर्मपीठं तदुक्तं वै क्षेत्रे त्वानन्दकानने ।
तत्पीठदर्शनादेव जनः पापैः प्रमुच्यते ॥ २ ॥
पुरा विवस्वतः पुत्रो यमी धर्मभृतां वरः ।
तपस्तताप तत्क्षेत्रे लोकाऽनुग्रहकारणात् ॥ ३ ॥
शिशिरे जलमध्यस्थो वर्षास्वभ्रावकाशकः ।
तपतौ पञ्चवह्निस्थः कदाचित्त्वतिवातगः ॥ ४ ॥
पादाऽग्राऽङ्गुष्ठभूस्पर्शी बहुकालं स तस्थिवान् ।
एकपादस्थितः सोऽपि बहुकालं ततः पुनः ॥ ५ ॥
समीराऽभ्यवहर्ताऽऽसीत् ततः पपौ जलं मनाक् ।
कुशाग्रमात्रेण तद्बिन्दून् ततश्चाहारवर्जितः ॥ ६ ॥
दिव्यां चतुर्युगीमित्थं स निनाय तपश्चरन् ।
चतुर्गुणं दिदृक्षुः श्रीशंकरं वै समाधिना ॥ ७ ॥
शंकरस्तस्य तपसा सन्तुष्टः स्थिरचेतसः ।
ययौ तस्मै वरान् दातुं धर्मरूपाय साक्षिणे ॥ ८ ॥
प्रत्यवोचत्तु तं धर्मं वरं वृणु यथेप्सितम् ।
दृष्ट्वा स मां प्रणनाम चकार स्तवनं तथा ॥ ९ ॥
वव्रे संहारकृद्रूपं मम द्रष्टुं तदाऽनघः ।
मया प्रदर्शितं तस्मै भयानकं ममैव तत् ॥१०॥

महारुद्रस्वरूपं यत् संकर्षणस्वरूपकम् ।
अथ त्वं मत्स्वरूपोऽसि धर्मराजो भवेति वै ॥११॥
समस्तदेहिनां धर्माधिकारे शासनं कुरु ।
कर्मसाक्षी च जन्तूनां भव सर्वज्ञ इत्यपि ॥१२॥
धर्मक्षेत्रमिदं सर्ववाञ्छाप्रपूरकं तथा ।
मोक्षदं भवतु प्राणिपापप्रक्षालनक्षमम् ॥१३॥
धर्मेश्वरं मम रूपं तव नाम्ना भवत्वपि ।
गृहाण त्वं कृष्णमन्त्रं वैष्णवः परमो भव ॥१४॥
इत्युक्त्वा धर्मराजाय ददौ मन्त्रं महेश्वरः ।
ओं नमः श्रीकृष्णनारायणाय ब्रह्मणे नमः ॥१५॥
मालां कण्ठे च वृन्दाया ददौ करे जपार्थिकाम् ।
ललाटे चन्द्रकं चक्रे त्वाशीर्वादान् ददौ बहून् ॥१६॥
न्यायोपदेशं बहुधा ददौ श्रीशंकरः स्वयम् ।
सुखं धर्मफलं प्रोक्तं स्वेच्छाविषयमेव तत् ॥१७॥
दुःखं त्विच्छाविघातौ वै दुष्कर्मणां तु तत्फलम् ।
स्वर्गं सुखं तु देवानामाराधनेन जायते ॥१८॥
साधनानां सुखं पूर्णं दानेनैव प्रजायते ।
अन्यात्मनां प्रतुष्ट्यैवाऽऽनन्दार्थि जीवनं भवेत् ॥१९॥
परपीडाकरं सर्वं स्वस्यापि दुःखदं भवेत् ।
परोपकारः कर्तव्यः कर्तव्यं त्वात्मदर्शनम् ॥२०॥
कृष्णाराधनभक्त्यादि कर्तव्यं मोक्षणाय च ।
लोके वै सम्पदः पुंसां प्राग्दानेन भवन्ति हि ॥२१॥
यन्न दत्तं तन्न लभ्यं तस्माद् धर्मं समाचरेत् ।
कृतस्य फलदानं वै सर्वत्र नियमः कृतः ॥२२॥
शुभस्य चाऽशुभस्यापि त्वया कार्यो विनिर्णयः ।
तत्र तत्र फलं तेभ्यो दास्यत्येव जनार्दनः ॥२३॥
इन्द्रियाणां स्वभावेन भोगः पापं न तन्मतम् ।
अन्यायेन कृतो भोगः पापं प्रसह्य जायते ॥२४॥
प्रसन्नभावनाजन्यं कर्म सन्तोषकारकम् ।
अद्रोहं नैव पापाय पुण्यं सन्तोषदं तु तत् ॥२५॥
कृष्णे समर्पणं सर्वं निष्कामं मोक्षदं तु तत् ।
तस्माद् धर्मः सदा कार्यः कार्यं मोक्षप्रदं व्रतम् ॥२६॥
परात्महिंसनं त्वन्यद्रोहस्तथाऽन्यनिन्दनम् ।
अन्यापहरणं तद्वदुद्वेजनं परात्मनाम् ॥२७॥
एतत्पापप्रदं प्रोक्तं तदन्यत्पुण्यकृत्परम् ।
तेषां फलं यथायोग्यं देहि धर्मभृतां वर ॥२८॥
याहीत्युक्त्वा च पाणिभ्यां मृडः पस्पर्श तं वृषम् ।
सूर्यपुत्रः पुनः प्राह हे नाथ प्रार्थयाम्यहम् ॥२९॥
हे शंभो कीरडिम्भानां मत्पुरःप्राप्तजन्मनाम् ।
अमीषां पितृहीनानां शुकी माता मृतिं गता ॥३०॥
शुकः श्येनेन सहसा भक्षितश्च ततो मया ।
रक्षितानामनाथानामितिहासकथाविदाम् ॥३१॥
वरदो भव देवेशेत्युक्त्वा मौनपरोऽभवत् ।
अथ शंभुः शुकानाह को वरो भवतां कृते ॥३२॥
देयो मयेति संश्रुत्वा शुकशावा जगुस्तु तम् ।
पक्षिणामपि देवेश दर्शनं ते महद्धनम् ॥३३॥
एतत्तपस्वियोगेन जन्मान्तरसहस्रजाम् ।
कथां विद्मो वयं नाथ स्मरामो देवकोटिषु ॥३४॥
दैत्येषु भोगिषु निशाचरेषु किन्नरेषु च ।
विद्याध्रेषु गन्धर्वेषु मनुष्येषु जलेषु च ॥३५॥
स्थलेष्वपि वनेष्वपि विवरेषु भुवोऽन्तरे ।
याचितृषु च दातृषु रक्षकेषु च घातिषु ॥३६॥
सुखितेषु दुःखितेषु मूर्खेषु पण्डितेषु च ।
स्वामिषु सेवकेष्वन्यभूतात्मकेषु शाखिषु ॥३७॥
जन्मानि तत्प्रकार्याणि स्मरामोऽस्य प्रभावतः ।
इतो योनेस्ततो योनौ ततो योनेस्ततोऽन्यतः ॥३८॥
पिनाकिन्! क्वापि न प्रापि सुखलेशो मनागपि ।
इदानीं त्वां समीक्ष्यैव कृतकृत्या बभूविम ॥३९॥
अथापि चेद्भवेद् देयं वरदानं कृपा तव ।
देहि ज्ञानं येन मुक्ता भवामो भवबन्धनात् ॥४०॥
करामलकवत् सर्वं ब्रह्माण्डगोलकादिकम् ।
अस्मद्वाग्गोचरेऽस्त्येव धर्मसान्निध्यसेवनात् ॥४१॥
धर्मराजस्य तपसा जाताः स्मो ज्ञानभाजनम् ।
श्रुत्वेति कीरबालानां तानुवाच शिवापतिः ॥४२॥
काश्यामानन्दवनके धर्मपीठे मम गृहम् ।
मोक्षलक्ष्मीविलासाख्यं मणिरत्नादिनिर्मितम् ॥४३॥
पतत्रिणोऽपि मुच्यन्ते यत्कुर्वाणाः प्रदक्षिणम् ।
बिन्दुमाधवरूपेण धर्मनदे वसाम्यहम् ॥४४॥
नये पञ्चनदस्नातान् तद्विष्णोः परमं पदम् ।
धर्मपीठे बालकीरा यूयं वै ज्ञानभाजनम् ॥४५॥
जाताः स्थ तत् प्रगृह्णीध्वं मनुं वै वैष्णवं परम् ।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥४६॥
गृह्णीध्वं तुलसीमालां जपताऽन्वहमच्युतम् ।
देहान्ते दिव्ययानेन गन्तास्थोऽच्युतधाम यत् ॥४७॥
इत्युक्त्वा च कीरान् कृत्वा वैष्णवान् भगवान् हरः ।
अन्तर्धानं जगामाऽथ धर्मक्षेत्रे च ते कीराः ॥४८॥

भजन्ते श्रीकृष्णनारायणं राधापतिं प्रभुम् ।
लक्ष्मीनारायणसंहिताकथां वाचयन्ति च ॥४९॥
नित्यं कल्पान्तरकथाः श्रावयन्ति जनान् शुकाः ।
कामरूपधरा विज्ञा विद्वांसो वै द्विजोत्तमाः ॥५०॥
एवं कृष्णपातिव्रत्यपरास्ते ह्यभवन् सदा ।
कृष्णपूजां कृष्णकथां चक्रुर्नित्यं विहंगमाः ॥५१॥
तत्रैकदा समायाता पौलोमी व्रतकामिनी ।
मनोरथव्रतं चक्रे तताप परमं तपः ॥५२॥
नित्यं तां श्रावयन्त्येते कथां पापप्रणाशिनीम् ।
लक्ष्मीनारायणसंहितात्मिकां मोक्षदायिनीम् ॥५३॥
कथां श्रुत्वा शची भक्त्याऽऽर्चयत् कृष्णनरायणम् ।
उपचारैः षोडशभिर्धर्मक्षेत्रे नदीतटे ॥५४॥
पञ्चनदे पूजयित्वा शिवं विश्वेश्वरं विभुम् ।
शची नित्यं पूजयति करोति नर्तनं तथा ॥५५॥
गीतेन सरहस्येन कलकण्ठीकलेन च ।
तद्गानेनातिसन्तुष्टो हरः साक्षाद् बभूव ह ॥५६॥
उवाच त्वं वरं ब्रूहि प्रसन्नोऽस्मि पुलोमजे ।
शची प्राह प्रसन्नश्चेन्मनोरथं प्रपूरय ॥५७॥
सर्वदेवेषु यो मान्यः सर्वदेवेषु सुन्दरः ।
यायजूकेषु सर्वेषु यः श्रेष्ठः सोऽस्तु मे पतिः ॥५८॥
यथाभिलषितं रूपं यथाभिलषितं सुखम् ।
यथाभिलषितं चायुः प्रसन्नो देहि मे भव ॥५९॥
यदा यदा तु पत्या मे सङ्गः स्यात् सुखवाञ्छया ।
तदा तदा तु तद्देहं त्यक्त्वाऽन्यदेहमाप्नुयाम् ॥६०॥
भर्तुर्व्यये़ऽपि वैधव्यं क्षणमात्रं न मे भवेत् ।
पातिव्रत्यं शाश्वतं मे पतिनाशेऽपि चाऽस्तु वै ॥६१॥
इतिवृणोमि भगवन्नखण्डितसुभाग्यताम् ।
एतच्छ्रुत्वा महादेवो जहास समुवाच ताम् ॥६२॥
कुरु व्रतं मनोरथतृतीयायाः शुभे शुचि ।
तेन व्रतेन चीर्णेन महासौभाग्यदेन तु ॥६३॥
अवश्यं भविता चेष्टस्तव चैवं मनोरथः ।
पूज्या विश्वभुजा गौरी भुजविंशतिशालिनी ॥६४॥
वरदोऽभवद्धस्तश्च साक्षसूत्रः समोदकः ।
देव्याः पुरस्ताद् व्रतिन्या पूज्य आशाविनायकः ॥६५॥
चैत्रशुक्लद्वितीयायां गृह्णीयान्नियमं शुभम् ।
ब्रह्मचर्यं भूशयनं प्रातरुत्थाय वै शुचि ॥६६॥
अशोकवृक्षस्य शुभं कुर्याद्वै दन्तधावनम् ।
अन्यत् सर्वं नित्यकर्म विधाय स्नानमाचरेत् ॥६७॥
कृष्णनारायणांशं तं गणेशं समपूज्य च ।
घृतपूरान् विनिवेद्य गौरीपूजां समाचरेत् ॥६८॥
अशोककुसुमैः श्रेष्ठैरशोकवर्तिधूपनैः ।
दीपैर्नैवेद्यकैर्नानाविधैः संभोजयेत् सतीम् ॥६९॥
एवं कुंकुमशोभाढ्या ह्येकभुक्तं व्रतं चरेत् ।
एवं चैत्रतृतीयायामारभ्य फाल्गुनावधिम् ॥७०॥
द्वादशतृतीयानां वै व्रतं मनोरथप्रदम् ।
यथालब्धोपचारैर्वै पवित्रैः प्रचरेद् व्रतम् ॥७१॥
व्रतसम्पूर्तये कुर्यात् स्थण्डिलेऽग्निसमर्चनम् ।
शतमष्टाधिकं होमं तिलाऽऽज्यादिभिराचरेत् ॥७२॥
सदैव नक्ते पूजोक्ता सदा नक्ते तु भोजनम् ।
नक्त एव हि होमोऽयं नक्ता एव क्षमापनम् ॥७३॥
नमोऽस्तु ते विश्वभुजे पुरयाऽऽशु मनोरथान् ।
नम आशागणेशाय मम देहि मनोरथम् ॥७४॥
आचार्यं पूजयेद् दानं दद्यात् यथाबल व्रती ।
दद्यात् पयस्विनीं गां च व्रतस्य परिपूर्तये ॥७५॥
प्रातश्चतुर्थ्यां चतुरो भोजयित्वा कुमारकान् ।
यद्वा द्वादश संपूज्य सतीबुद्ध्या कुमारिकाः ॥७६॥
दद्याद् दानानि विधिना व्रतमेतत् सुनिर्मलम् ।
पत्नीं मनोरमां कुल्यां मनोवृत्त्यनुसारिणीम् ॥७७॥
तारिणीं दुःखसंसारसागरस्य पतिव्रताम् ।
कुर्वन्नेतद्व्रतं वर्षे कुमारं प्राप्नुयात् स्फुटम् ॥७८॥
कुमारी पतिमाप्नोति स्वाढ्यं सर्वगुणाधिकम् ।
सुवासिनी लभेत्पुत्रान् पत्युः सौख्यमखण्डितम् ॥७९॥
दुर्भगा सुभगा स्याच्च दरिद्रा स्याद्धनान्विता ।
विधवापि न वैधव्यं पुनराप्नोति कुत्रचित् ॥८०॥
गुर्विणी तु शुभं पुत्रं लभते सुचिरायुषम् ।
यो यो मनोरथो यस्य तं तं ध्रुवं स विन्दति ॥८१॥
व्रतं कृष्णं विना चैन्द्रि ! नैव सिद्ध्यति सर्वथा ।
तस्माद् गृहाण मन्त्रं श्रीकृष्णनारायणस्य वै ॥८२॥
वैष्णवी भव चेन्द्राणि ! ततः सिद्धिमवाप्स्यसि ।
अवैष्णवकृतं व्यर्थं व्रतं दानं जपस्तपः ॥८३॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
जपं कुरु सदा तन्वि गृहाण तुलसीस्रजम् ॥८४॥
कण्ठे धारय वृन्दाया मालां बिन्दुं ललाटके ।
हृदये श्रीकृष्णनारायणं स्वस्वामिनं पतिम् ॥८५॥
एवं कृत्वा व्रज गेहं कुरु व्रतं फलं भवेत् ।
अरुन्धत्या वसिष्ठोऽपि लब्धोऽत्रिरनसूयया ॥८६॥

सुनीत्योत्तानपादाच्च ध्रुवः प्राप्तोऽङ्गजोत्तमः ।
सुनीतेर्दुर्भगत्वं तु पुनरस्माद् व्रताद् गतम् ॥८७॥
चतुर्भुजः पतिः प्राप्तः क्षीराब्धिकन्यया तथा ।
तस्माद् व्रतं प्रकर्तव्यं वैष्णव्या तत्तथा कुरु ॥८८॥
इत्युक्ता सा शची जाता वैष्णवी प्रययौ गृहम् ।
व्रतं कृतवती साध्वी कृष्णपतिव्रतान्विता ॥८९॥
ब्रह्मचर्यपरा त्वेकभुक्तवती हि वत्सरम् ।
भूशयाना सनियमा व्रतान्ते चेन्द्रकाम्यया ॥९०॥
उद्वाहिता सुरेन्द्रेण कृता कल्पायुषी सती ।
यथा यथाऽभिलषितं तथा तस्या ह्यभूत् फलम् ॥९१॥
इति ते कथितं लक्ष्मि! व्रतस्य फलनं शुभम् ।
कीरबालाः शची चेति वैष्णवाः कल्पनाशने ॥९२॥
ययुर्गोलोकधामाभिध्येयं कृष्णपदाम्बुजम् ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिः सुभाग्यता ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सूर्यपुत्रस्य तपसा धर्मराजत्वं, कीरबालानां सार्वज्ञ्यं, पौलोम्या इन्द्रपत्नीत्वं, तेषां वैष्णवत्वं, ततो मुक्तिः, मनोरथव्रतं चेत्यादिनिरूपणनामा त्रिसप्तत्यधिकचतुश्शततमोऽध्यायः ॥ ४७३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! कथां रम्याममित्रजिन्नृपस्य वै ।
मयि नारायणे पातिव्रत्ययुक्तां कुटुम्बिनः ॥ १ ॥
अमित्रजिन्महाराजः परमो वैष्णवोऽभवत् ।
सर्वराजन्यगुणधीः सर्वदूषणवर्जितः ॥ २ ॥
कृष्णनारायणे देवे चेतोवृत्तिं निधाय सः ।
चकार राज्यं निर्द्वन्द्वं विष्णुभक्तिपरायणः ॥ ३ ॥
अभुनक् प्रचुरान् भोगान् समस्तान् विष्णुसात्कृतान् ।
हरेरायतनान्युच्चैः प्रतिसौधं पदे पदे ॥ ४ ॥
तस्य राज्ये समभवन् गृहाणि मन्दिराणि च ।
'गोविन्द गोप गोपाल गोपगोपीश्वरेश्वर ॥ ५ ॥
गुणातीत गरुडस्थ कृपालो कमलापते ।
कृष्ण केशव कंजाक्ष कीनाशभयनाशक ॥ ६ ॥
पुरुषोत्तम पद्मेश पुण्डरीकविलोचन ।
पीताम्बर प्रभानाथ पार्वतीश परेश्वर ॥ ७ ॥
जनार्दन जयास्वामिन् जन्ममृत्युजराहर ।
श्रीवत्सवक्षः श्रीकान्त श्रीप्रद श्रेयसांप्रद ॥ ८ ॥
दामोदर दयासिन्धो माणिकीश्वर चक्रधृक् ।
विष्णो नारायण कृष्णनारायण नरोत्तम ॥ ९ ॥
अक्षरेश च राधेश कम्भरेश हृदिस्थित' ।
इत्यादीनि पवित्राणि नामानि प्रतिमन्दिरम् ॥१०॥
स्त्रीबालवृद्धगोपालवदनोदीरितानि तु ।
श्रूयन्ते चापि दृश्यन्ते रम्याणि मोक्षदानि वै ॥११॥
तुलसीकाननान्येव विलोक्यन्ते गृहे गृहे ।
चरित्राणि सुगीयन्ते पवित्राणि हरेर्जनैः ॥१२॥
सौधभित्तिषु दृश्यन्ते प्रतिमा लीलयाऽन्विताः ।
ऋते हरेः कथायाश्च नान्या वार्ता निशम्यते ॥१३॥
यद्राज्ये नैव हिंसाऽस्ति द्वेषो नास्ति परस्परम् ।
हन्यन्ते नैव चाऽहिताः कृष्णभक्तिपरायणाः ॥१४॥
अपि बालास्तथा वृद्धास्तस्य राष्ट्रे स्त्रियोऽपि च ।
पयःपानं न कुर्वन्ति सम्प्राप्य हरिवासरम् ॥१५॥
पशवोऽपि तृणाहारं त्यजन्ति हरिवासरे ।
महामहोत्सवः सर्वैः पुरौकोभिर्वितन्यते ॥१६॥
स एव दण्ड्यो यो भुंक्ते सम्प्राप्ते हरिवासरे ।
अन्त्यजा अपि तद्राष्ट्रे शंखचक्रांकधारिणः ॥१७॥
कृष्ण एव परो देवः कृष्ण एव परा गतिः ।
कृष्ण एव परो बन्धुस्तस्याऽऽसीदवनीशितुः ॥१८॥
एतद् द्रष्टुं नारदर्षिः समाययौ तदा क्वचित् ।
राज्ञा समर्चितः प्राह राजानं नारदो मुनिः ॥१९॥
धन्योऽसि कृतकृत्योऽसि मान्योऽप्यसि दिवौकसाम् ।
सर्वभूतेषु गोविन्दं यस्त्वं पश्यसि भक्तराट् ॥२०॥
एतादृशं विलोक्य त्वां शुचित्वमगमं त्वहम् ।
एक एव हि सारोऽत्र भक्तिभावः परेश्वरे ॥२१॥
कृष्णं भजन्तं भजन्ते पदार्थाः सर्व एव तु ।
कृष्णे स्थिरत्वमाप्तस्य योगः सिद्धो विमुक्तिदः ॥२२॥
यौवनं धनमायुष्यं ज्ञात्वा पद्मे तु वारिवत् ।
शाश्वतं कृष्णचरणं मोक्षदं प्रसमाश्रयेत् ॥२३॥
हृदि नेत्रे च जिह्वायां रक्षणीयो जनार्दनः ।
सोऽपि जनार्दनो बोध्यो जनार्दनसमाश्रयात् ॥२४॥
निष्कामसेवया श्रीशं पूजयित्वा रमापतिम् ।
पुरुषोत्तमतां श्रेष्ठां प्राप्नुयान्मानवे भवे ॥२५॥
राजंस्ते श्रीकृष्णभक्त्या प्रसन्नो भगवान् हरिः ।
प्रेषयामास मामत्र भक्तकार्यकरः स्वयम् ॥२६॥
शृणु विद्याधरपुत्री कृष्णभक्ताऽतिसुन्दरी ।
कृष्णपातिव्रत्यपरा नाम्ना मलयगन्धिनी ॥२७॥
क्रीडन्ती पितुराक्रोडे हृता कंकालकेतुना ।
दानवश्चम्पकावत्यां नगर्यामद्य वर्तते ॥२८॥

स स्वत्रिशूलघातेन मरिष्यन्ति त्वया नृप।
अद्य निद्राति पर्यंके पार्श्वे कृत्वा त्रिशूलकम् ॥२९॥
कन्या सा दास्यति तुभ्यं वञ्चयित्वा त्रिशूलकम्।
गच्छ शीघ्रं कृष्णभक्तां रक्ष हस्तं गृहाण च ॥३०॥
इत्युक्तः स ययौ दिष्टमार्गेण नृपतिर्गृणन्।
कृष्ण कृष्णेति कृष्णेति कृष्णनारायणेति च ॥३१॥
नगर्यां स प्रविष्टश्च यत्र सौधेऽस्ति कन्यका।
प्रविवेश तु तं सौधं कन्यां जगाद चैकलाम् ॥३२॥
नारदस्योपदेशेन तव रक्षार्थमत्र वै।
समागतोऽस्मि दैत्यं च हन्तुं त्रिशूलकेन वै ॥३३॥
सा विलोक्य समाकर्ण्य विश्वस्ताऽभूत् सुकन्यका।
दर्शयामास तं शूलं राजा शूलेन दानवम् ॥३४॥
जघान श्रीहरिं गृणन् मृतोऽसौ दानवो बली।
सुरूपं रक्षकं भूपं प्रोवाच मधुरं सती ॥३५॥
अथोदारमते वीर निजप्राणैः पणीकृताम्।
गृहाण मां वरारोहां कुलकन्यामदूषिताम् ॥३६॥
इति ब्रुवत्यां कन्यायां नारदोऽतर्कितो मुनिः।
आययौ तौ तुतुषतुर्दृष्ट्वा तं मुनिसत्तमम् ॥३७॥
पाणिग्रहेण विधिनाऽभिषिक्तौ नारदेन तौ।
जग्मतुर्नारदाऽऽदिष्टवर्त्मना कृतमंगलौ ॥३८॥
काशीं त्वाययतुस्तौ च मन्यमानौ कृतार्थताम्।
सैकदा तं पतिं राज्ञी पतिभक्ता सुतार्थिनी ॥३९॥
रहो विज्ञापयाञ्चक्रे कर्तुं पुत्रप्रदं व्रतम्।
मार्गशुक्लतृतीयायामभीष्टतृतीयाव्रतम् ॥४०॥
राज्ञाऽऽदिष्टा भक्तनारी चचार तद्व्रतं शुभम्।
पतिव्रता भागवती कृष्णनारायणे रता ॥४१॥
कृष्णपतिव्रता साध्वी त्वाबाल्याद् वैष्णवी सती।
पुरा कुबेरपत्न्या वै ऋद्धयाख्यया कृतं व्रतम् ॥४२॥
सापि प्राप्तवती पुत्रं समर्थं नलकूबरम्।
पूज्याऽत्र पार्वती देवी स्तनन्धययुतासती ॥४३॥
मार्गे शुक्ले तृतीयायां सुवर्णकलशोपरि।
ताम्रपात्रं निधायैकं तण्डुलैः परिपूरितम् ॥४४॥
नूत्नं सरंगं वस्त्रं च निधाय तत्र सूक्ष्मकम्।
तत्र सत्कमलं न्यस्य यद्वा स्वर्णविनिर्मितम् ॥४५॥
ब्रह्माणीं पूजयेत् तत्र रत्नपट्टाम्बरादिभिः।
पुष्पैः फलैश्च नारंगैः सुगन्धैश्चन्दनादिभिः ॥४६॥
परमान्नादिनैवेद्यैः पक्वान्नैश्च जलादिभिः।
धूपैर्दीपैः स्तवनैश्च नीराजनादिभिस्तथा ॥४७॥
रात्रौ जागरणं कुर्यात् सोत्सवं हरिकीर्तनैः।
हस्तमात्रमिते कुण्डे जातवेदस-इत्यृचा ॥४८॥
घृतेन मधुनाऽऽप्लाव्य जुहुयान् मन्त्रविद्द्विजः।
सहस्रकमलानां तु होमं कुर्याद् व्रती मुदा ॥४९॥
नवप्रसूतां कपिलां धेनुं दद्याद् द्विजातये।
उपोष्य दम्पती भक्त्या चतुर्थ्यां तु द्विजातये ॥५०॥
दत्वा सद्भोजनं दानं वस्त्राणि भूषणानि च।
आचार्याय धनं मूर्तिं दद्यातां गां च दक्षिणाम् ॥५१॥
भोजयित्वाऽथ तं पश्चात् स्तुवीयातां पुटाञ्जली।
सुतं वंशकरं देहि तुष्टा शिवा रमा ह्यजा ॥५२॥
भुक्तशेषेण चान्नेन कुर्यातां पारणं ततः।
एवं कृतं व्रत ताभ्यां दम्पतीभ्यां सुतप्रदम् ॥५३॥
पूजनान्ते शिवा लक्ष्मीः सावित्री त्वागताः पुरः।
स्मेराननाः शुभाशिषो दत्वाऽन्तर्धानमागताः ॥५४॥
ततः सा कान्तसेवाभिरन्तर्वत्नी बभूव ह।
तया तु प्रार्थितो दिव्यः पुत्रो विष्णवंशसंभवः ॥५५॥
जातमात्रो व्रजेत् स्वर्गं पुनरायाद् गृहं प्रति।
भक्तः सदा त्रिदेवेषु प्रसिद्धो भुवनत्रये ॥५६॥
विनैव स्तन्यपानेन षोडशाब्दाकृतिः क्षणात्।
सर्वसामर्थ्यसम्पन्नो वैष्णवानां सदाग्रणीः ॥५७॥
अथ कालेन तनयं मूलर्क्षे साऽप्यजीजनत्।
अथ ऋक्षाभिविद्भिः सा विज्ञप्ताऽरिष्टसंस्थिता ॥५८॥
देवी राजार्थिनी चेत् त्वं त्यज दुष्टर्क्षजं सुतम्।
सा तु श्रुत्वा महाभक्ता सर्वथा पतिदेवता ॥५९॥
अत्याक्षीत् तं तथा प्राप्तं तनयं नयकोविदा।
विकटाया महागौर्याः पुरो न्यस्य गृहं गता ॥६०॥
गौर्याऽर्पितः स योगिन्यै योगिनी व्योममार्गतः।
ययौ यत्र वसन्त्येव रक्षिका नवमातरः ॥६१॥
ब्रह्माणी वैष्णवी रौद्री वाराही नारसिंहिका।
कौमारी चापि माहेन्द्री चामुण्डा चापि चण्डिका ॥६२॥
दृष्ट्वा तं बालकं प्राप्तं ता ऊचुः सुन्दरं सुतम्।
राज्ययोग्यो भवत्वेष महालक्षणलक्षितः ॥६३॥
पुनस्तत्रैव नेतव्यो यत्राऽस्य जन्म विद्यते।
षोडशाब्दो जातमात्रो भविष्यति महाबलः ॥६४॥
एवं मातृगणाशीर्भिः प्रापितो जन्मनः स्थले।
आनन्दकानने दिव्यं तताप स परं तपः ॥६५॥
तपसा तु प्रसन्नोऽभूच्छिवस्त्वाविर्बभूव ह।
प्रोवाच तं वरं ब्रूहि ददाम्यत्र तवेप्सितम् ॥६६॥

स तु प्रणम्य शंभुं वै परितुष्टाव भावतः।
वरं च प्रार्थयाञ्चक्रे यदि देयो वरो मम ॥६७॥
मम नाम्ना भवेत् तीर्थं वीरवीरेश्वराह्वयम्।
तथास्त्विति हरः प्राह ततोऽयं बालकः पुनः ॥६८॥
वरं वव्रे मम मुक्तिर्भवेद् गोलोकधामनि।
हरः प्राह विना कृष्णं सा मुक्तिर्नहि लभ्यते ॥६९॥
गृहाण कृष्णमन्त्रं त्वं भव भक्तो विशेषतः।
'ओं नमः श्रीकृष्णनारायणायेति मुहुर्जप ॥७०॥
तुलसीमालिकां कण्ठे करे चापि गृहाण वै।
इत्युक्त्वा प्रददौ मन्त्रं कृतः स वैष्णवो महान् ॥७१॥
आह तं शंकरः पश्चाजनेतुर्वैष्णवोत्तमात्।
विष्णोरंशः समुत्पन्नो भवान् भक्तो ममापि च ॥७२॥
त्वं तु राज्यं परं प्राप्य सर्वभूपालदुर्लभम्।
भुक्त्वा भोगाँश्च विपुलानन्ते मुक्तिमवाप्स्यसि ॥७३॥
पत्नीं पतिव्रतां प्राप्य लब्ध्वा पुत्राँश्च तत्सुतान्।
श्रीविष्णोर्दिव्ययानेन गोलोकं यास्यसि ध्रुवम् ॥७४॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः।
ओं नमः श्रीकृष्णनारायणाय पतये नमः ॥७५॥
कुरुतं संजपं नित्यं त्वं तथा भाविनी सती।
पतिव्रताऽपि ते कान्ता मोक्षमाप्स्यथ तं परम् ॥७६॥
इत्युक्त्वा शंकरस्त्वन्तर्धानं जगाम तत्परम्।
वीरवीरो महाबाहुर्जजाप तं मनुं मुहुः ॥७७॥
भार्यां कैलासराजस्य नृपतेः पुत्रिकां सतीम्।
नाम्ना वसुमतीं प्राप्य समुत्पाद्य शतं सुतान् ॥७८॥
ययौ गोलोकमोक्षं स भार्यया सह भक्तराट्।
दिव्ययानेन वै भक्तप्रजाभिः सह पार्थिवः ॥७९॥
इति ते कथितं लक्ष्मि! कृष्णभक्तिपरायणम्।
दम्पत्योः पावनं वृत्तं श्रोतॄन् वक्तॄंश्च पावयेत् ॥८०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने अमित्रजिन्नृपतेर्नारदस्य कृपया पतिव्रतास्त्रीप्राप्तिः तथा मलयगन्धिन्या भार्यया काश्यामभीष्टतृतीयाव्रतेन वीरवीरो महावैष्णवः सुतः प्राप्तः, पतिव्रतया सहितस्य राज्ञो गोलोके मुक्तिरित्यादिनिरूपणनामा चतुःसप्तत्यधिकचतुश्शततमोऽध्यायः ॥ ४७४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! प्रवक्ष्यामि दुर्वाससोऽतिकष्टदम्।
कदल्याश्चरितं पश्चाज्ज्ञानेन मोक्षदं परम् ॥ १ ॥
पत्नीव्रतं तु मुनिना वाग्दानाऽवसरे धृतम्।
क्षमामयं तथा सम्यग् वैराग्यदं तपःकरम् ॥ २ ॥
बलेः पुत्रः साहसिको वने तिलोत्तमायुतः।
रतिं चकार विजने दिवा कामेन मोहितः ॥ ३ ॥
यत्र दुर्वाससो देहे वल्मीकस्तपतोऽभवत्।
दुर्वासास्त्वान्तरदृष्ट्या ज्ञातवाँस्तं बलेः सुतम् ॥ ४ ॥
अमर्यादं शशापाऽपि धेनुको भव दानवः।
खरवद् वर्तसे यस्मात् सन्निधौ मम चाश्रमे ॥ ५ ॥
खरो भव वने चेयं तिलोत्तमाऽपि बाणजा।
उषाऽनिरुद्धपत्नी च भवत्विति शशाप वै ॥ ६ ॥
उषा शशाप तं दुर्वाससं त्वं पीडितः स्त्रिया।
भवाऽतिदुःखितः काममोहितश्चेति वै तदा ॥ ७ ॥
तेन दोषेण दुर्वासाः कामवानभवत् क्वचित्।
तदा तत्रागमदौर्वनामर्षिः स्वसुतायुतः ॥ ८ ॥
ऊरूद्भवो ब्रह्मणस्तु पुरा कल्पे तपस्यतः।
ऊर्ध्वरेता हि योगीन्द्र और्वस्तेनेति स स्मृतः ॥ ९ ॥
तस्य जानूद्भवा कन्या कदलीनाम विश्रुता।
दुर्वाससं प्रार्थयन्ती नान्यं मनसि रोचते ॥१०॥
सुतायुक्तो मुनिरौर्वो दुर्वाससं ननाम ह।
दुर्वासाश्च प्रणनाम समुत्तस्थौ मुदान्वितः ॥११॥
और्वो दुर्वाससं प्रोचे कन्यकाया मनोरथम्।
कदली मम कन्येयं ध्यायन्ती त्वां स्मरत्यपि ॥१२॥
सर्वरूपगुणाधारा दोषेणैकेन संयुता।
अतीव कलहाविष्टा कोपेन गालिकाब्रुवा ॥१३॥
नानागुणयुतं वस्तु न त्यजेदेकदोषतः।
और्वस्य वचनं श्रुत्वा दृष्ट्वा कन्यां सुसुन्दरीम् ॥१४॥
नवयौवनसम्पन्नां मुनिर्मुमोह कामतः।
उवाचौर्वं सुखयता हृदयेन विदूयता ॥१५॥
नारी नरस्य संसारे मुक्तिमार्गनिरोधिका।
व्यवधानं तपस्याया मोहपाशनिबन्धिनी ॥१६॥
कारागाराख्यसंसारे दुर्वहं निगडं तु सा।
अतो मे ध्यायतः कृष्णपादाब्जं विघ्न आगतः ॥१७॥
एनं मोहं फलं तिलोत्तमाशापस्य वेद्म्यहम्।
और्व मे रोचते नैव संसारो यद्यपि क्षयः ॥१८॥
तवाऽऽज्ञां मस्तके कृत्वा ग्रहीष्यामि सुतां तव।
उपेतां कामिनीं त्यक्त्वा भयं स्यान्नाशकारकम् ॥१९॥
रहस्युपस्थितां कामाद् गृह्णीयान्नाशसंकरे।
किन्त्वतिनिन्दितः स स्यात् स्त्रीजितश्चेत् सदा भवेत् ॥२०॥

औौर्व त्वं तु स्वयं चात्र कन्यया सह चागतः ।
दातुं मह्यं हि ते कन्यां ततोऽस्मि धर्मसंकटे ॥२१॥
विनाशाऽपेक्षया ग्राह्यो धर्म एव सनातनः ।
ग्रहीष्यामि तव कन्यां सहिष्ये शतगालिकाः ॥२२॥
अतिरेके कटुवाक्ये दास्यामि तत्क्षणे फलम् ।
शतगालीसहिष्णुत्वं पत्नीव्रतं मम ध्रुवम् ॥२३॥
अस्याः पतिव्रतं नित्यं शतगालीप्रदानकम् ।
यादृशो वरराजोऽस्ति तादृशी च वधूः कृता ॥२४॥
अहो भाग्यस्य वैचित्र्यं भोगिने सर्पिणी धृता ।
यद्यहं शतपूर्वं स्यामधैर्यः सा प्रदण्डयेत् ॥२५॥
भाषाबन्धं प्रकृत्वैवमौर्वो ददौ सुतां निजाम् ।
स्वस्तीत्युवाच दुर्वासा विवाहं विधिनाऽकरोत् ॥२६॥
और्वस्तां सुखकृद्वाक्यैर्बोधयामास कन्यकाम् ।
शृणु पुत्रि प्रवक्ष्यामि नीतिसारं सुखावहम् ॥२७॥
हितं सत्यं च गार्हस्थ्यपारकृद्वचनं मम ।
स्वकान्तस्तु परो बन्धुरिह लोके परत्र च ॥२८॥
नहि कान्तात् परः प्रेयान् कुलस्त्रीणां परो गुरुः ।
देवपूजा व्रतं दानं तपश्चानशनं जपः ॥२९॥
तीर्थस्नानं यज्ञदीक्षा पृथ्वीप्रदक्षिणादयः ।
त एते पतिसेवायाः कलां नार्हन्ति षोडशीम् ॥३०॥
किमेतैः पतिभक्तायाः सर्वपुण्यप्रशेवधेः ।
दुःखी जनः सुखार्थं वै साकांक्षः प्रथमो भवेत् ॥३१॥
पतिसेवा सुखार्थेति तत्र दत्तमतिर्भव ।
पतिसेवा परो धर्मः स्वर्गमोक्षप्रदोऽस्ति ते ॥३२॥
स्वप्रज्ञानेन सतत कान्तं नारायणाऽधिकम् ।
दृष्ट्वा तच्चरणाम्भोजसेवां नित्यं करिष्यसि ॥३३॥
परिहासेन कोपेन भ्रमेणाऽवज्ञया मुनेः ।
कटूक्तिं स्वामिनः साक्षात्परोक्षान्न करिष्यसि ॥३४॥
स्त्रिया वाग्योनिदुष्टाया यमदण्डो भवेद् ध्रुवम् ।
सर्वधर्मपरीतां या कटूक्तिं कुरुते पतिम् ॥३५॥
नैकजन्मकृतं पुण्यं तस्या नश्यति निश्चितम् ।
गाली दानं न कर्तव्यं क्वापि कुत्रापि केनचित् ॥३६॥
त्वया पुत्रि वधूर्भूत्वा मुनेर्नैव विशेषतः ।
गालीदानं मनसाऽपि स्मर्तव्यं न पतिव्रते ॥३७॥
तदा सौख्यं च ते नित्यं सौभाग्यं संभविष्यति ।
अन्यथा तत्र विघ्नोऽस्ति वत्से निबोध मद्वचः ॥३८॥
प्राप्तो मणिर्न हातव्यो निर्मूल्यः कंकरो यथा ।
लब्धः पतिर्न धिक्कार्यो यथा चौरः शठोऽहितः ॥३९॥

स्वामी नैवाऽवमन्तव्यो यथा श्वा मर्कटो यथा ।
त्वङ्कार्यो न त्वया कान्तः किंकरोऽनिष्टकृद् यथा ॥४०॥
भर्ता नाऽवगणनीयो यथा कृत्तिमयो मृगः ।
त्राता वशे न कर्तव्यो यथा डित्थमयः करी ॥४१॥
वंशदाता न वंशेन ताडनीयः कदाचन ।
भोजनस्याऽर्पके पत्यौ नभोजनवदाचरेत् ॥४२॥
निन्दायितं नाचरेद्वै प्रिये त्वानन्ददायिनि ।
सेवनीये गुरौ नैव वनीयतां समाचरेत् ॥४३॥
सदाऽपारप्रदे पत्यौ पारदत्वं न वै चरेत् ।
पुरुषार्थप्रतिमायां रुषार्थे न चरेत् सती ॥४४॥
कामनायां प्रवृत्तायां न किंमनायते प्रिया ।
पत्युः शेषतया शिष्टा वर्तेत न शिरस्तथा ॥४५॥
पत्यौ प्राणाँश्चार्पयित्वा तिष्ठेत प्राणहा न तु ।
रतिं दद्याद् यथातृप्ति कष्टदां विरतिं न वै ॥४६॥
सर्वं दद्यात् स्वामिने वै गालीदानं न वै क्वचित् ।
आत्मार्पणं प्रकुर्याद्वै कष्टार्पणं विना सती ॥४७॥
इति कन्यां बोधयित्वा जगामौर्वः स्वकाश्रमम् ।
दुर्वासाश्चेतनारामः त्वाश्रमं स्त्रीयुतो ययौ ॥४८॥
अहो सुकृतिनां कामो वाञ्छामात्रेण सिद्ध्यति ।
कदली तं नवं कान्तं सिषेवे स च तां सतीम् ॥४९॥
तपो ध्यानं परित्यज्य गृहाऽऽसक्तोऽभवन्मुनिः ।
करोति कलहं नित्यं प्रातरुत्थाय कन्दली ॥५०॥
गालीवाक्यं विना नैव प्रबोधयति तं पतिम् ।
तस्यां पितुः कृता शिक्षा ऊषरे बीजवद् वृथा ॥५१॥
खाने पाने भोजनेऽर्थे विहारे संगमेऽर्चने ।
कटूक्तिं प्रायशो ब्रूते सेहे तां क्रोधनो मुनिः ॥५२॥
पत्नीव्रतं प्रतिज्ञातं शतगालीसहिष्णुता ।
दुर्वासा बोधयामास नीतिवाक्यैस्तु कामिनीम् ॥५३॥
सा तन्न बुबुधे किञ्चित् करोति कलहे स्पृहाम् ।
तातप्रदत्तज्ञानं तु नान्तःस्थानं चकार वै ॥५४॥
उग्रा पूर्वाद् विशेषा सा पतिपुत्रवती यतः ।
न हीयते प्रबोधेन स्वभावो दुरतिक्रमः ॥५५॥
नित्यं कटूक्तिं कान्तं सा करोति हेतुना विना ।
तत्रापि भोजने देवपूजने तु विशेषतः ॥५६॥
जगत् प्रकम्पितं येन स कम्पितस्तया रुषा ।
पुत्राः पुत्र्योऽभवँस्तस्यां विंशतिर्विंशतिस्ततः ॥५७॥
कटूक्तिर्वर्धिता नार्या शताधिकगुणा सदा ।
अथ स्थानं परित्यज्य लोकलज्जाविगर्हितः ॥५८॥

ययौ स्थानान्तरं नीत्वा बालाँस्त्यक्त्वा तु तां प्रियाम् ।
एको बालो धृतो मूर्ध्नि द्वौ धृतौ स्कन्धयोः पुनः ॥५९॥
कट्यां धृतौ द्वावृषिणा पार्श्वयोर्यान्ति चापरे ।
अन्ये त्वग्रे पृष्ठतश्च प्रयान्ति वानरा यथा ॥६०॥
सर्वे मातृस्वभावास्ते पित्रंशास्तामसास्तथा ।
मार्गे कीशकुलायन्ते नाटयन्ति नटा यथा ॥६१॥
विग्रहन्ति विना तत्त्वं क्रोशन्ति च मृषा मुधा ।
दुर्वाससः शिरोदेशेऽपत्यं मूत्रं चकार वै ॥६२॥
स्कन्धयोश्च मलं चक्रे कट्यां ष्ठीवनमाचरत् ।
विना जलं न वै शुद्धिस्तत एवं ययौ पुरः ॥६३॥
तत्राऽऽययौ च देवर्षिर्नारदः शंकरस्तथा ।
ब्रह्मा विष्णुः सनकाद्याः सप्तर्षयः कुतूहलात् ॥६४॥
रूपान्तरैश्च ते प्राहुः किमेवं वहसे मलम् ।
दुर्वासाः प्राह गार्हस्थ्यसुखमत्राऽनुभूयते ॥६५॥
जीवन्वै नरके मग्नो यमकुण्डो गृहाश्रमः ।
अहो कष्टं मलिनत्वं नरकं चन्दनायते ॥६६॥
मूत्रं जयति तैलस्य स्थाने जटासु मेऽद्य वै ।
अहो मोहस्य केदारो विषं यत्राऽमृतायते ॥६७॥
दुःखं सुखायतेऽज्ञानादज्ञानं कन्दलीकृतम् ।
कं सुखं दलितं यस्मान्मम सा कन्दली प्रिया ॥६८॥
त्यजामि वा रक्षयामि किं करोमि तया विना ।
एवं निःश्वस्य दुर्वासाः सार्थमध्ये स्थितः क्षणम् ॥६९॥
हसितो बोधितश्चापि नारदाद्यैर्महर्षिभिः ।
गृहस्थानां भवेत् क्लेशः संसारः क्लेशसंभृतः ॥७०॥
गच्छ गृहं पुनर्विप्र मैवं त्यज गृहं स्वकम् ।
इति सम्बोधितो यावत् तावत् सा कन्दली सती ॥७१॥
रुदती पृष्ठतः समाजगामाऽऽनयनाय तम् ।
पादयोः पतिता प्राह गालीं दास्येन न वै क्वचित् ॥७२॥
करोत्वनुग्रहं क्रोधिन् ! शठापते स्थवीरक ! ।
इतिवाक्यानि मिष्टानि कन्दल्याः सम्मतानि वै ॥७३॥
जगाद कन्दली नम्रा दीना च कातरा मुहुः ।
दयां कृत्वा च दुर्वासा धृतो वस्त्रे च योषिता ॥७४॥
ययौ गृहं शरीरेणाऽपत्यकर्दमलेपिना ।
सस्नौ शुद्धिं चकारापि जजाप ब्रह्म चान्तरे ॥७५॥
एवं रोषो लयं यातः कर्मवश्यस्य रोषिणः ।
पुत्रवती कटूक्तिं सा शतोत्तरां जगाद ह ॥७६॥
ज्ञानिनां प्रवरो विप्रः क्षमासंस्थां चकार ह ।
नित्यं शतोत्तरां वक्ति 'बोधं चक्रे दयानिधिः ॥७७॥
मौनं तथापि सा धत्ते नैव वेगाद् दिने दिने ।
एवं गालीप्रदानैश्च प्रदग्धं मानसं मुनेः ॥७८॥
तस्याः कटूक्तिवाचिन्या आयुः पूर्णं बभूव ह ।
स्वात्मारामोऽपि मुनिराट् कोपावेशातिवेगिलः ॥७९॥
शशाप कामिनीं रोषाद् भस्मराशिर्भवेति वै ।
मुनेरिङ्गितमात्रेण भस्मसात् सा बभूव ह ॥८०॥
एवमत्युच्छ्रितानां वै मत्तानां श्रेय एव न ।
अपत्यानि मुनेस्तस्य चक्रुशुर्मातृनाशनात् ॥८१॥
अथ तस्या आत्मतत्त्वं जीवोऽन्तरीक्षगोऽवदत् ।
हे नाथ सर्वदर्शी त्वं ज्ञानवान् योगिनां वरः ॥८२॥
सर्वं जानासि सर्वज्ञ किमहं बोधयामि ते ।
सदुक्तिर्वा कटूक्तिर्वा कोपः सन्ताप एव वा ॥८३॥
लोभो मोहश्च कामश्च क्षुत्पिपासादिकं च यत् ।
स्थौल्यं कार्श्यं विनाशश्च शान्तघोरसुमूढताः ॥८४॥
सर्वे शरीरधर्मास्ते शब्दो गाली च भौतिकाः ।
सत्त्वं रजस्तमश्चैव शरीरं त्रिगुणात्मकम् ॥८५॥
न्यूनाधिकं भवेत् तच्च संसारस्तेन जायते ।
रोदनं हसनं क्लेशश्चोद्वेगो भयमित्यपि ॥८६॥
क्रोधः शान्तिश्च शापश्च शारीरा नात्मनः प्रिय ।
सत्त्वोदयात्तु मोक्षेच्छा कर्मेच्छा तु रजोगुणात् ॥८७॥
तमोगुणात् कलहेच्छा द्वयोर्नौ सदृशं तमः ।
तमः कोपस्य जनको यथा त्वयि तथा मयि ॥८८॥
कोपात् कटूक्तिर्गाली च कटूक्त्या शत्रुता भवेत् ।
तया त्वप्रियता सद्यः शत्रुः कः कस्य कः सखा ॥८९॥
को वा प्रियोऽप्रियः कः किं किं मित्रं को रिपुर्भवेत् ।
रागद्वेषौ प्रधानौ वै सर्वत्र शत्रुमित्रयोः ॥९०॥
प्राणाऽधिकः प्रियः स्त्रीणां भर्तुः प्राणाधिका प्रिया ।
बभूव शत्रुता सद्यो दुरुक्त्या च क्षणाद् रुषा ॥९१॥
यद्वृत्तं तद्वृत्तं सर्वं भौतिकं भूतदोषतः ।
शोचनीयं गतं नैव जातं यत्तच्च नान्यथा ॥९२॥
अहं दग्धा तव पत्नी तेऽपि दग्धं तपोधनम् ।
दग्धयोर्देहयोश्चाथ गुणयोर्नागमः पुनः ॥९३॥
गतं तद्वै गतं सर्वं नष्टं तन्नष्टमेव हि ।
अथाऽधुना प्रकर्तव्यं यथा श्रेयो भवेत्तु नौ ॥९४॥
क्षमापराधं निखिलं किं कर्तव्यं वदाऽधुना ।
किं करोमि क्व यामीति भविता कुत्र जन्म मे ॥९५॥
तव जाया सदा चास्मि नान्यस्य कुत्रचित् क्वचित् ।
न भूता न भविष्यामि प्राप्स्यामि त्वां पुनः पुनः ॥९६॥

इति श्रुत्वा वचस्तस्याः शोकेन हतचेतनः ।
क्षणोत्तरं च स्वस्थः स प्राणाँस्त्यक्तुं समुद्यतः ॥९७॥
स्त्रीविच्छेदो विदग्धानां यतः शोकं करोति हि ।
ततो योगासनं कृत्वा मुमुर्षुर्न ह्युवाच ताम् ॥९८॥
सा त्वम्बरे मुनिं दृष्ट्वा मुमुर्षुं शोकविह्वला ।
सस्मार श्रीकृष्णनारायणं दुर्गमरक्षकम् ॥९९॥
तावत् तत्राऽऽययौ बालो विप्रो भूत्वा जनार्दनः ।
सस्मितः श्यामवर्णश्च दुर्वाससं जगाद च ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दुर्वाससः और्वकन्यया कदल्या सह शतगालीसहनपूर्वकप्रतिज्ञया विवाहस्ततः पातिव्रत्यात्मकतद्धर्मनिरूपणं, विंशतिपुत्रपुत्रीमत्त्वं, क्रोधेनातिक्रामन्त्याः कदल्याः ऋषिशापेन भस्मता, कदल्याः स्तुतिः, जनार्दनागमश्चेत्यादिनिरूपणनामा पञ्चसप्तत्यधिकचतुश्शततमोऽध्यायः ॥ ४७५ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! यथा प्राह दुर्वाससं द्विजाऽर्भकः ।
कृष्णनारायणो विष्णुः समयोचितमेव तत् ॥ १ ॥
दुर्वाससं प्रणमन्तं शोचन्तं कर्म वै स्वकम् ।
पूजयन्तं वासयन्तं कुशासनेऽतिभावतः ॥ २ ॥
उवाच ब्राह्मणबटुस्तस्मै दत्वा सदाशिषम् ।
सर्वं जानासि दुर्वासर्गुरोर्मन्त्रप्रसादतः ॥ ३ ॥
तथापि ब्राह्मणबद्रुः कथयामि निबोध मे ।
ब्राह्मणानां तपो धर्मस्तपः साध्यं जगत्त्रयम् ॥ ४ ॥
वैष्णवानां हरेर्भक्तिर्दास्यं च परमं तपः ।
हरेः कथायाः श्रवणं भजनं तस्य सर्वदा ॥ ५ ॥
सेवनं पूजनं सर्वं कर्तव्यं वैष्णवस्य वै ।
मुनेस्तु ते विशेषेण श्रेयः कार्यं शुभं सदा ॥ ६ ॥
एतत् सर्वं परित्यज्य शोकं च शोककारणम् ।
कथं दुःखप्रदं बुद्धेर्नाशकं त्ववलम्बसे ॥ ७ ॥
का कस्य पत्नी कः कान्तः कस्या वा भवचक्रके ।
मूर्खाणां वञ्चनां कर्तुं करोति मायया हरिः ॥ ८ ॥
मिथ्या पत्नी तवेयं तु क्षणान्तेन गताऽधुना ।
नहि मिथ्या भवेन्नित्यं नित्यं नाऽदृश्यतां व्रजेत् ॥ ९ ॥
तव पत्नी सदा चेयं कन्दली निर्मिता सती ।
नारायणेन ते छाया तव शिक्षाप्रदायिनी ॥१०॥

यत् त्वया कल्पितो लोकस्त्वत्कम्पार्थं तु सा कृता ।
मा शोकं कुरु चात्रार्थे सा ते पत्नी पुनर्मुने ॥११॥
भविष्यति न सन्देहो द्वेधा भूत्वा वरिष्यति ।
वद कान्तां प्रार्थनाढ्यामाकाशस्थां पतिव्रताम् ॥१२॥
प्रतीक्षमाणां ते त्वाज्ञां ब्रूहि किं सा करिष्यति ।
तावद् दुर्वाससा दृष्टा कथिता कदली भव ॥१३॥
शुभदा फलदा कान्ता सकृत्सूता सुदुर्लभा ।
बहुपुत्रीमती मूलात् सदा पतिव्रता भव ॥१४॥
इत्युक्ता सा प्रत्युवाच त्वं चापि कर्दमो भव ।
यथा नाम तथा दुर्वासात्मकः कर्दमो मम ॥१५॥
मूले क्लेदमयो नित्यं शैत्यभावान्वितो भव ।
इत्युक्तः कर्दमो भूत्वा रूपान्तरेण वै मुनिः ॥१६॥
दुर्वासः कर्दमो नित्यं कदलीमूलगोऽभवत् ।
कन्दली कदलीजातिर्भूता कदलदायिनी ॥१७॥
सकृत्प्रसूता फलदा मूलापत्यप्रदायिनी ।
संजाता वनमध्ये च वन्ध्या कदली चेत्यपि ॥१८॥
हस्तीनां भोजनं सा तु ह्यभवत् सर्वदा वने ।
अथ तं ब्राह्मणबद्रुः पुनः प्राह मुनिं हितम् ॥१९॥
श्रृणु विप्र तव पत्नी कल्पे कल्पे पुनः पुनः ।
कदली शान्तरूपा च भविष्यति सुखप्रदा ॥२०॥
एकानंशाभिधा कृष्णस्वसा श्रीदेवकीसुता ।
पार्वत्यंशसमुद्भूता सुशीला चिरजीविनी ॥२१॥
कल्पे कल्पे तव पत्नी सुन्दरी सा भविष्यति ।
मनो देहि तपस्यायां मुदा तत्काल आगते ॥२२॥
शान्तस्वरूपा सा बाला कृष्णद्वारा मिलिष्यति ।
इत्युक्त्वा भगवान् कृष्णनारायणश्चतुर्भुजः ॥२३॥
दत्वा स्वदर्शनं तस्मै सोऽन्तर्धानो बभूव ह ।
मुनिः सर्वं भ्रमं त्यक्त्वा तपस्यायां मनो दधे ॥२४॥
अत्युच्छ्रितस्य दमनं सूचितं जायते क्वचित् ।
द्विगुणाऽभ्युदयश्चाऽनुजायते दमितस्य वै ॥२५॥
कन्दली कदलीजातिर्बभूव धरणीतले ।
यादृशी साऽभवत्तूग्रा तादृशीं शीततां गता ॥२६॥
कन्दल्यास्तु पितुः सरस्वत्या नद्यास्तटे शुभे ।
आसीद् भव्याश्रमस्तत्र कन्दल्याः पातिव्रत्यतः ॥२७॥
ब्रह्मशीलव्रतेनापि भक्त्या श्रीमाधवस्य च ।
पितुर्वस्त्राणि सर्वाणि शुष्काण्यार्द्राणि यानि च ॥२८॥
वायुना धार्यमाणानि तिष्ठन्ति त्वम्बरे सदा ।
विना तु कीलकं लक्ष्मि ! चमत्कारोऽयमद्भुतः ॥२९॥

यावत् सा कन्दली दग्धा दुर्वासःशापतस्तदा ।
तत्क्षणं धौतवस्त्राणि पेतुरूर्ध्वाद् भुवस्तले ॥३०॥
पृथिव्यां पतिते वस्त्रे तपस्त्यक्त्वौर्व एव तु ।
ध्यानेन बुबुधे सर्वं कन्याभस्मादि संकटम् ॥३१॥
शोकाविष्टो जगामाशु जामातुराश्रमं क्षणात् ।
सिषेच पृथिवीरेणून् रुदन् नयनबिन्दुभिः ॥३२॥
हे वत्से कदलीत्येवं रुरोदोच्चार्य वै पुनः ।
श्वशुरस्य स्वरं ज्ञात्वा दुर्वासा भयविह्वलः ॥३३॥
ऊटजाया बहिर्भूत्वा पपात तत्पदाम्बुजे ।
विललाप भृशं पश्चात् सान्त्वयित्वा गुरुं मुनिम् ॥३४॥
वृत्तान्तं कथयामास मूलमारभ्य तं मुनिम् ।
श्रुत्वा वार्तां पुनरौर्वः शुशोच बहुधा पुनः ॥३५॥
जामातारं समुवाच भीतं प्रणतकन्धरम् ।
अये ब्रह्मन्नत्रिपुत्र पौत्रस्त्वं ब्रह्मणः शुभः ॥३६॥
स्वल्पदोषे बहुतरः कृतो दण्डस्त्वया कथम् ।
त्वज्जन्मशंकरांशेन शिष्यस्त्वं ब्रह्मणस्तथा ॥३७॥
वेदविज्ञश्च गुणवान् ज्ञानवाँश्च व्रतस्थितः ।
अनसूया महासाध्वी कमलांशा तव प्रसूः ॥३८॥
गुणवान् जनको यस्य माता गुणवती सती ।
तयोः पुत्रो दयाहीनः सृष्टेः सूक्ष्मा त्वहो गतिः ॥३९॥
न जाने केन दोषेण तव त्वैतादृशी मतिः ।
हिंसाप्रधाना शश्वद्वंशसम्पद्विनाशिनी ॥४०॥
मम प्राणाधिका त्वेका कन्या त्वयि समर्पिता ।
महापतिव्रता वाणीमात्रदोषसमन्विता ॥४१॥
वाग्दुष्टायास्तु दण्डो हि परित्यागो नयः स्मृतः ।
परित्यक्तां पुनः पुत्रीं पिता पालयति ध्रुवम् ॥४२॥
मदपत्यं स्वल्पदोषे यतो भस्मीकृतं त्वया ।
पराभवस्तेऽपि महान् भविष्यति न संशयः ॥४३॥
द्रोग्धुः कर्मफलं तूर्णं ददाति करुणानिधिः ।
इत्युक्त्वाऽतिविलप्यैव हा पुत्रीति वदन् मुहुः ॥४४॥
ज्ञात्वा तां कदलीवृक्षस्वरूपां सरितस्तटे ।
आमूलात्तां खनयित्वा सहनीत्वा ययौ गृहम् ॥४५॥
अस्वामिनीं फलहीनां पुत्रीं कुमारिकां तु ताम् ।
कन्दलीं कदलीरूपां पुपोष जलसेचनैः ॥४६॥
कर्दमस्तन्मूलदेशे क्लिद्यमानोऽभवत्ततः ।
दुर्गन्धः स च दुर्वासो दुर्वासाः शापतोऽभवत् ॥४७॥
तयोर्योगे त्वपत्यानि निष्फलान्यभवन्पुनः ।
वनानि तानि जातानि गजभुक्तिप्रदानि वै ॥४८॥
दुर्वाससस्तु चत्वारिंशदपत्यानि यानि वै ।
कदलीगर्भजातानि तान्यैवाश्रममाययुः ॥४९॥
और्वेण पालितान्येव तेषां वंशो व्यवर्धत ।
अथ स्मृत्वा प्रियां दुर्वासास्तपस्यापरोऽभवत् ॥५०॥
ततः कालान्तरे राजाऽम्बरीषात् स पराभवम् ।
श्वशुरशापतो लेभे शृणु लक्ष्मि ! वदामि ते ॥५१॥
अम्बरीषः सूर्यवंशी राजा परमधार्मिकः ।
श्रीकृष्णचरणाम्भोजे तन्मनः सततं ह्यभूत् ॥५२॥
न राज्येषु न भार्यासु न पुत्रेषु प्रजासु न ।
न सम्पत्सु क्षणं चित्तं पुण्यकर्माऽर्जितास्वपि ॥५३॥
ध्यायतेऽहर्निशं भक्तो ज्ञाने स्वप्ने हरिं सदा ।
महाभागवतः शान्तो विष्णुव्रतपरायणः ॥५४॥
एकादशीव्रतरतः कृष्णपूजासु तत्परः ।
सर्वकर्मस्वलिप्तश्च कर्ता कृष्णार्पितेषु च ॥५५॥
सुतीक्ष्णं षोडशारं च हरेश्चक्रं सुदर्शनम् ।
प्रभुणा रक्षितं शश्वद् रक्षायै नृपसन्निधौ ॥५६॥
एकादशीव्रतं कृत्वा द्वादशी दिवसे सति ।
स्नात्वाऽभ्यर्च्य हरिं दानं दत्वा सौवर्णराजतम् ॥५७॥
साधून् विप्रान् भोजयित्वा भोजनार्थमुवास सः ।
तावत्तत्र समायातो दुर्वासाः क्षुधितो मुनिः ॥५८॥
दृष्ट्वा नत्वा समुत्थाय दत्वा तं पाद्यमासनम् ।
पप्रच्छ राजा तं प्रीतः काऽऽज्ञा ते वद कामितम् ॥५९॥
दुर्वासाः प्राह देह्यन्नं विधिना क्षुधितस्य मे ।
किन्त्वघमर्षणमन्त्रं जप्त्वाऽऽयाम्यचिरेण वै ॥६०॥
क्षणं प्रतीक्षतां राजन्नित्युक्त्वा प्रययौ ततः ।
शीघ्रं नाऽऽयाति दुर्वासाः द्वादशीं विगतोन्मुखीम् ॥६१॥
विलोक्य राजा पप्रच्छ वशिष्ठं धर्मसंकटम् ।
नायाति मुनिशार्दूलः प्रयाति द्वादशी तिथिः ॥६२॥
संकटेऽस्मिन् विधेयं किं वदेति प्रत्युवाच तम् ।
वशिष्ठो हितकृत् तथ्यं पुण्यदं सर्वसम्मतम् ॥६३॥
द्वादश्यां समतीतायां त्रयोदश्यां तु पारणम् ।
उपवासफलं हत्वा व्रतिनं हन्ति निश्चितम् ॥६४॥
न भोजयित्वा मूढश्चेदतिथिं समुपस्थितम् ।
स त्रस्तः क्षुधितो भुंक्ते कुंभीपाके व्रजेद् ध्रुवम् ॥६५॥
शतवर्षं तत्र तिष्ठन् नरश्चाण्डालतां व्रजेत् ।
व्याधियुक्तो दरिद्रश्च भवेज्जन्मनि जन्मनि ॥६६॥
अतोऽतिसूक्ष्मं ते ब्रूमोऽधुना परमसंकटे ।
रक्षां कुरु द्वयोर्धर्मे समालोक्य वदामि ते ॥६७॥

उपवासफलं रक्ष कृष्णस्य चरणोदकम् ।
भुक्त्वा शीघ्रमपो राजाँस्तद्रक्षणमभक्षणम् ॥६८॥
इत्युक्तो बुभुजे राजा किञ्चिद्वारि हरिं स्मरन् ।
एतस्मिन्नन्तरे तत्राऽऽजगाम क्रोधनो मुनिः ॥६९॥
चिच्छेद कोपात् सर्वज्ञः स्वजटां नृपतेः पुरः ।
ततः समुत्थितः खड्गहस्तो नरोऽग्निसन्निभः ॥७०॥
राजेन्द्रं हन्तुमायान्तं तं दृष्ट्वा चक्रमाच्युतम् ।
चिच्छेद कृत्यापुरुषं छेत्तुं दुर्वाससं प्रति ॥७१॥
गतं चक्रं विलोक्यैव विप्रो दुद्राव भीतवत् ।
ब्रह्माण्डक्रमणे चक्रं पश्चाद्धावत्सुदर्शनम् ॥७२॥
दृष्ट्वा त्राहीत्यभिगृणन् ब्रह्माणं शरणं ययौ ।
ब्रह्मा प्राह हरेर्दासं शप्तुं गतः कथं मुने ॥७३॥
रक्षिता यस्य भगवाँस्तं को हन्ति जगत्त्रये ।
क्षुद्राणां महतां चापि भक्तानां रक्षणाय तु ॥७४॥
ररक्ष सततं चक्रं श्रीहरिर्भक्तवत्सलः ।
यो मूढं वैष्णवं द्वेष्टि विष्णुप्राणसमं जनम् ॥७५॥
तस्य द्वेष्टुः स्वयं कृष्णनारायणोऽन्तमाचरेत् ।
शीघ्रं स्थानान्तरं गच्छ वत्स त्राणं न वाऽधुना ॥७६॥
अन्यथा त्वां मया सार्धं हनिष्यति सुदर्शनम् ।
किं ब्रह्मलोकं ब्रह्माण्डं दग्धुं शक्तं क्षणेन यत् ॥७७॥
तेजसा विष्णुतुल्यं यत् केनाऽन्येन निवार्यते ।
इति श्रुत्वा प्रदुद्राव जगाम शरणं शिवम् ॥७८॥
कृपानिधान मां रक्षेत्युवाच शंकरं भिया ।
न तं पप्रच्छ कुशलं कैलासस्थोऽपि शंकरः ॥७९॥
संहर्ता जगतां शंभुस्तूर्णमुवाच वै भिया ।
पौत्रस्त्वं जगतां धातुरत्रेस्तु तनयो मुने ! ॥८०॥
ममांशो वेदविशोऽसि मूर्खतुल्यं तु कर्म ते ।
वय यस्मात् समुत्पन्नास्तद्भक्तं हंसि वै कथम् ॥८१॥
अहं ब्रह्मा च कमला दुर्गा वाणी च राधिका ।
प्रभा लक्ष्मीः पार्वती च माणिकी श्रीः रमा जया ॥८२॥
नहि भक्तात्पराः सर्वे भक्तोऽस्मभ्यः परो यतः ।
क्षुद्राँश्च महतो भक्तान् शश्वद् रक्षति यत्नतः ॥८३॥
चक्रेण भगवान् भक्तं रक्षति दुःसहेन वै ।
दुर्निवार्यं यदा चक्रं न प्रतीतं सुरक्षणे ॥८४॥
तदा चतुर्भुजः श्रीमान् स्वयं गच्छति रक्षितुम् ।
भक्तकृते भ्रमत्येव छायेव सततं हरिः ॥८५॥
कान्ता प्राणाधिका शश्वन्नहि लोके ततोऽधिकः ।
भक्तान् द्वेष्टि स्वयं सा चेत् तूर्णं त्यजति तां प्रभुः ॥८६॥
सर्वेषां तु प्रिया विप्राः स्वशरीरादपि हरेः ।
ब्राह्मणेभ्यः प्रिया भक्ताः साधवः प्राणतः प्रियाः ॥८७॥
विप्रेभ्यः साधवः श्रेष्ठाः सदाऽच्युतसुगोत्रकाः ।
साधुधर्मशीलरक्षाकरास्ते सर्वतः प्रियाः ॥८८॥
अयं राजापि साधूनां धर्मान् रक्षति माधवे ।
भज ब्राह्मण गोविन्दं स्मर तस्य पदाम्बुजम् ॥८९॥
व्रज शीघ्रं तु वैकुण्ठं श्रीकृष्णः शरणं तव ।
चक्रं कैलासवासाँस्तु प्रदहत् तत्र वर्तते ॥९०॥
पार्वती तु तदा प्राह सत्यं चेन्मे पतिव्रतम् ।
तेजः सत्यं तपः सत्यं यदि चेच्चिरसञ्चितम् ॥९१॥
कैलासस्थास्तथा चार्यं सर्वे भवन्तु विज्वराः ।
ममाशिषा हरेर्भक्त्या ब्राह्मणः शरणागतः ॥९२॥
दुर्वासा वैष्णवो भक्तः शीघ्रं भवतु विज्वरः ।
इत्येवमुक्त्वा कृपया विरराम शिवा, शिवः ॥९३॥
सुदर्शनं क्षणं तिष्ठत् प्रतीक्षते मुनिं मुहुः ।
मुनिः प्रणम्य तौ देवौ वैकुण्ठं शरणं ययौ ॥९४॥
दृष्ट्वा सुदर्शनं पश्चात् पपात पादयोर्हरेः ।
त्राहि मां कमलाकान्त त्राहि मां करुणानिधे ॥९५॥
दीनबन्धो महाविष्णो त्राहि मां संकटार्णवे ।
भगवन्नव मां भीतं रक्ष मां भवसागरे ॥९६॥
किं स्तौमि पाहि मां कृष्णनारायण नमोऽस्तु ते ।
इत्युक्त्वा नेत्रनीरैः संसिसेच चरणाम्बुजे ॥९७॥
नारायणस्तु तं प्राह समुत्तिष्ठ स्थिरो भव ।
शृणु मे वचनं भद्रं भविष्यति सुखं तव ॥९८॥
अन्येषां भवति ज्ञानं श्रुत्वा शास्त्रं सतां मुखात् ।
मन्मूर्तयस्तु शास्त्राणि सन्तस्तु शास्त्रमूर्तयः ॥९९॥
मूर्तिमन्ति तु शास्त्राणि सन्तो मे विचरन्ति हि ।
तदुक्तं शास्त्रमेवाऽस्ति मदुक्तं तद्धृदि ह्यहम् ॥१००॥
ब्राह्मणेभ्यश्च वेदेभ्यः सन्तः श्रेष्ठाः सदा मम ।
मत्तोऽपि साधवः श्रेष्ठास्तान् भजामि सदा हृदि ॥१०१॥
अहं प्राणो वैष्णवानां मम प्राणास्तु वैष्णवाः ।
तान् द्वेष्टि यः स मां द्वेष्टि मम प्राणस्य हिंसकः ॥१०२॥
पुत्रान् पौत्रान् कलत्राणि राज्यं लक्ष्मीं विहाय च ।
ध्यायन्ते सततं ये मां को मे तेभ्यः परः प्रियः ॥१०३॥
परा भक्तास्त्र मे प्राणा नहि लक्ष्मीर्न शंकरः ।
न भारती न वै ब्रह्मा न दुर्गा न गणेश्वरः ॥१०४॥
न ब्राह्मणा न वेदाश्च न वेदजननी परा ।
न राधा नहि गोपाला न गोप्यः प्राणतः प्रियाः ॥१०५॥

यथा प्रिया मम सन्तः सर्वपूज्या ममापि च ।
मयैतत् कथितं सर्वं सत्यं सारं च वास्तवम् ॥१०६॥
न प्रशंसापरं तेषां ते मे प्राणाधिकाः प्रियाः ।
ये द्विषन्ति तु मद्भक्तान् प्राणानामधिकं प्रियान् ॥१०७॥
तेषां शास्ता त्वहं पूर्णस्तूर्णं दण्डप्रदः प्रभुः ।
स्वतन्त्रः सर्वतत्त्वेषु परतन्त्रस्तु साधुषु ॥१०८॥
गोलोके वाऽथ वैकुण्ठे द्विभुजं वा चतुर्भुजम् ।
अक्षरे शाश्वतं रूपं रूपमात्रं हि तन्मम ॥१०९॥
प्राणास्तु सर्वथा भक्ते सत्सु वसन्ति मेऽनघ ।
जलान्नं भक्तदत्तं च भक्षणीयं हि तन्मम ॥११०॥
अभक्ष्यं द्रव्यमन्येन दत्तं चेदमृतोपमम् ।
अम्बरीषं नृपश्रेष्ठं निरीहं तमहिंसकम् ॥१११॥
कथं हंसि दयाशीलं सन्तं प्राणिहिते रतम् ।
दयां कुर्वन्ति ये सन्तः सततं सर्वजन्तुषु ॥११२॥
ये भजन्ति तु मां भक्त्या मद्भाग्याश्च मयि स्थिताः ।
तान् द्विषन्ति तु ये मूढास्तेषां हन्ताऽहमेव वै ॥११३॥
भक्तानां हिंसकं शत्रुमहं रक्षितुमक्षमः ।
अम्बरीषालयं गच्छ सत्वां रक्षितुमीश्वरः ॥११४॥
करोतु पारणं तत्र राज्ञः संप्रीतये भवान् ।
पूर्णे वर्षे भवान् भीतो भ्रमत्येव स्थले स्थले ॥११५॥
उपवासी स राजेन्द्रः सभार्यः प्रशुचाऽन्वितः ।
ततोऽहमुपवासी च भक्तोपवासकारणात् ॥११६॥
ममाऽऽशिषा तु दुर्वासो विज्वरस्त्वं भविष्यसि ।
पथि हिंसां च मच्चक्रं तव नैव करिष्यति ॥११७॥
अहमद्य च निश्चिन्तः सुखं भोक्ष्यामि निश्चितम् ।
भक्तदत्तं पारणायां प्रीत्या कृत्वा सुधोपमम् ॥११८॥
लक्ष्मीदत्तमपि द्रव्यं नाहं भोक्तुमपीश्वरः ।
यावद्भक्तो मम त्वास्ते ह्युपवासी मम प्रियः ॥११९॥
गच्छ शीघ्रं त्वम्बरीषं कुरु त्वं भोजनं मुने ! ।
इत्युक्तः प्रययौ शीघ्रं सचक्रः क्रोधनो मुनिः ॥१२०॥
उपोष्य वत्सरं राजा प्रतीक्षते मुनीश्वरम् ।
ददर्श त्वागतं नत्वा भोजयित्वाऽन्नमुत्तमम् ॥१२१॥
स्वयं राजा तु बुभुजे चक्रं प्रापूजयत्ततः ।
तुष्टो विप्रोऽपि युयुजे नृपस्य परमाशिषम् ॥१२२॥
जगाम स्वालयं तूर्णं प्रशशंस पुनः पुनः ।
माहात्म्यं सर्वतः श्रेष्ठं वैष्णवानां सतामहो ॥१२३॥
अथ कालान्तरे तप्त्वा तपश्च क्रोधनो मुनिः ।
एकानंशां प्राप पत्नीं वसुदेवसुतां पुनः ॥१२४॥
पतिव्रतया दुर्वासाः सेवितः सत्त्वकाम्यया ।
पत्नीयुतः सत्यलोके राजते क्रोधनो मुनिः ॥१२५॥
एतस्य श्रवणाल्लक्ष्मि ! पातिव्रत्यं दृढं भवेत् ।
भक्तसेवां परं धर्मं ज्ञात्वा भक्ता भवेत् सती ॥१२६॥
कृष्णनारायणभक्ता भूत्वा कृष्णपतिव्रता ।
नाऽपराधं प्रकुर्वीत भक्तानां स्वामिनः सती ॥१२७॥
पत्युः सहेत सर्वस्वं क्षमावती यथा क्षितिः ।
शीता भवेत् कदलीवत् स्वामिनं सुखयेत् सती ॥१२८॥
कन्दल्यास्तु समाख्यानं श्रावितं बोधनाय वै ।
मम भवन्तु तथा नार्यो गालीदा कन्दली यथा ॥१२९॥
मा भवन्तु नराश्चापि दुर्वासाश्च यथा सरुट् ।
पठनाच्छ्रवणात्त्वस्य भुक्तिर्मुक्तिर्भवेत् प्रिये ! ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दुर्वाससो बहुविप्ररूपनारायणदर्शनं, कन्दल्याः कदलीवृक्षत्वं, दुर्वाससः कर्दमात्मकदुर्वासत्वं, और्वस्य शापेनाऽम्बरीषापराधजन्यमहद्भयागमः, पातिव्रत्यदार्ढ्यं, वसुदेवसुतया एकानंशया दुर्वाससो विवाहश्चेत्यादिनिरूपणनामा षट्सप्तत्यधिकचतुश्शततमोऽध्यायः ॥४७६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि कथां पातकनाशिनीम् ।
विश्वकर्मा गुरोर्भक्तिं चकार तत्फलं शुभम् ॥ १ ॥
पातिव्रत्यं पितृव्रतं मातृव्रतं गुरुव्रतम् ।
स्वर्गदं मोक्षदं चान्यदीप्सितस्य प्रदं ध्रुवम् ॥ २ ॥
विश्वकर्माऽभवत् पूर्वं ब्रह्मणस्त्वपरा तनुः ।
त्वष्टुः प्रजापतेः पुत्रो निपुणो बुद्धिमान् स्वतः ॥ ३ ॥
कृतोपनयनो बालो गुरुकुले वसन् व्रती ।
चकार गुरुशुश्रूषां भिक्षान्नकृतभोजनः ॥ ४ ॥
एकदा तं गुरुः प्राह मदर्थमूटजां कुरु ।
यथा शैत्यं जलधारा तापो न बाधते मम ॥ ५ ॥
यथा न जीर्णता तस्या विनाशो न यथा भवेत् ।
परिवर्तनमप्यस्याः कदाचिन्न भवेत् तथा ॥ ६ ॥
सर्वर्तुसुखदां शालां कुरु पुत्र मदर्थिकाम् ।
तथास्त्विति गुरुं प्राह करिष्ये त्वत्प्रसादतः ॥ ७ ॥
अथाऽयं गुरुपत्न्याऽपि समाज्ञप्तः कुरु प्रभम् ।
कंचुकं मम योग्यं वै सूर्यवह्निसमं मृदु ॥ ८ ॥

न गाढं न श्लथं चापि वाल्कलं सुमनोहरम् ।
यस्य धृतौ न चान्याम्बरधृतिः समपेक्षते ॥ ९ ॥
ओमित्यपि च तामाह ततः स सेवकः शुभः ।
गुरुपुत्रेण चाज्ञप्तो ममार्थे पादुके कुरु ॥१०॥
चर्मादिबन्धनिर्मुक्ते नित्यश्लिष्टे सुखप्रदे ।
यदारूढस्य मे चर्या पंके वार्षु स्थलेऽनिले ॥११॥
ओमित्यपि च तं प्राह ततो गुरुसुताऽऽह तम् ।
भूषणे मे कर्णयोग्ये करयोग्ये तु कंकणे ॥१२॥
कुमारीक्रीडनीयानि दन्तिदन्तमयान्यपि ।
गृहोपकरणान्यत्र मूसलोलूखलादि च ॥१३॥
पीठानि चापि पात्राणि स्थालिका उज्ज्वलास्तथा ।
यथाऽङ्गुल्यो न दह्यन्ते पाको यत्र शुभो भवेत् ॥१४॥
एकस्तम्भमयं सौधं वाय्वाधारं च वस्तुकम् ।
ओमित्याहापि तां तद्वद् वयस्या अपि तं जगुः ॥१५॥
स्वस्वेष्टवस्तुनिर्माणं कर्तुं ताँश्चौं जगाद सः ।
तथेति संप्रतिज्ञाय सर्वेषां पुरतः प्रिये ॥१६॥
किञ्चित् कर्तुं न जानाति तेन चिन्तापरोऽभवत् ।
अंगीकृत्य गुरोर्वाक्यं न कुर्यान्निरयी भवेत् ॥१७॥
गुरुशुश्रूषणं धर्मः सदाऽस्ति ब्रह्मचारिणाम् ।
गुरूणां वाक्यकरणात् सिद्ध्यन्ति हि मनोरथाः ॥१८॥
एवं विचिन्त्य स ययौ वनं ददर्श तत्र वै ।
तपस्विनं स पप्रच्छ को भवानिति ते नमः ॥१९॥
तापसः प्राह तं त्वाष्ट्रं योऽसि, किं ते, वदात्र मे, ।
त्वाष्ट्रः प्राह कलाशैल्प्यं वेत्तुं जानामि ते मुखात् ॥२०॥
तापसः प्राह विश्वेशं शंकरं तपसा भवान् ।
तुष्टं करोतु ते शंभुर्दास्यति मानसेप्सितम् ॥२१॥
इत्युक्त्वाऽदृश्यतां यातस्तापसश्च ततः परम् ।
त्वाष्टस्त्रिहायनं चोग्रं तपश्चचार भावतः ॥२२॥
तावत् प्रसन्नो भगवान् शंकरः पार्वतीपतिः ।
आविर्बभूव सहसा वरं ददौ कलामयम् ॥२३॥
सर्वकलास्तव बुद्धौ प्रयास्यन्ति विकासनम् ।
गृहाण मन्त्रं शुद्ध्यर्थं पात्रतार्थं च मन्मुखात् ॥२४॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
इतिमन्त्रं सदा त्वाष्ट्र जप सम्पत्प्रदं शुभम् ॥२५॥
कण्ठे करे च तुलसीमालां गृहाण पुण्यदाम् ।
भाले बिन्दुं गृहाणैनं कलात्मकं शुभास्पदम् ॥२६॥
इति दत्वा हरः प्राह विज्ञानं च तवेप्सितम् ।
श्रीकृष्णकृपया स्वस्तु नवकौशल्यबृंहितम् ॥२७॥
त्वं सुवर्णादिधातूनां दारूणां दृषदामपि ।
मणीनामपि रत्नानां पुष्पाणां वाससामपि ॥२८॥
कर्पूरादिसुगन्धीनां द्रव्याणामप्यपामपि ।
कन्दमूलफलानां च त्वक्साराणां त्वचामपि ॥२९॥
सर्वेषां वस्तुजातानां शैल्प्यं श्रेष्ठं प्रवेत्स्यसि ।
स्वामिनां रुच्यनुसारं चेष्टं कर्तुं प्रवेत्स्यसि ॥३०॥
नेपथ्यरचनाः सर्वाः सर्वाः सूपादिसंस्कृतीः ।
तौर्यत्रिकादिकं चापि सर्वं ज्ञास्यसि तत्त्वतः ॥३१॥
यन्त्रायुधजलावासदुर्गतन्तुकलादिकम् ।
ऐन्द्रजालं मनोज्ञानं लोकान्तरकलादिकम् ॥३२॥
अतिलोकोत्तरं चापि सर्वं वेत्स्यसि मूलतः ।
भज कृष्णं सदा त्वाष्ट्र स ते ज्ञानं प्रदास्यति ॥३३॥
विश्वकर्मेति ते नाम भगवाँस्त्वां वदिष्यति ।
यदा तु राजा भविता दिवोदासो विधेर्वरात् ॥३४॥
तदाऽऽनन्दवने त्वं मे प्रासादं संकरिष्यसि ।
राजा द्रव्यव्ययं कृत्वा कारयिष्यति मन्दिरम् ॥३५॥
विश्वकर्मन् व्रज गुरोराज्ञायां तिष्ठ तत् कुरु ।
इत्युक्त्वाऽन्तर्हितः शंभुस्त्वाष्ट्रो ययौ गुरोर्गृहम् ॥३६॥
ओमित्युक्ताश्च ये यत्र शैल्प्ये ते तेन तोषिताः ।
प्रदाय तान्यभीष्टानि गृहीत्वा च तदाशिषः ॥३७॥
रञ्जयामास तान्सर्वान् कलाकौशल्यकर्मभिः ।
अथ साहाय्यदाः कान्ताः सस्मार कृष्णसन्निधौ ॥३८॥
श्रीकृष्णस्त्वाविरासीच्च स्वमूर्तेर्दिव्यशक्तयः ।
कृष्णेच्छया वामभागादुत्पन्नाः कन्यकास्तदा ॥३९॥
चतुष्षष्टिकला दिव्याः सुरूपा नवयौवनाः ।
पातिव्रत्यपराः कृष्णाज्ञया त्वाष्ट्रं प्रवव्रिरे ॥४०॥
पतिं कृष्णस्वरूपं तं त्वाष्ट्रं ताः सम्प्रसेविरे ।
जपं चक्रुः कृष्णनारायणाय पतये नमः ॥४१॥
ध्यानं प्रपूजनं सेवां त्वाष्ट्रे कृष्णस्य चक्रिरे ।
कृष्णः प्रादुरभूत्तासां सन्निधौ च समान्तरे ॥४२॥
कान्तभक्त्या प्रतुष्टः स ता ददुर्वरदानकम् ।
अत्र सर्वं सुखं भुक्त्वा सृष्यन्ते मां प्रयास्यथ ॥४३॥
भवतीनां न चान्योऽस्ति धर्मः कान्तस्य सेवनात् ।
कान्ते चाऽहं कान्तस्त्वस्मि मया कान्तः प्रकीर्त्यते ॥४४॥
यत्र नाऽहं न स कान्तो न सा कान्ता मया विना ।
तस्यान्मत्पातिव्रत्येन कान्ते मोक्षमवाप्स्यथ ॥४५॥
इन्द्रादयो लोकपाला विश्वेदेवा मरुद्गणाः ।
आदित्या वसवो रुद्राः साध्या विद्याधरोरगाः ॥४६॥

ऋषयोऽप्सरसो यक्षा गन्धर्वाः सिद्धचारणाः ।
सर्वे मदात्मकाः सन्ति विश्वकर्माऽहमेव च ॥४७॥
तत्पत्न्यो मां स्वामिरूपं समाराध्य च मां सदा ।
कल्पे कल्पान्तके मुक्तिं यान्ति मच्छरणं शुभाः ॥४८॥
इत्युक्त्वा भगवान् कृष्णश्चान्तर्धानं ययौ ततः ।
तास्तु कलात्मिका दिव्याः पतिं त्वाष्ट्रं सिषेविरे ॥४९॥
पठनाच्छ्रवणात्स्वस्य कलाकौशलमाप्नुयात् ।
कथितं ते गुरोः पत्युर्भक्ते लक्ष्मि फलं शुभम् ॥५०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने त्वष्टुः पुत्रस्य गुरुभक्त्या शंभुवरेण कलाकौशल्यं श्रीकृष्ण-नारायणभक्त्या चतुषष्टिकलात्मकपत्नीलाभः, तासां पातिव्रत्यं चेत्यादिनिरूपणनामा सप्तसप्तत्यधिक-चतुश्शततमोऽध्यायः ॥४७७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि व्यासस्य चरितं शुभम् ।
आनन्दकानने नित्यं वसतः शास्त्रशेवधेः ॥ १ ॥
बभाषे त्वेकदा शिष्यान् श्लोकं पठन्त्विमं हि सः ।
विद्यानां त्वाश्रयः काशी काशी लक्ष्म्याः पराश्रयः ॥ २ ॥
मुक्तिक्षेत्रमिदं काशी काशी सर्वा त्रयीमयी ।
कश्च ब्रह्मा शश्च शंभुरश्च विष्णुस्त्रयोऽत्र वै ॥ ३ ॥
ब्राह्मी ब्रह्म परब्रह्म त्रयः काश्यां वसन्ति हि ।
भोगो मोक्षस्तथा दास्यं लभ्यन्तेऽत्र त्रयोऽपि च ॥ ४ ॥
कर्म ज्ञानं च भक्तिं च विन्दते मानवोऽत्र वै ।
एतादृशे वने तत्र व्यासः श्रुत्वा पवित्रताम् ॥ ५ ॥
भिक्षार्थं काशिकायां स बभ्राम सर्वतोदिशम् ।
न लेभे स यदा भिक्षां कोपाच्छशाप काशिकाम् ॥ ६ ॥
यतो भिक्षां न ददति गर्विष्ठाश्चात्र वै जनाः ।
माभूत् त्रैपूरुषी विद्या माभूत् त्रैपूरुषं धनम् ॥ ७ ॥
माभूत् त्रैपूरुषी मुक्तिर्जनेषु काशिवासिषु ।
दत्वा शापं परिक्षिप्य भिक्षापात्रं च निर्ययौ ॥ ८ ॥
अथ गच्छन् महादेव्या गृहद्वारि निषण्णया ।
प्राकृतस्त्रीस्वरूपिण्या भिक्षायै प्रार्थितोऽतिथिः ॥ ९ ॥
भगवान् भिक्षुकास्तावदद्य दृष्टा न कुत्रचित् ।
असत्कृत्याऽतिथिं नाथो न मे भोक्ष्यति कर्हिचित् ॥१०॥
वैश्वदेवादिकं कृत्वा प्रतीक्षतेऽतिथिं सदा ।
ततोऽतिथिर्भवानद्य भव मे स्वामिनो द्विज ॥११॥
विनाऽतिथिं गृहस्थो यस्त्वन्नमेको निषेवते ।
भुंक्ते पापं गृहपतिः सहितः स्वपितामहैः ॥१२॥
तस्मादागच्छ विप्रेन्द्र कुरु मे पत्युरीहितम् ।
गार्हस्थ्यं मम पत्युश्च भिक्षया सफलं कुरु ॥१३॥
श्रुत्वा सविस्मयो व्यासः पप्रच्छ तां दयापराम् ।
भद्रे का त्वं धर्ममयी मूर्तिः शान्तिप्रदाऽत्र वै ॥१४॥
त्वां विलोक्याऽन्तरात्मा मे प्रसीदति शिवाऽसि किम् ।
यद्वा लक्ष्मीः कमलस्था रोहिणी वा शशिस्थिता ॥१५॥
किं वा वाराणसी चाऽऽस्से मुक्तिदेवी च विद्यसे ।
करुणा वा स्वयं यद्वा मद्भाग्यं प्रमदात्मकम् ॥१६॥
भक्तिर्यद्वा भवपत्नी त्वं चान्नदात्री हरिप्रिया ।
सर्वथैव न नारी त्वं त्वमस्यभीष्टदेवता ॥१७॥
केयं चिन्ताऽथवा मेऽत्र काचित् त्वं भव सुन्दरि ।
यदि चेत् कथयेः स्वस्या भिक्षां गृह्णामि भावतः ॥१८॥
इत्युक्ता प्राह गृहिणीऽत्रत्यस्यैवाऽस्मि कामिनी ।
नित्यं चरन्तं पश्यामि त्वां तु शिष्यगणैर्वृतम् ॥१९॥
त्वमेव मां नो जानीषे जाने त्वामहमेव यत् ।
तपस्विन् मे स्वामिनस्त्वयातिथ्यं सफलीकुरु ॥२०॥
व्यासः प्राहाऽस्ति मे कश्चिन्नियमः पूरितो भवेत् ।
एकभिक्षां तदाऽहं वै करिष्ये नान्यथाऽधिकाम् ॥२१॥
सती प्राहाऽविशंकं त्वं वद न्यूनं यतोऽत्र न ।
व्यासः प्राहाऽयुतशिष्यैः सह पंक्तिमहं वृणे ॥२२॥
सती प्राहाऽविलम्बेन सशिष्यो भव पंक्तिशः ।
सिद्धं सर्वं मम पत्युः प्रतापाद् वर्ततेऽदनम् ॥२३॥
अहं न तादृङ्माहेला भर्तृयशोविघातिका ।
आयात्यतिथिर्भवनं तावत् सिद्धयति भोजनम् ॥२४॥
परिपूर्णाः सर्वशालाः परिपूर्णमनोरथाः ।
परिपूर्णं गृहं सर्वं पत्युः पादप्रसादतः ॥२५॥
इत्युक्तश्च प्रहृष्टश्च सशिष्यः पंक्तिशोऽभवत् ।
तावत्पात्रेषु भोज्यानि जलपात्राणि चन्दनम् ॥२६॥
व्योमतस्त्वेककालेन स्थापितानि विधानतः ।
भोक्तुं त्वारेभिरे सर्वे विधिना परिवेषितान् ॥२७॥
तद्दिव्यपाकसंभारान् भुक्त्वा तृप्तिं सुलेभिरे ।
आचान्ताः पूजितास्त्वेते यावद् गन्तुं प्रचक्रमुः ॥२८॥
तावत् सती तं पप्रच्छ तीर्थस्थस्य वृषोऽत्र कः ।
यथा तदनुसारेण तीर्थे वर्तामहे वयम् ॥२९॥
श्रुत्वोवाच सतीं व्यासो धर्मास्तीर्थनिवासिनाम् ।
स एष धर्मो नान्योऽस्ति यस्त्वया परिचर्यते ॥३०॥

त्वमेव धर्मं जानासि पतिशुश्रूषणे रता ।
येनैष तोषमायाति तव भर्ता चिरन्तनः ॥३१॥
सती प्राह स वै धर्मः पाल्यतेऽहर्निशं मया ।
साधारणानि धर्माणि सम्पृच्छे तानि मे वद ॥३२॥
व्यासः प्राह शृणु साध्वि ! नोद्वेगं जनयेत् क्वचित् ।
मनसा वचसा वाऽथ क्रियया प्राणिनं सदा ॥३३॥
परोत्कर्षं विलोक्यैव कार्या प्रसन्नता हृदि ।
विचार्यं सर्वं कर्तव्यं येन स्यादुदयः शुभः ॥३४॥
शंभुः प्राहः तदा व्यासं त्वय्येषु कोऽस्ति तद्वद ।
त्वया शापः प्रदत्तो यः काशीनिवासिषु क्रुधा ॥३५॥
उद्वेगजनकं तत्तु परोत्कर्षो न सह्यते ।
विचार्य न कृतं तद्धि येन स्यादुदयः शुभः ॥३६॥
त्वयोक्तो नियमो भग्नस्त्वयैव शापदानतः ।
एवं वै वर्तमानस्य काशी योग्या न वै तव ॥३७॥
बहिर्गच्छ सदा व्यास माऽत्र वासोऽस्ति ते कृते ।
इत्युक्तः स ययौ पूर्वरोधसि सरितोऽन्तिकम् ॥३८॥
कृत्वाश्रमं शुभं व्यासो नित्यं तिष्ठति तत्र वै ।
यत्र व्यासो गतस्तत्र ययौ देवी सरस्वती ॥३९॥
काश्यां मुक्ता जना जाता आबालवृद्धमानवाः ।
विष्णुरूपाणि सर्वाणि मुनयो वेदपारगाः ॥४०॥
ययुः सर्वाणि शास्त्राणि व्यासाश्रमं शुभाश्रयम् ।
शंकराद्यास्तदा सर्वे मूका आसन् क्षणात् खलु ॥४१॥
ज्ञात्वा तु कारणं तत्र व्यासनिष्कासनात्मकम् ।
शंकरः पार्वतीयुक्तो ययौ व्यासाश्रमं तदा ॥४२॥
नत्वा व्यासं पूजयित्वा चकार स्तवनं हरः ।
क्षमस्व व्यास मद्दोषं कृष्णनारायण प्रभो ॥४३॥
गर्वनाशक देवेश मूका मे नगरी यतः ।
विना सरस्वतीं व्यासं विना शास्त्राणि सर्वथा ॥४४॥
यत्र सन्ति न वै वेदा यत्र शास्त्रं न विद्यते ।
यत्र मन्त्रा न विद्यन्ते मूकास्तत्र तु भूसुराः ॥४५॥
यत्र सरस्वती नास्ति न सन्ति यत्र पण्डिताः ।
तत्स्थलं लयमित्युक्तं काशीशून्याऽद्य विद्यते ॥४६॥
तमोभावेन बुद्धेर्वा गर्वेणाऽवदमच्युत ।
क्षमस्व तत्कृपानाथ त्वया कृष्णेन जीववान् ॥४७॥
त्वया व्यापकदेवेन वसामि शाश्वते पुरे ।
समागच्छ कृपासिन्धो मूकत्वं दूरगं कुरु ॥४८॥
इत्यर्थितस्तदा व्यासः कृष्णद्वैपायनः प्रभुः ।
शंकरं पार्वतीं प्राह मूकत्वं तु तदा व्रजेत् ॥४९॥
सरस्वतीनिवासं चेत् करोतु तव सन्निधौ ।
यदि त्वं सगणः शंभो पूर्णायां प्रातिमासिकम् ॥५०॥
प्रातस्त्वत्र समागत्य कुरु मे पूजनं महत् ।
तदा सरस्वती तत्राऽऽगमिष्यति ममाऽऽज्ञया ॥५१॥
मन्दिरं तु सरस्वत्याः पूर्वस्यां तव सन्निधौ ।
प्रकारय च तत्रेयं नित्यदा संनिवत्स्यति ॥५२॥
इत्युक्तः शंकरस्त्वाह तथौमिति शिवायुतः ।
अथ व्यासः सुशास्त्राणि वेदाः सरस्वती तथा ॥५३॥
ययुश्च मुनयो विप्राः काश्यामूषुर्यथास्थलम् ।
सर्वे निर्मूकतां प्राप्तं बिश्वेश्वरोऽपि मोदते ॥५४॥
शंकरेणार्पिते सौधे तस्थौ माता सरस्वती ।
व्यासो निर्मूकतां दत्वा ययौ नैजाश्रमं पुनः ॥५५॥
शंभुः शिवा तथा देवाः पूर्णायां प्रातिमासिकीम् ।
यात्रां कुर्वन्ति तत्रैव यत्र व्यासाश्रमोऽस्ति वै ॥५६॥
शंकरेण सह सर्वे देवास्तीर्थानि भूतयः ।
गच्छन्ति व्यासपूजार्थं निर्मूकत्वस्य सिद्धये ॥५७॥
इत्येवं कथित लक्ष्मि ! सामर्थ्यं शंकरस्य वै ।
पार्वत्यास्तत्पातिव्रत्यं व्यासस्यैश्वर्यमुत्तमम् ॥५८॥
शंकरस्य सदा कृष्णे पातिव्रत्यं परं तथा ।
सर्वेषामपि देवानां कृष्णद्वैपायने च तत् ॥५९॥
पातिव्रत्यं परं यस्य श्रवणात्पठनात्तथा ।
भुक्तिर्मुक्तिर्भवेल्लक्ष्मि ! स्वेप्सितं सुखमाप्नुयात् ॥६०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने व्यासस्य काश्यां भिक्षाया अलाभे शापस्ततः पार्वतीकृताऽतिथिसत्कारः, शंभुना व्यासस्य बहिर्वासकरणम्, व्यासेन सरस्वत्याद्याहृतं, काशीप्रजाया मूकता, शंभुर्गत्वा व्यासादीनानिनाय, मूकतानिवृत्तिः, पूर्णिमायां व्यासतीर्थे कर्तव्यमित्यादिनिरूपणनामाऽष्टसप्तत्यधिकचतुश्शततमोऽध्यायः ॥ ४७८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवदामि कथां वै वाल्मिकेः शुभाम् ।
आसीत् सुमतिनामा तु विप्रो भृगुकुलोद्भवः ॥ १ ॥
रूपयौवनसम्पन्ना तस्य कान्ता च कौशुकी ।
तस्यां पुत्रः समुत्पन्नस्त्वग्निशर्मेति नामकः ॥ २ ॥
स पित्रा प्रोच्यमानोऽपि वेदाभ्यासं करोति न ।
अथैकदा त्वनावृष्ट्या लोकाः संपीडितास्त्वति ॥ ३ ॥

सुमतिः सकुटुम्बो वै वने कृत्वाऽश्रमं स्थितः ।
आभीरैर्दस्युभिः सार्धं संगोऽभूदग्निशर्मणः ॥ ४ ॥
वने मार्गेण तेनाऽत्र ये निर्यान्ति जनास्तु तान् ।
अग्निशर्मा क्रूरकर्मा हन्ति हरति तद्धनम् ॥ ५ ॥
सप्तर्षयः पथा तेन सुव्रताः समुपस्थिताः ।
अग्निशर्मा हर्तुकामस्तांस्तु सप्त विलोक्य च ॥ ६ ॥
प्राह वस्त्राणि छत्राणि पत्त्राणादीनि यानि वै ।
सर्वाणीमानि मुञ्चध्वमन्यथा मारयामि वः ॥ ७ ॥
इति श्रुत्वाऽस्य वचनमत्रिः प्राहाऽग्निनामकम् ।
अस्मत्पीडाकरं पापं ब्राह्मणे वै कथं त्वयि ॥ ८ ॥
समुत्पन्नं वयं तीर्थयायिनः स्मस्तपस्विनः ।
अग्निशर्मा तदा प्राह मम माता पिता स्वसा ॥ ९ ॥
भार्या सुताः क्षुधिता वै वर्तन्ते पोषयामि तान् ।
विनाऽपहारं कस्माद्वै पोषणं स्याद् वनेऽत्र वै ॥१०॥
तस्मात् करोमि पापं त्वविगणय्य शुभाऽशुभम् ।
अत्रिः प्राहाऽग्निशर्माणं शृणु तथ्यं हितं शुभम् ॥११॥
पित्रादीननुपृच्छ त्वं स्वकर्मोपार्जितं प्रति ।
युष्मदर्थं क्रियते यत्पापं तत् कस्य कथ्यताम् ॥१२॥
चेन्न ते कथयन्ति स्म स्वीकुर्वन्ति न चेद् यदि ।
ब्रूयुस्तवैव पापं चेन् मा मृषा प्राणिनोऽवधीः ॥१३॥
अग्निशर्मा तदा प्राह मया पृष्टा न ते क्वचित् ।
युष्मद्वचसा पृच्छामि गत्वा भावं कुटुम्बिनाम् ॥१४॥
जानामि तु यथा यूयं तिष्ठध्वमत्र यावता ।
आगच्छामि पुनस्त्वत्रेत्युक्त्वाऽऽशु पितरं ययौ ॥१५॥
पप्रच्छ धर्मघातेन प्राणिहिंसादिकर्मणा ।
सुमहज्जायते पापं कस्यैतत् कथ्यतां मम ॥१६॥
मातरं चापि पप्रच्छ पितरौ प्राहतुश्च तम् ।
तवैव पापं पुत्र स्यान्नावयोरिति वै ततः ॥१७॥
त्वया कृतं त्वया भोग्यं भरणं त्वावयोः कुरु ।
अथ भार्या जगादैवं साऽऽह पापं तवैव तत् ॥१८॥
अथ पुत्रान्सुतामाह स्वसारं प्राह तेऽपि तम् ।
ऊचुः पापं तवैवाऽस्ति नाऽस्माकं तन्मनागपि ॥१९॥
एवं स्वार्थित्वमाज्ञाय वैराग्येण समन्वितः ।
ऋषीणां पादयोर्नत्वा शोचन्नुवाच तान् द्विजः ॥२०॥
न मे माता न च पिता न भार्या न च मे सुतः ।
सुता स्वसा न मे त्वस्ति यतस्ते स्वार्थमात्रकाः ॥२१॥
भवन्तः शरणायातं तत्पापात् त्रातुमर्हथ ।
अत्रिस्तं प्राह वृक्षाऽधः स्थित्वा ध्यानं समाचर ॥२२॥

कृष्णनारायणमूर्तेः पापपुञ्जं प्रणाशय ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥२३॥
जप त्वं श्रद्धया शश्वत् तुलसीमालया करे ।
श्रीकृष्णो हि स्वयं त्वत्र तवोद्धारं करिष्यति ॥२४॥
इत्युक्त्वा प्रययुः सर्वे सोऽपि ध्यानपरोऽभवत् ।
तद्ध्यानस्थोऽभवद् योगी वत्सराणि त्रयोदश ॥२५॥
ध्याने स्थितः सदा मन्त्रं जजाप सस्वरः स वै ।
वम्रीभिस्तु कृतस्तस्योपरि वल्मीक उच्छ्रयः ॥२६॥
सोऽपि तत्र निश्चलः सन् ध्यायन् जजाप तत्तथा ।
नोत्थितो न जलं वान्यत् पपौ चखाद वा क्वचित् ॥२७॥
अथैते ऋषयस्तेन पथा निर्ययुरन्तिकात् ।
शुश्रुवुस्तद्ध्वनिं मन्त्रजपस्य विस्मयं गताः ॥२८॥
दृष्ट्वा वल्मीकमेवैते तदन्तःस्थं जडं यथा ।
गंगाजलेन संस्कृत्योत्थापयामासुरीश्वराः ॥२९॥
स चोत्थितः शनैस्तस्मान्नमश्चक्रे मुनीश्वरान् ।
प्राहाऽहं तारितः पापात् संसाराद् घोरकर्मणः ॥३०॥
जपामि तं कृष्णमन्त्रं समुद्धृतः कृपालुभिः ।
प्रसादाद् भवतां ज्ञानं मया तथ्यं समर्जितम् ॥३१॥
अन्ते मोक्षगतिं यायां कुर्वन्त्वनुग्रहं मयि ।
इत्युक्त्वा मुनिचरणप्रक्षालनजलं पपौ ॥३२॥
मुनयस्तं जगदुश्च वाल्मीकिरिति नामतः ।
ययुस्ते मुनयः सत्यं वाल्मीकिस्तु हरिं भजन् ॥३३॥
त्रिकालज्ञानमासाद्य रामकाव्यं चकार ह ।
येनोद्धारं गमिष्यन्ति देहिनोऽसंख्यसख्यकाः ॥३४॥
यावज्जीवं ब्रह्मव्रतं पश्चाद्रक्षन् स भक्तराट् ।
पालयामास कृष्णस्य पातिव्रत्यं हि शाश्वतम् ॥३५॥
प्रातः स्नानं चकाराऽसौ सन्ध्यां चकार भावतः ।
विष्णुं शिवं गणपतिं पार्वतीं त्वनलं रविम् ॥३६॥
रामादित्यं सप्तदेवान् पुपूज प्रत्यहं ऋषिः ।
षोडशोत्तमवस्तुसंयुक्तभावैः शुभ्राऽऽन्तरैः ॥३७॥
वन्यैः फलैस्तथा कन्दैः पत्रैर्बीजादिभिः सदा ।
नैवेद्यं त्वर्पयामास जलं कूपोदकं तथा ॥३८॥
वन्यचन्दनकाष्ठैश्च धूपं दीपं चकार सः ।
वल्कलादीनि वस्त्राणि ददौ रामाय पूजने ॥३९॥
वल्लीतन्तूपनीतं ददौ पुष्पाणि भावतः ।
मिष्टं मधु ददौ क्षौद्रं तत्कालीनं फलादिकम् ॥४०॥
अकृष्टपच्यमृष्यन्नं सूर्यपक्वं ददौ मुदा ।
वह्निपक्वानि शिङ्ग्वादिबीजानि प्रददौ तथा ॥४१॥

मृगाश्च पक्षिणश्चान्ये पशवो भयवर्जिताः ।
रामनामश्रवास्तत्र समायान्ति मुमुक्षवः ॥४२॥
तिष्ठन्ति स्थैर्यभावेन यावत्पूजा प्रवर्तते ।
रात्रौ वसन्ति तत्रैव रामनामश्रवोत्सुकाः ॥४३॥
तेभ्यो रामप्रसादं स पत्रं पुष्पं फलं जलम् ।
कन्दं कणादिकं दत्वा ततो भुंक्तेऽतिहर्षतः ॥४४॥
वन्या अतिथयः क्वापि समागच्छन्ति दैवतः ।
कृष्णरूपाँस्तु तान्मत्वा सेवते परमादरात् ॥४५॥
न विस्मरति रटनं रामरामेति वै क्षणम् ।
जाताऽस्य जपसामर्थ्याद् वाक्सिद्धिरन्यदुर्लभा ॥४६॥
उपतिष्ठन्ति रत्नानि वाल्मीक्यभीप्सितानि वै ।
एकदा स ग्रीष्मकाले वने शुष्केऽतितापने ॥४७॥
फलपत्रदलहीने न लब्ध्वा वै फलादिकम् ।
शुशोच श्रीहरेर्नित्यनैवेद्यार्थं करोमि किम् ॥४८॥
नास्ति पत्रादिकं भक्ष्यं कृष्णार्पणं ददामि किम् ।
इति सञ्चिन्त्य मनसा तिष्ठत्यूटजसन्निधौ ॥४९॥
करोति श्रीकृष्णनारायणरामहरेविभो ।
भावनां मे ग्रसित्वाऽद्य सन्तुष्टो भव केशव ॥५०॥
एवं वदति तत्रैव कश्चिद् गोपाल आगतः ।
दोग्ध्या गवा युतो वत्सतरासंयुक्तथाऽन्तिकम् ॥५१॥
तमुवाच मुने त्वत्र स्थातुमिच्छामि वै क्षणम् ।
यास्ये वनान्तरं क्षणं विश्रम्य तव चाश्रमे ॥५२॥
इत्युक्त्वाऽश्वत्थछायायां स्थितः क्षणं गवा युतः ।
दुदोह पर्णपुटे तां दुग्धं तस्मै ददौ मुदा ॥५३॥
वाल्मीकस्त्वतिसंहृष्टो जग्राह पूजनाय तत् ।
देवेभ्यस्त्वर्पयित्वा तत् प्रासादिकं विभज्य च ॥५४॥
कृष्णनैवेद्यसंपूतं पपौ तस्मै ददौ तथा ।
तावत्तद्धृदये जातः प्रकाशोऽक्षरब्रह्मणः ॥५५॥
दिव्यं चक्षुः समुद्भूतं निरावरणसत्प्रभम् ।
गोपालं तं ददर्शाऽसौ श्रीकृष्णं राधिकापतिम् ॥५६॥
कामधेनुयुतं भक्तनैवेद्यार्थं समागतम् ।
पुनर्गोपालमेवैनं ददर्श मायया हरेः ॥५७॥
अत्याश्चर्यभरश्चाऽयं तुष्टाव परमेश्वरम् ।
नित्यतृप्तिस्तथा जाता दुग्धेनाऽस्य हि शाश्वती ॥५८॥
कृष्णनारायणस्तावददृश्योऽभूत् क्षणान्तरे ।
वाल्मीकस्तं दिव्यरूपं स्मारंस्मारं ननर्त ह ॥५९॥
नित्यं सस्मार तं कृष्णं दिव्यं भक्तदयाकरम् ।
स एव रामरूपेण वल्मीकेन व्यलोकि वै ॥६०॥
भविष्यचरितं सर्वमदर्शि करगं यथा ।
नित्यं स राथयामास रामादित्यस्य चिन्तनम् ॥६१॥
अन्ते ययौ हरेर्धाम वैकुण्ठं शाश्वतं पदम् ।
नहि पापकृतां चापि कृष्णभक्तावसद्गतिः ॥६२॥
अन्योद्धारमपि कर्तुं समर्था भगवज्जनाः ।
कामः क्रोधो मनोजीवश्चेन्द्रियाणि च वासनाः ॥६३॥
त एव सन्ति तद्रूपाः किन्तु कृष्णसमागमात् ।
जायन्ते दिव्यरूपास्ते सर्वेषां मुक्तिदायकाः ॥६४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽग्निशर्मणः पातिव्रत्यतपसा वाल्मीकित्वं सर्वज्ञत्वं मुक्तिश्च, सप्तर्षियोगाद् ऋषित्वं, गोपालधेनुरूपेण कृष्णदर्शनं चेत्यादिनिरूपणनामैकोनाशीत्यधिकचतुश्शततमोऽध्यायः ॥४७९॥

श्रीनारायण उवाच—

शृणु पृथ्व्यां शुभं तीर्थमवन्तीनगरं रमम् ।
यत्रास्ते त्वापगा शिप्रा तां ययौ राम एकदा ॥ १ ॥
सतीयः सलक्ष्मणश्च तर्पयामास पूर्वजान् ।
लक्ष्मणं तु ततः शिप्राजलमानेतुमुक्तवान् ॥ २ ॥
लक्ष्मणस्तदनादृत्योवाच सीतां वदाऽधुना ।
यद्यहं वारानयेयं सीता किं ते करिष्यति ॥ ३ ॥
राम नाहं दासभावं सर्वकालं करोमि ते ।
इयं सुपुष्टा सुदृढा मत्तोऽपि पीवरा ह्यतः ॥ ४ ॥
वद राघव सीतां त्वमनया किं करिष्यसि ।
लक्ष्मणोक्तमपूर्वं तच्छ्रुत्वा रामश्च जानकी ॥ ५ ॥
संतस्थतुर्विमनसौ सीता वै जलमाददे ।
तत्र पीत्वाऽथ भुक्त्वा च महाकालेश्वरं ययुः ॥ ६ ॥
तत्र विभावरीं नीत्वा रामः प्राहाऽनुजं प्रगे ।
उत्तिष्ठ वत्स सौमित्रे व्रजामोऽन्यस्थलं वनम् ॥ ७ ॥
सौमित्रिरब्रवीद् रुष्टो नाऽहं गन्ता कथंचन ।
व्रज त्वमनया सार्धं भार्यया प्रियया तव ॥ ८ ॥
नाहमग्रे वनं यामि न वाऽयोध्यां कदापि वै ।
एवं ब्रुवाणं सौमित्रिमुवाच भगवान् स्वयम् ॥ ९ ॥
शनैरायाहि सौमित्रे सीतया सह मेऽनुज ।
कथं वै वर्तसे रोषे कथं वा सह निर्गतः ॥१०॥
यतस्त्वया प्रगन्तव्यं शनैः शनैस्तपस्विना ।
लक्ष्मणः प्राह यद्येवं करिष्ये न वचस्तव ॥११॥

कैंकर्यं न करिष्ये ते तदा यामि वनं सह।
तथा स्त्विति प्राह रामो लक्ष्मणस्तु शनैर्ययौ ॥१२॥
अथाऽब्रवीत् पुनर्नाऽहं गन्ताऽस्मि वै त्वया वनम्।
इत्युक्त्वा निषसादाऽसौ रामो याति पुरः पुरः ॥१३॥
अथोत्थाय धनुः कृत्वा सज्यं तत्र नियोज्य च।
शरं विचारयामास रामं हत्वाऽथ जानकीम् ॥१४॥
वशं करोमि चाऽरण्ये तापसः सर्वदा सुखी।
रामः शीघ्रं प्रयात्येव सीताऽपि याति वेगतः ॥१५॥
लक्ष्मणः सशरं चापि कृत्वा मोक्तुं शशाक न।
अहो भ्राता कथं वध्यो माताऽत्र जानकी हि मे ॥१६॥
पूज्या कथं वशं नेया का मे भ्रान्तिरियं न्वहो।
पुनश्चैवं विचार्याऽपि शराऽधीनमनाः पुनः ॥१७॥
पुनर्दयालुहृदयस्तावत् प्लक्षतरुं पुरः।
रामो ददर्श तं गत्वा निषसाद हि तद्भुवि ॥१८॥
सीताऽप्यागत्य विश्रान्ता लक्ष्मणोऽपि शनैर्ययौ।
रामः प्राह कथं भ्रातः कृतं वै सशरं धनुः ॥१९॥
लक्ष्मणो व्रीडया नम्रः क्षणमात्रं बभूव ह।
अन्तर्गतं विदित्वैव रामः प्रोवाच भूस्थितिम् ॥२०॥
न ते लक्ष्मण ! दोषोऽस्ति क्षेत्रस्याऽस्य हि चेष्टितम्।
अस्मिन् क्षेत्रे न सौभ्रात्रं सर्वो हि स्वार्थतत्परः ॥२१॥
परस्परं न मन्यन्ते स्वार्थनिष्ठैकहेतवः।
न शृण्वन्ति पितुः पुत्राः पुत्राणां च तथा पिता ॥२२॥
न च शिष्यो गुरोर्वाक्यं गुरुर्वा शिष्यसेवनम्।
स्वार्थानुबन्धिनी प्रीतिर्न कश्चित् कस्यचित् प्रियः ॥२३॥
एतादृशं बलं त्वस्या भूमेरस्ति ममाऽनुज।
न च ते तत्र दोषोऽस्ति मा व्रीडां व्रज चाऽनघ ॥२४॥
श्रुत्वा नत्वाऽऽह सौमित्रिः कथं त्वेतादृशं स्थलम्।
संजातं यज्जडमपि चेतनान् नः प्रबाधते ॥२५॥
रामः प्राह पुरा त्वत्र घोरखनकनामकः।
राक्षसोऽभून्महापुष्टः सप्ततालप्रमाणवान् ॥२६॥
कामरूपधरो व्योम्ना नगरेषु गृहेषु च।
अवातराते चोड्डीय बलाद् भक्ष्यं जनादिकम् ॥२७॥
अपाहरति क्रौर्येण त्रालान्नारीश्च गोवृषान्।
एकगव्यूतिभूमौ स वने कृत्वाऽऽश्रमं खलः ॥२८॥
अदृश्यरूपश्चरति पक्ष्यादिकांश्च खादति।
क्वचिद् भवति शार्दूलो मृगो वा गवयः क्वचित् ॥२९॥
क्वचिद् राजा क्वचिद् विप्रः क्वचिन्नारी सुरूपिणी।
क्वचित् सर्पः क्वचित् कीशः क्वचिद् रूक्षो भवत्यपि ॥३०॥

यथा यस्य भवेद् योग्यं रूपं तद्वान् भवत्यसौ।
मिलित्वा चाप्युषित्वा च सहयानं विधाय च ॥३१॥
करोति हिंसनं तेषां विश्वस्य तान् प्रखादति।
क्वचित्तु कृत्रिमं रम्यं पत्तनं नगरं शुभम् ॥३२॥
प्रदर्शयति प्रजया शोभितं त्वैन्द्रजालिकम्।
यत्राऽऽपणेषु वणिजां दृश्यन्ते ह्युद्यमा नवाः ॥३३॥
कुमाराणां शुभाः शाला उद्यानानि वनानि च।
मन्दिराणि सुरम्याणि राजसैन्यं महत्तमम् ॥३४॥
एवं गान्धर्वनगरं विधापयति वै क्वचित्।
अथैकदा श्रीगोपालः कम्भराभार्यया पुनः ॥३५॥
तीर्थयात्राकृते तेन पथा दिव्या विनिर्गतः।
श्रीकृष्णांशः श्रीगोपालो लक्ष्म्यंशा कम्भरा सती ॥३६॥
दृष्टौ घोरखननेन मार्गगौ रक्षसा वने।
अतितेजस्विनौ शान्तौ सुप्रभौ सूर्यवर्चसौ ॥३७॥
तावत्तु स मनश्चक्रे विश्वास्य योग्यकर्मणा।
रक्षसा चिन्तितं त्वेतौ देवभाग्यौ यतो मया ॥३८॥
दैवजुष्टं सुनगरं सोत्सवं संविधाय च।
आतिथेयेन विधिना सन्मान्यौ भक्ष्यकोत्तमौ ॥३९॥
इति विचार्य कृतवान् नगरं दिव्यमानवम्।
दिव्यराजोपकरणं यज्ञशालादिशोभितम् ॥४०॥
नगरेशः स्वयं भूत्वा नीत्वाऽर्घ्यं च तयोः पुरः।
ययौ दूरं सुसत्कारं कृत्वाऽऽनिनाय तौ गृहम् ॥४१॥
आश्चर्यं परमं तौ तु प्रापतुर्दम्पती तदा।
पूजितौ भोजितौ पादसंवाहितौ प्रतोषितौ ॥४२॥
विश्रान्तौ विश्रमितौ निद्रिताविव बभूवतुः।
तावत् स राक्षसो यातो ग्रहीतुं हेतिमुल्बणम् ॥४३॥
दम्पत्योर्विशसनार्थे तत्क्षणे कम्भरां सतीम्।
प्राह गोपालकृष्णः स पश्य कपटसेवकम् ॥४४॥
आनेतुं कम्भरालक्ष्मि ! गतोऽसौ करवालकम्।
राक्षसोऽयं महादुष्टो बहूनत्ति छलाद् वने ॥४५॥
तस्य नाशो मया कार्यस्तदर्थं त्वहमागतः।
स्वस्था भव क्षणं साध्वि ! पश्य कार्यं क्षणं मम ॥४६॥
यावदेवं हि भगवान् निवेदयति पत्निकाम्।
तावत् संगृह्य सुतीक्ष्णं करवालं समागतः ॥४७॥
अथोत्थाय तदा तूर्णं गोपालकृष्ण एव तम्।
अदृश्येन स्वरूपेण पत्न्या सह स्थलान्तरम् ॥४८॥
अपसृतश्च शय्यायां दृष्टौ तथा यथा पुरा।
करवालेन शय्यायां मत्वा जघान यावता ॥४९॥

करवालं तदा शय्याघट्टितं च द्विधाऽभवत् ।
अर्धं हस्तगतं रक्षःपादयोः पतितं च सत् ॥५०॥
पदाग्रौ छेदयामास यदर्धं त्वग्रभागकम् ।
तत्तु प्रोड्डीय च गले तीक्ष्णाग्रं लग्नमुल्बणम् ॥५१॥
गलो भिन्नश्चोत्पतितो राक्षसः क्षणमूर्छितः ।
दयायुक्कंभरालक्ष्मीर्जलं पातुं च तं ययौ ॥५२॥
तावद्दधार बाहुभ्यां मुमुर्षुर्वैरभावतः ।
भक्ष्येच्छया निजग्रासं कर्तुं यावत् समिच्छति ॥५३॥
तावत् तयाऽभिशप्तः स मरणं याहि राक्षस ।
एतादृशेऽत्र नगरे शाठ्यं करोषि सर्वथा ॥५४॥
वञ्चयसिच्छलधर्मा तस्माचे भूमिका सदा ।
छलात्मिका वञ्चयित्री कापट्यक्रूरतायुता ॥५५॥
सदैव भवतु क्रूरधर्मणस्ते निवासतः ।
अन्येऽप्यत्र भुवो योगाच्छलक्रौर्यादिधर्मिणः ॥५६॥
भविष्यन्ति न सन्देहो मित्राणि शत्रवो यथा ।
स्वकीयाः परकीयाश्च संगदोषाद्धि राक्षसाः ॥५७॥
तेन पापेन तु पुनर्नारका दुःखभोगिनः ।
तव भूमिगताः सर्वे भविष्यन्ति जनाऽधमाः ॥५८॥
इतिशप्तो यदा देव्या राक्षसस्तावदेव तु ।
प्राणाँस्तत्याज स क्रूरो नगरं विलयं गतम् ॥५९॥
भूमिररण्यरूपा सा समभूत् केवला स्थली ।
तदा सा कम्भरालक्ष्मीर्विशेषाश्चर्यसंप्लुता ॥६०॥
अभवद् देवदेवाय पप्रच्छ जालकं नु किम् ।
गोपालकृष्णः प्रोवाच राक्षसस्यैन्द्रजालिकम् ॥६१॥
सर्वमासीन्मया पूर्वं ज्ञातमेव हि सुन्दरि ।
राक्षसोऽयं मृतः स्वस्य हस्तेनैव यतः पुनः ॥६२॥
यास्यति राक्षसीं योनिं रामहस्तेन वै पुनः ।
आवयोर्दर्शनसेवाफलेन स मरिष्यति ॥६३॥
तदा यास्यति मुक्तिं स सोऽथ द्वीपे तु दक्षिणे ।
वर्तिष्यते यदा रामो गमिष्यति हनिष्यति ॥६४॥
इत्युक्त्वा तौ ययतुश्च सा भूमिः राक्षसी पुरा ।
शप्ताऽस्ति तेन योगेन लक्ष्मणाऽत्र मनस्तव ॥६५॥
कुविचारं तु कृतवन्नात्र दोषो मनाङ् तव ।
देशः कालः क्रिया सङ्गो मन्त्रो ध्यानं च दीक्षणम् ॥६६॥
गुरुश्चैते यादृशाः स्युस्तथा फलन्ति शिष्यके ।
राक्षसस्य निवासेन भूमिः सा शापिता ह्यभूत् ॥६७॥
भूमेर्योगेन सौमित्रे क्रूरं ते मानसं ह्यभूत् ।
गता भूमिस्तु सा भ्रातः स्वस्थो भव सुखान्वितः ॥६८॥

सीतायाः पातिव्रत्यस्य बलेन मानसं न वै ।
विकृतिं तु समापन्नं ममापि मानसं न वै ॥६९॥
येषां पत्नीव्रतं नित्यं पातिव्रत्यं दृढं तथा ।
तेषां मनसि भूम्यादि प्रसंगो नैव रोहति ॥७०॥
त्वं चापि वर्तसे भ्रातर्ब्रह्मचारी सुतापसः ।
अतस्ते धैर्यमद्यापि सुस्थितं विकृते हृदि ॥७१॥
अन्ये तु कलहं कुर्युरवश्यमीदृशस्थले ।
विनाशफलमाप्नुयुर्नास्ति तत्र हि संशयः ॥७२॥
पातिव्रत्येन धर्मेण भवन्ति सुखिनो जनाः ।
पतिः कृष्णः परब्रह्म नारायणो हरिः प्रभुः ॥७३॥
सीता पतिव्रता यस्मादहं वनेऽपि मोदवान् ।
तादृशश्च व्रतधर्ता भ्राता मेऽत्र वचस्करः ॥७४॥
नास्ति दुःखं महारण्ये त्रयाणामेकवर्तिनाम् ।
स्वर्गो मोक्षो गृहं राज्यं सहैवास्ति वने मम ॥७५॥
इत्येतत्कथितं त्वत्र भूबलं प्राक् सुशापितम् ।
अत्राऽस्माकं पादस्पर्शो जातस्तस्माच्छनैः शनैः ॥७६॥
भूबलं क्रूरता रूपं लयमेष्यति कालतः ।
भविष्यति शुभं तीर्थमवन्तीमण्डलं महत् ॥७७॥
इत्युक्त्वा प्रययुरग्रे वनेषु वनचारिणः ।
इति ते कथितं लक्ष्मि पतिव्रताप्रशापनम् ॥७८॥
पातिव्रत्यबलं चापि देशायनमिभावितम् ।
पठनाच्छ्रवणात्स्वस्य मतिस्तु विमला भवेत् ॥७९॥
देशकालादिसम्प्राप्तः पराभवो न दुःखयेत् ।
धर्मे मतिर्भवेत्पुष्टा व्रतादौ विमला भवेत् ॥८०॥
यथेष्टफलदं त्वस्य स्मरणं शान्तिदं भवेत् ।
स्वर्गदं मोक्षदं चापि शाश्वतानन्ददं भवेत् ॥८१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने अवन्तीयात्रायां लक्ष्मणस्य मनःपरिवर्तनोत्तरं भुवि तत्र घोरखनकराक्षसवासेन गोपालकृष्णकृततन्नाशेन च शापितभूमि तथा लक्ष्मणमानसदुष्टता सीतायाः पातिव्रत्यं चेत्यादिनिरूपणनामाऽशीत्यधिक-चतुश्शततमोऽध्यायः ॥ ४८० ॥

श्रीनारायण उवाच—

भूयस्तु संप्रवक्ष्यामि ऋषिपत्नीकृतं व्रतम् ।
तच्छृणुष्व मयाऽऽख्यातं पवित्रं पापनाशनम् ॥ १ ॥
सप्तर्षीणां तु या भार्याः सप्तपत्न्यः पतिव्रताः ।
तास्तु गंगां गताः स्नातुं दृष्ट्वा वह्निं कुशस्थले ॥ २ ॥

शैत्येन वेपितास्तप्तुं गतास्ता वह्निसन्निधौ।
वास्तवोऽग्निः स नैवाऽऽसीत् किन्तु क्षिप्तः स गंगया ॥ ३ ॥
तेजस्वी शंकरस्याऽऽसीद्धातुर्वै वह्निसदृशः।
शरस्तम्बे वह्नितुल्यो वह्निनाऽप्सु समर्पितः ॥ ४ ॥
वह्निमिश्रः स वै धातुर्दृष्ट्वा स्नातपतिव्रताः।
तासु प्रविष्टश्च तदा वह्निना प्रेरितः क्षणात् ॥ ५ ॥
गर्भवत्यस्तु ता जाता विज्ञाताः ऋषिभिस्तु ताः।
एवं देवपरिभ्रष्टा दूषिताः पावकेन वै ॥ ६ ॥
ऋषिभिः परित्यक्तास्ता बभ्रमुश्च वनाद्वनम्।
एवं बहुगते काले नारदो वैष्णवः परः ॥ ७ ॥
तासां शुभं समिच्छन् वै समायातो वनान्तरे।
ताभिः स सत्कृतस्तत्र धृतव्रतो महामुनिः ॥ ८ ॥
समासीनस्ता उवाच देशकालोचितं वचः।
किमिदं क्रियते जातो भवतीनां पराभवः ॥ ९ ॥
कस्माद्वै ऋषिभिस्त्यक्ता लोकमातृपतिव्रताः।
ता ऊचुर्हि वयं त्यक्ताः कार्तिकेयप्रसंगतः ॥१०॥
शंकरस्य महद्वीर्यं वह्नावासीत् कुशोपरि।
वह्निं ज्ञात्वा वयं स्नात्वा तप्तुं तत्र गता यदा ॥११॥
अग्निः स्पृष्ट्वा गुप्तरूपः प्रविष्टो नो हि वर्ष्मसु।
धातुश्चास्मद्गर्भभागे संलग्नो योनिमण्डले ॥१२॥
तेन जाताः सगर्भाश्च वयं दुष्टा इति स्थितिः।
यज्ञकार्यकरैस्तैश्च वयं त्यक्ताः सुदुःखिताः ॥१३॥
लोकापवादजं किञ्चिज्जातं दिष्टवशादघम्।
किं कुर्मः क्व च गच्छामः किं तपः का च देवता ॥१४॥
यस्याऽऽराधनपुण्येन व्रजामः पूततां पुनः।
एतन्निश्चित्य वै ब्रह्मन्नत्राऽस्मान् वद तत्त्वतः ॥१५॥
इति पृष्टो नारदस्तु ध्यात्वोवाच हितावहम्।
श्रूयतां भोस्तपःश्रेष्ठं भवतीनां सुकारणम् ॥१६॥
गयातीर्थं महाश्रेष्ठं महाकालवनस्थितम्।
तत्राऽक्षयवटं गत्वा धूतपापा भविष्यथ ॥१७॥
भाद्रशुक्लस्य पञ्चम्यामुपोषणपरायणाः।
संकुरुत व्रतं जागरणान्वितं सुपावनम् ॥१८॥
नारदस्य वचः श्रुत्वा ऋषिपत्न्यः सुहर्षिताः।
महाकालवनं जग्मुर्यत्र तीर्थं गयाभिधम् ॥१९॥
तत्र वटं विलोक्याथ स्नात्वा दानादिकाः क्रियाः।
कृतवत्यस्तु ताः पुण्या भाद्रस्य धवले दले ॥२०॥
पञ्चम्यां ताः समुपोष्य जागरं त्वैकनैशिकम्।
चक्रुस्ताः परपुंस्पर्शदोषहीनास्तदाऽभवन् ॥२१॥
भर्तृकोपविनिवृत्ताः सद्यो ययुर्गृहं स्वकम्।
ऋषिभिः स्वागतं दत्तं पूर्ववद्दृष्टिदृष्टिभिः ॥२२॥
तदाप्रभृति लोकेऽत्र सा तिथिः ऋषिपञ्चमी।
नारीणां व्रतलाभाय कृता नारायणेन वै ॥२३॥
लक्ष्म्या च राधया, गौर्या प्रभया जयया तथा।
पार्वत्या पद्मया मंजुलया माणिक्यया तथा ॥२४॥
सावित्र्या संज्ञया शच्या मेनया नारदाननात्।
श्रुत्वा व्रतं कृतं तद्वै ऋषिपञ्चमिकात्मकम् ॥२५॥
परपुंसः स्पर्शजन्यं मासेषु द्वादशस्वपि।
कामाऽकामादिसंसर्गजन्यं पापं च यत् स्त्रियाः ॥२६॥
स्वल्पं वापि महच्चापि भोगाऽभोगकृतं तु यत्।
रजस्वलादृक्संस्पर्शजन्यं वा सूतकादिकम् ॥२७॥
अशुद्धिः स्पर्शजन्या या गृहोपकरणादिषु।
जलभोजनपात्रेषु स्थले सर्वत्र वस्तुषु ॥२८॥
राजस्वल्यकृतो दोषः स्पर्शजन्यश्च यो भवेत्।
बालकेषु च वृद्धेषु पराधीनेषु वापि यः ॥२९॥
देहसंसर्गजा दोषाः कामसंसर्गजास्तथा।
सर्वे नश्यन्ति नारीणामृषिपंचमिकाव्रतात् ॥३०॥
व्रतेन ऋषिपञ्चम्याः शुद्ध्यन्ति सर्वथा स्त्रियः।
पवित्रास्ता भवन्त्येव राजस्वल्येन सर्वथा ॥३१॥
नीवाराहारकं कुर्याच्छुचिर्भूत्वाऽबला नरः।
न तयोर्जायते कश्चिदापद्दुःखं कदाचन ॥३२॥
दुर्भगत्वं न नारीणां न वियोगश्च भर्तृभिः।
पुत्रतो धनतो वापि न वियोगो भविष्यति ॥३३॥
अवन्त्यामीदृशं तीर्थं वर्तते पापनाशकम्।
अत्र दानादिकं कृत्वा लभते पुण्यमक्षयम् ॥३४॥
यो वै नियममाश्रित्य कथामेतां शृणोति च।
पर्वे वा सततं सोऽपि हयमेधफलं लभेत् ॥३५॥
पातिव्रत्यफलं पत्नी लभेत् पंचमीपालनात्।
अक्षयं च हरेर्धाम सह पत्या लभेत्ततः ॥३६॥
सधवा वाऽप्यधवा वा कुर्यादेतद्व्रतं परम्।
कृष्णनारायणपतिं सन्तोष्टुं शुद्धिकाम्यया ॥३७॥
कृष्णनारायणः श्रीमान् शोधयित्वा सतीजनम्।
रक्षिष्यति कृपालुः स पादयोर्निजसेवने ॥३८॥

व्रतं नारायणे येन यथा वाऽर्पितमञ्जसा ।
तयोः कृष्णः पतिः स्वामी भविष्यत्यविता ध्रुवम् ॥३९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सप्तर्षिपत्नीनां कार्तिकेयप्रसंगेनाऽनलस्पर्शजन्यदोषवारणार्थमृषिपञ्चमीव्रतमभिहितम् , पातिव्रत्यमहिमदर्शनं चेतिनिरूपणनामैकाशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८१ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कृष्णद्वैपायनव्यासस्य चेष्टितम् ।
नर्मदायास्तटेऽभीष्टार्थनां चापि सुमुक्तिदाम् ॥ १ ॥
आसीत् पूर्वं महाश्रेष्ठः ऋषिर्नाम्ना पराशरः ।
तेन चोग्रं तपस्ततं गंगाम्भसि समा दश ॥ २ ॥
कुंभकं प्राणनियमं कृत्वा स जाह्नवीजले ।
प्रविष्टश्च ततः पूर्णे द्वादशाब्दे विनिर्ययौ ॥ ३ ॥
भिक्षार्थे स गतो ग्रामं नावि तत्रैव संस्थिता ।
तेन दृष्टा शुभा बालाऽक्षता सुदृढयौवना ॥ ४ ॥
तां दृष्ट्वा मन्मथाऽऽविष्ट उवाच मधुराक्षरम् ।
मां रमस्वाऽद्य सुभ्रु त्वं मम चित्तप्रमाथिनी ॥ ५ ॥
इत्युक्ता सा मुनिं नत्वोवाच क्वाऽहं हि धीवरी ।
क्व त्वं मुनिर्महान्साधुः संगमो युज्यते न नौ ॥ ६ ॥
ऋषिर्ध्यात्वाऽब्रवीत् कन्यां न त्वं कैवर्तपुत्रिका ।
राजपुत्री भवसि त्वं शृणु जन्म वदामि ते ॥ ७ ॥
वसुनामा तु राजाऽभूत् सोमवंशे प्रतापवान् ।
जम्बूद्वीपाधिपः कन्ये बहुपत्नीपतिः स हि ॥ ८ ॥
वैष्णवः स गुरोर्भक्तो राज्यं करोति धर्मतः ।
म्लेच्छास्तस्य विरोधेन शाकद्वीपनिवासिनः ॥ ९ ॥
तेषां स विजयार्थे वै ययौ सभृत्यपुत्रकः ।
संग्रामस्तु महाञ्जातो वसुना ह्यवनिभृता ॥१०॥
जिता म्लेच्छाः करदास्ते कृताः सखण्डभूभृतः ।
तस्य प्रधाना महिषी स्वस्या सौधे रजस्वला ॥११॥
जाता तया प्रेषितो वै दूतो राजसमीपगः ।
दूतः स शुकरूपो वै पाठितं मानवो यथा ॥१२॥
चञ्च्वा गृहीत्वा लिखितं पत्रं ययौ विहायसा ।
त्वां विना पट्टराज्ञीयं ऋतुकालेऽपि जीवति ॥१३॥
इत्येवं लिखितं त्वासीद् भूर्जपत्रं शुभाक्षरम् ।
गतः पक्षी यत्र वसुः सत्यभामासुप्रेषितः ॥१४॥
लेखं ददौ शुको राजा वाचयामास तत्क्षणम् ।
स्वीयं वीर्यं समुत्पाद्य कृत्वा च पुटिकां दृढाम् ॥१५॥
शुकाय चार्पयामास गच्छ राज्ञीं प्रदेहि तत् ।
नृपं प्रणम्य चञ्च्वा संगृह्य स बीजपुटिकाम् ॥१६॥
उत्पपात समुद्रस्योपरि त्वायाति वेगतः ।
शुकं सामिषं संकल्प्य श्येनस्तत्रापि धावितः ॥१७॥
हतश्चञ्चुप्रहारेण वीर्यपात्रं पपात ह ।
जले मत्स्येन गिलितं तत्राऽपत्ये बभूवतुः ॥१८॥
दाशैर्मत्स्यो गृहीतश्चोत्पाटितस्तावदेव च ।
यमलं ददृशुर्गर्भे शशिसूर्यसमप्रभम् ॥१९॥
हर्षितास्ते धीवरास्तु दृष्ट्वा बालं च बालिकाम् ।
पुत्रं राज्ञे प्रदायैव पुत्रीं ते प्रत्यपालयन् ॥२०॥
सा त्वं कन्ये वरारोहे न हि कैवर्तकन्यका ।
एवमुक्ता तु सा दत्वाऽऽत्मानं पराशराय वै ॥२१॥
यद्यहं राजकन्याऽस्मि मत्स्यगन्धो निवर्त्यताम् ।
पराशरेण तत्रैव तपसा सुरभीकृता ॥२२॥
जलयाने च तां मुनिः पस्पर्श दिवसे यदा ।
सा प्राह व्रीडिता लोकाः प्रपश्यन्त्यावरं कुरु ॥२३॥
तदा पराशरेणापि संध्याता तामसी सती ।
अन्धकारस्वरूपा च निहारवारिसंभृता ॥२४॥
जाता समन्ततस्तत्र यत्र नौर्नैव दृश्यते ।
बालाऽप्यतिप्रसन्नाऽभूद् रेमे ब्रह्मर्षिणा सह ॥२५॥
बीजदानोत्तरं तत्राऽपत्यं सा सुषुवे क्षणात् ।
बालकं तत्र जटिलं सुभगं दण्डधारकम् ॥२६॥
कमण्डलुधरं शान्तं मेखलाकटिभूषणम् ।
धृतोपवीतकं स्कन्धे मायागुणविवर्जितम् ॥२७॥
सा तं दिव्यं सुतं तत्र पराशरस्य संददौ ।
पराशरेण सा बाला शुभाशीर्भिर्नियोजिता ॥२८॥
मम योगेऽपि कन्या त्वं नाम्ना सत्यवती सती ।
शन्तनोर्नृपतेः पत्नी भविष्यसि न संशयः ॥२९॥
प्रथमा महिषी तस्य सोमवंशविभूषणा ।
इत्युक्त्वा स्वं सुतं नीत्वा पराशरमुनिर्ययौ ॥३०॥
नत्वा पुत्रं पराभक्त्या साष्टांगं प्रणयेन च ।
तं प्रयान्तमथाऽऽलोक्य सत्यव्रत्यब्रवीत् सुतम् ॥३१॥
वरो देयस्त्वयाऽभीष्टः स्नेहास्ते यदि मातरि ।
किमप्युपादिश त्वं मां येन सिद्धिमवाप्नुयाम् ॥३२॥
पुत्र उवाच मातस्त्वमाराधय हरिं सदा ।
सर्वेषां कर्मणां सारं श्रीकृष्णार्पणमस्तु यत् ॥३३॥

ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
इतिजापं कुरु मातर्मोक्षस्ते संभविष्यति ॥३४॥
मत्स्यगन्धा तदा प्राह करिष्यामि तथा सुत ।
परन्तु जननीनां वै सुतस्य विरहानलः ॥३५॥
सर्वदा दुःखदः स्यात्तु तस्मान्मा गच्छ वत्सल ।
त्वद्वियोगादहं पुत्र पञ्चत्वं यामि नाऽन्यथा ॥३६॥
नास्ति पुत्रसमः स्नेहो नास्ति भ्रातृसमं बलम् ।
नास्ति पुत्रसमं स्थानं विश्रान्तेर्वृद्धताऽऽगमे ॥३७॥
व्यासः प्राह विषादं मा मा कुरु मां स्मर प्रभुम् ।
पश्य मे यादृशं रूपं मोक्षदं दिव्यमैश्वरम् ॥३८॥
इत्युक्त्वा दर्शयामास तेजः कोटिशशिप्रभम् ।
तत्र चतुर्भुजं रूपं सकिरीटसुकुण्डलम् ॥३९॥
नवीननीरदश्यामं शरत्पंकजलोचनम् ।
ईषद्धास्याननं रम्यं तेजः परिधिशोभितम् ॥४०॥
सतिलकं रक्तगण्डं बिम्बौष्ठं षोडशाब्दिकम् ।
श्रीवत्सचिह्नशोभाढ्यं वनमालाविराजितम् ॥४१॥
रक्तचरणकरयोस्तलैः सुकोमलैर्युतम् ।
चन्द्रनिभनखराजिराजितं रशनायुतम् ॥४२॥
सकिंकिणीनद्धभूषादिव्याम्बरविराजितम् ।
लक्ष्मीप्रभाजयापद्मापार्वतीमाणिकीयुतम् ॥४३॥
नन्दसुनन्दपार्षदगणसेवितपत्कजम् ।
अनन्तदासदासीभिर्जयशब्दैः सुवर्धितम् ॥४४॥
एतादृशं दिव्यरूपं दृष्ट्वा सत्यवतीरूपम् ।
मेने नारायणं पुत्रं मोक्षदं कृपयाऽऽगतम् ॥४५॥
तावत् तत्राऽऽगतं दिव्यं विमानं कोटिपार्षदैः ।
सेवितं श्रीरमाराधालक्ष्मीदासीविराजितम् ॥४६॥
मातरं प्राह मोक्षं ते करोमि भवबन्धनात् ।
रूपं द्वयं कुरु मातर्मत्प्रभावाद् यथेष्टकम् ॥४७॥
रूपेणैकेन मद्धाम प्रयाहि पार्षदैः सह ।
द्वितीयेन स्वरूपेण कन्याऽत्र वस मानवी ॥४८॥
शन्तनोस्त्वं भाविनी वै गृहिणी राज्यभोगिनी ।
वैकुण्ठे मे वियोगस्ते कदापि नैव जायते ॥४९॥
इत्युक्त्वा जलमादाय गांगं चिक्षेप तत्तनौ ।
सद्यो द्वयस्वरूपा साऽभवन्माता तदा क्षणात् ॥५०॥
व्यासाऽऽज्ञयैकरूपेणाऽऽरुरोह तद्विमानकम् ।
द्वितीयेन स्वरूपेण नौकायां सा स्थिताऽभवत् ॥५१॥
अथ व्यासः स्वरूपं स्वं दिव्यं तिरश्चकार ह ।
ययौ विमानं वैकुण्ठं नीत्वा सत्यवतीं प्रसूम् ॥५२॥
नौकास्था मायया तस्य मोहिता प्रार्थयत् सती ।
रक्षा कार्या मम पुत्र प्रदेयं दर्शनं सदा ॥५३॥
व्यासः प्राह त्वया मातर्विषादः कार्य एव न ।
आपत्काले त्वयाऽहं वै स्मर्तव्यः कार्यसिद्धये ॥५४॥
आपदस्तारयिष्यामि क्षम्यतां मातरात्मजे ।
यदा यदा तु स्मर्तव्यः साक्षाद् भवामि ते पुरः ॥५५॥
इत्युक्त्वा तु ययौ व्यासः पराशरेण संयुतः ।
पराशरो ययौ स्वस्य कुट्यां तपःपरः पुनः ॥५६॥
पराशरसुतस्तत्र निषण्णो वनमध्यतः ।
नारदेन समाख्यातं देवेभ्यो व्यासजन्म च ॥५७॥
गंगातटे समाजग्मुर्ब्रह्माद्या देवतास्तदा ।
भानुः पितामहः शक्रः सनकाद्या महर्षयः ॥५८॥
दक्षाद्याश्च समाजग्मुर्नारदाद्याश्च गायकाः ।
मनवः पितरो वेदाः शास्त्राण्यपि समाययुः ॥५९॥
देव्यः सरस्वतीलक्ष्मीशारदाद्याः समाययुः ।
नारायणः शिवः सत्या सहितस्त्वाययौ तदा ॥६०॥
पितरो मानवा दिव्या दिव्यदेहाः समाययुः ।
तीर्थान्यपि ह्रदाश्चारण्यानि वनानि चाययुः ॥६१॥
पुष्पैः संवर्धितो व्यासः कृष्णद्वैपायनः प्रभुः ।
आशीर्वादान् पृथग् दत्वा साधुसाध्वितिभाषितः ॥६२॥
पितामहेन बालोऽसौ गर्भाधानादिसंस्कृतः ।
द्वैपायनो द्वीपजन्मा पाराशर्यः पराशरात् ॥६३॥
कृष्णरूपः कृष्णनाम्ना कृष्णद्वैपायनः प्रभुः ।
विरिञ्चिनाऽभिषिक्तोऽसावृषिसंघैः पुनः पुनः ॥६४॥
आशीर्वादैर्वर्धितश्च सरस्वत्यादिभिस्तथा ।
स्तुतो वेदैः प्ररक्षार्थं व्यासार्थं व्यास संभव ॥६५॥
सर्वैः स्वतेजसा दृष्टः कृष्णनारायणः प्रभुः ।
नत्वा सर्वान् शुभं वव्रे सर्वेभ्यो मानसं तथा ॥६६॥
आत्मीयं ज्ञानमार्गीयं निर्बन्धनं च मोक्षदम् ।
तथास्त्विति तदा सर्वे प्रोचुश्चक्रुर्महोत्सवम् ॥६७॥
पुष्पवृष्टिर्बभूवाऽस्य मस्तके ननृतुः स्त्रियः ।
वेदा मन्त्रांस्तदा कृष्णवर्णकांश्च जगुर्मुदा ॥६८॥
सरस्वतीरमालक्ष्म्यादिभिर्मिष्टान्नभोजनैः ।
भोजितास्तत्र चायातास्ताम्बूलादिभिरर्चिताः ॥६९॥
विधातुराज्ञयोत्सवसमाहारं प्रचक्रिरे ।
स्वस्वस्थानं ययुः सर्वे व्यासस्तीर्थेषु संययौ ॥७०॥
गंगाऽवगाहिता तेन केदारं बदरीस्थलम् ।
हरद्वारं पुष्करं च नारायणसरोवरम् ॥७१॥

द्वारिकागोमतीस्नानं चमत्कारपुरं तथा ।
कुंकुमवापिकातीर्थं चाश्वपट्टसरस्तथा ॥७२॥
नदीं भद्रावतीं स्नात्वा ययौ वामनसंस्थलीम् ।
रैवताद्रिं ददर्शाग्रे स्वर्णरेखाऽवगाहनम् ॥७३॥
दामोदरस्य च नारायणहृदेऽवगाहनम् ।
वलिखातभुवं गत्वा सोमनाथस्य दर्शनम् ॥७४॥
गोपीनाथं तथा नत्वा साभ्रमतीं प्रगाह्य च ।
नर्मदां चापि तपतीं विगाह्य त्र्यम्बकेश्वरम् ॥७५॥
उज्जयिनीं तथा चोंकारेश्वरं स प्रणम्य च ।
ताम्रपर्णी चन्द्रभागां सेतुबन्धं ययौ ततः ॥७६॥
पुनराव्य तीर्थानि श्रीशैलादीनि चादरात् ।
कृत्वा ययौ जगन्नाथपुरं कामाक्षिणीमपि ॥७७॥
ब्रह्मपुत्रां ययौ पश्चात् कालीं कपिलतीर्थकम् ।
गयां काशीं तथाऽयोध्यां गण्डकीं च प्रयागकम् ॥७८॥
नैमिषं च कुरुक्षेत्रं सरस्वतीं ययौ ततः ।
यमुनायामवगाह्य ययौ वै नर्मदातटम् ॥७९॥
साह्लादं नर्मदां दृष्ट्वा चित्तं विश्रम्य शान्तिदम् ।
तपश्चचार विपुलं नर्मदातटमाश्रितः ॥८०॥
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
सार्द्रवासास्तु हेमन्ते ध्यायमानो हरिं प्रभुम् ॥८१॥
कृष्णनारायणस्तस्य प्रत्यक्षोऽभूत् क्षणान्तरे ।
ददावाशीर्वचनानि शुकी पत्न्यभवत्तदा ॥८२॥
शुकः पुत्रोऽभवच्चापि त्वागताः ऋषिसत्तमाः ।
व्यासाश्रमे स्थितास्ते तु व्यासेन कृतसत्क्रियाः ॥८३॥
आरण्यानि सुशाकानि फलान्यारण्यकानि च ।
तानि दास्यामि सर्वेषां व्यासेनैवं सभाजिताः ॥८४॥
एवमुक्त्वा शुचिर्भूत्वा नर्मदातटमाश्रितः ।
तुष्टाव नर्मदां साऽपि प्रत्यक्षा ह्यभवत् क्षणात् ॥८५॥
नर्मदा प्राह वचनं वरं वृणु यथेप्सितम् ।
व्यासो वव्रे यदि तुष्टा यदि देयो वरो मम ॥८६॥
आतिथ्यमुत्तरे कूले मम दातुं त्वमर्हसि ।
नर्मदा प्राह मे मार्गो दक्षिणाभिमुखो यतः ॥८७॥
कूलं कथं भवेदुत्तरस्त्वं स्वयं विचारय ।
तदा व्यासः स्वयमग्रे चचाल मार्गयादिशन् ॥८८॥
नर्मदा तत्पथा याता चक्रुः पुष्पाञ्जलिं सुराः ।
व्यासाश्रमः कृतस्तत्र व्यासतीर्थं ततोऽभवत् ॥८९॥
तत्रैव नर्मदा साक्षान्मूर्तिमती स्थिताऽभवत् ।
व्यासं नारायणं कृष्णं सेवते सा पतिव्रता ॥९०॥
व्यासोक्तेन तु मार्गेण याता सा प्रथमं सती ।
व्यासं नित्यं स्नापयति निजनिर्मलवारिणा ॥९१॥
नैवेद्यजलपुष्पादिताम्बूलधूपदीपकैः ।
सेवते सततं व्यासं कृष्णनारायणं सती ॥९२॥
एवं पातिव्रत्यपरा वर्तते नर्मदा सदा ।
तत्र स्नानं जनाः कृत्वा पूजयित्वा हरिं सतीम् ॥९३॥
पातिव्रत्यफलं श्रेष्ठं प्राप्स्यन्ति निश्चितं रमे ।
यः पठेच्छृणुयाच्चापि लभेत्तत्तीर्थजं फलम् ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पराशराद् व्यासस्य जन्म, मत्स्यगंधाया जन्मवृत्तान्तः, व्यासस्य, तीर्थभ्रमणं नर्मदातीरे वासो नर्मदायाः पातिव्रत्यं चेत्यादिनिरूपणनामाद्व्यशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि त्वनसूयां पतिव्रताम् ।
अत्रिर्नाम्नाऽभवत्तस्याः पतिर्वै ब्रह्मणः सुताः ॥ १ ॥
अग्निहोत्ररतो नित्यं देवताऽतिथिपूजकः ।
अनसूयाऽपि तत्प्राणा पतिकार्यहिते रता ॥ २ ॥
पतिव्रता पतिं भेजे कृष्णनारायणं यथा ।
एवं काले गतेऽपत्यं दम्पत्योर्नाऽभवत्तदा ॥ ३ ॥
सुखासीनौ प्रवदतः सुखदुःखानि कर्मभिः ।
अत्रिः प्राह प्रिये कान्ते त्रैलोक्ये सचराचरे ॥ ४ ॥
न त्वया सदृशी लोके सर्वदा मे हिते रता ।
पतिपुत्रप्रिया नारी लोकाञ्जयति दुस्तरान् ॥ ५ ॥
पुत्रेण लोकाञ्जयति पुत्रेण परमा गतिः ।
नास्ति पुत्रसमो बन्धुः पृथिव्यां चात्र दृश्यते ॥ ६ ॥
असिपत्रवने याम्ये पतन्तं योऽभिरक्षति ।
दुर्भिक्षेष्वपि दैन्यादौ वृद्धकालेऽपि सत्सुतः ॥ ७ ॥
पुत्रं विना तु किं भद्रे यतिर्वापि सुतः प्रिये ॥ ८ ॥
लोकलज्जाप्रेरितश्च तारयेत् पितरौ हि सः ।
पुत्रहीने कथं सौख्यमिह लोके परत्र च ॥ ९ ॥
दिवानिशं चिन्तयानः शुष्यामि शर्म नो लभे ।
अनसूयाऽपि तं श्रुत्वा प्राहाऽहं शोचयामि तत् ॥१०॥
तवोद्वेगकरं यच्च मामुद्वेजयति प्रभो ।
येन पुत्रा भवेयुर्मे येन तुष्येत् प्रजापतिः ॥११॥
अत्रिः प्राह मया भद्रे तपस्तप्तं सुदारुणम् ।
व्रतोपवासैर्नियमैः शाकाहारादिभिः प्रिये ॥१२॥

क्षीणं देहमशक्तोऽहं जन्मप्रभृति तापसः ।
वार्धक्यं दृश्यते देहे प्रस्थानं पारलौकिकम् ॥१३॥
नाऽतिदूरं दृश्यतेऽत्र तथ्यं तुभ्यं निवेदितम् ।
अनसूयाऽह तं भर्तनारी पतिव्रताऽस्मि ते ॥१४॥
त्रिवर्गसाधना चाऽस्मि पतिपुत्रविवर्धिनी ।
भवतस्त्वाज्ञया तप्त्वा भविष्यामि सुतप्रसूः ॥१५॥
जपस्तपस्तीर्थयात्रापुत्रेज्यामन्त्रसाधनम् ।
पतिव्रतां वदन्त्येव गुरवो लोकरक्षकाः ॥१६॥
अनुज्ञाता च दुःखेऽहं तपस्तप्स्यामि दारुणम् ।
पुत्रार्थिनी बहुदिनान्यहं विष्णुं प्रयामि च ॥१७॥
अत्रिः प्राह समीचीनं मम सन्तोषकारकम् ।
अनुज्ञाता मया भद्रे पुत्रार्थे तप आचर ॥१८॥
ऋणानि त्रीण्यपाकृत्य मनो मोक्षे नियोजयेत् ।
देवानां च मनुष्याणां पितॄणामनृणं कुरु ॥१९॥
न भार्यासदृशं पोतं तारकं त्वपरं मतम् ।
नहि देवाः प्रशंसन्ति सद्भार्यारहितं गृहम् ॥२०॥
शुष्कं भवति वै चान्यद् भार्यया रहितं सुखम् ।
सम्मुखे सम्मुखाऽऽयाति विलोमे तु पराङ्मुखी ॥२१॥
अतो भार्या प्रशंसाया आस्पदं गृहमेधिनाम् ।
पतिव्रते महाभागे सर्वदा हितकारिणि ॥२२॥
तपश्चरस्व सफलं पुत्रप्रदं ममाऽऽज्ञया ।
पत्याज्ञा विष्णुवचनं सफलं स्यात् प्रिये त्वयि ॥२३॥
तवेच्छा वर्तते सापि द्राक् सफलयतु प्रभुः ।
एवं प्रसन्नतां पत्युः समागृह्य पतिव्रता ॥२४॥
स्वकार्ये सबला भूत्वा साष्टांगं प्रणताऽब्रवीत् ।
त्वत्प्रसादेन विप्रेन्द्र सर्वमेतदवाप्नुयात् ॥२५॥
आशीर्वादैर्योजिता चानसूया वै पतिव्रता ।
हंसलीलागतितीव्रा प्राप्ताऽसौ नर्मदातटम् ॥२६॥
नर्मदोत्तरतीरे साऽभवत्पर्णाशना तथा ।
नियमस्थाऽभवन्नित्यं शाकाहारा क्वचित् क्वचित् ॥२७॥
स्तोत्रपरा हृदा देवान् शुभैः स्तोत्रैश्च संयता ।
ग्रीष्मेषु साऽभवन्मध्ये पञ्चाग्नितेजसां दिवा ॥२८॥
वर्षायां साऽवर्ण्यच्च चान्द्रायणं बहिः स्थिता ।
हेमन्ते जलवासा चाऽकरोत् त्रिषवणं सती ॥२९॥
देवानां तर्पणं समर्चनं च हवनं तथा ।
नैवेद्यं सोत्सवं पुष्पाञ्जलिं स्तोत्रं क्षमार्थनम् ॥३०॥
अकरोत् सा वने नित्यहरिण्यादिसहायिनी ।
एवं वर्षशते याते विष्णुरुद्रपितामहाः ॥३१॥
क्षुत्क्षामां तापसीं पुत्रार्थिनीं ज्ञात्वा समाययुः ।
द्विजरूपेण ते देवा एरण्ड्याः संगमस्थले ॥३२॥
आगत्य वेदमन्त्रांश्चोच्चारयन्ति तपःस्थले ।
श्रुत्वा वेदस्य मन्त्रांश्चाऽनसूया प्रेमपूरिता ॥३३॥
ईक्षमाणा मुहुस्तां तु दिशां समुत्थिता स्थलात् ।
दृष्ट्वाऽऽश्रमगतान् विप्रानतिथीनर्घ्यमाददौ ॥३४॥
तेषां चरणान्प्रक्षाल्य पपौ शिरसि चाऽकरोत् ।
अद्य मे सफलं जन्म विप्राणां दर्शनेन वै ॥३५॥
अद्य मे सफलं कार्यं तपो विप्रप्रदर्शनात् ।
अद्य मे भूमिका चेयं सफला ब्राह्मणागमात् ॥३६॥
इत्युक्त्वा पादयोर्नत्वा चक्रे प्रदक्षिणं मुहुः ।
पुनः साष्टांगनमनं कृत्वा सत्कारमब्रवीत् ॥३७॥
कन्दमूलफलैर्दिव्यैरद्याहं तर्पयामि वः ।
पर्णकुट्यां च विश्रान्तिं यात दर्भासनादिषु ॥३८॥
इति श्रुत्वा तु ते विप्रा ऊचुस्तां तापसीं सतीम् ।
तपसा चातितीव्रेण तव सत्येन सुव्रते ॥३९॥
पातिव्रत्येन धर्मेण तृप्ताः स्म तव दर्शनात् ।
अस्माकं कौतुकं जातं किमर्थं तप्यते त्वया ॥४०॥
स्वर्गं वा लोकसम्पत्तिं मोक्षं वा चान्यदेव वा ।
किमिष्यते त्वया साध्वि ! तपसा दुष्करेण वै ॥४१॥
तपसा सिद्ध्यति स्वर्गस्तपसा तु परा गतिः ।
तपसा सर्वकामानां सिद्धिर्भवति पुष्कला ॥४२॥
यौवने तु सदा भोगा भोक्तव्या मनसेप्सिताः ।
तांस्तु सर्वान् विहायाऽत्र कुतो हेतोर्विशुष्यसि ॥४३॥
अनसूया तु तच्छ्रुत्वा प्रोवाच सुरपुंगवान् ।
युवत्वे तु तपः कार्यं युवत्वे परमा गतिः ॥४४॥
युवत्वे च सुतोत्पत्तिर्वृद्धत्वे सर्वमप्रियम् ।
इत्युक्ता देववर्यास्ते साधु साध्विति चाऽब्रुवन् ॥४५॥
विप्ररूपाणि विवृत्य ब्रह्मविष्णुमहेश्वराः ।
त्रयः साक्षात्तु ते भूत्वा वरं वृणीवेति चाऽब्रुवन् ॥४६॥
यत्त्वया चाभिलषितं दद्मः सर्वे वदाधुना ।
चतुर्भुजो वासुदेवः शंखचक्रगदाधरः ॥४७॥
गरुडेन सहितश्च श्रिया च सहितोऽभवत् ।
प्रसन्नवदनो ब्रह्मा चतुर्वदनशोभितः ॥४८॥
हंससावित्रिकायुक्तश्चाऽक्षमालाकरोऽभवत् ।
वृषभं तु समारूढः पार्वतीसहितः शिवः ॥४९॥
पञ्चवक्त्रस्त्रिनेत्रश्च दशबाहुसमन्वितः ।
इत्येतान् पूजनीयांश्च देवान् दृष्ट्वा च तापसी ॥५०॥

आनन्दिताऽभवत् तूर्णं दृष्ट्वा नत्वा ह्युवाच तान् ।
किंव्यापाराश्च के यूयं विष्णुरुद्रपितामहाः ॥५१॥
तदहं श्रोतुमिच्छामि वदतात्र दयाद्रवः ।
ब्रह्मोवाच सति ! प्रावृट्कालोऽहं च जलं तथा ॥५२॥
मेघोऽहं च प्रवर्षामि सन्ध्याऽहं पूर्वदैशिकी ।
विष्णुरुवाच हेमन्तश्चाहं पुष्णामि सर्वथा ॥५३॥
पालनीयं जगत् सर्वं ममाऽस्ति कार्यमुत्तमम् ।
रुद्रः प्राह सति ! चाहं ग्रीष्मकालः क्षयंकरः ॥५४॥
शोषयामि जगत्सर्वं रुद्ररूपस्तपस्विनि ! ।
एवं वयं त्रयो देवास्त्रयः कालास्त्रयोऽग्नयः ॥५५॥
तिस्रः सन्ध्या भवामश्च नित्यमेकत्वमागताः ।
वरं दद्मश्च ते भद्रे यत्ते मनसि वर्तते ॥५६॥
अनसूया समुवाच वन्ध्याऽस्मि किं वृणे सुराः ।
मम पुत्रा भवताऽत्र ब्रह्मविष्णुमहेश्वराः ॥५७॥
विष्णुरुवाच तां देवीं भद्रे न वरदाः सुताः ।
भवन्ति किन्तु तत्तुल्या भवन्ति वरदानतः ॥५८॥
भद्रे ददामि तान्पुत्रान् देवतुल्यपराक्रमान् ।
पितृतुल्यगुणोपेतान् सोमयाजिबहुश्रुतान् ॥५९॥
अनसूया च तान्प्राह दातव्यमीप्सितं मम ।
वरदानकृते योग्या यद्यस्ति यात पुत्रताम् ॥६०॥
नान्यथा तत्तु कर्तव्यं वसताऽत्र ममोदरे ।
विष्णुरुवाच तां देवीं गर्भवासे न वै वयम् ॥६१॥
आयामः किन्तु वायुस्ते गर्भे स्थास्यति गर्भवत् ।
सगर्भमुदरं ते तु वायुः प्रदर्शयिष्यति ॥६२॥
नवमासोत्तरे काले प्रसूतेश्च गृहे वयम् ।
आगमिष्याम ऐश्वर्यसहितास्त्वद्गृहे शुभे ॥६३॥
वायोर्निःसरणे काले वयं बालस्वरूपिणः ।
त्रय एव भविष्यामश्चाऽयोनिसंभवाः सुताः ॥६४॥
योनिवासं तु वै देवा नैव यान्ति शुभाश्रयाः ।
इत्युक्त्वा बालरूपास्तेऽदृश्यन्त वै क्षणं तदा ॥६५॥
अथ ययुः स्वकं धाम दिव्यवाहनसंश्रिताः ।
प्राप्ता वरं तु सा देवी क्षीणदेहा ययौ गृहम् ॥६६॥
शिलातले निषण्णं साऽपश्यत् कान्तं महाव्रतम् ।
ननाम प्रणता तस्य पादौ प्रक्षाल्य सा पपौ ॥६७॥
कुशलं पृष्ठा प्रोवाच कृपया ते फलान्विता ।
निर्विघ्ना वरमादाय सेवायामागताऽस्मि वै ॥६८॥
पतिपुण्येन साध्व्याश्च फलन्ति त्विष्टपादपाः ।
पुत्रत्रयं ब्रह्मविष्णुमहेशाख्यं मयाऽर्जितम् ॥६९॥
भगवत्पादसेवायाः फलं प्राप्तं चिरेण वै ।
असाध्यश्चान्यनारीणां वरः प्राप्तः सुदुर्लभः ॥७०॥
तेनाऽहं ते प्रयच्छामि पुत्रान्तृषितपोधनान् ।
इत्युक्ता हर्षिता सम्यक्कान्तसेवापराऽभवत् ॥७१॥
साऽलोकयत् पतिं कान्तं कान्तेन साऽवलोकिता ।
दर्शनादेव सञ्जातं ललाटे मण्डलं प्रभम् ॥७२॥
अमूलं दीर्घमूलं च त्रिरंगं गोलकं शुभम् ।
तेजोमयं सहस्रादिरश्मिजालसमावृतम् ॥७३॥
तस्य मध्ये त्रयो देवा ह्यभासन्त क्षणान्तरे ।
देवैराज्ञापितो वायुर्गर्भस्थानेऽवसत् सदा ॥७४॥
अनसूया गर्भवती तेजसा त्वभवच्छुभा ।
अथ मासेषु नवसु यातेषु दशमे यथा ॥७५॥
योग्ये तु समये साध्वी सूतिकागृहमाविशत् ।
वायुर्गर्भान्निःससाराऽभवन् देवास्तु बालकाः ॥७६॥
हेमवर्णः पूर्वपुत्रो ब्रह्माऽभवत् पितामहः ।
चन्द्रमाः षोडशकलः सोमः पोषणदायकः ॥७७॥
स चाऽयं प्रथमः पुत्रोऽनसूयायास्तु नन्दनः ।
द्वितीयस्तु महाभागः स्वयं साक्षान्महेश्वरः ॥७८॥
सृष्टिसंहारकः सोंऽशो दुर्वासो नामतोऽभवत् ।
तृतीयस्त्वभवत्पुत्रो विष्णुर्नारायणो हरिः ॥७९॥
दत्तात्रेयो महायोगी भगवान् श्रीपतिः प्रभुः ।
जगद्व्यापी जगन्नाथः स्वयं देवो जनार्दनः ॥८०॥
एवं प्राप्य सती पतिव्रता पुत्रत्रयं वरम् ।
कृतकृत्याऽभवत् सा हि मुनिरत्रिस्तथैव च ॥८१॥
त्रयस्ते जातमात्रास्तु युवानश्चाभवन् प्रिये ।
सती लक्ष्मीश्च सावित्री दिव्यास्तत्र समागताः ॥८२॥
स्वस्वपतीनां सेवार्थमनसूयां प्रणम्य ताः ।
वध्वः सिषेविरे देवान् जलभोजनचन्दनैः ॥८३॥
त्रयस्ते दर्शनं ददुः पित्रोर्दिव्यस्वरूपिणः ।
सर्वसमृद्धिमयं त्वत्रेर्गृहं तैर्वै कृतं सदा ॥८४॥
देवाश्च मुनयः सिद्धाः ऋषयश्च तपोधनाः ।
देव्यश्च पार्षदा गणा नित्यमायान्ति दृष्टये ॥८५॥
अत्रेराश्रममाकीर्णं वर्तते देवकोटिभिः ।
नित्यं यज्ञाः प्रवर्तन्ते तथोत्सवा दिने दिने ॥८६॥
अथ देवास्त्रयस्त्वेते पितरावाहुरादरात् ।
तपस्तप्तुं समिच्छामो यास्यामोऽतो वनान्तरम् ॥८७॥
माता श्रुत्वा शोकमग्ना ह्यभवत् पुत्रगर्धिनी ।
उवाच पुत्राः सौख्यार्थं तपस्तप्तं मया यतः ॥८८॥

लालनार्थं पालनार्थं सौख्यार्थं त्रय एव हि ।
दर्शनार्थं च सेवार्थं मया देवा सुतीकृताः ॥८९॥
कथं तेऽस्मान् विहायैव तपसे यास्यथाऽच्युताः ।
सहिष्यते वियोगो न तस्माद् गन्तव्यमेव नः ॥९०॥
श्रुत्वा देवास्त्रयो मातुर्दधू रूपद्वयं ततः ।
दिव्यरूपैर्ययुः तपःकरणार्थं स्थलान्तरम् ॥९१॥
दुर्वासाः संययौ नैजं कैलासं शिवसन्निधौ ।
चन्द्रमाः सत्यलोकं च दत्तो द्वीपान्तरं ययौ ॥९२॥
अथ बालस्वरूपास्ते त्रयो भूत्वा गृहे निजे ।
मातुरंके रममाणा वर्तन्ते प्राकृता इव ॥९३॥
पितुरंके रममाणा आश्रमे विहरन्ति ते ।
हरिणानां बालकैस्ते मृगपक्षिभिरित्यपि ॥९४॥
तापसैः सह वर्तन्ते प्राकृता बालका इव ।
बालखेलनकैर्देवपूजनैः पितृरञ्जनैः ॥९५॥
यापयन्ति दिवसाँस्ते मातापितृसुखप्रदाः ।
एवं वै तपसा प्राप्तास्त्रयो देवाः ऋषेः सुताः ॥९६॥
यज्ञोपवीतमागृह्य वेदाध्ययनमाचरन् ।
यज्ञकार्याणि नित्यं ते चक्रुरत्रेः पुरस्त्रयः ॥९७॥
अत्रेरेव गृहीतश्च कृष्णनारायणात्मकः ।
मन्त्रश्च तुलसीमाला तैस्तु वैष्णवपुंगवैः ॥९८॥
चिरंजीवास्त्रयस्ते च सर्वलोकगतिकृतः ।
वर्तन्ते तारका दिव्या वैष्णवाः कुलतारकाः ॥९९॥
एतत्ते कथितं लक्ष्मि ! दिव्याख्यानं परं शुभम् ।
पठनाच्छ्रवणाच्चापि स्वर्गदं मोक्षदं मतम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽत्रेः पत्न्याऽनसूयया तपसा ब्रह्मविष्णुमहेशाः सोमदत्तदुर्वाससः पुत्रा लब्धाः पातिव्रत्यबलं चेत्यादिनीरूपणनामा त्र्यशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! च रोहिण्या पुरा कृततपःपरम् ।
येनाऽऽप्ता चन्द्रपत्नीनां मौर्धन्यं सर्वदा सती ॥ १ ॥
अभीष्टा सर्वनारीणां भर्तुश्चापि विशेषतः ।
एकदा निश्चयीभूता तपसे सा पतिव्रता ॥ २ ॥
गत्वा तु नर्मदातीरे चकार विपुलं तपः ।
एकरात्रं द्विरात्रं च षड् द्वादश तथाऽपरैः ॥ ३ ॥
पक्षमासोपवासैश्च कृशीकृतकलेवरा ।
आराधनपरा नित्यं नारायणगुरोर्हरेः ॥ ४ ॥
स्नात्वा स्नात्वा जले नित्यं नर्मदाया हरौ रता ।
पूजयति स्म गोविन्दं नारायणीपतिं प्रभुम् ॥ ५ ॥
प्रसन्नो भगवान्नारायणीस्वामी नरायणः ।
उवाचाऽहं प्रसन्नोऽस्मि व्रतेन नियमैश्च ते ॥ ६ ॥
ददाम्यभीप्सितं तेऽद्य वरं वृणु महासति ! ।
एवं श्रुत्वा वचस्तस्य नत्वा संपूज्य भावतः ॥ ७ ॥
पादयोस्तु जलं पीत्वा भूत्वा दर्शनपावनी ।
वरं वव्रे रोहिणी सा दास्यं ते चरणाम्बुजे ॥ ८ ॥
प्रथमं तद्वरं देहि भक्तिस्त्वयि विशेषिणी ।
अथ द्वितीयं च वरं लोके चन्द्रगृहे सदा ॥ ९ ॥
सर्वासां तु सपत्नीनामधिका शशिनः प्रिया ।
यथा भवानि ह्यचिरात् त्वत्प्रसादात्तथा कुरु ॥१०॥
हरिः प्राह स्वरूपे द्वे धारयाऽस्मत्प्रसादतः ।
एकेन याहि वैकुण्ठं द्वितीयेनात्र संवस ॥११॥
द्वितीयेन स्वरूपेण भव त्वं शशिनः प्रिया ।
भार्या पतिव्रता सर्वसपत्नीनां समग्रणीः ॥१२॥
इत्युक्त्वा भगवान् कृष्णनारायणो ययौ स्वकम् ।
वैकुण्ठं तां सतीं नीत्वा विमानेन विहायसा ॥१३॥
सा तु द्वितीयरूपा च ययौ चन्द्रमसो गृहम् ।
तत आरभ्य सा जाता मूर्धन्या सर्वयोषिताम् ॥१४॥
इति ते कथितं लक्ष्मि ! तपसः फलमुत्तमम् ।
स्वर्गमोक्षप्रदं रम्यं ममाऽऽराधनरूपकम् ॥१५॥
अथाऽन्यत्ते प्रवक्ष्यामि मुक्तिदं चरितं मम ।
दक्षस्य दुहिता त्वासीत् कुमुदा नाम विश्रुता ॥१६॥
सोमाय दत्वा तान् दक्षो परमं मौदमाप्तवान् ।
तस्यां स जनयामास पुत्रममृतनामकम् ॥१७॥
अथ ज्ञात्वा सुरा यज्ञफलार्थिनो ययुश्च तम् ।
अमृतं पीतवन्तस्ते ज्ञात्वा दैत्यास्ततो ययुः ॥१८॥
चन्द्रमसं च ते प्राहुर्देहि नोऽमृतमुत्तमम् ।
पानार्थं त्वन्यथा त्वां वै भक्षयिष्याम एव यत् ॥१९॥
चन्द्रो नैवेष दातुं त्वमृतं तेभ्यस्ततो हि ते ।
तं चन्द्रं जगृहुः स्वर्गात्पातयामासुरम्बरात् ॥२०॥
हाहाकारो महान् जातः कुमुदा तस्य कामिनी ।
पातिव्रत्येन धर्मेण जलं कृत्वा करे तदा ॥२१॥
उवाचाऽहं पतिधर्मा पतिव्रता पतिस्थिता ।
पातिव्रत्यबलेनैते दानवा यान्तु संक्षयम् ॥२२॥
इत्युक्त्वा वारि, चिक्षेप दानवेषु ततस्तु ते ।
भस्मीभूतास्तदा जाताः शेषाः शुक्रं गुरुं प्रति ॥२३॥

ययुर्निवेदयामासुर्दैत्यानां भस्मभावनम् ।
शुक्रस्तत्र समागत्य जीवयामास चासुरान् ॥२४॥
ननाम कुमुदां शुक्रो दैत्या नेमुर्ययुर्गृहम् ।
चन्द्रः कुमुदया स्वसामर्थ्येनोत्थापितो भुवः ॥२५॥
अथ ब्रह्मदेवाद्यैरागत्य विश्रमीकृतः ।
पुनः संस्थापितः स्वर्गे देवा बभूवुरज्वराः ॥२६॥
इति ते कथितं लक्ष्मि ! पातिव्रत्यबलं महत् ।
सर्वसम्पत्करं विघ्नहरं सौभाग्यवर्धनम् ॥२७॥
अथाऽन्यमपि वक्ष्यामि चमत्कारं शृणु प्रिये ।
नर्मदायां चतुःसंगे वर्तते यज्ञपर्वतः ॥२८॥
स्वयंभुवा पुरा तस्मिन्निष्टः सौत्रामणिर्मखः ।
तत्रैवेष्टं मघवता हयमेधेन पद्मजे ॥२९॥
निष्क्रान्ता पर्वतात्तस्माच्चतुर्नाममहानदी ।
पतिता नर्मदायां सा संगमे यज्ञपर्वते ॥३०॥
ऋषिः सुपर्णो यत्राऽऽसीज्जाबालिर्ब्रह्मवीजजः ।
पुरुहूता तस्य पत्नी धर्मपत्नी पतिव्रता ॥३१॥
प्रमाद्य त्वब्रवीद्वाक्यं पुरुहूता निजं पतिम् ।
ऋतुकाले पर्वणि मां भजस्व त्वं महामुने ॥३२॥
जायते मे यथा पुत्रः सर्वसन्तानपावनः ।
पुत्रेण लोकान् जयति तृप्यन्ति पितृदेवताः ॥३३॥
अपुत्रस्य गतिर्नास्ति तस्मात्पुत्रमजीजनः ।
श्रुत्वोवाच सुपर्णस्ताममावास्याऽद्य विद्यते ॥३४॥
कामदेवः सदा पत्नि ! वर्जनीयो हि पर्वणि ।
अकर्तव्यं व्रते पुण्ये दिने पितृतिथावपि ॥३५॥
गमनं दम्पतीभ्यां वै ऋतुकालेऽपि भामिनि ।
पितरस्तस्य तन्मांसं भुञ्जते ऋतुगामिनः ॥३६॥
दिव्यं वर्षसहस्रं तु तप्तं मे दुष्करं तपः ।
तच्च सर्वं प्रविनश्येत् पर्वणि संगमात्तव ॥३७॥
पश्य स्नात्वा क्षणमात्राच्चाण्डालं संगमेऽत्र वै ।
यान्तं विमानमार्गेण स्वर्गे धिक्कृत्य मां प्रिये ॥३८॥
तपः करोमि सततं धिक्कारस्तेन वै कथम् ।
कृतो भवेदिति चिन्तापरो भवामि सुप्रिये ॥३९॥
वदाऽत्र कारणं साध्वि ! धिक्कृतस्तेन वै कथम् ।
पश्चात्ते संप्रदास्यामि धर्मं चेन्मन्यसे सति ! ॥४०॥
ऋतुदानं पर्वकाले यदि धर्मो भवेत् प्रिये ।
तावत् काचित्समायाता निषादी नर्मदातटे ॥४१॥
धिक्कारं सा श्रुतवती तदर्थं त्वाह तं ऋषिम् ।
अहंकारविमूढात्मा त्वत्समो नास्ति तापसः ॥४२॥
न स्नानं न जपो होमो न स्वाध्यायोऽच्युतार्चनम् ।
न च वा भजनं चेष्टमन्त्रस्य विहितं त्वया ॥४३॥
निष्फलं क्लेशमापन्नो वायुभक्षो निराश्रयः ।
त्वत्तपोध्यानयोगश्च निष्फलं स्वर्गदं न वै ॥४४॥
उवाच तां निषादीं च तदा नम्रगिरा मुहुः ।
काऽसि त्वं तीर्थमायाता निषादीरूपमाश्रिता ॥४५॥
उमा सरस्वती गंगा मां जिज्ञासितुमागता ।
अनुग्रहमिमं मन्ये वद धर्मं सनातनम् ॥४६॥
निषाद्युवाच तं हर्षात्तदा धर्मं सनातनम् ।
विप्राण्यहं च विप्रो मे भर्ताऽऽसीन्नैमिषे वने ॥४७॥
संस्थितस्तपसि नित्यं मां न स्पृशति मासिके ।
कामार्तया मया ऋतुस्नातया प्रार्थितः स हि ॥४८॥
अमावास्यादिने पुत्रलब्धये याचितः पतिः ।
अकाले याचमानाऽहं तेन शप्ता महात्मना ॥४९॥
अधर्मं याचमाना त्वं भव शूद्रा निषादजा ।
मया शप्तो भव तत्र चाण्डालो यत्र चाप्यहम् ॥५०॥
इति शापाभिभूतौ वै दम्पती नर्मदाभवम् ।
लक्ष्मीनारायणसंहितायाः श्रुत्वा कथानकम् ॥५१॥
माहात्म्यमुत्तमं दिव्यं तारकं स्नानमात्रतः ।
समागतो पतिर्मे सः चाण्डालः स्वर्गमाप्तवान् ॥५२॥
अहं निषादी विप्राणी स्नात्वा यास्यामि मोक्षणम् ।
तस्मात्त्वं भज गोविन्दं तपसा सह सर्वदा ॥५३॥
सार्थकं ते भवेत् सर्वमन्यथा निष्फलं तव ।
हर्यर्थं कुरु कर्माणि होमजप्यादिकानि वै ॥५४॥
यास्यसे त्वं तु वैकुण्ठं कृष्णनारायणाश्रितम् ।
इत्युक्त्वा नर्मदानीरे स्नात्वा स्वर्गे ययौ हि सा ॥५५॥
येन मार्गेण तद्भर्ता ययौ सा तेन संययौ ।
एतच्छ्रुत्वा तु जाबालिं सुपर्णं स्वपतिं सती ॥५६॥
पुरुहूता प्रणम्यैव ययाचे वै क्षमां तदा ।
धर्मं सनातनं ज्ञात्वा पर्वण्यपि ऋतावपि ॥५७॥
मैथुनं दम्पतीनां वै योग्यं नास्त्येव सर्वथा ।
एवं धर्मं परं ज्ञात्वा दम्पती तौ तु वैष्णवौ ॥५८॥
भजनं श्रीकृष्णनारायणाय स्वामिने नमः ।
कृत्वा नित्यं च जपनं पत्नीव्रतपतिव्रतौ ॥५९॥

ययौ कालेन वैकुण्ठं जपधर्मपरायणौ ।
इति ते कथितं लक्ष्मि धर्मज्ञानं मुनेः स्त्रियाः ॥६०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने रोहिण्याः कुमुदायास्तपः, पुरुहूतायाश्च नर्मदास्नानेन मोक्षणं, पर्वणि ऋतुदानाऽदानं धर्म इत्यादिनिरूपण-नामा चतुरशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८४ ॥

श्रीनारायण उवाच—

अन्यत्त्वाख्यानकं वक्ष्ये शृणु लक्ष्मि पुरातनम् ।
सकुटुम्बो गतो मोक्षमृषिर्दीर्घतमा महान् ॥ १ ॥
काशीराजोऽभवच्चित्रसेनाऽऽख्यस्तस्य पत्तने ।
काश्यभिधे स वसते मुनिर्दीर्घतमाः सदा ॥ २ ॥
काश्या उत्तरदिग्भागे मन्दारारामनामकम् ।
स्थलं द्रुमलताकीर्णं तत्र दीर्घतमा ऋषिः ॥ ३ ॥
तपस्तपति चात्यर्थं तिष्ठति दारपुत्रयुक् ।
शुश्रूषयन्ति तं सर्वे सुताः पञ्च तथेतरे ॥ ४ ॥
तस्य पुत्रः ऋष्यश्रृंगः कनीयानपि तापसः ।
योगी च ब्रह्मचारी च वेदाध्ययनतत्परः ॥ ५ ॥
कन्दमूलफलाहारस्तिष्ठति मृगरूपधृक् ।
मृगमध्ये वसन्नित्यं पित्रोर्नमः क्रियाकृते ॥ ६ ॥
प्रातः सायं समायाति पुनर्याति मृगेषु सः ।
अथ काशीपतिश्चित्रसेनो नृपो जनैः सह ॥ ७ ॥
मृगयार्थं गतश्चाश्वारूढो मन्दारपादपान् ।
तत्र राजा मृगयूथपश्यद्वै महत्तमम् ॥ ८ ॥
अधावँश्च मृगा दश दिशो भयान्नृपोऽपि च ।
एकाकी प्रययौ पृष्ठे मृगाणां गहने वने ॥ ९ ॥
मध्याह्नोऽपि प्रसंजातो दिग्भ्रमोऽपि च भूभृतः ।
क्षुत्तृषार्तोऽभवच्छायामाश्रित्य सरसस्तटे ॥१०॥
स्थितः क्षणं जले स्नानं चकार कुमुदानि च ।
गृहीत्वा तर्पणं कृत्वा पपौ वारि यथेप्सितम् ॥११॥
मृगमध्ये स्थितो योगी ऋष्यश्रृंगो महातपाः ।
मृगभक्षणकामश्च राजा वृक्षमूलाश्रितः ॥१२॥
चापं धृत्वा कराग्रेण प्राक्षिपत्तच्छरं मृगे ।
ऋष्यश्रृंगः शरविद्धः कृष्णकृष्णेति संवदन् ॥१३॥
कस्यैषा दुर्मतिर्जाता मृगमध्ये स्थितोऽप्यहम् ।
केनाऽहं पातितस्त्वत्र न किञ्चिदपराधवान् ॥१४॥
वाचं तां मानुषीं श्रुत्वा राजा तन्निकटं ययौ ।
दृष्ट्वा तं घातितं विप्रं हाहाकृत्वा रुरोद ह ॥१५॥
विप्रः प्राह न ते सिद्धिर्मम नाशे तु भूमिप ! ।
तवैव विहिता हत्या त्वया तत्प्रतिफालिनी ॥१६॥
जननी मे पिता वृद्धौ भ्रातरौ मे तपस्विनः ।
मम नाशं तु ते श्रुत्वा मरिष्यन्ति यदि नृप ! ॥१७॥
एता हत्या भविष्यन्ति कथं शुद्धिर्भवेत् तव ।
उपायं ते कथयामि कुरु तद् यदि मन्यसे ॥१८॥
मां गृहीत्वाऽऽश्रमं पुण्यं यत्र तौ पितरौ मम ।
आवेदयस्व चात्मानं पुत्रहन्तारमागतम् ॥१९॥
तौ दृष्ट्वा मां करिष्येते कारुण्यं वै तवोपरि ।
उपायं वा करिष्येते येन शान्तिर्भविष्यति ॥२०॥
चित्रसेनस्तु तच्छ्रुत्वा स्कन्धे कृत्वा तु भूसुरम् ।
मूर्छितं नीयमानं तं दृष्ट्वा मार्गे व्यसुं नृपः ॥२१॥
न्यग्रोधमूलके विप्रं दाहयामास तद्वने ।
स्नानं कृत्वाऽतिशोकार्तो रुरोद च मुमोद च ॥२२॥
ऋष्यश्रृंगस्य चास्थीनि गृहीत्वाऽऽश्रमसन्निधौ ।
गतवन्तं नृपं वीक्ष्य मुनिर्दीर्घतपास्तु तम् ॥२३॥
आसनं मधुपर्कादि ददौ स्नेहेन भूपतिम् ।
राजाऽऽह नार्घयोग्योऽहं पापवानस्मि भूसुर ॥२४॥
मृगमध्ये स्थितो विप्र तव पुत्रो मया हतः ।
पुत्रघ्नं शाधि मां विप्र तीव्रदण्डेन दण्डय ॥२५॥
मृगभ्रान्त्या हतो विप्रो दुष्कृतं तन्मया प्रभो ।
इति श्रुत्वा तु मात्राद्या रुरुदुर्बान्धवादयः ॥२६॥
दीर्घतपा विचार्यैव रुदन् ययौ तु तत्स्थलम् ।
जगाद नृपतिं राजन् बुद्धिः कर्मानुसारिणी ॥२७॥
जायते हि मनुष्याणां तथा तेऽपि मतिर्मता ।
हत्यां त्वं कृतवान् राजन् ! किन्तु सा ते न वै भवेत् ॥२८॥
वयं पिता तथा माता भ्रातरश्च कुटुम्बकम् ।
ऋष्यश्रृंगस्य शोकेन योगेन च तनुत्यजः ॥२९॥
भविष्यामः क्षणाद् राजन्नस्थीन्यादाय नार्मदम् ।
शूलभेदं गच्छ तीर्थं क्षिपाऽस्थीनि च तज्जले ॥३०॥
मुच्यसे सर्वपापेभ्यो मम वाक्यान्न संशयः ।
आदेशं ते करिष्यामीत्याह तं नृपसत्तमः ॥३१॥
ऋष्यश्रृंगस्य शोकेन योगधारणया द्विजाः ।
कुटुम्बं व्यसुतां प्राप्तं दग्ध्वा तद् ब्राह्मणैर्जनैः ॥३२॥
राजाऽस्थीनि च संगृह्य शुद्धो भूत्वा तु नर्मदाम् ।
ययौ स्वल्पेन कालेन पृष्ट्वा तीर्थं च तन्नृपः ॥३३॥

नर्मदादक्षिणे कूले शूलभेदं सुपावनम् ।
आगत्याऽस्थीनि संधृत्वा भूमौ स्नात्वा ततः शुचिः ॥३४॥
तिलमिश्रेण तोयेन तर्पयित्वेष्टदेवताः ।
निक्षिप्याऽन्तर्जलेऽस्थीनि यावत्पश्यति चाम्बरे ॥३५॥
तान् ददर्श ततः सर्वान् देवमूर्तिधरान् शुभान् ।
दिव्यवस्त्रैश्च संवीतान् दिव्याभरणभूषितान् ॥३६॥
विमानैः काञ्चनैर्दिव्यैः कृष्णपार्षदसेवितैः ।
उत्पततः समालोक्य राजा हर्षमुपागतः ॥३७॥
ऋषिर्विमानमारूढश्चित्रसेनमथाऽब्रवीत् ।
भोभो राजँस्त्वत्प्रसादाद् गतिर्दिव्या ममाऽद्य वै ॥३८॥
मदीयवचनाद् राजन् निष्पापस्त्वं भविष्यसि ।
इत्युक्त्वा प्रययुः सर्वे मुक्तिं दीर्घतपोजनाः ॥३९॥
राजा शंभुं स्मरन् प्राणाँस्त्यक्तुं तत्र समुद्यतः ।
शंकरस्तु समागत्य तं रुरोध नृपं हठात् ॥४०॥
अद्यापि त्वं युवा राजन् न युक्तं मरणं तव ।
स्वस्थानं याहि राज्यं संभुङ्क्ष्व कालान्तरे ततः ॥४१॥
काशीराज्यं चिरं कृत्वा ध्यात्वा श्रीशंकरं तु माम् ।
नन्दिर्नामा गणो मे त्वं देहान्ते संभविष्यसि ॥४२॥
इत्युक्त्वा प्रययौ शंभुः राजा काशीपुरीं ययौ ।
देहान्ते शंकरं ध्यात्वा नन्दिर्नामा गणोऽभवत् ॥४३॥
इति ते कथितं लक्ष्मि ! पावनं चरितं शुभम् ।
यच्छ्रुत्वा विलयं यान्ति पातकानि नृणां प्रिये ! ॥४४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ऋष्यशृंगस्य मृगरूपस्य काशीराजचित्रसेनशरेण मृत्यूत्तरं तत्पितृदीर्घतपःप्रभृतीनां नर्मदाजलेऽस्थिनिक्षेपान्मुक्तिरित्यादिनिरूपणनामा पञ्चाशीत्यधिकचतुश्शततमोऽध्यायः ॥४८५॥

श्रीनारायण उवाच—

आनर्तदेशे सौराष्ट्रे चमत्कारपुरान्तिके ।
नदी नागमतीनाम्ना वर्तते पूर्वतः शुभा ॥ १ ॥
यस्यां स्नानाद् विमुच्यन्ते मुक्ता भवन्ति मानवाः ।
तत्र लक्ष्मि ! मृगी काचित् व्याधबाणप्रपीडिता ॥ २ ॥
अवाततार सलिले प्राणाँस्तत्याज वारिषु ।
चैत्रशुक्लतृतीयायां मध्याह्नेऽर्यमदैवते ॥ ३ ॥
सूर्यवारे च तत्पुण्यान्मेनका नाम साऽभवत् ।
अप्सरास्त्रिदशेन्द्रस्य सुरूपा पतिधर्मिणी ॥ ४ ॥
एकदा तत्र मुनिराड् विश्वामित्रः समाययौ ।
तीर्थार्थे नागनद्यां स सस्नौ नगरपूर्वतः ॥ ५ ॥
यत्र सा मेनका नित्यमायाति स्नानकामुकी ।
स्नान्तं सुरूपं दिव्यं च पुष्टं मुनिं विलोक्य सा ॥ ६ ॥
यौवनस्थं पतिं कर्तुमीयेष कामपीडिता ।
सानन्दा सुरतार्थाय समीपं समुपागमत् ॥ ७ ॥
ननाम चरणे वाक्यैस्तुष्टाव सुमनोहरैः ।
सधैर्यः स मुनिस्तां वै मेने नागरिकीं स्त्रियम् ॥ ८ ॥
आशीर्वादान् प्रदायैव प्रहृष्टेनाऽन्तरात्मना ।
उवाच देवीं तां पृच्छन् स्त्रीधर्मांश्च विशेषतः ॥ ९ ॥
शुभलाभोऽस्तु ते कच्चिन्मनसा कर्मणा गिरा ।
भक्तिः संवर्तते कृष्णनारायणे च शाश्वती ॥१०॥
कच्चित्त्वं वर्तसे बाले पतिपादपरायणा ।
चारित्रविनयोपेता सदा मधुरभाषिणी ॥११॥
कच्चित्त्वं सर्वदाऽभीष्टा पत्युदनैस्तथाऽर्चसि ।
बन्धून् स्वमित्रवर्गं च तत्पुरः पृष्ठतोऽपि वा ॥१२॥
कच्चिद् भर्तरि संसुप्ते त्वं निद्रावशमेष्यसि ।
उत्थानमप्रबुद्धेन करोषि ब्राह्मकालिके ॥१३॥
कच्चित् प्रातः समुत्थाय करोषि पतिसेवनम् ।
ततो गृहं मार्जयित्वा करोषि मण्डनादिकम् ॥१४॥
कच्चित् स्नात्वा स्नापयित्वा पतिं संपूज्य भावतः ।
बालपत्यानि संभाल्य वर्तसे भक्तियोगिनी ॥१५॥
कच्चिद्देवान्नमस्कृत्य गुरुं गां च पतिं तथा ।
करोषि त्वं प्राणयात्रां दत्त्वाऽन्नं शक्तितो जलम् ॥१६॥
कच्चिन्मध्याह्नवेलायामतिथीन् सेवसेऽन्नकैः ।
कच्चिद् गृहागतनिराश्रितायान्नं ददासि वै ॥१७॥
कच्चिदस्तं गते सूर्ये नाऽन्नमश्नासि भामिनि ! ।
अदत्त्वा निजभृत्येभ्यः साधुभ्यश्च विशेषतः ॥१८॥
कच्चित् पिबसि पानीयं वस्त्रपूतं सुराऽर्पितम् ।
कच्चिद् दयावती भूत्वा गात्रक्लेशकरानपि ॥१९॥
यूकामत्कुणदंशादीन् पुत्रवत्परिरक्षसि ।
कच्चित् साधुजनान्नित्यं कृष्णधर्मं सुभक्तितः ॥२०॥
शृणोषि भक्तितो भद्रे भक्तिं करोषि सादराम् ।
कच्चिच्छ्रुत्वा दिनं पुण्यं प्रकरोषि व्रतादिकम् ॥२१॥
गुरुमाचार्यमोशं वाऽऽगतं करोषि पूजितम् ।
शास्त्रस्य वाचकस्यापि व्याख्यातुश्च विशेषतः ॥२२॥
कच्चिच्छास्त्राणि रम्याणि साधुभ्यः संप्रयच्छसि ।
श्रुत्वा कथां निष्क्रयं च वाचकाय प्रयच्छसि ॥२३॥

कच्चित् कृष्णालये नृत्यं गीतं वाद्यं सुकीर्तनम् ।
बलिपूजोपहारांश्च त्वं करोषि स्वशक्तितः ॥२४॥
कच्चित्प्रावरणं वस्त्रं साधुभ्यः सम्प्रयच्छसि ।
वृथा पर्यटनं नान्यगृहे करोषि भामिनि ॥२५॥
कच्चिन्नाऽश्नासि पूर्वं त्वं स्वभर्तरिबुभुक्षिते ।
आज्ञाभंगं कदाचिच्च भर्तुः करोषि नैव तु ॥२६॥
कच्चित् प्रकुपिते कान्ते कोपं न यासि सद्व्रते ।
कच्चित् त्वं कुपिता भर्त्रे नोत्तराणि प्रयच्छसि ॥२७॥
अथाऽपराधशान्त्यर्थे प्रियं हृद्यं प्रजल्पसि ।
कच्चित्त्वं प्रोषिते कान्ते मलिनाम्बरधारिणी ॥२८॥
दीना विवर्णवदना कच्चिद् भवसि वा कृशा ।
कच्चिन्मन्दिरमालिन्यं दूरीकरोषि सेवया ॥२९॥
कच्चिद्भिन्नं तथोच्छिष्टं पात्रं धत्से न वै गृहे ।
कच्चिद् व्रजसि रात्र्यादौ नोत्सवेषु स्थलान्तरे ॥३०॥
कच्चिन्न कुरुषे मैत्रीं पुंश्चलीभिः कदाचन ।
कच्चिद् दधासि सौभाग्यचिह्नानि पतिरंजनी ॥३१॥
कच्चित्ते पातिव्रत्ये वै विघ्नो नायाति कश्चन ।
पतिपुत्रवती साध्वी कच्चिद् भवसि भामिनि ॥३२॥
इत्युक्ता सा ऋषिं प्राह पातिव्रत्योपदेशकम् ।
अन्यास्ता योषितो विप्र यासां धर्मास्त्वयोदिताः ॥३३॥
वयं स्वर्गस्थाऽप्सरसः स्वेच्छाचारिण्य एव वै ।
अपतिकाः स्वतन्त्राश्च मुनिमानसमोहिकाः ॥३४॥
अक्षताः सर्वदा शुद्धाः प्रेमसेवापरायणाः ।
नवरूपधराः कन्याः सेवारसपरायणाः ॥३५॥
कामधर्मेण सत्सेवां कुर्मो यतितपस्विनाम् ।
साधूनां वा गृहस्थानामस्मत्सत्कारवेदिनाम् ॥३६॥
रञ्जयित्वा सुबहुधा तदाशीर्वादमाप्नुमः ।
तेन पुण्येन वै स्वर्गे नित्यमस्मत्कृतेऽस्ति हि ॥३७॥
कामसेवासमं पुण्यं नान्यन्मन्यामहे वयम् ।
कामभंगसमं पापं नान्यच्छापप्रदं भुवि ॥३८॥
सुखभंगो महत्पापं सर्वस्वदाहकं ऋषे ।
सुखदानं महादानं भोजनसेवनाम्बरैः ॥३९॥
अंगानां मर्दनैः पादसंवाहनादिभिः सदा ।
नर्तनैः कीर्तनैः प्रशंसनैः पुण्यमवाप्यते ॥४०॥
यैः परे रञ्जितास्तेषां परे लोकाः सुखप्रदाः ।
यैः परे दुःखितास्तेषां परे लोकास्तु दुःखदाः ॥४१॥
परलोकस्य सौख्यार्थे सेवयामो वयं जनान् ।
परोपकारं कुर्मो वै यथेष्टसर्वदानकैः ॥४२॥
धनं वस्त्रं भूषणं च भोजनं देहमित्यपि ।
सर्वं दद्मः परसौख्यार्थं यत्फलं पुनराप्नुमः ॥४३॥
भोजनं जिह्वया त्वात्मतृप्त्यर्थं दीयते जनैः ।
स्पर्शनं तु त्वचा त्वात्मतृप्त्यर्थे दीयते तथा ॥४४॥
श्रवणं गीतिकानां तु दीयते कर्णतृप्तिकृत् ।
दर्शनं रूपशृंगारादीनां चक्षुःसुखप्रदम् ॥४५॥
एवमन्येन्द्रियैश्चापि त्वात्मतृप्त्यर्थमुत्तमम् ।
दानं सन्दीयतेऽस्माभिः पुण्यार्थं हरितोषणम् ॥४६॥
आत्मतोषे हरेस्तोषस्तेन चात्मनिवेदिता ।
पाल्यते सर्वदाऽस्माभिः फलं कृष्णार्पितं महत् ॥४७॥
विधात्रा त्रिविधाः सृष्टा नार्यः संसारसेविकाः ।
विवाहिताश्च सामान्या ब्रह्मचर्यपरास्तथा ॥४८॥
विवाहितानां धर्मास्तु पतिसेवापरायणाः ।
ये त्वयोक्तास्तु सत्प्रश्नमिषेण युग्मवाहकाः ॥४९॥
द्वितीया यास्तु सामान्या अप्सरसश्च ता वयम् ।
अस्मद्धर्मास्ततो भिन्नाः सर्वसेवापरायणाः ॥५०॥
तृतीयास्तु ब्रह्मचर्यपराः साध्व्यो भवन्ति ताः ।
कामधर्मपरित्यक्ताः साधुशीलपरायणाः ॥५१॥
स्वधर्मस्था दिवं यान्ति परधर्मा भयावहाः ।
वयं सेवापरा भृत्याः किंकर्यः सर्वदा स्मृताः ॥५२॥
दास्यो वा ह्युपपत्न्यश्च देव्यो दिव्या यतो वयम् ।
त्वादृशासामृषीणां सेवया कृतार्थभावनाः ॥५३॥
वद त्वं क्षत्रियवरस्तापसो हृदयंगमः ।
मम मानसतोषार्थं तव धर्मोऽस्ति चेन्मुने ॥५४॥
भजस्व मां समायातां नारायणपरायणाम् ।
त्वां तु नारायणं मत्वा सेवयिष्ये न दूषणम् ॥५५॥
विश्वामित्रस्तदा प्राह हितं तापसधार्मिकम् ।
अहं व्रतधरः सुभ्रु ब्रह्मचर्यपरायणः ॥५६॥
सर्वेषां व्रतिनां मूलं ब्रह्मचर्यमुदाहृतम् ।
आस्तां दूरं तव संगः संस्पर्शो भाषणं तथा ॥५७॥
गच्छ दूरं स्वर्गदेवि न मे त्वया प्रयोजनम् ।
व्रतिनां प्रमदाग्राहः पापदः पुण्यनाशकः ॥५८॥
संसारभ्रमणं नारी विवाहमण्डपे गताः ।
वह्नेर्भ्रमणव्याजेन पतिं दर्शयति ध्रुवम् ॥५९॥
तस्मात् स्त्रीभिः समं संगं स्पर्शं योगं च वर्जयेत् ।
अंगारसदृशी नारी घृतकुंभसमः पुमान् ॥६०॥
अस्पर्शाद् दृढतामेति तत्संपर्काद् विलीयते ।
स्त्रियो मूलमनर्थानां निरोधः स्वर्गगामिनाम् ॥६१॥

कुलीना वीरवत्यश्च नाथवत्योऽपि योषितः ।
एकस्मिन्नेव भर्तरि सन्तुष्टाः स्वर्गगास्तु ताः ॥६२॥
स्त्रीणां संगं समासाद्य संसारे भ्रमते नरः ।
नृणां संगं समासाद्य संसारे भ्रमतेऽबला ॥६३॥
मया त्यक्तौ हि संसारस्तद्बीजं त्वमुपस्थितम् ।
ममापि यमलोकानां दुःखं तेऽपि त्वया भवेत् ॥६४॥
तस्मान्मया न वै ग्राह्या गच्छाऽन्यत्र प्रिया भव ।
इत्युक्ता मेनका प्राह विश्वामित्रवचः शृणु ॥६५॥
हिमाचले प्रतपतो नरनारायणस्य वै ।
तपश्चोग्रं परं ज्ञात्वा महेन्द्रस्त्वप्सरोगणैः ॥६६॥
कामवसन्तप्राणैश्च सहितः संययौ द्रुतम् ।
तपोभंगविधानाय प्रारंभन्नृत्यगीतिकाम् ॥६७॥
नारायणो नरं प्राह चूतपुष्पाणि चानय ।
सक्थिन संमर्द्य समुत्पाद्य त्वप्सरोवराम् ॥६८॥
नरः सम्मृद्य पुष्पाण्युत्पादयामास चोर्वशीम् ।
अतिरूपवतीं यस्या अग्रे सर्वास्तमस्त्वचः ॥६९॥
अदृश्यन्ताऽप्सरसस्ता महेन्द्रस्य तदेन्द्रकः ।
साश्चर्यं समुवाचेदं शृण्वतां तु दिवौकसाम् ॥७०॥
शतशो मेऽप्सरसश्च मया कान्त्याऽन्धकी कृताः ।
तस्याः प्रभुं कथं शक्तः पातयितुं भवाम्यहम् ॥७१॥
इति गर्वं विहायैव पतितः पादयोर्हरेः ।
ययाचे तूर्वशीं नारायणान्नारायणो ददौ ॥७२॥
तदा नरस्य पुत्री सा प्रार्थयामास माधवम् ।
भगवन् कन्यका चाहं नरनारायणस्य वै ॥७३॥
अयोनिजा सती साध्वी ब्रह्मचर्यपरायणा ।
तापसी भगवत्पुत्री कथं यामि दिवं प्रभो ॥७४॥
सामान्याऽहं कथं भूत्वा वर्तिष्ये तान्सुरान्प्रति ।
अप्सरसां तु के धर्मास्तान्मे श्रावय तत्त्वतः ॥७५॥
इत्युक्तः श्रीहरिस्तस्यै श्रावयामास तद्वृषान् ।
दासीवत् सर्वदा स्थेयं सुरान्प्रति दिविस्थितान् ॥७६॥
नृत्यं गीतं सेवनं च कर्तव्यं देवयोषिता ।
सर्वे देवाः समाः सेव्याः पतिरूपेण वै दिवि ॥७७॥
मानवा वा मुनयोऽपि तापसाः पतिरूपिणः ।
सेवनीया भविष्यन्ति गच्छ तिष्ठ यथासुखम् ॥७८॥
ऊर्वशी प्रसमाकर्ण्य पितरं प्राह सद्व्रता ।
परपुंसां प्रसंगेन नरकं यातनामयम् ॥७९॥
प्रभोक्तव्यं भवेत् तस्मान्मया स्वर्गे न चेष्यते ।
नारायणस्तदा प्राह स्वर्गस्याऽप्सरसां कृते ॥८०॥

तव कृते तथा पुत्रि नास्ति वै यमयातनाः ।
अप्सरसो देवपुण्यात् ससृजे विश्वसृट् स्वयम् ॥८१॥
तासां पापं न चैवास्तीत्याह ब्रह्मा तथा पुरा ।
तवापि पुत्रि देवानामसंख्यानां प्रसेवया ॥८२॥
कामधर्मेण युक्ताया अपि पापं न वै भवेत् ।
इत्यपापं पुरा प्राह ब्रह्मा नारायणस्तथा ॥८३॥
अस्माकं सर्वथा देवकिंकरीणां हि योषिताम् ।
तस्माद् भजस्व मां विश्वामित्र हठं परित्यज ॥८४॥
पण्यस्त्रियो वयं यावद् वाचां बन्धनमस्ति वै ।
तावत्पतिव्रताः स्मश्च पतिर्भव सदा मम ॥८५॥
इत्युक्त्वा संस्थिता तत्र निकटे सन्मुखे हठात् ।
विश्वामित्रः स्थलं त्यक्त्वाऽन्यत्र ययौ तदा तु सा ॥८६॥
शशाप तं मुनिश्रेष्ठं कामखण्डनपीडिता ।
अद्यैव भव दुर्बुद्धे बलीपलितजर्जरः ॥८७॥
एवमुक्तोऽभवत् तादृक् शापने जरया युतः ।
मुनिः प्राह न ते पापं मम पापं तु संभवेत् ॥८८॥
तस्माद् विहाय चान्यत्र प्रयामि तेन रोचते ।
तस्माद् भव त्वमप्याशु जराजर्जरितांगका ॥८९॥
सापि तद्वचनात् सद्यस्तादृग्रूपा व्यजायत ।
ततः क्रोधस्य शान्त्यर्थं नागवल्यां तु सा सती ॥९०॥
सस्नौ तावत्पूर्वरूपा यथावद् युवती प्रिया ।
समभवत् ततो विश्वामित्रः सस्नौ नदीजले ॥९१॥
सोऽपि पूर्वरूपोऽभूत् शापौ नष्टौ परस्परम् ।
एतादृशं महत्तीर्थं नागनद्यां प्रवर्तते ॥९२॥
यत्र स्नात्वा नरा नार्यो भवन्ति यौवनान्विताः ।
स्वर्गदेवीसमा नार्यो नराः स्वर्गसुरा इव ॥९३॥
ततः सा मेनका मुनिं नत्वा स्वर्गं ययौ स्वतः ।
ऋषिस्तपः परं चक्रे नारायणपरायणः ॥९४॥
इति ते कथितं लक्ष्मि गूढधर्मप्रवर्तनम् ।
यद्विज्ञानेन व्रतिनो लभन्ते स्वर्गमोक्षणे ॥९५॥
शृणु लक्ष्मि ! प्रवक्ष्यामि महेन्द्रगर्वभंजनम् ।
चमत्कारपुरे जातं निशामय मतिप्रदम् ॥९६॥
पुरा शतमखो दर्पात् कृत्वा शतमखान् मुदा ।
बभूव सर्वदेवानामध्यक्षः सम्पदा युतः ॥९७॥
दिने दिने तदैश्वर्यं वर्धते तपसां फलात् ।
ददौ मन्त्रं सिद्धिदं वै बृहस्पतिस्तु पुष्करे ॥९८॥
स जजाप नमो राधेश्वराय ओं नमो नमः ।
शतसंवत्सरं जप्त्वा जातः पूर्णमनोरथः ॥९९॥

ब्रह्मस्वरूपां प्रकृतिं सम्पन्मूढो न मन्यते ।
प्रकृतिर्जडदिव्या च तं शशाप ततः परम् ॥१००॥
गुरुं दृष्ट्वा समुत्थाय न ननाम मुदान्वितः ।
गुरुः शशाप तं कोपाद् यातु सम्पद्वरेरिति ॥१०१॥
एवं भ्रष्टमतिरिन्द्रस्त्वहल्यां परिपश्य च ।
चकमे गौतमरूपं धृत्वा रेमे तया सह ॥१०२॥
ददर्श गौतमस्तं च धिक्कृत्य तं शशाप ह ।
योनीनां तु सहस्रं वै तव गात्रे भवत्विह ॥१०३॥
पूर्णवर्षं च सततं योनिगन्धं त्वमाप्नुहि ।
ततः सूर्यं समाराध्य सहस्राक्षो भविष्यसि ॥१०४॥
मम शापाद् गुरोः शापद् भ्रष्टश्रीर्भव साम्प्रतम् ।
अथेन्द्रः प्रययौ तीर्थं पुष्करं तपसे ततः ॥१०५॥
निष्कृतिं संविधायाऽथ गृहं ययौ ततः पुनः ।
इन्द्रस्त्यक्तगुरुर्दैवाद्ब्रह्माणं शरणं ययौ ॥१०६॥
तदाज्ञया विश्वरूपं प्रचकार पुरोहितम् ।
दैत्यदौहित्रमेवैनं ज्ञात्वा दैत्याभिपक्षिणम् ॥१०७॥
यज्ञे दैत्येभ्य एवैनं ददतं हव्यमुत्तमम् ।
प्रचिच्छेद शिरस्तस्य तीक्ष्णबाणेन वै ततः ॥१०८॥
विश्वरूपपिता त्वष्टा श्रुत्वा सद्यश्चुकोप ह ।
इन्द्रशत्रो विवर्धस्वेत्युक्त्वा चक्रे क्रतुं परम् ॥१०९॥
यज्ञकुण्डात् समुत्तस्थौ वृत्रो नाम महासुरः ।
इन्द्रो जघान वज्रेण वृत्रं वै देवकण्टकम् ॥११०॥
ब्रह्महत्या रक्तवस्त्रा ससनालोच्छ्रया तथा ।
ईषाप्रमाणदशना खड्गहस्ता बभूव ह ॥१११॥
धावन्तं धावमाना सा महेन्द्रं तं जगाम ह ।
दुद्रावेन्द्रः संविवेश मानसाख्यसरोवरे ॥११२॥
मृणालसूक्ष्मसूत्रे वै सापि वटे तटे स्थिता ।
नहुषस्त्वभवदिन्द्रो ययाचे कामतः शचीम् ॥११३॥
शची गुरोर्हि शरणं याता ररक्ष तां गुरुः ।
बृहस्पतिस्ततो यातो मानसाख्यसरः स्वयम् ॥११४॥
रक्षणाय स्वशिष्यस्य चाजुहाव शचीपतिम् ।
स्वरं बृहस्पतेर्ज्ञात्वा बहिः समाययौ गुरुम् ॥११५॥
नत्वा तुष्टाव च गुरुं पादयोः पतितस्तदा ।
क्षमस्व भगवन् दोषं कृपां कुरु कृपानिधे ॥११६॥
भृत्यापराधं सततं न गृह्णाति सदीश्वरः ।
स्वभार्यासु स्वशिष्येषु स्वभृत्येषु सुतेषु च ॥११७॥
इति श्रुत्वा गुरुः प्राह गच्छ राज्यं दिवः कुरु ।
हतशत्रुर्मत्प्रसादाद् गत्वा पश्य सतीं शचीम् ॥११८॥
संसारविजयं वर्म गृहाणेदं ततः परम् ।
ब्रह्महत्यां भस्मसाच्च कुरु गच्छ मया सह ॥११९॥
एवं कृत्वा महेन्द्रस्तु ययौ स्वर्गं तदा पुनः ।
दैत्यैर्विनाशितां स्वस्य राजधानीं पुनर्नवाम् ॥१२०॥
कारयामास रचितां नाम्नाऽमरावतीपुरीम् ।
विश्वकर्मकृतां वीक्ष्य न तुतोष सुरेश्वरः ॥१२१॥
विश्वकर्मा गृहं गन्तुं न शशाक विनाऽऽज्ञया ।
विश्वकर्मा हरिं कृष्णं सस्मार कमलापतिम् ॥१२२॥
नारायणो विप्ररूपं धृत्वाऽऽजगाम तां पुरीम् ।
अतिखर्वो वैष्णवश्च युयुजे शक्रमाशिषम् ॥१२३॥
मधुपर्कादिकं दत्वा शक्रः सत्कारमाचरत् ।
पप्रच्छाऽऽगमनं कस्माद् वदेति विप्रबालकम् ॥१२४॥
विप्रबटुस्तु तं प्राह नूतनां नगरीं तव ।
समाद्रष्टुमागतोऽस्मि प्रष्टुं वचनमीप्सितम् ॥१२५॥
चित्रं नगरनिर्माणं समाकर्ण्याऽद्भुतं तव ।
कतिवर्षाणि निर्माणे भवान् संकल्पितो यथा ॥१२६॥
कतिचित् तां विश्वकर्मा निर्माणं वा करिष्यति ।
एवंभूतं विनिर्माणं न केनेन्द्रेण निर्मितम् ॥१२७॥
नैवंविधं सुनिर्माणे विश्वकर्मा परः क्षमः ।
बालकस्य वचः श्रुत्वा जहास स सुरेन्द्रकः ॥१२८॥
सम्पन्मदातिमत्तश्च पुनः पप्रच्छ बालकम् ।
कतीन्द्राणां समूहश्च त्वया दृष्टः श्रुतोऽथवा ॥१२९॥
विश्वकर्मा कतिविधस्तं ये ब्रूहि शिशोऽधुना ।
शक्रस्य वचनं श्रुत्वा विप्रबटुरुवाच तम् ॥१३०॥
जानामि कश्यपं तव तातं प्रजापतिं तथा ।
मुनिं मरीचिं जानामि तत्तातं वेधसं तथा ॥१३१॥
कल्पं च प्रलयं कतिविधं जानामि सर्वथा ।
ब्रह्मजनकं वैराजं तत्पितरं हिरण्मयम् ॥१३२॥
जानाम्यण्डं कतिविधं ब्रह्मविष्णुमहेश्वरान् ।
ब्रह्माण्डेषु कतिविधानिन्द्रान् जानामि सर्वशः ॥१३३॥
यदि संख्याऽस्ति रेणूनां धरायां तु सुरेश्वर ।
तथापि संख्या शक्राणां नास्त्येव किं वदामि ते ॥१३४॥
शक्रस्याऽऽयुश्चाधिकारो युगानामेकसप्ततिः ।
अष्टाविंशतिशक्राणां पतनेऽहर्निशं विधेः ॥१३५॥
विधेरष्टोत्तरशतमायुरेव प्रमाणतः ।
सुरेन्द्राणां तु का संख्या नास्ति संख्या विधेरपि ॥१३६॥
महाविष्णोर्लोमकूपे वैराजाः सन्त्यनेकशः ।
वैराजस्य रोमकूपे ब्रह्माद्याः सन्त्यनेकशः ॥१३७॥

एवं लोम्नः प्रमाणेन ब्रह्माण्डाः सन्त्यसंख्यकाः ।
ब्रह्माण्डे च कतिविधाः सुराः सन्त्येव त्वत्समाः ॥१३८॥
विप्रबटौ वदत्येवं पार्श्वतो निर्गतं तदा ।
पिपीलिकासमूहं च व्यायतं धनुषां शतम् ॥१३९॥
क्रमशस्तान् सन्निरीक्ष्य जहासोच्चैर्द्विजार्भकः ।
नोवाच किञ्चिन्मौनी च गंभीरः सगणो यथा ॥१४०॥
इन्द्रः प्राह कथं विप्रबटो हससि मे वद ।
विप्रबटुरुवाचेन्द्रं दृष्टाः पिपीलिकास्त्वया ॥१४१॥
सृष्टः पिपीलिकासंघ एकैकः क्रमशो मया ।
सर्वे ते क्रमशस्त्वासन्निन्द्राः पूर्वात्प्रपूर्वजाः ॥१४२॥
इदानीं ते तु सम्प्राप्ता भूतजातिं पिपीलिकाम् ।
कर्मणा क्रमशो यान्ति जीवाः कीटनृदेवताः ॥१४३॥
कर्मणा द्रुमतां यान्ति यक्षतां नागतां तथा ।
पक्षित्वं च पशुत्वं च नारीत्वं नरतां तथा ॥१४४॥
प्रेतत्वं च सुरत्वं च ऋषित्वं कर्मणा तथा ।
ब्रह्मत्वं सुरराजत्वं कर्मणा प्राप्यतेऽपि तु ॥१४५॥
मृत्युस्तु मस्तकस्थायी सर्वेषां विद्यते सदा ।
जलबुद्बुदवत्सर्वं शक्र नश्यति नित्यशः ॥१४६॥
मूढा मुह्यन्ति लोकेऽत्र मुह्यन्ति नैव पण्डिताः ।
इत्युक्त्वा स विप्रबटुस्तत्र तस्थौ च सस्मितः ॥१४७॥
विस्मितस्त्रिदशाध्यक्षो गर्वहीनो बभूव ह ।
एतस्मिन्नन्तरेतत्राऽऽजगाम तापसो जनः ॥१४८॥
अतिवृद्धो महायोगी जटाधारी मृगाजिनी ।
सर्वे वक्षःस्थलं तस्य रोमचक्राभिसंभृतम् ॥१४९॥
मध्ये किञ्चिद्रोमहीनं समुत्पाटितलोमकम् ।
मस्तके च वर्तुलं संदधन् कटं समायतम् ॥१५०॥
आगत्य मध्ये तस्थौ स विप्रपुत्रमहेन्द्रयोः ।
महेन्द्रो वृद्धरूपं तं मधुपर्कादिकं ददौ ॥१५१॥
प्रणनामाऽथ पप्रच्छ कुत आगम्यते त्वया ।
किन्नामा त्वं गृहं कुत्र कथमागमनं तव ॥१५२॥
कटं कथं मस्तके ते लोमचक्रं च वक्षसि ।
मध्यदेशे रिक्तभागो लोमोत्पाटनजः कथम् ॥१५३॥
वृद्धः प्राह च वैकुण्ठादद्य त्वागम्यते मया ।
लोमशोऽहं ऋषिर्नाम्ना तीर्थार्थं गमनं मम ॥१५४॥
अल्पायुषा मया चेन्द्र कुत्रापि न कृतं गृहम् ।
न विवाहश्चोपजीव्यं भिक्षोपजीविनाऽधुना ॥१५५॥
वर्षणाऽऽतपशान्त्यर्थं मस्तकस्थं कटं मम ।
वक्षोरोमाणि यावन्ति तावत्कल्पायुरस्म्यहम् ॥१५६॥
कल्पैकेऽपगते चेन्द्र लोमैकोत्पाटनं मम ।
उत्पाटितरोमसंख्याः कल्पा नष्टा ममाग्रतः ॥१५७॥
जातं त्वंगुलमात्रं तद् वर्तुलं रोमहीनकम् ।
वक्षोलोमानि यावन्ति प्रतिकल्पैकरोमकम् ॥१५८॥
भविष्यन्त्युत्पाटितानि तदा मे मरणं भवेत् ।
दशाधिकशते याते ब्रह्माऽब्दानां मृतिर्मम ॥१५९॥
असंख्यविधयः सृष्टौ मरिष्यन्ति मृता अपि ।
कलत्रेण च पुत्रेण गृहेण किं प्रयोजनम् ॥१६०॥
वैराजपत्तने चक्षुर्निमेषस्तु हरेर्भवेत् ।
श्रीहरेश्चरणं नित्यं चिन्तयामि स्थले स्थले ॥१६१॥
दुर्लभं श्रीहरेर्दास्यं भक्तिर्मुक्तेर्गरीयसी ।
स्वप्नवत् सर्वमैश्वर्यं तद्भक्तिव्यवधायकम् ॥१६२॥
एवमुक्त्वा वृद्धविप्रश्चान्तर्धानं जगाम ह ।
शिशुविप्रस्ततश्चेन्द्रं कृत्वा गर्वविहीनकम् ॥१६३॥
अदृश्यतां गतस्तूर्णमिन्द्रो वैराग्यमाप्तवान् ।
सर्वं विन्यस्य पुत्रे तु त्यक्त्वा राज्यश्रियं शचीम् ॥१६४॥
उत्सुकोऽभूदरण्यं वै हरेर्भक्त्यर्थमादरात् ।
बृहस्पतिः स्वकं शिष्यं बोधयामास वै तदा ॥१६५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इति नित्यं जपं ध्यानसहितं कुरु शार्ङ्गिणः ॥१६६॥
तेन मुक्तिश्च ते भाव्या मा याहि वनमन्यथा ।
इत्युक्तो भजमानः स भूत्वा च वैष्णवो महान् ॥१६७॥
चकार राज्यं धर्मिष्ठश्चान्ते मुक्तिं जगाम ह ।
पठनाच्छ्रवणाचास्य ज्ञानवान् जायते जनः ॥१६८॥
श्रद्धा सुवर्धते भक्तो भक्तौ गर्वो नश्यति सर्वथा ।
वृथा मानं याति दूरं याति त्वन्ते हरेः पदम् ॥१६९॥
इति ते कथितं लक्ष्मि ! भुक्तिमुक्तिप्रदं शुभम् ।
विज्ञानं गर्वनाशार्थं भक्तेर्वृद्ध्यर्थमेव च ॥१७०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मेनकां प्रति विश्वामित्रपृष्टपातिव्रत्यप्रश्नेऽप्सरसामन्यधर्मपरत्वे परस्परशापेन जरा, नागमतीनद्यां स्नानेन शापनिवारणं चेत्यादि । तथा इन्द्रस्य गर्वनाशार्थं प्रकृतेः शापः, गुरोः शापः, गौतमशापश्च, गुरोरपमानाच्छापेन सम्पन्नाशः, वृत्रनाशः, ब्रह्महत्या, गुरोः कृपया ब्रह्महत्यानाशः, नवीनप्रासादनिर्माणं, विश्वकर्मनिरोधः, नारायणस्य विप्रबटुरूपेणाऽऽगमनं, पिपीलिकासमूहदर्शनं, लोमशस्यागमनं, तदायुर्लोमक्षरणे निश्चित्येन्द्रस्य वैराग्यं विश्वकर्मणो निर्बन्धतेन्द्रगर्वनाशश्चेतिनिरूपणनामा षडशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८६ ॥

श्रीनारायण उवाच—

अथ धन्वन्तरेर्दर्पभंगः पूर्वं यथा कृतः ।
तदाख्यानं कथयामि शृणु लक्ष्मि सुरेश्वरि ! ॥ १ ॥
नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् ।
पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥ २ ॥
सर्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः ।
गरुडस्य सुशिष्यो वै शंकरस्योपशिष्यकः ॥ ३ ॥
शिष्याणां स सहस्रेण याति वैकुण्ठमेकदा ।
ददर्श तक्षकं मार्गे लेलिहानं भयानकम् ॥ ४ ॥
लक्षनागैः परिवृतं पातालात्तु समागतम् ।
तीर्थेच्छया महीलोके विचरन्तं शुभाशयम् ॥ ५ ॥
धन्वन्तरिर्गर्वयुक्तो विषमन्त्रान् मुमोच ह ।
तक्षकः क्रोधसंयुक्तो भोक्तुं दुद्राव वैद्यकम् ॥ ६ ॥
तावद् धन्वन्तरेः शिष्यो दम्भिनामा जजाप ह ।
विषमन्त्रं महाघोरं संचक्रे तक्षकं वशे ॥ ७ ॥
मन्त्रेण जृम्भितं कृत्वा निर्विषं तं चकार ह ।
अमूल्यं मणिरत्नं जहार तन्मस्तकस्थितम् ॥ ८ ॥
करेण भ्रामयित्वा तु क्षेपयामास दूरतः ।
पतितो मृतवत्तस्थौ तक्षकस्तद्व्रणास्तदा ॥ ९ ॥
चक्रुर्निवेदनं वासुकये वासुकिराययौ ।
सर्पान् विषोल्बणान्नीत्वा पञ्चमुखान् सहस्रशः ॥१०॥
द्रोणकालीयकर्कोटपुण्डरीकधनञ्जयान् ।
धन्वन्तरेः शिष्यगणा भयमापुर्विलोक्य तान् ॥११॥
नागविषैर्दंशितास्ते शेरते पृथिवीतले ।
धन्वन्तरिर्मन्त्रामृतैर्जीवयामास सेवकान् ॥१२॥
चकार जृम्भितं मन्त्रैः सर्पसंघं रुषा ज्वलन् ।
वासुकिस्तु तदा गौरीं सस्मार मनसाऽभिधाम् ॥१३॥
मनसे ! त्वं समागच्छ नागान् रक्षाऽतिसंकटात् ।
जगत्त्रये महाभागे पूजा तव भविष्यति ॥१४॥
मनसा द्राक् समागत्योवाच यामि रणांगणे ।
तं शत्रुं संहरिष्यामि प्रजेष्यामि न संशयः ॥१५॥
गुरुर्मे भगवान् शेषो दत्तवान् कवचं मम ।
संसार भस्मसात् कृत्वा पुनः स्रष्टुमहं क्षमा ॥१६॥
शिष्याऽहं मन्त्रशास्त्रेषु शंभोर्भगवतस्तथा ।
शंभोः शिष्यं गरुडं न गणयामि मनागपि ॥१७॥
धन्वन्तरिस्तच्छिष्याणामेकः किं गणयामि तम् ।
इत्युक्त्वा श्रीहरिं शेषं शंभुं स्मृत्वा प्रणम्य च ॥१८॥
यत्र धन्वन्तरिस्त्वास्ते तत्राजगाम तत्क्षणम् ।
मन्त्रैश्च जृम्भितान् सर्पान् जीवयामास लीलया ॥१९॥
विषमन्त्रैः शत्रुशिष्यान्निश्चेष्टांश्च चकार सा ।
यत्नतोऽपि धन्वन्तरिर्नोत्थापयितुमीश्वरः ॥२०॥
प्रहस्य मनसा प्राह त्यज सिद्धाभिमानिताम् ।
वद जानासि किं सिद्ध शिष्योऽसि गरुडस्य वै ॥२१॥
अहं च गरुडश्चापि शिष्यौ शंभोर्हि विश्रुतौ ।
अधीतं कल्पपर्यन्तं तत्र का गणना तव ॥२२॥
मन्त्रितं कमलं चेदं प्रेरयामि स्थिरो भव ।
इत्युक्त्वा प्राक्षिपत् पद्मं मन्त्रितं सूर्यसदृशम् ॥२३॥
धन्वन्तरैस्तु फुत्कारैर्भस्मसात् तत् तदाऽभवत् ।
देवी जग्राह मन्त्राढ्यां शक्तिं परमदारुणीम् ॥२४॥
धन्वन्तरिस्त्रिशूलेन बभंज कणशस्तु ताम् ।
मनसा नागपाशं प्रचिक्षेप मन्त्रितं तदा ॥२५॥
नागलक्षान्वितं घोरं धन्वन्तरिश्च तत्क्षणात् ।
गारुडं प्रेरयामास तेन नागास्त्रभक्षणम् ॥२६॥
कृतं वै लीलया तावन्मनसा शूलमाददे ।
शिवदत्तं च सफलं प्रलयाग्निसमप्रभम् ॥२७॥
तावद् ब्रह्मा तथा शंभुः रक्षार्थमागतौ द्रुतम् ।
देवौ ननाम मनसा गरुडो वैद्यकस्तथा ॥२८॥
ब्रह्मा प्राह मनसायाः पूजां कुर्विति वैद्यकम् ।
धन्वन्तरे ! नहि साम्यं रणं ते दुर्गया सह ॥२९॥
त्रैलोक्यं भस्मसात् कर्तुं शूलेनेयं प्रभावती ।
कुरु स्तोत्रं मनसायास्तुष्टा वरं प्रदास्यति ॥३०॥
धन्वन्तरिः शुचिर्भूत्वा शुक्लपुष्पैरपूजयत् ।
चारुचम्पकवर्णाभां सर्वांगशुमनोहराम् ॥३१॥
नागेन्द्रवाहिनीं देवीं सर्वविद्याविशारदाम् ।
ध्यात्वा दत्वा षोडशवस्तूनि स्तोत्रं चकार ह ॥३२॥
'नमः सिद्धिस्वरूपायै वरदायै नमो नमः ।
नमः कश्यपकन्यायै शंकरायै नमो नमः ॥३३॥
बालानां रक्षणकर्त्र्यै नागदेव्यै नमो नमः ।
नम आस्तीकमात्रे ते जरत्काव्र्यै नमो नमः ॥३४॥
तपस्विन्यै च योगिन्यै नागस्वस्रे नमो नमः ।
साध्व्यै तपस्यारूपायै शंभुशिष्ये ! च ते नमः' ॥३५॥
इति स्तुता च मनसा भूत्वा शान्ता सुखप्रदा ।
स्वस्तीत्युक्त्वा ययौ नत्वा गृहं ब्रह्ममहेश्वरौ ॥३६॥
देवा वैद्यो गरुडश्च सर्पा ययुर्निजालयान् ।
इति ते कथितं लक्ष्मि ! मनसाया बलं महत् ॥३७॥

धन्वन्तरेर्दर्पभंगः श्रवणात् सर्पभीर्न वै ।
वंशजानां नागभयं नास्ति श्रवणमात्रतः ॥३८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने नागेषु धन्वन्तरेर्मन्त्रप्रयोगाः, मनसादेव्या मन्त्रप्रयोगैर्धन्वन्तरेर्गर्वोनाशितश्चेतिनिरूपणनामा सप्ताशीत्यधिकचतुश्शततमोऽध्यायः ॥ ४८७ ॥

श्रीलक्ष्मीरुवाच—

भगवन् श्रोतुमिच्छामि शारदं रासमण्डलम् ।
कृष्णनारायणगोपीलीलामयं निशामय ॥ १ ॥

श्रीनारायण उवाच—

शृणु तत्ते प्रवक्ष्यामि रासरमणमुत्तमम् ।
गोपीभिर्नवलक्षाभिर्नवलक्षैश्च माधवैः ॥ २ ॥
शरच्चन्द्रपूर्णिमायां किशोरः स युवाऽभवत् ।
युवतीभिर्युवानश्च श्रीकृष्णा रेमिरे प्रिये ॥ ३ ॥
विचार्य श्रीहरिर्नक्तं वनं वृन्दावनं ययौ ।
शुभो चन्द्रोदये सर्वगोपीसंकल्पपूर्तये ॥ ४ ॥
चकार तत्र कुतुकाद् विनोदमुरलीरवम् ।
तच्छ्रुत्वा राधिका विनिःससार च द्रुतं गृहात् ॥ ५ ॥
त्रयस्त्रिंशद्वयस्याश्च सुशीलाद्या ययुर्मुदा ।
समा वेषेण वयसा रूपेण च गुणेन च ॥ ६ ॥
ययुस्त्वन्या नवलक्षगोप्यस्त्यक्त्वा गृहादिकम् ।
सर्वा बभूवुरेकत्र मालाहस्तास्तु काश्चन ॥ ७ ॥
चारुचन्दनहस्ताश्च श्वेतचामरहस्तकाः ।
काश्चित् कस्तूरिकाकराः काश्चित् कुंकुमवाहिकाः ॥ ८ ॥
काश्चित् ताम्बूलपात्राश्च काश्चित् कांचनभाम्बराः ।
कृष्णकृष्णवदन्त्यश्च ददृशू रासमण्डलम् ॥ ९ ॥
सुनिर्जनं कुसुमितं वासितं पुष्पवायुभिः ।
शुश्रुवुस्ता द्विरेफाणां कोकिलानां मधुध्वनिम् ॥१०॥
राधा गोप्यः प्रविविशुः शोभितं रासमण्डलम् ।
राधां गोपीश्च संवीक्ष्य हसन् कृष्णोऽप्यदृश्यत ॥११॥
नवयौवनसम्पन्नो रत्नाभरणभूषितः ।
कन्दर्पकोटिलावण्यरूपोज्ज्वलो मनोहरः ॥१२॥
वक्रलोचनकोणेन ददर्श गोपिका मुहुः ।
गोपीनां नवलक्षाणि कृष्णानां च तथैव हि ॥१३॥
लक्षाण्यष्टादश युगलानि वै रासमण्डले ।
रासं रेमे कीर्तनैः सत्तालैश्च कूर्दनैर्मुहुः ॥१४॥
हस्तानां मेलनैस्तालीदानैर्वक्रविभङ्गिभिः ।
दण्डैश्च स्कन्धसंयोगैश्चुम्बनैः करपीडनैः ॥१५॥
एवं वै रासमाक्रीड्य श्रान्ता निषेदुरुन्मुखाः ।
पुपूजुस्ताः प्रियं कान्तं ददुस्ताम्बूलमुत्तमम् ॥१६॥
जगृहुर्मुखताम्बूलं परस्परं स्मरान्विताः ।
कामरूपः स्वयं कृष्णो ज्ञात्वा तन्मानसानि वै ॥१७॥
कामभावेन ताः सर्वा जग्राह च चुचुम्ब च ।
शृंगाराऽष्टप्रकारं च संयोगं त्वंगयोस्तथा ॥१८॥
नखदन्तकराणां च प्रहारं वै यथोचितम् ।
चुम्बनाष्टविधं चापि चकार रसिकेश्वरः ॥१९॥
अंगैरंगानि प्रत्यंगैः प्रत्यंगानि युयोज च ।
चकाराश्लेषणं तासां कामुकीनां सुखावहम् ॥२०॥
नवलक्षस्थले कृष्णः कान्तासक्तो विराजते ।
तासां दत्वा रतितृप्तिं तूर्ध्वरेताः स्वयंप्रभुः ॥२१॥
स्थलक्रीडां तथा कृत्वा जलक्रीडार्थमाययौ ।
नवलक्षयुगलानि रेमिरे यमुनाजले ॥ २२॥
सवस्त्राश्च विवस्त्राश्च रमन्ते कामतृप्तये ।
चुचुम्बुः स्वामिनं मूर्छां प्रापुरानन्दवारिधौ ॥२३॥
समाश्लिषुर्दृढं कान्तं कृत्वा वक्षसि वर्ष्मणि ।
एवं तृप्तिं ददौ कृष्णो जलेऽपि सुचिरं प्रभुः ॥२४॥
अथ निर्गत्य वस्त्राणि धारयामासुरुत्सुकाः ।
ततश्च खेलनं चक्रे भिन्नं भिन्नं सुरञ्जनम् ॥२५॥
शृंगारं च विविधं ताश्चक्रे कृष्णस्य गर्विताः ।
कृष्णस्तासां कबर्यादिशृंगारं त्वसृजन्नवम् ॥२६॥
काचित् कान्तं पुरः कृत्वा चकार केशसाधनम् ।
काचिद् ददौ तु चूडायां मयूरपिच्छमुत्तमम् ॥२७॥
काचिद् ददौ चक्षुषोस्तु कज्जलं भालकुंकुमम् ।
गुञ्जामाल्यं च चूडायां वेष्टयामास काचन ॥२८॥
काचिद् वस्त्रं ददौ सूक्ष्मं स्वामिने चोत्तरीयकम् ।
काचिद् ददौ कुसुमानां मालां कण्ठे मनोहराम् ॥२९॥
काचिच्चकार तिलकं चन्द्रकं काचिदादधत् ।
काचिदलक्तकं हस्तपादतलनखेष्वदात् ॥३०॥
काचिद् वंशीं ददौ हस्ते काचित्ताम्बूलकं ददौ ।
अन्या सुदर्पणे रम्यं दर्शयामास चाननम् ॥३१॥
परा चकार कृष्णस्य पादसंवाहनं मुदा ।
अन्या जलं ददौ काचिद् ददौ सत्पवनं शनैः ॥३२॥
काचिच्चन्दनलेपं च चकार कृष्णवर्ष्मणि ।
अपरा हस्तमादाय ग्रन्थिस्फोटं चकार ह ॥३३॥

इतरा जंघयोः सक्थ्नोर्मर्दनं प्रचकार वै ।
ननृतुश्च जगुः काश्चित् काश्चिच्चुचुम्बुरुत्सुकाः ॥३४॥
काचित् कृष्णं समादाय निकुंजे प्रजगाम ह ।
अन्या तं शयने कृत्वाऽऽददे रतिसुखं मुदा ॥३५॥
नर्तनं कारयामास तं तु काचिद् बलेन वै ।
सोऽपि कस्याश्चित्कबर्याः सुनिर्माणं चकार ह ॥३६॥
सिन्दूरं प्रददौ भाले कस्तूरीं बिन्दुभिः सह ।
अतिसूक्ष्मं चन्दनेन्दुं कौतुकात् तदधो ददौ ॥३७॥
पत्रावलीं सुललितां सुकपोले चकार ह ।
पादयोर्मञ्जिरे दत्वाऽलक्तकं सुन्दरं ददौ ॥३८॥
भूषणैर्भूषयामास लोपयामास चन्दनम् ।
प्रददे नासिकामध्ये दुर्लभं गजमौक्तिकम् ॥३९॥
एवं कृष्णा नवलक्षं नवलक्षं च गोपिकाः ।
अन्योन्यं भूषयामासुः रमे ! कामातिचेष्टिताः ॥४०॥
बहुमूर्तीः संविधाय योगिनां परमो गुरुः ।
पुनश्चकार शृंगारं गोपीनां कामसौख्यदम् ॥४१॥
मूर्छामवापुः सततं कामानन्दपरिप्लुताः ।
एवं रामा रमयित्वा कृत्वा षाण्मासिकीं निशाम् ॥४२॥
निद्रां दीर्घां भुवि कृत्वा कृत्वाऽर्कस्य स्थिरां गतिम् ।
कामतृप्तिं परां दत्वाऽप्यूर्ध्वरेताः परेश्वरः ॥४३॥
अप्रस्खलितः श्रीकृष्णो बभूव कामगर्वहृत् ।
पुनर्जगाम रासस्य मण्डपे रासखेलनम् ॥४४॥
चकार बहुभ्रमणैर्विविधैः कीर्तनैस्तदा ।
सर्वे देवादयो व्योम्नि स्थिताः पत्नीप्रजायुताः ॥४५॥
चिक्षिपुः पुष्पवृष्टिं च ददृशू रासमण्डलम् ।
कस्तूरीचन्दनादीनां वृष्टिं चक्रुर्मुनीश्वराः ॥४६॥
जयकारं स्तुतिं कृत्वा ययुस्ते यमुनातटे ।
श्रीकृष्णो रमयामास विश्रम्य तु पुनश्च ताः ॥४७॥
विजहाराऽपि सर्वत्र निर्जनेषु यथेष्टकम् ।
पुष्पोद्यानेषु रम्येषु सरसां सुतटेष्वपि ॥४८॥
कन्दरे कन्दरे रम्ये नदेषु च नदीष्वपि ।
वाञ्छितेषु प्रमदानां त्रयस्त्रिंशद्वनेष्वपि ॥४९॥
भाण्डीरे श्रीवने रम्ये कदम्बकानने तथा ।
तुलसीकानने कुन्दवने चम्पककानने ॥५०॥
निम्बारण्ये मधुवने जम्बीरकानने तथा ।
नालिकेरवने पूगवने च कदलीवने ॥५१॥
बदरीकानने बिल्ववने नारिंगकानने ।
अश्वत्थकानने वंशवने दाडिमकानने ॥५२॥
मन्दारकानने तालवने चाम्रवने तथा ।
केतकीकाननेऽशोकवने खर्जूरकानने ॥५३॥
आम्रातकवने जम्बूवने शाल्मुकानने ।
कटादिकानने पद्मवने जातिवने तथा ॥५४॥
न्यग्रोधगहने रम्ये तथा श्रीखण्डकानने ।
प्रकृष्टकेसरवने रेमे षाण्मासिकीं निशाम् ॥५५॥
कामिनीनां यथा कामः शृंगारेण विवर्धते ।
तथा तथा हरी रेमे तासामानन्ददायकः ॥५६॥
तथापि मानसं पूर्णं कामिनीनां बभूव न ।
आप्रातरेवं रासेषु ददौ कामसुखं हरिः ॥५७॥
सर्वासां च यदा कामतृप्तिर्जाता मुमोच ताः ।
ततो यम्यां गता वार्षुं क्रीडनार्थं ततः परम् ॥५८॥
कृष्णस्त्वदृश्यतां यातो गोप्यो ययुर्निजालयान् ।
एता गोपांगनाः सर्वा नेश्वरं मेनिरे पतिम् ॥५९॥
कामुक्यः कामभावेन रतिशूरं हि मन्वते ।
तथापि तन्मनस्कास्ताः प्रापुर्दिव्यगतिं प्रियाः ॥६०॥
दिव्ययोगाज्जडं चापि दिव्यभावं व्रजत्यपि ।
कृष्णं लोष्टं वह्नियोगाद् वह्निभावं हि गच्छति ॥६१॥
अथ रासस्य वै श्रेष्ठान्मण्डपान् कृत्रिमान् शुभान् ।
विश्वकर्मकृतान् दिव्यान् शतयोजनविस्तृतान् ॥६२॥
नवलक्षासनान् रम्यान्पर्यंकान्नवलक्षकान् ।
विश्वकर्मा तिरोहितांश्चकार क्षणमात्रतः ॥६३॥
अथैकलः किशोरोऽयं श्रीकृष्णः स्वगृहं प्रति ।
यावद्गच्छति मार्गे तं ददर्श मुनिपुंगवः ॥६४॥
अष्टावक्रः कृष्णवर्णो दिगम्बरो जटान्वितः ।
नखश्मश्रुसुदीर्घश्च शान्तः प्रणतकन्धरः ॥६५॥
स वै प्रणम्य गोविन्दं तुष्टाव मुनिपुंगवः ।
प्राणांस्तत्याज योगेन निपत्य चरणाम्बुजे ॥६६॥
तत्तेजस्तु समुत्तस्थौ सप्ततालप्रमाणकम् ।
सुदिव्यः पुरुषो भूत्वा तस्थौ कृष्णसमीपतः ॥६७॥
दृष्ट्वा मृतं मुनिं कृष्णः संस्कारं कर्तुमुद्यतः ।
षष्टिवर्षसहस्राणि निराहारोऽभवन्मुनिः ॥६८॥
रक्तमांसाऽस्थिहीनं तद्वर्ष्म भस्मभृतं ह्यभूत् ।
तदुद्धृत्य ददौ कृष्णश्चितायां भस्म मिश्रितम् ॥६९॥
एतस्मिन्नन्तरे व्योम्नः स्यन्दनः प्रसमाययौ ।
पार्षदप्रवरैर्युक्तः श्रीकृष्णसदृशैर्वरैः ॥७०॥
पार्षदाः श्रीहरिं नत्वा नीत्वा तं दिव्यपूरुषम् ।
अष्टावक्रं मुक्तदेहं जग्मुर्गोलोकमुत्तमम् ॥७१॥

शृणु लक्ष्मि! ब्रह्मणस्तु प्रचेतास्तस्य चाऽसितः।
सुतः सपुत्रविहीनस्तपस्तेपे सहस्रकम् ॥७२॥
अब्दानां सकलत्रोऽपि न लेभे च यदा सुतम्।
तदा प्राणान् विहातुं सोऽभवदुद्यमितोऽथ वै ॥७३॥
तं सम्बोद्धुं बभूवाऽथ सत्या वागशरीरिणी।
कथं त्यजसि प्राणाँस्त्वं गच्छ शंकरसन्निधिम् ॥७४॥
सिद्धं कुरु गृहीत्वा तु मन्त्रं शंकरवक्त्रतः।
वरेणाऽभीष्टदेव्याश्च पुत्रस्ते भविता ध्रुवम् ॥७५॥
श्रुत्वा ययौ स कैलासं सकलत्र उवाच तम्।
महादेव कृपासिन्धो देहि पुत्रं नमाम्यहम् ॥७६॥
हरः प्राह भविता ते पुत्रो मदंशमत्समः।
जप मन्त्रं 'राधिकायै श्रीकृष्णाय नमोऽस्तु ते' ॥७७॥
राधा मन्त्रेण प्रत्यक्षा शतवर्षोत्तरं ह्यभूत्।
पुत्रवान् भव चेत्युक्त्वाऽदृश्या बभूव राधिका ॥७८॥
असितस्य ततः पुत्रो देवलाख्यो बभूव ह।
सुयज्ञनृपतेः कन्यां रत्नमालावतीम्रुवाम् ॥७९॥
जगृहे स विवाहेन शतवर्षोत्तरं स च।
विरक्तः शयने त्यक्त्वा तां स्वयं तु वनं ययौ ॥८०॥
तपसे पर्वते गन्धमादनेऽब्दसहस्रकम्।
तपश्चचार दिव्योऽभूद् देहेन सूर्यवद् द्विजः ॥८१॥
रंभा तं देवलं दृष्ट्वा त्वेकदा काममोहिता।
तपोभंगार्थमागच्छजग्राह देवलो न ताम् ॥८२॥
रुष्टा शापं ददौ कोपादन्तर्दुःखान्विता सती।
कामदुःखेन दुःखार्ता यतो मां स्वीकरोषि न ॥८३॥
भव कुब्जश्चाष्टवक्रो जर्जरो नीलविकृतः।
तपोहीनः कुरूपश्च कामिनीजनगर्हितः ॥८४॥
रम्भा शप्त्वा ययौ स्वर्गमृषिर्नाम्नाऽष्टवक्रकः।
देवलः स प्रसिद्धोऽभूत् प्रययौ मलयाचलम् ॥८५॥
षष्टिवर्षसहस्राणि तपः पुनश्चकार सः।
सोऽयं ज्ञात्वा रासखेलं दर्शनाय समागतः ॥८६॥
ध्यानमग्नो दीर्घसूत्री न प्राप्तो रासदर्शनम्।
कृष्णयोगाद् ययौ धाम गोलोकं भक्तिमान् मुनिः ॥८७॥
कृष्णनारायणो विष्णुर्ययौ नन्दगृहं ततः।
प्रातः स्मरन्ति सर्वास्ता विकृताः कृष्णतन्मयाः ॥८८॥
इति लक्ष्मि! कथितं ते रासमण्डलमुत्तमम्।
पठनाच्छ्रवणात्स्य कृष्णप्राप्तिर्भवेद्ध्रुवम् ॥८९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने रासमण्डले गोपीभिः कामभावेन कृष्णस्य चरित्रम्, देवलस्य रंभायाः शापेनाऽष्टावक्रत्वं, तस्य मोक्षणं चेतिनिरूपणनामाऽष्टाशीत्यधिकचतुश्शततमोऽध्यायः ॥४८८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! कथां रम्यां चमत्कारपुरोद्भवाम्।
सत्यधर्मपरां तिर्यग्योनिमोक्षकरीं शुभाम् ॥ १ ॥
नागनद्यास्तटे तत्र दक्षिणे योजनद्वये।
आस्ते सरोवरं दीर्घे पञ्चयोजनविस्तृतम् ॥ २ ॥
कस्यचित्त्वथ कालस्य स्नात्वा तत्र सरोवरे।
दुर्वासा मुनिराड् राज्ञः कलशस्य गृहं ययौ ॥ ३ ॥
चमत्कारपुरेशं तं कलशं प्राह सत्वरः।
चातुर्मास्यव्रतस्थोऽहं पारणं कर्तुमुत्सहे ॥ ४ ॥
तस्माद् यत्किंचिदन्नं ते सिद्धमस्ति गृहे नृप।
तद् देहि भोजनार्थं मे बुभुक्षाऽतीव वर्धते ॥ ५ ॥
कलशाख्यो महाराजः सिद्धान्नं यदुपस्थितम्।
मिष्टान्नं व्यञ्जनं चोष्यं पेयं खाद्यं तथाऽऽमिषम् ॥ ६ ॥
सर्वं भोज्यकृते तस्मै प्रददौ स्वयमेव वै।
अथाऽसौ बुभुजे विप्रः सूपं मांसरसान्वितम् ॥ ७ ॥
अज्ञातभोजनो विप्रो ज्ञात्वाऽन्नं मांसमिश्रितम्।
व्रतभंगस्य दोषेण चुकोप तं शशाप च ॥ ८ ॥
यतो मांसान्वितं दत्वा व्रतभंगः कृतो मम।
तस्मात्त्वं चामिषाहारो भव व्याघ्रो वनादिषु ॥ ९ ॥
राजा प्रदीनवचनः प्रोवाचाऽनुग्रहं कुरु।
आशंकितस्य दासस्य भक्तस्य विनतस्य च ॥१०॥
दुर्वासास्तं ततः प्राह यदा धेनुस्तु नन्दिनी।
शंभोर्बाणं भूतलस्थं दर्शयिष्यति ते नृप ॥११॥
भविष्यसि तदा मुक्तश्चेत्युक्त्वा प्रययौ मुनिः।
बभूव राजा भयकृद् व्याघ्राकृतिर्वनेचरः ॥१२॥
अथ कालेन च गवां कुलं तृणार्थमागतम्।
यत्रासीन्नन्दिनी धेनुर्हंसवर्णा घटस्रवा ॥१३॥
सा तृणार्थं निकुंजान्ते गता लिंगं तु शूलिनः।
ददर्श तृणधान्यादिच्छन्नं गुल्मादिमध्यगम् ॥१४॥
ततस्तस्योपरि स्थित्वा सुस्राव सुमहत्पयः।
तत्र दैवात् स वै व्याघ्रो भ्रमँस्त्वरित आययौ ॥१५॥
दृष्ट्वा तां नन्दिनीं व्याघ्रः प्रजग्राह ततस्तु सा।
गोष्ठे बद्धं स्वकं वत्समतृणादं पयःपरम् ॥१६॥
सस्मृत्य दुःखिता दीना करुणं पर्यदेवयत्।
अहोऽहं केन पापेन त्यक्त्वा बालं तु गोष्ठगम् ॥१७॥
मरणार्थं व्याघ्रमुखे पतिता शंकरोऽवतु।
येन सत्येन भक्त्या ते स्नपनाय तृणाय च ॥१८॥

आगता तेन सत्येन भूयान्मे सुतसंगमः।
व्याघ्रः श्रुत्वा तामुवाच त्यज वृथा प्रलापकान् ॥१९॥
इष्टदेवं स्वर्गदं त्वं स्मर सौख्यं ततो भवेत्।
अवश्यं मरणं तेऽस्ति यतोऽस्ति वशगा मम ॥२०॥
धेनुः प्राह शृणु व्याघ्र नात्मानं विलपाम्यहम्।
शंभुपूजां विधायैव मृत्युर्मे मोक्षदो यतः ॥२१॥
वत्सो मे गोकुले बद्धः स्मरमाणो मदागमम्।
सन्तिष्ठते पयोवृत्तिः कथं स्यात् स मया विना ॥२२॥
तस्मान्मुञ्च महाव्याघ्र मामद्य सुतवत्सलाम्।
सखीजनस्य तं दत्वा समागच्छामि तेऽन्तिकम् ॥२३॥
व्याघ्र उवाच या मृत्योर्मुखान्निष्क्रम्य याति सा।
पुनर्नैव समागच्छेत् तस्मात् त्वां भक्षयामि ॥२४॥
नन्दिन्युवाच शपथैरागमिष्यामि तेऽन्तिकम्।
यत्पापं ब्रह्महत्यायां मातापित्रोश्च वञ्चने ॥२५॥
गुरोः साधोर्वञ्चने च पत्युः साध्व्याश्च वञ्चने।
तेन पापेन लिप्यामि नाऽऽगच्छामि पुनर्यदि ॥२६॥
विश्वासघातिनां पापं कृतघ्नानां च यद्भवेत्।
व्रतभंगप्रकर्तॄणां देवखण्डनकारिणाम् ॥२७॥
निन्दकानां जीविकाहारिणां पापं च यद्भवेत्।
तेन पापेन लिप्यामि नाऽऽगच्छामि पुनर्यदि ॥२८॥
एवं शपथान् व्याघ्रः स श्रुत्वा विस्मयतोऽब्रवीत्।
यद्येवं तद्गृहं गच्छ वीक्षयस्व निजात्मजम् ॥२९॥
सखीनामर्पयित्वाऽथ भूय आगमनं कुरु।
इत्युक्ता रंभमाणा सा ययौ वत्सं त्वरान्विता ॥३०॥
अथाऽकालाऽऽगतां दृष्ट्वा रंभमाणां स्वमातरम्।
वत्सः प्रपच्छ कस्मात् त्वमद्याऽकाले समागता ॥३१॥
उद्भ्रान्तमानसाः कस्माद् बाष्पक्लिन्नानना कुतः।
माता प्राह पयःपानं कुरु पश्चाद् वदामि ते ॥३२॥
वत्सः पपौ पयः पूर्णे मूर्ध्न्याघ्रातस्तया मुहुः।
आलीढश्च शनैरुक्तो व्याघ्रवृत्तान्त एव च ॥३३॥
अहं गता वने त्वद्य व्याघ्रेणासादिता बलात्।
स मया प्रार्थितो व्याघ्रो भक्षमाणो नखायुधः ॥३४॥
शपथैरागमिष्यामि गोष्ठे संवीक्ष्य बालकम्।
साऽहं तेन विनिर्मुक्ता तवार्थे शपथैः सुत ॥३५॥
अथ तत्र गमिष्यामि दत्वा त्वामन्यधेनवे।
सुखी जीव प्रिय वत्स भोजितो हृष्टभाषितः ॥३६॥
वत्साऽऽहाहं च तत्रैव यास्यामि यत्र गच्छसि।
श्लाघ्यं हि मरणं सम्यङ् मातुरग्रे ममाऽधुना ॥३७॥
एकाकिनाऽपि मर्तव्यं त्वया हीनेन वै मया।
त्वदग्रतो हि मर्तव्यं स्वर्गदं मे भविष्यति ॥३८॥
यदि मातस्त्वया सार्धं व्याघ्रो मां सूदयिष्यति।
या गतिर्मातृभक्तानां सा मे नूनं भविष्यति ॥३९॥
अथवा शपथैश्चाहं यामि त्वमत्र तिष्ठ वै।
नास्ति मातृसमो बन्धुर्बालानां क्षीरजीविनाम् ॥४०॥
नास्ति मातृसमो नाथो नास्ति मातृसमा गतिः।
नास्ति मातृसमः पूज्यो नास्ति मातृसमः सखा ॥४१॥
नास्ति मातृसमो देवस्त्विह लोके परत्र च।
एवं सेवा सदा मातुः कर्तव्या भक्तिरुत्तमा ॥४२॥
मातृसेवां परं धर्ममनुतिष्ठन्ति ये सुताः।
गतिं ते परमां यान्ति मात्राशीर्वादलक्षिताः ॥४३॥
तस्मादहं गमिष्यामि त्वं तु तिष्ठाऽत्र गोष्ठके।
आत्मप्राणैस्तव प्राणान् रक्षयिष्याम्यसंशयम् ॥४४॥
पुत्रवाक्यं धर्मयुक्तं श्रुत्वोवाच तु नन्दिनी।
ममैव विहितो मृत्युर्न ते पुत्राऽद्य वासरे ॥४५॥
तत्कथं मम जीवं त्वं रक्षस्यसुभिरात्मनः।
मातुर्वाक्यमनुष्ठाय प्रमादं मा समाचर ॥४६॥
लोभात् संजायते नाशस्त्विह लोके परत्र च।
लोभात्प्रमादाद्विश्वासाज्जनो वै बध्यते त्रिभिः ॥४७॥
तस्माल्लोभस्त्वया पुत्र मा कार्यो गमनाय वै।
आत्मा पुत्र त्वया रक्ष्यः सर्वदैव प्रयत्नतः ॥४८॥
नैकाकिना प्रगन्तव्यं यूथं त्यक्त्वा निजं क्वचित्।
एवं संभाष्य तं लक्ष्मि! मुहुस्तमवलिह्य वै ॥४९॥
शोकबाष्पसमायुक्ता सखीमध्येऽभवत् क्षणम्।
उवाच बहुले! चम्पे! वसुधारे! घटस्रवे! ॥५०॥
हंसनादे! श्रियानन्दे। शुभक्षीरे! महोदये!।
तथाऽन्या धेनवः सर्वाः श्रुत्वा कुर्वन्तु मद्वचः ॥५१॥
अद्य व्याघ्रेण निकटे भक्ष्यार्थं गृहीताऽस्म्यहम्।
प्राप्ता युष्मद्दर्शनार्थं सुतस्य दर्शनाय च ॥५२॥
शपथैः कृच्छ्राच्चायाता दुष्टः पुत्रः सुभाषितः।
शासितो भवतीनां च प्रदत्तः पुत्रको मया ॥५३॥
ज्ञानाऽज्ञानकृतं यद्वै भवतीनां तु दुष्कृतम्।
क्षान्त्वाऽनाथोदुग्धपो मे बालो रक्ष्यः सदा प्रियाः ॥५४॥
मातृशोकाभिसन्तप्तः पाल्यः सर्वाभिरेव सः।
अहं तत्र गमिष्यामि स व्याघ्रो यत्र वर्तते ॥५५॥
अपश्चिमः प्रणामोऽयं सर्वासां विहितो मया।
श्रुत्वा तद् धेनवः प्राहुर्न गन्तव्यं हि नन्दिनि! ॥५६॥

आपद्धर्मे शपथस्तु मृषा कर्तव्य एव यत् ।
पापं नास्ति मृषावक्तुः प्राणनाशे ह्युपस्थिते ॥५७॥
विवाहे नर्मणि नार्यां प्राणापदि धनापदि ।
अनृतं नहि पापाय धर्मः प्रोक्तः स रक्षकः ॥५८॥
पालयस्व निजं पुत्रं व्रजाऽस्माभिर्निजं गृहम् ।
श्रुत्वा ता नन्दिनी प्राह परप्राणस्य रक्षणे ॥५९॥
पश्चाऽनृतं शुभो धर्मो न स्वप्राणस्य रक्षणे ।
साधूनां सत्यमेवाऽस्ति धर्मस्तारणकारकः ॥६०॥
सत्ये प्रतिष्ठितो लोको धर्मः सत्ये प्रतिष्ठितः ।
विष्णवे पृथिवीं दत्वा बलिः सत्ये व्यवस्थितः ॥६१॥
प्रतिज्ञाय विहन्याचेत् सर्वघाती भवेद्धि सः ।
धेनवोऽथ तदा प्राहुर्नमस्कार्योऽसि सर्वथा ॥६२॥
सत्यधर्मवती प्राणान् गणयस्येव नैव यत् ।
किं वक्ष्यामो वृषे सत्ये स्थितां त्वां देववन्दिताम् ॥६३॥
तस्माद् गच्छ महापुण्ये न शोच्यः पुत्रकस्त्वया ।
शुभस्ते विजयश्चास्तु धर्मो रक्षतु नन्दिनीम् ॥६४॥
इत्युक्त्वा नन्दिनी सखीजनान् नत्वा शनैः शनैः ।
वनाधिदेवताः सर्वा रक्षन्तु मम पुत्रकम् ॥६५॥
एवं प्रलपमाना सा ययौ व्याघ्रस्थलं तु गौः ।
व्याघ्रो व्यात्ताननश्चास्ते तस्या मार्गावलोककः ॥६६॥
नन्दिनी प्राह तं नत्वा त्वागताऽहं वनेचर ।
सत्यमालम्ब्य धर्मं वै कुरु तृप्तिं प्रभक्षय ॥६७॥
व्याघ्रः प्राह सति ! सत्ये स्थिता विघ्नविवर्जिता ।
त्वां दृष्ट्वाऽहं महापुण्यो भवाम्यद्याऽतिपावनः ॥६८॥
नहि सत्यवतां किञ्चिदशुभं विद्यते क्वचित् ।
अहं भद्रे दुराचारो हिंसकः पापशेवधिः ॥६९॥
त्वां धर्मिष्ठां घातयित्वा प्राप्स्यामि खलु कां गतिम् ।
तस्मात् त्वं मे ज्ञानदानप्रसादं कर्तुमर्हसि ॥७०॥
सत्संगं सफलं लब्ध्वा गतिर्मे शुभदा भवेत् ।
धेनुः प्राह तपः सत्ये, त्रेतायां ध्यानमेव तु, ॥७१॥
द्वापरे यज्ञदानं च, दानमेकं कलौ शुभम् ।
कल्यन्ते तु हरेर्नाम तारकं केवलं भवेत् ॥७२॥
सर्वदानोत्तमदानं ह्यभयस्य प्रदानकम् ।
हिंस्राणां तु भवेत् तन्न तस्माच्छ्रीहरिकीर्तनम् ॥७३॥
सेवनं श्रीहरेर्वापि शंभोर्वा राधिकापतेः ।
कर्म मोक्षकरं स्याच्च त्वं सदा तत्समाचर ॥७४॥
गहनेऽत्र वने व्याघ्र वर्ततेऽत्र हरस्थलम् ।
तृणच्छन्नं शिवलिंगं नित्यं प्रातः प्रपूजय ॥७५॥
प्रदक्षिणां प्रणामादि कुरु मुक्तिर्भविष्यति ।
इत्युक्त्वा दर्शयामास लिंगं व्याघ्रस्य नन्दिनी ॥७६॥
व्याघ्रो दृष्ट्वा सत्वरं वै यथा राजाऽभवत् पुरा ।
दुर्वासःशापमुक्तोऽभूत् स्मृत्वा प्राह च नन्दिनीम् ॥७७॥
नृपः कलशनामाऽहं हैहयाऽन्वयसंभवः ।
दुर्वाससो मुनेः शापाद् व्याघ्रत्वं समुपागतः ॥७८॥
नन्दिनीधेनुयोगेन शापमुक्तिर्भविष्यति ।
शंकरस्य दर्शनेन पुना राजा भविष्यसि ॥७९॥
इत्यहं पूर्ववृत्तान्तं स्मराम्यद्य शुचिस्त्वदे ! ।
इत्युक्त्वा स प्रणम्यैव गां शिवं तं ननाम च ॥८०॥
पुपूज परया भक्त्या स्नपयामास गौः शिवम् ।
दुग्धेन तु तदा शंभुराविर्भूय जगाद ह ॥८१॥
मम भक्तौ सदा शुद्धौ मुक्त्यर्थं कृष्णमेव वै ।
भजतां श्रीकृष्णनारायणं पतिं हरिं मुदा ॥८२॥
इत्युक्तौ 'श्रीकृष्णनारायणाय स्वामिने नमः' ।
मन्त्रं गृहीत्वा ययतुर्निजं निजं गृहं ततः ॥८३॥
कुटुम्बादिकमुभयोरानन्दं च्चासवत् तदा ।
कालेन मुक्तिमापन्नो कृष्णनारायणाश्रितौ ॥८४॥
विमानेन सुदिव्येन ययतुः कृष्णधाम तौ ।
पठनाच्छ्रवणाच्चास्य भुक्तिं मुक्तिं वृषं लभेत् ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चमत्कारपुरीयकलशाख्यनृपस्य दुर्वाससः शापाद् व्याघ्रत्वं, नन्दिनीधेनुयोगाच्छिवदर्शनान्मुक्तिः, सत्यव्रतस्य प्रभावश्चेतिनिरूपणनामैकोननवत्यधिकचतुश्शततमोऽध्यायः ॥४८९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां त्वन्यां सद्भाग्यसम्पदां प्रदाम् ।
आसीद् राजा वृको नाम सोमवंशसमुद्भवः ॥ १ ॥
तस्य भार्याऽभवत्साध्वी पातिव्रत्यपरायणा ।
तयोः पश्चिमवर्षेषु कन्या त्वेकाऽभवत् तदा ॥ २ ॥
ज्योतिर्विदो जन्मलग्नं दृष्ट्वा प्राहुर्नृपं नृपीम् ।
चित्रासंस्थे रवौ तिथौ चतुर्दश्यां निशाकरे ॥ ३ ॥
या कन्या प्राप्नुयाज्जन्म सा भवेद् विषकन्यका ।
तस्याः पाणेर्ग्राहकः षण्मासेषु निधनं व्रजेत् ॥ ४ ॥
यद्गृहे जन्म चापन्ना तत् स्याद् वैभववर्जितम् ।
सेयं राजँस्तव पुत्री तादृशी विषकन्यका ॥ ५ ॥

पैतृकं श्वशुरीयं च हनिष्यति गृहद्वयम् ।
राजँस्त्यक्त्वा ततस्तां त्वं सदा राज्ये सुखी भव ॥ ६ ॥
यद्वा सा च भवेत् साध्वी यतिनी सांख्ययोगिनी ।
तदा कुलद्वयोद्धारं करिष्यति न संशयः ॥ ७ ॥
अभाग्यानामपि भाग्यं त्यागित्वे परिवर्तते ।
भस्मच्छन्नो यतिश्चूर्णमौषधं श्रेयसे यतः ॥ ८ ॥
यत्र क्वापि समुत्पन्नो यतिर्मणिश्च मौक्तिकम् ।
स्वर्णं कन्यौषधं सर्वे दिव्यतां यान्ति दीक्षया ॥ ९ ॥
तस्माद् यथेष्टं कर्तव्यं रोचते यच्च ते नृप ।
इत्युक्तोऽपि स राजर्षिर्मत्वा भाग्यं स्वपूर्वकृत् ॥१०॥
मार्जयितुमशक्यं तां न वै तत्याज वत्सलः ।
येन येन शरीरेण यद्यत् कर्म करोति यः ॥११॥
यस्यां यस्यामवस्थायां यादृशाद्वेगतश्च यत् ।
तेन तस्यां च तद्भुंक्ते नाऽकृतं प्राप्यते क्वचित् ॥१२॥
पञ्चैतानीह सृज्यन्ते गर्भस्थस्यैव देहिनः ।
आयुः कर्म च वित्तं च विद्या निधनमेव च ॥१३॥
यथा वृक्षेषु वल्लीषु फलानि कुसुमानि च ।
स्वं कालं नातिवर्तन्ते तद्वत्कर्म पुराकृतम् ॥१४॥
यथा धेनुसहस्रेषु वत्सो विदन्ति मातरम् ।
तथैव कोटिमध्यस्थं कर्तारं कर्म विन्दति ॥१५॥
स्वेन पूर्वं कृतं कर्म न कश्चिद् देहवान् भुवि ।
बलेन प्रज्ञया वापि समर्थः कर्तुमन्यथा ॥१६॥
स्वकृतान्युपतिष्ठन्ति सुखदुःखानि देहिनाम् ।
अहंकारममत्वाभ्यां सजते यः स बद्ध्यते ॥१७॥
सुशीघ्रमभिधावन्तं निजं कर्माऽभिधावति ।
शेते सह शयानेन तिष्ठन्तमनुतिष्ठति ॥१८॥
येन यत्रापि भोक्तव्यं सुखं वा दुःखमेव वा ।
नरः स बद्धो रज्ज्वेव बलात्तत्रैव नीयते ॥१९॥
जाग्रतां स्वपतां वापि प्रजल्पतां प्रगच्छताम् ।
कर्म सिषाधयिषूणां प्रतिपादयितामपि ॥२०॥
सर्वस्वार्पणकर्तृणामवश्यमुपतिष्ठति ।
तैलक्षये यथादीपो निर्वाणमधिगच्छति ॥२१॥
कर्मक्षये त्वाशयानां क्षये निर्वाणमृच्छति ।
क्लेशमूला वासना सा. कर्माशया निगद्यते ॥२२॥
तदुत्पन्नफलं दृष्टादृष्टजन्मनि वेधते ।
न मन्त्रा न तपो दानं न तीर्थं न च वाऽऽश्रयः ॥२३॥
समर्था रक्षितुं जन्तुं पूर्वकर्मप्रवाहतः ।
अन्नपानानि जीर्यन्ति भोजनानि दिवानिशम् ॥२४॥
तस्मिन्नेवोदरे गर्भः कथं नाम न जीर्यते ।
तस्माद् गर्भसमं कर्म भोगं विना न नश्यति ॥२५॥
शुभं वा यदि वा पापं स्वकृतं प्राप्यते जनैः ।
तद्वदियं मम पुत्री यथाकर्म समागता ॥२६॥
विषकन्या मम भाग्ये लिखिता पूर्वकर्मभिः ।
तत्तथाऽस्तु दैवदत्तं हेलनीयं न कर्हिचित् ॥२७॥
उपस्थितं तु भोगार्थे समागच्छतु मां प्रति ।
वैभवे बहवो भोगा तन्नाशे तापसी स्थितिः ॥२८॥
उभयत्रापि लाभो मे निर्वाणं च निसर्गतः ।
दैवदत्तं मिलेच्चेद्वै को लाभस्ततत उत्तमः ॥२९॥
पुत्री निमित्तरूपा मे वैराग्येऽपि भविष्यति ।
मम मुक्तौ च तस्याश्च मुक्तिरपि भविष्यति ॥३०॥
अरक्षं तिष्ठति दैवाद् दैवान्नश्यति रक्षितम् ।
दैवाज्जीवत्यनाथोऽपि दैवान्नश्यति नाथवान् ॥३१॥
अतिवार्धक्यसौख्यार्थे पुत्री त्वालम्बनं मम ।
सविषा वा सर्वनाशा कथं त्यजामि चात्मजाम् ॥३२॥
अनाथामबलां त्यक्त्वा कथं स्यां भ्रूणहा भुवि ।
पोष्यत्यागं विधायैव भवेयं याम्यगः कथम् ॥३३॥
आत्मा पुत्री पुत्रतुल्या तदर्थे पृथिवीं त्यजेत् ।
सैव लक्ष्मी मम बाला मम भाग्यादुपागता ॥३४॥
एते स्वार्थपराः सर्वे वदन्तु मनसेप्सितम् ।
मया पुत्री रक्षणीया वैराग्याय निवृत्तये ॥३५॥
कृतं राज्यं बहुसमं दृष्टा भोगा अनन्तकाः ।
पुत्रीमिषेण निर्बन्धः करिष्ये भजनं हरेः ॥३६॥
सर्वं नश्यतु मे शीघ्रं स्वार्था नश्यन्तु विघ्नदाः ।
भक्तिर्मुक्तिः सुता शान्तिः सद्वृत्तिर्मा विनश्यतु ॥३७॥
एवं स निश्चयं कृत्वा नाऽऽत्यजत् कन्यकां निजाम् ।
सापि शर्मवती नित्यं वैराग्येण हि वर्तते ॥३८॥
तस्मात् शर्मवती नाम्ना कृता पित्रा सुखप्रदा ।
अथ सा यौवनं प्राप्ता कृष्णनारायणं सदा ॥३९॥
भजति स्म प्रगे स्नात्वा नमति स्म पितुः पदम् ।
सेवते स्म प्रसूं साध्वी मत्वा पुण्यमनुत्तमम् ॥४०॥
अथ पूर्वकृताद् दैवाद् वृकस्य नृपतेः पुरीम् ।
शत्रवः परितो वृत्त्वा त्वयुद्धयन् बहुवासरान् ॥४१॥
वृको युद्धे हतो दैवाद् दिने तु दशमे यदा ।
तदा लोकास्तदेवोचुरनया विषकन्यया ॥४२॥
राज्ञो राज्यं गतं सर्वं राजाऽपि निहतो रणे ।
उक्तो ज्योतिर्विदा पूर्वं नृपस्तत्याज नैव ताम् ॥४३॥

अधुना बध्यतां त्वेषा निर्यास्यतां पुरादितः ।
अवशिष्टस्य रक्षा स्यादन्यथा नाश एव हि ॥४४॥
कन्या श्रुत्वा प्रजावाणीं निर्ययौ निशिथे सती ।
हाटकेश्वरशंभोश्च क्षेत्रं गत्वा क्षणं स्थिता ॥४५॥
नत्वा शंभुं शोकमग्ना चिन्तयामास वै मृतिम् ।
अथ तस्याः स्मृतिर्जाता पूर्वजन्मसमुद्भवा ॥४६॥
चण्डालत्वे मया पूर्वं गौरेका वितृषीकृता ।
तत्पुण्येन नृपपुत्री सञ्जाताऽस्मि बृकालये ॥४७॥
पूर्वदेहे बहुपुत्रा त्वासं चण्डालभामिनी ।
विगर्हिता च दारिद्र्यकदर्थिता क्षुधार्दिता ॥४८॥
तृषार्दिताऽप्यहं ददौ जलं गवे सुपुष्कलम् ।
तेन पुण्येन संजाता कन्याऽहं भूभृतः खलु ॥४९॥
किन्तु चण्डालपुत्रीत्वे तदा गौरीं तु कानकीम् ।
चोरयित्वा च पाषाणैर्बभंज खण्डशश्च ताम् ॥५०॥
देवालयाद् विनिर्गत्य विक्रयार्थं महापणम् ।
यावद्गतवती तावद्धृता राजभटैरहम् ॥५१॥
ताडिता दण्डिता कारागारे क्षिप्ता ततो मृता ।
पार्वतीमूर्तिभंगेन सञ्जाता विषकन्यका ॥५२॥
मम कर्म मयाऽवश्यं भोक्तव्यमथमेव तु ।
किन्तु जलप्रदानस्य पुण्यं प्राप्तं मया शुभम् ॥५३॥
अथ तत्रोटजां कृत्वा करोमि तप उत्तमम् ।
जलदानं फलदानं यथाशक्ति च सेवनम् ॥५४॥
सतां यतीनां साधुनां गवां धर्मिष्ठयोषिताम् ।
बालानां देवभक्तानां सेवया मोक्षणं भवेत् ॥५५॥
इति कृत्वा तपस्तेपे गौरीं संस्थाप्य भक्तितः ।
व्रतं कृतवती गौर्याः स्नात्वा पूजादि चाचरत् ॥५६॥
एकान्तरोपवासैश्च नृत्यगीतैर्मनोहरैः ।
तोषयामास नित्यं सा ग्रीष्मे पञ्चाग्निसाधना ॥५७॥
शिशिरे जलमध्यस्था वर्षायां जलवृष्टिषु ।
स्थिता पूर्वं फलाहारा पत्राहारा ततः परम् ॥५८॥
शुष्कपर्णादिनी पश्चाज्जलाहारा बभूव सा ।
वाय्वाहारा ततो जाता चात्मारामा ततः परम् ॥५९॥
आकाशशयना त्यक्तकुटीरा च दिगम्बरा ।
बभूव धूलिकामग्ना भूतले भूतलं यथा ॥६०॥
बहुकालो गतस्तस्या योगिन्या योगधर्मतः ।
मुखं वलिभिराक्रान्तं पलितैरङ्कितं शिरः ॥६१॥
कन्याभावेऽपि वर्तन्त्या गौरी तुष्टा बभूव ह ।
अथ तस्याः परीक्षार्थं शची भूत्वा तु पार्वती ॥६२॥
श्वेतं गजं समारुह्य महाराज्ञी समाययौ ।
दधती मुकुटं मूर्ध्नि सेव्यमानाऽप्सरोगणैः ॥६३॥
प्रसन्नवदना शर्मवतीं प्रोवाच सादरम् ।
वरं वृणु यथेष्टं ते ददामि तापसि प्रिये ॥६४॥
अहं भार्या सुरेशस्येन्द्राणी भवामि नामतः ।
स्वयं प्राप्ता दयां कृत्वा दातुं तव तपःफलम् ॥६५॥
भवानी निष्ठुरा कन्ये नाऽद्यापि त्वां प्रपश्यति ।
इति श्रुत्वा रजो देहादुद्धूल्य च कृताञ्जलिः ॥६६॥
नमस्कृत्याऽऽह नाऽहं त्वत्प्रसादं चिन्तये शचि ।
वरं त्वत्तस्तु नेच्छामि नाऽन्यासां देवयोषिताम् ॥६७॥
या देवी शिवकान्ताऽस्ति वरं तस्या वृणोम्यहम् ।
यया .वर्षसहस्राणि शिवार्थं तप्तमेव यत् ॥६८॥
कृष्णवामांगसंभूता प्रकृतिर्या सदाशिवा ।
यया व्याप्तमिदं सर्वं तस्या वरं वृणोम्यहम् ॥६९॥
शच्युवाच तदा कन्यामहं वज्रधरी शची ।
स्वामिन्यहं तु देवानां देवीनामीश्वरी सती ॥७०॥
मया दत्तैर्वरैः सर्वा देव्यो भवन्ति कन्यके ।
त्वं कथं नैवगृह्णासि वरं मत्तः कुतापसि ! ॥७१॥
तन्नूनं वज्रघातेन चूर्णयिष्यामि ते शिरः ।
इतिश्रुत्वा धैर्ययुक्ता कन्या प्राह सुरेश्वरीम् ॥७२॥
स्वामिनी त्वं सुराणां च देवीनामपि तद्गतम् ।
यस्याः प्राप्तं तवैश्वर्यं परां तां तोषयाम्यहम् ॥७३॥
स्वागतं ते मातृतुल्ये पूज्येऽर्चयामि सत्फलैः ।
स्वल्पमप्यपराधं ते न करोमि महेश्वरि ॥७४॥
तथापि वधयोग्यां मां मन्यसे निक्षिपाऽऽयुधम् ।
एवमुक्त्वा शिवां ध्यात्वाऽवाततार हृदम्बरे ॥७५॥
चिन्तयामास च हृदि मरणं वा च दर्शनम् ।
एकं लब्धव्यमेवाऽत्र शच्या वा शिवयोषितः ॥७६॥
अन्यथा ज्वलनं योग्यं सेवयिष्यामि चानलम् ।
तावत् त्वैरावतो जातस्तदा सिंहस्वरूपकः ॥७७॥
शची जाता शिवारूपा ह्यप्सरसस्तु सेविकाः ।
रुद्राण्यो भालचन्द्राश्च शूलहस्ताः शुभाननाः ॥७८॥
शुक्लां शुक्लवृषस्थां पार्वतीं शुक्लाम्बरां हृदि ।
दृष्ट्वा शर्मवती चक्षुरुद्घाट्याऽग्रे व्यलोकयत् ॥७९॥
विषकन्या स्तुतिं चक्रे प्रणिपत्य सगद्गदा ।
'नमस्ते शांकरि रक्षाकरि प्राणातिवल्लभे ॥८०॥
सर्वकामप्रदे सत्ये भक्ताया हृदयंगमे ।
नमस्तेष्टगुणैश्वर्यवत्यै सत्यै नमो नमः ॥८१॥

ध्यायन्ति योगिनस्त्वां चार्चयन्ति स्नेहवस्तुभिः ।
सम्यग्भावात्मकैः पुष्पैरर्चयामि महेश्वरि' ॥८२॥
इत्युक्त्वा प्रणनामाऽथ पार्वती तामुवाच ह ।
परितुष्टाऽस्मि ते पुत्रि वरं प्रार्थय वाञ्छितम् ॥८३॥
विषकन्या तदोवाच सर्वं जानासि चेश्वरि ।
भर्तुरर्थे मया सर्वः कृतोऽयं तपउग्रमः ॥८४॥
तत्किं तेन करिष्यामि साम्प्रतं जरयाऽऽवृता ।
वसाऽत्र पार्वति नित्यं कन्यानां शुभदा भव ॥८५॥
इत्युक्ता पार्वती तथास्त्विति प्राह ततः परम् ।
पस्पर्श पाणिना कन्यां चकार नवयौवनाम् ॥८६॥
उवाचोनषोडशाब्दां दिव्यां चम्पकसदृशीम् ।
वद कन्ये वरारोहे किमिष्यते ततः परम् ॥८७॥
कन्याऽऽह मातः शंभोर्मे दर्शनं कारय प्रभोः ।
सती प्राह समागच्छ कैलासं सिंहसंस्थिता ॥८८॥
इत्युक्ता सा शर्मवती ययौ कैलासमेव तु ।
दृष्ट्वा च शंकरं साध्वी लब्ध्वा मन्त्रं तु वैष्णवम् ॥८९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
कण्ठे च तुलसीमालां गृहीत्वा सात्त्वती तदा ॥९०॥
अभवद् वैष्णवी कन्या नारायणपरायणा ।
अन्ते नारायणं लब्ध्वा पतिं मुक्तिं जगाम सा ॥९१॥
इत्येवं कथितं लक्ष्मि ! शर्मवत्याः शुभावहम् ।
तापस्याः शुक्लचरितं विषकन्यातपः परम् ॥९२॥
पार्वतीनिष्ठया भक्त्या लब्ध्वा शंभोश्च दर्शनम् ।
वैष्णवी परमा भूत्वा ययौ विष्णोस्तु मन्दिरम् ॥९३॥
भाग्यहीना गृहहीना कर्महीनाऽपि या भवेत् ।
तपसाऽऽराधनया च भुक्तिं मुक्तिं लभेत तु ॥९४॥
पठनाच्छ्रवणाच्चास्य तादृशीं सद्गतिं लभेत् ।
भाग्यरेखां सुरेखां च कृत्वा दास्यं हरेर्व्रजेत् ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सौराष्ट्रीयवृकराज्ञः शर्मवत्या विषकन्यायाः पितृराज्यनाशोत्तरं तपः, पूर्वजन्मादिस्मृतिः, गौरीशंभ्वोराराधना, परीक्षा, वरदानम्, शिवाशिवदर्शनम्, कैलासगमनम्, ततो नारायणभक्त्या वैकुण्ठे मोक्षणं, चेतिनिरूपणनामा नवत्यधिकचतुश्शततमोऽध्यायः ॥ ४९० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारपुरे नागनदीतटे ।
मुण्डीरे तु वरे तीर्थे चमत्कारं वदामि ते ॥ १ ॥
समुद्रखाडिकाप्रान्ते विटंकाख्ये पुरे शुभे ।
कुष्ठव्याधियुतो विप्रः शराख्यो यौवनेऽभवत् ॥ २ ॥
शरभार्याऽभवत् साध्वी सुभ्राम्नी शीलशालिनी ।
स्वामिसेवापरा नित्यमिन्द्रियैर्नहि चञ्चला ॥ ३ ॥
कुष्ठितं स्वामिनं चापि पश्यत्येव यथास्मरम् ।
सेवते दासिकारीत्या पत्नीरीत्या मुदा मुदा ॥ ४ ॥
औषधानि विचित्राणि महार्घ्याण्यपि चाददे ।
तदर्थमुपलेपाँश्च पथ्यानि विविधानि च ॥ ५ ॥
तथा भिषग्वरान्नित्यमानयित्वा च सादरम् ।
तदर्थेन गुणस्तस्य यथा स्यात् सा ह्यकारयत् ॥ ६ ॥
यथा यथा स गृह्णाति भेषजानि तथा तथा ।
पूर्वकर्मविपाकेन रोगो व्याप्नोति वर्ष्मणि ॥ ७ ॥
एकदा तस्य चायातोऽतिथिर्विप्रोऽतिमार्गगः ।
तं श्रान्तं च गृहप्राप्तं दृष्ट्वा तस्य प्रिया सती ॥ ८ ॥
अज्ञातं तं गृहिभक्त्या भोजनाद्यैरतोषयत् ।
कृताहारं सुविश्रान्तं तं पप्रच्छ शरो द्विजः ॥ ९ ॥
कुत आगम्यते विप्र ! कुत्र यासि स्थलान्तरे ।
पान्थः प्राह चमत्कारपुरादायामि साम्प्रतम् ॥१०॥
यामि कान्तीपुरीं यत्र निवासो मे सदा द्विज ।
तत्राऽहमभवं कुष्ठी पूर्वकर्मविपाकतः ॥११॥
औषधानि विविधानि सेवितान्यपि सर्वदा ।
कुष्ठो न नश्यति किंचिद् वर्धते तु दिने दिने ॥१२॥
श्रुतं चापि मया वैद्याच्चमत्कारपुरे शुभे ।
सूर्यातीर्थं शुभं त्वास्ते कुष्ठव्याधिविनाशकम् ॥१३॥
मुण्डीरस्वामिनः स्थाने सूर्यदेवस्य मन्दिरम् ।
तत्र गच्छेद् व्रतं कृत्वा स्नायात् सूर्यं प्रपूजयेत् ॥१४॥
तेन कुष्ठो भवेल्लीनश्चमत्कारोऽस्ति दैविकः ।
अथाऽहं द्रव्यमादायाऽगच्छं तीर्थे रविस्थलम् ॥१५॥
नित्यं प्रातः समुत्थाय स्नात्वा पश्यामि भास्करम् ।
पूजयामि यथाशक्ति प्रणमामि स्मरामि च ॥१६॥
सूर्यवारे विशेषेण निराहारो भवामि च ।
करोमि जागरं रात्रौ गीतवादित्रकीर्तनैः ॥१७॥
एवं पूजां व्रतं कुर्वन् यावत्सम्वत्सरं स्थितः ।
ततः सम्वत्सरस्याऽन्ते स्वप्ने मा भास्करोऽब्रवीत् ॥१८॥
प्रसन्नोऽस्मि तव भक्त्या ततः कुष्ठं प्रयातु ते ।
पूर्वजन्मनि देवस्य यतः स्वर्णं हृतं त्वया ॥१९॥
कुष्ठी त्वमत्र संजातः पापं लीनं च तत् तव ।
ओं ह्रां ह्रीं ह्रौं सः सूर्याय नमो रोगविनाशिने ।
एव मुक्त्वा रविस्तत्र जलेनाऽस्नापयच्च माम् ॥२०॥

तावन्निद्रा मम नष्टाऽपश्यं देहं निरोगकम् ।
अहं वै विस्मयं प्राप्तो दृष्ट्वा मां व्याधिवर्जितम् ॥२१॥
तस्मात् त्वं याहि विप्रेन्द्र चमत्कारपुरं शुभम् ।
सूर्यतीर्थे समाश्रित्य वत्सरं सूर्यमर्चय ।
मन्त्रं प्रोक्तं जप मालावर्तनेन दिवानिशम् ॥२२॥
सर्वव्याधिप्रणाशस्ते सूर्यसेवाकृतो भवेत् ।
स्वस्ति तेऽस्तु गमिष्यामि स्वगृहं त्वत्र तोषितः ॥२३॥
इत्युक्त्वा स ययौ विप्रश्चाऽथ द्विजः स कुष्ठभाग् ।
वीक्षांचक्रे निजपत्न्या वक्त्रं दीनो जनो यथा ॥२४॥
पत्नी पतिव्रता साध्वी पान्थोक्तं चान्वमन्यत ।
गन्तव्यं नाथ तत्तीर्थे यत्र सूर्योऽस्ति कुष्ठहा ॥२५॥
अहं त्वया समं तत्र शुश्रूषानिरता सदा ।
स्थास्यामि कः परो लाभः स्वामिनः सेवनं विना ॥२६॥
एवमुक्तः पतिर्विप्रः साध्व्या वित्तेन संयुतः ।
हाटकेश्वरजे क्षेत्रे सम्प्राप्तः सूर्यमन्दिरम् ॥२७॥
दृष्ट्वा सूर्यग्रहक्षेत्रं विशालं तापसाऽन्वितम् ।
तपोमनश्चकाराऽयं वैराग्यं पुण्यतो ययौ ॥२८॥
सुधाम्नीं स ततः प्राह धन्योऽहं त्वं तथा प्रिये ।
तीर्थक्षेत्रं तापसाश्च रविर्दृष्टाः सुपुण्यतः ॥२९॥
मुक्तिर्जाता प्रियेऽस्माकं पुण्यक्षेत्रागमात् खलु ।
मायामोहाद् विनिष्क्रान्ता भजिष्यामो हरिं सदा ॥३०॥
भिक्षावृत्तिं करिष्यामो जीविष्यामो यथातथम् ।
रोगो यातु च मा यातु जन्मरोगो भविष्यति ॥३१॥
भज शान्तिं हरिं साध्वि शान्तिर्मे वर्ततेऽधुना ।
तवापि सर्वदा शान्तिरस्तु मा खिन्नतां व्रज ॥३२॥
अहं निर्वेदमापन्नः पुण्यक्षेत्रागमात् प्रिये ।
त्वं यदि चेच्छसि कान्ते गृहं गन्तुं व्रजाऽधुना ॥३३॥
अहं तीर्थे स्वकं देहं त्यक्त्वा यास्यामि मोक्षणम् ।
इत्युक्त्वा श्रीकृष्णनारायण रक्षेति वै गृणन् ॥३४॥
विप्रश्चकार भजनं पत्नी प्राह च तं तदा ।
अभुक्ते त्वयि नो भुक्तं कदाचित् कान्त वै मया ॥३५॥
एकान्तेऽपि महाभाग न सुप्तं जाग्रति त्वयि ।
विना कान्तस्य चरणं नास्ति त्वन्यत्र मानसम् ॥३६॥
सुखं सर्वं कान्तसेवां विना नान्यत्तु मे हृदि ।
कान्तेन सहिता कान्ता सदा भाग्यवती त्वियम् ॥३७॥
कान्तपुण्येन पुण्याऽहं कथं त्यक्त्वा व्रजाम्यहम् ।
परलोकाय सार्थं त्वां त्यक्त्वा यामि कथं गृहम् ॥३८॥
न गृहं वै शिलाजन्यं किन्तु विवाहमालया ।
प्राप्तं वै परलोकाय चेतनं त्वं गृहं मम ॥३९॥
भोक्तुं विश्रमितुं रन्तुं तापं शमयितुं तथा ।
गृहं सत् कान्तरूपं वै सत्या नार्याः सदाऽस्ति यत् ॥४०॥
आत्मनो मनसस्तन्वाश्चेन्द्रियाणां सुखाप्तये ।
गृहं क्रीतं प्राणद्रव्यार्पणेन स्वामिनामकम् ॥४१॥
तत्र गताऽस्मि नित्यं वै गन्तव्यं नाऽवशिष्यते ।
अगृहिणी कथं यामि त्वया हीना गृहान्तरम् ॥४२॥
तस्मात् त्वया समं नाथ करिष्ये तीर्थसेवनम् ।
देहयात्रां यथालब्धैः करिष्ये तव सेवने ॥४३॥
धर्मपाशविनिर्बद्धाः सत्येनात्मानमालभे ।
सहधर्मवृता पत्नी सहैव तु गमिष्यति ॥४४॥
एवं तस्या विदित्वा स ब्राह्मणो निश्चयं दृढम् ।
अतीव तुष्टो धन्योऽहं यस्येदृशी सती प्रिया ॥४५॥
अथैवं वर्तमानौ तौ दम्पती हरितत्परौ ।
श्रावणे नागनद्यास्तु तटे तत्र महोत्सवे ॥४६॥
लक्षाधिकमनुष्याणां समाजे सूर्यदर्शनम् ।
कर्तुं ययतुः पूजां च शुभां विशेषवस्तुभिः ॥४७॥
जनानां बहुसम्मर्दे विप्रोऽभूद्बाधितस्तदा ।
पतितो जनसम्मर्देऽप्यशक्तो नोत्थितः पुनः ॥४८॥
अशक्ता त्वबला नेतुमूर्ध्वं सम्मर्दकाषता ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥४९॥
इति जापं कृतवती सती साध्वी पतिव्रता ।
'ओं सवित्रे नमः साक्षिरूपिणे परमात्मने' ॥५०॥
इतिजापं कृतवान् स भक्तो विप्रो विरागवान् ।
तावत् तयोः प्ररक्षार्थं कृष्णनारायणो रविः ॥५१॥
समायातावेककाले हस्तेनादाय तावुभौ ।
अम्बरे दिव्यहस्तेन कृत्वा सम्मार्ज्य तावुभौ ॥५२॥
कुष्ठहीनं द्विजं कृत्वा सतीं च दिव्यरूपिणीम् ।
कृत्वा चोभौ शुभं भूयात् पश्यतां तीर्थवासिनाम् ॥५३॥
इत्याशीर्भिर्वर्धयित्वा ददतुर्वरदानकम् ।
सुखिनौ तु सदा भूत्वा चिरं स्थित्वा भुवस्तले ॥५४॥
अन्ते धाम तु वैकुण्ठं दम्पती संप्रयास्यथः ।
इत्युक्त्वा वै शुभां पूजां ताभ्यां समर्पितां तदा ॥५५॥
गृहीत्वा दिव्ययानाभ्यां ततो नारायणावुभौ ।
ययतुर्निजलोकं तौ ब्राह्मणश्च प्रियायुतः ॥५६॥
नवयौवनरूपाढ्यश्चाभवद् देववत्तदा ।
जग्मुराश्चर्यमत्यर्थं लोका नगरवासिनः ॥५७॥

लक्षशो मानवास्तत्र दम्पत्योः पूजनादिकम् ।
चक्रुः पूताः समभवन् तीर्थफलमवाप्य च ॥५८॥
विप्रयोगेन सूर्यस्य कृष्णनारायणस्य च ।
लब्ध्वा तु दर्शनं दिव्यं चमत्कारपुरे शुभे ॥५९॥
सूर्यक्षेत्रे सूर्यगृहे कृतकृत्या विपाप्मकाः ।
संबभूवुर्हरेर्भक्ता भेजिरे श्रीहरिं सदा ॥६०॥
एवं पतिव्रता साध्वी कुष्ठिपतिं प्रसेव्य च ।
याता त्वन्ते हरेर्धाम चमत्कारपुरे पुरा ॥६१॥
एतस्य पठनाच्चाथ श्रवणात् कीर्तनादपि ।
भुक्तिः शुद्धिश्च मुक्तिश्च भवन्त्येव न संशयः ॥६२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सौराष्ट्रीयस्य विटंकपुरस्य कुष्ठिशराख्यविप्रस्य देवद्रव्यचौरस्य चमत्कारपुरे नागमतीनद्यां सूर्यगृहतीर्थकरणात् सूर्यस्य नारायणस्य च दर्शनात् पतिव्रतासुधाम्नीपत्न्या सह मोक्ष इत्यादिनिरूपणनामैकनवत्यधिक-चतुश्शततमोऽध्यायः ॥ ४९१ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि चमत्कारपुरे पक्षौ निपेततुः ।
गरुडस्य पतिव्रतानिन्दया तद् वदामि ते ॥ १ ॥
पुनरतस्याः प्रसादेन संलग्नौ च वदामि ते ।
पुराऽऽसीद् ब्राह्मणो मित्रं गरुडस्य भृगूद्वहः ॥ २ ॥
तस्य कन्या माधवीति नाम्नाऽभूद् गुणमण्डिता ।
अथ तस्या वरार्थाय प्रोवाच गरुडं द्विजः ॥ ३ ॥
मम कन्यासुयोग्यं च वैष्णवं सात्त्वतं शुभम् ।
सदृशं वरमन्वीक्ष येन तस्मै ददाम्यहम् ॥ ४ ॥
गरुडस्तु तदा प्राह समस्तक्षितिमण्डले ।
मम पृष्ठे सुतां त्वां च कृत्वा संभ्रमयाम्यहम् ॥ ५ ॥
ततस्तस्याः कुमार्या वै सदृशं च गुणान्वितम् ।
स्वयं दृष्ट्वा वरं तस्मै देहि भवामि साधनम् ॥ ६ ॥
एवमुक्तोऽथ विप्रः स तत्क्षणात् कन्यया सह ।
आरूढो गारुडं पृष्ठं ययौ द्रष्टुं वरं शुभम् ॥ ७ ॥
यं यं विप्रं कुमारं सा कन्या पश्यति वै हृदा ।
तदा न तस्याश्चित्ते स वर्तते स्म कथंचन ॥ ८ ॥
कुलवान् यो विरूपः स रूपाढ्यो न कुलोत्तमः ।
रूपकुलान्वितः कश्चिद् गुणहीनो विलोकितः ॥ ९ ॥
गुणयुक्तो न धनवान् सधनो न गुणादिमान् ।
सर्वोक्तयुक्तोऽपि कश्चिद् दृष्टो व्यंगो विचिचकः ॥१०॥
अव्यंगश्चोक्तगुणवान् दृष्टो व्यवायमार्गगः ।
एवं काले गते दीर्घे भ्रमतां भूतलेऽन्वहम् ॥११॥
तेषामासीन्मनोवाञ्छा द्रष्टुं नारायणं प्रभुम् ।
ययुः श्वेतं द्वीपधाम ययुश्च बदरीवनम् ॥१२॥
क्षीराब्धिं तु ययुः पश्चाद् वैकुण्ठं ते ययुर्मुदा ।
बलिगृहं ययुश्चापि ययुः कुंकुमवापिकाम् ॥१३॥
भृगुक्षेत्रं ययुर्वृन्दावनं श्रीरंगपर्वतम् ।
महेन्द्रं गन्धमादं च मेरुं स्वर्गं ययुस्तथा ॥१४॥
सत्यलोकं ययुस्तैस्तु दृष्टो वै नारदो मुनिः ।
सान्त्वपूर्वं स च पृष्टो विष्णुं ब्रह्मसनातनम् ॥१५॥
क्व देवः पुण्डरीकाक्षः साम्प्रतं वर्तते मुने ! ।
विष्णोः स्थानानि सर्वाणि वीक्षितानि समन्ततः ॥१६॥
अस्माभिः संप्रहृष्टाभिर्न दृष्टस्तत्र केशवः ।
नारदः प्राह सर्वत्र वर्तते भगवान् सदा ॥१७॥
अशुद्धैश्च भवद्भिस्तु न दृष्टस्तत्र केशवः ।
यन्मनो वासनाहीनं निर्गुणं दिव्यतां गतम् ॥१८॥
तैरेव दृश्यते विष्णुः सकामैर्नहि वीक्ष्यते ।
ततो मानसशुद्ध्यर्थं संवासं कुरुत क्षितौ ॥१९॥
चमत्कारपुरे दिव्ये हाटकेश्वरतीर्थके ।
तत्रैव श्रीकृष्णनारायणो वः सम्मिलिष्यति ॥२०॥
तत्प्राप्त्यर्थं चमत्कारनगरं यात मा चिरम् ।
महासरोवरे तत्र चातुर्मास्ये जनार्दनः ॥२१॥
नागनद्यां जलशायी वर्तते स्म नरायणः ।
अथाऽऽयातास्त्रयस्तत्र जलशायिसरोवरे ॥२२॥
ब्राह्मणं च सुतां क्षेत्रेऽवतारयित्वा शोभने ।
गरुडः प्राह तपसा प्राप्स्यते भगवान् स्वयम् ॥२३॥
कुरुतां तपसा शुद्धिं जपेन पूजया व्रतात् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥२४॥
इत्येवं सततं जापाच्छुद्धिः स्याद् वासनाक्षये ।
इत्युक्त्वा गरुडस्तत्र ययौ नारायणान्तिकम् ॥२५॥
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ।
जपन्तास्ते जलमध्ये निराहारस्तथा च तौ ॥२६॥
पुत्री पिता निराहारौ तेपाते तप उत्तमम् ।
गरुडो बहुवर्षान्ते ददर्श पादसेविकाम् ॥२७॥
पादसंवाहनासक्तां लक्ष्मीं त्वां तन्मुखेक्षणाम् ।
अपरां च तथा वृद्धां लक्ष्मीपार्श्वे निवेशिताम् ॥२८॥
ध्यानस्थां च कृशांगीं च शाण्डिलीं ब्रह्मचारिणीम् ।
अन्यां सुयौवनां तस्याः पार्श्वे ददर्श पक्षिराट् ॥२९॥

अनेकजन्मपापानां हारिणीं नर्मदां सतीम् ।
अपरं पुरुषं वृद्धं शान्तं कृशं च तापसम् ॥३०॥
ददर्श गेरुडस्तत्र मार्कण्डेयं महामुनिम् ।
ताश्च तं च प्रणमँस्तैः सत्कृतो गरुडः शनैः ॥३१॥
ददर्श विष्णुमुन्निद्रं स्मेरास्यं भक्तवत्सलम् ।
पृच्छन्तं कुत आयातः कुशलं प्राह पक्षिराट् ॥३२॥
ममास्ति दयितं मित्रं ब्राह्मणो भृगुवंशजः ।
तस्यास्ति माधवी नाम कन्या वै ब्रह्मचारिणी ॥३३॥
न तस्याः सदृशः कान्तः प्राप्तस्त्रैलोक्यमण्डले ।
तस्यास्तु पुण्डरीकाक्षः पतिः सर्वगुणैर्युतः ॥३४॥
सदृशः पुण्डरीकाक्ष्या मम चित्ते व्यवस्थितः ।
तस्मात् पाणिग्रहं तस्याः स्वीकुरुष्व नरायण ॥३५॥
श्रुत्वा नारायणः प्राह लक्ष्म्यंशा साऽस्ति कन्यका ।
शृणु वैकुण्ठजं पूर्वाख्यानं वदामि तेऽनघ ॥३६॥
एकदा सा महालक्ष्मीर्गर्वं कृतवती सती ।
न मया सदृशी त्वन्या नारायणोऽपि नैव च ॥३७॥
मया कृत्वा समृद्ध्या च सृष्टिः सर्वा सुशोभते ।
मां विना च भवेद्रूक्षं तस्माच्छ्रेष्ठाऽस्मि सर्वथा ॥३८॥
अद्य मया न गन्तव्यं नारायणस्य सन्निधौ ।
आवश्यके स्वयं नारायणश्चात्र मम गृहे ॥३९॥
आगमिष्यति पश्यामि स्नेहमीक्षामि कीदृशम् ।
इति मत्वा न च लक्ष्मीर्ययौ नारायणगृहम् ॥४०॥
जयं च पार्षदं नारायणो ज्ञात्वा ह्युवाच ह ।
लक्ष्मीर्गर्वयुता त्वद्य विद्यते मानिनी यथा ॥४१॥
यद्यागच्छेन्मम द्वारे देयः प्रवेश एव न ।
अथ नारायणं ज्ञात्वा दिव्यदृष्ट्या पराङ्मुखम् ॥४२॥
चिरकाले गते लक्ष्मिर्मानं हित्वा समाययौ ।
जयस्तु पार्षदः प्राह मातर्नाऽऽज्ञाऽस्ति वै हरेः ॥४३॥
हरेर्दासस्तव दासः सदाऽस्मि किन्तु शार्ङ्गिणः ।
आज्ञा पाल्या मया त्वत्र तस्य द्वारे प्रतिष्ठता ॥४४॥
यस्य द्वारे नियुक्तोऽस्मि तदाज्ञा मुख्यतो मता ।
यथेष्टं कुरु मातस्त्वं निरोधः स्वामिना कृतः ॥४५॥
इत्युक्त्वा पतितस्तस्याः पादयोः प्रणयान्वितः ।
निवारिता सा द्वाराच्च तेन दौवारिकेण वै ॥४६॥
तदाऽऽत्मनस्तिरस्कारं मत्वा सती च मानिनी ।
स्मृत्वा हरेः पादपद्मं देहं त्यक्तुं समुद्यता ॥४७॥
तदा रुष्टा त्रिलोक्यां वै गृहलक्ष्मीः स्थले स्थले ।
ज्ञात्वा ब्रह्मा महेशश्च विष्णुर्धर्मश्च भास्करः ॥४८॥
चन्द्रः कामः कुबेरश्च वह्निर्विघ्नेश्वरोऽनिलः ।
ऋषयो मुनयश्चापि मनवश्च महेश्वरः ॥४९॥
समाययू रुदन्तस्ते पद्माया पुरतस्तदा ।
तुष्टुवुश्च महालक्ष्मीं सतीं दीनां हरीश्वरीम् ॥५०॥
क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे ।
शुद्धसत्त्वस्वरूपे च कोपादिपरिवर्जिते ॥५१॥
उपमे सर्वसाध्वीनां देवीनां देवपूजिते ।
त्वया विना जगत् सर्वं मृततुल्यं च निष्फलम् ॥५२॥
सर्वसम्पत्स्वरूपा त्वं सर्वेषां सर्वरूपिणी ।
रासेश्वर्यधिदेवी त्वं त्वत्कलाः सर्वयोषितः ॥५३॥
कैलासे पार्वती त्वं तु क्षीरोदे सिन्धुकन्यका ।
स्वर्गे च स्वर्गलक्ष्मीस्त्वं मर्त्यलक्ष्मीश्च भूतले ॥५४॥
वैकुण्ठे तु महालक्ष्मीः सर्वानने सरस्वती ।
गंगा त्वं तुलसी त्वं च प्रभा त्वं त्वं च पार्वती ॥५५॥
सावित्री माणिकी त्वं च पद्मा त्वं पद्मिनी सती ।
मञ्जुला त्वं भार्गवी च कम्भरा मनसा सती ॥५६॥
वृन्दा हंसा च राधा च मूलप्रकृतिरीश्वरी ।
कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दनकानने ॥५७॥
विरजा चम्पकवने शतशृंगे तु सुन्दरी ।
पद्मावती पद्मवने मालती मालतीवने ॥५८॥
कुन्ददन्ती कुन्दवने सुशीला केतकीवने ।
कदम्बमाला दुर्गा त्वं कदम्बानां तु कानने ॥५९॥
राजलक्ष्मी राजसौधे गृहलक्ष्मीर्गृहे गृहे ।
प्रसीद जगतां मातर्मा मृतिं गच्छ पद्मजे ॥६०॥
इति देवस्तुतिं श्रुत्वा त्यक्त्वा तु रोदनं सती ।
उवाच सुप्रसन्नास्ताँस्तेऽपि शुश्रुवुरादरात् ॥६१॥
त्यजामि देहं न क्रोधान्न वैराग्येण साम्प्रतम् ।
किन्तु त्विदं समालोच्य यदस्ति मरणोत्तरम् ॥६२॥
यस्मिन् सदीशे महति सर्वसाम्ये च निर्गुणे ।
सर्वात्मनि सदानन्दे समता तृणशैलयोः ॥६३॥
भ्रूभंगलीलया लक्ष्मीलक्षं स्रष्टुमलं तु यः ।
भृत्ये स्त्रियां यत्समता किं कार्यं तस्य सेवया ॥६४॥
तत्पत्नीनां प्रधानाऽहं निरस्ता द्वारिणाऽधुना ।
तद्भृत्यभृत्यभृत्येन परिपूर्णेन नेप्सिता ॥६५॥
त्यक्ष्यामि जीवनमहमसौभाग्या च स्वामिनि ।
वह्नौ तु कामनां कृत्वा यथा भद्रं भवेत्तथा ॥६६॥
या स्त्री भर्तुरसौभाग्या साऽसौभाग्या हि सर्वतः ।
शयने भोजने तस्या न सुखं जीवनं वृथा ॥६७॥

यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत्किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽथवा ॥६८॥
यद्भक्तिर्नास्ति कान्ते च सर्वप्रियतमे परे ।
सा शुचिर्धर्महीना च सर्वकर्मविवर्जिता ॥६९॥
पतिर्बन्धुर्गतिर्भर्ता दैवतं गुरुरेव सः ।
सर्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः ॥७०॥
पिता माता सुतो भ्राता क्लिष्टा दातुमिदं धनम् ।
सर्वस्वदाता स्वामी वै मूढानां योषितां सुराः ॥७१॥
काचिदेव तु जानाति महासाध्वी पतिं प्रभुम् ।
अतिसद्वंशजाता हि सुशीला कुलपालिका ॥७२॥
व्रतं चाराधनं दानं सत्यं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥७३॥
अतः किञ्चिन्न वक्ष्यामि निष्ठुरं पतिमीश्वरम् ।
भृत्याऽपराधैर्देवस्य प्राणाँस्त्यक्ष्यामि निश्चितम् ॥७४॥
पतिदोषे महासाध्वी पतिं चाऽनिष्ठुरं वदेत् ।
यदि सोढुमशक्ता च प्राणाँस्त्यजति धर्मतः ॥७५॥
पतिसेवा व्रतं स्त्रीणां पतिसेवा परं तपः ।
पतिसेवा परो धर्मः पतिसेवा सुरार्चनम् ॥७६॥
पतिसेवा परं सत्यं दानतीर्थाऽनुकीर्तनम् ।
सर्वदेवमयः स्वामी सर्वदेवमयः शुचिः ॥७७॥
सवपुण्यस्वरूपश्च पतिरूपी जनार्दनः ।
या सती भर्तुरुच्छिष्टं भुंक्ते पादोदकं सदा ॥७८॥
तस्या दर्शमुपस्पर्शं नित्यं वाञ्छन्ति देवताः ।
ततः सर्वाणि तीर्थानि पुनन्ति पापिनो ह्यघात् ॥७९॥
इत्युक्त्वा सा महासाध्वी रुरोद वै मुहुर्मुहुः ।
उवाच ब्रह्मा भीतश्च भक्तिनम्रात्मकन्धरः ॥८०॥
भविष्यति न भद्रं च जयस्य द्वाररक्षितुः ।
विजयोऽपि सहयोगी तवाऽपराधकर्मणि ॥८१॥
त्वया न शप्तौ तौ मूढौ प्रियाऽपराधभीतया ।
भविष्यतो राक्षसौ तौ सनकादिविनिन्दया ॥८२॥
सापराधं तु धर्मिष्ठः क्षमया न शपेद् यदि ।
सर्वनाशो भवेत्तस्य निश्चितं मा चिरं सति ! ॥८३॥
यदि शप्तुं न शक्तश्च न दण्डं कर्तुमीश्वरः ।
सापराधेऽपि पुरुषे धर्मो दण्डं करोति हि ॥८४॥
सर्वं क्षमस्व हे मातर्गच्छ गच्छ प्रियान्तकम् ।
मां च त्वत्स्वामिनो भक्तं नियोज्यं सृष्टिकर्मणि ॥८५॥
इत्युक्त्वा तां पुरस्कृत्य सार्धं देवैर्मुनीन्द्रकैः ।
शीघ्रं जगाम संस्तोतुं नारायणान्तिकं ह्यतः ॥८६॥

भगवन् देवदेवानां तथाऽन्येषां सुखावह ।
भोगसम्पत्प्रदातस्त्वं गृहाण कमलां सतीम् ॥८७॥
यया सर्वे वयं स्पृद्धा यां विना प्रस्तरा यथा ।
किम्वधिकं हि स्तोतव्यं गृहाण लोकहेतवे ॥८८॥
ब्रह्मणः स्तवनं श्रुत्वा दृष्ट्वा लक्ष्मीं पुरःस्थिताम् ।
रुदतीं नम्रवदनां प्रोवाच कमलोद्भवम् ॥८९॥
सर्वं जानामि सर्वज्ञः सर्वात्मा सर्वपालकः ।
सर्वशास्ता सर्वकर्मफलदाताऽस्मि पद्मज ॥९०॥
भक्ते कलत्रे बन्धौ च सर्वत्र समता मम ।
विशेषतोऽतिमद्भक्तः कलत्रात्पर एव सः ॥९१॥
मद्भक्तौ तव पुत्रौ च द्वारपालौ दुरन्तकौ ।
क्षम मामपराधं च तयोश्च भक्तिपूर्णयोः ॥९२॥
मद्भक्तिपूर्णो बलवान् दैत्येभ्यो न बिभेति च ।
रक्षितो मम चक्रेण भक्तिमाध्वीकदुर्मदः ॥९३॥
किन्तु मया तव स्रष्टावागन्तव्यं तव स्तवात् ।
मया सह प्रबलयोर्मम प्रदासयोरपि ॥९४॥
जीवानां गुणगानार्थं जयस्य विजयस्य च ।
प्रजन्माऽऽवश्यकं तस्मान्निमित्तं हि मया कृतम् ॥९५॥
अथ कालान्तरे सनकादिरोषाद् भविष्यति ।
शृणु त्वन्यत् पृथिव्यामानर्तदेशेऽब्धिसन्निधौ ॥९६॥
चमत्कारपुरे विप्रो नाम्ना शाण्डिल्यसंज्ञकः ।
ममांशः स तपस्तेपे पुत्र्यर्थं भार्यया युतः ॥९७॥
सहस्रवत्सरान्तेऽहमभवं सन्निधौ स्थितः ।
प्रसन्नवदनस्तं च वरदानाय प्राह च ॥९८॥
तस्य भार्या सुतां वव्रे लक्ष्मीतुल्यां गुणान्विताम् ।
तथास्त्विति मया प्रोक्तं ततोऽहमगमं लयम् ॥९९॥
शाण्डिल्यः स सुताप्राप्तिं प्रतीक्षते प्रियायुतः ।
निमित्तं श्वेतदेवाऽत्र लक्ष्मीद्वारा मया कृतम् ॥१००॥
सेयं लक्ष्मीर्मानयुक्ता छायारूपा प्रयातु ताम् ।
पातिव्रत्ये मनाक् दोषं लक्ष्म्यां नेच्छामि सर्वदा ॥१०१॥
सदोषं च शरीरं वै लक्ष्म्याः छायास्वरूपकम् ।
यातु शाण्डिल्यभार्यायां पुत्र्यर्थं वरदानकम् ॥१०२॥
इत्युक्ताश्च सुराः सर्वे लक्ष्मीराश्चर्यमाप्नुयुः ।
नारायणस्य हार्दं वै नैव जानन्ति कश्चन ॥१०३॥
अथ शान्ताश्च तच्छ्रुत्वा लक्ष्मीस्तुष्टा बभूव ह ।
पत्याज्ञया ययौ शीघ्रं छायारूपेण माधवी ॥१०४॥
सेयं शाण्डिल्यपुत्री च माधवीति प्रवर्तते ।
लक्ष्मीं दिव्येन रूपेण जग्राह तत्र श्रीहरिः ॥१०५॥

माधवी च ब्रह्मचर्यपरा स्वसदृशं पतिम् ।
मामेवेच्छति लक्ष्मीशं नान्यं पतिं समिच्छति ॥१०६॥
गरुड त्वं कथां चेमां नैव जानासि मायया ।
आनय त्वं तां समीपे माधवीं मे पतिव्रताम् ॥१०७॥
लक्ष्म्यंशां मानदेहां च ऋषेः पुत्रीं मम प्रियाम् ।
यां च दृष्ट्वा स्वयं पश्चात् प्रकरोमि यथोचितम् ॥१०८॥

एवमुक्तो गरुडस्तामानयामास सन्निधौ ।
विप्रस्तूवाच नत्वा तं भगवन्तं सनातनम् ॥१०९॥
गृहाण कन्यां भगवँस्त्वामेवेच्छति सा सदा ।
भगवाँस्त्वं समायाहीत्युवाच तां सुशृण्वताम् ॥११०॥
लक्ष्मीवन्न्यविशत्पार्श्वे कन्या प्रसन्नमानसा ।
शय्यैकान्ते समाविष्टा दक्षिणे मुरविद्विषः ॥१११॥
अथ कोपपरीतांगी महिषीधर्ममाश्रिता ।
लक्ष्मीरुवाच तां कन्यां सपत्नीति विचिन्त्य च ॥११२॥

यस्मान्मे पुरतः पापे कान्तस्य मम हर्षिता ।
शय्यायां त्वं समाविष्टा लज्जां त्यक्त्वा सुदूरतः ॥११३॥
तस्माद् वृद्धमुखी नूनं विकृता त्वं भविष्यसि ।
श्रुत्वा शोकं तदा कन्या तत्पिताऽपि प्रचक्रतुः ॥११४॥
स्वयं विष्णुर्हरिः प्राह मैवं लक्ष्मीर्भविष्यसि ।
ज्ञाने वृद्धा वृद्धमुखी मता मे ज्ञानवर्धिनी ॥११५॥
ब्रह्मज्ञानपरा मधुविद्या सा माधवी तथा ।
शाण्डिल्यविद्याऽधिष्ठात्री ज्ञानवृद्धा भविष्यति ॥११६॥

इत्युक्ता शाण्डिली भूत्वा माधवी सा हरिप्रिया ।
क्षीरोदे वर्तते नित्यं लक्ष्मीरूपा सुभागिनी ॥११७॥
ब्रह्मचर्यपरा नारायणसेवापरायणा ।
शाण्डिल्यश्च सुतां दत्वा कृतकृत्यो बभूव ह ॥११८॥
गरुडः श्रीहरिं तत्र पप्रच्छ संशयान्वितः ।
नारीणां ब्रह्मचर्ये वै संशयास्पदमेव तु ॥११९॥
विशेषाद् यौवनावस्थाप्राप्तायां श्रद्दधामि न ।
अवश्यं यौवनस्थेन तिर्यग्योनिगतेन च ॥१२०॥

विकारः खलु कर्तव्यो नाऽविकाराय यौवनम् ।
एवं तस्य वचः श्रुत्वा शाण्डिली ब्रह्मचारिणी ॥१२१॥
मौनव्रतधरा किञ्चिन्नोवाच वैष्णवी सती ।
साध्व्या नार्या निन्दया च पक्षिनाथस्य तत्क्षणात् ॥१२२॥
उभौ पक्षौ गतौ नाशं रुण्डाकारोऽथ सोऽभवत् ।
अशक्तश्च तथा गन्तुं पदमात्रमपि क्वचित् ॥१२३॥
हरिः प्राह गरुड ! त्वत्पक्षौ नष्टौ हि निन्दया ।
दूषितं ब्रह्मचर्यं यत् शाण्डिल्यां संशयेन वै ॥१२४॥

तस्मात् त्वं शाण्डिलीं नत्वा प्रसादय सुखी भव ।
गरुडस्तां प्रतुष्टाव ननाम च पुनः पुनः ॥१२५॥
तुष्टा सती शाण्डिली च द्विजं पस्पर्श पाणिना ।
ततोऽस्य पक्ष सञ्जातौ तत्क्षणादेव योजितौ ॥१२६॥
गरुडः श्रीकृष्णनारायणं लक्ष्मीं च शाण्डिलीम् ।
तत्रत्यांश्च प्रणिपत्य शाण्डिल्यं ब्राह्मणं तथा ॥१२७॥
पृष्ठे कृत्वा ययौ क्षेत्रं चमत्कारपुरं शुभम् ।
विन्यस्य तं ब्राह्मणं च गरुडः प्रययौ दिवम् ॥१२८॥
इतिते कथितं लक्ष्मि ! पातिव्रत्यपरायणम् ।
लक्ष्म्यास्ते पूर्ववृत्तान्तं पापतापप्रणाशनम् ॥१२९॥
य इदं शृणुयाद् यद्वा वाचयेच्छ्रावयेत्तथा ।
भुक्तिं मुक्तिं लभेद्धाम्नि दास्यभक्तिं सुदुर्लभाम् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चमत्कारपुरीयविप्रकन्याया माधव्या भगवतो भार्यात्वं, लक्ष्म्या अवताररूपायास्तस्याः शाण्डिलीत्वं नारीणां ब्रह्मचर्यव्रते शंकितस्य गरुडस्य पक्षयोः पतनं, शाण्डिलीप्रसादेन पक्षसहितत्वं, लक्ष्म्याः अवतरणार्थं भगवत्कृताऽवमाननम्, एवमादिनिरूपणनामा द्विनवत्यधिकचतुश्शततमोऽध्यायः ॥४९२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पयोऽब्धौ तु शाण्डिली कमला शुभे ।
नारायणस्य मे सेवां चक्राते पादमर्दनम् ॥ १ ॥
लक्ष्म्या दक्षश्चरणो मे शाण्डिल्या वामको धृतः ।
लक्ष्मीस्तु वामपादार्थं जगाद शाण्डिलीं तदा ॥ २ ॥
देहि मे वामपादं वै सेविकायाः परं धनम् ।
वामा वामांगना वामप्रभागा प्रियभोगिनी ॥ ३ ॥
गृहाण त्वं दक्षपादं वामभागो हि मेऽस्ति यत् ।
नार्या वामस्वरूपत्वं नरस्यार्धांगरूपकम् ॥ ४ ॥
तथैव वर्तमानायाः सौभाग्यं वर्धतेऽनिशम् ।
शाण्डिल्याह न दास्येऽहं दक्षः पूर्वं त्वया धृतः ॥ ५ ॥
स्वधृतस्त्वं कथं त्यक्तुमर्हसि दक्षपत्तलम् ।
वामसेवा मया कार्या न दास्ये त्वां कथंचन ॥ ६ ॥
लक्ष्मीः क्रुद्धाऽभवत् तां चाऽशपत्त्वाश्वमुखी भव ।
शाण्डिल्यप्यशपल्लक्ष्मीं त्वं वै गजमुखी भव ॥ ७ ॥
तादृश्यौ ते शुभे जाते क्षीरोदे विष्णुसन्निधौ ।
शोकं जगाम भगवान् कथमेवं कृतं प्रिये ॥ ८ ॥

अयोग्यशापौ संजातौ परस्परं सुदुस्तरौ ।
अथ ते दुःखिते विष्णुं शेषशायिनमाहतुः ॥ ९ ॥
भगवन् शापमोक्षो नौ यथा स्याच्च तथा कुरु ।
नारायणस्तदा प्राह जातो मदिच्छयैव हि ॥१०॥
शापस्तन्मोक्षणं चापि भविष्यति मदिच्छया ।
अहं पृथ्व्या भारनाशार्थं गमिष्ये भुवस्तलम् ॥११॥
तत्रेयं शाण्डिली मे वै भगिनी संभविष्यति ।
अश्वमुखी त्वं च लक्ष्मीः हस्तिमुखी भविष्यसि ॥१२॥
तत्राऽहं देवकीपुत्रो भविष्यामि प्रभुर्हरिः ।
अथ या सुप्रभानाम्नी वसुदेवप्रियाऽपरा ॥१३॥
तस्यां माधवी जज्ञेऽश्ववक्त्ररूपा तु शाण्डिली ।
तां दृष्ट्वा विकृताकारां सुतां जातां ज सुप्रभा ॥१४॥
वसुदेवसमायुक्ता विषादं परमं गता ।
सा जाता यौवनोपेता सुता तादृङ्मुखान्विता ॥१५॥
न कश्चिद्वरयामास वाजिवक्त्रां विलोक्य ताम् ।
अथ तां भगवान् कृष्णश्चमत्कारपुरं प्रति ॥१६॥
प्रेषयामास तपसे तया तप्तं तपस्तदा ।
ततस्तुष्टिं गतो ब्रह्मा वरार्थं तामुवाच ह ॥१७॥
सा तु वव्रे मुखं नार्या भद्रं सौम्यं सुरूपकम् ।
ब्रह्मा तथास्त्विति प्राह साऽभवद्वै शुभानना ॥१८॥
सुभद्रा नाम विख्याता वीरसूः पतिवल्लभा ।
उपयेमे सुतः पाण्डोर्या पार्थः कृष्णपार्श्वगः ॥१९॥
तस्यां जज्ञे सुतो वीरो योऽभिमन्युरिति स्मृतः ।
पुनर्याता हरेर्धाम कालान्ते वै पतिव्रता ॥२०॥
अथ लक्ष्मीर्गजवक्त्रा ययावानर्तदेशगम् ।
हाटकेश्वरसंज्ञं सत्क्षेत्रं तपश्चकार सा ॥२१॥
ब्रह्माणं तोषयामास तपसा दारुणेन वै ।
तामुवाच ततो ब्रह्मा वर्षान्ते तुष्टिमागतः ॥२२॥
वरं प्रार्थय देवेशि ! यत्ते मनसि वर्तते ।
लक्ष्मीरुवाच वक्त्रं मे प्रभो ! पूर्वाननं वृणे ॥२३॥
ब्रह्मा प्राह तथास्त्वेवं महालक्ष्मीर्भवेति च ।
एवं वरं समागृह्य ययौ सा च शुभानना ॥२४॥
महालक्ष्मीः सुरूपा च क्षीरोदशायिनं प्रति ।
एवं सा माधवी चापि महालक्ष्मीरपीश्वरी ॥२५॥
स्थापिते नगरक्षेत्रे चन्द्रभार्याभिरादरात् ।
पूजयिष्यति सद्भक्त्या महालक्ष्मीं च माधवीम् ॥२६॥
सा भविष्यति सौभाग्ययुक्ता पुत्रवती सती ।
यावत्संवत्सरं तावत्त्वेकभक्ताशनाऽयना ॥२७॥
अक्षारलवणाशा या नारी मां पूजयिष्यति ।
न तस्याः पतिजं दुःखं दौर्भाग्यं वा भविष्यति ॥२८॥
किन्तु सौभाग्यमतुलं सर्वं सम्यग् भविष्यति ।
धनं धान्यं च सौवर्णं सौधं गोधनमाप्यते ॥२९॥
शुचिर्भूत्वा पठेद्भक्त्या वाचयेच्छ्रावयेच्च वा ।
शृणुयाद्वा नरो नारी सुसौभाग्यमवाप्नुयात् ॥३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने अश्वमुख्या माधव्या गजमुख्या लक्ष्म्याश्च कालान्तरे सुभद्रात्वं महालक्ष्मीत्वं चेतिनिरूपणनामा त्रिनवत्यधिकचतुश्शततमोऽध्यायः ॥४९३॥

श्रीनारायण उवाच—

अथाऽन्यां च कथां दिव्यां हाटकेश्वरभूमिजाम् ।
चमत्कारमयीं लक्ष्मि ! शृणु ब्रह्मव्रतान्विताम् ॥ १ ॥
चमत्काराभिधश्चासीन्नृपो यन्नामशोभितम् ।
चमत्कारपुरं नागवतीनद्यास्तटेऽकरोत् ॥ २ ॥
तस्य पुरस्य रक्षार्थं देवतास्तेन निर्मिताः ।
स्थापिता विधिना ताश्च शुभा रक्षन्ति तत्प्रजाः ॥ ३ ॥
अथ तस्य महीपस्य अम्बानाम्न्यभवत् सुता ।
अन्या वृद्धाऽभिधा पुत्री ह्युभे ते गुणमण्डिते ॥ ४ ॥
काशीराजश्चोपयेमे ह्युभे विप्राग्निसन्निधौ ।
कस्यचित्त्वथ कालस्य यवनैस्तूत्तरस्थितैः ॥ ५ ॥
संगरोऽभून्महान् काशीराजश्च निधनं गतः ।
अथाऽम्बा चापि च वृद्धा वैधव्यं प्राप्य दुःखदम् ॥ ६ ॥
पितृगृहं ययतुस्ते हाटकेश्वरभूमिगम् ।
यावद्वर्षशतं चोग्रं कृतवत्यौ तपः परम् ॥ ७ ॥
दुर्गायाः पूजनं नित्यं चक्रतुर्होमपूर्वकम् ।
नाशार्थं पतिशत्रूणां किन्तु दुर्गा तुतोष न ॥ ८ ॥
ततो वैराग्यमासाद्य वाञ्छन्त्यौ स्वतनुक्षयम् ।
मन्त्रैराथर्वणैर्विप्रैः क्षुरिकासूक्तसंभवैः ॥ ९ ॥
छित्वा छित्वा स्वमांसानि मन्त्रपूतानि भक्तितः ।
कारितवत्यौ होमं तु सुसमिद्धे हुताशने ॥१०॥
अग्निकुण्डात्ततस्तस्माच्चतुर्हस्ता शुभानना ।
श्वेतवस्त्रा विनिष्क्रान्ता धाम्ना बालार्कसदृशी ॥११॥
तथाऽन्या चाऽष्टनेत्रास्या तप्तहाटकसन्निभा ।
तस्मात् कुण्डाद् विनिष्क्रान्ता धृतखड्गा भयावहा ॥१२॥
अपराऽपि तथारूपा शक्तिः परमदारुणा ।
तास्तु प्रोचुर्वरार्थं च काशीराजप्रिये ततः ॥१३॥

ऊचतुश्च पतिर्नौ हि काशीराजो इतो रणे।
यवनैर्हि ततस्तेषां क्षयं वृणीमहे यतः ॥१४॥
तथाऽस्त्विति वरं प्राहुस्तदा कुण्डात् सहस्रशः।
निष्क्रान्ताः संख्ययाऽपारा मातरो नैकरूपिकाः ॥१५॥
एका गजमुखा तत्र तथाऽन्या तुरगानना।
सारमेयमुखा चान्या पक्षिराजमुखा परा ॥१६॥
तिर्यग्वपुःस्वरूपाऽन्या वक्त्रैर्मानुषसंभवैः।
त्रिशीर्षाः पञ्चशीर्षाश्च सप्तशीर्षास्तथाऽपराः ॥१७॥
जंघामुखा जघनास्या हृदानना निराननाः।
पार्श्वाननाः पश्चिमास्याः पृष्ठास्याः काश्चनापि च ॥१८॥
एकहस्ता द्विहस्ताश्च दशहस्ता विहस्तकाः।
अन्या विंशतिहस्ताश्च बहुपादा विपादिकाः ॥१९॥
एकपादा ऊर्ध्वपादा एकनेत्रा द्विनेत्रकाः।
बहुनेत्रा गजारूढा हयारूढा वृषस्थिताः ॥२०॥
नरवानरसिंहाजगर्दभव्याघ्रसंस्थिताः।
सर्पगोधाऽऽखुमकरकूर्मकुक्कुटसंस्थिताः ॥२१॥
विहगादिसमारूढा नृत्यन्त्यो हास्यशोभिताः।
ऊर्ध्वकेशा विकेशाश्च गात्रकेशाश्च भूरिशः ॥२२॥
लम्बकेशा वाजिकेशा ह्रस्वदन्त्यस्तथाऽपराः।
विदन्त्यो दीर्घदन्त्यश्च गजदन्त्यो विभीषणाः ॥२३॥
लोहदन्त्यो लम्बकर्ण्यो विकर्ण्यः शूर्पकर्णिकाः।
शंकुकर्ण्यः कुकर्ण्यश्च बहुकर्ण्यः सुकर्णिकाः ॥२४॥
चर्मवस्त्रा विवस्त्राश्च रोमवस्त्रास्तथाऽपराः।
खड्गहस्ताः कुन्तहस्ता बाणपाशधनुर्धराः ॥२५॥
शूलमुद्गरभूशुण्डिप्राशतोमरभूषिताः।
प्रययुस्ता विनाशार्थं यवनानां कुलानि वै ॥२६॥
बालवृद्धसमोपेतं तेषां राष्ट्रं दुरात्मनाम्।
स्त्रीभिश्च सहितं ताभिर्देवताभिः प्रभक्षितम् ॥२७॥
एवं निर्वास्य तद्राष्ट्रं त्वागताः पुनरेव ताः।
चमत्कारपुरं प्राहुर्यवनानां विनाशनम् ॥२८॥
ताभ्यां ता विधवाभ्यां च पूजिताः स्थापिताश्च ताः।
अथोचुस्ता दीयतां नश्चाहारो वास इत्यपि ॥२९॥
महादेवी तदा ताभ्यो ददौ वासं च भोजनम्।
मर्त्यलोकेऽत्र या नार्यो गर्भवत्यः स्वपन्ति च ॥३०॥
सन्ध्याकाले प्रभाते च कामासक्ता भवन्ति च।
स्नानं नैव प्रकुर्वन्ति तद्गर्भो वोऽस्तु भोजनम् ॥३१॥
रुदन्त्यो या विनिर्यान्ति चत्वरेषु वनेषु च।
तासां गर्भस्तु युष्माकं सम्प्रदत्तः प्रभुज्यताम् ॥३२॥

उच्छिष्टा याः प्रसर्पन्ति रमन्ते च स्वपन्ति च।
तासां गर्भः समस्तानां युष्माकं भोजनाय वै ॥३३॥
न षष्ठीजागरो यस्य बालकस्य भविष्यति।
स भविष्यति भोज्याय युष्माकं नात्र संशयः ॥३४॥
न संधास्यति वा यत्र पावकं सूतिकागृहे।
स भविष्यति भोज्याय युष्माकं बालरूपधृक् ॥३५॥
माङ्गल्यैः सम्परित्यक्तं यद्भवेत् सूतिकागृहम्।
तस्मिन्यस्तिष्ठते बालः स युष्माकं प्रकल्पितः ॥३६॥
सन्ध्यायां बालका ये वा स्वपन्त्याकाशदेशगाः।
ते सर्वे भोजनार्थाय युष्माकं सन्निवेदिताः ॥३७॥
यस्य जन्मदिने प्राप्ते वर्षान्ते क्रियते न च।
मांगल्यं तस्य तद्गात्रं युष्माकं परिकल्पितम् ॥३८॥
तैलाभ्यंगं नरः कृत्वा यश्च स्नानं करोति न।
स दत्तो भोजनार्थाय युष्माकं नात्र संशयः ॥३९॥
उच्छिष्टो यः पुमाँस्तिष्ठेद् यो वा चत्वरमध्यगः।
भक्षणीयः स सर्वाभिर्निर्विकल्पेन चेतसा ॥४०॥
रजस्वलां व्रजन् यो वा पुरुषः काममोहितः।
नग्नः शेते तथा स्नाति भक्षणीयः स वो मतः ॥४१॥
दक्षिणाऽभिमुखः शेते निशिथे दधिभक्षकः।
युष्मदमन्ता पुरुषो भक्षणीयो विशेषतः ॥४२॥
इत्येवं क्रूरदेवीनां स्थानानि भक्षणानि च।
तेषां गृहे प्रदत्तानि ततस्तास्तोषमागताः ॥४३॥
ताश्च रक्षन्ति नगरं क्षेत्रं श्रीहाटकेश्वरम्।
अथ पित्रा प्रजानां च चमत्कारेण भूभुजा ॥४४॥
मन्दिरं कारितं रम्यं विशालं सरितस्तटे।
अम्बा पादप्रहारेण भूमिं चक्रे गुहात्मिकाम् ॥४५॥
तस्यां स्वपादुके न्यस्ते त्वम्बया राजकन्यया।
वृद्धया स्थापिते तत्र गुहायां स्वकरेण वै ॥४६॥
अम्बा प्राह ततः सर्वा देवीर्विनयसंयुताः।
इमे मत्पादुके दिव्ये गुहामध्ये गते सदा ॥४७॥
सर्वाभिः सेवनीये च न नेतव्ये बहिः क्वचित्।
या काचित् पादुके धृत्वा निष्क्रमिष्यति मोहतः ॥४८॥
सा दिव्यभावनिर्मुक्ता शृगाली संभविष्यति।
अत्राऽऽगत्य पादुकयोरर्चनं योगिनो जनाः ॥४९॥
करिष्यन्ति तथा बलिं भवतीभ्यो मुदान्विताः।
दास्यन्ति ये च ते सिद्धिमवाप्स्यन्ति सुदुर्लभाम् ॥५०॥
ततः सर्वाश्च ता देव्यो गुहामध्ये व्यवस्थिताः।
परिवार्य मन्दिरे ते पादुके मोक्षदायिके ॥५१॥

ते प्रपूज्य च नार्यो वा नरा वा दूरतः शुभे ।
ताश्च देवीर्नमस्कृत्य प्राप्स्यन्तीष्टमनोरथान् ॥५२॥
प्रयास्यन्ति परां सिद्धिं जन्ममृत्युविवर्जिताम् ।
शंभुना ध्यायमानेन तृतीयनेत्रतः पुरा ॥५३॥
श्वेताम्बरधरा शुभ्रा कन्या प्रकाशिता खलु ।
सा चाम्बास्थापितपादुकार्चने नियता कृता ॥५४॥
अम्बा प्राह तु तां कन्यां तव शिष्यापरम्परा ।
कन्यका दीक्षिता देवीस्वरूपैव न मानवी ॥५५॥
कौमारब्रह्मचर्येण युक्ता स्यात् पूजिकाऽनयोः ।
ततो ददौ रत्नदण्डचामरौ छत्रमुज्ज्वलम् ॥५६॥
मन्त्रं पूजाविधिं शाटीं कण्ठसूत्रं ददौ सती ।
मन्त्रग्रहणकर्त्री या कन्यका सा परम्परा ॥५७॥
कन्यावंशोद्भवः सर्वा भविष्यन्ति हि मन्त्रतः ।
'ओं श्रीं ह्रीं क्लीं अम्बायै नारायण्यै स्वाहा नमः ओम्' ॥५८॥
इतिमन्त्रेण शिष्या वै कन्यकावंश उच्यते ।
तदन्वयसमुत्थायाः कन्यकायाः करेण तु ॥५९॥
पादुकयोर्नरो नारी पूजायाः कारकः खलु ।
कन्यापूजाकारकश्च भवेदतिसुखान्वितः ॥६०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चमत्कारनृपतेः अम्बावृद्धाकन्ययोस्तपोभिरम्बावृद्धापादुकापूजनं कुमारिकावंशकृतमेवेत्यादिनिरूपणनामा चतुर्नवत्यधिकचतुश्शततमोऽध्यायः ॥ ४९४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयिष्ये कथां पातकनाशिनीम् ।
अग्नितीर्थसमुद्भूतां चमत्कारपुरे पुरा ॥ १ ॥
सोमवंशेऽभवद्राजा प्रतीपो नामतो बली ।
तस्य पुत्रद्वयं ज्येष्ठो देवापिः शन्तनुस्ततः ॥ २ ॥
राजा च निधनं प्राप्तो देवापिस्तपसे ययौ ।
प्रजाभिः शन्तनुः राज्ये सत्वरं विनियोजितः ॥ ३ ॥
एवं व्यतिक्रमे जाते शक्रो ववर्ष नैव तु ।
तेन कृच्छ्रं गतो लोकः सर्वोऽपि क्षुत्प्रपीडितः ॥ ४ ॥
सन्त्यक्ताः पतिभिर्नार्यः पुत्राश्चपितृभिर्निजैः ।
मातरश्च तथा पुत्रैर्लोकेष्वन्येषु का कथा ॥ ५ ॥
एवं वर्षत्रये जातं म्रियन्ते मानवादयः ।
दैवयोगात् क्वचित् किञ्चित् कस्यचिद् यदि दृश्यते ॥ ६ ॥
सस्यं सिद्धमसिद्धं वा ह्रियते बलिभिः परैः ।
शुष्काः सर्वे द्रुमा जाता आपगाश्च जलाशयाः ॥ ७ ॥
वस्तुहीनो जनः सर्वो यज्ञहीनोऽतिनास्तिकः ।
व्रतहीना धर्महीना नरा नार्योऽभवँस्तदा ॥ ८ ॥
क्षुधया पीडिताः सर्वे ऋषयस्तु विशेषतः ।
एतस्मिन्नन्तरेऽरण्ये विश्वामित्रो महामुनिः ॥ ९ ॥
चर्मास्थिशेषसर्वांगो बुभुक्षार्त इतस्ततः ।
परिभ्रमँस्ततः प्राप्य कंचिद्ग्रामं विनोदकम् ॥१०॥
मृतमर्त्योद्भवैर्व्याप्तमस्थिशेषैः समन्ततः ।
मृतानां च शवानां च मांसादस्य निवेशनम् ॥११॥
चण्डालस्य गृहं त्वासीद् दुर्गन्धेन समावृतम् ।
तत्राऽपश्यत्सारमेयं मृतं शुष्कं चिरोषितम् ॥१२॥
समादाय ततस्तं च ह्यापद्धर्मपरायणः ।
शुष्कं दण्डेन सन्ताड्य कृत्वा खण्डानि तानि च ॥१३॥
नीत्वा ययौ यत्र देशे जलं काष्ठं च लभ्यते ।
प्रक्षाल्य सलिले तानि श्रपयामास चानले ॥१४॥
आदाय पितॄन् तर्पित्वा यावदग्नौ जुहोति सः ।
तावद् वह्निरशुद्धेस्तु भयेनाऽदृश्यतां गतः ॥१५॥
सर्वत्र पृथिव्यामग्निशालायां हवनस्थले ।
चित्ते कोपं तथा कृत्वा शक्रोपरि विशेषतः ॥१६॥
अथाग्निविगमे होमे नष्टे देवप्रभोजनम् ।
निरुद्धं तेन देवर्षिब्रह्मविष्णुपुरस्सराः ॥१७॥
वह्नेरन्वेषणार्थाय बभ्रमुर्धरणीतलम् ।
अथाऽरण्ये गजो दृष्टः प्रपच्छुस्तं हिमालये ॥१८॥
वह्निर्हव्यप्रभोक्ता चेत् त्वया दृष्टोऽत्र नो वद ।
गजः प्राहाऽत्र संकीर्णे वंशस्तम्बे प्रवर्तते ॥१९॥
गुप्तो भूत्वा प्रविष्टः स दग्धस्तेनाऽहमागतः ।
इत्युक्तास्ते ययुस्तत्र वह्निर्यत्र हि वर्तते ॥२०॥
तावद्वह्निः शशापैनं गजं निर्देशकारकम् ।
गुप्तं मे त्वं निवेदयस्यतो जिह्वा सदा तव ॥२१॥
विपरीता भवत्वेवेत्युक्त्वा स्तम्बाद् विनिर्ययौ ।
देवैः स्तम्बे न वै दृष्टो लग्नाः पृष्ठे दिदृक्षया ॥२२॥
अथ दृष्टः शुको देवैर्भ्रममाणो हिमालये ।
पृष्टश्च शुक ! वह्निं त्वं दृष्टवानत्र चेद् वद ॥२३॥
शुकः प्राह कुलायो मे शम्यामत्र हि वर्तते ।
वर्तन्ते शिशवो मेऽपि वह्निस्तत्र समागतः ॥२४॥
तेन दग्धा वयं सर्वे कृच्छ्रादेव विनिर्गताः ।
तत्र शम्यां गुप्तरूपश्चास्ते वह्निर्विदन्तु तम् ॥२५॥
एवमुक्तस्ततो वह्निः क्रुद्धः शुकं शशाप ह ।
अहं यस्मात् त्वया पक्षिन् देवानां विनिवेदितः ॥२६॥

तस्माच्छुक्र न ते वाणी विस्पष्टा संभविष्यति ।
एवं शप्त्वा शुकं वह्निः सुरैः शम्यां सुमार्गितः ॥२७॥
तावत् ततोऽदृश्यभावं कृत्वा देशान्तरं ययौ ।
पुष्करं तीर्थमासाद्य जलमध्ये तले स्थितः ॥२८॥
देवा ध्यानेन वै दृष्ट्वा मत्स्यं पप्रच्छुरुत्सुकाः ।
वह्निरत्रागतः कुत्र वर्तते वद नः सुरान् ॥२९॥
मत्स्यः प्राह तले चात्र पुष्करे वर्तते हि सः ।
तेन दग्धा वयं तीरे तिष्ठामो दुःखिता ह्यति ॥३०॥
इत्युक्तवन्तं मत्स्यं स शशाप क्रोधितोऽनलः ।
स्वज्ञातिभक्षका मत्स्या भवन्तु सर्वभक्षकाः ॥३१॥
इति शप्त्वा ततः स्थानाद् दुद्राव बहुवेगतः ।
अश्वपट्टसरः प्राप्य सौराष्ट्रे चाऽऽस्थितोऽनलः ॥३२॥
सुरा ज्ञात्वा ध्यानवृत्त्या ययुः कुंकुमवापिकाम् ।
सरस्वतीरगतं कूर्मं पप्रच्छुः वह्निरागतः ! ॥३३॥
चेदत्र वद नः कूर्म! स प्राहाऽत्र जले तले ।
प्रविष्टो वह्निरागत्य दग्धा वयं बहिर्गताः ॥३४॥
देवास्तं द्रष्टुमुत्कण्ठायुक्तास्तत्र तदाऽनलः ।
कूर्मं शशाप ते वंशो वृद्धिं नैव गमिष्यति ॥३५॥
एवं शप्त्वा ततः स्थानाद् देवाऽदर्शनवाञ्छया ।
हाटकेश्वरजे क्षेत्रे नागनद्यां ययौ ततः ॥३६॥
जलाशयं सुगम्भीरं प्रविष्टस्तत्र चाऽऽश्रितः ।
तत्र वह्निप्रवेशेन दग्धा मत्स्याश्च दर्दुराः ॥३७॥
तीरं निर्गत्य यान्तं च देवा गत्वा च दर्दुरम् ।
पप्रच्छुस्तं वह्निरत्र वर्तते वा नवेति वै ॥३८॥
भेकः प्राहात्र गम्भीरे जले वह्निरुपागतः ।
तेन वै जलमध्यस्था दग्धा भूरिजलौकसः ॥३९॥
अहं कृच्छ्रेण निर्गत्य जीवामि देवसंश्रयात् ।
तच्छ्रुत्वा तं जले देवा मार्गयामासुरुत्सुकाः ॥४०॥
वह्निः शशाप तं भेकं देवेभ्यो यन्निवेदितः ।
तस्मात् त्वं भव वै न्यूनं विजिह्वोऽत्र धरातले ॥४१॥
एव मुक्त्वा ततः स्थानाद् यावद्वह्निर्विनिर्गतः ।
तावत् स ब्रह्मणा प्रोक्तो भो भो वह्ने स्थिरो भव ॥४२॥
कथं धावसि गुप्तात्मा देवान् दृष्ट्वा प्रतिस्थलात् ।
त्वमाद्यश्चैव सर्वेषां देवानां वर्तसे मुखम् ॥४३॥
त्वय्याहुतिर्हुता सम्यगादित्यमुपतिष्ठति ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥४४॥
तस्माद् धाता विधाता च त्वमेव जगतां मतः ।
सन्तुष्टे म्रियते विश्वं त्वयि रुष्टे विनश्यति ॥४५॥

सर्वे यज्ञा रसाः सर्वे पाकाः सर्वे त्वयि स्थिताः ।
तवाश्रयेण जीवानि जीवन्ति चान्तरश्वर ॥४६॥
ब्रूहि कस्मात् प्रगुप्तस्त्वं जायसे सुखदो भव ।
वह्निः श्रुत्वा ह्यजं प्राह शृणु गुप्तेस्तु कारणम् ॥४७॥
अनावृष्ट्या महेन्द्रस्य सञ्जातश्चौषधिक्षयः ।
ततोऽस्म्यहं तु मांसेन विश्वामित्रेण योजितः ॥४८॥
अभक्ष्यभक्षणाद्भीतो गुप्तो भवामि नान्यथा ।
ब्रह्माऽऽकर्ण्याऽऽह देवेशं किमर्थं नैव वर्षसि ॥४९॥
इन्द्रः प्राहाऽग्रजं त्यक्त्वा देवापिं भ्रातरं प्रजाः ।
चक्रिरेऽनुजनिं पृथ्वीपतिं शन्तनुमुत्पदम् ॥५०॥
तत्पापेन न वर्षामि क्रमलंघनकारणात् ।
ब्रह्मा प्राह च तत्पापं भुक्तं शन्तनुना यतः ॥५१॥
अकालमृत्यवः सर्वे दुर्भिक्षमरणाः परे ।
शन्तनु क्षुधितश्चास्ते पापं भुक्तं तु तेन वै ॥५२॥
वृष्टिं कुरु महेन्द्र त्वं मम वाक्यात् प्रजाकृते ।
इत्युक्तः पुष्करावर्तान्मेघान् समादिदेश सः ॥५३॥
ववृषुश्च महामेघाः पूरयामासुरम्मयम् ।
ब्रह्मा वह्निं ततः प्राह प्रत्यक्षो भव पावक ॥५४॥
अग्निहोत्रेषु यज्ञेषु विप्राणां हवनेषु च ।
वरं वृणु यथेष्टं ते ददामि हितकाम्यया ॥५५॥
यत्र यत्राऽभवो गुप्तस्तत्तत् तीर्थं त्वदात्मकम् ।
वह्नितीर्थं प्रसिद्धं च पावनं संभविष्यति ॥५६॥
वह्निः प्राह च भगवन्! वर्षत्रयं हि भोजनम् ।
नाप्तवानस्मि कुत्रापि देहि मे भोजनं ततः ॥५७॥
ब्रह्मा विप्रान् समाहूय वह्नेस्तृप्त्यर्थमेव तु ।
वसोर्धाराप्रदानेन घृतस्य धारया मुदा ॥५८॥
तर्पयन्त्वनलं चेत्युवाच ते चक्रिरे तथा ।
वसोर्धाराप्रदानेन वर्षपर्यन्तमेव ह ॥५९॥
ततस्तुष्टिं परां प्राप्य परां पुष्टिं गतोऽनलः ।
यस्माद् भवति सम्पूर्णे पूर्णाहुत्या च धारया ॥६०॥
एवं वह्निं सम्प्रकाश्य वृष्टिं कर्तुं विधाय च ।
ब्रह्माद्या देवताः स्वर्गं ययुस्ततो गजादयः ॥६१॥
ऋष्याश्रमेषु वन्येषु दृष्ट्वा वह्निं प्रकाशितम् ।
ययुः पावकशरणं प्रार्थयामासुरीश्वरम् ॥६२॥
यत्र यत्राऽभवद् वह्निर्येन यत्राऽवलोकितः ।
गजाद्या अनलं प्राहुः प्रभो शापं निवारय ॥६३॥
वह्निः प्राह गजेन्द्रं ते जिह्वा कार्यक्षमाऽस्तु वै ।
नृपवाहनरूपश्च मिष्टान्नं भक्षयिष्यसि ॥६४॥

शुकं प्राह च ते जिह्वा नृपप्रशंसिकाऽस्तु वै ।
भेकं प्राह च ते जिह्वा वृष्टिसूचनदाऽस्त्विति ॥६५॥
मत्स्यं प्राह च ते वंशश्चैकस्माच्छतकोऽधिकः ।
सहस्रान्तश्चैकस्मिन् प्रसवे प्रसवेऽस्तु वै ॥६६॥
कच्छपं प्राह ते चायुः शतवर्षपरं स्थिरम् ।
भवत्वपि भवद्वंशे भगवान् श्रीहरिः स्वयम् ॥६७॥
कार्यवशाज्जन्म लब्ध्वा तारयिष्यति वंशजान् ।
मत्स्यः कूर्मोऽभवत् साक्षाद्भगवान् श्रीहरिः स्वयम् ॥६८॥
गणेशश्च गजास्यो वै तथा लक्ष्मीर्गजानना ।
जातौ श्रीकृष्णरूपौ तौ व्यासपुत्रात्मकः शुकः ॥६९॥
संजातो दर्दुरो राजा कामरूपधरो हरिः ।
सौराष्ट्रे देवनगरे येनाऽऽसीद् वैष्णवं जगत् ॥७०॥
देवनगरराजः स बभूव वैष्णवः परः ।
जाजलिश्चाऽऽगमत् सोमेश्वरं तीर्थे तु चैकदा ॥७१॥
ततश्च रैवतं तीर्थं कृत्वा द्वारवतीं ययौ ।
ततो ययौ चमत्कारपुरं नागनदीतटे ॥७२॥
सुष्वाप स्वप्नदोषेण धातुः प्रस्खलितोऽभवत् ।
कौपीनं च समुत्थाय तेन प्रक्षालितं जले ॥७३॥
भेकी तं भक्ष्यरूपेण निगीलितवती द्रुतम् ।
तस्यां पुत्रः समभवत् तीरे भेकी प्रपीडिता ॥७४॥
समागत्य मृतिं प्राप्ता धीवरेण धृता हि सा ।
उदरस्य प्रदेशश्च तस्या आसीत् प्रफाटितः ॥७५॥
तत्र दृष्टः शुभो बालः श्वसन् संगृह्य तं सुतम् ।
धीवरस्तु ददौ सूर्यसमं राजवराय तम् ॥७६॥
चमत्कारेण राज्ञा स वर्धितो गौर्जरेश्वरः ।
राजाऽभवन् महाभक्तो वैष्णवो विष्णुरूपवान् ॥७७॥
यस्य राज्येऽभवन् सर्वे वैष्णवा मानवादयः ।
दर्दुरेण समुद्रस्य तटे दर्दुरकं पुरम् ॥७८॥
स्थापितं सुविशालं च राजधानीस्वरूपकम् ।
मोहमयं दिवः साम्ये दक्षिणं समृद्धिपूरितम् ॥७९॥
अथ भेकाय वह्निः स द्वितीयं तु वरं ददौ ।
चिरञ्जीवा तव जातिर्भवत्वेवं नवं पुनः ॥८०॥
प्रतिवर्षं नूतनं वै शरीरं प्राग्भवाद् भवेत् ।
पुनर्भूस्तेन वर्षायां जायते भेक एव ह ॥८१॥
इत्येवं कथितं सर्वं सामर्थ्यं वह्निसंस्थितम् ।
विश्वामित्रश्च तं वह्निं तुष्टं दृष्ट्वा तु तत्क्षणम् ॥८२॥
दूरीचकार मांसं तत्सारमेयमशुद्धकम् ।
उपवासं तदा चक्रे तावत् तत्र महाजनः ॥८३॥
व्रीहीन् त्रैवार्षिकान् भूमेः खनित्वा भूदरस्थितान् ।
समादाय ययौ दैवात् ददौ तस्मै महर्षये ॥८४॥
स्नात्वा शुद्धिं परां कृत्वा कृत्वा होमं चिदम्बरे ।
आकाशवपुषि कृष्णे बुभुजे दैवमालितम् ॥८५॥
अथ यात्रां स निर्वर्त्य ययौ तीर्थार्थमेव च ।
श्रवणात्पठनाच्चास्य पापप्रज्वालनं भवेत् ॥८६॥
धर्मे श्रद्धा भवेच्चापि वह्नेः प्रसन्नता भवेत् ।
पावनं मानसं भूत्वा भक्तियोग्यं भवेत् प्रिये ॥८७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ज्येष्ठं विहायाऽनुजस्य राज्याभिषेके वृष्ट्यभावे विश्वामित्र-हुतमांससंसर्गेण दोषभीतवह्नेरन्वेषकाणां देवानां सन्देशप्रदगजशुकपुष्करमत्स्यकूर्मभेकानां वह्नेः शापश्चानुग्रहश्चेत्यादिकथननामा पञ्चनवत्य-धिकचतुश्शततमोऽध्यायः ॥४९५॥

श्रीनारायण उवाच—

शृणु लक्ष्म्यभवद् राजा ह्यजापालाभिधो महान् ।
साकेतविषये श्रीमानचिन्तयत् स पुनः पुनः ॥ १ ॥
मया तत्कर्म कर्तव्यं यदन्यैरिह भूमिपैः ।
न कृतं न करिष्यन्ति ये भविष्यन्त्यतः परम् ॥ २ ॥
प्रजानां पालनं शश्वत् करादानं विना न वै ।
करादानेन सैन्यादिपोषणं भवति ध्रुवम् ॥ ३ ॥
करादानेन राष्ट्रस्य मनःक्षोभः प्रजायते ।
तस्मान्मया विना सैन्यं तपःशक्त्या स्वराष्ट्रकम् ॥ ४ ॥
रक्षणीयं विचिन्त्यैवं वशिष्ठं समुवाच सः ।
मया तपः प्रकर्तव्यं प्रजानां हितकाम्यया ॥ ५ ॥
तादृशं परमं क्षेत्रं प्रदर्शय कृपानिधे ।
वशिष्ठः प्राह सौराष्ट्रे क्षेत्रं श्रीहाटकेश्वरम् ॥ ६ ॥
शीघ्रं तपःफलसिद्धिप्रदं तद्वर्तते नृप ।
ब्रह्मचर्यपरो भूत्वा शुचिर्व्रतपरायणः ॥ ७ ॥
पार्वती त्वं पूजयस्व तुष्टा शीघ्रं भविष्यति ।
इत्युक्तः प्रययौ तत्र पार्वतीं समपूजयत् ॥ ८ ॥
तदाराधनया माता तुष्टा प्राह नृपोत्तमम् ।
ब्रूहि तद् येन ते सर्वं प्रकरोमि हृदि स्थितम् ॥ ९ ॥
राजा प्राह प्रजारक्षाकृतेऽस्त्राणि तदर्थकान् ।
मन्त्रान् शस्त्राणि दिव्यानि देहि मे खेचराणि वै ॥१०॥
यानि जानन्ति सर्वासां प्रजानामपराधकम् ।
अन्यायं पारदार्यादि चौर्यादि मानवा इव ॥११॥

मत्पार्श्वस्थानि तान्येव तत्र गत्वाऽपराधिनम्।
दण्डयेयुः पुनः पार्श्वमागच्छेयुर्यथास्थलम् ॥१२॥
मन्त्रग्रामं तथा देहि व्याधीनां निग्रहाय च।
येन प्रजाः स्युर्नीरोगाः पुष्टाः सुखाश्च निर्भयाः ॥१३॥
करजीव्यं गजवाजिसैन्यं मे नास्त्यभीप्सितम्।
पार्वती प्राह राजेन्द्र दुष्करं तव कर्म वै ॥१४॥
तथाप्येवं प्रदास्यामि तपसस्ते फलानुगम्।
ज्ञानयुक्तानि शस्त्राणि मन्त्रग्रामं च तादृशम् ॥१५॥
सर्वे रोगा स्तवाऽधीना भविष्यन्ति महीतले।
यदा त्वं यास्यसि स्वर्गं जले स्थापय तानि वै ॥१६॥

नान्यस्मै तानि कस्मैचिद् दातव्यानि कदाचन।
इत्युक्त्वा प्रददौ देवी दिव्यास्त्रशस्त्रमन्त्रकान् ॥१७॥
राज्ञा यथा प्रार्थितांश्च व्याधिमन्त्रांश्च सर्वशः।
व्याधयो येन गृह्यन्ते मुच्यन्ते स्वेच्छया तथा ॥१८॥
सुखेन परिपाल्यन्ते व्याधयो दृष्टिगोचराः।
एवं देवीप्रसादेन प्राप्य वै सकलं नृपः ॥१९॥

ययौ साकेतनगरीं गजदानादिकं ददौ।
सैन्यं व्यस्तं चकारापि करांश्चाऽमोचयत्तथा ॥२०॥
प्रजानां रक्षणं तानि शस्त्राण्येव दधत्यपि।
दण्डं यथापराधं च प्रकाशं गुप्तमेव वा ॥२१॥
अदृष्टान्यपि शस्त्राणि तानि कुर्वन्ति तत्क्षणात्।
गुप्तोऽपि नाऽपराधोऽस्ति कस्यचित् प्रकटः कुतः ॥२२॥

एवं नियमितं सर्वं राज्ये च परराष्ट्रके।
अन्येषां च महीपानां राज्ये गुप्त्यान्यनेकशः ॥२३॥
कुर्वन्ति चापराधानि तेषां चक्रे यमग्रहम्।
स च वै सकलान् व्याधीन् मन्त्रैः संयम्य यत्नतः ॥२४॥
अजारूपान् स्वयं पश्चाद् यष्टिमादाय रक्षति।
रोगेषु निगृहीतेषु सुखं श्रेष्ठं गताः प्रजाः ॥२५॥
प्रयाताः शून्यतां सर्वे नरकाश्च शनैः शनैः।
न कश्चिन्नरकं याति न च मृत्युपथं नरः ॥२६॥

स्वर्गतुल्याः सत्यतुल्याः पृथ्व्यां प्रजास्तदाऽभवन्।
ततो वैवस्वतो गत्वा ब्रह्माणं प्रार्थयत् सति ॥२७॥
अहं पुरा त्वया ब्रह्मन् धर्माधर्मदिदृक्षया।
समादिष्टोऽस्मि लोकानां निग्रहानुग्रहौ प्रति ॥२८॥
अजापालेन भूपेन तत्सर्वं निष्फलीकृतम्।
तपःशक्त्या प्रजानाथ देवीमाराध्य पार्वतीम् ॥२९॥
नाधयो व्याधयस्तेन प्रवर्तन्ते महीतले।
न पापानि चापराधान् कुर्वन्त्यपि भयात् प्रजाः ॥३०॥

एवं धर्मस्य सन्पन्थाः तेन कृतो हि भूभृता।
तस्य रोधं प्रकुर्वन्तु ब्रह्मविष्णुमहेश्वराः ॥३१॥
श्रुत्वैवं यमराजस्य ब्रह्मा सस्मार शंकरम्।
विष्णुं च तौ समायातौ शंभुं प्राह च विश्वसृट् ॥३२॥
किं कर्तव्यं चात्र कार्ये वद शंभो वद प्रभो।
शंभुराह सुधर्मे वै प्रवृत्तस्य शुभार्थिनः ॥३३॥
कथं निवारणं तत्र क्रियते कश्च निग्रहः।
आयुस्तस्य कियद्दीर्घं वर्तते वद मे यम! ॥३४॥
येन तत्समये प्राप्ते तन्नयामि निजं क्षयम्।
यमः प्राह तदायुश्च षष्टिवर्षसहस्रकम् ॥३५॥

पञ्चवर्षसहस्राणि गतानि तस्य साम्प्रतम्।
तिष्ठन्ति पञ्चपञ्चाशत्सहस्राणि भविष्यकम् ॥३६॥
अहो दीर्घं तदायुश्च विलोक्य शंकरो ययौ।
व्याघरूपं समास्थाय तस्य राज्ञः समीपतः ॥३७॥
मेघगर्जननिर्घोषं गर्जमानो मुहुर्मुहुः।
अजाश्चाथ तं संवीक्ष्य दुद्रुवुः सर्वतो दिशः ॥३८॥

व्याघ्रेण भक्षिताः सर्वे तदा स पृथिवीपतिः।
व्याघ्रं हन्तुं मन्त्रयुक्तान्यस्त्राणि प्रैरयत्ततः ॥३९॥
तानि शस्त्राणि मन्त्रांश्चाऽस्त्राणि जग्राह शंकरः।
स्ववक्त्रेण समस्तानि न चाऽऽयान्ति नृप प्रति ॥४०॥
अस्त्राभावात् ततस्तूर्णं द्वन्द्वयुद्धं चकार सः।
तावद्व्याघ्रोऽभवच्छंभुस्त्रिलोचनस्त्रिशूलवान् ॥४१॥

राजा त्वानन्दमग्नोऽभूत् मुदा तुष्टाव शंकरम्।
अज्ञानादवमानं ते कृतं शंभो क्षमां कुरु ॥४२॥
शंभुः प्राह मया क्षान्तं परितुष्टेन सर्वथा।
त्वया कृतं महत् कर्म नान्यैः पूर्वं कृतं तथा ॥४३॥
प्रजानां रक्षणं चातिमानुषं वै कृतं त्वया।
तस्माद् गच्छ मया सार्धं कैलासं पार्थिवोत्तम ॥४४॥
अनया धर्मपत्न्या ते सहितश्च सुखी भव।
नात्र लोके त्वया स्थेयं विरोधेन यमस्य वै ॥४५॥

देवानां च विरोधेन त्वया स्थेयं न भूतले।
इत्युक्तः स नृपः प्राह करिष्यामि यथाऽऽत्थ मे ॥४६॥
देव्या पूर्वं तु मे प्रोक्तं यदा त्वं पृथिवीतलात्।
प्रयास्यसि तदाऽस्त्राणि शस्त्राणि सर्वमन्त्रकान् ॥४७॥
मह्यं दत्वा प्रयातव्यं तत् कृत्वा यामि शंकर।
शंभुस्तस्मै ददौ तांश्च शस्त्रास्त्रमन्त्रकांस्ततः ॥४८॥
राजा ययौ चमत्कारक्षेत्रं श्रीपार्वतीं प्रति।
ददौ सर्वाणि पार्वत्यै जले न्यस्य प्रपूज्य च ॥४९॥

माघशुक्लचतुर्दश्यां स्नात्वा पार्वतीकुण्डके ।
ययौ राजा तु साकेतं शंभुर्यत्र प्रतीक्षते ॥५०॥
राज्यं पुत्रेऽर्पयित्वैव सभार्यो नृपतिर्ययौ ।
कैलासं शंभुना सार्धं शंभुना भूभृते ततः ॥५१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इतिमन्त्रः प्रदत्तश्च तुलसीमालिकाऽर्पिता ॥५२॥
परमो वैष्णवो भूत्वा सभार्यः श्रीहरिं भजन् ।
गोलोकं प्रययौ लक्ष्मि ! मुक्तो बभूव शाश्वतः ॥५३॥
तस्य पुत्रोऽभवद् राजा दशरथः सुधार्मिकः ।
विमानेन दिवं याति पातालादौ प्रयाति च ॥५४॥
यस्य पुत्रः स्वयं विष्णू रामचन्द्रो बभूव ह ।
कस्यचित्त्वथ कालस्य दैवज्ञैस्तस्य भूपतेः ॥५५॥
कथितं रोहिणी भेदं शनिर्ग्रहः करिष्यति ।
तेन द्वादशवर्षाणि दुर्भिक्षं संभविष्यति ॥५६॥
तथा सम्पत्स्यते सर्वं भूतलं नष्टमानवम् ।
इति श्रुत्वा ययौ राजा तन्मार्गे यत्र वै शनिः ॥५७॥
शक्रदत्तविमानेन शनैश्चरमुपाद्रवत् ।
सज्जं कृत्वा धनुस्तत्र शनैश्चरमुवाच ह ॥५८॥
त्यजैनं रोहिणीमार्गं त्वां हनिष्यामि चान्यथा ।
दिव्यास्त्रमन्त्रयुक्तेन शरेणाऽऽनतपर्वणा ॥५९॥
इति श्रुत्वा शनिः प्राह कस्त्वं रुणत्सि मां दिवि ।
राजा प्राह नृपश्चास्मि अजपुत्रो भुवः पतिः ॥६०॥
नाम्ना दशरथः प्रजारक्षार्थमत्र चागतः ।
शनिः प्राह त्वया साकं विरोधो नास्ति मे क्वचित् ॥६१॥
कथं चापेन वै राजन् मन्मार्गं हन्तुमिच्छसि ।
राजा प्राह शने त्वं रोहिणीमार्गेण गच्छसि ॥६२॥
रोहिणीसंभवं त्वं हि शकटं भेदयिष्यसि ।
तथा जाते नवै वृष्टिरन्नानां संभवो न च ॥६३॥
तेन प्रजाविनाशश्च यज्ञनाशः सुराऽर्दनम् ।
तस्माद् रुद्धस्तवः मार्गः श्रुत्वा शनिरुवाच तम् ॥६४॥
तुष्टोऽहं तव वीर्येण न कृतं केनचित्तु यत् ।
तत् कृतं वै त्वया राजन् वरं वृणु ददामि ते ॥६५॥
तस्मात्प्रजासुखार्थे न भेदयिष्यामि रोहिणीम् ।
राजा प्राह तव वारे तैलाभ्यंगं करोति यः ॥६६॥
तस्य पीडा चाऽऽससाह त्वया कार्या न वै क्वचित् ।
तिलदानं लोहदानं यः करोति दिने तु ते ॥६७॥
वर्षमात्रं त्वया तस्य पीडा कार्या न वै क्वचित् ।
तव गोचरपीडायां शान्तिकर्तुर्जनस्य वै ॥६८॥
सप्त सार्धानि वर्षाणि पीडा कार्या न वै त्वया ।
तथाऽस्त्विति शनिः प्राह विरराम भुवः पतिः ॥६९॥
इदं श्रुत्वा महेन्द्रश्च शीघ्रं ययौ च तत्स्थलम् ।
भूपालं प्राह तुष्टोऽस्मि तव चाऽद्भुतकर्मणा ॥७०॥
वरं मत्तो गृहाणाऽद्य श्रुत्वा राजा ह्युवाच तम् ।
त्वया सह सदा मैत्री महेन्द्र चास्तु मे शुभा ॥७१॥
इन्द्रस्तथाऽस्त्विति प्राह मैत्री मय्यस्तु ते सदा ।
नित्यं सायं प्रगन्तव्यं ममाऽऽलयं त्वया नृप ॥७२॥
इत्युक्त्वा प्रययाविन्द्रो नृपो याति दिवं सदा ।
इन्द्रसदसि संश्रुत्वा गान्धर्वीणां सुगीतिकाः ॥७३॥
नृत्यं तालान्वितं चापि कथा देवर्षिवक्त्रतः ।
दृष्ट्वा श्रुत्वा समायाति चायोध्यां प्रति प्रत्यहम् ॥७४॥
यदा निर्याति शक्रस्य सभातस्तदनन्तरम् ।
दशरथाऽऽसनस्याऽभ्युक्षणं कारयति सदा ॥७५॥
अथैकदा नारदस्तं समुवाच नृपं मुदा ।
राजँस्त्वदासनस्याऽभ्युक्षणं चेन्द्रः करोति हि ॥७६॥
दशरथस्ततो यातः स्वासने संस्थितस्ततः ।
उत्थाय वीक्षयामास स्वासनं दूरमास्थितः ॥७७॥
इन्द्राज्ञया तदा भृत्यः प्रोक्षयामास चासनम् ।
दृष्ट्वा राजा महेन्द्रं च पप्रच्छ तस्य कारणम् ॥७८॥
इन्द्रः प्राह भवानद्यावधि पितृऋणान्वितः ।
अपुत्रस्य गतिर्नास्ति न च स्वर्गं ततः परम् ॥७९॥
यदा पश्यति पुत्रस्य वदनं पुरुषो नृप ।
सोऽनृण्यं समवाप्नोति पितृणां च ततः परम् ॥८०॥
इत्युक्तः स नृपस्तर्हि तनयार्थं सुदुःखवान् ।
वशिष्ठेन ततश्चक्रे पुत्रेष्टिं गृहमागतः ॥८१॥
ज्येष्ठा प्रासूत कौशल्या रामं पुत्रं नरायणम् ।
कलहा केकयी पुत्रं प्रासूत भरतं सुतम् ॥८२॥
शत्रुघ्नलक्ष्मणौ मध्या सुमित्रा सुषुवे सुतौ ।
कन्यां चैकां सुषुवे सा लोमपादाय पुत्रिका ॥८३॥
पुत्रीरूपा प्रदत्ता वै पुत्रहीनाय तारिणी ।
आनृण्यं त्वभवत्तस्य ययौ वैकुण्ठमेव सः ॥८४॥
अथ रामोऽभवद् राजा वनवासोत्तरं ततः ।
दशवर्षसहस्राणि दशवर्षशतानि च ॥८५॥
सीतादेहान्तकालोत्तरकाले राज्यमाकरोत् ।
एकादशसहस्रान्ते देवदूतः समाययौ ॥८६॥
तेनोक्तं देवराजेन प्रेषितोऽहं समागतः ।
तस्माच्छृणु प्रसन्देशं कुरु गृहं च निर्जनम् ॥८७॥

पश्चात्ते कथयिष्येऽहं श्रुत्वा रामो जगाद ह ।
लक्ष्मण निर्जनं कुर्याः देवदूतं शृणोम्यहम् ॥८८॥
यावद्वार्ता क्रियते च तावदन्ये समागताः ।
कृत्वाऽतो वार्तिकामौनं देवदूत उवाच ह ॥८९॥
यथा दंष्ट्राच्युतः सर्पो नागो वा मदवर्जितः ।
आज्ञाहीनस्तथा राजा मानवैः परिभूयते ॥९०॥

के इमेऽत्र समायाता रहस्यवचनेऽपि ते ।
शंकालापमपि त्वं यन्नैकान्ते श्रोतुमिच्छसि ॥९१॥
श्रुत्वा कोपं ततः कृत्वा दृढं स प्राह लक्ष्मणम् ।
निष्कासय बहिस्त्वन्यान् मा प्रवेशय कॉश्चन ॥९२॥
यदि कश्चिन्नरो मोहादागमिष्यति चान्तरम् ।
स्वहस्तेन न सन्देहः सूदयिष्यामि तं द्रुतम् ॥९३॥
न हन्मि तं दृष्टिचरं तदा धर्मगतिर्न मे ।
भवेदिति प्रतिजाने भव स्वस्थोऽत्र वर्तने ॥९४॥

ओमित्युक्त्वा लक्ष्मणश्च सौधद्वारि दृढः स्थितः ।
देवदूतोऽपि रामेण समं चक्रे सुमन्त्रणाम् ॥९५॥
रावणस्य कृतो नाशो धर्मः संस्थापितो भुवि ।
आयुः पूर्णं कृतं चात्र वैकुण्ठं याहि रोचते ॥९६॥
एतस्मिन्नन्तरे प्राप्तो दुर्वासाः क्षुधयाऽन्वितः ।
व्यग्रश्चोवाच कुत्राऽऽस्ते रामः शीघ्रं निवेदय ॥९७॥

गच्छ लक्ष्मण शीघ्रं चान्यथा शापं ददाम्यहम् ।
शापेन वै कुलं सर्वं धक्ष्यामि नात्र संशयः ॥९८॥
लक्ष्मणो विनयं कृत्वा ददौ शान्तिं महर्षये ।
स न शान्तः प्रदातुं च शापमूर्ध्वं करं दधे ॥९९॥
तच्छ्रुत्वा लक्ष्मणः शीघ्रं रामं प्राहाऽऽगममृषेः ।
रामः प्राह द्रुतं प्रवेशय दुर्वाससं मुनिम् ॥१००॥
लक्ष्मणस्तु मुनिं प्रवेशयामास द्रुतं तदा ।
गृहीत्वा च मधुपर्कं रामो ययौ समीपगः ॥१०१॥
ननामाऽर्घ्यं प्रदत्वा च स्वागतं प्रचकार ह ।
धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वं मे गृहमागतः ॥१०२॥
एतद्राज्यं प्रजाश्चेमा विभवोऽनुग्रहात्तव ।
इत्युक्तो मुनिराट् प्राह निराहारोऽस्मि वै व्रते ॥१०३॥
चातुर्मास्ये तदन्ते च समिच्छामीह पारणाम् ।
यच्छ मे भोजनं शीघ्रं रघूत्तमस्ततः ऋषिम् ॥१०४॥

भोजयामास मिष्टान्नैः स्थित्वाऽग्रतः स्वयं प्रभुः ।
मुनिर्भुक्त्वा प्रदत्वाऽऽशीर्वादान् ययौ यथागतः ॥१०५॥
अथ रामं प्राह खड्गं गृहीत्वा लक्ष्मणः स्वयम् ।
विनिपातय खड्गेन मां प्रतिज्ञां च पालय ॥१०६॥

रामः सञ्चिन्त्य तं प्राह विवासो मरणाऽधिकः ।
व्रज लक्ष्मण मुक्तस्त्वं मया देशान्तरं द्रुतम् ॥१०७॥
त्यागो वाऽथ वधो वाऽथ साधूनामुभयं समम् ।
न मया दर्शनं भूयस्त्वया कार्यं च लक्ष्मण ॥१०८॥
इत्युक्तः स ययौ तूर्णं सरयूतीरमेव हि ।
स्नात्वा पद्मासनं कृत्वा ब्रह्मरन्ध्रेण निर्गतः ॥१०९॥

तेजोमयोऽम्बरे यातो दृष्टो रामेण देहिभिः ।
ययुः सर्वे ददृशुश्च पतितं लक्ष्मणं शवम् ॥११०॥
विलेपुर्बान्धवाद्याश्च करुणं पर्यवेदयन् ।
चन्दनादिचितां कृत्वा देहं निदधुस्ते तदा ॥१११॥
आकाशवागभवच्च माऽग्निं देहि रघूत्तम ।
तवाऽयं बान्धवो राम ब्रह्मणः सदनं गतः ॥११२॥
त्वया सुग्रीवभक्तं च विभीषणं प्रभक्तकम् ।
लक्ष्मणं सहनीत्वैव गन्तव्यं धाम चैव ह ॥११३॥

ततो रामो विमानेन पुष्पकेण तु दक्षिणाम् ।
दिशं ययौ सह नीत्वा सुग्रीवं च विभीषणम् ॥११४॥
समागतः स्वनगरीं लक्ष्मणं तद्विमानके ।
कृत्वा कुशं लवं राज्येऽभिषिच्य धाम संययौ ॥११५॥
विभिषणं द्वितीयेन रूपेण च रघूत्तमः ।
ररक्ष राज्यकार्यार्थे लंकायां चिरजीविनम् ॥११६॥

सेतुर्विनाशितो यस्माद् राक्षसा नेयुरित्यतः ।
एतच्छ्रवणपाठाभ्यां भुक्तिर्मुक्तिर्भवेत् प्रिये ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने अजापालमहाराजस्य रोगाणामजामण्डलरूपेण निग्रहो दशरथस्य शनिकृतरोहिणीशकटवेधनिरोधो रामकृत-प्रतिज्ञया वैकुण्ठगमनं चेत्यादि निरूपणनामा षण्णवत्य-धिकचतुश्शततमोऽध्यायः ॥ ४९६ ॥

श्रीनारायण उवाच—

अष्टषष्टिप्रमाणानि तीर्थक्षेत्राणि भूतले ।
कीर्तयामि शृणु लक्ष्मि ! पावनानि हि देहिनाम् ॥ १ ॥
सोमनाथं महत्तीर्थं सौराष्ट्रे रेवताचलः ।
कुंकुमवापिकातीर्थं द्वारिकातीर्थमित्यपि ॥ २ ॥

चमत्कारपुरं तीर्थं नारायणसरोवरम् ।
अर्बुदाद्रिर्महत्तीर्थं पुष्करं तीर्थमुत्तमम् ॥ ३ ॥
हिंगलाजीमहत्तीर्थं हरिद्वारं तथोत्तमम् ।
काश्मीरमण्डलं तीर्थं बद्रिकाश्रममित्यपि ॥ ४ ॥

केदारनाथस्तीर्थं च कुरुक्षेत्रं च पावनम् ।
शालग्रामाभिधं क्षेत्रं कामाक्षी कामरूपके ॥ ५ ॥
नेपाले च पाशुपतं कपिलाश्रममब्धिके ।
मुक्तिनाथं तथा क्षेत्रं महालक्ष्मीनिवासनम् ॥ ६ ॥
तीर्थं हरिहरक्षेत्रं जगन्नाथपुरी तथा ।
गयाक्षेत्रं च साकेतनगरीतीर्थमुत्तमम् ॥ ७ ॥
पर्शुरामप्रकुण्डानि माथुरं मण्डलं तथा ।
सिद्धपुरं महत्तीर्थं प्रयागराज इत्यपि ॥ ८ ॥
काशीक्षेत्रं दण्डकारण्यके श्रीत्र्यम्बकं तथा ।
ओंकारेश्वरतीर्थं च शुक्लतीर्थं तथोत्तमम् ॥ ९ ॥
भृगुक्षेत्रं श्रियास्तीर्थं नर्मदाब्धिसमागमः ।
कल्किभूः संभलतीर्थं चन्द्रभागास्थतुलसी ॥१०॥
अरुणाद्रिर्महत्तीर्थं श्रीशैलस्तीर्थमुत्तमम् ।
काञ्चीद्वयं शुभं तीर्थं चिदम्बरं च पावनम् ॥११॥
जनार्दनकृतं क्षेत्रं भूतपुरीसुमण्डलम् ।
कुमारिकासतीक्षेत्रं धर्मारण्यं च पावनम् ॥१२॥
रामेश्वरं महत्क्षेत्रं मल्लिकार्जुनतीर्थकम् ।
मलयाचलतीर्थं च ताम्रपर्णी च पावनी ॥१३॥
उज्जयिनीमहाकालवनं नैमिषकं वनम् ।
महेन्द्राद्रिर्महत्तीर्थं विशालाक्षीवनं तथा ॥१४॥
कालंजरं महत्क्षेत्रं क्षेत्रं गोकर्णकं तथा ।
अमरकण्टकं तीर्थं सप्तगोदावरं तथा ॥१५॥
विन्ध्याचलीत्रिकूटाख्यं तीर्थं च पक्षितीर्थकम् ।
महाकैलासकं तीर्थं तापीसागरसंगमः ॥१६॥
जामदग्न्याश्रमपर्शुरामक्षेत्रं सुतीर्थकम् ।
पुलहाश्रमतीर्थं च कावेरीतीर्थमित्यपि ॥१७॥
क्षेत्रं वाराहतीर्थं च ऋषभक्षेत्रमित्यपि ।
नृसिंहाचलतीर्थं च मीनाक्षीतीर्थमित्यपि ॥१८॥
पद्मनाभमहाक्षेत्रमष्टषष्टीनि तानि वै ।
लक्ष्मि चानादितीर्थानि सन्त्येवैतानि भूतले ॥१९॥
अन्यान्यपि त्रयस्त्रिंशत्कोटितीर्थानि सन्ति च ।
तारकाः साधवो देवाः ऋषयो मुनयस्तथा ॥२०॥
सत्यः साध्व्यः कुमार्यश्च पातिव्रत्यपरायणाः ।
तापस्यस्तापसा ब्रह्मचर्यव्रतपरायणाः ॥२१॥
धर्मिष्ठाश्च चमत्कृतिकरा यतिवरास्तथा ।
गावश्चान्ये जातिस्मरा भक्ताश्च वैष्णवास्तथा ॥२२॥
शैवाः सौरा गाणपत्या देवीभक्ताश्च शांकराः ।
ब्राह्माश्चान्द्रमसा ईशभक्ता वह्निप्रभक्तकाः ॥२३॥
साधका मान्त्रिकाश्चापि परकायप्रवेशकाः ।
सिद्धिमन्तश्च ये यत्र निवसन्ति विरागिणः ॥२४॥
सन्तः परमहंसाश्च सांख्ययोगिन्य इत्यपि ।
यत्र वसन्ति पुण्यानि तानि तीर्थानि पद्मजे ॥२५॥
भवन्ति पापनाशार्थं समर्थानि जडान्यपि ।
चेतनानि तु तीर्थानि जडतीर्थकराणि वै ॥२६॥
देवस्थानानि सर्वाणि तीर्थान्येव भवन्ति हि ।
गुर्वाश्रमाश्च गुरवस्तीर्थानि सर्वदा प्रिये ॥२७॥
तारयित्वा च संसारात् स्थापयन्त्यैश्वरे पदे ।
मोक्षे वा तानि तीर्थानि पापक्षालनकानि वै ॥२८॥
पतिस्तीर्थं पिता तीर्थं तीर्थं माता पतिव्रता ।
सती तीर्थं च गौस्तीर्थं सन्तस्तीर्थं समुत्तमम् ॥२९॥
गुरुस्तीर्थं हरिस्तीर्थं देवास्तीर्थं च सर्वदा ।
ज्ञानं तीर्थं परं शुद्धं भक्तिस्तीर्थं ततः परम् ॥३०॥
दास्यं तीर्थोत्तमं सेवा तीर्थं तीर्थोत्तमोत्तमम् ।
सेवया लभ्यते सर्वः पुरुषार्थः सुदुर्लभः ॥३१॥
हरेः सेवा सतां सेवा तीर्थं तीर्थोत्तमोत्तमम् ।
अन्यानि यानि तीर्थानि तन्मूलानि भवन्ति वै ॥३२॥
'ओंनमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
एवं जापः परं तीर्थं महावैष्णवकारकम् ॥३३॥
'कृष्णनारायणः स्वामी नान्यः स्वामी मतो मम' ।
इत्येवं त्वर्पणं तीर्थं चात्मनः परिकीर्तितम् ॥३४॥
स्थूलसूक्ष्माऽऽन्तराणामर्पणं दास्यं हि तीर्थकम् ।
यथा कृष्णः प्रसन्नः स्यात्तत्कार्यं तीर्थमेव वै ॥३५॥
नृत्यं तीर्थं त्वप्सरसां तुष्येद् येन जनार्दनः ।
गीतं तीर्थं च नारीणां तुष्येद् येन तु माधवः ॥३६॥
गान्धर्वाणां वाद्यतीर्थं तुष्येद् येन नरायणः ।
कामस्तीर्थं तु गोपीनां तुष्येद् येन व्रजेश्वरः ॥३७॥
ध्यानं तीर्थं योगवतां येन तुष्यति केशवः ।
एवं तीर्थं परं मत्वा ज्ञात्वा श्रीकृष्णमिष्टदम् ॥३८॥
सर्वं तस्मिन् समर्प्यैव मोक्षं सञ्चिनुयाद् बुधः ।
पठनाच्छ्रवणाच्चास्य सर्वतीर्थफलं भवेत् ॥३९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽष्टषष्टितीर्थतदितराऽऽध्यात्मिकतीर्थादिनिरूपणोद्देशादिकथननामा सप्तनवत्यधिकचतुश्शततमोऽध्यायः ॥ ४९७ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! ब्राह्मणानां चमत्कारमयीं कथाम् ।
आनर्ताधिपतिर्भूभृत् प्रसन्नो ब्राह्मणान् वरान् ॥ १ ॥
समाहूय समुवाच प्रणिपत्य मुहुर्मुहुः ।
सुवर्णं वा गजाश्वं वा संक्रान्तौ मकरे रवेः ॥ २ ॥
यस्य यद्रोचते दातुमिच्छामि पृथिवीमपि ।
प्रसादः क्रियतां मह्यं दीनस्य प्रणतस्य च ॥ ३ ॥
विप्रास्त्वाहुर्वयं नित्यं निष्परिग्रहधर्मिणः ।
भिक्षाहारास्तापसाश्च किं गजाश्वसुवर्णकैः ॥ ४ ॥
चमत्कारो नृपः प्राह भवन्तो लोकपावनाः ।
राज्यलक्ष्म्याः प्रशुद्ध्यर्थं दानं गृह्णन्तु पावनाः ॥ ५ ॥
द्वासप्ततिब्राह्मणाश्च वर्तन्तेऽत्र नदीतटे ।
पर्णकुटीर्विधायैव व्योममार्गविहारिणः ॥ ६ ॥
तपःशक्त्या सदा यान्ति नानातीर्थेषु भक्तितः ।
जपं स्नानं तर्पणं च कृत्वा त्वायान्ति वै पुनः ॥ ७ ॥
वाराणस्यां प्रयागे वा पुष्करे नैमिषे तथा ।
अश्वपट्टसरसि प्रभासे केदारके तथा ॥ ८ ॥
क्वचित् प्रयान्ति संक्रान्तौ चातुर्मास्येऽपि यान्ति च ।
अत्र वर्षे च संक्रान्तौ नागवल्यास्तटे द्विजाः ॥ ९ ॥
गृह्णन्तु मम दानं च कुर्वन्तु पावनान् हि नः ।
इत्युक्ता अपि विप्रास्ते विरागाः पुष्करं ययुः ॥१०॥
पञ्चरात्रिनिवासार्थं संक्रान्तौ मकरे रवेः ।
राजा विज्ञाय तत्सर्वं दमयन्तीं प्रियां तदा ॥११॥
प्राह त्वं कनकं भूषा वस्त्राण्यादाय सद्धनम् ।
नागनद्यास्तटं याहि यत्र ब्राह्मणयोषितः ॥१२॥
भूषणादीनि वस्तूनि तासां यच्छ यथेच्छया ।
न तासां पतयोऽस्माकं प्रकुर्वन्ति प्रतिग्रहम् ॥१३॥
स्त्रियोऽवश्यं ग्रहीष्यन्ति दानं भूषणप्रभृति ।
यादृशं यादृशं वाऽपि नारी धत्ते विभूषणम् ॥१४॥
सा तथेति प्रतिज्ञाय बहून्याभरणानि च ।
मणिमुक्ताप्रवालानि कुण्डलानि शुभानि च ॥१५॥
तथा चन्द्रोज्ज्वलान् हारान् नूपुराणि बृहन्ति च ।
इन्द्रनीलमहानीलवैदूर्यखचितानि च ॥१६॥
पद्मरागैस्तथा वज्रैर्माणिक्यैश्च मनोहरैः ।
केयूरैः कंकणैर्दिव्यैः श्रृंखलाहेमसूत्रकैः ॥१७॥
गृहीत्वा नागवत्यां वै स्नातुं संक्रान्तिपर्वणि ।
समायाता तिलमिष्टान्नानि नीत्वा बृहन्ति च ॥१८॥
स्नात्वा तीरे निवेश्यैतन्महाभूषणपर्वतम् ।
प्रतीक्षते च पात्राणि दानस्य तन्नदीतटे ॥१९॥
एतस्मिन्नन्तरे प्राप्तास्तापस्यः कौतुकान्विताः ।
ज्ञात्वा दानार्थमायातां दमयन्तीं नृपप्रियाम् ॥२०॥
कीदृशी राजपत्नी सा किंरूपा किंविभूषणा ।
इतिकौतुकमापन्ना विप्रपत्न्यः समागताः ॥२१॥
आगतास्ता नमश्चक्रे प्राह राज्ञी मनोहरम् ।
मयाऽयं भूषणस्तोम उद्दिश्य गरुडध्वजम् ॥२२॥
कल्पितोऽद्य दिने दानं ब्राह्मणीषु फलप्रदम् ।
तस्माद् गृह्णन्तु तापस्यो मया दत्तानि वाञ्छया ॥२३॥
भूषणानि ह्यनेकानि प्रसादः क्रियतां मम ।
ततश्चैकाऽब्रवीत् तासामेनां मुक्तावलीं मम ॥२४॥
देहि श्रुत्वा नृपपत्न्या प्रक्षाल्य चरणौ स्वयम् ।
दत्ता मुक्तावली तस्यै वस्त्रैर्दिव्यैः समन्विता ॥२५॥
तथाऽन्यायै ददौ हारं हाराकांक्षां विबुध्य सा ।
तृतीयायै कुण्डले च ददौ ज्ञात्वा च तन्मनः ॥२६॥
ततश्च शेषास्तापस्यो जगृहुर्भूषणानि च ।
यानि यानि ददौ तस्यै तस्यै मुदा च तानि च ॥२७॥
यथा यथा प्रगृह्णन्ति तापस्यो भूषणानि ताः ।
तथा तथाऽस्याः संजज्ञे दमयन्त्याः प्रमोदकः ॥२८॥
अन्यानि च प्रचिक्षेप शतशोऽथ सहस्रशः ।
गृह्णन्त्विति कथयित्वा मौनं तस्थौ नृपप्रिया ॥२९॥
गृहीतानि तु सर्वाणि तापसीभिस्ततो ह्यपि ।
न तृप्तिर्जायते तासां राज्ञी तदाह ताः पुनः ॥३०॥
सन्तोषः क्रियतां गत्वा चानयामि पुनः पुनः ।
इत्युक्त्वा प्रययौ तूर्णं गृहीत्वा चाययौ द्रुतम् ॥३१॥
अनन्तानि भूषणानि चाम्बराणि धनानि च ।
ददौ पञ्चाहपर्यन्तं ब्राह्मणीभ्यो मुहुर्मुहुः ॥३२॥
तापस्योऽपि दधुस्तानि वस्त्राणि विविधानि हि ।
भूषणानि च गात्रेषु सस्पृहास्तोषपूर्विकाः ॥३३॥
ऊटजानि धनवस्त्रभूषापूर्णानि चक्रिरे ।
अथ चतस्रो ब्राह्मण्यो वल्कलाजिनशोभिताः ॥३४॥
दानग्रहणं नेच्छन्त्यो न तस्याः पार्श्वमागताः ।
तासां दानस्य लाभार्थं राज्ञी तु पञ्चमे दिने ॥३५॥
भूषणानि महार्हाणि गृहीत्वा ताः ययौ द्रुतम् ।
राज्ञी प्रोवाच ताः सर्वाः प्रसादः क्रियतामिति ॥३६॥
इमानि भूषणार्थाय गृह्णन्तां भूषणानि वै ।
तापस्यस्तु विरागिण्यः पतीच्छानुगताः सदा ॥३७॥

पातिव्रत्यपराः प्राहुः पतीनां नास्ति तन्मनः ।
पत्युराज्ञां विना पत्नी करोति देहशोभनम् ॥३८॥
पापं सा प्राप्नुयात् तस्माद् गृह्णीमो न वयं तव ।
नाऽस्माकं भूषणैः कार्यं भूषिता वल्कलैर्वयम् ॥३९॥
एवं संवदतां तासां तया सार्धं तु तत्क्षणम् ।
चत्वारः पतयः प्राप्ता व्योममार्गेण चाश्रमान् ॥४०॥
शुनःशेपोऽथ शाक्रेयो बोद्धो दान्तश्चतुर्थकः ।
शेषाः सर्वे गतिभ्रंशं प्राप्य भूमार्गमाश्रिताः ॥४१॥
पत्नीनां तृष्णया भूषादानग्रहणदोषतः ।
चत्वारस्ते ऋषिपत्नीः कन्यकाश्च विभूषिताः ॥४२॥
दृष्ट्वा किमिदं किमिदं प्रोचुर्विकृतमाश्रिताः ।
केन दत्वाऽऽभूषणानि यत् तापस्यो विडम्बिताः ॥४३॥
धनवस्त्राणि दत्वा नश्चाश्रमोऽयं विकारितः ।
तदा प्राहुस्तु तापस्यश्चमत्कारनृपस्य वै ॥४४॥
महिषी दमयन्तीयं वर्तते साम्प्रतं तया ।
सम्प्रदत्तानि सर्वासां भूषणान्यम्बराणि च ॥४५॥
अस्माकमपि संप्राप्ता दातुं सेयं प्रतिष्ठति ।
अस्माभिर्न गृहीतानि निषिद्धा सा निवारिता ॥४६॥
इतिश्रुत्वा च तां दृष्ट्वा ब्राह्मणास्तपसः क्षयात् ।
तां शेपुस्ते श्रावयित्वा शृणु लक्ष्मि ! तपोबलम् ॥४७॥
द्वासप्ततिर्वयं राज्ञि ! स्नानार्थं पुष्करे गताः ।
व्योममार्गेण तपसा मनोमारुतरंहसा ॥४८॥
चत्वारस्त इमे प्राप्ता येषां दारैः परिग्रहः ।
न कृतस्तेऽपरे व्योम्नो मार्गाद् भ्रष्टाश्च पुष्करे ॥४९॥
नारीणां च सतीनां तु सतीत्वेन महद्बलम् ।
दानग्रहेण नष्टं तद् वैहायसं बलं यतः ॥५०॥
तपसो वञ्चितोऽस्माकमाश्रमोऽयं त्वया धनैः ।
विभूषणादिदानैश्च तत् त्वं शिला भवाऽत्र वै ॥५१॥
अथ तुष्टाव सा राज्ञी मुक्त्यर्थं च तदा तु ते ।
प्राहुश्चात्र माधवीति शाण्डिली कमलांशजा ॥५२॥
विप्रकन्या समागत्य तवोद्धारं करिष्यति ।
अचिरेणैव कालेन साऽऽगमिष्यति माधवी ॥५३॥
लक्ष्मीरूपा शिलायां सा स्थास्यत्येव नदीतटे ।
शिला कन्यास्वरूपा सा भविष्यति रमा यथा ॥५४॥
शृणु लक्ष्मि ! तत्र कन्यां शिलां ब्राह्मणसन्निधौ ।
तत्क्षणमेव सञ्जातां ज्ञात्वा वृत्तान्तमेव तम् ॥५५॥
राजा तत्र द्रुतं प्राप पत्नीं शुशोच वै द्रुतम् ।
चत्वारो ब्राह्मणा नीत्वा कुटुम्बं व्योमसत्पथा ॥५६॥
ययुर्हिमालयं विघ्नशून्यं स्थलं तपस्विनः ।
राजा शिलां प्रसंस्पृश्य स्मृत्वा स्मृत्वा प्रियागुणान् ॥५७॥
विललाप क्षणं पतिव्रतां श्राद्धं चकार ह ।
तस्या उपरि सौधं च कारयामास पार्थिवः ॥५८॥
स्वयं कर्पूरधूपाद्यैर्वस्त्रकुंकुमचन्दनैः ।
पूजां चकार नित्यं च कारयामास भूसुरैः ॥५९॥
अथ पद्म्यां महीं क्रान्त्वा चाऽष्टषष्टिर्द्विजाः शुभाः ।
आयाता नागनद्यास्ते तीरे श्रान्ताः सुदूरगाः ॥६०॥
दृष्ट्वाऽऽभरणयुक्तांश्च ज्ञात्वा वृत्तान्तमित्यपि ।
विविदुः कारणं व्योम्नः पातस्य दानसंग्रहम् ॥६१॥
दमयन्त्याः शिलाभावं ज्ञातवन्तश्च वै ततः ।
चमत्कारनृपराष्ट्रनाशार्थं जगृहुर्जलम् ॥६२॥
यतश्चास्मद्गतिर्व्योम्नि नाशिता दानलोभतः ।
ब्राह्मणीनां मनो जातं राजसं रागमिश्रितम् ॥६३॥
तत्फलं यातु राजा च राष्ट्रं चेति विचिन्त्यते ।
शापं वक्तुमारभन्ते तावद्वै विप्रयोषितः ॥६४॥
वारयामासुरत्यर्थं शापो देयो न सर्वथा ।
यतो वयं नरेन्द्रस्य भार्यया समलंकृताः ॥६५॥
सुवस्त्रैर्भूषणैर्दिव्यैः श्रद्धापूतेन चेतसा ।
वयं दारिद्र्यदोषेण कर्षिता भवतां गृहे ॥६६॥
न प्राप्तं तु सुखं मर्त्ये वस्त्रभूषादिसंभवम् ।
केवलानां तापसानां परो लोकः सुखप्रदः ॥६७॥
नीचानां विषयस्थानां त्विहैव सुखमात्रकम् ।
तपोधर्मगृहस्थानामुभयत्र सुखं सदा ॥६८॥
तदस्माभिः सुखं चात्र भोक्तव्यं धर्मवर्तिभिः ।
ता वयं वस्त्रभूषाणां सुखं संसेव्य सर्वदा ॥६९॥
गृहस्थधर्मान् संसेव्य पतिसेवां सुरार्चनम् ।
संसेव्य साधयिष्यामो लोकद्वयमनुत्तमम् ॥७०॥
तस्माद् यूयं चात्र विप्रा भूमिमादाय भूपतेः ।
वृत्तिं चापि गृहीत्वैव रम्याणि च गृहाणि च ॥७१॥
गृहीत्वैवाथ वीक्षध्वं पुत्रपौत्रसमुद्भवम् ।
सौख्यं चापि कुमारीणां बान्धवानां विशेषतः ॥७२॥
न करिष्यथ चेद्वाक्यमेतदस्मदुदीरितम् ।
सर्वाः प्राणपरित्यागं करिष्यामो न संशयः ॥७३॥
यूयं स्त्रीवधपापेन युक्ताः यास्यथ रौरवम् ।
श्रुत्वैतच्छापदानार्थं धृतं वारि भुवस्तले ॥७४॥
तत्यजुर्दारवाक्यैस्ते सा भूरुषरतां गता ।
अथ श्रुत्वा च तद्वार्तां राजा मुमोद चाययौ ॥७५॥

ब्राह्मणेभ्यः प्रदानार्थे भुवो धनस्य सम्पदाम् ।
ब्राह्मणानां वचनेन राजा पुरमकारयत् ॥७६॥
प्राकारपरिखायुक्तं गोपुरैः सौधपंक्तिभिः ।
शोभितं नगरं नाम चमत्कारपुरं तु तत् ॥७७॥
अष्टषष्टिब्राह्मणानां वासस्तत्र कुटुम्बिनाम् ।
कारितो भूभृता तेभ्यो जीविकाऽपि समर्पिता ॥७८॥
ततः परं च सा लक्ष्मीर्माधवी या च शाण्डिली ।
नागनद्यां नचिराद्वै पुरं द्रष्टुं समागता ॥७९॥
स्नात्वा क्षणं शिलायां सा निषसाद तदा सती ।
दमयन्ती पुनर्जाता नारीरूपा यथा पुरा ॥८०॥
ब्राह्मणीभ्यो नमस्कृत्य स्वप्नोत्थितेव हर्षिता ।
ययौ राजगृहं महोत्सवं चकार भूपतिः ॥८१॥
ग्रामाणामष्टषष्टिं च ददौ दानं सुखप्रदम् ।
विप्राणामथ चत्वारि गोत्राण्यन्यान्यपि प्रिये ॥८२॥
ययुर्हिमालयं चात्र चतुःषष्टिश्च शेषिताः ।
तैः सम्यक्कारिता यज्ञा बहुद्रव्यसुदक्षिणाः ॥८३॥
यज्ञे कृतेऽभवद् राजा रोगेणातिप्रपीडितः ।
कारणं तत्र वै चासीदेकस्य ब्राह्मणस्य वै ॥८४॥
त्रिजातस्य स्पृष्टद्रव्यहोमः क्रूरफलप्रदः ।
त्रिजातस्य परीक्षार्थे वह्निना दिव्यसजलम् ॥८५॥
कुण्डं प्रदर्शितं तत्र स्नाने विस्फोटको भवेत् ।
यस्य स एव बोद्धव्यस्त्रिजात इति तत्कृतम् ॥८६॥
परीक्ष्यैवं च विप्रः स निष्कासितो वनं ययौ ।
तपश्चक्रे हरं स्मृत्वा हरस्तुष्टो बभूव ह ॥८७॥
वरं वृणु हरः प्राह विप्र उवाच शंकरम् ।
त्रिजातदोषं निष्कास्य देहि सर्वोत्तमोच्छ्रताम् ॥८८॥
शंकरश्च ददौ तस्मै न गरं न गरं मनुम् ।
यदुच्चारणमात्रेण सर्पा निर्विषतां तथा ॥८९॥
प्राप्नुयुर्मरणं चापि गृहाण गच्छ तत्स्थलम् ।
एतन्मन्त्रं गृहीत्वा स नगरं च ययौ द्विजः ॥९०॥
नगरस्था द्विजा ह्यासँस्तदा सर्पप्रपीडिताः ।
त्रिजातेन च मन्त्रेण रक्षिताः सर्वतो द्विजाः ॥९१॥
ते स्थिता नागराः सर्वे त्रिजाताद्याः समुत्तमाः ।
कृष्णभक्तिपराः सर्वे हाटकेश्वरपूजकाः ॥९२॥
हाटकेश्वरदेवात्ते लब्धवन्तो मनुं तदा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥९३॥
चक्रुश्च भजनं जापं नरा नार्यश्च सर्वदा ।
गोलोकं प्रययुश्चान्ये प्रयान्ति भजनात् प्रिये ॥९४॥
इत्याख्यातश्चमत्कारो ब्राह्मणानां तपस्विनाम् ।
पठनाच्छ्रवणाच्चास्य वाञ्छितं च फलं भवेत् ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चमत्कारनृपतिभार्यया दमयन्त्या कृतरत्नस्वर्णादिदान-ग्रहणेन व्योममार्गगामिब्राह्मणानां पतनं विप्रशापेन दमयन्त्याः शिलात्वं पुनर्माधवीस्पर्शेन राज्ञीत्वं नगरवासादि चेतिनिरूपणनामाऽष्टनवत्यधिक-चतुश्शततमोऽध्यायः ॥४९८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! भद्रिकायाः कथां दिव्यां मनोरमाम् ।
रेवत्याश्च कथां दिव्यां कथयामि निबोध मे ॥ १ ॥
चमत्कारपुरे नागा हाटकेश्वरभक्तितः ।
आगत्य खलु पातालान्निवसन्ति क्वचित्क्वचित् ॥ २ ॥
एकदा नागबालं वै रुद्रमालाभिधं द्विजः ।
क्रथो नामाऽहनन्नद्यां लगुडेन वृथा जले ॥ ३ ॥
हा हतोऽस्मीत्युवाचाऽयं सर्पस्तस्य प्रसूस्तदा ।
तथा सर्पाश्चाययुश्च मनुष्यरूपधारिणः ॥ ४ ॥
प्राणाँस्तत्याज बालः स सर्पाः क्रुद्धा भयंकराः ।
दुद्रुवुर्विप्रनाशार्थे विप्रो दुद्राव चाश्रमम् ॥ ५ ॥
नागा गत्वा सकुटुम्बं भक्षयामासुरुल्बणाः ।
तस्य विप्रस्य भगिनी बालवैधव्यदुःखिता ॥ ६ ॥
ब्रह्मचर्यपरा साध्वी कृष्णभक्तिपरायणा ।
तापसी भद्रिकानाम्नी शशाप नागिनीं तदा ॥ ७ ॥
नागमाता रेवती त्वं सवंशं नाशमाप्नुहि ।
रेवती शापमापन्नाऽऽराधयामास पार्वतीम् ॥ ८ ॥
ततः कतिपयाहस्य तस्यास्तुष्टा महेश्वरी ।
प्रोवाच वरदाऽस्मीति रेवती वरमार्थयत् ॥ ९ ॥
भद्रिकाशापनाशो मे भवत्विति समार्थयत् ।
पार्वती प्राह शापस्य नाशो नैव भवेत् क्वचित् ॥१०॥
किन्तु सर्पस्तक्षको वै सौराष्ट्रे रैवतो नृपः ।
आनर्तविषये भावी तस्य क्षेमंकरी प्रिया ॥११॥
भविष्यति तयोः पुत्री मानुषी त्वं भविष्यसि ।
तव भर्ता तदा शेषः स्वयं तत्र भविष्यति ॥१२॥
तव वरस्य लाभार्थं ब्रह्माणं प्रति मे गतिः ।
क्षणमात्रं भाविनी वै तत्र ते वंशविस्तरः ॥१३॥
नाशमेष्यति चेत्येवं वंशनाशो भविष्यति ।
पुनस्ते बलरामेण विवाहः संभविष्यति ॥१४॥

श्रीकृष्णश्च स्ववंशस्य नाशं करिष्यति प्रभुः ।
कण्वशापेन वै तत्र ह्येवं शापः फलिष्यति ॥१५॥
एवमुक्ता रेवती सा ययौ पातालमेव च ।
शेषं निवेदयामास वृत्तान्तं निर्वृत्तं भुवि ॥१६॥
अथ सा ब्राह्मणी नाम्ना भद्रिका विधवा सती ।
कथां शुश्राव शास्त्राणां कृष्णनारायणाऽऽननात् ॥१७॥
देवयात्रां तीर्थयात्रां चक्रे भक्तिं नरायणे ।
अथैकदा तक्षकश्च समाययौ भुवस्तलम् ॥१८॥
नागवत्यास्तटे दृष्ट्वा भद्रिकां तु सुरूपिणीम् ।
निनाय नररूपेण पातालं भद्रिका च तम् ॥१९॥
शशाप मानुषो भूत्वा सह पत्न्या सुताभवम् ।
दुःखं वै प्राप्स्यसे वंशनाशसम्पादकं तदा ॥२०॥
तक्षको भयमापन्नस्तुष्टाव तां तु भद्रिकाम् ।
भद्रिका प्राह मां पृथ्व्यां नय तत्र स्थले पुनः ॥२१॥
तक्षकेण तदाऽऽनीता चमत्कारपुरं प्रति ।
अथ लोकापवादेन चितां सा प्रविवेश ह ॥२२॥
पश्यतां जनवृद्धानां शुद्ध्यर्थं भद्रिका यदा ।
न दग्धा रोमश्चो वाजि जनास्त्वाश्चर्यमागता ॥२३॥
वह्निर्वै शीतलो जातः शुद्धा सा भद्रिका यतः ।
पपाताथ महावृष्टिः कुसुमानां नभस्तलात् ॥२४॥
देवाः प्राहुः परं शुद्धा वर्तसे त्वं सुभद्रिके ।
न त्वया सदृशी चान्या काचित् सती भविष्यसि ॥२५॥
तिस्रः कोट्योऽर्धकोटिश्च यानि लोमानि मानुषे ।
तेषां मध्ये न ते साध्वि पापमेकमपि क्वचित् ॥२६॥
त्वं च साध्वी सती कृष्णनारायणपतिव्रता ।
भूत्वा च त्यागिनी देवी सांख्ययोगमुपाश्रिता ॥२७॥
सतां सेवां कुरु पुण्यं समाराधय केशवम् ।
भद्रिका प्रार्थयामास श्रुत्वा देवं जनार्दनम् ॥२८॥
तावत् कृष्णो द्विजो भूत्वाऽवाततार भुवस्तलम् ।
ददौ तस्यै शुभां दीक्षां तुलसीमालिकां गले ॥२९॥
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ।
इत्युक्त्वा त्रिः कर्णमन्त्रं यथावदृश्यतां द्विजः ॥३०॥
भद्रिकाऽऽराधयामास कृष्णनारायणं सदा ।
तत्र परं तपश्चक्रे भिक्षान्नकृतभोजना ॥३१॥
नागनद्यां च तन्नाम्ना भद्रिकातीर्थमुत्तमम् ।
चमत्कारकरं जातं स्नात्वा निष्पापता भवेत् ॥३२॥
अथ सा भद्रिका कालं प्राप्ता दिव्यशरीरिणी ।
भूत्वा मोक्षं ययौ धाम कृष्णनारायणस्य वै ॥३३॥
एवं सतीबलं लक्ष्मि ! मुक्तिदं पापनाशनम् ।
कृष्णनारायणभक्त्या भवत्येव न संशयः ॥३४॥
पठनाच्छ्रवणाच्चास्य कीर्तनादपि पद्मजे ।
भुक्तिं मुक्तिं लभेत् सम्पद्रामारोग्यमीशताम् ॥३५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने भद्रिकाख्यब्राह्मण्याः शापेन नागमातुः रेवतीत्वं तक्षकस्य मानुषत्वं भद्रिकायाः कृष्णभक्त्या मुक्तिश्चेत्यादिनिरूपण-नामा नवनवत्यधिकचतुरशततमोऽध्यायः ॥४९९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां कर्णोत्पलाया ब्रह्मयोषितः ।
सत्यसन्ध इतिख्यातः पुराऽऽसीत् पृथिवीपतिः ॥ १ ॥
तस्य कर्णोत्पलानाम्नी कन्याऽऽसीद् धर्मपालिनी ।
लक्ष्म्यंशरूपा चिह्नैश्च रेखाभिः कमलासमा ॥ २ ॥
युवतीं तां वरयोग्यां दृष्ट्वा स पृथिवीपतिः ।
चिन्तयामास च मुहुः कस्येमां प्रददाम्यहम् ॥ ३ ॥
न तस्याः सदृशः कश्चिद् वरोऽत्र धरणिस्थले ।
न स्वर्गे न च पाताले तस्माद् यामि पितामहम् ॥ ४ ॥
ब्रह्माऽत्र विषयेऽवश्यं यं वरं दर्शयिष्यति ।
तस्मै पुत्रीं प्रदास्यामि नान्यस्मै वै कथंचन ॥ ५ ॥
अथ पुत्रीं सहनीत्वा ब्रह्मलोकं जगाम सः ।
ब्रह्मा चासीत् कृष्णपूजापरं क्षणं जगत्पतिः ॥ ६ ॥
पूजान्ते सत्यसन्धः स राजा ब्रह्माणमादरात् ।
पुत्र्या सह नमस्कृत्य प्रोवाच विनयाऽन्वितः ॥ ७ ॥
अहं पितः समायातो मर्त्यलोकात्तवाऽन्तिकम् ।
सत्यसन्धो महीपाल आनर्तदेशविश्रुतः ॥ ८ ॥
इयं कर्णोत्पलानाम्नी कमलांशा सुता मम ।
अस्या योग्यः पतिः कश्चिन्नान्यलोके विलोक्यते ॥ ९ ॥
तस्मान्मे ब्रूहि भर्तारमस्या येन ददाम्यहम् ।
श्रुत्वा ब्रह्मा च तं प्राह शृणु राजन् वृषं प्रति ॥१०॥
आत्मश्रेणीप्रसूताय वयोज्येष्ठाय सर्वथा ।
कन्या देया तु धर्माय यशसे कुलवृद्धये ॥११॥
सेयं तव सुता मर्त्ये ज्येष्ठभावं समाश्रिता ।
सर्वेषां भूमिपालानां वार्धक्यमत्र तच्छृणु ॥१२॥
ममाऽन्तिकं प्रपन्नस्य तव जातं युगत्रयम् ।
अतीता भूतले मर्त्या ये दृष्टा प्राक् त्वया नृप ॥१३॥
अन्या सृष्टिः समुत्पन्ना सांप्रतं धरणिस्थले ।
ममात्र सत्यलोके तु ये वर्तन्ते महर्षयः ॥१४॥

न वै ते मानुषीं भार्यां कुर्वन्ति हि कथंचन।
श्लेष्ममूत्रपुरीषाणां संस्थानमतिगर्हिताम् ॥१५॥
तपसा कन्यका चेयं कायान्तरं करोति चेत्।
कामदेवो दिव्यरूपां ग्रहीष्यति सुतां तव ॥१६॥
नाम्ना प्रीतिं द्वितीयां वै भार्यां रत्युत्तरागताम्।
तस्माद् राजेन्द्र भूलोकं याहि त्वं सुतया सह ॥१७॥
कामदेवाय दातव्या त्वया कालान्तरे सुता।
इत्युक्तः सकन्यकः स भूतलं प्रसमाययौ ॥१८॥
यावत्पश्यति देशं सः स्थलस्थाने जलाशयान्।
जलस्थानेषु वै जातान् स्थलसंघान् विचित्रकान् ॥१९॥
अन्यान् लोकाँस्तथा धर्मान् देशे तत्र व्यवस्थितान्।
पृच्छन्नपि न जानाति सम्बन्धं केनचित् सह ॥२०॥
पुत्राः पौत्रास्तथा भृत्या हस्त्यश्वादिकमित्यपि।
ते सर्वे निधनं प्राप्ता युगान्तरे च बान्धवाः ॥२१॥
अथ मर्त्याऽनिलस्पृष्टस्तत्क्षणात् स महीपतिः।
सा च कन्या जराग्रस्तौ तावुभौ श्वेतमूर्धजौ ॥२२॥
शीर्णदन्तौ बलिपूर्णौ विरूपौ जर्जरात्मकौ।
अमनोज्ञावतिजातौ चिपिटाक्षौ पुरातनौ ॥२३॥
स तु राजा तथाभूतो वेपमानः पदे पदे।
पप्रच्छ मानवान् कोऽत्र देशः कोऽयं पुरं च किम् ॥२४॥
अथ प्रोचुर्जनास्तस्य देशश्चानर्तसंज्ञकः।
बृहद्बलाख्यो राजाऽत्र प्राप्तिपुरं च पत्तनम् ॥२५॥
शुभ्रमती सरिच्चैषा गर्तातीर्थं च नामतः।
इति श्रुत्वाऽन्यनामानि विस्मयं त्वाप भूपतिः ॥२६॥
शुशोच वै क्षणं पश्चात् स्नात्वा नद्यां स भूपतिः।
विद्यमानं बृहद्बलं प्रति ययौ सकन्यकः ॥२७॥
सत्यसन्धस्तमुवाच राजन् वृत्तं निबोध मे।
आनर्ताधिपतिश्चाहं सत्यसन्धः पुरात्विति ॥२८॥
आसं कर्णोत्पलानाम्नी सुता मे गुणशालिनी।
सेयं मया सहैवाऽऽस्ते लक्ष्मीतुल्या रमाकला ॥२९॥
सोऽहमस्याः प्रदानार्थं सत्यलोकमितो गतः।
प्रष्टुं पितामहं देवं स्थितस्तत्र मुहूर्तकम् ॥३०॥
तावदत्र व्यतीता वै युगा बहुतरा नृप।
सत्यलोकात् समायातो यावत्पश्यामि भूतलम् ॥३१॥
सर्वं परिणतं वारि स्थलं वनं च पत्तनम्।
अज्ञातमिव मे सर्वं लोक्यते किन्तु मानवैः ॥३२॥
तव नाम प्रदत्तं तत्समायातोऽस्मि तेऽन्तिकम्।
राजा बृहद्बलो लक्ष्मि! श्रुत्वा वंशप्रपूर्वजम् ॥३३॥

श्रुतं सत्यगतं चात्राऽऽयातं दृष्ट्वाऽतिविह्वलः।
हर्षाश्रुनयनो भूत्वा पपात तस्य पादयोः ॥३४॥
उवाच स्वागतं राजन् भूयः सुस्वागतं पितः।
इदं राज्यं निजं भूयो मया भृत्येन रक्षितम् ॥३५॥
स्वेच्छया देहि दानानि कुरु राज्यं निजं पितः।
ततः सोऽपि वंशजं स्वं समालिंग्य नृपं नृपः ॥३६॥
शिरस्याघ्रायाऽश्रुपूर्णनेत्राभ्यां तं सिषेच च।
प्राह राज्यं मया चीर्णं दत्तं दानं पुरा बहु ॥३७॥
वाजिमेधमुखैर्यज्ञैरिष्टं सम्पूर्णदक्षिणैः।
तस्मात् तपश्चरिष्यामि सुतया त्वनया सह ॥३८॥
बृहद्बलस्तमुवाच यथेष्टं कुरु पार्थिव।
तवैवास्ति महद्राज्यं गृहाण वा तपः कुरु ॥३९॥
पारम्पर्येण राजेन्द्र मयैतत्सकलं श्रुतम्।
सत्यसन्धो महीपालः कन्यामादाय निर्गतः ॥४०॥
पुनश्चिरं स नायातस्ततस्तस्य सुमन्त्रिभिः।
अभिषिक्तः सुतस्तस्य सुहयो नाम पार्थिवः ॥४१॥
तस्याऽहं क्रमशः सप्तसप्ततितमवंशजः।
पुरुषोऽस्मि समुद्धर्ता धन्योऽहं दर्शनाच्च ॥४२॥
गर्तातीर्थे कुरु तपः पुत्र्या समं पितामह।
येन ते चरणौ नित्यं सेवयिष्ये ससेवकः ॥४३॥
श्रेयः प्राप्नोम्यसंन्दिग्धं प्रसादः क्रियतामिति।
अथ प्रजा ब्राह्मणाश्च नरा नार्यश्च राष्ट्रजाः ॥४४॥
समाययुः सत्यसन्धं द्रष्टुं कुतुहलान्विताः।
आशीर्वादान् प्रयुञ्जानाः पुपूजुस्तं मुदान्विताः ॥४५॥
अथ राजा तथा कन्या नदीं प्राप्य तटे तदा।
कृत्वा पर्णाश्रमं तत्र तेपाते तप उत्तमम् ॥४६॥
गौरीं तत्र प्रतिष्ठाप्य कर्णोत्पला तु नित्यदा।
भक्त्या त्वाराधयामास राजा च शंकरं ततः ॥४७॥
साक्षात्तुष्टो महादेवः प्रसन्नास्यः समाययौ।
राजानमाह तपसा वर्धते पुण्यमत्यति ॥४८॥
वद किं ते ददाम्यत्र राजा वव्रे प्रमोक्षणम्।
शंभुः प्राह परं मोक्षं कृष्णनारायणः स्वयम् ॥४९॥
प्रदास्यति प्रभुस्त्वां त्वं गृहाण तुलसीस्रजम्।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥५०॥
मन्त्रं गृहाण चेत्युक्त्वा ददौ मन्त्रं च मालिकाम्।
शंभुस्तिरोऽभवद् राजा भेजे जजाप माधवम् ॥५१॥
अथ राजा बृहद्बलो ह्यवाप निधनं तदा।
सत्यसन्धेन विप्रेभ्यो जीविकाद्याः समर्पिताः ॥५२॥

एवं याते दिने गौरी सन्तुष्टा कन्यकोपरि ।
साक्षात् प्रोवाच ते पुत्रि तुष्टाऽहं वाञ्छितं वद ॥५३॥
कर्णोत्पलाऽऽह तातो मे मदर्थे कष्टमाप्तवान् ।
मम पत्युर्मार्गणाय राज्याद् भ्रष्टः कुटुम्बतः ॥५४॥
वैराग्येण तपस्तेपे कन्याऽहं वृद्धतां गता ।
ततस्ते कृपया गौरि यथाऽहं तरुणी नवा ॥५५॥
रूपयौवनसम्पन्ना सुन्दरी स्यां तथा कुरु ।
तथा भवतु मे भर्ता कश्चिद् देवोत्तमोत्तमः ॥५६॥
रूपसम्पद्यौवनादियुक्तश्चिरंप्रजीवनः ।
यथापितुर्मे सन्तोषो भवेन्मातस्तथा कुरु ॥५७॥
गौरी प्रोवाच माघस्य शुक्लस्य तृतीयातिथौ ।
शनैश्चरदिने वसुदैवत्यर्क्षे तु यौवनम् ॥५८॥
रूपं संकल्प्य नद्यां च स्नानं कुर्वन्त्र सुन्दरि ! ।
ततो दिव्यशरीरा त्वं नवयौवनशालिनी ॥५९॥
भविष्यसि न सन्देहो भज कृष्णनरायणम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥६०॥
जप मन्त्रं सदा त्वेनं ध्यानं कुरु हरेस्तथा ।
सर्वं प्राप्स्यसि तपसा भक्त्याऽभीष्टं क्षणं कुरु ॥६१॥
एवमुक्त्वा कृष्णमन्त्रं दत्वा च तुलसी स्रजम् ।
तिरोबभूव गौरी च कन्या यथोक्तमाचरत् ॥६२॥
तृतीयायां शनेर्योगे वसुदेवर्क्षसंयुते ।
ध्यात्वा सारूप्य सौभाग्ययौवनानि नवानि च ॥६३॥
विवेशार्धनिशायां सा जले यावच्चदैव सा ।
नवयौवनरूपाढ्या निष्क्रान्ता सलिलात् तदा ॥६४॥
तावच्छ्रीब्रह्मणाऽऽज्ञप्तः कामदेवः स्वयं खलु ।
पत्न्यर्थं प्रीतिसंयुक्तश्चाऽऽजगामाऽब्रवीच्च ताम् ॥६५॥
ब्रह्मणा प्रेषितश्चाहं नवयौवनरूपवान् ।
पार्वत्यानुमतश्चात्र त्वदर्थं त्वागतोऽस्म्यहम् ॥६६॥
अस्म्यहं कामदेवो वै चिरंजीवी रतीश्वरः ।
प्रीतिनाम्नी मम भार्या शाश्वती भव मा चिरम् ॥६७॥
कर्णोत्पलाऽऽह मे तातं गत्वा प्रार्थय मां स्वयम् ।
कन्या नास्ति कदाचिद्वै स्वच्छन्दा पितृसन्निधौ ॥६८॥
तत्राहं पूर्वतो गत्वा कन्या तिष्ठामि सुन्दरी ।
भवानागत्य पश्चाच्च प्रार्थयिष्यति मां मुदा ॥६९॥
इत्युक्त्वा तं प्रणिपत्य कन्या स्वपितरं ययौ ।
अथ तां स समालोक्य पिता सुतां सुयौवनाम् ॥७०॥
आश्चर्यमाप पप्रच्छ कारणं रूपयौवने ।
कन्या प्राह पितर्गौर्याः प्रसादात् स्नानमात्रतः ॥७१॥
नद्यां लब्धवतीरूपं यौवनं च नवं वपुः ।
हरिं चाराध्य कान्तं श्रीकृष्णनारायणं तथा ॥७२॥
सर्वमाप्तवती देव्या ब्रह्मणा च मदर्थकः ।
पतिः सुरूपलावण्यतेजोयौवनशोभितः ॥७३॥
प्रेषितः सुन्दरः पुष्पबाणधृक् सोऽपि तेऽन्तिकम् ।
समायाति विलोक्यैनं समर्प्य मां सुखी भव ॥७४॥
इत्युक्तश्च पिता पुत्रीं विलोक्य कमलासमाम् ।
अब्रवीदद्य मे पुत्रि संजातं तपसः फलम् ॥७५॥
एतस्मिन्नन्तरे कामो राज्ञोऽन्तिकमुपागमत् ।
नत्वाऽब्रवीत् तव कन्यां देहि मे भूप सुन्दरीम् ॥७६॥
ब्रह्मणाऽत्र समादिष्टः पार्वत्याऽनुमतस्तथा ।
वरणार्थे स्वयं समागतोऽस्मि कामदेवकः ॥७७॥
ततः समर्पयामास तां कन्यां वह्निसन्निधौ ।
सा च रतेरनुस्थाना प्रीतिनामाऽभवत् प्रिया ॥७८॥
तां च नीत्वा ययौ कामः कामलोकं सुराजसम् ।
सत्यसन्धोऽपि हृष्टात्मा सुतां दृष्ट्वा सुखान्विताम् ॥७९॥
अभीष्टपतिना युक्तां कृतकृत्यो बभूव ह ।
दृढं पद्मासनं कृत्वा ब्रह्मद्वारेण योगवित् ॥८०॥
देहान्निःसारयामास चात्मानं ब्रह्मणा सह ।
ययौ यत्राऽस्ति कन्या सा कामलोके सुपुत्रिका ॥८१॥
तस्मात् कन्यां द्वितीयां तु तां सुरूपादिधारिणीम् ।
नीत्वा दत्वा चैकरूपां कामाय त्वपरां तनुम् ॥८२॥
राजा मुक्तः सुतां मुक्तां सहनीत्वा च पार्षदैः ।
हरेर्मुक्तैः सह धाम गोलोकं प्राप शाश्वतम् ॥८३॥
एव कर्णोत्पला लक्ष्मि ! भक्त्या च तपसा तथा ।
प्रीतिरूपा कामपत्नी मुक्ता च मोक्षगाऽभवत् ॥८४॥
बृहद्बलस्य राज्ञ्या च कृष्णनारायणः प्रभुः ।
आराधितश्च पुत्रार्थं विप्ररूपेण माधवः ॥८५॥
समागत्य ददौ गर्भं मानसं च क्षणान्तरे ।
जातिस्मरोऽभवत्पुत्रो नारायणसमुद्भवः ॥८६॥
विंशतिवर्षकायुष्को नारायणसमो गुणैः ।
धनुर्विद्यावेदविद्याचमत्कारादिशेवधिः ॥८७॥
अटचन्द्रोऽभवन्नाम्ना चमत्कारनराधिपः ।
य एतच्छृणुयाद्वापि श्रावयेद् भक्तिभावतः ॥८८॥

चतुर्वर्गस्य संसिद्धिं लभते नात्र संशयः ।
कन्या नारी च सौभाग्यं लभते प्रीतिवत् सदा ॥८९॥
भुक्तिं मुक्तिं सम्पदश्च पुत्रं धान्यं धनादिकम् ।
सौभाग्यं पुण्यपुञ्जं च लभते नात्र संशयः ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सत्यसन्धनृपतेः कन्यायाः कर्णोत्पलायाः कमलांशायाः पतिमार्गणार्थे ब्रह्मलोकगमनं ततः पृथिवीमागत्य कामदेवपत्नीत्वं प्रीतिनाम्नाऽथ च मोक्षणं द्वितीयरूपेणेत्यादिनिरूपणनामा पञ्चशततमोऽध्यायः ॥५००॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! याज्ञवल्क्यऋषेः कथां मनोहराम् ।
आसीद् ब्राह्मणशार्दूलः शाकल्य इतिविश्रुतः ॥ १ ॥
भार्गवाऽन्वयसंभूतो वेदवेदांगपारगः ।
वर्धमाने पुरे धर्मारण्ये शिष्यप्रशिष्यवान् ॥ २ ॥
सदा विद्यादानदाता योगसिद्ध्यादिशोभितः ।
तस्य शिष्योऽभवद्याज्ञवल्क्यः सेवापरायणः ॥ ३ ॥
शाकल्यश्च वर्धमाननृपतेर्वै पुरोहितः ।
पौरोहित्यं करोत्येव सर्वेषु नृपकर्मसु ॥ ४ ॥
प्रेरयति च्चाशीर्वादान् दातुं प्रभातके ।
याज्ञवल्क्यं श्रेष्ठशिष्यं याज्ञवल्क्योऽपि नित्यदा ॥ ५ ॥
यात्याशीर्वाददानार्थं प्रातः स्नात्वा मुदान्वितः ।
एकदा तु विना स्नानं मलिनाम्बरसंयुतः ॥ ६ ॥
याज्ञवल्क्यः प्रभाते वै वर्तते च तदा गुरुः ।
याज्ञवल्क्यमुवाचेदं गच्छ शीघ्रं नृपं प्रति ॥ ७ ॥
एवं तं योजयामास शान्त्यर्थे नृपमन्दिरे ।
याज्ञवल्क्यो ययौ शान्तिपाठं कृत्वा जपोत्तरम् ॥ ८ ॥
शान्त्युदकप्रदानाय तं नृपं प्रति संययौ ।
पार्थिवोऽपि मुनिं विना स्नानं दृष्ट्वा च शंकितः ॥ ९ ॥
न जग्राह जलं चाशीर्वचनं चापि तद्दिने ।
असत्यं च प्राह राजा नाऽहं स्नातो द्विजोत्तम ॥१०॥
मुनिं स्नानविहीनं तु तथ्यं प्रवक्तुमक्षमः ।
अत्र शालागते काष्ठे तस्मादेतज्जलं क्षिप ॥११॥
याज्ञवल्क्योऽपि विज्ञाय स्वस्याऽस्नातस्य कारणम् ।
ज्ञात्वाऽपमानं स्वस्यैव जलं चिक्षेप काष्ठके ॥१२॥
तावत् काष्ठं पल्लवितं शाखाफलसमन्वितम् ।
तत्क्षणादेव सञ्जातं जलस्पर्शप्रभावतः ॥१३॥

राजा चमत्कृतिं दृष्ट्वा पश्चात्तापं विधाय च ।
सत्यं प्राह पुनर्वाक्यं मुने स्नातोऽस्मि किन्तु ते ॥१४॥
भयात्तवैव मालिन्यं दृष्ट्वा जग्राह नैव तत् ।
ततोऽभिषेकं मे विप्र कुरु स्यां पुत्रवान् यथा ॥१५॥
याज्ञवल्क्यस्तदा प्राह राजन् शंकापरो भवान् ।
ममाऽभिषेकदानस्य त्वमनर्होऽसि साम्प्रतम् ॥१६॥
गुरवस्तु सदा शुद्धा भवन्ति ब्राह्मणा नृप ।
साधवश्च न वा स्नाताः स्नाता वा श्रीहरेस्तनुः ॥१७॥
तत्रापि यदि विद्वांसस्तत्राप्यैश्वर्यशालिनः ।
सिद्धा वा ब्राह्मणा देवा देववासाः प्रतापिनः ॥१८॥
नारीसंगकृताश्चापि न स्नाता अपि पावनाः ।
मन्त्रसिद्धिब्रह्मसिद्धितपःसिद्धिपरास्तु ये ॥१९॥
तत्र शुद्धिर्न द्रष्टव्या गुरौ साधौ सुरे हरौ ।
पितरि मातरि पत्यौ सत्यां गवि कदाचन ॥२०॥
कामः क्रोधस्तथा लोभः पारुष्यं वासना रतिः ।
सर्वे दिव्यास्तत्र बोध्याः समर्थे नास्ति दूषणम् ॥२१॥
मलिना पृथिवी पादस्पृष्टा तस्य हि पावनी ।
रथ्याम्बु गंगया मिश्रं गांगवत्पापनाशकम् ॥२२॥
विष्णुप्रसादभोजी वै जीवन्मुक्तो गुरुः स्मृतः ।
नित्यं तपस्यानिरतः शुचिः शान्तश्च शास्त्रवित् ॥२३॥
सर्वेषामपि तीर्थानां पावनस्तु गुरुर्भवेत् ।
सर्वेषामपि वन्द्यानां पिता वन्द्यो गुरुर्मतः ॥२४॥
पितुः शतगुणैर्माता मातुः शतगुणैः सुरः ।
मन्त्रदस्तन्त्रदश्चैव सुराणां च चतुर्गुणः ॥२५॥
गुरुः श्रेष्ठः पापपुञ्जनाशको मोक्षसम्प्रदः ।
नारायणश्च भगवान् गुरुरेव मतो भवेत् ॥२६॥
प्रत्यक्ष ईश्वरश्चात्र तारको भवति प्रभुः ।
उद्देशे दीयते तस्मै सुरायेति श्रुतौ श्रुतम् ॥२७॥
प्रत्यक्षभोक्ता स्वगुरुः स्वयं देही जनार्दनः ।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव स्वयं शिवः ॥२८॥
गुरौ च सर्वदेवाद्यास्तिष्ठन्ति सततं मुदा ।
गुरौ तुष्टे हरिस्तुष्टो यस्मिँस्तुष्टे च देवताः ॥२९॥
वह्निवायुसमः पूतस्तेजसा भास्करोपमः ।
विष्णुमन्त्रोपासकश्च गुरुर्वै वैष्णवो द्विजः ॥३०॥
तेजस्विनं गुरुं दृष्ट्वा गृह्णीयात् सर्वमेव ह ।
मन्त्रं जलं प्रसादं चाशीर्वादं ह्यविशंकितः ॥३१॥
ऐकान्तिको गुरुर्देवः पुंसां लक्षं समुद्धरेत् ।
क्रियाः शुभाऽशुभा यस्य विष्णुपादे समर्पिताः ॥३२॥

मन्त्रग्रहणमात्रेण जीवन्मुक्तस्ततो भवेत् ।
भित्त्वा ब्रह्माण्डमखिलं प्रापयते हरेः पदम् ॥३३॥
राजँस्त्वं वञ्चितश्चाद्य मायया शंकितो मयि ।
पुनर्जलं मया नैव दीयते शंकिताय ते ॥३४॥
विशेषतश्च स्वार्थाय लाभं दृष्ट्वा प्रयाचते ।
दातव्यं नैव ऋषिभिः स्वार्थिने नास्तिकाय च ॥३५॥
तस्मान्नेऽभिषेकदानपात्रं नाऽसि पुनर्नृप ।
अहं यास्यामि तत्रैव यत्रस्थः स गुरुर्मम ॥३६॥
राजा प्राह याज्ञवल्क्यमभिषेकं ददासि चेत् ।
तव दास्यामि वस्त्राणि वाहनानि वसूनि च ॥३७॥
ऋषिः प्राह स वै मन्त्रो होमान्ते स्फुरते न मे ।
तस्माज्जलं पुनस्तादृग् बलवच्चैव जायते ॥३८॥
गच्छाम्यहं गृहं राजन् तवेष्टं नाऽद्य संभवेत् ।
इत्युक्त्वा स्वगृहं तूर्णं जगाम मुनिसत्तमः ॥३९॥
अपरेऽह्नि प्रभाते च शाकल्यः स्वयमेव ह ।
आशीर्वादान् प्रदातुं च ययौ भूपं तदा नृपः ॥४०॥
प्रणिपत्य मुनिं प्राह ह्यस्त्वया यः प्रप्रेषितः ।
शिष्यो भूयः स शान्त्यर्थं प्रेषणीयो मम गृहम् ॥४१॥
बाढमित्येव सम्प्रोक्त्वा पूजामादाय वै गुरुः ।
याज्ञवल्क्यं समाहूय पुनः प्रोवाच सादरम् ॥४२॥
अद्यापि त्वं नरेन्द्रस्य शान्त्यर्थं भवनं व्रज ।
विशेषात्पार्थिवेन्द्रेण समाहूतोऽसि पुत्रक ॥४३॥
याज्ञवल्क्यस्तदा प्राह राजाऽस्ति नास्तिको द्विजे ।
गर्वयुक्तोऽस्ति तस्मात्त्वं गमिष्यामि नवै पुनः ॥४४॥
मया तस्याऽभिषेकार्थं सलिलं चोद्यतं यदा ।
क्षिप काष्ठे सलिलं तदित्युक्तं वै कुबुद्धिना ॥४५॥
मयाऽपि द्राक् जलं क्षिप्तं काष्ठे काष्ठं ततो द्रुतम् ।
नवपल्लवितं जातं दृष्ट्वा राजा मुमोह तत् ॥४६॥
शाकल्यः प्राह सामर्थ्यं तवाऽऽलोक्य स भूपतिः ।
आह्वयति पुनस्त्वां तं गच्छ मानपुरःसरम् ॥४७॥
अनुवृत्ता नृपा ग्राह्या नावमान्यास्तदा क्वचित् ।
आरोहन्ति शनैर्भृत्या धुन्वन्तमपि पार्थिवम् ॥४८॥
समो मानेऽपमाने च चित्तज्ञः कालवित् सदा ।
सर्वसहः क्षमी विज्ञो भवेद्वै राजवल्लभः ॥४९॥
ममाऽऽज्ञाऽपि त्वया पाल्या गच्छ पुत्र नृपं प्रति ।
याज्ञवल्क्यस्तदा प्राह न यामि नास्तिकं प्रति ॥५०॥
चतुर्धा धर्मनाशोऽत्र विद्यते शृणु सद्गुरो ।
गन्तुं यस्याऽद्य शिष्यस्य क्रमो वै वर्तते गुरो ॥५१॥
तद्भंगः प्रथमो दोषो द्वितीयोऽक्रमदूषणम् ।
न गमिष्ये च मद्वाक्यं निषेधात्मकदूषणम् ॥५२॥
तृतीयं जायते मेऽत्र नृपेच्छाभंगदूषणम् ।
चतुर्थं फलदोषात्म तस्मात् कार्यं न तन्मया ॥५३॥
एवं यदि बलान्मां त्वं योजयिष्यसि तं प्रति ।
त्वां त्यक्त्वाऽन्यत्र यास्यामि गमिष्यामि न तं प्रति ॥५४॥
इत्युक्तः क्रोधमापन्नः शाकल्यः समुवाच तम् ।
एकमप्यक्षरं गुरोरवगत्य ततः परम् ॥५५॥
दक्षिणां नास्ति पृथ्व्यां यां दत्वा शिष्योऽनृणी भवेत् ।
तस्मात्पालय चाज्ञां मे मद्विद्यां वा परित्यज ॥५६॥
नो चेद् ददामि शापं ते गच्छाऽन्यत्र यथासुखम् ।
इत्युक्तो याज्ञवल्क्यः स विद्याया वमनं तदा ॥५७॥
कृत्वोवाच गुरुं नत्वा पश्य विद्यां प्रछर्दिताम् ।
एकमप्यक्षरं नास्ति तावकीयं ममोदरे ॥५८॥
तस्माच्छिष्योऽस्मि ते नाऽहं न च मे त्वं गुरुः स्थितः ।
साम्प्रतं स्वेच्छयाऽन्यत्र प्रयास्यामि नमोऽस्तु ते ॥५९॥
एवमुक्त्वा सिद्धिदं वै हाटकेश्वरनामकम् ।
क्षेत्रं समाययौ तत्राऽऽराधयामास भास्करम् ॥६०॥
नियतो नियताहारो ब्रह्मचर्यपरायणः ।
गायत्रीन्यासमासाद्य चचार दुष्करं तपः ॥६१॥
सूर्यस्तुष्टो मानवः सन् वर्षान्ते तमुवाच ह ।
याज्ञवल्क्य वृणु स्वेष्टं सर्वं दास्यामि ते रविः ॥६२॥
याज्ञवल्क्यः प्रणम्यैव वव्रे विद्यां च वैदिकीम् ।
तथाऽन्यां मन्त्रतन्त्रीयां ब्रह्मविद्यां तथा पराम् ॥६३॥
सूर्यः प्राह लघिमां ते सिद्धिं ददामि वै तया ।
लघुर्भूत्वा ममाऽश्वानां कर्णान्ते विश तिष्ठ च ॥६४॥
मत्तोभ्यासं च विद्यानां वैदिकीनां कुरु द्रुतम् ।
एवमुक्तः स तेनाऽथ वाजिकर्णं समाश्रितः ॥६५॥
वेदानपठत्सूर्यात् स जनकायाऽभ्यपाठयत् ।
ब्रह्मविद्यां दत्तवाँश्च भार्याद्वयाय वै ऋषिः ॥६६॥
मैत्रेयी प्रथमा ज्येष्ठा कात्यायनी द्वितीयका ।
पत्नीद्वयं याज्ञवल्क्यस्याऽऽसीत् कात्यायनः सुतः ॥६७॥
कात्यायनं सर्वविद्याः पाठयामास चान्ततः ।
एकदा शाण्डिली कात्यायनीं बोधं ददौ शुभम् ॥६८॥
नागनद्यास्तटे तेन वैराग्यं समवाप सा ।
न स्नाति न च भुंक्ते वा हास्यं न कुरुते सती ॥६९॥
केवलं बाष्पपूर्णाक्षी निःश्वसन्ती बभूव ह ।
शाण्डिली तां प्रतीदिनं ह्युपदेशं ददाति च ॥७०॥

शृणु साध्वि मम तातः शाण्डिल्यो मुनिपुंगवः ।
तस्यैकाऽहं समुत्पन्ना माधवीनामकन्यका ॥७१॥
पितुः करोमि शुश्रूषां होमकाले यथोचिताम् ।
नीवारादीनि धान्यानि नित्यं चैवाऽऽनयाम्यहम् ॥७२॥
कदाचित्त्वथ कालस्य नारदो मुनिरागतः ।
आश्रमे मम तातस्य श्रान्तो मया प्रसेवितः ॥७३॥
स्नापितो भोजितः संवाहितो देहेऽतिभावतः ।
निविष्टश्चासने मात्रा संपृष्टो विनयात्तदा ॥७४॥
एकेयं कन्यकाऽस्माकं वार्धक्ये वर्तते मुने ! ।
तदस्याः कीर्तय क्षिप्रं भर्तारं सुसुखोदयम् ॥७५॥
व्रतं वा नियमं वा त्वं तपो होमं जपं च वा ।
मन्त्रं वा येन चीर्णेन भर्ता स्यात् सौम्यसद्गुणी ॥७६॥
स्नेहिलश्च प्रसन्नास्यः प्रियवाङ् स्वप्रियाप्रियः ।
श्रुत्वा श्रीनारदः प्राह गौरीपूजनमुत्तमम् ॥७७॥
हाटकेश्वरजे क्षेत्रे गत्वा करोतु ते सुता ।
भर्तारं प्राप्स्यति गौर्या आशीर्वादेन ते सुता ॥७८॥
तत्र पूर्वं गता गौरी गंगेर्ष्यया शुभस्थलम् ।
ततः सा चिन्तयास कां देवीं पूजयाम्यहम् ॥७९॥
सौभाग्यार्थं यतोऽन्या मां पूजयेयुः सदा स्त्रियः ।
इति विचार्य सा भक्त्या पुपूजाऽऽत्मानमेव च ॥८०॥
स्वीयमूर्तिं मृदा कृत्वा स्थाने चैकत्र चासने ।
आत्मप्राणाग्निहोत्रैश्च मन्त्रैराथर्वणैस्तथा ॥८१॥
पृथ्वीं जलं तथा तेजो वायुमाकाशमित्यमून् ।
मूर्तौ संयुज्य चात्मानं तापसी सा यतव्रता ॥८२॥
गौरीं संपूजयामास पुष्पधूपानुलेपनैः ।
तन्मन्त्राकृष्टचित्तो वै शंकरः सत्वरं ययौ ॥८३॥
वद देवि तव शक्त्या गौर्याऽऽकृष्टोऽहमागतः ।
कथं त्वं कुरुषे चैतत्तव रूपस्य पूजनम् ॥८४॥
आकर्षयति मां गौरी प्रसह्य तव सन्निधौ ।
तस्मादागच्छ कैलासं ब्रूहि दोषोऽस्ति चेन्मयि ॥८५॥
पार्वती प्राह मूर्ध्ना त्वं धत्से गंगां सपत्निकाम् ।
तस्मान्नाहं गमिष्यामि यावन्न त्यजसि प्रियाम् ॥८६॥
शंभुः प्राह नृपो भागीरथस्तप्त्वाऽतिदारुणम् ।
तपो मां प्रार्थयामास गंगाया धारणाय वै ॥८७॥
आकाशाज्जाह्नवीवेगं पतन्तं धरणीतले ।
गमिष्यन्तं च पातालं विज्ञाय मां न्ययोजयत् ॥८८॥
अत्रैव गंगास्थित्यर्थं ततश्चैवं धृता मया ।
सा मन्मूर्ध्नः शनैर्हिमालयं लब्ध्वा शुभाऽऽलयम् ॥८९॥
भारते पावनार्थं वै देहिनां यास्यति ध्रुवम् ।
एनां जलस्वरूपां च कृत्वा पित्रे ददामि ते ॥९०॥
आगच्छ मे प्रिये कान्ते सौभाग्यं सर्वदाऽस्तु ते ।
सापत्न्यं नैव बोद्धव्यं सा नास्ति मे विवाहिता ॥९१॥
नापि पत्नी नवा दासी नान्या भार्यात्मिकापि च ।
आश्रिताऽस्ति सती तस्मादागच्छ गृहमेव मे ॥९२॥
एवमुक्त्वा महादेवो वृषमारोप्यतां शिवाम् ।
स्वयमारुह्य पश्चाच्च ययौ कैलासपर्वतम् ॥९३॥
तां गौरीं तव पुत्रीयं समाराधयतु द्रुतम् ।
प्रीतिकरं यथेष्टं च ततः प्राप्स्यति सत्पतिम् ॥९४॥
इत्युक्त्वा नारदः सत्यं लोकं ययौ ततः परम् ।
मया कुमार्या च भक्त्या गौरी प्रपूजिता व्रते ॥९५॥
मार्गशुक्लतृतीयायां नैवेद्यगन्धलेपनैः ।
तत्प्रभावादयं प्राप्तो जैमिनिर्ब्राह्मणः पतिः ॥९६॥
तस्मात्त्वमपि कल्याणि पूजयैनां समाहिता ।
संप्राप्स्यसि सुसौभाग्यं मैत्रेय्या सदृशं शुभे ॥९७॥
श्रुत्वा कात्यायनी सर्वं शाण्डिल्या यत्प्रकीर्तितम् ।
चकार मार्गतृतीयाव्रतं गौरीप्रपूजनम् ॥९८॥
ततोऽस्याः पतिरागत्य गृहीत्वा दक्षिणे करे ।
निनाय स्वगृहं तां वै बहुमानपुरःसरम् ॥९९॥
ततः परं तया सार्धं वर्तते हर्षितः सदा ।
मैत्रेय्या सदृशो यद्वत् ततोऽपि च विशेषतः ॥१००॥
कात्यायनी सुपुत्रं सुषुवे कात्यायनं परम् ।
कात्यायनसुतो वररुचिर्जातो गुणालयः ॥१०१॥
कात्यायनस्य सामर्थ्यं शृणु लक्ष्मि ! वदामि ते ।
पुरा पृथ्व्याः समुद्भूतं किञ्चित्प्राणिमयं चरम् ॥१०२॥
अपूर्वं चान्धकमुग्रं कृष्णदन्तं भयानकम् ।
शंकुकर्णं कृशास्यं च ऊर्ध्वकेशं बुभुक्षितम् ॥१०३॥
नृपेण बलिना मन्त्रैराकृष्टं बलवन्महत् ।
अथ देवान् भक्षितुं तत् प्रदुद्राव पुनः पुनः ॥१०४॥
बलिना सम्परित्यक्तं देवैस्तत् ताडितं मुहुः ।
तथापि न क्षतिं प्राप पातितं धरणिस्थले ॥१०५॥
उपविष्टास्ततस्तस्य देवा भूत्वा समन्ततः ।
तस्योदरे गतो ब्रह्मा शक्राद्याः पार्श्वतः स्थिताः ॥१०६॥
तावच्छुक्रेण सन्दिष्टा दैत्या हन्तुं सुराँस्तदा ।
आययुः पक्षमादाय तावद्विष्णुः स्वयं प्रभुः ॥१०७॥
प्राह भूतं शृणु भूत त्वदर्थे देवदैत्ययोः ।
संग्रामोऽत्र भवेत् तद्वै नैषः शोभन एव ह ॥१०८॥

देवा दैत्यास्त्वयि भूते तिष्ठन्तु मित्रवद् यथा ।
तव पूजां करोम्येवं वास्तुनामा भवान्मतः ॥१०९॥
तत्र ते भोजनं चार्पयामि गृहाण भावतः ।
ततस्तेन प्रतिज्ञातमविकल्पेन चेतसा ॥११०॥
उक्तं च यो न मे पूजां करिष्यति नवे स्थले ।
कथंचिन्मानवः कश्चिद् भक्ष्यः स मे भविष्यति ॥१११॥
बाढमित्येवमुक्ते च विश्वकर्माऽकरोद् विधिम् ।
कात्यायनो गृहं चक्रे वास्तुं चाऽपूजयत्तदा ॥११२॥
वास्तुपूजां च सकलां कात्यायनश्चकार ह ।
हाटकेश्वरजे क्षेत्रे ततः पूजा प्रवर्तिता ॥११३॥
तथा न प्राप्नुयाद् दोषं गृहजातं कथंचन ।
शिलोत्थं कुपदोत्थं च कुवास्तुजमथापि वा ॥११४॥
वैशाखस्य तृतीयायां वास्तोः पूजाऽभवत्पुरा ।
तदा पूजाप्रकर्तुश्च गृहं राज्यसमं भवेत् ॥११५॥
इति ते कथितं लक्ष्मि ! त्वाख्यानं चोत्तमोत्तमम् ।
भुक्तिमुक्तिसुसौभाग्यपतिपुत्रादिदायकम् ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शाण्डिल्यशिष्यस्य याज्ञवल्क्यस्य शुष्ककाष्ठेपल्लवीकरणता विद्याप्रच्छर्दनं याज्ञवल्क्यस्य तत्पुत्रकात्यायनस्य च चमत्काराः, वास्तुपुरुषाऽर्चनादि चेतिनिरूपणनामैकाऽधिकपञ्चशततमोऽध्यायः ॥ ५०१ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पुरा चासीद् हारीतनामको मुनिः ।
वानप्रस्थाश्रमी तस्य भार्या पूर्णकलाभिधा ॥ १ ॥
साध्वी पतिव्रता रूपौदार्ययौवनशोभिता ।
लक्ष्मीसमां तां दृष्ट्वा वै कामदेवो मुमोह च ॥ २ ॥
स्नान्तीं विवस्त्रां संपश्यन् त्यक्त्वा प्रीतिं रतिं स्त्रियौ ।
विजनं तत्स्थलं मत्वा प्रसुप्तः स तटे क्षणम् ॥ ३ ॥
कौतुकं प्रचकाराऽसौ निःश्वासान् निःश्वसन् मुहुः ।
तिष्ठन् सन्दर्शने तस्या रुग्णो दीनो यथा जनः ॥ ४ ॥
सापि तथाविधं कंचिदनाथं भिक्षुकं शुभम् ।
मत्वा पार्श्वे ययौ किंचिद् फलं दातुं प्रभोजनम् ॥ ५ ॥
तावत् कामो यौवनस्थो वह्निवच्च प्रभासुरः ।
कामप्रभृतनयनः सर्वांगसुन्दरो दृढः ॥ ६ ॥
अभवत् क्षणमात्रेण सानुरागश्च भावुकः ।
पूर्णकला तु तं दृष्ट्वा सानुरागं तु निर्जने ॥ ७ ॥
जम्भाभंगकृतायासवेपमानशरीरकम् ।
द्रुतं तद्बाणनिर्भिन्ना साभिलाषा बभूव ह ॥ ८ ॥
पार्श्वे सा निषसादाऽस्य स्पृष्ट्वा विहस्य वै मुहुः ।
हन्यमाना विशेषेण कामबाणैः पतिव्रता ॥ ९ ॥
भूमिं लिलेख चांगुल्या पश्यन्ती तन्मुखाम्बुजम् ।
सायं समयः सञ्जातो हारीतस्तामनागताम् ॥१०॥
ज्ञात्वाऽन्वेष्टुं चिरं तत्राऽऽययौ यत्र तु सा सती ।
तिष्ठत्येव न संभोगं लब्धवती च तावता ॥११॥
हारीतस्तां सतीं पतिव्रतां दृष्ट्वा तु मोहिताम् ।
तां विमोहां कारयन्तं जल्पन्तं च रजोमयम् ॥१२॥
कामस्य ह्यद्रुतं भावं ज्ञात्वा कोपात् समब्रवीत् ।
यस्मात् पाप त्वया पत्नी ममैवं शरपीडिता ॥१३॥
अनभिज्ञा तथा साध्वी स्वामिधर्मपरायणा ।
प्रतार्यते सुरूपः सन् भोक्तुमिच्छसि मे प्रियाम् ॥१४॥
कुष्ठव्याधिसमायुक्तस्तस्माद् विप्रियदर्शनः ।
स्वकैर्दारैस्तथा मुक्तो भविष्यसि न संशयः ॥१५॥
इत्युक्तः सः प्रणिपत्योवाच हारीतमुत्तरम् ।
मया भार्या तव दृष्टा मोहमात्रेण वै मुने ॥१६॥
न च भुक्ता तथा नैव कुचेष्टापि कृताऽधुना ।
तस्मान्नाहं शापपात्रं क्षमां कुरु कृपानिधे ॥१७॥
पापं त्रेधा मानसं वाचिकं कर्मजमित्यपि ।
मनस्तापाद् व्रजेत्पापं मानसं तद्गतं मम ॥१८॥
वाचिकं तु जपेनैव यद्वा स्तवनमात्रतः ।
तस्य प्रसादनेनैव नश्यति यत्र तत्कृतम् ॥१९॥
प्रायश्चित्तैर्यथोक्तैश्च कर्मजं पातकं व्रजेत् ।
कर्मजं न कृतं कृतं मानसं वाचिकं च यत् ॥२०॥
भवत्प्रसादतो नश्येत् प्रसन्नो भव सर्वथा ।
हारीतः प्राह तं कामं देहप्राबल्ययोगतः ॥२१॥
प्रथमं मनसा सर्वं चिन्त्यते तदनन्तरम् ।
ततः प्रजल्पते वाचा क्रियते कर्मणा पुनः ॥२२॥
प्रथमं हि मनस्तस्मात् सर्वकृत्येषु दोषवत् ।
तस्मात्ते निग्रहश्चात्र मानसोऽपि कृतो मया ॥२३॥
रवेराराधनेनैव कुष्ठस्ते विगमिष्यति ।
इयं भार्या मम पत्नी भूत्वा खण्डशिला क्षणम् ॥२४॥
सूर्याराधनपुण्येन सती पत्नी भविष्यति ।
इत्युक्त्वा च ययौ स्वस्याऽऽश्रमं हारीतको मुनिः ॥२५॥
पूर्णकला शिला जाता कामः कुष्ठी ततोऽभवत् ।
नागनद्यास्तटे सूर्ये ध्यात्वाऽऽराधनमाचरत् ॥२६॥

मासान्ते रविरागत्य कामकुष्ठं ह्यनाशयत् ।
शिलां स्पृष्ट्वा सतीं पत्नीं कृत्वा पूर्वं यथास्थिताम् ॥२७॥
ददौ नारायणमन्त्रं ययौ सूर्यो दिवं प्रति ।
कामः कामस्य भवनं सती हारीतकगृहम् ॥२८॥
ययौ पतिं नमस्कृत्य वस्तुतः पावनी तदा ।
सिषेवे भावतः साध्वी भेजे नारायणं हरिम् ॥२९॥
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ।
जजाप नित्यदा मन्त्रं बभूव दिव्यवैष्णवी ॥३०॥
अथ तस्याः सन्निधौ वै दीर्घिकानामकन्यका ।
समागच्छति नित्यं वै सेवनार्थं गृहान्तरात् ॥३१॥
पर्णशाला च सान्निध्ये वर्तते इतिभावतः ।
नित्यं पूर्णकलापार्श्वे तिष्ठति चत्वरे द्रुमे ॥३२॥
वेदिकायां च शालायां जपति श्रीहरेर्मनुम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥३३॥
एवं जापप्रभावेण दिव्यदेहा हि कन्यका ।
बभूव व्योमचारा च निरावरणसिद्धिका ॥३४॥
वीरशान्तस्य च ऋषेः पुत्री सा दीर्घिका ह्यभूत् ।
अतिदीर्घा प्रमाणेन जनहास्यविवर्धिनी ॥३५॥
न कश्चिद् वरयामास दृष्ट्वाऽतिदीर्घिकां तु ताम् ।
अतिसंक्षिप्तकेशीं च ह्यतिदीर्घां च वामनाम् ॥३६॥
उद्वाहयति यः सः षण्मासान्तरे मृतिं व्रजेत् ।
इतिकारणमालम्ब्य न गृह्णाति जनश्च ताम् ॥३७॥
ततो वैराग्यमापन्ना तपस्तेपे सुदारुणम् ।
चान्द्रायणानि कृच्छ्राणि तथा चीर्णान्यनेकशः ॥३८॥
पाराकाणि यथोक्तानि तथा सान्तपनानि च ।
एवं तस्या व्रतस्थायास्तेजो वृद्धिं गतं बहु ॥३९॥
आकाशगामिनी शक्तिरुद्भूता तपसो बलात् ।
ततो महेन्द्रसदसि याति समुत्सवादिषु ॥४०॥
यदा देवसभातः सा प्रयाति स्वगृहं तदा ।
तदासनाऽभ्युक्षणं च कुर्वन्तीन्द्रस्य किंकराः ॥४१॥
तथा दृष्ट्वाऽभ्युक्षणं च पप्रच्छ सा पुरन्दरम् ।
कं दोषं वीक्ष्य मे शक्र प्रोक्ष्यते त्वासनं मम ॥४२॥
इन्द्रः प्राह सुते ! तेऽस्ति शारीरो दोष एव ह ।
त्वं कुमार्यपि संप्राप्ता ऋतुकालं विगर्हितम् ॥४३॥
अविवाहश्च तेऽद्यापि त्वशुद्धिः सा त्वयि स्थिता ।
ऋतुकाले पतियोगः शुद्धिकरो हि योषिताम् ॥४४॥
तत् त्व वरय भर्तारं येन यास्यसि मेध्यताम् ।
तच्छ्रुत्वा पृथिवीं गत्वा चत्वरेषु त्रिकेषु च ॥४५॥
उद्धृत्य दक्षिणं पाणिं वक्ति वरार्थमेव यत् ।
यदि कश्चिद् द्विजो जात्यः पाणिग्रहं करोतु मे ॥४६॥
मम तपसश्चार्धं तु तस्मै ददामि साम्प्रतम् ।
जल्पन्तीं तां जना हास्यं चक्रुर्नर्म परस्परम् ॥४७॥
एकः कश्चित् कुष्ठरोगी ब्राह्मणः प्राह दीर्घिकाम् ।
अहं त्वामुद्वहिष्यामि कृत्वा पाणिग्रहं तव ॥४८॥
ततस्तस्याः कुमार्याः स पाणिं जग्राह साऽप्यथ ।
पतिं प्राह वद मे कां सेवां करोमि ते पते ॥४९॥
पतिः प्राहाऽष्टषष्टितीर्थेषु गन्तुं मयेष्यते ।
सहायेन त्वदीयेन यदि शक्नोषि तत्कुरु ॥५०॥
अहो भाग्यमिति मत्वा ततस्तूर्णं पतिव्रता ।
कारयामास सुलभं वंशकुटीरकं शुभम् ॥५१॥
मृदुतूलासनयुक्तं ततः प्राह निजं पतिम् ।
मम देवाऽऽरोह मंजुषासनेऽसगमूर्धनि ॥५२॥
नयामि सर्वतीर्थेषु क्षेत्रेषु च शुभेषु च ।
ततः कुष्ठी प्रहृष्टश्च निषसाद कुटीरके ॥५३॥
सा तत् स्वमस्तके कृत्वा सर्वतीर्थे यथासुखम् ।
सर्वक्षेत्रेषु बभ्राम स्नापयन्ती निजं पतिम् ॥५४॥
तीर्थे स्नानात् सतीयोगात् पत्युः कुष्ठो निवर्तते ।
नित्यं कुष्ठस्य संह्रासो दृश्यते तेजसाऽधिकः ॥५५॥
एवं सा हाटकेशस्य क्षेत्रं प्राप्ता निशामुखे ।
नागवत्यास्तटे वृक्षच्छायामाश्रित्य पेटिकाम् ॥५६॥
स्थापयित्वा विशश्राम पतिस्तस्या नदीतटम् ।
प्रातरुत्थाय च शनैः स्नातुं माण्डुक्यसंज्ञकः ॥५७॥
यष्ट्या याति सुतौ पत्रसमुदायं विलंघ्य च ।
तावत् पत्रेषु ऋषिराट् माण्डव्यो निद्रितोऽभवत् ॥५८॥
माण्डुक्येन पदा यष्ट्या स्पृष्टः पत्रान्तरस्थितः ।
अजानता गतेर्मार्गे माण्डव्यो जागृतोऽभवत् ॥५९॥
प्राह . कोऽयं महामूढः पदा यष्ट्या च मामिह ।
ताडयति मम निद्राभंगं करोति पापवान् ॥६०॥
सूर्योदयात् प्रागेव ते मृतिर्भवतु वै ध्रुवा ।
माण्डुक्यस्तं तथा श्रुत्वा ननाम वै मुहुर्मुहुः ॥६१॥
तथापि तोषमेवाऽयं नापन्नो माण्डवीसुतः ।
माण्डुक्यस्त्वरितः स्नात्वा चागत्य वृक्षसन्निधौ ॥६२॥
पत्नीं प्राह यथावृत्तं कुरु सेवां तथान्तिमाम् ।
माण्डव्यशापतश्चाहं मरिष्ये प्राक् रवेर्दृशेः ॥६३॥
दीर्घिका च तदा प्राह पातिव्रत्यं तु मे यदि ।
तीर्थयात्रा च विधिना पतिसेवा च भावतः ॥६४॥

सर्वं सत्यव्रतं चेन्मे सूर्योदयोऽत्र मा भवेत् ।
इत्युक्तो भास्कराऽश्वानां स्तंभनं व्योममण्डले ॥६५॥
बभूव सहसा तेन नाभ्युदेति प्रभाकरः ।
रात्रिकालो महाञ्जातः सर्वे सूर्योदयं विना ॥६६॥
बभूवुश्चातिदुःखस्था रुद्धा यज्ञादिकाः क्रियाः ।
श्राद्धाऽध्ययनदानानि धर्मकृत्यानि यानि च ॥६७॥
सूर्याधाराणि सर्वाणि रुद्धानि च विशेषतः ।
देवाः स्वर्गपराः सर्वे यज्ञभागविवर्जिताः ॥६८॥
जाताश्च दुःखिताः सर्वे ययुर्यत्र दिवाकरः ।
प्राहुर्देव कथं नैव करोष्युदयनं प्रभो ॥६९॥
एतत् त्वया विना सर्वं जगद् व्याकुलतां गतम् ।
सूर्यः प्राह भयात् पतिव्रतायाः नोदयो मम ॥७०॥
तस्माद् गत्वा सुराः सर्वे तां वदन्तु कृते मम ।
येन तद्वाक्यमासाद्य गमिष्याम्युदयं सुखम् ॥७१॥
अन्यथा मां शपेत् क्रुद्धा नूनं सा हि पतिव्रता ।
पातिव्रत्येन तपसा वर्तते सा सुरेश्वरी ॥७२॥
कस्तस्या वचनं शक्तः कर्तुं चैवमतोऽन्यथा ।
एतस्मात्कारणाद् भीतो नोद्गच्छामि कथंचन ॥७३॥
पतिव्रतात्वमापन्ना नारी विदन्ति तत्फलम् ।
अश्वमेधसहस्रेण यत्फलं जायते हि तत् ॥७४॥
इत्युत्तमतपोयोगाद्बिभेमि सत्ययोषितः ।
ततो देवा द्रुतं यान्तु यत्राऽस्ति सा पतिव्रता ॥७५॥
अथ देवाः समायाता दीर्घिकां जगदुश्च ते ।
त्वया पतिव्रते ! सूर्यो यन्निषिद्धो दिवाकरः ॥७६॥
शुभं तन्न कृतं भद्रे क्रिया नष्टा रविश्रिताः ।
तस्मादुद्गच्छतु प्राज्ञे ! तव वाक्याद् दिवाकरः ॥७७॥
यज्ञक्रिया जपो होमः प्रवर्तन्ते यतः शुभे ।
दीर्घिका च तदा प्राह माण्डव्येन च रोषतः ॥७८॥
मे पतिः शप्त एवाऽस्ति रव्युदये मृतो भवेत् ।
ततो मया निरुद्धोऽस्ति सूर्यो ह्युदयनं प्रति ॥७९॥
विना कान्तं न मे सूर्योदयेनाऽस्ति प्रयोजनम् ।
श्राद्धदानादिकैः कृत्यैरन्यैर्वा न प्रयोजनम् ॥८०॥
अथ ते विबुधाः प्राहुर्विचार्य विनयान्विताः ।
उद्गच्छतु रविर्भद्रे तवाऽयं दयितः पतिः ॥८१॥
कायाकल्पं समासाद्य पुनर्जीवतु तत्क्षणम् ।
पञ्चविंशतिवर्षीयं कामदेवमिवाऽपरम् ॥८२॥
त्वं च द्रक्ष्यसि संभूत्वा कन्या पञ्चदशाब्दिकी ।
एवं श्रेष्ठं सुखं लोके स्वेच्छया साधयिष्यसि ॥८३॥
सूर्योदये तव पत्युः शरीरं निधनं गतम् ।
पुनः सञ्जीवयिष्यामो देहि सूर्योदयं हि नः ॥८४॥
इत्युक्ता बाढमित्यंगीकृत्योवाच सती पुनः ।
यथा देवाः प्रवदन्ति दम्पत्योर्वै नवं वयः ॥८५॥
करिष्यन्त्यावयोस्तेन सत्येनोदय भास्कर ।
इत्युक्तमात्रे प्राक् काष्ठा प्रभाता चाभवद् द्रुतम् ॥८६॥
अरुणस्य प्रवेशश्चाऽदृश्यताऽरुणपर्वते ।
तावत् सूर्योदयो जातः संमृतो दीर्घिकापतिः ॥८७॥
विबुधानां करैः स्पृष्टः पुनरेव समुत्थितः ।
पञ्चविंशतिवर्षीयः कामरूपोऽतिसुन्दरः ॥८८॥
दीर्घिकाऽप्यभवत्पञ्चदशवर्षाऽतिसुन्दरी ।
दिव्या देवीसमा देवस्पर्शेन कमलासमा ॥८९॥
देवास्तां सादरं प्रोचुः सकान्तां वै पतिव्रताम् ।
वरं वृणु सति साध्वि नाऽदेयं विद्यते तव ॥९०॥
सा चोवाच नदीतीर्थं दीर्घिकेति जगत्त्रये ।
अद्यप्रभृति लोके वै ख्यातं मे नामतो भवेत् ॥९१॥
अन्ते धाम हरेर्मोक्षस्थलं लभेयमाच्युतम् ।
सह भर्त्रेति तां प्राहुस्तथाऽस्त्विति सुरा ययुः ॥९२॥
ततः सा बहुकालं वै सुखं प्राप्य पतिव्रता ।
उत्तरे वयसि प्राप्ते कान्तं वीक्ष्य मृतं सती ॥९३॥
सह तेन जगामेयं ब्रह्मलोकं पतिव्रता ।
एवं ते लक्ष्मि ! चाख्यातं दीर्घिकाव्रतमुत्तमम् ॥९४॥
पठनाच्छ्रवणात्तथावर्तनात् सेवनादपि ।
भुक्तिं मुक्तिं लभेन्नारी नरोऽपि नात्र संशयः ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने हारीतपत्न्यां पूर्णकलायां मोहितकामदेवस्य कुष्ठित्वं पूर्णकलायाः शिलात्वं पुनरुद्धारः, दीर्घिकायाः पतिसेवापुण्येन सूर्यस्तम्भनं पतिसहितायास्तस्या नवयौवनं मोक्षश्चेत्यादिनिरूपणनामा द्व्यधिकपञ्चशततमोऽध्यायः ॥ ५०२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथां मुनेर्जाबालेर्मोक्षकारिणीम् ।
जबालायाः ऋषिदास्याः पुत्रो जाबालिसंज्ञकः ॥ १ ॥
ब्राह्मणस्य तु बीजेन समुत्पन्नो बभूव ह ।
कौमारब्रह्मचर्येण येन चीर्णं तपः सदा ॥ २ ॥
कृच्छ्रचान्द्रायणादीनि पाराकाणि शनैः शनैः ।
कुर्वताऽनेन वै देवा संनीता भयगोचरम् ॥ ३ ॥

ततो देवा हि मिलिताश्चक्रुर्विघ्नस्य मन्त्रणाम् ।
रंभां संप्रेषयामासुर्ब्रह्मचर्यविघातिनीम् ॥ ४ ॥
ब्रह्मचर्यं तपोमूलं सिद्धिसम्पादकं महत् ।
आबालाद् ब्रह्मचारी च जाबालिस्तेजसा महान् ॥ ५ ॥
कामधर्मं न जानाति नारीसंगमवर्जितः ।
तस्य क्षोभाय च देवं वसन्तं सायुधं तथा ॥ ६ ॥
कामं रतिं तथा प्रीतिं प्रेषयामासुरीश्वराः ।
इन्द्राज्ञया गताः सर्वे हाटकेश्वरभूतलम् ॥ ७ ॥
जाबालेः पर्णशालायाः सन्निधौ कुसुमाकरः ।
चक्रेऽकस्मादशोकस्य सुशोभां पुष्पसञ्चयैः ॥ ८ ॥
तिलकानां च चूतानां शोभां मञ्जरिकादिभिः ।
सरोजानि समन्ताच्च विकासं प्रापुरुत्तमम् ॥ ९ ॥
ववौ च सुरभिर्वायुर्दाक्षिणात्यः स्मरप्रदः ।
तत्रान्तरे तस्य मुनेः रंभा सामीप्यमागता ॥१०॥
मुनिः पश्यति यावत् तां साऽपि वस्त्रं विहाय च ।
समीपवर्तिसलिले संस्नातुं प्रविवेश ह ॥११॥
विवस्त्रां तां समालोक्य कामस्य वशगोऽभवत् ।
पुलकांचितसर्वांगः क्षुभितश्चाऽभवत् ततः ॥१२॥
रम्भा जलाद् विनिर्गत्य वस्त्रमावृत्य चार्धकम् ।
आर्द्ररूपा मुनेः पार्श्वे गता ननाम सस्मिता ॥१३॥
प्रोवाच मधुरं ब्रह्मन्नाश्रमे कुशलं किमु ।
मुनिः प्राह सदा मेऽस्ति कुशलं च तवागमात् ॥१४॥
का त्वं देवी मानुषी वा मम मन्मथवर्धिनी ।
रम्भा प्राह कथं गात्रे स्वेदस्ते विकृतिस्तथा ॥१५॥
मुनिः प्राह तवाऽऽलोकात् स्वेदो मे मन्मथोद्भवः ।
ब्रह्मचर्यपरस्यापि महाव्रतेऽपि वर्तिनः ॥१६॥
रम्भा प्राह च यद्येवं मां भजस्व यथासुखम् ।
नात्र कश्चिद् भवेद् दोषो भजमानाऽस्मि यत् स्वयम् ॥१७॥
अप्सरोऽहं स्वर्गपत्नी तव भक्तां भजस्व माम् ।
यो नारीं कामसन्तप्तां स्वयं प्राप्तां परित्यजेत् ॥१८॥
नारीनिःश्वासदग्धः स सर्वथा हीयते जनः ।
एवमुक्त्वा तया सोऽपि परिष्वक्तो महामुनिः ॥१९॥
एवं तया समं रेमे स्थितो यावद्दिनक्षयम् ।
ततो निष्कामतां प्राप्तो विससर्ज च तां ततः ॥२०॥
सा च गत्वा सुरान्प्राह क्षोभितो वै महामुनिः ।
तपस्तस्य हृतं सर्वमिन्द्र त्वं सुखभाग् भव ॥२१॥
अथ दध्रे मुनेर्गर्भं सुषुवे सा च बालिकाम् ।
मुनिर्यत्र पुनश्चक्रे तपस्तत्र ययौ च सा ॥२२॥
नीत्वा सरोजपत्राक्षीं कन्यां चन्द्रशुभाननाम् ।
गत्वाऽऽश्रमे ऋषेरग्रे मुमोचेदं च साऽब्रवीत् ॥२३॥
तव वीर्यसमुत्पन्नां मम गर्भे प्ररोपिताम् ।
कन्यकां ते सुतां दिव्यां परिपालय ते नमः ॥२४॥
न स्वर्गे विद्यते वासो मानुषाणां कथंचन ।
एतस्मात् कारणात् तुभ्यं दत्वा यामि दिवं पुनः ॥२५॥
एवमुक्त्वा ययौ रंभा जाबालिः स्नेहपूरितः ।
कन्यां तां पालयामास रसैर्मिष्टफलोद्भवैः ॥२६॥
वर्धते स्म मृगैः सार्धं क्रीडति स्म च पक्षिभिः ।
तस्यर्षेः सर्वकार्येषु साहाय्यं स्म करोति च ॥२७॥
समित्कुशादि च वनादानयामास नित्यदा ।
एकदा स्वाश्रमाद् दूरं फलार्थं सा जगाम च ॥२८॥
तदा व्योम्ना विमानस्थश्चित्रांगदाभिधो दिवः ।
गान्धर्वो निर्ययौ दृष्ट्वाऽवतीर्य तां जगाद च ॥२९॥
का त्वं चैकाकिनी बाले वने भ्रमसि कन्यके ।
कन्या प्राह च जाबालेः कन्या फलवती ह्यहम् ॥३०॥
फलपुष्पार्थमायाता समीपे मे पिताऽस्ति च ।
चित्रांगदस्तदोवाच पिता ते भार्यया विना ॥३१॥
कुमारब्रह्मचारी त्वां जनयामास वै कथम् ।
कन्योवाच मम माता रम्भानाम्न्यप्सरोवरा ॥३२॥
मुनिं संसेव्य तद्द्वारा पुत्रीं प्राप ततः पिता ।
जाबालिर्मे जनकोऽस्ति पोषिता तेन सद्रसैः ॥३३॥
चित्रांगदस्ततः प्राह वरारोहे भजस्व माम् ।
अहं चित्रांगदो नाम गन्धर्वस्त्रिदिवौकसाम् ॥३४॥
कन्या प्राह कुमार्यस्मि तथा च वशगा पितुः ।
तस्मात्प्रार्थय मे तातं स मां तुभ्यं प्रदास्यति ॥३५॥
ममापि रोचते चित्ते भवान् युवा सुरूपवान् ।
चित्रांगदः प्राह शक्नोम्यर्थयितुं न वै तथा ॥३६॥
को जानाति हि तच्चित्तं कीदृग्रूपं भविष्यति ।
कन्या प्राह च यद्येवं विनाऽऽज्ञां किं करोम्यहम् ॥३७॥
जानीयाच्चेत् पिता मे त्वां मां चापि सम्प्रधक्ष्यति ।
इति प्रवदमानां तामधीरश्चित्रकांगदः ॥३८॥
जग्राह चांके प्रबलो रेमे तया वनद्रुमे ।
सापि कामेन संव्याप्ता रमयामास तं मुहुः ॥३९॥
दिव्यभावं परित्यज्य कामभावमुपाश्रिता ।
दिवसो निर्गतः सायं गतं तद् बुबुधे न सा ॥४०॥
जाबालिरथ तच्चिन्तामग्नो दुःखसमन्वितः ।
अनायातां सुतां विपद्गतां ज्ञात्वा निशामुखे ॥४१॥

परिबभ्राम सर्वत्राऽन्वेषयितुं वने वने ।
अहो व्याघ्रैर्भक्षिता किं वृक्षात् सम्पतिता किमु ॥४२॥
अगाधजलमग्ना वा नीता वाऽन्येन वै बलात् ।
इत्येवं च परिवदन् बभ्राम शोककर्षितः ॥४३॥
कंचिच्छब्दं समाकर्ण्य मत्वा बालां प्रयाति तम् ।
अथ वृक्षतले शब्दं शुश्राव कन्यकाकृतम् ॥४४॥
शीघ्रं तत्र समायातो ददर्श सनरां सुताम् ।
क्रोधाविष्टो गृहीत्वा च काष्ठं दुद्राव तं नरम् ॥४५॥
धिक्धिक् पाप वने पुत्र्याः कौमार्यं दूषितं त्वया ।
त्वया पुत्रि लाञ्छनं च दत्तं लोके ममोपरि ॥४६॥
तस्मादेनं तथा त्वां च नाशयामीति संवदन् ।
प्रहारं यावत् क्षिपति तावत् चित्रांगदोऽम्बरे ॥४७॥
अदृश्योऽभूच्च सा कन्या विवस्त्रा शक्तिवर्जिता ।
पितुर्भयाच्च तत्रैव निषसाद प्रकम्पिता ॥४८॥
मुनिः काष्ठप्रहारेण सन्ताड्य पतितां क्षितौ ।
मृतां मत्वा च विसृज्य यावत् पश्यति चाम्बरे ॥४९॥
तावच्चित्रांगदो दृष्टो विमानेन दिवं व्रजन् ।
शप्तो मुनिना द्राक् सः कुष्ठी भव पतात्र च ॥५०॥
गान्धर्वस्तु पपातोर्व्यां कुष्ठी जातः क्षणात्तदा ।
प्राह कुरु क्षमां मह्यं पुत्र्यै दयायुतो भव ॥५१॥
भूतं तद् भूतमेवाऽत्र स्वल्पः कोपो हि साधुषु ।
जाबालिस्तं तदा प्राह दण्डपात्रं विचार्य वै ॥५२॥
यथा पुत्री तथा त्वं च वस्त्रहीनः सदा भव ।
उभौ त्वत्र सदा नग्नौ तिष्ठतं वै वनद्रुमे ॥५३॥
यद्यन्यत्राऽगमिष्यतं शिरःस्फोटो हि वां भवेत् ।
एवं शापं तु तौ प्राप्तौ क्षेत्रे श्रीहाटकेश्वरे ॥५४॥
तत्रैव तौ तथा रुद्ध्वा मुनिर्निजाश्रमं ययौ ।
चैत्रमासे शुक्लपक्षे निशार्धे भगवान् हरः ॥५५॥
योगिनीभिरतत्र रन्तुं दैवात् समाययौ वने ।
तत्र तदा शुभाभ्यां च नग्नाभ्यां गायनं तथा ॥५६॥
नर्तनं च कृतं शंभोः प्रसादार्थं मुहुर्मुदा ।
शंभुस्तुष्टश्चकारैनं गन्धर्वं निरुजं तदा ॥५७॥
व्योमगामित्वसामर्थ्यं गणत्वं च ददौ हरः ।
कन्यां तां योगिनीत्वं च व्योमगामित्वमाददौ ॥५८॥
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ।
इति मन्त्रं ददौ ताभ्यां ददौ तुलसीमालिकाम् ॥५९॥
भक्तौ तौ वैष्णवौ जातौ हाटकेश्वरतीर्थके ।
चित्रांगदेन संशप्तो जाबालिश्च निरम्बरः ॥६०॥
जनहास्यास्पदो नित्यं यथाऽहं त्वं तथा भव ।
इतिशापेन संदग्धो गर्हयामास योषितम् ॥६१॥
अहो पापात्मनां पुंसां योषित्संगो हि जायते ।
सकृद् योषित्प्रसंगेन मम दुःखं हि कीदृशम् ॥६२॥
आजन्ममरणं यावत्पापं प्राप्तं विवस्त्रकम् ।
तर्हि स्त्रीषु प्रसक्तानां का गतिरित्यचिन्तयत् ॥६३॥
एवं तस्य ब्रुवाणस्य पुत्री प्राह च योगिनी ।
एतच्चराचरं विश्वं स्त्रीभिः सन्धार्यते शुभम् ॥६४॥
कथं तां निन्दसि पितर्निन्दको दुःखमवाप्नुयात् ।
पिता प्राह स्त्रियः शश्वत् सर्वावस्थासु दुःखदाः ॥६५॥
इह लोके परत्रापि ताभ्यः सौख्यं न लभ्यते ।
पुत्री प्राह पितस्ते वै बुद्धिर्नास्ति दमो न च ॥६६॥
किमन्त्यजोऽपि तत्कर्म कुरुते यत् त्वया कृतम् ।
अहं काष्ठप्रहारेण त्वया प्रहारिता मुहुः ॥६७॥
स्त्रीहत्योद्भवपापस्य चिन्ता नाऽभूच्च ते हृदि ।
विशेषेण सुतायाश्च का ते गतिर्भविष्यति ॥६८॥
शप्ताऽहं सर्वदा नग्नभावे त्वत्पातकं च ते ।
नित्यं नवनवोत्थं मन्निश्वासजं महत्तरम् ॥६९॥
कल्पान्तेऽपि च ते तस्य नैवाऽन्तः संभविष्यति ।
तस्माद् भुंक्ष्व तथैव त्वं गन्धर्वशापतः पितः ॥७०॥
न भूयो निन्दसि प्रायो न च संताडयिष्यसि ।
अनिन्द्यां योषितः सर्वा नैता दूष्यन्ति कर्हिचित् ॥७१॥
मासि मासि रजो ह्यासां दुष्कृतं परिकर्षति ।
पिता प्राह स्त्रियः पापा नैताः शुद्ध्यन्ति कर्हिचित् ॥७२॥
सुता प्राह न चैवं वै वेदोक्तं शृणु शासनम् ।
ब्राह्मणाः पादतो मेध्या गावो मेध्यास्तु पुच्छतः ॥७३॥
अजाश्च मुखतो मेध्याः स्त्रियो मेध्याश्च सर्वतः ।
पिता प्राह तदा शास्त्रं परित्यज्य च कल्पितम् ॥७४॥
ब्राह्मणाः सर्वतो मेध्या गावो मेध्याश्च सर्वतः ।
अजाश्चापि क्वचिन्मेध्या न मेध्याश्च स्त्रियः क्वचित् ॥७५॥
पुत्र्युवाच गृहे चिन्तामणिः कल्पद्रुमो गृहे ।
कुबेरः किंकरस्तस्य यस्याऽस्ति कामिनीगृहे ॥७६॥
पितोवाचाऽऽपदस्तस्य दुःखं तस्याऽखिलं गृहे ।
नरकोऽस्त्यत्र वै तस्य यस्यास्ति कामिनी गृहे ॥७७॥
पुत्र्युवाचात्र सौख्यानि भोगस्थानानि यानि च ।
धर्मार्थकामजातानि तानि स्त्रीभ्यो भवन्ति हि ॥७८॥
पितोवाचाऽत्र दुःखानि यानि पापानि देहिनाम् ।
यानि कष्टानि गण्यन्ते स्त्रीभ्यस्तानि भवन्ति हि ॥७९॥

पुत्र्युवाच विवाहेन धर्मार्थकाममोक्षकान् ।
वह्निप्रदक्षिणाभिश्च नारी ज्ञापयति ध्रुवान् ॥८०॥
पितोवाच विवाहेन जन्मजन्मान्तराणि च ।
संसारभ्रमणान्येव नारी ज्ञापयति भ्रमैः ॥८१॥
पुत्र्युवाच सतीं पत्नीं प्राप्य सर्वार्थसाधिकाम् ।
के नाम नैव रज्यन्ते देहिनो ज्ञानिनोऽपि च ॥८२॥
पितोवाच न रज्यन्ते विरागाश्चात्मनि स्थिताः ।
मूढास्तासु निपतन्ति ज्वालायां शलभा इव ॥८३॥
पुत्र्युवाच स्तनौ श्रोण्यौ जघनं मुखमण्डलम् ।
सेव्यन्ते पुण्यवद्भिश्च तदन्ये भाग्यवञ्चिताः ॥८४॥
पितोवाच विनाशस्योन्मुखा लेखा ललाटजा ।
यस्यास्ति तेन सेव्यन्ते तान्यन्ये पुण्यशालिनः ॥८५॥
पुत्र्युवाच स्त्रियाः स्पर्शो दर्शनं रचनादयः ।
परिष्वंगश्च सुखदाः सर्वथा श्रमनाशकाः ॥८६॥
पितोवाच स्त्रियाः स्पर्शादयो मिष्टविषात्मकाः ।
संगाद्या दुःखदाः सृष्टौ साध्वाश्रमविनाशकाः ॥८७॥
पुत्र्युवाच स्त्रिया दुष्टः सुखी सुकृती को न वै ।
स्पृहणीयतमः को न स्त्रीजनो यस्य वल्लभः ॥८८॥
पितोवाच स्त्रिया दृष्टो दुःखभाक् पापवान्न कः ।
तिरस्कार्यो भवेत्को न स्त्रीजनो यस्य वल्लभः ॥८९॥
पुत्र्युवाचापि कीटस्य रोचते स्त्रीसमागमः ।
मनुष्यस्य च देवादेः किं पुनर्ज्ञानिनोऽपि च ॥९०॥
पितोवाचातिपापस्याऽमेध्यस्य रोचते कृमेः ।
अमेध्यं स्त्रीशरीरं कामिनो नान्यस्य वै सतः ॥९१॥
पुत्र्युवाच स्वयं ब्रह्मा पाशं नारीस्वरूपकम् ।
कथं वै जनयामास ब्रह्मा भुनक्ति यं स्वयम् ॥९२॥
त्वया रंभा कथं भुक्ता पालिताऽहं सुता कथम् ।
अन्यलग्ना कथं शप्ता यदि मूल्यं न गण्यते ॥९३॥
त्वं च मात्रा कथं लब्धो जबालया हि सेवया ।
ऋषीणामाश्रमेष्वेव पश्य मूल्यं स्त्रियास्तदा ॥९४॥
कस्य पुत्रोऽसि पृष्टस्त्वं याज्ञवल्क्येन पाठने ।
मातरं पृष्टवान् त्वं च तदा मूल्यं स्त्रियास्तव ॥९५॥
इदानीं क्व गतं तद्वै ज्ञानं नारीप्रदर्शितम् ।
मातृपुत्रोऽसि सम्यक् तत् पितृपुत्रो न वै ह्यसि ॥९६॥
अज्ञातपितृका नारीं निन्दन्ति त्वादृशाः पितः ।
ते सदा कालसूत्रे वै पच्यन्ते निन्दकाः स्त्रियाः ॥९७॥
पितरौ सर्वदा पूज्याविति मत्वा मया पितः ।
त्वं न शप्तस्तथाऽप्यत्र गान्धर्वेण प्रशापितः ॥९८॥
स्वकृत्यस्य फलं लब्धं त्वया चापि मयापि च ।
कन्या देया योग्यकाले यस्मै कस्मैचिदेव ह ॥९९॥
दैवयोगादहं प्राप्ता गान्धर्वाय क्षतिस्तु का ।
अप्सरःकन्यका चाहं गान्धर्वं समुपाश्रिता ॥१००॥
का हानिस्तेऽत्र सम्बन्धे शापे वा लाभ एव कः ।
विना विचारं कृतवान् क्रुद्धश्च ज्ञानदुर्बलः ॥१०१॥
क्षमस्वाऽधिकवाचो मे ह्यनुनेयाऽस्मि वै यतः ।
इत्युक्त्वा साश्रुनेत्रेयं प्रणनाम च पादयोः ॥१०२॥
पिता तु लज्जितो जातः पुत्र्या ज्ञानं विलोक्य च ।
प्राह धन्यतरं मन्ये त्वहमात्मानमद्य वै ॥१०३॥
यस्य मे त्वं सुता जाता ईदृक्शास्त्रविचक्षणा ।
तस्मान्मे कोप एवाद्य शान्तः पुत्रि ! सुखा भव ॥१०४॥
इत्युक्त्वा प्रययौ विप्रः पर्णशालां प्रति द्रुतम् ।
पुत्री चक्रे तपस्तत्र योगिनीमध्यवर्तिनी ॥१०५॥
अथ कालान्तरे तुष्टो नारायणः समाययौ ।
दिव्यरूपां विधायैव तां निनाय प्रमोक्षणम् ॥१०६॥
चतुर्भुजाऽभवत्साध्वी नारायणपतिव्रता ।
चित्रांगदो ययौ स्वस्य गान्धर्वलोकगाश्रमम् ॥१०७॥
जाबालिस्तपसा कृष्णनारायणं भजंस्ततः ।
शापमुक्तोऽभवत् कृष्णनारायणप्रतापतः ॥१०८॥
ययौ गोलोकमुत्कृष्टं धाम कृष्णकृपावशात् ।
आत्मनिवेदिता किं किं न करोति सुदुर्लभम् ॥१०९॥
अकार्यं चाविनाश्यं चाऽप्रधृष्यं शाश्वतं च यत् ।
परावृत्य नवं कृत्वा समर्पयति पद्गतम् ॥११०॥
अपि वज्रसमं भाग्यं शैथिल्यं नयति ध्रुवम् ।
कृष्णनारायणभक्तिर्नवं भाग्यं करोति च ॥१११॥
एतत्ते सर्वमाख्यातं लक्ष्मि वाञ्छाप्रपूरकम् ।
पठतां शृण्वतां चैव त्विह लोके परत्र च ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने
जाबालिना रम्भाद्वारोत्पादितपुत्र्याः फलवत्याश्चित्रां-
गदगन्धर्वकृतभोगे पितृशापेन नग्नयोगिनीत्वं,
पितुरपि समीपस्थायित्वं, ततस्तपसामुक्तिः,
संवादश्च पद्मशिलायां द्वयोर्वासश्चेत्यादि-
निरूपणनामा त्र्यधिकपञ्चशत-
तमोऽध्यायः ॥ ५०३ ॥

श्रीनारायण उवाच—

आदित्या वसवो रुद्रा अश्विनौ देवतेश्वराः ।
पूजनीयाः सदा लक्ष्मि ! योगक्षेमकरा हि ते ॥ १ ॥

वरुणश्च तथा सूर्यो भानुः पूषा च तापनः।
इन्द्रश्चैवाऽर्यमा चैव धाता चैव भगस्तथा ॥ २ ॥
गभस्तिर्धर्मराजश्च त आदित्या दश द्वयम्।
धरो ध्रुवश्च सोमश्च मखश्चाप्यनिलो नलः ॥ ३ ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ हि नामतः।
मृगव्याधश्च शर्वश्च मृगीव्याधस्तृतीयकः ॥ ४ ॥
अजैकपादहिर्बुध्न्यः पिनाकी षष्ठ इत्यपि।
दहनश्च कपाली च रैवतो नवमस्तथा ॥ ५ ॥
वृषाकपिस्त्र्यम्बकश्च रुद्रा एकादशैव ते।
नासत्यश्चापि दस्रश्च द्वावेतावश्विनीसुतौ ॥ ६ ॥
त्रयस्त्रिंशत्समाख्याता एते तु सुरनायकाः।
दानवानां च देवानां मानवानां च देहिनाम् ॥ ७ ॥
पूजनीयाः सदा तेन नापमृत्युः प्रजायते।
अष्टम्यां च चतुर्दश्यां रुद्राः पूज्याः सदा प्रिये ॥ ८ ॥
दशम्यां वसवः पूज्यास्तत्र शुक्ले विशेषतः।
सप्तम्यामथ षष्ठ्यां च आदित्यान्पूजयेत् तथा ॥ ९ ॥
अश्विपुत्रौ तथा पूज्यौ द्वादश्यां षोडशादिभिः।
रुद्रास्तुष्टा रक्षणं च ददत्यपि परं पदम् ॥१०॥
विलासादीन् ददत्येव स्वर्गे तु वसवोऽर्चिताः।
आदित्याः पूजितास्तुष्टा ऐश्वर्यं त्वर्पयन्ति वै ॥११॥
देववैद्यौ पूजितावश्विनौ नाशयतो रुजः।
सर्वेषां च सुरादीनां गुणगानादिलेखकः ॥१२॥
व्यासस्तु सर्वदा पूज्यो ज्ञानमोक्षप्रदो गुरुः।
यत्पुत्रः शुकनामाऽपि शुक्यां ब्रह्म बभूव ह ॥१३॥
वेदव्यासस्य वै चासीत् कलत्रार्थे मतिः क्वचित्।
ततो विचित्रवीर्यस्य क्षेत्रे पुत्रान् धुरन्धरान् ॥१४॥
सत्यवत्याः समादेशाज्जनयामास स प्रभुः।
पाण्डुं च धृतराष्ट्रं च विदुरं चेति कौरवान् ॥१५॥
वानप्रस्थेऽपि सन्तिष्ठन् चकार वंशविस्तरम्।
ततः स चिन्तयामास भार्यामद्य करोम्यहम् ॥१६॥
ततः स प्रार्थयामास जाबालिं मुनिपुंगवम्।
तस्य कन्यां द्वितीयां तु चेटिकाख्यां शुकीं शुभाम् ॥१७॥
जाबालिस्तु ददौ तस्मै चेटिकां स्वसुतां शुभाम्।
सापि गर्भवती जाता गर्भो याति बहिर्नहि ॥१८॥
द्वादशाब्दा अतिक्रान्ता न निर्याति बहिः खलु।
यत्किंचिच्छृणुते सर्वं गर्भे गर्भगतः सुतः ॥१९॥
शुकी सा गर्भतेजोभिः शुशुभे वेदसूरिव।
गर्भोऽपि हृदये सर्वं दधार ज्ञानचिन्तनम् ॥२०॥
वेदाः सांगाः श्रुतास्तेन गर्भेऽधिता यथाश्रुताः।
स्मृतयः संहिता मोक्षशास्त्राणि नीतयस्तथा ॥२१॥
ब्रह्माऽध्ययनमेवाऽपि व्याख्यानान्यात्मवन्ति च।
सर्वं गर्भे श्रुतं यद्यदधीतं यावदेव तत् ॥२२॥
यथा यथा सुतो वृद्धिं याति जठरमाश्रितः।
माता तथा तथा गुर्वी पीडां याति ततः पिता ॥२३॥
व्यासः पप्रच्छ कस्त्वं वै प्रविष्टो गर्भरूपधृक्।
कथं बहिर्न चाऽऽयासि वद सर्वं यथातथम् ॥२४॥
गर्भः प्राह पिशाचोऽहं राक्षसोऽहं च मानुषः।
सुरोऽहं तुरगश्चाहं गजोऽहं कुक्कुटोऽस्मि च ॥२५॥
छागोऽहं च कुमारोऽहं वृक्षोऽहं बालकोऽस्म्यहम्।
चतुरशीतिलक्षासुयोनिषु वै भ्रमन् मुहुः ॥२६॥
आगतोऽस्मि कथं वेद्मि कोऽहं ते वच्मि कं च माम्।
मानुषे जठरे चात्र प्रविष्टोऽस्मि निरञ्जनः ॥२७॥
अत्र योगं साधयामि प्राप्य ज्ञानं तु वेदजम्।
निर्विण्णोऽस्मि मोक्षमार्गं प्रतीक्षामि च शाश्वतम् ॥२८॥
न वै घोरेऽत्र संसारे भ्रमणं मे प्ररोचते।
न यास्यामि बहिर्गर्भादत्रैव ब्रह्मचिन्तनम् ॥२९॥
करिष्येऽथ गमिष्यामि मोक्षं तव कृपावशात्।
व्यासः प्राह शृणु चात्मन् निरञ्जनस्य ते सुत ॥३०॥
योनिकुण्डेऽतिदुर्गन्धे वस्तुं प्रीतिः कथं वद।
निष्क्रामस्व ततो विद्वन् गर्हितात् मूत्रकुण्डकात् ॥३१॥
बहिरागत्य योगं वा ज्ञानं चार्जय शोभनम्।
गर्भः प्राह नवं ज्ञानं नवो योगश्च नेष्यते ॥३२॥
तावज्ज्ञानं च वैराग्यं पूर्वजातिस्मृतिस्तथा।
यावद्गर्भस्थितिर्मेऽस्ति मोक्षेच्छा तावदेव ह ॥३३॥
जन्तुश्चेद् गर्भनिष्क्रान्तः स्पृश्यते बाह्यवायुना।
सर्वं गर्भगतं ज्ञानं योगो भानं विनश्यति ॥३४॥
तस्मान्नाहं कृतहानेर्निष्क्रमिष्ये कथञ्चन।
गर्भादेव प्रयास्यामि मोक्षमित्यस्ति निश्चयः ॥३५॥
व्यासः प्राह न ते चात्मन् वायुपाशो भविष्यति।
ज्ञानं योगश्च ते सर्वं यथार्थं स्थास्यति ध्रुवम् ॥३६॥
माया ते बाधते नैव गर्भे वा बहिरेव वा।
तस्माद् दर्शय मे वक्त्रं चानृण्यं संवृजाम्यहम् ॥३७॥
पितरश्च सुतृप्ताः स्युस्तव जन्मश्रवाद् द्रुतम्।
गर्भः प्राह यदि त्वं मे विष्णुं साक्षिणं रक्षय ॥३८॥
तदा बहिर्निःसरामि तत्र योग्यं कुरु द्रुतम्।
व्यासः सस्मर तच्छ्रुत्वा कृष्णनारायणं प्रभुम् ॥३९॥

कृष्णनारायणो देवस्तत्र क्षिप्रं समाययौ ।
साक्षी तत्राऽभवत् प्राह शृणु गर्भं हितावहम् ॥४०॥
प्रतिभूस्ते भवाम्यत्र सर्वं ज्ञानादिकं तव ।
स्थास्यत्येव बहिर्याहि गच्छ योगार्थमेव च ॥४१॥
माया मे वायुसंस्पर्शकृता व्याप्ता न ते भवेत् ।
अथ गर्भो विनिष्क्रान्तः कृष्णनारायणेच्छया ॥४२॥
द्वादशाब्दप्रमाणस्तु यौवनस्य समीपगः ।
जातमात्रो जातिस्मरो योगिराडिव चेतनः ॥४३॥
कृष्णं जननीं जनकं प्रणम्यैव च तत्क्षणात् ।
वनं स प्रस्थितो बालो व्यासस्तिष्ठेत्युवाच तम् ॥४४॥
संस्कारान् जातकर्मादीन् ते करोमि स्थिरो भव ।
चेटिकायाः सुतः प्राह संस्काराः प्रतिजन्मनि ॥४५॥
सहस्रशः कोटिशश्च जाता मे भवसागरे ।
यैरहं बन्धनरूपैः परिक्षिप्तोऽस्मि योनिषु ॥४६॥
अथ व्यासः शुकं नाम दधार भगवान् स्वयम् ।
शुको गन्तुं पदन्यासाँश्चक्रे व्यास उवाच तम् ॥४७॥
पितरं तं परित्यज्य योगार्थं यो वनं व्रजेत् ।
स याति नरकं पुत्र मा व्रज त्वं गृहे वस ॥४८॥
शुकः प्राह यथाऽहं ते सुतस्तथा गते भवे ।
त्वं चासीर्मे सुतश्चाहं पिता ते तत्र शासनम् ॥४९॥
त्वया पाल्यं मम व्यास यथैषा धर्मसंस्थितिः ।
नाहं निषेधनीयस्तु व्रजमानस्तपोवनम् ॥५०॥
व्यासः प्राह जनिं लब्ध्वा पुण्यप्राप्यां द्विजगृहे ।
संस्कारान् यश्च गृह्णाति वेदोक्तान् स विशिष्यते ॥५१॥
शुकः प्राह च संस्कारादात्ममुक्तिर्न निश्चिता ।
संस्काराच्चेद्भवेन्मुक्तिस्तादृग्धूर्तस्य सा भवेत् ॥५२॥
व्यासः प्राह भवेत्पूर्वं ब्रह्मचारी ततो गृही ।
अथ त्यागं पुरस्कृत्य ततो मुक्तिर्भवेत् सुत ॥५३॥
शुकः प्राह ब्रह्मचर्यान्मोक्षश्चेत् षण्ढ आप्नुयात् ।
गार्हस्थ्येन च मोक्षश्चेजगत्सर्वं तमाप्नुयात् ॥५४॥
वने वासाद् यदि मोक्षो मृगादीनां स वै भवेत् ।
त्यागाच्चेन्मुक्तिरुत्कृष्टा दरिद्राणां च सा भवेत् ॥५५॥
व्यासः प्राह गृहस्थादिक्रमेण सत्पथाश्रयः ।
इहाऽमुत्रानन्ददाता तेन मोक्षः फलात्मकः ॥५६॥
शुकः प्राह गृहैः सक्तो मोहरागवशंगतः ।
वासनाबन्धबद्धश्च यममार्गे फलं लभेत् ॥५७॥
व्यासः प्राह विना रागं पैत्र्यं दैवं प्रसाधयेत् ।
शुकः प्राह विना भक्तिं पैत्र्यं दैवं प्रतारयेत् ॥५८॥
व्यासः प्राह गृहे भक्तिं पैत्र्यं दैवं सदा कुरु ।
शुकः प्राह निजात्मा मे गृहं तत्र करोम्यहम् ॥५९॥
व्यासः प्राह विना पुत्रं पुंनामनरको ध्रुवः ।
पुत्रेण तस्य तरणं तस्मात्पुत्रः प्रशस्यते ॥६०॥
शुकः प्राह तथैव चेत् खरवानरसूकराः ।
पुत्रवन्तस्तरिष्यन्ति को विशेषोऽत्र मानुषे ॥६१॥
व्यासः प्राह यदि ज्ञानं तेषामपि च मोक्षणम् ।
शुकः प्राह पितस्तद्वै गर्भादेवाऽर्जितं मया ॥६२॥
गमिष्यामि समायातं मोक्षं भक्त्या च केशवम् ।
प्राप्तं चिन्तामणिं त्यक्त्वा कंकरं कथमावहेत् ॥६३॥
प्राग्ग्रासेऽमृतमुत्सृज्य मक्षिकां वै कथं ग्रसेत् ।
प्राप्ते स्वर्णरसे चाग्रे कर्दमं मर्दयेत् कथम् ॥६४॥
सूर्यस्य दर्शनं त्यक्त्वा राहुं कथं विलोकयेत् ।
दिव्यदीपं परित्यज्य धूम्रोल्कां कथमर्जयेत् ॥६५॥
एककारागारमुक्तौ द्वितीये वै कथं पतेत् ।
ब्रह्ममार्गे चावगते क्षुद्रस्रुत्या कथं सरेत् ॥६६॥
श्रेष्ठं चोपस्थितं त्यक्त्वा कनिष्ठं नावलम्बयेत् ।
सत्यं प्राप्तं परित्यज्य कृत्रिमं चाभिलषेत् कथम् ॥६७॥
अक्के चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्याऽर्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥६८॥
इत्युक्त्वा पितरं कृष्णद्वैपायनं हृदि स्थितम् ।
मातरं चेटिकां कृष्णशक्तिं प्रणम्य सादरम् ॥६९॥
ययौ वनं सदाऽवनं यत्रात्मना भवत्यपि ।
व्यासः शोकं चेटिका च दुःखं जगाम वै क्षणम् ॥७०॥
शुकी व्यासं ततः प्राह चरिष्यामि तपः पुनः ।
पुत्रार्थं येन वंशस्य वर्धको मे भवेत् सुतः ॥७१॥
व्यासाज्ञां सा समासाद्य तपस्तेपे पतिव्रता ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥७२॥
इति मन्त्रं ददौ व्यासो जजाप सा दिवानिशम् ।
कृष्णनारायणस्तत्र त्वाययौ हृष्टमानसः ॥७३॥
वरदोऽस्मीति तां प्राह वरं वरय सुव्रते ।
शुकी प्राह सुतं देहि मम वंशविवर्धनम् ॥७४॥
तथाऽस्त्विति हरिः प्राह ययावदर्शनं ततः ।
चेटिका सुसुतं लेभे कपिञ्जलमिति श्रुतम् ॥७५॥
कपिञ्जलो महायोगी पित्रोश्चैव समाज्ञया ।
गार्हस्थ्यं स्वीचकाराऽसौ भरद्वाजीं सुकन्यकाम् ॥७६॥
परिणेमे ततो भारद्वाजः पुत्रो बभूव ह ।
भरद्वाजस्य तैत्तिरः कामरूपधरः सुतः ॥७७॥

सच प्राग्ज्योतिष्देशे ययौ पर्वतभूस्तरे ।
ततः पुनः समागत्य नवलक्षाभिधेऽचले ॥७८॥
निवासं स्वीचकाराऽसौ कामाक्षीं चाऽभजत् सतीम् ।
कामरूपो महायोगी पर्वतीयो महेश्वरः ॥७९॥
पर्वतीयप्रजानां वै गुरुः राजा तपोबलात् ।
अभवत् तेन गिरयः कामरूपाभिधास्ततः ॥८०॥
अभवँश्च नराः स्वल्पा नार्यो बह्व्यः सतीच्छया ।
भजन्ति स्मैकपुरुषं शतं शतं हि योषिताम् ॥८१॥
अथ बालवयोगीन्द्रो ब्रह्मपुत्रातटे वसन् ।
तपश्चचार कठिनं बालवन्मोहवर्जितः ॥८२॥
तं ताः सम्प्रार्थयामासुर्नराणां वृद्धये ततः ।
सर्वाः पुत्रप्रसवाभिमुख्यो भवन्तु मद्वरात् ॥८३॥
यादृक्संख्याः कन्यकानां नराणां सन्तु ताः समाः ।
साम्योत्तरं साम्यभावे कन्याकुमारमातरः ॥८४॥
भविष्यथ यथायोग्या इति ताश्च तथाऽभवन् ।
एवं ते कथितं लक्ष्मि पुरावृत्तं युगे युगे ॥८५॥
नवं नवं पुनः सञ्जायते निर्माणवद् भवे ।
कामरूपं तथा तीर्थं बालवाकुण्डकं तथा ॥८६॥
भुक्तिमुक्तिप्रदं श्रेष्ठ पठनाच्छ्रवणादपि ।
यथेष्टदायकं मन्त्रसिद्धिप्रदं हि विद्यते ॥८७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कृष्णद्वैपायनव्यासस्य शुक्यां शुककपिञ्जलौ सुतौ,कपिञ्जलस्य भरद्वाजस्तस्य तैत्तिरः सुतः, बालवयोगिवरदानात् कामरूपदेशे नराणां नारीसमसंख्याकोत्पत्तिरित्यादिनिरूपणनामा चतुरधिकपञ्चशततमोऽध्यायः ॥५०४॥

श्रीलक्ष्मीरुवाच—

नारायण परब्रह्म भगवन् करुणानिधे ।
ध्यात्वा रूपं तव भक्ता भुक्तिं मुक्तिं प्रयान्ति च ॥ १ ॥
सनत्कुमारः सनकः सनन्दश्च सनातनः ।
सनत्सुजातः पञ्चैते त्वत्समा भुक्तिमुक्तिदाः ॥ २ ॥
वैष्णवानामग्रणीश्च शंकरो लोमशस्तथा ।
मार्कण्डेयो याज्ञवल्क्यो धर्मः शेषो वृषस्तथा ॥ ३ ॥
वेदाश्च वैष्णवा नित्या बलिर्बाणो विभीषणः ।
हनुमान् जाम्बवानश्वत्थामा प्रह्लाद आसुरिः ॥ ४ ॥
वोढुः पञ्चशिखो दिवोदासस्तथाऽम्बरीषकः ।
उद्धवश्च शशी सूर्योऽनिलश्चापि हुताशनः ॥ ५ ॥
एते भक्तास्तव नित्यं त्वाज्ञावहाः सुतास्तव ।
तव ध्यानं सदा कृत्वा चिरं तिष्ठन्ति जीविनः ॥ ६ ॥
शंकरश्च तव पुत्रः कथं पञ्चशिरा ह्यसौ ।
त्वत्स्वरूपाद्विभिन्नश्च किमत्र कारणं वद ॥ ७ ॥
एकमस्तकदेवस्य पञ्चमस्तकपुत्रकः ।
तदिदं महदाश्चर्यं संशयं मे निरासय ॥ ८ ॥

श्रीनारायण उवाच—

पूर्वं भगवताऽजेन कृत्वा सृष्टिं तु विस्तृताम् ।
चतुर्विधां बहुकालं नरनारीमयीं शुभाम् ॥ ९ ॥
ततः स चिन्तयामास नारीरूपाणि सर्वशः ।
मोहस्थानानि रम्याणि कृतान्यपि ततोऽपि च ॥१०॥
नारीणामपि यत्र स्यान्मोहस्तादृशपुत्तलीम् ।
रचयामीति संकल्प्य रूपसञ्चयसंयुताम् ॥११॥
एकामप्सरसं दिव्यां देवीभ्योऽपि च तैजसीम् ।
सर्वेषां घुसदां तेजः समादाय तिलं तिलम् ॥१२॥
रूपरूपातिरूपाढ्यां चमत्कृतिं स निर्ममे ।
यां दृष्ट्वा क्षोभमापन्नः स्वयमेव पितामहः ॥१३॥
ततस्तां प्रेषयामास योगिनः शंकरस्य वै ।
धैर्यस्य सम्परीक्षार्थं साऽपि कैलासमाययौ ॥१४॥
अपश्यच्छंकरं कृष्णध्यानमग्नं च निर्जने ।
नित्यं तत्र स्थिता भक्ता यथा ध्यानकरी सती ॥१५॥
समीपस्था कृष्णनारायणजापं चकार सा ।
तस्या देहात् कोटिचन्द्रतुल्यं मिष्टं च शीतलम् ॥१६॥
कानकं प्रससारोग्रं तेजोमण्डलमद्भुतम् ।
तत्तेजो वर्तुलाकारं गत्वा शंकरपक्ष्मणोः ॥१७॥
लग्नं प्रकाशरूपं च नेत्रान्तः प्रविवेश ह ।
रश्मिद्वारागतं चान्तर्हृदयं यत्र योगिराट् ॥१८॥
तिष्ठत्यात्मनि चात्मानं संयुज्य तेजसां खनौ ।
तत्र शंभुश्च तत्तेजो ददर्श कमनीयकम् ॥१९॥
द्वेधा वृत्तिः समाधौ च जाता सत्या मृषा समा ।
मृषां लोकयितुं चेहा बभूव शंकरस्य वै ॥२०॥
सत्यां विसृज्य चायातो बहिः किमिति कौतुकात् ।
नेत्रमुद्घाट्य च यावत् पुरः पश्यति सुन्दरीम् ॥२१॥
विसस्मार सतीं मूर्तिं विस्मयं परमं गतः ।
वृत्त्या तल्लीनया ज्ञात्वा मुग्धं दर्शनलालसम् ॥२२॥
सापि तृतीयनेत्रस्योद्घाटने भस्मताभयात् ।
मुग्धं विलोकयन्तं तं हित्वा पूर्वस्थलीं ततः ॥२३॥

प्रदक्षिणाया व्याजेन सा प्रणम्य कृतांजलिः ।
दक्षिणं सा गता पार्श्वे शंभुर्निश्चलमस्तकः ॥२४॥
द्रष्टुकामश्च तां हृदा समीयेषाऽतिरागतः ।
तावद्वै दक्षिणं वक्त्रं निर्गतं तत्क्षणं शुभम् ॥२५॥
अथ सा भयसम्पन्ना ययौ पश्चिमतोदिशम् ।
शंभुस्तस्याः स्वरूपाकृष्टान्तर्भावोऽपि पश्चिमम् ॥२६॥
वदनं तृतीयं चक्रे दर्शनार्थे नवं शुभम् ।
अथ सा भयमापन्नोत्तरभागं गता ततः ॥२७॥
तां द्रष्टुं चोत्तरं वक्त्रं निर्माय स ददर्श ताम् ।
अथाऽऽकाशे गता सा च तां द्रष्टुं पञ्चमं शिरः ॥२८॥
व्योमगं शंकरस्तत्र चकार च ददर्श ताम् ।
जहास च मुधा प्रेम्णा रूपलीनो बभूव ह ॥२९॥
ग्रीवां न चालयामास योगाभ्यासबलान्वितः ।
एतस्मिन्नन्तरे देवो नारदः पार्वतीं प्रति ॥३०॥
सर्वं निवेदयामास प्राह शंकरचेष्टितम् ।
दृष्ट्वा रूपवतीं नारीं कृतवान् स नवं नवम् ॥३१॥
मुखं तेनाऽभवद् वक्त्रपञ्चकं शंकरस्य वै ।
अहं जानामि नास्त्यन्या नारी त्वत्सदृशी क्वचित् ॥३२॥
पतिस्ते च कथं मुग्धो हास्यास्पदो भविष्यति ।
हास्यस्य पदवीं त्वं च गमिष्यस्यद्य पार्वति ॥३३॥
येन कामो भस्मरूपः कृतो योगीश्वरः स्वयम् ।
स चाद्य मायया विष्णोर्मोहं यातो दिवः स्त्रियाम् ॥३४॥
सर्वासां देवपत्नीनां पूज्या त्वं त्वत्पतिश्च सः ।
तच्चित्तं स्निग्धतां यातं देवदास्यां विलोकय ॥३५॥
प्रागेव तां समादाय निजांके स्थापयिष्यति ।
तव मूल्यात्परं मूल्यमप्सरसः करिष्यति ॥३६॥
कुरु शीघ्रं निरोधं वै यावदंके करोति न ।
इति श्रुत्वा नारदस्य दृष्ट्वा पञ्चमुखं पतिम् ॥३७॥
विकृतं तं समालोक्य नेत्रेषु प्रविवेश सा ।
सर्वनेत्राणि वै शंभोः रोधयामास योगिनी ॥३८॥
एतस्मिन्नन्तरे सर्वतेजांस्यपि हतानि च ।
अन्धकारमयं सर्वं पुष्पवन्तौ वितेजसौ ॥३९॥
प्रलयस्य समुत्थानं कालरात्रेः समागमः ।
भूकम्पाश्च तदा जाता भयभीताश्च देहिनः ॥४०॥
एवं जाते सर्वसृष्टिक्षोभे नन्द्यादयो गणाः ।
सर्वे सतीं नमस्कृत्य स्तुत्वा चापि पुनः पुनः ॥४१॥
मुञ्च मुञ्च सुरश्रेष्ठे शंभोर्नेत्राणि मुञ्च वै ।
पश्यन्तु हरनेत्राणि जगदान्ध्यं प्रसर्पतु ॥४२॥
एवमुक्तापि सा देवी न नेत्राणि मुमोच सा ।
तावद्धरेण भालस्थं विसृष्टं लोचनं परम् ॥४३॥
कृपाविष्टेन लोकानां येन रक्षा प्रजायते ।
वारयितुं न शक्तोऽस्मि देवीं प्राणगरीयसीम् ॥४४॥
अथ देवी ततो नेत्रयोगं विहाय सुस्थिरा ।
हरस्य सन्निधौ तिलोत्तमामुवाच वै रुषा ॥४५॥
यस्मान्मे दयितः पापे त्वया रूपाद्विडम्बितः ।
तस्मात्त्वं रूपहीना च शीर्णकेशा महोदरी ॥४६॥
चिपिटाक्षी बृहद्दन्ती भव वै भग्ननासिका ।
अथ जाता तत्क्षणेन तिलोत्तमा कुरूपिणी ॥४७॥
तुष्टाव पार्वतीं कृताञ्जलिः क्षमां यस्म याचते ।
नास्ति मेऽत्राऽपराधो वै दास्या दर्शनयोषितः ॥४८॥
देवस्य तव किंकर्याः प्रसादं कर्तुमर्हसि ।
पार्वती च तदा प्राह समागच्छ मया सह ॥४९॥
शंकरात् त्वं गृहाणात्र मन्त्रं पापहरं शुभम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥५०॥
ततो याहि मया सार्धं तीर्थं श्रीहाटकेश्वरम् ।
नागनद्यां रूपतीर्थे स्नाहि शापनिवृत्तये ॥५१॥
एवं मन्त्रं गृहीत्वा च गृहीत्वा तुलसीस्रजम् ।
नागमत्यां ययौ सस्नौ सुरूपा सा बभूव ह ॥५२॥
पूर्वमासीद् यथारूपा तथारूपा विशेषतः ।
बभूव पार्वतीं नत्वा ययौ सत्ये पितामहम् ॥५३॥
सर्वं निवेदयामास पञ्चवक्त्रादिरोहणम् ।
ब्रह्मा प्राह प्रतिसृष्टिं तथा भवति पुत्रिके ॥५४॥
त्वां निमित्तं समासाद्य हरः पञ्चमुखो मुहुः ।
जायते च तव कीर्तिः सदा लोके भविष्यति ॥५५॥
इत्युक्त्वा तां ददावाशीर्वादान् सृष्टौ स्थिरा भव ।
देवकार्यकरी सत्यलोके वासकरी भव ॥५६॥

इतिश्रीलक्ष्मीनाराणीयसंहितायां प्रथमे कृतयुगसन्ताने तिलोत्तमानिमित्तेन शंकरस्य पञ्चमुखवत्ता, तिलोत्तमायाः पार्वतीशापः, नागवत्यां स्नानेन शापनिवृत्तिरित्यादि-निरूपणनामा पञ्चाधिकपञ्चशततमोऽध्यायः ॥५०५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सरस्वत्या रक्तसलिलवाहिता ।
यथा जाता पुरा तां ते प्रवक्ष्यामि च पावनीम् ॥ १ ॥
विश्वामित्रस्य च वशिष्ठस्याऽऽसीद् विमनस्कता ।
ब्रह्मणा ब्राह्मणैश्चोक्तो विश्वामित्रः पुनः पुनः ॥ २ ॥

ब्राह्मणोऽयं ब्राह्मणोऽयं ब्रह्मर्षिः क्षत्रियोऽपि वै ।
वशिष्ठेन तु नैवोक्तः शृणु तत्कारणं प्रिये ॥ ३ ॥
आसीत् पुरा ऋचीकाख्यो भृगुपुत्रो महामुनिः ।
व्रताध्ययनसम्पन्नस्तपस्वी चैकदा तु सः ॥ ४ ॥
तीर्थयात्राप्रसंगेन ययौ भोजकटं पुरम् ।
कौशिकी च नदी यत्र यत्र गाधिर्महीपतिः ॥ ५ ॥
तस्यां स्नात्वा प्रसन्तर्प्य पितृदेवान् जजाप सः ।
तावत् तीरे तत्र चैका स्नानार्थं राजकन्यका ॥ ६ ॥
युवती रूपसम्पन्ना सर्वावयवशोभना ।
समायाता च तां दृष्ट्वा मुनिर्मुमोह कामतः ॥ ७ ॥
कस्येयं कन्यका चेति लोकान् पप्रच्छ, ते जनाः ।
प्राहुः गाधिसुता चास्ति गौरीपूजनलालसा ॥ ८ ॥
ईहमाना सुभर्तारं व्रतं करोति कान्तदम् ।
अत्र ब्रह्म जपित्वा च पूजयित्वा यथाक्रमम् ॥ ९ ॥
नैवेद्यं विविधं गौर्यै दत्वा करोति गायनम् ।
नृत्यं च वादनं चापि नित्यं गौरीप्रतुष्टये ॥१०॥
श्रुत्वा स मुनिराट् गाधिं प्रतिययौ सुलालसः ।
ऋचीकं स्वागतं वीक्ष्य राजा सत्कारमाचरत् ॥११॥
कृत्वाऽर्हणां ऋषिं कृताञ्जलिः पप्रच्छ भावतः ।
निस्पृहस्यापि ते विप्र किमागमनकारणम् ॥१२॥
यथेष्टं मे समाचक्ष्व प्रयच्छामि च तेऽखिलम् ।
ऋचीको मोहभावेन ययाचे तां सुकन्यकाम् ॥१३॥
ब्राह्मणेन विवाहेन तां मे देहीति चाब्रवीत् ।
सा मया वीक्षिता गौरीपूजायामिति चाऽब्रवीत् ॥१४॥
तच्छ्रुत्वा भयसन्त्रस्तो गाधिर्बुद्धिमतां वरः ।
दरिद्रं जरठं मत्वा प्रोवाच नीतिसंभृतम् ॥१५॥
अस्माकं कन्यकादाने शुल्कमस्ति द्विजोत्तम ।
तच्चेद् यच्छसि कन्यां तां तुभ्यं दास्याम्यसंशयम् ॥१६॥
ऋचीकः प्राह राजँस्त्वं कन्याशुल्कं वदात्र मे ।
द्रुतं यच्छामि ते सर्वं दुर्लभं चापि गोलके ॥१७॥
गाधिः प्राहैकतः श्यामकर्णानां वाजिनां द्विज ।
शतानि सप्त मे देहि श्वेतानां चैव सर्वतः ॥१८॥
स तथेति प्रतिज्ञाय ऋचीकस्तपसोज्ज्वलः ।
गंगातीरं ययौ चापोवोहेति च जजाप वै ॥१९॥
चतुःषष्टिऋचासूक्तं वारुणं नियुयोज ह ।
तावत् पूर्णे जपे देवो वरुणस्तत्र चाययौ ॥२०॥
तेन सार्धं वाजिनश्च निष्क्रान्ताः सलिलात् तदा ।
सर्वे श्वेताः सुवेगाश्च श्यामैकश्रवणाः शुभाः ॥२१॥
शतानि सप्तसंख्यानि तावत्संख्यैर्नरैर्युताः ।
ऋचीकोऽपि समादाय नत्वा तं वरुणं तदा ॥२२॥
अश्वान् गृहीत्वा पुरुषैर्गाधिं जगाम वै द्रुतम् ।
तस्मै निवेदयामास कन्यार्थे तान् हयोत्तमान् ॥२३॥
गाधिस्तु तान् समागृह्य सर्वान् वाजिमखस्य च ।
कन्यां तस्मै ददौ विप्रवह्निसाक्ष्ये विधानतः ॥२४॥
ऋचीको धर्मपत्न्यां च निष्कामः समपद्यत ।
कालान्तरे सतीं प्राह सेवमानां पतिव्रताम् ॥२५॥
अहं तपसे यास्यामि वरं वृणु ददामि ते ।
सापि स्वार्थविहीनस्य श्रुत्वा वाक्यमृषेस्ततः ॥२६॥
स्वस्या जननीं प्रोवाच वृत्तान्तं शोकधर्षिता ।
जननी तां सुतां प्राह पुत्रार्थं वृणु पुत्रिके ॥२७॥
ब्राह्मण्येन युतं पुत्रं त्वदर्थं वृणु पुत्रिके ।
क्षात्रेण तेजसा युक्तं मदर्थं च सुतं वृणु ॥२८॥
सा पतिं सम्प्रणम्याऽऽह जनन्युक्तं सविस्तरम् ।
ऋचीको यज्ञदेवार्थं प्रचकार चरुद्वयम् ॥२९॥
पुत्रेष्टिं विधिवत् कृत्वा चरुं द्वेधा विभज्य च ।
एकस्मिन् योजयामास ब्राह्मयतेजोऽखिलं यशः ॥३०॥
अन्यस्मिन् योजयामास क्षात्रं तेजोऽखिलं ततः ।
भार्यायै प्रददौ ब्राह्मयतेजोयुक्तं चरुं हि सः ॥३१॥
अब्रवीत् प्राशय त्वेनमश्वत्थाऽऽलिङ्गनं कुरु ।
ततः प्राप्स्यसि सत्पुत्रं ब्रह्मतेजःसमन्वितम् ॥३२॥
द्वितीयं च चरुं पत्न्या मात्रे ददौ सुतार्थकम् ।
क्षात्रतेजोमयं दत्वा प्राह प्राश्य चरुं त्विमम् ॥३३॥
न्यग्रोधालिङ्गनं कृत्वा प्राप्स्यसि क्षत्रियं सुतम् ।
अथ माता सुतां प्राह रहस्ये भाविनोदिता ॥३४॥
सर्वलोकस्य वै स्वार्थे श्रैष्ठ्यं क्षौद्र्यं परार्थके ।
मच्चरुपेक्षया पुत्रि त्वच्चरौ श्रेष्ठता भवेत् ॥३५॥
श्रुत्वा पुत्री मातृवत्सा भ्रातृश्रैष्ठ्याभिलाषिणी ।
अकरोद् व्यत्ययं वृक्षे चरौ चापि हि पद्मजे ॥३६॥
ततः पुंसवने स्नाने ते शुभे प्रेमविह्वले ।
दधाते गर्भमेका तु सुता क्षात्रेण तेजसा ॥३७॥
भूत्वा गर्भवती नित्यं राज्यभोगे मनो दधे ।
युद्धवार्तास्तथा चक्रे हस्त्यश्वारोहणादिजाः ॥३८॥
रक्तवस्त्रोत्तमभूषाः कैसरं च विलेपनम् ।
पितुर्गृहात् समानीय शृंगारं च करोति सा ॥३९॥
दृष्ट्वैवं चेष्टितं पत्न्याः ऋचीकः प्राह तां तदा ।
किं प्रिये व्यत्ययश्चर्वोः कृतो वा वृक्षयोस्तथा ॥४०॥

चेष्टया ते ज्ञायतेऽत्र भाविनं को विलंघयेत् ।
द्विजाचारविहीनस्ते ध्रुवं पुत्रो भविष्यति ॥४१॥
तव माता चेष्टया च क्षात्रं धर्मं विना सदा ।
दृश्यते नु शमस्था च जपहोमपरायणा ॥४२॥
तीर्थयात्रा कथाश्रावे सश्रद्धा तेन तेऽनुजः ।
भविष्यति ब्राह्मणस्य तेजसा ब्रह्मणा समः ॥४३॥

यादृशा दौर्हृदाः सन्ति सगर्भाणां तु योषिताम् ।
तादृशानि लक्षणानि पुत्रे वसन्ति योषिताम् ॥४४॥
पित्रोर्निषेकसमये सगर्भायां स्त्रियां तथा ।
यादृशी वर्तते चेष्टा सा गर्भे प्रतिबिम्बते ॥४५॥
अथ पत्नी ऋषिं प्राह क्षमस्व तां क्षतिं मम ।
व्यत्यासो यः कृतो नाथ पुनर्दयां कुरु प्रभो ॥४६॥
ब्राह्मणो मे भवेत् पुत्रो मन्मातुः क्षत्रियः सुतः ।
ऋचीकः प्राह नैवं स्याद् गतं जातं तथैव तत् ॥४७॥

किन्तु पुत्रगणाः क्षात्राः पौत्रे यास्यन्ति मद्वरात् ।
इत्येवं वै दयां कुर्वे पुत्रस्ते ब्राह्मणोऽस्तु वै ॥४८॥
इत्येवं वरदानेन जमदग्निः सुतोऽभवत् ।
जमदग्नेः सुतः पर्शुरामः क्षात्रक्रमोऽभवत् ॥४९॥
एकविंशतिधा भूमौ चक्रे रणं तु राजभिः ।
अथ गाधेर्गृहपत्नी दधे गर्भं ततः परम् ॥५०॥
ब्राह्मणीवत् समाचारा सुषुवे पुत्रमुत्तमम् ।
ब्राह्मणं कर्मणा योगसन्ध्याध्यानपरायणम् ॥५१॥

विश्वामित्रइतिख्यातं क्षात्रधर्मविरागिणम् ।
यदा राज्यक्षमो जातो गाधिना योजितश्च सः ॥५२॥
पितृपैतामहं राज्यं गृहाण वेदमार्गगः ।
पुत्रे दत्वा सोऽपि राज्यं विश्वामित्रो वने स्थितः ॥५३॥
सकलत्रो देवविप्रपूजापरायणः शुचिः ।
तापसश्च कृष्णनारायणध्यानपरः सदा ॥५४॥
एकदा वनमध्येऽयं मृगयार्थं भ्रमन् ययौ ।
वसिष्ठस्याऽऽश्रमं रम्यं मृगद्रुशिष्यशोभितम् ॥५५॥
वशिष्ठस्तं समायान्तं प्रत्युत्थायोन्मुखं ययौ ।
दत्वा तस्मै तदाऽर्घं च मधुपर्कं यथोचितम् ॥५६॥

अब्रवीद् राजयोग्यं च स्वागतं ते महीपते ।
वद कृत्यं करोम्यद्य सत्कारं ते यथोचितम् ॥५७॥
विश्वामित्रस्तदा प्राह सैन्यं मे निकटे स्थितम् ।
मृगयार्थं समायातो जलं पीत्वा प्रयामि च ॥५८॥
बुभुक्षितेषु भृत्येषु यः स्वामी कुरुतेऽशनम् ।
स याति नरकं घोरं तस्माद् यास्यामि वै द्रुतम् ॥५९॥

वशिष्ठश्च तदा प्राह सर्वानानय तानिह ।
अस्ति मे नन्दिनी धेनुर्वाञ्छितं या प्रयच्छति ॥६०॥
तस्या बलेन सर्वान् वै तृप्तिं दास्यामि चोत्तमाम् ।
श्रुत्वैवं त्वानयामास सैन्यं महीपतिस्ततः ॥६१॥
वशिष्ठः कामधेनुं तामुवाच स्वागताय वै ।
विश्वामित्रस्य राजर्षेर्यावद्भोजनलब्धये ॥६२॥

कुरुष्व तृप्तिपर्यन्तं खाद्यपेयादिकं शुभम् ।
अश्वानां च गजादीनां यवसादिकमित्यपि ॥६३॥
ततो विश्रामलब्ध्यर्थं गृहोपकरणादिकम् ।
धेनुर्बाढं समुवाच ससृजे तत्क्षणं बहु ॥६४॥
भक्ष्यं भोज्यं लेह्यचोष्ये पेयं लेप्यं च भोग्यकम् ।
दासायुतं तथा दासीदशसाहस्रमित्यपि ॥६५॥
ते दासा दासिका विश्वामित्राय च बलाय च ।
ददुः शीघ्रं सुभोज्यानि शर्कराघृतवन्ति च ॥६६॥

दधि दुग्धं मधु मिष्टं पेयं सुशीतलं जलम् ।
एवं गवा नृपः सैन्ययुतस्तृप्तिं विधापितः ॥६७॥
विश्वामित्रः कौतुकं च दृष्ट्वाऽऽश्चर्यं जगाम ह ।
अहो चित्रं गवा तृप्तिं नीता वयं सहस्रशः ॥६८॥
तस्मात्सन्नीयतामेषा स्वगृहं धेनुरुत्तमा ।
ततः प्राह वशिष्ठाय तव दास्यामि चेप्सितम् ॥६९॥
वरान् रथांश्च हस्त्यश्वान् गा अन्याश्च सहस्रशः ।
देहि मे नन्दिनीं राज्ये योग्यां वशिष्ठ सर्वथा ॥७०॥

वशिष्ठस्तु तदा प्राह होमधेनुरियं नृप ।
अस्मत्कामप्रदा देवी ह्यदेया गौर्द्विजन्मनाम् ॥७१॥
सर्वकामप्रदा चेयं तापसानां कृते स्थिता ।
अदेया सर्वथा गौश्च विक्रये मातृविक्रयः ॥७२॥
न साम्नां नैव भेदेन न दानेन प्रसह्य न ।
न विक्रीय न वा चान्यैरुपायैस्त्वां समर्पये ॥७३॥
तस्माद् गच्छ महाराज स्वस्थानं च सुखी भव ।
विश्वामित्रस्ततः प्राह राज्यस्य सत्तया मुनिम् ॥७४॥
यत्किञ्चिद् विद्यते रत्नं पार्थिवस्य क्षितौ हि तत् ।
सर्वं स्याद् राजकीयं वै नीतिश्चेयं मुने सदा ॥७५॥

तस्मान्नयामि धेनुं वै नृपतेर्धनमेव तत् ।
इत्युक्त्वाऽऽज्ञापयामास भृत्यवर्गं ततश्च ते ॥७६॥
भृत्या धेनुं निगृह्यैव रश्मिना निन्युरुल्बणाः ।
अथ गच्छति सा नैव त्वश्रुपूर्णा बभूव ह ॥७७॥
दण्डप्रहारैस्ते निन्युः प्रसह्याऽऽकृष्य भृत्यकाः ।
लोकयन्तं वशिष्ठं सा पप्रच्छ दुःखकर्षिता ॥७८॥

किं दत्ताऽस्मि मुनिश्रेष्ठ त्वयाऽहं चाऽस्य भूपतेः।
वशिष्ठः प्राह धेनो त्वं न दत्ताऽसि मया शुभे ॥७९॥
प्राणा यान्तु मम मातर्मा याहि त्वं मयि स्थिते।
तद्रक्षस्व स्वयं धेनो ह्यात्मानं मत्प्रभावतः ॥८०॥
इत्युक्ता कोपमापन्ना चक्रे हुंकारगर्जनाः।
हुँकारेभ्यश्च फेनेभ्यो रोमेभ्यः स्वेदमण्डलात् ॥८१॥
निष्क्रान्ताः सायुधा म्लेच्छाः पुलिन्दाः शबराः खसाः।
योद्धारो व्योममार्गस्था अच्छेद्या अप्रधृष्यकाः ॥८२॥
असंख्याता अहनँस्ते विश्वामित्रस्य तान् महान्।
ततः कोपपरीतात्मा विश्वामित्रः स्वयं धनुः ॥८३॥
सज्यं कृत्वा च मरणे निश्चितोऽतियुयोध ह।
तथापि सैनिका अश्वा गजा भटाः पदातयः ॥८४॥
विश्वामित्रस्य वै सर्वे हता धेनूद्भवैर्भटैः।
विश्वामित्रं परित्यज्य शेषं सर्वं निपातितम् ॥८५॥
कृपां कृत्वा वशिष्ठस्तु नन्दिनीमिदमब्रवीत्।
रक्ष नन्दिनि भूपालं म्लेच्छैरेतैः समावृतम् ॥८६॥
राजा हि यत्नतो रक्ष्यो राजा नारायणांशजः।
सन्मार्गे वर्तते सर्वो राजदण्डभयाद् यतः ॥८७॥
इति श्रुत्वा नन्दिनी सा म्लेच्छान् वारयितुं ययौ।
तावद्राजा रुषा तां गां प्रहर्तुमुपचक्रमे ॥८८॥
वशिष्ठस्ते समालोक्य गोप्रहारं नृपकृतम्।
तं बाहुं स्तम्भयामास सहेतिं तस्य भूपतेः ॥८९॥
जडीभूतो नृपो लज्जायुक्तो वशिष्ठमाह च।
रक्ष वशिष्ठ मां म्लेच्छैर्वध्यमानं जडीकृतम् ॥९०॥
ममाऽपराधान्नष्टं मे सर्वं सैन्यमनन्तकम्।
तस्माद् यास्याम्यहं हर्म्यं न युद्धेन प्रयोजनम् ॥९१॥
एवमुक्तो वशिष्ठश्च स्तम्भदोषविवर्जितम्।
विश्वामित्रस्य तु करं चकाराऽऽह सुखावहम् ॥९२॥
गच्छ राजन् विमुक्तोऽसि मा विरोधय भूसुरैः।
राजा ययौ स्वभवनं प्रलापमकरोन्मुहुः ॥९३॥
धिग्बलं क्षत्रियाणां तु धिग्वीर्यं धिक्प्रजीवितम्।
श्लाघ्यं ब्रह्मबलं चैकं ब्राह्मयं तेजो हि केवलम् ॥९४॥
तच्च कर्म मया कार्यं यथा स्याद् ब्राह्मणं बलम्।
तपसाऽऽराधनया च चरिष्यामि महातपः ॥९५॥
अथ विश्वसहं पुत्रं राज्ये संस्थाप्य भूपतिः।
हिमवन्तं ययौ तत्र तपश्चक्रे सुदारुणम् ॥९६॥
शतवर्षत्रयं फलाहारो बभूव केवलम्।
वर्षास्वाकाशसंस्थश्च ग्रीष्मे पञ्चाग्नितापनः ॥९७॥
शैत्ये शीतजलावासो बभूव च ततः परम्।
शतवर्षत्रयं शुष्कपर्णाहारो बभूव सः ॥९८॥
शतवर्षत्रयं ततो जलाहारोऽभवन्नृपः।
अथ वर्षशतं वाय्वाहारो बभूव तत्परम् ॥९९॥
इन्द्रो भयेन संगम्योवाच तं तापसं नृपम्।
तुष्टोऽस्मि तव राजेन्द्र वरं वृणु यथेप्सितम् ॥१००॥
विश्वामित्रस्तदा प्राह देहि ब्राह्मण्यमेव मे।
तदर्थं वै तपश्चर्यां करोमि नान्यकाम्यया ॥१०१॥
इन्द्रः प्राह क्षत्रियस्याऽनेन देहेन वै कुतः।
संस्कारैर्जायते चाष्टाचत्वारिंशद्भिरेव यत् ॥१०२॥
ब्राह्मण्यं तद् भवेद् राजन्नन्यं वरं ततो वृणु।
राजा प्राह न ब्राह्मण्यादन्यत् सम्प्रार्थयाम्यहम् ॥१०३॥
परित्यक्ष्याम्यहं देहं प्राप्स्ये वा विप्रतां व्रज।
इन्द्रो दिवं ययौ श्रुत्वा राजा तेपेऽतिदुष्करम् ॥१०४॥
पुनर्वर्षसहस्रं वै व्यतिक्रान्तं ततः पुनः।
आजगाम स्वयं ब्रह्मा पुण्यैर्देवर्षिभिः सह ॥१०५॥
ब्रह्मा प्राह प्रतुष्टोऽस्मि वरं वरय चेप्सितम्।
राजा प्राह च विप्रत्वं देहि मे नान्यदीप्सितम् ॥१०६॥
ब्रह्मा प्राह धरापृष्ठे विप्रत्वं क्षत्रियस्य न।
क्षत्रियेण प्रजातस्य विप्रत्वं जायते कथम् ॥१०७॥
राजा प्राहाऽसमर्थश्चेद् याहि स्वं भवनं पितः।
देहं त्यक्ष्यामि वा प्राप्स्ये विप्रत्वं तपसा भुवि ॥१०८॥
अथाऽब्रवीदृचीकोऽत्र ब्राह्मयैर्मन्त्रैर्मया पितः।
योजितश्च चरुस्तत्राऽमितं ब्राह्मण्यमर्पितम् ॥१०९॥
क्षत्रियात् क्षात्रधर्माऽपि ब्राह्मणो भवितुं ह्ययम्।
अर्हत्येव निषेके ब्राह्मणत्वं त्वस्य मिश्रितम् ॥११०॥
ततश्चैनं कीर्तयस्व ब्रह्मर्षिं त्वं पितामह।
ब्राह्मयधर्मसमाचारो वर्ततेऽयं सदा शुचिः ॥१११॥
श्रुत्वा ब्रह्मा क्षणं ध्यात्वा ज्ञात्वा यथार्थकारणम्।
ब्रह्मर्षिस्त्वमिति प्राह सर्वे प्राहुस्तथैव तम् ॥११२॥
वसिष्ठस्तु रुषा प्राह नाऽहं वक्ष्यामि तं तथा।
क्षत्रियस्य सुतं कस्माद् विप्रं वक्ष्यामि बोधवान् ॥११३॥
इत्युक्त्वा प्रययौ शीघ्रं वसिष्ठो हाटकेश्वरम्।
क्षेत्रं तेपे तपस्तत्र विश्वामित्रोऽपि चाययौ ॥११४॥
वशिष्ठस्य वधार्थं वै चिन्तयामास संवसन्।
विश्वामित्रो देववतीनद्याः स्थानेऽभिचारकम् ॥११५॥
चकार दारुणैर्मन्त्रैर्जुह्वानो जातवेदसम्।
ततो वह्नेस्तु निष्क्रान्ता शक्तिर्वानरवाहना ॥११६॥

भयानकाऽऽयुधहस्ता विश्वामित्रेण सा तदा ।
योजिता तु वसिष्ठस्य वधार्थं सा ययौ द्रुतम् ॥११७॥
अथाऽऽश्रमे वशिष्ठस्य तत्कालं दुर्निमित्तकम् ।
अदृश्यत पपातोल्का निहत्य रविमण्डलम् ॥११८॥
रक्तवृष्टिरस्थिमिश्रा व्यजायत क्षणान्तरे ।
शिवा प्राचीं समुद्दिश्य रुरोद दीर्घनादतः ॥११९॥
एवं जाते महाशक्तिर्वह्नेः पर्वतसदृशी ।
अदृश्यत समायान्ती कृत्यारूपा सचेतना ॥१२०॥
सामवेदोक्तमन्त्रैः सा वशिष्ठेन निरोधिता ।
महामन्त्रैः पुनस्तत्र स्तम्भिताऽऽथर्वणोद्भवैः ॥१२१॥
ततो नारीस्वरूपा सा प्रोवाच मुनिपुंगवम् ।
सामवेदः सुप्रमाणं तवापि जगतामपि ॥१२२॥
तेनाऽहं विधिना सृष्टा प्रेरिता मुनिना तथा ।
मा कुरुष्वाऽप्रमाणं तं प्रहारं सह मे ऋषे ॥१२३॥
रक्षयिष्यामि ते प्राणान् स्वल्पस्पर्शेन सार्थिका ।
वशिष्ठः प्राह यद्येवं कुरु स्पर्शं दयावति ॥१२४॥
मया त्वाथर्वणा मन्त्राः संहृता मर्म मा स्पृश ।
इत्युक्ता सा वशिष्ठं वै स्पृष्ट्वा पपात भूतले ॥१२५॥
सा च शक्तिर्देवधारा नाम्ना तत्रैव तिष्ठति ।
पूजनाच्छ्रवणात्त्वस्या भक्तिं मुक्तिं च संलभेत् ॥१२६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विश्वामित्रवसिष्ठयोः कामधेनुनिमित्तकक्लेशः, ऋचीकस्य गाधिसुतया श्यामकर्णाश्वविनिमयेन विवाहः, मातृपुत्र्योर्व्यत्यासेन पुत्रार्थचरुप्राशनम्, पौत्रयोर्व्यत्यासगुणाः, गाधेर्विश्वामित्रः, ऋचीकस्य जमदग्निः, विश्वामित्रस्य तपो ब्राह्मण्यं च, विश्वसहः सुतः, विश्वामित्रप्रेरितशक्तिसहविश्वामित्रस्तंभनमित्यादिनिरूपणनामा षडधिकपञ्चशततमोऽध्यायः ॥ ५०६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! सा च शक्तिर्धारानाम्नी कुमारिका ।
ब्राह्मणस्याऽभवत्पुत्री देवशर्मण ईश्वरी ॥ १ ॥
कन्यारूपा तपस्तेपेऽरुन्धतीमित्रतां गता ।
अरुन्धत्याश्रमे वासं ततश्चकार शोभना ॥ २ ॥
एकदाऽरुन्धती प्राह सरस्वत्यास्तटे शुभम् ।
ममाश्रमपदं रम्यं तत्र तिष्ठ मया सह ॥ ३ ॥
ततः सा कन्यका धारा तया सार्धं ययौ ततः ।
शक्तिरूपा स्थिता देवी सरस्वत्यास्तटे शुभा ॥ ४ ॥
दिव्या ब्रह्मस्वरूपा च वसिष्ठोऽपि महामुनिः ।
हाटकेश्वरजं क्षेत्रं त्यक्त्वा सरस्वतीतटे ॥ ५ ॥
स्वाश्रमं प्रययौ तत्र तपस्तेपे सुखावहम् ।
विश्वामित्रेण विज्ञातं शक्तिर्मे तत्र संगता ॥ ६ ॥
वशिष्ठस्य गृहे चास्ते तापसी ब्रह्मपुत्रिका ।
वसिष्ठोऽपि सरस्वत्यास्तटे चास्ते निजाश्रमे ॥ ७ ॥
ज्ञात्वा चुकोप चात्यर्थं शशाप च सरस्वतीम् ।
भव रक्तजला यत्र वसिष्ठो न वसेत् क्वचित् ॥ ८ ॥
आथर्वणेन मन्त्रेण विश्वामित्राभिचारतः ।
सरस्वती तदा तूर्णं जाता रक्तजला यतः ॥ ९ ॥
अपेयं तज्जलं जातं दैवानां कर्मवर्जितम् ।
भूतप्रेतपिशाचानां पेयं ज्ञात्वा विहाय तत् ॥१०॥
तत्तीरस्था ययुर्दूरं वसिष्ठः पुष्करं ययौ ।
धारा शक्तिर्देवता च वासं चकार सर्वदा ॥११॥
सरस्वत्या वसिष्ठश्चाऽऽवेदितो जलशुद्धये ।
रक्तताया लयार्थं च पुष्करेऽर्बुदपर्वते ॥१२॥
वसिष्ठः प्राह रक्तस्य शुद्ध्यर्थं तव सर्वथा ।
यतिष्ये गच्छ देवेशि सर्वं ते सुखदं यथा ॥१३॥
वसिष्ठो योगमास्थाय चावतीर्य धरातले ।
प्लक्षवृक्षस्य मूले वै सरस्वत्या जलान्विते ॥१४॥
कृत्वा समाधिं नेत्राभ्यां लोकयामास चान्तरे ।
तावत्पृथ्वीतलाच्छुद्धं जलं परमपावनम् ॥१५॥
प्रवाहरूपं सम्भूतं सरस्वत्यां युयोज तत् ।
तज्जलं सर्वथा पूर्णं सरस्वत्यां बभूव ह ॥१६॥
निष्कास्य सलिलं रक्तं वेगेन च बहिर्महिः ।
शुद्धं जलं सरस्वत्यास्तन्मूलात्सर्वदाऽस्ति हि ॥१७॥
शुद्धवार्योघबलतो रक्तं निःसारितं जलम् ।
प्रवाहं च द्वितीयं तत् कृत्वा यातं स्थलान्तरम् ॥१८॥
उद्वेलं सम्भ्रमद्गच्छद्यातं निम्नस्थलीं प्रति ।
सा तु साभ्रमतीनाम्नी नदी जाता तदुत्थिता ॥१९॥
अथैकदा ऋषियाज्ञवल्क्यः साभ्रमतीतटे ।
तीर्थयात्राप्रसंगेन निर्ययौ भगिनीयुतः ॥२०॥
कंसारिकाऽभिधा सा च बाल्याद्वै ब्रह्मचारिणी ।
तापसी संयमप्राप्ता ज्ञानानन्दमयी सती ॥२१॥
याज्ञवल्क्यस्य भागिनी वैष्णवी चार्तववृषा ।
ऋतुधर्मं समापन्ना यात्रायां तेन हेतुना ॥२२॥
याज्ञवल्क्यः स्थितिं चक्रे सप्ताहं सरितस्तटे ।
वृक्षोऽधःपर्णशालायां भगिनी त्वपरोटजे ॥२३॥

याज्ञवल्क्यस्य दैवाद्धि स्वप्नदोषो बभूव ह ।
रेतोयुक्तं परिधानं समुत्तार्य ब्रहिःस्थले ॥२४॥
स्थापयित्वा पुना रात्रौ सुतो निद्रां जगाम ह ।
अथ कंसारिका मूत्रशौचार्थं तु क्षणान्तरे ॥२५॥
ऊटजाद्बहिरायाता ददर्श पतिताऽम्बरम् ।
मूत्रशौचं विधायैवाऽम्बरं संगृह्य चोटजे ॥२६॥
सुष्वाप शयने साध्वी चोत्ताना च ततः पुनः ।
क्लिन्नयोन्यन्तरं भागं प्रवेशिताऽम्बरेण सा ॥२७॥
सवीर्यकाऽज्ञानवती मार्जयामास वै मुहुः ।
वस्त्ररेतसो योगेन योनिः क्लिन्ना विशेषतः ॥२८॥
पुनस्तेनैव वस्त्रेण मार्जयामास वै मुहुः ।
स्वयोनेस्तु मलं मत्वा मार्जयामास चान्तरम् ॥२९॥
एवं त्वमोघरेतस्तद् भगमध्येऽन्वसंचरत् ।
रजसा मिश्रितं गर्भरूपं बभूव तत्तदा ॥३०॥
अथ प्रातः समुत्थाय याज्ञवल्क्योऽम्बरं निजम् ।
अन्वेषयामास बहिः प्राप्तं नैवाऽम्बरं यतः ॥३१॥
पप्रच्छ भगिनीं धौत्रं ज्ञातं प्राप्तं नु वा त्वया ।
सा प्राहाऽत्र मया भ्रातः रक्षितं शयने मम ॥३२॥
भ्राता प्राह मया तेन स्नातव्यं देहि मे स्वसः ।
स्वसा प्राह नयिष्येऽहं क्षालनार्थं नदीतटम् ॥३३॥
याहि त्वं चाम्बरं नीत्वा चायाम्येव क्षणान्तरे ।
इत्युक्तः स ययौ नद्यां सापि शंकितमानसा ॥३४॥
ददर्श धौत्रं विस्तार्य शेषं धातुं तदन्तरे ।
शुष्कायमानं संवीक्ष्य जातशंका बभूव ह ॥३५॥
चिन्तयामास सततं मया योन्यन्तरे मुहुः ।
क्लिन्नभावस्य नाशार्थं वस्त्रं प्रवेशितं तदा ॥३६॥
योनिर्विशेषतः क्लिन्ना संबभूव पुनः पुनः ।
रजो मे निःसृतं चापि धातुयोगेन वै ध्रुवम् ॥३७॥
इदानीं ज्ञातमेवैतत्कारणं गोप्यमेव तत् ।
यदि गर्भो भवेन्मेऽत्र दैवं हि बलवत्तरम् ॥३८॥
इतिज्ञात्वा संविचार्य शोकं चकार भामिनी ।
गोपयामास मासान्तं ततः प्राह सहोदरम् ॥३९॥
मया कार्यं व्रतं भ्रातर्गन्तव्यं च निजाश्रमम् ।
मिथिलाविषये यत्र व्रतं वै पूर्णतां व्रजेत् ॥४०॥
इत्युक्त्वा प्रययौ निजं चाश्रमं तद्वने शुभे ।
गौरीं सम्पूजयामास व्रतेनाऽनशनेन वै ॥४१॥
सप्ताहे संव्यतीते तु गौरी साक्षात् समाययौ ।
कंसारिका जगादेदं गर्भो मे भ्रातृरेतसः ॥४२॥
मन्ये तिष्ठति ह्युदरे दैवं तद्बलवत्तरम् ।
तस्य वृद्धिं मानसीं च कुरु सौभाग्यसुन्दरि ॥४३॥
यथा नान्ये च जानीयुस्तथा जन्म समर्पय ।
गौरी तथाऽस्त्विति प्राह पस्पर्श पाणिनोदरम् ॥४४॥
गर्भः पक्वः क्षणाज्जातो बालः सम्पूर्ण एव च ।
सुषुवे बालकं गौरीसन्निधौ तत्क्षणात् सती ॥४५॥
नालच्छेदं स्वयं गौरी चकार शुद्धिप्रभृति ।
कंसारिका व्रतव्याजान्न- निःससार वै बहिः ॥४६॥
गौर्युक्तरीतिमाश्रित्य रात्रौ शान्ते वने च सा ।
वेष्टितं सूक्ष्मवस्त्रेण बालं नीत्वा रविद्युतिम् ॥४७॥
नातिदूरं ययौ श्रेष्ठमश्वत्थं विजनस्थले ।
तस्याऽधस्ताद्विमुच्याथ वाक्यमेतदुवाच ह ॥४८॥
अश्वत्थ विष्णुरूपोऽसि त्वं देवेषु प्रतिष्ठितः ।
तस्माद् रक्षस्व मे पुत्रं सर्वतस्त्वं वनस्पते ! ॥४९॥
एष ते शरणं प्राप्तो मम पुत्रस्तु बालकः ।
सलज्जाया निर्दयायास्तस्माद् वृक्ष प्रपोषय ॥५०॥
एवमुक्त्वा सुतस्नेहाद् रुरोद चाऽप्रकाशितम् ।
तावत्तत्राऽऽगता षष्ठीदेवी या मनसाऽभिधा ॥५१॥
बालानां रक्षिका या सम्प्रेषिता शिवयोषिता ।
प्राहैनां मा रुरोदाऽत्र करिष्ये त्वस्य रक्षणम् ॥५२॥
गच्छ मौनं स्वाश्रमं त्वं दास्ये बालं प्रपोषितम् ।
तुभ्यं मा खिद साध्वि त्वं सुखं सर्वं भविष्यति ॥५३॥
तथापि शंकमाना तां राक्षसीं प्ररुरोद सा ।
तावदाकाशजा वाणी सञ्जाता मेघनिःस्वना ॥५४॥
मा त्वं शोकं कुरुष्वास्य बालकस्य कृते शुभे ।
एष शापादुतथ्यस्य ज्येष्ठभ्रातुर्बृहस्पतेः ॥५५॥
अवतीर्णो तव कुक्षौ बृहस्पतिः स्वयं गुरुः ।
एष चाथर्वणं वेदं शतकल्पं सविस्तरम् ॥५६॥
सप्तभेदं च नवधा पञ्च कल्पं करिष्यति ।
जन्मयोगी पिप्पलस्य रसं संभक्षयिष्यति ॥५७॥
अयं वै पिप्पलादेति नाम्ना ख्यातो भविष्यति ।
एषा षष्ठी महादेवी रक्षां त्वस्य करिष्यति ॥५८॥
इत्युक्ता प्रययौ तत्र यत्र स्वस्याऽऽश्रमः शुभः ।
अथ सा चिन्तया नित्यं पुत्रप्रगतमानसा ॥५९॥
समयं निर्जनं लब्ध्वा मुहुर्याति सुतं प्रति ।
रक्षितं हसमानं च पुष्टं दृष्ट्वा मुमोद ह ॥६०॥
चुम्बनं स्तन्यपानादि कृत्वा दत्वा प्रयाति वै ।
अथ वन्यजनैः पुत्रश्चावलोकित एव सः ॥६१॥

ऋष्याश्रमेषु सा वार्ता प्रससार बहुस्थले ।
दैवपुत्रः पिप्पलादः प्लक्षवृक्षे हि वर्तते ॥६२॥
ऋषिसंघास्तु तं द्रष्टुं प्रयान्ति पिप्पलस्थितम् ।
कश्चिच्चेद् ग्रहीतुं याति बालः प्रयात्यदर्शनम् ॥६३॥
षष्ठीदेवी करोत्येवाऽन्तर्धानं बालकस्य वै ।
श्रुत्वाऽऽश्चर्यं याज्ञवल्क्यो ययौ तद्दर्शनाय वै ॥६४॥
एकाक्ष्येव च तं दृष्ट्वा स्वानुरूपगुणाश्रयम् ।
कथं चायं मम रूपं प्राप्तवानित्यचिन्तयत् ॥६५॥
बालः प्राह पितस्तेऽस्तु नमस्कारो मम प्रभो ! ।
जातिस्मरोऽस्ति त्वद्वीर्यादुत्पन्नोऽहं बृहस्पतिः ॥६६॥
कंसारिका च माता मे स्वाम्रवस्त्रस्य योगतः ।
सुषुवे मां पार्वतीवाक्याच्च पिप्पलवृक्षके ॥६७॥
पोषणार्थं धृतवती षष्ठी रक्षति मां सदा ।
तावत्कात्यायनी प्राप्ता मैत्रेयी ज्ञानशेवधिः ॥६८॥
सख्यस्त्वन्या वननार्यश्चागतास्तत्र संभ्रमाः ।
कंसारिकाऽपि चायाता बालं द्रष्टुं सुहर्षिता ॥६९॥
सर्वेषां शृण्वतां बालः पिप्पलादो हि योगिराट् ।
जजाप परमं मन्त्रं पिप्पलस्कन्धमाश्रितः ॥७०॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
श्रुत्वा कंसारिका पुत्रं प्रार्थयामास मानसे ॥७१॥
मम मुक्तिं कुरु पुत्र कृतकृत्या भवामि च ।
वृथा वै लोकनिन्दायाः श्रवणं मे न यद् भवेत् ॥७२॥
पुत्रः सस्मार च ज्ञात्वा कृष्णनारायणं हरिम् ।
आययौ श्रीकृष्णनारायणो विमानशोभितः ॥७३॥
कंसारिका सुतं कृत्वा वक्षस्यथ चुचुम्ब च ।
स्तन्यं ददौ ततस्तेन वर्ष्मणा दिव्यतां गता ॥७४॥
तेनैव दिव्यदेहेन विमानवरमास्थिता ।
कृष्णनारायणमन्त्रं गृहीत्वा वैष्णवी ततः ॥७५॥
सर्वेषां पश्यतां व्योम्ना गोलोकं प्रजगाम ह ।
आश्चर्यं परमं दृष्ट्वा याज्ञवल्क्यो महामुनिः ॥७६॥
षष्ठीदेव्या मुखात् सर्वं विदित्वा वृत्तमेव तत् ।
निश्चिकाय सुतं स्वस्य गोपयामास तद्वृत्तम् ॥७७॥
ययौ नैजाश्रमं पुत्रं दत्त्वाऽऽशीर्वादमुत्तमम् ।
कस्यचित्त्वथ कालस्य नारदो मुनिसत्तमः ॥७८॥
निर्गतस्तेन मार्गेण दृष्ट्वा सूर्याभबालकम् ।
पप्रच्छ विस्मयाऽऽविष्ट एकाकी को भवानिह ॥७९॥
क्व ते माता पिता चापि किमर्थं त्विह तिष्ठसि ।
निवत्स्यसि कथं चात्र सर्वं मे विस्तराद् वद ॥८०॥
पिप्पलाद उवाचैनं का माता कः पिता मतः ।
नारदः प्राह गर्भस्य धारिणी जन्मदायिनी ॥८१॥
क्षेत्रं माता मता बीजाधायकस्तु पिता मतः ।
बालः प्राहाऽज्ञबालस्य भानं क्षेत्रस्य वै कथम् ॥८२॥
बीजस्यापि कथं भानं पित्रोर्भानं तु बान्धवैः ।
न च मे बान्धवाः सन्ति वृक्षोऽयं मे समाश्रयः ॥८३॥
पिप्पलोऽयं पिता मेऽस्ति षष्ठी मनसा मातृका ।
इत्येवमात्र संवेद्मि वद मां को भवानिह ॥८४॥
नारदस्तु तदा प्राह याज्ञवल्क्यस्य रेतसा ।
कंसारिकायां जातोऽसि पितरौ ते ततो मतौ ॥८५॥
बालः प्राह कथं चात्र तिष्ठामीति वदाऽत्र मे ।
नारदश्चाह देवानां गुरुस्त्वं वै बृहस्पतिः ॥८६॥
उतथ्यभार्यासंहर्ता उतथ्यशापदोषतः ।
जातोऽस्यत्र बालरूपः पिप्पलादो महामुनिः ॥८७॥
अथर्ववेदो यश्चैषः शतशाखोऽस्ति मानवे ।
शतकल्पश्च गूढार्थो राज्ञामध्ययनाय वै ॥८८॥
नवशाखः पञ्चकल्पः प्रसन्नार्थसुखागमः ।
त्वया सम्यक् परिष्कृतो व्याख्यातः संभविष्यति ॥८९॥
तदर्थं तेऽत्र जन्माऽस्ति माता ते मोक्षणं गता ।
पिता ते याज्ञवल्क्योऽस्ति तत्पार्श्वे त्वमितो व्रज ॥९०॥
अहं वै नारदश्चाऽस्मि ब्रह्मपुत्रः सुवैष्णवः ।
गृहाण वैष्णवं मन्त्रं मालां च तुलसीकृताम् ॥९१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इत्युक्त्वा प्रददौ मन्त्रं मालां चापि ददौ च तम् ॥९२॥
बालः प्राह वने वासः कथं मे दुःखहेतुकः ।
कथं मातृवियोगो मे वदाऽत्र कारणं मुने ॥९३॥
नारदः प्राह जन्मस्थः शनिस्ते तेन चेदृशीम् ।
अवस्थां त्वं गतोऽसीति नान्यत् तत्र हि कारणम् ॥९४॥
बालः श्रुत्वा रुषा चोर्ध्वं तं ददर्श शनैश्चरम् ।
तस्य दृष्टिनिपातेन न्यपतत् तत्क्षणाच्छनिः ॥९५॥
नारदश्च शनिं प्राह मा त्वं वीक्षय बालकम् ।
हानिं विशेषतस्तेऽयं करिष्यति न संशयः ॥९६॥
बालं प्राह प्रकोपं त्वं संहराऽत्र शनैश्चरे ।
ग्रहा गावो नरेन्द्राश्च सन्तश्च ब्राह्मणास्तथा ॥९७॥
पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यवमानिताः ।
शनिना वीक्षितौ स्वस्य पादौ जन्मक्षणे तदा ॥९८॥
दग्धावुभौ ततश्चाऽन्यं भस्मराशिं करोत्ययम् ।
यदि पश्यति नेत्राभ्यां तादृशो रौद्रनेत्रकः ॥९९॥

पूजनीयो न च बाल! ह्यवमान्यः कदाचन।
श्रुत्वैवं पिप्पलादः सः स्तुतिं चक्रे शुभावहाम् ॥१००॥
नमस्ते क्रूरनेत्राय पिंगलाय नमोऽस्तु ते।
नमस्ते कृष्णवर्णाय भस्मकर्त्रे नमोऽस्तु ते ॥१०१॥
नमस्ते रौद्रदेहाय सौरये ते नमोनमः।
नमस्ते मन्दवाराय शनैश्चर नमोऽस्तु ते ॥१०२॥
श्रुत्वा स्तुतिं शनिः प्राह परितुष्टोऽस्मि सर्वथा।
वरं वरय भद्रं ते ममापि भद्रमस्तु च ॥१०३॥
पिप्पलादो वरं वव्रे बालानां पीडनं त्वया।
अद्यप्रभृति वै क्वापि न कार्यं देहि मे वरम् ॥१०४॥
यावदष्टतमं वर्षं बाले ते पीडनं नहि।
स्तोतुः पीडा न तेऽप्यस्तु वारे पूजयितुश्च ते ॥१०५॥
तथा ते न च पीडाऽस्तु तैलाभ्यंगविधायिनः।
यस्त्वां लोहमयं कृत्वा तैलमध्ये त्वधोमुखम् ॥१०६॥
धारयेत् तेन तैलेन ततः स्नानं समाचरेत्।
तस्य पीडा न कर्तव्या देयो लाभो महीभुजे ॥१०७॥
सार्धसप्ती तव यस्य स तिलान् लोहसंयुतान्।
ददाति तव वारे यस्तस्य कार्यं न पीडनम् ॥१०८॥
कृष्णगोदानकर्तुश्च कार्यं न पीडनं त्वया।
शमीसमिद्भिर्होमस्य कर्तुस्ते माऽस्तु पीडनम् ॥१०९॥
कृष्णपुष्पानुलेपैश्च कृष्णतिलैश्च गुग्गुलैः।
कृष्णवस्त्रैश्च ते पूजाकर्तुर्माऽस्तु प्रपीडनम् ॥११०॥
एवमुक्तः शनिस्तेन बाढमुक्त्वा ततः परम्।
बालं ह्युवाच गत्यर्थं पुनर्न पतनं यथा ॥१११॥
बालः प्राह यथेष्टं त्वं गच्छ सौर्य निजालयम्।
इत्युक्तः स ययौ स्वर्गं नारदो बालकेन च ॥११२॥
पूजितश्च ययौ सत्यलोकं ततः स बालकः।
षष्ठीदेव्या समानीतो याज्ञवल्क्यस्य सन्निधौ ॥११३॥
अर्पितश्चोपनीतश्च याज्ञवल्क्येन बालकः।
पिप्पलादश्चमत्कारी योगीन्द्रो वेदविद्दषिः ॥११४॥
समभवन्महावीर्यो लोककल्याणकारकः।
इति ते कथितं लक्ष्मि! वृत्तं पापविनाशनम् ॥११५॥
यश्चैतत्पुण्यमाख्यानं पठेद्वा शृणुयाच्च वा।
अगम्यागमनं पापं शमं याति न संशयः ॥११६॥
उपसर्गभये जाते तस्य चौघः प्रशाम्यति।
शनैः शनैरसन्दिग्धं पिप्पलादवचोबलात् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने साभ्रमत्या उत्पत्तिः, याज्ञवल्क्यस्य भगिन्यां पिप्पलादोत्पत्तिः, बृहस्पतिः पिप्पलादो जातः, शनैश्चरपूजादिचेत्यादिनिरूपणनामा सप्ताधिकपञ्चशततमोऽध्यायः ॥५०७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! त्वया पूर्वं गौरी वै पञ्चपिण्डिका।
पूजिता तेन संलब्धः कृष्णनारायणः पतिः ॥ १ ॥
गौर्या दर्शनमात्रेण नारी सौभाग्यमाप्नुयात्।
ज्येष्ठे शुक्ले वृषभस्थे रवौ तां जलमर्पयेत् ॥ २ ॥
जलमन्त्रेण या नित्यं सा सौभाग्यं शुभं लभेत्।
न सा वन्ध्या प्रतिष्ठेत काकवन्ध्याऽपि नैव च ॥ ३ ॥
न दौर्भाग्यं लभेत् क्वापि सप्तजन्मान्तराणि च।
पृथिव्यापश्च तेजश्च वायुराकाशमित्यपि ॥ ४ ॥
पञ्चभिः रचयेद् गौरीं सा प्रोक्ता पञ्चपिण्डिका।
सहस्रगुणितं पुण्यं पञ्चपिण्डाप्रपूजने ॥ ५ ॥
काशीराजः पुरा चासीज्जयसेनः प्रतापवान्।
तस्य पत्नीसहस्रं तु ह्यासीत् तत्र प्रियोत्तमा ॥ ६ ॥
अमानाम्नी मद्रराजविश्वक्सेनसुताऽभवत्।
अमा प्रगे समुत्थाय स्नात्वा गंगातटे शुभाम् ॥ ७ ॥
पञ्चपिण्डात्मिकां गौरीं कृत्वा कर्दमसंभवाम्।
ततः सम्पूजयामास सती षोडशवस्तुभिः ॥ ८ ॥
ततो विसृज्य तां देवीं दत्वा दानानि सा गृहम्।
प्रयात्येव स्म सदा च सौभाग्यं वर्धते सदा ॥ ९ ॥
रूपं च यौवनं कान्तप्रीतिश्च धन्यमान्यता।
वर्धन्तेऽस्या विलोक्यैतत् सपत्न्यो दुःखितास्तदा ॥१०॥
तन्मूलं पूजनं गौर्या ज्ञात्वा द्रष्टुं च ता ययुः।
यत्र पूजयति गौरीं सा कृत्वा पञ्चपिण्डिकाम् ॥११॥
अमा चोत्थाय तास्तत्र मानयित्वाऽऽसनं ददौ।
ताः पप्रच्छुरमां नित्यसौभाग्यवृद्धिकारणम् ॥१२॥
अमा प्रसन्नमनसा सपत्नीः प्राह पूर्ववत्।
अहमासं पुरा शूद्रा वीरसेनस्य कन्यका ॥१३॥
कुसुमे नगरे चापि विवाहो मेऽभवत् तदा।
विप्रमुखान्मया गौरीपूजा सौभाग्यदा श्रुता ॥१४॥
गौरीपूजां विना क्वापि पातव्यं न जलं त्वपि।
येन संप्राप्यतेऽभीष्टं पूजा पुण्येन चेप्सितम् ॥१५॥
ततस्तत्र जनौ पूजा कृता मया तु नित्यदा।
पूजयित्वा पिण्डगौरीं प्रक्षिपामि जले सदा ॥१६॥
अथ कान्तश्च मे यातस्तीर्थार्थे द्वारिकां प्रति।
सह नीत्वा च मां प्राप्तो निर्जलं मरुमण्डलम् ॥१७॥
सूर्यस्तपति रौद्रे च वृषस्थेऽतितृषाप्रदे।
सार्थस्तृषातुरो जातो जलं मरुमरीचिजम् ॥१८॥
मृषा वै दृश्यते सत्यं जलं प्राप्तं न तत्स्थले।
अहं तृषाकुला जाता स्मृता गौरी मया तदा ॥१९॥

पञ्चभिर्मुष्टिभिस्तप्तवालुकाभिः सुनिर्मिता ।
गौरी प्रपूजिता वाचा हृदा ततो मृता ह्यहम् ॥२०॥
तत्पुण्येन दशार्णाधिपतेः कन्याऽभवं शुभा ।
भवतीनां कनिष्ठाऽस्मि ज्येष्ठाऽस्मि गौरिकार्चनात् ॥२१॥
जातिस्मराऽस्मि संजाता तत्स्मृत्वा चात्र नित्यदा ।
पूजयामि कर्दमेन कृत्वा तां पञ्चपिण्डिकाम् ॥२२॥
तेनाऽत्र वर्धते नित्यं सौभाग्यं विविधं मम ।
पुण्यं च वर्धते दिव्यं दिव्यभावप्रदायकम् ॥२३॥
सर्वा मम भगिन्यः स्थ ईर्ष्याधर्मो न मेऽस्ति च ।
पूजयन्तु भवत्योऽपि सौभाग्यं लप्स्यथ ध्रुवम् ॥२४॥
सत्येनाऽनेन मे गौरी ममाऽभीष्टं प्रयच्छतु ।
प्रयच्छतु भवतीनामभीष्टं सा हरप्रिया ॥२५॥

इत्युक्तास्ताः सपत्न्यश्च पुपूजुर्गौरिकां ततः ।
पूजामन्त्रास्तया साध्व्या दत्तास्ताभ्यश्च तत्क्षणे ॥२६॥
ये त्वया तु महालक्ष्मि ह्युच्चारिताः पुराऽर्चने ।
नमःपृथिव्यै क्षान्तीशि नम आपोमये शुभे ॥२७॥
तेजस्विनि नमस्तुभ्यं नमस्ते वायुरूपिणि ।
आकाशरूपसम्पन्ने पञ्चरूपे नमोनमः ॥२८॥

एभिर्मन्त्रैस्त्वया लक्ष्मि पूजिता पञ्चपिण्डिका ।
तेन वैकुण्ठराज्यं त्वं प्राप्तवती सुदुर्लभम् ॥२९॥
एवं या पूजयेन्नारी गौरिकां पञ्चपिण्डिकाम् ।
षोडशोपकरणैः सा सद्यः स्यात् पतिवल्लभा ॥३०॥
शृणु लक्ष्मि ! ततश्चामा चिन्तयामास वै हृदि ।
सौभाग्यं परमं लब्धं दुर्लभं सर्वयोषिताम् ॥३१॥

न चाऽपत्यं मम जातं तेन दह्यामि वै मुहुः ।
अथैवं वर्तमानायां दुर्वासाश्चाययौ द्रुतम् ॥३२॥
जयसेनो नृपश्चक्रे स्वागतं चासनं ददौ ।
दत्वाऽर्घ्यं मधुपर्कं च ततः पप्रच्छ तं मुनिम् ॥३३॥
शिष्यं कृत्वा कृपापात्रं पवित्रीकृतवानसि ।
अद्य धन्यतमो जातः सकुटुम्बस्तवाऽऽगमात् ॥३४॥

तद् ब्रूहि किं करोम्यद्य गृहाऽऽयातस्य ते मुने ।
दुर्वासाः प्राह राजँस्ते मन्दिरे संवसन्नहम् ॥३५॥
चातुर्मास्यविधानं संकरिष्ये सुखपूर्वकम् ।
मृत्तिकाग्रहणं यावच्छुश्रूषा क्रियतां मम ॥३६॥
बाढमित्येवमुक्त्वा तच्छुश्रूषां कृतवान्नृपः ।
अमा नित्यं सुसेवायां वर्ततेऽति नृपाज्ञया ॥३७॥
चातुर्मास्यां व्यतीतायां यदा संप्रस्थितो मुनिः ।
तदा प्रोवाच सन्तुष्टो राजन् किं करवाणि ते ॥३८॥

राज्ञा स ऋषिराट् प्रोक्तश्चामाऽपत्यं विना मुने ।
दहत्येव सदा तस्मात् कुरु तां पुत्रमातरम् ॥३९॥
मुनिः प्राह शृणु क्ष्मेश त्वयं वै पूर्वजन्मनि ।
मृत्युकाले तप्तवालुकानां गौरीं विधाय ताम् ॥४०॥
पूजयामास तेनात्र राज्यं प्राप्तवती सती ।
गौरी यत्तापसंयुक्तवालुकाभिः कृताऽनया ॥४१॥
तत्फलं च विना पुत्रमुद्वेगोऽस्या हि सर्वदा ।
न देवो विद्यते काष्ठे पाषाणे मृत्तिकासु च ॥४२॥
भावे हि विद्यते देवो मन्त्रभक्त्यादिभिर्युते ।
सैषा गौरीं कर्दमेन कृत्वा वै पञ्चपिण्डिकाम् ॥४३॥
हाटकेश्वरजे क्षेत्रे गत्वा संपूजयेद् यदि ।
वृषस्थे भास्करे दद्याजलधारामखण्डिताम् ॥४४॥

ततः क्षेत्रबलाच्चापि पुण्योदयो भविष्यति ।
यथा यथा जलाद् गौर्याः शीतभावो भविष्यति ॥४५॥
तथा तथाऽस्या दाहोऽपि शान्तिं यास्यत्यहर्निशम् ।
दाहान्ते भविता गर्भस्ततः पुत्रमवाप्स्यति ॥४६॥
अथाऽस्ति च व्रतं पुण्यं गौरीतुष्टिकरं परम् ।
येन चीर्णेन वै नारी देवतात्वमवाप्नुयात् ॥४७॥

गोमयाख्या महादेवी कर्तव्या गोमयेन वै ।
भाद्रे कृष्णे तृतीयायां प्रातर्दन्तान् विशोधयेत् ॥४८॥
उपवासस्य नियमं गृह्णीयाद् गौरिकां स्मरन् ।
निशागमे मृन्मयं वै कार्यं गौरीचतुष्टयम् ॥४९॥
एका गौरी प्रकर्तव्या पञ्चपिण्डा यथोदिता ।
प्रहरे प्रहरे प्राप्ते तासु पूजां समाचरेत् ॥५०॥

हिमाचलगृहे जाता देवि त्वं शंकरप्रिये ।
मेनागर्भसमुद्भूता पूजां गृहाण ते नमः ॥५१॥
धूपं कर्पूरकं रक्तवर्तिकं घृतदीपकम् ।
जातीपुष्पाणि नैवेद्यं मोदकानर्घमर्पयेत् ॥५२॥
मातुलुङ्गकुसुमाढ्यमर्घं गृहाण ते नमः ।
द्वितीये प्रहरान्तेऽर्धनारीश्वरीं प्रपूजयेत् ॥५३॥

अगुरुचन्दनं धूपं नैवेद्यं गुडमर्घकम् ।
ददेन्नारीकेरयुक्तमर्घं वै मन्त्रतस्तदा ॥५४॥
अर्घो मे गृह्यतां देवौ पार्वतीपरमेश्वरौ ।
तृतीये प्रहरे प्राप्ते शतपत्र्या प्रपूजयेत् ॥५५॥
गुग्गुलधूपं नैवेद्यं सजातीसलिलार्घकम् ।
ग्रन्थिचूर्णेन धूपं च स्वर्घं मदनजं फलम् ॥५६॥
दद्यात्पुनस्ततः प्राप्ते चतुर्थे प्रहरे त्वथ ।
गौरीं तां पञ्चपिण्डां वै भृंगराजेन पूजयेत् ॥५७॥

पञ्चभूतमयी गौरी गृहाणत्वर्घं मयाऽर्पितम् ।
नैवेद्यं धूपदीपादि पुष्पाञ्जलिं समर्पयेत् ॥५८॥
कुर्यान्नीराजनं स्वेष्टप्रार्थनां जागरं चरेत् ।
नृत्यं वाद्यं कीर्तनं सोत्सवं कुर्यात् प्रयत्नतः ॥५९॥
प्रभाते विप्रयुगलं स्नात्वा प्रपूजयेद् व्रती ।
करेणुं वडवां वाऽऽरोहयेद् गौरीचतुष्टयम् ॥६०॥
सवाद्योत्सवशब्देन नद्यादौ तां परिक्षिपेत् ।
आहूताऽसि मया देवी पूजिताऽसि मया शुभे ॥६१॥
मम सौभाग्यदानाय यथेष्टं गम्यतामिति ।
एवं लक्ष्म्या कृता पूर्वं पूजा गौर्या विशेषतः ॥६२॥
भाद्रकृष्णतृतीयायां चतुर्षु प्रहरेषु च ।
प्रातर्गौर्यस्तया दृष्टा रत्नप्रभाविभूषिताः ॥६३॥
ताश्चोचुस्तां महालक्ष्मीं मा नो जले प्रवाहय ।
मन्दिरं कारयित्वाऽत्र हाटकेश्वरक्षेत्रके ॥६४॥
स्थापयाऽस्मान् व्रतार्थं च नारीणां सुखकारिणीः ।
इति ताः स्थापितास्तत्र लक्ष्म्या भाग्यसुतप्रदाः ॥६५॥
सेयं राजँस्तव पत्नी गौरीचतुष्टयं तथा ।
गौरीं च गोमयीं चापि पञ्चपिण्डात्मिकां तथा ॥६६॥
कृत्वा संपूजयेत् तेन पुत्रसौभाग्यमाप्नुयात् ।
तथा प्राप्येत च कृष्णनारायणः पतिः स्वयम् ॥६७॥
इत्युक्त्वा प्रययौ शीघ्रं दुर्वासाश्चाथ सा सती ।
अमानाम्नी ययौ क्षेत्रं हाटकेश्वरसंज्ञितम् ॥६८॥
कृत्वा सर्वं विधानेन बभूव पुत्रमातृका ।
बहुकालोत्तरे चाऽमा लक्ष्मीरूपा बभूव ह ॥६९॥
दिव्यदेहा गता विष्णोर्वकुण्ठं दासिकाऽभवत् ।
इत्येवं कथितं लक्ष्मि तवाऽमायाश्च तद्व्रतम् ॥७०॥
या त्वेतत्पठते भक्त्या गौरीपूजाफलं लभेत् ।
न सा लक्ष्म्या वियुज्येत न च दौर्भाग्यमाप्नुयात् ॥७१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने काशीराजपत्न्या अमया कृतं पञ्चपिण्डिकागौरीव्रतं तेन पुत्रसौभाग्यप्राप्तिर्लक्ष्मीत्वप्राप्तिश्चेतिनिरूपणनामा-ऽष्टाऽधिकपञ्चशततमोऽध्यायः ॥ ५०८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्म्यैकदा सत्ये ब्रह्माणं प्रति नारदः ।
दर्शनार्थं ययौ भ्रान्त्वा लोकत्रयं ननाम तम् ॥ १ ॥
ब्रह्मा पप्रच्छ च कुतः पुत्र आगम्यते, वद ।
नारदः प्राह मर्त्यानां मण्डलानि विलोक्य च ॥ २ ॥
तव पूजाविधानाय विज्ञापयितुं हृद्गतम् ।
समागतोऽस्मि च पितः श्रुत्वा कुरु यथोचितम् ॥ ३ ॥
दैत्यानां हि बलं लोके सर्वत्राऽस्ति प्रवर्तितम् ।
यज्ञाश्च सत्यधर्माश्च सत्कर्माणि च सर्वथा ॥ ४ ॥
प्रसह्य तैर्विनाश्यन्ते देवा भक्ताश्च दुःखिनः ।
तस्माद् यथेष्टं भगवन् कल्याणं कर्तुमर्हसि ॥ ५ ॥
इत्येवं विनिवेद्यैव नत्वा सम्पूज्य संययौ ।
ब्रह्मा वै चिन्तयामास यज्ञार्थं शुभभूतलम् ॥ ६ ॥
निर्विघ्नं तत्स्थलं क्वास्तीत्याशातुं पद्मपुष्पकम् ।
करस्थं स समुवाच पत स्थले तु पावने ॥ ७ ॥
ततश्चिक्षेप पुष्पं तद् भ्रान्त्वा लोकान् समन्ततः ।
हाटकेश्वरजे क्षेत्रे सम्पपात सुपावने ॥ ८ ॥
एतस्मिन्नन्तरे प्राप्तः पश्चात् तस्य पितामहः ।
क्षेत्रं दृष्ट्वा प्रसन्नोऽभूद् यज्ञार्थं प्रपितामहः ॥ ९ ॥
आदिदेश ततो वायुं समानय पुरन्दरम् ।
आदित्यैर्वसुभिः सार्धं रुद्रैश्चैव मरुद्गणैः ॥१०॥
गन्धर्वैर्लोकपालैश्च सिद्धैर्विद्याधरैस्तथा ।
ये च मे स्युः सहायास्तैः समस्ते यज्ञकर्मणि ॥११॥
वायुश्चेन्द्रं देवगणैर्युतं समानिनाय च ।
ब्रह्मा प्राह महेन्द्रं च वैशाख्यामग्निष्टोमकम् ॥१२॥
यज्ञं कर्तुं समीहेऽत्र सम्भारानाहरस्व वै ।
ब्राह्मणाँश्च तदर्हान् वै योग्योपस्कारकाँस्तथा ॥१३॥
इन्द्रस्तानानयामास संभाराँश्च द्विजोत्तमान् ।
आरेभे च ततो यज्ञं विधिवत् प्रपितामहः ॥१४॥
शंभुर्देवगणैः सार्धं तत्र यज्ञे समागतः ।
देवान् ब्रह्मा समुवाच स्वस्वस्थानेषु तिष्ठत ॥१५॥
विश्वकर्मन् कुरु यज्ञमण्डपं यज्ञवेदिकाः ।
पत्नीशालाः सदश्चापि कुण्डान्यावश्यकानि च ॥१६॥
यज्ञपात्राणि च गृहान् चमसाँश्च चषालकान् ।
यूपान् शयनगर्तांश्च स्थण्डिलानि प्रकारय ॥१७॥
हिरण्मयं सुपुरुषं कारय त्वं सुरूपिणाम् ।
बृहस्पते त्वमानीहि यज्ञार्हान्नृत्विजोऽखिलान् ॥१८॥
यावत् षोडशसंख्याकान् शुश्रूषां कुरु देवराड् ।
कुबेर च त्वया देया दक्षिणा कालसंभवा ॥१९॥
त्वया विधे विधौ कार्यं कृत्याऽकृत्यपरीक्षणम् ।
लोकपालाः प्ररक्षन्तु त्वैन्द्यादिका दिशस्तथा ॥२०॥
भूतप्रेतपिशाचानां प्रवेशो दैत्यरक्षसाम् ।
मा भूदित्यथ यज्ञेन दीयतां दानमुत्तमम् ॥२१॥

आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
भवन्तु परिवेष्टारो भोक्तुकामजनस्य तु ॥२२॥
यज्ञार्हा ब्राह्मणा वृत्तास्तिष्ठन्तु यज्ञमण्डपे ।
मैत्रावरुणश्च्यवनोऽथर्वाको गालवस्तथा ॥२३॥
मरीचिर्मार्कवश्चैते सर्वकर्मविशारदाः ।
प्रस्थानकर्ता चाध्वर्युः पुलस्त्यस्तत्र तिष्ठतु ॥२४॥

रैभ्यो मुनिस्तथोन्नेता तिष्ठतु यज्ञमण्डपे ।
ब्रह्मा भवतु नारदो गर्गोऽस्तु सत्रवीक्षकः ॥२५॥
होतारोऽग्नीध्रभरद्वाजपराशरास्त्रयः ।
बृहस्पतिस्तथाऽऽचार्य उद्गाता गोभिलो मुनिः ॥२६॥
शाण्डिल्यः प्रतिहर्ता च सुब्रह्मण्यस्तथाऽङ्गिराः ।
अस्य यज्ञस्य सिद्ध्यर्थं सन्त्वृत्विजस्तु षोडश ॥२७॥
ब्रह्मा तान् पूजयामास दीक्षितस्तैस्तु विश्वसृट् ।
यजमानोऽभवद् यज्ञकार्यं ततः प्रवर्तितम् ॥२८॥

ब्रह्मा च नारदं प्राह सावित्रीं क्षिप्रमानय ।
वाद्यमानेषु वाद्येषु सिद्धकिन्नरगुह्यकैः ॥२९॥
गन्धर्वैर्वाद्यसंयुक्तैरुच्चारणपरैर्द्विजैः ।
अरणिं समुपादाय पुलस्त्यो वाक्यमब्रवीत् ॥३०॥
पत्नीपत्नीतिविप्रेन्द्राः प्रोच्चैस्तत्र व्यवस्थितः ।
ब्रह्मा पुनर्नारदं संज्ञया करस्य वै द्रुतम् ॥३१॥
गृहं सम्प्रेषयामास पत्नी चानीयतामिति ।
सोऽपि गत्वाऽऽह सावित्रीं पित्रा सम्प्रेषितोऽस्म्यहम् ॥३२॥

आगच्छ मण्डपं देवि यज्ञकार्यं प्रवर्तते ।
परमेकाकिनी कीदृग्रूपा सदसि दृश्यसे ॥३३॥
आनीयन्तां ततो देव्यस्ताभिर्वृत्ता प्रयास्यसि ।
इत्युक्त्वा प्रययौ यज्ञे नारदोऽजमुवाच ह ॥३४॥
देवीभिः सह सावित्री समायास्यति सुक्षणम् ।
पुनस्तं प्रेषयामास ब्रह्माऽथ नारदो ययौ ॥३५॥
मातः शीघ्रं समायाहि देवीभिः परिवारिता ।
सावित्र्यपि तदा प्राह यामि केशान् प्रसाध्य वै ॥३६॥

नारदोऽजं प्राह केशान् प्रसाध्याऽऽयाति वै ततः ।
सोमपानमुहूर्तस्याऽवशेषे सत्वरं तदा ॥३७॥
पुलस्त्यश्च ययौ तत्र सावित्री त्वेकलाऽस्ति हि ।
किं देवि सालसा भासि गच्छ शीघ्रं क्रतोः स्थलम् ॥३८॥
सावित्र्युवाच तं ब्रूहि मुहूर्तं परिपाल्यताम् ।
यावदभ्येति शक्राणी गौरी लक्ष्मीस्तथाऽपराः ॥३९॥
देवकन्याः समाजेऽत्र ताभिरेष्यामि संहिता ।
सोऽपि गत्वा द्रुतं प्राह सोमभाराऽर्दितं विधिम् ॥४०॥

सा मां प्राह च देवीभिः सहिताऽऽयामि वै मखे ।
अहं यास्यामि सहिता न त्वेकला कथंचन ॥४१॥
एवं ज्ञात्वा सुरश्रेष्ठ कुरु यत्ते सुरोचते ।
अतिक्रामति कालश्च यज्ञपानक्षणात्मकः ॥४२॥
श्रुत्वा ब्रह्मा महेन्द्रं च प्राह सा शिथिलात्मिका ।
नाऽऽयात्येवाऽन्यया पत्न्या यज्ञः कार्यो भवत्विति ॥४३॥

ब्रह्माज्ञया भ्रममाणां कन्यां कांचित् सुरेश्वरः ।
चन्द्रास्यां गोपजां तन्वीं कलशव्यग्रमस्तकाम् ॥४४॥
युवतीं सुकुमारीं च पप्रच्छ काऽसि कन्यके ।
गोपकन्येति सा प्राह तक्रं विक्रेतुमागता ॥४५॥
परिग्रहासि चेत् तक्रं देहि मूल्यं द्रुतं मम ।
इन्द्रो जग्राह तां तक्रसहितां गोपकन्यकाम् ॥४६॥
गोर्वक्त्रेणाऽऽवेशयित्वा मूत्रेणाऽऽकर्षयत् ततः ।
एवं मेध्यतमां कृत्वा संस्नाप्य सलिलैः शुभैः ॥४७॥

सुवाससी धारयित्वा नीत्वा धृत्वाऽजसन्निधौ ।
आनीतेयं त्वदर्थं वै ब्रह्मन् सर्वगुणान्विता ॥४८॥
गवां च ब्राह्मणानां च कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ॥४९॥
गोरुदराद् विनिष्क्रान्ता प्रापितेयं द्विजन्मताम् ।
पाणिग्रहं कुरुष्वास्या यज्ञपानं समाचर ॥५०॥
रुद्रः प्राह च गोयन्त्रनिष्क्रान्तेयं ततः खलु ।
गायत्रीनामपत्नी ते भवत्वत्र मखे सदा ॥५१॥

ब्राह्मणास्तु तदा प्राहुरेषाऽस्तु ब्राह्मणीवरा ।
गोपजातिवर्जितायास्त्वं पाणिग्रहणं कुरु ॥५२॥
ब्रह्मा पाणिग्रहं चक्रे समारेभे शुभक्रियाम् ।
गायत्र्यपि समादाय मूर्ध्नि तामरणिं मुदा ॥५३॥
वाद्यमानेषु वाद्येषु सम्प्राप्ता यज्ञमण्डपम् ।
विधिश्चक्रे स्वकेशानां क्षौरकर्म ततः परम् ॥५४॥
विश्वकर्मा तु गायत्रीनखच्छेदं चकार ह ।
औदुम्बरं ततो दण्डं पौलस्त्यो ब्रह्मणे ददौ ॥५५॥

एणश्रृंगान्वितं चर्म समन्त्रं प्रददौ तथा ।
पत्नीं शालां गृहीत्वा च गायत्रीं मौनधारिणीम् ॥५६॥
मेखलां निदधे त्वन्यां कट्यां मौञ्जीमयीं शुभाम् ।
ततो ब्रह्मा च ऋत्विग्भिः सह चक्रे क्रतुक्रियाम् ॥५७॥
कर्मणि जायमाने च तत्राऽऽश्चर्यमभून्महत् ।
जाल्मरूपधरः कश्चिद् दिग्वासा विकृताननः ॥५८॥
कपालपाणिरायातो भोजनं दीयतामिति ।
निषिध्यमानोऽपि विप्रैः प्रविष्टो यज्ञमण्डपम् ॥५९॥

सदस्यास्तु तिरश्चक्रुः कस्त्वं पापः समागतः ।
कपाली नग्नरूपश्चाऽपवित्रखर्परान्वितः ॥६०॥
यज्ञभूमिरशुद्धा स्याद् गच्छ शीघ्रमितो बहिः ।
जाल्मः प्राह कथं चास्मि ह्यशुद्धो भिक्षुको व्रती ॥६१॥
ब्रह्मयज्ञमिमं ज्ञात्वा शुद्धः स्नात्वा समागतः ।
गोपालकन्या नित्यं या शूद्री त्वशुद्धजातिका ॥६२॥
स्थापिताऽत्र नु सा शुद्धा विप्रोऽहं पावनो न किम् ।
तावत् तत्र समायातो ब्राह्मणो वृद्धरूपवान् ॥६३॥
श्रीकृष्णो वै तमुवाच प्रत्युत्तरं शृणु प्रिये ।
जाल्म नैषाऽस्ति शूद्राणी ब्राह्मणी जातितोऽस्ति वै ॥६४॥
शृणु जानामि तद्वृत्तं नान्ये जानन्त्यतद्विदः ।
पुरा सृष्टे समारम्भे श्रीकृष्णेन परात्मना ॥६५॥
स्वांशरूपा हि सावित्री स्वमूर्तेः प्रकटीकृता ।
अथ द्वितीया कन्या च पतिव्रताऽभिधा कृता ॥६६॥
कुमारश्च कृतः पत्नीव्रताख्यो ब्राह्मणस्ततः ।
ब्रह्मा वैराजदेहाच्च कृतस्तस्मै समर्पिता ॥६७॥
सावित्री श्रीहरिणैव गोलोके एव सन्निधौ ।
अथ यज्ञप्रवाहार्थं ब्रह्मा यज्ञं करिष्यति ॥६८॥
पृथिव्यां मर्त्यरूपेण तत्र मानुषविग्रहा ।
पत्नी यज्ञस्य कार्यार्थमपेक्षिता भविष्यति ॥६९॥
हेतुनाऽनेन कृष्णेन सावित्र्याज्ञापिता तदा ।
द्वितीयेन स्वरूपेण त्वया गन्तव्यमेव ह ॥७०॥
प्रागेव भूतले कन्यारूपेण ब्रह्मणः कृते ।
सावित्री श्रीकृष्णमाह कौ तत्र पितरौ मम ॥७१॥
श्रीकृष्णस्तां तदा सन्दर्शयामास शुभौ तु तौ ।
इमौ पत्नीव्रतो विप्रो विप्राणी च पतिव्रता ॥७२॥
मदंशौ मत्स्वरूपौ चाऽयोनिजौ दिव्यविग्रहौ ।
पृथ्व्यां कुंकुमवाप्यां वै क्षेत्रेऽश्वपट्टसारसे ॥७३॥
सृष्ट्यारंभे विप्ररूपौ वर्तिष्येतेऽतिपावनौ ।
वैश्वदेवादियज्ञादिहव्याद्यर्थं गवान्वितौ ॥७४॥
सौराष्ट्रे च यदा ब्रह्मा यज्ञार्थे संगमिष्यति ।
तत्पूर्वं तौ गोभिलश्च गोभिला चेति संज्ञिता ॥७५॥
गवां प्रपालकौ भूत्वाऽऽनर्तदेशे गमिष्यतः ।
यत्राऽऽभीरा निवसन्ति तत्समो वेषकर्मभिः ॥७६॥
दैत्यकृतार्दनं तेन प्रच्छन्नयोर्न वै भवेत् ।
इतिहेतोर्दशपूर्वं दैत्यक्लेशभिया तु तौ ॥७७॥
श्रीहरेराज्ञयाऽऽनर्ते जातावाभीररूपिणौ ।
गवां वै पालकौ विप्रौ पितरौ च त्वया हि तौ ॥७८॥

कर्तव्यौ गोपवेषौ वै वस्तुतो ब्राह्मणावुभौ ।
मदंशौ तत्र सावित्रि ! त्वया द्वितीयरूपतः ॥७९॥
अयोनिजतया पुत्र्या भाव्यं वै दिव्ययोषिता ।
दधिदुग्धादिविक्रेत्र्या गन्तव्यं तत्स्थले तदा ॥८०॥
यदा यज्ञो भवेत् तत्र तदा स्मृत्वा सुयोगतः ।
मानुष्या तु त्वया नूत्नवध्वा क्रतुं करिष्यति ॥८१॥
सहभावं गतो ब्रह्मा गायत्री त्वं भविष्यसि ।
ब्राह्मणयोः सुता गूढा गोपमध्यनिवासिनोः ॥८२॥
ब्रह्माणी च ततो भूत्वा सत्यलोकं गमिष्यसि ।
ब्राह्मणास्त्वां जपिष्यन्ति मर्त्यलोकगतास्ततः ॥८३॥
इत्येवं जायमानैषा गायत्री ब्राह्मणी सुता ।
वर्तते गोपवेषीया नाऽशुद्धा जातितो हि सा ॥८४॥
एवं प्रत्युत्तरितः स जाल्मः कृष्णेन वै तदा ।
तावत् तत्र समायातौ गोभिलागोभिलौ मुदा ॥८५॥
अस्मत्पुत्र्या महद्भाग्यं ब्रह्मणा या विवाहिता ।
आवयोस्तु महद्भाग्यं दैत्यकष्टं निवार्यते ॥८६॥
यज्ञद्वारेण देवानां ब्राह्मणानां सतां तथा ।
इत्युक्त्वा तौ गोपवेषौ त्यक्त्वा ब्राह्मणरूपिणौ ॥८७॥
पितामहौ हि विप्राणां परिचितौ महात्मनाम् ।
सर्वेषां पूर्वजौ तत्र जातौ दिव्यौ च भूसुरौ ॥८८॥
ब्रह्माद्याश्च तदा नेमुश्चक्रुः सत्कारमादरात् ।
यज्ञे च स्थापयामासुः सर्वे हृष्टाः सुरादयः ॥८९॥
ब्रह्माणं मालया कुंकुमाक्षतैः कुसुमादिभिः ।
वर्धयित्वा सुतां तत्र ददतुर्यज्ञमण्डपे ॥९०॥
वृद्धो वै ब्राह्मणस्तत्र कृष्णरूपं दधार ह ।
सर्वैश्च वन्दितः साधुः साध्वित्याहुः सुरादयः ॥९१॥
जाल्मः कृष्णं हरिं दृष्ट्वा गायत्रीपितरौ तथा ।
दृष्ट्वा ननाम भावेन प्राह भिक्षां प्रदेहि मे ॥९२॥
बुभुक्षितोऽस्मि विप्रेन्द्रा गर्हयन्तु न मां द्विजाः ।
दीनान्धैः कृपणैः सर्वैस्तर्पितैरिष्टिरुच्यते ॥९३॥
अन्यथा स्याद्विनाशाय क्रतुर्युष्मत्कृतोऽप्ययम् ।
अन्नहीनो दहेद् राष्ट्रं मन्त्रहीनस्तु ऋत्विजः ॥९४॥
याज्ञिकं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ।
श्रीकृष्णश्च तदा प्राह जाल्मे ददतु भोजनम् ॥९५॥
विप्राः प्राहुः खप्परं ते त्वशुद्धं विद्यते ततः ।
बहिर्निःसर दास्यामो भिक्षां पार्श्वमहानसे ॥९६॥
एतस्यामन्नशालायां भुञ्जन्ति यत्र तापसाः ।
दीनान्धाः कृपणाश्चैव तथा क्षुत्क्षामका द्विजाः ॥९७॥

अशुद्धं ते कपालं वै यज्ञभूमेर्बहिर्नय ।
गृहाणाऽन्यच्छुद्धपात्रं दूरं प्रक्षिप्य खप्परम् ॥९८॥
एवमुक्तश्च जाल्मः स रोषाच्चिक्षेप खप्परम् ।
यज्ञमण्डपमध्ये च स्वयं त्वदृश्यतां गतः ॥९९॥
सर्वेप्याश्चर्यमापन्ना विप्रा दण्डेन खप्परम् ।
चिक्षिपुस्तद्बहिस्तावद् द्वितीयं समपद्यत ॥१००॥
तस्मिन्नपि परिक्षिप्ते तृतीयं समपद्यत ।
एवं शतसहस्राणि समपद्यन्त वै तदा ॥१०१॥
परिश्रान्ता ब्राह्मणाश्च यज्ञवाटः सखप्परः ।
समन्ततस्तदा जातो हाहाकारो हि सर्वतः ॥१०२॥
ब्रह्मा वै प्रार्थयामास सन्नत्वा तां दिशं मुहुः ।
किमिदं युज्यते देव यज्ञेऽस्मिन् कर्मणः क्षतिः ॥१०३॥
तस्मात् संहर सर्वाणि कपालानि महेश्वर ।
यज्ञकर्मविलोपोऽयं मा भूत् त्वयि समागते ॥१०४॥
ततः शब्दोऽभवद् व्योम्नः पात्रं मे मेध्यमस्ति वै ।
भुक्तिपात्रं मम त्वेते कथं निन्दन्ति भूसुराः ॥१०५॥
तथा न मां समुद्दिश्य जुहुवुर्जातवेदसि ।
यथाऽन्या देवतास्तद्वन्मन्त्रपूतं हविर्विधे ॥१०६॥
अतोऽत्र मां समुद्दिश्य विशेषाज्जातवेदसि ।
होतव्यं हविरेवात्र समाप्तिं यास्यति क्रतुः ॥१०७॥
ब्रह्मा प्राह तदा प्रत्युत्तरं व्योम्नि च तं प्रति ।
तव रूपाणि वै योगिन्नसंख्यानि भवन्ति हि ॥१०८॥
कपालं मण्डपे यावद् वर्तते तावदेव च ।
नात्र चमसकर्म स्यात् खप्परं पात्रमेव न ॥१०९॥
यज्ञपात्रं न तत्प्रोक्तं यतोऽशुद्धं सदा हि तत् ।
यद्रूपं यादृशं पात्रं यादृशं कर्मणः स्थलम् ॥११०॥
तादृशं तत्र योक्तव्यं नैतत्पात्रस्य योजनम् ।
मृन्मयेषु कपालेषु हविः पाच्यं क्रतौ मतम् ॥१११॥
तस्मात् कपालं दूरं वै नीयतां यत् क्रतुर्भवेत् ।
त्वया रूपं कपालिन् वै यादृशं पात्र दर्शितम् ॥११२॥
तस्य रूपस्य यज्ञेऽस्मिन् पुरोडाशेऽधिकारिता ।
भवत्वेव च भिक्षां संगृहाण तृप्तिमाप्नुहि ॥११३॥
अद्यप्रभृति यज्ञेषु पुरोडाशात्मकं द्विजैः ।
तवोद्देशेन देवेश होतव्यं शतरुद्रिकम् ॥११४॥
विशेषात् सर्वयज्ञेषु जप्यं चैव विशेषतः ।
अत्र यज्ञं समारभ्य यस्त्वां प्राक् पूजयिष्यति ॥११५॥
अविघ्नेन क्रतुस्तस्य समाप्तिं प्रव्रजिष्यति ।
एवमुक्ते तदाश्चर्यं जातं शृणु तु पद्मजे ॥११६॥
यान्यासँश्च कपालानि तानि सर्वाणि तत्क्षणम् ।
रुद्राण्यश्चान्नपूर्णा वै देव्यो जाताः सहस्रशः ॥११७॥
सर्वास्ताः पार्वतीरूपा अन्नपूर्णात्मिकाः स्त्रियः ।
भिक्षादात्र्यो विना याभिर्भिक्षा नैवोपपद्यते ॥११८॥
तावच्छ्रीशंकरश्चापि प्रहृष्टः पञ्चमस्तकः ।
यज्ञमण्डपमासाद्य संस्थितो वेदिसन्निधौ ॥११९॥
ब्राह्मणा मुनयो देवा नमश्चक्रुर्हरं तथा ।
रुद्राणीः पूजयामासुरारेभिरे क्रतुक्रियाम् ॥१२०॥
सहस्रशः क्रतौ देव्यो निषेदुः शिवयोषितः ।
शिवेन सहिताश्चान्याः कोटिशो देवयोषितः ॥१२१॥
एवं शंभुः क्रतौ भागं स्थापयामास सर्वदा ।
पठनाच्छ्रवणाच्चास्य यज्ञस्य फलमाप्नुयात् ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ब्रह्मणा यज्ञार्थं हाटकेश्वरक्षेत्रे नागवत्यास्तीरे देवाद्विद्वारा ससामग्रीमण्डपादिरचना कारिता, जाल्मरूपेण शंकरागमनम्, गायत्र्या ब्राह्मणीजातीयतावृत्तान्तः, कपालानां अन्नपूर्णादेव्यात्मकत्वं, शंकरस्य यज्ञे स्थानं, चेत्यादिनिरूपणनामा नवाऽधिक-पञ्चशततमोऽध्यायः ॥५०९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि यजतश्च ब्राह्मणो वै क्रतौ तदा ।
ऋषीणां कोटिरायाता दक्षिणापथवासिनाम् ॥ १ ॥
सिंहारण्यस्थितानां च नैमिषारण्यवासिनाम् ।
खण्डान्तरस्थितानां च कोट्यः संगतास्तदा ॥ २ ॥
श्रुत्वा पैतामहं यज्ञं कौतुकेन समन्विताः ।
कीदृशो भविता यज्ञो दीक्षितो यत्र पद्मजः ॥ ३ ॥
रूपतीर्थे नागनद्यां स्नात्वा दिव्यस्वरूपिणः ।
ऋषयस्ते यज्ञभूमिं गत्वा नेमुः पितामहम् ॥ ४ ॥
उपविष्टाः परिश्रान्ताः स्वागतेन प्रपूजिताः ।
चक्रुस्ते वै कथा दिव्या यज्ञकर्मसमुद्भवाः ॥ ५ ॥
सोमपानस्य सम्बन्धे वादं चक्रुः परस्परम् ।
उद्गातुश्च तथाऽध्वर्योः तत्त्ववादो बभूव च ॥ ६ ॥
भुक्तवन्तस्ततः सर्वे निन्युर्निशां सुखेन ते ।
द्वितीये दिवसे प्राप्ते द्वादश्यां मखकर्मणि ॥ ७ ॥
ऋत्विग्भिश्च समारब्धे कौतुकं शृणु पद्मजे ।
बटुः कश्चिन्नर्मकारी जलसर्पं सदःस्थले ॥ ८ ॥

चिक्षेप प्रहसन् शीघ्रं विधातुः सन्निधौ ततः ।
डुण्डुभः स भ्रममाणो होतुः पार्श्वमुपाययौ ॥ ९ ॥
होतारं वेष्टयामास भृगुं तथापि वै भृगुः ।
न चचाल निजस्थानात् प्रायश्चित्तविभीषया ॥१०॥
तदोद्वेगश्च सर्वेषां क्षोभो मनाक् बभूव ह ।
मुनिश्च्यवनः पितरं ददर्श सर्पवेष्टितम् ॥११॥
सर्पप्रक्षेपकं बालं शशाप क्षोभकारकम् ।
यस्मात् पाप त्वया सर्पः क्षिप्तः सदसि दुर्मते ॥१२॥
तस्माद् भव द्रुतं सर्पः श्रुत्वाऽथाऽऽह बटुस्तु तम् ।
हास्येन जलसर्पोऽयं मया मुक्तोऽत्र लीलया ॥१३॥
न होतारं समुद्दिश्य कस्माच्छापं ददासि मे ।
इति प्रवदन् सर्पत्वमापन्नः स क्षणान्तरे ॥१४॥
सनातनऋषेः पुत्रो बटुः शुशोच वै मुहुः ।
डुण्डुभं स्वं समादाय ययौ भृगुं जगाद च ॥१५॥
सनातनसुतश्चास्मि पौत्रस्तु परमेष्ठिनः ।
शप्तस्तव सुतेनाऽस्मि च्यवनेन महात्मना ॥१६॥
शापाद् रक्ष मुने विप्रं बटुं मां शरणागतम् ।
श्रुत्वा भृगुः कृपाविष्टश्च्यवनं प्राह रे सुत ! ॥१७॥
अयुक्तं विहितं त्वेतद् यच्छप्तोऽयं बटुस्त्वया ।
न त्वां धर्षयितुं शक्तो विषाढ्योऽपि भुजंगमः ॥१८॥
किम्पुनर्जलसर्पोऽयं निर्विषो रज्जुसन्निभः ।
शापमोक्षं कुरुष्वाऽस्य विप्रबटुः सुखीभवेत् ॥१९॥
च्यवनः प्राह शापो मे मिथ्या नैव भवेत् पितः ।
ब्रह्मा श्रुत्वा तदा प्राह जातं सर्वं मदिच्छया ॥२०॥
पुरा संस्रष्टुकामोऽहं नागानां नवमं कुलम् ।
तद्भविष्यति वै त्वत्तस्तव वंशो धरातले ॥२१॥
नागः कर्कोटकः पुत्रीं निजां दास्यति ते प्रियाम् ।
तव वंशः सविस्तारो मर्त्यलोके निवासकृत् ॥२२॥
श्रावणशुक्लपञ्चम्यां जनास्तद्वंशपूजनम् ।
करिष्यन्ति तव वासो नागतीर्थे प्रथिष्यते ॥२३॥
एवं प्रवदतोऽजस्य यज्ञे नागाः समाययुः ।
निमन्त्रिताश्च वासुकिस्तक्षकश्च कृषीहरः ॥२४॥
पुण्डरीकः कम्बलाश्वतरौ कालपरो बलः ।
शेषश्चान्ये प्रणम्योचुर्यज्ञे देवं पितामहम् ॥२५॥
सेवाकार्यं क्रतौ ब्रह्मन् प्रयच्छ नः सदोचितम् ।
ब्रह्मा प्राह भवन्तोऽत्र कामरूपधराः शुभाः ॥२६॥
नागतीर्थे निवसन्तु यज्ञे येषां च दुष्टता ।
विघ्नेच्छा च भवेत् तेभ्यो रक्षणीयः क्रतुर्मम ॥२७॥
एतत्कृत्यतमं नागा मम यज्ञस्य रक्षणम् ।
भाद्रकृष्णस्य पञ्चम्यां जनैः पूजामवाप्स्यथ ॥२८॥
बाढमुक्त्वा च ते सर्वे नागतीर्थमुपाश्रिताः ।
सनातनसुतोपेताः सनातनस्य वंशकृत् ॥२९॥
परिणेमे सुतां कर्कोटकस्य नवयौवनाम् ।
तद्वंशः सर्वथा भूमौ विस्तृतश्चाऽभवत्ततः ॥३०॥
यत्फणासु बिन्दुयुक्तं तिलकं चतुरस्रकम् ।
उपरि दण्डशून्यं च ते सनातनवंशजाः ॥३१॥
वैष्णवा बहुरूपाश्च शुक्लाः पिंगाश्च पाण्डुराः ।
रक्ताः कृष्णा हरिताश्च बभूवुः कालभेदतः ॥३२॥
कर्बुराश्च ततो जाताः सांकर्यान्निर्विषास्तथा ।
जलसर्पाः स्थलसर्पाः कामरूपधरास्तथा ॥३३॥
अथ भोज्यादिकं चक्रुः सायं रात्रौ च जागरम् ।
तृतीये च दिने त्रयोदश्यां ऋत्विज एव ते ॥३४॥
प्रातः सवनमासाद्य संलग्ना यज्ञकर्मसु ।
यज्ञे प्रवर्तिते शब्दस्तत्राऽभूद् विरतिं विना ॥३५॥
दीयतां दीयतां त्विष्टं भुज्यतां भुज्यतां बहु ।
नीयतां नीयतां दानं वाञ्छिताद्वै चतुर्गुणम् ॥३६॥
पक्वान्नानां पर्वताश्च वित्तानां राशयस्तथा ।
घृतक्षीरवहा नद्यो मिष्टपेयसरांसि च ॥३७॥
आसन् सहस्रगुणिताः कोटितृप्तिप्रदास्तदा ।
एतस्मिन्नन्तरे तत्र कश्चिज्ज्ञानी समागतः ॥३८॥
त्रिकालज्ञो नमस्कृत्य ब्रह्माणं निषसाद ह ।
कथयामास सर्वान् स नैजं परिचयं ततः ॥३९॥
ऋत्विजस्तं पप्रच्छुः स्वभूतकर्माणि कौतुकात् ।
स तानि कथयामास तेनाऽऽश्चर्यान्विताश्च ते ॥४०॥
पप्रच्छुर्वद कस्मात्ते ज्ञानं लोकोत्तरं ननु ।
को गुरुस्ते वद विद्वन् ब्रह्मा हरो हरिश्च वा ॥४१॥
ज्ञानी प्राह गुरवो मे षडेते पिंगला तथा ।
कुररः सर्पो भ्रमरश्चेषुकारः कुमारिका ॥४२॥
एतेषां वर्तनाज्ज्ञानं लब्धं मया शुभोत्तमम् ।
सौराष्ट्राधिपतेरासीन्नारीणां शतकं द्विजाः ॥४३॥
तस्याऽप्यन्तःपुरे चासीत् पिंगला नाम नायिका ।
रात्रौ सुखं स्वपित्येव पतिहीना निरीहिणी ॥४४॥
अन्यास्तु शतशो भार्या रजन्यां कामवाञ्छया ।
आहरन्ति शुभान् धूपान् लेपाँश्च कुसुमानि च ॥४५॥
विलेपनानि मुख्यानि सूक्ष्माणि चाम्बराणि च ।
मन्मथोत्साहसंयुक्ताः पुलकेन समन्विताः ॥४६॥

एका जानाति मां शय्यां नूनमेवाऽऽह्वयिष्यति ।
अन्या जानाति मां चैव तृतीया मां च नाऽपराम् ॥४७॥
स्पर्धयन्ति प्रपश्यन्ति प्रतीक्षन्ति नृपं तदा ।
तासामेकामाह्वयति द्वितीयां वा तृतीयकाम् ॥४८॥
चतुर्थीं वा पञ्चमीं वा दश वा तु क्वचिन्निशि ।
शेषाः शोकं समासाद्य निःश्वस्य प्रस्वपन्ति च ॥४९॥

आशादुःखगता नैव लभन्ति निद्रिकालवम् ।
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥५०॥
आशां निराशां कृत्वा च सुखं स्वपिति पिंगला ।
न करोति च श्रृंगारं न स्पर्धां च कथंचन ॥५१॥
न व्याकुलत्वमापेदे सुखं स्वपिति पिंगला ।
अन्तःपुरस्य सेवायां नियुक्तेन मया सदा ॥५२॥

विलोकितं ततश्चाहं त्यक्त्वाऽऽशां प्रस्वपिम्यपि ।
ये स्वपन्ति सुखं रात्रौ तेषां जाठरजोऽनलः ॥५३॥
इध्यते भोजनं पूर्णं गृह्णाति याति पुष्टताम् ।
तदेतत् कारणं जातं पुष्टता ज्ञानवर्धिनी ॥५४॥
श्रूयतां कुरराल्लब्धं ज्ञानं यथा वदामि तत् ।
ममाऽऽसीद् द्रविणं भूरि पितृपैतामहं महत् ॥५५॥

द्रविणस्य कृते मां च प्रबाधन्ते दिवानिशम् ।
पुत्राः पौत्राश्च दायादा बान्धवा ज्ञातयस्तथा ॥५६॥
यस्याऽहं न प्रयच्छामि स मां नित्यं प्रबाधते ।
एकस्तु यतते प्राणान् हर्तुं नित्यं ममान्तिके ॥५७॥
अपरो दण्डयुक्तश्च भयं दत्वा प्रयाचते ।
तृतीयो याचते साम्ना परः प्रशंसया तथा ॥५८॥
अन्यो भेदेन च तथेतरो जयप्रदानकैः ।
याचते द्रविणं चान्ते दीनो भूत्वाऽपि वै मुहुः ॥५९॥
एवं नाहं क्वचित् सौख्यं तेषां पार्श्वाल्लभामि वै ।
दिवारात्रौ सुखं निद्रां शान्तिं लभामि नैव च ॥६०॥

अथैकस्मिन् दिने दृष्टः कुररो मांससंयुतः ।
हन्यमानो व्योममार्गे मांसार्थं परितः खगैः ॥६१॥
मांसं चञ्च्वा पतितं तदनुपेतुः खगाश्च ते ।
कुररश्च सुखी जातः पक्षिभिस्तैः समुज्झितः ॥६२॥
आमिषस्य परित्यागात् कुररः सुखमेधते ।
मया पुत्रादिकान् द्रव्यं विभज्यार्ऽपितमेव ह ॥६३॥
ततः प्रभृति तैर्मुक्तः सुखं तिष्ठामि पुष्टिमान् ।
अर्थसम्पद् विमोहाय विमोहो नरकाय च ॥६४॥
तस्मादर्थमनर्थं तु मोक्षार्थी दूरतस्त्यजेत् ।
यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ॥६५॥

आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ।
दोषहीनोऽपि धनवान् भूपालैर्दण्ड्यते मुहुः ॥६६॥
दरिद्रः कृतदोषोऽपि प्रायः सन्त्यज्यते जनैः ।
परैः समावृता नित्यं यान्ति स्खलन्ति वै पदे ॥६७॥
असम्बद्धानि जल्पन्ति धनिनो मद्यपा यथा ।
भक्ते द्वेषो बहिः प्रीतिः रुचिरं गुरु लघ्वपि ॥६८॥

मुखे तु कटुकं नित्यं धनिनां ज्वरिणामिव ।
अर्थार्थे जीवलोकोऽयं श्मशानमपि सेवते ॥६९॥
जनितारमपि त्यक्त्वा निःस्वं यान्ति सुता अपि ।
तावत् तिष्ठति मैत्री वै यावन्नार्थप्रयोगिता ॥७०॥
सम्बन्धेऽर्थस्य संजाते वैरं सम्पद्यते स्वयम् ।
ततो वित्तं विहायाऽहं सुखं कुररवत् स्थितः ॥७१॥

सर्पाज् ज्ञानं यथा लब्धं कथयामि यथा पुरा ।
सर्पः परकृतं वेश्म प्रविश्य सुखमश्नुते ॥७२॥
उषित्वा तत्र सौख्येन त्यक्त्वा याति दिगन्तरम् ।
ममत्वं कुरुते नैव स्वयं नैव करोति च ॥७३॥
गृहारंभस्तु दुःखाय न सुखाय कदाचन ।
गृहारम्भेण ममता मृत्युकाले प्रतिष्ठति ॥७४॥

गृहे कृते कृता भार्या ततः पुत्राश्च कन्यकाः ।
कृत्याऽकृत्यं तदर्थं च पुनर्भोगाय तिष्ठति ॥७५॥
कोशकारमिवाऽऽत्मानं वेष्टितं नैव बुद्ध्यते ।
अहंताममतायुक्ताः सक्ताः सीदन्ति जन्तवः ॥७६॥
स्नेहपंकार्णवे मग्नाः पुत्रस्त्रीपशुसम्पदाम् ।
यथा मत्तगजा अज्ञास्तथा नश्यन्ति मानवाः ॥७७॥
भृत्यः पापानि कुरुते भुक्तेऽर्थांश्च महाजनः ।
भोक्ता मुक्तश्च तत्पापात् कर्ता दोषेण लिप्यते ॥७८॥
मोक्षमार्गार्गलभूतं हर्म्यं त्यक्तं मया ततः ।
गृहिणां दुःखदात्रा न भवितव्यं सता क्वचित् ॥७९॥

यत्र क्वापि वसेन्नित्यं सत्तावर्ज्ये द्रुमाश्रये ।
बाधावर्ज्यो चरेद् भिक्षां माधुकरीं विधूमके ॥८०॥
ध्यायेन्नारायणं जपेत् कृष्णनारायणं सदा ।
रागद्वेषौ न वै कार्यौ शत्रुता मित्रता न च ॥८१॥
लोष्टाऽश्मकाञ्चनानां च तुल्यताऽमानमानयोः ।
देशो यस्य स्वस्य नास्ति परो वा नास्ति सर्वदा ॥८२॥
वसुधाऽस्ति कुटुम्बं वा ब्रह्मकुटुम्बमेव वा ।
चतुर्विंशतितत्त्वानि गृहं कुटुम्बमस्थिरम् ॥८३॥
सहैव तूह्यते नित्यं नान्यगृहे तु वासना ।
कुलालचक्रवच्चात्र वेगेन भ्रमणं यदा ॥८४॥

शान्तिं यास्यति तावत्तु मोक्षघटं समर्जयेत् ।
एवंज्ञानं मया सर्पाल्लब्धं वै मोक्षदायकम् ॥८५॥
तत्प्रभावान्महत्तेजः सुखं मे वर्तते सदा ।
अथापि भ्रमराल्लब्धं ज्ञानं वदामि सारजम् ॥८६॥
कस्मिँश्चित्तु द्रुमे दृष्टो भ्रमरो वै मया पुरा ।
शाखाग्रं स समाश्रित्य कृतपूर्वनिकेतनः ॥८७॥
वसन्ते द्रुमपुष्पेषु फलेष्वपि सुगन्धिषु ।
वन्येषु बहुवृक्षेषु स्थितं श्रेष्ठतरं रसम् ॥८८॥
समादाय निकेते स्वे नियोजयति नित्यदा ।
अनुद्वेगो मधुश्रेष्ठं पुटके भृतवान् बहु ॥८९॥
तेन तृप्तिं प्रयाताश्च बहवो मधुपाः परे ।
मया सारं गृहीतं च शास्त्राणां मधुवत् शुभम् ॥९०॥
रचितानि सुशास्त्राणि तानि गृह्णन्ति मानवाः ।
उपजीवन्ति वै चान्ये यथा भृंगास्तथा जनाः ॥९१॥
तेन पुण्येन तेजस्वी चास्मि ज्ञानेन सर्वदा ।
आत्मारामाश्च मुनयो भोगतृष्णाविवर्जिताः ॥९२॥
सारमाध्वीकसन्तृप्ताः प्रभवन्ति सुतेजसः ।
लोभमोहान्विता ये ते जायन्ते वै वितेजसः ॥९३॥
वेदाः शास्त्राणि लोकानां हितार्थाय मया कृताः ।
सारमादाय सर्वेभ्यो दत्तवानस्मि वै सुखी ॥९४॥
इषुकाराद् यथा लब्धं ज्ञानं तत् प्रवदामि च ।
आत्माऽवलोकनार्थाय मया पृष्टाः सहस्रशः ॥९५॥
आत्मदर्शनप्रख्यातास्तदुक्तं च मया कृतम् ।
ज्ञानेन चापि योगेन चाध्यात्मपठनेन च ॥९६॥
अभ्यासेन च दिव्येन चक्षुषा तन्मया कृतम् ।
न वै दृष्टो मयाऽऽत्मा तु ततो वैराग्यवानहम् ॥९७॥
अभ्रमद् भूतले तादृग्गुर्वर्थे यः प्रदर्शयेत् ।
आत्मानं किन्तु कुत्रापि नाऽलभं तादृशं गुरुम् ॥९८॥
अथाऽहं राजमार्गस्य निर्जने च स्थले स्थितः ।
कश्चिदभ्यासकर्ता च यत्र विध्यति लक्ष्यकम् ॥९९॥
इषुणा च मुहुर्लक्ष्यं त्वेकाग्रमनसा हि सः ।
विध्यत्येव हि पार्श्वस्थं नाऽन्यज्जानाति चापरम् ॥१००॥
तन्मार्गेण तु सैन्येन सहितो नृपतिर्ययौ ।
मया दृष्टोऽथ केनापि समागत्य क्षणान्तरे ॥१०१॥
इषुमान् लक्ष्यवेद्धाऽयमभ्यासदत्तमानसः ।
सम्पृष्टः कियतीर्वेला गता यातस्य भूपतेः ॥१०२॥
इषुकारो न शुश्राव पुनः पप्रच्छ तं तथा ।
तथापि नैव शुश्राव लक्ष्ये तल्लीनतां गतः ॥१०३॥
पुनः स्पृष्ट्वा कम्पयित्वा पप्रच्छ मानवो हि तम् ।
तदा प्राहेषुमान्नैव वीक्षितः क इतो गतः ॥१०४॥
नेतः सैन्यं गतं दृष्टं पृच्छाऽन्यं चेद् गतो भवेत् ।
शरलक्ष्यसमभ्यासमानसो न व्यलोकयम् ॥१०५॥
तच्छ्रुत्वा च मया तत्र त्वात्मदर्शनहेतवे ।
चिन्तितं त्वेकचित्तत्वं स्वात्मदर्शनकारकम् ॥१०६॥
आत्मज्ञानं ब्रह्मविद्या विना चित्तनिरोधनम् ।
नैव सञ्जायते क्वापि विनाऽभ्यासं न दर्शनम् ॥१०७॥
लब्धं चेति मया ज्ञानं तत्करोमि निरोधनम् ।
चिन्तयामि हरिं नित्यं हृत्पंकजनिवासिनम् ॥१०८॥
विश्वरूपं हरिं कृष्णनारायणं बहिर्हृदि ।
सुरूपं धारयाम्येव ध्यायामि च पुनः पुनः ॥१०९॥
ततो दिक्षु दिगन्तेषु गगने पृथिवीतले ।
नरे बाले गवि वृक्षे स्त्रीषु वल्लीषु पर्वते ॥११०॥
अग्रे पृष्ठे सर्वतत्त्वे पश्याम्यभ्यासतो हरिम् ।
तमेकं चैवं पश्यामि नान्यत् किंचिद् विना हरिम् ॥१११॥
अहं तत्तेजसा चैवं दीप्तोऽस्म्यत्र सदा तथा ।
एवं ज्ञानं ततो लब्धं ध्यानाभ्यासस्य सर्वथा ॥११२॥
अथ कन्यासकाशाच्च लब्धं ज्ञानं ब्रवीम्यहम् ।
मम पृष्टे पुरा मार्गे मम पत्नी विनिर्गता ॥११३॥
नारी पुत्रवती कन्यावती प्राह पतिं च माम् ।
कुरु योगं गृहे मुक्तिर्भविष्यति न संशयः ॥११४॥
ब्रह्मचारी यतिर्भूत्वा संयतात्मा भव गृहे ।
यदि मां त्वं परित्यज्य यास्यस्यन्यत एव चेत् ॥११५॥
तदहं तु मरिष्यामि बालस्तेऽपि मरिष्यति ।
मरिष्यति कुमारी च ततो नाथ दयां कुरु ॥११६॥
मा व्रजस्व परं तीर्थं गृहतीर्थं विहाय वै ।
हाटकेश्वरजं तीर्थं स्मरणान्मुक्तिदं यतः ॥११७॥
इतिभार्यावचसाऽहं पर्णकुटिं विधाय च ।
हाटकेश्वरजे क्षेत्रे नातिदूरं वसामि वै ॥११८॥
वानप्रस्थस्य मे कन्या क्रीडति वै ममाश्रमे ।
प्रकोष्ठे वलयैर्युक्ता बहुभिः शब्दकारिभिः ॥११९॥
काष्ठद्यानयने कार्ये काष्ठघातेन वै क्वचित् ।
क्वचिदेकैकवलयं भिद्यते खण्डशः क्वचित् ॥१२०॥
एवं याते तु समयेऽवशिष्टं वलयद्वयम् ।
ततः शब्दोऽपि भवति ततः काले गते पुनः ॥१२१॥
प्रतिप्रकोष्ठं त्वेकं तु वलयं विद्यतेऽधुना ।
न संघर्षो न शब्दश्च ह्येकलस्य प्रजायते ॥१२२॥

तद्विचिन्त्य मया ज्ञानं प्राप्तं त्यक्तः स चाऽऽश्रमः ।
बहुभिः कलहो नित्यं द्वाभ्यां संघर्षणं तथा ॥१२३॥
एकाकी विचरिष्यामि कुमारीवलयं यथा ।
ततो दाराऽऽसुतपुत्रीः परित्यज्य भ्रमाम्यहम् ॥१२४॥
यत्राऽस्तमितशायी च यल्लब्धकृतभोजनः ।
स्मरामि सर्वदा कृष्णनारायणं विबन्धनः ॥१२५॥
एवं लब्धं मया ज्ञानं तेभ्यस्तेभ्यो विचिन्तनात् ।
यस्माद् यस्माद् भवेज्ज्ञानं स स्याद् गुरुस्तथा च ते ॥१२६॥
एभिर्लोकान्तरज्ञानं मयाऽऽत्मज्ञानमेव च ।
लब्धं तच्छ्रीकृष्णनारायणानुग्रहतोऽधिकम् ॥१२७॥
एतस्य श्रवणाच्चापि लभते ज्ञानमीदृशम् ।
इत्युक्त्वा विररामाऽसौ ज्ञानी यज्ञाऽतिथिस्तदा ॥१२८॥
अश्वपट्टसरःस्थो वै कृष्णनारायणः स्वयम् ।
यज्ञेऽतिथिश्च सत्कार्यः इत्यादेशार्थमागतः ॥१२९॥
विज्ञाय श्रीकृष्णनारायणं ध्यानेन ऋत्विजैः ।
सत्कृतः श्रीहरिर्विप्रः ऋत्विक्षु निषसाद ह ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने यज्ञे सनातनसुतस्य बटुरूपेण सर्पक्षेपणार्थमागमनम्, ततः श्रीकृष्णनारायणस्याऽतिथिरूपेण स्वगुर्वादिज्ञानप्रदानार्थमागमनम्, ज्ञाननिरूपणं चेत्यादिप्रदर्शननामा दशाधिकपञ्चशततमोऽध्यायः ॥५१०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततश्चैनमतिथिं श्रीनरायणम् ।
विप्ररूपं पप्रच्छुस्ते ब्राह्मणा मण्डपस्थिताः ॥ १ ॥
गृहं त्यक्त्वा गतस्त्वं क्व कियान् कालो गतस्तव ।
वद योग्यं यज्ञकार्ये समेतानां तपस्विनाम् ॥ २ ॥
अतिथिश्च तदा प्राह भ्रान्तोऽहं भुवनत्रयम् ।
ब्रह्मलोकं चेशलोकं जीवलोकं पुनः पुनः ॥ ३ ॥
खण्डानां पृथिवीनां च गोलोकानां शतानि च ।
सहस्राणि चायुतानि लक्षाणि चार्बुदानि च ॥ ४ ॥
यत्राऽस्तमितशाय्यस्मि कृतात्तदेहयात्रकः ।
निवसामि यथादेहे प्रायस्तत्त्वेषु वै तथा ॥ ५ ॥
यज्ञे वसामि सर्वत्र प्रलयेऽपि वसामि च ।
संख्यया रहितान्येव वर्षाणां मे गतानि च ॥ ६ ॥
युगानां संख्यका नास्ति त्वायुर्मे शाश्वतं मतम् ।
यत्र गच्छामि तीर्थानि भवन्त्येव ममागमात् ॥ ७ ॥
तानि कृत्वाऽप्यनन्तानि त्वागतोऽस्मि सुरक्रतौ ।
द्वीपान् खण्डान् भ्रमित्वा च तीर्थानि सकलान्यपि ॥ ८ ॥
दक्षिणं पूर्वज्योतिष्कं हिमशैलं तथोत्तरान् ।
श्वेतद्वीपं कृष्णदेशं सिंहारण्यं च रैवतम् ॥ ९ ॥
कृत्वा सारस्वतं गांगं वाराणसीं च पुष्करम् ।
श्रुत्वा क्रतुं सार्वभौमं पितामहस्य पश्चिमे ॥१०॥
समागतोऽस्मि चातिथ्यं ग्रहीतुं दीयते यदि ।
ब्रह्माद्यास्तं कृष्णनारायणं प्राहुर्वरं वृणु ॥११॥
यथेष्टं च तथाऽऽतिथ्यं गृहाणाऽध्यात्मिकं च वा ।
अवश्यं तत् प्रदास्यामो ज्ञानिने त्वन्तरात्मने ॥१२॥
अतिथिः प्राह मेऽपेक्ष्या नित्यमात्मनिवेदिता ।
प्रपन्नानां शरण्यं च सर्वार्पणं तथेप्सितम् ॥१३॥
अदत्त्वा मे तु ये कुर्युर्ब्रह्माद्या अपि वै क्रतुम् ।
अदत्त्वाऽतिथये नैव प्राप्नुयुः फलमीप्सितम् ॥१४॥
यज्ञभागं देवभागं दिव्यत्वं प्रार्थयामि च ।
आन्तरत्वं च बाह्यत्वं प्रयच्छन्तु तथा मम ॥१५॥
इत्युक्ता देवताः प्राहुर्दूरात् समागतोऽतिथिः ।
सत्पात्रं चासि विप्रेन्द्र सर्वं ते दीयते क्रतौ ॥१६॥
य एषः क्रियते यज्ञस्तस्य नाथो हरिः स्मृतः ।
एतस्मात् कारणात् प्रोक्तः स देवो यज्ञपुरुषः ॥१७॥
वर्तसे कुंकुमवाप्यां क्षेत्रे कृष्णनरायणः ।
श्रीमद्गोपालकृष्णस्य कम्भरा कमला प्रिया ॥१८॥
तपसा मानसं लेभे त्वात्मरथं चात्मजं तु यम् ।
स त्वं लक्ष्मीपतिर्नारायणः श्रीपार्वतीपतिः ॥१९॥
प्रभेशो माणिकीशश्च जयेशः श्रीहरिः स्वयम् ।
वर्तसे यज्ञकर्मात्मन् कर्मणां फलदायकः ॥२०॥
मनसेशो मंगलेशो राधेशश्चाक्षरेश्वरः ।
रमेशश्चापि मुक्तेशः परमात्माऽऽन्तरस्थितः ॥२१॥
तव नाम्ना सदा देयं पूर्णे यज्ञे फलं भवेत् ।
श्राद्धे पैत्र्ये तथा दैवे यो वै त्वां पूजयिष्यति ॥२२॥
विष्णुनामसमोपेतं भविष्यति तदक्षयम् ।
कृष्णे तुष्टिं गते सर्वे सुरास्तुष्टा भवन्ति वै ॥२३॥
इत्युक्त्वा ब्रह्मलक्ष्मीशधर्मशेषशिवादयः ।
ददावतिथये सर्वं कृष्णनारायणाय वै ॥२४॥
ततः प्रभृति सञ्जाता पूजा त्वतिथिसंभवा ।
तस्माल्लक्ष्मि ! सदा पूजाऽतिथेः कार्या शुभे क्षणे ॥२५॥
गृहस्थानां परो धर्मो नान्योऽस्त्यतिथिपूजनात् ।
अतिथेर्न परो देवो देवं नातिक्रमेत् कत्रचित् ॥२६॥

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
तद् दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥२७॥
सत्यं व्रतं तपोऽधीतं दत्तमिष्टं शतं समाः ।
तस्य सर्वं भवेन्नष्टमतिथिं यो न पूजयेत् ॥२८॥
यस्य गेहेऽतिथयो वै सुतृप्ताश्च भवन्ति हि ।
स गृहस्थस्तदन्ये तु भवन्ति गृहरक्षिणः ॥२९॥
पुरा सुकृतपुण्यानां जनानामिह भूतले ।
त्रीण्येतानि प्रपद्यन्ते श्राद्धं दानं शुभा गिरः ॥३०॥
तुष्टेऽतिथौ गृहस्थस्य सन्तुष्टाः सर्वदेवताः ।
विमुखे विमुखाः सर्वा भवन्त्येव न संशयः ॥३१॥
अप्यात्मनः प्रदानेन तोषयितव्य एव सः ।
नारायणो देवताश्च देव्यश्चाऽतिथयो गुरुः ॥३२॥
साध्वी कन्या ह्यनाथा च भिक्षुकी ह्यतिथिर्मताः ।
पितृश्राद्धे भोजनस्य समये योऽभियाति च ॥३३॥
दूराध्वादित आश्रान्तो मध्याह्ने योऽभियाति च ।
कृते तु भोजने चाऽह्नि रात्रौ वा योऽभिगच्छति ॥३४॥
त एतेऽतिथयः प्रोक्ता नाऽतिथिः पूर्वमागतः ।
प्रियो वा यदि वा द्वेष्यो मूर्खो वा पण्डितोऽथवा ॥३५॥
तस्य शक्त्या प्रदातव्यमन्नं वै गृहमेधिना ।
आसनं च जलं भावः सुवाणी स्नेहवीक्षणम् ॥३६॥
एतानि तु सतां गेहे नोच्छिद्यन्ते कदाचन ।
अतिथेः स्वागतात् तृप्ता भवन्ति पितरः खलु ॥३७॥
अतिथेरासनात् तुष्टिर्ब्रह्मणो जायते तथा ।
अर्घेण शंभोः पाद्येन देवानां तोषणं भवेत् ॥३८॥
भोज्यदानेन विष्णोश्च तृप्तिर्भवति शाश्वती ।
यथाशक्ति सदा पूज्यो भोजनीयो विशेषतः ॥३९॥
इत्युक्त्वा यज्ञकार्यस्य विधिं कृत्वा सुरास्ततः ।
परिहारं विधायैव भोजयामासुरीश्वरान् ॥४०॥
रात्रिं निन्युरुत्सवैश्च व्याख्यानैः पारमेश्वरैः ।
चतुर्थे दिवसे यज्ञकर्मारम्भं यथाव्यधुः ॥४१॥
सोमपानादिकं सर्वं होमद्रव्यादिकं तथा ।
प्रावर्तत यथायोग्यं तावत् तत्र समागतः ॥४२॥
युवा वै ब्राह्मणः कश्चिद् बुभुक्षितस्तृषायुतः ।
होमद्रव्यं शुभं दृष्ट्वा भक्षयामास सोत्सुकः ॥४३॥
प्रस्थाता तं भक्ष्यमाणं दृष्ट्वा शशाप धिग् वदन् ।
होमार्थद्रव्यं दुष्ट त्वं रक्षोवदत्र खादसि ॥४४॥
राक्षसानामिदं कर्म राक्षसो भव मा चिरम् ।
इत्युक्तः सोऽभवत् तत्र ऊर्ध्वकेशोऽतिभैरवः ॥४५॥
लम्बोष्ठो विकरालास्यो राक्षसः कृष्णवर्णकः ।
शंकुकर्णश्च रक्ताक्षो दृष्टमात्रभयंकरः ॥४६॥
राक्षसं तं तदा दृष्ट्वा भीता वित्रेसुरीश्वराः ।
रक्षोघ्नानि च सूक्तानि जजपुश्च पुनः पुनः ॥४७॥
राक्षसोऽपि भयं त्यक्त्वा पितामहमुपागमत् ।
उवाचाऽऽत्मानमुद्दिश्य कृताञ्जलिः प्रणम्य च ॥४८॥
पौत्रोऽहं वै तव ब्रह्मन् पुलस्त्यस्य सुतो द्विजः ।
नीतो राक्षसतामत्र प्रस्थात्रा शापतः पितः ॥४९॥
अहं विश्वावसुर्नाम पौलस्त्योऽस्मि कृपां कुरु ।
भक्षितं यन्मया चात्र होमार्थं यत्प्रकल्पितम् ॥५०॥
अपराधं क्षमयित्वा राक्षसत्वं निराकुरु ।
तदा ब्रह्मा प्रतिप्रस्थातरं प्राह दयायुतः ॥५१॥
बालोऽयं मम पौत्रस्तु कृत्याऽकृत्ये न वेत्ति च ।
तस्य राक्षसभावो वै त्वया हर्तव्य एव ह ॥५२॥
श्रुत्वा तच्च मुनिः प्राह पुलस्त्यस्य तु वंशजाः ।
देवकार्यविरोधित्वाद् भविष्यन्ति हि राक्षसाः ॥५३॥
नाऽस्य राक्षसभावो वै हर्तुं केनापि शक्यते ।
सत्यपि मानवे भावे कृतमुच्छिष्टमेव यत् ॥५४॥
यज्ञद्रव्यं स्वभावोऽयं नैषेकः केन वार्यते ।
स्याच्च वा शीतलो वह्निर्यदि स्यादुष्णगुः शशी ॥५५॥
तन्मे स्यादन्यथा वाक्यं व्याहृतं प्रपितामह ।
तस्मादयं सदा चास्तु राक्षसः रक्षसां पतिः ॥५६॥
श्रुत्वैवं वचनं तस्य विधिर्विश्वावसुं तदा ।
जगाद पौत्र चानेन रूपेण तिष्ठ सर्वदा ॥५७॥
चमत्कारपुरस्याऽस्य पश्चिमस्थानमाश्रितः ।
पश्चिमे राक्षसाः सन्ति कूष्माण्डकाः पिशाचकाः ॥५८॥
भूताः प्रेताः पिशाचाश्च तान्निवारय सर्वथा ।
तद्गच्छ पुत्र तत्र त्वं सर्वेषामधिपो भव ॥५९॥
राक्षसानां मया दत्तं तव राज्यं च साम्प्रतम् ।
राक्षसः प्राह राज्ये च मया भोक्तव्यमेव किम् ॥६०॥
राज्ञा चैव मया देयं भृत्यानां भोजनं च किम् ।
न करोति च यो राजा भृत्यप्रजाप्रपोषणम् ॥६१॥
तस्यापि नरकप्राप्तिस्ततो देहि प्रभोजनम् ।
ब्रह्मा प्राह तिलैर्दर्भैर्विहीनं श्राद्धमेव ते ॥६२॥
रजस्वलया संदृष्टं शूकरेणाऽवलोकितम् ।
शुना खरेण च दृष्टं विधिहीनं च तेऽर्पितम् ॥६३॥
कुष्ठी कुनखी महिषो वा भुंक्ते यत्र तेऽर्पितम् ।
अस्नातैश्च कृतं तैलाभ्यंगवद्भिर्मलाम्बरैः ॥६४॥

भुंक्ते च श्यामदन्तो वा वृषलीपतिरेव वा ।
वेदहीनेन च कृतं ब्रह्मचर्यं विना कृतम् ॥६५॥
देवकार्यविहीनं च तत्ते सर्वं भविष्यति ।
प्रत्यक्षं लवणं तक्रं विकृतं ते भविष्यति ॥६६॥
यजमानो द्विजो वाऽथ ब्रह्मचर्यविवर्जितः ।
भोक्तापि तादृशो यत्र तत्सर्वं ते भविष्यति ॥६७॥
आयसेन तु पात्रेण यत् पावित्र्यविवर्जितम् ।
दत्तमन्नं सदा तेऽस्तु मन्त्रशुद्धिविवर्जितम् ॥६८॥
इत्युक्तो राक्षसो नत्वा दत्तं भुक्त्वा ययौ ततः ।
यज्ञकार्ये च सम्पन्ने परिहारः कृतस्तथा ॥६९॥
ततश्च पञ्चमे त्वह्नि पुलस्त्येन प्रबोधिताः ।
श्वेतधौताम्बराः स्नाताश्चक्रुः कर्माणि तत्क्रतौ ॥७०॥
सामवेदस्य गानेन तूद्गात्रा कर्मयोजितम् ।
शंकुभिः क्रियते यच्च तत्कृतं सुसमाहितम् ॥७१॥
देवैरागत्य सानन्दं कृतं वै सोमभक्षणम् ।
होमे प्रदीप्तवह्नौ च जायमाने पुनः पुनः ॥७२॥
प्रारब्धे सोमभक्ष्येऽथ गीते चोद्गातृनिर्मिते ।
आगता कन्यका त्वेका सामगीतिसमुत्सुका ॥७३॥
शंकुकर्णं निजं चित्ते वाञ्छमाना विचक्षणा ।
छन्दोगस्य सुता श्रेष्ठा देवशर्माभिधस्य सा ॥७४॥
उदुम्बरीतिनाम्ना सा सामश्रवणलालसा ।
उद्गातारं च सदसि वचनं व्याजहार वै ॥७५॥
यथा तथा प्रवर्तन्ते शंकवः सामसूचिताः ।
दक्षिणाग्नौ कृते होमे पापनाशो भवेदिति ॥७६॥
एवं तया दर्शितश्च होमः कृतो द्विजैरिति ।
ततः पप्रच्छुरेते तां कुत आयासि कन्यके ॥७७॥
उदुम्बरी समुवाच पर्वतस्य ऋषेः सुता ।
जातिस्मराऽभिजाताऽस्मि शापाद् गन्धर्वलोकतः ॥७८॥
गायने स्वरभंगो वै नारदस्याऽन्वपद्यत ।
तदा च हसितस्तत्र नारदो गायने मया ॥७९॥
ततः स कुपितो मह्यं मिथ्याऽहं हसितस्त्विति ।
तेन नारदशापोऽभून्मानुषी भव कन्यके ॥८०॥
मया प्रसादितः स्तोत्रैः शापान्तार्थं तदा च सः ।
प्राह मां मानुषी श्रेष्ठविप्रगृहे भविष्यसि ॥८१॥
देवशर्मगृहे जाता तेनाऽहं कन्यकाऽधुना ।
सत्यभामा मम माता वर्तते च पतिव्रता ॥८२॥
नारदेन तदा चोक्तं ब्रह्मा यज्ञं करिष्यति ।
तत्र तदा च समये शंकोश्चापि विपर्यये ॥८३॥
तदा तत्र त्वया वाच्यः स्थाने शंकुः समाहितः ।
दक्षिणाग्नौ कृते होमे पापनाशो भवेदिति ॥८४॥
तावत्तदा च ते मोक्षो भविष्यति न संशयः ।
इमां कान्तिं मम पश्य विमानं त्वागतं तथा ॥८५॥
अहं यास्यामि मे स्वर्गं गान्धर्वस्थानमद्य हि ।
उद्गाता च तदा प्राह यज्ञे क्षतेर्निवारिके ॥८६॥
तुष्टोऽहं त्वं वरं ब्रूहि न वृथा दर्शनं मम ।
उदुम्बरी तदा प्राह देहि मे देवसन्निधौ ॥८७॥
यज्ञे यज्ञे समाजे च मध्यस्था भुक्तिरेव मे ।
ततो मत्पुरतस्तत्र कार्यं शंकुप्रचारणम् ॥८८॥
मत्तेजःकर्मणा तुष्टिः स्वर्गस्थानां भवेत् तथा ।
एवं तद्वचनं श्रुत्वा उद्गाता तामथाऽब्रवीत् ॥८९॥
यज्ञे सदसि मध्ये त्वां विन्यस्य सम्प्रपूज्य च ।
वस्त्रभूषागन्धपुष्पलेपनैश्च ततः परम् ॥९०॥
शंकुप्रचारणं सर्वे करिष्यन्ति त्वदग्रतः ।
कल्याणं ते सदा चास्तु सन्तोषं त्वं परं व्रज ॥९१॥
त्वया विरहितं कर्म निष्फलं भावि सर्वथा ।
या नारी सदसो मध्ये फलैस्त्वां पूजयिष्यति ॥९२॥
सा फलं प्राप्स्यति पूर्णं यज्ञस्य श्रेय इत्यपि ।
वस्त्रभूषादिभिः पूजाकर्त्री ते यज्ञपुण्यभाग् ॥९३॥
इत्येवं देववर्यैश्च तथोद्गाता च भूसुरैः ।
उक्ता देवी ततो व्योम्नि दिव्या विमानगाऽभवत् ॥९४॥
विमाने त्वम्बरे तस्याः पूजां कर्तुं जनाः स्त्रियः ।
सहस्रशश्चागतास्तैः पूजिता बहुवस्तुभिः ॥९५॥
श्रुत्वैवं देवशर्माऽपि पुत्रीं द्रष्टुं समागतः ।
पत्नीयुतो नमश्चक्रे पुत्रीं विमानगां सताम् ॥९६॥
पुत्री प्राह पितर्मा त्वं मा नमस्कारमाचर ।
प्राप्ता स्वर्गगतिर्मे वै पुण्यह्रासाद् विनंक्ष्यति ॥९७॥
तिष्ठाऽत्र स्वांगनायुक्तः स्वर्गं नेष्यामि वै सह ।
ततस्तौ हर्षितौ तस्याः पितरौ सुस्थितौ तदा ॥९८॥
पुत्र्यां पूजां प्रपश्यन्तौ मन्यमानौ स्वधन्यताम् ।
अन्ये कुटुम्बिनश्चापि धन्यान् मत्वाऽत्र संस्थिताः ॥९९॥
तावद्भृगुः समायातो ब्रह्माणं सदसो बहिः ।
प्राह कन्यां यज्ञकार्ये गृहीत्वा नित्यदा पुनः ॥१००॥
उद्गात्रा वेदमार्गोऽयं कृतश्चाऽवैदिकः प्रभो ।
देवीत्वं चार्पितं तस्यै मानुष्यै देवसन्निधौ ॥१०१॥
सोमपानं तया साकं यज्ञे नः सम्प्रवर्तितम् ।
एतद्योग्यं न वै जातं तस्माद् योग्यं विचारय ॥१०२॥

इत्युक्तो विश्वसृट् प्राह नैषा वै मानुषी सती।
किन्तु गान्धर्वपुत्री सा देवी ह्युदम्बरी सदा ॥१०३॥
यज्ञे नारदशापाद्वै मुक्ता शंकुमिषेण सा।
यज्ञीया देवता चेयं सर्वदा स्थास्यति ध्रुवम् ॥१०४॥
अथ तावच्च कैलासादागता मातरः क्रतौ।
अष्टषष्टिसंख्यया वै हृष्टाः प्रोचुश्च वेधसम् ॥१०५॥
आमन्त्रिताः पवनेन तव यज्ञे समागताः।
उदुम्बरीं यज्ञमध्ये लब्धवतीं प्रपूजनम् ॥१०६॥
भागं चेति समाकर्ण्य चागतास्तत् पितामह।
भागं स्थानं यज्ञसदोमध्ये देहि च शाश्वतम् ॥१०७॥
ब्रह्मणा त्वष्टषष्टिर्वै स्थानानि त्वर्पितानि हि।
तेषु ताः सुस्थिता यज्ञे पूजिता बलिभिस्तदा ॥१०८॥
तर्पिताः संस्थिता मौनं सावित्री तत आगता।
द्विजैः साऽभिहिता यज्ञे मा गच्छेति निवारिता ॥१०९॥
ब्रह्मणा परिणीताऽस्ति गायत्रीति वरांगना।
इतिश्रुत्वा वज्रतुल्यं मेने शुशोच वै रुषा ॥११०॥
सूर्यस्त्वस्तंगतस्तावत् परिहारः क्रतोरभूत्।
याज्ञिकानां च विप्राणां तत्त्ववादोऽभवन्निशि ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽतिथिदत्तवरदानं, पुलस्त्यपुत्रविश्रावसुना होमद्रव्यभक्षणं, राक्षसो भवेति शापः, पर्वतर्षिपुत्र्या उदुम्बर्या आगमनं क्रतौ पूजास्थानं च, अष्टषष्टिमातृकागणाऽऽगमश्चेत्यादिनिरूपणनामाएकादशाधिकपञ्चशततमोऽध्यायः ॥ ५११ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि त्वष्टषष्टिदेव्यो यास्तत्र संस्थिताः।
यज्ञक्षेत्रे तु तास्तत्र पत्तनस्थैः प्रपूजिताः ॥ १ ॥
कुलदेव्योऽभवन् निवासिता नगरवासिभिः।
यज्ञे भूमौ च ताः श्रुत्वा सावित्री ताः शशाप ह ॥ २ ॥
ममाऽऽगमनपूर्वं वै यज्ञे स्थानं कृतं यतः।
सपत्न्या सह मिलिता अस्मांस्त्यक्त्वा ततः सदा ॥ ३ ॥
नगरस्थकृता पूजा युष्माकं न फलिष्यति।
अप्रासादाः शीतवर्षाऽऽतपक्लिष्टा भविष्यथ ॥ ४ ॥
आकाशगतिशून्याश्च दीना यूयं भविष्यथ।
इति शप्ताश्च ताः सर्वा उदुम्बरीं समाययुः ॥ ५ ॥
शापं तं श्रावयामासुः पूजानैष्फल्यमेव यत्।
ततश्च प्रार्थयामासुः शापस्यापि निवारणम् ॥ ६ ॥
उदुम्बरी च ताः प्राह सावित्रीवचनं न वै।
मृषा कर्तुं समर्थोऽहं किन्तु वरं ददामि यत् ॥ ७ ॥
अष्टषष्टिषु गोत्रेषु नगरस्थैर्नियोजिताः।
पितामहस्य कृपया तत्र पूजा फलिष्यति ॥ ८ ॥
भोज्यं पानं पूजनं च गोत्रस्थैर्दास्यते ततः।
तत्र तृप्तिर्भवतीनां भविष्यति सुखासनम् ॥ ९ ॥
अदृश्यहास्यकर्त्रीणां दात्रीणां च बलेस्तथा।
पुरद्वारे पूजिकानां तृप्तिं दानेन यास्यथ ॥१०॥
एवं ता नागनद्या वै परितः स्थापिताः शुभाः।
अथोदुम्बरीजनको देवशर्मा ह्युपस्थितः ॥११॥
पत्नीयुक्तः सतीं दिव्यां पुत्रीं दृष्ट्वा तुतोष सः।
स एवाऽऽसीत्पुरानाम्ना गन्धर्वः पर्वतो दिवि ॥१२॥
उदुम्बर्या प्रार्थितः सः पित्रर्थं भूतले मुहुः।
नारदेन यदा शप्ता मात्रर्थं च तदैव ह ॥१३॥
मातः पितर्युवां पृथ्व्यामागच्छतं मया सह।
भवतं मम पितरौ मानुषौ मानुषी त्वहम् ॥१४॥
युवयोस्तु सुता तत्र भविष्यामि ततश्च तौ।
देवशर्मा च तत्पत्नी जातौ वै मानुषौ तयोः ॥१५॥
सुता ह्युदुम्बरी जाता या विमानेऽत्र तिष्ठति।
तां दृष्ट्वा देवशर्माऽपि तनु त्यक्त्वा प्रियायुतः ॥१६॥
बभूव दिव्यदेहो वै यानं समारुरोह सः।
पत्नीयुक्तः सुतायुक्तो निशां निनाय चाम्बरे ॥१७॥
एवं यातं दिनं रात्रिः पञ्चमी च क्रतोर्गता।
प्रत्यूषे च ततो जातेऽवभृथस्नानमित्यपि ॥१८॥
विधिर्बोध्यं सर्वतीर्थमयं कार्यं भवेदिति।
ततः स्वर्गे देवताभिः समं यास्याम एव ह ॥१९॥
इति विचार्य च त्रयस्ते च विमानसंस्थिताः।
दक्षिणां च क्रतोः परिहारं चावभृथं तथा ॥२०॥
प्रतीक्षन्तेऽथ वै ब्रह्मा सदःस्थान् ब्राह्मणान् मुनीन्।
दक्षिणां प्रददौ तत्र पुष्करं च सरोवरम् ॥२१॥
तीर्थरूपं पावनं च स्थापयामास पश्चिमे।
कार्तिके धवले पक्षे त्वेकादशीत एव वै ॥२२॥
पूर्णिमान्तं च पञ्चाहं तीर्थान्यन्यानि चापि वै।
स्थास्यन्त्यत्र सरस्येव सर्वयुगेषु भूसुराः ॥२३॥
पञ्चरात्रस्य मध्येऽत्र यश्च स्नानं करिष्यति।
दानादिकं जपं चापि तदक्षयं भविष्यति ॥२४॥
अथ ते ब्राह्मणाः सर्वे पुण्यदानप्रपूरिकाम्।
अनुज्ञां प्रददुस्तुष्टा यज्ञस्य फलसिद्धये ॥२५॥

पूर्णं च हवनं जातं दक्षिणा बहुलाऽर्पिता ।
तुष्टाश्च ब्राह्मणाः सन्तस्तथाऽन्ये प्राप्य वै धनम् ॥२६॥
पुलस्त्यः प्राह च तत्र यज्ञः सम्पूर्णदक्षिणः ।
प्रायश्चित्तैर्विरहितः सम्पन्नो जयतात् सदा ॥२७॥
अतः परं कर्मशेषं वरुणेष्टिं जपं तथा ।
करोमि च ततः सर्वैः प्रकर्तव्यं फलप्रदम् ॥२८॥
अवभृथाख्यं स्नानं च त्वया मयाऽप्सु वै शुभम् ।
एवमुक्त्वा सह सर्वैर्ययौ पुष्करतीर्थकम् ॥२९॥
नागनद्यां तु ऋत्विग्भिः साऽऽचार्याऽग्नीध्रहोतृभिः ।
ब्रह्मणा सह विप्रैश्च सदस्यैर्बहुभिस्तदा ॥३०॥
यथा वह्नौ तथा तोये सर्वैस्तत्र हविः शुभम् ।
हूयते संविधानेन यज्ञपात्रैः समन्वितम् ॥३१॥
वरुणस्य प्रतुष्ट्यर्थं विविशुस्ते ततो जलम् ।
ऋत्विग्भिर्ब्रह्मणा सर्वैः सर्वाऽनिष्टप्रशान्तये ॥३२॥
अवभृथस्थले स्नानं यः कश्चिद् वै करिष्यति ।
सर्वतीर्थमये मर्त्यो विपाप्मा स भविष्यति ॥३३॥
यानि कानि च तीर्थानि त्रैलोक्ये वै भवन्त्यपि ।
वारुणीमिष्टिमासाद्य तान्यायान्ति च सन्निधौ ॥३४॥
तस्मात् सर्वप्रयत्नेन दीक्षितेन समन्वितैः ।
तत्र स्नानं प्रकर्तव्यं जलमध्ये तु सार्थिभिः ॥३५॥
अथ ब्रह्मा महेन्द्रं च प्राह लोकहिताय वै ।
जनानां बहुसम्मर्दे जना ज्ञास्यन्ति नैव माम् ॥३६॥
स्नानं जले क्षणे तत्र ततस्त्वं गजमास्थितः ।
हस्ते वंशे कृष्णसारमृगं धृत्वा तदाऽम्बरे ॥३७॥
सर्वेषां स्नानकालस्य ज्ञानाय तत् जले क्षिप ।
येन लोकसमस्तोऽयं ज्ञात्वा स्नास्यति तत्क्षणम् ॥३८॥
स्नानं यः कुरुते श्रेयः सम्प्राप्नोति यथोदितम् ।
दूरस्थोऽपि सुवृद्धोऽपि बालोऽपि योषितोऽपि च ॥३९॥
स्नानजं लभते श्रेय इन्द्रः श्रुत्वा तथाऽकरोत् ।
तत्क्षणे देवता विप्राः ऋषयो मुनयस्तथा ॥४०॥
सन्तश्च मानुषा दिव्या गन्धर्वा गुह्यकादयः ।
चतुर्दशभुवां वासकृतः सस्नुः समाहिताः ॥४१॥
ब्रह्मा शक्रं तदा प्राह वरं वृणु ददामि ते ।
इन्द्रः प्राहात्र वै तीर्थे प्रतिवर्षं तु यो नृपः ॥४२॥
मृगचर्मविनिक्षिप्याऽवभृथं च करिष्यति ।
गजे स्थित्वा क्रतोरन्ते सः स्यात्पापविवर्जितः ॥४३॥
अजेयः सर्वशत्रूणां स्नातारः पापवर्जिताः ।
प्रजाः सुखभरास्तद्वन्नीरोगाः स्युर्ममाऽऽशिषा ॥४४॥
कार्तिके पञ्चदिवसैः कृत्वा क्रतुं व्रतादिकम् ।
प्रतिपद्दिवसे प्राप्ते कुतुपे स्नायिनो जनाः ॥४५॥
भविष्यन्ति विजयिनो वर्षपापविवर्जिताः ।
आधिव्याधिविनिर्मुक्तास्ते भविष्यन्त्यसंशयम् ॥४६॥
एतस्मिन्नन्तरे प्राप्तो यक्ष्माख्यो दारुणो गदः ।
अचिकित्स्योऽपि देवानां तथा धन्वन्तरेरपि ॥४७॥
नीलाम्बरो रक्तजिह्वः शुष्कपार्श्वश्च सुस्वरः ।
क्षुत् कुर्वन् श्लेष्मणा शुष्क पादेऽशक्त उवाच ह ॥४८॥
दूराच्छ्रुत्वा तव यज्ञं पितामह उपागतः ।
दक्षेणाऽहं पुरासृष्टश्चन्द्रार्थं कुपितेन वै ॥४९॥
रोहिणीपक्षपातस्य फलात्मकोऽहमस्मि च ।
चन्द्रेण शंकरो देवस्तपसा तोषितस्ततः ॥५०॥
शंभुर्मह्यं ददौ पक्षमेकं कृष्णं न चापरम् ।
तत्र भोज्यं मम कुत्र भवेल्लभ्यं पितामह ॥५१॥
पूर्णिमायां यज्ञसत्रे भुंक्त्वा ब्रूयुर्द्विजा यदि ।
तृप्ताः स्म इति तेन स्यात् पूर्णं यज्ञफलं विभो ॥५२॥
यज्ञसत्रे यदि नैव तर्पिता येन भूसुराः ।
तस्मिन् वासो मम देयो यज्ञपुण्यविनाशकृत् ॥५३॥
तव यज्ञे मम तृप्तिर्यथा स्यात् तत्तथा कुरु ।
ब्राह्मणोऽहं दक्षपुत्रो मम तृप्तिर्विधीयताम् ॥५४॥
ब्रह्मा प्राह क्रतौ विप्रवचनं तृप्तिकृन्न चेत् ।
यजमाने त्वया तत्र स्थेयं पुण्यक्षयात्मना ॥५५॥
किं च विप्रैर्वैश्वदेवस्याऽन्ते देयो बलिस्तव ।
तेन ते द्वितीयपक्षे तृप्तिः पूर्णा भविष्यति ॥५६॥
बलिदातुर्गृहे वंशे त्वया स्थेयं न कर्हिचित् ।
इत्युक्तः प्राह यक्ष्मा सः तृप्तोऽस्मि देहि भूतलम् ॥५७॥
वसामि तपसे चात्राऽऽकल्पान्तं वै पितामह ।
ब्रह्मणा च ततो दत्तं भूतलं त्वाश्रमाय तम् ॥५८॥
यक्ष्मा तूत्तरभागे च नागनद्याः समीपतः ।
सामुद्रसंगमं प्राप्य चक्रे नैजाश्रमं स वै ॥५९॥
यो ददाति वैश्वदेवस्याऽन्ते बलिं तु यक्ष्मणे ।
तस्य कुटुम्बिनां यक्ष्मा पश्वादीनां न जायते ॥६०॥
न तस्य भेषजानि स्युर्न मन्त्रा न चिकित्सकाः ।
इत्युक्तः स ययौ यक्ष्मा भोज्यं नीत्वाऽब्धिसन्निधौ ॥६१॥
अथ लक्ष्मि शृणु जातं सावित्रीकृतभर्त्सनम् ।
क्रतौ तु वेधसस्तत्र वदामि त्वं निशामय ॥६२॥
गौरीं लक्ष्मीं शचीं मेधामरुन्धतीं च पार्वतीम् ।
प्रभां च माणिकीं स्वाहां कम्भरां च क्षमां धृतिम् ॥६३॥

स्वधां पुष्टिं च सगुणां बुद्धिं हंसां च मञ्जुलाम् ।
पद्मां रमां सतीं कृष्णां नारायणीं सरस्वतीम् ॥६४॥
तथा दासीर्घृताचीं मेनकां रम्भां तिलोत्तमाम् ।
उर्वशीं मोहिनीं स्वर्णां ललितां च जयां दयाम् ॥६५॥
सह नीत्वा वाद्यघोषैर्यदा याता क्रतुस्थलम् ।
सावित्री तु तदा तस्याः प्रास्फुरद्दक्षिणा तु दृक् ॥६६॥
दक्षिणानि तथाऽङ्गानि प्रास्फुरन् योषितां तदा ।
गीतोत्सवपराः सर्वा आययुर्यज्ञमण्डपम् ॥६७॥
नारदः सम्मुखः प्रायाज् ज्ञात्वाऽऽगतां निजप्रसूम् ।
प्राह तां गोपकन्याया वृत्तान्तं सर्वमेव सः ॥६८॥
रशना योजिता कट्यां विवाहितेति वेधसा ।
श्रुत्वा प्रम्लानवदना सावित्री रक्तवर्जिता ॥६९॥
वैमनस्यं परं प्राप्ता तेजोरूपप्रभाक्षया ।
शून्येन मनसा याता प्रस्खलन्ती पदे पदे ॥७०॥
काराग्रहसमं तं च मण्डपं सा ददर्श ह ।
दृष्ट्वा नूतनया तत्र सपत्न्या सहितं पतिम् ॥७१॥
कोपसंरक्तनयना परुषं वाक्यमब्रवीत् ।
विबुधा ब्राह्मणा आर्षा ये सदस्पतयस्त्विह ॥७२॥
मूकीभावं गता नार्यः शृण्वन्तु न्यस्तमानसाः ।
किमेतद् युज्यते कर्तुं तव वृद्धतमाकृतेः ॥७३॥
उभयोः पक्षयोरेषा ह्यशुद्धा वै विवाहिता ।
पशुधर्मपरा तक्रविक्रेत्री मलिना सदा ॥७४॥
पापप्रचुरजातीया गृहीता गर्हितं कृतम् ।
अवश्यं यदि ते कार्यं भार्यया परया मखे ॥७५॥
विधे विप्रा त्वया क्वापि न लब्धा किं जगत्त्रये ।
ऊढा त्वाभीरकन्येयं नूनं भ्रष्टोऽसि वै विधेः ॥७६॥
तस्मादेतेन कृत्येन न त्वं प्राप्स्यसि पूजनम् ।
तव पूजाप्रकर्तारो भविष्यन्ति हि निर्धनाः ॥७७॥
पुत्राणामथ पौत्राणामन्येषां च दिवौकसाम् ।
अयोग्यं चापि विप्राणां यदेतत् कृतवानसि ॥७८॥
अथवा नैष दोषस्ते स्वार्थाः कुर्वन्ति वै तथा ।
न लज्जन्ति न जानन्ति कृत्याकृत्यं शुभाऽशुभम् ॥७९॥
अकृत्यं मन्यते कृत्यं मित्रं शत्रुं च मन्यते ।
शत्रुं च मन्यते मित्रं जनः स्वार्थवशंगतः ॥८०॥
द्यूतकारे न वै सत्यं चौरे चापि न सौहृदम् ।
मैत्री नास्ति नृपे क्वापि लज्जा स्वार्थिषु नैव च ॥८१॥
न मे स्याद् दुःखमेतद्धि यत्सापत्न्यमुपस्थितम् ।
समर्थस्य सहस्राणि नारीणां तु भवन्ति वै ॥८२॥
कुलीनानां स्वजात्यानां न तु नीचजयोषिताम् ।
एतत्पुनर्महद् दुःखं यदाभीरो विगर्हिता ॥८३॥
वल्लवी नष्टचारित्रा किं करोमि प्रिये ध्रुवम् ।
तस्माद् यास्याम्यरण्यं द्राग् विडम्बिता त्वया विधे ॥८४॥
तव पूजाप्रकर्ता वै दरिद्रः संभविष्यति ।
यतश्चाभीरसुतेयं मम स्थाने कृता त्वया ॥८५॥
भविष्यति न सन्तानं तव मच्छापतो विधे ।
गायत्रीपूजिका नारी वन्ध्या क्लिष्टा भविष्यति ॥८६॥
अस्या वै मानसाः पुत्रा भविष्यन्ति यदि क्वचित् ।
सर्वे म्लेच्छा रात्रिचरा अशिष्टाश्चाऽप्यकेतनाः ॥८७॥
लोकनाशकराः सर्वे भविष्यन्ति युगान्तरे ।
इन्द्र त्वं शत्रुभिर्युद्धे जितो बन्धनमाप्स्यसि ॥८८॥
विष्णो त्वं मानुषो भूत्वा चिरं भृत्यत्वमाप्स्यसि ।
रुद्रं त्वं स्त्रीवियोगस्य दुःखं चिरमवाप्स्यसि ॥८९॥
अग्ने त्वं सर्वभक्षोऽभूः, विप्रा यात दरिद्रताम् ।
कुबेर ते धनं भोग्यं कदापि नो भविष्यति ॥९०॥
देवा यज्ञे त्वाभीराणीसहाय्या अनपत्यकाः ।
भवतापि तथा दैत्यैः पराभूता मुहुर्मुहुः ॥९१॥
गायत्र्याः पार्श्वतश्चान्या यायाश्चात्र व्यवस्थिता ।
तासां परस्परं संगः कदापि न भविष्यति ॥९२॥
एवमुक्त्वा देवपत्नीर्विहाय त्वेकला तदा ।
सावित्री प्रययौ पूर्वपुष्करं त्वर्बुदाचले ॥९३॥
सावित्रीं पूजयेत् सम्यक् पूर्णमास्यां विशेषतः ।
सर्वान्कामानवाप्नोति दीपनैवेद्यदानतः ॥९४॥
यावन्तस्तन्तवस्तस्या दह्यन्ते दीपसंभवाः ।
मुहूर्तानि च यावन्ति घृतदीपः प्रतिष्ठति ॥९५॥
तावज्जन्मानि सा नारी भवेत् सौभाग्यशालिनी ।
पुत्रपौत्रसमेता च धनिनी शीलमण्डना ॥९६॥
न दुर्भगा न वन्ध्या च न वा काणा विरूपिणी ।
सावित्र्याः सन्निधौ नृत्यं करोति या तु सुन्दरी ॥९७॥
गीतं वा कुरुते या च वसेत् सा दिवि देवता ।
या मिष्टान्नं फलं दद्यात् सा वसेद् दिवि देवता ॥९८॥
चमत्कारपुरे लक्ष्मि ! सावित्रीतीर्थसुस्थले ।
स्नात्वा संपूज्य चाध्यायं शृणुयाद्वा पठेत्तु यः ॥९९॥
सर्वपापविनिर्मुक्तो यज्ञस्य फलभाग् भवेत् ।
एवं गतायां सावित्र्यां गायत्री समुदैरयत् ॥१००॥
मत्कृते येऽत्र संशप्ताः सावित्र्या ब्राह्मणादयः ।
तेषामहं करोम्युद्धारणं पत्युः प्रभावतः ॥१०१॥

ब्रह्मकार्येषु सर्वत्र सिद्धिर्न स्याद्विना ह्यजम् ।
ब्रह्मा सत्रेषु सर्वत्र मुख्यस्थानो भविष्यति ॥१०२॥
विष्णुर्द्वेधा भवन् कृष्णोऽर्जुनश्छायात्मकस्तथा ।
कृष्णो मर्त्योऽर्जुनसारथ्यं भृत्यत्वं करिष्यति ॥१०३॥
गोपाः कृष्णप्रसंगेन कीर्तिं यास्यन्ति देवताः ।
इन्द्र ते बन्धनं ब्रह्मा नाशयिष्यति चासुरात् ॥१०४॥
वह्ने त्वं सर्वभक्षित्वे पावकः पावनो भव ।
रुद्र त्वं तु सतीनाशे गौरीयुक्तो भविष्यसि ॥१०५॥
कुबेर त्वं देवतानां धनदो वै भविष्यसि ।
देवानां त्वनपत्यत्वं त्वैच्छिकं संभविष्यति ॥१०६॥
अन्याः स्त्रियस्तु याः शप्तास्तासां छायाः पृथक् पृथक् ।
असंयुक्ता भविष्यन्ति मूलरूपाणि नैव ह ॥१०७॥
उक्त्वैवं सा विरराम देवाः साध्विति चाऽब्रुवन् ।
गायत्र्यां पूजनं नित्यं प्रातर्जपं तथाऽर्चनम् ॥१०८॥
करिष्यन्ति द्विजा नित्यं सावित्रीं नैव नैव च ।
एवमुक्त्वा तु ते सर्वे गायत्रीपूजनं व्यधुः ॥१०९॥
स्वस्वस्थानं गताः सर्वे कोटिशो देवतादयः ।
उदुम्बरी विमानेन पितृभ्यां सह स्वर्ययौ ॥११०॥
ब्रह्मा त्वर्बुदमासाद्य नीत्वा सावित्रिकामपि ।
ययौ सत्यं च ते लक्ष्मि ! कथितं क्रतुवर्तनम् ॥१११॥
श्रवणात्पठनात्त्वस्य भुक्तिर्मुक्तिर्भवेद्ध्रुवम् ।
सम्पत्पुत्रपशुव्रातद्रव्यादि वर्धतेऽन्वहम् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽष्टषष्टिदेवीनां कुलदेवीत्वं यज्ञान्ताऽवभृथस्नानं यक्ष्मरोगागमनं गायत्रीविरोधात् सावित्रीदत्तशापाः, गायत्रीकृतनिवारणानि, सर्वेषां स्वस्वलोकगमनं, चेत्यादिनिरूपणनामा द्वादशाधिकपञ्चशततमोऽध्यायः ॥ ५१२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चमत्कारे क्षत्त्रा च ब्राह्मणीति च ।
सखीद्वयं समास्ते वै तपोवृत्तिपरे ह्युभे ॥ १ ॥
छान्दोग्य इतिनाम्नाऽऽसीत् सामवेदी पुरा द्विजः ।
पश्चिमे वयसि तस्य कन्याऽपत्यं बभूव ह ॥ २ ॥
यस्मिन्नहनि सञ्जाता तस्मिन्नेव दिने तदा ।
आनर्ताधिपतेश्चापि कन्याऽपत्यं बभूव ह ॥ ३ ॥
राजा चक्रेऽभिधानं वै रत्नवतीति शोभनम् ।
रत्नवत्या ह्यभून्मैत्री विप्रपुत्र्या शुभाऽक्षया ॥ ४ ॥
एकासनं तथा शय्या त्वेकान्नेन च भोजनम् ।
विप्रो दुहितुः समये योग्ये प्राप्तेऽप्यचिन्तयत् ॥ ५ ॥
उद्वाहं किन्तु कन्या सा सख्या वियोगकातरा ।
गत्वा नृपतेः पुत्रीं सा जगाद बहुदुःखिता ॥ ६ ॥
सखि तातो विवाहं मे प्रकरिष्यति साम्प्रतम् ।
तेन सख्यं विनश्येच्च वियोगः स्यात्तदाऽऽवयोः ॥ ७ ॥
श्रुत्वा नृपस्य दुहिता कृत्वा कण्ठे रुरोद ताम् ।
राज्ञी मृगावती श्रुत्वा तत्राऽऽजगाम सत्वरम् ॥ ८ ॥
ज्ञात्वा रोदनहेतुं च जगाद च शुभाक्षिणीम् ।
पुत्रि त्वां मम पुत्र्याश्च सखित्वे निश्चिनोम्यहम् ॥ ९ ॥
मम पुत्र्यै प्रदास्ये त्वां सखीरूपां सदा प्रियाम् ।
राज्ञी ब्राह्मणमाहूय प्राह विप्र सुता तव ॥१०॥
मम पुत्र्याश्चातिस्निग्धा प्रिया सखी हि वर्तते ।
तस्मात् कुरु वचो मह्यं कन्यां देहि च मे तव ॥११॥
यद्वा यस्य मम कन्या दीयते तन्नृपस्य वै ।
पुरोधास्तस्य यो विप्रस्तस्मै देया सुता तव ॥१२॥
एकस्थाने स्थितयोस्तु मैत्रीसौख्यं सदा भवेत् ।
छान्दोग्यः स्वसुतायाश्चाऽभिप्रायं त्ववगम्य वै ॥१३॥
ददौ राज्ञ्यै कुमारीं तां ब्रह्मचर्यपरायणाम् ।
विप्रकन्या रत्नवत्या समं वासं चकार ह ॥१४॥
नृपगृहे तु सा जाता युवत्यतीव शोभना ।
नृपः स्वां कन्यकां दातुं सुयोग्याय वराय तु ॥१५॥
विप्रैरन्वेषणं पृथ्व्यां कारयामास तस्य वै ।
दशार्णाधिपतिर्भूपः पत्यर्थं संवृतस्तया ॥१६॥
बृहद्बलः स नृपतिर्विवाहार्थं समागतः ।
विश्वावसोर्ब्राह्मणस्य राज्ञः पुरोहितस्य च ॥१७॥
परावसुरितिनाम्ना कुमारोऽभूत् तदा युवा ।
सोऽपि राज्ञा समं तत्र त्वाययौ स पुरोहितः ॥१८॥
राजा लग्नमुहूर्ते वै मण्डपे वह्निसन्निधौ ।
आगतस्तत्र कन्या च विप्रकन्यासखीयुता ॥१९॥
पितृभ्यामन्यनारीभिर्युक्ता वेदीसमीपतः ।
समानीता प्रदानाय तत्राऽऽश्चर्यमभून्महद् ॥२०॥
कन्या जातिस्मरा ब्रह्मचर्यपरा शिवांशजा ।
पार्वतीकलया जाता योगिनी जन्मतोऽभवत् ॥२१॥
कामरूपधरा साध्वी विप्रकन्यापि तादृशी ।
सर्वसिद्धिमयी त्वासीद् ब्रह्मचर्यपरायणा ॥२२॥

ताभ्यां गौरीप्रतापेन कायव्यूहः प्रसाधितः ।
सिद्धयः साधिताः सर्वाः कामदेवो जितस्तथा ॥२३॥
पार्वत्या वैष्णवो मन्त्रस्ताभ्यां दत्तो रहस्यकृत् ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥२४॥
पतिः कृष्णं विना नान्यः पातिव्रत्यं हरेः सदा ।
पालनीयं न चान्यस्येत्याह श्रीपार्वती च ते ॥२५॥
योगसिद्धीर्ददौ ताभ्यां सिद्धिभिर्दिव्यवैभवे ।
चमत्काराऽन्विते जाते मण्डपे ते च कन्यके ॥२६॥
राजकन्याऽभवत् तत्र सिंहिकारूपधारिणी ।
विकराला ललज्जिह्वा स्फारनेत्रा सगर्जना ॥२७॥
विप्रपुत्री तदा व्याघ्री क्रूरा समभवत् क्षणात् ।
त्रस्ताः सर्वजना दृष्ट्वा दुद्रुवुर्मण्डपाद् बहिः ॥२८॥
कन्यके द्वे विना सर्वे पलायिता हि मण्डपात् ।
कोलाहलो महान् जातो ग्रामे राष्ट्रे प्रजाजने ॥२९॥
बृहद्बलो विहायैते ययौ स्वनगरं तदा ।
पितृभ्यां वारिते पश्चात् पार्वतीरूपमेव ते ॥३०॥
धृतवत्यौ तदा शान्तिर्जाता प्रजाजनस्य वै ।
पूजितं दिव्यदेहं वै लोकैश्च पार्वतीद्वयम् ॥३१॥
शतचन्द्रसमे ते द्वे कन्यके शंकरान्विते ।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥३२॥
इति जपन्त्यौ वैष्णव्यौ जाते ते कन्यके ततः ।
पूर्वरूपान्विते दृष्ट्वा सन्तुष्टाश्च निरीक्षकाः ॥३३॥
वार्ता सर्वत्र लोकेषु पार्वतीद्वयमेव तत् ।
देवीद्वयं वर्तते वै प्रवृत्तैवं गृहे गृहे ॥३४॥
नित्यं लोकाः पूजयन्ति पश्यन्ति च नमन्ति च ।
आरार्त्रिकं च कुर्वन्ति चमत्कारपुरे सदा ॥३५॥
एवं काले व्यतीतेऽथ तीर्थं देवीद्वयात्मकम् ।
हाटकेश्वरजे क्षेत्रे सञ्जातं पावनं परम् ॥३६॥
रत्नवती प्रसस्मार कृष्णनारायणं मुहुः ।
मयाऽऽत्माऽस्त्यर्पितस्तेऽतः कृष्णत्वं नय मामितः ॥३७॥
विप्रकन्याऽपि तत् प्राह यत्र त्वं तत्र चाप्यहम् ।
सखीं त्यक्त्वा सखी नान्यस्थलं याति कदाचन ॥३८॥
तदा देवी स्मृता ताभ्यां दुर्गा चाप्यागता द्रुतम् ।
आज्ञयामास तपसे ते चोभे प्रस्थिते यदा ॥३९॥
तदा मृगावती राज्ञी मायामोहसमन्विता ।
अश्रुपूर्वेक्षणा दीना पुत्रीमेतदुवाच ह ॥४०॥
मा पुत्रि साहसं कार्यं तपोऽर्थं ते कथंचन ।
बाला त्वं सुकुमारांगी सदैव सुखभागिनी ॥४१॥
कथं तपःसमर्थाऽसि विधातुं त्वमनिन्दिते ।
कन्दमूलफलाहारा चीरवल्कलधारिणी ॥४२॥
तस्मान्मुख्यस्य भूपस्य कस्यचित्त्वां ददाम्यहम् ।
एषा ते ब्राह्मणी नामसखी परमसम्मता ॥४३॥
यास्यति वै त्वया साकं कौमारभावमाश्रिता ।
यस्य भूपस्य हर्म्ये त्वं प्रयास्यसि विवाहिता ॥४४॥
रत्नवती च तां प्राह मातर्नैवं त्वया पुनः ।
वाच्यं मदर्थे यदि मे प्राणान् रक्षितुमिच्छसि ॥४५॥
हठेन यदि विघ्नं मे करिष्यसि तदा तनुम् ।
त्यक्ष्यामि विषयोगेण चर्वयित्वा च जिह्विकाम् ॥४६॥
अनलं वा प्रवेक्ष्यामि प्राप्स्यामि श्रीहरिं पतिम् ।
नान्यं पतिं करिष्यामि निश्चयोऽयं मया कृतः ॥४७॥
साऽहं तपश्चरिष्यामि कौमारव्रतधारिणी ।
पतिं श्रीमत्कृष्णनारायणं प्राप्स्यामि सत्पतिम् ॥४८॥
सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति च द्विजाः ।
सकृत् सत्यः प्रजल्पन्ति त्रीण्येतानि सकृत् सकृत् ॥४९॥
मनसा चिन्त्यते कार्यं वाचा संप्रोच्यते ततः ।
कर्मणा क्रियते पश्चाद् सती तद्वत् करोम्यहम् ॥५०॥
एवं सा प्रोच्य जननीं विरराम हरेः प्रिया ।
अथ राज्ञी सखीं तस्या ब्राह्मणीं प्राह वै ततः ॥५१॥
मम पुत्री पतिं नैवोद्वाहं वाञ्छति पुत्रिके ।
त्वया कार्यो विवाहस्तु गच्छ हर्म्यं पितुस्तव ॥५२॥
यद्वाहं कारयिष्यामि विवाहं ते यथेप्सितम् ।
क्षमस्व यन्मयोक्तं तत् कदाचित् कटुकं वचः ॥५३॥
त्वयोक्तं वा कदाचित् तत् क्षान्तं सर्वं मया सुते ।
ब्राह्मणी प्राह तां राज्ञीं धर्मयुक्तं वचस्तदा ॥५४॥
अष्टवर्षा भवेद् गौरी नववर्षा च रोहिणी ।
दशवर्षा भवेत् कन्या कन्यादानं प्रशस्यते ॥५५॥
राजस्त्वत्यं ततश्चोर्ध्वं यावन्नैव तु दृश्यते ।
तावद् दानं हि कन्यायाः पूर्णपुण्यप्रदं श्रुतम् ॥५६॥
कन्यात्वं तु प्रणष्टं मे कौमार्यं चापि गच्छति ।
अतीते षोडशे वर्षे स्त्रीधर्मिणी भवामि वै ॥५७॥
रजस्वलां तु यः कन्यामुद्वाहयति तस्य वै ।
सन्तानं पापसंयुक्तं पातयत्यपरान् दश ॥५८॥
रजस्वलां तु यः कन्यां पिता यच्छति सोऽपि च ।
पातयेत् स्वकुलानां तु दशपूर्वान् दशाऽपरान् ॥५९॥
तस्मादहं करिष्यामि सख्या सार्धं तपः परम् ।
पित्रा मात्रा त्वया चापि न मे कार्यं कथंचन ॥६०॥

सम्प्राप्तः श्रीकृष्णनारायणः पतिः परः प्रभुः।
एवमुक्त्वा कन्यके द्वे योगज्ञानसमन्विते ॥६१॥
नत्वा त्वाज्ञां गृहीत्वा च पित्रोर्नत्वा गणाधिपम्।
ययतुर्व्योममार्गेण भर्तृयज्ञं मुनिं वने ॥६२॥
आश्रमं सात्त्विकं चावलोकयामासतुः शुभम्।
ऋषेस्तपःप्रभावेण परस्परविरोधिनाम् ॥६३॥
मेलनं सर्वदा त्वास्ते वैरं यत्र न दृश्यते।
भर्तृयज्ञं वैष्णवं संगत्वा नत्वा च तस्थतुः ॥६४॥
प्रोचतुर्विनयोपेते कृताञ्जलिपुटे ह्युभे।
आवां तपोऽर्थे त्वायाते तद् ब्रूहि तपसो विधिम् ॥६५॥
भर्तृयज्ञो महायोगी जगाद तपसो विधिम्।
येन सम्प्राप्यते मोक्षः किं पुनस्त्रिदशालयः ॥६६॥
चान्द्रायणानि कृच्छ्राणि तथा सान्तपनानि च।
तपोद्वाराणि सर्वाणि कार्तिकेयव्रतानि च ॥६७॥
रागद्वेषविहीनत्वं सार्वभौममहिंसनम्।
सत्यं च ब्रह्मचर्यं चाऽस्तेयं कृष्णपरिग्रहम् ॥६८॥
सन्तोषं चात्मशुद्धिं च प्राणनिग्रहणं तथा।
कृष्णनारायणाध्यायं कृष्णनारायणेऽर्पणम् ॥६९॥
सुखितेषु तथा मैत्रीं दुःखितेषु दयां शुभाम्।
पुण्यवत्सु मुदितां चाऽपुण्यवत्सु ह्युपेक्षणम् ॥७०॥
सतां सेवां सर्वरीत्या देवसेवनमित्यपि।
प्रकुर्याच्छ्रीकृष्णनारायणाराधनमन्वहम् ॥७१॥
व्यवस्थासु त्रिदेहैश्च त्रिगुणानां तदर्पणम्।
यात्रामात्रं तनौ स्नेहः श्रीकृष्णे प्रेम शाश्वतम् ॥७२॥
कार्यं च कल्पनं ध्यानं स्वप्नं भानं तदर्पणम्।
सत्त्वेन रजसा यद्वा तमसा च तदर्पणम् ॥७३॥
दैहिकं मानसं काम्यमकाम्यं वा तदर्पणम्।
उपादिदेश जपनं स्मरणं कीर्तनं कृतिम् ॥७४॥
प्रेक्षणं भाषणं स्पृश्यं गम्यं ग्राह्यं विसर्जनम्।
सर्वं कृष्णात्मकं कार्यं तपस्त्वेतत्परं मतम् ॥७५॥
येन वै श्रीकृष्णनारायणः प्राप्येत कर्मणा।
प्रवृत्तं वा निवृत्तं वा कर्म तत् तप उत्तमम् ॥७६॥
अन्यत् सर्वं हि लभ्येत कृष्णः प्राप्येत नैव चेत्।
कृष्णं विना निरयः स लब्धस्तन्न तपो मतम् ॥७७॥
कृष्ण कृष्णेति कृष्णेति ग्राह्ये धार्ये तथाऽऽगनि।
यदा सञ्जायते त्वैक्यं तदा मोक्षमवाप्नुयात् ॥७८॥
कृष्णदास्यं कृष्णभक्तिः परमं तप उच्यते।
अनेकजन्मतपसा संप्राप्य जन्म मानवम् ॥७९॥
कृष्णभक्तिर्यदि भवेत् सफलं जन्म मानवम्।
सफलं जीवनं तस्य कुर्वतः कर्मणः फलम् ॥८०॥
पितृणां च सहस्राणि स्वस्य मातुश्च निश्चितम्।
मातामहानां पुंसां च शतानां सोदरस्य च ॥८१॥
बान्धवस्यापि पत्न्याश्च गुरूणां शिष्यभृत्ययोः।
तत्कर्म शोभनं पुत्र्यौ यच्च कृष्णे समर्पणम् ॥८२॥
तत्तपः शोभनं कर्म कृष्णसन्तोषणं यतः।
तद्व्रतं तत्तपः सत्यं तद्भक्तिः पूजनं तथा ॥८३॥
तदुद्देश्यमनशनं यद् भवेद् दास्यदं हरेः।
समस्तपृथिवीदानं प्रादक्षिण्यं भुवस्तथा ॥८४॥
समस्ततीर्थस्नानं च समस्तं च व्रतं तपः।
समस्तयज्ञकरणं सर्वदानफलं तथा ॥८५॥
समस्तवेदवेदांगपठनं पाठनं तथा।
भीतस्य रक्षणं चैव ज्ञानप्रदानमुत्तमम् ॥८६॥
अतिथीनां पूजनं च शरणागतरक्षणम्।
सर्वदेवार्चनं चापि वन्दनं जपनं मनोः ॥८७॥
भोजनं विप्रदेवानां पुरश्चरणपूर्वकम्।
गुरुशुश्रूषणं चापि पित्रोर्भक्तिश्च पोषणम् ॥८८॥
सर्वं श्रीकृष्णदासस्य कलां नार्हन्ति षोडशीम्।
तस्मात् पुत्र्यौ प्रयत्नेन भजतं कृष्णमीश्वरम् ॥८९॥
शाश्वतं सत्पतिं दिव्यं परमात्मानमेव हि।
नित्यं सत्यं परब्रह्म कृष्णनारायणं पतिम् ॥९०॥
परिपूर्णतमं शुद्धं निर्लिप्तं साक्षिणं हरिम्।
भक्तिदं दास्यदं स्वस्य निजसम्पत्पदप्रदम् ॥९१॥
भजतं परमानन्दं स्वामिनं कान्तमान्तरम्।
किंवा जलं स्थलं किम्वा नक्तं किम्वा दिनं तथा ॥९२॥
व्रतं किम्वा तपः किम्वा किं भोज्यं पेयमेव किम्।
देहः किम्वा मनः किम्वा विस्मृत्य भजतं हरिम् ॥९३॥
श्रीकृष्णनारायण कृष्णकृष्ण श्रीकृष्णनारायण कान्तकृष्ण।
श्रीकृष्णनारायण चान्तरात्मन् प्रदेहि दास्यं चरणे प्रियेश ॥९४॥
प्रेम्णा नु भक्त्या स्तवनेन पूजया
समर्पणेनापि हृदि स्थितं सुते।
श्रीकृष्णनारायणमान्तरं पतिं
सुरक्षकं संभजतं सुखप्रदम् ॥९५॥
रमापद्मार्चितं लक्ष्मीसेवितं प्रभयाऽर्चितम्।
माणिकीचुम्बितं कृष्णं चरणं भजतं सुते ॥९६॥
सततं शंभुना गीतं पार्वत्या चिन्तितं हृदि।
ध्यातं सनकसद्भिश्च भजतं तत्पदं हरेः ॥९७॥

श्रीश्रीकृष्णपादपद्मं स्वप्ने जपति यः सुते ।
शतजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥९८॥
तद्व्रतं तत्तपः सत्यं तत्पुण्यं तच्च पूजनम् ।
सफलं कृष्णसम्बन्धि स्वजन्मखण्डनं यतः ॥९९॥
श्रीकृष्णं तं परित्यज्य किं भवेत् तपसा सुते ।
तपसां फलमाप्नोति श्रीकृष्णस्मरणेन वै ॥१००॥
यतो भक्तिर्न च भवेच्छ्रीकृष्णे परमात्मनि ।
स गुरुः परमो वैरी करोति जन्म निष्फलम् ॥१०१॥
ते तथेति परं ज्ञानं लब्ध्वा भक्त्यात्मकं शुभम् ।
नत्वा गत्वा सरस्तीरं चान्द्रायणादि चक्रतुः ॥१०२॥
षष्ठकालादनं शरत्त्रयं जगाम वै तयोः ।
हेमन्ते जलवासिन्यौ ग्रीष्मे पञ्चाग्निसाधिके ॥१०३॥
निराश्रये च वर्षायां बभूवतुर्हरेः प्रिये ।
ध्यायमाने दिवानक्तं जपन्त्यौ श्रीहरिं पतिम् ॥१०४॥
ततो वर्षशतं सार्धं निराहारे बभूवतुः ।
तावत्कालं शीर्णपर्णाशिन्यौ चापि बभूवतुः ॥१०५॥
ततश्चापि जलाहारे यावद्वर्षशतानि षट् ।
वायुभक्षे सहस्रं च वर्षाणां ते बभूवतुः ॥१०६॥
तत्र नित्यं च तपसि स्थिते सख्यावुभे ह्यपि ।
अथ तुष्टः स्वयं कृष्णनारायणो जगत्पतिः ॥१०७॥
युवा सुरूपः श्यामश्च गरुडेन समाययौ ।
तेजोव्याप्तप्रतिभः स तापस्यौ समुवाच वै ॥१०८॥
नेत्रे चोन्मील्य वीक्षेथां वरं दातुं समागतः ।
श्रुत्वेति ते बहिर्दृष्टिं कृत्वा लोकयतः प्रभुम् ॥१०९॥
सत्पतिं श्रीकृष्णनारायणं कान्तं मनोहरम् ।
रूपानुरूपावयवं योग्यं सेव्यपदाम्बुजम् ॥११०॥
तपस्त्यक्त्वा पेततुस्तत्पादयोरूचतुः पते ।
गृहाण किंकरीद्वन्द्वं देहि दास्यं पतिर्भव ॥१११॥
कृष्णं कण्ठे ववल्गाते साश्रुनेत्रेऽतिकर्षिते ।
कृष्णश्चुचुम्ब पस्पर्श करेणाऽऽश्राय भावनाम् ॥११२॥
दिव्यरूपे रमातुल्ये विधाय च नियाय च ।
गरुडे ते निजांके द्वे सक्थ्नोरुपरि स्थापिते ॥११३॥
भुजाभ्यां पार्श्वयोर्नीत्वा भर्तृयज्ञस्थलं ययौ ।
तयोर्गुरुं वैष्णवं तं नीत्वा गरुडपृष्ठके ॥११४॥
चत्वारस्ते गरुडेन ययुर्गोलोकधाम वै ।
श्रीकृष्णस्याऽऽगमं ज्ञात्वा ऋषयस्तत्स्थलं ययुः ॥११५॥
व्योम्नि यान्तं नमश्चक्रुः पूजयामासुरीश्वरम् ।
नागनद्याह्रदः सोऽपि रत्नसरः सुनामतः ॥११६॥
तदानीं सुप्रसिद्धं वै जातं स्नानात्प्रमोक्षदम् ।
कृष्णदास्यौ तु ते जाते शाश्वतानन्दसेविके ॥११७॥
स्वर्गे देवीभिरागत्य प्रार्थिते स्थातुमेव यत् ।
देवीनां श्रेयसे स्वर्गे स्थातव्यं चेति वै तदा ॥११८॥
श्रीकृष्णेन कृते ते द्वे तारके स्थापितेऽपि च ।
छायारूपे मुक्तिदे वै पठनाच्छ्रवणादपि ॥११९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चमत्कारपुरीयराजपुत्रीविप्रपुत्र्योर्विवाहकाले सिंहव्याघ्ररूपधर्त्रीत्वं, ततो भर्तृयज्ञाश्रमवासः, ततो दुर्वहं तपः, ततः भर्तृयज्ञेन सह तयोः श्रीकृष्णनारायणप्राप्तिर्गोलोकगमनं चेतिनिरूपणनामा त्रयोदशाधिकपञ्चशततमोऽध्यायः ॥५१३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! मर्त्यलोके सर्वपातकनाशनम् ।
क्षेत्रत्रयं तथाऽरण्यत्रयं पुरीत्रयं तथा ॥ १ ॥
वनत्रयं तथा ग्रामत्रयं तीर्थत्रयं परम् ।
शैलत्रयं तथा नदीत्रयं सर्वफलप्रदम् ॥ २ ॥
कुरुक्षेत्र हाटकेशक्षेत्रं प्रभासक्षेत्रकम् ।
यथोक्तविधिना कृत्वा जनः पापात् प्रमुच्यते ॥ ३ ॥
प्रथमं पुष्करारण्यं नैमिषारण्यमित्यपि ।
धर्मारण्यं तृतीयं च सर्वेष्टफलदायकम् ॥ ४ ॥
वाराणसीपुरी त्वेका द्वितीया द्वारकापुरी ।
तृतीयाऽवन्तिकापूश्च यथेष्टफलदायिनी ॥ ५ ॥
वृन्दावनं द्वैतवनं तथा च खाण्डवं वनम् ।
स्नानाद्वासात् स्वर्गमोक्षप्रदं पापविनाशकम् ॥ ६ ॥
कालग्रामः शालग्रामो नन्दिग्रामस्तृतीयकः ।
इन्द्रियग्रामतृष्णानां ध्वंसको मोक्षदस्तथा ॥ ७ ॥
अग्नीतीर्थं शुक्रतीर्थं पितृतीर्थं तृतीयकम् ।
तत्र स्नानाद् भुक्तिमुक्ती लभते मानवो ध्रुवम् ॥ ८ ॥
श्रीपर्वतश्चाऽर्बुदाद्रिः रैवताचल इत्यपि ।
यात्राकर्ता स्वर्गभोक्ता पश्चान्मुक्तिप्रगो भवेत् ॥ ९ ॥
गंगानदी नर्मदाख्यानदी सरस्वतीनदी ।
स्नानाद् भुक्तिस्तथा मुक्तिस्तथेष्टं सर्वदा ददेत् ॥१०॥
ज्ञानवापी च कुंकुमवापी रोहणवापिका ।
जलपानाद् भवेन्मुक्तिर्वापीत्रयं हि पावनम् ॥११॥
नारायणसर इन्द्रसरो मानसकं सरः ।
सरस्त्रयं भुक्तिमुक्तिप्रदं स्नानाद्भवत्यपि ॥१२॥

पार्वती च प्रभा लक्ष्मीर्माणिकी च जया रमा।
राधा पञ्चाऽष्टनामानि तारयेद् भवसागरात् ॥१३॥
वज्रापथश्चोत्तरपथो दक्षिणापथ इत्यमी।
मुक्तिदास्त्रय एवाऽत्र यात्रया नात्र संशयः ॥१४॥
ब्रह्महत्यादिकं पापं जात्यन्तरादिभोजनम्।
चाण्डालगृहवासित्वं सुरामांसाशनादिकम् ॥१५॥
नागनद्यां कृतस्नानात् सर्वं शुद्धयति सर्वथा।
नागलीलानामतो वै श्रीकृष्णस्य तु दासिका ॥१६॥
राधिकाकबरीग्रन्थिं नर्मणा कृष्णसन्निधौ।
निर्बन्धनां विकीर्णां च चकार स्वकरेण वै ॥१७॥
पुनः केशान् वलयित्वा धम्मिलं राधिकाऽकरोत्।
नागलीला पुनर्ग्रन्थिं विकीर्णां चाऽकरोद् धिया ॥१८॥
गोलोके च मुहुर्ग्रन्थिर्मुहुर्वियोजनं तयोः।
नर्मणाऽन्योन्यसाहचर्याज्जातं तेन तु राधिका ॥१९॥
क्रुद्धा प्रोवाच गच्छ त्वं नागलीले भुवस्तलम्।
आभीरस्य गृहे याहि त्वाभीरेण धृता भव ॥२०॥
इत्युक्त्वा सा सखी राधां तुष्टाव शापमोचने।
राधा प्राह यदा त्वाभीरेण धृता भविष्यसि ॥२१॥
तदा जलस्वरूपेण पावनी विचरिष्यसि।
अग्राह्या त्वं विना कृष्णं भविष्यसि न संशयः ॥२२॥
कृष्णनारायणः स्वामी यदा तत्राऽऽगमिष्यति।
तदा त्वं कन्यका भूत्वा गोलोकं त्वागमिष्यसि ॥२३॥
तावन्मुक्तिप्रदा पापक्षालिनी शुद्धिदा सदा।
श्वपचादिजातिभ्रष्टमानवानां च पावनी ॥२४॥
स्नानमात्रेण तु शुद्धिप्रदा त्वं वै भविष्यसि।
इत्युक्ता राधया नत्वा ययौ सा भूतलं तदा ॥२५॥
आनर्तीयाऽऽभीरवर्यगृहे जाता हि कन्यका।
श्यामसुरः पिता तस्या नागलीलेतिनामतः ॥२६॥
जातिस्मरां त्वाजुहाव माता च राणिका तथा।
मुमोद कन्यकां लब्ध्वोज्ज्वलां दिव्यस्वरूपिणीम् ॥२७॥
सरस्तीरे गवां शकृद्गृह्णाना तु दिवा सदा।
गोमण्डले भ्रमत्येव तां दृष्ट्वाऽऽभीरबालकः ॥२८॥
युवा तां धर्षयामास युवतीं रूपशालिनीम्।
सा स्मृत्वा राधिकाशापं जलरूपा बभूव ह ॥२९॥
नागनदी तु सा जाता कृष्णस्यैव प्रिया सखी।
यस्यां स्नानेन चाण्डालगृहिणी ब्राह्मणी भवेत् ॥३०॥
शृणु लक्ष्मि वर्धमानपुरे त्वन्त्यजजातिजः।
चण्डालः कुंभको नाम तस्याऽभूत्त्वात्मजः सुतः ॥३१॥
घूककर्ण इतिख्यातः सुरूपस्तीर्थयात्रया।
चमत्कारपुरं प्राप्तो द्विजरूपं समाश्रितः ॥३२॥
स स्नाति सर्वतीर्थेषु भिक्षान्नकृतभोजनः।
द्विजवद्वर्तते नित्यं सहवासाद्द्विजक्रियः ॥३३॥
चमत्कारपुरे तत्र सुभद्रब्राह्मणस्य वै।
सन्ताने कन्यका त्वेका द्विगुणैश्च रदैर्युता ॥३४॥
आसीत् त्रिस्तनयुक्ता च महोदरी भयंकरा।
यस्याः पतिर्भवेद् यः षण्मासे निधनं व्रजेत् ॥३५॥
नाऽतो जग्राह तां कश्चिदष्टादशाऽधिवत्सराम्।
तावत् तस्या गृहे भिक्षां कर्तुं सोऽन्त्यजजातिकः ॥३६॥
घूककर्णः समायातस्तं दृष्ट्वा सा मुमोह च।
तस्याः पिता सुरूपं च द्विजवेषं विलोक्य च ॥३७॥
पप्रच्छ गोत्रजात्यादि कुलं नामादिकं ततः।
घूककर्णो द्विजं प्राह स्थानं मे गोडदेशके ॥३८॥
ग्रामे भोजकटे मेऽस्ति पिता माधवभूसुरः।
वसिष्ठगोत्री तस्याऽहं चन्द्रप्रभाऽभिधः सुतः ॥३९॥
अष्टमे वत्सरे मे तु पिता वै निधनं गतः।
वाराणस्यामधीत्यैव किञ्चिन्मात्रं शुभक्रियम् ॥४०॥
तीर्थानि भ्रममाणोऽत्राऽऽयातो यास्यामि गोमतीम्।
प्रभासं च ततः शुक्लं तीर्थं ततः पुनर्गृहम् ॥४१॥
इति श्रुत्वा तथा पुत्र्या वृत्तिं ज्ञात्वा सुतापिता।
प्राह चेन्मे सुतां त्वत्र गृह्णासि ते ददाम्यहम् ॥४२॥
तथेत्युक्त्वा स जग्राह चाण्डालो विधिना ततः।
विवाहोत्तरकाले स विलासानकरोद् बहून् ॥४३॥
खाद्यैः पानैः सुवस्त्रैश्च द्विजयोग्यैः समुत्सवैः।
परं स व्रजति प्रायो येन मार्गेण केनचित् ॥४४॥
सारमेया भषन्त्येनं पृष्ठतोऽनुव्रजन्ति च।
विप्रयोगे वेदवाक्यं यदि चोच्चरति क्वचित् ॥४५॥
रक्तं पतति वक्त्राच्च तत्क्षणात् तस्य दुर्मतेः।
स्वप्ने च जल्पनां चक्रे मलनिष्कासनक्रियाम् ॥४६॥
एवं चिह्नैरयं किञ्चिच्चाण्डालेति विशंकितः।
जनैः शंकाविनाशाय दैवी शुद्धिरपेक्षिता ॥४७॥
तप्तायसं करे धृत्वा शुद्धिशंका निवर्तते।
तथा कार्यं त्वया प्रातर्न चेद् दग्धोऽसि वै द्विजः ॥४८॥
दग्धश्चेदन्यजातीय इति वै निश्चयो भवेत्।
अथ रात्रौ निजां भार्यां प्रोवाचाऽहं न वै द्विजः ॥४९॥
अस्मि त्वन्त्यजजातीयो ज्ञातश्च शंकितो जनैः।
देशान्तरं गमिष्यामि त्वमागच्छ मया सह ॥५०॥

पत्नी प्राह मम भाग्यं दुष्टं वह्न्यर्थमेव ह।
पापसन्दूषितं सर्वं कुटुम्बं मम वर्ष्म च ॥५१॥
गच्छ रात्रौ बहिर्नो चेत् संप्राप्स्यसि महापदम्।
इत्युक्तः स ययौ देशान्तरं रात्रौ भयात् खलु ॥५२॥
प्रभाते दुहिता बाष्पनेत्रा प्रोवाच मातरम्।
मातः पूर्वं मम पापं दत्ताऽहमन्त्यजस्य यत् ॥५३॥
स प्रयातो मध्यरात्रौ समावेद्य निजं कुलम्।
ममाऽग्निस्नानमेवाऽस्ति शुद्धिर्नान्या भुवस्तले ॥५४॥
पिता ज्ञात्वा शुशोचाति त्वन्येऽपि शोकमाव्रजन्।
विप्राः सर्वे मिलित्वा च प्रायश्चित्तं प्रशोधकम् ॥५५॥
कन्यायाश्च तदा प्राहुर्वह्निप्रवेशनं ततः।
अन्येषां तस्य संसर्गे गतानां तु व्रतानि वै ॥५६॥
अथ काष्ठानि चादाय वह्निं दत्वा तु कन्यका।
नत्वा पितॄन् सुरान् स्मृत्वा समारोहति यावता ॥५७॥
'ओं नमः श्रीकृष्णनारायणाय पतये नमः'।
जपमेवं प्रकुर्वाणा ददौ पादं हुताशने ॥५८॥
तावद्वह्निः शीतलश्च नाऽदह्यत् तां दयावशः।
नाऽस्या दोषोऽस्ति तस्मात् सा राजस्वल्येन शुद्ध्यति ॥५९॥
अथ तावत् समायातः कृष्णनारायणः प्रभुः।
साधुवेषो वैष्णवश्च धर्मशास्त्रादिपण्डितः ॥६०॥
त्रिकालज्ञः स्वयं लक्ष्मीपतिः श्रीपुरुषोत्तमः।
प्राह किं जायते चेयं कथं दह्यति चानले ॥६१॥
लोका निवेदयामासुर्वृत्तान्तं संगजं ततः।
प्राह तान् श्रीकृष्णनारायणः स्वामी दयापरः ॥६२॥
मया पूर्वं श्रुतं स्वर्गे चमत्कारपुरे नदी।
नागलीलाऽभिधा कृष्णपत्नी गोलोकधामतः ॥६३॥
पावनार्थं श्वपचादिसंगमाद्यघकारिणाम्।
वर्तते तज्जले स्नात्वा शुद्ध्यन्ति श्वपचादयः ॥६४॥
तस्माद् गच्छत तत्रैव स्नानं कुरुत सर्वथा।
वह्निः श्रुत्वा तथेत्याह ततः सर्वे ययुर्नदीम् ॥६५॥
कन्यैका श्रीकृष्णनारायणं दृष्ट्वाऽभिसंययौ।
नत्वा त्वं स्वामिनं प्राह गृहीत्वा तत्करं मुदा ॥६६॥
तीर्थं त्वन्त्यजपापघ्नं नातिदूरेऽस्ति वै ह्रदः।
समायात च कुरुत स्नानं तत्र द्विजेश्वराः ॥६७॥
तयोक्तास्ते तथा साकं गत्वा सस्नुश्च साम्बराः।
विप्रकन्या यदा स्नाता तदा तस्याः शरीरतः ॥६८॥
श्वपची कृष्णवर्णा तु निर्गता स्नानमात्रतः।
अन्येषामपि देहेभ्यः काका घूकाः पीपिलिकाः ॥६९॥
कृष्णवर्णा निर्गताश्च ययुर्देशं तु पश्चिमम्।
सहस्रयोजनात्पारं अब्धिक्ते भूतले तदा ॥७०॥
एते विप्रा पावनाश्च ब्राह्मणी शुद्धतां गता।
एवं सर्वे समायाता नगरं स्वस्वकाश्रमम् ॥७१॥
कन्यका ब्राह्मणी पश्चाद् ब्रह्मचर्यपरायणा।
ह्यवर्तत सती साध्वी कृष्णस्वामिपतिव्रता ॥७२॥
नागवतीं सदा याति स्नानार्थं तु तदा नदी।
नित्यं वै कन्यका भूत्वा ब्राह्मण्या सह मन्दिरे ॥७३॥
कृष्णनारायणस्वामिदर्शनार्थं प्रयाति च।
प्राप्ते तु ब्राह्मणपुत्र्या आयुषस्तु क्षये हरिः ॥७४॥
नदीं च तां ब्राह्मणीं च दिव्यरूपां विधाय च।
गोलोकं श्रीकृष्णनारायणो निनाय ते ह्युभे ॥७५॥
दिव्यरत्नसुनद्धेन कोटिसूर्यप्रभावता।
विमानेन पतिं कृष्णं प्राप्य ते ययतुर्मुदा ॥७६॥
गोलोकं धाम नित्यं यद् राधारमादिशोभितम्।
अथ ब्रह्मापि कुलटाशापादत्र सुतीर्थके ॥७७॥
पुरा वै कुलटाशापात् प्रमुक्तः संबभूव ह।
इत्येवं कथितं लक्ष्मि! पावनं तीर्थमुत्तमम् ॥७८॥
यत्र स्नानेन वै शुद्धिः सर्वा निर्वाहमेति हि।
पठनाच्छ्रवणाचास्य सदा शुद्ध्यति मानवः ॥७९॥
मन्त्रं प्राप्य गुरुं नत्वा नागवत्यां समाहितः।
स्नायाद् यः स भवेच्छुद्धः कृष्णवन्नात्र संशयः ॥८०॥

इतिश्रीलक्ष्मीनाराणीयसंहितायां प्रथमे कृतयुगसन्ताने गोलोके राधिकायाः शापाद् नागलीलासख्या नागवतीनदीत्वं, यस्यां स्नानेन घूककर्णचाण्डालेन विवाहिताया ब्राह्मणकन्यया ब्राह्मणानां च शुद्धिर्जाता, ततो ब्राह्मणकन्या नागवतीनदी च दिव्यकन्यके भूत्वा श्रीकृष्णनारायणेन सह गोलोकं ययतुरित्यादिनिरूपणनामा चतुर्दशाधिकपञ्चशततमोऽध्यायः ॥५१४॥

श्रीलक्ष्मीरुवाच—

कदा ब्रह्मा कुलटया शप्तः किमर्थमेव च।
नागनद्यां ततः स्नात्वा येन शुद्धो हि विश्वसृट् ॥ १ ॥
नारायणहरे कृष्ण मे वदात्र कथां तु ताम्।
कृष्णनारायणः श्रुत्वा लक्ष्म्यै संप्राह तां कथाम् ॥ २ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! पुरा ब्रह्मा जनयामास कन्यकाम्।
मोहिनीं मानसीं तां चाप्सरसं कृतवान् स्वयम् ॥ ३ ॥

सर्वसाधारणी सा तु देवपत्नी ततोऽभवत् ।
अथ सा त्वेकदा दृष्ट्वा ब्रह्माणं संमुमोह वै ॥ ४ ॥
विस्मृत्य पितरं चेति कामसंकल्पमाचरत् ।
मन्वन्तरे रैवतस्य सुचन्द्रो वैष्णवो नृपः ॥ ५ ॥
तपसे मलयद्रोण्यां ययौ वर्षसहस्रकम् ।
वल्मीकाच्छादितं देहं दृष्ट्वा धाता समाययौ ॥ ६ ॥
वरं वृणु प्रतुष्टोऽस्मीत्युवाच तं जगत्पिता ।
वव्रे स श्रीकृष्णनारायणभक्तिं च दासताम् ॥ ७ ॥
ब्रह्मा कमण्डलोर्वारि चिक्षेप च सिषेच वै ।
राजा सम्यच्छरीरः सन् ननाम तु पुनः पुनः ॥ ८ ॥
तथास्त्विति वरं ब्रह्मा ददौ तदा रथोत्तमम् ।
गोलोकादागतं दिव्यं समारुरोह भूपतिः ॥ ९ ॥
पार्षदः स दिव्यरूपो भूत्वा कृष्णपदं ययौ ।
ब्रह्मा यान्तं सत्यलोकं ददर्श मोहिनी पथि ॥१०॥
तदा मुमोह सद्यः सा निर्जने रन्तुमेव च ।
विलोक्य वक्रनयना जुगोप सस्मितं मुखम् ॥११॥
पुलकाञ्चितसर्वांगी कामवेगेन पीडिता ।
निषसाद शनैर्भूमौ पुरतो ब्रह्मणः पदे ॥१२॥
ब्रह्मा निरीक्ष्य तां पुत्रीं विकारं नहि चाप सः ।
ब्रह्मलोकं ययौ तां च समाश्वास्य पिता यथा ॥१३॥
सकामा सा तदा जाता निराशा हतचेतना ।
दिवानिशं सचिन्ता सा स्वप्ने ध्याने चतुर्मुखम् ॥१४॥
आसीना संस्थिता यद्वा शयनं कुर्वती क्षणम् ।
तप्तपात्रे यथा सस्यं भ्रमत्येव तथा पथि ॥१५॥
कामं सहायमासाद्य तेन सार्धं हि मोहिनी ।
ब्रह्मलोकं ययौ चाजं निर्जने सा ददर्श तम् ॥१६॥
तमेव मोहितं कर्तुं समारेभे पुरः स्थिता ।
क्षणं ननर्त सुचिरं सुगानेन क्षणं जगौ ॥१७॥
विधाता सुस्वरं श्रुत्वा मुमोह साश्रुलोचनः ।
दृष्ट्वा मुग्धं कलाः सर्वा दर्शयामास नर्तने ॥१८॥
दत्वा तथापि वै पारितोषिकं विरतो ययौ ।
हतोद्यमा तु सा प्राह कामं देव नमोऽस्तु ते ॥१९॥
निक्षिप त्वं स्वकान् बाणान् कामदेव विधौ ततः ।
अन्तरीक्षे स्थितः कामो महास्त्रं प्रैरयन्मुदा ॥२०॥
बभूव चञ्चलो ब्रह्मा चक्रे निरीक्षणं मुहुः ।
मोहिन्याश्च समागत्य प्राह विचार्य मोहिनीम् ॥२१॥
चञ्चलाऽसि मोहिनि त्वं नाऽहं योग्योऽस्य कर्मणः ।
गच्छ पुत्रि ममाऽऽज्ञाया त्वन्यत्र विहरस्व यत् ॥२२॥
विश्वसेत् कुलटां यश्च विपत् तस्य पदे पदे ।
अये वत्से गच्छ दूरं विहाय पितरं हि माम् ॥२३॥
तव योग्यं परं देवं युवानं पश्य मोहिनी ।
मोहिनी प्राह धातारं मे मनो न स्थिरं यतः ॥२४॥
भूतं त्वयि विशेषेण चञ्चलं वीक्षिते मया ।
अहो गन्तुमशक्ताऽहं त्वया यद्यपि भर्त्सिता ॥२५॥
कृपां कुरु कृपासिन्धो न मां हन्तुं त्वमर्हसि ।
सन्तो गर्वं न कुर्वन्ति परोपकृतिशालिनः ॥२६॥
काचित् सती पतिं प्राप्य पातिव्रत्यपरायणा ।
काचित्तु कर्मणा भुंक्ते नरं कृत्वाऽङ्गविक्रयम् ॥२७॥
मम धर्मस्तथा ब्रह्मन्मनोऽभिलषितं नरम् ।
भुक्त्वा तृप्तिर्भवेत् तद्वत् कर्तव्यं नरसेवनम् ॥२८॥
तेन तृप्तिः कर्मणां च खण्डनं धर्म एव नः ।
तत् त्वां कर्माऽन्यथाकर्तुं समर्थं चाहमागता ॥२९॥
महतां सेवया शश्वद् यशसा भान्ति योषितः ।
गृही तपस्वी कामी वा त्यजेत् स्त्रियमुपस्थिताम् ॥३०॥
निःश्वासहतपुण्यः सः शापपात्रं भवेदिह ।
नष्टश्रीर्भ्रष्टरूपश्च भ्रष्टबुद्धिर्भवेत्तथा ॥३१॥
सद्यः स क्लीबतां याति ब्रह्मन् शापेन योषितः ।
विधुरश्च सदा शापबलेन जायतेऽसुखः ॥३२॥
उत्तिष्ठ तज्जगन्नाथ पारं कुरु स्मरार्णवे ।
सततं त्वन्मनस्कां मां दासीं क्रीणीहि सादरम् ॥३३॥
इत्युक्त्वा वेधसो वस्त्रं विचकर्ष हि मोहिनी ।
ब्रह्मा धैर्यं समालम्ब्य सारमाह सुतां प्रति ॥३४॥
त्यज मामम्बिके वृद्धं निष्कामं पश्य चापरम् ।
त्वया सह निबन्धो मे कामलेखो न विद्यते ॥३५॥
पूर्वकर्मकृता रेखा पतिं ददाति योषिते ।
मुञ्च वस्त्रं मम पुत्रि धैर्यमालम्बय क्षणम् ॥३६॥
एतस्मिन्नन्तरे विप्ररूपा आजग्मुरीश्वराः ।
अत्रिः पुलस्त्यः पुलहो वसिष्ठः क्रतुरंगिराः ॥३७॥
भृगुर्मरीचिः कपिलो वोढुः पञ्चशिखो रुचिः ।
आसुरिश्च प्रचेताश्च पत्नीव्रतो बृहस्पतिः ॥३८॥
शुक्र उतथ्यः करकः कण्वो गौतमकश्यपौ ।
सनकश्च सनन्दश्च कर्दमश्च सनातनः ॥३९॥
सनत्कुमारः पिप्पलः शंकुः शुक्रः पराशरः ।
शातातपो लोमशश्च मार्कण्डेयो विभाण्डकः ॥४०॥
मृकण्डुश्च्यवनो जरत्कारुरास्तिककौशिकौ ।
भारद्वाजः ऋष्यशृंगो भरद्वाजश्च नारदः ॥४१॥

वामदेवश्च दुर्वासाः स्वयंप्रकाश इत्यमी ।
तत्याज मोहिनी दृष्ट्वा व्रीडया वेधसं तदा ॥४२॥
ब्रह्मा चासनमारूढो मोहिनी पार्श्वतः स्थिता ।
प्रणेमुर्मुनयस्तं च ब्रह्मा ददौ शुभाशिषम् ॥४३॥
पप्रच्छुर्मुनयो देवं कथमेषा तवाऽन्तिके ।
ब्रह्मा प्राह चिरं नृत्यं गीतं चापूर्वमित्यपि ॥४४॥
दर्शयितुं त्वागतेयं कृत्वा श्रान्ता स्थिता यतः ।
मुनयो जहसुस्तत्र कुलटां प्रति सर्वथा ॥४५॥
सद्यश्चुकोप तूत्थाय साऽऽह विश्वसृजं तदा ।
एते त्वनिग्रहाः सर्वे वृद्धा हसन्ति मां विधे ॥४६॥
तेऽपि हास्यं प्रयास्यन्ति लोकानां स्वस्वकर्मभिः ।
त्वं च मां भजमानां वै यतो गृह्णासि नैव च ॥४७॥
नैतान् वारयसि ब्रह्मन् हास्यपात्रं ततो भव ।
अपूज्यो भव सर्वत्र नारीणां मानवर्जितः ॥४८॥
तव पत्नी तव कार्ये भर्त्सनां वै करिष्यति ।
कृत्वाऽजं पूजनहीनं ययौ स्वर्गे तु मोहिनी ॥४९॥
क्षणं ब्रह्मा च मुनयः शुशुचुः शापमोक्षणम् ।
ब्रह्मा विचार्य च ततश्चमत्कारपुरान्तिके ॥५०॥
नागवत्यां समायातः शुद्ध्यर्थं शापहानये ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥५१॥
जपन् मन्त्रं कृष्णदत्तं सस्नौ तीर्थेऽघनाशने ।
जहौ देहं तु तं ब्रह्मा शप्तं नागनदीतटे ॥५२॥
तस्मात् सहस्रशस्तत्र चोत्पन्ना वृन्दलास्ततः ।
नगरं तत्र संश्रित्य स्थिता ब्रह्मा दिवं ययौ ॥५३॥
दिव्यरूपधरश्चैवं शापः पूर्वतनुस्थितः ।
वृन्दलास्ते सदा लोके ह्यपूज्यास्त्वभवँस्ततः ॥५४॥
नारीभिर्भर्त्सिताः शश्वन्नारीरूपविडम्बकाः ।
मोहका मोहिनीतुल्या रतिहीना अवीर्यकाः ॥५५॥
न नरा न च नार्यस्ते योनिलिंगविवर्जिताः ।
स्वल्पमूत्रछिद्रमात्रयुतास्ते तु ततः परम् ॥५६॥
ब्रह्माणं च समुद्दिश्य चक्रुर्वै तर्पणं जले ।
ब्रह्मा तत्र समायातश्चक्रुस्ते प्रार्थनां विधेः ॥५७॥
नपुंसकत्वनाशाय ब्रह्मा प्राह च ताँस्तदा ।
तपः कुरुत सततं समुद्दिश्य तु मोहिनीम् ॥५८॥
सा निस्तारं हि भवतां करिष्यति हितावहा ।
ततस्ते वै तटे नद्यास्तपश्चक्रुर्निरन्तरम् ॥५९॥
मोहिनीं ते नमो मातर्वृन्दलत्वनिवारिणीम् ।
स्वाहा कामप्रिये तुभ्यमुद्धारं कुरु नस्त्विह ॥६०॥
इति सम्प्रार्थयन्तस्ते वृन्दलानां गणास्तदा ।
ददृशुर्नागनद्यास्तु तटे सौभाग्यसुन्दरीम् ॥६१॥
बहुचरास्वरूपां तां रक्तकञ्चुकिकान्विताम् ।
रक्तशाटिकया युक्तां वह्निवर्णां सभूषणाम् ॥६२॥
पुष्टां पुष्टस्तनीं पुष्टजघनां तनुमध्यमाम् ।
सुरूपां पद्मपत्राक्षीं केशधम्मिलशोभिताम् ॥६३॥
कबरीसुतिसम्पन्नां भालपत्रान्वितां सतीम् ।
वलयेन करयोश्च. कंकणैरूर्मिकादिभिः ॥६४॥
शोभितां रशनायुक्तां मञ्जीरवरशोभिताम् ।
कर्णनासाभुजाकण्ठभालभूषणभूषिताम् ॥६५॥
अंकुरितस्तनां पृथुश्रोणीं वृत्तकपोलकाम् ।
कुन्दोत्तमकलीदन्तां रक्तबिम्बाधरां शुभाम् ॥६६॥
शरच्चन्द्राननां मिष्टस्वरां स्मेराननान्विताम् ।
पुष्टां प्रेमभरां कन्यां भक्तानुग्रहकातराम् ॥६७॥
कामधर्मविहीनां च राजस्वल्यविवर्जिताम् ।
कामरूपधरां व्योम्नि दृष्ट्वा सर्वे नपुंसकाः ॥६८॥
तस्यास्तु तेजसा छन्ननेत्राः क्षणं तदाऽभवन् ।
सा त्वाजगाम पृथिवीतलं नागवतीतटे ॥६९॥
सर्वैः संवन्दिता चापि पूजिता तोषिताऽर्थिता ।
मर्दिता च तथा सर्वांगेषु संवाहिता सती ॥७०॥
उवाच तान् प्रसन्नाऽस्मि वरैर्युष्मान् मदाश्रितान् ।
योजयामि वृणुध्वं वै यथेष्टं मा चिरं तदा ॥७१॥
वृन्दला हि तदा प्राहुरुद्धाराय कृपां कुरु ।
षण्ढत्वस्य विनाशाय तुष्टुवुस्ते मुहुर्मुहुः ॥७२॥
तदा देवी तु तान्प्राह मोहिन्यहं पुराभवा ।
प्रकृतेश्च तिरस्काराद् यूयं ब्रह्मतनूद्भवाः ॥७३॥
षण्ढाः सर्वे हि सञ्जाता नारीभर्त्सनपापतः ।
नारीणां कामशान्त्यर्थं नराः कृष्णेन निर्मिताः ॥७४॥
नारीणां मासिके धर्मे कामनलो विवर्धते ।
तच्छान्तिं त्विच्छति भार्या पतिना सार्धमेव तु ॥७५॥
यस्या नास्ति पतिः सा तु स्वेष्टं गच्छन्ति शान्तये ।
शान्तिकर्म तु नारीणां धर्मः शान्तिप्रदो नृणाम् ॥७६॥
भजमानां भजन्ते ये ते त्वाशीर्वादभूमयः ।
आगतां कामसन्तप्तां तिरस्कुर्वन्ति ये नराः ॥७७॥
आत्महनश्च ते बोध्याः सेविकाघातकाश्च ते ।
तेन पापेन षण्ढत्वं प्रयान्ति प्रतिजन्मनि ॥७८॥
कामक्रियास्थयोर्विघ्नकर्तारोऽपि नपुंसकाः ।
कामानन्दहनः सर्वे षण्ढा भवन्ति शापतः ॥७९॥

प्रसह्य भोगकर्तारश्चापि षण्ढा भवन्ति वै।
पतिशून्या तु या नारी कामतप्ता भवेद् यदि ॥८०॥
अगृह्णन्नपराधी स्यात् फलं षण्ढत्वमेव यत्।
तस्मान्नरैः सदा नार्यः पूज्याः सेव्यास्तदिच्छया ॥८१॥
भवन्तः षण्ढतानिवृत्त्यर्थं भवन्तु दीक्षिताः।
श्मश्रुहीना नारीवस्त्रधरा नारीविभूषणाः ॥८२॥
मम भक्ता मम पूजाकर्तारो मम जापकाः।
मम वंशधरा मुक्ताः षण्ढतातो भविष्यथ ॥८३॥
बहुचरेत्यभिधाय ददौ मन्त्रं निजं तु सा।
'ओं नमो बहुचरायै मोहिन्यै कामयोषिते ॥८४॥
षंढत्वं हर मातस्त्वं श्रेयः कुरु परं मम'।
इतिमन्त्रं नागनद्यां स्नापयित्वा ददौ शुभम् ॥८५॥
'ओं श्रीं ह्रीं क्लीं कामदात्र्यै स्वाहा' दशाऽक्षरम्।
मन्त्रं ददौ द्वितीयं च कामनासिद्धिहेतवे ॥८६॥
यस्यासीच्चणकामात्रं योनिच्छिद्रं तु तत्स्थले।
देवी सा चित्रयामास योनिं पूर्णां तु दीक्षणे ॥८७॥
यस्मासीच्च लवंगाभं लिंगचिह्नं तु तत्स्थले।
पूर्णं लिंगं साण्डयुग्मं चित्रयामास रेखया ॥८८॥
हिंगुलारसदानेन पूर्णकामत्वलब्धये।
जन्मान्तरे भवेन्नारी नरो वा तद्विरेखितः ॥८९॥
शाटिकां कञ्चुकीं श्रेष्ठां घर्घरीं दोरकं तथा।
दन्तिकां सिन्दूरंचूर्णं हिंगुलं मन्त्रमित्यपि ॥९०॥
जलं च मन्त्रितं स्निग्धं चुम्बनं च ददौ तदा।
सर्वान्नपुंसकान् देवी पस्पर्श स्तनयोस्तदा ॥९१॥
गण्डयोर्भालयोः कपोलयोः केशेषु नेत्रयोः।
पृष्ठे नितम्बयोश्चाग्रे जघनयोस्तथोदरे ॥९२॥
नाभ्यां सक्थ्नोः पादयोश्च सिषेच मस्तके च तान्।
षण्ढत्वपापनाशोवाभवत्विति जगाद तान् ॥९३॥
एवं दीक्षां गृहीत्वा ते पुपूजुर्देविकां तदा।
सा च पूजां समगृह्य ययौ वै चोत्तरां दिशम् ॥९४॥
एवं षण्ढत्वनिवृत्तिं कर्तुं दीक्षां ददौ सती।
बहुचरा हिंगुलाजा भुवि तिष्ठति शाश्वती ॥९५॥
ब्रह्मा तां भजमानां च यतो जग्राह नैव तु।
कारणं तत्र ते वच्मि शृणु लक्ष्मि पुराभवम् ॥९६॥
ब्रह्मा स्वकमले तप्त्वा श्रुत्वा व्योमगिरां पुरा।
सृष्टिं सर्वां समारेभे सस्मार श्रीहरिं पुनः ॥९७॥
नारायणं ददर्शाग्रे ययाचे वरदानकम्।
तव माया यथा मे न बाधेत स्त्रीस्वरूपिणी ॥९८॥
तथा चाशीर्वचो देहि ततः सृष्टिं करोमि वै।
नारायणस्तथाऽस्त्वित्येवाऽऽह तत्र हि वेधसम् ॥९९॥
सृष्टिं चतुर्युगानां च योग्यां नारीनरात्मिकाम्।
काले यथा यथा योग्यां रचय त्वं तथा तथा ॥१००॥
कामं क्रोधं तथा लोभं मोहं च कपटं क्वचित्।
गृह्णन्तं त्वां च निर्लेपं रक्षयिष्ये सृजिं कुरु ॥१०१॥
धर्मभानं सदा तेऽस्तु सदा ते रागहीनता।
मम स्मृतिः सदा चाऽस्तु सदा जीवन्प्रमुक्तता ॥१०२॥
धर्माधर्मौ तवेच्छैव तव देहोद्भवौ सदा।
कर्मणां फलदाता च भव त्वं मम वाञ्छया ॥१०३॥
अकर्ता क्रियमाणेऽपि ह्यभोक्ता भोगसागरे।
निर्लेपो लेपवाँश्चापि सदा भवसि पद्मज ॥१०४॥
इतिहेतोर्हरेरनुग्रहाद् ब्रह्मा प्रजापतिः।
इच्छया नैव जग्राह मोहिनीं मोहवर्जितः ॥१०५॥
भक्ता भगवतो नैव गृह्णन्ति विषयान् क्वचित्।
हरेर्भक्तिं विहायैव पावनीं बन्धनाशिनीम् ॥१०६॥
इति ते कथितं लक्ष्मि! मोहिनीकृतमुल्बणम्।
शापस्य कारणं मुक्तिः षण्ढत्वं दीक्षणं तथा ॥१०७॥
य इदं शृणुयाद् भक्त्या पठेद्वा तस्य दूषणम्।
कामभावकृतं सर्वं नश्यत्येव न संशयः ॥१०८॥
नागवत्यां प्रतापोऽयं नागलीलासखीकृतः।
पापानां नाशकः सर्वजीवानां तारकस्तथा ॥१०९॥
यस्याः ससेवनात् पानात् स्नानात्तथाभिषेचनात्।
भुक्तिर्मुक्तिर्भवेत् पूर्णं पुरुषार्थचतुष्टयम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मोहिन्यप्सरो ब्रह्माणं वीक्ष्य मोहिता, ब्रह्मणा तु न गृहीता, ततः तं शशाप, ब्रह्मा नागवतीनद्यां शुद्धः, त्यक्तदेहान्नपुंसकानामुत्पत्तिः, बहुचराहिंगुलाजादीक्षया नपुंसकानां मोक्षश्चेत्यादिनिरूपणनामा पञ्चदशाधिकपञ्चशततमोऽध्यायः ॥ ५१५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि कथां रम्यां वृकासुरकृतां शुभाम्।
पुरा बभूव च वृको दैत्यस्तेपे परं तपः ॥ १ ॥
शतवर्षं तु केदारे क्षेत्रे तुष्टो हरस्तु तम्।
वरं दातुं ययौ नित्यं न जग्राहाऽसुरो वरम् ॥ २ ॥
सर्वैश्वर्यं सर्वसिद्धिं भुक्तिं मुक्तिं हरेः पदम्।
दैत्यः किञ्चिन्न गृह्णाति परितः शूलपाणिनः ॥ ३ ॥

शंभुः रुरोद तं दृष्ट्वा प्रेमपाशेन वेष्टितः।
रोदनश्रवणेनाऽस्य ध्यानभंगो बभूव ह ॥४॥
ददर्श पुरतः शंभुं दातारं सर्वसम्पदाम्।
वरं वव्रे वृकस्तरमान्नत्वा च भक्तिपूर्वकम् ॥५॥
हस्तं दधे च यन्मूर्ध्नि स भस्म भवितेति च।
ओमित्युक्त्वा प्रयान्तं तं दुद्राव दैत्यपुंगवः ॥६॥
पपात डमरुः शंभोर्व्याघ्रचर्म च भूतले।
दैत्यं पृष्ठे च धावन्तं कृपया न च हन्ति सः ॥७॥
दुष्टानुसारं साधुश्च न करोति कदाचन।
साधवो घ्नन्ति घ्नन्तं च भृत्यं पुत्रं प्रियां विना ॥८॥
शिवो मां मम शरणं त्वाययौ निरहंकृतः।
हे हरे रक्ष रक्षेति जपन्तं भयविह्वलम् ॥९॥
तदा मया धृतं रूपं नार्या दैत्यश्च मोहितः।
दापयित्वा निजमूर्ध्नि हस्तं तं दैत्यपुंगवम् ॥१०॥
भस्मीभूतं कृतवांश्च शंकरो विज्वरोऽभवत्।
तथापि शंकरो भक्तो मम गर्वान्वितोऽभवत् ॥११॥
सदा विष्णुर्मम कार्यं करोत्येव महापदि।
संहर्ताऽहमिति मत्वा त्रिपुरं हन्तुमुद्यतः ॥१२॥
कोऽयं पतंगवद्दैत्य इति मत्वा रणं ययौ।
विहाय शूलं मद्दत्तं मदीयकवचं तथा ॥१३॥
चिरं बभूव समरो वर्षमेकं दिवानिशम्।
शंभोः रथं बभंजापि जहाराऽस्त्राणि शंकरात् ॥१४॥
शिवं शयानमुत्तोल्य पातयामास भूतले।
तदाऽहं कलया शीघ्रं वृषरूपं विधाय च ॥१५॥
शयानं शंकरं धृत्वा विषाणाभ्यामुरुक्रमम्।
स मद्दत्तेन शूलेन जघान त्रिपुरं हरः ॥१६॥
सद्यः पपात दैत्येन्द्रश्चूर्णीभूतो हि भूतले।
तुष्टुवुर्देवताः शंभुं दर्पं तत्याज शंकरः ॥१७॥
ततोऽहं वृषरूपेण वहामि भक्तशंकरम्।
मम प्रियतमो नास्ति त्रैलोक्येषु शिवात्परः ॥१८॥
शृणु लक्ष्मि हरस्याऽत्र कथां रम्यां पुराभवाम्।
युगषष्टिसहस्राणि तपः कृत्वा महेश्वरः ॥१९॥
विरराम ततश्चाग्रे मां ददर्श नरायणम्।
अतीव कमनीयांगं किशोरं श्यामसुन्दरम् ॥२०॥
न बभूव वितृष्णश्च लोचनाभ्यां त्रिलोचनः।
पश्यन्निमेषरहितो रुरोद प्रेमविह्वलः ॥२१॥
एकेनाऽस्येन वै कथं स्तौमि श्रीपुरुषोत्तमम्।
एवं चतुर्धा मनसि कल्पयामास मस्तकम् ॥२२॥
प्रतिकल्पनं च शिरो नूतनं नूतनं तदा।
बभूव तच्चतुर्वक्त्रं पूर्वेण सह पञ्चमम् ॥२३॥
एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः।
बभूव तेन शोभाढ्यः पञ्चवक्त्रस्त्रिलोचनः ॥२४॥
स्तवनादधिका प्रीतिः शिवस्य मम दर्शने।
तेनाधिकानि तस्यैवं बभूवुर्लोचनानि वै ॥२५॥
त्रिगुणानि तु नेत्राणि संहारकं तृतीयकम्।
विभूतिगात्रः स विभुः सतीसंस्कारभस्मना ॥२६॥
धत्ते तस्यास्त्वस्थिमालां प्रेमभावेन भस्म च।
अन्येषां मुण्डमालां च धत्ते संहृतदेहिनाम् ॥२७॥
जटां तपस्याकालीनां धत्तेऽद्यापि विवेकतः।
न चेच्छा केशसंस्कारे स्वांगवेषेण योगिनः ॥२८॥
समता चन्दने पंके लोष्टे रत्ने मणौ धने।
गरुडद्वेषिणो नागाः शंकरं शरणं ययुः ॥२९॥
बिभर्ति कृपया स्वांगे तानेव शरणागतान्।
वाहनं वृषरूपोऽहमन्यस्तं वोढुमक्षमः ॥३०॥
पारिजातादिकं पुष्पं सुगन्धि चन्दनादिकम्।
मयि सन्न्यस्य तेष्वेवं प्रीतिर्नास्ति कदाचन ॥३१॥
धत्तूरे तत्सदा प्रीतिर्बिल्वपत्रानुलेपने।
गन्धहीने सुगन्धे च योगोष्टे व्याघ्रचर्मणि ॥३२॥
दिव्यलोके दिव्यतल्पे जनतायां न तन्मनः।
श्मशानेऽतीव रहसि ध्यायते मामहर्निशम् ॥३३॥
ज्ञानं मृत्युञ्जयं शूलं धत्ते मत्तेजसाऽन्वितम्।
जलं विषप्रशान्त्यर्थं धत्ते शीतं दिवानिशम् ॥३४॥
पार्वतीं च मया दत्तां योगिनीं कार्यसिद्धये।
लोकशिक्षणदानार्थं धत्ते पत्नीं पतिव्रताम् ॥३५॥
शंकरः परमात्मा मे प्राणेभ्योऽपि परः शिवः।
त्र्यम्बके मन्मनः शश्वत् प्रियो मे भवात्परः ॥३६॥
न संवसामि गोलोके वैकुण्ठे तव वक्षसि।
सदा शिवस्य हृदये निबद्धः प्रेमपाशतः ॥३७॥
स्वरसिद्धं सुतानेन पञ्चवक्त्रैश्च शंकरः।
शश्वद् गायति मद्गाथां तेनाऽहं तत्समीपतः ॥३८॥
मम भक्तिं च दास्यं च मुक्तिं च सर्वसम्पदः।
सर्वसिद्धीर्दातुमीशो न दाता शंकरात् परः ॥३९॥
पञ्चवक्त्रैः स मे नाम प्रेम्णा गायत्यहर्निशम्।
मद्रूपं ध्यायति शश्वत् भक्तः शंकरात्परः ॥४०॥
भक्तत्वात् स्वप्रतापाद्वा पात्रभेदात् क्षणान्तरात्।
भिन्नरूपक्रियाचेष्टा धत्ते मन्वन्तराद्धरः ॥४१॥

अहं सुदर्शनं शंभुस्तेजसा च वयं समाः।
ब्रह्मा स्रष्टा तु योगेन नाऽस्माभिस्तेजसा समः ॥४२॥
सनत्कुमारो वैकुण्ठमेकदा प्रजगाम ह।
ददर्श भुक्तवन्तं च नाथं नारायणं हि माम् ॥४३॥
मया दत्तं चावशेषं तस्मै तुष्टेन चेतसा।
ग्रासमात्रेण तत्रैव भुक्तं तेनैव किञ्चन ॥४४॥
किंचिद् ररक्ष बन्धूनां भक्षणार्थे च दुर्लभम्।
किंचिद् दत्तं शंकराय भुक्तं सर्वं तु शंभुना ॥४५॥
भक्त्युद्रेकात् ग्रासमात्रं भुक्त्वा भक्त्या ननर्त सः।
पुलकांकितसर्वांगः साश्रुनेत्रो मुदान्वितः ॥४६॥
गायन् मम गुणान् भक्त्या सुकण्ठः पंचवक्त्रतः।
रागभेदैकतानेन तालमानेन सुन्दरम् ॥४७॥
पपात डमरुर्हस्ताच्छृङ्गं च व्याघ्रचर्म च।
स्वयं निपत्य पश्चाच्च रुदन् मूर्छामवाप ह ॥४८॥
अतीव कमनीयं तद्रूपं ध्यात्वैकमानसः।
सहस्रदलमध्यस्थं मां पश्यन् हृत्सरोरुहे ॥४९॥
एतस्मिन्नन्तरे देवी पार्वती परमेश्वरी।
मुदाऽऽजगाम शीघ्रं तं प्रसन्नवदनेक्षणा ॥५०॥
रुदन्तं मूर्छितं दृष्ट्वा निपतितं च भक्तितः।
प्रहस्य वार्तां पप्रच्छ पार्श्वस्थं सर्पमेव सा ॥५१॥
कामरूपधरं भक्तं वैष्णवं स्कन्धवासितम्।
सर्वं तां कथयामास नागराट् संपुटाञ्जलिः ॥५२॥
नारायणप्रसादस्याऽदनेन प्रेमविह्वलः।
ईदृशीं सुसमावेश्याऽवस्थां प्राप्तोऽस्ति शंकरः ॥५३॥
श्रुत्वा चुकोप सा मह्यं प्रसादो नार्पितः कथम्।
शप्तं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥५४॥
उवाच शंभुं त्वं पोष्टा करोषि दुर्नयं कथम्।
सदा ते परिपाल्याऽहं पोष्या भक्त्या च किंकरी ॥५५॥
वञ्चिताऽहं त्वया नाथ हरेः प्रसादभक्षणे।
पात्रं हरेः प्रसादस्य त्वं भक्तः प्रथमं हरेः ॥५६॥
पात्रं तव प्रसादस्य पार्वत्यहं तव प्रिया।
पात्रं हरेर्हरस्यापि प्रसादस्याऽहमीश्वरी ॥५७॥
अदत्त्वा वञ्चिता त्वद्य हरनिर्माल्यभक्षणे।
अदत्त्वा वञ्चिता चाद्य हरेः प्रसादभक्षणे ॥५८॥
अतो मत्तो गृहाणेदं फलं वञ्चनजं शिव।
अद्य प्रभृति ये लोका नैवेद्यं भुञ्जते तव ॥५९॥
ते जन्मैकं सारमेया भविष्यन्त्येव सर्वथा।
इत्युक्त्वा पार्वती तत्र रुरोद पुरतः क्षणम् ॥६०॥

शिवः करेण तन्नेत्रजलमार्जनमाचरत्।
कृत्वा वक्षसि सद्वाक्यैर्बोधयामास सान्त्वनैः ॥६१॥
परितुष्टा तु सा देवी भर्तारं समुवाच ह।
कलेवरं संत्यक्ष्यामि नैवेद्येन विना हरेः ॥६२॥
बिभर्मि देहं सततं तव सौभाग्यवर्धनम्।
कथं वहामि सौभाग्यरहितं नु कलेवरम् ॥६३॥
अपूर्वं तव नैवेद्यं जन्ममृत्युजराहरम्।
शप्तं मया कृतं दुष्टं सारमेयजनुप्रदम् ॥६४॥
यदि भक्ष्याम्यहं चापि सारमेयी भवामि च।
न भक्ष्यामि तदा पत्युः प्रसादेन तु वञ्चिता ॥६५॥
पातिव्रत्येन धर्मेण हीना जीवामि वै कथम्।
तस्माद् देहं परित्यज्य यामि गोलोकमेव च ॥६६॥
पार्वतीं चेत्युक्तवतीं ददौ धैर्यं हरः स्वयम्।
शृणु देवि कुरु पाकं नैवेद्यं देहि विष्णवे ॥६७॥
तत्प्रसादमहं भुक्त्वा तुभ्यं दास्ये स्थिरा भव।
लिंगप्रसादस्त्वग्राह्य इति तेऽस्तु वचःफलम् ॥६८॥
प्रतिमायाः प्रसादस्तु ग्राह्यः सर्वो भविष्यति।
प्रतिमालिंगमिश्रोऽपि सर्वग्राह्यो भविष्यति ॥६९॥
एवं गृहाण मे शिष्टं पातिव्रत्ये स्थिता सदा।
सारमेयजनिर्नैव तथा कृते भविष्यति ॥७०॥
लिंगमात्रप्रसादाधिकारे चण्डप्रचण्डकौ।
नियुक्तौ तौ मया भक्तौ गणौ मम निरन्तरम् ॥७१॥
इत्युक्ता पार्वती कृत्वा पाकं श्रीहरये ददौ।
शंकराय ददौ तं च शिष्टं सा बुभुजे सती ॥७२॥
इत्येवं लिंगशिष्टस्याऽग्राह्यत्वं कथितं रमे।
अथ देवी महादेवं मिष्टान्नं विविधं सदा ॥७३॥
मम प्रसादं निर्वर्त्य भक्त्या भोजयति सती।
षट्पंचाशत्प्रसंख्यानि पक्वान्नव्यञ्जनानि च ॥७४॥
नित्यं मम प्रसादं तं भोजयामास सादरम्।
कृष्णजन्मदिने कृत्वा मत्प्रसादं विधाय च ॥७५॥
भोजयितुं यदाऽऽरब्धा वैष्णवः शंकरस्तदा।
देवीं प्राह शृणु त्वद्य धर्मसंकटमागतम् ॥७६॥
व्रतस्येष्टस्य दिवसे भोजनं ग्राह्यमेव न।
कृष्णप्रसादस्त्याज्यो न त्यागे पापं शताधिकम् ॥७७॥
वदात्र किं प्रकर्तव्यं करोमि चेन्न दूषणम्।
पार्वती क्षणमात्रं स्वहृदयेऽन्तर्विवेश ह ॥७८॥
कृष्णनारायणं तत्र प्रसस्मार हरिः स्वयम्।
समागत्याह देवेशीं पश्य मां प्रति पार्वति ॥७९॥

शंकरो मत्स्वरूपोऽस्ति नात्र भेदो हि विद्यते।
मत्स्वरूपेण भुञ्जीत नात्र दोषो भवेत्तदा ॥८०॥
भक्तरूपेण नैवात्र व्रते भोक्तव्यमेव ह।
मत्स्वरूपेण भोक्तव्यं तत्र दोषो न विद्यते ॥८१॥
वद त्वं शंकरं देवि भक्तं रूपं विहाय च।
भगवद्रूपमास्थाय करोतु भोजनं हरः ॥८२॥
इत्युक्ता सा सती तूर्णं नत्वा कृष्णनरायणम्।
बहिरागत्य कान्तं स्वं यथोक्तं प्राह भावतः ॥८३॥
भक्तरूपं विहायात्र भगवद्रूपमाप्नुहि।
ततो भोजनमाधत्स्व कृष्णे विभौ परात्मनि ॥८४॥
शंभुः प्राह कथं देवि भक्तत्वं शाश्वतं मम।
त्याज्यं भवेद् वदात्रार्थे तत्त्यागे दूषणं महत् ॥८५॥
अभक्तस्य जलं चान्नं ग्राह्यं पश्चान्न वै भवेत्।
अभक्तः सर्वथा वर्ज्यो वैष्णवैश्च सुरादिभिः ॥८६॥
पार्वती प्राह देवाऽहं त्वबला बुद्धिवर्जिता।
तथापि चात्र वादार्थे कथयामि तथा कुरु ॥८७॥
यदि चास्मि तव भक्ता नान्यभक्ता कदाचन।
सिद्धान्तस्य सुसार्थक्यं भवेदेवंकृते कुरु ॥८८॥
कृष्णः शंभुश्च संन्यासीत्येवं त्रिरूपवान् भव।
कृष्णरूपेण वै सर्वं भुंक्ष्व सिद्धान्तमत्र मे ॥८९॥
तत्प्रसादस्वरूपं त्वं भुंक्ष्व सन्न्यासिरूपतः।
साधोः सन्न्यासिनश्चापि प्रसादो मेऽर्थकृद् भवेत् ॥९०॥
तवाऽऽज्ञया ग्रहीष्यामि न चेन्नैव स्पृशाम्यपि।
जलं फलं कुसुमं चौषधं दुग्धादिको रसः ॥९१॥
गुरोर्वाक्यं स्वामिवाक्यं न व्रतघ्नं कदाचन।
इत्युक्तः शंकरस्तत्र दधार प्रतिमात्रयम् ॥९२॥
कृष्णरूपोऽन्नसर्वस्वं बुभुजे पार्वतीकृतम्।
सारूप्येन स्वरूपेण भक्ता भुञ्जन्ति धामनि ॥९३॥
अथ सन्न्यासनैष्कर्म्ये भोजनेऽपि न दूषणम्।
इति कृत्वा च बुभुजे सन्न्यासी शंकरः स्वयम् ॥९४॥
तत्प्रसादं सती देवी सन्न्यासिनीस्वरूपिणी।
शंकरस्याऽऽज्ञया भूत्वा बुभुजे हरिभोजनम् ॥९५॥
भक्ता पात्रमार्जनादि चक्रे सतीस्वरूपिणी।
तानि रूपाणि संहृत्य पार्वतीपरमेश्वरौ ॥९६॥
बभूवतुर्यथापूर्वरूपिणौ भक्तिकारिणौ।
इत्येवं मम भक्तानां लक्ष्मि भक्तिर्हि विद्यते ॥९७॥
सूक्ष्मं वै धर्मसर्वस्वं को नु जानाति तं विना।
शंकरः स तु सन्न्यासी त्रिलोके व्यचरन्मुदा ॥९८॥
मम भक्तिं चकारोग्रामकारयच्च वैष्णवान्।
काले काले तथा भूत्वा भक्तिं करोति मे शिवः ॥९९॥
शिवाऽपि यतिनी भूत्वा भक्तिं करोति मे तथा।
मम ज्ञानाश्रयः शंभुराचार्यः शास्त्रकृत् तथा ॥१००॥
तारको बद्धजीवानां ज्ञानभक्तिप्रदायकः।
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥१०१॥
यज्ञरूपाणि पुण्यानि व्रतान्यनशनानि च।
तपांसि नानादानानि विप्रदेवार्चनानि च ॥१०२॥
चिरं पुनन्ति सर्वाणि दर्शनादेव साधवः।
सुसतां विष्णुभक्तानां रजसां स्पर्शमात्रतः ॥१०३॥
पूतानां पादपद्मानां सद्यः पूता वसुन्धरा।
तीर्थानि च पवित्राणि समुद्राः पर्वतास्तथा ॥१०४॥
सुरा दर्शनमिच्छन्ति सतां पातकनाशिनाम्।
सोऽज्ञानी नैव बुबुधे सन्तं मनुष्यजन्मना ॥१०५॥
परमं स्वादु दुग्धं वै न जानाति तथा दधि।
तथा सद्भ्यो जायमानं न जानाति सतो जनान् ॥१०६॥
स्वगृहं नैव जानाति परज्ञानेन वै वृथा।
स एव परमो लाभो वैष्णवानां सतां कृपा ॥१०७॥
भवाब्धितरणे तर्य्यो तत्र सन्तो हि नाविकाः।
विप्रा गुरवो लोकस्य सन्तो विप्रगुरूत्तमाः ॥१०८॥
सनकाद्या महासन्तः सन्न्यासिनोऽतिपावनाः।
शोधयन्ति भुवनानि वासना दीर्घकालजाः ॥१०९॥
एवं स शंकरो भक्तो भक्ता शिवा तथा मम।
साधुसाध्वीरूपयुक्तौ प्रसादार्थे बभूवतुः ॥११०॥
पद्मजे मम भक्तानां मदर्थे किमसाध्यकम्।
मम लाभार्थमेवैते सर्वे त्यजन्ति रोधकम् ॥१११॥
इति ते कथितं पूर्वं पुनश्च स्मारितं शुभम्।
मम दास्यं हरे देव्यां त्वयि चापि परात्परम् ॥११२॥
एतस्य श्रवणात्पाठान्मननाद्वर्तनात्तथा।
भुक्तिर्मुक्तिर्मम दास्यं सर्वे स्यान्नात्र संशयः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शंकरस्य गर्वहरणं, भक्त्युद्रेकता, परमभागवतसर्वस्वार्पणधर्मवत्त्वं, सन्न्यासरूपधारित्वं, भगवत्प्रसादाशित्वं, चेलादिनिरूपणनामा षोडशाधिकपञ्चशततमोऽध्यायः ॥ ५१६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! पुरा त्वासीद् हिरण्यकशिपुर्महान्।
तस्य पुत्रद्वयं जज्ञे प्रह्लादश्चान्धकस्तथा ॥ १ ॥

हिरण्यकशिपौ प्राप्ते परलोकं हरेः करात् ।
अमात्यैरभिषेकाय प्रह्लादः सन्नियोजितः ॥ २ ॥
किन्तु नैच्छत् स राज्यं तद् दानवैर्द्वेषकारणात् ।
ततोऽन्धकोऽभिषिक्तश्च राज्ये दानवपुंगवैः ॥ ३ ॥
अन्धकोऽपि समाराध्य ब्रह्माणं त्वमरोऽभवत् ।
यावत्कल्पं वरपुष्टस्ततः शक्रं जिगाय सः ॥ ४ ॥
अमरावतिकां स्वस्य राजधानीं चकार सः ।
इन्द्रः शंभुं समाराध्य वरं वव्रे सुरार्थकम् ॥ ५ ॥
अन्धकेन हृतं सर्वं देवराज्यं मखादिकम् ।
यज्ञभागादिकं सर्वं राज्यं हृतं प्रयच्छ मे ॥ ६ ॥
शिवस्तथास्त्विति प्राह प्रेषयामास तं प्रति ।
वीरभद्रं निजदूतं स गत्वोवाच चान्धकम् ॥ ७ ॥
हरादेशात्परित्यज्य स्वर्गं गच्छ धरातलम् ।
पितृपैतामहं राज्यं पृथिव्यां त्वं समाचर ॥ ८ ॥
नो चेत् तव पदं सर्वं शंकरः संहरिष्यति ।
अन्धकस्तं वीरभद्रं समुवाच हरं वद ॥ ९ ॥
कस्त्वं श्मशानवासोऽसि गणनायां ममान्तिके ।
कैलासं मे समर्प्य त्वं काश्यां गच्छ श्मशानके ॥१०॥
नो चेत् प्राणान् हरिष्यामि तव सेन्द्रस्य शंकर ।
श्रुत्वा वीरप्रभद्रस्तं विनिर्भर्त्स्य ययौ हरम् ॥११॥
कथयामास तद्वाक्यं सन्नद्धश्च हरोऽभवत् ।
गणैर्देवैस्तथा चान्यैः सैन्यैर्युक्तोऽमरावतीम् ॥१२॥
ययौ तां वाहिनीं दृष्ट्वा तत्रसुर्दैत्यपुंगवाः ।
अन्धकन्तु निद्रायां दृष्टं दुःस्वप्नमुल्बणम् ॥१३॥
सउद्वेगभयव्यासश्चाहारोत्साहवर्जितः ।
अन्धकः पुत्रमित्रादीनाह सर्वमरिष्टकम् ॥१४॥
मया दृष्टो निशीथेऽद्य दुःस्वप्नोऽतिभयप्रदः ।
बिभ्रती रक्तपुष्पाणां मालां च रक्तचन्दनम् ॥१५॥
रक्ताम्बरं तीक्ष्णखड्गं खर्परं च भयानकम् ।
प्रकृत्याऽट्टाट्टहासं च ललज्जिह्वा भयंकरी ॥१६॥
अतीव वृद्धा कृष्णांगी नारी पुरेऽत्र नृत्यति ।
मुक्तकेशी छिन्ननासा कृष्णा कृष्णाम्बरान्विता ॥१७॥
विधवा सा महाशूद्री ममालिंगनकामुकी ।
मलिनं चैलखण्डं च बिभ्रती रूक्षमूर्धजान् ॥१८॥
दधती चूर्णतिलकं कपोले मम वक्षसि ।
हसित्वा क्रूरतां दर्शयित्वा चुम्बति मां मुहुः ॥१९॥
कृष्णवर्णानि पक्वानि छिन्नभिन्नानि सर्वशः ।
पतन्ति कृत्वा शब्दांश्च शश्वत्तालफलानि हि ॥२०॥
कुचैलो विकृताकारो म्लेच्छो हि रूक्षमूर्धजः ।
ददाति मह्यं भूषायां छिन्नभिन्नकपर्दकान् ॥२१॥
महारुष्टा च दिव्या स्त्री पतिपुत्रवती सती ।
बभंज पूर्णकुंभं च साऽभिशप्य पुनः पुनः ॥२२॥
अम्लानां मुण्डमालां च रक्तचन्दनचर्चिताम् ।
ददाति मह्यं विप्रश्च महारुष्टोऽतिशप्य वै ॥२३॥
क्षणमंगारवृष्टिश्च भस्मवृष्टिः क्षणं क्षणम् ।
क्षणं क्षणं रक्तवृष्टिर्जायते नगरे मम ॥२४॥
वानरं वायसं श्वानं भल्लूकं सूकरं खरम् ।
पश्यामि विकटाकारं शब्दं कुर्वन्तमुल्बणम् ॥२५॥
पश्यामि शुष्ककाष्ठानां राशिमम्लानकज्जलम् ।
अरुणोदयवेलायां कर्पीश्छिन्ननखानि च ॥२६॥
पीतवस्त्रपरीधाना शुक्लचन्दनचर्चिता ।
बिभ्रती मालतीमालां रत्नभूषणभूषिता ॥२७॥
क्रीडाकमलहस्ता च सिन्दूरबिन्दुशोभिता ।
कृत्वाऽभिशापं मां रुष्टा याति मन्मन्दिरात् सती ॥२८॥
पाशहस्तांश्च पुरुषान् मुक्तकेशान् भयंकरान् ।
अतिरूक्षांश्च पश्यामि विशतो नगरं मम ॥२९॥
नग्ननारीं मुक्तकेशीं नृत्यन्तीं च गृहे गृहे ।
अतीव विकृताकारां पश्यामि सस्मितां सदा ॥३०॥
छिन्ननासा च विधवा महाशूद्री दिगम्बरा ।
सा तैलाभ्यंगितं मां च करोत्यतिभयं करी ॥३१॥
निर्वाणांगारयुक्ताश्च भस्मपूर्णा दिगम्बराः ।
अतिप्रभातसमये चित्राः पश्यामि सस्मिताः ॥३२॥
पश्यामि च विवाहं च नृत्यगीतमनोहरम् ।
रक्तवस्त्रपरीधानान्पुरुषान् रक्तमूर्धजान् ॥३३॥
रक्तं वमन्तं पुरुषं नृत्यन्तं नग्नमुल्बणम् ।
धावन्तं च शयानं च पश्यामि सस्मितं तथा ॥३४॥
राहुग्रस्तं च गगने मण्डलं चन्द्रसूर्ययोः ।
एककाले प्रपश्यामि सर्वग्रासं च तामसम् ॥३५॥
उल्कापातं धूमकेतुं भूकम्पं राष्ट्रविप्लवम् ।
झञ्झावातं महोत्पातं पश्यामि च क्षितिस्थितः ॥३६॥
वायुना घूर्ण्यमानांश्च छिन्नस्कन्धान्महीरुहान् ।
पतितान् पर्वतांश्चैव पश्यामि पृथिवीतले ॥३७॥
पुरुषं छिन्नशिरसं नृत्यन्तं नग्नमुच्छ्रितम् ।
मुण्डमालाकरं घोरं पश्यामि च गृहे गृहे ॥३८॥
दग्धं सर्वाश्रमं भस्मपूर्णमङ्गारसंकुलम् ।
हाहाकारं प्रकुर्वन्तं सर्वं पश्यामि सर्वतः ॥३९॥

स्नातुं गच्छामि च नदीं सा तु शुष्कायते क्षणात् ।
मूर्तयो देवतानां च दृष्टा विलीनतां गताः ॥४०॥
गर्दभं घोटकं गन्त्रीयुतं यान्तं च दक्षिणाम् ।
गन्त्र्यां स्थितं च मां तत्र प्रपश्यामि चिरं मुहुः ॥४१॥
अन्यत्र गमनं मे वै भाति लोकान्तरं प्रति ।
मयैव च विवाहोऽपि मया दृष्टो हि योषिता ॥४२॥
गणेशमस्तकं स्कन्धाद्वियुक्तं दग्धमित्यपि ।
नद्यां मयेति सन्दृष्टं क्षणाज्जागरुकोऽभवम् ॥४३॥
उष्ट्रो भूफलिनीर्भुक्त्वा मां प्रत्येतीति वीक्षितम् ।
सिद्धान्नानि वीक्षितानि न च भुक्तानि वै मया ॥४४॥
स्वप्ने चातीव कलहः परस्परं प्रवीक्षितः ।
स्वस्यैव मुण्डनं स्वप्ने कारितं च मया मुहुः ॥४५॥
हरितद्रुमशाखानां भंगा विलोकिता मया ।
समुद्रे ब्रूडति कश्चिन्मम बन्धुर्विलोकितः ॥४६॥
कस्यचिल्लिंगतो रक्तं निःसृतं वीक्षितं मया ।
ब्राह्मणस्त्वतिरुष्टश्च शपतीत्यवलोकितम् ॥४७॥
जीर्णाम्बरं धृतं देहे नष्टं तत्पतितं तथा ।
कुकुरा मां विलोक्यैव भषन्तीत्यवलोकितम् ॥४८॥
शुष्ककाष्ठानि च मया द्वेधीकृतानि हस्ततः ।
निकृन्तने यन्त्रेण वेल्लणार्थं विलोकितम् ॥४९॥
फणाफुल्लो महासर्पो दृष्टश्चापि मृतोऽपि सः ।
व्योमसेतोर्बालकश्चाऽकूर्दवत् पतितुं जले ॥५०॥
जलं विहाय च दूरं पाषाणे पतितो भ्रमात् ।
अन्यस्य भवने दृष्टं गोष्ठं रिक्तं विवर्तितम् ॥५१॥
आरण्यकश्च मार्जारो विलोकितो मया वने ।
कृष्णाम्बरो जनो मां धूष्कृतीयन्त्रेण वै मुक्रत् ॥५२॥
अलक्षयद् यथा हन्तुं कृत्वा मां वै प्रदक्षिणम् ।
मया रिक्ता धूष्कृती सा स्फोटिता तं जनं प्रति ॥५३॥
गौः सवत्सा बहिर्याति रात्रौ ममाऽऽश्रमात् तथा ।
भवनस्य ध्वजश्चापि पतितश्चावलोकितः ॥५४॥
सत्कार्यार्थं च कोशस्य कुञ्चिका नैव वीक्षिता ।
आशीर्वादपरा विप्रा मां विहायाऽन्यतो गताः ॥५५॥
एवं दृष्टं मया स्वप्ने सर्वमथ निशात्यये ।
न जाने किं दैवयोगाद् विपरीतं भवेदिति ॥५६॥
शुशोचेति वर्णयित्वाऽन्धकस्तावच्च तत्प्रिया ।
पत्नी रात्रौ च दुःस्वप्नं यद् ददर्श जगाद तत् ॥५७॥
शृणु राजन् ममाऽप्यत्राऽरीष्टानि हि निशात्यये ।
उपस्थितानि निद्रायां तैश्च भयं व्रजामि वै ॥५८॥
अहो स्वामिन्निहाऽऽगच्छ त्वां करोमि स्ववक्षसि ।
परिणामे विधाता मे न जाने किं करिष्यति ॥५९॥
रत्नसिंहासनेऽहं च रत्नच्छत्रं च बिभ्रती ।
तदाऽऽतपत्रं जग्राह रुष्टो विप्रस्तु मे प्रभो ॥६०॥
सागरे कज्जलाकारे महाघोरे च दुस्तरे ।
गभीरे प्रेरयामास मामेव दुर्बलां स च ॥६१॥
तत्र स्रोतसि शोकार्ता भ्रमामि च मुहुर्मुहुः ।
महोर्मीणां च वेगेन व्याकुला नक्रसंकुलैः ॥६२॥
त्राहि त्राहीति हे नाथ त्वां वदामि मृतं पतिम् ।
त्वां न दृष्ट्वा महाभीता करोमि बहुरोदनम् ॥६३॥
नाथ तत्र निमज्जन्ती पश्यामि चन्द्रमण्डलम् ।
निपतन्तं च गगनाच्छतखण्डं च भूतले ॥६४॥
क्षणान्तरे शतखण्डं सूर्यं पश्यामि भूतले ।
एककाले द्वयोर्ग्राहः कृष्णं चाकाशमण्डलम् ॥६५॥
क्षणान्तरे प्रपश्यामि ब्राह्मणो दीप्तिमानिति ।
मत्क्रोडस्थसुधाकुंभं बभञ्ज प्ररुषेति च ॥६६॥
क्षणान्तरे प्रपश्यामि महारुषं च भूसुरम् ।
गृहीत्वा संव्रजन्तं च सन्निधौ वै पतिं मम ॥६७॥
क्रीडाकपालदण्डं च हस्ताद्धस्तं मम प्रभो ।
सहसा खण्डखण्डं च बभूव सह हेतुना ॥६८॥
हस्ताद्धस्तं च सहसा दर्पणो वलयस्तथा ।
निर्मलः कज्जलाकारः खण्डखण्डो बभूव ह ॥६९॥
हारो मे रत्नसाराणां छिन्नो भूत्वा च वक्षसः ।
अतीव मलिनं पद्मं पपात धरणिस्थले ॥७०॥
सौधपुत्तलिकाः सर्वा नृत्यन्ति च हसन्ति च ।
आस्फोटयन्ति गायन्ति रुदन्ति च क्षणे क्षणे ॥७१॥
कृष्णवर्णं बृहच्छत्रं त्रिशूलं खे समागतम् ।
निपतन्तं भ्रमन्तं चोत्पतन्तं त्ववलोकये ॥७२॥
प्राणाधिदेवः पुरुषो निःसृत्याऽऽभ्यन्तरान्मम ।
प्रिये विदार्य देहीति ततो यामीत्युवाच माम् ॥७३॥
कृष्णवर्णा च प्रतिमा मामाश्लिष्यति चुम्बति ।
कृष्णवस्त्रपरीधाना स्वप्ने पश्यामि साम्प्रतम् ॥७४॥
इतीदं विपरीतं च दृष्ट्वा वै प्राणवल्लभ ।
नृत्यन्ति दक्षिणांगानि प्राणा आन्दोलयन्ति मे ॥७५॥
रुदन्ति शोकात् कर्षन्ति समुद्विग्नं च मानसम् ।
तव वामांगकम्पं च लोकयामि पुनः पुनः ॥७६॥
किमिदं किमिदं नाथ विपरीतं भविष्यति ।
इत्युक्त्वा तं समाश्लिष्य क्षणं सुखं ललाभ ह ॥७७॥

अन्धकस्तां समाश्लिष्य ददौ धैर्यं पुनः पुनः ।
प्रेम्णा त्वाकृष्य तन्वंगीं परिरेभे चुचुम्ब च ॥७८॥
एतस्मिन्नेव समये महेन्द्रस्य शुभानि वै ।
सुस्वप्नान्यभवँस्तेन तुतोष हृष्टमानसः ॥७९॥
ददर्श प्रथमं विप्रबालकं पद्मलोचनम् ।
भूषितं सस्मितं पुष्पमालाचन्दनराजितम् ॥८०॥
बद्धशिखं सतिलकं जपन्तं वेदमातरम् ।
ततो ददर्श रुचिरां पतिपुत्रवतीं सतीम् ॥८१॥
स्वर्णवस्त्रपरीधानां रत्नभूषणभूषिताम् ।
ज्वलत्प्रदीपहस्तां च शुक्लधान्यकरां वराम् ॥८२॥
शरच्चन्द्रनिभास्यां च सस्मितां वरदां शुभाम् ।
ततो ददर्श विप्रं च प्रकुर्वन्तं शुभाशिषम् ॥८३॥
श्वेतपद्मं राजहंसं तुरगं च सरोवरम् ।
ददर्श चित्रितं चारु फलितं पुष्पितं शुभम् ॥८४॥
आम्रनिम्बनारिकेलागुर्वर्ककदलीतरुम् ।
दशन्तं श्वेतसर्पं च स्वात्मानं पर्वतस्थितम् ॥८५॥
वृक्षस्थं च गजस्थं च तरीस्थं तुरगस्थितम् ।
वीणां प्रवादयन्तं च भुञ्जानं मिष्टपायसम् ॥८६॥
दधिक्षीरयुतान्नं च पद्मपत्रस्थमीप्सितम् ।
कृमिविट्सहितांगं च शुक्लचन्दनर्चितम् ॥८७॥
शुक्लधान्यपुष्पहस्तं प्रासादस्थं समुद्रगम् ।
ततो ददर्श रजतं मणिं शुभ्रं च काञ्चनम् ॥८८॥
मुक्तामाणिक्यरत्नं च पूर्णकुंभजलं शुभम् ।
सुरभिं सहवत्सां च वृषभेन्द्रं मयूरकम् ॥८९॥
शुकं च सारसं हंसं चिल्लं खञ्जनमित्यपि ।
ताम्बूलं पुष्पमाल्यं च ज्वलदग्निं सुरार्चनम् ॥९०॥
पार्वतीप्रतिमां कृष्णनारायणस्य सन्निधौ ।
शांकरं चोज्ज्वलं लिंगं गुरुं देवं बृहस्पतिम् ॥९१॥
विप्रबालां सुफलितां कृषिं पक्वफलान्विताम् ।
देवस्थलीं च राजेन्द्रं सिंहं व्याघ्रं गजं मुनिम् ॥९२॥
दृष्ट्वा स्वप्नं समुत्तस्थौ चकाराऽऽह्निकमीप्सितम् ।
शंकरं कथयामास सर्वं वृत्तान्तमेव तम् ॥९३॥
शंकरोऽपि तदा प्राह महेन्द्रं शकुनानि वै ।
यानि ददर्श मार्गे स मंगलार्हाणि सर्वथा ॥९४॥
जयप्रदानि सर्वाणि मंगलाऽऽसूचकानि वै ।
वामे विप्रं शिवां पूर्णकुंभं नकुलचाषकम् ॥९५॥
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम् ।
शुक्लपुष्पं च माल्यं च धान्यं च खञ्जनं शुभम् ॥९६॥
दक्षिणे ज्वलदग्निं च विप्रं च वृषभं गजम् ।
वत्सप्रयुक्तां धेनुं च श्वेताश्वं राजहंसकम् ॥९७॥
वेश्यां च पुष्पमालां च पताकां दधि पायसम् ।
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम् ॥९८॥
मद्यं मांसं चन्दनं च माध्वीकं घृतमुत्तमम् ।
कृष्णसारं फलं लाजां सिद्धान्नं दर्पणं तथा ॥९९॥
विचित्रितं विमानं च सुदीप्तां प्रतिमां तथा ।
शुक्लोत्पलं पद्मवनं शंखचिल्लं च कोरकम् ॥१००॥
मार्जारं पर्वतं मेघं मयूरं शुकसारसम् ।
शंखकोकिलवाद्यानां ध्वनिं शुश्राव मञ्जुलम् ॥१०१॥
विचित्रकृष्णसंगीतं हरिशब्दं जयध्वनिम् ।
एवंभूतं शुभं दृष्टं कथयामास सर्वथा ॥१०२॥
तावद् भेर्यो ह्यवाद्यन्त शंखाः शंकरसैन्यके ।
अन्धकश्चापि विज्ञाय ससैन्यः समरं ययौ ॥१०३॥
प्रथमं मिलिता नग्ना विधवा खण्डवस्त्रिका ।
मलिना विकृताऽऽकारा छिन्ननासोर्ध्वमूर्धजा ॥१०४॥
गर्दभो महिषश्चोष्ट्रः सूकरः श्वा च भल्लुकः ।
काको गृध्रो वानरश्च कंकः शुष्कतृणानि च ॥१०५॥
कुलालस्तैलकारश्च नापितो रजकस्तथा ।
दग्धकाष्ठं गलत्कुष्ठो वृषलो कलहद्विजः ॥१०६॥
रुष्टभिक्षुः प्रमुण्डा च प्रमुण्डी कृपणस्तथा ।
क्षुत्कारः शस्त्रपतनं रथात्मुकुटपातनम् ॥१०७॥
ध्वजदर्पणपतनं त्वश्वानां जानुभुग्नता ।
रिक्तं कलशयुगलं कृष्णसर्पो भयंकरः ॥१०८॥
घूकस्य दर्शनं चेति समीपे मीलितानि वै ।
मृत्युसूचकवस्तूनि वीक्षितान्यन्धकेन वै ॥१०९॥
पवनश्चातिवेगेन सन्मुखं वाति दुःखकृत् ।
यन्त्रीचक्रं प्रभग्नं च हस्तिः प्रमत्ततां गतः ॥११०॥
विदित्वैवं रणे त्रस्तो बहिर्धैर्याऽवलम्बनः ।
उपर्याडम्बरयुक्तो मृत्युनिश्चितमानसः ॥१११॥
अन्धकः कोटिसैन्येन हरान्तिकमुपाययौ ।
ददर्श देवसैन्यानि भुवि व्योम्नि जलेऽपि च ॥११२॥
दानवानां च सैन्यानि सन्नद्धानि प्रतिक्रमात् ।
युद्धारंभस्य वाद्यानि त्ववाद्यन्ताऽसुरादिषु ॥११३॥
युद्धबोधकचिह्नात्मध्वजा व्योम्नि चकाशिरे
दैत्यः सशंकरं नत्वा मुमोच शतसायकान् ॥११४॥
शंकरस्तानर्धचन्द्रैश्छित्वा मुमोच मार्गणान् ।
शिलीमुखान् शतसंख्याम् दैत्यस्तान् प्रचकर्त ह ॥११५॥

एवं समभवद् युद्धं देवानां दानवैः सह ।
गणैश्च विकृताकारैर्दानवानां भयंकरम् ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽन्धकासुरस्य तत्पत्न्याश्च दुष्टस्वप्नाद्यपशकुनानि, इन्द्रस्य सुशकुनानि, शंकरेण सहाऽन्धकस्य युद्धं चेति-निरूपणनामा सप्तदशाधिकपञ्चशततमोऽध्यायः ॥५१७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तदा युद्धे सेनयोरुभयोरपि ।
दारुणश्चाऽप्रमेयश्च संग्रामो जीवदक्षिणः ॥ १ ॥
भयंकरोऽभवद् व्योम्नि पृथ्व्यां जलेऽपि सर्वशः ।
एतस्मिन्नन्तरे तत्र भद्राख्यस्तु महाबलः ॥ २ ॥
अन्धकस्य महासेनापतिर्बली महारथी ।
निर्भर्त्स्य शंकरं कार्तिकेयं गणाधिपं तथा ॥ ३ ॥
चिक्षेप श्रीगणेशे वै बाणं प्रलयवह्निभम् ।
तद्बाणं त्वर्धचन्द्रेण संचिच्छेद गणाधिपः ॥ ४ ॥
भद्रश्चिक्षेप सूर्याभां शक्तिं स्कन्दं प्रति क्रुधा ।
कार्तिकेयस्तु तां वैष्णवास्त्रेण व्यहनत् तदा ॥ ५ ॥
भद्रश्चिक्षेप तु नारायणास्त्रं रणमूर्धनि ।
प्रणम्य कार्तिकेयस्तु शेते पृथिवीमाश्रितः ॥ ६ ॥
ऊर्ध्वमस्त्रं तु बभ्राम शतसूर्यसमप्रभम् ।
प्रलीनमस्त्रमाकाशे विश्वसंहारकारकम् ॥ ७ ॥
अस्त्रे गते कार्तिकेयो गृहीत्वा स्वगदां दृढाम् ।
भद्ररथं प्रबभञ्ज जघानाऽश्वाँश्च सारथिम् ॥ ८ ॥
अन्धकस्य तु सेनापस्तदा दुद्राव कार्तिकम् ।
भद्रं तं कार्तिकेयस्तु शक्त्या जघान वै क्रुधा ॥ ९ ॥
द्वेधा विभिन्न पतितो ममार स रणांगणे ।
हते भद्रेऽन्धकपुत्रो धूम्रो महापराक्रमः ॥१०॥
बाणानां शतकं स्कन्दे चिक्षेप रणमूर्धनि ।
कार्तिकेयोऽग्निबाणेन बाणौघान् प्रददाह च ॥११॥
धूम्रश्चिक्षेप ब्रह्मास्त्रं सृष्टिसंहारकारकम् ।
दृष्ट्वा शंम्वात्मजः शीघ्रं सबीजं मन्त्रपूर्वकम् ॥१२॥
ब्रह्मास्त्रेणैव सहसा सञ्जहाराऽवलीलया ।
धूम्रः शिलीमुखैर्बाणैर्जघान कार्तिकं मुहुः ॥१३॥
कार्तिकेयस्तु तद् दृष्ट्वा धनुर्बाणौघसंयुतम् ।
मुमोच जृम्भणं युद्धे शीघ्रं तं च महारथम् ॥१४॥
जडो बभूव धूम्रस्तु निश्चेष्टो रणमूर्धनि ।
पुनश्चिक्षेप निद्रास्त्रं धूम्रश्च निद्रितोऽभवत् ॥१५॥
तावद्वै त्वन्धकस्तं च बोधास्त्रेणाऽप्रबोधयत् ।
स्कन्दस्तु शतबाणैस्तं जघानाऽसुरमन्धकम् ॥१६॥
अन्धकोऽपि कार्तिकं च त्रिशूलेन जघान ह ।
गदया कार्तिकरथं बभञ्ज रत्ननिर्मितम् ॥१७॥
गदया कार्तिकः क्रुद्धो बभंजाऽन्धकवाहनम् ।
अन्धकश्चार्धचन्द्रेण क्षुरधारेण लीलया ॥१८॥
चिच्छेद कार्तिकधनुर्भल्लास्त्रेण नियोजितम् ।
कार्तिको गदया गत्वाऽन्धकं पृष्ठे जघान ह ॥१९॥
अन्धकः पतितो मूर्छां जगामाऽथ क्षणान्तरे ।
वीरभद्रो गणेशश्च कार्तिको भैरवास्तथा ॥२०॥
काल्यश्च रणचण्ड्यश्च युयुधुर्दानवैः सह ।
दानवास्तु शंकुकर्णो माहिषाक्षो वृकाननः ॥२१॥
विन्ध्यहनुर्यमस्कन्धो वृषशृंगो गुहाननः ।
क्रूरक्रमो विवराक्षो युयुधुस्ते सुरैः सह ॥२२॥
शंकरस्तु तदा शूलं गृहीत्वा चान्धकासुरम् ।
हन्तुं चकार यत्नं च महाशंखं ह्यवादयत् ॥२३॥
रथमध्ये स्वयं शंभुः स्थितः संहारकारकः ।
महारथानां लक्षैश्च रथानां च त्रिकोटिभिः ॥२४॥
त्रिकोटिभिर्गजेन्द्राणां मल्लानां च त्रिकोटिभिः ।
शतकोटिभिरश्वानां चर्मिणां तच्चतुर्गुणैः ॥२५॥
खड्गिनां तत्सप्तगुणैर्द्विगुणैस्तद्धनुष्मताम् ।
अष्टौ चापि दिशांपाला भैरवा देवकोटयः ॥२६॥
सान्नाहिका युयुधुश्च दानवैः शतकोटिभिः ।
उन्मत्तभैरवश्चापि संहारभैरवस्तथा ॥२७॥
असितांगो भैरवश्च रुरुभैरव इत्यपि ।
महाभैरवसंज्ञश्च कालभैरव इत्यथ ॥२८॥
प्रचण्डभैरवश्चापि क्रोधभैरव उल्बणः ।
शक्तिभिः सहिताः सर्वे युयुधिरे रणांगणे ॥२९॥
उग्रचण्डा प्रचण्डा च चण्डिका चण्डिनायिका ।
चण्डेश्वरी च चामुण्डा चण्डी चण्डकपालिका ॥३०॥
कोट्याद्यास्तथा चान्या युयुधिरे रणांगणे ।
चन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी ॥३१॥
कौमारी नारसिंही च वाराही विकटाकृतिः ।
माहेश्वरी महामाया भैरवी भीमरूपिणी ॥३२॥
रथस्थास्तास्तदा सर्वा युयुधिरेऽसुरैः सह ।
राक्षस्यः पर्वतप्राया युद्धं चक्रुश्च कोटिशः ॥३३॥

अन्धकः शंकरं हन्तुं दिव्यास्त्रेण नियोजितम् ।
धनुर्दधार सगुणं चिक्षेप च शरं हरे ॥३४॥
अंजनं नाम दिव्यास्त्रं ग्रीष्ममार्तण्डसन्निभम् ।
हरिश्चिक्षेप धावल्यं दिव्यास्त्रं चन्द्रसन्निभम् ॥३५॥
वह्निं चिक्षेपाऽन्धकश्च हरस्तं वारुणेन वै ।
प्रज्वलन्तं तालमानं निर्वाणं प्रचकार सः ॥३६॥
वायुं चिक्षेपाऽन्धकश्च चिक्षेप पार्वतं हरः ।
नारायणास्त्रं चिक्षेप ह्यन्धको रणमूर्धनि ॥३७॥
शंभुर्भार्गवसंश्रेष्ठो नारायणं ननाम तम् ।
चिक्षेप चाऽन्धको नागमस्त्रं श्रीशंकरोपरि ॥३८॥
शंकरो गरुडेनैव संजहार क्षणेन वै ।
अन्धकस्त्वर्धचन्द्रं च चिक्षेप शंकरोपरि ॥३९॥
शंभुर्गदां प्रचिक्षेपाऽन्धकं प्रति भयानकाम् ।
अन्धकस्य रथश्चूर्णो बभूव सारथिस्तथा ॥४०॥
इन्द्रो वज्रं प्रचिक्षेपाऽन्धकं भस्मकरं तदा ।
अन्धकेन मुखे ग्रस्तं विद्युद्रूपं जलं यथा ॥४१॥
अन्धकश्च तदा प्रचिक्षेपेन्द्रं हन्तुमेव च ।
ब्रह्मास्त्रं शंकरस्तच्च ब्रह्मास्त्रेण न्यवारयत् ॥४२॥
अन्धकस्तु तदा शंभुं हन्तुं खड्गेन वेगतः ।
दुद्रावाऽभिमुखः सैन्ये हाहाकारोऽभवत्तदा ॥४३॥
मर्तुकामो महेशस्य सन्निधौ यजगाम ह ।
शंकरं स जटायां वै जघानातिबलेन तु ॥४४॥
जटा द्वेधाऽभवत् तूर्णं खड्गो द्वेधाऽभवत्तथा ।
वीरभद्रेण च गदा ताडिता गदया सह ॥४५॥
अन्धको भूतले त्वर्धः प्रविष्टो विवरे तदा ॥४६॥
वीरभद्रधृतां लौहीं गदामाश्लिष्य चान्धकः ।
आकृष्टया तु गदया सहैव निर्ययौ तलात् ॥४७॥
वियुक्तः सन् हरं हन्तुं शक्तिं जग्राह चायसीम् ।
शंभुस्त्रिशूलमादाय चिक्षेपाऽसुरवक्षसि ॥४८॥
स विद्धोऽपि स्वयं तेन त्रिशूलेन महासुरः ।
ब्रह्मणो वरमाहात्म्यान्न च प्राणैर्वियुज्यते ॥४९॥
तस्य तपःफलं श्रेष्ठं रक्षत्येव पुनः पुनः ।
शतवर्षं फलाहारः शतवर्षं दलादनः ॥५०॥
शतवर्षं मूलभक्षी शतवर्षं सुमादनः ।
शतवर्षं कन्दभक्षी शतवर्षमयाचितः ॥५१॥
शतवर्षं जलाहारः शतवर्षं तु बाष्पपः ।
शतवर्षं वायुभक्षी शतवर्षं त्वभोजनः ॥५२॥
ततो वर्षसहस्रं वै जलान्तर्वर्तिसंस्थितः ।
तस्य वै तपसा जाताऽनलेन वारिशुष्कता ॥५३॥
जाता तत्र तु पृथिवी समदृश्यत लावणी ।
तत्र वर्षसहस्रं तु तृतीयं व्यगमत्तदा ॥५४॥
वल्मीकः सुमहान् जातो वंशस्तम्बाभ्यधिष्ठितः ।
प्रसन्नो विश्वसृट् तस्मै वरं वृणु समाह च ॥५५॥
स च वव्रे तव हस्तान्न मे शंकरहस्ततः ।
न वा विष्णोः कराद्वापि देवीभ्यो देवतादिभिः ॥५६॥
तव सृष्टौ भवेन्मृत्युश्चिरंजीवो भवामि च ।
अनेनैव तु देहेन दिव्यतां प्रव्रजामि च ॥५७॥
इतिश्रुत्वाऽऽह वेधास्तं तथाऽस्त्विति तथा भव ।
इत्येवं वरदानेन दिव्यकायो महासुरः ॥५८॥
नायं नाशमवाप्नोति पुनरुत्थाय वै बली ।
जघान च समाक्रुद्धो विशेषेण बहून् गणान् ॥५९॥
शंकरं ताडयामास गदापातैर्मुहुर्मुहुः ।
एवं युद्धं समभवच्चिरं स्वर्गे पिनाकिना ॥६०॥
त्रिशूलभिन्नो दैत्यः स यदा मृत्युं न गच्छति ।
उत्थायोत्थाय क्रुद्धस्तु प्रहारेणाऽर्दयद्बली ॥६१॥
शंकरस्तं सुविमृश्य मृत्युना परिवर्जितम् ।
ततो निर्भिद्य शूलाग्रे प्रोत्क्षिप्य गगनांगणे ॥६२॥
छत्रवद् धारयामास लम्बमानमधोमुखम् ।
क्षरन्तं रुधिरं भूमौ गात्रेभ्यो वर्ष्मसंभवम् ॥६३॥
चिरं तं स्थापयामास तथैव शूलधारया ।
ततः कालेन युद्धेन चर्मास्थिस्नायुमात्रकः ॥६४॥
धातुत्रययुतश्चायं नष्टधातुचतुष्टयः ।
अतोऽन्धको बलहीनः स्तुतिं चकार दीनवत् ॥६५॥
न त्वं देवो मया ज्ञातो वाग्दुष्टेन दुरात्मना ।
ईदृग्वीर्यसमोपेतस्तस्माद् युक्तं भवत्कृतम् ॥६६॥
अनुरूपं मदान्धस्य विवेकरहितस्य च ।
दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्यमित्यपि ॥६७॥
न तिष्ठति चिरं कालं यथाऽहं मदगर्वितः ।
पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ॥६८॥
त्राहि मां देव ईशान सर्वपापानि क्षालय ।
दुःखितोऽहं वराकोऽहं दीनोऽहं शक्तिवर्जितः ॥६९॥
त्रातुमर्हसि मां देव प्रपन्नं शरणे स्थितम् ।
सर्वपापक्षणे शंभो त्वयि सञ्जायते मतिः ॥७०॥
नाममात्रं तव कृत्वा मुक्तिमाप्नोति पापकृत् ।
तव पूजाविहीनानां दिवसा वन्ध्यताऽन्विताः ॥७१॥
तस्माद् भक्तं तव रूपं जानन्तं मोचयाऽत्र माम् ।
स्वगणं कुरु दिव्यं वै देहेनाऽनेन नाऽन्यथा ॥७२॥

गतो मे दानवो भावस्त्यक्तं राज्यं तथा प्रभो।
त्यक्ताः पुत्राः प्रपुत्राश्च विभवाश्च मयाऽद्य वै ॥७३॥
तस्य तद्वचनं श्रुत्वा दैत्यं विगतकल्मषम्।
उत्तार्य शनकैः शूलाच्छंभुर्विनयसंश्रितम् ॥७४॥
तस्य नाम तदा चक्रे भृंगिरीटिरिति प्रभुः।
अब्रवीच्च सदा मे त्वं वल्लभः संभविष्यसि ॥७५॥
तिष्ठ सौम्यतया सर्वगणेषु मम चाश्रितः।
इत्येवं जलसंस्कारात् कृत्वा तं नवविग्रहम् ॥७६॥
निनाय शंभुः कैलासं देवाद्याः स्वगृहं ययुः।
स्वर्गराज्यं यथायोग्यं प्राप्तवन्तः पुनः स्वकम् ॥७७॥
अथ दुष्टः सुतस्तस्याऽन्धकस्य दानवेश्वरः।
वृको नाम महाक्रूरः प्रविवेशाऽब्धिवारिषु ॥७८॥
इन्द्रो ययौ पुरीं रम्याममरावतीसंज्ञिकाम्।
यज्ञभागान् पुनर्लेभिरे सुदेवा धरातले ॥७९॥
वृको वर्षसहस्राणि तपस्तेपे पदा स्थितः।
अंगुष्ठमात्रसंस्थानः पञ्चसाहस्रवत्सरे ॥८०॥
ब्रह्मणो वरदानं च जरामरणवर्जितम्।
लेभे ततो ययावद्रिं सौराष्ट्रे रेवताचलम् ॥८१॥
ततः स्वर्गे ययाविन्द्रपदं जिगाय वै स्थितः।
शुक्रात्प्राप्याऽभिषेकं च स्वयमिन्द्रो बभूव ह ॥८२॥
तेन यज्ञादयः सर्वे देवकार्याणि यान्यपि।
जपहोमादयः पितृकार्याणि विप्रपूजनम् ॥८३॥
सर्वं विनाशितं स्वस्य कृतं करादिकं तथा।
स एव यज्ञभागानां भोक्ता नान्यः कदाचन ॥८४॥
यजनादिविधाता च दण्ड्य एव न संशयः।
इत्येवं शासनं चक्रे धर्मकर्मविरोधि सः ॥८५॥
सांकृतिं तपसां पूर्णशेवधिं स वृकासुरः।
गत्वा जघान तं तत्र शस्त्राणि नैव सर्वथा ॥८६॥
पस्पर्शुस्तस्य खड्गश्च शतधा खण्डशोऽभवत्।
सांकृतिस्तं शशापाऽथ शीघ्रं नाशोऽस्तु तेऽसुर ॥८७॥
शंकरश्च जघानैनं वृकं तत् कथितं च ते।
लक्ष्मि! कथाप्रसंगेन शृणु चान्यत्कथानकम् ॥८८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽन्धकासुरो युद्धे शंकरेण स्वत्रिशूले रोपितो भृंगिरीटिगणः कृतः, वृकस्तत्पुत्रोऽपि शंकरेण सूदित इत्यादिनिरूपणनामाऽष्टादशाऽधिकपञ्चशततमोऽध्यायः ॥५१८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि च राजानो देवा दैत्यास्तथाऽपरे।
मायामोहं समालभ्य रमन्ते प्राणदेवने ॥ १ ॥
गन्तव्यं त्वस्ति सर्वेषां पञ्चत्वे पञ्चवर्जितः।
स्वयं त्वन्यत्र पञ्चत्वे पञ्चैकत्वं प्रयाति च ॥ २ ॥
नहिं माया गता कैश्चिदात्मभिः सह नश्वरी।
अर्बुदाऽर्बुदवर्षायुर्जीविभिरपि कर्हिचित् ॥ ३ ॥
शृणु राजा पुरा त्वासीदिन्द्रद्युम्नइतिश्रुतः।
ब्रह्मण्यश्च शरण्यश्च साधुलोकप्रपालकः ॥ ४ ॥
यज्वा दानपतिर्दक्षः सर्वभूतहिते रतः।
न दुर्भिक्षं न च व्याधिर्न च चौरकृतं भयम् ॥ ५ ॥
न न्यूनता प्रजायां वै भोग्यद्रव्यस्य कस्यचित्।
असंख्याताः क्रतवश्च कृताः सम्पूर्णदक्षिणाः ॥ ६ ॥
अग्निष्टोमोऽतिरात्रश्च उक्थः षोडशिकस्तथा।
सौत्रामण्यथ पशुजश्चातुर्मास्यं व्रतक्रतुः ॥ ७ ॥
वाजपेयोऽश्वमेधश्च राजसूयश्च सोमपः।
पुण्डरीकश्च पुत्रेष्टिः सस्येष्टिः रुद्रवैष्णवौ ॥ ८ ॥
कारीरिवैश्वदेवश्चेत्याद्यान् यज्ञांश्चकार सः।
न तदस्ति धरापृष्ठे नगरं पत्तनं च वा ॥ ९ ॥
तीर्थे शाला वनं वापी यत्र सत्रं न तस्य वै।
सर्वत्रैवेन्द्रद्युम्नस्यान्नानि भुज्यन्त ईश्वरैः ॥१०॥
देवाः ऋषयो भृत्याश्च विद्यार्थिनश्च भूसुराः।
यतयः साधवः साध्व्यः सांख्ययोगिन्य इत्यपि ॥११॥
ब्रह्मचारी वानप्रस्थः सन्न्यासी त्यागवानपि।
अनाथो दीन इत्याद्या भुंजते तस्य सत्रके ॥१२॥
तीर्थे न विद्यते तादृग् यत्र तस्य न देवलम्।
तेन कन्याऽर्बुदाऽयुतानां दानमुत्तमम् ॥१३॥
कृतं प्रकारितं चापि सदा सन्तः सुपूजिताः।
दशमीदिवसे तस्य राज्ये वै गजपृष्ठगः ॥१४॥
दुन्दुभिस्ताड्यमानस्तु बभ्राम सकलं पुरम्।
उज्जयिन्यां च वै प्रातर्भावी श्रीहरिवासरः ॥१५॥
तनैव स्वशरीरेण ब्रह्मलोकं स्वयं गतः।
ततः कल्पसहस्रान्ते स प्रोक्तो ब्रह्मणा स्वयम् ॥१६॥
इन्द्रद्युम्न! धरां याहि न स्थातव्यं त्वयाऽत्र वै।
तव कीर्तिसमुच्छेदः संजातोऽद्य धरातले ॥१७॥
यावत्कीर्तिर्धरापृष्ठे तावत्स्वर्गे वसेन्नरः।
एतस्मात्कारणाल्लोकाः कुर्वन्ति नामलेखनम् ॥१८॥

वापीकूपतडागादौ देवतायतनादिषु ।
गच्छ शीघ्रं धरापृष्ठं स्वां कीर्तिं नूतनीकुरु ॥१९॥
कीर्तौ सत्यां मम सत्ये द्रष्टा त्वं भविताऽसि वै ।
ततः सः प्रययौ पृथ्वीं काम्पिल्यनगरं प्रति ॥२०॥
अथ पप्रच्छ देशः को नगरं किं जनान् तदा ।
ऊचुस्तेऽयं प्रदेशोऽस्ति त्वानर्तो नगरं तु वै ॥२१॥
काम्पिल्यं को भवानत्राऽपरिज्ञाता प्रवर्तते ।
राजा प्राह पुरा चाऽहमिन्द्रद्युम्नो महीपतिः ॥२२॥
देशे वेजहके रोचकाख्ये वै नगरेऽधिपः ।
स देशः क्व पुरं क्वाऽऽस्ते मया स्थेयं च तत्र वै ॥२३॥
जनाः प्राहुर्न विद्मस्तं नृपं देशं च पत्तनम् ।
राजा प्राह चिरायुष्कं प्रदर्शयत मां जनाः ॥२४॥
यदि कश्चिद्भवेदत्र यस्तं वेत्ति महीपतिम् ।
जनाः प्राहुर्दशकल्पजीवी संश्रूयते मुनिः ॥२५॥
नैमिषारण्यके पृच्छ मार्कण्डेयो वदिष्यति ।
राजा गत्वा व्योमपथा पप्रच्छ तं मुनीश्वरम् ॥२६॥
इन्द्रद्युम्नेति भूपोऽत्र त्वया दृष्टः श्रुतोऽथवा ।
मुनिः प्राह मया नैव दृष्टो वापि श्रुतोऽपि वा ॥२७॥
तस्य तद्वचनं श्रुत्वा राजा नैराश्यमासवान् ।
मुनिः प्राहः मया साकं समागच्छ हिमाचलम् ॥२८॥
तत्रास्ते च बको नाम ऋषिर्मत्तः पुरातनः ।
इति तौ व्योममार्गेण गत्वा पप्रच्छतुर्नतौ ॥२९॥
इन्द्रद्युम्नमहीपालस्त्वया दृष्टः श्रुतोऽपि किम् ।
बकः प्राह मम कालो विंशतिकल्पको गतः ॥३०॥
समये तत्र तत्पूर्वं नैव वेद्मि हि तं नृपम् ।
इन्द्रद्युम्नो बकं प्राह चिरायुष्ट्वं कथं तव ॥३१॥
बकः प्राह पुरा विश्वरूपोऽहमभवं द्विजः ।
कस्यचित्त्वथ कालस्य संक्रान्तौ मकरस्य वै ॥३२॥
कृष्णनारायणः पञ्चामृतेन स्नापितो मया ।
शंकरः स्नापितस्तत्र हरेः प्रसादवारिणा ॥३३॥
ततोऽहं राजपुत्रत्वं प्राप्तः पश्चिमभूतले ।
जातिस्मरः सदा पञ्चामृतैः कृष्णनरायणम् ॥३४॥
शिवं च पूजयाम्येवं प्रातर्वर्षसहस्रकम् ।
तेन पुण्यप्रभावेण जातोऽहं वै चिरस्थिरः ॥३५॥
कैलासे शंभुदास्यं चाऽकरवं वै ततः परम् ।
गालवस्याऽऽश्रमे गत्वा विद्याध्ययनमाचरम् ॥३६॥
तस्य पत्नी ऋतुस्नाता मया स्पृष्टा विकारतः ।
सा तु शशाप मां धूर्त ! बकोऽरण्यगतो भव ॥३७॥
तेनाऽहं बकरूपोऽस्मि ऋषिः कामस्वरूपधृक् ।
वर्ताम्यत्र महारण्ये बकाकारः सदा शुचिः ॥३८॥
जातिस्मरः सदा त्वत्र भजामि श्रीहरिं बकः ।
मार्कण्डेयस्तु तं प्राह वेत्सि त्वत्तोऽपि पूर्वजम् ॥३९॥
यदि कंचिद् दर्शयस्व येन पृच्छामि तं च तत् ।
बकः प्राह समायाहि मत्तश्चापि पुरातनः ॥४०॥
यत्रास्ति दयितो मेऽति ह्युलूकर्षिश्चिरस्थिरः ।
त्रयस्ते च गतास्तत्र कैलासे शिखरे हि मे ॥४१॥
सोपि दृष्ट्वा बकं मित्रं स्वागतेनाऽभ्यनन्दयत् ।
बकः पप्रच्छ चोलूकम् इन्द्रद्युम्ननृपं प्रति ॥४२॥
वद जानासि चेन्मित्र ! कदा जातः स भूपतिः ।
उलूकः प्राह मे कल्पाश्चत्वारिंशत्प्रसंख्यकाः ॥४३॥
व्यतीता न श्रुतो दृष्टस्त्विन्द्रद्युम्नो महीपतिः ।
इन्द्रद्युम्नस्तु तं प्राहोलूकता वै कथं तव ॥४४॥
उलूकः स्वकथामाह पुराऽऽसं ब्राह्मणो भुवि ।
ब्रह्मचारी हरभक्तो बिल्वपत्रैः प्रपूजकः ॥४५॥
ततो वर्षसहस्रान्ते ददौ स्वदर्शनं हरः ।
ददौ मे वैष्णवं मन्त्रं कृष्णनारायणेति च ॥४६॥
शंभुरदृश्यतां प्राप्तश्चाऽहं भार्गवसन्निधौ ।
आश्रमं तस्य संप्राप्तो विरूपोऽपि शुभाश्रयम् ॥४७॥
भार्गवस्याऽभवत्पत्नी नाम्ना सुदर्शना सती ।
गालवकन्यका सा च पातिव्रत्यपरायणा ॥४८॥
तस्यां त्वासीद् भार्गवस्य कन्यैका युवती शुभा ।
सा मया याचिता चाथ विवाहितापि वै ततः ॥४९॥
विरूपं मां सदा मत्वा कन्यका प्राह मातरम् ।
विरूपाय प्रदत्ताऽस्मि नाऽहं जीवितुमुत्सहे ॥५०॥
विषं वा भक्षयिष्यामि प्रवेक्ष्यामि हुताशनम् ।
अथ तां भार्गवः प्राह यस्मै दत्ता स्थिरा भव ॥५१॥
वेदधर्मः स एवाऽस्ति पतिं नारायणं स्मरेत् ।
संसेव्य स्वपतिं त्वं वै भविष्यसि दिवंगता ॥५२॥
अतः सेवस्व तं नाथं कुरु जन्म फलान्वितम् ।
इत्येवं शिक्षिता साऽपि नैव मेने हितं ततः ॥५३॥
न मां वै सेवते रात्रौ ततो मया प्रसह्य सा ।
अर्धरात्रे हृता तस्याः पितुर्गृहान्ममाश्रमम् ॥५४॥
प्रातर्विप्रो जजागार पिता तस्यास्तथा प्रसूः ।
क्वाऽसौ सा दुहितेत्येवं बभ्रमतुर्ममाश्रमम् ॥५५॥
आगत्यैनां ददृशतुः सापि रुरोद वीक्ष्य तौ ।
ततः कोपपरीतात्मा मां प्रोवाच स भार्गवः ॥५६॥

निशायां तु त्वया पत्नी मम पुत्री हृता यतः ।
निशाचरो भवानस्तु उलूकश्चेति शापतः ॥५७॥
उलूकोऽस्मि हि सञ्जातो जातिस्मरश्च सर्वदा ।
कामरूपधरश्चास्मि वर्तामि चाऽत्र पर्वते ॥५८॥
पत्नी मे स्वपितुर्हर्म्ये स्थिता नारायणाश्रिता ।
ययौ श्रीमत्कृष्णनारायणदास्यप्रदं पदम् ॥५९॥
एवं मे कौशिकत्वं वै सञ्जातं चात्र पर्वते ।
अखण्डबिल्वपत्रैस्तु पूजनस्य फलं परम् ॥६०॥
चिरायुष्ट्वं तु मे दिव्यरूपधारित्वमित्यपि ।
बकः प्राहेतरं कंचिच् चेज्जानासि चिरायुषम् ॥६१॥
वद तत्र प्रगच्छामः पृच्छामस्तं नृपं प्रति ।
उलूकः प्राह तु मया सार्धमागच्छताऽत्र वै ॥६२॥
गन्धमादनशिखरे गृध्रर्षिर्वर्तते महान् ।
चिरन्तनो यदि तं च नृपं ज्ञास्यति पूर्वजम् ॥६३॥
इत्युक्त्वा तान् समादायोलूको गृध्रं समाययौ ।
गृध्रर्षिस्तांस्तथा दृष्ट्वा प्रहृष्टः सम्मुखं ययौ ॥६४॥
स्वागतं कृतवांश्चापि पृष्ठवांश्चाश्रमे ऋतम् ।
उलूकः प्राह मे मित्रं नाडीजंघो बको ह्ययम् ॥६५॥
यस्य मित्रं तु मार्कण्डस्तस्याऽयं नृपतिः सुहृत् ।
अयं चात्राऽऽगतः प्रष्टुं पुरेन्द्रद्युम्नभूपतिः ॥६६॥
आसीत्कश्चिन्नवेत्येवं वेत्तुं चास्ति समागतः ।
गृध्रः प्राह तु मे कल्पा अशीतिः प्रययुः खलु ॥६७॥
न दृष्टो न श्रुतः कोऽपि क्वाऽपीन्द्रद्युम्नभूपतिः ।
तस्य तद्वचनं श्रुत्वा सोऽपि राजा सुदुर्मनाः ॥६८॥
मनसा चिन्तयामास मरणे कृतनिश्चयः ।
पप्रच्छ गृध्रं जातोऽसि चिरायुस्त्वं कथं वद ॥६९॥
गृध्रः प्राह पुरा चैत्यवृक्षेऽहं न्यवसं सुखम् ।
वसन्ते च जनास्तं चाऽपूजयन् फलितं द्रुमम् ॥७०॥
कामिन्यस्तत्र वृक्षे च दोलां बबन्धुरुत्तमाम् ।
तत्र संस्थाप्य च कृष्णनारायणं मुहुर्मुहुः ॥७१॥
सर्वा आन्दोलयामासुः कुमार्यः सधवास्तथा ।
अहं तु कौतुकाविष्टो रात्रौ तत्र स्वयं स्थितः ॥७२॥
करोम्यान्दोलनं ताभिः रमामि विरमामि च ।
जनैर्दृष्टस्ताडितश्च पञ्चत्वं प्रासवांस्ततः ॥७३॥
जातिस्मरोऽभवं राजा नाम्ना ख्यातः कुशध्वजः ।
कृष्णनारायणं नित्यं चान्दोलयामि पूर्ववत् ॥७४॥
शंभुं चान्दोलयाम्येव शिवरात्रौ पुनः पुनः ।
जन्माष्टम्यां तथानादिश्रीकृष्णं न्यस्य तत्र च ॥७५॥
आन्दोलयामि सततं नरनारायणं तथा ।
एवं प्रकुर्वतो मे श्रीशंभुः प्रत्यक्षतां गतः ॥७६॥
भवते वरदश्चास्मि वैष्णवाय वरं वृणु ।
इत्युवाच हरो मह्यं मयाऽपि च तदाऽर्थिनम् ॥७७॥
कैलासे मे देहि वासं वैष्णवानां समागमे ।
वैष्णवस्य च ते नित्यं करिष्यामि सुसेवनम् ॥७८॥
एवमुक्तो महादेवो मां कैलासं निनाय सः ।
कदाचित्त्वथ कालस्य विमानेन निजेच्छया ॥७९॥
मया च भ्रममाणेन दृष्टाऽग्निवेश्यपुत्रिका ।
जले प्रविष्टा स्नानार्थं त्वालिभिर्बह्वीभिर्युता ॥८०॥
मयाऽवतीर्य सा बाला पत्न्यर्थं याचिता तदा ।
कामभावेन सा नैव व्यलोकयत्तु मां प्रति ॥८१॥
मयोद्धृत्य जलात् सा च बलान्नीता विमानके ।
तदा तद्रोदनं श्रुत्वा तत्पिता मां शशाप ह ॥८२॥
गृध्रवद् बालिकां वं चाऽस्पृशः सद्व्रतशालिनीम् ।
तस्माद्गृध्रो भव चात्र विमानं ते प्रणश्यतु ॥८३॥
अहं गृध्रस्तदा जातो विमानं नष्टमेव मे ।
बाला चाऽकृतभोगा सा ययौ स्वं पितरं प्रति ॥८४॥
एतद्वै सर्वमाख्यातं सखे ! गृध्रत्वकारणम् ।
कृष्णनारायणप्रीत्या चिरायुश्चास्मि भूतले ॥८५॥
इन्द्रद्युम्नं न जानामि वद किं करवाणि ते ।
इतिश्रुत्वा नृपतिः स निराशश्च हुताशने ॥८६॥
प्रवेशं चेच्छति तत्र मरणं कर्तुमिच्छति ।
तावद् गृध्रस्तु तं प्राह वह्निं मा विश भूपते ॥८७॥
अहं ते कीर्तयिष्यामि ममाऽप्यस्ति चिरन्तनः ।
स ज्ञास्यति मम मित्रं हीन्द्रद्युम्नं पुरातनम् ॥८८॥
यामस्तत्र तु कमठो मान्थरकोऽस्ति यत्र च ।
मानसे सरसि ख्यातस्तत्रैव कृतकेतनः ॥८९॥
सर्वे ययुस्तत्कमठं सेवमानं शुभातपम् ।
तीरस्थं सरसस्तत्र तेऽवतीर्णास्ततोऽम्बरात् ॥९०॥
तावत् स कच्छपः शीघ्रं सलिलेऽन्तर्जगाम ह ।
गृध्रस्तं निजमित्रं च प्राह कस्मात् प्रयासि भोः ॥९१॥
मित्रं दृष्ट्वा कथं यासि भीत इव विलोक्यसे ।
सुनीचोऽपि गृहं प्राप्तो भवेत्पूज्यतमः सताम् ॥९२॥
अथ कूर्मो जलमध्ये शिरोमात्रबहिर्मुखः ।
प्रत्युवाच परं मित्रं करोमि स्वागतं तव ॥९३॥
तव मित्रस्य च तथा मित्रमित्रादिमाननम् ।
परं त्वयं नृपः कश्चित् पञ्चमो यः प्रदृश्यते ॥९४॥

तस्येन्द्रद्युम्नसंज्ञस्य भयाद् यामि जलान्तरम् ।
अनेन तु पुरा दग्धा पृष्ठिर्मे तु मखाग्निभिः ॥९५॥
नाऽद्याऽपि सा क्षतिः संपूर्यते पृष्ठगता मम ।
एनं दृष्ट्वा यज्ञकीर्तिं स्मृत्वा पृष्ठक्षतिं तथा ॥९६॥
विद्रवामि जले मित्र ! करोमि स्वागतं तु वः ।
इन्द्रद्युम्नस्य राजर्षेः कीर्तिसंश्रवणं महत् ॥९७॥
सहस्रसंख्यया राज्ञा सर्वे वै क्रतवः कृताः ।
नाऽद्यापि कीर्तिपुण्ये च नश्येतेऽस्य तु भूपतेः ॥९८॥
पञ्चाशच्च शतं कल्पा मम त्वत्र जले गताः ।
तत्पूर्वं रोचके नाम्ना पत्तने चाऽभवं तदा ॥९९॥
अस्य भयेन तत् त्यक्त्वा वसाम्यत्र सरोवरे ।
इत्युक्त्वा स बहिर्गत्वाऽकरोत् सन्मानन बहु ॥१००॥
संभाषां विविधां कल्पान्तरीयां चक्रिरे मिथः ।
कूर्मो जातिस्मरः कामरूपधृग् देवरूपवान् ॥१०१॥
सत्कारं भोजनाद्यं च कल्पयायास तत्क्षणम् ।
इन्द्रद्युम्नः प्रहृष्टोऽभूत् पप्रच्छत कच्छपं ततः ॥१०२॥
चिरायुष्टं कथं तेऽस्ति रोचकात् पूर्वमेव किम् ।
कुत्र वासश्च ते त्वासीत् कुत्र जन्म व्रतं तव ॥१०३॥
वद मे जायते चात्यानन्दो मित्रस्य दर्शनात् ।
श्रुत्वैवं कच्छपः प्राह शृणु राजन् पुराभवम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने इन्द्रद्युम्नराज्ञः पृथिव्यां मार्कण्डेयबकर्षिघूकर्षिगृध्रर्षिकमठर्षिकृतकीर्तिनवीनत्वं, प्रागपराद्धजन्यबकादिजन्मानि, पुण्यकृतचिरजीवित्वादि चेत्यादिनिरूपणनामा एकोनविंशदधिकपञ्चशततमोऽध्यायः ॥५१९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कच्छपः सः प्रोवाच प्राग्भवं स्वकम् ।
इन्द्रद्युम्नमहाराज ! शृणु दृष्टं मया तु यत् ॥ १ ॥
अहं वैकुण्ठधामस्थो नारायणस्य पार्षदः ।
वसुहारीतनामाऽसं चतुर्बाहुर्मनोहरः ॥ २ ॥
सुवर्णवाटिकायां तु नित्यायां वै सरोवरे ।
नित्यं कमलपुष्पाणि समाहर्तुं नियोजितः ॥ ३ ॥
लक्ष्म्या माला कृता नित्यमर्प्यते श्रीहरेर्गले ।
मया त्वानीय पुष्पाणि दीयते नित्यदा श्रियै ॥ ४ ॥
एकदा स्नानमग्नोऽहं विचिन्वन् कमलानि तु ।
सुचिरं कृतवाँस्तत्र सरस्येवाऽऽप्लवं रतः ॥ ५ ॥
मालायाः समयस्तत्र व्यतीतश्च ततः परम् ।
लक्ष्मीः स्वयं समागत्य प्राह मां किं करोषि रे ॥६॥
चिरायते तु पूजायां जले मग्नोऽसि दुर्मते ।
जले एव सदा तिष्ठ न मे तेऽस्ति प्रयोजनम् ॥ ७ ॥
करोषि तरणं कूर्मसमं कूर्मः सदा भव ।
इत्युक्तः कूर्मतां प्राप्तो वैकुण्ठस्य सरोवरे ॥ ८ ॥
सृष्टौ तु जायमानायां गंगा सत्ये समागता ।
तस्माद्वै ब्रह्मसरसस्तेनाऽहं च समागतः ॥ ९ ॥
ततोऽन्यपार्षदस्तत्र कमलार्थे च योजितः ।
नाम्ना त्वनन्तशीलः सः कदाचिद् जलमध्यगः ॥१०॥
प्रसर्पन् सत्यलोकं वै जलेन सह चागतः ।
ब्रह्मणा स विष्णुरूपौ मत्वा संपूजितो मुदा ॥११॥
अनन्तशीलस्तत्राऽऽह प्रसन्नोऽस्मि वरं वृणु ।
ब्रह्मा प्राह मया यावद्ब्रह्माण्डानां तु कोट्यः ॥१२॥
क्रियन्ते सर्षपतुल्यास्तान् सदा धारय प्रभो ।
तथास्त्विति तदा प्राह किन्तु मे देहि वेदिकाम् ॥१३॥
यत्र स्थित्वा धारयामि स्थिरो ब्रह्माण्डमण्डलम् ।
सत्यलोके च गंगायां तदा चाहं ह्युपस्थितः ॥१४॥
आसं तत्रैव गंगायां ब्रह्मा प्राह च मां तदा ।
कच्छप ! त्वं वहाऽनन्तं ह्यभीष्टं करवाणि ते ॥१५॥
मयोक्तं च यथा लक्ष्मीनारायणस्य दासता ।
भवेन्मे तु तथा ब्रह्मन् कुरु तत्पार्षदोऽस्म्यहम् ॥१६॥
वेधास्तथाऽस्त्विति प्राह मया शेषश्च संधृतः ।
अनन्ताख्यो मम पृष्ठेऽनन्तेन च फणोपरि ॥१७॥
ब्रह्माण्डानि धृतान्येव जायन्ते विरमन्ति च ।
ब्रह्मणा तु तपस्तप्तं मम लाभस्य सिद्धये ॥१८॥
नारायणस्य दास्यस्य प्राप्त्यर्थे श्रीहरिस्तदा ।
ब्रह्माणं च समागत्य वर्षान्ते प्राह सन्मुखः ॥१९॥
वरं वरय भद्रं ते कथं स्मृतोऽस्मि मे वद ।
ब्रह्मा प्राह हरे कृष्णनारायण जगत्प्रभो ॥२०॥
पार्षदस्ते मया प्राप्तो वसुहारीतसंज्ञकः ।
लक्ष्मीशापेन कमठस्वरूपं लब्धवाँस्तु यः ॥२१॥
मया सम्प्रार्थितोऽनन्तस्तव श्रेष्ठः सुपार्षदः ।
ब्रह्माण्डानां धारणार्थे तेनाऽर्थितं शुभासनम् ॥२२॥
तदा स कमठः सम्यगाधारो वै मयाऽर्पितः ।
अनन्ताय च कमठो वव्रे नारायणाश्रयम् ॥२३॥
दास्यं यथा भवेत् तस्माद् देहि दास्यं च भक्तयोः ।
पार्षदयोरुभयोस्त्वं कृपां कुरु तथा प्रभो ॥२४॥

नारायणस्तदा प्राह तथाऽस्त्विति पुनः पुनः ।
अन्धकाद्यसुरत्रातान्नाशयित्वा क्षणान्तरे ॥२५॥
परिश्रमविनाशार्थं क्षीरोदे सागरे तदा ।
शेषस्य गेन्दुकं कृत्वा कच्छपस्य तु पृष्ठके ॥२६॥
शयिष्ये तत्र मे दास्यं कच्छपाऽनन्तयोः सदा ।
दास्ये चेति वरं दत्वा नारायणस्तिरोऽभवत् ॥२७॥
आगतः श्रीहरिस्त्वत्र लक्ष्मीं नीत्वा पयोदधौ ।
यत्राऽऽहं कच्छपो नित्यं प्रतिष्ठामि महाजले ॥२८॥
शेषोऽनन्तो मम पृष्ठे पर्यंकगेन्दुकोऽभवत् ।
तत्र शेते जगन्नाथः कृष्णनारायणो हरिः ॥२९॥
दास्यं द्वाभ्यां तत्र लब्धं नित्यं श्रीहरिपादयोः ।
ब्रह्मणां तु शते नष्टे त्वेकदा लोमशो मुनिः ॥३०॥
क्षीरोदे श्रीकृष्णनारायणस्य दर्शनाय वै ।
समागतो मया दृष्टः पृष्टश्च कुशलं प्रति ॥३१॥
गृहादिकं सुखं चास्ते प्रत्युत्तरं जगाद सः ।
ब्रह्मणां दशकं नष्टं सन्निधौ मम कच्छप ॥३२॥
ब्रह्मणां तु शते नष्टे मरिष्यामि क्षणान्तरे ।
स्वल्पायुश्च कथं कुर्याद् गृहं यन्नश्वरं क्षणात् ॥३३॥
ततोऽहं मुनिना सार्धम् आज्ञया श्रीहरेस्तथा ।
रूपं द्वितीयं धृत्वैव स्वल्पं वै शतयोजनम् ॥३४॥
तीर्थयात्राकृतेऽगच्छं ब्रह्माण्डान्तःप्रवीक्षितुम् ।
सोऽहं लोमशमुनिना सार्धं पातालभूमितः ॥३५॥
उपर्युपरि चाऽगच्छं तथा तथैव वायुना ।
देह मे तु स्वभावेन परं संकोचतां गतम् ॥३६॥
पृथ्व्यां कृष्णमणिजन्ये सौराष्ट्रे त्वश्वपट्टके ।
व्याघ्रारण्यान्तरे श्रेष्ठे मिष्टोदे वै सरोवरे ॥३७॥
पञ्चयोजनकाऽऽयामे लोमशस्याऽऽश्रमे तटे ।
पूर्वस्मिन् रैवताद्भागे विश्रान्तिं चाऽलभं क्षणम् ॥३८॥
तत्र कुंकुमवाप्यां च कम्भराकृष्णमन्दिरे ।
पत्नीव्रतो ब्राह्मणश्च कृष्णांशो वर्तते सदा ॥३९॥
श्रीः स्वयं कम्भरालक्ष्मीः कृष्णो गोपालकृष्णकः ।
कृष्णनारायणो यत्र मन्दिरे वर्तते सदा ॥४०॥
एकादश तथा रुद्रा अष्टौ च वसवस्तथा ।
आदित्या द्वादश चापि देववैद्यौ च सर्वदा ॥४१॥
त्रयस्त्रिंशच्च ते देवाः कल्पे कल्पे नवा नवाः ।
नित्यं तिष्ठन्ति यद्द्वारे तत्र तीर्थोत्तमे शुभे ॥४२॥
पत्नीव्रतो महाविष्णुसमायुर्वीक्षितो मया ।
लोमशेनाऽर्चितो विप्रो मयापि त्वर्चितस्तदा ॥४३॥
ब्रह्मणां कोट्यो यस्य सन्निधौ लीनतां गताः ।
यस्य वंशाश्चतुर्दशलोकेषु ब्राह्मणा मताः ॥४४॥
सृष्ट्यन्तरेऽपि तस्यैव वंशास्ते ब्राह्मणाः सदा ।
तस्याऽहं दर्शनं कृत्वा न्यवसं लोमशाश्रमम् ॥४५॥
तदासीन्नृपतिरिन्द्रद्युम्नोऽत्र भूतले महान् ।
सप्तद्वीपसमुद्राणां पृथ्वीनां सार्वभौमकः ॥४६॥
रोचकायां राजधान्यां रैवताचलसन्निधौ ।
पूर्वस्यां वै दिशि व्याघ्रारण्यभूमौ बभूव सः ॥४७॥
द्वितीया राजधान्यस्य महाकालवनेऽभवत् ।
तृतीयाऽऽसीत् तथा श्रीमत्पुरुषोत्तमपूर्गता ॥४८॥
वेधसो वर्तमानस्य चत्वारिंशत्समासु च ।
गतासु भूतले ह्यासीदिन्द्रद्युम्नो महीपतिः ॥४९॥
स च दृष्ट्वा स्वके तीर्थे त्वश्वपट्टसरोवरे ।
कच्छपं मां महाकायं योजनाऽर्धसुवर्तुलम् ॥५०॥
लोमशस्याऽधीनकं च मत्वा ज्ञात्वा ऋतुक्षमम् ।
वव्रे राजा लोमशान्मां यज्ञपीठार्थमुत्तमम् ॥५१॥
लोमशेन तथास्त्वेव कृत्वा दत्तोऽहमेव यत् ।
मम पृष्ठो भूभृता वै बहुवर्षाणि सन्ततम् ॥५२॥
अनेन तु कृता यज्ञा लोमशेन प्रकारिताः ।
ततः पृष्ठं मम दग्धं मया संप्रार्थितो मुनिः ॥५३॥
लोमशः सुदयालुर्मां प्राह गच्छतु मानसम् ।
सरो हिमगिरेः प्रान्ते ततोऽहं त्वत्र चागतः ॥५४॥
अत्र वै ब्रह्मणो वर्षपञ्चकं मे गतं ध्रुवम् ।
कल्पास्तु ब्रह्मणो मेऽत्र गतानि तानि वै शृणु ॥५५॥
अष्टादशसहस्राणि तथा च पञ्चविंशतिः ।
मानसेऽत्र गताः कल्पास्तान् स्मरामि यथातथम् ॥५६॥
द्वितीयेन स्वरूपेण चात्र तिष्ठामि सर्वदा ।
पृष्ठं मे निरुजं सम्यग् जातं हिमाद्रिसंश्रयात् ॥५७॥
लोमशर्षिर्गुरुर्मेऽस्ति गच्छ तत्राश्रमं शुभम् ।
राजँस्त्वं प्रथमं याहि पुरुषोत्तमसत्पुरीम् ॥५८॥
यत्र त्वया जगन्नाथः स्वहस्तेन पुराऽऽहितः ।
ततो याहि महाकालवनं यत्र तव गृहम् ॥५९॥
ततो याहि सुराष्ट्रं यत्राऽश्वपट्टसरोवरम् ।
कुंकुमवापिका यत्र लोमशो वर्तते मुनिः ॥६०॥
यत्र वै श्रीकृष्णनारायणो लक्ष्मीपतिः स्वयम् ।
पार्वतीमाणिकीराधाप्रभास्वामी पुमुत्तमः ॥६१॥
सप्तभौमे महासौधे दिव्ये संराजते हरिः ।
गच्छ राजँस्तत्र सेवां कृत्वा याहि ततः परम् ॥६२॥

सत्यलोकं कल्पकालं पुनर्द्रक्ष्यसि मां ततः ।
एभिर्वै मुनिभिः सार्धं यशस्तेऽव्याहतं भुवि ॥६३॥
श्रुत्वा यास्यसि सत्यं तत्कल्पं प्रति भुवम् ।
कच्छपस्य हितं मिष्टं वाक्यं संगृह्य ते ततः ॥६४॥
निवृत्ताश्च ततः स्थानात् स्वस्वस्थानि भेजिरे ।
इन्द्रद्युम्नः समायातो लोमशं प्रति तत्क्रमात् ॥६५॥
यस्य वै पार्श्वतो दिक्षु चतुर्योजनभूतले ।
माया नास्ति न वै रागद्वेषौ कुतस्तु वासना ॥६६॥
ब्रह्मरूपाश्रमं प्राप्य राजा तृप्तोऽभवत्तदा ।
लोमशस्य मुखात् सर्वं श्रुत्वा कृष्णनरायणम् ॥६७॥
सम्पूज्य कम्भरालक्ष्मीं श्रीमद्गोपालकृष्णकम् ।
त्रयस्त्रिंशत्सुराँश्चाप्याश्रयोवास स वत्सरम् ॥६८॥
शुश्राव सत्कथास्तत्र लोमशस्य मुखाम्बुजात् ।
लक्ष्मीनारायणसंहिताया नित्यं नवा नवाः ॥६९॥
तत्र शुश्राव च यज्ञान् स्वकृतान् लोमशाननात् ।
तथा श्रीमज्जगन्नाथप्रतिष्ठां स्वकृतां शुभाम् ॥७०॥
तथा सर्वत्र सत्राणि त्वन्नानां भोजनानि च ।
दानानि गजगोवाजिहिरण्यरत्नयोषिताम् ॥७१॥
पृथिव्यां सन्ति यावन्ति वस्तूनि तावतामपि ।
दानानि जपपूजादि श्रुतवाँश्च गुरोर्मुखात् ॥७२॥
ज्ञानं चात्मप्रदं स्वर्गप्रदं मोक्षप्रदं तथा ।
लोमशस्य मुखात् सर्वं लब्धवाँश्चात्मदर्शनम् ॥७३॥
लोमशेन श्रुतं यच्छ्रीकृष्णनारायणाननात् ।
शृणु लक्ष्मि ! प्रवक्ष्यामि तेऽहं भक्तौपयौगिकम् ॥७४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मानससरोवरस्थेन कच्छपेन स्वस्य शेषस्य च विष्णोः पार्षदत्वं कथितं, ततः कुंकुमवापीक्षेत्रे लोमशाश्रमेऽश्वपट्टसरोवरे वासः, आयुः, इन्द्रद्युम्नयज्ञाश्चेत्यादिवृत्तान्तकथननामा विंशत्यधिकपञ्चशततमोऽध्यायः ॥ ५२० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! चेन्द्रद्युम्नः पप्रच्छ लोमशम् ऋषिम् ।
ऋषे ! शान्तिकरं ज्ञानं कथं जायेत तद्वद ॥ १ ॥
आत्मशान्तिं विना सर्वं जालं चोद्वेजकं मतम् ।
आत्मशान्तिसमो लाभो नान्यः कश्चिच्च तं वद ॥ २ ॥
लोमशः श्रीकृष्णनारायणं स्मृत्वा जगाद तम् ।
शृणु राजन् प्रवक्ष्यामि श्रीहरेः स्मरणं कुरु ॥ ३ ॥
अक्षरं ब्रह्म परमं धाम व्यापकमुत्तमम् ।
शाश्वतं यत्र वित्यैस्तु मुक्तैः सेव्यः परात्परः ॥ ४ ॥
श्रीहरी राजते श्रीमत्कृष्णनारायणो हरिः ।
दिव्यो युवाऽतिबलवान् रूपरूपानुशेवधिः ॥ ५ ॥
कोटिकोट्यर्कतेजांसि सदा यस्याऽणुभागतः ।
प्रकाशन्ते सर्वसृष्टिगतो मुक्ताभिसेवितः ॥ ६ ॥
अनन्तरूपधृक् श्रीमत्पुरुषोत्तम एव सः ।
अक्षरादिसमस्तानां स्वामी नारायणश्च सः ॥ ७ ॥
अक्षरातीत एवाऽसौ द्विभुजो दिव्यविग्रहः ।
श्रोतव्यश्चापि मन्तव्यो ध्येयश्च श्रीपतिः प्रभुः ॥ ८ ॥
नेत्रे कज्जलसंशोभे पद्मपत्रायतेऽरुणे ।
प्रेम्णा च निभृते शश्वद्भावगर्भेऽतिकर्षणे ॥ ९ ॥
स्वर्णरोम्णां राजिभिश्च विराजितेऽतिमञ्जुले ।
हृदयस्य तु सर्वस्वं निवेदयत आदरात् ॥१०॥
भ्रूकुटिभ्यां कामकोटिशरवेधनकारके ।
आत्मानन्दभृते स्निग्धे रसिकानां रसान्विते ॥११॥
तारकापानपीयूषप्रदे मीनसुचञ्चले ।
आकर्णान्तगतप्रान्ते कोणकौशल्यसंभृते ॥१२॥
रक्तरेखान्विते श्वेते परितः स्फटिकोज्ज्वले ।
सर्वदृश्यप्रतिबिम्बान्विते ध्येये मनोहरे ॥१३॥
नासिकां तिलपुष्पाभां पक्वबिम्बसमौष्ठकौ ।
तनुरेखाचमत्कारकरश्मश्रुविभूषितौ ॥१४॥
स्वल्पनिम्नं ततः सम्यगुच्छ्रायं चिबुकं स्मरेत् ।
कपोलौ सूर्यचन्द्राभौ भालं बिन्दुविराजितम् ॥१५॥
स्मरेत् सतिलकं चातिप्रोज्ज्वलं चैकरेखकम् ।
केशाँश्च मञ्जुलान् स्निग्धान् वक्रान् कृष्णाँश्च पिंगलान् ॥१६॥
स्मरेत् मुकुटप्रभया प्रोज्ज्वलान् दीर्घरश्मिकान् ।
कर्णौ शष्कुलिकाशोभौ रत्नहीरककुण्डलौ ॥१७॥
ध्यायेत् स्वामिनि परिधिव्याप्तं मुखं च तेजसाम् ।
कोटिकन्दर्पकान्त्यादिराजितं हृदयंगमम् ॥१८॥
कम्बुकण्ठं दृढपुष्टस्कन्धौ ध्यायेन्मनोहरौ ।
भोगिभोगसमौ बाहू स्वर्णचम्पकसूज्ज्वलौ ॥१९॥
करिहस्ताभकरभौ पद्माभे हस्तयोस्तले ।
नखचन्द्राँश्च धवलान् योग्यरक्तान् समुन्नतान् ॥२०॥
सरेखाङ्गुलिकाः सर्वा अङ्गुष्ठौ च प्रकोष्ठकौ ।
ध्यायेद् वक्षःस्थलं लक्ष्मीचिह्नयुक्तं समुन्नतम् ॥२१॥
विशालं श्रीवत्सचिह्नं रोम्णां दक्षिणवर्तनम् ।
स्तनं द्वयं तथा ध्यायेदुदरं त्रिवलिश्रितम् ॥२२॥

निम्ननाभिं जघनं च पार्श्वद्वयं समुज्ज्वलम् ।
कटिं सिंहकटितुल्यां ध्यायेल्लिंगं नितम्बकौ ॥२३॥
उरू ध्यायेद् गजहस्तसमौ जानू सुवर्तुलौ ।
जंघे रम्ये पत्तले च पद्मपत्राभपाण्डुरे ॥२४॥
अंगुलीर्नखचन्द्राढ्या ध्यायेद् भूषाम्बराणि च ।
हारराजीन् दन्तपंक्तिं हृदयं मानसं स्मरेत् ॥२५॥
भावनां च गुणान् सर्वैश्वर्याणि च क्रियां स्मरेत् ।
एवं वै श्रीकृष्णनारायणमूर्तेर्हि चिन्तनात् ॥२६॥
शान्तिर्वै शाश्वती राजन् जायेतैव न संशयः ।
ततो ध्यायेद्धरौ तस्मिन् श्रीकृष्णं राधिकां तथा ॥२७॥
ध्यायेन्नारायणं लक्ष्मीं ब्रह्माणं च सरस्वतीम् ।
सावित्रीं चापि गायत्रीं शिवं दुर्गां च पार्वतीम् ॥२८॥
ध्यायेद् गंगां च विष्णुं च लक्ष्मीं वृन्दां च तुलसीम् ।
ध्यायेत्तत्राऽक्षराऽतीते व्यूहाँश्च विभवाँस्तथा ॥२९॥
अर्चा अंशकलावेशान् विभूतीश्च हरौ स्मरेत् ।
क्षीरस्थं श्वेतभूसंस्थं हिमस्थं स्वगतं स्मरेत् ॥३०॥
सर्वदेहिगतं तं वै विष्णुं ध्यायेज्जनार्दनम् ।
नरे नार्यां सदा तं वै पश्येत् कृष्णनरायणम् ॥३१॥
सत्ये स्वर्गे क्षितौ व्योम्नि पाताले हृदयाम्बरे ।
पुत्रे पत्न्यां पशौ कान्ते जडे चेतनवर्गके ॥३२॥
दृश्येऽदृश्ये प्रिये ग्राह्ये विप्रिये वर्ज्यवस्तुनि ।
ध्यायेद् वै श्रीकृष्णनारायणं गोपालबालकम् ॥३३॥
कम्भरालालितं दिव्यं त्वश्वपट्टसरोऽन्तिकम् ।
लोमशेन सदा ध्यातं ब्रह्मरुद्रादिवन्दितम् ॥३४॥
राधालक्ष्मीरमापद्माप्रभापद्मावतीश्वरम् ।
माणिकीपार्वतीनाथं जयेशं ललितापतिम् ॥३५॥
मुक्तेशं चावतारेशं सच्चिदानन्दविग्रहम् ।
श्रीकृष्णवल्लभं नाथं जगज्जन्मादिकारणम् ॥३६॥
सिद्धिसंसेवितं ज्ञानानन्दसम्पत्प्रशेवधिम् ।
ध्यायेत् कान्तस्वरूपं तं स्वामिनं हृदयाम्बुजे ॥३७॥
एकतानतया ध्यायेन्नरो नारी पतिं प्रभुम् ।
कुंकुमवापिकातीर्थप्रसेवितं परेश्वरम् ॥३८॥
ध्यायेत्स्मरेज्जपेन्नित्यं नमेत् संसेवयेत्तथा ।
पूजयेदर्चयेत्पादपद्मे धृतामृतं पिबेत् ॥३९॥
प्रसादं संप्रसेत्तस्य सुगन्ध्यादि समावहेत् ।
प्रदक्षिणां स्तुतिं कुर्याद्दीपं नैवेद्यमर्पयेत् ॥४०॥
आरार्त्रिकं प्रकुर्याश्च सर्वस्वार्पणमाचरेत् ।
एवमात्मा समर्प्यश्चार्पणीयः सर्वदा हरौ ॥४१॥
कामः क्रोधः सुखं स्नेहो लोभो मोहादयस्तथा ।
दया दानं च दाक्षिण्यं दमनं दोषमण्डलम् ॥४२॥
सर्वं समर्पयेत् तस्मै तत्र क्षिपेन्निरन्तरम् ।
तेन वह्नौ यथा धातुस्तथा शुद्ध्यति मानवः ॥४३॥
इन्द्रद्युम्न ! फलं हित्वा कुर्याद् दास्यं सदा हरेः ।
अहं श्रीमत्कृष्णनारायणदास्येन दिव्यताम् ॥४४॥
अलभं चिरजीवित्वं ब्रह्मतुल्यं वपुस्तथा ।
जीवन्मुक्तिं तथैश्वर्यसिद्धीर्वैराग्यसम्पदम् ॥४५॥
सन्तोषं चाऽलभं तृष्णाक्षयं मायाविवर्जितम् ।
मायालेपादिराहित्यं तथाऽऽवरणहीनताम् ॥४६॥
क्लेशान् कर्माशयान् दग्ध्वा विचरामि हरिर्यथा ।
लोष्ठं काष्ठस्य योगेन तरत्येव जलार्णवम् ॥४७॥
कृष्णनारायणसंगाल्लोमशो लेपशातनः ।
ब्रह्ममुक्तो वर्ततेऽत्र कल्पानां कालशातनः ॥४८॥
ब्रह्मादिस्तम्बपर्यन्तमसंख्यं विश्वमेव यत् ।
सर्वं चराऽचराधारं यः सृजत्येव लीलया ॥४९॥
ब्रह्मेशशेषधर्माश्च दिनेशश्च गणेश्वरः ।
मुनीन्द्रवर्गो देवेन्द्रो ध्यायति यमहर्निशम् ॥५०॥
वेदाः स्तुवन्ति यं कृष्णनारायणं जगत्प्रभुम् ।
स्तौति यं प्रकृतिर्हृष्टा स्तौति भीता सरस्वती ॥५१॥
षण्मुखश्चतुरास्यश्च पञ्चास्यः स्तौति यं हरिम् ।
सहस्रास्यश्च वेदास्या अनलास्याः स्तुवन्ति यम् ॥५२॥
स्वेच्छामयं निरीहं च निर्गुणं च निरञ्जनम् ।
परात्परतरं ब्रह्म परमात्मानमीश्वरम् ॥५३॥
नित्यं ज्योतिरभिव्याप्तं भक्तानुग्रहविग्रहम् ।
नित्यानन्दं च नित्यं च नित्यमक्षरविग्रहम् ॥५४॥
भज नित्यं गुरुं कृष्णनारायणं प्रभुं पतिम् ।
सोऽवतीर्णोऽत्र भगवान् भूभाराद्यपनुत्तये ॥५५॥
गोपालबालवेषश्च वल्लभो मायया प्रभुः ।
स एव रक्षिता पोष्टा संहर्ता तं सदा भज ॥५६॥
पितरं मातरं विद्यामन्त्रदं सद्गुरुं पतिम् ।
तमेव श्रीकृष्णनारायणं भज महीपते ॥५७॥
इन्द्रद्युम्न ! निबोधेदं ज्ञानं मत्तः परात्परम् ।
त्यज सर्वं विघ्नकरं मुदं लभ हरेः परम् ॥५८॥
किं राज्यं किं यशो ग्रामः कः स्वदेशोऽपरश्च कः ।
कः कस्य पुत्रः कस्तातः का माता कस्यचित् कुतः ॥५९॥
आयान्ति यान्ति संसारं परं स्वकृतकर्मभिः ।
कर्मानुसाराज्जन्तुश्च जायते स्थानभेदतः ॥६०॥

कर्मणा जायते कश्चिद् विप्राण्यां वा नृपस्त्रियाम् ।
वैश्यायां वा शूद्रनार्यां पशौ पक्षिणि वृक्षके ॥६१॥
नारायणप्रदत्तेषु सानन्दा विषयेषु ते ।
देहत्यागे विषण्णाश्च वियोगे बान्धवस्य च ॥६२॥
मायया तत्कृतं सर्वं कन्या वधूर्विरागिणी ।
अवस्थास्ता विभिन्ना वै एकस्या एव योषितः ॥६३॥

प्रजाभूमिधनादीनां विच्छेदो मरणाधिकः ।
नित्यं भवति मूढस्य विदुषो न कदाचन ॥६४॥
कृष्णनारायणभक्तस्तद्याजी तत्परायणः ।
कृष्णमन्त्रोपासकश्च कृष्णसेवारतो भव ॥६५॥
यद्भयाद् वाति वातोऽयं रविर्भाति च नित्यशः ।
भाति चन्द्रो महेन्द्रश्च कालभेदे प्रवर्षति ॥६६॥
वह्निर्दहति मृत्युश्च चरत्येव तु जन्तुषु ।
बिभर्ति वृक्षः कालेन पुष्पाणि च फलानि च ॥६७॥

व्योमाधारोऽपि वायुश्च वाय्वाधारं जलादिकम् ।
जलाधारः कच्छपश्च तदाधारो ह्यनन्तकः ॥६८॥
अनन्तशेषभोगेषु ब्रह्माण्डानि च पर्वताः ।
निश्चलं च जलं तस्माज्जलस्थैर्यं वसुन्धरा ॥६९॥
सप्तस्वर्गं धराधारं ज्योतिश्चक्रं ग्रहाश्रयम् ।
अष्टावरणयुक्तानां ब्रह्माण्डानां महाविराट् ॥७०॥

आधारस्तस्य वै भूमा महाविष्णुः सदाशिवः ।
तस्याधारश्च वैकुण्ठो गोलोकश्च तदाश्रयः ॥७१॥
गोलोकस्याऽऽश्रयोऽनन्ताऽक्षरधाम परं शुभम् ।
ब्रह्मलोकः परात् परः परमं धाम तत्परम् ॥७२॥
दिव्यं सर्वत्र संव्याप्तं सीमवर्जितमेव तत् ।
यत्र वै सर्वधामानि त्रिपादस्याऽमृतं दिवि ॥७३॥

पादोऽस्य विश्वाभूतानि परं ततो न विद्यते ।
तत्रस्थं श्रीकृष्णनारायणं गोपालबालकम् ॥७४॥
कम्भरानन्दनं राजन् भजाऽक्षरपतिं हरिम् ।
परमे धामनि सोऽयं कृष्णनारायणो हरिः ॥७५॥
अनन्त मुक्तमध्यस्थो वर्तते पुरुषोत्तमः ।
अक्षरे च तथा धाम्नि वर्ततेऽक्षरपूरुषः ॥७६॥

राधाकृष्णश्च गोलोके वैकुण्ठे श्रीपतिः प्रभुः ।
शिवलोके शिवरूपः सत्ये ब्रह्मा हरिर्मतः ॥७७॥
तेजस्विनां च वै सूर्यः पवित्राणां तथाऽनलः ।
द्रवाणां स हरिर्वारि चेन्द्रियाणां मनः स च ॥७८॥
शीघ्रगानां समीरः स दण्डदानां यमो हि सः ।
कालः कलयतां सोऽपि चाक्षराणामवर्णकः ॥७९॥

साम्नां साम सुराणां स इन्द्रो राज्ञां प्रतापकः ।
ईशानः स दिगीशानां कुबेरो धनिनां हि सः ॥८०॥
व्यापकानां नमः सोऽपि साक्षी चापि स एव हि ।
तैजसानां सुवर्णं स रत्नं धनेषु चैव सः ॥८१॥
मणीनां कौस्तुभः कृष्णनारायणः स्वयं प्रभुः ।
शालग्रामस्तथाऽर्च्यानां पत्राणां तुलसी च सा ॥८२॥

पुष्पाणां पारिजातः सः तीर्थानां पुष्करः स च ।
वैष्णवानां कुमारः स योगीन्द्राणां गणाधिपः ॥८३॥
सेनापतीनां स्कन्दः सः नरो धनुष्मतां हि सः ।
नक्षत्राणां शशी सोऽयं रामः शस्त्रभृतां हि सः ॥८४॥
मासानां मार्गशीर्षः सः वसन्तः सः ऋतूत्तमः ।
राजेन्द्राणां च रामः सोऽवताराणां नरायणः ॥८५॥
श्रीकृष्णः स भगवतां वारेषु रविवासरः ।
तिथिष्वेकादशीरूपः पृथ्वी क्षमावतां हि सः ॥८६॥

अपत्यानां स वै माता भक्ष्याणां त्वमृतं हि सः ।
गव्येष्वाज्यं स वै प्रोक्तो द्रुषु कल्पद्रुमो हि सः ॥८७॥
सुरभिः कामधेनूनां गंगा सः सरितां हरिः ।
पण्डितानां वाणीरूपो मन्त्राणां प्रणवश्च सः ॥८८॥
परा विद्या च विद्यानां सस्यानां धान्यमेव सः ।
अश्वत्थः फलिनां कृष्णो गुरूणां मन्त्रदश्च सः ॥८९॥

कश्यपः सः प्रजेशानां गरुडः पक्षिणां हि सः ।
अनन्तः स च नागानां नराणां नृपतिः स हि ॥९०॥
ब्रह्मर्षीणां भृगुः सोऽयं देवर्षीणां च नारदः ।
राजर्षीणां जनकः स महर्षीणां शुकः स च ॥९१॥
गन्धर्वाणां चित्ररथः सिद्धानां कपिलः स च ।
लोमशश्चिरजीवानां गुरुर्बुद्धिमतां स वै ॥९२॥

शुक्रः कविवराणां स ग्रहाणां च शनिः स वै ।
शिल्पिनां विश्वकर्मा सः मृगाणां मृगराट् स वै ॥९३॥
वाहानां शिववाहः स ऐरावतश्च हस्तिषु ।
गायत्री छन्दसां सोऽपि शास्त्राणां वेद एव सः ॥९४॥
यादसां वरुणः कृष्ण ऊर्वश्यप्सरसां हि सः ।
जलाशयानां चाऽब्धिः सः सुमेरुर्भूधरेषु सः ॥९५॥
हिमाद्रिः स रत्नवतां राधिका प्रकृतिष्वपि ।
देवीनां कमला कृष्णः शतरूपा च योषिताम् ॥९६॥
सन्तः प्रियाणां कृष्णः स सावित्री सुशीलासु सः ।
प्रह्लादः सोऽपि दैत्यानां बलिष्ठानां बलिः स च ॥९७॥
नारायणर्षिर्भगवान् ज्ञानिनां ब्रह्मचारिणाम् ।
हनुमान् वानराणां स वीराणां च नरः स्वयम् ॥९८॥

मनसा नागकन्यानां वसूनां द्रोण एव सः ।
कामिनां कामरूपः स रंभा सः कामुकीषु वै ॥९९॥
गोलोकः स च लोकानां धाम्नां चाऽऽक्षरधाम सः ।
वासानां श्रीरमावासो वैकुण्ठो भगवान् हि सः ॥१००॥
शान्तिर्मातृकवर्गे सः रतिः स सुन्दरीषु वै ।
धर्मः साक्षिगणे सोऽस्ति सन्ध्या वै वासरेषु सः ॥१०१॥
देवेष्विन्द्रो राक्षसेषु विभीषणो हरिः स्वयम् ।
कालाग्निरुद्रो रुद्राणां संहारो भैरवेषु सः ॥१०२॥
शंखेषु पाञ्चजन्यः सः शरीरे मस्तकं च सः ।
लक्ष्मीनारायणसंहितात्मकः स्वकथासु सः ॥१०३॥
स्वायंभुवो मनूनां स व्यासो विद्वत्सु माधवः ।
स्वधा सः पितृपत्नीषु स्वाहा वह्निप्रियासु सः ॥१०४॥
यज्ञानां राजसूयः सः यज्ञपत्नीषु दक्षिणा ।
नीतिवत्स्वंगीरा सूतः कथकेषु हरिर्हि सः ॥१०५॥
शस्त्रास्त्रज्ञेषु च पर्शुरामो दैवं बलेषु च ।
व्रतानां श्रीकृष्णनारायणस्वामिव्रतं हि सः ॥१०६॥
दातॄणामिन्द्रद्युम्नः स दूर्वा स ओषधिष्वपि ।
तृणानां दर्भरूपः सः सत्यं व्रतेषु धार्मिषु ॥१०७॥
स्नेहपात्रेषु पुत्रः सः स व्याधिः शत्रुमण्डले ।
सेवासु दास्यमेव श्रीहरिर्वरो वरेषु च ॥१०८॥
आश्रमेषु गृहस्थः सः सन्न्यासश्च विवेकिषु ।
सुदर्शनं सः शस्त्राणां कुशलं सः शुभाशिषाम् ॥१०९॥
ऐश्वर्याणां महाज्ञानं वैराग्यं च सुखेषु सः ।
मिष्टवाक्यं प्रीतिदेषु दानेषु चात्मदानकम् ॥११०॥
सञ्चयेषु धर्मकार्यं कर्मणां चार्चनं हि सः ।
कठोरेषु तपः कृष्णः फलेषु मोक्ष एव सः ॥१११॥
नारीषु चानुवृत्तिः सः नरेषु वीर्यमेव सः ।
अष्टसिद्धिषु प्राकाम्यं काशी कृष्णः पुरीषु च ॥११२॥
नगरेषु कृष्णनारायणस्य नगरं हि सः ।
देशेषु वैष्णवक्षेत्रं विराट् तथाऽऽश्रयेषु सः ॥११३॥
सूक्ष्मेषु परमाणुः स ह्यौषध्यादौ रसायनम् ।
वैद्यानामश्विनीपुत्रौ विषादः क्षयकारिणाम् ॥११४॥
धन्वन्तरिर्मन्त्रविदां मिष्टानां च क्षुधा हि सः ।
रागाणां मेघमल्लारः श्रीदामा पार्षदेषु सः ॥११५॥
पशुजन्तुषु धेनुः सः वृक्षेषु चन्दनं हि सः ।
वैष्णवः सर्वपूतेषु कृष्णनारायणो हि सः ॥११६॥
वृक्षेष्वंकुररूपः सः वस्तुषु चाकरो हि सः ।
सर्वभूतेषु वै कृष्णनारायणोऽस्ति सर्वदा ॥११७॥
यथा वृक्षे फलान्येव फले बीजे तथाऽङ्कुरः ।
सर्वकारणरूपः सः, नान्यद्वै कारणान्तरम् ॥११८॥
सर्वेशः श्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
तन्मायामोहमापन्नास्तं न जानन्ति दुर्धियः ॥११९॥
तमोग्रस्तेन दुर्बुद्ध्या विधिना वञ्चितेन च ।
स्वात्मा सः सर्वजन्तूनां स्वामी वै सर्वदेहिनाम् ॥१२०॥
भज तं श्रीकृष्णनारायणं राजन् प्रभापतिम् ।
स्वर्गं मोक्षं लभस्वापि भजित्वा पार्वतीपतिम् ॥१२१॥
इमं विभूतियोगं यो ज्ञानविज्ञानकारकम् ।
पठेद्वा शृणुयात्तस्योपस्थितः श्रीहरिर्भवेत् ॥१२२॥
मंजुला मञ्जूषा चेयं मुनीनां मनसां स्थिरा ।
हंसा परमहंसानां मानसी सगुणा हरेः ॥१२३॥
यामभ्यस्य भवेद् योगी धर्ममेघसमाधिमान् ।
सर्वसिद्धिप्रमाज्ञप्तिबोधानन्दमयो भवेत् ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने इन्द्रद्युम्नाय लोमशोक्तज्ञानविज्ञानविभूतिसंभृतभगवन्महिमादिनिरूपणनामैकविंशत्यधिकपञ्चशततमोऽध्यायः ॥५२१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततश्चापि लोमशः स महामुनिः ।
इन्द्रद्युम्ने ददौ ज्ञानं लीनं मायिकवायुना ॥ १ ॥
लोमशः प्राह राजँस्त्वं शृणु वृत्तं पुराभवम् ।
एकदा नारदः सत्याल्लोकाच्छ्रीबदरीवनम् ॥ २ ॥
नारायणं नरं द्रष्टुं तीर्थयात्राप्रसंगतः ।
विशालायां तदा त्वासीत् स्वायंभुवमनोः सु[illegible] ॥ ३ ॥
तपस्यां संप्रकुर्वन् श्रीकृष्णनारायणं जपन् ।
प्रियव्रताभिधानस्तं दृष्ट्वा श्रीनारदो मुनिः ॥ ४ ॥
ययौ तस्य तु निकटे राजा ननाम चादरात् ।
राजा चेष्टा बहुयज्ञैर्विपुलैर्भूरिदक्षिणैः ॥ ५ ॥
निवृत्तिं धर्ममाश्रित्य साधुं ननाम नारदम् ।
अभ्युत्थानेन च मुदा ज्वलद्भास्करतेजसम् ॥ ६ ॥
ददौ पाद्यं चासनं सुनैवेद्यं बदरीफलम् ।
ततः पप्रच्छ कुशलं पप्रच्छ लोकवर्तनम् ॥ ७ ॥
भगवन् किञ्चिदाश्चर्यमेतस्मिन् कृतसंज्ञिते ।
युगे दृष्टं श्रुतं वापि तन्मे कथय नारद ॥ ८ ॥
नारदः प्राह दृष्टं यच्छृणुष्वाश्चर्यमद्भुतम् ।
ह्यस्तनेऽहनि राजेन्द्र ! श्वेतद्वीपं गतोऽभवम् ॥ ९ ॥

तत्र दुग्धसरो दृष्ट्वा फुल्लपंकजशोभितम् ।
तथा तस्य तटे रम्यां कुमारीं पृथुलोचनाम् ॥१०॥
दृष्ट्वाऽहं विस्मयाऽऽपन्नस्तां कन्यामायतेक्षणाम् ।
पृष्टवानस्मि राजेन्द्र तदा मधुरभाषिणीम् ॥११॥
काऽसि भद्रे कथं वाऽसि किं वा कार्यमिह त्वया ।
कर्तव्यं चारुसर्वांगि तन्ममाऽऽचक्ष्व सुन्दरि ॥१२॥
एवमुक्ता मया सा च मां दृष्ट्वाऽनिमिषेक्षणा ।
क्षणं तूष्णीं स्थिता यावत् तावन्मे ज्ञानमुत्तमम् ॥१३॥
विस्मृतं सर्ववेदाश्च शास्त्राणि संहितास्तथा ।
योगाः शिक्षास्तथा सर्वा धर्मन्यायाः कलादयः ॥१४॥
सर्वं दृष्ट्वैव मे राजन् कुमार्याऽपहृतं क्षणात् ।
ततोऽहं विस्मयाविष्टश्चिन्ताशोकाकुलः स्वयम् ॥१५॥
तामेव शरणं गत्वा हृदा पश्यामि तां पुनः ।
तावद् दिव्यः पुमाँस्तस्याः शरीरे समदृश्यत ॥१६॥
तस्यापि पुंसो हृदये त्वपरस्तस्य चोरसि ।
अन्यो रक्तेक्षणः श्रीमान् द्वादशादित्यसन्निभः ॥१७॥
एवं दृष्ट्वा पुमांसोऽत्र त्रयः कन्याशरीरगाः ।
क्षणेन लीनाः कन्यैकां प्रपश्यामि न तान्पुनः ॥१८॥
ततः पृष्टा मया देवी सा कुमारी कथं मम ।
वेदा नष्टा ममाऽऽचक्ष्व भद्रे तन्नाशकारणम् ॥१९॥
कन्या प्राह च माताऽहं वेदानां तव नारद ।
सावित्री ब्रह्मणः पत्नी जननी तव नारद ॥२०॥
त्वया नाऽहं समागत्य सत्कृता वा नमस्कृता ।
मां न जानासि येन त्वं ततो वेदा हृतास्तव ॥२१॥
सावित्रीं चापि गायत्रीं यो न जानाति वै द्विजः ।
तस्य ज्ञानं तु वेदानां जायते न कदाचन ॥२२॥
मातृनाशे भवेन्नाशः पुत्राणां मातृसेविनाम् ।
मातृभक्ताश्च ते पुत्रा विना क्वापि च मातरम् ॥२३॥
नहि तिष्ठन्ति पात्रेषु वेदा नष्टास्ततस्तव ।
मातृपूजां न कुर्वन्ति मन्वते न च मातरम् ॥२४॥
नमन्ति मातरं नैव ते स्युर्मूर्खा जडात्मकाः ।
मातरं नहि जानन्ति सेवन्ते न च मातरम् ॥२५॥
आशीर्वादविहीनास्ते जडा भवन्ति तामसाः ।
मातृदुःखं कृतं येन माता नैव च पोषिता ॥२६॥
गर्भभारहता तेन कृता माताऽवमानिता ।
ते विचित्तास्तथोन्मत्ता दरिद्रा दुःखिनस्तथा ॥२७॥
उद्वेजिनः सविघ्नाश्च रुग्णा भवन्ति पुत्रकाः ।
तस्मान्माता पितुर्दशगुणा मान्या सुतेन वै ॥२८॥
कार्यार्थं गमने क्वापि माताऽऽह्वयति पृष्ठतः ।
तत्कार्यं सफलं सिद्ध्येन्माता तस्माद्गरीयसी ॥२९॥
पिता बीजप्रदाता तन्नवमासान् पुपोष या ।
कष्टं प्रसह्य सूते तं पञ्चवर्षाणि रक्षति ॥३०॥
मूत्रमलादि बालस्य प्रक्षालयति सर्वदा ।
तस्माच्छतगुणा माता बालं कट्यां दधाति या ॥३१॥
उदरे च तथा कट्यां हृदये च दधाति या ।
सदा पूज्यतमा माता सेवनीया शुभेच्छुभिः ॥३२॥
नारदस्तां समुत्थाय ज्ञात्वा मातरमित्यथ ।
नत्वा प्रपूज्य पप्रच्छ के त्रयः पुरुषा इति ॥३३॥
मातोवाच मयि दृष्टः सर्वांगश्चारुशोभनः ।
एष ऋग्वेदनामा वै वेदो नारायणः स्वयम् ॥३४॥
वह्निभूतो दहत्याशु पापान्युच्चारणादनु ।
एतस्य हृदये योऽयं दृष्ट आसीत्त्वयाऽऽत्मज ॥३५॥
स यजुर्वेदरूपेण स्थितो ब्रह्मा महाबलः ।
तस्याऽप्युरसि संविष्टो य एष शुचिरुज्ज्वलः ॥३६॥
सामवेदो महाभागवतभक्तः स शंकरः ।
एष आदित्यवत् पापान्याशु नाशयति स्मृतः ॥३७॥
एते त्रयो महावेदास्तथा देवास्त्रयश्च ते ।
एतस्मिन् सरसि पुत्र ! ज्ञानात्मके ममान्तिके ॥३८॥
स्नात्वा गृहाण वेदादीन् सर्वज्ञत्वं तथा लभ ।
कृते वेदसरःस्नाने प्राग्भवीयं स्मरिष्यसि ॥३९॥
एवमुक्त्वा तिरोभावं गता माता तदा मम ।
अहं तत्र कृतस्नानो लब्ध्वा सहस्रजन्मजम् ॥४०॥
ज्ञानं समागतश्चात्राऽऽश्चर्यं दृष्टं हि तन्मया ।
तत्रैकं मम ते जन्म कथयामि पुराभवम् ॥४१॥
पूर्वकल्पे भवानासीद् राजा बाहुधनो भुवि ।
दक्षिणे पश्चिमे देशे सिंहारण्ये च रैवते ॥४२॥
तदाऽहमभवं तत्र शत्रुजितानदीतटे ।
ब्राह्मणो वेदविद्यादिनिष्णातः शारदाऽभिधः ॥४३॥
बहुभृत्यपरीवारो बहुधान्यधनादिमान् ।
किन्तु ज्ञानेन सम्पन्नश्चासं परमबुद्धिमान् ॥४४॥
ततो ध्यातं मयैकान्ते किमनेन करोम्यहम् ।
द्वन्द्वेन सर्वमेतद्धि न्यस्य पुत्रेषु याम्यहम् ॥४५॥
तपसे धृतसंकल्पो विचार्यं च रसायनम् ।
दास्यभक्त्या हरिस्तुष्येत् पितरः श्राद्धकर्मभिः ॥४६॥
देवा यज्ञैर्जना दानैः स्त्रियः कामैः रिपुः क्षयैः ।
ततोऽहं निर्गतो गेहादश्वपद्मसरः प्रति ॥४७॥

लोमशो यत्र वै शश्वद् राजते सरसस्तटे ।
तत्र गत्वा मया विष्णुः पुराणपुरुषोत्तमः ॥४८॥
आराधितोऽतिसद्भक्त्या कृष्णनारायणो हरिः ।
ततो मे भगवाँस्तुष्टः प्रत्यक्षतां जगाम मे ॥४९॥
स्तुतो मया तदा कृष्णनारायणश्च तद्यथा ।
'परं पराणाममृतं पुराणं पुरुषं प्रभुम् ॥५०॥
नमाम्यप्रतिमं कृष्णनारायणं पतिं परम् ।
ईशितारं हरिं चोग्रतेजसं वीर्यवत्तमम् ॥५१॥
परब्रह्म परेशं त्वां स्तौमि नारायणं प्रभुम् ।
श्रीपतिं कम्भरालक्ष्मीबालं गोपालबालकम् ॥५२॥
राधालक्ष्मीरमापद्माप्रभापद्मावतीपतिम् ।
पार्वतीमाणिकीगंगाललितामनसापतिम् ॥५३॥
सतां च स्वामिनं कृष्णनारायणं नमाम्यहम् ।
प्रसिद्धः शरणं मेऽस्तु कृष्णनारायणः प्रभुः ॥५४॥
प्रधानेशश्च धामेशो ह्यक्षरेशः सतीपतिः ।
सहस्रमूर्धाऽनन्ताक्षोऽनन्तबाहूरुपादवान् ॥५५॥
क्षीरस्थश्चामृतस्थश्च कुंकुमवापिकास्थितः ।
त्रियुगश्च त्रिवेदस्थः कृते श्वेततनुश्च यः ॥५६॥
ततो रक्तश्च पीतश्च कृष्णश्चापि ततः पुनः ।
वर्तते बहुधा यश्च विप्रान् मुखात् ससर्ज यः ॥५७॥
भुजयोर्बहुधा क्षत्रं चोर्वोर्विशः पदाच्चरान् ।
वर्णान् ससर्ज यो देवो विश्वतनुं नमामि तम् ॥५८॥
शंखचक्रगदापद्मधनुर्ध्वजत्रिशूलवान् ।
स्वस्तिकस्वर्णरेखात्मश्रीवत्सहारशोभितः ॥५९॥
शरणं मे सदा चाऽस्तु मुक्तिदो मेस्तु वै भवान्' ।
इतिस्तुतो मया देवः कृष्णनारायणः प्रभुः ॥६०॥
वरं वृणीष्वेत्यसकृत् प्राहाऽहं मोक्षमिष्टवान् ।
इष्टदेवश्च मां प्राह भज त्वं प्रकृतिं मुने ॥६१॥
ममाऽऽज्ञया च प्रवृत्तिर्मोक्ष एव न संशयः ।
विनाऽऽज्ञां मे च निवृत्तिर्बन्धनाय भवेद् ध्रुवम् ॥६२॥
तस्मात् कल्पान्तरं याहि सायं जातोऽद्य वै दिवा ।
नारं पानीयमित्युक्तं नारं ज्ञानं तथोच्यते ॥६३॥
नारं त्वात्मस्थितं विष्णुं यो ददाति स नारदः ।
सदा ते नाम चैतद्वै ख्यातं सम्यग् भविष्यति ॥६४॥
एवमुक्तश्च तं नत्वा कृष्णनारायण प्रभुम् ।
लोमशं तं महर्षिं च राजँस्त्वद्गृहमागतः ॥६५॥
त्वया सम्मानितश्चाहं त्वर्थितो मोक्षणं प्रति ।
मयाऽप्युक्तं भज कृष्णनारायणं पतिं प्रभुम् ॥६६॥
प्रवृत्तिं च हरेर्नारायणस्यैव कुरु नृप ।
त्वया राज्यं परित्यक्तं निर्गतस्त्वं मया सह ॥६७॥
ब्रह्मलोकं गतौ चावां रात्रिर्जाता दिनस्य च ।
दिवसश्च पुनः सृष्टो ब्रह्मणा परमेष्ठिना ॥६८॥
तत्राऽहं नारदी जातः स्मृतो नृप ! भवान् मया ।
प्रियव्रतः स एवाऽयं चेति त्वां द्रष्टुमागतः ॥६९॥
यस्मान्नारायणं ध्यात्वा प्राप्तोऽस्मि गुरुतां नृप ।
तस्मात् त्वमपि राजेन्द्र भव विष्णुपरायणः ॥७०॥
मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥७१॥
कृष्णनारायणविष्णोर्मूर्तयस्ताः शुभप्रदाः ।
दर्शनं प्राप्तुमिच्छूनां सोपानानि च शोभनाः ॥७२॥
यत्तासां परमं रूपं दृष्टवानहमेव तत् ।
पुरा कल्पे तदा तत्र कुंकुमवापिकाऽऽलये ॥७३॥
नरनारायणौ चात्र मूर्ती तस्यैव शोभने ।
ब्रह्मचर्यव्रतस्थेऽत्र लोककल्याणहेतवे ॥७४॥
धरा मूर्तिस्तस्य चाद्या सर्वधारणपोषिका ।
द्वितीया सलिलं मूर्तिस्तृतीया तैजसी प्रभा ॥७५॥
चतुर्थी प्राणमूर्तिर्वायुर्व्योमाख्या तु पञ्चमी ।
मन आत्मा चान्तरात्मा हरेस्ताश्चाष्टमूर्तयः ॥७६॥
अभिव्याप्तमिदं सर्वं जगन्नारायणेन हि ।
इत्युक्तो नारदेनाऽसौ राजा भागवतो महान् ॥७७॥
नारायणात्मकं ब्रह्मपरं जप्त्वा स्वयंभुवः ।
कृष्णनारायणमनाः परं निर्वाणमाप्तवान् ॥७८॥
इत्येवं लोमशः सर्वं कथयामास भूभृते ।
इन्द्रद्युम्नाय विज्ञानं कृष्णनारायणाश्रितम् ॥७९॥
श्रुत्वा लक्ष्मि ! महाभागवतो राजा तुतोष ह ।
पुनस्तं लोमशं प्राह सुधां चात्माश्रितां मुने ॥८०॥
पात्रं मत्वा शुभं शिष्यं ब्रह्मामृतं च पायय ।
इत्युक्ते लोमशस्तं च ब्रह्मज्ञानं ततोऽब्रवीत् ॥८१॥
वैदिकं सामवेदोक्तमार्षं च गहनं तथा ।
ज्ञानचक्षुष्मतां ग्राह्यं हृत्प्रकाशकृतां स्थिरम् ॥८२॥
ध्यातॄणां पचनीयं च ब्रह्मौपनिषदं परम् ।
यच्छ्रुत्वा वासनालिप्तो ब्रह्मभूयाय कल्पते ॥८३॥

छिद्यते हृदयग्रन्थिर्भिद्यते संशयस्तथा ।
लीयते तामसो भावो वर्धन्ते सुखसम्पदः ॥८४॥
क्षीयन्ते सर्वकर्माणि शुष्कार्द्राणि दृढान्यपि ।
यज्ज्ञानेनान्तरं चक्षुरैश्वर्याढ्यं प्रकाशते ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कुंकुमवापीक्षेत्रे लोमशेन्द्रद्युम्नसंवादे नारदस्य श्वेतद्वीपे साविव्यां ज्ञानह्रासस्ततः सावित्रीप्रदवेदादिज्ञानं, बदर्यो प्रियव्रताय तत्कथनं, प्रियव्रतस्य मोक्षः, भगवद्धा-माऽवताराऽवतारिज्ञानफलं चेत्यादिनिरूपणनामा द्वाविंशत्यधिकपञ्चशततमोऽध्यायः ॥५२२॥

श्रीनारायण उवाच—

एकाग्रमानसी भूत्वा कृत्वाऽऽत्मनि परेश्वरम् ।
कथ्यमानां परां विद्यां लोमशोक्तां तु भूभृते ॥ १ ॥
आकर्णय बहिर्वृत्तिं त्यक्त्वाऽन्यां मोक्षकारिणीम् ।
यामाश्रित्यर्षयः सर्वे निषेदुर्ब्रह्मणोऽन्तिके ॥ २ ॥
लोमशः प्राह राजानम् ओमित्यात्मानमान्तरम् ।
स्मृत्वा ध्यात्वा यथोक्तं च कथयामि निबोध मे ॥ ३ ॥
'ओं नमः परब्रह्मणे भ्राजद्भ्राजद्वर्ष्मणे ।
ब्रह्मसवित्रेऽक्षरब्रह्मादिवास्याय त्रिक्रणे' ॥ ४ ॥
दिव्ये ब्रह्मपुरे यो ह दिव्यमूर्तिः प्रतिष्ठितः ।
अमूर्तमूर्तेष्वन्तर्यामी मूर्तश्च परं हि तत् ॥ ५ ॥
विप्रासो विदुरत्रपुरुषमद्व्रूपमतिशम् ।
कमनास्यं कप्याक्षं युगग्रहर्गं पुरुषोत्तमम् ॥ ६ ॥
पराणखस्वरुणिम्रीभिर्भ्राजते परि य उत् यः ।
हृद्गुहृदक्षभ्रांकनं यमेतेऽत्र सन्तो विदुः ॥ ७ ॥
ब्रह्मगवा विविदुरेतमीश्वरीन्दुमप्रभालम् ।
तिलसुमनोनासं नृरूपं विभान्तमापूर्णम् ॥ ८ ॥
हिरण्यकेशमक्रुण्ठदृश्यं यत्तेऽन्तराऽभितः ।
किशोरप्रतिमं सच्चिदानन्दमयोगं प्रेयुः ॥ ९ ॥
ब्रह्मपात्राणि ह वै समुपासत श्रेयःखणेयम् ।
षोडशकलं पत्कजाऽऽन्तराभं परस्य पूष्णः ॥१०॥
कला भवन्तेऽष्टास्यूल्लेखास्वस्तिकादिका दक्षे ।
व्योमार्धेन्दुशफराद्या दक्षेतरेऽस्य चरणे ॥११॥
एको ह्येषः सर्वयन्ता सुरूपो
रूपं रूपं रूप्यमाणोऽधिशेते ।
सहस्रधा चाप्यथ नान्तधा सन्
समानरूपो रूप्यतेऽक्षय्यलोके ॥१२॥
सर्वे जीवा ईश्वराश्चाथ मुक्ता
गुणातीतं चाऽक्षरं ब्रह्ममूलम् ।
यस्याऽऽनन्दं लब्ध्वाऽऽनन्दीभवन्ति
ह्येषः सहजाऽऽनन्दभूमिः परात्मा ॥१३॥
सर्वे जीवा ईश्वराश्चाथ मुक्ता
गुणातीतं चाक्षरं ब्रह्ममूलम् ।
यस्यैश्वर्यं लब्ध्वा ईशा भवन्ति
ह्येषः सहजैश्वर्यभूमिः परात्मा ॥१४॥
सव जीवा ईश्वराश्चाथ मुक्ता
गुणातीतं चाक्षरं ब्रह्ममूलम् ।
यस्य वित्तिं लब्ध्वा विदो भवन्ति
ह्येषः सहजवित्तिभूमिः परात्मा ॥१५॥
सर्वे जीवा ईश्वराश्चाथ मुक्ता
गुणातीतं चाक्षरं ब्रह्ममूलम् ।
यस्या सत्तां लब्ध्वा सन्तो भवन्ति
ह्येषः सहजसत्यभूमिः परात्मा ॥१६॥
सर्वे जीवा ईश्वराश्चाथ मुक्ता
गुणातीतं चाक्षरं ब्रह्ममूलम् ।
यस्य तृप्तिं लब्ध्वा तृप्ता भवन्ति
ह्येषः सहजतृप्तिभूमिः परात्मा ॥१७॥
अरं दासो न मीह्लुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचित्तो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥१८॥
वेशोभग्यस्य शान्तातेः कणे धूमा
रमत्वा ईशनानि कत् तम् ।
स्तवामनेनसं गर्भं तरुषेम
एनः प्रयुञ्ज्य त्सरूपणीशनीभिः ॥१९॥
पराञ्चि तत् खानि परात्मरूपाण्य-
भिन्नतत्त्वान्यपि भक्तिचारात् ।
पृथग्भिधेयानि हरन्ति तज्ज्ञा
रसैकशक्तीन्यपृथग्भूतं हि तत् ॥२०॥
श्रोत्रस्य श्रोत्रं मनसो मनस्तत्
वाचो ह वाक् चक्षुषस्तद्धि चक्षुः ।
त्वचस्त्वमित्येव तदीयशक्तयो
मुक्तस्य खानामुत ब्रह्मणस्तत् ॥२१॥
ज्ञानस्वरूपोऽथ मनःस्वरूपो
ज्ञानस्य वित्तिर्मन एव तस्य ।
तदेव धीर्ह्रीश्च तदेव कामो
मेधा तथेच्छा धिषणा कृतश्च ॥२२॥

पुमंकपूर्णेऽपि रतिर्न गुता
प्राकाम्यसेव्येऽपि न रूपतः स्त्रीः ।
ग्राह्येऽपि तस्मिन्न हृतिः स्वचित्ते-
र्वियोगयोगेऽपि न तत्त्वव्याहृतिः ॥२३॥

अमातृजत्वान्नहि कोषषट्कम्
अनन्नकोषान्नहि चित्यचित्यतिः ।
प्राणः स्वशक्तिस्तदप्राणकस्य
काशोऽपि निरावरणात्मभावः ॥२४॥

अनन्नग्रासान्नहि मेहनादिकं
ततो न गुर्वादि कुतो हि निद्रा ।
नित्यप्रसन्नस्य कुतोऽप्रसन्नता
प्रेष्ठैकभावान्न परेष्टधीनता ॥२५॥

हिरण्यकेशाश्च हिरण्यवन्नखाः
मुकुन्ददन्ता नहि योगभागिनः ।
चिदैकरूपा रमणीयस्यात्मकाः
सदैकमानाः प्रविभान्ति तस्य ॥२६॥

अगोऽपि गन्ता मनसो जवीयोऽ-
विप्रांस एनं नाप्नुवन् प्रागुपास्तेः ।
विप्रेष्ठकोऽन्यानत्येति जवीयः
तिष्ठन्नचिति चिति चापि ईशः ॥२७॥

तदभ्याशे न भयं किंचनाऽस्ति
न तत्राऽन्यत् किंचनाऽपूर्वमस्ति ।
उभौ तीर्त्वा जीवमायेशभावौ
धूम्रातिगो मोदते तत्सयुजः ॥२८॥

श्रवणायाऽपि बहुभिर्यो न लभ्यः
शृण्वन्तोऽपि बहवो यं न विद्युः ।
नियाम्यशं तमीड्यं विदित्वा
निचाय्य तां शान्तिमत्यन्तमेति ॥२९॥

तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं
मत्वा धीरः पुण्यपापे जहाति ॥३०॥

अणोरणीयान्महतो महीयान्
लघोर्लघीयाँश्च गुरोर्गरीयान् ।
तमक्रियः पश्यति धूतपापो
हरेः प्रसादात् प्रपूरितसत्वः ॥३१॥

न सः परात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्य परात्मा विवृणुते तनुं स्वाम् ॥३२॥

अशुक्लमकृष्णमराजसं तत्
नियामकं नित्यमनन्तपारम् ।
अनादिनं ब्रह्मपरं ध्रुवं हरिं
निचाय्य तं मृत्युमुखात्प्रमुच्यते ॥३३॥

स ब्रह्मसत् मुक्तसदीशसद्वसु-
रव्यक्तसज्जीवसदेव कार्यसत् ।
तथापि न लिप्यते ह्यन्तरात्मा
अलेप्यशक्तिः प्रतिरूपकोऽसौ ॥३४॥

वश्यद्वितीयः सर्वभूतान्तरात्मा
बीजं प्रधानं बहुरूपं व्याकरोति ।
तमान्तरं ये परिपश्यन्तिमुक्ता-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥३५॥

नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कल्पान् ।
तमान्तरस्थं ये परिपश्यन्ति मुक्ता-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥३६॥

न भाति सविता तदग्रे न कौमुदीशो
न सौदामिन्यो भान्ति कुतोऽनलोऽयम् ।
तमेव भान्तमनु भाति सर्वं तदन्त-
स्तस्य भासा सर्वमिदं प्रविभाति तत् सत् ॥३७॥

अश्वत्थलोके भयादस्य सूर्य-
स्तपत्यग्निर्वहति चाऽप्यनिलः ।
ईशा अप्यण्डं परिकुर्वन्ति यद्भया-
त्तं कृष्णनारायणं यान्ति तद्विदः ॥३८॥

तमच्छायं शुभ्रं स्नेहमूर्तिं
शीलभ्राजत् नित्यविज्ञानधर्मम् ।
स्वेष्टं देवं वेदयते यस्तु विद्वान्
स तत्प्रसादात् तद्वत् सार्वज्ञ्यमेति ॥३९॥

तमद्रेश्यमग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रं तमपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं
तमव्ययं कार्ययोनिं परिपश्यन्ति मुक्ताः ॥४०॥

यथोर्णनाभिः सृजते गृह्णते च
यथा क्षितावोषधयो भवन्ति ।
यथा सतो नरात् केशलोमानि संभवन्ति
तथा परेशात् संभवतीह विश्वम् ॥४१॥

परं ब्रह्मैवेदममृतं पुरस्तात्
परब्रह्म पश्चाद् दक्षिणे चोत्तरे च ।
अधश्चोर्ध्वे व्यापकं ब्रह्मकृत्या
परं ब्रह्मव्याप्तमिदं विश्वं समस्तम् ॥४२॥

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यति ध्यायमानः ॥४३॥

बृहच्च तद्दिव्यमचिन्त्यरूपं
सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात् सुदूरे तदिहान्तिके च
पश्यत्स्विहैव निहितं गुहायाम् ॥४४॥

सत्येन लभ्यस्तपसा सः परात्मा
माहात्म्यज्ञानेन ब्रह्मचर्येण नित्यम् ।
स्वस्य स्वरूपे दिव्यरूपो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥४५॥

यदा द्रष्टा पश्यति स्वर्णवर्णं
विधातारं पुरुषं ब्रह्मपारम् ।
तदा वेत्ता शुक्लकृष्णे विहाय
निरविद्यः कृष्णसाम्यं प्रयाति ॥४६॥

समापदेहे देही नित्यं निमग्नो
मायाग्राह्यो मुह्यति शोकमेति ।
यदा स्वान्यं पश्यति सर्वव्याप्तं
तदा चात्मा जायते शोकहीनः ॥४७॥

द्वौ तौ सुमित्रे चैकवृक्षं श्रयेते-
ऽन्योन्यं कार्ये प्रोत्साहनप्रदे स्तः ।
अधीरैको ग्रध्नया चात्ति मिष्टं
धीरश्चान्यः तं सुतृप्तो ददाति ॥४८॥

यथाऽऽपगा वार्धिभावं प्रयान्ति
भिन्नख्यातिप्रतिमाने विसृज्य ।
तथा ज्ञाताऽऽख्याप्रतिमाविधुरोऽ-
क्षरात्परं दिव्यपूरुषमेति ॥४९॥

परब्रह्म वेद यो ब्रह्म स स्या-
न्न चाऽऽवर्त्ते भ्रमते कर्मकृष्टः ।
औष्ण्यं त्यक्त्वोद्वेजनं वै जहाति
हृद्ग्रन्थिभिस्त्यज्यते चामृताय ॥५०॥

यश्चात्र नित्यं प्रतिबोधमात्त-
श्चाऽस्मिन्देहे हृद्गुहायां विराजन् ।
तदन्तःस्थः सृष्टिकृत् सर्वहर्ता
व्यतिरेकी वर्तते दिव्यलोके ॥५१॥

विदन्ति सन्तोऽथ विज्ञो वयं
तमवेदने स्यात्पतनं महत्कृतम् ।
तस्यैव विज्ञा अमृताः सम्बभूवु-
रन्ये तु दुःखं चाविद्यकं ययुर्वै ॥५२॥

एवं विद्यान्महिमानं परात्मनो
नास्यास्ति वृद्धिः कर्मभिर्वा क्षतिश्च ।
तस्यैव भूयाः पदवित् धामगन्ता
तमालम्ब्य लिप्यते नाऽघकर्मभिः ॥५३॥

सर्वं यस्य चाक्षरे ब्रह्मणि यत्
सर्वं तस्य मुक्तवृन्देऽनुषक्तम् ।
तद्वै सर्वमीश्वरेषु प्रविष्टं तदेवाऽ-
स्मिन् जीवभूते तथाऽन्ये ॥५४॥

यदक्षरे तद् भवत्येव केवले
तथा ह वै शबले वै निरञ्जने ।
हिरण्मये महद्विष्ण्वाख्येऽथ विष्णौ
रुद्रेऽथापि वर्तमाने विराजे ॥५५॥

प्रकृत्यादावष्टकावृत्तिकासु
तलेष्वत्र द्विसप्तकेषु विराजते ।
अत्र भूमौ राजते कृष्णनारायणः
स्वामी तं विदित्वाऽमृतं व्रज ॥५६॥

तस्माद्धि सूक्ष्मचिदचिद्विशिष्टात्
स्थूलं हि चिदचिद्विशिष्टं प्रजायते ।
उपादानोपादेययोरभेदात्
सर्वं तत्त्वं परब्रह्मैकमेव ॥५७॥

परात्मनस्तस्य पूर्णावतारिणः
काचिच्छक्तिर्व्यूहसंज्ञामुपैति ।
क्रमान्न्यूना सैव विभवावतारा
पूर्णांशमुख्याऽऽवेशगौणादिरूपा ॥५८॥

तत्तद्योगात्तत्स्वरूपस्य लब्धि-
स्तस्मिन् लीनालीनभावं ह्युपैति ।
परात्मनश्चोपासनया परेशं
परां मुक्तिमाप्नुवन्तीति तत् सत् ॥५९॥

मुक्ताधारं परब्रह्मव्याप्यचेतनमक्षरम् ।
सर्वाधारं परब्रह्मशरीरं धाम यत्र सः ॥६०॥
तदेवाऽस्त्यक्षरं ब्रह्मधाम तेजोमयं हरेः ।
यावद्वेदतपोब्रह्मचर्यचीर्णं हि तत्पदम् ॥६१॥
अशरीरं शरीरं च मूर्तं चाऽमूर्तमित्यपि ।
शुद्धं नित्यं च मायादिप्रकाशकं हरेस्तनु ॥६२॥
सच्चिदानन्दवासात्म जन्ममृत्युजरातिगम् ।
कृष्णनारायणस्वामिश्रितं सद्वर्तते परम् ॥६३॥
यदर्चिमत्परब्रह्मतेजोऽभिन्नं सनातनम् ।
रजसश्च परे पारे तत्राऽध्यक्षं हरिं भज ॥६४॥
हिरण्मयात्परात्कोशादपि चोर्ध्वे च निष्कलम् ।
शुभ्रं ज्योतिर्ज्योतिषां च तत्राध्यक्षं हरिं भज ॥६५॥
यद्वोलोमाकृतिप्रत्यंगान्यभिन्नात्मशक्तयः ।
न वै भागो न वै त्यागो रसैक्यं च परेशवत् ॥६६॥
सार्वज्ञ्यं शेषसापेक्षं तत्रस्थं श्रीहरिं भज ।
परब्रह्मगतं तेजोमयं तत्र हरिं भज ॥६७॥
मुक्ता ह्यनादिनो नित्या वसन्ति यत्र शाश्वते ।
तत्रस्थं श्रीहरिं राजन् कृष्णनारायणं भज ॥६८॥
एवमक्षरधामस्थं परधामस्थितं परम् ।
भजित्वा साम्यभावाप्ता बह्वस्तं सदा भज ॥६९॥
यः सेतुः सर्वधर्माणामक्षरं ब्रह्म यस्य भूः ।
तत्रस्थं श्रीकृष्णनारायणं ज्ञात्वा सदा भज ॥७०॥
यः स्यादस्याऽनवज्ञानी भक्तिदास्यविवर्जितः ।
अशुद्धः स न तं यायात् संसारागमवेष्टितः ॥७१॥
अपरोक्षानुभववाँस्तस्य नारायणस्य यः ।
स च तद्धाम चाप्नोति ततो भूयो न जायते ॥७२॥
भक्तिर्बलं भवेद् यस्य ज्ञानं पुष्टिप्रदं तथा ।
गुरुसेवारथारूढः प्राप्नोति श्रीहरेः पदम् ॥७३॥
जीवेभ्यस्तु परा ईशा ईशेभ्यः परमक्षरम् ।
अक्षरात्परमं कान्तं ज्ञात्वा तद्धाम चाप्नुयात् ॥७४॥
हृदयग्रन्थिभेदान्तं सर्वं स्यादनुशासनम् ।
कृष्णनारायणग्रन्थिं लब्ध्वा गच्छ परं पदम् ॥७५॥
परे त्वयि मयि चान्ये योऽस्ति तं भज सादरम् ।
मृत्युपाशान् स चाप्नोति यस्तं भेदेन पश्यति ॥७६॥

हृदा चान्तश्चक्षुषा तं ज्ञात्वा नानाविवर्जितम् ।
नानाभावकृतं मृत्युं हत्वा याहि परं पदम् ॥७७॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
जप मन्त्रं सदा राजन् स त्वां पारं करिष्यति ॥७८॥
विस्रंसमानदेहस्य बन्धनं नावशिष्यते ।
अबन्धनस्य मुक्तस्य ते किमत्राऽवशिष्यते ॥७९॥
ऊर्ध्वमूलोऽर्वाकप्रशाख एषोऽश्वत्थो महान् तरुः ।
तं विहायाऽक्षरं ब्रह्म पश्यामृतं हरिं व्रज ॥८०॥
यद्भयात् सर्वतेजांसि प्रकाशन्ते विधानवत् ।
ईशा ईशत्वमापन्ना यस्मात्तं श्रीहरिं भज ॥८१॥
हृत्स्थान् कामान् परिहाय कृष्णं चात्र समश्नुहि ।
अमृतं परमानन्दं भुंक्ष्व कृष्णनरायणात् ॥८२॥
सत्यं तपो ब्रह्मचर्यं दास्यं येषु प्रतिष्ठितम् ।
तेषां चास्ति ब्रह्मलोको येषु जैह्मयं न नाऽनृतम् ॥८३॥
द्वे विद्ये सर्वथा राजन् परा वेद्या तथाऽपरा ।
परया त्वाप्यते कृष्णनारायणोऽक्षरे पदे ॥८४॥
तदन्याश्चापराः सर्वा याभिर्ब्रह्म न चाप्यते ।
ये वै परात्मनः प्रेष्ठां वाचं सद् व्याहरन्ति ते ॥८५॥
पुण्ये ब्रह्मपदे यान्ति दास्यं श्रीपरमात्मनः ।
परब्रह्म विजानाति सेवते भजते च यः ॥८६॥
जाग्रति चान्तरे स्वप्ने त्र्यवस्थोत्तरवैभवे ।
सोऽश्नुते सर्वकामाँश्च ब्रह्मणा सह मिश्रितान् ॥८७॥
अन्नं प्राणं मनो ज्ञानं चानन्दं तमवेहि च ।
आत्मानं चान्तरात्मानं कृष्णनारायणं भज ॥८८॥
कंभरापुत्रसेवाभिः केनानन्देन पूर्यते ।
गोपालबालसेवाभिर्गोभिः संश्रियते नृप ॥८९॥
वाणी मनश्च विषयं करोत्येव न यं प्रभुम् ।
आनन्दं तं हरेर्याहि कुतश्चन भयं न ते ॥९०॥
ज्ञानाद् यज्ञाः प्रजायन्ते कर्माण्यपि भवन्ति च ।
सम्पद्यते सुरतृप्तिः श्रीमत्कृष्णे समर्पिते ॥९१॥
परब्रह्म च यो वेद यस्ततो न प्रमाद्यति ।
मायापाप्मानमुत्सृज्य ब्रह्मभोगान् समश्नुते ॥९२॥
सन्तं कृष्णं प्रवदन्तं सन्तं ध्यायन्तमेव च ।
सेवमानं तथा सन्तं सत्पदं स हि कर्षति ॥९३॥
स हि सृष्ट्वा तदेवाऽनुप्राविशत्सः परात्परः ।
सत्यं यथानृतं तेन सत्यमित्येव बुद्ध्यते ॥९४॥
असद् व्याकृतभावं च सुकृतं तेन बुद्ध्यते ।
सोऽक्षरात्पुरुषद्वारा नैकाण्डान्युदपादयत् ॥९५॥

तस्य परात्मनो योगात् तेषु सत्यं च सुकृतम् ।
अक्षरे च यथा तद्वज्ज्ञात्वा मोक्षमवाप्नुयात् ॥९६॥
सदेव राजन् भगवानभूत्पुरा
ततः समस्तं सत्स्वरूपं विकासितम् ।
रसात्मकोऽयं सर्वरसप्रदाता
लब्ध्वा रसं तस्याऽऽनन्दीभवन्ति ॥९७॥
अस्याऽऽनन्देन वै लोका भवन्ति चाभयं गताः ।
मनो वाचो न वै यान्ति यत्र तं भज केशवम् ॥९८॥
तस्माज्जायन्त इमानि जीवन्त्यपि ततः प्रभोः ।
तत्रैवेमे पलीयन्ते शाश्वतं प्रलयं व्रज ॥९९॥
परमात्मा दिव्यरूपो ध्येयश्चासीत्पुरागृहे ।
रचयित्वा द्वितीयं च तत्रोवास च तं भज ॥१००॥
स्थावरं जंगमं सर्वं प्रज्ञानेत्रं प्रभासते ।
प्रज्ञाने वर्तते यश्च तं नेत्रं भज माधवम् ॥१०१॥
शान्तं सर्वात्मकं ब्रह्मपरं कं खं हरिं भज ।
श्रद्धया तपसा दिव्यं नेतारं त्वर्चिषाऽच्युतम् ॥१०२॥
दिव्यान्तःस्थं शुक्लपक्षान्तरात्मानं हरिं भज ।
उत्तरायणमासस्थं सम्वत्सरान्तरस्थितम् ॥१०३॥
आदित्यवर्तिनं चन्द्रान्तरात्मानं च तं भज ।
विद्युत्प्रकाशदातारं वरुणस्थं जलान्तरम् ॥१०४॥
इन्द्रान्तरं प्रजापतेरान्तरस्थं विराड्गतम् ।
रुद्रहृदयं विष्णुस्थं महाविष्णुप्रतिष्ठितम् ॥१०५॥
निरञ्जनस्थं शबलान्वितं केवलगं भज ।
अक्षरब्रह्मगो भूत्वा तत्पुमांसं सदा भज ॥१०६॥
दानानां फलदातारं धूम्ररात्रिस्थितं प्रभुम् ।
कृष्णपक्षान्तरस्थं च दक्षिणायनगं हरिम् ॥१०७॥
सम्वत्सरान्तरस्थं च पितृस्थं व्योमगं भज ।
चन्द्रस्थं च प्रजापालस्थितं राजन् सदा भज ॥१०८॥
वायुस्थं चाभ्रसंवासं मेघस्थं कणवर्तिनम् ।
बीजस्थं कार्यरूपं चाभिव्याप्तं श्रीहरिं भज ॥१०९॥
रमणीयखनिजेषु विप्रादिषु हरिं भज ।
दयनीयखनिजेषु गवादिषु हरिं भज ॥११०॥
एष देवो हतपाप्मा विजरो मृत्युवर्जितः ।
विशोकः क्षुतृषाहीनः सत्यकामप्रकल्पनः ॥१११॥
त्वत्स्वरूपस्त्वत्समानस्त्वादृशं तं प्रभुं भज ।
त्वस्य रूपेण ते चाभिनिष्पत्तिस्तं तथा भज ॥११२॥
क्रीडन्नृत्यन् कीर्तयँश्चानन्दयन् संस्मरन् सदा ।
स्वेन रूपेण कुर्वन्तं त्वां तं तथाविधं भज ॥११३॥
विना भक्तं न रमते द्वितीयं तं ह्यकल्पयत् ।
तं त्वयि व्याप्तमेवैनं हृदयस्थं सदा भज ॥११४॥
सोऽयमात्मा त्वया राजन् द्रष्टव्यो हृत्स्थचक्षुषा ।
श्रोतव्यो हृच्छ्रवसा च मन्तव्यो दिव्यतेजसा ॥११५॥
निर्णेतव्यस्तस्य बुद्धया न त्याज्यः स कदाचन ।
एवं सर्वात्मभावेन पश्य कृष्णं सनातनम् ॥११६॥
तस्मिन् सर्वाणि भूतानि चार्पितानि च तं भज ।
यः पृथिव्यां जले वह्नौ वायौ व्योम्नि च तं भज ॥११७॥
यस्येमानि शरीराणि शरीरस्थं च तं भज ।
आत्मा सन्तः प्रतिमा च यस्य तं केशवं भज ॥११८॥
यस्मात् सर्वे समानन्दा जीवा चानन्दिता यतः ।
आप्तकामं महानन्दं पूर्णं नारायणं भज ॥११९॥
कामान् विहाय हृदये हरिं स्थापय भावतः ।
स्थितं चावेहि वै राजन् याहि तं शरणं भज ॥१२०॥
नाऽनवाप्तं तदा तेऽत्राऽवशिष्टं नहि शिष्यते ।
सैषा ब्राह्मी पराविद्या पाठिता ते प्रमोक्षदा ॥१२१॥
अथायं राजा सन्तृप्तश्चात्मन्येव जनार्दनम् ।
परमं पुरुषं दिव्यं ददर्श पुरुषोत्तमम् ॥१२२॥
शंखचक्रगदापद्मधनुःशूलादिराजिम् ।
राधालक्ष्मीप्रभापद्मापार्वतीमाणिकीश्वरम् ॥१२३॥
सर्वाभिः सेविकाभिश्च सेवितं पार्षदैस्तथा ।
हृदये तं प्रभुं कृष्णनारायणं विलोक्य च ॥१२४॥
तदिच्छया बहिश्चापि तं ददर्श श्रियाःपतिम् ।
लोमशस्य च कृपया पराविद्याप्रभावतः ॥१२५॥
व्योम्नः समागतं दिव्यं विमानं चातिसुन्दरम् ।
ब्रह्मणश्चाज्ञया देवदूतेन त्वधिवासितम् ॥१२६॥
देवदूतः समुवाचाऽऽगच्छाऽऽगच्छ विमानके ।
राजन्नयामि ते सत्यं लोकं श्रीपरमेष्ठिनः ॥१२७॥
इन्द्रद्युम्नश्च तं प्राह न मे सत्ये प्रयोजनम् ।
यास्यामि श्रीकृष्णनारायणस्य चरणं ध्रुवम् ॥१२८॥
अक्षरात्परमं धाम लोमशस्य कृपालवात् ।
इत्युक्तो देवदूतः स ययौ लोकं तु वेधसः ॥१२९॥
इन्द्रद्युम्नो विरराम लोमशस्य तु सन्निधौ ।
लोमशस्तं सरस्तीरे तृणासनं ददौ शुभम् ॥१३०॥
कदम्बद्रुमनिकटे कृष्णनारायणालये ।
राजा स्नात्वा हरिं ध्यात्वा पूजयित्वा नरायणम् ॥१३१॥
लोमशं पूजयित्वा च ऋषीन्नत्वा तदाश्रमे ।
फलादि श्रीकृष्णनारायणाय विनिवेद्य च ॥१३२॥

समर्प्य गुरवे तत्र बुभुजे च पपौ जलम् ।
योगनिद्रां सुखमयीं लेभे रात्रौ हरिं स्मरन् ॥१३३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने इन्द्रद्युम्नाय लोमशर्षिसमुपदिष्टब्राह्मीपराविद्यौपनिषदात्मस्मरणनामा त्रयोविंशत्यधिकपञ्चशततमोऽध्यायः ॥५२३॥

श्रीनारायण उवाच—

आकर्णय महालक्ष्मि ! लोमशस्य कथां शुभाम् ।
प्रातः समुत्थितो राजा कृताह्निको गुरुं प्रति ॥ १ ॥
जगाम दर्शनार्थं च दृष्ट्वा कृष्णनरायणम् ।
गुरुणाऽऽशीर्योजितः स पप्रच्छ लोमशम् ऋषिम् ॥ २ ॥
भगवन् मोक्षदातस्त्वं मायातीतो जितेन्द्रियः ।
वर्तसे च यथा धाम्नि तथैवात्र कराग्रदृक् ॥ ३ ॥
वद मे भगवद्धाम्नि कालो नास्ति ततः प्रभो ।
नित्यः सेवाप्रकारादेर्नियामकः क्षणात्मकः ॥ ४ ॥
दिनात्मको व्यवहारः कथं भक्तैर्विधीयते ।
इति पृष्टो लोमशस्तु राजानं प्राह भूपते ॥ ५ ॥
कृष्णनारायणमूर्तेः किरणैः सुप्रभान्वितैः ।
प्रसरद्भिर्भिन्नरूपैः क्षणाद्याः सन्ति सर्वदा ॥ ६ ॥
तज्ज्ञास्तत्किरणैः प्रातर्मध्यं सायं विदन्ति च ।
कृष्णनारायणस्तेषां सेवां गृह्णाति तत्र च ॥ ७ ॥
मूर्तौ लीनस्थितिर्निद्रा दास्यसेवा तु जाग्रती ।
श्वेतप्रकाशनं चाहः सन्ध्या रक्तप्रकाशनम् ॥ ८ ॥
मेघश्यामावलोके च मूर्तौ स्थैर्ये निशेति च ।
गोलोकेऽपि तथा कृष्णकिरणैर्व्यवहृतयः ॥ ९ ॥
वैकुण्ठेऽपि तथा नारायणतेजःप्ररीतयः ।
अक्षरे तु परे धाम्नि परब्रह्मप्रभादिभिः ॥१०॥
इत्येवं तद्गतेभ्यश्च श्रुतं मुक्तेभ्य एव यत् ।
कथितं ते चेन्द्रद्युम्न ! किमन्यत् प्रष्टुमिच्छसि ॥११॥
इन्द्रद्युम्नस्ततो लक्ष्मि ! पप्रच्छ लोमशम् ऋषिम् ।
कृष्णनारायणश्चात्र क्षेत्रे प्राकट्यमिच्छति ॥१२॥
यदा तदा स किं मातृगर्भे तिष्ठति वा न वा ।
भौतिकं किं तस्य वर्ष्म उताऽन्यादृशमेव किम् ॥१३॥
छिन्धि मे संशयं जातं लौकिकं च कृपां कुरु ।
लोमशः प्राह राजर्षे कृष्णस्य परमात्मनः ॥१४॥
नारायणस्य सर्वस्याऽवतारादेर्यदा यदा ।
सृष्टौ भवति प्राकट्यं तदा गर्भानुसारतः ॥१५॥
वायुं गर्भस्थितं त्वाज्ञापयत्येव हरिः सदा ।
गर्भकुक्षौ त्वया स्थेयं जलेन सह तावता ॥१६॥
यथा गर्भवती माता बहिर्दृश्येत वै तथा ।
कुक्षिं प्रोच्छ्रयतां प्राप्तां कुरु कालेन यावता ॥१७॥
यत्र यत्र यादृशश्च समयः समपेक्ष्यते ।
तावत्तत्र दर्शयित्वा गर्भस्याऽप्यभिवर्धनम् ॥१८॥
प्रसवस्य समये च वायोर्जलस्य कुक्षितः ।
बहिर्निःसारणं तत्र दर्शनीयं च लौकिकम् ॥१९॥
मया तत्र तदा तत्रस्थितैरनभिलक्षितम् ।
बालरूपं यथा गर्भजन्यं दृश्येत वै तथा ॥२०॥
भासमात्रं करणीयं गर्भजलाभियोजितम् ।
मायया छन्ननेत्राणामत्र नास्ति गतिर्मयि ॥२१॥
दिव्यदृशः प्रपश्यन्ति दिव्यां सूक्ष्मां मम कृतिम् ।
स्थूलदृशः प्रपश्यन्ति गर्भाज्जातो हि बालकः॥२२॥
एवमेव हि मुक्ताश्च भवन्त्ययोनिसंभवाः ।
मातापित्रोर्न तज्ज्ञानं यतो रतिप्रियौ हि तौ ॥२३॥
कामदेवस्य रीत्यैव तयोर्भानं ममोद्भवे ।
अकामयोस्तु दिव्यं वै तत्क्षणान्मम दर्शनम् ॥२४॥
ततो वायो ! न मे गर्भागमो न धातुसंश्रयः ।
न च गर्भगृहे वासो योनेर्निष्कासनं न हि ॥२५॥
बाल्यभावो न मे त्वस्ति न जन्ममरणे शुभे ।
न हि देहो भौतिको मे किन्तु दर्शय तत्तथा ॥२६॥
एवमाज्ञापयति श्रीकृष्णनारायणः प्रभुः ।
राजँस्तदनुसारेण वायुर्दर्शयति कृतिम् ॥२७॥
भोजनादि तथा तस्य नित्यतृप्तस्य वै हरेः ।
लौकिकं नैव भवति भक्ताः कुर्वन्ति भावतः ॥२८॥
यद्यदात्मन एवाऽस्ति प्रियं भोग्यं मनोहरम् ।
तस्मै समर्प्य भोक्तव्यं धर्मश्चायं सनातनः ॥२९॥
एवं भक्तकृता सेवा नित्यतृप्तस्य तृप्तिदा ।
लक्ष्म्यै पुरा प्रदत्तं च वरदानं तु शार्ङ्गिणा ३०॥
निवेदितं न वै न्यूनं कथं भवति तत्र वै ।
हरिः प्राह मया भुक्तं वर्धेत न क्षयं व्रजेत् ॥३१॥
यथा यथाहं भुञ्जे तत् वर्धते च तथा तथा ।
जडं चेतनतां याति दिव्यभावं प्रपद्यते ॥३२॥
प्रसन्नतां समासाद्य याति प्रफुल्लतां तदा ।
नवं नवं भवत्येव रसान्वितं शुभप्रदम् ॥३३॥
दिव्यदृशः प्रपश्यन्ति पश्यन्ति न बहिर्दृशः ।
इत्येतत् कथितं राजन् नैवेद्यस्य प्रवर्धनम् ॥३४॥

एवं कृष्णे प्रदत्तानां ह्रासो नास्ति क्वचिन्नृप ।
प्रत्युत वर्धते सर्वं किमन्यच्छ्रोतुमिच्छसि ॥३५॥
इन्द्रद्युम्नस्ततोऽपृच्छल्लोमशं सद्गुरुं हरिम् ।
कस्मात् त्वं ग्रीष्मकालेऽपि मध्यं प्राप्ते दिवाकरे ॥३६॥
निवासार्थं गृहं रम्यं किमर्थं न करोषि वै ।
लोमशस्तं नृपं प्राह स्वल्पायुश्चास्मि सर्वथा ॥३७॥
कस्यार्थे कार्यं आवासस्त्वनित्यं जीवितं यतः ।
यदि स्याच्छाश्वतं दीर्घं जीवितं गृहमाभजेत् ॥३८॥
राजा प्राह च सर्वेषां चिरायुः श्रूयते भवान् ।
तेनाऽहमपि संप्राप्तो भवद्दर्शनकाम्यया ॥३९॥
लोमशस्तु तदा प्राह शृणु राजन् वदामि तत् ।
कल्पे कल्पे प्रसंप्राप्ते रोमैक्यं मम नश्यति ॥४०॥
अभावे वक्षसो रोम्णां मम नाशो भविष्यति ।
त्रिलक्षं च पञ्चषष्टिसहस्राणि गतानि मे ॥४१॥
कल्पानि तत्र वै नष्टा वेधसो दश मे पुरः ।
नाभेरुपरिचाऽऽकण्ठं रोमाणि सन्ति मे नृप ॥४२॥
षट्त्रिंशल्लक्षपञ्चाशत्सहस्राणि च तानि वै ।
त्रिलक्षं च पञ्चषष्टिसहस्राण्यधिकानि च ॥४३॥
तावत्कल्पानुषित्वैव ब्रह्माण्डेषु ततः परम् ।
यास्यामि परमं लोकं किं करोमि गृहेण वै ॥४४॥
पश्य त्वं मच्छरीरेऽत्र जानोरधोऽङ्गुलायतम् ।
यावत्कल्पं प्रतिस्पर्धि संजातं रोमवर्जितम् ॥४५॥
जीवितव्यं ध्रुवं नास्ति ज्ञायते रोमनाशनात् ।
न करोमि गृहं तेन कारणेन महीपते ॥४६॥
राजा प्राह ऋषे ! पूर्वं किं कर्म विहितं त्वया ।
तपो दानं कृतं कीदृग् येनेदृग्जीवितं चिरम् ॥४७॥
लोमशस्तु तदा प्राह शृणु राजन् चिरं मम ।
अहमासं पुरा सृष्टौ शूद्रोदारिद्र्यपीडितः ॥४८॥
दास्यं कुर्वन् तदाऽऽसं संगतोऽहं बदरीवनम् ।
क्षुत्क्षामः सुपिपासार्तो दृष्ट्वा नारायणं नरम् ॥४९॥
जलं कमलपुष्पाणि समर्प्यार्चनमाचरम् ।
अथ पूजां विनिर्वर्त्य गिरेर्मार्गे समाश्रितः ॥५०॥
हिमेन क्षुधया मृत्युं गतो विप्रगृहे ततः ।
जातिस्मरोऽभवं तेन मौनं रक्षामि सर्वथा ॥५१॥
ईशान इति मे नाम पिता चक्रे प्रहर्षितः ।
अन्यैः सम्प्रेर्यमाणोऽपि नैव जल्पामि किञ्चन ॥५२॥
वैराग्यं परमं प्राप्तो दृष्ट्वा संसारसंस्थितिम् ।
पिता मेऽयोजयद् वाचः प्रकाशार्थं तु भेषजम् ॥५३॥
तेन मे जायते हास्यं कृतमन्त्रजनान्प्रति ।
अश्वपट्टसरःक्षेत्रे निवसन् भक्तिभावतः ॥५४॥
कृष्णनारायणं देवं पूजयामि समाहितः ।
शिलोञ्छवृत्तिमासाद्य प्राणवृत्तिं समाचरन् ॥५५॥
नारंगैर्बदरैः शाकैश्चिर्भटैः फलपत्रकैः ।
ततो मे श्रीकृष्णनारायणः प्रत्यक्षतां गतः ॥५६॥
उवाच परितुष्टोऽस्मि वरं वरय सुव्रत ।
ततोऽर्थितं मया कुरु जरामरणवर्जितम् ॥५७॥
कृष्णः प्राह न वै मर्त्येऽमरत्वं कस्यचिद्भवेत् ।
मर्यादां कुरु तस्मात्ते जीवितस्य ददामि तत् ॥५८॥
ततश्चोक्तो हरिः कल्पे कल्पे रोमैकपातनम् ।
भवेन्मे नाभितः कण्ठावधि रोम्णां प्रपातनम् ॥५९॥
तावदायुर्ममैवाऽस्तु वेधोऽब्दानां दशाधिकम् ।
शतं यत्र विलीयेत ततो यास्यामि धाम ते ॥६०॥
तथाऽस्त्विति हरिः प्राह ययौ चाऽदर्शनं ततः ।
तत आरभ्य चैवात्र कुंकुमवापिकाऽन्तिके ॥६१॥
अश्वपट्टसरःक्षेत्रे निवसामि तथाऽवधिम् ।
कृष्णनारायणसेवाफलं मे चिरजीवनम् ॥६२॥
पृथ्वीनां प्रलया दृष्टा जीवनेऽत्र सहस्रशः ।
प्रलये यामि वैकुण्ठं जलस्योपरि संस्थितम् ॥६३॥
तेजआवरणप्रान्ते पुनःसृष्टौ भुवं प्रति ।
आगच्छामि निवसामि कृष्णनारायणाश्रमे ॥६४॥
पत्नीव्रतस्तथा विप्रः पतिव्रता च तत्प्रिया ।
भवतस्तौ चिरजीवौ प्रतिकेशाऽजपातनौ ॥६५॥
तथा श्रीकम्भरालक्ष्मीगोपालकृष्णभूसुरौ ।
भवतस्तौ चिरजीवौ प्रतिकेशाऽजपातनौ ॥६६॥
कृष्णनारायणस्तस्य बालोऽक्षरपतिः स्वयम् ।
प्रतिसृष्टि प्रतिकल्पं जायते च तयोर्गृहे ॥६७॥
तमेव श्रीकृष्णनारायणं भजामि सर्वदा ।
तेषामायुर्विलोक्यैव मम गर्वो न वर्तते ॥६८॥
भजामि श्रीकृष्णनारायणं त्वं भज तं हरिम् ।
लोकस्य हरिभक्तस्य वाञ्छितं नास्ति दुर्लभम् ॥६९॥
इत्येवं मम वृत्तान्तः कथितश्चेन्द्रद्युम्नक ।
त्वं जातः कीर्तिमान् लोके गच्छाऽक्षरपदं हरेः ॥७०॥
इन्द्रद्युम्नस्ततः प्राह सर्वेषां शापमोक्षणम् ।
कच्छपोलूकगृध्रर्षिबकमार्कण्डमोक्षणम् ॥७१॥
कदा भावि वद विद्वन् सर्वज्ञस्त्वं हरिर्यथा ।
लोमशस्तु तदा प्राह यदा कृष्णनरायणम् ॥७२॥

भजिष्यन्ति च ते सर्वे मन्त्रग्रहणपूर्वकम् ।
तदा मोक्षोऽत्र वै क्षेत्रे भविष्यति न संशयः ॥७३॥
इन्द्रद्युम्नस्तु तान् सर्वान् सस्मारोपकृतो मुहुः ।
जातिस्मराश्च ते कामरूपधराः समाययुः ॥७४॥
नतास्ते लोमशं कृष्णनारायणं समार्चयन् ।
पुपूजुः कम्भरालक्ष्मीं गोपालकृष्णमार्चयन् ॥७५॥
चकार स्वागतं त्वश्वपट्टसरस्तटे ऋषिः ।
लोमशः प्रददौ मन्त्रं कृष्णनारायणस्य वै ॥७६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
जेपुस्ते संस्थितास्तत्र लोमशस्याऽऽश्रमेऽनघे ॥७७॥
अश्वपट्टसरस्येते स्नात्वा कुंकुमवापिकाम् ।
गत्वा चक्रुर्जलपानं जेपुर्मन्त्रं दिवानिशम् ॥७८॥
तेषां लोमशकृपया वासना विलयं गता ।
मुक्तास्ते श्रीकृष्णनारायणाऽनुग्रहतोऽभवन् ॥७९॥
कच्छपर्षिः कच्छदेशे नारायणसरोवरे ।
घूकर्षिः श्रीहाटकेशक्षेत्रे नागनदीतटे ॥८०॥
गृध्रर्षिः श्रीरैवताद्रौ दत्तात्रेयतपःस्थले ।
बकर्षिः श्रीसोमनाथक्षेत्रे समुद्रसन्निधौ ॥८१॥
मार्कण्डेयस्तलश्यामस्थलेऽरण्ये वसन्ति च ।
दिव्यास्ते चिरजीवाश्च कामरूपधराः सदा ॥८२॥
वर्तिष्यन्ते प्रतिकल्पं लोककल्याणहेतवे ।
रैवते कार्तिके सर्वे त्वायान्ति प्रतिवत्सरम् ॥८३॥
प्रदक्षिणार्थे देवानां कृष्णनारायणस्य च ।
लोमशोऽहं प्रगच्छामि दिवसान् पञ्च तत्र वै ॥८४॥
श्रीकृष्णनारायणइत्युदारं
गृणन्त एवाऽद्रिमनुक्रमन्ते ।
तेषां पृथिव्याक्रमणस्य पुण्यं
जायेत संवच्मि तु लोमशोऽहम् ॥८५॥
अथेन्द्रद्युम्ननृपतेर्भजनेन हरिः स्वयम् ।
तुतोष परया भक्त्या लोमशानुग्रहेण च ॥८६॥
ददौ दिव्यां परां दृष्टिं निरावरणिकां हृदि ।
कृष्णनारायणं विलोकयामास हृदि प्रभुम् ॥८७॥
लोमशो दक्षिणां न्यस्य कृत्वाऽऽत्मानं परात्मनि ।
ब्रह्मरन्ध्रेण तु यथा निर्यातुं यावदिच्छति ॥८८॥
तावद्दिव्याक्षरान्मुक्तैर्जुष्टं विमानमागतम् ।
कोटिकोट्यर्कसंकाशं समारुरोह तत् नृपः ॥८९॥
कृष्णनारायणं नत्वा ययौ ब्रह्माक्षरं पदम् ।
लोमशो विधिवच्चक्रे जलदानादि तत्कृते ॥९०॥
एवं ते कथितं लक्ष्मि ! लोमशातनतोद्भवम् ।
लोमशेतिऋषेर्नामाख्यानं चिरप्रजीविनः ॥९१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने भगवद्धाम्नि समयज्ञानपरिचयः, जन्मग्रहणे दिव्यता, नैवेद्येऽभिपूरकता, लोमशस्य प्राग्वृत्तान्तः, मार्कण्डेयादिचिरंजीवानां ततः सौराष्ट्रादौ चिरवासश्चेत्यादिनिरूपणनामा चतुर्विंशत्यधिकपञ्चशततमोऽध्यायः ॥ ५२४ ॥

श्रीनारायण उवाच—

एकदा चागमन्नाम्ना ख्यातस्त्वश्वशिरानृपः ।
लोमशस्याश्रमे क्षेत्रे चाश्वपट्टसरोवरे ॥ १ ॥
कपिलस्तु महातेजा दर्शनार्थं समाययौ ।
अश्वशिराः कपिलं तमृषिं पप्रच्छ संशयम् ॥ २ ॥
मोक्षः स्यात् कर्मणा किं वा ज्ञानेन निर्णयं वद ।
शृणु लक्ष्मि ! कपिलर्षिर्यमाह निर्णयं शुभम् ॥ ३ ॥
प्रवदामि गृहस्थानां कर्मिणां हितकाम्यया ।
यत्किंचित् कर्म वै देही करोति साध्वसाधु वा ॥ ४ ॥
सर्वं नारायणे न्यस्य कुर्वन्नपि न लिप्यते ।
शृणु संयमनो विप्र आत्रेयवंशजोऽभवत् ॥ ५ ॥
तपस्यभिरतः प्रातः स्नातुं भागीरथीं नदीम् ।
धर्मारण्ये गतस्तत्र हरिणानां गणं स्थितम् ॥ ६ ॥
लुब्धो निष्ठुरको नाम व्याधो धनुःसमन्वितः ।
जिघांसुराययौ तीरे सज्ज्यं कृत्वा ससायकम् ॥ ७ ॥
धनुर्दृष्ट्वा तु विप्रः स व्याधं तं मृगयारतम् ।
वारयामास मा भद्र ! जीवघातमिमं कुरु ॥ ८ ॥
श्रुत्वा प्रहस्य व्याधस्तं प्रोवाच मुनिसत्तमम् ।
नाऽहं हिंसामि वै जीवान् नाऽहं करोमि सर्वथा ॥ ९ ॥
परमात्मा स्वयं भूतैः क्रीडति स्वीयमायया ।
माया तस्य जनिः पुष्टिर्निधनं चेति वै क्रमात् ॥१०॥
भवन्त्येव हि जीवानां तत्र नैमित्तिका वयम् ।
अहंभावः सदा ब्रह्मन् विधेयो मुमुक्षुभिः ॥११॥
प्राणयात्रामात्ररतं करोति चेन्न लिप्यते ।
अहंकारस्तत्र यस्य स साधुत्वं न गच्छति ॥१२॥
अहंकारं परित्यज्य गृह्णाम्येकं मृगं द्विज ।
इत्याकर्ण्य स विप्रेन्द्रो निषिषेध च लुब्धकम् ॥१३॥
हिंसनं सर्वथा पापं मा कुर्वेवं कदाचन ।
सन्ति फलानि मूलानि पत्राणि च जलानि च ॥१४॥

सस्यानि शाकपत्राणि निर्वाहं तैः समाचर।
अहिंसने सुयात्रा चेन्निर्वहेत् हिंसि मा वृथा ॥१५॥
अहंकारो न कर्तव्य इति ते वाञ्चि वर्तते।
नात्मनि किन्तु वै स्वार्थे भवान् मृगादनो यतः ॥१६॥
उपदेशं प्रकुर्वन्ति सर्वेऽभिमानवर्जने।
न त्यजन्ति चाभिमानं वाङ्मनसोः पृथक्-पृथक् ॥१७॥
वदन्ति चान्यत् प्रकुर्वन्ति चान्यत्
प्रमूष्य चान्यान् विहरन्ति चान्यत्।
स्वार्थप्रवीणाश्च निजार्थमाप्य
दूरी भवन्त्येव परान् विनाश्य ॥१८॥
व्याधः प्राह ऋषे नाहं कपटी स्वार्थसाधकः।
परीक्षां मे कुरु त्वत्र प्रत्यक्षं ते भवेन्ननु ॥१९॥
कुरु लोष्ठमयं जालं तस्याऽधो वह्निमावह।
अतीव तत्र शुष्को ज्वालयतां काष्ठसञ्चयः ॥२०॥
तथाकृतं तु विप्रेण प्रध्मातश्चानलो ह्यति।
गवाक्षैर्निर्गता ज्वालाः सहस्राणि च जालके ॥२१॥
लोहजालं तदा रक्तं यदा वह्निरिवाऽऽबभौ।
तदा व्याधो योगसिद्धिं समालम्ब्य निजां तनुम् ॥२२॥
वह्निरूपां तु कृतवान् सूर्यवद्दाहसंचयाम्।
वह्निर्यस्य पुरस्तत्र निस्तेजस्को बभूव ह ॥२३॥
निषसाद समुत्थाय जाले तत्र स लुब्धकः।
व्रह्निर्वै वह्निना नैव दह्यते च यथा तथा ॥२४॥
लुब्धको नैव दग्धो हि काष्ठजन्येन वह्निना।
संयमनो ब्राह्मणश्च तथाऽन्ये विस्मयं गताः ॥२५॥
प्राहुः कस्त्वं वद चास्मान् सः प्राहाऽहं हुताशनः।
स्वयं चास्मि न मे हिंसा पच्यन्ते मयि देहिनः ॥२६॥
अहं बुद्धिं विहायैव करोमि स्वस्वभाववत्।
अहंकारो मम नष्टस्तपसा ज्ञानयोजिना ॥२७॥
अहंकारे विनष्टे च कर्मभिर्नहि लिप्यते।
अहंकारो मूलमस्ति स्तम्भो ममत्वमुच्यते ॥२८॥
शाखा रागस्तथा द्वेषो ग्रन्थो लोभश्च मोहनम्।
पत्राणि तत्र कर्माणि रसश्चास्वादनं सदा ॥२९॥
पुष्पं प्रवर्तनाख्यं च फलं मिष्टं सुखं तथा।
अमिष्टं तु भवेद् दुःखं भुञ्जते देहिनः सदा ॥३०॥
वह्नेर्मूले क्षिप वारि ज्वाला निर्यान्ति यत्स्थलात्।
इत्युक्तो ब्राह्मणस्तत्र तोयपूर्णं घटं द्रुतम् ॥३१॥
चिक्षेप सहसा वह्निः प्रशशाम यदा तले।
ज्वालाः सर्वा विनष्टाश्च मूलनाशात् समन्ततः ॥३२॥

लुब्धकस्त्वाह तं विप्रं प्रत्यक्षं वै निदर्शनम्।
मूलनाशे समस्तस्य वृक्षस्य नाशनं भवेत् ॥३३॥
अभिमानं प्रमूलं चेन्नष्टं कर्मकृतां यदि।
पापेनापि च पुण्येन लिप्यते न कदाचन ॥३४॥
एतस्मिन् ज्वलितो वह्निर्बहुशाखश्च सत्तम।
मूलनाशेऽभवन्नष्टस्तथाऽहं कर्मवान् सदा ॥३५॥
आत्मा देहं समाश्रित्य पिण्डधर्मं समाश्रितः।
क्षुधया तृषया व्याप्तः खादन् पिबन् प्रवृत्तिमान् ॥३६॥
कुर्वन् सर्वं वर्जयित्वाऽभिमानं लेपकारणम्।
अन्तरात्मनि संयुक्तः कुर्वाणो नाऽवसीदति ॥३७॥
अथाऽऽह लुब्धको विप्रं स्पृश लोष्ठं द्विजोत्तम।
लोष्ठं चोष्णं दाहकारि ज्ञातं त्यक्तं द्विजेन तु ॥३८॥
ततः परपर्शं स व्याधस्तस्य दाहो न चाऽभवत्।
लुब्धकस्तं तदा प्राह संस्काराश्चाभिमानजाः ॥३९॥
यथा लोष्ठे वह्निजन्याः संस्कारा दाहका इव।
यावद्भवन्ति पुरुषास्तावद् दह्यन्ति सर्वथा ॥४०॥
तथाऽभिमानसंस्कारा यावद्भवन्ति देहिषु।
तावत् पुण्येन पापेन लिप्यन्ते नात्र संशयः ॥४१॥
अभिमानं च संस्कारास्त्याज्यास्तपस्यया तथा।
कृष्णनारायणभक्त्या योगेन ध्यानवृत्तिभिः ॥४२॥
सर्वसमर्पणभक्त्या लिप्यते नहि कर्मभिः।
एवमुक्ते तु वै विप्रे व्याधस्योपरि चाम्बरात् ॥४३॥
पपात पुष्पवृष्टिश्च विप्रस्योपरि वै मनाक्।
ततो व्याधो हरिणं तं जघानैकं तदापि च ॥४४॥
विप्रः प्राह मृगात्मा च कुत्र याति प्रदर्शय।
व्याधः संकल्पयामास विमानं स्वर्गलोकजम् ॥४५॥
तावद् दिव्यविमानानि कामगानि महान्ति च।
बहुरत्नानि मुख्यानि ददर्श ब्राह्मणोत्तमः ॥४६॥
तेषु निष्ठुरकं लुब्धं सर्वेषु समवस्थितम्।
ददर्श ब्राह्मणस्तत्र कामरूपिणमुत्तमम् ॥४७॥
अद्वैतभावनासिद्धं योगाद्बहुशरीरकम्।
मृगं दिव्यस्वरूपं च देवात्मकं विलोक्य च ॥४८॥
दृष्ट्वा विप्रो मुदा युक्तः संयमनो बभूव ह।
अन्ये चाऽप्यभवँस्तत्र देहाऽहंकारवर्जिताः ॥४९॥
एवं ज्ञातं भवेत् कर्म कुर्वतोऽपि स्वजातिकम्।
निर्बन्धं तत् पापपुण्यविलेपेन विवर्जितम् ॥५०॥
तादृशं नैव चात्मानं करोति बन्धनं क्वचित्।
यथा नारायणो देवो निर्लेपो वस्तुमात्रकम् ॥५१॥

कुर्वन् गृह्णन् कारयँश्च ग्राहयन् लेपवर्जितः।
प्रत्युत स्वपदं प्राप्तं निर्गुणं प्रकरोति तत् ॥५२॥
तथाऽऽत्मा मायया हीनो न करोति न लिप्यते।
प्राप्तं भुक्तं जडं वस्तु करोति दिव्यमेव तत् ॥५३॥
निर्लिप्तं बन्धनहीनं मुक्तिरथं तत् करोति वै।
ज्ञात्वा संयमनो विप्रः प्रययौ निजमाश्रमम् ॥५४॥
कपिलश्चाऽश्वशिरसं नृपं प्राह तथा पुनः।
तस्मात् त्वमपि राजेन्द्र देवं नारायणं प्रभुम् ॥५५॥
आत्मन्येव स्वदेहे तु पश्य त्वाराधयन्प्रभुम्।
निर्लिप्तो भविता शीघ्रं यथा व्याधोऽभवत्पुरा ॥५६॥
कपिलस्य वचः श्रुत्वा स राजाऽश्वशिराः शुभः।
मेने च कर्मिणां मुक्तिं कृष्णार्पितेन कर्मणा ॥५७॥
अथ तत्राऽगमत् तावज्जैगीषव्यो महामुनिः।
पञ्चाशत्कल्पकायुश्च लोमशस्याऽऽश्रमे शुभे ॥५८॥
ऋषयस्ते तदा चक्रुः स्वागतं च परस्परम्।
चक्रुः स्वर्गादिलोकानां संभाषां क्षेमकारिणीम् ॥५९॥
अश्वशिराः प्रणम्यैव कपिलं संस्थितेषु च।
सर्वेषु ऋषिषु मध्ये संपप्रच्छ प्रणम्य तम् ॥६०॥
कथमाराधये देवं हरिं नारायणं परम्।
कपिलः प्राह वै राजन् नारायणा ह्यनन्तकाः ॥६१॥
भवन्ति श्रीकृष्णनारायणोपासनयाऽत्र वै।
क एषः प्रोच्यते राजँस्त्वया नारायणो गुरुः ॥६२॥
आवां नारायणौ द्वौ तु त्वत्प्रत्यक्षगतौ नृप।
अश्वशिरास्तदाकर्ण्य समुवाच द्विजौ च तौ ॥६३॥
जैगीषव्यः कपिलश्च श्रुतौ मया पुरा शुभौ।
भवन्तौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्बिषौ ॥६४॥
कथं नारायणावावामिति मे वदथो वचः।
शंखचक्रगदापद्मधनुःस्वस्तिककेतुभिः ॥६५॥
युक्तः पीताम्बरो लक्ष्मीपतिर्गरुडवाहनः।
नारायणः परब्रह्म कस्तस्य सदृशो भुवि ॥६६॥
इतिराज्ञो वचः श्रुत्वा तौ विप्रौ सिद्धयोगिनौ।
जहसतुः पश्य नारायणं चेति जजल्पतुः ॥६७॥
एवमुक्त्वा स कपिलः स्वयं विष्णुर्बभूव ह।
जैगीषव्यश्च गरुडस्तत्क्षणं समजायत ॥६८॥
राजा त्वाश्चर्यमापन्नो दृष्ट्वा सगरुडं हरिम्।
नत्वाऽऽह शाम्यतां विप्रौ नेमं पृच्छामि त्रायणम् ॥६९॥
किन्तु ब्रह्मा यतो जातो नाभिपंकजमध्यगः।
तमेनं ब्रह्मपितरं त्रायणं संवदाम्यहम् ॥७०॥
श्रुत्वा च कपिलस्तत्र पद्मनाभो बभूव ह।
जैगीषव्योऽभवद् ब्रह्मा नाभिपद्मोपरि स्थितः ॥७१॥
ब्रह्मणस्तु ललाटाद्वै रुद्रोऽभूद् रक्तनेत्रकः।
राजा तदा विचार्यैव पुनः प्राह च तौ द्विजौ ॥७२॥
नेक्ष्यो भवति सर्वात्मा सर्वव्यापी नरायणः।
भवद्भ्यां दर्शिता माया योगिभ्यां योगसिद्धिजा ॥७३॥
नारायणस्तु भगवान् नेक्ष्यः सर्वात्मकः प्रभुः।
ततस्तत्र कपिलेन जैगीषव्येन वै तदा ॥७४॥
सर्वात्मकानि रूपाणि दर्शितानि निजात्मनोः।
मत्कुणा मशका यूका भ्रमरा भोगिनः खगाः ॥७५॥
अश्वा गावो द्विपाः सिंहा व्याघ्रा गोमायवो मृगाः।
अन्येऽपि पशवः कीटा ग्राम्या आरण्यकास्तथा ॥७६॥
पशवो मानवा वृक्षा वल्लिकायाश्च सर्वशः।
तद्दृष्ट्वा भूतसंघातं स राजा विस्मयं गतः ॥७७॥
विवेद जैगीषव्यस्य माहात्म्यं कपिलस्य च।
पप्रच्छ तावृषी भक्त्या किमिदं द्विजसत्तमौ ॥७८॥
तौ द्विजावूचतुर्भूपं त्वया पृष्टं च किं स्मर।
कथमाराधये देव हरिं नारायणं परम् ॥७९॥
आराधनाय प्रत्यक्षो हरिर्वै ते प्रदर्शितः।
कपिलोऽहं च प्रत्यक्षो भवाम्यत्र नरायणः ॥८०॥
भज मां यदि ते श्रद्धा प्रत्यक्षं प्राप्तमेव ह।
सर्वज्ञस्य गुणाः सर्वे मयि सन्ति तदंशतः ॥८१॥
तस्माल्लब्धा मया सर्वे भक्त्या तव प्रदर्शितः।
स तु नारायणो देवः सर्वज्ञः कामरूपवान् ॥८२॥
पद्मनाभादपि दूरं महाविष्णोः परेऽस्ति च।
गोलोकाच्चापि वैकुण्ठात्परे चाक्षरधामनि ॥८३॥
अनादिश्रीकृष्णनारायणो मुक्तेषु राजते।
सौम्यः क्वापि स्वेच्छयाऽत्र प्राप्यते मानवैः किल ॥८४॥
लोमशोऽयं प्राप्तवाँस्तं कृष्णनरायणं परम्।
अत्राऽश्वपट्टसरसः क्षेत्रे श्रीकृष्णवल्लभम् ॥८५॥
सर्वेषामवताराणामवतारिणमच्युतम्।
आवां तस्य दर्शनार्थमागतौ स्वः शुभाश्रमे ॥८६॥
स वै सर्वशरीरस्थः परमात्मा जगत्पतिः।
स्वदेहे वर्तते चापि दृश्यते निजभक्तितः ॥८७॥

अतोऽर्थे दर्शितं रूपं श्रीकृष्णनारायणस्य च ।
आवयोस्तत्र राजेन्द्र प्रतीतिः स्यात्तथा तव ॥८८॥
एवं सर्वगतो देवस्तव देहेऽपि वर्तते ।
सर्वप्रजासु भृत्येषु मन्त्रिष्वपि स्थितः स हि ॥८९॥
पशवः कीटसंघाद्याः सर्वे विष्णुमया नृप ।
भावनां तु दृढां कुर्याद् यद्वै सर्वमयो हरिः ॥९०॥
नान्यत् तत्सदृशं भूतं सर्वभूतेष्ववस्थितः ।
तमान्तरस्थं वै देवमितिभावेन सेवताम् ॥९१॥
एष ते दर्शितश्चाराधनामार्गोऽतिमोक्षदः ।
परिपूर्णेन भावेनाऽर्चय कृष्णनरायणम् ॥९२॥
पूजोपहारैर्धूपाद्यैर्नैवेद्यारात्रिकादिभिः ।
ध्यानेन दासभक्त्या च सुप्राप्यः स परेश्वरः ॥९३॥
योऽसौ नारायणो देवः परमात्मा सनातनः ।
तत्तद्रूपेण बहुधा वर्तते कार्यकृत् प्रभुः ॥९४॥
मत्स्यः कूर्मो वराहश्च नरसिंहश्च वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्की तथाऽपरे ॥९५॥
इत्येताः कथितास्तस्य मूर्तयः कपिलादयः ।
साधवश्चापि सिद्धाश्च साध्व्यः सत्यश्च योगिनः ॥९६॥
दर्शनं प्राप्तुमिच्छूनां सोपानानि भवन्ति वै ।
यत्तस्य परमं रूपं तन्न पश्यन्ति देवताः ॥९७॥
अस्मदादिस्वरूपेण पूरयत्येव भावनाम् ।
तस्माद् व्याप्तमिदं सर्वं जगन्नारायणेन हि ॥९८॥
भज तं च प्रिये यथाभिमते स्थितमच्युतम् ।
बृहस्पतिः पुरा रैभ्यं ब्रह्मपुत्रं जगाद ह ॥९९॥
वसुसंज्ञं तु राजानं चाक्षुषे त्वान्तरे मनोः ।
रैभ्य शृणु वसो राजन् समाकर्णय चादरात् ॥१००॥
यत्किञ्चित् कुरुते कर्म पुरुषः साध्वसाधु वा ।
सर्वं नारायणे न्यस्य कुर्वन्नपि न लिप्यते ॥१०१॥
स च नारायणः श्रीमान् सर्वप्राणिष्ववस्थितः ।
भज तं श्रीकृष्णनारायणं चान्तरगं प्रभुम् ॥१०२॥
ततस्तौ श्रीकृष्णनारायणं संभेजतुः सदा ।
मुक्तिं यातौ परे धाम्नि दास्यात्मिकां च शाश्वतीम् ॥१०३॥
इत्येतत् कथितं सर्वं कपिलस्य वचोऽर्थदम् ।
राजा चाश्वशिराः पुत्रं ज्येष्ठं स्थूलशिराह्वयम् ॥१०४॥
अभिषिच्य निजे राज्ये नत्वा गुरून् पुनः पुनः ।
नैमिषाख्यं वनं दूरं ययौ तत्र हरिं प्रभुम् ॥१०५॥
तपसाऽऽराधयामास प्रत्यक्षोऽभूद्धरिः स्वयम् ।
विमानेन निजं भक्तं निनायाऽक्षरधाम सः ॥१०६॥
इत्येतत् कथितं सर्वमश्वशिरःप्रमोक्षणम् ।
कर्मणा चार्पितेनेशेश्वरे ज्ञानान्वितेन वै ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कपिलेन अश्वशिरसे राज्ञे ज्ञानदाने संयमनद्विजनिष्ठुरक-व्याधनिदर्शनेन कर्मणा सर्वसमर्पणात्मकेन मोक्षः प्रदर्शितः, कपिलस्य जैगीषव्यस्य चाऽनेक-विभूतिरूपत्वं चेत्यादिनिरूपणनामा पञ्चविंश-त्यधिकपञ्चशततमोऽध्यायः ॥५२५॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! वसोः पूर्ववृत्तान्तं चाऽभवद्यथा ।
कथयामि चमत्कारं रैभ्यस्यापि ततः परम् ॥ १ ॥
वसुरासीन्महाभक्तः . काश्मीरनृपतिः स्वयम् ।
अनादिश्रीकृष्णनारायणस्य शरणागतः ॥ २ ॥
'ओं नमः श्रीकृष्णनारायणस्य स्वामिने नमः' ।
इतिमन्त्रं प्रजग्राह वार्धक्ये तु नरायणात् ॥ ३ ॥
बादरीं स समायाति प्रतिसंवत्सरं नृपः ।
नारायणस्य सेवार्थे दर्शनार्थे च भावतः ॥ ४ ॥
कण्ठे च तुलसीमालां सदा रक्षति शोभनाम् ।
करेऽपि जपनार्थं सर्वदा रक्षति मालिकाम् ॥ ५ ॥
जानन् क्षणस्थितिं स्वस्य संसारस्यापि तादृशीम् ।
संसारे निर्मिताः सर्वे संघाताः शोकभीप्रदाः ॥ ६ ॥
वायुश्च भूमिराकाशो जलं तेजश्च पंकजम् ।
शरीरं पञ्चभूतैश्च निर्मितं सर्वदेहिनाम् ॥ ७ ॥
मिथ्याभ्रमः कृत्रिमश्च स्वप्नवन्मायथाऽन्वितः ।
को वा कस्य सुतस्तत्र का स्त्री कस्य पतिस्तथा ॥ ८ ॥
कर्मभिर्निर्मितं सर्वं कर्मबन्धनजं त्विदम् ।
सुखं दुःखं भयं शोकं देहयोगे प्रगच्छति ॥ ९ ॥
मानुषे च पशौ देवे द्रुषु कीटेषु जन्तुषु ।
पक्षिष्वपि तृणे चापि जन्म याति स्वकर्मभिः ॥१०॥
पुनः पुनर्भ्रमत्येव यावत्कर्मलयो न वै ।
सत्यं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम् ॥११॥
निमेषस्य चतुर्भागस्त्रुटिः स्यात् तद्द्वयं लवः ।
लवद्वयं यवः प्रोक्तः काष्ठा तद्दशपंचभिः ॥१२॥
त्रिंशत्काष्ठाः कलाः प्रोक्ता क्षणस्त्रिंशत्कलो मतः ।
क्षणैः षष्ट्या पलं प्रोक्तं षष्ट्या तेषां च नाडिका ॥१३॥
नाडीद्वयं मुहूर्तं त्रिंशन्मुहूर्तं दिवानिशम् ।
मासस्त्रिंशदहोरात्रैर्द्वौ मासौ तु ऋतुर्मतः ॥१४॥

ऋतुत्रयं स्यादयनमयने द्वे तु वत्सरम् ।
अनेनैव तु मानेन मानवानां कृतेऽत्र वै ॥१५॥
लक्षैः सप्तदशाख्यैश्च सौराब्दैश्च तथा परैः ।
अष्टाविंशतिसाहस्रैर्निश्चितं वै कृतं युगम् ॥१६॥
अष्टशताधिक्ययुक्तचतुःसाहस्रसंख्यकाः ।
षष्ट्यधिकत्रिशतकैर्गुणितास्ते कृते मताः ॥१७॥
तत्र वै जायते शुक्लवर्णो हि भगवान् स्वयम् ।
लोकाः पापविनिर्मुक्ताः क्षान्ता दान्ता जितेन्द्रियाः ॥१८॥
दीर्घायुषस्तपोमग्नः कामक्रोधादिवर्जिताः ।
न पुत्रसंभवो मृत्युर्वीक्ष्यते जनकैः क्वचित् ॥१९॥
ततस्त्रेतायुगं स्याच्च लक्षैर्द्वादशभिस्तथा ।
षण्णवतिसाहस्रैः सौराब्दैर्निश्चितं सुरैः ॥२०॥
षट्शताधिक्ययुक्तत्रिसाहस्रसंख्यकाः खलु ।
षष्ट्यधिकत्रिशतकैर्गुणितास्ते त्रिके युगे ॥२१॥
पापेनैकेन पादेन रौद्रं धर्मे तदा विशेत् ।
ततो रक्तत्वमभ्येति श्रीमत्कृष्णनरायणः ॥२२॥
पापांशेन मिथो लोकः संस्पर्द्धी जायते तदा ।
स्वर्गार्थे दानयज्ञाश्च कुर्वन्ति यानि वै दिवम् ॥२३॥
केचित्स्वल्पायुषस्तत्र जायन्ते स्पर्धयाऽपि च ।
जनके विद्यमाने तु पुत्राणां मरणं न वै ॥२४॥
कामक्रोधादयस्तत्र भवन्ति न भवन्ति च ।
एकवारं तदा कृष्या वापितं क्षेत्रमुत्तमम् ॥२५॥
सप्तवारान् प्रगृह्णन्ति वैश्याः कृष्णपरायणाः ।
सर्वा घटस्तवा गावो महिष्यश्च चतुर्गुणाः ॥२६॥
शापानुग्रहकृत्येषु समर्था मानवास्तदा ।
न चौरो जा॰ श्च सर्वे धर्मरता जनाः ॥२७॥
ततस्तृतीययुगको द्वापरो विद्यते क्रमात् ।
द्वौ पादौ तत्र पापस्य द्वौ च धर्मस्य संस्थितौ ॥२८॥
तच्चाऽष्टलक्षमानेन सौराब्दानां प्रकीर्तितम् ।
चतुःषष्टिभिरन्यैश्च सहस्रैश्च युगं तदा ॥२९॥
चतुःशताऽऽधिकद्विसाहस्रप्रसंख्यकाः खलु ।
षष्ट्यधिकत्रिशतकैर्गुणितास्ते द्विके युगे ॥३०॥
कामः क्रोधो मदो लोभो दम्भो मत्सर एव च ।
षडेते तत्र जायन्ते ईर्ष्या चापि तु सप्तमी ॥३१॥
अथ तैरन्विताः सर्वे विरुद्धा वै परस्परम् ।
केऽपि शान्ताश्च दान्ताश्च जितेन्द्रिया भवन्ति हि ॥३२॥
ततः कलियुगं प्रोक्तं सर्वदोषाश्रयं तदा ।
एकपादो वृषो यत्र पापं पादैस्त्रिभिः स्थितम् ॥३३॥
श्वेतः सत्ये रक्तवर्णस्त्रेतायां भगवानपि ।
नीलश्च द्वापरे कृष्णोऽलिवद् वै जायते कलौ ॥३४॥
प्रमाणं तु कलेर्दिष्टं लक्षाश्चत्वार एव च ।
द्वात्रिंशच्च सहस्राणि सौराब्दानि भवन्ति हि ॥३५॥
द्विशताधिकैकसाहस्रात्मप्रसंख्यकाः खलु ।
षष्ट्यधिकत्रिशतकैर्गुणितास्ते कलौ मताः ॥३६॥
एकद्वित्रीणि चत्वारि सहस्राणि दश क्रमात् ।
कलिद्वीतत्रीतसत्ययुगाऽब्दानि भवन्ति हि ॥३७॥
मानवानि द्विचतुःषडष्टशतान्यनुक्रमात् ।
भवन्त्यब्दानि साहस्रे द्वे, मिलित्वा तु तान्यथ ॥३८॥
द्वादशाब्दसहस्राणि मानवानां चतुर्युगम् ।
बोध्यं सौराणि त्रिचत्वारिंशल्लक्षाणि चाप्यथ ॥३९॥
विंशतिसाहस्रसंख्याधिकान्येव चतुर्युगम् ।
युगक्षयकृतश्चायुःक्षयः सृष्टौ मतोऽपि हि ॥४०॥
यस्य चास्ति गृहे वित्तं तथा नार्यो मनोरमाः ।
तैर्नरैस्तु समं मैत्रीं कलौ कुर्वन्ति मानवाः ॥४१॥
स्वार्थमात्रपराः पुत्रा भूषास्वार्थपराः प्रियाः ।
स्नुषा वेत्ति च वित्तेन यदि श्वश्रूः क्षयं व्रजेत् ॥४२॥
मम स्याद् गृहमैश्वर्यं सर्वे वाञ्छन्ति तत्तथा ।
अल्पोदकास्तदा मेघा अल्पसस्या च मेदिनी ॥४३॥
धूर्ता विडम्बकाः सन्तो गुरवश्च कलौ युगे ।
अल्पक्षीरास्तदा गावः क्षीरे सर्पिर्न विद्यते ॥४४॥
सर्वभक्षास्तदा विप्रा नृपा निष्करुणास्तदा ।
चौर्यकार्यपराः सर्वे पृथिवी गतयौवना ॥४५॥
अतिक्रान्तशुभाः कालाः पर्युपस्थितदारुणाः ।
वर्षे चतुष्टये कन्या गर्भवती भविष्यति ॥४६॥
पञ्चदशन्यूनवर्षे मृत्युरेव भविष्यति ।
भविष्यन्ति कलौ चान्ते जना वितस्तिमात्रकाः ॥४७॥
दशवर्षायुषश्चान्ते गृहं बिलं भुवोऽन्तरे ।
प्रावरणं तदा वै स्याद् गुप्तवस्त्रं हि केवलम् ॥४८॥
एकवर्णा भविष्यन्ति वर्णाः सर्वे मिथोऽन्विताः ।
म्लेच्छीभूता दुराचारा धर्मकर्मविवर्जिताः ॥४९॥
चतुर्युगानां सप्ततिं त्वेकाधिकां मनुस्तथा ।
महेन्द्रश्च प्रभुंक्ते वै दीर्घमायुः पुनः पुनः ॥५०॥
मनोः समं महेन्द्रेण परमायुः प्रकीर्तितम् ।
चतुर्दशेन्द्रविच्छित्तौ ब्रह्मणो दिनमुच्यते ॥५१॥
एवं परिमिता रात्रिर्दिवारात्रं हि कल्पकः ।
ब्रह्मणस्तु वर्षशतं परमायुर्विनिर्मितम् ॥५२॥

सौरसावनचन्द्रर्क्षैर्मानैरेभिश्चतुर्विधैः ।
कालो निर्याति सर्वेषां भूतानां क्षितिमण्डले ॥५३॥
पञ्चषष्ट्यधिकैश्चापि दिनानां च शतैस्त्रिभिः ।
भवेन्मानववर्षं तत् पञ्चोनैस्तैश्च सावनम् ॥५४॥
चान्द्रमेकादशोनं तु त्रिंशद्धीनं तु ऋक्षजम् ।
शीतातपौ तथा वृष्टिर्मानवाब्देन जायते ॥५५॥
अग्निष्टोमादयो यज्ञा विवाहा उत्सवादयः ।
सावनेन भवन्त्येव सर्ववर्णेषु वै क्षितौ ॥५६॥
कुसीदाद्या व्यवहारा उत्पन्नानि च यान्यपि ।
अधिमासप्रयुक्तेन चान्द्रेणैव भवन्ति हि ॥५७॥
नक्षत्रेण तु मानेन मियन्ते चामितारकाः ।
एवं देवा मानवाश्च दैत्यास्त्वन्ये सदा क्षितौ ॥५८॥
प्रवर्तन्ते च जायन्ते म्रियन्ते चेदृशं जगत् ।
तत्र मायाबन्धनेनावृतः पारं न याति वै ॥५९॥
तस्मान्मया सदा कृष्णनारायणः पुमुत्तमः ।
भजनीयः पूजनीयो ध्यातव्यश्च निरन्तरम् ॥६०॥
कालो भक्षयति सर्वान् क्षणे वर्षे युगे तथा ।
मां शिखायां दत्तहस्तः कालो ग्रसितुमिच्छति ॥६१॥
इत्येवं बोधयुक्तः स राजा भक्तिपरायणः ।
वसुर्धर्मानुमत्या च स्वराज्यं प्रत्यपालयत् ॥६२॥
अयजद् बहुभिर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ।
कर्मार्पणेन देवेशं कृष्णनारायणं हरिम् ॥६३॥
तोषयामास बहुभिर्दास्यभावैश्च वर्तयन् ।
ततः कालेन महता वसुर्वैराग्ययोगतः ॥६४॥
निवृत्तराज्यभोगेच्छाद्वन्द्वस्याऽन्तमुपेयिवान् ।
निजपुत्रं विवस्वन्तं श्रेष्ठं भ्रातृशतस्य च ॥६५॥
अभिषिच्य निजे राज्ये पुष्करं समुपाययौ ।
यत्र श्रीपुण्डरीकाक्षन्नारायणः संविराजते ॥६६॥
वसुः काश्मीरभूपः स तपोभिरुग्रसाधितैः ।
भक्त्या स्मरन् हरिं तत्र दिव्यदेहं ददर्श तम् ॥६७॥
कृष्णनारायणं देवं सर्वान्तर्यामिणं प्रभुम् ।
तुष्टाव तं नमस्तेऽस्तु पुण्डरीकाक्ष ! ते नमः ॥६८॥
विश्वमूर्ते सर्वतेजोनिवास कृष्ण ते नमः ।
शरण्यं रक्षकं विष्णुं जिष्णुं व्योमनिवासिनम् ॥६९॥
गोपालकृष्णबालं त्वां नमस्ये चक्रपाणिनम् ।
नान्यत् किञ्चित्प्रपश्यामि व्यतिरिक्तं त्वयाऽच्युत ॥७०॥
एवं तु वदतस्तस्य मूर्तिमान् पुरुषः किल ।
निर्गत्य देहान्नीलाभो घनचण्डो भयंकरः ॥७१॥
रक्ताक्षो ह्रस्वकायश्चोवाच राजन् करोमि किम् ।
वसुः पप्रच्छ तं पापरूपं कोऽसि वदाऽत्र मे ॥७२॥
पापरूपः स वै प्राह तव पापं भवाम्यहम् ।
न चास्मि केवलं पापं पापप्रेतोऽस्मि तेऽनघ ॥७३॥
शृणु पूर्वे कलौ राजँस्त्वं राजा दक्षिणापथे ।
जनस्थाने कदाचित्त्वं मृगयार्थमुपागतः ॥७४॥
तत्र त्वया तु दण्डेन मृगवेषधरो मुनिः ।
प्रस्रवणे गिरौ सन्ताडितो मृतः स सत्वरम् ॥७५॥
हरिणं तं हतं मत्वा यावद् ग्रहीतुमिच्छसि ।
तावन्मृगवपुर्विप्रो वीक्षितो हि नरस्त्वया ॥७६॥
त्वं चातिभयमापन्नो हत्यया मानवस्य वै ।
हत्याऽहं तु महाघोरा प्रेतब्राह्मणनाशजा ॥७७॥
अहं ब्रह्मग्रहो राजन् शरीरे न्यवसं तव ।
अद्याऽवधि पीडयितुं खादितुं तव वर्ष्म च ॥७८॥
राज्यभोगा मया दृष्टा भुक्ता देहे च ते नृप ।
रक्तं पीतं खादितं च मांसं ते नूतनं सदा ॥७९॥
त्वं च राज्यप्रभावेण कृशो नैव विलोक्यसे ।
बहुभोजनपानादिस्मृद्धिमत्त्वान्नृपोत्तम ॥८०॥
अथ त्वया तत्पापस्य प्रायश्चित्तं विचिन्तितम् ।
श्रीहरेर्द्वादशी शुद्धा त्वया राजन्नुपोषिता ॥८१॥
व्रतान्यन्यानि च नारायणो मे प्रियतामिति ।
कृतानि च तथा दानं गवां दत्तं पुनः पुनः ॥८२॥
ततस्त्वं दक्षिणापथे स्वगृहे कुक्षिशूलतः ।
रुग्णो मृतस्तव पत्नी नाम्ना नारायणी सती ॥८३॥
ददौ जलं तवाऽऽस्ये च श्रीविष्णोश्चरणामृतम् ।
किन्तु त्वया तदा पत्नी स्मृता ध्याता मृतिक्षणे ॥८४॥
तेन त्वं कल्पमेकं च जातो विष्णुपुरे पुनः ।
कुमारो वासनायुक्तो मोक्षाद्वै वञ्चितो यतः ॥८५॥
अहं तत्र त्वया सार्धं तव देहस्थ एव तु ।
संस्थितः कल्पपर्यन्तं सद्भोगान् बुभुजे त्वयि ॥८६॥
तत्र कल्पे त्वया स्वर्गे बहुधा भुक्तमेव च ।
स्वर्गस्थे च त्वयि राजन् स्थितोऽहं स्वेन तेजसा ॥८७॥
पुना राजस्वरूपे च स्थितोऽहं बहुवत्सरान् ।
ततोऽहःकल्पनिवृत्तौ रात्रिकल्पे गतेऽपि च ॥८८॥
इदानीमादिसृष्टौ च सत्ये युगे नराधिप ।
संभूतस्त्वं महाराज ! राज्ञः सुमनसो गृहे ॥८९॥
काश्मीरदेशाधिपतेरहं त्वङ्गरुहेषु ते ।
निवासाम्यद्यपर्यन्तं भुञ्जानो नूतनं नवम् ॥९०॥

यज्ञैरिष्टं त्वयाऽनेकैर्बहुभिश्चाप्तदक्षिणैः ।
न चाऽहं तैरपहृतो विष्णुस्मरणवर्जितैः ॥९१॥
इदानीं च विशालायां त्वया भक्तिः कृता हरेः ।
स्तोत्रं प्रहृणभावेन कृतं सर्वात्मनाऽत्र च ॥९२॥
भक्तेस्तव प्रभावेण पुण्डरीकाक्षशार्ङ्गिणः ।
सर्वात्मनाऽर्पणेनापि प्रसादितो हरिः स्वयम् ॥९३॥
किंकरान् प्रेषयामास विष्णुर्नारायणः प्रभुः ।
पश्य त्वेतान् महाव्योम्नि विमानेष्वभ्यवस्थितान् ॥९४॥
तदैतैर्विष्णुपुरुषैर्मूशलैः प्रहृतोऽस्म्यहम् ।
क्षयं यातश्च्युतश्चास्मि रोमकूपेभ्य एव ते ॥९५॥
तव भक्तिप्रभावेण विहायाऽङ्गरुहाण्यहम् ।
एकीभूतः पुनर्जातो व्याधरूपी तवान्तिके ॥९६॥
अहं भगवतः स्तोत्रं श्रुत्वा भक्त्या च ते नृप ।
विष्णुपार्षददण्डस्य स्पर्शेनाऽपि महाऽघतः ॥९७॥
मुक्तोऽस्मि प्रेतभावाच्च धर्मबुद्धिश्च मेऽस्ति च ।
ततो राजन्निजमित्रं त्वदाश्रितं निराश्रयम् ॥९८॥
भक्तं मां देहि सुखदं वरदानं कृपां कुरु ।
एवं श्रुत्वा वसुर्व्याधायापि ददौ वरं शुभम् ॥९९॥
शृणु व्याध ! त्वया स्मारितोऽस्मि जन्मान्तरं मम ।
ततस्त्वं मद्वरेणातो धर्मव्याधो भविष्यसि ॥१००॥
एवमुक्त्वा तु भूपः स विमानवरमास्थितः ।
परेण श्रीकृष्णनारायणेनाऽक्षरधाम वै ॥१०१॥
ययौ पार्षदयुक्तः स पार्षदोऽभूद्धरेस्ततः ।
अथाऽयं धर्मकर्मा च धर्मव्याधो बभूव ह ॥१०२॥
इत्येतत् कथितं लक्ष्मि ! वसोश्चरितमुत्तमम् ।
यः पठेच्छृणुयाच्चास्य तीर्थस्नानफलं भवेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने काश्मीरनृपस्य वसोः प्राग्जन्म मृगरूप ब्रह्महत्याया भक्तिबलेन निःसृताया धर्मव्याधजन्मता, वसोस्ततो मुक्तिश्चेत्यादिनिरूपणनामा षड्विंशत्यधिकपञ्चशततमोऽध्यायः ॥५२६॥

श्रीनारायण उवाच—

शृणु रैभ्यस्य चरितं लक्ष्मि ! देहप्रमोक्षदम् ।
रैभ्यः स्वयं जगामाथ गयां पुण्यां तपोधनः ॥ १ ॥
तत्र पितॄन् परभक्त्या पिण्डदानेन तर्पयन् ।
ततापं सुमहत् तीव्रं तपः परमदुश्चरम् ॥ २ ॥
चरतस्तस्य तत्तीव्रं तपो रैभ्यस्य धीमतः ।
आजगाम महायोगी विमानस्थोऽतिदीप्तिमान् ॥ ३ ॥
त्रसरेणुसमे शुद्धे विमाने सूर्यसन्निभे ।
परमाणुप्रमाणेन पुरुषस्तत्र दीप्तिमान् ॥ ४ ॥
सोऽब्रवीद् रैभ्य ! किं कार्यं तपश्चरसि सुव्रत ! ।
एवमुक्त्वा दिवो भूमेरन्तराऽऽस च वै पुमान् ॥ ५ ॥
तावद् वै रोदसीव्याप्तं विमानं समजायत ।
यत्राऽनन्ताश्च ऋषयो दृष्टा रैभ्येण धीमता ॥ ६ ॥
विष्णुलोकमभिव्याप्तं विमानं स ददर्श ह ।
ततः स विस्मयाऽऽविष्टो रैभ्यः प्रणयपूर्वकम् ॥ ७ ॥
पप्रच्छ तं महायोगिन् ! को भवान् प्रब्रवीतु मे ।
पुरुषः पञ्चवर्षायुर्बालो रैभ्यमुवाच ह ॥ ८ ॥
अहं रुद्रादवरजो ब्रह्मणो मानसः सुतः ।
नाम्ना सनत्कुमारोऽस्मि जनलोके वसाम्यहम् ॥ ९ ॥
भवतः पितृतृप्त्यादिकर्मभिस्तृप्त एव ते ।
धन्यवादप्रदानार्थमागतोऽस्मि तवाऽन्तिकम् ॥१०॥
धन्योऽसि सर्वदा वत्स ब्रह्मणः कुलवर्धनः ।
वेदानाश्रित्य च पितॄन् प्रीणासि सर्वदाऽनघ ॥११॥
मन्त्रव्रतजप्यहोमैर्गयायां पिण्डदानकैः ।
पितॄणां तृप्तिदाः पुत्रास्तदन्ये सूतका यतः ॥१२॥
शृणु रैभ्य ! विशालाख्यो नृपो बभूव वै पुरा ।
पुत्रार्थे च द्विजान् श्रेष्ठान् पप्रच्छ मतिमान् हि सः ॥१३॥
विप्राः प्राहुर्गयां गत्वा पितॄन् तर्पय भावतः ।
अन्नदानैर्जलैः पिण्डैर्गोदानैश्चान्यदानकैः ॥१४॥
ध्रुवं सुतस्ते भविता सुखदाता क्षितीश्वरः ।
विशालनगरेशः स विशालः प्रययौ ततः ॥१५॥
गयां मघासु पितॄणां कृतवान् पिण्डदानकम् ।
तावद् वियति पुरुषास्त्रयस्तत्र समागताः ॥१६॥
दृष्ट्वा सितं च रक्तं च कृष्णवर्णं तृतीयकम् ।
ननाम तान् समुवाच गृह्णन्त्विमान् सुपिण्डकान् ॥१७॥
उपेक्ष्यते भवद्भिः किं शंसन्तु मे कुतूहलम् ।
ततस्तेषु सितः प्राह पुत्र ते जनकोऽस्म्यहम् ॥१८॥
नाम्ना वृत्तेन च श्वेतः कर्मणाऽपि कुलेन च ।
अयं तु मे पिता रक्तो नृशंसकृच्च विप्रहा ॥१९॥
तस्य पिता कृष्णवर्णो नाम्ना वृत्त्या च कर्मभिः ।
कृष्णवर्णेन ऋषयो बहवस्तु पुरा हताः ॥२०॥
एतौ मृताववीच्याख्यं प्रपन्नौ नरकं चिरम् ।
अहं पुण्यैः समापन्नः शक्रासनं सुदुर्लभम् ॥२१॥

त्वया मन्त्रैर्गयायां संदत्ताः पिण्डा विधानतः।
तेनैतौ नरकात् समाकृष्यानीतौ सुयोजितौ ॥२२॥
पितॄन् पितामहाँश्चैव तथैव प्रपितामहान्।
प्रीणयामीति तत्तोयं त्वया दत्तं सुपुत्रक ॥२३॥
तेनाऽस्मद्युगपद्योगो जातोऽत्र तव सन्निधौ।
गृहीमः पिण्डदानं च जलं तृप्ताः स्म सर्वथा ॥२४॥
तीर्थप्रभावाद् गच्छामि पितृलोकं न संशयः।
अत्र पिण्डप्रदानेन ह्येतौ तव पितामहौ ॥२५॥
दुर्गतावपि संशुद्धौ पुण्यवन्तौ बभूवतुः।
तीर्थप्रभाव एषोऽस्ति ब्रह्मघ्नस्याऽपि तत्सुतः ॥२६॥
पितुः पिण्डप्रदानेन कुर्यादुद्धरणं पुनः।
एतस्मात् कारणाद् राजन् सितोऽहं जनकस्तव ॥२७॥
किञ्चिदधिकं ते वच्मि येन मोक्षो भवेद्धि नः।
शृणु सांसारिकं ज्ञानं येन यास्यसि मोक्षणम् ॥२८॥
नित्यं च प्रातरुत्थाय रात्रिवस्त्रं विहाय च।
अभीष्टदेवं हृत्पद्मे ब्रह्मरन्ध्रे गुरुं तथा ॥२९॥
विचिन्त्य मनसा प्रातःकृत्यं सर्वं समाचर।
स्नाने शौचे क्रियायां च हरिं स्मर मुहुर्मुहुः ॥३०॥
धौतवस्त्रे निधायैव परमेशं प्रपूजय।
शालग्रामे मणौ यन्त्रे प्रतिमायां जलेऽपि च ॥३१॥
संपूजय गवि विप्रे गुरुष्वेव विशेषतः।
घटेऽष्टदलपद्मे च पात्रे चन्दनचर्चिते ॥३२॥
शालग्रामे च मनसि पूजय श्रीपतिं सति।
देहि षोडशद्रव्याणि भजनं च मुहुः कुरु ॥३३॥
लक्ष्मीं सरस्वतीं दुर्गां राधां गंगां च तुलसीम्।
नारायणं ह्यजं शंभुं कृष्णं विनायकं गुरुम् ॥३४॥
प्रपूजय सदा प्रीत्याऽतिथिं सूर्यं हुताशनम्।
पितरौ ब्राह्मणं साधुं सूर्यं पूजय भावतः ॥३५॥
अदृश्याँस्ते कथयामि दर्शनीया न ते क्वचित्।
विष्ठां न पश्येत् सत्प्राज्ञो व्याधिबीजस्वरूपिणीम् ॥३६॥
मूत्रं च व्याधिबीजं च तथा नरककारणम्।
लिङ्गं योनिं पापदुःखव्याधिदारिद्र्यदायिनीम् ॥३७॥
नार्यंगं यद् विनाशस्य कारणं नावलोकयेत्।
अतिभोगान् वर्जयेच्च रोगाणां कारणानि यत् ॥३८॥
अस्तकाले रविं चन्द्रं न पश्येद् व्याधिकारणम्।
खण्डं समुदितं चन्द्रं न वीक्षेताऽऽधिकारणम् ॥३९॥
जलस्थं च रविं चन्द्रं दृष्ट्वा शोकं व्रजेन्नरः।
एकस्य शयनस्थानं भोजनं च गतिं तथा ॥४०॥
न कुर्यात् पापिना सार्धं सर्वं नाशस्य कारणम्।
आलापाद् गात्रसंस्पर्शाच्छयनाश्रयभोजनात् ॥४१॥
सञ्चरन्ति ध्रुवं व्यक्तौ पापान्यन्यकृतान्यपि।
हिंस्रजन्तुसमीपं च न गच्छेद् दुःखकारणम् ॥४२॥
खलेन सार्धं मिलनं न कुर्याच्छोककारणम्।
ब्राह्मणानां गवां चापि वैष्णवानां सतां तथा ॥४३॥
न कुर्याद्धिंसनं हानिं सर्वनाशस्य कारणम्।
देवदेवलविप्राणां सतीनां च सतामपि ॥४४॥
वित्तं वस्तु धनं नैव हरेन्नाशस्य कारणम्।
दक्षिणां तु द्रुतं दद्यादन्यथा नाशकारणी ॥४५॥
जीवानां हिंसनं कृत्वा वंशहानिर्भवेद्ध्रुवम्।
देवं गुरुं न नमेद् यः पापभाङ् नरकं व्रजेत् ॥४६॥
या स्त्री मूढा दुराचारा स्वपतिं हरिरूपिणम्।
न पश्येत्तर्जनं कृत्वा कुंभीपाके पतेत्तु सा ॥४७॥
वाक्तर्जनाद् भवेत् काको हिंसनात् सूकरो भवेत्।
सर्पो भवति कोपेन दर्पेण गर्दभो भवेत् ॥४८॥
कुक्कुरी च कुवाक्येनाऽप्यन्धा च विषदर्शनात्।
पतिव्रता तु वैकुण्ठे पत्या सह व्रजेद् ध्रुवम् ॥४९॥
शिवं दुर्गां गणपतिं सूर्यं विप्रं च वैष्णवम्।
पितरं मातरं पुत्रं सतीं भार्यां गुरुं पतिम् ॥५०॥
अनाथां भगिनीं कन्यां विनिन्द्य नरकं व्रजेत्।
शालग्रामजलं कृष्णप्रसादं ये तु भुंजते ॥५१॥
तीर्थं पुनन्ति ते सन्तः शतं पुंसां वसुन्धराम्।
विष्णुप्रसादभोजी तु लभतेऽश्वक्रतोः फलम् ॥५२॥
प्रदीप्तं शिवलिंगं च शालग्रामं मणिं तथा।
प्रतिमां यज्ञसूत्रं च सुवर्णं शंखमित्यपि ॥५३॥
हीरकं च तथा मुक्तां गोमूत्रं गोमयं घृतम्।
शालग्रामशिलातोयं भूमौ त्यक्त्वा व्रजेदधः ॥५४॥
दरिद्रः कृपणः कुष्ठी वंशहीनोऽप्यभार्यकः।
भूमिहीनः प्रजाहीनो बन्धुहीनश्च कुत्सितः ॥५५॥
अन्धः पंगुर्वा खर्वश्च खञ्जश्चाप्यंगहीनकः।
भवेत् क्रमेण पापात्मा ह्येतान् भूमौ त्यजेत्तु यः ॥५६॥
मृद्भस्मगोशकृत्पिण्डैस्तथा वै वालुकादिभिः।
कृत्वा लिंगं सकृत्पूज्य वसेत् कल्पशतं दिवि ॥५७॥
येषां च दर्शने पुण्यं कथयामि निशामय।
सुब्राह्मणानां तीर्थानां वैष्णवानां सतां तथा ॥५८॥
देवतानां तथा पित्रोः पत्युर्दर्शनमुत्तमम्।
सूर्यस्य च सतीनां च यतीनां ब्रह्मचारिणाम् ॥५९॥

सन्यासिनां गवां वह्नेर्गुरोर्गजस्य वाजिनः ।
सिंहस्य कोकिलस्यापि खञ्जनस्य शुकस्य च ॥६०॥
हंसानां च मयूराणां चाषाणां शंखपक्षिणाम् ।
वत्सप्रयुक्तधेनूनामश्वत्थानां मणेस्तथा ॥६१॥
पतिपुत्रवतीनां च जनानां तीर्थयायिनाम् ।
प्रदीपानां सुवर्णस्य मुक्तानां हीरकस्य च ॥६२॥
माणिक्यानां तुलस्याश्च श्वेतपुष्पस्य दर्शनम् ।
पापनाशकरं पुण्यं मंगलस्य प्रदं मतम् ॥६३॥
फलानि शुक्लधान्यानि घृतं दधि मधूनि च ।
पूर्णकुंभं च लाजाँश्च शर्करां दर्पणं जलम् ॥६४॥
मालां च शुक्लपुष्पाणां दृष्ट्वा पुण्यं व्रजेज्जनः ।
गोरोचनं च कर्पूरं रजतं च सरोवरम् ॥६५॥
पुष्पोद्यानं पुष्पितां च शुक्ले चन्द्रमसं नवम् ।
पीयूषं चन्दनं देवोत्थानं देवालयं ध्वजम् ॥६६॥
कस्तूरीं कुंकुमं देवखातं वटं च दुन्दुभिम् ।
पताकां च देवघटं सुगन्धिपवनं तथा ॥६७॥
शंखं शुक्तिं प्रवालं च रजतं स्फटिकं कुशम् ।
ताम्रं गंगामृदं विष्णुं पुस्तकं रत्नमक्षतान् ॥६८॥
तपस्विनं च विद्वांसं समुद्रं कृष्णसारकम् ।
यज्ञं महोत्सवं दुग्धं गोमूत्रं गोमयं तथा ॥६९॥
गोधूलिं गोष्पदं गोष्ठं पक्वसस्यां च भूमिकाम् ।
रुचिरां पद्मिनीं श्यामां सुवेषां कन्यकां सतीम् ॥७०॥
करं गन्धं च सिद्धान्नं दृष्ट्वा पुण्यं लभेज्जयम् ।
दत्वा विष्णुपदे पिण्डान् विष्णुं यस्तु प्रपूजयेत् ॥७१॥
पितॄणां स्वात्मनश्चापि करोति जन्ममोक्षणम् ।
एतत्ते कथितं राजन् सानन्दं पुण्यवर्धकम् ॥७२॥
एवं पुण्यप्रभावेण सुशुद्धा जायते मतिः ।
पितॄणां च तथा भक्तिर्हृदि तस्य प्रवर्धते ॥७३॥
सितो विशालं सन्दिश्य प्राह कृष्णं सदा भज ।
देहि त्वेकादशीपुण्यं कार्तिकस्य व्रतानि च ॥७४॥
कृष्णनारायणपूजाफलं देहि विमुक्तये ।
अखण्डमात्रिकापुण्यं देहि चास्मद्विमुक्तये ॥७५॥
इत्युक्तः स विशालाख्यो नृपः पुण्यं तथा ददौ ।
करे जलं गृहीत्वैव मुमोच पृथिवीतले ॥७६॥
तावद्विष्णोः पार्षदाश्च विमानस्थाः समाययुः ।
मन्त्रम् ओं श्रीकृष्णनारायणाय स्वामिने नमः ॥७७॥
ददुः प्रादुर्विमानेऽत्र चत्वारोऽपि च वैष्णवाः ।
आरोहन्तु च वैकुण्ठं समायान्तु च पार्षदाः ॥७८॥
इत्युक्तास्ते ययुर्धाम पार्षदैः सह तत्क्षणम् ।
एतस्मात् कारणाद् रैभ्य ! भवान् धन्यो मयोच्यते ॥७९॥
सकृत् गयाभिगमनं सकृत् पिण्डप्रदानकम् ।
दुर्लभं त्वं पुनर्नित्यमत्रैवाऽसि व्यवस्थितः ॥८०॥
किमनु प्रोच्यते रैभ्य ! तव पुण्यमिदं प्रभो ।
येन साक्षाद् गदापाणिर्दृष्टो नारायणः स्वयम् ॥८१॥
सनातनर्षिश्चोक्त्वैवं तत्रैवान्तरधीयत ।
रैभ्यः स्तुतिं हरेश्चक्रे प्रेमगद्गदया गिरा ॥८२॥
सितं कृते त्रीतयुगेऽरुणं नीलं तु द्वापरे ।
कलौ युगेऽलिप्रतिमं कृष्णनारायणं श्रये ॥८३॥
अक्षरे परमे धाम्नि गोलोकेऽथ विकुण्ठके ।
योऽस्ति स श्रीकृष्णनारायणो मे हृदयेऽपि च ॥८४॥
तं त्वां लोमशवासस्थं सर्वगं परमेश्वरम् ।
नमामि चाश्रयाम्यत्र संसारतरणाय वै ॥८५॥
मत्स्यादीनि मखाद्याश्च सन्तस्ते चाऽङ्गवैभवाः ।
तथा मां कुरु चाद्यैव सिद्धमण्डलमण्डितः ॥८६॥
एवं स्तुतस्तदा विष्णुः प्रादुर्बभूव सुन्दरः ।
शंखचक्रगदापाणिर्गरुडस्थो वियद्गतः ॥८७॥
उवाच रैभ्य ! तुष्टोऽस्मि समागच्छ मया सह ।
रैभ्यो गरुडमारुह्य यत्र ते सनकादयः ॥८८॥
तत्र गत्वा च तान्नत्वा वैकुण्ठं हरिणा सह ।
जगाम दिव्यदेहेन लक्ष्मि ! त्वत्कान्तसन्निधौ ॥८९॥
एतद् रैभ्यस्य चरितं तथा विष्णोर्गदाभृतः ।
यः पठेच्छृणुयाच्चापि भुक्तिं मुक्तिं लभेत सः ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विशालराज्ञो हरिभजनान्मुक्तिः, रैभ्यस्यापि तत्त्वज्ञानेन भक्त्या च मुक्तिः, गयायां रैभ्यस्य सनत्कुमारदर्शन-मुपदेशादि चेत्यादिनिरूपणनामा सप्तविंशत्यधिक-पञ्चशततमोऽध्यायः ॥ ५२७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ऋषिश्रेष्ठ आवत्स्यस्त्वेकदा गिरिम् ।
रैवतं कार्तिके मासि प्रदक्षिणं विधाय च ॥ १ ॥
मासत्रयं समुवास लोमशस्याऽऽश्रमे तदा ।
अश्वपट्टसरस्तीरे कृष्णनारायणालये ॥ २ ॥
शिवरात्रौ निशायां च पुपूज लोमशेश्वरम् ।
प्रातर्ब्राह्ममुहूर्ते च क्षणं निद्राऽभवद् यदा ॥ ३ ॥

स्वप्नं तत्र ददर्शाऽसावृषिरावत्यनामकः।
दिव्ययानेन स ययौ सत्यलोकं ततः परम् ॥ ४ ॥
विष्णुलोकं महाविष्णोर्लोकं कैलासमाययौ।
वैहायसेन यानेन वैकुंठं स ययौ ततः ॥ ५ ॥
गोलोकं स ययौ पश्चाद् ययावक्षरधाम सः।
ययौ च परमं धामाऽनन्तं परात्परात्परम् ॥ ६ ॥
सर्वश्रेष्ठं ब्रह्मलोकं गत्वा ददर्श पूरुषम्।
दिव्यं श्रीमत्कृष्णनारायणं मुक्ताऽक्षरेश्वरम् ॥ ७ ॥
अनादिश्रीकृष्णनारायणं मुक्ताभिवन्दितम्।
स्थितः स श्रीहरिस्तस्मायावत्याय जगाद ह ॥ ८ ॥
वद लोकेषु सर्वत्र किं त्वया चाऽवलोकितम्।
आवत्यः प्राह भगवन् अत्र यद्वै विलोक्यते ॥ ९ ॥
तादृशं सुखसाम्राज्यं कुत्रापि नावलोकितम्।
नाऽक्षरे न च गोलोके न वैकुण्ठेऽमृतेऽपि च ॥१०॥
न च सत्ये तथा भूमौ ते सुखांशो न विद्यते।
विलक्षणं सुखं तेऽस्ति नित्यानन्दसुतृप्तिदम् ॥११॥
अक्षरे मुक्तबाहुल्यं गोलोके राधिकादयः।
वैकुण्ठे श्रीरमाद्याश्च सत्ये देवादयः स्थिताः ॥१२॥
तदन्यत्र तु का वार्ता सर्वा वै भोगभूमयः।
गोलोकं चापि वैकुण्ठं कैलासं चाक्षरं पदम् ॥१३॥
चत्वार्येतानि ते कृष्णनारायणस्य भूमिकाः।
भक्तानां रमणार्थं च त्वया वै शाश्वतीकृताः ॥१४॥
ये तु भक्ता यथेच्छन्ति सेवार्थं तांस्तथा तथा।
तृप्तिं ददासि दास्यत्वे प्रेम्णा स्नेहेन कामतः ॥१५॥
आत्मानन्दस्तव मूर्तेः परधाम्नि विशिष्यते।
सेवाऽऽनन्दोऽक्षरे धाम्नि तदन्येभ्यो विशिष्यते ॥१६॥
दास्यानन्दश्च गोलोके सख्यानन्दो विकुण्ठके।
पूजाऽऽनन्दः सत्यलोके यथायोग्यं विशिष्यते ॥१७॥
अन्यत्र विषयानन्दः क्लेशमिश्रो विशिष्यते।
मया दृष्टोऽत्र भगवन् स एवाऽक्षरधामनि ॥१८॥
मया चाऽऽलोकितः कृष्णनारायणोऽक्षराऽधिपः।
गोलोके त्वं राधिकेशः कृष्णन्नायण ईक्षितः ॥१९॥
वैकुण्ठे त्वं लक्ष्मीशश्च दृष्टः कृष्णनरायणः।
कैलासे त्वं लोकितश्च वैराग्यानन्दसंभृतः ॥२०॥
योगी ज्ञानी यतिश्चापि शिवापतिः स्वयं हरिः।
सत्यलोके त्वमेवाऽसि सावित्रीश्वर एव ह ॥२१॥
सोऽथं सूर्ये मया दृष्टो हिरण्मयः पुमान् भवान्।
पृथ्व्यां कुंकुमवाप्यां च गोपालकृष्णबालकः ॥२२॥
वर्तसे कम्भरालक्ष्मीपुत्रः कृष्णनरायणः।
लोमशस्याश्रमे तत्र मन्दिरे वर्तसे प्रभो ॥२३॥
राधां क्वचित् क्वचिल्लक्ष्मीं क्वचिच्च पार्वतीं सतीम्।
क्वचिच्च माणिकीं देवीं क्वचित् प्रभां रमां क्वचित् ॥२४॥
पद्मां जयां च ललितां हंसां च मञ्जुलां क्वचित्।
पद्मावतीं सतीं वृन्दां तुलसीं च सरस्वतीम् ॥२५॥
शिवां पार्श्वे प्रपश्यामि मूलप्रकृतिकां क्वचित्।
क्वचिन्मुक्तां देविकां च चम्पां हैमीं च शान्तिकाम् ॥२६॥
क्वचित्तु योगिनं साधुं विद्वांसं च सनातनम्।
वीक्षे रूपाणि ते कृष्ण दृष्ट्वा पारं न याम्यहम् ॥२७॥
अद्य मे सफलं जन्म मोक्षपारं गतो यतः।
अनेककल्पपुण्येन न ते दर्शनमाप्यते ॥२८॥
कृपयाऽद्य मया लब्धं दर्शनं ते श्रियः पते।
इत्युच्यमाने निद्रा सा नष्टाऽऽवत्यस्य तत्क्षणम् ॥२९॥
पुरतः श्रीकृष्णनारायणं ददर्श सस्मितम्।
प्रणिपत्य ऋषिः प्राह स्वप्नं दृष्टं मया प्रभो ॥३०॥
वद मे तत्फलं त्वद्य किं मे स्याच्छाश्वतं फलम्।
कृष्णनारायणः प्राह शृणु त्वावत्य तत्फलम् ॥३१॥
शीघ्रं ते भाविनी मुक्तिर्लोमशस्य तु सन्निधौ।
अश्वपट्टसरसश्च क्षेत्रस्याऽस्य प्रभावतः ॥३२॥
शिवरात्रेर्व्रतपुण्यात्तथाऽत्रागमनान्मुने ।
गृहाण मन्त्रं ये त्वत्र सन्नद्धौ मोक्षणे भव ॥३३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः'।
गृहाण तुलसीमालां कण्ठे कण्ठीं गृहाण च ॥३४॥
वद चान्यत्तु तेऽभीष्टं ददाम्यत्र न संशयः।
आवत्यस्तु तदा प्राह मुक्तिं देहि परेऽक्षरात् ॥३५॥
सर्वलोकहितार्थं च स्वप्नज्ञानं वदात्र मे।
तथास्त्विति हरिः प्राह कृष्णनारायणः प्रभुः ॥३६॥
प्राह ज्ञानं तदाऽऽवट्यां य स्वप्नानां शृणु प्रिये।
सुस्वप्नदर्शनं पुण्यं यदि नीचं न वक्ति च ॥३७॥
काश्यपं दुर्भगं नीचं शत्रुमज्ञानिनं स्त्रियम्।
त्यक्त्वा रात्रिं च दिवसे वक्ति विप्रं सुपण्डितम् ॥३८॥
देवालये च देवं चाप्यश्वत्थतुलसीवटम्।
उक्त्वा तद् द्विगुणं पुण्यमप्रकाश्यं चतुर्गुणम् ॥३९॥
सुस्वप्नदर्शने प्राज्ञो गंगास्नानफलं लभेत्।
अर्थं वित्तं च भार्यां च भूमिं पुत्रं लभेत सः ॥४०॥
मोक्षं च परमैश्वर्यं लभते सर्ववाञ्छितम्।
स्वप्नस्तु प्रथमे यामे संवत्सरे फलप्रदः ॥४१॥

द्वितीये प्याष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ।
चतुर्थेत्वर्धमासेन स्वप्नः स्वात्मफलप्रदः ॥४२॥
दशाहे फलदः स्वप्नोऽप्यरुणोदयदर्शने ।
प्रातः स्वप्नस्तुफलदस्तत्क्षणं यदि बोधितः ॥४३॥
चिन्ताव्याधिसमायुक्तो नरः स्वप्नं तु पश्यति ।
तत्सर्वं निष्फलं दृष्टं दिवा स्वप्नं च निष्फलम् ॥४४॥
जडो मूत्रपुरीषेण पीडितश्च भयाकुलः ।
दिगम्बरो मुक्तकेशो न लभेत् स्वप्नज फलम् ॥४५॥
स्वप्नोत्तरं पुनर्निद्रां प्रयातो न लभेत् फलम् ।
स्वप्नं रात्रौ यश्च वक्ति न तस्य जायते फलम् ॥४६॥
उक्त्वा काश्यपगोत्रं तु विपत्तिं लभते जनः ।
दुर्गते दुर्गतिं याति नीचे व्याधिं प्रयाति च ॥४७॥
रात्रौ भयं च लभते मूर्खे च कलहं लभेत् ।
कामिन्यां धनहानिः स्याद् रात्रौ चौरभयं भवेत् ॥४८॥
निद्रायां लभते शोकं पण्डिते वाञ्छितं फलम् ।
न प्रकाश्यश्च स स्वप्नो बुधेन काश्यपे क्वचित् ॥४९॥
गवां हयानां शैलानां प्रासादानां च हस्तिनाम् ।
द्रूणामारोहणं स्वप्ने धनदं परिकीर्तितम् ॥५०॥
भोजनं रोदनं वीणावादनं दृश्यते यदि ।
प्रतिगृह्णाति वा स्वप्ने सस्याढ्यां भूमिमालभेत् ॥५१॥
शस्त्रास्त्रेण यदि विद्धो व्रणेन क्रमिणा तथा ।
विष्ठया रुधिरेणापि स्वप्ने लिप्तो धनी भवेत् ॥५२॥
स्वप्नेऽप्यगम्यागमनो भार्यालाभं करोति हि ।
मूत्रसिक्तः पिबेच्छुक्रं नरकं च विशत्यपि ॥५३॥
नगरं प्रविशेद् रक्तं समुद्रं वा सुधां पिबेत् ।
स चाप्नोति शुभां वार्तां विपुलं च धनं लभेत् ॥५४॥
गजं नृपं सुवर्णं च वृषभं धेनुमित्यपि ।
दीपमन्नं फलं पुष्पं कन्यां छत्रं रथं ध्वजम् ॥५५॥
दृष्ट्वा कुटुम्बं लभते कीर्तिं च विपुलां श्रियम् ।
पूर्णकुंभं द्विजं वह्निं पुष्पताम्बूलमन्दिरम् ॥५६॥
शुक्लधान्यं नटं वेश्यां दृष्ट्वा श्रियमवाप्नुयात् ।
गवां क्षीरं घृतं दृष्ट्वा चार्थं पुण्यधनं लभेत् ॥५७॥
पायसं पद्मपत्रे च दधि दुग्धं घृतं मधु ।
मिष्टान्नं स्वस्तिकं भुक्त्वा ध्रुवं राजा भवेदिति ॥५८॥
पक्षिणां वा मनुष्याणां भुंक्ते मांसं नरो यदि ।
बह्वर्थं शुभवार्तां च लभते वाञ्छितं फलम् ॥५९॥
छत्रं खड्गं पादुकां च लब्ध्वा धान्यं च गच्छति ।
जले तरेत्तु यः स्वप्ने प्रधानो जायते ध्रुवम् ॥६०॥

फलितं भूरुहं दृष्ट्वा धनं प्राप्स्यति निश्चितम् ।
सर्पेण दष्टो मनुजो धनस्य लाभवान् भवेत् ॥६१॥
सूर्यं चन्द्रं च संवीक्ष्य स्वप्ने व्याधिर्विनश्यति ।
वडवां कुकुटीं क्रौञ्चीं दृष्ट्वा पत्नीं लभेजनः ॥६२॥
स्वप्ने यो निगडैर्बद्धः प्रतिष्ठां च सुतं लभेत् ।
पद्मपत्रे नदीतीरे भुंक्ते पद्मपुटे तथा ॥६३॥
दध्यन्नं पायसं स्वप्ने स स्याद् राजा न संशयः ।
जलौकसं वृश्चिकं च सर्पं स्वप्ने पप्रश्यति ॥६४॥
धनं पुत्रं च विजयं प्रतिष्ठां च प्रपद्यते ।
शृंगिभिर्दंष्ट्रिभिः कोलैर्वानरैः पीडितो यदि ॥६५॥
स्वप्ने शिरसि मुकुटं धारयेद् भूपतिर्भवेत् ।
धनं वा विपुलं यद्वा प्रधानं च पदं लभेत् ॥६६॥
मत्स्यं मांसं मौक्तिकं च शंखं चन्दनहीरकम् ।
स्फटिकं रजतं दृष्ट्वा विपुलं धनमाप्नुयात् ॥६७॥
सुतं च रुधिरं स्वर्णं भुक्त्वा विष्ठां धनं लभेत् ।
प्रतिमां शिवलिंगं च दृष्ट्वा धनं जयं लभेत् ॥६८॥
फलितं पुष्पितं बिल्वमाम्रं दृष्ट्वा धनं लभेत् ।
ज्वलद्वह्निं प्रसमीक्ष्य धनं बुद्धिं श्रियं लभेत् ॥६९॥
आमलकं च कमलं दृष्ट्वा च धनवान् भवेत् ।
देवताश्च द्विजा गावः पितरः साधवो गुरुः ॥७०॥
पत्नी पतिश्च नृपतिः सती कन्याः पतिव्रताः ।
यद् ददाति निजं स्वप्ने तद्वस्तु प्राप्स्यते ध्रुवम् ॥७१॥
शुक्लाम्बरधरा नार्यः शुक्लमाल्यानुलेपनाः ।
समाश्लिष्यन्ति यं स्वप्ने तस्य श्रीः सर्वतः सुखम् ॥७२॥
पीताम्बरधरां नारीं पीतमाल्यानुलेपनाम् ।
अवगूहति यः स्वप्ने कल्याणं तस्य जायते ॥७३॥
शुक्लं सर्वं प्रशस्तं भस्माऽस्थिकार्पासमन्तरा ।
कृष्णं दुष्टं हस्तिवाजिगोद्विजदेवमन्तरा ॥७४॥
दिव्या स्त्री सस्मिता विप्रा रत्नभूषणभूषिता ।
यस्य गृहं समायाति स प्रियं लभते ध्रुवम् ॥७५॥
स्वप्ने तु ब्राह्मणो देवो ब्राह्मणी देवकन्यका ।
ब्रह्मचारिणी सन्तुष्टा सस्मिता च पतिव्रता ॥७६॥
फलं ददाति यस्मै च तस्य पुत्रो भविष्यति ।
यं स्वप्ने ब्राह्मणाः सन्तः प्रकुर्वन्ति शुभाशिषम् ॥७७॥
यद्वदन्ति च तद्वस्तु तस्यैश्वर्यं च तद्भवेत् ।
परितुष्टो द्विजो यस्य गृहमायाति तस्य वै ॥७८॥
सम्पत्तिस्तस्य चायाति यशश्च विपुलं सुखम् ।
पदे पदे सुखं तस्य स मानं गौरवं लभेत् ॥७९॥

अकस्मादपि तु स्वप्ने लभते सुरभिं यदि ।
भूमिलाभो भवेत्तस्य पत्नी चापि पतिव्रता ॥८०॥
करेण कृत्वा हस्ती यं मस्तके स्थापयेद् यदि ।
राज्यलाभो भवेत्तस्याऽऽचार्यपदं गुरोः पदम् ॥८१॥
स्वप्ने विप्रः प्रतुष्टः सन् समाश्लिष्यति यं जनम् ।
तीर्थस्नायी श्रिया युक्तः सुसम्पन्नो भवेत्तु सः ॥८२॥
द्विजः स्वप्ने तु कुसुमं यस्मै ददाति संहसन् ।
जययुक्तो धनयुक्तो यशस्वी च सुखी भवेत् ॥८३॥
स्वप्ने विलोक्य तीर्थानि सौधरत्नगृहाणि च ।
तीर्थस्नायी धनवाँश्च जययुक्तो भवेद्धि सः ॥८४॥
स्वप्ने यं पूर्णकलश कश्चित् कस्मै ददाति चेत् ।
पुत्रलाभो ग्रहीतुः स्यात् सम्पदश्चाक्षयास्तथा ॥८५॥
हस्ते धृत्वा कुडवं चाढकं वा वारसुन्दरी ।
यस्य गृहं समायाति स लक्ष्मीं विपुलां लभेत् ॥८६॥
दिव्या स्त्री यद्गृहं गत्वा पुरीषं विसृजेद् यदि ।
अर्थलाभो भवेत्तस्य दारिद्र्यं तु प्रयात्यपि ॥८७॥
यस्य गृहं समायाति ब्राह्मणो भार्यया सह ।
पार्वत्या सह शंभुर्वा लक्ष्म्या नारायणोऽथवा ॥८८॥
साधुः साध्वी गुरुर्गुर्वी स्वप्ने यस्मै ददाति वै ।
धान्यं पुष्पांजलिं स्वर्णं तस्य श्रीः सर्वतोमुखी ॥८९॥
मुक्ताहारं पुष्पमाल्यं चन्दनं ब्राह्मणोऽर्पयते ।
यस्मै तस्य गृहे लक्ष्मीस्तथा श्रीः सर्वतोमुखी ॥९०॥
गोरोचनं पताकां च हरिद्रामिक्षुदण्डकम् ।
सिद्धान्नं च लभेत् स्वप्ने तस्य श्रीः सर्वतोमुखी ॥९१॥
ब्राह्मणो ब्राह्मणी वापि ददाति यस्य मस्तके ।
छत्रं पुष्पं शुक्लधान्यं स च राजा भवेद् ध्रुवम् ॥९२॥
स्वप्ने रथस्थितः शुक्लमाल्यलेपनशोभितः ।
भुंक्ते दधि दुग्धपाकं स वै राजा भवेदिति ॥९३॥
स्वप्ने विप्रोऽथवा विप्रा यस्मै सुधां घृतं दधि ।
ददाति स्वर्णपात्रादि सोऽपि राजा भवेद् ध्रुवम् ॥९४॥
कुमारी चाष्टवर्षीया रत्नभूषणभूषिता ।
यस्य तुष्टा भवेत् स्वप्ने स भवेत् कविपण्डितः ॥९५॥
ददाति चेत् पुस्तकं सा स स्याद्वै पण्डितेश्वरः ।
मातेव चेत्पाठयति स्यात्सार्वभौमपण्डितः ॥९६॥
पितेव पाठयेद् विप्रो यं सोऽपि स्याद् बृहस्पतिः ।
प्राप्नोति पुस्तकं स्वप्ने स ख्यातः पण्डितो भवेत् ॥९७॥
स्वप्ने विप्रो यं सुमन्त्रं ददाति प्रतिमां तथा ।
यस्मै स मन्त्रसिद्धिमान् गुणवान् धनवान् भवेत् ॥९८॥

विप्रो विप्राशिषं लब्ध्वा कविर्नृपो धनी भवेत् ।
विप्रस्तुष्टः सस्ययुक्तां सधान्यां पृथ्वीं जने ॥९९॥
स्वप्ने ददाति स वै स्यादवश्यं पृथिवीपतिः ।
स्वप्ने विप्रो रथे कृत्वा स्वर्गादिकं प्रदर्शयेत् ॥१००॥
यं स भवेत्तु दीर्घायुश्चिरंजीवी धनाधिपः ।
विप्राय विप्रः सन्तुष्टो यस्मै कन्यां ददाति च ॥१०१॥
स्वप्ने स तु भवेन्नित्यं धनाढ्यः पृथिवीपतिः ।
स्वप्ने सरोवरं चाब्धिं नदीं नदं प्रवीक्ष्य च ॥१०२॥
श्वेतसर्पं श्वेतशैलं दृष्ट्वा श्रियमवाप्नुयात् ।
यं पश्यति मृतं स्वप्ने स भवेच्चिरजीवनः ॥१०३॥
अरोगी रोगिणं दुःखी सुखिनं वीक्ष्य स्यात्तथा ।
दिव्या स्त्री यं प्रवदति मम स्वामी भवानिति ॥१०४॥
स्वप्ने दृष्ट्वा च जागर्ति स च राजा भवेद् ध्रुवम् ।
स्वप्ने तु कालिकां दृष्ट्वा लब्ध्वा स्फटिकमालिकाम् ॥१०५॥
इन्द्रचापं शक्रवज्रं स प्रतिष्ठां लभेद् ध्रुवाम् ।
स्वप्ने विप्रस्तु यं वक्ति मम दासो भवेति च ॥१०६॥
हरिदास्यं स भक्तिं च लब्ध्वा सुवैष्णवो भवेत् ।
स्वप्ने विप्रो हरिः शंभुर्ब्रह्माणी कमला शिवाः ॥१०७॥
शुक्ला स्त्री देवमाता वा जाह्नवी वा सरस्वती ।
गोपालिका सती साध्वी कन्यका च पतिव्रता ॥१०८॥
दृश्यते सुप्रसन्ना च तथाशीर्वाददायिनी ।
द्रष्टा भवेद् देवतुल्यो नृपो वाऽऽचार्यसत्तमः ॥१०९॥
इत्येवं कथितं तेऽत्राऽऽवस्त्य ! सुस्वप्नजं फलम् ।
दृष्ट्वा नारायणं मां च स्वप्ने मोक्षमवाप्नुयात् ॥११०॥
आवस्त्यः प्राह भगवन् ! दश कल्पा गता मम ।
लोमशस्य प्रतापेन तव योगकृतं फलम् ॥१११॥
समासाद्य प्रयाम्यद्य तव धाम सनातनम् ।
इत्युक्त्वा दिव्यदेहेन कृष्णनारायणाश्रयम् ॥११२॥
दिव्ययानं समारुह्य ययावक्षरधाम सः ।
श्रवणात्पठनाल्लक्ष्मि जीवन्मुक्तो भवेज्जनः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आवस्त्याख्यऋषेः स्वप्नेऽनेकधामदर्शनोत्तरं श्रीकृष्णनारायणेन सुस्वप्नानां फलान्यभिहितानि श्रुत्वाऽऽवस्त्यो मुक्तिं जगामेत्यादिनिरूपणनामाऽष्टाविंशत्यधिकपञ्चशततमोऽध्यायः ॥५२८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि पापं येषां तु दर्शने ।
दुःस्वप्नं पापबीजं च केवलं विघ्नकारणम् ॥ १ ॥

गोघ्नं च ब्राह्मणघ्नं वा कृतघ्नं कुटिलं तथा।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥ २ ॥
मिथ्यासाक्षिप्रदातारं तथाऽऽतिथ्यविवञ्चकम्।
देवविप्रद्रव्यहारिक्षेत्रहारिणमित्यपि ॥ ३ ॥
अश्वत्थघातिनं वृन्दाघातिनं देवनिन्दकम्।
साधुविद्वेषिणं सेर्ष्यमनाचारं च देवलम् ॥ ४ ॥
छिन्ननासां पतिभक्तिहीनां च व्यभिचारिणीम्।
विधवां क्रोधितं दुष्टमृणग्रस्तं च जारजम् ॥ ५ ॥
चौरं मिथ्यावादिनं च राहुग्रस्तं विधुं रविम्।
दृष्ट्वा स्नानं प्रकुर्याच्चाप्यष्टोत्तरशतं जपान् ॥ ६ ॥
नष्टचन्द्रो न दृश्योऽस्ति भाद्रे मासिसिताऽसिते।
चतुर्थ्यामुदितश्चन्द्रो न द्रष्टव्यः कदाचन ॥ ७ ॥
चन्द्रस्तारापहरणं कलंकमतिदुर्वहम्।
तस्मै ददाति सन्द्रष्ट्रे कामतो यदि पश्यति ॥ ८ ॥
अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत्।
'ओं नमः श्रीकृष्णनारायणाय चाऽकलंकिने ॥ ९ ॥
चन्द्रकलंकसंहर्त्रे ताराशुद्धिप्रवादिने'।
इतिमन्त्रेण संपूतं जलं साधु पिबेत् तदा ॥१०॥

श्रीलक्ष्मीरुवाच—

राहुग्रस्तः कथं सूर्यो न द्रष्टव्यः शशी तथा।
सन्देहं नाशय मेऽत्र करुणावरुणालय ॥११॥

श्रीनारायण उवाच—

एकदा जमदग्निश्च महाकौतूहलान्वितः।
रेणुकासहितस्तुष्टो जगाम नर्मदातटम् ॥१२॥
निर्जने च दिवा पत्न्याः कामभोगं चकार सः।
पत्नीच्छया न तु स्वस्येच्छया तस्याः प्रतुष्टये ॥१३॥
अथ सूर्यो धर्मसाक्षी ऋषिं प्रोवाच धर्मवित्।
स्वयं ज्ञाता धर्मकर्ता प्रपौत्रो ब्रह्मणो भवान् ॥१४॥
महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती।
दिवा संगं स्त्रियाः कुर्वन् धर्मं त्यजति वै कथम् ॥१५॥
अहं च धर्मिणां साक्षी तेन त्वां कथयामि ते।
उवाच सूर्यं ताम्राक्षः क्रोधमात्रां समाश्रितः ॥१६॥
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा।
त्वया संज्ञा वडवा सा दिवा चालिंगिता कथम् ॥१७॥
येन नासाविवराच्चाऽश्विनी पुत्रौ बभूवतुः।
कामदग्धा भजमाना युवती यदि चेच्छति ॥१८॥
तस्याः कामानलः शाम्य इति पत्युर्वृषो महान्।
कस्त्वं धर्मप्रवक्ता मे याहि स्वस्थानमेव च ॥१९॥
अद्य मे निर्जने स्थाने कामभंगस्त्वया कृतः।
मम शापात् पापदृश्यो राहुग्रस्तो भविष्यसि ॥२०॥
स्वतेजसा कृतगर्वात् हततेजा भविष्यसि।
मेघाच्छन्नः स्वल्पतेजाः पापदृश्यस्तथा भव ॥२१॥
इति शप्तो रविः प्राह ब्राह्मणम् ऋषिपुंगवम्।
क्षमस्व वैष्णवः शुद्धः स्वधर्मं च समाचर ॥२२॥
अहं यथा त्वया शप्तो मया शप्तो भवाँस्तथा।
पराभूतः क्षत्रियेण भविष्यसि द्विजेश्वर ॥२३॥
मरणं क्षत्रियास्त्रेण भवतश्च भविष्यति।
जमदग्निः रविं प्राह शंभुना त्वं पतिष्यसि ॥२४॥
शापनिस्तारणं तत्र चकार विश्वसृट् स्वयम् ॥२५॥
जमदग्ने ! ऋषिमध्ये स्थानं स्वर्गे वधेऽपि ते।
भविष्यति मदायुस्त्वं शान्तो भव सुखी भव ॥२६॥
सूर्यं प्राह ततो ब्रह्मा कुत्रचिद् दिवसे प्रगे।
घनाच्छन्नोऽपि सद्यस्त्वं दृश्यो मुक्तो भविष्यसि ॥२७॥
न्यूनातिरिक्तवर्षे च राहुग्रस्तो भविष्यसि।
अस्तकाले घनाच्छन्ने मध्याह्नस्थे जलेऽपि च ॥२८॥
अर्धोदिते च समये पापदृश्यो भविष्यसि।
अन्यथा सर्वकालेन पुण्यदृश्यो भविष्यसि ॥२९॥
मालीसुमालीयुद्धेन शंभुना त्वं पराजितः।
पुनः स्वर्गं गतः श्रेष्ठं जयमाप्स्यसि मा शुचः ॥३०॥
जमदग्निं पुनः प्राह मरणेऽपि च ते सुत।
नारायणो निजांशेन तव पुत्रो भविष्यति ॥३१॥
तस्य पराक्रमेणापि यशस्ते शाश्वतं भवेत्।
इत्युक्त्वा तौ विसृज्यैव ब्रह्मा सत्यं समाययौ ॥३२॥
इत्येवं कथितं लक्ष्मि सूर्यस्याऽदर्शनं तदा।
चन्द्रो भाद्रे चतुर्थ्यां च तारां जहार कामतः ॥३३॥
शशाप तारा कोपेन निष्कामा सा पतिव्रता।
अद्य त्वया गुरुपत्नी स्पृष्टा तस्माच्च तद्दिने ॥३४॥
पापदृश्यो हि सर्वेषां कलंकदो भविष्यसि।
राहुग्रस्तो घनग्रस्तः पापदृश्यो भविष्यसि ॥३५॥
कलंकी भव चेत्येवं प्रोक्त्वा कामं जगाद सा।
तेजस्विना केनचित् त्वं भस्मीभूतो भविष्यसि ॥३६॥
अतश्चन्द्रस्तदारभ्य पापदृश्योऽस्ति तत्तिथौ।
इत्येवं कथितं लक्ष्मि ! पापदृश्यत्वकारणम् ॥३७॥

दुःस्वप्नं ते कथयामि यद्वै दुष्टफलप्रदम् ।
स्वप्ने हसति यो हर्षाद् विवाहं यदि पश्यति ॥३८॥
नर्तनं गीतमिष्टं च विपत्तिस्तस्य निश्चिता ।
दन्ता यस्य विपीड्यन्ते विचरन्तं च पश्यति ॥३९॥
धनहानिर्भवेत्तस्य पीडा चापि शरीरजा ।
कन्या घटं समादाय यस्य गृहात् प्रगच्छति ॥४०॥
स्वस्त्री वा क्रोधसम्पन्ना स्वस्याऽऽलयात्प्रयात्यपि ।
स्वप्ने द्रष्टुर्भवेल्लक्ष्मीनाशो दारिद्र्यमित्यपि ॥४१॥
अभ्यंगितस्तु तैलेन यो गच्छेद् दक्षिणां दिशम् ।
खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः ॥४२॥
स्वप्ने कर्णे जपापुष्पमशोकं करवीरकम् ।
लवणं पश्यति तैलं विपत्तिस्तस्य वै भवेत् ॥४३॥
नग्नां कृष्णां छिन्ननासां भृत्यां वा विधवां च वा ।
कपर्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात् ॥४४॥
स्वप्ने रुष्टं ब्राह्मणं च ब्राह्मणीं क्रोधितां तथा ।
दृष्ट्वा भवेद् विपत्तिश्च लक्ष्म्या निर्गमनं तथा ॥४५॥
वनपुष्पं रक्तपुष्प पलाशं पुष्पितं तथा ।
कार्पासं शुक्लवस्त्रं च दृष्ट्वा दुःखमवाप्नुयात् ॥४६॥
गायन्तीं च हसन्तीं च कृष्णवस्त्रान्वितां स्त्रियम् ।
स्वप्ने कृष्णां विधवां च दृष्ट्वा मृत्युमवाप्नुयात् ॥४७॥
देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च ।
आस्फोटयन्ति धावन्ति तस्य वै मरणं भवेत् ॥४८॥
वान्तं मूत्रं पुरीषं च वैद्यं रौप्यं सुवर्णकम् ।
प्रत्यक्षमथवा स्वप्ने जीवेद् द्रष्टा दशाहकम् ॥४९॥
कृष्णवस्त्रा कृष्णमाला कृष्णलेपादिमण्डिता ।
उपगूहति यं नारी तस्य मृत्युर्ध्रुवो भवेत् ॥५०॥
मृतवत्सं च मुण्डं च मृगस्य च नरस्य च ।
अस्थिमालां विन्दते यस्तस्य विपत्तिरच्युता ॥५१॥
रथं खरोष्ट्रसंयुक्तमेकाकी योऽधिरोहति ।
तत्रस्थोऽपि च जागर्ति मृत्युस्तस्य दशाहके ॥५२॥
अभ्यंगितस्तु हविषा क्षीरेण मधुनाऽपि च ।
तक्रेणापि गुडेनापि तस्य पीडा भवेदति ॥५३॥
रक्तवस्त्रा रक्तमाला रक्तलेपादिमण्डिता ।
उपगूहति यं स्वप्ने व्याधिस्तस्य भवेद् ध्रुवः ॥५४॥
नखकेशांश्च पतितान् भस्मान्वितचितां तथा ।
दृष्ट्वा निर्वाणकाङ्गारान् मृत्युमाप्नोति निश्चितम् ॥५५॥
श्मशानं शुष्ककाष्ठं च लोष्टं शुष्कतृणानि च ।
किंचित्कृष्णं वाजिनं च शर्मीं दृष्ट्वाऽतिदुःखभाग ॥५६॥

पादुकां फलकं रक्तं पुष्पमाल्यं भयानकम् ।
माषं मसूरं मुद्गं वा दृष्ट्वा सद्यो व्रणी भवेत् ॥५७॥
कटकं सरटं काकं भल्लूकं वानरं गवम् ।
पूयं गात्रमलं स्वप्ने पश्यति व्याधिमान् भवेत् ॥५८॥
भग्नभाण्डं क्षतं शूद्रं गलत्कुष्ठं च रोगिणम् ।
रक्ताम्बरं च जटिलं सूकरं महिषं खरम् ॥५९॥
महाघोरं चान्धकारं मृतं जीवं भयप्रदम् ।
योनिलिंगं तथा दृष्ट्वा स्वप्ने विपत्तिमाप्नुयात् ॥६०॥
कुवेषरूपं म्लेच्छं च यमदूतान् भयानकान् ।
पाशशस्त्रान्वितहस्तान् दृष्ट्वा मृत्युं लभेद् द्रुतम् ॥६१॥
विप्रो विप्रा सुतो बालः सुता बाला रुषा यदि ।
विलापं कुरुते स्वप्ने द्रष्टा दुःखमवाप्नुयात् ॥६२॥
कृष्णं कुसुमं तन्मालां सस्यं शस्त्रास्त्रधारिणम् ।
म्लेच्छां च विकृताकारां दृष्ट्वा मृत्युमवाप्नुयात् ॥६३॥
त्यक्तप्राणं मृतं दृष्ट्वा शवं मृत्युमवाप्नुयात् ।
मत्स्यादि धारयेद् यो हि तद्भ्रातुर्मरणं भवेत् ॥६४॥
वाद्यं च नर्तनं गीतं गायनं रक्तवाससम् ।
मृदंगं वाद्यमानं तं दृष्ट्वा दुःखमवाप्नुयात् ॥६५॥
छिन्नं वापि कबन्धं वा विकृतं मुक्तमूर्धजम् ।
क्षिप्रं नृत्यं प्रकुर्वन्तं दृष्ट्वा मृत्युमवाप्नुयात् ॥६६॥
मृतो वापि मृता वापि कृष्णम्लेच्छा भयानका ।
उपगूहति यं स्वप्ने स्वयं तां वोपगूहति ॥६७॥
स्वस्य शवं तथा वीक्ष्य क्षिप्रं मृत्युं प्रधारयेत् ।
यस्य दन्ताः प्रभग्नाश्च केशा यस्य पतन्ति च ॥६८॥
धनहानिर्देहपीडा भवेत्तस्य पदे पदे ।
उपद्रवन्ति यं स्वप्ने श्रृंगिणो दंष्ट्रिणस्तथा ॥६९॥
बालका मानवाश्चापि गृहस्य च कुटुम्बिनः ।
अन्ये भृत्यास्तथा तस्य भवेद् राजकुलाद् भयम् ॥७०॥
वृक्षं छिन्नं पतन्तं च शिलावृष्टिं तुषं क्षुरम् ।
रक्तांगारं भस्मवृष्टिं दृष्ट्वा दुःखमवाप्नुयात् ॥७१॥
गृहं पतन्तं शैलं वा धूमकेतुं भयप्रदम् ।
भग्नस्कन्धं नरं वापि दृष्ट्वा दुःखी भवेज्जनः ॥७२॥
वृक्षाच्छैलाद्रथाद्देहाद्रोर्गजात्तुरगाच्च खात् ।
भूमौ यः पतति स्वप्ने विपत्तिस्तस्य निश्चिता ॥७३॥
उच्चैः पतन्ति गर्तेषु भस्मांगारयुतेषु च ।
क्षारकुण्डेषु चूर्णेषु मृत्युस्तेषां भवेद् ध्रुवम् ॥७४॥
बलाद् गृह्णाति दुष्टश्च छत्रमुष्णीषमेव कात् ।
पितुर्नाशो भवेत्तस्य गुरोर्वापि नृपस्य वा ॥७५॥

सुरभिर्यस्य गेहात्तु याति त्रस्ता सवित्सका ।
प्रयाति गृहतस्तस्य लक्ष्मीः क्षितिश्च मानिनी ॥७६॥
यमपाशनिबद्धो यो यमदूतैश्च नीयते ।
म्लेच्छैश्चौरैस्तथाऽन्यैर्वा तस्य मृत्युः समीपगः ॥७७॥
गणको ब्राह्मणो वापि ब्राह्मणी वा गुरुः सती ।
साधुर्वा शपति रुष्टो विपत्तिस्तस्य भाविनी ॥७८॥
शत्रवः कुक्कुटाः काका भल्लुकाश्च विरोधिनः ।
पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्हि निश्चितः ॥७९॥
महिषा भल्लुका उष्ट्राः सूकरा गर्दभास्तथा ।
रुष्टा धावन्ति यं स्वप्ने स रोगी निश्चितं भवेत् ॥८०॥
रक्तचन्दनकाष्ठानि घृताक्तानि जुहोति यः ।
गायत्र्याश्च सहस्रेण तेन शान्तिर्विधीयते ॥८१॥
यदनिष्टं भवेत् स्वस्य स्वप्ने दृश्येत चेद् यदि ।
अनिष्टकारकं तस्यादिष्टं स्यादिष्टकारकम् ॥८२॥
कृष्णनारायणनाम्नां जपान्निष्पापतां व्रजेत् ।
दुःस्वप्नस्तत्फलं दातुं समर्थो न भवेत्तदा ॥८३॥
विष्णुं नारायणं कृष्णं रामं च श्रीहरिं शिवम् ।
श्रियं लक्ष्मीं राधिकां जानकीं प्रभां च पार्वतीम् ॥८४॥
जपन् द्वादश दुःस्वप्नः सत्फलदः प्रजायते ।
'ओं ह्रीं श्रीं क्लीं दुःखहन्त्र्यै दुर्गायै ते नमः स्वाहा' ॥८५॥
मन्त्रं वै दशधा जप्त्वा दुःस्वप्नः शुभदो भवेत् ।
शतलक्षजपात्सिद्धः सिद्धिं ददाति वाञ्छिताम् ॥८६॥
ओं नमो मृत्युञ्जयाय स्वाहेति लक्षधा जपेत् ।
दृष्ट्वाऽपि मरणं स्वप्ने शतायुर्जापको भवेत् ॥८७॥
पूर्वोत्तरमुखो भूत्वा स्वप्नं प्राज्ञे शुचौ द्विजे ।
गुरौ देवे दिव्यजने फलदं स्यात् प्रकाशयेत् ॥८८॥
अश्वत्थे गणके विप्रे पितृदेवाऽऽसनेषु च ।
आर्ये च वैष्णवे मित्रे पत्यौ स्वप्नं प्रकाशयेत् ॥८९॥
काश्यपे दुर्गते नीचे देवसद्विप्रनिन्दके ।
मूर्खे जडेऽनभिज्ञे च क्रूरे स्वप्नं न वर्णयेत् ॥९०॥
इत्येवं कथितं लक्ष्मि ! लोकानामुपकारकम् ।
धन्यं यशस्यमायुष्यं पठनाच्छ्रवणादपि ॥९१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने क्वचित् सूर्यचन्द्रयोर्दर्शने शापवर्णनं दुष्टस्वप्नतत्फलतन्निवारणादिवर्णनमितिनिरूपणनामैकोनत्रिंशदधिकपञ्चशततमोऽध्यायः ॥५२९॥

श्रीलक्ष्मीरुवाच—

मानवानां विविधानामितिकर्तव्यताव्रतम् ।
उपकाराय मे ब्रूहि यथा मोक्षोदयो भवेत् ॥ १ ॥

श्रीनारायण उवाच—

अहिंसा सर्वतो ज्येष्ठा सर्वेषां पुण्यदं व्रतम् ।
आत्मने तुष्टिदानं च परं पुण्यप्रदं मतम् ॥ २ ॥
यथाकथञ्चिज्जीवानां देयं सुखं च तोषणम् ।
कायेन मनसा वाचा क्रियया वस्तुभिस्तथा ॥ ३ ॥
आशीर्वादाश्च लभ्यन्ते श्रेयो मोक्षश्च सम्पदः ।
स्नानं ध्यानं मम पूजा नैवेद्यं सेवनं तथा ॥ ४ ॥
परोपकारः सन्तोषः कर्तव्यानि सदा जनैः ।
विष्णुप्रसादभोजी च जीवन्मुक्तो भवेज्जनः ॥ ५ ॥
विष्णुमन्त्रं गृहीत्वा च कृत्वा वै गुरुसेवनम् ।
ध्यात्वा कृष्णपदाम्भोजं मोक्षस्थानमवाप्नुयात् ॥ ६ ॥
गुरूणां पूजनं नित्यं कर्तव्यं पोषणं तथा ।
सर्वेषामपि वन्द्यानां पिता स्वस्य महान् गुरुः ॥ ७ ॥
पितुः शतगुणा माता मातुः शतगुणः सुरः ।
सुरस्य मन्त्रदश्चतुर्गुणो गुरुर्हि मोक्षदः ॥ ८ ॥
मोक्षदस्य शतगुणो ज्ञानमोक्षप्रदो गुरुः ।
गुरुः प्रत्यक्ष ईशेशो गुरुर्नारायणः प्रभुः ॥ ९ ॥
उद्देशो दीयते तस्मै सुराय गुरवे श्रुतेः ।
प्रत्यक्षभोक्ता स्वगुरुः स्वयं देही जनार्दनः ॥१०॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरेव स्वयं शिवः ।
श्रीगुरौ सर्वदेवा वै तिष्ठन्ति सततं मुदा ॥११॥
गुरौ तुष्टे हरिस्तुष्टस्तेन तुष्यन्ति देवताः ।
वैष्णवः श्रीहरेप्राप्तिकरो गुरुर्नारायणः ॥१२॥
ब्राह्मणो वैष्णवो नित्यं गुरुर्मुक्तः सुरैः समः ।
तस्य पादोदकं पीत्वा शुद्ध्यन्ति प्राणिनो ह्यघात् ॥१३॥
विष्णुप्रसादभोजी तु पवित्रां कुरुते महीम् ।
वैकुण्ठे मोदते सोऽन्ते पार्षदो हरिणा सह ॥१४॥
तदाश्रयः प्रकर्तव्यो ग्राह्यो मन्त्रस्ततोऽपि च ।
मन्त्रग्रहणमात्रेण जीवन्मुक्तः प्रजायते ॥१५॥
पुरुषाणां सहस्रं स लीलया तूद्धरेत् शुचिः ।
क्रिया विष्णुपदे यस्य संकल्पाश्च तदर्पिताः ॥१६॥
स एव श्रीहरिर्बोध्यो न मे तस्मात्परः प्रियः ।
मन्त्रं क्वापि न गृह्णीयात् दरिद्राद् भक्तिवर्जितात् ॥१७॥

आमिषं सर्वथा बोध्यं मम नैवेद्यवर्जितम् ।
यद्यपि स्यात् सुधातुल्यं तदभक्ष्यं प्रकीर्तितम् ॥१८॥
धर्मव्याधेन वै पुत्रीं पुरा ज्ञात्वा शुचिं द्विजम् ।
मतंगपुत्रं मातंगं तस्मै दत्ता यतः खलु ॥१९॥
पवित्रस्य गृहे पुत्र्याः परं श्रेयो भविष्यति ।
इति विचार्य दत्ता सा किन्त्वेकस्मिन् दिने पुनः ॥२०॥
श्वश्रूः स्नुषां जगादेदं व्याधजे ! हिंसकात्मजे ! ।
किं जानासि धर्मकृत्यमशुद्धे ! कलहंकरि ! ॥२१॥
इति श्रुत्वा तु सा कन्या ययौ स्वजनकं प्रति ।
प्राह मां व्याधजे ! चेति श्वश्रूः प्राह पुनः पुनः ॥२२॥
व्याधो जगाम जामातुर्गृहं प्राह सुखोदयम् ।
भोजनं प्रददौ श्वश्रूर्विना देवनिवेदितम् ॥२३॥
न तत्र देवपूजापि नाऽन्नशुद्धिर्विलोकिता ।
वैश्वदेवः कृतो नैव नाऽतिथिः पूजितस्तथा ॥२४॥
जलं न गालितं चापि वह्नौ घृतं न चार्पितम् ।
व्याहृतिर्न कृता तत्र स्नानं दृष्टं न वै गृहे ॥२५॥
गोग्रासो भूतसंग्रासो न जामात्रा कृतोपि हि ।
न देवकीर्तनं चापि न सूर्यनमनं तथा ॥२६॥
श्वश्रूगृहे तदीयैस्तु दैवं पैत्र्यं न वै कृतम् ।
तत्सर्वं वीक्ष्य कन्यायाः पिता प्रभोजनाऽऽसने ॥२७॥
स्थित्वा प्राह मया त्वेतद् ग्राह्यं नैव भवेद्यतः ।
तस्यान्न त्वामिषं प्रोक्तं यद् देवाय न चार्प्यते ॥२८॥
जलं च वारुणीतुल्यं देवपादामृतं विना ।
तस्मान्मया न भोक्तव्यं भवदीयं प्रभोजनम् ॥२९॥
मया पुत्री यतो दत्ता ज्ञात्वा धर्मगृहं शुभम् ।
मोक्षार्थं सा प्रदत्ता वै न तु पापादनाय वै ॥३०॥
यत्र सन्ध्या जपो ध्यानं देवार्चनं समर्पणम् ।
किञ्चिन्नास्ति तदन्नं चामिषं वारि सुरासमम् ॥३१॥
मया त्वजानता पुत्री साक्षान्नरके पातिता ।
त्वद्गृहान्मे शुद्धिरस्ति देवनैवेद्यजा सदा ॥३२॥
विना देवार्पणं नाहं भुनज्मि तु कदाचन ।
व्याधपुत्रीति वै प्रोक्ता न तत्तथ्यं वचस्तव ॥३३॥
हरेर्नैवेद्यहीनो वै व्याधः सत्यतयोच्यते ।
तस्माद्व्याधो मतंगस्त्वं ब्रह्मकर्मविवर्जितः ॥३४॥
अहं जात्यापि चेद्व्याधः कर्मणा नैव नैव च ।
त्वं कर्मणा महाव्याधतुल्यो भवसि नित्यदा ॥३५॥
नाऽहं पुत्रीं प्रेषयिष्ये गृहं ते पुनरागमे ।
इत्युक्त्वा प्रययौ व्याधो वैष्णवो भक्तराड् गृहम् ॥३६॥

कृत्वा कृष्णार्पणं सर्वं बुभुजेऽन्नजलादिकम् ।
तस्माल्लक्ष्मि ! सर्ववर्णैरर्पितं मे शुभं भवेत् ॥३७॥
दिव्यं प्रमोक्षदं त्वन्नं जलं पत्रं दलादिकम् ।
ब्राह्मणानां सदा भक्ष्यं हविष्यं च निरामिषम् ॥३८॥
आमिषस्य परित्यागात् सूर्यवत्तेजसा भवेत् ।
अनिवेद्य प्रभोक्ता तु सुरामिषाशनो भवेत् ॥३९॥
श्राद्धं दद्यात् सदा तोयं दद्याद्वै पितृदैवतः ।
माता पिता गुरुर्भार्या शिष्यः पुत्रः स्वसा सुता ॥४०॥
अनाथा पितृवंशीया नित्यं पोष्या गुरुप्रिया ।
तासां वै पोषणात् कृष्णश्चान्तरात्मा प्रसीदति ॥४१॥
सर्वं कृष्णस्य यत्किञ्चिन्नाहं कर्ताऽस्मि कर्मणाम् ।
कर्मणा मनसा वाचा सततं चिन्तयेत्तथा ॥४२॥
सर्वार्पणं भवेत् कर्म पूर्वकर्मनिकृन्तनम् ।
भक्ष्याऽभक्ष्यं विचार्यैव कर्तव्यं कर्मकृन्तनम् ॥४३॥
अयस्पात्रे पयःपानं गव्यं सिद्धान्नमित्यपि ।
भ्राष्ट्रादिकं गुडं मधु नालिकेरोदकं तथा ॥४४॥
फलं मूलं च यत्किञ्चिदयःपात्रे न भक्षयेत् ।
दग्धान्नं चातितप्तं चोच्छिष्टं पर्युषितं तथा ॥४५॥
मादकं जीवहिंसोत्थमभक्ष्यं च परस्य यत् ।
नालिकेरोदकं कांस्ये ताम्रपात्रे स्थितं मधु ॥४६॥
गव्यं च ताम्रपात्रस्थं सर्वं मद्यं विना घृतम् ।
दुग्धं सलवणं मधुमिश्रं तैलं गुडं घृतम् ॥४७॥
पीतशेषजलं माघे मूलकं भाद्रके दधि ।
हस्ताद्धस्तगृहीतानि रसानि नैव भक्षयेत् ॥४८॥
कर्पूरं रौप्यपात्रस्थं भ्रष्टस्पृष्टं न भक्षयेत् ।
हिंस्रकीनां सूकरीणां चमरीणां वनौकसाम् ॥४९॥
हरिणीनां वानरीणां भल्लुकीनां पयस्तथा ।
वाजिन्युष्ट्रीकरेणूनां खरीणां गवयीभवम् ॥५०॥
गेण्डीनां चित्रकीनां च दुग्धादि नैव भक्षयेत् ।
अगालितं पयो वारि तक्रं तैलं घृतादिकम् ॥५१॥
अनिवेद्यं हरेश्चापि सर्वमभक्ष्यमेव यत् ।
पिपीलिकामिश्रितं च मधु गव्यं गुडं रसम् ॥५२॥
पक्षिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलादिकम् ।
काकभक्ष्यमभक्ष्यं च सर्वेषां द्रव्यमित्यपि ॥५३॥
घृतपक्वं तैलपक्वं पक्वं केवलवह्निना ।
सूर्यपक्वं कालपक्वं भक्ष्यं शुद्धं भवेद् यदि ॥५४॥
सर्वेषामशुचीनां च जलमन्नं परित्यजेत् ।
अभक्ष्यभक्षणे शुद्धिं कुर्यात् कृष्णजपं व्रतम् ॥५५॥

शुभाऽशुभं तु यत्कर्म विना भोगं क्षयोऽस्य न ।
न नष्टं दुष्कृतं क्वापि जायते सुकृतेन वै ॥५६॥
न नश्यति सुकृतं च दुष्टकृतेनापि कर्मणा ।
किन्तु पुण्येन पापस्य बलं क्षीणं प्रजायते ॥५७॥
उत्सूद्यते बलात् पुण्यं पापं क्वचित् परस्परम् ।
श्रीकृष्णार्पणभावे तु नवं भोग्यं न जायते ॥५८॥
स्वर्गं तु सुकृतेनैव निरयो दुष्टकृतेन च ।
कर्मणा नहि मोक्षश्च स तु स्यान्मम सेवया ॥५९॥
ज्ञानाग्नौ हवनं यस्य कर्मणस्तत्तु भस्मसात् ।
मयि वा हवनं यस्य तत्तु मोक्षफलं ददेत् ॥६०॥
शृणु पापेन लोकानां यथा जन्म प्रजायते ।
याम्यदण्डोत्तरं जन्म जायते कथयामि तत् ॥६१॥
गोघ्नः स्याद् दन्दशूकश्च गौश्च चाण्डाल इत्यपि ।
ब्रह्मघ्नो विट्कृमिर्भूत्वा म्लेच्छश्चान्धो भवेत्ततः ॥६२॥
स्त्रीघ्नः स्याद् यक्ष्मणा ग्रस्तः श्वा दरिद्रश्च सर्वथा ।
गर्भघ्नः श्वा भवेत्पश्चाद् घोटकश्च भवेत्तथा ॥६३॥
नरघ्नश्च गजेन्द्रः स्यात् ततो भवेत् किरातकः ।
कुक्कुटघ्नः कुक्कुरः स्यान्मार्जारघ्नो बिडालकः ॥६४॥
सर्पहा च भवेत् सर्पो हस्ती च घोटकोऽपि च ।
क्षुद्रजन्तुवधकर्ता क्षुद्रजन्तुः प्रजायते ॥६५॥
अश्वत्थघ्नः शाल्मलिः स्यात् ततः शूद्रो भवेत् पुनः ।
मिथ्यासाक्ष्यप्रदाता च कृतघ्नोऽतिकृतघ्नकः ॥६६॥
विश्वासघाती मित्रघ्नो भवेद् गृध्रः पुनः पुनः ।
सूकरः श्वापदो भूत्वा ततः शूद्रः प्रजायते ॥६७॥
वस्त्रहारी गव्यहारी रौप्यमुक्तापहारकः ।
बको भूत्वा शूद्रजातिस्ततः कुष्ठी भवेदिति ॥६८॥
कोशहारी फलहारी द्रव्यहारी तु यक्षकः ।
भूत्वा तु चाषपक्षी स्यात्ततः शूद्रो भवेदिति ॥६९॥
पक्वद्रव्यापहारी च कस्तूरीमृगजन्मभाक् ।
धान्यहर्ता कृपणः स्यात् स्वर्णहर्ता तु कुष्ठवान् ॥७०॥
क्रोधी मृतः खरो मंकोडकः सर्पश्च वायसः ।
लौहचौरस्तु निर्वंशो मषीचौरस्तु कोकिलः ॥७१॥
शुकोऽप्यञ्जनचौरस्तु मिष्टचौरः कृमिर्भवेत् ।
विप्रद्वेषी गुरुद्वेषी शिरसां स कृमिर्भवेत् ॥७२॥
रक्तद्रव्यापहारी च रक्तदोषान्वितो भवेत् ।
आचारहीनो म्लेच्छः स्यात् खञ्जो भवति हिंसकः ॥७३॥
अहंकारी कर्णहीनो बधिरः शास्त्रनिन्दकः ।
वाक्यहर्ता तु मूकः स्यात् हिंसकः केशवर्जितः ॥७४॥
मिथ्यावादी श्मश्रूहीनो दुर्वाक्यो दन्तहीनकः ।
जिह्वाहीनः सत्यहारी ग्रन्थचौरो जडो भवेत् ॥७५॥
अश्वग्राही त्वश्वचौरः पुनश्चाश्वः प्रजायते ।
ततो वै घोटकः क्षुद्रो गजचौरो गजो भवेत् ॥७६॥
छागचौरो भवेच्छागो दानहा म्लेच्छ एव च ।
एकाकी मिष्टभोक्ता स्यान्मक्षिका च पिपीलिका ॥७७॥
तैलचौरस्तैलकारो रसचौरो दरिद्रकः ।
असदोषधदाता च व्यालग्राही भवेज्जनः ॥७८॥
पुंश्चली स्याद् गोधिका च शृगाली भल्लुकी तथा ।
तडागहा नक्रजातिः कच्छपो मत्स्यको भवेत् ॥७९॥
चित्रवस्त्रापहारस्तु मयूरः स्याद् वनादिषु ।
तेजःपात्रापहारी च भवेत् कारण्डवश्चिरम् ॥८०॥
सुराणां प्रतिमाचौरश्चान्धः स्याद्वै पुनः पुनः ।
पितृदेवार्चनहन्ता शृगालः शवभुग् भवेत् ॥८१॥
गुरुद्वेषी दरिद्रः स्याद् देवद्रोही च दांभिकः ।
दीपनिर्वाणकर्ता तु खद्योतः स्याद्वने वने ॥८२॥
गोणीहर्ता कपोतः स्यान्मालाहर्ता विहंगमः ।
चरको धान्यचौरः स्यान्मांसचौरश्च कुंजरः ॥८३॥
विदुषां दुखदः स्यात्तु मण्डुको वै पुनः पुनः ।
काव्यद्वेषी नकुलः स्यात् कृकलासस्ततः परम् ॥८४॥
कन्याविक्रयकारी च व्याधः स्याद्वै पुनः पुनः ।
धर्महीनः पशुः स्याच्च तैलकारस्ततः परम् ॥८५॥
मिथ्याकलंकवक्ता च रजको मूक इत्यपि ।
अभिचारप्रकर्ता स्याद् हिंसकः प्रेत इत्यपि ॥८६॥
मिथ्यावक्ता च दैवज्ञो वानरो भाण्ड इत्यपि ।
इत्येवं कथितं लक्ष्मि ! मुख्यं विपाकजं फलम् ॥८७॥
यस्य रागश्रेष्ठभोगे द्वेषोऽस्ति विपरीतके ।
तस्य जन्म भवेत् कर्म पुनः पुनर्विपाकजम् ॥८८॥
रागद्वेषौ गतौ यस्य बुद्धिर्यस्य न लिप्यते ।
धर्माधर्मपरित्यागी कर्मणा नहि बध्यते ॥८९॥
नेन्द्रियाणि प्रवर्तन्ते मत्वा स्वविषयान् प्रति ।
आत्मन्येवाऽर्पणकर्ता बध्यते नहि कर्मभिः ॥९०॥
नार्यहं वा नरोऽहं वेत्त्येवं यो नाभिमन्यते ।
आत्मभावे सदा मग्नस्तस्य कर्म न लिप्यते ॥९१॥
दुःखं सुखं सुखं दुःखं द्वे यस्य समतां गते ।
परस्वभावनालोपस्तस्य कर्म न लिप्यते ॥९२॥
ब्रह्मरूपः स्वयं भूत्वा कुर्वन् ब्रह्मार्थमेव चेत् ।
प्रवृत्तो वर्तते मय्यच्युते मुक्तिं गतो भवेत् ॥९३॥

इत्येवं कथितं लक्ष्मि ! कर्मनिर्बन्धनं मया ।
पठनाच्छ्रवणाच्चास्य कर्मनिकृन्तनं भवेत् ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मनुष्यस्य कर्तव्यं, व्याधकन्यामिषेण हरेरनैवेद्य-भोजिनां व्याधत्वम् , अभक्ष्यनिर्देशः पापफलात्मक-कर्मविपाकजन्मादिदर्शनं चेत्यादिनिरूपण-नामा त्रिंशदधिकपञ्चशत-तमोऽध्यायः ॥१३०॥

श्रीनारायण उवाच—

शृणु लक्ष्म्येकदा रम्ये त्वश्वपट्टसरोवरे ।
कुंकुमवापिकाक्षेत्रे ऋषयश्चाययुर्मुदा ॥ १ ॥
ऊर्जकृष्णाष्टमीं कर्तुं कृष्णनारायणस्य वै ।
जयन्त्या उत्सवे त्वन्ये रैवताचलवासिनः ॥ २ ॥
व्योममार्गेण सशिष्या ज्वलन्तो ब्रह्मतेजसा ।
पुलहश्च पुलस्त्यश्च क्रतुश्च भृगुरङ्गिराः ॥ ३ ॥
प्रचेताश्च वशिष्ठश्च दुर्वासाः कण्व इत्यपि ।
कात्यायनः पाणिनिश्च कणादो गौतमस्तथा ॥ ४ ॥
सनकश्च सनन्दश्च तथा ऋषिः सनातनः ।
कपिलश्चासुरिश्चापि वायुः पञ्चशिखस्तथा ॥ ५ ॥
विश्वामित्रो वाल्मीकिश्च कश्यपश्च पराशरः ।
विभाण्डको मरीचिश्च शुक्रोऽत्रिश्च बृहस्पतिः ॥ ६ ॥
गार्ग्यो वात्स्यो वात्स्यायनो व्यासश्च जैमिनिस्तथा ।
मितवाग्ऋष्यसंगश्च याज्ञवल्क्यश्च मंकणः ॥ ७ ॥
सौभरिः शुद्धजटिलो भरद्वाजः सुभद्रकः ।
मार्कण्डेयो बगदाद आसुरिश्च विटंकणः ॥ ८ ॥
अष्टावक्रः शतानन्दो वामदेवश्च भागुरिः ।
संवर्तश्चाप्युतथ्यश्च नरश्च नारदस्तथा ॥ ९ ॥
जाबालिः पर्शुरामश्चाप्यगस्त्यः पैल इत्यपि ।
शालायनो गौरमुखोऽप्युपमन्युः श्रुतश्रवाः ॥१०॥
मैत्रेयश्च्यवनश्चापि वररुचिः सुपर्णकः ।
स्वयंप्रकाशो विश्वात्मा सायणः पिप्पलायनः ॥११॥
एते चान्ये प्रमूर्धन्याः समाजग्मुर्महोत्सवे ।
तान् दृष्ट्वा सहसोत्थाय नमस्कृत्य पुटांजलिः ॥१२॥
कुशासनेषु रम्येषु वासयामास लोमशः ।
पूजयामास विधिवत् कुशलप्रश्नपूर्वकम् ॥१३॥
एतस्मिन्नन्तरे व्योम्नि तेजोराशिः प्रकाशयन् ।
दिशः सर्वाः परितश्चावततार सनातनः ॥१४॥
तेजसोऽभ्यन्तरे रम्यः कुमारः कनकप्रभः ।
यथैव पञ्चवर्षीयः सभामध्ये समागतः ॥१५॥
प्रणेमुर्मुनयः सर्वे लोमशो नारदादयः ।
चक्रुश्च स्वागतं भ्रातुः सर्वज्येष्ठस्य योगिनः ॥१६॥
भगवान् श्रीकृष्णनारायणः स्वागतमाचरत् ।
सनत्कुमारो भगवानुवाच तानृषींस्तदा ॥१७॥
भद्रं वो मुनयः शश्वत्तपसां फलमीप्सितम् ।
निष्फलः श्रीकृष्णनारायणे कुशलप्रश्नकः ॥१८॥
साम्प्रतं कुशलं वश्च दर्शनं परमात्मनः ।
भारावतरणायैव चाविर्भूतस्य साम्प्रतम् ॥१९॥
उवाच श्रीकृष्णनारायणस्तं योगिनं मुनिम् ।
देहिनः श्रीहरेश्चापि कुशलप्रश्नमीप्सितम् ॥२०॥
सनत्कुमारो भगवान् प्राह कृष्णनरायणम् ।
शरीरे प्राकृते नाथाऽकुशलस्य हि संभवः ॥२१॥
तत्र वै कुशलप्रश्नं युज्यते देहिनां सदा ।
नित्यदेहे क्षेममूर्तौ सुखप्रश्नमनर्थकम् ॥२२॥
रक्तबिन्दूद्भवा देहा जीवानां कृतकर्मणाम् ।
न तु वै श्रीकृष्णनारायणस्याऽकृतकर्मणः ॥२३॥
प्रकृतीशस्याऽक्षराधिपतेर्नित्यस्वरूपिणः ।
सर्वेषामवताराणां कारणस्य हरेः कथम् ॥२४॥
नित्यानन्दरवनेस्तस्य कुशलप्रश्नमुच्यते ।
रक्तवीर्याश्रितो देहस्तव नास्ति कदापि वै ॥२५॥
भक्तानुग्रहमात्रेण दृश्यसे दिव्यविग्रहः ।
यस्याश्रयेण जीवानां कुशलं सर्वदा भवेत् ॥२६॥
यत्स्पर्शेन च भक्तानां दिव्यत्वं त्वादृशं भवेत् ।
सत्वं धन्योऽसि भगवन् मान्योऽसि जगतामपि ॥२७॥
सर्वेश्वरेश्वरोऽसि त्वं त्वत्परो नास्ति विश्वतः ।
इतिकृत्वा पुनर्नत्वा चार्चयामास भावतः ॥२८॥
श्रीपतिं श्रीकृष्णनारायणं चाक्षरधारकम् ।
एतस्मिन्नन्तरे ब्रह्मा सावित्र्या सह चाययौ ॥२९॥
पार्वत्या सह शंभुश्च धर्मो मूर्त्या सहाऽऽययौ ।
अनन्तो नागिनीयुक्तः सूर्यः संज्ञासमन्वितः ॥३०॥
शशी च रोहिणीयुक्तः शच्या युक्तः सुरेश्वरः ।
आदित्या वसवो रुद्रा दिक्पालाद्याश्च देवताः ॥३१॥
सहसा श्रीकृष्णनारायणश्चोत्थाय भक्तितः ।
मधुपर्कादिकं दत्वा सत्कारं सुसमाचरत् ॥३२॥
प्रणेमुः ऋषयः सर्वे देवानृषींस्ततः सुराः ।
आनर्चुः श्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥३३॥

अथाऽऽसने स्थितः सनत्कुमारः प्राह संसदि ।
मया दृष्टं परंधाम न दृष्टः पुरुषोत्तमः ॥३४॥
धामाऽक्षरं लोकितं च न दृष्टश्चाक्षराधिपः ।
मया दृष्टस्तु गोलोको न दृष्टो राधिकापतिः ॥३५॥
ततो दृष्टं च वैकुण्ठं न दृष्टः श्रीरमापतिः ।
ततो दृष्टश्च दुग्धाब्धिर्नास्ति तत्र हरिः स्वयम् ॥३६॥
परिश्रान्तविषण्णेन स्नातं क्षीरोदधेस्तटे ।
विस्तीर्णे तत्र कमठो दृष्टो वै नैकयोजनः ॥३७॥
धन्योऽसीति मयोक्तः स नाहं धन्य उवाच माम् ।
क्षीरोदः सागरो धन्यो जन्तवो यत्र मद्विधाः ॥३८॥
ततो मया सागराय धन्यवादः प्रश्रावितः ।
समुद्रः प्राह मां नाहं धन्यवादस्य पात्रकम् ॥३९॥
धन्यवादस्य पात्रं तु पृथिवी लोकधारिणी ।
यत्र सप्ताब्धयो नित्यं वसन्ति च वितस्तिके ॥४०॥
ततो मया पृथिव्यै च धन्यवादः प्रवर्णितः ।
पृथिव्याह च मां नाहं धन्यवादस्य पात्रिका ॥४१॥
धन्यवादस्य पात्रं तु शेषोऽनन्तो ममाऽऽसनम् ।
यत्राऽनन्तानि चाण्डानि फणायां सन्त्यणुर्यथा ॥४२॥
ततो मया ह्यनन्ताय धन्यवादः समर्पिताः ।
अनन्तः प्राह मां नाऽहं धन्यवादस्य पात्रकम् ॥४३॥
धन्यवादस्य पात्रं तु कूर्मो ममाश्रयो महान् ।
यस्य पीठे मादृशा वै शेषा वसन्त्यसंख्यकाः ॥४४॥
ततो मया कच्छपाय धन्यवादः समीरितः ।
कच्छपः प्राह मां नाऽहं धन्यवादस्य भूमिका ॥४५॥
धन्यवादस्य वै भूमिरापो यत्र वसाम्यहम् ।
अप्सु सन्ति मादृशा वै कच्छपाः कोटिशो मुने ॥४६॥
ततो मया महाद्भ्यश्च धन्यवादः प्रवर्तितः ।
आपः प्राहुस्तु मां धन्यवादार्हा न वयं मुने ॥४७॥
धन्यवादस्य पात्रं तु महातेजो जलाश्रयम् ।
ततो मया महातेजोमूर्तये धन्यताऽर्पिता ॥४८॥
महातेजश्च मां प्राह महावायोर्हि धन्यता ।
योग्याऽस्ति च मया वायुर्धन्यवादेन योजितः ॥४९॥
यत्राऽनन्तानि वै सृष्टिमण्डलानि तरन्ति हि ।
वायुः प्राह च मां नाऽहं धन्यवादार्ह ईश्वरः ॥५०॥
धन्यवादस्य पात्रं तु व्योमाकाशो हि वर्तते ।
मया व्योम्नेऽर्पितो धन्यप्रवादो व्योम चाह माम् ॥५१॥
नाऽहं धन्यो जडाकाशश्चोत्पत्तिनाशवानहम् ।
धन्यवादस्य पात्रं तु चिदाकाशो यतो मम ॥५२॥
समुत्पत्तिर्विनाशश्च सृष्टौ सृष्टौ प्रजायते ।
अहं यस्यैकदेशेऽस्मि मयि ब्रह्मा हरो हरिः ॥५३॥
वैराजरोमभूमिस्था वर्तन्ते शतवार्षिकाः ।
अहं ततो ददौ चिदाकाशाय धन्यतां मुहुः ॥५४॥
चिदाकाशश्च मां प्राह नाऽहं धन्यस्य पात्रकम् ।
धन्यस्य पात्रता श्रीमत्कृष्णनारायणे प्रभौ ॥५५॥
अक्षरेशेऽनादिकृष्णनारायणे पुमुत्तमे ।
युज्यते परमेशानेऽवताराणां विधायके ॥५६॥
अनन्तपारे सर्वेशे यस्मात्सर्वं प्रवर्तते ।
यस्यैकरोमकिरणाच्चिदाकाशा अनन्तकाः ॥५७॥
यत्र गोलोकधामाद्याः प्रकाशन्ते स्थले स्थले ।
तादृक्चैतन्यगगनव्राता यत्किरणात् खलु ॥५८॥
तस्माऽनादिश्रीमत्कृष्णनारायणे हि धन्यताम् ।
देहि सनत्कुमार त्वं सर्वधन्यतमाश्रये ॥५९॥
यत्र मुक्ता निवसन्ति यतोऽवतारकोटयः ।
यतो व्यूहा वासुदेवप्रभृतयो भवन्ति च ॥६०॥
यतो धर्मो यतो वेदा यत्राऽन्तर्यामिता स्थिता ।
व्यापकश्चान्वयी यश्च सर्वज्ञः सर्वशक्तिमान् ॥६१॥
यतो यज्ञाः कर्मकाण्डाः प्रवृत्तिश्चात्मनां यतः ।
यत्र चान्ते निवृत्तिश्च कर्मफलं यतो भवेत् ॥६२॥
फलदाता कर्महेतुः सर्वादिः सर्वकारकः ।
धन्यवादेन योक्तव्यो नान्यो धन्याश्रयो मुने ॥६३॥
इत्युक्तोऽहं परे लोकेऽक्षरलोकात्परे स्थिते ।
योगशक्त्या गतो द्रष्टुं दातुं च धन्यवादकान् ॥६४॥
कारणं कारणानां तं प्रवीक्षितुं स्वधामनि ।
सोऽहं तत्रत्यमुक्तानां दिव्यतेजोभिरावृतः ॥६५॥
द्रष्टुं शक्तोऽभवं नैव सन्तं च दिव्यविग्रहम् ।
गन्तुं तु शक्यते योगाद् द्रष्टुं शक्तं त्वनुग्रहात् ॥६६॥
अदृष्ट्वा तं मुक्तवृन्दं पृष्ट्वा क्व भगवानिति ।
ज्ञात्वा विराजते त्वश्वपट्टसरोऽन्तिके शुभे ॥६७॥
क्षेत्रे कुंकुमवाप्यां वै लोमशाश्रमशोभिते ।
गेहे च कम्भरालक्ष्म्या गोपालकृष्णमन्दिरे ॥६८॥
दिव्याऽदिव्याक्षिभिः सर्वैर्दृश्योऽनादिनरायणः ।
गच्छ त्वं श्रीकृष्णनारायणं पश्य क्षितौ मुने ॥६९॥
इत्याज्ञाय समायातोऽस्म्यहं दर्शनहेतवे ।
धन्यवादान् प्रदातुं च तस्मै योऽत्र विराजते ॥७०॥
बालः श्रीकम्भरालक्ष्म्या गोपालकृष्णनन्दनः ।
वसन्ति यत्र वेदाश्च पराविद्याऽत्र वर्तते ॥७१॥

सर्वानन्दा मुक्तयश्च यस्याऽक्षिकोणके स्थिताः ।
सर्वे देवाश्च ऋषय ईश्वरा यन्मनोभवाः ॥७२॥
तस्मायनादिश्रीकृष्णनारायणाय वै नमः ।
स्वामिने बालरूपाय वल्लभाय च ते नमः ॥७३॥
मुक्तानां पतये धाम्नां पतये ते नमोनमः ।
अवतारवृन्दधर्त्रे ईश्वरेशाय ते नमः ॥७४॥
राधालक्ष्मीस्वामिने ते जयायाः पतये नमः ।
ललितामाणिकीपद्मापार्वतीशाय ते नमः ॥७५॥
प्रभावृन्दातुलसीश्रीपद्मावतीश ते नमः ।
मञ्जुलाकान्त हंसेश योगीशेश च ते नमः ॥७६॥
कमलाकान्त सिद्धीश ते प्रत्यक्ष नमोनमः ।
नमोहृदयवासाय सर्वान्तर्यामिणे नमः ॥७७॥
नमः मयूरपिच्छाढ्यमुकुटधारिणे नमः ।
नमः कौस्तुभसंशोभद्वक्षःस्थलाय ते नमः ॥७८॥
नमः कुण्डलकर्णाय स्वर्णहाराय ते नमः ।
सर्वशक्तिस्वरूपाय कामकामाय ते नमः ॥७९॥
नैकासुरविनाशाय भक्तत्राणाय ते नमः ।
भक्तवाञ्छितदात्रे ते श्रीकृष्णाय नमो नमः ॥८०॥
धन्येयं कुंकुमवापी धन्योऽयं लोमशो मुनिः ।
अश्वपट्टसरो धन्यं धन्यं व्याघ्रवनं शुभम् ॥८१॥
धन्या इमे च ऋषयो धन्या द्रुतृणभूरुहाः ।
धन्याः पक्षगमा जीवा धन्या भूवासकारिणः ॥८२॥
धन्या नरास्तथा नार्यो धन्यं चराचरं त्विदम् ।
यत्र वै बालरूपस्त्वं वर्तसे पुरुषोत्तमः ॥८३॥
दृश्यसे सर्वविषयो गम्यसे ज्ञानिभिः खलु ।
अद्य नः सफलं जन्म पुण्यं नः पारवर्जितम् ॥८४॥
सृष्टिसञ्चालकैर्यो न प्राप्यते दृश्यसेऽत्र नः ।
अनेकजन्मशुद्धानां दर्शनं तेऽत्र युज्यते ॥८५॥
अस्माकं चात्र सञ्जातं पुरुषार्थचतुष्टयम् ।
शरण्यं यत्पदं लब्धं प्रत्यक्षं सेवनोचितम् ॥८६॥
इत्येवं स्तवनं कृत्वा बालवेषं पुमुत्तमम् ।
पुपूजुः परया भक्त्या श्रृंगारितं जगत्प्रभुम् ॥८७॥
उपदाः प्रददुः सर्वे चक्रुश्च तिलकं शुभम् ।
आरार्त्रिकं प्रचक्रुश्च नेमुस्तुष्टुवुरादरात् ॥८८॥
प्रदक्षिणं प्रचक्रुश्च नैवेद्यं विविधं ददुः ।
देवा देव्यः पुष्पवृष्टिं चक्रुः कृष्णस्य मूर्धनि ॥८९॥
महोत्सवे कोटिशो वै भुवनानां निवासिनः ।
समायाता जयन्त्यां श्रीकृष्णनारायणस्य ते ॥९०॥

दर्शनं च प्रसादं च चरणामृतमित्यपि ।
शुभाशिषश्च संगृह्य ययुर्निजालयं मुदा ॥९१॥
अनादिश्रीकृष्णनारायणरयैतत् स्तवं शुभम् ।
परमैश्वर्यजनकं सुखदं सम्पदांप्रदम् ॥९२॥
निर्वाणमोक्षदं लक्ष्मि ! हरिभक्तिप्रदं परम् ।
अक्षरेशपददातृ सर्वसिद्धिप्रदं वरम् ॥९३॥
लोभमोहकामक्रोधकर्ममूलनिकृन्तनम् ।
बलबुद्धिप्रदं चैव जन्ममृत्युविनाशनम् ॥९४॥
धनपुत्रप्रियाभूमिपतिसम्पत्प्रदं नृणाम् ।
शोकदुःखहरं यश्च पठेद्वा श्रृणुयाच्च वा ॥९५॥
बन्धनान्मुच्यते दुःखी भीतो मुच्येत वै भयात् ।
रोगाद्विमुच्यते रोगी दरिद्रश्च धनी भवेत् ॥९६॥
दस्युग्रस्तो रिपुग्रस्तो हिंस्रजन्तुसमावृतः ।
स्तोत्रेणाऽनेन वै लक्ष्मि ! कल्याणं लभते जनः ॥९७॥
सनत्कुमारो भगवान् ददौ श्रीलोमशाय यत् ।
लोमशश्च ददावन्यऋषिभ्यो मोक्षहेतुकम् ॥९८॥
अनादिश्रीकृष्णनारायणभक्ताय सर्वथा ।
दासभक्ताय दातव्यं विदुषे च मुमुक्षवे ॥९९॥
अश्वमेधसहस्राच्च पृथिव्याश्च प्रदक्षिणात् ।
स्नानाच्च सर्वतीर्थानां स्तोत्रमेतत्तु पुण्यदम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कुंकुमवापिकाक्षेत्रे लोमशाश्रमेऽनादिश्रीकृष्णनारायणस्य जयन्त्यां तिथौ धन्यवादाऽऽशीर्वादप्रदानार्थमागतेन सनत्कुमारेण क्रमशो धन्यवादार्हपराकाष्ठाश्रयाऽनादिश्रीकृष्णनारायणस्य ऋषित्राताय कथित महिमादिनिरूपणनामैकत्रिंशदधिकपञ्च-शततमोऽध्यायः ॥ ५३१ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि चमत्कारं मुनेर्गौरमुखस्य वै ।
आसीत् कृतयुगे राजा सुप्रतीको बलाधिकः ॥ १ ॥
तस्य भार्याद्वयं विद्युत्प्रभा कान्तिमती तथा ।
अपुत्रस्तोषयामास चित्रकूटे तु सेवया ॥ २ ॥
दुर्वाससं वरं तस्माल्लेभे 'सुपुत्रवान् भव' ।
राजा विद्युत्प्रभायां दुर्जयाख्यं प्रासवान् सुतम् ॥ ३ ॥
कान्तिमत्यां सुद्युम्नाख्यं द्वितीयं प्रासवान् सुतम् ।
दुर्जयस्य ददौ वाराणसीराज्यं नृपस्ततः ॥ ४ ॥

स्वयं तु चित्रकूटाद्रिं तपोऽर्थं प्रजगाम ह ।
दुर्जयश्चिन्तयामास राज्यवृद्धिं प्रति प्रभुः ॥ ५ ॥
त्रिंशदक्षौहिणीसैन्ययुतः स उत्तरां दिशम् ।
जित्वा किंपुरुषं हरिवर्षं रोमाव्रतं कुरुम् ॥ ६ ॥
भद्राश्वं मेरुमध्यं च जित्वा जेतुं दिवं ययौ ।
मेरुपर्वतमारुह्य यावत् प्रयाति तावता ॥ ७ ॥
नारदो दुर्जयजयं देवराजाय चोक्तवान् ।
इन्द्रः सैन्यं समादाय प्रति युद्धं चकार ह ॥ ८ ॥
शंकरस्य त्रिशूलेन दुर्जयेन पराजितः ।
इन्द्रस्तद्वशतां यातः सुराः सर्वे वशंगताः ॥ ९ ॥
दुर्जयो लोकपालाँस्तु विहायैव भुवं ययौ ।
तत्र द्वावसुरौ विद्युत्सुविद्युन्नामकौ ततः ॥१०॥
आगत्य दुर्जयं चोभौ प्राहतुः शृणु भूपते ।
लोकपालानविजित्य सुखं न स्यात् कदाचन ॥११॥
आवां जेष्याव एवैतान् देहि स्वर्गं च नौ यदि ।
ओमित्युक्त्वा ददौ ताभ्यां सुराज्यं तत्सुहृद्वरौ ॥१२॥
हेतृप्रहेतृनामानौ बहुसैन्यपरिच्छदौ ।
मनोः स्वायंभुवः पुत्रौ कन्ये द्वे ददतुर्हि ते ॥१३॥
हेतुकन्या सुकेशी तु मिश्रकेशी प्रहेतृजा ।
दुर्जयस्ते शुभे लब्ध्वा निजं राष्ट्रं जगाम च ॥१४॥
सुकेश्याः प्रभवाख्यश्च मिश्रकेश्याः सुदर्शनः ।
पुत्रौ द्वौ दुर्जयस्याऽऽस्ताम् महाबलपराक्रमौ ॥१५॥
एवं राजा वर्धमानस्त्वेकदा स हिमालयम् ।
अरण्येषु जगामाऽसौ मृगयार्थं ससैन्यकः ॥१६॥
ग्रीष्मकालमरण्येषु निनाय बहुसैन्यकः ।
हास्तिने नगरे यस्य राजधानी तदाऽभवत् ॥१७॥
अरण्ये वासितं तेनाऽक्षौहिणीपञ्चकं बलम् ।
पञ्चविंशतिसंख्याकं हास्तिने नगरे धृतम् ॥१८॥
दुर्जयो हिमभूमीनामरण्ये विचरँस्तदा ।
ददर्शारण्यके देशे नाम्ना गौरमुखं मुनिम् ॥१९॥
अनेकर्षिसुसञ्जुष्टं महाभागवतोत्तमम् ।
यत्र वेदान् पाठयन्ति कुमारान् वै महर्षयः ॥२०॥
कन्यकाभ्यो मुनिभिश्च पाठ्यन्ते वेदकाण्डिकाः ।
दुर्जयो दर्शनार्थं वै गतस्त्वाश्रममण्डलम् ॥२१॥
चकार स्वागतं राज्ञस्तदा गौरमुखो मुनिः ।
जगाद च यथाशक्त्या ते सानुगस्य भोजनम् ॥२२॥
करिष्यामि प्रमुच्यन्तां साधु वाहा वनेऽभितः ।
राजा प्रसन्नस्तद्भक्त्याऽऽश्रमस्यान्तिकमेव सः ॥२३॥

पञ्च चाक्षौहिणीसैन्यं वासयामास सत्वरम् ।
ऋषिः संस्मृत्य मनसा कृष्णनारायणं प्रभुम् ॥२४॥
किं मया भोजनं चास्य देयमिति विचार्य च ।
गंगाजले प्रविश्याऽयं तुष्टाव श्रीनरायणम् ॥२५॥
नमस्ते श्रीकृष्णनारायणायाक्षरधामिने ।
नमस्ते चाद्यरूपाय वीणाधृक्द्विभुजाय च ॥२६॥
शंखचक्रान्वितलक्ष्मीपतयेऽर्थधृगे नमः ।
सर्वप्रदाय दिव्याय भक्तगोप्त्रे च ते नमः ॥२७॥
पञ्चभूतस्थितायाऽत्र हृदयस्थाय ते नमः ।
आपूरकाय सर्वेषामक्षयाय च ते नमः ॥२८॥
ब्रह्मव्रतधरायाऽब्धौ शेषस्थाय च ते नमः ।
त्वत्तो भूतमिदं सर्वं सर्वदात्रे च ते नमः ॥२९॥
त्वत्तो यज्ञस्तथा हव्यं कव्यं भोज्यं च वारि च ।
सर्वं चास्ति शरीरं ते तस्मै भोज्यं प्रदेहि वै ॥३०॥
ममाऽत्र श्रीकृष्णनारायण राजा हि दुर्जयः ।
आगतोऽभ्यागतस्तस्य चातिथ्यं कुरु माधव ॥३१॥
अहं च तव दासोऽस्मि कुरुष्वन्नादिसञ्चयम् ।
यं यं स्पृश्यामि हस्तेन यं च पश्यामि चक्षुषा ॥३२॥
काष्ठं वा तृणकन्दं वा तत्तदन्नं चतुर्विधम् ।
तथा पेयं जलं मिष्टं दुग्धं दधि घृतादिकम् ॥३३॥
तत्सर्वं सिद्ध्यतां मह्यं यद्ध्यातं मनसा मया ।
तवैव तु प्रतापेन भवेदातिथ्यमच्युत ॥३४॥
इति स्तुतः प्रसन्नात्मा साक्षाद्बभूव सन्निधौ ।
श्रीयुतः श्रीकृष्णनारायणो गरुडसंस्थितः ॥३५॥
शंखचक्रधनुर्वज्रध्वजशूलकरं हरिम् ।
दृष्ट्वा तं स मुनिर्नत्वा कृताञ्जलिरथाऽब्रवीत् ॥३६॥
इदानीमेष नृपतिर्यथा सबलवाहनः ।
ममाश्रमे कृताहारः श्वः प्रयाता स्वकं गृहम् ॥३७॥
तथा कुरु महाराज! कृष्णनारायण प्रभो ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥३८॥
इत्युक्तः श्रीहरिस्तस्मै चित्तशुद्धिं ददौ पुरा ।
ततश्चिन्तामणिं दिव्यं ददौ तस्मै महाप्रभम् ॥३९॥
तं दत्वाऽन्तर्दधे कृष्णः स तु गौरमुखो मुनिः ।
मणिं स्पृष्ट्वा महासौधं चिन्तयामास चोन्नतम् ॥४०॥
हिमवच्छिखराकारं गृहं वै शतभूमिकम् ।
शशांकरश्मिसंव्यासं स्वर्णराजतवस्तुकम् ॥४१॥
तादृशानां सहस्राणि लक्षलक्षाणि सर्वशः ।
गृहाणि निर्ममे विप्रो विष्णोर्मणेः प्रभावतः ॥४२॥

प्राकाराणि तथोपान्ते तल्लग्नोद्यानकानि च ।
कोकिलहंसमेनासारसमयूरवन्ति च ॥४३॥
चम्पकाशोकपुन्नागनागकेसरवन्ति च ।
वृक्षवल्लीस्तम्त्रपुष्पनानाद्विजयुतानि च ॥४४॥
हस्तिनां हस्तिशालाश्च तुरगाणां च मन्दुराः ।
उष्ट्राणां च गवयानां वृषभाणां च शालिकाः ॥४५॥
रचयामास संकल्पाच्चकार भक्ष्यसञ्चयान् ।
भक्ष्यं भोज्यं तथा लेह्यं चोष्यं पानं सशर्करम् ॥४६॥
चकाराऽन्नाऽद्यविषयं शाकानि व्यञ्जनानि च ।
हैमराजतपात्राणि फलानि विविधानि च ॥४७॥
एवं कृत्वा स विप्रस्तु राजानं भूरितेजसम् ।
उवाच सर्वसैन्यानि स्वस्वनामाऽङ्कितगृहान् ॥४८॥
प्रविशन्तु सुखं तत्र वसन्तु मुदितानि च ।
दशयोजनविस्तारं त्रिंशद्योजनदीर्घकम् ॥४९॥
सैन्यानि विविशुर्दिव्यं नगरं सूर्यसन्निभम् ।
राजा स्वभवनं त्वद्रिप्रोन्नतं प्रविवेशह ॥५०॥
गौरमुखोऽथ संगृह्य मणिं राजानमाह यत् ।
मज्जनाऽभ्यवहारार्थं दासान् विलासिनीस्तथा ॥५१॥
प्रेषयामि च संप्रोच्य मणिं स्पृष्ट्वा जगाद सः ।
दासा दास्यो नवावस्था भवन्त्वस्य प्रभावतः ॥५२॥
निश्श्रेरुर्योषितस्तावद् राज्ञस्तस्य प्रपश्यतः ।
सुकुमारांगरागाढ्या दिव्याश्च नवयौवनाः ॥५३॥
सुकपोलाः सुचार्वङ्ग्यः सुकेशान्ताः सुलोचनाः ।
स्वर्णचम्पकवर्णाभाः कुमारा लक्षशस्तथा ॥५४॥
सुरूपाश्च समारब्धयौवना देवसदृशाः ।
काश्चित् सौवर्णपात्रीश्च गृहीत्वा सम्प्रतस्थिरे ॥५५॥
एवं सर्वाः कुमार्यश्च कुमाराश्च प्रसेवकाः ।
राज्ञः सैन्यस्य च कृते चक्रुः सिद्धं हि भोजनम् ॥५६॥
परिधानं पराश्चक्रुः स्नापयामासुरन्यकाः ।
पादसंवाहनं चक्रुरन्या आस्तरणं व्यधुः ॥५७॥
ताम्बूलानि ददुश्चान्या मिष्टं जलं ददुस्तथा ।
वीजयामासुरपराश्चक्रुः परास्तु गायनम् ॥५८॥
भृत्या यथाऽभ्यपेक्षं च चक्रुः सेवां जनस्य वै ।
नानाविधानि तूर्याणि तत्राऽवाद्यन्त भूरिशः ॥५९॥
मज्जतो नृपतेस्तस्य ननृतुश्चान्ययोषितः ।
एवं दिव्योपचारेण स्नात्वा राजा महाबलः ॥६०॥
विविधान्नं तु विधिना बुभुजे सैन्यमित्यपि ।
यथा राज्ञस्तथा भृत्यजनस्यापि प्रपूजनम् ॥६१॥
गजाश्वादिपशूनां च माननं चोत्तमोत्तमम् ।
चकार मुनिराट् स्वीयदासदासीभिरुत्तमम् ॥६२॥
अथ रात्रिः समायाता चन्द्रकान्तिसमन्विता ।
प्रदर्शनानि रम्याणि मुनिना दर्शितानि च ॥६३॥
नृत्यान्यपि च नारीणां महोत्सवाश्च दर्शिताः ।
मल्लानां चरयुद्धानि दर्शितानि शुभान्यपि ॥६४॥
संगीतानि च दैवानि वाद्यानि चोत्तमानि च ।
गान्धर्वरागरागिण्यो दर्शिता मणिमूलिकाः ॥६५॥
व्याख्यानानि रञ्जनानि हास्यान्यपि कृतानि च ।
द्यूतान्यपीन्द्रजालानि नटनर्तनकानि च ॥६६॥
दृष्टिबन्धानि चान्यानि दर्शितानि निशार्धके ।
अथ तेषां शयनेषु रत्नस्वर्णमयेषु च ॥६७॥
पुष्पान्वितेषु मृदुषु नार्यः सेवां प्रचक्रिरे ।
राजा दिव्यांगनाभिश्च सेव्यते शयनोत्तमे ॥६८॥
एवं सुमनसस्तस्य ऋषेर्मणेः प्रभावतः ।
राजा सैन्यानि च सुखं हृष्टाः प्रसुषुपुस्ततः ॥६९॥
प्रातरुत्थानकार्यार्थं वाद्यानि विविधानि च ।
अवाद्यन्त कुमारीणां गायनैः सह सर्वशः ॥७०॥
स्नात्वा राजा जलपानं कृत्वा भक्ष्यं विधाय च ।
ससैन्यस्त्वरितो गौरमुखस्य पूजनाय वै ॥७१॥
आययौ पर्णशालायां यत्रास्ते तु मणिर्मुनिः ।
ततः कुमार्यो भृत्याश्च सर्वाण्यपि गृहाणि च ॥७२॥
गृहोपस्करणादीनि भोज्यपेयानि सर्वशः ।
अन्तर्धानं गतं सर्वं क्षणाद् वनं बभूव तत् ॥७३॥
स राजा विस्मयापन्नश्चिन्तयामास वीक्ष्य तत् ।
कथमेवं मणिर्मह्यं भवतीति पुनः पुनः ॥७४॥
चिन्तामणिमिमं स्वस्य हरामीति विचिन्त्य सः ।
नत्वाऽऽश्रमबहिर्भागे गत्वा तूवाच मन्त्रिणम् ॥७५॥
विरोचन ! मुनिं याहि याचनां कुरु वै मणेः ।
स तमृषिं समागत्य मणिं याचितुमुद्यतः ॥७६॥
रत्नानां भाजनं राजा मणिं तस्मै प्रदीयताम् ।
अमात्येनैवमुक्तस्तु क्रुद्धो गौरमुखोऽब्रवीत् ॥७७॥
राजा दाता भवेन्नित्यं प्रतिग्राही तु भूसुरः ।
त्वं च राजा स्वयं भूत्वा याचसे दिनवत् कथम् ॥७८॥
अयोग्यस्त्वं मणेः पात्रं नासि मा याचनां कुरु ।
त्रैलोक्यं यस्य वशगं स्वर्गं पातालमित्यपि ॥७९॥
मेरुः रत्नाकराश्चापि तथाप्यहो दरिद्रता ।
ब्राह्मणस्य धने वाञ्छां करोषि न्यायवर्जिताम् ॥८०॥

अतृप्तस्याऽज्ञानिनस्तु सर्वे स्युर्विषया गृहे ।
तथापि तृष्णया शान्तिं नाधिगच्छति पापवान् ॥८१॥
एवं ब्रूहि दुराचारं राजानं दुर्जयं स्वयम् ।
गच्छ द्रुतं च यावत्ते विघ्नः कश्चिन्न जायते ॥८२॥
दूतो जगाम राजानं प्रोक्तवाँश्च यथोचितम् ।
क्रुधा नीलाख्यसामन्तं राजाऽऽह गच्छ मा चिरम् ॥८३॥
विप्रस्य मणिमाहृत्य तूर्णमेहि ममान्तिकम् ।
नीलो ययौ तथा शीघ्रं मणेः कुट्यां प्रगच्छति ॥८४॥
तावन्मणेस्तु निर्जग्मुः कोटिशः शस्त्रपाणयः ।
योद्धारः सरथाश्चान्ये सध्वजाश्चासिचर्मिणः ॥८५॥
सधनुस्तूणीरबाणाः शक्तिभूशुण्डिकान्विताः ।
पञ्चदशाक्षौहिण्यश्च पञ्चदश च नायकाः ॥८६॥
नामभिः सुप्रभो दीप्तितेजाश्च शुभदर्शनः ।
सुकान्तिः सुन्दरः सुन्दः प्रद्युम्नः सुमनाः शुभः ॥८७॥
सुशीलः सुखदः शम्भुः सुदान्तः सोम इत्यपि ।
सुरश्मिश्चेति ते सर्वे योधयामासुरुल्बणाः ॥८८॥
भूशुण्डिकास्तथा शूलाः खड्गानि च धनूंषि च ।
पतन्ति च गदा वज्राः शक्तयश्च सुयोधिनाम् ॥८९॥
रथो रथं परिवार्य तस्थौ गजो गजं तथा ।
हयो हयं पदातिश्च पदातिं प्रससार वै ॥९०॥
रणे त्वविरते तत्र नदी रक्तसमुत्थिता ।
राज्ञः सचिवो विसंज्ञः ससैन्यश्च हतो रणे ॥९१॥
दुर्जयस्तु स्वयं तत्र मणिजैः संयुयोध ह ।
अवशिष्टस्य सैन्यस्य सर्वे कदनमाबभौ ॥९२॥
अथ हेतृप्रहेतृभ्यां श्रुतो जामेः रणो महान् ।
युध्यतस्तौ सहायेऽस्य चम्वः पञ्चदशोल्बणाः ॥९३॥
नायकाः पञ्च च दश प्रेषिता रणमूर्धनि ।
ये पुनर्नोत्थिता नष्टा नामतस्तान् प्रकर्णय ॥९४॥
प्रघसो विघसश्चापि सघसश्चाशनिप्रभः ।
विद्युत्प्रभः सुघोषश्च प्रोन्मत्ताक्षः प्रतर्दनः ॥९५॥
अग्निदन्तोऽग्नितेजाश्च बाहुः शक्रो विरोधकः ।
भीमकर्मा विप्रचित्तिः, दैतेयाः परमायुधाः ॥९६॥
महामाया युयुधुस्ते मणिजैर्योधपुंगवैः ।
पञ्चदशाक्षौहिण्यश्च दैतेयानां हतास्तु ताः ॥९७॥
तावत् हेता प्रहेता चाययतुः सैन्यकोटिभिः ।
विद्युत् सुविद्युश्च तावत् स्वर्गेशावसुरावुभौ ॥९८॥
त्रिंशदक्षौहिणीयुक्तौ भत्वा युद्धे सहायदौ ।
आययतुर्हिमदेशे कम्पिताऽभूद्वसुन्धरा ॥९९॥
रक्तवाहा नदी तत्र त्वब्धिं प्राप्तुं द्रुतं गता ।
अथ गौरमुखो दृष्ट्वाऽनन्तं सैन्यं तु रक्षसाम् ॥१००॥
सस्मार श्रीकृष्णनारायणं मणिपतिं प्रभुम् ।
श्रीहरिः पुरतस्तस्य पीतवासाः खगासनः ॥१०१॥
समागत्य समुवाच वद किं कार्यमत्र मे ।
ऋषिः प्रोवाच भगवन् जहीमं दुर्जयं नृपम् ॥१०२॥
दैतेयाँश्चेति वै श्रुत्वा चक्रं मुमोच दैत्यहा ।
कोटिसूर्यसमं चक्रं भस्मीचकार दुर्जयम् ॥१०३॥
सैन्यान्यपि च रक्षांसि नैकोऽप्यत्राऽवशिष्यते ।
उवाच निमिषेणेदं निहतं दानवं कुलम् ॥१०४॥
अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् ।
भविष्यति यथार्थं च ऋषीणां सन्निवेशनम् ॥१०५॥
अहं च यज्ञपुरुष एतस्मिन् वनगोचरे ।
नाम्ना याज्याः सदा चेमे पञ्चदश च नायकाः ॥१०६॥
कृते युगे क्रमादेते स्युर्नृपा मणिजा इमे ।
एवमुक्त्वा मणिं नीत्वा देवोऽन्तर्धानमागतः ॥१०७॥
द्विजोऽपि स्वाश्रमे तस्थौ मुदा परमया युतः ।
सैन्यान्यपि च सर्वाणि श्रीविष्णौ लीनतां ययुः ॥१०८॥
दुर्जयः श्रीहरौ तत्र लीनो बभूव योगतः ।
चक्रहतानि सैन्यानि स्वर्गं गतानि योगतः ॥१०९॥
एवं नारायणस्यांशा उक्ता मण्युद्भवाः प्रिये ।
पठनाच्छ्रवणाच्चास्य मुक्तिः स्यात् स्वर्गमित्यपि ॥११०॥
अथ गौरमुखो विप्र आरिराधयिषुर्हरिम् ।
युद्धदुरीतनाशार्थं प्रभासक्षेत्रमाययौ ॥ १११॥
सौराष्ट्रे रैवती भूमौ स्नात्वा दामोदराह्वये ।
कुण्डे नारायणह्रदे समुद्रे गोमतीयुते ॥११२॥
प्राच्यां चापि सरस्वत्यां चाश्वपट्टसरो ययौ ।
कुंकुमवापिकाक्षेत्रे लोमशस्याश्रमे शुभे ॥११३॥
तत्राऽऽजगाम ऋषिराट् मार्कंडेयो महामुनिः ।
लोमशं प्रथमं नत्वा मार्कंडेयं ननाम सः ॥११४॥
मणेः समर्पयितारं कृष्णनारायणं प्रभुम् ।
प्रत्यक्षं वर्तमानं तं गोपालकृष्णनन्दनम् ॥११५॥
आत्मानं च कृतार्थं वै मेने गौरमुखो मुनिः ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥११६॥
इतिमन्त्रं जपन् देवं मार्कण्डेयं पप्रच्छ सः ।
मृतानां मोक्षणार्थं च दुरीतक्षयकारकम् ॥११७॥
मयाऽत्र किमनुष्ठेयं शाधि ममात्र तीर्थके ।
मार्कण्डेयश्च तं प्राह कृष्णनारायणो हरिः ॥११८॥

सर्वेषामेव देवानामाद्योऽत्र वर्तते प्रभुः।
प्रत्यक्षं तं भज कृष्णनारायणं श्रियः पतिम् ॥११९॥
तेन मुक्तिश्च सर्वेषां दुरीतानां च नाशनम्।
भविष्यत्येव क्षेत्रेऽस्मिन् श्राद्धानि कुरु चात्र वै ॥१२०॥
इत्युक्तः स मुनिः श्राद्धानि चक्रे मोक्षकांक्षया।
युद्धे मृताश्च ये तेषामुद्धारं कृतवान् स्वयम् ॥१२१॥
विमानैस्ते गताः सर्वेऽक्षरं धाम परात्मनः।
अयं गौरमुखः पूर्वे जन्मन्यासीद् भृगुः स्वयम् ॥१२२॥
तदन्वयात्मजस्त्वेषो मार्कण्डेयो मुनीश्वरः।
श्राद्धेन बोधयामास पुत्रस्तं पितरं पुनः ॥१२३॥
अथ गौरमुखस्तत्र ज्ञात्वा कृत्वा च तर्पणम्।
सस्मार सर्वजन्मानि स्मृत्वा कृष्णनरायणे ॥१२४॥
सर्वात्मनाऽर्पितो भूत्वा ययौ धामाऽक्षराऽभिधम्।
लयं जगाम सर्वेशे चाऽपुनर्भवसंज्ञिते ॥१२५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दुर्जयस्य त्रिलोकराज्यं, गौरमुखाश्रमे श्रीकृष्णनारायणार्पितमणिना सुस्वागतं, चिन्तामण्यर्थे युद्धं, दुर्जयादिविनाशः, गौरमुखस्य प्रभासाऽऽगमनं, मुक्तिश्चेत्यादिनिरूपणनामा द्वात्रिंशदधिकपञ्चशततमोऽध्यायः ॥५३२॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! च देवानां विवादेऽध्यात्मसंज्ञितम्।
ज्ञानं पूर्वे वराहः श्रीभगवानाह यद् भुवे ॥ १ ॥
चिन्तामणिसमुत्पन्नः सुप्रभो नाम भूपतिः।
प्रजापालोऽस्य नामापि द्वितीयं सार्थकं त्वभूत् ॥ २ ॥
स त्वेकदा ययौ ऋष्याश्रमान् द्रष्टुं मुदा ऋषीन्।
यत्र महातपा नाम ऋषिः कल्पायुरस्ति च ॥ ३ ॥
तपस्तपत्यनाहारो जपन् ब्रह्मसनातनम्।
यत्र वृक्षास्तथा वल्लयःस्तम्बास्तृणानि पक्षिणः ॥ ४ ॥
पशवश्च मृगाः सरीसृपाः सन्ति मुमुक्षवः।
रागद्वेषविहीनाश्च ऋषिवत्तपआस्थिताः ॥ ५ ॥
तान्पश्यन् स प्रजापालो महातपस आश्रमम्।
प्रविवेश मुदा तं च ऋषिं दृष्ट्वा मुमोद च ॥ ६ ॥
ननाम परया भक्त्या चकार दण्डवन्मुदा।
कुशासनस्थितस्यास्य ऋषेर्वै दर्शनात्तदा ॥ ७ ॥
मतिं मायामयीं तूर्णं विसस्मार जगन्मयीम्।
मुनेः सान्निध्यतो राजा चकार धर्ममानसम् ॥ ८ ॥
आत्मज्ञानस्य जिज्ञासां मोक्षोपायागमं तथा।
मुनिस्तं च नृपं दृष्ट्वा चकराऽभ्यागतक्रियाम् ॥ ९ ॥
आसनं स्वागतं पानं भोजनं कुशलं वचः।
ततः पप्रच्छ तं शान्तं मुनिं विनयवान् नृपः ॥१०॥
भगवन् दुःखसंसारमग्नैः पुंभिर्जिगीषुभिः।
यत्कार्यं तन्ममाशंस प्रणतस्य सुखावहम् ॥११॥
महातपास्तु तच्छ्रुत्वा प्राह राजन्निबोध मे।
संसारार्णवमग्नैश्च पोतः स्थिरो ध्रुवो दृढः ॥१२॥
कार्यः श्रीमत्कृष्णनारायणः श्रीपुरुषोत्तमः।
पूजा दानानि यज्ञाश्च ध्यानं सर्वार्पणं तथा ॥१३॥
दास्यं चेमानि दिव्यानि सोपानानि मतानि वै।
तेषां निःश्रेणिकां भक्तिं गृहीत्वाऽऽरोहणं कुरु ॥१४॥
पारावारस्यापि पारं गमिष्यसि न संशयः।
नृपः प्राह कथं पूजा कर्तव्या तस्य वै हरेः ॥१५॥
ऋषिः प्राह हरेः पूजा कार्या यथा वदामि ते।
धात्वादीनां प्रतिमायां शालग्रामे शिवेऽथवा ॥१६॥
साधुजनेषु साध्वीषु गोःषु गुरौ जनार्दनम्।
भावयेत् स्वामिनि पित्रोः पतिव्रतायां भास्करे ॥१७॥
वह्नौ विप्रे कन्यकायां बालेऽनाथे निराश्रिते।
चैत्यवृक्षे तुलस्यां च भावयेत् पुरुषोत्तमम् ॥१८॥
मानसं हृदये ध्यायेदिन्द्रियादौ च वर्ष्मणि।
देवेषु चात्मनि ध्यायेत् पूजयेच्छ्रीपतिं तथा ॥१९॥
पुरुषाणां तथा स्त्रीणां तथा कृष्णः प्रसीदति।
इमे सर्वे समुत्पन्ना हरेरेव हरेस्तनुः ॥२०॥
अग्निस्तथाऽश्विनौ गौरी गणेशश्च भुजंगमः।
कार्तिकेयस्तथाऽऽदित्या मातरश्चापि दुर्गिकाः ॥२१॥
दिशः कुबेरो विष्णुश्च यमो रुद्रः शशी तथा।
पितरश्चेति संभूता नारायणस्य मूर्तितः ॥२२॥
त एते पूजनीया वै नारायणसमन्विताः।
मूर्तयस्ते भवन्त्येव नारायणसमुद्भवाः ॥२३॥
राजा प्राह मया कुत्र प्राप्तव्यास्ताः सुमूर्तयः।
येनाऽहं पूजयाम्येव सूपचारैश्च गोचरान् ॥२४॥
ऋषिः प्राह शृणु राजन्! तेषां द्वेधा हि मूर्तयः।
दिव्या देवस्वरूपाश्च प्रत्यक्षा न भवन्ति ताः ॥२५॥
आदित्यास्ते शरीरेऽत्र वसन्त्येव च गोचराः।
त एते च भवन्त्येव सदा तत्त्वांशरूपिणः ॥२६॥
एकदा ते पृथक्पृथक् प्राप्ता गर्वं समन्ततः।
अहं योग्योऽस्म्यहं श्रेष्ठश्चाऽहं याज्यः सदा तनौ ॥२७॥

नान्यो मत्सदृशश्चात्र देहे भवति कश्चन ।
एवं तेषां हि तत्त्वानां विवादः समजायत ॥२८॥
तेषां विवदमानानां निर्णयार्थं तु युक्तितः ।
हिरण्यगर्भो भगवान् प्रोवाच तान्प्रति प्रभुः ॥२९॥
युष्माकं यद्विना चेदं न स्यात्तद्वै महत्तमम् ।
एवमुक्ते प्रथमं तु वह्निरुत्थाय पार्थिव ! ॥३०॥
उवाचाऽहं महानस्मि मां यजध्वं ममाश्रये ।
विनाशमुपगच्छेद्वै शरीरं मद्विना कृतम् ॥३१॥
एवमुक्त्वा जाठरोऽग्निर्वैश्वानरो विनिर्ययौ ।
त्यक्त्वा देहं वर्षमात्रमुवासाऽन्यत्र वै ततः ॥३२॥
निर्गतेऽपि तु तस्मिँस्तच्छरीरं नहि शीर्यते ।
तदा ज्ञातं वह्निना वै नाहं श्रेष्ठतमः पुनः ॥३३॥
ततोऽश्विनौ मूर्तिमन्तौ प्राणापानस्वरूपिणौ ।
आवां प्रधानावित्येवमूचतुर्देवमण्डले ॥३४॥
एवमुक्त्वा शरीरं संविहाय क्वचिदास्थितौ ।
वर्षमात्रं शरीरं तु तद्विनापि स्थितं यथा ॥३५॥
वायुव्यापारहीनं च सुस्थिरं कुंभकेन वै ।
तयोर्ज्ञानं तदा जातं नाऽऽवां श्रेष्ठतमौ यतः ॥३६॥
ततो वागब्रवीद् गौरी प्राधान्यं मम वर्तते ।
साऽप्येवमुक्त्वा क्षेत्रात्तु निश्चक्राम बहिः शुभा ॥३७॥
तया विनापि तत्क्षेत्रं वागूनं व्यवतिष्ठत ।
मौनं तेन तया ज्ञातं नाहं श्रेष्ठतमा यतः ॥३८॥
ततो गणपतिर्वाक्यमाकाशाख्योऽब्रवीत्तदा ।
न मया रहितं किञ्चिच्छरीरं स्थायि वत्सरम् ॥३९॥
महानहं समुच्चार्य सोऽपि निष्क्रम्य देहतः ।
पृथग्भूतस्तथाप्येतच्छरीरं नाप्यनीनशत् ॥४०॥
विनाशाख्यमपि तेन विना नैव विशीर्यते ।
सुषिरैस्तु विहीनं तद् यथापूर्वं व्यवस्थितम् ॥४१॥
तेन व्योम्नोऽभवद् बोधो नाहं श्रेष्ठतमो यतः ।
अथ वै धातवः सर्वे स्थूलभूतादयोपि च ॥४२॥
प्रादुरस्मद्विहीनस्य शरीरस्य न धारणम् ।
वयं श्रेष्ठा इति चोक्त्वा जहुर्देहं शरीरजाः ॥४३॥
तैर्व्यपेतमपि क्षेत्रं पुरुषेण प्रपाल्यते ।
न च नष्टं किन्तु शुष्कं जातं सचेतनं ह्यपि ॥४४॥
तेन जातं हि धातूनां ज्ञानं श्रेष्ठा वयं नहि ।
तं दृष्ट्वा चाऽब्रवीत् स्कन्दः सोऽहंकारस्वरूपवान् ॥४५॥
मया विना शरीरस्य संभूतिरपि नेष्यते ।
तस्माच्छ्रेष्ठतमश्चाहं नान्योऽस्ति सदृशो मया ॥४६॥
एवमुक्त्वा शरीरात्तु स व्यपेतः पृथक्स्थितः ।
वत्सरं च विना तेन देहं मुक्तवदास्थितम् ॥४७॥
न शीर्णं न मृतं चापि शान्तं तिष्ठति पूर्ववत् ।
तेन तस्याऽभवज्ज्ञानं नाहं श्रेष्ठतमो यतः ॥४८॥
अथ चक्षुर्भानुरूपं कुपितं त्वरयाऽब्रवीत् ।
मया विना नवै क्षेत्रं क्षणं चापि प्रवर्तते ॥४९॥
एवमुक्त्वाऽथ यातं तत्, शरीरं तु न शीर्यते ।
आगत्य च यथापूर्वं स्थितं ददर्श वर्ष्म तत् ॥५०॥
तेन तस्याऽभवज्ज्ञानं नाहं श्रेष्ठतमं यतः ।
ततः कामादिदोषाणां तन्मात्राणि च मातरः ॥५१॥
शब्दाद्याश्च समूचुर्वै वयं श्रेष्ठतमा इति ।
नाऽस्माभिर्व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ॥५२॥
उक्त्वा मात्रागणो वर्षं बहिर्ययौ ततः पुनः ।
शरीरं शीर्यते नैव पूर्ववदेव संस्थितम् ॥५३॥
मात्राणामभवज्ज्ञानं न नः श्रैष्ठ्यं ततः खलु ।
मूलमाया त्रिगुणात्मा दुर्गाऽब्रवीद् रुषा सती ॥५४॥
न मयाऽस्य विना भूतिस्तस्माच्छ्रेष्ठाऽस्मि सर्वतः ।
इत्युक्त्वाऽन्तर्दधे वर्षं पुनरेव समागता ॥५५॥
दृष्ट्वा देहं योगभावमापन्नं चेतनेन वै ।
यथापूर्वमभून्नैव शीर्णं नष्टं मृतं न वा ॥५६॥
चेतनस्य प्रतापेन तत्तथैव व्यवस्थितम् ।
ततस्तस्याः समभवज्ज्ञानं श्रेष्ठा न चाप्यहम् ॥५७॥
ततो दिशः समुत्तस्थुरूचुश्चेदं वचो महत् ।
नास्माभी रहितं कार्यं भवतीति विचार्य ताः ॥५८॥
श्रोत्रयुक्ता गता वर्षं शरीरं न हि शीर्यते ।
यथापूर्वमभूत्तत्तु कार्णश्रवणवर्जितम् ॥५९॥
तेन तासामभूज्ज्ञानं वयं श्रेष्ठतमा न वै ।
अथ धनञ्जयो वायुर्घनेशः प्राह सर्वथा ॥६०॥
प्राणे यातेऽप्यहं स्थाता त्र्यहं शवेषु चान्ततः ।
मां विना न शरीरं स्याद् दुर्गन्धं नाशमाप्नुयात् ॥६१॥
ततः श्रेष्ठतमश्चास्मीत्युक्त्वा दूरगतोऽभवत् ।
तथापि चेतनयुक्तं यथावद्वै सुतिष्ठति ॥६२॥
तेन तस्याऽभवज्ज्ञानं नाहं श्रेष्ठतमः खलु ।
ततो विष्णुर्मनः प्राह नाऽयं देहो मया विना ॥६३॥
तस्माच्छ्रेष्ठतमं चाहमित्युक्त्वाऽन्तर्दधेऽपि च ।
अमननं शरीरं तु पूर्ववदेव संस्थितम् ॥६४॥
दृष्ट्वा तस्माऽभवज्ज्ञानं नाहं श्रेष्ठतमं यतः ।
ततो धर्मः कृतं कर्माब्रवीचाहं महत्तमम् ॥६५॥

अहं पालितवान् देहं तस्माच्छ्रेष्ठोऽस्मि सर्वथा।
इदानीं मय्यपगते कथमेतद् भविष्यति ॥६६॥
एवमुक्त्वा गतौ धर्माधर्मौ कर्मात्मकावुभौ।
तथापि चात्मना युक्तं शरीरं नहि शीर्यते ॥६७॥
आगत्य द्वौ निश्चयं हि चक्रतुर्न महत्तमौ।
अथाऽब्रवीन्महादेवो महत्तत्त्वं महत्तमम् ॥६८॥
अहमेव महानस्मि मया हीनं न तिष्ठति।
एवमुक्त्वा गतः शंभुर्महत्तत्त्वं शरीरतः ॥६९॥
वर्षमात्रं तथाप्येतच्छरीरं शीर्यते न वै।
ततस्तस्याऽभवज्ज्ञानं नाममात्रं महान् मम ॥७०॥
वस्तुतो न महानस्मि मृषा मे श्रेष्ठता खलु।
अथात्र पितरश्चोचुरिन्द्रियार्थाः महत्तमाः ॥७१॥
शब्दाद्याश्च वयं स्थूला अस्माभिर्देहजीवनम्।
ततो वयं तु सर्वेभ्यो बलिष्ठाश्च महत्तमाः ॥७२॥
विनाऽस्माकं च वै शीघ्रं शरीरं सम्प्रशीर्यते।
एवमुक्त्वा तु तद्देहं त्यक्त्वाऽन्तर्धानमागताः ॥७३॥
तथापि न शरीरं तद् विशीर्णं वै मनागपि।
ततस्तेषामभूज्ज्ञानं वयं श्रेष्ठतमा न वै ॥७४॥
अथ भुजंगिका या तु वासना समुवाच सा।
अहं श्रेष्ठतमा मां तु विना देहं न तिष्ठति ॥७५॥
सापि वर्षं गता दूरं पुनरेव समागता।
दृष्ट्वा पूर्वं यथा वर्ष्म विवेद नोत्तमाऽप्यहम् ॥७६॥
अथ सर्वेऽपि सम्भूयः देहं त्यक्त्वा बहिर्ययुः।
अग्निः प्राणस्तथाऽपानो व्योम सर्वे च धातवः ॥७७॥
अहंकारो मनो भानुः कामाद्याश्च गणास्तथा।
काष्ठा वायुर्विष्णुधर्मौ शंभुश्चापीन्द्रियार्थकाः ॥७८॥
एतैर्मुक्तमपि क्षेत्रं मुक्ताविव सुसंस्थितम्।
सोमेन चात्मना योगैश्वर्येणरक्षितं यतः ॥७९॥
पाल्यमानं न विशीर्णं तेन तेषां गणस्य च।
गर्वो नष्टो न वै श्रेष्ठः समुदायोऽपि नः खलु ॥८०॥
अथ सोमस्य जीवस्य गर्वोऽभवन्महत्तमः।
मया वै पाल्यते देहस्ततोऽहं सर्वथोत्तमः ॥८१॥
एवं वै निश्चिते सोमे षोडशात्मन्यथाऽक्षरे।
त्वं महानिति जानीमः किन्तु तत्संशयास्पदम् ॥८२॥
यद्विना न शरीरं वै सन्तिष्ठेत हि तन्महत्।
त्वं चाप्यत्र परीक्षां संकुरु चात्मन् निजस्य हि ॥८३॥
विज्ञास्यामस्ततस्तेत्र श्रैष्ठ्यं दिव्यं हि नान्यथा।
एवमुक्तो हि जीवात्मा निर्ययौ देहतस्तदा ॥८४॥
बभ्राम च बहिर्वर्षं सर्वानादाय चाम्बरे।
नित्यं त्यक्तं शरीरं च पश्यत्येव बहिः स्थितः ॥८५॥
किन्तु नारायणस्तत्र तस्थौ श्रीपुरुषोत्तमः।
जीवात्मनो गर्वनाशं कर्तुं कृष्णनरायणः ॥८६॥
शरीरं चेतयामास रक्षयामास सादरम्।
स्वैश्वर्येण गुणैः स्वीयैर्विनाऽप्यात्मानमान्तरम् ॥८७॥
प्रागवस्थं शरीरं तु दृष्ट्वा सर्वज्ञपालितम्।
ताभिश्च देवतत्त्वैश्च जीवात्मा पुनराययौ ॥८८॥
तेन स ज्ञातवान्नाऽहं श्रेष्ठोऽत्र संभवामि वै।
अथ ता देवताः प्राहुर्वयं स्थास्याम एव हि ॥८९॥
गच्छ त्वमेकलश्चात्मन् जीवामो वा न वै वयम्।
इत्युक्तो जीववर्माऽसौ तांस्त्यक्त्वा निर्ययौ बहिः ॥९०॥
जडतुल्योऽभवत्तत्र बहिर्नारायणं विना।
अचेतन इव जातः सुषुप्त इव सर्वथा ॥९१॥
अतेजस्क इव जातोऽप्रकाश इव धूम्रकः।
मृत इवाऽभवत्तत्र कृष्णनारायणं विना ॥९२॥
शरीरे तु स्थिता वह्न्यादयो हि जीवमन्तरा।
अपि श्रीमत्कृष्णनारायणस्याऽन्वयतः खलु ॥९३॥
दिव्ययोगाद् दिव्यभावं ब्रह्मभावं समास्थिताः।
परब्रह्मणो योगेन ब्रह्मभावं प्रपेदिरे ॥९४॥
जडा अपि च ते जाताश्चेतना मुक्तसदृशाः।
श्रीहरेरन्यथाकर्तुंसमर्थस्य प्रसंगतः ॥९५॥
ताः क्षेत्रदेवताः सर्वा वैलक्ष्यभावमास्थिताः।
स्थूलं सूक्ष्मं कारणं च शरीरत्रयमित्यपि ॥९६॥
नारायणस्य योगेन नारायणात्मकं तदा।
प्राप्तं नारायणरूपं दिव्यं ब्रह्मात्मकं यतः ॥९७॥
तदा जीवात्मनो गर्वो नष्टः सर्वस्तदाऽभवत्।
तस्यापि चाऽभवज्ज्ञानं नाऽहं श्रेष्ठतमो यतः ॥९८॥
श्रेष्ठः पूज्यः सदा ध्येयः स्मर्तव्यः श्रीहरिं सदा।
येन जातानि जीवन्ति वह्न्याद्याः सर्वदेवताः ॥९९॥
येनाऽऽश्रितोऽप्यहं जीवो जीवामि नान्यथा क्वचित्।
तद्योगेन यथा दिव्यश्चात्मा भवामि सर्वथा ॥१००॥
तद्योगेन तथैतानि तत्त्वान्यपि च सर्वथा।
दिव्यान्येव हि जातानि यानि पूर्वं जडान्यपि ॥१०१॥
मां विनाऽपि च दिव्या वै मुक्ताः स्युस्ते च धामसु।
यदीच्छेन्मां विहायैव जडा दिव्या भवन्त्विति ॥१०२॥
सर्वं कर्तुं समर्थस्य विहृतिं को निवारयेत्।
तस्मान्नारायणः कृष्णः सर्वश्रेष्ठतया मतः ॥१०३॥

ततो देवास्तुष्टुवुस्तं सर्वस्थं परमेश्वरम् ।
स्वस्वस्थाने स्थिताः प्राहुः कृष्णनारायणं मुहुः ॥१०४॥
त्वमग्निस्त्वं तथा प्राणस्त्वमपानो भवस्यपि ।
त्वं वाणी चाम्बरं त्वं च धातवस्त्वं शरीरगाः ॥१०५॥
अहंभावस्त्वमेवाऽसि त्वमेवासि च नेत्रकम् ।
त्वं शब्दादीनि मात्राणि त्वं माया त्रिगुणात्मिका ॥१०६॥
त्वं श्रोत्रं वर्तसे धनंजयोऽपि त्वं मनस्तथा ।
त्वं धर्मस्त्वं महत्तत्त्वमिन्द्रियार्थास्त्वमेव च ॥१०७॥
त्वं च सद्वासनात्मा च जीवात्मा त्वं नरायणः ।
सर्वात्मा त्वं विना त्वां वै नैते सत्तामयः क्वचित् ॥१०८॥
सता त्वया वयं सन्तः सर्वेशस्त्वं परेश्वरः ।
स्वामी पतिः पोषकश्च जीवातुः रक्षकस्तथा ॥१०९॥
अस्माभिरपयातैस्तु कथमेतद् भविष्यति ।
एवमत्र शरीरं तु त्यक्तमस्माभिरेव तु ॥११०॥
त्वया वै रक्षितं दिव्यं तत्स्थानस्त्वं प्रपालयेः ।
स्थानभङ्गो न नः कार्यस्तवाधीना वयं सदा ॥१११॥
एवं स्तुतस्ततो देवस्तेषां तोषं परं ययौ ।
उवाच चैतान् क्रीडार्थं भवन्तश्च कृता मया ॥११२॥
भवद्द्वारा प्रक्रीडामि नान्यदस्ति प्रयोजनम् ।
वरं वृणुत देवा वै तुष्टोऽस्मि च ददामि च ॥११३॥
तदा देवा वव्रिरे वै द्वेधा स्वरक्षणं सदा ।
शरीरेषु यथावस्थं दिव्यभावेन चापरम् ॥११४॥
श्रीहरिस्तां तदा प्राह द्वे द्वे प्रत्येकशोऽधुना ।
रूपे धृत्वा कृपया मे तिष्ठन्तु कथयामि च ॥११५॥
भूतकार्येष्वमूर्तेन तत्त्वरूपेण सर्वथा ।
देवलोके तु मूर्तेन तिष्ठध्वं मम सेवकाः ॥११६॥
प्रलये च लयं मयि त्वाविशत द्रुतं सुराः ।
अभिधानानि देवानां युष्माकं च करोम्यहम् ॥११७॥
अग्निर्वैश्वानरो देवः प्राणापानौ तथाऽश्विनौ ।
वाणी गौरी हिमपुत्री व्योम पद्मावतीपिता ॥११८॥
शरीरधातवश्चेमे नानाभूतानि चैव ह ।
अहंकारः स्वयं स्कन्दः कार्तिकेयो भविष्यति ॥११९॥
नेत्रे सूर्यशशिरूपे स्वर्गदेवौ भविष्यतः ।
शब्दादीनि च मात्राणि गजवक्त्रो भविष्यति ॥१२०॥
शरीरमाया दुर्गा च कारणान्ते भविष्यति ।
श्रोत्रं दिग्भावमापन्नं देवरूपं भविष्यति ॥१२१॥
धनंजयो धनेशो वै कुबेरः संभविष्यति ।
इदं मनो विष्णुनामा भविष्यति न संशयः ॥१२२॥
धर्मोऽपि यमनामा च याम्यदेवो भविष्यति ।
महत्तत्त्वं च भगवान् महादेवो भविष्यति ॥१२३॥
इन्द्रियार्थाश्च पितरो भविष्यन्ति न संशयः ।
वासना च रतिरूपा भविष्यति तु कामिनी ॥१२४॥
जीवात्मा मे नररूपः पार्श्वस्थः संभविष्यति ।
क्वचिच्च चन्द्रमा भूत्वाऽमृताधारो भविष्यति ॥१२५॥
एवं वरप्रदानेन जातास्ते सृष्टिदेवताः ।
हिरण्यगर्भतत्त्वस्था देहेऽपि तानि चापि हि ॥१२६॥
परब्रह्म तु यः प्रोक्तः कृष्णनारायणः प्रभुः ।
स एव देवतारूपः सृष्टौ वै वर्तते प्रभुः ॥१२७॥
स एव तत्त्वरूपश्च शरीरेऽत्र वसत्यपि ।
तस्माद् राजन् भज देवाँस्तथा तत्त्वानि वर्ष्मणि ॥१२८॥
शरीरे त्वं पूजयैतानभेदेन हरौ सदा ।
स एव तु त्वया स्वस्मिन् लब्धोऽस्त्यन्यत्र मा व्रज ॥१२९॥
एवं वेदान्तपुरुषः प्रोक्तो नारायणात्मकः ।
एवंप्रभावो देवोऽसौ वेदवेद्यो जनार्दनः ॥१३०॥
श्रीपतिः श्रीकृष्णनारायणोऽनाद्यन्त एव सः ।
कथितो नृपते तुभ्यं प्रजापाल हि तं भज ॥१३१॥
इत्युक्त्वा विरराामाऽसौ महातपा मुनिस्तदा ।
वाराहः प्राह पृथिवीं त्वय्यपि सन्ति ते सुराः ॥१३२॥
तान् देवान् भज देवेशि येन मोक्षो भवेद् ध्रुवम् ।
इतिते कथितं लक्ष्मि प्रत्यक्षाख्यानमैश्वरम् ॥१३३॥
पठनाच्छ्रवणाच्चास्य तथोक्तानां प्रपूजनात् ।
तत्त्वानां ब्रह्मविज्ञानान्मुक्तो भवति मानवः ॥१३४॥
धर्मार्थकाममोक्षाणां परा सिद्धिः प्रजायते ।
एवमेकात्मतां ज्ञात्वोपासते ऋषयो हरिम् ॥१३५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने प्रजापालराज्ञो महातपानामकऋषिप्रदत्तशारीरतत्त्वात्मक-वेदान्तपुरुषज्ञानोपासनादिनिरूपणनामात्रयस्त्रिंशदधिक-पञ्चशततमोऽध्यायः ॥५३३॥

श्रीनारायण उवाच—

शृणु लक्ष्म्येकदा शंभुरासीनोऽभूद् वरान्तिकम् ।
कैलासे ध्यानमग्नस्तु कृष्णनारायणं स्मरन् ॥ १ ॥
कुंकुमवापिकाक्षेत्रं प्रभासं तीर्थमुत्तमम् ।
व्याघ्रारण्यं महारम्यं सिंहारण्यं च रैवतम् ॥ २ ॥
अश्वपट्टसरस्तीर्थं भद्रां शत्रुंजितां नदीम् ।
लोमशं वैष्णवं भक्तं विष्णुं गोपालकृष्णकम् ॥ ३ ॥

देवीं च कम्भरालक्ष्मीं स्मरन् ध्याने ह्यभूत् स्थिरः।
तस्योत्संगे समागत्य तप्तकांचनसप्रभा ॥ ४ ॥
श्रीदेवी पार्वती योगसिद्धिदा मोक्षदायिनी।
निषसाद मुखं शंभोर्विलोक्य सस्मिताऽभवत् ॥ ५ ॥
उवाच देवी मधुरं प्रेमपूरितलोचना।
कं ध्यायसेऽहर्निशं त्वं नाऽतो विरमसे क्वचित् ॥ ६ ॥
एवमुक्त्वाऽतिभावेन संजाताऽस्राऽऽविलेक्षणा।
शंभुर्ध्यानं परित्यज्य प्राह भक्तां महेश्वरीम् ॥ ७ ॥
कथं ह्यस्राविलनेत्रा प्रेम्णा शुचाऽथवा प्रिये।
वद सर्वमभीष्टं ते करवाणि सदा प्रिये ॥ ८ ॥
त्वं मे हृदयं देवेशि तथाऽहं हृदयं च ते।
अहं तवास्मि सर्वस्वं त्वं च सर्वस्वमेव मे ॥ ९ ॥
श्रुत्वा वै पार्वती देवी बभूव स्वस्थमानसा।
पुनः पप्रच्छ कान्तं तद्ध्यानमग्नस्य कारणम् ॥१०॥
किमिदं ध्यायसि नाथ वद मे शाश्वतं यदि।
सनातनं स्वरूपं चेल्लोकमोक्षप्रदं तथा ॥११॥
शंभुः प्राह सति ! नास्य ध्यानस्थस्य हरेर्मया।
कृष्णनारायणस्यात्र पारं गन्तुं हि शक्यते ॥१२॥
स सदाऽऽलोक्यते ध्याने चिन्त्यते स रमेश्वरः।
पूज्यते कमलाकान्तोऽर्च्यते श्रीमाणिकीपतिः ॥१३॥
सेव्यते स प्रभाकान्तो लक्ष्मीपतिर्नरायणः।
पार्वतीश्वर एवाऽयं यो मया ध्यायते सति ॥१४॥
अहमस्मात्समुत्पन्नो नाऽस्म्यहं तु पृथक् ततः।
तं ध्यायामि त्वनादिश्रीकृष्णनारायणं सति ॥१५॥
तिस्रः कोट्योऽर्धकोटिश्च तीर्थानि यत्र वै हरौ।
सदा तिष्ठन्ति सर्वेशि तं स्मरामि श्रियः पतिम् ॥१६॥
त्वां स्मरामि हरेः पार्श्वस्थितां लक्ष्मीस्वरूपिणीम्।
आत्मानं श्रीकृष्णनारायणात्मकं स्मराम्यहम् ॥१७॥
लोमशस्याश्रमो यत्र यद्भूमौ रैवताचलः।
प्रभासं मम तीर्थं च यत्र देशे सुराष्ट्रके ॥१८॥
यत्र शत्रुंजिता, भद्रा, यत्र कुंकुमवापिका।
अश्वपट्टसरो यत्र तत्र गोपालनन्दनम् ॥१९॥
अनादिश्रीकृष्णनारायणं स्थितं स्मराम्यहम्।
असद्भावान्विताः क्षेत्रं नैव जानन्ति शाश्वतम् ॥२०॥
सद्भावभाविता देवि जानन्त्येतत् सनातनम्।
कृष्णनारायणस्यैतत् प्राकट्यस्य स्थलं शुभम् ॥२१॥
क्षेत्रस्याऽस्याऽभिधानानि कल्पे कल्पे पृथक्-पृथक्।
जायन्ते युगभेदेन जना जानन्ति नैव तत् ॥२२॥
पूर्वं नाम्ना मणिक्षेत्रमभूत् सुराष्ट्रमण्डलम्।
पाद्मक्षेत्रं ततश्चाऽभून्नाम्ना ख्यातं तदेव तु ॥२३॥
वैष्णवं क्षेत्रमेवैतन्नाम्ना जातं ततः परम्।
ततो वै लोमशक्षेत्रं नाम्नाऽभूत् ख्यातमेव तत् ॥२४॥
ततः पत्नीव्रतक्षेत्रं नाम्ना जातं प्रसिद्धिमत्।
तत इन्द्रद्युम्ननामक्षेत्रं तत्समजायत ॥२५॥
ततो वै नारसिंहाख्यं क्षेत्रं तत्समजायत।
ततो व्याघ्रारण्यनामक्षेत्रं वै समाजायत ॥२६॥
ततो रुक्मांगदक्षेत्रं नाम्ना ख्यातमजायत।
कुंकुमवापिकाक्षेत्रं ततः ख्यातमजायत ॥२७॥
अश्वपट्टसरस्तीर्थं ततो नाम्ना ह्यजायत।
ततः प्राभासिकं क्षेत्रं नाम्ना प्रोक्तं भविष्यति ॥२८॥
ततः सोमेश्वरं क्षेत्रं ततः कंकाभिधं पुनः।
ततः सोमपदं क्षेत्रं नाम्ना ख्यातं भविष्यति ॥२९॥
ततः क्षेत्रं गिरिनारं कालान्तरे भविष्यति।
ल्पे कमध्ये सुराष्ट्रं च मम योगानुसारतः ॥३०॥
ऋषेर्योगात्तथा कृष्णनारायणस्य योगतः।
तव योगात्तथा काले पृथङ्नामानि सर्वथा ॥३१॥
भविष्यन्ति सति तानि जानाम्यहं हि योगतः।
तादृशं पुण्यकृत्क्षेत्रं मोक्षदं सर्वदेहिनाम् ॥३२॥
अनादिश्रीकृष्णनारायणश्वासात्मकं सदा।
यत्र वै वामतो विष्णुर्यत्र कृष्णनरायणः ॥३३॥
तलस्वामी तथा यत्र गोपीनाथोऽपि यत्र च।
यत्र सिद्धेश्वरश्चाहं यत्र भद्रेश्वरस्तथा ॥३४॥
सोमेश्वरस्तथा चास्मि यत्र त्वं भद्रिका सति।
यत्र मध्यभुवि त्वस्ति लक्ष्मीनारायणः प्रभुः ॥३५॥
राजधान्यां यत्र साध्व्यो बह्व्यो वै कृष्णयोषितः।
यत्राऽऽनर्तोद्भवं राज्यं यत्र गोपालकृष्णजः ॥३६॥
अनादिश्रीकृष्णनारायणः साक्षाद् वसत्यपि।
तादृशं तद्विशालं च क्षेत्रं वै शतयोजनम् ॥३७॥
प्रायः समुद्रतो व्याप्तं त्रिपार्श्वे प्राग्भुवाऽन्वितम्।
दर्शनादपि लोकानां पापतापनिवारकम् ॥३८॥
यत्र सतां च साध्वीनां योगिनीनां कुलानि च।
महतां सात्त्वतानां च भुवां रक्षणकारिणाम् ॥३९॥
ज्ञानिनां च तपस्यायां रतानां ब्रह्मचारिणाम्।
कुलानि लोककल्याणकारिणां प्रवसन्त्यपि ॥४०॥
नारीणां साधुभक्तानां साधुनाथार्थदेहिनाम्।
सर्वस्वार्पणभक्तानां स्वामिनारायणसेविनाम् ॥४१॥

यत्र विष्णोः कलांशाश्च प्रजायन्ते विभूतयः।
तत्क्षेत्रं चासनं देवि पुरातनं हि मेऽस्ति यत् ॥४२॥
तत् स्मरामि महत्क्षेत्रं शान्तिं यामि पुरातनीम्।
त्वां स्मरामि यदा देवि बहिश्चायामि वै क्षणात् ॥४३॥
एवं मे वल्लभं क्षेत्रं कल्पान्ते कार्ष्णवाल्लभम्।
नाम्ना ख्यातं पार्वतं च तव योगाद्भविष्यति ॥४४॥
तस्मिन् क्षेत्रे महादेवि ह्येकान्तेऽब्धितटे सदा।
निवसामि मया गुप्तं कृतं स्थानं ममार्थवत् ॥४५॥
युगे युगे तु तीर्थानि जायन्ते च वियन्ति च।
अशास्त्रवाचकानां तु क्षेत्रसंगोपनं वरम् ॥४६॥
पापा निन्दन्ति माहात्म्यमज्ञात्वा भूतले हरिम्।
अनादिश्रीकृष्णनारायणं सुराष्ट्रजं प्रभुम् ॥४७॥
इदं तीर्थमिदं तीर्थं भ्रमन्ति ज्ञानहीनकाः।
गृहतीर्थं न जानन्ति मीनशूलधनुर्ध्वजैः ॥४८॥
वज्रस्वस्तिकचक्रैश्च नारायणं हि गोचरम्।
राधिकापार्वतीलक्ष्मीमाणिकीसुप्रभापतिम् ॥४९॥
सर्वेषां खलु तत्त्वानां स्वामिनं वल्लभं पतिम्।
अहं देवि भजाम्येनं श्रीकृष्णं पुरुषोत्तमम् ॥५०॥
परे धाम्नि स्थितं चाश्वपट्टसरस्तटस्थितम्।
लोमशस्याश्रमे कान्तं कोटिगोपीपतिं प्रभुम् ॥५१॥
यस्य वासः सदा तत्र कल्पे कल्पान्तरेऽपि च।
ततोऽहं नित्यदा देवि तं स्मरामि पुरातनम् ॥५२॥
अन्येषु तीर्थवर्येषु मे मनो न स्थिरायते।
कुंकुमवापिकातीर्थे सर्वात्मना स्थिरायते ॥५३॥
ततो नित्यं सहजेन स्मर्यते मनसा हि तत्।
यावत्स्मरामि तत्क्षेत्रं तावत् कृष्णनारायणः ॥५४॥
प्रहसन् मां प्रति त्वेति यथा मित्रं पुरातनम्।
अनेकैर्दिव्यभावैश्च लीलाभिः स मनोहरः ॥५५॥
कल्पान्तरानुरूपाभिः रमयत्येव मां प्रिये!।
यथा मे मानसं तस्मिन् ग्रथितं न वियुज्यते ॥५६॥
तथाऽनादिकृष्णनारायणो मां स्वे प्रकर्षति।
नैव मुञ्चति भियं मां निरोधयति मां निजे ॥५७॥
एतादृशं परं क्षेत्रं स्मर कान्ते महेश्वरि।
अनादिश्रीकृष्णनारायणं स्मर मम प्रिये ॥५८॥
इत्युक्ता पार्वती देवी ब्रह्मानन्दपरिप्लुता।
क्षेत्रस्य श्रवणादेव बभूव ब्रह्मतन्मयी ॥५९॥
तावत्तस्याः कृष्णनारायणः स्वहृदयेऽस्फुरत्।
दिव्यरूपधरो बालः कोटिकन्दर्पसुन्दरः ॥६०॥
प्राह मातर्मम क्षेत्रं कथं नायासि वै क्वचित्।
इत्युक्त्वा पार्वतीं नत्वा तेजोमण्डलमध्यगः ॥६१॥
कोटिकान्ताकान्तसेवितः साक्षाद् दर्शनं ददौ।
युवाऽक्षराख्यलोकस्य मुक्तैर्जुष्टस्ततः परम् ॥६२॥
गोलोकस्थो द्विभुजश्च गोपीगोपगणार्चितः।
वैकुण्ठस्थश्चतुर्बाहुः रमाश्रीकमलार्चितः ॥६३॥
कैलासस्थो नागसूत्रो हिमोज्ज्वलो दृढो युवा।
जटाजूटशिराश्चोरौ सती यस्यास्ति सोऽभवत् ॥६४॥
एवं दत्वा दर्शनं स्वं पुनश्चान्तरधीयत।
सती तु पार्वती देवी महदाश्चर्यमास्थिता ॥६५॥
जजागार समाधेः सा प्राह श्रीशंकरं पतिम्।
दृष्टं क्षेत्रं मया कान्त दृष्टः कृष्णनरायणः ॥६६॥
इदानीं कृतकृत्याऽहं जाता दृष्ट्वाऽच्युतं पतिम्।
यश्च संवर्तते धाम्नि परेऽक्षरात् पुमुत्तमः ॥६७॥
स एव श्रीकृष्णनारायणोऽश्वपट्टतीर्थके।
गोलोके चापि वैकुण्टे कैलासेऽपि स एव सः ॥६८॥
पतिर्मे वर्तसे चैवं मया हृदि विलोकितम्।
वद क्षेत्रं विशालं मे श्रवानन्दः प्रजायते ॥६९॥
कुंकुमवापिकाक्षेत्रं सर्वतीर्थोत्तमोत्तमम्।
अद्य ज्ञातं मया शंभो! माहात्म्यं कथयस्व मे ॥७०॥
जपं दत्तं हुतं चेष्टं तपस्तप्तं कृतं च यत्।
कुंकुमवापिकाक्षेत्रे क्व कस्मिंश्चाऽक्षयं भवेत् ॥७१॥
क्षेत्रस्य वर्तुलं सीम क्षेत्रसारं च मे वद।
तव हस्ताऽऽमलकवद् दृश्यं भवति सर्वथा ॥७२॥
शंकरः प्राह देवेशि सौराष्ट्रं तु प्रियं मम।
कुंकुमवापिकाक्षेत्रं कृष्णस्य मम च प्रियम् ॥७३॥
प्रभासाद् रैवताद्रेश्च शत्रुंजितानदीमतः।
चमत्कारपुराच्चापि तत्क्षेत्रं सुप्रियं मम ॥७४॥
यत्र सन्निहितो नित्यमच्युतो भगवान् स्वयम्।
यत्र वै लोमशो ब्रह्मा यत्राऽहं निवसामि च ॥७५॥
शतयोजनविस्तीर्णं क्षेत्रं सौराष्ट्रमण्डलम्।
मणिजन्यं तु तद्दिव्यं मोक्षदं प्राणिनां सदा ॥७६॥
पश्चिमे रैवतं पीठं पूर्वे शत्रुंजिदाह्वयम्।
उत्तरे च चमत्कारं दक्षिणे सोमनाथकम् ॥७७॥
अन्तःपीठं त्वश्वपट्टसरः कुंकुमवापिका।
यत्र भद्रा हिरण्या च स्वर्णरेखा ह्युजस्वती ॥७८॥
हरिण्युन्मत्तगंगा च शत्रुंजिता सरस्वती।
नागनदी गोमती च कृष्णा दिव्या हरेःप्रियाः ॥७९॥

आपगा भवतारिण्यः सौराष्ट्रे सन्ति सर्वदा ।
न्यंकुमती वज्रिणी च माहेश्वरी महासती ॥८०॥
सिंहारण्यस्थितान्येव सन्ति तीर्थानि तान्यपि ।
सौराष्ट्रे यानि तीर्थानि कृष्णनारायणेच्छया ॥८१॥
वापी कूपतडागानि पल्वलानि ह्रदादयः ।
सरांसि चापगाश्चापि देवानामालयास्तथा ॥८२॥
सतां निवासा ग्रामाश्च मेध्याः पापहरा हि ते ।
सौराष्ट्रे मध्यदेशे श्रीकृष्णनारायणो हरिः ॥८३॥
उत्तरे श्रीवासुदेवो गोलोकाधिपतिः प्रभुः ।
पश्चिमे वामनो देवो दक्षिणे सोमनाथकः ॥८४॥
पूर्वे श्रीगोपिकानाथो वर्तन्ते भवतारकाः ।
मध्यभागे वसेद् यस्तु यदि नैष्कृतिको नरः ॥८५॥
यदि पापो यदि शठो मुच्यते सर्वपातकात् ।
मध्यभागे सदा देवि ! त्वया सह वसाम्यहम् ॥८६॥
तत्र ब्रह्मादयः सन्ति नारायणपुरोगमाः ।
योगिनः साधवस्तत्रोपासते लोमशं मुनिम् ॥८७॥
यत्किंचिदशुभं कर्म कृतं मानवबुद्धिना ।
तत्सर्वं विलयं यायात्कृष्णनारायणाश्रयात् ॥८८॥
गोपालेश्वरनामाऽहं मध्ये तिष्ठामि तत्र वै ।
असंख्यत्वात्तु कल्पानां जना जानन्ति नैव माम् ॥८९॥
स्नेहाच्च तव भक्त्या च मया तेऽत्र निवेदितम् ।
अहं वै वैष्णवो भूत्वा मध्ये वसामि सर्वदा ॥९०॥
यज्ञदानजपैर्होमैः स्वाध्यायैः पितृतर्पणैः ।
चान्द्रायणैश्चोपवासैस्तीर्थादिगमनैस्तथा ॥९१॥
यत्पदं लभ्यते देवि ततः श्रेष्ठं पदं हरेः ।
अक्षराख्यं महद्धाम प्राप्यते मध्यसंश्रयात् ॥९२॥
तिर्यग्योनिगता ये च पशुपक्षिमृगादयः ।
कृमिकीटपतंगाद्या जलस्थलनिवासिनः ॥९३॥
स्थावरा जंगमाश्चान्ये बाला वृद्धा नराः स्त्रियः ।
चाण्डालाः पुष्कसाश्चापि कुत्सिता विमतास्तथा ॥९४॥
वियोनिजा देहिनश्च मुच्यन्ते मध्यवासतः ।
लोमशो नारसिंहश्च सनकाद्याश्चिरायुषः ॥९५॥
मार्कण्डेयः पञ्चशिखो वोढुरासुरिरित्यपि ।
दत्तात्रेयो हनुमाँश्च गणेशो व्यास इत्यपि ॥९६॥
जाम्बवान् कपिलश्चान्ये यत्र क्षेत्रे वसन्ति च ।
तेषां प्रतापतो जीवा मुच्यन्ते मध्यवासतः ॥९७॥
दशार्बुदसहस्राणि कोटित्रितयमित्यपि ।
सौराष्ट्रे ऋषयो नित्यं तिष्ठन्त्यदृश्यरूपिणः ॥९८॥
मेरोः शक्या गुणा वक्तुं समुद्राणां च बिन्दवः ।
कृष्णनारायणस्यात्र दिव्यक्षेत्रस्य वै सति ! ॥९९॥
शक्या नैव गुणा वक्तुं वर्षकोटिशतैरपि ।
इत्याह शंकरो देवीं ततश्च विरराम ह ॥१००॥
एवं लक्ष्मि ! तव पत्युः कृष्णनारायणस्य मे ।
क्षेत्रं पुण्यं परं श्रुत्वा सस्मार पार्वती हरिम् ॥१०१॥
ध्याने स्थिता च सा नित्यं प्रातः स्मरति भावतः ।
अनादिश्रीकृष्णनारायणक्षेत्रं सुमुक्तिदम् ॥१०२॥
श्रवणात्पठनाच्चाऽस्य स्मरणाद्वन्दनादपि ।
भुक्तिमुक्तिप्रदं क्षेत्रं जीवानां सम्पदां प्रदम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सौराष्ट्रे कुंकुमवापीतीर्थक्षेत्रमहिम्नः पार्वतीं प्रतिशंकरकृतं वर्णनमितिनिरूपणनामा चतुस्त्रिंशदधिकपञ्चशततमोऽध्यायः ॥५३४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततो देवी पार्वती शंकरं पतिम् ।
तुष्टाव प्रार्थयामास स्मृत्वा स्वाप्नं हरेर्वचः ॥ १ ॥
प्राणेश ! श्रीकृष्णनारायणः श्रीभगवान् स्वयम् ।
प्राह मातर्मम क्षेत्रं कथं नायासि वै क्वचित् ॥ २ ॥
इत्येवं कथिता चाऽहं स्वप्ने भगवता प्रिय ! ।
तत्क्षेत्रं द्रष्टुमिच्छामि गोपालेश्वरमण्डितम् ॥ ३ ॥
यत्र श्रीभगवान् विष्णुः कृष्णनारायणः प्रभुः ।
वर्तते मुक्तकोट्याद्यैर्द्रष्टुमिच्छामि तत्स्थलम् ॥ ४ ॥
यत्तन्त्रं लोकचक्रं वै यत्तन्त्रं लयचक्रकम् ।
स यत्र वर्तते देवो द्रष्टुमिच्छामि तत्स्थलम् ॥ ५ ॥
यदधीनं हि लोकानां गोपायनं प्रवर्तते ।
स कृष्णो वर्तते यत्र द्रष्टुमिच्छामि तत्स्थलम् ॥ ६ ॥
महाभूतानि सर्वाणि येन धृतानि वर्ष्मणि ।
स धृतो येन देशेन द्रष्टुमिच्छामि तत्स्थलम् ॥ ७ ॥
यस्मान्मत्स्यस्तथा कूर्मो वाराहो नरसिंहकः ।
कपिलश्च हरिश्चापि वासुदेवः पृथुस्तथा ॥ ८ ॥
दत्तात्रेयस्तथा हंसः ऋषभो वामनः प्रभुः ।
पर्शुरामस्तथा यज्ञनारायणः कुमारकाः ॥ ९ ॥
सनकाद्यास्तथा रामो हयग्रीवश्च नारदः ।
व्यासो बुद्धस्तथा कल्किर्हंसश्च मोहिनी तथा ॥१०॥
विष्णुश्चैते ह्यवतारा जायन्ते लोकरक्षकाः ।
स राजते यत्र देशे द्रष्टमिच्छामि तत्स्थलम् ॥११॥

राधा रमा सती लक्ष्मीः पद्मा पद्मावती प्रभा ।
पार्वती ललिता कृष्णा जया माणिकी तुलसी ॥१२॥
वृन्दा श्रीः कमला सीता रुक्मिणी द्रौपदी शिवा ।
गंगा सरस्वती हंसा शारदा मंजुला रतिः ॥१३॥
मूर्तिश्च मानसा सन्ध्या गायत्री मूलप्रकृतिः ।
सावित्री देविका मुक्तिः शान्तिर्भक्तिश्च योषितः ॥१४॥
यस्माज्जाता मातरश्च लोकानां सुखदायिकाः ।
स राजते यत्र देशे द्रष्टुमिच्छामि तत्स्थलम् ॥१५॥
धर्मार्थकाममोक्षाणामाश्रयो भगवाँस्तु यः ।
प्रलयस्य पुनः सृष्टेर्द्रष्टुमिच्छामि तत्स्थलम् ॥१६॥
सहस्रक्रमणो देवः सहस्रज्ञानरश्मिवान् ।
सहस्रकंधरो यत्र द्रष्टुमिच्छामि तत्स्थलम् ॥१७॥
यन्नाभौ कल्पनामात्राज्जातं पैतामहं गृहम् ।
यल्ललाटाद्धर्मबिन्दोर्जातः शिवापतिः प्रभुः ॥१८॥
यस्य वै हृदयाल्लक्ष्मीपतिः सम्भूत एव च ।
सोऽपि यस्मात् समुत्पन्नस्तस्य प्रप्रपितामहः ॥१९॥
यत्र संराजते शंभो द्रष्टुमिच्छामि तत्स्थलम् ।
दुग्धाब्धौ शयनं चक्रे शेषपर्यंकमास्थितः ॥२०॥
यः स यस्मात्समुत्पन्नस्तस्यापि चावतारिणम् ।
अनादिश्रीकृष्णनारायणमिच्छामि वीक्षितुम् ॥२१॥
हव्यादैश्चापि क्रव्यादैर्भावादैरमृतादनैः ।
अनदनैस्तथा यो वै रमते ह्यनुरूपतः ॥२२॥
बालरूपं स्वप्नदृष्टं द्रष्टुमिच्छामि तं प्रभुम् ।
त्रयाणां च चतुर्णां च यो गतिः परमेश्वरः ॥२३॥
पञ्चानां षोडशानां च द्रष्टुमिच्छामि तं प्रभुम् ।
तेजांसि यं श्रयन्ते च तपांसि चार्पणानि च ॥२४॥
क्रतवस्त्यागसन्न्यासाः श्रयन्ते यं परेश्वरम् ।
कान्तकान्तं च तं शंभो ! द्रष्टुमिच्छामि सत्वरम् ॥२५॥
इत्युक्तः शंकरो देवो भक्तिं विलोक्य योषितः ।
उवाच मधुरं देवीं स्मरन् कृष्णनरायणम् ॥२६॥
धन्ये मान्ये सदा पूज्ये कृष्णप्रिये पतिव्रते ।
हृष्यामि त्वद्वचः श्रुत्वाऽऽप्यायितं भक्तिवारिणा ॥२७॥
धन्योऽहं यद्गृहे पत्नी नारायणे दृढव्रता ।
भक्तिमती स्वेष्टदेवे जगदुद्धारकारिणी ॥२८॥
न मया सदृशो देवि ! भाग्यवान् भुवनेष्वपि ।
यत्पत्नी श्रीकृष्णनारायणदास्याभिरञ्जिता ॥२९॥
ममापि वर्तते साध्वि ! द्रष्टुमिच्छा हि तत्स्थलम् ।
बहुकालो गतो यस्मात्पुनर्यास्यामि वै त्वया ॥३०॥

सौभाग्यं वर्धतां कान्ते प्रसन्नयसि यन्मनः ।
व्योममार्गेण यास्यावो बहुपूजोपचारकैः ॥३१॥
अनादिश्रीकृष्णनारायणस्य विधिनाऽर्चनम् ।
करिष्यावः कार्तिके वै स्थास्यावस्तत्र शोभने ॥३२॥
शिवरात्रिं करिष्यावस्तत्र वै रैवताचले ।
ततोऽक्षयतृतीयायां स्नास्यावः सोमनाथके ॥३३॥
श्रावणं च करिष्यावो गोमत्यां कृष्णपत्तने ।
नवरात्रं चमत्कारे कृत्वा कैलासमेव तु ॥३४॥
आयास्यावो महादेवि ! वद नन्दीश्वरं तथा ।
गणेशं कार्तिकेयं च योगिनीमण्डलं वद ॥३५॥
दुर्गानां मण्डलं चापि रुद्रानेकादशापि च ।
गंगां च वीरभद्रं च चण्डं प्रचण्डमित्यपि ॥३६॥
शृंगिं भृंगिं च रीटिं किरीटिं चेशानमित्यपि ।
अग्निं च मंगलं चन्द्रं कालं भैरवमित्यपि ॥३७॥
दुर्वाससं तथा लाभं तोषं सिद्धीश्च वै वद ।
ऋद्धिं च हनुमन्तं च तथाऽन्यान् मम सेवकान् ॥३८॥
तवापि सेविका देवीर्वद यात्रार्थमुत्सुकान् ।
सर्वान् वाहनसामग्रीरुपदाऽऽगृह्य यान्त्विति ॥३९॥
इत्येवं शंकराल्लब्ध्वा समाज्ञां पार्वती सती ।
सुप्रसन्ना समुत्थाय घोषयामास सर्वथा ॥४०॥
सन्नह्यन्तां सुयात्रार्थे द्रुतं सौराष्ट्रमण्डले ।
यत्रास्ते श्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥४१॥
सोमनाथो वामनश्च भवेशो गोपिकापतिः ।
तत्र यात्राकृते सर्वैर्गन्तव्यं व्योमगामिभिः ॥४२॥
कुंकुमवापिकाक्षेत्रं चाश्वपट्टसरोवरम् ।
अनादिश्रीकृष्णनारायणं च लोमशं मुनिम् ॥४३॥
मातरं कंभरालक्ष्मीं पितृगोपालकृष्णकम् ।
दृष्ट्वाऽर्चयित्वा सेवित्वा यास्यामः कृतकृत्यताम् ॥४४॥
एवं कैलासवासास्ते बहुरत्नादिसंभृताः ।
ऊर्जकृष्णस्य सप्तम्यां यात्रां चक्रुर्मुदान्विताः ॥४५॥
दुन्दुभयो ह्यवाद्यन्त प्राजायन्त जयेरणाः ।
प्रावर्तन्ताऽम्बरे सर्वे त्वाययुर्घटिकान्तरे ॥४६॥
व्योम्नि कोटिगणदेवीवाहनैः समलंकृतः ।
महादेवस्तु तैः पृष्टः समुवाच स्थले स्थले ॥४७॥
अयं केदारनाथोऽहं दक्षेश्वरस्तथा ह्यहम् ।
अर्बुदे पुष्करं चेदं सिद्धक्षेत्रमिदं तथा ॥४८॥
रणेश्वरं च मे क्षेत्रं सौराष्ट्रं चेदमागतम् ।
सालेशोऽयं महाविष्णुर्भद्रा चेयं महापगा ॥४९॥

शत्रुञ्जिता नदी चेयं गोरक्षस्य च धूनिका ।
अश्वपट्टसरश्चेदं पश्चिमोत्तरसेतुमत् ॥५०॥
मध्यद्वीपे मन्दिरं च यत्र कुंकुमवापिका ।
अनादिश्रीकृष्णनारायणालयोऽयमुत्तमः ॥५१॥
दक्षिणे वृक्षविस्तारे लोमशस्याश्रमो ह्ययम् ।
व्याघ्रारण्यं तथा दूरं दीर्घं चेदं विलोक्यते ॥५२॥
पश्चिमे रैवतश्चायं पञ्चयोजनतः परः ।
इत्युक्त्वा शंकराद्यैश्च पार्वतीयुक्तदर्द्गणैः ॥५३॥
साक्षताः पुष्पांजलयश्चन्दनद्रवमिश्रिताः ।
व्योममार्गादर्पिताश्च सासभौमालयोपरि ॥५४॥
अनादिश्रीकृष्णनारायणो विजयतेतराम् ।
इतिशब्दैर्ध्वनिभिश्च दिशोऽपूर्यन्त सर्वतः ॥५५॥
लोमशः कंभरालक्ष्मीर्गोपालकृष्ण ऊर्ध्वगान् ।
ऋषयश्च विलोक्यैतानभिजग्मुस्तदाऽम्बरे ॥५६॥
जयशब्दा नमःशब्दा धन्यशब्दास्तदाऽभवन् ।
मिलित्वा चाऽवतेरुश्च पश्चिमे सेतुमण्डले ॥५७॥
तेरुनाम्नाप्रदेशः सोऽभवत्पश्चिमदिग्भवः ।
सेतुना च कृतं तैर्वै पूर्वं गत्वा प्रदक्षिणम् ॥५८॥
उज्ज्वलः स प्रदेशोऽभूत् ततः पूर्वं गताश्च ते ।
अमराणां गतेर्योगादमरा भूमिकाऽभवत् ॥५९॥
दुन्दुभिरवयोगेन दुन्दुरवाऽभवच्च भूः ।
व्याघ्रारण्यमुखे गत्वा सेतुना ते च देवताः ॥६०॥
दक्षिणपश्चिमसेतुं समागत्य ततश्च ते ।
वापीद्वीपं सासभौमं मन्दिरं जग्मुरुत्सुकाः ॥६१॥
लोमशाद्याः ऋषयश्च स्वागतं शुभमाननम् ।
चक्रुर्देवाधिदेवस्य शंभोः सत्याः सुपूजनम् ॥६२॥
कौशासनानि प्रददुरर्घं जलं फलानि च ।
सौधान्तःस्थं कृष्णनारायणं द्रष्टुं ययुस्ततः ॥६३॥
अनादिश्रीकृष्णनारायणो यत्र विराजते ।
चिरंजीविश्वतैर्युक्तो मुक्तकोटिभिरर्चितः ॥६४॥
अवतारैः शोभितश्च देवैः संसेवितः प्रभुः ।
ऊर्जकृष्णस्य सप्तम्यां निशायां पूजितश्च तैः ॥६५॥
राधारमादिपत्नीभिरसंख्याभिरभिष्टुतः ।
शंकराद्यैर्वेदमन्त्रैर्वर्णितः षोडशादिभिः ॥६६॥
नीराजितस्ततः कृष्णः शृंगारितः पुनः पुनः ।
पार्वत्या कस्तूरिकया बिन्दुर्भाले सकुंकुमः ॥६७॥
कृतः साक्षतशोभश्च शंभुना तिलकं शुभम् ।
चन्दनेन कृतं रम्यं पार्वत्या तु ततः पुनः ॥६८॥
कोटिकन्दर्पलावण्यभृतं हरिकपोलकम् ।
सचन्द्रकं कृतं त्वार्द्रकुंकुमेन पुनः पुनः ॥६९॥
रञ्जयामास देवेशी दृष्ट्वा कृष्णं मनोहरम् ।
उपदा विविधा रत्नसौवर्णादीनि चार्पयत् ॥७०॥
दण्डवत् कृतवन्तस्ते संभाषां विदधुर्मिथः ।
गोपालनन्दनो बालः कृष्णनारायणः प्रभुः ॥७१॥
पूजोत्तरं स्वयं स्वस्याऽऽसनादुत्थाय सत्वरम् ।
ननाम पादयोः शंभोः पार्वत्याश्च परेश्वरः ॥७२॥
आतिथ्यविधिना पादौ प्रक्षाल्य सलिलं पपौ ।
संकल्पेन च सैन्यानां निवासार्थं तु लोमशः ॥७३॥
चकाराऽऽरैवतं यावन्नगरं वर्तुलं महत् ।
पञ्चविंशतिसंख्याकयोजनानां भुवोन्तरे ॥७४॥
वासयामास तान् सर्वान् भोज्यपानाऽऽश्रमादिभिः ।
सेवयामास सर्वांश्च कृष्णनारायणः स्वयम् ॥७५॥
श्रीमद्गोपालकृष्णश्च शंभुं प्राहाऽऽश्रुनेत्रकः ।
धन्योऽहं कृतकृत्योऽहं मद्धाम पावितं त्वया ॥७६॥
सर्ववन्द्येषु मूर्धन्यं पदं दत्तं त्वया च मे ।
एते परेश्वराश्चान्ये यन्ममाश्रममागताः ॥७७॥
धन्येयं पृथिवी शुभ्रा यावदण्डं भविष्यति ।
तावच्च पावनी तीर्थरूपा ख्याता भविष्यति ॥७८॥
कंभराख्या महालक्ष्मी पार्वतीं प्राह शोभनम् ।
लोकमातुः किमु वाच्यं पाविताऽहं त्वया सति ! ॥७९॥
त्वया दुःखविहन्त्र्या च वर्धितो मम बालकः ।
तपोभिर्या न दृश्याऽस्ति सा दृष्टाऽद्य मया सति ! ॥८०॥
पूर्वेषां संभवानां प्रस्मारितं पुण्यमत्र वै ।
स्वागतं सर्वथा हैमि शांभवि शान्तिमावह ॥८१॥
अहं दासीसमेता च सेवां करोमि शं वह ।
उक्त्वैवं कम्भरालक्ष्मीः पादसंवाहनं तदा ॥८२॥
पार्वत्यास्त्वतिथिरीत्या चक्रेऽन्यसेवनादिकम् ।
पर्यंकेषु मृदिव्येषु कैलासादधिकेषु च ॥८३॥
विश्रान्तिं लब्धवन्तस्ते शंकराद्यास्तु देवताः ।
भोजनानि सुपानानि ताम्बूलकानि भावतः ॥८४॥
ददुः कृष्णजनाः सर्वे संजगृहुः सुखास्तु ते ।
सुषुपुः शंकराद्या वै कृष्णनारायणस्तदा ॥८५॥
पार्वतीं मातरं प्राह मद्वाक्यं पालितं सति ।
स्वागतं ते प्रकुर्वन्ति रमाद्या मम चांगनाः ॥८६॥
इयं मे पार्वतीनाम्नी प्रभेयं तत्सहायिनी ।
माणिकीयं मम कान्ता लक्ष्मीरियं पतिव्रता ॥८७॥

राधेयं ललिता चेयं जयेयं कमला त्वियम्।
पद्मिनी भार्गवी चेयं मुक्तेयं देविका त्वियम् ॥८८॥
चम्पेयं हेमभेयं च शान्तेयं वाजिनी त्वियम्।
मौक्तिकेयं मंजुलेयं हंसेयं सगुणा त्वियम् ॥८९॥
एवमन्याः सहस्राणि विद्यन्ते ता इमेऽत्र वै।
तव सेवां प्रकुर्वन्तु याम्यहं निजमन्दिरम् ॥९०॥
इत्युक्त्वा श्रीकृष्णनारायणो जगाम मन्दिरम्।
सुष्वाप च सुखं प्रातस्तूर्याणि विविधानि च ॥९१॥
अवाद्यन्त हि दिव्यानि प्रबोधं लेभिरे जनाः।
ऊर्जकृष्णाष्टमी चेयं जयन्ती श्रीहरेर्मम ॥९२॥
अनादिश्रीकृष्णनारायणस्याऽऽसीत्ततश्च ते।
शंकराद्या नित्यकार्यं कृत्वा सज्जाः सुशोभनाः ॥९३॥
प्रातः पूजां चाभिषेकं कर्तुं मन्दिरमाययुः।
देवताः शंकरेन्द्राद्या मुनयः ऋषयस्तथा ॥९४॥
पितरः कश्यपाश्चान्ये ब्राह्मणा मानवास्तथा।
मुक्ता देव्यः सुरकन्या नागकन्याश्च भोगिनः ॥९५॥
गन्धर्वाः किन्नरा गुह्याः सन्तः किंपुरुषादयः।
साध्व्यः पतिव्रता ब्रह्मव्रतिन्यो योगयोषितः ॥९६॥
मातरो वनदेव्यश्च नद्यः पुर्यश्च धेनवः।
गोप्यश्चैताः पयःकुल्या दधिकुल्या घृतानि च ॥९७॥
मधुकुल्याः शर्कराः संगृह्य तीर्थजलानि च।
सौवर्णकलशान्नीत्वा फलाऽक्षतसमन्वितान् ॥९८॥
जलयात्रादिविधया कृत्वा मूर्धसु गालिकाः।
आययुः सर्वनाथाधिश्रितं दिव्यसुमन्दिरम् ॥९९॥
पुष्पमालाश्चन्दनानि कस्तूरीश्चाऽक्षतांस्तथा।
पुष्पसाररसांश्चापि सुगन्धितैलकानि च ॥१००॥
मृद्द्रव्याणि रम्याणि रक्तपीतानि यानि च।
ता आदाय समाजग्मुः कृष्णनारायणं प्रति ॥१०१॥
अनादिश्रीकृष्णनारायणः स्वणाम्बरं शुभम्।
परिधाय सरस्तीरे स्वर्णसिंहासने वरे ॥१०२॥
निषसादाथ देवाद्यैर्बृहस्पत्यादिभिस्तदा।
भूतशुद्धिं कारयित्वा प्रदायाऽऽचमनानि च ॥१०३॥
अर्घ्यं दत्वा जलस्नानं कारयित्वा ततः परम्।
दुग्धकुम्भैर्दुग्धस्नानं कारितं शुभदर्शनम् ॥१०४॥
धेनवो व्योममार्गेण पयांसि मुमुचुस्तदा।
गोप्यो देव्यादिकाः कृष्णे ववृषुर्दधि पिच्छलम् ॥१०५॥
देवा घृतानि मुमुचुर्मधूनि वनदेवताः।
पथ्याद्याः प्रददुस्तस्मिन् शर्करास्नानमुज्ज्वलम् ॥१०६॥

अध्वयः सरितस्तीर्थोत्तमान्यदुर्जलानि च।
अभिषेकं शुभं चक्रुस्ततश्चन्दनतैलजम् ॥१०७॥
लेपं सम्मर्दनं कृत्वा स्नापयित्वाऽम्बराणि च।
ददुर्दिव्यानि देवाश्च भूषाश्च धनदा ददुः ॥१०८॥
श्रांगारिकं तथाऽन्येऽन्याः सर्वे महोत्तमं ददुः।
मुकुटं कुण्डले हारानूर्मिकाः शृंखलादिकाः ॥१०९॥
छत्रं सुचामरे कृष्णं धारयित्वा तु देवताः।
वैदिकैर्मुख्यसूक्ताद्यैर्नीराजनं व्यधुर्मुदा ॥११०॥
क्षमां पुष्पांजलिं दत्वा भोजनं पुरतो न्यधुः।
भगवान् बुभुजे पानं पपौ ददौ समागतान् ॥१११॥
प्रसादं कानके पात्रेऽक्षय्यं कोटिगुणं यतः।
अथ तान् भोजयामासुर्गोलवाद्या महर्षयः ॥११२॥
सायं प्रणर्तनं चक्रुर्गायनं कीर्तनानि च।
दानानि विविधान्येवाऽसंख्यकानि ददौ हरिः ॥११३॥
रात्रौ नीराजनं चक्रुर्जुहुवुश्च हुताशने।
उत्सवस्य परिहारं कृत्वा सुषुपुरीश्वराः ॥११४॥
सर्वे शान्ता योगनिद्रां गता युगलकोटयः।
पठनाच्छ्रवणाच्चस्य तद्यात्राफलभाग्भवेत् ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ध्यानस्थशंकरात् ज्ञात्वा कुंकुमवापीक्षेत्रं जिगमिषुसगण-शंकरपार्वतीशक्तिसतीदेवदेवीतीर्थदिव्येश्वरादिसमस्त-विभूतिदेहिभिः समागत्योर्जकृष्णाष्टमीजयन्त्यां श्रीकृष्णनारायणाऽर्चनं कृतमित्यादिनिरूपणनामा पञ्चत्रिंशदधिकपञ्चशततमोऽध्यायः ॥५३५॥

श्रीनारायण उवाच—

अथ प्रातर्नवम्यां प्राजायन्त तूर्यनिःस्वनाः।
जजागरुश्च देवाद्याः स्नात्वा वेषांश्च दध्रिरे ॥ १ ॥
अनादिश्रीकृष्णनारायणदर्शनहेतवे।
आजग्मुस्तं पुपूजुश्च गोपालकृष्णनन्दनम् ॥ २ ॥
श्रीमद्गोपालकृष्णश्च तथा श्रीलोमशो मुनिः।
पतिव्रताद्याश्चक्रुः संपूजां तेषां सुवैदिकीम् ॥ ३ ॥
अवतारार्चनं चक्रुर्मुनयस्तत्र वासिनः।
तानि तीर्थानि जातानि कोटिशोऽत्र सरोवरे ॥ ४ ॥
विष्णोः शंभोर्ब्रह्मणश्चार्चनं चकार लोमशः।
श्रीमद्गोपालकृष्णस्तु शंभोः पूजनमाचरत् ॥ ५ ॥
शंभुः प्राह सदा चाऽहं वसामि कृष्णसन्निधौ।
गोपालेश्वरनामाऽहं ख्यातिं यास्यामि चात्र वै ॥ ६ ॥

सती प्राह सदा चाहं कम्भराकमलार्चिता ।
वत्स्यामि शंकरपार्श्वे कम्भराकमलेश्वरी ॥ ७ ॥
ख्याता दिव्यस्वरूपेण भविष्यामि रमेच्छया ।
गणेशः कार्तिकेयश्च मम पुत्रौ मया सह ॥ ८ ॥
शुकशुण्ढो भगवाँश्च क्रमान्नाम्ना भविष्यतः ।
सन्तुष्टा च सती चाहं ब्रह्मचर्यपरायणा ॥ ९ ॥
सन्तोषदुर्गानाम्नी च भविष्यामि प्रभोः पुरः ।
एवं नन्दिवीरभद्रप्रभृतयो गणाः सदा ॥१०॥
तत्तन्नाम्ना निवत्स्यन्ति श्रीकृष्णमन्दिराग्रतः ।
अथ विष्णोर्ब्रह्मणश्च पत्नीयुक्तस्य पूजनम् ॥११॥
चकार विधिना श्रीमद्गोपालकृष्ण आदरात् ।
ताभ्यां तत्र निवासोऽपि कृतो दिव्येन वर्ष्मणा ॥१२॥
तानि तीर्थानि जातानि सुराणां कोटिकानि हि ।
देवा गणास्तथाऽन्येऽपि वृक्षा नद्यश्च वल्लिकाः ॥१३॥
गन्धर्वाः किन्नरा अन्ये काश्यपा दिव्यदृष्टयः ।
दिव्यदेहा निवासान् वै चक्रिरे कृष्णसन्निधौ ॥१४॥
सौराष्ट्रे सर्वथा क्षेत्रे कृष्णनारायणाज्ञया ।
येषां यत्राऽभवत् हार्दं तत्र ते न्यवसँस्तदा ॥१५॥
अथ भोजनपानानि कृतवन्तश्च ते सुराः ।
देवा देव्यो ययुर्नत्वा निवासनगरे मुदा ॥१६॥
एवं वै देवतास्तत्र न्युषुर्मासचतुष्टयम् ।
किं भाग्यं वर्णये भूमेर्न भूतं न भविष्यति ॥१७॥
लक्ष्मीनारायणसंहितायाः कथाः क्रमात्तदा ।
दत्तात्रेयो महाराजो वाचयामास नित्यदा ॥१८॥
शुश्रुवुः परया भक्त्या नित्यं देव्यश्च देवताः ।
जडदाश्च चेतनाश्चापि चतुर्दशभुवां प्रजाः ॥१९॥
सेन्द्रिया माघपर्यन्तं दिव्यनगरसंस्थिताः ।
शिवरात्र्यां ययुः सर्वे रैवताचलपर्वतम् ॥२०॥
दत्तात्रेयो भगवांस्तु शृंगे वासं व्यधाद् दृढम् ।
अम्बा भवस्तथा विष्णुः स्वस्वस्थानानि भेजिरे ॥२१॥
गणा देवास्तथा देव्यो यथेष्टं वासमादधुः ।
शिवरात्रिव्रतं तत्र रैवताद्रौ विधाय च ॥२२॥
सोमनाथं परं क्षेत्रं प्रभासं ते ययुस्ततः ।
तैः प्रभासे कृताऽक्षय्यतृतीया तत्र वै शुभा ॥२३॥
पार्वती प्राह भगवन् प्रभासं क्षेत्रमित्यपि ।
नाम्ना समुच्यते कस्माद् वद मेऽर्थं यथार्थकम् ॥२४॥
शंभुः प्राह शृणु कान्ते ! भासते मम योगतः ।
प्रकृष्टं तत्प्रभासं वै क्षेत्रं नाम्ना प्रकीर्त्यते ॥२५॥
चन्द्रमसः प्रभा आसन् ममैव वरदानतः ।
क्षयस्याऽपगमे कान्ते प्रभासं तेन कीर्त्यते ॥२६॥
सूर्यपुत्री प्रभा भूमौ कृष्णनारायणप्रिया ।
यत्र त्वास पुरा मर्त्यरूपा रम्या कुमारिका ॥२७॥
अनादिश्रीकृष्णनारायणं प्राप्ता तपस्यया ।
प्रभाया आसनं यत्र प्रभासं तेन कीर्त्यते ॥२८॥
देवैर्यत्र प्रभालब्धा तपोभिरुग्रकैर्यतः ।
प्रथमं भासमानं तत् सर्वतीर्थेषु वर्तते ॥२९॥
यत्र श्रीर्भारती वह्निं वाडवं सागरेऽक्षिपत् ।
तदा वै भासमानं तत् प्रभासं समजायत ॥३०॥
सौराष्ट्रस्य नवमो यो भागो विभासते क्षितौ ।
कीर्त्या प्रभासः प्रोक्तः सः प्रभा ज्ञानं च तत्प्रदः ॥३१॥
प्रकृष्टा भा भारती च आस विप्रमुखेषु या ।
वेदात्मिकां प्रभासं तत्क्षेत्रं वै ब्राह्मणप्रियम् ॥३२॥
प्रत्यक्षं भास्करश्चार्कद्रुमजन्मस्वरूपतः ।
यत्र वै वर्तते तस्मात्प्रभासं सुरभाषितम् ॥३३॥
सूर्यस्यासीत्पुरा तेजो दुःसहं विश्वकर्मकः ।
शाणोल्लीढं रविं कृत्वा सह्यतेजस्कमाचरत् ॥३४॥
शाणोच्छिन्नानि तेजांसि व्यभजच्छस्त्रहेतवे ।
आयुधानि तेजसां च कृतानि विश्वकर्मणा ॥३५॥
तथापि शिष्यते तेजस्तदत्र सागरान्तिके ।
स्थापितं यच्छनैः शान्तमभवत् तत्प्रभासकम् ॥३६॥
तेजसः षोडशो भागः सूर्यस्य मण्डलेऽभवत् ।
यत्तस्य श्चाक्षयं तेजस्तत्प्रभासे स्थिरीकृतम् ॥३७॥
द्यौः संपुष्टिं प्रापिता च यजुर्मयेन तेजसा ।
स्वर्गं प्रपोषितं साम्ना तेजसा विश्वकर्मणा ॥३८॥
अन्येन निर्मितं चक्रं विष्णोर्हरस्य शूलकम् ।
धनदस्य च शिबिका दण्डः प्रेतपतेस्तथा ॥३९॥
कार्तिकस्य तथा शक्तिर्गदा हनुमतस्तथा ।
करवालं तथा देव्या महाकालस्य पाशकः ॥४०॥
पाशुपतं तथा नारायणास्त्रं त्वंशतः कृतम् ।
अन्यान्यपि तथास्त्राणि यथायोग्यं कृतानि हि ॥४१॥
एवं सूर्यस्य वै तेजः सागरान्तिकमास्थितम् ।
प्रभासं तन्महत्क्षेत्रं मम देवि ! निवासभूः ॥४२॥
माहेश्वर्या दक्षिणं च न्यंकुमत्याः कृतस्मरम् ।
अद्रिं व्याप्य योजनानां द्वादशाऽभिप्रभासकम् ॥४३॥
तत्राऽर्कवृक्षतां यातः सूर्यो वंशानुवंशतः ।
अर्कवृक्षं पूजयेद् यः कुष्ठस्तस्य विनश्यति ॥४४॥

सोमेश्वराद् वह्निकोणे सिद्धेश्वरोऽहमास्थितः ।
जैगीषव्येन सिद्धेन तपो वर्षसहस्रकम् ॥४५॥
कृत्वाऽहं स्थापितः सिद्धेश्वरो भवामि शैलजे ।
वालखिल्यास्तत्र सिद्धिं जग्मुर्वै तपसा पराम् ॥४६॥
कृतस्मरात् समारभ्य यावदर्कस्थलं सति ! ।
सिद्धयोऽष्टौ निवसन्ति मम सेवापरायणाः ॥४७॥
ब्राह्मी चैव हिरण्या च नद्यौ वै ब्रह्मणः सुते ।
मंकीशर्षिस्तथा सन्ति सुनन्दाद्याश्च मातरः ॥४८॥
कृतस्मरं महाद्रिं च दृष्ट्वा तु ऋषयो द्विजाः ।
अस्माभिश्च सह यात्राकरा वासानि चक्रिरे ॥४९॥
अत्रिर्वसिष्ठः पुलहः क्रतुर्भृगुः पुलस्त्यकः ।
मरीचिः कश्यपो भारद्वाजो यमोऽङ्गिरा मनुः ॥५०॥
आपस्तम्बोऽथ सांवर्तः काव्यः कात्यायनस्तथा ।
गौतमः शंखलिखितौ वाचस्पतिस्तथाऽरुणिः ॥५१॥
जामदग्न्यो याज्ञवल्क्यः ऋष्यश्रृंगो विभाण्डकः ।
गार्ग्यः शौनकदाल्भ्यौ च व्यास उद्दालकः शुभः ॥५२॥
नारदः पर्वतश्चैव दुर्वासा उग्रतापसः ।
शाकल्यो गालवश्चापि जाबालिर्मुद्गलः ऋभुः ॥५३॥
विश्वामित्रः कौशिकश्च जह्नुर्विश्वावसुस्तथा ।
धौम्यश्चैव शतानन्दः शाकटायन एकतः ॥५४॥
द्वितस्त्रितस्तथा चान्ये ये चार्षश्च समागताः ।
ते यथेष्टं निजशालाश्चक्रुश्चात्र प्रभासके ॥५५॥
ज्वलन्तस्तपसा सर्वे संस्थिताः कृतपर्वते ।
सोमनाथं सोमवारे पूजयामासुरीश्वराः ॥५६॥
स्नात्वा सन्ध्यादिकं कृत्वा पूजयित्वा नरायणम् ।
योग्ये वै मण्डपे रम्ये न्यस्य कुंभं सुशोभनम् ॥५७॥
चूतपल्लवशोभाढ्यं चन्दनाक्षतपूजितम् ।
कुंकुमचन्दनैः कृत्वा घटार्धे प्रतिमान्वितम् ॥५८॥
उमादेहार्धसंयुक्तं शंकरार्धसमन्वितम् ।
यथाभूषाशोभितं च यथावस्त्रादिमण्डितम् ॥५९॥
उमया सहितं शंभुं पुपूजुस्तत्र ते द्विजाः ।
विविधैर्भक्ष्यभोज्यैश्च फलैः पानैर्विलेपनैः ॥६०॥
धूपदीपोत्तमैर्नीराजनैः स्तुतिभिरीश्वराः ।
आनर्चुर्याचयामासुः क्षमां पुष्पांजलिं ददुः ॥६१॥
गायनं कीर्तनं चक्रुर्नर्तनं जागरान्वितम् ।
यः कश्चित् सोमवाराणां नवकं भावतश्चरेत् ॥६२॥

शिवतुल्यो भवेत् सोऽपि जरामरणवर्जितः ।
सम्प्राप्ते नवमे वारे कुर्यादुद्यापनं महत् ॥६३॥
मण्डलं मण्डपं कुण्डं कारयेत् सुपरिष्कृतम् ।
वेदिकां कारयेद्रम्यां चतुरस्रां सुचित्रिताम् ॥६४॥
पद्मं च कारयेन्मध्ये धान्यस्य मण्डलस्य च ।
कलशानष्टदिग्भागे सहिरण्यान् पृथक्-पृथक् ॥६५॥
नवदुर्गाः पूजयेच्च मध्ये सोमेश्वरं हरम् ।
रुक्मशय्यासमारूढं हेमजं पूजयेद् व्रती ॥६६॥
गन्धस्रग्धूपनैवेद्यैर्वस्त्रालंकारदर्पणैः ।
छत्रचामरताम्बूलैर्दीपघण्टावितानकैः ॥६७॥
तोषयित्वा हरं पश्चाद् दानं श्रीगुरवे ददेत् ।
होमं च कारयेद् दद्यात्पायसान्नं बलिं शुभम् ॥६८॥
रात्रौ च जागृयात् पञ्चगव्यं पीत्वा हरं स्मरेत् ।
प्रभाते तु ततः स्नात्वा ध्यायेत् सोमं क्षणं पुनः ॥६९॥
ततः प्रपूज्य सोमेशं क्षीरखण्डादिनिर्मितैः ।
भक्ष्यभोज्यैरनेकैश्च नैवेद्यं शंभवे ददेत् ॥७०॥
ब्राह्मणान् भोजयेद् देवान् ऋषीन् पितॄंश्च तर्पयेत् ।
अतिथीन् पूजयेच्चापि कन्याः संभोजयेत्तथा ॥७१॥
वस्त्रदानं कारयेच्च गोदानं च प्रकारयेत् ।
आशीर्वादाँश्च गृह्णीयात् परिहारं समाचरेत् ॥७२॥
एवं चीर्णव्रतं सम्यक् लभते पुण्यमक्षयम् ।
धान्यधनादिसमृद्धिं पुत्रदारादिकाँस्तथा ॥७३॥
न वन्ध्यात्वं भवेत्तस्या दारिद्र्यं नाशमाप्नुयात् ।
ऋषिभिश्च सुरैः सोमवारव्रतं कृतं तथा ॥७४॥
दानानि प्रददुस्तद्वदुद्यापनं दधुस्तथा ।
शंकरः प्राह देवेशि ! दोषाँस्त्यक्त्वा स्वभावजान् ॥७५॥
तीर्थे कुर्याज्जनस्तेन लभते शाश्वतं फलम् ।
तीर्थानुगमनं पद्भ्यां तपः परं फलप्रदम् ॥७६॥
छत्रोपानद्विहीनस्तु तैर्थिकोऽघानि नाशयेत् ।
पारक्यान्नं न भोक्तव्यं भैक्ष्यं पारक्यमेव न ॥७७॥
देवतानां गुरूणां च मातापित्रोः सतां तथा ।
कुटुम्बस्य स्मरणं च तीर्थे कार्यं मुमुक्षुणा ॥७८॥
तीर्थे दोषान्न गृह्णीयाद् वज्रलेपा भवन्ति यत् ।
लुठित्वा लुण्ठयेत्तत्र नृत्यन् गायन् हसँस्तथा ॥७९॥
धूलीधूसरसर्वांगो भवेत्तीर्थे हरिं स्मरेत् ।
'ॐ नमः सोमनाथाय पार्वतीपतये नमः' ॥८०॥

जपेन्मन्त्रं सोमनाथे सर्वपापप्रणाशनम् ।
ध्यायेत् सोमेश्वरं मां च त्वया सार्धं महेश्वरि ॥८१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इत्येवं श्रावयेल्लोकान् कारयेद्भजनं हरेः ॥८२॥
वैष्णवान् प्रणमेन्मार्गे श्रीपतिं हृदि धारयेत् ।
नास्ति सौराष्ट्रसदृशो देशो वै जगतीतले ॥८३॥
सोमनाथसमं तीर्थं मे नास्ति भुवि पार्वति ! ।
पापिनां पापशमनं व्रतिनामीप्सितप्रदम् ॥८४॥
अभाग्यानां भाग्यकरं ब्रह्मलोकप्रदायकम् ।
तुलापुरुषदानं च तथा ब्रह्माण्डदानकम् ॥८५॥
पृथिवीक्षेत्रदानं च कल्पपादपदानकम् ।
हिरण्यस्य कामधेनोर्गजाश्वानां च दानकम् ॥८६॥
रथानां च गृहाणां च रत्नानां दानकानि च ।
कलशानां च कन्यानां विद्यानां दानकानि च ॥८७॥
कल्पलतानां दानानि जीवदानं जलार्पणम् ।
वृत्तिदानं तथोद्यानदानं चारण्यदानकम् ॥८८॥
समुद्रतीरदानं च पर्वतानां प्रदानकम् ।
गोमहिषीप्रदानं च वनवाटीप्रदानकम् ॥८९॥
ज्ञानदानं मुक्तिदानं स्वर्गदानं फलार्पणम् ।
सर्वस्वार्पणदानं च पुनः प्राप्त्यै समाचरेत् ॥९०॥
कूपवापीसरोदानं पाषाणकाष्ठदानकम् ।
यानयन्त्रशिबिकादिदानं मधुरसार्पणम् ॥९१॥
कर्तव्यं च यथाशक्ति सौराष्ट्रे मम तीर्थके ।
प्रासादं धवलं सौधं कारयेज्जीर्णमुद्धरेत् ॥९२॥
तीर्थमभ्युद्धरेज्जीर्णे परोपकृतिमाचरेत् ।
परोपकारकर्तॄणां श्रेयः परं भवेत् सति ! ॥९३॥
केचिद्दानप्रभावेण केचित् स्नानेन मानवाः ।
केचिद् ध्यानप्रभावेण केचिद्योगेन वा जनाः ॥९४॥
केचिज्ज्ञानेन वा केचिज्जपेन सेवयाऽपरे ।
कथायाः श्रवणेनापि केचित् कीर्तननर्तनैः ॥९५॥
पूजनैश्चापरे तीर्थैर्वन्दनैः स्तवनैः परे ।
अन्ये सन्न्यसनैर्भक्त्या दास्येनाऽन्ये जपेन च ॥९६॥
सर्वथाऽर्पणभावेन तीर्थस्था यान्ति सद्गतिम् ।
इन्द्रियैर्हीन एवापि तीर्थपूतो भवेत् प्रिये ॥९७॥
प्रभासे निधनं प्राप्तो भवेन्मम परिग्रहः ।
एवं प्रभासं ध्यात्वैव समाश्रयेन्ममाऽनुगः ॥९८॥
इत्येवं कथितं लक्ष्मि ! शंभुना सोमतीर्थके ।
पार्वत्यै साररूपं च चक्रुर्वासानि देवताः ॥९९॥
पठनाच्छ्रवणाच्चास्य देशान्तरनिवासिनः ।
तीर्थयात्राफलं स्याच्च भुक्तिमुक्तिस्तथा भवेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शंकरादीनां रैवताचल(गिरनार)तीर्थे सोमनाथतीर्थे च यात्राकरणं, प्रभासनामनिरुक्तिः, अर्कवृक्षात्मकताऽर्कस्य, सोमनाथपूजा, दानादि, महिमा, चैत्यादिनिरूपणनामा षट्त्रिंशदधिकपञ्चशततमोऽध्यायः ॥५३६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तथाऽन्यानि तीर्थानि कथितानि च ।
शंभुना हिमवत्पुत्र्यै तान्यपि कथयामि ते ॥ १ ॥
वाडवाग्निक्षेपतीर्थे समुद्रे वर्तते सदा ।
तत्र स्नानं प्रकुर्वीत वह्निवत् पावनो भवेत् ॥ २ ॥
पञ्चकं च ततो गच्छेद् वपनं तत्र कारयेत् ।
हृदि स्मरन् सोमनाथं केशाँस्तत्र विनिःक्षिपेत् ॥ ३ ॥
पापानि केशसंस्थानि विलीयन्ते तथाकृते ।
सभर्तृकाऽङ्गुलमात्रं पृष्ठकेशान् हि छेदयेत् ॥ ४ ॥
आचमनं ततः कृत्वा स्नायात् सामुद्रके जले ।
'तेऽग्निर्योनिरिडा देहो रेतोधाऽमृतस्य नाभिः ॥ ५ ॥
तस्मै ते रत्नगर्भाय नमोऽवग्रहे ते जले' ।
इति स्नात्वा तिलमिश्रजलैः पितॄँश्च तर्पयेत् ॥ ६ ॥
पुरा देवैर्दीर्घसत्रं प्रारब्धं च प्रभासके ।
सर्वस्वं ब्राह्मणेन्द्राणां प्रभासवासिनां ददुः ॥ ७ ॥
दानं देवास्तदा चायन् द्विजा दूरतरा अपि ।
दक्षिणादानवाञ्छाश्च तावद् देवाः सवासवाः ॥ ८ ॥
सर्वस्वदानतो रिक्ताः प्रार्थनाभंगभीतितः ।
प्रणष्टा ब्राह्मणान् दृष्ट्वा ब्राह्मणाश्चानुवव्रजुः ॥ ९ ॥
सुराः समुद्रमाविश्योदरे तत्र व्यवस्थिताः ।
समुद्रो मूर्तिमान् भूत्वा सत्कारार्थं तटस्थितः ॥१०॥
कृत्रिमं भोजनं रम्यं विप्रेभ्यो मत्स्यमिश्रितम् ।
ददौ च ब्राह्मणाः सर्वे बुभुजुः स्वर्णभाजने ॥११॥
न व्यजानन् गुप्तमांसं भक्षितं चेति वै ततः ।
पूर्वमाकाशगन्तारो ह्यासँस्ते ब्राह्मणाः खलु ॥१२॥
भोजनोत्तरमेवैते पतिताः सहसा भुवि ।
सविस्मयाः समूचुस्ते किमत्र कारणं भवेत् ॥१३॥
तत्रैको योगवृत्त्या च ज्ञातवान् वारिधेः क्रियाम् ।
वञ्चिता इति वै ज्ञात्वा शेपुर्विप्रास्तु वारिधिम् ॥१४॥

त्वयोपगुप्तमस्माकं मांसमन्नेन संयुतम् ।
दत्तं वै भोजने तस्मादस्पृश्यो भव सर्वदा ॥१५॥
ततो वर्षसहस्रं तु अस्पृश्योऽभूत्तु वारिधिः ।
ततो दुःखेन चात्मानं शोषयामास वै जलम् ॥१६॥
स्थलाकारोऽभवद् यावद् देवा ययुः पितामहम् ।
सामुद्रजलयोगेन वृष्ट्या सस्यानि भूतले ॥१७॥
जायन्ते च प्रजाः सर्वाः पुष्यन्ति तेन सर्वथा ।
समुद्रस्य जलं रक्ष यथा शोषं न गच्छति ॥१८॥
इति ते प्रार्थयांचक्रुर्ब्रह्मा श्रुत्वा तटं ययौ ।
अस्पृश्यतावारणार्थं प्रार्थयामास भूसुरान् ॥१९॥
ब्राह्मणाः प्रतिगृह्णन्तु रत्नानि वारिधेस्तथा ।
वारिधिं शापमुक्तं च प्रकुर्वन्तु क्षमायुताः ॥२०॥
ब्राह्मणाः प्रार्थयामासुर्ब्रह्माणं त्वं तथा कुरु ।
ब्रह्मा प्राह तदाऽब्धिं च त्रिधा मेध्यो भविष्यसि ॥२१॥
पर्वकालेषु च नदीसंगमेषु तथा सदा ।
तटतीर्थेषु मेध्यस्त्वं स्पर्शस्नानप्रदो भव ॥२२॥
पूज्यश्च सर्वदा तत्राऽन्यत्रापि देवपूजने ।
अभिषेके तव वारि सदा मेध्यं भवेदिति ॥२३॥
एवमस्पृश्यतानाशं चक्रिरे ब्राह्मणादयः ।
रत्नानि जगृहुः सर्वे प्रययुर्निजकेतनम् ॥२४॥
ततः स्नास्यति यः सम्यक् सागरे लवणाम्भसि ।
अश्वमेधसहस्रस्य फलं प्राप्स्यति चात्र सः ॥२५॥
श्रीसोमेशसमुद्रस्याऽऽन्तरे ये तु मृता जनाः ।
पापिनोऽपि गमिष्यन्ति स्वर्गं निर्धूतकल्मषाः ॥२६॥
एवं वै सजलस्त्वब्धिः पवित्रत्वं पुरा गतः ।
सोमेशादाकृतस्मरं क्षेत्रं सागरसन्निधौ ॥२७॥
कोटितीर्थमयं सर्वं स्वर्गमोक्षप्रदं परम् ।
एवं स्नात्वा सोमनाथं गच्छेद् द्रष्टुं व्रती ततः ॥२८॥
स्नापयित्वा विधानेन जपेत्तु शतरुद्रिकाम् ।
स्नापयेत्पयसा दध्ना घृतेन मधुनाऽपि च ॥२९॥
इक्षुरसेन च ततः कुंकुमेन विलेपयेत् ।
कर्पूरोशीरमिश्रेण मृगनाभियुतेन च ॥३०॥
चन्दनेन सुगन्धेन धूपैर्दीपैस्तथाऽम्बरैः ।
नैवेद्यैस्तर्पयित्वा तं नीराजयेन्नमेत्तथा ॥३१॥
स्तुतिमष्टांगनत्यादि गीतं वाद्यं च नर्तनम् ।
प्रदक्षिणं कथां कुर्याच्छृणुयात्पारमेश्वरीम् ॥३२॥
विप्रतपस्विदीनान्धकृपणेभ्यो ददेत् धनम् ।
भोजनं स्वम्बरं चापि दापयेत् भावयेत् व्रती ॥३३॥

एवं सोमेश्वरतीर्थे यः करोति विधानतः ।
धनाढ्यः सप्तजन्मानि ततः कैलासमाव्रजेत् ॥३४॥
सान्ध्यमारात्रिकं कुर्यात्तस्य मोक्षो भवेद् ध्रुवम् ।
अथ लक्ष्मि ! पञ्चनद्यस्तीर्थे तत्र तु मोक्षदम् ॥३५॥
हरिणी ब्रह्मिणी न्यंकुः कपिला च सरस्वती ।
प्रभासे संवर्तते वै पञ्चस्रोता सरस्वती ॥३६॥
शृणु लक्ष्मि ! पुरा साऽत्र यथाऽऽगता सरस्वती ।
पुरा चेन्द्रादयो जित्वा दैत्यान् पृथ्वीं समागताः ॥३७॥
दधीचेराश्रमं दृष्ट्वा ददृशुर्दधीचिमृषिम् ।
आयुधानि विमुच्याऽग्रे रक्षेमानीति वै ददुः ॥३८॥
देयानि स्युः पुनस्तानि शत्रुभिर्यदि नो रणः ।
मुक्त्वाऽस्त्राणि ययुः स्वर्गं शतवर्षोत्तरम् ऋषिः ॥३९॥
जलेन च सहाऽस्त्राणि पीत्वा ययौ हिमालयम् ।
पिप्पलद्रुममध्ये सः चचार परमं तपः ॥४०॥
ततो देवैः समागत्याऽस्त्राण्यर्थितानि सर्वशः ।
दधीचिः प्राह देहे मेऽस्थिरूपाणि वसन्ति वै ॥४१॥
गोलोकाद् गाः समानीय कर्कशजिह्विकादिभिः ।
नन्दां सुभद्रां सुरभिं सुशीलां सुमनां तथा ॥४२॥
आज्ञापयन्तु मेऽस्थ्नां संप्राप्त्यर्थं लेहने तु ताः ।
देवा एवंप्रकारेण प्रापुरस्थीनि वै ततः ॥४३॥
देवस्पृष्टास्तु ता गावः शुद्धाः पूज्या यथास्थिताः ।
मुखमेकं परं तासां न स्पृष्टं रक्तलेपितम् ॥४४॥
अस्थ्नामस्त्राणि कृत्वैव देवा निर्ययुरम्बरम् ।
दधीचेस्तु सुभद्रायां जातो बालः सुलक्षकः ॥४५॥
उवाच मातरं क्वास्ति पिता मे जननि ! ततः ।
सा प्राह निधनं प्राप्तो देवानां कार्यसिद्धये ॥४६॥
बालश्चचार च तपो हिमाचले ततः खलु ।
तस्य ऊरोः समुत्पन्ना ऊर्वर्या वडवाभिधा ॥४७॥
सापि तेजोमयी जाता तेजोऽपि निःसृतं बहिः ।
और्वोऽयं वाडवोऽग्निस्तद्वनं ददाह दारुणः ॥४८॥
देवाः सरस्वतीं प्राहुर्देवि ! ह्येनं प्रशामय ।
सरस्वती तु तं नीत्वा बालरूपं प्रभासके ॥४९॥
समागत्य प्रचिक्षेप समुद्रे वडवानलम् ।
कुमारिकाकरबालो बुभुजे लवणोदकम् ॥५०॥
पुपोष तत्र वै तिष्ठन्नाद्याप्यब्धिं प्रमुञ्चति ।
यत्र तापोऽभवत्तस्याः क्षणं साऽदृश्यतां गता ॥५१॥
पुनः शीता समागह्य नयति समेति भूतले ।
नैकस्थलेषु गुप्ता सा नैकस्थानेषु गोचरा ॥५२॥

एवं कृत्वा ययौ चाब्धिं निक्षिप्योवास वै चिरम् ।
प्राची सरस्वती सा तु प्रभासे वर्तते सदा ॥५३॥
तत्र वै ऋषयश्चासँश्चत्वारो विष्णुसदृशाः ।
हिरण्यश्चाथ वज्रश्च न्यंकुः कपिल इत्यपि ॥५४॥
पृथक्पृथक्समाहूताः स्नानार्थं तैः सरस्वती ।
सागरोऽपि तदा तस्याः सम्मुखः सहसा स्थितः ॥५५॥
ऋषीणां सेवनार्थं सा पञ्चरूपा बभूव ह ।
हरिणी वज्रिणी न्यंक्वी कापिली सागरी तथा ॥५६॥
पञ्चापि पापहन्त्र्यस्ताः पावन्यः पापिनां सदा ।
मांसमद्यस्तैन्यनारीभोगदोषादिनाशिनी ॥५७॥
कृतस्मरो रोधकर्ता दग्धोऽद्रिस्तेन वह्निना ।
श्वेतोपलास्तु ता जाता रासन्यः सौधकारिकाः ॥५८॥
चाक्षुषस्याऽन्तरे वह्निर्दाधीचो वाडवानलः ।
वैवस्वतान्तरे और्वो भार्गवो वडवानलः ॥५९॥
शंकरस्य ललाटाग्निर्यः स एवाऽयमुच्यते ।
तीर्थं चात्र सरस्वत्या गूहेश्वरं सुतीर्थकम् ॥६०॥
आमर्दकीनदीयोगे संगमेश्वरतीर्थकम् ।
गोवत्सकं तथा तीर्थं झिल्लतीर्थं परं शुभम् ॥६१॥
कूष्माण्डस्य मुनेः स्थानं कूष्माण्डेश्वरसंज्ञितम् ।
कृष्णनारायणस्तत्र समागत्य सरस्वतीम् ॥६२॥
स्वागतं कारयामास कूष्माण्डमुनिना तदा ।
श्रमं च नाशयामास वाडवानलभारजम् ॥६३॥
तापं च शमयामास स्वकरस्पर्शमात्रतः ।
कुमारी साऽर्थयामासैकाकिन्या च मया प्रभो ॥६४॥
कन्यया चात्र वै कथं वस्तव्यं रक्षकं विना ।
पाता रक्षयिता नास्ति मम चात्र वने हरे ! ॥६५॥
तस्मात् पाता मम त्वत्र भव त्वं पुरुषोत्तम ।
यद्वा कुंकुमवाप्यां वा चाश्वपट्टसरोवरे ॥६६॥
तव गृहे समागत्य तत्र तिष्ठामि पादयोः ।
इत्युक्त्वाऽश्राविलनेत्रा कृष्णनारायणं प्रति ॥६७॥
दीनेव चाऽप्यनाथेव क्षणं जाता कुमारिका ।
ततः श्रीमत्कृष्णनारायणस्तां गृह्य पाणिना ॥६८॥
शोकं वै दूरयामास साऽपि कृष्णनरायणम् ।
कण्ठलग्नाऽभवत् साध्वी वव्रे नारायणं पतिम् ॥६९॥
सुमनोमालिकां कृष्णकण्ठे ददौ सरस्वती ।
अनादिश्रीकृष्णनारायणो जग्राह भावतः ॥७०॥
सनाथां तां तथा कृत्वोवाचाऽत्र त्वं स्थिरा भव ।
नदीरूपेण देवेशि ! लोकोद्धारस्य हेतवे ॥७१॥

सरस्वती तदा प्राह नाथाऽहं स्वामिनं विना ।
स्थातुं शक्या कथं तस्मात्त्वमत्र मोक्षदो वस ॥७२॥
इत्युक्तः श्रीकृष्णनारायणः श्रीभगवान् स्वयम् ।
सरस्वतीपतिः साक्षात् पिप्पलस्य द्रुमोऽभवत् ॥७३॥
अक्षयः पिप्पलवृक्षो वर्तते यत्र सा प्रिया ।
मूले संगं समासाद्य नित्यं त्वास्ते सरस्वती ॥७४॥
यत्राऽहं कृष्णरूपेण लक्ष्मि लयं गतः सदा ।
वर्ताम्येव न जानन्ति जना मां नेत्रगोचरम् ॥७५॥
पितॄणां सर्वदा मोक्षं तत्र करोमि पिण्डतः ।
लक्ष्मीः सदा च मूले मे त्वास्तेऽपवादमन्तरा ॥७६॥
अथ कालान्तरे चाहं नैकसाहस्रयोषिताम् ।
परिणीतानां च पतिर्लयं यास्यामि तत्स्थले ॥७७॥
एवमुक्त्वा सतीं पत्नीं जलरूपां विधाय च ।
द्वितीयं युवतीरूपं सह नीत्वा मम प्रियम् ॥७८॥
नवोढासहितश्चाहं त्वश्वपट्टसरोवरम् ।
ममाऽऽलयं ह्यगमं च वसामि तु तया सह ॥७९॥
तत्र सरस्वती देवी सदाऽऽस्ते चरणे मम ।
लोकानां वचने चापि जयदा हि विराजते ॥८०॥
एवमेषा ब्रह्मणस्तु पुत्री सत्यनिवासिनी ।
कुमारी हैमशैलस्था कुरुक्षेत्रे समागता ॥८१॥
भद्रावर्ते पुष्करे च श्रीस्थले सिद्धभूतले ।
पाञ्चालेऽश्वपट्टसरोवरे स्वर्णपुरे तथा ॥८२॥
रैवते च प्रभासे च तथा बहुस्थले पुनः ।
कालभेदेन भक्तानामुपासनबलेन च ॥८३॥
प्रयागादौ तथा तीर्थोत्तमादौ दैवकार्यतः ।
प्रसंगेन गता सेयं प्रभासे च मम प्रिया ॥८४॥
स्वर्गनिःश्रेणिसंभूता प्राची सरस्वती सती ।
वर्तते जीवकल्याणकरी मम वचःस्थिता ॥८५॥
देवास्ते न मनुष्यास्ते नदी तिस्रः पिबन्ति ये ।
चन्द्रभागां च गंगां च तथा देवीं सरस्वतीम् ॥८६॥
यमुनां च गण्डकीं च स्वर्णरेखां च वा नदीम् ।
यथा कामदुघा गावः सर्वकालफलप्रदाः ॥८७॥
चिन्तामणिसमास्तिस्रो नद्यस्ताः कामपूरिकाः ।
अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ॥८८॥
यत्र स्थितानि तीर्थे वै तस्मात् किमधिकं भवेत् ।
नारायणेन सहितो नरो लोके युगान्तरे ॥८९॥
कल्यवतारूपस्य तथा तत्सहयायिनाम् ।
संहर्ता दोषनाशार्थं ह्यास्यत्यत्र पुनः पुनः ॥९०॥

प्राची सरस्वती दोषान् हत्याजान् क्षालयत्यपि ।
त्रिरात्रोपोषणं कृत्वा स्नातव्यं दोषशान्तये ॥९१॥
सरस्वत्युत्तरे तीरे तनुं त्यक्त्वा प्रयाति वै ।
ब्रह्मलोकं शाश्वतं स ह्यपुनर्भवमारकम् ॥९२॥
श्राद्धकर्तुश्चैकविंशतिकुलोद्धरणं भवेत् ।
यं यं काममभिध्याय प्राणप्रयाणमाप्यते ॥९३॥
स तद्भावसमायुक्तो याता भवति मानवः ।
पुरा नाम्नाऽभवद् राजा बृहद्रथ इति श्रुतः ॥९४॥
तस्य भार्याऽभवत्साध्वी नाम्ना त्विन्दुमती सती ।
एकदा तद्गृहं प्राप्तः ऋषिः कण्व इति श्रुतः ॥९५॥
राजा तस्स्वागतं चक्रे पप्रच्छ कुशलादिकम् ।
ततो धर्मकथां चक्रे स ऋषिर्नृपसन्निधौ ॥९६॥
इन्दुमती ऋषिं नत्वा पप्रच्छ प्राग्भवं स्वकम् ।
राज्यं सौख्यं च सौभाग्यं देवोपमः पतिर्मम ॥९७॥
सुखं मान्यं च सम्पत्तिः कस्य प्राप्तं फलं मया ।
कण्वः प्राह शृणुः राज्ञि ! मा रोषं कुरु मां प्रति ॥९८॥
त्वमासीरन्यदेहे तु ह्याभीरी शीलवर्जिता ।
सौराष्ट्रविषये याता स्नातुं प्रभासके तदा ॥९९॥
त्वया हस्तात् कंकणं च हेम्नस्तत्रार्पितं शुभम् ।
तीर्थे महात्म्यमाज्ञाय ब्राह्मणानां मुखात्ततः ॥१००॥
तेन पुण्येन दाशार्णनृपतेः कन्यका भुवि ।
बृहद्रथेन वोढाऽसि राज्ञी जाताऽसि चोत्तमा ॥१०१॥
इतिप्रभासमाहात्म्यं श्रुत्वा सा पुनरेव च ।
तीर्थे कृत्वा समुद्रे च कंकणं प्राक्षिपत् पुनः ॥१०२॥
ततो देवी स्वर्गवासा कल्पायुष्काऽभवच्छुभा ।
इत्येवं लक्ष्मि ! माहात्म्यं प्रभासाब्धिजलस्य वै ॥१०३॥
भुक्तिमुक्तिप्रदं कृष्णनारायणेन योजितम् ।
शंकरः पार्वतीं सर्वाः कथाः प्राह पुनः पुनः ॥१०४॥
पार्वती कंकणं तत्र ददौ चाब्धौ तु कानकम् ।
शंकरोऽभूत् प्रसन्नश्च देव्योऽपि तानि संददुः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने वह्नितीर्थे समुद्रपावित्र्यं, दधीचप्लक्षकवडवानलसरस्वती वृत्तान्तम्, पञ्चस्रोतोमयीसरस्वती, पिप्पलद्रुमकूष्माण्ड-तीर्थे, समुद्रे कंकणदानेनाऽऽभीर्या राज्ञीत्वं, दान-महिमा, चेल्यादिनिरूपणनामा सप्तत्रिंश-दधिकपञ्चशततमोऽध्यायः ॥५३७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः प्राह सतीं तु पार्वतीम् ।
वराहाख्यो महाविष्णुः सोमतीर्थे प्रतिष्ठति ॥ १ ॥
तथा ब्रह्मा गणेशश्च हेरम्बनामतः स्थितः ।
तथा कपर्दिनामापि क्षेत्ररक्षाकरः स्थितः ॥ २ ॥
अतस्तत्र महातीर्थे कपर्दीश्रीगणाधिपः ।
पूजनीयस्तथा विष्णुर्वराहोऽर्च्यः सदा जनैः ॥ ३ ॥
आसीद् राजा पुरा देवि ! शशबिन्दुरितिस्मृतः ।
स तु साकं भार्यया वैहायसेन पथैकदा ॥ ४ ॥
विमानेन ययौ तीर्थे कर्तुं प्रभासमुत्तमम् ।
फाल्गुने कृष्णपक्षे तु चतुर्दश्यां निशामुखे ॥ ५ ॥
अथ सोमेश्वरक्षेत्रे व्रतिनोऽत्र समागतान् ।
अपश्यन्मुनिवर्यांश्च तदा जागरणे स्थितान् ॥ ६ ॥
सोमनाथं मुनीन् नत्वा कंचित् केदारकं प्रति ।
ययौ तत्र स्थितं लिंगं पुपूज परमादरात् ॥ ७ ॥
ऋषयस्तं च पप्रच्छुः कथं मुक्त्वा तु सोमकम् ।
केदारं पूजितं राजन् ! वदात्र कारणं तु नः ॥ ८ ॥
राजा प्राह पुरा चाहं सौराष्ट्रे शूद्रवर्णजः ।
अभवं भार्यया साकं क्षेत्रे चात्र समागतः ॥ ९ ॥
हरिणीसरिति तत्र कमलानि मया तदा ।
दृष्टानि तानि नीतानि विक्रयार्थे मया तदा ॥१०॥
सोमनाथसमीपं च विक्रयार्थं स्थितो दिवा ।
अस्तंगतेऽपि च रवौ क्रीतानि केनचिन्न वै ॥११॥
ततोऽहं क्षुधया व्याप्तो गतो लिंगसमीपतः ।
तत्र काचिदनंगाख्या शिवरात्रिव्रतस्थिता ॥१२॥
स्वतन्त्रा स्त्री जागरणे गीतनृत्योत्सवे रता ।
मया दृष्टा तथा पृष्टा किमेतत् क्रियते त्वया ॥१३॥
सा मामुवाच हि तदा शिवरात्रिव्रतं प्रति ।
व्रतकर्ता दुःखहीनो जायते सम्पदा युतः ॥१४॥
भयरोगारिष्टनाशो जायतेऽस्य पदे पदे ।
अथ श्रुत्वा मम बुद्धिरुत्पन्ना तद्व्रतं प्रति ॥१५॥
उपवासः सहजतो जातः पद्मस्थले मम ।
स्नात्वा तैः कमलैर्देवो रुद्रेशः पूजितस्तदा ॥१६॥
जागरणं कृतं पत्न्या साकं कल्याणवाञ्छया ।
तत्पुण्येन च राजाऽस्मि राज्ञी चेयं मम प्रिया ॥१७॥
जातिस्मरः सभार्योऽस्मि ततो रुद्रेश्वरं खलु ।
केदारे संस्थितं त्वत्र पूजयामि पुराऽर्चितम् ॥१८॥
अतो रुद्रेश्वरं तीर्थे राज्यप्रदं प्रपूजनात् ।
धर्मार्थकाममोक्षाणां प्रदं शान्तिप्रदं सुखम् ॥१९॥

स्वतन्त्रा या प्रमदा च पूजयित्री तदाऽभवत् ।
सा तु रंभानामस्वर्गोप्सरा जाता मनोहरा ॥२०॥
एवं केदाररुद्रेशं तीर्थे तत्र प्रवर्तते ।
ततः संपूजयेत् तत्र श्वेतकेत्वीश्वरं हरम् ॥२१॥
श्वेतकेतुनृपेणाऽत्र पुरा कृत्वा तपः परम् ।
मुक्तिर्लब्धा तत्र शंभुः श्वेतकेत्वीश्वरोऽभवत् ॥२२॥
अथाऽऽदित्येश्वरं प्रेयात् पूर्वस्यां संस्थितं हरम् ।
अथ शंभुस्त्रिपुरस्य विनाशाय स्वनेत्रतः ॥२३॥
अश्रु मुमोच क्रोधेन स भौमो मंगलोऽभवत् ।
तेन वै पूजितस्तत्र भौमेश्वरोऽभवद्धरः ॥२४॥
एवं नवग्रहतीर्थे तत्र वै वर्तते प्रिये ।
ज्ञानक्रियेच्छाः शक्तयस्तिस्रो नारायणस्य याः ॥२५॥
मंगला च विशाला च चत्वरा ताः स्थिताः सदा ।
तासां तीर्थं परं चात्र प्रभासे शान्तिदायकम् ॥२६॥
विशालाक्षी तथा विष्णोः समुत्पन्ना पुरा युधे ।
दैत्यानां तु विनाशार्थं तत्तीर्थं च प्रभासके ॥२७॥
लक्ष्मि ! साकं त्वया चाहं गतवान् वै पुरा युगे ।
लक्ष्मीतीर्थं तथा कृष्णनारायणस्य तीर्थकम् ॥२८॥
वर्तते सोमसत्क्षेत्रे दर्शनान्मुक्तिदं शुभम् ।
कामतीर्थं रतितीर्थं वर्तते च प्रभासके ॥२९॥
गौरीतीर्थमिषातीर्थे पापहन्तु विभासते ।
नारदस्त्वेकदा चक्रे पुण्डरीकं क्रतुं पुरा ॥३०॥
नारदक्रतुतीर्थं तद् वर्तते तु प्रभासके ।
गौतमोऽपि मुनिस्तत्र पुरा यात्रार्थमागतः ॥३१॥
चातुर्मासं तपश्चक्रे गौतम तीर्थमुच्यते ।
आदौ कृते युगे दैत्यो महान् वै मेघवाहनः ॥३२॥
अभून्महाशरीरः स योजनायतविस्तृतः ।
पादुके द्वे समारुह्य आदिनारायणः स्वयम् ॥३३॥
जघान तं महादैत्यं पादुकातीर्थमुच्यते ।
पादुकया हतो दैत्यस्ताडितया तु वक्षसि ॥३४॥
पादुकासनसंस्थोऽहं कृष्णनारायणः स्वयम् ।
तिष्ठामि सोमके तीर्थे मोक्षदोऽसुरनाशकः ॥३५॥
इति ते कथितं लक्ष्मि ! माहात्म्यं विष्णुदैवतम् ।
अथैकादशरुद्राणां तीर्थानि सन्ति तत्र वै ॥३६॥
अजैकपादहिर्बुध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥३७॥
प्राणोऽपानः समानश्चोदानो व्यानश्च वायवः ।
नागश्च कूर्मः कृकलो देवदत्तो धनंजयः ॥३८॥
आत्मा चेति क्रमाज्जाता रुद्रा ह्येकादशैव ते ।
अमूर्ता मूर्तिमापन्नास्तत्तीर्थं च प्रभासके ॥३९॥
नन्दिनाऽपि तपस्ततं मृत्युञ्जयहरोपरि ।
नन्दितीर्थं तु तत्तत्र वर्तते बहुपुण्यदम् ॥४०॥
धेनूर्भूत्वा पुरा पृथ्वी तीर्थार्थं तत्र चागता ।
सोमेशं स्नपयामास सती दुग्धस्य धारया ॥४१॥
ततः स्नात्वा विलीनाऽभूद् यत्र गोतीर्थमेव तत् ।
पापतापहरं जातं पृथिव्या योगतः प्रियम् ॥४२॥
अथ पूर्वे समुद्रेऽभूद् विरावो नाम राक्षसः ।
मनुष्यादो हतस्तत्र सुदर्शनेन विष्णुना ॥४३॥
तदिदं पश्चिमे जातं विरावलयनं स्थलम् ।
विष्णुचक्रप्रपूतं च तीर्थं परमशोभनम् ॥४४॥
चक्रपाणिरहं पूज्यस्तत्र विरावलीनके ।
पूजको मे परंधाम यास्यत्येव न संशयः ॥४५॥
अथ द्वादशसूर्याश्च विष्णोर्दर्शनहेतवे ।
प्रभासं प्रथमं यान्ति ततोऽश्वपट्टसारसम् ॥४६॥
क्षेत्रं यान्ति दर्शनार्थं कृष्णनारायणस्य ते ।
विष्णुर्धाता भगः पूषा मैत्रेन्द्रौ वरुणोऽर्यमा ॥४७॥
विवस्ववानंशुमाँस्त्वष्टा पर्जन्यो द्वादशैव ते ।
स्वस्वमासान्तके काले स्नात्वा यान्ति प्रभासके ॥४८॥
विष्णुः संस्नाति वै चैत्रे वैशाखे त्वर्यमा तथा ।
विवस्वान् ज्येष्ठमासेऽथ चाषाढे त्वंशुमाँस्तथा ॥४९॥
पर्जन्यः श्रावणे मासि भाद्रे तु वरुणस्तथा ।
इन्द्रश्चाश्वयुजि मासि धाता संस्नाति कार्तिके ॥५०॥
मार्गशीर्षे तथा मित्रः पूषा पौषे प्रयाति च ।
माघे भगस्तथा त्वष्टा स्नाति तत्र च फाल्गुने ॥५१॥
एते वै नैजमासान्ते तप्त्वा स्नात्वा प्रयान्ति च ।
इत्यादित्यस्थलं तीर्थं प्रभासे वर्तते शुभम् ॥५२॥
अथाऽष्टवर्षको ब्रह्मा सोमनाथस्य तूत्सवे ।
आगतोऽभूत् प्रतिष्ठायां पूर्वस्यां तस्य चासनम् ॥५३॥
ब्रह्मतीर्थं तु तत्प्रोक्तं स्नानात्पापविनाशकम् ।
ब्रह्माणमष्टवर्षं च रथे संस्थाप्य शोभिते ॥५४॥
सावित्रीसहितं मासे कार्तिके पूर्णिमादिने ।
वाहयेत् कारयेद् यात्रां सोमनाथं प्रति ध्रुवम् ॥५५॥
पूजयेद् भक्तिभावेन षोडशाद्युपचारकैः ।
रथं तु कर्षयेत् तस्य चतुर्मुखस्य सर्वथा ॥५६॥
पुनः संस्थापयेत्तस्य मन्दिरे वाद्यनर्तनैः ।
राष्ट्रस्य श्रेयमन्विच्छन् रथयात्रां प्रकारयेत् ॥५७॥

अहं लक्ष्मि ! कथयामि यत्र यत्र पितामहः ।
वर्तते भूतले सृष्टौ कल्पे कल्पान्तरेऽपि वा ॥५८॥
कालेनाऽस्तं स्थलं चापि स्मरणीयं सुखप्रदम् ।
पुष्करे स सुरश्रेष्ठो गयायां प्रपितामहः ॥५९॥
वेदगर्भः कान्यकुब्जे भृगुकच्छे चतुर्मुखः ।
सृष्टिकर्ता च कौबेर्या नन्दिग्रामे बृहस्पतिः ॥६०॥
अष्टवर्षः प्रभासे च काश्यां सुरप्रियो हि सः ।
चतुर्वेदो द्वारिकायां वैदिशे भुवनाधिपः ॥६१॥
पौण्ड्रके पुण्डरीकाक्षः पीताक्षो हस्तिनापुरे ।
विजयाख्यो जयन्त्यां स जगन्नाथे जयन्तकः ॥६२॥
वाद्यदेशे पद्महस्तस्तमोलौ च तमोपहाः ।
अहिच्छत्रे जनानन्दः काञ्च्यां जनप्रियो ह्यजः ॥६३॥
कर्णाटके च वै ब्रह्मा ऋष्यशृंगे मुनीश्वरः ।
श्रीकण्ठे श्रीनिवासाख्यः कामरूपे शुभाकरः ॥६४॥
उड्डीसायां देवकर्ता स्रष्टा जालन्धरे तथा ।
मल्लिकायां च स विष्णुर्महेन्द्रादौ तु भार्गवः ॥६५॥
गोहस्ते स्थविरो ब्रह्मा उज्जयिन्यां पितामहः ।
कौशाम्ब्यां च महादेवः साकेतेऽर्कपितामहः ॥६६॥
चित्रकूटे विरञ्चिश्च वन्ध्ये वाराहविश्वसृट् ।
हरिद्वारे सुरेशश्च हिमाद्रौ हंसवाहनः ॥६७॥
हैहिकायां वेदहस्तोऽर्बुदाद्रौ पद्महस्तकः ।
वृन्दावने पद्मनेत्रो नैमिषे कुशहस्तकः ॥६८॥
गोपक्षेत्रे गोचरोऽयं सुचन्द्रो यमुनातटे ।
गंगातीरे पद्मभूश्च जनस्थाने जलोद्भवः ॥६९॥
दक्षिणे सेतुपालश्च उत्तरे हंसवाहनः ।
अर्बुदे वासकृद्ब्रह्मा उत्कले नारदाधिपः ॥७०॥
अश्वपट्टसरस्तीरे परमेष्ठी पितामहः ।
प्रयागे च यजुर्नाथः स्वयंभूः रैवताचले ॥७१॥
कच्छे नारायणमधुर्ब्रह्मवाहे असुप्रियः ।
अंकुलके ब्रह्मगर्भो विदर्भायां द्विजप्रियः ॥७२॥
नारायणर्षिर्गोमन्ते इन्द्रप्रस्थे दुरासदः ।
सुदर्शनश्च पम्पायां सुरूपे राष्ट्रवर्धनः ॥७३॥
विरजायां महारूपो देवाध्यक्षः समस्थले ।
कदम्बे केल्लनाध्यक्षः सुपीठे जलदेश्वरः ॥७४॥
कैलासे देवगंगाभ्रः श्रीशैले च त्रिनेत्रधृक् ।
त्र्यम्बके त्रिपुरारिश्च नैमिषे चक्रधृक् तथा ॥७५॥
शृंगवेरपुरे शूरो नन्दिपुर्यां विरूपकः ।
गौतमेशः स्वच्छपादे माल्यवान् हास्तिने पुरे ॥७६॥

वाचिक्षेत्रे द्विजेशोऽयं स्वर्गे दिवेश्वरस्तथा ।
भूतिकायां पुरेशश्च चन्द्रायां हंसवाहनः ॥७७॥
चम्पायां गारुडो ब्रह्मा महायक्षो महोदये ।
सुयज्ञः पूजकारण्ये धर्मारण्ये वृषात्मकः ॥७८॥
पूर्वदेशे शुक्लवर्णो विभावर्यां सुपद्मजः ।
देवदारुवने केशी मातृभूमौ विनायकः ॥७९॥
अलकायां धनेशेशस्त्रिकुटे योगिराडजः ।
पाताले नागभूर्ब्रह्मा कोविदारे युगादिकृत् ॥८०॥
स्त्रीराज्ये सुरताध्यक्षः सः पौर्णाद्रौ प्रभोगधृक् ।
शाल्मलौ तक्षकेशश्च अम्बिष्ठायां सुदर्शकः ॥८१॥
नरवीथ्यां महावीरः कान्तारे दुर्गनाशकः ।
पद्मावत्यां पद्मग्रहो गगने मृगरूपधृक् ॥८२॥
समुद्रे मेघवाहश्च रणेषु क्षारभूः सदा ।
चक्रेषु मूलबीजश्च ललाटे च गुरुस्तथा ॥८३॥
सत्यलोके प्रपितादिर्दर्भस्तृणेषु वै तथा ।
यज्ञेषु मुख्यविप्रश्च वैराजे कमलोद्भवः ।
मेरौ चाजस्वरूपश्च पितृलोके च पितृकः ॥८४॥
चमत्कारपुरे छिन्नशिराः कुरौ च वाजपः ।
भाग्यदेवेषु वेधाश्च विधाता सृष्टिकूटके ॥८५॥
शास्त्रेषु वैधरूपश्चाष्टोत्तरशतरूपकः ।
ब्रह्म वै वर्तते सृष्टौ जनकः परमेश्वरः ॥८६॥
प्रभासे बालरूपं तं पूजयेत् परमेष्ठिनम् ।
अष्टोत्तरशतविश्वसृजां पूजाफलं भवेत् ॥८७॥
आग्नेयं तु यदा ऋक्षं कार्तिक्यां चेद् भवेत् क्वचित् ।
प्राजापत्यं भवेच्चेद्वा सा तिथिस्तत्र पुण्यदा ॥८८॥
विशाखासु यदा सूर्यः कृत्तिकासु च चन्द्रमाः ।
स योगः पद्मको नाम प्रभासे कार्य एव सः ॥८९॥
अथ लक्ष्मि ! शृणु चान्यद् दक्षो धर्माय कन्यकाः ।
पुरा दश ददौ तासामेका विश्वा तु नामतः ॥९०॥
सा धर्मात्तु महाविश्वा चाष्टावजनयत् सुतान् ।
आयो भवश्च सामश्च धरश्चैव नलोऽनिलः ॥९१॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ वृषात्मजाः ।
तथा मध्ये सप्तमश्च पुत्रेच्छया प्रभासकम् ॥९२॥
समाययौ प्रत्यूषः स तेपे वर्षशतं परम् ।
सोमनाथः प्रसन्नः सन् सुतं तस्मै हि देवलम् ॥९३॥
ददौ प्रत्यूषकस्तत्र यल्लिंगं समपूजयत् ।
प्रत्यूषेश्वर इत्युक्तो महादेवः सुतप्रदः ॥९४॥

अथाऽनिलोऽपि तत्रैवाऽऽराधयामास शंकरम् ।
मनोजवेति विख्यातं तस्मै चापि सुतं ददौ ॥९५॥
अनिलेश्वर इत्येवं ख्यातिं जगाम शंकरः ।
प्रभासेन तथा लिंगं प्रभासेश्वरमाहितम् ॥९६॥
बृहस्पतेस्तु भगिनी भुवना तस्य कामिनी ।
विश्वकर्माऽभवत्तस्यां सुतः प्रभासतो बली ॥९७॥
प्रभासेश्वरसंज्ञः स महादेवोऽभवत् खलु ।
प्रभासेन स्थापितो वै फाल्गुने तामसे दले ॥९८॥
त्रयोदश्यां शिवरात्रौ तीर्थे तत्परमं ह्यभूत् ।
अथ तत्र महातीर्थं वामनस्वामिनामकम् ॥९९॥
बलिं बध्वा सर्वराज्यं याचित्वा बलिखातके ।
यत्र पादं प्रथमं च न्यस्तं तत्तीर्थमुत्तमम् ॥१००॥
विष्णुतीर्थमितिख्यातं वर्तते सागरान्तिके ।
विष्णुना विहतो यत्र पुरा शंखासुरस्तटे ॥१०१॥
शंखतीर्थं हरेर्योगाद्वर्तते ध्वानकारकम् ।
वीरभद्रेश्वरं चापि तीर्थं तत्रास्ति शांकरम् ॥१०२॥
अथैकदा त्वनादिश्रीकृष्णनारायणः स्वयम् ।
बहुगोपीसमायुक्तोऽश्वपट्टसरसो ययौ ॥१०३॥
प्रभासं परमं क्षेत्रं रन्तुं रैवतके तदा ।
कृष्णनारायणेशं च गोपीश्वरं द्वितीयकम् ॥१०४॥
बाणं संस्थापितं तेन शुभ्रं तत्तीर्थमुत्तमम् ।
अथैकदा चन्द्रकला आययुः षोडशैव ताः ॥१०५॥
कलेश्वरं परं तीर्थं चक्रुः स्नात्वा प्रभासके ।
लम्बिनी चन्द्रिका कान्ता कूटा शान्ता महोदया ॥१०६॥
भीषणी नन्दिनी चैव सुपर्णा विमलाऽक्षया ।
शुभदा शोभना पुण्या हंसा सीता कलाः क्रमात् ॥१०७॥
कलादित्यः स्थापितश्च सूर्योऽपि तीर्थमाचरत् ।
अथैकदा चतुष्षष्टियोगिन्यस्तत्र संययुः ॥१०८॥
रैवताचलपश्चिमयोगिन्यद्रित एव ताः ।
योगिनीश्वरमेवैताः स्थापयामासुरीश्वरम् ॥१०९॥
तासां नामानि वै लक्ष्मि ! शृणु याः शंकरप्रियाः ।
आदौ मुख्या महालक्ष्मीर्नन्दा क्षेमकरी तथा ॥११०॥
शिवदूती महाभद्रा भ्रामरी चन्द्रमण्डला ।
रेवती हरसिद्धिश्च दुर्गा विषमलोचना ॥१११॥
सहजा कुलजा कुब्जा मायावी शांभवी क्रिया ।
आद्या सर्वगता शुद्धा भावमान्या मनोतिगा ॥११२॥
विद्याऽविद्या महामाया सुषुम्णा सर्वमंगला ।
ओंकारात्मा महादेवी वेदार्थजननी शिवा ॥११३॥
पुराणाऽऽन्वीक्षिकी दीक्षा चामुण्डा शंकरप्रिया ।
ब्राह्मी शान्तिकरी गौरी ब्रह्मण्या ब्राह्मणप्रिया ॥११४॥
भद्रा भगवती कृष्णा ग्रहनक्षत्रमालिनी ।
त्रिपुरा त्वरिता नित्या सांख्या कुण्डलिनी ध्रुवा ॥११५॥
कल्याणी शोभना नित्या निष्कला परमा कला ।
योगिनी योगसद्भावा योगगम्या गुहाशया ॥११६॥
कात्यायनी उमा शर्वा अपर्णा ता हरस्त्रियः ।
युगान्तरे तथाऽन्याश्चोपासनाबलतः प्रिया ॥११७॥
योगिन्योऽपि प्रजायन्ते कोटिशः शंकरप्रियाः ।
एतासां सोमनाथस्य सन्निधौ तीर्थमुत्तमम् ॥११८॥
वर्तते पापनाशार्थं पावनं सुखदं सदा ।
एतासां पूजनं कार्यमष्टकासु सदा जनैः ॥११९॥
देवत्वं सात्त्विका यान्ति सात्त्विकीं भक्तिमास्थिताः ।
पठनाच्छ्रवणाच्चापि भुक्तिमुक्तिप्रदं शुभम् ॥१२०॥
माहात्म्यं सोमतीर्थस्य प्रभासस्य च ते पुरः ।
कथितं यच्छंकरोक्तं पार्वत्यै तु प्रभासके ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽनेकप्रसिद्धतीर्थानि, ब्रह्मा भिन्नस्थलेषु भिन्नो भिन्नो वर्णितः, वसवोऽष्टौ, सूर्या रुद्राः चतुःषष्टियोगिन्यश्च कथिता इतिनिरूपणनामाऽष्टात्रिंशदधिकपञ्चशततमोऽध्यायः ॥ ५३८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! तथाऽन्यानि तीर्थानि कथयामि ते ।
यान्युक्तानि महादेव्यै महादेवेन वै तदा ॥ १ ॥
वामदेवस्य सावर्णेरघोरस्य तथा परम् ।
कपिलस्य शुभं तीर्थं वर्तते तु प्रभासके ॥ २ ॥
तथा श्रीमुखसंज्ञं च वनं लक्ष्म्या विराजते ।
यत्र वै वैष्णवा योगिसिद्धा बसन्ति सर्वदा ॥ ३ ॥
सगरेण पुराऽऽदित्यः स्थापितो यत्र भास्करः ।
सागरादित्यतीर्थं तद् विद्यते तु प्रभासके ॥ ४ ॥
अन्त्यजस्य सुता चाऽक्षमालाऽभूद् युवती पुरा ।
पूर्वजन्मनि शूद्रा सा रजस्वला हि शंकरम् ॥ ५ ॥
पस्पर्श तेन दोषेण कन्याऽन्त्यजस्य चाऽभवत् ।
वसिष्ठेन तपोयोगाद् गृहीता जनकार्पिता ॥ ६ ॥
बहुवर्षं पुरा देवो न ववर्ष तदा तु ते ।
हिमभूमौ ददस्वाऽन्नं समयाचन्त चान्त्यजम् ॥ ७ ॥

तेन पुत्र्या सहान्नं वै दत्तं तदा वसिष्ठकः ।
आपद्धर्मं समालोच्योवाच तत्राऽन्त्यजं यथा ॥ ८ ॥
जीवरक्षार्थमाग्रह्णन् नहि पापेन लिप्यते ।
अजीगर्तः सुतं हन्तुमुपासर्पद् बुभुक्षितः ॥ ९ ॥
भारद्वाजः क्षुधार्तस्तु उपजग्राह गाः पुरा ।
क्षुधार्तो ह्यभ्यगाद् गां तु विश्वामित्रोऽपि वै पुरा ॥१०॥
इत्युक्त्वा तामक्षमालां जग्राह स वसिष्ठकः ।
अन्नं भुक्त्वा चाययुस्ते प्रभासे त्वब्धिसन्निधौ ॥११॥
अक्षमाला तपश्चक्रेऽरुन्धती सा व्यजायत ।
तयाऽक्षमालिकेशश्च स्थापितः शंकरस्तदा ॥१२॥
अथ तत्र सिद्धलक्ष्मीतीर्थं वै वर्तते शुभम् ।
तथा तीर्थं महाकालीकृतं चापि विराजते ॥१३॥
पुष्करावर्तकानाम्नी नदी कमलदा शुभा ।
वर्तते शुभतीर्थं च प्रभासे सद्गतिप्रदम् ॥१४॥
अथ मित्राभिधः कश्चित् कायस्थोऽभूद् धरातले ।
तस्य पुत्रोऽभवच्चित्रश्चित्रा कन्याऽभवत्तथा ॥१५॥
पित्रोर्मृत्यौ बालकौ तौ प्रभासं ययतुस्ततः ।
तुष्टुवतुस्तत्र सूर्यं तपसा बहुवासरान् ॥१६॥
चित्रस्य तु प्रसन्नोऽभूत् सूर्यः प्राह वरं वृणु ।
स वव्रे सर्वकार्येषु प्रौढत्वं रुचिमत्त्वकम् ॥१७॥
तथास्त्विति रविः प्राह धर्मराजश्च तं तथा ।
कुशलं तु परं ज्ञात्वा कृतवान् लेखकं निजम् ॥१८॥
सूर्योऽपि चाऽभवत्तत्र चित्रादित्य इति प्रथः ।
चित्राऽभवद्धर्मराजगृहिणी तपसः फलात् ॥१९॥
चित्रेश्वरीति सा तत्र देवी संराजते तथा ।
तीर्थं चापि शुभं जातं रोगदोषनिवारकम् ॥२०॥
अथात्र शीतला देवी वर्तते दुःखनाशिनी ।
विस्फोटकप्रशान्त्यर्थं मयूरॉस्तत्र कूर्दयेत् ॥२१॥
विस्फोटं चर्चिका चापि बालानां प्रशमो भवेत् ।
कर्पूरं कुंकुमं चापि चन्दनं कुसुमानि च ॥२२॥
नवम्यां शुक्लपक्षे तां नैवेद्यं घृतपायसम् ।
मालां बिल्वमयीं दद्याद् रोगा नश्यन्ति दूरतः ॥२३॥
शीतलातीर्थमेवैतदुक्तं बालसुखादिकृत् ।
चित्रा या यमपत्नी सा चित्रपथा सरिद्वरा ॥२४॥
द्वितीयेन स्वरूपेण जाता प्रभासके स्थले ।
तद्वै तीर्थं पापतापप्रशान्त्यर्थं समुच्यते ॥२५॥
धर्मराजकृतं तीर्थं प्रभासे वर्तते तथा ।
ब्रह्मणा निर्मितः कुण्डः कायाकल्पकरोऽस्ति वै ॥२६॥
नारदेन कृतं तीर्थं विद्यते स्वरभासितम् ।
यज्ञकुण्डो महत्तीर्थं ब्रह्मादिकसुरैः कृतम् ॥२७॥
हिरण्यायास्तटे स्वर्णदानादि पुण्यदं हि तत् ।
वैनतेयं तथा तीर्थं सर्पभीतिनिवारकम् ॥२८॥
रैवन्तकं महत्तीर्थं सूर्यपुत्रस्य वर्तते ।
अश्वस्थं तं पूजयित्वा स्वावापद् विनश्यति ॥२९॥
स्वर्गवैद्यकृतं तीर्थं सावित्रीतीर्थमित्यपि ।
तपसा जायमानं तद् विद्यते वै प्रभासके ॥३०॥
तलस्वामीतितीर्थं च उष्णजलान्वितं तथा ।
सिंहारण्ये वर्तते च पावनं स्वर्गदं शुभम् ॥३१॥
शृणु लक्ष्मि ! पुरा तत्र सिंहारण्ये तलोद्भवम् ।
आसीन्महेन्द्रनामा तु दानवस्तपसो बलात् ॥३२॥
जिग्ये देवान् शंकरात् सः प्रार्थयामास संगरम् ।
युयुधे शंकरेणाऽऽदौ ब्रह्माण्डक्षयकारकः ॥३३॥
ततः कोपाच्छिवदेहाज्ज्वाला बह्व्योऽभवँस्तदा ।
तासां मध्ये तलो दग्धो दुद्राव च वनान्तरे ॥३४॥
शिवः सोमेश्वरं गत्वा सुस्थितः स तलस्ततः ।
महेन्द्रं पीडयामास बधान ककुभां पतीन् ॥३५॥
तलो विस्मयमापन्नो हर्षनृत्यमथाऽकरोत् ।
चकम्पे तस्य नृत्येन सर्वं स्थावरजंगमम् ॥३६॥
क्षुभिता गिरयः सर्वे विद्रुतो लवणार्णवः ।
त्रैलोक्यं व्याकुलीभूतं तदा वै लोमशो मुनिः ॥३७॥
प्रभासं तु समागत्य शंकरं प्राह रक्ष नः ।
तलं नाशय देवेश मा चिरं च द्रुतं कुरु ॥३८॥
रुद्र उवाचाऽवध्यो मे तलः पुत्रसमः स्थितः ।
किन्तु उष्णवने रम्ये तप्तोदकसमीपतः ॥३९॥
दुर्वासा वर्तते तं च प्रार्थयध्वं सुरादयः ।
अनादिश्रीकृष्णनारायणो गुप्तप्रयागके ॥४०॥
शत्रुंजयाचले त्वश्वपट्टसंज्ञसरोवरे ।
सौराष्ट्रे महति क्षेत्रे वर्तते भगवान् स्वयम् ॥४१॥
दुर्वाससा स्तूयमानो लोमशादिभिरादरात् ।
देवैः सम्प्रार्थ्यमानश्च तलं विनाशयिष्यति ॥४२॥
कल्पे कल्पे पूर्वभूमौ व्याघ्रारण्ये स्थितः प्रभुः ।
सिंहारण्यगतं दैत्यं तलं हन्ति पुनः पुनः ॥४३॥
एवमुक्तो लोमशः सः उष्णोदकसमीपतः ।
गत्वा दुर्वाससं देवान्नीत्वा कृष्णनरायणम् ॥४४॥
स्वस्थानं पावनं गत्वा प्राह कृष्णनरायणम् ।
भगवन् राक्षसश्चोग्रो हराऽवध्यो हि वर्तते ॥४५॥

भवता नाशनीयः स सुरमानुषदुःखदः ।
अनादिश्रीकृष्णनारायणो गत्वा सचक्रकः ॥४६॥
व्याघ्रारण्ये तलं दृष्ट्वा मुमोच वै सुदर्शनम् ।
तलो दुद्राव च सिंहारण्यमुष्णोदगह्वरम् ॥४७॥
तत्र चक्रेण तु द्वेधाऽभवद् दैत्यो ममार च ।
दुर्वाससा पूजितश्च मार्कण्डेयेन चार्चितः ॥४८॥
कृष्णनारायणः संज्ञां तलस्वामीति चाप यत् ।
तलस्वामी महत् तीर्थं कृष्णनारायणाश्रयम् ॥४९॥
नित्यमुष्णोदककुण्डत्रयमक्षयमस्ति च ।
पापक्षालनकं स्वर्गप्रदं मोक्षप्रदं तथा ॥५०॥
तत्र तीर्थे तु सावित्र्यास्तपःस्थानं प्रविद्यते ।
अथाऽन्यदस्ति तीर्थं च भूतमातृकसंज्ञकम् ॥५१॥
भूतप्रेतगणानां च स्थानानि सन्ति तत्र च ।
भूतानां मातरं तत्र पूजयेद् भयवारिणीम् ॥५२॥
चाक्षुषस्याऽऽन्तरे लक्ष्मि ! पुरा कृतयुगे सती ।
शंकरं संविवाह्यैव रमते स्म च कानने ॥५३॥
पार्वत्यां कामभावेन तृप्तोऽभूच्छंकरस्ततः ।
पार्वती कानने तत्र कैलासे स्नानमाचरत् ॥५४॥
पार्वत्याः स्नानमात्रेण निर्गता जलकर्दमात् ।
मातरो भूतिका भीमा असंख्या रूपवर्जिताः ॥५५॥
कृष्णाः करालवदनाः पिंगाक्ष्यो मुक्तमूर्धजाः ।
कपालमालाभरणा बद्धमुण्डार्धपिण्डिकाः ॥५६॥
कपालखट्वांगधरा मुण्डमालाधरास्तथा ।
द्वीपिचर्माम्बरधरा रणत्किंकिणिमेखलाः ॥५७॥
डिमड्डमरुकारावाश्चित्कारापूरिताम्बराः ।
दशकोट्यः सुसञ्जाताश्चतस्रोऽत्र हि नायिकाः ॥५८॥
रक्तकर्णी महाजिह्वा क्षया च पापकारिणी ।
एतासामन्वये जाता बहवो ब्रह्मराक्षसाः ॥५९॥
श्लेष्मान्तकस्त वृक्षे ते प्रायशश्च वसन्ति ते ।
उत्तालाश्चपलाश्चैते नृत्यन्ति च हसन्ति च ॥६०॥
वृक्षे कण्टकिते रौद्रे वसन्त्यपि वने वने ।
शंकरोऽपि तदा स्नानं चक्रे तज्जलकर्दमात् ॥६१॥
भूता असंख्याः सञ्जाता विकराला भयंकराः ।
द्वौ मुख्यौ तादृशावेव तद्रूपाभरणौ नरौ ॥६२॥
कपालखट्वांगधरौ जातौ चर्मावगुण्ठितौ ।
अनुगम्यमानौ बहुभूतैर्महाभयानकैः ॥६३॥
सिंहशार्दूलादिमुखैर्भीषणस्वरकर्मभिः ।
तौ च क्षुधायुतौ शिवां शिवं तदाहतुर्मुहुः ॥६४॥
भोजनं भोजनं चेति शंभुः प्राह तदा च तौ ।
युवयोर्हस्तसंपर्कान्मांसासृगादि जायताम् ॥६५॥
नक्ताहारविहारौ च दिवास्वप्नावभागिनौ ।
पुत्रवद् रक्षतं लोकान् धर्मं पालयतं सदा ॥६६॥
इत्युक्तौ तौ गणौ भूतमातृनायकसेवितौ ।
एकीभूतौ क्षणेनैव सहोदरौ सहायकौ ॥६७॥
आवयोः खलु शौचेन जातौ वै मलिनौ सदा ।
आभ्यां वासश्च दातव्यो दूरं पश्चिमभूतले ॥६८॥
सिंहारण्ये वने वासो सोमनाथसमीपतः ।
सिंहव्याघ्रपशुक्षेत्रे सौराष्ट्रे जायतामिति ॥६९॥
यत्र कण्टकिनो वृक्षा रूक्षा रणप्रदेशकाः ।
कुड्यादौ चित्रिता यत्र मञ्जर्यश्च भवन्ति वै ॥७०॥
भार्या यत्र पुनर्भूश्च वल्मीकश्च शमी तथा ।
यत्र गृहे नराः पञ्च, यत्र वा स्त्रीत्रयं भवेत् ॥७१॥
यत्र वा गोत्रयं तत्र तद्गृहे वसतिश्च वः ।
अन्धकारे भूविवरे गह्वरे धनपूरिते ॥७२॥
एकच्छागं द्विगर्दभं गोत्रयं पञ्चमाहिषम् ।
षडश्वं वा सप्तगजं तद्गृहे वसतिर्हि वः ॥७३॥
यत्र गृहे च कुद्दालो दात्रकं पेटिका तथा ।
स्थाल्यादिभाजनं यत्र तत्रैवास्ति विशीर्णकम् ॥७४॥
क्षिप्तं स्थले स्थले नास्ति व्यवस्था शुद्धिरित्यपि ।
मुसलोलूखलयोश्च देहल्यां स्त्रीः निषीदति ॥७५॥
शकृन्मूत्रं च यत्रास्ति मलं यत्र च कचरम् ।
लंघ्यन्ते यत्र धान्यानि पक्वापक्वानि वेश्मनि ॥७६॥
लंघ्यन्ते यत्र शास्त्राणि तद्गृहे वसतिर्हि वः ।
मनुष्यास्थि गृहे यस्य सेवतीवल्लिका तथा ॥७७॥
रोहितश्च जटी यत्राऽऽगस्त्यको बन्धुजीवकः ।
कर्णिका च भवेद् यत्र स्थलपद्मं च यत्र वै ॥७८॥
मल्लिका च यत्र हर्म्ये तत्र वै वसतिर्हि वः ।
तालं तमालं भल्लावं चिञ्चावृक्षाश्च यत्र वै ॥७९॥
बकुलः कदलीषण्डं कदम्बः खदिरोऽपि वा ।
न्यग्रोधोऽश्वत्थ आम्र उदुम्बरः पनसस्तथा ॥८०॥
अशोक ओड्रवृक्षश्च तत्र भूतनिवेशनम् ।
देवार्चनं यत्र नास्ति यत्र नास्ति जपादिकम् ॥८१॥
कृष्णभक्तिर्यत्र नास्ति भूतानां वसतिर्हि सा ।
मलिनास्याश्च ये मर्त्या मलिनाम्बरधारिणः ॥८२॥
मलदन्ता गृहस्थाश्च भूतानां वसतिः सदा ।
दीपो नास्ति यत्र गेहे जनो नास्ति समान्तरे ॥८३॥

मलयुक्ता नालिकाद्यास्तत्र भूतादिवेशनम् ।
स्नानहीना नरा नार्यो वसतिर्भवतु ध्रुवम् ॥८४॥
मद्यमांसाशना लोका वासार्हाः सन्तु वः सदा ।
चत्वरे गोचरे ग्रामगोपुराग्रे श्मशानके ॥८५॥
मृतशाविकभूभागे चैत्ये द्रुमे च प्रस्तरे ।
मलभूमौ नालिकादौ भूतानां वसतिः सदा ॥८६॥
मन्त्रमान्त्रिकदेहे च मन्त्रिते च कणे तथा ।
मन्त्रस्य विषये देहे भूतानां वसतिर्भवेत् ॥८७॥
आकस्मिकमृतेर्भूमौ तडागस्य तटेऽनिले ।
दुष्टेऽपवित्रभूमौ च भूतानां वसतिः सदा ॥८८॥
अमायां च चतुर्दश्यां वैशाखे कार्तिके तथा ।
बलिदानां पूजकानां गृहे मा निवसन्तु वै ॥८९॥
नारायण हरे कृष्ण शिव राधे रमापते ।
विष्णो श्रीमत्कृष्णनारायण श्रीकमलापते ॥९०॥
प्रभानाथ महालक्ष्मीपते श्रीमाणिकीपते ।
पार्वतीश्वर पद्मेश मुक्तधामाधिसत्पते ॥९१॥
अक्षरेशेत्यादिरूपं भजनं स्वामिनो हरेः ।
पूजनं यत्र देवानां तत्र मा निवसन्तु वै ॥९२॥
यत्र शुद्धिस्तथा धर्मः कलहो यत्र नास्ति च ।
मालिन्यं यत्र वै नास्ति तत्र मा निवसन्तु वै ॥९३॥
यत्र स्यादान्तरे शुद्धिस्तत्र भूतो न तिष्ठतु ।
उपासनाबलं यत्र भूतमाता न तत्र वै ॥९४॥
वैशाखे शुक्लपक्षे च पञ्चदशदिनेष्वपि ।
भूतमातुः प्रपूजा च कर्तव्या प्रोक्षणीयकैः ॥९५॥
प्रोक्षणैर्जलसेचैश्च ग्रीवां सिन्दूरकैस्तथा ।
पुष्पैर्धूपैरर्चयेच्च बलिं ददेद् यथोचितम् ॥९६॥
माषादिकृष्णभोज्यं वै तेन तुष्टः प्रजापते ।
न शाकिन्यो गृहे तस्य न पिशाचा न राक्षसाः ॥९७॥
न भूताद्याः पीडयन्ति वंशः सुखं विवर्धते ।
भोजयेत् क्षीरसंयाव कृसरैः पूयपायसैः ॥९८॥
तेन पुत्रपशुसमृद्धिं शरीरारोग्यमाप्नुयात् ।
एकादश्यां नवम्यां च प्रक्षाल्य कुड्यकं ततः ॥९९॥
मुखबिम्बानि चित्राणि कारयेद् रक्तकज्जलैः ।
मातॄणां चण्डिकानां च राक्षसीनां तथैव च ॥१००॥
भूतप्रेतपिशाचानां शाकिनीनां तथैव च ।
मुखानि कारयेत् तत्र हावभावयुतानि च ॥१०१॥
अमायां पूजयेत्तानि रात्रौ दीपेन संयुतः ।
मस्तके च निजे धृत्वा सुहृन्मित्रसमन्वितः ॥१०२॥

ग्रामान्ते च श्मशानान्ते वीरभ्रमणमाचरेत् ।
स दीपः सर्वभूतानां साधको बलवान् भवेत् ॥१०३॥
नित्यं च भ्रामयेद् दीपं रात्रौ ग्रामे श्मशानके ।
पञ्चदश्यां प्रकुर्वीत भूतमातुर्महोत्सवम् ॥१०४॥
पूजयेद्भोजयेन्नमेत् क्षमयित्वा गृहं व्रजेत् ।
एवं पूजाप्रकर्तुश्च भूतविघ्नो न जायते ॥१०५॥
अथ तस्या भूतमातुः शरीरात् पञ्चकोटयः ।
पिशाचाः स्वेदबिन्दुभ्यो जाताः सर्वे भयानकाः ॥१०६॥
धमनीसन्तताः शुष्काः श्मश्रूलाश्चर्मवाससः ।
उलूखलाभरणाश्च शूर्पच्छत्राः खरस्वराः ॥१०७॥
पाणिपात्राः शिरोहारा बुभुक्षिताः कुरूपिणः ।
नखज्वालितकेशेभ्यश्चांगारानुद्गिरन्ति ते ॥१०८॥
आकर्णदारितास्याश्च लम्बभ्रूस्थूलनासिकाः ।
पृष्ठतः पाणिपादाश्च पृष्ठगाश्च विपादगाः ॥१०९॥
आक्रोशन्तश्च दीनास्याः सूतिकागृहवासनाः ।
तैः खाद्यं चार्थितं शंभोः शंभुर्वरं ददौ तदा ॥११०॥
अन्तर्धानं प्रजास्वेव कामरूपत्वमित्यपि ।
उभयोः सन्ध्ययोश्चारो भग्नगृहेषु चासनम् ॥१११॥
अनाचारगृहाण्येव भग्नान्यायतनानि च ।
राजमार्गोपरथ्याश्च चत्वराणि च वेदिकाः ॥११२॥
उपलाश्च तथा कोणान् रथ्यानां निर्गमांस्तथा ।
चैत्यवृक्षादिकांश्चापि शृंगाणि चोच्छ्रयाँस्तथा ॥११३॥
स्थानानि च पिशाचानां निवासाय ददौ हरः ।
अधर्मिकान् जनाँश्चापि मद्यमांसाशिनस्तथा ॥११४॥
मलमूत्रभरांश्चापि निवासाय ददौ हरः ।
तेषां विघ्नविनाशाय बलिं कुर्याद् विचक्षणः ॥११५॥
पूपैर्हरिद्रकृशरैर्मधुना तिलचूर्णकैः ।
ओदनं साऽऽसवं दद्यात् तिलभक्तं गुडौदनम् ॥११६॥
कृष्णानि चैव वासांसि धूम्राः सुमनसस्तथा ।
एवं कृत्वा च सन्तुष्टा विघ्नान् हरन्ति सर्वदा ॥११७॥
एवं हरेण भूतानां पिशाचानां च मातरः ।
सर्वपुत्रगणोपेताः प्रेषिताश्च प्रभासकम् ॥११८॥
सिंहारण्यं निवासार्थं दत्तं वै शतयोजनम् ।
यत्र खाद्यं मिलेत्तेषां पश्चिमे सागरे सदा ॥११९॥
ते कैलासं परित्यज्य सिंहारण्यं समागताः ।
उपद्रवानकुर्वंश्च प्रजास्वागत्य वै पुनः ॥१२०॥
अनादिश्रीकृष्णनारायणो हन्तुं च ताँस्तदा ।
सुदर्शनं मुमोचाऽत्राऽरण्ये दुद्रुवुरम्बरे ॥१२१॥

भूताः पिशाचकाद्याश्च मातरश्चेति पश्चिमम् ।
पारेसमुद्रं जग्मुस्ते कृष्णवर्णाः पिशाचकाः ॥१२२॥
कद्रूपा अब्रिक्तदेशे वसतिं तत्र चक्रिरे ।
कोटिशस्ते ततो जाताः कामरूपा हि मानवाः ॥१२३॥
ये तु चक्रेन निहतास्ते देवा मलिनास्तदा ।
सिंहारण्ये निवसन्तो देहान्तराणि जगृहुः ॥१२४॥
सोमनाथस्य शंभोस्ते शिष्याः प्रजाः सुपुत्रकाः ।
पुत्र्यः सुताश्च शिष्याश्च सिंहारण्ये वसन्ति वै ॥१२५॥
उष्णोदकस्य कुण्डस्याऽभितोऽद्रिषु वनेषु च ।
तामसानां कृते लक्ष्मि तामसा देवताः सदा ॥१२६॥
तीर्थरूपा भवन्त्येव स्वभावगुणभावनैः ।
तेषां तीर्थं महत्त्वद्वै सिंहाऽरण्येऽस्ति तामसम् ॥१२७॥
भूतमातुः पिशाचानां भूतानां च निवासनम् ।
चक्रेण सीदमानाः संसीदमाना हि जातयः ॥१२८॥
पश्चिमायां क्षितौ जाताः पिशाचसदृशास्तु ते ।
इत्येवं कथितं देव्यै शंभुना च प्रभासके ॥१२९॥
कैलासजन्यं वृत्तान्तं तीर्थमिषेण सोमके ।
मया ते कथितं लक्ष्मि ! तलस्वामी त्वहं पुरा ॥१३०॥
तलनाशार्थमभवं तथाऽन्यच्छृणु पावनम् ।
पठनाच्छ्रवणाच्चास्य पापहानिः प्रजायते ॥१३१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने प्रभासक्षेत्रे तीर्थव्रातवर्णनेऽरुन्धतीपूर्वजन्मवृत्तान्तः, चित्रायाः पूर्वजन्माख्यानं, शीतलायास्तीर्थं, तलस्वामितीर्थाख्यानं, भूतमातृतीर्थाख्यानं, भूतानां वासस्थानानि, अब्रिक्तदेशादौ सीदमानानां वासः, इत्यादिनिरूपणनामैकोनचत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥५३९॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! शंभुर्देव्यै तथोत्तरम् ।
तीर्थं च यद् यदुवाच कथयामि क्रमात्तथा ॥ १ ॥
पुष्पदन्तेश्वरं तीर्थं तथा माण्डव्यतीर्थकम् ।
तपसो वै तयोः स्थानं माण्डव्यपुष्पदन्तयोः ॥ २ ॥
पञ्चप्रभासान् संपश्येन्मुख्यं प्रभासकं तटे ।
दक्षिणे चाप्प्रभासं च पश्चिमं च प्रभासकम् ॥ ३ ॥
उत्तरं च प्रभासं च पूर्वं प्रभासमित्यपि ।
यमो वरुणो धनदो महेन्द्रश्चेति सर्वतः ॥ ४ ॥
भासयन्ति प्रभासं च ततश्चतुर्विधं हि तत् ।
जामदग्न्येश्वरं तीर्थं तथा तत्र हि वर्तते ॥ ५ ॥
कृतस्मरं महत्तीर्थं पर्वतात्मकमेव तत् ।
स्मरं दग्ध्वा पुनः कृत्वा पार्वत्या युयुजे हरः ॥ ६ ॥
यत्र कामः शंकरेण कृतः सजीवनः पुरा ।
कृतस्मरः स विज्ञेयः पर्वतः शंकराश्रितः ॥ ७ ॥
कामकुण्डश्च तत्रास्ति यत्र कामो हि विद्यते ।
स्नात्वा तत्र त्रयोदश्यां सुभगो रूपवान् भवेत् ॥ ८ ॥
पुण्यं सारस्वतं तीर्थं येन जीवन्ति सोमके ।
अन्यानि सर्वतीर्थानि शुभे सामुद्रसंगमे ॥ ९ ॥
पुण्यकृल्लभते तत्र वैशाखीं सोमसंयुताम् ।
अमां सोमयुतां चापि किं तदा पर्वकोटिभिः ॥१०॥
बिल्वपत्रं शमीपत्रं कर्णिकां मालतीं तथा ।
धत्तूरकं चम्पकं चाऽशोकं श्रीफलमक्षतान् ॥११॥
शर्करां चन्दनं मिष्टं कंकणं संगमेऽर्पयेत् ।
सरस्वत्यां मनुष्यैश्च ध्यातव्यो वै हरिर्हरः ॥१२॥
तस्मै देया सुपूजा च मुक्तिदा भुक्तिदा च सा ।
तत्राऽस्थि मृतदेहस्य क्षेपणीयं विमुक्तये ॥१३॥
यावदस्थि मनुष्यस्य तिष्ठेत् सारस्वते जले ।
तावद्वर्षसहस्राणि स्वर्गे लोके स तिष्ठति ॥१४॥
स्वर्गनिःश्रेणिसंभूता प्रभासस्था सरस्वती ।
दर्शनेनाऽऽचमनेन राजसूयफलप्रदा ॥१५॥
तत्र श्राद्धेन पितरो मुक्तिं यान्ति सुतर्पिताः ।
अह्नो मुहूर्ता विख्याताः पञ्चदश च तत्र च ॥१६॥
प्रातःकाले मुहूर्तांस्त्रीन् संगवं त्रिमुहूर्तकान् ।
मध्याह्नं च मुहूर्तांस्त्रीनपराह्णं तथैव त्रीन् ॥१७॥
सायाह्नं च मुहूर्तांस्त्रीन् विद्यात्तत्र च श्राद्धकृत् ।
सायाह्नो राक्षसी वेला तत्र श्राद्धं न कारयेत् ॥१८॥
दिवाऽष्टमो मुहूर्तो यः सः कालः कुतुपः स्मृतः ।
स चाऽनन्तफलदाता मध्याह्नः कुतुपात्मकः ॥१९॥
पापं च कुत्सितं तस्मात् कुतोः पालनं रक्षणम् ।
कुतुपः स समादिष्टः कुतुपा अष्टरूपिणः ॥२०॥
मध्याह्नो गेण्डुकपात्रं रजतं गोघृतं तथा ।
दर्भास्तिलानि धेनुश्च दौहित्रः कुतुपाश्च ते ॥२१॥
ऊर्ध्वं मुहूर्तात्कुतुपाद् यन्मुहूर्तं चतुष्टयम् ।
मुहूर्तपञ्चकं चैव स्वधाभवनमिष्यते ॥२२॥
विष्णोर्देहात्समुत्पन्नाः कुशाः कृष्णतिलास्तथा ।
तिलोदकाऽञ्जलिर्देया सदर्भा स्थलवर्तिभिः ॥२३॥
त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतुपस्तिलाः ।
दौहित्रो गेण्डुकः पशुर्ललाटे शृंगवान् हि सः ॥२४॥

तस्य शृंगस्य यत्पात्रं तद् दौहित्रमिति स्मृतम् ।
क्षीरिणी या सवत्सा गौस्तत्क्षीराद् यद्घृतं भवेत् ॥२५॥
तद् दौहित्रमिति प्रोक्तं दैवे पैत्र्ये च कर्मणि ।
दुहितुश्च सुतः श्रेष्ठो दौहित्रः श्राद्धभोजने ॥२६॥
दर्भाग्रं दैवमित्युक्तं सतिलाग्रं तु पैतृकम् ।
तत्राऽवलम्बिनो ये तु ते कुशाः कुतुपाः स्मृताः ॥२७॥
शुक्लन्यायार्जितद्रव्यैस्तृप्यन्ति पितरः सुराः ।
अन्यायार्जितद्रव्यैश्च तृप्यन्ति पुष्कसादिजाः ॥२८॥
भूक्षिप्तान्नेन च तृप्ता भवन्ति च पिशाचजाः ।
स्नानवस्त्रजलेनापि तृप्यन्ति नीचयोनिजाः ॥२९॥
सुगन्धाम्बुकणैस्तृप्ता भवन्ति देवतांगताः ।
पिण्डोद्धृतेऽन्नकणकैस्तृप्यन्ति च विपद्भवाः ॥३०॥
भुक्त्वा चाऽऽचमनेनैव तृप्यन्ति पशुयोनिजाः ।
विप्राः श्राद्धे श्रोत्रियश्च योगी सामगवैदिकौ ॥३१॥
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडंगवित् ।
दौहित्रकश्च जामाता स्वस्रीयश्चोत्तमस्तथा ॥३२॥
पञ्चाग्निकर्मनिष्ठश्च तपोनिष्ठोऽथ मातुलः ।
मातुश्च पितरश्चैव शिष्यसम्बन्धिबान्धवाः ॥३३॥
वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः ।
चिरायुश्चैव विज्ञेयाः सत्पुरुषाश्च पावनाः ॥३४॥
भागिनेयं विशेषेण तथा बन्धुगणानपि ।
नातिक्रमेन्नरश्चैतान् मूर्खानपि च पद्मजे ॥३५॥
जलं दद्यात् फलं दद्याद् दद्यात् पिण्डाँश्च पायसम् ।
मिष्टं च शर्करां दद्याद् दद्यादिष्टतमं सदा ॥३६॥
द्रव्यपात्रादिलाभे च दद्यात् तृप्तिकरं हि तत् ।
पुण्याहेषु प्रदद्याच्च नित्ये नैमित्तिके तथा ॥३७॥
निर्णीतदिवसे दद्याद् वत्सरे वत्सरे ध्रुवम् ।
अमायां सर्वथा दद्यात् प्राप्नुवन्ति ध्रुवं मृताः ॥३८॥
महादानानि च दद्यान्नारायणालये तथा ।
जलात्तीरं यावदार्द्रं यद्वा हस्तचतुष्टयम् ॥३९॥
तत्र नारायणः स्वामी नान्यालयः स उच्यते ।
गावः सुवर्णं रजतं रत्नानि च सरस्वती ॥४०॥
तिलं कन्या गजोऽश्वश्च शय्या वस्त्रं तथा मही ।
धान्यं पयश्च छत्रं च गृहं दानानि षोडश ॥४१॥
सत्यं दमस्तथा शौचं सन्तोषो नैष्ठ्यमार्जवम् ।
ज्ञानं शमो दया दानमेतत्पात्रं प्रशस्यते ॥४२॥
अतिथिप्रियशान्ताय सीदते चाहिताग्नये ।
श्रोत्रियाय तथैकाऽपि गौर्देया मोक्षदा हि सा ॥४३॥

बहुभ्यो न प्रदेयानि गौर्गृहं शरणं स्त्रियः ।
प्रासादा यत्र सौवर्णा रूप्यरत्नौज्ज्वलाः शुभाः ॥४४॥
वराश्चाप्सरसो यत्र तत्र गच्छन्ति गोप्रदाः ।
षष्टिवर्षसहस्राणि स्वर्गे वसति भूमिदः ॥४५॥
एवं सारस्वतं तीर्थं कृत्वा मार्कण्डतीर्थकम् ।
यायाद् यत्र स्थितो दीर्घं युगानां तपसे मुनिः ॥४६॥
ततो यायाद् यत्र कृष्णकुलनाशस्थली मता ।
गोलोकधामदा दिव्या चाग्र्युगरणांगणा ॥४७॥
यदा रणांगणो जातस्तदाऽपशकुनानि च ।
तेषां जातानि च लक्ष्मि ! शृणु विनाशकानि च ॥४८॥
कालस्तेषां गृहाण्येव परिक्राम्यति दृश्यते ।
करालो विकटो मुण्डः पुरुषः कृष्णपिंगलः ॥४९॥
सम्मार्जनीमहाकेतुर्जपापुष्पावतंसकः ।
कृतकुकलसहारः काकैश्च कृतभूषणः ॥५०॥
गृहाण्यवेक्ष्य कार्ष्णानां नादृश्यत पुनर्गतः ।
सुप्तानां ददृशुः केशान् नृणां युवतयो निशि ॥५१॥
भिन्नकटकप्राकोष्ठाः उत्क्रोचयन्ति सर्वशः ।
मेना चीचीतिकूचीति रौति गृहेषु नित्यदा ॥५२॥
खराश्च वायवो रूक्षा ववुः कंकरवाहकाः ।
अजाः शिवानां च रुतमनुकुर्वन्ति वै तदा ॥५३॥
पाण्डुरा रक्तपादाश्च विहगाः कालनोदिताः ।
कपोताश्च तथा घूका गृहेषु विचरन्ति हि ॥५४॥
व्यजायन्त खरा गोषु वृषाश्चाश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषका नकुलीषु च ॥५५॥
भार्याः पतीन् वञ्चयन्ति पत्नीश्च पुरुषास्तथा ।
विभावसुः प्रज्वलितो वामं विपरिवर्तते ॥५६॥
नीललोहितमाञ्जिष्ठान् विसृजन् स्वार्चिषः पृथक् ।
उदयास्तमने नित्यं विपर्यस्तो दिवाकरः ॥५७॥
व्यदृश्यताऽसकृज्जनैः कबन्धैः परिवारितः ।
महासनेषु सिद्धान्ने संस्कृतेऽतीव भासुरे ॥५८॥
उच्चार्यमाणे कृमयो दृश्यन्ते भोजनालये ।
परस्परं च नक्षत्रं हन्यमानं व्यदृश्यत ॥५९॥
अनिवेदितदेवाग्रेऽश्रूयन्त रासभस्वराः ।
त्रयोदशी राहुणा च ग्रस्ता नाशकरी सदा ॥६०॥
काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य नगरीं निशि ।
स्त्रियं स्वप्नेषु मुष्णाति नगरीं प्रति धावति ॥६१॥
कुर्वन्ति भीषणं नादं कुक्कुटास्तु रणाजिरे ।
कुरूपा द्विशिरा रौद्राश्चतुर्बाहव एव च ॥६२॥

स्त्रीणां गर्भेष्वजायन्त राक्षसा गुह्यकास्तथा ।
अलंकाराणि छत्राणि ध्वजाश्च कवचानि च ॥६३॥

ह्रियमाणानि दृश्यन्ते रक्षोभिश्च भयानकैः ।
एवं जातानि विज्ञाय विशकुनानि माधवः ॥६४॥

कुलान्यादाय सोमाढ्यं प्रभासं समुपाययौ ।
सान्तःपुरेण कृष्णेन ऐरकाहेतिभिस्तदा ॥६५॥

स्वकुलानि संहृतानि परस्परजिघांसया ।
कार्ष्णनिर्वाणभूमिः सा परं तीर्थं समुच्यते ॥६६॥

ऐरकापत्रजातानि तृणान्यपि विपर्यये ।
आसन् मुशलीभूतानि खड्गीभूतानि वै तदा ॥६७॥

सर्वे लीनं यत्र भूमौ चिता गव्यूतिभूमिगा ।
तत्र यात्रा प्रकर्तव्या महावैराग्यदा प्रिये ॥६८॥

ततो यायाद् हिरण्यां च नदीं स्नायात् सुपुण्यदाम् ।
ततो यायाद् रुरुक्षेत्रं यत्र देवी कुमारिका ॥६९॥

रुरोर्दैत्यस्य नाशार्थे देवानां तेजसाऽभवत् ।
सा स्थिता वर्तते तत्र पार्वती वै कुमारिकाम् ॥७०॥

पूजयेद् वन्दनां कुर्याच्छाटिकां चार्पयेच्छुभाम् ।
ततो यायाद् ऋषितीर्थं पुरा यत्र महर्षयः ॥७१॥

चातुर्मास्ये निवासं वै सत्रार्थं चक्रुरीश्वराः ।
यत्र त्रिनेत्रमत्स्यानां वंशो वसति शाश्वतः ॥७२॥

अंगिरा गौतमोऽगस्त्यो विश्वामित्रो बृहस्पतिः ।
संवर्तश्च्यवनो रैभ्यो दुर्वासाः कश्यपो भृगुः ॥७३॥

मार्कण्डेयो जमदग्निरुशना कण्वगालवौ ।
नारदः पर्वतश्चापि भरद्वाजोऽथ भागुरिः ॥७४॥

मेधातिथिर्यवक्रीतस्तथाऽन्ये वैष्णवाः शुभाः ।
विष्णुयागे प्रवृत्ते च वृषादर्भिनृपस्तदा ॥७५॥

आह प्रतिग्रहं मत्तो गृह्णीध्वं मुनिपुंगवाः ।
मुद्गान् माषाँश्च व्रीहींश्च तथा रत्नानि काञ्चनम् ॥७६॥

ऋषयस्तु तदा प्राहुर्न गृह्णीमः प्रतिग्रहम् ।
राज्यद्रव्यं महादोषयुक्तं गृह्णीम एव न ॥७७॥

दशसूनासमश्चक्री दशचक्रिसमो ध्वजी ।
दशध्वजिसमा वेश्या दशवेश्यासमो नृपः ॥७८॥

राज्ञो दानं महाघोरं पाचयितुं न शक्यते ।
अन्येभ्यो दीयतां राजन् कुशलं तेऽस्तु सर्वथा ॥७९॥

श्रुत्वा राजा ययौ नैजं गृहं पश्चाच्च गुप्तकम् ।
दानं दातुं हेमगर्भाण्युदुम्बराण्यकारयत् ॥८०॥

व्यकिरन् मन्त्रिणस्तस्य यत्र ते ऋषयः स्थिताः ।
अंगिराः प्राह ऋषयो मा गृह्णन्तु फलानि वै ॥८१॥

गुप्तदानानि सन्त्येव वृषादर्भिनृपस्य वै ।
धनस्य सञ्चयस्तपःसंचयस्य विनाशकः ॥८२॥

नहि सञ्चयवान् कश्चिद् दृश्यते निरुपद्रवः ।
अप्रतिग्रहशीलानां तेजो नित्यं विवर्धते ॥८३॥

अकिञ्चनत्वं राज्यं च तुलया सह तोलने ।
अकिञ्चनत्वमधिकं राज्यादपि धनादपि ॥८४॥

अर्थो ह्यनर्थरूपोऽस्ति श्रेयसां भ्रंशकारकः ।
शोकमोहप्रदश्चापि तं सुखी दूरतस्त्यजेत् ॥८५॥

धर्मार्थमिति मत्वाऽपि द्रव्यसंगं न वै चरेत् ।
प्रक्षालनाद्धि पंकस्य पंकस्याऽस्पर्शनं वरम् ॥८६॥

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका नहि जीर्यति ॥८७॥

अनन्तपारा सा तृष्णा धनाशा दुःखदा सदा ।
अधर्मबहुला चापि तस्मात्तां दूरयेत् सदा ॥८८॥

असन्तुष्टा विनश्यन्ति द्रव्यलोभेन संकटैः ।
सन्तुष्टमानसस्यैव सर्वत्र सुखशेवधिः ॥८९॥

उपानद्गूढपादस्य यथा चर्मावृतैव भूः ।
सन्तोषामृततृप्तानां शान्तिः सुखमनन्तकम् ॥९०॥

लुब्धानां तृष्णया नाशः कुतः शान्तिः कुतः सुखम् ।
कामः कामयमानस्य पूर्यते नैव कर्हिचित् ॥९१॥

अथैनमपरः कामो भूयो विध्यति बाणवत् ।
उपभोगेन कामस्तु कदाचिन्नहि शाम्यति ॥९२॥

प्रत्युत वर्धते पुष्टो घृतयोगेन वह्निवत् ।
कामानभिलषन् जन्तुर्लुब्धः सुखं न विन्दति ॥९३॥

चतुःसमुद्रसहितां भुंक्तेऽपि पृथिवीं नृपः ।
न तथापि कृतार्थश्च वितृष्णो जायते क्वचित् ॥९४॥

अप्रतिगृह्णतां लोकाः शाश्वतानन्ददायकाः ।
विनापि तपसा तेषां तपो भवति लक्षधा ॥९५॥

सन्तानतन्तुस्तृष्णाऽस्ति देहस्था रक्तशोषिणी ।
दुस्त्यजा राक्षसीरूपा जीर्यतोऽपि न जीर्यति ॥९६॥

तृष्णा प्राणान्तको रोगस्तं त्यजेत् स सुखी सदा ।
लोकतृष्णा वित्ततृष्णा पुत्रतृष्णा च कामना ॥९७॥

एतास्तृषाः प्राणभक्षा बिभ्यस्ताभ्यो महेश्वराः ।
तस्मादुदुम्बराण्येव भवन्तु नृपतेः सदा ॥९८॥

इत्युक्त्वा हेमगर्भाणि त्यक्त्वोदुम्बरकाणि च ।
सत्रं चक्रुः स्वस्थरूपास्तापसाः पारमेश्वराः ॥९९॥
तेषां पुण्यस्थलं तीर्थं प्रभासे वर्तते प्रिये ।
लक्ष्मि ! तीर्थं तारकं तत् कर्तव्यं मोक्षदायकम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने प्रभासचतुष्टयतीर्थानि, तीर्थत्रातेषु सारस्वततीर्थे, कुलुपसमयादयः, दौहित्रादीनामर्थाः, मार्कण्डतीर्थ-कृष्णकुलनाशतीर्थम्, रणादावनिष्टसूचकानि, वृषादर्भिकृतानि गुप्तसुवर्णगर्भोदुम्बराणि, अंगिरसो दानाऽग्रहम्, अन्यान्यतीर्थानि चेत्यादिनिरूपणनामा चत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥५४०॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! नन्दतीर्थं शंकरेण यथोदितम् ।
पार्वत्यै ते कथयामि नन्दो भागवतो ह्यभूत् ॥ १ ॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इतिमन्त्रो वशिष्ठाद्वै गृहीतस्तेन भूभुजा ॥ २ ॥
महाभागवतो ह्यासीन्नारायणपरायणः ।
न दुर्भिक्षं न चा व्याधिर्नाऽकाले मरणं नृणाम् ॥ ३ ॥
न चौरा न च कापट्यं न चाऽवृष्ट्यादिकं भयम् ।
तस्मिन् शासति राजेन्द्रे प्रजाश्चासन् सुखाः सदा ॥ ४ ॥
विमानं तस्य तुष्टेन दत्तं वै विष्णुना स्वयम् ।
व्यचरन् सर्वलोकान् स विमानवरमास्थितः ॥ ५ ॥
एकदा व्यचरन् भूमौ मानसं तु सरो ययौ ।
देवादिसेवितं पद्मसुगन्धपरिवासितम् ॥ ६ ॥
दिव्यवारिसमायुक्तं शीततृप्तिप्रदं शुभम् ।
तत्राऽपश्यच्छुभं पद्मं विकसितं च पाण्डुरम् ॥ ७ ॥
तत्राऽप्यंगुष्ठमात्रं च स्थितं पुरुषसत्तमम् ।
अपश्यच्चाऽकथयत् स्वसारथिं गच्छ वै जलम् ॥ ८ ॥
यदिदं दृश्यते पद्मं पुरुषेण विराजितम् ।
रत्नहारालिशोभेन पीतवस्त्रादिधारिणा ॥ ९ ॥
द्विभुजेन सुदिव्येन मध्यभागे ह्यधिष्ठितम् ।
तदिदं कमलं शीघ्रं समानय ममान्तिकम् ॥१०॥
धारयिष्यामि शिरसि भविष्यामि कृतार्थकः ।
एवमुक्तः सारथिस्तु विमानादवरुह्य च ॥११॥
व्योम्ना वायुसमाधारश्चावाततार पद्मिनीम् ।
अधोमस्तकस्थित्यैव हस्तं प्रसार्य यावता ॥१२॥
व्योम्नैव गृहीतुं याति तत्पद्मं नालसंस्थितम् ।
यावता स्पृशति तावद् धूम्रस्तस्मादजायत ॥१३॥
अन्धकारमये तत्र व्योम्नि ममार सारथिः ।
नन्दो विमानमध्ये च कृष्णवर्णो बभूव ह ॥१४॥
बलवीर्यविहीनश्च मेधाशक्तिविवर्जितः ।
उन्मत्त इव सञ्जातो म्लानशुष्काननस्तथा ॥१५॥
कज्जलपिण्डवद्देहं दृष्ट्वा शुशोच भूपतिः ।
किमिदं मे तु सञ्जातं मृतश्च सारथिर्मम ॥१६॥
कोपोऽयं कस्यचिज्जातो वसिष्ठो मां प्ररक्षतु ।
इत्युक्तमात्रस्तु गुरुर्वसिष्ठस्तत्र चाययौ ॥१७॥
योगबलेन च याने समागत्याऽऽह भूपतिम् ।
मा भयं याहि राजेन्द्र कुशलं शं तवाऽस्तु वै ॥१८॥
राजा वसिष्ठं दृष्ट्वा च विशोकः समपद्यत ।
नमस्कारं विधायैव दीनवन्निजगाद तम् ॥१९॥
एष मे भगवन् जातः कृष्णो देहविपर्ययः ।
सारथिर्मम नष्टश्च कमलस्य प्रभावतः ॥२०॥
किमिदं वद मे ब्रह्मन् निस्तारं कारयाऽस्य वै ।
वसिष्ठः प्राह राजेन्द्र मानसेऽत्र सरोवरे ॥२१॥
एतद् ब्रह्मोद्भवं नाम कमलं पद्मजातिकम् ।
नारायणस्य नाभेर्वै यदा ब्रह्मा व्यजायत ॥२२॥
सनालकमलं तद्वै पद्ममेतन्निगद्यते ।
तज्जातीयं तु कमलं मानसेऽत्र सरोवरे ॥२३॥
वंशरूपेण भगवान् रक्षत्येव परम्पराम् ।
एतदीयसुसन्ताने कमले सर्वदा ह्यजः ॥२४॥
अंगुष्ठमात्रप्रतिमो ब्रह्मा तत्र विराजते ।
यावन्ति कमलान्यत्र तस्य सन्तानजानि हि ॥२५॥
तावन्ति ब्रह्मणा चाधिवासितानि भवन्ति वै ।
नान्ये पश्यन्ति चैतानि पुण्यहीना हि देहिनः ॥२६॥
सुपुण्या मोक्षगन्तारः पश्यन्त्येतत्तु पद्मकम् ।
दृष्टमात्रेण चानेन दृष्टाः स्युः सर्वदेवताः ॥२७॥
एतद्वै दृश्यते धन्यैर्ब्रह्मभागवतैर्जनैः ।
महाभागवतैर्लोकैर्यत् त्वया दृष्टमेव हि ॥२८॥
एतस्मिन् दृष्टमात्रे तु जलस्पर्शे च वै कृते ।
सर्वशोकविनिर्मुक्तः पदं निर्वाणमाप्नुयात् ॥२९॥
सारथिस्तव राजेन्द्र ददर्श कमलं तथा ।
पस्पर्श च जलं नालं मुक्तिं जगाम तावता ॥३०॥

अहं नित्यं दर्शनार्थं त्वायामि व्योममार्गतः ।
न स्पृशामि जलं किन्तु नत्वा तं पितरं ह्यजम् ॥३१॥
पुनर्गच्छामि मे स्थानं पुष्करं चार्बुदाचलम् ।
त्वं तु महावैष्णवोऽसि दृष्टवानसि तेन वै ॥३२॥
सवेधसं च कमलं तव पुण्यं हि शाश्वतम् ।
जलं न स्पृष्टवाँस्तेन राजन् जीवसि वर्षसे ॥३३॥
किन्तु पद्मं च हर्तुं ते वाञ्छा जाता नृपेश्वर ।
तेन कार्ष्ण्यं तव जातं दोषेण नीलवर्णता ॥३४॥
वाञ्छन्ति देवता नित्यं मुनयः ऋषयस्तथा ।
मानसे ब्रह्मपद्मं तु द्रक्ष्यामस्तत् कदा वयम् ॥३५॥
प्राप्स्यामश्च परं ब्रह्म यद्गत्वा न निवर्तनम् ।
एवं तेजोविशिष्टं तत् हर्तुं कामेन पंकजम् ॥३६॥
अपहारप्रदोषश्च त्वया लब्धो ह्यजानता ।
ततो राजन् पद्मसंस्थं वेधोयुक्तं नरायणम् ॥३७॥
कृष्णनारायणक्षेत्रे गत्वाऽऽराधय सोमके ।
प्रभासे श्रीकृष्णनारायणं च वेधसा युतम् ॥३८॥
स्वर्णपद्मे कारयित्वा समाराधय तापसः ।
ततस्त्वं नीलतादोषान्मोक्ष्यसे नात्र संशयः ॥३९॥
वशिष्ठस्य वचः श्रुत्वा नन्दभूपो जगाम ह ।
कुंकुमवापिकाक्षेत्रमश्वपट्टसरोवरम् ॥४०॥
तत्र स्नात्वा कृष्णनारायणं नत्वा च लोमशम् ।
रैवताद्रौ वामनं च ययौ नत्वाप्रभासकम् ॥४१॥
तत्र वै कानकीं मूर्तिं पद्मस्थां ब्रह्मणायुताम् ।
अनादिश्रीकृष्णनारायणरूपां निधाय च ॥४२॥
पूजयामास विविधैरुपचारैर्दिवानिशम् ।
तपश्चकार भगवत्समाराधनपूर्वकम् ॥४३॥
विष्णुं शिवं गणपतिं पार्वतीं च दिवाकरम् ।
पूजयामास विधिना श्रीहरिं पञ्चदेवताः ॥४४॥
माहेश्वर्यास्तटे रम्ये तपःस्थानं चकार सः ।
तस्य तपस्तथा भक्तिं विलोक्य देवतास्तथा ॥४५॥
ब्रह्मा कृष्णस्तथा लक्ष्मीर्दर्शनं प्रददुस्तदा ।
प्रसन्नाः स्म इति प्राहुर्वरं वृणु यथेप्सितम् ॥४६॥
राजा प्राह हरेर्भक्तो नैव वाञ्छति चैहिकम् ।
मोक्षं देहि सतां संगं प्रदेहि शाश्वतं पदम् ॥४७॥
अनादिश्रीकृष्णनारायणः प्राह हसँस्तदा ।
राजन् तत्तु त्वदर्थं वै मया प्रागेव निश्चितम् ॥४८॥
न मे भक्तस्य वै भुक्तौ मुक्तौ वा रोधनं भवेत् ।
प्रसन्नोऽस्मि च राजँस्ते कृष्णता पद्मदोषजा ॥४९॥
या जाताऽसि लयं यातु भव चम्पकवर्णकः ।
दिव्यदेहस्तथा भूत्वा भज मां पुरुषोत्तमम् ॥५०॥
अत्राऽऽगत्य जनो यो मां कृष्णनारायणं प्रभुम् ।
वेधसं पञ्चदेवाँश्च सूर्यादीन् पूजयिष्यति ॥५१॥
स च लोके निरोगी स्याद् यास्यत्यन्ते परां गतिम् ।
एवं हरिर्वरं दत्वा कृत्वा सुवर्णवर्णकम् ॥५२॥
तत्र तीर्थं परं कृत्वा ततश्चान्तरधीयत ।
नन्दीघट्टे नरः स्नात्वा भुक्तिं मुक्तिमवाप्नुयात् ॥५३॥
नन्दतीर्थं तथा कृत्वा न पुनर्मर्त्यतां व्रजेत् ।
नन्दतीर्थस्य पार्श्वे च त्रितकूपाख्यमुत्तमम् ॥५४॥
पावनं वर्तते तीर्थं कर्तव्यं पुण्यलब्धये ।
पुरा सौराष्ट्रविषये विप्र आत्रेयसंज्ञकः ॥५५॥
बभूव तस्य पुत्राश्चैकतो द्वितस्त्रितस्त्रयः ।
त्रितः सर्वगुणोपेतो मूर्खौ ज्येष्ठौ बभूवतुः ॥५६॥
गते स्वर्गे तु पितरि धुरं जग्राह वै त्रितः ।
तस्य बुद्धिः समुत्पन्ना कथं यज्ञं करोम्यहम् ॥५७॥
स निमन्त्र्य द्विजश्रेष्ठान् यज्ञकर्मण्यधिष्ठितान् ।
यज्ञार्थं द्रव्यलाभाय प्रवासं प्रजगाम ह ॥५८॥
गृहीत्वा भ्रातरौ ज्येष्ठौ गवार्थं प्रस्थितस्त्रितः ।
यस्य यस्य गृहे याति ग्रामेषु भ्रातृसंयुतः ॥५९॥
तत्र तत्र परां पूजां लेभे गाश्च सुपुष्कलाः ।
एवं द्रव्यं पुष्कलं च गोधनं विपुलं तथा ॥६०॥
गृहीत्वा गृहमायाति भ्रातृभ्यां सहितः स च ।
त्रितो गवां पुरो याति पृष्ठतो भ्रातरौ च तौ ॥६१॥
अथ तं गोधनं दृष्ट्वा भूरिदानार्थमाहृतम् ।
ज्येष्ठयोस्तु मतिर्जाता पापप्रायाऽतिलोभतः ॥६२॥
परस्परमूचतुस्तौ भ्रातरौ पापचेतसौ ।
त्रितो यज्ञेषु कुशलो वेदेषु कुशलस्तथा ॥६३॥
मान्यः पूज्यश्च सर्वेषामावां मूर्खौ निरर्थकौ ।
एतच्च गोधनं सर्वं त्रितो दास्यति दानके ॥६४॥
अस्माकं न भवेत् किञ्चित् प्रत्युत यत्पितुर्धनम् ।
तस्मादपि प्रदातव्यं भविष्यति क्रतौ तदा ॥६५॥
यज्ञे लोकाश्च दास्यन्ति धनानि च बहून्यपि ।
त्रितस्य तानि सर्वाणि नावयोर्वै कपर्दिका ॥६६॥
तस्मादावां धनहीनौ त्रितो धनाढ्य एव च ।
भविष्यति ततो हेतोर्वधस्त्रितस्य युज्यते ॥६७॥
एवं विचार्य तौ ज्येष्ठौ यान्तं त्रितं पुरः पुरः ।
आह्वयामासतुः कूपं दृष्ट्वा जलार्थिनौ यथा ॥६८॥

जलपानं करिष्यामः समागच्छाऽत्र भो त्रित ! ।
त्रितः श्रुत्वा समायातो द्वाभ्यां क्षिप्तो हि कूपके ॥६९॥
ततस्तौ गोधनं नीत्वा द्रव्यं नीत्वा च पुष्कलम् ।
प्रस्थितौ स्वगृहं हृष्टमानसौ लोभकारिणौ ॥७०॥
कूपे च पतितो विप्रश्चिन्तयामास मानसे ।
विप्रा यज्ञार्थमाहूताः क्रतुर्मया कृतो नहि ॥७१॥
तस्मात् यद्भावि तज्जातं कूपेऽत्र मानसं क्रतुम् ।
करोमि यावज्जीवामि जलेन मनसा तथा ॥७२॥
इति विचिन्त्य सूक्तानि प्रोक्त्वा प्रोक्त्वा जलेन वै ।
अञ्जलिना च हवनं चकार कर्दमेन सः ॥७३॥
श्रद्धया तस्य ददतो भूयस्तृप्तास्तु देवताः ।
आगत्य ब्राह्मणं प्रोचुर्विप्र सन्तर्पिता वयम् ॥७४॥
तुष्टाः स्म मानसैर्भावैर्वद दास्याम ईप्सितम् ।
त्रितः प्राह मया यज्ञो भावयज्ञोऽत्र वै कृतः ॥७५॥
द्रव्ययज्ञं गृहे गत्वा करोमि तत्तथा मम ।
स्वास्थ्यं कुरुत देवेशाः कूपान्निःसरणं मम ॥७६॥
इत्युक्ताश्च सुरा विप्रं नीतवन्तो जलाद्बहिः ।
गृहे गत्वा क्रतुं कृत्वा भ्रातृभ्यां पूजितश्च सः ॥७७॥
दक्षिणा विविधा दत्वा पुनः कूपं ययौ त्रितः ।
तपश्चचार विपुलं कृष्णनारायणं स्मरन् ॥७८॥
जगाम श्रीहरेर्धाम दिव्ययानेन शाश्वतम् ।
स कूपस्त्रितकूपोऽस्ति देवतीर्थं तु पावनम् ॥७९॥
जलपानाद् भवेन्मुक्तिस्त्रितस्य स्मरणादपि ।
श्रवणात्पठनाच्चास्य वैकुण्ठं लभते जनः ॥८०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने नन्दराज्ञः सारथेः मानससरसि ब्रह्मकमलदर्शने ग्रहणार्थे गतस्य मुक्तिः, नन्दस्य मनसा ग्रहणपापस्य फलं कृष्णवर्णता, नन्दीतीर्थस्नानाच्छुभ्रवर्णता, त्रितविप्रस्य भ्रातृद्वयकृत-कूपनिक्षेपस्तत्र जलयज्ञे देवताभिः कृतोद्धारस्तपश्चर्या मुक्तिश्चेति त्रिततीर्थम्, इत्यादि निरूपण-नामैकचत्वारिंशदधिकपञ्चशत-तमोऽध्यायः ॥५४१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महापुण्यं वृत्तान्तं प्राग्भवं शुभम् ।
श्रवणात्पापहं यच्च धारणान्मोक्षदं परम् ॥ १ ॥
अहं तुष्यामि भावेन श्रद्धया सेवया तथा ।
दास्येन प्रेमवृत्त्या च भक्तेष्टकृद् भवामि हि ॥ २ ॥
भावसाध्योऽस्म्यहं देवि ! न वित्तैर्न जपैरहम् ।
भक्तानां तु मदर्थे वै कायक्लेशो भवेत् क्वचित् ॥ ३ ॥
कर्मणा मनसा वाचा मच्चित्तो यो जनो भवेत् ।
अहिंसां सत्यमस्तेयं ब्रह्मचर्यं समाचरेत् ॥ ४ ॥
एकभक्तं तथा नक्तमुपवासादिकं चरेत् ।
मम संकीर्तनं साधुस्मरणं चाऽप्यनिन्दनम् ॥ ५ ॥
भजनं च प्रकुर्याद्वै मम प्रतुष्टये रमे ।
पुराऽऽसीद् ब्रह्मणः पुत्र आरुणिर्नाम नामतः ॥ ६ ॥
सोऽरण्यमगमत् किञ्चित्तपोऽर्थं द्विजसत्तमः ।
तपस्तेपे दारुणं चाप्युपवासपरायणः ॥ ७ ॥
नागनद्यास्तटे रम्ये त्वावसथं चकार सः ।
स्नानार्थमेकदा नद्यां ययौ स्नात्वा तटे स्थितः ॥ ८ ॥
ददर्श तत्र चायान्तं व्याधं धनुश्शरान्वितम् ।
तं द्विजं हन्तुमायात् स व्याधो वल्कलकांक्षया ॥ ९ ॥
ऋषिस्तु ज्ञातवान् दिव्यचक्षुषा व्याधमानसम् ।
शुशोच स हृदि यद्वै व्याधोऽयं बहुपापकृत् ॥१०॥
मम हत्याकृतं पापमहो तस्याऽधिकं भवेत् ।
एवं वै पापकर्तुश्च कदोद्धारो भविष्यति ॥११॥
तस्माद् विना द्विजहत्यां गृह्णातु वल्कलानि सः ।
इति कृत्वाऽर्पितान्येव यावन्ति वल्कलानि हि ॥१२॥
ध्यायन्नारायणं देवं तस्थौ मौनं तु भूसुरः ।
तं दृष्ट्वा सुव्रतं विप्रं चान्तर्गतहरिमृषिम् ॥१३॥
दयालुं शान्तहृदयं परपापनिवारकम् ।
व्याधस्य मानसं तत्र क्रूरतां तु विहाय वै ॥१४॥
सात्त्विकं धर्मयुक्तं च व्यावर्तत क्षणान्तरे ।
व्याधो विहाय चापं च शरांश्च वाक्यमब्रवीत् ॥१५॥
हन्तुमिच्छन्नहं विप्र ! भवन्तमिह चागतः ।
इदानीं दर्शनात्तेऽत्र हिंसाबुद्धिर्गता मम ॥१६॥
ब्राह्मणा बहवो नार्यो मया हता हि पापिना ।
कां गतिं प्रतिपत्स्यामि ब्रह्मघ्नोऽहं द्विजोत्तम ॥१७॥
इदानीं तप्तुमिच्छामि तपोऽहं त्वत्समीपतः ।
उपदेशादिदानेन प्रसादं कर्तुमर्हसि ॥१८॥
एवमुक्तोऽप्यसौ विप्रो नोत्तरं प्रत्यपद्यत ।
पापिना तु सहाऽऽलापे पापं संक्रमते यतः ॥१९॥
अनुक्तोऽपि स धर्मेच्छुर्व्याधस्तत्रैव तस्थिवान् ।
यथा विप्रस्तथा व्याधस्तपस्तेपे तरोरधः ॥२०॥
अथैकदा नदीतीरे सिंहः कश्चित् समागतः ।
बुभुक्षितश्च तं विप्रं दृष्ट्वा खादितुमीश्वरम् ॥२१॥

विप्रं यावत् तटे सिंहो जिघृक्षति च तावता ।
व्याधेन शरघातैश्च शीघ्रं सिंहो विनाशितः ॥२२॥
ऋषिः ओं श्रीकृष्णनारायणाय स्वामिने नमः ।
इत्युक्त्वा जलमग्नोऽभूज्जलाधो निषसाद च ॥२३॥
कृष्णनारायणं नाम श्रुत्वा सिंहो ममार च ।
भूत्वा निष्पापकस्तस्माद् दिव्यपुमान् समुत्थितः ॥२४॥
श्रुतमात्रे जहौ प्राणान् दिव्यदेहोऽभवत्ततः ।
उवाच यामि तद्देशं यत्र कृष्णनरायणः ॥२५॥
त्वत्प्रसादाद् द्विजश्रेष्ठ ! विपाप्मा मोक्षभागहम् ।
श्रुत्वेदं च जलाऽन्तःस्थो ब्राह्मणो बहिराययौ ॥२६॥
पप्रच्छ तं तदा सिंहपुरुषं कोऽसि वै वद ।
सिंहपुमान् द्विजं प्राह प्रागासं वैदिकोऽप्यहम् ॥२७॥
दीर्घबाहुरितिख्यातो क्रियाकाण्डपरायणः ।
सर्वे वेद्मि क्रतुकार्यं नान्याऽपेक्षा च मे ततः ॥२८॥
अहं जानामि वेदाँश्च वेद्म्यहं च शुभाशुभम् ।
ब्राह्मणैर्नैव मे कार्यं किं वस्तु ब्राह्मणा इति ॥२९॥
ममैवंवादिनो विप्राः सर्वे क्रोधसमन्विताः ।
ऊचुः शापं दुराधर्षं क्रूरः सिंहो भविष्यसि ॥३०॥
ज्ञानं ते च विनष्टं स्यान्मात्यर्थे स्मरणं तव ।
मृत्युकाले कृष्णनारायणं नाम हि श्रोष्यसि ॥३१॥
तदा मुक्तिर्भविता ते ह्यारुणेः सन्निधौ पशो ! ।
त्वया यदृच्छया भक्ष्यं षष्ठकाले समागतम् ॥३२॥
पशुनृपक्षिजातीयं यत्ते स्थास्यति सन्निधौ ।
यदेषुघातं लब्ध्वा तु प्राणैः कण्ठगतैर्भवान् ॥३३॥
श्रोष्यति श्रीकृष्णनारायणं ब्राह्मणवक्त्रतः ।
तदा मोक्षगतिस्ते वै भविता नात्र संशयः ॥३४॥
परवक्त्रगतं चापि विष्णोर्नाम श्रुतं मया ।
कृतदोषोऽपि विप्रो मे मोक्षदाता बभूव ह ॥३५॥
यस्य दर्शनमात्रेण प्रत्यक्षोऽभवदच्युतः ।
यः पुनः स्वमुखेनैव गृह्णाति श्रीनरायणम् ॥३६॥
प्राणप्रयाणसमये मुक्तो भवति वै ध्रुवम् ।
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ॥३७॥
जंगमा ब्राह्मणा देवास्तत्रस्थः पुरुषोत्तमः ।
ब्राह्मणस्याऽऽरुणेर्योगाद् गच्छामि शाश्वतं पदम् ॥३८॥
इत्युक्त्वाऽऽरुणिमापूज्य ययौ ब्रह्माक्षरं पदम् ।
आरुणिश्च ततो व्याधं समुवाच प्रसन्नहृत् ॥३९॥
जिघृक्षोर्मृगराजस्य यत् त्वया रक्षितोऽस्म्यहम् ।
तत् पुत्र ! तुष्टस्ते दद्मि वरं वरय सुव्रत ॥४०॥

व्याधः प्राह वरश्चायं यस्त्वं मां भाषसे स हि ।
पुत्रता तव सन्तोषः किमस्मादपरो वरः ॥४१॥
अतः परं वरेणाऽहं किं करोमि प्रशाधि माम् ।
ऋषिः प्राह त्वया व्याध ! प्रार्थितोऽहं तपोऽर्थिना ॥४२॥
मया किञ्चित्तदा नोक्तं यतश्चासीदघी भवान् ।
इदानीं तव पापानि तपसा मम रक्षया ॥४३॥
तथा मे दर्शनेनापि कृष्णनामश्रुतेन च ।
नष्टानि शुद्धदेहोऽसि साम्प्रतं नात्र संशयः ॥४४॥
तपः कुरुष्व साधो त्वं मोक्षमेवमवाप्स्यसि ।
व्याधः प्राह भवतोक्तः कृष्णनारायणः प्रभुः ॥४५॥
स कथं प्राप्यते पापरतैर्वै मादृशैर्गुरो ।
ऋषिः प्राह तमुद्दिश्य सर्वं कुर्यात् समर्पणम् ॥४६॥
सः परं तमवाप्नोति भक्त्या व्रतेन कर्मणा ।
एवं ज्ञात्वा च तद्भक्त्या सर्वं व्रतं समाचर ॥४७॥
न भक्षयेदनैवेद्यं न वदेदनृतं क्वचित् ।
जपं कुर्यात् सदा तस्य ध्यानं कुर्याद्धरेस्तथा ॥४८॥
एतत्ते व्रतमादिष्टं मया व्याध तथा कुरु ।
अत्रैव तपसा युक्तस्तिष्ठ त्वं यावदिच्छसि ॥४९॥
एवमुक्त्वा मुनिः पुनः सलिलाऽन्तर्विवेश ह ।
व्याधो गुरुं स्मरंस्तेपे तपस्त्वाहारवर्जितः ॥५०॥
क्षुधाकाले शीर्णपर्णान्यभक्षयत् क्वचित् क्वचित् ।
शनैः शनैस्त्यक्तवाँश्च पर्णानां भक्षणं तदा ॥५१॥
निराहारस्तपस्तेपे स्मरन् गुरुमतन्द्रितः ।
एवं तपस्यतस्तस्य दुर्वासा अभ्यगान्मुनिः ॥५२॥
ददर्श शुष्कदेहं च सप्राणं व्याधमेव सः ।
तपस्तेजोऽन्वितं कृष्णनारायणे स्थितं हृदा ॥५३॥
ज्ञात्वा ऋषिं स च व्याधो नत्वा च शिरसा मुनिम् ।
उवाच तं कृतार्थोऽस्मि भगवन् दर्शनात् तव ॥५४॥
इदानीं त्वमतिथिर्मे प्राप्तोऽसि दैवतं मम ।
शीर्णपर्णादिभिः कृत्वा प्रीणयामि द्विजोत्तमम् ॥५५॥
दुर्वासा अपि तं शुद्धभावपूतं जितेन्द्रियम् ।
जिज्ञासुस्तत्तपःश्रैष्ठ्यमिदमुच्चैरुवाच ह ॥५६॥
यवगोधूमशालीनामन्नं मिष्टं सुसंस्कृतम् ।
दीयतां मे क्षुधार्ताय त्वामुद्दिश्याऽऽगताय मे ॥५७॥
भक्तव्याधोऽयमित्युक्तश्चिन्तां परमिकां गतः ।
कस्मादानेयमेतादृक् कथं तत् संभवेन् मम ॥५८॥
एवं चिन्तयतस्तस्य स्मरतश्च नरायणम् ।
गुरोश्च कृपया व्योम्नः पात्रं संपतितं शुभम् ॥५९॥

सौवर्णं सिद्धिसंयुक्तं तज्जग्राह करेण सः ।
तद् गृहीत्वा मुनिं प्राह प्रतीक्षस्व क्षणम् ऋषे ॥६०॥
अत्रैव स्थीयतां यावद्भिक्षाटनं करोमि च ।
तावन्मयि प्रसादं त्वं गुरो विधातुमर्हसि ॥६१॥
एवमुक्त्वा सपात्रः स भिक्षां याचितुमेव च ।
नातिदूरेण नगरं वृक्षवल्ल्यादिशोभितम् ॥६२॥
लक्ष्यीकृत्य प्रयाति स्म मार्गवृक्षादिवल्लयः ।
तस्य तत्र प्रयातस्य चाग्रतः सर्वशोभनाः ॥६३॥
वृक्षेभ्यो निर्ययुः कन्या हेमपात्राग्रपाणयः ।
वनदेव्यश्च सुन्दर्यः पक्वान्नानि शुभानि च ॥६४॥
व्यञ्जनानि च पेयानि चोष्याणि भोज्यकानि च ।
भक्ष्याणि शुभलेह्यानि मधूनि सुरसाणि च ॥६५॥
दुग्धानि घृतमिश्राणि शर्करापायसानि च ।
व्यञ्जनानि विविधानि तिक्तमिष्टाम्ब्लकानि च ॥६६॥
षट्पञ्चाशद्विधान्येव ददुस्ता वनदेवताः ।
स च कृतार्थमात्मानं मत्वा पुनरथाश्रमम् ॥६७॥
आजगाम ऋषिं प्राह भिक्षा प्राप्ता यथेप्सिता ।
ब्रह्मन् क्षालय पादौ त्वमुपविश्याऽऽसने शुभे ॥६८॥
इमां गृहाण भिक्षां च कुरु मां पुण्यभाजनम् ।
एवमुक्तः स जिज्ञासुस्तपो बलं पुनर्मुनिः ॥६९॥
प्राह भक्तं च तं व्याधं नास्ति पात्रं जलस्य मे ।
नदीं गन्तुं न शक्नोमि पात्रं तेऽपि न विद्यते ॥७०॥
कथं प्रक्षालनं व्याध ! पादयोर्मे भवेदिति ।
इत्युक्तो व्याधभक्तः सः पुनश्चिन्तापरोऽभवत् ॥७१॥
अनादिश्रीकृष्णनारायण स्मृत्वा गुरुं तथा ।
स्मृत्वा जगाम शरणं तां तु नागनदीं तदा ॥७२॥
उवाच प्रणतो भूत्वा सरित् ! त्वं शरणं मम ।
व्याधोऽस्मि पापकर्माऽस्मि ब्रह्महाऽस्मि सरिद्वरे ! ॥७३॥
तथापि मां भक्तमत्र पाहि ते शरणागतम् ।
देवतां नैव जानामि न मन्त्रं न तथाऽर्चनम् ॥७४॥
आरुणेर्मे गुरोः पादौ ध्यात्वा पश्यामि वै शुभम् ।
एवं भक्तस्य मे देवि ! कृपां कुरु सरिद्वरे ! ॥७५॥
ऋषेरासन्नतां याहि पादशौचार्थमापगे ! ।
एवमुक्त्वा नागनदी जलप्रवाहरूपतः ॥७६॥
आजगाम यतस्तस्थौ दुर्वासा वृक्षमाश्रितः ।
तद् दृष्ट्वा महदाश्चर्यं दुर्वासा विस्मयं ययौ ॥७७॥
प्रक्षाल्य हस्तपादौ च भिक्षान्नं श्रद्धया ऋषिः ।
बुभुजे परमप्रीतस्तथाऽऽचम्य हसन्मुहुः ॥७८॥

तं व्याधं शुष्कदेहं च क्षुधा दुर्बलतां गतम् ।
वरं ददौ ते वेदा वै सांगाः सार्थपदक्रमाः ॥७९॥
ब्रह्मविद्यास्तथा सर्वाः प्रत्यक्षा वै भवन्तु हि ।
त्वं च नाम्ना सत्यतपा ऋषिरग्र्यो भविष्यसि ॥८०॥
व्याधः प्राह कथं शूद्रो वेदाध्ययनवानहम् ।
ऋषिः प्राह शरीरं ते गतं पापमयं ध्रुवम् ॥८१॥
तपोमयं शरीरं ते द्वितीयं वर्ततेऽधुना ।
प्रागशनं गतं नाशमिदानीं ज्ञानमागतम् ॥८२॥
एवं त्वं शुद्धकायोऽसि सत्यमेतद् ब्रवीमि ते ।
दीक्षया तपसा भक्त्या देहो वै परिवर्तते ॥८३॥
तेन वेदाध्ययनादि प्रतिभास्यति तेऽधुना ।
प्रागवस्थमधर्माख्यं परिज्ञानविवर्जितम् ॥८४॥
गतं ते व्याधशरीरं, परं धर्मव्रतादिमत् ।
इदानीं वै समापन्नं भक्तिपूतं द्वितीयकम् ॥८५॥
यस्तु भावः पुरा ह्यासीत् प्राणिनो निघ्नतस्तव ।
तत्पापाख्यं शरीरं ते पापसंज्ञं गतं खलु ॥८६॥
इदानीं शुभसद्वृत्ति तपआर्जवभक्तिमत् ।
द्वितीयां धर्मरूपं तु शरीरं ते व्यवस्थितम् ॥८७॥
व्याधः प्राह ऋषिं नारायणो वै साधनं विना ।
कथमाराधनीयश्चाऽपरिग्रहेण योगिना ॥८८॥
दुर्वासाः प्राह मनसा पूजनं सर्वथाऽऽचरेत् ।
न धनं वा कुलं तत्र सम्पद्वा समपेक्ष्यते ॥८९॥
भावेन भगवान् नित्यं तुष्यत्येव जनार्दनः ।
स्नात्वा ध्यात्वा हरिं नित्यं मानसैरुपचारकैः ॥९०॥
पूजयेद् भावयेन्नीराजयेत् क्षमापयेत्तथा ।
पुष्पांजलिं जलमर्घं दद्याद् दद्याच्च मानसम् ॥९१॥
आत्मार्पणं प्रकुर्याच्च तेन तुष्येज्जनार्दनः ।
सधनैर्निर्धनैश्चापि प्राप्यते परमेश्वरः ॥९२॥
अपि कोटिश्रेष्ठदानैर्भक्तिहीनैर्न तुष्यति ।
सभक्तेस्तु पत्रमात्रदानेनाऽपि प्रतुष्यति ॥९३॥
जलेन चन्दनेनापि पुष्पमात्रेण तुष्यति ।
त्रितस्य खलु भावेन कर्दमेनापि चार्चिताः ॥९४॥
जलेन वै सुराः सर्वे सन्तुष्टा हि निदर्शनम् ।
प्रह्लादस्य जपेनैव तुष्टः श्रीभगवान् हरिः ॥९५॥
गोपीनां श्रीकृष्णनारायणस्तुष्टो ह्यदर्पणात् ।
लक्ष्म्या दास्येन सन्तुष्टः कृष्णनारायणः प्रभुः ॥९६॥
पार्वत्याश्च त्वपर्णायाः सन्तुष्टः शंकरः स्वयम् ।
अम्बरीषस्य भगवाँस्तुष्टो भावेन पूजया ॥९७॥

एवं श्रीमत्कृष्णनारायणोऽक्षराधिपः प्रभुः।
भावभक्त्या प्रसन्नः स्यान्न विना भावमच्युतः ॥९८॥
देवता गुरवः सन्तः पितरो धर्म ईश्वरः।
मोक्षः फलं सदित्येतच्छ्रद्धागम्यं हि भावितम् ॥९९॥
भक्तिः सेवा व्यवहारश्चोपार्जनं च मेलनम्।
अर्थः सिद्धिः सुखं चैतत् क्रियासाध्यं तदष्टकम् ॥१००॥
मन्त्रो विद्या च कलहो गायनं जप आह्वनम्।
उपदेशोऽर्थवादश्च वाणीसाध्यं तदष्टकम् ॥१०१॥
गृहाणि च स्त्रियो रम्याः पुत्राश्चाज्ञाकराः क्षितिः।
यशो मानं पतिः पार्श्वाः पुण्यसाध्यं तदष्टकम् ॥१०२॥
शान्तिस्तृप्तिर्विरागश्च श्रेयः पुण्यं च मोक्षणम्।
निवृत्तिश्चोपकारश्च ज्ञानसाध्यं तदष्टकम् ॥१०३॥
पृथ्वीं प्राह पुरा देवो वाराहो जलमग्निकान्।
जलप्लुतां महीं दध्यान्नारायणाय भावतः ॥१०४॥
तथाप्यहं प्रसन्नः स्यां पृथ्व्यां रसोऽस्मि वै यतः।
त्वया देवि स्मृतश्चाहं जलेन पूजितस्तथा ॥१०५॥
त्वद्रक्षार्थं समायातो वाराहं रूपमास्थितः।
एवं मे भावयुक्तेन मनसा शरणं व्रजेत् ॥१०६॥
तस्याऽहं सर्वथा तुष्टो मोक्षं ददामि तद्वशः।
द्वादश्यां च प्रगे पूजां यः करोति तु भावतः ॥१०७॥
तस्याऽहं ब्रह्मलोकं च ददामि शाश्वतं क्षिते!।
इत्युक्त्वा पृथिवीं क्रोडः उद्दधार जलोपरि ॥१०८॥
इत्येवं पार्वतीं लक्ष्मि! शंभुः प्राह प्रभासके।
पठनाच्छ्रवणाच्चास्य ब्रह्मलोकफलं भवेत् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आरुणेः सन्निधौ सिंहस्य मुक्तिः, व्याधकृता विप्ररक्षा तपश्चर्या च, वैदिकस्य दीर्घबाहोर्विप्राणामवमानात् सिंहो भवेति शापः, तपस्यतो व्याधस्य प्रार्थनयाऽऽरुणेः पादप्रक्षालितवती नागमती नदी, व्याधस्य पावित्र्यं सत्यतपानामकऋषित्वं, दुर्वाससा कृतज्ञानोपदेशश्चेत्यादिनिरूपणनामा द्वाचत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥ ५४२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! प्रभासे वै पार्वती शंकरं वरम्।
संपप्रच्छ तिथिस्वामिनश्च वदामि ते यथा ॥ १ ॥
यथा सृष्टेः समारंभे ब्रह्मा यस्मै ददौ तिथिम्।
तत्ते लक्ष्मि! प्रवक्ष्यामि तिथीनां देवतादिकम् ॥ २ ॥
ब्रह्मा सृष्टिं विधातुं च मनो दधे तु पुष्करे।
यदा किञ्चिन्नाध्यगच्छत् तदा रोषोऽस्य चाऽभवत् ॥ ३ ॥
ललाटाद् रोषरूपो वै घर्मबिन्दुस्तदाऽक्षरत्।
वह्निजातिः स पतितः क्षुधितो भोज्यमार्थयत् ॥ ४ ॥
ब्रह्मणा च क्रतौ हव्यं जाठरे भुक्तमित्यपि।
पृथ्व्यादौ खनिजं खाद्यं त्रेधा भोज्यं पुराऽर्पितम् ॥ ५ ॥
हवनीयो जाठरश्चाकरजश्चेति वै त्रिधा।
आद्यं प्रतिपद्दिवसे व्यभजद् विश्वरूट् च तम् ॥ ६ ॥
सा तिथिः प्रथमा तस्मै चार्पिता पूजनादिकम्।
वह्नेः प्रतिपदि ब्राह्मे मुहूर्ते कार्यमेव तत् ॥ ७ ॥
अथ सूर्यस्य वै पत्नी संज्ञा तेजोऽसहा सती।
अश्विनीरूपमास्थाय ययौ हैमोत्तरं पुरा ॥ ८ ॥
सूर्यस्त्वश्वस्वरूपेण लेभे संगं तया सह।
अश्विनीबालकौ जातौ प्राणापानौ भिषग्वरौ ॥ ९ ॥
द्वितीयायां च तज्जातौ सा ताभ्यां ब्रह्मणा पुरा।
पूजनादौ तिथिर्दत्ता रोगव्याधिविनाशिनी ॥१०॥
अथ वाणीं समुत्पाद्य ब्रह्मा गौरीस्वरूपिणीम्।
तृतीयायां शंकराय ददौ विवाहकर्मणा ॥११॥
सा गौर्यै वै तिथिर्दत्ता सौभाग्यादिविवर्धिनी।
अथ गौर्या गणेशस्तन्मात्रात्मकः सुतोऽभवत् ॥१२॥
श्रीकृष्णस्तु स्वयं प्रातश्चतुर्थ्यां गणनायकः।
जातस्तस्य पूजनार्थं तस्मै चतुर्थिकाऽर्पिता ॥१३॥
अथ कद्र्वाः सुतानां तु नागानां गरुडेन वै।
भक्षणार्थं वरे प्राप्ते ब्रह्मातो निजरक्षणम् ॥१४॥
नागाश्च प्रार्थयामासुर्ब्रह्मा तद्रक्षणं तथा।
पूजनं पञ्चमीदिने ददौ सा नागपञ्चमी ॥१५॥
तत्र दुग्धतिलैस्तृप्ता दशन्ति नैव मानवान्।
अथ वै कार्तिकस्वामी षष्ठ्यां जातः सतीगृहे ॥१६॥
अहंकारात्मकस्तस्मै षष्ठी तिथिः समर्पिता।
अथ नेत्रं समुत्पाद्याऽदित्याख्यं प्रथमे युगे ॥१७॥
तेजोऽर्पणं विधायैव लोकतेजःप्रलब्धये।
व्योम्नि तं स्थापयामास सप्तम्यां श्रीनरायणः १८॥
सप्तमी सा तिथिस्तस्मै प्रदत्ता परमेष्ठिना।
अथाऽन्धकाख्यदैत्यस्य नाशनार्थं सुरैः पुरा ॥१९॥
देव्यस्त्वष्टौ निर्मिता वै मातरो याः प्रकीर्तिताः।
शब्दः स्पर्शस्तथा रूपं रसो गन्धोऽथ कामना ॥२०॥
अहंकृतिस्तथा भ्रान्तिस्मूर्ता मूर्तयोऽभवत्।
कामः क्रोधस्तथा लोभो मोहो मदश्च मत्सरः ॥२१॥

पैशुन्यं चाऽनसूया च मूर्तयस्त्वभवन् पुरा ।
कामं योगेश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥२२॥
लोभं तु वैष्णवीं विद्धि ब्रह्माणीं मदमेव च ।
मोहं स्वायंभवीं विद्धि कौमारीं मत्सरोद्भवाम् ॥२३॥
पैशुन्यं यमदण्डीं चाऽप्यसूयां विद्धि मातृकाः ।
एता रक्तप्रशोषिण्यो भवन्ति देहगेहजाः ॥२४॥
अन्धकस्य शोषितं च रुधिरं सर्वमेव यत् ।
तेन रक्तोद्भवाश्चान्ये कोटिशोऽप्यन्धकास्तदा ॥२५॥
नष्टा एव हि ताभ्यश्च दत्ताऽष्टमी तु वेधसा ।
तत्र पूज्याश्च ता रक्षां कुर्वन्त्यनुदिनं शुभाः ॥२६॥
अथ त्वाष्ट्रस्य वेत्रस्य विनाशार्थं तु वेधसा ।
शरीरमाया दुर्गा च स्वाच्छरीरात् प्रकाशिता ॥२७॥
सायुधा मानसी कन्या सा च दुर्गाऽष्टसद्भुजा ।
सिंहास्थिता जघाने यं वेत्रासुरं ततश्च सा ॥२८॥
हिमालये स्थिता तस्याः प्राकट्यं नवमीतिथौ ।
ब्रह्मा तस्यै नवमीं च ददौ पूजादिहेतवे ॥२९॥
अथ सर्वाणि तत्त्वानि पुरा वै वेधसं प्रति ।
प्रार्थयामासुरत्यर्थमाश्रयं निजमद्भुतम् ॥३०॥
तदा तु ब्रह्मणा कर्णदेशाद् दश च कन्यकाः ।
उत्पादिता दिशस्तास्तु पूर्वा च दक्षिणा तथा ॥३१॥
पश्चिमा चोत्तरा चोर्ध्वा ह्यधोगा मुख्यतश्च षट् ।
ईशा ह्यग्निर्नैर्ऋतिश्च वायवी चेति ता दश ॥३२॥
ताभ्यः कार्यस्वरूपाभ्योऽवकाशं कर्म संददौ ।
अवकाशस्वरूपाभ्यः पतयश्च समर्पिताः ॥३३॥
पूर्वामिन्द्राय दक्षां च यमाय कुबेराय तु ।
उत्तरां पश्चिमां वरुणायोर्ध्वां ब्रह्मणे स्वयम् ॥३४॥
अधोगां फणिने चैशां चेशायाग्निं तु वह्नये ।
निर्ऋतिं निर्ऋतये च वायवीं वायवे तथा ॥३५॥
ददौ ब्रह्मा च दशमीं तिथिं ताभ्योऽर्चनाय च ।
अथैकादशिकायां च कुबेरमसृजत् प्रभुः ॥३६॥
धनं जयाख्याद्वायोस्तु तस्मै तां च तिथिं ददौ ।
नारायणस्य तेजोभिः कन्या त्वेका ह्यजायत ॥३७॥
एकादशेन्द्रियाणां सा व्रतं त्वेकादशी मतम् ।
द्वादश्यां च समुत्पन्नः परान्नारायणात् खलु ॥३८॥
पद्मनाभो मनोरूपो मूर्तो विष्णुः प्रपोषकः ।
तस्मै ददौ हरिकृष्णो द्वादशीं मोक्षदायिनीम् ॥३९॥
अथ वै ब्रह्मणो वक्षःस्थलाद् धर्मो ह्यजायत ।
युगारंभे चतुष्पात् स श्वेतवर्णोऽभवत् खलु ॥४०॥
द्रव्यगुणक्रियाजातिचतुष्पद्युक् प्रकीर्तितः ।
त्रिशृंगश्च स्मृतो वेदे ससंहितपदक्रमः ॥४१॥
तथा आद्यन्त ओंकारद्विशिराः सप्तहस्तवान् ।
दानं दया दमो धर्मोऽर्थः कामो मोक्ष इत्यमी ॥४२॥
हस्ता अथ उदात्तादित्रिभिर्बद्धो व्यवस्थितः ।
कृतो वै ब्राह्मणस्तत्र चतुष्पात् षट्क्रियात्मकः ॥४३॥
त्रेता च क्षत्रियस्तत्र त्रिपादो गौण एव सः ।
द्वापरो वैश्य एवात्र द्विपादश्च प्रगौणकः ॥४४॥
कलिः शूद्रस्तत्र चैकांशेन धर्मो व्यवस्थितः ।
स धर्मः पीडितः सृष्टेरादौ क्षत्रेण पादतः ॥४५॥
चन्द्रेणाऽपहृता तारा गुरोः पत्नी पतिव्रता ।
धर्मस्तेन महाघोरारण्यं संप्रविवेश ह ॥४६॥
चतुर्दशसु लोकेषु धर्मो वै लीनतां गतः ।
असुराश्च सुराश्चापि ह्यधर्मेणाऽऽवृतास्तदा ॥४७॥
जिघृक्षन्तः परौकांसि परस्त्रीधनसम्पदः ।
बभ्रमुः परसौधेषु निर्मर्यादास्तदाऽभवन् ॥४८॥
युयुधुरपजह्रुश्च परकीयं परस्परम् ।
ब्रह्मा विनाशमालक्ष्य धर्मं प्राह सनातनम् ॥४९॥
त्वां विना तु जगत्सर्वं विनाशं प्रसमेष्यति ।
चन्द्रस्त्यजतु वै तारां धर्मस्तिष्ठतु सर्वथा ॥५०॥
त्वयैव पाल्यते पृथ्वी त्रैलोक्यं च त्वयैव हि ।
जनस्तपस्तथा सत्यं त्वया सर्वं तु पाल्यते ॥५१॥
न त्वया रहितं किञ्चिज्जगत्स्थावरजंगमम् ।
विद्यते त्वद्विहीनं चेत् सद्यो नश्येत् ततो जगत् ॥५२॥
त्वमात्मा सर्वभूतानां सतां सत्त्वस्वरूपवान् ।
राजसीनां रजस्त्वं च तामसीनां तमोमयः ॥५३॥
त्वया हीना इमे देवाः सर्वे तून्मार्गवर्तिनः ।
उन्मार्गे यच्छ मूढानां त्वं पुत्र परमा गतिः ॥५४॥
एवं स्तुतो वृषः शान्तचक्षुर्भ्यां देवतादिकान् ।
अपश्यद् दृष्टमात्रास्ते बभूवुर्धर्ममानसाः ॥५५॥
क्षणेन गतसम्मोहा असुरा अपि धार्मिकाः ।
समभवन् धर्मयुक्ताः सर्वे च ऋतवस्तथा ॥५६॥
वृक्षा वल्ल्यो नरा नार्यश्चेतनानि जडानि च ।
सर्वे स्वधर्मयुक्ताश्च शीतोष्णाद्यास्तथाऽभवन् ॥५७॥
एवं धर्माय च दत्ता तिथिस्तस्य त्रयोदशी ।
धर्मो यत्राऽभवद्गुप्तो धर्मारण्यं हि तत्स्मृतम् ॥५८॥
ब्रह्माधर्मं समादिश्य सृष्टेरग्र्यं पदं ततः ।
ययौ वै सत्यलोकं च जगत् स्वस्थमभूत्तथा ॥५९॥

ततो मूर्तस्वरूपेण यमराजोऽभवद्धि सः ।
अथ रुद्रो ब्रह्मणस्तु ललाटात्समजायत ॥६०॥
चतुर्दश्यां तिथौ तस्मै यज्ञभागोऽपि चार्पितः ।
दक्षयज्ञे हरद्वारे ऋषिभिर्मुनिभिस्तथा ॥६१॥
सा तिथिः शिवरात्र्याख्या रुद्राय सर्वथाऽर्पिता ।
धर्मस्य श्वशुरो दक्षो, दक्षकन्याशतं त्वभूत् ॥६२॥
ताश्च सृष्टेः सुवृद्ध्यर्थं सुरेभ्यः प्रददौ पृथक् ।
सतीं ददौ शंकराय दश धर्माय वै ददौ ॥६३॥
श्रद्धा मेधा धृतिर्मूर्तिः क्षमा लज्जा शुचिः स्मृतिः ।
शक्तिः श्रुतिस्तदेतासु मूर्तेर्नारायणोऽभवत् ॥६४॥
हरिः कृष्णो नरश्चेति चत्वारो मूर्तिभक्तिजाः ।
द्वे भार्ये कामदेवाय रतिः प्रीतिस्तथैव च ॥६५॥
एकां स्वाहां ददौ वह्नेः पितृणां च स्वधां ततः ।
सप्तविंशतिकन्यास्तु नक्षत्राणि निशापतेः ॥६६॥
अश्विनी भरणी चापि कृत्तिका मृगशिर्षिका ।
आर्द्रा पुनर्वसुः पुष्या चाश्लेषा च मघा तथा ॥६७॥
पूर्वाफाल्गुनिका चोर्ध्वफाल्गुनी हस्तिनी तथा ।
चित्रा स्वातिर्विशाखाऽनुराधा ज्येष्ठा च मूलिका ॥६८॥
पूर्वाषाढोत्तराषाढा श्रवणा च धनिष्ठिका ।
शतभीषा पूर्वभाद्रपदोर्ध्वभाद्रिकस्तथा ॥६९॥
रेवती चेति चन्द्रस्य पत्न्योऽभवँश्च रोहिणी ।
कश्यपाय ददौ दक्षः शुभाः कन्यास्त्रयोदश ॥७०॥
अदितिश्च दितिश्चापि दनुः काष्ठा इरावती ।
विनता चापि कद्रूश्च सिंहिका सुप्रभा तथा ॥७१॥
ईर्ष्या माया तथा हिंसा निर्ऋतिश्चेति ताः खलु ।
वरुणायार्पिताः पञ्च गौडी वस्त्रा च वार्तिका ॥७२॥
साध्वी सुमालिका चेति वरुणान्यस्तु ताः स्मृताः ।
कुबेराय ददौ पञ्च भद्रा च मदिरा ततः ॥७३॥
विद्या धन्या धना चेति कुबेराण्यश्च ता इति ।
रुद्राय दश कन्यास्ता जया च विजया तथा ॥७४॥
इरावती मधुच्छन्दा सुप्रिया जनका तथा ।
कान्ता सुभद्रा धर्माली शुभा च रुद्रयोषितः ॥७५॥
आदित्येभ्यो ददौ दक्षो द्वादश कन्यकाश्च ताः ।
प्रभावती सुभद्रा च विमला निर्मला वृता ॥७६॥
तीव्रा दक्षा ह्यरुणा च विद्या च द्वारपालिनी ।
वर्वसा च प्रभा चेति सूर्यस्य योषितश्च ताः ॥७७॥
विश्वदेवेभ्यश्च दक्षो ददावष्टौ हि कन्यकाः ।
योगनिद्रा विभूतिश्च शिंशपा शरमा गुहा ॥७८॥
माला वंशा तथा ज्योत्स्ना ता विश्वदेवयोषितः ।
अश्विन्याश्च सुताभ्यां द्वे सुवेषा भूषणा तथा ॥७९॥
एका श्वासा वायवे च सावित्रीं ब्रह्मणे तथा ।
लक्ष्मीं च विष्णवे दक्षो ददौ ताः शतकन्यकाः ॥८०॥
सृष्टेरादौ युगे चैवं कन्यादानं बभूव ह ।
तेन कन्याप्रदानस्य रीतिः सर्वेषु चागता ॥८१॥
ताभ्यः प्रपूरितं सर्वं जगत् स्थावरजंगमम् ।
अथ वै पितरः सर्वे ब्रह्मणश्चाननात् पुरा ॥८२॥
धूम्ररूपाः समुत्पन्ना ऊर्ध्वाननास्तथोर्ध्वगाः ।
अमावास्या च पितृभ्योऽर्पिता वै प्रथमे युगे ॥८३॥
चन्द्रमसे पूर्णिमा च कलानां निधयेऽर्पिता ।
ब्रह्मणो मनसे जाय शीतदेवाय वेधसा ॥८४॥
इत्येवं कथितं लक्ष्मि ! तिथीनामर्पणं तव ।
दीपोत्सवी तथा तेऽत्र धनत्रयोदशी शुभा ॥८५॥
लक्ष्मि ! समर्पिता तुभ्यं शारदायैव सर्वथा ।
मूलनक्षत्रयोगश्च श्रवणस्य तथा पुनः ॥८६॥
सरस्वत्यै पूजनार्थं चार्पितो हरिणा मया ।
एवं विविधवाराश्च तत्तदुत्पत्तिनामतः ॥८७॥
सप्तदेवेभ्य एवादौ युगे समर्पिता मया ।
तत्र तेषां पूजनेन तदीयं सर्वथा बलम् ॥८८॥
धनं सौख्यं समैश्वर्यं ददत्येव हि देवताः ।
विघ्नानां शमनं तद्वद् दारिद्र्यस्य विनाशनम् ॥८९॥
आधिव्याधिविनाशादि जायते देवपूजनात् ।
एवं लक्ष्मि ! सदा देवे प्रतिमायां तिथौ तिथौ ॥९०॥
निवसामि स्वयं कृष्णनारायणः परेश्वरः ।
भावेन सुप्रसन्नोऽस्मि भक्त्या दास्येन सर्वथा ॥९१॥
करोमि श्रेय एतेषां शरणागतवत्सलः ।
श्रवणात्पठनाच्चास्य फलं भवति शाश्वतम् ॥९२॥
तत्तत्तिथिसुराणां त्वर्चनजं च फलं भवेत् ।
एवं प्राह स्वयं शंभुः शिवरात्र्यां प्रभासके ॥९३॥
पार्वत्यै तन्मया लक्ष्मि ! तुभ्यं सर्वं निवेदितम् ।
विशेषेणेष्ट देवं तु ध्यायेद्वै देवतास्वपि ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने पञ्चदशतिथीनां तत्तद्देवानां च सहेतुकवर्णननामा त्रिचत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥५४३॥

श्रीनारायण उवाच—

शृणु तीर्थानि चान्यानि शंकरोक्तानि पद्मजे ।
न्यंकुमती देविका च नदीद्वयं तु मोक्षदम् ॥ १ ॥

पुरा संवर्त्तर्षिपुत्राः पञ्चाशन्मृगवेषिणः ।
मृगचर्मपरीधानाः सिंहारण्ये न्युषुः सदा ॥ २ ॥
तापसा रागहीनाश्च तपोऽर्थे पितृनोदिताः ।
पुण्ये प्रभासके क्षेत्रे तृणपत्रादिभोजिनः ॥ ३ ॥
ब्रह्मचर्यपरा नित्यं त्रिःस्नानादिविधायिनः ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥ ४ ॥
जपन्त इति गोविन्दं वृक्षोऽधोवासिनोऽभवन् ।
अथैकदा वीरधन्वा राजा प्रभासमाययौ ॥ ५ ॥
वने दृष्ट्वा मृगान् तांश्च विव्याध सायकैर्यदा ।
ब्राह्मणास्ते मृता हत्या राज्ञो जाता हि दुःखदाः ॥ ६ ॥
राजा चिन्तातुरो यातो देवराताश्रमं तदा ।
विज्ञाप्य ब्रह्महत्याश्च रुरोदाऽतीव दुःखितः ॥ ७ ॥
स ऋषिर्देवरातस्तु दयालुः प्राह भूभृतम् ।
मा रोदिहि गच्छ पार्श्वे वर्तते देविकानदी ॥ ८ ॥
तपः कुरु तटे तस्या आरभस्व मखं ततः ।
प्रायश्चित्तानि कृत्वैव शुद्धो राजन् भविष्यसि ॥ ९ ॥
इत्याश्रुत्य च तं नत्वा ययौ तां देविकां नदीम् ।
देवरातं सह नीत्वा विष्णुयागं चकार सः ॥१०॥
सहस्रशो ब्राह्मणांश्च भोजयामास सादरम् ।
पूजयामास देवांश्च तर्पयामास पितृकान् ॥११॥
तोषयामास मिष्टान्नैर्दानैश्च भिक्षुकांस्ततः ।
यज्ञस्य परिहारेऽत्र कृष्णनारायणः प्रभुः ॥१२॥
लोमशश्च मुनिस्तत्र मृगौ भूत्वा प्रजग्मतुः ।
मण्डपवेदिकां गत्वा निर्भयौ धृतधूम्रकान् ॥१३॥
घ्राणेन च मुहुस्तत्राऽऽकर्षयामासतुर्मुभौ ।
राजा देवौ तु तौ मत्वा ननामोत्थाय पादयोः ॥१४॥
तावत् क्षुवद्भ्यां ताभ्यां च नासिकामलतो नृपः ।
श्लेष्मावृतः कृतस्तत्र नैर्मल्यमाप्तवान्नृपः ॥१५॥
राज्ञो देहात्तदा कन्याः कृष्णवर्णा हि सर्वशः ।
विनिर्जग्मुस्तदा कुण्डे निपेतुस्ताः प्रजज्वलुः ॥१६॥
किमिदं किमिदं त्वेतज्जातः कोलाहलास्तदा ।
मृगौ तौ नररूपौ च मानुषौ संबभूवतुः ॥१७॥
दिव्यदेहो लोमशश्च कृष्णनारायणोऽपि च ।
ऊचतुस्तं नृपं राजन्! यज्ञेन तोषितौ त्वया ॥१८॥
दृष्टावत्र कृपया नौ ब्रह्महत्याः प्रदाहिताः ।
शुद्धोऽसि देविकाक्षेत्रे मम भक्त्या गुरूक्तितः ॥१९॥
माहि राज्यं कुरु मैवं पुनर्हिंसामनर्थिकाम् ।
अनादिश्रीकृष्णनारायणप्राकट्यकालिकम् ॥२०॥
ऊर्जकृष्णाष्टमीरूपं व्रतं कुरु भजस्व माम् ।
एवं कृत्वा मोक्षमार्गे यास्यस्येव न संशयः ॥२१॥
कृतं तेन यथोक्तेन जयन्तीकालिकं व्रतम् ।
नारायणः प्रसन्नः सन्नायातश्च पुनः पुनः ॥२२॥
कुंकुमवापिकाक्षेत्राद्विमानेन विहायसा ।
मृत्युकालेऽगमत् स्वर्गमिन्द्रलोकं स पार्थिवः ॥२३॥
तस्येन्द्रस्त्वर्घमादाय प्रत्युत्थानेन चाययौ ।
विमानस्थाः कृष्णनारायणस्यैव तु पार्षदाः ॥२४॥
उत्थानं च प्रकुर्वन्तं राजानं प्राहुरीश्वराः ।
प्रत्युत्थानं त्वया राजन् नैव कर्तव्यमत्र यत् ॥२५॥
देवास्त्वत्तो हीनपुण्या भवान् पुण्येन वर्धते ।
बहुपुण्ययुतः स्वल्पपुण्यवन्तं प्रति प्रभुः ॥२६॥
प्रत्युत्थानं प्रकरोति स्वल्पपुण्यवतस्तदा ।
स्वल्पं पुण्यं विनश्येत्तु तस्मान्नोत्थानमाचर ॥२७॥
एवं ये ये दिशां पालाः सत्कारार्थं समागताः ।
ते ते स्वल्पवृषाश्चैनं राजानं परिपूज्य च ॥२८॥
ययुः स्वं स्वं निकेतं च राजा नोत्थित एव हि ।
एवं स सत्यलोकान्तं गतो राजा विमोक्षणम् ॥२९॥
अपुनर्मारके लोके दाहप्रलयवर्जिते ।
अद्यापि तिष्ठते देवैः स्तूयमानो जलोपरि ॥३०॥
द्वितीयरूपे वैकुण्ठे शाश्वतं सुखमाप्तवान् ।
प्रसन्ने यज्ञपुरुषे दुर्लभं किन्नु चोत्तमम् ॥३१॥
इह जन्मनि सौभाग्यमायुरारोग्यसम्पदः ।
ददात्येव रमानाथः परां मुक्तिं च दुर्लभाम् ॥३२॥
एवं मुक्तिं गतो राजा देविकायास्तटे शुभे ।
देवरातकृतं तीर्थं यज्ञनारायणात्मकम् ॥३३॥
मृगतीर्थं तथा तत्र देविकायां हि वर्तते ।
स्नात्वा ध्यात्वा हरिं स्मृत्वाऽवश्यं मोक्षमवाप्नुयात् ॥३४॥
शिवस्तु पार्वतीं प्राह न्यंकुमत्यास्तटे पुरा ।
च्यवनश्च ऋषिः पत्नीसहितस्तीर्थवाञ्छया ॥३४॥
पद्भ्यां समागतो न्यंकुमत्यां स्थितो हि वत्सरम् ।
वत्सरं सोमनाथे च वत्सरं लोमशाश्रमे ॥३६॥
वत्सरं रैवताद्रौ च वत्सरं त्वर्बुदाचले ।
एवं कृत्वा सुतीर्थानि ययौ बदरिकाश्रमम् ॥३७॥
श्रीपार्वती तदाऽपृच्छत् का तद्भार्याऽभवत् सती ।
शंभुः प्राह शृणु साध्वि ! च्यवनस्याऽपि सत्कथाम् ॥३८॥
पूर्वतटे हिरण्यायाः कदाचित्तपसि स्थितः ।
सूर्यस्तोत्रं चकाराऽसावष्टोत्तरशतात्मकम् ॥३९॥

सूर्यस्तदा प्रसन्नः सन् समायातस्तु सन्निधौ ।
उवाच तमृषिं ब्रूहि वरं किं करवाणि ते ॥४०॥
च्यवनः प्राह लोकानां चक्षुस्त्वं परमेश्वर ।
अष्टोत्तरशतरूपैरष्टोत्तरशतस्थले ॥४१॥
मूर्तिमान् वस सौराष्ट्रे मन्दिरेषु महत्सु च ।
हिरण्यसिंहो राजा ते करिष्यत्यालयान् शुभान् ॥४२॥
लोकरक्षार्थमेवात्र सौराष्ट्रे सर्वतो वस ।
तथास्त्विति रविः प्राह कृत्वाऽष्टोत्तरशातकम् ॥४३॥
रूपाणां च रविस्तस्थौ सौराष्ट्रे वै यथारुचि ।
तानि नामानि ते देवि ! कथयामि यथायथम् ॥४४॥
'ओं सूर्योऽर्यमा भगस्त्वष्टा पूषाऽर्कः सविता रविः ।
गभस्तिमानजाऽऽदित्यो धाताऽऽदित्यः प्रभाकरः ॥४५॥
क्षित्यादित्यो वनादित्यः प्रभादित्यः खखेश्वरः ।
प्राणादित्यश्च सोमार्को गुर्वादित्यो दिवाकरः ॥४६॥
शुक्रार्कोऽङ्गारकादित्य इन्द्रार्को बोधभास्करः ।
दीपांशुश्च विवस्वाँश्च शुच्यर्कश्चरभास्करः ॥४७॥
ब्रह्मादित्यश्च रौद्रार्को विष्णुः स्कन्दार्क इत्यपि ।
श्रवणार्को यमार्कश्च वैद्युतार्को दिवस्पतिः ॥४८॥
वैश्वानरार्कश्चाग्न्यर्कश्चेन्धनादित्य ईश्वरः ।
धर्मादित्यश्च वेदार्को वाचार्कः कृतभापतिः ॥४९॥
त्रेतादित्यो द्वापरार्कस्तुर्यादित्यः कलीश्वरः ।
कलादित्यश्च काष्ठार्को मुहूर्तादित्य इत्यपि ॥५०॥
चक्रादित्यो वत्सरार्कस्तिग्मरश्मिर्विभावसुः ।
पुरुषार्को हिरण्यार्को योगादित्यः सदीश्वरः ॥५१॥
लोकादित्यः प्रजादित्यो विश्वादित्यस्तमोनुदः ।
वारुणार्कः सागरार्को जीमूतार्कः प्रतापनः ॥५२॥
भूतार्को निर्मलार्कश्च लोलार्कस्तिग्मदीधितिः ।
कुष्ठहादित्य ईशार्को भानुः कामार्क इत्यपि ॥५३॥
जयादित्यश्च भद्रार्को रैवतादित्यकान्तिमान् ।
संज्ञेशश्च सुवर्णार्कः शत्रुंजिदर्क आदिहक् ॥५४॥
कपिलांशुश्चांशुमालिन् कंकादित्यश्च भास्पतिः ।
वनादित्यश्च सप्ताश्वश्चारुणार्कस्त्रिविष्टपः ॥५५॥
नारायणो हरिताश्वः सन्ध्येशो भगवान् प्रभुः ।
ग्रहादित्यश्चाऽमरेशः कंथडेशः कराधिपः ॥५६॥
वेदादित्यः सुराष्ट्रार्को नृपादित्यः सतीश्वरः ।
द्युमणिः सविता धाता विधातार्केति ते नमः' ॥५७॥
इत्येवं खलु सौराष्ट्रे पृथक् पृथग्वसन्ति हि ।
सूर्या लोकप्ररक्षार्थं तत्तीर्थे लोकपावनम् ॥५८॥
हिरण्यायास्तटे रम्यं विद्यते क्षत्रपूजितम् ।
सूर्योदये पठेद् यस्तु स पुत्ररत्नसंचयान् ॥५९॥
जातिस्मृतिं च मेधां चारोग्यं स्वर्गं च विन्दति ।
हिरण्यं च गजान् राज्यं रामाश्च दिव्यसम्पदः ॥६०॥
एवं च्यवनसामर्थ्यात् सूर्यनारायणः स्वयम् ।
अष्टोत्तरशतधा सन् समुवास सुराष्ट्रके ॥६१॥
च्यवनाश्रम एवापि हिरण्यायास्तटे शुभे ।
तीर्थं वै विद्यते तत्र लोककल्याणकारकम् ॥६२॥
च्यवनस्य सती भार्या शर्यातेर्दुहिताऽभवत् ।
कदाचित्तु गते काले तपस्तेपे ऋषिर्वने ॥६३॥
भृगोः पुत्रश्च्यवनः स पृथ्व्यां दीर्घं स्थिरोऽभवत् ।
कालेन महता देवि ! समाकीर्णः पिपीलकैः ॥६४॥
सर्वतो मृत्तिकापिण्डैरभिव्याप्तो लतादिभिः ।
वल्मीकैन समाछन्नस्तपस्येव व्यवस्थितः ॥६५॥
अथ कस्यापि कालस्य शर्यातिर्नाम भूपतिः ।
वने समाजगामाऽसौ यत्र ऋषेः शुभाश्रमः ॥६६॥
राज्ञः कन्या सुकन्याख्या सखीभिः परिवारिता ।
चंक्रम्यमाणा वल्मीकं च्यवनस्य समासदत् ॥६७॥
सुपुष्पाणि विचिन्वन्ती वल्मीके ऋषिचक्षुषी ।
दृष्ट्वा किं न्विति साश्चर्या कण्डकेन बिभेद सा ॥६८॥
रक्तं नेत्रविवराभ्यां निर्यातं सा भयं गता ।
ऋषेः कोपेन शर्यातेः सैन्यस्य नृपतेस्तथा ॥६९॥
समारुद्धे शकृन्मूत्रे पर्यतप्यत पार्थिवः ।
कन्योवाच पितश्चात्राऽपराद्धो वै ऋषिर्मया ॥७०॥
राजा ऋषिं समवदत् कन्यां क्षन्तुं त्वमर्हसि ।
च्यवनः प्राह मे कन्यां देहि दोषं क्षमामि वै ॥७१॥
राजा ददौ तदा कन्यां ऋषिश्च प्रससाद ह ।
सैन्यं स्वस्थं समभवत् सिषेवे कन्यका ऋषिम् ॥७२॥
ऋषिं वृद्धं देववैद्यौ समाजग्मतुरीश्वरौ ।
सुकन्यां तावूचतुश्च वृद्धयोग्या न सुन्दरी ॥७३॥
सा त्वं च्यवनमुत्सृज्य वरयस्वैकमावयोः ।
कन्या प्राह पतिर्देवो वृद्धो वा यदि वा कृशः ॥७४॥
देववैद्यौ कुरुतं मे पतिं युवानमीश्वरम् ।
वैद्यौ तौ कृतवन्तौ तं स्वसदृशं महामुनिम् ॥७५॥
रूपत्रयं समानं वै जातं यथा पृथङ् न वै ।
कन्या विचारयामास कोऽत्र मेऽस्ति पतिः खलु ॥७६॥
पातिव्रत्येन वै चान्तःसमधिना स्वकं पतिम् ।
विज्ञाय तं करे गृह्य पादयोः पतिता सती ॥७७॥

वैद्यावश्वर्यमापन्नौ सत्येयं वै पतिव्रता ।
तौ वैद्यौ च्यवनं तत्राहतुर्यज्ञेषु सर्वथा ॥७८॥
भागौ स्यातामावयोश्च तथा त्वं कुरु भार्गव ।
ऋषिर्यज्ञे भागवन्तौ कृतवाँस्तौ भिषग्वरौ ॥७९॥
अथैकदा तु शर्यातिः कन्यायाः सुखमुत्तमम् ।
द्रष्टुं समागतस्तत्राश्रमे कन्यां ददर्श सः ॥८०॥
युवानं सेवमानां तां पप्रच्छ कन्यकां नृपः ।
कोऽयं कन्ये ! सेवितोऽस्ति परः कश्चिच्च मे भ्रमः ॥८१॥
कन्या प्राह पितर्मेऽस्ति पतिः श्रीच्यवनो मुनिः ।
अश्विनीसुतयोगेन यौवनं स्वामिनाऽर्जितम् ॥८२॥
राजा श्रुत्वा प्रसन्नोऽभूत् ऋषिं प्राह करोमि ते ।
सेवां वद ऋषे चात्र ऋषिः प्राह मखं कुरु ॥८३॥
ततः परमसंहृष्टः शर्यातिस्तु क्रतोः कृते ।
कारयामास संभारान् याजयामास भार्गवः ॥८४॥
सुरवैद्यौ भागवन्तौ च्यवनेन कृतौ तदा ।
इन्द्रस्तं वारयामास नैतौ भागार्हणौ यतः ॥८५॥
भिषजौ कर्मणा चैतौ जन्मना चापि गर्हितौ ।
ऋषिरिन्द्रमनाहृत्य ददौ भागौ भिषग्द्वये ॥८६॥
इन्द्रो वज्रम् ऋषिं हन्तुं जग्राहोर्ध्वकरोऽभवत् ।
ऋषिस्तं स्तंभयामास महेन्द्रः शरणेऽपतत् ॥८७॥
भागं तयोर्ददौ पश्चात् स्तंभनं प्रशशाम ह ।
एवं प्रतापवान् विप्रो हिरण्यायास्तटे शुभे ॥८८॥
कुटीं कृत्वा वर्षमात्रं भार्यया तु सुकन्यया ।
सह तेपे तपश्चोग्रं सौराष्ट्रे वै प्रभासके ॥८९॥
तदाश्रमे वैखानसाः ऋषयोऽपि वसन्ति वै ।
तत्तीर्थे भावतः कुर्यात् सामर्थ्यैश्वर्यसम्पदाम् ॥९०॥
धनपुत्रसुतारोग्यसमृद्धीनां सम्प्रदं परम् ।
पठनाच्छ्रवणाच्चास्य सर्वपापैः प्रमुच्यते ॥९१॥
इत्येवं शंकरो लक्ष्मि ! पार्वतीं प्रजगाद ह ।
शर्यातेश्च्यवनस्यापि कथां परमपावनीम् ॥९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने न्यंकुमत्यां देविकायां च नद्यां देवराततीर्थेऽष्टोत्तरशतनामसहितसूर्यतीर्थच्यवनतीर्थानां तदाख्यानसहितानां कथननामा चतुश्चत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥५४४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकरश्च पार्वतीं प्राह पावनम् ।
अगस्त्यादिकतीर्थानां वर्णनं प्रवदामि ते ॥ १ ॥
न्यंकुमत्यास्तटे दिव्यमगस्त्याश्रममुत्तमम् ।
आसीत् पूर्वे कृते वर्षमात्रं तपश्चकार सः ॥ २ ॥
अगस्त्यर्षिः कदाचिद्वै ययौ तीर्थसमीहया ।
दक्षिणस्यां दिशि तत्र वातापिरुपशामितः ॥ ३ ॥
इल्वलो नाम तद्भ्राताऽग्रजः कापट्यसंभृतः ।
नगर्यां मणिमत्यां स चास वातापिरेव तु ॥ ४ ॥
अगस्त्यं स चमत्कारं श्रुत्वा तं प्रति चाययौ ।
प्राह मे भगवन् पुत्रं देहि महेन्द्रसदृशम् ॥ ५ ॥
अगस्त्यस्तं चाऽसुरं तु दातुं नैच्छत् सुतं ततः ।
चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य तपोभृतः ॥ ६ ॥
तीर्थयात्रां कुर्वतश्चागस्त्यस्य मार्गमध्यतः ।
वातापिः फलरूपोऽभूत् कालिंगरं सुपक्वकम् ॥ ७ ॥
कामरूपस्तृतीयश्चातापिः पर्णगृहं शुभम् ।
बभूव शोभनमृष्याश्रमरूपं सवेदिकम् ॥ ८ ॥
इल्वलस्त्वागतानां वै वाटगानां समर्हणम् ।
फलभोजनदानाद्यैश्चकार नित्यमेव च ॥ ९ ॥
फलभोजी मार्गगश्चातिथिर्भुक्त्वा फलं ततः ।
जलं पिबति यावद्वै तावदिल्वल आसुरः ॥१०॥
आह्वयत्युदरस्थं तं वातापिं सत्फलात्मकम् ।
हे वातापे बहिर्याहित्येवं श्रुत्वोदरंगतः ॥११॥
सजीवस्तूदरं भित्त्वा निर्यात्येव हि तत्क्षणम् ।
त्रयस्ते भ्रातरो हृष्टा मिलित्वा तं मृतं जनम् ॥१२॥
खादन्ति नित्यशस्त्वेवं कुर्वन्ति ऋषिहिंसनम् ।
तेन पथा ह्यगस्त्यश्च निर्गतो यावदेव ह ॥१३॥
आतापिः पर्णशालाऽभूद् वातापिस्तु फलं ह्यभूत् ।
इल्वलस्तं तदाऽगस्त्यमतिथिं प्राह हर्षतः ॥१४॥
ऋषे भाग्यं मम धन्यं गृहाण फलभोजनम् ।
अभ्यागतस्य सेवा वै करोति मोक्षणं परम् ॥१५॥
अगस्त्यस्तं तथेत्याह निषसाद गृहान्तरे ।
इल्वलस्तत्फलं द्वेधा चतुर्धा प्रविभज्य च ॥१६॥
अगस्त्यं भोजयामासाऽऽह्वयामासाऽनुजं पुनः ।
प्रत्युत्तरं न चाऽवाप पाचयामास तम् ऋषिः ॥१७॥
भ्रामयित्वोदरे हस्तं प्रत्युद्गारं चकार च ।
तदा भयं समापन्न इल्वलस्तत्स्थलात्तदा ॥१८॥
चक्रे पलायनं शीघ्रं दुद्रावाऽऽतापिरित्यपि ।
तौ मुनिः क्रोधदृष्ट्यैव भस्मीचकार तत्क्षणात् ॥१९॥
ततोऽगस्तिर्देहशुद्धिं कर्तुं तीर्थेषु वै चरन् ।
समागतोऽत्र वै न्यंकुमत्यास्तटे स्थिरोऽभवत् ॥२०॥

वर्षमात्रं तपश्चक्रेऽगस्त्यतीर्थमिदं हि तत् ।
देहशुद्ध्यर्थमादिष्टं पावनं स्वर्गदं परम् ॥२१॥
अथ राजा पुरा चासीन्नृगो नाम जनाधिपः ।
स कदाचिद् ययौ तीर्थयात्रार्थं वै प्रभासके ॥२२॥
स्वल्पभृत्ययुतो मार्गे सिंहारण्ये द्रुमालये ।
विशश्राम निशायां च लेभे निद्रां शुभां सुखाम् ॥२३॥
ज्ञात्वा पर्वतजाश्चौराः शतशो हेतिसंयुताः ।
स्वर्णादिधनमाहर्तुं परितः पर्यवेष्टयन् ॥२४॥
राज्ञस्तु रक्षकाः स्वल्पाश्चौरास्तत शताधिकाः ।
किं कार्यं प्राणनाशः स्याद्धनहेतोर्न तद्वरम् ॥२५॥
मत्वैवं तु नृगः प्राह गृह्णन्त्वेतत्तु पुष्कलम् ।
आत्मानं रक्षयेत् प्राज्ञो धनैर्दारैस्तथार्जवैः ॥२६॥
यद्यप्यस्मि नृपश्चाहं मया दण्ड्या इमे खलाः ।
तथापि नास्ति सैन्यं मे वने पर्याप्तमेव यत् ॥२७॥
प्राणग्लहे प्राणहानौ नास्ति चिन्ता यतो नृपः ।
किन्तु मोक्षकरी यात्रा न मे स्यादिति हानितः ॥२८॥
द्रव्यं दत्वा च गन्तव्यं यात्रां कृत्वा ततः पुनः ।
मार्गयित्वा च तान् सर्वान् नाशयिष्ये रणांगणे ॥२९॥
विचार्यैवं नृगो यावद् भृत्यान् आज्ञां करोति च ।
धनं दातुं हि चौरेभ्यस्तावद्राज्ञः शरीरतः ॥३०॥
एका नारी सशस्त्रा वै समुत्पन्नाऽतिरोषिणी ।
हेतिभिस्तान् सर्वचौरान् जघान लीलया रणे ॥३१॥
राज्ञा स्वास्थ्यं गतस्तीत्रं ववन्दे तां प्ररक्षणीम् ।
सा तु शीघ्रं पुना राज्ञो देहे प्रवेशमास्थिता ॥३२॥
ततो राजा ययौ प्रातर्मार्गे प्रभासकस्य सः ।
वामदेवमृषिं दृष्ट्वा तपन्तं देविकातटे ॥३३॥
विशश्राम क्षणं मध्याह्ने च गुरुत्तमम् ।
वामदेवं च पप्रच्छ का कन्याऽऽसीच्छरीरजा ॥३४॥
वामदेवः समाधिं च कृत्वा ज्ञात्वा च पूर्वजम् ।
पुण्यं नृपं समुवाच पूर्वं तं शूद्रकोऽभवः ॥३५॥
श्रावणस्य कृता शुक्ला त्वेकादशी तथा त्वया ।
उपोषिता द्वादशी च तत्पुण्यं त्वयि संस्थितम् ॥३६॥
पुण्यरूपा तु सा कन्या तिथिद्वयस्वरूपिणी ।
कन्या चैकादशी सा च हेतयो द्वादशी तिथिः ॥३७॥
ताभ्यां चौराः शत्रवस्ते हतास्तीर्थव्रतस्य ते ।
एवं चात्र परत्राऽऽयं कृतं पुण्यं प्रयाति हि ॥३८॥
सखा पुण्यं चात्मनि स्थं सहायं सर्वदाऽस्ति तत् ।
तस्मात्तीर्थं व्रतं दानं कर्तव्यं मानवे भवे ॥३९॥

इत्युक्तो ज्ञातवान् सर्वं नृगस्तुष्टो बभूव ह ।
वामदेवमृषिं नत्वा संपूज्य चोपदा ददौ ॥४०॥
तत्तीर्थं वामदेवस्य नृगस्यापि प्रकीर्तितम् ।
सौराष्ट्रे सोमके क्षेत्रे रक्षकं मोक्षदं तथा ॥४१॥
सोमनाथं प्रसम्पूज्य ययौ हर्म्ये निजं ततः ।
अथाऽऽसीद् देवशर्माख्यो द्विजः प्रभासतीर्थजः ॥४२॥
न्यंकुमत्यास्तीरे वासं चकार स च निर्धनः ।
धनार्थं ग्राममुत्सृज्य चौर्यं कार्यं चकार सः ॥४३॥
तस्य पुत्रोऽभवन्नाम्ना दुःसहश्चौर एव सः ।
व्यसनोपरतोऽरण्ये जीर्णदेवालये वसन् ॥४४॥
चौर्यं चकार देवस्य दीपं प्रज्वाल्य वै तदा ।
जनैर्भृशं ताडितश्च मृतोऽभूच्च शिवालये ॥४५॥
गान्धारविषये राजा ख्यातो नाम्ना तु दुर्मुखः ।
प्रजोपद्रवकृन्मूर्खो धर्मकार्यबहिष्कृतः ॥४६॥
शिवालयस्य संस्काराच्छिवभक्तोऽभवद्धि सः ।
पुष्पस्रग्धूपनैवेद्यगन्धादिभिः शिवं सदा ॥४७॥
अन्यांश्चाप्यर्चयत्येव सुरान् दीपप्रदानकैः ।
यत्र यत्राश्रमे दैवे प्रयात्येव स पार्थिवः ॥४८॥
दीपदानं करोत्येव देवालयेषु सर्वदा ।
एकदा स च तीर्थेषु विचरन् रैवताचले ॥४९॥
सोमनाथं समायातः सिंहारण्ये तु मार्गगः ।
न्यंकुमत्यास्तटे प्राप निधनं कालयोगतः ॥५०॥
दीपदानस्य च पूजायाश्च फलेन दुर्मुखः ।
विश्रवसः सुतः सोऽभूत् कुबेरो यक्षराडिति ॥५१॥
कुबेरस्तु ततो जातिस्मरः प्रभासमाययौ ।
यत्र पूर्वं मृतस्त्वासीन्न्यंकुमत्यास्तटे हि सः ॥५२॥
तत्र शंभुं प्रतिष्ठाप्य मन्दिरं निर्ममे हि सः ।
तत्तीर्थं तु निजाख्यादियुतं कुबेरशंकरम् ॥५३॥
कृतवाँश्च शिवं तत्र तुष्टाव शुभ्रमानसः ।
शंकरश्च कुबेराय वरदानत्रयं ददौ ॥५४॥
सख्यं धनाधिपत्यं च दिक्पालत्वं दिवौकसाम् ।
कुबेरेशं तत्र गत्वा भक्त्या यः पूजयिष्यति ॥५५॥
तद्गृहे सप्तपुरुषावधि लक्ष्मीनिवत्स्यति ।
अथ कैवर्तको मत्स्यघाती स्वारोचिषेऽन्तरे ॥५६॥
समुद्रस्य तटे जालं जलक्लिन्नं शिवालये ।
नीत्वा ध्वजस्य दण्डे तज्जालं दोरकनिर्मितम् ॥५७॥
स्थापयामास च यथा ध्वजो दृश्येत जालकृत् ।
शोषणाय जलस्यैवं जालध्वजोऽभवद्दिनम् ॥५८॥

तत्पुण्येन स कैवर्तो जन्मान्तरे तु भूपतिः ।
सौराष्ट्रे कुंकुमवापीक्षेत्रे क्रतुध्वजाभिधः ॥५९॥
राजाऽभवत् प्रतापी च लोमशस्याऽऽश्रमे सदा ।
ओं नमः श्रीकृष्णनारायणायेति जपन् सदा ॥६०॥
परमो वैष्णवो जातः शंकरस्य प्रसादतः ।
जातिस्मरः प्रददौ च प्रभासे सोमनाथके ॥६१॥
ध्वजां शुभ्रां महादीर्घां प्रतिवर्षं ततो ददौ ।
दशवर्षसहस्राणि राज्यं चकार भूपतिः ॥६२॥
अश्वपट्टसरोमध्ये कृष्णनारायणालयम् ।
जीर्णं तन्नूतनं राजा कारयामास शृंगवत् ॥६३॥
ततो दिव्यविमानेन ययौ वैकुण्ठमेव सः ।
पठनाच्छ्रवणाच्चास्य भवेन्मोक्षपदं ध्रुवम् ॥६४॥
देवकुलं शुभं क्षेत्रं प्रभासे वर्तते तथा ।
ऋषितोया नदी रम्या मिमिलुर्यत्र देवताः ॥६५॥
ऋषिभिः प्रार्थिताश्चानावृष्टिकाले तु सत्रके ।
तर्पिता बहुयज्ञैश्च वृष्टिर्जाताऽतिशोभना ॥६६॥
देवतानामृषीणां च कुलानां समवायतः ।
ऋषिकुलाख्यसुसरिद्वरा तीर्थं हि पावनम् ॥६७॥
व्याघ्रारण्ये ऋषयस्तु न्यवसन् ये पुरा युगे ।
ब्रह्माणं त्वेकदा द्रष्टुं सत्यलोकं ययुर्हि ते ॥६८॥
तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्माणं कमलोद्भवम् ।
ब्रह्मा तुष्टोऽवदत् सर्वान् वृणुध्वं मानसेप्सितम् ॥६९॥
ऋषयस्ते तदा प्राहुः स्नानसन्ध्यादि कर्म यत् ।
सामुद्रेण सलिलेन त्वनन्तपुण्यदायकम् ॥७०॥
जलपाने चातिथीनां सत्कारादौ च भूजलम् ।
कूपादीनां भवत्येव वसामो यत्र नित्यदा ॥७१॥
तस्मान्नद्यस्त्वया ब्रह्मन् प्रेषयितव्या क्ष्मां प्रति ।
मिष्टानि हि जलान्यासां क्रियार्हाणि प्रभासके ॥७२॥
प्राप्स्यामो येन च यथा तथा कुरु पितामह ।
अभिषेकाय नो देहि नदीं पुण्यां पितामह ॥७३॥
वीक्षां चक्रे तदा ब्रह्मा कर्तव्यार्थे विचिन्त्य च ।
निम्नगा आह्वयामास गंगां यमीं सरस्वतीम् ॥७४॥
चन्द्रभागां तथा रेवां सरयूं गण्डकीं तथा ।
तापीं गोदावरीं शिप्रां कावेरीं देविकां तथा ॥७५॥
चर्मण्वतीं च माहेन्द्रीं भद्रां शत्रुंजितां तथा ।
मूर्तिमत्यश्च ताः सर्वाः स्थिता वै ब्रह्मणः पुरः ॥७६॥
ब्रह्मणा च कृता दृष्टिः कमण्डलुं प्रति तदा ।
ताश्च भावं परिज्ञाय विविशुस्तत्कमण्डलुम् ॥७७॥
तास्तु तेभ्यो मुनिभ्यश्च दत्ता नेतुं भुवं प्रति ।
तोयरूपाः कमण्डलुजलस्था हि सरिद्वराः ॥७८॥
तदानीं सा ऋषितोया सर्वसरिन्मयी शुभा ।
ऋषितोयानामनदी सौराष्ट्रे समजायत ॥७९॥
देवदारुवने यत्र जलं कमण्डलोः पुरा ।
सन्न्यस्तमृषिभिस्तत्र नदी सा संबभूव ह ॥८०॥
समुद्रं प्रापिता सा हि सौभाग्याद्यैर्विवर्धिता ।
मूलचण्डीशतीर्थे सा प्रपूर्वाभिमुखी ततः ॥८१॥
भुक्तिमुक्तिप्रदा रम्या कथिता शंकरेण वै ।
पार्वत्यै सा मया लक्ष्मि ! कथिता ते समासतः ॥८२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽगस्त्याश्रमस्य आतापीवातापील्वलविनाशस्य वामदेवनृगकुबेरतीर्थानां क्रतुध्वजमोक्षस्य देवकुलऋषितोयादितीर्थानां सोपाख्यानवर्णननामा पञ्चचत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥ ५४५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रवक्ष्यामि विशालनृपतेः पुरा ।
जातं दिव्यं चरित्रं यत् पार्वत्यै प्राह शंकरः ॥ १ ॥
पूर्वं राजा विशालोऽभूत् काशीपूर्यां महाबलः ।
गोत्रजैर्हृतराज्योऽसौ गन्धमादनमाययौ ॥ २ ॥
तस्य द्रोण्यां बदरीं च शुभां प्राप्य नृपोत्तमः ।
तपश्चक्रे भजमानः कृष्णनारायणं हरिम् ॥ ३ ॥
कदाचिदागतौ तत्र पुराणावृषिसत्तमौ ।
नरनारायणौ देवौ धर्मपुत्रौ हिमाश्रितौ ॥ ४ ॥
तौ दृष्ट्वा सुतपस्यन्तं बदरीस्थं नृपं शुभम् ।
ध्यायन्तं परमं ब्रह्मविष्णुरूपं जनार्दनम् ॥ ५ ॥
नरनारायणं प्रीतौ दृष्ट्वा तं क्षीणकल्मषम् ।
ऊचतुर्वरदौ राजन् वृणीष्व वरमीप्सितम् ॥ ६ ॥
राजा प्राह भवन्तौ कौ न जानामि कथं वरम् ।
अज्ञाताभ्यां प्रगृह्णामि दातुं शक्तौ च कं वरम् ॥ ७ ॥
आराधयामि यं कृष्णनारायणं जगद्गुरुम् ।
तस्माद् वरं ग्रहीष्यामि नान्यस्मादिति भूसुरौ ॥ ८ ॥
एवमुक्तावाहतुस्तौ कमाराधयसे प्रभुम् ।
कं वा वरं वृणोषि त्वं कथयस्व कुतूहलात् ॥ ९ ॥
एवमुक्तो नृपः प्राह कृष्णनारायणं प्रभुम् ।
आराधयामि सततं ततस्तावूचतुः पुनः ॥१०॥

राजँस्तस्यैव देवस्य प्रसादादावयोर्वरम् ।
गृहाण त्वं वरं ब्रूहि कस्ते मनसि वर्तते ॥११॥
यथा यज्ञेश्वरं देवं यज्ञैर्विविधदक्षिणैः ।
यष्टुं समर्थता मे स्यात्तथा मे ददतं वरम् ॥१२॥
तदा नारायणं श्रेष्ठं भ्रातरं सम्प्रदर्श्य वै ।
नरः प्राह च राजानं शृणु राजन् सनातनम् ॥१३॥
अयं मे पूर्वजो भ्राता लोकानां मार्गदर्शकः ।
मया सह तपः कुर्वन्नास्ते बदरिकाश्रमे ॥१४॥
अयं मत्स्योऽभवत् पूर्वं ततः कूर्मोऽभवत्पुनः ।
वराहश्चाऽभवत् सोऽयं नरसिंहस्ततोऽभवत् ॥१५॥
वामनश्चततो जातस्ततः परशुरामकः ।
ततो रामश्च बुद्धश्च कृष्णः कल्किस्ततो ह्ययम् ॥१६॥
अनादिश्रीकृष्णनारायणः सोऽयं परात्परः ।
राजते कुंकुमवापीतीर्थे सौराष्ट्रभूतले ॥१७॥
सोऽयं नारायणः साक्षाल्लक्ष्मीपतिः रमापतिः ।
श्रीपतिः कमलाकान्तः पार्वतीपतिरीश्वरः ॥१८॥
कृष्णो राधापतिः प्रभापतिश्च माणिकीपतिः ।
भक्तपतिर्मुक्तपतिः सतीपतिः पुमुत्तमः ॥१९॥
मत्स्यं राजन्नुपासीत वेदज्ञानस्य लब्धये ।
कूर्मं राजन्नुपासीत शारीरबलपुष्टये ॥२०॥
क्रोडं राजन्नुपासीत पृथ्वीराज्यादिलब्धये ।
नरसिंहमुपासीत पापिशत्रुनिवृत्तये ॥२१॥
वामनं समुपासीत सार्वभौमत्वसिद्धये ।
पर्शुराममुपासीत क्रूरशत्रुनिवृत्तये ॥२२॥
रामादित्यमुपासीत सदा धर्मस्य वृद्धये ।
बुद्धं साधुमुपासीत त्वात्मज्ञानस्य लब्धये ॥२३॥
कृष्णं कान्तमुपासीत गोलोकादिकलब्धये ।
कल्किं राजन्नुपासीत रागद्वेषादिहानये ॥२४॥
अनादिश्रीकृष्णनारायणं त्वक्षरमुक्तये ।
युगलं समुपासीत भुक्तिमुक्तिसमृद्धये ॥२५॥
एवमुक्त्वा नरस्तस्य हरेर्वासरजं व्रतम् ।
कुरु राजन् सदा त्वेकादश्यामुपोषणं तथा ॥२६॥
द्वादश्यामुपवासं च समर्थो यजने भव ।
इत्युक्त्वा तौ ययतुश्च बदरीं नृपतिस्ततः ॥२७॥
व्रतं चकार विधिवत् सामर्थ्यं चाप वै पुनः ।
चक्रं सुदर्शनं तस्मै प्रसन्नेन तु विष्णुना ॥२८॥
अर्पितं तत् समादाय ययौ राज्यं निजं पुनः ।
शत्रून् विजित्य च राजा चक्रवर्ती बभूव सः ॥२९॥
तेन च तपसः स्थानं हिमालये कृतं पुरा ।
तत्र वै नगरी पर्णशालाढ्या ऋषियोजिता ॥३०॥
तापसानां कृते तेन राज्ञा नाम्ना स्वकेन वै ।
विशालाख्या निर्मिता सा बदरी चाश्रमात्मिका ॥३१॥
विशालनृपतेर्नाम्ना विशालाख्याऽभवच्छुभा ।
नरनारायणावासा ऋषीणां सुखवासदा ॥३२॥
तत्र तीर्थं परं कृत्वा परं धामाऽभिगच्छति ।
तत्र जन्मनि राजाऽसौ राज्ये स्थित्वा पुनः पुनः ॥३३॥
यज्ञैश्च विविधैरिष्ट्वा प्रसन्नमकरोद्धरिम् ।
अथैकदा सतीर्थार्थं ययावर्बुदपुष्करम् ॥३४॥
ततो वै लोमशक्षेत्रं ततश्च रैवताचलम् ।
प्रभासक्षेत्रमासाद्य सोमनाथं विलोक्य च ॥३५॥
गुप्तप्रयागं गत्वा च चकार वैष्णवं क्रतुम् ।
ततः श्रीकुंकुमवापीक्षेत्रे नत्वा तु लोमशम् ॥३६॥
ययौ राज्यं ततो हित्वा संसारं बदरीं ययौ ।
भक्त्या नारायणं प्राप्य ययौ धाम परं हरेः ॥३७॥
अनेन राज्ञा यज्ञस्तु यत्र गुप्तप्रयागके ।
कृतः श्रेष्ठं परं तीर्थं तारकं तद्धि विद्यते ॥३८॥
शृणु चान्यं च नृपतिं यन्नाम्ना तीर्थमुत्तमम् ।
भद्रेश्वरं जयन्त्याख्ये संभूतं भद्रिकातटे ॥३९॥
आसीत् कृतयुगे राजा भद्राश्वो नाम भक्तराट् ।
यस्य नाम्नाऽभवद् वर्षं भद्राश्वं नाम नामतः ॥४०॥
तस्याऽगस्त्यः कदाचित्तु गृहमागत्य सत्तमः ।
उवाच सप्तरात्रं तु वसामि भवतो गृहे ॥४१॥
तं राजा शिरसा नत्वा स्थीयतामित्यभाषत ।
तस्य कान्तिमतीनाम्नी भार्याऽऽसीच्च पतिव्रता ॥४२॥
तस्यास्तेजः समभवच्चन्द्रकान्तिसमं भुवि ।
शतानि पञ्च नृपतेश्चान्याः पत्न्योऽभवन्नपि ॥४३॥
ता दास्य इव कर्माणि कुर्वन्त्यस्यास्तपोबलात् ।
महाभागा कान्तिमती भार्या सर्वोत्तमाऽस्ति च ॥४४॥
सपत्न्यश्च भयात्तस्या दास्यं कुर्वन्ति नित्यदा ।
तामगस्त्यस्तदा दृष्ट्वा रूपतेजोन्वितां शुभाम् ॥४५॥
राजानं तत्र लुब्धं च हरेर्भक्त्या विवर्जितम् ।
कान्तिमतीं भक्तिहीनां दृष्ट्वा च मुनिरब्रवीत् ॥४६॥
प्रथमे दिवसे दृष्ट्वा लोकयन्तं प्रियामुखम् ।
साधु साधु जगन्नाथेत्याहाऽगस्त्यः प्रहर्षितः ॥४७॥
द्वितीये दिवसेऽप्येवं राज्ञीं नृपं विलोक्य च ।
अहो मुष्टमहो मुष्टं जगदेतच्चराचरम् ॥४८॥

इत्यगस्त्योऽवदद् धुन्वन् शिरो नृपस्य शृण्वतः ।
तृतीयेऽहनि भूपं च राज्ञीं दृष्ट्वा शुचाऽवदत् ॥४९॥
अहो मूढा न जानन्ति दातारं परमेश्वरम् ।
य एकेन दिनेनैव राज्ञस्तुष्टः प्रदत्तवान् ॥५०॥
चतुर्थे दिवसे हस्तावुत्क्षिप्य पुनरब्रवीत् ।
साधु साधु जगन्नाथ स्त्री शूद्राः साधु साध्विति ॥५१॥
द्विजाः साधु नृपाः साधुवैश्याः साधु पुनः पुनः ।
साधु भद्राश्च साधु त्वं साधु मोऽगस्त्य साधु ते ॥५२॥
साधु प्रह्लाद साधु त्वं ध्रुवः साधु महाव्रतः ।
एवमुक्त्वा ननर्तोच्चैरगस्त्यो राजसन्निधौ ॥५३॥
एवम्भूतं तु तं दृष्ट्वा पत्नीयुक्तो नृपोत्तमः ।
किं हर्षकारणं ब्रह्मन्! येनेत्थं नृत्यते त्विह ॥५४॥
किं च संभाषसे विद्वन् परानन्देन चेतसा ।
अगस्त्यस्तं च भद्राश्वं तथा राज्ञीमुवाच ह ॥५५॥
अहो मूर्खः कुराजा त्वं मूर्खी चेयं प्रिया तव ।
मूर्खाश्च मन्त्रिणः सर्वे अहो मूर्खाः पुरोहिताः ॥५६॥
सर्वं मौर्ख्यान्वितं राजन् दृश्यते तव मण्डलम् ।
सरलं विदितार्थं च ये न जानन्ति मे मतम् ॥५७॥
एवमुक्ते पुना राजा कृतांजलिरभाषत ।
न जानीमो वयं ब्रह्मन् तवोक्तं भावपूरितम् ॥५८॥
विवेचय महाविद्वन् यद्यनुग्रहकृद् भवान् ।
अगस्त्यश्च तदा प्राह वृत्तान्तं प्राग्भवं यथा ॥५९॥
आसीद् वैश्यो हरदत्तनामा नगरपत्तने ।
तस्य भृत्यो भवानासीच्छूद्रवर्णोऽतिभक्तिमान् ॥६०॥
इयं राज्ञी तव पत्नी वैश्यभृत्या तदाऽभवत् ।
स वैश्योऽश्वयुजि मासि द्वादश्यां नियतः स्थितः ॥६१॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
गृणन् विष्ण्वालयं गत्वा पुष्पधूपादिभिर्हरिम् ॥६२॥
अभ्यर्चयति नित्यं वै चिरं ध्यानं करोति च ।
देवालये भवन्तौ च कृत्वा स रक्षपालकौ ॥६३॥
संस्थाप्य द्वौ प्रदीपानां ज्वालनार्थं ततः स वै ।
प्रयाति स्वगृहं वैश्यो भवन्तौ तु हरेर्गृहे ॥६४॥
सम्मार्जनं जलदानं पुष्पतुलसीयोजनम् ।
आगतानां च सत्कारं कृत्वा नित्यं हरेः पुरः ॥६५॥
दिवानिशं भवन्तौ च दीपानामप्यखण्डताम् ।
आस्तां संरक्षयन्तौ वै पुनः प्रज्वाल्य संस्थितौ ॥६६॥
तेन पुण्येन भवतोः पापानि त्वायुषा सह ।
विलीनानि प्रभातायां रजन्यां च युवां तदा ॥६७॥
श्रीहरेः कृपया शूद्रदेहौ त्यक्त्वा मृतिं गतौ ।
ततो राजँस्तत्र जन्म प्रियव्रतगृहेऽभवत् ॥६८॥
इयं कान्तिमती सैव तव पत्नी सहाऽऽगता ।
पारक्यस्याऽपि दीपस्य ज्वालितस्य हरेर्गृहे ॥६९॥
सेवाभक्तिदास्यभावैः प्रसादितस्य शार्ङ्गिणः ।
राज्यं श्रेष्ठं भवद्भ्यां च प्रसादेनेदमर्जितम् ॥७०॥
यः पुनः स्वेन वित्तेन विष्णोरग्रे प्रदीपकान् ।
ज्वालयेत् तस्य यत्पुण्यं तत् संख्यातुं न शक्यते ॥७१॥
मार्जनं लेपनं प्रक्षालनं पात्रप्रशोधनम् ।
पादसंवाहनं वस्त्रक्षालनं स्तवनं तथा ॥७२॥
जीर्णोद्धरणमिज्यां च पुष्पतुलसीयोजनम् ।
नैवेद्यं सलिलं पत्रं फलमारार्त्रिकादिकम् ॥७३॥
चन्दनाऽक्षतकुंकुमाऽबीरसुगन्धचर्चनम् ।
नित्यं कुर्यात्तस्य पुण्यपारं वक्तुं न शक्यते ॥७४॥
तेन राजँस्तव पुण्यं स्मृत्वा प्राक्कृतमेव च ।
साधु साधु जगन्नाथेत्युक्तं हर्षेण वै मया ॥७५॥
कृते वर्षेण यत्पुण्यं त्रेतायां तत् षण्मासिकैः ।
द्वापरे च त्रिभिर्मासैः कलावेकदिनेन तत् ॥७६॥
ओं नमः श्रीकृष्णनारायणायेति वदन् जनः ।
भक्त्या संपूजयन् कृष्णं सर्वं तल्लभते फलम् ॥७७॥
एवं स्थितेऽपि लोकेऽस्मिन् प्राप्ते कलौ जनाः खलु ।
भजिष्यन्ते न वै कृष्णं द्वापरे त्रियुगेऽपि वा ॥७८॥
मुष्टास्ते कर्मभिः स्वैश्च वञ्चिताः स्युश्च सर्वथा ।
त्वं च राजन् रतश्चात्र कान्तायामेव सर्वदा ॥७९॥
न त्वं नेयं स्मरस्यत्र कृष्णनारायणं प्रभुम् ।
एतत्सर्वं विलोक्यैव मयोक्तं चापरे दिने ॥८०॥
अहो मुष्टमहो मुष्टं जगदेतच्चराचरम् ।
श्रीहरेर्मायया मुष्टं वञ्चितं वै चराचरम् ॥८१॥
भजन्ते न हरिं सम्पद्दातारं पुरुषोत्तमम् ।
अथ पारक्यदीपस्योत्कर्षादपि फलं महत् ॥८२॥
राज्यं लब्ध्वं तथापि श्रीहरेर्नाम गृणन्ति न ।
न राजा न च वा राज्ञी स्मरत्यपि नरायणम् ॥८३॥
ममागमेऽपि नैवैतौ भजेते पुरुषोत्तमम् ।
सत्संगेन हि सर्वत्राऽभक्ता अपि क्षणं खलु ॥८४॥
भक्तिं कुर्वन्ति कृष्णस्य न तु मूर्खाः कदाचन ।
सुयोगेऽपि भक्तिहीना मूढा एव न संशयः ॥८५॥
राजा मूढस्तस्य राज्ञी मूढतमेति भाति मे ।
अतस्तृतीयदिवसे युवां दृष्ट्वा मयेरितम् ॥८६॥

अहो मूढा न जानन्ति गोविन्दं परमेश्वरम् ।
एतत्सर्वं सुखं चापि हरेर्दीपक्रियाफलम् ॥८७॥
एकस्यैव दिवसस्य फलं राज्योत्तमोत्तमम् ।
चतुर्थे दिवसे राजन् हस्तावुत्क्षिप्य वै मया ॥८८॥
विचार्यैव श्रावितं वां भक्ताः सर्वे हि साधवः ।
भगवता द्विजा ये च राजानो ये च वैष्णवाः ॥८९॥
यजन्ते विविधैर्यज्ञैस्तेन ते साधवः स्मृताः ।
ये न भजन्ति देवेशं सत्यपि स्मृद्धिसाधने ॥९०॥
निर्धनोऽपि ततः श्रेष्ठो यो वै भजति केशवम् ।
अहं यद्यप्यरण्यस्थो निर्धनो निःकुटुम्बकः ॥९१॥
तथापि साधुरेवाऽस्मि सस्मृद्धीनामपेक्षया ।
यमहं न विस्मरामि कदापि पुरुषोत्तमम् ॥९२॥
तेन साधो अगस्त्येति मयोक्तं मां प्रति ध्रुवम् ।
सा स्त्री धन्या स शूद्रश्च तथा धन्यतरो मतः ॥९३॥
शुश्रूषां स्वामिनो नारायणत्मकस्य सर्वथा ।
कान्ते च स्वामिनि नित्यं परोक्षो हरिरस्ति वै ॥९४॥
मत्वा करोति येन स्यात् कृष्णार्पणं सुकर्म तत् ।
सा स्त्री धन्या तथा शूद्रो द्विजशुश्रूषणे रतः ॥९५॥
द्विजाज्ञया हरेर्भक्तिं साधू तौ यत् करोति हि ।
द्विजास्ते साधवः प्रोक्ता हरेर्भक्तियुताश्च ये ॥९६॥
नृपास्ते साधवः प्रोक्ता हरिं भजन्ति नित्यदा ।
आसुरं भावमाश्रित्य प्रह्लादः पुरुषोत्तमम् ॥९७॥
मुक्त्वा चान्यं न जानाति तेनाऽसौ साधुरुच्यते ।
उत्तानपादपुत्रश्च ध्रुव एव तु बालकः ॥९८॥
वने विष्णुं समाराध्य प्राप स्थानं महत्तमम् ।
तेन साधुर्ध्रुवश्चापि मयोक्तं राजसत्तम ॥९९॥
सर्वं साधु भवेद् राजन् श्रीकृष्णः स्मर्यते हृदि ।
असाधु यावदेवैतच्छ्रीकृष्णो विस्मृतो यदि ॥१००॥
त्वया राजन् परं प्राप्तं राज्यं विष्णुस्तु विस्मृतः ।
तस्माद्भजाऽत्र गोविन्दं श्रीकृष्णं पुरुषोत्तमम् ॥१०१॥
इत्युक्तौ दम्पती नत्वा स्मृत्वा प्राग्भवजं फलम् ।
भेजाते श्रीहरिं कृष्णनारायणं फलप्रदम् ॥१०२॥
य इदं शृणुयाल्लक्ष्मि ! मोक्षस्तस्याऽपि संभवेत् ।
पार्वतीं शंकरः प्राह यत्तन्मयेरितं तव ॥१०३॥
भद्राश्वः स ययौ तीर्थयात्रार्थं च प्रभासके ।
सौराष्ट्रे तेन भद्रायास्तटे वै पश्चिमे शुभे ॥१०४॥
जयन्ताख्ये पत्तने च शांकरं तीर्थमास्थितम् ।
भद्रेश्वरं च तन्नाम श्रवणात्पापनाशनम् ॥१०५॥
पुना राजा ददौ तत्राऽगस्त्याश्रमं तपोमयम् ।
अश्वपट्टसरसश्च तटे ब्रह्मर्षिसेवितम् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विशालनृपकृतविशालातीर्थभद्राश्वनृपकृत भद्रे तीर्थाऽगस्त्यकृतोपदेशश्चेत्यादिनिरूपणनामा षट्चत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥ ५४६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततोऽगस्त्यो भद्राश्वं नृपतिं शुभम् ।
आत्मज्ञानं यथा प्राह वच्मि ते लोकमोक्षदम् ॥ १ ॥
शंकरेण प्रभासे वै प्रोक्तं सत्यै पुरा हि तत् ।
भद्राश्वः समपप्रच्छाऽगस्त्यं मोक्षप्रदं वरम् ॥ २ ॥
ज्ञानं वद महाप्राज्ञ ! येन मोक्षं प्रयामि वै ।
अगस्त्यः प्राह राजानं गुरुं विना गतिर्न वै ॥ ३ ॥
गुरुर्ब्रह्मा स्वयं विष्णुः शंभुर्नारायणो गुरुः ।
गुरुरेव परब्रह्म प्रत्यक्षो भगवान् हरिः ॥ ४ ॥
तं प्रसाद्य भवेन्मोक्षयोग्यता देहिनः पुरा ।
आत्मप्रसादस्तस्यैवाशीर्भिर्जायत एव हि ॥ ५ ॥
व्रतं कुर्यादर्चनं च प्रसादनं पुनः पुनः ।
ज्ञानमन्त्रप्रदाता च तारयेद् भवसागरात् ॥ ६ ॥
गुरवे भोजनं दद्याद् वैष्णवो यज्ञ उच्यते ।
कुर्यात्तु वैष्णवं यज्ञं यजेद् योगीश्वरं हरिम् ॥ ७ ॥
यो हरेः सरहस्यं तु सुमन्त्रं चोपपादयेत् ।
तस्मै दद्यात्तु सर्वस्वं प्रियं चात्मार्पणादिकम् ॥ ८ ॥
फलं तस्मै प्रदत्तस्य कोटिकोटिगुणोत्तरम् ।
सुखं राज्यं महानन्दः स्वर्गं मोक्षश्च शाश्वतः ॥ ९ ॥
गुरौ सति तु यश्चान्यमाश्रयेत् पूजयेत् कुधीः ।
स न फलमवाप्नोति दत्तमस्य तु निष्फलम् ॥१०॥
प्रयत्नेन गुरौ पूर्वं पश्चादन्यस्य दापयेत् ।
अविद्यो वा सविद्यो वा गुरुरेव जनार्दनः ॥११॥
मार्गस्थो वाऽप्यमार्गस्थो गुरुरेव परा गतिः ।
प्रतिपद्य गुरुं यस्तु पश्चाद् विप्रतिपद्यते ॥१२॥
गुर्वपराधपात्रं स दुःखी स्यात् पुरुषाधमः ।
गुरौ नारायणश्चास्ते तं प्रसाद्य सुखी भवेत् ॥१३॥
मूर्तिर्नारायणस्यैव चेतना गुरुरेव ह ।
जागर्ति स्नाति वस्त्राणि धारयत्येव चन्दनम् ॥१४॥
कुंकुमादि सुगन्धादि गृह्णाति स जनार्पितम् ।
पुष्पं पत्रं फलं तोयं भोज्यं ताम्बूलकं तथा ॥१५॥

जलं भूषां कज्जलादि गृह्णाति स जनार्पितम् ।
आसनं वाहनं यानं पर्यंकं पादुकादिकम् ॥१६॥
जलं सौभाग्यद्रव्यादि गृह्णाति स जनार्पितम् ।
मनो भावं प्रेम भक्तिं सेवां वस्तु तथार्पितम् ॥१७॥
पादसंवाहनं पेयं मैत्रीं हास्यं प्रसन्नताम् ।
नमस्कारं देहसेवां गृह्णाति स जनार्पितम् ॥१८॥
शिष्यदुःखं दयालुर्वै गृह्णाति वारयत्यपि ।
साहाय्यं कुरुते शश्वज्ज्ञानं ददाति शान्तिदम् ॥१९॥
पापं प्रज्वालयत्येव पुण्यं ददाति पुष्कलम् ।
नैजं सर्वं ददात्येव गुरुरेव जनार्दनः ॥२०॥
गुरुरेव पतिः पुत्रः सती साध्वी पतिव्रता ।
पिता माता तथा भार्या सर्वस्वं गुरुरेव ह ॥२१॥
रक्षकः पोषकश्चापि तारकश्चावबोधकः ।
हरेर्धाम्नः प्रापकश्च गुरुरेव हरिः स्वयम् ॥२२॥
भ्राता चैकगुणो मान्यः पिता दशगुणस्ततः ।
माता शतगुणा मान्या सहस्रगुणको गुरुः ॥२३॥
अपारगुणकः कृष्णनारायणः पुमुत्तमः ।
अक्षराऽधिपतिः श्रीमान् भगवान् पुरुषोत्तमः ॥२४॥
एवं प्रत्यक्षमूर्तिं वै गुरुं सम्पूजयेत् सदा ।
दिव्यमूर्तिर्गुरुः साक्षाद्धरेर्दिव्यस्य योगतः ॥२५॥
शिष्यस्य दिव्यतासम्पादको दिव्यहरिः स वै ।
एवं मत्वा सदा राजन् गुरुं ध्यायीत चार्चयेत् ॥२६॥
परं कल्याणदं पात्रं शिष्यः समर्जयेद् गुरुम् ।
भद्राश्वः स्वगुरोर्वाक्यं श्रुत्वा मुमोद चात्मनि ॥२७॥
सर्वं प्राप्तं गुरुः प्राप्तः पूर्णतां मन्यतेऽपि च ।
लोकानां बोधलाभाय नत्वा प्रपच्छ वै पुनः ॥२८॥
गुरो ! प्राप्तं मया सर्वं प्राप्तव्यं नावशिष्यते ।
तथापि वद मे मोक्षधर्मान् लोकहितावहान् ॥२९॥
भगवन् कर्मणा केन छिद्यते भवसंसृतिः ।
किंवा कृत्वा न शोचन्ति मूर्ताऽमूर्तोपपत्तिषु ॥३०॥
किं कृत्वा च परब्रह्ममयो भवति मानवः ।
इति राज्ञो वचः श्रुत्वाऽगस्त्यः प्राह प्रमोदवान् ॥३१॥
शृणु राजन् कथां दिव्यां दूरासन्नव्यवस्थिताम् ।
दृश्यादृश्यविभागोत्थां समाहितमना भव ॥३२॥
आसीद् राज्यं पुरा चापि वर्तमाने भविष्यति ।
अपारं च तथाऽसीमं यत्र सूर्यो न चन्द्रमाः ॥३३॥
न रात्रिर्न च दिवसो दिशो नैव न भूस्तथा ।
न चौर्देवा न वा चासन् दिव्यं राज्यं तथा हि तत् ॥३४॥
तत्र सम्राट् मुक्तपालो राजा शाश्वतजीवनः ।
पालयामास दिव्यान् वै मुक्तान् संख्याविवर्जितान् ॥३५॥
प्रजास्तं मानयामास सर्वात्मभावनार्पणाः ।
प्रजानां भोजनं मिष्टं राजा सर्वं ददाति वै ॥३६॥
न च शैत्यं नातपश्च सिद्धियुक्ताश्च ताः प्रजाः ।
विनिन्द्राः शाश्वतानन्दा नित्यतृप्ता निराशयाः ॥३७॥
सर्वे संकल्पसत्याश्च राजाऽऽनन्दपरिप्लुताः ।
वर्तन्ते च प्रजाः सर्वास्तस्यैव चक्रवर्तिनः ॥३८॥
यत्र नान्यत् खण्डराज्यं साम्यवादश्चतुर्विधः ।
सालोक्यं सर्वमुक्तानां सार्ष्टिता सर्वदेहिनाम् ॥३९॥
सारूप्यं सर्वतत्त्वानां सायुज्यं सर्वयोगिनाम् ।
भोजने रमणे याने वाहने कल्पने रतौ ॥४०॥
ज्ञाने भक्तौ वेदने चोपकार्येऽपि समानता ।
एवं राज्यं महद् यत्र सत्यमेव न चानृतम् ॥४१॥
यत्र न्यायालयो नास्ति नास्ति दोषाधिकारिता ।
यत्र चौर्यं वैमनस्यं शात्रवं वर्तनं न वै ॥४२॥
यत्राऽशुद्धिस्तथा नास्ति क्षयो यत्र न विद्यते ।
यत्र चातिशयो नास्ति कुतो द्वेषश्च रागकः ॥४३॥
तादृशं राज्यसर्वस्वं प्रत्यक्षं करपात्रवत् ।
दूरदृश्यं दूरश्रावो दूरचिन्तनमित्यपि ॥४४॥
सर्वं साक्षाच्चात्मतन्त्रं साधनं चात्मजं हि तत् ।
तद्राज्यं पावनानां तु प्रजानामधिवासनम् ॥४५॥
अपावनानां यात्रापि तत्र नैव हि जायते ।
सीमा या चाऽपावनानां तदूर्ध्वं तदग्राह्यकम् ॥४६॥
अपावनान्यरण्यानि वर्तन्ते परितस्ततः ।
स चात्मपालको राजाऽऽरण्यं विहर्तुमाययौ ॥४७॥
अरण्यानि समुद्रांश्च पर्वतान् क्षेत्रभूमिकाः ।
यानि दिव्यमहाराज्यादधस्तटे भवन्ति च ॥४८॥
दास्यै दत्तं च तद्राज्यं भृत्याय पूर्वमेव ह ।
दिदृक्षुः कृपया राजा पश्चिमं तटमाययौ ॥४९॥
ऊर्ध्वं तीरं समुद्रस्याऽनन्तपारस्य शाश्वतम् ।
भवाब्धौ यत्र वै द्वीपे द्वीपे वसन्ति धीवराः ॥५०॥
कामः क्रोधश्च लोभश्च मोहो मदश्च पञ्च ते ।
अष्टौ द्रुमास्तथा यत्र वर्तन्ते कामवर्षिणः ॥५१॥
धर्मोऽधर्मस्तथा ज्ञानमज्ञानं च चतुर्थकम् ।
ऐश्वर्यं चाप्यनैश्वर्यं रागो वैराग्यमित्यमी ॥५२॥
नदी तीर्यग् यत्र याति मनोवहाभिधाऽनिशम् ।
अधश्चोर्ध्वं बभ्रमुश्च पञ्च मुख्याश्च नायकाः ॥५३॥

शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च नामतः।
एको मुख्यप्रधानश्च प्राणाख्यो वर्तते सदा ॥५४॥
एका स्त्री वर्तते दासी यथा राज्ञी बलाधिका।
त्रिगुणा सा बुद्धिनाम्नी राजेन्द्रं सेवते सदा ॥५५॥
सा स्त्री स्वे वक्षसि नित्यं महेन्द्रं रक्षति ध्रुवम्।
सहस्रसूर्यप्रतिमं लक्षचन्द्रसमा च सा ॥५६॥
तस्याऽधरस्त्रिविकारो हास्यमाश्चर्यमुन्नता।
तस्या वर्णस्त्रिरूपश्च श्वेतो रक्तस्तमोमयः ॥५७॥
युवती सर्वदा रम्या नूतनेव व्रजस्थिता।
विना च पुरुषं म्लाना तूष्णीभूता मृता यथा ॥५८॥
दिव्यं तं पुरुषं दृष्ट्वा समायान्तं तदाऽन्तिगम्।
साशा सजीवना यद्वज्जाता जडाऽपि चेतना ॥५९॥
नृपोऽपि तां कृपयैव विलोक्य च मुहुर्मुहुः।
समुद्रं च वनं तस्याः क्षेत्राणि संविवेश ह ॥६०॥
तस्मिन् प्रविष्टे नृपतौ स्त्रीराज्यस्थाः प्रजास्तदा।
प्रधानाद्याश्च सम्भूय तत्स्वागतार्थमाययुः ॥६१॥
केचिन्नम्रा जलं पात्रमानिन्युरासनादिकम्।
भयादैक्यं गतवन्तः क्षणेन चोपदान्विताः ॥६२॥
तैस्तदाधीवरैर्न्यायवर्जितैर्वेष्टितो नृपः।
कामादिभिस्तथाप्येषस्तेभ्यो न हृदयं ददौ ॥६३॥
अथाऽयं नृपतिस्तांश्चोद्धतान् ज्ञात्वा वशेच्छया।
एकं वै मानसं पुत्रं चिन्तयामास नायकम् ॥६४॥
यदधीना इमे सर्वे भवेयुर्न च स्युर्यथा।
तावत् सा स्त्री निरपत्या सापत्येच्छावती ह्यभूत् ॥६५॥
प्रार्थयामास राजानं कुरु सापत्यकां च माम्।
तथाऽस्त्विति नृपः प्राह सुषुवे स्त्री स्वकं सुतम् ॥६६॥
त्रिवर्णं पुरुषं श्वेतं रक्तं कृष्णं च सदृशम्।
जातमात्रः सोऽप्युवाच मम नाम प्रदेहि वै ॥६७॥
महानिति ततश्चक्रे मुख्यं नाम सुतस्य सः।
राजा तेन प्रसन्नोऽभूत् पुत्रोऽपि तं नृपं तदा ॥६८॥
धर्षयामास वेगेन किन्तु नृपो महाबलः।
धर्षणं तस्य नापेदे ततोऽसौ पुत्रकाम्यया ॥६९॥
तुष्टाव तं नृपं तेन दत्तस्तत्सदृशः सुतः।
सोऽपि त्रेधाऽभवत्तस्य महान् प्राहाऽहमेव ह ॥७०॥
अस्मीतिनामतः ख्यातोऽहंकारः पितृसदृशः।
एवं पुत्रं प्रपुत्रं च लब्ध्वा स्त्री चातिहर्षिता ॥७१॥
तद्बलेन ततः सा स्त्री तं राजानं रुरोध ह।
तथापि न निरुद्धः स यदा वै बलवत्तमः ॥७२॥
तदा नैजं बलं मत्वा न्यूनं सैन्यं च सा पुनः।
वव्रे पुत्रान् पञ्च चान्यान् अहंकारस्य बालकान् ॥७३॥
राजा ददौ च तान् पञ्च तन्मात्रात्मकबालकान्।
तेऽपि चागत्य च सर्वे संभूय रुरुधुर्नृपम् ॥७४॥
तथापि भूपतिः सिद्धो रुद्धो नैव च नैव च।
तदा वव्रे तु सा नारी दश पञ्च च बालकान् ॥७५॥
तथास्त्विति नृपः प्राह ददौ दशेन्द्रियाणि च।
पञ्चप्राणान् ददौ ते च सम्भूय रुरुधुर्नृपम् ॥७६॥
तथाप्ययं न रुद्धोऽभूत् ततस्तेऽन्याश्रयं ययुः।
स्वराज्यस्थं महेन्द्रं ते संवेष्ट्य संस्थितास्तदा ॥७७॥
इन्द्रश्चात्मा महेन्द्रः स रुद्धो दस्युभिरेव ह।
इन्द्रेण सह ते सर्वे ह्येकीभूय हि दस्यवः ॥७८॥
राजानं च ततो हन्तुं बद्धुं वा मन्थितुं च वा।
उद्यताः सहसा तत्र तथापि बद्ध एव न ॥७९॥
अथ सर्वान् विहायैव राजा गन्तुं समीहते।
तावत् सेन्द्रास्तदा सर्वे बभूवुश्च मृता यथा ॥८०॥
पुनः सर्वैः प्रार्थितश्च जीवानार्थं च तैः पुनः।
मेलयितुं मण्डले स्वे वर्तयितुं सदा सह ॥८१॥
तदा दयालुर्भगवान् दिव्यराज्यकरः प्रभुः।
स्वस्थाने कार्यकर्तारं बद्धमिवाऽनुगामिनम् ॥८२॥
पुरुषं जनयामास यथा कर्मानुरूपिणम्।
हिरण्यवर्णं निर्लिप्तं नृपाज्ञालेपमास्थितम् ॥८३॥
स्त्रिया महताऽहंकृत्या कामाद्यैरभिवाञ्छितम्।
शब्दाद्यैः श्रवणाद्यैश्च प्राणाद्यैरभिसत्कृतम् ॥८४॥
जनयित्वा ददौ तेभ्यो रुद्धः संवेष्टितश्च सः।
जडचेतनग्रन्थिश्च हिरण्मयो नरश्च सः ॥८५॥
सदृशान् जनयामास रोमसंख्याकबालकान्।
सुशोभमानान् वैराजाँस्तेऽपि तृष्णाकुलास्ततः ॥८६॥
असंख्यबालकान् स्वल्पान् ससृजुर्नाभिदेशतः।
तेभ्यो दत्ता महातृष्णा प्रत्येकं च प्रवर्तिका ॥८७॥
कार्यकाण्डप्रयोक्त्री च वासना चाऽपराऽर्पिता।
उभाभ्यां रमते ब्रह्मा जनयत्यपराः प्रजाः ॥८८॥
एतत् सर्वं परं कार्यकरं कुटुम्बमेव सः।
स्त्रियै दत्त्वा ययौ नैजं देशं दिव्यं नृपश्च सः ॥८९॥
तावल्लीनानि सर्वाणि कुटुम्बानि शुभानि वै।
तैर्लीनैर्नृपतेश्चेन्द्रो निराश्रयो बभूव ह ॥९०॥
रुरोद पापरुद्धः स वासनाक्रमवासितः।
पुनः कृपालुर्भूपालस्तदर्थं सुखमाश्रयम् ॥९१॥

ददौ व्योम ततो वायुं तेजो जलं भुवं तथा ।
लीनेभ्यो व्यक्तरूपाणि दत्तवान् भूपतिः स वै ॥९२॥
सावकाशानि पञ्चैक्यभावापन्नानि कार्यतः ।
संयुक्तानि महेन्द्रस्याऽऽश्रयाण्यालम्बनानि च ॥९३॥
तावत्तानि च लीनानि समुद्भूतानि वै पुनः ।
जीवितानि स्वकार्येषु समागत्य स्थितानि च ॥९४॥
महेन्द्रो दस्युभिर्व्याप्तो नवद्वारे पुरे शुभे ।
राज्यं च कारयामास प्रचकार स्वयं तथा ॥९५॥
महेन्द्राद्या बभ्रमुश्च दिग्भ्रमे चाति पीडिताः ।
तदा तं नृपतिं प्राहुर्देहि मार्गप्रदर्शकम् ॥९६॥
प्रार्थनां परमां श्रुत्वा राजा कन्या सुबोधिनीम् ।
ददौ महेन्द्रसंज्ञाय यथा दिव्यनृपालयः ॥९७॥
प्रदृश्यते तया साकं महेन्द्रः सुखवानभूत् ।
अमूर्ता इव ते सर्वे न्यूषुरायतने शुभे ॥९८॥
नवद्वारे पुरे त्वेकस्तम्भे सर्वककुब्पथे ।
नदीसहस्रसंकीर्णे सर्वकार्यसमाश्रिते ॥९९॥
महेन्द्रं त्वेकलं दृष्ट्वा सखायं नृपतिश्च सः ।
आवर्तमानं मुग्धं च नष्टमिव स्थितं च तम् ॥१००॥
संसूच्य वाचकान् शब्दान् वेदानशिक्षयच्छुभान् ।
नियमांश्च यमाँश्चापि शिक्षयमास वै तदा ॥१०१॥
तेन मोहो विनष्टो वै सस्मार भूपतिं पुनः ।
किन्तु बन्धैर्वेष्टितः स न निर्गन्तुं शशाक ह ॥१०२॥
शस्त्रं त्वैच्छत्तदा देवान्नृपतेः शीघ्रमेव तु ।
भूपः शस्त्रमसंगं च ददावस्मै सुवज्रकम् ॥१०३॥
छित्वा तदा महेन्द्रश्च बन्धनानि नृपालयम् ।
ययौ नित्यसुखानन्दान्वितोऽभूत् क्षणमात्रतः ॥१०४॥
महेन्द्राः सर्व एवैते पूर्वकर्मानुसारतः ।
कायानगरराजानो भवन्ति भवसागरे ॥१०५॥
चतुर्विंशतिचौरैश्च बद्धयन्ते मध्यसंस्थिताः ।
उपासनया बुद्धया च भक्त्या दास्येन योगतः ॥१०६॥
अन्यतमेन शस्त्रेण भित्वा बन्धनमेव च ।
याति दिव्यनृपराज्यं पुनर्यत्र न बन्धनम् ॥१०७॥
आगतेयं कथा राजन् सर्वस्य विषये स्थिता ।
त्वद्देहे मम देहे च सर्वजन्तुषु सदृशी ॥१०८॥
मायाराज्यं विहायैव दिव्यभूपाश्रयं चरेत् ।
तेनमुक्तस्थितिं प्राप्य शाश्वतं सुखमश्नुते ॥१०९॥
प्रवृत्तं मण्डलं हित्वा निवृत्तं पदमाप्नुयात् ।
पार्वत्यै शंकरश्चैवं प्राह लक्ष्मि ! मयोदितम् ॥११०॥
अगस्त्यश्च समुवाच भद्राश्वाय नृपाय च ।
सोऽयं राजा च सौराष्ट्रे प्राप्य ज्ञानमनुत्तमम् ॥१११॥
ययौ राज्यं स्वकं तत्र समाराध्य नरायणम् ।
माहेन्द्रमण्डलं हित्वा भक्त्या नारायणस्य सः ॥११२॥
ययौ मोक्षपदं दिव्यनृपतेर्वासरूपकम् ।
पठेद् यः शृणुयाच्चापि लभेतात्मविसर्जनम् ॥११३॥
भवपारं परं पारं मायाब्धेर्वासनाक्षयम् ।
पुरातनं महामित्रं प्राप्नुयान्नात्र संशयः ॥११४॥
सकामस्य धनं पुत्रोऽपत्यानि सम्पदस्तथा ।
भवेयुश्च सदारोग्यं तत्त्वज्ञानश्रवात् प्रिये ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने भद्राश्वराज्ञेऽगस्त्यप्रदत्तात्मज्ञानगुरुमहिमादिनिरूपणनामा सप्तचत्वारिंशदधिकपञ्चशततमोऽध्यायः ॥५४७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! प्रभासस्य पूर्वस्यां शंकरोदितम् ।
पार्वत्यै सुमहत्तीर्थं प्राण्युद्धारकरं शुभम् ॥ १ ॥
गुप्तप्रयागस्तत्राऽस्ति देवोऽस्ति माधवस्तथा ।
जाह्नवी यमुना देवी सरस्वती च तत्र वै ॥ २ ॥
अन्यान्यपि च तीर्थानि वसन्ति तत्प्रयागके ।
शृगालेश्वरतीर्थं च सन्निधौ वर्तते तथा ॥ ३ ॥
त्रिःसंगमो नदीनां च तीर्थं तत्परमं शुभम् ।
ब्रह्मकुण्डो विष्णुकुण्डो रुद्रकुण्डस्तथा शुभः ॥ ४ ॥
कुण्डमध्याद् विनिर्गत्य गंगा यमीं सुगच्छति ।
अनयोरन्तरे सूक्ष्मे गुप्ता चास्ते सरस्वती ॥ ५ ॥
अत्र माघे स्नानकर्ता प्रयागस्नानजं फलम् ।
तीर्थराजफलतुल्यं लभति नात्र संशयः ॥ ६ ॥
तस्मिंस्तीर्थे मातरश्च रक्षिकाः संवसन्ति हि ।
भूतादिभयनाशाय ता मातॄः संप्रपूजये ॥ ७ ॥
वृषभस्तत्र दातव्यो यात्राफलोपलब्धये ।
विष्णुकुण्डे जनः स्नात्वा यस्तु माधवमर्चयेत् ॥ ८ ॥
स तु यास्यति वैकुण्ठं यत्र देवो हरिः स्वयम् ।
शृगालेश्वरनामेशक्षेत्रं क्रोशार्धमित्यपि ॥ ९ ॥
गवाहता द्विजहता ये दंष्ट्रिपशुभिर्हताः ।
आत्मघातकरा ये च सर्पदष्टाश्च ये मृताः ॥१०॥
शय्यामृताः शौचहीनास्तेषां श्राद्धं तदत्र वै ।
कारयेत् तेन मुक्ता स्युर्दुःखशोकविवर्जिताः ॥११॥

तत्र सिद्धेश्वरं तीर्थं देवैः संस्थापितं पुरा ।
अणिमादिकमैश्वर्यं स्मृद्धिं विन्देत् प्रपूजनात् ॥१२॥
ततो वै नारदादित्यं तीर्थं गच्छेद् रवेर्गृहम् ।
एकदा तु पृथिव्यां वै तीर्थयात्राप्रसंगतः ॥१३॥
नारदस्त्वागतस्तस्य सूर्यक्रियाप्रसंक्रमात् ।
शैथिल्यं समभूद् देहे यथा जराकृतं भवेत् ॥१४॥
स्वर्गं सत्यं ततो गन्तुं नोत्साहं कुरुते मुनिः ।
यतो विरूपतां प्राप्तो यौवनादिविवर्जितः ॥१५॥
विजातीयादिभावेन सत्ये लोके वसेत् कथम् ।
एवं चिन्तयतस्तस्य सूर्यः साक्षात् बभूव ह ॥१६॥
वद नारद का चिन्ता जायते तव मानसे ।
मर्त्यलोके च येऽप्यन्ये बहु भ्रमन्ति ते खलु ॥१७॥
ईश्वरा वा च देवा वा ऋषयो योगिनोऽपि वै ।
मम क्रियाभिर्व्याप्ताश्च यान्ति वै जीर्णतां ध्रुवम् ॥१८॥
यथा मर्त्यास्तथा तेऽपि मम कालप्रभावतः ।
ग्रस्यन्ते मानवैस्तुल्या वृद्धा भवन्ति सर्वशः ॥१९॥
वद त्वं षोडशाब्दश्च दृश्यसे सत्यलोकगः ।
किन्तु चाऽद्य क्षितौ जातो जरया ग्रस्त एव यत् ॥२०॥
मा त्वं चिन्तां कुरु ब्रह्मन् युवा सन् विचरिष्यसि ।
न प्रभावः किरणानां तवोपरि भविष्यति ॥२१॥
इत्युक्तो नारदस्तत्र सुदृढः षोडशाब्दिकः ।
यथापूर्वं हि संजातः सूर्यश्चादृश्यतां गतः ॥२२॥
नारदेन तदा तत्र नारदादित्यनामकः ।
सूर्यदेवः स्थापितश्च तीर्थं कृतं च पावनम् ॥२३॥
सप्तम्यां रविवारेण यस्तं पश्यति मानवः ।
तस्य रोगभयं न स्यात् प्रसादाद् द्युमणेः रवेः ॥२४॥
अन्यत् तीर्थं तत्र चास्तेऽपरनारायणाश्रयम् ।
फाल्गुनाऽमलपक्षे तु ह्येकादश्यां विधानतः ॥२५॥
पूजयेत् पुण्डरीकाक्षं विष्णुं नारायणात्मकम् ।
अथ गंगा शुभं तीर्थं तत्रैशान्यां हि वर्तते ॥२६॥
यत्र त्रिनेत्रका मत्स्या वसन्ति रुद्रचिह्निनः ।
शृणु गंगागमं तत्र मत्स्यानां च त्रिनेत्रताम् ॥२७॥
यदा रुद्रो विवस्त्रः सन् कदाचिदृषिमण्डले ।
आश्रमेषु तु भिक्षार्थं विचचार तदा च तैः ॥२८॥
क्रुद्धैस्तैः ऋषिभिः शप्तो ह्यजानद्भिर्महेश्वरः ।
गजवद् भ्रमसे लोके लज्जाहीनः पशुर्यथा ॥२९॥
तस्माद् भव गजस्त्वं चाऽरण्यवासीति शंकरः ।
द्रागेव च गजो भूत्वाऽरण्यं विवेश शंकरः ॥३०॥
तत्र भृगुर्योगदृष्ट्या विदित्वा शंकरं च तम् ।
निरानन्दं जगत् सर्वं दृष्ट्वा चाह ऋषीन् परान् ॥३१॥
अयं तु शंकरश्चासीद् गजरूपोऽपि सोऽभवत् ।
अपराधो महान् जात इति मत्वा च शंकरम् ॥३२॥
ध्यायन्तः प्रार्थयामासुरत्यर्थं च प्रभासके ।
क्षेत्रे शृगालनाम्न्येव यत्र गुप्तप्रयागकः ॥३३॥
तत्र प्राप्ताश्च ते सर्वे तपोनिष्ठास्तपोधनाः ।
भृगुरत्रिस्तथा मंकिः कश्यपः कण्व इत्यपि ॥३४॥
गौतमः कौशिकश्चापि कुशिकश्च महातपाः ।
जातूकर्ण्यो वसिष्ठश्च सत्यतपाः पराशरः ॥३५॥
शाण्डिल्यश्च पुलस्त्यश्च वत्सः सावर्णिरित्यपि ।
शूकरोऽपि भरद्वाजो भार्गवो दीर्घतापसः ॥३६॥
एते चान्येऽपि बहवोऽगस्त्याद्याः ऋषयो हि ते ।
तपः कृत्वा हरं ध्यात्वा तल्लीनास्ते तदाऽभवन् ॥३७॥
शंभुस्तदा तु साक्षाद्वै समाजगाम तान्प्रति ।
उवाच वरदानार्थं ते च स्वेष्टं प्रवव्रिरे ॥३८॥
यदि प्रसन्नो देवेश गंगामानय प्रागिह ।
अभिषेकं तत्र कृत्वाऽर्चयित्वा त्वां ततः परम् ॥३९॥
अज्ञानात्ते प्रद्रोग्धारो यास्यामः पूततां ततः ।
द्वाभ्यां वयं च नेत्राभ्यां न ज्ञातः शंकरो भवान् ॥४०॥
तेन जातस्तेऽपराधः पुनः स्यान्न तथा च नः ।
देहि शंभो तृतीयं च नेत्रं दिव्यं यथा तव ॥४१॥
हरेर्हरस्य चान्येषां प्रत्यक्षः स्यात् प्रमाणधृक् ।
परिचयस्तथा चक्षुरान्तरं देहि शंकर ॥४२॥
शंभुः प्राह तथाऽस्त्वेव यूयं पावनपावनाः ।
त्रिनेत्राश्च सदा सन्तु गंगा चेयं समागता ॥४३॥
इत्युक्त्वा शंकरस्तूर्णं तत्स्थानाद् विगतोऽभवत् ।
ऋषयः पापमुक्ताश्च शंकरस्य प्रसादतः ॥४४॥
यज्ञं चक्रुर्वैष्णवं च तत्र क्षेत्रे दिनाष्टकम् ।
ब्राह्मणा देवताश्चान्ये तीर्थान्यरण्यदेवताः ॥४५॥
समाजग्मुस्तस्य यज्ञे नारायणप्रसादजम् ।
अन्नं भुक्त्वा परां तृप्तिं गता वै प्राणिनोऽपरे ॥४६॥
जलजाः स्थलजाः सर्वे तृप्तास्तत्र शुभे क्रतौ ।
मत्स्याः प्राहुर्मुनीन् सर्वान् यथा वै धीवरा हि नः ॥४७॥
जिघांसवो न हन्युर्वै तथाऽऽशीर्दीयतां हि नः ।
ऋषयश्च तदा प्राहुस्त्रिनेत्राश्च भवन्तु वै ॥४८॥
तृतीयं दिव्यनेत्रं च दूरदर्शनकारकम् ।
शांकरं रूपमेवैतद् भवतां जायतां सदा ॥४९॥

धीवरेभ्यश्च ऋषिभिः शांकरास्ते प्रदर्शिताः ।
त्रिनेत्रा वै शुभा मत्स्या न हन्तव्याः कदाचन ॥५०॥
त्रिनेत्रत्वे कारणं च प्रोक्तं गंगाऽऽगमे तथा ।
तत्र कुण्डे समागत्य स्नात्वा मत्स्यान् विलोकयेत् ॥५१॥
तेभ्यो दद्याच्चणकादीन् हेमं विप्राय चार्पयेत् ।
गाश्च वस्त्रं तिलान् दद्यात् त्रिनेत्रः स भवेद् ध्रुवम् ॥५२॥
ऋषितोयाजले स्नात्वा कुण्डे तप्तोदके तथा ।
शंकरं पूजयेत्तत्र स भवेद् भुवनाधिपः ॥५३॥
तत्र चतुर्मुखश्चास्ते विनायको महाबलः ।
सोमवारे पूजयित्वा स्वेष्टकामान् लभेज्जनः ॥५४॥
ततो गच्छेत् परं तीर्थं गोपालस्वामिनं हरिम् ।
सर्वपापौघशमनं दारिद्र्यौघविनाशनम् ॥५५॥
बकुलस्वामिनं कृष्णनारायणं प्रपूजयेत् ।
उत्तरार्कं ततो गच्छेत् सर्वरोगप्रणाशनम् ॥५६॥
समुद्रस्य तटे तत्र ऋषितीर्थं हि विद्यते ।
पाषाणाकृतयस्तत्र दृश्यन्ते ऋषयः सदा ॥५७॥
मरुद्देवीं ततो यायान्मरुद्भिः पूर्वपूजिताम् ।
क्षेमादित्यं ततो गच्छेच्छन्नरस्थानमध्यगम् ॥५८॥
ततो गच्छेन्महादेवीं शुभ्रां कण्टकशोधिनीम् ।
ऋषितोयातटे यज्ञं चक्रुः पुरा महर्षयः ॥५९॥
धूमैः समावृतं व्योम यज्ञहोमाग्निहोत्रजैः ।
ज्ञात्वा दैत्याः समुद्रस्य मध्यात्तत्र समाययुः ॥६०॥
मायाविनो महाकायाः श्यामवर्णा महोदराः ।
लम्बभ्रूश्मश्रुनासाग्रा रक्ताक्षरक्तमूर्धजाः ॥६१॥
उपद्रवं च ते चक्रुर्यज्ञविध्वंसहेतवे ।
एतान् दृष्ट्वा ऋषयश्च दुद्रुवुर्भयकातराः ॥६२॥
पत्नीशालां समाविष्टाः केचिद्धर्ययुता द्रुतम् ।
अग्निहोत्रहविष्यं च हविर्विन्यस्य मन्त्रतः ॥६३॥
सुसमिद्धे जुहुवुश्च रक्षसां नाशहेतवे ।
हुतमात्रे समुत्पन्ना शक्तिर्लोकभयंकरा ॥६४॥
खड्गशक्तित्रिशूलासिचर्महस्ता महोज्ज्वला ।
तया ते निहता दैत्याः समस्ता अथ ता तदा ॥६५॥
तुष्टुवुः ऋषयः सर्वे प्रसन्ना साऽप्युवाच तान् ।
वरं वृणुध्वं मुनयो ददाम्यत्र यथेप्सितम् ॥६६॥
मुनयो वव्रिरे देवकण्टकानां विशोधिनी ।
कण्टकशोधिनीनाम्नी स्थानेऽत्र वस रक्ष नः ॥६७॥
एवमस्तु समुवाच तत्रैव च स्थिता ततः ।
अष्टम्यां वा नवम्यां च पूजयेत्तां हितावहाम् ॥६८॥
राक्षसेभ्यः पिशाचेभ्यो भयं तस्य न जायते ।
प्राप्नुयाद् यज्ञसिद्धिं च फलं क्रतूद्भवं तथा ॥६९॥
ततो गच्छेदुन्नताख्यं तीर्थं चोत्तरभूस्थितम् ।
ब्रह्मेश्वरं पूजयेच्च तथा कृष्णनरायणम् ॥७०॥
ऋषितोयातटे पूर्वं तेपुर्वै ब्राह्मणास्तपः ।
अत्युग्रं तेन भिक्षुश्च भूत्वा नारायणो ययौ ॥७१॥
ततः शंभुर्वृषो भूत्वा चचार ऋषिसन्निधौ ।
त्रिकालदर्शिभिस्तत्र दृष्टो नारायणो हरः ॥७२॥
दृष्टमात्रो विरराम शंकरो वृषरूपवान् ।
तत्र शंभुर्लिंगरूपः संजातश्चण्डिकेश्वरः ॥७३॥
अहं नारायणो लक्ष्मि ! तदा तैः प्रार्थितो बहुः ।
रक्षणार्थमासुरेभ्यस्तदा मया निवेदितम् ॥७४॥
अत्र कुरुत नगरं निवासाय महाप्रभम् ।
हूयन्तामग्निहोत्राणि देवताः सर्वदा द्विजाः ॥७५॥
इज्यन्तां विविधैर्यज्ञैः क्रियतां चापि पूजनम् ।
आतिथ्यं जायतां नित्यं भक्तिर्मम च निश्चला ॥७६॥
मम प्रसादतश्चान्ते मुक्तिर्वः संभविष्यति ।
ऋषयस्ते तदा प्राहुर्नगराऽवनदुर्बलाः ॥७७॥
नगरेणेह किं कुर्मस्तव भक्तिमभीप्सवः ।
मोक्षं देहि महाराज ! रक्षणं नः सदा कुरु ॥७८॥
हरिः प्राह सदा रक्षां करिष्ये भवतामहम् ।
सस्मार विश्वकर्माणं विश्वकर्मा समाययौ ॥७९॥
यत्र चण्डीश्वरः शंभुस्तां भूमिं चतुरस्रिकाम् ।
अष्टयोजनविस्तीर्णां जग्राह नगरार्थिकाम् ॥८०॥
पूर्वे तु शंकरः श्रीमान् पश्चिमे न्यंकुमत्यपि ।
उत्तरे स्वर्णनन्दा च दक्षिणे सागरावधिम् ॥८१॥
मध्ये नागनहरक्षेत्रं नगरं चोन्नतं परम् ।
कारयित्वा हरिस्तेभ्यो विप्रेभ्यो वासकारणात् ॥८२॥
ददौ न्यूषुस्तत्र विप्रा होमयज्ञक्रियापराः ।
उन्नतो विघ्नराजश्च तत्र रक्षणहेतवे ॥८३॥
स्थापितः श्रीकृष्णनारायणेन शंभुसन्निधौ ।
पूजितो धनदः पुत्रसम्पदां च प्रदः सदा ॥८४॥
कामाँश्च मुक्तिं च प्रदास्यति न संशयः ।
वास्तुकार्ये गणेशं च शंकरं श्रीनरायणम् ॥८५॥
पुपूजुर्विश्वकर्माणं मातृगणाँश्च भूसुरान् ।
कलशं संपुपूजुश्च तदा शंभुः समाययौ ॥८६॥
प्रत्यक्षः कलशाग्रे वै कलशेशस्ततोऽभवत् ।
यत्र स्थले पुपूजुश्च तत्र स्थलेश्वरोऽभवत् ॥८७॥

माघमासेऽभवत् सर्वे नगरं पूजनं तथा ।
ततो जातं चोन्नताख्यं नगरं विप्रतीर्थकम् ॥८८॥
विश्वकर्मेश्वरं चापि लिंगं तत्रैव पूजितम् ।
ब्रह्मा बालस्वरूपश्चोन्नताख्ये न्यवसत्ततः ॥८९॥
रैवते वामनो बालः प्रभासे बालको हरः ।
उन्नतेऽजो बालरूपो वर्तते तत् त्रयं समम् ॥९०॥
बालरूपे न मायाऽस्ति कापट्यं न च वासना ।
मोक्षदं बालरूपं वै पूज्यं रम्यं निरामयम् ॥९१॥
कामः क्रोधस्तथा लोभो मोहाद्या बालरूपिणि ।
निर्मूला एव नोत्पन्ना विद्यन्ते नैव जन्मतः ॥९२॥
संगदोषाच्च जायन्ते संस्काराद्वा ततः परम् ।
सत्यं व्रतं सदा तत्र बालके चाऽप्यहिंसनम् ॥९३॥
अस्तेयं वर्तते तत्र ब्रह्मवद्वर्तनं तथा ।
अपरिग्रह एवापि विश्वासो मातृनोदिते ॥९४॥
रागेण हीनता चापि सन्तोष उदरंभरः ।
शुद्धिश्चात्मनि निर्दिष्टा तपः पोषकधीनता ॥९५॥
विद्याध्यायश्चेशभावः सर्वे सन्ति हि बालके ।
संसारस्य च यद्रूपं विषयाभिगतिप्रदम् ॥९६॥
तत्तत्र बालके नास्ति तस्माद् विष्णुर्हि बालकः ।
सर्पोऽपि बालकं मत्वा प्रसृप्य बालकोपरि ॥९७॥
निर्भयश्च प्रयात्येवाऽजातशत्रुकबालता ।
यस्य कस्यापि वाऽपत्यं सदयं लोक्यते सदा ॥९८॥
सर्वयोनिगतैर्जीवैः प्रेम्णा संलोक्यते तथा ।
नारायणस्वरूपत्वं तदेव बालके मतम् ॥९९॥
ध्रुवं बालं च प्रह्लादं सनकादींस्तथा शुकम् ।
बालं कृष्णस्वरूपं चाराध्य मोक्षं गताः पुरा ॥१००॥
यौवने वार्धके वापि नरे नार्यां नपुंसके ।
स्याद् यदि बालभावश्चेद् दोषाऽसंक्रमणं तथा ॥१०१॥
पूज्यते देववत् सोऽपि निर्दोषो बालको यतः ।
दोषहीनं च वार्धक्यं दोषहीना च बालता ॥१०२॥
द्वयोः साम्यं च नैर्मल्ये पावित्र्यस्य स्थले शुभे ।
बालं नमन्ति वै चन्द्रं बालं पश्यन्ति मातरः ॥१०३॥
बालां कन्यामुद्वहन्ति बालं गृह्णन्त्यवंशिनः ।
बलं नारायणीयं च स्वच्छं यत्रास्ति सर्गजम् ॥१०४॥
तद्वान् बालः सम्प्रदिष्टस्तस्माद्बालो नरायणः ।
विद्यादानं बालकेभ्यो भोज्यदानं सहायताम् ॥१०५॥
समर्पयन्ति जनतास्तस्माद् बालः प्रशस्यते ।
ब्रह्मचर्ये सदा बाले ब्रह्मणो रूपमेव यत् ॥१०६॥
तस्माद् बालो ब्रह्मचारी ब्रह्मलोकाऽधिकारवान् ।
ब्रह्ममोक्षप्रदश्चापि यथा कृष्णो नरायणः ॥१०७॥
गौरीं च बालिकां सौम्यां संपूज्य लभते फलम् ।
पार्वतीपूजनस्यापि लक्ष्म्यर्चनस्य चापि वै ॥१०८॥
अरजस्काः सदा देव्यो दिवि वसन्ति बालिकाः ।
सावित्री चापि गायत्री श्रीश्च लक्ष्मीश्च बालिकाः ॥१०९॥
तस्य स्वामी सदा बालो ब्रह्मा कृष्णो हरस्तथा ।
लोकाः स्वानुगतैर्भावैः कल्पयन्ति सुयौवनम् ॥११०॥
स्ववद् विकृतकाकारान् दिव्यानप्यत्यदिव्यकान् ।
दोषहीनान् सदा शुद्धान् दैत्या गृह्णन्ति दोषितान् ॥१११॥
सदोषे वै कथं मोक्षो निर्दोषे वासना कथम् ।
तस्मान्निर्दोषका देवा बाला मोक्षप्रदाः सदा ॥११२॥
बाला नित्याः सदा मुक्ता राजन्ते ब्रह्मधामनि ।
सदा किशोरा दिव्याश्च प्रशस्ता बालकास्ततः ॥११३॥
इत्येवमुक्तवान् शंभुः पार्वत्यै चोन्नतादिकम् ।
तीर्थं मया च ते लक्ष्मि ! कथितं मोक्षदं श्रवात् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गुप्तप्रयागतीर्थशृगालेश्वरक्षेत्राऽपरनारायणतीर्थत्रिनेत्र-तीर्थोन्नतनगरस्थानेश्वरादिनैकतीर्थनिरूपणं बाल-तात्पर्यार्थनिरूपणं चेत्यादिनामाऽष्टचत्वारिंश-दधिकपञ्चशततमोऽध्यायः ॥ ५४८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः पार्वत्यै प्राह वच्मि तत् ।
तीर्थं मोक्षकरं स्मृद्धिप्रदं चोन्नतमण्डले ॥ १ ॥
दुर्गादित्यं शुभं तीर्थं विनायकसुतीर्थकम् ।
यत्र गजस्वरूपधृग् विनायकोऽभवत्पुरा ॥ २ ॥
महाकालेश्वरं तीर्थं सर्वरक्षाकरं महत् ।
महोदयं परं तीर्थमृषितोयाजलस्थितम् ॥ ३ ॥
तलस्वाम्यभिधे तीर्थे क्षेत्रपः कालमेघकः ।
वर्तते वनरक्षार्थे सिंहारण्यनिवासकृत् ॥ ४ ॥
न्यंकुमत्यास्तटे शंखावर्ततीर्थं हि शोभनम् ।
कृष्णनारायणगृहाद् दक्षिणे गोष्पदं वरम् ॥ ५ ॥
तीर्थं चानन्तनागेन रक्षितं विष्णुभोगिना ।
स्नाता श्राद्धस्य च कर्ता तारयेदेकविंशतिम् ॥ ६ ॥
कुलानां च स्वयं मोक्षं स्वर्गं सम्प्राप्नुयाच्छुभम् ।
पदे पदेऽश्वमेधस्य फलवान् स्याच्च तीर्थकृत् ॥ ७ ॥

गुप्तगयाऽपि सा प्रोक्ता विष्णुना स्वयमेव तत् ।
गन्धदानेन गन्धादि सौभाग्यं पुष्पदानतः ॥ ८ ॥
धूपदानेन राज्याप्तिर्दीप्त्याप्तिर्दीपदानतः ।
ध्वजदानात्पापहानिर्यात्रया ब्रह्मलोकभाक् ॥ ९ ॥
गोष्पदं तन्महत्तीर्थं तत्र वृत्तं पुरा शृणु ।
अंगराज्ञोऽभवत्पुत्रो वेनो नाम प्रजापतिः ॥१०॥
स मातामहदोषेण कालकन्यासुतः खलु ।
सुधर्मान् पृष्ठतः कृत्वा पापबुद्धिरजायत ॥११॥
स्थितिमुत्थापयामास वेदशास्त्रोदितां हि सः ।
आसीदियं मतिस्तस्य विनाशे प्रत्युपस्थिते ॥१२॥
अहमीड्यश्च पूज्यश्च सर्वयज्ञैश्च सर्वदा ।
मयि यज्ञा विधातव्या मयि होतव्यमित्यपि ॥१३॥
ऋषयस्तं तदा प्राहुर्मा ह्यधर्मं कुरु नृप ।
वेनः प्राह मया सृष्टो धर्मश्चाधर्म इत्यपि ॥१४॥
भवन्तो मां मानयन्तु श्रोतव्यं कस्य वै मया ।
वीर्यश्रुततपःसत्यैर्मया कोऽन्यः समो भुवि ॥१५॥
इतिब्रुवाणं मुनयोऽनुनेतुं प्रभवो न वै ।
जातास्ततश्चातिरुष्टा जघ्नुस्तं तु महाबलम् ॥१६॥
आथर्वणेन मन्त्रेण हत्वाऽस्य वामबाहुतः ।
निर्मथ्योत्पादयामासुर्निषादान् कृष्णवर्णकान् ॥१७॥
तुम्बराँश्च खसान् वैन्ध्यान् धीवरान् वेनपापजान् ।
पुनर्महर्षयस्तेऽथ पाणिं वेनस्य दक्षिणम् ॥१८॥
ममन्थुश्च तदुत्पन्नः पृथुर्वै सूर्यसन्निभः ।
धनुर्ध्वजं तथा शूलं मत्स्यं चक्रं करे दधन् ॥१९॥
चिह्नरेखात्मकं चापि बाह्यं खड्गं च वर्म च ।
तस्मिन् जाते नदा नद्यः समुद्रा भूधरादयः ॥२०॥
सरत्नाश्चाभिषेकाय पृथुं तं चोपतस्थिरे ।
ब्रह्मा विष्णुश्चामराश्च ऋषयो मानवा द्रुमाः ॥२१॥
स्थावरा जंगमाः सर्वे सिषिचुस्तं नराधिपम् ।
पृथुना ताः प्रजाः सर्वा धर्ममार्गैः सुनन्दिताः ॥२२॥
अकृष्टपच्या पृथिवी सिद्ध्यन्त्यन्नानि चिन्तया ।
सर्वाः कामदुघा गावः पुटके पुटके मधु ॥२३॥
एवं प्रतापिनः पृथोर्यशोगानं तु मागधैः ।
सूतैश्च बन्दिभिस्तत्र कृतं भावि विचार्य च ॥२४॥
भविष्यत्सर्ववृत्तान्तं विज्ञाय तु पृथुः स्वयम् ।
तद्भीत्या धनुरागृह्य वसुधामर्दयद् यदा ॥२५॥
गौर्भूत्वा च मही तस्य शरणं त्वन्वपद्यत ।
राज्ञा जगद्धितार्थे सा दुग्धा नैकपयः प्रति ॥२६॥
पृथोर्दुहितृतां प्राप्ता पृथिवी साऽभवत् प्रथा ।
वेनस्य सद्गतिं कर्तुं पृथुर्यज्ञं चकार ह ॥२७॥
नारदश्च तदा प्राह वेनो म्लेच्छोऽद्य वर्तते ।
पूर्वपापेन वै जन्म मरौ देशेऽस्ति तस्य वै ॥२८॥
तमुद्धर्तुं तीर्थयात्रां कुरु मोक्षो भविष्यति ।
पृथुर्गतो मरुन्देशान् निनाय पितरं गृहम् ॥२९॥
ततो ययौ कुरुक्षेत्रं म्लेच्छं तत्र च तीर्थके ।
स्नापयामास विधिना पापं तथापि तिष्ठति ॥३०॥
तीर्थं प्राह च वेनोऽयं पूर्वपापातिकोटिभिः ।
व्याप्तोऽस्य पापपुञ्जानि क्षालयितुं न शक्यते ॥३१॥
एष घोरैर्महापापैरतीव परिवेष्टितः ।
प्रभासं तीर्थमासाद्य तत्र शुद्धो भविष्यति ॥३२॥
तत्र सरस्वती पुण्या पञ्चस्रोता प्रवर्तते ।
तस्या यत् पञ्चमं स्रोतो न्यंकुमती निगद्यते ॥३३॥
तस्यास्तटे स्थितं तीर्थं गोष्पदं नाम नामतः ।
तत्र प्रेतशिला चास्ते प्रेतानां मुक्तिदायिनी ॥३४॥
यत्र प्रेताः पुरा मुक्ता अष्टाविंशतिकोटयः ।
नन्दिनी कामधेनुर्या पदं धृत्वा पुराऽत्र वै ॥३५॥
प्रेतानां मुक्तये तत्र स्थिता गोष्पदमेव तत् ।
सा प्राह मे पदं प्रेताः पापहं मोक्षदं सदा ॥३६॥
अत्राऽऽगत्य जनो यश्च स्नानं श्राद्धं करिष्यति ।
गयासप्तगुणं तस्य फलं पूर्णं भविष्यति ॥३७॥
इत्युक्त्वा प्रेतमोक्षं च कृत्वाऽन्तर्धानमाशु सा ।
याता प्रेता अपि मुक्तिं गतास्तत्र तु गोष्पदे ॥३८॥
ततः पृथुर्ययौ तत्र गोष्पदे म्लेच्छसंयुतः ।
अग्रे कृत्वा ब्राह्मणान् स ययौ न्यंकुमतीतटम् ॥३९॥
विलोक्य गोष्पदे क्षेत्रे पदं प्रेतशिलास्थितम् ।
चकार कुण्डान् वेदीश्च मण्डपान् यज्ञसिद्धये ॥४०॥
तत्र यज्ञः समारब्धो विधिवद् भूरिदक्षिणः ।
प्रत्यक्षं पितरस्तस्य बभूवुर्ज्वलनप्रभाः ॥४१॥
तृप्ताश्चाहुर्वयं तृप्ताः सन्तुष्टाः स्वर्गभागिनः ।
राजन् धन्योऽसि पुण्योऽसि वयं धन्यतरास्त्रयः ॥४२॥
पितृषु चैवमुक्तेषु म्लेच्छो वेनस्तदा द्रुतम् ।
म्लेच्छदेहं परित्यज्य दिव्यदेहो बभूव ह ॥४३॥
उवाच पापनिर्मुक्तो गच्छामि त्रिदशालयम् ।
गच्छ राज्यं सुखं भुंक्ष्व पुत्रवाच्यं कृतं त्वया ॥४४॥
एवं श्रुत्वा पृथुश्चातिमुमुदे च ननाम तान् ।
ब्राह्मणान् हर्षयामास स्वर्णभूधनदानकैः ॥४५॥

अथ गुप्तप्रयागं च कृत्वा सोमेश्वरं तथा ।
रैवताद्रिं परिक्रम्य ययौ भद्रेश्वरं ततः ॥४६॥
कुंकुमवापिकातीर्थमश्वपट्टसरोवरम् ।
लोमशस्याऽऽश्रमं दृष्ट्वाऽर्चयित्वा कम्भरारमाम् ॥४७॥
दृष्ट्वा गोपालकृष्णं च पूजयित्वा पुमुत्तमम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥४८॥
सिद्धक्षेत्रे यमीं स्नात्वा निजाऽऽवासं ययौ पृथुः ।
ईश्वरो भगवान् कृष्णनारायणांश एव यः ॥४९॥
पृथुः स वेनवन्मुक्तिं ययौ चान्ते हि शाश्वतीम् ।
श्राद्धकाले कथा चेयं श्रोतव्या संहितात्मिका ॥५०॥
ततो गच्छेच्छुभं तीर्थं नारायणगृहं परम् ।
गोष्पदाद् दक्षिणे चाब्धितटे तिष्ठति केशवः ॥५१॥
क्वचिज्जनार्दनस्तत्र क्वचिच्च मधुसूदनः ।
क्वचित् स पुण्डरीकाक्षः क्वचिन्नारायणः स्वयम् ॥५२॥
महासुरान् विनिहत्य विश्रान्तिं याति तत्र वै ।
कुबेरतीर्थे बालार्कं बालार्केश्वरमित्यपि ॥५३॥
अम्बिकास्थानमित्येतत् सर्वपापानि नाशयेत् ।
ततो गच्छेद् देविकायास्तटे जालेश्वरं शुभम् ॥५४॥
शृणु तत्र भवं दिव्यमितिहासं पुरातनम् ।
नाभागस्य च संवादमापस्तम्बतपोनिधेः ॥५५॥
आपस्तम्बः ऋषिः पूर्वं विवस्त्रः सलिले वसन् ।
प्रभासतीर्थे चोग्रं वै तपश्चकार मीनवत् ॥५६॥
शैवालेनाऽभवद्व्याप्तो देहः कांचनसदृशः ।
धीवरा मत्स्यसंग्राहा जालेन जलमध्यतः ॥५७॥
मत्स्यैः सह ऋषिं तं च जगृहुर्दैवयोगतः ।
विलोक्य तं महर्षिं च मानवं ब्रह्मनन्दनम् ॥५८॥
अपराद्धमिति मत्वा नेमुः शिरोभिरेव तम् ।
ऊचुरज्ञानजं दोषं दयालो क्षन्तुमर्हसि ॥५९॥
सेवां दर्शय दाशानां प्रसन्नो भव सुव्रत ।
ऋषिः स क्षमया युक्तो दाशान् प्रोवाच दुःखितः ॥६०॥
एतेषां जलमत्स्यानां कदनं च कृतं महत् ।
कैवर्तैश्च मिलित्वैव कार्यं मत्स्यप्ररक्षणम् ॥६१॥
यतो जले निवासान्मे मत्स्या वै बान्धवा यथा ।
स्वार्थं सर्वे प्रकुर्वन्ति परार्थः खलु दुर्लभः ॥६२॥
ज्ञानिनामपि चेच्चेतः स्वार्थमात्रे रतं यदि ।
अज्ञानिनां तदा किं स्याद् वैलक्षण्यं तु दक्षकैः ॥६३॥
ज्ञानिनो ध्यानयोगस्थास्त्यजन्त्यज्ञानिनो यदि ।
अज्ञास्तु जन्तवो लोके क्व प्राप्स्यन्ति सुखं ततः ॥६४॥

समे दुःखे समायातोऽबलाँस्त्यजति चेद् बली ।
किं बलं स्वार्थपोषं तद्व्यर्थं पापं तदुच्यते ॥६५॥
शक्तश्चान्यस्य दुःखानि वारयेद् वै यथाबलम् ।
परदुःखविहन्ता वै नारायणांश उच्यते ॥६६॥
पापात्पापतरं तं हि प्रवदन्ति पुरातनाः ।
सामर्थ्ये सति नान्येषां दुःखनाशं करोति यः ॥६७॥
ममाऽग्रे स्यादुपायस्तु विना मत्स्यविमोचनम् ।
नाऽहं मोक्तुं समिच्छामि यथा मत्स्यास्तथाप्यहम् ॥६८॥
खादन्तु मां सुखं दाशाः सह मत्स्यैर्यथेष्टकम् ।
त्यजन्तु वा च तान् मत्स्यान् मया सह समावृतान् ॥६९॥
जीवो येषां च मत्स्यानां निर्गतस्तेषु योगतः ।
प्रविश्याऽन्तर्जीवयिष्ये तपोभिर्जीवदानतः ॥७०॥
यन्ममाऽस्ति शुभं किञ्चित्तद्दीनानुपगच्छतु ।
यत् कृतं दुष्कृतं तैस्तु तदशेषमुपैतु माम् ॥७१॥
धीवराणां च यद्दुःखं मे स्यात्तदपि साम्प्रतम् ।
अन्तः प्रविष्टः सत्त्वानां भवेयं सर्वदुःखभाक् ॥७२॥
दृष्ट्वाऽन्धान् कृपणान् व्यंगाननाथान् रोगिणस्तथा ।
दया न जायते यस्य स रक्ष इति मे मतिः ॥७३॥
प्राणसंशयमापन्नान् प्राणिनो भयविह्वलान् ।
यो न रक्षति शक्तोऽपि स पापं समुपाश्नुते ॥७४॥
परोपकारेणाऽऽर्तानां सुखं यदुपजायते ।
तस्य स्वर्गोऽपवर्गोऽपि षोडशांशोऽपि नैव तु ॥७५॥
तस्मादेतानहं हीनाँस्त्यक्त्वा भीतान् सुदुःखितान् ।
वर्जयित्वा न यास्यामि पदमात्रमितोऽपि च ॥७६॥
दाशेभ्यश्चैवमेवैतदृषिणा विनिवेदितम् ।
मत्स्यानां रक्षणं हित्वा न मे रक्षा भविष्यति ॥७७॥
अहं रक्ष्यो यदि दाशा मत्स्यान् मुञ्चन्तु वै द्रुतम् ।
यद्वा मे त्यजने दुःखं मत्स्यत्यागात्मकं यदि ॥७८॥
भवतां जायते तर्हि मूल्यं ददातु भूपतिः ।
भवन्तो द्रव्ययुक्ताः स्युः प्रयत्नफलभागिनः ॥७९॥
अहं मत्स्यैश्च सहितो बन्धशून्यो भवामि च ।
श्रुत्वा तु धीवरैः सर्वं नाभागाय निवेदितम् ॥८०॥
नाभागश्चाययौ तत्र यत्राऽऽपस्तम्बकमत्स्यकाः ।
स सम्यक् पूजयित्वा तं देवकल्पं मुनिं नृपः ॥८१॥
प्रोवाच भगवन् ब्रूहि किं करोमि तवाऽऽज्ञया ।
आपस्तम्बो दयायुक्तो राजानं प्राह सत्वरम् ॥८२॥
श्रमेण महताऽऽविष्टान् कैवर्तान् दुःखजीविनः ।
श्रममौल्यं प्रयच्छ त्वं मद्योग्यं यदि मन्यसे ॥८३॥

नाभाग आह दाशेभ्यः शतसाहस्रमुद्रिकाः।
सुवर्णानां ददाम्यत्र मूल्यं तुल्यं च ते यदि ॥८४॥
ऋषिः प्राह त्वया नाऽहं शतसाहस्रकैर्नृप।
नियम्यः सदृशं मेऽत्र मूल्यं प्रदीयतां परम् ॥८५॥
राजाऽऽह कोटिमूल्यं वै निषादेभ्यः प्रदीयताम्।
ऋषिः प्राह त्वया नाहं नियम्यः कोटिभिर्नृप ॥८६॥
सदृशं दीयतां मूल्यं ब्राह्मणैः सह चिन्तय।
राजाऽऽह राज्यमर्धं वै निषादेभ्यः प्रदीयताम् ॥८७॥
ऋषिः प्राह समस्तं वै राज्यं मे सदृशं न वै।
सदृशं दीयतां मूल्यमृषिभिः सह चिन्तय ॥८८॥
महर्षैस्तद्वचः श्रुत्वा नाभागोऽभूद् विषादवान्।
एतस्मिन्नन्तरे तत्र लोमशस्तु महातपाः ॥८९॥
कुंकुमवापिकाक्षेत्राद् आपस्तम्बं समाययौ।
ज्ञात्वा वृत्तान्तमाश्चर्यकरं नाभागमब्रवीत् ॥९०॥
मा विषादं गच्छ राजन् मूल्यम् ऋषेर्न कानकम्।
किन्तु विप्रास्तथा गावो दिव्याः सृष्टाः स्वयंभुवा ॥९१॥
एकस्मादेव तत्त्वाद् वै दिव्याद् दिव्याश्च ते च ताः।
दिव्यं दिव्यस्य मूल्यं गौर्मूल्यमस्यै प्रदीयताम् ॥९२॥
श्रुत्वा राजा सहर्षोऽभूत् प्रोवाच जालगं मुनिम्।
उत्तिष्ठोत्तिष्ठ भगवन् गवा क्रीतो मया मुने ॥९३॥
ऋषिः प्राह त्वया सम्यक् क्रीतोऽस्मि वै गवा नृप।
गोद्वयं मम मूल्यं वै पवित्रं परमं शुचि ॥९४॥
गावः प्रदक्षिणीकार्याः पूजनीयाश्च नित्यशः।
मंगलायतना दिव्याः सृष्टा ह्येताः स्वयंभुवा ॥९५॥
स्थानागाराणि विप्राणां देवतायतनानि च।
यद्गोमयेन शुद्ध्यन्ति किमस्मादधिकं पुनः ॥९६॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तथैव च।
गवां पञ्च पवित्राणि पुनन्ति सकलं जगत् ॥९७॥
गावो ममाग्रतो नित्यं गावः सन्तु च पृष्ठतः।
गावो मे हृदयेऽग्रे च गोमध्ये च वसाम्यहम् ॥९८॥
तेनाऽग्नयो हुताः सम्यक् पितरश्चापि तर्पिताः।
देवाश्च पूजितास्तेन यो ददाति गवाह्निकम् ॥९९॥
सौरभेयी जगत्पूज्या देवी विष्णुपदे स्थिता।
सर्वमेतन्मया दत्तं मया दत्तं प्रतीच्छतु ॥१००॥
रक्षणाद् धेनुपुत्राणां गवां कण्डूयनैस्तथा।
क्षीणार्तरक्षणाच्चापि जनः स्वर्गे महीयते ॥१०१॥
आदौ गावो बहिश्चापि मध्ये चान्ते प्रकीर्तिताः।
रक्षन्ति तास्तु देवानां क्षीराज्यममृतं सदा ॥१०२॥
तस्माद् गावः प्रदातव्याः पूजनीयाश्च नित्यशः।
स्वर्गस्य संगमायैताः सोपानमिव निर्मिताः ॥१०३॥
एतच्छ्रुत्वा ऋषेर्वाक्यं निषादा अपि सत्वरम्।
गोमाहात्म्यं विदन्तश्च नत्वाऽऽपस्तम्बमब्रुवन् ॥१०४॥
संभाषा दर्शनं स्पर्शः कीर्तनं स्मरणं तथा।
पावनानि किलैतानि साधूनां योगिनां सदा ॥१०५॥
वयं हि पावितास्तस्मान्नाभागाद् गोद्वयं शुभम्।
भवन्मूल्यं गृहीतं यत् पूजयिष्याम एव गाम् ॥१०६॥
भवान्मुक्तस्तथा मत्स्या मुक्ता मुक्तं च गोद्वयम्।
वयं मुक्ताश्च नाभागो मुक्तः साधुसमागमात् ॥१०७॥
भवान् पूज्यस्तथा मत्स्याः पूज्याः पूज्यं च गोद्वयम्।
वयं पूज्याश्च नाभागः पूज्यः साधु समागमात् ॥१०८॥
ऋषिः प्राह मया मूल्यं ममैव गोद्वयं कृतम्।
लोमशस्योपदेशेन प्रसन्नोऽस्मि ततः पुनः ॥१०९॥
करोमि शुभसंकल्पं मत्स्या भवन्तु जीविताः।
गोद्वयस्य प्रदानेन मत्स्या यास्यन्ति जीवनम् ॥११०॥
तस्माद् गोयुगलं देवं ब्राह्मणाय महात्मने।
तेन मत्स्याः प्रजीवेयुर्यूयं स्युर्दोषवर्जिताः ॥१११॥
तदा श्रुत्वा धीवरैस्तद् गोद्वयं मुनये तदा।
आपस्तम्बाय तत्रैवाऽर्पितं निर्दोषताऽर्जिता ॥११२॥
ऋषिः प्रसन्नस्तान्प्राह पश्यन्तु मीनमण्डलम्।
गोद्वयस्य प्रदानेन जीवितं पुनरेव हि ॥११३॥
तथोक्ते जीविता मत्स्या ययुः सामुद्रवारिषु।
स्वंगीकृताश्च ये मत्स्यास्तथा वै शातिताश्च ये ॥११४॥
तेषां मुक्त्यर्थमापस्तम्बर्षिः प्राह पुनर्वचः।
एष वः प्रतिगृह्णामि गामिमां तत्प्रपुण्यतः ॥११५॥
निषादा गच्छत स्वर्गं सह मत्स्यैरनंगकैः।
प्राणिनां प्रीतिमुत्पाद्य निन्दितेनापि कर्मणा ॥११६॥
नरकं यदि प्राप्स्यामि पश्यामि स्वर्गमेव तत्।
यन्मया सुकृतं किञ्चिन्मनोवाक्कायकर्मभिः ॥११७॥
कृतं तेनैव दुःखार्ताः सर्वे यान्तु शुभां गतिम्।
ततस्तस्य प्रसादेन निषादाः सहमत्स्यकैः ॥११८॥
दिवं गताश्च तान् वीक्ष्य नाभागः समुवाच ह।
सेव्याः श्रेयोऽर्थिभिः सन्तः पुण्यतीर्थजलोपमाः ॥११९॥
क्षणोपासनमप्यत्र न येषां निष्फलं भवेत्।
सद्भिः सहाऽऽसनं कार्यं सद्भिः कुर्वीत सत्कथाम् ॥१२०॥
सतां वृत्तेन वर्तेत नासद्भिः किञ्चिदाचरेत्।
सतां समागमादेव समत्स्या मत्स्यजीविनः ॥१२१॥

त्रिविष्टपमनुप्राप्ता यथाऽश्वमेधयाजिनः ।
आपस्तम्बो मुनिस्तत्र लोमशश्च महामुनिः ॥१२२॥
वरैस्तं विविधैरिष्टैश्छन्दयामास भूपतिम् ।
ऋषिस्तं कारयामास यज्ञसंकल्पमादरात् ॥१२३॥
तथेति चोक्ते वै प्रीत्याऽऽपस्तम्बः प्रशशंस तम् ।
अहो धन्योऽसि राजेन्द्र धर्मे ते वर्तते मतिः ॥१२४॥
आज्ञां गृह्णासि विप्रस्य धन्यं कुटुम्बमित्यपि ।
राजानस्तु मदाविष्टाः प्रायो गृह्णन्ति नैव च ॥१२५॥
ब्राह्मणानां वचो नित्यव्यसनाऽऽहतबुद्धयः ।
ध्रुवं जन्म ध्रुवो मोहो ध्रुवो नरको भूभृताम् ॥१२६॥
राज्यं ते बहुमन्तारो विदन्त्यासुरजं कुलम् ।
मनीषिणस्तु पश्यन्ति राज्यादि नरकोपमम् ॥१२७॥
परलोकं साधयन्ति शाश्वतीं गतिमात्मनः ।
एवमुक्त्वा महात्मानौ जग्मतुः स्वं स्वमाश्रमम् ॥१२८॥
नाभागोऽपि वरं प्राप्य ययौ स्वं नगरं प्रति ।
क्रतुं चकार विधिवत् शत्रुंजितातटे शुभम् ॥१२९॥
अनादिश्रीकृष्णनारायणं श्रीकमलापतिम् ।
समिज्य च यथावन्ते ब्रह्माऽक्षरपदं परम् ॥१३०॥
जालस्थले तु ऋषिणा स्थापितौ विष्णुशंकरौ ।
जालेश्वरं च तत्क्षेत्रं प्रख्यातं समभूत् पुरा ॥१३१॥
देविकायास्तटे तत्र नाभागो मत्स्यजीविनः ।
आपस्तम्बो लोमशश्च मत्स्या नारायणस्तथा ॥१३२॥
स्मृतमात्रा मुक्तिदास्ते भवन्ति मुक्तिगा यतः ।
चैत्रशुक्लत्रयोदश्यां जातं वृत्तान्तमेव यत् ॥१३३॥
श्राद्धं यात्रां धेनुदानं कुर्यात्तत्र जनो यदि ।
भुक्तिं मुक्तिं लभेतात्र परत्रापि यथेप्सितम् ॥१३४॥
शंभुः सतीं यथा प्राह लक्ष्मि ! ते कथितं मया ।
पठनाच्छ्रवणाचापि स्वर्गमोक्षप्रदं भवेत् ॥१३५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने दुर्गादित्यगोष्पदवेननृपशुद्धिमुक्तिनारायणगृहजालेश्वर-तीर्थनाभागाऽऽपस्तम्बर्षिचरित्रादिवर्णननामैकोन-पञ्चाशदधिकपञ्चशततमोऽध्यायः ॥५४९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः पार्वत्यै समुवाच यत् ।
तीर्थवर्यं कथयामि तेऽपि स्वर्गादिदायकम् ॥ १ ॥
देविकायास्तटे त्वासीत् तुण्डीनामा ऋषिः पुरा ।
कूपस्तत्राऽभवत्वेकः ऋषेर्योगात्स मुक्तिकृत् ॥ २ ॥
हरिणाः पतितास्तत्र जलपानार्थमुग्रगाः ।
मृतास्ते मुनिना सर्वे जीवितास्तपसो बलात् ॥ ३ ॥
जलं हूंकारमात्रेण पूरितं कूपगं तदा ।
तटोपरितो वहति चमत्कारकरं यतः ॥ ४ ॥
तत्र तुण्डीश्वरो देवः स्थापितस्तेन तीर्थकम् ।
तत्र तीर्थे शुभं कृत्वा ह्याशापुरं गणेश्वरम् ॥ ५ ॥
गच्छेन्नैवेद्यमाधाय दानं दद्यात्तु कानकम् ।
ततो गच्छेत् कापिलं तु तीर्थं पापहरं शुभम् ॥ ६ ॥
कपिलौ रैवतं गच्छन् यत्रोवास हि वत्सरम् ।
कपिला सा नदी तत्र तीर्थरूपा व्यजायत ॥ ७ ॥
प्रौष्ठपद्यसिते पक्षे षष्ठ्यां भौमो भवेद् यदि ।
व्यतीपातश्च रोहिण्यां सा षष्ठी कपिला मता ॥ ८ ॥
कपिलासंगमे षष्ठ्यां कपिलायां समाहितः ।
स्नात्वा श्रीकपिलं विष्णुं पूजयेदर्कभूस्थितम् ॥ ९ ॥
कपिला कपिलो विष्णुः रक्षतां चेति चार्थयेत् ।
कपिलां गां प्रदद्याच्च वाजिमेधफलं भवेत् ॥१०॥
हाटकेशं ततस्तीर्थे प्रकुर्यात् पावनं परम् ।
ततो गच्छेदगस्त्यस्याश्रमं वत्सरसेवितम् ॥११॥
कालकेयाः पुरा दैत्याः समुद्रान्तर्निवासिनः ।
रात्रौ पृथ्व्यां समागम्य सुप्तान् विप्रादिकान् मुहुः ॥१२॥
भक्षयन्ति स्म तान् ज्ञात्वा कालकेयान् विहिंसकान् ।
अगस्त्यः संययौ तत्र समुद्रस्य तटं प्रति ॥१३॥
तपश्चकार विधिवद् वर्षमात्रं तटे स्थितः ।
चतुर्थ्यां फाल्गुने मासि नक्ताहारं विधाय सः ॥१४॥
पञ्चम्यां तिलपिष्टं च भुक्त्वा होमं चकार सः ।
एवं चतुर्षु मासेषु कृत्वैकभोजनं ततः ॥१५॥
निराहारः समभवन्निर्विघ्नव्रतमुत्तमम् ।
वर्षोत्तरं स मुनिराट् लोकरक्षां व्यचिन्तयत् ॥१६॥
पश्यध्वं कौतुकं देवाः समीनमकरादिकम् ।
अञ्जलिना पिबाम्येनं शोषयामि महार्णवम् ॥१७॥
एवमुक्त्वा हरिं स्मृत्वा कृत्वा ब्रह्माणमान्तरम् ।
गण्डूषमकरोत् सर्वं समुद्रं सरितां पतिम् ॥१८॥
कालकेया विनष्टाश्च पाचितं जलमित्यपि ।
ततश्च मेघवर्षैर्वै समुद्राः सजलाः पुनः ॥१९॥
इत्यागस्त्याश्रमं रम्यं तीर्थं पापप्रणाशनम् ।
लोपामुद्रासहितं मां यश्चाऽत्राऽऽगत्य पूजयेत् ॥२०॥
हाटकेशो मया नीतस्तं विधिना प्रपूजयेत् ।
अयने चोत्तरे मर्त्यो गोलक्षफलमाप्नुयात् ॥२१॥

भद्राश्वो नृपतिस्तत्राऽगस्त्यदर्शनकांक्षया ।
समाजगाम चानर्च पप्रच्छ कुशलं प्रति ॥२२॥
आश्चर्यं यदि ते किञ्चिद् विदितं दृष्टमेव वा ।
तन्मे कथय धर्मज्ञ ततो यामि प्रभासकम् ॥२३॥
अगस्त्यस्तं नृपं प्राह श्वेतद्वीपोद्भवां कथाम् ।
आश्चर्यरूपो भगवान् कृष्णनारायणः प्रभुः ॥२४॥
कुंकुमवापिकातीर्थे राजते पुरुषोत्तमः ।
तस्याश्चर्याणि दृष्टानि बहूनि विविधानि च ॥२५॥
सोऽयं नारायणः शेते श्वेतद्वीपेऽपि सर्वदा ।
नारदः श्रीकृष्णनारायणं दृष्ट्वा सुराष्ट्रके ॥२६॥
माथुरे श्रीराधिकेशं कृष्णं दृष्ट्वा ततः परम् ।
हिमाद्रौ श्रीनरनारायणं दृष्ट्वा ययौ मुनिः ॥२७॥
श्वेतद्वीपं तत्र सोऽयं ददर्श समरूपिणः ।
शंखचक्रगदापद्मान्पुरुषाँस्तिग्मतेजसः ॥२८॥
सदृशान् सदृशाकारान् सदृशगुणवैभवान् ।
किशोरान् रूपसम्पन्नान् सुघटांश्च मनोहरान् ॥२९॥
अयं विष्णुरयं विष्णुरेष विष्णुः सनातनः ।
चिन्ताऽभूत्तस्य तान् दृष्ट्वा कोऽस्मिन् विष्णुरिति प्रभुः ॥३०॥
कस्मै नत्वा ततोऽन्याँश्च पश्यामि खलु भावतः ।
न्यूनस्य प्रथमे पूज्ये पूज्यपूजाव्यतिक्रमे ॥३१॥
आयुर्यशोज्ञानहानिः प्रत्यवायोऽधिको भवेत् ।
एवं चिन्तयतस्तस्य चित्तं कृष्णनरायणम् ॥३२॥
चिन्ता युक्तं मुधा जातं कथमाराधयामि तम् ।
येन वेद्मि परं कृष्णनारायणं करोमि किम् ॥३३॥
एवं संचिन्त्य दध्यौ स तं देवं परमेश्वरम् ।
ध्यातस्तस्य कांभरेयः परितोषं जगाम ह ॥३४॥
उवाच स प्रसन्नः सन् साक्षाद् भूत्वा नरायणः ।
वरं वरय भद्रं ते दृष्टं रूपं मम त्वया ॥३५॥
येऽत्र लोके समायान्ति सारूप्यादिचतुष्टयम् ।
तेषां भवति त्वत्रैव ब्रूहि किं ते ददाम्यहम् ॥३६॥
नारदः प्राह ते प्राप्तिर्यथा स्यात् तच्च मे वद ।
नारायणस्तदा प्राह पौरुषं सूक्तमेव मे ॥३७॥
सहस्रशीर्षा पुरुषो यत्राऽहं वर्णितो मुने ।
तदास्थाय जना ये मां प्रयक्ष्यन्ति नरायणम् ॥३८॥
ते मां प्राप्स्यन्ति सततं संहिताऽध्ययनेन च ।
लक्ष्मीनारायणसंहितोक्तमार्गेण ये जनाः ॥३९॥
पूजयिष्यन्ति मां भक्तास्ते प्राप्स्यन्ति वै ध्रुवम् ।
मम क्षेत्रं गमिष्यन्ति मे करिष्यन्ति दर्शनम् ॥४०॥
सेवां सतां करिष्यन्ति ते मां प्राप्स्यन्ति निश्चितम् ।
मन्नाम विहितं भिन्नं सर्वेषां रटनाय वै ॥४१॥
विना पूजां नामभक्त्याऽवश्यं प्राप्स्यन्ति मां जनाः ।
सर्वं ज्ञानं तव मुने प्रकाशं यास्यति ध्रुवम् ॥४२॥
मम दर्शनयोग्यं च मुक्तदर्शनयोग्यकम् ।
सर्वं विवेकजं ज्ञानं भविष्यति च ते मुने ॥४३॥
इत्युक्त्वा भगवाँस्तेषु सदृशेषु च विष्णुषु ।
ययौ पुनर्नारदश्च ज्ञातवान्नैव तं प्रभुम् ॥४४॥
मत्वा चाऽदर्शनं विष्णोः समानेषु च विष्णुषु ।
तां दिशं प्रणिपत्यैव नारदस्तु दिवं प्रति ॥४५॥
यास्यन् यत्र सुराष्ट्रे चाऽगस्त्योऽहं निवसामि वै ।
तत्राऽऽगत्य क्षणं स्थित्वा ययौ वैहायसं पुरम् ॥४६॥
तद्वै नारदतीर्थं च स्थलं ज्ञानप्रदं शुभम् ।
भद्राश्वोऽपि मुनिं नत्वा ययौ प्रभासकं प्रति ॥४७॥
इत्येवं श्वेतभूमिस्थं ज्ञात्वा नारायणं ततः ।
विशालास्थं यामुनस्थं कुंकुमवापिकास्थितम् ॥४८॥
अक्षरात् पररूपं च ज्ञात्वा मोक्षं हि विन्दति ।
स्मरन् विष्णुं पठन्वेदान् ददन् दानं यजन् हरिम् ॥४९॥
साधून् सन्तोषयन् भक्तो मोक्षभाङ् नाऽत्र संशयः ।
तीर्थं साधुमयं साध्वीमयं श्रेष्ठं प्रमोक्षदम् ॥५०॥
ततो गच्छेद् भीमनाथतीर्थं भीतिनिवारकम् ।
सुपर्णेशीं ततः पश्येत् सुपर्णं च नरायणम् ॥५१॥
कौबेरेशीं ततो गच्छेत्ततो भल्लं सुतीर्थकम् ।
भल्लतीर्थे सदा विष्णुर्वर्तते गंगया सह ॥५२॥
गंगा च वैष्णवं क्षेत्रं पावनं मूर्तिमद् यतः ।
वल्लकेन निषादेन विष्णुः कृष्णः सनातनः ॥५३॥
भल्लं धनुषि सन्धाय हतो गोलोकगोऽभवत् ।
वल्लकोऽपि मृगभ्रान्त्या प्लक्षद्रुस्तम्बसंस्थितम् ॥५४॥
विष्णुं जघान भल्लेन गत्वा पश्यति माधवम् ।
तुष्टाव च ततः खिन्नः प्राप्तवाँस्तदनुग्रहम् ॥५५॥
ययौ तत्रैव गोलोकं विष्णुना सह धीवरः ।
भल्लक्षेत्रं हि तत्प्रोक्तं विद्धः पादतले हरिः ॥५६॥
मोक्षदं स्वर्गदं श्रेष्ठं जन्ममरणवेधकृत् ।
ततो गच्छेद्धिरण्याया उत्तरे रैवतं प्रति ॥५७॥
कौशिकं परमं तीर्थं ततो वस्त्रापथात्मकम् ।
दामोदरं रैवतकं भवमिन्द्रेश्वरं तथा ॥५८॥
चक्रोद्यानं रेवतीतीर्थकं वासिष्ठकाश्रमम् ।
शृणु चास्या भूमेर्लक्ष्मि कथां पापप्रणाशिनीम् ॥५९॥

गजो नामाऽभवद्राजा भार्यया सह पार्थिवः ।
गंगाजलाभिषेकार्थे ययावुवास तत्र च ॥६०॥
भद्रो नाम मुनिस्तस्याऽऽजगाम पुरतः क्वचित् ।
तं गजः प्राह मोक्षार्थे ज्ञानं देहि मुने मम ॥६१॥
भद्रः प्राह स्वयं चात्मा तीर्थं सर्वेषु पावनम् ।
तत्राऽऽस्ते श्रीकृष्णनारायणस्तीर्थोत्तमोत्तमम् ॥६२॥
तस्य ज्ञानं स्मृतिरूपं परं ज्ञानमिहोच्यते ।
अन्यत् सर्वं ज्ञानमात्रं मेधाभारकरं नृप ॥६३॥
तीर्थानि तोयपूर्णानि देवाः पाषाणमृन्मयाः ।
आत्मस्थं येन पश्यन्ति ते न पश्यन्ति तं परम् ॥६४॥
सन्ति तीर्थान्यनेकानि पुण्यान्यायतनानि च ।
पुण्यतोयाः पवित्राश्च सागराः सरितस्तथा ॥६५॥
ज्ञानं तेषां च तीर्थानां ज्ञानोत्तमोत्तमं मतम् ।
अनादिश्रीकृष्णनारायणं विष्णुं नरायणम् ॥६६॥
मत्स्यं वराहं नृव्याघ्रं वामनं कच्छपं हरिम् ।
रामं रामं च रामं च कृष्णं श्रीपुरुषोत्तमम् ॥६७॥
हरिं श्रीकपिलं दत्तात्रेयं बुद्धं च रैणुकम् ।
वासुदेवं पृथुं हंसमृषभं च कुमारकान् ॥६८॥
नारदं च क्रतुं चाश्वग्रीवं व्यासं जनार्दनम् ।
मोहकं राजराजं च कल्कघ्नं च पुमुत्तमम् ॥६९॥
नरं नारायणं देवं श्वेतद्वीपपतिं प्रभुम् ।
शेषस्थं पद्मनाभं च जगन्नाथं रणस्थितम् ॥७०॥
नामानि तस्य वासानि स्मृत्वा मोक्षमवाप्नुयात् ।
गंगा च यमुना चैव नदी गोदावरी शुभा ॥७१॥
शतद्रुश्च तथा विन्ध्या पयोधा वरदा तथा ।
चर्मण्वती च सरयू गण्डकी चण्डपापहा ॥७२॥
चन्द्रभागा विपाशा च शोणा ब्रह्मसुता तथा ।
एताश्चान्याश्च या बह्वयो हिमाश्रयाद्योऽद्रयः ॥७३॥
नामोच्चारेण येषां हि पापं याति विनाशनम् ।
अश्वपट्टसरसश्च मानससरसस्तथा ॥७४॥
नारायणसरसश्च पुष्करसरसस्तथा ।
इन्द्रद्युम्नसरसश्च स्मरणादेव मोक्ष्यते ॥७५॥
कान्यकुब्जे मार्गशीर्षे ह्युषित्वा स्वर्गमाप्नुयात् ।
अर्बुदे पौषपूर्णायां माघ्यां गयासुतीर्थके ॥७६॥
फाल्गुन्यां हिमवत्पृष्ठे चैत्र्यां वसेत् प्रभासके ।
अश्विन्यां कुंकुमवाप्यां वैशाख्यां चाप्यवन्तिके ॥७७॥
ज्येष्ठ्यां त्रिकूटके चैव श्रावण्यां पूर्वसागरे ।
भाद्र्यां सारस्वते चैव कार्तिक्यां रैवताचले ॥७८॥
कापिले च तथा द्वीपे शालग्रामेऽपि भूतले ।
दीपोत्सव्यां चान्द्रभागे श्राद्धं स्नानं जपं चरेत् ॥७९॥
गोलोकेऽक्षरधाम्नि वैकुण्ठे कैलासकेऽथवा ।
यथाभक्ति भवेद् वासो व्रतिनां तीर्थशालिनाम् ॥८०॥
मासानां कार्तिकः श्रेष्ठः कार्तिके भीष्मपञ्चकम् ।
तत्रापि द्वादशी श्रेष्ठा राजन् दामोदरे जले ॥८१॥
सोमनाथस्य सान्निध्ये उदयान्तो गिरिर्महान् ।
तस्य पश्चिमभागे तु रैवताद्रिः स्मृतो महान् ॥८२॥
नदी तत्र च वहति सुवर्णरेखिका शुभा ।
धातवस्तत्र तु रक्ताः श्वेता नीला विचित्रकाः ॥८३॥
पाषाणाः कुंजराकाराः स्वर्णगैरिकसन्निभाः ।
वृक्षा वल्ल्यश्च गुल्माश्च काञ्चनानां समुद्भवाः ॥८४॥
तत्र नद्यां स्वर्णलेखानाम्न्यां नारायणो ह्रदः ।
दामोदरह्रदश्चापि राधादेरीति चापि वै ॥८५॥
तत्र स्नात्वा जलं पीत्वा यान्ति मुक्तिं हि देहिनः ।
हरिश्चन्द्रेण बलिना शिबिना नहुषेण च ॥८६॥
नलेन च महादानान्यर्पितानि हि रैवते ।
गतास्ते विष्णुभवनं शाश्वतं च निरामयम् ॥८७॥
इत्येवं भद्रवचनं श्रुत्वा गजो जनाधिपः ।
समाययौ रैवतस्य प्रभासस्य च तीर्थके ॥८८॥
दत्वा दानान्यनेकानि हविर्हुत्वा हुताशने ।
ऊर्ध्वपादः स्थितो भूत्वाऽपिबद्धूममधोमुखः ॥८९॥
अन्ये तेन सहाऽऽयातास्तपः कुर्वन्ति वै तथा ।
सर्वैर्व्रतं कृतं तत्र ध्येयो दामोदरो गिरौ ॥९०॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षोपगमनं प्रति ॥९१॥
स राजा ऋषिभिः सार्धं यावत् तिष्ठति तत्र वै ।
विमानानां सहस्राणि तावत्तत्राऽगतानि वै ॥९२॥
येषु देव्यो रमाद्यास्यो नारायणस्य पार्षदाः ।
मुक्ताश्चान्ये समभवन् शतशोऽथ सहस्रशः ॥९३॥
सर्वैश्चानुचरैः सार्धं स राजा भार्यया सह ।
गतो विमानमारूढो यदक्षरपदं वरम् ॥९४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ।
इति मन्त्रस्य चोद्घोषो विमानेष्वखिलेष्वपि ॥९५॥
सतालिकोऽभवद् व्योम्नि येन स्वर्गादिवासिनः ।
दर्शनार्थं विमानानां मुक्तानां मार्गमध्यगाः ॥९६॥
अवस्थाय च राजानं नारायणं परेश्वरम् ।
समभिलोकयामासुः पूजयामासुरीश्वरान् ॥९७॥

एवं पितृमुनीनां च लोकान् भित्त्वाऽण्डकाद् बहिः ।
ययुर्मोक्षपदं सर्वे कृत्वा तीर्थं तु रैवतम् ॥९८॥
शंकरः पार्वतीं प्राह क्षेत्रस्यैवंविधां कथाम् ।
मया लक्ष्मि ! चाभिहिता तुभ्यं मोक्षकरी शुभा ॥९९॥
पठनाच्छ्रवणात्त्वस्याः कथायाः पापनाशनम् ।
स्वर्गं सत्यं च वैकुण्ठं परं धामाऽक्षरं लभेत् ॥१००॥
इदं श्रुत्वा तथा भक्त्या मोदयित्वा प्रशंसयेत् ।
सर्वपापरहितः सन् परंब्रह्माधिसंव्रजेत् ॥१०१॥
का मया प्रोच्यते लक्ष्मि ! सौराष्ट्रस्य पवित्रता ।
स्वयं श्रीमत्कृष्णनारायणस्य मणिरूपिणः ॥१०२॥
देशः सौराष्ट्रइत्याख्यो मोक्षदोऽस्ति पदे पदे ।
अनादिश्रीकृष्णनारायणः पूर्वेऽस्ति सर्वदा ॥१०३॥
पश्चिमे वामनो देवो दक्षिणे सोमनाथकः ।
उत्तरे च चमत्कारनगरं द्वारिका शुभा ॥१०४॥
शत्रुंजिता स्वर्णरेखा भद्रा चोष्णा हिरण्यका ।
देवनदी न्यंकुमती सरितो मोक्षदाः शुभाः ॥१०५॥
यत्र सन्ति रैवतश्च शत्रुंजयो वराटकः ।
शालमालो नवनीतश्चान्ये पर्वतपुंगवाः ॥१०६॥
महर्षयश्च भगवत्स्वरूपा यत्र सन्ति हि ।
सत्यो लक्ष्मीसमा यत्राऽक्षता देव्यो वसन्ति च ॥१०७॥
चन्द्रो यन्मुखमालोक्य क्षणं स्तब्धो भवत्यपि ।
तादृश्यो दिव्यदेव्यश्च सूर्यतुल्याश्च बालकाः ॥१०८॥
यत्र वसन्ति शीलस्थाः साक्षान्नारायणोऽपि च ।
अनादिश्रीकृष्णनारायणस्य गोपिकास्तथा ॥१०९॥
लक्षशो यत्र सौराष्ट्रे भक्ता वसन्ति सेविकाः ।
सर्वो ब्रह्ममयो देशो लक्ष्मि ! वैकुण्ठवन्मम ॥११०॥
इत्येवं कथितं सर्वं शंकरोदितमेव ते ।
पाठकाः श्रावकाः श्रोतुजना मुक्ता भवन्ति च ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने तुण्डीश्वरकपिलातीर्थाऽगस्त्यनारदचमत्कारभीमनाथतीर्थभल्लक्षेत्ररैवततीर्थगजनृपमोक्षादीनां सोपाख्यानवर्णननामा पञ्चाशदधिकपञ्चशततमोऽध्यायः ॥ ५५० ॥

श्रीनारायण उवाच—

शंकरः पार्वतीं प्राह तीर्थान्तराणि यान्यपि ।
सौराष्ट्रे तानि ते वच्मि लक्ष्मि ! निबोध मे प्रिये ! ॥ १ ॥
उन्नविल्लं शुभं तीर्थं गुहात्मकं च शांभवम् ।
गंगेश्वरं पश्चिमे वै रैवताद् भाति शोभनम् ॥ २ ॥
यक्षेश्वरीमहातीर्थम् उपलास्त्वं च शोभनम् ।
वस्त्रापथे महाक्षेत्रे नगरे वामने पुरा ॥ ३ ॥
पुत्रशोकाभिसन्तप्तो वसिष्ठो भगवानृषिः ।
आजगाम तपस्तप्तुं स्वर्णरेखानदीतटे ॥ ४ ॥
ईशानकोणे नगरात् स्वर्णरेखानदीजले ।
वासिष्ठं तन्महत्तीर्थं वर्तते भुक्तिमुक्तिदम् ॥ ५ ॥
बलिखातं मखतीर्थं कृतस्मरस्य सन्निधौ ।
वर्तते मोक्षदं नाथतीर्थं लोकस्य शान्तिदम् ॥ ६ ॥
वस्त्रापथस्य वायव्ये दिव्यं चास्ति सरोवरम् ।
अप्सरसां परीतालं देवाः स्नान्ति विहारिणः ॥ ७ ॥
जालीगहनशंभुश्च देवी त्रिशूलिनी तथा ।
हेरम्बाख्यो गणेशश्च वर्तन्ते तीर्थवासिनः ॥ ८ ॥
पश्चिमे सागरे तत्र मकरालयपत्तनम् ।
कुन्दनाख्यं पुरं चापि मणिभद्रं शुभाश्रयम् ॥ ९ ॥
श्रीदामपुरमुत्कृष्टं द्वारिकाक्षेत्रमुत्तमम् ।
एवं तीर्थानि सामुद्रे तटे वसन्त्यनेकशः ॥१०॥
एवमुक्त्वा महादेवः पार्वतीं परमेश्वरीम् ।
कृत्वा प्राभासिकं यज्ञं श्रावणे समुपस्थिते ॥११॥
ययौ कोटिगणैर्युक्तो द्वारिकां नगरीं प्रति ।
श्रीकृष्णाद्यास्तीर्थदेवाः सत्कारं चक्रुरीश्वराः ॥१२॥
मासं नीत्वा कृष्णभूमौ चमत्कारपुरं ययुः ।
तत्र देव्यश्चाऽष्टषष्टिसंख्या हरेण पूजिताः ॥१३॥
नवरात्रव्रते सर्वाः प्राप्य श्रीशंकरं पतिम् ।
निमग्नाः सुखविस्तारे ब्रह्मानन्दात्मसागरे ॥१४॥
आश्विने च ययुः सर्वे पर्वतं त्वर्बुदाचलम् ।
गगनस्थं पुष्करं तु यत्र संराजतेऽनिशम् ॥१५॥
द्वितीयं पर्वतशृंगे तृतीयं भूतले स्थितम् ।
वसिष्ठादिमहर्षीणामाश्रमा यत्र शोभनाः ॥१६॥
पर्वते चाकचक्यादिरूपाश्च वालुकाः शुभाः ।
वृक्षाश्च वल्लिकाः स्तम्भास्तापसा इव भान्ति च ॥१७॥
अरण्यान्यपि रम्याणि देवोद्यानानि वै तथा ।
यज्ञानां भूमयो यत्र तापसानां च वेदिकाः ॥१८॥
सतीनां मुनिवासाश्च साधूनामाश्रमास्तथा ।
विद्यन्ते ब्राह्मणानां च वैष्णवानां शुभालयाः ॥१९॥
सारस्वतानि तीर्थानि नदा नद्यश्च पाविकाः ।
मेघानां शिखरावासा वायूनां गन्धमिश्रिताः ॥२०॥

धेनूनां देवकोटीनां वासा यत्र भवन्ति च ।
योगिनां सिद्धजीवानां मण्डलानि वसन्ति च ॥२१॥
पुष्करे शिखरे वासं तत्र चक्रुः शिवादयः ।
पुष्करादीनि तीर्थानि वसिष्ठाद्या महर्षयः ॥२२॥
ब्रह्माद्या देवताश्चान्ये चक्रुः शंकरमाननम् ।
जलं पुष्पं फलं चार्घं नैवेद्यं सेवनादिकम् ॥२३॥
ददुः श्रीपरमेशाय पार्वतीपतये सुराः ।
वशिष्ठेन कृता पूजा विशिष्टा च निजालये ॥२४॥
सुविश्रान्तिं ततश्चक्रुः शांकरास्त्वर्बुदाचले ।
अर्बुदोऽयं दिव्यमूर्तिः सत्कारं कृतवान् बहुम् ॥२५॥
शंकरः पार्वतीं प्राह निशायां स्वासने कथाम् ।
श्रृणु त्वस्य कथां दिव्यां पापतापप्रणाशिनीम् ॥२६॥
गौतमोऽभून्मुनीनां वै मान्यो धन्यो महानृषिः ।
शतशृंगे निवासं स कृत्वा तपश्चचार ह ॥२७॥
अहल्या तस्य भार्याऽपि तापसी ब्रह्मवादिनी ।
दण्डकारण्यवास्तव्या गौतमे किंकरी सदा ॥२८॥
अतिथीनां पूजनं सा सदा करोति भामिनी ।
एकदाऽवग्रहे जाते पृथ्व्यामन्नानि सन्ति न ॥२९॥
विप्रा विचारयामासुर्भोजनं क्व मिलिष्यति ।
गौतमोऽस्ति समर्थः स पूजयत्यतिथीन् सदा ॥३०॥
तद्गृहं समगच्छाम इत्याययुः समन्ततः ।
गौतमस्तद्विलोक्यैव ब्रह्माणं प्रपितामहम् ॥३१॥
सस्मार सुबहु ब्रह्मा प्रत्यक्षः सम्बभूव ह ।
वरं वृणु समुवाच गौतमः प्राह भूतले ॥३२॥
जलं गोधूमधान्यानि यवाश्च कणिशादयः ।
प्रातरारभ्य जायन्तां मध्याह्ने तत्कणान्वयम् ॥३३॥
पक्वीयो नित्यमित्येवं तेषां पक्वं च भोजनम् ।
वैश्वदेवं शुभं श्राद्धं नैवेद्यं देवतासु च ॥३४॥
आतिथेयं ब्राह्मणानां कुर्मो यथा तथाऽस्तु मे ।
ब्रह्मा त्वाश्रुत्य च तथास्त्विति प्राह ययौ ततः ॥३५॥
नित्यं धान्यं नवं प्रातर्जायते तच्च पच्यते ।
सहस्राणां नित्यमेव विप्राणां भोजनं तथा ॥३६॥
भवत्येवं वत्सरं वै ब्राह्मणा भोजितास्तथा ।
पातिव्रत्यप्रभावेणाऽहल्या करोति सेवनम् ॥३७॥
संकल्पयति नित्यं सा प्रातः कान्तस्य पादयोः ।
नत्वा पतित्वा चाऽङ्गुष्ठे प्रक्षाल्याऽर्घं विधाय च ॥३८॥
यद्यहं स्वामिभार्याऽस्मि स्वामिभक्ता पतिव्रता ।
तदा त्वत्र प्रजायन्तां लक्षपात्राणि नित्यशः ॥३९॥
दासा दास्यः सेवकाश्च धेनवो रसवद्प्रदाः ।
खाद्यपेयानि सर्वाणि क्रियन्तां हुतभुक् स्वयम् ॥४०॥
देवाश्च परिवेष्टारो भवन्तु दण्डके मम ।
एवं नित्यं सुसंकल्प्य कृत्वा महानसानि च ॥४१॥
पाचयित्वा नवान्नानि कृत्वा विश्वसुरार्पणम् ।
गोग्रासान् जन्तुभागांश्च विकीर्य पितृपिण्डकान् ॥४२॥
विप्रान् लक्षमितान् नित्यं भोजयत्यधिकानपि ।
अथ वर्षोत्तरे काले सुवृष्टिर्भूतलेऽभवत् ॥४३॥
अन्नानि सर्वदेशेषु जातान्येव समन्ततः ।
विप्राः प्राहुर्वयं देशान्तराण्येष्याम एव वै ॥४४॥
गौतमस्तांस्तदा प्राह वसताऽत्रैव भूसुराः ।
तदा ते ब्राह्मणाः प्राहुः स्वतन्त्राः स्मो वयं मुने ! ॥४५॥
त्वयाऽन्नानि प्रदत्तानि रक्षिताश्च वयं सदा ।
यस्याऽन्नं तस्य वै देहोऽधीनता तस्य चोत्तमा ॥४६॥
तद्वाक्यं सर्वथा पाल्यं किन्तु जिगमिषा ध्रुवा ।
इत्युक्त्वा चिन्तयामासुर्गन्तुं ते मिषमद्भुतम् ॥४७॥
एको विप्रो रोधनाख्यः प्राणायामं विधाय च ।
संयमेन विवेशाऽन्तर्हृदये गौतमस्य हि ॥४८॥
अन्यैश्चैका तु गौस्तत्र निर्मिता मायया शुभा ।
सा गता गौतमस्यैव शालायां तृणसन्निधौ ॥४९॥
गौतमोऽपि स्थितस्तत्र प्राणायामे स्थिरो ह्यतः ।
गौर्गता पर्णशालायां गौतमस्तां विलोक्य च ॥५०॥
रोधनाऽन्तःप्रवेशेन प्राणरुद्धा भवाऽत्र गौः ।
एवमुच्चारयामास प्राणरुद्धाऽभवत्तु गौः ॥५१॥
पतिता मूर्छिता चापि विप्राः प्राहुस्तदा मुहुः ।
गोघ्नो वै गौतमो नाऽस्याऽऽश्रमे स्थेयं तु भूसुरैः ॥५२॥
गौतमस्तान् मुहुः स्तुत्या तुष्टाव पूज्यभूसुरान् ।
नेयं मृताऽस्ति मूर्छायां मूर्छा नश्येत्तु वा कथम् ॥५३॥
प्रायश्चित्तं करोम्यत्र मा यान्तु भूसुरा गृहात् ।
इत्युक्ता ब्राह्मणाः प्राहुः प्रायश्चित्तं न जीविते ॥५४॥
मूर्छिते वा प्रकर्तव्यं मूर्छा दूरीकरोतु वै ।
गंगाजलं समानीय समाप्लावय गामिमाम् ॥५५॥
विमूर्छा स्थास्यति द्राग् वै वयं यामो वनान्तरम् ।
इत्युक्त्वा प्रययुः सर्वे विप्रा दण्डकभूमितः ॥५६॥
गौतमो व्योममार्गेण ययौ श्रीशंकरं प्रति ।
शंकरः स्वागतं तत्र कैलासे कृतवान् पुरा ॥५७॥
गौतमस्तु हरं नत्वा ययाचे गांगकं जलम् ।
शंकरः स्वं जटाखण्डं समुत्पाट्य ददौ तदा ॥५८॥

सगांगं तं निनायात्र दत्वा गोदेहमस्तके ।
तदुत्पन्नजलेनैनां प्लावयामास गौतमः ॥५९॥
गौर्जाता स्वस्थहृदया विमूर्छा स्वाश्रमे स्थिता ।
गंगा सा गौतमी जाता गोदानस्य वरेण हि ॥६०॥
गोदावरीति विख्याता दण्डकारण्यवासिनी ।
अथ तान् ब्राह्मणानाह गौतमर्षिः पलायितान् ॥६१॥
सर्वे भवन्तु कापट्यधर्माभासा युगान्तरे ।
रौद्राः कपालसंगाश्च भोज्यदानां विनिन्दकाः ॥६२॥
इत्येवं सति ! ते चास्य गौतमस्य प्रभावनम् ।
कथितं सुचमत्कारमयं गोदावरं स्थलम् ॥६३॥
तत्र गोदावरे तीर्थे गौतमस्याऽभवच्छुभः ।
शिष्यस्तूत्तंकनामा यो वेदानधीत्य यावतः ॥६४॥
गुरवे दक्षिणां दातुं प्रार्थनां प्रचकार सः ।
गुरुपत्नी तदा प्राह दक्षिणां मणिमालिकाम् ॥६५॥
सौदासस्य गृहे राज्ञी मदयन्ती स्ववक्षसि ।
धारयत्येव नित्यं सा त्वानेतव्या, प्रदेहि ताम् ॥६६॥
इत्युक्तो गुरुपत्न्या स प्रस्थितः सत्वरं तदा ।
सुदासस्य गृहं प्रायात् सुदासं व्याघ्ररूपिणम् ॥६७॥
ददर्श त्वभियान्तं स्वं भक्षयितुं स भूसुरः ।
विप्रः प्राह यथेष्टं त्वं खाद मां तदनन्तरम् ॥६८॥
अतिथिस्ते समायातो मणिमालां प्रदेहि मे ।
गुरवेऽर्पयित्वा चैष्यामि दक्षिणां त्वभिवाञ्छिताम् ॥६९॥
राजा प्राह शुभं विप्र ! याच्यतां महिषी मम ।
इत्युक्तो भूसुरो राज्ञीं ययाचे मालिकां प्रति ॥७०॥
राज्ञी प्राह त्वमानीहि चाभिज्ञानं नृपस्य वै ।
स गत्वा त्वरितं भूपमभिज्ञानमयाचत ॥७१॥
सौदासश्चाह वाक्यं यदभिज्ञानं यतो भवेत् ।
यैर्विना सुगतिर्नास्ति दुर्गतिं येन यान्ति च ॥७२॥
गत्वैवं ब्रूहि तां साध्वीं श्रुत्वा दास्यति मालिकाम् ।
सा ददौ भूसुरायैनां मालिकां दिव्यसत्प्रभाम् ॥७३॥
उवाच त्वसुरस्तत्र रणान्तिके प्रतिष्ठति ।
अतलात् स समागत्य मालामिच्छति मे शुभाम् ॥७४॥
अजामृतोऽसुरो नाम्ना खातयामास तत्तलम् ।
भूगर्भे वासयामास राक्षसान् स निजानुगान् ॥७५॥
तेन वै विवरं पृथ्व्यां चातिदीर्घं कृतं यतः ।
आहरेन्न यथाऽऽगत्य तथा रक्ष प्रयाहि वै ॥७६॥
इत्युक्तः सोऽप्युत्तंकश्च मणिहारं समाददे ।
आयातः स्वगुरोः पत्न्यै ददौ हीरकहारकम् ॥७७॥
गुरुं पप्रच्छ वाक्यस्य शुभार्थं स जगाद ह ।
प्रसादिता द्विजा दानैर्दास्यन्ति सुगतिं पराम् ॥७८॥
असन्तुष्टा द्विजा यस्य दुर्गतिस्तस्य सर्वदा ।
इत्यर्थं चापि विज्ञाय मुमुदे भूसुरस्तदा ॥७९॥
आशीर्वादान् गुरोर्गुर्व्योः समादाय महानृषिः ।
उत्तंकः पुष्करं तीर्थं रम्यं निजालयं ययौ ॥८०॥
उत्तंकतीर्थमत्राऽस्ति पापतापप्रणाशनम् ।
अथैतद् विवरं दीर्घमायतं चासुरैः कृतम् ॥८१॥
तत्रैकदा वशिष्ठस्य कामधेनुः पपात ह ।
वशिष्ठो निजयोगेन होमधेनुं निजां तदा ॥८२॥
बहिर्निष्कासयामास तत आरभ्य सर्वदा ।
पूर्तिं विचारयामास विवरस्य महाद्रिणा ॥८३॥
हिमालयं ययौ शीघ्रं वशिष्ठो हि विहायसा ।
अर्थयामास तत्पुत्रं विवरस्य प्रपूर्तये ॥८४॥
नन्दिवर्धं सुतं प्रादाद् वशिष्ठस्तं निनाय च ।
विवरे स्थापयामास नन्दिवर्धननामकम् ॥८५॥
अर्बुदेन च नागेन धृतस्तत्र यथायथम् ।
अर्बुदाचलमेवैतन्नामख्यातिं गतं ततः ॥८६॥
भाद्रशुक्लस्य पञ्चम्यां त्वायातः पर्वतो यतः ।
तीर्थान्यपि वशिष्ठेन चानीतानि बहून्यपि ॥८७॥
अस्य शृंगे नागतीर्थे वशिष्ठस्याऽऽश्रमस्तथा ।
शंकरस्य तथा वासस्तत्र स्नानं च निर्झरे ॥८८॥
धनसम्पत्सुखस्वर्गपुत्रलक्ष्म्यादि चाप्यते ।
वन्ध्या स्नात्वा पुत्रवती भवेदेव न संशयः ॥८९॥
श्राद्धं तत्र करिष्यन्ति पितरस्तस्य सर्वथा ।
मुक्तिं स्वर्गात् प्रयास्यन्ति कर्ताऽपि मुक्तिगो भवेत् ॥९०॥
वशिष्ठश्चानयामास गौतमीं च सरस्वतीम् ।
गंगां मन्दाकिनीं तत्राऽचलेश्वरं च शंकरम् ॥९१॥
गौतमी ब्राह्मणी काचिदनपत्यत्वदुःखिता ।
साध्वी तीर्थे नागतीर्थमाययावर्बुदाचले ॥९२॥
अथ सा चिन्तयामास धिङ् मां पुत्रविवर्जिताम् ।
इति चिन्तापरा स्नातुं नागतीर्थे विवेश सा ॥९३॥
स्नात्वा सा निर्गता तस्मात् सलिलाद् यावदेव हि ।
विनापि भर्तृसंयोगं सद्यो गर्भवती ह्यभूत् ॥९४॥
प्रसन्ना सा च शुश्राव गां तदा चाऽशरीरिणीम् ।
यो यद्वाञ्छति चित्तेऽत्र जलमध्ये व्यवस्थितः ॥९५॥
चिन्तितं तदवाप्नोति नारी वाऽथ नरोऽपि वा ।
त्वया त्वत्र जलेस्थित्वा पुत्रवाञ्छा कृता हृदि ॥९६॥

अतो गर्भयुता जाता पुत्रस्तव भविष्यति ।
श्रुत्वाऽऽकाशगतां वाणीं देवदूतेन भाषिताम् ॥९७॥
दृष्ट्वा पतिं विना गर्भं वाक्यमेतदुवाच सा ।
अहो तीर्थप्रभावोऽयमपूर्वः प्रतिभाति मे ॥९८॥
यत्र संजायते गर्भः स्त्रीणां शुक्रं रजो विना ।
ततो गृहं गता सा च सुषुवे सुतमुत्तमम् ॥९९॥
सकामा ये चात्र तीर्थे स्नान्ति तेषां मनोरथाः ।
फलन्त्येव न सन्देहो यथा सा गौतमी तथा ॥१००॥
गोमती चाहृता कुण्डे वशिष्ठेन महात्मना ।
तत्र स्नात्वा परं स्वर्गं विन्दते नात्र संशयः ॥१०१॥
शृणु देवि ! चमत्कारमचलेश्वरसन्निधौ ।
शुकश्चासीत् कृतनीडः प्रदक्षिणं करोति सः ॥१०२॥
उड्डीयोड्डीय च नीडे विश्राम्यति पुनः पुनः ।
कालेन च मृतो राजा वेणुनामाऽभवद्धि सः ॥१०३॥
जातिस्मरो बभूवाऽसौ राजा स्मृत्वा शुकस्थितिम् ।
अचलेश्वरमासाद्य प्रदक्षिणमथाऽकरोत् ॥१०४॥
नान्यत् किञ्चित् करोत्येव करोत्येव प्रदक्षिणम् ।
नारदाद्याः ऋषयस्तु दृष्ट्वा भूपं तथाविधम् ॥१०५॥
पप्रच्छुः केवलं प्रदक्षिणं कथं विधीयते ? ।
नैवेद्यं फलपुष्पादि कथं नार्पयसे वद ॥१०६॥
वेणुः प्राह पुरा पक्षी शुकश्चासं स्थितोऽत्र तु ।
देवं तत्र स्थितं कुर्वन् प्रदक्षिणमहर्निशम् ॥१०७॥
कृपया तत्प्रभावाच्च जातिस्मरोऽधुनाऽभवम् ।
करोमि तन्महापुण्यं स्मृत्वा देवप्रदक्षिणम् ॥१०८॥
अनन्तपुण्यलाभार्थं करोम्येव प्रदक्षिणम् ।
ऋषयो नृपतेः श्रुत्वा साधु साध्विति चाऽब्रुवन् ॥१०९॥
राजा कालेन महता हरभक्त्या ततः परम् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥११०॥
इति मन्त्रं हराल्लब्ध्वा भक्त्या वैकुण्ठमाययौ ।
तस्यै शंभूदितं वृत्तं लक्ष्मि ! ते तु मयोदितम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शंकरादीनां द्वारिकाचमत्कारपुराऽर्बुदाचलादिगमनं, गौतमवृत्तान्तं, सौदासोत्तंकवृत्तान्तं, नागतीर्थमहिमा, वेणुंनृपमोक्षः, अर्बुदानयनवृत्तान्तं, चेत्यादिनिरूपणनामैकपञ्चाशदधिकपञ्चशततमोऽध्यायः ॥५५१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकरं स्वागतं श्रुत्वाऽर्बुदाचले ।
अगस्त्यस्तद्दर्शनार्थं दक्षिणात् समुपागतः ॥ १ ॥
नत्वा शंभुं पूजयित्वा सुखासीनः शुभासने ।
शंभुना सत्कृतोऽगस्त्यः पप्रच्छ शंकरं ततः ॥ २ ॥
चिरंजीवित्वमेवाऽत्र कथं स्यान्मे वद प्रभो ! ।
शंभुः प्राह भज कृष्णनारायणं पुमुत्तमम् ॥ ३ ॥
सौराष्ट्रे वर्तमानं वै काम्भरेयं रमापतिम् ।
विना भक्तिं हरेः क्वापि दिव्यत्वं नैव जायते ॥ ४ ॥
विना च दिव्यभावेन चिरंजीवो न जायते ।
कालक्षयादिकं दिव्ये स्पृशत्येव न कर्हिचित् ॥ ५ ॥
दिव्ययोगं विना दिव्यभावो नैव कदाचन ।
दिव्यो नारायणो विष्णुर्भूतभावन ईश्वरः ॥ ६ ॥
तस्मिन् देहे प्रविष्टे च दिव्यता स्याद् विशेषतः ।
सिद्ध्यस्तत्र वर्तन्ते यत्र कृष्णनरायणः ॥ ७ ॥
अहं वै शंकरो ब्रह्मा विष्णुश्चान्ये दिवौकसः ।
दिव्या नारायणांशेन तस्मान्नारायणं भज ॥ ८ ॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
जप नित्यं महामन्त्रं ध्यानं कुरु हरेः सदा ॥ ९ ॥
जुहुधि श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
प्रसन्नः सन् यथेष्टं ते दास्यत्येव स दिव्यताम् ॥१०॥
इत्युक्तोऽगस्त्यमुनिराड् ध्यानं चकार पूजनम् ।
वन्दनं स्मरणं नित्यं कृष्णनारायणस्य वै ॥११॥
लोमशस्याऽऽश्रमे गत्वोवासाऽश्मपट्टके तदा ।
अथैकदा स मुनिराट् तीर्थार्थं काशिकां ययौ ॥१२॥
व्योम्ना हिमगिरिं गत्वा प्रययौ मानसं सरः ।
कच्छपं मानसे दिव्यं ददर्श मुनिपुंगवः ॥१३॥
कमलानि सुदिव्यानि ददर्श कानकानि च ।
कच्छपेनाऽर्पितं दिव्यं कमलं स्वागते शुभम् ॥१४॥
तावत् स मुनिराट् तत्र बभूव दिव्यदृष्टिमान् ।
उड्डीय कच्छपं नत्वा ययाविलावृतं ततः ॥१५॥
मेरोः पार्श्वस्थिते खण्डे ददर्श सुसरोवरम् ।
तस्य तटे शुभा तेन दृष्टा काचिन्महाकुटी ॥१६॥
तत्रोपवासशिथिलो दृष्टस्तेन हि तापसः ।
अस्थिचर्मावशेषश्च चीरवल्कलकाम्बरः ॥१७॥
पृष्टश्च प्रतिपत्त्यर्थं कस्त्वं चेति महात्मना ।
स त्वगस्त्यं समुवाच स्थीयतां स्थीयतां द्विज ॥१८॥

आतिथ्यं गृह्यतां ब्रह्मन् प्रविश्यतां स्थलं मम।
इतिश्रुत्वा संप्रविष्टोऽगस्त्यः पर्णकुटीं च ताम् ॥१९॥
तावद्ददर्श पुरुषं विप्रं ज्वलन्तमीश्वरम्।
भूमौ शुभासनस्थं प्राजपन्तं ब्रह्म शाश्वतम् ॥२०॥
स्वकरे मालिकां युञ्जन् ललाटे तिलकं दधन्।
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ॥२१॥
होममेवं प्रकुर्वन्तं प्रत्येकं मणिमाप्य च।
वदन्तं मालिकान्ते च पौरुषं सूक्तमुत्तमम् ॥२२॥
एतादृशः स पुरुषो लक्ष्मीसूक्तमुवाच ह।
सूक्तोत्तरं तु तत्कुण्ड्यां कुण्डाद्वै पञ्चकन्यकाः ॥२३॥
निर्ययुः काञ्चनं सिंहासनं त्वेका ददौ तदा।
द्वितीया जलपात्रेण पादप्रक्षालनं व्यधात् ॥२४॥
तृतीया व्यजनं धृत्वा मुनये पवनं ददौ।
चतुर्थी पञ्चमी धृत्वा चामरे पक्षयोः स्थिते ॥२५॥
पुनः श्रीसूक्तमुच्चार्य कुण्ड्यां स तापसो मुहुः।
होमं चकार वै तावत् कन्यास्तु शतशः शुभाः ॥२६॥
हेमकुंभकरास्तत्रोत्पन्नाः पार्श्वे सरोवरम्।
वारुणेन च होमेन शीघ्रं तत्रैव निर्मितम् ॥२७॥
तास्तु जलानि चानीय स्नापयामासुरेत्य तम्।
वस्त्रेण मार्जनं चक्रुश्चालंकारान् ददुस्ततः ॥२८॥
वस्त्राणि च ददुः पूजां चक्रुर्नैवेद्यमुत्तमम्।
जलं ददुस्ततस्ताश्चाऽन्तर्धानं प्रययुः क्षणात् ॥२९॥
अथाऽगस्त्यः समालोक्याऽऽश्चर्यं ध्यानं चकार ह।
नेत्रे सम्मीलिते यावत् तावन्मेरुगिरौ निजम् ॥३०॥
उच्चशृंगे स्थितं मूर्ध्नि पश्यत्यात्मानमात्मना।
पश्यति सागरान्सप्त तथैव कुलपर्वतान् ॥३१॥
सप्तद्वीपवतीं पृथ्वीं ददर्श मेरुसंस्थितः।
दृष्ट्वा सर्वं पुनर्ध्यानं चकाराऽगस्त्यको मुनिः ॥३२॥
भुवर्लोकं तथा स्वर्गं जनं सत्यं ददर्श ह।
ब्रह्मसभां च वैकुण्ठं ददर्श तत्र वै स्थितः ॥३३॥
तत्र ददर्श पुरुषं चतुर्बाहुं जनार्दनम्।
उन्मील्य नेत्रे यावच्च बहिः पश्यति तावता ॥३४॥
न वै मेरुर्न वै दिव्या कुटी नैव सरोवरम्।
मानसं न सरश्चापि काशिकाऽपि न विद्यते ॥३५॥
अश्वपट्टसरस्तीरे लोमशस्याऽऽश्रमे शुभे।
अगस्त्यः स्वं ददर्शैव नैजे पर्णगृहे तदा ॥३६॥
तदारभ्याऽत्र लोके चागस्त्यस्य दिव्यता यथा।
चिरंजीवित्यमत्यर्थमैश्वर्याण्यतिगानि च ॥३७॥
जातान्येव च तद्देशं कदा प्राप्स्ये पुनः शुभम्।
इत्येवं चिन्तयानोऽसौ शंभुं द्रष्टुं हिमाचलम् ॥३८॥
नरनारायणं द्रष्टुं मुहुर्याति नरायणम्।
द्रष्टुं चापि श्वेतभूमिं सत्यलोकं पुनः पुनः ॥३९॥
तथापि च पुनर्नैव जायते तस्य दर्शनम्।
इत्येवं शंकरः प्राह पार्वतीं तावदेव च ॥४०॥
पुनरगस्तिरायातो दर्शनार्थं तमार्बुदम्।
नत्वा शंभुं प्रणम्यैवोवाच जिज्ञासितं तदा ॥४१॥
भगवन् दिव्यलोकस्य पुरा दृष्टस्य वै मया।
व्रतं तपो वा धर्मो वा प्राप्त्यर्थे साधनं वद ॥४२॥
शंकरः प्राह तच्छ्रुत्वा यत्ते लक्ष्मि! वदाम्यहम्।
अनाराध्य हरिं भक्त्या तल्लोकाप्तिर्न वै भवेत् ॥४३॥
आराधिते हरौ लोका भवेयुर्वै करेऽखिलाः।
यो यज्ञे त्विज्यते देवो यस्मात् सर्वमिदं जगत् ॥४४॥
उत्पन्नं सर्वदा यस्मिन् लीनं भवति सामरम्।
अनादि श्रीकृष्णनारायणो देवः परात्परः ॥४५॥
अक्षराधिपतिः श्रीमान् पूर्णः श्रीपुरुषोत्तमः।
परिपूर्णतमः सोऽयं भजनीयः सदा जनैः ॥४६॥
सकामैर्वापि निष्कामैः सर्वार्थदः स वै प्रभुः।
चतुर्धात्माऽभवत्पूर्वं स एव पुरुषोत्तमः ॥४७॥
गोलोके श्रीकृष्णरूपो वैकुण्ठे स नरायणः।
वासुदेवोऽव्याकृते च हैमे नरनरायणः ॥४८॥
पुनश्चाऽयं चतुर्धा चाऽभवच्छ्रीपुरुषोत्तमः।
सत्यलोकोत्तरे विष्णुर्विष्णुश्च क्षीरसागरे ॥४९॥
श्वेतद्वीपे तथा विष्णुर्विष्णुरादित्यको दिवि।
पुनश्चायं स भगवान् त्रिधात्मानं ससर्ज ह ॥५०॥
सदाशिवं महाविष्णुं महाकालं च शाश्वतम्।
पुनश्चायं स भगवान् त्रिधात्मानं ससर्ज ह ॥५१॥
अनिरुद्धं च प्रद्युम्नं संकर्षणं च शाश्वतम्।
पुनश्चायं स भगवान् त्रिधात्मानं ससर्ज ह ॥५२॥
ब्रह्माणं राजसं रूपं सात्त्विकं विष्णुमेव च।
तामसं रुद्ररूपं च सृष्टिपुष्टिविनष्टिकृत् ॥५३॥
एक एव हि भगवान् कल्पे कल्पे प्रजायते।
सृष्टौ सृष्टौ गोलकेषु स एवाऽसंख्यरूपधृक् ॥५४॥
यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्माऽसौ महेश्वरः।
चत्वारो वा त्रयश्चैते तत्त्वं त्वेकं सनातनम् ॥५५॥
मोक्षदं पररूपेण कार्यरूपेण भूतिदम्।
सत्त्वेनात्मा शुद्ध्यति श्रीनारायणानुभावतः ॥५६॥

शुद्धया वै मुच्यते जन्तुः शुद्धिर्नारायणाश्रया ।
नारायणश्च भगवान् यज्ञरूपी विवर्तते ॥५७॥

कृते नारायणः शुद्धः सूक्ष्मरूप उपास्यते ।
त्रेतायां यज्ञरूपेण कथाभिर्द्वापरेऽर्चनैः ॥५८॥

कर्मभिर्बहुभिः कल्के कल्पितैरपि पूज्यते ।
इज्यते चेद् द्वेषबुद्धया चैतेषु रूपधारिषु ॥५९॥

भेदबुद्धया ज्ञायते चेन्न मुक्तिस्तस्य वै क्वचित् ।
एकं ज्ञात्वा भजेद् यः स मुक्तः स्यान्नात्र संशयः ॥६०॥

भेदं कृत्वा भजेच्चैकं परं नैव द्विषीत चेत् ।
पातिव्रत्यपरस्याऽस्य मुक्तिर्भवेन्न संशयः ॥६१॥

भेदं कृत्वा भजेच्चैकं निन्देदन्यं तु योजनः ।
सर्वं नष्टं भवेत्तस्य दुर्गतिं स समाप्नुयात् ॥६२॥

इदं च शृणु मेऽगस्त्य ! गदतः प्राक्तनं यथा ।
सृष्ट्यारंभे हरेर्भक्ता ह्यभवन् सृष्टिवासिनः ॥६३॥

सर्वशा इव ते सर्वे धर्मस्था मोक्षभागिनः ।
चतुर्दशस्तरस्था वै यष्ट्वा श्रीपुरुषोत्तम् ॥६४॥

मोक्षं क्रमात् प्रयान्ति स्म ततो ब्रह्मा हरिं प्रभुम् ।
सस्मार, श्रीहरिश्चापि प्रादुर्भूतो हि सर्वगः ॥६५॥

उवाच ब्रूहि किं कार्यं ब्रह्मोवाच हरिं ततः ।
देवदेव ! जनः सर्वो मुक्तिमार्गे व्यवस्थितः ॥६६॥

कथं सृष्टिर्हि भविता स्वर्गादिषु च को वसेत् ।
नारकेष्वेषु लोकेषु केषां वासे मनो भवेत् ॥६७॥

एवमुक्तस्तदा श्रीमन्नारायणो जगाद तम् ।
युगानि त्रीणि बहवो मामुपेष्यन्ति भागतः ॥६८॥

अन्त्ये युगे प्रविरला भविष्यन्ति महाश्रयाः ।
एष मोहं सृजाम्याशु यः सर्वान् मोहयिष्यति ॥६९॥

रुद्रश्च बहुरूपाणि तामसानि पुनः पुनः ।
भैरवादीनि चान्यानि पार्वत्यपि पराणि च ॥७०॥

दैत्यानां नाशनार्थाय घोराणि धारयिष्यति ।
मद्यमांसादिलुब्धाश्च मोहिता वै शरीरिणः ॥७१॥

तानि चाश्रित्य वै सत्त्वमार्गहीना विमार्गगाः ।
भविष्यन्ति तथा वेदं त्यक्त्वा तामसमोहतः ॥७२॥

तन्त्राणि तामसान्येव हिंसाढ्यानि यथारुचि ।
करिष्यन्ति च तान्याश्रित्य ये द्वेषपरास्तदा ॥७३॥

भविष्यन्ति न वै तेषां मुक्तिर्निरयगामिनाम् ।
अथाऽहं ब्रह्मणा प्रोक्तः कुरु मोहवचांसि वै ॥७४॥

यान्याश्रित्य जना लोके जन्मभागा भवन्तु हि ।
तस्मादारभ्य कालात्तु मयाऽगस्त्य ! कृतान्यपि ॥७५॥

तामसानि च तन्त्राणि सकामानां प्रियाणि हि ।
तेषु चाभिरतो लोको बाहुल्येन व्यवस्थितः ॥७६॥

प्रवहत्येव संसारे मृतौ जन्मनि वै मुहुः ।
कल्के युगे जनाः प्राय आश्रयिष्यन्ति मानुषान् ॥७७॥

मत्वा तान् परमात्मानं निन्दिष्यन्ति शिवादिकान् ।
तेन पापेन ते सर्वे यास्यन्ति निरयान् ध्रुवान् ॥७८॥

गुरवो वञ्चयिष्यन्ति स्वयं मुग्धा हि मानवान् ।
निन्दारागैश्च विद्वेषैर्ममाऽहंकारदूषणैः ॥७९॥

कापट्यचौर्यविश्वासघातैः स्वार्थैर्निरन्तरम् ।
तेन पापेन गुरवो यास्यन्ति निरयान् बहून् ॥८०॥

श्ववत् मान्या भविष्यन्ति लोकेषु गुरवो जनाः ।
यममार्गा याम्यलोकाः काशिष्यन्ते च तद्बलात् ॥८१॥

तस्मादगस्त्य ! लोकोऽयं काम्येन कर्मणा मया ।
बहुधा पूरितश्चास्ते मोक्षगस्तु क्वचित् क्वचित् ॥८२॥

य एवं वेत्ति विप्रर्षे परं नारायणं प्रभुम् ।
सर्वात्मानं परंब्रह्म तथा नश्चाऽपरान् बहून् ॥८३॥

मुख्यतो गुणतश्चापि मोहस्तस्य न बाधते ।
पश्याऽगस्त्य ! मयि ब्रह्मपरं रूपं सनातनम् ॥८४॥

एवमुक्तोऽगस्तिमुनिर्ददर्श शंकरं यदा ।
तत्र ददर्श ब्रह्माणं ब्रह्माण्यन्तर्नरायणम् ॥८५॥

नारायणे परंब्रह्माऽनादिनं पुरुषोत्तमम् ।
ज्वलद्भास्वरवर्णाभं कोटिकन्दर्पसुन्दरम् ॥८६॥

एवं दृष्ट्वाऽगस्तिविप्रस्तुष्टाव परमेश्वरम् ।
भवान् विष्णुः परंब्रह्म कृष्णनारायण प्रभो ॥८७॥

विश-प्रवेशने धातुस्तत्र स्नुप्रत्ययादनु ।
विष्णुः स व्यापकः सर्वदेवादौ परमेश्वरः ॥८८॥

क्वचिद् ब्रह्मा क्वचिद् रुद्रो भवानेव परात्परः ।
विष्णुर्नारायणः शंभुर्ब्रह्मा कृष्णनरायणः ॥८९॥

एभिश्च नामभिर्ब्रह्मपरं प्रोक्तं सनातनम् ।
नास्ति भेदोऽवताराणामेकस्मिन्नवतारिणि ॥९०॥

योऽन्यथा भावयेदेतत् ते बोध्याः कलिधर्मिणः ।
ते यान्ति नरकं घोरं निन्दकाः पापपूरुषाः ॥९१॥

एतादृशा भविष्यन्ति भेदका हि कलौ युगे ।
मोहका वंचका लोके ज्ञानगोष्ठ्या विडम्बकाः ॥९२॥

वदिष्यन्ति वयं मुग्धा जानीमः परमं प्रभुम् ।
नान्ये जानन्ति तत्तत्त्वमवतारादिचिन्तकाः ॥९३॥
इत्येतेषां निन्दकानां ह्यवतारद्रोहिणाम् ।
क्षेत्राणि धर्मराजस्य नगर्यां कारितानि वै ॥९४॥
तेन बाह्यव्रते शुभ्रा हृदि कृष्णा विनिन्दकाः ।
द्रोहिणश्चावमन्तारो यास्यन्ति नरके ध्रुवम् ॥९५॥
ब्रह्मणाऽहं पुरा सृष्टः प्रोक्तश्च सृज वै प्रजाः ।
अविज्ञानसमर्थोऽहं निमग्नः सलिले तदा ॥९६॥
तत्राऽपश्यं सुपुरुषं दिव्यं त्वंगुष्ठमात्रकम् ।
किशोरं मेघसंकाशं पुण्डरीकनिभेक्षणम् ॥९७॥
तमहं पृष्टवान् कस्त्वं कथं जातः प्रकथ्यताम् ।
स मामाह त्वमेवाऽहं ब्रह्माऽहं विष्णुरस्म्यहम् ॥९८॥
अहं नारायणो देवो जलशायी सनातनः ।
अनादिश्रीकृष्णनारायणो भवामि धामनि ॥९९॥
दिव्यं तेऽस्तु नेत्रमत्र पश्य मां यत्नतो हर ।
एवमुक्तस्तदा तेन यावत्पश्याम्यहं च तम् ॥१००॥
तावत् परेऽक्षरे दिव्ये धाम्नि दृष्टो मया प्रभुः ।
स एव वीक्षितश्चापि गोलोकेऽपि विकुण्ठके ॥१०१॥
महाविष्णुर्जले दृष्टो विराड्रूपोऽपि वीक्षितः ।
तन्नाभौ पंकजं दृष्टं ब्रह्मा तत्र विलोकितः ॥१०२॥
तत्पार्श्वेऽहं मया दृष्टो दृष्ट्वाऽहं हर्षमागतः ।
तपसा तद्गुणान् स्मृत्वाऽस्तौषं श्रीपरमेश्वरम् ॥१०३॥
इत्येवं शंकरः प्राहाऽगस्त्यं वै त्वर्बुदाचले ।
तन्मया तेऽत्र कथितं लक्ष्मि ! मोक्षप्रदं वचः ॥१०४॥
पठनाच्छ्रवणाच्चास्य मोक्षो भवेत् परेऽक्षरे ।
सकामानां गृहलक्ष्मीधनपुत्रादिकं भवेत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्तानेऽऽगस्त्यस्य दिव्यताचिरजीवित्वादिप्राप्तिः, अर्बुदाचले रुद्रस्य चमत्कारः, सत्येतरयुगीयमानवानां त्रिदेवविषयकपरस्परद्रोहकारिणां संसारप्रवाहसजीवनतेत्यादिनिरूपणनामा द्विपञ्चाशदधिकपञ्चशततमोऽध्यायः ॥ ५५२ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततोऽगस्त्यं स्तुतिं नारायणस्य वै ।
शंभुश्चकार च यथा प्राह चापि वदामि ते ॥ १ ॥
'ओं नमोऽक्षरवासाय परधाम्नि विराजते ।
परेशाय किशाराय मुक्तेशाय नमोऽस्तु ते ॥ २ ॥
शुद्धाय मूलरूपायाऽनन्ताय ते नमो नमः ।
सर्वरूपस्वरूपाय सहस्रबाहवे नमः ॥ ३ ॥
सहस्ररश्मियुक्ताय वेधसे शुद्धकर्मणे ।
विशालदेहवासाय विश्वार्तिहारिणे नमः ॥ ४ ॥
सहस्रार्कस्वरूपाय शंभवे ते नमो नमः ।
समस्तविद्यावासाय चक्रिणे ते नमो नमः ॥ ५ ॥
सदा समस्तगीर्वाणैर्नुते कृष्णाय ते नमः ।
अनादिने भूपतयेऽच्युताय शेषवासिने ॥ ६ ॥
मरुतां पतये सर्वपतये ते सदा नमः ।
जलेशाय क्षितीशाय विश्वनेत्राय ते नमः ॥ ७ ॥
शशांकाय च सूर्याय विश्वेश्वराय ते नमः ।
अप्रतर्क्यस्वरूपायाऽमृतरूपाय ते नमः ॥ ८ ॥
दिगन्तरप्रकाशाय हृदम्बराय ते नमः ।
नारायणाऽयनायेति विश्वतोमुखिने नमः ॥ ९ ॥
देवाऽऽर्तिहारिणेऽसंख्यवक्त्राय विष्णवे नमः ।
पुराणाय महेशाय जगत्प्रसूयते नमः ॥१०॥
कोटिदेहिषु कैश्चित् त्वं सन्मार्गिभिरुपास्यसे ।
एको भवान् प्रकृतेश्च परादक्षरतः परः ॥११॥
विदामग्रेसरः सर्वविज्ञो विशालमूर्तिकः ।
सूक्ष्मरूपो गुणा यत्र प्राकृता न वसन्ति हि ॥१२॥
वाचां न विषयो यश्च भक्तवाग्विषयोऽस्ति सः ।
न च कर्माऽभिभूतो यः करोति सततं सृजिम् ॥१३॥
अनिन्द्रियोऽपि चेन्द्राद्यैरुपास्यश्चेन्द्रियादिमान् ।
असारेऽपि च संसारे साररूपोऽस्ति वै भवान् ॥१४॥
यजद्भिरवसीयेताऽताद्दृशोऽपि चतुर्भुजः ।
परं रूपं न जानीमो जानीमो दृष्टिगोचरम् ॥१५॥
अवतारतनुं विद्मस्तद्द्वाराऽऽश्रयमाप्नुमः ।
अब्जयोनिस्तव वर्ष्म नैव वेद न चाप्यहम् ॥१६॥
वेद्मि विशुद्धतपसा पुराणं कविमीश्वरम् ।
अहं पद्मासनाद्याश्च प्रसूताश्चाऽसकृद् विभोः ॥१७॥
बालैर्नैवं मया चान्यैः सम्बुद्ध्यसे न कीदृशः ।
नत्या तुष्टिं प्रगच्छामः स्तुत्या तृप्ताश्च वैदिकाः ॥१८॥
जन्मान्तरविवेकोत्थत्वत्प्रसादान्मतिर्यदि ।
लब्धलाभा भवेत्तेन शिवं स्याद् ब्रह्मपारगम् ॥१९॥
सूक्ष्मः स्थूलो भवँश्चाऽद्य मम नेत्रस्य भूरभूः ।
दृष्टोऽसि कृतकृत्योऽहं सुलभो मेऽद्य भाग्यतः ॥२०॥
नतोऽस्मि दण्डवत् विष्णोऽर्पितोऽस्मि पादयोस्तव ।
स्तुतिं जुषस्व भक्तस्य जनार्दन ! विशेषतः ॥२१॥

सृष्टिं सृजस्व वै ब्रह्मा निदेशमकरोन्मम ।
देहि तद्विज्ञतां सार्वभौमीं सृजामि सेवया ॥२२॥
हृदिस्थोऽसि नमस्तेऽस्तु बहिःष्ठोऽस्मि नमामि तं ।
सर्वगस्य न चात्राऽस्ति व्यवस्था मत्पृथक् तव ॥२३॥
इति प्रकाशं स्तवनं बुद्ध्वाऽऽन्तरं च वाचिकम् ।
भीतं पुनीहि भगवन् तवाऽस्मीति विभावय ॥२४॥
एवं स्तुतो हरिर्देवो रुद्रेणामिततेजसा ।
उवाच विष्णुः सन्तुष्टो वरं वरय चेप्सितम् ॥२५॥
रुद्रः प्राह सदा सृष्टेर्ज्ञानं देहि जनार्दन ।
रक्षणं सर्वथा तत्र कुरु मे संहृतेः परम् ॥२६॥
देवकार्यावतारेषु मानुषत्वमुपागतम् ।
त्वामेवाराधयिष्यामि त्वं सदा मेऽवनं कुरु ॥२७॥
श्रुत्वा श्रीभगवान् प्राह रुद्र ज्ञानी सदा भव ।
सृष्टिविज्ञानमूर्ध्वं च सदा तेऽस्तु पुरातनम् ॥२८॥
सर्वलोकेषु पूज्यस्त्वं भव मत्तोऽप्यतीव वै ।
इत्युक्त्वा श्रीहरिः कृष्णोऽन्तर्धानं प्रजगाम ह ॥२९॥
अहं भजामि तं देवं नारायणं परात्परम् ।
एवमेष हरिर्देवः सर्वगः सर्वभावनः ॥३०॥
वरदोऽभूत् पुरा मह्यं तेनाऽहं दैवतैर्वरः ।
नारायणात्परो देवो न भूतो न भविष्यति ॥३१॥
एतद्रहस्यं वेदानां पुराणानां च सत्तम ।
मया ते कथितं सर्वं यथा सर्वमयो विभुः ॥३२॥
इत्येवं शंकरः प्राहाऽगस्त्यं वै मुनिपुंगवम् ।
अगस्त्यश्च परं ज्ञानं श्रुत्वा नैजाश्रमं ययौ ॥३३॥
अथ शंभुः पार्वतीं च प्राहाऽऽकर्णय भामिनि ! ।
नमुचिं दैत्यवर्यं मे भद्रकर्णो गणो महान् ॥३४॥
हतवानत्र तत्स्थाने भद्रकर्णह्रदात्मकम् ।
तीर्थं मे विद्यते रम्यमर्बुदाद्रौ सुखप्रदम् ॥३५॥
तथा केदारकुण्डाख्यं परं तीर्थं सुमुक्तिदम् ।
अजपालो महाराजो वैदेहनगरेऽभवत् ॥३६॥
पूर्वजन्मनि शूद्रोऽसौ कमलेन च शंकरम् ।
एकदा पूजयामास तेन पुण्येन भूपतिः ॥३७॥
जातो वैदेहनगरे जातिस्मरः स्मरन् जनुम् ।
केदारतीर्थं कृतवान् समागत्याऽर्बुदाचले ॥३८॥
ब्रह्मा सर्वाणि तीर्थानि नीत्वाऽर्बुदं समाययौ ।
तदा केदारतीर्थं तु रूपान्तरेण चागतम् ॥३९॥
हिमाचले प्रभासे चार्बुदे केदारकं त्रिधा ।
ऋषिर्मंकणको नाम सरस्वत्यास्तटे स्थितः ॥४०॥
तपस्तेपे सुधर्मात्मा रक्तं नास्ति हि चर्मणि ।
सिद्धोऽहमिति विज्ञाय ततो नृत्यं चकार सः ॥४१॥
तस्यैवं नृत्यतस्तत्र ननृतुस्तस्य नर्तनात् ।
पृथिव्यादीनि तत्त्वानि सर्वे स्थावरजंगमाः ॥४२॥
ततो देवा हरं प्राहुर्नर्तनस्याऽवरोधनम् ।
शीघ्रं कुरु महादेवाऽन्यथा भूतक्षयो भवेत् ॥४३॥
शंभुस्तत्र समागम्याऽब्रवीत् किं नृत्यसे कथम् ।
मंकणकस्तदा प्राह पश्य विप्र कलेवरे ॥४४॥
तपसा मे पित्तरक्ते नष्टे हृष्यामि हर्षतः ।
एवमुक्तो महादेवः प्रोवाच पश्य मंकण ! ॥४५॥
अंगुष्ठं ताडयाम्यत्र तर्जन्या पश्य मे तपः ।
इत्युक्त्वा ताडितोऽङ्गुष्ठो निष्क्रान्तं भस्म पाण्डुरम् ॥४६॥
तद् दृष्ट्वा विस्मितो विप्रो गर्वहीनो बभूव ह ।
जानुभ्यामवनिं गत्वा तुष्टाव तापसं हरम् ॥४७॥
मामुद्धर महादेव रूपं दर्शय शाश्वतम् ।
अत्र गंगासरस्वत्योः संगमस्तीर्थमुत्तमम् ॥४८॥
मंकणकमहातीर्थं स्यातं स्यान्नित्यमेव ह ।
अत्र स्नातुः फलं स्वर्गो मोक्षश्चान्ते भवेदिति ॥४९॥
शंभुः प्राह तथास्त्वत्र तीर्थं त्वन्नामतोऽस्तु वै ।
इत्युक्त्वाऽहं ततश्चाऽत्रान्तर्धानं प्रगतोऽभवम् ॥५०॥
अथाऽन्यत्तीर्थवर्यं वै कोटीश्वरं तु विद्यते ।
यत्र हरेण बहुधा रूपाण्येकक्षणे पुरा ॥५१॥
यात्रालुब्राह्मणानां तु दर्शनदानहेतवे ।
धृतानि तन्महत् तीर्थं पापतापप्रणाशनम् ॥५२॥
अर्बुदे रूपतीर्थं च वर्तते पावनं परम् ।
पुराऽऽसीत् काचिदाभीरी विरूपा विकृतानना ॥५३॥
एकदा फलमानेतुमागता गिरिनिर्झरे ।
जलेऽपसृत्य पतिता बभूव दिव्यरूपिणी ॥५४॥
पद्मनेत्रा सुकेशान्ता युवती षोडशाब्दिकी ।
तां विलोक्य तदा देवा मानवा विस्मयं ययुः ॥५५॥
कदाचित् तद्वने स्विन्द्रः पुष्करे प्रसमागतः ।
दृष्ट्वा सुवासिनीतुल्यां दिव्यां देवीमनुपमाम् ॥५६॥
देवोऽपि मानुषो भूत्वा तां पप्रच्छ कुलादि किम् ? ।
स्वस्येन्द्रत्वं जगादैनां सापि प्राह सुरेश्वरम् ॥५७॥
मां नय त्वं सहस्राक्ष ! सुराऽऽवासं सहाऽऽत्मना ।
इन्द्रस्तां स्वविमानेन नीतवानमरावतीम् ॥५८॥
नाम्ना वपुरिति ख्यातां तां चकार शुभाप्सराम् ।
एवं प्रभाववत्तीर्थं वपुतीर्थं हि विद्यते ॥५९॥

तत्र पूर्वे बिलं चास्ते चास्ते तिलकपादपः ।
विवरान्निर्गतं वारि तिलकस्पृष्टमेव तत् ॥६०॥
पिबेद् वन्ध्या भवेत् पुत्रवती रोगश्च नश्यति ।
रूपतीर्थे तपस्तप्तं पुराऽदित्या चिरं परम् ॥६१॥
इन्द्रे राज्यपरिभ्रष्टे बलौ राज्येश्वरे स्थिते ।
तस्यां वै तपसा जातो विष्णुर्ह्रस्वोऽसुरान्तकृत् ॥६२॥
एवं तस्यास्तपःस्थानं रूपतीर्थमुदाहृतम् ।
अथाऽम्बरीषतीर्थं च विद्यते त्वर्बुदाचले ॥६३॥
बहुवर्षसहस्राणि तपस्तेपेऽम्बरीषकः ।
नारायणश्चेन्द्ररूपं गृहीत्वा गरुडे गजे ॥६४॥
स्थित्वा समाययौ प्राह वरं गृहाण भूपते ।
राजा प्राह विना विष्णुं त्वत्तो वरं न कांक्षये ॥६५॥
मुक्तिं दातुं न शक्तोऽसि व्रज स्वर्गं यथागतम् ।
इत्युक्त्वा त्वान्तरे दध्यौ नारायणं परेश्वरम् ॥६६॥
तावदिन्द्रोऽभवद् विष्णुर्गजोऽपि गरुडात्मकः ।
प्राह तुष्टोऽस्मि ते भक्त्या वदेप्सितं वरं नृप ! ॥६७॥
राजा प्रोन्मील्य नेत्रे तु यावत्पश्यति वै पुनः ।
नारायणं प्रसंवीक्ष्य हर्षं चाप जगाद च ॥६८॥
संसारतारणोपायं वद मे परमेश्वर ।
हरिः प्राह त्वया राजन् प्रातर्निद्रां विहाय च ॥६९॥
कर्तव्यं मम कैशोरे रूपे ध्यानं पुनः पुनः ।
ततः स्मरणं रटनं नाम्नां प्रकीर्तनं तथा ॥७०॥
कर्तव्यं स्नानकार्यादौ मन्मूर्तिं स्मरता त्वया ।
मम पूजा प्रकर्तव्या हृदये प्रतिमादिषु ॥७१॥
स्नानं चन्दनपुष्पादि वस्त्राभूषणमित्यपि ।
भोजनं जलपानादि नीराजनं स्तवादिकम् ॥७२॥
पुष्पाञ्जल्यर्पणं चापि देयं मह्यं विसर्जनम् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ॥७३॥
होतव्यं वैश्वदेवादि सतामास्ये हुताशने ।
मिष्टं स्वेष्टं त्वया देयं गोपूजादिकमित्यपि ॥७४॥
भजनं मे सदा कार्यं कृष्णनारायणेति च ।
सर्वं कृष्णार्पणं कार्यं सुतदारधनादिकम् ॥७५॥
आत्मा समर्पणीयश्च प्रेम्णा तन्मुक्तिसाधनम् ।
शृणु नित्यं कथां मेऽत्र स्पृश मां पुरुषोत्तमम् ॥७६॥
पश्य मे प्रतिमां दिव्यां खाद रसान् प्रसादजान् ।
गन्धं गृहाण मूर्तेर्मे कराभ्यां मम मर्दनम् ॥७७॥
पद्भ्यां प्रदक्षिणं मां च वाचा मे कीर्तनं कुरु ।
आनन्दं मम मूर्तेश्च गृहाण नृप सर्वथा ॥७८॥
विरुद्धं सर्वदा यन्मे वायुमिश्रं परित्यज ।
प्राणे धारय मां नित्यं मननं मे विधेहि यत् ॥७९॥
चिन्तनं निर्णयं चापि सन्मानं मे सदा कुरु ।
ब्रह्मानन्दं ब्रह्मरसं सर्वं काण्डमयं कुरु ॥८०॥
यत्र यत्र भवानास्ते सम्भूय त्वेकलोऽपि वा ।
तत्र तत्राऽस्मि सुस्थोऽहं मां विलोकय सर्वथा ॥८१॥
सर्वत्र सौम्यभावं त्वं कुरु राजन् मयि स्थिते ।
मुक्तेः सुसाधनं त्वेतत्परमं ते मयोदितम् ॥८२॥
इत्युक्तो नृपतिस्तेन विष्णुना प्रभविष्णुना ।
ततश्चकार नृपतिः स्वस्थितिं तन्मयीं पराम् ॥८३॥
स नित्यं पूजयामास गन्धमाल्यानुलेपनैः ।
ततः कालेन महता स राजा हरिमन्दिरे ॥८४॥
अवर्तत सुपूजायां सपुत्रदारबान्धवः ।
सर्वदा भगवाँस्तत्राश्रमे सन्निहितोऽस्ति वै ॥८५॥
एवं प्राप्य परां भक्तिं ययावक्षरधाम सः ।
तादृशं परमं तीर्थं चाम्बरीषतपःस्थलम् ॥८६॥
वर्तते चार्बुदे रम्यं मोक्षदं पापहारकम् ।
यस्तु सम्पूजयेद् भक्त्या हृषीकेशं तथाऽर्बुदे ॥८७॥
स याति विष्णुसालोक्यं प्रसादाच्छ्रीहरेः प्रिये ! ।
अम्बरीषेण यत्राऽयं समाराधित ईश्वरः ॥८८॥
हृषीकेशस्वरूपेण नारायणो विराजते ।
एकादश्यां हृषीकेशसन्निधौ जागरं चरेत् ॥८९॥
दर्शनं तस्य कुर्याच्च कपिलाफलमाप्नुयात् ।
यस्तत्र चतुरो मासान् हृषीकेशं प्रपूजयेत् ॥९०॥
परब्रह्म परंधाम गच्छत्येव न संशयः ।
एकः सर्वाणि तीर्थानि करोति भुवनेषु वै ॥९१॥
पश्यत्यन्यो हृषीकेशं समं तस्य फलं मतम् ।
एको दानानि सर्वाणि सत्पात्रेभ्यः प्रयच्छति ॥९२॥
पश्यत्यन्यो हृषीकेशं समं तस्य फलं मतम् ।
एकः कन्यासहस्रं तु दद्यात् तीर्थे विवाहतः ॥९३॥
पश्यत्यन्यो हृषीकेशं समं तस्य फलं मतम् ।
एको देहे हरिं पश्येत् पश्येदन्योऽर्बुदे हरिम् ॥९४॥
चातुर्मास्ये प्रभक्तः सन् फलं तस्याऽयुताऽयुतम् ।
धेनुदानसहस्रेण समं विष्णोर्हि दर्शनम् ॥९५॥
अग्निष्टोमादियज्ञैश्च समं विष्णोर्हि दर्शनम् ।
हिमालये त्यजेद् देहं ब्रह्मज्ञानं वदेत् सदा ॥९६॥
पश्यत्यन्यो हृषीकेशं समं तस्य फलं मतम् ।
प्रायोपवेशकृच्चैकोऽपरो विष्णुं हि पश्यति ॥९७॥

गयाश्राद्धं चरेदन्यश्चातुर्मास्ये समाहितः ।
चान्द्रायणेन वै तुल्यं हृषीकेशस्य दर्शनम् ॥९८॥
सहस्राब्दं तपःकर्ता मुक्तो भवति दर्शनात् ।
वेदाध्ययनतश्चापि हृषीकेशस्य दर्शनम् ॥९९॥
वर्धते पुण्यदं स्वर्गप्रदं मोक्षप्रदायकम् ।
बहुना किमिहोक्तेन शृणु संक्षेपतः प्रिये ! ॥१००॥
एकतो वर्तते सर्वमेकतो हरिदर्शनम् ।
तस्मात् सर्वप्रयत्नेन स्थातव्यं हरिसन्निधौ ॥१०१॥
एकतस्तु हृषीकेशस्त्वेकतः कर्णिकेश्वरः ।
तयोर्मध्ये मृता यान्ति वैकुण्ठे हरिसन्निधौ ॥१०२॥
पुष्पमेकं हृषीकेशे यस्त्वारोपयते हृदा ।
सर्वसौभाग्ययुक्तः स्यादिह लोके परत्र च ॥१०३॥
तस्य स्थाने मार्जनस्य फलं मुक्तिः प्रकीर्तिता ।
शुक्लपक्षेऽथवा कृष्णे ध्वजमारोपयेत्तु यः ॥१०४॥
तस्य पापानि नश्यन्ति याति धामाऽक्षरं हरेः ।
पञ्चामृतेन यः पूजां कारयेद् भोजयेद्धरिम् ॥१०५॥
भूदानं दापयेद् यद्वा मन्दिरं कारयेत् पुनः ।
शाश्वतं समयं धाम्नि सद्यो मुक्तिमवाप्नुयात् ॥१०६॥
इत्येवं शंकरः प्राह पार्वतीं त्वर्बुदाचले ।
लक्ष्मि ! मया तु ते प्रोक्तं माहात्म्यं तीर्थसंभवम् ॥१०७॥
पठनाच्छ्रवणाच्चास्य भुक्तिं मुक्तिं लभेज्जनः ।
सकामो धनवान् पुत्रसम्पद्वान् जायते ध्रुवम् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने-ऽर्बुदाचले शंकरकृतनारायणस्तुतिः, भद्रकर्णहृदतीर्थे केदारकुण्डं मंकणकतीर्थं कोटीश्वरतीर्थं रूपतीर्थम् अम्बरीषतीर्थम् हृषीकेशतीर्थं च सोपाख्यानं निरूपितमितिनामा त्रिपञ्चाशदधिकपञ्चशततमोऽध्यायः ॥५५३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! हरः प्राह पार्वतीं तीर्थमण्डलम् ।
विश्वावसुस्तपस्तेपे सिद्धः शिवपरायणः ॥ १ ॥
तुतोष नृपतेस्तस्य शंभुर्दर्शनमाययौ ।
वरं वृणु समुवाच सिद्धिं वव्रे हराच्च सः ॥ २ ॥
सिद्धेश्वरं च तल्लिंगं तीर्थरूपं व्यजायत ।
शुक्रेश्वरं च शुक्रेण स्थापितं तीर्थमुच्यते ॥ ३ ॥
शुक्रः श्रीशंकरात् प्राप्तस्तपस्तप्त्वाऽत्र दुष्करम् ।
विद्यां सञ्जीवनीं मृत्युञ्जयां सन्धायिनीं तथा ॥ ४ ॥
तत्राऽस्ति निर्झरणं च जलस्य पावनं शुभम् ।
तत्र कुण्डे जनः स्नात्वाऽल्पमृत्युभयमुत्सृजेत् ॥ ५ ॥
ततो गच्छेद् वालखिल्यतपःस्थानं सुपावनम् ।
तत्र कुण्डे जनः स्नात्वा दिव्यरूपधरो भवेत् ॥ ६ ॥
किरातवनिता तत्र कुरूपाऽपि तृषान्विता ।
जलं पातुं ययौ दृष्ट्वा स्नानार्हं जलमुत्तमम् ॥ ७ ॥
स्नात्वा यावद्बहिर्याति दिव्या देवी तदाऽभवत् ।
तस्याः पतिस्तु तां दृष्ट्वा पप्रच्छ काऽसि सुन्दरि ! ॥ ८ ॥
मम पत्नी समायाता कुण्डेऽत्र जलवाञ्छया ।
त्वया दृष्टा कृष्णवर्णा चेद् यदि वद देविके ॥ ९ ॥
सा चोवाच निजं कान्तं तवैव दयिताऽस्म्यहम् ।
कुण्डस्नानप्रभावेण जाताऽस्मि देवकन्यका ॥१०॥
स्वामिंस्त्वं स्नाहि कुण्डेऽत्र देवतुल्यो भविष्यसि ।
इत्युक्तः स्नानमकरोत् तावन्नष्टान्यघानि वै ॥११॥
देहं त्यक्त्वा मृतिं यातो वनितापि पतिव्रता ।
पुनः स्नात्वा तनुं त्यक्त्वा विमानेन सुवर्चसा ॥१२॥
देवकन्याभिराजुष्टा स्वामिना सह सुन्दरी ।
नमस्कृत्वा शुभं तीर्थं प्रययौ त्रिदिवं प्रति ॥१३॥
मणिकर्णाऽभिधा यत्र किराती मोक्षणं गता ।
मणिकर्णेश्वरः कुण्डं लिंगं तीर्थं हि तन्मतम् ॥१४॥
वालखिल्यास्तत्र नित्यं तिष्ठन्ति कुतुपे शुभे ।
तत्र सूर्यग्रहे स्नानं कुरुक्षेत्रस्य पुण्यदम् ॥१५॥
स्नाने यत्स्मरणं स्यात् तत्प्राप्यते नात्र संशयः ।
अथाऽपरं पङ्गुतीर्थं पङ्गुविप्रेण संस्थितम् ॥१६॥
च्यवनस्याऽन्वये पङ्गुनामा विप्रः कदाचन ।
शनैः शनैः समायातोऽर्बुदे सार्थस्य योगतः ॥१७॥
एकं निर्झरमासाद्य तपस्तेपे सुदारुणम् ।
शिवभक्तिपरो वायुभक्षो होमजपक्रियः ॥१८॥
तस्य तुष्टो महादेवः साक्षात्तत्र समाययौ ।
चैत्रशुक्लचतुर्दश्यां वरदानं ददौ हरः ॥१९॥
याहि मोक्षं पङ्गुभावं विहाय दिव्यदेहवान् ।
स च मोक्षं गतो नत्वा पङ्गुतीर्थं हि तन्मतम् ॥२०॥
यत्रोमासहितः शंभू राजते निर्झरान्तिके ।
स्नात्वा पीत्वा जलं याति मोक्षं शंभोः प्रसादतः ॥२१॥
अथ चित्रांगदो राजा पुरा पापपरोऽभवत् ।
मृगयार्थं वनं यातोऽर्बुदे हृदसमीपतः ॥२२॥
जलपानाय च यातः स्नातस्तत्र हृदे तथा ।
अकस्मात्स मृतो राजा ग्राहेण भक्षितोऽपि च ॥२३॥

यमदूतैर्यमद्वारं नीतोऽघवान् तदा नृपः ।
यमराजश्च तान् प्राहाऽर्बुदे मत्तीर्थके स्थले ॥२४॥
मृतोऽयं वै ह्रदे पुण्ये नाऽयं दण्डार्ह एव यत् ।
यातु स्वर्गे सहस्राणि युगानां त्वेकविंशतिः ॥२५॥
यत्र पूर्वं मया तप्तं तपस्तत्र मृतो ह्यसौ ।
तत्र तीर्थे जनः स्नाता स्वर्गं प्राप्स्यति निश्चितम् ॥२६॥
यमतीर्थं हि तत्प्रोक्तं चित्रांगदविमुक्तिदम् ।
पुण्ड्रोदं च ततस्तीर्थं गच्छेत् पापप्रणाशकम् ॥२७॥
पुरा पुण्ड्रोदको नाम विप्रो वैराग्यमास्थितः ।
अर्बुदे निर्झरे रम्ये मर्तुकामः समाययौ ॥२८॥
एकस्मिन्नेव काले तु तत्रैव च सरस्वती ।
वीणाविनोदसंयुक्ता विविक्ते पथि संस्थिता ॥२९॥
उवाच ब्राह्मणं देवी वद किं तेऽस्ति वाञ्छितम् ।
स प्राह नास्ति मे बुद्धिरूपाध्यायैस्तिरस्कृतः ॥३०॥
न मे सरस्वती माता जिह्वाऽग्रे वर्तते यतः ।
मर्तुमिच्छामि चात्रैव येन श्रेयो भविष्यति ॥३१॥
माता प्राह प्रसादान्मे वाणी तेऽस्तु सदोत्तमा ।
विद्या वेदादिजन्यास्ते त्वासन्तां तर्कशोभनाः ॥३२॥
अद्यप्रभृति वाग्मी त्वमत्र लोके भविष्यसि ।
सारस्वतं शुभं तीर्थं पुण्ड्रोदाख्यं भविष्यति ॥३३॥
त्रयोदश्यां स्नानकर्ता विद्वान् सम्यग् भविष्यति ।
एवमुक्त्वा तु सा देवी तत्रैवान्तरधीयत ॥३४॥
पुण्ड्रोदको हि सर्वज्ञो भूत्वा त्वन्ते दिवं ययौ ।
ततो गच्छेन्नलतीर्थं श्रीमाता यत्र राजते ॥३५॥
नलाख्ये शिखरे तत्र बाष्कलिर्नाम दानवः ।
पुराऽभवन्महाघोरस्तद्विनाशाय पार्वती ॥३६॥
श्रीमाता रूपिणी जाता हिताय जगतां सती ।
बाष्कलिं च जीवग्राहं गृहीत्वा मृत्युवर्जितम् ॥३७॥
पर्वतस्य महच्छृगं नत्वा तस्योपरि स्वयम् ।
निविष्टा सा जगन्माता वसत्यालोकरक्षिणी ॥३८॥
तत्रैव पादुके दिव्ये तथा न्यस्ते शुभे ततः ।
करोति तद्दर्शनं यः संसारं स न पश्यति ॥३९॥
मत्पादुकाभराक्रान्तो बाष्कलिर्दैत्यपुंगवः ।
नाऽस्मात् स्थानाद् बहिः क्वापि निर्गत्योर्ध्वं गमिष्यति ॥४०॥
चैत्रे चतुर्दशीरात्रौ पादुकापूजनं मम ।
कर्तव्यं गह्वरे तत्र निवत्स्याम्यणुरूपिणी ॥४१॥
अत्र तीर्थं करिष्यन्ति ये ते कैलासवासिनः ।
भविष्यन्ति न सन्देहश्चेत्युक्त्वाऽदृश्यतां गता ॥४२॥
ततो गच्छेच्छुंभनाशकरीं विन्ध्याचलीं सतीम् ।
अर्बुदे दिव्यरूपेण राजते सा शिवाज्ञया ॥४३॥
गुहामध्यं समासाद्य विविक्ते दुर्गमे स्थले ।
यस्तां पश्यति भावेन सर्वमीप्सितमाप्नुयात् ॥४४॥
अथ पूर्वे तपस्तप्तं मंकिना ब्राह्मणेन वै ।
पूर्वं विप्रो महामूर्खः पर्वते महिषीं शुभाम् ॥४५॥
दुग्धदां रक्षयामास तथाऽन्या महिषीः पुनः ।
ताश्च विक्रीय भूक्षेत्रं वृषद्वयं च जगृहे ॥४६॥
वृषौ क्वचिद् धुरि न्यस्तौ तावदुष्ट्रः समागतः ।
आघ्राय तौ धुराकाष्ठे ग्रीवां प्रोतां चकार सः ॥४७॥
अथोष्ट्रः स भययुक्तो गले प्रालग्नगोधुरः ।
गोयुगेन हि ग्रीवायां लम्बमानेन वै तदा ॥४८॥
दुद्राव तेन तु वृषौ विप्राणौ वै मृतौ ततः ।
मंकिर्वैराग्यमापन्नो निर्झरं चार्बुदाचले ॥४९॥
समाश्रित्य तपो घोरं चकार प्रजपन् हरिम् ।
मंकिः पिण्डारकः सोऽयं ददर्श शंकरं पुरः ॥५०॥
तुष्टाव तं तथा मुक्तिं जगाम शंकरेच्छया ।
मंकेः पिण्डारकस्यैतत् स्थलं पिण्डारकं ततः ॥५१॥
ख्यातं पिण्डारकं तीर्थं स्नातव्यं त्वष्टमीतिथौ ।
देयं गोमहिषीदानं भुक्तिं मुक्तिं लभेत् ततः ॥५२॥
रक्तानुबन्धं शुभं तीर्थं गच्छेत् ततोऽर्बुदाचले ।
पुराऽऽसीत् पार्थिवो नाम्ना इन्द्रसेनो महाबलः ॥५३॥
तस्य पत्नी सुनन्दाऽऽसीत् पातिव्रत्यपरायणा ।
राजा ययौ रणे योद्धुं जीत्वा शत्रून् समागतः ॥५४॥
दूतं स प्रेषयामास राज्ञीं प्रति परीक्षया ।
सुनन्दां ब्रूहि गत्वा त्वम् इन्द्रसेनो हतो रणे ॥५५॥
श्रुत्वा करोति कां चेष्टां विदित्वाकारमेव तु ।
मरणाय यदि यत्नं कुर्याद् रक्ष्या प्रयत्नतः ॥५६॥
इत्युक्तः स गतो दूतश्चोवाचापि यथोदितम् ।
सुनन्दाऽऽकर्ण्य शीघ्रं स्वप्राणान् जहौ निरुद्ध्य वै ॥५७॥
हत्यापापं नृपे लग्नं हास्यपरीक्षयोत्थितम् ।
राज्ञो गुरुतरं कार्यं सालस्यं समपद्यत ॥५८॥
तेजोहीनं विवर्णं च प्रसन्नता विवर्जितम् ।
गृहमागत्य राजा स ज्ञात्वा तत् पर्यदेवयत् ॥५९॥
स्त्रीहत्याया विनाशार्थं ततस्तीर्थाय निर्ययौ ।
प्राप्तो रक्तानुबन्धाख्यं तीर्थं चार्बुदपर्वते ॥६०॥
तत्र स्नात्वा विनिष्क्रान्तो यावन्निजं प्रपश्यति ।
तावन्न दृश्यते छाया या लग्ना स्त्रीवधोद्भवा ॥६१॥

सुरूपो वीर्यवान् जातस्तेजोवृद्धिः पराऽभवत् ।
तत्र तीर्थे तपस्तप्त्वा विसृज्य वर्ष्म योगतः ॥६२॥
आरुह्य दिव्ययानं च कैलासं प्रययौ द्रुतम् ।
प्राणिनामनुरक्तानां तारणं प्रकरोति तत् ॥६३॥
तीर्थं रक्तोद्धारकं तन्नाम्ना ख्यातं ततः सदा ।
विनायकं शुभं तीर्थं कुर्याद् विघ्नप्रशान्तये ॥६४॥
ततः पार्श्वेश्वरं तीर्थं गच्छेत् पापप्रणाशनम् ।
देवलस्याऽभवत्पत्नी पार्थाऽभिधा पतिव्रता ॥६५॥
तया तप्तं तपस्तत्र वन्ध्यात्वनाशहेतवे ।
साऽत्र ददर्श शंभुं वै पुत्रवरं ललाभ च ॥६६॥
पुत्रशतं ततः प्राप्तं शंकरस्य वरात् तया ।
यत्राऽस्ति निर्मलं तोयं गिरिगह्वरनिःसृतम् ॥६७॥
तीर्थस्याऽस्य विधानेन दारपुत्रादिकं लभेत् ।
मांमुद्गलहृदतीर्थं च कर्तव्यं मोक्षकाङ्क्षिणा ॥६८॥
मुद्गलर्षिः पुरा तत्र तपस्तेपेऽतिदारुणम् ।
ओं नमः श्रीकृष्णनारायणेति जपन् सदा ॥६९॥
अर्बुदे त्रिषवणश्च बभूव क्षीणकल्मषः ।
तं तु नेतुं महास्वर्गे देवदूतः समागतः ॥७०॥
विमानस्थो मुनिं प्राहाऽऽरुहैतद् गम्यतां दिवि ।
इन्द्रेण प्रेषितश्चाऽस्मि शीघ्रमागच्छ मा चिरम् ॥७१॥
पप्रच्छ मुद्गलस्तं वै गुणान् दोषान् दिवस्तथा ।
श्रुत्वा यास्यामि चेन्मन्ये क्षमं स्वर्गं शुभं मम ॥७२॥
दूतः प्राह स्वकैः पुण्यैः प्राप्यते स्वर्जनै मुने ! ।
मुनिः प्राह यथार्थं तत्फलं श्रावय मेऽनुग ॥७३॥
अश्रुतैस्तैर्न गच्छेयमिति मे हृदि निश्चितम् ।
चरिष्ये च तपो भूरि पूजयिष्ये नरायणम् ॥७४॥
दूतः प्राह गुणान् सर्वान् यौवनं सर्वथा समम् ।
नन्दनादीनि रम्याणि दिव्यदेववनानि च ॥७५॥
अनन्यसदृशा भोगाः सदा तृप्तिप्रदाः सुखाः ।
बुभुक्षा नैव न तृष्णा नाऽऽलस्यं नाऽपि निद्रिका ॥७६॥
देव्यो रम्याश्चैकरूपा भोगयोग्याः पुनः पुनः ।
गान्धर्वा गायनं नित्यं श्रावयन्ति च वाद्यजम् ॥७७॥
रमयन्ति गृहे रामा गीतनृत्यप्रहासनैः ।
न च रोगाः शरीरेषु पुष्टिस्त्वमृतसंभवा ॥७८॥
वीर्यं देहे पूर्णतत्त्वं ह्रासो यस्य न विद्यते ।
भोज्यं चामृतमेवाऽस्ति बहुधा स्वेच्छया कृतम् ॥७९॥
वातपित्तकफादीनां संसर्गो देवतासु न ।
दुर्गन्धादि न विद्येत रूपं त्वेकप्रमाणकम् ॥८०॥
वृद्धिह्रासौ त्वचां नास्ति मलं चापि न विद्यते ।
दिव्यदृष्टिर्दिव्यभोगा दिव्याम्बराणि सन्ति च ॥८१॥
व्योममार्गे गतिमन्तः सुराद्या विहरन्ति हि ।
विमानान्यप्यसंख्यानि मणिरत्नानि हीरकाः ॥८२॥
दिव्यास्तेजोमयाः सर्वे सौधे दीपा निसर्गजाः ।
चन्द्रकान्तिसमाऽऽव्याप्तं भवनं प्रतिदैवतम् ॥८३॥
दासा दास्यः सहस्राणि पेयरसाश्च कामदाः ।
कामचाराः कामभोगा मानसाः स्रजिरूपिणः ॥८४॥
सहस्रयुगपर्यन्तं पराऽऽयुश्च ततोऽधिकम् ।
पुण्यानुरूपं स्वर्गे संभुज्यते भोगदेहिना ॥८५॥
यावत्पुण्यक्षयस्तावत् पश्चात् पातमवाप्नुयात् ।
एवं गुणाः प्रवर्तन्ते नोदरार्थं हि भृत्यता ॥८६॥
नूतनं पुण्यकं स्वर्गे जायते न कथंचन ।
तेन पातो भवेत् तस्मात् पुण्यक्षये दिवौकसाम् ॥८७॥
अयमेव महान् दोषः पतनं वै भयंकरम् ।
कर्मभूमिरियं ब्रह्मन् भोगभूमिर्दिवं मतम् ॥८८॥
यदत्र क्रियते श्रेष्ठं पुण्यं तत्रोपभुज्यते ।
दानवानां बले जाते क्वचिद्धरन्ति दानवाः ॥८९॥
गृहं दाराश्चोपवस्तून्यपि सर्वाणि वै बलात् ।
तदिदं दूषणं चापि परभुक्ताः स्त्रियोऽपि च ॥९०॥
तथा कोटिगुणितान् वै दृष्ट्वा पुण्यप्रभाविणः ।
बहुसमृद्धानल्पपुण्यः पश्चात्तापं करोत्यपि ॥९१॥
न च यैः सुकृतं भूरि कृतं तेऽल्पाः सुदुःखिनः ।
यन्न मर्त्ये प्रदत्तं तत्स्वर्गे न प्राप्यते क्वचित् ॥९२॥
तद् दुःखं तु महत् प्रोक्तं मानवे पूर्वकर्मवत् ।
एतत्ते सर्वमाख्यातं गुणदोषात्मकं दिवम् ॥९३॥
आगच्छ सुमुने ! शीघ्रं यद्वेप्सितं वदाऽत्र मे ।
श्रुत्वा विचार्य तत्सर्वं मर्त्यवत् प्राह मुद्गलः ॥९४॥
यथा चात्र तथा तत्र धनदारगृहादिकम् ।
क्लेशस्य भाजनं चास्ति पतनस्य भयं तथा ॥९५॥
पुण्यहानिः सदा त्वास्ते वर्धनं न हि जायते ।
तेन स्वर्गेण मे दूत ! नैव कार्यं कथञ्चन ॥९६॥
वाच्यस्त्वया ममाऽऽदेशाद् देवराजः स्फुटं वचः ।
क्षम्यतामपराधो मे न स्वर्गीया स्पृहा मम ॥९७॥
तत्कर्माऽहं करिष्यामि येन स्यात् पतनं न वै ।
साधयिष्यामि तान् लोकान् ये सदा भयवर्जिताः ॥९८॥
एवं श्रुत्वा मुद्गलं तं स दूतः स्वर्गनिस्पृहम् ।
ययौ शीघ्रं महेन्द्रं सम्प्राह विस्तारपूर्वकम् ॥९९॥

शक्रः श्रुत्वाऽथ तं प्राह बलादानय तं मुनिम् ।
स्वर्गभोगार्थकं पुण्यं नाऽभुक्त्वा क्षयमेष्यति ॥१००॥
दूतः श्रुत्वा ययौ तत्र यत्र तिष्ठति मुद्गलः ।
विलोक्य मुद्गलः शीलं जलं विवेश योगतः ॥१०१॥
दूतः स जडवज्जातो मुनेर्दृष्ट्या विचेष्टकः ।
इन्द्रः स्मृतोऽथ दूतेन समायातः सुरेश्वरः ॥१०२॥
वज्रहस्तः स्थितो व्योम्नि मुनिं नेतुं समीहते ।
स्तम्भयामास चेन्द्रं तं दृष्टिपातेन मुद्गलः ॥१०३॥
तदा शक्रः स्तुतिं चक्रे भग्नोत्साहश्च मुञ्च माम् ।
स्वर्गे वा यदि वा मर्त्ये तिष्ठ त्वं मुञ्च मां मुने ॥१०४॥
मुद्गलः प्राह देवेन्द्र ! दुर्लभं दर्शनं तव ।
याहि स्वर्गं सदूतस्त्वं स्थास्याम्यत्रैव चाऽनघ ॥१०५॥
भजिष्ये श्रीकृष्णनारायणं यास्येऽक्षरं पदम् ।
मां मुञ्चेति त्वया प्रोक्तं तीर्थं मांमुञ्चनामकम् ॥१०६॥
भवत्विदं सदा प्रख्यं तव शब्देन वज्रभृत् ।
फाल्गुने पूर्णमास्यां ये स्नास्यन्त्यत्र ह्रदे जनाः ॥१०७॥
तर्पयिष्यन्ति पितॄंश्च यास्यन्ति मोक्षणं हि ते ।
श्रुत्वैवं प्रययौ स्वर्गं दूतमादाय वज्रभृत् ॥१०८॥
मुद्गलोऽपि परंब्रह्म चिन्तयँस्तत्र संस्थितः ।
अनादिश्रीकृष्णनारायणं ध्यात्वाऽक्षरं ययौ ॥१०९॥
इत्याह शंकरो लक्ष्मि ! पार्वतीं त्वर्बुदाचले ।
मया ते कथितं तद्वै मोक्षदं लोकपावनम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सिद्धतीर्थशुक्रतीर्थमणिकर्णतीर्थपंगुतीर्थयमतीर्थपुण्ड्रोदतीर्थ-श्रीमातृविन्ध्याचलीमंकिपिण्डारकरक्तोद्धारपार्थामुद्गल-मांमुञ्चतीर्थानां सोपाख्यानानां वर्णनं स्वर्गस्य गुणदोषनिरूपणं चेत्यादिनामा चतुःपञ्चाशद-धिकपञ्चशततमोऽध्यायः ॥५५४॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः पार्वतीं प्राह चार्बुदे ।
तीर्थान्यन्यानि ते वच्मि पापनाशकराणि हि ॥ १ ॥
तत्राऽऽस्ते चण्डिकातीर्थे विप्रैश्चण्डी समर्चिता ।
स्थापिता वेदमन्त्रैश्च महिषासुरनाशिनी ॥ २ ॥
अर्बुदे जाह्नवीकुण्डं शिखरे विद्यते शुभम् ।
यत्र गंगा शंकरेण लभते वत्सरान्तरे ॥ ३ ॥
सहयोगं तु सेवायां वरदानेन चार्बुदे ।
अथाऽचलेश्वरं तीर्थं शैवं तत्र च विद्यते ॥ ४ ॥
यत्र पूर्वं पापचारः कुष्ठक्षामतनुर्नरः ।
भिक्षार्थमागतस्तत्र सक्तुभिक्षामवाप सः ॥ ५ ॥
कुडवे न्यस्य रात्रौ स सुप्तस्तत्र क्षणं यदा ।
तावत् श्वा प्रसमागत्य भक्षयामास सक्तुकम् ॥ ६ ॥
अन्ये श्वानः समागत्य शुना कुर्वन्ति विग्रहम् ।
उन्निद्रः सोऽभवच्छ्रुत्वा सक्तूनाशं ददर्श च ॥ ७ ॥
ततो वै केवलं वारि पीत्वा स्नात्वा द्रुमान्तिके ।
सुष्वाप च ततः प्रातश्चोन्निद्रः स बभूव ह ॥ ८ ॥
यावत् पश्यति चात्मानं देवगन्धर्वसन्निभम् ।
जलस्नानप्रपानादेः प्रतापं ज्ञातवाँश्च सः ॥ ९ ॥
अथ कालान्तरे दैववशात् स निधनं गतः ।
ततो जातिस्मरो जातो विदर्भाधिपतेर्गृहे ॥१०॥
भीमो नाम नृपश्रेष्ठो दमयन्तीपिता हि सः ।
शुने सक्तूप्रदानस्य फलं राज्यमवाप सः ॥११॥
गत्वा तत्र ददात्येव सक्तून् वै प्रतिवासरम् ।
पप्रच्छुर्गालवाद्यास्तं कथं सक्तून् ददासि वै ॥१२॥
हस्त्यश्वरथदानानि दीयन्ते न कथं त्वया ।
स तदा कथयामास प्राग्भवस्याऽद्भुतं फलम् ॥१३॥
सक्तूदानप्रभावेण राज्यं प्राप्तं यतो मया ।
सक्तवो मम वै तीर्थे श्वभिस्तत्र हि भक्षिताः ॥१४॥
मया स्नानं तथा पीतं जलं पुण्यप्रदं ततः ।
क्षीणपापोऽभवं राजा करोमि सक्तुदानकम् ॥१५॥
ज्ञात्वा दानेन सक्तूनां फलं मे शाश्वतं भवेत् ।
तीर्थेऽत्र मुक्तिसंयुक्ते भक्त्या सक्तून् ददामि हि ॥१६॥
श्रुत्वा ते मुनयः सर्वे विस्मयं परमं गताः ।
साधु साधु परं राजन्नित्यब्रुवन् पुनः पुनः ॥१७॥
एतस्य पठनाद्वापि श्रवणादपि भूपतिः ।
भवेदत्र परत्रापि शाश्वतं सुखमाप्नुयात् ॥१८॥
कुलसन्तारणं तीर्थं वर्तते चार्बुदाचले ।
पुरा त्वासीत् पापकर्मरतश्चाऽप्रस्तुताभिधः ॥१९॥
नृपः सत्कारशून्यश्च ज्ञानदानविवर्जितः ।
न्यायतोऽन्यायतो वापि करोति धनसंग्रहम् ॥२०॥
ततो वार्धक्यमापन्नो वृद्धैरन्यैश्च बोधितः ।
कुरु राजन् धर्मकार्यं मरणादौ शुभं भवेत् ॥२१॥
राजा प्राह बलं धर्मो बलेन च कृतं मया ।
धनं राज्यं दारगृहं तथाऽन्यत्त्वर्जितं बहु ॥२२॥
नाऽस्माच्चाऽस्ति परो धर्म इन्द्रियतृप्तिदात् परः ।
इत्युक्ता मौनमादाय ययुः स्वं स्वं निकेतनम् ॥२३॥

अथाऽन्ते तस्य पितरो दुःखिता ऊचुरेव तम्।
वयं शुद्धसमाचारा दानधर्मपराः पुरा ॥२४॥
पुण्यैः स्वर्गं गताश्चाद्य कुपुत्रेण निपातिताः।
त्वं तु कुपुत्रः सञ्जातो धर्मकार्यविवर्जितः ॥२५॥
ततश्चोद्धर नः सर्वान् कृत्वा किञ्चिच्छुभार्जनम्।
कर्मभिस्तव पापात्मन् वयं नरकमाश्रिताः ॥२६॥
नरकं दश यास्यन्ति भविष्याश्च त्वया युताः।
श्रुत्वा राजा परं दुःखमवाप प्राह योषितम् ॥२७॥
पत्नी प्राह तथा श्रुत्वा पितॄनुद्धर शोभनैः।
राजा विप्रान् समाहूय पितृमेधं चकार ह ॥२८॥
तीर्थयात्रां तथा चक्रे चार्बुदेऽपि समागतः।
कुलसन्तारणं प्राप्य स्नानं तत्र चकार सः ॥२९॥
जलाञ्जलीन् ददौ स्मृत्वा पितॄन् पितामहादिकान्।
विमुक्ताः पितरो रौद्रान्नरकात्सुप्रहर्षिताः ॥३०॥
ततो दिव्यविमानस्था दिव्यमालाम्बरान्विताः।
तमूचुस्तारिताः सर्वे वयं पुत्र त्वयाऽधुना ॥३१॥
यस्मात् कुलं त्वया पुत्र तीर्थेऽस्मिँस्तारितं ततः।
कुलसन्तारणं नाम तीर्थमेतद् भविष्यति ॥३२॥
आगच्छ त्वं स्वपुत्राय वसवेऽर्प्य भूधुरम्।
दिवं प्रतीति संश्रुत्वाऽप्रस्तुतं स्वधुरं सुते ॥३३॥
दत्वा पितृविमानं च समारुह्य गतो दिवम्।
एषः प्रभावस्तीर्थस्य मया ते कथितः प्रिये ॥३४॥
ततो गच्छेत् परं तीर्थं पर्शुरामाश्रमात्मकम्।
तपस्तप्तं यत्र तेन प्राप्तान्यस्त्राणि शंकरात् ॥३५॥
रामतीर्थमिति ख्यातं पापतापप्रणाशनम्।
तत्र वारिह्रदे स्नात्वा भुक्तिं मुक्तिमवाप्नुयात् ॥३६॥
ततो गच्छेद् ब्रह्मपदं तीर्थं परमशोभनम्।
पुरा ब्रह्माऽर्थितो विप्रैर्मोक्षदं देहि वस्तु नः ॥३७॥
ब्रह्मा प्राह ददाम्येव पदं मे तस्य पूजनात्।
जनानां मोक्षणं स्याच्चरणारविन्दसेवनात् ॥३८॥
स्पृशन्तु ऋषयः सर्वे देवाश्चापि पदं मम।
पूजयिष्यन्ति संप्राप्ते कार्तिके पूर्णिमादिने ॥३९॥
तोयैः फलैश्च कुसुमैर्गन्धभोज्यानुलेपनैः।
ते यास्यन्ति न सन्देहो मम लोकं सुदुर्लभम् ॥४०॥
पितामहपदं चार्च्यं भुक्तिमुक्तिप्रदं हि तत्।
तत्र वै वर्तते मुख्यं पुष्करं त्रिविधं प्रिये ॥४१॥
पद्मजस्य सदाऽभीष्टं ब्रह्मणा च पुरा कृतम्।
वशिष्ठाद्या ऋषयो वै पुरा सत्रं समाचरन् ॥४२॥
ब्रह्मा तु सत्यलोकाद्वै यज्ञे तत्र समागतः।
त्रिसन्ध्यार्थं प्रगन्तव्यं सत्यलोके पुनः पुनः ॥४३॥
ब्रह्मणा मुनिभिश्चापि विचार्यैव च लाघवम्।
सत्यलोकात् समानीतं पुष्करं चार्बुदाचले ॥४४॥
यावत् सत्रं चार्बुदे वै सन्ध्या तेषां बभूव ह।
तत्राऽन्यानि पुष्कराणि समाजग्मुस्तदा भुवि ॥४५॥
उत्तमं पुष्करं व्योम्नि मध्यमं शिखरोपरि।
तृतीयं तु पृथिव्यां वै सरोवरमभूत्तथा ॥४६॥
कार्तिके पूर्णिमायां ये स्नानं कुर्वन्ति भावतः।
तेषां लोकाः शाश्वताश्च स्वर्गाद्या अपि भोगदाः ॥४७॥
तत्रोत्तरे च सावित्रीकुण्डं वै पापनाशनम्।
ब्रह्मणः प्रतिमा रम्या दर्शनान्मोक्षदायिनी ॥४८॥
धुन्धुमारोऽभवत् पूर्वं भक्तः श्रीशंकरस्य ह।
उमामहेश्वरस्तेन स्थापितो भवनाशनः ॥४९॥
तं देवं परिपूज्यैव निमितीर्थं समाचरेत्।
यत्र वै निमिना राज्ञा वार्धक्ये चार्बुदाचले ॥५०॥
लोमशोऽपि तदा तत्र ब्रह्मर्षिभिः समागतः।
ब्रह्मयज्ञः कृतस्तत्र विष्णुयागश्च वर्तितः ॥५१॥
रुद्रयागः कृतश्चापि संहितायाः कथा कृता।
महोत्सवे समस्तानि जम्बूद्वीपगतान्यपि ॥५२॥
तीर्थानि त्वाययुस्तत्राऽवभृथार्थं जलाशये।
जम्बूतीर्थं तु तज्जातं प्रत्ययार्थं द्रुमस्तथा ॥५३॥
जम्बूवृक्षोऽभवत्तत्र दिव्यो द्राक् संव्यजायत।
तत्र स्नानं निमिश्चक्रे सर्वतीर्थमये ततः ॥५४॥
सदेहः स गतः स्वर्गं दिव्यो भूत्वा सुरोपमः।
एतत् सर्वं त्वर्बुदस्य माहात्म्यं पार्वति! तव ॥५५॥
समाख्यातं मम स्थानमयं पुण्यप्रदं प्रिये।
अर्बुदस्तु स्वयं तीर्थं तत्र तीर्थानि कोटिशः ॥५६॥
वसन्ति च निवत्स्यन्ति गुणकर्मादिभिः सताम्।
पार्वति! ते प्रसंगेन श्रद्धया च मयाऽपि वै ॥५७॥
कृतानि बहुतीर्थानि धन्योऽहं वै त्वया प्रिये!।
यस्य पत्नी देवपरा भक्तिमती परेश्वरे ॥५८॥
धर्मकार्ये समुत्साहा सश्रद्धा पुण्यकर्मणि।
आतिथ्येऽतिप्रसन्ना च सत्सेवायां शुभादरा ॥५९॥
आत्मकार्येऽतिवेगा च ज्ञाने प्रेमवती सदा।
यज्ञस्येवाऽनुसन्धानवती जपपरायणा ॥६०॥
तपःशौचादिसंयुक्ता होमयज्ञपरायणा।
भर्तृदेवा पितृदेवा भृत्यरक्षाकरी तथा ॥६१॥

गोभूब्राह्मणसाधूनां साध्वीनां मानकारिणी ।
सर्वभूतात्मभूतस्य नारायणस्य किंकरी ॥६२॥
क्षमया पृथिवीतुल्या वैराग्ये वृक्षसदृशी ।
सौशील्ये ब्रह्मतुल्या च सेवने स्नेहपात्रिका ॥६३॥
सहाये स्तम्भवन्नित्यं दाने चात्मसमर्पिणी ।
परलोके सहाया च धन्यस्तस्य गृहाश्रमः ॥६४॥
स एव साधुरत्रोक्तो यस्य पत्नी पतिव्रता ।
यस्य नास्ति तथा पत्नी न स साधुः स पापवान् ॥६५॥
यस्य पत्नी कटु वक्ति क्रूरं चक्षुः करोति च ।
करोति रोषवद् वक्त्रं मानसं न ददात्यपि ॥६६॥
धिक् तस्य जीवनं लोके निरयश्चात्र तस्य वै ।
यस्य गृहे न वै पुण्यं नास्ति सेवा तु शार्ङ्गिणः ॥६७॥
नास्ति भोज्यसमुत्साहो नास्ति वस्त्रादि शोभनम् ।
नास्ति प्रेममयी वाणी नास्ति स्नेहावलोकनम् ॥६८॥
नरे नार्यो च वाऽपत्ये तस्य जन्म निरर्थकम् ।
धन्योऽहं कृतकृत्योऽहं यस्येदृशी सती प्रिया ॥६९॥
त्वयाऽस्मि सर्वदा धन्यो विरक्तो रक्तया सह ।
उद्वेगं स्त्रीकृतं लब्ध्वा यान्ति त्वन्ये वनान्तरम् ॥७०॥
न तेषां वनवासेन सिद्धिर्भवति तादृशी ।
यादृशी स्त्रीप्रसादेन गृहस्थस्याऽपि संभवेत् ॥७१॥
अबलानामनाथानां बालानां रोगिणां तथा ।
दरिद्राणां क्षुधितानां तृषितानां विवस्त्रिणाम् ॥७२॥
निराश्रयाणां लोकानां सतां सतीनां योगिनाम् ।
आशीर्वादाः फलन्त्यत्र द्रुतं सिद्धिप्रदा हि ते ॥७३॥
यत्र देव्यो रमण्यश्च मोदन्ते गृहमेधिनाम् ।
तत्र लक्ष्मीः सम्पदश्च स्वर्गं मोक्षोऽस्ति धर्मिणाम् ॥७४॥
यत्र सर्वविधा शान्तिर्निर्वृत्तिर्विद्यतेऽनिशम् ।
तत्र मोक्षो भवत्येव धन्योऽहं तादृशो गृही ॥७५॥
यो गृहस्थो दिवारात्रं धनं त्वर्जयति ध्रुवम् ।
भारवाही न जानाति रक्षणं स्त्रीकुटुम्बिनाम् ॥७६॥
भोजनं चासनं वस्तुयोजनं तूत्सवादिकम् ।
धनं तस्य निरर्थं वै निःश्वासदग्धमेव तत् ॥७७॥
यद्धनं नैव देवानां गृहस्थानां कुटुम्बिनाम् ।
वंश्यानां च निजानां च भोग्यं तन्मृत्तिकासमम् ॥७८॥
यः पतिर्न प्रसन्नोऽस्ति हास्याननो न दृश्यते ।
प्रसन्नशब्दः प्रेमाढ्यः स्नेहनेत्रो न दृश्यते ॥७९॥
समानहृदयो नास्ति नास्ति भावयुतस्तथा ।
नाऽनुग्रहं विधत्ते च न चाऽऽवश्यकतां चरेत् ॥८०॥
न रमेत रमयेद्वा न च ध्यानं करोति च ।
न चाह्वयति मिष्टेन नाऽऽकारयति वै हृदा ॥८१॥
न वा मिष्टं भोजयेद्वा पाययेन्मधुरं न च ।
मधु सम्मेलयेन्नैव मिलत्येव न निर्जने ॥८२॥
न च स्पृशति सौख्यार्थे स्मरेन्नैव शुभस्थले ।
न पृच्छेद् गृहिणीभावं मानसं न च रञ्जयेत् ॥८३॥
किं तेन पतिना लोके वृथा तस्या जनुर्भुवि ।
तस्माद् देवि ! त्वया रक्ष्यो वैराग्ये संस्थितोऽप्यहम् ॥८४॥
त्वयैव मम गार्हस्थ्यं प्रकाशमेति सर्वथा ।
त्वया पूर्वं तपः कृत्वा मम मूल्यं प्रवर्धितम् ॥८५॥
त्वया दग्ध्वा सतीदेहं देवत्वं मम वर्धितम् ।
त्वया दैत्यांस्तथा हत्वा स्वामिश्रैष्ठ्यं प्रकाशितम् ॥८६॥
त्वया पुत्रौ गणस्कन्दौ दत्त्वा मे पूज्यता कृता ।
त्वयैव देवि गार्हस्थ्यं स्वर्गो मोक्षो वनेऽपि मे ॥८७॥
त्वयैव देवि तीर्थानि कृतान्यत्र मया भुवि ।
गमिष्यामोऽधुना नैजं कैलासं वद किं परम् ॥८८॥
यद्यत् ते रोचते हैमि ! वद सम्पादयेप्सितम् ।
इत्युक्त्वा विररामाऽसौ शंकरो लोकशंकरः ॥८९॥
इत्येवं कथितं लक्ष्मि ! तुभ्यं चार्बुदतीर्थकम् ।
पापतापहरं मोक्षकरं शान्तिकरं परम् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने-
ऽर्बुदाचले चण्डिकातीर्थजाह्नवीकुण्डाऽचलेश्वरभीम-
तीर्थकुलसन्तारणतीर्थपर्शुरामतीर्थब्रह्मपदतीर्थत्रिपु-
ष्करसावित्रीकुण्डनिमितीर्थानां सोपाख्यानं
वर्णनं, शिवकृता सतीप्रशंसा, चेतिनिरू-
पणनामा पञ्चपञ्चाशदधिकपञ्चशत-
तमोऽध्यायः ॥ ५५५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकराद्याः कृत्वा तीर्थानि चार्बुदे ।
व्योमयानैर्ययुर्व्योम्नि पश्यन्तो भूतलादिकान् ॥ १ ॥
सती च पार्वती दृष्ट्वा सुशोभम् ऋक्षपर्वतम् ।
पप्रच्छ शंकरं नम्रा कोऽयं प्रकाशते गिरिः ॥ २ ॥
शंभुः प्राह महानास्ते ऋक्षाख्यः पर्वतो ह्ययम् ।
यत्र वै ऋषयः सन्ति तापसा वनवासिनः ॥ ३ ॥
ओंकाराख्यो वसाम्यत्र त्वया साकं हि ऋक्षके ।
श्रुत्वैवं पार्वती प्राह शंभोऽत्र भूतले पुनः ॥ ४ ॥

हिमालयात् समारभ्य समुद्रं प्रति पर्वताः ।
कति त्वदाश्रयाः सन्ति कति नद्यश्च मे वद ॥ ५ ॥
शंभुः प्राह शृणु हैमि ! सप्ताऽत्र कुलपर्वतान् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ ६ ॥
विन्ध्यश्च पारियात्रश्च ह्येते वै कुलपर्वताः ।
अन्ये तु मन्दरः शारः कैलासो दर्दुरस्तथा ॥ ७ ॥
मैनाको वैद्युतो वारन्धमः पाण्डुरकस्तथा ।
तुंगप्रस्थः कृष्णगिरिर्जयन्त ऋष्यमूककः ॥ ८ ॥
ऐरावतश्च गोमन्तश्चित्रकूटः श्रीपर्वतः ।
चकोरकूटः श्रीशैलः शत्रुंजितः कृतस्मरः ॥ ९ ॥
रैवताद्रिर्बरदादः शालमालादयोऽपि च ।
वर्तन्ते पावनास्तीर्थभूमयस्तारकाः शुभाः ॥१०॥
हिमाचलो महानास्ते पिता तेऽयुतश्रृंगवान् ।
तस्मान्नद्यो निर्गता याः स्वसारस्तव ताः शृणु ॥११॥
गंगा सिन्धुः शतद्रुश्च वितस्ता च सरस्वती ।
विपाशा चन्द्रभागा च सरयूर्यमुना तथा ॥१२॥
इरावती देविका च कुहूर्गोमती बाहुदा ।
धूतपापा दृषद्वती निस्वीरा कौशिकी तथा ॥१३॥
चक्षुष्मती गण्डकी च लोहिता ब्रह्मपुत्रकः ।
याः समुद्रं यथानिम्नं मिमीलुः पुण्यपावनाः ॥१४॥
पारियात्रोद्भवाश्चापि समाकर्णय शोभने ! ।
वेदस्मृतिर्वेदवती सिन्धुपर्णा चर्मण्वती ॥१५॥
चन्द्रनाभा रोहिपारा नाशदाऽऽचारनामिका ।
वेदत्रयी विदिशा च वपन्ती ताः समुद्रगाः ॥१६॥
नदीः ऋक्षप्रसूताश्च शृणु त्वं पावनीः शुभाः ।
शोणो ज्योतीरथा चापि नर्मदा सुरसा तथा ॥१७॥
मन्दाकिनी दशार्णा च तमसा पिप्पला तथा ।
चित्रकूटा करतोया चित्रोत्पला पिशाचिका ॥१८॥
विशाला वंजुका वालुवाहिनी विरजा तथा ।
शुक्तिमती पंकिनी च रात्री ताः ऋक्षपुत्रिकाः ॥१९॥
विन्ध्यपादोद्भवाश्चापि शृणु पापविनाशिनीः ।
शुभा तापी पयोष्णी च मणिजाला कुमुद्वती ॥२०॥
वेण्णा पाशा वैतरणी शीघ्रादाऽन्त्या गिरा तथा ।
दुर्गा तोया वैदिपाला विन्ध्यपर्वतजाश्च ताः ॥२१॥
सह्यपादोद्भवाश्चापि शृणु नदीः समुद्रगाः ।
गोदावरी भीमरथी कृष्णा वेणी च वञ्जुला ॥२२॥
तुंगभद्रा सुप्रयोगा बाह्यकावेरीति स्मृता ।
मलयाचलजा नद्यस्ताम्रपर्ण्युत्पलावती ॥२३॥
पुष्पावती शतमाला एताश्चापि समुद्रगाः ।
महेन्द्रतनया नद्यस्त्रियामा इक्षुला तथा ॥२४॥
ऋषिकुल्या त्रिविन्दाला वंशवरा च मूलिनी ।
अथ शुक्तिमतो नद्यः पलाशिनी च लूतसी ॥२५॥
ऋषिका मन्दगामा च समुद्रगास्तु ता अपि ।
एता महत्तमा नद्यस्तथा गोमती भद्रिका ॥२६॥
ओजस्वती स्वर्णरेखा नागनदी च देविका ।
साभ्रमती हिरण्या च न्यंकुमती शत्रुंजिता ॥२७॥
मनोरमा चन्द्रकला नारायणी माहेश्वरी ।
एताश्चान्या भवन्त्येव पापघ्न्यो मोक्षदायिकाः ॥२८॥
श्रुत्वा चैवं सती शंभुं समुवाच ततः परम् ।
एतासु नाथ कुत्र त्वं समूर्तो वर्तसे वद ॥२९॥
शंभुः प्राह च रेवायां वर्तेऽहं लिंगमूर्तिकः ।
नर्मदाकंकराः सर्वे शंकरा इति मे स्थितिः ॥३०॥
पार्वती प्राह मे वाञ्छा जायते नर्मदातटम् ।
द्रष्टुं दर्शय रेवां मे यस्मात् सा निर्गता तथा ॥३१॥
यत्र प्रविष्टा चाब्धौ सा सर्वां दर्शय मे शिव ।
तथास्त्विति हरः प्राह ऋक्षे चावातरत् तदा ॥३२॥
पार्वत्या सहितः शंभुस्तथा स्वर्गणकोटिभिः ।
रेवा यस्मान्निःससार तत्रैवाऽवाततार ह ॥३३॥
ऋक्षे च पर्वते सर्वे न्यूषुः सस्नुर्विशश्रमुः ।
जलं पपुर्भोजनानि चक्रुस्ततश्च पार्वती ॥३४॥
गणानां तु सभामध्ये शंकरं समपृच्छत ।
रेवोद्भवं मम ब्रूहि तथा तीर्थानि चांजसा ॥३५॥
शंकरस्तां नर्मदाया आगमं निजगाद ह ।
शृणु हैमि ! पुरा दैत्यो हिरण्यकशिपुर्महान् ॥३६॥
देवादीनर्दयामास देवा नारायणं ययुः ।
विष्णुं विज्ञापयामासुर्दैत्यदुःखं सुदारुणम् ॥३७॥
विष्णुर्नृसिंहरूपेण हतवान् दानवेश्वरम् ।
ततो देवैरर्थितेयं पावनार्थं हरेर्गृहात् ॥३८॥
वैकुण्ठात्पावनी मूर्तिः रेवा दिव्यस्वरूपिणी ।
नारायणस्य भक्ता या दिव्या दासी सुसेविका ॥३९॥
जलरूपा स्वयं भूत्वा देवैः सह समाययौ ।
स्वर्गे सा देवलोके वै तस्थौ च बहुवत्सरान् ॥४०॥
अथ राजाऽभवत् पृथ्व्यां हिरण्यतेजानामतः ।
सोमवंशोद्भवः सोऽयं त्वेकदा तपसे वने ॥४१॥
ययौ तपश्चचाराति ब्राह्मणानां समाज्ञया ।
महादेवस्य तुष्ट्यर्थं हिताय देहधारिणाम् ॥४२॥

नर्मदाया भुवि त्वानयनार्थं स जनाधिपः ।
महादेवं चाऽपरोक्षं ददर्श नृपतिस्तदा ॥४३॥
वव्रे वरं नर्मदायाः पृथ्व्यामागमनं शुभम् ।
सर्वेषां देहिनां येन समुद्धारो भवेदिति ॥४४॥
शंभुः प्राह तथाऽस्त्वेतत् त्वया सम्यग् विचारितम् ।
सस्मार नर्मदां सापि शंकराग्रे ह्युपस्थिता ॥४५॥
शंभुः प्राह भुवं याहि रेवे मोक्षस्य हेतवे ।
जनकल्याणदा तत्र भव पापप्रणाशिनी ॥४६॥
रेवा प्राह निराधारा कुत्र तिष्ठामि शंकर ! ।
शंभुः प्राह नगश्चास्ते तूदयाचलनामकः ॥४७॥
स त्वां धारयितुं शक्तस्तच्छृंगेऽवतर प्रिये ।
ततः सा नर्मदा स्वर्गादवाततार वै शनैः ॥४८॥
हिरण्यतेजास्तस्यास्तु सलिलैः समतर्पयत् ।
पितॄन् पितामहादींश्च तिलोदकानि वै ददौ ॥४९॥
उद्धृताः पितरः सर्वे ययुः स्वर्गं च मोक्षणम् ।
सोऽयं नार्मदवार्भिश्च पवित्रोऽस्ति पदे पदे ॥५०॥
नर्मदा वर्ण्यते सेयं सप्तकल्पानुगामिनी ।
ते देशाः पर्वताः पुण्यास्ते ग्रामास्तेऽपि चाश्रमाः ॥५१॥
यत्र यात्रा सरिच्छ्रेष्ठा नर्मदा सप्तकल्पगा ।
त्रिभिः सारस्वतं पुण्यं सप्ताहेन तु यामुनम् ॥५२॥
सद्यः पुनाति गांगेयं दर्शनादेव नर्मदा ।
रेवातटेषु ये वृक्षाः पतिताः कालपर्यये ॥५३॥
नर्मदातोयसंस्पृष्टास्ते यान्ति परमां गतिम् ।
रेवाया यत्र कुत्रापि संगमे च तटेऽपि वा ॥५४॥
स्नानं दानं जपो होमः स्वाध्यायः पितृपूजनम् ।
देवभक्तिर्महादीक्षा न्यासो देहविसर्जनम् ॥५५॥
यत्किञ्चित् स्यान्मनुष्याणामनन्तफलदं भवेत् ।
नार्मदे मूलतीर्थे तद् वाजिमेधफलप्रदम् ॥५६॥
कुलानां शतमागामि समतीतं तथा शतम् ।
उद्धरेदात्मना सार्धं रेवातीर्थावगाहनात् ॥५७॥
भूदानस्य प्रदात्राऽत्र राज्यप्राप्तिं लभेद् ध्रुवम् ।
नर्मदातोयपानस्य स्नानस्य प्रेक्षणस्य च ॥५८॥
अपि चान्द्रायणशतादधिकं फलमस्ति वै ।
प्रातर्यो नर्मदां पुण्यां स्मरेन्मोक्षं लभेत्तु सः ॥५९॥
उदयाद्रिस्थितां तां चानिनाय भूतले पुनः ।
पुरूरवाख्यराजर्षिः सोमवंशे बभूव यः ॥६०॥
चन्द्रपुरीमहाराज्यं सार्वभौमं चकार सः ।
निराबाधाः प्रजास्तस्य भवदारिद्र्यवर्जिताः ॥६१॥

चिरायुषो जनाश्चासन् कामदुघाश्च धेनवः ।
कौशेयपट्टवस्त्राश्च नरा नार्यो विभूषिताः ॥६२॥
वृक्षे वृक्षे रसधारा धरणिः सस्यशालिनी ।
एवं राज्ञा कृते राज्ये सर्वं सिद्धिमयं ह्यभूत् ॥६३॥
तेन सूर्यग्रहे हस्तिवाजिगोभवनानि च ।
स्वर्णरूप्यकरत्नानि दाने दत्तानि भूरिशः ॥६४॥
अतर्पयत् पितॄँश्चापि हव्यकव्येन भूपतिः ।
तदाश्चर्यमभूद् राज्ञो पितॄणां दर्शने शृणु ॥६५॥
अतिकष्टेन पितरो जलं पिबन्ति वीक्षितम् ।
क्षुत्क्षामकण्ठताल्वोष्ठान् कश्मलाँश्च मृदंभसा ॥६६॥
नग्नान् मलिनवस्त्राँश्च शतशोऽथ सहस्रशः ।
दृष्ट्वा पुरूरवा राजा नत्वा पितॄनुवाच ह ॥६७॥
के यूयं विकृताकाराः प्रेतभूता बुभुक्षिताः ।
कथयध्वं यथा मोक्षो भवेत्प्रेतस्वरूपतः ॥६८॥
पितरस्तु नृपं प्राहुर्वयं वै तव पूर्वजाः ।
सद्धिहीनमिदं क्षेत्रं धर्मकर्मविवर्जितम् ॥६९॥
न वै तीर्थं विना मुक्तिस्तीर्थं चानय भूमिषु ।
इत्युक्त्वा ते ययुर्याम्यां दिशं राजापि तत्क्षणात् ॥७०॥
पुत्रे राज्यधुरं न्यस्य ययावुदयपर्वतम् ।
कन्दमूलफलाहारः शिवपूजापरायणः ॥७१॥
भक्तिं चकार परमां तया तुष्टो महेश्वरः ।
प्रत्यक्षोऽभूदुवाचैनं भूपं वरं वृणु नृप ॥७२॥
राजा वव्रे सप्तकल्पवहां श्रीनर्मदां नदीम् ।
पितॄणां तारणार्थं वै भूमिषु त्ववतारय ॥७३॥
शंभुना भक्ततुष्ट्यर्थमाहूता नर्मदा नदी ।
मकरासनमारूढा दिव्याभरणभूषिता ॥७४॥
प्रोज्ज्वला युवती कन्या नारायणांगसंभवा ।
सर्वसौभाग्यसम्पन्ना कृष्णकुन्तलशोभना ॥७५॥
आगत्य शंकरं नत्वोवाच कथं नु संस्मृता ।
शिवः प्राह त्वदर्थं वै चतुर्दशसहस्रकम् ॥७६॥
वर्षाणां नृपतिस्तेपे हिरण्यतैजसो नृपः ।
भावात् पितृप्रमोक्षार्थम् ऋक्षाद्रौ त्वं प्रयाहि वै ॥७७॥
प्रेतरूपान् सर्वपितॄन् नरकस्थान् समुद्धर ।
इत्युक्त्वा व्योममार्गेण रेवा ऋक्षाद्रिमाययौ ॥७८॥
शंभुस्तस्यै ददावर्घ्यं सुदृढमृक्षपर्वतम् ।
गगनात् प्रच्युता रेवा पपात पर्वतोपरि ॥७९॥
पुरूरवाः स राजर्षिर्नर्मदां त्विदमब्रवीत् ।
अनुग्रहः कृतो देवि ! पितॄणां तारणाय मे ॥८०॥

राज्ञा ततस्तत्र नद्यां स्नात्वा सुराः सुतर्पिताः ।
पितरस्तर्पिताश्चापि पिण्डाद्यैस्तोषितास्तथा ॥८१॥
नरकादुद्धृताः सर्वे देवयानपथे स्थिताः ।
कृमिकीटपतंगाद्याः पक्षिणश्चाण्डजाश्च ये ॥८२॥
एषोऽवतारश्च पुन आदिकल्पे कृते युगे ।
एवं सा श्रीकृष्णनारायणवामांगजा सती ॥८३॥
कन्या श्रीनर्मदादेवी देवैः स्वर्गे समाहृता ।
स्वर्गादुदयशिखरं नीता हिरण्यतेजसा ॥८४॥
उदयाद्रेः ऋक्षशैलं पुरूरवा निनाय च ।
ततो भूभागमापन्ना पावनी चाब्धिगाऽभवत् ॥८५॥
स्नानावगाहनात्पानात्स्मरणात्कीर्तनादपि ।
अनेकभवजं घोरमघं सर्वं विनश्यति ॥८६॥
अथ प्राप्ते प्रथमे च कलौ नद्यश्च सर्वशः ।
पञ्चसाहस्रसौरान्ते ययुः स्वर्गं तदा पुनः ॥८७॥
प्राप्ते कृतेऽभवद् राजा पुरुकुत्सः प्रतापवान् ।
तपस्तेपे नर्मदाया अवताराय वै पुनः ॥८८॥
मया तुष्टेन तस्मै च वरोऽर्पितस्ततस्तु सा ।
स्मृता रेवा समायाता ममाऽऽज्ञया भुवं प्रति ॥८९॥
पर्यंकपर्वते रम्ये वेणुस्तम्बे ह्यवातरत् ।
पर्यंकाद्रिःसृता वेगाद् वारुणीं दिशमब्धिगा ॥९०॥
पुरुकुत्सं पतिं कृत्वा शापात् समुद्रतां गता ।
वर्तते पावनी लोके स्वर्गसोपानपद्धतिः ॥९१॥
येऽप्यधर्मरता लोके नर्मदायां मृता यदि ।
तेऽपि रुद्रत्वमायान्ति रेवातोयप्रसंगतः ॥९२॥
तत्र वैण्येश्वरं देवं वेणुमूले व्यवस्थितम् ।
आद्यं तीर्थं परं तद्धि पापतापप्रणाशनम् ॥९३॥
रेवोद्गमोत्तरे भागेऽनन्तपुरं सुपत्तनम् ।
ऋष्याश्रमात्मकं त्वास्ते दिव्यं मुक्तिप्रदं सदा ॥९४॥
व्यासाश्रमं पुरा तत्र सदासीत्पावनं परम् ।
शैवक्षेत्रं परं तीर्थं विद्यते शाश्वतं शुभम् ॥९५॥
उत्पलावर्त्तनामा च माधवो यत्र तिष्ठति ।
सहस्रमस्तको विष्णुर्वर्तते पावने स्थले ॥९६॥
क्रोशमात्रं हरिक्षेत्रं नर्मदायां प्रकथ्यते ।
रेवाया उत्तरे कूले कपिलातीर्थमुत्तमम् ॥९७॥
त्रिपुरीतीर्थमत्राऽस्ति शंकरस्तत्स्वरूपधृक् ।
क्रोशद्वयप्रमाणं तद् विद्यते स्वर्गदं शुभम् ॥९८॥
त्रिपुरं विनिहत्यैव विशश्राम क्षणं हरः ।
तीर्थं तत्पावनं स्वर्गमोक्षदं स्नानमात्रतः ॥९९॥
इत्येवं शंकरः प्राह पार्वतीं नर्मदासखीम् ।
मयोक्तं तु पुरा वृत्तं लक्ष्मि ! ते मनसेप्सितम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने नर्मदाया ब्रह्मलोकादुदयाचलगमस्तः ऋक्षाद्यागमस्ततो-भूतलावतरस्ततो वेणुतीर्थाऽनन्तपुरतीर्थादीति-हासेषु पुरूरवसो नृपस्य रेवावतारेण पितृद्धारादि-निरूपणनामा षट्पंचाशदधिकपञ्चशत-तमोऽध्यायः ॥५५६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः पार्वतीं प्राह पावनम् ।
आख्यानं तत् कथयामि त्वादिकल्पे कृते युगे ॥ १ ॥
मनुर्नामाऽभवद्राजा सूर्यवंशो महाबली ।
साकेता तस्य नगरी प्रधानाऽऽसीत्तदा भुवि ॥ २ ॥
अवध्या दानवैस्तस्मादवध्या नामतोऽभवत् ।
सप्तप्राकाररक्षाढ्या परिखासप्तवर्तुला ॥ ३ ॥
दशयोजनविस्तीर्णा सरयूमनुसंस्थिता ।
नवखण्डां मेदिनीं स शशासैकप्रियाव्रतः ॥ ४ ॥
एकदा स महाराजो वसिष्ठं प्रत्यभाषत ।
यज्ञो मया प्रकर्तव्यो दूरं चारण्यकस्थले ॥ ५ ॥
पावनं तादृशं स्थानं प्रदर्शय यथारुचि ।
वसिष्ठश्चापि तच्छ्रुत्वा गृहीत्वा विप्रसम्मतिम् ॥ ६ ॥
ऋक्षे वै पर्वतेऽरण्ये यतो रेवा प्रवर्तते ।
तत्र यज्ञं कुरु राजन्नित्याज्ञां प्रददौ पुरा ॥ ७ ॥
हयमेधं महायज्ञं गत्वा तत्र चकार सः ।
भूगोसुवर्णरत्नानि यज्ञे ददौ स भूपतिः ॥ ८ ॥
दशयोजनपर्यन्तं यज्ञकार्यार्थमण्डपम् ।
अकारयच्च रेवायास्तीरे यज्ञपरो नृपः ॥ ९ ॥
आहूय देवताः सर्वा देवेन्द्रम् पाकशासनम् ।
अतर्पयत् त्वर्घपाद्यैर्मधुपर्कैश्च विष्टरैः ॥ १०॥
अतर्पयद् भूमिदेवान् साधूंश्च भोजनादिभिः ।
हारकेयूरकटकैः कण्ठाभरणभूषणैः ॥११॥
भोजनानां प्रशालासु पंक्तिष्वपि समागताः ।
वयांसि पक्षिणश्चान्ये कीटा वा वनचारिणः ॥१२॥
यज्ञोच्छिष्टेषु लुलिता जाताः सर्वे हिरण्मयाः ।
एवं निवर्तितो यज्ञो नर्मदायास्तटे महान् ॥१३॥
अवभृथे स्तुता रेवा राज्ञा तोषं गता नदी ।
स्वर्गसोपानभूताऽसि पितॄणां मोक्षकारिणी ॥१४॥

पापघ्ना सर्वलोकानां माता चातिगरीयसी ।
दिवं नय महासाध्वि ! पापतापप्रणाशिनि ! ॥१५॥
स्तोत्रं श्रुत्वा महाभागा मनोर्नृपस्य सा ततः ।
प्रत्युवाच नृपं तुष्टा मकरासनसंस्थिता ॥१६॥
सर्वाभरणशोभाढ्या चन्द्रकान्तिनिभानना ।
कन्यारूपा हास्ययुक्ता वरं वृणु हृदीप्सितम् ॥१७॥
राजा प्राह सदा लोके तीर्थरूपाऽसि तारिणी ।
तारयाऽत्र शुभे तीर्थे यज्ञभूमौ सदा सति ॥१८॥
मम राज्ये तथा नद्यो वसन्तु भवतारिकाः ।
युगानि शाश्वतानीह प्रजाकल्याणहेतवे ॥१९॥
आगच्छ च मया साकं रूपान्तरेण नर्मदे ।
साकेतायां नगर्यां मे सरय्वा सह संवस ॥२०॥
तथाऽस्त्वित्याह तं रेवा ययौ रूपान्तरेण सा ।
साकेतायां नगर्यां च रेवाकुण्डेऽवसत्ततः ॥२१॥
यज्ञभूमौ महत्तीर्थं यज्ञस्थानं तु ऋक्षके ।
स्नानात् तत्र दिवं यान्ति देहिनः पुण्यशालिनः ॥२२॥
अथाऽऽस्ते भगवान् विष्णुर्ब्रह्मकुण्डं सुपावनम् ।
रेवा चोत्तरवाहाऽत्र स्नात्वा मोक्षमवाप्नुयात् ॥२३॥
हंसतीर्थं ततश्चास्ते हंसा यत्र दिवं गता ।
ततश्चाग्रे सिद्धतीर्थं सिद्धा वसन्ति तापसाः ॥२४॥
ततो गंगायमुनासंगमो रेवाजले शुभः ।
मतंगर्षिः पुरा गंगां यमुनां च समाह्वयत् ॥२५॥
ऋषीणां मह्यमानानां स्नानार्थं प्रातरेव ह ।
मूर्ता गंगा यमुना च समाययौ जले तदा ॥२६॥
जलरूपाऽभवत् तीर्थं त्रिसंगमात्मकं शुभम् ।
अथ रम्यं योगतीर्थं तथा ऋक्षेश्वरं परम् ॥२७॥
तीर्थमाप्सरसं नाम वर्तते शापवारकम् ।
पुरा त्विन्द्रसभायां चाप्सरसो नृत्यमाचरन् ॥२८॥
कामः स्वयं परं रूपं धृत्वा तत्र समाययौ ।
नर्तक्यस्तं तदा दृष्ट्वा मुमुहुर्विस्मयान्विताः ॥२९॥
तालगीतिस्वरन्यासनृत्यक्रमान् विसस्मरुः ।
तदा त्विन्द्रश्च कोपाऽति नर्तकीस्ताः शशाप ह ॥३०॥
चम्पके सीमपेऽनामे केशिनि चापि भामिनि ।
कौमुदि सुप्रभे तथोत्पले महोदयेऽसिमे ॥३१॥
लोकपाला विराजन्ते सभायामत्र चेश्वराः ।
यथांगं नर्तनं प्राप्तं विक्रमं च प्रमादतः ॥३२॥
ततो निषादयोनिं संयान्तु तच्छिक्षणं ह्यलम् ।
नर्मदायां ततः स्नात्वा कुंभयोगे पुनः पुनः ॥३३॥
माघे मासि तृतीयायां निराहाराश्च निर्जलाः ।
गौरीं शंभुं त्वर्चयित्वा दिवं पुनरवाप्स्यथ ॥३४॥
इत्युक्तास्ता निषाद्यश्च तथा भूत्वा तु नार्मदे ।
जले स्नात्वा ययुर्मुक्तिं तीर्थं चाप्सरसं हि तत् ॥३५॥
अथ तीर्थं परं दत्तात्रेयानदी च रेवया ।
संगता तत्र संस्नात्वा पूजयित्वा च केशवम् ॥३६॥
निर्धूय सर्वपापानि यान्त्यन्ते श्रीहरेः पदम् ।
ततो गांजालभेदाख्यं तीर्थं कार्यं प्रमोक्षदम् ॥३७॥
सोमवंशे नृपश्चासीद् देवानीक इतिप्रथः ।
तदात्मजश्चक्रवर्ती हरिकेशः स नामतः ॥३८॥
कन्यापुरेऽभवत् तस्य राजधानी परात्परा ।
तुंगभद्रातटे तेन मखाश्च बहवः कृताः ॥३९॥
हरिकेशो ददौ दानं दोग्ध्रीणामेकलक्षकम् ।
सूर्यग्रहे च निष्काणां सहस्रं प्रतिभूसुरम् ॥४०॥
ददावथ पुनर्वेदविद्यायां विजयाय वै ।
ब्राह्मणानां सभा तत्र चकार महतीं पुनः ॥४१॥
यो वै तत्र विजयेत तस्मै गौरेकवत्सिका ।
दोग्ध्री सुवर्णभूषाढ्या हीरकस्रक्सुशोभिता ॥४२॥
दातव्येति विनिश्चित्य प्रश्नं राजा चकार ह ।
अत्र राहुसूर्ययोगे स्नाने प्रयागजं फलम् ॥४३॥
स्नान प्रारब्धजं किं वा विना प्रारब्धमीयते ।
सुमुख्यं कारणं किन्तु किं भवेद्वा प्रयोजकम् ॥४४॥
प्रयागभूमिर्नाऽत्राऽस्ति संयोगो नास्ति तद्भवः ।
कथं तज्जं फलं स्याच्च हेतुं विना न जन्यता ॥४५॥
इति प्रश्ने कृते राज्ञि पण्डिताः ऋषयस्तदा ।
केचिदाहुस्त्वर्थवादं तदा प्राशस्त्यबोधकम् ॥४६॥
अन्ये प्राहुर्विना भूमिं प्रयागस्य न तत्फलम् ।
अपरे च तदा प्राहुः प्रयागसदृशं फलम् ॥४७॥
स्नानं प्रयागस्नानेन सदृशं जगदुः परे ।
स्नानं प्रारब्धजं चान्ये परे प्रारब्धमन्तरा ॥४८॥
प्रयत्नेन भवत्येव स्नानं पुण्यं विनापि च ।
मुख्यं तु कारणं तत्र मुमुक्षा वा बुभुक्षता ॥४९॥
इच्छाऽस्ति कारणं मुख्यं या काचिद्वा भवेद्धि सा ।
सार्थवाहस्तदेच्छाया उत्तेजको भवत्यपि ॥५०॥
प्रयोजिका तु जिज्ञासा शास्त्रजन्या पुनः पुनः ।
शास्त्रयोगे कारणं तु कृपा गुरोः सदा मता ॥५१॥
एवंविधा भवेयुश्च हेतवो भिन्नरूपिणः ।
एवं वादः प्रवृत्तश्च नैकेनापि निरूपितम् ॥५२॥

मुख्यं तु कारणं तत्र पुण्यदं यद् हृदि स्थितम् ।
परब्रह्म स्वयं दातृ फलस्यैवेति विस्मृतम् ॥५३॥
तेन कैश्चिन्न विजिता धेनुः स्वर्णमयी तदा ।
विवादे विजयार्थे च प्रवृत्तेऽपि न निर्णयः ॥५४॥
ब्राह्मणानां विवादे च तत्राऽऽसीदेकभूसुरः ।
नाम्ना रौद्रायणोऽथर्वमन्त्रविद् वादकारकः ॥५५॥
विवादे जायमानेऽपि विजयं नैव लब्धवान् ।
रुष्टः स चाऽनले राज्ञा कारयामास तत्क्षणम् ॥५६॥
होमं रौद्रैर्महामन्त्रैः सुतेजस्वैरजानता ।
राज्ञा कृतेन होमेन युगान्ताग्निसमप्रभः ॥५७॥
तत्कुण्डादुत्थितो वह्निर्ज्वालामालाभयंकरः ।
दग्धो हि मण्डपस्तेन मण्डपस्थाश्च पूरुषाः ॥५८॥
भस्मीभूतं तथा चान्यत् सामग्र्युपस्करवस्तुकम् ।
राजा प्राहाऽत्र हत्यानां दग्धानां निष्कृतिरस्तु मे ॥५९॥
यथा भवेत्तथा विप्रा ! दीयतां त्वाचरामि ताम् ।
ब्राह्मणाश्च तदा प्राहुः कल्पग्रामं प्रयाहि वै ॥६०॥
भृग्वाद्याः ऋषयस्तत्र प्रष्टव्या निष्कृतौ त्वया ।
एवमुक्तो ययौ राजा पादचारी सुकल्पकम् ॥६१॥
महर्षीन् स प्रणम्यैव सम्भाषां प्रचकार ह ।
ततो निवेदयामास कृतौ हत्याघमुल्बणम् ॥६२॥
श्रुत्वा तम् ऋषयः प्राहुर्गायत्रीदशलक्षकम् ।
तीर्थे तीर्थे जप राजन् याह्यष्टषष्टितीर्थकम् ॥६३॥
गोहिरण्यप्रदानं च कुरु होमायुतं तथा ।
देहि सद्यश्च विप्रेभ्यः सहस्रशतदक्षिणम् ॥६४॥
एवं पापस्य मुक्तिः स्यात् कुरु तीर्थानि भावतः ।
ये मृता वह्निदग्धाश्च तेषामस्थिप्रवाहणम् ॥६५॥
नर्मदायां कुरु राजँस्तेन मुक्तिर्भविष्यति ।
नर्मदोदकसम्पर्काद् दिवि देवत्वमाप्यते ॥६६॥
तिलोदकप्रदानेन तेषां मुक्तिर्भवेद् ध्रुवम् ।
नर्मदायास्तटे रम्ये शुभं यज्ञं च वैष्णवम् ॥६७॥
समाचर पुनर्यत्र मोक्षणं संभविष्यति ।
इत्युक्तः स तु राजर्षिः पुनः श्रीनर्मदां प्रति ॥६८॥
ययौ यज्ञं तर्पणं च चक्रे तत्र तटे शुभे ।
प्रवाहो निर्गतस्तत्र नर्मदायां समाविशत् ॥६९॥
स गाङ्गालेतिविख्यातो नर्मदासंगमोऽभवत् ।
हरिकेशेन पितरो मृता दग्धाश्च ये कृतौ ॥७०॥
सर्वे ते तारितास्तत्र तृप्ताः प्रोचुर्नृपं ततः ।
त्वत्प्रसादान्महाभाग ! वयं देवत्वमागताः ॥७१॥
दिव्ययानसमारूढा यास्यामो वैष्णवं पदम् ।
हरिकेशो नृपः श्रुत्वा परया च मुदा युतः ॥७२॥
सप्तकल्पस्थिरां रेवां नत्वा चक्रे स्तुतिं ततः ।
नमस्तेऽस्तु सरिच्छ्रेष्ठे ! सप्तकल्पनिवासिनि ॥७३॥
स्नात्वा त्वयि जनः क्वापि सर्वत्र मुक्तिमृच्छति ।
त्वत्प्रसादान्महादेवि ! मुक्तिर्जाता भवार्णवात् ॥७४॥
पितॄणां वह्निदग्धानां जय देवि दयावति ! ।
नर्मदा तद्वचः श्रुत्वा मूर्ता कन्या बभूव सा ॥७५॥
वरं वृणु नृपं प्राह राजा वव्रे वरं तदा ।
यदि मे वरदा साध्वि ! पूतं मां कुरु पावनि ! ॥७६॥
स्नानाऽवगाहनात्पानात्स्मरणात्कीर्तनादपि ।
सप्तजन्मकृतं पापं सद्य एव विनश्यतु ॥७७॥
रेवोवाच तथाऽस्त्वेव ततश्चान्तरधीयत ।
हरिकेशश्चक्रवर्ती नत्वा पुनश्च तां दिशम् ॥७८॥
कामिकं यानमारुह्य ययौ साकेतपत्तनम् ।
तत्तीर्थे नार्मदं हत्यानाशकृन्मोक्षदं शुभम् ॥७९॥
हरिवेशं च गाङ्गालं हत्यापापविनाशनम् ।
धन्यं यशस्यमायुष्यं भुक्तिमुक्तिप्रदं शुभम् ॥८०॥
अथ याम्यां दिशि नाम्ना तीर्थं बालुकशांकरम् ।
यत्र कन्यानर्मदासंगमो जातो हि मोक्षदः ॥८१॥
ततश्चाऽग्रे समाख्यातं तीर्थं पूर्णमनोरथम् ।
हरिवर्मा पुरा चासीद् विराटनगराधिपः ॥८२॥
कृतस्तेन क्रतुस्तत्र गोलक्षं तत्र संददौ ।
देवाः सुतर्पितास्तत्र विप्राः सन्तश्च पूजिताः ॥८३॥
अथाऽन्यदपि सत्तीर्थं रेवामत्स्यासमागमः ।
यत्राऽऽपो निर्मलाः पानात् स्नानान्मुक्तिप्रदाः सदा ॥८४॥
रेवाया उत्तरे कूले कपिलासंगमात्परम् ।
नर्मदापुरमत्राऽऽस्ते यत्र विप्रास्तु तापसाः ॥८५॥
कोटिशो वै विराजन्ते जमदग्न्याश्रमान्तिके ।
जमदग्निर्महोग्रं च तपश्चचार शांकरम् ॥८६॥
साक्षाद्भूच्छिवस्तस्य वरं वृणु जगाद तम् ।
ऋषिर्वव्रे कामधेनुं गोलोकात् सा समाययौ ॥८७॥
धर्मकर्मशुभार्थे च शिवपूजासुतर्पणे ।
पितृकार्ये देवकार्ये गावः पुण्यतमाः सदा ॥८८॥
कामधेनोः सकाशाच्च जमदग्निरवाप ह ।
सर्वान् कामान् धर्मरूपान् सम्पत्प्रदान् दिवःप्रदान् ॥८९॥
ऋषीणां च सहस्राणि नित्यं भोजयते द्विजः ।
जमदग्नेर्महाकीर्तिः पृथ्व्यां व्याप्ता गवा तदा ॥९०॥

विप्रचित्त्याख्यदैत्यस्य कन्या माहिष्मती तु या ।
तस्या नाम्ना स नगरीं माहिष्मतीं विनिर्ममे ॥९१॥
यत्सन्निधौ महारण्ये जमदग्निर्रुवास ह ।
ययौ सखीभिर्व्योम्ना सा वीक्षितुं मन्दराचलम् ॥९२॥
तपन्तं चाऽस्वरसंज्ञं तत्र ददर्श तापसम् ।
दृष्ट्वाऽऽश्रमपदं रम्यं चिन्तयामास भामिनी ॥९३॥
भीषयित्वाऽहमेनं तु तिष्ठाम्यत्राश्रमे स्वयम् ।
कामरूपधरा साऽपि भूत्वाऽरण्यनिवासिनाम् ॥९४॥
ऋषीणां सन्निधौ याता महिषीरूपधारिणी ।
ऋषिभिः खलु शप्ता सा महिष्यस्तु शतं समाः ॥९५॥
महिषं पुत्रमासाद्य ततः स्वस्था भविष्यसि ।
एवं शप्ता ययौ सा तु नर्मदातीर्थमुत्तमम् ॥९६॥
यत्र तेपे तपो घोरं सिन्धुद्वीपो महातपाः ।
सिन्धुद्वीपस्य वै वीर्यं प्रचस्कन्द शिलातले ॥९७॥
जलाऽन्वितं सुगन्धं तत् पपौ सा महिषी तदा ।
ततः सा सुषुवे विप्रवीर्यजन्यं सुतं दृढम् ॥९८॥
महिषाख्याऽसुरं क्रूरं यं जघान हि शांकरी ।
नारायणी महाशक्तिस्ततो माहिष्मती निजाम् ॥९९॥
माहिष्मतीं पुरीं गत्वा जमदग्न्याश्रमान्तिके ।
कालेन सा मृता प्राप्ता स्वर्गमृषेः प्रतापतः ॥१००॥
तीर्थं तज्जामदग्न्यं वै माहिष्मतं सुशोभनम् ।
विशोकैरण्डिका चैव तृतीया पावनी मता ॥१०१॥
चतुर्थी नर्मदा तासां संगमे कपिला शिला ।
तीर्थं पुण्यतमं त्वास्ते यत्र पिण्डप्रदानतः ॥१०२॥
पितरो मोक्षणं यान्ति पर्शुरामेण तारिताः ।
एतत्ते कथितं लक्ष्मि ! पुरा सत्यै शिवोदितम् ॥१०३॥
श्रवणात्कीर्तनाच्चाऽस्य दिवि देवत्वमाप्यते ।
भुक्तिर्मुक्तिर्लभ्यतेऽपि जामदग्न्याश्रमे शुभे ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ऋक्षपर्वते मनुकृतयज्ञतीर्थे विष्णुब्रह्मकुण्डहंसतीर्थे त्रिसंगमयोगतीर्थे आप्सरसतीर्थे दत्तात्रेयासंगमः गांजालभेदतीर्थे वालुकं पूर्णमनोरथतीर्थे कन्यानर्मदासंगमः मत्स्यासंगमो नर्मदापुरं जामदग्न्यतीर्थमित्यादीनि सबीजानि निरूपितानीतिनामा सप्तपञ्चाशदधिकपञ्चशततमोऽध्यायः ॥ ५५७ ॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! महादेवेन भाषितम् ।
पार्वत्यै नार्मदं चान्यत् तीर्थं तत् कथयामि ते ॥ १ ॥
मत्स्यायाश्च तथा ताप्याः संगमो मोक्षदायकः ।
कलहंसाभिधः पूर्वं देवर्षिर्ध्यानतत्परः ॥ २ ॥
तत्र कृत्वाऽऽश्रमं रम्यं तपस्तेपे सुदारुणम् ।
शाकमूलफलाहारो ह्यतिष्ठत्त्वेकपादतः ॥ ३ ॥
शिवध्यानपरस्याऽस्य तपसा देवराट् स्वयम् ।
भीतो ब्राह्मणरूपेण वञ्चयितुं समाययौ ॥ ४ ॥
उवाच, कलहंस ! त्वं किमर्थं कुरुषे तपः ।
ऋषिः प्राह कथं चेन्द्र ! मां विडम्बयसे द्विजम् ॥ ५ ॥
जानामि त्वां तुराषाढं नेन्द्रराज्यं प्रकामये ।
आराधयाम्यहं शंभुं कुरु राज्यं यथेप्सितम् ॥ ६ ॥
इन्द्रः प्राह वरं विप्र ! वृणु द्रक्ष्यसि शंकरम् ।
कलहंसस्तदोवाच नान्यं वरं वृणोम्यहम् ॥ ७ ॥
शंभौ भक्तिः सदा मे स्यादिति शक्तोऽसि देहि चेत् ।
तथाऽस्त्विति सुरेशश्च ययावुक्त्वा त्रिविष्टपम् ॥ ८ ॥
शंकरस्तु द्रुतं तत्र साक्षात् हसन् समाययौ ।
कलहंसो नमश्चक्रे स्तोतुं समुपचक्रमे ॥ ९ ॥
नमो भक्तकृपायुक्त महादेव नमोऽस्तु ते ।
नमः शिवाय भक्तानामिष्टप्रदाय ते नमः ॥१०॥
भवसागरमग्नानामुद्धारकाय ते नमः ।
परब्रह्मस्वरूपाय वैष्णवाख्याय ते नमः ॥११॥
ओं नमः श्रीकृष्णनारायणात्मकाय ते नमः ।
पार्वतीपतये प्रभास्वामिदेवाय ते नमः ॥१२॥
नारायणीशरूपाय जयाध्यक्षाय ते नमः ।
सर्वबीजस्वरूपाय कारणाय नमो नमः ॥१३॥
शंभुः स्तोत्रं शुभं श्रुत्वा वरं वृणु जगाद तम् ।
कलहंसेश्वरं तीर्थं वव्रे च ऋषिसत्तमः ॥१४॥
तत्र प्राणैर्वियुक्तानां मोक्षं वव्रे शुभं वरम् ।
शंभुः प्राह तथैवाऽस्तु चान्ते मुक्तिस्तवाऽस्तु च ॥१५॥
अन्तर्धानं ययावुक्त्वा कलहंसोऽपि सर्वथा ।
भजित्वा नार्मदं तीर्थं चान्ते ब्रह्मपदं ययौ ॥१६॥
मत्स्यातापीसंगमे तत्कलहंसं सुतीर्थकम् ।
पापघ्नं स्वर्गदं मोक्षप्रदं वर्तेत ऐश्वरम् ॥१७॥
अन्यत् तीर्थं बृहत्याश्च नर्मदायाश्च संगमः ।
विन्ध्यपर्वतशोभाढ्यं विद्यते तापसाश्रितम् ॥१८॥

रक्तधर्माभिधः कश्चिन्निषादस्तत्र चाययौ ।
भरणायात्मवर्गस्य वन्यकन्दफलादिभिः ॥१९॥
प्रातः स रेवासलिलं शिवाय वै समाहरत् ।
अज्ञानभक्तिगर्भस्तु स्नापयित्वा फलं ददौ ॥२०॥
अथोत्तरायणे प्राप्ते पुपूज कुसुमैः सदा ।
बिल्वादि चार्पयामास शंकराय स भावतः ॥२१॥
निषादः स ददर्शैकस्मिन् दिने शंकरं गृहे ।
तृतीयमीक्षणं तत्र मूर्तेर्नैव स पश्यति ॥२२॥
तदा तु चिन्तयामास केनाऽप्यपहृतं हि तत् ।
विचार्य वामनेत्रं स्वं तीक्ष्णबाणेन तत्क्षणम् ॥२३॥
ललाटे देवदेवस्य समुत्कृत्य न्यवेदयत् ।
न कम्पो न च कार्पण्यं न विषादो न देवनम् ॥२४॥
तेन तुष्टो महादेवो निषादं प्राह संहसन् ।
वरं वृणु महाभक्त ! यदिष्टं मनसेप्सितम् ॥२५॥
निषादो वचनं श्रुत्वा साष्टांगं प्रणिपत्य च ।
वरं वव्रे निषादास्तु सर्वे पक्षिगणैः सह ॥२६॥
सपुत्रदारपशवो ये चान्ये पापदेहिनः ।
त्वत्प्रसादाद्वरदानान्मुक्तिलोकं प्रयान्तु ते ॥२७॥
एवं वरं वृणे योग्यं भूतानां मोक्षकाम्यया ।
शंभुः श्रुत्वा प्रसन्नः सन्नुवाचाऽस्तु तथा वरः ॥२८॥
सर्वसंकल्पकामाप्तिं मत्प्रसादात् त्वमाप्स्यसि ।
सर्वे मुक्तिं प्रयास्यन्ति यथा संकल्पितं त्वया ॥२९॥
इत्युक्त्वा स महादेवस्तत्रैवाऽन्तरधीयत ।
ततः काले विमानस्थो निषादोऽनुचरादिभिः ॥३०॥
धृतस्वर्णातपत्रस्तु वीज्यमानोऽप्सरोगणैः ।
दिव्याभरणवस्त्राढ्यो दिव्यचन्दनपूजितः ॥३१॥
पशुपक्षिगणैः साकं ययौ मुक्तिपदं यतः ।
तदिदं कथितं हैमि ! शिवनेत्रह्रदात्मकम् ॥३२॥
तीर्थं वै पावनं सर्वसमृद्धिदं मुक्तिदं तथा ।
अथाऽन्यत्परमं तीर्थं नार्मदे चोत्तरे तटे ॥३३॥
विद्यते क्रतवो यत्र तीर्थयात्रागतेन च ।
जनकेन कृतास्तत्र दक्षिणातोषिता द्विजाः ॥३४॥
धर्मराजस्तथा चाऽन्ये दिशां पालाः समाययुः ।
धर्मराजो जनकं संप्राहार्घादि ददन् नृपम् ॥३५॥
तपसा ध्यानयोगेन दानदेवार्चनैरपि ।
शिवरेवाप्रसादेन जिता लोकास्त्वयाऽखिलाः ॥३६॥
जनको धर्मराजं च पप्रच्छ विनयेन वै ।
के देशाः पर्वताः पुण्याः का नद्यश्चाश्रमाश्च के ॥३७॥
कानि तीर्थानि लोकेऽस्मिन् यत्र दत्तं हुतं तपः ।
न क्षीयते मनुष्याणां तन्मे कथय तत्त्वतः ॥३८॥
धर्मः प्राह शृणु राजन् शंकरस्य मुखाच्छ्रुतम् ।
कल्माषपादो राजाऽऽसीन्माथुरे मण्डले पुरा ॥३९॥
नाभागाख्यश्च राजाऽऽसीत् साकेतमण्डले पुरा ।
नाभागस्य विमानं तु व्योम्नि चोपरि गच्छति ॥४०॥
कल्माषपादयानं तु भूतले याति नाऽम्बरे ।
इति हेतोः शिवं नत्वा कल्माषपादभूपतिः ॥४१॥
पप्रच्छ शृण्वतां सर्वगणानां संशयं स्वकम् ।
पुष्करे दशयज्ञाश्च विधत्ताश्च मया हर ! ॥४२॥
गंगायां नैमिषारण्ये प्रभासे शशिभूषणे ।
प्रयागराजे काश्यां च प्रत्येके शतकं तथा ॥४३॥
इष्टं साग्रं क्रतूनां तु मया तत्र महेश्वर ।
अधो याति विमानं मे नाभागस्याऽम्बरोपरि ॥४४॥
कथमेवं न्यूनता मे पुण्येऽहं येन निम्नगः ।
शंभुः प्राह तदा तं वै कल्माषपादभूपतिम् ॥४५॥
लक्षमेधं नामतीर्थं रेवाया उत्तरे तटे ।
शंकरो लक्षमेधेशो राजते तत्र नित्यशः ॥४६॥
चकार तत्र नाभागो यज्ञमेकं सुवैष्णवम् ।
तेन पुण्येन यानं वै नाभागस्याऽम्बरे स्थितम् ॥४७॥
त्वया रेवातटे नैव यज्ञः कृतो महाफलः ।
तेन निम्नप्रदेशे ते विमानं याति नाऽम्बरे ॥४८॥
नर्मदायाः परं तीर्थं ततो नैव हि विद्यते ।
इति श्रुत्वा च कल्माषचरणो नृपतिस्ततः ॥४९॥
प्रययौ नर्मदातीरं दशयज्ञान् चकार ह ।
वैष्णवं चाथ रौद्रं च वाजिमेधं च वै क्रतुम् ॥५०॥
कारीरिं वाजपेयं च विश्वजितं महाक्रतुम् ।
पुण्डरीकं नरमेधं गोमेधं वैश्वदेवतम् ॥५१॥
एवं यज्ञाँश्चकाराऽयं ज्ञानयज्ञं तथा पुनः ।
लक्ष्मीनारायणसंहितायज्ञं प्रचकार सः ॥५२॥
ततो यानं स्वयं व्योम्नि समुत्थाय समूर्ध्वगम् ।
यथाकामं सत्यलोकं वैकुण्ठं च ययौ ततः ॥५३॥
नाभागस्य विमानाद्वै ह्युपर्युपरि याति तत् ।
एवं कल्माषपादो वै कृत्वा ब्रह्मसमर्पणम् ॥५४॥
जीवद्देहेन वैकुण्ठं गन्तुं योग्योऽभवत्ततः ।
यस्य क्रतौ स्वयं विष्णुर्लक्ष्म्या साकमुपस्थितः ॥५५॥
विष्णुना चार्पिता माला दिव्या कण्ठेऽस्य भूभृतः ।
तेन योगेन वैकुण्ठं यात्यायाति क्वचित् क्वचित् ॥५६॥

एवं राजा समर्थोऽभूत् श्रीविष्णोः सम्प्रसादतः ।
तत्तीर्थं जानकं चान्यत् काल्माषपादिकं तथा ॥५७॥
विद्यते नर्मदाकूले पावनं मोक्षदं परम् ।
अथाऽन्यद् विद्यते रम्यं सप्तसारस्वतं शुभम् ॥५८॥
सप्तसारस्वतो नाम गन्धर्वः शिवकिंकरः ।
कैलासे गायनं कृत्वा प्रययौ रैवताचलम् ॥५९॥
विनाऽऽज्ञां शंकरस्याऽथ त्वाययौ सुचिरेण सः ।
नन्दी शशाप तं कोपाद् व्रज चाण्डालतां क्षितौ ॥६०॥
नर्मदायां व्यतिपाते स्नात्वा यास्यसि मोक्षताम् ।
इत्येवं स तु गान्धर्वश्चाण्डालयोनितां गतः ॥६१॥
जातिस्मरोऽभवत् पृथ्व्यां बभ्राम नार्मदे तटे ।
स्नात्वा रेवाजले शंभुं पूजयित्वा विधानतः ॥६२॥
चाण्डालयोनिसम्मुक्तो गान्धर्वतां ययौ पुनः ।
सप्तसारस्वतं तीर्थं मोक्षदं तत्प्रकीर्तितम् ॥६३॥
नर्मदादक्षिणे तीरे त्वशोकवनिकासु च ।
अशोकजननाख्यं सत्तीर्थं त्वपरमुत्तमम् ॥६४॥
अघमर्षऋषेस्तत्राश्रमो ब्राह्मणशोभितः ।
ऋषयो यत्र ब्रह्मिष्ठा विचिन्वन्ति प्रमोक्षणम् ॥६५॥
अघमर्षाश्रमं धर्मो वैश्यरूपेण चाऽऽगमत् ।
जिज्ञासार्थं कीदृशा वै ऋषयोऽत्र वसन्ति नु ॥६६॥
स वैश्योऽत्र तपश्चक्रे ब्राह्मणातिशयं ततः ।
ब्राह्मणेभ्यः स प्रददौ मृगचर्माणि सर्वशः ॥६७॥
कौपीनानि तथा भिक्षां ततो नाशिकमाययौ ।
वर्षमेकं व्यतीतं च वैश्यस्य तापसैः सह ॥६८॥
न भोगो न च कार्पण्यं न मानो न च मत्सरः ।
न दोषा द्वेषरागाद्या जितं सर्वं विशा ततः ॥६९॥
सप्तसारस्वतं तीर्थं नार्मदं त्वागमद्धि सः ।
स्नात्वा पुपूज विष्णुं श्रीकृष्णनारायणं हरिम् ॥७०॥
तथा शंभुं बाणरूपं पूजयामास सादरम् ।
हरिः प्रत्यक्षतां प्राप्य प्राह त्वं वृष एव यः ॥७१॥
तथापि सिद्धतां प्राप्तस्तपसा च विशेषतः ।
इदं विमानमारुह्य दिव्यभोगसुखं कुरु ॥७२॥
पुत्रदारस्नुषोपेतो विष्णुलोकमितो व्रज ।
धर्मः प्राह तदा विष्णो ! ऋषयो नर्मदातटे ॥७३॥
अत्र दशसहस्राणि विद्यन्ते ये तपोधनाः ।
ते सर्वे मम तपसा विष्णुलोकं प्रयान्तु वै ॥७४॥
इमं वरमहं मन्ये श्रीहरेरेव नान्यतः ।
श्रुत्वैवं ऋषयः सर्वे साऽभिमानाऽहमान्विताः ॥७५॥
तिरश्चक्रुर्हि तं वैश्यं प्रोचुश्चापि परस्परम् ।
महतां भूसुराणां वै वैश्यः करोति लाघवम् ॥७६॥
वैश्यस्य तपसा विप्रा याता वैकुण्ठमित्यपि ।
लोके दर्शयितुं सोऽयं वरं वृणोति शाठ्यतः ॥७७॥
वैश्यस्य श्रेष्ठतां लोके ज्ञापयन् स वृणोति हि ।
न वयं तपसा तस्य गच्छामो वै दिवं प्रति ॥७८॥
ब्राह्मणस्याऽवमानेन वैश्योऽय व तरिष्यति ।
इत्युक्त्वा ऋषयस्तं च वैश्यं प्राह प्रयाहि भोः ॥७९॥
वैश्यधर्मे गृहाणापि कृषिं कुरु गृहे स्थितः ।
न योग्यस्त्वं तपः कर्तुं जात्यभिमानवानसि ॥८०॥
गच्छ गच्छ गृहं मा चाऽऽयाहि त्वं वै द्विजान्तिकम् ।
इत्युक्तः स द्विजान् दृष्ट्वा साभिमानक्रुधान्वितान् ॥८१॥
विमुक्तनामकं विप्रं प्रजगाद स कर्षुकः ।
ब्राह्मणानां परो धर्मः क्रोधाभावः प्रशान्तता ॥८२॥
अहंममताराहित्यं तद्वान् यः स च भूसुरः ।
क्रोधाहंममतायुक्तो ब्राह्मणो नैव विद्यते ॥८३॥
तादृशस्य तपः सर्वं श्राद्धं वाऽपि च निष्फलम् ।
दैवतैरपि दुर्ज्ञेयो गहनो जातिनिर्णयः ॥८४॥
ब्रह्मकर्मसमाचारं वैश्यं ब्राह्मणमुच्यते ।
ब्रह्मकर्मविहीनं च विप्रं वैश्यं समुच्यते ॥८५॥
निष्ठुरं निर्घृणं क्रूरं कृतघ्नं दीर्घकोपिनम् ।
द्विजं विवादशूरं च दूरतः परिवर्जयेत् ॥८६॥
इत्युक्त्वा वैश्यवर्यः स विरराम क्षणं ततः ।
विप्राः पप्रच्छुरेनं त्वं कोऽसि वैश्यस्वरूपधृक् ॥८७॥
वैश्यः प्राह च धर्मोऽस्मि परीक्षार्थं समागतः ।
कीदृशा ब्राह्मणा यूयं नर्मदातटवासिनः ॥८८॥
अहंममते विसृज्य तपः कुरुत चोत्तमम् ।
रोषं तु सर्वथा त्यक्त्वा भजध्वं परमेश्वरम् ॥८९॥
एवं ब्रह्मव्रतेनाऽत्र यूयं मुक्तिं गमिष्यथ ।
अथ ते शमयामासुर्धर्माद् दोषान्निजाँस्ततः ॥९०॥
धर्मं प्रपूजयामासुर्निर्दोषाः ऋषयोऽभवन् ।
अथ दिव्यविमानानि त्वागतानि वृषान्तिके ॥९१॥
वृषाज्ञया हि ते सर्वे समारुह्याऽघमर्षणः ।
अपि धर्मेण सार्धं च विष्णुना रमया सह ॥९२॥
सप्तसारस्वतं नत्वा ययुर्वैकुण्ठमेव च ।
श्रवणात्पठनाच्चापि भुक्तिमुक्तिप्रदं हि तत् ॥९३॥
इत्युक्त्वा शंकरो देव्यै विरराम च पद्मजे ! ।
मया तुभ्यं परं तीर्थं सप्तसारस्वतात्मकम् ॥९४॥

कथितं मुक्तिदं मोक्षप्रदं स्नातुर्विशेषतः ।
अनेकयज्ञफलदं पुत्रदारधनप्रदम् ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मत्स्यातापी संगम-कलहंसेश बृहतीनर्मदासंगमशिवनेत्र-हृद-लक्षमेध-सतसारस्वतादितीर्थानि सेतिहास-चमत्कारभूतानि निरूपितानीतिनामाऽष्टपञ्चाशदधिकपञ्चशततमोऽध्यायः ॥ ५५८ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततः शंभुः पार्वतीं प्राह चोत्तमम् ।
शाण्डिल्याकल्पगायोगं तीर्थं चान्यद् वदामि ते ॥ १ ॥
यत्र जन्म सहस्राऽर्जुनाख्यस्य भूपतेरभूत् ।
तत्र शाडिल्यकौण्डिन्यमाण्डव्या न्यवसन् मुदा ॥ २ ॥
शाण्डिल्यस्याऽऽश्रमस्त्वास्ते शाण्डिल्यारेविकायुजि ।
शाण्डिल्यपुरमित्येवं प्रसिद्धं तत्पुराऽभवत् ॥ ३ ॥
निशायां मूषकः कश्चिद्टमान इतस्ततः ।
प्रभक्षितो बिडालेन तावद् वृकः समागतः ॥ ४ ॥
किञ्चिच्छेषं मूषकं तं त्यक्त्वा दुद्राव चाखुभुक् ।
तदा मेघे प्रसञ्जाते प्रवाहस्तत्र निर्गतः ॥ ५ ॥
अस्थिप्रवहणं त्वाखोः प्रसंजातं जले ततः ।
तीर्थस्याऽस्य प्रभावेण यक्षोऽभवत् स उन्दुरुः ॥ ६ ॥
बृहद्वृन्दसमाख्यातो यक्षायुतसमावृतः ।
हंसयुक्तविमानेन यक्षेश्वरो दिवं ययौ ॥ ७ ॥
यक्षलोकेऽधिपो जातस्तीर्थस्यैव प्रभावतः ।
ततो गच्छेन्महातीर्थं कुब्जारेवासमागमम् ॥ ८ ॥
रन्तिदेवेन वै यत्र यज्ञः कृतोऽतिशोभनः ।
अवन्ध्याया नृपश्चासीद् रन्तिदेवाऽभिधः पुरा ॥ ९ ॥
वसिष्ठस्याऽनुमत्या स रेवातीरे क्रतुं शुभम् ।
कर्तुं चाज्ञापयामास भृत्यामात्यपुरोधसः ॥१०॥
यज्ञोपस्कारसंभारः शीघ्रमेव विधीयताम् ।
धेनूश्च दशलक्षाणि सवत्साः सुपयस्विनीः ॥११॥
हेमभारैर्भूषिताश्च कामदुघाः सुमंगलाः ।
आनयन्तु लक्षमश्वानामयुतं सुदन्तिनाम् ॥१२॥
मणिमाणिक्यरत्नानां यत्राऽऽनन्त्यं यथा भवेत् ।
अनेकानि सहस्राणि विमानानां स्युरम्बरे ॥१३॥
पृथ्वीयानान्यनेकानि चानयन्त्वत्र तीर्थके ।
आज्ञाप्यैवं स्वयं याने व्योमगे सन्निषद्य वै ॥१४॥
नर्मदायास्तटे गत्वा सान्तःपुरपरिच्छदः ।
विशश्राम सुवर्णस्य यूपान् कुण्डाँश्च मण्डपान् ॥१५॥
कारयामास भक्ष्यांश्च भोज्यान् पक्वान्नपर्वतान् ।
कृतवान् रत्नभूषाभिर्ब्राह्मणान् समलंकृतान् ॥१६॥
यज्ञदीक्षां प्रजग्राह पत्न्या सह नराधिपः ।
यज्ञे प्रवर्तिते हव्यवाहनः सर्वगोचरः ॥१७॥
प्रत्यक्षो जगृहे हव्यं मूर्तिमान् स्वाहया सह ।
ब्रह्मशक्रादयो देवा लोकपाला मरुद्गणाः ॥१८॥
विश्वेदेवाश्च साध्याश्च वसवश्चन्द्रभास्करौ ।
सरितः सागराः शैलाः सर्वतीर्थानि चापगाः ॥१९॥
मातरः सिद्धगन्धर्वाः सयक्षोरगराक्षसाः ।
उमया सहितो रुद्रो विष्णुर्नारायणीयुतः ॥२०॥
आययुर्यज्ञभागाँश्च तेषां पृथगकल्पयत् ।
वेदध्वनिं प्रवृत्तं च श्रुत्वा दानवपुंगवाः ॥२१॥
महाबाहुसुबाह्वाद्याः क्रौंचपुरनिवासिनः ।
आययुर्नर्मदातीरे सभृत्यबलवाहनाः ॥२२॥
प्रचक्रिरे क्रतौ विघ्नं दक्षिणायां दिशि स्थिताः ।
उवाच रन्तिदेवं तु ब्रह्मा भयात् प्रविह्वलः ॥२३॥
विघ्नं वारय राजेन्द्र ! यज्ञः क्रमाद् यथा भवेत् ।
ब्रह्मिष्ठो रन्तिदेवस्तच्छ्रुत्वोवाच हरिं स्मरन् ॥२४॥
यदि मे विद्यते सत्यं ब्रह्मभक्तौ परा मतिः ।
दैत्यराक्षसदुष्टाद्या लयं यान्तु विना मृधम् ॥२५॥
एवमुक्त्वा स राजर्षिः सस्मार विष्णुमीश्वरम् ।
शंखचक्रगदापद्मधारी साक्षादुपागतः ॥२६॥
विष्णोश्चक्रं कुशाग्रेऽत्र तिष्ठतु राक्षसार्दनम् ।
एवमुक्त्वा नार्मदे सुजले त्वाप्लाव्य तं कुशम् ॥२७॥
प्रेषयामास रक्षार्थं दक्षिणस्यां दिशि ध्रुवम् ।
उत्तरेऽपि तथा चान्यत् प्रेषयामास दर्भकम् ॥२८॥
देवमन्त्रेण घोरेण रक्षां विधाय सर्वतः ।
पूर्वस्यां पश्चिमायां च प्रेषयामास वै कुशौ ॥२९॥
मूर्तिमन्तस्तु ते जाताश्चक्रुर्दुर्गान् समन्ततः ।
अग्निना ज्वलमानाश्च राक्षसानां प्रदाहकाः ॥३०॥
दुर्गास्ते व्योमचारा वै यत्र यत्र च राक्षसाः ।
तत्र तत्राऽभिगत्वैव ददहुस्तान् सहस्रशः ॥३१॥
अथाऽग्नौ च जुहावाऽयं राजा बिल्वाऽऽम्रवेतसम् ।
तस्मात् समुत्थितं लिंगं ज्वलत्कालानलप्रभम् ॥३२॥
नेमुर्यज्ञीयभूमिस्थाः सर्वे कुण्डस्थमीश्वरम् ।
रन्तिदेवस्य वै सर्वे चमत्कारं विलोक्य च ॥३३॥

धन्यवादान् ददुस्तत्र देवाद्या अपि भावतः ।
दानवा दुद्रुवुः सर्वे भयाद् दर्भानलोत्थितात् ॥३४॥
क्रौंचद्वीपं ययुर्यज्ञः संपूर्णतां गतस्तथा ।
लिंगं बिल्वाम्रकं नत्वा पूजयित्वा सुरादयः ॥३५॥
ययुः स्वर्गं प्रशंसन्तो नृपं तीर्थं चमत्कृतिम् ।
साकेतं च ययौ यानं समारुह्य च भूपतिः ॥३६॥

तत्र तीर्थे कृतस्नाना यान्ति ब्रह्म सनातनम् ।
दर्शनादपि पापानां प्रक्षालकं प्रमोक्षदम् ॥३७॥
कुब्जायां चाऽपरं तीर्थं हारिकेशाख्यमस्त्यपि ।
हरिकेश इतिख्यातः शालग्रामे द्विजोऽभवत् ॥३८॥
शिलोञ्छवृत्तिर्धर्मात्मा तस्य पत्नी पतिव्रता ।
सुव्रताख्याऽभवद् यस्यां शतं पुत्राः प्रजज्ञिरे ॥३९॥
कपिलापुरमाश्रित्य हरिकेशो दिवानिशम् ।
शिलानामर्जनेनैव प्रस्थमन्नं समृच्छति ॥४०॥

बाला अपि च ते पुत्रा यथाकथंचिदेव तु ।
वर्तयन्ति प्रभिक्षाद्यैः पूर्णमन्नं न यन्ति हि ॥४१॥
स्थितिं तु तादृशीं दृष्ट्वा माता शुशोच विह्वला ।
पतिं प्राह सुदुःखार्ता गर्हमाणां निजां दशाम् ॥४२॥
वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः ।
भरणीयाः प्रयत्नेन धर्म एषः सनातनः ॥४३॥
तस्मात् प्रतिग्रहं कृत्वा भर्तव्यं स्वकुटुम्बकम् ।
पुत्रेण लोकं जयति पुत्रेण सुखमेधते ॥४४॥

पुत्रेण सुखमाप्नोति पितॄणां च सुतो गतिः ।
अम्बरीषो महाराजश्चायोध्याधिपतिः किल ॥४५॥
प्रकरोति क्रतुं याहि कुरुक्षेत्रे द्विजोत्तम ।
गताश्च ब्राह्मणास्तत्र प्रतिग्रहजिघृक्षया ॥४६॥
गाः काञ्चनं धनं लब्धं शालग्रामनिवासिभिः ।
श्रुत्वैवं भामिनीवाक्यं गृहीत्वा च कुटुम्बकम् ॥४७॥
कुरुक्षेत्रे ययौ यज्ञे प्रविष्टश्चाऽध्वरे द्विजः ।
अम्बरीषो विलोक्यैनं च्चार्घपाद्यैरपूजयत् ॥४८॥

उवाचाऽऽतिथ्यरूपेण याचयस्व यथेप्सितम् ।
विप्रः प्राह धनं वर्षशतं यावद्भवेन्मम ॥४९॥
पर्याप्तं सकुटुम्बस्य तावद् देहि नृपोत्तम ।
धेनूर्देहि प्रतिपुत्रं हेमभारपरिष्कृताः ॥५०॥
आभरणानि वस्त्राणि क्षेत्रोद्यानगृहाणि च ।
दारिद्र्यं मे यथा न स्यात्तथा भिक्षां प्रदेहि मे ॥५१॥
अम्बरीषः प्रसन्नोऽति ददौ सर्वं यथेप्सितम् ।
शालग्रामे शुभे क्षेत्रे विप्रो राजेव मोदते ॥५२॥

कालान्तरे ततः प्राप्ते विप्रो मृत्युवशं ययौ ।
मरुदेशे निरुदेके ब्रह्मरक्षस्त्वमागतः ॥५३॥
राजप्रतिग्रहाच्चापि तथा ब्राह्मण्यलोपतः ।
विषयवासनावत्त्वाद् धनादिवासनादिना ॥५४॥
इह वृक्षाः प्ररोहन्ति दावदग्धा घनागमे ।
राजप्रतिग्रहदग्धाः प्ररोहन्ति न कर्हिचित् ॥५५॥
नरके रौरवे घोरे तस्य वै पतनं भवेत् ।
विप्रोऽयं राक्षसः प्रेतो भूत्वा सुतान् प्रियां तथा ॥५६॥
आगत्याऽऽगत्य च गृहे रुदन् प्राह पुनः पुनः ।
ममोद्धारं प्रकुर्वन्तु राक्षसोऽहं प्रतिग्रहात् ॥५७॥
जातोऽस्मि मे महानारायणबलिं ददत्वपि ।
ततस्तस्य सुतैर्नारायणबलिः प्रसंकृतः ॥५८॥
व्योमवाण्या सुतेभ्यश्च कथितं यान्तु नर्मदाम् ।
कुब्जायाः संगमे तत्र बिल्वाम्रके सुतीर्थके ॥५९॥

तत्र स्नात्वा भवत्येव ब्रह्मरक्षोविमोक्षणम् ।
लभते ब्रह्मलोकं च पापतापप्रणाशनात् ॥६०॥
श्रुत्वा साध्वी सुतैर्युक्ता ययौ बिल्वाम्रकस्थलम् ।
राक्षसोऽपि कुटुम्बेन सहाऽदृश्यो ययौ तदा ॥६१॥
सम्प्राप्तः सुमुदायुक्तः कुब्जारेवासमागमम् ।
स्नात्वा शंभुं प्रपूज्यैव नारायणं समर्च्य च ॥६२॥
ध्याने तस्थुस्तदा व्योम्ना विमानं त्वाययौ शुभम् ।
विष्णुपार्षदयुक्तं च समारुह्य महोज्ज्वलम् ॥६३॥

तत्क्षणाद् दिव्यदेहास्ते ब्रह्मलोकं तदा ययुः ।
एवं कुब्जासंगमस्य रेवायां पापनाशनम् ॥६४॥
मोक्षणं हरिकेशस्य जातं कुटुम्बिनस्तदा ।
सर्वे ययुर्हि ते मुक्तिं तथा यास्यन्ति मानवाः ॥६५॥
अथ सुवर्णनाम्नश्च गन्धर्वस्य प्रिया सती ।
हेमगर्भेतिविख्याता पुत्री तस्याः प्रसुन्दरी ॥६६॥
सुकामा नामतः सा च धनदेन विवाहिता ।
तस्यां पुत्रः केतुमालो राजा वैद्याधरे पुरे ॥६७॥

बभूव तस्य पत्नी च शशिरेखेतिनामतः ।
द्वे कन्ये जनयामास रतिं प्रीतिं मनोरमे ॥६८॥
ददौ स कामदेवाय पाणिग्रहणपूर्वकम् ।
अन्याश्च कन्यका बह्वीर्दासीरूपा तदा ददौ ॥६९॥
ताश्च कन्या नियमं वै जगृहुः शिवपूजनम् ।
कृत्वा जलादिकं ग्राह्यं नान्यथा तु कदाचन ॥७०॥
अथैकदा ययुः सर्वा देवनद्यां विगाहितुम् ।
चित्रांगदश्च गन्धर्वो दृष्ट्वा तास्तत्र चाययौ ॥७१॥

कामरूपधरो भूत्वा रूपानुरूपशोभितः ।
सस्नौ जले यदा तस्मिन् मोहितास्तास्तु कन्यकाः ॥७२॥
रेमुस्तेनैव साकं च विसस्मरुर्हरार्चनम् ।
एवं वै दिवसे याते सायं संस्मृत्य शंकरम् ॥७३॥
आययुः पूजनार्थं च भुक्त्वा पीत्वाऽन्नवारि च ।
पार्वती कुपिता दृष्ट्वा शशाप सायमेव ताः ॥७४॥
धर्मस्य नियमं हित्वा चाऽपूज्य शंकरं च माम् ।
जलान्नं भुक्तवत्यश्च ततो दोषान्विताः खलु ॥७५॥
मम शापेन वै सर्वा भवन्तु कुब्जिकास्तथा ।
वामन्यश्च मर्त्यलोके हीनांगा वनभील्लिकाः ॥७६॥
एवं शप्तास्तु ताः सर्वा मर्त्यलोकं समागमन् ।
बभ्रमुरता वनेऽरण्ये भील्लिकाः शापदुःखिताः ॥७७॥
एकदा च कुबेरो वै तेन मार्गेण चाम्बरे ।
निर्गतो दिव्ययानेन दृष्ट्वा ता दुःखितास्ततः ॥७८॥
ययौ शीघ्रं पार्वतीं च प्रति कैलासमेव सः ।
नत्वा रुरोद च तदा सती प्राह कथं त्विह ॥७९॥
रोदिषि वद मे त्वत्र कारणं प्रकरोमि यत् ।
कुबेरः कन्यकाशापनिर्वृत्तिं प्रार्थयत् तदा ॥८०॥
श्रुत्वैतत् पार्वती प्राह यान्तु सर्वा हि नर्मदाम् ।
यज्ञपाकाश्रमं गत्वा बिल्वाम्रकं सुतीर्थकम् ॥८१॥
कृत्वा शापात्ततो मुक्ता भविष्यन्ति द्रुतं तु ताः ।
यत्र वै संगमे कुब्जा गान्धर्व्यो भील्लयोनितः ॥८२॥
मुक्ताः स्नात्वा जलं पीत्वा कुब्जातीर्थं तदुच्यते ।
कुब्जानदी च सा प्रोक्ता नर्मदासंगता च या ॥८३॥
तत्र स्नाताः शापमुक्ता गान्धर्व्यो यानसंस्थिताः ।
ययुः सर्वाः कुबेरोक्त्या स्वर्गं पुनर्निजालयम् ॥८४॥
अनेके जलपानाद्यैस्तत्र सिद्धिं परां गताः ।
श्रवणात् कीर्तनाद् वापि मुच्यन्ते भवबन्धनात् ॥८५॥
अथान्यत्तत्र वै तीर्थं माहेश्वरपुरात्मकम् ।
रौद्रं वारुणमासाद्य क्रोशमात्रप्रमाणतः ॥८६॥
शिवक्षेत्रेऽत्र ये स्नाताः पशवः पक्षिणोऽपि च ।
अपि कीटपतंगाद्या मृता यान्ति दिवं परम् ॥८७॥
सालंकायनमुनिना कृतो यज्ञो महान् पुरा ।
अयोध्याधिपतिः सालंकायनाऽऽख्यो नृपोऽभवत् ॥८८॥
अनावृष्टौ प्रजातायां मार्कण्डेयं महामुनिम् ।
पर्यपृच्छत् कारणं च मार्कण्डेयो जगाद तम् ॥८९॥
गंगासागरसंभेदे तव राज्ये नराधिप ।
अधिकारविहीना वै सकामाः फलवाञ्छनाः ॥९०॥
साम्प्रतं सप्तचाण्डाला ऊर्ध्वपादा अधःशिखाः ।
कणधूमं पिबन्त्येव तपः कुर्वन्ति तेन वै ॥९१॥
तपस्यनधिकाराणां पापं तपसि जायते ।
तद्दशांशस्त्वयि राजन्नास्ते ततोऽप्यवग्रहः ॥९२॥
तस्मात्तान् दण्डय राजन्! तपोरोधं च कारय ।
यज्ञं च नार्मदे क्षेत्रे समाचर महामखम् ॥९३॥
वृष्टिस्तेन च सर्वत्र भविष्यति न संशयः ।
मुच्यतां पापदोषेण राज्यं स्वर्गमवाप्स्यसि ॥९४॥
श्रुत्वा राजा त्वादिदेश भृत्यान् सम्भारसिद्धये ।
सप्तरात्राभ्यन्तरतो यथा यज्ञः प्रवर्तते ॥९५॥
राजा राज्यप्रजाश्चाप्यमात्या राजकुमारकाः ।
ऋषयो मुनयो विप्रा राज्ञ्यो देवाः सुरेश्वराः ॥९६॥
आययुस्तत्र वै तीरे रेवायाश्च निमन्त्रिताः ।
अर्बुदाऽर्बुदसंख्याकाः स्वर्णमुद्राश्च संददौ ॥९७॥
कोटिगोगजवाज्यादिदानं चकार भूपतिः ।
हिरण्मया महास्तम्भाः सुवाद्या अपि कानकाः ॥९८॥
भक्ष्यभोज्यरसाद्याश्चाऽपूर्वा दिव्यरसाऽन्विताः ।
वर्तन्ते तत्र भूभागे विष्णुः साक्षात् समाययौ ॥९९॥
रुद्रश्चाग्निः स्वयं ब्रह्मा तत्तद्देव्यः समाययुः ।
यज्ञो निर्वर्तितः पूर्णोऽवभृथं नर्मदाजले ॥१००॥
चक्रुः सर्वे महावृष्टिः संजाता क्षितिमण्डले ।
देवाद्याः पूजिता राज्ञा ब्राह्मणाश्च प्रतोषिताः ॥१०१॥
तादृशं तन्महत्तीर्थं यज्ञीयं नार्मदं शुभम् ।
सञ्जातं तापसा राज्ञा निरुद्धास्तपसस्तथा ॥१०२॥
ये चाण्डालास्तपस्यासन् तेन वृष्टिर्बभूव च ।
इत्येवं च क्रतुं कृत्वा ययुः स्वं स्वं निकेतनम् ॥१०३॥
तत आरभ्य तत्तीर्थं यज्ञतीर्थं हि कथ्यते ।
इत्येवं शंकरः प्राह पार्वतीं तीर्थमण्डलम् ॥१०४॥
मयोदितं च ते लक्ष्मि! पापतापप्रणाशनम् ।
पठनाच्छ्रवणाच्चापि मुक्तिदं नार्मदं जलम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने शाण्डिल्याकल्पगातीर्थरन्तिदेवतीर्थहरिकेशतीर्थाऽम्बरीष-तीर्थबिल्वाम्रकतीर्थसालंकायनतीर्थादीनि सचमत्कार-निरूपितानीतिनामैकोनषष्ट्यधिकपञ्चशततमोऽध्यायः॥५५९॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! तथाऽन्यानि यानि तीर्थानि शंभुना ।
पार्वत्यै चाभिधत्तानि कथयामि समासतः ॥ १ ॥

चमत्कारपुरे नागनदीतीरे पुराऽरुणिः ।
ऋषिरास तदा तत्र कश्चिद्व्याधः समागतः ॥ २ ॥
ऋषेर्योगाच्छुद्धमना व्याधस्तपश्चचार ह ।
द्विजत्वं कर्मणा प्राप्तो नाम्ना सत्यतपा ह्यभूत् ॥ ३ ॥
स तु सत्यतपा दुर्वाससा चाशीःसुयोजितः ।
ययौ कुब्जानर्मदायाः संगमं स्नानकारणात् ॥ ४ ॥
स्नात्वा पीत्वा जलं पुण्ययुतो हिमाचलं ययौ ।
हिमाद्रेरुत्तरे पादे पुष्पभद्रानदीतटे ॥ ५ ॥
चित्रशिलां समध्यास्य भद्रन्यग्रोधसन्निधौ ।
तपश्चकार तत्राऽपि भजन् वै श्रीनरायणम् ॥ ६ ॥
स कदाचित् कुठारेण चिच्छेद समिधः किल ।
चिच्छेद चांगुलीमेकां वामतर्जनिकां ततः ॥ ७ ॥
भस्मचूर्णं विनिष्क्रान्तं न मांसं न च लोहितम् ।
अंगुली सन्धिता तेन पूर्ववच्चाऽभवत्तदा ॥ ८ ॥
एतदाश्चर्यमेकेन किन्नरेण त्रिलोकितम् ।
आकाशे गच्छता तेन किन्नरेण दिवं ततः ॥ ९ ॥
गत्वा त्विन्द्रसभायां चाऽपूर्वमाश्चर्यमीरितम् ।
तद्यथा दृष्टमाश्चर्यं मया तापसदर्शितम् ॥१०॥
पुष्पभद्रानदीतीरे सत्यतपास्तु तापसः ।
तपसा शुष्कदेहश्च देहे भस्मैव वर्तते ॥११॥
तच्छ्रुत्वा सहसा शक्रोऽनुजं विष्णुं समब्रवीत् ।
आगच्छ विष्णो गच्छामो हिमवत्पार्श्वमुत्तमम् ॥१२॥
तत्राश्चर्यमपूर्वं मे कथितं किन्नरेण वै ।
एवमुक्तस्ततो विष्णुर्वाराहरूपमग्रहीत् ॥१३॥
मृगयुश्च तथैवेन्द्रो जग्मतुस्तमृषिं प्रति ।
विष्णुर्वाराहरूपेण ऋषिदृष्टिपथे स्थितः ॥१४॥
भूत्वा दृश्योऽप्यदृश्योऽभूत्पुनरेव च दृश्यते ।
तावदिन्द्रो धनुष्पाणिस्तीक्ष्णसायकधृग् वने ॥१५॥
आगत्य सत्यतपसमृषिमेनमुवाच ह ।
भगवन्निह दृष्टस्ते वराहः पृथुलो महान् ॥१६॥
येन तं हन्मि भृत्यानां पोषणाय महामुने ।
श्रुत्वा मुनिश्चकितः सन् चिन्तयामास तत्क्षणात् ॥१७॥
यदि तं दर्शयाम्यस्मै वराहं स हनिष्यति ।
नो चेत् कुटुम्बः क्षुधया सीदत्यस्य न संशयः ॥१८॥
उभयथापि मे पापं भवत्येव न संशयः ।
वराहः शरणं यातो ममाश्रमेऽवनाय वै ॥१९॥
व्याधश्चापि हि मां प्राप्तो वीक्ष्य मां सत्यवादिनम् ।
असत्यवचने दोषो विश्वासघातनं परम् ॥२०॥
अन्यतरस्य हिंसा च दूषणं सर्वथा भयम् ।
एवं गतेऽत्र किं वाच्यमथाऽसौ चिन्तयन् हरिम् ॥२१॥
क्षणं साक्षिणि धैर्यं च स्थैर्यं प्राप तदा द्रुतम् ।
रक्षात्मिका सुबुद्धिश्च क्षणात्तस्य व्यजायत ॥२२॥
नेत्रं पश्यति नो वक्ति वक्ति जिह्वा न पश्यति ।
पश्यत्यन्यो वदत्यन्यो द्वयोर्नास्त्येककार्यता ॥२३॥
द्रष्टा मूको वक्ता चान्धः को दद्यादुत्तरं वद ।
एवं श्रुत्वा परं तुष्टाविन्द्रविष्णू क्षणान्तरे ॥२४॥
स्वरूपे दर्शयन्तौ च वाक्यमेतत् समूचतुः ।
ब्रूहि तुष्टौ च नौ तेऽत्र वृणु चैकं वरं परम् ॥२५॥
तच्छ्रुत्वाऽसौ सत्यतपा उवाच संप्रसन्नहृत् ।
नान्यो वरः पृथिव्यां मे परो विष्णोस्तु दर्शनात् ॥२६॥
येन कृतार्थता मेऽस्ति दुर्लभं तव दर्शनम् ।
तथाप्यत्र पुष्पभद्राजले वटान्तिके तु ये ॥२७॥
स्नात्वा ध्यात्वा हरिं स्मृत्वा वसेयुर्मासमेककम् ।
तेषां पापानि नश्यन्तां मुक्तिं तेभ्यः प्रदेह्यपि ॥२८॥
तथेत्युक्त्वा तु तौ देवौ दत्वा तस्य वरं तथा ।
विमानस्थौ व्योममार्गे तिष्ठतस्तावदेव च ॥२९॥
गुरुस्तस्य समायातश्चारुणिः समदृश्यत ।
दुर्वासाश्च समायातः स्मृतौ सत्येन वै तदा ॥३०॥
पूजितौ सत्यतपसा ज्ञात्वा शिष्यं कृतार्थकम् ।
सिद्धं च तपसा दग्धकिल्बिषं पुरतः स्थितम् ॥३१॥
आरुणिः प्राह सिद्धोऽसि ब्रह्मभूतोऽसि सर्वथा ।
इदानीमात्मना सार्धं मुक्तिकालो मतोऽस्ति ते ॥३२॥
उत्तिष्ठाऽऽगम्यतां पुत्र मया सार्धं विमानके ।
नारायणेन चेन्द्रेण तथा दुर्वाससा सह ॥३३॥
यास्यामो नार्मदं तीर्थं परं कुब्जाम्रकं शुभम् ।
एवमुक्त्वा चारुणिश्चात्रेयः सत्यतपास्त्रयः ॥३४॥
ध्यात्वा नारायणं देवं चारुरुहुर्विमानकम् ।
भक्तानां वाञ्छया नारायणश्चेन्द्रोऽपि नार्मदम् ॥३५॥
याज्ञीयं तीर्थमासाद्य स्नात्वा स्वर्गं ययुस्ततः ।
ततो मुक्तिं जगामाऽसौ सत्यतपाः परं पदम् ॥३६॥
अन्ये चिरंजीविनश्च स्वस्वस्थानानि वै ययुः ।
दुर्वासाद्यास्तु कैलासादिकं यच्छाश्वतं मतम् ॥३७॥
अथाऽन्यत्ते प्रवदामि तीर्थं वै नार्मदे जले ।
मण्डपेश्वरसंज्ञं च तीर्थं तत्र हि राजते ॥३८॥
यत्र स्नात्वा तनुं त्यक्त्वा राजा वैद्याधरे पुरे ।
दशवर्षसहस्राणि भवत्येव न संशयः ॥३९॥

मानसौ ब्रह्मणः पुत्रौ बादरायणशाकटौ ।
वनस्थौ च प्रति राजा ह्यजापालो ययौ क्वचित् ॥४०॥
अवध्याधिपतिर्नत्वा पप्रच्छ मधुरम् ऋषी ।
पितृणां तारणार्थाय दानं देयं मयाऽत्र वै ॥४१॥
के ग्रहीष्यन्ति ऋषयः समायान्तु मदन्तिकम् ।
तदा द्वौ वर्जयित्वा तु बादरायणशाकटौ ॥४२॥
अन्ये राज्ञा प्रदत्तानि दानानि जगृहुस्तदा ।
गजानां दशसाहस्रं घण्टाभरणभूषितम् ॥४३॥
प्रादाद् विप्रेभ्यश्च धनं मठान् हेममयाँस्तथा ।
कलंजरगिरिं राजा चकार त्रिःप्रदक्षिणम् ॥४४॥
नमस्कृत्वा ऋषीन् सर्वान् जगाम स्वपुरं प्रति ।
गते तस्मिन् महीपाले ऋषयो धनमोहिताः ॥४५॥
सुखं च परमं प्राप्ता राजद्रव्येण राजसाः ।
तपसः पतिता भोगे सक्ता बभूवुरेव ते ॥४६॥
पुण्यक्षयेण च मृताः ऋते बादरशाकटौ ।
राजप्रतिग्रहो घोरो रौद्रः पापो भयावरः ॥४७॥
ऋते ब्रह्मस्वरूपं वै कः सोढुं शक्तिमान् भवेत् ।
कामक्रोधपरा भूत्वा मृतास्ते ब्राह्मणास्ततः ॥४८॥
श्वयोनिं समनुप्राप्ता जाता अमेध्यभक्षकाः ।
अथ प्रतिग्रहयुक्तविप्रेषु वासकारणात् ॥४९॥
संगदोषेण जातौ श्वमुखौ बादरशाकटौ ।
दृष्ट्वाऽऽननं श्वतुल्यं च चिन्तयामासतुश्च तौ ॥५०॥
सगदोषेण वै पापं लग्नं राजप्रतिग्रहे ।
इति सञ्चिन्त्य तौ सत्यं ययतुः परमेष्ठिनम् ॥५१॥
अभिवाद्य प्राहतुश्च वृत्तान्तं विकृताननौ ।
श्रुत्वा ब्रह्मा निष्कृतिं च प्राह वै नार्मदे जले ॥५२॥
स्नानेन शुद्धिर्भविता यान्तु वै मण्डपेश्वरम् ।
पितामहवचः श्रुत्वा बादरायणशाकटौ ॥५३॥
श्वभिः ऋषिभिः सहितौ नर्मदां ययतुस्तदा ।
स्नात्वा पीत्वा जलं तत्र पापहीनास्तु तेऽनघाः ॥५४॥
ययुः स्वर्गे दिव्ययानैरेवं तीर्थं तदुत्तमम् ।
श्रवणात्कीर्तनाच्चापि हयमेधफलं भवेत् ॥५५॥
ततो गच्छेत् परं तीर्थं श्वेतकिंशुकसंज्ञकम् ।
नर्मदादन्तिवनिकासंगमे स्नानमाचरेत् ॥५६॥
तीर्थे कपिशिलाख्यं च कुर्यात् ततः शुभप्रदम् ।
शशभीनर्मदायोगं तीर्थं गच्छेत् ततः परम् ॥५७॥
राजतीर्थं ततो गच्छेद् रामलक्ष्मणसेवितम् ।
उत्तीर्य नर्मदां रामो ययौ वनान्तरे पुरा ॥५८॥
दशाश्वमेधतीर्थे च ततो गच्छेत्परं शुभम् ।
पिपीलिकोद्धारतीर्थे ततो गच्छेत् प्रमुक्तिदम् ॥५९॥
वन्ध्यारेवासमायोगं ततो गच्छेच्छुभप्रदम् ।
शुक्लतीर्थे ततो गच्छेत् स्वर्गमोक्षप्रदं वरम् ॥६०॥
रासभीनर्मदाभेदे स्नात्वा मोक्षो भवेद् ध्रुवम् ।
हविर्धानस्तु राजर्षिः समर्थोऽभूत् पुरा युगे ॥६१॥
आत्रेयस्य सुतश्चासीत् हरिकेशाभिधानकः ।
अग्निपुत्री सुतेजाश्च पाणिग्रहणधर्मतः ॥६२॥
हविर्धानाय दत्ता सा सुतेजानामिका ततः ।
हविर्धानस्तु राजर्षिः ऋतुं बुद्ध्वा गतो हि ताम् ॥६३॥
कदाचित्तु युवा तत्राऽऽययौ वै हरिकेशकः ।
सोऽपि वै कामभावेन तस्या जग्राह वै करम् ॥६४॥
अग्निहोत्रस्य शालायां जग्राह कामधर्मतः ।
हरिकेशस्तया सार्कं रेमे यथेष्टकामतः ॥६५॥
हविर्धानश्च ददृशे युगलं सुरते स्थितम् ।
आसीद् विषण्णवदनो ह्यवध्यो ब्राह्मणो यतः ॥६६॥
पत्नी चापि ह्यवध्या वै यतः स्त्रीजातिरेव सा ।
विचार्येत्थं शनैर्विप्रं हविर्धान उवाच ह ॥६७॥
मातरं गुरुपत्नीं च स्वसारं च सुतां तथा ।
गत्वा तु प्रविशेदग्निं ततः शुद्ध्यति मानवः ॥६८॥
गुरुं च गुरुपुत्रं च गत्वा स्त्री संविशेच्चिताम् ।
एवं कर्तुं समर्थौ न भवन्तौ भवतो यतः ॥६९॥
गर्दभस्त्वं भव विप्र सुतेजा गर्दभी भव ।
वर्षशतं तथाऽरण्ये जातौ तौ गर्दभौ ततः ॥७०॥
जातिस्मरौ कदाचित्तावगस्त्याऽश्रममीयतुः ।
पप्रच्छतुश्च शापस्य निवृत्त्यर्थं तपो व्रतम् ॥७१॥
अगस्त्यः प्राह यातं वै हविर्धानं प्रति ह्युभौ ।
तौ ततश्च हविर्धानाश्रमं ययतुरादरात् ॥७२॥
क्षमां याचितवन्तौ च नेमतुः पादयोस्तदा ।
हविर्धानश्च तौ प्राह यातं वै नर्मदातटम् ॥७३॥
स्नात्वा पीत्वा जलं तस्यास्तपसा क्षीणकल्मषौ ।
यास्यथः परमां मुक्तिं फलं मानुषजन्मनः ॥७४॥
एवमुक्तौ ययतुश्च नर्मदां चेरतुस्तपः ।
शुद्धौ तौ गर्दभीं योनिं त्यक्त्वा दिव्यौ बभूवतुः ॥७५॥
कामिकं यानमारूढौ सर्वालंकारभूषितौ ।
ययतुस्तौ दिवं तत्र न्युषतुर्युगसप्ततिः ॥७६॥
अथाऽन्ते ययतुः श्रीमन्नारायणपदं च तौ ।
तत्र तीर्थे हरिकेशं सुतेजस्कं प्रमोक्षदम् ॥७७॥

हविर्धानेश्वरं लिंगं रेवागर्दभीसंगमे ।
वर्तते परमं पुण्यं दर्शनात् पापनाशनम् ॥७८॥
ततो गच्छेत् करमर्दातीर्थे पुण्यप्रदं परम् ।
मैत्रेयस्याऽऽश्रमं राजा कुशध्वजः समाययौ ॥७९॥
नर्मदायास्तटे रम्ये श्राद्धं चकार भावतः ।
तत्र दानं ददौ राजा गवां दशाऽयुतानि वै ॥८०॥
सवत्सानां सुवर्णानां घण्टाऽऽभरणशोभिनाम् ।
भोजयित्वा ततः श्राद्धे ब्राह्मणाँस्तान्नृपोत्तमः ॥८१॥
ययौ राजा निजं गेहं विप्रास्तत्र व्यवस्थिताः ।
तान् धेनूश्चागता जग्धुं राक्षसाश्चैकदा वने ॥८२॥
धेनवो विविशुर्वारौ काश्चिद्दिवं ययुस्तदा ।
विप्रान् वै भक्षितुं तत्र दुद्रुवू राक्षसास्ततः ॥८३॥
सस्मरुर्ब्राह्मणाः कृष्णनारायणं पुमुत्तमम् ।
लक्ष्मीपतिं प्रभानाथं पार्वतीशं नरायणम् ॥८४॥
माणिकीशं च हंसेशं मञ्जुलेशं हृदिस्थितम् ।
तावद् विष्णुः समायातः शंखचक्रगदाधरः ॥८५॥
चक्रेण करमर्देन नाशयामास राक्षसान् ।
ब्राह्मणान् संररक्षापि गावस्तत्राऽऽगताः पुनः ॥८६॥
करमर्देश्वरः शंभुर्विष्णुचक्राद्विनिर्गतः ।
करमर्देश्वरं तीर्थं परं रक्षाकरं मतम् ॥८७॥
अथ कालान्तरे विष्णुर्विप्रान् गाश्च विमानके ।
आरोहयित्वा वैकुण्ठं नीतवान्मोक्षमालयम् ॥८८॥
तत्र स्नाता दिवं यान्ति मृताश्च न पुनर्भवाः ।
श्रवणात् कीर्तनाच्चापि गोसहस्रफलं भवेत् ॥८९॥
इत्याह पार्वतीं शंभुर्मया लक्ष्मि ! च ते पुरः ।
उदितं श्रीकृष्णनारायणचक्रप्रतीर्थकम् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आरुणिशिष्यसत्यतपसो मोक्षः, मण्डपेश्वरतीर्थं, बादरायण-शाकटायनयोः श्वमुखतानिवृत्तिः, नर्मदादन्तिशनिका-संगमः, रासभीनर्मदातीर्थवृत्तान्तः, करमर्दतीर्थे चेत्यादिसेतिहासनिरूपणनामाषष्ट्यधिक-पञ्चशततमोऽध्यायः ॥ ५६० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकरश्च पार्वत्यै प्राह तीर्थकम् ।
ज्वालेश्वरं सुविख्यातं कथयामीह तेऽनघे ॥ १ ॥
बलेः पुत्रं त्रिपुरं वै बाणं बाणेन शंकरः ।
निजघान ततश्चास्त्रं ज्वालामालासमन्वितम् ॥ २ ॥
पतितं कल्पगावार्षु ज्वाला शान्ता तदाऽभवत् ।
ज्वालेश्वरं हि तत्प्रोक्तं पापराक्षसनाशनम् ॥ ३ ॥
अथ रेवाच्रुसंगं तीर्थं वै राजते परम् ।
नैमिषारण्यके क्षेत्रे पुराऽऽसीन्नगरी शुभा ॥ ४ ॥
हिरण्यानामतः स्वर्णसासभौमैर्गृहैर्युता ।
हिरण्यवेगानाम्नी च नदी चास्ते पुरीयुता ॥ ५ ॥
हिरण्यबाहुसंज्ञश्च राजा चेयेष वै क्रतुम् ।
नैमिषे स ऋषीन् सर्वान् पप्रच्छ यज्ञभूमिकाम् ॥ ६ ॥
ते तु प्राहुर्महाक्षेत्रं पुष्करं मखयोग्यकम् ।
तस्मिन्निष्टं हुतं सर्वं पुण्यं कोटिगुणं भवेत् ॥ ७ ॥
राजा प्राह क्रतुर्मे पुष्करे निष्पाद्यतां शुभः ।
ततो जगाम राजर्षिः पुष्करं सर्वसंभृतः ॥ ८ ॥
गवां च दशलक्षाणि सार्धं लक्षं तु वाजिनाम् ।
द्विपञ्चाशत्सहस्राणि गजेन्द्राणां रथाऽयुतम् ॥ ९ ॥
मणिमाणिक्यरत्नानि वस्त्राण्याभरणानि च ।
तेषां संख्या त्वसंख्यैव कुबेरस्य धनं यथा ॥१०॥
भक्ष्यभोज्यानि पानानि प्रवर्तन्ते दिवानिशम् ।
प्रवर्तितस्ततो यज्ञश्चाहूतो यत्र विश्वसृट् ॥११॥
शुक्रश्चापि तदाहूतो नान्ये देवा हि भूसुरैः ।
अन्यदेवैश्च किं कार्यं द्वाभ्यां सर्वं प्रपूजितम् ॥१२॥
न विष्णुश्च न चादित्या न चन्द्रो वरुणो न च ।
न रुद्रो न मरुतश्च नाऽन्ये दिश्या न पालकाः ॥१३॥
यज्ञे प्रवर्तिते यज्ञच्छिद्रान्वेषणतत्पराः ।
विघ्नं कर्तुं समायाता ह्यसुरा देवकण्टकाः ॥१४॥
सर्वशो दानवा दैत्या भूतवेतालराक्षसाः ।
पिबन्ति सोमं यज्ञांगं भक्षयन्ति स्म भूसुरान् ॥१५॥
अग्निर्विनाशितो यज्ञयूपश्च मण्डपो हतः ।
ब्रह्मा शक्रो देवताश्च वीक्ष्याऽऽकस्मिकनष्टताम् ॥१६॥
अदृश्यतां गतास्तस्मात् स्थानाद् विघ्नभयात्ततः ।
हिरण्यबाहुः कुपितो ब्राह्मणान् प्रति वै तदा ॥१७॥
यज्ञे ज्येष्ठाननाहूय देवान् विप्रा हि भिक्षुकाः ।
अपलायन्त मे यज्ञं त्यक्त्वा स्वार्थपरा यतः ॥१८॥
अथ दैत्याः प्रसंगृह्य संभारान् प्रययुर्गृहान् ।
राजाऽविचारयन्नाऽयं पौरुषस्य क्षणो मम ॥१९॥
न कोपस्य न युद्धस्य रुष्टे देवादिमण्डले ।
एकाकी हयमारुह्य सहपत्न्या व्रजाम्यहम् ॥२०॥
यत्राऽऽदित्या न न विष्णुर्न रुद्रो न च चन्द्रमाः ।
तथाऽन्ये न दिशांपालाः कथं यज्ञः सुसिद्ध्यति ॥२१॥

लोलुपा ब्राह्मणाः सर्वजिह्विर्षवो न रक्षकाः ।
किन्तु ते ध्वंसका जाता लोभमूला अशक्तकाः ॥२२॥
यदि मे विद्यते सत्यं भवन्तु ब्रह्मराक्षसाः ।
सकण्टके निरुदके प्रदेशे नष्टचेतनाः ॥२३॥
शापं श्रुत्वा च वै विप्रैः शप्तो राजाऽपि दूरतः ।
अरक्षिता त्वं यज्ञस्य क्षत्रियाधम एव च ॥२४॥
अनघानां ब्राह्मणानां शापदो भव वै खरः ।
वने द्वादशवर्षाणि बभूवुः खरराक्षसाः ॥२५॥
अथ काले गतेऽरण्ये देवर्षिर्नारदो मुनिः ।
आजगाम ददर्शैतान् खरं च राक्षसाँस्तथा ॥२६॥
खरो ननाम देवर्षिं पप्रच्छ मोक्षकारणम् ।
नारदस्तु तदा प्राह नार्मदं जलमुत्तमम् ॥२७॥
रेवाचरुकसम्भेदे स्नात्वा मुक्तिं प्रयास्यसि ।
ब्राह्मणा राक्षसाश्चापि स्नात्वा यास्यन्ति मोक्षणम् ॥२८॥
इत्युक्तास्ते ययू रेवां रेवाचरुकसंगमे ।
स्नात्वा मुक्तिं गताः सर्वे नर्मदाजलसंगमात् ॥२९॥
ब्रह्मयानसमारूढाः स्तूयमानाश्च बन्दिभिः ।
ययुर्दिव्यं ब्रह्मलोकं नर्मदावारिसंगमात् ॥३०॥
यत्र विष्णुस्तथा रुद्रो सूर्यो नारायणस्तथा ।
तत्र श्रीर्विजयश्चैव भुक्तिर्मुक्तिश्च शाश्वती ॥३१॥
यत्र भक्तिर्गुरौ चास्ते यथा देवे तथा गुरौ ।
तस्य कामाः प्रसिद्ध्यन्ति गुर्वात्मकहरेर्बलात् ॥३२॥
श्रवणात् कीर्तनादस्य स्मरणात् सेवनादपि ।
वन्दनाद्धारणाद्वापि मुच्यते भवबन्धनात् ॥३३॥
अथाऽतिश्रेष्ठतीर्थं चाऽमरकण्टकमुच्यते ।
तदारभ्य गिरिश्रेष्ठं सर्वं पुण्यतमं स्मृतम् ॥३४॥
यावद्वै संगता रेवां चतुर्नाम्नी महानदी ।
उत्तरे वर्तते यज्ञपर्वतः पावनो महान् ॥३५॥
स्वयंभुवा पुरा तस्मिन्नष्टः सौत्रामणिर्मखः ।
तत्रैवेष्टं मघवता हयमेधेन वै पुरा ॥३६॥
दधीचिनाऽथ देवैश्च तत्रैवेष्टं महामखैः ।
स यावत् संगमो नद्याः स यावद्यज्ञपर्वतः ॥३७॥
रजः सर्वं पवित्रं वै वर्तते मोक्षदायकम् ।
ब्रह्मपुत्रः सुपर्णश्च ऋषिर्यत्राऽभवत्पुरा ॥३८॥
संगमे वासकृद् विद्वान् सर्वशास्त्रविचक्षणः ।
पुरुहूता तस्य भार्या धर्मपत्नी पतिव्रता ॥३९॥
एकदा त्वब्रवीद् वाक्यं संप्रसाद्य निजं पतिम् ।
ऋतुकाले यथायोग्ये मां भजस्व महामुने ॥४०॥
जायते मे यथापुत्रः सर्वसन्तानपावनः ।
पुत्रेण लोकान् जयति तृप्यन्ति पितृदेवताः ॥४१॥
अपुत्रस्य गतिर्नास्ति तस्मात्पुत्रमजीजनः ।
ब्राह्मणस्तु तदा प्राहाऽमावास्या वर्जिता प्रिये ! ॥४२॥
नाऽत्र संगः प्रकर्तव्यः पितॄणामपि बाधकः ।
दिव्यं वर्षसहस्रं तु तप्तं मे दुष्करं तपः ॥४३॥
तद्विनाशो यथा स्यान्न तथाऽन्यत्र दिने तव ।
गर्भलाभाय च प्रिये यतिष्ये मा शुचं व्रज ॥४४॥
इत्युक्ता सा तदोवाच पत्नी ऋषिं सुपर्णकम् ।
पश्यात्र नार्मदे तीर्थे स्नानमात्रेण पापतः ॥४५॥
मुक्तो भूत्वा हि चाण्डालो विमानेन दिवं ययौ ।
न तप्तं न हुतं तेन न जप्तं न यमाः कृताः ॥४६॥
नियमान् स न जानाति तथाप्यसौ दिवं गतः ।
व्रतं नैव कृतं तेन राजस्वत्वं न पालितम् ॥४७॥
न कृतानि व्रताहानि तथापि स दिवं गतः ।
तीर्थस्याऽस्य तु माहात्म्यं परमं तादृशं मुने ॥४८॥
स्नानमात्रेण पापानां नाशो भवति सर्वथा ।
तस्माद् भोगं भजस्वाऽत्र मां गृहाण कृपानिधे ! ॥४९॥
भार्यावाक्यं क्वचित् पाल्यं तदा धर्मो न लुप्यते ।
ऋतुस्नाता यदा भार्याऽपत्येच्छा प्रबला यदा ॥५०॥
भार्याया जायते तत्राऽवश्यं पाल्यं स्त्रिया वचः ।
पुत्रोऽवश्यं प्रजायेत ऋतुदानेन वै तदा ॥५१॥
तत्र व्रतं विहातव्यं पर्वाऽपि चोत्सवोऽपि च ।
अनुत्साहहते काले न गर्भोऽपत्यदायकः ॥५२॥
वत्सराणां सहस्रे च विना संगेन वै गते ।
एतादृशे स्थले धर्मः प्रियावाक्यं न चेतरः ॥५३॥
नाऽपवादो न वा बाधो न वा दोषोऽत्र विद्यते ।
दावानले महारण्ये कियन्मात्रं तृणादिकम् ॥५४॥
अमृतानां समुद्रेषु कियन्मात्रं विषतृणम् ।
मध्याह्नसूर्यवेलायां कियन्मात्रं गृहे तमः ॥५५॥
पुण्यपर्वतसंस्थाने कियन्मात्रं ह्यमादिनम् ।
तस्मादद्यैव मां नाथ भजाऽतिप्रेमभावतः ॥५६॥
अग्रहे यद्भवेत्पापं नाऽस्मापुण्यं हि तत्समम् ।
इत्युक्तश्च पतिस्तत्र भार्यां जग्राह कामतः ॥५७॥
ददौ पुत्रस्य गर्भं सः पुत्रोऽभूद् भास्करोपमः ।
अमाश्राद्धे च पितरो भुक्त्वा ये तृप्तिमागताः ॥५८॥
तैरागत्य निशायां च प्रहस्य कथितं तदा ।
अद्य गर्भप्रदानस्य प्रायश्चित्तं द्रुतं कुरु ॥५९॥

नर्मदायां पुनः स्नात्वा होमं जपं पुनः कुरु ।
वयं तृप्ताः प्रसन्नाः स्म सन्तानसन्निहेतवे ॥६०॥
भार्यया चार्थितस्त्वं तां पुत्रार्थे यद् गृहीतवान् ।
नार्मदं सलिलं चात्र पावनं पापनाशनम् ॥६१॥
ब्रह्महत्याबालहत्यागुरुस्त्रीहननोद्भवम् ।
व्रतनाशादिजं पापं व्यवायादिसमुद्भवम् ॥६२॥
स्नानमात्रेण रेवायां नश्यत्येव न संशयः ।
इत्युक्त्वा पितरस्तस्य ययुः प्रसन्नमानसाः ॥६३॥
अनपत्यविनिश्वासहता गर्भेण जीविताः ।
अथ कालान्तरे तत्र सुपर्णो भार्यया सह ॥६४॥
विमाने चोज्ज्वले स्थित्वा ययौ ब्रह्मपुरं परम् ।
भुक्तिं मुक्तिं गतस्तत्र सुपर्णः संगमोत्तमे ॥६५॥
अथ वै पश्चिमे नीलगंगाया नर्मदोत्तरे ।
व्यतीपातेश्वरं नाम तीर्थं परमशोभनम् ॥६६॥
सावित्र्याश्च तपस्तप्तं सावित्रीकुण्डमस्ति च ।
इन्द्रद्युम्नोऽभवद् राजा यज्ञं कर्तुं समीहते ॥६७॥
पप्रच्छ च महर्षीन् स धर्मारण्यस्थितांस्तदा ।
मार्कण्डाद्याश्च तं प्राहुर्नार्मदं क्षेत्रमुत्तमम् ॥६८॥
राजा तूद्घोषयांचक्रे गन्तुं रेवां प्रजाजनम् ।
गवां च त्रीणि लक्षाणि सवत्सानां पयोमुचाम् ॥६९॥
अश्वानां श्यामकर्णानां सपादं लक्षमेव च ।
दन्तिनामयुतं चापि घण्टाभरणभूषितम् ॥७०॥
सहस्राणि च चत्वारि यानानां कामचारिणाम् ।
लक्षं तु करभाणां वै मणिमाणिक्यलक्षकम् ॥७१॥
अग्निशौचानि वस्त्राणि पात्राणि कानकानि च ।
नानाभक्ष्याणि भोज्यानि पानानि विविधानि च ॥७२॥
लक्षं कर्मकराणां च तिलदर्भादिकं तथा ।
संगृह्य ब्राह्मणैः सार्धं राजा विमानमाश्रितः ॥७३॥
मुदा परमया युक्तः सान्तःपुरपरिच्छदः ।
धर्मारण्यं ययौ राजा यत्र सा नर्मदा नदी ॥७४॥
यात्राऽद्रिर्वर्तते रम्यो वैदूर्यमणिशोभितः ।
ओंकारेश्वरस्तथाशंभुर्विराजते महाप्रभः ॥७५॥
ओंकारसन्निधौ रेवाकोटितीर्थं विराजते ।
अत्र दत्तं हुतं चेष्टं तपस्ततं ह्यनन्तकम् ॥७६॥
सर्वदा सर्वकार्येषु नर्मदा कोटिपुण्यदा ।
त्रिंशद्योजनपर्यन्तं यज्ञयूपांश्च मण्डपान् ॥७७॥
कारयामास राजाऽसौ कुण्डानि त्रिविधानि च ।
वेदध्वनितनिर्घोषा दिवं भूमिं समस्पृशन् ॥७८॥
निर्धूमश्चाऽभवद् वह्निर्जग्राह घृतहव्यकम् ।
ब्रह्माणं च तथा विष्णुं शंकरं च समाह्वयत् ॥७९॥
रुद्रा एकादश तत्र तथाऽऽदित्याश्च द्वादश ।
विश्वेदेवा स्तथा साध्या मरुतो वसवस्तथा ॥८०॥
लोकपालाः समुद्राश्च नद्यः शैलाः सुपादपाः ।
दिक्पाला भूतपालाश्च तीर्थानि पितरस्तथा ॥८१॥
सिद्धकिन्नरगन्धर्वा नागराक्षसगुह्यकाः ।
विद्याधराश्चारणाश्चाप्याययुस्तत्र क्रतूत्सवे ॥८२॥
घृतक्षीरवहा नद्यो दधिपायसकर्दमाः ।
बभूवुर्जलपानानि रसपानानि सर्वशः ॥८३॥
भक्ष्यभोज्यैश्च विविधैः काम्ययानादिभिस्तथा ।
तृप्ता देवाश्च मुनयो भूतग्रामं चतुर्विधम् ॥८४॥
एवं निर्वर्तितो यज्ञोऽवभृथं नर्मदाजले ।
बभूव दक्षिणातृप्तिः सर्वेषां यज्ञभागिनाम् ॥८५॥
ओंकारेशं स्वयं राजा पुपूज हेमरत्नकैः ।
मणिमाणिक्यहीराद्यैः कर्पूरागुरुचन्दनैः ॥८६॥
गन्धपुष्पैश्च विविधैर्ध्वजच्छत्रविमानकैः ।
चामरैर्व्यजनैश्चापि पूजयित्वा हरं हरिम् ॥८७॥
तुष्टाव मोक्षदात्रे ते ओंकाराय नमोनमः ।
साक्षाद् रुद्रो बभूवाऽथ मूर्तिमान् तस्य सन्निधौ ॥८८॥
प्राह वरं वृणीष्वेति चेन्द्रद्युम्न उवाच तम् ।
आवासं कुरु द्रोण्यां वै सर्वदा यज्ञपर्वते ॥८९॥
मृतानां मोक्षणं स्याच्च पापिनामपि चात्र वै ।
पर्वतं वेष्टयेद् यस्तु सूत्रेणैकेन पर्वणि ॥९०॥
पृथिवी वेष्टिता तेन सशैलवनकानना ।
तेन पुण्येन तस्यात्र मोक्षो ब्रह्मपदं भवेत् ॥९१॥
तथाऽस्त्विति हरः प्राह तत्रैवाऽन्तरधीयत ।
ब्रह्मा प्राह च राजानं वरदानार्थमेव च ॥९२॥
राजा प्राहाऽत्र वै ब्रह्मन् लिंगमूर्तिधरो भव ।
तथास्त्विति प्रोच्य तत्र ब्रह्मा चान्तरधीयत ॥९३॥
राजा विष्णुं प्रतुष्टाव साष्टांगं प्रणिपत्य च ।
केशवं माधवं विष्णुं गोविन्दं मधुसूदनम् ॥९४॥
पद्मनाभं हृषीकेशं श्रीधरं च त्रिविक्रमम् ।
दामोदरं वासुदेवं श्रीहरिं कम्भरासुतम् ॥९५॥
गोपालबालं राधेशं श्रीशं रमेश्वरं प्रभुम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥९६॥
मंजुलेशं पार्वतीशं प्रभेशं माणिकीपतिम् ।
लक्ष्मीनारायणं हंसाजयानाथं नमाम्यहम् ॥९७॥

शंखचक्रगदाशार्ङ्गवनमालाविभूषणम् ।
लोकनाथं जगन्नाथं श्रीनाथं प्रणमाम्यहम् ॥९८॥
अक्षरेश च मुक्तेश ललितेश नमोऽस्तु ते ।
अवतारेश देवेश व्यूहेश च नमोऽस्तु ते ॥९९॥
ईश्वरेश च मायेश दुर्गेश जाह्नवीपते ।
जीवेशाऽनन्तयज्ञेश यज्ञाधिप नमोऽस्तु ते ॥१००॥
वेदात्मकाय कान्ताय धर्मपुत्राय ते नमः ।
ब्रह्मव्रतधरायाऽत्रिगुणाय च नमोऽस्तु ते ॥१०१॥
प्रकृतीशाय शान्ताय वैकुण्ठस्थाय ते नमः ।
नृसिंहमत्स्यवाराहकूर्मरूपाय ते नमः ॥१०२॥
साधुवेषधरायादिकारणाय च ते नमः ।
सहस्रशिरसे वेद्यपुरुषाय च ते नमः ॥१०३॥
असुराणां दमनार्थं धृतरूपाय ते नमः ।
हिरण्यगर्भरूपायाऽमृतधाम्ने च ते नमः ॥१०४॥
सर्वगर्भाय कृष्णायाऽन्तरात्मने च ते नमः ।
स्रष्ट्रेऽवित्रे च संहर्त्रे कार्यरूपाय ते नमः ॥१०५॥
सर्वदिक्पालरूपाय लोकपालात्मने नमः ।
अर्धनारीस्वरूपाय त्रिदेवाय च ते नमः ॥१०६॥
अनन्ताऽऽनन्दनिधये ब्रह्मधाम्ने च ते नमः ।
कर्मफलप्रदात्रे ते चाऽन्तःस्थाय नमो नमः ॥१०७॥
सौराष्ट्रकृतवासाय श्रीकृष्णाय परात्मने ।
कोटिगोपीकान्त तुभ्यं सुखदाय नमो नमः ॥१०८॥
ब्राह्मतेजसे क्षत्राणां वीर्यरूपाय ते नमः ।
विशां सम्पत्स्वरूपाय शरण्याय च ते नमः ॥१०९॥
पातिव्रत्यस्वरूपाय पत्नीवृषाय ते नमः ।
सदोर्ध्वरेतसे कृष्ण मोक्षदाय च ते नमः ॥११०॥
साधुषु सर्वदा स्थात्रे बालरूपाय ते नमः ।
नमो भक्तमनःकामपूरकाय नमो नमः ॥१११॥
ज्ञानदाय तथेच्छासंप्रदाय यत्नदाय च ।
क्रियादात्रे फलदात्रे भोक्त्रे भोग्याय ते नमः ॥११२॥
प्रकाशाय परेशाय जीवस्थाय च ते नमः ।
सर्वदेहिनिवासाय शक्तियोग्याय ते नमः ॥११३॥
अचिन्त्यगुणधाम्ने ते दिव्यदेहाय ते नमः ।
अपारैश्वर्यधात्रे ते दृश्यरूपाय ते नमः ॥११४॥
अदृश्यरूपरूपाय नित्यज्ञाय च ते नमः ।
सर्वतत्त्वस्वरूपाय मण्डपाय च ते नमः ॥११५॥
पञ्चाग्निकृतरूपाय व्रतस्थाय च ते नमः ।
पुण्यदाय महेशाय सर्वेशाय च ते नमः ॥११६॥
सर्वदुःखविनाशित्रे वह्निरूपाय ते नमः ।
नमोऽस्तु स्रुक्स्रुवाद्यात्मयज्ञपात्राय ते नमः ॥११७॥
दक्षिणापतये तुभ्यं चाशीर्वादाय ते नमः ।
तृप्तये शान्तिरूपाय रसरूपाय ते नमः ॥११८॥
सर्वेन्द्रियनिवासाय सत्यकामाय ते नमः ।
आदित्यादिस्वरूपाय वृषरूपाय ते नमः ॥११९॥
नमस्कारस्य पात्रायाऽर्पणपात्राय ते नमः ।
त्वत्प्रसादात् कृपासिन्धो यज्ञसिद्धिर्ममाऽभवत् १२०॥
करं गृहाण मे विष्णो यथा पत्नीकरं वरः ।
देहि मे चरणे वासं नान्यं वृणोमि केशव ! ॥१२१॥
विष्णुः श्रुत्वा परं स्तोत्रं प्रसन्नः प्राह भूपतिम् ।
वरं वृणु वरं राजन् यत्ते मनसि वर्तते ॥१२२॥
ददामि ते न सन्देहो यज्ञसिद्धिर्भविष्यति ।
इन्द्रद्युम्नस्तदोवाच ओंकारनाथसन्निधौ ॥१२३॥
वैदूर्यपर्वते कृष्ण निवासं कुरु सर्वदा ।
येन मोक्षो भवेत्तत्र चागतानां तवाऽर्चनात् ॥१२४॥
दर्शनाद् वन्दनाच्चापि सेवनादवगाहनात् ।
प्राणत्यागे देहिनां च गमनं ते पदे भवेत् ॥१२५॥
पितॄणामन्नदानेन यान्तु ते वैष्णवं पदम् ।
अपि कीटपतंगाद्या यान्त्वत्र परमां गतिम् ॥१२६॥
तथास्त्विति हरिः प्राह चावाततार तत्र च ।
तीर्थान्यपि स्थितान्यत्र नारायणपदाम्बुजे ॥१२७॥
अवतेरुश्च तीर्थानि नर्मदायां क्रतुक्षितौ ।
नीलगंगासंगमे च वर्तन्ते मोक्षदानि वै ॥१२८॥
राजा रेवां प्रतुष्टाव सप्तधारामयी भव ।
इत्येवमर्थयामास सापि सप्तप्रवाहिणी ॥१२९॥
सञ्जाता मोक्षदा रेवा सर्वतीर्थमयी सती ।
दानं हुतं जपस्तप्तं सर्वमत्राऽक्षयं भवेत् ॥१३०॥
इत्येवं वै क्रतुं कृत्वा चेन्द्रद्युम्नो हि नर्मदाम् ।
विष्णुं देवान् तथोंकारं नमस्कृत्य ययौ गृहम् ॥१३१॥
देवाद्या मानवाद्याश्च यज्ञे तृप्तां ययुर्गृहम् ।
श्रवणात्कीर्तनादस्य गोसहस्रफलं लभेत् ॥१३२॥
शंकरः पार्वतीं प्राह मोक्षश्चात्र भवेत् प्रिये ! ।
लक्ष्मि ! तीर्थं मयोक्तं ते भुक्तिमुक्तिप्रदं परम् ॥१३३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने जालेश्वरतीर्थे हिरण्यबाहुराज्ञो गर्दभतामुक्तिः, रेवाचरुक-संभेदतीर्थम्, अमरकण्टकतीर्थं, यज्ञपर्वतः, सुपर्णकथा, ओंकारतीर्थमित्यादिनिरूपणनामैकषष्ट्यधिकपञ्च-शततमोऽध्यायः ॥५६१॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंभुना कीर्तितां कथामघापहाम् ।
पार्वत्यै ऋक्षकाद्रौ तां कथयामि प्रपावनीम् ॥ १ ॥
वसुदानोऽभवद् राजाऽवध्यायाः सार्वभौमकः ।
ईजे यागसहस्रेण हयमेधेन माधवम् ॥ २ ॥
सपादलक्षमधिकं सर्वा जीवन्ति तत्प्रजाः ।
तदा दैत्याश्च रेवायास्तटे वै दक्षिणे शठाः ॥ ३ ॥
केतुमाली सुकेतुश्च सुमुखो दुन्दुभिस्तथा ।
धर्मविघ्नप्रकर्तारोऽभवन् यज्ञविभंजकाः ॥ ४ ॥
अमरकण्टके यज्ञान् कर्तुं वाञ्छति कोऽपि न ।
तदा राजा ययौ रेवां यज्ञं कर्तुं महाबलः ॥ ५ ॥
ब्राह्मणैः सहितो विद्वान् ऋत्विग्भिर्वेदपारगैः ।
गवां च पञ्चलक्षाणि सवत्सानां पयोमुचाम् ॥ ६ ॥
सपादलक्षमश्वानां दन्तिनामयुतं तथा ।
मणिमाणिक्यरत्नानि हेमरूप्यवसूनि च ॥ ७ ॥
विविधं भक्ष्यभोज्यं च आज्यं व्रीहितिलांस्तथा ।
मण्डपान् यज्ञयूपाँश्च समादाय स भूपतिः ॥ ८ ॥
गत्वा संशोधयामास भूमिं चकार मण्डपान् ।
वेदिका यज्ञकुण्डाँश्च स्थापयामास चानलम् ॥ ९ ॥
जुहावाऽऽज्यानि हव्यानि तोषयामास माधवम् ।
देवान् पितॄनृषीन् विप्राँस्तर्पयामास भोजनैः ॥१०॥
दक्षिणादिप्रदानैश्च जीवान् कणतृणादिभिः ।
असुराणां समवायो विघ्नार्थं चाययौ तदा ॥११॥
राज्ञा दिव्यास्त्रसन्धानैर्हतो विद्रावितश्च सः ।
एवं प्रवर्तितो यज्ञो निर्विघ्नो वासुदानकः ॥१२॥
आवभृथ्योदकैः क्लिन्ना वसुधा हेमनिर्मिता ।
बभूवुर्लुलिता ये तु कर्दमे मृगपक्षिणः ॥१३॥
ते हेमवर्णकास्तत्र बभूवुः पुण्ययोगतः ।
युगपज्जलधाराभिर्ब्रह्मविष्णुमहेश्वराः ॥१४॥
पूजितास्तज्जलं चैकीभूय प्रस्रवणात्मकम् ।
तथा स्नानोदकं सर्वदेवानामृषिभिः कृतम् ॥१५॥
तत्प्रवाहोऽपि मिलितस्तत्र प्रस्रवणे तदा ।
गवां मुत्रप्रवाहाश्च लक्षाणां तत्र संगताः ॥१६॥
भक्ष्यभोज्यादिशिष्टानां क्षीराज्यानां च निर्झराः ।
होमप्रसादभूतानां दुग्धानां च प्रवाहकाः ॥१७॥
मिलिता यज्ञनिम्ने ते प्रवाहा आपगात्मकाः ।
कपिला नाम वै चित्रजला सरित्प्रपावनी ॥१८॥
नर्मदां संगता सोऽयं रुद्रावर्तः प्रदेशकः ।
देवर्षिमुनिभिश्चित्रजलान्यालोक्य सा नदी ॥१९॥
कपिलेति कृता नाम्ना दक्षिणातोषणोत्तरम् ।
वरं ददुस्ते राज्ञे वै कपिलासंगमे च ये ॥२०॥
नर्मदायां प्रस्नास्यन्ति द्रक्ष्यन्ति च महेश्वरम् ।
विष्णुं नारायणं तेऽत्र दिव्ययानैः परं पदम् ॥२१॥
यास्यन्ति चापि कीटाद्या ये मरिष्यन्ति चात्र वै ।
एवं वरं परं दत्वा सर्वे ययुर्निजालयान् ॥२२॥
वसुदानः क्रतुं कृत्वाऽवध्यायां समुपागतः ।
श्रवणात् कीर्तनादस्य मुच्यते भवबन्धनात् ॥२३॥
अथाऽभूद् विश्रवा राजा मथुराया महाबली ।
अरुन्धतीप्रसूताया दाक्षायण्याः सुतो हि सः ॥२४॥
तीर्थयात्राप्रसंगेन ययावमरकण्टकम् ।
स्नात्वा ध्याने स्थितो राजा नर्मदायास्तटे यदा ॥२५॥
तावत् पश्यति मध्याह्ने प्रतीच्यादित्यमण्डलात् ।
द्वौ सूर्यौ पूर्वदिग्भागे गतौ द्वौ दक्षिणां दिशम् ॥२६॥
द्वौ पातालं तथा चोर्ध्वे द्वौ सूर्यौ चण्डरूपिणौ ।
कालः संवर्तको वह्निः प्रजज्वालाऽम्बरे तदा ॥२७॥
रौद्राश्च दारुणा वाता ववुर्विक्षोभकारिणः ।
दिग्दाहो भूमिकम्पश्च उल्कापाताश्च दारुणाः ॥२८॥
समभवन् तदा पृथ्व्यां राजा ध्यानादजागरीत् ।
तृषार्तो दाहसन्तप्तो जलं पातुं तु नर्मदाम् ॥२९॥
ययौ यावत्तु तावद्वै जलं किञ्चिन्न विद्यते ।
प्रवाहो विलयं यातो जलं लेभे न कुत्रचित् ॥३०॥
जलं विनाऽद्य मरणं ध्रुवं मे चेत्यचिन्तयत् ।
अनादिश्रीकृष्णनारायणं सस्मार वै तदा ॥३१॥
ओंकारनाथं सस्मार तावद् ददर्श पुष्पितम् ।
फलितं पत्रशोभाढ्यं कल्पवृक्षं सुशाखिनम् ॥३२॥
तद्दृष्ट्वा शीतलां छायां प्राप्य राजा स्थिरोऽभवत् ।
शरीरममृतं जातं तृषातापो न्यवर्तत ॥३३॥
जीविताशाऽभवत् तस्य ततो राजा ददर्श ह ।
शयानं पुरुषं दिव्यं छायायां दीप्ततेजसम् ॥३४॥
कुंभाः पार्श्वे च चत्वारस्तस्य तिष्ठन्ति सोदकाः ।
तं प्रणम्य स्थितो राजा विष्णुरूपं ददर्श तम् ॥३५॥
सुप्तं ददर्श पुरुषं द्वितीयं त्र्यम्बकं शिवम् ।
तावद् ददर्श राजाऽन्यान् सुरान् देवान् मुनींस्तथा ॥३६॥
ततो ददर्श नारीं चोद्विग्नां रुधिरसंप्लुताम् ।
विकीर्णमूर्धजां कट्यां कन्यां बाले निधाय च ॥३७॥

सा चोवाच नृपं राजन् स्तन्यं पिब तृषां त्यज ।
अस्म्यहं पृथिवी देवी बालो मे विश्वसृट् ह्यजः ॥३८॥
कन्येयं नर्मदा चास्ते घटास्ते सन्ति सागराः ।
कल्पवृक्षो वटश्चास्ते वयं सर्वे चिरंस्थिराः ॥३९॥
अक्षयाः प्रतिकल्पस्थाः पिब पानीयमादरात् ।
इत्युक्त्वा विलयं याता राजा ददर्श नर्मदाम् ॥४०॥
सजलां च पपौ वारि विश्रवास्तृप्तिमागतः ।
कृत्वा तीर्थे ययौ नैजां नगरीं मथुरां पुनः ॥४१॥
एवंविधं नित्यतीर्थे विद्यते नार्मदं जलम् ।
श्रवणात् कीर्तनाच्चास्य मुच्यते भवबन्धनात् ॥४२॥
नर्मदादक्षिणे तीरे कपिलायाश्च पश्चिमे ।
विष्णोस्तत्र पुरी रम्या तीर्थे मोक्षकरं शुभम् ॥४३॥
दैत्या विनाशिताः पूर्वे विष्णुना च ततः परम् ।
तत्रागत्य पुरी रम्या निर्मिता विष्णुना शुभा ॥४४॥
कपिला पश्चिमायां तु नीलगंगा प्रविद्यते ।
तदन्तरा चक्रतीर्थे वामनं च युगन्धरम् ॥४५॥
सुदर्शनं नाम तीर्थं दैत्यसूदनमित्यपि ।
विष्ण्वावर्तं शिवावर्तं लक्ष्म्यावर्तं तथैव च ॥४६॥
तत्र स्नानेन दानेन ह्यनन्तफलमश्नुते ।
क्रोशमात्रप्रमाणं तद् विष्णुक्षेत्रं प्रकीर्तितम् ॥४७॥
तत्र श्राद्धेन पितरस्तृप्यन्ति यान्ति मोक्षणम् ।
तत्र जप्तं तपस्तप्तं सर्वं भवति चाक्षयम् ॥४८॥
श्रवणे द्वादशी पुण्या रोहिण्यामष्टमी शुभा ।
तत्रोपोष्य जनो भक्तो विष्णुलोके महीयते ॥४९॥
कार्तिके वाऽथ वैशाखे ह्युपवासं करोति यः ।
दशकोट्युपवासानां फलं तत्र लभेज्जनः ॥५०॥
पतिव्रता तु या नारी भक्ता नारायणस्य वै ।
अनादिश्रीकृष्णनारायणं तत्र प्रपूजयेत् ॥५१॥
तस्याः श्रीभगवान् कृष्णः सौभाग्यं शाश्वतं दिवि ।
धाम्नि ददाति लक्ष्म्याश्च समं त्वानन्दपूरितम् ॥५२॥
अत्र तीर्थे धर्मराजस्तैर्थिकानां समादरे ।
अर्घदानाय चायाति धर्मतेजोवपुर्धरः ॥५३॥
पतिव्रतानां चैवाग्रे स्थित्वा पादौ प्रवन्दते ।
प्रहस्य वैष्णवं लोकं ततः पश्चान्निवर्तते ॥५४॥
धर्मराजं तदा प्रत्यागतं सत्ये च तापसाः ।
ब्रह्मणो मानसाः पुत्रा अपृच्छन्नृषयः खलु ॥५५॥
कस्माच्च कारणाद्धर्मपादचारी गतः स्वयम् ।
प्रहस्य धर्मराजश्च प्राह तान् परमाद्भुतम् ॥५६॥

पतिव्रतानां दीप्तिं च दीप्तिं मासोपवासिनाम् ।
वर्तते देवताभ्यश्च विशेषा तेन वै स्वयम् ॥५७॥
दर्शनार्थं गतश्चासम् अशक्ताः किंकरा मम ।
स्थातुं च सन्निधौ तेषां ततश्चासं गतोऽप्यहम् ॥५८॥
एवं नारायणस्थलं पावनं मोक्षदं सदा ।
वर्तते तत्र देवेशि ! श्रवणादपि मोक्षदम् ॥५९॥
शाकल्यस्याऽऽश्रमं यज्ञपर्वतान्नार्मदं तटम् ।
अभिव्याप्य वर्तते च निःसृता चरुका नदी ॥६०॥
तत्राख्यातं दारुवनं गीयते सर्वदैवतैः ।
शक्रेणेष्टं पुरा तत्र बृहस्पतिपुरोधसा ॥६१॥
लिंगं व्याघ्रेश्वरं तत्र वर्तते पापनाशनम् ।
बभ्रुर्नाम पुरा चासीद् राजा परमधार्मिकः ॥६२॥
पुण्ड्रवर्धनवासी च चिन्तयामास वैष्णवः ।
पितुः क्षयाहे सम्प्राप्ते श्राद्धकाले तु वैष्णवम् ॥६३॥
श्राद्धान्नभोजिनं विप्रं नाऽऽप स च भूपतिः ।
संचिन्त्य विप्रभोज्यार्थे पाकमप्सु व्यनिक्षिपत् ॥६४॥
ऋग्वेदो मूर्तिमान् वाक्यं तदा प्राह च भूपतिम् ।
गच्छ राजन् भरद्वाजं याचस्व ब्राह्मणं शुभम् ॥६५॥
राजा ययौ च तच्छ्रुत्वा भारद्वाजाश्रमं परम् ।
सोऽभिवाद्य नमस्कृत्य मुनिं प्राह मनोगतम् ॥६६॥
महर्षे श्राद्धकालोऽयं पितॄणां मम वर्तते ।
भोजयेऽहं यथा विप्रं तथा त्वं कर्तुमर्हसि ॥६७॥
तस्य तद्वचनं श्रुत्वा भारद्वाजोऽब्रवीद् वचः ।
महर्षीणां सहस्राणि तुष्टानामूर्ध्वरेतसाम् ॥६८॥
हंसलोमशमुख्यानां यदि भोजयितुं क्षमः ।
कुरु श्राद्धं यथेष्टं वै भोजयिष्याम एव च ॥६९॥
दद्या हेममयं पीठं दद्या धान्यं तथा वसु ।
मधुधेनुं तथा दिव्यां पयोधेनुं तथैव च ॥७०॥
दधिधेनुं घृतधेनुं शर्कराधेनुमित्यपि ।
गुडधेनुं वस्त्रधेनुं धानधेनुं तथापि वै ॥७१॥
जलधेनुं स्वर्णधेनुं द्विदलाधेनुमित्यपि ।
कार्पासधेनुं च कपिलां सवत्सां धेनुमित्यपि ॥७२॥
कौपीनं चाग्निशौचस्य वस्त्रस्यापि प्रदेहि च ।
भारद्वाजवचः श्रुत्वा स्वीचकार च भूपतिः ॥७३॥
पत्न्यै सर्वं गृहे गत्वा न्यवेदयच्च भावतः ।
आमिषं कल्पयित्वा तु पितृकार्ये प्रवर्तये ॥७४॥
शुद्धेन चामिषेणैव तर्पयामास तान् पितॄन् ।
आमिषम् ऋषयो दृष्ट्वा कुपिताश्चाब्रुवंस्तदा ॥७५॥

अभक्ष्यभक्षणं कृत्वा करीषाग्नौ विशेद् द्विजः ।
आमिषस्य प्रसंगेन मूलनाशस्त्वया कृतः ॥७६॥
बभ्रुरुवाच वेदोक्तं मया कृतं न चान्यथा ।
गोमेधो हयमेधश्च नरमेधस्तथाऽपरः ॥७७॥
क्षत्रियाणां भवेद् यज्ञो मया धर्मेण वै कृतम् ।
राज्ञस्तद्वचनं श्रुत्वा भारद्वाजोऽब्रवीदिदम् ॥७८॥
पितॄणां भोजने राजँस्त्वया विप्रा निमन्त्रिताः ।
विप्राश्च वैष्णवाः सन्त्यामिषं द्रष्टुं च नोत्सुकाः ॥७९॥
तस्मात् त्वयाऽत्र वै श्राद्धे योग्यं नैव कृतं यतः ।
मांसादो भव पापेन व्याघ्रो व्याघ्री च ते प्रिया ॥८०॥
वने वर्षसहस्रं तु वसुधां विचरिष्यथः ।
एवं श्रुत्वा राजपत्नी सुधर्माख्याऽब्रवीद् वचः ॥८१॥
क्षत्रधर्मानुगन्ता मे यतः शप्तः पतिस्त्वया ।
पतिव्रता च निर्दोषा धर्मिष्ठाऽहं तथैव च ॥८२॥
ततो मयाऽपि विप्रेभ्यो दीयते शाप उल्बणः ।
भविष्यथ महाघोरा यूयं वै ब्रह्मराक्षसाः ॥८३॥
निर्जले मरुदेशे च तृषाक्षुधातिदुःखिताः ।
भारद्वाजस्तदा शीघ्रं ययौ ब्रह्माणमेव च ॥८४॥
सर्वं न्यवेदयत् तत्र शापकारणमित्यपि ।
ब्रह्मा प्राह च वेदोक्तं जात्युक्तं चापि कर्म यत् ॥८५॥
न स्याच्चेल्लोकसम्मान्यं नैव कुर्यात् कदाचन ।
वेदोक्तं लोकसम्मान्यं हृद्रम्यं चापि यद्भवेत् ॥८६॥
तत्कार्यं सुखदं स्याद्वै न त्वेकानुगतं सुखम् ।
अस्तु जातं तु तज्जातं निस्तारं वच्मि पुत्रक ॥८७॥
व्याघ्ररूपोऽपि राजर्षिः राज्ञी विप्राश्च राक्षसाः ।
प्रयान्तु नर्मदातीरं मार्कण्डेयं मुनिं प्रति ॥८८॥
इत्युक्तो मुनिराड् भारद्वाजो नीत्वा च भूसुरान् ।
व्याघ्रं व्याघ्रीं राक्षसांस्तान् ययौ मार्कण्डकं मुनिम् ॥८९॥
तुष्टुवुः परया प्रीत्या जगदुः शापकारणम् ।
मुक्त्यर्थं प्रार्थयामासुस्तं मुनिं पितरं यथा ॥९०॥
त्वं पिता नो गुरुश्चापि हरिर्धाता स्वयं शिवः ।
पापादुद्धर घोराच्च जन्मतो घोरयोनितः ॥९१॥
मार्कण्डेयस्तदोवाच शाकल्यस्याऽऽश्रमोऽस्ति वै ।
वैदूर्यात्पश्चिमे भागे यत्र यज्ञास्त्वनेकशः ॥९२॥
जातास्तत्र च पावन्यां भूमौ यान्तु महेश्वरम् ।
कृष्णनारायणं चापि पूजयन्तु व्रतस्थिताः ॥९३॥
जपध्यानपरा नित्यं तपश्चोग्रं तपन्त्वपि ।
कन्दमूलफलाहाराः सन्तिष्ठन्तु तथा सति ॥९४॥
नर्मदास्नाननिरता देवपूजापरायणाः ।
शीघ्रं शापविनिर्मुक्ता भवन्तः संभवन्त्विति ॥९५॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
जपन्तु चाक्षरं मन्त्रं शीघ्रं भवन्त्विति ॥९६॥
इत्युक्तास्ते ययुस्तत्र जापं चक्रुर्मुहुर्मुहुः ।
सस्नुस्ते नर्मदातोये पपुस्तेपुः परं तपः ॥९७॥
मासान्तरे च तत्रैव दिव्ययानस्थितो हरिः ।
आययौ शापनाशार्थं दिव्यलक्ष्मीयुतः प्रभुः ॥९८॥
व्याघ्ररेवासंगमे च विप्रान् विमुच्य शापतः ।
व्याघ्रं व्याघ्रीं तथा शापाद् विमुच्य भगवान् स्वयम् ॥९९॥
ययौ नैजं परं धाम राजा राज्ञी च भूसुराः ।
ययुर्नैजान् गृहान् पश्चात् कालान्तरे च ते ययुः ॥१००॥
वैष्णवं परमं धाम मुक्ता मन्त्रप्रभावतः ।
श्रवणात्कीर्तनादस्याऽप्यश्वमेधफलं लभेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कपिलारेवासंगम-विश्रवातीर्थ-विष्णुपुरीचक्रतीर्थ-दारुवन-व्याघ्रेशतीर्थानां सेतिहासनिरूपणनामा द्वाषष्ट्यधिकपञ्चशततमोऽध्यायः ॥ ५६२ ॥

श्रीलक्ष्मीरुवाच—

भगवन् मधुधेन्वादि कथं देयं च मे वद ।
किं पुण्यं को विधिस्तत्र गोदानं च कियद् भवेत् ॥ १ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि पुरा राजाऽभवन्महान् ।
विनीताश्वेतिविख्यातो बहुयागकरः प्रभुः ॥ २ ॥
स सर्वमेधमारेभे तेन गावो द्विपा वसु ।
स्वर्णं सर्वं च विप्रेभ्यो दत्तानि भवनानि च ॥ ३ ॥
नाऽन्नं तेन तदा दत्तं स्वल्पं मत्वा जलं तथा ।
अथ गंगातटे मृत्वा स कालेन ययौ दिवम् ॥ ४ ॥
तस्य देहो मृत्तिकायां निक्षिप्तो गह्वरे द्विजैः ।
पुण्यां गंगामृदं ज्ञात्वा पृथ्व्यां निहित एव ह ॥ ५ ॥
अथाऽयं भूपतिः स्वर्गे क्षुधितस्तृषितस्तथा ।
दिव्यविमानवासोऽपि पृथ्व्यां भोज्यार्थमाययौ ॥ ६ ॥
यत्र कलेवरं नैजं तत् खनित्वा चखाद सः ।
होतानाम्ना तदा राज्ञः पुरोहितो ददर्श तम् ॥ ७ ॥
खादन्तं निजदेहं च पप्रच्छ किं करोषि वै ।
राजा प्राह न मे स्वर्गे भोजनं चोपतिष्ठति ॥ ८ ॥

वदाऽत्र कारणं मे किं श्रुत्वा होता ह्युवाच तम् ।
होता प्राह त्वया पूर्वं जलान्नानां प्रदानकम् ॥ ९ ॥
स्वल्पं मत्वा कृतं नैव तेनाऽमृतं न चाप्यते ।
अत्र कर्मक्षितौ यद्यत् कृतं दत्तमवाप्यते ॥१०॥
न दत्तं नोपतिष्ठेत तस्माद् देहि जलान्नकम् ।
तिलधेनुं शुभां देहि जलधेनुं च सत्तम ॥११॥
घृतधेनुं रसधेनुं दधिधेनुं प्रदेहि च ।
दुग्धधेनुं मधुधेनुं शर्कराधेनुमित्यपि ॥१२॥
अन्नधेनुं व्रीहिधेनुं स्वर्णगां च प्रदेहि वै ।
वस्त्रधेनुं कपिलां च सवत्सां संप्रदेहि च ॥१३॥
एवमन्यानि दानानि देहि तत्फलमाप्नुहि ।
अन्नदानेन च स्वर्गे क्षुधया वर्जितो भवेः ॥१४॥
विधानं तिलधेनोश्च त्वं शृणुष्व नराधिप ।
चतुर्भिः कुडवैश्चात्र प्रस्थ एकः प्रकीर्तितः ॥१५॥
धेनुः षोडशभिः कार्या चतुर्भिर्वत्सिका भवेत् ।
नासा गन्धमयी तस्या जिह्वा गुडमयी शुभा ॥१६॥
पुच्छं सूत्रमयं तस्या वस्त्रयुग्मं तु झल्लरी ।
नेत्रे मुक्तामये दन्ताः फलात्मकाश्च कम्बलम् ॥१७॥
गलकम्बलरूपं च नवनीतमयाः स्तनाः ।
स्वर्णशृंगीं रौप्यखुरां घण्टाऽऽभरणभूषिताम् ॥१८॥
कांस्यदोहां चतुर्थांशवत्सिकासहितां शुभाम् ।
कृष्णाजीनयुतां सर्वरत्नयुक्तां च नन्दिताम् ॥१९॥
सर्वौषधिसमायुक्तां मन्त्रपूजां तु दापयेत् ।
अन्नं मे जायतामन्यत्पानं सर्वरसास्तथा ॥२०॥
सर्वं सम्पादयाऽस्माकं तिलधेनो नमोऽस्तु ते ।
शर्करासहितां त्वां प्रददामि विप्रमूर्तये ॥२१॥
एवं दत्तां विधानेन गृह्णीयाद् ब्राह्मणोत्तमः ।
हस्ते पुच्छं जलं चापि पुष्पं तन्दुलमित्यपि ॥२२॥
गन्धं गृहीत्वा नेत्रे च संस्पृश्य गां समर्पयेत् ।
गोमयं मण्डलं कृत्वा दाता दद्याद् विधानतः ॥२३॥
प्रदक्षिणं नमस्कारं कृत्वा दद्याद् द्विजातये ।
द्विजोऽहं त्वां प्रगृह्णामि कुटुम्बार्थं सुभक्तिमान् ॥२४॥
भजस्व कामान् मां देवि तिलधेनो नमोऽस्तु ते ।
दात्रे सर्वं भक्ष्यभोज्यं पानादि देहि यत्र सः ॥२५॥
एवं धेनुः प्रदातव्या तेन भुक्तिश्च मोक्षणम् ।
होता प्राह तथा देहि जलधेनुं विधानतः ॥२६॥
गोचर्ममात्रं भूभागं गोमयेनोपलेपयेत् ।
तत्र वारिपूरितं तं घटं पूज्याऽक्षतादिभिः ॥२७॥
तं धेनुं कल्पयित्वैव दूर्वास्रग्भिर्विभूषितम् ।
पञ्चरत्नयुतं कृत्वा सप्तधान्ययुतं तथा ॥२८॥
गोधूमास्तण्डुलाश्चापि यवाश्च चणकास्तथा ।
माषा मुद्गाश्च कंगवश्च सप्तधान्यमिति न्यसेत् ॥२९॥
घृतपात्रं दधिपात्रं मधुपात्रं च शर्कराम् ।
स्थापयेद्वै चतुर्दिक्षु तथा चास्ये सुवर्णकम् ॥३०॥
मुक्ताफले चक्षुषी च शृंगे चन्दनकाष्ठजे ।
ताम्रपृष्ठं कांस्यदोहं दर्भान् रोमाणि कल्पयेत् ॥३१॥
ताम्रपत्रश्रवणे च पुच्छं सुत्रमयं तथा ।
कम्बले पुष्पमालां च गुडास्यां शुक्तिदन्तिकाम् ॥३२॥
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनान् ।
इक्षुपादाँस्तथा कृत्वा गन्धपुष्पोपशोभिताम् ॥३३॥
कृष्णाजिनोपरि न्यस्य वस्त्रेणाऽऽच्छादितां तु ताम् ।
गन्धपुष्पैः समभ्यर्च्य पूर्वमुखां समर्पयेत् ॥३४॥
साधुविप्राय राजेन्द्र श्रोत्रियायाऽऽहिताग्नये ।
तपोवृद्धाय पात्राय दातव्या च कुटुम्बिने ॥३५॥
यो ददाति नरो राजन् यः पश्यति शृणोति च ।
प्रतिगृह्णाति यो विप्रो मुच्यते सर्वपातकात् ॥३६॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः ।
विमुक्तः सर्वपापैस्तु विष्णुलोकं स गच्छति ॥३७॥
जलधेन्वा वत्सिकां च कलशे कल्पयेच्छुभाम् ।
जलाहारस्त्वेकदिनं तिष्ठेद्वै जलधेनुदः ॥३८॥
ग्राहकोऽपि त्रिरात्रं च तिष्ठेज्जलेन धर्मवान् ।
यत्र क्षीरवहा नद्यो मधुपायसकर्दमाः ॥३९॥
यत्र त्वप्सरसां गीतं तत्र यान्ति जलप्रदाः ।
यद्वा पापविनिर्मुक्ता विष्णुसायुज्यमाप्नुयुः ॥४०॥
अथ दद्याद् रसधेनुमैक्षवस्य रसस्य वै ।
घटं प्रपूर्य संपूज्य पूर्ववद् वत्सिकां तथा ॥४१॥
चतुर्थांशां कल्पयित्वा सप्तव्रीहिसमन्विताम् ।
सर्वोपस्करसंयुक्तां तिलपात्रादिसंयुताम् ॥४२॥
दाता च ग्राहकश्चापि त्वेककालयभोजनः ।
सोमपानफलं तस्य पश्यतोऽपि तथा फलम् ॥४३॥
दश पूर्वान् परांश्चापि स्वात्मानं चैकविंशकम् ।
प्रापयेत्परमं स्थानं स्वर्गान्नावर्तते पुनः ॥४४॥
ददस्व च महाराज परं स्थानमवाप्नुहि ।
गुडधेनुं तथा कृत्वा सवत्सां कांस्यदोहिनीम् ॥४५॥
सौवर्णे मुखशृंगे च दन्ताश्च मणिमौक्तिकैः ।
ग्रीवा रत्नमयी त्वस्या घ्राणं गन्धमयं तथा ॥४६॥

शृंगे त्वगुरुकाष्ठेन पृष्ठं ताम्रमयं तथा।
पुच्छं क्षौममयं तस्याः सर्वाभरणभूषिताम् ॥४७॥
इक्षुपादां रौप्यखुरां कम्बलं पट्टसूत्रकम्।
आच्छाद्य पटसूत्रेण घण्टाचामरशोभिताम् ॥४८॥
प्रशस्तपत्रश्रवणां नवनीतस्तनीं व्रती।
फलैः संशोभयित्वा च दद्याद् विप्राय भावतः ॥४९॥
गन्धपुष्पैः पूजयित्वा दत्त्वा छत्रं च पादुके।
गुडधेनो प्रदत्ता त्वं सर्वसम्पत्प्रदा भव ॥५०॥
दानादस्माच्च मे मातर्भक्ष्यभोज्यं प्रयच्छ वै।
वाचा कृतं कर्मकृतं मनसा यद् विचिन्तितम् ॥५१॥
मानकूटं तुलाकूटं कन्यागोऽर्थे ह्युदाहृतम्।
अनृतं नाशमायातु गुडधेनो द्विजार्पिता ॥५२॥
गुडधेनोः प्रदानाच्च सौभाग्यमखिलं लभेत्।
दश द्वादशसाहस्रा दश चाष्टौ च जन्मसु ॥५३॥
न शोकदुःखदौर्गत्यं तस्य संजायते क्वचित्।
तद्वच्च शर्कराधेनुं देहि भारचतुष्टयम् ॥५४॥
सवत्सिकां विभूषाढ्यां प्रपूज्य पूर्ववद् व्रती।
गां पूर्वाभिमुखीं कृत्वा वत्सामुत्तरतो न्यसेत् ॥५५॥
हस्ते तु दक्षिणां दत्वा गन्धपुष्पाढ्यचन्दनाम्।
धेनुं समर्पयेत् तस्य मुखं च न विलोकयेत् ॥५६॥
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्।
सर्वकामसमृद्धस्तु जायते नात्र संशयः ॥५७॥
मधुधेनुं प्रवक्ष्यामि सर्वपातकनाशिनम्।
धेनुं मधुमयीं कृत्वा सम्पूर्णघटषोडशाम् ॥५८॥
चतुर्थेन तथांशेन वत्सिकां परिकल्पयेत्।
पूर्वोक्तांगैः समायुक्तां सप्तधान्यान्वितां तथा ॥५९॥
तिलपात्रचतुष्टयेनान्वितां पुष्पपूजिताम्।
द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तां प्रतिपादयेत् ॥६०॥
प्रीयन्तां पितरो देवा मधुधेनो नमोऽस्तु ते।
अहं गृह्णामि त्वां देवि कुटुम्बार्थे नमोऽस्तु ते ॥६१॥
दत्वा दानं पायसेन मधुना च दिनं नयेत्।
यत्र नद्यो मधुवहास्तत्र गच्छन्ति धेनुदा ॥६२॥
दशपूर्वान् दश परानात्मानं चैकविंशकम्।
नयते विष्णुसायुज्यं मधुधेनुप्रदानतः ॥६३॥
क्षीरधेनुं च ते वच्मि तां निबोध प्रदेहि च।
गोमयैर्लिप्तभूभागे कुशेषु मृगचर्मणि ॥६४॥
गोरेखां परितः कृत्वा क्षीरकुंभं न्यसेच्छुभम्।
वत्साख्यं कलशं चापि पूर्वोक्तांगानि सर्वथा ॥६५॥
वस्तूनि न्यस्य धान्यानि तिलपात्राणि दिक्षु च।
विन्यस्य पूजितां दद्यात् क्षीरधेनुं द्विजाय वै ॥६६॥
दीयमानां प्रपश्यन्ति तेऽपि यान्ति परां गतिम्।
षष्टिवर्षसहस्रं तु चेन्द्रलोके महीयते ॥६७॥
पित्रादिभिस्तु सहितो ब्रह्मणो भवनं व्रजेत्।
ततो याति परंधाम विष्णुरूपधरो भवन् ॥६८॥
दधिधेनुः प्रदातव्या दधिकुंभात्मिकां शुभाम्।
सप्तधान्यान्वितां वत्सायुतां शृंगारितां तथा ॥६९॥
पूजितां मण्डितां कृत्वा ब्राह्मणाय ददेद् व्रती।
एकाहारी व्रती स्यात् त्रिदिनं तिष्ठेत्तु वै द्विजः ॥७०॥
दध्ना तेन परं लोकं याति दाताऽर्थिताऽपि च।
नवनीतमयीं धेनुं दद्याद् वत्सायुतां शुभाम् ॥७१॥
पूर्ववत्सर्वशोभाढ्यां सर्वांगपरिकल्पिताम्।
पूजितां धान्ययुक्तां च ब्राह्मणाय समर्पयेत् ॥७२॥
पुरा देवासुरैः सर्वैः सागरस्य तु मन्थने।
उत्पन्नं दिव्यममृतं नवनीतमिदं शुभम् ॥७३॥
आप्यायनं तु भूतानां नवनीत! नमोस्तु ते।
लवणधेनुं वक्ष्यामि दातव्या शुभमिच्छता ॥७४॥
षोडशप्रस्थमानां गां वत्सां चतुर्थपादिकाम्।
सर्वशृंगारसंयुक्तां पूर्वोक्तांगप्रपूरिताम् ॥७५॥
ग्रहनक्षत्रपीडायां ब्राह्मणाय प्रदापयेत्।
इमां गृहाण भो विप्र रुद्ररूपां नमोऽस्तु ते ॥७६॥
कामं पूरय मे देवि! रुद्ररूपे! नमोऽस्तु ते।
दिनं व्रती लवणाशी त्रिरात्रं ब्राह्मणो भवेत् ॥७७॥
अथ कार्पासकीं धेनुं दद्यात् सुखप्रशान्तिदाम्।
ग्रहपीडासु चोग्रासु दुःस्वप्नेऽरिष्टदर्शने ॥७८॥
पुण्येष्वायतनेष्वेव दद्यात् प्राग्वत् सुबृंहिताम्।
चतुर्भारमितेनैव कल्पितां वत्सिकायुताम् ॥७९॥
पूजितां सोपकरणां सर्वांगां वै समर्पयेत्।
रक्षां कुरु महादेवि परत्राऽत्र नमोस्तु ते ॥८०॥
धान्यधेनुः प्रदातव्या व्रीहिधेनुस्तथा शुभा।
अंगानि पूर्ववत् कृत्वा पूजयित्वा च तां ततः ॥८१॥
दीपं प्रदक्षिणं कृत्वा प्रीयतां मधुसूदनः।
सर्वलक्ष्मीमयीधेनो धान्यरूपे नमोऽस्तु ते ॥८२॥
एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत्।
यावच्च पृथिवी सर्वा वसुरत्नानि भूपते ॥८३॥
तावत्पुण्यं समधिकं व्रीहिधेनोश्च तत्फलम्।
इह लोके च सौभाग्यमायुरारोग्यवर्धनम् ॥८४॥

विमानेनाऽर्कवर्णेन चान्ते याति हरेर्गृहम् ।
अथातः संप्रवक्ष्यामि कपिलां धेनुमुत्तमाम् ॥८५॥
यत्प्रदानाज्जनो याति ब्रह्मलोकं सनातनम् ।
पूर्वोक्तेन विधानेन दद्याद् धेनुं सवत्सिकाम् ॥८६॥
सर्वालंकारसंयुक्तां सर्वरत्नादिमण्डिताम् ।
कपिलायाः शिरो ग्रीवा सर्वतीर्थानि भूपते ॥८७॥
कपिला शिरसो वारि प्रातर्यो वन्दति स च ।
दग्धस्त्रिंशजन्मपापो भवत्येव सुपुण्यवान् ॥८८॥
कल्य प्रदक्षिणं कुर्याद् भूप्रदक्षिणपुण्यदम् ।
प्रदक्षिणैक्यं निर्दहेद् दशजन्मोत्थपापकम् ॥८९॥
कपिलामूत्रसंस्नातो यावत्तीर्थाप्लुतो भवेत् ।
गोसहस्रेण तुल्यं वै कपिलादानमुच्यते ॥९०॥
मृतभस्म च जिघ्राति कपिला यावदेव हि ।
तावत्प्रेतो महापुण्यैः पूर्यते दिविवासकृत् ॥९१॥
गवां कण्डूयनं रक्षा गोशतार्पणसदृशम् ।
तृणोदकादिकं दत्तं गोमेधफलदं मतम् ॥९२॥
सुवर्णकपिला चैका द्वितीया गौरपिंगला ।
तृतीया चापि रक्ताक्षी चतुर्थी गुडपिंगला ॥९३॥
पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिंगला ।
सप्तमी श्वेतपिङ्गाक्षी त्वष्टमी कृष्णपिंगला ॥९४॥
नवमी पाटला बोध्या दशमी पुच्छपिंगला ।
एकादशी क्षुरश्वेता त्वेतासां चोत्तमा मता ॥९५॥
कपिला ह्यग्निहोत्रार्थे यज्ञार्थे च सुरकृते ।
उद्धृत्य सर्वतेजोभिर्ब्रह्मणा निर्मिता पुरा ॥९६॥
दानानामुत्तमं दानं निधीनां ह्येतदक्षयम् ।
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ॥९७॥
कपिलाया घृतेनेह दध्ना क्षीरेण सर्पिषा ।
निर्वृत्यन्तेऽतिथिपूजादीनि हूयन्त इष्टकाः ॥९८॥
अग्निहोत्राणि मन्त्रैश्च विविधैर्ब्रह्मवेदिभिः ।
कपिला या पिंगलाक्षी सर्वसौख्यप्रदायिनी ॥९९॥
सिद्धिबुद्धिप्रदा धेनुः सर्वलक्षणलक्षिता ।
सर्वास्तास्तारयन्त्येव दत्ता नद्योः समागमे ॥१००॥
अग्निपुच्छा चाग्निमुखो चाग्निलोमाऽनलप्रभा ।
तथाऽऽग्नायी श्वेतखुरा सुवर्णा नाम सा मता ॥१०१॥
आसन्नप्रसवां धेनुं दानार्थे प्रतिपालयेत् ।
जायमानस्य वत्सस्य मुखं योन्यां प्रदृश्यते ॥१०२॥

तावत् सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ।
कपिलाऽर्धप्रसूता सा दातव्या वैष्णवाय वै ॥१०३॥
धेन्वा यावन्ति रोमाणि सवत्साया भवन्ति च ।
तावत्यो वर्षकोट्यस्तु ब्रह्मलोके वसन्ति ते ॥१०४॥
ब्राह्मणस्य करे दत्वा सुवर्णं पुच्छमित्यपि ।
उदकं च करे दत्वा वाचयेत् प्रददेत् तथा ॥१०५॥
समुद्रवसना तेन सशैलग्रामशोभना ।
रत्नपूर्णा क्षितिर्दत्ता भवत्येव न संशयः ॥१०६॥
दाता प्रयाति पितृभिर्विष्ण्वाख्यं च परं पदम् ।
यश्चोभयमुखीं दद्यात् सर्वपापनिवृत्तये ॥१०७॥
तद्दिने पायसाहारो जलाहारोऽथवा वसेत् ।
दद्याद्वै सुधनं चापि वित्तशाठ्यं विवर्जयेत् ॥१०८॥
इमां गृह्णोभयमुखीमुभयत्र शमस्तु वै ।
ददे वंशविवृद्ध्यर्थं सदा स्वस्तिकरी भव ॥१०९॥
प्रतिगृह्णामि त्वां धेनो कुटुम्बार्थे विशेषतः ।
शुभं भवतु मे नित्यं देवधात्रि नमोऽस्तु ते ॥११०॥
मे नित्यं स्वस्ति भवतु विष्णुरूपे नमोऽस्तु ते ।
ओं द्यौस्त्वां ददातु भूमिं स्वयं प्रतिगृह्णात्वपि ॥१११॥
ओं क इदं कस्मै अदात् ब्रह्म इदं ब्रह्मणेऽदात् ।
इत्युक्त्वा विधिना विप्रं गोयुक्तं वै समर्चयेत् ॥११२॥
प्रणमेदनुयायाच्च तां धेनुं तद्गृहं नयेत् ।
एवं दानेन पृथिवीदानं भवेन्न संशयः ॥११३॥
श्राद्धकाले पठेत्तस्य पितरोऽश्नन्ति भावतः ।
अमायां पठने वर्षशतं तृप्यन्ति पूर्वजाः ॥११४॥
श्रोतुश्चापि वर्षकृतं पापं नश्यति दूरतः ।
माघशुक्लद्वादश्यां च द्वादश्यां श्रावणे सिते ॥११५॥
कार्तिक्यां पञ्चदश्यां वा द्वादश्यां वा विशेषतः ।
सर्वदा वा यथायोग्यं दानं श्रीगुरवेऽर्पयेत् ॥११६॥
ब्रह्माण्डोदरभूतानि तानि दत्तानि तेन वै ।
अथवा पीड्यसेऽत्यन्तं क्षुधया तृषया नृप ॥११७॥
वद ते वंशजं यश्च दानं दद्यात् तथाविधम् ।
अन्नानां च जलानां च रसानां च विशेषतः ॥११८॥
धेनुर्दद्याच्च तेनैव स्वर्गे ते भोजनं भवेत् ।
होता चैवं तमुक्त्वा च बदर्याश्रममाययौ ॥११९॥
राजा नाम्ना विनीताश्वः स्ववंशं वक्तुमुद्यतः ।
ययौ ततश्च दानादि वंशजेन कृतानि वै ॥१२०॥

तेन मुक्तिं गतो राजा शाश्वते ब्रह्मणः पदे ।
शंकरेण तथा लक्ष्मि ! पार्वत्यै कथिता कथा ॥१२१॥
मया तेऽत्रोदिता सम्यग् भुक्तिमुक्तिप्रदा यतः ।
पठनाच्छ्रवणाच्चास्या गोप्रदानकृतं फलम् ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने द्वादशरसादिधेनुकपिलाधेनुदानादिविधिश्रवणं विनीताश्वेनराजा कृतमित्यादिनिरूपणनामा त्रिषष्ट्यधिकपञ्चशततमोऽध्यायः ॥ ५६३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! शंकरेणोदितानि नर्मदातटे ।
कपिलामरयोर्मध्ये नर्मदोंकारमध्यतः ॥ १ ॥
कोटितीर्थानि सन्त्येव यत्र क्वापि जनश्चरेत् ।
राजानस्ते प्रजायन्ते शुभे वैद्याधरे पुरे ॥ २ ॥
दीयते कोटितीर्थे यद् गुंजामात्रं हिरण्यकम् ।
तस्य संख्या न विद्येत यावदाभूतसंप्लवम् ॥ ३ ॥
सूत्रेण वेष्टयेद् यस्तु यज्ञशैलं च पर्वसु ।
सूत्रयुगसहस्राणि स्वर्गलोके महीयते ॥ ४ ॥
पुत्रिणी भर्तृसंयुक्ता नारी तद्वेष्टिनी भवेत् ।
कौशेयं पट्टसूत्रं च कार्पासं च महोज्ज्वलम् ॥ ५ ॥
नवतन्तुं च यः कुर्याद् दशद्वादशतन्तुकम् ।
अष्टादशगुणं वापि चतुर्विंशतितन्तुकम् ॥ ६ ॥
न्यग्रोधे बन्धयेत् सूत्रम् ऋणापाकरणं भवेत् ।
ओंकारं वेष्टयेद्वा यः कैलासं विन्दते हि सः ॥ ७ ॥
सफलः सूत्रयागः स्याद् यतीन् संभोजयेत् ततः ।
यः शारीरेण कष्टेन पर्यटेच्छिवपर्वतम् ॥ ८ ॥
पदे पदे यज्ञफलं तस्य स्याच्छंकरोऽब्रवीत् ।
करिणीरूपमास्थाय स्वयं सरस्वती सरित् ॥ ९ ॥
स्नातुमायाति तु कोटितीर्थे स्नात्वा प्रयाति च ।
कावेरीसंगमाद् यावदुदधेः संगमोऽस्ति हि ॥१०॥
अत्रान्तरे तीर्थकोट्यो नर्मदायां वसन्ति वै ।
कावेरीपर्यंकशैलमध्ये तु दशलक्षकम् ॥११॥
नर्मदायां समासाद्य जमदग्नेर्महाश्रमम् ।
श्रीकण्ठं नीलकण्ठं च कन्यातीर्थे प्रवर्तते ॥१२॥
सूर्यपिंगललिंगं च नारायणस्य मन्दिरम् ।
लक्ष्मीतीर्थं सतीतीर्थं वर्तते पापनाशनम् ॥१३॥
मोक्षदो वै गिरिः पुण्यः सर्वतोऽमरकण्टकः ।
कावेर्यां स्नानमात्रेण जना यान्ति परां गतिम् ॥१४॥
कुबेरतपसा या वै कौबेरी नामतोऽभवत् ।
सा कावेरीतिसंप्रोक्ता पितृद्धारकरी नदी ॥१५॥
नानामुखसहस्रैस्तु कावेरी तारिणी मता ।
नर्मदादक्षिणे कूले वाराहे विन्ध्यपर्वते ॥१६॥
पयोष्णी निर्गता चन्द्रपुत्री शीताऽतिपावनी ।
वाराहशरीराज्जाता सोमगंगा च तारिणी ॥१७॥
तत्र स्नात्वा जनो भक्त्या भवे वै न पुनर्भवेत् ।
पयोष्णीसंगमे तत्र सोमावर्त्तः प्रदेशकः ॥१८॥
तत्र स्नानस्य दानस्य संख्यां कर्तुं न शक्यते ।
तापीपयोष्णीसंभेदः कुरुक्षेत्राच्छताधिकः ॥१९॥
फलदः श्रीहरिर्यत्र श्रीपतिः पुरुषोत्तमः ।
विराजते प्रशस्तं तद्विष्णुक्षेत्रं प्रकीर्त्यते ॥२०॥
कार्तिक्यां दीपदाने तु चक्रवर्ती भवेन्नृपः ।
रेवां भित्त्वा चण्डवेगानाम्नी नदी विनिःसृता ॥२१॥
तत्र स्नात्वा ब्रह्महत्यादिकपापं विनश्यति ।
चण्डेश्वरो महादेवस्तत्र तिष्ठति पापहा ॥२२॥
चन्द्रसेनः सोमवंशी पुराऽऽसीत् पापकृन्नपः ।
परदाररतश्चौरो मदिरापानकृद्धि सः ॥२३॥
नैमिषारण्यवासस्य शाण्डिल्यस्य तु भामिनीम् ।
नाम्ना सौदामिनीं रूपयौवनाद्यन्वितां सतीम् ॥२४॥
चन्द्रसेनो ददर्शैनां जटावल्कलधारिणीम् ।
उवाच मे भव पत्नी भुंक्ष्व भोगांश्च पुष्कलान् ॥२५॥
श्रुत्वा सौदामिनी प्राह याचस्व मे पतिं नृप ।
शाण्डिल्यं परिपप्रच्छ राजा तस्यां सुमोहितः ॥२६॥
यौवनस्थां च पत्नीं ते चेदद्य त्वं ददस्व मे ।
मौल्ये ददामि ते द्रव्यमस्याः शतसहस्रशः ॥२७॥
ऋषिः प्राहस्त्रियो राजन् छलमूला हि सर्वशः ।
न च तासां प्रियः कश्चिद् यथेच्छसि तथा कुरु ॥२८॥
कामान्धश्च तदा राजा करे जग्राह तां सतीम् ।
सा तु कोपान्नृपं प्राह भवाम्यद्य रजस्वला ॥२९॥
मम स्पर्शादद्य दिने चण्डालस्त्वं भविष्यसि ।
प्रथमेऽहनि चाण्डालीसमा रजःप्लुता मता ॥३०॥
इत्युक्तोऽपि हठात्तां वै पस्पर्श च करे पुनः ।
तावच्चाण्डालतां प्राप्तो राजा सर्वभयावहः ॥३१॥
रूपरंगविहीनश्च कृष्णवर्णोऽभवत् क्षणात् ।
राजा तां च सतीं त्यक्त्वा ययौ स्वनगरं प्रति ॥३२॥
अवध्यावासिनश्चाहुः राजपुत्रः कथं वने ।
गतश्चाण्डालतां प्राप्त इत्याश्चर्यपरा मिथः ॥३३॥

वसिष्ठस्तु नृपं प्राह याहि तां प्रति वै पुनः ।
क्षमां याचस्व गत्वैव सर्वं शान्तं भविष्यति ॥३४॥
राजा जगाम तां नत्वा ऋषिं नत्वा पुनः क्षमाम् ।
याचयामास च मुहुस्तदा चाहतुर्दम्पती ॥३५॥
राजन् शीघ्रं प्रयाहि त्वं चण्डवेगासमागमम् ।
चण्डेश्वरं हरिं तत्राऽभ्यर्च्य स्नात्वा ह्यवाप्स्यसि ॥३६॥
पापस्य मोक्षणं चेति श्रुत्वा राजा ययौ नदीम् ।
चण्डवेगां च रेखां च तत्र स्नात्वा हरं हरिम् ॥३७॥
पुपूज परया भक्त्या निष्पापश्च बभूव सः ।
अन्ते मुक्तो बभूवाऽपि चण्डवेगाप्रभावतः ॥३८॥
दिव्ययानसमारूढो ययौ वैकुण्ठमुत्तमम् ।
श्रवणात् कीर्तनाच्चापि घोरपापं विनश्यति ॥३९॥
अथ तीर्थं परं चान्यदेरण्डीनर्मदागमः ।
एरण्डीश्वरलिंगं च वर्तते पापनाशनम् ॥४०॥
कुंकुमेन समालिप्य गन्धपुष्पैः प्रपूजयेत् ।
दिव्यवर्षसहस्रं तु मोदते शिवसन्निधौ ॥४१॥
भद्ररुद्रौ पुरा कल्पे सुगन्धर्वौ बभूवतुः ।
तमभ्यर्च्य विधानेन गतौ वैद्याधरं पुरम् ॥४२॥
भद्रेश्वरं तथा रुद्रेश्वरं संस्थाप्य स्वर्गतौ ।
अथ पितृप्रतृप्त्यर्थं दुर्वासा मुनिराट् क्वचित् ॥४३॥
बभ्राम सर्वतीर्थानि ततो गयामुपाययौ ।
पिण्डान् ददौ तथा वारि ददौ फलानि वै रसान् ॥४४॥
ददौ कुशतिलाँस्तत्र किन्तु वै पितरस्तदा ।
न दृष्टा तेन मुनिना तदा प्राह मुनीन् स्वयम् ॥४५॥
करे गृह्णन्ति पितरः पिण्डानीह मया श्रुतम् ।
तदद्य भो न पश्यामि तीर्थयात्रा निरर्थिका ॥४६॥
श्रुत्वा तन्मुनयः प्राहुः प्रतीक्षाऽमादिनं मुने ।
करे गृह्णन्ति पितरः पिण्डान् दर्शे प्रकल्पितान् ॥४७॥
दुर्वासा दर्शपर्यन्तं तस्थौ तत्र हि श्रद्धया ।
अवाग्जन्ततः पिण्डाँस्तथापि पितरः खलु ॥४८॥
मूर्तिमन्तो नाऽऽययुश्च दुर्वासास्तु तदा पुनः ।
एरण्डनामकं तत्र तपन्तं प्राह वै मुनिम् ॥४९॥
नाऽत्र ते स्यादर्थसिद्धिरागच्छ वै मया सह ।
इत्युक्त्वा मुनिमेरण्डं सह नीत्वा च नार्मदे ॥५०॥
तीरे तस्थौ समागत्य ओंकारेऽमरकण्टके ।
तत्र सस्मार च पितॄन् ब्रह्मा साक्षात् समाययौ ॥५१॥
गृहाणाऽर्पितमेवाऽत्र पिण्डं तुष्टोऽभवत्तदा ।
ददौ वारि स्वयं ब्रह्मा तृप्तो नार्मदवारिणा ॥५२॥
ब्रह्माणाऽर्पितवार्येव दुर्वासा मुनिराट् तथा ।
एरण्डको मुनिश्चापि दधार शिरसा तदा ॥५३॥
ब्रह्मकमण्डलुवारि एरण्डमस्तकाद् भुवि ।
पतितं तत्प्रवाहश्च नर्मदाया जलं गतः ॥५४॥
अमायां सोमवारे चैरण्डरेवासमागमे ।
तीर्थे पर्व महज्जातं पितृद्धारकरं परम् ॥५५॥
ब्रह्मा तुष्टो वरदानं ददावेरण्डिकातटे ।
अदृश्याः पितरस्तृप्तिं दर्शे यास्यन्ति शाश्वतीम् ॥५६॥
गयायामपि चादृश्यास्तृप्तिं यास्यन्ति शाश्वतीम् ।
वैष्णवेभ्यः पवित्रेभ्यो ब्रह्मव्रतेभ्य इत्यपि ॥५७॥
निष्पापेभ्यो मानवेभ्यः शुद्धहृद्भ्यस्तु सर्वदा ।
दृष्टिपथं प्रयास्यन्ति पितरौ नान्यथा क्वचित् ॥५८॥
एवमेरण्डिकातीर्थं रेवासंगमगं ह्यभूत् ।
श्रवणात् कीर्तनादस्योद्धारः स्यात् पितृतीर्थिनः ॥५९॥
ततस्तीर्थं परं चान्यद् रेवाशल्यविशल्ययोः ।
भरतेन कृतो यज्ञो यत्र शल्या विशल्यका ॥६०॥
नदीद्वयं समुद्भूतं विवेश नार्मदं जलम् ।
आसुरा विघ्नकर्तारो युयुधुर्भरतेन वै ॥६१॥
भरतेनाऽऽसुरा बाणैर्नाशिता बहवस्तदा ।
भरतस्य भटानां च शल्यपीडानिवृत्तये ॥६२॥
यूपमूलान्नदी जाता विशल्या शल्यकर्षिणी ।
तत्र स्नात्वा भरताद्या यज्ञनारायणेहया ॥६३॥
विपीडास्ते विशल्याश्च बभूवुः सर्वशोऽनघाः ।
तेन शल्या विशल्या च नदीद्वयं प्रकीर्त्यते ॥६४॥
प्रवाहद्वयरूपं तन्नर्मदायां समाहृतम् ।
एतत्तीर्थं परं पुण्यं पावनं नार्मदे तटे ॥६५॥
स्वायंभुवेऽन्तरे प्राप्ते त्वादिकल्पे कृते युगे ।
दानवैर्निर्जिता देवा नर्मदातीरमाश्रिताः ॥६६॥
ते देवा ब्रह्मसहिता ईश्वरं शरणं गताः ।
बृहस्पतिस्ततः प्राह ब्रह्माणं परमेष्ठिनम् ॥६७॥
इष्टिं कुरु महारौद्रीं दानवानां क्षयंकरीम् ।
एतस्मिन्नन्तरे देवा ययुस्ते नार्मदं तटम् ॥६८॥
भित्वा भुवं तदा लिंगं समुत्थितं महोज्ज्वलम् ।
ओंकारं संवदत् तत्र भूर्भुवः स्वश्च कीर्तयत् ॥६९॥
पर्वतादुत्थितं सोऽपि ओंकारगिरिरुच्यते ।
उवाच वचनं शंभुः साक्षाद् भूत्वा पितामहम् ॥७०॥
इष्टिं कुरु महारौद्रीं दैत्यानां प्रक्षयंकरीम् ।
ततो ब्रह्मा चकारेष्टिं देवानां शान्तिकारिणीम् ॥७१॥

इत्याद्यास्तद्भयाद् भग्ना जग्मुस्ते तु रसातलम् ।
ओंकारस्य प्रभावेण देवा जाताश्च निर्भयाः ॥७२॥
ओंकारं शंकरं प्राच्र्य ययुर्दिवं सुरादयः ।
कल्पान्तगं महालिंगं पर्वताग्रे विराजते ॥७३॥
पञ्चब्रह्म पञ्चवक्त्रं नवशक्तिसमन्वितम् ।
शंखकुन्देन्दुसंकाशं सद्यो वक्त्रं तु पश्चिमम् ॥७४॥
ऋग्वेदो निर्गतो यस्माद् ब्रह्मा तत्राधिदेवता ।
उत्तरं वामदेवं तु पीताभं सुमनोहरम् ॥७५॥
यजुर्वेदोद्भवं विद्धि विष्णुस्तत्राऽधिदेवता ।
अघोरं मेघवर्णाभं याम्यां दिशि समस्थितम् ॥७६॥
सामवेदोद्भवं विद्धि सूर्यकालाग्निदैवतम् ।
पूर्वे तत्पुरुषं ज्ञेयं कुङ्कुमारुणसन्निभम् ॥७७॥
अथर्वे निर्गतं तुर्यमापस्तत्राऽधिदेवताः ।
ईशानेस्तववक्त्रं तु पञ्चवर्णे महातनुम् ॥७८॥
श्रुतिसिद्धान्तसंगीतं सोमं तत्राधिदेवता ।
षष्ठं सदाशिवं नाम निर्भोगं च निरामयम् ॥७९॥
एतत्ते कथितं सर्वमोंकारस्य तु वर्णनम् ।
ओंकारदक्षिणामूर्तिं पूजयेन्मोक्षमाप्नुयात् ॥८०॥
दद्याद् गृहस्य सामग्रीः पूजोपकरणानि च ।
जीर्णोद्धारादिकं ध्वजदण्डघण्टादि कारयेत् ॥८१॥
वस्त्रभूषामृदंगादि दद्याओंकारमूर्तये ।
उद्यानवाटिकाक्षेत्रादीनि तस्मै निवेदयेत् ॥८२॥
तस्य दानफलस्येह संख्यां कर्तुं न शक्यते ।
दाता भुक्तिं तथा मुक्तिं लभते नात्र संशयः ॥८३॥
धुन्धुमारोऽभवद्राजा देवताऽतिथिपूजकः ।
ययौ विन्ध्याचलं रेवावनं विवेश तत्र च ॥८४॥
वाराहं श्वेतवर्णं स गर्जन्तं प्रददर्श ह ।
हन्तुं तं यावद् यतते तावत् क्रोडोऽपि तत्क्षणम् ॥८५॥
विवेश जलमध्ये च कोटितीर्थेऽथ तं तथा ।
प्रविशन्तं पृष्ठतोऽनुजगाम सोऽपि भूपतिः ॥८६॥
तावत् क्रोडो दिव्यदेहो भूत्वा विमानमास्थितः ।
तं च तथाविधं दृष्ट्वा राजा पप्रच्छ कारणम् ॥८७॥
दिव्यरूपधरो देवो वराहश्चाह भूभृतम् ।
अहं शंभुगणो नाम्ना ह्यंगदोऽस्मि सुगायकः ॥८८॥
दृष्ट्वोर्वशीं च रंभां चाऽप्यभूवं काममोहितः ।
व्याहरन् शूकरीं वाणीं कामक्रीडामयोऽभवम् ॥८९॥
नन्दी शशाप मां दृष्ट्वा शूकरोऽरण्यके भव ।
मया प्रमादितो नन्दी शापान्तं वरमादिशत् ॥९०॥
दर्शनाद् धुन्धुमारस्य कोटितीर्थनिषेवणात् ।
त्यक्त्वा तु सौकरीं योनिं कैलासं चागमिष्यसि ॥९१॥
एवमुक्त्वा स्वस्ति तेऽस्तु समुच्चार्य ययौ गणः ।
राजा शिलातले तत्र निषसाद क्षणं ततः ॥९२॥
राज्ञो हयो नर्मदाया जलपानं समाकरोत् ।
तावत् सोऽप्यभवद् दिव्यो विमानस्थोऽम्बरेऽभवत् ॥९३॥
द्विजो भूत्वाऽब्रवीद् भूपं गालवोऽहं पुराऽभवम् ।
ब्रह्मर्षिः कौरवे क्षेत्रे वाजिदानप्रतिग्रहात् ॥९४॥
दग्धो वाजितनुं प्राप्य रेवायोगेन मोक्षणम् ।
प्राप्तोऽस्मि यामि वै सत्यं ब्रह्मलोकं ममालयम् ॥९५॥
मया राजन् पुरा राज्ञो द्रुमत्सेनात् प्रतिग्रहः ।
गृहीतः कारणवशाच्छृणु तत्कथयामि ते ॥९६॥
राजा मध्यप्रदेशस्य गजवाजिरथादिकम् ।
स्वर्णरत्नाम्बराभूषादिकं नीत्वा रविग्रहे ॥९७॥
कुरुक्षेत्रं समायातो दानार्पणाय सर्वथा ।
किन्तु विप्रा विमृश्यैव राज्ञो घोरप्रतिग्रहम् ॥९८॥
न जगृहुस्तदा राजा स्थानं विप्रान् निनिन्द च ।
अब्रह्मण्यमिदं स्थानं ब्रह्महीनं न याजनम् ॥९९॥
लीनं ब्रह्मबलं सर्वं दानपात्रं न विद्यते ।
आकर्ण्य नृपतेर्वाक्यं मया बलं प्रदर्शितम् ॥१००॥
गालवोऽहं देहि दानं ग्रहीष्ये विद्यते बलम् ।
राजा राज्योपयोग्यानि ददौ वस्तूनि मे तदा ॥१०१॥
अहं राजसमो जातो राज्यभोगसमन्वितः ।
राजा ययौ ततश्चाहं त्यक्त्वाऽग्निहोत्रप्रभृति ॥१०२॥
व्यचरं बहुभोगेषु मृत्वा चाश्वोऽभवं तव ।
सोऽहं रेवाजलेनाऽद्य मुक्तोऽस्म्यस्तु च ते शुभम् ॥१०३॥
एवमुक्त्वा गालवस्तु ययौ सत्यं निजालयम् ।
राजा विचारयामास विनाऽश्वं यामि कुत्र वै ॥१०४॥
तावत् त्रिनेत्रा युवती साक्षादागत्य चाह तम् ।
अस्म्यहं कपिलानाम्नी सरिन्नार्मदवारिगा ॥१०५॥
त्वं च राजन् मम वार्षु स्नात्वा जलं पिबाऽत्र मे ।
राज्यं कृत्वा दिवं याहि सान्तःपुरपरिच्छदः ॥१०६॥
यं यं चिन्तयसे कामं तं तं प्राप्नोषि सुव्रत ।
एवमुक्त्वा ययौ चान्तर्धानं सा कपिला नदी ॥१०७॥

प्रणिपत्य च भूपस्तां स्वपुरं प्रति संययौ।
श्रवणात् कीर्तनादस्य मुच्यते भवबन्धनात् ॥१०८॥
इत्येवं कथितं तीर्थमाहात्म्यं शंकरेण वै।
शिवायै तन्मयोक्तं ते लक्ष्मि! मोक्षप्रदं परम् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कोटितीर्थे सूत्रवेष्टनं सूर्यपिंगललिंगं लक्ष्मीनारायणालयः, कावेरीपयोष्णीसोमगंगाचण्डवेगासंगमाः, चन्द्रसेनस्य चण्डालतामुक्तिः, एरण्डीसंगमः, शल्याविशल्यासंगमः, धुन्धुमारस्य वाराहतामुक्तिः, गालवस्य वाजितामुक्तिरित्यादिनिरूपणनामा चतुःषष्ट्यधिकपञ्चशततमोऽध्यायः ॥ ५६४ ॥

श्रीलक्ष्मीरुवाच—

केन केन विधानेन जनः कर्माणि कारयेत्।
भुक्तिं मुक्तिं गृहस्थोऽपि येन साफल्यमाप्नुयात् ॥ १ ॥

श्रीनारायण उवाच—

शृणु सर्वं कथयामि गृहस्थोऽपि क्रियापरः।
कामलोभादियुक्तोऽपि जन्मसार्थक्यमाप्नुयात् ॥ २ ॥
मयि चित्तं समास्थाय ममताऽहंविवर्जितः।
मां प्रधार्य सदा भोग्ये भोक्तर्यपि क्षमापरः ॥ ३ ॥
फलमूलानि शाकानि पयोव्रतादि सञ्चरन्।
षष्ठ्यष्टमी ह्यमावास्या तूभयत्र चतुर्दशी ॥ ४ ॥
व्रताहानि पर्वकालो द्वादशी श्राद्धपूजनम्।
मैथुनं नाभिसेवेत तेषु निमित्तकेष्वपि ॥ ५ ॥
सर्वं कुर्याच्च मां स्मृत्वा मदर्थं चेत्करोति वै।
मयि योगविधानेन कर्म कुर्याद् दृढव्रतः ॥ ६ ॥
पूतात्मा धर्मसंयुक्तो मयि स्नेहपरायणः।
न ग्लानिर्न जरा तस्य न मोहो रागमत्सरौ ॥ ७ ॥
व्यवधानकरा यस्य ममलोकं स गच्छति।
आजीवनं मम पूजां कृत्वा धाम्नि महीयते ॥ ८ ॥
एतच्छ्रुत्वा पुनर्लक्ष्मीः पप्रच्छ पुरुषोत्तमम्।
कस्मिन् काले तव पूजा कथं कार्या वदाऽत्र मे ॥ ९ ॥
काले काले च देवेश कीदृशं कर्म ते कृते।
कथं संस्थापनं तेऽत्रावाहनं च विसर्जनम् ॥१०॥
धूपं दीपं कीदृशं च गृह्णासि वद मे हरे!।
कथं पाद्यं स्थापनं च गृह्णास्यपि विलेपनम् ॥११॥
आसनं शयनं यानं कन्दमूलफलानि च।
कथं गृह्णासि भगवन् कीदृशं चार्पितं शुभम् ॥१२॥
शरदि कीदृशं कर्म शिशिरे कर्म कीदृशम्।
वसन्ते कीदृशं कर्म ग्रीष्मे किं कर्म ते मतम् ॥१३॥
प्रावृट्काले च किं कर्म वर्षान्ते कीदृशं चरेत्।
यानि तत्रोपभोग्यानि पुष्पाणि च फलानि च ॥१४॥
अर्चायाः किं प्रमाणं ते स्थापनं कीदृश मतम्।
परिमाणं कियत् तस्या उपवासश्च कीदृशः ॥१५॥
पीतं रक्तं पाटलं वाऽम्बरं गृह्णासि कीदृशम्।
तेषां हितकरं वस्त्रं किंरूपं तव सम्मतम् ॥१६॥
केषु द्रव्येषु सम्मिश्रं मधुपर्कं च ते मतम्।
मधुपर्कस्य दानस्य पुण्यं गुणाश्च कीदृशाः ॥१७॥
केषु लोकेषु गच्छन्ति मधुपर्कस्य भक्षकाः।
किम्प्रमाणं प्रदातव्यं मधुपर्कादिकं पुरा ॥१८॥
कानि शाकानि चान्नानि पेयान्यपि प्रियाणि ते।
केन मन्त्रविधानेन प्राशनं ते प्रदीयते ॥ १९॥
व्रते त्वां पूजयित्वा च यथा स्यान्नापराधकः।
कथं तथा वर्तितव्यं पूजायां स्पर्शने तथा ॥२०॥
कानि कर्माणि कुर्वीत तव भक्तस्य भोजने।
प्रापणं ते कथं कार्यं पात्रं कीदृशमुच्यते ॥२१॥
प्रसादं ते च के लोके भुञ्जन्ति पावनं परम्।
ये च एकाशिनो भक्ता अर्चयन्ति च केशवम् ॥२२॥
स्मरन्ति सततं त्वां च तव भक्तेषु वासिनः।
तेषां तु का गतिर्देव तव भक्तिं प्रकुर्वताम् ॥२३॥
कृच्छ्रसान्तपने रक्ता वाय्वाहाराश्च वा व्रते।
कृष्णस्पर्शं प्रकुर्वन्ति प्रपद्यन्ते च कां गतिम् ॥२४॥
अक्षारलवणा ये च तव कार्यपरायणाः।
पयोव्रताश्च ये भक्तास्ते प्रयान्ति च कां गतिम् ॥२५॥
गोदुग्धादिसमाहारा गवां सेवापरायणाः।
उञ्छवृत्तिपरा भक्ताः प्रयान्ति कीदृशीं गतिम् ॥२६॥
भिक्षोपजीविनो ये च गृहस्थधर्ममाश्रिताः।
माधवे सर्वदा सक्ताः कां प्रयान्ति गतिं तु ते ॥२७॥
तव क्षेत्रेषु तीर्थेषु प्राणान् मुञ्चन्ति ये जनाः।
पञ्चाग्नीनां प्रतप्तारः कां गतिं नाथ यान्ति ते ॥२८॥
पञ्चातपे मृता ये च भृगुपाते मृतास्तथा।
कटशय्याप्रसुप्तारो व्योमशयनमास्थिताः ॥२९॥

गोव्रजे शायिनश्चापि तव भक्तिपथे स्थिताः ।
तव दर्शनकर्तारः कां गतिं यान्ति केशव ॥३०॥
शाकाहारं कणाहारं गव्याहारं यवादनम् ।
सक्त्वाहारं च कुर्वन्ति भजन्ते त्वां निरन्तरम् ॥३१॥
पयःपानपरा वापि कां गतिं यान्ति तेऽनुगाः ।
शिरसा दीपकं धृत्वा येऽभियन्ति तवाऽऽलयम् ॥३२॥
पत्रं पुष्पं फलं तोयं काष्ठं धृत्वा च मस्तके ।
तव सेवां प्रकुर्वन्ति कां गतिं यान्ति तेऽनुगाः ॥३३॥
अश्माशनं व्रतं कृत्वा प्रपद्यन्ते तु नित्यशः ।
पत्राहाराः प्रदक्षिणपरायणाश्च ते जनाः ॥३४॥
स्वधर्मचारिणः साध्वीसाधुसेवापरायणाः ।
जानुभ्यां च प्रसर्पन्तस्तव क्षेत्रं प्रयान्ति ये ॥३५॥
दण्डवन्नमनैश्चापि ये प्रयान्ति तवाऽऽलयम् ।
तेषां तु का गतिर्देव ! तव लोके भविष्यति ॥३६॥
उत्तानशयनं कृत्वा दीपं ते धारयन्ति ये ।
अवाङ्मुखास्तु भूत्वा वा प्रयान्ति तव मन्दिरम् ॥३७॥
पुत्रदारगृहान् मुक्त्वा ये त्वां शरणमागताः ।
तेषां तु का गतिः सिद्धा कथयस्व नरायण ॥३८॥
त्वां भजँश्च गते जीवे मधुपर्कसमन्विते ।
वह्निदाहे जलवाहे क्षित्याश्रये च वर्ष्मणि ॥३९॥
सांख्ययोगसुविज्ञानः प्रपद्यते च कां गतिम् ।
त्वत्क्षेत्राऽर्पितदेहाश्च त्यागमार्गमुपाश्रिताः ॥४०॥
तव नामपरा नित्यं नमो नारायणाय च ।
ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा ॥४१॥
इति जापपरा ये च नरा नार्योऽपि सर्वथा ।
तव धर्मपरास्तेषां कीदृशी तु गतिर्मता ॥४२॥
रणे शस्त्रहताः कृष्णनारायण गृणन्ति च ।
नामप्रकीर्तनात्तेषां कीदृशी तु गतिर्भवेत् ॥४३॥
अकस्मान्मरणं प्राप्ता आवेशेन मृता अपि ।
तव स्मृतिपरा ये च कां गतिं यान्ति माधव ! ॥४४॥
अहं शिष्या च दासी च तव भक्त्या व्यवस्थिता ।
भाषितोऽसि मया ह्येवं सर्वलोकसुखावहम् ॥४५॥
रहस्यं धर्मसंयुक्तं तव भक्तिसमन्वितम् ।
सञ्चिन्त्य लोकलाभार्थं तद्भवान् वक्तुमर्हति ॥४६॥
नारीं विना नरा ये च याश्च नार्यो नरान् विना ।
कामतृप्तिं गता नैव तव भक्तिपरायणाः ॥४७॥
अतृप्ताश्च मृता लोके भोग्येच्छासहिता जनाः ।
कां गतिं ते प्रपद्यन्ते त्यागिनो विधवादिकाः ॥४८॥
अप्राप्तकामभोगाश्च कुमारमरणान्विताः ।
तव दास्यपरा नार्यो नरा यान्ति च कां गतिम् ॥४९॥
तव दीक्षापराश्चापि तव भिक्षादनाः सदा ।
तव भक्तेषु भक्तासु रताः कामावसायिनः ॥५०॥
तवैव प्रेमपात्रेषु प्रेममात्रपरायणाः ।
नान्यत्र गमना ये च नरा नार्यश्च वैष्णवाः ॥५१॥
तव प्राप्तीच्छया नान्यं वाञ्छन्ति हृदये क्वचित् ।
एवंविधा महाभक्ताः सर्वस्वार्पणकारकाः ॥५२॥
गतिं कां ते प्रपद्यन्ते तन्ममाचक्ष्व माधव ।
गुरवो लोकराजानो गृहस्था भोगसंवृताः ॥५३॥
विषयेषु निमग्नाश्च कां गतिं यान्ति तेऽनुगाः ।
यद्यपि परमं गुह्यं मम प्रीत्या वदस्व तत् ॥५४॥
इत्युक्तो भगवान् विष्णुः कृष्णनारायणः पतिः ।
लक्ष्मीमुवाच तान् धर्मान् निजधर्मपरायणः ॥५५॥
यत् त्वया पृच्छ्यते लक्ष्मि ! तच्छृणुष्व सुखावहम् ।
यथाकथंचिद् वृत्तिर्मे भक्तो दुःखं न यान्ति वै ॥५६॥
नाहं दानसहस्रेण नाऽहं यज्ञशतैरपि ।
नापि वित्तेन तुष्यामि तुष्यामि प्रेममात्रतः ॥५७॥
मयि चित्तं समाधाय यो मां भजति माधवि ! ।
नित्यं तुष्यामि तस्याऽहं भक्तं मे बहुदोषकम् ॥५८॥
ये नमस्यन्ति मां भक्त्या नार्यो नराश्च मद्व्रताः ।
अर्धरात्रेऽन्धकारे वा मध्याह्ने वाऽपराह्णके ॥५९॥
यच्चित्तं नान्यमाधत्ते मम मूर्तौ व्यवस्थितम् ।
मत्प्राणा मद्व्रतौ सक्ता मल्लोमामत्स्वधापराः ॥६०॥
मत्तृषा मत्सहवासा मदर्नंगपरायणाः ।
मम ताम्बूलभोगाश्च मम चूम्बनकारिणः ॥६१॥
मम पार्श्वे प्रसूताश्च ममारोहणतत्पराः ।
मदंगसंगकृद्ध्याना मम निर्वृत्तिधारणाः ॥६२॥
ते मामेव प्रपश्यन्ति मयि कर्मपरायणाः ।
लब्धलाभा गुणज्ञाश्च मम भक्तौ व्यवस्थिताः ॥६३॥
मम लोके वसन्त्येते मम पार्श्वे ममाश्रिताः ।
मच्छय्यायां रमन्ते ते नरा नार्यो ममानुगाः ॥६४॥
स्वल्पकेन न गम्यन्ते ममाऽऽनन्दा मम प्रिये ! ।
क्षणभक्तकृते लक्ष्मि ! दुष्प्राप्योऽहं नरायणः ॥६५॥
मम कर्माणि कुर्वन्ति मां प्रपश्यन्ति माधवि ! ।
व्यवस्थिताश्च मे भक्तौ स्वार्थेऽपि तादृशाश्च ये ॥६६॥
तेभ्यो ददामि भोगार्थं लोकान् स्वर्गादिकान् प्रिये ।
द्वादश्यामुपवासं च कृत्वा भक्तिपरायणः ॥६७॥

तीर्थजलाञ्जलिं प्रातश्चादित्याय समर्पयेत् ।
नमो नारायणायेति सूर्यं व्योम्नि विलोकयेत् ॥६८॥
यावन्तो बिन्दवः सूक्ष्माः पतन्त्येवाञ्जलेर्जलात् ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥६९॥
श्वेतपुष्पैः पूजयन्ति द्वादश्यां मां तु ये जनाः ।
मृष्टैर्धूपैर्धूपयन्ति हृदि कृत्वा स्मरन्ति माम् ॥७०॥
नमोऽस्तु विष्णवे गृह्ण प्रीयतां भगवन्मम ।
नमोऽस्तु भोजनं गृह्ण प्रीयतां च जलं पिब ॥७१॥
एवं मां पूजयेत्प्रेम्णा शास्त्राणि शृणुयान्मम ।
मम लोकं स गच्छेद्वै जायेतापि चतुर्भुजः ॥७२॥
श्यामाकं गोधूमकं च मुद्गं शालिं यवं तथा ।
नीवारं कङ्कुकं चैतन्मुन्यन्नं सात्त्विकं सदा ॥७३॥
मम नैवेद्यकं कृत्वा भुञ्जीत मत्परायणः ।
यानि कर्माणि कुर्वीत मम भक्तिपरायणः ॥७४॥
षट्कर्मनिरतश्चापि ममाऽहंकारवर्जितः ।
लाभाऽलाभौ परित्यज्य भिक्षाहारो जितेन्द्रियः ॥७५॥
मम कर्मसमायुक्तः पैशुन्येन विवर्जितः ।
शास्त्रानुसारिमध्यस्थो न वृद्धशिशुचेतनः ॥७६॥
ब्राह्मणोऽपि तथाभूतो याति मां परमेऽक्षरे ।
मम सारूप्यमाप्यैव भोगान् भुंक्ते मया सह ॥७७॥
क्षत्रियो दानशूरश्च यथाधर्मे व्यवस्थितः ।
यज्ञेषु कुशलः शुद्धो मम कर्मसु योगवान् ॥७८॥
ममाऽहंकारशून्यश्च गुणज्ञो मध्यसंस्थितः ।
अल्पभाषी गुरुविद्योऽनसूयो निन्द्यवर्जितः ७९॥
अभ्युत्थानादिकुशलो नित्यं भागवतप्रियः ।
पैशुन्यशाठ्यरहितो यो मां स्मरति नित्यशः ॥८०॥
भजते मां च यो नित्यं मम धाम प्रगच्छति ।
वैश्योऽपि मम भक्तिस्थो नित्यकर्मपरायणः ॥८१॥
लाभालाभसमः शान्तो ममाऽहंमोहवर्जितः ।
ऋतुकालाभिगामी च सदा भक्तेषु वत्सलः ॥८२॥
गुरुसम्पूजको नित्यं मम पूजापरायणः ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ॥८३॥
शूद्रो दासो मम भूत्वा करोति कर्म किंकरः ।
दम्पती मम भक्तौ स्तो मम कर्मपरायणौ ॥८४॥
उभौ भागवतौ भक्तौ मद्भक्तौ कर्मनिष्ठितौ ।
देशकालौ च जानीतो रजसा तमसोज्झितौ ॥८५॥
अहंममताशून्यौ च श्रद्धाविनयशोभितौ ।
पूतात्मानौ लोभमोहहीनावतिथिपूजकौ ॥८६॥
नमस्कारपरौ नित्यं मम सेवापरायणौ ।
भजमानौ च मामेव देवदर्शनकारिणौ ॥८७॥
मम ध्यानपरौ नित्यं दास्यभावाऽन्वितौ मयि ।
एवं शूद्रश्च वा शूद्री मम कर्म समाचरेत् ॥८८॥
त्यक्त्वा ऋषिसहस्राणि शूद्रं भक्तं भजाम्यहम् ।
त्यक्त्वा लाभमलाभं च मोहं कामं विसृज्य च ॥८९॥
शीतोष्णाभ्यां विप्रयुक्तो नित्यं मां यो विचिन्तयेत् ।
न तिक्ते च कटौ मिष्टे चाम्ले क्षारे कषायके ॥९०॥
स्पृहा रस्ये लेह्यचोष्यभक्ष्यपेयादिषु क्वचित् ।
भार्यां पुत्रं कुटुम्बं च पोषयन् मत्परायणः ॥९१॥
धृतिश्रद्धापरो नित्यमन्यकार्यजुगुप्सकः ।
बाल्ययौवनवार्धक्यवासनावर्जितः सदा ॥९२॥
स्वल्पभोगी देहयात्रानिर्वाहमात्रसद्ग्रहः ।
कारुण्यः सर्वसत्त्वानां प्रत्युत्थानपरस्तथा ॥९३॥
मौनं विशेषतो धृत्वाऽर्चयत्येव च मां सदा ।
अन्यभोजनदानाद्युत्तरं भोजनवान् व्रती ॥९४॥
अनुष्ठानपरश्चापि मम पार्श्वे मनश्चरः ।
काले मूत्रपुरीषाणि विसृज्य स्नानतत्परः ॥९५॥
पुष्पे धूपे च गन्धे च मम कार्ये सदा रतः ।
कन्दमूलफलाहारो यवसक्तुपराशनः ॥९६॥
षष्ठकाले नवकाले दशमे पक्षकेऽदनी ।
एवं मदर्थे कर्माणि सप्तजन्मानि विन्दति ॥९७॥
मदर्थे त्यक्तसम्बन्धास्त्यागमात्रपरायणाः ।
सन्तः साध्व्यस्त्यागरक्ता मम सेवार्थजीवनाः ॥९८॥
ये भवन्ति महादीक्षावन्तो नराश्च योषितः ।
तान्प्रपश्यति प्रातश्च नित्यं योगिजना अपि ॥९९॥
एवमुक्तविधानेन यस्तु कर्माणि वर्तयेत् ।
तमहं मम पार्श्वे वै रक्षामि त्वां यथा प्रियाम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सर्वेषां महाभागवतीक्रियाभिः लक्ष्मीकृतप्रश्नानुसारेण तदुत्तरकर्मनैष्कर्म्यात्मिकाभिः श्रीहरिधामवासादिकथननामा पञ्चषष्ट्यधिकपञ्चशततमोऽध्यायः ॥ ५६५ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि त्वया पृष्टं पूजा कार्या कथं कदा ।
इत्यादिसर्वप्रश्नानां कथयामि विधानकम् ॥ १ ॥

प्रातर्ब्राह्मे मुहूर्ते च मध्याह्ने सायमित्यपि ।
मम पूजा प्रकर्तव्या षोडशोपसुवस्तुभिः ॥ २ ॥
स्नपनं भोजनं चारात्रिकं विभूषणादिकम् ।
जलपानं ताम्बूलकं पुष्पाञ्जल्यादिकं चरेत् ॥ ३ ॥
शीतकाले कम्बलादि चोष्णोदकादि चार्पयेत् ।
मृष्टानि भोजनादीनि बलपुष्टिकराणि च ॥ ४ ॥
वर्षाकाले ह्यनुष्णं चाऽशितं जलं तथाऽम्बरम् ।
मध्यपुष्टिकरं भोज्यं दातव्यं मे प्रिये ! तदा ॥ ५ ॥
आतपस्य च समये शीतं सुगन्धवज्जलम् ।
सूक्ष्मवस्त्रादि दातव्यं पच्यं भोज्यं फलादिकम् ॥ ६ ॥
स्थापनं च तदा वाच्यं समागच्छ प्रभो प्रिय ।
स्वर्णाद्यासनमासाद्य गृहाण मम पूजनम् ॥ ७ ॥
आगच्छ भगवन् स्वामिन् नारायण पते प्रभो ।
पूजां गृहीत्वा गन्तव्यं निजाऽऽवासे न चान्यथा ॥ ८ ॥
काष्ठादिचूर्णसम्पाद्यं सुगन्धरसमिश्रितम् ।
धूपं गृहाण भगवन् कृष्णनारायण प्रभो ॥ ९ ॥
घृतदीपं सौम्यगुणं गृहाण परमेश्वर ।
घृतदीपं चन्दनस्य धूपं गृह्णामि भावतः ॥१०॥
तीलतैलस्य दीपं च गुग्गुलस्य च धूपनम् ।
यद्वा गृह्णामि कालेऽपि पुष्पसारं सुगन्धकम् ॥११॥
तीर्थजलानि संगृह्य क्षालनं पादयोर्मम ।
कर्तव्यमृत्वनुसारं गृह्णामि पादशोधनम् ॥१२॥
स्नपनं तीर्थसलिलैर्दध्ना दुग्धेन सर्पिषा ।
मधुना शर्करया च तैलेन च प्रमर्दनम् ॥१३॥
नैर्मल्यापादकं चूर्णं स्निग्धं शान्तिकरं सितम् ।
दातव्यं मज्जनं मे च गात्रे योग्ये विशेषतः ॥१४॥
चन्दनं पुष्पसारादि विष्णुतैलादि लेपनम् ।
गृह्णामि नित्यदा भक्तप्रदत्तं भावतः प्रिये ! ॥१५॥
स्वर्णसिंहासनाद्यं च गृह्णामि कम्बलासनम् ।
पट्टिकां काष्ठसंभूतां चाध्यास्य चाभिषेचनम् ॥१६॥
गृह्णामि भावतो लक्ष्मि ! दत्तं नरेण योषिता ।
पर्यंके गेन्दुके रम्ये मृदौ सास्तरणे पृथौ ॥१७॥
पार्श्वकाभ्यां युते गण्डमश्रुकाभ्यां समन्विते ।
कशिपुशोभिते दंशवाराच्छदनसञ्चिते ॥१८॥
गुप्तदोरकयुक्ते च स्वपिमि कमले सदा ।
यानं हंसयुतं चाश्वयुतं गजादिशोभितम् ॥१९॥
स्वर्णनिर्माणरूपं च व्योमगामि महत्तमम् ।
गरुडं वा माणिकीं वा रथं दिव्यं वहामि वा ॥२०॥
कन्दमूलफलादीनि सुगन्धरसवन्ति च ।
पक्वानि ऋतुजातानि गृह्णामि भक्तभावतः ॥२१॥
स्वर्णपात्रे प्रेमपात्रे संस्कृतं चार्पितं शुभम् ।
शरत्काले यथा स्वस्य शिशिरेऽपि यथा स्वकम् ॥२२॥
वसन्ते च यथा स्वस्य ग्रीष्मे चापि यथा स्वकम् ।
प्रावृष्यपि च वर्षान्ते यथा स्वस्यैव रोचते ॥२३॥
भोग्यं धार्यं तथा पेयं खाद्यं वस्त्रं विभूषणम् ।
जलं यानं वाहनादि वायुर्दोला वनादिकम् ॥२४॥
भवनं स्वपनं वारि शयनं सेविकादिकम् ।
तथा सर्वं मम कल्प्यं तथा देयं न चान्यथा ॥२५॥
यथा देहे तथा देवे कर्तव्यं चार्पणं प्रिये ।
अर्चा षडंगुलादूर्ध्वप्रमाणा च शुभा मता ॥२६॥
चतुःषष्ट्यंगुलं यावत् ततो दीर्घा न शस्यते ।
प्रतिष्ठानं मन्दिरे च नेत्रवृत्तिः समा भवेत् ॥२७॥
द्वारे ऊर्ध्वे चतुर्थांशे नेत्ररेखासमस्थली ।
यथा भवेत् तथा मूर्तेः प्रतिष्ठानं मतं मम ॥२८॥
मूर्त्यधः स्वर्णरत्नादि स्थाप्यं सिंहासनान्तरे ।
गर्भे तत्र च संस्थाप्या प्रतिमा श्रीहरेः प्रिये ! ॥२९॥
दक्षिणे तु पतिः स्थाप्यो वामे श्रीः राधिका शिवा ।
लक्ष्मीश्च माणिकी हंसा प्रभा पार्वती मंजुला ॥३०॥
जया च ललिता शान्ता मनसा च सरस्वती ।
दुर्गा गंगा च कमला सावित्री विरजा तथा ॥३१॥
अन्या अपि यथेष्टा स्याद् भक्तस्य श्रीहरेः प्रिया ।
संस्थाप्या कर्णनिम्ना वै यथाशोभं तु दर्शनम् ॥३२॥
पूर्वेऽहनि भवेन्नक्तं नक्तं सूर्यास्तपूर्वकम् ।
द्वितीयेऽहनि कार्यं न प्राशनं च दिवानिशम् ॥३३॥
पत्रपुष्पफलान्नादेरुपोषणं च तत्स्मृतम् ।
एकहारः फलाहारो जलाहारो न बाधकः ॥३४॥
वसन्ते श्वेतवस्त्राणि फाल्गुने केसराणि च ।
कौसुंभानि तथाऽऽषाढे स्वर्णवर्णानि चाश्विने ॥३५॥
चित्रवर्णान्युत्सवादौ चैकवर्णानि नित्यदा ।
स्वर्णतारादिशोभाढ्यं धार्यते च मया प्रिये ! ॥३६॥
लोहतारं विना वस्त्रं सर्वं श्रेयस्करं मतम् ।
रक्तं सम्पत्करं वस्त्रं पीतं लक्ष्मीप्रदं मतम् ॥३७॥
श्वेतं ज्ञानकरं शश्वच्चित्रं भोगप्रदं मतम् ।
नीलं निषिद्धमेवाऽत्र धार्यं नैव कदाचन ॥३८॥
मधुपर्को गुडाज्यस्य शर्कराज्यस्य वापि च ।
शर्कराक्षीरमिश्रस्य खण्डादध्नोस्तथा मतः ॥३९॥

मधुमिष्टादिपेयस्य मिष्टपेयस्य वा मतः ।
यद्गृहे जाठरे शान्तिर्भवेत् तत् मधुपर्ककम् ॥४०॥
आम्ररसादौ सर्पिश्च शर्करा चेत्यपि त्रयम् ।
मिष्टफलेषु मिष्टं च मिश्रितं मधुपर्ककम् ॥४१॥
मह्यं देयं यथायोग्यं शीतलं गुणकृन्मम ।
मधुपर्कप्रदानेन स्वर्गे चात्र विभूतयः ॥४२॥
दातुर्भवन्ति सततं चान्नपानादिपुण्यदाः ।
घृतकुल्या मधुकुल्या दधिकुल्याश्च तद्गृहे ॥४३॥
क्षीरकुल्यास्तक्रकुल्या जलकुल्या भवन्ति च ।
यत्र लोके च ताः कुल्यास्तत्र यान्ति मधुप्रदाः ॥४४॥
यावज्जाठरशान्तिः स्यात्तावत्प्रमाणकं मधु ।
देयं तृप्तिप्रदं मिष्टं येन लोकाः सनातनाः ॥४५॥
दातुरमृतदाः सर्वे रसदाश्च भवन्ति वै ।
सात्त्विकान्येव शाकानि कूष्माण्डादीनि सर्वथा ॥४६॥
वृन्ताकानि दुग्धवतीगिल्किकादीनि यान्यपि ।
तान्दूलादीनि पत्राणि सार्षपादिदलानि च ॥४७॥
कर्कटीकारवेल्लानि चिरभट्टानि यानि च ।
सौम्यानि कन्दमूलानि सन्ति प्रियाणि मे प्रिये ! ॥४८॥
श्रीखण्डपायसादीनि क्वथितानि शुभानि च ।
क्वथिका राजिकाराद्धमारनालानि यान्यपि ॥४९॥
गर्मरीमर्चिकातिक्तकरवीराम्रकाणि च ।
एवंविधानि रम्याणि सन्ति प्रियाणि मे सदा ॥५०॥
भुंक्ष्व कामं मिष्टमिष्टं शनैः पूर्णं प्रशान्तिदम् ।
यथारुचि प्रभो भुंक्ष्व पक्वान्नादीनि केशव ॥५१॥
इत्येवं भोजयेन्मां च वीजयेत्पवनं तदा ।
पुनः प्रेम्णा मम पात्रे भक्तः सम्परिवेषयेत् ॥५२॥
एवं वै भोजयेन्नित्यं स्वर्णासने निधाय माम् ।
स्वर्णपात्रे जलं भृत्वा स्वर्णस्थाल्यादिपात्रके ॥५३॥
प्रेम्णा सर्वं परिवेषयित्वा जलं च पाययेत् ।
ताम्बूलकं शुभं दद्यात् कुर्याच्च 'पादमर्दनम् ॥५४॥
पूजायां चापराद्धा मे यथा न स्युस्तथा भवेत् ।
मामशुद्धशरीरो न स्पृशेत् स्नानं विना क्वचित् ॥५५॥
मूकवन्नैव यायाच्च मन्दिरस्थं च मां प्रति ।
प्रबोधयेन्न वै मूको विना घण्टादिवादनम् ॥५६॥
अकाले चाऽनियमेन प्रबोधयेन्न मां क्वचित् ।
श्रेष्ठिमानुषराजार्थे जागरं कारयेन्न माम् ॥५७॥
स्वार्थार्थे पूजयेन्नैव पृष्ठं नैव प्रदर्शयेत् ।
क्षुवनं वादकरणं मर्यादात्यजनं न वा ॥५८॥
अशुद्धवस्त्रसहितो न यायान्मम मन्दिरम् ।
अशुद्धवस्तु संस्पृश्य विना प्रक्षाल्य वै करौ ॥५९॥
न मां स्पृशेन्न मामकीनानि वस्तूनि संस्पृशेत् ।
कण्डूयनं स्वयं कृत्वा न मां स्पृशेत् कदाचन ॥६०॥
दुष्टसंकल्पमेवापि मद्गृहे न हि कारयेत् ।
मत्पूजायां स्वयं नाऽद्यान्न पेयाश्च जलान्यपि ॥६१॥
मूकवत्पूजयेन्नैव विना मे रटणं तदा ।
मन्माल्यशिष्टसामग्रीदूरीकृत्य पुनः करम् ॥६२॥
अप्रक्षाल्य स्पृशेन्नैव नूतनानि च वस्तूनि ।
थूत्काराऽपानवाय्वादि विसर्जयेन्न मन्दिरे ॥६३॥
मूत्रादिकं क्रियाच्चेद्वै स्नानं कृत्वा स्पृशेत्तु माम् ।
मम पूजामध्यवर्ती नान्यकार्यपरो भवेत् ॥६४॥
अन्यमना भवेन्नापि दुर्गन्धिभक्षको न च ।
अशुद्धपानो न स्याच्च न च हिंसापरो भवेत् ॥६५॥
वस्त्रभूषाद्यर्पणे मां प्रसह्य नैव धारयेत् ।
शीतोष्णादौ यथा स्वस्य तथा स्यान्मेऽनुकूलकृत् ॥६६॥
मुखप्रक्षालनं तैलमर्दनं चन्दनार्पणम् ।
यथायोग्यं प्रकुर्याच्च नाऽधिकं दुःखकृद् यथा ॥६७॥
शैत्ये वह्नेरुपस्थानं नात्युत्कृष्टं क्रियान्मम ।
वस्त्राणां धारणे नित्यं कुर्याद् विनिमयं मम ॥६८॥
भूषाणां धारणे चापि कुर्याद्वै परिवर्तनम् ।
न गालीं प्रवदेन्नान्यनिन्दां ग्राम्यकथां वदेत् ॥६९॥
न स्वपेन्मन्दिरमध्ये नग्नो भवेन्न मन्दिरे ।
निषीदेन्न च मां कृत्वा पृष्ठे जनमुखं प्रति ॥७०॥
विना पादौ सम्प्रक्षाल्य न गच्छेन्मन्दिरान्तरे ।
आरात्रिवर्तिकां दीपं स्पृष्ट्वा विना जलेन च ॥७१॥
करप्रक्षालनं मां वै स्पृशेन्नैव च वस्तुकम् ।
नान्यं प्रवेशयेत् कंचित् कांचिच्च मन्दिरान्तरे ॥७२॥
उच्छिष्टाननहस्तादि प्रविशेन्नैव मन्दिरे ।
मालापुष्पादि चोत्तार्य विना चोत्तारणक्षणम् ॥७३॥
दद्यान्नान्यजनायेति यद्यपि स्यान्महीपतिः ।
पूर्वदिनस्य चोत्तार्यं रक्षयेच्च ददेत्तदा ॥७४॥
हस्ते समर्प्य वा दद्यात् तात्कालिकं प्रसादनम् ।
आवरणपटं नैव पुनर्मध्ये समुच्छ्रयेत् ।
न पातयेत्तथा मध्ये दर्शकानां ह्युपस्थितौ ॥७५॥
शंखं जलेन भृत्वैव दीपं प्रज्वाल्य वै शुभम् ।
वस्त्रं मार्जनयोग्यं च धृत्वा पात्रे सुगन्धिभृत् ॥७६॥
घण्टां संवादयित्वैव ततश्चारात्रिकं चरेत् ।
नग्नमूर्तेः समये मे द्वारं नोद्घाटयेत् क्वचित् ॥७७॥

वस्त्रभूषाधारणादौ द्वारपिधानमाचरेत् ।
धूलीं रजो जन्तुजालं दूरयेद्वै प्रतिक्षणम् ॥७८॥
रात्रौ च शयनादूर्ध्वं चाऽऽप्रातर्मध्यकालिकम् ।
मन्दिरोद्घाटनं नैव कुर्यादापदमन्तरा ॥७९॥
मध्याह्नेऽपि तथा नैवोद्घाटयेत् कष्टमन्तरा ।
भोज्यकाले वदेद् भोज्यकीर्तनं वाद्यसंयुतम् ॥८०॥
असंस्कृतमशुद्धं चाऽसात्त्विकं चाम्बरादिकम् ।
विभूषणं च हाराद्यनिर्मलं चान्नमित्यपि ॥८१॥
जलं चान्यदायुधादि न धारयेन्न चार्पयेत् ।
भावनां शैलविषयां धातुरूपां न चाचरेत् ॥८२॥
दिव्योऽहं सर्वथा वर्ते व्यापकश्चान्तरात्मकः ।
सर्वज्ञः सर्वसंस्थश्च पश्यामि मूर्तिसंस्थितः ॥८३॥
चित्तैकाग्र्यं हि पूजायां रक्षणीयं प्रयत्नतः ।
सर्वेन्द्रियाणां वृत्तीनां मम मूर्तौ विशेषतः ॥८४॥
भक्तस्य भोजने देयं मिष्टं प्रासादिकं मम ।
यथा ममातिसत्कारस्तथा कार्यो जनस्य मे ॥८५॥
भोजनीयो विशेषेण तत्र भुञ्जाम्यहं प्रिये ।
प्रापणं गोधूमकङ्कुयवादीनां सदुत्तमम् ॥८६॥
मदर्थं शुभपक्वान्नं निर्माय देयमेव ह ।
पात्रं स्वर्णादिधातूनां नूतनं देयमेव मे ॥८७॥
मत्कृपापात्रतामाप्ता भक्ता भागवता मम ।
प्रसादाशनयोग्यास्ते तुलसीमालिकायुताः ॥८८॥
महामन्त्रयुताश्चापि दीक्षिता नरयोषितः ।
आत्मनिवेदिभक्ताश्च नैवेद्यप्राशनेऽर्हकाः ॥८९॥
ममैकान्तिकभक्तेषु वासिनां भक्तियोगिनाम् ।
मम लोके गतिः साम्या चतुर्बाहुस्वरूपिणी ॥९०॥
कृच्छ्रादिव्रतकर्तारो यदि भोगेच्छवो जनाः ।
ते तु यान्ति महत्स्वर्गं वैराजं लोकमित्यपि ॥९१॥
अक्षारलवणा ये च व्रतिनो मत्क्रियापराः ।
सत्यलोकं प्रयान्त्येव यदि भोगेच्छवः सदा ॥९२॥
गवां सेवापरा भक्ता महाभागवता यदि ।
तक्ष यान्ति च गोलोकं शाश्वतं धाम मे जनाः ॥९३॥
उञ्छवृत्तिपरा भक्ताः परं वैकुण्ठमेव ते ।
प्रयान्ति रागहीनाश्च यात्रामात्रपरायणाः ॥९४॥
भिक्षाहारा गृहस्थाश्च मद्व्रताः साधवश्च ते ।
यान्ति मे शाश्वतं धामाऽक्षरममृतमव्ययम् ॥९५॥
मम गृहेऽन्तिके क्षेत्रे चालये मन्दिरेऽपि च ।
प्राणैर्वियुज्यते यः स यात्यक्षरं पदं मम ॥९६॥
अग्नितापा मम भक्ताः साकांक्षा यान्ति वै दिवम् ।
सौरलोकं तापसास्ते प्रयान्तीन्द्रभुवं तथा ॥९७॥
शाकाद्याहारकर्तारो मम भक्तिपरायणाः ।
मम लोकं त्वमृताख्यं प्रयान्त्येव न संशयः ॥९८॥
दीपदानपरा ये च तपःपरा ममाश्रिताः ।
पत्रपुष्पादिदातारो यान्ति मे परमं पदम् ॥९९॥
धर्मिष्ठाश्च सतां सेवापरा यान्ति हि मद्गृहम् ।
जानुयाना मम भक्ता यान्ति धामाऽक्षरं परम् ॥१००॥
उत्तानशयनाद्याश्च यान्ति दिव्यं परं पदम् ।
सर्वत्यागा मम सन्तो मत्स्वरूपा भवन्ति वै ॥१०१॥
यत्र क्वापि धृते देहे मयि सन्धृतमानसाः ।
आत्मना यान्ति मल्लोकं राधालक्ष्म्याश्रितं पदम् ॥१०२॥
त्यागिनः सांख्ययोगाश्च चतुर्भुजा हि विष्णवः ।
भवन्त्येव न सन्देहो मुक्ता मद्रूपधारिणः ॥१०३॥
ओं नमः श्रीकृष्णनारायणायेतिजपान्विताः ।
नरा नार्योऽक्षरादूर्ध्वं परं धाम प्रयान्ति मे ॥१०४॥
शस्त्रहता अपि नामपरा मे भक्तिसंयुताः ।
पार्षदा मम जायन्तेऽक्षरे धाम्नि हि शाश्वताः ॥१०५॥
अकस्मान्मरणं प्राप्ता यदि मच्चित्तवर्त्तिनः ।
क्षणमात्रं स्मरन्तो मां प्रयान्ति परमां गतिम् ॥१०६॥
अतृप्ता नरवर्गा वा नार्यो वा मेऽनुवर्तिनः ।
प्रयान्ति चैश्वरान् लोकान् कोटिकन्याप्रसेवितान् ॥१०७॥
मम दीक्षापरा यान्ति परे धाम्नि महात्मताम् ।
गृहस्थाः कामभोगाढ्या भक्ताश्चेद् यान्ति वैकुतम् ॥१०८॥
मायायाश्च प्रधानाया लोकेषु विगतज्वराः ।
त्यागिनो विधवाद्याश्च भक्ताः कामाभिलाषिणः ॥१०९॥
जायन्ते विष्णुरूपाश्च रमारूपाश्च धामनि ।
कोटिकल्पानि सौख्यानि भुञ्जते ते विकुण्ठके ॥११०॥
मयि स्नेहपरा भक्ता नरा नार्योऽतिकामुकाः ।
मम पत्न्यो भवन्त्येव शाश्वतीं मुक्तिमाश्रिताः ॥१११॥
गुरवोऽपि गृहस्थाश्च कृष्णरूपा भवन्ति ते ।
गोलोके सर्वभोगाश्च शाश्वतानन्दमोदिनः ॥११२॥
इत्येतत् कथितं लक्ष्मि तव पृष्टं मयाऽनघे ।
पठनाच्छ्रवणाच्चास्य लभेद्वै शांकरीं गतिम् ॥११३॥
ब्राह्मीं वा वैष्णवीं वापि स्थितिं लभेन्न संशयः ।
कथयिष्येऽन्यदेवाऽपि पार्वत्या शंकराय यत् ॥११४॥
नर्मदामूलके ऋक्षे पृष्टं यत् तच्छुभावहम् ।
दुःखं सुखं च भक्तानां मनोमात्रविकल्पनम् ॥११५॥

मया धामान्यसंख्यानि गोलोकादीनि चाऽक्षरे ।
प्रान्ते भक्तप्रभोगार्थे निर्मितानि सुखानि हि ॥११६॥
भक्तभक्तायुगलानि मम भक्तिपराणि च ।
मदिच्छयैषु तिष्ठन्ति यावद्भोगविरामिता ॥११७॥
भोगतृप्तिसुखानां वै विरामेऽक्षरधामनि ।
यान्ति तानि युगलानि मत्स्वरूपपराणि हि ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने श्रीलक्ष्मीकृतानां विविधप्रश्नानां भक्तिकृज्जनगतिसमाधानादिनिरूपणनामा षट्षष्ट्यधिकपञ्चशततमोऽध्यायः ॥ ५६६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! च दुःखानि विना भक्तिं जनस्य वै ।
तथा सुखानि वक्ष्यामि मम योगेन सर्वथा ॥ १ ॥
अनेकचित्तविभ्रान्तो ममाऽहंकारसंवृतः ।
अजितेन्द्रिय आशास्थस्ततो दुःखतरं नु किम् ॥ २ ॥
असन्तुष्टश्चातितृष्ण उद्वेगक्लेशकारकः ।
वासनाकृष्टहृदयस्ततो दुःखतरं नु किम् ॥ ३ ॥
अपूतात्मा धर्महीनो दयादानविवर्जितः ।
लक्ष्मीभोगविहीनश्च ततो दुःखतरं नु किम् ॥ ४ ॥
रोगो मोहो जरा ग्लानिः सशस्त्रः परवञ्चकः ।
परदुःखप्रदाता चेत् ततो दुःखतरं नु किम् ॥ ५ ॥
ममाऽर्चनक्रियाहीनः सतां सेवाविवर्जितः ।
गृहे क्लेशकरः स्याच्चेत् ततो दुःखतरं नु किम् ॥ ६ ॥
नास्ति देवो न वै धर्मो परलोको न विद्यते ।
मन्यते न पुनर्जन्म ततो दुःखतरं नु किम् ॥ ७ ॥
उचितेनोपचारेण द्रव्ये सत्यपि मानवः ।
यो मां नैव प्रपद्येत ततो दुःखतरं नु किम् ॥ ८ ॥
सर्वभक्षी सर्ववस्तुविक्रेता नतिवर्जितः ।
यो न मां प्रतिपद्येत ततो दुःखतरं नु किम् ॥ ९ ॥
अभ्यागतं चातिथिं चाऽदत्वा भुंक्ते निजानपि ।
पाकभेदप्रकर्ता चेत् ततो दुःखतरं नु किम् ॥१०॥
परोपताप्यसन्तुष्टो मन्दात्मा देवदूषकः ।
कर्महीनो ह्रासमूले ततो दुःखतरं नु किम् ॥११॥
आत्मश्रेयो ह्यनासाद्य चाऽकृत्वा पापदाहनम् ।
मृत्युकालवशं प्राप्तस्ततो दुःखतरं नु किम् ॥१२॥
राज्ये सत्यपि याम्यानां हस्ते गत्वा प्रसह्य वै ।
दूतदुःखं समाप्नोति ततो दुःखतरं नु किम् ॥१३॥
हस्त्यश्वरथयानानि सैन्यानि भृत्यवर्गकान् ।
विहायाऽन्यवशो याति ततो दुःखतरं नु किम् ॥१४॥
अश्नन्ति मादकं केचित् केचिच्छालिघृतादिकम् ।
शुष्कान्नं केचिदश्नन्ति केचित् कन्दफलान्यपि ॥१५॥
वरवस्त्रावृतां शय्यां सेवन्ते समभूषिताम् ।
तृणेषु शेरते केचित् कुर्वन्ति नात्मसाधनम् ॥१६॥
मरणं सर्वसामान्यं नैकं त्यजति नाऽपरम् ।
ज्ञात्वैवं न भजन्ते मां ततो दुःखतरं नु किम् ॥१७॥
सुरूपो दृश्यते कश्चित् कश्चिद् विरूपकुब्जकः ।
सगुणो निर्गुणः कश्चित् साम्यं चोदरपोषणम् ॥१८॥
विद्वान् मूकस्तथा कश्चिन्न कश्चिच्छाश्वतोऽत्र वै ।
ज्ञात्वैव मां न भजते ततो दुःखतरं नु किम् ॥१९॥
विद्यमाने धने केचित् कृपणा भोगवर्जिताः ।
दाता सत्यपि दारिद्र्ये बहुव्ययपरायणः ॥२०॥
एवं सत्यपि वर्षान्ते रिक्तं गृहं द्वयोरपि ।
किं फलं धनिनस्तस्य किं फलं निर्धनस्य च ॥२१॥
दानयज्ञादिराहित्ये ततो दुःखतरं नु किम् ।
द्विभार्यो बहुभार्यो वा तदा सम्पद्यते जनः ॥२२॥
यदा चैकत्राऽसन्तुष्टश्चापरां स प्रशंसति ।
एका तु दुर्भगा तत्र सदा शापपरायणा ॥२३॥
भोगे शापानुलेपश्च परलोकविनाशकृत् ।
ज्ञात्वैवं भजते मां न ततो दुःखतरं नु किम् ॥२४॥
सद्गृहे धृतजन्मानो सर्वसाधनसंभृताः ।
कुर्वन्ति पापकर्माणि ततो दुःखतरं नु किम् ॥२५॥
लब्ध्वा तु मानुषीं संज्ञां सर्वज्ञानसमन्विताम् ।
मामेव न प्रपद्यन्ते ततो दुःखतरं नु किम् ॥२६॥
कृत्वा तु विपुलं कर्म स्वार्थमात्रपरायणः ।
विपरीतमतिं याति स दुःखायोपजायते ॥२७॥
दुःखं स्वेच्छाविरुद्धं स्यात् सुखं स्वेच्छानुकूलता ।
आत्मनश्च परं दुःखं नित्यानन्दविहीनता ॥२८॥
मृत्युत्तरं च यल्लभ्यं मानवेन हि वर्ण्यते ।
कर्मणा शाश्वतं सौख्यं तच्चेन्नास्ति वृथाजनुः ॥२९॥
जीवन् दुःखसमायुक्तो मृतोऽपि दुःखभाक् पुनः ।
तस्य व्यर्थं गतं जन्म ततो दुःखतरं नु किम् ॥३०॥
मां पूजयित्वा नैवेद्यं विशिष्टं परिकल्प्य च ।
शेषमन्नं समश्नाति ततः सौख्यतरं नु किम् ॥३१॥

त्रिकालं मां प्रपद्यन्ते पश्यन्ति प्रतिमां मम ।
भक्तिं कुर्वन्ति मे प्रेम्णा ततः सौख्यतरं नु किम् ॥३२॥
देवतातिथिमर्त्यानां गवां चान्नं विभज्य च ।
आश्रितानां ततः पश्चात् समश्नाति गृहाधिपः ॥३३॥
ते निराशा न गच्छन्ति सन्तुष्टा यान्ति दानतः ।
यस्यैवं वर्तमानस्य ततः सौख्यतरं नु किम् ॥३४॥
मासि मास्येकदिवसस्त्वमावास्येति योच्यते ।
पितरो यस्य तृप्यन्ति ततः सौख्यतरं नु किम् ॥३५॥
भोजनादौ च साधुभ्यः पायसान्नं ददाति यः ।
अभिन्नमुखरागेण ततः सौख्यतरं नु किम् ॥३६॥
बह्वीष्वपि स्वपत्नीषु यस्य बुद्धिर्न भिद्यते ।
समं सौख्यं ददात्येव ततः सौख्यतरं नु किम् ॥३७॥
अहिंसनं व्रतं शुद्धान्तरो रक्षेद् रुषं त्यजन् ।
सुरूपं भोग्यवस्त्वादि दृष्ट्वा दृष्टिं ददाति न ॥३८॥
शान्तात्मा कामनाहीनो मोहहीनः समन्ततः ।
लोष्ठवत् पश्यति स्वर्णं ततः सौख्यतरं नु किम् ॥३९॥
पूजायां वर्तमाने च यदि प्राणः प्रगच्छति ।
देवार्थं मरणं स्याच्चेत् ततः सौख्यतरं नु किम् ॥४०॥
कुत्सितं नैव कुर्याच्च कुर्यादेवात्ममोक्षणम् ।
लाभाऽलब्धावपि तुष्टस्ततः सौख्यतरं नु किम् ॥४१॥
भर्ता व्रतं सदा स्त्रीणां साक्षान्मूर्तं प्रविद्यते ।
भर्तारं समनुसृत्य वर्तते या पतिव्रता ॥४२॥
पत्नीव्रतं तथा पत्युः साक्षान्मूर्तिः पतिव्रता ।
पत्नीं सन्तुष्य च पतिर्वर्तते सुखदायकः ॥४३॥
दम्पती प्रेमपूर्णौ चेत् ततः सौख्यतरं नु किम् ।
विभवाढ्यो जनो यश्च विद्याविनयवाँस्तथा ॥४४॥
निगृहीतेन्द्रियः स्याच्चेत् ततः सौख्यतरं नु किम् ।
सहते चाऽवमानानि व्यसने दुर्मनाः सदा ॥४५॥
मम भक्तौ चातिसक्तस्ततः सुखतरं नु किम् ।
जलं मिलति निर्मूल्यं भिक्षया चान्नमाप्यते ॥४६॥
न चिन्ता द्रव्यरक्षायास्ततः सुखतरं नु किम् ।
शरीरं रोगहीनं च पाचनाग्निः समुज्ज्वलः ॥४७॥
पक्वाऽपक्वं पचत्येव ततः सुखतरं नु किम् ।
शीतं न बाधते चाति औष्ण्यं नाभिभवत्यपि ॥४८॥
वृक्षवायुकुटावासस्ततः सुखतरं नु किम् ।
लोकाः कुटुम्बं सर्वत्र आधारः परमेश्वरः ॥४९॥
चिन्तनं श्रीहरेर्नित्यं ततः सुखतरं नु किम् ।
गृहं यस्य तु पारक्यं गुहाप्रख्यं निरामयम् ॥५०॥
पोषणं परभृत्तुल्यं भोजनं शुकवत्तथा ।
भजनं सहजं यस्य ततः सौख्यतरं नु किम् ॥५१॥
सकामो वा ह्यकामो वा ममालयनिवासकृत् ।
यस्तु प्राणाद् वियुज्येत ततः सुखतरं नु किम् ॥५२॥
मातरं पितरं भार्यां गुरुं देवं च बालकान् ।
देवतामिव पश्येद् यस्ततः सौख्यतरं नु किम् ॥५३॥
शान्तिर्ज्ञानं विचारश्चाऽनुद्वेगश्च विवेकिता ।
धैर्यं स्थैर्यं निरपृहत्वं ततः सौख्यतरं नु किम् ॥५४॥
पूजयेद् देवदेवेशं कृष्णनारायणं हरिम् ।
निपतेद्व दण्डवद् भूमौ ज्ञानी भागवतः शुचिः ॥५५॥
शिरसा चांजलिं कृत्वा प्रसीदेति वदेद्धरिम् ।
क्षमापयेद्धरिं नित्यं ततः सौख्यतरं नु किम् ॥५६॥
अभ्यञ्जनं च मे दद्याद् दद्याद् वा तैलमर्दनम् ।
सर्वं शरीरं चाऽभ्यञ्ज्याद् घृतेनापि च मस्तकम् ॥५७॥
आज्यमानमपि तथा यावन्तस्तैलबिन्दवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥५८॥
ततः पुण्यकृताँल्लोकान् सुखान् विन्दति मानवः ।
ततः परं पुमांसं मां विन्दत्यक्षरसंज्ञके ॥५९॥
उद्वर्तनं च मे दद्याच्छुद्धयन्त्यंगानि येन मे ।
पिप्पलिका मधुकश्च अश्वपर्णश्च कर्कटः ॥६०॥
एतेषां तु शुभं चूर्णं मम गात्रसुखावहम् ।
एवमुद्वर्तनं कृत्वा घर्षयित्वा शनैः शनैः ॥६१॥
नैर्मल्यं मे प्रकुर्याच्च भक्तः करेण सर्वथा ।
तत आमलकं चैव सुगन्धचूर्णमुत्तमम् ॥६२॥
तेन मे सर्वगात्राणि मर्दयित्वा दृढव्रतः ।
यद्वा क्षारस्नेहगन्धगूटिकाभिः प्रमार्जनम् ॥६३॥
स्नपनं जलधाराभिः कारयेन्मां सुखावहम् ।
पश्चाद् गन्धं प्रदद्याच्च पुष्पसारादिकं तथा ॥६४॥
कर्मण्यान्यपि माल्यानि पुष्पांञ्जलिं प्रदापयेत् ।
पश्चाद् धूपं च मे दद्यात् सुगन्धद्रव्यमिश्रितम् ॥६५॥
पश्चाद् वस्त्रं च मे दद्यात् क्षौमं शुक्लं च पीतकम् ।
पश्चाद् भूषां मम दत्वा त्वासनं चोपकल्पयेत् ॥६६॥
पश्चाद्वै भोजनं दत्वा प्रसादं संग्रसेत् ततः ।
पश्चाज्जलं सुताम्बूलं दद्यान्मे शयनादिकम् ॥६७॥
एवं भक्तिं प्रकुर्यान्मे पादसंवाहनं चरेत् ।
रञ्जयेन्मां कथालापैर्हासयेच्च हसेत्तथा ॥६८॥
आनन्दं कारयेन्मां च ततः सौख्यतरं नु किम् ।
भक्तो भक्ता च वा कृष्णे सर्वस्वार्पणमाचरेत् ॥६९॥

फलं तस्य च गोलोके कृष्णः सर्वं ददाति वै ।
एवं मुक्तेः परे लाभे ततः सौख्यतरं नु किम् ॥७०॥
राधावत् सेवने कृष्णं लक्ष्मीवच्च नरायणम् ।
पार्वतीवच्छकरं च प्रभावद्धारकरं प्रभुम् ॥७१॥
माणिक्यावत् स्वामिनं चानादिकृष्णनरायणम् ।
सेवते सर्वथा धाम्नि ततः सौख्यतरं नु किम् ॥७२॥
य एतेन विधानेन यक्ष्यन्ते खलु मां प्रिये ।
प्राप्स्यन्ति ते परां सिद्धिं मम धामगतां ध्रुवाम् ॥७३॥
अहमेव वरारोहे सर्वभूतसनातनः ।
अधश्चोर्ध्वे च तिर्यक् च कोणेषूपरि संस्थितः ॥७४॥
नरे नार्यां कुमार्यां च विधवायां जरायुते ।
देहे देहिन्यपि चास्मि बाले युनि च गर्भगे ॥७५॥
एवं मां यो विजानीयाद् भजन्मां सर्वभावनः ।
संसारे विजयस्तस्य ततः सौख्यतरं नु किम् ॥७६॥
येन गर्भे न गच्छेद्वै तच्छृणुष्व समुद्रजे ।
कृत्वापि विपुलं कर्म चात्मानं न प्रशंसति ॥७७॥
करोति सर्वकर्माणि शुद्धेनैवाऽन्तरात्मना ।
ऐश्वर्ययुक्तो भवति समर्थोऽनुग्रहादिके ॥७८॥
कार्याऽकार्ये विजानाति कृष्णधर्मे विनिष्ठितः ।
शीतोष्णवातवर्षादिक्षुत्पिपासासहस्तथा ॥७९॥
कृष्णधनो निरालस्यः सत्यवागनसूयकः ।
ब्रह्मचर्यपरो नित्यं स्वदारनिरतस्तथा ॥८०॥
सत्याचारो विशुद्धात्मा नित्यं च भगवत्प्रियः ।
संविभज्य विशेषज्ञः साधुभक्तसुवत्सलः ॥८१॥
प्रियभाषी प्रभक्तानां मम सेवापरायणः ।
एवं यो मे भवेद्भक्तः कुयोनिं नहि गच्छति ॥८२॥
नाभिलषति स्वर्गादीन् मम लोकं स गच्छति ।
जीवहिंसानिवृत्तश्च सर्वभूतहितंकरः ॥८३॥
सर्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः ।
बाल्ये स्थितोऽपि वयसि क्षान्तो दान्तः शुभे रतः ॥८४॥
परेणापकृतं नैव गणयत्येव मानसे ।
मम सेवां संस्मरेच्च मम सत्यं च जल्पति ॥८५॥
व्यलीकाद् विनिवृत्तो यस्तथ्येतिकृतनिश्चयः ।
नित्यं मौनविशेषस्थः परोक्षेऽपि न चाक्षिपेत् ॥८६॥
ऋतुकाले स्त्रियं गच्छेदपत्यार्थी न कामतः ।
ईदृशास्तु जना भद्रा मम भक्तिपरायणाः ॥८७॥
गर्भवासं न ते यान्ति यन्ति वासं ममाश्रये ।
आत्मना निश्चितं कुर्यात् साक्षिणं मां प्रदिश्य च ॥८८॥
परवादं न कुर्वीत शाठ्यधौर्त्यं विवर्जयेत् ।
न निन्देद्धर्मकार्याणि मम धर्मपथे स्थितः ॥८९॥
एभिर्गुणैः समायुक्तो मम सेवां करोति चेत् ।
मामेव स समाप्नोति ततः सौख्यतमं नु किम् ॥९०॥
पुनरन्यत्तु वक्ष्यामि कमले शृणु मे प्रिये ।
तरन्ति पुरुषा येन गर्भसंसारसागरम् ॥९१॥
जितेन्द्रिया जितक्रोधा लोभमोहविवर्जिताः ।
आत्मोपकारका नित्यं देवाऽतिथिगुरुप्रियाः ॥९२॥
कपिलापूजका नित्यं तीर्थयात्राकरास्तथा ।
साधुसाध्वीपूजकाश्च वृद्धसन्मानकारकाः ॥९३॥
अनाथान् पालयेद् यश्च भेदभावं करोति न ।
सर्वेषामपि पुत्राणां विशेषं न करोति यः ॥९४॥
संक्रुद्धं स्वगुरुं दृष्ट्वा यस्तु तत्र प्रसादयेत् ।
पूजयेत् कपिलां भक्त्या पालयेत् स्त्रीं पतिव्रताम् ॥९५॥
अग्निं नहि क्रमेत् पद्भ्यां मेहयेन्न जले क्वचित् ।
गुरुभक्तो भवेन्नित्यं ज्ञानवाचं च जल्पकः ॥९६॥
एवं धर्मेण संयुक्तो यो नु मां प्रतिपद्यते ।
स च गर्भे न गच्छेद्वै मम लोकं स गच्छति ॥९७॥
भुक्त्वा परस्य चान्नानि यश्चैव न विकुत्सति ।
बाल्ये वयस्यपि च यो मम नित्यमनुव्रतः ॥९८॥
येन केनापि सन्तुष्टो मातापितृप्रपूजकः ।
दाता भोक्ता न्यायतश्च स्वतन्त्रो नित्यसंयतः ॥९९॥
विकर्म नाभिकुर्वीत कौमारव्रतमास्थितः ।
सर्वभूतदयायुक्तः सत्त्वेन च समन्वितः ॥१००॥
मत्या च निस्पृहोऽत्यन्तं परार्थेष्वस्पृहः सदा ।
ईदृग्भक्तो मम शिष्यो मम लोकं प्रगच्छति ॥१०१॥
इमं गुह्यं वरारोहे देवैरपि दुरासदम् ।
त्वं मे शिष्या च दासी च भक्ता पत्नीति कीर्तितम् ॥१०२॥
इत्येवं शंकरस्तत्र पार्वतीम् ऋक्षपर्वते ।
मम भक्तिं पुरा प्राह तैर्थभावे च नार्मदे ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सुखभावो दुःखभावः श्रीकृष्णनारायणपूजा सर्वकर्मसमर्पणतादिफलं जन्माभावश्चेत्यादिनिरूपणनामा सप्तषष्ट्यधिकपञ्चशततमोऽध्यायः ॥५६७॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! मम भक्तिपराणां चोत्तमां मतिम् ।
यद्यपि स्यान्मम तीर्थे धूलीधूसरता यदि ॥ १ ॥

तथाप्यहं महाराज्यं प्रददामि मृतस्य वै ।
पूर्वं कोकाभिधे तीर्थे वाराहावतराश्रये ॥ २ ॥
कश्चिल्लुब्धो विहिंसन् वै चाययौ कोकमण्डले ।
तत्र दृष्ट्वा जले मत्स्यं बडिशेनाऽऽजहार सः ॥ ३ ॥
तस्य हस्तात्तु बलवान् मत्स्यस्तूर्णं विनिर्गतः ।
अथ श्येनश्च तं वीक्ष्य पद्भ्यां जग्राह सत्वरम् ॥ ४ ॥
उड्डीनोऽपि महाभारं वोढुं निर्बल एव सः ।
ततः पद्भ्यां वियुक्तः सन् मत्स्यः कोकामुखेऽपतत् ॥ ५ ॥
ममार रजसा स्पृष्टो राजपुत्रोऽभवच्छुचिः ।
अथ कालेन तस्यैव मृगव्याधस्य चांगना ॥ ६ ॥
गृहीत्वा मूर्ध्नि मांसानि पद्भ्यां प्रयाति तत्र वै ।
एका चिल्ली मांसलुब्धा मांसं हर्तुं समाययौ ॥ ७ ॥
व्याधपत्न्या ताडिता सा शरेण पतिता मृता ।
जाता चन्द्रपुरे राज्ञः कन्या तीर्थरजःश्रयात् ॥ ८ ॥
युवत्यपि नरं श्रेष्ठं जुगुप्सति न चेच्छति ।
सौम्यं सुरूपं पुरुषं सर्वानपि जुगुप्सति ॥ ९ ॥
अथ काले गते तयोः सम्बन्धोऽभूद्विवाहतः ।
तथा च दम्पती नित्यं धर्मं पालयतः स्थितौ ॥१०॥
मध्याह्ने जायते पत्युः शिरोरुगतिपीडिनी ।
वैद्यौषधैः सहस्रैः सा पीडा नैव न्यवर्तत ॥११॥
कदाचिद् दयिता नैजं भर्तारमिदमब्रवीत् ।
का न्वियं वेदना स्वामिन् चिकित्साभिर्न गच्छति ॥१२॥
पुनः पुनः पृच्छ्यमानः प्रियामुवाच वै पतिः ।
मुञ्चत्वं मानुषं भावं तां जातिं स्मर पौर्विकीम् ॥१३॥
यदि ज्ञातुं तवेच्छाऽस्ति गृहाणाऽऽज्ञां तु वृद्धयोः ।
मातापित्रोर्मम गन्तुं तीर्थे कोकामुखं प्रति ॥१४॥
तत्र गत्वा कथयिष्ये मा मोहं कुरु भामिनि ।
ततः प्रसादयामास श्वश्रूश्वशुरकौ वधूः ॥१५॥
प्राह कोकामुखे गन्तुमिच्छावस्तीर्थयोगतः ।
कार्यगौरवभावेन न निषिद्धौ कथंचन ॥१६॥
अद्य यावत् किमपि वां याचितं न मया क्वचित् ।
पुरस्ताद् युवयोस्तन्मे याचितं दातुमर्हतः ॥१७॥
शिरोवेदनया युक्तः सदा तव सुतो ह्ययम् ।
मध्याह्ने मृतकल्पो वै जायते चातिपीडितः ॥१८॥
कोकामुखं विना कष्टं न निवृत्तं भविष्यति ।
त्वरितं गन्तुमिच्छावो विष्णोस्तत्परमं पदम् ॥१९॥
इति स्नुषावचः श्रुत्वा राजा प्राह शुभं वचः ।
गृहाण पुत्र रत्नानि दासान् दासीः रथादिकान् ॥२०॥
दानार्हाणि च वस्तूनि धनानि विपुलानि च ।
कुरु तीर्थे सुखात्पुत्र पुत्रि रक्ष पतिं तव ॥२१॥
अनुज्ञे शक्रो राजा दम्पती वणिजादिभिः ।
ययतुस्तत्र गत्वा च कोकामुखं हरिं तथा ॥२२॥
देवान् दृष्ट्वा जले स्नात्वा दानानि ददतुस्ततः ।
रजनी व्यतीता च प्रातः स्नातौ तु दम्पती ॥२३॥
प्रणम्य शिरसा विष्णुं पतिः पत्नीं मृदन्तरे ।
अस्थीनि दर्शयामास मीनस्य पूर्वजन्मनः ॥२४॥
एतानि मम चास्थीनि पूर्वदेहोद्भवानि हि ।
अहं पुराभवं मत्स्यः कोकेषु विचरन् जले ॥२५॥
व्याधेन निगृहीतोऽहं बडिशेन जलेचरः ।
तद्धस्तान्निर्गतस्तत्र बलेन पतितो भुवि ॥२६॥
श्येनेनामिषलुब्धेन नखैर्विद्धोऽभवंस्तदा ।
नीत आकाशमार्गेण तस्माच्च पतितोऽत्र वै ॥२७॥
तेन चातिप्रहारेण जाता शिरसि वेदना ।
अहमेव विजानामि स्मरामि वेदनां ह्यति ॥२८॥
तेन दुःखं न मे शान्तं मध्याह्ने जायते ह्यति ।
श्रुत्वैवं तस्य भार्याऽपि प्राह पूर्वभवं स्वकम् ॥२९॥
अहं पूर्वभवं च चिल्ली क्षुत्तृड्युता द्रुमे ।
समासीना तदा भक्ष्यं विचिन्वाना तदन्तरे ॥३०॥
अथ कश्चिन्मृगव्याधः प्रियया सह तद्द्रुमे ।
हत्वा मृगान् समायातो मांसान् ररक्ष भूतले ॥३१॥
तावन्मया मांसपिण्डो विद्धो वज्रसमैर्नखैः ।
व्याधो ददर्श मां तत्र जघान च शरेण माम् ॥३२॥
अपातयच्च भूमौ मां पतिताऽहं मृतिं गता ।
एतत्क्षेत्रप्रभावेण जाताऽस्मि त्वत्प्रिया नृपी ॥३३॥
एतानि यस्य चास्थीनि शेषाणि च ममापि च ।
गलितान्यल्पशेषाणि स्मरामि सर्वमेव तत् ॥३४॥
अथ चात्र प्रकर्तव्यं धर्मकार्यं प्रमोक्षदम् ।
इतिनिश्चित्य तौ तत्र विष्णुलोके सुखावहम् ॥३५॥
चक्रतुर्भजनाद्यं च द्रव्यरत्नादिदानकम् ।
ददतुः परमप्रीतौ पात्रेभ्यः स्वानि शेषतः ॥३६॥
तत्र स्थित्वा वरारोहे मम सेवाव्यवस्थितौ ।
तस्मात् स्थानाद् वपुस्त्यक्त्वा श्वेतद्वीपमुपागतौ ॥३७॥
शुक्लाम्बरधरौ दिव्यभूषणैश्च विभूषितौ ।
दिव्यरूपधरौ भक्तौ मम भागवतौ सदा ॥३८॥
दीप्तिमन्तौ सुरूपौ च स्वर्णवच्छुभदर्शनौ ।
चतुर्भुजौ यथा लक्ष्मीविष्णू सामर्थ्यशोभितौ ॥३९॥

तयोर्योऽभूत्परिजनश्चमत्कारं प्रवीक्ष्य सः ।
मम सेवापरश्चाऽभूत् मम कर्मव्यवस्थितः ॥४०॥
मानुषं भावमुत्सृज्य मम लोकमुपागतः ।
सर्वशो द्युतिमाँस्तत्र मत्सान्निध्यमुपागतः ॥४१॥
मम भक्ताः स्त्रियो लक्ष्मि त्वत्स्वरूपा भवन्ति वै ।
तेजसा दीप्तिमत्यश्च शुद्धसत्त्वविभूषिताः ॥४२॥
नवयौवनपूराश्च सर्वाश्चोत्पलगन्धिकाः ।
चारुचम्पकवर्णाभा मुक्ताः सर्वाः प्रियव्रताः ॥४३॥
प्रसादान्मम सुश्रोणि नित्ययौवनपूरिताः ।
नित्यानन्दभृताः सर्वाः सर्वसिद्धिसमन्विताः ॥४४॥
एष धर्मश्च कीर्तिश्च शक्तिश्चापि महद्यशः ।
कर्मणां परमं कर्म तपसां च महत्तपः ॥४५॥
कथानां परमं चापि कृतीनां परमा कृतिः ।
वृषाणां परमो धर्मो यन्ममाश्रयणं परम् ॥४६॥
मम धर्मं समाश्रित्य रजो धृत्वा च मस्तके ।
प्रसादप्राशनं कृत्वा मम लोके महीयते ॥४७॥
मम पादजलं पीत्वा स्नात्वा मत्तीर्थवारिषु ।
मम साधोरनुवृत्तिं पालयित्वा मुहुर्मुहुः ॥४८॥
सतां सेवां सदा कृत्वा कृत्वा भागवतार्चनम् ।
श्रुत्वा च संहितां लक्ष्मीनारायणीयसंज्ञिताम् ॥४९॥
जना यान्ति परां मुक्तिं चिल्लीमत्स्यौ यथा पुरा ।
एतन्मरणकालेऽपि स्मृत्वा मुच्येत बन्धनात् ॥५०॥
विशेषेणापि ते लक्ष्मि कथयामि शुभक्षणम् ।
कुमुदं मार्गशीर्षं च वैशाखं श्रावणं तथा ॥५१॥
ममातिमोदपात्राणि मासाश्चैते ममार्चने ।
कार्तिके द्वादशीकाले नवान्नैर्नवपुष्पकैः ॥५२॥
पूजयेन्नववार्भिश्च स मे लोकाय कल्पते ।
गते मेघागमे काले प्रसन्नशरदाश्रये ॥५३॥
अम्बरे विमले जाते विमले शशिमण्डले ।
नातिशीते न चात्युष्णे काले हंसविराविणि ॥५४॥
कुमुदोत्पलकल्हारपद्मसौरभनिर्भरे ।
कुमुदस्य तु मासस्य भवेद्या द्वादशी शुभा ॥५५॥
तस्यां मामर्चयेद् यस्तु व्रतं कुर्यात्तथा मम ।
प्रबोधिनीं पालयेच्च स याति परमां गतिम् ॥५६॥
शिशिरेऽपि मार्गशीर्षे द्वादश्यां कुसुमैर्नवैः ।
ममार्चनं प्रकुर्याद् यः स याति परमां गतिम् ॥५७॥
मासं मार्गशिरं यद्वद् वैशाखं चापि मे प्रियम् ।
तत्र पुष्पादिभिश्चाऽहमर्चनीयो व्रते दिने ॥५८॥
नववर्षसहस्राणि नववर्षशतानि च ।
तिष्ठते मम लोके स यो ददाति च मेऽर्चनम् ॥५९॥
एकैकगन्धपत्रस्य दानमेतन्महत्फलम् ।
कौमुदस्य तु मासस्य मार्गशीर्षस्य वै तथा ॥६०॥
वैशाखस्य तु मासस्य द्वादश्यां धवले दले ।
एकभक्तिपरो भूत्वा वनमालां विभूषिताम् ॥६१॥
पुष्पाणां च विभूषाश्च गन्धपुष्पाणि यो न्यसेत् ।
वर्षाणि द्वादशैवेह तेन पूजा कृता भवेत् ॥६२॥
शालपुष्पं सुगन्धि कौमुद्यां चन्दनमर्पयेत् ।
उत्पलं चन्दनं चापि दद्यान्मार्गशिरे शुभम् ॥६३॥
वैशाख्यां स्थलकमलं जलं शीतं सशर्करम् ।
इक्षुरसं प्रदद्यान्मे शान्तिदं पुष्टिदं तथा ॥६४॥
प्राप्नोति प्रददानस्तु मम भक्तिपरायणः ।
दिव्यं वर्षसहस्रं वै वैकुण्ठं च ततः परम् ॥६५॥
परं पदं स मे याति पुण्यस्याऽन्तो न विद्यते ।
न जन्ममरणे तस्य न ग्लानिर्न क्षुधा तृषा ॥६६॥
एवंविधं परं लोकं प्राप्नुयान्मम पूजकः ।
फाल्गुनस्य तु मासस्य शुक्लद्वादशिकातिथौ ॥६७॥
रम्यवासन्तिकैः पुष्पैः पूजयेन्मां सुभावतः ।
श्वेतं पाण्डुरकं चापि सुगन्धं शोभनं बहु ॥६८॥
न स गच्छति संसारं मम लोकं स गच्छति ।
वैशाख्यां शालपुष्पाणि शुभानि तरुणानि च ॥६९॥
दत्वा मह्यं च भक्तेभ्यो जनो मोक्षाय कल्प्यते ।
प्रपूज्य श्रीभागवतान् स्थापयित्वाऽग्रतश्च माम् ॥७०॥
पूजयेत् परया प्रीत्या नरो नारी सुभावतः ।
संस्तुवन्त्यृषयो मन्त्रैर्भक्ताः स्तवैः स्त्रियो हृदा ॥७१॥
गन्धर्वाऽप्सरश्चापि गीतनृत्यैः सवादनैः ।
स्तुवन्ति देवलोकाश्च पुराणं पुरुषोत्तमम् ॥७२॥
सिद्धा विद्याधरा यक्षाः पिशाचोरगराक्षसाः ।
स्तुवन्ति देवं सर्वेषां मां श्रीकृष्णनरायणम् ॥७३॥
आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ।
स्तुवन्ति देवदेवेशं युगानां संक्षयेऽपि च ॥७४॥
पृथ्वी वायुश्च विश्वे च तेजः सूर्यादयो ग्रहाः ।
समन्विताः स्तुवन्त्येनं श्रीकृष्णं पुरुषोत्तमम् ॥७५॥
स्वयं ब्रह्मा च सोमश्च शक्रश्चाग्निश्चिदम्बरम् ।
स्तुवन्ति श्रीकृष्णनारायणं लोकमहेश्वरम् ॥७६॥

नारदः पर्वताश्चाप्यसितश्च देवलो मुनिः ।
पुलहश्च पुलस्त्यश्च भृगुश्चांगिर इत्यपि ॥७७॥
एते चान्ये च बहवो मित्रावसुपरावसू ।
स्तुवन्ति मां रमेशं वै योगिनां परमं गुरुम् ॥७८॥
सत्यलोकनिवासाश्चाष्टावरणधृताश्रयाः ।
वैराजा ईश्वराश्चापि मां भजन्ते हि माधवि ! ॥७९॥
पितरस्त्वर्यमाद्याश्च याम्याः श्रवणसंज्ञकाः ।
संवत्सराश्च कालाख्या मां स्तुवन्ति तु नित्यशः ॥८०॥
ऋषयो मुनयः सर्वे दिक्पाला लोकपालकाः ।
निधयः कृत्तिकाः काष्ठा अनंगो मनवस्तथा ॥८१॥
कलाश्च तिथयः सर्वास्तत्त्वान्यपि स्तुवन्ति माम् ।
नक्षत्राणि सुराः सर्वे गुणा वर्णा भजन्ति माम् ॥८२॥
भोगाश्च भोगिनः सर्वे योगिन्यश्चाप्सरोगणाः ।
तीर्थानि च नदा नद्यो नाडिकाः खनिकास्तथा ॥८३॥
वालखिल्याः पिशाचाद्या भूताः प्रेताः स्तुवन्ति माम् ।
कूष्माण्डाश्चण्डिकाः सर्वा वेतालाश्च विनायकाः ॥८४॥
डाकिन्यश्चापि शाकिन्यस्तथा कृत्या भजन्ति माम् ।
जरायूजा अण्डजाश्च स्वेदजाः पार्थिवांकुराः ॥८५॥
मानवा जलजाश्चापि स्थलजा देहिनश्च माम् ।
स्तुवन्ति दुःखव्यवस्थायामाश्रमस्था निरन्तरम् ॥८६॥
गृहदेवा ग्रामदेवा वनारण्यादिदेवताः ।
वनानि पर्वताद्याश्च तडागानि खवाणि च ॥८७॥
अखातानि च खातानि चाब्धयोऽपि स्तुवन्ति माम् ।
आलया ग्रामसंस्थानाश्चेतना वै भजन्ति माम् ॥८८॥
यमलोककृतावासाः कर्मिणस्तु मुहुर्मुहुः ।
मां स्मरन्ति कृपानाथं समुद्धाराय दुःखतः ॥८९॥
आर्ताः स्तुवन्ति मां शश्वज्जिज्ञासवः क्वचित् क्वचित् ।
अर्थार्थी यावदर्थस्य लाभो भवति तावता ॥९०॥
मज्ज्ञा नित्यं स्मरन्त्येव स्तुवन्ति च भजन्ति च ।
सूताश्च मागधाश्चापि बन्दिनश्चारणादयः ॥९१॥
स्तावकाः कथकाः सर्वे पण्डावन्तो भजन्ति माम् ।
न्यायदाः शासकाश्चापि चौराश्चापहरास्तथा ॥९२॥
तामसाः सात्त्विका यद्वा राजसाश्च स्तुवन्ति माम् ।
भाट्टा गान्धर्वकुशलाः किन्नराः किंपुमर्थकाः ॥९३॥
साध्याः साध्व्यस्तथा सत्यो ब्रह्मचारिण्य इत्यपि ।
आभिचारिण्य एवापि मां स्तुवन्ति भजन्ति माम् ॥९४॥
नागाः सर्पा उरगाश्च सरीसृपा मृगादयः ।
धर्मे निजे वर्तमानाः सर्वे भजन्ति मां खलु ॥९५॥
यथाभावं ददाम्येभ्यः फलं कर्मानुसारि वै ।
मुक्ता भजन्ति सततं हृदि वासं प्रदाय मे ॥९६॥
तेभ्यो ददामि हृदयं भक्तेभ्यो मम ते यथा ।
एवं लक्ष्मि सदा सर्वे जीवाः प्रोता मयि ध्रुवम् ॥९७॥
मां विना नैव तिष्ठन्ति कम्पन्ते नैव मां विना ।
प्रकाशं नैवाप्नुवन्ति मां विना हृदयस्थितम् ॥९८॥
अनादिश्रीकृष्णनारायणश्चाहं परेश्वरः ।
काम्भरेयो महाराजः संराजे सर्वदेहिषु ॥९९॥
मम भासा प्रभासन्ते सर्वेषां हृदयानि वै ।
मम शक्त्या प्रकुर्वन्तीन्द्रियाणि ग्रहणानि च ॥१००॥
ममान्वयेन संसारो याति वियाति वर्तते ।
ममोपस्थानहेत्वैतत् सर्वमानन्दभूमिकम् ॥१०१॥
अतो लक्ष्मि ! सदा सेव्यो नारायणः परात्परः ।
सर्वर्तुजन्यसद्द्रव्यैर्मानसैर्भवनैस्तथा ॥१०२॥
तेषामुद्धरणार्थाय जाग्रतो न स्वपिम्यपि ।
न मे निद्रा हि भक्तार्थे नौदासीन्यं मदाश्रिते ॥१०३॥
न चालस्यं स्वावनार्थे न मूर्तिः प्रेमशून्यके ।
इति ज्ञात्वा ये भजन्ति स्तुवन्ति च स्मरन्ति माम् ॥१०४॥
त एव मोक्षभागा वै नरा नार्यः प्रियेऽब्धिजे ।
पाठकाः श्रावकाश्चापि श्रोतारो मननार्थिनः ॥१०५॥
सर्वे भावभराः स्युश्चेत् प्रयान्ति परमं पदम् ।
सर्वयज्ञफलं तेषां मम वाक्येऽनुवर्तिनाम् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने विष्णोस्तीर्थरजोमाहात्म्यं श्वेतद्वीपमुक्ताः कार्तिकमार्गशीर्षवैशाखादिद्वादशीषु कृतभगवत्पूजाफलं सर्वभूतप्राणिमात्रकृतस्तुत्यादिभिर्भगवत्प्राप्तिरित्यादिनिरूपणनामाऽष्टषष्ट्यधिकपञ्चशततमोऽध्यायः ॥५६८॥

श्रीनारायण उवाच—

श्रूयतां च त्वया लक्ष्मि ! शंभुः परमवैष्णवः ।
पार्वतीं प्राह माहात्म्यं मम तीर्थादिसंभवम् ॥ १ ॥
चन्द्रद्वीपः प्रभासेतुस्ताम्रपार्णेय इत्यपि ।
गभस्तिमान् नागद्वीपः सौम्यो गन्धर्व इत्यपि ॥ २ ॥
वारुणः कौमारिकेयश्चैते देशा हि नार्मदाः ।
नर्मदाजलसिक्तास्ते तद्वारिपानकारिणः ॥ ३ ॥
देहिनः पुण्ययोगेन स्वर्गं मोक्षं प्रयान्ति च ।
जीवाः कर्मफलं स्वेषां प्राप्नुवन्ति शुभाशुभम् ॥ ४ ॥

श्रेयोऽर्थं च तपो होमं दानं ध्यानं च पूजनम् ।
कारुण्यं नर्मदास्नानं कर्तव्यं शुभलब्धये ॥ ५ ॥
आख्यानं कथयिष्यामि यथावृत्तं पुरातनम् ।
कुवलयाश्वो राजर्षिः पुरा कृतयुगेऽभवत् ॥ ६ ॥
अनेकानि सहस्राणि दानानि विविधानि च ।
दत्तानि तेन राज्ञा वै सर्वतीर्थेषु भावतः ॥ ७ ॥
इष्टाश्च क्रतवस्तेन वर्जयित्वा तु नर्मदाम् ।
राजा कुवलयाश्वः स दानधर्मपरायणः ॥ ८ ॥
राहुसूर्यसमायोगे कुरुक्षेत्रं ययौ किल ।
लक्षमेकं हयानां च दन्तिनामयुतं तथा ॥ ९ ॥
हेममाणिक्यरत्नानि वासांसि विविधानि च ।
श्रद्धया परया युक्तो ब्राह्मणेभ्यो ददौ ग्रहे ॥१०॥
शेषं द्रव्यं च तत्क्षेत्रे सर्वं कंकरवन्नृपः ।
अञ्जलिना प्रतिस्थलं विकीर्य स्नानमाचरत् ॥११॥
ततो जगामाऽवध्यायां निजे राज्येऽभजद्धरिम् ।
अथ राजा मुचुकुन्दो विष्णुभक्तो जितेन्द्रियः ॥१२॥
दैत्यानामधिपश्चासीत् स च सूर्यग्रहे ययौ ।
नर्मदामोंकारनाथं वैदूर्यसिद्धपर्वतम् ॥१३॥
नर्मदाकपिलायोगे कोटितीर्थेऽवसच्च सः ।
लक्षमेकं तु दोग्ध्रीणामयुतं वाजिनां तथा ॥१४॥
सहस्रं दन्तिनां चैव रथानां च सहस्रकम् ।
कामिकानां तु यानानां सहस्रं हेममालिनाम् ॥१५॥
धनं धान्यं सुवासांसि रत्नानि विविधान्यपि ।
स्नानं कृत्वा यथायोग्यं विप्रेभ्यः प्रददौ तदा ॥१६॥
ददावोंकारनाथाय दक्षिणां च शतायुतम् ।
यो यं कामयते कामं तं तस्मै स प्रयच्छति ॥१७॥
एवं कृत्वा परं तीर्थे स्वालयं पुनराययौ ।
अथ कालान्तरे भूपौ स्वस्वपुण्यप्रभावतः ॥१८॥
स्वर्गं प्राप्तौ चाप्सरोभिः सेविताविन्द्रसदृशौ ।
मुचुकुन्दरथस्तूर्ध्वे सदा प्रयाति वै दिवि ॥१९॥
कुवलयाश्वयानं तु तदधो याति सर्वदा ।
उभौ निवेदितौ दूतैर्धर्मराजस्य धीमतः ॥२०॥
कुवलयाश्वो राजर्षिर्मुचुकुन्दो महाबलः ।
लोकान्तरमुभावेतौ विमानस्थौ समागतौ ॥२१॥
तावदुत्पतितं यानं मुचुकुन्दस्य चोपरि ।
योजनानां सहस्रेण ह्युपर्युपरि वर्तते ॥२२॥
अवध्याऽधिपतेर्यानमधोभागे प्रवर्तते ।
श्रुत्वा तद्धर्मराजोऽपि पप्रच्छ चित्रगुप्तकम् ॥२३॥
कतरं पूजये राज्ञोर्वद मेऽर्घादिकर्मभिः ।
पुण्यबलं द्वयोर्वीक्ष्य प्राह वै चित्रगुप्तकः ॥२४॥
मुचुकुन्दं प्रथमं प्रार्चय रेवाप्रतापतः ।
सप्तर्षीनपि पप्रच्छ तेऽब्रुवन् चित्रगुप्तवत् ॥२५॥
मुचुकुन्दं समासाद्य त्वर्घपाद्येन पूजय ।
दानेन कापिलेनेज्यो दानवेन्द्रोऽतिपुण्यवान् ॥२६॥
एवमुक्तो धर्मराजो दानवेन्द्रमुपाश्रयत् ।
अञ्जलिं तु ततो बद्ध्वा यानस्याऽग्रे व्यवस्थितः ॥२७॥
कुशलं तेऽद्य दैत्येन्द्र सर्वधर्मान्वितो भवान् ।
निर्जितास्ते त्रयो लोका दानेनाऽनेन भूतले ॥२८॥
ओंकारदक्षिणस्याऽन्ते मूर्तौ काविलसंगमे ।
सप्तकल्पवहातीरे पुण्यसंख्या न विद्यते ॥२९॥
एवमुक्त्वा पूजयित्वा दर्शयामास मार्गकम् ।
विष्णोर्वैकुण्ठलोकस्य मुचुकुन्दो जगाम ह ॥३०॥
अथाऽऽसाद्य ततो भूपं कुवलयाश्वमेव तु ।
धर्मराजः स्वयं प्राह स्वागतं ते करोमि वै ॥३१॥
राजा प्राह विरोधो वै देवदानवयोः सदा ।
त्वं देवो वै कथं दैत्यं प्राक् प्रपूजितवानसि ॥३२॥
मां त्यक्त्वा दानवेन्द्रः स पाद्यार्घ्येण त्वयाऽर्चितः ।
विपरीतं तु तत्सर्वं धर्मराज कृतं कथम् ॥३३॥
यमः प्राह यथाकर्म कर्तव्यं मेऽवशिष्यते ।
विषादं त्यज राजेन्द्र गहना कर्मणां गतिः ॥३४॥
कुरुक्षेत्रादधिकं वै पुण्यं स्यान्नार्मदे स्थले ।
कलां नार्हन्ति तीर्थानि सार्धं कल्पगया क्वचित् ॥३५॥
कर्मसाक्षी तु सर्वेषां यथान्यायं करोमि हि ।
स राजा विस्मयापन्नो द्रुतं नत्वा यमेश्वरम् ॥३६॥
नर्मदां स्नातुकामश्च कपिलासंगमं प्रति ।
आययौ संगमे सस्नौ दिव्ययानं हि भूभृतः ॥३७॥
तदा तूर्ध्वे गतं पूर्णे विष्णुलोकं सनातनम् ।
एतादृशं परं पुण्यप्रदं तीर्थं हि नार्मदम् ॥३८॥
भुक्तिमुक्तिप्रदं पापक्षालकं कमले प्रिये ! ।
जना पापा अपि यान्ति मुक्तिं रेवाजलाप्लवात् ॥३९॥
तीर्यते विष्णुधर्मेण संसाराब्धिः सुदुस्तरः ।
रक्ता मूढाश्च लोका वै प्रवर्तन्तेऽतिपापके ॥४०॥
ते नात्मानं विजानन्ति न कृष्णं नहि देवताः ।
न शृण्वन्ति परं श्रेयः सति चक्षुषि नेक्षते ॥४१॥
समे पथि शनैर्यान्तो प्लवन्ते स्म पदे पदे ।
यममुक्ता अपि जीवा न जानन्ति प्रबोधिताः ॥४२॥

क्लिश्यन्ते ते वृथा नानारागलोभवशा नराः ।
दृष्ट्वा गर्भखनिं कष्टां प्रत्यक्षां त्रासबोधिनीम् ॥४३॥
मोक्षमार्गं न बुद्ध्यन्ति तेषां रेवा विमुक्तिदा ।
प्रेतभूताः प्रजाः सर्वा यमलोकाधिकारिकाः ॥४४॥
शिवः प्राह श्रृणु शैले ! पुराख्यानं वदामि ते ।
सूर्येण कथितं त्वासीत्पुराख्यानं तु नार्मदम् ॥४५॥
यमाय निजपुत्राय लोकतारणहेतवे ।
आश्रयेन्नर्मदां देवीं सप्तकल्पवहां सतीम् ॥४६॥
स्नानावगाहनात्पानात् तथा दानक्रियादिभिः ।
धामदा मोक्षदा स्वर्गप्रदा श्रेयःप्रदा हि सा ॥४७॥
ध्यायमाना नर्मदा पापिनां पापविनाशिनी ।
संस्मृता कीर्तिता नाम्ना स्वर्गदा याम्यवारिणी ॥४८॥
नर्मदे नर्मदे चोक्त्वा पापो याम्यं न पश्यति ।
नरकस्थोऽपि रेवां स हरिं हरं स्मरेद् यदि ॥४९॥
मुच्यते यमदूतैः स तत्क्षणान्नात्र संशयः ।
वैदूर्यपर्वतः ऋक्षस्तथा चामरकण्टकः ॥५०॥
ओंकारो नर्मदा चैते भुक्तिमुक्तिफलप्रदाः ।
सिद्धेश्वरं च यज्ञेशं मध्यस्थं शशिभूषणम् ॥५१॥
कपिलेशं चतुर्थं तच्छिवक्षेत्रं प्रमुक्तिदम् ।
तेषां पूजां प्रकुर्वन्ति पुष्पधूपाऽऽर्चितर्पणैः ॥५२॥
शिवलोकं तु ये यान्ति शाश्वतं पदमैश्वरम् ।
गोदानं हेमदानं च तिलदानं तथैव च ॥५३॥
अन्नदानं पयोदानं सर्वोपस्करमित्यपि ।
प्रासादाऽऽरामदानं च ददाना यान्ति मोक्षणम् ॥५४॥
यमलोकं न ते यान्ति भक्ता भगवतो ननु ।
लोको विचारणीयोऽयं मिश्रितो वर्तते सदा ॥५५॥
सन्मानं चापमानेन वियोगे नेष्टसंगमः ।
यौवनं जरया ग्रस्तं सौख्यं कष्टादुपद्रुतम् ॥५६॥
बलिभिः पलितैश्चापि जर्जरीकृतविग्रहः ।
स्त्रीपुंसोर्यौवनं रूपं यदन्योन्यं प्रियंकरम् ॥५७॥
तदेव जरया ग्रस्तमुभयोरपि न प्रियम् ।
अपूर्ववत्तथात्मानं शैथिल्येन समन्वितम् ॥५८॥
यः पश्यन्न विरज्येत कोऽन्यस्तस्मादचेतनः ।
जराऽभिभूतः पुरुषः पत्नीपुत्रादिबान्धवैः ॥५९॥
अशक्तत्वाद् दुराचारैर्भृत्यैश्च परिभूयते ।
धर्ममर्थं च कामं च मोक्षं न जरया युतः ॥६०॥
शक्तः साधयितुं तस्माच्छीघ्रं धर्मं समाचरेत् ।
वातपीतकफादीनां वैषम्यं व्याधिमण्डलम् ॥६१॥
देहे तिष्ठति नित्यं वै बहुदुःखकरं मुहुः ।
दुःखानि स्वात्मवेद्यानि किं तत्र वेद्यते परैः ॥६२॥
एकोत्तरं मृत्युशतं हे नित्यं प्रवर्तते ।
तत्रैकं कालरूपं च शेषास्त्वागन्तुकाः स्मृताः ॥६३॥
कालः प्रतिक्षणं देहं क्षपयत्येव शान्तिमान् ।
आगन्तुकाः क्षपयन्ति तत्त्वानि हि प्रतिक्षणम् ॥६४॥
आगन्तुका मृत्यवस्तु नात्यन्तं मारयन्ति वै ।
भेषजादिप्रतिस्पर्द्धिसाधनैर्विद्रवन्ति ते ॥६५॥
कालमृत्युः क्षणाद्यात्मा महाकालात्मकस्तथा ।
जपहोमप्रदानाद्यैर्भेषजैश्च न शाम्यति ॥६६॥
अपमृत्युस्तु देहस्य विषमव्यादिसंभवः ।
सर्वेषां जलपातादिवह्निपातादिसंभवः ॥६७॥
क्षयं करोति वृष्ट्यादि कीटानां जलपूरतः ।
ज्ञाताऽयं पुरुषो नित्यमपमृत्योर्बिभेति च ॥६८॥
विविधा व्याधयः कष्टाः सर्पाद्याः प्राणिनोऽपि च ।
विषाणिनोऽभिचाराश्च मृत्योर्द्वाराणि देहिनाम् ॥६९॥
आवृतं रोगसर्पाद्यैरपि धन्वन्तरिः स्वयम् ।
स्वस्थं कर्तुं न शक्नोति कालग्रस्तं हि देहिनम् ॥७०॥
नौषधं न तपो दानं न मित्राणि न बान्धवाः ।
परित्रातुं समर्था नो कालग्रस्तं प्रवासिनम् ॥७१॥
नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमो रिपुः ।
नास्ति मृत्युसमः कालो देहिनां सुखमानिनाम् ॥७२॥
सद्भार्यासुतमित्राणि राज्यैश्वर्यसुखानि च ।
मृत्युश्छिनत्ति सर्वाणि वार्यमाणोऽपि वेगतः ॥७३॥
इदं ते कथितं पुत्र धर्मराज मयाऽर्थवत् ।
परिणामे भवेत् सर्वं सर्वथा कालभोजनम् ॥७४॥
तस्मात् सर्वप्रयत्नेन सेव्या नारायणी सुतिः ।
सर्वदुःखहरा रेवा सर्वशोकविनाशिनी ॥७५॥
यान् यान् कामयते कामान् ताँस्तान् रेवा प्रयच्छति ।
ज्ञानं ध्यानं चाध्ययनं रेवासेवनमेव तत् ॥७६॥
यज्ञो दानं तपः सत्यं लक्ष्मि ! रेवाम्बुसेवनम् ।
ब्रह्मकूर्चसहस्राणि रेवातोयसमानि न ॥७७॥
गोदानं तत्र वै दत्तं गोमेधायुतपुण्यदम् ।
शशांकोऽभूत् पुरा राजा नर्मदातीरमाश्रितः ॥७८॥

दानं यज्ञं तपश्चक्रे पर्वतेऽमरकण्टके ।
ददौ चार्धप्रसूतां गां ब्राह्मणाय महात्मने ॥७९॥
दानस्याऽस्य प्रभावेण दिव्यूर्ध्वयानगोऽभवत् ।
यावद्वत्सस्य पादौ द्वौ मुखं योनौ प्रदृश्यते ॥८०॥
तावद्गौः पृथिवी ज्ञेया सशैलवनकानना ।
स्वर्णशृंगी रूप्यखुरी सवत्सा कांस्यदोहना ॥८१॥
नर्मदास्नानयुक्ता च सकुशा तिलसंयुता ।
ओंकाराऽमरयोर्मध्ये कोटितीर्थे शशांककः ॥८२॥
एताः सहस्रसंख्याका ब्राह्मणेभ्यो ह्यकल्पयत् ।
स राजा दानपुण्येन दिव्ययानेन वै दिवि ॥८३॥
राजते तु तदा नेदुर्देवदुन्दुभयो दिवि ।
तत्क्षणे यानमारूढो हरिश्चन्द्रोऽपि भूपतिः ॥८४॥
कुरुक्षेत्रे गोसहस्रं दत्वा यानेन चाययौ ।
धृतस्वर्णातपत्रस्तु वीज्यमानश्च चामरैः ॥८५॥
योजनानां सहस्रेण हरिश्चन्द्रो ह्यधःस्थितः ।
एवं दृष्ट्वा निम्नभावं जगामाऽब्जं स सत्वरम् ॥८६॥
विषण्णवदनोऽपृच्छत् पितामहं तु कारणम् ।
मया तु कौरवे क्षेत्रे दानं दत्तमनन्तकम् ॥८७॥
शशांकेन तु रेवायां दानं दत्तमनन्तकम् ।
कथं पुण्यं नार्मदं तु कुरुक्षेत्राद् विशिष्यते ॥८८॥
येनाऽहमस्मि निम्नस्थो हरिश्चन्द्रः समूर्ध्वगः ।
श्रुत्वा ब्रह्मा हरिश्चन्द्रं प्राह मा खेदमावह ॥८९॥
शशांकेन पुरा सूर्यग्रहेऽद्रयमरकण्टके ।
अनेकानि सहस्राणि कृतानीष्टानि भूपते ॥९०॥
अन्यतः सर्वतीर्थानि चैकतोऽमरकण्टकम् ।
तोलितं च मया पूर्वममरेशो विशिष्यते ॥९१॥
सेव्यतां कल्पगा देवी यदिच्छेत्परमं पदम् ।
हरिश्चन्द्रस्ततो नत्वा ययावमरकण्टकम् ॥९२॥
नर्मदायास्तटे द्रव्यं धनं गाश्च ददौ तदा ।
अथ पुण्योदयेनाऽस्य विमानं चोर्ध्वगं ह्यभूत् ॥९३॥
तदा सन्तोषमापन्नः कृत्वा राज्यं चिरं ततः ।
ययौ वैकुण्ठमेवाऽयं नर्मदायाः प्रभावतः ॥९४॥
यद्यप्यनेन दत्तानि कौरवे च बहून्यपि ।
दानानि तत्फलं नैव नार्मदेन समं ह्यभूत् ॥९५॥
एवं वै नार्मदं तीर्थं सर्वश्रेयस्करं परम् ।
भुक्तिदं मोक्षदं चापि कोटितीर्थसमन्वितम् ॥९६॥
एतत्सर्वं समाख्यातं शिवायै शंकरेण ह ।
मया तुभ्यं महालक्ष्मि ! प्रोक्तं तन्नार्मदं फलम् ॥९७॥

यः शृणोति जनो लक्ष्मि गोसहस्रफलं लभेत् ।
पठनाच्छ्रवणात्स्मृतेर्लभेद्वै तादृशं फलम् ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कुवलयाश्वमुचुकुन्दविमानवैषम्ये हरिश्चन्द्रशशांकविमानवैषम्ये नर्मदामरकण्टकमाहात्म्याधिक्यादिकथननामैकोनसप्तत्यधिकपञ्चशततमोऽध्यायः ॥५६९॥

श्रीलक्ष्मीरुवाच—

श्रुतं वै नार्मदं पुण्यं माहात्म्यं चामरेश्वरे ।
कोटितीर्थोद्भवं कृष्ण ! कुरुक्षेत्रात् सहस्रगम् ॥ १ ॥
कथमेवं त्वया नाथ रचितं मायया पुरा ।
क्वचित्पुण्यं कृते साम्ये क्वचिन्न्यूनं तथाऽधिकम् ॥ २ ॥

श्रीनारायण उवाच—

सर्वं मे रचनालभ्यं नर्मदा सप्तकल्पगा ।
सप्तकाल्पिकदेवानामृषीणां च सतां तथा ॥ ३ ॥
योगान्ममाऽवताराणां नर्मदा सर्वतोऽधिका ।
नित्यं च प्रलये रेवा क्षीरोदे च ममान्तिकम् ॥ ४ ॥
पादसेवापरा भूत्वा तिष्ठते मम भामिनी ।
मम योगान्मम माया दिव्या भवति चोत्तमा ॥ ५ ॥
शृणु मायामयं सर्वं मया यादृक् प्रकल्पितम् ।
तत् सृष्ट्वाऽनुप्रविशामि मम योगेन शिष्यते ॥ ६ ॥
शृणु मां न विजानन्ति रुद्रेन्द्राः सपितामहाः ।
मया नारायणेनैव कृता अपि सुरेश्वराः ॥ ७ ॥
सर्वे तीर्थमयाः सन्ति मम वासेन सुन्दरि ।
पर्जन्यौ वर्षति देशे देशो जलेन पूर्यते ॥ ८ ॥
व्योम निर्जलतां याति माया मत्कृतिरूपिणी ।
पुनर्जलैः समावृत्तं व्योम वै दृश्यते क्षणात् ॥ ९ ॥
पुनर्वृष्टिः पुना रिक्तं मायैषा निर्मिता मया ।
पावनं तु जलं सर्वं मम वासेन भामिनि ! ॥१०॥
संकल्पितं विशेषेण पावनं वै विशेषतः ।
निर्झराणां जलं साधुसेवितं पावनं यथा ॥११॥
ततो देवैः सेवितं पावनतरं भवत्यपि ।
मया प्रसेवितं तत्पावनतमं प्रजायते ॥१२॥
किं मुहुः सेवितं तच्च तत्रापि प्रतिकल्पगम् ।
मया प्रसेविता रेवा क्षीरोदे मत्समा ततः ॥१३॥
पावनी पावनानां च मांगल्यानां च मंगला ।
मोक्षदानां परमोक्षप्रदा मन्मायया हि सा ॥१४॥

सोमो यत्क्षीयते पक्षे पक्षे पुनर्विवर्धते।
अमायां दृश्यते नैव मायेयं मद्विनिर्मिता ॥१५॥
हेमन्ते सलिलं कूपे चोष्णं भवति सुन्दरि।
जायते शीतलं ग्रीष्मे मायेयं च मया कृता ॥१६॥
भास्करश्चैकमार्गेण सदा याति न चान्यथा।
उदेति पूर्वतो नित्यमस्तमेति च पश्चिमे ॥१७॥
निम्नतां मृदुतां शैत्ये चोर्ध्वं तु तिग्मतां ततः।
प्रयाति क्लृप्तिवैचित्र्यान्मायेयं मम सुन्दरि ॥१८॥
शुक्रं च शोणितं भिन्नं भिन्नदेहे प्रजायते।
तयोर्योगे भवेद्गर्भो नान्यथा तु कदाचन ॥१९॥
सजातीये च जायेत न वैजात्ये प्रजायते।
गर्भे प्रविश्य जीवस्तु सुखदुःखे हि विन्दति ॥२०॥
विना देहं न वै दुःखं सुखं वा चात्मनः क्वचित्।
जातश्च विस्मरेद् गर्भं मायैषा निर्मिता मया ॥२१॥
यथाकर्म भवेज्जन्तुर्भिन्नदेहोऽपि जीवति।
यथाकर्म भवेन्मृत्युर्देहस्थितोऽपि गच्छति ॥२२॥
शुक्रशोणितसम्मिश्रे गर्भे कर्कन्धुसदृशे।
अङ्गुल्यश्चरणौ चापि भुजौ शीर्षं कटिस्तथा ॥२३॥
पृष्ठं तथोदरं चापि दन्तौष्ठपुटनासिकाः।
कर्णौ नेत्रे कपालौ च ललाटं जिह्विका तथा ॥२४॥
मायया मे भवन्त्येते जायन्ते जन्तवस्ततः।
तस्यैव जीर्यते भुक्तमग्निना पीतमेव च ॥२५॥
अधस्तु स्रवते मूत्रं मायैषा निर्मिता मया।
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथाऽपरे ॥२६॥
भूताद्या मानसाद्याश्च प्राणाद्या धातवोऽपि च।
प्रवर्तन्तेऽन्नतत्त्वाद्वै मायैषा निर्मिता मया ॥२७॥
सर्वर्तुषु सहस्रेषु गतेष्वपि चिरं स्थितः।
नवर्तुं नैव जानाति स्वास्थ्यानुकूलमित्यपि ॥२८॥
भोजनादीनि वस्तूनि नैव जानाति तत्त्वतः।
कस्मात् कीदृग्भवेल्लाभो मायैषा मम सुन्दरि ॥२९॥
आपो दिव्या मया सृष्टा अदृश्याद् दृश्यरूपिकाः।
भौमा नद्यो भवन्त्येव दृष्टौ बहूदकाश्च ताः ॥३०॥
ग्रीष्मे शुष्यन्ति सर्वास्ताः पुनश्चक्रं तथैव तत्।
उद्भवन्ति प्रशुष्यन्ति मायैषा प्रतिवत्सरम् ॥३१॥
आकाशं शून्यरूपं वै वायुश्चापि प्रवाहकः।
हिमालयं समासाद्य हिमात्मको भवत्यपि ॥३२॥
शिलात्मकं हिमं शृंगाद् द्रवत्येव शनैः शनैः।
गांगता जायते सा तु गंगा देशसुखावहा ॥३३॥
मेघा वहन्ति सलिलमुद्धृत्य लवणार्णवात्।
वर्षन्ति मधुरं लोके क्षारं वार्धौ कृतं मया ॥३४॥
क्वचित्तु कटुरूपं तत् क्वचिन्मिष्टं जलं मतम्।
भिन्नगुणं जायते तन्मायैषा मम पद्मजे ॥३५॥
रोगनाशकरं वीर्यमोषधे निक्षिपाम्यहम्।
ओषधे दीयमाने वा काले भूत्वा हराम्यहम् ॥३६॥
गर्भो बालो युवा वृद्धो जरठः शक्तिवर्जितः।
बीजमंकुरकं पत्रं काण्डं नालं च पुष्पकम् ॥३७॥
फलं रसादि तृप्तिश्च बीजाद् बीजसहस्रकम्।
क्वचित्तु निष्फलं बीजं मायैषा मत्कृता प्रिये ॥३८॥
मत्सृष्टास्तु नरा नार्यो भवन्ति शतपुत्रकाः।
मम ते च न पुत्रोऽस्ति मायैषा मम पद्मजे ॥३९॥
एकस्मादेव देहाच्च जायन्ते जन्तुकोटयः।
मस्तके कीटका लिक्षा वस्त्रेषु मत्कुणादयः ॥४०॥
रोमकूपेषु कीटाश्च स्वेदाद् यूकादयस्तथा।
अंगे छिन्ने मांसमध्ये कृमयश्च भवन्त्यपि ॥४१॥
मूत्रे कीटाः सूक्ष्मरूपा भवन्त्येव नलादिषु।
वीर्यजन्यास्तथा गर्भा जायन्तेऽपत्यरूपिणः ॥४२॥
एकस्मादेव देहाद्वै जायन्ते भिन्नसृष्टयः।
सर्वे पुत्राः स्वस्य बालाः स्वस्माज्जातास्तु ते यतः ॥४३॥
विसदृशास्तु कीटाद्यास्तेषु स्नेहो न विद्यते।
सदृशे पिण्डके पुत्रे स्नेहो भवति देहिनाम् ॥४४॥
सर्वेषु जन्तुषु त्वेषा मया माया निधापिता।
एकत्र शत्रुता कीटेऽन्यत्र पुत्रेऽतिरक्तता ॥४५॥
कीटारक्तपिबा एव पुत्राः सर्वपिबा अपि।
गर्भे रक्तपिबा मातुश्चांके दुग्धपिबास्तथा ॥४६॥
बाल्ये द्रव्यपिबाश्चापि यौवने सम्पदाम्पिबाः।
विचित्तत्वे मृतौ शान्तिपिबा असुपिबा अपि ॥४७॥
एवं सर्वपिबे स्नेहो मायैषा मम भामिनि!।
नरे नार्या भवेत् स्नेहो नार्या स्नेहो नरस्य च ॥४८॥
नार्योश्च नरयोर्वा न तादृङ् माया ममेदृशी।
जले पृथ्व्यां रसे देहे वृष्टौ बीजे च भक्षिते ॥४९॥
तत्राऽमृतं विसृजामि क्षुधायां तद्विभाव्यते।
अक्षुधायां विषं तस्यान्मायैषा मम सुन्दरि ॥५०॥
लोक एवं विजानाति गरुडो वहतेऽच्युतम्।
किन्त्वहं गरुडं नीत्वा प्रयामि चान्तरस्थितः ॥५१॥
लोकाः सर्वे विजानन्ति देवा नित्यं मखाशिनः।
किन्त्वहं मखरूपेण यक्ष्यामि त्रिदिवौकसः ॥५२॥

सर्वेलोका विजानन्ति गुरुर्ददाति दीक्षणम् ।
किन्त्वहं तु गुरौ दीक्षारूपस्तिष्ठामि मायया ॥५३॥
सर्वे लोका विजानन्ति वरुणः पाति सागरम् ।
किन्त्वहं वरुणे स्थित्वा रक्षामि सागरान् सदा ॥५४॥
सर्वे लोका विजानन्ति कुबेरो धनरक्षकः ।
किन्त्वहं धनरूपेण रक्षाम्यस्य कुबेरताम् ॥५५॥
सर्वे लोका विजानन्ति वृत्रः शक्रेण सूदितः ।
किन्त्वहं मायया शक्रे स्थित्वा वृत्रं व्यनाशयम् ॥५६॥
एवं लोका विजानन्ति सूर्यो नारायणो महान् ।
किन्त्वहं सूर्यमाविश्य प्रकाशयामि योग्यतः ॥५७॥
ध्रुवे ध्रौव्यं मया दत्तं मेरौ माध्यस्थ्यमित्यपि ।
अब्धौ वाडवरूपोऽस्मि मेघेषु वायुरूपवान् ॥५८॥
आकाशे तिष्ठते वारि नैव पश्यन्ति वै जनाः ।
देवा अपि न जानन्ति ह्यमृतं कुत्र तिष्ठति ॥५९॥
औषधं मायया सृष्टं वने तिष्ठति सर्वथा ।
वीर्यं तत्राऽऽदधाम्येव रोगनाशकरं सदा ॥६०॥
लोको ह्येवं विजानाति राजा पालयति प्रजाः ।
किन्त्वहं नृपमाविश्य पालयामि प्रजा मम ॥६१॥
सृष्टौ सायंकालरूपो रात्रौ प्रलयरूपवान् ।
प्रातर्गर्भस्वरूपोऽहं माययैव भवामि च ॥६२॥
सूर्यः पाचयति सर्वं माययाऽहं रवौ स्थितः ।
वह्निः पाचयति सर्वं मायया चानले स्थितः ॥६३॥
सूर्यांशुरूपवानस्मि प्रकाशयामि गोलकम् ।
मायां प्रलयकालिनीं कृत्वा संहृत्य वै जगत् ॥६४॥
शेषे शयेऽपि शेषश्च शेते मे मायया तदा ।
पश्य मायाबलं मे त्वं स्त्रीरूपा वर्तसे सदा ॥६५॥
कथं न जायसे लक्ष्मि पुंस्वरूपा वदात्र मे ।
सेयं माया मम लक्ष्मि स्त्रीरूपे तेऽस्ति चेष्टता ॥६६॥
ममाऽस्ति पुंस्वरूपे चेष्टता माया ममास्ति सा ।
प्रजापतिं हरं विष्णुं सृजामि जलमध्यतः ॥६७॥
तेऽपि मां नहि जानन्ति मम मायाविमोहिताः ।
ऋषिर्विप्रः पुराकल्पे सोमशर्माऽभिधो मम ॥६८॥
भक्तोऽपि मायया छन्नो न विवेद निजं परम् ।
माया मम विशालाक्षि ! रोहिणी लोमहर्षिणी ॥६९॥
कचिदिन्द्रियलौल्येन प्रबध्नात्यपि योगिनम् ।
सोमशर्मा मायया मे कर्षितः स्त्रीत्वमाप ह ॥७०॥
नासीत् तादृक् तस्य कर्म नापराधः कृतस्तथा ।
ममाऽऽराधनयुक्तोऽपि निषादीजन्म चाप्तवान् ॥७१॥
नित्यं चिन्तयते मूर्तिं मम लक्ष्मि ! मनोहराम् ।
अथ दीर्घेन कालेन तुष्टोऽहं भक्तिकर्मभिः ॥७२॥
तपोभिश्चापि सततं प्रत्यक्षतामहं गतः ।
वरार्थं स मया प्रोक्तस्तुष्टोऽस्मीष्टं ददामि ते ॥७३॥
रत्नानि काञ्चनं गाश्च साम्राज्यं चाप्यकण्टकम् ।
अथवेच्छसि स्वर्गं च यत्र सौख्यं वराङ्गनाः ॥७४॥
धनं यानं वाहनानि सैन्यान्यपि च सम्पदः ।
हेमभाण्डानि सौधानि काननानि द्युमन्ति च ॥७५॥
अक्षयानि च पात्राणि विविधान्यमृतानि च ।
भोगान् दिव्यानैश्वरांश्च वदाऽर्पयामि ते द्विज ॥७६॥
ददामि ते वरं विप्र यावत्ते चित्तचिन्तितम् ।
श्रुत्वा मद्वचनं विप्रो नत्वोवाच शनैर्हि माम् ॥७७॥
चेन्न प्रकुप्यसे नाथ वरं समनुयाचते ।
यत् त्वया भाषितं देव सर्वं देयं मम त्वया ॥७८॥
एवं लक्ष्मि सुभक्तोऽपि ययाचे लालसान्वितः ।
मयोक्तः कथमेतद्वै सर्वं वै याचसेऽनघ ॥७९॥
बन्धनं मम भक्तस्य मम खेदाय जायते ।
तदाऽऽश्चर्यदर्शनेच्छुर्मम मायादिदृक्षुकः ॥८०॥
मां प्राह मधुरं वाक्यं विरागं रागमिश्रितम् ।
नाहं स्वर्णं गाश्च रत्नं राज्यं स्वर्गं वरांगनाः ॥८१॥
ऐश्वर्यं चाऽक्षयं पात्रं चामृतं यानवाहनम् ।
भोक्तुमिच्छामि भगवन् नेच्छामि दिव्यतां प्रभो ॥८२॥
तथा स्वर्गसहस्राणामेकं वापि न रोचये ।
किन्तु मे वर्तते चेच्छा कथं कृत्वा विक्रीडसि ॥८३॥
निदर्शनार्थं देवेश स्वरूपं द्रष्टुं वृणोम्यहम् ।
माया वै दृश्यते सत्या मिथ्योच्यते महर्षिभिः ॥८४॥
कीदृशीयं वेदितव्या दृष्टान्तार्थं प्रदर्शय ।
ततस्तस्य वचः श्रुत्वा स मया तत्र भाषितः ॥८५॥
ते किं मे मायया विप्र भक्तिं कुरु सुखं लभ ।
देवा अपि न जानन्ति मायया मे विमोहिताः ॥८६॥
त्वं तु नैव विजानासि मायायां पतितोऽपि सन् ।
जिज्ञाससि ह्ययोग्यं वै कृतकार्योऽपि वै पुनः ॥८७॥
भवितुं चाऽकृतकार्यः कथं चेच्छसि शोचनम् ।
एवमुक्तोऽपि मुग्धः स मायया मामुवाच ह ॥८८॥
यदि तुष्टोऽसि मे कृष्ण भक्त्या वा तपसा मम ।
मायां दर्शय मे स्वल्पां यथा जानामि तादृशम् ॥८९॥
सर्वं संसारचक्रे वै पुनर्बद्धो भवामि न ।
ततो मयोदितं तस्मै याहि कुब्जाम्रकं स्थलम् ॥९०॥

गंगातीरं महादिव्यं तत्र सर्वमवाप्स्यसि ।
श्रुत्वा मद्वचनं कृत्वा प्रदक्षिणं च मां ततः ॥९१॥
ययौ कुब्जाम्रकं तीर्थं प्रातर्मायाभिलाषुकः ।
ततः कन्थां वंशदण्डं जलपात्रं च कञ्चुकम् ॥९२॥
पाथेयं च तटे न्यस्य नत्वा गंगां पुनः पुनः ।
जलमाधाय शिरसि कृत्वाऽऽचमनमित्यथ ॥९३॥
पीत्वा जलं च मां स्मृत्वा स्नातुं विवेश वारिषु ।
तावन्मे मायया विप्रो जले चाऽदृश्यतां गतः ॥९४॥
पार्श्वे निषादसदने तत्स्त्रीगर्भगतोऽभवत् ।
हृदयेऽचिन्तयत्तत्र गर्भक्लेशेन पीडितः ॥९५॥
अहो कष्टं मया प्राप्तं कस्यचिद् दुष्कृतस्य ह ।
योऽहं निषादिकागर्भे वसामि नरकात्मके ॥९६॥
धिक् तपो धिक् च मे कर्म धिक् फलं धिक् च जीवितम् ।
योऽहं निषादगर्भेऽत्र तिष्ठामि मूत्रसंकुले ॥९७॥
दुर्गन्धे दुःसहे वातपित्तश्लेष्मरजोवहे ।
अलं किं भाषणेनाऽत्र नष्टे किं रोदनेन वै ॥९८॥
मायाजिज्ञासया मूत्रकेदारिकां प्रवेशितः ।
कुतो विष्णुः कुतश्चाहं क्वास्ते गंगाजलं हि तत् ॥९९॥
क्वाऽयं निषादिकागर्भः क्वाऽयं मूत्रह्रदस्तथा ।
गर्भसंसारनिष्क्रान्तः पश्चादाप्स्यामि शान्तताम् ॥१००॥
एवं चिन्तयमानस्य नवमासात्मकं क्षणम् ।
व्यतीतं दशमे मासि पूर्णे गर्भाद्बहिर्गतः ॥१०१॥
भूम्यां तु पततस्तस्य नष्टं गर्भे विचिन्तितम् ।
अजायत च सा कन्या निषादपुत्रिका ततः ॥१०२॥
विप्रत्वं विस्मृतं सर्वं तया मायाविमुग्धया ।
अथ पित्रा कृतोद्वाहा युवती धीवरप्रिया ॥१०३॥
षट् पुत्रान् सुषुवे कन्याः सप्त वर्षद्वयान्तरे ।
भक्ष्याऽभक्ष्यं खादति स्म पेयाऽपेयं पिबत्यपि ॥१०४॥
शशादीन् घातयित्वा चामिषाहारं करोत्यपि ।
कार्याऽकार्यं न जानाति वाच्यावाच्यं न वेत्ति सा ॥१०५॥
गम्यागम्यं न जानाति मायाजालावृता यतः ।
पञ्चाशद्वर्षके काले मया सा प्रेरिता हृदि ॥१०६॥
घटं गृहीत्वा विट्लिप्तवस्त्रक्षालनकारणात् ।
ययौ स्नातुं तु तत्रैव यत्र न्यस्तं पुराऽम्बरम् ॥१०७॥
तीरे निःक्षिप्य वस्त्राणि घटं संस्थाप्य सा तटे ।
प्रस्वेदघर्मसन्तप्ता सशिरःस्नानमिच्छुकी ॥१०८॥
स्नातुं विवेश गंगायां तावज्जातः स भूसुरः ।
सोमशर्माऽभिधो विप्रः सस्मार पूर्ववृत्तकम् ॥१०९॥
बहिस्त्वागत्य वै कूले प्रातःकाले धृतांश्च यान् ।
वस्त्रदण्डकलशांश्चाऽपश्यन्मध्याह्नके क्षणे ॥११०॥
पार्श्वे तत्रैव नार्या च धृता विड्वस्त्रगर्गरीः ।
अपश्यत्तु महाश्चर्यं प्राप मध्यन्दिने तदा ॥१११॥
विप्रः स धीवरीवस्त्रादिकं त्यक्त्वा ततः पुरा ।
त्यक्तं धौत्रं च जग्राह धारयामास लज्जया ॥११२॥
शुशोचाति तदा स्मृत्वा निषद्य समवालुके ।
मया किं कर्म पापेन कृतं निन्द्यं सुदुःखदम् ॥११३॥
येनाऽऽचारात् परिभ्रष्टो गतश्चैतादृशीं दशाम् ।
निषादी ह्यभवं भक्ष्याऽभक्ष्यं नैवाऽविचारयम् ॥११४॥
जीवानघातयं सर्वाञ्जलस्थलादिवासिनः ।
पेयाऽपेयं कृतवाँश्चाऽगम्यागमनमाचरम् ॥११५॥
वाच्यावाच्यं न वै दृष्टं चौर्यादिकं मुहुः कृतम् ।
पुत्रा दुहितरश्चापि निषादाज्जनिता मया ॥११६॥
वर्तन्ते बालकाः स्तन्यपानार्हाश्च गृहे मम ।
प्रतीक्षन्ते त्वागमं मे जातश्चाहं नरोऽत्र वै ॥११७॥
किं कार्यं किमकार्यं वै मायामोहं तरामि न ।
अपत्यशोकसंव्याप्तो विप्रतास्मरणं गतः ॥११८॥
विप्रो भूत्वाऽतिलज्जावान् मौनं च निषसाद सः ।
एतस्मिन्नन्तरे तत्र निषादो बालकास्तथा ॥११९॥
चिरकालगतत्वेन मार्गयितुं तदाऽऽययुः ।
तत्र तां ते मृगयन्ति भार्यें मातश्च रोदिनः ॥१२०॥
पृच्छति स्म च तं विप्रं निषादो बालकैर्युतः ।
त्वया दृष्टाऽस्ति मे पत्नी द्विजाऽत्र स्नातुमागता ॥१२१॥
बाला दुहितरस्तस्या रुदन्ति करुणं गृहे ।
स्तन्यपानं विना चापि मध्यभोजनमन्तरा ॥१२२॥
किन्तु पश्यथ भो विप्रा अन्ये नराश्च योषितः ।
मम भार्या जलं नेतुं वस्त्रं क्षालयितुं तथा ॥१२३॥
स्नातुं समागतां चात्र यदि चेद् वदथाऽत्र मे ।
घटमादाय हस्तेन त्वागता भालिता यदि ॥१२४॥
किन्तु प्रत्युत्तरं नाप्त्वा रुरोद स तदा पुनः ।
जनाः पश्यन्ति तं विप्रं दण्डकलशसंयुतम् ॥१२५॥
न पश्यन्ति च तां नारीं दद्युः प्रत्युत्तरं कथम् ।
भीलो दुःखेन सन्तप्तो दृष्ट्वा कुंभपटादिकम् ॥१२६॥
अपश्यंश्च स्वकां पत्नीं करुणं पर्यवेदयत् ।
अपि ग्राहेण केनापि स्नायमाना धृता किमु ॥१२७॥
न चाऽप्रियं मयाऽस्त्युक्ता कदाचित्त्वपि कर्मसु ।
स्वप्नेऽपि नोक्तपूर्वाऽस्ति नात्मघातः प्रसंभवेत् ॥१२८॥

किन्तु क्रूरपिशाचेन भक्षिता वापि रक्षसा ।
यद्वा प्रसह्य केनापि नीता देशान्तरं भवेत् ॥१२९॥
किं कृतं दुष्कृतं पूर्वं मया कर्म हि कष्टदम् ।
येन मत्पुरतो भार्याऽल्पाऽऽयुष्ये विगतिं गता ॥१३०॥
एहि मे सुभगे कान्ते मम चित्तानुवर्तिनि ।
पश्यैतान् बालकान् कन्या रुदतः क्षुधितांस्तथा ॥१३१॥
कामं मां क्षुधितं चापि शास्यसे त्वं पिपासितम् ।
यदि दैवं शृणोष्यत्र धर्मेण देहि मे प्रियाम् ॥१३२॥
एवं विलपमानस्य निषादस्य त्वितस्ततः ।
सव्रीडं भाषते विप्रो निषादं गच्छ नास्ति सा ॥१३३॥
यथा कर्म गता सा ते सर्वथा ह्यनिवृत्तये ।
बालाँस्तान् परिरक्षस्व गच्छ किं क्लिश्यसे वृथा ॥१३४॥
कारुण्यात्ते कथयामि तवाऽहं सा प्रियाऽभवत् ।
स्नानमात्रेण तु मुनिः पूर्ववन्मायायाऽभवम् ॥१३५॥
निषादः प्राह तं विप्रं स्त्रीत्वं प्राप्तोऽसि वै कथम् ।
पुंस्त्वं चापि कथं प्राप्त एतदाचक्ष्व पृच्छतः ॥१३६॥
विप्रः प्राह हरिर्भक्त्या मया साक्षात्कृतस्तदा ।
वरेण छन्दयामास मयाऽपि चेप्सितं तदा ॥१३७॥
मायां मे दर्शय नाथ कीदृशी सा भवेदिति ।
ततोऽहं तेन चाप्युक्तो गच्छ कुब्जाम्रके जले ॥१३८॥
तत्र द्रक्ष्यसि चेत्युक्त्वा त्वन्तर्धानं जगाम सः ।
अहमागत्य गंगायां स्नात्वा निषादबालिका ॥१३९॥
निषादीगर्भसंभूता तव पत्न्यभवं ततः ।
अद्य स्नात्वा पुनर्जातो ब्राह्मणो वै यथापुरा ॥१४०॥
श्रुत्वैवं स निषादश्च बालकाश्च तिरोऽभवन् ।
अहं त्वासं च तद्रूपो लक्ष्मि ! मायाप्रदर्शकः ॥१४१॥
मध्याह्ने चागता विप्राः स्नातुं ते सोमशर्मकम् ।
प्राहुः कथं नु पूर्वाह्णश्चाऽद्य तीरे प्रयापितः ॥१४२॥
प्रातरारभ्य चैवात्राऽऽमध्याह्नं तिष्ठसे कथम् ।
दिनार्धे दर्शिता माया पञ्चाशद्वार्षिकी प्रिये ! ॥१४३॥
अथाऽहं दर्शयित्वा स्वं तमवोचं पुराकृतम् ।
भवान्तरे त्वया भक्ताः साधवो नाभिवादिताः ॥१४४॥
तत्पापादीदृशो भोगो मायामिषेण तेऽभवत् ।
गच्छ विप्र परं धाम श्वेतद्वीपं सुखी भव ॥१४५॥
विप्रो ययौ ततो धाम नारायणस्तिरोऽभवत् ।
मायातीर्थमिदं लक्ष्मि ! मोक्षदं वर्तते भुवि ॥१४६॥
श्रवणात् कीर्तनाच्चास्य भुक्तिर्मुक्तिर्भवेत् खलु ।
पार्वत्यै शंकरः प्राह नार्मदे क्षेत्रके पुरा ॥१४७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने भगवत्कृतमायारचना, सोमशर्मविप्रस्य मायादर्शने निषादीस्त्रीत्वं, द्वादशाऽपत्यमातृत्वं, पुनर्जलनिमज्जने विप्रत्वं मोक्षणं, मायातीर्थमाहात्म्यं चेति-निरूपणनामा सप्तत्यधिकपञ्चशततमोऽध्यायः ॥ ५७० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि प्रवक्ष्यामि जंगमं तीर्थमुत्तमम् ।
ये तु भागवताः शुद्धास्ते नूनं मम मूर्तयः ॥ १ ॥
तान्साधून्ये नमस्यन्ति ते मामेव नमन्ति वै ।
विदितोऽस्मीह कमले तैरहं नात्र संशयः ॥ २ ॥
मम दर्शनकामा ये ते मे भक्ता द्विजादयः ।
शुद्धा भागवताः पूज्या द्रष्टव्याः सर्वदा नृभिः ॥ ३ ॥
विशेषेण क्षितौ साधुद्विजरूपेण चास्थितः ।
तस्मात् साधुसेवका ये ते मे भक्ता न संशयः ॥ ४ ॥
यो मां प्राप्तुमिहेच्छेद्वै परं मोक्षं ततः स च ।
अनन्यमानसो भूत्वा स मद्भक्तान् प्रतोषयेत् ॥ ५ ॥
मां यथा च तथा साधून् साध्वीः प्रतोषयेत् सदा ।
सेवया चानुवृत्त्या च यथेष्टसम्प्रदानतः ॥ ६ ॥
शृणु लक्ष्मि कथयामि पुराकल्पकथां यथा ।
रैभ्यो नाम महर्षिर्वै जलमध्ये तले वसन् ॥ ७ ॥
ममैवाराधने युक्तो निर्वाणकर्मनिष्ठितः ।
योगी जितेन्द्रियश्चासीत् तापसो दिव्यविग्रहः ॥ ८ ॥
दशवर्षसहस्राणि चोर्ध्वबाहुः स्थितोऽभवत् ।
सहस्रं चाम्बुभक्षोऽभूत् तावच्चैवलभक्षणः ॥ ९ ॥
भूमिवासं ततस्त्यक्त्वा जलेऽयुतमुवास सः ।
भक्त्या तु परया तेनर्षिणा चाराधितो ह्यहम् ॥१०॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
मन्त्रं जपन् च मां ध्यायन् स चास्ते जलमध्यगः ॥११॥
तेन प्रीतोऽभवं तस्य रैभ्यस्य सन्निधौ जले ।
गंगायामगमं साक्षाज्जलं शुष्कायितं मया ॥१२॥
रैभ्य उत्थाय च तीरे आम्रद्रुं समुपाययौ ।
विशालोऽपि तदा चाम्रः कुब्जभावं गतोऽभवत् ॥१३॥
ऋषिमाच्छाद्य तु यथा छत्रवत् तिष्ठते द्रुमः ।
अहं कुब्जस्तथा भूत्वाऽप्याम्रस्याऽधो गतोऽभवम् ॥१४॥

कुब्जाम्रकं हि गंगायां तीर्थं तत्कथ्यते भुवि ।
मां वीक्ष्य श्रीकृष्णनारायणं प्रत्यक्षमागतम् ॥१५॥
जानुभ्यामवनिं गत्वा मां तुष्टाव रमेश्वरम् ।
नमस्कृत्य स्थितं तं च मम भक्तं पुरातनम् ॥१६॥
वरेण छन्दयामास त्वहं तस्य दयाकरः ।
सोऽप्युवाचात्र हे नाथ निवासं कुरु सर्वदा ॥१७॥
त्वयि भक्तिः सदा भूयान्ममाप्यत्र स्थले प्रभो ।
अन्यभक्तिर्मम विभो रोचते न कदाचन ॥१८॥
नित्यं त्वां पूजयिष्यामि द्रक्ष्याम्यत्रापि भाग्यतः ।
निवत्स्यामि त्वया सार्धं यथा ह्यक्षरसंस्थितः ॥१९॥
उपेन्द्र यदि तुष्टोऽसि ममाऽयं दीयतां वरः ।
मया बाढं वरो दत्तो निवासं तत्र चाऽलभम् ॥२०॥
एवं भक्तवशश्चाऽस्मि भक्तोऽहं मयि भक्तराट् ।
अभेदस्त्वावयोर्लक्ष्मि ! यथा श्रीश्रीशयोः सदा ॥२१॥
तत्र कुब्जाम्रके भद्रे स्थानं तु मम रोचते ।
पुण्डरीकाक्षनामाऽहं तत्र तिष्ठामि सुन्दरि ! ॥२२॥
मम वासालये वृत्तं पुराश्चर्यं महाद्भुतम् ।
मम निर्माल्योत्करे वै व्याली तिष्ठति निर्भया ॥२३॥
गन्धमाल्योपहाराणि भक्षयन्ती यदृच्छया ।
अथैकदा नकुलो वै स्थलान्तरात् समागतः ॥२४॥
तेन दृष्टा सर्पिणी सा तयोर्युद्धं तदाऽभवत् ।
माघे शुक्ले द्वादश्यां तु मध्याह्ने मम मन्दिरे ॥२५॥
व्याल्या दष्टो नकुलः स नकुलेनापि सर्पिणी ।
उभौ क्षतैस्तीव्रवरैस्तदा पञ्चत्वमागतौ ॥२६॥
व्याली प्राग्ज्योतिषे जाता राजपुत्री तु रोषिणी ।
कोसलाधिपतेः पुत्रोऽभवत्तु नकुलः सरुट् ॥२७॥
अवर्धतां च तौ पूर्वसंस्कारसंयुतावुभौ ।
सा कन्या नकुलं दृष्ट्वा सद्यो हन्तुं प्रधावति ॥२८॥
व्यालीं दृष्ट्वा राजपुत्रः सहसा हन्तुमेति च ।
तयोर्विवाहो भाग्याच्च पूर्वबन्धानुसारतः ॥२९॥
सञ्जातश्च द्वयोः प्रीतिरभूद्वै जतुकाष्ठवत् ।
एवं तयोर्गतः कालो वर्षाणां सप्तसप्ततिः ॥३०॥
विहरन्तौ समुद्याने त्वेकदा शाद्वले स्थले ।
दृष्ट्वा व्यालीं राजपुत्रस्तां विहन्तुमुपाद्रवत् ॥३१॥
पत्न्याऽतिवार्यमाणोऽपि व्यालीं जघान जीवतः ।
तदा सा रोषगा राज्ञी हृदि दुःखमवाप ह ॥३२॥
तस्यामेव च वेलायां राजपुत्र्यग्रतो बिलात् ।
नकुलो दैवयोगाद्वै विनिर्गत्य प्रयाति हि ॥३३॥
दृष्ट्वा तं राजपुत्री सा नकुलं शुभदर्शनम् ।
क्रोधाज्जघान दण्डेन वारिताऽप्यतिभूभृता ॥३४॥
नकुलं घातितं दृष्ट्वा मांगल्यं राजभूषणम् ।
कुपितो राजपुत्रश्च राजपुत्रीमभाषत ॥३५॥
स्त्रीणां भर्ता सदा मान्यस्तं मामुल्लंघ्य निष्ठुरे ।
दर्शनीयः प्रियो राज्ञां मांगल्यः शुभसूचनः ॥३६॥
घातितो नकुलः कस्मान्मया वै वार्यमाणया ।
इति भर्तृवचः श्रुत्वा प्रत्युवाच नृपात्मजा ॥३७॥
असकृद् वार्यमाणोऽपि व्यालीं घातितवान् यतः ।
तस्मान्मयाऽपि नकुलो घातितः सर्पघातकः ॥३८॥
राजपुत्रश्च तां प्राह युक्तियुक्तं हि तर्जयन् ।
सर्पस्तीव्रविषः पत्नि ! यद्दंशान्म्रियते जनः ॥३९॥
तस्मान्मया हतो दुष्टोऽहितकारी विषोद्धतः ।
प्रजापालो नृपः प्रोक्तो दण्डयाम्यपथे स्थितान् ॥४०॥
साधून् ये चापि हिंसन्ति ह्यपराधविवर्जितान् ।
स्त्रियं चैवापि हिंसन्ति ते दण्ड्या राजधर्मतः ॥४१॥
मयैवं राजधर्मो वै कर्तव्यस्तेन सा हता ।
वद त्वं चापराद्धं किं नकुलेन तवाऽत्र किम् ॥४२॥
दर्शनीयश्च मांगल्यो राज्ञां योग्यो गृहेष्वपि ।
द्यूतेऽपि कुशलः सोऽयं नकुलः किं त्वया हतः ॥४३॥
मया निवार्यमाणाऽपि प्राणान्नीतवती यतः ।
ततो मम न भार्याऽसि न चाहं ते पतिः स्थितः ॥४४॥
किञ्च तेन न हन्मि त्वां स्त्रियोऽवध्याः सदैव यत् ।
इत्युक्त्वा तां तदुद्याने त्यक्त्वा गृहं ययौ नृपः ॥४५॥
एवं क्रोधं समादाय नष्टस्नेहौ बभूवतुः ।
अथ वार्ता प्रजायां साऽप्रसरत् कर्णकर्णतः ॥४६॥
श्रुत्वा राजकुमारस्य पितरौ कोसलेश्वरौ ।
वृद्धौ स्नुषां कुमारं चाऽऽह्वयामासतुरन्तिके ॥४७॥
वधूपुत्रौ ततो दृष्ट्वा पिता वचनमब्रवीत् ।
पुत्र ! कुत्र गतं प्रेम युवयोः कारणं नु किम् ? ॥४८॥
अतिस्निग्धौ सदा युवां विरुद्धाचरणौ कथम् ।
पुत्र ! दक्षोऽसि धर्मिष्ठां नैनां त्यक्तुं त्वमर्हसि ॥४९॥
अप्रियं नोक्तपूर्वं तु यया नेष्टं कृतं तव ।
सदा त्वत्तोषणे दक्षा त्वया त्यक्तुं न युज्यते ॥५०॥
गृहधर्मो राजधर्मः सदा योषित्कृतः खलु ।
वंशधर्मो यज्ञधर्मः स्त्रीभ्य एव प्रवर्तते ॥५१॥
एवं पितृवचः श्रुत्वा कुमारः प्रत्यभाषत ।
दोषो न विद्यते तात ! स्नुषायां कोऽपि कुत्रचित् ॥५२॥

किं मया वार्यमाणाऽपि नकुलं मेऽग्रतोऽहनत् ।
ततोऽभवन्मम क्रोधो मयेयं परिभाषिता ॥५३॥
मम भार्या न भवती न चाहं तव वै पतिः ।
पुत्रस्य वचनं श्रुत्वा वध्वाः शुश्राव भूपतिः ॥५४॥
शिरसा प्रणतिं कृत्वा सेदं वचनमब्रवीत् ।
अपराधविहीना च भीता सा सर्पिणी नृप ॥५५॥
मयाऽतिवार्यमाणेन राजपुत्रेण घातिता ।
ततोऽहं क्रोधसन्तप्ता मौनमास्थाय संस्थिता ॥५६॥
तावद्दृष्टो नकुलश्च मया क्रोधेन ताडितः ।
वार्यमाणा कुमारेण पुनर्दण्डेन ताडितः ॥५७॥
अन्योन्यप्रतिस्पर्धित्वान्मया वै नकुलो हतः ।
अत्र न्यायं कुरु राजन् देहि दण्डं करोमि तत् ॥५८॥
वधूपुत्रवचः श्रुत्वा राजाऽऽह निपुणं वचः ।
तिर्यञ्चोः कारणे कस्माद् युवां विश्लेषमाप्नुथः ॥५९॥
हते तु नकुले पुत्र किं ते क्रोधस्य कारणम् ।
राजपुत्रि हतायां सर्पिण्यां क्रोधं करोषि किम् ॥६०॥
अल्पहेतोर्बहुनाशं कथं स्वीकुरुथो वृथा ।
पितुर्वचः शुभं श्रुत्वा जातिस्मरः कुमारकः ॥६१॥
प्रत्युवाच हि पितरं प्राक्स्वभावः प्रवर्तते ।
प्रकृतिं यान्ति भूतानि निग्रहोऽत्र न विद्यते ॥६२॥
स्वल्पेऽपि कारणे वैरं प्राग्जन्मीयं प्रवर्तते ।
एवं श्रुत्वा पुत्रवाक्यं पिता प्राह सुतं तदा ॥६३॥
ब्रूहि पुत्र यथान्यायं प्रीतिविच्छेदकारणम् ।
प्राग्जनीयं भवेद् यद् तदुभयोरिह कथ्यताम् ॥६४॥
पितृपृष्टं तु चेद् गुप्तं न गोपायन्ति सत्सुताः ।
सत्यं वाऽसत्यमेवाऽपि चेन्न ब्रुवन्ति पुत्रकाः ॥६५॥
पतन्ति नरके ते वै रौरवे तप्तवालुके ।
पित्रा पृष्टं तु ये ब्रूयुः शुभं वाऽशुभमेव च ॥६६॥
दिव्यां तु ते गतिं यान्ति या गतिः सत्यवादिनाम् ।
श्रुत्वैवं वचनं पुत्रः पितरं प्राह सादरम् ॥६७॥
कुब्जाम्रकं च यत्तीर्थं तत्र गत्वा महीपते ! ।
तद्गुप्तमेव वक्तव्यं प्रीतिविच्छेदकारणम् ॥६८॥
बाढं त्वाह तदा राजा राज्ञी प्राह तथैव च ।
अथाऽमात्यान् गुरून् राजा चाहूय समुवाच तान् ॥६९॥
कुब्जाम्रकं शुभं तीर्थं गच्छामस्तस्य साधनम् ।
शीघ्रं सम्पाद्यतां चापि युज्यन्तां गजवाजिनः ॥७०॥
गजाश्वपशुयानादिकार्षापणकवैनवः ।
सुवर्णरत्नवस्त्राणि त्वन्नानि विविधान्यपि ॥७१॥
अथ राजा सुतं प्राह देशकालोचितं तदा ।
राज्यं शून्यं कथं त्यक्त्वा गमिष्यामो वयं सुत ! ॥७२॥
ज्येष्ठपुत्रः स चोवाच कनीयसे प्रदेहि तत् ।
राजा प्राह तथा स्याच्चेद् धर्मलोपो भवेद् यतः ॥७३॥
कथं देयं कनिष्ठाय विद्यमानेऽग्रजे सुते ।
ज्येष्ठः प्राहाऽनुजानामि ताताऽस्मै देहि मेदिनीम् ॥७४॥
न स्याद् धर्मविलोपोऽत्र ममाऽस्तित्वं न वै भवेत् ।
नाऽहं कुब्जाम्रकं गत्वा निवर्तिष्ये पुनर्गृहम् ॥७५॥
एतत्सत्यवचो मत्वा कनीयांसं प्रदेहि वै ।
श्रुत्वैवं भूपतिः राज्ये कनिष्ठमभ्यषेचयत् ॥७६॥
राजा तीर्थं ययावन्तःपुरवर्गादिना सह ।
ततस्तीर्थविधिं कृत्वा ददौ दानानि भूरिशः ॥७७॥
अन्नवस्त्रसुवर्णानि गोहस्त्यश्वगृहाणि च ।
ततो रात्र्यां व्यतीतायां ज्येष्ठः सुतः स्नुषायुतः ॥७८॥
स्नात्वा तीर्थविधिं कृत्वा नत्वा गुरून् पुनः पुनः ।
पितुः प्रदक्षिणं कृत्वा मातरं चाभिवाद्य च ॥७९॥
निर्माल्यकूटं यत्राऽऽसीन्मन्दिरस्याऽन्तिके ध्रुवम् ।
गत्वा तत्राह पितरं नकुलोऽहं पुराभवम् ॥८०॥
कदलीनां समुद्याने चात्र वासोऽभवन्मम ।
अत्र चाशीविषा सर्पी मया दृष्टा हि सन्निधौ ॥८१॥
माघशुक्लद्वादशिकादिने प्रातस्तदाऽऽवयोः ।
युद्धयतोर्जातिवैरेण तीक्ष्णं सन्दशतोर्द्वयोः ॥८२॥
समकालेऽभवन्मृत्युः कुब्जाम्रके सुतीर्थके ।
देवाश्रये च तत्पुण्यादहं तव सुतोऽभवम् ॥८३॥
स्नुषा ते सर्पिणी सेयं प्राग्ज्योतिषसुताऽभवत् ।
एवं प्राग्भवसंस्कारात् सर्प्यां च नकुले द्वयोः ॥८४॥
वैरं प्रवर्तते नौ च तच्च विच्छेदकारणम् ।
अथाऽऽवयोर्महाराज पूर्णमायुः क्षयं गतम् ॥८५॥
तीर्थेऽत्र स्पष्टवाण्या वै वैकुण्ठं याव एव च ।
इत्युक्त्वा तौ हरिं नत्वा पुण्डरीकाक्षमेव च ॥८६॥
पितरौ च तथाऽमात्यान् देहं त्यक्त्वा क्षणान्तरे ।
दिव्यौ भूत्वा विमानेन चतुर्भुजधरावुभौ ॥८७॥
श्वेतद्वीपं ययतुर्वै विष्णुपार्षदयानगौ ।
राजाद्या विस्मयं प्रापुः राजाऽपि भक्तिमाँस्तदा ॥८८॥
पुत्रशोकेन सन्तप्तो व्रतं तपश्चकार ह ।
स्वल्पकालेन संसाध्य सिद्धिं वै तापसीं पराम् ॥८९॥
ययौ पत्न्या सह देहं त्यक्त्वा वैकुण्ठमेव च ।
दिव्यं वै परमं धाम यत्र देवो जनार्दनः ॥९०॥

ममाऽतीव प्रसादेन तपसश्च बलेन च ।
कृत्वा मद्भजनं तत्र ममाऽऽक्षरपदं ययौ ॥९१॥
योऽसौ परिजनस्तस्य कृत्वा सोऽपि च सुकृतम् ।
कुब्जाम्रके परां सिद्धिं प्राप्त्वा मद्धाम संययौ ॥९२॥
एवं कुब्जाम्रकं तीर्थं रैभ्येन तु विवर्धितम् ।
पुण्डरीकाक्ष वासाढ्यं राजपुत्रविमुक्तिदम् ॥९३॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
जपन् स्नानं शुभं कृत्वा पानं संस्करणं तथा ॥९४॥
दर्शनं मम मूर्तेश्च कृत्वा नारी नरोऽपि वा ।
प्रक्षाल्य सर्वपापानि प्रयाति परमां गतिम् ॥९५॥
उक्तमन्त्रः परो जाप्यश्चातुर्वर्ण्येन सर्वदा ।
सर्वकर्मसु मुख्यार्थः काम्भरेयोऽत्र देवता ॥९६॥
अनादिश्रीकृष्णनारायणो राधाप्रभापतिः ।
पार्वतीमाणिकीनाथो लक्ष्मीनारायणः प्रभुः ॥९७॥
मञ्जुलेशश्च हंसेशः सगुणेशः स्वयंप्रभुः ।
दयानाथः शान्तिनाथश्चम्पाहैमीजयापतिः ॥९८॥
तेजसां यो महत्तेजस्तपतां यो महत्तपः ।
तं भजित्वा भवेन्मुक्तो गोलोकाधिपतेः पुरः ॥९९॥
शाश्वतेन सुखेनाऽत्र पूर्यते कृष्णवत्तदा ।
य एतत्पठति लक्ष्मि ! कल्यमुत्थाय मानवः ॥१००॥
तारयेत् स स्वकुलजान् दशपूर्वान् दशाऽपरान् ।
एतत्तु पठमानो वै यस्तु प्राणान् विमुञ्चति ॥१०१॥
चतुर्भुजः स जायेत मल्लोकेषु प्रतिष्ठितः ।
श्रवणादपि मुक्तः स्याच्छंभुः प्राह सतीं तदा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने कुब्जाम्रके हरिद्वारे भक्तमाहात्म्ये रैभ्यस्य चमत्कारः, नकुलसर्पिण्योः राजकुले जन्मोत्तरं मिथो वैरेण प्राग्जन्मस्थले गत्वा मुक्तिश्चेत्यादिनिरूपणनामैक-सप्तत्यधिकपञ्चशततमोऽध्यायः ॥ ५७१ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महातीर्थं कुब्जाम्रकं प्रमोक्षदम् ।
नर्मदायां समागत्य कुब्जारेवासमागमे ॥ १ ॥
व्यवस्थितं ध्रुवं सप्तकल्पं वै शंकरोऽवदत् ।
पार्वत्यै तीर्थयात्रायामृक्षपर्वतसंस्थितः ॥ २ ॥
अथान्यान्यपि तीर्थानि कथयामि निशामय ।
माहिष्मत्याः पश्चिमे वै तीर्थं शोकविनाशनम् ॥ ३ ॥
अशोकवनिकाख्यातं मातंगाश्रमशोभितम् ।
तत्र या पूजयेद् गौरीं तृतीयायां पतिव्रता ॥ ४ ॥
कन्या लभेत् पतिं स्वेष्टं द्रव्यरूपबलान्वितम् ।
मातंगो नाम देवर्षिस्तपस्तेपेऽत्र दुष्करम् ॥ ५ ॥
प्राग्जन्मनि निषादः स जातिस्मरो ह्यभूत् सदा ।
पापनाशकरे स्थाने महर्षीणां समागमात् ॥ ६ ॥
धर्मज्ञाताऽभवच्छ्रेष्ठो रागहीनश्च बोधवान् ।
नर्मदासेवनाच्चापि पुण्यवानभवद्धि सः ॥ ७ ॥
निर्विण्णश्च जटावल्कलाऽम्बरः श्वपचोऽपि ह ।
अशोकवनिकासंस्थः कन्दमूलफलाशनः ॥ ८ ॥
वर्षाणां स सहस्रं वै तपस्तेपेऽतिदारुणम् ।
एवं वै तपतस्तस्य जटाग्रेभ्यो विनिःसृताः ॥ ९ ॥
यक्षिण्यः श्यामवर्णाश्च तेजस्विन्यो विभूषिताः ।
एकाशीतिसहस्राणि सस्नुरता नर्मदाजले ॥१०॥
स्नानमात्रेण ताः प्रापुर्यक्षलोकान् सुवाहनैः ।
मन्त्रयन्त्रविहीनोऽपि नमः शिवाय संगृणन् ॥११॥
सिद्धिमानभवत्तस्य पुरः शंकर आययौ ।
भक्तं प्राह वरं स्वेष्टं वृणीष्व शंकरोऽस्म्यहम् ॥१२॥
मातंगः प्राह मन्नाम्ना तीर्थं ख्यातमिदं भवेत् ।
चाण्डालाः श्वपचाश्चर्मकारा ये पापयोनयः ॥१३॥
अत्राऽऽगत्य पवित्राश्च मुक्तिमाप्नुयुरेव च ।
मातंगेश्वरलिंगं च नत्वेयुर्मोक्षणं तथा ॥१४॥
एनं वरं प्रदेह्यत्र यद्यहं तेऽस्मि भक्तिमान् ।
श्रुत्वा तच्छंकरः प्राह तथाऽस्त्विति पुनस्ततः ॥१५॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
इत्येनं जप मातंग ! मुक्तिस्ते वैष्णवी परा ॥१६॥
भविष्यति न सन्देहस्तथा त्वज्जातिवर्तिनाम् ।
अस्य मन्त्रस्य योगेन वैकुण्ठे मोक्षणं भवेत् ॥१७॥
देहि मन्त्रं मयोक्तं च कुरु सर्वांश्च वैष्णवान् ।
इत्युक्त्वा शंकरश्चान्तर्धानं ययौ ततः परम् ॥१८॥
मतंगो निजवर्णेभ्यो देहिभ्यः प्रददौ मनुम् ।
प्रेषयामास स बहून् चाण्डालान् वैष्णवान् पुरा ॥१९॥
गोलोकं श्रीहरेर्धाम स्वयं यानं च कामिकम् ।
समारुह्य ययौ चैत्रे मोक्षं वै परमं शुभम् ॥२०॥
अशोकवनिकं चैतन्मातंगतीर्थमुच्यते ।
तिलपिष्टादिदानेन सक्तूदानेन तर्पणे ॥२१॥
पितरो जलपानेन मुक्तिं यान्ति न संशयः ।
तत्रैव दक्षिणे भागे तीर्थं मृगवनाभिधम् ॥२२॥

तत्र स्नात्वाऽर्चयेद् विष्णुं शंखचक्रगदाधरम् ।
एकादश्यां निराहारः पूजयेत् परमेश्वरम् ॥२३॥
पतिव्रता पतिं कृष्णनारायणं प्रपूजयेत् ।
स्नानदानप्रभावेण लोकं प्राप्नोति वैष्णवम् ॥२४॥
व्याधः कश्चिद् दुराचारो निर्दयश्च पुराऽभवत् ।
सधनुष्को मृगाँस्तत्र जघान च तृषाकुलः ॥२५॥
विना जलं द्रुमच्छायामाश्रित्य क्षणमास्थितः ।
निद्रां ययौ च तत्पश्चाद् वनसंघर्षजोऽनलः ॥२६॥
उत्थितश्च ददाहाऽसौ वनं व्याधमृगान्वितम् ।
अथ मासान्तरे वर्षा जाता भस्मास्थिखण्डकाः ॥२७॥
नर्मदायां गताः सर्वे वृष्टिपूरेण वाहिताः ।
मृगास्ते नर्मदायोगाद् गान्धर्वा देवकोट्यः ॥२८॥
अभवँश्च स वै व्याधो राजाऽभवद्धि भूतले ।
तदन्ये प्राणिनश्चापि नर्मदाजलयोगतः ॥२९॥
यक्षाद्या अभवन् देवा दशवर्षसहस्रकम् ।
स्वर्गं भुक्त्वा ततस्तेऽपि तथा राजाऽस्य गायकाः ॥३०॥
वैष्णवेनैव यानेन संप्राप्ता वैष्णवं पदम् ।
अवशः स्ववशो वापि प्राणाँस्त्यजति नार्मदे ॥३१॥
दिव्यवर्षसहस्रं स विष्णुलोके प्रमोदते ।
अङ्गारावर्तसंभेदो गोसहस्रफलप्रदः ॥३२॥
अङ्गारेश्वरदेवश्च तत्र तिष्ठति संगमे ।
स्नानमात्रो नरस्तत्र गाणपत्यमवाप्नुयात् ॥३३॥
चतुर्थ्यां मंगले वारे हिरण्यपुरुषं शुभम् ।
कृत्वा रक्तेन वस्त्रेण वेष्टयेत् सघृतं तथा ॥३४॥
गूडं दद्याद् ब्राह्मणाय मंगलं पुरुषं ददेत् ।
दानतीर्थप्रभावेण शक्रार्धासनभाग्भवेत् ॥३५॥
युवनाश्वः पुरा राजा कोसलाया ह्यभून्महान् ।
चक्रवर्ती कृतयुगे सर्वधर्मपरायणः ॥३६॥
अभिवाद्य वशिष्ठं स समुवाच पुरोहितम् ।
कस्मिन् स्थाने यजेद् यज्ञं तीर्थे देशे सुरालये ॥३७॥
वशिष्ठस्तं समुवाच नैमिषं तीर्थमुत्तमम् ।
सफलो हयमेधश्च कोटिकोटिगुणोत्तरः ॥३८॥
मत्स्येन विष्णुना चोक्तं सूर्येणापि तथोदितम् ।
मनुपुत्रात्र यज्ञार्हं युवनाश्व ! तवोदितम् ॥३९॥
श्रुत्वा राजा गुरोर्वाक्यं समादिदेश मन्त्रिणः ।
यज्ञोपस्करमादाय समागच्छत सत्वरम् ॥४०॥
घोषणा च कृता लोके आहूताश्च सुराः क्रतौ ।
ब्रह्मा विष्णुः सुरेशश्च स्कन्दो वैश्रवणस्तथा ॥४१॥
शंभुश्च वसवश्चापि रुद्रा आदित्यकास्तथा ।
अश्विनौ च दिशां पाला लोकपालाश्च सर्वशः ॥४२॥
धेनूनां दशलक्षाणि हेमरत्नान्वितानि हि ।
लक्षमेकं वाजिनां सद्दन्तिनामयुतत्रयम् ॥४३॥
मणिमाणिक्यमुक्ताश्च हिरण्यं चाप्यनन्तकम् ।
नानाविधानि द्रव्याणि भक्ष्यभोज्यानि सर्वशः ॥४४॥
यज्ञद्रव्यं च यच्चान्यत् तत्सर्वसहितो नृपः ।
नानासहस्रयानैश्च नानावाद्यसहस्रकैः ॥४५॥
वेदघोषेण महता गीतिकैर्नादयन् दिवम् ।
विवेश नैमिषं तीर्थं यत्र श्रीहरिदर्शनम् ॥४६॥
अनादिश्रीकृष्णनारायणं दृष्ट्वा ततो नृपः ।
दीनानामयुतायाऽसौ ददौ सुवर्णलक्षकम् ॥४७॥
भूषणानि ददौ स्नात्वा रूप्यकाण्यमितानि तु ।
ओं नमो विष्णवे प्रोक्त्वा जलदर्भौ निधाय वै ॥४८॥
संकल्प्य स्वर्णपात्रे स यज्ञवाटमकारयत् ।
दशक्रोशमितां भूमिं यज्ञयूपमयीं नृपः ॥४९॥
हेमयूपसुशोभाढ्यामकारयच्च मण्डपान् ।
वेदिका यज्ञकुण्डानि मुख्यकुण्डान्वितानि च ॥५०॥
ततो निर्वर्तितो यज्ञो वशिष्ठप्रमुखैर्द्विजैः ।
मुदिता देवताः सर्वा जयशब्दान् वदन्ति वै ॥५१॥
यज्ञं समाप्य च राजा सान्तःपुरपरिच्छदः ।
यावद् यानं समारुह्य निःसृतो नैमिषाद् वनात् ॥५२॥
तावत् कश्चिद् वानरस्त्वागत्योवाच नृपं मुहुः ।
तिष्ठ तिष्ठ शृणु राजन् मिथ्याहंकारवान् भवान् ॥५३॥
किं ते यज्ञविधानेन फलं मन्ये न चाधिकम् ।
पुराऽमरेश्वरे यज्ञे सत्यधर्मस्य भूपतेः ॥५४॥
वर्जयित्वा मुखं मेऽभूत् कण्ठाऽधो हेमवर्णकम् ।
अस्माकं शिशवः सर्वे तत्राऽभवन् हिरण्मयाः ॥५५॥
कपिलानर्मदायोगे यज्ञतोयप्रभावतः ।
स्नानाऽवगाहनात्पानाल्लुण्ठनात्कर्दमे क्रतोः ॥५६॥
गन्धर्वलोकं सम्प्राप्तो भूतग्रामश्चतुर्विधः ।
अथाऽहं लुलितो यज्ञे तव नैमिषसंभवे ॥५७॥
पंकेन लिप्तं गात्रं मे क्षालितं यज्ञवारिणा ।
न किञ्चित् फलमासीन्मे न गात्रं स्वर्णतां गतम् ॥५८॥
अहंकारगतो यज्ञस्तव सर्वो निरर्थकः ।
गवां त्वयाऽयुतं दत्तं धनं धान्यमनन्तकम् ॥५९॥
स्वर्णं रूप्यं तथा दत्तं किन्तु सर्वं निरर्थकम् ।
एतत्ते कथितं राजन् क्रतुस्ते नहि तादृशः ॥६०॥

सत्यधर्मस्य नृपतेर्यथाऽभून्नर्मदातटे ।
स्वस्ति वोऽस्तु गमिष्यामि नर्मदां स्वर्णरूपदाम् ॥६१॥
श्रुत्वा त्वदीयं यज्ञं वै नैमिषारण्यमागतः ।
निराशोऽहं प्रगच्छामि नाऽभून्मे कांचनं मुखम् ॥६२॥
वानरस्य वचः श्रुत्वा युवनाश्वोऽब्रवीत् तदा ।
कोऽसि वानररूपस्त्वं वद मे श्रेयसां निधे ॥६३॥
कपिः प्राह कदम्बाख्यो जाबालिपुत्र आत्मवित् ।
जातिस्मरः फलचौर्याद् वानरत्वमुपागतः ॥६४॥
कृतानि सर्वतीर्थानि वेषेणानेन भूपते ।
न श्रेयो मेऽभवत् किंचित्तीर्थेषु त्वल्पमित्यपि ॥६५॥
केवलं नार्मदे क्षेत्रे सत्यधर्ममखोत्तमे ।
वपुर्हिरण्मयं सर्वं मुखवर्जं ममाऽभवत् ॥६६॥
वानरस्य वचः श्रुत्वा राजा तु नैमिषं पुनः ।
ययौ श्रीपरमेशं तं ह्यादिदेवं विभुं हरिम् ॥६७॥
तुष्टाव परया प्रीत्या भगवन्तं नरायणम् ।
भगवन्नैमिषे क्षेत्रे मया यज्ञः प्रसाधितः ॥६८॥
अत्रान्ते श्रावयामास ह्येको वानररूपधृक् ।
न यज्ञे ते मम लाभो वृथा यज्ञस्ततस्तव ॥६९॥
स त्विच्छति मुखं स्वस्य हिरण्मयं क्रतूत्तरम् ।
हिरण्मयं मुखं तस्य यथा स्यात् तत् तथा कुरु ॥७०॥
श्रुत्वा श्रीभगवानाह मूर्तिस्थो युवनं नृपम् ।
नर्मदायां पुनर्यज्ञं सत्यधर्मः करिष्यति ॥७१॥
तत्र तस्य मुखं स्वर्णं भविष्यन्ति न संशयः ।
वदैनं वानरं याहि राजँस्त्वं कोसलां पुरीम् ॥७२॥
राजा श्रुत्वा तु नैमिषं हरिं नत्वा पुरीं ययौ ।
वानरश्च ययौ रेवाकपिलासंगमं पुनः ॥७३॥
तत्र गत्वा सत्यधर्मं नैमिषाख्यानमाह सः ।
सत्यधर्मश्च तच्छ्रुत्वा हरेर्वचः प्रमाणयन् ॥७४॥
प्रचकार पुनर्यज्ञं वानरोऽवभृथोत्तरम् ।
कर्दमे स्वमुखं लुण्ठन् प्रावेशयन्मुहुर्मुहुः ॥७५॥
हेमीभूतवपुर्जातो मुखं सर्वं च कानकम् ।
अभवच्च तदा त्यक्त्वा शरीरं वानरस्य सः ॥७६॥
देवदुन्दुभिनादेन सत्कृतश्चाप्सरां गणैः ।
हंसयुक्तेन यानेन ययौ वैकुण्ठमेव सः ॥७७॥
तत्र यज्ञे श्वापदाद्याः कणं भुक्त्वा दिवं गताः ।
एवं वै नार्मदं तीर्थं सर्वोपरि प्रवर्तते ॥७८॥
श्रवणात्कीर्तनाच्चास्य गोसहस्रफलं भवेत् ।
शंकरः पार्वतीं प्राह मया लक्ष्मि ! तवोदितम् ॥७९॥
स्वद्रव्येण तु यो यज्ञं करोति नार्मदे तटे ।
भुक्त्वा स पुष्कलान् भोगान् विष्णुलोके महीयते ॥८०॥
धात्रीं हिरण्मयीं कृत्वा ब्राह्मणाय प्रकल्पयेत् ।
नर्मदातीरमाश्रित्य विष्णुलोके महीयते ॥८१॥
प्रत्यक्षधेनुं यो दद्याद्धेमरत्नविभूषिताम् ।
घृतधेनुं गुडधेनुं शर्कराधेनुमित्यपि ॥८२॥
रेवाकपिलयोर्योगे विष्णुलोके महीयते ।
शृणु चान्यां कथां चापि पापतापप्रणाशिनीम् ॥८३॥
वीरणस्य तु राजर्षेर्मैत्रेयोऽभूत्पुरोहितः ।
तेन चायतनं विष्णोः कृष्णनारायणस्य ह ॥८४॥
कारितं नर्मदातीरे स्वर्णकलशशोभितम् ।
तदायतनपुण्येन नर्मदायाः प्रभावतः ॥८५॥
मोदते वैष्णवे लोके मैत्रेयो वै चतुर्भुजः ।
अथाऽयं वीरणो राजा शुश्राव देवदूततः ॥८६॥
राजँस्तव गुरुः स्वर्गं निम्नीकृत्य गतो हरेः ।
वैकुण्ठं त्वं कथं नैव यास्यसि दर्शनाय वै ॥८७॥
देवदूतस्य तच्छ्रुत्वा पप्रच्छ च कथं गतिः ।
देवदूतस्तदा प्राह यज्ञमाचर नार्मदे ॥८८॥
तटे रम्ये हरिं कृष्णं तोषयित्वा प्रयास्यसि ।
वीरणोऽपि क्रतुं श्रेष्ठं वैष्णवं प्रचकार ह ॥८९॥
देवास्तत्र समायाता मैत्रेयोऽपि नरायणः ।
लक्ष्म्याद्या मातरश्चापि राजा सर्वा ह्यतोषयत् ॥९०॥
अथाऽवभृथकं स्नानं कृत्वा दत्त्वा च दक्षिणाः ।
वीरणो दिव्ययानेन भूत्वा दिव्यो हि वैष्णवः ॥९१॥
चतुर्भुजाभिः कन्याभिर्वीज्यमानोऽतिसुन्दरः ।
चतुर्बाहुधरः कृष्णनारायणं रटन् मुहुः ॥९२॥
देवैश्च पार्षदैर्मार्गे वर्धितः स्वागतीकृतः ।
ययौ विष्णोः परं धाम वैकुण्ठं नित्यशान्तिदम् ॥९३॥
रन्तिदेवोऽपि राजर्षिः कृत्वा यज्ञांश्च नार्मदे ।
क्षेत्रे बिल्वाँस्तथाऽऽम्रांश्च समर्प्य परमेश्वरम् ॥९४॥
तोषयित्वा हरिं देवान् तीर्थे बिल्वाम्रकं तदा ।
कृत्वा चाज्ञां समादाय नारायणस्य शार्ङ्गिणः ॥९५॥
प्रजाश्च वैष्णवीर्भक्ताः काश्चिन्नीत्वा सहापि च ।
तटे चान्ते हरेर्धाम ययौ सकुलबान्धवः ॥९६॥
दधीचिर्नाम राजर्षिरवन्तीनृपतिः पुरा ।
नर्मदायास्तटे गत्वा दत्त्वा चेन्द्राय पृष्ठगम् ॥९७॥
वंशास्थि च ततो भक्त्या ययौ नारायणं पदम् ।
यदस्थिजातशस्त्रैर्वै देवा जिग्युर्महासुरान् ॥९८॥

अमासोमसमायोगे स्नात्वा बिल्वाम्रके प्रिये ।
भुक्तिं मुक्तिं जना यान्ति नार्मदक्षेत्रयोगतः ॥९९॥
विश्वे देवाः परां सिद्धिं बिल्वाम्रके समाप्नुयुः ।
पाठकाः श्रावकाश्चापि यास्यन्ति परमां गतिम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने-ऽशोकवनिकायां मातंगाश्रमः, अंगारेश्वरम्, सत्यधर्मस्य यज्ञे नकुलस्य स्वर्णरूपता, वीरणस्य मोक्षः, इत्यादिनिरूपणनामा द्वासप्तत्यधिकपञ्च-शततमोऽध्यायः ॥ ५७२ ॥

श्रीनारायण उवाच--

आकर्णय महालक्ष्मि ! शंकरोदितमुत्तमम् ।
सुवर्णद्वीपतीर्थे च नर्मदाजलमध्यतः ॥ १ ॥
हारीतो वै महर्षिस्तु पुरा कृतयुगेऽतपत् ।
तत्र हरितवर्णस्य कृष्णनारायणस्य ह ॥ २ ॥
दर्शनं जायते रम्यं तपतां योगिनां तथा ।
अथ रेवोत्तरे कूले पर्यंको नाम पर्वतः ॥ ३ ॥
तत्र पापहरो विष्णुः स्वयं तिष्ठति माधवः ।
क्रोशमात्रप्रमाणं तत् हरिक्षेत्रं प्रकीर्तितम् ॥ ४ ॥
तत्र स्नाता मृताश्चापि प्रयान्ति परमां गतिम् ।
नर्मदायाम्यभागे च माण्डव्याश्रममुत्तमम् ॥ ५ ॥
विभाण्डकः ऋष्यशृंगस्तथाऽन्ये न्यवसन्पुरा ।
विशोकानर्मदासंगोऽशोकेश्वरश्च शंकरः ॥ ६ ॥
शोभने निम्नगे तत्र नर्मदाविन्ध्यसंगमः ।
निवसन्ति मोक्षदाश्च देव्यस्तत्र समागमे ॥ ७ ॥
हर्षसिद्धा च सावित्री देवमाताऽदितिस्तथा ।
देवयानी ब्रह्मतन्त्री रोहिणी कम्भरायणी ॥ ८ ॥
लोपामुद्रा तथेन्द्राणी दाक्षायणी प्रभा ध्रुवा ।
रत्नावली तथा संज्ञा तारा सिद्धिश्च पार्वती ॥ ९ ॥
लक्ष्मीः राधा मणिकी च हंसा च मंजुलाऽमृता ।
मंगला सगुणाऽशोका स्वस्वस्वामियुतास्तु ताः ॥१०॥
दया जया च ललिता मौक्तिकी हेमचम्पिका ।
कस्तूरिका च सविता वसन्ति विन्ध्यनार्मदे ॥११॥
संभेदेऽशोकवनिकाक्षेत्रे गौर्या वरः कृतः ।
आश्विने धवले चतुर्दश्यां व्रतवती च या ॥१२॥
अपुत्रिणी तथा वन्ध्या दुर्भगा भर्तृवर्जिता ।
पञ्चरत्नफलैः स्नाता दिव्यवस्तुभिरर्चयेत् ॥१३॥
स्नापयेच्च जलैः संभोजयेत् कुमारिकास्तथा ।
अखण्डसौभाग्ययुता पुत्रिणी मानिता भवेत् ॥१४॥
आदौ कृते रविश्चन्द्रः काञ्चीपुरपतिर्नृपः ।
सोमवंशसमुद्भावो नर्मदातीरवासिनम् ॥१५॥
मैत्रावरुणिकं विप्रमगस्त्यं प्रति संययौ ।
शाण्डिल्येन समं राजा पुरोहितेन तेन वै ।
ननामाऽगस्तिकं विप्रं पादौ जग्राह तस्य च ॥१६॥
अगस्तिः कुशलं सर्वं पप्रच्छ चासनं ददौ ।
राजा प्राह तपतस्ते दर्शनात् किल्बिषं गतम् ॥१७॥
अद्य मे सफलं जन्म राज्यं जीवनमित्यपि ।
कस्मिन् स्थाने यजे यज्ञं यथा संसिद्ध्यते क्रतुः ॥१८॥
सुराणां चाऽक्षया तृप्तिः पितॄणां मोक्षणं भवेत् ।
मुनिः प्राह क्रतोर्योग्या नर्मदा सप्तकल्पगा ॥ १९ ॥
अशोकवनिका यज्ञभूमिः ख्याता सुरार्चिता ।
तत्र यज्ञं वैष्णवं त्वं विधेहि पारमेष्ठ्यसि ॥२०॥
राजाऽगस्तिं सह नीत्वा ययावशोकिकां स्थलीम् ।
रेवाया दक्षिणे कूले यज्ञयूपांश्च मण्डपम् ॥२१॥
दशक्रोशानाभिव्याप्य कारयामास भूपतिः ।
सप्तर्षयस्तथा वालखिल्याश्चान्येऽपि भूसुराः ॥२२॥
ब्रह्मद्वयो लोमशश्च कुंकुमवापिकास्थितः ।
सुराश्च ब्राह्मणाश्चान्ये ययुर्यज्ञः प्रवर्तितः ॥२३॥
तृप्तास्तु देवताः सर्वा विप्राः संलब्धदक्षिणाः ।
ततस्तत्र समायातो दुर्वासा मुनिराट् क्रुधा ॥२४॥
उवाच नात्र मे स्थानं वैवस्वतस्य नास्ति च ।
नारदः पर्वतो नास्ति कालो मृत्युर्न विद्यते ॥२५॥
चित्रगुप्तस्तथा नास्ति कथं यज्ञः प्रवर्तितः ।
दुर्वाससं रविश्चन्द्रो नत्वा प्राह तदा वचः ॥२६॥
को मे समर्थो विघ्नाय सुरासुरगणेष्वपि ।
अशोकेश्वरदेवस्य नर्मदायाः प्रसादतः ॥२७॥
मया निर्वर्तितो यज्ञो यज्ञे पूज्याः समागताः ।
भवन्तोऽपि मम पूजां गृह्णन्तु दक्षिणास्तथा ॥२८॥
ददामि वो न सन्देहो दुर्वासा नारदादयः ।
यो यं कामयते कामं तं तस्मै प्रददाम्यहम् ॥२९॥
आगताः प्रस्तुतास्तत्र नारदाद्या महर्षयः ।
तोषिता भूभृता ते च यथेष्टादिप्रदानतः ॥३०॥
दुर्वाससा ततः पुनस्त्वर्थितं शृणु पद्मजे ।
पूर्वं पार्वतीशापेन पाटलीपुत्रवासिनः ॥३१॥

शप्ता वै ब्राह्मणाः श्वानो भूत्वा भ्रमन्ति वै क्षितौ ।
तेषां मुक्तिं च राजेंस्त्वं कुरु पुण्यप्रदानकैः ॥३२॥
राजा प्राह कथं ते वै शापं प्राप्ता वदस्व मे ।
दुर्वासाः प्राह ते विप्राः पुरा वल्कलधारिणः ॥३३॥
नेपाले वै पशुपतिं पूजयितुं ययुस्तदा ।
पुपूजुः शंकरं भक्त्या गौर्या विरहितं च ते ॥३४॥
अर्धनारीश्वरे नारीभागं हित्वा पुंमात्रकम् ।
चन्दनाद्यैः समानर्चुः पार्वती क्रोधतस्तदा ॥३५॥
शशाप ब्राह्मणाँस्तांश्च नार्यर्धभेदकारिणः ।
वर्षसहस्रं सर्वे वै श्वयोनिं तु गमिष्यथ ॥३६॥
अथ शापेन ते सर्वे श्वयोनिं प्रगतास्तदा ।
वर्तन्ते तान्मोचय त्वं वनादाहूय चात्र वै ॥३७॥
अथ राज्ञा प्रेषिताश्च किंकरास्तद्वनं प्रति ।
श्वानो जातिस्मराः शीघ्रं किंकरैः सह चाययुः ॥३८॥
अशोकवनिकाभूमिं प्राह तान्नृपतिर्मुदा ।
अशोकेश्वरदेवस्य नर्मदायाः प्रभावतः ॥३९॥
मम दानप्रभावेण महर्षीणां प्रसादतः ।
त्यक्त्वा श्वयोनिं मुनयो ब्रह्मलोकं प्रयान्तु वै ॥४०॥
युष्मत्पापं शापरूपं मयि सर्वं विशाम्यतु ।
तत्क्षणान्मुक्तशापास्ते कामिकं यानमास्थिताः ॥४१॥
भूत्वा महर्षयो दिव्या रविश्चन्द्रं प्रतुष्टुवुः ।
त्वं माता त्वं पिताऽस्माकं त्वं गुरुर्मोक्षदायकः ॥४२॥
एवमुक्त्वा ययुः स्वर्गं सत्यलोकात्मकं शुभम् ।
दुर्वासाद्याः ऋषयोऽपि प्रशशंसुर्नृपं तदा ॥४३॥
साधु साधु महाभाग ! त्वं तु यज्ञतपोनिधिः ।
नान्यस्त्वया समः कश्चित् सोमवंशोद्भवो नृपः ॥४४॥
प्राणत्यागो हि सुकरः पुण्यत्यागोऽति दुष्करः ।
पुण्यं प्रदास्यसि क्ष्माभृत् फलं त्वस्याऽस्ति शाश्वतम् ॥४५॥
वरं वृणीष्व भद्रं ते यत्ते मनसि वर्तते ।
राजाऽऽह मम पुण्येन जना दुर्बुद्धयोऽपि च ॥४६॥
प्राप्नुवन्तु परं लोकं वर एष मम प्रियः ।
दुर्वासाद्याः ऋषयोऽपि तथाऽस्त्वित्यभिधाय वै ॥४७॥
अन्तर्धानं ययुः सर्वे ततो धर्मः समागतः ।
प्रसन्नः सन् धर्मराजो वरं ददामि चाह तम् ॥४८॥
यमलोको जितो राजन् देवलोको जितस्त्वया ।
यज्ञपुण्यप्रदानेन श्वानो मुक्ताः कृतास्त्वया ॥४९॥
पृथिव्यां दुष्करं कर्म यज्ञपुण्यप्रदानकम् ।
वरयोग्योऽसि राजेन्द्र वृणुष्व च यथेप्सितम् ॥५०॥
रविश्चन्द्रस्तदा प्राह यमलोकगताश्च ये ।
पापिनो दुःखभोक्तारो नारका यातनार्दिताः ॥५१॥
मम यज्ञशतेनैव दानेन तपसा तथा ।
प्रयान्तु त्वत्प्रसादेन स्वर्गं सत्यं सुखावहम् ॥५२॥
यमः प्राह तथैवाऽस्तु पुण्यं ते वर्धते बहु ।
परोद्धारेऽर्पितं पुण्यं सहस्रगुणितं भवेत् ॥५३॥
तेन पुण्येन राजेन्द्र याहि त्वं ब्रह्मपत्तनम् ।
शाश्वतं धाम यन्नित्यानन्दभृतं पराक्षरम् ॥५४॥
यतस्त्वया कश्मलाद्वै मोचिताः पापयोनयः ।
क्षत्रियाः शतशो राजन् अन्ये चापि सहस्रशः ॥५५॥
एवमुक्त्वा धर्मराजो दत्वा राज्ञे जपाय वै ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥५६॥
षोडशाक्षरमन्त्रं च ययौ स्वभवनं मुदा ।
राजा कालेन दिव्योऽभूद् यथावक्षरतः परम् ॥५७॥
ब्रह्मधामोत्तरं धाम परं पुमुत्तमस्य यत् ।
श्रवणात् कीर्तनादस्य गोसहस्रफलं भवेत् ॥५८॥
अथ तीर्थे वागुरेवासंगमाख्यं ततः परम् ।
ब्रह्मदत्तोऽभवद् राजा कोशलानां प्रशासकः ॥५९॥
सूर्यवंशी क्रतुं रेवावागुयोगे चकार ह ।
दशयोजनपर्यन्ता यज्ञभूमिरभूत्तदा ॥६०॥
अस्य यज्ञे चातितृप्ताः प्रेता मुक्तिं परां गताः ।
शृणु प्रेताः कथं जाताः केऽभवँस्ते पुरा यथा ॥६१॥
कार्तिक्यां पुष्करे तीर्थे पुरा महर्षयो ययुः ।
अयोगन्धः स्वयंभूश्च पुण्डरीकाक्ष इत्यपि ॥६२॥
ब्रह्मा काव्यस्तथा होता सदनो वेदगर्भकः ।
कृतध्वनः स्वस्तिकश्च सावित्रो वामदेवकः ॥६३॥
अघमर्षो ब्रह्मतेजास्तथाऽन्ये ब्राह्मणा ययुः ।
सर्वे गार्हस्थ्यधर्मस्थास्तृष्णाहीना हि वैष्णवाः ॥६४॥
तेषां भार्याः पतिधर्मा भर्तृशुश्रूषणे रताः ।
चीरवल्कलधारिण्यः शाकश्यामाकभक्षिकाः ॥६५॥
दारिद्र्यदोषसन्तप्ता विषण्णाश्चैकदा तु ताः ।
विप्रस्थितिं यजनं याजनं चाध्यापनं तथा ॥६६॥
अध्ययनं तथा दानं प्रतिग्रहं व्यगर्हयन् ।
षट्स्वेतेषु विप्रकर्मस्वतिकष्टं विलोक्यते ॥६७॥
भूषणं राजसं किञ्चिन्नाप्यते ब्राह्मणगृहे ।
एवं व्यगर्हयँस्तासां श्रुत्वा विप्रा महर्षयः ॥६८॥
विषण्णवदनास्तासां पूरयितुं मनोगतम् ।
सस्त्रीपुत्रा ययुः सूर्यग्रहे क्षेत्रे च कौरवे ॥६९॥

यत्र दानं ददाति स्म हरिश्चन्द्रो रवेर्ग्रहे ।
प्रतिग्रहेच्छया समागतान् दृष्ट्वा स भूपतिः ॥७०॥
प्रसन्नवदनो दानसाफल्यं प्रशशंस ह ।
धन्या मे सफला यात्रा कुरुक्षेत्रेऽद्य वर्तते ॥७१॥

क्षुधार्ता दुःखिताश्चापि बाला वृद्धाः कृशाऽऽतुराः ।
वल्कलाजिनवस्त्राश्च दुर्बला मे क्षुपागताः ॥७२॥
एवमुक्त्वा नमस्कृत्यैकैकस्य च पृथक्पृथक् ।
लक्षं लक्षं हिरण्यस्य तथा गावः सहस्रशः ॥७३॥

सहस्रं तुरगाणां च दन्तिनां शतमित्यपि ।
सप्तभौमान् गृहान्रम्यान् हेमप्राकारतोरणान् ॥७४॥
यानवाहनदासाँश्च दासीस्तथा समार्पयत् ।
राजप्रतिग्रहं प्राप्ताः पापभोक्तार एव ते ॥७५॥

षट्कर्माणि परित्यज्य विलासेष्वभवन् हृताः ।
कालान्तरे मृता जाताः प्रेतरूपा भयावहाः ॥७६॥
प्रतिग्रहप्रभावोऽयं विप्रस्य पतनं यतः ।
ते च जातिस्मराः सर्वे दानदग्धाः सबान्धवाः ॥७७॥

दुःखिनस्त्वागतास्तीर्थे पुष्करं यत्र नारदः ।
बदरीं प्रति संयास्यन्निर्गतस्तत्प्रदेशतः ॥७८॥

प्रेतरूपान् मुनीन् दृष्ट्वा विषादं परमं गतः ।
पप्रच्छ च कथं प्रेता जाता इति ततश्च ते ॥७९॥
ऊचुर्वयं हरिश्चन्द्रनृपतेर्वै प्रतिग्रहम् ।
कुरुक्षेत्रे लब्धवन्तो लोभेन तत्फलं गताः ॥८०॥

प्रेतभावं समापन्ना मोक्षोऽस्माकं विधीयताम् ।
श्रुत्वा तान्नारदः प्राह नर्मदां यात पावनीम् ॥८१॥
वागीशं च पुरं तत्र नर्मदातटमाश्रितम् ।
अध्वरे ब्रह्मदत्तस्य मोक्षणं वो भविष्यति ॥८२॥

इत्युक्त्वा नारदो नारायणाश्रमं ययौ ततः ।
प्रेता ययुस्तमुद्देशं वागीशपुरमुत्तमम् ॥८३॥

स्नात्वा सूर्यं हरिं शंभुं पूजयित्वा ययुर्मखम् ।
मखप्रासादिकं प्राश्य पापहीनाः सुरूपिणः ॥८४॥
बभूवुस्तान् विलोक्यैतान् विमलान् सूर्यवर्चसः ।
ब्रह्मदत्तादयो नत्वा पप्रच्छुर्यूयमत्र के ॥८५॥

कथं प्रेतत्वमापन्ना बभूव मुक्तता कथम् ।
अथ तैर्निजवृत्तान्तस्तेभ्यस्तत्र निवेदितः ॥८६॥

चक्रुश्चोपरि राज्ञस्ते पुष्पवृष्टिं दिवंगताः ।
ब्रह्मयानं समारुह्य ब्रह्मलोकं ययुस्ततः ॥८७॥

राजानं शंशमाना वै मखं च नार्मदं जलम् ।
देवा विप्रा ययुर्नैजं देशं यज्ञे प्रतोषिताः ॥८८॥
श्रवणात्कीर्तनादस्य गोसहस्रफलं भवेत् ।
अन्यच्चापि सहस्रावर्तकं तीर्थं प्रविद्यते ॥८९॥

तत्र स्नातस्य विधिवद् वृषोत्सर्गफलं भवेत् ।
करावनं तथा तीर्थं सौगन्धिकं वनं तथा ॥९०॥
तत्र सरस्वती चास्ते पितृुद्धारकरी शुभा ।
त्रिशूलाख्यं तथाऽन्यच्च तीर्थं गणेशताप्रदम् ॥९१॥

ब्रह्मोदं चापरं तीर्थं सप्तर्षिस्नानकारितम् ।
कपिञ्जलो मुनिश्रेष्ठो हव्यवाहश्च देवता ॥९२॥
भगवान् देवयानश्च विश्वावसुर्महामुनिः ।
अस्य तीर्थस्य माहात्म्याद् ब्रह्मलोकमुपागताः ॥९३॥

वस्वाश्रमं तथा रम्यं तीर्थं परममस्ति च ।
सप्तसारस्वतं तीर्थं यत्र कृष्णनरायणः ॥९४॥
साक्षाद् विराजते ब्रह्मा स्तुतिं तस्य चकार ह ।
अनादिश्रीकृष्णनारायणो भवतु मे गतिः ॥९५॥

अक्षराधिपतिर्मुक्तपतिः श्रीपुरुषोत्तमः ।
राधापतिश्च लक्ष्मीशः पार्वतीशोऽस्तु मे गतिः ॥९६॥

जयापतिर्ललितेशो माणिकीशोऽस्तु मे गतिः ।
वासुदेवः स्वयं स्वामी नारायणोऽस्तु मे गतिः ॥९७॥
भूमा विष्णुर्महाकृष्णो वैराजेशोऽस्तु मे गतिः ।
उपेन्द्रो हंसनाथश्च भूश्रीशोऽस्तु च मे गतिः ॥९८॥

प्रभापतिर्मञ्जुलेशो हंसेशः सगुणापतिः ।
कांभरेयश्च भगवान् हरिकृष्णोऽस्तु मे गतिः ॥९९॥
हृषीकेशो माधवश्च देवीनाथोऽस्तु मे गतिः ।
शंखचक्रगदापद्मायुधः श्रीगरुडासनः ॥१००॥

सर्वाविर्भावमूलं च जनार्दनोऽस्तु मे गतिः ।
परमात्मा परब्रह्म गोपालबालकः प्रभुः ॥१०१॥

विश्वात्मा चान्तरात्मा च हृदयस्थोऽस्तु मे गतिः ।
भक्तस्य भगवान् कृष्णः प्रीयतां सवितापतिः ॥१०२॥
सीतारमाप्रपुण्येशो भक्तपतिः प्रसीदतु ।
जन्मप्रभृति यत्किञ्चिदर्जितं मे त्वदर्पितम् ॥१०३॥

नान्यः पुण्यतरो देवो नास्ति विष्णुपरं तपः ।
नास्ति स्वामिपरं ज्ञानं सर्वं स्वामिमयं जगत् ॥१०४॥

एतत्स्तवरवेणापि जना यास्यन्ति मोक्षणम् ।
श्रवणात्कीर्तनादस्य हयमेधफलं लभेत् ॥१०५॥

ब्रह्मा स्तुत्वा जले स्नात्वा कार्तिक्यां यानमास्थितः ।
अनादिश्रीकृष्णनारायणं रटन् ययौ दिवम् ॥१०६॥
एतत् तीर्थं कृष्णनारायणोदं मोक्षदं स्मृतम् ।
शंभूदितं च यत्तस्तै मया लक्ष्मि ! तवोदितम् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सुवर्णद्वीपतीर्थे विशोकानर्मदासंगमः, अशोकेश्वरे रविश्चन्द्रयज्ञे प्रेतोद्धारः, वागुरेवासंगमः, श्रीकृष्ण-नारायणतीर्थादि चेतिनिरूपणनामा त्रिसप्त-त्यधिकपञ्चशततमोऽध्यायः ॥५७३॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततो गच्छेत्तीर्थं देवमयं शुभम् ।
सतीं शंभुर्जगादैवं नार्मदे चोद्भवे स्थितः ॥ १ ॥
सहस्रयज्ञं तीर्थं च जनार्दनाधिवासितम् ।
कृत्वा याम्यां च नगरीं नैव पश्येत् कदाचन ॥ २ ॥
शुक्लतीर्थं ततो गच्छेत् सर्वतीर्थमयं परम् ।
तेन शुक्लीकृता देवा ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥
तीर्थानां कोटयस्तत्र शुक्लतीर्थे वसन्ति वै ।
इन्द्रः शंभुं स्नापयित्वा बिल्वपत्रैः समार्चयत् ॥ ४ ॥
दिक्पालैः श्रीकृष्णनारायणस्तत्रैव पूजितः ।
कश्यपस्याऽऽश्रमं पुण्यं यत्रायुतर्षिमण्डलम् ॥ ५ ॥
मुनीनां कोटयश्चापि शुक्लेश्वरमुपासते ।
सर्वतीर्थमयं तीर्थं सर्वदेवमयं हि तत् ॥ ६ ॥
पितामहेन यत्रेष्टो यज्ञे यज्ञेश्वरः पुरा ।
सर्वपापानि नश्यन्ति तस्या भूमेर्निषेवणात् ॥ ७ ॥
अगत्या तु मृतानां तन्मुक्तिदं शुक्लतीर्थकम् ।
ययातिर्नाम धर्मात्मा चक्रवर्त्यभवन्नृपः ॥ ८ ॥
इयाज स महायज्ञैः रेवामधुमतीयुजौ ।
यत्र मध्येश्वरं लिंगं माधवोऽहं नरायणः ॥ ९ ॥
तत्र स्नाता दिवं मोक्षं यान्ति ते न पुनर्भवाः ।
ययातिना ब्राह्मणैश्चैकदा यज्ञः प्रवर्तितः ॥१०॥
यत्र नास्ति हरेः स्थानं शंभोः स्थानं न वै तथा ।
जटासुरस्तदा दैत्यश्छिद्रं दृष्ट्वा ह्युपाययौ ॥११॥
असुरैर्ध्वंसितो यज्ञो यूपाश्च विनिपातिताः ।
भुक्तो हुतपुरोडाशः सोमपानं च तैः कृतम् ॥१२॥
अष्टोत्तरशतं देवा मृगरूपेण निर्गताः ।
राजाऽस्त्रं प्रतिजग्राह स्मृत्वा हरिं हरं तदा ॥१३॥
जघान दानवान् युद्धे आहूताश्च पुनः सुराः ।
पुनः प्रवर्तितो यज्ञो हरविष्णुप्रसादतः ॥१४॥
हरिणा शंभुना तत्र प्रत्यक्षेण स्वतेजसा ।
शुक्लीकृतं जगत्सर्वं यथा गोलोकमक्षरम् ॥१५॥
ययातिना वरेणापि छन्दितौ तु हरो हरिः ।
तिष्ठतं नित्यमत्रैव दिव्यरूपेण चेश्वरौ ॥१६॥
तावदारभ्य तौ श्वेतौ दीप्यमानौ हरो हरिः ।
वर्तेते भक्तकल्याणकरौ तीर्थे हि शुक्लके ॥१७॥
यज्ञदानादिकं सर्वमक्षयं तत्र जायते ।
ये केऽपि देहिनस्तत्र जलं पास्यन्ति वा क्वचित् ॥१८॥
ते सर्वे धाम यास्यन्ति शुक्लतीर्थप्रभावतः ।
कामयन्ते तु यान् कामान् तांँस्तान् प्राप्स्यन्ति मानवाः॥१९॥
ययातिस्तु गृहं तत्र कारयित्वा सुमन्दिरम् ।
तत्र देवौ प्रतिष्ठाप्य निजराज्यमुपागतः ॥२०॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
जपन् धाम ययौ चान्ते श्रोता वक्ताऽपि मोक्षगः ॥२१॥
द्वीपेश्वरं तथा तीर्थं नर्मदायास्तटे स्थितम् ।
ततो गच्छेत्तु कार्तिक्यां वैष्णवं तीर्थमुत्तमम् ॥२२॥
नाभागेन स्तुतो विष्णुर्यत्र प्रत्यक्षतां गतः ।
ततो गच्छेन्मेघनादाभिधं श्रीशंकरं प्रिये ! ॥२३॥
पुरा वै रावणो रक्षः पर्यटन् पृथिवीमिमाम् ।
ययौ देवगिरौ यत्र मयो नामाऽस्ति दानवः ॥२४॥
पौलस्त्यस्तं मयं प्राह केयं कन्याऽस्ति कस्य च ।
किन्नामधेया तपति तप उग्रं तवाऽऽश्रमे ॥२५॥
मयः प्राह मम पत्न्यां तेजोवत्यां सुपुत्रिका ।
जन्म प्राप च पत्यर्थं तपते दारुणं तपः ॥२६॥
नाम्ना मन्दोदरीं विद्धि गृहाण स्वागतं शुभम् ।
रावणस्तु तदा प्राह राजाऽहं देहि मेऽत्र ताम् ॥२७॥
मयो ददौ सुतां तस्मै विधिना रावणस्ततः ।
ययौ स्वं सिंहलं द्वीपं यत्र सा सुषुवे सुतम् ॥२८॥
जातमात्रेण बालेन रवः कण्ठात् प्रकाशितः ।
मेघवत् तेन नाम्नाऽसौ मेघनाद इतिकृतः ॥२९॥
मेघनादः शंकरस्य भक्तोऽभवद् यथा पिता ।
भावयामास देवेशं पार्वत्या सह शंकरम् ॥३०॥
तपोभिश्चोपवासाद्यैः क्लिश्यते तत्कलेवरम् ।
मेघनादस्त्वेकदा वै ययौ कैलासपर्वतम् ॥३१॥
लिंगं पाषाणकं नीत्वा प्रययौ नार्मदं तटम् ।
मेघनादेन सलिले स्थापितं पूजितं तथा ॥३२॥

मेघारवाख्यो ग्रामश्च गर्जनाख्यस्तथाऽपरः ।
मेघनादसमाख्यातं क्षेत्रं तच्चाऽभवत्ततः ॥३३॥
शंकरस्तपसा तस्य तत्र प्रत्यक्षतां गतः ।
ततो मुक्तिं गतः कालान्तरेण विष्णुघातितः ॥३४॥
अथ दारुवनं तीर्थं वर्तते पुण्यदायकम् ।
मातलिश्च महेन्द्रस्य दारुकाख्यः पुराऽभवत् ॥३५॥
स चागत्य जले तत्र रेवायां सुतपोऽतपत् ।
अभजत्परया भक्त्या शंकरं दारुकेश्वरम् ॥३६॥
शंभुस्तुतोष प्रददौ वरं मन्त्रं च वैष्णवम् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ॥३७॥
अंशाऽवतरणे विष्णोः सारथिस्त्वं भविष्यसि ।
तोषयित्वा जगन्नाथं ततो यास्यसि सद्गतिम् ॥३८॥
ततः शंभुस्तिरोधानं ययौ दिवं च मातलिः ।
वासुदेवसुतः कालान्तरेऽभवत्स मातलिः ॥३९॥
कृष्णयोगेन वै मुक्तिं गतो गोलोकधामनि ।
अथाऽन्यद् वर्तते तीर्थं करञ्जेश्वरमुत्तमम् ॥४०॥
कश्यपात्तु दनोः पुत्रः करञ्जस्त्वभवत्पुरा ।
तपश्चचार यत्राऽयं करञ्जेश्वरमेव तत् ॥४१॥
महादेवः प्रसन्नोऽभूद् ददौ तस्मै वरं शुभम् ।
अत्र करञ्जशंभुर्वै निवत्स्यामि सुतीर्थके ॥४२॥
ततो ययौ दिवं सोऽपि करञ्जः शंभ्वनुग्रहात् ।
अथ वै पिप्पलेशस्य तीर्थं मुक्तिप्रदं शुभम् ॥४३॥
पिप्पलादकृतं चास्ते गन्तव्यं तत्र वै ततः ।
गुह्यतीर्थं ततो गच्छेद् बालहत्याविनाशनम् ॥४४॥
गोविन्दाख्योऽभवद्विप्रस्तस्य भार्या पतिव्रता ।
तस्यां स जनयामास पुत्रमेकं सुसुन्दरम् ॥४५॥
कदाचिद् ब्राह्मणः सोऽपि काष्ठान्यानेतुमुत्सुकः ।
वनं यातस्ततो नीत्वा काष्ठभारं गृहागतः ॥४६॥
गृहे तमसि बालस्तु सुप्तोऽभूद् यत्र पार्श्वके ।
काष्ठभारं निचिक्षेप विप्रश्चाऽज्ञात एव सः ॥४७॥
बालो ममार भारेण द्विजो जानाति नैव तत् ।
ब्राह्मण्यपि क्षणादूर्ध्वं ज्ञातवती तथापि तम् ॥४८॥
न शशंस भयात्तस्य सोऽपि पुनर्वनं गतः ।
ततः सा विललापाऽथ गोविन्दे त्वागते पुनः ॥४९॥
मौनमास्थाय च ददौ भोजनं शयनं ददौ ।
रात्रौ स्वपन्तं कान्तं सा कृमिव्याप्तं ददर्श ह ॥५०॥
बालहत्यात्मकाः सर्वे कृमयस्तं ववल्गिरे ।
ब्राह्मणी स्वपतिं रात्रौ पापकृमिसमावृतम् ॥५१॥
शुशोच वीक्ष्य मनसा बहिर्नैवाऽप्रकाशयत् ।
अथ प्रातर्ब्राह्मणोऽपि शीघ्रमुत्थाय नर्मदाम् ॥५२॥
प्रत्यरण्यं ययौ काष्ठान्यानेतुं तृषितोऽभवत् ।
जलं पीत्वा वनदारुण्यादाय निशिथे गृहम् ॥५३॥
आययौ भोजनं जग्ध्वा शयने निद्रितोऽभवत् ।
पुनर्विप्रा कृमिशून्यं दृष्ट्वा देहं स्वस्वामिनः ॥५४॥
कथनीयं स्वामिने मे सुतस्य मरणं प्रगे ।
विचार्येत्थं च सुष्वाप प्रातश्चाह पतिं ततः ॥५५॥
पुत्रोऽयं घातितः काष्ठभारैर्नाथ त्वया तु तत् ।
गतेह्नि पातकं घोरं कृमिरूपं तनौ तव ॥५६॥
लोकितं पूर्वनिशिथे नात्र रात्रौ क्व तद्गतम् ।
वद पुण्यं कृतं किञ्चित् किं वा जातं शुभं प्रभो ॥५७॥
विप्रः प्राह मया पीतं जलं नार्मदमत्र यत् ।
तदा मयाऽपि ते दृष्टाः कीटा देहाद्विनिःसृताः ॥५८॥
किमिदं किमिदं चैतन्मत्वा चाहं सुमोह च ।
किन्तु नात्यवधार्यं तन्मत्वा तुभ्यं न वोदितम् ॥५९॥
ईश्वरेच्छा सुखदुःखप्रवाहे कारणं प्रिये ! ।
एहि पुत्रं निधायैत्र गच्छावो नर्मदातटम् ॥६०॥
स्नापयित्वा करिष्यावः संस्कारं जलवाहनम् ।
इति निर्णीय तौ पुत्रशवमादाय मौनतः ॥६१॥
ययतुर्नर्मदातीरं स्नापयामासतुः शवम् ।
सस्नतुश्च तदा तौ द्वौ तावत्पुत्रः सचेतनः ॥६२॥
सप्राणस्त्वभवच्छीघ्रं ब्रह्महत्याऽपि भूसुरान् ।
विनिर्गत्य द्रुतं नष्टा जज्वाल वह्निना तदा ॥६३॥
इत्याश्चर्यं परं दृष्ट्वा तुतुषतुर्द्विजौ सुतम् ।
गृहीत्वा स्वगृहं तुष्टौ ययतुर्नार्मदाद् बलात् ॥६४॥
जीवनाख्यं परं तीर्थं बालहत्याप्रणाशनम् ।
तत्र स्नात्वा परां सिद्धिं लभेन्नात्र विचारणा ॥६५॥
अथ तीर्थं विश्वरूपानर्मदासंगमात्मकम् ।
तत्र पूर्वं महेन्द्रस्य शापादप्सरसां वरा ॥६६॥
विश्वरूपा सारिका चाऽभवच्चूतनिवासिनी ।
शंकरं सा समुपास्य प्रत्यक्षं प्राकरोद्वरम् ॥६७॥
यत्र प्रादुर्भूत ईशस्तत्र सा मोक्षणं गता ।
सारिकारूपमुत्सृज्याऽप्सरो रूपवती शुभा ॥६८॥
जाता तत्र नदी चापि विश्वरूपाऽभिधानिका ।
शंकरस्य प्रसादेन संजाता नर्मदांगता ॥६९॥
तत्तीर्थे शापनाशार्थे स्नातव्यमृद्धिमिच्छता ।
शापस्य कारणं चित्रांगदं गन्धर्वमुत्तमम् ॥७०॥

नर्तने देवसदसि कामयामास वै हृदा ।
नृत्यं क्षतिं तदा प्रापत् तेन दोषेण शापिता ॥७१॥
सा च स्वर्गे पुनर्गत्वा ययौ कैलासमित्यपि ।
अथ राजा धर्मसेनः सारिकातीर्थमाययौ ॥७२॥
कैलासाधिपतिर्भक्तो वैष्णवो वाजिराजितः ।
नर्मदायां जले स्वाश्वं समाप्लाव्य जलं पपौ ॥७३॥
तावदश्वोऽभवत्तत्र चतुर्भुजो मनोहरः ।
दिव्ययानसमारूढो ययौ वैकुण्ठमेव सः ॥७४॥
विष्णुदूतो नृपं प्राह राजँस्ते पृष्ठमागता ।
शुनी चेयं जलं पीत्वा स्नात्वा चायाति पश्य ताम् ॥७५॥
इत्युक्तो नृपतिर्यावच्छुनीं पश्यति तावता ।
स्वदेहं सा परित्यज्याऽप्सरोवरा बभूव ह ॥७६॥
विमाने तत्र संरुह्य ययौ वैकुण्ठमेव सा ।
व्योमवाणी च राजानं तदोवाच धृतिं वह ॥७७॥
शरीरजेन कष्टेन तपःसाध्या विभूतयः ।
पादचारी हि गच्छ त्वं परपादैः समागतः ॥७८॥
पादचारी समायाद् यस्तस्य मुक्तिर्ध्रुवाऽत्र भो ।
भूयो यात्रां प्रकुरुषे पद्भ्यां स्वनगरान्नृप ॥७९॥
तदा मुक्तिस्तु ते स्याद्वै पुण्यमादाय याहि भो ।
श्रुत्वा राजा धर्मसेनो ययौ ततः पुनर्गृहम् ॥८०॥
त्रयोदश्यां पादचारी नर्मदायामुपागमत् ।
चतुर्दश्यां प्रगे स्नात्वा सारिकेशं ददर्श ह ॥८१॥
विष्णुं नारायणं कृष्णं साक्षात् कृत्वा स्मरन् हरिम् ।
ययौ विमानमारुह्य वैकुण्ठं पारमेश्वरम् ॥८२॥
अथ तीर्थं चन्द्रमत्या नर्मदायां समागमम् ।
चन्द्रेश्वरः सदाशंभुर्विराजतेऽत्र सर्वदा ॥८३॥
अथ तीर्थं हारिणं च लुब्धकेन मृगः पुरा ।
हतो मध्यन्दिने श्रेष्ठः कुरंगो नर्मदातटे ॥८४॥
पतितो गतजीवश्च दिव्यदेहधरोऽभवत् ।
विमानेन तु दिव्येन ब्रह्मलोकं जगाम सः ॥८५॥
दृष्ट्वा वैराग्यमापन्नो लुब्धको मरणाय ह ।
निर्णयं कृतवाँस्तत्र सलिले निममज्ज ह ॥८६॥
तत्क्षणाद् दिव्यदेहोऽसौ गन्धर्वपुरमाययौ ।
हरिणेश्वरमेवैतल्लिंगं लुब्धेश्वरं तथा ॥८७॥
तीर्थं बाणेश्वरं चापि धनुरीश्वरमित्यपि ।
रमेश्वरं पञ्चमं च तीर्थं मुक्तिप्रदं हि तत् ॥८८॥
तत्र देवाय भावेन प्रदद्यादष्टपुष्पकम् ।
वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं तथा ॥८९॥

वानस्पत्यं प्राजापत्यं शिवपुष्पं तथाऽष्टमम् ।
वारिजं सलिलं ज्ञेयं सौम्यं मधुयुतं पयः ॥९०॥
आग्नेयं धूपदीपादि वायव्यं चन्दनादिकम् ।
पार्थिवं कन्दमूलादि वानस्पत्यं फलादिकम् ॥९१॥
प्राजापत्यं शुभाऽन्नादि शिवपुष्पमुपासनम् ।
अहिंसा प्रथमं पुष्पं द्वितीयमिन्द्रियग्रहः ॥९२॥
तृतीयं तु दयापुष्पं चतुर्थं स्मरणं हरेः ।
पञ्चमं सद्गुरोः सेवा षष्ठं वै पितृपूजनम् ॥९३॥
सप्तमं स्वामिनः सेवाऽष्टमं नारायणाश्रयः ।
एभिर्वै प्राप्यतेऽनादिकृष्णनारायणः प्रभुः ॥९४॥
राधा वै प्रथमं पुष्पं लक्ष्मीः पुष्पं द्वितीयकम् ।
तृतीयं पार्वती पुष्पं प्रभा पुष्पं चतुर्थकम् ॥९५॥
पञ्चमं माणिकी पुष्पं जया पुष्पं च षष्ठकम् ।
ललिता सप्तमं पुष्पं मंजुला पुष्पमष्टमम् ॥९६॥
एता मे पुष्परूपा वै सन्ति पुष्पेषु संस्थिताः ।
विना ता नैव गृह्णामि पुष्पाणि पद्मजे क्वचित् ॥९७॥
हंसा पुष्पं च सगुणा पुष्पं चम्पा सुपुष्पकम् ।
दया पुष्पं देविका संपुष्पं मुक्ता सुपुष्पकम् ॥९८॥
षोडशोपूपचारेषु सहस्राण्यपि षोडश ।
कला मे संप्रविष्टा हि सन्ति गृह्णामि तांस्तदा ॥९९॥
वस्तुना मत्स्वरूपेण पूजां गृह्णामि नित्यदा ।
एवं विष्णुमयो भूत्वा पूजयेत् स गतिं लभेत् ॥१००॥
कृत्वा वै हरिणं तीर्थं ततो यायात्तु भार्गवम् ।
तीर्थोत्तमं परं तीर्थं यत्र कैलासवासिनः ॥१०१॥
अन्धकासुरमाहत्य शंकरेण समं सुराः ।
नर्मदायां यदा स्नातुं तीर्थार्थं समुपाययुः ॥१०२॥
उत्तरं दक्षिणं कूलमवगाह्य प्रयत्नतः ।
गत्वा तु दक्षिणे कूले पर्वतं भृगुसंज्ञितम् ॥१०३॥
हरो बिभेद शूलेन तेन भिन्नं रसातलम् ।
पातालान्निःसृता गंगा नाम्ना भोगवती हि सा ॥१०४॥
तत्र तीर्थं समुत्पन्नं शूलभेदाभिधं तथा ।
तत्र ब्रह्मा स्वयं विष्णुः शिवस्तिष्ठन्ति सर्वदा ॥१०५॥
यत्र गंगा च यमुना नर्मदा च सरस्वती ।
संगता दिव्यरूपेण शूलभेदे व्यवस्थिताः ॥१०६॥
चक्रतीर्थं परं तीर्थं तत्र वै वर्तते सदा ।
सर्वतीर्थमयं तीर्थं सर्वतीर्थाधिकं परम् ॥१०७॥
सर्वपुण्याधिकं पुण्यं सर्वदुःखघ्नमुत्तमम् ।
भृगुतीर्थं परं श्रेष्ठं यत्र लक्ष्मीर्हि भार्गवी ॥१०८॥

विष्णवे भृगुणा दत्ता विवाहविधिना पुरा ।
वैकुण्ठसदृशं तीर्थं भृगुतीर्थं तदुच्यते ॥१०९॥
कन्यादानं पूजनं श्रीहरेः कार्यं हि तत्स्थले ।
श्रवणात्पठनाच्चास्य दानपूजाफलं लभेत् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सहस्रयज्ञतीर्थशुक्लतीर्थद्वीपेश्वरतीर्थमेघनादतीर्थदारुवन-तीर्थकरंजेश्वरतीर्थजीवनतीर्थविश्वरूपारेवासंगम-चन्द्रावतीनर्मदासंगमहरिणेश्वरादिशूलभेदभृगु-क्षेत्रादितीर्थनिरूपण नामा चतुःसप्तत्यधिक-पञ्चशततमोऽध्यायः ॥ ५७४ ॥

श्रीलक्ष्मीरुवाच—

कन्यादानं कीदृशं दातव्यं मम पितुः स्थले ।
वद मे श्रीकृष्णनारायणस्वामिन् कृपां कुरु ॥ १ ॥

श्रीनारायण उवाच—

स्ववित्तेनाऽनुकर्तव्यं कन्योद्वाहनमुत्तमम् ।
यस्याग्रे नैव वित्तं स्यात्तेन कन्या सुशोभिता ॥ २ ॥
वस्त्राद्यैस्तुलसीपत्रं संस्पृष्ट्वा वह्निसन्निधौ ।
कन्या देया जलसाक्ष्ये विप्रसाक्ष्ये च मण्डपे ॥ ३ ॥
वरमालां गृहीत्वा च कन्या तं वरयेद् वरम् ।
भोजनाद्यं यथाशक्ति प्रोत्साहश्चेद् ददेच्छुभम् ॥ ४ ॥
योग्यं दृष्ट्वा वरं लब्ध्वा प्रदद्याद् विक्रयं विना ।
विक्रयो धनमाहृत्य दीयते पातकं महत् ॥ ५ ॥
अभिगम्य प्रदातव्या चोत्तमं तारकं तु तत् ।
आहूय तु प्रदातव्या मध्यमं तारकं तु तत् ॥ ६ ॥
प्रसह्य च प्रदातव्या त्वधमं दानमेव तत् ।
किंकरीवत्प्रदातव्या निष्फलं दासिकासमम् ॥ ७ ॥
कन्यादाने जायमाने कुर्युः श्रीहरिकीर्तनम् ।
नार्यः कुटुम्बिनां तत्र मण्डपे वाद्यघोषिते ॥ ८ ॥
निर्वर्तिते च तद्दाने पूजनं दर्शनं हरेः ।
कुर्यातां दम्पती पश्चाद् विशेतां निजमन्दिरम् ॥ ९ ॥
पूजनादि प्रकुर्यातां नित्यं प्रातः सुवस्तुभिः ।
उपचारैः श्रेष्ठतमैः कुर्यातां नाऽपराद्धकम् ॥१०॥
पूजापराधकर्तॄणां पापमेवोपजायते ।
शृणु लक्ष्मि वच्मि दोषान् प्रायश्चित्तयुतान् यथा ॥११॥
मम भक्तो मम कर्मपरायणः सदा भवेत् ।
गृहे देवगृहं स्वल्पं पृथक् कृत्वाऽर्चयेन्नु माम् ॥१२॥
मूर्तिं यथेप्सितां न्यस्य स्नानाम्बरसुचन्दनैः ।
पत्रपुष्पजलैर्भोज्यैर्धूपदीपनिवेदनैः ॥१३॥
प्रदक्षिणाऽऽर्तिकरणैः स्तुतिक्षमाविसर्जनैः ।
नित्यं प्रपूजयेद् दत्वा ध्यानं वै मत्परायणः ॥१४॥
कथायाः श्रवणं कुर्यात् कीर्तनं चोपदेशनम् ।
नर्तनं वादनं कुर्यादुत्सवं सुमनोहरम् ॥१५॥
शृणु तत्त्वेन मे लक्ष्मि ! मम धर्मं सनातनम् ।
देवा एतन्न जानन्ति योगज्ञाः सांख्यवेदिनः ॥१६॥
विना भागवतीं दीक्षां पूजनं मे निरर्थकम् ।
लक्षेषु लभते कश्चिद् दीक्षां मम सुखावहाम् ॥१७॥
मयि शान्तं मनः कृत्वा त्वभिगच्छेद् गुरुं प्रति ।
तदाज्ञां तु पुरस्कृत्य प्रार्थयेत् शाधि मां गुरो ! ॥१८॥
गुरुणा दर्शितान् दीक्षाद्रव्यादीन् समुपाहरेत् ।
लाजां मधु कुशाँश्चापि घृतं चामृतमित्यपि ॥१९॥
दुग्धं दधि गवां मूत्रं शकृच्चापि सुशर्कराम् ।
यज्ञोपवीतं गन्धं च कुंकुमं चाक्षतांस्तथा ॥२०॥
पुष्पाणि तुलसीं धूपं दीपं नैवेद्यकं फलम् ।
जलं मालां च कण्ठीं च कृष्णाजिनं च धोत्रकम् ॥२१॥
दण्डं कमण्डलुं वास उत्तरीयं घटं तिलान् ।
पादुकेऽर्घपात्रं चरुस्थालीं व्रीहींश्च दर्विकाम् ॥२२॥
यवाँश्च गुडधानाँश्च फलानि भोजनानि च ।
भक्ष्यभोज्याऽन्नपानानि कर्मण्यानि च सर्वशः ॥२३॥
यानि कानि च बीजानि रत्नानि विविधानि च ।
कांस्यपात्राणि कलशं चाम्रपात्राणि दोरकम् ॥२४॥
अशोकस्य सुपत्राणि पट्टिकासनमित्यपि ।
त्रिभाणं चाचमनीयं होमपात्रं स्रुवादिकम् ॥२५॥
होमकाष्ठानि सर्वाणि पिप्पलोदुम्बराणि च ।
खादिरं बिल्वकाष्ठं चापामार्गं चार्कमित्यपि ॥२६॥
आमलकं च तुलसीं चन्दनं च वटं तथा ।
शालं च मधुकं चेति काष्ठानि समुपाहरेत् ॥२७॥
स्नात्वा मंगलसंयुक्तो वेदिं कुर्यात् सुशोभनाम् ।
ब्राह्मणश्चतुरस्रां षोडशहस्तां समन्ततः ॥२८॥
तत्र धान्यैर्मण्डलं सर्वतोभद्रं प्रकारयेत् ।
नवं जलघटं मध्ये पुष्पपल्लवशोभितम् ॥२९॥
सौवर्णं राजतं ताम्रं स्थापयेद् रत्नगर्भगम् ।
तस्योपरि तिलैः पूर्णां स्थालीं न्यस्य विधानतः ॥३०॥

पूजयेन्मां परब्रह्म गुरुं चापि सुवस्तुभिः ।
वेदिमध्ये सुद्रव्याणि स्थापयेत् संस्कृतानि वै ॥३१॥
चतुरः कलशान् दद्याच्चतुःपार्श्वेषु सुन्दरि ।
वारिपूर्णान्नूत्नपत्रयुक्तान् फलैर्विभूषितान् ॥३२॥
सर्वतः शुक्लवस्त्रैश्च वेष्टितानाम्रशोभितान् ।
उपस्पृश्याऽवसथे च मण्डपे गुरुसन्निधौ ॥३३॥
पूर्वमुखाद् गुरोर्मन्त्रं शिष्यश्चोत्तरसन्मुखः ।
वामकर्णेन गृह्णीयान्मन्त्रं भागवतं परम् ॥३४॥
'अनादिश्रीकृष्णनारायणोऽस्तु शरणं मम' ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥३५॥
एतौ मन्त्रौ गुरुः सर्वान् श्रावयेत् स्त्रीर्नरानपि ।
दीक्षांगो मन्त्र एवाऽस्ति ज्ञानात्मको हरिर्हि सः ॥३६॥
एष भागवतो जातः शिष्यो मन्त्रप्रभावतः ।
एतान् भागवतान् दृष्ट्वा चाभ्युत्थानं प्रकारयेत् ॥३७॥
माननीया यथाऽहं वै तथा भागवता जनाः ।
यस्तु भागवतान् दृष्ट्वा स्वयं भागवतः शुचिः ॥३८॥
अभ्युत्थानं न कुर्वीत तेनाऽहं तु प्रहिंसितः ।
कन्यां दत्वा तु भक्ताय पुनस्तां प्रेषयेन्न यः ॥३९॥
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ।
भार्यां प्रियसखीं यस्तु साध्वीं हिनस्ति निर्घृणः ॥४०॥
सतीं च वैष्णवीं लक्ष्मीरूपां गृहस्य देवताम् ।
पुनस्तेनैव पापेन नाप्नोति स स्त्रियं क्वचित् ॥४१॥
स्त्रीणां दुःखप्रकर्तारो भवन्ति दुःखिनः सदा ।
बिल्ववृक्षोदुम्बरौ तुलसी प्लक्षस्तथाऽम्रकः ॥४२॥
अशोको बकुलश्चाप्यामलकी कर्णिका तथा ।
दैवतरवः कर्मण्या न छेत्तव्या हि मूलतः ॥४३॥
दीक्षितेन तथा लक्ष्मि त्वभक्ष्यं वर्ज्यमेव ह ।
अपेयं च तथा वर्ज्यं निन्दा वर्ज्या च हिंसनम् ॥४४॥
पैशुन्यं स्तैन्यमावर्ज्यं कार्यं चातिथ्यपूजनम् ।
व्यवायः सर्वथा त्याज्यो ब्रह्मचर्यं च निग्रहः ॥४५॥
रक्षणीयं प्रयत्नेन गुरोः सेवनमित्यपि ।
दृष्ट्वा परस्य भाग्यानि द्रव्याणि सम्पदादिकम् ॥४६॥
दारिद्र्यं चात्मनो दृष्ट्वा कार्यं नोद्वेजनं क्वचित् ।
एवं वै नियमान् दद्यान्मातापित्रोश्च सेवनम् ॥४७॥
नियमेन प्रदद्याच्च श्रीहरेर्भजनं सदा ।
अथ वेद्यां स्थापयेदौदुम्बरस्य दलद्वयम् ॥४८॥
जलपात्रं क्षुरं चापि तत आवाहयेच्च माम् ।
आगच्छ भगवँश्चात्र मूर्तौ वेद्यां च सन्निधौ ॥४९॥
अर्घ्यं पाद्यं गृहाणैतत् ततः स्ववपनं शुभम् ।
कारयेन्मण्डपपार्श्वे रोमपापानि यान्ति यत् ॥५०॥
नीरोमं च शिखायुक्तं शोणितेन विवर्जितम् ।
क्षौरं प्रकारयित्वा च स्नात्वा वस्त्रं च धौत्रकम् ॥५१॥
उत्तरीयं तथा धृत्वा नमस्कुर्याद् गुरुं हरिम् ।
प्रज्वाल्य वह्निदेवं च होमपात्रेण चानले ॥५२॥
घृतेन मधुमिश्रेण लाजाकृष्णतिलादिभिः ।
दत्वा होमं सप्तवारान् विंशतिं च तिलोदनम् ॥५३॥
ततः सत्यस्वरूपं त्वां वह्निं नमामि संवदेत् ।
तिस्रः प्रदक्षिणाः कृत्वा देवं भागवतं गुरुम् ॥५४॥
गुरुपादौ प्रसंगृह्य प्रार्थयेत् सद्गुरुं तदा ।
गुरुदेवप्रसादेन् लब्धा दीक्षा यदृच्छया ॥५५॥
यच्चैवाऽपकृतं किञ्चिद् गुरुर्मर्षयतां मम ।
इत्युक्तवते शिष्याय दद्याद् यज्ञोपवीतकम् ॥५६॥
कमण्डलुं तथा दद्याज्जलपात्रं तु शुद्धये ।
चन्दनं विष्णवे चापि गन्धं तैलं च वैष्णवम् ॥५७॥
मधुपर्कं तथा दद्याच्छिष्यः पूजाक्रमागतम् ।
वस्त्रं भूषां पुष्पमालां नारायणाय चार्पयेत् ॥५८॥
ततः कण्ठीं तौलसीं च शिष्यकण्ठे गुरुर्ददेत् ।
तिलकं चन्द्रकयुतं ललाटेऽस्य ददेत्तथा ॥५९॥
नाम नारायणनाम्ना कुर्यादाचार्यतान्वितम् ।
दास्यान्वितं च वा कुर्यात्तथा वेषं यथोचितम् ॥६०॥
यथाव्यक्ति प्रदद्याच्च दानं चापि यथाबलम् ।
होमवह्निं तथा देवं गुरुं नत्वा च वैष्णवान् ॥६१॥
दक्षिणां भोजनं वस्त्रं तेभ्यो दत्वा गृहं सरेत् ।
कृष्णसारस्य चर्माऽन्नासनं विप्रः समर्पयेत् ॥६२॥
पालाशं दण्डमेवाऽयं ब्राह्मणो रक्षयेत् सदा ।
क्षत्रियस्त्वायुधं त्यक्त्वा दीक्षां प्रोक्तविधानतः ॥६३॥
गृह्णीयाच्छागचर्माऽपि प्लक्षदण्डं विशेषतः ।
वेदिकां द्वादशहस्तां कारयित्वा च पूर्ववत् ॥६४॥
सर्वमन्यत् प्रगृह्णीयाद् दीक्षायां गुरुतः शुभम् ।
नियमान् धारयेन्नाहं शस्त्रं स्पृशामि हिंसकम् ॥६५॥
दीक्षां पूर्वोक्तविधिना प्राप्य भागवतीं ततः ।
शुद्धान् भागवतान् सर्वान् भोजयेद् दानमर्पयेत् ॥६६॥
अथ वैश्यः सर्ववस्तून्याहृत्य वेदिकां शुभाम् ।
दशहस्तां कारयेच्च लेपयेद् गोमयेन ताम् ॥६७॥
छागचर्म धारयेच्च दण्डमौदुम्बरं तथा ।
अन्यत् सर्वं पूर्ववच्च कारयेद् दीक्षितो भवेत् ॥६८॥

देवाभिवादनं कृत्वा पुरो भागवतेषु च ।
साधुभ्यो भोजनं दद्यादपराधान् क्षमापयेत् ॥६९॥
शूद्रोऽपि गृह्णीयाद् दीक्षां भागवतीं शुभावहाम् ।
सर्वसंस्काररद्रव्याणि मया पूर्वोदितानि वै ॥७०॥
तानि प्रकल्पयेद् वेद्यां वेदी चाष्टकरान्विता ।
कर्तव्या तत्र विधिना पूर्ववत् पूजयेद्धरिम् ॥७१॥
चर्म नीलस्य छागस्य दण्डश्च वैष्णवोऽस्य वै ।
एवं दीक्षां च गृह्णीयाच्छूद्रो भागवतो भवेत् ॥७२॥
भोजयेद् वैष्णवान् साधून् साध्वीश्चापि यथा धनम् ।
चतुर्णामपि वर्णानां छत्रमाचार्यवेदकम् ॥७३॥
ब्राह्मणे पाण्डुरं छत्रं क्षत्रिये रक्तमेव च ।
वैश्ये पीतं तथा शूद्रे नीलं गुरुः प्रदापयेत् ॥७४॥
दीक्षितानां प्रकर्तव्यं लक्ष्मि वदामि तेऽत्र वै ।
सर्वथा चिन्तनीयोऽहं गोमुख्यां मालया प्रिये ॥७५॥
गणना कारिका माला तौलसी सा गणान्तिका ।
एषा गणान्तिका नाम दीक्षांगत्रीजरूपिणी ॥७६॥
तथा मे भजनं कार्यं दीक्षायाः स्यान्महाफलम् ।
गुप्तां गुणान्तिकां कृत्वा चिन्तयेन्मां बुधोत्तमः ॥७७॥
कार्तिके मार्गशीर्षे च वैशाखे शुक्लपक्षके ।
एकादश्यां निराहारो द्वादश्यां प्रातरेव ह ॥७८॥
दीक्षां प्रगृह्णीयाच्चेद्वै मुच्यते भवबन्धनात् ।
केशप्रसाधनार्थं मे दद्याद्वै कङ्कतीं शुभाम् ॥७९॥
अंजनं दर्पणं दद्यात् तथा दद्याच्च मालिकाम् ।
नोच्छिष्टः संस्पृशेन्मालामाकाशे स्थापयेद्धि ताम् ॥८०॥
सन्ध्यां कुर्यान्मम भक्तः सम्यग् ध्यानात्मिका तु सा ।
मुहूर्तं ध्यानमाबध्य मम मन्त्रं जपेन्मुहुः ॥८१॥
ममाग्रे दीपकं कुर्यात्तेजोराशिविवर्धनम् ।
मल्ललाटे तिलकं सचन्द्रं वै कारयेत्तथा ॥८२॥
धूपं सुगन्धं मे दद्यादिमं श्लोकमुदीरयेत् ।
सुगन्धानि तवाऽङ्गानि स्वभावेनैव केशव ॥८३॥
अमुना शुभधूपेन धूपितानि गृहाण तम् ।
दीपं दद्याद् घृतजन्यं पितॄणां तारकं शुभम् ॥८४॥
सौवर्णं राजतं कांस्यं पात्रं मम प्रशस्यते ।
तानि त्यक्त्वेह सर्वाणि ताम्रं हि मम रोचते ॥८५॥
शृणु तत्त्वेन मे लक्ष्मि येन ताम्रं मम प्रियम् ।
पूर्वे कमलपत्राक्षि गुडाकेशो महासुरः ॥८६॥
ताम्ररूपं समादाय ममैवाराधने रतः ।
वर्षाणां तु सहस्राणि चतुर्दश मुनिश्चलः ॥८७॥
तस्य ताम्राश्रमं चाहं ययौ प्रसन्नतायुतः ।
चतुर्बाहुं स मां दृष्ट्वा प्रणनाम स वै मुहुः ॥८८॥
मयोक्तं ते प्रसन्नोऽस्मि वरं ब्रूहि हृदीप्सितम् ।
गुडाकेशस्तदा प्राह विशुद्धेनान्तरात्मना ॥८९॥
जन्मनां तु सहस्राणि त्वयि भक्तिर्दृढाऽस्तु मे ।
चक्रेण वधमिच्छामि त्वया मुक्तेन माधव ॥९०॥
मम चक्रहतस्यैतद्रसामांसादिकं च यत् ।
ताम्रं नाम भवेद् देव पवित्रीकरणं शुभम् ॥९१॥
ताम्रपात्रेऽर्पिते तेऽस्तु प्रीतिः सर्वाधिका प्रभो ।
बाढमिति मयोक्तः स यावल्लोकस्य संस्थितिः ॥९२॥
तावत्ताम्रस्वरूपस्त्वं मम पात्रं भविष्यसि ।
तत्ताम्रभाजने मह्यं दीयते यत् सुपुष्कलम् ॥९३॥
मङ्गल्यं च पवित्रं च मया ताम्रे कृतं तदा ।
वैशाखशुक्लपक्षस्य द्वादश्यां मध्यगे रवौ ॥९४॥
चक्राद्वधमभीप्सन् वै शुभं कुर्वन् मदर्थकम् ।
विष्णुसंस्थो भविष्यामि कदाऽहमिति चिन्तयन् ॥९५॥
मम पूजां तदा कृत्वा प्रार्थयामास मां प्रति ।
मुञ्च मुञ्च प्रभो चक्रमपि वह्निसमप्रभम् ॥९६॥
आत्मा मे नीयतां शीघ्रं निकृत्याऽङ्गानि सर्वशः ।
मया चक्रेण च हतः प्राप्तो मां परमेश्वरम् ॥९७॥
ताम्रं तन्मांसमस्त्वव कृतं मया यथोदितम् ।
ताम्रे प्रापणकं दद्यात् पूजाभोजनप्रभृति ॥९८॥
सिक्थे सिक्थे फलं तस्य शताश्वमेधजं भवेत् ।
तावद्वर्षसहस्राणि दिव्यानि मम धामनि ॥९९॥
मोदते स ततो धाम परं याति परं पदम् ।
एवं मां भोजयित्वैव ताम्रपात्रे च कानके ॥१००॥
राजतेऽपि च ताम्बूलं दत्वा विसर्जनं चरेत् ।
इत्येवं मम भक्तो वै दीक्षितोऽर्चनमाचरेत् ॥१०१॥
नित्यं नित्यं प्रिये लक्ष्मि सत्यैतच्छंभुनोदितम् ।
श्रवणात्पठनाच्चापि मम धामगतो भवेत् ॥१०२॥
नरो नारी तथाऽन्यश्च दीक्षां लब्ध्वा विधानतः ।
मां भजेदात्मनो मोक्षं लभेज्जन्मफलं हि तत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृयुगसन्ताने कन्यादानं भागवतीदीक्षाविधानं गुडाकेशाख्यासुरस्य चक्रेण नाशोत्तरं तद्रसाऽसृक्प्रभृतीनां ताम्रधातुत्वं चेत्यादिनिरूपणनामा पञ्चसप्तत्यधिकपञ्चशत-तमोऽध्यायः ॥ ५७५ ॥

श्रीलक्ष्मीरुवाच—

अहं दीक्षां शुभां श्रुत्वा नारायण मुखात्तव ।
तव माहात्म्यबोधा च जाताऽस्मि विमला प्रभो ॥ १ ॥
अहो देवस्य माहात्म्यं चातुर्वर्ण्यसुखावहम् ।
दीक्षादानेन वै ज्ञातं तथाऽन्यद् भक्तकारणात् ॥ २ ॥
पृच्छामि चापराधेषु किं फलं किं निवारणम् ।
तव पूजापराणां त्वं शुद्धिं वद जनार्दन ॥ ३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि प्रवक्ष्यामि चापराधविशोधनम् ।
शुद्धो भागवतो भूत्वा मम पूजापरायणः ॥ ४ ॥
आपद्गतोऽपि राजान्नं भुंक्ते यः पापसंभृतम् ।
निरये तेन पापेन वासस्तस्य प्रजापते ॥ ५ ॥
राजा प्रवर्तते कुर्वन् कर्म तामसराजसम् ।
दारुणं गर्हितं तस्य चान्नं पापभरं महत् ॥ ६ ॥
धार्मिकेन न भोक्तव्यं राजान्नं नरकप्रदम् ।
यद्वा राज्ञां तु भोक्तव्यं भोज्यं भागवतैर्नरैः ॥ ७ ॥
स्थापयित्वा तु मां लक्ष्मि ! निवेद्य मां च सर्वशः ।
धन्यधान्यसमृद्धानि दत्वा मां स्वीकरोति चेत् ॥ ८ ॥
सिद्धं भागवतैर्भक्तैर्मम शेषप्रसादिकम् ।
भुञ्जानस्य न वै पापलेपस्तत्र प्रजायते ॥ ९ ॥
अप्रसादं च राजान्नं भुंक्ते तस्य तु पद्मजे ।
चान्द्रायणेन शुद्धिः स्यान्मम भक्तस्य वै तथा ॥१०॥
दन्तकाष्ठमचर्वित्वा चाऽकृत्वा मुखशोधनम् ।
स्नात्वा स्पृशति मां चेत् स दुर्गन्धिमुखवान् यतः ॥११॥
पुण्यहीनो भवेद् भक्तो ममाऽपराधतस्ततः ।
मनुष्यः किल्बिषी लक्ष्मि कफपित्तमलान्वितः ॥१२॥
पूयशोणितदुर्गन्धि मुखमस्य यतः सदा ।
शुद्धं वायुं समाचम्य दुर्गन्धं च विमुञ्चति ॥१३॥
तेन मे मूर्तिसामीप्येऽपराधस्तस्य जायते ।
दन्तकाष्ठेन शुद्धिः स्यात्सुगन्धद्रव्ययोजनात् ॥१४॥
अपराधे तथा जाते व्योमशायी दिनद्वयम् ।
भवेत् ममाऽतिभजनं कुर्यात् कृष्णपरायणः ॥१५॥
शतमालाजपं कुर्यादपराधो न विद्यते ।
अथ कृत्वा मैथुनं चाऽस्नातः शवात्मको हि सः ॥१६॥
तदपराधपाकश्च लालाख्ये निरये पतेत् ।
मनुष्यस्य परो धर्मः स्नानं ध्यानं च पूजनम् ॥१७॥
अस्नातो मलमूत्राढ्यो मलाख्ये निरये पतेत् ।
प्रायश्चित्तं तस्य कार्यं भक्तियुक्तेन चेतसा ॥१८॥
यावकं वा च पिण्याकं भक्षयेद्वै दिनत्रयम् ।
तुर्यं चोपवसेत् तेन शुद्धिर्भक्तस्य जायते ॥१९॥
अथ स्पृष्ट्वा शवं गत्वा श्मशानं स्नाति नैव यः ।
तस्याऽशुद्धस्य पितरः पतन्ति सोऽपि वै पतेत् ॥२०॥
श्मशाने जम्बुका भूत्वा भवन्ति शवभक्षकाः ।
प्रायश्चित्तं तस्य कार्यं मम भक्तेन चांजसा ॥२१॥
एकाहारो दिनैक्यं च दिनैक्यं चाप्युपोषितः ।
पञ्चगव्यं ततः पीत्वा शुद्ध्यत्येव न संशयः ॥२२॥
नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्घृणः ।
तेन पापेन भक्तोऽपि याम्ये याति रजोमये ॥२३॥
अन्धस्ततः प्रजायेत दरिद्रो बुद्धिवर्जितः ।
शुद्धिस्तस्यापराधस्योपोषणं त्वेकमेव हि ॥२४॥
आकाशशयनं स्नानं सवस्त्रं गव्यप्राशनम् ।
कृत्वा मुच्येदशुद्धेः स मम कर्मपरायणः ॥२५॥
स्पृष्ट्वा तु मृतकं लक्ष्मि ! यो मत्क्षेत्रेषु तिष्ठति ।
न स्नाति मां स्पृशत्येषश्चाण्डालजन्म चाप्नुयात् ॥२६॥
अन्धः स जायते पश्चान्मण्डुको मक्षिका भवेत् ।
टिट्टिभो वा मशकश्च कृकलासः खरोऽथवा ॥२७॥
मार्जारो वानरो वापि जायते त्वपराधवान् ।
शुद्ध्यर्थं तादृशो भक्तो मम कर्मपरायणः ॥२८॥
एकाहारं पञ्चदशदिनानि वर्तयेत्ततः ।
पञ्चगव्यं प्राशयेच्च शुद्ध्यत्येवाऽपराधतः ॥२९॥
स्पृशमानेन मां लक्ष्मि मुञ्चत्यपानवायुकम् ।
तेन दोषेण जायेत मक्षिका मूषकस्तथा ॥३०॥
श्वा वा कूर्मः प्रजायेत ततः स मानवो भवेत् ।
अतो नक्तं त्रीण्यहानि वर्तयेत् तेन शुद्ध्यति ॥३१॥
शतमालाजपं कुर्यात् स्नायाद् भक्तिपरायणः ।
पुरीषं मुच्यते यस्तु वातेन सह दोषतः ॥३२॥
मम पूजास्थितो वापि ममान्यकर्मतत्परः ।
पुरीषनरके याम्ये पतेत् तेन ततः परम् ॥३३॥
मनुष्यो जायते लक्ष्मि मम कर्मपरायणः ।
प्रायश्चित्तं ततः कार्यं जले शयनमित्यपि ॥३४॥
आकाशशयनं चापि दिनैक्यं प्रसमाचरेत् ।
शतमालाजपं कुर्यादपराधात्प्रमुच्यते ॥३५॥
स्नात्वाऽपि यदि मार्गेषु मलिनेषु प्रगच्छति ।
अप्रक्षालितपादाद्यो यो हि मामुपसर्पति ॥३६॥

सोऽप्यशुद्धः पापवान् स्यान्मम विप्रियकारकः।
तेन दत्तं गन्धमाल्यं न वै गृह्णामि भावतः ॥३७॥
तेन प्रक्षालनं कृत्वा पादयोः करयोस्तथा।
आचम्य च यथान्यायं शुद्धः सन् मामुपस्पृशेत् ॥३८॥
मलत्यागं तथा कृत्वा सप्तवारं तु मृत्तिकाम्।
प्रक्षालनेन्द्रिये दत्त्वा करयोश्च तथा ददेत् ॥३९॥
पादयोः पञ्चवारं च ततः पात्रं परिमृजेत्।
गण्डूषान् सप्त कृत्वा च ततः स्नानं समाचरेत् ॥४०॥
मद्भक्तो वै भवेच्छुद्धः पूजको नान्यथा प्रिये।
गन्धांशहस्तयुक्तश्चेत्स्पृशेन्मां दोषभाग्भवेत् ॥४१॥
प्राणायामं चाचमनं कृत्वा प्रक्षालयेत् करौ।
एवं शुद्धिर्भवेल्लक्ष्मि नाऽपराधस्तदा भवेत् ॥४२॥
यस्तु क्रोधसमायुक्तो मम भक्तोऽपि मानवः।
प्रस्पृशेन्मम गात्राणि स तदा दोषभाग्भवेत् ॥४३॥
तेन पापेन चिल्ली स्यात् ततः श्येनो भवेत् स च।
मृत्कटिको भवेत् कीटः क्रोधेन कृष्णवर्णवान् ॥४४॥
क्रुद्धेन न च कर्तव्यं लोभेन त्वरया न च।
मत्पूजनं विधानेन कर्तव्यं मोक्षदं हि तत् ॥४५॥
स्नात्वा मालाशतं कुर्यात् क्रोधशुद्धिस्ततो मता।
अकर्मण्येन पुष्पेण यो मामर्चयते भुवि ॥४६॥
मूर्खो भागवतश्चापि वानरो जायते ततः।
मार्जारो वा बलीवर्दः छागो वा ग्रामकुक्कुटः ॥४७॥
महिषो वा भवेत् पुष्पदाता यन्मे न रोचते।
तच्छुद्ध्यर्थं चैकभोजी भवेद्वै दिनसप्तकम् ॥४८॥
सर्वपापप्रमुक्तः स्यान्मम लोके गतिर्भवेत्।
रुधिराक्ताम्बरयुक्तो यदि मामुपसर्पति ॥४९॥
रजस्वलारजोयुक्तवस्त्राढ्यो मां च सर्पति।
तेन दोषेण जायेत श्वपचो नात्र संशयः ॥५०॥
मासमेकान्नभोजी स्यान्मालासहस्रकं जपेत्।
अन्तिमे तु दिने कुर्यादुपवासं स शुद्ध्यति ॥५१॥
अन्धकारे विना दीपं स्पृशते मां स दोषभाक्।
अन्धजन्म भवेत् तस्य प्रायश्चित्तं वदामि च ॥५२॥
एकाहारं पञ्चदिनं नेत्राच्छादनपूर्वकम्।
कुर्यान्मालाशतं चापि जपेच्छुद्धो भवेत्तदा ॥५३॥
कृष्णवस्त्रं न वै धार्यं पूजायां मम सर्वथा।
तेन दोषेण नकुलः कच्छपो वा भवेत्ततः ॥५४॥
पारावतो भवेद्वापि प्रायश्चित्तं वदामि ते।
सप्ताहं चैकभोजी स्यान्मालाशतं प्रकारयेत् ॥५५॥
ततः शुद्धिर्भवेत्तस्य मम लोकगतो भवेत्।
वाससा चाऽप्यधौतेन यो मे कर्माणि चाचरेत् ॥५६॥
स च हस्ती तथोष्ट्रो वा हयो वा जम्बुकोऽथवा।
सारंगो वा भवेत्तस्माच्छुद्धिः कार्या प्रयत्नतः ॥५७॥
उपवासं चरेदेकं जपेच्च शतमालिकाः।
अथोच्छिष्टं शुनौ यच्चद् दद्याच्चेन्मे च कर्मणि ॥५८॥
सारमेयो भवेत्सोऽपि गोमायुर्घूक एव वा।
शुद्धिः कार्या शाकमूलफलाशिना दिनत्रयम् ॥५९॥
पञ्चगव्यं चतुर्थे च पिबेदुपवसेत्तथा।
अपराधो विनश्येद्वै मम लोकगतो भवेत् ॥६०॥
दीपप्रकाशने कृष्णकज्जला चाङ्गुलिर्भवेत्।
दग्धवर्तिगन्धयुक्ता क्षालनीया प्रयत्नतः ॥६१॥
करस्याऽक्षालने स्पर्शे मम स्यादपराधनम्।
कुष्ठी तेन भवेद्रोगी तस्माद्धस्तं विशोधयेत् ॥६२॥
अपराधे संजाते शतमालाजपं चरेत्।
सोपवासं तेन शुद्धिर्भवेत् कर्मण्यको भवेत् ॥६३॥
श्मशानं यो जनो गत्वा त्वस्नात्वैव तु मां स्पृशेत्।
जम्बुको गृध्रको वा स जायते वा पिशाचकः ॥६४॥
ततश्चोपवसेच्चैकदिनं मालासहस्रकम्।
जपेत्तेन भवेच्छुद्धिर्नान्यथा स्नानमात्रतः ॥६५॥

श्रीलक्ष्मीरुवाच—

श्मशानं त्वपवित्रं चेच्छंभुर्भागवतोत्तमः।
तव भक्तः कथं चास्ते श्मशाने दोषभाग्यथा ॥६६॥

श्रीनारायण उवाच—

शृणु लक्ष्मि पुरावृत्तं शंभोस्ते कथयाम्यहम्।
श्मशानं नास्ति शुद्धं वै यदशुद्धं सदा मतम् ॥६७॥
केनचित्तु निमित्तेन शंभुर्वासमरोचयत्।
प्रायश्चित्तस्वरूपं तं वासं न मनुते सदा ॥६८॥
यद्यपि शंकरो भक्तोत्तमो मे वर्तते महान्।
श्मशाने वसतस्तस्य गृह्णामि नाऽर्चनादिकम् ॥६९॥
प्रायश्चित्तोत्तरं सर्वं गृह्णामि नान्यथा क्वचित्।
शंकरो नाशयामास त्रिपुराणि तथाऽसुरम् ॥७०॥
बालान् वृद्धाँस्तथा स्त्रीश्च त्रिपुरे वासिनस्ततः।
तेन पापेन संलिप्तो नष्टैश्वर्यश्च शंकरः ॥७१॥
नष्टयोगबलो नष्टमायाबलो बभूव ह।
विवर्णवदनो भूत्वा न शक्नोति विचेष्टितुम् ॥७२॥

मृतप्रायोऽभवच्छापैरासुरस्त्रीसमर्पितैः ।
नष्टसंज्ञो हतज्ञानो नष्टानन्दो यथाऽबलः ॥७३॥
ततोऽहं तं समापन्नो विलोक्य शंकरं ततः ।
अवोचं मा शुचः श्रेयः करिष्ये तव वै द्रुतम् ॥७४॥
मया दृष्टः शंकरश्च तदा दिव्येन चक्षुषा ।
तावद्रुद्रस्य सामर्थ्यं प्रकाशमगमत्पुनः ॥७५॥
मयोक्तं तव पापस्य नाशार्थमहमागतः ।
श्रुत्वोवाच हरो मां च पापसन्तप्तलोचनः ॥७६॥
हे विष्णो त्वत्प्रसादेन हतस्त्रिपुरकाऽसुरः ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥७७॥
बालवृद्धा हताश्चापि दग्धानि त्रिपुराणि च ।
तत्पापस्य प्रभावेण न शक्नोमि विचेष्टितुम् ॥७८॥
प्रणष्टैश्वर्यमायश्च नष्टज्ञानात्मसद्बलः ।
किं कर्तव्यं मया विष्णो पापावस्थेन साम्प्रतम् ॥७९॥
विष्णो तत्त्वेन मां ब्रूहि पापस्याऽस्य विशोधनम् ।
एवं प्रार्थयमानस्य मया रुद्रस्य भाषितम् ॥८०॥
कपालमालां सन्धार्य समलो विहर क्षितौ ।
शंभुः पप्रच्छ मां कीदृक् समलत्वं प्रकीर्त्यते ॥८१॥
मयोक्तं वै श्मशानं च मलं पूतिकमुच्यते ।
श्मशाने वास एवाऽत्र समलत्वं प्रकीर्त्यते ॥८२॥
तत्राऽऽदाय कपालानि रम तत्रैव शंकर ।
भूतप्रेतादिभृत्यैश्च सार्धं वस समाशतम् ॥८३॥
तावत्पूजा मम नैव कर्तव्या बाह्यतः क्वचित् ।
मानसं पूजनं कार्यं नापराधो भविष्यति ॥८४॥
पूर्णे वर्षशते याते गौतमस्याश्रमं व्रज ।
प्रसादाद् गौतममुनेर्भविता गतकिल्बिषः ॥८५॥
ततः पापविनाशेन शरीरशुद्धिमाचर ।
वर्षमात्रं व्रतं पयोव्रतं गृहाण शुद्धिकृत् ॥८६॥
ब्रह्मकूर्चं च वा श्रेष्ठं व्रतं मासिकमित्यपि ।
करिष्यसि तथा शुद्धः पूजनार्हो भविष्यसि ॥८७॥
पश्चात् त्वया श्मशाने न वस्तव्यं कर्हिचिच्छिव ! ।
यदीच्छसि मम पूजायोग्यत्वं वैष्णवं वृषम् ॥८८॥
रुद्रायैवं वरं दत्वा तत्रैवाऽन्तर्हितोऽभवम् ।
रुद्रोपि भ्रमते वर्षशतं श्मशानके स्थले ॥८९॥
विना तु कृतसंस्कारो ममादेशपरायणः ।
वर्षशते गते रुद्रो ययौ वै गौतमाश्रमम् ॥९०॥
गौतमेन तदा तस्योपदेशः सम्प्रकीर्तितः ।
रूपद्वयं सदा रुद्र प्रधारय क्रियावशात् ॥९१॥
पापं सर्वं गतं तेऽत्र शुद्धोऽसि वैष्णवो महान् ।
महाभागवतं रूपं सदा गृहाण सात्त्विकम् ॥९२॥
कैलासे सर्वदा तिष्ठ भक्तेष्वपि च सात्त्विकः ।
छायात्मकं द्वितीयं च रूपं धारय भैरवम् ॥९३॥
भूतप्रेतपिशाचानामुपास्यं समलं च तत् ।
श्मशानवासयोग्यं च तामसानां सदाश्रयम् ॥९४॥
इत्युक्तः शंकरो धृत्वा रूपद्वयं ततः पुनः ।
श्मशानस्थो न मे भक्तो न वा वैष्णव इत्यपि ॥९५॥
कैलासस्थो हि मे भक्तः पूजार्हो वैष्णवोत्तमः ।
इत्येतत् कथितं लक्ष्मि ! श्मशानं समलं सदा ॥९६॥
श्मशानस्थाः समला वै न वै शुद्धाः शवस्थले ।
पश्चाद् रुद्रस्य भूताद्यैस्तामसैस्तादृशैर्जनैः ॥९७॥
शंकरस्य तु कैलासं श्मशानं चेति वर्ण्यते ।
वस्तुतो नैवमेवाऽस्ति श्मशानं शंकरप्रियम् ॥९८॥
श्मशानं नैव कस्यापि लक्ष्मि वै भवति प्रियम् ।
देवानां तु कथं तत् स्यात् प्रियं सत्त्वक्रियावताम् ॥९९॥
इति ते कथितं तत्त्वं प्रायश्चित्तं वदामि ते ।
पञ्चगव्यं प्राशनीयं सोपवासं दिनैकके ॥१००॥
सवस्त्रं स्नानमातव्यं तुलसीपत्रभोजनम् ।
विमुक्तस्तेन पापेन मम कर्मार्हणो भवेत् ॥१०१॥
मद्यपानप्रकर्ता तु भ्रष्टो भवति देहतः ।
ब्रह्मकूर्चव्रतेनाऽस्य शुद्धिर्भवति सर्वथा ॥१०२॥
उलूकः स्यादन्यथा सः कीटो भवति वै पुनः ।
ब्रह्मकूर्चव्रतं वच्मि शृणु लक्ष्मि ! प्रशोधकम् ॥१०३॥
मासं वा पक्षकं वा तत् कर्तव्यं देहधारिणा ।
पयस्यामलकं शुण्ठीं पलाशपत्रमित्यपि ॥१०४॥
शर्करां तुलसीपत्रं क्वाथयेच्च पिबेद् दिने ।
यथापच्यं भवेत् तद्वद् विकृतं न यथा भवेत् ॥१०५॥
अन्यत् किञ्चिद् भक्षयेन्न जलं पिबेत्तु शान्तये ।
ब्रह्मकूर्चव्रतं त्वेतत् पाक्षिकं मासिकं च वा ॥१०६॥
यानि कानि च पत्राणि पावनानि हि शाखिनाम् ।
क्वाथयेच्च पिबेन्नित्यं पालाशं तत्र निश्चितम् ॥१०७॥
पञ्चगव्यं पिबेद्वापि पाक्षिकं मासिकं च वा ।
ब्रह्मकूर्चसमं तच्च सर्वपापप्रशोधकम् ॥१०८॥
कायाकल्पकरं त्वेतन्मोक्षदं मरणे सति ।
शरीरधातुशुद्ध्यर्थं रेचनं क्वाथनं तु तत् ॥१०९॥
ब्रह्मभक्त्या कृतं तद्वै मोक्षणार्थं प्रकल्प्यते ।
प्रायश्चित्तीकृतं तद्वै पापक्षालनकं भवेत् ॥११०॥

रोगनाशकृते चेत्तद्धातुशुद्धिकरं भवेत् ।
अपथ्यं चेत् क्वचित्तद्वै मरणाय प्रकल्प्यते ॥१११॥
पलाण्डुशाकपत्रादिभक्षकः स्याद्धि सूकरः ।
श्वा भवेज्जम्बुको वापि ममापराधकृन्नरः ॥११२॥
ब्रह्मकूर्चव्रतं कृत्वा शतमालाजपांश्चरेत् ।
तेन शुद्धिर्भवेत्तस्य मम कर्माईणो भवेत् ॥११३॥
यः पारक्येन वस्त्रेण न धौतेनापि मां स्पृशेत् ।
मृगजन्म ह्यवाप्नोति हीनपादैकको भवेत् ॥११४॥
माघमासे जले तिष्ठेत्प्रहरद्वयमेव ह ।
तेन शुद्धिः शतमाला जपेद् भवति निर्मलः ॥११५॥
नवान्नं यो नाऽर्पयेन्मे स्वयं भुंक्ते रसाहृतः ।
पापभोक्ता भवेत्तेन कर्तव्यं समुपोषणम् ॥११६॥
शतमालाजपश्चापि तेन शुद्ध्यति मानवः ।
अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ॥११७॥
यातुधानो भवेत्तेन कर्तव्यं समुपोषणम् ।
शतमालाजपश्चापि तेन शुद्ध्यति वैष्णवः ॥११८॥
वहन्नुपानहौ पद्भ्यां यस्तु मामुपसंक्रमेत् ।
चर्मकारः स जायेत ततः श्वा सूकरो भवेत् ॥११९॥
पाक्षिकं चैकभुक्तं च शतमालाः समाचरेत् ।
तेन शुद्धिर्भवेत् तस्य मम भक्तस्य पद्मजे ॥१२०॥
विना घण्टादिशब्दं तु यो वै मां प्रतिबोधयेत् ।
बधिरो जायते तेन कर्तव्यं समुपोषणम् ॥१२१॥
शतमालाजपश्चापि मम भक्तः स शुद्ध्यति ।
अन्नं भुक्त्वा बहुतरमजीर्णेन परिप्लुतः ॥१२२॥
उद्गारेण समावृत्तोऽस्नातश्चाप्युपसर्पति ।
वानरो वा श्रृगालः श्वा छागो वा जायते हि सः ॥१२३॥
त्रिदिनं चोपवासी स्यान्मालाशतं च वर्तयेत् ।
थ एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥१२४॥
न स लिप्येत पापेन मम लोकं स गच्छति ।
यस्तु भागवतो नित्यं कल्यमुत्थाय वाचयेत् ॥१२५॥
पठेद्वा श्रृणुयाच्चापि मम लोकं स गच्छति ।
शंभुनोक्तं हि यत् सत्यै मयोक्तं तव पद्मजे ॥१२६॥
आरोग्याणां महारोग्यं मोक्षाणां मोक्षणं परम् ।
शोधनानां परा शुद्धिः प्रसन्नानां च पात्रता ॥१२७॥
तपः परमं तपसां भक्त्यात्मकं मयोदितम् ।
मम भक्तेन कर्तव्यं रक्षसां न विचारणा ॥१२८॥
मुमुक्षूणां योगिनां च साध्वीनां च सतामपि ।
मम भक्तियुतानां च कृते मयात्र कीर्तितम् ॥१२९॥
गर्भविषप्रसक्तानां वासनासंहृतहृदाम् ।
नास्तिकानां कृते नैतन्मयोक्तं लक्ष्मि ! शोधनम् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने भगवत्पूजनेऽपराधा ये ते तेषां शुद्धिः शरीरान्तरयोन्यन्तरात्तिर्वा चेत्यादि, शंकरस्य श्मशानप्रियत्वाख्यानम-श्मशानवासिता चेत्यादिनिरूपणनामा षट्सप्तत्यधिकपञ्चशततमोऽध्यायः ॥ ५७६ ॥

श्रीनारायण उवाच—

श्रृणु लक्ष्मि ! श्रृगाल्याश्च गृध्रस्य च मृतेरनु ।
तीर्थस्पर्शप्रसंगेन राज्यलब्धिश्च मोक्षणम् ॥ १ ॥
अकामा या मृता तीर्थे बभूव राजपुत्रिका ।
श्रृगाल्यपि विशालाक्षी चतुःषष्टिकलान्विता ॥ २ ॥
तत्र मृतस्तथा गृध्रः सोऽपि राजा बभूव ह ।
अहो तीर्थप्रभावो वै तिर्यञ्चौ दिव्यतां गतौ ॥ ३ ॥
हैमदेशे ब्रह्मदत्तोऽभवत् काम्पिल्यभूपतिः ।
तत्कुमारः सोमदत्तः श्राद्धार्थे प्रविचिन्त्य च ॥ ४ ॥
पित्रर्थे मृगयां यातो मृगलिप्सुर्वने तदा ।
न तत्र लभते किञ्चिच्छृगाली तेन वीक्षिता ॥ ५ ॥
शरेण तेन विद्धा सा गंगाजलमुपागता ।
तीरे पीत्वा जलं शीघ्रं तीर्थे प्राणान् मुमोच ह ॥ ६ ॥
तावद् वटे कुमारः स गृध्रं ददर्श संस्थितम् ।
शरेण पातयामास गृध्रं राजकुमारकः ॥ ७ ॥
मृतः सोऽपि जलतीरे पतित्वा पुण्यमाप्तवान् ।
सोमदत्तो द्वयं नीत्वा ययौ गृहं ततश्च तौ ॥ ८ ॥
गृध्रः कलिंगराजस्य सुतो बभूव शोभनः ।
सृगाली सा तथा जज्ञे काञ्चीराजस्य पुत्रिका ॥ ९ ॥
द्वयोस्तीर्थप्रभावेण सम्बन्धोऽजायत स्वतः ।
विवाहितौ सुखं कालं निन्यतुश्चातिभाग्यकौ ॥१०॥
प्रेम्णा व्याप्तौ न चान्योन्यं सेहाते विरहं क्वचित् ।
अथैकदा वधूः प्राह स्वामिनं प्रणयान्विता ॥११॥
मयैकं हि व्रतं कार्यं देयाऽनुज्ञा त्वया प्रिय ! ।
मम स्नेहात् प्रियं चेत् तेऽनुज्ञां दातुमिहाऽर्हसि ॥१२॥
सत्यं मूलं प्रजानां च विष्णुः सत्ये प्रतिष्ठितः ।
सत्यमूलं सदा राज्यं व्रतं सत्येन वर्धते ॥१३॥
इत्युक्तस्तु पतिः प्राह विज्ञापय कुरु प्रिये ।
यथेष्टं चर सर्वं तद् दास्ये साहाय्यमुत्तमम् ॥१४॥

साऽपि भर्तृवचः श्रुत्वा सविश्रम्भा ह्युवाच तम् ।
एका स्वपितुमिच्छामि मध्याह्नेहं तथाविधा ॥१५॥
यथा कश्चिन्न मां पश्येत् स्वल्पकालं तु नित्यदा ।
श्वशुरो यदि वा श्वश्रूः पतिश्चान्योऽपि वा जनः ॥१६॥
सुप्तां मां नैव पश्येत् स व्रतमेतन्मुहूर्तकम् ।
श्रुत्वा बाढमुवाचैनां पत्नीं राजकुमारकः ॥१७॥
सौधं स्वतंत्रं तस्यै स ददौ यत्र न वै जनः ।
कश्चिदपि द्रक्ष्यते न शयनीये महाव्रताम् ॥१८॥
एवं वै समयं कृत्वा वर्तते स कुमारकः ।
पित्रा दत्तं तु तद्राज्यं बुभुजे प्रशशास सः ॥१९॥
तस्याऽभवन् पञ्च पुत्रा ज्येष्ठाय राज्यमाददत् ।
अथ स्वयं यथा पत्नी तथा व्रतमुपाश्रितः ॥२०॥
एकाकी स्वपते यत्र कश्चिज्जनो न पश्यति ।
सप्तसप्ततिवर्षाणि व्यतीतान्यस्य वै ततः ॥२१॥
अष्टसप्ततिके वर्षे ह्येकान्ते स नराधिपः ।
तमेव चिन्तयन्नर्थे मध्यसंस्थे दिवाकरे ॥२२॥
वैशाखस्य तु मासस्य शुक्ले द्वादशिकादिने ।
बुद्धिः प्रवर्तिता तस्य प्रियादर्शनलालसा ॥२३॥
कोऽर्थस्तत् किं व्रतं त्वस्या एषा स्वपिति निर्जने ।
न सुप्ताया व्रतं किञ्चित् सम्पद्यते सुपुण्यकृत् ॥२४॥
न केनचित् कृतो धर्मः सुप्तव्यं व्रतमेव तत् ।
भुक्त्वा तु कामभोगान् वै भुक्त्वा तु पिशितौदनम् ॥२५॥
ताम्बूलं क्षौमवस्त्रादि विभूषणानि मालिकाः ।
शृंगारादिकसर्वाणि सुगन्धरञ्जनानि च ॥२६॥
व्रतं कस्माद् भवेदत्र सुप्ता करोति यद्व्रतम् ।
अवश्यमेव द्रष्टव्या कीदृशं चरति व्रतम् ॥२७॥
कुप्येताऽपि तु सन्दृष्टा कुप्यत्वेव तथापि वै ।
यद्वा गच्छति क्रुद्धा सा यत्र गच्छतु रोचते ॥२८॥
यद्वा हानिर्भवेत् काचित् सापि चास्तु तथापि सा ।
द्रष्टव्यैवं चिन्तयतो व्योम प्राप्तो दिवाकरः ॥२९॥
स्नातः स विधिना चाथ क्षौमाभ्यामुपसंवृतः ।
भूत्वा चोत्सारयामास सर्वान् भृत्यान् समीपतः ॥३०॥
अद्य व्रते मया स्थेयं नागन्तव्यं जनैर्गृहम् ।
राजभवनद्वारं वा नरेणापि च योषिता ॥३१॥
यद्यागमिष्यति कश्चिन्मम वध्यो भविष्यति ।
एवमाज्ञापयित्वा तु राजा सौधान्तरं गतः ॥३२॥
पर्यंकस्य तले राज्ञ्या गुप्तो बभूव छादनैः ।
राज्ञी मध्याह्नवेलायां समायाता तदासने ॥३३॥
रुजार्ता रुरुदे तत्र शिरोवेदनपीडिता ।
किं मया तु कृतं पूर्वं यत्फलं वेदनात्मकम् ॥३४॥
भर्ताऽपि मां न जानाति पीडायुक्तां स्वमस्तके ।
किं कर्तव्यं क्व गन्तव्यं मे मर्तव्यं भवेत् खलु ॥३५॥
भर्ता पृच्छति नैवात्र किं व्रतं कीदृशं च ते ।
मया तस्मै कथितव्यं नान्यथाऽन्तो भविष्यति ॥३६॥
कथने मरणं मे स्याद् वक्तव्यं नाशकृद् भवेत् ।
अकथने सदा दुःखं सोढव्यं न निवर्तते ॥३७॥
तस्मान्मया प्रगन्तव्यं भर्त्रा सह च तत्स्थलम् ।
यत्राऽहं दुःखमापन्ना कथयिष्ये ततः पतिम् ॥३८॥
इति प्रियावचः श्रुत्वा समुत्थाय ततो नृपः ।
दोर्भ्यामालिंग्य वै भार्यां धैर्येणोवाच सुन्दरीम् ॥३९॥
किमिदं भाषसे भद्रे स्वात्मानं पीडितं प्रति ।
भिषजः सन्ति बहवो नाशयिष्यन्ति पीडनम् ॥४०॥
त्वया पूर्वं व्रतमिषाद् वेदनेयं सुगोपिता ।
येन वै क्लिश्यसे भद्रे शिरस्यसुखपीडिता ॥४१॥
या त्वं च भाषसे भद्रे यत्र वै दुःखपीडिता ।
पूर्वं जाता तत्र गत्वा कथयिष्ये च मे पतिम् ॥४२॥
भद्रे किं तत् स्थलं ब्रूहि यात्रां ते रोचते यदि ।
अवश्यं तत्र संयाहि मया सार्कं सुखं लभ ॥४३॥
किमिदं गोप्यते देवि पत्यग्रे त्वं पतिव्रते ।
भर्ता धर्मो यशो भर्ता भर्तैव प्रियमात्मनः ॥४४॥
भर्त्रे वाच्यं गोप्यमपि धर्मः पतिव्रतोदितः ।
इत्युक्ता स पतिं प्राह कथनेऽत्र विनाशनम् ॥४५॥
भवेत्तस्मान्न वक्तव्यं तव पीडाकरं प्रभो ।
सुखे हि वर्तसे नित्यं महाराजोऽसि सुन्दरः ॥४६॥
बह्व्यो मत्सदृशीभार्यास्तिष्ठन्त्यन्तःपुरे तव ।
सुखं भुंक्ष्व महाराज मामेकां परिहाय च ॥४७॥
गच्छाम्यहं मम स्थानं ततो मृत्युर्हि मे ध्रुवः ।
राजसे देववद् राजन् न मां तत्प्रष्टुमर्हसि ॥४८॥
त्वं मे देवो गुरुः साक्षाद् भर्ता यशः सनातनः ।
धर्मश्चार्थश्च कामश्च यशः स्वर्गश्च मानदः ॥४९॥
पृष्टया मे हितं वाच्यं तथ्यं सत्यं प्रियं तव ।
पतिव्रतानां सर्वासामेष धर्मः सनातनः ॥५०॥
न संशये नियोक्तव्यः सुखस्थो हि पतिः स्त्रिया ।
एतन्निश्चित्य मे पीडां न प्रष्टुं त्वमिहाऽर्हसि ॥५१॥
पतिः प्राह शृणु भद्रे शुभं वा यदि वाऽशुभम् ।
अवश्यमेव वक्तव्यं पृष्टया पतिना स्त्रिया ॥५२॥

अपि गुप्तान्यगुप्तानि गोपयन्ति न सत्स्त्रियः।
गोपायन्ति तु या गुप्तं भर्त्रग्रे सा न वै सती ॥५३॥
पत्नी प्राह प्रियं वाक्यं सार्थं धर्मान्वितं नृपम्।
देवो राजा गुरू राजा सोमो राजेति पठ्यते ॥५४॥
राजाग्रे नाऽनृतं वाच्यं गच्छावः सौकरं स्थलम्।
तीर्थे तत्र कथयिष्ये कृपां विशेषतः कुरु ॥५५॥
बाढमाह ततो राजाऽऽज्ञापयामास मन्त्रिणः।
तीर्थं सौकरवं गन्तुं बदर्याश्रमनिम्नगम् ॥५६॥
हस्त्यश्वरथलक्षाणि गावो दोग्ध्योऽयुतानि च।
धनधान्यानि रत्नानि भूषाम्बराणि वै तथा ॥५७॥
दानार्थं सह नीत्वा च प्रजया वृद्धया युतः।
ययौ गंगात्मकं तीर्थं न्युवास मासषट्ककम् ॥५८॥
अथ तीर्थविधिं कृत्वा ददौ दानानि सर्वशः।
उपोष्य तौ त्रिरात्रं च दम्पती नियमान्वितौ ॥५९॥
प्रणम्य भूषितौ विष्णुं कृष्णनारायणं हरिम्।
स्थितौ चाग्रे हरेस्तत्र पतिं प्राह सती प्रिया ॥६०॥
एह्येहि नाथ गच्छावः पश्य गोप्यं मनीषितम्।
सृगाली पूर्वमेवाऽहं तिर्यग्योनिव्यवस्थिता ॥६१॥
विद्धाऽत्र सोमदत्तेन बाणेन मस्तके पुरा।
यस्य दोषेण मेऽप्येष रुजा शिरसि संस्थिता ॥६२॥
काञ्चीराजकुले जन्म पित्रा दत्ता तव प्रिया।
क्षेत्रप्रभावान्मे सैषा जाता सिद्धिर्नमोऽस्तु ते ॥६३॥
श्रुत्वा राजाऽपि सस्मार पूर्वजातमुदन्तकम्।
अहं गृध्रो महाभागे वटेऽत्र वनचारिणा ॥६४॥
सोमदत्तेन विद्धश्च मृतोऽत्र तीर्थपुण्यतः।
जातोऽस्मि च कलिंगानां राजा तव पतिः प्रिये ॥६५॥
अकाममरणेनाऽपि पश्य क्षेत्रस्य सत्फलम्।
ते च भागवतश्रेष्ठास्तथा नारायणप्रियाः ॥६६॥
पौरजानपदास्तत्र ह्यासन् ये सहसंगताः।
सर्वेऽपि विस्मयं प्राप्ताश्चक्रुस्ते भजनं हरेः ॥६७॥
राजा राज्ञी शरीरे स्वे विहाय दिव्यमूर्तिकौ।
भूत्वा विमानमारुह्य ब्रह्मलोकं चतुर्भुजौ ॥६८॥
ययतुर्देवपूज्यौ तौ नेदुर्दुन्दुभयो दिवि।
प्रजाः सहगतास्ताश्च सर्वसंगं विहाय च ॥६९॥
तत्रैव मरणं प्रापुर्नारायणप्रसादतः।
चतुर्भुजाश्च ते सर्वे ब्रह्मलोकं ययुर्मुदा ॥७०॥
सर्वे शंखगदापद्ममणिभ्राः पार्षदा नराः।
नार्यश्चतुर्भुजायुक्ताः सर्वभोगसमन्विताः ॥७१॥
पार्षदाण्यो ब्रह्मलोके प्रमोदन्ते हरेर्गृहे।
एवं तीर्थप्रभावेण मुक्तिं ते शाश्वतीं गताः ॥७२॥
जन्मान्तरकृतं पुण्यं यत्स्वल्पमपि वा बहु।
तत्कदाचित् फलत्येव येन तीर्थागमो भवेत् ॥७३॥
यदल्पमपि जायेत तन्महत्त्वाय कल्पते।
य एतत्पठते सुभ्रु शृणुयाच्छ्रावयेच्च वा ॥७४॥
तेन द्वादशवर्षाणि पूजनं मे कृतं भवेत्।
शंभुः सत्यै पुरा प्राह लक्ष्मि ते कथितं मया ॥७५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने वाराहतीर्थमहिम्ना शृगाल्या गृध्रस्य च मरणोत्तरं राजगृहे जन्म, वृत्तान्तप्रकाशोत्तरं मुक्तिर्मस्तकरोगादिकारणकथनं चेतिनिरूपणनामा सप्तसप्तत्यधिकपञ्चशततमोऽध्यायः ॥ ५७७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि कथां त्वन्यां तीर्थानां पापनाशिनीम्।
शंकरोक्तामृक्षकाद्रौ पार्वत्यै ते वदाम्यहम् ॥ १ ॥
गायमानस्य मे क्षेत्रे मन्दिरे मम सन्निधौ।
पुण्यं वादयमानस्य नृत्यतो जाग्रतस्तथा ॥ २ ॥
गोदातुरन्नदातुश्च जलदातुश्च यत्फलम्।
मार्जयितुर्लेपयितुर्गन्धपुष्पप्रदायितुः ॥ ३ ॥
धूपदीपसुनैवेद्यप्रदातुश्चापि यत्फलम्।
जपयज्ञादिकर्तुश्च यत्फलं चैहिकं तथा ॥ ४ ॥
पारलौकिकमेवापि जायते तद् वदामि ते।
शृणु पूर्वं खञ्जरीटः पक्षी गंगातटेऽभवत् ॥ ५ ॥
कीटान् बहून् प्रभुक्त्वा स ह्यजीर्णातिप्रपीडितः।
गंगायां पतितस्तत्र जले मृत्युमुपागतः ॥ ६ ॥
तेन पुण्येन वैश्यस्य कोट्यधिस्वामिनो गृहे।
धनरत्नमहासमृद्धेऽजायत प्रविभक्तिमान् ॥ ७ ॥
गानं करोति सततं देवाग्रे मन्दिरे मम।
एककीर्तनजं पुण्यं सप्तजन्माघनाशनम् ॥ ८ ॥
इति मत्वा करोत्येषो गायनं कृष्णसन्निधौ।
द्वादशाब्दे गते वर्षे पितरौ प्राह हर्षतः ॥ ९ ॥
मत्प्रियं यदि कर्तव्यमेको मे दीयतां वरः।
न चाहं वारणीयो वै पित्रा मात्रा कथंचन ॥१०॥
सत्यं व्रतं समास्थाय तीर्थयात्रा मयेष्यते।
श्रुत्वा तं पितरौ तुष्टावूचतुर्वेद चेप्सितम् ॥११॥

गावस्त्रिंशत्सहस्राणि सर्वा वै शुभदोहनाः ।
यद्यत्र रोचते दानं देहि त्वमविचारितम् ॥१२॥
लक्षकोट्यात्मकं द्रव्यं दाने प्रदीयतां धनम् ।
धनधान्यानि रत्नानि देहि पुत्र ह्यवारितः ॥१३॥
कन्या वै रमणीयाः सु समुद्वह विधानतः ।
यज्ञैर्यष्टुं समिच्छा ते यज देवं जनार्दनम् ॥१४॥
यावद्भोजनतृप्तान् वा साधूनिच्छसि तर्पितुम् ।
सर्वं निजेच्छया पुत्र कर्तुमर्हसि साम्प्रतम् ॥१५॥
नय सार्धं त्वया पुत्र तीर्थयात्राकृतेऽपि च ।
शुभं वै चिन्तितं पुत्र तीर्थे नारायणाश्रमम् ॥१६॥
अद्य मातृस्तनौ धन्यौ त्वया पुत्रेण सार्थकौ ।
आयान्ति च पुनर्यान्ति गता गच्छन्ति चापरे ॥१७॥
दृश्यते च क्षणे नष्टो पुनर्भवति नश्यति ।
तस्माद्भक्तिर्हरेस्तीर्थे कर्तव्यं वै सुपुत्रकैः ॥१८॥
मातापितृसहस्राणि पुत्रदारशतानि च ।
जन्मजन्मनि वर्तन्ते कस्य ते कस्य वा वयम् ॥१९॥
तस्मात् पुत्र त्वया चाद्य शुभकार्येण तारिताः ।
पितरः पितरश्चापि वयं धन्याः सुपुत्रतः ॥२०॥
किन्तु वद विशेषं चेद् गुप्तं रहस्यमस्ति चेत् ।
वैराग्यं वा गृहौदासीनता ते वर्तते किमु ॥२१॥
गुप्तं चेन्नैव गोप्तव्यं पितरौ प्रति पुत्रक ।
इतिश्रुत्वा द्वयोर्वाक्यं नत्वा प्राह शुभं सुतः ॥२२॥
तत्राऽहं कथयिष्यामि तीर्थे श्रीहरिसन्निधौ ।
बाढमित्येव तं पुत्रं दम्पती प्रोचतुस्तदा ॥२३॥
गमने कृतसंकल्पा ययुः सौकरवं प्रति ।
यत्तु किंचिद्गृहे चास्ति कृतं नारायणं प्रति ॥२४॥
वैशाखद्वादशिकायां तीर्थक्षेत्रमुपागताः ।
स्नाताः सन्तृप्य विष्णुं वै ददुर्दानानि भूरिशः ॥२५॥
षण्मासा विगतास्तेषां कृष्णलग्नहृदां ततः ।
कौमुदे कार्तिके शुक्ले ह्येकादश्यां व्रतान्विताः ॥२६॥
द्वादश्यां च सुतः पृष्टः पितृभ्यां स्मारकं प्रति ।
पुत्रस्तच्चरणौ स्पृष्ट्वा पितरौ समभाषत ॥२७॥
खञ्जरीटो ह्यहमासं पक्षी चात्र स्थले पुरा ।
अजीर्णेन मृतस्त्वत्र तेन पुण्येन वां सुतः ॥२८॥
जातोऽस्मि भक्तिमान् जातिस्मरश्चाऽथ नमामि वाम् ।
प्रकाशे गोपनीयस्य ममाऽऽयुर्याति पूर्णताम् ॥२९॥
गमिष्ये भगवद्धाम गायमानस्य मे फलम् ।
इत्युक्त्वा च जलं पीत्वा नत्वा च पितृपादयोः ॥३०॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इत्येवं गायमानः स भूत्वा दिव्यवपुर्धरः ॥३१॥
चतुर्बाहुः पार्षदैश्च विमाने सन्धृतश्च सः ।
मुक्तो भूत्वा ययौ धामाऽक्षरं प्रकृतिपारगम् ॥३२॥
ततो माता पिता चान्ये दृष्ट्वाऽऽश्चर्यमनुत्तमम् ।
तेऽपि भक्तिं परां चक्रुश्चान्ये ये च समागताः ॥३३॥
स्वल्पेनैव च कालेन मम मुक्तिमुपागताः ।
सर्वे हि योगिनस्तत्र धाम्नि चोत्पलगन्धिनः ॥३४॥
मोदन्ते तु यथाभावं प्रसादात् क्षेत्रजान्मम ।
एवं वै गायमानस्य मुक्तिर्भवति मेऽनघे ॥३५॥
शृणु तत्त्वेन मे देवि लिम्पमानस्य यत्फलम् ।
मृत्तिकायुग्गोमयेन मम वेश्मोपलेपयेत् ॥३६॥
न्यस्तानि तत्र यावन्ति पदानि तु विलिम्पता ।
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ॥३७॥
सकामश्चेद् भवेद् राजा दिव्यवर्षसहस्रकम् ।
भक्तौ व्यवस्थितः पश्चान्मम धामाऽभिगच्छति ॥३८॥
समीपे वा यदि दूरे गत्वा नयति गोमयम् ।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम् ॥३९॥
गोमयानां च नेता स स्वर्गलोके महीयते ।
ततश्च राजा भवति पदवर्षसहस्रकम् ॥४०॥
मम भक्तिं सदा कृत्वा त्वन्ते मद्धाम याति हि ।
उपलेपने स्नाने वा सलिलं यो ददाति सः ॥४१॥
यावन्तो बिन्दवस्तत्र पानीयस्य भवन्ति हि ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥४२॥
तावद्वर्षसहस्राणि राजा भूत्वा ततः परम् ।
मां प्रसाद्य गुणैर्भक्तो मम धामाभिगच्छति ॥४३॥
सम्मार्जनं मन्दिरस्य करोति स्त्री नरोऽपि वा ।
यावन्तः पांसवो भूमेरुड्डीयन्ते तु मार्जिताः ॥४४॥
तावद्वर्षशतान्याशु स्वर्गलोके महीयते ।
तावद्वर्षशतान्यत्र राजा भूत्वा ततः परम् ॥४५॥
मम भक्त्या मम धाम प्रयाति मत्स्वरूपवान् ।
गायनं ये प्रकुर्वन्ति मम सेवापरायणाः ॥४६॥
प्रत्यक्षरं तु वर्षाणां सहस्रं दिवि मोदते ।
सर्वसेवागुणयुक्तो नित्यं मम पूजकः ॥४७॥
ततो भूमौ भवेद् राजा वैष्णवो वैष्णवैः सह ।
गायन्मम यशो नित्यं भक्त्या परमया युतः ॥४८॥
मत्प्रसादादायुषोऽन्ते मम धामाऽभिगच्छति ।
चाण्डालो ह्यभवत् कश्चिद् वने मन्मूर्तिसन्निधौ ॥४९॥

गायति स्म सदा गीतिं दूरमागत्य चैकदा ।
धृतः स रक्षसा तूर्णं खादितुं तु तदा हि सः ॥५०॥
उवाच राक्षसं गीत्युत्तरं मां खाद निर्भरम् ।
इदानीं तु क्षणं मुञ्च व्रतपुण्यं करोम्यहम् ॥५१॥
विष्णोर्वै तोषणार्थे च मया गीतिः प्रगीयते ।
जागरं चर्यते रात्रौ प्रातर्भुक्ष्वाऽऽगतं च माम् ॥५२॥
अस्नातानां गतिं यास्ये यद्यहं नागमे पुनः ।
ब्रह्मघ्नानां सुरापानां स्तेनानां पिशिताशिनाम् ॥५३॥
व्यवायिनां गतिं यास्ये यद्यहं नागमे पुनः ।
श्रुत्वैवं रक्षसा मुक्तो गीतिं च जागरं तथा ॥५४॥
चण्डालः प्रचकाराऽथ प्रातर्हरिस्तु भूसुरः ।
भूत्वा समाययौ प्राह मा गच्छ राक्षसं प्रति ॥५५॥
जिवितार्थाय सत्यस्य त्यजने दूषणं न वै ।
श्रुत्वा तं श्वपचः प्राह सत्यं मे निश्चितं व्रतम् ॥५६॥
सत्यमूलं जगत्सर्वं ह्यात्मा सत्ये प्रतिष्ठितः ।
नाऽहं मिथ्या चरिष्यामि गच्छ विप्र नमोऽस्तु ते ॥५७॥
एवमुक्त्वा श्वपाकस्तु गतो यत्र स राक्षसः ।
प्राह शीघ्रं खाद मां च मोक्षो ते मे भवेद् द्रुतम् ॥५८॥
रक्षः प्राह प्रसन्नोऽस्मि सत्याधारं च पालितम् ।
ब्रह्म सत्यधृतिः प्रोक्तं त्वया तद्रक्षितं यतः ॥५९॥
नेच्छामि भक्षितुं त्वां च देहि मे गीतिजं फलम् ।
येन मोक्षं प्रगच्छामि त्वया साकं सुभक्तिमन् ॥६०॥
चण्डालेन तदा दत्तं रक्षसे गीतिकाफलम् ।
रक्षो देहं परित्यज्य ययौ वैकुण्ठमुत्तमम् ॥६१॥
चण्डालोऽपि हरेर्भक्तो ययौ यानेन धाम च ।
तत्र चतुर्भुजो भूत्वा सिषेवे परमेश्वरम् ॥६२॥
एवं वै गीतिकापुण्यं स्वर्गमोक्षादिदायकम् ।
पापघ्नं दिव्यतासम्पादकं कीर्तनमेव मे ॥६३॥
वाद्यवादयितुः पुण्यं वदामि यद्धि जायते ।
प्रतिस्वरं शतवर्षं स्वर्गे लोके महीयते ॥६४॥
पश्चात् संजायते राजा दशवर्षसहस्रकम् ।
ततो याति मम भक्तो मम धाम परात्परम् ॥६५॥
नृत्यतो मत्सन्निधौ च लक्ष्मीस्थानं हि निश्चितम् ।
नरस्यापि योषितोऽपि यथेष्टं प्रददाम्यहम् ॥६६॥
धाम्नि मे नर्तको मुक्तो भवत्येव चतुर्भुजः ।
नृत्यं वै शाश्वतानन्दं ददाम्यस्मै हि धामनि ॥६७॥
जाग्रतो मम मूर्तेश्च सन्निधौ दिव्यमुत्तमम् ।
सार्वज्ञ्यं चापरोक्ष्यं च ददामि च यथा मम ॥६८॥
गोदात्रे मम गोलोकं ददामि मुक्तिमण्डलम् ।
अन्नदात्रेऽमृतं स्वर्गे ददाम्यक्षतभोजनम् ॥६९॥
जलदात्रेऽमृतलोकं ददाम्यक्षततृप्तिदम् ।
गन्धपुष्पप्रदात्रे च ददामि दिव्यवर्ष्म यत् ॥७०॥
शाश्वतं चाऽपूरकं च तत्त्वानां सुखलब्धये ।
लक्ष्मीश्वरीभिः रमते ईश्वरो भोगपूरितः ॥७१॥
धूपदस्य च सौगन्ध्यं मन्मूर्तेरिव जायते ।
दीपदस्य सदा दिव्यं चक्षुर्भवति सूर्यवत् ॥७२॥
अन्ते स्वर्गादिकं भुक्त्वा मुक्तो मद्धाम याति च ।
नैवेद्यस्य फलं तस्मै वैकुण्ठं प्रददाम्यहम् ॥७३॥
ब्रह्मराज्यं सदा भुंक्ते सदा नैवेद्यदो मम ।
जपयज्ञादिकर्त्रे च सार्वभौमस्थलं महत् ॥७४॥
प्रददामि पृथिव्यां वै ततः स्वर्गं ततः परम् ।
वैराजं पदमेवापि ततो मोक्षं ददामि च ॥७५॥
सकामानां कामपूरान् लोकान् यच्छामि सर्वथा ।
अकामानां मम धाम प्रयच्छामि च शाश्वतम् ॥७६॥
नराणां योषितां वापि यथेष्टं प्रददामि वै ।
देवत्वं वापि देवीत्वं स्वर्गादौ वितराम्यहम् ॥७७॥
ईशत्वं चेश्वरीत्वं वा वैराजादौ ददामि च ।
मुक्तानीत्वं च मुक्तत्वं यथेष्टं प्रकरोम्यहम् ॥७८॥
ब्राह्मीत्वं ब्रह्मतां चापि ददामि तदभीप्सितम् ।
कृष्णत्वं चापि कृष्णात्वं ददामि च तदीप्सितम् ॥७९॥
नारायणीत्वं च यद्वा नारायणत्वमित्यपि ।
अवतारत्वमेवाऽप्यवतारिणीत्वमित्यपि ॥८०॥
यथाभक्ति यथादास्यं यथापुण्यं ददाम्यहम् ।
परमेश्वरता मेऽस्ति सा तु नान्यस्य कस्यचित् ॥८१॥
सोऽहं चानादिश्रीकृष्णनारायणोऽस्मि चाक्षरात् ।
धाम्नः परे मम धाम्नि वर्तामि पुरुषोत्तमः ॥८२॥
इत्येतत् कथितं लक्ष्मि ! तव जिज्ञासितं मया ।
शंभुना कथितं पूर्वं सत्यै तीर्थेषु तिष्ठता ॥८३॥
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेत्तथा ।
मम दास्यं दुर्लभं भक्तानां ददामि शाश्वतम् ॥८४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने गायमानस्य खञ्जरीटस्य मुक्तिः, वादयमानस्य नृत्यतो जाग्रतो गोदातुरन्नदातुर्जलदातुः सम्मार्जयितुर्लेपयितुर्गन्धपुष्पादिदातुर्धूपदीपसुनैवेद्यदातुर्जपयज्ञादिकर्तुश्च फलप्राप्त्यादिनिरूपणनामाऽष्टसप्तत्यधिकपञ्चशततमोऽध्यायः ॥५७८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! कथयामि रवितीर्थस्य यत्फलम् ।
पार्वत्या प्रार्थितः शंभुः समुवाच सतीपुरः ॥ १ ॥
एकदा ऋषयो याज्ञवल्क्याद्याः शंसितव्रताः ।
आदित्येशं समायाता नर्मदाकच्छके पुरा ॥ २ ॥
प्रविश्य ऋषयः सर्वे वने पुष्पफलाकुले ।
वनान्ते ददृशुः शुभ्रां स्त्रियं रक्ताम्बरान्विताम् ॥ ३ ॥
रक्तमाल्यां सुशोभाढ्यां रक्तचन्दनचर्चिताम् ।
रक्ताभरणसंव्याप्तां शशिहस्तां भयप्रदाम् ॥ ४ ॥
तस्याः समीपतः कृष्णवर्णं वृद्धं च निर्दयम् ।
महाकायं पाशहस्तं पिंगाक्षं दीर्घजिह्विकम् ॥ ५ ॥
तीक्ष्णदंष्ट्राऽतिक्रुद्धं च विकरालस्वरूपिणम् ।
ऋषिभिश्च वीक्षितौ तौ संपृष्टौ पापकर्मिणौ ॥ ६ ॥
कौ भवन्तौ विकृतौ वै तीर्थस्थौ पापरूपिणौ ।
तावूचतुस्तदा विप्रान् जराऽहं कालपुत्रिका ॥ ७ ॥
अहं यमः स्वयं दण्डप्रदाता पापिनां सदा ।
यूयं धर्मचरा विप्रा धर्मं चरत नार्मदे ॥ ८ ॥
कच्छे तीर्थे सम्प्रविश्य सुखं तिष्ठत वैष्णवाः ।
च चावां तान् पीडयावो ये तु नार्मदसेवकाः ॥ ९ ॥
नर्मदानिन्दकानत्र हरिष्यामो यमालयम् ।
ते श्रुत्वा वचनं तत्र कच्छे च नार्मदे द्रुतम् ॥१०॥
भृगुणाऽध्यसिते चक्रुर्वासं मोक्षप्रदं शुभम् ।
तावत्तत्र नराश्चान्ये पञ्च दृष्टा महर्षिभिः ॥११॥
स्नानदेवार्चनैर्युक्ताः पुरुषास्ते महाबलाः ।
तैरुक्तं भूसुरेभ्यः प्रख्यातं तीर्थेषु वै क्षितेः ॥१२॥
न तत्पापं तु नो नष्टं यन्नष्टं त्वत्र चाप्लवात् ।
एकेनाऽस्मत्सु च गुरोर्दाराः पूर्वं प्रदूषिताः ॥१३॥
द्वितीयेन सुवर्णं वै मित्रस्य संहृतं पुरा ।
तृतीयेन ब्रह्महत्या कृता घोरा भयंकरी ॥१४॥
चतुर्थेन कृतं पापं सुराया मद्यपानकम् ।
पञ्चमेन गवां हत्या कृता ते च वयं त्विमे ॥१५॥
नर्मदायां भृगुक्षेत्रे स्नात्वा शुद्धाश्च निर्मलाः ।
नत्वाऽनादिकृष्णनारायणं श्रीभार्गवीपतिम् ॥१६॥
कृत्वा प्रदक्षिणं भक्त्या त्यक्त्वा प्राणान् दिवंगताः ।
ब्राह्मणैस्ते तदा दृष्टा रवितीर्थे विमानगाः ॥१७॥
यमेन कालपुत्र्या च न निरुद्धाश्च ते तदा ।
प्रत्युत वै नमस्काराः कृता द्वाभ्यां हृदा मुहुः ॥१८॥
अथाऽन्यत्ते प्रवक्ष्यामि त्वगस्त्येश्वरतीर्थकम् ।
आनन्देश्वरतीर्थं च द्वितीयं वर्तते तथा ॥१९॥
लीनेश्वरं तथा तीर्थं तृतीयं चापि वर्तते ।
एकदा कालबाष्पाख्यो दानवो दुश्चरं तपः ॥२०॥
आदौ कृतयुगे रेवाजले चचार तस्य तु ।
प्रसन्नः शंकरः साक्षाद् बभूव च जगाद ह ॥२१॥
वरं ब्रूहि यथेष्टं ते ददामीति च वै ततः ।
दानवः स परिवव्रे देहि मेऽत्र महेश्वर ! ॥२२॥
हस्तं शिरसि यस्यैव दास्यामि स मृतिं व्रजेत् ।
शंभुः प्राह त्वदिष्टं यत्तत्तथैव भविष्यति ॥२३॥
इतिश्रुत्वा वचो दैत्यः शंभुमेवाऽभिदुद्रुवे ।
हस्तं ते मूर्ध्नि दास्यामि न तत्सत्यं वचस्तव ॥२४॥
रुद्रः पलायितस्तेन केशवं शरणं गतः ।
निवेद्य केशवं शंभुस्तत्र जले न्यलीयत ॥२५॥
भक्तदुःखविनाशायाऽनादिकृष्णनरायणः ।
स्त्रीरूपं तत्र धृत्वैव दैत्यसम्मुखमागतः ॥२६॥
कुमारीं युवतीं रम्यां चन्द्रोज्ज्वलां च निर्जने ।
दृष्ट्वाऽऽरेभे परिरब्धुं दानवो मोहविह्वलः ॥२७॥
उवाच भव मे पत्नी तदा प्रत्याह केशवः ।
यदि मां मन्यसे भार्यां प्रत्ययश्चेद् भवेन्मम ॥२८॥
नृत्यं कुरु मया सार्धं जये ते स्यां हि कामिनी ।
तथास्त्विति दानवः स नृत्ये सम्यगवर्तत ॥२९॥
हस्तावुद्धृत्य शिरसि मयूरकलया तदा ।
नृत्यं चकार भगवान् दानवोऽपि तथाऽकरोत् ॥३०॥
शनैर्हस्तौ सम्मिलितौ पस्पृशतुः शिरः स्वकम् ।
दानवः स नृत्यमोहाद्भस्मीबभूव तत्क्षणात् ॥३१॥
शंकरस्तत्परिज्ञाय जलाद् बहिर्बभूव ह ।
अनादिश्रीकृष्णनारायणं नत्वा स्थिरोऽभवत् ॥३२॥
तत्तीर्थं नर्मदायां वै लीनेश्वरं समुच्यते ।
कृष्णनारायणेशं च तीर्थं तद् वैष्णवं परम् ॥३३॥
कृत्वा ययौ च भगवानदृश्यतां हरोऽपि च ।
स्नात्वा तत्र लभेन्मर्त्यो भुक्तिं मुक्तिं तथोन्नतिम् ॥३४॥
दक्षिणे नर्मदातीरे तीर्थं गोपालकेश्वरम् ।
कामधेनुस्तपस्तत्र पुत्रार्थे प्रचकार ह ॥३५॥
ध्यायमाना पराभक्त्या देवदेवं महेश्वरम् ।
तुष्टस्तस्या जगन्नाथः कपिलाया महेश्वरः ॥३६॥
कपिलादेहमध्याद्वै निःसृतः शंकरः स्वयम् ।
तुष्टोऽस्मीति समुवाच वरं वृणु यथेप्सितम् ॥३७॥

सुरभिः प्राह पुत्रं मे देहि दिव्यगुणैर्युतम् ।
तथाऽस्त्विति हरः प्राह धर्मः पुत्रो बभूव ह ॥३८॥
चतुष्पाद् वृषभात्मा वै वृषो लोकस्य रक्षकः ।
गोपालेशः शंकरोऽयं सुरभ्या समुदीरितः ॥३९॥
तत्तीर्थे कार्तिके चापि वैशाखे पूर्णिमातिथौ ।
वृषोत्सर्गं कारयेच्च शंकरस्य प्रतुष्टये ॥४०॥
वृषभे रोमसंख्या तु सर्वांगेषु च यावती ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥४१॥
ततो यायाद् ब्रह्मलोकं महाभागवतो यदि ।
यद्वा राजा भवेद् भूमौ पुनर्मोक्षमवाप्नुयात् ॥४२॥
अथ तीर्थोत्तमं रम्यं पराशराभिधं तथा ।
यत्र तप्तं तपश्चोग्रं पराशरेण वै पुरा ॥४३॥
तस्य तुष्टा महालक्ष्मीर्वरं ददौ सुतार्थकम् ।
पराशरः सुतं लेभे नारायणांशमुत्तमम् ॥४४॥
अथ तीर्थं भयघ्नं वै भीमेश्वरं शुभं तथा ।
तद्वत् तीर्थं नारदेशं यत्र योगोपलब्धये ॥४५॥
नारदो वै तपस्तेपे शंभुं निधाय चान्तरे ।
शंभुः साक्षाद् बभूवाऽस्मै योगसिद्धिं ददौ पराम् ॥४६॥
हनूमदीश्वरं तीर्थं ततो गच्छेत् सुखावहम् ।
रावणं त्वजयद्राजा सहस्रार्जुनसंज्ञकः ॥४७॥
कार्तवीर्यं विजिगाय जामदग्निर्महाप्रभुः ।
जामदग्निं जितवाँश्च दाशरथिर्महाप्रभुः ॥४८॥
दाशरथिं लब्धती सीता पूर्वाभिपुण्यतः ।
सीतां नीतवतस्तस्य रावणस्य वधः कृतः ॥४९॥
रामेण तस्य भक्तश्च हनूमान् वानरोत्तमः ।
लंकादाहोत्तरं हत्यादोषशान्त्यर्थमेव सः ॥५०॥
नर्मदायां भृगुक्षेत्रे समागत्य स्थिरोऽभवत् ।
हनूमदीश्वरं नाम तीर्थं तत्परमं स्मृतम् ॥५१॥
चमत्कारं शृणु लक्ष्मि ! पुरा तत्राऽभवत्परम् ।
सुपर्णो नाम राजर्षिर्बभूव वसुधातले ॥५२॥
शतबाहुर्बभूवाऽस्य कुमारो वैष्णवोत्तमः ।
विचरन् स ययौ विन्ध्याचलं यदृच्छया क्वचित् ॥५३॥
वने दृष्ट्वा कुमारोऽयं पिंगलं चैकलं द्विजम् ।
पप्रच्छ त्वं कथं चात्से भ्रमसेऽत्र सपुस्तकः ॥५४॥
विप्रः प्राह समायातः कान्यकुब्जादितो वने ।
प्रेषितो राजपुत्र्या च श्रेष्ठवराऽभिकांक्षया ॥५५॥
राजा नाम्ना शिखण्डी यस्त्वपुत्रश्चाकरोत्तपः ।
कन्यां स प्राप्तवान् तस्या विवाहं स समीहते ॥५६॥
कन्या सा पितरं प्राह नर्मदायास्तटे पुरा ।
मयूरी चाऽभवं तत्र मयूरेण समन्विता ॥५७॥
तत्रागतः कदाचित्तु व्याधस्तेन शरैर्मुहुः ।
हता निपातिता सार्धं स्वामिनाऽहं मृता तदा ॥५८॥
प्रच्छिद्य मस्तकं मे स देहं वह्नौ प्रपच्य च ।
भक्षयामास चार्धं तु चार्धं चिक्षेप वै जले ॥५९॥
नर्मदायास्तेन पुण्यबलेनाऽहं तव गृहे ।
जाताऽस्मि राजपुत्रीति सशिखा देहसुन्दरी ॥६०॥
जातिस्मरा स्मराम्येतत्स्थलं पुण्यप्रदं पितः ।
तत्र प्रेषय विप्रं च हनूमदीश्वरे स्थले ॥६१॥
पिशंगपत्रत्रिशाखवटस्याऽधः पिशंगिनी ।
शिला वै वर्तते तत्र पत्राण्यस्थीनि मे तदा ॥६२॥
क्षिप्तानि सन्ति पाषाणकूटे जीर्णानि सन्ति च ।
नर्मदाया जले तानि निक्षिप्तव्यानि सर्वथा ॥६३॥
तेन मुक्तिर्भवेन्मे वै नारायणं पतिं प्रति ।
इत्याशया नृपतेश्च मार्गणाय द्विजोऽप्यहम् ॥६४॥
समायातोऽस्मि लिखितं वाचयामि स्थलं हि तत् ।
इत्युक्त्वा तत्स्थलं लब्ध्वा प्राप्याऽस्थीनि यथातथम् ॥६५॥
निचिक्षेप जले विप्रस्तावत् कन्या मृताऽभवत् ।
शतबाहुस्तु तत्रैव स्मृत्वा निजां मयूरताम् ॥६६॥
शुशोच तत्र वै तीर्थे मृतः सोऽपि च तत्क्षणम् ।
दिव्यं यानं समायातं स्थितस्तत्र ततः स च ॥६७॥
ययौ मृता च सा यत्र राजपुत्री च तत्स्थलम् ।
सापि दिव्यस्वरूपा च देवी भूत्वा विमानकम् ॥६८॥
समारुरोह च तदा यानं ययौ च नर्मदाम् ।
तावद् विप्रः प्रसस्मार व्याधं स्वं पूर्वजन्मनि ॥६९॥
जलं पीत्वा नर्मदाया ममार तत्र तीर्थके ।
दिव्यदेहस्वरूपः सन् समारुरोह यानकम् ॥७०॥
ययुस्ते च त्रयः स्वर्गं नत्वा श्रीहनुमन्तकम् ।
नर्मदायाः प्रतापोऽयं हनूमत्तीर्थकेऽभवत् ॥७१॥
स्वर्गमोक्षप्रदो लक्ष्मि ! पापतापप्रणाशनः ।
मयूरी च मयूरश्च व्याधश्चेति त्रयः खलु ॥७२॥
रेवाजलं प्रपीत्वा च ययुर्मुक्तिं ततः परम् ।
इत्येवं कथितं लक्ष्मि ! पुण्याख्यानं हरोदितम् ॥७३॥

पार्वत्या श्रूयमाणं तत् पठनाच्छ्रवणादपि ।
भुक्तिमुक्तिप्रदं दिव्यं संसारभ्रमवारकम् ॥७४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने आदित्येशतीर्थे लीनेश्वरतीर्थे गोपालेश्वरतीर्थे पराशरतीर्थे हनुमदीश्वरतीर्थे चेत्यादिसोपाख्यानतीर्थनिरूपणनामै-कोनाशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५७९ ॥

श्रीनारायण उवाच—

भृगुक्षेत्रे सोमतीर्थे यत्राऽऽश्चर्यमभूत् पुरा ।
शम्बरो नाम राजाऽभूत्तस्य पुत्रस्त्रिलोचनः ॥ १ ॥
त्रिलोचनसुतः कण्ठः पापनिष्ठो बभूव ह ।
वने विभ्रमतस्तस्य मृगयूथमदृश्यत ॥ २ ॥
शरैस्तान् हतवाँस्तेषु द्विजो मृगस्वरूपधृक् ।
हतस्तेन च पापेन ब्रह्महत्यात्मकेन सः ॥ ३ ॥
कण्ठः क्षितिं भ्रमन्प्राप्तो नर्मदानागसंगमम् ।
स्नातो रेवाजले वारि पपौ चाथ मृगादनः ॥ ४ ॥
वृक्षच्छायां समाश्रित्य सुप्तस्ततः क्षणान्तरे ।
तत्र सोमेश्वरं बाणं समानर्च जलादिभिः ॥ ५ ॥
तावत् कश्चिद् ब्राह्मणो वै समायाति च मार्गगः ।
रक्तवस्त्रधरा नारी मार्गे तमाह भो द्विज ॥ ६ ॥
मम भर्ता सोमतीर्थे तिष्ठत्येनं रुषा वद ।
तव पत्नी त्वदर्थं सा वटस्था त्वां समीक्षते ॥ ७ ॥
इत्युक्तः स ब्राह्मणस्तु कण्टमागत्य चाह तत् ।
मया वटे स्थिता दृष्टा पाशहस्ता भयंकरा ॥ ८ ॥
तव भार्या त्वाह मां त्वं भर्तारं प्रेषयाऽत्र मे ।
संगमादर्धक्रोशे सा दूरे तिष्ठति भामिनी ॥ ९ ॥
कण्ठः स्वं प्रेषयामास भृत्यं यत्र स्थिता हि सा ।
गत्वा भृत्यः पप्रच्छैनां काऽसि कथं च तिष्ठसि ॥१०॥
स्त्र्युवाच तं कण्ठभृत्यं ब्रह्महत्या मृगोद्भवा ।
मृगघ्नं सम्प्रतीक्षेऽत्र तदर्थं चोद्भवो मम ॥११॥
गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥१२॥
नर्मदानागसंगेऽत्र तटे क्रोशार्धमात्रके ।
न संविशेद् ब्रह्महत्या तेन तिष्ठामि चात्र वै ॥१३॥
गच्छ त्वं प्रेषयेः शीघ्रं मया मुक्तं पतिं मम ।
भृत्य आगत्य राजानं कण्ठमाह तथैव च ॥१४॥
राजा शोकं जगामाऽऽशु पपात धरणितले ।
उवाच प्राणसन्त्यागं करोम्यत्र तु संगमे ॥१५॥
शीघ्रमानीयतां वह्निरिन्धनानि बहून्यपि ।
आनीतं तत्क्षणात् सर्वं भृत्यैः राजा तु संगमे ॥१६॥
स्नात्वा वह्निं प्रसंज्वाल्य नत्वा श्रीसोमनाथकम् ।
त्रिःप्रदक्षिणकं कृत्वा हृदि कृत्वा जनार्दनम् ॥१७॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
जपन् विवेश विष्णुं श्रीपतिं ध्यायन् चतुर्भुजम् ॥१८॥
स्मरन्नारायणं कृष्णं सुगतिं मे कुरु त्विति ।
तावद् विमानं दिव्यं वै विष्णुपार्षदसेवितम् ॥१९॥
आगतं तं चमत्कारं दृष्ट्वा भृत्या अपि ध्रुवम् ।
कृत्वा च निश्चयं मोक्षे विविशुस्ते हुताशनम् ॥२०॥
विमानस्था दिव्यरूपा भूत्वा ते पार्षदोत्तमाः ।
ययुर्दिव्यं हरेः स्थानं लक्ष्मीमाणिक्यशोभितम् ॥२१॥
प्रभापार्वतीसंजुष्टं हंसामंजुलिकाश्रितम् ।
चम्पादयारमाहैमीमुक्तादेवीसमर्चितम् ॥२२॥
कृष्णनारायणं तास्तु सेवन्ते ब्रह्मधामगाः ।
सोमतीर्थप्रसंगे देयानि दानानि भावतः ।
पितरस्तस्य तृप्यन्ति वंशो मुक्तिं प्रयाति च ॥२३॥
ब्रह्महत्या सुरापानं गुरुदारनिषेवणम् ।
भ्रूणहा 'शुद्धयति तत्र ह्येवमेव न संशयः ॥२४॥
ऋणमोचनसंज्ञं च तीर्थं गच्छेत्ततः परम् ।
दिव्यैः पैत्र्यैर्मानुषैश्च ऋणैरात्मकृतैरिह ॥२५॥
मुच्यते तत्स्थले स्नात्वा स्वर्गे देवः प्रमोदते ।
अथोत्तरे तटे वारौ वैष्णवं तीर्थमुत्तमम् ॥२६॥
जलशायीति वै नाम्ना विष्णुरास पुराऽत्र वै ।
नलमेघः पुरा दैत्यो बभूव सुरकष्टदः ॥२७॥
देवा जग्मुर्हरिं प्राहुर्दैत्यनाशाय माधवम् ।
भगवान् गरुडारूढश्चक्रं नीत्वा समाययौ ॥२८॥
नलमेघसखा धुन्धुमारो युद्धाय निर्गतः ।
हिमालयस्य वै द्रोण्यां विष्णुना घातितश्च सः ॥२९॥
अथाययौ महारुष्टो नलमेघो हरिं प्रति ।
युयुधे बहुधा तत्र विष्णुना सोऽपि घातितः ॥३०॥
सुदर्शनेन चक्रेण दृष्टस्तत्र तदालयः ।
महागुहान्तरे कन्या दिव्या दैत्येन रक्षिताः ॥३१॥
मानुष्यश्चाथ देव्यश्च गान्धर्व्यः शैल्य इत्यपि ।
चतुर्दशसहस्राणि हत्वा हृत्वा जनान् बहून् ॥३२॥
ता दृष्टा विष्णुना तत्र दैत्यस्य कामिनी तथा ।
नाम्ना सा मंगलादेवी रुरोदाति मुहुर्भृशम् ॥३३॥
श्रुत्वा दैत्यवधं भक्त्या कृष्णनारायणं पतिम् ।
वव्रे च वव्रिरे कन्याः सर्वाः श्रीमाणिकीप्रतिम् ॥३४॥

अक्षराधिपतिं सतां पतिं तां गरुडस्थिताः ।
समानीता नर्मदायां स्नापिता विष्णुना ततः ॥३५॥
तीर्थे कृत्वा जलशायिस्वरूपं भगवान् स्वयम् ।
नर्मदायां स्वीचकार ताः सर्वाः शयने क्षणम् ॥३६॥
अथ कुंकुमवाप्यां स भगवान् गरुडस्थितः ।
सर्वाभिः सह पत्नीभिः समाययौ निजस्थलम् ॥३७॥
लोमशेन च ताः सर्वा उपनीतवतीकृताः ।
नित्यं तिष्ठन्ति ता विष्णोः पार्श्वे धाम्नि क्षितावपि ॥३८॥
अश्वपट्टसरस्तीर्थे प्रासादेषु हरिप्रियाः ।
मुक्ताः स्युस्ते च शृण्वन्ति य इमां वैष्णवीं कथाम् ॥३९॥
ते धन्या मानुषे लोके पुण्याः पुण्यतमाः खलु ।
येषां भवति संयोगः साक्षात् कृष्णस्य भूतले ॥४०॥
दिव्यास्ते वै प्रजायन्ते नरा नार्यः स्थिरं चरम् ।
ब्रह्माश्रये जले दिव्ये स्नात्वा दिव्या भवन्ति ते ॥४१॥
अथ तीर्थं परं चन्द्रादित्याख्यं पावनं चरेत् ।
चण्डमुण्डौ पुरा त्वास्तां दानवौ नर्मदातटे ॥४२॥
सुतपश्चेरतुस्तत्र ध्यायतो भास्करं च तौ ।
सूर्यः प्रतोषितः प्राह वृणुतं सद्वरं तदा ॥४३॥
अजेयौ सर्वदेवानां वरं वृण्वः प्रदेहि तत् ।
तथास्त्विति रविः प्राह ताभ्यां संस्थापितो रविः ॥४४॥
चन्द्रः संस्थापितश्चापि चन्द्रादित्यं तत्तीर्थकम् ।
व्यासतीर्थं ततो गच्छेद् व्यासमूर्तिं प्रपूजयेत् ॥४५॥
सिद्धशंभुं पूजयेच्च द्वीपेश्वरं समर्चयेत् ।
मार्कण्डेयेश्वरं तीर्थे संकर्षणेश्वरं तथा ॥४६॥
श्रीकृष्णो राधया सार्धं बलेनापि विराजते ।
एरण्डीनामकं तीर्थं ततो गच्छेत्तु पावनम् ।
अत्रेः पत्नी चानसूया ह्यपुत्रा त्वास भामिनी ॥४७॥
तपस्तेपे यत्र रेवातटे एरण्डिसंगमे ।
गते वर्षशते तस्या विष्णुरुद्रपितामहाः ॥४८॥
ददुरागत्य च वरं निजतुल्यसुतार्थकम् ।
पुत्रास्तस्या अत्रितुल्या ब्रह्मविष्णुमहेश्वराः ॥४९॥
बभूवुस्ते चन्द्रदत्तदुर्वासश्च वै त्रयः ।
तत्तीर्थं पापतापानां शामकं पुत्रमोक्षदम् ॥५०॥
धूमपातं ततो गच्छेत् ततः सागरसंगमम् ।
अर्घं ददाति रेवायै नित्यदा सरितां पतिः ॥५१॥
नर्मदा वदति तत्र मदीये संगमे जनाः ।
स्नात्वा पितॄन् तर्पयिष्यन्त्येषां सप्तकुलान्यहम् ॥५२॥
तारयिष्यामि भक्तांश्च मोक्षयिष्यामि संकटात् ।
अहं वै नर्महास्यादि ददामि शार्ङ्गिणे मुहुः ॥५३॥
रमयामि हरिं नित्यं ममोत्संगे तदात्मिका ।
नृ-नराणां म-मोक्षं च दा-ददामीति नर्मदा ॥५४॥
एवं सा नर्मदा देवी मोक्षदा वर्तते परा ।
नर्मदायास्तव सख्या लक्ष्मि माहात्म्यमुत्तमम् ॥५५॥
साक्षाद्रावुदितं सत्यै शंभुना तन्मयोदितम् ।
भक्त्या श्रुत्वा जनः सर्वो मम धाम प्रयाति च ॥५६॥
सती श्रुत्वा शंकरात्सा विमानवरमास्थिता ।
कोटिगुणैः सेविता च शंकरेण समन्विता ॥५७॥
शंभूक्तानि च तीर्थानि कर्तुं ययौ मुदान्विता ।
आसमुद्रं गता शैली पुपूज तीर्थदेवताः ॥५८॥
कोटिरत्नादिदानानि ददौ पश्चात् स्वयं सती ।
भार्गवीं च भृगुकच्छे मिलित्वा व्योममार्गतः ॥५९॥
कैलासं प्रययौ साध्वी शंकरानुमता प्रिया ।
तीर्थजलानि प्रददौ कैलासवासिनोऽपि च ॥६०॥
एवं यात्रा कृता चैषा शंकरेण महात्मना ।
लोकानां पावनार्थं वै स्वयं ब्रह्मात्मको यतः ॥६१॥
महाभागवतो भक्तः शंकरो लोकशंकरः ।
सर्वेषां शं-प्रदाता स कैलासे हैमपर्वते ॥६२॥
वर्तते मम पूर्वं स यत्र तपः करोम्यहम् ।
बदरीवृक्षमाश्रित्य बहुवर्षव्यतिक्रमात् ॥६३॥
एकैकेन फलेनैव बदर्या निर्वहाम्यहम् ।
तत्राऽहं दश कोट्यश्च दशवर्षं दशार्बुदम् ॥६४॥
दश भूमेस्तथाऽन्यानि पद्मानि तपसि स्थितः ।
दैवा मां नैव पश्यन्ति कथं च मनुजाः खलु ॥६५॥
अहं पश्यामि तान्सर्वान् तपःस्थितः समागतान् ।
तोषयन्तस्ततः स्तोत्रैर्मदिच्छयैव ते च माम् ॥६६॥
पुरःस्थितं प्रपश्यन्ति यावत्कार्यं च तत्क्षणम् ।
श्रीबदर्याश्रमं पुण्यं यत्र भक्तः स्थितः स्मरेत् ॥६७॥
स याति वैष्णवं धाम राधालक्ष्म्यादिसेवितम् ।
मम योगरतो भक्तो मे मुक्तिफलभाग् भवेत् ॥६८॥
योऽवगच्छति तीर्थेषु मां प्रभुं स च मुच्यते ।
लक्ष्मीः प्राह वचः श्रुत्वा नारायणस्य वै तदा ॥६९॥
दास्यां मे प्रणयं कृत्वा विज्ञाप्यं शृणु केशव ।
मृदुना सुखभावेन वक्ष्यामि त्वां जनार्दन ॥७०॥
अल्पप्राणबला नार्यो भोगक्षेत्राणि योषितः ।
मालिन्येन सदा युक्ता धर्माचारविवर्जिताः ॥७१॥
पराधीनाः पत्यधीना अपत्यवशवर्तिकाः ।
मलमूत्रक्षालनादावशुद्धाः सर्वदा स्त्रियः ॥७२॥

अशुद्धौ तव पूजादि कथं स्यात्तच्च मे वद।
राजस्वल्ये तव पूजा कथं स्यात्तच्च मे वद॥७३॥
नारायणस्तदा प्राह साधु पृष्टं त्वयाऽनघे।
भक्तानां योषितां सौख्यप्रदं मोक्षप्रदं तथा॥७४॥
बालक्षालनसक्तानां सक्तानां वस्त्रक्षालने।
पतिसेवापराणां च स्थितानामृतुधर्मके॥७५॥
गृहाऽशुद्ध्यादिसंस्कारशोधनादिककर्मसु।
प्रसक्तानां न वै नित्यं शुद्धिर्यस्माद् विलोक्यते॥७६॥
तासां वै मम भक्तानां योषितां तु कृते मया।
मनोमूर्तिर्मया प्रोक्ता मानसे निवसाम्यहम्॥७७॥
स्त्रियः स्वभावतः शुद्धा निर्मिता ब्रह्मणा पुरा।
क्षेत्रं वै सर्वथा शुद्धं तेन भेत्तव्यमेव न॥७८॥
शुद्धत्वेऽपि निमित्तेष्वशुद्धकार्येषु सत्स्वपि।
कृतेषु स्नानमात्रेण स्त्रियः शुद्धा भवन्ति वै॥७९॥
यद्वा सुचित्रमूर्तेर्मे दर्शनं दूरतः सदा।
यावद्रजस्वलाधर्मस्तावद्दिनचतुष्टयम्॥८०॥
कर्तव्यमेव नान्यत्तु चान्यच्चेन्मानसं चरेत्।
तेनाऽहं संप्रतुष्टोऽस्मि नार्युद्धारपरायणः॥८१॥
देहकार्ये सदा शुद्धावशुद्धावपि सुन्दरि!।
चित्तं न्यस्य मयि कुर्यान्मम भक्तिपरायणः॥८२॥
न सा लिप्यति दोषेण ममाऽनुग्रहकारणात्।
शृणु लक्ष्मि! तथाऽन्यच्चशुद्धोऽहं सर्वदा प्रभुः॥८३॥
न चाऽशुद्धिर्लौकिकी मां स्पृशतीह कदाचन।
मद्योगाद्दिव्यतां यान्ति सर्वाश्चापि ह्यशुद्धयः॥८४॥
किन्त्वाचारप्ररक्षार्थे शुद्ध्यादिकं कृतं मया।
पुरुषा वा स्त्रियो वापि न पुमांसो न वा स्त्रियः॥८५॥
इन्द्रियाणि निगृह्यैव चित्तं मय्यनुवेश्य च।
मयि सन्न्यासयोगेन शुद्ध्यन्त्येव न संशयः॥८६॥
मम मूर्तौ सदा न्यस्तं चित्तं येन विवेकतः।
यस्यां कस्यामवस्थायां पुंसा षण्ढेन वा स्त्रिया॥८७॥
स च शुद्धो भवत्येव पूजादि स्वयमाचरेत्।
स्वातन्त्र्येणाऽचरेत्पूजामरण्ये निर्जनेऽथवा॥८८॥
असहाये चरेत्पूजां गणयामि न दूषणम्।
मनो बुद्धिश्च चित्तं च आत्माधीनाः शरीरिणाम्॥८९॥
मयि संयुज्य सत्प्रेम्णा न वै लिम्पन्ति मानवाः।
चित्तं मनश्च बुद्धिश्च मत्संस्थं च समं यदि॥९०॥
यत्किञ्चत्कुर्वतः कर्म पद्मपत्रमिवांऽभसि।
संयोगान्न च लिप्येत समत्वादेव नान्यथा॥९१॥
भक्ता दिवानिशं चात्र कुर्वन्तः कर्मसंकरम्।
तेऽपि यान्ति परां सिद्धिं यदि चित्तं मयि स्थितम्॥९२॥
जाग्रतः स्वपतो वापि शृण्वतः पश्यतोऽपि च।
यो मां चित्ते चिन्तयति मच्चित्तस्य तु किं भयम्॥९३॥
दुर्वृत्तमपि चाण्डालं ब्राह्मणं वापि तादृशम्।
मन्मानसं प्रशंसामि नान्यचित्तं कदाचन॥९४॥
यजन्तः सर्वधर्माणं मां च ज्ञानेन संस्कृताः।
मयि सन्न्यस्तचित्ताश्च मम भक्तिपरायणाः॥९५॥
ये मत्सेवां प्रकुर्वन्ति हृदि मां रक्षयन्ति ये।
ते चेत् स्वपन्ति भुञ्जन्ति रमन्ते कामयन्त्यपि॥९६॥
प्रवर्तन्ते निवर्तन्ते ते सर्वे लक्ष्मि मे प्रियाः।
यतः प्रशान्तचित्तास्ते मय्येव कृतनिश्चयाः॥९७॥
चित्तनाशो हि लोकस्य संसारस्य च मोक्षणम्।
तस्माच्चित्तं मयि न्यस्य मां स्पृशन्तु स्त्रियः सदा॥९८॥
मच्चित्तः सततं यो मां भजेत प्रेमपूरितः।
मत्पार्श्वं प्राप्य परमं मद्भावायोपपद्यते॥९९॥
राजस्वल्ये पञ्चमेऽह्नि ऋतुदानेन शुद्ध्यति।
शुद्ध्यर्थं च सुतार्थं च दातव्यमृतुदानकम्॥१००॥
ऋतुकालाऽभिगमनं ब्रह्मचर्यं मया कृतम्।
एवं स्थितेऽपि गच्छेन्न स्यान्नैष्फल्यमृतोस्तदा॥१०१॥
विरक्तयोः कृते नाऽयं नियमः संगमार्थकः।
सकामयोः कृते योगः ऋतौ गमः प्रशस्यते॥१०२॥
महाभागवतो भक्तः शुद्धिं रक्षन् यथोदिताम्।
मम सेवां प्रकुर्वीत दास्यभावेन भामिनि॥१०३॥
दासीभावेन भक्ता च या मे सेवां करोति च।
नरा नार्यश्च ते स्निग्धा नित्यं ते मे हृदि स्थिताः॥१०४॥
अज्ञाते रजसो दोषे मम स्पर्शादिकं भवेत्।
तदा स्नात्वा च मां स्नापयित्वाऽपि पञ्चमे दिने॥१०५॥
यद्वा चान्यः स्नापयेन्मां मालाशतं जपेन्मम।
रजस्वला क्षमां तत्र प्रार्थयेद् भगवन् प्रभो॥१०६॥
अजानन्त्या कृतः स्पर्शः क्षम्यतां करुणाकर।
इत्युक्त्वा श्रीकृष्णनारायणं नमेत् प्रशुद्ध्यति॥१०७॥
एवं दुष्यति नो लक्ष्मि नारी वा पुरुषोऽपि वा।
ततः कुर्वन्ति कर्माणि ते यथावन्मम प्रियाः॥१०८॥
सर्वाण्यनुदिनं भद्रे मम चित्तानुसारिणः।
कर्माणि मम सेवासु कुर्वन्तु नरयोषितः॥१०९॥
अवश्यं तान्नयिष्येऽहं मम लोकं परात्परम्।
मातापितृसहस्राणि पुत्रदारशतानि च॥११०॥

चक्रवत्परिवर्तन्ते यन्मोहान्मां न जानते ।
अज्ञानेनावृतो लोको मोहेन च वशीकृतः ॥१११॥
संगैश्च बहुभिर्बद्धस्तेन मां न च विन्दति ।
गच्छत्यन्यत्र माता वै पिता चान्यत्र गच्छति ॥११२॥
पुत्राश्चान्यत्र गच्छन्ति प्रमदाऽन्यत्र गच्छति ।
जायते चात्मनां स्थाने स्वस्वकर्मसमुद्भवे ॥११३॥
ज्ञानमूढा जना लक्ष्मि संसारे सन्ति मोहिताः ।
अल्पकालं परं मत्वा बद्ध्यन्ते नश्वरेऽपि च ॥११४॥
भविष्यन्ति पुनस्ते तु न मे मूर्त्या सहाऽऽसते ।
यस्यैतद्विदितं लक्ष्मि ! ब्राह्मं ज्ञानं मदात्मकम् ॥११५॥
मयि न्यस्य स्वमात्मानं मुच्यते नात्र संशयः ।
य एतच्छृणुयान्नित्यं कल्यमुत्थाय मानवः ॥११६॥
पुष्कलां लभते सिद्धिं मम लोकानुयायिनीम् ।
लक्ष्मिरूपाः सर्वनार्यो नरा मद्वद् भवन्ति च ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने सोमतीर्थे कण्ठस्य ब्रह्महत्यानाशः, जलशायितीर्थे नलमेघदानवनाशश्चतुर्दशसहस्रकन्यानां श्रीकृष्णनारायणपत्नीत्वं, चन्द्रादित्यतीर्थम्, आसमुद्रान्ततीर्थानि, शंकरस्य कैलासगमनम्, अशुद्धनरनारीणां मोक्षोपायकथनमित्यादिनिरूपणनामाऽशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८० ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि मम मूर्तिर्मन्मयी चाहमेव सा ।
एतदात्म्यमिदं सर्वं मूर्तिश्चाऽहं पुमुत्तमः ॥ १ ॥
पुरुषोत्तमसंज्ञोऽहं वसामि पुरुषोत्तमे ।
क्षेत्रे वै जगतां नाथो दिव्यरूपधरः पुमान् ॥ २ ॥
पुरुषोत्तमाख्यं दिव्यं क्षेत्रं परमपावनम् ।
यत्राऽस्मि दारवतनुः श्रीपतिः पुरुषोत्तमः ॥ ३ ॥
ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः स्वयम् ।
लोकानां चाक्षुषो भूत्वा दिव्योऽपि दृश्यतां गतः ॥ ४ ॥

श्रीलक्ष्मीरुवाच—

कथं दारुप्रतिमस्त्वं वर्तसे तत्र माधव ।
श्रोतुमिच्छामि भगवन् लोकानां हितकारणात् ॥ ५ ॥
कदा कस्मात् कथं तत्र भवानास्ते च कीदृशः ।
कृपयाऽनुग्रहेणाऽपि भक्तां श्रावय ते कथाम् ॥ ६ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि महापुण्यप्रदं रहस्यमुत्तमम् ।
यस्य संकथनाच्चापि क्षीयते चान्तरं तमः ॥ ७ ॥
अहं चास्मि जगन्नाथः सर्वभूतगुहाशयः
तथाप्येतन्मम क्षेत्रं वपुर्भूतं च मे परम् ॥ ८ ॥
स्वयं वपुष्मांस्तत्राऽस्मि मन्नाम्ना ख्यापितं मया ।
दशयोजनविस्तारं वालुकारामणीयकम् ॥ ९ ॥
नीलाचलेन महता पर्वतेन विराजितम् ।
सृष्ट्वा चराचरं ब्रह्मा चिन्तयामास वै पुरा ॥१०॥
देहिनां मोक्षणार्थं वै विष्णुं स्तोष्ये परेश्वरम् ।
अहं तु मम मोक्षार्थं भजिष्ये पुरुषोत्तमम् ॥११॥
विचार्येत्थं प्रतुष्टावाऽनादिश्रीकृष्णमच्युतम् ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ॥१२॥
अक्षरेशाय मुक्तानामधिपाय नमो नमः ।
राधालक्ष्मीप्रभाहंसामाणिकीशाय ते नमः ॥१३॥
पार्वतीशाय सगुणामंजुलेशाय ते नमः ।
श्रीकृष्णस्त्वं परब्रह्म नारायणस्त्वमेव च ॥१४॥
भूमा विष्णुर्महाविष्णुर्वैराजस्त्वं प्रवर्तसे ।
अन्तर्यामी प्रकाशश्च गोचरोऽगोचरस्तथा ॥१५॥
तत्त्वात्मकश्च प्रकृतिविकृतिश्चस्त्वमेव च ।
कोशसंस्थश्चाणुसूक्ष्मो महीयान्महतां भवान् ॥१६॥
द्रव्यं गुणश्च कर्म त्वं भावोऽभावस्त्वमेव च ।
माया च कारणं कार्यं त्वमेवाऽसि नमोऽस्तु ते ॥१७॥
संसारे त्वात्मलुब्धानां सारमात्मा त्वमेव च ।
असारश्चापि ते दृष्ट्वा साररूपः प्रजायते ॥१८॥
सोऽहं रागं परित्यज्य भविष्ये त्वां परेश्वरम् ।
किमसारस्वरूपाणां तुषाणामवघातनात् ॥१९॥
यत्र चान्ते भवेच्छून्यं तन्नारभेत बुद्धिमान् ।
मया सृष्टिः शून्यकान्ता कर्तव्या नैव केशव ॥२०॥
प्रसीदाऽद्य प्रमोक्षं च प्रदेहि मम चेच्छतः ।
एवं वै ब्रह्मणा चाहं स्तुतः श्रीगरुडध्वजः ॥२१॥
चतुर्भुजः कोटिसूर्यप्रकाशः श्रीनरायणः ।
आविरासं विविक्षुस्तं प्रहस्य चोक्तवाँस्ततः ॥२२॥
कथं ब्रह्मन् जातमात्रो वैराग्यं लब्धवानसि ।
कुरु चाज्ञां वह सृष्टिं ध्यानं मम विधेहि च ॥२३॥
अनाद्यविद्या सुदृढा दुश्छेद्या कर्मबन्धनैः ।
त्वया पूर्वं कृतं कर्म परमेष्ठित्वदायकम् ॥२४॥

विना भोगं न नश्येत्तन्नूतनानां प्रसंजकम् ।
तस्मिन् सति कथं सृष्टौ ह्रियेते मृतिजन्मनी ॥२५॥
तथापि भक्तिमार्गे ते यद्यस्ति मानसं हृदम् ।
यत्र मे मानसं चास्ति तत्र तेऽस्तीति धारय ॥२६॥
एवं मत्वा ह्यभिन्नं मां कुरु सर्वं मयोदितम् ।
हृदयेऽहं तव ब्रह्मन् प्रतिष्ठामि च सर्वदा ॥२७॥
निर्दिशामि मम कर्म तथा कुरु हृदोदितम् ।
सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ॥२८॥
सर्वतीर्थफलदे त्वं प्रदेशे याहि वै क्षितौ ।
तत्र जन्माऽयुतलब्धपुण्यपुञ्जास्तु मानवाः ॥२९॥
प्रपद्यन्ते निवासं वै नाऽभक्ता नाऽल्पपुण्यकाः ।
एकाम्रकाननाद् यावद् दक्षिणोदधितीरभूः ॥३०॥
पदात्पदात्परो दिव्यः प्रदेशो वर्तते मम ।
तत्र मत्कण्ठसंस्थश्च मणिर्नीलमसंज्ञितः ॥३१॥
समुत्तार्य मया संस्थापितः स नीलपर्वतः ।
ब्रह्मोवाच तदा श्रुत्वा कथं नीलमणिस्तदा ॥३२॥
त्वया संस्थापितस्तत्र वद मे कारणं प्रभो ।
हरिः प्राह शृणु ब्रह्मन् पुरा तु मधुकैटभौ ॥३३॥
ब्रह्माण्डनाशकौ दैत्यौ मया चक्रेण नाशितौ ।
मम भक्तौ मया सार्धं युद्धमुग्रं प्रचक्रतुः ॥३४॥
गदया तूग्रया मां च ताडयामासतुर्हृदि ।
मया धृतो मणिश्रेष्ठो हृदयादपहाय सः ॥३५॥
यावद्युद्धमभूत् तावत् तत्प्रदेशे निधापितः ।
तत्र भक्ता मम चोग्रा पृथ्वी भीता स्थिताऽभवत् ॥३६॥
कन्यका त्रासमापन्ना मण्याधारा प्रतिष्ठति ।
रक्षिताऽनेन मणिना प्रतीक्षते ममागमम् ॥३७॥
हत्वा दैत्यौ तदा चाहमगमं नेतुमेव तम् ।
तदा तु कन्यया पृथ्व्या स्तुतोऽहं परमेश्वरः ॥३८॥
त्वं रक्षाकारकश्चाऽसि पाता धाताऽसि मे प्रभो ।
पृथ्वीपतिस्त्वमेवाऽसि प्राणदोऽसि मम प्रभो ॥३९॥
सदैव रक्ष मां स्वामिन्नारायण हरे प्रभो ।
पापनाशं च मे भारं नाशय त्वं हरे प्रभो ॥४०॥
इत्युक्तोऽहमवोचं तां वरं ब्रूहि ददामि ते ।
साऽऽह नीलमणिं चात्र सदा रक्षितुमर्हसि ॥४१॥
येन मुक्तिर्भवेद् देहिपापनाशेन चात्र वै ।
मम रक्षा भवेच्चापि कृष्णाभूषणधारणात् ॥४२॥
श्रुत्वैवं भगवाँश्चाहं तामुक्तवाँस्तथास्त्विति ।
भूषारूपो मणिश्चायं नीलो मया समर्पितः ॥४३॥
पृथ्व्या धृतः स वै कण्ठे नित्यं धारयति ध्रुवम् ।
कण्ठात्मकं परं क्षेत्रं श्रीपुरुषोत्तमात्मकम् ॥४४॥
पुनश्चाहं यदा तस्मात्स्थानाज्जिगमिषुस्तदा ।
पुनः सा प्रार्थयामास त्वयाऽऽगन्तव्यमत्र च ॥४५॥
स्थेयं चात्र मदुद्धारपरेण प्रभुणा सदा ।
तथाऽस्त्विति मया चोक्तं वैकुण्ठं गतवानहम् ॥४६॥
तत्राज्ञा च तदा प्राप्ता मयाऽक्षरपतेः प्रभोः ।
नीलपर्वतभूमौ वै समिच्छामि पुमुत्तमः ॥४७॥
पुरुषोत्तमसंज्ञोऽहं वासं भक्तकृपावशः ।
एवं वै भगवाँस्तत्राऽनादिकृष्णनरायणः ॥४८॥
स्वयं वसति सर्वात्मा पुरुषोत्तमभूतले ।
सिन्धुतीरे राजते स नीलाद्रिर्द्योतयन् दिशः ॥४९॥
पृथिव्यां गोपितं स्थानं तव चाऽविदितं शुभे ।
सुराऽसुराणां दुर्ज्ञेयं मायया छादितं मम ॥५०॥
सर्वैश्वर्यसमायुक्तस्तत्र तिष्ठामि देहवान् ।
क्षराऽक्षरावतिक्रम्य वर्तेऽहं पुरुषोत्तमे ॥५१॥
लयेन न समाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ।
यथाऽहं चास्मि मे धाम्नि सर्वायुधधरः पुमान् ॥५२॥
पारमेश्वरचिह्नाढ्यस्तत्र मां द्रक्ष्यसे तथा ।
तत्र नीलाचलभूमौ कल्पवटस्य मूलके ॥५३॥
रौहिणाख्यकुण्डतटे वसन्तं द्रक्ष्यसे तु माम् ।
तत्र याहि प्रकाशं मां ध्यायतस्ते हि यास्यते ॥५४॥
इत्यादिश्य च ब्रह्माणं ततः श्रीपुरुषोत्तमः ।
पश्यतो ब्रह्मणस्तस्य तत्रैवान्तरधीयत ॥५५॥
ब्रह्मा चाभ्याययौ तत्र यत्रास्ते पुरुषोत्तमः ।
अद्राक्षीत्तं तथारूपं श्रीकृष्णं पुरुषोत्तमम् ॥५६॥
प्रत्यभिज्ञानसंहृष्टो बभूव ज्ञानसागरः ।
नेमे तुष्टाव च ब्रह्मा तदा श्रीपुरुषोत्तमम् ॥५७॥
तावत्तत्र वायसस्तु कश्चिद् व्योम्नः समाययौ ।
जलं पातुं पपातैव कुण्डे ममज्ज दैवतः ॥५८॥
कुण्डात्तु ब्रह्मणा तेन बहिर्निस्कासितश्च सः ।
पृथ्व्यां लुण्ठन् विलोक्यापि नीलकान्तिं परेश्वरम् ॥५९॥
काकदेहं परित्यज्य शंखचक्रगदाधरः ।
दिव्यदेहो बभूवात्र कृष्णपार्श्वे व्यवस्थितः ॥६०॥
काकस्य तु गतिं दिव्यां दृष्ट्वा योगीन्द्रदुर्लभाम् ।
ब्रह्माऽऽश्चर्यं जगामाऽथ चिन्तयामास तत्क्षणम् ॥६१॥
अहो क्षेत्रस्य माहात्म्यं विनाऽपि साधनं गतः ।
तामसोऽपि निकृष्टोऽपि चतुर्भुजत्वमाप्तवान् ॥६२॥

मनुष्योऽधिकृतो मुक्तौ खगोऽपि मुक्तिमाप ह ।
न किंचिद् दुर्लभं तत्र यत्र श्रीपुरुषोत्तमः ॥६३॥
पात्रापात्रे न वै तत्र यत्र कृष्णनरायणः ।
पुराणपुरुषो यत्र नाम्ना संकीर्त्यते जनैः ॥६४॥
तच्छ्रोतारोऽपि वै मुक्तिं यान्ति द्रष्टुस्तु का कथा ।
ध्यातुः सेवयितुश्चापि मुक्तिस्तत्र करंगता ॥६५॥
साक्षात्कृतो हि भगवान् दत्ते भक्ताय मुक्तिकाम् ।
पुरुषोत्तमसंज्ञकस्य महिमा चाद्भुतोऽस्ति यत् ॥६६॥
यत्र काकोऽपि तु हरिं साक्षात्प्रासश्चतुर्भुजः ।
किं पुनः सततं कृष्णध्यानयोगपरायणाः ॥६७॥
तत्र नीले दिव्यशैले पुरुषोत्तमक्षेत्रके ।
अपि कीटपतंगाद्या मुक्तिं प्रयान्ति सर्वशः ॥६८॥
तद् दृष्ट्वा यमराजो वै तूर्णं तत्र समागतः ।
ब्रह्मा ददर्श तं वैवस्वतं धर्मं हताशकम् ॥६९॥
निःश्वसन्तं च दीनं च स्वाधिकारनिरर्थकम् ।
यमराजाऽपि नीलाद्रौ श्रीहरिं प्रणिपत्य च ॥७०॥
तुष्टाव श्रीजगन्नाथं स्वाधिकारदृढस्थितौ ।
नमस्ते चैकतत्त्वाय द्वैतायाऽनन्तकाय च ॥७१॥
स्वप्रोतसर्वरूपाय धृतिपुष्टिकराय च ।
सर्वाभासाधिदेवाय नमस्ते सर्वयोनये ॥७२॥
विश्वासाय गुरवे साक्षिणे ते नमोनमः ।
कारुण्यसिन्धवे तुभ्यं परातीताय ते नमः ॥७३॥
जन्ममृत्युप्रहर्त्रे ते नमोऽस्तु दीनबन्धवे ।
मायाधिष्ठात्रात्मने ते पीतकौशेयवाससे ॥७४॥
मायाचक्रकर्तनाय चक्रिणे ते नमोनमः ।
दण्डदात्रेऽधिकर्त्रे ते परमेशाय वै नमः ॥७५॥
नीलमेघसुवपुषे नीलाद्रिवासिताय च ।
नमस्ते पुण्डरीकाक्षिशोभिताय गदाभृते ॥७६॥
श्रीवत्सकौस्तुभशोभाभासत्समूढवक्षसे ।
नीलवर्णं नीलशैलगुहावासं कृपालयम् ॥७७॥
आश्रितानां तु दुःखघ्नं प्रणमामि परात्परम् ।
यत्पादयोराश्रये संलुब्धा श्रीरनपायिनी ॥७८॥
वर्तते शाश्वती लक्ष्मीर्भक्तैश्वर्यप्रदायिनी ।
या प्रकृतिः पराधीना परेश तव वाञ्छया ॥७९॥
त्वामावृत्य विकारं सम्प्रयाति बन्धमुक्तये ।
भुक्तभोगाय चार्पयति निर्वाणतां त्वदिच्छया ॥८०॥
त्वमेव तु परब्रह्म ब्रह्मरूपेण वर्तसे ।
भूमरूपेण च व्यूहरूपेण वर्तसे तथा ॥८१॥
यमरूपेण च रुद्ररूपेण वर्तसे विभो ।
लक्ष्मीनारायण विष्णो कृष्णनारायणप्रभो ॥८२॥
काम्भरेयमहाराज कृपालो ते नमो मुहुः ।
प्रभानारायण पार्वतीशनारायण प्रभो ।
हंसनारायण मंजूनारायण नमोऽस्तु ते ॥८३॥
सगुणेश तव पत्नीं दुःखहर्त्रीं नमाम्यहम् ।
पुत्रचिन्तावारयित्रीं धारयित्रीं नमाम्यहम् ॥८४॥
इत्युक्त्वा विररामाऽसौ यमस्तावत्तु पद्मजा ।
धर्मस्तवप्रतुष्टेन नारायणेन देशिता ।
कृपामयी स्वयं भूत्वा लक्ष्मीर्धर्ममुवाच ह ॥८५॥
यमराज यदर्थं त्वं संस्तौषि तत्तु दुर्लभम् ।
क्षेत्रं चैतच्छ्रीहरेर्वै पुरुषोत्तमशार्ङ्गिणः ॥८६॥
सर्वेषां मोक्षदं चास्ति याम्यं पश्यन्ति नैव ते ।
दर्शकाश्चास्य तीर्थस्य न यास्यन्ति यमालयम् ॥८७॥
अत्याज्यं च तथा क्षेत्रमावयोः पुरुषोत्तमम् ।
ब्रह्मादिसर्वपालानां स्वामित्वं नात्र शस्यते ॥८८॥
नेह कर्मपरिपाका देहिनां संभवन्ति हि ।
अत्र वासेन कीटानामपि कर्म सुदुष्कृतम् ॥८९॥
विलयं याति माहात्म्यात्पुरुषोत्तमपादयोः ।
कर्मपाशप्रबद्धानां बन्धनं नात्र विद्यते ॥९०॥
दुष्कर्मिणां दण्डदाता त्वं यमो विहितोऽसि यत् ।
पुरुषोत्तमभूवासिदेहिनां त्वं न शासकः ॥९१॥
अत्र श्रीमान् परब्रह्म कृष्णनारायणः स्वयम् ।
स्वामी मे राजते साक्षान्नीलाद्रिकृतकेतनः ॥९२॥
दृष्ट्वा नारायणं तं वै मुच्यन्ते पापिनो यतः ।
तव दण्डो न वै तेषु त्वन्यत्र त्वं प्रभुर्यम ॥९३॥
मा समिच्छ जगन्नाथाश्रितानां शासनं यम ।
ब्रह्माऽप्ययं वायसस्य मुक्तिं वीक्ष्य स्मयं गतः ॥९४॥
गर्वं जहौ हि कर्मोत्थदेहिसंसारसंभवम् ।
त्वं चापि च तथा गर्वं परित्यज्य प्रशाधि तान् ॥९५॥
पुरुषोत्तमतीर्थातिरिक्तस्थान् सर्वदेहिनः ।
अत्र स्थिता न तेऽधीना मम स्वामिवशा हि ते ॥९६॥
अत्र वसन्त एवैते जीवन्मुक्ताश्चतुर्भुजाः ।
तस्मात्तेषां तव हस्तगतत्वं नैव नैव तु ॥९७॥
याहि कुरु मनःस्वास्थ्यमधिकारं निर्वर्तय ।
एतद्वासस्वहस्ताऽनागतत्वं मा शुचो यम ॥९८॥
एवं लक्ष्मीस्वरूपेण विष्णुना बोधितो यमः ।
खिदन् लक्ष्मीं पुनर्नत्वा स्मृत्वा हरिं जगाद ताम् ॥९९॥

मातर्यत्र भवेच्छ्रीमाननादिश्रीनरायणः ।
तत्क्षेत्रस्य महिमानं नाऽश्रृणवं पुरा ह्यहम् ॥१००॥
अभाग्यहतदेवोऽहं कथं वेद्मि हरेर्बलम् ।
परमेश्वरवाञ्छा वै निरंकुशा प्रवर्तते ॥१०१॥
अन्यत्र बन्धदा सैव याऽत्र मोक्षप्रदैव सा ।
एतत्क्षेत्रं कियद्दीर्घं यज्जीवा न ममस्पृशाः ॥१०२॥
एतत्क्षेत्रस्थितेः किदृक् फलं तदपि मे वद ।
येनाऽहं समनुज्ञाय विचरामि पृथक्पदम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने श्रीपुरुषोत्तमक्षेत्रे नीलमणिरूपनीलपर्वतकथा, रौहिणकुण्डतटे श्रीपुरुषोत्तममूर्तिः काकस्य वेधसः पश्यतो मुक्तिः, यमराजस्य तत्रागमनं, लक्ष्मीकृतनीलस्थलीयजीवानां यमदूताऽस्पर्शनं चेत्यादिनिरूपणनामैकाशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८१ ॥

श्रीलक्ष्मीरुवाच—

यमराज ! शृणु तत्त्वं पृष्टं हितकरं तव ।
क्षेत्रं फलं च कथये तथाऽन्यन्मोक्षदं शुभम् ॥ ॥ १ ॥
यथाहं श्रीकृष्णनारायणपार्श्वगता पुरा ।
आसं ततश्च प्रलये तद्वक्षःस्थलमास्थिता ॥ २ ॥
ददृशे च जगत्यस्मिन् प्रलीने मम सर्वथा ।
अहं चैतत् सुक्षेत्रं च पुरुषोत्तमसंज्ञकम् ॥ ३ ॥
द्वयं त्वासीद् दिव्यरूपं तदा मार्कण्डको मुनिः ।
सप्तकल्पायुरेवात्र निमग्नो प्रलयार्णवे ॥ ४ ॥
जलार्णवे भ्रममाणः पुरुषोत्तमक्षेत्रके ।
पुरुषोत्तमरूपे स नीलाद्रेस्तु समाश्रये ॥ ५ ॥
सामुद्रे सुतटे क्षेत्रे दिव्यं वटं समैक्षत ।
तत्राऽनादिकृष्णनारायणं ददर्श सूज्ज्वलम् ॥ ६ ॥
हसन्तं रमणीयं च षोडशाब्दं चतुर्भुजम् ।
यस्य वक्षसि क्षेत्रं तत् क्षेत्रे तं चापि मिश्रितम् ॥ ७ ॥
वदन्तं किं जले स्नासि मार्कण्डेय स्थिरो भव ।
एहि चात्र वटच्छायास्थले पार्श्वे ममाऽन्तिकम् ॥ ८ ॥
तच्छ्रुत्वा विस्मयं लेभे दृष्ट्वा क्षेत्रं वटं हरिम् ।
वारिभिः क्लिद्यते नैतद् दह्यते न च वह्निना ॥ ९ ॥
संवर्तकादिभिश्चैतच्छोशुष्यते न चाल्यते ।
एकार्णवे यथा नौश्च क्षेत्रं तथा हि दृश्यते ॥१०॥
ईक्ष्यते च वटो दिव्यो विशाल ईशितुस्तनुः ।
महाप्रलयवातेन पत्रं त्वस्य न कम्पते ॥११॥
तत्राऽयं भगवानास्ते न्यग्रोधे प्रलयेऽपि च ।
कथं भुवः प्रदेशोऽयं प्रलयेऽपि स्थिरोऽस्ति वै ॥१२॥
चिन्तयन्निति मुनिराट् कृष्णनारायणं प्रति ।
ययौ मां तस्य वक्षःस्थां दृष्ट्वा स्वं प्रजगाम ह ॥१३॥
'नमो नमस्ते पुरुषोत्तमाय लक्ष्मीद्वितीयाय नमो नमस्ते ।
जलाऽर्णवे मेऽक्षिसुगोचराय न्यग्रोधवासाय नमो नमस्ते ॥१४॥
दिव्याधिवासाय जगन्निवासकृतेऽत्रवासाय नमो नमस्ते ।
लये कृपालेशसमन्विताय निमग्नताराय मुहुर्नमोऽस्तु ॥१५॥
परं पदं चाक्षरधाम चामृतं
वैकुण्ठगोलोकहिरण्मयादिकम् ।
सर्वं भवान् यत्र कृताश्रयो भुवि
दिव्यं न चैतत्प्रलयोऽपि खादति ॥१६॥
सर्वत्रगं श्रीपुरुषोत्तमस्थं बृहत्स्वरूपं वटरूपसंस्थितम् ।
मायापरं ब्रह्मपरं लयोत्थं लयस्थितं त्वां प्रणमामि विष्णुम् ॥१७॥
एकार्णवे जगत्यत्र केयं भूः पारमेश्वरी ।
यत्र साक्षात् त्राणकर्ता राजसे मत्कृपाकरः ॥१८॥
त्राहि विष्णो जगन्नाथ घोरात्संसारसागरात् ।
न त्वं पृथग् यथाकाले मार्कण्डेयाद् विलोक्यसे ॥१९॥
यथा लक्ष्मीस्तथा चायं मार्कण्डेयस्तवानुगः ।
कथं मां त्यक्तवानास्ते भवान् भवार्णवे लये ॥२०॥
मां गृहाण प्रभो त्वत्र देहि वासं वटाश्रये ।
तव सेवां करिष्येऽत्र शाश्वतीं चाऽनपायिनीम्' ॥२१॥
इत्युक्तो भगवानाह समागच्छ मुने इह ।
तिष्ठ चात्र वटे लक्ष्म्या साकं सार्धं मया तथा ॥२२॥
प्रातः सर्वा मम सृष्टीः पुनः पूर्वाः प्रद्रक्ष्यसि ।
मया ते दर्शितं क्षेत्रं दिव्यं श्रीपुरुषोत्तमम् ॥२३॥
कुरु पर्णप्रशालां संवसाऽत्र वटमण्डले ।
अहं तव निमित्तेन वसाम्यत्र यतः स्थिरः ॥२४॥
मार्कण्डेयेन मुनिना श्रुत्वाऽऽज्ञां पारमेश्वरीम् ।
कृता वटजटाजूटे पर्णशाला शुभा तदा ॥२५॥
विवेश चान्तस्तावत् स ददर्शान्तर्हरिं स्थितम् ।
तन्मूर्तौ स प्रलीनश्च ददर्शाऽण्डानि कोटिशः ॥२६॥
अत्राण्डे ददृशे विप्रो भुवनानि चतुर्दश ।
ब्रह्मविष्णुमहेशादीन् दिक्पालान् लोकरक्षकान् ॥२७॥
सिद्धगन्धर्वदैत्यांश्च राक्षसान् सुरमानवान् ।
नागान् पितॄंश्च शैलाँश्च सागरान् संस्तराँस्तथा ॥२८॥

जगतां धारिणं शेषं सहस्रफणशोभितम्।
शेषाधारं कच्छपं च जलं तेजो ददर्श च ॥२९॥
वायुं व्योम महाकाशोत्तरं सर्वं ददर्श च।
चिदाकाशं च गोलोकं वैकुण्ठं स ददर्श ह ॥३०॥
अथ दिव्यप्रकाशं चाक्षरं धाम ददर्श सः।
यत्रास्ते श्रीकृष्णनारायणो लक्ष्मीपतिः स्वयम् ॥३१॥
तत्र वटं ददर्शाऽथ पर्णशालां स्वनिर्मिताम्।
अनादिश्रीकृष्णनारायणं तत्र ददर्श सः ॥३२॥
निजं मृकण्डतनयं क्षेत्रं च पुरुषोत्तमम्।
दिव्याऽब्धिं नीलशैलं च ददर्श मुनिराट् परम् ॥३३॥
ततो द्रागेव भगवद्वाञ्छया तु क्षणान्तरे।
पुनर्मायाऽभिसंकोचं गमितश्चान्तरे तदा ॥३४॥
हरौ स्वं पर्णशालायां हृदि लक्ष्मीयुतं प्रभुम्।
श्रीहरिं पूर्ववद् वीक्ष्य परमं विस्मयं गतः ॥३५॥
तुष्टाव परया भक्त्या श्रीकृष्णपुरुषोत्तमम्।
परमेश ममेष्टोऽसि किमाश्चर्यं प्रदर्शितम् ॥३६॥
त्वया चात्र स्थले कस्माद् वद मे श्रीहरे प्रभो।
भगवाँस्तं तदा प्राह पुरुषोत्तमभूतलम् ॥३७॥
मम धामैव भूमो वै मया संस्थापितं सदा।
दिव्यं द्वितीयरूपं तत् सवटं पुरुषोत्तमम् ॥३८॥
मन्दिरं पर्णशालेयं राजते साधुवासिनी।
त्वं मे त्वक्षरधामाऽसि मार्कण्डेयोऽपरः पुमान् ॥३९॥
नित्यत्वं चास्य धाम्नो मे दर्शितं ते क्षितावपि।
पुरुषोत्तमसंज्ञं वै क्षेत्रं धाम ममाऽस्ति तत् ॥४०॥
तस्मात् क्षेत्रमिदं रम्यं शाश्वतं मे विभावय।
न सृष्टिप्रलयावत्र विद्येते न च संसृतिः ॥४१॥
नित्यं पुमुत्तमं चात्र मां ज्ञात्वा पुरुषोत्तमम्।
क्षेत्रं विशति शुद्धात्मा स याति मम धाम वै ॥४२॥
नाऽस्य जन्म पुनर्भावि सान्द्रे सुखे गतो यतः।
श्रुत्वैवं मृकण्डतनयस्तत्र वासमरोचयत् ॥४३॥
प्रहृष्टहृदयः प्राह श्रद्धाभक्तिप्रपूरितः।
अनुगृह्णीष्व भगवन् क्षेत्रेऽस्मिन् पुरुषोत्तमे ॥४४॥
यथा स्थितो मृत्युवशं न व्रजे पुरुषोत्तम।
तव धाम्नि शाश्वते ते सुखे मग्नो भवामि यत् ॥४५॥
यमराज तदा कृष्णनारायणश्च तं मुनिम्।
प्रोवाचाऽहं त्वया साकं लक्ष्म्या साकं वसामि च ॥४६॥
निवत्स्यामि न सन्देहो लोककल्याणहेतवे।
यावदाभूतनाशं च पुनश्च प्रलयेऽपि च ॥४७॥
प्रलयान्ते पुनः सृष्टौ सृष्टयन्तेऽपि वसामि च।
निवत्स्यामि सदा चात्र वस त्वं पर्णपत्तने ॥४८॥
अत्र वै पर्णनगरी प्रसिद्धा सा भविष्यति।
पुरुषोत्तमपुर्याख्या जगन्नाथपुरी तथा ॥४९॥
कल्पे कल्पे नामख्यातिं गमिष्यति निवत्स्यति।
त्वं च मृत्युहरो भूत्वा स्थास्यस्यत्र न संशयः ॥५०॥
इत्युक्त्वाऽन्तर्दधे कृष्णनारायणो जगत्पतिः।
मार्कण्डेयो महामुनिस्तत्राऽऽवासमरोचयत् ॥५१॥
वटवायव्यकोणे च गर्तमास्थाय पावनम्।
ततेन तपसा मृत्युं जितवान् चाऽक्षरः स्वयम् ॥५२॥
मार्कण्डेयाश्रमस्तत्र वर्तते पावनो यतः।
पञ्चक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् ॥५३॥
अब्धितीरे द्विक्रोशं च मिलित्वा क्रोशसप्तकम्।
नीलपर्वतशोभाढ्यं स्वर्णवालुकसंस्तृतम् ॥५४॥
अनादिश्रीकृष्णनारायणवासाश्रितं परम्।
सर्वतीर्थः समुद्रोऽपि तीर्थराजत्वमाप्तवान् ॥५५॥
तत्तीरे भगवान् लक्ष्मीर्विराजते यमेश्वर।
साऽहं च कम्भरादेवी ब्रह्मानन्दपरिप्लुता ॥५६॥
या वै कुंकुमवाप्यां च सौराष्ट्रेऽपि विराजते।
गजानना चमत्कारे काश्यां सा कार्ष्णवाल्लभी ॥५७॥
जया सा त्वक्षरे धाम्नि गोलोके राधिका हि सा।
वैकुण्ठे सा रमा हिरण्मये प्रभा विनोदिनी ॥५८॥
श्वेताख्ये माणिकी लक्ष्मीः कैलासे पार्वती च सा।
सत्ये हंसा मंजुला मेरुद्रौ भ्वां सगुणा प्रिया ॥५९॥
अनादिश्रीकृष्णनारायणपत्न्यः सह स्थिताः।
पूर्वस्मिन् श्रीजगन्नाथः पश्चिमे द्वारिकाधिपः ॥६०॥
उत्तरे तु नरनारायणो दक्षे जनार्दनः।
स्वामिनो मे स्वरूपाणि कृष्णनारायणस्य वै ॥६१॥
जगन्नाथे त्वहं लक्ष्मीर्द्वारिकेशे प्रमेश्वरी।
नारायणे माणिकी च जनार्दने तु पार्वती ॥६२॥
सर्वेषामादिकल्पेऽत्र बभूवाऽहं पतिव्रता।
कल्पान्तरे तथा प्राविर्भावान्तरेऽपि साऽप्यहम् ॥६३॥
अनेकनामरूपाढ्या भवामि कृष्णवाञ्छया।
स्वामीष्टं मम धर्मः स पातिव्रत्यं तथा मम ॥६४॥
बहूनि मम नामानि रूपाणि च विभूतयः।
अवतारिण्य एवापि भविष्यन्ति स्त्रियो हरेः ॥६५॥
लक्षार्बुदानि वै नार्यो मम पत्युर्भवन्ति वै।
अप्रस्खलितवीर्यस्याऽखण्डितब्रह्मचारिणः ॥६६॥

अव्ययसत्त्वयुक्तस्य संख्यावर्ज्याः श्रियो हरेः।
तस्याऽप्रमेयकान्तस्य क्षेत्रं श्रीपुरुषोत्तमम् ॥६७॥
शंखाकारं पूर्वपश्चं पश्चिमे वृषभध्वजः।
पूर्वे शंखमुखे नीलकण्ठो देवो विराजते ॥६८॥
शंखस्योदरभागस्तु समुद्रोदकसंप्लुतः।
अब्धिकुलीनमारभ्य दिव्यन्यग्रोधकाऽवधिम् ॥६९॥
दृश्यते भगवाँस्तत्र भक्तानुग्रहकारकः।
यस्याऽयं भगवान् दृष्टिपथं याति स मुक्तिभाग् ॥७०॥
मरणान्मम धामस्थः स्नानात्स्वर्गगतस्तथा।
स्मरणात्पातकैर्हीनो जायते मानवोऽस्य वै ॥७१॥
नाभिदेशे तु शंखस्य स्थिताः कुण्डो वटो हरिः।
विमला तु महाशक्तिर्वर्तते तत्र मुक्तिदा ॥७२॥
प्रलयस्य भक्षयित्री महाप्रलयरोधिनी।
तां दृष्ट्वा प्रणमेद् यः स भोगानश्नाति शाश्वतान् ॥७३॥
वटाब्धिमध्यमं क्षेत्रं कीटादेरपि मुक्तिदम्।
अन्तर्वेदी भागवतः क्षेत्रं मध्यगतं हि सा ॥७४॥
तस्यां स्थिता भवन्त्येव शंखचक्राब्जधारिणः।
सार्धत्रिकोटिसंख्यानां तीर्थानां पुरुषोत्तमः ॥७५॥
राजा वै मुक्तिदो यस्मात् तीर्थराजोऽयमुच्यते।
रोहिणाख्ये दिव्यकुण्डे कारुण्याख्ये जले जनाः ॥७६॥
ये स्नास्यन्ति नरा नार्यस्ते स्युर्नारायणा ध्रुवम्।
तस्माद् यमेश ते चिन्ता माऽस्त्वेतस्य स्थलस्य वै ॥७७॥
मोक्षाधिकारिणामत्र नेश्वरस्त्वं परेतराट्।
एवमादिश्य धर्मेशं लक्ष्मीर्ब्रह्माणमाह च ॥७८॥
कामाख्यः क्षेत्रपालोऽत्र सदा नारायणाज्ञया।
वर्तते तपसा युक्तो भजते श्रीनरायणम् ॥७९॥
नृसिंहोऽयं च भगवान् दक्षिणे वर्तते हरेः।
नृहरेः सन्निधौ प्राणत्यागे मोक्षो भवेद् ध्रुवः ॥८०॥
दर्शनादपि नृहरेर्भुक्तिमुक्ती करंगते।
दानं जपादिकं चात्र कोटिकोटिगुणं भवेत् ॥८१॥
नृसिंहश्च वटश्चेताबुभौ नारायणौ यतः।
तच्छाया मोक्षदा तस्यामविद्या नाशमेति च ॥८२॥
वाराणस्यामविमुक्ते मुमुक्षोः कर्णमूलके।
शंभुर्दिशति बोधस्योपायं मन्त्रं ततः परम् ॥८३॥
समभ्यस्य क्रमान्मोक्षो ज्ञानं तस्य भवेद् यदि।
अत्र तु प्राणहानौ तत्क्षणे एव तु मोक्षणम् ॥८४॥
सारूप्यं लभते योऽपि कोऽपि विज्ञानमन्तरा।
स्नायादब्धिदृशा कृष्णच्छायायां वटवृक्षके ॥८५॥
क्षेत्रे धूल्याऽब्धिवार्भिर्यस्तन्मुक्तिर्मरणेऽत्र वा।
अन्तर्वेदीरक्षणार्थे शक्तयोऽष्टौ मया कृताः ॥८६॥
मंगला वटमूले तु पश्चिमे विमलाऽस्ति च।
शंखस्य पृष्ठभागे तु संस्थिता सर्वमंगला ॥८७॥
उत्तरे लम्बिका दक्षे कालरात्रिश्च संस्थिता।
कालरात्र्याः पृष्ठभागे चण्डरूपा व्यवस्थिता ॥८८॥
पूर्वे मरीचिका त्वास्ते वैष्णव्यो नाथदासिकाः।
अष्टानां दर्शनात्पापध्वंसोऽश्वमेधजं फलम् ॥८९॥
अथ भक्तश्च रुद्रोऽपि महाभागवतः प्रभुः।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९०॥
मन्त्रं जपन् भवँश्चाऽत्राऽष्टधोपास्ते पुमुत्तमम्।
आराध्य तपसा कृष्णं प्रार्थयद् वरमुत्तमम् ॥९१॥
यत्र त्वं नाथ तत्राऽहं वसेयं त्वां भजन् सदा।
त्वामृते कमलाकान्त नान्यन्निर्वाणकारणम् ॥९२॥
अन्तर्यामी प्रभुर्मे त्वं त्वां विना विग्रहः कुतः।
निर्मलाम्बरसंकाशं त्वामहं शरणं गतः ॥९३॥
इत्युक्तो भगवान् कृष्णो भक्तं रुद्रं विनिर्ममे।
क्षेत्रपालेश्वरं तत्राऽष्टधा भक्तोत्तमोत्तमम् ॥९४॥
कपालमोचनेशं च क्षेत्रपेशं यमेश्वरम्।
मार्कण्डेशं तथेशानं बिल्वेशं नीलकण्ठकम् ॥९५॥
वटेशं चेति तानष्टौ स्थापयामास माधवः।
एतान् दृष्ट्वा तथा स्पृष्ट्वा पूजयित्वा विमुच्यते ॥९६॥
अत्र क्षेत्रे मृतानां तद्धेतोर्यमो न शासकः।
तदर्थं स्वागतश्चेत्त्वं तदन्यत्र प्रसाधय ॥९७॥
सुदर्शनं हरेश्चक्रं मायायाः कर्तनं परम्।
नात्र माया भवेद् येन देही त्वद्वशगो भवेत् ॥९८॥
इत्युक्तो यमराजस्तु भगवन्तं प्रपूज्य च।
लक्ष्मीं नत्वा ययौ याम्यालयं तुष्टो हरिं भजन् ॥९९॥
श्रीरुवाच ततश्चाऽब्जं परमेष्ठिपदस्थितम्।
इन्द्रद्युम्नो महाराजो यज्ञाऽऽहर्ता सुवैष्णवः ॥१००॥
भविष्यत्यचिरेणैव सत्ययुगे स भक्तराट्।
अत्राऽऽगत्य महाभक्तिं करिष्यति दिवानिशम् ॥१०१॥
भगवत्प्रीतये त्वत्र वाजिमेधसहस्रकम्।
करिष्यति तथा ब्रह्मँस्तव प्रीत्यर्थमित्यपि ॥१०२॥

तदा कृपालुर्भगवान् तदनुग्रहकारणात् ।
एकदारुसमुत्पन्नश्चतुर्धा संभविष्यति ॥१०३॥

दारवीप्रतिमा विश्वकर्मा प्रघट्टयिष्यति ।
प्रतिष्ठापयिता त्वं च इन्द्रद्युम्नप्रसादितः ॥१०४॥

भविष्यसि तदा ब्रह्मन्नत्र श्रीपुरुषोत्तमे ।
अस्मादृश्यः प्रतिमास्ता नाणुमात्रमपि प्रभो ॥१०५॥

विसदृश्य इति ताश्च त्वं प्रतिष्ठापयिष्यसि ।
गच्छेदानीं सत्यलोकं ब्रह्मन् क्षेत्रं पुमुत्तमम् ॥१०६॥

पुनश्चायाहि च मया देवेनाऽपि स्मृतो यदा ।
इत्युक्तो विश्वसृट् सत्यं ययौ लोकं प्रपूज्य तौ ॥१०७॥

नारायणोऽपि भगवान् लक्ष्मीं प्राह दयानिधिः ।
एवमेव त्वदुक्तं वै सर्वमत्र भविष्यति ॥१०८॥

चर्मचक्षुष्मतां काष्ठरूपं भासिष्यते मम ।
दिव्यचक्षुष्मतां दिव्यो भासिष्ये च त्वया सह ॥१०९॥

नीलाचलगुहाऽन्तःस्थो नीलजीमूतसन्निभः ।
बिभ्रद् दारुमयं वर्ष्म शंखचक्रगदादिमान् ॥११०॥

संकर्षणो मया साकं सुभद्रा त्वं ममाऽन्तिके ।
सुदर्शनं तथा चक्रं निवत्स्यन्ति मया सह ॥१११॥

बहवो ह्यवतारा मे दिव्या जडाश्च मानुषाः ।
तिर्यञ्चो जलजाताश्च तेषां दिव्याः क्रियोत्तमाः ॥११२॥

तद्वदत्र दारुमयो मेऽवतारो मतो मम ।
द्यति संसारदुःखानि ददाति सुखमव्ययम् ॥११३॥

तस्माद् दारुमयश्चाऽहं परब्रह्म वसामि च ।
नहि काष्ठमयी मोक्षं ददाति प्रतिमा क्वचित् ॥११४॥

कृतेनाऽकृतता लक्ष्मि ! कदाचिन्नोपलभ्यते ।
अकृतो ह्यपवर्गः स कृताद्वा दारुतः कथम् ॥११५॥

अधिष्ठानं विना ब्राह्ममैश्वर्यं न प्रकाशते ।
अधिष्ठानं प्रतिमानं मम नारायणस्य तत् ॥११६॥

अलौकिकमपि कृत्वा लौकिकं तत्र वर्तये ।
कुत्र श्रुतं च वा दृष्टं प्रतिमा व्याहरेदिति ॥११७॥

इन्द्रद्युम्नाय स वरं ददौ काष्ठवपुर्धरः ।
दीनानाथैकशरणं तरणं भववारिधेः ॥११८॥

मोक्षणं सर्वपापानां नीलाद्रिशरणं हरिम् ।
मामेव शरणं लक्ष्मि ! ये त्वायास्यन्ति मानवाः ॥११९॥

तेषां दोषाननालक्ष्य ह्यपराधशतान्यपि ।
क्षमिष्ये स्वल्पभक्त्याऽपि दिव्यदारुवपुर्धरः ॥१२०॥

इत्युक्त्वा विरराम्मासौ वटे श्रीभगवान् स्वयम् ।
लक्ष्म्या साकं निजं रूपं ध्यायन् नीलाद्रिमण्डले ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने मार्कण्डेयाय श्रीपुरुषोत्तमक्षेत्रस्य शाश्वतिकताप्रदर्शनं तत्क्षेत्रप्रमाणं शंभोरष्टरूपैः पार्वत्याश्चाष्टरूपैः क्षेत्रपालत्वादि, वटस्य दिव्यता, इन्द्रद्युम्नेन भाविमूर्तिप्रतिष्ठापनादि, चेतिनिरूपणनामा द्व्यशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८२ ॥

श्रीनारायण उवाच—

अथ तेऽत्र चमत्कारं कथयामि शृणु प्रिये ।
मूर्तिरूपोऽस्म्यहं दिव्यो मोक्षदः सुखदः शुभः ॥ १ ॥

यथा पृथ्व्यादितत्त्वानि जीवात्मनो हि मूर्तयः ।
अमूर्तस्य गृहं मूर्तं तथा मे प्रतिमा गृहम् ॥ २ ॥

एकतत्त्वात्मकं चात्मस्वरूपं चर्मचक्षुषा ।
वीक्ष्यते न ततश्चाऽहं मूर्त्यात्मा दृश्यतां गतः ॥ ३ ॥

पृथ्वीशरीरकश्चाऽहं वारिशरीरकस्तथा ।
तेजशरीरकश्चापि वायुशरीरकस्तथा ॥ ४ ॥

आकाशमूर्तिकश्चाहं तन्मात्रामूर्तिकस्तथा ।
मनोबुद्ध्यादिशरीरश्चात्मेश्वरशरीरकः ॥ ५ ॥

ब्रह्मशरीरकश्चाऽहं मुक्तशरीरकस्तथा ।
सर्वशरीरकश्चाहं सर्वं दिव्यं मदाश्रयात् ॥ ६ ॥

दिव्यत्वे वेदमन्त्रादिकर्मकाण्डः प्रयोजकः ।
प्रतिष्ठा कारणं तत्र मुख्यं मम प्रवेशने ॥ ७ ॥

ततोऽहं तच्छरीरेण सर्वं करोमि देहिवत् ।
यद्येवं मां विजानीयान्मुक्तो भवति मच्छ्रितः ॥ ८ ॥

निश्चेष्टो दारुवर्ष्माऽपि दिव्यलीलाविलासकृत् ।
क्षमेऽहं स्वल्पभक्त्याऽपि भक्ताऽपराधकोटिकम् ॥ ९ ॥

कुरुक्षेत्रे पुरा त्वास्तां ब्राह्मणक्षत्रियावुभौ ।
सखायौ धर्महीनौ च वृत्तच्युतौ विमोहितौ ॥१०॥

पण्ययोषित्सहवासौ स्वधास्वाहाविवर्जितौ ।
पारलौकिकचिन्ता तु तयोः स्वप्नेऽपि नागता ॥११॥

एकदा तु कुरुक्षेत्रे विष्णुयागो व्यवर्तत ।
अगच्छतां यज्ञवाटमपश्यतां क्रियाविधिम् ॥१२॥

शृण्वानौ वैदिकान् मन्त्रान् पापं तयोर्न्यवर्तत ।
धर्मे मतिस्तयोर्जाता पुण्डरीकाऽम्बरीषयोः ॥१३॥

विवेकोऽपि समुद्भूतस्तरितुं वै भवार्णवम् ।
कृतपापप्रपुञ्जानां क्षालनार्थं च भूसुरान् ॥१४॥

अपृच्छतामभिवाद्य विशाप्य कल्मषं निजम् ।
सुरामिषव्यवायादि चौर्यं नार्यादिहिंसनम् ॥१५॥
तच्छ्रुत्वा वैष्णवश्रेष्ठो महाभागवतो द्विजः ।
दिव्यक्रियापरश्चैतावुवाच भक्तिसंभृतम् ॥१६॥
भो द्विज क्षत्रदायाद पापराशेः सुदारुणात् ।
मुक्तिं चेद् वाञ्छतस्तूर्णं गच्छतं पुरुषोत्तमम् ॥१७॥
क्षेत्रोत्तमं दारुमयो यत्रास्ते पुरुषोत्तमः ।
तमाराध्य जगन्नाथं लक्ष्मीराधाप्रभापतिम् ॥१८॥
पापक्षयं तथा मुक्तिं प्रयास्यथाऽक्षरे पदे ।
तन्मा विलम्बं कुरुत प्रयातं तत्र सत्वरम् ॥१९॥
उत्कले नीलशैले च वारिधेः सन्निधौ तटे ।
इत्युक्तौ तौ ऋषीन्नत्वा ययतुः पुरुषोत्तमम् ॥२०॥
ध्यायन्तौ मनसा विष्णुं शुद्धाहारव्रतावुभौ ।
गत्वा स्नात्वा सर्वतीर्थाश्रयाब्धौ मन्दिरं प्रति ॥२१॥
द्वारि कृत्वा दण्डवच्च तिष्ठन्तौ दर्शनेच्छया ।
भगवन्तं निरीक्षन्तौ नाऽपश्यतां यदा हि तौ ॥२२॥
निराशौ तु तदा भूत्वाऽऽरेभेतेऽनशनं व्रतम् ।
कीर्तयन्तौ हरेर्नामाऽभवतां लीनमानसौ ॥२३॥
अथ तृतीयरात्रौ तौ ज्योतिरेकमपश्यताम् ।
पुनर्लयं गतं ज्योतिस्तौ चोपवसतां स्थिरौ ॥२४॥
मध्ये सप्तमरात्रेश्च तौ श्रीहरिमपश्यताम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥२५॥
चतुर्भुजं सायुधं च रत्नाढ्यपादुकास्थितम् ।
कमलाक्षं हास्यमुखं वामे लक्ष्मीं स्वबाहुना ॥२६॥
पार्श्वे चाकर्षयन्तं च गृह्णन्तं श्रीकराच्छुभम् ।
ताम्बूलकं मुखे चाक्ष्णोः प्रेमप्रवाहपूरितम् ॥२७॥
तेजःपरिधिसंव्याप्तं सखीभिः परिवारितम् ।
रत्नवेत्रकराभिश्च तथा चामरपाणिभिः ॥२८॥
धृतगन्धप्रदीपाभिर्भूषिताभिर्विभूषणैः ।
रत्नछत्रं धृतवत्या शोभितं पुरुषोत्तमम् ॥२९॥
धूपपात्रं धृतवत्या धूपितं पुरुषोत्तमम् ।
कांचित् सहासां पश्यन्तं हसन्तं सुमनोहरम् ॥३०॥
तथा स्तुवतो देवांश्च सिद्धांश्च सनकादिकान् ।
नारदाद्यांश्च गन्धर्वान् प्रह्लादादींश्च वैष्णवान् ॥३१॥
नृत्यन्तं च प्रसादार्थमग्रतोऽप्सरसो गणम् ।
एवं सर्वं च तौ दृष्ट्वा दिव्यज्ञानौ बभूवतुः ॥३२॥
त्रिः परिक्रम्य तं कृष्णनारायणं कृताञ्जली ।
तुष्टुवाते मुहुस्तौ च हृदयस्थं हृषीश्वरम् ॥३३॥

आवां कामार्थलुब्धौ च पापमात्राभिचारिणौ ।
ऋषीणां कृपया चात्र शरणं ते ह्युपागतौ ॥३४॥
अनुकम्पय नौ नाथ सुदीनौ शरणागतौ ।
मूढौ दुष्कृतकर्माणौ पतितौ भवसागरे ॥३५॥
कोऽन्यस्त्वत्सदृशो बन्धुर्महाभयनिवारकः ।
स्वार्थशून्यः परार्थैकध्येयोऽनाथपतिः प्रभुः ॥३६॥
नारायणेति स्वन्नाम चतुर्वर्गैकसाधनम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥३७॥
मन्त्रस्ते मोक्षदश्चातिपापिनां पावकोऽस्ति हि ।
जपो भवान् परं पारं प्रापयत्येव तेन हि ॥३८॥
तन्नौ प्रसीद देवेश दृढां भक्तिं प्रदेहि नौ ।
घोराद् दुस्तरखाताच्च समुत्तारय केशव ॥३९॥
इन्द्रियाणि मनो बुद्धिरतव मूर्तौ वसन्तु नः ।
आत्मा संस्कारसहितश्चार्पितस्तव पादयोः ॥४०॥
प्रसीद देव सर्वात्मन्नसंख्येयशिरोभुज ।
असंख्यघ्राणनयनपाणिपाद नमोऽस्तु ते ॥४१॥
षड्विंशस्त्वं चान्तरात्मन् निष्प्रपंचः प्रवर्तसे ।
चतुष्पुमर्थमूर्तिस्त्वं जगन्नाथ नमोऽस्तु ते ॥४२॥
त्वदाराधनया कृष्ण भवन्ति सर्वसिद्धयः ।
योगाभ्यासं विना चास्मै कृष्णाय ते नमोनमः ॥४३॥
भक्तिं दृढां प्रदेह्यावां नास्त्यन्यत्प्रार्थनीयकम् ।
यावत्प्राणान्धारयावस्तावद्भक्तिर्दृढा त्वयि ॥४४॥
ततः पारेऽपि ते भक्तिं देहि नारायणप्रभो ।
अगाधभवपंकेऽत्र निमग्नयोः परायणम् ॥४५॥
दास्यं नाथ सदा देहि चानुकम्पय नौ विभो ।
इतिस्तुवन्तौ तौ भक्तौ पेततुर्दण्डवत् क्षितौ ॥४६॥
प्रसीदेति वदन्तौ च मुहुश्चक्रतुर्दर्शनम् ।
दिव्यदृष्ट्या विलोक्यैवं नेमतुश्च मुहुर्मुहुः ॥४७॥
तावददृश्यतां यातो लक्ष्मीनारायणः पतिः ।
तावुभौ चर्मनेत्राभ्यां पुण्डरीकाम्बरीषकौ ॥४८॥
मायया दर्शनं दिव्यं स्वप्नदृष्टमबुध्यताम् ।
ततः सिंहासनस्थं श्रीपतिं ददृशतुः पुनः ॥४९॥
काष्ठरूपं दिव्यकलिंगशोभाढ्यमुकुटान्वितम् ।
ललाटफलके स्वर्णवर्णबिन्दूर्ध्वपुण्ड्रकम् ॥५०॥
नवजीमूतसंकाशं फुल्लपद्मायतेक्षणम् ।
सद्रत्नसारजडितसौवर्णकुण्डलोज्ज्वलम् ॥५१॥
रक्ताधरं तिलपुष्पनासिकं वनमालिनम् ।
शंखचक्रगदापद्मायुधं चायतवक्षसम् ॥५२॥

मन्दहास्याननं दिव्यस्वर्णकटकबाहुकम् ।
श्रीवत्सकौस्तुभमौक्तिकादिहाराढ्यवक्षसम् ॥५३॥
आजानुयुगलं स्वर्णशृंखलाढ्यप्रकोष्ठकम् ।
सद्रत्नखचितोर्मिकाशोभिताङ्गुलिकाकरम् ॥५४॥
अभयं दर्शयन्तं च करेण मालिकान्वितम् ।
क्षौमपिशंगधौत्रं च दिव्यचन्दनचर्चितम् ॥५५॥
पुष्पहारालिसंशोभद्वक्षःस्थलस्थितश्रियम् ।
पुष्पगुच्छान्वितकरं सुवर्तुलकपोलकम् ।
धनुःकम्मानिकाकाराऽधरद्वयमनोहरम् ॥५६॥
इषद्गोप्त्वरश्मश्रुसत्सूक्ष्मरेखाऽधरान्वितम् ।
कामकोटिप्रलावण्यप्रेमाऽब्धिकंजलोचनम् ॥५७॥
आह्वयन्तं कटाक्षेण ज्ञापयन्तं च हृच्छ्रयम् ।
सप्तविंशतिहारालिसौवर्णरशनाकटिम् ॥५८॥
मञ्जीरकिंकिणीजालशब्दितचरणद्वयम् ।
अलक्तकादिसंलग्नशोणरूपाढ्यपत्तलम् ॥५९॥
सूक्ष्मचन्द्रकृतावासोन्नतवर्तुलसन्नखम् ।
धनुर्ध्वजत्रिशूलस्वस्तिकमत्स्यादिहस्तकम् ॥६०॥
ऊर्ध्वरेखाऽर्धचन्द्रादिवज्राङ्कुशादिपत्तलम् ।
नवयौवनपूरस्थं चित्तचौरं पतिं प्रभुम् ॥६१॥
अद्राष्टां च तौ सुभक्तौ श्रीस्वामिपुरुषोत्तमम् ।
तौ श्रीहरेर्दक्षभागे ददृशाते हलायुधम् ॥६२॥
संकर्षणं प्रभुं शेषं नैकब्रह्माण्डसत्फणम् ।
तं बलं यत्सहस्रादिफणामण्डलभूषितम् ॥६३॥
धवलं समुकुटं च सौवर्णकुण्डलाञ्चितम् ।
दिव्यमालाधरं नीलाम्बरं पंकजनेत्रकम् ॥६४॥
प्रोन्नतपीनवक्षःस्थमणिहारालिराजितम् ।
शंखचक्रगदापद्ममूशलहलधारिणम् ॥६५॥
अथ मध्ये तयोः सौम्यां भद्रां चम्पकसूज्ज्वलाम् ।
ददृशाते च तौ रम्यां समारब्धसुयौवनाम् ॥६६॥
कुंकुमारुणबिन्द्वाढ्यललाटफलकोज्ज्वलाम् ।
सौवर्णतन्तिकाराजद्भावकेसरचन्दनाम् ॥६७॥
कबरीभारशोभाढ्यां धम्मिलाकर्षणान्विताम् ।
कर्णनासागलबाहुप्रकोष्ठकटिभूषणाम् ॥६८॥
विद्युत्प्रभोज्ज्वलशाटीकञ्चुकीघर्घरीयुताम् ।
सर्वलावण्यसहितां लक्ष्मीं कृष्णप्रियां शुभाम् ॥६९॥
ताम्बूलकमलाद्यैश्च शोभितां व्यजनान्विताम् ।
दिव्यनेपथ्यसौन्दर्यसौरतानन्दवासिनीम् ॥७०॥

अद्राष्टां च शतसूर्यसमैकारसुदर्शनम् ।
सहस्रारं च भक्तानां रक्षाकरं प्रमुक्तिदम् ॥७१॥
दार्वग्रनिर्मितं चक्रं हरिं भद्रां बलं तथा ।
चतुर्धाऽवस्थितं कृष्णं दृष्ट्वा तौ विप्रबाहुजौ ॥७२॥
विस्मयं जग्मतुः प्रातः श्रद्दधतुश्च दिव्यताम् ।
न दारुप्रतिमा चेयं साक्षाद् ब्रह्म प्रकाशते ॥७३॥
दारुमिश्रेण भगवान् तीर्थराजतटे स्थितः ।
वटमूले दिव्यरूपो यं दृष्ट्वा मुच्यते जनः ॥७४॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
क्षितौ यदावतरति चतूरूपः प्रकाशते ॥७५॥
जगन्नाथस्य निकटे चावां स्थास्याव एव तु ।
इतिनिश्चित्य भक्तौ द्वौ कृष्णे भक्तिपरायणौ ॥७६॥
तत्र स्थितौ चिरं संप्रजयन्तौ कृष्णमानसौ ।
दिव्यौ भूत्वा ययौ श्रीमत्कृष्णनारायणाक्षरम् ॥७७॥
मुक्तिपदं परं धामाऽपुनरावृत्तिलक्षणम् ।
एवं ये भजमानास्तमनादिश्रीनरायणम् ॥७८॥
वासं यास्यन्ति पुरुषोत्तमपुर्यां नराः स्त्रियः ।
दिव्याश्चतुर्भुजा भूत्वा प्रयास्यन्ति ममाऽक्षरम् ॥७९॥
अपि कीटपतंगाद्या वियुज्यन्तेऽसुभिश्च ये ।
तेऽपि कृष्णस्य सामर्थ्यात् प्रयास्यन्ति परं पदम् ॥८०॥
सकामाः स्वर्गमेष्यन्ति लोकान् वैराजसंज्ञकान् ।
ऐश्वरांस्तेषु वै दिव्यान् भोगान् भुक्त्वा ततः परम् ॥८१॥
प्रयास्यन्ति मम लोकं चाक्षरादपि तूत्तमम् ।
इत्याह भगवान् लक्ष्मीं चोत्कले पुरुषोत्तमे ॥८२॥
दक्षिणस्योदधेस्तीरे वसन्ति वैष्णवा मम ।
नरा नार्यो धर्मयुक्ता मम भक्तिपरायणाः ॥८३॥
ऋषिकुल्यां समासाद्य दक्षिणोदधिगामिनीम् ।
स्वर्णरेखामहानद्योर्मध्ये देशः स उत्कलः ॥८४॥
भूस्वर्ग एष एवाऽस्ति देशः श्रीपुरुषोत्तमः ।
धर्मार्थकाममोक्षाणां प्रदो नारायणाश्रयात् ॥८५॥
नार्यः पतिव्रता यत्र नरा पत्नीव्रतस्थिताः ।
सदा कृतयुगो यत्र मद्भक्तेषु प्रवर्तते ॥८६॥
तेषां तु दर्शनाल्लक्ष्मि ! मुक्तिर्भवति शाश्वती ।
पठनाच्छ्रवणाच्चास्य भुक्तिं मुक्तिं लभेज्जनः ॥८७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने श्रीजगन्नाथपुर्यां विप्रक्षत्रिययोर्भगवत्साक्षात्कारेण मुक्तिरित्यादिनिरूपणनामा त्र्यशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८३ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि! कथां मम पुरातनीं यथोद्भवाम्।
पूर्वे कृते बभूवाऽसाविन्द्रद्युम्नो महानृपः॥ १॥
मार्कण्डेयो न जानाति तं कालं यत्र चास सः।
न बकर्षिर्न गृध्रर्षिर्न चेन्द्राद्या विदुर्हि तम्॥ २॥
किन्तु कूर्मो मानसस्थो जानाति तं पुरातनम्।
लोमशोऽपि विजानाति चेन्द्रद्युम्नं पुराभवम्॥ ३॥
सृष्टः स पञ्चमो वंशो वैष्णवाश्चाऽऽस भूतले।
अध्यात्मविद्भागवतः सर्वेषु ब्रह्मदर्शनः॥ ४॥
सर्वविद्यः सुशीलश्च यष्टा ब्रह्मण्य इत्यपि।
राजसूयं वाजिमेधसहस्रकमियाज सः॥ ५॥
महाकालवनेऽवन्तीराजधानीस्थितोऽभवत्।
मनोवाक्कर्मभिः कृष्णस्वामिभक्तिं चकार सः॥ ६॥
कुंकुमवापिकातीर्थस्थितः श्रीभगवान् स्वयम्।
श्रीस्वामिश्रीकृष्णनारायणः साक्षान्नृपस्य तु॥ ७॥
पूजावसरमासाद्य गत्वा गृह्णाति पूजनम्।
नैवेद्यं सम्प्रभुक्त्वा च नृपं बोधयति स्वयम्॥ ८॥
याहि राजन्मम क्षेत्रं पुरुषोत्तमसंज्ञकम्।
तत्र कारय मे सौधं प्रासादं रैवतोपमम्॥ ९॥
इत्युक्तः स च भूपोऽपि ओमित्याह नरायणम्।
हरिस्तस्याऽर्पितां पूजां प्राप्याऽदृश्यो भवत्यपि॥१०॥
अथ राज्ञा सभायां स्वपुरोहितो निवेदितः।
यत्र साक्षाज्जगन्नाथः क्षेत्रं दिदृक्षुरस्मि तत्॥११॥
विमानेन च यास्यामो विद्वद्भिः कविभिः सह।
दैवज्ञैः श्रोत्रियैः सार्धं दासदास्यादिभिस्तथा॥१२॥
इत्यभिदेशमादाय पुरोहितस्य पार्श्वगः।
तैर्थिको ब्राह्मणस्तत्र राजानं प्रत्यभाषत॥१३॥
योऽभूत् पत्नीव्रताख्यो वै नाम्ना ब्रह्माण्डगोचरः।
स प्राह राजन् जानामि पश्यामि करगं यथा॥१४॥
क्षेत्रं तद्वै जगन्नाथाश्रयमोद्रूप्रदेशके।
उत्कले नीलशैलस्याभितो दक्षिणसागरे॥१५॥
जले स्थले च तत्क्षेत्रं नाम्ना श्रीपुरुषोत्तमम्।
यत्रास्ते कल्पकवटो यत्र रौहिणकुण्डकम्॥१६॥
तत्रास्ते प्राग्दिशि हरेर्नीलेन्द्रमणिनिर्मिता।
तनुः कृष्णस्य दिव्या सा सारूप्यमुक्तिदायिनी॥१७॥
पश्चिमे शबराणां वै ग्रामः शबरदीपकः।
वर्तते तस्य मार्गोऽपि येन विष्ण्वालयं व्रजेत्॥१८॥
तत्र नीलमणिमूर्तिः कृष्णनारायणोऽस्ति वै।
तत्रोषितं मया राजन् वर्षं श्रीपुरुषोत्तमे॥१९॥
तुष्ट्यर्थं देवदेवस्य व्रतिना दिव्यचक्षुषा।
दृष्टा देवाश्च मुनयः प्रतिरात्रं समागताः॥२०॥
अनादिश्रीकृष्णनारायणस्य दर्शनाय ये।
महिमैष न कुत्रापि पुरा दृष्टो मया नृप॥२१॥
संहितानां कथास्तत्र श्रुताः कल्पान्तरार्थगाः।
तत्स्थानं दर्शनार्हं वै विद्यते नृपसत्तम॥२२॥
यथा वै रैवतीभूमिस्तथा नीलगिरिस्थलम्।
क्षेत्रद्वयं पुरा पश्चान्न भूतं न भविष्यति॥२३॥
त्वं यस्माद् विष्णुभक्तोऽसि तद्गत्वा श्रीधरं भज।
एवमुक्त्वा स वै विप्रश्चान्तर्धानं जगाम ह॥२४॥
अवाप्य विस्मयं राजा पुरोहितमुवाच यत्।
अमानुषमिदं वाक्यं श्रुतवेदानीं पुरोहितः॥२५॥
बुद्धिस्त्वरयते तत्र गन्तुं यत्र जगत्प्रभुः।
मम धर्मार्थकामाश्च त्वदायत्ताः पुरोहित॥२६॥
इदानीं त्वं पुरो याहि ममेष्टं साधितं भवेत्।
श्रुत्वा बाढं विप्र आह राजन् द्रक्ष्यसि केशवम्॥२७॥
यथा त्वं तत्तथा चाहं करिष्यामि तवार्थकम्।
तत्र वयं ततः सर्वे वत्स्यामः पुरुषोत्तमे॥२८॥
साफल्यं किमतो लोके परं यद्धरिदर्शनम्।
तत्र क्षेत्रे भगवतः सन्निधिं रोचते मम॥२९॥
प्रथमं मेऽनुजो यातु तद्देशं चारसंयुतः।
विद्यापतिर्जगन्नाथं नीलाद्रिं च वटं तथा॥३०॥
भूप्रदेशं प्रसमीक्ष्य प्रमीय च वसुन्धराम्।
समायातु विजानन् तत्क्षेत्रं नारायणाश्रयम्॥३१॥
श्रुत्वैवं चेन्द्रको राजा तथास्त्विति दिदेश तम्।
पुरोहितोऽप्यनुजं स्वं कथयामास तत्तथा॥३२॥
प्रस्थापयामास तं च कृतस्वस्त्ययनं द्विजैः।
विमाने पुष्पके स्थित्वा प्रोवाच सहयायिनः॥३३॥
अहो नः सफलं जन्म सुकल्या शर्वरी च नः।
द्रक्ष्यामो यद्भगवतो मुखपद्मं प्रमोक्षदम्॥३४॥
यं पश्यन्ति हृदि नित्यं योगिनः पारमेश्वराः।
तं नीलाचलवासं श्रीपतिं द्रक्ष्याम एव च॥३५॥
अदृश्यं संविलोक्यैव तरिष्यामो भवाम्बुधिम्।
यत्स्मृतिः पादरजकी द्रक्ष्यामस्तं जनायनम्॥३६॥
सरूपमुक्तिदं नाथं करिष्यामो दृशांचरम्।
अद्याऽहो प्राक्पुण्यपुञ्ज उत्थितो भगवत्प्रदः॥३७॥

वयं सर्वे चर्मदृग्भिर्लोकयिष्यामहे हरिम् ।
इत्थं वदन् ययौ व्योम्ना दिनार्धे पुरुषोत्तमम् ॥३८॥
ओड्रदेशं समुद्रं च वटं च नीलपर्वतम् ।
शंखचक्रगदापद्मधारिणो ददृशे जनान् ॥३९॥
अत्यद्भुतां सुवसतिं साक्षात्तनुभृतो हरेः ।
अथ नीलाद्रिनिकटे स्थले दिव्येऽतिशोभिते ॥४०॥
विमानं स्वं क्षितौ तत्राऽवतारयत् समस्थले ।
उपत्यकायामारूढो मुकुन्दालोकनोत्सुकः ॥४१॥
तत्र शुश्राव भगवद्भक्तयालापान् गिरौ मुहुः ।
अभियातश्च वै तत्र ददर्श शबरालयान् ॥४२॥
शबरदीपकं चापि विष्णुभक्तांश्च चिह्नितान् ।
दृष्ट्वा प्रणम्य शिरसा तस्थौ यावत् सविप्रकः ॥४३॥
तावद् विश्वावसुर्नाम शबरः परमेश्वरम् ।
पूजयित्वा समायातस्तं पप्रच्छ सविप्रकः ॥४४॥
अत्रास्ते भगवान् विष्णुर्जगन्नाथो महाप्रभुः ।
तदर्थं चागतो दूराद् दर्शनं कारयात्र मे ॥४५॥
इन्द्रद्युम्नस्य नृपतेरवन्तीपुरवासिनः ।
पुरोहिताऽनुजश्चाऽहं विद्यापत्यभिधानकः ॥४६॥
प्रेषितस्तेन राज्ञाऽत्र जिज्ञासुना यियासुना ।
हरिं दिदृक्षुणा मार्गं द्रष्टुं प्राङ्नीलमाधवात् ॥४७॥
दृष्ट्वा सर्वां नरपतेर्वार्तां नेष्यामि सोऽप्यहम् ।
निराहारो ध्रुवं साधो तन्मां कृष्णं प्रदर्शय ॥४८॥
श्रुत्वैवं शबरः सोऽपि प्राक् श्रुतां संहिताकथाम् ।
सस्मार तत्र यद्राजा चेन्द्रद्युम्नो हि वैष्णवः ॥४९॥
समागत्याऽत्र देवेशं चतुर्धा स्थापयिष्यति ।
वाजिमेधसहस्रं च भूमावत्र करिष्यति ॥५०॥
पृथिव्यन्तर्गते लीने माधवे नीलमाधवे ।
पुना राजा तमागत्य दारवं स्थापयिष्यति ॥५१॥
सोऽयं कालः समायातो गाथा सत्या भवेद् यदि ।
नीलमणिमयो नाथश्चादृश्यतां गमिष्यति ॥५२॥
अन्तर्धानं भगवतः सन्निधाने उपस्थितम् ।
तदेनं दर्शयाम्येव नीलेन्द्रमणिमच्युतम् ॥५३॥
इति विचार्य शबरो ब्राह्मणं प्राह हृद्गतम् ।
अस्माभिः श्रीलक्ष्मीनारायणसंहिता संश्रुता ॥५४॥
तत्रोदन्तः समायातश्चेन्द्रद्युम्नो महीपतिः ।
जगन्नाथे महाक्षेत्रे वासं नैजं करिष्यति ॥५५॥
नीलपाषाणमूर्तेस्ते दर्शनं विप्र जायते ।
भाग्यवाँस्त्वं ततश्चेन्द्रद्युम्नस्याऽपेक्षयाऽत्र वै ॥५६॥
राज्ञस्त्वस्य नीलमणिप्रभोर्न दर्शनं भवेत् ।
चक्षुर्भ्यां पश्य तं नीलमाधवं नीलशैलगम् ॥५७॥
नीलमणिवपुषं तमेहि यामो ह्यधित्यकाम् ।
इत्युक्त्वा तं करे धृत्वा गहनेन च वर्त्मना ॥५८॥
उपर्युपर्युपारुह्य शिलाकण्टकशालिनि ।
एकैकनरगम्ये च दुर्गमे निर्जने स्थले ॥५९॥
वृक्षच्छायातमःप्राये समानीय स शाबरः ।
दर्शयामास रौहिणं कुण्डं तीर्थं सुपावनम् ॥६०॥
तस्याऽत्र पूर्वभागेऽसौ कल्पछायावटो महान् ।
एतयोरन्तरे ब्रह्मन्निकुंजाभ्यन्तरे स्थितम् ॥६१॥
पश्य कृष्णं जगन्नाथं साक्षाच्छ्रीपुरुषोत्तमम् ।
इत्येवं दर्शयामास नीलपाषाणकं हरिम् ॥६२॥
स तु विप्रस्तत्र कुण्डे स्नात्वा सर्वात्मना हरिम् ।
प्रणम्य दूरतश्चैकमनास्तुष्टाव चान्तरे ॥६३॥
अक्षरातीतभगवन्कृष्णनारायणप्रभो ।
मुक्तेशजीवहृदयपरात्पर नमोऽस्तु ते ॥६४॥
सर्वकर्मसमाराध्ययोगसाध्य नमोऽस्तु ते ।
प्रेमपाशविषयात्मँस्तीर्थात्मँस्ते नमोनमः ॥६५॥
नमस्तेजःस्वरूपाय पावनाय नमोनमः ।
हुताशनाय देवाय हृच्छ्रयाय च ते नमः ॥६६॥
मन्त्रस्थाय जीवनाय निर्वाणाय च ते नमः ।
सर्वानन्दप्रदात्रे ते ब्रह्मेशाय नमोनमः ॥६७॥
मायिने तत्त्विने मूर्तिमते विश्वाससाक्षिणे ।
जिष्णवे बहुशिरसे कमलेशाय ते नमः ॥६८॥
मामुद्धर कृपासिन्धो त्राहि वासनयाऽन्वितम् ।
इन्द्रद्युम्ननृपस्यापि कुरु संकल्पपूरणम् ॥६९॥
इति विद्यापतिः स्तुत्वा ओमित्येवं जजाप ह ।
ततः स शबरः प्राह कृतार्थस्त्वं तु साम्प्रतम् ॥७०॥
गृहं यावः क्षुधितोऽसि वासोऽरण्येन चोचितः ।
हिंस्राणां पादचारोऽयं प्रदेशोऽस्ति भयप्रदः ॥७१॥
इत्युक्त्वा शबरो नैजं गृहं निनाय भूसुरम् ।
मार्गेऽपि विषमे नाऽस्य श्रमो यत् कृष्णदर्शनम् ॥७२॥
शबरो भोज्यपानाद्यैरतिथिं समपूजयत् ।
उवाच कच्चित् तृप्तोऽसि शाबरैर्वस्तुभिर्द्विज ॥७३॥
तव प्रतोषणादिन्द्रद्युम्नस्तुष्टो भविष्यति ।
विप्रः प्राहाऽऽश्चर्यमेतत् त्वद्गृहे दिव्यवैभवाः ॥७४॥
राज्यातिवर्तिनश्चैते कुत एते वदात्र माम् ।
शबरः प्राह देवाद्या नित्यमायान्ति वै हरेः ॥७५॥

दिव्योपचारानादाय पूजनाय जगत्पतेः ।
स्तुत्वा समर्च्याऽर्पयित्वा नर्तयित्वा प्रयान्ति च ॥७६॥
तानीमानि हि दिव्यानि सर्वोपकरणानि वै ।
तैर्वयं क्षीणरोगाश्च निवसामोऽर्बुदायुषः ॥७७॥
विष्णुप्रसादभोगेन पापक्षयं च दिव्यताम् ।
श्रुत्वाऽऽश्चर्यपरो विप्रः कृतार्थं स्वममन्यत ॥७८॥
अहो त्वत्रैव वस्तव्यं भगवच्छरणे सदा ।
यादृशो विष्णुभक्तोऽयं मया भाव्यं तथैव च ॥७९॥
किं गत्वा स्वगृहे मेऽस्ति विचार्येत्थं जगाद तम् ।
कृष्णदास्ये मया वृत्त्यं मयि ते चेदनुग्रहः ॥८०॥
किमन्यसेवया लोके विधास्ये स्वामिसेवनम् ।
यदि पुण्यं भवेत्पौर्वं लभते स्वामिसेवनम् ॥८१॥
साधु मित्र त्वया सार्धं पुण्यान्मे संगमोऽस्ति यत् ।
साधुसंगेन संसारं तरिष्ये दुस्तरं विषम् ॥८२॥
सारात्सारतरं पुण्यं वैष्णवेन सहासनम् ।
शबरस्तु तदा प्राह तथास्त्विति परं शृणु ॥८३॥
इन्द्रद्युम्नं समादाय वासं चात्र कुरु द्विज ।
नीलशैलकृता मूर्तिस्तावता लयमेष्यति ॥८४॥
इमां प्राचीनमूर्तिं च नैव द्रक्ष्यति भूपतिः ।
हरिरचिराद्वालुकास्वन्तर्धानं गमिष्यति ॥८५॥
स चागत्य नृपोऽदृष्ट्वा श्रीपतिं पुरुषोत्तमम् ।
प्रायोपवेशनस्थश्च स्वप्ने द्रक्ष्यति माधवम् ॥८६॥
हर्यादेशाद् दारुमयं हरेर्मूर्तिचतुष्टयम् ।
वेधोद्वारा प्रतिष्ठाप्य पूजयिष्यति भक्तितः ॥८७॥
कारयिष्यति देवस्य प्रासादं गगनोच्छ्रयम् ।
आवयोः स्थास्यति वंशो यावन्मूर्तिस्तु दारवी ॥८८॥
नीलेन्द्राश्ममयं स्मृत्वा स्नात्वा सिन्धौ ततः परम् ।
इन्द्रद्युम्नं प्रयाहि त्वं समानयाऽत्र तं नृपम् ॥८९॥
इत्युक्तो ब्राह्मणः स्नात्वा नत्वा विमानमास्थितः ।
सायं जगाम चावन्तीं नृपं दृष्टमवर्णयत् ॥९०॥
जगन्नाथे तदा क्षेत्रे वायुश्चण्डगतिर्ववौ ।
सायाह्नेऽर्चनवेलायामभितः स्वर्णवालुकाः ॥९१॥
उड्डीयन्ते स्म पवनात् ताभिश्छन्नः स माधवः ।
रौहिणकुण्डश्छन्नोऽपि वालुकापर्वतोऽभवत् ॥९२॥
देवाद्या वालुकाराशिं ददृशुस्ते न माधवम् ।
रौहिणं च तथा कुण्डं न ददृशुः क्षणान्तरे ॥९३॥
सर्वे ते प्रार्थयामासुः स्वापराधक्षमां प्रति ।
कथं नः सेवकाँस्त्यक्त्वा युगपन्नहि दृश्यसे ॥९४॥
येषामर्थेऽत्र धृतवान् मूर्तिरूपं कलेवरम् ।
ताननाथान् परित्यज्य कथं पृथ्व्यां तिरोहितः ॥९५॥
न प्रासादो न च स्थानं न मार्गो न भवानपि ।
न कुण्डं दृश्यते चात्र कथं कोपरतवेदृशः ॥९६॥
अस्माँश्चाप्यत्र प्रलये विकर्षय त्वया सह ।
सुराणां शोचतामेवं व्योमवाणी बभूव ह ॥९७॥
भो सुरा मा प्रशोचन्तु मदिच्छा विलये ध्रुवा ।
ततो मे दर्शनं लीनं परिवर्तनमिष्यते ॥९८॥
ब्रह्मा वदिष्यति सर्वमवतारान्तरं मम ।
श्रुत्वा देवा ययुः स्वर्गं शबराः शोकमाप्नुवन् ॥९९॥
नीलाद्रिर्वालुकाव्याप्तो बभूव दृश्यतेऽभितः ।
नीलमाधववाञ्छेयं यतस्तिरोऽभवत् स्वयम् ॥१००॥
अमन्यन्त च शबरा अथ विद्यापतिर्द्विजः ।
विमानेनाऽवन्तिकायामिन्द्रद्युम्नालयं ययौ ॥१०१॥
निर्माल्यमालां नीलाख्यमाधवस्य ददौ नृपे ।
राजा तुतोष निर्माल्यमालां शिरसि धारयन् ॥१०२॥
मालात्मकं प्रपश्यामि नीलमाधवमत्र वै ।
नमामि मालिकां दिव्यां भक्तमानसपूरणीम् ॥१०३॥
इत्युक्त्वा विप्रहस्तेन मालां कण्ठे ह्यधारयत् ।
मालात्मिकां श्रियं राजा तुष्टाव पारमेश्वरीम् ॥१०४॥
नय मां त्वं महालक्ष्मि यत्रास्ते भगवान् पतिः ।
इत्युक्त्वा न्यषीददृराजा समाजेऽवन्तिवासिनाम् ॥१०५॥
विप्रः पृष्टोऽथ वृत्तान्तं पुरुषोत्तमक्षेत्रजम् ।
सप्रकाशं हि सदसि वर्णयामास विस्तरात् ॥१०६॥
भिल्लद्वीपाऽवलोकं च समुद्रस्नानमित्यपि ।
नीलाद्रिरोहणं नीलमाधवस्याऽभिदर्शनम् ॥१०७॥
सुस्नानं रौहिणे कुण्डे दिव्यवटस्य दर्शनम् ।
शबराणामावसथान् वर्णयामास सर्वशः ॥१०८॥
नीलेन्द्रमणिमूर्तेश्च वर्णनं च यथातथम् ।
नीलेन्द्रमणिपाषाणमयी मूर्तिः पुरातनी ॥१०९॥
आरसेयी चाकचक्यमयी प्रपूजिता सुरैः ।
माला तस्यै चार्पितेयं सुरैर्म्लायति या न हि ॥११०॥
रिच्यते न च गन्धेन सेयं त्वत्कण्ठगा नृप ।
तत्रत्यं ते वर्णयिष्ये पूजनादि प्रदिव्यकम् ॥१११॥

भुक्तिर्मुक्तिश्च वै राजन् द्वे तत्र युगपत्स्थिते ।
न जरारोगशोकादिदुःखं तत्र हि विद्यते ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने इन्द्रद्युम्नस्य साक्षाच्छ्रीपुरुषोत्तमदर्शनं, पुरोहितभ्रातुर्विद्यापतेर्जगन्नाथक्षेत्रे प्रेषणम्, आगत्य यथाविलोकनतद्वर्णनम्, झञ्झावातेन वालुकासु नीलमाधवलयश्चेत्यादिनिरूपणनामा चतुरशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८४ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! ततो विद्यापतिः प्राह सभास्थले ।
दिव्यतां तस्य क्षेत्रस्य यथावत् कथयामि ते ॥ १ ॥
विप्रः प्राह च मध्याह्ने दिव्यगन्धो ववौ मरुत् ।
सुरा नैवेद्यदानार्थे व्योममार्गात्समाययुः ॥ २ ॥
वादनानि गायनानि सुरस्त्रीणां तदाऽभवन् ।
सहस्रमुपचाराणां देवैस्तस्मै समर्पितम् ॥ ३ ॥
सम्पूज्य जयपूर्वास्ते ययुः स्वर्गं सुरास्ततः ।
विश्वावसुः शबरो मे माधवस्य प्रसादनम् ॥ ४ ॥
भोज्यं माल्यं ददौ पूतं यदत्राऽपहृतं मया ।
प्रसादः शर्करात्मा च दीयतां सदसे नृप ॥ ५ ॥
समन्ताद् गहनाकीर्णं क्षेत्रं नीलाद्रिनामिकम् ।
तीर्थराजस्य वेलायां स्वर्णवालुकया वृतम् ॥ ६ ॥
विचित्रदृश्यं देवानां मानवानां तु का कथा ।
अद्रेः शृंगे कल्पजीवी महानुच्चो वटोऽस्ति च ॥ ७ ॥
दीर्घायतः पुष्पफलवर्जितः पल्लवोज्ज्वलः ।
तत्पश्चाद् रौहिणं कुण्डं तत्पूर्वे वेदिकास्थितः ॥ ८ ॥
न्यग्रोधच्छायया शीतश्चेन्द्रनीलमयो हरिः ।
चक्रगदाधरश्चास्ते स्वर्णपद्मोपरि प्रभुः ॥ ९ ॥
एकाशीत्यङ्गुलमितो मन्दहास्यस्फुरन्मुखः ।
राजीवसौम्यनेत्रश्चाऽमृतपूर्णाननः प्रभुः ॥१०॥
वपुषोऽश्ममयत्वेऽपि चन्द्रोज्ज्वलः स्मिताधरः ।
हाससंफुल्लगण्डाभ्यां रुचिरं चिबुकं हनुः ॥११॥
कर्णयोः कुण्डलाभ्यां च राजद् वक्षश्च मालया ।
ग्रैवेयकैश्च सौवर्णैः रत्नाञ्चितैः समुज्ज्वलैः ॥१२॥
पीनायतस्कन्धयुगजानुदीर्घचतुर्भुजः ।
आकर्णान्तायतकोणवक्रनेत्रकटाक्षकम् ॥१३॥
सकौस्तुभं कंकणोर्मिकाऽङ्गुलीयकभूषितम् ।
निम्ननाभिधरं चाधस्तनुरोमालिमञ्जुलम् ॥१४॥
सुरत्नमेखलाराजत्कटिकौशेयधौत्रकम् ।
सकिंकिणीमञ्जिराढ्यरक्ततलाङ्घ्रिपत्कजम् ॥१५॥
जघनं सुन्दरं दिव्यं कामाश्रयं च सुन्दरम् ।
लिंगं तेजोमयं रम्यं सर्वाकर्षणभाजनम् ॥१६॥
सर्वाशाद्योतको देवो नीलाद्रेरुपरि स्थितः ।
वामपार्श्वगता लक्ष्मीराश्लिष्टा पद्मपालिना ॥१७॥
वल्लकीवादनपरा भगवन्मुखलोचना ।
सर्वलावण्यशोभाढ्या सर्वाभरणभूषिता ॥१८॥
सर्वालंकृतितेजस्का प्रोद्भिन्ननवयौवना ।
छत्रीभूतफणावृन्दः शेषः पश्चाद् विलोकितः ॥१९॥
अग्रे व्यवस्थितं दृष्टं वपुर्बिभ्रत्सुदर्शनम् ।
कृताञ्जलिपुटं तस्य पश्चाद् गरुडमास्थितम् ॥२०॥
सजीवा इव ते भक्तानुग्राहका विलोकिताः ।
तत्र चेतो मम राजन्नत्यन्तमभिधावति ॥२१॥
अनेकजन्मसाहस्रपुण्यपाको हि पश्यति ।
सर्वसाधनलभ्यं तद्दर्शनात्प्राप्यतेऽक्षरम् ॥२२॥
तेन सर्वं कृतं मोक्षसाधनं येन वीक्षितः ।
त्वं च राजँस्त्वरयैव विलोकय जगत्प्रभुम् ॥२३॥
न जाने श्वः सूर्यद्रष्टा भविष्यसि न वेति च ।
श्वः कार्यमद्य कर्तव्यं मोक्षार्थं पारमेश्वरम् ॥२४॥
इत्युक्तश्चेन्द्रद्युम्नस्तु हर्षमवाप पुष्कलम् ।
कृतकृत्योऽस्मीति चाह प्रसादमालिकाग्रहात् ॥२५॥
तया दर्शनपात्रत्वं प्राप्तं चाद्य मया हरेः ।
सर्वात्मना च राज्येन सह गन्तव्यमेव च ॥२६॥
तत्रावासं सदा कृत्वा करिष्ये हयमेधकान् ।
सर्वोपचारैः श्रीनाथं पूजयिष्ये दिने दिने ॥२७॥
दास्येन सेवया कृष्णं प्रीणयिष्ये रमापतिम् ।
एवं राजा समुवाच तावदायाद्धि नारदः ॥२८॥
पूजितो वन्दितो राज्ञा राजानं समुवाच सः ।
अवतीर्णो नरं द्रष्टुं बदर्यां च नरायणम् ॥२९॥
तव कीर्तिं देवताभ्यः श्रुत्वा सत्ये समागतः ।
श्रीजगन्नाथगमने व्यवसायं विशेषतः ॥३०॥
तव ज्ञात्वा प्रसन्नोऽस्मि जातस्तं याहि सेवय ।
सहस्रजन्माभ्यासैश्च भक्तिर्भवति माधवे ॥३१॥
ब्रह्मा चाराध्य तं नाथं लेभे पैतामहं पदम् ।
तत्पुत्रोऽहं तद्वंशस्त्वं भक्त्या शोभा सदा हि नः ॥३२॥
अनाद्यविद्यानाशाय समर्था भक्तिरुत्तमा ।
तरिर्भक्तिभवाब्धौ सा जन्मरोगस्य भेषजम् ॥३३॥

मातेव रक्षति भक्तान् सन्तः पुष्यन्ति वै तथा ।
अक्षय्यं पदं तथा मुक्तिर्लभ्यते तदनुग्रहात् ॥३४॥
बहुयानां शलभानां दावतुल्या हरिप्रिया ।
सर्वतीर्थफलदात्री तारयित्री निमज्जताम् ॥३५॥
तपांसि यज्ञा दानानि व्रतानि धर्मसत्क्रियाः ।
एषां साहस्रकोट्यश्च न भक्तेरयुतांशकः ॥३६॥
सा त्रिधा गुणभेदेन तुरीया निर्गुणा मता ।
स्वार्थाऽभिचारयुक्ता सा तामसी भक्तिरीरिता ॥३७॥
स्वार्थपरार्थसम्मिश्रा राजसी भोगवाञ्छया ।
परार्थमात्रसन्धेया सात्त्विकी सुखभाजना ॥३८॥
फलेहारहिता सा निर्गुणा श्रीपुरुषोत्तमे ।
निर्गुणा मुक्तये प्रोक्ता प्रेमसेवात्मिका हरेः ॥३९॥
सात्त्विक्या ब्रह्मणः स्थानं राजस्या शक्रलोकताम् ।
तामस्या पितृलोकादीन् यान्ति पुनश्च भूजनुम् ॥४०॥
उत्तमामुत्तमां कुर्यात् तेन मुक्तिर्भवेत् क्वचित् ।
कुलाचारादिहीनोऽपि भक्तिमान् संप्रशस्यते ॥४१॥
सर्वविद्याधिवासोऽपि भक्तिहीनो विनिन्द्यते ।
यया वेत्ति परब्रह्म परा विद्या तु सा मता ॥४२॥
येन प्रीणाति भगवान् सत्क्रिया सा प्रकीर्तिता ।
ताभ्यां युक्तो भवेद् भक्तो भागवतोत्तमो हि सः ॥४३॥
तत्पादपांसुना विश्वं पूयते सचराचरम् ।
वासुदेवे तथा भक्ते साम्यं सञ्जायते सदा ॥४४॥
तयोरैश्वर्यरूपादिभेदो नैव च नैव च ।
शान्तचित्तस्तथा सौम्यो जितेन्द्रियो ह्यहिंसकः ॥४५॥
अद्रोग्धा कृपयायुक्तश्चास्ते यश्चाऽविनिन्दकः ।
गुणग्राही सदाचारः परसौख्यसुखान्वितः ॥४६॥
सर्वत्र श्रीकृष्णनारायणद्रष्टा विमत्सरः ।
दीनानुकम्पो हितकृद्धरौ कोट्यधिप्रेमवान् ॥४७॥
सतां सेवापरो देवपूजकः पितृतर्पकः ।
सर्वं विष्णुमयं जानन् समष्टिव्यष्टिमित्यपि ॥४८॥
अभेदेनैव पश्यँश्च दास्यं करोति वै हरेः ।
स्वामिसेवकभावेन सेवको वर्तते च यः ॥४९॥
हरिं भावयति कीर्तयति नमःकरोति च ।
भजत्येव प्रभुं नित्यं नान्येऽवधानमाचरेत् ॥५०॥
शिलास्वर्णद्रव्यलोष्टस्त्रीकूटकण्टकादिषु ।
मित्रशत्रुबन्धुभिन्नादिषु साम्यसमाधिमान् ॥५१॥
नामध्यानपरो विष्णोर्जयवाणीरतः सदा ।
देवचिह्नप्रियः ख्यातो भक्तो भागवतोत्तमः ॥५२॥
शंखचक्रगदापद्मचन्द्रतिलकशोभितः ।
कण्ठीमालाद्युतो वृन्दादलमाल्यविभूषितः ॥५३॥
रागद्वेषमदमानविहीनस्तृष्णिकाक्षयः ।
भक्तो भवति कामादिवर्जितो वासनाक्षयः ॥५४॥
इत्युक्तश्चेन्द्रद्युम्नश्च प्रीतिमान् नारदं प्रति ।
उवाच साधुसंगो मे भाग्यादद्य उपस्थितः ॥५५॥
तदावां यानमास्थाय पश्यावो नीलमाधवम् ।
एवं निश्चित्य पञ्चम्यां बुधे ज्येष्ठस्य चार्जुने ॥५६॥
पक्षे पुष्ये चेन्द्रद्युम्नः कारयामास घोषणाम् ।
यथाविभवतः सैन्यैः प्रजाभिर्बान्धवादिभिः ॥५७॥
नीलाद्रिगमनं कार्यं यावज्जीवं समर्प्य च ।
या वृत्तिर्दीयते चात्र तथा तत्रापि जीवतु ॥५८॥
राजानः सावरोधाश्च सामात्याः सपरिच्छदाः ।
रथैर्गजैस्तुरगैश्च कोषैः सह पदातिभिः ॥५९॥
सज्जा व्रजन्तु वै तत्र ब्राह्मणाः साग्निहोत्रिणः ।
वणिजः सहभाण्डैश्च सपण्याः पण्यजीविनः ॥६०॥
नृत्यगायनवादित्रज्योतिर्विद्यासुबुद्धयः ।
वैद्याश्च कथका भट्टाः सन्तश्च वारयोषितः ॥६१॥
गावः शकुन्तपाश्चापि शाकुनिकाश्च सेवकाः ।
दासा दास्यस्तथा यान्तु क्षेत्रं श्रीपुरुषोत्तमम् ॥६२॥
षष्ठ्यां स्वयं च मांगल्यं कारयामास यात्रिकम् ।
स्नात्वा तीर्थजलैः राजा नान्दीमुखानकारयत् ॥६३॥
हवनं च ततः कृत्वा चक्रे वह्निं प्रदक्षिणम् ।
ततो मांगल्यनेपथ्यविधानमुपचक्रमे ॥६४॥
हेमपीठे हरिं प्राच्यं तत्प्रसादस्य मालिकाम् ।
दधार प्रथमं राजा ध्यायन् श्रीपुरुषोत्तमम् ॥६५॥
यात्रार्थं च विनिर्दिश्य दक्षिणं पादमुद्दधौ ।
दक्षिणाः प्रददौ विप्रेभ्यो वामे गणिकेडितः ॥६६॥
श्वेताश्वकुंजरपारावतहंससुमालिकाः ।
सचूतपल्लवं पूर्णकुंभं पश्यन् ययौ नृपः ॥६७॥
नृसिंहमन्दिरं गत्वा पूजयित्वा हरिं सतीम् ।
द्वारमागत्य च यानं वैहायसं महत्तमम् ॥६८॥
समारुरोह समुनिः सान्तःपुरस्तथाऽपरे ।
अन्यैः सहस्रैर्यानैश्च प्रतस्थिरे पुरीं प्रति ॥६९॥
जयशब्दास्तूर्यशब्दा बभूवुः पुष्पवृष्टयः ।
नानायानसमारूढाः कोटिशश्च जनास्ततः ॥७०॥
ससंभाराः सकुटुम्बा ययुः श्रीपुरुषोत्तमम् ।
दिवसार्धेन ते सर्वे प्रापुरुत्कलभूमिकाम् ॥७१॥

सीम्नि स्थितां चर्चिकाख्यां देवीं पुपूजुरीश्वरीम् ।
चित्रोत्पलां नदीं गत्वा जलपानादि चाचरन् ॥७२॥
स्वादुभोज्यानि च बुभुजिरे सर्वे यथार्हतः ।
विशश्रमुर्नदीतीरे सैन्याऽऽवासादि तत्र च ॥७३॥
चक्रुः सायंविधिं चापि रात्रौ विनोदमादधुः ।
प्रातः स्नात्वा नित्यपूजां जलाहारादिकं तथा ॥७४॥
कृत्वा तस्थुस्तदा तावदोढ्रराजस्य सेवकः ।
इन्द्रद्युम्नं समायातः समुवाच नमोऽन्वितः ॥७५॥
उत्कलेशनृपश्चात्र भवन्तं द्रष्टुमिच्छति ।
विज्ञाय सार्वभौमं च देवं भवन्तमागतम् ॥७६॥
सोपायनो नदीतीरे प्रतीक्षते निदेशनम् ।
श्रुत्वा तद्वचनं राजाऽऽह्वयामासोढभूपतिम् ॥७७॥
वैष्णवैः सचिवैर्युक्तं पप्रच्छ कुशलं शुभम् ।
ओढ्रपतिर्ननामैनमुपदाः पुरतो न्यधात् ॥७८॥
परस्परं सुकुशलं स्वागतं चक्रतुस्ततः ।
प्रशशंसतुर्वैष्णवौ यज्जन्मसाफल्यमित्यपि ॥७९॥
अथोढ्रराजस्तं प्राह दक्षिणाऽब्धितटे हरिः ।
नीलाद्रौ कानने चास्ते लोकसञ्चारवर्जिते ॥८०॥
द्वितीयेऽह्नि वात्यया वालुकाछन्नः स पर्वतः ।
छन्नश्च रौहिणकुण्डश्छन्नश्च नीलमाधवः ॥८१॥
छिन्नभिन्नानि जातानि शबराणां गृहाण्यपि ।
कोपोऽयं चिन्तनादूर्ध्वं जातोऽपराधतः क्वचित् ॥८२॥
मम राज्यं भवतोऽस्ति यथाज्ञां प्रकरोम्यहम् ।
स्वागतं भोजनाद्यं च प्रेषयामि जनादिभिः ॥८३॥
इत्युक्त्वा चाशिषो लब्ध्वोढ्रपतिर्मौनमास्थितः ।
इन्द्रद्युम्नो नारदं च प्राहाऽऽगमस्तु निष्फलः ॥८४॥
नीलमाधवदेवस्य दर्शनं नैव चेद् यदि ।
करिष्येऽनशनं त्वत्र मरिष्ये मोक्षणं प्रति ॥८५॥
नारदस्तं तदा प्राह वैष्णवेच्छां न निष्फलाम् ।
करोति भगवाँस्तं त्वं प्रेक्षसे पार्थिव प्रभुम् ॥८६॥
धैर्यमावह भगवान् स्वतन्त्रोऽस्तीति विद्धि भोः ।
केवलो भक्तिवशगो भक्त्या ते वशमेष्यति ॥८७॥
वैष्णवस्त्वं पद्मयोनेः पञ्चमः पुरुषोऽसि वै ।
पितामहोऽप्यत्र कार्ये भवतो मां नियुक्तवान् ॥८८॥
सर्वं ते कथयिष्यामि नीलपर्वतसन्निधौ ।
श्रुत्वा राजा प्रहृष्टश्च मेने भाग्यं प्रवर्धितम् ॥८९॥
यन्मां पितामहश्चापि सहायं प्रददाति वै ।
अथ सर्वान् नीलशैलं गन्तुं त्वाज्ञां चकार ह ॥९०॥
ओढदेशाधिपो याने निषसाद च भूभृता ।
सह सर्वे व्योममार्गैर्महानदीं विहाय च ॥९१॥
एकाम्रवनकं क्षेत्रं प्रापुः क्षणान्तरे ततः ।
गन्धवहां नदीं त्यक्त्वा कोटिलिंगेश्वरं हरम् ॥९२॥
पूजावादित्रनिर्घोषान्वितं दृष्ट्वा स नारदम् ।
पप्रच्छाऽऽरण्यकं वीक्ष्य मन्यमानो हि माधवम् ॥९३॥
नीलाद्रिशिखरावासः प्राप्तः किं परमेश्वरः ।
मुनिः प्राह स नीलाद्रिर्वर्तते योजनत्रये ॥९४॥
अयन्तु शंकरावासः कोटिलिंगेश्वरात्मकः ।
शंभुर्भीतः शरणं श्रीहरेः पुराऽत्र चागतः ॥९५॥
पार्वतीं संविवाह्येशो हैमवासं चकार सः ।
मेनकां पार्वतीं प्राह बहुकाले गते शुभम् ॥९६॥
पतिस्ते निर्गुणः पुत्रि ! गृहद्वारविहीनकः ।
कियन्मम गृहे वासं करिष्यति विना गृहम् ॥९७॥
विना भूषाः समृद्धिं च शोभसे नैव पुत्रिके ।
वद सौधं तु निर्मातुं पृथक् स्थातुं स्वकालये ॥९८॥
इत्युक्ता शंकरं प्राह पार्वती नम्रमानसा ।
भगवँश्चिरवासो वै श्वशुरस्य गृहेऽगुणः ॥९९॥
पराधीननिवासस्तु विवाससदृशस्ततः ।
क्षौद्रीयसामपि तद्वन्महतामपि दुःखदः ॥१००॥
इत्युक्तः शंकरस्तूर्णं काशीं वासाय निर्ममे ।
पूर्वसागरगामिन्या गंगाया उत्तरे तटे ॥१०१॥
वाराणस्यां पञ्चक्रोशमितायां रत्नमण्डपे ।
तया रेमे पशुपतिर्बहुकालं पुरे स्वके ॥१०२॥
अथ राजा दिवोदासः सर्वान् देवान् हि काशितः ।
विसर्जयामास राज्यं चकार वैष्णवेषु च ॥१०३॥
कोटिलिंगानि संस्थाप्य शंभुः कैलासकं ययौ ।
राजानो बहवः पश्चाज्जाता वाराणसीभुवि ॥१०४॥
काशीराजेतिनामाऽपि शंकरोपासकोऽभवत् ।
तपसा शंकराल्लेभे वरं चाऽसंभवं पुरा ॥१०५॥
जेताऽसि कंसहर्तारं संग्रामे त्वमरिन्दम ।
तवाऽर्थेऽहं तदा योत्स्ये विष्णुना सह सर्वथा ॥१०६॥
श्रीहरिस्तद्वरं ज्ञात्वा चक्रं सुदर्शनं रणे ।
काशीराजसूदनाय प्राहिणोत् तच्च चक्रकम् ॥१०७॥
काशीराजशिरश्छित्वा पुरीं ददाह सर्वथा ।
तच्छ्रुत्वा कुपितः शंभुः पाशुपतास्त्रकं हरौ ॥१०८॥
मुमोच निष्फलं तच्च चकार भगवान् हरिः ।
तदा भयं समापन्नस्तुष्टाव शंकरो हरिम् ॥१०९॥

अपराधं क्षमस्वाऽद्य ते भक्तस्य हरे प्रभो ।
सृष्टोऽहं तामसो नाथ त्राहि मां शरणागतम् ॥११०॥
तदा चक्रं निवृत्तं शंकरात् कृष्णो बभूव तत् ।
प्रसन्नवदनः प्राह लक्ष्मीयुतो हसन् हरिः ॥१११॥
कालेनैतावता शंभो दुर्बुद्धिः कथमागता ।
हेतोर्नृपतिकीटस्य मया योद्धुमुपस्थितः ॥११२॥
त्वां ब्रह्माणं च मे चक्रं नाशयेत् क्रोधमन्त्रितम् ।
दयां करोमि मे भक्त याहि श्रीपुरुषोत्तमम् ॥११३॥
यदि वाञ्छसि रन्तुं वै चिरं सत्या समं तदा ।
दशयोजनविस्तीर्णे तत्र विरजमण्डले ॥११४॥
चित्रोत्पलां नदीमारभ्य यावद्दक्षिणोदधिः ।
श्रेष्ठो नीलाचलस्तत्र चतुर्धाऽहं व्यवस्थितः ॥११५॥
नीलमणिप्रतिमोऽहं तदुत्तरे वनं महत् ।
एकाम्रकाह्वयं तत्र निवासं निर्भयं कुरु ॥११६॥
मे पुरुषोत्तमक्षेत्रं त्वमेव परिपालय ।
इत्यादिष्टो ययौ शंभुस्तत्र वै वासमाचरत् ॥११७॥
ब्रह्मणा स्थापितः कोटिलिंगेश्वरोऽयमस्ति सः ।
श्रुत्वा राजा विमानाच्चाऽवाततार हरं प्रति ॥११८॥
पूजयामास विधिना ददौ दानानि भूरिशः ।
बिन्दुतीर्थे तत्र स्नात्वा श्रीशं सम्पूज्य तत्र च ॥११९॥
तस्थौ दध्यौ च तं शंभुं शंभुः साक्षादुवाच तम् ।
इन्द्रद्युम्न ! महाभागवतो न त्वादृशो भुवि ॥१२०॥
दुर्घटाऽपि च ते वाञ्छा शीघ्रं पूर्णा भविष्यति ।
नारदे पुनरादेहं यदादिष्टं स्वयंभुवा ॥१२१॥
तत् कल्पय प्रतिष्ठानं वाजिमेधपुरःसरम् ।
अन्तर्हितः खल्विदानीं नीलरत्नतनुर्हरिः ॥१२२॥
तत्र श्रीनरसिंहस्य क्षेत्रं कुरु च सन्निधौ ।
वाजिमेधसहस्रेण यजतां भूपतिर्ध्रुवम् ॥१२३॥
तदन्ते कल्पन्यग्रोधं प्रदर्शयाऽस्य भूपतेः ।
ब्रह्मरूपतरोस्तस्माच्चतस्रः प्रतिमाः शुभाः ॥१२४॥
घटिष्यते विश्वकर्माऽजः प्रतिष्ठापयिष्यति ।
ब्रह्मणो वरदानाच्च प्रयातेऽब्दसहस्रके ॥१२५॥
इन्द्रद्युम्नो हरिं साक्षान्मूर्तौ विलोकयिष्यति ।
दार्वीं तनुमास्थाय स्थितं दिव्यं नरायणम् ॥१२६॥
भज नारद ! राजाऽसौ भजतां स्वामिनं हरिम् ।
इत्युक्त्वाऽन्तर्दधे शंभू राजा विनामगोऽभवत् ॥१२७॥
ययौ पुरः कपोतेशस्थलीमासेदिवान्नृपः ।
सेनानिवेशयोग्यां च दृष्ट्वा सेनां न्यवेशयत् ॥१२८॥
बिल्वेश्वरकपोतेशौ पूजयित्वा च नारदम् ॥१२९॥
पप्रच्छ तौ कथं जातौ बिल्वेश्वरकपोतकौ ।
वद नः श्रीपतिप्राप्तिकरीं कथां सुशान्तिदाम् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने इन्द्रद्युम्नस्य विद्यापतिवर्णितश्रवणोत्तरं जगन्नाथं प्रति गमने निर्णयः, नारदागमः, प्रयाणम्, चित्रोत्पलातटे उत्कलेशाभिगमः, एकाम्रकवने कोटिलिंगेश-पूजनम्, इत्यादिनिरूपणनामा पञ्चाशीत्यधिक-पञ्चशततमोऽध्यायः ॥ ५८५ ॥

श्रीनारायण उवाच--

शृणु लक्ष्मि नारदस्तं नृपं प्राह कथां शुभाम् ।
बिल्वेशस्य कपोतेश्वरस्य ते कथयाम्यहम् ॥ १ ॥
पुरा कुशस्थली साऽऽसीत् तीक्ष्णकुशैः समावृता ।
तत्र तप्त्वा तपः शंभुः पूज्यः स्यामिति वाञ्छया ॥ २ ॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जपन् स तोषयामास हरिं श्रीपुरुषोत्तमम् ॥ ३ ॥
कपोत इव सूक्ष्मोऽभूदष्टमूर्तिरपि द्विजः ।
कपोतेश्वरतां यातस्तत्र सम्पूज्यतां गतः ॥ ४ ॥
तस्य संपूजका यान्ति श्रीपतिं पुरुषोत्तमम् ।
अथैकदा दानवास्तु भक्षयन्ति जनान् बहून् ॥ ५ ॥
पातालाद्वै समागत्य तत्र श्रीनीलमाधवः ।
विवरं पूरयामास बिल्वफलं तदन्तरे ॥ ६ ॥
निक्षिप्य द्रुममकरोत् स्थापयामास शंकरम् ।
तेन दानवरोधश्च जातस्तत्र बिलेश्वरः ॥ ७ ॥
शंकरः समभूत्तस्याऽर्चनाद् याति परं पदम् ।
अथ राजा विमानेन ययौ श्रीपुरुषोत्तमम् ॥ ८ ॥
तदाऽभूद् दुर्निमित्तं च स्पन्दो वामाऽक्षिहस्तयोः ।
पप्रच्छ नारदं राजा चापशकुनकारणम् ॥ ९ ॥
नारदः प्राह तृतीये सार्धं वालुकयाऽऽवृतः ।
नीलमाधवदेवोऽत्राऽदृश्यतां च गतो भुवि ॥१०॥
श्रुत्वा राजा शोकमग्नो बभूव तु क्षणोत्तरम् ।
प्राह पुरोहितं याहि मत्सुतं चाभिषेचय ॥११॥
मालवेषु सदाऽथाऽत्र निवत्स्यामि युगान्तरम् ।
प्राणान्न धारयिष्यामि न द्रक्ष्यामि यदा हरिम् ॥१२॥
आयुःशेषं करिष्यामि सफलं क्षेत्रमास्थितः ।
इति ब्रुवन्तं राजानं नारदः प्राह धैर्यतः ॥१३॥

हरेर्माया तादृशी वै मा मोहं याहि तत्र वै ।
मामुवाच स्वयं ब्रह्मा गच्छेन्द्रद्युम्नकं प्रति ॥१४॥
जगन्नाथः प्रयात्येषः न च द्रक्ष्यति माधवम् ।
न शोकस्तत्र कर्तव्यो वाच्य एवं स भूपतिः ॥१५॥
तत्कृते परमात्मानं प्रसाद्य पुरुषोत्तमम् ।
श्वेतद्वीपान्नयिष्यामि सहस्रान्ते महाक्रतोः ॥१६॥
इन्द्रद्युम्नोऽश्वमेधानां सहस्रेण यजन् हरिम् ।
तिष्ठतु च तदन्ते स द्रक्ष्यति दारवीं तनुम् ॥१७॥
सोऽवतारो हरेः पुनस्तेन ख्यातिं गमिष्यति ।
पुरा स्म मणिमूर्तिस्तु चतुर्धाऽवस्थितो हरिः ॥१८॥
दिव्यदारुवपुर्भूयश्चतुर्धाऽवतरिष्यति ।
आयाहि राजन् पश्यावो वालुकादिशमैश्वरीम् ॥१९॥
नीलाद्रौ वर्तते देवो नृसिंहो विघ्ननाशकः ।
पश्यामस्तं महोग्रं स विघ्ननाशं करिष्यति ॥२०॥
नीलमाधवशैलं च दृष्ट्वा यास्याव एव ताम् ।
कपोतेशस्थलीं तस्यां शालां सहस्रवार्षिकीम् ॥२१॥
विनिर्मायाऽश्वमेधेन यज श्रीपुरुषोत्तमम् ।
नृसिंहप्रतिमां तत्र यज्ञे पूजय नित्यदा ॥२२॥
विघ्ननाशो भवेद् येन तवेष्टं स करिष्यति ।
इत्युक्तश्चेन्द्रद्युम्नस्तां दिशं नत्वा ययौ पुरः ॥२३॥
तदा नारदसंसर्गाद् विदित्वा तु गिरेः शिरः ।
दिव्यसिंहवपुश्चास्ते कृष्णागुरुतरोरधः ॥२४॥
व्यात्तास्यो भीमदशनः पिंगसटाकुलो हरिः ।
हिरण्यकशिपोर्वक्षो दारयन् नखरैः प्रभुः ॥२५॥
अरुणाभो ललजिह्वः शंखचक्रधरो हरिः ।
किरीटमुकुटाढ्यश्च स्फारनेत्रभयंकरः ॥२६॥
दृष्ट्वा राजा प्रजाः सर्वे आनर्चुस्तं हरीश्वरम् ।
ततो ययुर्नीलमणिमाधवस्य स्थलं शुभम् ॥२७॥
न्यग्रोधं विपुलायामं शैलसान्नाहमुच्छ्रितम् ।
वालुकाभिः पूरितं च द्रुमं नारायणात्मकम् ॥२८॥
तथा स्थानं यत्र देवः स्वर्णसैकतसंवृतः ।
नारदो दर्शयामास नमन् स्मरन् मुहुः प्रभुम् ॥२९॥
वटमूलात् प्रतीच्यां हि नृसिंहस्योत्तरे नृप ।
अतिष्ठन् माधवो यत्र चतुर्मूर्तिधरः प्रभुः ॥३०॥
अनुग्रहीतुं त्वामेव पुनरत्रोद्भविष्यति ।
पुरे पौरैः स्थापिताऽन्या माधवस्य प्रतिकृतिः ॥३१॥
सापि मुक्तिप्रदा चास्ते का कथा ब्रह्मस्थापिता ।
आविर्भावतिरोभावौ प्रजायेते युगे युगे ॥३२॥
अनुग्रहार्थं भक्तानां स्थितोऽत्र करुणालयः ।
इति सन्दर्शितं स्थानमिन्द्रद्युम्नो ननाम तत् ॥३३॥
तुष्टाव परया प्रीत्या ध्यात्वा भूगर्भसंस्थितम् ।
सर्वेऽप्युपाया भगवन् भवन्ति तव दर्शने ॥३४॥
त्वयि दृष्टे प्रभिद्यन्ते वासनाकुलकोटयः ।
त्वमेव शरणं दीनमनुगृह्णीष्व मां विभो ॥३५॥
चर्मकृच्चक्षुषा पश्यामीश त्वां तत्प्रयोजनम् ।
इतिब्रुवन्तं चाकाशवाणी जगाद तं नृपम् ॥३६॥
मा चिन्तां व्रज भूपाल व्रजिष्ये त्वद्दृशोः पथम् ।
पैतामहं वचः प्राह नारदो यत्कुरुष्व तत् ॥३७॥
अथाऽऽह नारदस्तं च श्रद्धानं नृपं तदा ।
व्यवसाये सुकृतीनां देवा यान्ति सहायताम् ॥३८॥
तद् गच्छ राजँस्तत्रैव नीलकण्ठस्य सन्निधौ ।
स्थापयामि नृसिंहं च यागं कुरु च तत्पुरः ॥३९॥
दक्षिणे नीलकण्ठस्य धनुःशतान्तरे द्रुमः ।
चन्दनस्य वर्ततेऽस्य पश्चिमे भूमिका शुभा ॥४०॥
वाजिमेधसहस्रस्य क्षेत्रं दिव्यं भविष्यति ।
विश्वकर्मसुतस्तत्र प्रासादं घट्टयिष्यति ॥४१॥
गच्छ त्वमहमत्रैव स्थास्यामि दिनपञ्चकम् ।
आराध्यैनं दिव्यसिंहं साक्षाच्छ्रीपुरुषोत्तमम् ॥४२॥
प्रत्यर्चायां प्रतिष्ठाप्य प्राणेन्द्रियमनोयुतम् ।
नयिष्ये तत्र वै राजँश्चन्दनद्रुमसन्निधौ ॥४३॥
सन्निधावस्य यागस्तु फलातिशयवान् भवेत् ।
इत्युक्तो नृपतिस्तत्र ययौ ध्याने मुनिः स्थितः ॥४४॥
तावन्मनुष्यरूपेण पुत्रो वै देवशिल्पिनः ।
समाययौ त्वष्टृसुतो विश्वकर्मा तु सत्वरम् ॥४५॥
प्रासादं नरसिंहस्य पश्चिमाननमुत्तमम् ।
चतुर्थे दिवसे शीघ्रं पूर्णं चकार शोभनम् ॥४६॥
ततः प्रभाते विमले नारदः सुरमण्डलैः ।
देवीभिः सह नृत्यैश्च वादित्रैर्जयघोषणैः ॥४७॥
सुशोभितां विमानस्थां मणिरत्नाद्यलंकृताम् ।
मालासुगन्धलिप्तां च तेजःपरिधिशोभिताम् ॥४८॥
रम्यां प्रतिष्ठितप्राणां देवीभिरभिवाहिताम् ।
आदाय नरसिंहस्य प्रत्यर्चां प्रत्युपस्थितः ॥४९॥
राजाद्यास्तं प्रणिपत्य स्थापयामास मन्दिरे ।
धरारमाभ्यां सहितामिन्द्रद्युम्नोऽतितुष्टुवे ॥५०॥
'हयमेधसहस्रान्ते यथा त्वं चर्मचक्षुषा ।
दिव्यरूपं प्रपश्यामि तथाऽनुक्रोशय प्रभो ॥५१॥

यथा चेज्यसहस्रं मे निर्विघ्नं तत्समाप्यते ।
यज्ञेश त्वत्प्रसादान्मे तथा सान्निध्यमस्तु ते' ॥५२॥
इति स्तुत्वा विररामाऽऽरार्त्रिकं प्रचकार सः ।
ज्येष्ठशुक्लद्वादशी या स्वातीनक्षत्रसंयुता ॥५३॥
तस्यां प्रतिष्ठितः क्षेत्रे दिव्यसिंहो महर्षिणा ।
पूजयित्वा वाजिमेधसहस्रफलमाप्नुयात् ॥५४॥
पञ्चामृतैर्वा क्षीरेण नारीकेलरसेन वा ।
सपायसैरुपचारैर्जपापुष्पैः प्रपूजयेत् ॥५५॥
सर्वोपचारैः सन्तुष्य नृसिंहधाम चाप्नुयात् ।
वैशाखस्य चतुर्दश्यां शनेर्दिने स्वात्यृक्षके ॥५६॥
आद्यावतारो नृहरेः सन्ध्यायां तं प्रपूजयेत् ।
अथ यज्ञे समायाताः सुराः ऋषयो वैष्णवाः ॥५७॥
पितरो वेदयज्ञादिकुशला भूसुरास्तथा ।
त्रैलोक्ये ये च राजानः सिद्धा विद्याधरादयः ॥५८॥
किन्नरा देवगान्धर्वाश्चारणा वैष्णवाश्च ये ।
समायाता मण्डपश्च योजनद्वयभूतले ॥५९॥
कृतश्च वेदिका क्रोशे कुण्डो मध्ये विशालकः ।
कृतः क्रोशद्वये विप्रा यज्ञीयास्तत्र संस्थिताः ॥६०॥
मध्ये नृपाणां देवानामृषीणां च शचीपतिम् ।
पुरोधसा समं पूर्वमर्चयामास ऋद्धिभिः ॥६१॥
ततः सिद्धान् देवमुनीन्देवान् राज्ञश्च वैष्णवान् ।
विप्रादीन् पूजयामास प्राह यान्तु प्रसन्नताम् ॥६२॥
महेन्द्र ! चानुजानीहि प्रयक्ष्ये यज्ञपूरुषम् ।
हयमेधसहस्रेण यावत्तत्पूर्णतां व्रजेत् ॥६३॥
तावत्त्वं त्रिदशैः सार्धं सदोमध्यगतो वस ।
नीलमाधवप्राप्त्यर्थे यजामि नेन्द्रताऽऽप्तये ॥६४॥
पुनः प्रकाशिते कृष्णे श्रेयो वोऽपि भविष्यति ।
श्रुत्वा देवास्तदा प्राहुर्वयं सानुमतास्तव ॥६५॥
सुखं यजस्व राजेन्द्र वैकुण्ठं भक्तवत्सलम् ।
वयं तावन्नररूपा भजिष्यामोऽत्र वै हरिम् ॥६६॥
अथ यज्ञसमारम्भे भगवन्तमपूजयत् ।
पितॄन् विप्रान् वरयित्वा सपत्नीक उपस्थितः ॥६७॥
स्वस्तिवाच्यं द्विजान् शुद्धान् पुण्याहं वृद्धिकर्म च ।
निर्वर्त्य वरयामास ऋत्विजस्तेऽपि तं नृपम् ॥६८॥
सपत्नीकं दीक्षयित्वा वेद्यामाहवनीयकम् ।
प्रज्वलन्तं प्रणीयाऽथ मुमोच प्रोक्षितं हयम् ॥६९॥
ततः स दीक्षितो राजा वाग्यतो रौरवीं त्वचम् ।
अधिष्ठाय सदःस्थश्च भुक्त्यर्थं सन्दिदेश ह ॥७०॥
सर्वान् सर्वविधान्येव भोज्यानि समदापयत् ।
चतुर्दशसु लोकेषु यानि भोज्यानि सन्ति च ॥७१॥
यज्ञार्हाणि विचित्राणि सात्त्विकानि ह्यदापयत् ।
कामगावः कल्पवृक्षाश्चिन्तामणयः सर्वशः ॥७२॥
कल्पलताः सिद्धयश्च यथेष्टं रचयन्ति तत् ।
लक्ष्मीः स्वयं स्थिता तत्र सर्वसमृद्धिसुभोगदा ॥७३॥
न न्यूनं चाभिलषितं तद्यज्ञे चाऽभवत्तदा ।
चतुर्दशनिवासानां वैभवाः सद्यास्तदा ॥७४॥
वैराजानां यथा तद्वद् आसन् स्वामिप्रतापतः ।
यज्ञक्रियास्तथा मन्त्रा विधयश्च क्रमाः स्वराः ॥७५॥
यथार्था एव तत्राऽऽसन् न वै कर्मोपघातकम् ।
एवं प्रवर्तते यज्ञो विरतौ तु हरेः कथाः ॥७६॥
प्रवर्तन्ते ब्रह्मविद्याः सद्भिः सतीभिरीडिताः ।
लक्ष्मीनारायणसंहितायाः कथा प्रजायते ॥७७॥
अग्निमुखाः सुरास्तृप्ता नाऽस्मरन्ताऽमरावतीम् ।
पातालवासिनः सर्वे तृप्तास्तद्भोजनैः सदा ॥७८॥
सर्वे चेतनमूर्ताश्च तत्तद्भोजनपानकैः ।
यथा तृप्ताः पुनर्गन्तुं गेहं नेच्छां व्यधुर्निजम् ॥७९॥
इत्थं प्रवर्तितो यज्ञश्चेन्द्रद्युम्नस्य भूभृतः ।
त्रैलोक्यतृप्तिदः क्षेत्रे ह्यपूर्वः पुरुषोत्तमे ॥८०॥
जगदीशप्रसादाय पितामहनिदेशतः ।
एकोनं क्रमशः संस्था अवाप पृथिवीपतिः ॥८१॥
सहस्रं हयमेधस्य, नृपतिर्दिव्यतां व्रजेत्, ।
सोमाभिषेकतः पूर्वं सप्तमी या च रात्रिका ॥८२॥
तस्यास्तुरीयप्रहरे स्वप्ने राजा ददर्श ह ।
प्रत्यक्षं श्वेतद्वीपं च क्षीरसागरमध्यगम् ॥८३॥
तत्र सन्मण्डपे दिव्ये वरसिंहासनस्थितम् ।
ददर्श शंखचक्रादिधरं श्रीपरमेश्वरम् ॥८४॥
मेघवर्णं वनमालाधरं लावण्यशोभितम् ।
सौन्दर्यश्रीनिकेतं च सर्वदिव्यविभूषणम् ॥८५॥
दक्षपार्श्वे स्थितं शेषमनन्तं श्वेतवर्णकम् ।
फणासहस्रैश्छत्रीकृता येन वितानिका ॥८६॥
सकुण्डलं नीलवस्त्रं हलादियुक्चतुर्भुजम् ।
हारकेयूरवलयमुद्रिकाभिरलंकृतम् ॥८७॥
दक्षपार्श्वस्थितां भद्रां लक्ष्मीं ददर्श वै तदा ।
वराऽभयाऽब्जहस्तां च कुंकुमाभां सुलोचनाम् ॥८८॥
त्रैलोक्ययुवतीवृन्ददृष्टान्ताद्भुतविग्रहाम् ।
पद्मासनां लावण्यादिगुणाढ्यां सुविभूषिताम् ॥८९॥

पितामहं च ददृशे पुरतोऽस्य कृताञ्जलिम् ।
वामपार्श्वस्थितं चक्रं नानामणिविभूषितम् ॥९०॥
सनकाद्यैर्मुनीन्द्रैश्च स्तूयमानं विलोक्य सः ।
स्वप्नाद् बहिः समागत्य नमश्चकार वै मुहुः ॥९१॥
मेने सहस्रं सफलं यज्ञानां स्वकृतार्थताम् ।
शशंस नारदस्याऽग्रे यथा स्वप्नोऽन्वभूयत ॥९२॥
तत्फलं नारदः प्राह दशाहे हरिदर्शनम् ।
प्रत्यक्षं स्यात् ततो यज्ञं पूर्णं कुरु यथार्थतः ॥९३॥
ततः प्रववृते मुदा नृपतेर्वाजिमेधिका ।
दीयन्ते सर्वदानानि सुत्याऽभूत् कल्पवल्लिका ॥९४॥
तन्मध्येऽवभृथे स्नातुं कृतो यत्र ह्रदो महान् ।
दक्षिणे तटभूदेशे बिल्वेश्वरसमीपतः ॥९५॥
नियुक्ताः सेवकास्तत्र दृष्ट्वा वटं ससंभ्रमाः ।
न्यवेदयन्त नृपतिं दृष्टो वृक्षस्तटे महान् ॥९६॥
सामुद्रे च जले मूलं शाखाः स्नानगृहाऽभिगाः ।
शंखचक्रांकितः सोऽस्ति सर्वत्र सूर्यसन्निभः ॥९७॥
सुगन्धो देवभूवृक्षो विष्णुर्व्याजेन चागतः ।
नारदः प्रहसन् प्राह पूर्णाहुतिः प्रजायताम् ॥९८॥
स्वप्ने विष्णुस्त्वया दृष्टो दृष्टो वटस्तथाऽनुगैः ।
समाप्याऽवभृथं स्नानं कृत्वोत्सवं तटे तथा ॥९९॥
महावेद्यां स्थापयाऽत्र यज्ञेशं तरुरूपिणम् ।
विचार्येत्थं ययतुश्च द्रुमं भूपतिनारदौ ॥१००॥
दृष्ट्वा वृक्षं चतुःशाखं चतुर्भुजं जलाद् बहिः ।
आकर्षयित्वा मनुजैः पूजयामासतुश्च तौ ॥१०१॥
गीतवादित्रनिर्घोषैर्वेदमन्त्रादिभिः सह ।
स्रग्गन्धाऽलंकृतं वृक्षं महावेदीं विनिन्यतुः ॥१०२॥
सहस्रैरुपचारैश्च वेद्यां पुपूज भूपतिः ।
केन मूर्तिः कथं कार्येत्युवाच नारदं नृपः ॥१०३॥
तावदाकाशवाणी चाऽभवत्तत्र शुभावहा ।
प्रच्छाद्यतां महावेदी तरुयुक्ता शुभाऽम्बरैः ॥१०४॥
पञ्चदशदिनान्येव स्वयं मूर्तिर्भविष्यति ।
नारायणः स्वयं तत्र वृद्धवर्धकिरूपधृक् ॥१०५॥
उपस्थितः स वै वृद्धः शस्त्रपाणिः कलान्वितः ।
एनमन्तःप्रविश्यैव द्वारं बध्नन्तु यत्नतः ॥१०६॥
बहिर्वाद्यानि कुर्वन्तु यावत्तु घटना भवेत् ।
श्रुतो हि घटनाशब्दो बाधिर्याऽन्धत्वदायकः ॥१०७॥
सन्ताननाशकश्चापि राष्ट्रस्य नाशकोऽपि च ।
नाऽन्तःप्रवेशनं कुर्यान्न पश्येच्च कदाचन ॥१०८॥
नियुक्तदन्यः पश्येच्चेद् राज्ञो राष्ट्रस्य चैव ह ।
द्रष्टुश्चापि महाभीतिरन्धता चक्षुषोर्द्वयोः ॥१०९॥
तस्मान्नाऽवेक्षणं कार्यं यावत्प्रतिमनिर्मितिः ।
निर्व्यूढस्तु स्वयं देवः कृत्वान्ते संवदिष्यति ॥११०॥
वर्द्धकिर्घटयिष्यामीत्युक्त्वा चान्तर्दधे तदा ।
वेद्यां नारायणः काष्ठे वस्त्राऽधो न व्यदृश्यत ॥१११॥
वेदीं राजा बन्धनैश्च रक्षयामास सर्वशः ।
यदुवाच गिरां देवी तद्वत्परिचचार ह ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने बिल्वेशकपोतेशकथा, राज्ञोऽपशकुनानि, दिव्यनृसिंहादिदर्शनम्, कपोतेशस्थल्यां यज्ञमण्डपादिकरणम्, अवभृथाऽन्ते व्योमवाण्या कथितवटवृक्षस्य वेद्यामाच्छादनमित्यादिनिरूपणनामा षडशीत्यधिकपञ्चशततमोऽध्यायः ॥ ५८६ ॥

श्रीनारायण उवाच--

ततो लक्ष्मि ! यथाजातं शृणु मूर्तिप्रघट्टनम् ।
एवं दिने दिने याते दिव्यगन्धोऽनुभूयते ॥ १ ॥
पारिजातप्रसूनानां वृष्टिर्या मर्त्यदुर्लभा ।
दिव्यसंगीतनादाश्च गीतिका रुचिरास्तथा ॥ २ ॥
श्वेतवारिबिन्दवश्च चन्दनानां च बिन्दवः ।
ऐरावतादिवारणेन्द्राणां मदा बभूविरे ॥ ३ ॥
अदृश्यदेवतासंघैः पूज्यते व्योममार्गतः ।
उपासांचक्रिरे देवा दिव्यचिह्नानि जज्ञिरे ॥ ४ ॥
प्राप्ते पञ्चदशाहे च स्वयं पूर्णो बभूव ह ।
दिव्यसिंहासनसंस्थो वेदिकायां व्यदृश्यत ॥ ५ ॥
चतुर्मूर्तिर्जगन्नाथो बलो भद्रा सुदर्शनम् ।
सर्वाभरणशोभादिसम्पूर्णं वै चतुष्टयम् ॥ ६ ॥
भद्रा चेयं स्वयं लक्ष्मीः सर्वचैतन्यरूपिणी ।
त्वमासीः मे प्रिये भेदस्तव क्वचिन्न युज्यते ॥ ७ ॥
क्षणं न सहसे त्वं मां मोक्तुं लीलावतारिणम् ।
एवं तु मूर्तयस्तेन चतस्रो वै प्रकाशिताः ॥ ८ ॥
व्योमवाण्यभवत्तत्र राजन् रंगं प्रकारय ।
नीलं विष्णुं, बलं श्वेतं, रक्तं चक्रं, प्रचित्रय ॥ ९ ॥
भद्रामरुणां च नानालंकारशोभितां तथा ।
विना वै चित्रकारं तु नान्यः कश्चिद् विलोकयेत् ॥१०॥
गोपनीयाः प्रयत्नेन पटनिर्यासवल्कलैः ।
वर्षे वर्षेऽपि संस्कार्याः पूर्वसंस्कारमोचनात् ॥११॥

वल्कललेपसहिता मूर्तिर्दिव्या चिरन्तनी ।
वल्कललेपनाशे तु दुर्भिक्षं मरणं तथा ॥१२॥
सन्ततेश्च क्षयः स्याद्वै नेक्ष्यास्ता अपवारणाः ।
प्रमादान्मानवैश्चापि दृष्टाः स्युर्भयहेतवः ॥१३॥
तस्मात् सचित्रा द्रष्टव्या बहुशृंगारचित्रिताः ।
नीलाद्रौ कल्पवृक्षस्य वायव्यां शतहस्ततः ॥१४॥
उत्तरे च नृसिंहस्य सहस्रकरमुच्छ्रयम् ।
प्रासादं शिखराढ्यं च सुदिव्यं सुदृढायतम् ॥१५॥
कारयित्वा प्रतिष्ठाप्य तत्रैता विनिवेश्य ।
नीलमाधवसेवाकृच्छबरो वैष्णवोत्तमः ॥१६॥
विश्वावसुः पुरा मित्रं पुरोहितस्य तेऽभवत् ।
शबरस्य तथा त्वपुरोहितस्य च सन्ततिः ॥१७॥
नियुज्यतां च पूजायां सदा सर्वोत्सवादिषु ।
इतिश्रुत्वा व्योमवाचं भूपस्त्वावृतिवस्त्रकम् ॥१८॥
क्षणं चोत्तार्य मूर्तीस्ताः पूर्णा ददर्श शोभनाः ।
रत्नसिंहासनस्थाश्च तेजोव्याप्ताः सुवर्तुलाः ॥१९॥
कृष्णं पद्मस्थितं नीलं पार्श्वे च धवलं बलम् ।
फणामण्डलविस्तीर्णं मध्ये भद्रां तयोः शुभाम् ॥२०॥
विष्णोर्वामस्थितां कृष्णहस्ते सुदर्शनं तथा ।
क्षणं दृष्टास्तथा सर्वैः पुनर्वस्त्रेण चावृताः ॥२१॥
सर्वे नेमुस्ततश्चित्रशिल्पी रंगादि चाकरोत् ।
ततश्च वेदविधिना पूजां सूक्तैरकारयत् ॥२२॥
पौरुषेण तु सूक्तेन कृष्णं राजा ह्यपूजयत् ।
लक्ष्मीसूक्तेन च भद्रां द्वादशार्णेन वै बलम् ॥२३॥
सुदर्शनं सौदर्शन्यां ततो दानान्यदापयत् ।
अश्वमेधाऽङ्गभूताश्च कोटिशो गा ददौ धनम् ॥२४॥
तासां खुरोद्धृतेर्योगाद् गर्तोऽभूत्पावनः परः ।
दानाऽम्बुनापि संसृष्टस्तीर्थं चेन्द्रसरो हि तत् ॥२५॥
बभूव तारकं पितृद्धारकं जलदानतः ।
स्नानात्स्वर्गप्रदं पानाद्वैकुण्ठधामदं तथा ॥२६॥
दानात्समृद्धिप्रदं वासान्मोक्षदं मरणादपि ।
तीर्थानां परमं ख्यातं सर इन्द्रद्युतिकृतम् ॥२७॥
ततः प्रासादघटनामुपचक्राम भूपतिः ।
पूर्णे तु मन्दिरे जाते सौवर्णकलशान्विते ॥२८॥
शुभे काले मुहूर्ते च विप्रान् प्रपूज्य देवताः ।
स्वस्तिवाचं च कर्मर्द्धिं वाचयित्वा नृपस्ततः ॥२९॥
अर्घ्यं ददौ जगन्नाथं सौधस्थित्यै चिरं क्षितिम् ।
सम्प्रार्थ्य शिल्पिनोऽभ्यर्च्य वास्तुयागं विधाय च ॥३०॥
कृत्वा महोत्सवं पूजां ददौ दानानि भोजनम् ।
राजा सभायामगदद् यन्मयोपार्जितं धनम् ॥३१॥
जगन्नाथालयार्थं तत्सर्वं ददामि मुक्तये ।
कलेवरमिदं क्षेत्रं यत्राऽहंभाववान् विभुः ॥३२॥
तत्सेवया च राज्यर्द्धिः सफला मेऽस्तु तत्पदे ।
एष दारुवपुर्विष्णुः सुखदो धामबान्धवः ॥३३॥
अथ मूर्तेः पृष्ठदेशादागत्याऽच्युतनामकः ।
विप्रो जगाद रहसि तेजोमण्डलशोभितः ॥३४॥
परधामाऽक्षरधामाऽमृतधामाऽव्याकृतम् ।
गोलोकं चापि वैकुण्ठं क्षीरोदं श्वेतद्वीपकम् ॥३५॥
बदरीं चान्यधामानि यदि गन्तुं समिच्छ्यते ।
अत्र स्थेयं तदा क्षेत्रे दिव्ये श्रीपुरुषोत्तमे ॥३६॥
परब्रह्माऽक्षरब्रह्ममुक्तब्रह्माऽवतारकान् ।
व्यूहान् दिव्यान् विभवाँश्च तदंशान् द्रष्टुमिष्यते ॥३७॥
पुरुषोत्तममूर्तेश्च कर्तव्यं दर्शनं तु तैः ।
ईशलोकान् सत्यलोकान् वैराजान् स्वर्गसंज्ञकान् ॥३८॥
मानुषान् दिव्यपातालान् यदि भोक्तुं समिच्छ्यते ।
दानं स्नानं पूजनं च कर्तव्यं त्वस्य तैरिह ॥३९॥
ऐश्वर्याणि समग्राणि विद्याश्च सकलाः कलाः ।
गुणान् सामर्थ्यसत्तादि यदि प्राप्तुं समिच्छ्यते ॥४०॥
तदाऽयं श्रीजगन्नाथः सेव्यतां यावदर्पणैः ।
इदं दारुमयं ब्रह्म भुक्तिमुक्तिप्रदायकम् ॥४१॥
सच्चिदानन्दकैवल्यमुक्तिदं दर्शनादपि ।
नाण्वप्यत्र प्रभेदोऽस्ति धाम्नि श्रीपुरुषोत्तमे ॥४२॥
तस्माद् राजन्नत्र वासं कुरु मोक्षं प्रसाधय ।
विद्वत्तमोऽसि भक्तश्च सांगोपांगममुं भज ॥४३॥
पत्रपुष्पजलकन्दकणवस्त्रसुचन्दनम् ।
जलमण्वप्यर्पितं स्यादब्जगुणं जगत्प्रभौ ॥४४॥
लक्ष्मीर्माता ऋद्धिदा सा भोगान् दास्यति भक्तके ।
दात्रे दास्यामि सर्वं मे नात्र कार्या विचारणा ॥४५॥
इत्युक्त्वाऽदृश्यतां यातो विप्रो मूर्तौ हरेस्ततः ।
सर्वेषां समभूद् दिव्यमाश्चर्यं गोचरो हरिः ॥४६॥
आत्मना वर्तते मूर्तौ प्रेम्णाऽश्रूणि ह्यवासृजन् ।
नारदः स्थिरतां यातो ध्यानमुद्रामनैमिषीम् ॥४७॥
कुर्वन् समाधिप्रजडः प्रेममग्नोऽभवत् क्षणम् ।
आनन्दः प्रासरत्तत्र गोलोके इव तत्क्षणम् ॥४८॥
कार्यं पूर्णं त्वद्य जातं प्रोक्त्वा नारदं आह तम् ।
एनमाराध्य तिष्ठाऽत्र भूप यामि पितामहम् ॥४९॥

प्रासादं कुरु भूपाल धनेन महता ततः।
नृसिंहं च प्रतिष्ठाप्य विमुच्यसे सुखी भव ॥५०॥
कृतं निवेदयिष्यामि ब्रह्माणं तव दासताम्।
इन्द्रद्युम्नश्च तं प्राह निवसाऽत्र मया सह ॥५१॥

मन्दिरं कारयित्वा च यास्यावो नौ पितामहम्।
आवां विज्ञपयिष्यावः सः समागत्य वै स्वयम् ॥५२॥
महोत्सवं भगवतः प्रासादेऽत्र करिष्यति।
ओमित्यङ्गीचकारैव नारदश्चाऽथ भूपतिः ॥५३॥

यियासुस्त्वरितं कर्म मन्दिरस्याऽन्वचालयत्।
सहस्रशस्ततः शिल्पिवर्यांस्तत्र न्ययोजयत्।
वित्तव्ययस्तु कोटीनां न संख्यातुं प्रशक्यते ॥५४॥
नृपतेः श्रद्धया भक्त्या सत्त्वभावेन श्रीरपि।
प्रसन्ना मन्दिरं कर्तुं तदा साहाय्यमाचरत् ॥५५॥

गर्भप्रतिष्ठां विधिवत् कृत्वा धृत्वा च ताम्रजाम्।
वज्रपातादिविघ्नघ्नां न्यस्य पार्श्वे सुपट्टिकाम् ॥५६॥
शिखरस्य घट्टनार्थे चाज्ञाप्याऽमात्यकोत्तमान्।
गिरिशृंगोपमं कर्तुं शिखरं गगनंगमम् ॥५७॥

राजा शृण्वन् देवगाथां प्रासादविषयां शुभाम्।
भूपतेर्दुर्लभं किं स्यात्सहायो यस्य नारदः ॥५८॥
ब्रह्मा विष्णुस्तथा लक्ष्मीः का चात्र निम्नता भवेत्।
प्रासादः कार्यते तादृङ् न भूतो न भविष्यति ॥५९॥

नेदृग् वै वर्तते चोर्ध्वंगमः पृथ्व्यां स्थलान्तरे।
इति शृण्वन्ननामाऽसौ नारदं चाह नारदः ॥६०॥
तीर्थैर्मन्त्रैर्जपैर्दानैः क्रतुभिर्भूरिदक्षिणैः।
व्रतैरध्ययनैर्भूप तपोभिश्च यदर्जितम् ॥६१॥

न शक्यं तव राजेन्द्र भक्त्या तत्करमागतम्।
अतः परं न शोचस्व भक्तियोगेऽतिरेकिणि ॥६२॥
पितामहं द्रष्टुकामो गन्ता चेदन्तिकं विभोः।
उपदेक्ष्यति सोऽप्यस्य यात्रास्तास्ता महोत्सवाः ॥६३॥

स्वयं च भगवानेव तुभ्यं वरं प्रदास्यति।
प्रतिष्ठापिते प्रासादे तस्मिन् काले स्वयंभुवा ॥६४॥
अहमप्यागमिष्यामि तदा सप्तर्षिभिः सह।
तदावां तत्र गच्छावो ब्रह्मलोकमकल्मषम् ॥६५॥

इत्युक्त्वा नारदो भूपो नत्वा कृष्णं बलं सतीम्।
अनुज्ञां प्रार्थयामास ब्रह्मलोकगतिं प्रति ॥६६॥
उभौ दिव्यविमानेन ब्रह्माणं प्रति जग्मतुः।
नारदो भक्तियोगेन चेन्द्रद्युम्नोऽपि वैष्णवः ॥६७॥

चतुर्दशभुवनानि जिग्यतुः कृपया हरेः।
राजाऽप्यचिन्तयद् याने ब्रह्मलोके क्षणं च यत् ॥६८॥
पृथ्व्यां युगशतं याति प्रासादस्य तु किं भवेत्।
पुनरागमने मे तु लयं यास्यति मत्कृतम् ॥६९॥
कथं प्रतिष्ठां संवीक्ष्य गमिष्यामि कृतार्थताम्।
इतिचिन्तापरं भूपं नारदः प्राह मा शुचः ॥७०॥
कृष्णनारायणः स्वामी कालस्य दैर्घ्यकारकः।
ह्रस्वताधायकः सोऽपि क्षणं सूक्ष्मं करिष्यति ॥७१॥

सत्यभूलोकयोः काले त्वदर्थे समतां प्रभुः।
स्वेच्छया संविधायैव निजकार्यं करिष्यति ॥७२॥
यस्य कार्येषु भगवान् सहायोऽस्ति चतुर्मुखः।
तत्र कालकृतं द्रव्यकृतं विघ्नं न जायते ॥७३॥
पश्याऽग्रतश्चन्द्रकोट्याह्लादकं तेजसां चयम्।
विजानीहि ब्रह्मणश्च सद्मनस्तं समागतम् ॥७४॥
पश्य ब्रह्मपुरं त्वेतत् सभां पश्य सुशोभनाम्।
ततः परं च वैकुण्ठं जलोपरि हि वर्तते ॥७५॥
ततः परं च वैराजं धाम तस्मात्परेऽमृतम्।

परवैकुण्ठकं चापि गोलोकं चापि तत्परम् ॥७६॥
तत्परं चाक्षरं धाम तत्परं परमं पदम्।
पुरुषोत्तमधामाऽस्ति यत्परं नान्यदस्ति वै ॥७७॥
इन्द्रद्युम्नं वदन्नित्थं नारदस्य विमानकम्।
ब्रह्मसभोत्तरद्वारं समासाद्य स्थिरं ह्यभूत् ॥७८॥
नृपं च नारदं दृष्ट्वा ननाम द्वारपालकः।
ब्रह्माज्ञां च समागृह्य प्रावेशयच्च तौ सभाम् ॥७९॥

ब्रह्माणं प्रणमन् दूरे सावित्रीशारदान्वितम्।
राजा तस्थौ क्षणं तावद् ब्रह्मा भूपं समाह्वयत् ॥८०॥
एहि राजन् स्वागतं ते साक्षात् त्वं भगवत्प्रियः।
नारदस्य तु योगेन समायातोऽसि दुर्गमे ॥८१॥
गृहाण चामृतं भोज्यं पिब स्वाद्वामृतं रसम्।
वद किं चागमने ते कारणं हृदयंगमम् ॥८२॥
इत्युक्तो नृपतिः प्राह प्रासादः कृपया तव।
जातोऽस्ति तत्र चागत्य प्रतिष्ठापय माधवम् ॥८३॥
आगत्य श्रीजगन्नाथं स्थापयिष्यसि चेत् पितः।
त्वदनुग्रहः सफलो भवेन्मयि पितामह ॥८४॥
प्रसीद मां कुरुष्वेदं जगन्नाथस्त्वमेव यत्।
इतिस्तुतस्तदा ब्रह्मा प्राह भूपं तु सादरम् ॥८५॥
राजन् कृतस्त्वया सत्यं प्रासादो भगवत्स्थितौ।
नास्मिन् काले तव राज्यं न वा त्वत्सन्ततिर्नृप ॥८६॥

अत्राऽऽगतस्य ते कालः पृथ्व्यां भूयान् गतो नृप ।
मन्वन्तराधिकः कालो युगानां शतकं गतम् ॥८७॥
तव वंशोऽपि विच्छिन्नः कोटिशः क्षितिपा गताः ।
किन्तु राजन् दिव्यक्षेत्रे नाम्ना श्रीपुरुषोत्तमे ॥८८॥
कालस्य ह्रासशक्तिर्या कालश्च संहृतौ मया ।
श्रीकृष्णस्य निदेशेन यावन्मन्दिरपूर्णता ॥८९॥
सत्यलोकसमास्तत्र क्षणा देशाश्च तत्प्रजाः ।
कृता मयाऽऽज्ञया हरेस्तत्र सन्ति त एव वै ॥९०॥
श्रीस्वामिना मुकुटस्य मणिर्व्योम्नि रविः कृतः ।
सत्यलोकसमं चाहर्निर्माति दिव्यतां नयन् ॥९१॥
तस्माद् गच्छ महाराज ! तवाऽनुपदमेव ह ।
आयाम्येव प्रतिष्ठार्थं संभारान् कुरु चोचितान् ॥९२॥
पूर्वे परार्धे भो राजन् क्षेत्रं श्रीपुरुषोत्तमम् ।
नीलाऽश्मवपुरास्थाय न तत्याज जनार्दनः ॥९३॥
साम्प्रतं मे द्वितीयं तु परार्धे समुपस्थितम् ।
दारुमूर्तिरयं देवो मदायुः स्थास्यते पुनः ॥९४॥
श्वेतद्वीपस्थकृष्णस्य रोमाणि कल्पपादपाः ।
तन्मध्याद् वंटवृक्षस्तु दारुमूर्त्यर्थमाहृतः ॥९५॥
स्वयमुत्पतितः सिन्धोः सलिले सत्यपूरुषः ।
घोरसंसारनाशार्थे मया पूर्वं प्रयाचितः ॥९६॥
अनेकभक्तभक्त्या च दारुवर्ष्मा जनार्दनः ।
श्रुत्वैवं ब्रह्मवचनं प्रणिपत्य पितामहम् ॥९७॥
विमानेन नारदेनाऽऽजगामेन्द्रद्युतिर्भुवम् ।
मन्दिरं सुभगं दिव्यं पूर्णं वीक्ष्य जहर्ष सः ॥९८॥
ननाम दण्डवद्भूमौ श्रीनृसिंहं ननाम च ।
शिल्प्यादीन् प्राह भूपश्च स्वयं ब्रह्मा पितामहः ॥९९॥
एतत्प्रतिष्ठानविधौ सुरैः सहाऽऽगमिष्यति ।
तावत् पद्मनिधिस्तत्र ब्रह्मप्रेरित आगतः ॥१००॥
राजा सत्कारपूजादि चक्रे स्वागतमाचरत् ।
नारदः सर्ववस्तून्यालिख्य सञ्चयपत्रके ॥१०१॥
प्रतिष्ठार्थं ददौ पद्मनिधये सोऽपि सत्वरम् ।
सम्पादनं सुवस्तूनामकारयत्तथा शुभाम् ॥१०२॥
शालां स्वर्णमयीं तद्वन्नगरं नैकयोजनम् ।
मण्डपं च तथा कुण्डं कारयामास सत्वरम् ॥१०३॥
कारयामास च रथत्रयं सौवर्णमुत्तमम् ।
रथं षोडशचक्रं च विष्णोर्वै गरुडध्वजम् ॥१०४॥
पद्मध्वजं सुभद्राया वरं द्वादशचक्रकम् ।
बलस्य च चतुर्दशचक्रकं दर्पणध्वजम् ॥१०५॥
अथवा सीरिणः कार्यः सीरध्वजः समुत्तमः ।
स्थितो हस्ततले नित्यं निर्मलस्तस्य दर्पणः ॥१०६॥
तलस्थत्वादसौ तालस्तेन तालाङ्कितो बलः ।
हस्तषोडशविस्तारो रथश्चक्रधरस्य वै ॥१०७॥
चतुर्दश बलस्यापि सुभद्रायास्तु द्वादश ।
न वासितव्यो देवोऽसावप्रतिष्ठे रथे यतः ॥१०८॥
प्रासादे मण्डपे वापि पुरे तन्निष्फलं भवेत् ।
राजा रथप्रतिष्ठां च कारयामास सत्वरम् ॥१०९॥
रथस्येशानदिग्भागे शालां कृत्वा सुशोभनाम् ।
तन्मध्ये मण्डपं कृत्वा वेदीं तत्र च निर्मलाम् ॥११०॥
चतुरस्रां चतुर्हस्तमितां हस्तोच्छ्रितां तथा ।
प्रकारयेत् पूर्वरात्राबुत्तरतः शुभे क्षणे ॥१११॥
स्वस्ति प्रवाच्य चांकुरार्पणं प्रकारयेत्ततः ।
द्वात्रिंशद्देवताभ्यश्च बलिं दद्याद् यथाविधि ॥११२॥
प्रातर्वेद्यां मण्डले स्वस्तिके कुंभं निधापयेत् ।
पञ्चपादपक्वाथेन पुण्यतोयैश्च पल्लवैः ॥११३॥
रत्नगन्धौषधिगणैः पञ्चगव्यैः प्रपूरयेत् ।
पूजयेद् वेष्टयेद् वस्त्रामावाहयेच्च तं हरिम् ॥११४॥
तं पूजयेच्च विधिना वायव्यां समिधस्तथा ।
आज्यं चरुं मन्त्रयित्वाऽष्टसाहस्रं हुनेत् ततः ॥११५॥
सम्पातान्प्रापयेत् कुंभे रथं शृंगारयेत्ततः ।
सुगन्धयेद् धूपयेच्च ध्वजे न्यस्य समीरणम् ॥११६॥
प्रपूज्य गरुडं प्रार्थ्य रथमूर्ध्नि निवेशयेत् ।
तं कुंभं सेचयेत् प्लावयेद्रथं गरुडोपरि ॥११७॥
ततः पूर्णाहुतिं दत्वा दक्षिणां भूयसीं ददेत् ।
भोजयेच्च जनान् बलरथं प्रपूजयेत्ततः ॥११८॥
द्वादशाक्षरमन्त्रेण लक्ष्मीसूक्तेन श्रीरथम् ।
प्रार्थयेत् कमलं कृष्णनाभेस्त्वं चासनात्मकम् ॥११९॥
जातं चाऽसि च देवानामाबोधार्थं स्थिरं भव ।
इति पद्मध्वजं चोर्ध्वं समुच्छ्रयेन्नमेत्ततः ॥१२०॥
रथे प्रतिष्ठिते चैवं देवानारोप्य सर्वशः ।
मनुष्यैश्च नरैः स्त्रीभिर्गजाश्ववृषभादिभिः ॥१२१॥
नेतव्यास्ते रथा ग्रामे भ्रामयित्वा सुरालयम् ।
रथे स्थित्वा विप्रवर्यैर्बलिर्दातव्य उत्तमः ॥१२२॥
बलिं गृह्णन्तु भो देवा आदित्या वसवो ग्रहाः ।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगादयः ॥१२३॥
असुरा यातुधानाश्च रथदेवा विनायकाः ।
दिक्पाला लोकपालाश्चर्षयः कुर्वन्तु स्वस्ति च ॥१२४॥

अविघ्नमाचरन्त्वेते मा सन्तु परिपन्थिनः ।
सौम्या भवन्तु तृप्ताश्च दैत्या भूतगणादयः ॥१२५॥
ततो वैदिकसूक्तैश्च चालयेत् तान् रथान् शनैः ।
तत्रोत्पातान् शृणु लक्ष्मि ! ह्यनिदा ये भवन्ति वै ॥१२६॥
ईषाभंगे द्विजभयं भग्नेऽक्षे क्षत्रियक्षयः ।
तुलाभंगे वैश्यनाशः शम्या शूद्रक्षयस्तथा ॥१२७॥
धुराभंगे त्वनावृष्टिः पीठभंगे प्रजाभयम् ।
चक्रभंगे परराज्यं ध्वजपातेऽन्यभूपतिः ॥१२८॥
मूर्तिभंगे मरणं च पर्यस्ते देशविप्लवः ।
अधोमुखे रथे जाते सर्वजानपदक्षयः ॥१२९॥
एवं जाते बलिकर्म शान्तिहोमं प्रकारयेत् ।
पूर्वोत्तरे च दिग्भागे रथस्याऽग्निं प्रकल्पयेत् ॥१३०॥
समिद्भिर्घृतमध्वाज्यमूलाग्राभिश्च होमयेत् ।
शान्तिवार्चं स्वस्तियाचं भग्नांगे हवनं चरेत् ॥१३१॥
स्वस्ति भवतु भक्तेभ्यः स्वस्ति पुंस्त्रीभ्य इत्यपि ।
गोपशुभ्यः स्वस्ति चास्तु जगतः स्वस्ति चास्तु वै ॥१३२॥
शान्तिरस्तु शिवं चास्तु सर्वतः स्वस्ति चास्तु नः ।
स्वामिनाथ जगन्नाथ रक्षां शान्तिं करोतु नः ॥१३३॥
इति लक्ष्मि ! कारयेत्तु शान्तिमहार्चनादिकम् ।
राज्ञा तत्कारितं सर्वं नारदेनर्षिणा तदा ॥१३४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने चतुः-प्रतिमानां सम्पूर्णता, पूजनं, मूर्त्यर्थं प्रासादनिर्माणम्, इन्द्रद्युम्ननारदयोर्ब्रह्माणं प्रति गमनम्, प्रतिष्ठार्थं पद्मनिधेरागमनम्, रथानां निर्माणं, पूजा, ध्वजादिः, रथे विघ्नफलम्, शान्तिकर्मादि चेति-निरूपणनामा सप्ताशीत्यधिकपञ्च-शततमोऽध्यायः ॥ ५८७ ॥

श्रीनारायण उवाच—

शृणु लक्ष्मि यदा चेन्द्रद्युम्नः सत्यं जगाम ह ।
तदा खण्डेशराजा वै नियुक्तोऽभून्निरीक्षणे ॥ १ ॥
गालो नाम महीपालश्चोत्कलेलाप्रभूपतिः ।
ओढ्राजः स वै प्रोक्तस्तेन माधवमूर्तिका ॥ २ ॥
स्थापिता स्वल्पकालार्थं नित्यदर्शनहेतवे ।
अपसार्य च तां मूर्तिं सिंहासनवराणि च ॥ ३ ॥
कारयामास नृपतिः प्रासादे मध्यमे स्थले ।
तानि संशोभयामास राजा चेन्द्रद्युतिस्तदा ॥ ४ ॥
तावद्व्योम्नि सन्ददृशे विमानं ब्रह्मणः शुभम् ।
हंसवाह्यं सावित्र्यादिशोभितं तेजसाऽन्वितम् ॥ ५ ॥
ब्रह्मा चाऽवाततताराऽस्माद् गंगाजलसमन्वितः ।
जयशब्दा हर्षशब्दा नमःशब्दास्तदाऽभवन् ॥ ६ ॥
चतुर्दशभुवनानां देहिनां दर्शनेच्छया ।
सम्मर्दश्च महानासीदहंपूर्विकया तदा ॥ ७ ॥
ब्रह्माणं वर्धयामासुर्लाजाकुसुमकाऽक्षतैः ।
ब्रह्मा कृष्णरथं गत्वा ननाम च ददर्श च ॥ ८ ॥
ततो बलरथं पश्चाद् भद्रारथं जगाम च ।
ननाम च प्रतुष्टाव पुपूज दिव्यवस्तुभिः ॥ ९ ॥
नमः कृष्णाय शेषाय लक्ष्म्यै चक्राय वै नमः ।
विष्णुरामसुभद्राणामभेदाय नमो नमः ॥१०॥
अज्ञाननाशकर्त्रे च सुदर्शनात्मने नमः ।
एवं प्रणम्य विवृत्य नारदादिष्टपत्स्तुतिः ॥११॥
नीलाचलस्थप्रासादं वीक्षितुं समुपागमत् ।
मन्दिरं मण्डपं वेदीं शालां दृष्ट्वा तुतोष ह ॥१२॥
ब्रह्मासने कानने च ह्युपविष्टः स्वयं ह्यजः ।
देवा ऋषयो विप्राश्च निषेदुस्तत्र मण्डपे ॥१३॥
ऋत्विगाद्या यथास्थानं स्थिता ब्रह्माज्ञया ततः ।
भारद्वाजः समारेभे कर्तुं शान्तिकपौष्टिके ॥१४॥
त्रैलोक्यवासिनां पूजां चकार नृपतिस्तदा ।
कलेवरं भगवतः प्रासादं च मनोहरम् ॥१५॥
प्रतिष्ठाप्य भरद्वाजः समुच्छ्रितमहाध्वजम् ।
व्यज्ञापयत् प्रतिष्ठायै प्राणानां तु पितामहम् ॥१६॥
कृतस्वस्त्ययनो ब्रह्मा ऋषिभिर्ब्राह्मणादिभिः ।
सह गत्वा रथान् वाद्यघोषैर्जयरवैः सह ॥१७॥
स्तुत्वाऽवतारयामासुः रथात् सोपानवर्त्मना ।
भक्ता भागवता निन्युः शनैः प्रासादसन्निधिम् ॥१८॥
तूलिकासु स्थितास्वासु पुष्पवृष्टिरभून्मुहुः ।
जय त्वं जगतां नाथ जय कृष्णनारायण ॥१९॥
जय संकर्षण भद्रे जय सौख्यं विधेहि नः ।
इत्युद्घोषैः समानिन्युः प्रासादद्वारि मण्डपे ॥२०॥
वासयित्वाऽभिषेकाय सम्मुखाऽऽदर्शमण्डले ।
अधिवासितकुंभैश्च तीर्थवार्युपसंभृतैः ॥२१॥
सूक्ताभ्यां श्रीपुरुषयोश्चकाराऽजोऽभिषेचनम् ।
ततो ह्यलंकृतान् देवान् गन्धमाल्योपशोभितान् ॥२२॥
विप्रास्तान् संप्रचक्रुर्वै सिंहासनगतान् प्रभून् ।
ब्रह्मा शलाकया नेत्रे त्वंजयामास निम्नहक् ॥२३॥

न्यासाँश्चकार विधिवद् दिव्यशृंगारशोभितान् ।
भावयामास दिव्यांस्तान् मूर्तिस्थान् संप्रचेतनान् ॥२४॥
ततो नीराजयित्वा तान् प्रार्थयामास भक्तितः ।
सर्वजगत्प्रतिष्ठ त्वं मूर्तावत्र स्थिरो भव ॥२५॥
त्वयि प्रतिष्ठिते देवा वयं चापि प्रतिष्ठिताः ।
दिव्यमूर्तिमयो भूत्वा प्रासादेऽत्र स्थिरो वस ॥२६॥
त्वदाज्ञया प्रतिष्ठेयं पूर्णाऽऽस्तां त्वत्प्रसादतः ।
इत्युक्त्वा हृदयं स्पृष्ट्वा जजाप मन्त्रमाच्युतम् ॥२७॥
भोगान् निवेदयामास भोजयामास देहिनः ।
दापयामास दानानि परिहारं चकार सः ॥२८॥
वैशाखस्याऽमले पक्षे चाष्टम्यां पुष्ययोगतः ।
कृता प्रतिष्ठा च गुरौ ब्रह्मणा परमेष्ठिना ॥२९॥
तद्दिने च कृतं पुण्यं स्नानं दानं जपादिकम् ।
तपो व्रतं पूजनं च सर्वमक्षयतां व्रजेत् ॥३०॥
तद्दिने तत्र गत्वा च कृष्णं रामं च भद्रिकाम् ।
सुदर्शनं च पश्यन्ति मुक्तास्ते मम धामगाः ॥३१॥
अथ लक्ष्मि ! दिने तस्मिन् कृष्णमूर्तावदृश्यत ।
सार्यं नृसिंहो भगवान् सर्वैरद्भुतदर्शनः ॥३२॥
अथ क्षणान्तरे मत्स्यस्तथाऽदृश्यत कच्छपः ।
वाराहोऽदृश्यत क्षणान्तरे हंसोऽप्यदृश्यत ॥३३॥
हयग्रीवोऽदृश्यताऽपि कपिलोऽदृश्यताऽपि च ।
हरिश्चाप्यदृश्यताऽपि वासुदेवोऽप्यदृश्यत ॥३४॥
पृथुरदृश्यत तत्र दत्तात्रेयोऽप्यदृश्यत ।
ऋषभोऽदृश्यत पश्चाद् वामनोऽथाऽप्यदृश्यत ॥३५॥
परशुरामोऽदृश्यत यज्ञनारायणस्ततः ।
रामादित्योऽदृश्यताथ कुमाराः सनकादयः ॥३६॥
अदृश्यन्त नारदोऽदृश्यताऽपि राजराजकः ।
व्यासो बुद्धस्ततः स्वामिकृष्णनारायणः पुनः ॥३७॥
वैराजोऽदृश्यत तत्र लक्ष्मीनारायणोऽपि च ।
नरनारायणश्चैतेऽदृश्यन्ताऽपि क्षणे क्षणे ॥३८॥
अत्याश्चर्यं गताः सर्वे ज्ञातवन्तश्च वै तदा ।
अवतारा हरेः सर्वे पुरुषोत्तमसंभवाः ॥३९॥
अस्मादेव प्रजायन्ते भक्तानुरूपदर्शनाः ।
प्रजहृषुर्नृपाद्याश्च दृष्ट्वा हरिं हि तादृशम् ॥४०॥
संशया नाशमापन्ना अवताराऽवतारिणोः ।
सर्वरूपमयो मूलं साक्षात् यत् पुरुषोत्तमः ॥४१॥
आराध्यते यथा येन तथा तस्य फलप्रदः ।
यस्य यावाँस्तु विश्वासस्तस्य सिद्धिस्तु तावती ॥४२॥
अथ ब्रह्मा जगन्नाथं प्रार्थयामास गद्गदः ।
भगवन् इन्द्रद्युम्नस्य सहस्राणि तु जन्मनाम् ॥४३॥
तव भक्तिं कुर्वतोऽत्र व्यतीतानि पुरा पुरा ।
अद्य जन्मनि भक्तेश्च फलं प्राप्तस्तवेच्छया ॥४४॥
भक्तियोगेन राजा त्वां समर्चयितुमिच्छति ।
उपदेशं प्रदेह्येनं व्रतोत्सवान् समादिश ॥४५॥
इत्यर्थितो ब्रह्मणाऽऽह काष्ठमूर्तिर्हसन् हरिः ।
इन्द्रद्युम्न प्रसन्नोऽस्मि तव भक्त्याऽतिभावया ॥४६॥
वरं ददामि ते भूप मयि भक्तिः स्थिराऽस्तु ते ।
उत्सृज्य वित्तकोटीस्तु यन्ममाऽऽयतनं कृतम् ॥४७॥
भंगेऽप्येतस्य राजेन्द्र नैतत् त्यक्ष्ये कदाचन ।
अनेन दारुवपुषा स्थास्याम्यत्र परार्धकम् ॥४८॥
द्वितीयं पद्मयोनेस्तद् यावत्परिसमाप्यते ।
अथ न्यग्रोधोत्तरस्थकूपस्य ये जलेन माम् ॥४९॥
रामं भद्रां स्नापयेयुस्ते मल्लोकमवाप्नुयुः ।
स्नानस्थितं तु मां पश्येत् स यायात् परमं पदम् ॥५०॥
चतुर्दश्यां स्वर्णकुंभैरुद्धरेयुर्द्विजा जलम् ।
ज्येष्ठ्यां प्रातर्मञ्चके मां रामं भद्रां तु मण्डपे ॥५१॥
ऐशानीस्थे स्थापयित्वा स्नापयित्वा पुनर्नयेत् ।
दक्षिणाभिमुखं यान्तं संपश्येन्मां स मुच्यते ॥५२॥
ततः पञ्चदशाहानि स्थापयित्वा तु मां नृप ।
विरूपमभिरूपं वा न पश्येत्तु कदाचन ॥५३॥
ज्येष्ठस्नानमिदं दत्वा कृत्वा मुच्येत बन्धनात् ।
अथ माघस्य पञ्चम्यामष्टम्यां चैत्रशुक्लके ॥५४॥
गुण्डिचयात्रां कुर्याच्च मोक्षदा सुखदा हि सा ।
आषाढस्य द्वितीया पुष्यर्क्षयुताऽपि मोक्षदा ॥५५॥
ऋक्षाभावे तिथौ यात्रोत्सवः कार्यो मम नृप ।
तस्यां रथे समारोप्य रामं मां भद्रिकां तथा ॥५६॥
गुण्डिचामण्डपं नाम यत्राऽहमजनं स्थलम् ।
अश्वमेधसहस्रस्य वेदी यत्र त्वया कृता ॥५७॥
तत्र यात्रा प्रकर्तव्या मम स्थाने धरागते ।
दिनानि नव यास्यामि तडागं चेन्द्रद्युम्नकम् ॥५८॥
ततः परं मम देवालयं यास्यामि वै पुनः ।
तदा द्रष्टुः प्रतिपदं त्वश्वमेधफलं भवेत् ॥५९॥
ममोत्थानं मम स्वापं मत्पार्श्वपरिवर्तनम् ।
मार्गप्रावरणं चापि पुष्यस्नानमहोत्सवम् ॥६०॥
फाल्गुन्यां क्रीडनं कुर्याद् दोलायां सुमहोत्सवम् ।
चैत्रे सितत्रयोदश्यां कुर्यात् कर्मप्रपूरणम् ॥६१॥

चैत्रे शुक्लचतुर्दश्यां दमनैर्मे प्रपूजनम् ।
वैशाखशुक्लतृतीये लेपयेच्चन्दनैश्च माम् ॥६२॥
इत्युत्सवाः प्रकर्तव्यास्त्वयेन्द्रद्युम्न सर्वदा ।
भुक्तिमुक्तिप्रदा मे ते प्रसादसन्मुखा यतः ॥६३॥
ब्रह्मन् सत्यं याहि देवाः स्वर्गं यान्तु नृपोऽत्र च ।
तिष्ठतु चात्र स्थास्येऽहं ब्रह्मायुःपूर्णिमावधिम् ॥६४॥
इत्युक्ताः प्रययुः सर्वे कृष्णो मूर्तिर्बभूव ह ।
ब्रह्मा सत्यं ययौ पश्चाद् राजा चकार चोत्सवान् ॥६५॥
शृणु लक्ष्मि कथयामि ज्येष्ठस्नानं शुभावहम् ।
ज्येष्ठशुक्लदशम्यां च व्रतं संकल्प्य वाग्यतः ॥६६॥
एकादशे प्रगे यायान्मार्कण्डेयाऽवटं ततः ।
आचम्य शंकरं नत्वा स्नात्वा वृषणयोर्वृषम् ॥६७॥
स्पृष्ट्वाऽङ्गुष्ठेन लिंगं च मुष्टिना शक्तिमित्यपि ।
पूजयित्वा ततो यायान्नारायणमनामयम् ॥६८॥
न्यग्रोधं प्रणमेत् कुर्यात् प्रदक्षिणं नमेत्ततः ।
गरुडं प्रणमेच्चाथ प्रविशेत् कृष्णमन्दिरम् ॥६९॥
तं त्रिःप्रदक्षिणं कृत्वाऽर्चयेत् कुर्याच्च दर्शनम् ।
उपदाः सम्प्रदायैवोग्रसेनमनुज्ञाप्य च ॥७०॥
स्वर्गद्वारस्य मार्गेण यायात् स्नातुं समुद्रकम् ।
आचम्य प्राङ्मुखो लिखेन्मण्डलं न्यासमाचरेत् ॥७१॥
प्राणायामत्रयं कृत्वा बध्नीयात्कवचं दृढम् ।
'पूर्वे मां पातु गोविन्दो वारिजाक्षस्तु दक्षिणे ॥७२॥
प्रद्युम्नः पश्चिमे पातु हृषीकेशस्तथोत्तरे ।
आग्नेय्यां नरसिंहश्च नैर्ऋत्यां मधुसूदनः ॥७३॥
वायव्यां श्रीधरः पातु ऐशान्यां च गदाधरः ।
ऊर्ध्वे त्रिविक्रमः पातु त्वधो वाराहरूपधृक् ॥७४॥
सर्वत्र पातु मां स्वामी मनः कृष्णो नरायणः ।
चित्तं पातु गरुडस्थो बुद्ध्यहं तु जनार्दनः ॥७५॥
इन्द्रियाणि सदा पातु श्रीमान् पतिः प्रभापतिः' ।
इति वर्म धारयित्वा षोडशाद्युपचारकैः ॥७६॥
मण्डले पूजयेत्तत्र श्रीस्वामिपुरुषोत्तमम् ।
अन्तःशुद्ध्यर्थमाचामेद् बाह्ये दर्भजलं क्षिपेत् ॥७७॥
समुद्रे च त्रिःस्नायाच्च सर्वपापक्षयो भवेत् ।
तिलकं बिन्दुकं कुर्याद् वस्त्रे धृत्वाऽर्चयेद्धरिम् ॥७८॥
मण्डले श्रीधरायुक्तमावाहयेद् बृसीं ददेत् ।
पाद्यमर्घ्यमाचमनं मधुपर्कं तथाऽऽप्लवम् ॥७९॥
वस्त्रं यज्ञोपवीतं भूषणं गन्धानुलेपनम् ।
पुष्पमालां धूपनं च दीपं मिष्टान्नपानकम् ॥८०॥
ताम्बूलं चारार्त्रिकं प्रदक्षिणं स्तवनादिकम् ।
क्षमाऽपराधनं विसर्जनं कुर्यात् क्रमार्चनम् ॥८१॥
ध्यानं दानं तपो जाप्यं श्राद्धं च सुरपूजनम् ।
सिन्धुराजे कृतं सर्वं कोटिकोटिगुणं भवेत् ॥८२॥
अब्धिं च मन्दिरं नत्वा यायादिन्द्रद्युतेः सरः ।
नरसिंहमनुप्रार्थ्य तत्र स्नायाद् यथाविधि ॥८३॥
पश्चिमाभिमुखं ततो यायान्नृसिंहमर्चयेत् ।
समुद्रे स्नपनं कृत्वा प्रपश्येत् पुरुषोत्तमम् ॥८४॥
एवं कुर्यात् पञ्चतीर्थीं ध्रुवं मोक्षमवाप्नुयात् ।
ज्येष्ठशुक्लपूर्णिमायां ज्येष्ठागश्च शशी गुरुः ॥८५॥
तदा तीर्थानि गच्छन्ति क्षेत्रं श्रीपुरुषोत्तमम् ।
ज्येष्ठपंचकसंज्ञं च व्रतमुद्यापनं चरेत् ॥८६॥
कृष्णं बलं नृसिंहं च भद्रां चक्रं प्रपूजयेत् ।
नीलमाधवं गरुडं पूजयेत् पुरुषोत्तमम् ॥८७॥
स्वर्णकलशे दशमीदिनेऽर्चयेत्तु माधवम् ।
नारायणं त्वेकादश्यां द्वादश्यां यज्ञसूकरम् ॥८८॥
त्रयोदश्यां च प्रद्युम्नं चतुर्दश्यां तु नृहरिम् ।
पूर्णिमायां सर्वदेवान् पूजयित्वा विधानतः ॥८९॥
नित्यं वा पूर्णिमायां वा नैवेद्यं पायसं ददेत् ।
मिष्टान्नानि सुपेयानि फलाद्यानि समर्पयेत् ॥९०॥
होमं चाष्टोत्तरशतं हुनेत् साधून् प्रभोजयेत् ।
गवां दानानि कुर्याच्च यथेष्टफलभाग्भवेत् ॥९१॥
एवं यात्रादिकरणान्मोक्षमवाप्नुयाद् ध्रुवम् ।
पठनाच्छ्रवणाल्लक्ष्मि तद्यात्राफलभाग् भवेत् ॥९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ब्रह्मण आगमनं, जगन्नाथादिप्राणप्रतिष्ठा, स्वमूर्तौ अवताराणां दर्शनम्, उत्सवाः, रथयात्रा, रथयात्राफलानि, पञ्चतीर्थी, तद्विधिरित्यादिनिरूपणनामा-ऽष्टाशीत्यधिकपञ्चशततमोऽध्यायः ॥५८८॥

श्रीनारायण उवाच—

शृणु लक्ष्मि ! महावेदीमहोत्सवं वदामि ते ।
वैशाखशुक्लतृतीयातिथौ तु वरयेद् द्विजम् ॥ १ ॥
तक्षाणं वृणुयाच्चापि वनयागाय वै वनम् ।
गत्वा वृक्षमध्यभुवि वह्नावष्टोत्तरं शतम् ॥ २ ॥
हुत्वाऽऽज्यं वृक्षमूलेऽपि बलिं दत्वा च क्षेत्रपे ।
वृक्षमूले द्विजः किञ्चिच्छिन्द्यात् ततस्तु वर्धकिः ॥ ३ ॥

काष्ठान्यादाय च रथं कुर्याद् गणेशमर्चयेत् ।
द्वाविंशतिकरोच्छ्रायं चतुर्द्वारं रथं हरेः ॥ ४ ॥
षोडशचक्रसंयुक्तं गरुडध्वजशोभितम् ।
चतुर्दशारं शेषस्य भद्राया द्वादशारकम् ॥ ५ ॥
एवं सांगान् कारयित्वा चाकचक्ययेच्च तान् ।
बृंहयेत् सत्पटैः शृंगारयेत् सद्रत्नकैश्च तान् ॥ ६ ॥
आषाढशुक्लद्वितीयोरुणोदयेऽर्चयेद्धरिम् ।
ततो यात्रां कारयेच्च गुण्डिकामण्डपं प्रति ॥ ७ ॥

राज्योपचारैः रचयेदुत्सवं लक्षमानवैः ।
नातः परतरं विष्णोर्यन्त्रातरमवेक्ष्यते ॥ ८ ॥
चातुर्मास्ये स्थापयेच्च कार्तिकेऽन्नानि चार्पयेत् ।
विष्णोः प्रसादं भुञ्जीत तत्पावित्र्यं श्रिया कृतम् ॥ ९ ॥
नैवेद्यान्नं जगद्भर्तुर्गांगं वारि समं द्वयम् ।
अपि कुक्कुरचाण्डालस्पृष्टं दिव्यं जलान्नकम् ॥१०॥
यात्रा द्वादश वै कार्या मोक्षदा जगदीशितुः ।
वैशाखशुक्लतृतीये रथनिर्माणयात्रिका ॥११॥

ज्येष्ठे यात्रां पञ्चतीर्थीं पद्भ्यां गत्वा समाचरेत् ।
ज्येष्ठे कार्या गुण्डिकाभिगतिर्वै रथयात्रिका ॥१२॥
ज्येष्ठे प्रासादाभिगतिस्तुर्या दक्षिणयात्रिका ।
आषाढे शयनीयात्रा कर्तव्या माश्चतुष्टयी ॥१३॥
भाद्र पार्श्वपरिवृत्तिर्यात्रा पूजनरूपिणी ।
कुमुदे बोधिनीयात्रा महोत्सवस्वरूपिणी ॥१४॥
मार्गे प्रावरणयात्रा और्णवस्त्रादिधारणम् ।
पौषे पुष्यस्नानयात्रा तपःस्नानात्मिका शुभा ॥१५॥

पौषे सूर्योत्तरयानयात्रा पुण्यात्मिका मता ।
माघे वसन्तयात्रा च पूजोत्सवात्मिका मता ॥१६॥
फाल्गुने पुष्पदोलाया दोलायाः श्रावणेऽथवा ।
एवं महोत्सवाः कार्या मोक्षदा जगदीशितुः ॥१७॥
जगन्नाथपुरे दिव्ये जातिभेदो न विद्यते ।
नरनारीप्रभेदोऽपि तत्र कार्यो न सर्वथा ॥१८॥
सर्वे चतुर्भुजा दिव्या दृश्यन्ते तु द्विहस्तकाः ।
वसन्ति सर्वे मुक्ता मे पुण्यपुञ्जप्रदायकाः ॥१९॥

सर्वं प्रासादिकं मेऽस्ति दिव्यं दोषविहीनकम् ।
गोलोकं चापि वैकुण्ठं मया पृथ्व्यां समाहितम् ॥२०॥
नार्यो लक्ष्म्यो नरा नारायणा मे जगदीशितुः ।
कृपया च प्रतापेनाऽनुग्रहेण मता मम ॥२१॥
भोज्याऽन्नपानवस्त्रादि नाऽशुद्धं तत्र विद्यते ।
एकादशीमया तत्राऽन्नाशने तु वशीकृता ॥२२॥

मत्प्रसादान्नभोज्यैर्न दूषणं किन्तु भूषणम् ।
साधुसेवा गुरुसेवा मम सेवाऽत्र मुक्तिदा ॥२३॥
मया गोपीविहारैर्दीयते शश्वद्धि दर्शनम् ।
दिव्या क्रीडा कामरूपा संशयात्मविनाशिनी ॥२४॥

दिव्यभावात्मनां मोक्षानन्दसन्दोहदायिनी ।
एवं स्वात्मनि विज्ञाय दिव्यतां यान्ति देहिनः ॥२५॥
अहं गोपीपतिर्वृन्दावने कुंकुमवापिके ।
पुरुषोत्तमभूमौ च दुर्गभूमौ प्रसिद्धिमान् ॥२६॥

यस्मै यस्मै प्रसन्नः स्यां नान्यत्तस्याऽवशिष्यते ।
आनन्ददाता वै चास्मि यथा यैर्मत्त इष्यते ॥२७॥
लक्ष्मि ! क्षेत्रे मोक्षदे मे स्थापनं जगदीश्वरे ।
दर्शनं स्पर्शनं दूरस्मरणं चापि मोक्षदम् ॥२८॥
तुभ्यं मया कथितोऽयं कृतसन्तानखण्डकः ।
लक्ष्मीनारायणसंहितायाः प्रथमकोत्तमः ॥२९॥
अत्राऽऽरम्भे नारदस्य वैकुण्ठे द्रवता हरौ ।
मुक्तादीनां द्रवमुक्तिः साकारत्वं परेऽक्षरे ॥३०॥

गोलोकस्य प्रनिर्माणं राधार्थं कृष्णरूपतः ।
वैकुण्ठस्य च निर्माणं लक्ष्म्यर्थं चाक्षरेशितुः ॥३१॥
वासुदेवात्समारभ्य परमेष्ठ्यन्तसर्जनम् ।
ब्रह्मविष्णुमहेशानामनेकत्वं ततः परम् ॥३२॥
अव्याकृतस्य च बद्रिकाश्रमस्य च दिव्यता ।
ब्रह्मणा वीक्षिता सृष्टिर्नारायणतनौ धियै ॥३३॥
ब्रह्मविष्ण्वोर्महत्त्वे च विवादः कवचादिकम् ।
ब्रह्मतेजोमयशंभुलिंगाविर्भावकीर्तनम् ॥३४॥

लिङ्गान्तवीक्षणे मृषावादी ब्रह्मा च केतकी ।
अपूज्यतां सदा प्राप्तौ विष्णोश्च पूज्यतेति च ॥३५॥
अण्वण्डानां समुत्पत्तिरावरणेषु वासिनः ।
क्षणादिकमहाकालगणना च ततः परम् ॥३६॥
ब्रह्मणा च गुणाऽज्ञानाऽधर्माद्या मानसाः कृताः ।
धर्मरुद्रकृतान्तानां सृष्टिः रुद्रलयस्तथा ॥३७॥
सात्त्विकरुद्ररुद्राणीदासदासीप्रसर्जनम् ।
सनकादिशान्तसृष्टिर्वेदप्राकट्यमित्यपि ॥३८॥

माहात्म्यं च सतां दिव्यगीतादिसृष्टिरित्यपि ।
उपनिषत्कन्यकानां सृष्टिर्विद्याप्रसर्जनम् ॥३९॥
ब्रह्मप्रियादिगायत्रीसरस्वतीप्रसर्जनम् ।
एकादशीजयन्त्यादिभक्त्याराधनसर्जनम् ॥४०॥
महालक्ष्मीरमाराधासतीगंगादिसर्जनम् ।
साध्वीनां दिव्यनारीणां दिव्यचिह्नगुणादिकम् ॥४१॥

नारायणावतारात्मनरनारीप्रचिह्नकम् ।
पतिव्रताया उत्पत्तिः सामर्थ्यं च ततः परम् ॥४२॥
कुंकुमाऽक्षतताम्बूलनारिकेलरसादिकम् ।
रक्तगैरिकधात्वादि यथोत्पन्नं तथोदितम् ॥४३॥
कामधेनुसमुत्पत्तिः कामदेवादिसर्जनम् ।
पत्नीव्रतद्विजोत्पत्तिः पितृसेवामहत्त्वकम् ॥४४॥
पत्नीव्रतस्य माहात्म्यम् ऋणानुबन्धिपुत्रता ।
गर्भे निषेके प्राबल्यं कालदेशादिजं तथा ॥४५॥
निषेकसमयो रजोदोषापहरणं व्रतम् ।
आद्ये दिने ब्रह्मणस्तु ब्राह्मणानां प्रसर्जनम् ॥४६॥
सत्यलोके मानसी चर्षीणां सृष्टिः प्रकाशिता ।
महर्जनतपःस्वेव पितॄणां सर्जनं तथा ॥४७॥
पितृभ्यो देयमन्नादि हव्यवृक्षादिकं तथा ।
सूर्योत्पत्तिर्हिरण्यादि धाम चन्द्रोद्भवस्तथा ॥४८॥
रोहिण्यां पक्षपातेन चन्द्रस्य क्षयरुग्णता ।
सौराष्ट्रे सोमनाथस्य स्थापनात् क्षयहीनता ॥४९॥
देवमानुषभूतादिदैत्यदानवजंगमाः ।
यथा सृष्टा उदितास्ते युगवर्षादिसिद्धयः ॥५०॥
सिद्धिह्रासो नगराद्यौषधिवर्णाश्रमादिकम् ।
विश्वरूपस्य हत्यायाश्चतुर्धादानमित्यपि ॥५१॥
दध्यङ्ङास्थिकृतवज्रं वृत्रनाशोऽश्वमेधकः ।
वराहस्याऽवतारश्च पृथोश्चाऽवतरस्तथा ॥५२॥
मिथुनीसृष्टिसञ्चारः स्वप्नं मृत्युप्रदं तथा ।
चक्रवर्तिप्रचिह्नानि हिंसापक्षिप्रपातनम् ॥५३॥
द्वापरस्य स्वभावाश्च रैवतं नारदागमः ।
तत्त्वोद्देशो विवरश्च भुवो विवरपूरणम् ॥५४॥
रैवतस्य चन्द्रभावो मण्यंशो रैवतः स्वयम् ।
खट्वांगस्य तपश्चाऽश्वपट्टसरसि वर्णितम् ॥५५॥
कुंकुमवापिकातीर्थं गोपालकृष्णकोद्भवः ।
कम्भराया महालक्ष्म्याः प्रादुर्भावः समीरितः ॥५६॥
लक्ष्मीनारायणजन्म बर्हिषांगदकोद्भवः ।
पत्नीव्रतर्षेश्च गले मृतसर्पप्रसञ्जनम् ॥५७॥
ऋषेः पुत्रस्य शापेन कुहकदंश इत्यपि ।
प्रायोपवेशनं राज्ञः कथायाः स्थापनं तथा ॥५८॥
मूर्तिध्यानं व्रतदायास्तटे धन्वन्तरेर्गमः ।
सर्पसत्रं रक्षणं च सूर्यस्यापि विवाहनम् ॥५९॥
सूर्यपत्न्यास्तु संज्ञाया रूपद्वयस्य धारणम् ।
श्राद्धदेवयमयमीजननं च ततः परम् ॥६०॥

छायायामश्विनीवैद्याद्युत्पत्तिश्च ततः परम् ।
याम्यमार्गपुराणां वर्णनं नारकवर्णनम् ॥६१॥
नारकाणां फलं कर्म जन्मचिह्नादिकं तथा ।
शारीरदैवचिह्नानि श्रियाश्रिह्नानि योषिताम् ॥६२॥
शवौर्ध्वदैहिकं प्रेतपीडा तस्या निवारणम् ।
प्रेतता प्रेतभोज्यादि सूतकं पिण्डकार्पणम् ॥६३॥
दानफलं पिण्डब्रह्माण्डैक्यं निषेकनिर्मितिः ।
मृतानां दानकार्यैर्गतयो मुक्तिसाधनम् ॥६४॥
नारायणबलिश्चापि धन्वन्तरेः कथा तथा ।
सोमजन्म गुरुपत्न्या अपहृतिर्बुधोद्भवः ॥६५॥
धन्वन्तरित्रयजन्म दिवोदासकथानकम् ।
शंभोर्वाराणसीत्यागो दिवोदासे सविघ्नता ॥६६॥
योगिन्यर्कविधातृश्रीगणेशस्वप्नवर्तनम् ।
विष्णोर्नास्तिक्यकरणं राज्ञः प्रतापनाशनम् ॥६७॥
लक्ष्मीनारायणसंहितायाः सप्ताहवाचनम् ।
विश्वेश्वरप्रतिष्ठा च राज्ञो भक्तिविवर्धनम् ॥६८॥
इन्द्रसदसि च गुरोरवमानं दुर्वाससः ।
मालाया अवमानं च श्रीह्रासोऽब्धिप्रमन्थनम् ॥६९॥
रत्नोत्पत्तिरमृतार्थे दैत्यानां वञ्चनं तथा ।
सुरासुररणः पश्चात् पार्वत्यै मन्त्रयोजनम् ॥७०॥
पुण्यव्रतं च पुत्रार्थे कृष्णदर्शनमित्यपि ।
कार्तिकेयसमुत्पत्तिर्देवसेनापतित्वकम् ॥७१॥
तारकासुरनाशश्च तारकाख्यानमित्यपि ।
भिक्षार्थे श्रीकृष्णगतिर्गणेशोत्पत्तिरित्यपि ॥७२॥
शिरोनाशो गजमस्तकस्य सन्धानमर्चनम् ।
शनेर्दृष्टेः फलं चेति गणेशकार्तिकेययोः ॥७३॥
पृथ्वीप्रदक्षिणं चापि विवाहो मल्लिकार्जुनम् ।
नरनारायणप्रादुर्भावः पित्रोः प्रसेवनम् ॥७४॥
शंभोर्वैष्णवदीक्षाया ग्रहः सत्या अपि ग्रहः ।
तप्तचक्रांकनपुण्यं मन्त्रार्थास्तिलकानि च ॥७५॥
धाम्नां नामानि च परब्रह्मधाम्नः प्रवर्णनम् ।
अक्षरवर्णनं चापि गोलोकवर्णनं तथा ॥७६॥
स्थानानां गोपुरादीनां पट्टांगनानां वर्णनम् ।
महावैकुण्ठकथनं सप्तव्यूहादिवर्णनम् ॥७७॥
दासदासीभवनानां पार्षदानां च वर्णनम् ।
द्वितीयवैकुण्ठकस्य वर्णनं च जलोपरि ॥७८॥
तृतीयश्वेतद्वीपस्य वर्णनं सोपभूतिकम् ।
चतुर्थक्षीरवार्धिस्थवैकुण्ठवर्णनं तथा ॥७९॥

शंभोर्भस्माऽवगुण्ठादिशंकाया वारणं तथा ।
हयग्रीवाऽसुरोत्पत्तिर्मत्स्यावतरणं तथा ॥८०॥
नौकाया धारणं हिरण्याक्षनाशो वराहतः ।
जयस्य विजयस्याऽपि वैकुण्ठात्तु विवासनम् ॥८१॥
वाराहेण यथास्थानं पृथिव्याः स्थापनं ततः ।
तपो हिरण्यकशिपोः रुद्राच्च वरदानकम् ॥८२॥
प्रह्लादस्य ततो द्वेषो नृहरेरुद्भवस्ततः ।
हिरण्यकशिपोर्नाशः प्रह्लादस्य प्ररक्षणम् ॥८३॥
रैवताद्रौ वामनस्य प्रतापश्च प्रदक्षिणम् ।
मयराजस्य यज्ञश्च तीर्थानि विविधानि च ॥८४॥
अदितेश्च तपश्चर्या वामनोत्पत्तिरित्यपि ।
बलेर्यज्ञे याचना चेन्द्राय त्रिलोकदानकम् ॥८५॥
पयोव्रतं मृगीकुण्डकथा शकुनकानि च ।
तीर्थविधिर्व्रतादीनि चेन्द्रेश्वरकथानकम् ॥८६॥
शिवरात्रिमहिमादि मन्दराद्यागमस्तथा ।
अनेकतीर्थागमनं महालक्ष्मीप्रपूजनम् ॥८७॥
अलक्ष्म्याश्च समुत्पत्तिर्वासस्थानानि यान्यपि ।
द्वादश्यां हरिवासत्वं स्थानं लक्ष्म्याः समर्पणम् ॥८८॥
रेवतीजन्म च दुर्दमेन सह विवाहनम् ।
रेवतस्य तथा जन्म कृतवाचो गृहे पुनः ॥८९॥
रेवतीजन्म च विवाहनं बलेन वै पुनः ।
तीर्थे दामोदरकुण्डे श्राद्धादिकफलं तथा ॥९०॥
पत्नीव्रतद्विजस्याऽत्र सर्वधामप्रदर्शनम् ।
द्वयोर्नारायणयोश्च श्राद्धकर्मप्रवर्तनम् ॥९१॥
वस्त्रापथस्य तीर्थानि राधालक्ष्म्यादिसंभवः ।
मधुकैटभनाशार्थं मोहिनीभवनं हरेः ॥९२॥
महिषासुरनाशार्थं कात्यायनीप्रकाश्यता ।
ब्रह्मणो वीर्यतो जन्म महर्षीणां पुरोदितम् ॥९३॥
सतीजन्म दक्षजन्म पुनर्नारदजन्म च ।
शुंभनिशुंभयोर्जन्म कालीचामुण्डिकाजनुः ॥९४॥
रक्तबीजादिनाशश्च देवीसैन्योद्भवस्तथा ।
शुंभादीनां विनाशश्च सतीप्राकट्यकोत्सवः ॥९५॥
गोपगोपीगणोत्पादो देव्युत्पत्तिश्च नैकधा ।
शंभोर्वैराजभालोत्था सत्यास्तपसि वर्तनम् ॥९६॥
विवाहश्च वालखिल्याद्युत्पत्तिर्वेधसोऽपि च ।
कैलासपुरनिर्माणं शिवस्याऽऽत्मनिवेदिता ॥९७॥
दक्षयज्ञे द्विजानां च शापाः सत्या विनाशनम् ।
वीरभद्रकृतयज्ञभंगो दक्षस्य वै तपः ॥९८॥
शंभोर्भस्माऽस्थिधारित्वं पार्वतीजन्म इत्यपि ।
पितृकन्यास्तिस्र एता मेना धन्या कलावती ॥९९॥
तासां पुत्र्यः शिवा चापि सिता राधा हरिप्रियाः ।
कालीमन्त्रोत्सवश्चापि पार्वतीगुणवर्णनम् ॥१००॥
पार्वतीतप एवाऽथ मंगलोत्पत्तिरेव च ।
शंभोर्गोलोकधेन्वां वै वृषरूपोद्भवस्तथा ॥१०१॥
ब्रह्मवीर्याद्ब्रह्मपर्यो ब्रह्मसरस इत्यपि ।
शंभोर्वीर्याच्च हनुमान् वायुद्वारा समुद्गतः ॥१०२॥
शनैश्वरः पन्नतिश्च कामदाहो वरस्ततः ।
गौरीतपः शंकरस्य दर्शनं च गृहं गतिः ॥१०३॥
शंभोश्च नर्तनं शिवनिन्दा लग्नविनिर्णयः ।
मंगलं मण्डपशोभा पत्रिका वरयात्रिका ॥१०४॥
मेनाशोकनिवृत्तिश्च वरस्यापि प्रपूजनम् ।
कुलदेवीपूजनं च शिवस्य मण्डपागमः ॥१०५॥
विवाहः कालिकायाश्च गौरी जाता ततः परम् ।
लिंगपातो द्वादशज्योतिर्लिंगानां समुद्भवः ॥१०६॥
गुरुपूजामहिमादि सन्ध्यापित्रादिकोद्भवः ।
स्वर्णोत्पत्तिर्नारदस्य तथा गन्धर्वपुत्रता ॥१०७॥
मरणं जीवदानं च वैष्णवत्वं मृतिस्तथा ।
पुनर्नारदजन्मापि कैलासगमनम् ऋषेः ॥१०८॥
शंकराद् ब्रह्मज्ञानं च बदर्यागमनम् ऋषेः ।
तीर्थानि मार्कण्डकस्य चीरजीवित्वकारणम् ॥१०९॥
पञ्चशिलादितीर्थानि सोमकुण्डादयस्तथा ।
उर्वश्याश्च समुत्पत्तितीर्थादीनि शुभानि च ॥११०॥
नारदस्य विवाहश्च तथाऽग्निवंशवर्णनम् ।
काश्यपीयप्रजोद्देशः कल्पादीनां च वर्णनम् ॥१११॥
कलेर्धर्मा अथाऽऽनर्ताऽऽनीतसौराष्ट्रदेशता ।
द्वारिकावर्णनं चापि गोमत्यादिकवर्णनम् ॥११२॥
नृगराजसमाख्यानं दुर्वाससो रथे स्थितिः ।
गोपीतटाकमाहात्म्यं ब्रह्मकुण्डादितीर्थकम् ॥११३॥
कुशादिदैत्यनाशश्च पट्टराज्ञीस्थलानि च ।
कृष्णार्चनं सोमशर्मपितृप्रमोक्षणं तथा ॥११४॥
शंखपिण्डारकतीर्थे गोदावर्यास्तथाऽऽगमः ।
वज्रलेपाऽघनाशित्वं मायानन्दकथानकम् ॥११५॥
त्रिस्पृशैकादशी दैत्यमुरनाशादिकं तथा ।
उन्मीलनी पक्षवर्धा तथान्यासां व्रतानि च ॥११६॥
स्वर्णांगदस्य च वैश्वानरस्य लुंभकस्य च ।
केतुमतः कपिलाया गान्धर्वयोः कथास्तथा ॥११७॥

पर्शुरामजयो धात्रीकथा मेधाविनः कथा ।
ललितयोः कथा वरूथोद्धारादिप्रकीर्तनम् ॥११८॥
धृष्टबुद्धेर्विमुक्तिश्च शलभामोक्षणं तथा ।
कृत्वाख्यानं हेममाल्याख्यानं वामनकृच्छ्रकम् ॥११९॥
श्रावणानां महासिद्धिः रतेः कामाभिप्रापणम् ।
पुरुरवोपाख्यानं च हरिश्चन्द्रकथा ततः ॥१२०॥
मान्धातृकथनं शूद्रतपो धर्मस्य नाशनम् ।
चन्द्रसेनकथा वेदशिरःकथानकं तथा ॥१२१॥
इन्द्रसेनचन्द्रभागाकथा चाण्डालमोक्षणम् ।
कृच्छ्रव्रतानि च शाकटायनस्यर्द्धिवर्धनम् ॥१२२॥
पुण्डरीककुमुदद्वत्योरक्षराख्यपदे गतिः ।
उद्यापनं च प्रतिपद्व्रतानि च बहून्यपि ॥१२३॥
द्वितीयायास्तृतीयायाश्चतुर्थ्याश्च व्रतान्यपि ।
पञ्चम्याः षष्ठिकायाः सप्तम्या व्रतानि यान्यपि ॥१२४॥
अष्टम्याश्च नवम्याश्च दशम्याश्च व्रतान्यपि ।
एकादश्या द्वादश्याश्च त्रयोदश्या व्रतानि च ॥१२५॥
चतुर्दश्याः पूर्णिमाया अमायाश्च व्रतानि च ।
दोलाव्रतं रथयात्रा धनुर्मासो वसन्तकः ॥१२६॥
संक्रान्तिहोलिकापुष्पदोलाश्च शारदोत्सवः ।
लक्ष्मीनारायणव्रतं सुमतेश्च कथानकम् ॥१२७॥
हरिपञ्चकसंज्ञं च व्रत वारव्रतानि च ।
रुक्मांगदसमाख्यानं विद्धाऽऽख्यमोहिनीकृतम् ॥१२८॥
यमस्य शोचनं मोहिन्याश्च जन्म ततः परम् ।
रुक्मांगदस्य पत्नीत्वं व्रतभंगकरं वचः ॥१२९॥
धर्मांगदाख्यपुत्रस्य शिरोऽर्पणादिकं ततः ।
मोहिन्या दाहनं पश्चाद् विद्धातिथित्वमित्यपि ॥१३०॥
पुरुषोत्तममासस्य व्रतदानमहत्त्वकम् ।
बदर्यो मलमासस्य तिरस्कारे ततः परम् ॥१३१॥
अक्षरं धाम गमनं पुरुषोत्तमनामिता ।
तृतीयार्चाफलं रमाकृतं चतुर्थिकाव्रतम् ॥१३२॥
शारदा श्रीहरेः पत्नी जाता वै पञ्चमीव्रतात् ।
मेनाधन्याकलानां तु षष्ठीव्रतेन ईश्वराः ॥१३३॥
जामातरोऽभवन् शंभुरामकृष्णाः परेश्वराः ।
पतयः पार्वतीसीताराधानां परमेश्वराः ॥१३४॥
सप्तमीव्रततः सिद्धिबुद्धिभ्यां श्रीगणेश्वरः ।
पतिः प्राप्तश्च गोलोकेश्वरः श्रीकृष्ण एव यः ॥१३५॥
अष्टमीव्रततो घण्टाकम्बुदुन्दुभिप्रभृतेः ।
वाद्यगणस्य देवानां सन्निधौ वसतिः सदा ॥१३६॥
नवमीव्रततो वह्निसुवर्णयोः प्रपूज्यता ।
दशमीव्रततः पृथ्व्यामवतारो हरेः सदा ॥१३७॥
एकादशीव्रतान्मूर्त्यां नरनारायणोद्भवः ।
द्वादशीव्रततः सावित्री ब्रह्माणमवाप ह ॥१३८॥
त्रयोदशीव्रताज्जयाललितापार्वतीप्रभाः ।
अनादिश्रीकृष्णनारायणं प्रापुः पतिं मुदा ॥१३९॥
चतुर्दशीव्रताल्लक्ष्मीर्माणिकी चापतुः पतिम् ।
अनादिश्रीकृष्णनारायणस्वामिनमीश्वरम् ॥१४०॥
पूर्णाव्रतात्प्रेयसीश्रेयस्योः पतिर्नरायणः ।
अन्यपक्षे प्रतिपदि व्रतात् सहस्रनेत्रकः ॥१४१॥
राजा ह्यवाप च पदं वैराजं चैश्वरं शुभम् ।
द्वितीयाया व्रतात् सर्वहुतो नृपः ऋतम्भरा ॥१४२॥
पत्नी ज्ञातौ परमेष्ठी गायत्री चेति दैवतौ ।
तृतीयाया व्रताद् ब्रह्मसविता नृपतिस्तथा ॥१४३॥
भूरिशृंगा च तत्पत्नी सूर्यसंज्ञे बभूवतुः ।
चतुर्थीव्रतकरणात् समित्पीयूषभूपतिः ॥१४४॥
सप्तविंशतिपत्नीभिः सह चन्द्रो बभूव ह ।
पञ्चमीव्रतकरणाद् वसुदाननृपस्तथा ॥१४५॥
राध्यासा तस्य पत्नी च हिरण्मयौ बभूवतुः ।
षष्ठीव्रतेन च देवयवगिरिक्षितौ पुरा ॥१४६॥
पत्नीभ्यां सह माहेन्द्रपदमवापतुर्दिवि ।
सप्तमीव्रतकरणात्सन्ध्या जाता ह्यरुन्धती ॥१४७॥
सन्ध्या द्वेधा समुत्पन्ना कामस्य यौवने गतिः ।
अष्टमीव्रतकरणाद् गोपालकृष्णसद्गृहे ॥१४८॥
कम्भरालक्ष्मीसुतोऽभूत् श्रीकृष्णपुरुषोत्तमः ।
नवमीव्रतकरणात् शतमखनृपगृहे ॥१४९॥
सुवर्णायां रामादित्यनरादित्यौ बभूवतुः ।
दशमीव्रतकरणाद् विकुण्ठायाः स्वरूपतः ॥१५०॥
षट्श्रीरूपाणि चत्वारि वैकुण्ठान्यभवन्पुरा ।
एकादशीव्रतेनापि वम्री दशप्रचेतसाम् ॥१५१॥
पत्नी जाता वृक्षपुत्री ब्रह्मतनुविराजिता ।
द्वादशीव्रतकरणाज् ज्योत्स्नी त्रेधा हरेः प्रिया ॥१५२॥
त्रयोदशीव्रतेन सुदुघा पञ्चपतिप्रिया ।
चतुर्दशीव्रताद् दृढधन्वा मोक्षमवाप ह ॥१५३॥
अमाया व्रतकरणात् कदर्यमोक्षणादिकम् ।
धर्मपत्न्यश्च तत्पुत्राः ब्रह्माद्या ब्रह्मदर्शकाः ॥१५४॥
व्रताराधनया जाता हरेर्दर्शनकारिणः ।
जालंधरसमाख्याने वृन्दाया राधिकाशपात् ॥१५५॥

कालनेमिसुता त्वं च जालन्धरोद्भवस्तथा ।
देवपराजयो जालंधरगृहेऽवसद्धरिः ॥१५६॥
जालंधरो ययौ नेतुं पार्वतीं कैलकासनम् ।
वृन्दापातिव्रत्यभंगो जालन्धरविनाशनम् ॥१५७॥
वृन्दादत्तो धर्मदेवे शापो वृन्दा तु तुलसी ।
लक्ष्म्यास्तुलसीरूपत्वं गंगाद्याः सरितस्तथा ॥१५८॥
पद्मावत्यास्तुलसीत्वं सीता कुशध्वजोद्भवा ।
सुदामा शंखचूडोऽभूत् युद्धं तस्य च शंभुना ॥१५९॥
तुलसीशिलभंगश्च विष्णुः शालशिलात्मकः ।
पूजामाहात्म्यं तुलसीविष्णवोर्विवाहनं तथा ॥१६०॥
गण्डकीविष्णुसालंकायनाख्यानानि चक्रकम् ।
शालग्रामात् हरिहरक्षेत्रे तीर्थानि वै ततः ॥१६१॥
रुरुऋषीकेशतीर्थे लोहार्गलादिकं तथा ।
माथुरक्षेत्रमाहात्म्यं कृष्णावतरणं पुरा ॥१६२॥
निषादस्य राजजन्म राक्षसस्य च मोक्षणम् ।
भाण्डीरादिकतीर्थानि प्रक्रमणं वनानि च ॥१६३॥
विप्रस्य ब्रह्महत्यादिनाशनं कपिलात्ततः ।
वाराहमूर्तिदिव्यत्वं प्रतिष्ठानादिकं ततः ॥१६४॥
विश्रामघाटस्नानेन राक्षसत्वनिवारणम् ।
डाकिन्यादिमोक्षणं च कृष्णनारायणकृतम् ॥१६५॥
सुभद्रस्य सुतप्राप्तिर्गोकर्णे तीर्थमित्यपि ।
कुंकुमवापिकोद्याने वृक्षवल्ल्यादिदिव्यता ॥१६६॥
शुकमोक्षश्च गोकर्णद्वारा प्रेतप्रमोक्षणम् ।
पाञ्चालद्विजमुक्तिश्च भगिनीरतिनाशिका ॥१६७॥
साम्बे क्षोभजपापानां क्षालनं कृष्णयोषिताम् ।
भवतीर्थे कोटिपितृद्धारो दासीकृतः पुरा ॥१६८॥
निमिना पुत्रतृप्त्यर्थं श्राद्धं कृतं विधानतः ।
मेधातिथेः कथा श्राद्धे पितरश्च प्रदर्शिताः ॥१६९॥
नाचिकेतःकथा याम्यपुरीप्राकारवर्णनम् ।
नारकाणां दर्शनं च फलोदयसमीरणम् ॥१७०॥
पतिव्रताया माहात्म्ये जनकस्त्री वने पुरा ।
सम्पद्वती च सञ्जाता पातिव्रत्यकथा तथा ॥१७१॥
धेनुसेवा साधुसेवा सावित्र्यां वेददर्शनम् ।
सरमा गोरक्षयित्री दैत्यान् ददाह शापतः ॥१७२॥
अश्वपतिगृहे पुत्री सावित्री तपसाऽभवत् ।
कर्मफलानां कथनं सत्यवतश्च जीवनम् ॥१७३॥
पद्मायाः पिप्पलादेन विवाहो धर्मशापनम् ।
महालक्ष्म्याः कथा दिव्या नहुषस्य च सर्पता ॥१७४॥

अहल्यया काशिरक्षेन्द्रस्य भगांगता तथा ।
सीतारामवनावासो रावणादिविनाशनम् ॥१७५॥
पातिव्रत्ये राधिकाया उपदेशप्रशंसनम् ।
गृहगोधाकथा चापि काष्ठिलायाः कथानकम् ॥१७६॥
स्त्रीधर्माणां वर्णनं च हरिण्या वनरक्षणम् ।
रेणुकायाः कथा दिव्या भार्गव्याश्च कथा तथा ॥१७७॥
भार्गव्याः श्रीकृष्णनारायणेन च विवाहनम् ।
च्यवनर्षिकथा तेन सुकन्याया विवाहनम् ॥१७८॥
माण्डव्यस्य कौशिकस्य कथा सूर्योदयादिकम् ।
मदालसाविवाहश्च पुत्राणामुपदेशनम् ॥१७९॥
अलर्कस्याऽऽत्मविज्ञानं दत्तात्रेयस्य शिष्यता ।
पद्मिन्या जन्म च तथा नारायणविवाहनम् ॥१८०॥
वेंकटाद्रौ तोण्डमानकृतवाराहमन्दिरम् ।
ऋक्षविश्वासस्य हन्तुः धर्मगुप्तादिकस्य च ॥१८१॥
मुक्तिश्च सुमतिभद्ररामानुजप्रमोक्षणम् ।
जाबालितुम्बुरुतीर्थे व्यासस्य पूजनादिकम् ॥१८२॥
ब्रह्महत्यानिवारश्च सुवर्णमुखर्यागमः ।
वाराहोद्भव आञ्जन्यास्तपः पक्षजडीभवः ॥१८३॥
महेन्द्रादिजडीभावः ख्यातेरुज्जीवनं तथा ।
जयन्ती देवयानी च शुक्रकथा तथोदिता ॥१८४॥
नारदस्य पुनरुज्जीवनं मालावतीकृतम् ।
वीरायाश्च प्रभावत्याश्चमत्कारौ तथोदितौ ॥१८५॥
शक्तिपत्न्या शिलारूपा जाताः शप्ता यमादयः ।
अम्बरीषसमुत्पत्तिः श्रीमत्याश्चापि मोक्षणम् ॥१८६॥
दरिद्रताबुभुक्षाकलहादीनां निवासनम् ।
दासीकिंकरीपण्यस्त्रीदानधर्मनिरूपणम् ॥१८७॥
पातिव्रत्यं हरौ कृष्णे बाले नागिनीसंधृतम् ।
लक्ष्म्यादिसत्युद्भवश्चाऽसंख्यपत्नीसमुद्भवः ॥१८८॥
अनादिश्रीकृष्णनारायणस्य दर्शनं पुरा ।
श्रीमच्छ्रीकम्भरालक्ष्मीगोपालकृष्णयोरतपः ॥१८९॥
चतुर्युगानां धर्माश्च ततो वै सन्निरूपिताः ।
त्रिवेण्या नूतनं स्वर्गे भरद्वाजगृहे कृतम् ॥१९०॥
शबरीपम्पयोः रामयोगेन मोक्षणं तथा ।
चित्रलेखाचमत्कारा महीसागरसंगमे ॥१९१॥
कलहाया राक्षसीत्वं ततश्च मोक्षणं परम् ।
चोलराजविष्णुदासकथा कैकयीजन्म च ॥१९२॥
गोकुलकन्यकामोक्षो गोपीनां कृष्णमेलनम् ।
वीरबाहोः कान्तिमत्याः मुक्तिर्जन्मत्रयोत्तरम् ॥१९३॥

कालिन्द्या उद्धवस्यापि ध्यान्यासां पतिवर्तनम् ।
दानकन्नृपतेर्यात्रा नारकाणां च मोक्षणम् ॥१९४॥
संहितायाः कथाश्रावात् पिशाचत्वविमोक्षणम् ।
हेमन्तस्य पातिव्रत्याद् राज्यप्राप्तिः प्रमोक्षणम् ॥१९५॥
पतिद्वेष्ट्र्याः शुनीत्वं चोर्वशीत्वं च ततः परम् ।
विधूमस्याऽलम्बुषाया मोक्षणं परिकीर्तितम् ॥१९६॥
विद्याधरसुदर्शस्य वेतालत्वनिवारणम् ।
जरत्कार्वीचमत्कारः सुमित्रायाः प्रभावनम् ॥१९७॥
पुण्यनिधेः सुता लक्ष्मीः नारायणकृपादिकम् ।
तपतो धर्मदेवस्य वर्धिनी सेविकाऽभवत् ॥१९८॥
गान्धर्वीणां कुलदेवीत्वादिकं विप्रगोत्रकम् ।
स्त्रीणां मोक्षः तुलस्यादिवृक्षाणां देवतात्मता ॥१९९॥
सुयशराजसूये च कृतघ्नानां विवेचनम् ।
सुयशस्य तत्पत्न्याश्च गोलोकगमनं तथा ॥२००॥
तारायाः हरणं चन्द्ररक्षणं धर्मबोधनम् ।
दाशार्हनृपतेः कृष्णमन्त्रग्रहणे योग्यता ॥२०१॥
सीमन्तीन्या जले मग्नः स्वपतिश्चोपजीवितः ।
कन्यावेषस्य पुत्रस्य पुत्रीत्वं समजायत ॥२०२॥
पुण्यकेन व्रतेनापि गणेशपुत्रलाभनम् ।
शबरदम्पतीभस्म पुनस्तयोश्च जीवनम् ॥२०३॥
शारदायाः कृष्णभक्त्या कृष्णपतिप्रमेलनम् ।
शिवाऽच्युतौ चक्रतुर्वीरवनिताप्रमोक्षणम् ॥२०४॥
बन्दुलायाः समुद्धारो विन्ध्याद्रेर्वर्धनं तथा ।
लोपामुद्रापातिव्रत्यं काशीयात्रादिकं ततः ॥२०५॥
जमदग्नेर्विनाशश्च रेणुकायाः सतीव्रतम् ।
मनोरमासतीत्वं च सहस्रार्जुननाशनम् ॥२०६॥
गणेशस्यैकदन्तत्वं गृहपत्यस्य रक्षणम् ।
सुशिलाया राज्यलाभो मोक्षणं पतिभक्तितः ॥२०७॥
स्त्रीणां पवित्रता श्रेष्ठचिह्नान्यपि बहून्यपि ।
द्रौपद्या कृतदुर्वासोभोजनाभ्यागमादिकम् ॥२०८॥
कद्रूविनतासम्वादः सूर्याश्वविषयस्तथा ।
विनतायाश्च दासीत्वं गरुडेन विनाशितम् ॥२०९॥
लीलावत्यास्तथा मोक्षो धूतपापा पतिव्रता ।
धर्मदेवं पतिं प्राप्ता कलावत्याश्चमत्कृतिः ॥२१०॥
गान्धर्वी कृष्णयोगेन गोलोकधामगाऽभवत् ।
सप्तर्षिप्रमदाः कृष्णयोगेन दिव्यतां गताः ॥२११॥
सुरसा नामिनी कृष्णभक्तया सौभाग्यमागता ।
मण्डुकी शिवभक्त्या च गन्धर्वी समजायत ॥२१२॥

पारावतद्वयं भक्त्या मुक्तिमवाप शाश्वतीम् ।
यमस्य धर्मराजत्वं पौलोम्या इन्द्रभार्यता ॥२१३॥
अभिजिन्नृपतेः पुत्रप्राप्तिर्गोलोकमोक्षणम् ।
दुर्वाससः कदल्याश्च विवाहः कदलीद्रुमः ॥२१४॥
अम्बरीषाद्धयं तस्य वारणं भक्तसेवनम् ।
त्वाष्ट्रस्य तु चतुःषष्टिकलापत्नीप्रलाभनम् ॥२१५॥
काश्यां व्यासचमत्कारः पार्वतीमहिमा तथा ।
अग्निशर्मा वाल्मिकी चाऽभवन्मुक्तिं ततो गतः ॥२१६॥
अवन्त्यां लक्ष्मणस्याऽपि मनोमालिन्यमित्यपि ।
वह्निस्पृष्टाः ऋषिपत्न्यः शुद्धा वै पञ्चमीव्रतात् ॥२१७॥
व्यासजन्म नर्मदायाः पातिव्रत्यादिकं शुभम् ।
अनसूयातपःसिद्ध्या त्रिदेवाः पुत्रतां गताः ॥२१८॥
पुरुहूतामोक्षणं च ऋष्यशृंगविघातनम् ।
लोमशेन कृतं चेन्द्रगर्वस्यापि विनाशनम् ॥२१९॥
धन्वन्तरेर्गर्वभंगश्चाष्टावक्रस्य मोक्षणम् ।
कलशस्य तु व्याघ्रत्वं वेनुयोगाच्च मोक्षणम् ॥२२०॥
शर्मवत्या मोक्षणं च कुष्ठिविप्रस्य मोक्षणम् ।
माधव्याः कृष्णपत्नीत्वं शाण्डिल्याश्च चमत्कृतिः ॥२२१॥
अम्बावृद्धाकन्ययोः पादुकापूजनमित्यपि ।
ज्येष्ठे राज्याभिषिक्ते च वृष्ट्यभावेन चानले ॥२२२॥
विश्वामित्रकृतश्चामिषहोमोऽग्निस्तिरोऽभवत् ।
गजमत्स्यादिशापाश्च अजापालचमत्कृतिः ॥२२३॥
दशरथस्य च शनेः रोहिणीवेधरोधनम् ।
अष्टषष्टिप्रतीर्थानि दमयन्त्या समर्पितम् ॥२२४॥
दानं जगृहुर्विप्राश्च व्योम्नो निपेतुरेव ते ।
भद्रिकायाश्चमत्कारः कर्णोत्पलकथानकम् ॥२२५॥
याज्ञवल्क्यचमत्कारो वास्तुपुंसः कथानकम् ।
पूर्णकलाचमत्कारो दीर्घिकायाश्चमत्कृतिः ॥२२६॥
फलवत्या योगिनीत्वं व्यासपुत्रस्य योगिता ।
तिलोत्तमानिमित्तेन शंभोः पञ्चाऽऽस्यतोदिता ॥२२७॥
विश्वामित्रस्य तपसा ब्रह्मर्षित्वमथाऽभवत् ।
साभ्रमत्याः समुत्पत्तिः पिप्पलादोद्भवस्तथा ॥२२८॥
पञ्चपिण्डिकात्मगौरीव्रतं सौभाग्यदं शुभम् ।
हाटकेश्वरजे यज्ञे गायत्र्या विप्रता तथा ॥२२९॥
श्रीकृष्णस्याऽऽगमस्तत्र विश्वावसुश्च राक्षसः ।
अष्टषष्टिमातृगणागमश्च कुलदेवताः ॥२३०॥
राजपुत्रीविप्रपुत्र्योर्मोक्षणं कृष्णयोगतः ।
देवलीला नागनदी विप्रपुत्र्याश्च मोक्षणम् ॥२३१॥

ब्रह्मा शप्तश्च मोहिन्या शुद्धो नागनदीजले ।
षण्ढोत्पत्तिर्हिंगुलाजादीक्षया मोक्षणं तथा ॥२३२॥
शंभोर्गर्वविनाशश्चाऽन्धकनाशो हरेण च ।
इन्द्रद्युम्नस्य च कथा लोमशाश्रम इत्यपि ॥२३३॥
कुंकुमवापिकाक्षेत्रं नारदे वेदवेदिता ।
ब्राह्मीविद्या जन्मदिव्यं लोमशस्य पुराभवः ॥२३४॥
कपिलस्य च विज्ञानं नैकाऽवताररूपता ।
वसोश्च धर्मव्याधत्वं वैशालरैभ्यमोक्षणम् ॥२३५॥
आवन्त्यस्य चमत्कारः स्वप्नादिफलवर्णनम् ।
सूर्यचन्द्राऽदर्शनं सहेतुकं व्याधतोद्भवः ॥२३६॥
जयन्त्यां महिमा प्रोक्तः सनत्कुमारकेण च ।
युद्धं मणिकृते दुर्जयस्य गौरमुखस्य च ॥२३७॥
महातपामिहितं च वेदान्तज्ञानमित्यपि ।
कुंकुमवापिकाश्रैष्ठ्यं पार्वत्यै शंभुनोदितम् ॥२३८॥
ऊर्जकृष्णजयन्त्यां कैलासवासिसमागतिः ।
रैवते सोमनाथे च तलस्यामे प्रभासके ॥२३९॥
उण्णग्रामे च तीर्थानि सिंहमुक्तिस्तथोदिता ।
न्यंकुमत्यां देविकायां सूर्यतीर्थानि राष्ट्रके ॥२४०॥
च्यवनाऽगस्तिवैशालभद्राश्वतीर्थकानि च ।
गुप्तप्रयागोन्नतादिभीमनाथादयस्तथा ॥२४१॥
द्वारिका च चमत्कारपुरं चार्बुदमित्यपि ।
अगस्त्यदिव्यता मंकणकतीर्थादि चार्बुदे ॥२४२॥
नर्मदा ऋक्षकः शैलः कन्याभेदादितीर्थकम् ।
मत्स्यातापीसंगमश्च तथाऽन्ये संगमा अपि ॥२४३॥
बिल्वाम्रकादितीर्थानि सत्यतपसो मोक्षणम् ।
अमरकण्टकजालेश्वरौंकारादयस्तथा ॥२४४॥
धेनुदानं चन्द्रसेनमुक्तिर्गालवमोक्षणम् ।
एरण्डीसंगमो धुन्धुमारमुक्त्यादिवर्णनम् ॥२४५॥
सुखदुःखादिभावाश्च कार्तिकादिप्रशंसनम् ।
मुचुकुन्दादिदृष्टान्तैर्नर्मदायाः प्रशंसनम् ॥२४६॥
सोमशर्माख्यविप्रस्य माधानिषादिनीजनुः ।
रैभ्यस्यापि चमत्कारो नकुलस्य सुवर्णता ॥२४७॥
यज्ञतीर्थशुक्रतीर्थभृगुक्षेत्रादिकानि च ।
दीक्षा भागवती गुडाकेशासुरस्य ताम्रता ॥२४८॥
पूजापराधाः शमनं शृगालगृध्रयोः कथा ।
खञ्जरीटस्य मुक्तिश्च सेवयितुः फलानि च ॥२४९॥
नलमेघविनाशश्च समुद्रसंगमादयः ।
श्रीपुरुषोत्तमक्षेत्रे नीलपर्वतसत्कथा ॥२५०॥

वटस्य दिव्यता विप्रक्षत्रिययोः प्रमोक्षणम् ।
इन्द्रद्युम्नस्य च साक्षाद्दर्शनं गमनं पुरीम् ॥२५१॥
बिल्वेशादिकथा यज्ञावभृथादिनिर्वर्तनम् ।
पूर्णता प्रतिमानां च प्रासादस्य च निर्मितिः ॥२५२॥
ब्रह्मणश्चागमस्तत्र प्रतिष्ठा रथनिर्मितिः ।
अवतारादिकभावस्तथा यात्रोत्सवादयः ॥२५३॥
ग्रन्थवक्तुः प्रपूजादि कृतसन्तानगाः कथाः ।
संक्षेपात्कथिताश्चान्या गौण्यश्चाऽवान्तराश्च याः ॥२५४॥
आख्यानानि चोपव्याख्यानानि सन्ति ह्यनेकशः ।
धर्मार्थकामनास्वापमोक्षदानि निसर्गतः ॥२५५॥
पूर्वकल्पोपकल्पादिसंवृतानि च सन्ति वै ।
तपतामृषिमान्यानां मुनीनां भूभृतां तथा ॥२५६॥
कन्यकानां च बालानां नारीणां भक्तयोषिताम् ।
साधूनां वृक्षवल्लीनां तीर्थानां सरितां तथा ॥२५७॥
देवादीनां पशूनां च पक्षिणां रक्षसां तथा ।
आख्यानानि प्रकीर्णानि प्रसंगे कथितानि वै ॥२५८॥
असुराणां विनाशार्थे देवोद्योगाश्च वर्णिताः ।
पाप्युद्धारकथा दिव्या देवानुग्रहतश्च याः ॥२५९॥
बह्व्यस्ताः कथिताश्चात्र वैदिक्यश्च तथाविधाः ।
अध्यायानां वाचनेन विदिताः स्युः समन्ततः ॥२६०॥
तीर्थाख्यानचमत्कारा अवान्तरोपदेशनाः ।
तत्तत्प्रकरणालोकाद् विदिताः स्युः समन्ततः ॥२६१॥
समुद्रस्य तरंगाणां संख्याः कर्तुं न शक्यते ।
संहिताया विषयाणां गणना शक्तिवर्जिता ॥२६२॥
इत्येवं क्रमणाध्यायः कृतसन्तानकस्य वै ।
कथितः सुगमार्थाय तत्तत्कथासुमार्गणे ॥२६३॥
कथार्थानां वाचनेन स्मरणेन श्रवेण च ।
संहिताफलभाक् स्याच्च क्रमणाध्यायशीलनात् ॥२६४॥
सर्वतीर्थफलं सर्वयज्ञफलं प्रजायते ।
सर्वदानफलं मोक्षफलं तस्य प्रजायते ॥२६५॥
अस्य खण्डस्य यः पारायणं मासेन कारयेत् ।
तस्याऽश्वमेधसहस्रयज्ञजं जायते फलम् ॥२६६॥
सर्वतीर्थफलं स्याच्च सर्वदानफलं भवेत् ।
पत्रे पत्रे कृष्णनारायणयोगोऽत्र वर्णितः ॥२६७॥
योगिनां योगजं पुण्यमेतस्य श्रवणाद्भवेत् ।
आत्मा ब्रह्मदशापन्नः श्रोतॄणां जायतेऽनया ॥२६८॥
वक्तुस्तत्र कथा का वै वक्ता नारायणः स्वयम् ।
श्रोत्री यत्र स्वयं लक्ष्मीर्वेदोऽयं सामसंभवः ॥२६९॥

दिव्यसामानि सन्त्यत्र प्रत्यध्यायं पदानि वै ।
यदुच्चारयितारं वै मम धाम नयाम्यहम् ॥२७०॥
यथा त्वं मे प्रिया लक्ष्मि ! तथेयं संहिता प्रिया ।
लेखयित्वा गृहे रक्ष्या सम्पन्मोक्षप्रदायिनी ॥२७१॥
दिव्योऽहं दिव्यरूपा त्वं दिव्येयं संहिता मम ।
नाऽन्यशास्त्रेण तुल्यत्वं स्थिता सर्वोच्छ्रया यतः ॥२७२॥
त्वं द्वितीयस्वरूपेण संहितात्मतयाऽसि मे ।
श्रोतव्या सावधानेन मण्डपे तोरणान्विते ॥२७३॥
स्वर्णसिंहासने स्थाप्या स्वर्णवस्त्रादिशोभिता ।
नित्यं चन्दनपुष्पाद्यैः फलधान्यधनादिभिः ॥२७४॥
आरात्रिवाद्यघोषाद्यैर्धूपदीपाऽक्षतादिभिः ।
कुंकुमाऽगुरुगन्धाद्यैः पूजनीया जयारवैः ॥२७५॥
ततः संपूजयेद् व्यासं स्वामिश्रीकृष्णवल्लभम् ।
लक्ष्मीनारायणरूपं धनाऽन्नाम्बरभूषणैः ॥२७६॥
दुग्धघृतशर्कराद्यैस्तोषयेद् बहुसेवनैः ।
मत्तो न्यूनो नाऽस्य वक्ता प्रवेशस्तत्र मे तदा ॥२७७॥
तदाशीर्वादवचनं सफलं व्यासपीठजम् ।
तत्पादजलपानेन ध्वंसन्ते पापराशयः ॥२७८॥
तत्पुष्पहारलाभेन महेन्द्रसमृद्धिमाप्नुयात् ।
तस्य दर्शनमात्रेण कृष्णदर्शनजं फलम् ॥२७९॥
तस्य स्पर्शनमात्रेण कृष्णस्पर्शनजं फलम् ।
तस्य सेवनलाभेन कृष्णसेवाफलं लभेत् ॥२८०॥
दिव्ययोगाद् भवेद् दिव्यो नरो वा प्रमदाऽपि वा ।
एनां कृत्वा प्रमूलं च वदिष्यन्ति कथा जनाः ॥२८१॥
व्यासा ग्रन्थान् करिष्यन्ति ह्येतदाधारविस्तृतान् ।
पुरातनानि भावानां हृदयान्यत्र सन्ति हि ॥२८२॥
तत्प्रकाशप्रकर्त्रे वै व्यासपीठाधिवासिने ।
आचार्यश्रीकृष्णस्वामिस्वरूपाय महात्मने ॥२८३॥
राज्ञा देयानि गोवाजिगजग्रामधनानि च ।
अन्यैश्चापि यथासमृद्धि देयं सन्तोषकारि यत् ॥२८४॥
ब्रह्माण्डदानजं पुण्यं भवेद् वाचकपूजनात् ।
यानोद्यानभवनानि दासदासीकुलानि च ।
राज्योपचारयोग्यानि देयानि वाचकाय वै ॥२८५॥
यद्यदिष्टतमं स्वस्य देयं व्यासाय शार्ङ्गिणे ।
कृतसन्तानकश्चाऽयं सत्यकालीनचेष्टिकः ॥२८६॥
सत्यधर्मैः पूरितश्च सर्वधर्मैर्विशिष्यते ।
शृंगारयित्वा बहुधा गजे याने च मस्तके ॥२८७॥
धृत्वा चामरछत्राद्यैर्वर्धयित्वा महोत्सवैः ।
गीतकीर्तननृत्यैश्च वाद्यवैदिकसंस्तवैः ॥२८८॥
सहस्रशो जनैर्ग्रामे पत्तने नगरे गृहे ।
राजधान्यां राजगृहे श्रेष्ठिभिश्च निजालये ॥२८९॥
निधनैर्भावयुक्तैश्च पूजनीयो विशेषतः ।
कुमारिकाभिः कलशैर्जलपत्रफलान्वितैः ॥२९०॥
स्वागतेन वर्धयित्वा कुंकुमाद्यैश्च भावनैः ।
वन्दनीयो मंगलात्मा सौभाग्यवरलब्धये ॥२९१॥
सपतिकाभिरन्याभिः स्वेष्टसौख्यादिलब्धये ।
जनैर्दारसुताद्यर्थे स्त्रीभिः सौभाग्यवृद्धये ॥२९२॥
विद्याधनसमृद्ध्यर्थे चारोग्यद्रव्यादिलब्धये ।
कृतसन्तानकः खण्डः पूजनीयोऽतिदानकैः ॥२९३॥
पूगीफलं धनं स्वर्णं स्पर्शयित्वा स्वकं तदा ।
स्वकोशे रक्षणीयं यद् धनवृद्धिकरं भवेत् ॥२९४॥
साधनानि च सर्वाणि नाऽनेन तुलनानि वै ।
अतुल्यं पूजयित्वैनं भ्रामयित्वा सुपत्तनम् ॥२९५॥
अशेषं नियतस्थाने स्थापनीयोऽतिभावुकैः ।
परंधामाऽक्षरंधामाऽमृतं गोलोकमुत्तमम् ॥२९६॥
वैकुण्ठं श्वेतद्वीपं च श्रीधामेच्छेत्तदाप्नुयात् ।
स्वर्गं माहेन्द्रराज्यं वा पारमेष्ठ्यं पदं च वा ॥२९७॥
वैराजं वा नागराज्यं यदिच्छेत्तल्लभेत च ।
अहं दिव्यस्वरूपोऽस्मि कृतसन्तानमूर्तिकः ॥२९८॥
अध्यायैर्नवतियुक्तपञ्चशतमितैरयम् ।
श्लोकैस्तु पञ्चपञ्चाशत्साहस्रैः केशरूपिभिः ॥२९९॥
मस्तकं मे हि बोद्धव्यः कण्ठोर्ध्वं चायमेव हि ।
ब्रह्मरन्ध्रं मम लक्ष्मि विद्यते, त्वयि चात्र ते ॥३००॥
सौभाग्यपुण्यमूर्धाऽस्ति सर्वथा सर्वमंगलः ।
त्वां मां कृतं भजेत यः सर्वार्थानाप्नुयाद्ध्रुवम् ॥३०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने महावेदी (स्थनिर्माण) महोत्सवः, द्वादशयात्राः, कृतसन्तानोक्तकथानिर्देशाः, ग्रन्थवक्तृपूजादिमहिमेति-निरूपणनामैकोननवत्यधिकपञ्चशततमोऽध्यायः ॥५८९॥

श्रीनारायण उवाच—

अतः परं मम वक्षो लक्ष्मि ! तवैव वक्षसि ।
वर्तमानं दिव्यं त्रेतासन्तानकं हि विद्यते ॥ १ ॥
मया श्रीकृष्णरूपेण राधायै ते कथाः शुभाः ।
गोलोके कथितास्ताश्च सन्ति त्रेताप्रतानके ॥ २ ॥

पुरायुगेऽवतारो मे त्वया साकं सुराष्ट्रके ।
ऊर्जकृष्णाष्टमीरात्र्यां बभूव प्रथमे दले ॥ ३ ॥
सौराष्ट्रे त्वाश्विनकृष्णदलं जानन्ति तत् सदा ।
पूर्वार्धकाले तत्सर्वं व्यवर्तत मम प्रिये ॥ ४ ॥
कृतदेवाः कृतपालाः कृतभक्ताः कृतप्रियाः ।
कृतधर्माः कृतात्मानः पान्तु कृताधिवासिनः ॥ ५ ॥
सत्यसत्यः सत्यदेव्यः सत्यव्रताः सतीस्त्रियः ।
सत्यान्तरसत्मविधृताः पान्तु सत्यसमर्पिताः ॥ ६ ॥
[1]यश्चाऽऽसैक्षणकः स्वविद्रुतिमनु द्रावं गतश्चात्मवान् ।
युक्संज्ञामभिगृह्य लक्ष्मपधरो द्वेधाऽभवन्त्रायणः ॥
रालक्ष्माधिपतिर्गिरां मनुजनौ कृष्णारभृद् गांगतः ।
सोऽहं ज्यर्थमवैमि भक्तिसुभृतैस्ते यन्तु मद्द्व्यर्थकम् ॥ ७ ॥
पूर्णब्रह्मतदीयदिव्यतनवो नारायणाः श्रीः श्रियः ।
ईशा ईशनिकाश्च तत्त्वविभवो देवर्षिपित्रासुराः ॥
चैत्याऽचैत्यविभूतयस्तलिगणास्तिर्यग्भवाः सन्त्वमी ।
कृत्सन्तानकृते मदर्पणविधौ पृथ्व्यो मिथः श्रेयसाम् ॥ ८ ॥
ये वै काश्यपगोत्रजास्तदितरे मद्भक्तसंस्पर्शगा,
ये वा मद्धृदयंगमा मम सतामाशीर्वचोभूमयः ॥
या मामर्पणयाजिका निजगुणैः सम्पद्य सर्वात्मना ।
ब्राह्मीं भूमिमितास्तदीयकुलजान्मोक्षं नयाम्यक्षरे ॥ ९ ॥
केचिन्मां प्रयजन्ति यज्ञनिकरैरन्ये प्रसेवादिभि-
र्नित्यं संस्मरणैः परे तदितरे सर्वार्पणैः संयमैः ॥
रक्ता मां रतिमार्गणैरपि रुषा रुष्टा वृषस्था वृषै-
स्ते कान्ते मयि दिव्यशाश्वतपदे मज्जन्तु चानन्दिताः ॥१०॥
अथ लक्ष्मि ! कुरु शान्तिं कथयिष्ये पुनः कथाः ।
धर्मार्थकाममोक्षाढ्याः सत्योत्तरमुपस्थिताः ॥११॥
सत्ये ! सत्यविधानज्ञे ! सत्यव्रतधरे ! सति ! ।
सत्यसन्तानकश्चात्र त्वयि सत्यां समाप्यते ॥१२॥
श्वेतव्यासश्चादिमोऽहं व्यासो व्यासाश्रये हरौ ।
लक्ष्मीनारायणसंहिताऽऽद्यसन्तानमर्पये ॥१३॥
प्रत्यक्षः श्रीहरिः स्वामिस्वरूपः श्रेयसे नृणाम् ।
कृष्णनारायणो नित्यप्रत्यक्षो जयतीह वै ॥१४॥
देहेन्द्रियाऽन्तःकरणात्मसु गुणेषु कर्मसु ।
व्यापको मूर्तिरूपः श्रीहरिर्जयतु सर्वदा ॥१५॥
पञ्चपञ्चाशत्सहस्राण्यपि पञ्चशतान्यपि ।
सप्तविंशतिश्चश्लोका आद्यखण्डस्य सन्ति हि ॥१६॥
(५५,५२७) श्लोका अस्य प्रथमखण्डस्य)

इतिश्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने त्रेतासन्तानप्रस्तावः, आशीर्वादाः, स्तुतिश्चेतिकथननामा नवत्यधिकपञ्चशततमोऽध्यायः ॥ ५९० ॥

इतिश्रीलक्ष्मीनारायणसंहितायां प्रथमः
कृतसन्तानखण्डः
समाप्तः

श्रीकृष्णनारायणस्वाम्यर्पणमस्तु

[1] यः, ईक्षणकः आस, स्वस्य विद्रुतिं विवृत्तिरूपां सृष्टिम्, अनु द्रावं प्रवेशं गतः । आत्मवान् अन्तर्यामी । युक् संज्ञाम् युगलसंज्ञाम् । अभिगृह्य । लक्ष्मपधरः—लक्ष्मीपतिनामधृक् । त्रायणः—राधापतिनामभाक् । रालक्ष्माधिपतिः—राधापतिः लक्ष्मीपतिः । गिरम् मनुभावे । कृष्णारभृत्—कृष्णः नारायणश्चेति । गां वाणीं गतः । स एवाऽहं भक्तिभृज्जनैः । ज्यर्थम्—जय जयेति प्राप्नोमि । ते भक्ताः । मत्तोऽपि द्व्यर्थं द्विगुणं जयं यन्तु ॥ ७ ॥

शुद्धि-पत्रम्

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्	पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
१	१३	ऽब्धिमा	ऽब्धिगा	१२५	२	तिष्ठती	तिष्ठति
२	३९	प्रपन्तिः	प्रपत्तिः	१२६	२५	दिति	दिवि
४	१	हुरिः	हरिः	१२६	२८	धनहास्तु	धनदास्तु
८	१	स्याग्र	स्वाग्र	१२७	२४	जितान्नराः	जितान्तराः
१२	४३	ब्राह्मणा	ब्रह्मणा	१२९	१५	कर्मचारिणि	कर्मचारिणी
१२	४५	ऽभवन्	ऽभवत्	१३०	५६	लोकार्कः	लोलार्कः
१७	३७	सृष्ट	सृष्टि	१३१	२३	श्रेषवाग्	श्रेष्ठवाग
१७	१२	भवश्चि	भवँश्चि	१३३	२१	यन्नतः	यत्नतः
१८	२४	प्यद्भूत	प्यद्भुत	१४४	९	वियोजनाम्	वियोजनम्
२०	२६	ववर्त्त	यावर्त्त	१४५	४४	ग्रनावस्थ	घनावस्थ
२४	२५	ससां	सतां	१५४	४२	व्रते नैव	व्रतेनैव
२५	५३	अस्मादिभ्य	(आर्षः प्रयोगः)	१५८	९८	त्वधिकार	त्वाऽधिकार
२६	६९	साधवास्ते	साधवस्ते	१६३	१८	बहिद्वारम्	बहिर्द्वारम्
३०	२	जयतीति	जपतीति	१६३	१८	जर्जरमात्रं	जर्जरगात्रं
३०	१५	न्नथा	न्यथा	१६५	६३	वादपः	पादपः
३१	४६	ह्मवि	ह्माऽवि	१६८	७५	विलोपं	विलापं
४३	४९	स्तु कृते कटू	कटुनीकृते	१६८	१७	यस्मानेन	यस्याऽनेन
४४	२२	जातपः	जातयः	१७५	३	दातव्यो	दातव्या
४४	२७	भवन्ति	भवति	१७६	३२	प्रीतिनपहाय	प्रीतिमपहाय
४५	१९	तय्या	तत्रा	१८१	३७	विमो काच	विमोकाच्च
४६	१३	शिष्येन	शिष्येत	१८२	६५	दास	दारा
५२	७८	उपवार	उपवासर	१८५	१६	दिवो	दिव्यो
५४	११	स्थात्मका	स्थानात्मका	१८७	२२	स्वापणं	स्वापर्णं
५६	१२	तस्माश्च	तस्माच्च	१९०	१५	ब्रह्मा	ब्रह्म
६७	७४	यात्रा	यात्रा चाऽ	२०८	५६	सोधाना	सोद्याना
६८	२२	याऽऽस्त	यासाऽऽस्त	२११	७०	सुद्रस्यानां	सद्रस्यानां
७६	४७	चेद्रा	चेन्द्रा	२१३	५३	सुधांक्षु	सुधांशु
९१	५१	परशूना	पशूना	२१३	५९	स्तग्भि	स्तम्भि
१००	८	ब्रह्मया	ब्रह्मणा	२१६	१२	प्रभाभिनः	प्रभाविनः
१००	२५	ऽज्ञप्य	ऽप्य	२२३	३६	कियत्या	कियत्पा
१०६	९	निमालय	निभालय	२२४	२४	पहां	पदां
१२३	२७	लुलोभ	लुँलोभ	२२५	३६	लयाऽम	लयाऽन
१२४	७०	प्राप्स्यसी	प्राप्स्यसि	२३३	१६	भवन्त्यैव	भवन्त्वेव

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्	पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
२३५	२८	मण्यमणिः	मण्यग्रणिः	५८७	३७	जैरोग्यं	नैरोग्यं
२३६	१०	मंमोवा	मनोवा	५९२	७६	भिवारादि	निवारादि
२३७	२६	पातयोः	पादयोः	६२५	७५	मृतपात्रे	मृत्पात्रे
२३९	४	ऽज्ञ	ऽ	६२७	५४	सतैः	शतैः
२३९	२९	महाग्नि	हिमाग्नौ ते	६४२	१६	दद्याध्यं	दद्यादर्घ्यं
२३९	३३	दत्	यत्	६४३	२४	पशुवस्तुभिः	पसुवस्तुभिः
२४४	४	तेज्ञो	तेजो	६४५	२	पद्मापते	पद्मापते
२५३	२६	गजाजितं	गजाजिनं	६५०	३२	श्वचोऽपि	श्वपचोऽपि
२५३	५५	ऽन्ने	ऽन्ते	६६७	७४	त्तमाःकथाम्	त्तममाःकथाम्
२५५	२१	बलैतिनः	बलैधितः	६६८	११४	देवगृहस्य	भक्तान् देवगृहस्य
२५६	६६	तयो	तमो	६६९	३०	त्रिधिक्रमा	त्रिविक्रमा
२५७	१०८	मश्रु	श्मश्रु	६८९	११७	प्रास्ततु	प्रातस्तु
२५८	२२	नूपु	न्यूषु	६९४	५६	त्रिपीटक	चिपीटक
२६०	११३	उड्डीय	उड्डीय दिशि	६९५	७१	त्रिभूषाभिः	विभूषाभिः
२६८	७१	बती	रेवती	६९७	२४	दास्या	दास्ये
२८१	५३	आत्मा	आम्रा	७११	६३	त्व	तव
२८२	२९	हस्ति	हन्ति	७११	७९	गुप्तां	गुप्तं
२८४	८८	पक्षी	भक्षी	७१६	२१	उपत्यकाभ्यां	उपत्यकायां
२८८	१०२	वामः	वासः	७१६	३९	तदर्थेद्व	तदर्थे वै
३००	१९	शत्त्यो	शक्तयो	७३२	६४	गृहल्लो	बृहल्लो
३०८	१७	माना	माता	७३६	९०	भोजानि	भोज्यानि
३०९	२३	ह्यभूत्	दृष्टिगं ह्यभूत्	७२५	७३	मेऽद्य	मेऽद्य
३११	२७	कोपं	कोपं चक्रे	७२५	७८	मिरूपणीम्	मरूपिणीम्
३१५	११	ऋतुः	क्रतुः ।	७४४	१०६	दशामिका	दशमिका
३२२	११७	शक्थितः	सक्थितः	७४८	५५	मुषिभिः	मुष्टिभिः
३२२	११९	यदगो	यदग्रे	७५३	१५४	तरियामि	तरिष्यामि
३३५	२	महामहं	महानहं	७६०	७०	भूषायित्वे	भूषायित्वे
३५५	३६	स्त्यं	स्वं,	७६५	८६	जनयन्हरिः	जनयद्धरिः
३९६	१०५	स्वेचारी	स्वेच्छाचारी	७६७	६७	यत्तु	मत्तु
४०२	८७	मुषि	मृषि	७८०	६	आलास्या	आविलास्या
४०७	५०	भवां	भवताम्	७८१	६२	पत्र	चित्र
४४६	६३	द्रजम्	द्रनम्	७९२	५७	तुहो	होतु
४५०	११५	फलया	कलया	७९२	५७	काष्ठेऽम्नि	काष्ठेऽग्नि
४५०	३	गोवेष्टितम्	गोमृगवेष्टितम्	८०८	३७	थंमादयो	थंमादयो
५५२	६८	करस्य	शंकरस्य	८११	१३	शधिकदत्रि	शाधिकत्रिद
५५२	८३	रमीचिः	मरीचिः	८१२	३५	दभवे	दभवो
				८१६	१८	माप्स्यसि	माप्स्यसि

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्	पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
८३५	६	जीर्वा	जीर्ण	१०७५	३७	पं	पद्मं
८३५	२२	वित्सि	वेत्सि	१०८८	२५	द्वा	द्वारा
८३६	४७	दादानि	दानानि	११३३	९२	त्वाथित्येन	त्वातिथ्येन
८४७	६४	हायस्थाद्या	हास्याद्या	११३६	५७	अन्यमुक्ता	अन्यभुक्ता
८५२	९	जातिमात्रो	जातमात्रो	११३६	६२	रायत्काले	रापत्काले
८५३	७३	ऽस्थ	ऽस्य	११४१	३९	पतितत्र भू	पतिस्तत्र न
८५८	१२२	सुपायम्	सुपायसम्	११५१	८८	जवसि	जीवसि
८७४	९	यामु	मामु	११५८	४७	शुश्रुक	शुश्रुवु
८८२	२६	शकारित	राकारित	११६९	१४९	छूकं	घूकं
८८४	२२	कर्म	न कर्म	११८०	७२	सूत्रे	सूते
९००	८७	भक्तियु	भक्तिमु-	११८२	१२४	स्यावा	श्यावा
९०७	७९	सखाभिः	सखीभिः	११८६	१६	मातृस्त्वया	मातस्त्वया
९०८	१३२	पुजौ	पुत्रौ	११८६	३७	चापावा	चाप्तवा
९१७	१२१	मतौ	गतौ	११९३	१५	वास्याहि	वाख्याहि
९२७	७	मुञ्जात्	भुञ्ज्यात्	१२०४	५२	त्वागत्य	मागत्य
९३४	९४	क्रयविक्रयो	क्रयविक्रययोः	१२०६	३	सातौ	सानौ
९३७	२४	पितृण	पितृगण	१२०८	५८	द्यवि	द्यपि
९३७	३१	समुदे	समुद्रे	१२२०	१३०	मम	मा
९६४	८६	दिहुतुः	दुहितुः	१२२५	५१	क्तथा	क्तया
९८०	७८	नदि	नदी	१२२५	६१	राथयामास	ग्रथयामास
९८०	८५	मरोषाणां	मशेषाणां	१२२५	२	सतीयः	ससीतः
९८२	३२	मता	ममता	१२२६	३६	दिव्या	दिवा
१००७	४८	धूमिदो	भूमिदो	१२३१	७७	पुनराव्य	पुनरावृत्य
१००८	७२	प्रक्ष्यताम्	प्रत्यक्षताम्	१२३२	२९	साऽवर्ण्यंच	साऽवर्तयच्च
१०१४	८०	श्रीभूत	श्रीभू	१२३२	५२	दयादवः	दयाल्वः
१०२६	४	हुता	हृता	१२३६	८	थप	थमप
१०३१	२६	हररेग्रे	हरेरग्रे	१२३६	२१	कृता	कृत्वा
१०३१	४१	वैश्वरान्	वैश्वरान् भावान्	१२३८	५३	सामृ	नामृ
१०३४	४३	तेजक	तेजस्क	१२४२	१७	वस्तथा	वतस्तथा
१०३५	५५	क्षुक्षिता	क्षुधिता	१२७३	९९	नियाय	निनाय
१०४३	२५	णूसन्त्यनि	सन्त्यणूनि	१२८३	४८	यस्म	स्म
१०५२	५२	यज्ञसीश्च	यज्ञदासीश्च	१३०६	३७	कृष्णत्वं	कृष्ण ! त्वं
१०५३	२९	भेघारः	भेत्तारः	१३०६	४९	क्षीण्येतानि	त्रीण्येतानि
१०६१	५६	रते	रसै	१३२४	८३	वं	त्वं
१०६२	७५	देह्य	लेह्य	१३२७	४	वित्यैस्तु	नित्यैस्तु
१०६५	६४	ववा	तवा	१३३३	२१	त्वमित्येव	त्वगित्येव
१०७३	६२	हस्त्वं	हस्तं	१३३४	२६	स्यात्मकाः	स्वात्मकाः

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
१३३९	४२	द्दश	दश
१३४४	२६	घटस्तवा	घटस्त्वा
१३४९	३७	वस्यांय	वस्याय
१३५४	७६	सवित्सका	सवत्सिका
१३६०	३२	स्पृश्यामि	स्पृशामि
१३६४	४९	त्वरथा	त्वरया
१३६७	३०	ल्पे कमध्ये	कल्पमध्ये
१३६८	५७	मियं	मित्रं
१३७३	२५	वेत्रं	क्षेत्रं
१३७७	६७	श्राविल	श्वाविल
१३८७	९८	बिभ्यस्ताम्यो	बिभ्यत्याम्यो
१३८९	३३	स्पृष्ठौं	स्पृष्टवाँ
१३९५	८४	मनसे	मनस्ते
१४०१	२९	शत्रन्	शत्रून्
१४१०	२२	जंगामा	जंगमाः
१४२०	३७	जीवित्य	जीवित्व
१४२८	१२	गालावा	गालवा
१४३२	६९	सदि	सरि
१४५५	५३	ब्रह्माणा	ब्रह्मणा

पृष्ठम् श्लोकः अशुद्धम् शुद्धम्

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
१४६२	८६	कङ्कु	कङ्क
१४६४	४४	विधा	विद्या
१४६५	७१	सेवने	सेवते
१४६७	७२	ऽप्सरश्चापि	ऽप्सरसश्चापि
१४७०	६३	हे	देहे
१४७२	३४	क्षरं	क्षारं
१४७९	५०	शोभाद्या	शोभाढ्या
१४८५	६३	भूसुरान्	भूसुरात्
१४९६	४०	पद	पद्म
१५०१	५०	दुर्वासश्च	दुर्वाससश्च
१५०२	८२	दहकार्यं	देहकार्ये
१५१२	३६	पादरजकी	पापरजकी
१५१५	१७	पालिना	पाणिना
१५२१	१०९	नियुक्तदन्यः	नियुक्तादन्यः
१५२२	१९	सस्थाश्च	सनस्थाश्च
१५२६	६१	फाल्गुयां	फाल्गुन्यां
१५२८	८	यान्त्रातर	यात्रान्तर
१५३१	१२३	कुमुदद्ब	कुमुद्ब